वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

पञ्चमो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९४

॥ श्रीः ॥

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण

सङ्कलितम्

तेनैव संस्कृतम्

पञ्चमो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

विक्रम सं० २०१८] [ई० १९६२

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
मुद्रक : विद्याविलास प्रेस, वाराणसी-१

The
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi-1
(INDIA)
1962
Phone : 3145

PK
925
T37
V.5
920664

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 94

VACHASPATYAM

(A Comprehensive Sanskrit Dictionary)

COMPILED BY

SRI TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

VOL. V

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1 (India) Phone : 3145
1962

LIBRARY
AUG 17 1964
UNIVERSITY OF TORONTO

920664

एतद्भाषार्थस्तु क्षेत्रजवत् उभयोरभिसम्बन्धो दत्तकस्योभयगोत्रभागित्वम् अन्यथा जनकेनैव सर्वसंस्कारकरणे जनकगोत्रभागित्वं न ग्रहीतृगोत्रभागित्वं ग्रहीता संस्कारकरणे तु उत्तरस्य ग्रहीतुः पूर्वत्वात् प्राधान्यात्तेनैव उत्तरसन्ततेर्गोत्रमिति। तथा च पैठीनसिः "अथ दत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसङ्गतकुलीना द्व्यामुष्यायणा भवन्तीति"। आर्षेण ऋषुप्रणीतेन परिग्रहेण जनकग्रहीतोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः। व्यक्तमुक्तम् "द्व्यामुष्यायणका ये स्युर्दत्तक्रीतादयः सुताः। गोत्रद्वयेऽप्यनूढाः शुद्धशैशिरयोर्यथेति"। न च दत्तकस्य द्व्यामुष्यायणत्वं न घटते जनकस्यापि तत्र स्वत्वानपायेन "माता पिता वा दद्यातामिति" दानविध्यनुपपत्तेरिति वाच्यम्। "सामान्यं सर्वभूतेभ्यो मयोत्सृष्टमिदं जलम्। रमन्तु सर्वभूतानि स्नानपानावगाहनैः" इत्यादौ स्वमात्रस्वत्वनाशकसर्वभूतोद्देश्यकत्यागादेव नद्यादिवत् साधारणीकृते जले स्वामिनोऽपि उद्दिश्यतया स्वत्ववत् अत्रापि तादृशाभिसन्धिपूर्वकादेव दानात् तादृशदत्तकस्य साधारण्यसिद्धिरित्यास्तां विस्तारः।

अथ दत्तककर्तृकश्राद्धनिर्णयः। तत्र पितुः सपिण्डीकरणान्तषोडशश्राद्धे दत्तकस्य पूर्वग्रहीतत्वेऽपि सत्यौरसे नाधिकारः। "औरसे पुनरुत्पन्ने तेषु ज्येष्ठ्यं न विद्यते" इति देवलेन ज्येष्ठत्वप्रतिषेधात्। "पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः" इति याज्ञवल्क्यवचनाच्च। अन्यत्र सर्वत्रौरसवत्। "श्राद्धे तु विशेषमाह जातूकर्णः. "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश"। इतरे दश दत्तकादयः"। तथा पराशरः "पितुर्गतस्य देयत्वमौरसस्य त्रिपौरुषम्। सर्वत्रानेकगोत्राणामेकोद्दिष्टं त्रयेऽहनीति" अनेकगोत्राणां द्विगोत्राणाम्। औरसक्षेत्रजयोरपि साग्न्योरेव पार्वणाधिकारः "पार्वणेन विधानेन देयमग्निमता सदेति" जाबालमनूक्तपुराणैकवाक्यत्वात्। औरसक्षेत्रजव्यतिरिक्तानान्तु साग्निनिरग्निसाधारणानामेकोद्दिष्टमिति सिद्धम्। द्व्यामुष्यायणस्येतिकर्त्तव्यतायां विशेषमाह माङ्खायनसूत्रम् "पिण्डान् यथावनेजनं निधाय उभावेकस्मिन् पिण्डे पितृभेदे" इति। पितृभेदे एकस्मिन् पिण्डे उभौ जनकग्रहीतारौ कीर्त्तयेदिति शेषः। प्रवराध्याये, "पितृव्येण चैककार्यजातास्ते परिगृहीतारेव भवन्ति अथ यद्येषां भार्यास्वपत्यं न स्यात् तदा रिक्थं हरेयुः पिण्डं तेभ्यः त्रैपुरुषिकं दद्युः यद्यपि स्यादुभाभ्यामेव दद्युरित्याचार्यवचनं द्वे श्राद्धे कर्त्तव्ये कश्चाद्धे वा पृथगनद्दिष्ट एकपिण्डे वा द्वावनुकीर्त्तयेत् प्रतिग्रहीतारं चोत्पादयितारं आ तृतीयात् पुरुषादिति"। ग्रहीतुः क्रियानियमाभावे पुत्रान्तराभावे च तस्यैव क्रियानियमे अपत्यसद्भावे च न द्विपितृकत्वमित्यर्थः। अत्र श्राद्धभेदाभेदयोर्विकल्पः। न चेदं क्षेत्रजविषयं सत्याषाढेन दत्तकादीनां द्व्यामुष्यायणत्वादिति सूत्रेण दत्तकेऽपि तद्धर्मस्यातिदेशात्। तथा हारीतः, "तेषामुत्पादयितुः प्रथमं प्रवरो भवति द्वौ द्वौ पिण्डौ निर्वपेत् एकपिण्डे वा द्वावनुकीर्त्तयेद्द्वितीये पुत्रः तृतीये पौत्रः लेपिनस्त्रीन् वाचक्नवी आ सप्तमादित्येके" इति। तेषां पितॄणां मध्ये बीजिनः प्रथममार्षेयं क्षेत्रिणो द्वितीयमिति द्विप्रवरता। एकपिण्डे वेत्यत्र बीप्साध्याहारः। "यदि द्विपिता स्यादेकैकस्मिन्नेव द्वौ द्वावुपलक्षयेत्" इत्यापस्तम्बवचनात्। द्वितीये पितामहपिण्डे द्व्यामुष्यायणस्य पुत्रः, तृतीये प्रपितामहपिण्डे द्व्यामुष्यायणस्य पौत्र इति। यदि ग्रहीता प्रथमं मृतः तदा तस्मै तद्यात् अथ यदि जनकस्तदा जनकाय, यद्युभौ तदादौ जनकाय पश्चाद्ग्रहीत्रे दद्यादित्याह मरीचिः, "सगोत्रादन्यगोत्राद्वा यो भवेद्विधवासुतः। पिण्डं श्राद्धविधानञ्च क्षेत्रिणे प्राक् प्रदापयेत्। बीजिने तु ततः पश्चात् क्षेत्री जीवति चेत् क्वचित्। बीजिने दद्युरादौ तु मृते पश्चात् प्रदीयते। उभौ यदि मृतौ स्यातां बीजिन्यादौ ततो ददेत्। क्षेत्रिण्यादौ न दत्तं स्याद्बीजिने नोपतिष्ठते" इति। एतेनैकतरोपरतावपि द्विपितृकस्य पार्वणं दर्शितम्। तथा तुल्यन्यायेन मातृभेदेऽपि द्व्यामुष्यायणदत्तकस्य "पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्" इत्यनेन प्राग्मातामहश्राद्धे जननीपितॄणां प्रथमं निर्देशस्ततः प्रतिग्रहीत्री या माता तत्पितॄणाम्। गुप्तदत्तकस्य तु प्रतिग्रहीत्रा एव मातुः पित्रादिपिण्डदानं तस्य तन्मातृस्वधाकरत्वादिति। एवञ्च "स हि सन्तानाय पूर्वेषामिति" हेतुवचनगदस्वरसाद्भैकं पुत्रं दद्यादिति निषेधो द्व्यामुष्यायणातिरिक्तविषयः सन्तानविच्छेदाभावादित्युक्तमेव।

अथास्य सापिण्ड्यम्। जनककुले अवयवाभावेन

प्रतिग्रहीतृकुले च पिण्डान्वयेन त्रिपौरुषं यदाह याज्ञवल्क्यः "यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः। प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह। द्वाभ्यां सहाथ तत् पुत्राः पौत्राश्चैकेन तत्समम्। चतुर्थे पुरुषे च्छेदं तस्मादेषा त्रिपौरुषीति"। अस्यार्थः दत्तकादयः पुत्राः प्रेतानां प्रतिग्रहीतादीनां पितृव्यामौरसत्वे दत्तकत्वे द्व्यामुष्यायणत्वे वा यावन्तः पितृवर्गाः त्रयः षट् वा तावद्भिः सह तेषां योजनं सपिण्डनं कुर्युः तत्र प्रतिग्रहीतादीनामौरसत्वे तत्पितृपितामहप्रपितामहास्त्रयः, दत्तकत्वे तत्प्रतिग्रहीतृपितामहप्रपितामहास्त्रयः, द्व्यामुष्यायणत्वे तज्जनकाद्यास्त्रयः तत्प्रतिग्रहीतादयस्त्रय इति षट्। एवञ्च दत्तकस्य स्वकर्तृके पार्वणे येषां देवत्वं स्वपुत्रकर्तृके सपिण्डीकरणेऽपि तेषामेव तथात्वमिति ज्ञापितम्। दत्तकस्य पुत्रास्तु दत्तकसपिण्डीकरणं तत्प्रतिग्रहीता तत्पितृव्यां त्रयाणां मध्ये द्वाभ्यां सह कुर्युः। एवञ्च दत्तकस्य पौत्रा दत्तकप्रतिग्रहीतृभ्यां गृहीतः पितृव्यां त्रयाणां मध्ये एकेन गृहीतः पितेति यावत्तेन च समं सह तत् स्वपितृसपिण्डनं कुर्युः। चतुर्थपुरुषे च्छेदमिति। यो यदा यत् सपिण्डीकरोति स तत्पितादिभिस्त्रिभिरेव करोतीति चतुर्थे विरामः सिद्ध एवेति तदारम्भः "सिद्धे सत्यारम्भो नियमाय" इति न्यायेन सेपिनां सेपनिरासेन सापिण्ड्यव्यवच्छेदार्थः। तदेवाह तस्मादेषेति। एषा सपिण्डता। तथाच "सेपमाजयतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति" मत्स्यपुराणोक्तसाप्तपौरुषसापिण्ड्यस्य सामान्यस्थानेन विशेषेण बाध एव। अतएव हारीतेन "सेपिनस्त्रीन् वाचयाथः आ सप्तमादित्येके" इति पक्षान्तरमुपन्यस्तं सङ्गच्छते। तदेव संवर्त्तेनोक्तम् "दत्तकानान्तु पुत्राणां सापिण्ड्यं स्यात्त्रिपौरुषम्। जनकस्य कुले तद्वद्गृहीतुरिति धारयेति"। यदिदमभवत् त्रिपुरुषसापिण्ड्याभिधानं तत् द्व्यामुष्यायणाभिप्रायेण, तस्य त्रिकद्वयेन सपिण्डनविधानात्। शुद्धदत्तकस्य तु "गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति" प्रागुक्तमनुवचने पिण्डनिवृत्तिदर्शनात् प्रतिग्रहीतृकुलसापिण्ड्यमिति।" यत्तु डङ्गोतमीयम् "सगोत्रेषु कृता ये स्युर्दत्तकौतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते"। सगोत्रेषु मध्ये कृता अपि दत्तकादयो विधिनैव गोत्रं भजन्ते परन्तु तेषु सापिण्ड्यं नोत्पद्यते सगोत्रेष्वपि सापिण्ड्यात्तत्मनो परगोत्रेषु सुतरां सापिण्ड्यानुत्पत्तिरिति। तत्तु पुत्रान्तरवत् साप्तपौरुषसापिण्ड्यप्रकल्पो निषेधकं सापिण्ड्यप्रयुक्तदशाहाशौचादिप्रतिषेधकम् वा न तु सामान्यतः सापिण्ड्यनिषेधसूत्रवचनजातात्।

अथ दत्तकाशौचनिर्णयः। तत्र शुद्धदत्तकस्य जनककुले परस्परमशौचं नास्त्येव गोत्ररिक्थनिवृत्त्या अशौचनिवृत्तेरर्थसिद्धत्वात् द्व्यामुष्यायणस्य तु ऊह्यमेवाशौचमिति। ब्रह्मपुराणे "दत्तकस्य स्वयन्दत्तः कृत्रिमः क्रीत एव च। अपविद्धाय ये पुत्रा भरणीयाः सदैव ते। भिन्नगोत्राः पृथक् पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्र्यहाशौचस्य भागिनः"। पराशरः "भिन्नगोत्रः स्वगोत्रो वा नीतः संस्कृत्य चेच्छया। जनने मरणे तस्य त्र्यहाशौचं विधीयते"। तथा "औरसं वर्जयित्वा च सर्ववर्णेषु सर्वदा। चौलजादिषु पुत्रेषु जातेषु च मृतेषु च। अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः"। सर्वदा उपनयनानन्तरमपि। अत्र सगोत्रस्यापि विधिना जनकगोत्रविच्छित्तिपूर्वकगृहीतृगोत्रग्रहणात्सगोत्रदत्तकाविशेषात् त्र्यहाशौचमुक्तं युक्तमेव। तथा दत्तके अकृतोद्वाहे अज्ञातौरसस्य विवाहे न परिवेदनदोषः न वा दत्तकस्याग्रजसोदरात् पूर्वं विवाहकरणेऽपि क्षतिः। ननु शुद्धदत्तकस्य जनककुले सापिण्ड्यविच्छेदस्य दर्शितत्वात् तत्र विवाहः प्रसज्येत प्रसज्येत च द्व्यामुष्यायणस्यापि त्रिपुरुषानन्तरितकन्यासन्ततिपरम्परया विवाहः, नैवं "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने"। मनुवचने चकारात् पितृरसपिण्डा च इति गृहीतृमातृगोत्रस्यापि दत्तकस्य जनकस्यापि सपिण्डासगोत्रावर्जनाय पितृरिति पदोपादानात्। न च तथापि दत्तकस्य पितृरपि दत्तकत्वे तत्त्रिपुरुषानन्तरितकन्यासन्ततेर्विवाहः कर्तुं शक्यते पितृसापिण्ड्यसगोत्रत्वयोरभावादिति वाच्यम् यतो विवाहे नैतत् सापिण्ड्यमुपयुज्यते किन्तु सर्वसाधारणं परिभाषितं पितृपक्षे साप्तपौरुषं मातामहपक्षे पाञ्च-

पौरुषञ्चेति न काप्यनुपपत्तिः। तत्प्रपञ्चस्तु तत्र तत्र द्रष्टव्य इति।

अथ दत्तकविभागः। तत्र बृहस्पतिः "एक एवौरसः पुत्रः पितास्य वसुनः प्रभुः। शेषाणामान्दृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्"। शेषाणां ये तत्रांशभागित्वेन निषिद्धास्तेषाम्। आन्दृशंस्यं दया। प्रजीवनं भरणम्। तथा यमः "पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः। तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः। स्वयमुत्पादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः। तृतीयः पुत्रिकापुत्रो जातिधर्मविदो विदुः। पौनर्भवश्चतुर्थस्तु कानीनः पञ्चमः स्मृतः। षष्ठे च गूढ उत्पन्नः षड्डेते पिण्डदायिनः। अपविद्धः सहोढश्च दत्तः क्रीत एव च। क्रीतश्च पञ्चमः पुत्रो यश्चोपनयते स्वयम्। इत्येते सङ्करोत्पन्नाः षड्दायादबान्धवाः" नारदः। औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च। कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च। पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा। स्वयं चोपागतः पुत्रा द्वादशैते प्रकीर्त्तिताः। तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः। पूर्वः पूर्वः स्मृतो ज्येष्ठो जघन्यो यो य उत्तरः। क्रमादेते प्रवर्त्तन्ते मृते पितरि तद्वने। ज्यायसो ज्यायसोऽभावे जघन्यो यो य आप्नुयात्"। पूर्वपूर्वाभावे उत्तरोत्तरेषां दृविणार्हत्वमित्यर्थः। औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढजदत्तकक्रीतस्वयमुपागतापविद्धयत्र कचनोत्पादितानभिधाय विष्णु "तेषां पूर्वः पूर्वः श्रेयान् स एव दायहरः स चान्यान् बिभृयात्"। औरसपुत्रिकापुत्रक्षेत्रजगूढजकानीनपौनर्भवदत्तकक्रीतकृत्रिमस्वयंदत्तसहोढापविद्धानभिधाय याज्ञवल्क्यः "पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः।" मनुः "न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः" तथा "श्रेयसः श्रेयसोऽभावे यवीयान्कुलमर्हति। बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः"। सदृशा गुणेन औरसत्वक्षेत्रजत्वाद्युपाधिना वा। श्रेयस औरसादेः। यवीयान् न्यूनः क्षेत्रजादिरित्यर्थः। तथा "औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ। दशापरे च क्रमशः पितृरिक्थांशभागिनः"। दश दत्तकादयः। हारीतः "स्वयमुत्पादितः क्षेत्रजः पौनर्भवः कानीनः पुत्रिकापुत्रो गूढोत्पन्नश्चेति बन्धुदायादाः, दत्तः क्रीतोऽपविद्धः सहोढजः स्वयमुपागतः सहसाढश्चेत्यबन्धुदायादाः"। मनुः "पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः। तेषां षट् बन्धुदायादाः षड्दायादबान्धवाः। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादबान्धवास्तु षट्। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षड्दायादबान्धवाः"। बौधायनः "औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ। गूढश्चैवापविद्धश्च रिक्थभाजः प्रचक्षते। कानीनश्च सहोढश्च क्रीतं पौनर्भवं तथा। स्वयंदत्तं निषादश्च गोत्रभाजः प्रचक्षते"। एतच्च कानीनादीनां गोत्रमात्रभागित्वकथनमौरसीनां मध्ये कस्यापि सम्भवेऽंशहरत्वप्रतिषेधार्थम्। सहोढदत्तकक्रीतस्वयमुपागतापविद्धशौद्रानभिधाय औरसादीन् पराहत्य पुनर्वशिष्ठः "यस्य तु सर्वेषां वर्णानां न कश्चित् दायादः स्यादेते तस्य भागं हरेयुः"। औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपागतकृतकक्रीतानभिधाय देवलः "एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः। आत्मजाः परजाश्चैव तथा याटच्छिकास्तथा। तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितरेव षट्। विशेषतोऽपि पुत्राणामानुपूर्व्या विभिन्नते। सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्येष्ठत्वं न विद्यते। तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः। हीनास्तमुपजीवेयुर्यावाच्छादनसम्मृताः" कात्यायनः, "उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः स्मृताः। सवर्णा असवर्णास्तु यावाच्छादनभागिनः"। चतुर्थांशहराः स्मृता" इति द्वितीयचरणे कश्चित् पाठः। वशिष्ठः, "तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात्"। स प्रतिगृहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः। अत्र नानाविधवचनानां परस्परविरोधपरिहारार्थमेवं व्याख्यायते बृहस्पतिवचने औरसमात्रस्य धनभागित्वकथनमस्यैषां भरणमात्रकथनञ्च असवर्णक्षेत्रजदत्तकादिविषयं, देवलकात्यायनवचनैकवाक्यत्वात्। नारदादिवचनेषु च औरसाद्यभावे क्षेत्रजदत्तकादीनामुक्तक्रमेणांशहरत्वविधिरपि सर्वधनग्रहणविषयः। अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वशिष्ठोक्तो दत्तकविषये ज्ञेयः। तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरन्युत्कृष्टगुणदत्तकविषयो वाच्यः। "उत्पन्नो गुणैः सर्वैः पुत्रो

यद्वा हि दत्तिमः। स हरेतैव तद्विकृयं संप्राप्तोऽप्यन्यगोत्रतः" इति मनुवचनैकवाक्यत्वात्। गुणैः जातिविद्याचारैः। "समग्रधनभोक्ता स्यादौरसोऽपि जघन्यजः। त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः" इति ब्रह्मपुराणदर्शनात्। क्षेत्रजविषय इत्यन्ये। तथा केनापि छलिना दत्तकस्य बन्धुदायादत्वमन्येन भादायादत्वमुक्तम् तत् गुणवद्गुणवद्भेदेन समाधेयम्। पितुरिव बन्धूनां सपिण्डानामपि दायहरत्वाद्बन्धुदायादत्वं पितृमातृदायहरत्वात् अबन्धुदायादत्वम् "तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्" इत्यत्र पितुरेवेत्येवकारश्रवणात्। एवं दत्तकस्य धनग्रहणादौ सुभिभेदेन पूर्वापरोक्तिवैषम्यं गुणागुणविवेकेनावसेयम्। एतेनौरसस्य भ्रातृत्वादिधनेनैव भ्रातृत्वादिना संबन्धेनाधिकारत्वं तादृशेनैव सम्बन्धेन तादृशदत्तकस्यापि यथासम्भवमुचितांशभागित्वमवसेयम्। एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकस्य दत्तकपौत्रस्यापि दत्तोचितांशभागित्वं तदसत्त्वे सर्वहरत्वमपीति। न च पौत्रस्य स्वपितृयोग्यांशभागित्वनियमात् दत्तकस्य गृहीतुः पितामहौरसस्य तादृशपितृव्यतुल्यस्यैवांशस्य तद्योग्यत्वाद्दत्तकपौत्रः पितृव्यतुल्यमेवांशं लभतामिति वाच्यं पुत्रस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात्। ततश्च स्वसमानरूपस्य पितृव्यादंशांशः शास्त्रविहितस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु। एवं रीतिः प्रपौत्रेऽप्यनुसर्त्तव्येति। ननु क्षेत्रजदत्तकादीनां सामान्यधनाधिकारित्वेऽपि राज्येऽनधिकारः श्रूयते। यथा "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च दासश्च षडिमे पुत्रपांशुलाः। अभावे पूर्वपूर्वेषां परान् समभिलक्षयेत्। पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत्"। तथा "न क्षेत्रजादीस्तनयान् राजा राज्येऽभिषेचयेत्। पितृणां साधयेन्नित्यमौरसे तनये सतीति" उच्यते। शास्त्रान्तरसद्भावे विशेषशास्त्रस्य सामान्यपरत्वमेव लाघवात्। अतएव पूर्वपूर्वाभावे परपराधिकारबोधकं हि पूर्ववाक्यं प्रागुक्तनारदादिवचनैकवाक्यतया समग्रराज्यमेव विषयीकरोति परवचनस्य सत्यौरसे क्षेत्रजदत्तकादीनां समानांशनिषेधकम् असवर्णक्षेत्रजदत्तकादिविषयं वा। अन्यथा शास्त्रभेदे गौरवम्। तत्स्वीकारेऽपि नानेन वचनेन क्षेत्रजदत्तकादीनां सत्यौरसे स्वस्वोचितांशो निषिध्यते किन्त्वौरससत्त्वे तेषामभिषेकं निषिध्यौरसस्य राज्येऽभिषेको विधीयते तथा च क्षेत्रजदत्तकादयः सामान्यशास्त्रप्राप्तमंशं लभन्त एव तत्सङ्कोचकाभावात्। न चैतदेव वचनं बाधकं भिन्नविषयत्वात्। अतएव "भागार्हास्तनया इमे" इत्यनेन पूर्ववचने भागार्हत्वं स्पष्टीकृतम्। राज्यातिरिक्तस्य भाग इति न शक्यते वक्तुं राज्यस्यैव तत्रोपस्थितत्वात् पौनर्भवादीनान्तु पूर्वपूर्वाभावेऽपि राज्यनियोजनाभावः पृथगभिधानसामर्थ्यादिति। एतावता प्रबन्धेनाभिहितोऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः। स तु शूद्रस्य न सम्भवति तस्य तु "दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्। सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थित" इति मनुवचनेन "जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत्। मृते पितरि कुर्य्युस्तं भ्रातरस्त्वङ्गभागिनम्। अभ्रातृको हरेत् सर्वं दुहितॄणां सुतादृते" इति याज्ञवल्क्यीयेन च दासीपुत्रस्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन दत्तकापूपायितः सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशः असति तु तदर्द्धांशः। अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशित्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टस्य दासीपुत्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात्। एवं सत्सु क्षेत्रजादिषु सत्योश्च पत्नीकन्ययोर्दौहित्राधिकारे कृप्राधिकारविधिबाधापत्तिः। तेन दौहित्रपर्य्यन्ताधिकारिशङ्कलायां तदेकतमे सत्यपि न दासीपुत्रस्य सर्वहरत्वं किन्तु तत्समांशः। अतएव "दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत्। पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ" इत्यपि वचनं शूद्रविषय एव योजनीयम्। तथा "शूद्रस्य तु सवर्णैव नान्या भार्य्योपदिश्यते। तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत्" इत्यत्र वचने शूद्रायां भार्य्योत्पन्नानां सर्वेषां समांशमभिधाय पुनर्यदि पुत्रशतम् इत्यनेन पुत्रान्तराणामपि समांशता प्रतिपादिता। औरसमात्रपरत्वे पूर्वेणैतत्प्राप्त्या पुनरेतदभिधानं व्यर्थं स्यात्। द्व्यामुष्यायणदत्तकस्य तु जनकप्रतिग्रहीतोरुभयोरपुत्रत्वे सर्वरिक्थहरत्वं सत्यौरसे गृहीतस्य तु नांशहरत्वं गृहीतानन्तरमौरसोत्पत्तौ तु जनकधने तदौरसांशहरत्वं गृहीतुरसाधारणदत्तकस्य यादृशोऽंशः शास्त्रीयः तदर्द्ध-

हरत्वञ्चेति । यदाह प्रवराध्यायः ।"यद्येषां स्यात् भार्यां च अपत्यं न स्यात् तदा रिक्थं हरेयुरिति" । तथा नारदः "द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक् । रिक्थादद्वौ यथादद्युर्बीजिन्यौ त्रिकयोस्तथा" । बीजिन्यौ त्रिकपदयोर्जनकप्रतिग्रहीतृभयोपलक्षकत्वं प्रागेवाभिहितम् ।

अथान्धपङ्गुप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वस्तुतेर्न तदुपहीनदत्तकपुत्रादेः पितामहधनाधिकारः । किन्तु भरणमात्रम् अन्धादिभार्याणां भरणविधानेन तद्भरणस्य दण्डापूपायितत्वात् । तथा हि, "अन्धपङ्ग्वादीननधिकारिपुत्रानभिधायाह "औरसाः क्षेत्रजाश्चैषां निर्दोषा भागहारिणः । अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः । सुतायैषां प्रभर्त्तव्या यावन्न भर्त्तृसात् कृता."याज्ञ० । एवं यद्यानन्तरसत्पौरसेन सह दत्तकस्य विभागदर्शनात् सत्पौरसे गृहीतस्यापि नांशभागित्वमिति । तथा विधानं विना परिगृहीतस्यापि नांशभागित्वमित्याह "तस्मिन् जाते सुते दत्ते न कृते च विधानके । तत् स्वं तस्यैव वित्तस्य यः स्वामी पितुरङ्गजः" । तथा मनुः"अविधाय विधानं यः परिगृह्णाति पुत्रकम् । विवाहविधिभाजं तं न कुर्यात् धनभाजनम्" इति । अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह "यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित् । अंशभाजं न तं कुर्यात् यौनकस्य मतं हि तत्" ।

दत्तकमीमांसोक्तो विशेषो दिङ्मात्रमत्रोदाह्रियते । "पुत्रानुमत्या पुत्रवतोऽपि पुत्रग्रहणेऽधिकारः "यद्यः पिता वजानीते तस्मिंस्तिष्ठामहे वयम् । पुरस्तात् सर्वे कुर्म्महे त्वामन्वञ्चो वयं च हीति" यौतविज्ञात्" ।

"अपुत्रेणेति पुत्रं विवक्षितं स्त्रियाहोमप्रतिग्रहमन्त्रानधिकारेण तद्ग्रहणानधिकारः इति वाचस्पतिमतं तद्दूषयित्वा ब्राह्मणादिद्वारा होममन्त्रपाठेन भर्त्रनुज्ञया तासामप्यधिकारः इति" व्यवस्थापितम् । "एकत्वविवक्षया द्वाभ्यां त्रिभिर्वा एकः पुत्रो न गृहीतुं शक्यते द्व्यामुष्यायणविधिश्च जनकपरिग्रहीतद्वयविषयकः न प्रतिगृहीतृद्वयविषयक इत्यविरोधः" इति । अतन्द्रिकामतात् वैलक्षण्यम् । सोदरभ्रातृपुत्रस्य पुत्रीकरणे बहूनामपि मिलितानां युगपदेवाधिकारः । "तदयं निर्मलितोऽर्थः । यस्यानगोत्रः सपिण्डो मुख्यः तदभावेऽसमानगोत्रः सपिण्डः । यद्यप्यसमानगोत्रः सपिण्डः समानगोत्रोऽसपिण्डश्चेत्युभावपि तुल्यकक्षौ एकैकविशेषवत्त्वाद्दुभयोस्तथापि गोत्रप्रवर्त्तकपुरुषात् सापिण्ड्यप्रवर्त्तकपुरुषस्य सन्निहितत्वेनाभ्यर्हितत्वं तेन चासमानगोत्रोऽपि सपिण्ड एव ग्राह्यो मातामहकुलीनः सर्वथा सपिण्डाभावेऽसपिण्डस्तत्रापि समानोदकः आ चतुर्थात्समानगोत्रः प्रत्यासन्नः । तस्याभावे असमानोदकः सगोत्र ऐकविंशात् । तस्याप्यभावे असमानगोत्रोऽसपिण्डश्चेति तदाह शाकलः "सपिण्डापत्यकश्चैव सगोत्रजमथापि वा । अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत् । समानगोत्रजाभावे पालयेदन्यगोत्रजम्" इति । सगोत्र इत्यनेन सोदकसगोत्रौ गृह्येते । अत्र च पूर्वपूर्वस्य प्रत्यासत्त्यतिशयेन निर्देश इति तदेवाह वशिष्ठोऽपि "अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्" इति । अस्यार्थः अदूरबान्धवो बान्धवश्चेत्यदूरबान्धवः सन्निहितः सपिण्ड इत्यर्थः । सान्निध्यञ्च द्विधा सगोत्रतया स्वल्पपुरुषान्तरेण च भवति । तत्र सगोत्रः स्वल्पपुरुषान्तरः सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डः । तदभावे असमानगोत्रः सपिण्डस्तस्याप्यभावे बन्धुसन्निकृष्टः सपिण्डः बन्धूनां सपिण्डानां सन्निकृष्टः सपिण्डः स्वस्यासपिण्डः सोदक इत्यर्थः पर्य्यवस्यति । तत्रापि सन्निकर्षो द्विविधः सगोत्रतया स्वल्पपुरुषान्तरेण च । स्वस्यासपिण्डोऽपि स्वसमानगोत्रः स्वल्पपुरुषान्तरः सपिण्डानां सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डसपिण्डः सोदक इति यावत् । सपिण्डसोदकाभावे समानगोत्र ऐकविंशात् ग्राह्यः । "तदभावेऽसमानगोत्रोऽसपिण्डोऽपि ग्राह्यः ।"तदभावेऽसपिण्डेति"यौनकीयात् "सन्देहे चोत्पन्ने दूरबान्धवं गूढमिव स्थापयेत्" इति वशिष्ठलिङ्गात् । "दूरे बान्धवा यस्यासौ दूरबान्धवः गोत्रसापिण्ड्याभ्यामसन्निहित इत्यर्थः । सन्देहोऽत्र कुलशीलादिविषय । स चासपिण्डेऽसगोत्रे च भवतीति सोऽप्यत्रत्यते" ।

सगोत्रसपिण्डेषु भ्रातृपुत्र एव पुत्रीकार्य्य इत्युक्तं यथा "तत्र सोदरभ्रातृपुत्र एव पुत्रीकार्य्य इत्याह मनुः । "भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्" इति । अत भ्रातृणां प्रतिगृहीतृत्वप्रतिपादनात् ग्राह्यत्वाभावोऽवगम्यते ।

एकजातानामित्यनेनैकेन पित्रा एकस्यां मातरि जातानामेव गृहीतृत्वं न भिन्नोदराणां भिन्नपितृकाणां वेति गम्यते। भ्रातृणामिति पुंस्त्वनिर्देशात् पदद्वयोपादानसामर्थ्याच्च सोदराणां भ्रातृभगिनीनामपि परस्परपुत्रग्रहीतृत्वाभावोऽवगम्यते। तदाह वृद्धगौतमः "ब्राह्मणादितुल्ये नास्ति भागिनेयः सुतः क्वचिदिति" भागिनेयपदं भ्रातृपुत्रस्याप्युपलक्षणम् तेन भगिन्या भ्रातृपुत्रो न ग्राह्य इत्यर्थः सिद्ध्यति"।

एकपुत्रेण पुत्रदानस्य निषेधेन प्रतिग्रहोऽपि निषिद्धः यथोक्तं तत्रैव।

"एक एव पुत्रो यस्येति एकपुत्रः तेन तत्पुत्रदानं न कार्यम् "न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" वशिष्ठस्मरणात्। यत्र स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनस्य दानपदार्थत्वात् परस्वत्वापादनस्य च परप्रतिग्रहं विनानुपपत्तेस्तमप्याक्षिपति तेन प्रतिग्रहनिषेधोऽपि अनेनैव सिद्ध्यति। अतएव वशिष्ठः "न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" उक्त्वा तत्र हेतुमाह "स हि सन्तानाय पूर्वेषामिति" सन्तानार्थत्वाभिधानेनैकस्य दाने सन्तानविच्छित्तिप्रत्यवायो बोधितः। स च दातृप्रतिग्रहीतृरुभयोरपि उभयशेषत्वात्"।

मातापित्रोर्मध्ये पितुर्निरपेक्षतया स्त्रियास्तु भर्त्रनुज्ञापेक्षतया मुख्यगौणाधिकारौ तत्राक्षौ यथा

"बहुपुत्रेषेति पुंस्त्ववचनात् स्त्रियाः पुत्रदानप्रतिषेधः। "न स्त्री पुत्रं दद्यात्" नैरपेक्ष्यश्रवणात् भर्त्रनुज्ञाने तस्या अप्यधिकारः। तथा च वशिष्ठः "अन्यत्रानुज्ञानाद्भर्तुः" इति। यत्तु "दद्यान्माता पिता यं वा" इति यच्च "माता पिता वा दद्यातामिति" मातुः पितृसमकक्षतयाभिधानं तदपि भर्त्रनुज्ञानविषयमेव। न चैवं विधवाया आपद्यपि पुत्रदानं न स्यात् भर्त्रनुज्ञानासम्भवात् प्रतिग्रहवदिति वाच्यम्। मानवीयविकल्पदर्शनेन तथाकल्पनात् नैरपेक्ष्यकथनवचनाच्च स्त्रीनिरपेक्षस्यैकस्यापि भर्तृदानाधिकारः। "दद्यात् माता पिता यं वा"। "माता पिता वा दद्यातामिति" मातृनिरपेक्षैकपितृनिर्देशात्, बीजस्य प्राधान्यात् "अयोनिजा अपि पुत्रा दृश्यन्ते" इति बौधायनीयहेतुदर्शनाच्च। भारतेऽपि "माता भस्त्रा पितुः पुत्रो येन जातः स एव हि" इति। श्रुतिरपि "आत्मा वै जायते पुत्र" इति। मानवे दद्यातामित्युभयकर्तृकतावचनाच्चोभयाधिकारो मुख्यः। अतएव वशिष्ठः "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः" इति। बौधायनोऽपि "मातापित्रोरेव संसर्गसाम्यात्" इति। अतएव "माता पिता वा दद्यातामिति" मनुना मातुर्भर्त्रनुज्ञानसापेक्षत्वात् जघन्यत्वं स्वप्रनुज्ञाननैरपेक्ष्यात् पितुर्मध्यमत्वं जनकतासाम्यात् उभयोर्मुख्यत्वमभिप्रेत्य पूर्वपूर्वास्वरसादुत्तरोत्तरमभिहितम्। न चेदमेकमेव वाक्यं द्विवचनान्तैकक्रियान्वयादिति वाच्यम् मध्ये विकल्पाभङ्गतेः तस्मात् कल्पत्रयमेव। अतएव योगीश्वरः "दद्यान्माता पिता यं वा" इति प्रत्येकमेकवचनान्तमेव क्रियापदमुदाजहार। तत्रापि निमित्तमाह प्रयत्नत इति। प्रकृष्टो यत्नो यस्मिन् काले स्यात् प्रयत्न आपत्कालस्तेन चापत्काल एव पुत्रदानं नान्यथेत्यर्थः"।

पञ्चवर्षातीतस्यनयाग्रहता तत्रोक्ता यथा

"कालिकापु० "दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः। आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः। पितृगोत्रेण यः पुत्रः संस्कृतः पृथिवीपते। आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः। चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। कर्णान्तु पञ्चमाद्वर्षात् न दत्ताद्याः सुता नृप!। गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमञ्चरेत्। पौनर्भवन्तु तनयं जातमात्रं समानयेत्। कृत्वा पौनर्भवष्टोमं जातमात्रस्य तस्य वै। सर्वांस्तु कुर्यात् संस्कारान् जातकर्मादिकान् नरः। कृते पौनर्भवष्टोमे ततः पौनर्भवः सुतः इति"। कन्यबीजसमुद्भवा अपि दत्ताद्यास्तनया निजगोत्रेण प्रतिग्रहीता स्वगोत्रेण सम्यक् स्वस्मृतोक्तविधिना जातकर्मादिभिः संस्कारयेत् तदैव प्रतिग्रहीतुः पुत्रतां प्राप्नुवन्ति नान्यथेत्यर्थः। तदाह वशिष्ठः "अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" दत्ताद्या इत्यादिपदेन कृत्रिमादीनां ग्रहणम्। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयन्दत्तश्च दायश्च षड्डिमे पुत्रपांशुलाः। अभावे पूर्वपूर्वेषां परान् समभिषेचयेत्। पौनर्भवं स्वयन्दत्तं दायं राज्ये न योजयेदिति" पूर्वोपक्रमात्

योऽयं पौनर्भवादीनां राज्यनियोजनाभावः स औरस-व्यतिरिक्ताभाव एव "अभावे पूर्वपूर्वेषामित्यस्य वानेनापवादात् सत्यौरसे तु राज्याभावस्य "न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत्। पितॄणां साधयेच्चैत्यौरसे तनये सतीत्यनेन" प्रागेवाभिधानात्। सत्यौरसे क्षेत्रजादीन् राज्ये नैवाभिषेचयेत् पितॄणां नित्यं श्राद्धादि च नैव साधयेत् न कारयेदित्यर्थः। गोत्रेणेति यद्यपि जातकर्मादीनां साक्षाद्गोत्रस्य करणता न श्रूयते तथापि तदङ्गभूते वृद्धिश्राद्धे तत्सम्बन्धावश्यम्भावात् प्रधानेऽपि तत्सम्बन्ध इति। चूडादिषु साक्षादेव तत्सम्बन्धः। "शिखा अपि च कर्त्तव्याः कुमारस्यार्षसङ्ग्रहेति" स्मरणात्। संस्कारैः पुत्रत्वमित्युक्तम् तानेवान्वयव्यतिरेकाभ्यामाह पितुर्गोत्रेणेति। यः पुत्र आचूडान्तं चूडान्तैः संस्कारैः पितुर्जनकस्य गोत्रेण संस्कृतः सोऽन्यतोऽन्यस्य पुत्रतां न याति। अयमत्राभिसन्धिः। कृतचूडस्य परिग्रहीतुः पुत्रताभावप्रतिपादनम् असाधारणपुत्रतां विषयीकरोतीत्यवश्यं वाच्यम्। अन्यथा गृहीत्वा पञ्चधैयमिनेन कृतचूडस्यापि परिग्रहीतृपुत्रताप्रतिपादनविरोधात्। गृहीत्वेत्यस्य च कृतचूडविषयत्वावश्यम्भावः स्वदभिप्यते ततश्च चूडान्तसंस्कृतस्य परिग्रहे द्वाभ्यायवता भवति गोत्रद्वयेन संस्कृतत्वात् तस्य च फलं गोत्रद्वयसम्बन्ध इत्यग्रे वक्ष्यते। अनेन जातकर्मादीनां चूडान्तानां संस्काराणां पुत्रताहेतुत्वमुक्तम्। आचूडमिति वक्तव्ये यदन्यग्रहणं तदकृतार्षसमसङ्ग्रहिणस्य पुत्रीकरणाभ्यनुज्ञानार्थं प्रधाननिष्पत्त्या पुत्रताहेतुत्वात् चूडाद्या इति वक्ष्यमाणत्वाच्च। अकृतजातकर्माद्यसम्भवे कथमित्यत आह चूडाद्या यदीति। यदि चूडाद्याः संस्कारा निजगोत्रेण प्रतिग्रहीतृगोत्रेण कृता वैशब्दोऽवधारणे तदैव दत्ताद्यास्तनयाः स्युरन्यथा ते दासा उच्यन्ते इति। चूडा आद्या येषां ते तथेति न तु चूडाया आद्या इति पूर्वेण पौनरुक्त्यापातात्। अनेन जातकर्माद्यप्राशनान्तानां जनकगोत्रेणानुष्ठानेऽपि न विरोधः। तथा च अकृतजातकर्मादिर्दत्त्यः अकृतचूडोऽनुकल्प इति सिद्ध्यति। दत्ताद्या इत्यादिपदेन कृतिमादिग्रहणमित्युक्तमेव तेषामपि संस्कारैरेव पुत्रत्वं न परिग्रहमात्रेण अन्यथा दास उच्यत इति विप्रतिषेधात्। अन्यथा चूडाद्यकरणे कृतचूडादिपरिग्रहे वा दासता भवति न तु पुत्रत्वमित्यर्थः अस्य पुत्रत्वस्य यूपत्वादिवत् संस्कारजन्यत्वात्। असंस्कृतः पुत्रीकार्य्य इति स्थितम् तत्रावध्यपेक्षायामाह ऊर्द्ध्वमिति। असंस्कृतोऽपि पञ्चमादूर्द्ध्वं न ग्राह्यः कालाभावेन पुत्रत्वानुपपत्तेः। अनेन पञ्चैव वर्षाणि पुत्रपरिग्रहकाला इत्युक्तं भवति तद्व्यतिरेकेणाभिधानन्तु पञ्चमानन्तरं गौणोऽपि कालो नास्तीति प्रतिपादनाय। अन्यथा "स्वकालादुत्तरः कालो गौणः सर्वः प्रकीर्त्तितः" इति न्यायेन पञ्चमानन्तरस्य गौणकालत्वापत्तिः। ततश्च जननमारभ्यातृतीयवर्षं, तत्रापि तृतीयवर्षस्य मुख्यकालता ऊर्द्ध्वन्तु पञ्चमाद्वर्षादित्युपसंहारे वर्षत्रयाच्च अत्रापि चूडाशब्दस्य तृतीयवर्षपरतैवाभिप्रेतेति गम्यते। अन्यथा उपनीतिसहभावपक्षे अष्टमवर्षस्याकृतचूडस्य परिग्रहापत्तिः। नचेदापत्तिः "ऊर्द्ध्वन्तु पञ्चमाद्वर्षादित्यनेन विरोधात्"। तस्मादाचूडान्तमित्यत्र चूडाशब्दस्तृतीयवर्षपर एव युक्तः तृतीयानन्तरमापञ्चमं गौणः ऊर्द्ध्वन्तु गौणोऽपि नेति स्थितम्"।

"यत्तु कात्यायनस्मरणम्। विक्रयश्चैव दानञ्च न नेयाः स्युरनिष्कवः"। दाराः पुत्राश्च" इत्यनिच्छूनां दानादिनिषेधः सोऽपि पञ्चवार्षिकस्यैव नाधिकस्येति व्याख्येयम्। यच्च "बहवन्तु प्रकुर्य्यात् यमिति" वाक्ये गुणदोषविचक्षणमिति पाठमभिप्रेत्य विचक्षणं न तु बालमिति सर्वत्रैव व्याख्यातम् तदपि पञ्चवार्षिकमेव। विचक्षणं चातुर्य्यविशेषेण न तु बालम् "बाल या षोड़शाद्वर्षात्" इति वचनविरोधात् न कुर्य्यादित्यर्थ इति व्याख्येयम्। ब्रह्मसंस्कृताभावे कथमित्यत आह गृहीतेति। पञ्चवर्षीयं चूडान्तसंस्कारसंस्कृतमित्यर्थः। ननु कथं तस्य ग्रहणं दासताभिधानादित्यत आह पुत्रेष्टिमिति। अयमत्राभिसन्धिः "अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति इन्द्रोऽस्मिन्द्रः प्रयच्छतीति" वाक्ये प्रजाफलकत्वमष्टेः श्रूयते तत यत्रानुत्पन्ना प्रजा तत्र तदुत्पत्तिरेव भाव्या यत्र तु तत्रा परिस्फुरते ततोत्पत्तेरभावात्तस्याः प्रजात्वमेव भाव्यमिति कल्प्यते प्रकृतविध्यन्यथानुपपत्तेः। तत्र दासस्यापनोदनमस्ते न सम्भवतीति तदपनोदोऽवश्यमभ्युपेयः। अन्यथा प्रजात्वमात्रसम्भावे पुत्रपरिग्रहमात्रे स्यात्। यदि च संस्कारै-

रेव तत् पुत्रत्वोत्पत्तेर्न तदपेक्षेति तर्हि प्रकृतेऽपि तुल्यं प्रथमपदेनात् तत्सूचनात्। "सर्वांस्तु कुर्यात् संस्कारान् जातकर्मादिकान्नरः" इत्यत्रोऽभिधानाच्च। तस्मात् पुत्रेष्ट्या पूर्वसंस्कारप्रयुक्तदासत्वापनोदपूर्वकपुत्रत्वसम्पादनात् संस्कृतोऽपि परिग्राह्य इति स्थितम्। यद्येवं तर्हि संस्कृतमित्येव वाच्यम् किं पञ्चवर्षीयपदोपादानेनेति चेन्नैवम् पञ्चवर्षीयस्यैवेति नियमार्थत्वात् नियमस्याऽन्यग्रहणपूर्वकब्रह्मचर्यसफलकोपनयनप्राप्त्यर्थः। नचायन्नियमः पूर्ववाक्येनैव सिद्ध इति वाच्यम् तस्याकृतसंस्कारावधिसमर्पकत्वेन प्रकृतत्वाभावे परिगृहीतत्वात्। प्रथमनिति संस्कारेभ्यः प्रागित्यर्थः। ननु परिग्रहहोमादेव प्रागिति कुतो नवगम्यते, गृहीत्वेति साकाङ्क्षाया ग्रहणभावनायाः क्त्वाप्रत्ययेन पूर्वकालतावगमात्। पुत्रेष्ट्या पूर्वसंस्कारापनोदेन संस्कारान्तरावश्यप्रापेक्षणाच्चेति"।

पुत्रच्छायावहमित्यस्यार्थस्तत्रैवोक्तो यथा

"पुत्रच्छाया पुत्रसादृश्यं तच्च नियोगादिना स्वयसतुत्पादनयोग्यत्वम् यथा भ्रातृसपिण्डसगोत्रादिपुत्रस्य, नंचासम्बन्धिनि नियोगासम्भवः "बीजार्थं ब्राह्मणः क्वचिद्धनेनोपनिमन्त्र्यतामिति" स्मरणेन निमन्त्रणसम्भवात्। ततश्च भ्रातृपितृव्यमातुलदौहित्रभागिनेयादीनां निरासः पुत्रसादृश्याभावात्। एतदेवाभिप्रेत्योक्तमग्रे तेनैव "दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः। ब्राह्मणादिष्वेव नास्ति भागिनेयः सुतः क्वचिदिति"। अत्रापि भागिनेयपदं पुत्रासदृशानां सर्वेषामुपलक्षणं विरुद्धसम्बन्धस्य समानत्वात्। विरुद्धसम्बन्धश्च नियोगादिना स्वयसतुत्पादनायोग्यत्वम्। यथा विरुद्धसम्बन्धो विवाहगृहपरिगृहीते च वर्जितः। "दम्पत्योर्मिथः पितृमातृभाव्ये विवाहो विरुद्धसम्बन्धो यथा भार्यास्वसृदुहिता पितृव्यपत्नीस्वसा चेति"। अस्यार्थः यत्र दम्पत्योर्बन्धुवरयोः पितृमातृसाम्यं बध्वा वरः पितृस्थानीयो भवति वरस्य वा बधूर्मातृस्थानीया भवति तादृशो विवाहो विरुद्धसम्बन्धः तत्र यथाक्रमसुदाहरणद्वयं भार्यास्वसृदुहिता भ्रातृव्यपत्नी पितृव्यपत्नीस्वसा पितृव्यपत्नी भगिनी चेति। तथा प्रकृते विरुद्धसम्बन्धः पुत्रो वर्जनीय इति यतो रतियोगः सम्भवति तादृशः कार्य इति यावत्।"

"परिग्रहविध्यभावे विशेषमाह मनुः। "अविधाय विधानं यः परिगृह्णाति पुत्रकम्। विवाहविधिभाजं तं कुर्याच्च धनभाजनमिति"। परिग्रहविधिं विना परिगृहीतस्य विवाहमात्रं कार्यं न धनदानमित्यर्थः किन्तु तत्र पत्न्यादय एव धनभाजः विधिं विना तस्य पुत्रत्वानुत्पादात्। अतएव दृढगौतमः "सगोत्रेषु कृता वे स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति विधिनैव गोत्रतां यान्तीति नियमः दत्तादिविधीनां दत्तकादिलक्षणान्तर्गतत्वेन स्वरूपनिर्वाहकत्वात् यथोक्तं "यमद्भिः पुत्रमापदि"। अत्र ग्रहणं सकलदानविधेरुपलक्षणं तेन च प्रतिग्रहविधिरप्याक्षिप्तो भवति"।

"मेधातिथिरपि दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमाह "सत्यपि प्रयोगे इन्द्रादिशब्दवल्लोकतोऽर्थातिशयात् शास्त्रे चोत्पत्तिविधानात् भार्यादिव्यवहारवत् पुत्रत्वव्यवहारोऽवगन्तव्य इत्यादिग्रन्थसन्दर्भेण"। तस्मात् दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमिति सिद्धम्। दानप्रतिग्रहहोमाद्यन्यतमाभावे तु पुत्रत्वाभाव एवेति।"

दत्तकस्य जनकगृहीतोर्मध्ये सापिण्ड्यमस्ति न वेति संशयनिर्णयाय सापिण्ड्यविशेषस्य तयोरभावस्तत्र प्रतिपादितः "ननु मनुवचनात् जनकगोत्रनिवृत्तावपि प्रतिग्रहीतृगोत्रप्राप्तौ किं मानमित्यत आह दृढमनुः। दत्तक्रीतादिपुत्राणां बीजयमुः सपिण्डता। पञ्चमी सप्तमी तद्वत् गोत्रं तत्पालकस्य चेति"। दत्तक्रीतादिपुत्राणां बीजयमुर्जनकस्य सपिण्डतास्त्येव दानादिनापि सा न निवर्तते तस्या अवयवान्वयरूपतया यावच्छरीरं दुरपनेयत्वात् अनेनावयवान्वय एव सापिण्ड्यं न पिण्डान्वय इत्युक्तं भवति पिण्डान्वयस्य "व्यपैति ददतः स्वधेति" अपगमावगमात्। सा च सपिण्डता कियतीत्यपेक्षायामाह पञ्चमी सप्तमीति। पञ्चानां पूरणी पञ्चमी पञ्चपुरुषव्याप्तेत्यर्थः एवं सप्तमी। गोत्रमोऽपि "ऊर्ध्वं सप्तमात् पितृबन्धुभ्यः बीजिनश्च मातृबन्धुभ्यः पञ्चमादिति"। अत्र बीजिग्रहणं दत्तकाद्युत्पादकानां सर्वेषामपि संग्रहार्थं न केवलं क्षेत्रजोत्पादकस्यैव "य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य त्विति" मनुस्मरणात्। तस्य ते पुत्रा इति पुत्रत्वप्रतिपादनं सापिण्ड्यप्रतिपादनार्थं न तु पुत्रत्वोत्पादनार्थं "पुत्रान् द्वादश वानाह" इत्यादिप्रतिग्रहीतृपुत्रत्वप्रतिपादनविरोधात्

नेतरस्य प्रतिग्रहीतुरित्यर्थः। नन्वेवं कन्यावदुभयतापि सापिण्ड्यमास्तां प्रतिग्रहेण गोत्रवत् सापिण्ड्यस्याप्युत्पत्तेरिति चेन्नैवम् "सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति दृङ्गोतमस्मरणविरोधात्। ये दत्तादयः सुताः सगोत्रेषु सगोत्रमध्ये कृताश्चेत् विधिना गोत्रतां सन्ततित्वं यान्ति परन्तु तैः सह विधिना सापिण्ड्यं न विधीयते नोत्पद्यत इत्यर्थः। सगोत्रेष्वपि सापिण्ड्यानुत्पत्तौ परगोत्रे सुतरां सापिण्ड्यानुत्पत्तिरुक्ता। युक्तश्चैतत् पितारब्धत्वेन भर्ता सहैकशरीरारब्धकत्वेन च यथा उभयतापि सापिण्ड्यं सिद्ध्यति न तथा दत्तके पितारब्धत्वेऽपि प्रतिग्रहीता सहैकशरीरारम्भकत्वाभावात्"। तत्र चायमर्थः धर्मार्थं स्वस्यालोकतापरिहारकधर्मसम्पत्त्यर्थं तत्तद्गोत्रेण जनकामेच्छया भिन्नगोत्रेणापि परिग्रहीता पुत्रवत् पुत्रप्रतिनिधितया परिगृह्य ये पुत्रा वर्द्धिताः तेषु केवलं परिग्रहीतृसपिण्डविभागित्वमेव न सापिण्ड्यमिति तस्मात् यत्र दत्तके न परिग्रहीतृसापिण्ड्यं किन्तु जनककुल एव साम्प्रयौरुषिकं सापिण्ड्यमिति सिद्धम्"।

"नन्वेवं दत्तकस्य प्रतिग्रहीतृकुले सापिण्ड्याभावे कथं विवाहो न स्यादिति चेत् सत्यम्। सगोत्रत्वादिति ब्रूमः। तर्हि तद्भगिन्यादिसन्ततौ विवाहोऽस्तु सगोत्रत्वसपिण्डत्वयोरभावात् न चात्र निषेधकं वचनमुपलभामहे प्रत्युत "सावित्रीं यस्य यो दद्यात् तत्कन्यां न विवाहयेत्। तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत्" इत्याद्यनुकूलमेव वचनमस्ति। न चेष्टापत्तिः अविच्छिन्नाविगीतसकलदेशीयशिष्टाचारविरोधात् तस्मात् किं तत्राविवाहनिमित्तमिति। अत्र कैश्चिदुच्यते "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" इति मनुवाक्ये स्वस्यासपिण्डेति वक्तव्ये यत् पितुरसपिण्डावचनं तद्दत्तकस्य प्रतिग्रहीतृसपिण्डाया विवाहो मा प्रसाङ्क्षीदित्येवमर्थम् अन्यथा पितृद्वारके सापिण्ड्ये मूलपुरुषादष्टमस्य वरस्य, मातृद्वारके सापिण्ड्ये मूलपुरुषात् षष्ठ्याः कन्याया विवाहो न स्यात् पितुः सपिण्डत्वेन असपिण्डताऽभावात् न चेष्टापत्तिः "पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा" इत्यादिसकलस्मृतिनिबन्धशिष्टाचारविरोधात्। न चेदं दूषणं दत्तकेऽपि समानम् अष्टमस्य तस्य षष्ठ्याः कन्यायाः पितुः सपिण्डत्वेन अविवाहत्वप्रसङ्गादिति वाच्यम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" इति वक्ष्यमाणवाक्येन सप्तमस्य दत्तकपितृमूलपुरुषासपिण्डत्वेन षष्ठ्याः कन्यायास्तादृसापिण्ड्येन षष्ठ्याः सप्तमस्य च पितुः सपिण्डत्वाभावादित्युक्तमेव। तस्मात् दत्तकसापिण्ड्यनिर्णायकमिदमेव वचनमिति कानुपपत्तिः७। तदतिभ्रान्तप्रलपितं विकल्पासहत्वात् तथा हि किमिदं दत्तकस्यैव सापिण्ड्यनिर्णायकम् उत दत्तकौरसयोरुभयोरिति। नाद्यः द्वेधा हि अस्य वचनस्य दत्तकविषयता सम्भवेत् दत्तकप्रक्रमाद्वा दत्तकसापिण्ड्यनिर्णायकविशेषवचनैकवाक्यत्वाद्वा न चेद्दोभयमप्यस्ति अनुपलम्भात्। किञ्चास्य दत्तकपरत्वे अत्रत्यं पितृपदं गौण्या प्रतिग्रहीतृपितृपरं स्यात् तच्च अनिष्टम् "न विधौ परः शब्दार्थः" इति न्यायविरोधात्। नाप्यन्त्यः पितृपदे युगपद्वृत्तिद्वयविरोधात्। न च गङ्गायां मीनघोषाविव्यत्रैव वृत्त्यन्तरतात्पर्य्याद्वकं प्रमाणमस्ति। तस्मात् औरसविषयमेवेदं वचनं गर्भाधानादिप्रक्रमात् "पञ्चमात् सप्तमादूर्द्ध्वमिति" वचनान्तरैकवाक्यत्वाच्च। न चास्यौरसपरत्वे कूटस्थात्" अष्टमस्य वरस्य षष्ठीकन्यायाश्च अनुद्वाहत्वप्रसङ्गः पितुरसपिण्डत्वाभावादित्युक्तमेव दूषणमिति वाच्यम् तस्य पितुरिति पञ्चम्यां षष्ठीभ्रमनिबन्धनत्वेन अदूषणत्वात्। अतएव योगीश्वरेण "मातृतः पितृतस्तथा" इत्यत्र पञ्चमीत्वनिर्णायकस्तसिल्प्रयोग आदृतः। तस्यापि सार्वविभक्तिकत्वशङ्कायाम् "ऊर्द्ध्वं सप्तमात् पितृबन्धुभ्यो योजिनश्च मातृबन्धुभ्यः पञ्चमादिति" गौतमवाक्ये पञ्चम्या निर्णय इति न किञ्चित् समाधानमिति समाधानान्तरं वक्तव्यम्। तत्रापरे आहुः "चेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः" इत्यत्र वाक्ये चेत्रजादीनां पुत्रप्रतिनिधित्वाभिधानात् "प्रतिनिधिस्तद्धर्मा स्यादिति" न्यायेन सकलौरसधर्म्मप्राप्त्या प्रतिग्रहीत्रादिपितृसपिण्डावर्जनं सेत्स्यतीति। तन्न "न सापिण्ड्यं विधीयते" इत्यनेन निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेनाप्राप्त्या तद्वर्जनासम्भवात्। एतेन पुत्रनाम्ना औरसधर्मातिदेशात् प्रतिग्रहीत्रादिपितृसपिण्डावर्जनसिद्धिरित्यपास्तम् "न तौ पशौ करोतीति" वत् निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेन वर्जनासम्भवात् तस्मात् अनन्यगत्या वाचनिकमेव प्रतिग्रहीतृकुले सापिण्ड्यम् अभ्युपगन्त-

व्यपति । चेदुच्यते । द्विविधं हि सापिण्ड्यम् अवयवान्वयेन पिण्डान्वयेन चेति तत्रावयवान्वयसापिण्ड्यस्य दत्तके प्रत्यक्षबाधितत्वेन हेमाद्रिः पिण्डान्वयमेवोपादाय दत्तकादीनां प्रतिग्रहीतृकुले त्रिपुरुषमेव सापिण्ड्यं व्यवातिष्ठिपत्" ।

"दत्तकानामेषा पिण्डान्वयरूपा व्यवस्थाविवाहत्वादिप्रयोजिका त्रैपौरुष्येव सपिण्डता, न "लेपभाजस्ततः पौत्राः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति" मातृष्वाभिहिता साप्तपौरुषी तस्याः सामान्यरूपतया विशेषेणाप्रवादात्" । "एतदेवाभिप्रेत्योक्तं संग्रहकारेण "दत्तकानान्तु पुत्राणां सापिण्ड्यं स्यात् त्रिपौरुषम् । जनकस्य कुले तद्वद्गृहीतुरिति धारणेति"। यदिदमुभयत्र त्रिपुरुषसापिण्ड्याभिधानं तत् द्व्यामुष्यायणाभिप्रायेण तस्य त्रिकद्वयेन सह सपिण्डीकरणाभिधानात् शुद्धदत्तकस्य तु प्रतिग्रहीतृकुले त्रिपुरुषं पिण्डान्वयरूपं सापिण्ड्यं जनककुले साप्तपौरुषमवयवान्वयरूपमेवेति । तद्वत् सपिण्डतावत् गोत्रमपि बीजवप्तुर्जनकस्य न केवलं जनकस्यापि तु तत्पालकस्य च दत्तकादेर्यः पालकस्तस्य च गोत्रं दत्तकादीनां भवतीति । अनेन सपिण्डतावैलक्षण्यं गोत्रेऽभिहितं यथा सपिण्डता जनकस्यैव न तथा गोत्रं किन्तु उभयोरपि तदिति । न चेदमपि दत्तकमात्रे किन्तु द्व्यामुष्यायणे दत्तकविशेषे । तथा हि द्विविधा दत्तकादयो नित्यवद्द्व्यामुष्यायणा अनित्यवद्द्व्यामुष्यायणाश्चेति । तत्र नित्यवद्द्व्यामुष्यायण नाम ये जनकप्रतिग्रहीतृभ्यामावयोरयं पुत्र इति संप्रतिपन्नाः। अनित्यवद्द्व्यामुष्यायणास्तु ये चूडान्तैःसंस्कारैर्जनकेन संस्कृताः उपनयादिभिश्च प्रतिग्रहीता, तेषां गोत्रद्वयेनापि संस्कृतत्वात् द्व्यामुष्यायणत्वं परन्त्वनित्यं जातमात्रस्यैव परिग्रहे गोत्रद्वयेन संस्काराभावात् तस्य प्रतिग्रहीतृगोत्रमेव । तदिदं सर्वमभिप्रेत्याह सत्याषाढः "नित्यानां द्व्यामुष्यायणानां द्वयोरिति" सूत्रेण नित्यद्व्यामुष्यायणानां गोत्रद्वयप्रवरसम्बन्धमुक्त्वा तमेवानित्येऽप्यतिदिशति "दत्तकादीनान्तु द्व्यामुष्यायणवदिति" सूत्रेण । व्याख्यातञ्चैतत् प्रवरस्वामिभिः द्व्यामुष्यायणप्रसङ्गे नानित्यानाह दत्तकेति । तावदेव गोत्रसन्ततौ प्रथमेनैव संस्काराः परिग्रहीता चेत् तदा उत्तरस्य पूर्वत्वात्तेनैव उत्तरत्व । तथा पितृव्येण भ्रातृव्येण चैकार्थेण ये जातास्ते परिग्रहीतुरेवेति" । अस्य भाष्यस्यायमर्थः यो गोत्रद्वयेन संस्कृतस्तस्यैव गोत्रद्वयसम्बन्धो नोत्तरसन्ततेः जनकगोत्रसम्बन्धे किं कारणमित्यत आह प्रथमेनेति प्रथमो जनकस्तेनैव संस्कृतत्वात् । संस्काराश्च चौडान्ताः । "पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ! । आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः" इति कालिकापुराणात् । व्याख्यातञ्चैतत् प्रागेव अन्यस्यासाधारणीं पुत्रतां न याति किन्तु द्व्यामुष्यायणो भवतीति । प्रथमेनासंस्कारे कथमित्यत आह परिग्रहीत्रा चेदिति । परिग्रहीत्रैव जातकर्मादिसर्वसंस्कारकरणे चौडादिसंस्कारकरणेऽपि वा उत्तरस्य परिग्रहीतुरेव गोत्रम् तत् हेतुः पूर्वत्वात् संस्कारकरणे प्रथमत्वात् । द्व्यामुष्यायणसन्ततौ दत्तकसन्ततौ चामेच्छितं गोत्रमाह तेनैवेति । परिग्रहीतृगोत्रेणैव उत्तरसन्ततेर्गोत्रमुभयत्रापि । स्वगोत्रपरिग्रहमाह तथेति । जनकपरिग्रहीतोरेकगोत्रत्वेऽपि परिग्रहीतृव्यपदेशः परिग्रहसंस्कारकरणादिति । यत्तु "गोत्रैरिक्थे जनयितुर्न भजेद्दत्त्रिमः सुत इति तत्परिग्रहीतृव्यतिरिक्तजातकर्मादिसर्वसंस्कारकरणपक्षे वेदितव्यम् । ये तु नित्यवद्द्व्यामुष्यायणादत्तकादयस्तेषां गोत्रद्वयम् । "द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः । गोत्रद्वयेऽप्यनुद्वाहः शुद्धशैशिरयोर्यथेति" पारिजातधृतस्मरणात् । गोत्रद्वये जनकगोत्रे परिग्रहीतृगोत्रे च । दत्तकादीनाञ्च द्व्यामुष्यायणत्वे" इदं वचनं "नित्यानां द्व्यामुष्यायणानामिति" सत्याषाढवचनं च प्रमाणम् । प्रवरमञ्जर्यामप्यनेनैवाभिप्रायेणोक्तं "दत्तक्रीतक्रीतिमपुत्त्रिकापुत्रादीनां यथासम्भवं गोत्रद्वयं सप्रवरमस्तीति" एतावता द्विगोत्राणां गोत्रद्वयं सप्रवरं विवाहे वर्ज्यमिति" ।

शाखायां विशेषस्तत्रोक्तो यथा

"शाखापि प्रतिग्रहीतुरेवेत्याह वशिष्ठः "अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः । स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" । स्वस्य प्रतिग्रहीतुः शाखा यस्मिन् कर्म्मणि तत् स्वशाखं कर्म्म तद्भजतीति स्वशाखभागिति प्रतिग्रहीतृशाखीयमेव कर्म तेन कर्त्तव्यमित्यर्थः । दत्तकादीनां मातामहा अपि प्रतिग्रहीतुर्या माता तत्पितर एव पितृव्यायस्य

मातामहेष्वपि समानत्वात्" दत्तकमीमांसाकृत् ।

श्राद्धीयद्रव्यग्रहणनिषेधे विशेषस्तत्रोक्तो यथा

"एवं प्रतिग्रहीतृकुलश्राद्धीयद्रव्यं दत्तकाय प्रतिग्रहीतृजनककुलश्राद्धीयद्रव्यञ्च द्व्यामुष्यायणाय न दातव्यं "सपिण्डाय सगोत्राय श्राद्धीयं नैव दापयेत् । न भोजयेत् पितृश्राद्धे समानप्रवरं तथेति" हेमाद्रिपारिजातधृतवचनात् । श्राद्धीयं श्राद्धे दत्तद्रव्यम्" ।

दत्तदुहितापि गृहीतुं शक्यते यथोक्तं तत्रैव

"औरसपुत्रस्येव औरसपुत्रा अप्यपचारे क्षेत्रजाद्याः पुत्राः प्रतिनिधयो भवन्ति । "मुख्यापचारे प्रतिनिधिरिति" न्यायात् । मुख्यत्वञ्चास्या दानादिविधौ साधनत्वेन साधनत्वञ्च ऋतुगमनविधिना साधितायां द्रव्यार्जनविधिना अर्जितस्य व्रीह्यादेः क्रतुसाधनत्ववत् । तथा हि रात्रिसत्रन्यायेन "ऋतियात् प्रजां विन्दामहे ऋतियात् प्रजां विन्दते" इत्याद्यर्थवादोन्नीते "ऋतावुपेयात् तस्मिन् संविशेत्" इत्यादौ नित्ये ऋतुगमनविधौ स्त्रीपुंससाधारण्याः श्रुतिसिद्धायाः प्रजाया एव भाव्यत्वमवगम्यते । प्रजनयतीति प्रजेतिव्युत्पत्त्या प्रजननशक्तिमतः स्त्रीपुंसयोरेव प्रजाशब्दवाच्यत्वात् न नपुंसकस्य, तस्य शुक्रशोणितसाम्यजन्यत्वेन नान्तरीयकत्वात् । अतएव "अनधीत्य द्विजो वेदमनुत्पाद्य च सन्ततिम् । अनिष्ट्वा विविधैर्यज्ञैर्मोक्षमिच्छन् पतत्यधः" इति तादृश्या एव सन्ततेरनुत्पादे अधःपातः श्रूयते । संततोत्पन्नमिति सन्ततिः प्रजापर्याय एव । "प्रजा स्यात् सन्ततौ जने" इति कोषात् । एवम् "अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः । क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति" इत्यत्र अपत्यशब्दो व्याख्यातः "अपत्यं कस्मादपतनं भवति प्रजनेन प्रतनतीति" यास्कस्मरणात् । "आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी । आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे" इति कोषाच्च । यद्यत्र "पुमान् पुरुमना भवति पुंसतेर्वेति" यास्कोक्त्या पुंपदं बहुरूपरं तदा पुंसतेर्वेति" तदुक्त्यैव प्रसवकर्तृमिथुनपरमेव व्याख्यायताम् । अतएव यास्कः "मिथुनाः पित्रदायादाः" इति । तदेतादृक्, श्लोकास्यामध्युक्तम् । "अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदां शतमिति" । "अविशेषेण पुत्राणां दायो भवति धर्मतः । मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्" इत्यत्र पुत्रपदं मिथुनपरं दर्शितवान् । नचात्र मिथुनपदं पुत्रस्त्रीपरमिति वाच्यम् । अङ्गादङ्गात् सम्भवसि इत्यस्यासङ्गतेः । "न दुहितर इत्येके पुमान् दायादोऽदायादा स्त्रीति विज्ञायत" इत्येकीयमते दुहितृनिराकारणासङ्गतेश्च । यच्च "नापुत्रस्य लोकोऽस्तीत्यादौ पुत्रपदं तदप्युभयपरमेव । "भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति" पाणिनिना पुत्रदुहितृपदयोरेकशेषस्मरणात् । एतेन "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा" इत्यादावपि पुत्रपदं व्याख्यातम् । तत्साधनञ्च पुत्रिकाकरणलिङ्गमग्रे वक्ष्यते । अतएवोक्तम् "तत्समः पुत्रिकासुत" इति । "अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणामिति" च । यदि च अदृष्टवैकल्येन कन्यानुत्पादः तदा कृष्णप्रतिपच्छ्राद्धादिना तत्सम्पादनं कार्यं कृष्णचतुर्दश्याद्यादिना पुत्रादृष्टस्येव" । यत्तु गमनकरणिकायामेव भावनायाम् "एवं गच्छन् पुत्रं जनयेदिति" पुत्रस्यैव भाव्यत्वं प्रतीयते तत्प्रजापदोपात्तयोः स्त्रीपुंसयोर्मध्ये पुत्रस्य तद्वाक्यविहितगुणफलतया अवश्यत्वानुवादः पुत्रार्थिप्रवृत्त्यर्थः । गुणाश्च युग्मनिशाशुक्राधिक्यस्त्रीत्वामतेन्दुसौम्यपुंसवनाद्युपादयो योगिमन्वादिभिरेव एवमित्यादिना स्पष्टीकृताः । आश्वलायनेनापि पाणिग्रहणे पुत्रपुत्रीगुणफलत्वं प्रकटितम् । "गृह्णामि ते सौभगत्वाय हस्तमित्यङ्गुष्ठमेव गृह्णीयात् यदि कामयेत पुमांस एव मे पुत्रा जायेरन्नित्यङ्गुलीरेव, स्त्रीकामोरोमात्रं हस्तं स्राङ्गुष्ठसमयकाम इति" । एतेन "स्त्रियोऽयुग्मासु रात्रिषु" इत्यपि व्याख्यातम् । तस्मात् पुत्रस्येव श्राद्धकर्तृत्वेन परलोकसाधनतया च पुत्रा अपि दानश्राद्धादिविधिसाधनत्वेन सिद्धे मुख्यत्वे तदपचारे प्रतिनिधिर्युक्त एव । "दुहिता दुरहिता दूरे हिता दोग्धा" इति निरुक्त्या दुहितृदौहित्रद्वारापि पितृपकारकत्वं दर्शयति यास्कः मनुरपि "पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते । दौहित्रोऽपि ह्यसत्रैनं सन्तारयति पौत्रवदिति" । महाभारते गाम्बाय्युक्तिश्च "एका शताधिका बाला भविष्यति गरीयसी । तेन दौहित्रजाल्लोकान् प्राप्नुयामिति मे मतिः" । अन्यत्रापि "दुहितर एव मातापित्रोः किमीरसाः पुत्राः । निपतन् दिवो यया-

तिर्दौहित्रैरुद्धृतः पर्वभिति"। दौहित्रैरष्टकादिभिः कानीनैर्मागधीपुत्रैः। एवञ्चौरसदुहित्रभावे दौहित्रकृतलोकप्राप्त्यर्थं क्षेत्रजादिदुहितॄणामपि प्रतिनिधित्वेनोपादानं सिद्धमेव। न च व्रीहिप्रतिनिधित्व इव वचनमस्ति। यदीदं तर्हि भर्त्रपचारे देवरस्येव भार्यापचारे ग्यालिकायाः प्रतिनिधित्वं स्यात् श्वशुरशरीरावयवान्वयेन सौसादृश्यादिति चेन्नैवम् नहि श्वशुरशरीरावयवान्वयेन भार्योपादानं किन्तु तस्याः संस्कृतस्त्रीत्वेन, न च तत् ग्यालिकायामस्ति। यत्र च कनिष्ठादौ तदस्ति तत्र भवत्येव तस्याः ज्येष्ठाप्रतिनिधित्वम्। यथाह व्यतिरेकमुखेन योगीश्वरः। "सत्यामन्यां सवर्णायां धर्म्मकार्य्यं न कारयेत्। सवर्णासु विधौ धर्म्मे ज्येष्ठया न विनेतरेति"। तस्मात् सिद्धमासां न्यायत एव प्रतिनिधित्वम्"।

"दुहितृप्रतिनिधौ पुराणेषु लिङ्गदर्शनानि उपलभ्यन्ते। तत्र दत्तकाया रामायणे बालकाण्डे दशरथं प्रति सुमन्त्रस्य सनत्कुमारोक्तभविष्यानुवादो लिङ्गम्। "इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः। नाम्ना दशरथो वीरः श्रीमान् सत्यपराक्रमः। सख्यं तस्याङ्गराजेन भविष्यति महात्मना। कन्या चास्य महाभागा शान्ता नाम भविष्यति। अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः। स राजानं दशरथं प्रार्थयिष्यति भूमिपः। अनपत्योऽस्मि धर्मज्ञ! कन्येयं मम दीयताम्। शान्ता शान्तेन मनसा पुत्रार्थे वरवर्णिनी। ततो राजा दशरथो मनसाभिविचिन्त्य च। दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः। प्रतिगृह्य तु तां कन्यां स राजा विगतज्वरः। नगरं यास्यति क्षिप्रं प्रहृष्टेनान्तरात्मना। कन्यां तामृष्यशृङ्गाय प्रदास्यति स वीर्य्यवान्" इत्यादि"।

"तत्रैव ऋष्यशृङ्गं प्रति लोमपादवाक्यम्। "अयं राजा दशरथः सखा मे दयितः सुहृत्। अपत्यार्थं ममानेन दत्तेयं वरवर्णिनी। याचमानस्य मे ब्रह्मन्! शान्ता प्रियतमा मम। सोऽयं ते श्वशुरो धीर! यथैवाहं तथा नृपः" इत्यादि। अत्र दीयतां दास्यते प्रतिगृह्य दत्ताशब्दैर्दानविधिः स्पष्ट एव। तथा पुत्र इत्युपक्रम्य पुत्रार्थ इत्युपसंहारात् औरसपुत्रीवत् दत्तपुत्रेऽपि पुत्रप्रतिनिधिर्भवतीति गम्यते"।

एवं कृत्रिमादिपुत्रीकरणमपि शकुन्तलादीतिहासादौ द्रष्टव्यम्।

"दत्तकाशौचनिर्णयः। तत्र जनककुले परस्परं नास्त्येव। "गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा" इति मनुवचनात्। अत्र च स्वधापिण्डशब्दौ अशौचादिसकलपितृकर्मोपलक्षणं पिण्डदानादिनिमित्तीभूतगोत्ररिक्थयोर्निवृत्तिस्मरणात् प्रेतपिण्डदानादेश्चाशौचपूर्वकालत्वनियमात् ततश्च पिण्डनिवृत्त्या व्यशौचनिवृत्तिरर्थसिद्धैव। "असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत्। प्रथाहिणान्तु नैव स्यात् कर्त्तुः स्वस्ति तथापि च। यावदशौचमुदकं पिण्डमेकञ्च दद्युः" इत्यादिवाक्यपर्य्यालोचनया पिण्डाशौचयोः समव्याप्तिसिद्धेः तस्मात् दत्तकतज्जनकादीनाञ्च परस्परं नाशौचादि। यत्तु "वैजिकादपि सम्बन्धादनुरूपात्रादवं तत्रेदमिति" तदपि "व्यपैति ददतः स्वधा" इत्यनेनापोदितम् दत्तकातिरिक्तस्थले तस्य सावकाशत्वात्। किञ्च अशौचोदकदानादौ गोत्रसापिण्ड्ययोर्मिलितयोर्निमित्तत्वावगमात् अन्यतरापाये न तन्निमित्तमशौचादि। तथा च शङ्खलिखितौ "सपिण्डता तु विज्ञेया गोत्रतः साप्तपौरुषी। पिण्डस्योदकदानञ्च शौचाशौचं तदानुगमिति"।

प्रतिग्रहीतृपित्रादीनान्तु दत्तकादिमरणे त्रिरात्रमशौचम्। तदाह वृहस्पतिः "अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। मृतेष्वाप्लुत्य शुद्ध्यन्ति त्रिरात्रेण द्विजोत्तमाः"। इदञ्च त्रिरात्राशौचविधानं यत्प्रतियोगिकं भार्य्यात्वं पुत्रत्वञ्च तस्यैव। त्रिपुरुषानन्तरवर्तिनां पितृसपिण्डानान्तु पृथगाह मरीचिः "सूतके मृतके चैव त्रिरात्रं परपूर्वयोः। एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः" इति। यद्यपि दत्तकादीनामुत्पन्नानामेव स्वीकारात् परिग्रहीतुस्तदुत्पत्त्याशौचं न घटते तथापि तदपत्योत्पत्त्याशौचं घटत एवेति सूतकनिर्देशः। इदमपि समानजातीयानामेव पुत्राणाम्। तथा च ब्रह्मपुराणम्। "औरसं वर्ज्जयित्वा तु सर्ववर्णेषु सर्वदा। क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च। अशौचन्तु त्रिरात्रं स्यात् समान इति निश्चयः" इति। सर्वदा सर्वकाले उपनयनानन्तरमपि। "अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्त्ववित्" इति। यद्यपि प्रतिग्रहीतृमरणे दत्तकस्य दशाहाशौचं न घटते

सपिण्डसगोत्रत्वयोर्मिलितयोरभावात् अशौचविशेषस्याहत्य नोपलभ्यते तथापि "गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेतहारैः समं तत्र दशरात्रेण शुद्ध्यतीति" मरीचिवचनेन शिष्यस्य गुरुप्रेतकार्यकरणनिमित्तदशाहाशौचसुक्तमभवति। अत्र गुरुशब्दः आचार्यादिरूपः। गुरुत्वमत्राप्यस्ति उपनयनादिकर्तृत्वात्। ततश्च दत्तकस्य प्रतिग्रहीतृक्रियाकरण एव दशरात्राशौचं सिद्ध्यति अन्यथा त्रिरात्रमेव पूर्वोक्तवचनात्। एवं दत्तकस्य प्रतिग्रहीतुस्त्रिपुरुषानन्तरवर्तिसपिण्डमरणे एकाहः "एकाहस्तु सपिण्डानाम्" इति पूर्वोक्तमरीचिवाक्यात्। सोदकसगोत्रयोर्मरणे स्नानमात्रम्। "अन्यास्थितेषु दारेषु परपत्नीसुतेषु च" इति पूर्वोक्तप्रजापतिवाक्यात्"।

अन्येऽपि मीमांसादौ विशेषाः सन्ति ते च तत एवावगन्तव्या विस्तरभयात् न लिखिताः।

दत्तकचन्द्रिकानुसारिव्यवस्था वङ्गदेशे प्रचलिता मीमांसानुसारिव्यवस्था तु पाश्चात्यदेशप्रचलितेति भेदः।

वीरमित्रोदये अकृतानुज्ञे भर्त्तरि मृते स्त्रिया दत्तको ग्रहीतुं शक्यते इति व्यवस्थापितम् यथा "न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति"। अत्र भर्त्तानुज्ञां विना स्त्रियाः पुत्रप्रतिग्रहनिषेधाद्दत्तानुज्ञे भर्त्तरि मृते विधवया कृतः पुत्रो दत्तको न भवतीत्याङ्कस्तद्र अपुत्रस्य गत्यभावात्पुत्रकरणस्यावश्यकत्वत्रयवाच्छास्त्रमूलकतदनुज्ञायास्तत्राप्यक्षतेः। न चैवमनुज्ञानादन्यत्रेति व्यर्थम् व्यावर्त्याभावाच्छास्त्रीयानुमतेः सर्वत्रावश्यकत्वादिति वाच्यम्। समुच्चोः, पत्यन्तरे पुत्रवतो वानुज्ञाया असम्भवाद्भार्य्या यदि स्वपुत्रार्थिनी तां प्रति निषेधात्। तथा हि "सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति"। पुत्रकार्य्यश्राद्धादेः सपत्नीपुत्रेण सिद्धेर्भर्त्तानुज्ञां विना तादृशपुत्रो न कार्य्यः। उभयोरपि तत्र कार्य्यस्य तेन निष्पत्तेः। भर्त्तुर्हि स औरस एव मुख्यः तस्यापि दत्तवद्गौण इति तादृशपुत्रो भर्त्तानुमतिमन्तरेणेतरो न प्रतिग्राह्य इति तात्पर्य्यार्थः। वस्तुतस्तु "भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति" वचनवदेतस्यापि भ्रातृपुत्रस्य गौणदत्तकपुत्रत्वादिसम्भवेऽन्यपुत्रप्रतिनिधिर्न कार्य्य इत्यर्थकतया मिताक्षरास्मृतिचन्द्रिकादौ व्याख्यातत्वाद्भर्त्तरि जीवति भार्य्या स्वातन्त्र्येण तदननुमत्या न पुत्रीकरणीय इति भर्त्तुरनुज्ञानादन्यत्रेत्यस्यार्थः। मृते तु तस्मिन् न पारतन्त्र्यम् तस्या यत्पारतन्त्र्यं तदनुमतिरेवापेक्षिता। एवं सति दृष्टार्थता भवति प्रतिषेधस्य। तस्माददत्तानुज्ञे मृतेऽपि भर्त्तरि भार्य्याया दत्तकादिकरणमविरुद्धम्। मनुवचनद्वयस्य पूर्वोक्तार्थकत्वे उपपत्तिरपि मिताक्षरादावेवोक्ता"।

इयमपि व्यवस्था पाश्चात्यदेशे प्रचलिता।

दत्तवैश्यस्योपाधिभेदे "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" उद्वा० त०। [हरिवं० १९अ० दत्तशब्दे दृश्यम्।

दत्तशत्रु पु० अधिदेवन्टपपुत्रभेदे दत्तशर्म्मापि तत्पुत्रभेदे

दत्तात्मन् पु० द्वादशपुत्रान्तर्गते पुत्रभेदे "दत्तात्मा तु स्वयंदत्तः" याज्ञ०। "मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०। "स्वयमेव स्वात्मानमन्यस्मै दत्तवांस्तवाहं पुत्रो भवामीति स्वयमुपगतो मातापितृविहीनस्ताभ्यां त्यक्तो वा सवर्णोऽपतितः स उच्यते तथा च मनुः "मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं समर्पयेद्यस्तु स्वयन्दत्तस्तु स स्मृतः" इति। अकारणात् पातित्यादिकारणमन्तरेणैव दुर्भिक्षादौ पोषणाद्यसामर्थ्यादिना मातापितृभ्यान्त्यक्तः स्वतन्त्र इत्यर्थः" वी० मि०।

दत्तात्रेय पु० दत्तसंज्ञकः आत्रेयः। योगाचार्य्ये अनुसूयागर्भजे अत्रिपुत्रे षष्ठे भगवदवतारभेदे। आत्रेयशब्दे तस्योत्पत्तिकथा दृश्या "षष्ठमत्रेरपत्यत्वं हृतः प्राप्तोऽनुसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्यः स जगिवान्" भाग० १।३।१२। तेन च स्वसंहितायां योगोऽनुशिष्टः कार्त्तवीर्य्याय च तेन वरो दत्तः कार्त्तवीर्य्यशब्दे दृश्यः।

दत्तात्रेयेश्वर पु० काशीस्थे शिवलिङ्गभेदे "भीष्मकेशवनामासौ दत्तात्रेयेश्वराह्वयम्। दत्तात्रेयेश्वरात् पूर्वमेष आदिगदाधरः" काशीख० ३३ अ०।

दत्तानपकर्म्मन् न० दत्तस्य न अपकर्म्म यत्र। दत्ताप्रदानिकाख्ये व्यवहारविषयभेदे।

दत्ताप्रदानिक न० दत्तस्य असम्यक्कृतया दत्तत्वात् पुनराप्रदानं यद्गणमस्त्यत्र ठन्। अष्टादशविवादान्तर्गते व्यवहारविषयभेदे तत्स्वरूपादिकं वी०मि० उक्तं यथा नारदः "दत्ता द्रव्यमसम्यग्यः पुनरादातुमिच्छति।

दत्ताप्रदानिकं नाम व्यवहारपदं हि तदिति"। अस्य अशास्त्रीयमार्गाश्रयणेनेत्यर्थः। दानप्रकारस्यादेयादिभेदैश्चतुर्विधत्वमाह स एव। "अदेयमथ देयञ्च दत्तं वाऽदत्तमेव च। व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः" इति। तत्र तावदुदेयस्य स्वरूपभेदानाह बृहस्पतिः "सामान्यं पुत्रदाराधिसर्वस्वन्यासयाचितम्। प्रतिश्रुतमथान्यस्य न देयं त्वदृषा स्मृतमिति"। सामान्यं साधारणं प्रतिश्रुतं वाचादत्तम्। नारदोऽपि "अन्याहितं याचितकमाधिः साधारणञ्च यत्। निक्षेपः पुत्रदाराश्च सर्वस्वान्वये सति। आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना। अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतमिति"। साधारणं बहुस्वामिकं रिक्थादिकं न त्वविभक्तस्वामिकं सुवर्णादिकं तस्य सम्मतौ देयत्वेन वक्ष्यमाणत्वात्। अत्र पुत्रदानमेकपुत्रविषयं तद्दाने सन्ततिविच्छेदप्रसङ्गात्। अतएव विष्णुः, "शुक्रशोणितसम्भवः पुरुषो मातापितृनिमित्तस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतो नत्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषामिति"। अतश्च "सुतस्य सुतदाराणां वशित्वन्त्वनुशासने। विक्रये चैव दाने च वशित्वं न सुते पितुः" इत्यादीनि स्मृत्यन्तरोक्तवचनानि सुतस्यादेयत्वप्रतिपादकानि एकपुत्रविषयाणीति ज्ञेयानि। अनेकपुत्रेष्वपि मातापितृवियोगसहनक्षम एव देयः। अतएव कात्यायनः "विक्रयस्त्वेव दानञ्च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्चेति" यथा दारा विक्रयं दानं वा भर्त्रा न नेयास्तथा मातापितृभ्यां पुत्रा अपि पितृवियोगानिच्छवो न नेया इत्यर्थ उक्तः स्मृतिचन्द्रिकायाम्। न नेयाः स्युरनिच्छय इत्येतदनापद्विषयम्। "आपत्काले तु कर्त्तव्यं दानं विक्रयमेव वा। अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः" इति तानेवाधिकृत्य तेनैवाभिधानात्। मात्रापि पत्यनुज्ञया देयमित्याह विष्णुः "न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति"। अन्याहितादिवत् स्त्रीधनमप्यदेयम्। अतएव टलः "सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम्। अन्याहितञ्च निःक्षेपः सर्वस्वं चान्वये सति। आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः। यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः" इति। अदेयदाने प्रतिग्रहे च दण्डमाह मनुः। "अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। तावुभौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति"। अदेयग्रहणमदत्तस्याप्युपलक्षणार्थम्। अतएव नारदः। "गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति। दण्डनीयावुभावेतौ धर्मस्तेन महीक्षितेति"। अदत्तादेयग्रहणाद्गृहीतस्य परावर्त्तनमपि कार्यमिति गम्यते। अदत्तग्रहणे दाने च दानसिद्ध्यभावात्परस्वत्वानुत्पत्तेरित्युक्तं स्मृतिचन्द्रिकायाम्। देयस्वरूपमाह स एव। "कुटुम्बभरणाद्द्रव्यं यत्किञ्चिदतिरिच्यते। तद्देयमुपहत्यान्यन्न तद्दोषमवाप्नुयादिति"। अन्यदुपहत्य भर्त्तव्यं कुटुम्बमनवरुद्ध्येत्यर्थः। उपरोधस्य भोजनाच्छादनादिराहित्यनिबन्धनतोऽत्राभिमतो न ताम्बूलादिभोगसाधनवैकल्यनिबन्धनः। अतएव बृहस्पतिः। "कुटुम्ब भक्तवसनाद्देयं यदतिरिच्यत इति"। भक्तं भोजनं वसनमुच्छादनम्। भक्तवसनाद्यदतिरिच्यत इत्यन्वयः। याज्ञवल्क्योऽपि" स्वं कुटुम्बाविरोधेन देयं दारसुतादृते" इति। कुटुम्बाविरोधेन कुटुम्बानुपरोधेन कुटुम्बभरणावशिष्टं स्वन्देयमित्यर्थः। स्थावरविषये देयमाहतुः प्रजापतिबृहस्पती "सम्प्रागमाद्गृहक्षेत्राद्यद्यत्क्षेत्रं प्रदीयते। पित्र्यं वाथ स्वयंप्राप्तं तद्दातव्यं विवक्षितमिति"। सम्प्रागमात्पूर्वोक्तसम्प्रविभागमयुक्तात्। क्षेत्रग्रहणमुपलक्षणम्। पित्र्यं वंशपरम्परायातम्। स्वयंप्राप्तं स्वयमर्जितम्। पित्र्यस्वयंप्राप्तयोरुपादानं क्रीतादीनामुपलक्षणार्थम्। पित्र्यं वा स्वयंप्राप्तं वा यद्गृहक्षेत्रादिकं प्रदीयते तत्सम्प्रागमान्विताद्गृहक्षेत्रादुद्धृत्य दातव्यमिति विवक्षितमित्यर्थः। अत्र सम्प्रागमाद्गृहक्षेत्रादित्यभिधानं गृहक्षेत्रादिदानं कुटुम्बपर्य्याप्ते सागमके गृहे क्षेत्राद्यन्तरे सत्येव नान्यथेत्येवमर्थम्। यत्तु कात्यायनेनोक्तम् "सर्वस्वं गृहवर्जं तु कुटुम्बभरणाधिकम्। यद्द्रव्यं तत् स्वकन्देयमदेयं स्यात्ततोऽन्यथेति"। तद्गृहाद्यन्तराभावविषयम्। स्वकं स्वकीयम् यथेष्टविनियोगार्हद्रव्यमिति यावत्। स्वयंप्राप्तं त्वविभक्तधनैर्भ्रातृभिरननुज्ञातमपि देयम्। "स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारेण बन्धकम्" इति बृहस्पतिस्मरणात्। स्वेच्छादेयं भ्रात्राद्यनुज्ञामन्तरेणापि देयम्। बन्धकं बन्धाचारेणाधिरूपेण देयमित्यर्थः। यत्तु तेनैवोक्तम् "विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एकोऽप्यनीशः सर्वत्र दानाधमनविक्रये" इति। तत् समानाधिकाविभक्तस्थावरविषयम्। आधमनमा-

धीकरणं विभक्ता अपि स्थावरे समाः किमुताविभक्ता इति दण्डापूपन्यायेन व्याख्येयम्। अन्यथा विभागो निरर्थकः स्यात्। अतश्च यदुक्तं स्मृत्यन्तरे "एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः" इति। तत्क्रमायातविभक्तस्थावरविषयं सप्तानधिकस्थावरविषयं वेति मन्तव्यम्। स्वार्जितमपि किञ्चित्प्राप्तव्यवहारेषु पुत्रेषु सत्सु तदनुमत्यैव दातव्यमित्यभिप्रेत्याह भगवान् व्यासः। "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानन्न च विक्रयः। ये ज्ञाता येऽप्यज्ञाताश्च ये च गर्भे व्यवस्थिताः। हृत्तिं च तेऽभिकाङ्क्षन्ति न दानन्न च विक्रयः" इति। अत्रोत्तरपद्यं पूर्वपद्यदर्शितबृहस्पतिवचनार्थस्य दण्डापूपन्यायप्रदर्शनेन दृढीकरणार्थम्। किञ्चिद्भर्त्रा पत्न्यनुज्ञातमेव देयम्। किञ्चिन्मुख्येनापि भ्रात्राद्यनुज्ञातमेव देयम्। तथा च बृहस्पतिः "सौदायिकं क्रमायातं शौर्यप्राप्तं च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयादिति"। सौदायिकं वैवाहिकं यस्याः परिणयने लब्धं तस्याः अनुज्ञयैव दातव्यम्। क्रमायातम्पितृपितामहादिक्रमायातम्। स्त्रीज्ञात्यनुमतं न सकलन्देयम्। "वैवाहिके क्रमायाते सर्वदानन्न विद्यते" इति तेनैवोक्तत्वात्। देयोक्तिप्रसङ्गेन प्रतिग्रहे प्रकारविशेषं दर्शयति याज्ञवल्क्यः "प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः" इति। प्रकाशः प्रकटः ससाक्षिक इति यावत्। पुत्रप्रतिग्रहे प्रकारविशेष उक्तो वसिष्ठेन। "पुत्रं परिगृहीत्यनु बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबान्धवमसन्निकृष्टमेव गृह्णीयादिति"। अदूरबान्धवं सन्निहितमातृष्वसादिबान्धवम् असन्निकृष्टं सन्निकृष्टभ्रातृभगिनीपुत्रादिव्यतिरिक्तमेव प्रतिगृह्णीयादित्यर्थः। प्रासङ्गिकमुक्त्वा प्रकृतमभ्याह याज्ञवल्क्यः "देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत् पुनः" इति। इदन्ते दास्यामीति यत् प्रतिश्रुतन्तद्वश्यं तस्मै दातव्यं यदि धर्मप्रच्युतो न भवति। प्रच्युते पुनर्न दातव्यं "प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति" गौतमस्मरणात्। "दत्त्वा नापहरेत् पुनः"। न्यायमार्गेण यत् दत्तं सप्तविधमपि पुनर्नापहर्त्तव्यम् किन्तु तथैवानुमन्तव्यमित्यर्थः। यत् पुनः प्रतिश्रुतन्न ददाति दत्तं वाऽपहरति तस्य दोषमाह हारीतः "प्रतिश्रुतार्थादानेन दत्तस्य च्छेदनेन च। विविधान्नरकान् याति तिर्य्यग्योनौ च जायते। वाचैव यत्प्रतिज्ञातं कर्म्मणा नोपपादितम्। कथं तद्धर्मसंयुक्तमिह लोके परत्र च" इति। यद्दानं धर्मसंयुक्तं प्रतिगृहीतुः प्रदत्तधर्मसम्पत्त्यर्थं वाचा प्रतिज्ञातन्न पश्चादर्पितं तदिह परत्र च क्षयवन्नापैतीत्यर्थः। प्रतिश्रुतमदद्वाचा तद्दाप्यो दण्ड्यश्चेत्याह कात्यायनः "स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम्। न दद्याद्दण्डदाप्यः प्राप्नुयात्पूर्वसाहसम्" इति। मत्स्यपुराणेऽपि "प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः" इति। अनयोर्दण्ड्ययोरपराधानुसारेण व्यवस्था।

दत्तं सप्तविधमदत्तं षोडशप्रकारमित्याह नारदः "दत्तं सप्तविधं ज्ञेयमदत्तं षोडशात्मकम्" इति। तत्र दत्तभेदानाह स एव। "पण्यमूल्यं श्रुतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः। स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः" इति। पण्यमूल्यं क्रीतद्रव्यस्य मूल्यम्। श्रुतिस्वरूपं कात्यायनेन दर्शितम्। "अभीप्सितोपलब्ध्यर्थं दानं यत्तु निरूपितम्। उपलब्धिक्रियालब्धं सा श्रुतिः परिकीर्त्तिता" इति। प्रयोजनक्रियासम्पादनार्थं श्रुतिरित्यत इत्यर्थः। तुष्ट्या परितोषेण वन्दिप्रभृतिभ्यो दत्तमिति शेषः। स्नेहात् प्रीत्या दुहित्रादिभ्यो दत्तम्। प्रत्युपकारतः कृतोपकाराय प्रत्युपकारिणे दत्तम्। तत्प्रदर्शनार्थमाह। कात्यायनः "भयत्राणोपरक्षार्थात्तथाकार्यप्रसाधनात्। अनेन विधिना लब्धं भयत्राणादिकं धनम्"। उपकारकरणेन लब्धमिति यावत्। स्त्रीशुल्कं विवाहार्थं कन्याबन्धुभ्योदत्तम्। अनुग्रहार्थं परोपकारः कर्त्तव्य इति विधिबलाद्यत्र कृतापि अनुग्रहार्थं दत्तमेतत् सकलं सफलं भवतीति दर्शयितुन्नारद आह "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेभ्यो दत्तं तु सफलम्भवेदिति"। उपकारिणि परोपकारे सफलं फलातिशयोपेतमित्यर्थः। तदेतत्पण्यादि सप्तविधं दत्तमेव दानविदोविदुः अपरावर्तनीयं विदुरित्यर्थः। बृहस्पतिरपि "श्रुतिस्तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे। अनुग्रहसंप्रीत्या दत्तं सप्तविधं विदुरिति" अदत्तानि दर्शयति नारदः "अदत्तन्तु भयक्रोधशोकवेगरुगन्वितैः। तथोत्कोचपरीहासव्यत्यासच्छलयोगतः। बालमूढा स्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता समायं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्ये वा धर्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति

तत्स्मृतमिति" । रुक् उपतापः भयादिजनोत्थ उपतापस्तदन्वितैरित्यन्वयः । अपवर्जितं दत्तं बालादिभिरपवर्जितमित्यन्वयः । एतदुक्तं भवति भयोपतप्तेन बन्दिव्याघ्रादिभ्यो दत्तं क्रोधोपतप्तेन क्रोधविषयीभूतानां पुत्रभ्रात्रादीनां भयं कर्तुमितरेभ्यो दत्तम् । पुत्रादिवियोगजनितशोकवेगादुपतप्तेन किं स्थितेन धनेनेति तात्कालिक्या बुद्ध्या दत्तम् । उत्कोचेन राजकीयादिभ्यो दत्तम् । उपहासेन दत्तम् । व्यत्यासेन एकः स्वद्रव्यमन्यस्मै ददाति अन्योऽपि स्वीयमन्यस्मै ददातीति दानव्यत्यासेन दत्तम् । छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य दत्तम् । बालेनाप्राप्तव्यवहारेण दत्तं मूढेन लोकवेदानभिज्ञेन दत्तम् । अस्वतन्त्रेण दासादिना दत्तम् । आर्त्तेन रोगोपहतेन दत्तम् । मत्तेन धुस्तूरादिभक्षणादिना मत्तेन दत्तम् उन्मत्तेन वातपित्तादिदोषादिना चलितधिया दत्तम् । अयं मदीयं कर्म करिष्यतीति प्रतिलाभेच्छया प्रतिलाभमकुर्वाणाय दत्तम् । अपात्रायायोग्याय योग्योऽहम् इत्युक्तिमात्रेण दत्तम् । यत्तादिं करिष्यामीत्युक्त्वा धनं गृहीत्वा दूतादिकर्म्मणि विनियुञ्जानाय दत्तं इत्येवं षोडशप्रकारमपि दत्तं पुनः प्रत्याहरणीयत्वाददत्तमुच्यत इत्यर्थः । पुनःप्रत्याहरणीयत्वमेवंविधानामाह कात्यायनः "कामक्रोधास्वतन्त्रार्त्तक्लीबोन्मत्तप्रमोहितैः । व्यत्यासपरिहाराय यद्दत्तन्तत्पुनर्हरेत् । या तु कार्यप्रसिद्ध्यर्थमुत्कोचा स्यात्प्रतिक्रिया । तस्मिन्नपि प्रसिद्धेऽर्थे न देया स्यात्कथञ्चन । अथ प्रागेव दत्ता स्यात्प्रतिदाप्यस्ततो बलात् । दण्डं चैकादशगुणमाङ्गागीयमानवाः" उत्कोचस्वरूपमाह स एव । "स्तेयसाहसिकोद्धृत्तपारदारिकशंसनात् । दर्शनाद्दृत्तनष्टस्य तथाऽसत्यप्रवर्त्तनात् । प्राग्मतैस्तु यत्किञ्चिदुत्कोचाख्यं तदुच्यते । न दाता तत्र दण्ड्यः स्यान्मध्यस्थश्चैव दोषभागिति" एतदुक्तं भवति यदि मह्यं न प्रयच्छसि तदा त्वत्कृतं स्तेयादि कथयामीति भीतिसूत्पाद्य स्तेयादिकर्त्तुः सकाशाद्धनमादत्ते । तथा त्वं यदि धनं मह्यन्न प्रयच्छसि तदा पलायमानं त्वां दर्शयामीति भीतिसुत्पाद्य पलायिनः सकाशाद्यत्किञ्चिदादत्ते तथा तव सत्यमपि स्वामिनिकटेऽसत्यं वदिष्यामीत्युक्त्वा यत्किञ्चिदादत्ते तदुत्कोचाख्यं तद्राज्ञा दाप्यं उत्कोचापादकग्राहकौ च दण्डनीयाविति पुनः प्रत्याहरणीयमिति दृहस्पतिरप्याह प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया । कार्य्ये वाधर्म्मसंयुक्ते स्वामी तत्पुनराप्नुयादिति" । आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम् । तथा च कात्यायनः "स्वस्थेनार्त्तेन वा दत्तं आवितं धर्म्मकारणात् । अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः" इति । मनुरपि सोपाधिकदानादेर्निवर्त्तनमाह "योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यस्य वाप्युपधिस्तस्य तत्सर्वं विनिवर्त्तयेदिति" । योग उपाधिः येनागामिनोपाधिविशेषेणाधिविक्रयादानप्रतिग्रहाः कृतास्तदुपाधिविगमे ते सर्वेऽपि निवर्त्तेरन्नित्यर्थः ।"

दत्तामित्र पु० सौवीरे नृपभेदे । "दत्तामित्र इति ख्यातं संग्रामे कृतनिश्चयम् । सुमित्रं नाम सौवीरमञ्जुमोदमयज्ञरैः" भा० आ० १३९ अ० । [दत्तिभिः" रघुः

दत्ति स्त्री दा-क्तिन् ददादेशः । दाने "अनुगृह्णीत्र निवाप-

दत्तिक त्रि० अल्पो दत्तः ठक् । अल्पदत्ते । दत्तान्तशब्दात् मनुष्यनाम्नः घन् इलच् ठ क वा । देवदत्त+यज्ञदत्त+स्वार्थाद्यर्थे घादौ पूर्वपदलोपे दत्तिय, दत्तिल दत्तिक दत्तक देवदत्त यज्ञदत्त सोमदत्तादौ ।

दत्तेय पुंस्त्री०दत्ताया अपत्यम् ढक् । १दत्ताया दत्तककन्याया अपत्ये २इन्द्रे पु० हेमच० दत्तेयेति वा तत्र पाठः ।

दत्तोलि पु० पुलस्त्यसुनौ विष्णुपु० ।

दत्र न० दा-त्रा० कत्रन् । १धने "इन्द्र ! यत्ते माहिनं दत्रम्" ऋ० ३।३६।६ । "दत्रं धनम्" भा० । "दत्रे विश्वा अधिथा इन्द्र ! क्षयीः" ऋ० ४।१७।६ । "दत्रे धने" भा० ।२हिरण्ये निरु० "यो दत्रवँ उषसो न प्रतीकम्" ऋ० ६ ५०।८ ।

दत्त्रिम त्रि० दानेन निर्वृत्तः दा-क्त्रि-क्लृप्तेषु च । १दाननिर्वृत्ते । "निशां गते दत्त्रिमसभ्यतोषे" भट्टिः । "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः" इत्युक्ते २दत्तकपुत्रे पु० ।

दद दाने धृतौ च भ्वा० आ० सक० सेट । ददते अददिष्ट ददे । "विटविटपगतं ददस्व तस्यै" माघः ।[तत्रार्थे ।

दद त्रि० दा-वा० श । दातरि । पक्षे आदन्तत्वात् णः दाय

ददन न० दद-भावे ल्युट् । दाने शब्दर० ।

ददि त्रि० दा-कि द्वित्वम् । दानकर्त्तरि । [विदारणशीले ।

ददत् त्रि०दीर्य्यति दृ-क्विप् ह्रस्वः द्वित्वं तुकम् । दीर्य्यति ।

ददशान त्रि० दश-शानच् । दष्टे "यस्य गुप्तासो ददशानपवे-

जेंहमानस्य" ऋ० १०।२।६। "दहशानपवेः दह्यमानायुधस्य" भा० अत्र दह्यमानेति विपरणं कालाविवक्षयेति बोध्यम्

दद्धि(ग्धि) अव्य० वाच्ञायाम् निघण्टुः। अयं धातुरित्यन्ये।

दद्रु पु० ददते कण्डूं दद्-रु। रोगभेदे। "एकण्डुरागपिड़कं दद्रुमण्डलसङ्गतम्" भावप्र०। उद्गतं उच्छूनम् कुष्ठशब्दे २१५४ पृ० द्रष्टव्यम्। स्वार्थे क। द्रद्रुक तत्रार्थे शब्दर०। [अमरः २।६।कुचेरत्नमा०।

दद्रुघ्न पु० दद्रुं हन्ति हन-टक्। १चक्रमर्द्दके (दादमर्द्दन)।

दद्रुण त्रि० दद्रू+पामा० अस्त्यर्थे नः। दद्रुरोगयुक्ते अमरः। [भेदे (दाद)।

दद्रू स्त्री दरिद्रात्यनयाङ्गम् दरिद्रा-ऊ नि०। त्वग्रोग-

दध दाने धारणे च आ० भ्वा० सक० सेट्। दधते अदधिष्ट।

दधन्वत् त्रि० दधि-मतुप् वेदे नि० दधन्नादेशे मस्य वः। दधिविशिष्टे। "अच्छिद्रस्य दधन्वतः सुपर्णस्य दधन्वतः" ऋ० ६।४८।१८। "दधन्वतः दधिमतः" भा०।

दधि त्रि० धा-कि द्वित्वम्। १धारणकर्त्तरि किप्रत्ययान्तत्वे,न तद्योगे न कर्म्मणि षष्ठी "दृष्ट्वा दधिं सारूकमेतदर्चकान्" सुश्रु०। दध-इन्। २दुग्धविकृतिभेदे, (दइ) ३वस्त्रे च न० हेमच०। दधिगुणभेदादिकं भावप्र० उक्तं यथा

"दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु। पाकेऽम्लं श्वासपित्तास्रशोथमेदःकफप्रदम्। मूत्रकृच्छ्रे प्रतिश्याये पीनसे विषमज्वरे। अतीसारेऽरुचौ कार्य्ये शस्यते बलशुक्रकृत्। अथ दधिभेदाः। "आदौ मन्दं ततः स्वादु स्वादम्लञ्च ततः परम्। अत्यम्लमतिमम्लं पञ्चमं दधि पञ्चधा। अथ मन्दादीनां लक्षणानि गुणाश्च। मन्दं दुग्धं यदव्यक्तरसं किञ्चिद्घनं भवेत्। मन्दं स्वात् कृष्टविण्मूत्रं दोषत्रयविदाहकृत्। यत्स्वल्पं घनतां यातं व्यक्तं स्वादुरसं भवेत्। अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम्। स्वादु स्वादत्वभिष्यन्दि दृष्टं मेदःकफापहम्। वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम्। स्वादम्लमत्यन्तं मधुरं कषायानुरसं भवेत्। स्वादम्लस्य गुणा ज्ञेया सामान्यदधिवत्तनैः। अत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम्। अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम्। तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत्। अत्यम्लं दीपनं रक्तवातपित्तकरं परम्"। गोदधिगुणाः "गव्यं दधि विशेषेण स्वादम्लञ्च रुचिप्रदम्। पवित्रं दीपनं हृद्यं शैत्यकृत् पवनापहम्। उष्णं दन्तानलेभ्यश्च मध्ये गव्यं गुणाधिकम्। माहिषदधिगुणाः। माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्। स्वादुपाकमभिष्यन्दि हृद्यं गुर्वम्लदूषकम्"। छागीदधिगुणाः "आजं दध्युत्तमं स्वादि लघु दीपनवायपहम्। शस्यते श्वासकासार्शःक्षयकार्य्येषु दीपनम्"। पक्वदुग्धदधिगुणाः। पक्वदुग्धभवं रुच्यं दधि स्निग्धं गुणोत्तमम्। पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम्। निःसरदुग्धदधिगुणाः। असारं दधि संग्राहि शीतलं वातलं लघु। पिष्टस्थि दीपनं रुच्यं ग्रहणीरोगनाशनम्। गालितदधिगुणाः "गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु। बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत्। शर्करादिसहितदधिगुणाः। सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित्। सगुडं वातलं हृद्यं हृंहणं तर्पणं गुरु।" अथ रात्रौ दधिभोजननिषेधः। न नक्तं दधि भुञ्जीत नचाप्यघृतशर्करम्। नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना। अयमर्थः। रात्रौ दधि न भुञ्जीत भुञ्जीत चेत्तदा अघृतशर्करमसुद्गसूपं क्षौद्रमुष्णं विनामलकैश्च दधि न भुञ्जीत। तेन घृतशर्करादियुक्तं दधि रात्रावपि भुञ्जीतेत्यर्थः। तथा च। शस्यते दधि नो रात्रौ शस्तमम्बुघृतान्वितम्। रक्तपित्तकफोत्थेषु विकारेषु तु नैव तत्। तदम्बुघृतान्वितमपि। अथर्तुविशेषेण विधिनिषेधौ। हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते। शरदुष्णेष्ववस्थासु प्रायशस्तद्विगर्हितम्। कथाविधिना दधिसेवने दोषमाह ज्वरास्रकपित्तवीसर्पकुष्ठपाण्डुभयभ्रमान्। प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रियः। अथ सरस्य मस्तुनश्च लक्षणं गुणाश्च। दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः। स लोके सर इत्युक्तो दध्नोमण्डस्तु मस्त्विति। सरः स्वादुर्गुरुर्हृद्यो वातवह्निप्रवर्द्धनः। सान्द्रोवस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः। मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत्। स्रोतोविशोधनं स्वादु कफवह्न्यानिलापहम्। अहृद्यं प्रोषणं शीघ्रं भिनत्ति मलसञ्चयम्।

"दधि सुप्तेषु भोक्तव्यम् सर्वत्र दधिवर्ज्जयम्" मनुः। "विना लवणतोयाभ्यां न दधि भासेन जीर्य्यतिः" "कफपित्तकरं दधि" इति वैद्य०।

दधिशब्दस्य दुग्धविकारूपार्थत्वे स्त्रीत्वेन तदर्थे उक्तपुंस्त्वाभावात् टादावपि न पुंवद्भावः। धारणकर्त्ते-

रूपार्थपरत्वे तु प्रवृत्तिनिमित्तसाम्यात् उक्तपुंस्कत्वात् क्लीबत्वेऽपि वा पुंवद्रूपं दधये दधिने कुलाय इत्यादि। अस्य उरःप्रभृतिषु पाठात् बहुव्रीहौ नित्यं कप् बहुदधिको यज्ञ इत्यादि।

दधिकूर्चिका स्त्री "दध्ना सह पयः पक्वं यत् स्यात् सा दधिकूर्चिका" इत्युक्तलक्षणायामामिक्षायाम्।

दधिक्रा पु० दधिः दधदन्यं धारयन् सन् क्रामति क्रम-विट् अनसात्। १अश्वरूपे अग्न्यात्मके देवभेदे "दधिक्राम्ण उकवुर्विश्वकृष्टिम्" ऋ० ४।३८।२। उक्ता व्युत्पत्तिर्भाष्ये दर्शिता। "आ दधिक्राः अवसा पञ्च कृष्टीः" १०।२।२अश्वे निघ०। तस्यामनिरुक्तिः २।२७। तत्र दर्शिता यथा "तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा। तस्याश्ववद् देवतायाश्च निगमा भवन्ति"। अतो देवार्थतापीति गम्यते स चाग्निरूपः दधिक्रावन् शब्दे माधववाक्ये द्रष्टव्यम्।

दधिक्रावन् पु० दधिः दधत् क्रामति क्रम-वनिप् अनसात्। अश्वरूपे अग्न्यात्मके देवभेदे। "दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत् प्राण आयूंषि तारिषत्" तारा० ब्रा० १।६।१७। "दधिः दधदारयन् क्रामतीति दधिक्रावा क्रमेर्वनिपि विङ्नोरनुनासिकस्यादिति" मकरान्तोऽकारः, तस्य दधिक्राव्णः एतत् संज्ञकस्याश्वरूपस्य देवस्य" भा० अत्र द्राह्यायणः, "आग्नीध्रीयं गत्वा दधिमन्थं भक्षयेयुरसमुपहूय दधिक्राव्ण इति। अत्र यद्यप्यग्निनु मन्त्रे दधिक्राव्ण इति अश्वरूपोऽग्निविशेष एव देवतात्वेनाभिधीयते, तथापि दधिशब्दयोगात् सामान्येन दधिभक्षणे विनियोग इति द्रष्टव्यम्" भा०। एतदनुसारेण पञ्चगव्यादिशोधनेऽपि दधिशोधनेऽयं मन्त्रो विनियुक्तः इति बोध्यम्।

दधिघर्म पु० दधिसंस्कारके वैदिके कर्मभेदे। "दधिघर्मेण चरन्ति प्रवर्ग्यवांश्चेत्" आश्व० श्रौ० ५।१३।१। दधिघर्मो नाम कर्मविशेषः" नारा०। स च कात्या० श्रौ० उक्तो यथा १०।६।२०। "सप्रवर्ग्ये 'दधिघर्मः' सू० दध्याहरेति प्रेषितो दधिघर्मार्थं दध्याहरति तत्र यागार्थत्वात् सोमाग्निघर्मेण वत्सापाकरणादिना संस्कार्यं तत्र दध्नो द्रव्यसाध्यत्वात् पूर्वस्मिन्नहनि प्रातःसवनिक दध्यर्थदोहानन्तरं दधिघर्मः दध्यर्थमपि रात्रौ दोह आतञ्चनान्तः कर्त्तव्यः। तत्सम्बन्धिनो वत्सापाकरणादयोऽप्यनेनैव क्रमेण कर्त्तव्याः प्रवर्ग्यवत्येवायं दधिघर्मः" कर्कः। तत्करणप्रकारमपि तदुत्तरसूत्रैराह यथा "उपविश्य सदसः पुरस्तात् सपवित्रायामग्निहोत्रहवण्यां ग्रहणं यथोक्तम्" २१ सू०। तत् प्रतिप्रस्थात्राहृतदधि उत्तरवेदेः पश्चादासाद्याभ्य ततः सदसः पश्चादुपविश्य सपवित्रायामग्निहोत्रहवण्यां शाखापवित्रेणाग्निहोत्रहवण्याम यथोक्तं यथा प्रवर्ग्याध्यायोक्तं तथा ग्रहणं करोति अथो यावतीति मन्त्रान्तं स्थालीमुखेनैवाग्निहोत्रहवण्यां निनयनं कर्त्तव्यम्। आनयनञ्च निनयनमेव" कर्कः विस्तरः तदुत्तरसूत्रेषु दर्शितः। तादृशकर्मसमुदायश्च दधिघर्मशब्दार्थः।

दधिचार पु० दधि चारयति चालयति चर-णिच्-अण् उप० स०। मन्थानदण्डे हारा०। [२दधिजातमात्रे त्रि।

दधिज न० दध्नो जायते जन-ड। १नवनीते राजनि०

दधित्थ पु० दधीव तद्वर्णवत् द्रवे तिष्ठति स्था-क पृषो०। कपित्थे अमरः तद्द्रवस्य दधिवर्णत्वात् तथात्वम्। "दधित्थरसयुक्तां पिप्पलीं माक्षिकान्विताम्" सुश्रु०।

दधित्थाख्य पु० दधिमाख्याति आ+ख्या-क। सरलद्रवे (लोबान) रत्नमाला।

दधिधेनु स्त्री दानार्थं कल्पितदधिकुम्भनिर्मिते धेनुभेदे तद्विधानं हेमा० दा० स्कन्दपु० उक्तो यथा

"दधिधेनोर्महाराज! विधानं शृणु साम्प्रतम्। अनुलिप्ते महीभागे गोमयेन नराधिप!। गोचर्मप्रमाणन्तु पुनः पुष्पप्रकरसंयुतम्। कुशैरास्तीर्य्य वसुधां कृष्णाजिनकृतास्तराम्। दधिकुम्भञ्च संस्थाप्य सप्रधान्यस्य चोपरि। चतुर्थांशेन वत्सन्तु सौवर्णमुखसंयुतम्। प्रशस्तपत्रश्रवणां मुक्ताफलमयक्षणाम्। चन्दनागुरुशृङ्गीं च सर्वं वै गन्धमालिकम्। जिह्वा शर्करया राजन्! ब्राह्मं श्रोत्रखण्डकं तथा। फलमूलमया दन्ताः सितसूत्रस्य कम्बलाः। ताम्रपृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा। स्वर्णशृङ्गीं रौप्यखुरीं नवनीतमयस्तनीम्। इक्षुपादां सुवस्त्रैस्तु सर्वाभरणभूषिताम्। आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम्। ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते। क्षमाधियमयुक्ताय तादृशाय प्रदापयेत्। पुच्छेशोपविष्टाय सुद्विकाकर्षमात्रकैः। पादुकोपानहौ 'कृत्वं दत्त्वा मन्त्रमनुस्मरेत्। दधिक्राव्णेतिमन्त्रेण दधिधेनुं प्रदापयेत्। एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम!। एकाहारो दिनं तिष्ठेद्दध्ना च नृपनन्दन!। यजमानो वसेद्राजन्! त्रिदिवं च

द्विजोत्तमः ! दीयमानां प्रपश्यन्ति तेऽपि यान्ति परां गतिम् । दश पूर्वान् दश परानात्मानञ्चैकविंशकम् । विष्णुलोकमवाप्नोति यावदाहूतसंप्लवम् । दाता च दापकाश्चैव तेऽपि यान्ति परां गतिम् । यत्र मधुवहा नद्यो यत्र पायसकर्द्दमाः । ऋषयो सुनयं सिद्धास्तत्र गच्छन्ति धेनुदाः । य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः । सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति" । इतधेनुविधिवत् सर्वमत्र कर्म्म ।

दधिपयस् न० द्वि०ष० । दधि च पयश्च । "जातिरप्राणिनाम्" पा० अप्राणिजातित्वात् समाहारद्वन्द्वे प्राप्ते "न दधिपय आदीनि" पा० तन्निषेधः दधिपयसी ।

दधिपयआदि न० समाहारद्वन्द्वनिषेधनिमित्ते शब्दद्वयगणभेदे । स च गणः पा०ग०सूत्रे उक्तो यथा "दधिपयसी सर्पिर्मधुनी मधुसार्पषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राट्कौशिकौ प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्मार्वहिषी दीक्षातपसी श्रद्धातपसी मेधातपसी अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे स्वक्रमामे वाङ्मनसे" ।

दधिपुष्पिका स्त्री दधीव शुभ्रं पुष्पमस्याः कप् अत इत्त्वम् । श्वेतापराजितायाम् राजनि० ।

दधिपुष्पी स्त्री दधीव शुभ्रं पुष्पमस्याः जातित्वात् ङीष् । कोलशिम्ब्यां राजनि० ।

दधिपूप पु० दधिपक्वः पूपः । अपूपभेदे । "शालिपिष्टं युतं दध्ना मर्दयित्वा घृते पचेत् । वेष्टयेत् पक्वखण्डेन सुवृत्तं दधिपूपकम्" । दधिपूपो गुरुर्वृष्यो वृंहणोऽनिलपित्तहा । हृद्योऽग्निजननश्चैव विशेषाद् रुचिकारकः" पाकशास्त्रम् ।

दधिफल पु० दधीव द्रवः फलेऽस्य । कपित्थे अमरः तद्द्रवस्य दधितुल्यास्वरत्वात् तथात्वम् । [रत्नमाला ।

दधिमण्ड पु० ६त० । दध्नः मस्तुनि (मात) ख्याते पदार्थे ।

दधिमण्डोद(क) पु० दधिमण्ड इवोदकमस्य उदकस्य वा उदादेशः । दधिमण्डतुल्यजले समुद्रभेदे । "दधिमण्डोद एवात्र विज्ञेयो वारिजासनः" हेमा० ब्र० तद्ध्यानम् । "उत्तरेषु च कौरव्य ! द्वीपेषु श्रूयते कथा । एवं तत्र महाराज ! ब्रुवतश्च निबोध मे । घृततोयः समुद्रोऽत्र दधिमण्डोदकः परः । सुरोदः सागरश्चैव तथान्यो जलसागरः" भा० भी० १२ अ० ।

दधिमुख पु० १रामसेनापतिवानरभेदे "श्रीमान् दधिमुखो नाम हरिवृद्धोऽतिवीर्य्यवान्" भा०व०२५२अ० । २नागभेदे "सुराहस्तो दधिमुखस्तथा विमलपिण्डकः" भा०आ०३५ अ० सर्पनामोक्तौ दधिवक्त्रादयोऽप्यत्र ।

दधिवत् त्रि० दधि अस्त्यत्र मतुप् वेदे मस्य वः । दधियुक्ते "अपूपवान् दधिवान्करेम सीदतु" ऋग० १८। ४।१७। लोके तु न मस्य वः दधिमत् इत्येव स्त्रियां ङीप् ।

दधिवामन न० १शालग्रामसूर्त्तिषु वामनमूर्त्तिभेदे ब्रह्मवै० प्रकृतिख० तल्लक्षणमुक्तं यथा । "अतिक्षुद्रं द्विचक्रञ्च । नवीननीरदोपमम् । दधिवामनकं ज्ञेयं सर्व्वसिद्धिप्रदम् । दध्योदने होतव्यः वामनः । २दध्योदनेन हवनीये वामनभेदे पु० "दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतः । कृत्वा त्रैविक्रमं रूपं जपेन्मन्त्रमनन्यधीः" तन्त्रसारे दधिवामनप्रयोगः ।

दधिवारि न०६त० । दधिमस्तुपदार्थे (दधिर मात) हेमच० ।

दधिवाहन पु० अङ्गनामकनृपपुत्रे "अङ्गपुत्रो महानासीत् राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत्" हरिवं० ३१ अ० । दधिवामनपुत्रस्तु पुत्रो दिविरथस्तु" भा० आ० ४९ अ० ।

दधिशोण पु० वानरे त्रिका० ।

दधिषाय्य पु०दधि स्यति सो-ण्यत् षत्वम् । १इते उज्ज्वल० । "दधिषाय्यः" उणा० सू० सि० कौ० इत्तौ "दधातेराय्यः द्वित्वमित्त्वं सुक्च इत्युक्त्वा "पितावसो दधिषाय्य" इत्युदाजहार" ।

दधिसक्तु पु० ब० व० । "दध्युपसिक्ताः सक्तवः "अन्नेन व्यञ्जनम्" पा०समासः । दध्युपसिक्तेषु सक्तुषु । कन्दुपक्वानि तैलेन पायसं दधिसक्तवः" ति० त०कूर्म्मपु० ।

दधिसार पु० ६त० । नवनीते हेमच० ।

दधिस्कन्द पु० तीर्थभेदे ।

दधिस्नेह पु० ६त० । दधिसारे त्रिका० ।

दधिस्य(ध्यस्य) अतिगाढ्रेन दधीच्छति क्यचि अस्य सुक् वा । अतिगाढ्रेन दधीच्छायाया प० अक० सेट् । दधिस्यति दध्यस्यति ।

दधिस्वेद पु० दध्नः स्वेद इव । तक्रे (घोल) लटाधरः ।

दधी(च)चि पु० अथर्वमुनेरौरसे कर्द्दमप्रजापतिकन्यायां शान्तिनाम्न्यां जाते मुनिभेदे । इन्द्रयाचितेन तेन च प्राणांस्त्यक्त्वा स्वदेहास्थीनि दत्तानि इन्द्रेण च तैर्वज्रं निर्माय दत्तासुरो निहतः तत्कथा

"अनेनास्थिभिर्दधीचस्य न हन्तु त्विदमद्विषः । तथा-

इत्वा ऋषिश्रेष्ठो याच्यतां सुरसत्तमाः" । दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपून् । स च तैर्याचितोऽस्थीनि यत्राहविपरस्तदा । प्राणत्यागं कुरुश्रेष्ठ ! चकारैवाविचारयन् । सलोकानक्षयान् प्राप्तो देवप्रियकरस्तदा । तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा । कारयामास दिव्यानि नानाप्रहरणानि च । वज्राणि चक्राणि गदा गुरून् दण्डांश्च पुष्कलान्" भा० शल्य० ५२ अ० । "गते शतधृतौ चक्रः ! कर्दमस्तेन चोदितः । यथोचितं सुदुहितुः प्रादात् विश्वसृजां ततः" इत्युपक्रमे "अथर्वणेऽददाच्छान्तिं यया यज्ञो वितन्यते" भाग० ३।२४।२४ अ० । "दध्यङ्ङाथर्वणस्तद्वे यस्मादेतां मदात्मकम्" भाग० ६।९।५१ । तस्याथर्वणकर्दमदुहितृशान्तिजातत्वादाथर्वणत्वविशेषणम् । "ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा" अग्निपु० दध्यनृच्शब्दे व्युत्पत्तिर्दर्शिता ।

दधीचास्थि न० ६तत्० । तज्जातत्वात् १वज्रे २तन्नामनामके हीरके च त्रिका० ।

दधृष् त्रि० धृष–क्विन् नि० । १धृष्टे किञ्चनत्वात् झलि पदान्ते च कुत्वम् । २धर्षके च । "वाजेषु दधृषं कवे" ऋ० ३।४२।६। "दधृषम् यत्नं शामभिभावकम्" भा० ।

दधृष्वणि त्रि० दधृगिवाचरति दधृष्+क्विप् ततो बा० वनि । धर्षके । "वासश्छिनद्धृष्टं चिदु दधृष्वणिम्" ऋ० ८।६१।२ । [लाय परमेष्ठिने" यमतर्पणमन्त्रः ।

दध्न पु० दध–बा० न । वमभेदे । "औदुम्बराय दध्नाय नी-

दध्यन्च् पु० दधि धारकमञ्चति अनृच–क्विप् । अथर्वर्षिपुत्रे दधीचौ मुनिभेदे "दध्यङ्ङाथर्वणस्तद्वे" भाग० ६।९।५१ "स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्" भाग० ६।९।५५। "यामथर्वा मनुश्चिता दध्यङ्ङ्धियमत्नत इत्यृचमधिकृत्य निरुक्ते त्र १२।२२ अन्या निरुक्तिरुक्ता "दध्यङ्मन्त्रो ध्यानमिति वा मन्त्रक्रमश्चिन् ध्यानमिति वा" । "दध्यङ् ह वा अथर्वणो वामदेव्यं प्रवदोत्तवाच" छा० १।११।६।१२ । आथर्वणः अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरस्य शीर्षां युद्धतृषामश्वेन प्रतिहितेन शिरसा वा युवाभ्यामीमिमां मधुविद्यां यद् यदा वक्तु प्रोवाच प्रोक्तवान् । तदानीमश्वस्य शिरसः यत्स्थानलक्षणं पुनर्मानुषस्य शिरसः प्रतिमस्थानलक्षणं च यद्भवदीयं कर्म तदाविष्कृत्योभौ वर्णः । अतेयमाख्यायिका "इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य तदीमाननन्यै वक्ष्यति शिरसे छेदयाम्यहं त्वयाच । ततोऽश्विभावश्वस्य शिरश्छित्वा दधीचः शिरःप्रच्छिद्यान्यत्र निधाय तत्रास्य शिरः प्रत्यधत्तां तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविद्याश्च मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति । शाङ्खायनवाजसनेययोः प्रपञ्चेनोक्तम् । तस्य टादायजादौ दधीचः दधीचा इत्यादि । ततः स्वार्थे अण् इञ् वा पृषोदरत्वात्प्रभावे । दधीच दधीचि इति रूपमित्यवधेयम् ।

दध्यन्न न० दध्युपसिक्तमन्नम् "अन्नेन व्यञ्जनम" प्रा० समासः । दध्युपसिक्ते अन्ने "दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्" याज्ञ० दध्योदनोऽप्यत्र पु० । दध्योदनं हविश्चूर्णम्" याज्ञ० यज्ञवल्क्यौ ।

दध्याकर पु० ६तत० । दधिसमुद्रे शब्दार्थकल्पतरुः ।

दध्यानी स्त्री दधि–दधिरसमानयति आ–नी–क गौरा० ङीष् । (सुदर्शनगुडूच्च) सुदर्शनायाम् रत्नमाला ।

दध्युत्तर न० ६तत० । दधिसिद्धे शब्दच० । "पयसः सर्पिषश्चैव दध्नोदध्युत्तरस्य च" हरिवं० ७९३ अ० ।

दध्युत्तरग न० दध्न उत्तरं गच्छति गम–ड । दधिसिद्धे रत्नमाला । [जटाधरः ।

दध्युद(क) पु० दधि उदकमिवास्य वा उदादेशः । दधिसमुद्रे

दनायुस् पु० दनुकन्याभेदे सा च कश्यपपत्नीभेदः दनुशब्दे दृश्यम् । "दनुश्च दनायुश्च मातेव च पितेव च परिजग्दहतस्तस्माद्दानव इत्याहुः" शत० ब्रा० १।६।१।९ "दनायुषः पुत्राश्चत्वारोऽसुरपुङ्गवाः । विक्षरो बलवीरौ च वृत्रश्चैव महासुरः" भा० आ० ६५ अ० ।

दनु स्त्री दनुकन्याभेदे सा च कश्यपर्षिपत्नी दानवमाता । "प्रजज्ञिरे मुख्यभामा दनुकन्यास्तयोदश । अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः । कद्रूश्च मनुजव्याघ्र ! दनुकन्यैव भारत । एतासां वीर्यसम्पन्नं पुत्रपौत्रमनन्तकम् । "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत । तेषां प्रथमजो राजा विप्रचित्तिर्महाबलः । सतदो मतुश्चिश्चैव पुलोमा चेति विश्रुतः । असिलोमा च केशी च दुर्जयश्चैव दानवः । अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान् । तथा सुमनमूर्धा च देववान् केतुमांस्तथा । स्वर्भानुरश्वसिद्धश्च पृथिव्यां जज्ञिरे तथा । अश्वपोषश्च शङ्खश्च शुक्र-

गस्य महाबलः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचन्द्रश्च निकुम्भश्च कुजटः कपटस्तथा। शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा। एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः। अन्यौ तु खलु देवानां सूर्य्याचन्द्रमसौ स्मृतौ। अन्यौ दानवसङ्घानां सूर्य्याचन्द्रमसौ तथा। इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः। दनुपुत्रा महाराज! दश दानववंशजाः। एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि। वातापिः शक्रतपनः शठश्चैव महासुरः। गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः। असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत!" भा॰ आ॰ ६५ अ॰। दनोरपत्यम् अण्। दानव दनोरपत्ये पुंस्त्री स्त्रियां ङीप्।

दनायु पु॰ दानवभेदे दानवशब्दे दृश्यम्। अयं शब्दः दनायुम् शब्दात् प्राक् पाठ्यः।

दनुज पु॰ दनोर्जायते जन--ड। दनोरपत्ये असुरे अमरः।

दनुजद्विष् पु॰ दनुजान् द्वेष्टि द्विष--क्विप्। देवे हेम॰। दनुजारिप्रभृतयोऽप्यत्र।

दनुसूनु पु॰ ६त॰। दानवे जटाधरः।

दन्त पु॰ अन्तर्भावितण्यर्थे दम--तन्। १सुखान्नःस्वचर्वणसाधनेऽस्थिभेदे (दाँत) २कुञ्जे, ३पर्वतनितम्बे ४सानुनि, ५द्वात्रिंशत्संख्यायाञ्च मेदि॰। अत एव नैषध॰ दन्तानां द्विगुणितषोडशपदार्थरूपत्वेन भङ्ग्या द्वात्रिंशत्त्वं वर्णितं यथा। "उद्देशपर्वणापि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः। आन्विक्षिकीं यद्दशनद्विमार्क्षीं तां मुक्तिकामाकलितां प्रतीमः"। ६शैलशृङ्गे त्रिका॰ (।१।१) रूपे ७पञ्चमात्राप्रभेदे छन्दोग्र॰ सदन्ततया जन्मनि जन्मोत्तरं मासभेदे च तज्जन्मफलं ज्यो॰त॰ उक्तं यथा "जातः सदन्तः पितृमातृहन्ता तातं विहन्यात् प्रथमे तु मासे। अम्बां द्वितीये सहजं तृतीये मासे चतुर्थे शुभकारकः स्यात्। मिष्टान्नभोजी सुभगः सुताख्ये ५ षष्ठे सुखी पण्डितकल्पबुद्धिः। ततोऽधिकः स्यात् बलवान् द्युनाख्ये ७ मासेऽष्टमे वित्तसुखैर्विहीनः। सुरप्रतापी नवमे मृत्युश्च दशमे तथा। एकादशे द्वादशे च सुखी च सुभगो भवेत्। यष्टौ पुत्तलकान् कृत्वा सुगन्धैर्गन्धकैस्तथा। स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः। स्नानं संक्रमणस्याधः शम्भोर्द्वैर्शनमन्ततः। होमं विप्रार्च्चनञ्चैवमशमे दन्तदर्शने"। "स्निग्धा समाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः" बृ॰स॰ ६७ अ॰। दन्तमूलप्रादुर्भावश्च गर्भोपनिषदि गर्भे सप्तममासे जायते इति प्रतिपादितम्।

दन्तक त्रि॰ दन्ते दन्तमार्ज्जने प्रसितः कन्। १दन्तमार्जनप्रसिते। दन्त इव कन्। २शैलशृङ्गे गिरेः प्रदेशाद्बहिर्निर्गते ३पाषाणभेदे च हेमच॰। स्वार्थे क। ४दन्तशब्दार्थे पु॰।

दन्तकर्षण पु॰ दन्तान् कर्षति कृष--ल्यु। जम्बीरे शब्दर॰।

दन्तकाष्ठ न॰ दन्तधावनार्थं काष्ठम्। १दन्तधावने काष्ठे। तत्काष्ठमस्त्यत्र साध्यतया अच्। २विकङ्कतवृक्षे पु॰ राजनि॰। सफलतत्काष्ठभेदाः बृ॰ स॰ ८५ अ॰ उक्ता यथा

"वल्लीलतागुल्मतरुप्रभेदैः स्युर्दन्तकाष्ठानि सहस्रशो यैः। फलानि वाच्यान्यतितत्प्रसङ्गो मा भूदतो वक्ष्यथ कानिकानि। अज्ञातपूर्वाणि न दन्तकाष्ठान्यद्यात्र पत्रैव समन्वितानि। न युग्मपर्वाणि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा वा। वैकङ्कतश्रीफलकाश्मरीषु ब्राह्मी द्युतिः क्षेमतरौ सुदाराः। वृद्धिर्वटेऽर्के प्रचुरं च तेजः पुत्रा मधूके ककुभे प्रियत्वम्। लक्ष्मीः शिरीषे च तथा करञ्जे म्लेच्छेऽर्थसिद्धिः क्षमभीप्सिता स्यात्। मान्यत्वमायाति जनस्य जात्यां प्राधान्यमश्वत्थतरौ वदन्ति। आरोग्यमायुर्बदरीवृक्षयोरैश्वर्यवृद्धिः खदिरे सविल्वे। द्रव्याणि चेष्टान्यतिसुक्तके स्युः प्राप्नोति तान्येव पुनः कदम्बे। निम्बेऽर्थाग्निः करवीरेऽम्लवल्लिर्भार्गीरे स्यादिदमेव प्रभूतम्। यस्यां यत्नूनपहन्त्यर्जुने च श्यामायां च हिमतामेव नाशः। शालेऽश्वकर्णे च वदन्ति गौरवं सभद्रदारावपि चाटरूपके। वाञ्छभ्यमायाति जनस्य सर्वतः प्रियङ्गुपामार्गसजम्बुदाडिमैः। उदङ्मुखः प्राङ्मुख एव वाग्यतः कामं यथेष्टं हृदये निवेश्य। अद्यादनिन्द्यं च सुखोपविष्टः प्रक्षाल्य जह्याच्च शुचिप्रदेशे। अभिमुखपतितं प्रशस्तदिक्स्थं शुभमतिशोभनमूर्ध्वसंस्थितं यत्। अशुभकरमतोऽन्यथा प्रदिष्टं स्थितपतितं च करोति कष्टमस्मम्"।

स्का॰ त॰ नरसिंहपुराणे च "दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम्। सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः"। महाभारते। "तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम्। क्षीरिणो वृक्षगुल्माद्यान् भक्षयेद्दन्तधावने"। निषिद्धकाष्ठानि यथा "सुयाकतालहिन्तालास्तथा ताडी च केतकी। खर्जूरनारिकेलौ च सप्तैते वृक्षराजकाः। वृक्षराजसिरा पत्रैः कुर्याद्दन्तधावनम्। तावद्भवति चाण्डालो यावत्

इङ्गं न पश्यति । तस्य स्थौल्यं परिमाणञ्चाह विष्णुः "कनिष्ठाग्रसमं स्थौल्यं सकूर्चं द्वादशाङ्गुलम् । प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम्" मरीचिः द्वादशाङ्गुलञ्च वैश्यानां शूद्राणान्तु षड्ङ्गुलम् । चतुरङ्गुलमानेन नारीणां विधिरुच्यते । अन्तरप्रभवानाञ्च षड्ङ्गुलसदाकृतम्" । दन्तधावनदन्तपवनशब्दे ऽधिकं द्रष्टव्यम् । [राजनि०

दन्तकाष्ठक न० दन्तधावनोपयोगि काष्ठमात्रम् । आङ्गुल्यद्वये

दन्तकूर पु० दन्ताः कूरमचमिव चर्व्यत्वात् यत्र । संग्रामे नीलकण्ठः "माद्रीपुत्रः सहदेवः कलिङ्गान् समागतानजयद्दन्तकूरे" भा० उ० २२अ० । "अयं कपाटेन जघान पाण्ड्यं तथा कलिङ्गान् दन्तकूरे ममर्द" ४७ अ० ।

दन्तक्रूर पु० दन्ताः क्रूरा यत्र ।१देशभेदे २तद्रूपे च नीलक० । "ब्रह्मद्विषाञ्चाथ तस्मिन् सहस्राणि चतुर्दश । पुनरन्यानि जघ्राह दन्तक्रूरं जघान ह" भा० द्रो० ७० अ० ।

दन्तघर्ष पु० ६त० । दन्तानां परस्परघर्षभेदे । "यस्य वै भुक्तमात्रस्य हृदयं बाधते क्षुधा । जायते दन्तघर्षश्च स यतायुः स्मृतो बुधैः" मार्क० पु० ।

दन्तचाल पु० दन्तानां चालचलनमत्र । सुश्रुतोक्ते आतुरोपद्रवभेदे (दाँतनड़ा) । आतुरोपद्रवोपक्रमे "नेत्रस्तम्भं निमेषञ्च तृष्णां कासं प्रजागरम् । लभन्ते दन्तचालञ्च तांस्तानन्यानुपद्रवान्" ।

दन्तच्छद पु० दन्ताश्छाद्यन्तेऽनेन छद-णिच्-घ ह्रस्वः । ओष्ठे (ठोँट) दन्तायुधः । "निंस्ते दन्तच्छदं न वा" भट्टिः । "दन्तच्छदैः व्रणदन्तचिह्नैः" ऋतुसंहारः ।

दन्तच्छदोपमा स्त्री दन्तच्छद ओष्ठ उपमीयतेऽनया अङ् । बिम्बीलतायाम् (तेलाकुचा) राजनि० । तत्फलेन हि ओष्ठसादृश्यं प्रसिद्धम् ।

दन्तजात त्रि० जातो दन्तोऽस्य निष्ठान्तत्वात् परनिपातः । १जातदन्ते । "दन्तजातेऽनुजाते वा कृतचूडे च संस्थिते" मनुः । दन्तजननं तज्जननयोग्यकालश्चोभयमपि दन्तजातशब्देनोच्यते । गर्भोपनिषदि सप्तममासे दन्तजननकालस्योक्तत्वात् तत्र दैवात् दन्तानुत्पत्तावपि जातदन्तकालत्वात् दन्तजनन इवाशौचनिमित्तिता" शुद्धित० ।

दन्तजाह न० दन्तानां मूलं कर्णा० जाह । दन्तमूले ।

दन्तदर्शन न० दन्तानां दर्शनम् दृश-णिच्-ल्युट् । युद्धस्यादौ योधानां प्रतियोधं प्रति स्वदन्तान् बहिष्कृत्य दर्शने (दाँतखाटि) "दन्तदर्शनमारावस्ततो युद्धं प्रवर्त्तते" भा० व० ७० ७१ अ० ।

दन्तधावन पु० दन्तान् धावयति शोधयति धाव-ल्यु । १खदिरवृक्षे २गुञ्जाकरञ्जे, राजनि० ३बकुले शब्दच० । एतेषां तत्साधनत्वात् तथात्वम् भावे ल्युट् । ४दन्तमार्जने तत्प्रकारो यथा "प्रातर्भङ्क्त्वा च स्नेहयं कषायं कटुतिक्तकम् । भक्षयेद्दन्तधावनं दन्तमांसान्यबाधयन् । तस्य काष्ठानि यथा "कैऽप्यत्र करवीराम्रकरञ्जबकुलासनान् । दन्तकाष्ठार्थमन्ये तु सर्वान् कण्टकिनोऽभ्यधुः । खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा । तिन्तिड़ी वेणुपृष्ठश्च आम्रनिम्बौ तथैव च । अपामार्गश्च बिल्वश्च अर्कश्चोडुम्बरस्तथा । एते प्रशस्ताः कथिता दन्तधावनकर्मणि" । तत्र निषिद्धकाष्ठानि यथा "गुवाकतालहिन्तालखर्जूरैः केतकीयुतैः । नारिकेलेन ताड्या च न कुर्याद्दन्तधावनम्" । तस्य दिग्भेदसुखभेदे शुभाशुभफलं यथा "मृत्युः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः । पूर्वास्येनोत्तरास्येन सम्पदो दन्तधावनात्" । तस्य तिथिविशेषे निषेधो यथा "प्रतिपद्दर्शषष्ठीषु नवम्यां द्वादशीषु च । दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्" । दन्तघर्षणानन्तरं चक्षुःसेचनं यथा । दन्तानूर्द्ध्वमधो घृष्ट्वा प्रातः सिञ्चेच्च लोचने । तोयपूर्णमुखस्तेन दृष्टिराशु प्रसीदति" । रोगविशेषे दन्तकाष्ठवर्जनं यथा "अर्दितः कर्णशूली च दन्तरोगी नवज्वरी । शोषी कासी च मूर्च्छार्त्तौ दन्तकाष्ठं विवर्जयेत्" । तस्य गुणा यथा "निहन्ति वक्त्रवैरस्यं जिह्वादन्तास्रितं मलम् । आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम्" इति राजवल्लभः । "कृतशौचस्ततः प्राज्ञः कुर्याद्दन्तस्य धावनम् । जिह्वाया मार्जनञ्चापि रसालच्छदनादिभिः । दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा । न दन्तधावनं कुर्यात् कुर्याच्चेद्वारकी भवेत् । मध्यमानामिकाभ्याञ्च दृढाङ्गुष्ठेन च द्विजः । दन्तस्य धावनं कुर्यात् तर्जन्या न कदाचन । अश्वत्थवटबिल्वानां धात्रीणां काष्ठिकया बुधः । न दन्तधावनं कुर्यात्तत्रेन्द्रसुरसस्य च । नित्यक्रियाफलं प्रेप्सुस्त्वरया दन्तधावनम् । प्रभाते कुरुते प्राज्ञः सूर्योदयविवर्जिते । सूर्योदये द्विजश्रेष्ठ ! यः कुर्याद्दन्तधावनम् । नित्यक्रियाफलं तस्य सर्वमेव विनश्यति । यः स्नानसमये कुर्यात् जैमिने ! दन्तधावनम् । निराशाः पितरो यान्ति तस्य देवाः सुरर्षयः । दन्तस्य धावनं कुर्याद्यो मध्याह्नापराह्णयोः । तस्य पुण्यं न गच्छन्ति देवताः पितरो यमम् । स्नानकाले

पुष्करिण्यां यः कुर्याद्दन्तधावनम्। तावज्ज्ञेयः स चाण्डालो यावद्गङ्गां न पश्यति। भगवत्युदिते सूर्य्ये यः कुर्याद्दन्तधावनम्। तद्दन्तकाष्ठैः पितरो भुक्त्वा गच्छन्ति दुःखिनः। उपवासदिने विप्र! पितृश्राद्धदिने तथा। न च तत्फलमाप्नोति दन्तधावनकृन्नरः। प्रभाते मार्जयेद्दन्तान् वाससा रसनां तथा। कर्य्याद्दादश विप्रेन्द्र! कवलानि जलैर्बुधः। उपवासे पितृश्राद्धे विधिनानेन जैमिने!। दन्तधावनकृन्मर्त्यः संपूर्णं लभते फलम्" पाद्मे क्रियायोगसारः। "अपःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम्। सुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम्। कदम्बविल्वखदिरकरवीरवटार्जुनाः। तगरं हृहती जातीकरञ्जार्कातिमुक्तकाः। जम्बूमधूकापामार्गशिरीषोडुम्बरासनाः। क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने। कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः। प्रक्षाल्य भुक्त्वा च शुचौ देशे त्यक्त्वा तदाचमेत्। अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि। वर्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे। अभावे दन्तकाष्ठस्य निशिद्वायां तथा तिथौ। अपां द्वादश गण्डूषैः कुर्व्वीत मुखशोधनम्" इति गारुडे २१४ अ० "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्व्वाह्ण एव कुर्व्वीत देवतानाञ्च पूजनम्" मनुः।

दन्तपत्र न० दन्त इव पत्रमस्य। दन्ताकारपत्रयुक्ते कर्णभूषणभेदे शब्दर०। "विलासिनीविभ्रमदन्तपत्रम्" रघुः "कर्णावसक्तामलदन्तपत्रम्" कुमा० दन्तः गजदन्तः तन्निर्मितं पत्रम्। २गजदन्तनिर्म्मिते पत्राकारे कर्णभूषणभेदे च "अहृदये! गृहाण निपतितं दन्तपत्रम्" काद०।

दन्तपत्रक न०दन्त इव शुभ्रं पत्रं दलं यस्य कप्। कुन्दपुष्पे शब्दच०। स्वल्पार्थे ङीपि पुंवत् इत्वम्। दन्तपत्रिका स्वल्पे तत्रार्थे स्त्री विदग्धलीलोचितदन्तपत्रिका" माघः

दन्तपवन न० दन्तं पुनाति अनेन पू-करणे ल्युट्। १दन्तकाष्ठे। भावे ल्युट्। २दन्तधावने च। तत्प्रकारो भावप्र० उक्तो यथा

"तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरीणाहसुव्यथितमव्रणम्। अयुग्मपन्थि यद्यपि प्रत्यग्रं ग्रस्तभूमिजम्। अवेक्ष्यर्तुञ्च दोषञ्च रसं दोषञ्च योजयेत्। कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बस्तु तिक्तके श्रेष्ठः कषाये खदिरस्तथा। मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च। चूर्णेन तेजोवत्यां च दन्ताञ्छित्वं विशोधयेत्। एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च। दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्। तद्दुर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमक्षाभिरुचिं सौमनस्यं करोति च। न खादेद्गुडतालोष्ठजिह्वारोगसमुद्भवे। अथास्यपाके श्वासे च कासहिक्कावमीषु च। दुर्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीड़ितः। शिरोरुगार्त्तस्तृषितः श्रान्तःपानक्लमान्वितः। अर्दितः कर्णशूली च दन्तरोगी च वर्जयेत्"

दन्तपात पु०ष्ठ०। १दन्तानां पतने। २वर्षभेदे अश्वानां स्वतो दन्तविशेषपतने च तत्कालश्च वृ० सं०६६अ० उक्तो यथा "षड्भिर्दन्तैः सितामैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्त्यैः पतितसहितैस्त्र्यब्दपञ्चाब्दिकोऽश्वः। सन्दंशानुक्रमेण त्रिकपरिगताः कालिकापीतशुक्लाः काचा माक्षीकशङ्खावटचलनतो दन्तपातश्च विद्धि"

दन्तपाली स्त्री ष्ठ०। दन्ताग्रे "तालोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः। रक्तैस्तु रक्तसारा वङ्कणस्वनितार्थपूत्रयुताः" वृ० स० ६८ अ०।

दन्तपुप्पुटक पु० दन्तरोगभेदे दन्तरोगशब्दे सुश्रुतवाक्यम्।

दन्तपुष्प न०दन्त इव शुभ्रं पुष्पमस्य। १कुन्दे, २कतकफले च शब्दच०।

दन्तफल न० दन्त इव शुभ्रं फलमस्य। १कतकफले शब्दच० दन्तवत् शुभ्रं फलमस्य। २कपित्थे पु० ३पिप्पल्याम् राजनि० स्त्री टाप्।

दन्तभाग पु० दन्तसम्बन्धी भागः। गजस्य मुखात् स्कन्धपर्य्यन्ते अग्रभागे अमरः।

दन्तमल न० ष्ठ०। दन्तसम्मलेदे हारा०।

दन्तमांस न० दन्तसंलग्नं मांसम्। दन्तसंलग्नमांसे (मेड़े) ख्याते मांसभेदे।

दन्तमूल न० दन्तरोगभेदे दन्तरोगशब्दे दृश्यम्।

दन्तमूलिका स्त्री दन्त इव शुभ्रं मूलं यस्याः कप्। दन्तोत्तले राजनि०। [दृश्यम।

दन्तमूलीय पु० दन्तमूले भवः छ। तवर्गादौ। दन्त्यशब्दे

दन्तरोग पु० ष्ठ०। मुखरोगान्तर्गते दन्तदन्तमूलगते रोगभेदे स च रोग सुश्रुते उक्तो यथा।

"अथातो मुखरोगानां निदानं व्याख्यास्यामः। मुख-

रोगाः पञ्चवृष्टिः सप्तस्वायतनेषु तत्रायतनान्योष्ठौ दन्तमूलानि दन्ता जिह्वा तालुकण्ठः "सर्वाणि चेति। तत्राष्टावोष्ठयोः। षड्दश दन्तमूलेषु, अष्टौ दन्तेषु, इति चोपक्रम्योक्तं यथा।

"दन्तमूलगतास्तु शीतादो१ दन्तपुप्पुटको२ दन्तवेष्टकः३ शौषिरो४ महाशौषिरः५ परिदर६ उपकुशो७ दन्तवैदर्भोऽ वर्द्धनोऽधिमांसो१० नाड्यः११ षड्वेति" इत्युद्दिष्टा "शोणितं दन्तवेष्टेभ्यो यस्माकस्मात् प्रवर्त्तते। दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च। दन्तमांसानि शीर्यन्ते पतन्ति च परस्परम्। शीतादो नाम स व्याधिः कफशोणितसम्भवः१। दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान्। दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्तजः२। स्रवन्ति पूयरुधिरं बला दन्ता भवन्ति च। दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः३। श्वयथुर्दन्तमूलेषु रुजावान् कफरक्ततः। स्रावास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः४। दन्ताश्चलन्ति वेष्टेभ्यस्तानु चाप्यवदीर्य्यते। दन्तमांसानि पच्यन्ते कृष्णञ्च परिपीड्यते। यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञकः५। दन्तमांसानि शीर्यन्ते यस्मिन् जीवति चाप्यसृक्। पित्तात्कृष्णफलो व्याधिर्ज्ञेयः परिदरो हि सः६। वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च। आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः। आघ्रायन्ते स्रुते रक्ते सुखं पूति च जायते। यस्मिन्नुपकुशः स स्यात्पित्तरक्तकृतो गदः७। दन्तेषु दन्तमूलेषु संरम्भो जायते महान्। भवन्ति च चलाद्दन्ताः स वैदर्भोऽभिघातजः८। मारुतेनाधिको दन्तो जायते तीव्रवेदनः। वर्द्धनः स मतो व्याधिर्जायते रुक् च प्रशाम्यति९। हातव्ये पश्चिमे दन्ते महान् शोथो महारुजः। स्रावास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः१०। दन्तमूलगता नाड्यः षड् ज्ञेया वक्ष्यतेरिताः११। "दन्तगतास्तु दाशनः१ क्रिमिदन्तो२ दन्तहर्षो३ मज्जनकः४ दन्तशर्करा५ कपालिका६ श्यावदन्तो७ हनुमोक्षश्चेति। दाशने बहुधा दन्ता यस्मिंस्तीव्ररुगन्विताः। दाशनः स इति ज्ञेयः सदागतिनिमित्तजः। कृष्णस्त्रिदोषो यस्मिन् स्रावी सशर्करो महारुजः१। अनिलस्त्रिभवो वाताद्विज्ञेयः क्रमिदन्तकः२। दशनाः शीतसुप्तश्च सहन्ते सर्पणं न च। यस्य तं दन्तहर्षन्तु व्याधिं विद्यात्सुदारुणम्३ यस्य यस्य भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक्। कफवातकृतो व्याधिः स भङ्गनकसंज्ञितः४। शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै। सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा५। दलन्ति दन्तवल्कानि यदा शर्करया सह। ज्ञेया कपालिका सैव दशनानां विनाशिनी६। योऽस्थ्नि श्लेष्मपित्तेन दग्धो दन्तस्त्वशेषतः। श्यावतां नीलतां वापि गतः स श्यावदन्तकः७। वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः। हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः८"।

दन्तलेखक त्रि॰ दन्तान् लिखति जीविकार्थम् लिख— "संज्ञायाम्" पा॰ ण्वुल् "नित्यं क्रीडाजीविकयोः" पा॰ नित्यम्। दन्तलेखनरूपजीविकायुक्ते। "अकेजीविकार्थे" पा॰ पूर्वपदस्याद्युदात्तत्वम्।

दन्तवक्र पु॰ करूषाधिपे द्वापरयुगोद्भवे हिरण्यकशिपोरवतारूपे नृपभेदे "हिरण्यकशिपुर्योऽसौ दैत्यराजोऽभवत् पुरा। पृथुकीर्त्यां तु संजज्ञे तनयो दन्तवक्रकः। करूषाधिपतिर्वीरो दन्तवक्रो महाबलः" हरिवं॰ ३५ अ॰। "अधिराजाधिपञ्चैव दन्तवक्रं महाबलम्। जिगाय करदञ्चैव कृत्वा राज्ये न्यवेशयत्" भा॰स॰३०अ॰। सहदेवदक्षिणदिग्विजयोक्तौ "द्वारवत्यां निवसता यदुसिंहेन तेन वै" इत्युपक्रमे "दन्तवक्रश्च कारूषो निहतो दक्षिणापथे" हरिवं॰१७१अ॰। द्वारकावासकाले कृष्णेन वधो वर्णितः। "मातृष्वस्रेयोर्वैद्यो दन्तवक्रश्च पाण्डव!। पार्षदप्रवरौ विष्णोर्विप्रशापात् पदच्युतौ" भाग॰ ७।१।३२ इत्युपक्रमे हिरण्याक्षादिजन्मनामोक्त्यनन्तरम् "तावेव क्षत्रियौ जातौ माहृष्वस्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ"। ४४ "कृष्णोऽपि तमहन् गुर्व्या कौमोदक्या स्तनान्तरे। गाढनिर्भिन्नहृदय उद्वमन् रुधिरं मुखात्। प्रसार्य केशान् बाहूंश्च त्रीन् धरण्यां न्यपतद्गतसुः। ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम्" भाग॰१०।७७।७

दन्तवल्क पु॰ दन्तस्य वल्कमिव। दन्तावरकवर्णात्मके मांसभेदे "दलन्ति दन्तवल्कानि यदा शर्करया सह" सुश्रुतः।

दन्तवर्त्ति स्त्री दन्तनिर्मिता वर्त्तिः। "दन्तैर्हस्तिवराहोष्ट्रगवाश्वाजखरोद्भवैः सशङ्खमौक्तिकाभ्रौषिफेनैर्मरिचादिकैः कृतशुक्रमपि व्याधिं दन्तवर्तिर्निवर्त्तयेत्" चक्रदत्तोक्ते वर्तिकाभेदे। [स्त्रीरोगे क्षेम॰।

दन्तवस्त्र न॰ दन्तस्य वस्त्रमिव छादकत्वात्। दन्तवाससि

दन्तवासस् न॰ दन्तस्य वास इवाच्छादकत्वात्। ओष्ठे त्रिका॰

"तुलां यदारोहति दन्तवाससा" कुमा० । [राजनि० ।

दन्तबीज(क) पु० दन्त इव बीजमस्य वा कप् । दाडिमीवृक्षे

दन्तवेष्ट पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

दन्तवैदर्भ पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम्।

दन्तशङ्कु पु० "वडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रचुखे" सुश्रुतोक्ते अस्त्रभेदे ।

दन्तशठ पु०दन्तान् शठति क्लेदयति शठ–अच् । १जम्बीरे २कपित्थे ३कर्मरङ्गे, ४नागरङ्गे च । ५चाङ्गेर्यां ६चुक्राम्लिकायां स्त्री० मेदिनि० ७अम्बे हेमच० दन्तुद्राम्लिकायाम् स्त्री राजनि० ।

दन्तशर्करा स्त्री दन्तस्य शर्करेव । दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् । [ख्याते चूर्णभेदे त्रिका० ।

दन्तशाण पु० दन्तस्य शाण इव चिक्कणताहेतुत्वात् (मिसि)

दन्तशूल न० दन्तस्य शूलमिव । दन्तवेदनायाम् । "शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे" भा० शा०३०५ अ०।

दन्तशोफ पु० दन्तस्य शोफ इव । दन्तार्बुदे (दाँतेर आव) राजनि० । [भागे मांसपिण्डे शब्दच०।

दन्तसिरा स्त्री दन्तस्य सिरा यत्र । (मेड़े) ख्याते दन्ताधो-

दन्तहर्ष पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

दन्तहर्षक पु०दन्तान् हर्षयति हृष–णिच्–ण्वुल् । जम्बीरे जटाधरः । [दन्तीय तद्भवादौ त्रि० ।

दन्ताग्र न० ६त० । दन्तस्याग्रे ततः गहा० भवादौ छ ।

दन्ताघात पु० दन्तानाहन्ति आ+हन-अण् उप० स० । १निम्बूके । भावे घञ् । २दन्तैराहनने राजनि० । "दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्" गणेशध्यानम् । रतौ तत्स्थानानि यथा "स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः" कामशास्त्रम् ।

दन्ताद पु० "केशरोमनखादाश्च दन्तादाः चिक्कणास्तथा । कुष्ठजाश्च परीसर्पाज्ञेयाः शोणितसम्भवाः" सुश्रुतोक्ते दन्तखादकलक्षणरोगभेदे । "दन्तादानां समुद्दिष्टं विधानं सुखरोगिणाम्" सुश्रु० ।

दन्तादन्ति त्रि० दन्तैश्च दन्तैश्च प्रहृत्य प्रवृत्तं युद्धम् इच् समा० पूर्वाणोदीर्घः । परस्परदन्तप्रहारेण प्रवृत्ते युद्धे "कचाकचि युद्धमासीदुदन्तादन्ति नखानखि" भा० कर्ण० ४६ अ० । [जातित्वात् ङीष् ।

दन्तायुध पुं स्त्री०दन्ता युधमिवास्य । शूकरे त्रिका० स्त्रियां

दन्तार्बुद पु० दन्तस्यार्बुदमिव । दन्तरोगभेदे राजनि० ।

दन्तालिका स्त्री दन्तान् अलति भूषयति, तेभ्यो वा पर्य्याप्नोति अल+ण्वुल् । वल्गायाम् । (लागाम) त्रिका० "दन्तालिकाधरणनिश्चलपाणियुग्मम्" । (वल्गयालम्) माघः। अण् गौ०ङीष् दन्तानी तत्रार्थे वैजय०। [अमरः।

दन्तावल पु० दन्त+अस्त्यर्थे वलच् पूर्वपददीर्घः । हस्तिनि

दन्तिका स्त्री दम–तन्+गौरा० ङीष् स्वार्थे क ह्रस्वः । दन्तीवृक्षे अमरः ।

दन्तिजा स्त्री दन्तिका+पृषो० । दन्त्योषधौ शब्दर० ।

दन्तिन् पु० दन्त+अस्त्यर्थे इनि । हस्तिनि अमरः "अनिर्वाणस्य दन्तिनः" रघुः । "पिष्टाद्विष्टवासरसा च दन्तिनः" माघः । [दन्तीवृक्षे राजनि० ।

दन्तिनी स्त्री दन्तस्तदाकारोऽस्त्यस्याः मूले इनि ङीष् ।

दन्तिमद ६त० । हस्तिमदे गन्धद्रव्यभेदे शब्दार्थचि० ।

दन्तिमूलिका स्त्री दन्ति गजदन्तयुक्तमिव मूलमस्याः कप् कापि अत इत्वम् । दन्तीवृक्षे राजनि० ।

दन्ती स्त्री दम–तन् गौरा०ङीष् । १उदुम्बरपर्ण्यां, प्रत्यक्पर्ण्यौषधौ अमरः । दन्तः गजदन्त इव मूलमस्त्यस्याः अच् गौरा०ङीष् ।२स्वनामख्याते वृक्षे भावप्र० "लघुदीर्घप्रभेदेन प्रोक्तं दन्तीद्वयं बुधैः। दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहनुत् । तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रमीन्" भावप्र० तद्गुणा उक्ताः ।

दन्तीबीज न० दन्त्या इव बीजमस्य । जयपाले राजनि० ।

दन्तुर त्रि० उन्नताः दन्ताः सन्त्यस्य दन्त+उरच् । १उन्नतदन्तयुक्ते, उन्नतानते विषमे स्थाने च शब्दार्थचि० । "शूकरे निहते चैव दन्तुरो जायते नरः" शाता० तथाभवनसाधनं कर्मविशेष उक्तः। "कदाचिदुदन्तुरो मूर्खः कदाचिल्लोमशः सुखी । कदाचित् तुन्दिलो दुःखी कदाचिच्छुभ्रा सतीति" वासुदकम् । "अमलमणिशलाका दन्तुराभिः किरीटकोटिभिः" काद० । "करयन्त्रखदन्तुरान्तरे" नैष० ।

दन्तुरक पु० देशभेदे स च देशः बृ० सं० १४ अ० कूर्म्मविभागे अथ पूर्वस्यामित्युपक्रमे "मिथिलसमभटोड्राम्रवदनदन्तुरकाः" । पूर्वस्यामुक्तः । [राजनि०।

दन्तुरच्छद पु० दन्तुर उन्नतानतः छदो यस्य । बीजपूरे

दन्तोलूखलिक पु० दन्ता एव उलूखलः कण्डनसाधनं विद्यतेऽस्य ठन् । वानप्रस्थभेदे स हि दन्तैरेव व्रीह्यादीन् कण्डयित्वा खादति । "दन्तोलूखलिकः कारपक्वाशी

पाश्लक्ष्णकृकः" याज्ञ० । "अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा" मनुः । इनि । दन्तोलूखलीत्यपत्र ।

दन्तौष्ठ न० दन्ताश्च ओष्ठौ च तेषां समाहारः । दन्तौष्ठानां समाहारे । ततः शरीरावयवत्वात् भवादौ यत् । दन्तोष्ठ्य तद्वाच्यार्थे दन्त्यवकारे "दन्तोष्ठ्यौः स्मृतो बुधैः" शिक्षा०

दन्त्य पु० दन्ते दन्तमूले वा भवः यत् । दन्तदन्तमूलयोर्जाते ।तवर्गादौ वर्णे । "लृतुलसानां दन्ताः" सि०कौ० । "दन्त्यालृतुलसाः स्मृताः" पा० शि० । शेखरादौ दन्तशब्दस्य दन्तमूलपरतोक्ता अन्यथा भग्नदन्तस्य तदनुच्चारणापत्तेः" दन्तेभ्यो हितः यत् । २दन्तहितकारके त्रि० ।

दन्त्यरिष्ट न० दन्त्यम् अरिष्टं रिष्टाभावो यत्रौषधे । चक्रदत्तोक्ते अर्शोघ्ने औषधभेदे ।

"दन्ती चित्रकमूलानि जलद्रोणे विपाचयेत् । त्रिपलं त्रिफलायाश्च दन्तानां तत्र दापयेत् । तुलां गुडस्य तत्तिष्ठेन्मासार्द्धं घृतभाजने । तन्मात्रया पिबेच्चित्रमर्शोभ्यो विप्रमुच्यते । ग्रहणीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम् । दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः" ।

दन्दशूक पुंस्त्री गर्हितं दशति दन्श-गर्हार्थे यङ्-ऊक । १राक्षसे, "दन्दशूकान् लिघांसौ" भट्टिः २सरीसृपे, ३सर्पे च मेदि० । "दन्दशूकः पतङ्गो वा भवेत् कीटोऽथवा कृमिः" वाग्भ० ।

दन्द्रम्यमाण त्रि० द्रम-यङ् शानच् । कुटिलगतियुक्ते ।

दन्भ दम्भे भ्वा० पर० अक० सेट् । दम्भोति अदम्भीत् । दम्भित्वा दम्भ्वा । दब्धः । सनि वेट् इडभावपक्षे नलोपे धीप्सति धिप्सति दिदम्भिषति ।

दन्भ संघाते चुरा० आत्म० अक० सेट् । दम्भयते अदद्भत ।

दन्श क्लिंशने रदकरणकव्यापारभेदे दंशने (कामड़ान) भ्वा०पर०सक०अनिट् । दशति अदाङ्क्षीत् ददंश । "करौ निरोद्धुर्दशति स्म केवलम्" "कटुकीटान् दशतः सतः क्वचित्" नैष० । दष्टः दंष्ट्वा ।

दभ प्रेरणे चु० उभ० सक० सेट् इदित् । दम्भयति ते अदद्भत् त ।

दभ्र न० दभ्र-रक् । १अल्पे २तद्वति त्रि० अमरः ३सस्यदे पु० उणा० "अदभ्रदर्भमधिशय्य स स्वपीम्" किरा० । ४उत्तरस्यां दिशि स्त्री निघण्टुः । "अ सिदभ्रस्य चिद्रुपः" ऋ० १।८।२।

दम् अव्य० दम-क्विप् । कलहे शब्दार्थचि० ।

दम शमे दण्डे च दिवा० शमा० अक० सेट् । दाम्यति अदमत्-अदमीत् ददाम देमतुः । णिच् दमयति ते अदिदमत् त टिलु दमयुः दमितः दान्तः । ओदित् दमित्वा दान्त्वा । "यमो दाम्यति राक्षसान्" "जानुभ्यामदमद्भान्यान्" "दमित्वाप्यरिसंघातान्" "अदान्तां स्विदशैरपि" भट्टिः । दमः दम्यः दमनः ।

दम पु० दम-भावे घञ् । १दण्डे, २बाह्येन्द्रियाणां स्वस्वविषयेभ्यो निवर्त्तने, "निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते" इत्युक्ते बाह्येन्द्रियव्यापाररोधे, विकाररहितसन्निधानेऽपि ३मनसः स्थैर्ये, "कुत्सितात् कर्मणो विप्र ! यच्च चित्तनिवारणम् । स कीर्त्तितो दम" इत्युक्ते ४कुकर्मभ्यो मनसो निवारणे, ५कर्दमे, मेदि० ६दमने च । ६भीमसेनपुत्रभेदे दमयन्तीशब्दे दृश्यम् । ७विष्णौ पु० दमयितृशब्दे दृश्यम् ।

दमघोष पु० श्रुतश्रवोऽपरनामके शिशुपालपितरि राजभेदे "ततः संजनयामास सुप्रभे द्वे च दारिके । कुन्तीञ्च पाण्डोर्महिषीं देवतामिव भूचराम् । भार्य्यांञ्च दमघोषस्य चेदिराजस्य सुप्रभाम्" हरिवं० ९५ अ० ।

दमघोषज पु०दमघोषात् जायते जन-ड । शिशुपाले "सुदमो दमघोषजः" माघः ।

दमघोषसुत पु० ६त० । शिशुपाले "दमघोषसुतो वीरः शिशुपालो महामतिः" भा० आ० १८७ अ० दमघोषतनयादयोऽपत्य । [क्लेशसहने च ।

दमथ पु० दम-भावे उथा० अथच् । १दण्डे २तपः-

दमथु पु० दम-भावे अथु । १दमे दमने अमरः ।

दमन न०दम-भावे ल्युट् । १दण्डे २इन्द्रियादीनां बाह्यवृत्तिनिरोधे । कर्त्तरि अच् । (दोना)ख्याते ३पुष्पचामरे पुष्पप्रधाने वृक्षभेदे "दमनस्तु रसे तिक्तो हृद्यो दृष्यः सुगन्धिकः । ग्रहणीविषकुष्ठास्रच्छर्दकण्डूत्रिदोषजित्" भावप्र० । दमनारोपणोत्सवश्च नि०सि०उक्तो यथा "चैत्रशुक्लद्वादश्यां दमनोत्सवः "द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः । बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति" रामार्चनचन्द्रिकोक्तेः "अर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् । चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः" इति तत्रैव पाद्मवचनाच्च । शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्य्यः "तत्र स्यात् स्वीयतिथिषु षड्भ्यादेर्दमनार्पणम्" इति तत्रैवोक्तेः । ज्योतिःप्रकाशेऽपि "स्वस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा । पवित्रदमनारोपे यात्रा नक्षत्रिणिर्बुधैः" । तिथयस्तु "वह्निर्विरिञ्चिर्गिरिजा गणेशः

फणी विशाखो दिनजन्महेशः। दुर्गान्तको विश्वहरिः खरस्य पर्वः शशी चेति तिथीषु पूज्याः" इत्युक्ताः आगमोक्तदीक्षायतो दमनरोपणविधिः रामार्चनचन्द्रिकायाम्। तद्विधिस्तत्रैव दृश्यः। ४उपशान्ते ५वीरे शब्दर०। ६कुन्दवृक्षे राजनि०। ७ऋषिभेदे दमयन्तीशब्दे दृश्यम्। "यद्वरात् भीमस्य नृपस्य दमयन्तीकन्यावरलाभः। "दमनादमानाक् प्रसेदुपस्तनयां तथ्यगिरस्तपोधनात्। वरमाप"नैष०। दमयति–दम–णिच्–ल्यु। १शासनकर्त्तरि त्रि० दुष्टदमनः सर्वदमन इत्यादि। ९विदर्भाधिपभीमनृपसुतभेदे च दमयन्तीशब्दे दृश्यम्। स्वाधिकारात्प्रमाद्यन्तीः प्रजाः दमयितुं शीलमस्य वुच्। १०परमेश्वरे। "मरीचिर्दमनो हंसः" विष्णुस०। "वैवस्वतादिरूपेण दमयितृत्वात् वा" भाष्योक्तेः साधात्वम्। भावे ल्युट्। ११दमने न०, "न्यस्य दुष्टदमनक्षमं हरिम्" माघः।

दमनक पु० स्वार्थे क। १दमनवृक्षे "द्विगुणनगणभिह वितनुहि। दमनकमिति गदति शुचि हि" इत्युक्ते २षड्क्षरपादके छन्दोभेदे ३एकादशाक्षरपादके छन्दोभेदे च। "द्विजवर! युगलममलं तदनु कलय नवतुगुरुकम्। फणिपतिवरपरिगदितं दमनकमिदमतिललितम्" वृ०र०टी०

दमनी स्त्री दम्यतेऽग्निरनया–करणे ल्युट् ङीप। अग्निदमनीवृक्षे राजनि०।

दमन्य दमन इवाचरति दमन–क्यच् भेदे अन्त्यलोपः दमनकर्तृतुल्याचारे पर० अक० सेट्। दमन्यति अदमन्यीत्। "षड्डं त्रिशीर्षाणं दमन्यत्" ऋ०१०।९९।

दमयन्ती स्त्री विदर्भाधिपभीमनृपस्य कन्याभेदे तत्कथा भा० व० ५५अ० यथा

"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः। शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजः। स प्रजार्थे परं यत्नमकरोत् सुसमाहितः। तमभ्यागच्छदुग्रस्तु मुनिर्दमनो नाम भारत! तं स भीमं प्रजाकामस्तोषयामास धर्मवित्। सहिष्यामि तव राजेन्द्र! मत्कारेण सुवर्चसम्। तस्मै प्रसन्नो दमनः सभार्य्यायै वरं ददौ। कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः। दमयन्तीं दमं दान्तं दमनस्य सुवर्चसम्। उपपन्नान् गुणैः सर्वैर्भीमान् भीमपराक्रमान्। दमयन्ती तु रूपेण तेजसा यशसा श्रिया। सौभाग्येषु च लोकेषु यशः प्राप सुमध्यमा"। भा० व० ५८अ०। सा च पुण्यश्लोकनलराजकलत्रम् यथोक्तं तत्रैव ५७अ०

"सा सस्मरन्ती तु तान् देवान् पुण्यश्लोकस्य भारत!। नैषधं वरयामास भैमी धर्मेण पाण्डव!। विलप्यमाना वस्त्रान्ते जपाहावतसोचना। स्कन्धदेशेऽसृजत्तस्य स्रजं परमशोभनाम्। वरयामास चैवैनं पतित्वे वरवर्णिनी" "पार्थिवास्तानुभूयास्य विवाहं विस्मयान्विताः। दमयन्त्याश्च सुहृदः प्रतिजग्मुर्यथागतम्। गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः। विवाहं कारयामास दमयन्त्या नलस्य च। उषित्वा तत्र यथाकामं नैषधो द्विषदां वरः। भीमेन समनुज्ञातो जगाम नगरं स्वकम्"। "त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल"नैष०। ["दण्डो दमयिता दमः" विष्णुस०।

दमयिष्ठ त्रि० दम–णिच्–तृच्। १शासनकर्त्तरि २विष्णौ पु०

दमाय दमं दमनमिच्छति क्यच्–आत्मनोदमनेच्छायां पर० अक० सेट्। दमायति अदमायीत् "इत्थं वीर! उपसुपं दमायन्नन्यमन्य मतिने नीयमानः" ऋ० ६।४७। १६। "दमायन्तु ब्रह्मचारिणः" तै० ब्रा० १।४।२।

दमित त्रि० दम्यते स्म दम–णिच्–क्त वा दान्तेत्यादि इट्। कृतदमने इत्यादौ।

दमिन् त्रि० दम–यमा० शीलार्थे णिनुन्। १दमनशीले स्त्रियां ङीप्। २सागरसिन्धुनदीसङ्गमदक्षिणस्थे तीर्थभेदे न० ३तत्प्रवर्त्तकर्षिभेदे पु० "सागरस्य च सिन्धोश्च सङ्गमं प्राप्य भारत!" इत्युपक्रमे "प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ!। तीर्थं कुरुवरश्रेष्ठ! त्रिषु लोकेषु विश्रुतम्। दमीति नाम्ना विख्यातं सर्वपापप्रणाशनम्। तत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम्। तत्र स्नात्वाऽर्चयित्वा च रुद्रदेवगणैर्वृतम्। जन्मप्रभृति यत्पापं तत्स्नातस्य प्रणश्यति। दमी चात्र नरश्रेष्ठ! सर्वदेवैरभिष्टुतः। तत्र स्नात्वा नरव्याघ्र! हयमेधमवाप्नुयात्" भा०व०८२अ०।

दमु(मू)नस् पु० दम–अनसि पृषो० वा हुस्वः। १अग्नौ, अमरः २शुक्राचार्ये उणा०। निरुक्ते ४।५। "जुष्टो दमूना अतिथिर्दुरोणः" ऋचमधिकृत्य अस्य अन्या निरुक्तिरुक्ता यथा "दमूना दमनना वा दान्तमना वापि वा दम इति गृहनाम तन्मनाः स्वाश्रमा मनोतेः"। २दमयितरि त्रि०। "दमूना गृहपतिर्दम आँ" ऋ० ।।६०४। "दमयति राक्षसादिकमिति दमूनाः" भा०।

दमे अव्य० दम–वा० डे। गृहे निघण्टुः।

दम्पती पु० द्वि० ब०। जाया च पतिश्च द्वन्द्वे जायाशब्दस्य पत्ये दमादेशः। विवाहितयोः जायापत्योः अमरः। "तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुरात्रमम्" रघुः।

"भुञ्जीयातां ततः पश्चाद्वाग्यतं तु दम्पती" मनुः। "दम्पत्योर्मध्यगं धनम्" दायभा०। तयोरिदं पत्यन्तत्वात् यक्। दाम्पत्य तत्सम्बन्धिनि त्रि०।

दम्भ पु० दृभ-घञ्। १कपटे २माद्ये अधार्मिकेष्वात्मनो धार्मिकत्वख्यापने ४लोभवञ्चनाभ्यां विहितकर्मानुष्ठाने ५पूजाप्राप्त्यर्थं स्वधार्मिकत्वख्यापने। "द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्ज्जयेत्" मनुः। "सत्कारमानपूजार्थं तपो दम्भेन चैव यत्" गीता। न्यायरत्नवृत्तौ तु दम्भस्य रागविशेषेच्छाभेदरूपत्वमुक्तं यथा 'तद् त्रैराग्यं रागद्वेषमोहान्तर्भावात्" गौ०सू०। "तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भः" इत्युक्त्वा "कामो विरंसा रतिश्च विजातीयः संयोगः नारीगताभिलाष इति तु न युक्तं स्त्रियः कामेऽव्याप्तेः मत्सरः स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा, यथा राजकीयादुदपानान्नोदकं मेयम् इत्यादि। एवं परगुणनिवारणेच्छाऽपि। स्पृहा धर्माविरोधेन प्राप्तीच्छा तृष्णा इदं मे न क्षियताम्मितीच्छा उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः, परवञ्चनेच्छा माया, कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः" गौ० ह० ४।२ कामादिकदम्भान्तानामिच्छाविशेषरूपत्वात् रागरूपे दोषे अन्तर्भाव उक्तः अधिकं दोषशब्दे वक्ष्यते।

दम्भक पु० दृभ-ण्वुल्। प्रतारके। "धर्म्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः" मनुः।

दम्भन पु० दृभ-भावे ल्युट्। १दम्भे २मोहने च। "व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम्" मनुः।

दम्भिन् त्रि० दृभ-णिनि। दम्भकर्त्तरि। "दम्भिहैतुकपाषण्डवकवृत्तींश्च वर्ज्जयेत्" याज्ञ०।

दम्भोद्भव पु० १सार्वभौमे नृपभेदे। "राजा दम्भोद्भवो नाम सर्वभौमः पुराऽभवत्" भा० उ० ९१ अ०। इत्युपक्रमे तस्य नरनाम्ना ऋषिणा गर्वो निहतस्तत्कथा तत्रैवाध्याये दृश्या। "दण्डको नृपतिः कामात्, क्रोधाच्च जनमेजयः। लोभादैलस्तु राजर्षिर्वातापिर्हर्षतोऽसुरः। गौरवस्थो राघवो मानात् मदादुदम्भोद्भवो नृपः। प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः" काम०। दम्भ उद्भवो यस्य। २दम्भसमुत्थे कर्म्मादौ त्रि०। [३क्षीरके अमरः।

दम्भोलि पु० दृभ्नोति खेदयति दृभ-ओलि। १वज्रेऽस्त्रे।

दम्य त्रि० दम-यत्वर्णान्तत्वात् यत्। १प्राप्तभारवहनयोग्यावस्थे वत्सतरे २अनडुहि च अमरः। ३दमनीये ४दमनार्हे त्रि०। "अप्राप्तदम्यावस्थः" प्रा० त०। "धुर्य्येण दम्यः सदृशं बिभर्त्ति" रघुः।

दय गतौ वधे, दाने पालने च भ्वा० आत्म० सक० सेट्। दयते अदयिष्ट अदयिढ्वम् अदयिध्वम् अदयिढ्वम्। दयाम् बभूव आस चक्रे। "न वा पलायाञ्चक्रे विदयाञ्चक्रे न राक्षसः" भट्टिः दया दयितः। "व्रजन्ति तेषां दयमे न बन्धात्"। "स चापि रुधिरैर्मर्त्तः खेषामप्यदयिष्ट न" भट्टिः

दया स्त्री दय-भिदा० भावे अङ्। १दुःखितेषु भूतेष्वनुकम्पायाम् २परदुःखाऽसहने करुणाशब्दे दृश्यम्। ३परदुःखप्रहरणेच्छायाम्। "यत्नादपि परक्लेशं हर्त्तुं या हृदि जायते। इच्छा भूमिसुरश्रेष्ठ! सा दया परिकीर्त्तितेति"। आत्मवत् सर्वभूतेषु यो हिताय शुभाय च। वर्तते सततं हृष्टः क्रिया ह्येषा दया स्मृता। प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा। आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः"। इयं मोहपत्नी यथा। "मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया। सर्वलोकाश्च सर्वत्र निष्फलाश्च यया विना" देवीभागवते ९स्क० १अ०। यत्र मोहोऽस्ति तत्र दयायाः सत्त्वाद्दया मोहपत्नीति "अहिंसा परमो धर्म्मो विप्राणां नात्र संशयः। दया सर्वत्र कर्त्तव्या ब्राह्मणेन विजानता। यज्ञादन्यत्र विप्रेन्द्र! न हिंसा याज्ञिकी मतेति" देवीभागवतम्। यज्ञादन्यत्र दया कर्त्तव्या यज्ञे तु हिंसैव कर्त्तव्या न सा याज्ञिकी हिंसा हिंसा भवति। "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः" इति श्रुतेः। "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे। अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभाविति" मनुस्मृतेश्च। "तृणं वाप्यविधानेन छेदयेन्न कदाचनेति" कुलार्णवोक्तेश्च। ४दक्षकन्याजाते धर्मस्य पत्नीभेदे तदपत्यम् अभयम् धर्म्मशब्दे दृश्यम्। "धनुर्भृतोऽप्यस्य दयार्द्रभावम्" रघुः। "तय धर्म्मः सदयोदयोज्ज्वलः" नैष० सा च शान्तिरसस्य व्यभिचारिभावः यथाह सा० द०। शान्तरसोपक्रमे "रोमाञ्चाद्याः स्वानुभावास्तथा स्युर्व्यभिचारिणः निर्वेदहर्षस्मरणमतिभूतदयादयः"।

दयाकूट पु० दयायाः कूट इव। बुद्धे हेम०।

दयालु त्रि० दय-आलुच्। कृपायुक्ते। "दयालुरपि स कृष्णः" इत्युद्भटः। "यशःशरीरे भव मे दयालुः" "निरीक्षमाणः सुतरां दयालुः" रघुः।

दयावीर पु० दयया वीरः । १दयासहिते वीरे रसे २तद्युक्ते नायकभेदे च सा० द० वीररसलक्षणमुक्तं "स च दानधर्म्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्" स च दानवीरो धर्म्मवीरोदयावीरो युद्धवीरश्चेति चतुर्विधः" इति विभज्य "दयावीरो यथा जीमूतवाहनः । "शिरासुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति । तृप्तिं न पश्यामि तथापि तावत् किं भक्षयाम्यं विरतो गरुत्मन्" । एवमपि विभावादयः पूर्वोदाहरणवदूहयाः" उदाजहार ।

दयित पु० दय–क्त । १पत्यौ अमरः । २प्रियमात्रे त्रि० । ३भार्य्यायां स्त्री । "दयिता दयितामनाम्बुजं दर-मीलन्नयना निरीक्षते" रघुग० । "न गजा मगला दयिता दयिताः" भट्टिः ।

दयित्नु त्रि० दय–इत्नु । दयाशीले ।

दयू त्रि० देव–क्विप् ऊठ् । देवनकर्त्तरि ।

दर अव्य० दृ–भये अप् । १ईषदर्थे । २भये, ३गर्त्ते अमरः । अमरः "दरादराभ्यां दरकम्पिनी पपे" नैषधम् "दरमीलन्नयनानिरीक्षते" रघुगङ्गा० । "न जातु हार्दे न विहिंसादः" किरा० । ४कन्दरे पुंस्त्री० स्त्रीत्वे ङीप् । "दरीमुहोत्सङ्गनिषक्तभासः" । "दरीमुखोत्थितेन समीरणेन" कुमा० । ५शङ्खे शब्दार्थचि० । "स उच्चकाशे धवलो दरोदरोपरक्तमस्याधरशोणशोणिमेति" माघ० । [शब्दार्थचि० ।

दरक त्रि० दर+भये "कजादिभ्यो वुन्" पा० वुन् । भीरौ

दरकण्टिका स्त्री दर ईषत् कण्टो यस्याः कप् कापि अत इत्वम् । शतावर्य्याम् राजनि० ।

दरणि पुंस्त्री दृ–अनि । नद्यादेः कूलभङ्गे (भाङ्गन) शब्दार्थचि० । स्त्रीत्वे वा ङीप् ।

दरथ पु० दृ–विदारे "दृगमिदमिभ्यश्च" उणादिसूत्रात् अथ । १दिशु प्रसरथे २गर्त्ते च उज्ज्वलदत्तधृत-सूत्रात् अथ । १दिशु प्रसरथे २गर्त्ते च उज्ज्वलदत्तः ।

दरद स्त्री दृ–विदारणे "शृदृभसोऽदिः" उणा० अदि । १हृदये २कूले च उज्ज्वलद० । दृ–भये अदि । ३पर्वते ४प्रपाते ५भये च पु० मेदि० । ६म्लेच्छजातौ अमरटीका ।

दरद त्रि० दरं भयं ददाति दा–क दर ईषत् दायति शुध्यति दैप–शोधे–क वा । १भयदायके २हिङ्गुले पु० न० भावप्र० तल्लक्षणादिकमुक्तं यथा "हिङ्गुलं दरदं म्लेच्छमिङ्गुलसूर्णपारदम् दरदस्त्रिविधः प्रोक्तः वर्णैः शुक्लतुण्डकः । हंसपादस्तृतीयः स्याद्गुण-वानुत्तरोत्तरम् । वर्णैः शुक्लवर्णः स्यात् सपीतः शुक्लतुण्डकः । जवाकुसुमसङ्काशो हंसपादो महोत्तमः । तिक्तं कषायं कटुहिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । कुष्ठामकुष्ठज्वरकामलांस्त्रीहामवातौ च गरश्चिहन्ति । अर्द्धपातनयुक्त्या तु उमरुयन्त्रपाचितम् । हिङ्गुलं तस्य सतन्तु शुद्धमेवं न शोधयेत् । २देशभेदे पु० स च देशः ६त० स० १४ अ० ऐणान्यासुकः ऐणान्यामित्युपक्रमे अभिसार-दरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः" "शूद्राभीराश्च दरदाः काश्मीराः पत्तिभिः सह" भा० भी० ९ अ० । प्राच्यो-दीच्यदेशौ । सोऽभिजनोऽस्य तस्य राजा वा अण् । दारद पितादिकमेव तद्देशवासिनि तद्भूपे च । बहुषु अणो लुक् । "गृहीत्वा तु बलं सारं फाल्गुनः पाण्डु-नन्दनः । दरदान् सह काम्बोजैरजयत् पाकशासनिः । प्रागुत्तरां दिशं ये च वसन्त्याश्रित्य दस्यवः । निवसन्ति वने ये च तान् सर्वानजयत् प्रभुः" भा० स० २६ अ० । आर्षे क्वचिदेकत्वेऽपि अणो लुक् । "शाल्वराजश्च दरदो विदेहाधिपतिस्तथा" हरिवं० ९१ अ० । ३म्लेच्छजातिभेदे । ५भये शब्दरत्ना० । ६शनैः क्रियालोपात् शूद्रत्वापन्ने क्षत्रियभेदे च । "शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः" इत्युपक्रमे "पारदापह्लवाश्चीनाः किराता दरदाः खसाः" मनुः ।

दरवर पु० दरेषु शङ्खेषु वरः । पाञ्चजन्ये भगवतः शङ्खे श्रीधरः । "दध्मौ दरवरं तेषां विषादं शमयन्निव" भाग० १।११।२।

दरसान पु० दृ–विदारणे असानच् । द्योते उज्ज्वलद० ।

दरि(री) स्त्री दृ–विदारे इन् वा ङीप् । १कन्दरे शब्द-रत्ना० । २तक्षककुलजे सर्पभेदे पु० "पूर्णाङ्गदः पूर्णसहः प्रहासः शकुनिर्दरिः" भा० आ० ५७ अ० ।

दरित त्रि० दरो जातोऽस्य तारा० इतच् । जातभये हेमच० ।

दरिद्र त्रि० दरिद्रा–क । १दुर्गते २निःस्वे अमरः । "मणीव दारिद्र्यदरिद्रतां व्यधः" नैष० । "स्त्रीबालोन्मत्तवृद्धान्न दरिद्राणाञ्च रोगिणाम्" मनुः । दरिद्रत्वे हेतुः "अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च । अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते" प्रा० त० । "दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः" भाग० । "अटं पटः स्वदरिद्रतां गतः" मृच्छ० ।

दरिद्रा दुर्गतौ अदा० पर० अक० सेट् । दरि-द्राति अद्या० दरिद्रति अदरिद्रीत्–अदरिद्राषीत् । दरि-

ष्टामाह बभञ्ज चकार ददरिद्र ददरिद्रौ इत्येके। दरिद्रिता दरिद्रात्। दरिद्रिष्यति। दरिद्राथः। सनि। दिदरिद्रिषति दिदरिद्रासति। [शीले च।

दरिन् त्रि॰ दृ–भये विदारे वा इनि। १भीरौ २विदारके च।

दरोदर पु॰ दरोदर+षत्वो॰। पाशके "आश्रित्य दुर्गं गिरिकन्दरोदरं क्रीडन्प्रहृष्टान् यततं दरोदरम्" "यमकात् दरोदरो निष्कारः इति मोवर्द्धनः" उज्ज्वलद॰

दर्त्तृ त्रि॰ दृ–विदारे वेदे इडभावः। दारयितरि "स व्रजं दर्त्ता पार्थे अध द्योः" ऋ॰ ६।६६।८। "दर्त्ता दारयिता" भा॰। लोके तु दर्त्ता(रि)ता इत्येव।

दर्त्तु पु॰ दृ–विदारे वा॰ तु इडभावश्चान्दसः। दारके। "यत् पुरां दर्त्तुमारत्" ऋ॰६।२०।२। "दर्त्तुं दारकम्" भा॰

दर्दर पु॰ दृ–यङ् अच् पृषो॰। १पर्वते। २प्रद्युम्नभाजने च मेदि॰।

दर्दराद्रि न॰ अञ्जनभेदे शब्दच॰।

दर्दरीक न॰ दृ–विदारे फर्फरीका॰ नि॰। १वाद्यभेदे।

दर्दुर न॰ दर्द्दाति कर्णौ शब्देन उरच् नि॰। १भेके २मेघे ३वाद्यभेदे ४पर्वतभेदे "शैलस्य दर्दुरपुटानिव वादयन्तः" माघः "कौशेयं तित्तिरिर्हत्वा क्षौमं हत्वा तु दर्दुरः" मनुः "स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ" रघुः। "हिमवान् पारिपात्रश्च विन्ध्यः कैलासमन्दराः। मलयो दर्दुरश्चैव महेन्द्रो गन्धमादनः" भा॰ स॰ १० अ॰। "निर्वाय तस्माद्दुहितात् पश्चाशो लवणाम्भसः। समीपे सह्यमलयौ दर्दुरश्च महागिरिम्" भा॰ व॰ २८१ अ॰। "मलयात् दर्दुराच्चैव चन्दनागुरुसञ्चयान्" ५१ अ॰। दर्दुरः पर्वतः सन्निकृष्टतयास्त्यस्य अच्। ५तत्सन्निकृष्टे देशभेदे च। स च देशः "अथ दक्षिणेन उड्डा" इत्युपक्रमे "गिरिनगरवनादर्दुरमहेन्द्रमाहिष्मतीकच्छाः" ह॰ सं॰ १४॰अ॰ दक्षिणस्यामुक्तः। ६राक्षसभेदे संक्षिप्तसारः। ७चण्डिकायां स्त्री मेदि॰।

दर्दुरकं पु॰दर्दुराय कायति दर्दुर इव कायति शब्दायते वा कै–क। १वाद्यभेदे शब्देन मेघस्तुल्ये २भेके। स्वार्थे क। ३दर्दुरवद्भावे। [रत्नकरनिघण्टुः।

दर्दुरच्छदा स्त्री दर्दुर इव छदो यस्याः। ब्राह्मण्यां पा-

दर्द्दु(र्दू) पु॰ दरिद्रा–दरिद्रातेर्योपधे"उणा॰क उवा इकाराकारयोर्योप" उज्ज्वलदत्तः। १दद्रुरोगे भोजदेवश्चात्रायाने तु "दरिद्राद्वेर्योपधेति विधानिर्देशात् रिव आर्षेति वंहितापाठेर्योपधशब्दोपे दर्द्दुरित्यपि साधितम्। तथा रस्य इत्य आर्षेत्यन्यत्रदेशद्वितीयरेफलोपेन दर्द्दुरित्यपि साधितम्। एवञ्च रूपचतुष्टयमिति। सि॰ कौ॰।

दर्द्दु(र्दू)घ्न पु॰दर्द्दु(र्दू) हन्ति हन–ठक्। चक्रमर्द्दके शब्दर॰।

दर्द्दु(र्दू)नाशिनी स्त्री दर्द्दु(र्दू)नाशयति नश–णिच् णिनि ङीप्। तैलिनीवृक्षे राजनि॰।

दर्प पु॰ दृप–भावे घञ् कर्त्तरि अच् वा। १अहङ्कारे परावधीरणाहेतौ गुरुत्वपाद्यतिक्रामके २चित्तवृत्तिभेदे। गर्व॰ भेदे ३हर्षजन्यगर्वे ४मृगमदे मेदि॰। ५जम्बीरे त्रिका॰। ६उच्छृङ्खलत्वे ७धर्म्ममर्य्यादातिक्रमे नीलकण्ठः दर्पलक्षणविषयभेदादिकं ब्रह्मवैव॰ जन्मख॰ उक्तं यथा "अहङ्कारस्य सर्वेषां पापबीजमनङ्गजम्। ब्रह्माण्डेषु च सर्वेषां सर्वपर्य्यन्तसृष्टितः। येषां येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परे। विज्ञाय सर्वं सर्वज्ञा तेषां शान्ताहमेव च। क्षुद्राणां महतामेव येषां गर्वो भवेत् प्रिये!। एवंविधमहं तेषां चूर्णीभूतं करोमि च। चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः। ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च। धर्मस्य च यमस्यापि शाम्बस्य चन्द्रसूर्ययोः। मरुतस्य च वह्नेश्च गुरोर्वासवस्तथा। दौवारिकस्य भक्तस्य जयस्य विजयस्य च। सुराणामसुराणाञ्च भवतः कामशक्रयोः। लक्ष्मणस्यार्जुनस्यापि वायुस्य च भृगोस्तथा। सुमेरोश्च सप्तऋषीणां वायोश्च वरुणस्य च। सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा। सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च। प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च। प्राणाधिकाया राधाया अन्येषामपि का कथा। हत्वा दर्पञ्च सर्वेषां प्रसादञ्च चकार सः"।

२उत्साहे मल्लिना॰ "तेजो विहीनं विजहाति दर्पः" किरा॰ "दर्प उत्साहः" मल्लि॰।

दर्पक पु॰दर्पयति दृप–दर्पमोहनयोः णिच्–ण्वुल्। मोहकारके १कन्दर्पे अमरः। २अहङ्कारमोहयोः कारके त्रि॰।

दर्पण पु॰न॰ दृप–चन्दीपने ल्यु। १आदर्शे (आयना)। मुकुरे अमरः २नेत्रे न॰जटा॰ ३पर्वतभेदे ४नदभेदे च। "ततः पूर्वं महाराज! दर्पणो नाम पर्वतः। कुबेरो यत्र वसति धनपालैः समं सदेति। यस्मिन्नास्ते मध्यभागे रोहिणी रोहिताकृतिः। यस्मिन् लोहादिव स्रुष्टं स्वर्णतां याति तत्क्षणात्। तस्मादिदूरे स्रवति दर्पणो नाम वै नदः। हिमाद्रिप्रभवो नित्यं लौहित्य

बहुशः फले। सुसुत्पन्नं हि कौशिक्यं सर्वैर्देवमयैर्हरिः। सर्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम्। तस्य स्नानसमुद्भूतः पापदर्पस्य घातनः। तेनायं दर्पणो नाम पुरा देवगणैः कृतः। अस्मिन् स्नात्वा नदवरे योऽर्चयेद् दर्पणाचले। कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः। स याति ब्रह्मसदनमिह भूतिशतैर्युतः" इति कालि॰ पु॰ ८१ अ॰। "दर्पणनिर्मलासु पतिते घनतिमिरसुषि" माघः।

"भूयो बभौ दर्पणमादधाना" कुमा॰। "लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति" चाण॰। दर्पणस्य विम्बस्य स्वगतत्वव्यत्यस्तत्वादिमोहजनकत्वात् दर्पणत्वम्।

दर्पद त्रि॰ दर्पं ददाति दा-क। १गर्वदायकपदार्थे। २विष्णौ पु॰ "दर्पहा दर्पदः दृप्तः" विष्णुसह॰ "धर्मवर्त्मनि वर्त्तमानानां दर्पं ददाति दर्पदः" भा॰।

दर्पहन् त्रि॰ दर्पं हन्ति हन-क्विप्। १गर्वहारके २विष्णौ पु॰। दर्पदशब्दे दृश्यम्। [१३४१ पृ॰ उक्तम्।

दर्भ पु॰ दृभ-घञ् अच् वा। कुशभेदे तल्लक्षणादिकं कुशशब्दे

दर्भट न॰ दृभ-संदर्भे बा॰ अटन्। निष्टतगटहे त्रिका॰।

दर्भपत्र पु॰ दर्भस्येव पत्रमस्य। काशे राजनि॰।

दर्भपुष्प पु॰ सर्पभेदे अहिशब्दे सुश्रुतवाक्यं दृश्यम्।

दर्भमय त्रि॰ दर्भात्मकः मया॰मयट्। कुशनिर्म्मिते ब्राह्मणादौ

दर्भमूला स्त्री दर्भस्येव मूलमस्याः पाकरणेति ङीष्। औषधीभेदे। [दूरदेशादौ।

दर्भर त्रि॰ दर्भस्य सन्निकृष्टदेशादि दर्भ+अश्मा॰ रः। दर्भा-

दर्भानूप पु॰ दर्भप्रचुरोऽनूपः संज्ञात्वेऽपि तुन्नादिपाठात् पक्षे पूर्वपदात् न णत्वम्। दर्भप्रचुरेऽनूपे देशभेदे।

दर्भाह्वय पु॰ दर्भमाह्वयते सादृश्यात् आ+ह्वे-य। शुङ्गे नृपभेदे राजनि॰। [भा॰ व॰ ८३ अ॰।

दर्भि पु॰ ऋषिभेदे अर्द्धकीलाख्यं तीर्थं तेन निर्म्मितं यथाह "अर्द्धकीलस्य तत्रैव तीर्थं कुरुकुलोद्वह"। "विप्राणामनुकम्पार्थं दर्भिणा निर्मितं पुरा। व्रतोपनयनाभ्यां चाप्युपवासेन चाप्युत। क्रियामन्त्रैश्च संयुक्तो ब्राह्मणः स्नात्र संशयः। क्रियामन्त्रविहीनोऽपि तत्र स्नात्वा नरर्षभ!। चीर्णव्रतो भवेद्विद्वान् दृष्टमेतत् पुरातनैः। सप्तद्वारापि चत्वारः समानीताश्च दर्भिणा। तेषु स्नात्वा नरश्रेष्ठ न दुर्गतिमवाप्नुयात्। फलानि गोसहस्राणां चतुर्णां विन्दते हि सः।

दर्म्म त्रि॰ दृ-विदारे बा॰ म। दारके। "पुरां दर्मो अपामजः" ऋ॰ १।४५।२। मनि दर्म्मन् तत्रार्थे "दर्मा दर्मीष्ट विश्वतः" ऋ॰१।१२२।६।

दर्य्य त्रि॰ दरस्य हितम् गवा॰ यत्। दरहिते भयसाधने।

दर्व पुंस्त्री दृ-व। १राक्षसे उज्ज्वलद॰। स्त्रियां ङीष्। २उशीनरपत्नीभेदे स्त्री "उशीनरस्य पत्नीषु पञ्च राजर्षिवंशजाः। सृगा कृमिर्नवा दर्वा पञ्चमी च दृषद्वती" "नवायास्तु नवः पुत्रो दर्वायाः सुव्रतोऽभवत्" हरिवं॰ ३१ अ॰। ३हिंसे त्रि॰। घञ्। ४हिंसायां पु॰

दर्वट पु॰ दर्वाय हिंसायै अटति अट-अच् शक॰। दण्डपाशादिनि हारा॰। [२वाद्यभेदे संक्षिप्तसा॰।

दर्वरीक पु॰ दृ-विदारे फर्फरीकादि॰ नि॰। १इन्द्रे २वाते

दर्वि(र्वी) स्त्री दृ-विन् वा ङीप्। व्यञ्जनदारके (हाता) ख्याते पदार्थे खलाकायाम्।

"इक्षुजातीयमिक्षार्द्धप्रमाणं मेक्षणं भवेत्। दर्वी चाङ्गुष्ठपृष्ठ्यप्रमवदानक्रियाक्षमम्। एषैव दर्वी यस्तस्य विशेषस्तमहं ब्रुवे। दर्वी द्व्यङ्गुष्ठपृष्ठ्यप्रा तुरीयोनन्तु मेक्षणम्" कात्या॰ श्रौ॰। "मार्त्तं दर्वीपरिघट्टनेन" भा॰ व॰ यज्ञप्रश्ने। २कृष्णिकायां शब्दरत्ना॰ दर्वीकरः। [तत्रार्थे द्विरूपकोषः।

दर्विका स्त्री स्वार्थे क। दर्व्यां रावणकुटः। दर्वक पु॰

दर्वि(र्वी)होम पु॰ ६त॰। दर्वीसाधने होमभेदे "दर्वीहोमात्तु पादाय सर्वान् यः प्राप्नुते क्रतून्" भा॰ व॰ १२ अ॰।

दर्वीकर पु॰ दर्वीं फणां कर इवास्य। सर्पे अहिशब्दे दृश्यम्।

दर्वीसंक्रमण न॰ तीर्थभेदे। "दर्वीसंक्रमणं प्राप्य तीर्थं त्रैलोक्यपूजितम्। अश्वमेधमवाप्नोति स्वर्गलोकञ्च गच्छति" भा॰ व॰ ८४ अ॰।

दर्श पु॰ दृश्यन्ते शास्त्रदृष्ट्या सूर्य्यचन्द्रौ एकत्र स्थितौ यत्र। दृश-आधारे घञ्। १सूर्य्येन्दुसङ्गमकाले अमावास्यातिथौ "एकत्रस्थौ चन्द्रसूर्य्यौ दर्शनात् दर्श उच्यते" मत्स्यपु॰ कृष्णशब्देऽस्य विवृतिः। स निमित्ततया-ऽस्यास्य अच्। २दर्शकालकर्त्तव्ये यागभेदे। आग्नेयाष्टाकपालैन्द्रध्यैन्द्रपयोरूपयागत्रयात्मकोदर्शयागः। जातीयशब्दे तदितिकर्त्तव्यता दृश्या। "सर्वेभ्यो दर्शपौर्णमासौ" श्रुतिः भावे घञ्। दर्शने ३चाक्षुषज्ञाने।

दर्शक त्रि॰ पश्यति दृश-ण्वुल् दर्शयति दृश-णिच् ण्वुल् वा। १इङ्गिते २प्रधाने ३निपुणे मेदि॰। ४द्वारपाले ५॰ अमरः स हि द्वारदेशे समागतान् निवेद्य राज्ञाम

दर्शयतीति तस्य तथात्वम् ५दर्शयितरि च। "कर्म्मधार इवापारे भगवान् पारदर्शकः" भाग० १।१२।२८। तुमर्थे ण्वुल्। ६द्रष्टुमित्यर्थे। अनिमन्त्रितोऽपि गच्छेत यज्ञं गच्छेत दर्शकः" भा० अनु० १०४ अ०। दर्शकः द्रष्टुमित्यर्थः एतद्योगेन कर्म्मणि न षष्ठीत्यतः यज्ञमित्यत्र द्वितीया।

दर्शत पु० दृश्यतेऽसौ दिवि दृश-कर्म्मणि अतच्। १सूर्य्ये २चन्द्रे च त्रि० को०। ३दर्शनीये त्रि०। "स दर्शतश्रीरतिथिर्गृहेषु" रघु० १०।६१।२। "दर्शतश्रीः दर्शनीयविभूतिः" भा०।

दर्शन न० दृश-भावकरणादौ ल्युट्। १नेत्रे २स्वप्ने ३बुद्धौ ४धर्म्मे ५दर्पणे ६शास्त्रे मेदिनि० ७दृष्ट्यायाम् अजयपा० ८वर्षे त्रिकाण्ड० ९निभालने जटाध०। दृश्यते यथार्थतया ज्ञायते पदार्थोऽनेन करणे ल्युट्। अध्यात्मवेदके १०शास्त्रभेदे तानि च नास्तिकबौद्धजैनवैष्णवास्तिकादिमतभेदेन नानाविधानि। तानि च सर्वदर्शनसंग्रहे तत्तन्मतप्रदर्शनावसरे दर्शितानि। तत्रास्तिकदर्शनानि षट् तत्र गौतमेन न्यायदर्शनं, कणादेन वैशेषिकं, कपिलेन साङ्ख्यं, पतञ्जलिना योगदर्शनं, जैमिनिना पूर्वमीमांसाख्यासेन वेदान्तदर्शनम् प्रणीतम्। तत्र वेदान्तदर्शनं व्यासप्रणीतमेकमपि बहुभिर्विद्वद्भिः द्वैताद्वैतविशिष्टाद्वैतशुद्धाद्वैतप्रभेदेन नानाविधं यथा बुद्धस्यैकस्योपदेशकर्त्तुरपि विनेयानां बुद्धिवैचित्र्यात् स्वस्वबुद्ध्यनुसारिपदार्थकल्पनया योगाचारमाध्यमिकादिभेदा उपजाताः। एवं वेदान्तस्यापि "षड्दर्शनानि मेऽङ्गानि पादौ कुक्षिः करौ शिरः। तेषु भेदस्तु यः कुर्यान्मदङ्गच्छेदको हि सः। एतान्येव कुलस्यापि षड्ङ्गानि भवन्ति हि। तस्मान्मदात्मकं कौलमहं कौलात्मकः शिवे!" तन्त्रशास्त्रम्। पदार्थभेददर्शने फलभेदो यथा "नन्द उवाच। येषाञ्च दर्शने! पुण्यं पापञ्च यस्य दर्शने। तत्सर्वं वद सर्वज्ञ! श्रोतुं कौतूहलं हि मे। श्रीभगवानुवाच। शुद्धब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने। देवतापतिमादर्शात् तीर्थस्नायी भवेन्नरः। सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा। सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम्। भक्त्या गवाञ्च वृद्धानां वृद्धानाञ्च विशेषतः। गजेन्द्राणाञ्च सिंहानां श्वेताश्वानां तथैव च। मूकानाञ्च पिकानाञ्च खञ्जनानां तथैव च। हंसानाञ्च मयूराणां चाषानां शङ्खपक्षिणाम्। वृषभप्रमुखधेनूनामश्वानां तथैव च। पतिपुत्रवतीनाञ्च नराणां तीर्थवासिनाम्। प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः। शुक्लानां हीरकाणाञ्च माणिक्यानां महाशय!। तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम्। फलानि शुक्लधान्यानि दधि मधूनि च। पूर्णकुम्भञ्च लाजाश्च राजेन्द्र दर्पणं जलम्। मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः। गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्। पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः। देवाश्रितं देवघटं सुगन्धिपवनं तथा। शङ्खञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः। शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा। कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द! पुण्यं लभेन्नरः। पताकामक्षयवटं तरुं देवोत्थितं शुभम्। देवालयं देवस्नानं दृष्ट्वा पुण्यं लभेन्नरः। शुक्तिं प्रवालं रजतं स्फाटिकं कृष्णमूलकम्। गङ्गामृदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः। पुराणं पुस्तकं शुद्धं सबीजं विष्णुयन्त्रकम्। स्निग्धदूर्वाञ्चितं रत्नं दृष्ट्वा पुण्यं लभेन्नरः। तपस्विनं द्विजमन्त्रं सगुरुं कृष्णसारकम्। यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः। गोभूमं गोमयं दुग्धं गोभूतिं गोष्ठ गोसदम्। पङ्कजस्थान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः। रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्। सवेदिकां सुवसनां दिव्यभूषणभूषिताम्। वेश्यां वेणुकरीं गन्धं सदूर्वाक्षततण्डुलम्। सिद्धान्नं परमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम्। कार्त्तिक्यां पूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्। संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम्। हिङ्गुलायां तथाष्टम्यामिषे मासि सिते शुभे। श्रीदुर्गाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम्। शिवरात्रौ च काशग्रामे विश्वनाथस्य दर्शनम्। सोपवासं पूजाञ्च करोति जन्मखण्डनम्। जन्माष्टमीदिने भक्त्या दृष्ट्वा मां विन्ध्यमाधवम्। प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम्। उपोष्य व्रजभूमौ च भाण्डीरे माधवीवने। संपूज्य राधां मां चैव करोति जन्मखण्डनम्। पौषे मासि शुक्लरात्रौ यत्र तत्र स्थिते नरः। पद्मायाः प्रतिमां दृष्ट्वा करोति जन्मखण्डनम्। सप्रजन्म भवेत्तस्य पुत्रः पौत्रो धनेश्वरः। उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने। दृष्ट्वा काशग्रामसुपूर्णां करोति जन्मखण्डनम्। दत्त्वा विष्णुपदे पिण्डं विष्णुं यत्र विलोकयेत्। पितॄंश्च स्वात्मनश्चैव करोति जन्मखण्डनम्। प्रयागे मुण्डनं कृत्वा यत्र पितॄन् प्रतर्पयेत्। उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्। उपोष्य

पुष्करे स्नात्वा किं वा बदरिकाश्रमे । संपूज्य दृष्ट्वा मामेव करोति जन्मखण्डनम् । शिखां कृत्वा च बदरीं भुङ्क्ते बदरिकाश्रमे । दृष्ट्वा मत्प्रतिमां नन्द ! करोति जन्मखण्डनम् । दोलायमानं गोविन्दं दृष्ट्वा वृन्दावने च माम् । दृष्ट्वा संपूज्य नत्वा च करोति जन्मखण्डनम् । भाद्रे दृष्ट्वा च मद्भक्तं मामेव मधुसूदनम् । संपूज्य नत्वा भक्त्या च करोति जन्मखण्डनम् । रथस्थञ्च जगन्नाथं यो द्रक्ष्यति कलौ नरः । संपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम् । उत्तरायणसंक्रान्त्यां प्रयागे स्नानमाचरेत् । संपूज्य दृष्ट्वा मामेव करोति जन्मखण्डनम् । कार्त्तिक्यां पूर्णिमायाञ्च दृष्ट्वा मत्प्रतिमां शुभाम् । उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम् । चन्द्रभागासमीपे च माघ्याञ्च मां नमेत् शनैः । राधया सह मां दृष्ट्वा करोति जन्मनः क्षयम् । रामेश्वरं सेतुबन्धे आषाढ़पूर्णिमादिने । उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम् । दीननाथं दिनकरं लोलार्कं चोत्तरायणे । उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम् । ऋणिकोष्ठे सुवसने कल्पवृक्षे सुगह्वरे । विघ्नन्दके राजकोष्ठे नन्दके पुष्पभद्रके । पार्वतीप्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम् । नन्दिनं शङ्करं दृष्ट्वा करोति जन्मनः क्षयम् । त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ । सप्तपोष्य दधि प्राश्य मां दृष्ट्वा मुक्तिमाप्नुयात्" ब्रह्म० वै० जन्म० ख० । शकुनभेददर्शने फलभेदः शकुनशब्दे दृश्यम् ।

दर्शनप्रतिभू पु०दर्शनाय प्रतिभूः । प्रतिभूभेदे "दर्शने प्रातिभाव्ये च विधिः स्यात् पूर्वचोदितः" "यो यस्य प्रतिभूस्तिष्ठेत् दर्शनायेह मानवः । अदर्शयन् स तं तस्य प्रयच्छेत् स्वधनादृणम्" मनुः । वीरमि० विस्तरेण तद्विधिरुक्तो यथा

"अथ प्रतिभूः तत्र प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः । तद्भेदानाह बृहस्पतिः "दर्शने प्रत्यये दाने ऋणिद्रव्यार्पणे तथा । चतुःप्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः" । प्रत्ययो विश्वासः दानम् ऋणापाकरणार्थमर्थार्पणम् । ऋणिद्रव्यार्पणम् ऋणिनो यद्द्रव्यं ऋणोपकरणादि तदर्पणम् । चतुःप्रकाराणां प्रतिभूनां प्रातिभाव्याङ्गीकारप्रकारं दर्शयति स एव "आहैको दर्शयामीति साधुरित्यपरोऽब्रवीत् । दाताहमेतद्द्रविणमर्पयाम्यपरोऽब्रवीत्" । एको दर्शनप्रतिभूरहमेनं यत्रावनमहम् दर्शयिष्यामीत्याह । अपरः प्रत्ययप्रतिभूरेषः साधुर्न त्वां प्रतारयिष्यति यतोऽयं श्रेष्ठियपुत्रोऽस्य सर्वस्वसम्पन्नो यामोऽस्ति मत्प्रत्ययेनास्य द्रव्यं देहीति ब्रवीति । दानप्रतिभूर्यद्यपि न ददाति तदा सद्धिकमस्यमहं दातेति । अपरः ऋणिद्रव्यार्पणप्रतिभूर्यद्यपि न ददाति तदाहमेतदीयगृहोपकरणादिकमर्पयिष्यामीति कथयतीत्यर्थः । दर्शनप्रतिभुवा यदा धनिकस्य धारणिकदर्शनापेक्षा तदैव स दर्शनीयः इत्याह कात्यायनः "दर्शनप्रतिभूर्यस्तु देशे काले च दर्शयेत्" । यस्मिन् देशे काले च धनिकस्तद्दर्शनमपेक्षते तत्रैव दर्शयेत् अधमर्णमिति शेषः । दर्शिते च तस्मिन् धनिकेन प्रातिभाव्यात् स मोक्तव्य इत्युत्तरार्द्धेनाह स एव । "यद्यसौ दर्शयेत् तत्र मोक्तव्यः प्रतिभूर्भवेत्" । एवं प्रत्ययादिप्रतिभुवोऽपि तदविसंवादे मोक्तव्याः, अन्यथा धारणिकन्देयं धनं दाप्या इत्याहुः कात्यायनबृहस्पती "यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः । अदर्शयन् स तत्तस्मै प्रयच्छेत् स्वधनादृणम् । आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम् । उत्तरौ तु विसंवादे तौ विना तत्सुतौ तथा" । यत्तु योगीश्वरेण प्रतिभुवान्त्रैविध्यमेवोक्तम् । "दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते" तद्दानार्पणयोरनतिभेदाभिप्रायेण । "आद्यौ तु वितथे दाप्या वितरस्य सुता अपि" । वितथे दर्शनप्रत्यये विसंवादे इतरस्य सुता न दाप्याः । सुता इत्यभिधानात् पौत्रा इत्युक्तम्भवति दानं स्वधनार्पणं धनिकाय । अर्पणन्तु धारणिकधनमानीय तस्य अर्पणं धनिकस्य स्वधनलाभे उभयतो न विशेषः अतएव सूक्ष्मभेदविवक्षया पञ्चप्रकारा अपि प्रतिभुवो हारीतेनोक्ताः । "अभये प्रत्यये दाने उपस्थाने प्रदर्शने । पञ्चस्वेषु प्रकारेषु साहस्रो हि प्रतिभूर्बुधैः" अभयसुपद्रववारणम् । उपस्थानमत्र धारणिकधनस्य धनिकायानीयार्पणं न दर्शनतस्य पृथङ्निर्देशात् पञ्चस्वित्यनन्वयाच्च । व्यासस्तु सप्तभिर्विधयैः सप्तप्रकारं प्रतिभुवमाह । "लेख्ये कृते च दिव्ये वा दानप्रत्ययदर्शने । गृहीतबन्धोपस्थाने ऋणिद्रव्यार्पणे तथा" । प्रतिभूर्याहस्र इत्यत्र प्रकृतम । कात्यायनोऽपि "दानोपस्थानवादेषु विश्वासगपथाय च । लग्नकङ्कारवेदेवं यथायोग्यं विपर्यये" । वादोविवादस्तत्र प्रतिभूग्रहणम् । "उभयोः प्रतिभूर्याहस्रः समर्थः कार्यनिर्णय" इति । योगीश्वरेणाप्युक्तञ्च प्रागेव व्याख्या-

तम् । दर्शनप्रत्ययदानेषु यथावयं सर्वेषामलभावसम्भव इति परमार्थः । दर्शनप्रतिभुवे नष्टधारणिकान्वेषणाय कालावधिर्देय इत्याह । बृहस्पतिः "नष्टस्यान्वेषणे कालं दद्यात् प्रतिभुवे धनी । देशान्तरगतः षण्मासं वार्षमथापि वा" । सार्द्धमासमिति परमावधिः । तथा च कात्यायनः "नष्टस्यान्वेषणार्थन्तु देयं पञ्चदशं परम् । यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् । काले प्रतीते प्रतिभूर्यदि तं नैव दर्शयेत् । स तमर्थं प्रदाप्यः स्यात् प्रेते चैष विधिः स्मृतः" । परं परमावधिभूतम् । प्रतीतेऽन्वेषणाय परिकल्पिते, प्रेते चैष विधिरिति धारणिके मृते प्रतिभूस्तमर्थं प्रदाप्य इति विधिः कालावधिविशेषस्तत्रान्वयबाधात् । एतदपि दैवराजकृतप्रतिबन्धाभावे बोध्यम् । अतएव कात्यायनः "दर्शनप्रतिभूर्यत्र देशे काले न दर्शयेत् । निबन्धाभावहेतुत्वं दैवराजकृताद्ते" । निबन्धाभावः । दैवकृतो दीर्घरोगपरचाटिरूप ऋणदानप्रतिबन्धः । राजकृतो बन्धनाशेषदण्डादिरूपः । प्रतिभूभेदेन स्मृतमाह नारदः "ऋणिप्रत्यर्थिकर्वेतु प्रत्यये वाद्य स्थापिते । प्रतिभूस्तद्धनं दद्यादनुपस्थापयंस्तथेति" । ऋणिप्रत्यर्थिभ्यां प्रतिभूर्द्वेधा साध्येषु निर्द्धनत्वादिना स्वयमप्रत्यर्पयत्सिति दानप्रतिभूविषयम् । प्रत्यये विश्वासे स्थापिते विसंवादिते इति प्रत्ययप्रतिभूविषयम् । अनुपस्थापयन्ऋणिनमदर्शयन्ऋणिनः सकाशादाधिस्तं पर्याप्तं तद्धनं वोत्तमर्णायानर्पयन्निति दर्शनद्रव्यार्पणप्रतिभूविषयमिति विवेकः" ।

दर्शनीय त्रि॰ दृश–कर्म्मणि अनीयर् । १मनोहरे, २दर्शनयोग्ये च धरणिः । "दर्शनीयतमो नृणामिदं वचनमब्रवीत्" भा॰ स॰ ७५ अ॰ ।

दर्शप पु॰ दर्शेन दर्शनेन पिबन्ति पा–क । दर्शनमात्रेण पानेषु देवेषु "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा॰ उ॰ दर्शनमात्रेण तेषां तत्रिवृत्तपानसम्भवस्योक्तेस्तथात्वम् । "गुह्याश्च निर्माणरताख्यदेवाः सर्वागना दर्शपा आज्यपाश्च" भा॰ अनु॰ १६ अ॰ । [रात्रौ क्षेमच॰ ।

दर्शयामिनी स्त्री दर्शस्येव यामिनी । अन्धकारयुक्तायां

दर्शयितृ त्रि॰ दृश–णिच्–तृच् । १दर्शनकारके दर्शके "पथः श्रुतेर्दर्शयितारः ईश्वराः" रघुः २प्रतीहारे द्वारपाले पु॰

दर्शविषट् पु॰ दर्शे अमावास्यायां विषट् नामोऽदर्शनमस्य । चन्द्रे त्रिका॰ । [दिते च क्षेमच॰ ।

दर्शित त्रि॰ दृश–णिच्–क्त । १प्रकटिते २प्रकाशिते ३प्रतिपादिते च । "तद्दर्शितसुदासीनं स्वामेव पुरुषं विदुः" कुमा॰ । "तस्मै सुनिर्दोषदलिङ्गदर्शी" रघुः । मन्त्रदर्शिभिरुच्यते" मनुः । स्त्रियां ङीप् । प्रतीपदर्शिनी ।

दर्शिवन् त्रि॰ दृश–"अन्येऽपि दृश्यन्ते" इति पा॰ दृश्यनिप् । द्रष्टरि । "कुरूणां पाण्डवानां च भयात् प्रत्यक्षदर्शिवान्" भा॰आ॰ ६ अ॰ । "अन्यो न त्वामृते क्षेत्ता विद्यते सर्वदर्शिवम्" स्कं॰ सि॰ । "अत्र दर्शिवसु" इति शब्दकल्पनमतीव प्रामादिकम् ।

दल भेदे भ्वा॰पर॰अक॰ भेदने सक॰ सेट् । दलति अदालीत् शिचि वा घटा॰दलयति दालयति । ददाल देलतुः दलितः । दला "ददाल भूर्नभोरन्ध्रं गोष्पदम् ववर्ष च" "ददाल भूः पुपूरे द्यौः कपीनामपि निस्वनैः" "अदालिषुः शिलादेहे भूयस्यभूवन् महाद्रुमाः" भट्टिः "दलति शतधा यन्न हृदयम्" अमरु॰ ।

दल भेदने चुरा॰ उभ॰सक॰सेट् । दालयति-ते अदीदलत् त । "स्तृष्टिनाऽदालयत्तस्य" "दालयत्यष्टौ कुलच्छाम्बतः" अनर्घरा॰ । भेदश्चेह द्विधाकरणं विकसनन्तु तत्रविकसने । "दरविदलितमल्लीवल्लिचञ्चत्परागे" गीतगो॰ ।

दल न॰दल–अच् १एतत्सेधे २खण्डे ३पत्रे ४छदे मेदि॰ । ४वने शब्दर॰ ५तमालपत्रे राजनि॰ ६सर्वे लीलावती "प्राग्रापराधास्ताद्याः सूरज्या वेणुदलेन वा" मनुः "ताम्बूलीनां दलैस्तत्र रचितापानभूमयः" रघुः "वापीतललीनमहानीलदलासु" माघः । "व्यङ्गुः स्वर्णप्रभयुक्तः मनिजदलयुतः कीटगः कीटशोऽसौ" लीला॰ ।

दलकोष पु॰ दलान्येव कोषो यस्य । कुन्दपुष्पवृक्षे शब्दमा॰ । तस्य पुष्पे कोषान्तराभावात् तथात्वम्

दलट त्रि॰ दल–वा अटन् । द्विधाकारके । तेन निर्वृत्त अरी॰ वुञ् । दालिटक तन्निर्वृत्तादौ त्रि॰ ।

दलनिर्मोक पु॰ दलतीति दलं वल्कलं निर्मोक इव यस्य मूर्ज्जपत्रवृक्षे शब्दमाला । तस्य हि वल्कलस्य निर्मोककारत्वात्तथात्वम् ।

दलन न॰ दल–करणे ल्युट् । १दलनकारणे (डेला) २लोष्टे स्त्री॰ ङीप् रत्नावली । तथाभूतस्त्रियां स्त्री "प्रति पत्रपलदलनी" विद्धन्मनो॰ ।

दलप न॰ दल–कपन् । १प्रहरणे उज्ज्वलद॰ । २विदारकमात्रे त्रि॰२खण्डे उणादि॰ । दलं पाति पा–क । ४दलपतौ

दलाधिपदलपत्रादयोऽप्यत्र पु० । [हि दलाकार पुष्पा"

दलपुष्पा स्त्री दल इव पुष्पमस्याः । केतक्याम् राजनि० । सा

दल मा)शाली स्त्री दलेन मलति सम्बध्नाति मल--णिनि यनते शल--णिनि वा । कङ्कुकशाके पारस्करनि० । [रत्नमा०

दलसारिणी स्त्री दले पत्रे सारोऽस्त्यस्या इनि । केतके

दलसूचि(ची) स्त्री दलस्य सूचिरिव । कण्टके हारा० ।

दलसा स्त्री ६त० । पत्रसिरायाम् हेमच० ।

दलाढ़क पु०दलेनाढ़क इव । १स्वयंजाततिलवृक्षे, २शूद्रग्राम्, ३गैरिके ४फेने, ५खातके, ६नागकेशरे, ७महत्तरे, मेदि० दलुन्दे, ९करिकर्णे, १०गिरीषे, ११वात्यायाञ्च हेमच० ।

दलाढ्य पु० दलेन ढ्येनाढ्यः । पङ्ककर्वटे (दलदलिया) कर्दमभेदे त्रिका० । [शूद्रमनवृक्षे च पु० शब्दर० ।

दलामल न० दलेनामलम् । १मरुवके मेदि० । २मदनवृक्षे

दलाम्ल न० दलेनाम्लम् । चुक्रे (चुकापालङ्क) राजनि० ।

दलि स्त्री दल- इन् । १लोष्ट्रे उज्ज्वल० तत्रार्थे पुंस्त्री रन्तिदेवः । संज्ञायां कन् । दलिक शकाटे हेमच० ।

दलित त्रि० दल--क्त । १विकशिते । २खण्डिते ३अर्दीकृते । "व्येका दलिता विभाजितेष्टेन" "दलिता बाधे तयोः स्यातम्" लीला० । [ङीप् ।

दलिन् त्रि० दल--इनि० मत्वर्थे इनि । दलयुक्ते स्त्रियां

दलेगन्धि पु० दले गन्धो यस्याः इत् समा० सप्तम्या अलुक् । सप्तच्छदवृक्षे (छातिम गाछ)त्रिका० ।

दलोद्भव त्रि० दलादुद्भवति उद्+भू--अच् ५त० । दलजाते २मधुभेदे न० । "छर्दिमेहप्रशमनं मधु रूक्षं दलोद्भवम्" सुश्रु० ।

दल्भ पु०दल--भ । १ऋषिभेदे २चक्रे च उज्ज्वल०ततो गर्गा० अपत्ये घञ् । दाल्भ्य तदपत्ये पुंस्त्री । "तेन तं ह वको दाल्भ्यो विदाञ्चकार" छान्दो० ।

दल्मि पु० दल--मि । १इन्द्रे २वज्रे उज्ज्वलद० । ततो मत्वर्थे मतुप् यवादि० मोपकत्वेऽपि न मस्य वः । दल्मिमत् वज्रयुक्ते इन्द्रे । [दलस्यादूरदेशादौ ।

दल्य त्रि० दलस्यादूरदेशादि दल+चतुरर्थ्यां बला० य ।

दव गतौ भ्वा० पर० सक० सेट् इदित् । दन्वति अदन्वीत् । ददन्व । क्विपि दन् ।

दव पु० दुनोति दु-अच् । १वने, २वनानले च अमरः । भावे अप् । ३उपतापे । "अतिमात्रं दववद्दहन्नमि" माघः ।

दवथु पु०दु-उपतापे भावे अथुच् । उपतापे । "स दवथु वपुर्वचोविषम्" माघः "केचिद्वेपथुमाहेदुरल्पो दवथुस्तमम्" भट्टिः । [रोहिषवृक्षे राजनि० ।

दवदग्धक न० दवेन दग्धं सत् कायति प्रकाशते कै--क ।

दवदहन पु० दवजातो वनजातो दहनः । दावानले । "वरःवर्ष्येऽवर्ष्ये दवदहनदाहव्यतिकरः" उद्भटः । "किञ्चात्मजविश्लेषज्वरदवदहनप्रिशाभिः" भाग०५।८।२७श्लो० "दवाग्निप्रभृतयोऽप्यत्र "शयाम इच्छापि विना दवाग्निः" रघुः ।

दवि दूरीकरोति दूर+णिच्--ष्यू लदूरेत्यादिना दवादेशः नामधातुः दूरीकरणे सक० सेट् । दवयति अदी(द)दवत् । "दवयदतिरयेण प्राप्तसुवीविभागम्" भट्टिः ।

दविष्ठ त्रि० इदमेषामतिशयेन दूरम् इष्ठन् दवादेशः । दूरतमे । ईयसुन् दवीयस् तत्रार्थे त्रि० "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः स्त्रियां ङीप् । "नैव शक्तिरपि दवीयसी" किरा० । [यत्-त ।

दश दीप्तौ चु० उभ० अक० सेट् इदित् । दंशयति-ते अददंश-

दश दंशने चुरा०आत्म० सक० सेट् इदित् । दंशयते अददंशत

दशक न०दश परिमाणमस्य कन् । दशति, दशसङ्ख्याम् । "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" । "मृगया ऽक्षो दिवास्वप्नः परीवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः" मनुः ।

दशकण्ठ पु० दश कण्ठा यस्य । १रावणे हेमच० ।

दशकण्ठजित् पु० दशकण्ठं जयति जि--क्विप् । १रामे त्रिका० । दशकण्ठारिप्रभृतयोऽप्यत्र "दशकण्ठारिगुरुं विदुर्बुधाः" रघुः ।

दशकन्धर पु० दश कन्धरा यस्य । रावणे हेमच० । शृगो० रलोमे दशकन्धोऽप्यत्र "दशकन्धरालक्ष्मणोस्तथा युद्धमभून्महत्" भा० व० २८९ अ० । [त्रिका० ।

दशकन्धरजित् पु० दशकन्धरं जयति जि--क्विप् । रामे

दशकर्मन् न० दशविधम् कर्म । गर्भाधानादिश्मशानान्ते दशविधे संस्कारकर्मणि । दशकर्मपद्धत्यादौ तद्विवृतिर्दृश्या ।

दशकुलवृक्ष पु० दशगुणितः कुलवृक्षः संज्ञात्वात् कर्मधा० वा ष० त० । तन्त्रोक्ते कुलवृक्षदशके कुलवृक्षदशकं च तन्त्रसारोक्तं यथा "क्षेमातकः करञ्जश्च विल्वाम्रत्यकदम्बकाः । निम्बो वटोदुम्बरौ च धात्री चिञ्चा दश स्मृताः" "साधकः प्रातरुत्थाय कुलवृक्षं प्रचक्ष्य च" ।

दशक्षीर न० दशविधं क्षीरम् । मृगीगर्दभीक्षीरसहिते

"गव्यमाजं तथा चौद्भाविकं माहिषञ्च यत् । अश्वायाश्चैव नार्याश्च करेणूनां तथैव च" इत्युक्ताष्टविधक्षीररूपे क्षीरदशके "पुनः पचेत् दशक्षीरं सिताभ्यक्तचन्दनौ" सुश्रुतः ।

दशग्रामपति पु० दशानां ग्रामाणां पतिः उत्तरपदद्विगुः । दशग्रामाध्यक्षे । तत्प्रियोगादि मनुनोक्तं यथा

"ग्रामस्याधिपतिं कुर्यात् दशग्रामपतिं तथा । विंशतीशं शतेशञ्च सहस्रपतिमेव च । ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम् । शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम् । विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् । शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् । यानि राज्ञप्रदेयानि प्रत्यहं ग्रामवासिभिः । अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् । दशी कुलन्तु भुञ्जीत विंशी पञ्चकुलानि च । ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् । तेषां ग्राम्याणि कार्याणि पृथक् कार्याणि चैव हि । राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः" ।

दशग्रामिक त्रि० दश ग्रामा अधिकृतत्वेन सन्त्यस्य ठन् । तस्यादूरदेशादि कच्छा० चतुरर्थ्यां छच् वा । १दशग्रामाधिपे २तस्यादूरदेशादौ । स्त्रियां ङीष् चतुरर्थ्यां काश्या० ठञ् ञिठो वा । दाशग्रामिक तस्यादूरदेशादौ त्रि० ठञि स्त्रियां ङीष् ञिठे टाप् इति भेदः ।

दशग्रामिन् पु० दश ग्रामा अधिकृतत्वेन सन्त्यस्य इनि । दशग्रामाधिपतौ । "खसौम्ये दद्यात् ग्रामस्य पदं वा यत्र गच्छति । पञ्चग्रामी बहिः कोशात् दशग्राम्यथ वा पुनः" याज्ञ० ।

दशग्रीव पु० दश ग्रीवा अस्य । १रावणे ।

"पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ । कुम्भकर्णदशग्रीवौ भुवेनाप्रतिमौ भुवि" । "दशग्रीवस्तु सर्वेषां श्रेष्ठो राक्षसपुङ्गवः । महोत्साहो महावीर्यो महासत्त्वपराक्रमः" भा० व० २७४ अ० । २अक्षुरविशेषे "दशग्रीवश्च बाजी च गोवशाखा दशारवः । टिट्टिभो विटभूतश्च संस्थादर्शेन्द्रतापनः" भा० व० ९ अ० । ३दशग्रीवस्य पुत्रभेदे । "शिशुपालो दशग्रीवो रौक्मेयोऽथोपदिशो बली । सदामृक्षयमा वीरा वीर्यवन्तो महाबलाः" हरिवं० ११७ अ० । ४एकादशमन्वन्तरीयेन्द्रशत्रुभेदे तदुपक्रमे गरु० पु० ८७ अ० "एकैकस्मिंश्चकस्तेषां गन्धर्वेन्द्रश्च वै द्वयः । दशग्रीवो रिष्टकश्च स्त्रीभ्यो घातयिष्यति" ।

दशज्योति(स्) पु० दशभ्राजः पुत्रभेदे । "दशभ्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः । दशज्योतिः शतज्योतिः सहस्रज्योतिरेव च । दशपुत्रसहस्राणि दशज्योतेर्महात्मनः" भा० आ० १ अ० ।

दशत् स्त्री दश परिमाणमस्य अति । दशानां वर्गे-दशके दशसङ्ख्यायाम् । "स वै दक्षिणा नयन् । अन्यूना दशतो नवेद्यथा एकां दाक्षन्न स्यादृशभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यथा द्वे दाक्षन्न स्यात् पञ्चभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यथा त्रीणि दाक्षन्न स्यात्त्रिभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यथा पञ्च दाक्षन्न स्यादृभ्यो तथा दशतमुपावर्त्तये देवमा शतात्तयो ह्यस्यैषान्यूना विराडसि लोके काम-दुघा भवति" शतब्रा० ९।५।८।१६। "या प्रथमा दशदयं स लोको या द्वितीयान्तरिक्षं तया तृतीया द्यौः सेममेव लोकं प्रथमया दशतारोहन्नन्तरिक्षं द्वितीयया दिवं तृतीयया तथैवैतद्यजमान इममेव लोकं प्रथमया दशता रोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया" ८।५।२।१५ । "एकादश दशत आलभते । एकादशाक्षरा वै वीर्यं त्रिष्टुविन्द्रियस्यैव वीर्यस्यावरुद्ध्या एकादश दशत आलभते दश वै पशोः प्राणा आत्मैकादशः प्राणैरेव पशूनुत्समर्द्धयति" शत० ब्रा० १२।२।५।४ ।

दशतय त्रि० दशावयवा यस्य दशानामवयवा वा संख्यायाः अवयवे तयप् । १दशसंख्यायां २तत्संख्यान्विते त्रि० स्त्रियां ङीप् । "अथास्य संस्तविका देवा इन्द्रः सोमो वरुणः पर्जन्य ऋतव आग्नावैष्णवं हविर्न त्वक्संस्तविको दशतयीषु विद्यते" निरु० ७।८ । "तदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते" २० ।

दशति स्त्री दशावृत्ता दश नि० । दशावृत्तदशके शतसंख्यायां "कालेन महता कद्रुरण्डानां दशतीर्दश । जनयामास विप्रेन्द्र !" भा० आ० १६ अ० । यथा "दशावृत्ता नव नवतिः तथा दशावृत्ता दश दशतिः शतमित्यर्थः । दश दशतीर्दशशतानीत्यर्थः नीलक० । तत्संख्यायाञ्च "ओङ्कारस्याथ जायन्ते सुतयो दशतिर्दश" भा० उ० १०७ अ०

दशदशिन् त्रि० दशावृत्ता दश परिमाणमस्य इनि । शतगुणिते स्त्रियां ङीप् । [धर्मभेदे दशकशब्दे दश्यम् ।

दशधर्म पु० दशविधो धर्मः । सर्ववर्णसाधारणे मनूक्ते

दशधा अव्य० दशानां प्रकारः धाच् । दशप्रकारे "गायत्रीं दशधा जप्त्वा ततः सन्ध्यां समाचरेत्" भवि० त० । "श्रुते धर्मे रिक्तस्थानं दशधा परिकल्पयेत्" मनुः ।

दशन् त्रि॰ दन्तुश बा॰—कनिन् । संख्याविशेषे १द्विगुणितपञ्चके २ततसंख्यान्विते च । ततसंख्यावाचकाश्च एकादिशब्दे उक्ताः "दिशा दशोक्ताः पुरुषस्य लोके सहस्रमाहुर्दशपूर्ण्यं गतानि । दशैव मासान् बिभ्रति गर्भवत्यो दशैरेका दश दाशा दशार्हाः" भा॰ व॰ १३४ अ॰ । आसमन्तादीरयन्ति उपदिशन्ति एरका उपदेष्टारः दशोपनिषदां प्राधान्येन दशत्वात् तत्प्रतिपाद्योपदेशकत्वेन तेषां दशत्वम् ।

दशन न॰दश्यतेऽनेन वा दन्तुश—भावे करणादौ वा ल्युट् नि॰ नलोपः । १कवचे वर्मणि २शिखरे पु॰ मेदि॰ ।३दन्ते पुं॰ न॰ अमरः । "बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्भवा" रघुः । "तनुलोमकेशदशनां मृदङ्गीमुद्वहेत् स्त्रियम्" मनुः । "ताम्बूलाक्तं दशनमसकृत् दर्शयन्तीह चेटी" सा॰ द॰ ।

दशनच्छद पु॰दशनान् दलान् छादयति छादि—घञ् ह्रस्वः । ओष्ठे "दशनो दशनच्छदान्" भा॰ आ॰ १०२ अ॰ ।

दशनपद न॰दशनस्य दशनक्षतस्य पदम् । दशनक्षतस्थाने तदङ्के "दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्" गीतगो॰

दशनवासस् न॰ दशनस्य वास इवाच्छादकत्वात् । ओष्ठमात्रे अमरः ।

दशनवीज पु॰दशन इव बीजमस्य । दाडिमीवृक्षे पारस्करनि॰

दशनाङ्ग पु॰ ६त॰ । दशनक्षते । [(चुकापालङ) शब्दच॰ ।

दशनाढ्या स्त्री दशन आढ्यो यस्याः संबन्धात् । चुक्रिकायां

दशनोच्छिष्ट न॰ दशनेनोच्छिष्टं यत्र । अधरादिचुम्बने "रेवतीदशनोच्छिष्टपरिपूतपुटे दृशौ" माघः । २निश्वासे पु॰ ६त॰ । ३दन्तोच्छिष्टे त्रि॰ मेदि॰ ।

दशप पु॰ दश ग्रामान् पाति रक्षति पा—क । दशग्रामीरक्षके राजनियुक्ते पुरुषभेदे । तच्चिह्नोगादिकं भा॰ शा॰ ८७ अ॰ उक्तं यथा

"ग्रामस्याधिपतिः कार्यो दशग्राम्यास्तथाऽपरः । द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत् । ग्रामेयान् ग्रामदोषांश्च ग्रामिकः प्रतिभावयेत् । तान् ब्रूयाद्दशपायासौ स तु विंशतिमाय वै । सोऽपि विंशत्यधिपतिर्दत्तं जानपदे जने । ग्रामाणां शतपालाय सर्वमेव निवेदयेत् । यानि ग्राम्याणि भोज्यानि ग्रामिकस्तान्युपाश्नीयात् । दशपस्तेन भर्त्तव्यस्तेनापि द्विगुणाधिपः । स च ग्रामशताध्यक्षो भोक्तुमर्हति सत्कृतः । महान्तं भारतश्रेष्ठ ! सुस्फीतं जनसङ्कुलम् । तत्र ह्यनेकपायत्तं राष्ट्रो भवति भारत ! । ग्रामानगरमर्हन्तु सहस्रपतिरुत्तम । धान्यं स्थिरण्यं भोगेन भोक्तुं राष्ट्रीयसङ्गतः । तेषां संग्रामकृत्यं स्यात् ग्रामकृत्यञ्च तेषु यत् । धर्मज्ञः सचिवः कश्चित् तत् प्रपश्येदतन्द्रितः" ।

दशपञ्चतपस् पु॰ दशसु इन्द्रियेषु पञ्चसु वह्निषु च तपो यस्य । इन्द्रियजयपूर्वकपञ्चाग्नितपश्चारिणि । "अम्बुभक्षो वायुभक्षश्च दन्तोलूखलिकस्तथा । अश्मकुट्टो निरशनः दशपञ्चतपाश्च यः" हरिवं॰ ४५ अ॰ । [बुद्धे । हेमच॰

दशपारमिताध्वर पु॰ दशभिर्बलैः पारमितोऽध्वरो येन ।

दशपुर न॰दश दिशः पिपर्त्ति पृ—क । १कैवर्त्तीमुस्तके अमरः । दश पुरो यत्र अच् समा॰ । २मालवदेशैकखण्डे मेदि॰ स च देशः वृ॰सं॰१४ अ॰ अथ दक्षिणेन लङ्कोत्सुपक्रमे "दशपुरगोनर्द्दकोलकाः" दक्षिणस्यामुक्तः । "पातीकुर्वद्दशपुरवधूनेत्रकौतूहलानाम्" माघः ।

दशपुरुष पु॰ दशगुणितः पुरुषः । स्वजनकावधिपुरुषदशके । "यो मातृतः पितृतश्च दशपुरुषं समनुष्ठिता विद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो नाब्राह्मण्यं निनयेयुः" आश्व॰ श्रौ॰ ९।३।२० । "येषां मातृतः पितृतश्चोभयतो ये दशपूर्वाः पुरुषाः ते विद्यया तपसा पुण्यैः प्रतिषिद्धवर्जितैश्च युक्ताः सम्यगनुष्ठितवन्तो वैदिकं पन्थानम्, अपि च अब्राह्मण्यं न निनयेयुः निश्चयेनाब्राह्मण्यं न गमयेयुः । अब्राह्मणत्वगमनं नाम शूद्रायामपत्योत्पादनमित्युच्यते । विद्या नाम षड्ङ्गो वेदः, तदर्थज्ञानञ्च । तपो नाम श्रौतस्मार्त्तकर्मानुष्ठानम् । पुण्यकर्म नाम प्रतिषिद्धवर्जनम् । तानेवंविधान् पुरुषाननुप्रमर्पयेयुः, एतदुक्तं भवति मातृतः पितृतश्चोभयतः पूर्वं दश ये पुरुषाः ते षड्ङ्गवेदाध्ययनेन तदर्थज्ञानेन च श्रौतस्मार्त्तकर्मानुष्ठानेन च प्रतिषिद्धवर्जितेन च युक्ताः शूद्रायामपत्योत्पादनं चाकृतवन्तो ये पुरुषा तानेवंविधान् पुरुषाननुप्रमर्पयेयुः । दशपुरुषमिति दशपुरुषा इत्यर्थः । नारा॰ । "मातापितोर्यश्च वश्यः श्रोत्रियो दशपूरुषः" भा॰ अनु॰ ९० अ॰ "दशपुरुषविख्यातश्रोत्रियाणां महाकुलम्" स्मृतिः ।

दशपूर न॰ दश दिशः पूरयति पूर—अच् । कैवर्त्तीमुस्तके अमरे पाठान्तरम् ।

दशपेय पु॰दशभिः पुरुषैश्चमसं पेयमत्र । यागभेदे । "संस्पेष्टिभिश्चरित्वा दशपेयेन यजेत" आश्व॰ श्रौ॰ ९।३।१७ । "संस्पेष्टयो नाम सम्प्रेष्टयः आग्नेयादयः, ताभिः सम्प्राहं चरित्वा दशपेयेन यजेत । दशपेयो नाम यज्ञ-

कृतः" नारा० । "तत्र दश दशैकैकं चमसं भक्षयेयुः" १८. "तत्र दशमेवे एकैकं चमसं दशपुरुषा भक्षयन्ति" नारा० ।

दशबल पु० दश बलानि यस्य । बुद्धदेवे अमरः तानि च बलानि "दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै" । [बाहुयुक्ते त्रि०

दशबाहु स्त्री दश बाहवोऽस्याः । दशभुजायां दुर्गायाम् । दश-

दशभुजा स्त्री दश भुजा अस्याः । दुर्गायां "इतिवृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे । आविर्भूता दशभुजा देवी देवहिताय वै" कालिकापु० ५६ अ० ।

दशभूमिग पु० दशसु भूमिषु दानादिस्थलेषु गच्छति गम–ड । बुद्धे हेमच० । [त्रिका० ।

दशभूमीश पु० दशानां दानादीनां भूमीनामीशः । बुद्धे

दशम त्रि० दशानां पूरणे डटि नान्तत्वात् मट् । दशसंख्यायाः पूरणे । "दशमस्त्वमसि" वेदान्तपरिभाषा । "नवमे दशमे मासि प्रवक्तैः स्तूतिमारुतैः" यात्रा० । "आदद्दीतार्थ षड्भागं प्रजानामधिपो नृपः । दशमं द्वादशं वापि सतां धर्ममनुस्मरन्" । यद्यपि स्यात्तु सुतपुत्रोऽप्यपुत्रोऽपि वा भवेत् । नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः" मनुः । स्त्रियां ङीप् । सा च "शतायुर्वै पुरुषः" इति श्रुतेः पुरुषस्यायुःकालस्य शतसंख्यकतया तस्य दशभिर्विभागे नवतेरूर्द्ध्वं दशवर्षावच्छिन्ने २काले पुरुषावस्थाऽपि स्त्री । "यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः" । "चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः । स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च" मनुः । चन्द्रस्य दशमकलाक्रियारूपे तदुपलक्षिते वा कालभेदरूपे तिथिभेदे स्त्री । सा च शुक्ला एकादश्या, कृष्णा तु नवम्या युता ग्राह्या । "सम्पूर्णा दशमी कार्य्या पूर्वया परयाथ वा । युक्ता न दूषिता यस्मादिति स्मृतो सखी" । यथा सम्पूर्णा दोषरहिता तथा विद्वापीति विकल्पे व्यवस्थापयति विष्णुधर्मोत्तरीयम् । "शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितोरविः । कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः" । "आरभ्य तस्यां दशमीञ्च यावत्" तिथितत्त्व० । "कृष्णपक्षे दशम्यादि वर्जयित्वा चतुर्दशीम्" मनुः ।

दशमभाव पु० कर्म० जन्मवर्षादिलग्नांशविशेषानीतेषु तन्वादिद्वादशभावेषु दशमे भावे । तदानयनप्रकारो यथा । "पूर्वं नतं स्वाहिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात् । तत्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात् । खोदयात् खाग्निलब्धं यत् भुक्तं भोग्यं रवेस्त्यजेत् । इष्टनाड्यपलेभ्यश्च गतगम्याच्चिजोदयात् । शेषं खतप्राहतं भुक्तमशुद्धेन खवादिकम् । अशुद्धं शुद्धभे हीनयुक् तनुर्व्ययनांशकम् । एवं लङ्कोदयैर्भुक्तभोग्यं शोध्यं पलीकृतात् । पूर्वपश्चान्नतादन्यत् प्राग्वत्तद्दशमं भवेत्" । जातकोपयोपयोगितद्भावे शुभाशुभं सर्वार्थचिन्तकं यथा

"दशमात् प्रवृत्तिमाज्ञां कीर्त्तिं दृष्टिं प्रवासपूर्वादीन् । मानं कर्माजीवं जातुस्थानं च निर्दिशेद्धीमान् । कर्माधिपे हीनबले सपापे कर्मादिवैकल्यमुशन्ति तज्ज्ञाः । कर्मेशवागीशशशाङ्कपुत्रावीर्यान्विता यत्नकरा भवन्ति । शुभग्रहैर्दृष्टिसमन्वितास्ते वीर्यान्विता यत्नविशेषमाहुः । दुःस्थाः शशाङ्कात्मजजीवशुक्राः पापेक्षिताः कर्मविनाशमाहुः । नाशस्थितास्तत्र तदंशनाथास्तद्युक्तराशेरधिपाश्च नाशम् । राहौ च माने यदि वा दिनेशे भागीरथी स्नानमुशन्ति तज्ज्ञाः । माने च मीने यदि वा सभौम्ये भौमान्विते वा भविता च मुक्तिः । जलर्क्षगे पूर्वशशाङ्कजीवे मानस्थिते गाङ्गजलादिपूतः । माने गुरौ शुक्रयुते च केन्द्रे खोच्चस्थिते तादृशतोयपूतः । माने धने शुक्रयुते सजीवे केन्द्रोच्चगे तादृशतोयपूतः । बुधे व्यये वा यदि वा तदीशे खोच्चान्विते तादृशपुष्पभाक् स्यात् । चन्द्रे तृतीये जलराशियुक्ते सौम्यान्विते तादृशपुष्पभाक् स्यात् । शुभेश्वरे केन्द्रयुते जलर्क्षे सौम्येक्षिते तादृशतोयपूतः । बुधे सजीवे यदि वा सभौमे प्राकारकन्मण्डपगोपुरादीन् । मानस्थिते तद्गृहनाथयुक्ते करोति जीर्णोद्धरणादि तत्र । करोति कूपादितटागभूमिं कर्मेश्वरे गोपुरभागयुक्ते । सद्दंशके वा शुभदृष्टियुक्तभाग्येश्वरेणापि निरीक्षिते वा । चन्द्रात्मजे कर्मगते तदीशे भाग्यस्थिते पापविवर्जितेऽस्मिन् । सौम्येक्षिते शोभनभावयुक्ते यत्नस्य कर्त्ता स भवेत् तदानीम् । कर्माधिपेऽस्मिन् यदि सोमपुत्रे खोच्चस्थिते वा यदि धर्मराशौ । वियर्जितः स्याच्छिखिराहुपापैर्यत्नस्य कर्त्ता स भवेत्तदानीम् । कर्माधिपे खोच्चगते सपापे नीचांशगे नाशगतेऽपि तस्मिन् । विघ्नो भवत्येव मखस्य तस्य क्रूरादिषष्ठांशगतेऽपि चैवम् । तुङ्गस्थिते सोमसुते तदीशे खोच्चान्विते सोमसुतेन दृष्टे । शुभेक्षिते वा सबुधे स्वराशौ यत्नस्य कर्त्ता स भवेत्तदानीम् । आत्मास्थानाधिपे सौम्ये शुभदृष्टियुतेऽपि वा । शोभनांश-

गते वापि जातस्वाज्ञाधिपो भवेत् । आज्ञास्थानगते सूर्ये भूमिपुत्रेऽथ वा युते। केन्द्रान्विते तदीशेऽपि क्रूरामाज्ञां करोति सः । आज्ञाधिपे मन्दयुते रन्ध्रनाथेन संयुते । क्रूरांशे केन्द्रराशौ वा क्रूरामाज्ञां करोति सः । मानाधिपे केन्द्रयुते शुभयुक्तेक्षितेऽपि वा। क्रूरषष्ठांशसंयुक्ते सौम्यामाज्ञां करोति सः । राहुमन्दयुते माने रन्ध्रे राहौ ध्वजेऽपि वा । नीचस्थे धर्मभावेशे क्रूरामाज्ञां करोति सः । शशाङ्के कर्किसंयुक्ते गुरुशुक्रनिरीक्षिते । पारावतादिभागस्थे सत्कीर्त्तिसहितो भवेत् । तदीशे शुभसंयुक्ते शुभमध्यगतेऽपि वा । शुभग्रहाणामंशे वा सत्कीर्त्तिरहितो भवेत् । कान्तिस्थानाधिपे सौम्ये स्वोच्चमित्रस्ववर्गगे । सौम्यषष्ठांशके वापि सत्कीर्त्तिसहितो भवेत् । तदीशे देवलोकस्थे सिंहांशे शुभनायके । बलपूर्णे विलग्नेशे सत्कीर्त्तिसहितो भवेत् । पापग्रहाणां सम्बन्धे मानेनाथे बलान्विते । क्रूरषष्ठांशसंयुक्ते सत्कीर्त्तिसहितो भवेत् । अपकीर्त्तियुतो जातः कर्मस्थे च रवौ शनौ । पापांशके पापदृष्टे पापमध्यगतेऽपि तत् । शुभग्रहाणां सम्बन्धे मानतद्वायकेऽपि वा । स्वोच्चे वा स्वगृहे वापि जातो मानी दृढव्रतः । इङ्गितज्ञोऽपि मानी स्यान्माने जीवेऽथ वा शुभे । तदीशे शुभसम्बद्धे शुभमध्यगतेऽपि वा । पापे माने पापदृष्टे तदीशे नीचराशिगे । पापराशिग्रहांशके वापि मानहीनो भवेन्नरः । मानाधिपे चरांशस्थे बन्धुरसहितो भवेत् । स्थिरांशस्थैर्यसंदृष्टे मृगयात्र द्विदेहगे । षष्ठेशे कर्मराशिस्थे कर्मेशे मन्दसंयुते । केन्द्रत्रिकोणगे वापि दासी दासान् विनिर्दिशेत् । कर्माधिपस्यांशपतौ शनिसम्बन्धसंयुते । षष्ठाधिपस्य सम्बन्धे बहुदासान् विनिर्दिशेत् । शुभग्रहेण संदृष्टे कर्मराशौ तदीश्वरे । भानुपुत्रेण वा युक्ते बहुदासान् विनिर्दिशेत् । कर्मनाथेन वा भुक्तिप्रत्ये पूर्तिं विनिर्दिशेत् । तत्र पापसमायोगे जातुर्दौर्वल्यमादिशेत्''।

वर्षलग्नात् दशमभावफलादिकं नील०ता० उक्तं यथा

''सबलेऽवृपतौ स्वस्थे राज्यार्थसुखकीर्त्तयः। स्थानान्तराप्तिरन्यस्मिन् केन्द्रे गृहसुखाप्तयः । इत्थं बली रविः स्वस्थः पूर्वार्जितपदाप्तिकृत् । एकादशेऽस्मिन् बन्धुं स्याद्भूपामात्ययुधोत्तमैः । रविस्थानेन्दिरा लग्ने वा राज्याप्तिर्भोग्यदा । नीचेऽर्के पापसंयुक्ते भूपाद्बन्धवध दिशेत् । सिंहे रविर्बली स्वस्थः स्थानलाभनृपाश्रयः । स्थानान्तराधिकाराप्तिः इन्दुः सारपदे बली । स्वेशलग्नेशयर्मेशेत्यशाको राज्यदायकः । वर्मेशे राज्यसङ्गमेऽर्केत्यपाले महाक्षपः । शनिस्थाने कुजः पश्यन् सुयहां पापलग्नतः । नृपभीतिं वित्तनाशं दद्याद्दशमगो यदि । दैवज्ञे त्रिनवस्थेऽस्मिन् दग्धे नष्टेऽघसञ्चयः । मन्दोऽवृपोऽधिकारी त्रिधर्मगे धर्मवृद्धिदः । तस्मिन् दग्धेऽपि नष्टे च पापलग्नर्मनिन्दकः । दैवज्ञोऽदृक्फलं स्वर्थे गुरावित्यं नयार्थभाक् । तत्रस्था सुस्थता पुण्यागमपापं खलाश्रयात् । स्वतो स्वेशे रवौ स्वस्थे वर्मेसुयशिलं यदि । लग्नाधिपेन राज्याप्तिरुक्ता वीर्यानुमानतः । धर्मकर्माधिपौ दग्धौ धर्मराज्यक्षयावहौ''।

दशमहाविद्या स्त्री दशाष्टा महाविद्या । "काली तारा महाविद्या षोडशी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः'' इति तन्त्रोक्तेषु दशसु देवीमूर्त्तिभेदेषु ।

दशमालिक पु०।देशभेदे २तद्भूपे ३तद्वाहिजने च बृ०व०। "तथैव रमठाश्चीनास्तथैव दशमालिकाः" भा०भी०६अ० ।

दशमास्य पु० दश मासान् गर्भे स्थितः यत् । दशमासान् व्याप्य गर्भे स्थिते बाले। तथाभूतस्य गर्भात् सुखनिर्गमाय पाठ्यमन्त्रकलापं ऋ० दर्शितं यथा ।

"यथा वातः पुष्करिणीं समिङ्गयति सर्वतः । एवा ते गर्भ एजतु निरैतु दशमास्यः" ऋ० ५।७८।७ । "यथा वातो यथा वनं यथा समुद्र एजति । एवा त्वं दशमास्यः सहावेहि जरायुणा" ८ । "दश मासाञ्छयानः कुमारो अधिमातरि । निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि" ९ । "एतदाद्यृक्त्रयं गर्भस्राविण्युपनिषत् ।"एतदाद्यृक्त्रयेणासौ सप्तवद्भिः स्वयोषितः। गर्भिण्याः प्रसवायासु स्नुतवानन्विनाद्वधिः"। "यथा वातः पुष्करिणीं सर आदिकं सर्वतः समिङ्गयति सम्यक् चालयति एवैवं तव गर्भ एजतु कम्पतामृ । इतस्ततः सञ्चरतु । दशमास्यो दश मासान् गर्भे स्थितो निरैतु" । निर्गच्छतु "वातो यथा कम्पमानो वनं कम्पयति स्वयम् । यथा समुद्रश्चलति चाल्यते वाथ वायुना । स्थित्वा दशैव मासांस्त्वं गर्भोल्बेन सुवेष्टितः । निर्गच्छ जठरान्मातुर्जरायुजठरात् पतेत् । दशमासान्तुवित्वासौ जननीजठरे सुखम् । निर्गच्छतु सुखं जीवो जननी चापि जीवतु' भा० ।

दशमिन् त्रि० नवतेरूर्द्ध्वं दशमी वाऽवस्थाभेदोऽस्यास्य

परणार्थात् इनि । नवत्यूर्द्ध्ववयस्के अतिवृद्धे अमरः ।

दशमीस्थ त्रि॰ दशम्यामवस्थायां तिष्ठति स्था-क । १अतिवृद्धे दशमशब्दे उदा॰ । २स्वरक्षतानां कामिनां दशानां मध्ये नाशरूपां दशां प्राप्ते च दशाशब्दे दृश्यम् ।

दशमुख पु॰ दश मुखान्यस्य । १रावणे "गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः" मेघ॰ । २महाकालीरूपे देवीभेदे स्त्री "नीलाश्मदातुतिमास्यपाटदशकां सेवे महाकालिकाम्" महाकालीध्यानम् । तस्या दशास्यवत्त्वात्तथात्वम् । दशवदनादयोऽप्यत्र ।

दशमुखरिपु पु॰ ६त॰ । रामे "सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्याम्" रघुः ।

दशमूत्रक न॰ दशानां मूत्राणां समाहारः । दशानां प्राणिनां गोमहिषाजाविहयगजखरोष्ट्रमानुषमानुषीणां मूत्रे । प्राणिभेदे तद्गुणाः सुश्रुते उक्ता यथा

"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्न वातलम् । लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् । शूलगुल्मोदरानाहपिरेकास्थापनादिषु । मूत्रप्रयोगसाध्ये च १गव्यं मूत्रं प्रयोजयेत् । दुर्नामोदरशूलेषु कुष्ठमेहाविषूचिषु । आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम्२ । कासश्वासापहं शोफकामलापाण्डुरोगनुत् । कटुतिक्तान्वितं क्षारं३मीषन्मारुतकोपनम् । कासप्लीहोदरश्वासशोषवर्चोग्रहे हितम् । सक्षारनिम्बकटुकसघृतं वातघ्नमाविकम्४ । दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत् । आश्वं५ कफकरं मूत्रं कृमिदद्रुघ्नं शस्यते । सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनम् । तीक्ष्णं क्षारे किलासे च नागं६ मूत्रं प्रयोजयेत् । गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् । दीपनं गार्दभं७ मूत्रं कृमिवातकफापहम् । शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनम् । अर्शोघ्नं कारभं८ मूत्रं भानुवन्तुद १०विषापहम्" ।

दशमूल न॰दशसंख्यकानां मूलानां समाहारः पात्रा॰ न वा ङीप् । चक्रदत्तोक्ते पाचनभेदे "बिल्वशोनाकगाम्भारीपाटलागणिकारिकाः । दीपनं कफवातघ्नं पञ्चमूलमिदं महत् । शालपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरम् । वातपित्तहरं हृद्यं कनीयः पञ्चमूलकम् । उभयं दशमूलन्तु सन्निपातज्वरापहम् । कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते । पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम्" । अत्र वा ङीप् । दशमूलीरसे सर्पिः" चक्रद॰ ।

दशमूलघृत न॰ चक्रदत्तोक्ते ज्वरघ्ने घृतभेदे ।

"दशमूलीरसे सर्पिः सक्षीरे पञ्चकोलकैः । सक्षारैर्हन्ति तत्पूर्वं ज्वरकासाग्निनन्दनः । वातपित्तकफव्याधीन् प्लीहानं चापि पाण्डुताम्" । २तत्रोक्ते कासघ्ने घृतभेदे च । "दशमूलीकषायेण भार्गीकल्कं पचेत् घृतम् । दद्यात्तिक्तिरिनिर्यूहे तत्परं वातकासनुत्" ।

दशमूलतैल न॰ चक्रदत्तोक्ते बाधिर्य्यनाशके तैलभेदे ।

"दशमूलीकषायेण तैलप्रस्थं विपाचयेत् । एतत्कल्कं प्रदायैव बाधिर्य्ये परमौषधम्" ।

दशमूलषट्पलघृत न॰ चक्रदत्तोक्ते कासादिघ्ने घृतभेदे । "दशमूलाच्चतुःप्रस्थे रसे प्रस्थो घृतं कविः । सक्षारे पञ्चकोलैस्तु कल्कितं साधु साधितम् । कासहृत्पार्श्वशूलघ्नं हिक्काश्वासनिबर्हणम् । कल्कं षट्पलमेवात्र ग्राहयन्ति भिषग्वराः" ।

दशमूलाद्यघृत न॰ चक्रदत्तोक्ते कासनाशके घृतभेदे

"दशमूलाढके प्रस्थं घृतस्याक्षसमैः पचेत् । पुष्कराह्वशटीबिल्वसुरसव्योषहिङ्गुभिः । मेथातुषानं तत् देयं कासे वातकफाधिके । श्वासरोगेषु सर्वेषु कफवातात्मकेषु च"

दशयोग पु॰ दशानामङ्गानां योगः । विवाहादौ वर्ज्ये दोषभेदे तत्स्वरूपप्रतिपत्तिवादिकम् उपयमशब्दे १२६८ पृ॰ दृश्यम् । अयं दशयोगभङ्ग इत्यन्ये ।२दशहराशब्दे वक्ष्यमाणे ज्येष्ठमासशुक्लपक्षादिदशके च ।

दशरथ पु॰ सूर्य्यवंश्ये अजात्मजे रामचन्द्रपितरि नृपभेदे मेदि॰ "अयोध्यायां महाराजो रघुरासीन् महाबलः । अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्" हरिवं॰१५अ॰ ।

दशरथसुत पु॰ ६त॰ । रामे दशरथात्मजादयोऽप्यत्र ।

दशरश्मिशत पु॰ दश रश्मिशतान्यस्य । सहस्रकिरणे सूर्य्ये "दशरश्मिशतोपमद्युतिम् । यशसा दिक्षु दशस्वपि श्रुतम् । दर्शपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः" रघुः ।

दशरात्र पु॰ दशभिः रात्रिभिर्निर्वृत्तः ठञ् तस्य लुक् तद्धितार्थद्वि॰ अच् समा॰ । १दशरात्रसाध्ये यागभेदे स च यागः कात्या॰ २५।११।१७ श्रौ॰ उक्तः । दशानां रात्रीणां समाहारः । २रात्रिदशके न॰ । अस्य रात्रान्तत्वेऽपि संख्यावाचकपूर्वकत्वात् क्लीबता । "प्रतिषेधैः समं तत्र दशरात्रमशुध्यति । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्" मनुः । "अथ चेद्दशरात्रं सन्निपतेत् आद्यं दशरात्रम्" शु॰ त॰ ।

दशरूपक न॰ दश रूपकाणि दृश्यकाव्यानि प्रतिपाद्यत्वेन सन्त्यत्र अच् । नाटकादिलक्षणप्रतिपादकग्रन्थभेदे ।

दशरूपभृत् पु॰ दश मत्स्यादीनि रूपाणि बिभर्त्ति भृ-क्विप् । मत्स्यादिदशावतारधारके विष्णौ शब्दार्थक॰ । दशावतारशब्दे तद्रूपाणि दृश्यानि ।

दशलक्षणक पु॰ दश लक्षणान्यस्य कप् । धर्म्मे "दश लक्षणको धर्मः सेवितव्यः प्रयत्नतः" इत्युपक्रमे "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" मनुः ।

दशवाजिन् पु॰ दश वाजिनो रथेऽस्य । १चन्द्रे हेमच॰ । "दशाश्वं त्वेवपद्मस्थं विचिन्त्योमाधिदैवतम्" चन्द्रध्या॰ ।

दशवार्षिक त्रि॰ दशसु वर्षेषु भवः ठञ् उत्तरपदवृद्धिः । दशवर्षभवे स्त्रियां ङीप् । "पश्यतोऽब्रुवतो हानिर्भृत्येर्विंशतिवार्षिकी । परेण भुज्यमानाया धनस्य दशवार्षिकी" याज्ञ॰ ।

दशविध त्रि॰ दश विधा प्रकारा यस्य । दशप्रकारे "भेदस्तमसोऽष्टविधो दशविधो महामोहः" सा॰ का॰ । दशविधसंस्कारः ।

दशवीर न॰ दश वीरा यत्र । फलभेदे । "तदेतच्छाक्त्राणां दशवीरमेषां दश वीरा जायन्ते य एतदुपयन्ति" ता॰ ब्रा॰ २५।७।४ । "तदेतदुक्तं सत्रं शक्त्राणां दशरीरं वीरयन्त्यभिवानिति वीराः पुत्रास्तेषां दशसंख्यानां साधकम् अतो ये दीक्षिता एतदुपयन्ति तेषामपि दश वीराः पुत्रा । जायन्ते" भा॰ । [भिर्वेशं दशव्रजम्" ऋ॰८।८।२०

दशव्रज पु॰ ऋषिभेदे । "याभिः कण्वं मेधातिथिं यज्ञं या-

दशशत न॰ दशगुणितं शतम् । १सहस्रसंख्यायां २ततसंख्येये च । "गवां दशशतं धनम्" भा॰व॰ ६८ अ॰ ।

दशशतरश्मि पु॰दशशतं सहस्रं रश्मयोऽस्य । सूर्य्ये हेमच॰ ।

दशशताङ्गि स्त्री दश शतमङ्गयोऽस्य । १शतमूल्यां २शतावर्य्याम् पारस्करनि॰ ।

दशसप्ता स्त्री दश च सप्त चास्यां विष्टुतौ । साम्नो विन्यासभेदेन विष्टुतिभेदे तत्प्रकारादिकं ता॰ ब्रा॰ भाष्ये दर्शितं यथा ।

"अथ सप्तदशस्तोमस्य दशसप्ताख्या विष्टुतिः । सा द्विःप्रकारा । सप्तास्वितेत्यपरा सा च द्विःप्रकारा । ततः पञ्चभ्यस्तिसृभ्यो नवभ्यश्चेत्येकः । तत उद्यती ततो भस्त्रेति दशसप्तसप्तास्वितयोर्भेदेन सहेत्येवं सप्त विष्टुतयः । तद्याद्यां दशसप्ताख्यां विष्टुतिं दर्शयति" भा॰ । "पञ्चभ्यो द्विरुरोति स तिसृभिः स एकया स एकया, पञ्चभ्यो द्विरुरोति स एकया स तिसृभिः स एकया, सप्तभ्यो द्विरुरोति स एकया स तिसृभिः स तिसृभिर्दशसप्ता सप्तदशस्य विष्टुतिः" ता॰ ब्रा॰ २।७।१। "स्पष्टार्थः। आदितो द्वाभ्यां पञ्चभ्यां द्विरुरोति पर्य्यायाभ्यां दश । उत्तरे सप्तेति दश च सप्त चास्यां विष्टुताविति दशसप्तेयं सप्तदशस्तोमस्य विष्टुतिः" । तदुत्तरत्र खण्डादौ उद्यती सप्तास्वितभस्त्राणां प्रकारो वर्णितस्तत्रैव दृश्यः

दशसाहस्र न॰ दश गुणितं सहस्रं परिमाणमस्य अण् उत्तरपदवृद्धिः । १दशगुणितसहस्रमिते अयुते २ततसंख्येये च "भूतानां दशसाहस्रं परिघेण समाहतम्" हरिवं॰ २५२ अ॰ ।

दशसाहस्रिक त्रि॰दश सहस्राणि प्रमाणमस्य ठञ् उत्तरपदवृद्धिः । अयुतमितभागादौ । "दशसाहस्रिको भागस्तेषां धाता प्रकल्पितः" हरिवं॰ ११२ अ॰ ।

दशस्य त्रि॰ दशं दानमिच्छति यक् सुक् च नामधातुः दानेच्छायां प॰अक॰ सेट् दशस्यति अदशस्यीत् । "एवा नो अग्ने विश्वा दशस्य" ऋ॰ ७।४३।५ । "इरावती हेतुमती हि भूतं "सूयवसिनी मनुषे दशस्या" ७।९९।२ ।

दशहरा स्त्री दश पापानि हरति हृ-ट । गङ्गाजन्मदिने ज्यैष्ठशुक्लदशम्याम् ।

"ज्यैष्ठे मासि सितेतद्दिने शुक्लपक्षे दशम्यां हस्ते शैलाद्गिरगमदियं जाह्नवी मर्त्यलोकम् । पापान्यस्यां हरति च तिथौ सा दशेत्याख्याः प्रोक्तं दद्यादपि शतगुणं वाजिमेधायुतस्येति" शङ्खः । अपि च "अदत्तानामुपादानं हिंसा चैव विधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यमनृतं चैव पैशुन्यञ्चापि सर्वशः । असम्बद्धप्रलापश्च वाङ्मयं स्यात् चतुर्विधम् । परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् । एतानि दशपापानि हर त्वं मम जाह्नवि ! । दशपापहरा यस्मात् तस्माद्दशहरा स्मृता । "ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते" इति स्कन्दपुराणे काशीखण्डे । अत्र कुजबुधयोः कल्पभेदेन व्यवस्था ज्ञेया । १सेतुबन्धरामेश्वरयोः प्रतिष्ठादिने यथोक्तं स्कान्दे सेतुमाहात्म्ये "ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् । रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् । अता-

ऽस्यां तु विशेषेण पूजा कार्या हितार्थिभिः"। अत स्नानाङ्गसङ्कल्प उक्तः गारुडे २१५ अ० यथा। "अद्य कृष्णे तु नक्षत्रे दशम्यां व्यष्टके सिते। दशपापहरायाञ्च अदत्तादानकल्मषम्। विरुद्धाचरणं हिंसा परदारोपसेवनम्। पारुष्याहृतपैशुन्यमसम्बद्धं प्रभाषणम्। परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम्। एतद्दशाघघाताय गङ्गास्नानं करोम्यहमिति"।

दशा स्त्री दृश्य—अङ् नि० नञोपः। १अवस्थायां २दीपवर्त्याम्, मेदि० "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरता मणिदीपा इवोत्तमाः" इत्युद्भटः। ३चिह्ने, अजयपालः। ४कालकृतविशेषरूपायां ५गर्भवासजन्मादिबाल्ययौवनादिरूपायामवस्थायाञ्च। तास्च "गर्भवासः१जन्म२बाल्यं३ कौमारं४ पौगण्डम्५ यौवनं६ स्थाविरता७ जराऽ प्राचरोधः९ नाश१०" नीलकण्ठेनोक्ताः दश वेद्याः। ५कामकृते विरहिणां नेत्ररागाद्यवस्थादशके, ज्योतिषोक्ते नक्षत्रानुसारेण सूर्य्यादिग्रहाणां स्वामित्वेन हृभोग्यकाले च। तत्र सरकृतदशाश्च "नयनप्रीतिः प्रथमे चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येताः सरदशादशैव स्युः"। ग्रहाणां स्वस्वसूचितफलविपाककालभेदरूपा दशा च नानाविधा तत्र "कलौ नाक्षत्रिकी दशा" इत्युक्तेः नक्षत्रसूचितैव दशा याज्ञा साऽपि नानाविधा षट्त्रिंशद्वर्षीया मङ्गलादियोगिनीदशा, अष्टोत्तरीयवर्षात्मिका रव्याद्यष्टग्रहाणां दशा। विंशोत्तरीयवर्षात्मिकासूर्य्यादिनवग्रहैर्विपच्यमानफलात्मिका च तत्र योगिनीदशा तु "गुणं संवोक्ष्य जन्मर्क्षे वसुभिर्भागमाहरेत्। मङ्गलाद्यास्त्रिराद्यत्ता ह्यष्टौ ज्ञेया महादशाः"। "मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च एकोत्तरमिताः क्रमात्" इत्युक्तानुसारेण ज्ञेया। तदानयनञ्चान्यत्र "आर्द्रादिभिस्त्रिराद्यत्ता ह्यष्टौ ज्ञेयाः क्रमादमूः। मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च एकैकोत्तरवत्सरा। अश्विन्यादित्रयं तत्र भास्वदादित्रयेऽधिकम्। सिद्धायां रोहिणी शेषे सङ्कटायां मृगः परः। मङ्गलायाः पतिश्चन्द्रः पिङ्गलायाः रविस्तथा। धन्यायास्तु बुधः स्वामी भ्रामर्याः शरजीवतः। भद्रिकाया पतिर्जीव उल्कायाः रविनन्दनः। सिद्धायाः भार्गवः स्वामी सङ्कटायास्तु दानवः" इत्येवं क्रमात् दशाज्ञेया। तासां सुखेन ज्ञानाय

योगिनीदशाचक्रम्।

दशानाम	म	पि	ध	भ्रा	म	उ	सि	सं०
तदीशाः	च	र	बु	गु	जी	श	शु	रा
मानवर्षाः	१	२	३	४	५	६	७	८
जन्मनक्ष-	६	७	८	९	१०	११	१२	१३
त्रानुसारेण	१४	१५	१६	१७	१८	१९	२०	२१
तासां प्रवेश-	२२	२३	२४	२५	२६	२७	४	५
नक्षत्राणि।				१	२	३		

त्रैराशिकेन नक्षत्रभुक्तकालमपहाय प्रकृतदशाकालात् गतभोग्यकालानुसारेण दशाकालाः कल्प्याः एवं सर्वत्र।

विंशोत्तरीयदशा तु "रविश्चन्द्रस्तथा भौमो बुधजीवौ शनैश्चरः। बुधः केतुः भृगुश्चेति क्रान्तिकादौ त्रिधा भ्रमेत्"। दशावर्षाश्च "षट् सूर्य्यस्य दशा वर्षाः दिङ्मिता रजनीपतेः। कुजस्य सप्त वर्षाः स्युः राहोरष्टादशैव तु। गुरोः षोडश विज्ञेयाः शनेरेकोनविंशतिः। विदः सप्तदश ज्ञेया केतूनां सप्त कीर्त्तिताः। भृगोर्विंशतिरुद्दिष्टा सूर्य्यादीनां महादशाः"।

विंशोत्तरीयदशाचक्रम्।

दशेशाः	र	च	म	रा	जी	श	बु	के	शु
वर्षमानम्	६	१०	७	१८	१६	१९	१७	७	२०
जन्मनक्षत्रा-	३	४	५	६	७	८	९	१०	११
नुसारेण	१२	१३	१४	१५	१६	१७	१८	१९	२०
प्रवेशनक्षत्राणि	२१	२२	२३	२४	२५	२६	२७	१	२

त्रैराशिकेन प्राग्वद्भुक्तभोग्यकालानुसारेण दशाकल्पनम्। एतद्दशफलानि सर्वार्थचिन्तामणावुक्तानि यथा

"दशानुरोधेन फलं वदन्ति मुनीश्वरा जातशुभाशुभं तत्। सारं समुद्धृत्य तदेव वक्ष्ये भेदं यथा विस्तरतो दशानाम्। दीप्तः१ स्वस्थः२ मुदितः३ शान्तो४ दीनो५ऽतिदुःखितः६। विकलश्च७ खलः८ कोपी९ नवधा खेचरो भवेत्। उच्चस्थः खचरो दीप्तः१ स्वस्थः२ स्वक्षेत्रगो मतः। मुदितो३, मित्रभे४ शान्तः समगो दीनको५ऽधरः। शत्रुभे दुःखसंयुक्तो६ विकलः७ पापसंयुतः। खलः८ पराजितो ज्ञेयः कोपी९ ह्यादर्कसंयुतः। पृथक् पृथक् फलं तेषां दशाकाले विशेषतः। तत्र नामानुरोधेन परिपाके वदन्ति हि। पाके प्रदीप्तस्य धराधिपत्वसत्प्राप्तिः शौर्य्यं धनवाहनञ्च। स्त्रीपुत्रलाभं सुखनम्रपूजां चिर्तांश्चरान्मानसुखैति

विद्याम्१। स्वस्थस्य खेटस्य दशाविपाके स्वस्थो नृपा-
त्सुखधनादिसौख्यम्। विद्यायशःप्रीतिमहत्त्वताश्च
दारार्थभूम्यात्मजधर्ममेति२। सुदान्वितस्यापि दशाविपाके
वस्त्रादिभूगन्धसुतार्थधैर्यम्। पुराणधर्मश्रवणादिगान-
दानादियानाम्बरभूषणाग्निम्३। दशाविपाके सुखधैर्यमेति
शान्तस्य४ भूपुत्रकलत्रयानम्। विद्याविनोदान्वितधर्म-
शास्त्रं बन्धुर्दशाधिपपूज्यताञ्च। स्थानच्युतिर्बन्धु-
विरोधिता च हीनस्य५ खेटस्य दशाविपाके। जीवत्यसौ-
कुत्सितहीनवृत्त्या त्यक्तोजनै रोगनिपीड़ितः स्यात्।
दुःखान्वितस्यापि६ दशाविपाके नानाविधं दुःखसुपैति
नित्यम्। विदेशगो बन्धुजनैर्विहीनश्चौरादिभूपैर्भयसाम्र-
पन्नः। वैकल्यखेटस्य७ दशाविपाके वैकल्यतां याति
मनोविकारम्। पित्रादिकानां मरणं विशेषात् स्त्रीपु-
त्रयानाम्बरचोरपीड़ाम्। दशाविपाके कलहं वियोगं
खलस्य८ खेटस्य पितुर्वियोगम्। शत्रुक्षतानाम्बनभूमि-
नाशसुपैति नित्यं स्वजनैश्च निन्द्यः। कोपान्वितस्यापि९
दशाविपाके पापं समायाति बहुप्रकारैः। विद्यायशः
स्त्रीधनभूमिनाशं राज्ञाञ्च वित्तं हरतेऽत्र रोगी"।

अथ परमोच्चादिगरविदशाफलानि। भानोर्दशायां परमो
च्चगस्य भूम्यर्थदारात्मजकीर्त्तिशौर्यम्। संमानन भूमिपतेः
सकाशादुपैति सञ्चारविनोदगोष्ठीम्। उच्चान्वितस्यापि रवे-
र्दशायां गोहस्तिधान्यार्थपरिश्रमञ्च। संसारयुग्बन्धुजनैर्वि-
रोधं देशाद्विदेशञ्च क्षतिप्रकोपात्। प्रचण्डवेश्यागमनं क्षि-
तीशादुपैति दृष्टिं रतिकेलिमानम्। स्वदुन्दुभेरीरववृक्षया-
नमन्योन्यवैरं लभते मनुष्यः। चारोहिणी वासरनाय-
कस्य दशा महत्त्वं कुरुतेऽतिसौख्यम्। परोपकारं सुतदा-
रभूमिगोवाजिमातङ्गकृषिक्रियादीन्। दशावरोहा दिन-
नायकस्य कृषिक्रियावित्तगृहेष्टनाशम्। चोराग्निपीड़ां
कलहं विरोधं नरेशकोपं कुरुते विदेशम्। नीचस्थित-
स्यापि रवेर्विपाके मानार्थनाशं क्षितिपालकोपात्।
स्वबन्धुनाशं सुतमित्रदारैः पित्रादिकानामपकीर्त्ति-
मेति। अत्यन्तनीचान्वितसूर्यदाये विपत्तिमाप्नोति गृह-
च्युतिञ्च। विदेशयानं मरणं गुरूणां स्त्रीपुत्रगोभूमि-
कलेर्विनाशम्। मूलत्रिकोणस्थरवेर्विपाके क्षेत्रार्थदारात्मज-
बन्धुसौख्यम्। राजाश्रयं गोधनमित्रलाभं स्वस्थानया-
नादिकमेति राज्यम्। स्वक्षेत्रगस्यापि रवेर्दशायां
स्वबन्धुसौख्यं कृषिवित्तकीर्त्तिम्। विद्यायशःप्रार्थित
राजपूजां स्वभूमिलाभं सुखमेति विद्वान्। दशाविपाके
स्वधिपत्रुमस्य रवेः प्रनष्टार्थकलत्रपुत्रः। गोमित्रपित्रा-
दिशरीरकष्टं शत्रुत्वमायाति जनैः समन्तात्। सपत्न-
राशिस्थितसूर्यदाये दुःखी परिभ्रष्टसुतार्थदारः। नृपाग्नि
चोरैर्विपदं विषादं पित्रोर्विरोधञ्च दशान्तमेति। स्वमि-
त्रराशिस्थितसूर्यदाये स्वभृत्यमित्रात्मजराजपूजाम्। स्वगे-
हवासं स्वजनस्य सङ्गाद् यानादिभूषाम्बरताम्रलाभम्।
अत्यन्तमित्रर्क्षगतस्य भानोर्दशाविपाके क्षतिसौख्यमेति।
स्त्रीपुत्रधान्यार्थमनोविलासतटागयानाम्बरभूषणानि। स-
मर्क्षगस्यापि रवेर्दशायां सद्भक्तनैः स्यात् कृषिभूमिधान्यम्।
गोवाजियानाम्बरदेहसौख्यं स्त्रीपुत्रदोषं रणपीड़ितः
स्यात्। नीचान्वितस्यापि रवेर्दशायां नीचानुवृत्त्या कुन-
स्त्री कुशीलः। स्त्रीपुत्रधान्यार्थपशुक्रियादिमनोविकारं
सुखमेति हेयम्। उच्चान्वितस्यापि रवेर्दशायां मनोविलासं
लभते स्ववृत्त्या। तीर्थाभिषेकं हरिकीर्त्तनञ्च प्राकार-
कूपादिपुराणशास्त्रम्। पापान्वितस्य शुभखेर्विपाके नित्यं
मनः क्लिश्यति हेयबुद्ध्या। कुभोजनं कुत्सितवस्त्रपानं
कुशीलवृत्त्या स्वधनं क्षयत्वम्। दिनाधिनाथस्य शुभान्वि-
तस्य पाके सुखं भूमिधनादिवस्त्रम्। इष्टैर्विलासं
स्वजनैः समाजं कल्याणवाग्जालविनोदगोष्ठीम्।
पापेक्षितस्यापि सहस्रभानोर्दशाविपाके परमन्तु
दुःखम्। पित्रोर्विनाशं सुतदारकष्टं चोराग्निभूपाक्षतं
क्षयत्वम्। करोति भानुः शुभवीक्षितश्चेत् विद्यायशस्वी
सुतवाग्विलासम्। कान्तिप्रतापं रतिकेलिसौख्यं
पित्रोः सुखं भूपतिमाननं च। केन्द्रान्वितस्यापि
दिवाकरस्य दशाविपाके नृप सद्दुःखम्। स्थानच्यु-
तिर्बन्धुवियोगमेति भङ्गः क्षयेर्वित्तपरिश्रमञ्च। त्रिकोण-
संयुक्तरवेर्विपाके बुद्धिभ्रमं राजविमाननञ्च। सौख्या-
दिहानिं निधनं पितुश्च कर्म्मादिवैकल्यसुपैति काले।
उच्चांशकस्य च दशा विदधाति वृत्तिं नित्यं प्रतापजनितां
महतीं श्रियञ्च। नानाविनोदललितं रतिकेलिसौख्यं
स्त्रीवस्त्रलाभमनिशं पितृवर्गनाशम्। नीचांशयुक्तस्य
रवेर्दशायां भार्यार्थभूपुत्रविदेशयानम्। त्यक्तोजनैर्बन्धु-
विकुत्सितस्तु मनोविकारं ज्वरमेहरोगम्। आदौ सूर्य-
दशायां दुःखं पितृरोगक्षतक्षयश्चाधिः। मध्ये पशुधन-
हानिश्चान्ते विद्यामहत्त्वञ्च। दशाविपाके धनहानि-
मेति षष्ठस्थभानोरतिदुःखजालम्। गुल्मक्षयोद्भूत-
पवित्ररोगं मूत्रादिकृच्छ्रं त्वथवा प्रमेहम्। रन्ध्रस्थभानो-
रपि वा दशायां देहस्य कष्टं त्वथवाग्निचिह्नम्।

चातुर्थिकं नेत्रविकारकासं ज्वरातिसारं स्वपदच्युतिञ्च । भानोर्द्वादशगस्य चेद्यदि दशा क्लेशार्थहानिं क्षयं स्त्रीबन्धुत्मजभूमिनाशमथ वा पित्रोर्विनाशं कलिम् । स्थानात् स्थानपरिभ्रमं विकृतं राज्ञोभयं पाकरक् विद्यावादविनोदगोष्ठिकलहं गोवाजिसंपीडनम् । पुत्रोत्पत्तिविपत्तिमत्र कुरुते भानोर्धनस्थस्य वा क्लेशम्बुवियोग दुःखकलहं वागदूषणं क्रोधनम् । स्त्रीनाशं धननाशनं नृपभयं भूपुत्रयानाम्बरं सर्वं नाशमुपैति तत्र शुभयुक् वाच्यं न चैतत्फलम् । भानोर्विक्रमयुक्तस्य दशा धैर्यं महत् सुखम् । नृपमाननमर्थाप्तिं भ्रातृवैरं विपत्तथा । सुखस्थितस्यापि रवेर्दशायां भोगार्थभूभृत्यकलत्रहानिम् । क्षेत्रादिनाशं स्वपदच्युतिं वा यानच्युतं चोरविषाग्निशस्त्रैः । दारान्वितस्यापि रवेर्दशायां कलत्ररोगस्त्वथ वा मृतिर्वा । कुभोजनं कुत्सितपाकजातं क्षीरादिदध्याज्यविहीनमन्नम् । कर्मस्थितस्यापि रवेर्दशायां राज्यार्थलाभं समुपैति धैर्यम् । उद्योगसिद्धिं यशसा समेतं जयं विवादे नृपमाननं च । आयस्थितस्यापि दशा विपाके भानोर्धनाप्तिं शुभकर्मलाभम् । उद्योगसिद्धिं सुतदारसौख्यं यानादिभूषाम्बरदेहसौख्यम् । संज्ञाध्याये यस्य यद्द्रव्यसक्तं कर्मा जीवे यस्य यच्चोपदिष्टम् । भावस्थानालोकयोगोद्भवं च तत्तत्सर्वं तस्य योज्यं दशायाम् । सूर्ये स्थानबलाधिके क्षयिधनं गोभूमियानाम्बरं सौख्यं राजसु मानं परधनैः संयुज्यते कान्तिमान् । तत्पाके शयनाम्बरादि लभते सर्वोपकारं महाकीर्त्तिं भूषणमिष्टबन्धुसहितं तीर्थाभिषेकं महत् । रविर्यदा स्थानबलेन हीनस्तत्पाककाले बलमर्थनाशम् । स्थानच्युतिं बन्धुविरोधतापं देशाद्विदेशं समुपैति दुःखम् । दिग्वीर्ययुक्ते दिवसेश्वरे तु दिगन्तराक्रान्तिधनादिसौख्यम् । तत्तद्दिशः प्राप्तयशोऽर्थभूमिर्नो चेत्तथा तादृशमत्र नास्ति । तत्कालमानात्तनुते बलिष्ठे रवौ विपाके क्षयिभूमिवित्ते । उद्योगसिद्धिं नृपमाननञ्च हीने रवौ कालबलेन नाशम् । निसर्गतः सर्वसुपैति कालरवौ तु नैसर्गिकवीर्ययुक्ते । यानार्थभूषाम्बरदेहसौख्यं हीने रवौ चोरनृपाग्निभीतिम् । रवौ तु चेष्टाधिकवीर्ययुक्ते स्वचेष्टितार्थागममेति सौख्यम् । नृपस्य मानं सुतदारसौख्यं क्षयादियानाम्बरमत्र हीने । रवौ खगानां बलदृष्टियुक्ते त्वचिन्तयित्वा सकलं च सौख्यम् । तज्जायते तत्परिपाककाले तेनैव हीने सकलं विनाशम् । क्रूरादिषष्ठांशरिवेर्दशायां स्थानच्युतिं वा नृपचोरभीतिम् । कोपाधिकं तत्र शिरोरुजं च पित्रादिनाशं त्वथवा तदीयम् । सद्वंशषष्ठांशरवेर्दशायां सद्वंशपानाम्बरभूषणाप्तिम् । नामद्वयं राजसु पूजितञ्च वेदान्तशास्त्रागमधर्मशास्त्रम् । पारावताद्यंशयुतस्य भानोर्दशाविपाके महतीञ्च कीर्त्तिम् । बन्धुर्थदेशाधिपमाननं च पुत्रादिसंमिलकलत्रलाभम् । स्त्रीजन्यं फलमाङ्गरादौ पश्चात् फलं खेचरदृष्टिजन्यम् । मध्ये फलं स्थानभवं तथैव पापग्रहाणामिह योजयन्ति । भुजङ्गमत्रंशयुतस्य भानोर्दशाविपाकेऽहिभयं विषाद्वा । नृपाग्निपातित्यमनेकदुःखं पाशादिभृत्वत्रंशयुतस्य चैवम् । स्त्रीञ्चस्योऽपि दिनेशो नीचांशे चेत्कलत्रधनहानिः । स्वकुलजबन्धुविरोधः पित्रादीनां तथैव सुनिपाकम् । उच्चांशकयुतो भानुर्नीचस्योऽपि महत्सुखम् । करोति राज्यभारं च दशान्ते विपदं क्षयाम्" ।

अथोच्चादिगचन्द्रदशाफलानि "अत्युच्चगस्यापि निशाकरस्य दशाविपाके कुसुमाम्बरञ्च । महत्त्वतामेति कलत्रलाभं धनायतिं पुत्रमनोविलासम् । उच्चस्थितस्यापि निशाकरस्य प्राप्तौ दशायां सुतदारवित्तम् । मिष्टान्नपानाम्बरभूषणाप्तिं विदेशयानं स्वजनैर्विरोधम् । आरोहिणी चन्द्रदशा प्रपन्ना स्त्रीपुत्रवित्ताम्बरसौख्यकीर्त्तिम् । करोति राज्यं सुखभोजनञ्च देवार्चनं भूसुरतर्पणञ्च । निशाकरस्याथवरोहकाले स्त्रीपुत्रमित्राम्बरसौख्यहानिम् । मनोविकारं स्वजनैर्विरोधं चोराग्निभयैः पतनं तटाके । नीचांशगस्यापि निशाकरस्य प्राप्तौ दशायां विविधार्थहानिम् । कुभोजनं कुत्सितराजसेवा मनोविकारं समुपैति निद्राम् । मूलत्रिकोणस्थितचन्द्रदाये नृपाद्धनं भूमिसुतार्थदारान् । प्राप्नोति भूषाम्बरमानलाभं सुखं जनन्या रतिकेलिलोलम् । सत्तेवगस्यापि निशाकरस्य नृपाद्धनप्राप्तिमुपैति सौख्यम् । प्रचण्डवेशप्रागमनं क्षितीशात् संमानं स्त्रीसुतबन्धुसौख्यम् । निशाकरस्याथतिशत्रुराशिं गतस्य दाये कलहोऽर्थनाशम् । कुवस्त्रतां कुत्सितभोजनञ्च क्षेत्रार्थदारात्मजतापमानम् । यानाम्बराभरणादिहानिं विदेशयानं परिचारकत्वम् । देशान्तरे भ्रामति बन्धुहीनो दुःखी परिक्लिश्यति शत्रुभीते । मित्रर्क्षगस्यापि निशाकरस्य पाकेऽर्थलाभं क्षितिपालमैत्रीम । उद्योगसिद्धिं जलवस्त्रलाभं चित्राम्बराभूषणवाग्विलासम् । सुधाकरस्याथतिमित्रराशिं गतस्य

दाये त्वतिसौख्यमेति। विद्याविनोदाङ्कितराजपूजां क्षेत्रात्मदारात्मजकामलाभम्। दशाविपाके समराशिगस्य कलानिधेः काञ्चनभूमिलाभम्। किञ्चित्सुखं बान्धवरोगपीड़ां विदेशयानं लभते मनुष्यः। नीचस्थितस्य हि दशा विपद् महार्त्तिं क्लेशार्थदुःखवनवासमुपैति काले। कारागृहं निगड़पादकृशाङ्गहीनस्तौराग्निभूपतिभयं सुतदारशेषम्। क्षीणेन्दुपाके सकलं विहीनं राज्यार्थभूपत्रकलत्रभित्रम्। उन्मादचित्तं स्वजनैर्विरोधमृणित्वमायाति कुशीलवृत्त्या। पूर्णेन्दुपाके परिपूर्णमेति विद्याविनोदाङ्कितराजपूजाम्। स्त्रीपुत्रभृत्यार्थमनोविलासं विशेषतः शोभनकर्मलाभम्। केनापि खोच्चस्थवियच्चरेण युक्तस्य चन्द्रस्य दशाविपाके। मनःप्रसादं मदनाभिरामं स्त्रीपुत्रभृत्यादिविनोदगोष्ठीम्। पापान्वितस्यापि निशाकरस्य पाकेऽग्निचोरक्षितिपालकोपैः। दुःखं सुतस्त्रीसुतबन्धुहानिं विदेशयानं त्वशुभादिकर्म। चन्द्रस्य सौम्यग्रहसंयुतस्य प्राप्तौ दशायां शुभकर्मलाभम्। गोभूहिरण्याम्बरभूषणानि तीर्थाभिषेकं परदारसौख्यम्। पापेक्षितस्यापि निशाकरस्य दशाविपाके विफलं सुकर्म। कोपाधिकं कुत्सितभोजनञ्च मातुर्वियोगं त्वथवा तदोषम्। निशाकरस्यापि शुभेक्षितस्य परोपकारं महतीं च कीर्त्तिम्। इष्टार्थबन्धुगमभूषमानं जलाक्रयावस्त्रमनोविलासम्। मूलत्रिकोणगेन्दोर्दशां प्रपन्नो नरः सुबहुकोशः। बहुपुत्रवान् विनीतो बन्धुविरोधं प्रधानतां याति। सुखस्थितस्यापि निशाकरस्य मातुर्वियोगं सुखयानभूमिम्। क्लेशेर्तनाग्निं गृहकर्मलाभकीर्त्तिं स्वनामाङ्कितपद्मजालम्। दारान्वितस्यापि निशाकरस्य पाके कलत्राग्निमदाहरन्ति। सुपुत्रसौख्यं शयनाम्बरञ्च प्रमेहमलादिकृतं मनोरुक्। कर्मस्थितस्यापि दशा प्रपन्ना चन्द्रस्य कीर्त्तिं लभते सुविद्याम्। यत्नादिकर्माग्निमनेकसौख्यं भूपत्रयानाम्बरबन्धुपूजाम्। नीचांशगस्यापि दशा ददाति रोगं महत्तरं चेन्दोः। पादाक्षिरोगपीड़ां भुवि पराजयं गतोत्साहम्। उच्चांशगस्यापि दशा ददाति सौख्यं महत्तरं चेन्दोः। नानाविधधनलाभं भूपतिसम्मानदेहपुष्टिं च। चन्द्रदशायामादौ नरपतिसम्माननकीर्त्तिसौख्यं च। मध्ये स्त्रीमननाशं गृहधनसौख्याम्बरं चान्ते। नष्टस्य चन्द्रस्य दशा प्रपन्ना करोति दुःखं कलहं वियोगम्। चोराग्निभूपालभयं जलेन मूलादिकष्टं धननाशमाहुः। रन्ध्रास्थितस्यापि दशा प्रपन्ना देहस्य काश्यं जलभीतिदुःखम्। विदेशयानं सबलैर्विरोधं कुभोजनं मातृजनेषु नाशम्। रिपुफणचन्द्रदशाया प्राप्तो भूतिनाशनं कुरुते। राज्योऽन्तधनभाग्यं स्थानविनाशं महत्तर दुःखम्। चन्द्रस्य वित्तस्थितिपाककाले वित्तात्मजस्त्रीसुखभोगभाग्यम्। मिष्टान्नपानं रतिकेलिसौख्यं धनागमं पुण्यजलाभिषेकम्। तृतीयराशिस्थनिशाकरस्य दशा महत्सौख्यमनेकवित्तम्। मनो दृढं भ्रातृजनादिसौख्यं क्षुपत्रयानाम्बरभूषणाप्तिम्। लाभस्थितस्यापि निशाकरस्य प्राप्तौ दशायां विविधार्थलाभम्। मृदन्नपानाम्बरकेलिलोलं स्त्रीपुत्रलाभं तु मनोविलासम्। दिनेश्वरेणाहतचन्द्रदाये प्राप्नोति दुःखं स्वजनैर्विरोधम्। भार्यात्रयं भूपतिपाग्निचोरैर्मातुर्वियोगं क्षुधिधान्यनाशम्। चन्द्रे स्थानबलाधिके धनसुखं कीर्त्तिञ्च विद्यागमं देवब्राह्मणतर्पणं नृपधनान्याप्नोति भूमिं धनम्। स्त्रीरत्नाम्बरभूषणं क्षुधिधनं गोविक्रियामेधनं मिष्टान्नादिरसायनं फलयुतं दध्याज्यमाल्याम्बरम्। निशाकरे स्थानबलैर्विहीने स्थानार्थनाशं स्वपदच्युतिञ्च। स्वबन्धुनाशं त्वथवा वियोगं क्लेशैर्विनाशं समुपैति काले। निशाकरे दिग्बलसंयुतेऽस्मिन् दिगन्तरादागतवस्तु चित्रम्। विद्यागमं भूपतिमित्रताञ्च स्वबन्धुपूजां गजवाजिभूमिम्। चन्द्रे तथा कालबलान्वितेऽस्मिन् तुरङ्गयानं क्षुधिगोमहीश्च। विद्यादिघोषं नखकेशदन्तचर्माम्बरालङ्कृतवाहनञ्च। निसर्गवीर्यान्वितचन्द्रदाये निसर्गतस्यापि करोति सौख्यम्। अयत्नतो वाहनदेशलाभं नृपालपूजां बहुवाहनञ्च। चन्द्रे यदा दिग्बलवीर्य्ययुक्ते क्षुपाकटाक्षेण नरेश्वरस्य। समस्तभाग्यं समुपैति सौख्यं परोपकारं च मनोऽभिलाषम्। क्रूरादिषष्ठांशसमन्वितस्य दाये यशाङ्कस्य बहुत्वदुःखम्। स्त्रीपुत्रनाशं क्षितिपालकोपं विद्याविवादं कलहं जनैश्च। मृदुंशषष्ठांशसमन्वितस्य चन्द्रस्य दाये बहुपुत्रलाभम्। भृत्यार्थलाभं विजयं सुखं च कीर्त्तिञ्च विद्यां लभते विशेषात्। पारावतांशसमन्वितस्य चन्द्रस्य दाये महतीं च कीर्त्तिम्। विद्याविनोदं लभते च सौख्यं देवार्चनं पद्मजलाभिषेकम्। क्रूरदृष्टिकाणसंयुक्तचन्द्रो दिशति रोगिताम्। कार्यं पापसमायुक्तं गोब्राह्मणनिपीड़नम्। आदौ भावफलं प्रोक्तं स्थानजन्यं ततः फलम्। अंशोद्भवं फलं पश्चाद्ग्रहजातफलं तथा"।

अंशोच्चादिगभौमदशाफलम्। "अत्युच्चभूनन्दनदाय-

काले क्षेत्रार्थलाभं समरे जयञ्च । व्याधक्षयमन्वेति नरेश-मानसङ्कोदरस्त्रीसुतवाग्विनाशम् । उच्चङ्गतस्य हि दशा धरणीसुतस्य प्राप्नोति राज्यमथवा क्षितिपाच्च वित्तम् । भूमेश्च्दारसुतबन्धुसमागमं च यानादिरोहणविशेषविदेशयानम् । चारोहिणो भूमिसुतस्य सौख्यं दशा तनोत्यत्र नरेन्द्रपूजाम् । प्रधानताभ्यैर्यमनोऽभिलाषं भाग्योत्तरं गोगजवाजिसङ्घम् । धरासुतस्याप्यवरोहकाले स्थानार्थनाशं कलिकोपदुःखम् । विदेशवासं स्वजनैर्विरोधं चोराग्निभर्पैर्भयमेति कष्टम् । नीचस्थितस्यापि धरासुतस्य दाये कुहत्या स्वजनादिरक्षाम् । कुभोजनं गोगजवाजिनाशं स्वबन्धुनाशं नृपवह्निचोरैः । मूलत्रिकोणस्थितभौमदाये मिष्टान्नपानाम्बरभूषणाप्तिम् । पुराणधर्मत्रयं मनोज्ञं भ्रातृसौख्यं कृषिलाभमेति । स्वक्षेत्रगस्यापि धरासुतस्य दशाविपाके लभतेऽर्थभूमिम् । स्थानर्षिपत्वं सुखराज्यनाम्नामद्वयं भ्रातृसुखं सुखाप्तिम् । धरासुतस्याप्यतिशत्रुराशिं गतस्य दाये कलहादिदुःखम् । नरेशकोपं स्वजनैर्विरोधं भूम्यर्थदारात्मजमित्ररोगम् । भूनन्दनस्याप्यरिराशिगस्य दशाविपाके समरे च पीडाम् । शोकाग्निभूपालविषैः प्रमादं पीडातिकष्टादिगुदाक्षिरोगम् । मित्रक्षेत्रगस्यापि कुजस्य दाये मित्रत्वमायाति सपत्नरुद्धैः । चोराग्निमान्द्याक्षिविषादभूमिं क्षयैर्विनाशं कलिकोपदुःखम् । कुजस्य दाये त्वतिमित्रराशिं गतस्य भूपालकृतार्थभूमिम् । वस्त्रादियत्नादिविवाहदीक्षासुपैति देशान्तरलक्षभाग्यम् । धरासुतस्यापि समर्क्षमस्य गृहोपकार्यं स्वजनप्रभावात् । स्त्रीपुत्रभृत्यात्मसहोदराणां शत्रुत्वमाप्नोति नृपाग्निपीडाम् । नीचग्रहेणापि समन्वितस्य धरासुतस्यातिमनोविकारम् । प्रेष्यत्वहानिं परकीयमन्त्रं स्त्रीपुत्रनाशं नृपवह्निचोरैः । किञ्चित् सुखं भोजनवस्त्रपानं कष्टेन वृत्तिं नृपपूजनञ्च । उच्चान्वितेनापि रुमन्वितस्य भौमस्य दाये सुतदारपीडाम् । पापान्वितस्यापि कुजस्य दाये पापानि कर्माणि करोति नित्यम् । देवद्विजानां पितृदेवतानां सहोदराणाञ्च कुमार्गवृत्त्या । शुभान्वितस्यापि कुजस्य दाये केचित् सुखं देहलशाङ्गरोगम् । भूपैर्विवादं समरे जयं च विद्याविवादं परदेशवासम् । शुभेक्षितधरासूनोर्दाये भूस्वर्धनाश्रमम् । तस्मिन् गोचरसंयुक्ते त्वत्यन्तं शोभनं भवेत् । चारुं पापग्रहवीक्षितस्य प्राप्तौ दशायां बहुदुःखकष्टम् । जनैः परित्यक्तकलत्रमित्रो देशान्तरस्थः क्षितिपालकोपात् । केन्द्रगतभौमदाये चोरविषाभ्यासुपैति दुःखानि । कलहो वासविरोधं लभते देशान्तरं याति । चतुर्थराशिस्थितभौमदाये स्थानच्युतिं बन्धुविरोधिताञ्च । चोराग्निपीडां नृपतेः सकाशात् भीतिं परे दुर्गपदे प्रयाति । कलत्रयुक्तस्य कुजस्य दाये कलत्रहानिर्गुदमूत्रकृच्छ्रम् । अगोचरस्थस्य च तादृशं फलं तदन्यथा चेत् फलमन्यथैव । कर्मस्थितस्यापि कुजस्य पाके कर्मादिवैकल्यमुपैति दुःखम् । उद्योगभङ्गं त्वपकीर्त्तिमेति विद्यासुतस्त्रीधनमानहानिः । अर्कगभौमदशायां दधाति शोकं स्त्रिया विरोधं च । राज्याच्च्युतिं विपच्चाद्देशाद्देशान्तरं याति । वित्तगभौमदशायां संप्राप्तौ तस्य वृद्धिमुपयाति । स्वकुलाढ्यत्वं लभते नृपकृतवित्तं सुखाच्चिरोगञ्च । भ्रातृस्थानगतस्य सौख्यफलदो भूनन्दनोऽरातिहा धैर्यं वित्तसुतार्थदारसहजैः सङ्गं नृपात् पूज्यताम् । पुत्रस्थानगतस्य पत्नमरणं बुद्धिभ्रमं जाड्यतां शत्रुक्षेत्रगतस्य भूमिसहजैर्दुःखं महारोगभाक् । षष्ठमस्थधरासूनोर्दाये कीर्त्तिं विवेकिताम् । नेत्ररोगं स्वर्धनाशं दद्यात् कलहमेव वा । मरणपदस्थो भौमः करोति दुःखं महद्भयं पाके । स्फोटकमन्यविरोधं स्थानविनाशं विदेशयानञ्च । भवमस्थधरासूनोर्दशापाके पदच्युतिम् । गुरूणां च तथा कष्टं तपस्विषु महद्भयम् । आयस्थभौमदाये करोति राज्यार्थभूपसम्मानम् । समरे जयप्रतापं वासुपकारं मनोज्ञं कीर्त्तिम् । व्ययगतभौमदशायां प्राप्तौ धनच्छृतिं नृपाद्भीतिम् । स्थानसुतदारनाशं भ्रातृणां विदेशवासञ्च । उच्चांशसंयुक्तधरासुतकाले मनोभिलाषं विजयं सुखञ्च । प्रचण्डदासीगमनं नृपस्य प्रधानतां याति सुगन्धपद्मम् । नीचांशभौमदाये नीचयुतेऽत्यन्तकर्मवैकल्यम् । धनहानिभूपदण्डः शिश्नोदरपरायणोऽशीलः । भौमदशायामादौ लभते विविधार्थमानहानिं च । मध्येऽस्मिन्भूपचौरैर्भीतिं तत्र विनिर्दिशेत्प्रतिमान् । अन्ते भ्रातृवियोगं सुतधनदाराग्निशुल्कममूलादिम् । भौमेऽर्थवं न भवेन्नीचरयुक्ते विशेषतः कथयेत् । भौमस्य संस्थानबलान्वितस्य दशाविपाकेऽर्थफलतसौख्यम् । स्थानादिलाभं सुखकीर्त्तिशौर्यसद्योगविद्यां तनयादुपैति । स्थानवीर्यविहीनस्तु कुरुते स्वपदच्युतिम् । कुजः कुसीदवृत्त्या च जीवनं भवति ध्रुवम् । दिग्वीर्ययुक्तस्य कुजस्य दाये नृपात् सुखार्थरथप्रतापम् । गोभूमिलाभाम्बरयानलाभं दिगन्तरा

ज्ञानयशःप्रतापम्। कालवीर्ययुतभौमदशायां काम्य-
नाश्चरिति सौख्यमुपैति। षष्ठेशस्तमणिमौक्तिकलाभं
चित्रवस्त्रप्रगमञ्जलाभम्। निसर्गवीर्यान्वितभौमदाये
कृपाकटाक्षेण महीपतीनाम्। समस्तभाग्यात्मजमित्र-
बन्धुगोभूमिभूषाम्बरदेहसौख्यम्। निसर्गतः स्यान-
धनाक्षिनाशं पित्ताधिकं कुत्सितभोजनञ्च। कुजस्य
दाये कलहो विभिन्नः सहोदराणामपि देहपीडा।
वक्रान्वितस्य भौमस्य दशाकाले महद्भयम्। चौराग्न-
सर्पपीडां च वनवासं पदच्युतिम्। दृग्वीर्ययुक्तस्य
कुजस्य दाये कृपाकटाक्षेण महीपतीनाम्। समस्त-
भाग्यात्मजमित्रबन्धुगोभूमिभूषाम्बरदेहसौख्यम्। क्रू-
रषष्ठांशसंयुक्तभौमदायेऽतिपीडनम्। कारागृहप्रवेशञ्च
समस्तविभवक्षयम्। सौम्यषष्ठांशसंयुक्तभौमदाये शुभं
भवेत्। विवाहदीक्षायज्ञं च सर्वेषामुपकारकम्।
पारावतादिसंयुक्तभौमदाये महत् सुखम्। भूम्यर्थदार-
सम्पत्तिधनवाहनभोजनम्। क्रूरदृक्काणसंयुक्तकुज-
दाये मनोव्यथा। निगडं विषभीतिं च पाशबन्धनमेव
च। उच्चस्थोऽपि धरासूनुर्नीचांशकसमन्वितः। तत्-
पाके भ्रातृमरणं नृपपङ्क्तिविपाकजम्। भूमिपुत्रोऽपि
नीचस्थः स्वोच्चभागसमन्वितः। तत्पाके भूमिदारार्थ-
पुत्रमित्रविवर्द्धनम् कुजदशा।

अथ बुधदशा। "अत्युच्चसोमात्मजदायकाले धनान्वितः
स्यात्तिसुखमुपैति सौख्यम्। ज्ञानञ्च कीर्त्तिं जननायकत्वं
स्त्रीपुत्रभूम्यर्थमहोत्सवञ्च। उच्चस्थितस्यापि यशाङ्क-
सूनोर्दशा महत्त्वं कुरुतेऽर्थसौख्यम्। देहस्य पुष्टि-
र्धनधान्यपुत्रं गोवाजिमत्तेभसुदर्शनादम्। आरोहिणो
सौम्यदशा प्रपन्ना यज्ञोत्सवं मोक्षयाजिसङ्गम्। सुहृद्व-
र्गमाम्बरयानलाभं वाणिज्यभूम्यर्थपरोपकारम्।
यशाङ्कसूनोस्त्वरोहिणी या दशा महत्कष्टतरञ्च
दुःखम्। विज्ञानहीनं परदारसङ्गं नृपाग्निचौरैर्भय-
मत्र कष्टम्। नीचस्थचन्द्रात्मजदायकाले ज्ञानेन
हीनं स्वजनैर्वियुक्तम्। पदच्युतिं बन्धुविरोधितां च
विदेशयानं पनवासदुःखम्। मूलत्रिकोणान्वितसौम्य
दाये राज्यं महत्सौख्यकरं च कीर्त्तिम्। विद्याविलासं
निगमार्थशीलं प्रराणधर्मश्रवणादिपूतः। स्वक्षेत्रग-
स्यापि यशाङ्कसूनोः प्राप्तौ दशायां धनधान्यसम्पत्।
वाणिज्यगोभूमिसुताद्यदारसुहृद्वपाम्बरभूषणाप्तिः। य-
शाङ्कसूनोस्त्वरिराशिगस्य शत्रोर्भयं भूपतिकोप-
जातम्। विद्याविहीनं कुलहीनसेवां कुभोजनं दार-
सुतार्थनाशनम्। यशाङ्कसूनोरतिशत्रुराशिं गतस्य
पाके विपदं च दुःखम्। उद्योगभङ्गं स्वजनैर्विरोधं
यज्ञादिविघ्नं शुभकर्मनाशम्। मित्रक्षेत्रदशायां यशाङ्क-
सूनोर्धनार्जनं सौख्यम्। नामद्वयसंप्राप्तिः स्वनामा-
ङ्कितगद्यपद्यानि। व्यतिमित्रराशिगस्य दशा प्रपन्ना
महत्त्वतां याति। भूपतिमित्रं सौख्यं धनसुतदाराश्च
बन्धुसम्मानम्। समर्हगस्यापि यशाङ्कसूनोर्दशा सुखं
धान्यसुतम्बराणि। करोति राज्यच्युतिमत्रविघ्नं
विज्ञानहीनं पिटकादिरोगम्। नीचखेचरसंयुक्तं सौम्य-
दाये ऽतिकष्टताम्। पदभ्रंशं बन्धुनाशं कर्मनाशं मनो-
रुजम्। उच्चखेचरसंयुक्तसौम्यदाये महत् सुखम्।
भाग्योत्तरं सुविद्यां च वाणिज्यं गोकृषिक्रियाः।
विदः पापान्वितस्यापि दाये पापसुपैति च। क्षेत्रार्थ-
दारपुत्रादिकृषिगोभूमिनाशनम्। विदः सौम्ययुत-
स्यापि परिपाके महत् सुखम्। राज्ययोगं सुखं कीर्त्तिं
दारपुत्रसुपात् सुखम्। सौम्यक्षितस्यापि यशाङ्कसूनो-
र्दशाविपाके महतीं च कीर्त्तिम्। विद्याविलासोद्भव
राजपूजां कालिप्रतापं यशसा समेतम्। पापेक्षितस्या-
पि यशाङ्कसूनोर्धान्यक्षयं बन्धुजनैर्वियुक्तम्। विदेश-
यानं स्वपदच्युतिं च प्रेष्यानुवृत्त्या कलहोऽतिकष्टम्।
केन्द्रोपगस्य हि दशा शशिनन्दनस्य भूपालमित्रधन-
धान्यकलत्रपुत्राम्। यज्ञादि कर्मनृपमानवयःप्र-
लब्धिं सुहृद्वपाशयनाम्बरभूषणानि। लग्नं गतस्य
हि दशा शशिनन्दनस्य भूपालमानं कृषिलब्धभाग्यम्।
भेरीरवादि परिघोषितयानमार्गं तीर्थाभिषेकमथवा
जनति प्रसिद्धम्। वित्तगसौम्यदशायां विद्याप्राप्तिं
महत्त्वकीर्त्तिञ्च। भूपतिभाग्यसमानो राज्यस्थाने प्रधानतां
याति। तृतीयराशिस्थितचन्द्रसूनोर्दशाविपाके जडतां
सगेति। उदुगानमाजीवनगुल्मरोगमस्त्रार्त्तियोगे नृप-
मानतञ्च। यशाङ्कसूनोर्हिबुकस्थितस्य दशा प्रपन्ना
सुखधान्यमाशम्। सौख्यादिहीनं हिबुकेशमृत्यु-
मुद्योगभङ्गं च पदच्युतिं वा पञ्चमस्थशशिनन्दनस्य
या क्रूरबुद्धिरतिकष्टता भवेत्। हीनवृत्तिरपि राज-
सेवया लब्धलब्धधनमेति सम्पदम् षष्ठाष्टमान्त्यस्थित
सौम्यदाये त्वगदोषजातं बहुरोगमेति। विसूचिका
प्रेतिकपाण्डुरोगं नृपाग्निचौरैर्भयं क्षयत्वम्।
देहाङ्गवैकल्यकलत्रबन्धुविद्वेषयं भूपतिदत्तकोपम्। आक-

स्थिरं मृत्युभयं प्रमादं रिपुस्थितस्यापि शशाङ्कसूनोः। दारस्थितस्यापि शशाङ्कसूनोर्दशा विपाके सुतदारवित्तम्। विद्याविनोदं विमलाम्बरं च नामद्वयं भूपतिमित्रताञ्च। भाग्यस्थितस्यापि शशाङ्कसूनोर्भाग्योत्तरं दारसुतार्थलाभम्। तीर्थाभिषेकं जपहोमदानं यज्ञादिकर्माणि लभेन्मनुष्यः। कर्मस्थितस्यापि शशाङ्कसूनोर्दशाविपाके नृपतौल्यमेति। सौख्यं स्वनामाङ्कितगद्यपद्यं नामद्वयं दारसुतार्थलाभम्। प्रपूजनं देवमहीरुहाणां साम्राज्यनाभं जननायकत्वम्। कवित्वमार्गं समुपैति काले यज्ञादिदीक्षां स्वजनैर्विशेषात्। उपान्त्यराशिस्थितसौम्यदाये त्वनेकधा वित्तमुपैति काले। दानेन वा भूपतिमाननाद्वा क्षेत्रे वाणिज्यविचारतो वा। उच्चांशसंयुक्तशशाङ्कसूनोर्दशाविपाके सुतभूषणाप्तिः। मनोविलासं नयनाभिरामसत्साहसैर्यं च जलाभिषेकम्। नीचांशकयुतः सौम्यो नीचवृत्त्यानुजीवनम्। प्रेष्यत्वं परिहारं च दशायाञ्च करोति तत्। सौम्यदशायामादौ लभते धनधान्यसम्पदं पुरुषः। अन्ते स्वजनविरोधं मध्ये दाये नरेशसम्मानम्। अर्कगसौम्यदशायां लभते विविधापदं मनोदुःखम्। स्वकुलजनपविरोधं निन्दामयं वाक्चिकर्णरोगञ्च। स्थानवीर्ययुते सौम्ये तत्पाके कीर्त्तिराज्यटम्। मनोधैर्यं मनोत्साहं यज्ञदीक्षाशुभप्रदम्। तद्विहीनबुधे स्थानदारपुत्रमहद्भयम्। विदेशवासं दुःखं च मानापरिभवक्रियाः। टिगवीर्यसहिते सौम्ये दिगन्नाद्वनिकः सुधीः। सामन्तराजमित्रत्वं गन्धमाल्यस्य लेपनम्। कालवीर्ययुतसौम्यदशायां देहसौख्यं कलहादिवियोगम्। दारपुत्रनृपमाननमेति गाङ्गतोयपरिपूततनुः स्यात्। निसर्गवीर्यान्वितसौम्यदाये निसर्गतस्यापि शुभादि कर्म। विद्याविवादं स्वजनैर्तिरोधं मातृवियोगं त्वथवा तदीयम्। वक्रचेष्टान्विते सौम्ये भाग्यदारसुतार्थभाक्। तथा पुराणदानादिसद्ध्यानमाचरेत्। दृग्बलेन युते सौम्ये सर्वभूतेषु सौम्यताम्। करोति रतिकेलिञ्च राजप्रभाग्यसमन्वितम्। क्रूरषडंशसौम्यस्य दशापाके महद्भयम्। चोराग्निभूपैर्भीतिः स्याच्छुभदृग्योगवर्जिते। मृदंगादियुते सौम्ये राज्यलाभं महत्सुखम्। मार्दवं सर्वभूतेषु क्षत्रियपुत्रार्थसम्पदम्। सौम्ये वैशेषिकांशस्थे विशेषाद्राजपूज्यताम्। सुगन्धाम्बरमाल्यं च विद्यागोष्ठीरहस्यताम्। क्रूरदृष्ट्याशसंयुक्तचन्द्रसूर्यदा तदा। चोराग्निभूपतिभयं स्थाननाशं महद्भयम्। उच्चराशिगतः सौम्यो नीचभागगतो यदि। राज्यं सुखं महत्कीर्त्तिम् विनाशयति तत्क्षणात्। चन्द्रात्मजोऽपि नीचस्थः स्वोच्चभागसमन्वितः। अशुभफलमादौ तु शुभमन्ते प्रयच्छति"।

अथ गुरुदशा "गुरोर्दशायां परमोच्चगस्य राज्यं महत्सौख्यमुपैति कीर्त्तिम्। मनोविलासं गजवाजिसङ्घं नृपाभिषेकं स्वकुलाधिपत्यम्। कुलीरगस्यापि गुरोर्दशायां भाग्यात्तरं भूपतिमाननाद्वा। विदेशयानं महदाधिपत्यं दुःखैः परिक्लिष्टतनुर्मनुष्यः। आरोहिणी देवगुरोर्महत्त्वं दशा प्रपन्ना कुरुतेऽर्थभूमिम्। गानक्रिया स्वासुतराजपूजां स्वकीर्यतः प्राप्तयशःप्रतापम्। जीवदशायामारोहिण्यामीशो मण्डलादिनाथो वा। द्विजभूपालब्धधनो मेधावी कान्तिमान् विनीतात्मः। देवेन्द्रपूज्यस्य दशावरोहा करोति सौख्यं सततैव नाथः। सततयशः कान्तिविशेषजालं नरेश्वरत्वं सततैव याति। अतिनीचभागभाजो गुरोर्दशायां प्रभग्नगृहपुञ्जः। अन्योन्यकूटयर्थैरं क्षणिनाशं याति परभृत्यः। मूलत्रिकोणनिलयस्य गुरोर्दशायां राज्यार्थभूमिसुतदारविशेषसौख्यम्। यानाधिरोहणमपि स्वबलाप्तवित्तं यज्ञादिकर्मजनपूजितपादपीठम्। गुरोर्दशायां स्वगृहं गतस्य राज्ञोऽर्थभूधान्यसुखाम्बरञ्च। मिष्टान्नगोपाजिमनोविलासं काव्यादिपुण्यागमवेदशास्त्रम्। गुरोर्दशायामतिशत्रुराशिं गतस्य दुःखं समुपैति शोकम्। विघ्नाटमभूम्यर्थकलत्रनाशं नृपाग्निचोरैर्बहुदुःखपीड़ाम्। गुरोर्दशायामरिराशिगस्य क्षेत्रादिवित्तं शयनाम्बरञ्च। नरेशसम्मानमुपैति नित्यं स्त्रीपुत्रभृत्यात्मसहोदरार्त्तिम्। प्राप्तौ दशायामतिमित्रराशिं गतस्य जीवस्य नरेन्द्रपूज्यम्। मृदङ्गभेरीरवयानघोषं दिगन्तराक्रान्तसमस्तभाग्यम्। मित्रर्क्षगस्यापि गुरोर्दशायां नरेशमैत्रीं समुपैति कीर्त्तिम्। विद्याविवादे जयमन्नसौख्यसुगन्धमाल्यपरोपकारम्। समर्क्षगस्यापि गुरोर्दशायां सामान्यतो भूपतिदत्तभाग्यम्। क्षत्रप्रयोगो भूमिमनोविलासं मित्राम्बरालङ्कृतिभूषणाप्तिम्। नीचखेचरसंयुक्तजीवदाये मनोरुजम्। परप्रेष्यावाटञ्च पुत्राणाञ्च विरोधिताम्। उच्चखेचरसंयुक्तगुरुदाये महत्सुखम्। अनेकगोपुराटोनां निर्माणं नृपपूज्यताम्। पापान्वितस्यापि गुरोर्दशायां करोति पापं हृदयान्तरस्थम्। गूढं बहिः पुण्यफलं विशेषात् भूस्वर्वदारात्मजसौख्यमेति। शुभान्वितस्यापि गुरोर्दशायां नरेशवासं

मृदुलाम्बरं च। दानेन वित्तं नृपमाननाद्वा वस्त्रादिसंमार्गविशेषलाभम्। पापेक्षितस्यापि गुरोर्दशायां प्राप्तं सुखं किञ्चिदुपैति धैर्यम्। क्वचिद् यशः कुत्रचिदाप्तसौख्यं क्वचिद्धनं नाशमुपैति चान्ते। शुभेक्षितस्यापि गुरोर्दशायां देशान्तरे वित्तमुपैति भूपात्। देवार्चनं भूसुरतर्पणञ्च तीर्थाभिषेकं गुरुपूज्यताञ्च। केन्द्रगतजीवदायां राज्यं भूदारराजसम्मानम्। विविधसुखानन्दकरं बहुजनरक्षां प्रधानतां याति। लग्नगतस्य हि दशा पुरुषं करोति जीवस्य सौख्यसमलाम्बरभूषणाप्तिम्। यानाधिरोहणमदङ्गणवारवैश्च मत्तेभवाजिभटसङ्गयुतं करोति। चतुर्थकेन्द्रस्थितजीवदाये यानत्रयं भूपतिमित्रभावम्। भूपालयोगो यदि भूपतित्वं नो चेत्तदा तत्सदृशं करोति। कलत्रराशिस्थितजीवदाये दारार्थपुत्रार्थसुखं प्रयाति। विदेशयानं समरे जयञ्च भाग्यं परब्रह्मणि पुण्यकर्म। कर्मस्थितस्यापि गुरोर्विपाके राज्याप्तिमाहुर्नयसत्तदानीम्। भूपालयोगे त्वथ वार्थपुत्रकलत्रसत्कर्मसु राजयोगम्। पञ्चमस्थगुरोर्दाये मन्त्रोपासिर्महत्सुखम्। सुताप्तिं राजपूजाञ्च वेदान्तश्रवणादिकम्। त्रिकोणसंस्थस्य गुरोर्दशायां स्त्रीपुत्रधान्यार्थविवेकबुद्धिम्। सद्वस्त्रपानाम्बरपट्टवस्त्रयानादिलाभं नवमे तु सौख्यम्। उच्चांशसंयुक्तगुरोर्दशायां भाग्योत्तरं राजसमानमेति। प्रवालमुक्तामणिरत्नलाभं सर्वेषु सख्यं समुपैति सौख्यम्। नीचांशसंयुक्तगुरोर्विपाके भूपाङ्गयं गुल्मविचर्चिकादीन्। स्थानच्युतिं बन्धुविरोधिताञ्च नृपाग्निचोरैः स्वकुलोद्भवैश्च। अर्कगजीवदशायां सहसा ज्वरपीड़ितो भवेत् क्षीणः। ऊर्ध्वाङ्गरोगतप्तो दुःशीलत्वप्रभग्नसंसारः। आदौ गुरुदशाकाले नृपपूजां महत्सुखम्। मध्ये स्त्रीपुत्रलाभादि चान्ते कष्टं विनिर्दिशेत्। धनस्थितस्यापि गुरोर्विपाके धनार्यतिं भूपतिमाननञ्च। विद्या विवादाद्धितराजगोष्ठीं सर्वोपकारं विजयं सुखञ्च। नृपकृतबहुमानं भ्रातृभिर्भूमिलाभं परयुतविजनैर्वा दत्तगोभूमिवित्तम्। अशनवसनभूषागन्धमाल्याम्बराणि परकृतसुपकारं शुद्धतामेति शौर्यम्। तृतीयस्थगुरोर्दाये भ्रातॄणां च सुखं धनम्। नृपदत्तं धनं सौख्यं गन्धमाल्याम्बरादिकम्। नीरोगतां पुत्रकलत्रलाभं लग्नाद्रिपुस्थस्य गुरोर्दशायाम्। आदौ भवेदेवमथान्त्यपाके दारार्थचोरादिभयं सरोगम्। जीवोऽरणपदस्थः करोति सौख्यं स्वबन्धुजनहानिम्। स्थानच्युतिं विदेशं प्राप्ते स्त्रीराजपुत्रसम्मानम्। लाभं गजीवदशायां समाप्तौ राज्यलाभमुपयाति। बन्धुदारपुत्राङ्गपविरोधं स्वबन्धुविद्वेषम्। व्ययगतजीवदशायां प्राप्तौ वाहनादि समुपयाति। लभते विदेशयानं नानाक्लेशैश्च परिभूतः। पाके स्थानबलान्वितस्य च गुरोः क्षेत्रार्थदारात्मजान् संप्राप्नोति गजाश्ववस्त्रकनकं चित्राम्बरं भूषणम्। दिग्वीर्यान्वितदेवनायकगुरौ लोके प्रसिद्धं तथा जीवे कालबलाधिके नृपवधूसम्मानितां याति सः। निसर्गवीर्यान्वितजीवदाये निसर्गतश्चातिसुखं महत्त्वम्। विद्याविलासं रतिकेलिसौख्यं भागीरथीतोयकृताभिषेकम्। वक्रं गतस्यापि गुरोर्दशायां महार्थतां याति सुतार्थदारान्। युद्धे जयं भूपतिमित्रतां च सुगन्धजाताम्बरवाग्विलासम्। दिग्वीर्ययुक्तस्य गुरोर्विपाके कृपाकटाक्षेण महीपतीनाम्। समस्तभाग्यं समुपैति नित्यं देशान्तरे भाग्यति किञ्चिदेव। क्रूरषष्ठांशसंयुक्तगुरोर्दायेऽतिकष्टताम्। राजकोपावमानादीन् लभते नात्र संशयः। सौम्यषष्ठांशसंयुक्तगुरोर्दायेऽतिसौख्यताम्। वाहनं बन्धुसम्मानं यज्ञवैवाहिकं शुभम्। पारावतांशयुक्तस्य गुरोः पाके महत् सुखम्। सद्वस्त्रपट्टवस्त्रञ्च हेमविक्रियभूषणम्। पापद्रेक्काणयुक्तस्य गुरोर्दाये च बन्धनम्। कारागृहप्रवेशञ्च निगड़ं दारविग्रहम्। उच्चस्थोऽपि गुरुर्नीचराश्यंशकसमन्वितः। महाभाग्यं तु संप्राप्तं तत्क्षणादेव नश्यति। नीचस्थो देवपूज्योऽपि स्वोच्चांशकसमन्वितः। भाग्यक्षये तु संप्राप्ते भाग्यं याति तदा नरः"।

अथ शुक्रदशा। "अत्युच्चशुक्रदशायां मत्तविलासप्रियार्थभोगी स्यात्। माल्याच्छादनभोजनशयनस्त्रीपुत्रधनयुक्तः। स्वोच्चस्थितस्यापि भृगोर्दशायां स्त्रीसङ्गनष्टार्थविरुद्धधर्मम्। पित्रोर्विनाशं समुपैति दुःखं शिरोरुजं भूपतिमाननञ्च। आरोहिणी शुक्रदशा प्रपन्ना धान्यं वरालङ्कृतिकान्तिपूजाम्। प्रवृत्तिसिद्धिं स्वजनैर्विरोधं मात्रादिनाशं परदारसङ्गम्। भृगोः सुतस्याप्यवरोहकाले प्रचण्डवेश्यागमनं धनाप्तिम्। स्त्रीपुत्रबन्धुवार्त्तिमनोविकारं कृच्छ्रोरुरोगं मदनार्त्तिमेति। उद्वेगरोगतप्तः कर्मसु विफलेषु सर्वदाभिरतः। अतिनीचगतस्य दाये शुक्रस्यात्मार्थदारपुत्रार्त्तिम्। मूत्रतिकोचभाजो भृगोर्दशायां महाधिपत्यं स्यात्। क्रयविक्रयकशलधनवान् कीर्त्यन्वितो विभिन्नश्च। सर्वगशुक्रदशायां

लभते स्त्रीपुत्रमित्रधनशौर्य्यम् । नित्योत्साहं द्वेषं परोपकारं महत्त्वञ्च । भृगोर्दशायामतिशत्रुराशिं गतस्य पुत्रार्थकलत्रहानिम् । प्रभग्नसंसारविशीर्णदेहं गुल्माक्षिरोगं महणीप्रकोपम् । शत्रुक्षेत्रदशायां भृगोरपत्यार्थदारहानिः स्यात् । भूपतिरोषं कुरुते मन्त्रविद्याशास्त्रपापकर्माणि । मित्रक्षेत्र दशायां परोपकारी कलाविधिज्ञः । पुंगारामलब्धिः स्याद्देवमनुष्येश्वरोद्भूतार्थश्च । मित्रगशुक्रदशायां भूपतिसम्मानसौख्यं च । भोजनकाञ्जिसक्तं गजवरसङ्घैः निरस्तदोषैश्च । समर्क्षगस्यापि भृगोर्विपाके प्रमेहगुल्माक्षिगुदरोगः । किञ्चित् सुखं भूपतिवह्निचौरैः भयं स्वनामाङ्कितगद्यपद्यम् । नीचखेचरसंयुक्तभृगोर्दाये महद्भयम् । अपवादकृतं दोषं लभते पापकर्मभिः । स्वोच्चस्थितेन सहितस्य भृगोर्विपाके राज्यं महत्त्वसमराधिपतित्वमेव । हेमाम्बरादिमणिभूषणयानलाभं भेरीमृदङ्गपणवानकवाद्यघोषैः । पापान्वितस्यापि भृगोर्दशायां स्थानच्युतिं बन्धुजनैर्विरोधम् । आचारहीनं कलहप्रियत्वं लब्ध्यर्थभूम्यात्मजदारनाशम् । शुभान्वितस्यापि भृगोर्दशायां सौभाग्यमित्रात्मजधान्यलाभम् । नरेशपूजां गजवाजिसङ्घं प्रवालसुक्तामणियानलाभम् । पापेक्षितस्यापि भृगोर्दशायां मानार्थहानिं वसुपैति दुःखम् । स्त्रिया विरोधं स्वपदच्युतिं च विदेशवासं निजकर्महीनम् । शुभेक्षितस्यापि भृगोर्विपाके धनाम्बरं भूपतिपूजनञ्च । जनाधिपत्यं स्वशरीरकान्तिं कलत्रमित्रात्मजसौख्यमेति । केन्द्रं गतस्य हि दशा भृगुनन्दनस्य यानाम्बरादिमणिभूषितदेहकान्तिम् । राज्यार्थभूमिलब्धिवाहनवस्त्रगन्धदुर्गादियानवनयाजलाभिषेकम् । लग्नगशुक्रदशायां संप्राप्तं राजमानं लभते मणिगोधनलब्धिलाभं परापवादं महोत्साहम् । चतुर्थराशिस्थितशुक्रदाये राज्यं महत्सौख्यमुपैति यानम् । लब्धिक्रियावित्तपशुप्रजानां वृद्धिं प्रतापान्वितकीर्त्तिलाभम् । कलत्रराशिस्थितशुक्रदाये कलत्रनाशं लभते विदेशम् प्रमेहगुल्मादिशरीररोगं प्रभग्नवित्तात्मजबन्धुराज्यम् । कर्मस्थशुक्रस्य दशाविपाके विद्याधनप्राप्तिनरेशपूजे । भाग्योत्तरं पालितदेहकान्ति दिगन्तरप्राप्तयशः प्रतापम् । त्रिकोणसंयुक्तभृगोर्विपाके विद्याधनप्राप्तिनरेशपूजाम् । प्रवालसुक्तामणिगङ्गुशक्तिगोभूमियानाम्बरलाभम् । पञ्चमस्थभृगोर्दाये पत्नीप्राप्तिं विनिर्दिशेत् । कीर्त्तिञ्च राजपूजाञ्च सर्वेषामुपकारकम् । त्रिकोणस्थगतः शुक्रः करोति नृपपूज्यताम् । यज्ञकर्मादिलाभञ्च गुरुपित्रोः सुखं यशः । वित्तगशुक्रदशायां धनहानिमाङ्गर्धनायतिं चापि । अन्नसुखं यानवित्तार्थं परोपकारं नरेशसम्मानम् । तृतीयराशिस्थितशुक्रदाये धैर्य्यं महोद्वाहमदीनसत्त्वम् । चित्राम्बरालङ्कृतिवाहनाप्तिं सहोदराणां बहुभाग्यलाभम् । भृगोर्विपाकेऽरिगतस्य नाशं धान्यार्थबन्धुत्वात्मजसोदराणाम् । रोगं मंहाकार्यविनाशनं च शत्रोर्भयं भूपतिवह्निचौरैः । रन्ध्रस्थितस्यापि भृगोर्विपाके शस्त्राग्निचोरक्षतमित्रविघ्नम् । क्वचित् सुखं किञ्चिदुपैति वित्तं क्वचिच्चरेशाप्तयशः प्रतापम् । लाभस्थितस्यापि भृगोर्विपाके सुगन्धमाल्याम्बरराज्यपूजाम् । पुत्रार्थसौख्यं लब्धिक्रियञ्च दानं स्वनामाङ्कितपद्यजालम् । व्ययगतशुक्रदशायां लभते धान्यार्थराजसम्मानम् । स्थानच्युतिं प्रवासं मातृवियोगं मनोविलासञ्च । जीवर्क्षगतस्य भृगोः स्त्रीपुत्रमहीनाशनं कुरुते । कर्मसु नित्यो विघ्नो जननीक्लेशान्वितो मनोदुःखी । जीवर्क्षगशुक्रदशायां जीर्णगृहवासः शुभावरोधश्च । लभते दारविनाशं भ्रातृवियोगञ्च कलहञ्च । सिंहगशुक्रदशायां लभते विविधापदं मनोदुःखम् । उद्योगरोधतप्तः कर्मसु विफलेषु सर्वदाभिरतः । शुक्रे स्थानबलाधिके नरपतेः सम्माननं भूषणं विद्यावादविवादगोष्ठिरसिकं वार्मर्द्दयं संभ्रमम् । तस्मिन् दिक्प्रबलान्विते बहुयशःपुत्रार्थदाराम्बरं शुक्रे कालबलान्विते सुखधनं कीर्त्तिः स्वनामाङ्किता । निसर्गवीर्य्ययुक्तस्य भृगोर्दाये महत् सुखम् । लब्धिगोभूमिवित्तादि भ्रातृमातृसुखं भवेत् । वक्रं गतस्यापि भृगोः सुतस्य दशाविपाके त्वतिराजपूजाम् । मृदङ्गभेरीरवयुक्तयानं विचित्रवस्त्राभरणानि राजन्म् । दिग्वीर्य्ययुक्तस्य भृगोर्विपाके यज्ञादिकर्माणि करोति काले । विद्याविलासं शयनाम्बरञ्च नृपाभिषेकं कलहं विरोधम् । क्रूरषष्ठांशयुक्तस्य भृगोर्दाये विपद्भयम् । चोराग्निराजभीतिः स्यात् लब्धिगोभूमिनाशनम् । सौम्यषष्ठांशयुक्तस्य भृगोर्दाये महत् सुखम् । कूपारामतटागानां निर्माणं देवपूजनम् । वैशेषिकांशसंयुक्तभृगोर्दाये महत् सुखम् । वाहनं भूपसम्मानं स्त्रीवस्त्रौषधसम्पदः । क्रूरदृष्टेक्षणसंयुक्तभृगोर्दायेऽरिभीतिदम् । कारागृहमहत्कष्टमनन्तं चोरपीडनम् । उच्चक्षेत्रेऽपि नीचांशयुक्तः शुक्रोऽतिकष्टः । करोति राजभ्रमणञ्च स्थाननाशमथापि वा । उच्चांशयुक्तशुक्रोऽपि नीचराशिसमन्वितः । लब्धिगोभूमि-

वाणिज्यं धनधान्यविवर्द्धनम्" शुक्रमहादशाफलम् ।

अथ शनिदशा । "मन्दात्युच्चदशायां ग्रामसभामण्डलाधिपत्यं स्यात् । लभते विनोदशीलं पितृनाशं बन्धुकलहं च । स्वोच्चदशायां कुरुते देशभ्रंशं मनोरुजं दुःखम् । वाणिज्यहानिसत्वं कृषिहानिं नृपविरोधञ्च । आरोहिणी वासरनाथसूनोर्दशा विपाके नृपलब्धभागग्रम् । वाणिजग्रलाभं कृषिभूमिलाभं गोवाजियानं सुतदारलाभम् । दिनेशसूनोस्त्वरोहकाले राजग्रच्युतिं दारसुतार्थनाशम् । भागग्रलयं भूपतिकोपयुक्तं प्रेष्यत्वमायाति गुदाक्षिरोगम् । नीचस्थितस्यापि दिनेशसूनोर्दशायां कलत्रात्मजसोदराणाम् । नाशं महाकष्टतरां कृषिं च नीचानुवृत्त्या सुखमैति दृक्षिम् । मूलत्रिकोणनिलयस्य शनेर्दशायां देशान्तरादिवनवासमुपैति काले । नामद्वयं यदि समानगराधिपत्यं विद्वेषणं सुतकलत्रजनादिभिर्वा । स्वक्षेत्रगस्य च दशा दिवसेशसूनोर्द्वेषं करोति बलपौरुषकीर्त्तिजालम् । राजाश्रयं कनकभूषणभूमिलाभं धैर्यं स्वनामसदृशानुगुणं च सौख्यम् । शनेर्दशायामतिशत्रुगस्य स्थानच्युतिं बन्धुविरोधिताञ्च । चौरादिभूपैर्भयमत्र विघ्नं भृत्यार्थदारात्मजकोपमेति । दिनेशसूनोस्त्वरिराशिगस्य वैश्याङ्गनं प्राप्य तु भूमिनाशम् । कृषेर्विनाशं स्वपदच्युतिञ्च वैरं समायाति शरीरकष्टम् । मित्रक्षेत्रदशायां मन्दस्य तु शिल्पकर्मवेत्ता । ज्ञानबलं प्रतापं ददाति दुःखं महत्त्वञ्च । अधिमित्रमन्ददाये ददाति सौख्यं नरेशसम्मानम् । सुतधनदारविशेषात् पशुकृषिमहिषादिवाणिजग्रम् । समर्थगस्यापि शनेर्दशायां समानबुद्धिः सुतदारमित्रे । भृत्यापदं बन्धुजनेषु वैरं देहस्य कष्टं क्षयवातपित्तैः । नीचखेचरसंयुक्तशनेर्दाये महद्भयम् । विप्रलम्भोपवासञ्च नीचभृत्याद्भयोपनम् । स्वोच्चखेचरसंयुक्तशनेर्दाये महत्सुखम् । किञ्चिद्राज्यं कृषेर्लाभं भृत्यवर्गार्थनाशनम् । पापान्वितस्यापि शनेर्दशायां पापानि गूढानि करोति काले । नीचस्त्रिया सङ्गमनं विशेषाच्चोरादिनीचैः कलहं विदारम् । शुभान्वितस्यापि शनेर्दशायां विशेषतो ज्ञानमुपैति काले । परोपकारं नृपलब्धभागग्रं कृष्णानि धान्यान्ययसाञ्च लाभम् । पापेक्षितस्यापि शनेर्दशायां भृत्यार्थदारात्मजसोदराणाम् । नाशं समायाति परापवादं कुभोजनं कुत्सितगन्धमाल्यम् । शुभेक्षितस्यापि शनेर्दशायां स्त्रीपुत्रभृत्यार्थमुपैति काले । पश्चादुपैत्यत्र महत्त्वकष्टं गोभूमिवाणिजग्रकृषेर्विनाशम् । केन्द्रान्वितशनेर्दाये कलहायासपीडनम् । पुत्रमित्रार्थदारादिबन्धूनां मरणं ध्रुवम् । लग्नगतशनेर्दाये देहकष्टमुपैति च । स्थानच्युतिं प्रवासञ्च राजकोपं शिरोरुजम् । चतुर्थस्थशनेर्दाये मातृतद्वर्गनाशनम् । गृहदाहं पदभ्रंशं चोरार्त्तिं नृपपीडनम् । दारराशिगतस्यापि शनेर्दाये रिपुपीडनम् । मूत्रकृच्छ्रं महाद्वेषं स्त्रीहेतोर्मरणन्तु वा । दशमस्थशनेर्दाये कर्म्मनाशमुपैति च । देशान्तरं पदभ्रंशं निगडं राजपीडनम् । द्वितीयस्थशनेर्दाये वित्तनाशमथाक्षिरुक् । राजकोपं मनस्तापमन्नशेषं मनोरुजम् । तृतीयस्थशनेर्दाये कृषिगोधनसम्पदः । मनोजाड्यमनुत्साहं भ्रातृतद्वर्गनाशनम् । पञ्चमस्थशनेर्दाये पुत्रनाशं मनोरुजम् । राजकोपं भृत्यनाशं बन्धुस्त्रीवित्तविभ्रमम् । षष्ठस्थरविसूनोस्तु दशाकालेऽरिपीडनम् । व्याधिचोरविषैर्बाधां गृहक्षेत्रविनाशनम् । मरणपदस्थो मन्दः करोति नित्यं सुतार्थदाराणाम् । नाशं भृत्यजनानां गोमहिषभूमिदारनाशं च । नवमगतमन्ददाये पितोर्नाशं गुरोस्तथैवापि । लभते विदेशयानं स्वकुलजातैर्विनाशमुपयाति । लाभगमन्ददशायां लभते विविधार्थसौख्यसम्मानम् । सुतदारभृत्यसौख्यं मनोविलासं कृषेश्च लब्धधनम् । व्ययगतमन्ददशायां भीतिं चोराग्निभूपसङ्गैश्च । किंविधापदं च दुःखं विदेशयानं स्वबन्धुनाशञ्च । अर्कगमन्ददशायां स्वजनद्वेषं परस्त्रियं लभते । भृत्यापत्यविरोधं महोद्योगं दोषपरिभूतम् । नीचांशिमन्ददाये नीचाचारेण जीवनं लभते । सर्वेषां प्रेष्यत्वं धनसुतदारैश्च विग्रहं दुःखम् । उच्चांशिमन्ददाये विविधसुखानन्दभोगभागग्रादीन् । कुरुते विदेशयानं ग्रामसभामण्डलाधिपत्यं वा । आदौ मन्ददशायामतिदुःखं मातृनाशनं कुरुते । मध्ये विदेशयानं परगृहवासं परान्नभुक्त्वान्ते । स्थानवीर्य्ययुतमन्ददशायां दारपुत्रधनकीर्त्तिमुपैति । चोरशत्रुनृपवह्निभयं वा बन्धुनाशमथवाक्षिगुदार्त्तिम् । मन्दस्य दिग्वीर्य्ययुतस्य दाये दिगन्तरादाप्तं स्वार्थकीर्तिम् । भूस्यर्थदारात्मजसोदराणां विनाशनं बन्धुजनैर्विरोधम् । कालवीर्य्ययुतमन्ददशायां कालकूटविषभीतिमुपैति । दारपुत्रनृपचोरभयं वा धान्यभूमिकृषिवाहनलाभम् । वक्रचारयुतो मन्दः करोति विफलां क्रियाम् । उद्योगभङ्गदुःखञ्च सोदराणाञ्च नाशनम् । क्रूरषष्ठांशसंयुक्तशनिदाये महद्भयम् । नृपकोपं

पटभ्रंशं कारागृहनिवेशनम्। सौम्यषष्ठांशसंयुक्त-शनिदाये महत्सुखम्। दारपुत्रार्थसंपत्तिं लभते बन्धु-विग्रहम्। वैषेषिकांशसंयुक्तः शनिःसौख्यं करोति च। विशेषाद्राजसम्मानं विचित्राम्बरभूषणम्। क्रूर-द्रेष्काणसंयुक्तशनिदाये महद्भयम्। उद्बन्धनं विषा-द्भीतिं नृपचोराग्निजम्भयम्। नीचराशिगतो मन्दः स्वोच्चांशकसमन्वितः। दशादौ दुःखमापाद्य दशान्ते कष्टदो भवेत्। उच्चराशिगतो मन्दो नीचांशकसम-न्वितः। दशादौ सुखमापाद्य दशान्ते कष्टदो भवेत्।"

अथ राहुदशा। "राहोर्द्वादशोऽत्र केतोस्तु दशिकस्तुङ्गसंज्ञितः। मूलत्रिकोणं कुम्भश्च क्रियो मित्रभसुच्यते। एतत्सप्तमराशिस्तु केतोर्मूलत्रिकोण-भम्। षष्ठाष्टरिपुफगो राहुस्तद्दाये कष्टदो भवेत्। उच्चस्थः सैंहिकेयस्तु तत्पाके सुखदो भवेत्। राज्यं करोति मित्राग्निं धनधान्याभिवर्धनम्। राहुर्नीच-स्थितोदाये चोराग्निनृपभीतिदः। उद्बन्धनं विषा-द्भीतिं कुरुते सिंहिकासुतः। राहोर्दशायाः संप्राप्तौ नृपचोराग्निपीडनम्। विदेशयानं दुःखार्तिं वनवासा-द्भयं ध्रुवम्। लग्नगतराहुदाये बुद्धिविहीनं विषाग्नि-शस्त्रादैः। बन्धुविनाशं लभते दुःखार्तिञ्च पराजयं समरे। राहोर्दशायां धनराशिगस्य राज्यञ्च चित्तं हरते विशेषात्। कुभोजनं कुत्सितराजसेवा मनो विकारं त्वन्तं प्रकोपम्। तृतीयराशिस्थितराहुकाले पुत्रार्थदारात्मजसोदराणाम्। सुखं लभेद्बन्धनमाधिपत्यं विदेशयानं नरपालपूजाम्। चतुर्थराशिस्थितराहुकाले मातृविनाशस्त्वथवा तदीयम्। क्षेत्रार्थनाशं नृपतेः प्रकोपं भार्यादिपातित्यमनेकदुःखम्। चोराग्निबन्धार्ति मनोविकारं दारात्मजानामपि रोगपीडा। चतुर्थ-राशिस्थितराहुकाले प्रभग्नसंसारकलत्रपुत्रम्। बुद्धि-भ्रमं भोजनसौख्यनाशं विद्याविवादं कलहञ्च दुःखम्। कोपं नरेन्द्रस्य सुतस्य नाशं राहोः सुतस्यस्य दशा-विपाके। दशाविपाके त्वरिराशिगस्य चोराग्निभूपै-र्भयमाप्तनाशम्। प्रमेहगुल्मक्षयपित्तरोगं त्वगदोषरोगं त्वथवा मृतिञ्च। कलत्रराशिस्थितराहुदाये कलत्रनाशं सर्पति शीघ्रम्। विदेशयानं कृषिभाग्रहानिं सर्पा-द्भयं मृत्युसुतार्थनाशम्। राहोर्दशायां निधनस्थितस्य यमालयं याति सुतार्थनाशम्। चोराग्निभूपैः स्वकुलो-द्भवैश्च भयं मृगैर्वा वनवासदुःखम्। राहोर्दशायां नवमस्थितस्य पितोर्विनाशं लभते मनुष्यः। विदेशयानं गुरुबन्धुनाशं स्नानं समुद्रस्य सुतार्थनाशम्। मान-स्थितस्यापि दशाविपाके राहोः प्रवृत्तिं लभते मनुष्यः। पुराणधर्मश्रवणादिभिश्च गाङ्गेयतोयैरपि शुद्धदेहः। सौम्यर्क्षगश्चेत्फलमेवमेव पापर्क्षगश्चेन्न तथा भवेद्धि। प्रोक्तं फलं यत्सकलं तदेव सौम्यर्क्षगश्चेत्फलमन्यथान्यत्। पापर्क्षगतो राहुः कर्मस्थः पापसंयुतः। आभग्नस्त-त्तदाकाले पुत्रदारार्थपीडनम्। आयराशिगतो राहु-स्तत्पाके नृपमाननम्। धनाप्तिः दारलाभश्च गृहं क्षेत्रादिसम्पदः। व्ययगतराहुदशायां देशभ्रंशं मनो-रुजं कुरुते। विच्छिन्नदारपुत्रं कृषिपशुधनं धान्य-सम्पदां नाशम्। कुलीरगोमेष्युतस्य राहोर्दशाविपाके धनलाभमेति। विद्याविनोदं नृपमाननञ्च कलत्रभृत्या-त्मसुखं प्रयाति। पार्थौजमीनाश्वयुतस्य राहोर्दशाविपाके सुतदारलाभम्। देशाधिपत्यं नरवाहनञ्च दशावसाने सकलं विनाशम्। पापर्क्षसंयुक्तफणीन्द्रदाये देहस्य कार्श्यं स्वकुलस्य नाशम्। भूपाद्भयं बन्धनतोऽरिभीतिः प्रमेहकासक्षयमूत्रकृच्छ्रम्। शुभदृष्टियुतो राहुः करोति सफलक्रियाम्। राजमाननमर्थाप्तिं बन्धूनां मरणं ध्रुवम्। पापदृष्टियुतो राहुः कर्मनाशं करोति च। उद्योगभङ्गं देहार्तिं चोराग्निनृपपीडनम्। उच्चगेह-युतो राहुः राजप्रलाभं करोति च। स्त्रीपुत्रधनसम्पत्तिं वस्त्राभरणलेपनम्। नीचगृहयुतो राहुर्नीचवृत्त्यानु-जीवनम्। कुभोजनं कुदारञ्च कुपुत्रं लभते तदा। दशादौ दुःखमाप्नोति दशामध्ये सुखं यशः। दशान्ते स्थाननाशञ्च गुरुपुत्रादिनाशनम्।"

अथ केतुदशाफलम्। "भार्यापुत्रविनाशनं नरपते-र्भ्रान्तिर्महाकष्टतां विद्याबन्धुधनाप्तिमित्ररहितं रोगा-ग्निमित्रैर्भयम्। यानारोहणपातनं विषजलैः शस्त्रा-दिभिर्वा भयं देशाद्देशविवासनं कलिरुचिं वह्न्यादि-भिर्वा भयम्। केतोर्दशायां संप्राप्तौ दारपुत्रविनाशनम्। राजकोपं मनस्तापं चोराग्निक्षयिनाशनम्। केन्द्रस्थस्य दशा केतोः करोति विफलक्रियाम्। राज्यार्थसुत-दाराणां नाशनं विपदं तथा। लग्नकेन्द्रगतस्यापि केतोर्दाये महद्भयम्। ज्वरातिसारमेहञ्च श्वासकादि विषूचिकाः। धनराशिगतस्यापि केतोर्दाये धनक्षयम्। वाक्पारुष्यं मनोदुःखं कुत्सिताच्चं मनोरुजम्। तृतीय-राशिगस्यापि केतोर्दाये महत्सुखम्। मनोवैकल्य-

यावाति भ्रातृभिर्द्वेषणं परम् । चतुर्थराशिगस्यापि केतोर्दाये सुखक्षयम् । प्रभग्नदारपुत्रादिगृहे धान्य प्रहर्षितः । पञ्चमस्थस्य केतोस्तु दशाकाले सुतक्षयम् । बुद्धिभ्रमं विशेषेण राजकोपं धनक्षयम् । केतोस्त्वरिनतस्यापि दशाकाले महद्भयम् । चोराग्निविषभीतिः स्याद्देशाग्निं सन्तपैति च । कुलत्वराशिसंयुक्तकेतोर्दाये महद्भयम् । दारपुत्रार्थनाशश्च मलकष्टं मनोरुजम् । केतोरष्टमयुक्तस्य दशाकाले महद्भयम् । पितृमृत्युश्वासकासग्रहणग्रादिक्षयान्वितः । नवमस्थस्य केतोस्तु दशापाके पितुर्विपत् । गुरोर्वा विपदं दुःखं शुभकर्म्मविनाशनम् । कर्म्मस्थ केतोः संप्राप्तौ दशायां सुखमेति च । मानहानिं मनोजाड्यमपकीर्तिं मनोरुजम् । लाभस्थकेतोः संप्राप्तौ दाये सौख्यं करोति च । भ्रातृवर्गादिसौख्यञ्च यज्ञदारादिवर्धनम् । रिःफस्थकेतोः संप्राप्तौ दाये कष्टतरं भवेत् । स्थानच्युतिं प्रवासञ्च राजपीड़ाक्षिनाशनम् । दशादौ सुखमाप्नोति दशामध्ये महद्भयम् । दशान्ते राजभीतिञ्च देहजाड्यमथापि वा । शुभवीक्षणसंयुक्तः केतुः सौख्यं करोति च । राजप्रार्थं गृहशान्तिञ्च राजपूजां महत्तराम् । पापेक्षितयुतो वापि केतुर्दुःखं करोति च । ज्वरातिसारमेहांश्च त्वग्दोषं राजपीड़नम् ।" इयं हरगौरीदशेत्युच्यते ।

अष्टोत्तरीयदशा ज्योऽतं० उक्ता यथा ।

"षट् सूर्य्यस्य दशा ज्ञेया शशिनोदश पञ्च च । अष्टावङ्गारके प्रोक्ता बुधे सप्तदश स्मृताः । शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः । राहोर्द्वादश वर्षाणि भृगोरप्येकविंशतिः । दिनु त्रयं त्रयं ज्ञेयं विदिनु च चतुष्टयम् । कृत्तिकादि प्रदातव्यं दिगम्बरमता दशा । कृत्तिकादित्रये सूर्य्यः सोमो रौद्रचतुष्टये । मघादित्रितये भौमोबुधोहस्तचतुष्टये । अनुराधात्रये सौरिर्गुरुः पूर्वाचतुष्टये । धनिष्ठात्रितये राहुः शेषे शुक्रः प्रकीर्त्तितः । सूर्य्योपप्लवभौमार्किदशातिकष्टदा नृणाम् । गुरुशचन्द्रशुक्राणां यथेप्सितफलप्रदा" । वराहः "स्वशाकहीनशाकाद्दात् प्रत्यवृट् पञ्च वासरान् । तिथींश्च चन्द्रशिखिनौ क्ष्मागुणौ च कृताश्विनौ । दण्डपलविपलान्यनुपलानि च सावने । वर्द्धयित्वा कृतशेषभोगात्तु गणनक्रमात्" । अन्तर्दशाज्ञानमाह । "स्वदशाभिर्दशां हत्वा नवभिर्भागमाहरेत् । लब्धा मासास्तु तच्छेषं पूरयित्वा तु त्रिंशता । अर्द्धं हृत्वा दिनं लभ्यं तच्छेषे षष्टिपूरिते । नवभिश्च हृते लब्धा ज्ञेया दण्डास्तदन्तरे । रवेः षड्वर्षमध्ये तु वेदा ४ मासा रवेर्निजाः । चन्द्रस्य दश मासाश्च दिक्दिनं पञ्च मासकाः । कुजस्य, त्रस्य रुद्रास्तु मासा दिक्दिवसाः शनेः । षट्मासाद्युविंशश्च गुरोर्वर्षा द्युविंशतिः । राहोर्मासाष्टका ज्ञेया भृगोर्वर्षस्तु मासकौ । एवं ग्रहाणामन्येषामूह्याश्चैवान्तरोदयाः । यद्ग्रहस्यान्तरे यस्तु यत्संख्यं कालमाप्नुयात् । तत्संख्यं स्वान्तरे तस्मै स दद्यादिति निश्चयाः । स्वान्तरग्रहणे स्वांशं स्वांशेन पूरयेत् सदा" । दशाफलन्तु । "उद्विग्नचित्तपरिखेदितवित्तनाशक्लेशप्रवासगदपीड़ितपक्षघातैः । संक्षोभितस्वजनबन्धुवियोगदुःखैर्भानोर्दशा भवति कष्टकरी नराणाम्" । र । "सौख्यं विभर्त्ति वरवाहनयानरत्नकीर्त्तिप्रतापबलवीर्य्यशुभान्वितञ्च । मिष्टान्नपानशयनासनभाजनानि चान्द्री ददाति धनकाञ्चनभूमिशङ्खम्" । च । "शस्त्राभिघातबधबन्धनरेन्द्रपीड़ाचिन्ताज्वरं विकलताञ्च गृहे करोति । चौराग्निदाहभयभङ्गविपत्तिरोगकीर्त्तिप्रतापधनहा च दशा कुजस्य" । भ । "दिव्याङ्गनावदनपङ्कजपट्पदत्वं लीलाविलासशयनासनभोजनञ्च । नानाप्रकारविभवागमकोषवृद्धिः क्षिप्रं भवेद्बुधदशासु हितार्थसिद्धिः" । बु । "मिथ्यापवादबधबन्धनकार्य्यहानिर्मात्सर्य्ययुक्प्रियसुखद्रविणैर्विहीनः । मित्रेषु वैरमभिवाञ्छति वैरयुक्तः कष्टासु पापदशासु शनैश्चरस्य" । श । "रम्यं गृहं विनयसञ्चयमानदृद्धिं प्राप्नोति सौख्यधनधान्यविभूतियोगम् । धर्मार्थकामसुखभोगयशःप्रयुक्तं यावत् गुरुस्यतिदशा पुरुषोहि तावत्" । गु । "बुद्ध्या विहीनमतिनाशवियोगदुःखं नष्टार्थसिद्धिभयभङ्गविषार्त्तिरोगम् । सन्तापशोकपरदेशगतिं करोति राहोर्दशा भवति जीवनसंशयाय" । रा । "मन्त्रप्रभावनिपुणः प्रमदाविलासः श्वेतातपत्रजपपूजितदेशलाभः । कृष्णस्य लाभधनपूर्णमनोरथः स्यात् शौक्री दशा भवति निश्चलराजलक्ष्मीः" । शु । अन्तर्दशाफलं तु विस्तरभयान्नोक्तम् । "सत्ये लग्नदशा प्रोक्ता त्रेतायां योगिनी मता द्वापरे हरगौरी तु कलौ नाक्षत्रिकी दशा" अग्निपुराणनाम्ना पठित्वा गौड़ा अष्टोत्तरीयदशामेव नाक्षत्रिकी दशेत्याहुः । वराहेण तु नाक्षत्रिकीं दशामनादृत्यैव हरजातके बलिष्ठलग्नकेन्द्रस्थादिदशा प्रतिपादिता यथा

"उदयरविशशाङ्कप्राणिकेन्द्रादिसंस्थाः प्रथमवयसि

मध्येऽन्त्ये च दद्युः फलानि । न हि न फलविपाकः केन्द्रसंस्थाद्यभावे भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपि१ । आयुः ज्ञातं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वम् । साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य२ । एकर्क्षगोऽर्द्धमपहृत्य ददाति तु स्वन्त्यं त्रिकोणगृहगः खरगः खरांशम् । पादं फलस्य चतुरस्रगतः स होरास्त्वेवं परस्परगताः परिपाचयन्ति३। स्थानान्यघैतानि सवर्णयित्वा सर्वाण्यधश्चेह विवर्जितानि । दशावदपिण्डे गुणका यथांशं छेदस्तदैक्येन दशाप्रभेदः" ४ मू० ।

"उदयो लग्नं रविरात्मा शशाङ्कश्चन्द्रो मनः एषां-मुदयरविशशाङ्कानां मध्याद् यः प्राणी बलवान् तद्बलवशात्तस्य सम्बन्धिनी प्रथमा दशा भवति प्राणिनां देहवताम् । तथा च यवनेश्वरः "निशाकरादित्यविलग्नभानां तत्कालयोगादधिकं बलं यः। बिभर्ति तस्यादिदशेष्यते सा शेषांस्ततः शेषबलक्रमेणेति" उदयश्च रविश्च शशाङ्कश्चोदयरविशशाङ्काः उदयरविशशाङ्कानां प्राणी उदयरविशशाङ्कप्राणी च केन्द्रादिसंस्थाश्चोदयरविशशाङ्कप्राणिकेन्द्रादिसंस्थाः एवमेषां मध्याद्यो प्रथमा दशा दत्ता तस्यैव केन्द्रादिसंस्थाः केन्द्रपणफरापोक्लिमेषु स्थिता ग्रहाः वीर्योपचयक्रमेण दशां दद्युः एवं लग्नार्कशशाङ्कानां मध्यादेकस्य बलवतो दशा आदौ परिकल्प्या ततस्तस्य ये केन्द्रस्थाः तेषां दशाः परिकल्प्याः तैः केन्द्रस्थैः प्रथमे वयसि फलं दत्तं भवति ततः प्रथमदशापतेरेव ये पणफरस्थास्तेषां दशाः परिकल्प्याः तैः मध्ये वयसि फलं दत्तं भवति । ततः प्रथमदशापतेरेवापोक्लिमस्थानां दशाः परिकल्प्याः तैरन्त्ये वयसि फलं दत्तं भवति यदुक्तम् प्रथमवयसि मध्येऽन्त्ये च दद्युः फलानि तथा च यवनेश्वरः "पूर्वं तु केन्द्रोपगताः फलन्ति मध्ये वयः पाणफरे निविष्टाः । आपोक्लिमस्थाः फलदा वयोऽन्त्ये यथाबलं स्वं समुपैति पूर्वम्" । अथ यदि केन्द्रस्थाः ग्रहाः न भवन्ति तदा कः प्रथमे वयसि फलं प्रयच्छति इत्याह न हि न फलविपाक इत्यादि केन्द्रस्थाद्यभावे केन्द्रस्थानां ग्रहाणामभावे असम्भवे सति प्रथमे वयसि यः फलविपाकः स न हि न यतो द्वौ नञौ प्रकृतार्थं गमयतः पणफरस्थानामभावे मध्ये वयसि फलविपाको न हि न एतदुक्तं भवति यदा केन्द्रस्था ग्रहा न भवन्ति तदा पणफरस्थाः पूर्वं फलं प्रयच्छन्ति ततः आपोक्लिमस्थाः अथ केन्द्रस्थान भवन्ति पणफरस्थाश्च न भवन्ति । तदा सर्वस्मिन्नेव वयसि आपोक्लिमस्थाः फलं प्रयच्छन्ति । यत उक्तं भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपि इति एवमापोक्लिमस्थानामभावे प्रथमं केन्द्रस्थाः फलं प्रयच्छन्ति ततः पणफरस्थाः। आपोक्लिमस्था न भवन्ति न च पणफरस्थास्तदा सर्वस्मिन्नेव वयसि केन्द्रस्थाः फलं प्रयच्छन्ति । एतदुक्तं भवति । लग्नार्कशशाङ्कानां मध्ये यो बलवांस्तस्य प्रथमां दशां कल्पयित्वा ततस्तत्केन्द्रगानां सर्वेषां कल्पनीया तेषां परिकल्प्य पणफरस्थानां ततः परिकल्पनीयास्ततः परमापोक्लिमस्थानाम् केन्द्रस्थानामभावे प्रथम दशापतेरनन्तरं पणफरस्थानां कल्पनीयास्ततः आपोक्लिमस्थानाम् केन्द्रस्थानामभावे पणफरस्थानामभावे आपोक्लिमस्थानामेव कल्पनीयाः । अथ केन्द्रस्थाः पणफरस्थाश्च भवन्ति । आपोक्लिमस्था न भवन्ति तदा केन्द्रस्थानां परिकल्प्य पणफरस्थानामेव परिकल्पनीयाः अथ केन्द्रस्था भवन्ति पणफरस्था न भवन्ति आपोक्लिमस्थाश्च भवन्ति तदा केन्द्रस्थानां कल्पयित्वा आपोक्लिमगानामेव कल्पनीयाः । अथ केन्द्रगा एव केवलं भवन्ति तदा तेषामेव कल्पनीयाः । अथ पणफरगा एव भवन्ति तदा पणफरगानामेव कल्पनीयाः। अथाऽपोक्लिमगा एव भवन्ति तदा तेषामेव कल्पनीयाः। तथा च स्वल्पजातके उक्तम् । लग्नार्कशशाङ्कानां यो बलवांस्तद्दशा भवेत् प्रथमा । तत्केन्द्रपणफरापोक्लिमोपगानां बलाच्छेषाः" १ ;

अथ दशाकालप्रमाणं केन्द्रगानामपि दशाक्रमस्थानमिन्द्रवज्रयाह "आयुः ज्ञातमिति शोध्यन्तेषांशुद्धमायुर्यावद्वर्षप्रमाणं येन ग्रहेण दत्तं तस्य ग्रहस्य सम्बन्धिनी दशा कल्प्या परिकल्पनीया तत्र "लग्नार्कशशाङ्कानां यो बलवान् तद्दशा भवेत्प्रथमेति न्यायेन तद्दशां प्रथमं कल्पयित्वा ततस्तत्केन्द्रगानां परिकल्पनीया यत्रैषां च केन्द्रगानां मध्यात् सा च दशा प्रबलस्यातिबलस्य पूर्वं प्रथमं कल्प्या अनन्तरं तस्मादूनबलस्य एवं क्रमेण यथा यथा ऊनबला भवन्ति तथा तथा पश्चात्तदीयदशाः कल्पनीयाः । एवं केन्द्रगानां दशाः परिकल्प्य ततः पणफरगानाम् अनेनैव क्रमेण परिकल्प्याः ततः आपोक्लिमगानाम् अनेनैव क्रमेणेति । साम्ये बहूनामिति केन्द्रगानां बहूनां ग्रहाणां बलसाम्ये सति बहुवर्षदस्य बहूनि वर्षाणि येन दत्तानि तस्य प्रथमं दशा परि-

कल्प्या । नन्वत्र कथं ग्रहाणां बलसाम्यं भवति यदि द्वावपि समसूत्रिकोणोच्चगतौ भवतस्तदा नैसर्गिकेण बलेन योऽधिकः स एव बली स्यात् किन्तु स्थानदिक् चेष्टाकालबलग्रहदर्शनादिबलानि यावद्गणितविधिनैकी क्रियन्ते तावद्बलसाम्यं भवति ग्रहाणां यथा सामान्येनोदाहरणम् । यदि शनैश्चरो बलत्रयेण संयुक्तो भवति भौमो बलद्वयेन तदा तत्र भौमस्य निसर्गबलबलाद्बलसाम्यं भवत्येवं सर्वेषामपि ज्ञेयम् । तेषाञ्च साम्ये प्रथमोदितस्येति तेषां वर्षाणां साम्येऽपि वर्षतुल्यत्वेऽपि प्रथमोदितस्य दशा परिकल्प्या प्रथममादावर्कमण्डलाद्य उदित उद्गतस्तस्य । यदा बलसाम्यं न भवति तदा बहुवर्षेऽपि ग्रहे स्थिते तदा प्रथमोदितेऽपि स्थिते बलाधिकस्यैव पूर्वं परिकल्प्येति तेषाञ्च बलसाम्ये प्रथमोदितस्येत्यत्र द्विविध उदयः प्रत्यहं चक्रभ्रमवशादेकः, आदित्यविप्रकर्षेणापरः । तत्रेहादित्यविप्रकर्षेण उदयो गणितस्कन्धोक्तकालांशकवशाज्ज्ञेयः अत्र च भगवान् गार्गः "बली लग्नेन्दुसूर्याणां दशामाद्यां प्रयच्छति । तस्मात्ततः प्रयच्छन्ति केन्द्रादिस्थाः क्रमेण तु । तत्रापि बलिनः पूर्वं तत्साम्ये बहुदायकाः । तत्साम्येऽपि प्रयच्छन्ति ये पूर्वं रविविच्युताः" २ भट्टो० ।

"एवं दशाव्यवस्थायां जातायामन्तर्दशायाञ्च ग्रहस्थानं वसन्तिलकेनाह एकर्क्षगोऽर्द्धमिति दशापतिना सहैकर्क्षगोग्रहः एकस्मिन् राशौ गतः दशापतिदत्तान्तर्दशाकालस्य यदर्द्धं तदर्द्धमपहृत्य स्वैरात्मीयैः दशागुणैः परिपाचयति । त्र्यंशं त्रिकोणगृहगः दशापतेस्त्रिकोणगृहगो नवपञ्चमे स्थाने स्थितो दशापतिदत्तान्तर्दशाकालात् त्र्यंशं तृतीयभागमपहृत्य स्वैरात्मीयैः दशागुणैः परिपाचयति । स्मरगः स्मरांशमिति दशापतेः स्मरगः सप्तमस्थानगः दशापतिदत्तान्तर्दशाकालात् स्मरांशं सप्तमभागमपहृत्य स्वैः दशागुणैः परिपाचयति । पादं फलस्य चतुरस्रगतः दशापतेः चतुरस्रगोऽष्टमचतुर्थस्थानस्थो दशापतिदत्तान्तर्दशाकालात्पादं चतुर्थभागमपहृत्य स्वैर्दशागुणैः परिपाचयति । सहोराः होरा लग्नं तया सहिताः परस्परमन्योन्यमनेकप्रकारेण व्यवस्थिताः स्वैः स्वैः गुणैः परिपाचयति । एतदुक्तं भवति । यथा दशापतेः सकाशादेकर्क्षादिगो ग्रहो यथास्वं पठितमंशं परिपाचयति तथा लग्नमपि पाचयति । अथ दशापतेः प्रथमंशपरिकल्पनां कृत्वा पश्चादेकर्क्षादिगतानां कर्त्तव्याः यस्माद्दशापतेर्यो भाग आगच्छति तदनुसारेणार्द्धादयो भागाः। परिशेषाणां भवन्ति । अथैकस्मिन् स्थाने यदा बहवो ग्रहा भवन्ति तदा तेषां मध्याद् यो बलवान् स एवैकः परिपाचयति नान्ये । कथमेतद्गम्यते उच्यते । एकवचननिर्देशात् एकर्क्षगोऽर्द्धमपहृत्य ददाति तु स्वस्मिन्नाद्येकवचनात् न केवलं मिहिराचार्येणैकवचननिर्देशः कृतो यावत् स्वल्पज्ञातकेऽपि तथा चोक्तम् "एकर्क्षेऽर्द्धं त्र्यंशं त्रिकोणयोः सप्तमे तु सप्तांशं चतुरस्रयोस्तु पादं पाचयति गतो ग्रहः स्वगुणैरिति" गर्गादीनामप्येकवचननिर्देशोऽस्ति तथा च भगवान् गर्गः "एकर्क्षे संगतश्चार्द्धं त्रिभागन्तु त्रिकोणगः सप्तमस्थः स्वरांशन्तु पादन्तु चतुरस्रगः । लग्नेन सहिताः सर्वे ह्यन्योन्यं फलदायकाः" यवनेश्वरस्याप्येवम् "कालोऽर्द्धभागैकग्रहाश्रितस्य तदर्द्धभागं लभते चतुर्थे । त्रिभागभागी च त्रिकोणसंस्थात्तदर्द्धभाक् स्याच्च पृथक् त्रिकोणे । स्यात् सप्तमे सप्तमभागभागी स्थितो ग्रहस्वारवशात् ग्रहस्य"। एवं सर्वत्रैकवचननिर्देशः । तस्मादेवं ज्ञायते यथैक एवांशहारो भवति न सर्व इति तथा च सत्यः "अर्द्धं तृतीयमर्द्धं तथार्द्धं स्वोच्चसप्तमं भागम् । एकर्क्षे नवपञ्चमचतुर्थनिधनास्तसंस्थानम् । ददुर्यथा ग्रहाणां स्वदशास्वन्तर्दशाख्यानाम् । फलकालान्मितविधिक्रमेण भेदाश्च तेऽप्येवम् । एकर्क्षगेषु बलवान् भागहारो मितस्तो रिपोर्वापि मित्रञ्च"। पुष्कलफलं तस्मिन् काले रिपोर्नैवं तथा च मयः "एकर्क्षोपगतानां यो भवति बलाधिको विशेषेण । एकः स एव हर्त्ता नान्ये तत्र स्थिता विहगाः" । इति लग्नेऽपि यत्रांशापहारित्वं प्राप्तस्तत्र च लग्ने यदा ग्रहः स्थितो भवति तदा लग्नग्रहयोर्यो बलवान् स एवैकः पठितमंशमपहरति अन्ये सर्वेषामेकादिराशिगानामन्तर्दशाभागमिच्छन्ति । अन्ये पुनः एकमेव भागं गृहीत्वा तं भागमेकर्क्षगानां भागीकृत्य तद्भागांशमिच्छन्ति"१भट्टो० ।

"अथ दशांशपरिकल्पनाज्ञानमिन्द्रवज्रयाह स्थानानीति अर्द्धादिका भागाः स्थानशब्देनोच्यन्ते तेषां चार्द्धादिकानां भागानां सवर्णना कार्या सवर्णना सदृशच्छेदता ततः सवर्णयित्वा छेदसादृश्यसत्याद्य ततस्तानि सर्वाणि स्थानानि अधः स्वैः छेदैः विवर्जितानि कार्याणि छेदा अपास्या इत्यर्थः । उपरिगतांशयो यथांशं प्रत्यंशं गुणना कार्या भवन्ति छेदः तदैक्येन संक्षेपेण

छेदो भागहारो भवति। कस्मात् गुणके को भागहार इत्याह दशाब्दपिण्डे दशावर्षसमूहे। तेनैतदुक्तं भवति दशाब्दान् पृथक् पृथक् संगुणकारैः संगुणय्य छेदेन विभज्यावाप्तं वर्षाद्यमलर्दशा भवति" ४ भट्टो०।

"सम्यग्बलिनः स्वतुङ्गभागे संपूर्णा बलवर्जितस्य रिक्ता। नीचांशगतस्य शत्रुभागे ज्ञेयानिष्टफला दशा प्रसूतौ" ५ मू०।

"एवं दशान्तर्दशाविभागे ज्ञाते कस्य सम्बन्धिनी दशान्तर्दशा वा शुभफला भवति कस्याशुभफलेत्येतन्न ज्ञायते तदर्थं दशासु फलानुरूपाः संज्ञा वैतालीयेनाह सम्यग्बलिन इति प्रसूतौ पुरुषस्य जन्मकाले यो ग्रहः सम्यग्बलवान् भवति पूर्वोक्तैः बलैः सर्वैः युक्तो भवति तत्सम्बन्धिनी संपूर्णनाम्नी दशा भवति न केवलं यावत् स्वतुङ्गभागेऽवस्थितस्य परमोच्चभागगतस्यैव संपूर्णा नाम्नी भवति सम्यग्बलिनइत्युक्त्वा पुनः स्वतुङ्गभाग इत्यनेनैतज्ज्ञापयति यदि परमोच्चगतो ग्रहोऽन्यैः बलकारणैः युक्तो न भवति तथापि तस्य सम्बन्धिनी संपूर्णैव संपूर्णायां दशायामन्तर्दशायाञ्च काले शरीरारोग्यधनवृद्धिभिः पुरुषोऽभिवर्द्धते। अथ समस्तबलैः युक्तो न भवति किञ्चिदूनबलस्य भागे यो ग्रहो गतः भवति यस्य शत्रुभागे शत्रुनवांशे च गतस्तस्य दशानिष्टफला ज्ञेया ज्ञातव्या। अथानिष्टफलदशान्तर्दशाकाले धनहानिमनारोग्यञ्च प्राप्नोति अत्र च भगवान् गार्गिः "सर्वैर्बलैरुपेतस्य परमोच्चगतस्य च। संपूर्णाख्या दशा ज्ञेया धनारोग्यविवर्द्धिनी। सर्वैर्बलैर्विहीनस्य नीचराशिगतस्य वा। रिक्ता नाम दशा ज्ञेया धनारोग्यविनाशिनी। स्वोच्चराशिगतस्याथ किञ्चिदूनबलगतस्य च। पूर्णा नाम दशा ज्ञेया धनवृद्धिकरी शुभा। यः स्यात् परमनीचस्थस्तथाचारिनवांशके। तस्यानिष्टफला नाम व्याधिधनविवर्द्धिनी" ५ भट्टो०।

"भवस्य तुङ्गादवरोहिसंज्ञा मध्या भवेत् सा सुहृदुच्चभाग। आरोहिणी निम्नपरिच्युतस्य नीचारिभागेऽधमा भवेत् सा" ६ मू०।

"अथ दशान्तर्दशासंज्ञाः पुनरपीन्द्रवज्रयाह भवस्येति तुङ्गात्परमोच्चाद्भवस्य च्युतस्यावरोहिसंज्ञा दशा परमोच्चभागात्मादारभ्य यावत् परमनीचभागादि तत्रान्तरे यद्राशिषट्कं तत्रावस्थितेन ग्रहेण या दत्ता दशान्तर्दशा वा सावरोहिणीसंज्ञा भवति यस्मात्परमोच्चाद्भवः प्रत्यहमधोऽवतरतीति ग्रहः कल्प्यते यावत्परमनीचमिति अवरोहिसंज्ञा दशाऽधमफला भवति। यस्माद्वक्ष्यति "संज्ञानुरूपाणि फलान्यथैषामिति"। मध्या भवेत् सा सुहृदुच्चभाग इति सैवारोहिणी यत्र तत्र राशौ व्यवस्थितेन सुहृद्भागेन मित्रांशकस्थेन दत्ता दशा मध्यानाम्न्येव भवति एवं यत्र तत्र राशौ अर्थादेव स्वांशकस्थेन दशा मध्यैव। एवं यत्र तत्र राशौ स्वोच्चनवांशकस्थेन दशा मध्यैव। आरोहिणीति; निम्नान्नीचात् परिच्युतस्य चलितस्य ग्रहस्यारोहिणीनाम्नी दशा भवति परमनीचान्मभागादारभ्य यावत् परमोच्चभागादि तत्रान्तरे यद्राशिषट्कं तत्रावस्थितेन ग्रहेण या दत्ता दशान्तर्दशा वा सारोहिणीनाम्नी दशा भवति यस्मात् परमनीचादभवः प्रत्यहं तावदारोहतीति ग्रहः परिकल्प्यते यावत् परमोच्चमिति। आरोहिणी च श्रेष्ठफला भवति। नीचारिभांश इति सैवारोहिणी यत्र तत्र राशौ स्वनीचराश्यंशोपगतेन दत्ताऽधमानाम्नी दशा भवति एवं यत्र तत्र राशावरिभांशकस्थेन शत्रुनवांशकगेन दत्ताऽधमैव दशा भवति। पूर्वं शत्रुनवांशकगेन दत्तानिष्टफलेत्युक्तमधुना सैवाधमेति तत् किमेतदित्यत्रोच्यते अवरोहिणीशत्रुनवांशकस्थेन दत्तापि अनिष्टफला ज्ञेया आरोहिण्यधमा अनयोः कः फलभेदः अत्रोच्यते अनिष्टफलाफलमशुभं प्रयच्छति अधमाशुभमेवाल्पमिति एवमवरोहिणीसंज्ञा यदाधमसंज्ञा भवति तदा सैवानिष्टफलसंज्ञां लभते आरोहिणी यदा मध्यसंज्ञा भवति तदा सैव पूर्णेति संज्ञा ज्ञेया अत्राह, भगवान् गार्गिः "उच्चनीचान्तरस्थस्य दशा स्यादवरोहिणी। तस्यामल्पमवाप्नोति फलं क्लेशाच्छुभं नरः। मित्रोच्चस्वांशकस्थस्य मध्या मध्यफला तु सा। नीचोच्चमध्यगस्योक्ता श्रेष्ठा चारोहिणी दशा। सैवाधमाख्या भवति नीचराश्यंशगस्य तु। अवरोहिणी चेदधमा भवेत् कष्टफला तदा। आरोहिणी मध्यफला संपूर्णा परिकीर्त्तितेति" ६ भट्टो०।

"नीचारिभांशे समवस्थितस्य शस्ते गृहे मिश्रफला प्रदिष्टा। संज्ञानुरूपाणि फलान्यथैषां दशासु वक्ष्यामि यथोपयोगम्" ७ मू०।

"अथ दशान्तर्दशासंज्ञाः पुनरप्युपजातिकयाह नीचारीति शस्तानि गृहाणि स्वोच्चमूलत्रिकोणात्मक्षेत्रमित्रक्षेत्राणि तेष्ववस्थितेन नीचराश्यंशकेऽरिभांशे शत्रु-

नवांशके समवस्थितेन वा ग्रहेण दत्ता या दशान्तर्दशा वा सा मिश्रफलानाम्नैव मिश्रफला शुभमशुभञ्च फलं प्रयच्छति व्याधिसमेतमर्थागममेवमादिशेत् अर्थादेवाशस्तराशिगतेन, अशस्ताः शत्रुनीचराशयः तद्गेन खोच्चमित्रमूलत्रिकोणात्मवर्गोत्तमनवांशकगेनापि दत्ता मिश्रफलैव भवति संज्ञारूपाणि नामसदृशानि फलानि दशास्वन्तर्दशासु च ज्ञेयानि। तद्यथा संपूर्णाऽत्यन्तश्रेष्ठफलप्रदा। पूर्णा श्रेष्ठफला। अधमाऽशुभफलदा अल्पफलदा रिक्ता अर्थापहारिणी अनिष्टफलदात्यन्तमशुभफलकारी। मिश्रफला शुभमशुभञ्च फलं प्रयच्छति। अथैषां दशास्विति अथशब्दः आनन्तर्य्ये एषामादित्यपूर्वाणां ग्रहाणां दशासु यथोपयोगम् उत्तरत्र वक्ष्यामि यथा येन प्रकारेणैव युज्यते तथा तत्कथयिष्यामि कस्यान्तर्दशायां किं फलमुपयुज्यत" ७भट्टो०

"उभयेऽधममध्यमपूजिता द्रेष्काणैश्चरभेषु चोत्क्रमात्। अशुभेष्टसमाः स्थिरे क्रमाद्धोरायाः परिकल्पिता दशा" ८मू०।

"अथ लग्नदशायां शुभाशुभज्ञानं वैतालीयेनाह उभये इति। उभये द्विस्वभावे राशौ लग्नगते द्रेष्काणक्रमेणाधममध्यमपूजिता दशा ज्ञेयाः प्रथमद्रेष्काणे जातस्याधमाऽशोभनाऽनिष्टफला द्वितीये द्रेष्काणे मध्यमा मिश्रफला तृतीये द्रेष्काणे पूजिता श्रेष्ठफला। चरभेषु चरराशिषु उत्क्रमेण वैपरीत्येन तेन प्रथमद्रेष्काणे जातस्य पूजिता द्वितीये मध्यमा तृतीयेऽधमानिष्टफला अशुभेष्टसमाः स्थिरे क्रमादिति स्थिरे स्थिरराशौ प्रथमद्रेष्काणेऽशुभा द्वितीये द्रेष्काणे दृष्टा श्रेष्ठा तृतीये द्रेष्काणे समा मध्यफला एवं होरायाः लग्नस्य दशाः परिकल्पिता उक्ता इति" ८भट्टो०।

"एकं द्वौ नवविंशतिर्षतिकृती पञ्चाशदेषां क्रमाच्चन्द्रारेन्दुजगुरुजीवदिनकृद्वैवाकरणीणां समाः। स्वैः स्वैः पुष्टफला निसर्गजनितैः पक्तिर्दशायाः क्रमादन्ते लग्नदशा शुभेति यवनानेच्छन्ति केचित्तथा" ९मू०।

"अथ नैसर्गिकदशाकालं ग्रहाणां शार्दूलविक्रीडितेनाह एकमिति। एकाद्याः समाः एकादीनि वर्षाणि चन्द्रादीनां यथाभिहितानि नैसर्गिकाणि तद्यथा जन्मसमयादारभ्यैकं संवत्सरः एकश्चन्द्रस्य ततः परं द्वावारस्याङ्गारकस्य एवं त्रयः ततः परं नवेन्दुजस्य बुधस्य एवं द्वादश। ततः परं विंशतिः शुक्रस्य एवं द्वात्रिंशत्। ततः परं धृतयः अष्टादश जीवस्य गुरोः एवं पञ्चाशत् ततः परं कृतिसंख्या विंशतिः दिनकृतः सूर्य्यस्य एवं सप्ततिः। ततः परं पञ्चाशत् दैवाकरेः शौरेः, एवं विंशत्यधिकं वर्षशतम् १२०। एतेषु निसर्गदशाधिपेषु ग्रहेषु बलवत्स्वपचयशब्दितेषु च तद्दशासु शोभनानि दशाफलानि भवन्ति हीनबलेष्वनुपचयस्थेष्वशोभनानि। एतच्च सर्वथा चिन्त्यम्। यतो निसर्गदशास्वविसंवाद इति तथा च यवनेश्वरः "स्तनोपभोगः शशिनो वयः खम् भौमस्य विद्याद्गुणनानुजन्म। बौधन्तु शिक्षापदकालमाहुर्मैथुनेच्छा ललितप्रवृत्तिम्। शौक्रं युवत्वं विधुपूर्वदृष्टमामध्यमाद्देवगुरोर्वदन्ति। रवेर्वयोऽर्धात्परमन्यमस्मात् सौरेर्जरा दुर्भगकालमाहुरिति" नैसर्गिकस्वदशाकालस्य प्रयोजनमाह स्वैः स्वैरिति तत्र यस्य ग्रहस्य सम्बन्धिनी पूर्वविधिना ज्ञाता दशान्तर्दशा वा सा यदि नैसर्गिकसमाभिः निसर्गकथितवर्षैः स्वैः स्वैः आत्मीयैः युज्यते स्वदशाकालेन समकालं भवति तदा यावत्कालं तस्य दशाहयस्यैक्यं भवति तावत्कालं तस्य दशान्तर्दशा वा यदि भवति तस्याः पुष्टा परिपूर्णा फलपक्तिः पाको भवति क्रमात् प्रतिपद्य यावद्वर्त्तते तावच्छुभफलेत्यर्थः। अत्र केचिद्वदन्ति "यथा पूर्वविधिना ज्ञाता शुभा तदा शुभफलमत्यर्थं प्रयच्छत्यथाशुभा तदाऽशुभमत्यर्थमिति" एतच्चायुक्तम् यस्माद्यवनेश्वरः "स्वेष्टा दशा स्वे वयसि ग्रहस्येति" तथा च सत्यः "एकाब्दिकः शशी त्र्यब्दिकः कुजो द्वादशाब्दिकः सौम्यः द्वात्रिंशद्भृगुपुत्रो गुरुस्तु कथितः शतस्यार्द्धं ५०। सप्तत्यब्दः सूर्य्यो विंशत्यधिकः शनैश्चरोऽब्दशतः। वयसोऽन्तराणि चैषां स्वदशा नैसर्गिकः कालः। स्वं वयसः सदृशं ग्रहाः समासाद्य देहिनां कालम्। भक्षणपोषणचेष्टास्वभावदाः स्युर्यथासंख्यम्"। अथ लग्नदशानैसर्गिककालं पुराणयवनमतेनाह अन्ते लग्नदशा इति विंशत्यधिकाद्वर्षशताद्ऊर्ध्वं यदि कस्यचिदायुषः कालो भवति तदा स कालः सर्व एव लग्नस्य नैसर्गिकी दशा। कालो भवति तस्मिन काले पुराणयवनानां मतेन लग्नदशा शोभना भवति। विंशत्यधिकाद्वर्षशताद्ऊर्ध्वमित्येतत् कुतोऽवगम्यते उच्यते तदर्वाक्कालस्यान्यग्रहपरिग्रहीतत्वात् लग्नस्यानादकाशादेव। अथ वान्यः कश्चिदाह यथा ननु विंशत्यधिकात् शताद्धिकं यस्यायुर्नास्ति किं तस्य लग्ननैसर्गिको दशाकालो नास्ति। उच्यते नास्त्येव न केवलं यावद्वर्षसप्ततेरत्यधिकं नास्ति यस्यायु

नास्ति तस्य शनैश्चरसम्बन्ध नैसर्गिको दशाकालो नास्ति यस्य पञ्चाशतोऽधिकं नास्ति तस्यादित्यस्यापि नास्ति एवमन्येषामपि योज्यम् ननु विंशत्यधिकं वर्षशतं परमायुरत ऊर्ध्वं जीवितासम्भवात्को लग्नस्य नैसर्गिको दशाकालः उच्यते पूर्वमेव व्याख्यातं यथा विंशत्यधिकं वर्षशतं परमायुः त्रैराशिकाद्यमस्वादीनामायुर्ज्ञानार्थं प्रदर्शितं यतः तावत्प्रमाणादायुषः परं सम्भवतीति तथा च यदा मीनलग्ने बलवति मीनांशकाले च कश्चिज्जातो भवति सर्वे च ग्रहाः यत्र तत्र राशौ मीनांशकावस्थिता भवन्ति केचिदुच्चगताः केचिच्च वक्रितास्तदा मीनलग्नो द्वादशवर्षाणि ददाति स एव बलयुतस्तदान्यानि द्वादशवर्षाणि ग्रहश्चैको मीनांशकालं गत्वा द्वादशवर्षाणि ददाति तानि च वक्रोच्चगत्वात् त्रिगुणानि षट्त्रिंशद्भवन्ति आदित्यवर्जम् आदित्यस्य मेषे धन्वंशके गतस्य सप्तविंशतिवर्षाणि भवन्ति एवं चन्द्रादीनां यस्यां शतद्वयं षोडशाधिकं भवति आदित्यस्य सप्तविंशतिः लग्नस्य चतुर्विंशतिः। एवमेकीकृतं शतद्वयं सप्तषष्ट्यधिकं भवति। नन्वेतावत्, प्रमाणं कालं कश्चिज्जीवमानो न दृश्यते योनेस्तातिदुर्लभत्वात् उच्यते कश्चित् दृश्यत एव जन्मादिकः नेच्छन्ति केचित्तथा तां लग्नदशामन्ये केचिदाचार्याः स्मृतिकीर्त्तिप्रभृतयः तथा तेनैव प्रकारेण शुभेति नेच्छन्ति नो याच्छन्तीत्यर्थः यस्माद्बलत्वे लग्नस्य वयोऽन्ते तद्दशा भवति सा शुभा। आचार्येण लग्नदशायां शुभाशुभत्वं बलवशादुक्तं द्रेष्काणवशादुक्तम् उभयेऽधममध्यपूजिता इति यस्माद्बलहीनस्यापि लग्नस्य वयोऽन्ते दशाद्रेष्काणवशाच्छुभा भवति तस्माद्ये आचार्या अन्ते लग्नदशां नेच्छन्ति ते निष्कारणमेव नेच्छन्ति। ननु किमागमग्रन्थानां कारणेन उच्यते य एवाचार्याः अन्ते लग्नदशां नेच्छन्ति त एवागमानां त्यक्त्वा यथादर्शितकारणम् उपन्यस्य नेच्छन्ति तेन कारणेन दोष उक्तः तथा च स्मृतिकीर्त्तिः "अन्ते लग्नदशा शुभेति" यवनानैतद्वचनं मतं तस्मिन् हीनबले यतोऽन्यसमये साम्यादतो नेष्यते एतच्छ्रुतकीर्त्तिना कारणमुपन्यस्तं तच्च दृष्टमतो नैसर्गिके लग्नदशाकालेऽन्तदशा शुभेत्यवगन्तव्यम्" भट्टो०।

"पाकस्वामिनि लग्नगे मुहृदि वा वर्गस्यसौम्येऽपि वा प्रारब्धा शुभदा दशा त्रिदशषड्लाभेषु वा पाककृत्। मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थितश्चन्द्रः सत्फलबोधनानि कुरुते पापानि चातोऽन्यथा" ।०मु०।

"अथ दशान्तर्दशाशुभाशुभज्ञानं शार्दूलविक्रीडिते-नाह प्राकस्वामिनीति। सौरसावनचान्द्रनाक्षत्राणि च त्वारि मानानि तत्र सौरमानं रविभगणभोगः। यावता कालेनार्कोऽमेकं भुङ्क्ते स सौरो मासदिनं यावता कालेन राशिद्वादशकं भुङ्क्ते तत्सौरं वर्षं तच्च पञ्चषष्ट्यधिकैस्त्रिभिः शतैः दिनानां घटिकापञ्चदशकेन सार्द्धेन भवति। सावनसूर्योदयादुदयः। अर्कोदयात् पुनरेवार्कोदयः सावनमहोरात्रं तच्च षष्टिघटिकमहोरात्रं अहोरात्रत्रिंशन्मासः मासा द्वादश वर्षम्। एवं पञ्चाधिकैस्त्रिभिः शतैः दिनानां सावनं वर्षम्। चान्द्रं तिथिभोगः तच्च स्वमानेन षष्ट्यधिकं शतत्रयं भवति सावनेनेदं मानं शतत्रयं चतुःपञ्चाशदधिकं दिनानां तच्चान्द्रं वर्षं भवति। एवं सौरसावनचान्द्राणि त्रीणि मानानि प्रत्येकं स्वस्वमानेन षष्ट्यधिकं शतत्रयं भवति। नाक्षत्रं चन्द्रनक्षत्रभोगः तच्च दिनानां सप्तविंशत्या मासो भवति तत्र शतत्रयेण चतुर्विंशत्यधिकेन दिनानां वर्षसङ्ख्या "रव्यंशगोऽहोरात्रः सौरश्चान्द्रसमस्तिथिः। चन्द्रनक्षत्रभोगस्तु नाक्षत्रः परिकीर्त्तितः। स सावनो ग्रहर्क्षाणामुदयादुदयावधि। नाक्षत्रमाने मासः स्यात् सप्तविंशतिवासरः। शेषमानेषु निर्दिष्टो मासस्त्रिंशद्दिनात्मकः" इति तस्मात् सावनमानेनायुर्दायगणना कार्या यस्माच्छोध्यक्षेपविशुद्धगायुः कर्त्तव्यं तच्च सावनमानं सौरमानेन संक्रान्त्यवधिको मासः सावनस्त्रिंशद्दिनः चान्द्रोऽमास्यान्तिकः, नाक्षत्रो रेवत्यन्तिकः। सौरमधिमासकयुतं चान्द्रं भवति चान्द्रमवमरात्रोनं सावनं भवति चान्द्रं सावनाक्षत्रम् उक्तञ्च "युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रम्। अवमत्रिहीनं सावनमैन्दवमष्टान्वितं वर्षमिति। एवं शोध्यक्षेपविशुद्धं सावनमानेनायुर्दाविधिः तथा च मयूरचित्रकगगवान् गार्गिः "आयुर्दायविभागश्च प्रायश्चित्तक्रियास्तथा। सावनेनैव कर्त्तव्या सत्राणामप्युपासनम्"। नन्वर्कोदयादारभ्यार्कोदयावधिं यावदहोरात्रं तत् पुलिशतन्त्रे सौरमहोरात्रं पठ्यते। "अष्टाक्षवसुसप्तमरूपनवसुनिनगतिथयः शतगुणाश्च सौरेणेति" एतच्च पुलिश एव जानाति यस्मात् पुलिशतन्त्रं वर्ज्यायित्वा सर्वसिद्धान्तेषु तन्त्रेषु सौरमानेन रविभगणभोगः सौरमानमधिमासयुक्तं चान्द्रमवमरात्रोनं सावनं भवति एवं शोध्यक्षेपविशुद्धं चान्द्रं भवति। सावनमानं सर्वसंहितासु

चार्कोदयादारभ्यार्कोदयं यावद्यद्दिनरात्रं तत्सावनमहोरात्रमिति संज्ञा तथा च भगवान् पराशरः गार्गिश्च "सावनेन स्मृतो मासस्त्रिंशद्भुक्तिकरोदयः" तथा श्रीभट्टब्रह्मगुप्तः "सावनसूर्योदयादुदयमिति" एवं पुरुषस्य जन्मसमये सावनमहर्गणं कृत्वा तस्मात्तिथिनक्षत्रपरिच्छेदस्तात्कालिकाग्रहाः सलग्ना यथा कृतास्तथा दशान्तर्दशावसाने कर्त्तव्याः ततः व्यागामिदशाफलं वक्तव्यम् । कथ्यतेऽत्र । प्रथमं जन्मनि अहोरात्रात् तात्कालिकं कृत्वा ततस्तत्रान्तर्दशाकालं वर्षादिकं दिनीकृत्य योजयेद्वर्षाणि द्वादशभिः संगुण्य तेषु मासान् संयोज्य त्रिंशता पुनः संगुण्य तेषु दिनानि क्षिपेत् । एवं कृते दशाकालो दिनरूपो भवति तच्च तात्कालिके जन्माहर्गणे सविकले सविकलं संयोज्याहर्गणो भवति तत्राद्यो यद्घटिकादिः कालो भवति तस्यातीताहोरात्रात्परतो गणना कार्या तस्मादिष्टदिनमानमानयेदनेनाचार्यसूर्येण द्युगणोऽधोभवगुणितो द्विनवरसाप्तावधिकश्चान्द्रः चान्द्रोऽधरर्तुवेदानागाप्तः अधिमासदिनैर्हीनः इति अथ वसुगुणत्रिरात् मुनिगुणितैः द्विनवखरसाप्तः पृथग्गमखदिग्गिः लब्धं खरामगुणितं गुडाप्तात् मेककोरविद्युगणः एतत् खण्डनाद्यकरणेनैव भवति । कोऽसौ रविद्युगण इत्याह शाकोऽगवसुशरोनोऽर्कगुणः चैत्रादिमासयुक्तः त्रिंशद्गुणस्तिथियुत इति । अत्र षष्ट्यधिकेन शतत्रयेण भागमपहृत्यावाप्तं करणाब्दाः शेषास्त्रिंशद्भक्तास्तैत्रसितादयो मासाः शेषा वर्त्तमानमासे सितादयस्तिथयः करणाब्देष्वगवसुशरान् संयोज्यातीतशककालो भवति तस्मिन् शाके तस्मिन्मासे तस्मिन् दिने सोऽहर्गण इति तत्रैव दशाप्रवेशः पुनरप्यन्यमन्तर्दशाकालं दिनीकृत्य तस्मिन् योजयेत् एवं यावत्योऽन्तर्दशा भवन्ति तावत्योऽनेनैव प्रकारेण योजनीयाः । एवं ततो ग्रहान् लग्नञ्च गणयेत् अथ वानेन प्रकारेण कालानयनम् "आदित्ये क्रियमाणे यावन्तो गतभगणा भवन्ति तावन्तः करणप्रारम्भादारभ्य गताब्दाः । तेषु करणप्रणीतं शककालं संयोज्येष्टशककालो भवति वर्त्तमाने वर्षे यावन्तो राशयः स्फुटार्का भवन्ति तावन्तो मासाः सूर्यभगणानीतात् शुक्लपक्षं कृष्णपक्षं वा तिथिनक्षत्रं चन्द्रार्काभ्यां ज्ञायते एव । पाकस्वामिनीत्यादि यस्य ग्रहस्यान्तर्दशाप्रवेशः स पाकस्वामी तावच्चासौ पाकस्वामी यावत् तस्यान्तर्दशामेव । स च पाकस्वामिन्यन्तर्दशाप्रवेशे लग्नगो यदि भवति तदा तस्य सम्बन्धिन्यन्तर्दशा प्रारब्धा शुभदा शोभनफलदा भवति अथ वा तात्कालिकं पाकस्वामिनो यत् सुहृन्मित्रं तस्मिन्नपि दशा प्रवेशकाले लग्नगे शोभना दशा वक्तव्या । अथ वास्य दशापतेः पूर्वव्याख्यातो यो वर्गः तस्मिन्नपि लग्नगे शोभना । अथवान्यस्मिन् सौम्ये शुभग्रहे तत्काललग्नगे दशा प्रारब्धा शोभनैव । अथवा पाकमे दशाधिपतौ अथ तात्कालिकलग्नाच्चिदशषड्लाभेषु तृतीयषष्ठदशमैकादशस्थानानामन्यतमस्थे शोभनैव दशा वक्तव्या । यद्यपत्र सामान्येनोक्तं प्रारब्धा शुभदा दशा तथापि "अधिशत्रुदशां शत्रोः प्राप्तोऽनिष्टफलप्रदः । अधिमित्रोऽपि मित्रस्य दशां प्राप्तोऽतिशोभनः। समः समदशामेत्य यथोक्तफलदो हि सः"। एतदपि चिन्तनीयम् अनेन प्रकारेण यदि शुभफलान्तर्दशा भवति तदा शुभैव अन्यथाऽशुभैव । अथ शुभफलायामन्तर्दशायां किमप्यनवरतमेव सर्वकालं शुभफलावाप्तिर्भवति किं वा कस्मिंश्चिद्दिवसे एवमशुभायामन्तर्दशायामशुभफलावाप्तिरित्युभयत्र सन्देहव्युदासार्थमाह मित्रोच्चोपचयेत्यादि पाकेश्वरस्य दशापतेः प्रतिराशौ सञ्चरतः तत्काले यो ग्रहो मित्रं तत्तुङ्गस्थितचन्द्रमा यदा भवति तदा सत्फलबोधनानि कुरुते न केवलं यावत् पाकपतेरुपचयस्थानगतोऽपि त्रिषड्डेकादशदशमस्थानानामन्यतमस्थानस्थस्त्रिकोणगोऽपि नवपञ्चमस्थानगतोऽपि तथा मदनस्थः सप्तमे च स्थितः एतेषु निर्दिष्टस्थानेष्वन्यतमस्थानगश्चन्द्रभाः शुभफलायां दशायां सत्फलबोधनानि कुरुते । ज्ञायते ,तेषां फलानामित्यत्रोच्चोपचयत्रिकोणमदने यस्मिन् स्थाने पाकेश्वरस्य चन्द्रमाः स्थितः स राशिः जन्मनि योभाव आसीत्तदुद्भूतं सत्फलं बोधयति विशेषेण तथा दशा पठितमिति अतोऽस्मादुक्तप्रकारादन्यथा पाकपतेस्तत्कालं शत्रुगृहे नीचराशौ वा दशापतिना सहैकराशौ द्वितीयचतुर्थाष्टमद्वादशस्थानानामन्यतमस्थानस्थो भवति तदा शुभफलायां दशायां पापानि फलानि प्रकटीकरोति य च राशिर्यो भाव आसीत्तदुद्भूतं फलं बोधयति विशेषेण दशापठितमपि अनिष्टमष्टकवर्गोद्भूतं च मिश्रदशायां मित्रोच्चोपचयादिषु सत्फलबोधनानि कुरुते शत्रुनीचादिषु अशुभफलानामिति तथा च भगवान् गार्गिः "यद्राशिसंस्थः शीतांशुः शुभकृत् परिकीर्त्तितः। सराशिर्जन्मकाले तु यो भावस्तत् कृतञ्च तत्" । शरीरादि-

कृतं सौख्यं वक्तव्यं बलयोगतः अनिष्टराशिसंस्थं तु तद्भावानामशोभन इति" १० भट्टो० ।

"दशासु शस्तासु शुभानि कुर्वन्त्यनिष्टसंस्थास्वशुभानि चैवम् । मिश्रासु मिश्राणि दशाफलानि होराफलं लग्नपतेः समानम्" १६ मू० ।

"अथैकस्मिन् वृत्ते दशासु शुभान्यशुभानि च फलान्युक्तानि तेषां विषयविभागं लग्नदशाफलं चोपजातिकयाह दशासु इति शुभाशुभं व्यामिश्रत्वं दशासु पूर्वमेवोक्तं तथा जन्मकाले उपचयराशिस्थानिर्मलमूर्त्तयः स्वष्टगतश्च ये ग्रहास्तेषामपि दशाः शुभाः ये चोपचयस्था हता रुग्णाः खलमूर्त्तयस्तेषामपि दशा अशुभाः तथा च यवनेश्वरः "निशाकराद्दित्यविलग्नभानां तत्कालयोगादधिकं बलं यः । बिभर्त्ति तस्यादिदशेष्यते सा शेषास्ततः शेषबलक्रमेण । वयोऽधिको यः प्रथमाद्गतो वा ग्रहः स पूर्वं पठितो दशेशः । बलाधिकश्चेद्यदि केन्द्रसंस्थः पूर्वं स शेषासु यथा प्रदिष्टः । श्रेष्ठा दशा स्वे वयसि ग्रहस्य स्वोच्चश्रितात्कालबलाश्रिताच्चेत् । मूलत्रिकोणात् स्वगृहाच्च मध्या मित्राश्रिताच्चन्मगृहाश्रिताद्वा । नीचारिभांशोपगताच्छिताद्वा गृहात् परिध्वस्तविवर्णरुग्णा । जन्मेशशत्रोर्निधनारिभेशाद् या वाप्यते सा बहुदोषदा स्यात्" । एवं शस्तासु शोभनासु दशासु ग्रहाः शुभान्येव फलानि कुर्वन्ति दशाफलवृत्ते यानि शुभान्यभिहितानि तान्येव भवन्ति नेतराणि, अनिष्टसंस्थास्वशुभदशासु अशुभान्यनिष्टानि एव भवन्ति मिश्रासु दशासु मिश्राण्येव दशाफलानि भवन्ति एतच्च प्रतिसूत्रमग्रेऽभिव्याख्यातं तथा च सत्यः "जन्मन्युपचयभवनेषु संस्थिताः सव्यगाः सुमूर्त्तिधराः, श्रेष्ठं फलं विदध्युर्ग्रहाः क्रमात् स्वां दशां प्राप्य अन्यैर्निहता रुग्णाल्पमूर्त्तयो ह्युपचयर्क्षसंस्थाश्च स्वदशाभिहतं नेष्टं ग्रहाः प्रयच्छन्ति लोकेषु होराफलं लग्नपतेः समानमिति" होरायाः लग्नस्यान्तर्दशाफलं लग्नपतेः लग्नाधिपस्य समानं तुल्यम् वक्तव्यं यथा मेषलग्नजातस्य भौमदशाफलं वृषलग्नजातस्य शुक्रदशाफलं एवमन्येष्वपि वक्तव्यं किन्तु द्वेष्काणदशाच्छुभायां लग्नदशायां शुभफलमशुभायामशुभम् मिश्रायामुभयमपि । अथ ये पूर्वं दशारिष्टा उक्तास्तेषामिमे भङ्गाः प्रोक्ताः तथा च सारावल्याम् "प्रवेशे बलवान् खेटः शुभैर्वा संनिरीक्षितः । सौम्याधिमित्रवर्गस्थो मृत्युकृत् न भवेत् तदा । अन्तर्दशाधिनाथस्य बिबलस्य दशा यदा । बलिनः स्यात् तदा भङ्गो न बाध्या तस्य च ध्रुवम् । युद्धे च विजयी तस्मिन् ग्रहयोगे शुभो यदि । दशायां न भवेत् कष्टं स्वोच्चादिषु च संश्रिते इति" १८भट्टो०।

"संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवो यस्य यस्योपदिष्टः । भावस्थानालोकयोगोद्भवञ्च तत्तत्सर्वं तस्य योज्यं दशायाम्" २०मू० ।

"अथान्येषामपि फलानां दशास्वतिदेशं मालिन्याह संज्ञाध्याये इति । यस्य ग्रहस्य संज्ञाध्याये यद्द्रव्यम् "ताम्रं स्यान्मणिहेमेत्यादिना, अन्येनोक्तं कथितं तस्य तद्द्रव्यस्य शुभदशायां प्राप्तिः योज्या अशुभदशायां हानिः। यस्य कर्माजीवो यस्य ग्रहोपदिष्टो जातकेऽभिहितः "अर्थाप्तिः पितृपत्नीत्यादि तस्य ग्रहदत्तस्य कर्माजीवस्य तदन्तर्दशायामेवाप्तिर्भविष्यति । भावफलं वक्ष्यति "शूरस्तब्ध" इत्यादि स्थानफलं राशिफलं "प्रथितश्चतुरोऽटन" इत्यादि तथा "मेषे सस्मितमिरनयन" इत्यादि । आलोकनफलं दृष्टिफलम् "चन्द्रे भूपबुधौ" इत्यादि योगोद्भवं नाभसयोगानुक्त्वा "सर्वयोगेषु योगकर्तृभ्यो ग्रहेभ्यो मध्याद् यो बलीयान् स स्वदशायामेव फलं ददाति" नाभसयोगाः सकलदशास्वपि फलप्रदाः वक्ष्यति च "इति निगदिता योगाः सार्द्धं फलैरिह नाभसाः नियतफलदाश्चिन्त्या ह्येते समस्तदशास्वपीति" । एवमादि यद् यदुक्तं तत्सर्वं निरवशेषं तस्य ग्रहस्य दशायां योज्यमिति" २०भट्टो० ।

"छायां महाभूतकृताञ्च सर्वेऽभिव्यञ्जयन्ति स्वदशामवाप्य । कम्बग्निवाय्वम्बरजान् गुणांश्च नासास्वक् त्वक्श्रवणानुमेयान्" २१ मू० ।

"अथ यस्य जातकमपि न गणितं तस्य शरीरच्छायां दृष्ट्वा ग्रहदशाज्ञानमिन्द्रवज्रयाह छायां महाभूतकृतामिति पूर्वसूक्तम् "शिखिभूखपयामरुद्गणानां वशिनो भूमिसुतादयः क्रमेणेति" तत्रादित्यचन्द्रौ वक्ष्यम्बुप्रसिद्धावेव यः कश्चिद्गुरुः स्वदशामात्मीयदशामवाप्य महाभूतकृतां छायां अभिव्यञ्जयति प्रकटीकरोति छायाशब्देन शरीरशोभाभिधीयते शरीरकान्तिरित्यर्थः तथा च मच्छायोऽयं विच्छायोऽयं वर्त्तत इत्यभिधीयते एवमात्मीयदशायां पृथिव्यादिमहाभूतकृतां शरीरच्छायां व्यञ्जयति प्रकटीकरोति सा च कम्बग्निवाय्वम्बरजान् गुणान् कुः पृथिवी अन्नकरणः अग्निः क्षुतापनः

वायुः अनिलः अम्बरम् आकाशम् एभ्यो जातोत्पन्ना सा छाया तद्गुणान् करोति तांश्च यथासंख्यं नासास्त्वक्चक्षुश्रवणानुमेयान् । पार्थिवी पार्थिवं गुणं गन्धमभिव्यञ्जयति नासानुमेयं घ्राणेनोपलभ्यते आप्या आप्यं गुणं रसमभिव्यञ्जयति तज्जिह्वानुमेयम् आस्यशब्देनेह जिह्वा ज्ञेया तया रसस्योपलब्धेः आस्यग्रहणं चात्र वृत्तानुरोधात् कृतम्, आग्नेयी आग्नेयं गुणं रूपमभिव्यञ्जयति दृष्ट्यनुमेयं, वायवी वायव्यं स्पर्शं गुणमभिव्यञ्जयति त्वगनुमेयं स्पर्शेनोपलभ्यते नाभसी नाभसं गुणं शब्दमभिव्यञ्जयति श्रवणानुमेयं कर्णोपलभ्यम् । एतदुक्तं भवति यदा गुणगन्धः पुरुषो भवति तदास्य बुधकृता पार्थिवीच्छाया ज्ञेया । यदा मिष्टरसभोजी भवति तदास्य चन्द्रशुक्रकृताप्या छाया ज्ञेया । यदातीवरूपवान् सुकान्तः पुरुषो भवति तदा सूर्यभौमकृता आग्नेयी छाया ज्ञेया । यदा स्पर्शेन मृदुर्भवति तदा शनैश्चरकृता वायवी छाया ज्ञेया । यदास्य वचनं कर्णयोः सुखकरं भवति तदा जीवकृता नाभसी छाया ज्ञेया । छायाविशेषलक्षणमाचार्येण संहितायामभिहितम् तथा च "छाया शुभाशुभफलानि निवेदयन्ती लक्ष्मा मनुष्यपशुपक्षिषु लक्षणज्ञैः । तेजो गुणान् बहिरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्नघटस्थितेव । स्निग्धद्विजत्वङ्नखरोमकेशा छाया सुगन्धा च महीसुतस्या । तुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहनि प्रवृत्तिम् । स्निग्धा सिता च हरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान् करोति । सर्वार्थसिद्धिजननी जननीव चाया छायाफलं तनुभृतां शुभमाददाति । चण्डा कृशा पद्मदेहाग्निवर्णा युक्तं तेजो विक्रमैः सप्रतापैः । आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते । मलिनपरुषकृष्णा पापगन्धानिलोत्था जनयति बधबन्धं व्याधनर्थार्थनाशम् । स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा" २१भट्टो० ।

"शुभफलददशायां तादृगेवान्तरात्मा(ख्या) बहु जनयति पुंसां सौख्यमर्थागमं च । कथितफलविपाकैस्तर्कयेद्वर्त्तमानां परिणमति फलाप्तिः स्वप्नचिन्ताखवीर्यैः"२२मू०

"अत्र च वायवीं छायां वर्जयित्वा सर्वास्वेव छायासु अशुभं शुभं च फलं तत्कथम् शुभफलेयमशुभफलेयमिति तद्दशा ज्ञायते तत्संज्ञानमन्तरात्मनः स्वरूप वाचिन्याह शुभफलदेति शुभं फलं ददाति यः स शुभफलदः शुभफलदस्य ग्रहस्य या दशा तस्याम् अन्तरात्मा स्वदेहस्थः परमात्मा चित्स्वरूपः तादृगेव शुभो भवति । तस्य च पुरुषस्य छायादर्शितग्रहदशाकाले बहुविधमनेकप्रकारं सौख्यं सुखभावमर्थागमं धनलाभं च जनयत्युत्पादयति अर्थादेवाशुभदशायां पुरुषस्यान्तरात्माप्यशुभो भवति तत्र दर्शितग्रहछाया सूचिता तादृगेव फलदा सा चासौख्यमनर्थागमञ्च बहुप्रकारं जनयति मिश्रायां मिश्रा च । यात्रायाञ्च वक्ष्यति "निमित्तानुचरं सूक्ष्मं देहेन्द्रियमहत्तरम् । तेजो ह्येतच्छरीरस्थं त्रिकालफलवत्तृणाम् । प्रीतये न मनो नार्थेनासिद्धावभिनन्दति । तस्मात् सर्वात्मना यातुरनुमेयं यथा मनः। शुभाशुभानि सर्वाणि निमित्तानि स्युरेकतः । एकतश्च मनःशुद्धिस्तद्विशुद्धिर्जयावहा" इति कथितफलविपाकैरिति ग्रहाणां दशासु यानि फलानि शुभान्यशुभानि कथितान्युक्तानि तानि यः पुरुषो भुङ्क्ते तस्य पुरुषस्य तद्ग्रहदशा वर्त्तते इति ज्ञेयम् एतदुक्तं भवति यादृशं फलं शुभमशुभं वा पुरुषस्योपलभ्यते तच्च यस्य ग्रहस्य दशायां पठितं सा तस्य दशा नरस्य वर्त्तत इति ज्ञेयम् । एवं वर्त्तमानां दशान्तर्कयेल्लक्षयेदित्यर्थः । एवं छायावशेनान्तरात्मवशेन फलपक्षिवशेन वा गणितस्य जातकस्य वर्त्तमानां दशां वदेत् । यथा सौरदशायामशुभायां व्यङ्गत्वमुक्तं न च शुभायामथ नैकध्यं व्यङ्गत्वं दृष्टम् । शुक्रदशायां शुभायां निधिप्राप्तिरुक्ता न च सापि दृष्टा । तदर्थमाह परिणमति फलाप्तिरिति अवीर्यैः बलहीनैः ग्रहैः फलानि यानि शुभान्यशुभानि वा दत्तानि तत्फलाप्तिः फलप्राप्तिः स्वप्ने स्वप्नावस्थायां परिणमत्यनुभूयते चिन्तायां मनोरथेन वेति । केचित्तु "शुभफलददशायां तादृगेवान्तराख्येति पठित्वैवं व्याचक्षते यथा शुभायां दशायामन्तराख्यान्तर्दशा शुभापि भवति तदा पुंसां बहु जनयति सौख्यमर्थागममिति अर्थादेवाशुभायां दशायामशुभान्तर्दशा असौख्यमनर्थागमञ्च बहु जनयतीति"अनेन व्याख्यानेन शुभायामशुभायाञ्च शुभाशुभानि भवन्ति मिश्रफलं प्रयच्छन्ति । न चैतदिष्यते यस्मादुक्तम्"एकर्क्षगोऽर्कमपहृत्य ददाति तु स्वमिति" अत्र दशापतेः फलमपहृत्यान्तर्दशापतिरेव स्वं फलं ददातीति ज्ञेयम् अन्यथापहृत्येति निरर्थकं स्यादिति तस्मात् पूर्वपाठः श्रेयान् द्वितीयः प्रमादपाठः । प्रमादपाठेन विना छायां दृष्टाया दशायाः शुभाशुभत्वज्ञानेन

एष दशाङ्गधूपस्तु रुद्रस्यापि मनोहरेदिति" शब्दार्थचि० धृतवाक्यम्। पुष्पदानोत्तरं देवाय दीयमाने ३धूपविशेषे यथा "मधुसक्तं घृतं गन्धो गुग्गुल्वगुरुगैलजम्। सरलं सिद्धसिद्धार्थं दशाङ्गधूप उच्यते इति"। अन्यच्च। कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम्। केशरं वालकं पत्रं त्वक् जातीकोषसुत्तमम्। सर्वमेतद्घृतयुतं दशाङ्गधूप ईरित" इति।

दशाङ्गुल न०दश अङ्गुलय इव फलत्वगुपरि सन्त्यस्य अच्। १खर्बुजे फलभेदे भावप्र०तस्य फलोपरि अङ्गुलाकारदशसिरासत्त्वात् तथात्वम्। तद्गुणाः खर्बुजशब्दे २४६९ पृ० उक्ताः। दश अङ्गुलयः प्रमाणमस्य तद्धितार्थद्विगोः ठञ् तस्य लुक् अचसमा०। २दशाङ्गुलिप्रमाणयुक्ते त्रि०। "निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः" मनुः। सहस्रशीर्षेत्यादि "अत्यतिष्ठद्दशाङ्गुलम्" ऋ० १०।९०।१ "दशाङ्गुलं दशाङ्गुलिपरिमितं देशमत्यतिष्ठत् अतिक्रम्य व्यवस्थितः" भा०।

दशाधिपति पु० ६त० ज्योतिषोक्ते १दशापतौ रव्यादिग्रहे दशानां पदातीनामधिपतिः। दशपदात्यधिपत्ते राजनियुक्ते २सैन्यभेदे च (जमादार) "समानाशनपानास्ते कार्याः द्विगुणवेतनाः। दशाधिपतयः कार्याः शताधिपतयस्तथा। ततः सहस्राधिपतिं कुर्याच्छूरमतन्द्रितम्" भा०शा०१००अ०।

दशानन पु० दश आननान्यस्य। रावणे शब्दर०। "दशानन किरीटेभ्यस्तृणं राक्षसस्त्रियः" रघुः। "ध्वंसितोद्धत दशाननाम्" (लङ्काम्) माघः। दशास्यादयोऽप्यत्र।

दशानिक पु० आने जीवने हितः आनिकः दशाभेदे आनिकः। दन्तीवृक्षे शब्दच०

दशान्त पु० ६त०। १वार्द्धके २वर्त्तिकान्ते च। "निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान्। आसीदाशन्ननिर्वाणः प्रदीपार्चिरिवोषसि" रघुः।

दशामय पु० दशामया यस्मात्। रुद्रे हेमच०।

दशापवित्र न० दशा वस्त्राञ्चलं पवित्रमिव। श्राद्धादिदेवे वाससःखण्डे। "दशापवित्रनामको यो वस्त्रखण्डस्तेनोद्धृतो द्रोणकलशमूलमध्ये वितुभागान् मन्त्रगतैस्त्रिभिः शोधयेत्" "दशापवित्रस्य मध्ये शुक्लां पूर्वां स्रुवं सोमधारास्रावणार्थं यजमान आवध्नाति,सा नाभिरित्युच्यते। उदीचीनदशमशाचीननाभि च दशापवित्रं कृत्वा द्रोणकलशस्योपरिष्टाद्दृढत्वादयस्ततो वितनुयुः। वितन्य च दशापवित्रस्य कोणान् धारयेयुः" ता० ब्रा०१।२ भा०। "अथ दशापवित्रमुपस्पृश्य हङ्करोति" शत० ब्रा० ४।२।२।११

दशारुहा स्त्री दशसु दिक्षु आरोहति आ+रुह-क। कैवर्त्तीमुस्तके राजनि०।

दशार्ण पु० दश ऋणानि दुर्गाणि भूमयो जलाधारा वा यत्र "प्रवत्सेत्यादिना" पा०षट्टिः। १देशभेदे स च देशः वृ० सं० कूर्म्मविभागे १४ अ० आग्नेय्यामुक्तो यथा "आग्नेय्यां दिशि कोसलाः" इत्युपक्रमे "निषादराष्ट्राणि पुरिकदाशार्णाः"। स्वार्थे अण्। "तुलाधरेऽवन्त्यपरान्त्य साधून् वणिग्दशार्णान् भरुकच्छपांश्च" ५ अ०। "सप्तव्याधा दशार्णेषु" श्राद्धे पाद्मपितृगाथा। तद्ब्राह्मणशब्दो यत्रानुवाकेऽध्याये अस्ति विसृष्टा०अण्। दाशार्ण दशार्णशब्दयुक्ते अनुवाके अध्याये च। सोऽभिजनोऽस्य तस्य राजा वा अण्। दाशार्ण पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च "तत्र दाशार्णको राजा सुधर्म्मा लोमहर्षणम्। जघान भीमसेनेन महद्युद्धं निरायुधम्" भा०स०२८ अ०। भीमप्राचीजये। अत्र स्वार्थे क। बहुषु अणो लुक्। "पूर्वमागस्कृतो जित्वा दशार्णाः समरे जिताः" भा०आ० ११३अ०। "विजित्याल्पेन कालेन दशार्णानजयत् प्रभुः। प्रतीचीस्योऽपि तन्नामा देशोऽस्ति "तान् दशार्णान् स जित्वा च प्रतस्थे पाण्डुनन्दनः" भा० स० ३१ अ०। नकुलप्रतीचीजये। अतएव भा०भी० ९अ० "अतज्जर्द्धजनपदाञ्जिगीषुं गदतोमम" इत्युपक्रमे "उत्तमाश्च दशार्णाश्च मेकलास्योत्कलैः सह" इत्यत्र उत्तमत्वेन पूर्वं पूर्वदक्षिणस्याम् दशार्णानुक्त्वा "जठराः कुक्कुराश्चैव सदशार्णाश्च भारत!। पुनरन्यो निर्विशेषो दशार्णदेश उक्तः। परस्ताच्च "वातायना दशार्णाश्च रोमाणः कुशविन्दवः इत्यत्र वातायनत्वेन विशेषणात् तादृशोऽपि देशभेदोऽस्तीति गम्यते। "सम्पत्सन्ने कतिपयदिनस्थायिहंसा दशार्णाः" मेघ०।

दशार्णेयु पु० पौरवरौद्राश्वन्नृपस्य पुत्रभेदे "दशार्णेयुर्जलेयुश्च स्थलेयुश्च महाबलः" हरिवं०३१अ०।

दशार्द्ध न० दशानामर्द्धम्। १पञ्चसंख्यायां २तत्संख्येये च "अष्टौमात्रा विनाशिन्यो दशार्द्धानान्तु याः स्मृताः" मनुः। "छिद्रेण यन्त्रस्य समर्पयध्वं शरैः शितैर्योमचरैर्दशार्द्धैः" भा०आ० १८५ अ०। दश बलानि ऋध्नोति ऋध-अण्। ३दशबले बुद्धे त्रिका० दशबलशब्दे दृश्यम्।

दशार्ह पु०क्रोष्टुवंश्यस्वफल्कपुत्रभेदे "स्वफल्कस्य जज्ञिरे पुत्रास्त्रयः

परमधार्मिकाः । यावन्त्यश्च दशार्हस्य वंशो विष्णुरश्च यः" हरिव० १७ अ० क्रोष्टुवंश्योक्तौ । भाग० ९।२४।२ उक्ते श्रुष्णिनृपपौत्रे च । "क्रथस्य कुन्तिः पुत्रोऽभूद् वृष्णिस्तस्याथ निर्वृतिः । ततो दशार्हो नाम्नाभूत् तस्य व्योमः सुतस्ततः"। उपचारात् श्रुतद्वंशेत्र नृपे ४तदधिकृतदेशे च "धौम्यश्च भीमश्च युधिष्ठिरश्च यमौ च कृष्णाश्च दशार्हसिंहः । उवाच दिष्ट्या भवतां शिवेन प्राप्तः किरीटी सुहितः कृतास्त्रः । प्रोवाच कृष्णामपि यात्रसेनीं दशार्हभर्त्ता सहितःसुहृद्भिः"भा०व०१८२अ०।५ विष्णौ पु०"विजयोजयः सत्यसन्धो दशार्हः सात्वतां पतिः" विष्णु०स० । शङ्करभाष्ये तु दाशार्ह इति पठित्वा दाशोदानं तमर्हति दाशार्हः दशार्हस्य कुले उत्पन्नत्वाद्वा"व्याख्यातम् । दशार्हस्य गोत्रापत्यम् शिवा०अण् । दाशार्ह यदुवंशप्रमाणे कृष्णादौ त्रि०स्त्रियां ङीप् । दशार्हस्तद्वाचकशब्दोऽस्त्यत्र अध्याये अनुवाके वा विमुक्ता० अण् । दाशार्ह दशार्हशब्दयुक्ते अनुवाके अध्याये च । ६आयुधजीविसंघभेदे च । ततः स्वार्थे पर्वा० अण् । दाशार्ह आयुधजीविसंघभेदे । प्रज्ञा०स्वार्थे अण् । दाशार्ह यदुवंशेत्र नृपप्रासे च ।

दशावतार पु०दश अवतारा अस्य । विष्णौ दश अवतारास्त अवतारशब्दे दृश्या अन्येऽपि दशावताराः मत्स्यपु०उक्ता यथा "धर्मांशारायणस्यांशः संभूतश्चाक्षुषेऽन्तरे । यज्ञश्च वर्त्तयामासुर्देवा वैवस्वतेऽन्तरे । प्रादुर्भावे ततस्तस्य ब्रह्मा ह्यासीत् पुरोहितः । युगाख्यायाञ्चतुर्थ्यान्तु आपन्नेषु सुरेषु वै । संभूतः स समुद्रान्ते हिरण्यकशिपोर्वधे । द्वितीये नरसिंहाख्ये रुद्रो ह्यासीत् पुरोहितः । बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति । तृतीये वामनस्यार्थे धर्मेण तु पुरोधसा । एतास्तिस्रः कृतास्तस्य दिव्याः संभूतयो द्विजाः । मानुष्याः सप्त येऽन्ये तु शापजास्तान्निबोधत । त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह । नष्टे धर्मे चतुर्थांशे मार्कण्डेयपुरःसरः । पञ्चमः पञ्चदश्यान्तु त्रेतायां सम्बभूव ह । माम्धाता चक्रवर्त्ती तु तस्यौतथ्यपुरःसरः । एकोनविंश्यां त्रेतायां सर्वक्षत्रान्तकृद्विभुः । जामदग्न्यस्तथा षष्ठो विश्वामित्रपुरःसरः । चतुर्विंशे युगे रामो वशिष्ठेन पुरोधसा । सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः । अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात् । वेदव्यासस्तथा जज्ञे जातूकर्णपुरःसरः । कर्त्तुं धर्मव्यवस्थानमसुराणां प्रशासनम् । तिष्ठेत्र नवमके जज्ञे तपसा पुष्करेक्षणः । देवक्यां वसुदेवेन द्वैपायनपुरःसरः । तस्मिन्नेव युगे चीणे सन्ध्यांशिष्टे भविष्यति । कल्की विष्णुयशा नाम पाराशर्य्यपुरःसरः । दशमो भाव्यसंभूतो याज्ञवल्क्यपुरःसरः ।"

दशाश्व पु० दश अश्वा रथेऽस्य । चन्द्रे शब्दर० । "रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः । वामदक्षिणतो युक्ता दश तेन चरत्यसौ । वीथ्याश्वाश्वि अश्वाश्वि ध्रुवाधारेण वेगिना । त्रासद्विक्रमस्तस्य राशीनां सवितुर्यथा । अर्कस्येव स्थितस्याश्वाः सप्तद्वयुक्ता वहन्ति ते । कल्पमेकं मुनिश्रेष्ठ ! वारिगर्भसमुद्भवाः" पुराण सर्वस्वे विष्णु० पु० ।

दशाश्वमेध (धिक) न०काशीस्थतीर्थभेदे तन्महात्म्यादिकथा काशी०ख० ५२अ० उक्ता यथा

"साहाय्यं प्राप्य राजर्षेर्दिवोदासस्य पद्मभूः । इयाज दशभिः काश्यामश्वमेधैर्महामखैः । अद्यापि होमधूमोघैर्यद्व्याप्तं गगनान्तरम् । तदा प्रभृति नैवेह नीलिमानं जहात्यदः । तीर्थं दशाश्वमेधाख्यं प्रथितं जगतीतले । तदा प्रभृति तत्रासीद्वाराणस्यां शुभप्रदम् । पुरा रुद्रसरो नाम तत्तीर्थं कलसोद्भव ! । दशाश्वमेधिकं पश्चाज्जातं विधिपरिग्रहात् । स्वर्दुन्यथ ततः प्राप्ता भगीरथसमागमात् । अतीव पुण्यवज्जात मतस्तीर्थमनुत्तमम् । विधिर्दशाश्वमेधेशं लिङ्गं संस्थाप्य तत्र वै । स्थितवान् न गतोऽद्यापि क्वापि काशीं विहाय तु । राज्ञो धर्मरतेस्तस्य छिद्रं नाप च किञ्चन । अतः पुरारेः पुरतो विदित्वा किं वदेद्विधिः । क्षेत्रप्रभावं विज्ञाय ध्यायन् विश्वेश्वरं विभुम् । ब्रह्मेश्वरं च संस्थाप्य विधिस्तत्रैव संस्थितः । परा तनुरियं काशी विश्वेशस्येति निश्चितम् । अस्याः संसेवनाच्छम्भुर्न कुप्यति पुरा मयि । कः प्राप्य काशीं दुर्मेधाः पुनस्तत्रैव मिच्छति । अनेकजन्मजनितकर्म्मनिर्मूलनक्षमाम् । विश्वस्तापसंहर्त्तुः स्थाने विश्वपतेस्तनुः । सन्ताप्यते परं काश्याविच्छेद्यजमहाग्निना । प्राप्य काशीं त्यजेद्यस्तु समस्ताघौघनाशनीम् । नृपशुः स परिज्ञेयो महासौख्यपराङ्मुखः । निर्वाणलक्ष्मीं यः काङ्क्षेद्भ्रमन् संसारदुर्गतिम् । तेन काशी न सन्त्याज्या यद्याप्तैवादतुग्रहात् । यः काशीं संपरित्यज्य गच्छेदन्यत्र दुर्मतिः । तस्य हस्ततलाद्भ्रष्टश्चतुर्वर्गफलोदयः । निवर्हणीमघौघस्य सुपुण्यपरिष्टिं-

योम् । कः प्राप्य काशीं दुर्मेधास्त्यजेन्मोक्षसुखप्रदाम् । सत्यलोके कृतं सौख्यं क्व सौख्यं वैष्णवे पदे । यत् सौख्यं लभ्यते काश्यां निमेषार्द्धनिषेवणात् । वाराणसीगुणगणान्विर्णीय दुहिणस्त्विति । व्याहृत्य मन्दरगिरिं न पुनः प्रत्यगान्मुने ! । स्कन्द उवाच । मित्रावरुणयोः पुत्र । महिमानं ब्रवीमि ते । काश्यां दशाश्वमेधस्य सर्वतीर्थशिरोमणेः । दशाश्वमेधिकं प्राप्य सर्वतीर्थोत्तमोत्तमम् । यत् किञ्चित् क्रियते कर्म तदक्षयमिहेरितम् । स्नानं दानं तपो होमः स्वाध्यायो देवतार्चनम् । सन्ध्योपास्तिस्तर्पणञ्च श्राद्धं पितृसमर्चनम् । दशाश्वमेधिके तीर्थे सकृत् स्नात्वा नरोत्तमः । दृष्ट्वा दशाश्वमेधेशं सर्वपापैः प्रमुच्यते । ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् । दशाश्वमेधिके स्नात्वा मुच्यते जन्मपातकात् । ज्येष्ठशुक्लद्वितीयायां स्नात्वा ह्रदसरोवरे । जन्मद्वयकृतं पापं तत्क्षणादेव मुञ्चति । एवं सर्वासु तिथिषु क्रमात् स्नायान्नरोत्तमः । आ शुक्लदशमीं यावद्दशजन्माघमुत्सृजेत् । तिथिं दशहरां प्राप्य दशजन्माघहारिणीम् । दशाश्वमेधिके स्नातोयामीं पश्येन्न यातनाम् । लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ । दशजन्मार्जितैः पापैर्मुच्यते नात्र संशयः । स्नातो दशहारायां यः पूजयेल्लिङ्गमुत्तमम् । भक्त्या दशाश्वमेधेशं न तं गर्भदशा स्पृशेत् । ज्येष्ठे मासि सिते पक्षे पञ्चम्यां ह्रदसरे नरः । कुर्वन्नैवार्हिकीं यात्रां न विघ्नैरभिभूयते । दशाश्वमेधावभृथैर्यत् फलं सम्यगाप्यते । दशाश्वमेधे तज्जूनं स्नात्वा दशहरातिथौ । खर्जुन्याः पश्चिमे तीरे नत्वा दशहरेश्वरम् । न दुर्दशामवाप्नोति पुमान् पुण्यतमः क्वचित् । यत् काश्यां दक्षिणद्वारमन्तर्गेहस्य कीर्त्यते । तत्र ब्रह्मेश्वरं दृष्ट्वा ब्रह्मलोके महीयते । इति ब्राह्मणवेशेन वाराणस्यां महाधिया । दुहिणेन स्थितं तावद्यावद्विश्वेराणमः । दिवोदासोऽपि राजेन्द्रो दृष्ट्वा ब्राह्मणरूपिणे । ब्रह्मणे कृतयज्ञाय ब्रह्मशालामकारयत् । ब्रह्मेश्वर समीपे तु ब्रह्मशाला मनोहरा । ब्रह्मा तत्रावसद्ग्रीष्म ब्रह्मघोषैर्निनादयन् ।"

दशाह पु० दशानामह्नां समाहारः टच् समा० समाहारत्वात् नाह्नादेशः "अह्नान्ताः पुंसि" पा०पुंस्त्वम् । दशदिनमशौचे । "दशाहं शावमाशौचं सपिण्डेषु विधीयते" "अतिक्रान्ते दशाहे तु त्रिरात्रं मनुरब्रवीत्" मनुः ।

दशिन् त्रि० ब० व० दश संख्याः सन्ति येषाम् इनि । १दशसंख्यायुक्ते । दशसंख्या ग्रामाः अधिकृतत्वेन सन्त्यस्य इनि । २राज्ञा नियुक्ते दशग्रामाधिकृते च "दशी कुलन्तु भुञ्जीत विंशो पञ्च कुलानि च" मनुः । दश संख्याः प्रमाणं येषाम् इनि । ३दशसंख्याप्रमाणके त्रि० । "तां दशिभिः प्रायुङ्क्त" शत० ब्रा० १३।१४।२। दशा वर्त्तिका वस्त्राञ्चलं या अस्त्यस्य इनि । ४दशायुक्ते दीपे ५सदशे वस्त्रे च त्रि० ।

दशीविदर्भ पु० दक्षिणस्थे देशभेदे "अथापरे जनपदा इत्युपक्रमे "दशीविदर्भाः कान्तीकास्तङ्गनाः परतङ्गनाः" भा० भी०९ अ० ।

दशेन्धन पु० दशा वर्त्तिकेव इन्धनं यस्य । प्रदीपे त्रिका० ।

दशेर त्रि० दश-एरक् । हिंस्रे त्रिका० ।

दशेरक पु० दशेर+संज्ञायां कन् । १मध्यदेशे सोऽभिज्ञनोऽस्य तस्य राजा वा अण् । दाशेरक पितादिक्रमेण तद्देशवासिनि तन्नृपे च । बहुषु अणो लुक् । २दशेरक तत्रार्थे व०व० । हेमचन्द्रे दशेरुक इति पाठान्तरम् ।

दशेश पु० दशानामीशः । दशाधनौ १रव्यादिग्रहे । दशानां ग्रामाणामीशः । २राज्ञा नियुक्ते दशग्रामाधिकृते च । "शंसेद् ग्रामो दशेशाय दशेशो विंशतीशिनम्" मनुः ।

दशैकादशिक त्रि० एकादशार्थत्वादेकादश वस्त्रतो दश ये दत्ता दश एकादश भविष्यन्ति ते दशैकादशाः निपातनात् समासान्तोऽकारः । "प्रयच्छति ब्रह्मम्" पा० दशैकादशान् प्रयच्छतीत्यर्थे "कुशीददशैकादशात् वनृश्चा विति पा०ष्ठच् । यतं प्रति दशकरूपां दक्षिं यहोतरि वाङ्मुष्किभेदे स्त्रियां भित्त्वात् ङीष् ।

दशोणि पु० दश बहवः उणयोऽस्य । बहुहविष्के "दशोणये कवये तर्कसातौ" ऋ०६।२०।४ "दशोणये बहुहविष्कात् कवये मेधाविनः पञ्चम्यर्थे चतुर्थी" भा० ।

दशौषधकाल पु० दशविध औषधकालः या० क० । दशविधे औषधकाले स च सुश्रुते उत्तरतन्त्रे उक्तो यथा "अत ऊर्द्ध्वं दशौषधकालान्वक्ष्यामः । तत्र "निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं वा सग्रं कृतसंकृतयोगं यामान्तरञ्चेति दशौषधकालाः । तत्र निर्भक्तं १केवलमेवौषधमुपयुज्यते । । वीर्याधिकं भवति भेषजमन्नहीनं हन्यात्तथामयमसंशयमाशु चैव । तद्बालवृद्धयुवतीस्तदवोऽथ पीत्वा ग्लानिं परां समुपयान्ति बलक्षयञ्च । प्राग्भक्तं २नाम यत्तु प्राग्भक्त-

स्योपयुज्यते। शीघ्रं विपाकमुपयाति बलं न हिंसा दन्नादृतं न च सुखर्वदनाद्विरेति। प्राग्भक्तसेवनमधो बलमादधाति दद्याच्च दृङ्गिशुभीरुवराङ्गनाभ्यः। अधोभक्तं २नाम यद्भुक्तान्ते पीयते। पीतं यदन्नमुपयुज्य तदूर्द्धकाले हन्याद्गदान् बहुविधांश्च बलं दधाति। मध्येभक्तं ४नाम यन्मध्ये भक्तस्य पीयते। मध्ये तु पीतमुपहन्त्यविचारिभावाद्यो मध्यदेहमभिभूय भवन्ति रोगाः। अन्तराभक्तं ६नाम यदन्तरा पीयते पूर्वापरयोर्भक्तयोः। हृद्यं मनोबलकरञ्चथ दीपनीयं पथ्यञ्च सम्भवति चान्तरभक्तमेतत्। सभक्तं ७नामौषधेषु यत्साध्यते भक्तम्। पथ्यं सभक्तमबलाबलयोर्हि नित्यं तद्वैद्यिनामपि तथा शिशुवृद्धयोश्च। सामुद्गं ८नाम यद्भुक्तस्याटावन्ते च पीयते। दोषे द्विधा प्रतिहते तु समुद्गसंज्ञमाद्यन्तयोर्यदशनस्य निषेव्यते तु। सुखर्सुखर्चाभिष्टसभक्तमभक्तं वा यदौषधं सुखर्सुखरूपयुज्यते। श्वासे सुखर्सुखरतिप्रसृते च कासे हिक्कायमीषु च वदन्त्युपयोज्यमेतत्। ग्रासं ९नामकवलनम् (फलमस्य सुद्रितपुस्तके पतितम्) ग्रासान्तरं १०नाम यत्पिण्डव्याप्तिमिश्रम्। ग्रासान्तरेषु वितरेद्दमनीयधूमान् श्वासादिषु प्रथितदृष्टगुणांश्च लेहान्। एवमेते दशौषधकालाः"।

दस उत्क्षेपे उपक्षपे च अपक्षये अक० दि० पर०सक०सेट्। दस्यति। इरित् अदसत् अदासीत्-अदसीत्। उदित्। दसित्वा-दस्त्वा। "तेषां दिशोऽदसन्" तै० सं० १।६।१ १।२ "त्वां ह्यारी दसमानो भगमीट्टे तक्वीये" ऋ०१। १२४ ५। आर्षस्तङ् गणव्यत्ययश्च "मा ते प्राण उपदसन्" अथ०५।२०।१५ "अब्रह्मताविदसाम" यजु० १०।२२

दस दर्शने दंशने च चु० आ० सक० सेट् इदित्। दंसयते अददंसत दंसशब्दे द्रष्टव्यम्।

दस पु० दस उपक्षपे वेदे भावे अच्। उपक्षेपे "मनुं चक्रुरुपरं दसाय" ऋ० ६।२१।२१। दसाय शत्रूणामुपक्षेपाय" भा० लोके तु घञ् दास इत्येव तत्रार्थे उत्क्षेपे च।

दसेरक पु० दशेरकशब्दार्थे मरुदेशे "दसेरकाः केकयाः सकैकेयाः बृ० सं० ४अ०। सोऽभिजनोऽस्यास्य तस्य राजा वा अण्। दासेरक पित्रादिक्रमेण तत्र वासिनि तन्नृपे च बहुषु अणो लुक्। तत्रार्थे "आवन्त्यान् दाक्षिणात्यांश्च पार्वतीयान् दसेरकान्" भा०द्रो०११अ०। दासेरक पृषो०।२गर्द्दभे पुंस्त्री०।"यास्त्रिवन्त्यः प्रमेहन्ति यथैवोष्ट्र दसेरकाः" भा०क०१०अ०। अयं तालव्यमध्यश्च त्रिका०।

दस्र त्रि०दस उपक्षेपे मक् १उपक्षपके "पुरुषि दस्रो निरिषाति व्यजस्रैः ऋ०१। १४८।४। "दस्र उपक्षपयिता" भा० दस दर्शने कर्मणि मक्। २दर्शनीये "राजेव दस्र! निषदोऽधिबर्हिषि" ऋ०१०। ४३।२। "हे दस्र! दर्शनीयेन्द्र!" भा०। "दस्रत् क्षणोव्यध्वरम्" १।७४। ४। दस्रत् दस दंशनदर्शनयोः इयियुधीभ्योत्यादिना मक्। "दस्रमित्यत्र मकारस्य वर्णव्यत्ययेन तकारः" भा० "एतेनास्य तान्त्रकल्पनम् प्रामादिकम्। "जुजोषदिन्द्रोदस्रवर्चाः ऋ० १।१७२।४ "दस्रवर्चाः दर्शनीयतेजाः" भा० श्यनमाने ४चौरे ५हुताशने च मेदि०। स्वार्थे यत् दस्र दर्शनीये त्रि०। "हुत्रचाय दस्रं वचः" ऋ० ८। २४। २०।

दस्यु पु० दस-युच् अनुनासिकत्वात् नानादेशः।१महासाहसिके (डाकाइत्) २खले च शब्दार्थचि० "अभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत्। क्रव्याद्भिश्च हतस्याग्नेश्चण्डालादयैश्च दस्युभिः" मनुः। "मुखबाहूरुपज्जानां या लोके जातयो बहिः। म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः" मनूक्ते ब्राह्मणादिचतुर्वर्णभिन्ने ३जातिभेदे च। "प्रसाधनोपचारज्ञमदासं दासजीवनम्। सैरिन्ध्रं वागुराहृत्तिं स्मृते दस्युरयोगवे" मनुः। ४कर्मवर्जिते च। "गर्द्दते दस्युजूताय स्तवान्" ऋ०।६। २४। ८। "दस्युजूताय कर्म्मवर्ज्जितैः प्रेरिताय" भा० ५उपक्षपके त्रि०६असुरे पु० "चेतन्ते दस्युतर्हणा" ऋ०९।४७।२ "दस्यूनामसुराणां तर्हणा" भा० "स वज्रभृद्दस्युहा भीम उग्रः" ऋ०१।१००।१२दस्युहा "दस्यूनामुपक्षपयितॄणामसुराणां वहन्ता" भा०।

दस्युसात् अव्य०दस्यूनामधीनं भवति करोति सम्पद्यते वा साति। तस्कराधीने भूतादौ "अन्नाद्याकाल एव स्युर्लोकोऽयं दस्युसाद्भवेत्। पतेयुर्नरकं घोरं यदि राजा न पालयेत्" भा० शा० ६८ अ०।

दस्र पुंस्त्री० दस्यति पांसून् दस उपक्षपे रक्। १गर्द्दभे स्त्रियां जातित्वात् ङीष्। दस्यति रोगान् क्षिपति दस उपक्षेपे। २अश्विनीकुमारयोर्द्वयोः द्वि० व०। तत्तुल्यसंख्यत्वात् ३द्वित्वसंख्यायां ४तत्संख्येये च तदधिष्ठातृकत्वात् ५अश्विनीनक्षत्रे च मेदि०। "अनुसस्तुस्तमथ दस्रयोः सुतौ" माघः। तयोर्मध्ये विशेषवाचित्वे एकवचनान्तोऽयं "नासत्यस्यैव दस्रस्य सुतौ द्वावश्विनामपि। मार्त्तण्डस्यात्मजावेतावष्टमस्य मन्वं-

त्मनः" भा०शा०२०८। "देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति" हरिव० ९ अ०। नासत्यदस्रयोर्द्वन्द्वचारित्वात् द्वियचनान्तता हृद्विंशे त्रि०। ७शिशिरे न० संक्षिप्तसारः।

दस्रदेवता स्त्री० दस्रौ देवता अस्य। अश्विनीतारायां हेम०। अश्वियमदहनेत्यादिवाक्ये तस्या दस्रदैवत्यमनुसन्धेयम्।

दस्रसू स्त्री० दस्रौ सूते सू-क्विप्। सूर्य्यपत्न्यां त्वष्टृकन्यायां संज्ञायाम् त्रिका० अश्विनीकुमारशब्दे दृश्यम्

दह दीप्तौ भ्वा० दाहे सक०उ०उभ० सेट् इदित्। दंहयति ते अददंहत् त।

दह् दाहे भस्मीकरणे सक०भ्वा०प०अनिट्। दहति अधार्क्षीत् ददाह देहतुः। दग्धा दहात् धक्ष्यति। दग्धः दग्धिः दग्ध्वा दग्धव्यः दहनीयः दाह्यः। दाहः दहनम्। दाहयति अददीहत् दिधक्षति "उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्" हितो० "क्रुद्धं कुलं धक्ष्यति विप्रवह्निः" भट्टिः दहनङ्गारकारीव मैनान् धाक्षीः समूलकान्" भा०स०। ६०अ० "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः" सा०द० "देहं धारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकम्" भाग० "दग्धव्योऽसौ कटाग्निना" मनुः। "कर्म्माणि दहते अदाहि देहे। "दहते च कुलं सर्व्वम्" चाणक्यः। "देहे लब्धा मतेश्वरा" भट्टिः दंदह्यते। "दंदह्यमानां शोकेन" भट्टिः।

दहदहा स्त्री कुमारानुचरमातृभेदे "ख्याता दहदहा चैव तथा धमधमेति च" भा० श०४७अ०दह दहेति वक्ति मयूरव्य० कर्त्तारं चाभिदधातीति कर्त्तरि अयं साधुः एवं धमधमेत्यत्रापि बोध्यम्।

दहन पु० दह-ल्यु। १अग्नौ, "दवदहनस्तुहिनदीधितिस्तस्य" सा०द० "दह दहन! तदेतत् पापमङ्गं मदीयम्" गीतोक्तिः। २चित्रकवृक्षे, ३भल्लातके, ४दुष्टचेतसि च। ५कपोते पुं स्त्री० राजनि०स्त्रियां जातित्वात् ङीष्। ६दाहकमात्रे त्रि०। लोकदहन! मनो दहन इत्यादि। ७रुद्रभेदे पु०। "एकादश सुताः स्थाणोः ख्याताः परमतेजसः। मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः,। अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः। दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः, स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः" भा० आ० ६६ अ०। उपचारात् दक्षक्रियानक्षत्रे "दहनविधिगतास्थामैत्रभं सौम्यसारे" व्यो० त०। भावे ल्युट्। ८दाहे न०। "अपरो दहने स्वकर्म्मणां वहते ज्ञानमयेन वह्निना" रघुः।

दहनकेतन पु०न० दहनस्य केतन इव। धूमे हेमच०।

दहनप्लुष्ट त्रि०दहनादिव प्लुष्टं शोषणं यस्मात्। वैद्यकप्रसिद्धे (वेलेस्तारा) पदार्थे अग्निप्लुष्टादयोऽप्यत्र। तत्प्रदाने हि देहे वह्नेरिव शोषणं (फोस्का) भवतीति प्रसिद्धिः।

दहनप्रिया स्त्री ६त०। स्वाहायामग्निभार्य्यायाम् त्रिका०

दहनर्क्ष न०६त०। कृत्तिकानक्षत्रे "यदा विशाखासु महेन्द्रमन्त्री सुतस्य भानोर्दहनर्क्षयातः" बृ० स० १० अ०। दहनभादयोऽप्यत्र।

दहनसारथि पु०६त०। वायौ। "दक्षिणदहनसारथिरयाहतचञ्चलधूतकलिके" दशकु०। दहनसहचरादयोऽप्यत्र।

दहनागुरु न०दहनस्य दाहाय अगुरु। दाहागुरुणि राजनि०

दहनाराति पु० ६त०। जले राजनि०। तस्य वह्निनाशकत्वात् तथात्वम् दहनरिपुप्रभृतयोऽप्यत्र।

दहनोपल पु० दहनाय वह्नये हितः उपलः (आतसी) सूर्य्यकान्तमणौ हेम०। सूर्य्यकिरणसम्पर्केण हि ततो वह्नेः प्रादुर्भावात् तस्य तथात्वम्।

दहनोल्का ६०। विस्फुलिङ्गरूपायामुल्कायाम् त्रिका०

दहर पु० दह-अर। १भूमिकायां २स्वल्पे ३भ्रातरि ४बालके च मेदि०। ५अतिसूक्ष्मे ६दुर्बोधे च "अथ यदिदं दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" छा०उ०। तत्र स्वल्पे "नेष्टा पत्नीमानेष्यन् कौशं वासः परिधापयति चण्डातकं दहरं वा" कात्या०श्रौ० १४।५।२ "परिधापयतीति कारितत्वादधेप्रत्ययात् भवति चण्डातकं चलनक उच्यते एवं हृभियुक्तोपदेशः अङ्गोरुकं पिलासिन्या वासश्चण्डातकं विदुः" दहरं तु कौपीनम् दहरशब्दस्याल्पवाचकत्वात्" कर्कः। २नरके ३वरुणे च उणादि०।

दहराकाश पु० कर्म्म०। चिदाकाशे ईश्वरे।

दह्र पु०दह्-रक्। १दायाग्नौ २जठरे च। "सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः" भाग०४।१।३० "दह्राग्निः जठराग्निः" श्रीधरः स्वल्पार्थस्यैवात्र कर्म्मधारयः जठरस्थस्याग्नेः स्वल्पत्वात् इत्यन्ये।

दा दाने भ्वा०पर० सक० सेट् ण इत्। यच्छति प्रणियच्छति अदात्। ददौ ददतुः। देयात्। दास्यति। देयम् दानीयं दातव्यं दत्तः दातुम् दत्त्वा।

दा दाने जुहो० उभ०सक०सेट् । ददाति दत्ते प्रणिददाति । दद्यात् ददीत । ददातु ददत्तु देहि दत्ताम् ददस्व । अददात् अदत्त । अदात् अदित । ददौ ददिथ–ददाथ ददिव । ददे ददिषे । दाता देयात् दासीष्ट । दास्यति । कर्मणि दीयते अदायि अदायिषाताम्–अदिषाताम् । दासीष्ट–दायिषीष्ट दास्यते–दायिष्यते । दापयति । दित्सति देदीयते । दातव्यः दानीयः देयम् । दाता । दानं दायः दत्तं प्रत्तम् । दातुं दत्तिः दत्त्वा प्रदाय । ददत् ददानः । ददिवान् । "यो ददाति स कुकूदः" अमरः । "मूर्ध्नि मूर्द्धाभिषिक्तस्य ददति स्म विधानतः" रामा०अयो० २६स० "दद्याच्चैवासनं स्वकम्" "सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वा" मनुः । "देहि युद्धं नरपते! ममाद्य रणमूर्द्धनि" भा० उ०१८३अ० "ददौ स दश धर्माय" मनुः । "अवकाशं किलोदन्वान् रामायास्यर्थितो ददौ" रघुः । "पाण्डवानां सभामध्येऽप्रदुर्योधन उपागतः । तस्मै गाश्च हिरण्यञ्च" विदग्धमु० । "न दास्यामि समादातुं सोमं कस्मैचिदप्यहम्" भा० आ०३४अ० "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे" गीता "देयं दारसुताहृते" याज्ञ० । "दत्तभुक्तफलं धनम्" दायभागधृतभारतम् "दत्तात्मा तु स्वयं दत्तः" मनुः "सुता ददे तस्य सुताय मैथिली" भट्टिः । "आददानः परक्षेत्रात्" न दण्डं दातुमर्हति" "स ज्ञेयः दत्त्रिमः सुतः" मनुः "तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्" स्मृतिः । "अदित्सन्तं दापयति प्रजानन्" यजु०९।२४ । "दायादानपि दापयेत्" मनुः । "तेषामशीतिं यानानि रत्नपूर्णानि दापय" रामा०अयो०३२ स० । "स दाप्यः पञ्चमं दमम्" याज्ञ० "अस्मभ्यमित्त दित्सि" ऋ०१।१७०।३ "दित्सन्तं भूयो यजमानश्चिकेत" ऋ०२। १४।१० ।

अति+अतिक्रम्य दाने अत्यन्तदाने च । "न जीवन्तमतिददाति" कात्या० ४।१।२७। "आतट. बलिर्दत्तः" चाण०

अनु+पश्चाद्दाने तुल्यरूपदाने प्रतिनिधित्वेन च । "न ढूढेत्र अनुददासि वासम्" ऋ०१।१९०।५। "सूरांश्चदस्रा अनु दादपस्याम्" ७।४५।२ "यः शर्धते नानददाति शध्याम्" २। १२।२०

अभि+आभिमुख्येन दाने "तथैव चैनमुक्त्वा वामपार्श्वमभ्यदात्" भा० व० १९७अ० गद्यम् ।

अव+अधोदाने अवत्तम् आदिकर्मणि तु वा तादेशः यथाह सि० कौ० "अवदत्तं विदत्तञ्च प्रदत्तञ्चादिकर्मणि सुदत्तमनुदत्तञ्च निदत्तमिति वेष्यते" चशब्दाद्यथाप्राप्तम् ।

आ+ग्रहणे "दद्याच्चैवाददीत वा" । "शुभां विद्यामाददीतावरादपि" मनुः । "त्वं चादास्यसि भूयोऽहं पाप्मानं जरया सह" भा०आ०८४अ० । "शरीरमात्तं मृत्युना" क्षा० उ० "आददानः परक्षेत्रात्" मनुः ।

अप+आ+अपेक्ष्य ग्रहणे । "मृत्पिण्डमपादाय महावीरं करोति" शत०ब्रा० १४।१।२।१७

उद्+आ+उदस्य ग्रहणे "उदादाय पृथिवीं जीवदानुम्" यजु०१ । २८। [रघुः ।

उप+आ+सामीप्येन ग्रहणे "उपात्तविद्यो गुरुदक्षिणार्थी"

परि+आ+परिवर्त्य ग्रहणे "पर्यादानं चास्त्राणि सोमधन्वानमर्जुनम्" भा०उ०४८अ० "तस्मिन्निर्धीनाद्यधोतप्रत्तां पर्यादददीत च" भा०शा० ८६अ०।

प्रति+आ+प्रतिग्रहणे दत्तस्य पुनर्ग्रहणे च । "शुभाशुभं कर्मकृतं यदन्यत्तदेव प्रत्यादद्ते स्वदेहे" भा०शा० २०२ अ० "न चाहं शक्तः शापं प्रत्यादातुम्" भा०आ०३अ०

वि+आ+अङ्गादेःप्रसारणे आत्म०स्वाङ्गप्रसारणे तु पर०। "व्यादायास्यं महारक्षस्तौ दृष्ट्वाऽथ ह्यधावत" हरिवं० ३१७ अ० । "भक्षयत्येष मां रुद्रो व्यात्तास्यो दारुणाकृतिः" भा०व०६४अ० । "नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्" गीता ।

परि+उपरिस्थापने । "वित्ते दुःखप्रत्रं सर्वमाप्ते परिददग्मसि" ऋ० ८।४७।१५ "परिदग्मसि उपरि दग्धः वयं वित्ताः परित्यजामः इत्यर्थः । अथवा वित्ते मयि यद्दुःखप्रत्रं दृष्टं तत् स्वर्णकाराय भाण्डकाराय वा परिदग्मसि अस्मत्तोऽपि निष्कृष्य तयोरुपरि स्थापयामः" भा०

प्र+विधानादिना प्रकर्षेण च दाने । "प्रदानं स्वाम्यकारणम्" मनुः । "प्रत्तं जलं द्वयञ्जलमन्निकेऽपाम्" भट्टिः । "नष्टं विनष्टं कृमिभिः शृहतं विप्रमे स्थितम् । हीनं पुरुषकारेण प्रदद्यात् पालयेत् तु" मनुः ।

अनु+प्र+पश्चात् प्रदाने । "एते श्वासानुप्रदाना अधोपाश्च विहृष्यते । कण्ठम्" शिक्षा ।

प्रति+प्र+पत्यर्पणे गृहीतस्य पुनरर्पणे "राज्यं प्रतिप्रदास्यामि" भा० उ० ५५२५ श्लो० ।

सम्+प्र+सत्कारेण प्रदाने । "तदर्हमासनं तस्मै सम्प्रदाय यथाविधि । गां चैव मधुपर्कं च सम्प्रदायार्घ्यमेव च" भा० स०५अ० । "अहन्यहनि चार्घ्येव याचतां सम्प्रदीयते" भा० व०८५२१ श्लो० । अविच्छेदेन शिष्टानामाचारे च, सम्प्रदायः ।

प्रति+प्रतिरूपदाने प्रत्यर्पणे च। "सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्" याज्ञ०। "प्रतिदास्यामि भगवन्! पुंलिङ्गं तव सुव्रत!" भा० उ० १९३ अ०।

"शिष्यव्यतिक्रमं वीक्ष्य निवर्त्य गुरुरागतः। अशपत् पततां देहो निमे! पण्डितमानिनः। निमिः प्रतिददौ शापं गुरवे धर्मवर्जिने। तवापि पततां देहो लोभाद्धर्ममजानतः" भाग० ९।१३।५

दा लवने अदा० प० सक० अनिट् पित् तेन न घुसंज्ञा। दाति अदासीत् दायात्। "अग्निर्हि दाति रोमा पृथिव्याः" ऋ०१०।६५।४ "दाति छिनत्ति दाप् लवने अदादित्वाच्छपो लुक्" भा०। "कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय" १०।१३१।२ "स हि ग्रा धन्वाक्षितं दाता न दात्या पशुः" ५।७।७ "अहिंसन्तु ओषधीर्दान्तु पर्वनू" अथ० १२।२।२१ "वर्हिर्देवसदनं संदामि" कात्या०श्रौ० कर्कधृतश्रुतिः। [उज्ज्वलद०।

दाक पु०ददाति यज्ञे हविरादिकं दा-क न कित्। यजमाने

दाक्ष त्रि०दक्षस्येदम् अण्। दक्षसम्बन्धिनि मखादौ "भागीयसां भागमादातुमिच्छन् महो दाक्षो येन कृत्तोऽन्यथावत्" हरिवं०१३१ अ०। दाक्षीणां समूहः अङ्गो लक्षणं वा दृञ्जन्तात् अण्। २दाक्षिसमुदाये ३तदङ्गे च पु० ४तल्लक्षणे न०। "परम्परासंबद्धोऽङ्गः साक्षात्तु लक्षणम्" सि०कौ०। दाक्षेः छात्राः "दृञ्जश्च" पा०अण्। ५दाक्षेः छात्रेषु ब० व०। दाक्षेरागतः अण्। ६दाक्षेरागते त्रि०। गोत्रचरणात् वुञि प्राप्ते "न दण्डमानवान्तेवासिषु" पा० पर्युदासात् अणेव। ७दाक्षेः दण्डप्रधानमानवेषु दृश्यन्तेवासिषु च तेन तद्भिन्नेषु दाक्षकः। तेषु तु दाक्षादण्डमानवाः शिष्या वा" सि०कौ०।

दाक्षक पु० दाक्षेरिदम् गोत्रचरणात् वुञ्। १दण्डमानवान्तेवासिभिन्ने तत्सम्बन्धिनि तेषु तु अणेव। दाक्षशब्दे दृश्यम्। दाक्षीणां विषयो देशः राजन्या० वुञ्। २दाक्षेर्विषये पु०।

दाक्षायण पुंस्त्री दक्षस्य गोत्रापत्यम् दृञ् "यञिञोश्च" पा० यूनि फक् "दृञः प्राचामिति" पा० विशेषणात् न युवप्रत्ययस्य लुक् तस्य प्रागदेशस्थितत्वाभावादिति" सि०कौ० १दक्षस्ययूनि गोत्रापत्ये। दाक्षायणस्य विषयो देशः ऐषु कार्या०भञ्जल। दाक्षायणभक्त तदीये देशरूपे विषये पु०। दक्षस्येदम् दाक्षं तच्च तदयनञ्चेति। २सुवर्णादावलङ्कारे च। "दाक्षायणं दक्षिणा" कात्या० श्रौ० ४।४।२८। "दाक्षायणं सुवर्णमुच्यते" कर्कः। "यो बिभर्त्ति दाक्षायणं हिरण्यम्" यजु० २४।५१। "दाक्षायणशब्दोऽलङ्कारार्थः वेददी०भक्तेः २भूषणे च। तत्र दक्षस्य यून्यपत्ये "यदाबध्नन् दाक्षायणा हिरण्यम्" यजु०२४। ५२। स्त्रियां ङीप्। "भोः कश्यपस्य पुत्रोऽहं माता दाक्षायणी च मे" भा० शा०१७०अ० "दाक्षायणयोऽश्विनीत्याद्याः" अमरः। दक्ष एव दाक्षः तस्यायनं तत्कृतो यज्ञभेदः संज्ञात्वात् पूर्वपदाद्युत्वम्। ४दक्षकृते यज्ञभेदे स च यज्ञः शत०ब्रा० २।४।४।२ उक्तो यथा

"प्रजापतिर्ह वा एतेनाग्रे यज्ञेनेजे प्रजाकामो वसुः प्रजया पशुभिः स्यां श्रियं गच्छेयं यशस्त्रेवमन्नादः स्यामिति। स वै दक्षो नाम। तदयजनेन सोऽयजत तस्मादुदाक्षायणयज्ञो नाम" तद्विधिर्यथा "दाक्षायणयज्ञः प्राजापत्ययज्ञस्यामस्य" कात्या०श्रौ० ४।४।१। इत्यादिषु २०सूत्रेषूक्तः। "तत्रैवं प्रथमं पौर्णमास्यां श्राद्धान्वारम्भणीयपूर्वकोऽग्नीषोमीययागः पुनरुद्धृत्य सांनाय्यवदुपक्रमः। प्रतिपदाग्नेयेन पुरोडाशेनैन्द्रेण दध्ना पयसा च यागः, पक्षे वैस्रधः। मांसमैथुनवर्जनसङ्कल्पः। पुनरुद्धृत्य तस्मिन् प्रतिपद्दिन एवैन्द्राग्नयागः पुनरुद्धृत्य मैत्रावरुण्याः पयस्यायाः उपक्रमः। प्रातर्द्वितीयायामाग्नेयेन मैत्रावरुण्या च यागो यथोक्त पक्षे आदित्यचरुः तदानीमेव पुनरुद्धृत्याग्नीषोमीययागः। ततः पुनरुद्धरणादिदधियागपक्रमः। प्रातस्तृतीयायामाग्नेयसांनाय्ययागः पक्षे वैस्रधः। तदानीमेवोद्धृत्यैन्द्राग्नयागः। पुनरुद्धृत्य मैत्रावरुण्या उपक्रमः तदनन्तरमादित्यो वा इत्येवम्प्रकारेण संवत्सरं यावत् प्रत्यहं कर्त्तव्यम्" कर्कः। तत्पद्धतिस्तु तत्र भाष्ये दृश्या। "कृत्वेष्ट्वाग्रयणञ्चैव चातुर्मास्यानि चाहरेत्। उत्तरायणञ्च क्रमशो दाक्षस्यायनमेव च" मनुः। सुवर्णे "दाक्षायणी ब्रह्मस्त्री वेणुमान् सकमण्डलुः" याज्ञ० "दाक्षायणं सुवर्णं तदस्यास्तीति इनि। दाक्षायणी" मिता०।

दाक्षायणी स्त्री० दक्षस्य स्त्र्यपत्यम् दृञि फक् ङीप्। १अश्विन्यादितारासु २सत्यां दुर्गायाम् मेदि० "सापि दक्षाय सुश्रोणी गौरी दक्षाय ब्रह्मणा। दुहितृत्वे पुरा याहि रुद्रेणोढा महात्मना। सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम!" वराह०पु०। ३रेवतीनक्षत्रे हेम०। ४दन्तीवृक्षे रत्नमा०। ५अदित्यां कश्यपपत्न्याम् "दक्षश्च तेषामारभ्य प्रजाः

सम्यग्विवर्द्धिताः । तत्र दाक्षायणीपुत्राः सर्वे देवाः-सवासवाः । यमवोऽष्टौ च रुद्राश्च आदित्यामरुतस्तथा" ।

दाक्षायणीपति पु० ६त० । १शिवे २चन्द्रे च त्रिका० ।

दाक्षायण्य पु० दाक्षायण्यामदितौ भवः बा०यत् । आदित्ये "प्रलोभतस्तथा दक्षो भवितेह प्रजापतिः । दाक्षायण्यस्तथादित्यो मनुरादित्यतस्तथा" भा० अनु०१४७अ०

दाक्षि पुंस्त्री दक्षस्य गोत्रापत्यम् इञ् । दक्षस्यापत्ये घोषादिषु परेषु अस्य आद्युदात्तता दाक्षिघोषः दाक्षिकन्था दाक्षिह्रद इत्यादि । संज्ञातेऽपि एतत्पूर्वककन्यायास्तत्पुरुषे "तत् पुरुषे शालाया नपुंसके" "कन्या च" पा० क्लीवत्वप्राप्तावपि "संज्ञायां कन्योशीनरेषु" पा०उशीनरत्वाभावात् न क्लीवता । उशीनरदेशकन्यायान्तु क्लीवत्वात् नाद्युदात्तता । "कन्यापलदनगरग्रामह्रदोत्तरपदात्" पा०एतत्पूर्वककन्यादिभ्यः भवार्थे छ । दाक्षिकन्थीयं दाक्षिनगरीयमित्यादि । "कूलसूदस्थलकर्षाः" पा० आद्युदात्तात् अस्मात् परस्यकूलादीनामादिरुदात्तः । दाक्षिकूलः दाक्षिकर्षः । एतौ च ग्रामविशेषवाचिनौ । अस्य इङन्तत्वात् ग्रस्यशब्दे परे नाद्युदात्तता । दाक्षिग्रस्यः ।

दाक्षिण त्रि० दक्षिणा प्रयोजनमस्य अण् । श्रुतयज्ञाङ्गहोमभेदे स च "अथ प्रतिपरेत्य गार्हपत्यम् दाक्षिणानि जुहोति" शत०ब्रा०४।२।४।६ इत्युपक्रम्य दर्शितः "इडां भक्षयित्वा शालाद्वार्ये दाक्षिणहोमः" कात्या०श्रौ० १०।२।४ "ततः शालाद्वार्ये दाक्षिणहोमः कर्त्तव्यः दाक्षिणहोम इति संज्ञा "अथ प्रतिपरेत्य गार्हपत्यं दाक्षिणानि जुहोतीति" श्रुतत्वात् दाक्षिणानि दक्षिणा प्रयोजनानि येषाम्" कर्कः ।

दाक्षिणक पु० दक्षिणायां कर्मसमाप्तौ द्रव्यदानरूपायां क्रियायां प्रकृतः दक्षिणमार्गेण चन्द्रलोकं गच्छंति वा वुञ् । १दक्षिणातत्परे इष्टापूर्त्तेन २चन्द्रलोकगामिनि च उपचारात् दक्षिणमार्गगामिनो २बन्धे च । "विपर्ययादतत्त्वज्ञानादध्यते बन्धः स च त्रिविधः प्राकृतिकोवैकृतिको दाक्षिणकश्चेति इत्युपक्रमे "इष्टापूर्त्तेन-दाक्षिणकः पुरुषतत्त्वानभिज्ञो हि इष्टापूर्त्तकारी कामोपहतमनाबध्यत इति" सा०कौ० । [लायां भवे ।

दाक्षिणशाल त्रि० दक्षिणशालायां भवःञ । दाक्षिणशा-

दाक्षिणात्य त्रि० दाक्षिणा भवः "दक्षिणापश्चात्पुरसस्त्यक्" पा० त्यक् । १दक्षिणाभवे २नारिकेले पु० राजनि० ।

दाक्षिणापथक त्रि० दक्षिणापथे देशे भवः धूमा० वुञ् । दक्षिणापथदेशभवे ।

दाक्षिण्य न० दक्षिणस्य अनुकूलस्य पटोर्वा भावः ष्यञ् । १आनुकूल्ये २पटुतायाम् । "नारदो मत्प्रियं कुर्वन् मुनिरक्लिष्टकर्मकृत् । दाक्षिण्यादनुरोधाच्च दत्तवान्नात्र संशयः" हरिवं०१२६अ० । "तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा" रघुः । "दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम्" सा०द०उक्ते १नाटकलक्षणभेदे च ।

दाक्षी स्त्री दक्षस्य स्त्र्यपत्यम् इञ् । "इतो मनुष्यजातेः" पा०ङीष् । १दक्षस्य स्त्र्यपत्ये २पाणिनिसुनेर्मातरि च

दाक्षीपुत्र पु० ६त० । पाणिनिसुनौ हेमच० ।

दाक्षेय पु०दाक्ष्या अपत्यम् । पाणिनिसुनौ हेमच० ।

दाक्ष्य न० दक्षस्य भावः कर्म्म वा ष्यञ् । १कौशले सहसाप्रत्युत्पन्नकार्येषु अव्यामोहेन प्रवृत्तौ "शक्तिं चानेक्ष्य दाक्ष्यं च भृत्यानाञ्च परिग्रहम्" मनुः । "दाक्ष्यं सद्यःफलदं यदपतः" माघः ।

दाघ पु० दह-भावे घञ् न्यङ्क्वा० कुः । दाहे शब्दार्थचि० ।

दाडक पु० दल-ण्वुल् लस्य डः । दले शब्दार्थक० ।

दाडिम त्रि०दल-विशरणे भावे घञ् दालेन निर्वृत्तः भावात् इमप् लस्य डः । स्वनामख्याते फलप्रधाने वृक्षे मेदि० "तत् फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् । तत्र स्वादु १त्रिदोषघ्नं तृड्दाहज्वरनाशनम् । हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु । कषायानुरसं प्राहि स्निग्धं मेधाबलावहम् । स्वाद्वम्लं २दीपनं रुच्यं किञ्चित् पित्तकरं लघु । अम्लन्तु ३पित्तजनकमुष्णं वातकफापहमिति" भाव०प्र० । २एलायां मेदि० । अस्य स्त्रीत्वे गौरा० ङीष् । "वियोगिनीमैक्षत दाडिमीमसौ" नैष० "रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः" देवी० । एतत् स्थिता दुर्गा रक्तदन्ती । अमरे पुंस्त्वोक्तिः प्रायिकी उदाहरणदृष्ट्या मेदिनिकरेण त्रिलिङ्गत्वस्योक्तेः ।

दाडिमपत्रक पु० दाडिमस्य पत्रमिव पत्रमस्य कप् । रोहितकवृक्षे २राजनि०

दाडिमपुष्प पु० दाडिमस्य पुष्पमिव पुष्पमस्य । १रोहितकवृक्षे ६त० । २दाडिमस्य पुष्पे न० ।

दाडिमप्रिय पु० दाडिमं तत्फलं प्रियमस्य । १शुकखगे २दाडिमप्रियमात्रे त्रि० शब्दरत्ना०

दाडिमभक्षण पु०दाडिमं भक्षयितुं शीलमस्य ल्यु । १शुकखगे शब्दच० । २दाडिमफलभक्षके त्रि० । भक्ष-भावे ल्युट् ६त० । ३दाडिमफलस्य भक्षणे न०

दाडिमादिचूर्ण न० दाडिमफलत्वगादिचूर्णविशेषे । "द्वे

पले दाडिमादष्टौ खण्डादु व्योषं पलत्रयम् । त्रि त्रुगम्बिपलञ्चैव चूर्णमेकत्र कारयेत् । टङ्कचूर्णं मात्रया भुक्तमरोचकहरं परम् । दीपनं पाचनं च स्यात् पीनसज्वरकासजित्" वैद्य०

दाडिमाष्टक पु० दाडिमस्य तत्त्वचः अष्टकं पलाष्टकं यत्र । दाडिमफलत्वगादियुक्ते चूर्णभेदे "कर्षोन्मिता त्रुगाक्षीरी चातुर्जातं द्विकार्षिकम् । यमानी धान्यका जाटी गन्धिव्योषं पालांशकम् । पलानि दाडिमादष्टौ सितायाश्चैकतः कृतः । गुणैः कपित्थाष्टकवच्चूर्णोऽयं दाडिमाष्टकः" चक्रद० । कपित्थाष्टकञ्च १६६०पृ० उक्तम् तद्वद्गुणयुतोऽयमिति बोध्यम् ।

दाडिमीरस पु० "दाडिमं घृतसन्नद्धं तत्र पात्रे विनिःक्षिपेत् । ततः पक्वः पटेपूत इति स्याद्दाडिमीरसः" इत्युक्ते रसभेदे

दाडिमीसार पु० दाडिमीं तच्छब्दं सरति गच्छति अण् । दाडिमवृक्षे राजनि० । [वृक्षे शब्दार्थचि० ।

दाडिम्ब पु०दा–बा०ङ डस्य नेत्वम् । (डालिम) । ख्याते

दाडी स्त्री दल्यते फलेऽसौ दल–कर्म्मणि घञ् गौरा० ङीष् लस्य डः । दाड़िमे पा० । तस्याः फलम् । अण् तस्य हरितक्या० लुपि "हरीतक्यादि चेति" प्रकृतिलिङ्गत्वात् २तत्फलेऽपि स्त्री ।

दाढ़ा स्त्री दैप् शोधे दा–दाने सम्पदा०भावे क्विप् ढे गुडत्रे दानाय वा ढौकते ढौक–बा०ड । १दन्तभेदे दंष्ट्रायाम् हेम० । दानाय प्रेरणे २प्रार्थनायां ३समूहे च" शब्दार्थकल्प० । स्वार्थे क कापि अत इत्त्वम् । दाढ़िका तत्रार्थे हेम० । दाढ़ायै केशसमूहाय प्रभवति ठक् । दाढिका (दाढ़ि) श्मश्रुणि । "केशेषु मृद्धतोहस्तौ छेदयेदविचारयन् । पादयोर्दाढिकायां च" मनुः । "दाढिकायां श्मश्रुणि" कुल्लू० ।

दाण्ड पु०स्त्री दण्डस्य इक्ष्वाकुपुत्रभेदस्यापत्यम् शिवा० अण् । १दण्डस्यापत्ये स्त्रियां ङीप् । दण्डस्य भावः पृथ्वा० । वा अण् । २दण्डभावे न० । ३आयुधजीविसङ्घभेदे । दण्डानां समूहः अञ् । ४दण्डसमूहे न० ।

दाण्ड(ण्डि)कि त्रि० "आण्डस्त्रिगर्त्तषष्ठांश कौण्डोपरघटाण्ड(ण्डि)की । क्रोष्टुकिर्जालमालिश्च ब्रह्मगुप्तोऽथ जालकिः" सि० कौ०उक्ते त्रिगर्त्तषष्ठे आयुधजीविसङ्घभेदे ततः स्वार्थे क । दाण्ड(ण्डि)कीय तत्रार्थे ।

दाण्डपाता स्त्री दण्डस्य पातो यस्यां तिथौ "यास्यां क्रियायाम्" पा०सूत्रेण संज्ञायां जः । दण्डमात्रस्यतिथिभेदे ।

दाण्डाजिनिक त्रि० दण्डाजिनेन तद्धारणेनार्थानन्विच्छति "व्ययःमूलदण्डाजिनाभ्याम्" पा०ठञ् । मायाविनि कपटेनार्थलाभेच्छया दण्डाजिनधारिणि

दाण्डायन पु० दण्डस्य गोत्रापत्यम् नडा० फक् । दण्डगोत्रापत्ये तस्य स्थलं दाण्डिनायनस्थलम् । ग्रामभेदे "कूलसूदस्थलकर्णाः संज्ञायाम्" पा० ततः उत्तरपदस्थलशब्द आद्युदात्तः" सि० कौ० ।

दाण्डिक त्रि० दण्डेन तद्धारणेन जीवति ठेतना० ठञ् । दण्डधारणोपजीविनि । तस्य भावः पुरो० यक् । दाण्डिक्य तद्भावे न० । [दण्डप्रोक्तकल्पसूत्राध्यायिषु

दाण्डिन् पु० ब०व० । दण्डेन प्रोक्तमधीयते शौन० णिनि ।

दाण्डिनायन पुंस्त्री० दण्डिनो गोत्रापत्यं नडा० फक् दाण्डिनायनेत्यादिना टिलोपाभावः । दण्डिनोगोत्रापत्ये ।

दात त्रि० दाप् लवने कर्म्मणि क्त । १लूने, २छिन्ने । दैप्–शोधे कर्त्तरि क्त । ३शुद्धे च । दो–खण्डने इत्यस्य तु दितः दा–दाने इत्यस्य तत्त इति भेदः ।

दाति स्त्री०दैप् शोधे दाप लवने भावे क्तिच् । १शुद्धौ २छेदने दा–दाने बा०ति । ३दाने ४इष्टे च "मरुतो दातिवारः" ऋ०१।१६७।८। "दातिवारः प्रदेयजनः दत्तवरणीयऋविर्लक्षणधनो वा" भा०

दातु न०दा–भावे तुन् । १दाने "कत्तस्य दातु शवसो व्युष्टौ" ऋ० १०।९९।१ "कद दातु किं दानम्" भा० "सहस्र दातु पशुमद्विरण्यवत्" ऋ०९।७२।९। २दातरि त्रि० ।

दातृ त्रि० दा–दाने तृच् । १दानकर्त्तरि २दानशीले च १दातर्मे भूभृतां नाथः प्रमाणीक्रियतामिति" कुमा० "कामो दाता कामः प्रतिग्रहीता कामैतत्ते" यजु०७।४८ स्त्रियां ङीप् । शीलार्थे तृचि तु न कर्म्मणि षष्ठी "स हि ध्वा धन्वाजितं दाता न दात्या पशुः ऋ० ५।७।७। दातृधर्म्मश्च दानशब्दे दृश्यः ।

दातूरह पुंस्त्री० दाप्–लवने क्तिन् दातिमूहते ऊह–अण् दो–खण्डने क्तिन् दितिं वहति वह–क ऊठ् दितूरहः ततः स्वार्थे अण् देविकाशिंशपेत्यादिना व्यत्त्व १कालकण्ठके पक्षिभेदे अमरः । २जलकाके राजनि० ३चातके मेदि०४मेघे पु०शब्दर० । जातित्वे सर्वत्र स्त्रियां ङीप् । "सारसं रज्जुबालं च दातूरहं शुकसारिके" मनुः "क्रव्यादपक्षिदातूरहशुकप्रतुदटिट्टिभान्" याज्ञ० ।

दात्यौह पुं स्त्री दात्यूह+पृषो०। दात्यूहे खगे शब्दर०

दात्र न० दो–खण्डने दाप् लवने वा करणे ष्ट्रन्। छेदन साधने लवित्रे (दा) अस्त्रभेदे अमरः। "क्षुरैः क्षुरप्रैर्भल्लैश्च दात्रैरञ्जलिकैस्तथा" हरिव०२३७ अ० "दात्रेण धान्यं लुनाति" व्या०। दा–दाने कर्मणि त्र। २दातव्ये। "दात्रं यत्रोपदस्यति" ऋ०८।४३।२२ "दात्रं दातव्यम्" कर्त्तरि त्र। ३दानकर्त्तरि "सोमस्य दात्रमसि" यजु०१०।६ "दात्रं दानकर्त्तृ" वेददी०। दा दाने भावे त्र। ४दाने "तद्वां दात्रं महि कीर्त्तेन्यम्" ऋ०१।११६।६ "दात्रं दानम्" भा०।

दात्व पु० दा–दाने त्वन्। १दातरि २यज्ञकर्मणि च उज्ज्वल०।

दाद पु०दद–भावे घञ्। दाने "दत्त्वा च विविधान् दादान् पूजयित्वा च वै द्विजान्" भा०श० ३७अ० "तत्र दत्त्वा बहून् दादान् विप्रान् संपूज्यमाधवः" ४०अ०।

दाधिक त्रि० दध्नि दध्ना वा संस्कृतः दध्ना चरति दध्ना संसृष्ट उपसिक्तं वा ठक्। १दध्नि संस्कृतद्रव्ये २दध्नाचारिणि ३दध्ना संसृष्टे ४दध्नोपसिक्ते च "बीजपूररसोपेतं सर्पिर्दधि चतुर्गुणम्। साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित्" सुश्रुतोक्ते गुल्मादिनाशके पुंयौषधभेदे न०।

दाधित्य न० दाधित्यस्य विकारः अनुदात्तादित्वात् यञ्। दाधित्यस्य कपित्थस्य विकारे। तस्य परिमाणम्। तत्प्रत्ययात् पुनरञ्। २दाधित्यपरिमाणे न०।

दाधृवि स्त्री धृवि–यङ् लुक् इन्। धरित्र्यां माधवः "पुत्रा यांशो तु दाधृविभरध्यै" ऋ०६।६६।३। "दाधृविर्धरित्री" भा०।

दाधृषि त्रि० धृष–यङ्लुक्–इन्। अत्यन्तधर्षके "ब्रह्मणा यामि सवनेषु दाधृषिः" ऋ०२।७।७ "दाधृषिर्धर्षकः" भा० "सत्राहणं दाधृषिं तुम्रमिन्द्रम्" ऋ०४।११६।८ "दाधृषिमत्यन्तधर्षकम्" भा०।

दान आर्जवे ऋजूकरणे सक० उभ० भ्वा० स्वार्थे सन्। छेदने तु न सन्। दीदांसति ते अदीदांसीत् अदीदांसिष्ट छेदने तु दानति ते। अदानीत् अदानिष्ट दीदांसयति दानयति। दीदांसति काष्ठं ऋजूकरोतीत्यर्थः दानति काष्ठं छिनत्तीत्यर्थः।

दान न० दा–दाने दो–खण्डने दैप् शोधने वा भावादौ ल्युट्। १गजमदजले २दीयमाने त्रि० ३धने न० "दानं दटत्यपि जलैः सहसाधिरूढे" माघः "सेनाचरीभवदिभाननदानवारिवासेन यस्य जनिता सुरभीरणश्रीः" नैष० "व्यासीदनाविष्कृतदानराजिः" रघुः। ४पालने ५छेदने ६शुद्धौ च स्वस्वत्वत्यागादनुकूलव्यापारभेदे स्वत्वाभिसन्धानापूर्वकस्वत्वत्यागे दानपदार्थनिरूपणं तदङ्गादिकं च पुद्धि० त० यथा

देवलः "अर्थीनामुदिते पात्रे श्रद्धया प्रतिपादनम्। दानमित्यभिनिर्दिष्टं व्याख्यानन्तस्य वक्ष्यते" अर्थीद्रव्यम्। उदिते शास्त्रकथिते श्रद्धा देवलोक्ता यथा "सत्कृतिस्थानसूया च सदा श्रद्धेति कीर्त्तिता"। अतएव भगवद्गीतासु "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतन्तु यत्। असदित्युच्यते पार्थ! न च तत् प्रेत्य नेह च"। हरिवंशे बलिं प्रति भगवद्वाक्यम् "अश्रोत्रियं श्राद्धमधीतमव्रतं त्वदृत्विजं यज्ञमहुतं हुतम्। अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षड्ते तव दैत्यपुङ्गव!"। प्रतिपादनं स्वीकरणं पात्रायत्तीकरणमिति यावत्। तेन शास्त्रोक्तसम्प्रदानस्वत्वावच्छिन्नद्रव्यत्यागो दानम्। ततश्च उद्देश्यपात्रविशेषो यदि न स्वीकरोति तदा सोपाधित्यागविशेषस्यानिर्वाहान्न दातुः स्वत्वं निवर्तते इति रत्नाकरप्रभृतयः। वस्तुतस्तु "प्रदानं स्वाम्यकारणमिति" मनूक्तेर्दानमात्रात् सम्प्रदानस्य तद्विषयज्ञानाभावदशायामपि स्वत्वसत्त्वात् पितुः स्वत्वोपरमात्तद्वने गर्भस्यस्येव। तेन शास्त्रोक्तसम्प्रदानस्वत्वापादकद्रव्यत्यागोदानम्। तथाच दत्तस्य प्रतिग्रहो न तु प्रतिग्रहघटितं दानमिति। व्यक्तमाह कात्यायनः "पिता दत्तमादाय गृहीत्वा निष्क्रामयति" आदाय प्रतिगृह्य ततोहस्तं गृहीत्वा वक्ष्यमाणमन्त्रेण निष्क्रामयतीत्यर्थः। "दत्त्वान्ते स्वस्तिवाचयेत्" इति वक्ष्यमाणवचनाच्चेति। अतएव मरीचिः "बहुगोषु यथा वत्सं मातरं लभते सुतः। मनसा यस्य यद्दत्तं तद्धि तस्योपतिष्ठते"। नचैतत्तर्पणमात्रपरं बहुगोष्विति दृष्टान्ताभिधानेन च यस्य यदिति सामान्याभिधानेन होमाधिकरणन्यायात् सामान्यपरं तेन श्राद्धादावपि तथा। "एकत्र निर्णीतः" इति न्यायाच्च। अतएव दत्तस्योद्देश्यपात्राभावेऽपि इतरधनवत्तद्धनस्वामिकुले प्रतिपत्तिमाह हेमाद्रिधृतधौम्यः "परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु"। दानकल्पतरौ नारदः "ब्राह्मणस्य च यद्दत्तं सान्वयस्य न चाग्नि सः।

सङ्कल्पे तस्य निनयेत्तदभावेऽस्य बन्धुषु। यदा तु न सङ्कल्पः स्यान्न च सम्बन्धिबान्धवाः। दद्यात् सजातिशिष्येभ्यस्तदभावेऽपत्ये निःक्षिपेत्" अतएव श्राद्धीयान्नस्य पात्राभावे जले प्रक्षेपः। अतएव "मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत्। विद्यते सागरस्यान्तो दानस्यान्तं न विद्यते" इति नारदीयोक्तम्। दानानन्तरमेव स्वीकारात् पूर्वं दक्षिणा क्रियते। यत्र तु पात्रविशेषानुद्देश्यकदानं तत्र दातुः प्रतिपत्त्युपदेशात् तदधीनसम्प्रदानविशेषनिरूपितस्वत्वं त्यागादेव जायते। तत्र प्रतिपादनमाह मत्स्यपुराणम् "न चिरं धारयेद्धेम्नि हेम संप्रोक्षितं बुधाः। तिष्ठद्भयापहं यस्मात् शोकव्याधिकरं नृणाम्। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलम्"। "संप्रोक्षितं पात्रमुद्दिश्य त्यक्तमिति" हेमाद्रिः। अतएव विष्णुपुराणे "तस्मात् सर्वात्मना पात्रे दद्यात् कनकमुत्तमम्। अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे। प्रमादतस्तु तद्भष्टं तावन्मात्रं नियोजयेत्। अन्यथा स्तेययुक्तः स्याद्धेम्नः प्रदत्तं विनाशिनि"। तद्धेम ब्राह्मणावोत्सृष्टं ब्राह्मणसादकृतम् यदि चौरादिनापह्रियते तदा तावदेव पुनरुत्सृज्य देयमिति दत्तसागरः। "द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयात् याजयेदध्यापयेत्" इति श्रुतौ याजनाध्यापनसाहचर्यात् प्रतिग्रहस्य स्वत्वमजनयतोऽप्यर्जनरूपता न विरुद्धा याजनाध्यापनादौ दक्षिणादानादेव स्वत्वादिति दायभागः। नतु प्रतिग्रहात् स्वत्वं प्रागुक्तमनुधौम्यनारदीयवचनविरोधात्। सम्प्रदानस्वीकारात् पूर्वं त्यक्तद्रव्यस्यान्येन ग्रहणे ब्रह्मस्वापहारापत्तेश्च। एवञ्च दाने सम्प्रदानस्य कारणत्वोद्देश्यत्वात्, नत्वनुमतिद्वारा मानाभावात् मनसा पात्रमनुद्दिश्येत्यत्र व्यभिचाराच्च। एवञ्च त्यागाच्छिद्दत्तमपि दातुः स्वत्वं संप्रदानाग्रहणादसम्यक्त्वेन तस्यादानत्वश्रुतेर्दातुः पुनः स्वत्वमुत्पद्यते। तथाच नारदः "दत्त्वा दानमसम्यग्यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्" असम्यक्त्वञ्च दानस्याद्देयद्रव्यदानाद्वा व्ययार्थदानाद्वा सम्प्रदानभ्रान्त्यादिना वा पित्राद्यसम्मत्यादिना वा दातुरेवाशुद्ध्या व्यवस्थाभेदाद्वा इति वाचस्पतिमिश्राः। तथाच देवलः। "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुः"। धर्मयुक् न्यायार्जितं द्रव्यं तथाच विष्णुधर्मोत्तरम् "देशकाले तथा पात्रे धनं न्यायागतं तथा। यद्दत्तं ब्राह्मणश्रेष्ठाः! तदनन्तं प्रकीर्तितम्"। प्रतिग्रहाभावे प्रतिग्रहीतरूपाङ्गाभावादसम्यक्त्वम्। दत्तस्याप्रदानं पुनर्हरणं यस्मिन् व्यवहारपदे तत्तथेति विज्ञानेश्वरः। अतएव यज्ञाद्यर्थं याचकाय धनं दत्तमपि तेन तदकरणे पुनस्तद्ग्रहणमाह मनुः "धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनम्। पश्चान्न च तथा यत् स्यान्न देयन्तस्य तद्भवेत्"। दत्तस्य गृहीतस्य भुक्तस्यापि पुनरादानश्रुतेः सुतरां पात्रस्योपेक्षायां तथेति। उपेक्षया स्वत्वहानिमाह बृहस्पतिः "प्राप्तमात्रं येन भुक्तं स्वीकृत्यापरिपन्थिनम्। तस्य तत् विनिमाप्नोति हानिश्चोपेक्षया तथा"। अतएव प्रतिग्रहीतुस्त्यागात् फलं वक्ष्यते। अन्यत्र हारीतः "प्रतिश्रुत्याः प्रदानेन दत्तस्य छेदनेन च। विविधान् नरकान् याति तिर्यग्योनौ च जायते। वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम्। तद्धनं ऋणसंयुक्तम् इह लोके परत्र च"। दत्तस्योच्छेदनं स्वयन्दत्तस्य द्रव्यस्य प्रतिग्रहीतृदानविक्रयादिकं विना छेदं बलात् स्वीकरणं नतु तद्विक्रीतादेर्ग्रहणम्। तथा चाश्वमेधिके पर्वणि युधिष्ठिरं प्रति व्यासवाक्यं "दत्तैषा भवता मह्यं तान्च भूमिं ददाम्यहम्। अरण्यं दीयतां मेऽद्य आसीत् पूर्वन्तु ते यतः" इति कात्यायनः "स्वस्थेनार्त्तेन वा दत्तं आवितं धर्मकारणात्। अदत्त्वा तु मृते दाप्यस्तत्सुतोनात्र संशयः"। आर्त्तेन जन्मप्रभृति महारोगिव्यतिरिक्तरोगिणेत्यर्थः। महारोगिणां दाने "तेषां मध्ये तु यः कुष्ठी गर्हितः सर्वकर्मसु" इति प्रागुक्तभविष्यपुराणीयनिषेधात्। एवञ्च सुमूर्षुदत्तस्य यद्दानोपसर्गत्वाभिधानं तद्धर्मार्थेतरदानपरम्। स्मृतिः "स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते। वसित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम्"। अत्र श्राद्धवद्भोपितदेशाभिधानात् "यज्ञोदानं तपोजप्यं श्राद्धञ्च सुरपूजनम्। गङ्गायान्तु कृतं सर्वं कोटिकोटिगुणं भवेत्" इति स्कान्दे गङ्गायामिति गङ्गातीरपरमिति गङ्गावाक्यावली। पाद्मे "शिवस्य विष्णोरग्नेश्च सन्निधौ दत्तमक्षयम्"। लिङ्गपुराणे "शालग्रामशिला यत्र तत्तीर्थं योजनद्वयम्। तत्र दानञ्च होमश्च सर्वं कोटिगुणं भवेत्"। यत्र भूर्लोके। भूर्लोकमाह विष्णुपुराणम्। "पादगम्यञ्च यत् किञ्चि-

इस्वस्ति पृथिवीमयम् । स भूलोकः समाख्यातो विस्तारोऽस्य मयोदितः" पृथिवीमयं पार्थिवम् । ततश्च शालग्रामस्य पात्रादप्यस्यानेऽपि तीर्थत्वमतएव केवलभूमौ शालग्रामावस्थानं तीर्थाय मैथिलानां दुराचरणमेव । शङ्खलिखितौ "आहारं मैथुनं निद्रां सन्ध्याकाले विवर्जयेत् । कर्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ" । स्मृतिः "गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् । सहस्रगुणमाहूय याचिते तु तदर्द्धकम्" । विष्णुधर्मोत्तरम् "सीदते द्विजमुख्याय योऽर्थिने न प्रयच्छति । सामर्थ्ये सति दुर्बुद्धिर्नरकायोपपद्यते" । यमः "आशां दत्त्वा ह्यदातारं दानकाले निषेधकम् । दत्त्वा सन्त्यजते यस्तु तमाहुर्ब्रह्मघातकम्" । मात्स्ये "अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम् । केशेष्विव गृहीतस्तु मृत्युना धर्ममाचरेत्" । भारते "एकां गां दशगुर्दद्याद्दश दद्याच्च गोशतो । शतं सहस्रगुर्दद्यात् सहस्रं बहुगोधनः" । व्यासः "ग्रामादर्द्धमपि ग्रामसर्वस्वः किन्न दीयते । इच्छानुरूपोविभवः कदा कस्य भविष्यति" । तथा "मुक्त्वा दानं न शस्यते" । अतएवाग्निपुराणम् "चासमुष्टिं परगवे ग्रासं दद्यात्तु यः सदा । अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति" । देवलः "अपापरोगी धर्मात्मा दितृसुरव्यसनः शुचिः । अनिन्द्याजीवकर्मा च षड्भिर्दाता प्रशस्यते" अनिन्द्याजीवकर्मा अगर्हितजीवनोपायः । तथा "अपराबाधमक्लेशं प्रयत्नेनार्जितं धनम् । अल्पं वा विपुलं वापि देयमित्यभिधीयते" । अपराबाधं परपीड़ारहितम् अक्लेशं पात्रक्लेशाजनकम् । तथा "यत् यच्च दुर्लभं द्रव्यं यस्मिन् कालेऽपि वा पुनः । दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा" देवलः "दृष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् । श्लाघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते । तस्मादात्मकृतं पुण्यं दृष्टा न परिकीर्त्तयेत्" दृष्टं यजनं अनुकीर्त्तनं कथनं श्लाघा प्रशंसा अनुशोचनं धनव्ययेन पश्चात्तापः । भग्नतेजः फलजननशक्तिहीनं दृष्टा रक्षादिप्रयोजन विना । देवलः "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् । केवलं धर्मबुद्ध्या यत् धर्मदानं प्रचक्ष्यते" । प्रयोजनमिह लौकिकमभिहितम् । याज्ञवल्क्यः "न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्ष्यते" । वृत्तमाचारः । विष्णुधर्मोत्तरे "पतनात् त्रायते यस्मात् पात्रं तस्मात् प्रचक्षते" । महाभारते "पात्राणामपि तत् पात्रं शूद्रान्नं यस्य नोदरे" । अत्र साक्षाच्छूद्रदत्तदततण्डुलाद्यनुपयोगीति दानसागरः । शूद्रस्वत्वाश्रयान्नाभोजीति रत्नाकरः । वस्तुतस्तु कुमूर्षुप्रकरणाभिहितशूद्रान्नानुपयोगोत्यर्थः । याज्ञवल्क्यः "दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः" । निमित्तेषु गङ्गातीरादिसंक्रान्त्यादिषु । वृद्धमनुः "सहस्रगुणितं दानं भवेद्दत्तं युगादिषु । कर्म श्राद्धादिकञ्चैव तथा मन्वन्तरादिषु" । विवादचिन्तामणौ वशिष्ठः "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकः । तस्य प्रदानविक्रयपरित्यागे तु मातापितरौ प्रभवतः नस्वेकं पुत्रं दद्यात् प्रतिगृह्णीयात् वा स हि सन्तानाय पूर्वेषामिति" । कात्यायनः "विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः । दाराः पुत्राश्च सर्वस्वमात्मन्येव तु योजयेत् । आपत्काले तु कर्त्तव्यं दानं विक्रय एव च । अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चयः" । एवं भरणासामर्थ्य एव परित्यागः । मनुः "सप्त वित्तागमाधर्म्या दायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च" । दायोऽन्वयागतः लाभो निध्यादेः । जयः संग्रामादेः । प्रयोगः कुशीदं, कर्मयोगः कृषिवाणिज्यपुत्रकन्यादि । बृहस्पतिः "कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते । मध्वास्वादो विषं पश्चाद्दातुर्धर्मोऽन्यथा भवेत्" । कीर्त्तिनरकाभ्यामित्यर्थः । अस्यापवादमाह स एव "कुटुम्बं पीड़यित्वा तु ब्राह्मणाय महात्मने । दातव्यं भिक्षवे चान्नमात्मनोभूतिमिच्छता" । अतएव भविष्यपुराणे "स्वल्पे महति वा तुल्यं फलमाद्यदरिद्रयोः" । विष्णुधर्मोत्तरे "यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत्" । हारीतः "तामसेन तु द्रव्येण ऋत्विग्भिस्तामसैस्तथा । तामसं भावमास्थाय तामसो यज्ञ उच्यते । तामसेन तु यज्ञेन दानेन तपसा तथा । निरये जन्म चेदाहुर्द्धिं विद्याच्च तामसीम्" । तामसी बुद्धिर्लोभाधिपत्यकृपा इति रत्नाकरः । "राजसेन तु द्रव्येण ऋत्विग्भीराजसैस्तथा । राजसं भावमास्थाय राजसोयज्ञ उच्यते । राजसेन तु यज्ञेन दानेन तपसा तथा । निरयस्वर्गयोर्जन्म क्रूरराज्यं श्रिया युतम् । सात्विकेन तु द्रव्येण ऋत्विग्भिः सात्विकैस्तथा । सात्विकं भावमास्थाय सात्विको यज्ञ उच्यते । सात्विकेन तु यज्ञेन दानेन तपसा

तथा। देवलोके ध्रुवं वासो देवसायुज्यमेव च"। मत्स्यपुराणञ्च "येषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम!। पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम्। कर्मणा प्राप्यते लोके राजसस्य तथा फलम्। कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम्" द्रव्याणामपि तत्तद्भेदमाह नारदः "पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः। व्याजेनोपार्जितं यद्यत्तत् कृच्छ्रं ससुदाहृतम्। पार्श्विकः पाशतया योऽर्जयतीति प्रायश्चित्तविवेकः। आर्त्त्या परपीड़या, प्रतिरूपकेण कृत्रिमरत्नादिना, साहसेन ससहायानगिर्य्यारोहणादिना, व्याजेन ब्राह्मणवेशेन शूद्रादिना। कृच्छ्रं तामसं इति रत्नाकरः। "कुशीदकृषिवाणिज्यशुल्कशालानुवृत्तिभिः। कृतोपकारादाप्तञ्च राजसं ससुदाहृतम्" अनुवृत्तिः सेवा। "श्रुतशौर्य्यतपःकन्याशिष्यप्रयाज्यान्वयागतम्। धनं सप्तविधं शुद्धं मुनिभिः ससुदाहृतम्"। श्रुतेनाध्ययनेन शौर्य्येण जयादिना तपसा जपहोमदेवार्च्चनादिना कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं शिष्यागतं गुरुदक्षिणादिना, याज्यागतं आर्त्विज्यलब्धम् अन्वयागतं दायादिभ्योलब्धं शुद्धं सात्विकम्। अत्र स्वत्वहेतुभूतव्यापाररूपार्जनगणे चौर्य्यस्यापि निर्देशाच्चौर्य्योपात्तद्रव्येऽपि यथेष्टविनियोज्यत्वेन शास्त्रगम्यत्वरूपस्वत्वमस्तीति प्रतीयते भवदेवभट्टसम्मतोऽयं पक्षः। यत्तु "द्रव्यमस्वामिविक्रीतं पूर्वस्वामी समश्नुयात्" इति याज्ञवल्क्यीयेन चौरविक्रीतस्यास्वामिविक्रीतत्वमुक्तं तत्रास्वामिपदमप्रशस्तस्वामिपरं "अप्राशस्त्यं विरोधश्च नजार्थाः षट् प्रकीर्त्तिताः" इति प्रागुक्तत्वात्तत्र स्वामित्वाभावपरं प्रागुक्तनारदवचनविरोधात्। "ब्राह्मणस्वं न हर्त्तव्यं क्षत्रियेण कदाचन। दस्युनिष्क्रियया स्तु स्वमजीवन् हर्तुमर्हति" इत्यनेन चौरस्वत्वाभिधानाच्च अतएव याज्ञवल्क्यः बुभुक्षितस्त्वग्रहं स्थित्वा धान्यमब्राह्मणाद्धरेत्"। मनुरपि "तथैव सप्तमे भक्ते भक्तानि षड्दनन्नता। अश्वस्तनविधानेन हर्त्तव्यं हीनकर्मणः" इत्याभ्यां तत्रहोपवासषड्डपवासानन्तरं धान्यचौर्य्येण जीवनाभिधानात्तदस्य बलिवैश्वदेवार्हता प्रतीयत इति। (अहोरात्रे भोजनद्वयविधानात् त्रिरात्रोपवासे षड्भोजनस्य सम्भवेन वाक्ययोरकवाक्यत्वया त्रिरात्रोपवास एव सिद्ध्यति। अतः षड्डपवासस्य पाक्षिकत्वोक्तिश्चिन्त्यमूला)। अत्र हरिवंशीयस्वप्नव्याधोपाख्याने "ते नियागाद्गुरोस्तस्य गां दोग्ध्रीं समपालयन्। क्रूरा बुद्धिः समभवत्तां गां वै हिंसितुं तदा। पितृभ्यः कल्पयित्वैनामुपभुञ्जीत भारत!। स्मृतिः प्रत्यवमर्षश्च तेषां जात्यन्तरेऽभवत्"। अत्र गुरोर्गां हत्वा श्राद्धेन चौराणामपि जातिस्मरणाद्धैर्य्येण स्वत्वं प्रतीयते। एतत्तु व्यत्यन्ताशक्तानां शक्तानां तु मत्स्यपुराणे "गामग्निं ब्राह्मणं शास्त्रं काञ्चनं सलिलं स्त्रियः। मातरं पितरञ्चैव ये निन्दन्ति नराधमाः। न तेषामूर्द्ध्वगमनमेवमाह प्रजापतिः। परस्वं हरते यस्तु पश्चाद्दानं प्रयच्छति। न स गच्छति वै स्वर्गं दातारो यत्र भागिनः" इति सात्विकराजसिकवत् फलाभावपरम्। अन्यथा प्रागुक्तहारीतादिवचनविरोधापत्तेः। शातातपपराशरौ "सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने च दहत्यासप्तमं कुलम्" वशिष्ठव्यासपराशराः "यस्य चैकगृहे मूर्खो दूरे चैव बहुश्रुतः। बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः"। शातातपः "मन्त्रपूतञ्च यद्दानमपात्राय प्रदीयते। दातुर्निष्फलं तद्धि हस्तं तद्धोक्तुर्जिह्वां निकृन्तति। न ददस्वेति यो ब्रूयात् देवाग्नौ ब्राह्मणेषु च। तिर्य्यग्योनिशतं गत्वा चाण्डालेष्वभिजायते"। वशिष्ठः "परिभुक्तमवज्ञातमपर्य्याप्तमसंस्कृतम्। यः प्रयच्छति विप्रेभ्यस्तद्धस्तन्यवतिष्ठते"। अपर्य्याप्तं स्वकार्य्याक्षमम्। यमः "सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न स तत्फलमाप्नोति तत्रैव परिवर्त्तते"। अत्रैव दृष्टफल एवावतिष्ठते न स्वर्गादिफलमाप्नोतीत्यर्थः। महाभारते "पङ्गुन्धबधिरामूकाव्याधिनोपहताश्च ये। भर्त्तव्यास्ते महाराज! न तु देयः प्रतिग्रहः"। व्याधिना यक्ष्मादिना। व्यासः "मातापितृभ्यां यद्दत्तं यद्दत्तं भ्रातृबन्धुषु। आत्मजेषु च यद्दत्तं सोऽनन्तस्वर्गसंक्रमः। पितुः शतगुणं दानं सहस्रं मातुरेव च। अनन्तं दुहितुर्दानं कोटिश्चैव दत्तमक्षयम्"। विशेषयति नारदः "साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्। योऽसङ्ग्रहः प्रतिगृह्यापि पुनः सङ्ग्रहः प्रयच्छति। आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः" धनस्वामिनमात्मानं सन्तारयति दुस्तरमिति। येषाञ्च स्कान्दे विशेषः। गोतमः "अन्तर्जानु करं कृत्वा शकुनन्तु तिलोदकम्। फलांशमभिसन्धाय प्रदद्याच्छ्रद्धयान्वितः"। उदकस्तुतिमभिधायाह हारीतः "तस्माद्द्विर-

बोध्यैतद्ददद्यादालभ्य एव च" इति अबोध्य प्रोक्षेति रत्नाकरः। अत्र यद्यपि "उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्। न्युब्जेनाभ्युक्षणं प्रोक्तं तिरश्चीनोक्षणं स्मृतम्" इति वर्द्धमानधृतेन विरुद्धम्। अतएव कुसुमाञ्जलौ प्रोक्षणाभ्युक्षणादिभिरिति भेदेनोक्तं तथापि "यस्य यद्दीयते वस्त्रमलङ्कारादि काञ्चनम्। तेषां दैवतसङ्ख्यार्थं कृत्वा प्रोक्षणपूजने। उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना प्रतर्पयेत्" इति कालिकापुराणाद्व्याख्याने-ऽपि न शास्त्रविरोधः। वस्तुतस्तु उभयदर्शनाद्वैकल्पिकम्। आलभ्य पाणिना स्पृष्ट्वा। आपस्तम्बः "सर्वाण्युदकपूर्वाणि दानानि यथाश्रुति वीहारे" इति। अन्वाहार्य्यदानादौ यथाश्रुति यावदेव श्रूयते तावदेव कुर्य्यात् वीहारे यज्ञे नोदकपूर्वतानियमः इति कल्पतरुरत्नाकरौ। अन्वाहार्य्यसमावस्थाश्राद्धं एवञ्चापस्तम्बसूत्रैकवाक्यत्वात् यथाश्रुति वीहारः इति जैमिनिसूत्रेऽपि श्रुतिरुत्पत्तिवाक्यं शाब्दी व्युत्पत्तिश्च तेनोत्पत्तिव्युत्पत्तिवाक्ययोरर्थः यथाश्रुतः स एव विनियोगवाक्ये ग्राह्य इति सूत्रार्थः। नतु श्रुतेरेव शब्दैर्वाक्यरचना कार्य्येत्यर्थः मूलभूतश्रुत्यन्तरकल्पनापत्तेरदृष्टार्थतापत्तेश्च। ततश्च सङ्कल्पादिवाक्ये सङ्कल्पविषयीभूतस्यार्थस्याभिलप्यमानत्वादभिलापे तु तद्वाचकसर्वशब्दानां सामर्थ्यात् श्रुतशब्दस्य नियमो नास्ति अन्यथा विश्वजिता यजेतेत्यादौ स्वर्गकाम इत्यभिलापो न स्यादश्रुतत्वात् तथा "कपिलाकोटिदानात्तु गङ्गास्नानं विशिष्यते इति ब्रह्माण्डपुराणात् कपिलाकोटिदानजन्यफलाधिकफलप्राप्तिकाम इति शिष्टानुमताभिलापो न स्यात्। अतएव ग्रहादीनां नानासूनिभिर्नानानामान्युक्तानि तेषां यत् किञ्चिन्नाम्नैवोल्लेखाय। तथाच मत्स्यपुराणम् "सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः। राहुः केतुरिति प्रोक्ता ग्रहालोकहितावहाः"। याज्ञवल्क्यः "सूर्य्यः सोमो महीपुत्रः सोमपुत्रः बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः" यत्र त्वेकस्य देवस्य पूजादौ विशिष्य नानानामोपादानं तत्र ततएव तान्येवाभिलप्यानि न तु नामान्तराणि एवं यत्र बहुभिर्मुनिभिर्यन्नामाभिधीयते तत्र तदेव यन्नाम्नं तथाभिधानेन श्रुतिस्तत्रैव तात्पर्य्यं प्रतीयते। एवञ्च विधिशब्दस्य मन्त्रत्वे भावः स्यादिति न्यायेनापि विधिशब्दस्य विधिवाक्यस्थदेवताप्रतिपादकमात्रस्य मन्त्रसम्पादकत्वं बोध्यम्, योभियाज्ञवल्क्येन "मित्रोधाता भगस्त्वष्टा पूषार्य्यमांशुरेव च। पर्य्यायनामभिश्चैव एकएव निगद्यते" तथा। "वाचकेऽपि च विज्ञाते वाच्यएव प्रसीदति" इत्युक्तम्। अतएव मनुः "वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम्। अन्नतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम्"। अत्र वाग्देवता सरस्वतीति श्रुतेर्वाक्सरस्वत्योरेकार्थत्वात् वाग्दैवत्यचरुणा सरस्वती यजनं संगच्छते। अन्यथा नामभेदाद्देवताभेदे विरुद्धं स्यात्। तेऽसत्यवचने सम्भाव्यमाने शूद्रविट्क्षत्रियविप्रवधविषयान्दृतादिसाक्षिणः। स्मृतिः "नामगोत्रे समुच्चार्य्य प्राङ्मुखो देवकीर्त्तनात्। उदङ्मुखाय विप्राय दत्त्वान्ते स्वस्ति वाचयेत्"। देवकीर्त्तनादिति ल्यब्लोपे पञ्चमी देवकीर्त्तनं कृत्वेत्यर्थः। ततश्च दातासकदैवतं विष्णुदैवतं वा वक्तव्यमिति।

देयद्रव्यदेवा विष्णुध॰उक्ता यथा "अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता। कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः। प्राजापत्यो गजः प्रोक्तस्तुरगोयमदैवतः। तथा चैकशफं सर्वं कथितं यमदैवतम्। महिषश्च तथा याम्य उष्ट्रो वै नैर्ऋतो भवेत्। रौद्री धेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते। मेषन्तु वारुणं विद्याद्वराहो वैष्णवः स्मृतः। आरण्याः पशवः सर्वे कथिता वायुदैवताः। जलाशयानि सर्वाणि वारिधानीं कमण्डलुम्। कुम्भञ्च करकञ्चैव वारुणानि विनिर्दिशेत्। सप्तद्रव्याणि रत्नानि वासुद्राणि तथैव च। आग्नेयं कनकं प्रोक्तं सर्वलौहानि चाग्नय। प्राजापत्यानि शस्यानि पक्वान्नमपि च द्विजाः!। क्षेयानि सर्वगन्धानि गान्धर्वाणि विचक्षणैः। वार्हस्पत्यं स्मृतं वासः सौम्यानि रजतानि च। पक्षिणश्च तथा सर्वे वायव्याः परिकीर्त्तिताः। विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च। सारस्वतानि क्षेयानि पुस्तकाद्यानि पण्डितैः। सर्वेषां शिल्पमाख्यातं विश्वकर्मा तु दैवतम्। द्रुमाणामथ पुष्पाणां शाकानां फलितैः सह। फलानामपि सर्वेषां तथा क्षेयो वनस्पतिः। मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च। कृष्णाजिनं शय्यां रथमासनमेव च। उपानहौ तथा यानं तथा यत् प्राणवर्द्धितम्। कौशाम्बाङ्गिरसं त्वेतत् प्रतिगृह्णीत मानवः। पार्य्यङ्कञ्च तथोशीरं वर्षशस्त्रध्वजादिकम्। व्रतोपकरणं सर्वं कथितं सर्वदैवतम्। एतद्धन्तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः!। तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम्"। देवकीर्त्तनादिलक्ष

देयकीर्त्तनादिति ष्टुत्रिंशन्मते पाठः व्याख्यातश्च हेमाद्रिणा "देयकीर्त्तनोत्तरकालं दत्त्वेत्यर्थः।

विष्णुधर्मोत्तरेऽपि "ब्रह्मस्व नाम गृह्णीयाद्दानीति ततो वदेत्। तोयं दद्यात्तथा दाता दाने विधिरयं स्मृतः"। व्यासः "नामगोत्रे समुच्चार्य्य प्रदद्याच्छ्रद्धयान्वितः। परितुष्टेन भावेन तुभ्यं सम्प्रददे" इति। सम्प्रदानवाक्येऽहं-प्रयोगमाह कात्यायनः "अहमस्मै ददानीति संप्रदानाभाषणं दीयते" एवञ्च सम्प्रददे ददानीत्येतयोर्विकल्पः स च व्यवस्थितः आत्मनामिफले सम्प्रददे परनामिफले ददानीति उभयपदित्वात् दाधातोः फलवति कर्त्तर्यात्मने पदं दृश्यते अफलवति कर्त्तरि परस्मैपदमिति पाणिनिस्मरणात्। अतएवात्मनेपदं परस्मैपदम् इत्येतयोरात्मने परस्मै इत्याभ्यां समाख्या सङ्गच्छते। ददानीत्यस्य दद इतिवत् वर्त्तमानार्थतेति। अतएव "सम्प्रदाय ददानीति" मनुनाप्युक्तं सङ्गच्छते अनुमत्यर्थं तु सम्प्रत्याभिधानमप्रयोजकमिति। श्राद्धादौ फलभागिनां गोत्राद्युच्चारदर्शनात् तदितरत्रापि तथोच्चारः। हारीतः "अथासद्द्रव्यदानमसत्यं यत्र दत्त्वा परितप्यते तद्दानमफलं यच्चोपकारिणे ददाति तन्मलं परिक्लिष्टं यच्च सोपधं ददाति अन्यत्रावितमल्पं यच्चापात्राय ददाति अनिष्टदानं भवति यच्चादत्त्वा प्रकीर्त्त्यते भयदानं यच्चाभयया ददाति क्रोधाद्राक्षसं यच्चाक्रुद्ध्य ददाति दत्त्वा वा क्रोशति अवज्ञातं पैशाचं यच्चावज्ञातं ददाति दत्त्वा वावजानीते सुमूर्खोत्तमसं यच्चाप्रकृतो ददाति एते दानोपसर्गायैरुपसृष्टं दानमप्रसिद्धमसत्यं भयशस्यमध्रुवफलं भवत्यल्पफलं चेति"। तर्हि त्यागानन्तरकाले, कस्मात्पश्चात्तन्नवेऽप्यदानमसमर्पणम्। उपकारिणे व्यसनोपकारिणे तदितरोपकारिणे तु दद्यः। "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे। दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्"। तस्मात् यच्चोपकारपरहितम्। सोपधं यच्च अन्यत्रावितं चोपकारार्थं प्रकाशितम्। अनिष्टदानं यत्रवे दानं, अवोपानभेदः अप्रकृतोभयादिमात्। तथाच नारदः "अदत्तन्तु भवक्रोधकामशोकरुगन्वितैः। बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदं कर्म्मेति प्रतिज्ञाभेच्छया च यत्"। "प्रतिज्ञाभेच्छया सोपाधिदत्तमपाध्यसिद्धौ" इति विवादचिन्तामणिः। एतत्परमेव हारीतेन सोपधमित्युक्तम्"। हेमाद्रौ दानखं० दानाङ्गादिकं विस्तरेणोक्तं यथा "अथ दानाङ्गनिरूपणम्। तानि च प्रतिग्रहीतृ द्रव्यकालदैवब्राह्मणसंज्ञकानि। तदुक्तं भविष्यपुराणे "प्रतिग्रहीता द्रव्यञ्च कालो देशश्च पावनः। श्रद्धा च सात्विकी चेयं दानानामङ्गपञ्चकम्"।

तत्र प्रतिग्रहीतृपात्रनिरूपणम्। स्कन्दपुराणे देवीं प्रति ईश्वरवचनम् "श्रुतीनामाकराह्येते रत्नानामिव सागराः। विप्रा विप्राधिपमुखे! पूजनीयाः प्रयत्नतः"। विप्राधिपः चन्द्रः तद्वन्मुखं यस्याः सा तथा देवीसम्बोधनमेतत्। "यत्र वेदविदो विप्रा न प्राश्नन्त्युत्तमं हविः। न तत्र देवा देवेशि! हविरश्नन्ति कर्हिचित्"। तथाच तैत्तिरीयश्रुतिः "यावतीर्व्वै देवतास्ताः सर्व्वा वेदविदि ब्राह्मणे वसन्तीत्यादि"। "वियदित्युच्यते व्योम प्रकारः प्रापणे स्मृतः। दिवं सम्प्रापयन्त्येते दातॄन् विप्रास्ततः स्मृताः। अपि नारायणोऽनलो ब्रह्मा स्कन्दोऽनिलः शिवो। तद्दानं नाभिनन्दन्ति यत्र विप्रा न पूजिताः। वेदाः प्रसादसुख-मायु-र्धर्म्मः सुखं धनम्। श्री-र्यशः-स्वर्गवासश्च तानू विप्रानर्च्चयेद्बुधः"। विष्णुधर्म्मोत्तरे श्रीभगवानुवाच "ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः। निर्भृतस्तितैश्च निर्भृतस्ते तैरहं सर्वकर्म्मसु। विप्राः परा गतिर्मह्यं यस्तान् पूजयते नृप!। तमहं स्वेन रूपेण प्रपश्यामि युधिष्ठिर!। काणाः कुण्ठाश्च षण्डाश्च दरिद्रा व्याधिताश्च ये। एवंरूपाश्च ये विप्राः पश्य रूपं ममैव ते"। इतन्तु ब्राह्मणजातिमात्रस्तुतिपरम्। याज्ञवल्क्यः "तपस्तप्त्वाहजद्ब्रह्मा ब्राह्मणान् वेदगुप्तये। तन्मात्रं पितृदेवानां धर्मसंरक्षणाय च"। मनुः "नास्ति विप्रसमो देवो नास्ति विप्रसमो गुरुः। नास्ति विप्रात् परः शत्रुर्नास्ति विप्रात् परो विधिः"। वह्निपुराणम् "न जातिर्न कुलं राजन्! न स्वाध्यायः श्रुतं न च। कारणानि द्विजत्वस्य वृत्तमेव तु कारणम्। किं कुलं वृत्तहीनस्य करिष्यति दुरात्मनः। जनयः किं न जायन्ते कुसुमेषु सुगन्धिषु। नैकमेकान्ततो ज्ञात्वा पठनं हि विधीयते!। वृत्तमन्विष्यतां तात! रक्षोभिः किं न पठ्यते। बहुना किमधीतेन नष्टस्येव दुरात्मनः। तेनाधीतं श्रुतं वापि यः क्रियामनुतिष्ठति। अपाकस्य यथा तोयं स्वदते च यथा पयः। दूष्यं स्यात् स्वानदोषेण, वृत्तहीनं तथा श्रुतम्। तस्माद्विद्धि महाराज! वृत्तं ब्राह्मणलक्षणम्। अथर्वदोऽपि दुर्वृत्तः

भूतादत्यतरः स्मृतः। सत्यं दम-स्तपोदानमहिंसेन्द्रिय-निग्रहः। दृश्यन्ते यत्र राजेन्द्र! स ब्राह्मण इति स्मृतः"। वशिष्ठः "यं न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम्। न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः"। सन्, विशिष्टः असन्, तद्विपरीतः। अत्र चात्मोत्कर्षप्रकाशनं यो न करोति स पात्रमिति तात्पर्यमिति। यमः "अहिंसानिरतो नित्यं जुह्वानो जातवेदसम्। स्वदारनिरतो दाता स वै ब्राह्मण उच्यते। श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा। असम्भिन्नार्यमर्यादः स वै ब्राह्मण उच्यते। आशिषोऽर्थार्थ-पूजाभ्यां प्रसङ्गान्न करोति यः। निवृत्तो लोभ-मोहाभ्यां तं देवा ब्राह्मणं विदुः"। 'आशिषः' आशीर्वादान्,-'अर्थार्थं' धनलाभाय। प्रसङ्गः अत्यासक्तिः। "सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा। दृश्यन्ते यत्र नागेन्द्र सर्वे ब्राह्मण उच्यते"। यमशातातपौ "तपोधर्मो दया दानं सत्यं शौचं श्रुतं घृणा। विद्याविज्ञानमास्तिक्य-मेतद्ब्राह्मणलक्षणम्"। बौधायनः "विद्या तपश्च योनिश्च एतद्ब्राह्मणलक्षणम्। विद्यातपोभ्यां योहीनो जातिब्राह्मण एव सः"। वशिष्ठः "ये शान्तदान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः"। यमः "विद्यावन्तश्च ये विप्राः सुव्रताश्च तपस्विनः। सत्य-संयम-संयुक्ता ध्यान-युक्ता जितेन्द्रियाः। पुनन्ति दर्शनं प्राप्ताः सिद्धं इवः संगतिं गताः। तेषां दत्त्वा च संभोज्य [illegible] परमां गतिम्। दत्त्वा हिरण्यं गुहाय दाता याति सुखां गतिम्। विद्यातपःशीलवंश्च स च तारयते परः"। कूर्मपुराणे "स्वाध्यायवन्तो ये विप्रा विद्यावन्तो जितेन्द्रियाः। सत्यसंयमयुक्ताश्च तेभ्यो दद्यात् द्विजोत्तमाः!। श्रोत्रियाय कुलीनाय विनीताय [illegible]। व्रतस्थाय दरिद्राय प्रदेयं शक्तिपूर्वकम्"। संवर्तः "श्रोत्रियाय दरिद्राय अर्थिने च विशेषतः। यद्दानं दीयते तत्तु तद्दानं शुभकारकम्"। श्रोत्रियस्तु, यमेनोक्तः "ओंकारपूर्विकास्तिस्रः सावित्रीर्यश्च विन्दति। चरितब्रह्मचर्यश्च स वै श्रोत्रिय उच्यते" ओंकारपूर्विका महाव्याहृतीरिति शेषः"। याज्ञवल्क्यः "सर्वस्य प्रभवो विप्रा श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः"। पद्मपुराणे "यथाहि सर्वदेवानां ज्येष्ठः श्रेष्ठः पितामहः। तथा ज्ञानी सदा पूज्यो निर्ममोनिष्परिग्रहः"। मत्स्यपुराणे "शीलं संवासतो ज्ञेयं शौचं संव्यवहारतः। प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं परीक्ष्यते"। भविष्यपुराणे "शान्ति-स्पृहा-दया-सत्य-दानं शीलं तपः श्रुतम्। एतद्दाङ्गसंहितं परमं पात्रलक्षणम्"। वशिष्ठः "स्वाध्यायाढ्यं योनिमन्तं प्रशान्तं वैतानस्थं पापभीरुं बहुज्ञम्। स्त्रीषु शान्तं धार्मिकं गोशरण्यं व्रतैः शान्तं तादृशं पात्रमाहुः"। योनिमान् प्रशस्तकुलोद्भवः। वैतानस्थः अग्निहोत्रादिकर्मपरः। स्त्रीषु शान्तः स्त्रीविषये शान्तः। गोशरण्यः गोशुश्रूषारतः"। यमः "विद्यायुक्तो धर्मशीलः प्रशान्तः शान्तोदान्तः सत्यवादी कृतज्ञः। दृष्टिग्लानो गोहितो गोशरण्यो दाता यस्तं ब्राह्मणः पात्रमाहुः! स्वाध्यायवान् नियमवांस्तपस्वी ध्यानवित्तु यः। शान्तो दान्तः सत्यवादी विप्रः पात्रमिहोच्यते" महाभारते "साङ्गांस्तु चतुरो वेदान् योऽधीते वै द्विजर्षभः। षडङ्गोऽनिवृत्तः कर्मभ्यस्तं पात्रमृषयोविदुः"। 'पात्रं' पात्रतममित्यर्थः। वशिष्ठः "किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्। पात्राणामपि तत् पात्रं गूढाग्नं यस्य नोदरे"। बृहस्पतिः "किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्। आगमिष्यति यत् पात्रं तत्पात्रं तारयिष्यति। ब्रह्मचारी भवेत्पात्रं पात्रं वेदस्य पारगः। पात्राणामुत्तमं पात्रं गूढाग्नं यस्य नोदरे"। व्यासः "किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्। अस्त्रीर्थं च यत्पात्रं तत्पात्रं तारयिष्यति"। अस्त्रीर्थं योन्यादिस्त्रीरहितम्। याज्ञवल्क्यः "न विद्यया केवलया तपसा वापि पात्रता। यत्र ह्येतदुभे चोभे तद्धि पात्रं प्रकीर्तितम्"। देवलः "पात्रं ब्राह्मणश्चैव श्रोत्रियश्च ततः परः। अनूचानस्तथा भ्रूण-ऋषिकल्प ऋषिर्मुनिः। इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं स्मृतौ। तेषां परः परः श्रेष्ठो विद्यावृत्तविशेषतः। ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्। अनुपेतः क्रियाहीनो भ्रूण इत्यभिधीयते"। अनुपेतः उपनयनरहितः। "एकदेशमतिक्रम्य वेदस्याचारवान्मुनिः। स ब्राह्मण इति प्रोक्तो निभृतः सत्यवागृषी"। एकदेशातिक्रमः वेदस्य किञ्चिन्न्यूनस्याध्ययनम्। निभृतः

शान्तः। "एवां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्। वेद-वेदाङ्ग-तत्त्वज्ञः शुद्धात्मा पापवर्जितः। शेषं श्रोत्रियवत् प्राप्तः सोऽनूचान इति स्मृतः। अनूचानगुणोपेतो यस्तु स्वाध्यायसन्नितः। भ्रूणहत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः। वैदिकं लौकिकञ्चैव सर्वं ज्ञानमवाप्य यः। आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः"। लौकिकम् अर्थार्जनादिज्ञानम्। "ऊर्ध्वरेतास्तपस्युग्रे नियताशी न संशयी। शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः। निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः। ध्यानस्थो निष्क्रियो दान्तस्तुल्यमृत्काञ्चनो मुनिः। निवृत्तः निषिद्धकाम्यकर्मभ्यः। निष्क्रियः अर्थार्जनादिक्रियारहितः। "एवमन्वयविद्याभ्यां दृष्टेन च सुसंस्कृताः। त्रिशुक्रा नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु"। सवनादिषु यज्ञादिषु। "प्रतिग्रहसमर्थोऽपि हत्वा विप्रो यथाविधि। निस्तारयति दातारमात्मानञ्च स्वतेजसा। समर्थोऽपि, समर्थएवेत्यर्थः। "न लोके ब्राह्मणेभ्योऽन्यत् पवित्रं पुण्यमेव वा। अन्नन्यच्च द्विजेन्द्राणां नास्ति दत्तवतामिति। योक्तव्यो हव्यकव्येषु त्रिशुक्रो ब्राह्मणो द्विजैः। अभिभूतश्च पूर्वोक्तैर्दोषैः स्पृष्टश्च नेष्यते"। अभिभूतः अपकृष्टः। पूर्वोक्तैः कुलविद्याचारैः। दोषैः उपपातकादिभिः। मनुः "पात्रस्य हि विशेषेण श्रद्धानस्यैव च। अल्पं वा बहु वा प्रेत्य दानस्य प्राप्यते फलम्"। दक्षः "समं द्विगुणमाहस्रमनन्तञ्च यथाक्रमम्। दाने फलविशेषः स्याद्विधायामेवमेव हि। शतमब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे। सहस्रगुणमाचार्ये अनन्तं वेदपारगे"। 'अब्राह्मणः, राजभृतादिः। यदाह शातातपः। "अब्राह्मणास्तु षट्प्रोक्ता ऋषिः शातातपोऽब्रवीत्। आद्योराजभृतस्तेषां द्वितीयः क्रयविक्रयी। तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः"। बहवो याज्या यस्य स बहुयाज्यः। "पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य वा"। ग्रामस्य नगरस्य भृत इत्यन्वयः। "अनागतान्तु यः पूर्वां सादित्याञ्चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः"। 'ब्राह्मणव्रुवस्तु, परस्तादपात्रेषु व्याख्यास्यते"। आचार्यस्तु महाभारते "अध्यापयेत्तु यः शिष्यं स्तोपनयनं द्विजः। सरहस्यञ्च सकलं वेदं भरतसत्तम!। तमाहुर्वै महाप्राज्ञ! प्रवदन्ति मनीषिणः। एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति इत्यर्थस्तमाचार्यः स उच्यते। विवाहादीनि कर्माणि यः करोति नृपोत्तम!। सम्भावयति चान्नेन स विप्रो गुरुरुच्यते। आग्न्याधेयं पाकयज्ञा नग्निष्टोमादिकं तथा। यः करोति इतो मूर्खं स तु स्याद्ऋत्विजो द्विजः"। यमः "समम्ब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे। प्राधीते शतसाहस्रमनन्तं वेदपारगे। 'प्राधीतः, पारङ्गाध्ययनः। "उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्याञ्च स भवेद्वेदपारगः"। दक्षस्मृतिः "शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतम्। क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतम्। श्रोत्रिये चैव साहस्रमाचार्ये द्विगुणं ततः। आत्मज्ञे शतसाहस्रमनन्तं त्वग्निहोत्रिणि"। विष्णुधर्मोत्तरे "असानुषे समं दानं गोषु चैव कलं तथा। द्विगुणञ्च तदेवोक्तं तथा सौवर्णशङ्करे। शूद्रे चतुर्गुणं प्रोक्तं विशि चाष्टगुणं भवेत्। क्षत्रिये षोडशगुणं ब्राह्मणे तदेव तु! दानि यद्दत्तं स्मृतं दानं वेदाध्ययनतत्परे। शतघ्नं तद्विनिर्दिष्टं प्राधीते लक्षसम्मितम्। अनन्तञ्च तदेवोक्तं ब्राह्मणे वेदपारगे"। एतेषु, केषाञ्चिदब्राह्मणब्राह्मणव्रुवादीनामपात्राणामपि पात्रत्वनिरूपणं मन्त्रवद्भवादिदानव्यतिरिक्तदानविषयम्। "मन्त्रपूर्वञ्च यद्दानमपात्राय प्रदीयते। दातुर्निष्फलं दत्तं तद्भोक्तुर्जिह्वां निकृन्तति"शातातपवचनात्। "उपदेशन्ति दातारं गौरन्नः काञ्चनं क्षितिः। अश्रोत्रियस्य विप्रस्य दत्तं दत्त्वा निराकृतेरिति" वशिष्ठवचनाच्च मन्त्रपूर्वं गवादिदानानामपात्रप्रतिपादननिषेधात्। शूद्रादीनान्तु पात्रत्वनिरूपणम् अन्नदानविषयम्। "क्षत्राज्जितरेभ्यः" इतिगौतमवचनात् "अन्नं सर्वत्र दातव्यमिति" वक्ष्यमाणत्वाच्च। दक्षः "व्यसनापदर्थञ्च कुलुम्बार्थञ्च याचते। एवमन्विष्य दातव्यं सर्वदानेष्वयं विधिः"। व्यसनं, राजचौराद्युपद्रवः। 'आपत् दुर्भिक्षादिपीडा। 'आद्योऽर्थशब्दो, निवृत्तिवचनः। मनुः "सान्तानिकं यक्ष्यमाणमध्वगं सार्ववेदसम्। गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः। नवैतान् स्नातकान् विद्याद्ब्राह्मणान् धर्मभिक्षुकान्। 'सान्तानिकः, सन्तानप्रयोजनविवाहार्थीत्यर्थः। 'अध्वगः' अत्र धर्मार्थं प्रचलितः। सार्ववेदसः सर्वस्वदक्षिणयज्ञकृत्। 'उपतापी, व्याधिपीडितः "निःस्वेभ्योदेयमेतेभ्यो दानं

विद्याविशेषतः। एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम्। इतरेभ्यो बहिर्वेदि कृतान्नन्तु प्रदीयते"। विद्याविशेषत इति अल्पविद्याय अल्पं बहुविद्याय बह्वित्यर्थः। बोधायनः सुब्राह्मण-श्रोत्रिय-वेदपारगेभ्यो गुर्वर्थ-निर्वेशौषधार्थ-वृत्तिक्षीण-यज्ञमाणाध्ययनाध्वसंयोग वैश्वजितेषु द्रव्यविभागो यथार्हन्तु कार्यो बहिर्वेदि भिक्षमाणेषु कृतान्नमितरेषु"। निर्वेशः, विवाहः। वैश्वजितः, सर्वस्वदक्षिणया कृतविश्वजिद्यागः। बहिर्वेदिग्रहणादेतेभ्यो बहिर्वेद्यपि धनमवश्यं देयम्। अन्येभ्यस्तु अन्तर्वेद्येव धनदाननियमः। बहिर्वेदि तु कृतान्नस्यैव। आपस्तम्बः "भिक्षमाणो निमित्त-माचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षितस्य निवपादिलोपः। तत्र, गुणान् समीक्ष्य यथा देयं, इन्द्रिय-प्रीतर्थं च भिक्षमाणमनिमित्तं न तथाहियेत"। 'बुभूर्षा भरणेच्छा। अर्हतश्च नियमादिलोप इति, अधिकारिणश्चावश्यककर्मविधिलोपप्रसङ्गः। यमः "वेदेष्वनसमद्वेषु हुतं विप्रमुखाग्निषु। सन्तारयति दातारं महतः किल्बिषादपि"। पद्मपुराणे "एकं वेदान्तगं विप्रं भोजयेत् श्रद्धयान्वितः। तस्य भुक्त्वा स वै कोटिविप्राणां नात्र संशयः"। शातातपः "वेदपूर्णमुखं विप्रं सुभुक्तमपि भोजयेत्। न तु मूर्खं निराहारं षड्रात्रमुपवासिनम्"। व्यासः "यत् सिक्थं वेदविद्भुङ्क्ते षट्कर्मनिरतः शुचिः। दातुः फलमसंख्येयं जन्म जन्म तदक्षयम्। वेदविद्याव्रतस्नाते श्रोत्रिये गृहमागते। क्रीडन्त्यौषधयः सर्वा वाग्यागः परमा गतिम्"। 'औषधयः, अन्नानि। महाभारते "तद्भक्तास्तद्भनाराजंस्तद्गृहास्तद्वपाश्रयाः। अर्थिनश्च भवन्त्यर्थे तेषु दत्तं महाफलम्"। अत्र तच्छब्देन पूर्वोक्ताः पितरो देवताश्च परामृश्यन्ते। अथवा तदेव दीयमानं भक्तमदनीयं येषां ते तथा एवं तद्भगादिशब्दा अपि। "तस्करेभ्यः परेभ्यो वा ये भयार्त्ता युधिष्ठिर!। अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम्। कृतज्ञा कृतदारांश्च ये विप्रा देशसंज्ञके। अर्थार्थमभिगच्छन्ति तेषु दत्तं महाफलम्। चारित्रनियता राजन्! ये क्षयाः क्षयहेतवः। अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम्। व्युत्क्रान्ताः स्वधर्मेषु पाखण्डसमवेषु च। क्षयप्राप्ताः क्षयाहारास्तेषु दत्तं महाफलम्। तपस्विनस्तपोनिष्ठास्तथा भैक्ष्यचराश्च ये! अर्थिनः किञ्चिदिच्छन्ति तेषां दत्तं महाफलम्"। आदित्यपुराणम् "अक्रोधना धर्मपराः शान्ता दमदमे रताः। तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम्। कृतसर्वस्वहरणानिर्दोषाः प्रमविष्णुभिः। स्पृहयन्ति सुभक्तानां तेषु दत्तं महाफलम्"। शातातपपराशरौ "सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने च दहत्यासप्तमं कुलम्"। भविष्यपुराणे यस्त्वासप्तमतिक्रम्य ब्राह्मणं पतिताहते। दूरस्थं भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत्। तस्मान्नातिक्रमेत् प्राज्ञो ब्राह्मणान् प्रातिवेशिकान्"। प्रातिवेशिकान् अगृहादूरवर्त्तिगृहान्। "सम्बन्धिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा। भागिनेयं विशेषेण तथा बन्धून् धराधिप!। नातिक्रमेन्नरस्तेतान् सुमूर्खानपि गोपते!। अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत्"। विट्पतिः कामाता। सुमूर्खानपि नातिक्रमेदित्येतत्, अन्नदानविषयम्। हिरण्यादिदाने तु, सन्निहितमूर्खव्यतिक्रमे दोषाभावात् तदुक्तं व्याघ्रपादबोधायनशातातपपराशरैः "यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः। बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः। ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते। ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते"। महाभारते "यदि स्यादधिको विप्रो दूरे क्षत्रादिभिर्युतः। तस्मै यत्नेन दातव्यमतिक्रम्यापि सन्निधिम्"। विष्णुः "पुरोहितस्त्वात्मन एव पात्रं स्वबुद्धिपुत्रजामातरश्चेति"। 'यस्यैते पुरोहितादयः, तस्यैव ते अन्यगुणरहिता अपि पुरोहितादित्वेनैव पात्राणि। व्यासः "मातापितृषु यद्दत्तं भ्रातृषु स्वसृतासु च। जायापत्योस्तु यद्दत्तं सोऽनिन्द्यः स्वस्तिसंक्रमः। पितुः शतगुणं दानं सहस्रं मातरश्चत। अनन्तं दुहितृदानं सोदर्ये दत्तमक्षयम्"। विष्णुधर्मोत्तरम् "आत्मनस्तु भवेत् पात्रं नान्यस्य स्यात् पुरोहितः। पुरोहिते तु स्वे दत्तं दानमक्षयमुच्यते। उपाध्यायर्त्विजोश्चैव गुरावपि च मानवैः। वर्णापेक्षा न कर्त्तव्या मातरं पितरं प्रति"। उपाध्यायादयस्तु, पूर्वमेव व्याख्याताः तथा। "मातृष्वसा स्वसा चैव तथैव च पितृष्वसा,। मातामही भागिनेयी भागिनेयस्तथैव च। दौहित्रो विट्पतिश्चैव तेषु दत्तन्तु अक्षयम्। श्रीभट्टे यत्तथा दत्तं तदप्यक्षयमुच्यते। मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता। अदत्त-

दानाजायन्ते परभाग्योपजीविनः"। उपकारिणि परोपकारपरे। विशिष्टाः गुणातिशयशालिनः। ब्रह्मपुराणे "यत् कन्यासु पिता कुर्य्याद्दानं पूजनमर्च्चनम्। यत्कृतं सुकृतं विद्यात्तासु दत्तं तदक्षयम्। यद्दत्तं तासु कन्यासु तद्दानं पुण्यमेव च"। कालिकापुराणम् "यद्दत्तं वेदविद्विप्रे यद्दत्तं ब्रह्मचारिणि। त्रयोनिषेषु यद्दत्तं कारुण्येन च यत् सदा। तत् सर्वमक्षयं दानं वै मानेन विधाय यत्"। विष्णुधर्म्मोत्तरे "अन्नदाने न कर्त्तव्यं पात्रापेक्षणमण्वपि। अन्नं सर्वत्र दातव्यं धर्मकामेण वै द्विज!। सदोषेऽपि तु निर्दोषं सगुणेऽपि गुणावहम्। तस्मात् सर्वप्रयत्नेन देयमन्नं सदैव तु। विद्याध्ययनसक्तानामन्नदानं महाफलम्"। तथा "दत्त्वा नृपतिभीतानामृषिणाञ्च तथा धनम्। तस्करेभ्यश्च भीतानां फलमक्षयमुच्यते। यियज्ञतां तथा दत्तं व्यसनं तर्त्तुमिच्छताम्। दुःखान्वितानां दीनानामक्षयं परिकीर्त्तितम्। विवाहमेखलाबन्धप्रतिष्ठादिषु कर्मसु। व्यापन्नेषु तु यद्दत्तमक्षयं तदुदाहृतम्"। संवर्त्तः "दानान्येतानि देयानि तथान्यानि च सर्वशः। दीनान्धकृपणार्थिभ्यः श्रेयःकामेण धीमता"। पद्मपुराणे "दीनान्धकृपणानाथवाग्विहीनेषु यत्तथा। विकलेषु तथान्येषु जडवामनपङ्गुषु। रोगार्त्तेषु च यद्दत्तं तत्स्याद्बहुफलं धनम्"। अत्र अपात्रनिरूपणम्। तत्र मनुः "घोरश्चकान् वाणिजकांस्तथा कारुकशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्। ये व्यपेताः स्वकर्मभ्यः परपिण्डोपजीविनः। द्विजत्वमभिकाङ्क्षन्ति तांश्च शूद्रवदाचरेत्। नान्टगब्राह्मणो भवति न वणिग्न कुशीलवः। न शूद्रप्रेषणं कुर्य्यात् स्तेनो न चिकित्सकः। अव्रता ह्यनधीयाना यत्र भैक्ष्यचरा द्विजाः। तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः"। वसिष्ठः "उदक्योऽन्वासते येषां ये च केचिदनग्नयः। कुलं वाऽस्त्रोत्रियं येषां सर्वे ते शूद्रधर्मिणः"। अन्वासते कर्मकाले समीप एव तिष्ठन्ति। विष्णुः "न दानं यशसे दद्यान्न भयान्नोपकारिणि। न स्तवगीतशीलेभ्यो धर्मार्थमिति निश्चयः"। उपकारिणि आत्मोपकारपरे प्रत्युपकारसमीहयेत्यर्थः। महाभारते "यस्तु प्रेष्यान् द्विजान् मूढो योजयेद्वाहनकर्म्मणोः। न भवेत्तत्फलं तस्य वैदिकीयं तथा श्रुतिः"। यमः "अव्रतानामसन्ध्यानां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम्। अपविद्धाग्निहोत्रस्य गुरोर्विप्रियकारिणः। द्रविणं नैव दातव्यं सततं पापकर्मणः। न प्रतिग्रहमर्हन्ति दुष्टाध्यापका द्विजाः। शूद्रस्याध्यापनाद्विप्रः पतत्यत्र न संशयः"। तथा "राजधानी यथा शून्या यथा कूपस्य निर्जलः। यथा हुतमनग्नौ च तथा दत्तं द्विजेऽनृचे"। वसिष्ठः "यथा काष्ठमयो हस्ती यथा चर्म्मयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः। विद्वद्भोज्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते। व्यपनाशदिभिक्षन्ति महद्भा जायते भयम्"। व्यासगतातपौ "नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते। रौद्रित्वन्तं दीयमानं किं मया दुष्कृतं कृतम्। शौचहीनास्तु ये विप्रा न च यज्ञोपवीतिनः। हुतं दत्तं तपस्तेषां नश्यत्यत्र न संशयः। ऊषरे वापितं बीजं यच्च भस्मनि हूयते। क्रियाहीनेषु यद्दत्तं त्रिषु वाशोविधीयते। प्रस्तरे पतितं बीजं भिन्नभाण्डे च दोहनम्। भस्मन्यपि हुतं द्रव्यं तद्दुदानमसाधुषु"। पूर्वत्र पात्रगुणकथने कृतेऽपि पुनर्दोषवचनमेवंविधदोषभाग्जनप्रतिषेधार्थम्। मनुः "पात्रभूतो हि यो विप्रः प्रतिगृह्य प्रतिग्रहम्। असत्सु विनियुञ्जीत तस्य देयं न किञ्चन। सञ्चयं कुरुते यश्च प्रतिगृह्य समन्ततः। धर्मार्थं नोपयुङ्क्ते यो न तं तस्करमर्चयेत्"। असत्सु, निषिद्धेषु द्यूतादिषु। दक्षः "विधिहीने तथा पात्रे यो ददाति प्रतिग्रहम्। न केवलं हि तद्याति श्रेयमस्य नश्यति"। मनुः "अनर्हते यद्ददाति न ददाति यदर्हते। अर्हानर्हापरिज्ञानाद्दानाद्धर्मो हीयते"। यमः "यस्तु लिङ्गं चितां वृत्तिमलिङ्गिभ्यः प्रयच्छति। घोरायां ब्रह्महत्यायां पच्यते नात्र संशयः"। भविष्यपुराणे "नाब्रह्मणाय दातव्यं न देयं ब्राह्मणाक्रिये। न ब्राह्मणब्रुवे चैव न च दुर्ब्राह्मणे धनम्"। व्यासः "ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च भवेद्ब्राह्मणः स तु। गर्भाधानादिभिर्युक्तस्तथोपनयनेन च। न कर्मविद्यचाधीते स भवेद्ब्राह्मणाक्रियः"। वराहपुराणे "अव्रतो वैश्यराजन्यौ शूद्रवाब्राह्मणास्त्रयः। वेदव्रतविहीनश्च ब्राह्मणो ब्राह्मणध्रुवः"। यमः "यस्य वेदश्च वेदी च विच्छिद्येते त्रिपौरुषम्। स वै दुर्ब्राह्मणो नाम यश्चैव दुष्टसीपतिः"। कूर्मपुराणे "न वार्य्यपि प्रयच्छेत नास्तिके हैतुकेऽपि वा। न पाषण्डिषु सर्वेषु नावेदविदि धर्म्मविषु।

नास्तिकः, परलोकवासनाशून्यः। हैतुकः हेतुभिः परलोकं निराकरिष्णुः। मनुर्विष्णुश्च "न वार्य्यपि प्रयच्छेत वैडालव्रतिके द्विजे। न बकव्रतिके पापे नावेदविदि धर्म्मवित्। त्रिष्वप्येतेषु दत्तं हि विधिनोपार्जितं धनम्। दातुर्भवत्यनर्थाय परत्रादातुरेव च"। अनर्थः प्रत्यवायः। "यथा ह्यप्लवेनौपलेन निमज्जत्युदके तरन्। दातृप्रतिग्रहीतारौ तथैवावीचौ निमज्जतः"। यमः "यः कारणं पुरस्कृत्य व्रतचर्यां निषेवते। पापं व्रतेन प्रच्छाद्य वैडालं नाम तद्व्रतम्। अर्थञ्च विपुलं गृह्य दत्त्वा लिङ्गं विवर्जयेत्। आश्रमान्तरितं रक्षेदुत्तैडालं नाम तद्व्रतम्। यतीनामाश्रमं गत्वा प्रत्यवस्येत्तु यः पुनः। यतिधर्मविलोपेन वैडालं नाम तद्व्रतम्"। विष्णुः "धर्म्मध्वजी सदा लुब्धः शूद्रिको लोकदम्भकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः। यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्। अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः। ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः। ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा"। चतुर्विंशतिमतम् "रोदित्यस्य दीयमानं किं मया दुष्कृतं कृतम्। अश्रोत्रियस्य विप्रस्य हस्तं दृष्ट्वा निराकृतेः"। कात्यायनस्त्वन्यथाह "यः स्वाध्यायाग्निमालस्याद्देवादीन्नैमित्तिरिष्टवान्। निराकर्त्ता भिक्षादीनां स विज्ञेयो निराकृतिरिति"। शातातपः "नेष्टं देवलके दत्तमप्रतिष्ठञ्च यार्द्धुषौ। यच्च वाणिजके दत्तं न च तत् प्रेत्य नो इह" दक्षः "पूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे। चाटचारणचौरेभ्यो दत्तं भवति निष्फलम्"। स्कन्दपुराणे "देवपितृविहीने यदीश्वरेभ्यश्च दीयते। दत्त्वा तु कीर्त्तितं यच्च देवाग्नित्यागिने तथा। अन्यायोपार्जितधनैर्दत्तमब्राह्मणे च यत्। गुरवेऽन्दतवक्त्रे च स्त्रीनाथ पतिताय च। कृतघ्नाय च यद्दत्तं सर्वदा ब्रह्मविद्विषे। याजकाय च सर्वस्य दुष्टस्त्रीः पतये तथा। परिचाराय भृत्याय सर्वस्य पिशुनाय च। इत्येतानि च राजेन्द्र! दुष्टादानानि षोडश। गर्भस्थोऽज्ञानबालोऽपि भुङ्क्ते दुष्टो न यौवने। तद्दत्तस्येह नाप्नोति सर्वथा रिपुसूदन"। तदीयफलमिति शेषः। विष्णुधर्मात् "परस्थाने तथा दानं सदोषं परिकीर्त्तितम्। आरूढपतिते चैव अन्यायात्तैर्द्धनैश्च यत्। व्यर्थं हि ब्राह्मणे दानं पतिते तस्करे तथा। गुरोश्चाप्रीतिजनके कृतघ्ने ग्रामयाजके। वेदविक्रायके चैव यस्य चोपपतिर्गृहे। स्त्रीभिर्जितेषु यद्दत्तं व्याजग्राहे तथैव च। ब्रह्मबन्धौ च यद्दत्तं यद्दत्तं दुष्टयोषितौ। परिचारके च यद्दत्तं तथा दानानि षोडश" महाभारते "पङ्गुन्धबधिरा मूका व्याधितोपहताश्च ये। भर्त्तव्यास्ते महाराज! न तु देयः प्रतिग्रहः" इति प्रतिग्रहीतृनिरूपणम्।

अथ द्रव्याख्यं दानाङ्गमुच्यते। तत्र देयनिरूपणम्। भविष्यपुराणे "यद्यदिष्टं विशिष्टञ्च न्यायप्राप्तञ्च यद्भवेत्। तत्तद्गुणवते देयमित्येतद्दानलक्षणम्"। वह्निपुराणे "शुभोपात्तेन यत्किञ्चित् करोति लघुना नरः। अनन्तं फलमाप्नोति सुकृतोऽपि यथा पुरा"। शुभोपात्तेन न्यायोपार्जितेन। लघुना स्वल्पेन द्रव्येणेति शेषः। देवीपुराणे "न्यायतो यानि प्राप्तानि शाकान्यपि नृपोत्तम!। तानि देयानि देव्यास्तु कन्यकायोषितां सदा। तद्भुक्तेषु च वित्तेषु अपरेषु च नित्यशः" विष्णुपुराणे "यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता"। महाभारते "विशेषतो महाराज! तस्य न्यायार्जितस्य च। श्रद्धया विधिवत् पात्रे दत्तस्यान्तो न विद्यते"। गौतमः "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति"। 'अप्रतिबन्धः' दायएव ऋक्थम्। संविभागः सप्रतिबन्धोदायः। परिग्रहः, जलतृणकाष्ठादेरनन्वयपूर्वस्य स्वीकारः। अधिगमः निध्यादेः प्राप्तिः। एषु निमित्तेषु स्वामी भवति। अधिकम् असाधारणम्। निर्विष्टम् कृषिप्रादिना द्विजशुश्रूषादिना च यल्लब्धम्। "निर्वेशो भृतिभोगयोरिति" स्मरणात्। मनुः "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च"। प्रयोगः न्यायोपचयार्थं द्रव्यप्रयोगः। कर्म्मयोगः आर्त्विज्यम्। नारदः "धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः। रक्षणं वर्द्धनं भोग इति तस्य विधिः क्रमात्। तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च। कृष्णञ्च, तस्य विज्ञेयो विभागः सप्तधा पुनः। एकैकस्य शुक्लादेः सप्त सप्त भेदा भवन्तीत्यर्थः। "श्रुतशौर्य्यतपःकन्यायाज्यशिष्यप्राप्त्यागतम् धनं सप्तविधं शुक्लमुदयोऽप्यस्य तद्विधः"। आगतशब्दः श्रुतादिभिः प्रत्येकं संबध्यते। कन्यागतम् आर्षविवाहे

वराङ्गीकृतं गोमिथुनादि। याच्ञागतम् आर्त्विज्यादिलब्धम्। शिष्यागतम्। गुरुदक्षिणादि। अत्र च यथाधिकारं शुक्लत्वमवधेयम्। उदयः फलं तदस्य शुक्लमित्यर्थः "कुशीदलब्धिर्वाणिज्यशिल्पशुल्कानुवृत्तितः। सतोपकारादाप्तञ्च शबलं समुदाहृतम्"। न्यायोपचयार्थं द्रव्यप्रयोगः कुशीदम्। शिल्पं कारुकादिकर्म। व्याकरादिभ्योद्रव्योदयः शुल्कम्। अनुवृत्तिः सेवा। "पार्श्वकद्यूतचौर्यार्त्तिप्रतिरूपकसाहसैः।" व्याजेनोपार्जितं यत्तत् सर्वेषां कृष्णमुच्यते"। पार्श्वकोपार्जितं उत्कोचादिलब्धम्। आर्त्युपार्जितं परपीडया लब्धम्। प्रतिरूपकं मणिसुवर्णादेः प्रतिरूपकरणम्। साहसं स्वप्राणात्ययाङ्गीकारेण परस्वतोहरत्वादिकम्। व्याजः दम्भेन तपः प्रभृति। "तेन क्रयो विक्रयश्च दानं ग्रहणमेव च। विविधाश्च प्रवर्त्तन्ते क्रियाः सम्भोग एव च। यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च"। यथाविधेन शुक्लेन कृष्णेन शबलेन वा दानादि कुरुते तथाविधं फलमाप्नोतीति, शुक्लेन सुखं दुःखरहितम्, शबलेन, मिश्रम्, कृष्णेन असुखोदयम्। पद्मपुराणे "शुक्लेन वित्तेन कृतं पुण्यं बहुफलं भवेत्। शबलं मध्यमफलं कृष्णं हीनधनं फलम्"। ब्रह्मप्रोक्ते "शुक्लवित्तेन यो धर्मं प्रकुर्यात् श्रद्धयान्वितः। तीर्थं पात्रं समासाद्य देवत्वं तत् समश्नुते। राजसेन च भावेन वित्तेन शबलेन च। दद्याद्ब्राह्मणतिथिभ्योमानुषत्वे तदश्नुते। तमोद्वत्तस्तु यो दद्यात् कृष्णवित्तेन मानवः। तिर्य्यक्त्वं तत्फलं प्रेत्य समश्नाति नराधमः"। नारदः "तत् पुनर्द्वादशविधं प्रतिवर्णाश्रयात् स्मृतम्। साधारणं स्यात्त्रिविधं शेषं नवविधं स्मृतम्"। धर्मप्रमिति शेषः। प्रतिवर्णाश्रयान्नवविधं, साधारणं त्रिविधमित्येवं द्वादशविधमित्यर्थः। "क्रमागतं प्रीतिदायः प्राप्तञ्च सह भार्य्यया। अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम्। वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम्। प्रतिग्रहेण संलब्धं याच्ञतः शिष्यतस्तथा। त्रिविधं क्षत्रियस्यापि प्राङ्वैशेषिकं धनम्। युद्धोपलब्धं कारात् दण्डाच्च व्यवहारतः"। कारः बल्यादिः। "वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम्। लब्धिगोरक्षवाणिज्यैः शूद्रस्यैश्वर्यानुग्रहात्"। एभ्यः ब्राह्मणादिभ्यः। "सर्वेषामेव वर्णानामेवं धर्म्योऽनागमः। विपर्य्यायादधर्मः स्यान्न चेदापद्गरीयसी"।

एवंधर्मसाधनं द्रव्यं निरूप्य तच्च कियद्देयं किं देयमित्यपेक्षायां याज्ञवल्क्यः "स्वं कुटुम्बाविरोधेन देयं दारसुताहते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्"। अन्वये सन्ताने। प्रतिश्रुतं प्रतिज्ञातम्। कुटुम्बाविरोधस्तु, व्याख्यातो बृहस्पतिना "कुटुम्बभरणवसनाद्देयं यदतिरिच्यते। भध्वास्वादो विषं पथ्याद्दातुर्धर्मोऽन्यथा भवेत्"। भक्तं अन्नम्। वसनं वस्त्रम्। (यावता द्रव्येण कुटुम्बस्य वस्त्रमन्नं संपद्यते तदतिरिक्तं देयं, इतरत्तु न देयमित्यर्थः)। मनुः "शक्तः परजने दाता स्वजने दुःखजीविनि। मध्वापानो विषास्वादः स धर्मप्रतिरूपकः"। कात्यायनः "सर्वस्वं बृहस्पतिर्वर्ज्यन्तु कुटुम्बभरणाधिकम्। यच्च द्रव्यं स्वकं देयमदेयं स्यादतोऽन्यथा"। तथा "सप्रराताद्गृहक्षेत्रात् यद्यत् क्षेत्रं प्रचीयते। पित्रा वाथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम्"। सप्रराताद्भ्यो यत्प्रचीयते, अधिकं भवति, तद्दातव्यमिति विवक्षितमित्यर्थः। शिवधर्म्मात् "तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत्। भागद्वयन्तु धर्म्मार्थमनित्यं जीवितं यतः"। अशेषवित्तस्य भागपञ्चकं परिकल्प्य भागत्रयं जीवनाय संरक्ष्य भागद्वयं धर्म्मार्थं कल्पयेदित्यर्थः। महाभारते "एकां गां दशगुर्दद्याद्दशदद्याच्च गोशती। शतं सहस्रगुर्दद्यात् सर्वे तुल्यफलाः स्मृताः"। नन्वेतद्वचनद्वयोपात्तयोर्वित्तगोशब्दयोरुपलक्षणार्थत्वेन देयमात्रपरत्वाद्विषमभागपरिकल्पनं विरुद्धं यथाश्रुतगोवित्तपरत्वेनाविरोधे दशगुरेकां गां दद्यादितिवचनाद्दुदशावरगोर्द्वितीयोऽपि गोदानानधिकारः स्यात् दशधेनुयोग्यधनिपरत्वे तु उपलक्षणपक्षाङ्गीकाराद्विरोधतादवस्थ्यं तस्माद्भूनाधिककल्पयोः स्वपत्नीदाराधिकारिविषयतयैव व्यवस्थेति सुस्थम्। कुटम्बाविरोधेन देयमित्युक्तम् तस्यापवादमाह व्यासः "कुटुम्बं पीडयित्वापि ब्राह्मणाय गृहात्मने। दातव्यं भिक्षवे चात्मनात्मनो भूतिमिच्छता"। यत्यतिथ्यादिविषयमेतत्। कात्यायनः "स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारेण बन्धकम्। वैवाहिककमायाते सर्वदानं न विद्यते"। बन्धक आधिः तद्बन्धाचारेणाधिरूपेणैव देयम्। यद्विवाहलब्धं तत्तस्यां भार्य्यायां सत्यां सर्वमदेयम्। यच्च पितामहादिक्रमायातं तत्र पुत्रे सति न देयम्। "सौदायिकं क्रमायातं शौर्य्यप्राप्तञ्च यद्भवेत्। स्त्रीप्राप्तिस्वामनुज्ञातं वृत्तं सिद्धिमवाप्नुयात्"। सौदायिकं

विवाहलब्धं तद्भार्य्ययानुज्ञातम्। क्रमायातम् अविभक्त-धनैर्ज्ञातिभिरनुज्ञातम्। भृत्येन सता युद्धेन लब्धं स्वामिनानुज्ञातमित्यर्थः। याज्ञवल्क्यः "देयं प्रतिश्रुतञ्चैव दत्त्वा नापहरेत् पुनः" यमः "यच्च वाचा प्रतिज्ञातं कर्म्मणा नोपपादितम्। तद्धनमृणसंयुक्तमिह लोके परत्र च" ऋणसंयुक्तम् ऋणासमर्पणजन्यदोषसंयुक्तमित्यर्थः। "सप्राजाताद्धरो हन्याद्दत्तमानांस्तु सप्त च। अतिक्रान्तान् सप्त हन्याद्प्रयच्छन् प्रतिश्रुतम्। प्रतिश्रुताप्रदानेन दत्तस्य हरणेन च। जन्मप्रभृति यत् पुण्यं तत्सर्वं सम्प्रणश्यति"। महाभारते "ब्राह्मणं स्वयमाहूय भिक्षार्थे कृतवर्त्तिनम्। पश्चान्नास्तीति यो ब्रूयात्तं विद्याद्ब्रह्मघातकम्" तथा "संश्रुत्य यो न दित्सेत याचित्वा यस्य नेष्यति। उभावन्धतिकावेतौ मृषा पापमवाप्नुतः" तथा "यो न दद्यात् प्रतिश्रुत्य स्वल्पं वा यदि वा बहु। आशास्तस्य हताः सर्वाः क्लीबस्येव प्रजाफलम्। यं निरीक्षेत संक्रुद्ध आशया पूर्वजातया। प्रदहेत हि तं राजन्। कङ्कमक्षयमुग्यथा। तस्माद्दातव्यमेवेह प्रतिश्रुत्य युधिष्ठिर!"। नारदः "ब्राह्मणस्य च यद्देयं सान्वयस्तु न चास्ति सः। सकुल्ये तद्धरेत्तदभावेऽस्य बन्धुषु। यदा तु न सकुल्यः स्यात्तच्च सम्बन्धि-बान्धवाः। दद्यात् सजातिशिष्येभ्यस्तदभावेऽप्सु निक्षिपेत्"। गौतमः "प्रतिश्रुत्याप्यधर्म्मसंयुक्ताय न दद्यात्"। कात्यायनः "प्राणसंशयमापन्नं यो मामुत्तारयेदितः। सर्वस्वन्ते प्रदास्यामीत्युक्तोऽपि न तथा भवेत्"

अथ फलातिशयप्रतिपादनार्थं पात्रविशेषेण देयविशेषाः। भविष्यपुराणे "गोभूतिलहिरण्यादि दद्यान्नित्यमतन्द्रितः। तथा द्रव्यविशेषांश्च दद्यात् पात्रविशेषतः। आर्त्तानामन्नदानञ्च गोदानञ्च कुटुम्बिनाम्। तथा प्रतिष्ठाहीनानां चेलदानं प्रशस्यते। सुवर्णं याज्ञिकानाञ्च विद्याञ्चैवोर्द्ध्वरेतसाम्। कन्याञ्चैवानपत्यानां ददतां गतिरुत्तमा"। विष्णुधर्म्मोत्तरात् "युद्धोपकरणं द्रव्यं क्षत्रिये द्विजपुङ्गवाः!। पण्योपयोगि तद्वैश्ये शूद्रे शिल्पोपयोगि च। यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत्। येन येन च भाण्डेन यस्य वृत्तिरुदाहृता। तत्तत्तस्यैव दातव्यं पुण्यकामेन धीमता। दण्डं कृष्णाजिनञ्चैव तथा विप्राः! कमण्डलुम्। धीरं पुण्यमवाप्नोति दत्त्वैतान् ब्रह्मचारिणे। वस्त्रं शय्यासनं धान्यं वेश्म वेश्मपरिच्छदम्। गृहस्थाय तु तद्दत्तं ज्ञेयं बहुफलं सदा। नीवारं दलकन्दं शाकं फलं मूलञ्च गोरसम्। वानप्रस्थाय यद्दत्तमनन्तं परिकीर्त्तितम्। भिक्षाप्रदानं यतये पात्रदानं तथा हितम्। गन्धमाल्यताम्बूलरत्नवस्त्रादिकं स्त्रियः। स्त्रीणां प्रदानं दातव्यं भर्त्तृहस्ते तु नान्यथा। प्रोक्तं संग्रहणं ह्येतद्भुवं भर्त्तुः प्रयच्छतः। अन्नं प्रतिश्रयञ्चैव पान्थे दत्तं महाफलम्। विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम्। यः प्रयच्छति धर्म्मज्ञः सोऽश्वमेधमवाप्नुयात्। आतुरेभ्यो धनं दत्त्वा दानं बहुफलं भवेत्। बाले क्रीडनकं दत्त्वा भृष्टमन्नं तथैव च। फलं मनोहरं वापि अग्निष्टोमफलं लभेत्। भृष्टान्नं मानवो दत्त्वा भृष्टान्नानि तु काङ्क्षताम्। अक्षयं फलमाप्नोति स्वर्गलोकञ्च गच्छति। व्रीहिहीने तथा दत्त्वा भोजनं द्विजसत्तम!। वस्त्रं शुभं वा धर्म्मज्ञः पुण्यं महदुपाश्नुते। कृपास्थानं परं विप्रा विच्युताः पुरुषाः श्रिया। तेभ्योऽनुकम्पा कर्त्तव्या सतां वर्त्मनि तिष्ठता। कार्य्ये सत्युद्यमं कृत्वा परेषां सत्पस्थिते। अक्षयं फलमाप्नोति नात्र कार्य्या विचारणा। यवसानां प्रदानेन धेनुमत्सु द्विजातिषु। लवणानाञ्च धर्म्मज्ञाः! फलमक्षयमश्नुते। प्रसवेषु तु यद्दत्तं व्यसनार्त्तिभयेषु च। तद्दानमक्षयं प्रोक्तं पुरुषस्य विपश्चितः। दत्त्वा ब्राह्मणशार्दूल! जलपात्रमथार्थिने। फलमक्षयमाप्नोति नात्र कार्य्या विचारणा"। अङ्गिराः "देवतानां गुरूणाञ्च मातापित्रोस्तथैव च। पुण्यं देयं प्रयत्नेन नापुण्यं नोदितं क्वचित्" नन्दिपुराणे "पापदः पापमाप्नोति नरो लक्षगुणं सदा। पुण्यदः पुण्यमाप्नोति शतशोऽथ सहस्रशः। तथा पात्रविशेषेण दानं स्यादुत्तरोत्तरम्। पितृमातृगुरुब्रह्मचारिणां दीयते तु यत्। तल्लक्षगुणितं विद्यात् पुण्यं वा पापमेव वा"। वह्निपुराणे "द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ। दाताक्षय च दुर्भिक्षे सुभिक्षे हेमवस्त्रदः"

अथ यद्देयनिरूपणम्। देवलः "अन्यायाधिगतां दत्त्वा सकलां पृथिवीमपि। अङ्गावर्जमपात्राय न काङ्क्षिङ्गुतिमाप्नुयात्"। वह्निपुराणात् "अन्यायोपागतं द्रव्यं गृहीत्वा यो ऽपण्डितः। धर्म्माभिकाङ्क्षी यजते न धर्म्मफलमश्नुते। धर्म्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा। ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्। यामेन कर्म्मणा विप्रो धनं लब्ध्वा निरंशकः। रागमोहान्वितस्वान्तः

कलुषां योनिमाप्नुयात्। अर्थसञ्चयबुद्धिर्हि लोभमोह वशगतः। उद्वेजयति भूतानि हिंसया पापचेतनः। एवं लब्ध्वा धनं लोभात् यजते यो ददाति च। स पापकर्मणा तेन न विन्दति परां गतिम्" तथा। "एतैरन्यैश्च बहुभिरन्यायोपार्जितैर्धनैः। आरभ्यन्ते क्रिया यास्तु पिशाचाशत दैवतम्"। हद्धशातातपः "द्रव्येणान्यायलब्धेन यः करोत्यौर्द्ध देहिकम्। न स तत्फलमाप्नोति तस्यार्थस्य दुरागमात्" स्कन्दपुराणे "देवद्रव्यं गुरुद्रव्यं द्रव्यं चण्डेश्वरस्य च। त्रिविधं पतनं दृष्टं दानलङ्घनभक्षणात्"। यमः "अपहृत्य परस्यार्थं दानं यस्तु प्रयच्छति। स दाता नरकं याति यस्यार्थस्य तत्फलम्" तथा। "परिभुक्तमवज्ञातमपर्याप्तमसंस्कृतम्। यः प्रयच्छति विप्रेभ्यस्तद्भक्तन्यवतिष्ठते। परिभुक्तं गृहीतोपयोगं वस्त्रादि। अपर्याप्तं स्वकार्याक्षमं जरद्गवादि। शातातपः "वेदविक्रयनिर्दिष्टं स्त्रीषु यच्चार्जितं धनम्। अदेयं पितृदेवेभ्यो यच्च क्लीवादुपागतम्" वेदविक्रयो निर्दिष्टो व्यपदिष्टो यत्र तत्तथा निर्दिष्टमितिपाठे वेदविक्रयाल्लब्धमित्यर्थः। स्त्रीषु यच्चार्जितमिति स्त्रीव्यापारोपजीवनेन यल्लब्धम्। स्त्रीषु विक्रीतासु केचित्" दक्षः "सामान्यं याचितं न्यास आधिर्दारास्तथैव तद्धनम्। अन्वाहितञ्च निक्षेपः सर्वस्वञ्चात्मये सति। आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः। यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः"। सामान्यं अनेकस्वामिकम्। याचितं संव्यवहारार्थं याचितानीतं वस्त्रालङ्कारादि। गृहस्वामिने अदर्शयित्वा तत्परोक्षमेव गृहस्वामिने अर्पणीयमिति गृहजनहस्ते स्थापितं द्रव्यं न्यासः। आधिः प्रसिद्धः। दाराः कलत्रम् तद्धनं दारधनम्। तच्च व्याख्यातं मनुना "अध्यग्न्यध्याववाहनिकं दत्तञ्च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्"। अध्यग्नि अग्निसमक्षं यत् स्त्रियै दत्तम्। अध्यावाहनिकं विवाहकाले पित्रादि दत्तम्। प्रीतिकर्मणि स्त्रीपुंसम्बन्धेन भर्त्रार्पितम्। विवाहोत्तरकालेऽपि भ्रात्रादिभ्यः प्राप्तम्। याज्ञवल्क्योऽप्याह "भ्रातृमातृपितृपतिप्राप्तमध्यग्न्युपागतम्। आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्" दारान्तरमिच्छता भर्त्रा यद्दत्तं तदाधिवेदनिकम्। एवंप्रकारं स्त्रीधनं न देयमिति। अन्वाहितं यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यस्य हस्ते स्वामिने देहीति निहितम्। गृहस्वामिसमक्षं स्थापितं द्रव्यं निक्षेपः। कात्यायनः "विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्च सर्वस्वमात्मनैव तु योजयेत्। आपत्काले तु कर्तव्यं दानं विक्रय एव वा। अन्यथा न प्रवर्त्तन्ते इति शास्त्रस्य निश्चयः"। "आपत्काले तु कर्त्तव्यं दानं विक्रय एव वेति" स्वकीयदानविक्रयेच्छुदारादिविषयम्। यत्तु दाराणाम् "आपत्स्वपि न देयानीति" दक्षेणादेयत्वमुक्तं तत् स्वदानविक्रयानिच्छुदारादिविषयम्। वशिष्ठः "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषां न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः"। बृहस्पतिः "कस्मैचिद्याचमानाय दत्तं धर्माय यद्भवेत्। पश्चाच्च न तथा तत् स्यान्न देयं तस्य तद्भवेत्"। धर्मं कर्त्तुं याचमानाय यद्दत्तं तेन चेदसौ धर्मं न कुर्य्यात्तदा तत्तस्मै न देयमित्यर्थः। अङ्गिराः "बहुभ्यो न प्रदेयानि गौर्भूहं शयनं स्त्रियः। विभक्तदक्षिणाश्चैता दातारं तारयन्ति हि। एका एकस्य दातव्या न बहुभ्यः कथञ्चन। दातुर्विक्रयमापन्नां दहत्यासप्तमं कुलम्"। विक्रेतुरेवैतद्दोषप्रदर्शनं न प्रकृतस्य दातुरिति। औपकायनः "कन्याशय्यागृहञ्चैव देयं यद्गोस्त्रियादिकम्। तदेकस्मै प्रदातव्यं न बहुभ्यः कथञ्चन" व्यासः "न व्यङ्गां रोगिणीं वन्ध्यां न कृशां मृतवत्सिकाम्। न वामनां वेहतञ्च दद्याद्विप्राय गां नरः। वेहत् गर्भोपघातिनी। देवलः "विवत्सां रोगिणीं रूक्षां स्थविरां गृहभीषणाम्। क्षीणक्षीरशरीराङ्गां दत्त्वा दोषमवाप्नुयात्"। कात्यायनः "न चोषरां न निर्दग्धां महीं दद्यात् कथञ्चन। न श्मशानपरीताञ्च न च पापनिषेविताम्"। पापाः हिंस्रप्राणिनो व्याघ्रादयः। विष्णुधर्मोत्तरे "सोषरां तस्कराकीर्णां तथा व्यालवतीं भुवम्। न दद्यात्तु द्विजश्रेष्ठो या च सन्धिषु संस्थिता"। स्कन्दपुराणे "पापदः पापमाप्नोति नरो लक्षगुणं सदा। तस्मान्न दद्यान्मेधावी पातकं आढ कस्यचित्"। महाभारते "दुःखितेभ्यो हि भूतेभ्यो मृत्युरोगजरादिभिः। भूयः को दुःखमपरं सहणो दातुमर्हति। दुःखं ददाति योऽन्यस्य ध्रुवं दुःखं स विन्दति। तस्मान्न कस्यचिद्दुःखं दातव्यं दुःखमीरुणा"।

"अथ पात्रविशेषे अदेयमुच्यते। यमः "सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न तत्फलमवाप्नोति तत्रैव परिवर्त्तते"। परिवर्त्तः विपर्य्ययः एवशब्दः अप्यर्थः तेन तत्र तस्मिन् दातर्य्यपि परिवर्त्तते धर्म्मविपरीतं धर्मं जनयतीत्यर्थः। तथा चोक्तम् "यतये काञ्चनं दत्त्वा दाताऽपि नरकं व्रजेदिति"। देवलः "पक्वमन्नं गृहस्थस्य वानप्रस्थस्य गोरसः। वृत्तिश्च भिक्षुवृत्तिभ्यो न देयं पुण्यमिच्छता"। वृत्तिः भिक्षातिरिक्तं वर्तनम्। तथा "न शूद्राय हविर्दद्यात् स्वस्ति क्षीरं तिलान् मधु। न शूद्रात् प्रतिगृह्णीयात्तेषामन्नन्निवेदयेत्। मांसं काञ्चनं क्षेत्रं गास्तिला मधुसर्पिषी। तथा सर्वान्नसांश्चापि चण्डालेभ्यो ददेत न"। स्वस्ति न दद्यादिति प्रणामनमस्कारेण शूद्रस्य स्वस्तीति न ब्रूयादित्यर्थः। तेषामपि क्षीरादीनां क्रयार्थमन्यत्द्रव्यं निवेदयेदित्यर्थः। शङ्खलिखितौ "क्षीरं पायसं यावं दधिमधुलवणाजिनानि शूद्रेभ्यो न दद्यान्नोपाकृतं किञ्चित्"। विष्णुधर्मोत्तरात् "भुवं धेनुमथाश्वञ्च रत्नानि कनकन्तथा। तिलांश्च कुञ्जरं दद्याद्राविज्ञातगुणागुणान्"

अतःपरं ग्राह्याग्राह्यद्रव्ये विस्तरेणोक्ते ते च ग्राह्याग्राह्यशब्दे प्रायेण दर्शिते।

दानाङ्गकालेषु तिथिकालः प्रथमस्तत्रैव।

भविष्यपुराणे "तिथीनां प्रवरा यस्माद्ब्रह्मणा संप्रदाहृता। प्रतिपादिता पदे पूर्वे प्रतिपत्तेन चोच्यते। स्नानं दानं शतगुणं कार्त्तिके या तिथिर्भवेत्"। स्कन्दपुराणे "आश्विने मासि संप्राप्ते द्वितीया शुक्लकृष्णगा। दानं प्रदत्तं यत्तस्यामनन्तफलमुच्यते"। पद्मपुराणे "वैशाखमासे या पुण्या तृतीया शुक्लपक्षगा। अनन्तफलदा दातुः स्नानदानादिकर्मसु"। भविष्यपुराणे "शिवा शान्ता सुखा राजंश्चतुर्थी त्रिविधा स्मृता। माघि भाद्रपदे शुक्ला शिवा लोकेषु पूजिता। तस्यां स्नानं तथा दानं उपवासो जपस्तथा। भवेत् सहस्रगुणितं प्रसादाद्दुन्दिनो नृपः। माघमासि तथा शुक्ला या चतुर्थी महीपते!। सा शान्ता शान्तिदा नित्यं शान्तिं कुर्यात्सदैव हि। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते। यदा शुक्लचतुर्थ्यान्तु वारो भौमस्य वै भवेत्। तदा सा सुखदा ज्ञेया सुखा नामेति कीर्त्तिता। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते"। स्कन्दपुराणे "शुक्ला मार्गशिरे मासि श्रावणे या च पञ्चमी। स्नानदाने बहुफला नागलोकप्रदायिनी"। भविष्यपुराणे "येयं भाद्रपदे मासि षष्ठी च भरतर्षभ!। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते" तथा "शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो भवेद्यदि। सप्तमी विजया नाम तत्र दत्तं महाफलम्। शुक्लपक्षस्य सप्तम्यां नक्षत्रं पञ्चतारकम्। यदा च स्यात्तदा ज्ञेया जया नामेन सप्तमी। स्नानदानादिकं तस्यां भवेत् शतगुणं विभो!। पञ्चतारकमितिः रोहिण्यश्लेषामघाहस्तस्य। "या मार्गशीर्षमासस्य शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर! सर्वानन्दकरी स्मृता। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते"। आदिपुराणे "रेवती यत्र सप्तम्यामादित्यदिवसे भवेत्। तद्दानं शतसाहस्रमिति प्राह दिवाकरः। भविष्यपुराणे "पौषे मासि यदा देवि! शुक्लाष्टम्यां बुधो भवेत्। तदा तु सा महापुण्या महारुद्रेति कीर्त्तिता। तस्यां स्नानं महादानं तर्पणं विप्रभोजनम्। मत्प्रीतये कृतं देवि! शतसाहस्रिकं भवेत्"। महाभारते "अष्टकासु च यद्दत्तं तदनन्तमुदाहृतम्"। आश्वलायनः "हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका" इति। तथा शातपथश्रुतिः "द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्या" इति। द्वादशापि कृष्णाष्टम्य इत्यर्थः। देवीपुराणे "आश्विनस्य तु मासस्य नवमी शुक्लपक्षगा। जायते कोटिगुणितं दानं तस्यां नराधिप!"। गरुडपुराणे "ज्यैष्ठस्य शुक्लदशमी संवत्सरसुखी स्मृता। तस्यां स्नानं प्रकुर्वीत दानञ्चैव विशेषतः। "एकादश्यां सिते पक्षे पुष्यर्क्षं यत्र सत्तम!। तिथौ भवति सा प्रोक्ता विष्णुना पापनाशिनी। दानं यद्दीयते किञ्चित् सप्तद्दिग्य जनार्दनम्। होमो वा क्रियते तस्यामक्षयं कथितं फलम्। मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। महती द्वादशी ज्ञेया उपवासे महाफला। फलं दत्तकृतानाञ्च तस्यां क्षयगुणं भवेत्"। विष्णुधर्मोत्तरात् "भाग्यर्क्षसंयुता चैत्रे द्वादशी स्यान्महाफला"। भाग्यर्क्षं पूर्वफल्गुनी। "हस्तयुक्ता तु वैशाखे ज्यैष्ठे तु स्वातिसंयुता। ज्येष्ठया च तथाषाढे मूलोपेता च वैष्णवे" वैष्णवे श्रावणे मासि। "तथा भाद्रपदे मासि श्रवणेन तु संयुता। आश्विने द्वादशी पुण्या भवत्याजर्क्षसंयुता"। आजर्क्षः पूर्वभाद्रपदा। "कार्त्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा"। सौम्यः मार्गशीर्षः। पौषे मृगशिरोपेता माघे चादित्यसंयुता"। आदित्यः पुनर्वसुः

"फाल्गुने पुष्यसहिता द्वादशी पावनी परा। नक्षत्रयुक्तास्वेतासु स्नानं दानमुपोषितम्। मन्वादिकृतं मनुष्याणामक्षय्यफलदायकम्"। स्कन्दपुराणे "यस्तु चैत्रत्रयोदश्यां स्नानं दानं समाचरेत्। फलं शतगुणं तस्य कर्मणो लभते नरः।" ज्योतिःशास्त्रे "कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते। चैत्रे चतुर्दशी शुक्ला श्रावणप्रोष्ठपादयोः। माघस्य या कृष्णपक्षे दाने बहुफला हि सा।" विष्णुधर्मोत्तरात् "वैशाखी कार्त्तिकी माघी पूर्णिमा तु महाफला। पौर्णमासीषु सर्वासु मासर्क्षसहितासु च। स्नानानामिह दानानां फलं दशगुणं भवेत्। यस्यां पूर्णेन्दुना योगं याति जीवो महाबलः। पौर्णमासी तु सा ज्ञेया महापूर्वा द्विजोत्तम!। स्नानं दानं तथा जाप्यमक्षय्यं तत्तदा स्मृतम्। ब्रह्मपुराणे "आग्नेयन्तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित्। महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा।" आग्नेयमृक्षं कृत्तिका। "यदा याम्यन्तु भवति ऋक्षं तस्यां तिथौ क्वचित्"। तिथिः सापि महापुण्या ऋषिभिः परिकीर्त्तिता"। याम्यमृक्षं भरणी। "प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप!। सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा।" प्राजापत्यम् ऋक्षं रोहिणी। व्यासः "अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण विषुवत्सदृशं फलम्। शङ्खोऽपि "अमावास्या तु सोमे तु सप्तमी भानुना सह। चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी। चतस्रस्तिथयस्त्वेता स्तुत्याः सुर्यर्क्षयादिभिः। सर्वमक्षयमत्रोक्तं स्नानदानजपादिकम्। "महाभारते "अमा सोमे तथा भौमे गुरुवारे यदा भवेत्। तत् पर्व पुष्करं नाम सूर्यपर्वशताधिकम्। शातातपः "अमावस्या सोमवारे सूर्यवारे च सप्तमी। अङ्गारकदिने प्राप्ते चतुर्थी वा चतुर्दशी। तत्र यः कुरुते कर्म शुभं वा यदि वाऽशुभम्। षष्टिवर्षसहस्राणि कर्त्ता तत्फलमश्नुते"। विष्णुपुराणे "अमावस्या यदा मैत्र! विशाखा-ऋक्षयोगिनी। श्राद्धे पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीम्। अमावस्या यदा पुष्ये रौद्रर्क्षे वा पुनर्वसौ। द्वादशाब्दीं तथा तृप्तिं प्रयान्ति पितरोऽर्चिताः"। रौद्रर्क्षम् आर्द्रा। "वासवाजैकपादर्क्षे पितृणां तृप्तिमिच्छता। वारुणे वाऽऽप्यदैवत्ये देवानामपि दुर्लभा"। वासवः धनिष्ठा। अजैकपादः पूर्वाभाद्रपदा। वारुण शततारका। आप्यदैवत्य पूर्वाषाढा। "माघेऽसिते पञ्चदशी कदाचिदुपैति योगं यदि वारुणेन। ऋक्षेण कालः स परः पितृणां नक्षत्रपुण्यैर्नृप! लभ्यतेऽसौ"। वारुणः शततारा। अथ युगादिप्रभृतयः। तत्र स्कन्दपुराणे "नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात् कृतम्। त्रेता सिततृतीयायां वैशाखे समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम्। कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः। युगादयः स्मृता ह्येते दत्तस्याक्षयकारकाः।" ब्रह्मपुराणे "युगारम्भास्तु तिथयो युगाद्याख्येन कीर्त्तिताः। फलं दत्तहुतानाञ्च तास्वनन्तं प्रकीर्त्तितम्।" तथा एतास्वतस्तिथयो युगाद्या दत्तं हुतञ्चाक्षयमाशु विन्द्यात्। युगे युगे वर्षशतेन यत्तपो युगादिकाले दिवसेन तद्भवेत्।" तथा "सूर्य्यस्य सिंहसंक्रान्त्यामन्तः कृतयुगस्य च। तथा वृश्चिकसंक्रान्त्यामन्तस्त्रेतायुगस्य च। ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्य संख्यया। तथा च कुम्भसंक्रान्त्यामन्तः कलियुगस्य च।" पद्मपुराणे "युगादिषु युगान्तेषु स्नानदानजपादिकम्। यत्किञ्चित् क्रियते तस्य युगान्ताः फलसाक्षिणः।" आदित्यपुराणे "दिनर्क्षं रेवती यत्र गमनञ्चैव राशिषु। युगान्तदिवसं विद्धि तत्र दानमनन्तकम्। ग्रहोपरागे विषुवे सोम्ये वा मिहिरोपदिः। सप्तमी शुक्ला कृष्णा वा युगान्तदिवसं विदुः।" मिहिरोपदिः सूर्य्यग्रहः। मनुः "सहस्रगुणितं दानं भवेद्दत्तं युगादिषु। कर्म श्राद्धादिकञ्चैतत्तथा मन्वन्तरादिषु।" मत्स्यपुराणे "अश्वकशुक्लनवमी द्वादशी कार्त्तिकस्य तु। चैत्रस्य तु तृतीया या तथा भाद्रपदस्य तु। फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा। श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा। आषाढस्य तु दशमी माघमासस्य सप्तमी। कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठे पञ्चदशी तथा। मन्वन्तरादयश्चैता दत्तस्याक्षयकारकाः। स्नानं दानं जपो होमः स्वाध्यायपितृतर्पणम्। सर्वमेवाक्षयं विद्यात् कृतं मन्वन्तरादिषु। अत्रामावस्याष्टमीव्यतिरेकेण सर्वाः शुक्ला एव। पुराणान्तरेण तु श्रावणस्यामावस्या भाद्रपदस्य कृष्णाष्टमी मन्वन्तरादिरिति प्रतिपादितम् तद्यथा "आश्विने शुक्लनवमी द्वादशी कार्त्तिके तथा। तृतीया चैत्रमासस्य तथा भाद्रपदस्य च। श्रावणस्याप्यमावस्या० पौषस्यैकादशी तथा। आषाढस्यापि दशमी माघमासस्य सप्तमी।

नभस्यस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा। कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी तथा। मन्वन्तरादयश्चैता दत्तस्याक्षयकारकाः।"

अथ व्यतीपातादिकालाः। याज्ञवल्क्यः "शतभिन्दुक्षये दानं सहस्रन्तु दिनक्षये। विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्"। वराहपुराणे "दर्शे शतगुणं दानं तच्छतघ्नं दिनक्षये। शतघ्नं तस्य संक्रान्तौ शतघ्नं विषुवे ततः। युगादौ तच्छतगुणमयने तच्छताहतम्। सोमग्रहे तच्छतघ्नं तच्छतघ्नं रविग्रहे। असंख्येयं व्यतीपाते दानं वेदविदो विदुः। शतघ्नं शतगुणमित्यर्थः। तथा "उत्पत्तौ लक्षगुणं कोटिगुणं भ्रमणनाड़िकायान्तु। अर्बुदगुणितं पतने जपदानाद्यक्षयं पतिते।" उत्पत्त्यादिमानमुक्तं ज्योतिःशास्त्रे "विंशतिर्द्वियुतोत्पत्तौ भ्रमणे चैकविंशतिः। पतने दश नाड्यस्तु पतिते सप्त नाड़िकाः। व्यतीपातोऽपि विष्कुम्भादियोगेषु सप्तदशो योगः। दृङ्मतेन तु प्रकारान्तरेण व्यतीपातो दर्शितः। "श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते। नागदैवतम् अश्लेषा। मस्तकं प्रथमचरणः। मस्तक इति श्रवणादिभिः प्रत्येकं सम्बध्यते। शास्त्रान्तरेऽन्योऽपि व्यतीपात उक्तः। "पञ्चाननस्थौ गुरुभूमीपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे। पाशाभिधाना करभेण युक्ता तिथिर्व्यतीपात इतीह योगः। अस्मिन् हि गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापम्। शूरत्वमिन्द्रत्वमसामयत्वं मन्वाधिपत्यं लभते मनुष्यः"। पञ्चाननः सिंहः गुरुभूमिपुत्रौ बृहस्पत्यङ्गारकौ। पाशाभिधाना द्वादशी। करभम् हस्तनक्षत्रमिति। ज्योतिःशास्त्रे तु रविचन्द्रयोः क्रान्तिसाम्ये सूर्यौ वैधृतव्यतीपातौ दर्शितौ। तदाह गालवः "चन्द्रार्कयोर्नयनयोर्लक्षणजातमूर्तिः कालानलद्युतिनिभः पुरुषोऽति रौद्रः। अस्तोदयतो भुवि पतंश्च निरीक्षमाणः कं घातयेऽहमिति च व्यतीपातयोगः।" आह भृगुः "क्रान्तिसाम्यसमयः समीरितः सूर्यपर्वसदृशो मुनीश्वरैः। तत्र दत्तहुतजप्तपूजनं कोटिकोटिगुणमाह भार्गवः"। अयमर्थः सूर्याचन्द्रमसोः क्रान्तिसाम्ये पुण्यकालद्वयं सम्भवति। एकः व्यतीपाताख्यः अपरः वैधृताख्यः। तत्र क्रान्तिसाम्यलक्षणस्य व्यतीपातस्य गण्डोत्तरार्द्धादारभ्य क्रमशः सार्द्धेषु सप्तसु योगेषु सम्भवोऽस्ति वैधृतसंज्ञस्य तु शुक्रयोगादारभ्य सार्द्धेषु त्रिषु योगेषु सम्भवोऽस्ति "वैधृते व्यतीपाते दत्तमक्षयकृद्भवेत्"। भरद्वाजः "व्यतीपाते वैधृते च दत्तस्यान्तो न विद्यते। व्यतीपाते विशेषेण स हि सूक्ष्मः प्रकीर्तितः।" सूक्ष्मप्रकारेण प्रसिद्धस्तु सप्तविंशतितमो योगो वैधृत इति।

अथोपरागकालः। पद्मपुराणे "चन्द्रस्य यदि वा भानो राहुणा सह सङ्गमः। उपराग इति ख्यातस्तत्रानन्तफलं स्मृतम्। इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं भवेत्। गङ्गातीरे तु सम्प्राप्ते इन्दोः कोटी रवेर्दश"। रवेर्दशगुणमिति लक्षगुणाद्दशगुणमित्यर्थः। एवमुत्तरत्रापि तथा। "रविवारे रवेर्ग्रासः सोमे सोमग्रहस्तथा। चूड़ामणिरिति ख्यातस्तत्रानन्तं फलं स्मृतम्।" भरद्वाजः "चन्द्रसूर्योपरागे च यत्कर्तव्यं तदुच्यते। सर्वं हेममयं दानं सर्वे ब्रह्मसमा द्विजाः। सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे"। ऋष्यशृङ्गः "राहुग्रस्तो यदा सूर्यो यस्तु श्राद्धं समाचरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे"। शातातपः "अयनेषु सदा देयं विशिष्टं स्नानहेमयत्। षडशीतिमुखे चैव विमोक्षे चन्द्रसूर्ययोः। विमोक्षे वर्तमाने न तु विमुक्तयोरित्यर्थः "उपरागे तु तत्कालमिति" स्मरणात्।

आह शातातपः "संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद्यो हि मानवः। सप्तजन्मान्तरं रोगी दुःखभागी सदा भवेत्।" वृद्धवशिष्ठः "अयने द्वे च विषुवे चतस्रः षडशीतयः। चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः। ऋषकर्कटसंक्रान्त्यौ द्वे तुलगद्दक्षिणायने। विषुवे च तुलामेषे गोलमध्ये ततोऽपराः"। ऋषः मकरः। गोलः राशिचक्रम्। "कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षडशीति मुखा प्रोक्ता षडशीतिगुणा फलैः। वृषवृश्चिककुम्भेषु सिंहे चैव यदा रविः। एतद्विष्णुपदं नाम विषुवादधिकं फले।" गालवः "मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ। षडशीतिमुखेऽतीते तथोदगयने भरि फलम्"। एतच्च फलाधिक्यप्रतिपादनार्थमुक्तम्। फलमाह भरद्वाजः "षडशीत्यान्तु यद्दानं यद्दानं विषुवद्वये। दृश्यते सागरस्यान्तस्तस्यान्तो नैव विद्यते।" विष्णुपदादिसूक्ष्मतमं पुण्यकालमाह गालवः "स्थिरभे विष्णुपदं षडशीतिमुखं द्वितनुभे तुला-

मेषे । विषुवन्तुर्ये दक्षायणं सौम्यकं सूर्ये ।" पूर्वश्लोकैर्व्याख्यातमेतत् । "अयनांशकतुल्येन कालेनैतत् स्फुटं भवेत् । सर्वविष्णुपदाद्युक्तभेदादि ह्ययनेऽन्यथा । कृगकर्कादिगे सूर्ये यास्योदगयने सति । तदा संक्रान्तिदाने सुरुक्ता विष्णुपदादयः ।" अयमर्थः राशिं प्रति त्रिंशद्दंशका भवन्ति सूर्यश्च प्रतिदिनमेकैकमंशं भुङ्क्ते तत्र यावद्भिरंशैरयनच्युतिर्भवति तावता सूर्यस्य भोग्यकालेन भाविनां विष्णुपदादिकानां च्युतिर्भवतीति ततश्च यदा द्वादशभिरयनच्युतिर्भवतीति तदा भाविन्याः संक्रान्तेर्द्वादशभिर्दिनैरर्वाक् पुण्यकालो भवति अस्मिंश्च तत्संक्रान्तिनिमित्तं दानादि कर्त्तव्यमिति । एवं न्यूनातिरिक्तेष्वपि बोद्धव्यम् । न केवलमादित्यस्यैव संक्रमसमये पुण्यकालः किन्तु सर्वेषामपि ग्रहाणां नक्षत्रराशिसंक्रमे पुण्यकालो भवतीति । तदुक्तं ज्योतिःशास्त्रे "नक्षत्रराश्योरविसंक्रमे सुरर्वाक् परत्रापि रसेन्दुनाड्यः । पुण्यास्तथेन्दोस्त्रिधरापलैर्युता एकैव नाड़ी कुनिभिः शुभोक्ता । नाड्यस्ततस्त्रः सपलाः कुजस्य बुधस्य तिस्रः पलविंशयुक्ताः । सार्द्धाब्धिनाड्यः पलसप्तयुक्ताः गुरोस्तु शुक्रे सपलाश्चतस्रः । द्विनागनाड्यः पलसप्तयुक्ता शनैश्चरस्याभिहिताः सुपुण्याः । आद्ये तु मध्ये जपदानहोमं कुर्वन्नवाप्नोति सुरेन्द्रधामं ।" अस्यार्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक् परतश्च षोड़श घटिकाः पुण्यकालः । तथा चन्द्रस्यापि राशिनक्षत्रगमने घटिकैकापलानि त्रयोदश अर्वाक् परतश्च पुण्यकालः । एवं मङ्गलस्य घटिकाचतस्रः पलमेकञ्च पुण्यकालः । तथा बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि पुण्यकालः । बृहस्पतेरपि सार्द्धाश्चतस्रो घटिकाः सप्त पलानि पुण्यकालः । शुक्रस्य चतस्रो घटिकाः पलमेकञ्च पुण्यकालः । शनैश्चरस्यापि द्व्यशीतिघटिकाः सप्त पलानि पुण्यकाल इति ।

अथ प्रकीर्णकालाः । आह विष्णुः "अमावस्या व्यतीपातो ग्रहणं चन्द्रसूर्ययोः । मन्वादयो युगादिश्च संक्रान्तिर्वैषृतिस्तथा । दिनक्षयं दिनच्छिद्रमवमञ्च तथा परम् । द्व्ययने विषुवद्युग्मं षड़शीतिमुखन्तथा । चतस्रो विष्णुपद्यश्च पुत्रजन्मादि चापरम् । आदित्यादिग्रहाणाञ्च नक्षत्रैः सह सङ्गमः । विज्ञेयः पुण्यकालोऽयं ज्योतिर्विद्भिर्विचार्य्य च । तत्र दानादिकं कुर्यादात्मनः पुण्यवृद्धये ।" अमावास्यादीनि प्रसिद्धानि । दिनक्षयं चक्रः पद्मपुराणे "द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनक्षयः ।" वशिष्ठोऽप्याह "एकस्मिन् सावने त्रिंशतिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम् ।" दिनच्छिद्रलक्षणमाह भृगुः "तिथ्यर्द्धतिथियोगर्क्षछेदादौ शशिपर्वणः । सदशौ दिवसच्छिद्रसमाख्यौ प्राह भार्गवः । अयमर्थः तिथ्यर्द्धं करणं करणतिथियोगनक्षत्राणामन्ते आदौ च पर्वकालः सोमग्रहणतुल्यः स च दिनच्छिद्रसंज्ञ इति । छेदकालमानमप्युक्तं तेनैव "छेदादिकालः कथितस्तिथिक्षत्योर्घटीद्वयम् । नागवह्निपलोपेतं तद्वै तत्त्वपलैर्युतम् । पलैः षोड़शभिर्युक्तं नाडिकाद्वितयं युतेः । छेदादिसमयः प्रोक्तो दानेऽनन्तफलप्रदः ।" क्षतिः करणम् । नागः अष्टौ । वह्नयः त्रयः । भं नक्षत्रम् । तत्त्वं पञ्चविंशतिः । युतिः योगः । तदयमर्थः सिद्धो भवति । तिथिकरणयोराद्यन्ते घटिकाद्वयमष्टत्रिंशत् पलानि पुण्यकालः । नक्षत्रस्य तु पञ्चविंशतिपलैर्युक्तं घटिकाद्वयम् । योगस्यापि षोड़शभिः पलैर्युक्तं घटिकाद्वयमिति । अयमलक्षणमाह विष्णुः "तिथित्रयं स्पृशत्येको वारः स्यादवमं हि तत् । त्रिवारस्पृक् तिथिर्यत्र दिनस्पृक् च तदुच्यते ।" अत्र दिनक्षयावमयोरियान् भेदः । यत्र तिथिद्वयावसाने वारावसानं स दिनक्षयः । यत्र तिथिद्वयावसानेऽपि वारानुवृत्तिः सोऽवम इति । ब्रह्मप्रोक्तो "एकादश्यमावस्या पूर्णिमा पुत्रजन्म च । वैषृतिश्च व्यतीपातो भद्रा चाक्षयवासरः । युगमन्वादयस्तु सुरिन्दुपर्वसमानकाः । क्रान्तिसाम्यं दिनच्छिद्रं ग्रहाणां भगमस्तथा" । भगमः राशिनक्षत्रेषु गमनम् । देवीपुराणे "व्यतीपातो विष्णुपदं षड़शीतिमुखन्तथा । क्रान्तिसाम्यममावास्या ग्रहणं वैषृतिश्च यः । संक्रान्तिश्च दिनच्छिद्रं तिथिद्वद्विदिनक्षयः । इत्यादिः पुण्यकालस्तु होमदानादिकर्मणः" । स्कन्दपुराणे "ग्रहणं चन्द्रसूर्याभ्यामुत्तरायणमुत्तमम् । विषुवं सव्यतीपातं षड़शीतिमुखन्तथा । दिनच्छिद्राणि संक्रान्तिर्नैयं विष्णुपदं पुनः । इति कालः समाख्यातः पुंसां पुण्यविवर्द्धनः । अस्मिन् दत्तानि दानानि स्नानहोमतपांसि च । अनन्तफलदानि स्युः स्वर्गमोक्षप्रदान्यपि" । आह च्यवनः "अमावास्यासंक्रान्तिव्यतीपातविषुवायनषड़शीतिमुखविष्णुपदादिवैषृतिग्रहणान्तं स एव पुण्यकालः । "अयने षड़शीतौ च चन्द्रसूर्यग्रहे तथा । युगादौ वैषृतौ चैव दत्तं भवति चाक्षयम्" । आह

शातातपः "अयनेषु तु यद्दत्तं षडशीतिमुखेषु च। चन्द्रसूर्योपरागे च दत्तं भवति चाक्षयम्"। नारदः "विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः। स योगः पद्मको नाम पुष्करेष्वतिदुर्लभः"।

अथ निषिद्धकालाः तत्र शङ्खलिखितौ "व्याहारं मैथुनं निद्रां सन्ध्याकाले तु वर्ज्जयेत्। कर्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ"। स्कन्दपुराणे "रात्रौ दानं न कर्त्तव्यं कदाचिदपि केनचित्। हरन्ति राक्षसा यस्मात् तस्माद्दातुर्भयावहम्। विशेषतो निशीथे तु न शुभं कर्म शर्मणे। अतो विवर्जयेत् प्राज्ञो दानादिषु महानिशाम्। तथा "स्नानञ्चैव महादानं स्वाध्यायन्तु न तर्पणम्। प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने"। व्याह ज्योतिःपराशरः "अग्न्याधेयं प्रतिष्ठाञ्च यज्ञदानाद्यभिग्रहान्। माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्। वापीकूपतडागादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणाशामुखे कुर्वन् न तत्फलमवाप्नुयात्। बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते। मलमासद्वयैतानि वर्जयेद्यत्नतः सदा"।

अथ निषिद्धस्यापि धर्मविशेषेण पुण्यकालत्वमभिधीयते। देवलः "राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च"। वृद्धवसिष्ठः "ग्रहणोद्वाहसंक्रान्तियात्रादिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते"। विष्णुधर्मोत्तरे "पूजनन्त्वतिथीनाञ्च पान्थानामपि पूजनम्। तत्र रात्रौ तथा ज्ञेयं गवामस्तञ्च पूजनम्"। महाभारते "रात्रौ दानं न शंसन्ति विना त्वभयदक्षिणाम्। विद्यां कन्यां द्विजश्रेष्ठा! दीपमन्नं प्रतिश्रयम्"। श्रीमार्कण्डेयपुराणे "महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्। स्नानं तत्र न कुर्वीत काम्यनैमित्तिकादृते"। विश्वामित्रः "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः। नैमित्तिकन्तथा कुर्य्यान्नित्यन्तु न मनागपि"।

अथ निमित्तानुरोधेन सदा पुण्यकालाः। विष्णुधर्मोत्तरे "कालः सर्वोऽपि निर्दिष्टः पात्रं सर्वमुदाहृतम्। अभयस्य प्रदाने तु नात्र कार्य्या विचारणा। तदेव दानकालस्तु यदा भयमुपस्थितम्"। तथा "न कालनियमो दृष्टो दीयमाने प्रतिश्रये। तदैव दानमस्योक्तं यदा पान्थसमागमः। न हि कालं प्रतीक्षेत जलं दातुं तृषान्विते। अन्नोदकं यदा देयमित्याह भगवान्मनुः"। स्कन्दपुराणे "अर्द्धप्रसूतां गां दद्यात् कालादीनविचारयन्। कालः स एव ग्रहणे यदा सा द्विमुखी तु गौः"। व्यासः "आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत्। तदभावे तु गौरेव नरकोद्धरणाय वै। तदा यदि न शक्नोति दातुं वैतरणीन्तु गाम्। शक्तोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च"। वराहपुराणे "व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः। पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः। तदा गोभूहिरण्यादि दत्तमक्षयतामियात्"। तथा "यावत् काल सुते जाते न नाड़ी छिद्यते नृप!। चन्द्रसूर्योपरागेण तमाहुः समयं समम्"। विष्णुधर्मोत्तरे "अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः!। संस्कारेषु च पुत्रस्य तदक्षयं प्रकीर्त्तितम्"। मत्स्यपुराणे "यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितम्। तदैव दानकालः स्याद्यतोऽनित्यं हि जीवितम्"। इति कालनिरूपणम्।

अथ देशाख्यं दानाङ्गमुपवर्ण्यते। तत्र देवीपुराणे "सर्वे शिवाश्रमाः पुण्याः सर्वा नद्यः शुभप्रदाः। दानस्नानोपवासादिफलदाः सततं नृणाम्"। व्याह विष्णुः "चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते। स म्लेच्छदेशो विज्ञेय आर्य्यदेशस्ततः परः"। भविष्यपुराणे "न हीयते यत्र धर्मश्चतुष्पात् सकलो द्विज!। स देशः परमो नित्यं सर्वपुण्यतमो मतः। विद्वद्भिः सेवितो यत्र यस्मिन् देशे प्रवर्त्तते। शास्त्रोक्तश्चापि विप्रेन्द्र! स देशः परमोमतः"। याज्ञवल्क्यः "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्म्मान्निबोधत"। श्रीमार्कण्डेयपुराणे "सह्यस्य चोत्तरो यस्तु यत्र गोदावरी नदी। पृथिव्यामपि कृतस्नायां स प्रदेशोऽतिपावनः"। व्यासः "गङ्गाद्वारे प्रयागे च अविमुक्ते च पुष्करे। नगरे चाङ्गहासे च गङ्गासागरसङ्गमे। कुरुक्षेत्रे गयायाञ्च तीर्थे काञ्चनकण्टके। एवमादिषु तीर्थेषु दत्तमक्षयतामियात्। सर्वतीर्थमयी गङ्गा तत्र दत्तं महाफलम्"। स्कन्दपुराणे "वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि च। गङ्गा समुद्रतीरञ्च नैमिषामरकण्टकम्। श्रीपर्वतमहाकालं गोकर्णं वेदपर्वतम्। इत्याद्याः कीर्त्तिता देशाः सुरसिद्धनिषेविताः। सर्वे शिवोद्भवाः पुण्याः सर्वा नद्यः ससागराः। गोसिद्धमुनिवासाश्च देशाः पुण्याः प्रकीर्त्तिताः। एषु तीर्थेषु यद्दत्तं फलस्यानन्त्यमश्नुते"। पद्मपुराणे "गङ्गा चोदङ्मुखी यत्र यत्र प्राची सर-

स्वती। तत्र क्रतुशतं पुण्यं स्नानदानेषु सुव्रत !। लिङ्गं वा प्रतिमां वापि दृश्यते यत्र कुत्रचित्। तत् सर्वं पुण्यतां याति दानेषु च महाफलम्"। ब्रह्मप्रोक्ते "नदीतीरे गवां गोष्ठे ब्राह्मणानाञ्च वेश्मनि। दत्तं शतगुणं प्राहुर्लक्षमादित्यसन्निधौ। शिवस्य विष्णोर्वह्नेश्च सन्निधौ दत्तमक्षयम्"। तथा "अग्निहोत्रे गवां गोष्ठे वेदघोषपवित्रिते। शिवायतनसंस्थाने यदल्पमपि दीयते। तदनन्तफलं ज्ञेयं शिवक्षेत्रानुभावतः"। मत्स्यपुराणे "शालग्रामसमुद्भूता शिला चक्राङ्कमण्डिता। यत्र तिष्ठति वसुधे। तत्क्षेत्रं योजनत्रयम्। द्वारवत्याः शिला देवि ! सुहृता मम सुहृदा। यत्रापि नीयते तत्प्रा-तीर्थं द्वादशयोजनम्"। तथा "प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च। दत्त्वा चाक्षयमाप्नोति नदीपुण्या-वनेषु च"। आयतने शङ्करादिक्षेत्रे तदुक्तं भविष्य-पुराणे "क्रोशमात्रं भवेत् क्षेत्रं शिवस्य परमात्मनः। प्राणिनान्तत्र पङ्क्तं शिवसायुज्यकारणम्। फलं दत्त-कृतानाञ्च अनन्तं परिकीर्त्तितम्। मनुजैः स्थापिते लिङ्गे क्षेत्रे मानमिदं स्मृतम्। स्वयम्भुवि सहस्र स्यादार्षे चैव तदर्द्धकम्"।

अथ श्रद्धाख्यं दानाङ्गमुच्यते। स्कन्दपुराणे "दानं दद्यात् प्रयत्नेन श्रद्धापूतमतन्द्रितः। श्रद्धाकृतं स्वल्पमपि दानमानन्त्यमश्नुते। अश्रद्धयापि यद्दत्तं सर्वस्वमपि सत्तम !। न तत् फलाय भवति तस्माच्छ्रद्धां समाश्रयेत्"। देवलः "प्रदाय शाकमुष्टिं वा श्रद्धाभक्तिसमुद्यताम्। महते पात्रभूताय सर्वास्मुदयमाप्नुयात्"। महाभारते "श्रद्धया साध्यते धर्म्मो महद्भिर्नियताशिभिः। निष्कि-ञ्चनास्तु मुनयः श्रद्धावन्तो दिवं गताः। धर्मार्थकाम-मोक्षाणां श्रद्धा परमकारणम्। पुंसामश्रद्दधानानां न धर्म्मो नापि तत्फलम्"। वह्निपुराणात् "श्रद्धापूर्वाः सर्वधर्म्माः श्रद्धामध्यास्तसंस्थिताः। श्रद्धानिष्ठाप्रतिष्ठाश्च धर्म्माः श्रद्धैव कीर्त्तिताः। श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः। श्रद्धामात्रेण गच्छन्ति न वाक्येन न चक्षुषा। कायक्लेशैर्न बहुभिर्न चैवार्थस्य राशिभिः। धर्मः सम्प्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि। श्रद्धा धर्मः परः सूक्ष्मः श्रद्धा ज्ञानं श्रुतन्तपः। श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत्। सर्वस्वं जीवितञ्चापि दद्याच्छ्रद्धया यदि। नाप्नुयात् स फलं किञ्चित् श्रद्दधा-नस्ततो भवेत्"। वेदव्यासः "श्रद्धा वै शान्तिनी देवी सूर्य्यस्य दुहिता नृप !। सवित्री प्रसवित्री च लोक-विश्वासिनी तथा। वागष्टकं त्यजते श्रद्धा समोऽश्वत्थ भारत"। महाभारते "क्रियावान् श्रद्दधानश्च दाता प्राज्ञोऽनसूयकः। धर्माधर्मविशेषज्ञः सर्वं तरति दुस्त-रम्"। स्कन्दपुराणे "श्रद्धा मातेव जननी ज्ञानस्य सुकृतस्य च। तस्माच्छ्रद्धां समुत्पाद्य ज्ञानं सुकृतमर्जयेत्" मनुः "श्रद्धयेष्टञ्च पूर्त्तञ्च नित्यं कुर्य्यात् प्रयत्नतः। श्रद्धा-कृते क्षत्रिये ते भवतः स्वागतैर्द्धनैः"। याज्ञवल्क्यः "दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः। याचि-तेनापि दातव्यं श्रद्धापूतन्तु शक्तितः"। वृहस्पतिः "मन्त्रा ज्यदोषाद्धोमे तु तपसोन्द्रियदोषतः। न्यूनता स्याच्च-दाने तु श्रद्धायुक्ते भवेत् क्वचित्"।

"देशनिरूपणञ्च पूर्वं व्रतखण्डादावेव प्रपञ्चितम्। इह तु पात्रादिदानाङ्गनिरूपणप्रतिज्ञानिर्वाहार्थं दिङ्मात्रमेव प्रदर्शितम्। न चात्र भविष्यपुराणमतेन दानाङ्गपञ्चके निरूप्यमाणे दानाङ्गभूतस्यापि दातुः कथं पृथगनुपादन-मिति शङ्कनीयं दानस्य दातव्यतिरेकेणानुपपत्तेस्तेनैव तदाक्षेपात्। एवं तर्हि देशकालादेरप्यनुपादानं स्यात्। "अथ सामान्येनैव तदाक्षेपेऽपि ब्रह्मायत्तादिविशेषलाभार्थं तन्निरूपणमिति चेत् दातापि तर्हि शुचित्वादिविशेषला-भार्थं निरूपणीयः स्यात्। उच्यते तत्तद्विधायकवाक्यगता-ख्यातप्रत्ययोपात्तत्वादेव तदनिरूपणं नत्याक्षेपात्, शुचि-त्वादिविशेषलाभस्तु वाक्यान्तरादिति कर्त्तृनभिधानपक्षे तु प्रत्ययोपात्तभावनयैवासाधारणेन तदाक्षेपात् देशा-दिसाम्यम्। एवमादिकोपपर्य्यालोचनया षडङ्गं दान-मिति वदता देवलेन तु निरूप्यतएव तथा हि "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुरिति"। तल्लक्षणन्तु प्रागभिहितमिति तु न पुनरादियामहे। न तु श्रद्धा-दिवदितिकर्त्तव्यतापि दानाङ्गमित्यतः प्रतिपादनीयैव यदाह याज्ञवल्क्यः "देशकाल उपायेन द्रव्यं श्रद्धास-मन्वितम्। पात्रे प्रदीयते यत्तत् सकलं धर्मलक्षणम्"। इति उपायः इतिकर्त्तव्यता।

अथ दानसामान्यविधिरुच्यते। तत्र दानधर्म्मः। भविष्य-पुराणे "सम्यक् संसाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण महावीरः ! काम्यं कामान्वितेन च। आचार युक्तः श्रद्धावान् प्राप्नोत्यध्यात्मवित्तमः। कर्म्मणां फलमाप्नोति न्यायार्जितधनस्य यः"। एतच्च प्रथम

कल्पादिना। संसाधनं यथाविहितसाधनम्। अधिकारिणा अर्थिना समर्थेन विदुषा च। अध्यात्मवित्तमः परलोकफलभागिन्यात्मनि दृढ़प्रत्ययवान्। न्यायार्जितधनः स्वदृष्ट्यर्जितधनः। आपस्तम्बः "प्रयोजयितानुमन्ता कर्त्तेति स्वर्गनरकफलेषु भागिनः यो भूय आरभते तस्मिन् फलविशेषः"। याज्ञवल्क्यः "विधिदिष्टन्तु यत् कर्म करोत्यविधिना तु यः। फलं न किञ्चिदाप्नोति कृतमात्रं हि तस्य यत्"। मनुः "प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्"। साम्परायिकं पारलौकिकम्। योगियाज्ञवल्क्यः "श्रद्धाविधिसमायुक्तं कर्म यत् क्रियते नृभिः। सुविशुद्धेन भावेन तदानन्त्याय कल्पते। विधिहीनं भावदुष्टं कृतमश्रद्धया च यत्। तद्भवत्यसुरास्तस्य मूढ़स्य ह्यकृतात्मनः"। भविष्योत्तरे "काम्योदानविधिः पार्थ! क्रियमाणो यथातथम्। फलाय मुनिभिः प्रोक्तो विपरीतो भयावहः"। गारुड़पुराणे "प्रशस्तदेशकाले च पात्रे दत्तं तदक्षयम्। कोटिजन्मार्जितं पापं ददतस्तस्य नश्यति। सकलाङ्गोऽपि सम्भारो यस्य दानक्रियाविधौ। सम्भवेदपि पापीयान् स सद्यो मुक्तिमेष्यति"। देवीपुराणे "शुचिना भावपूतेन क्षान्तिसत्यव्रतादिना। अपि सर्षपमात्रोऽपि दातारं तारयेदिह"। दक्षः "दानञ्च विधिवद्देयं काले पात्रे गुणान्विते"। यमः "सर्वत्र गुणवद्दानं श्वपाकादिष्वपि स्मृतम्। देशे काले विधानेन पात्रे दत्तं विशेषतः"। गुणवत् उत्तमफलम्। तथा "दानं हि बहुमानाद्यो गुणवद्भ्यः प्रयच्छति। स तु प्रेत्य धनं लब्ध्वा पुत्रपौत्रैः सहाश्नुते। परञ्चादुपहत्येह दानं दत्त्वा विचक्षणः। सुखोदयं सुखोदर्कं प्रेत्य वै लभते धनम्"। अनुपहत्य पीड़ामनुत्पाद्य, सुखोदर्कं सुखोत्तरफलम्। रामायणे "नावज्ञया प्रदातव्यं किञ्चिद्दानं कदाचित्। अवज्ञया हि यद्दत्तं दातुस्तद्दोषमावहेत्"। शातातपः "अभिगम्य तु यद्दानं यच्च दानमयाचितम्। विद्यते सागरस्यान्तस्तस्यान्तो नैव विद्यते। प्रच्छन्नानि च दानानि ज्ञानञ्च निरहंकृतम्। तपांसि च सुगुप्तानि तेषां फलमनन्तकम्"। ब्रह्मप्रोक्ते "गुप्तभाषायी गुप्तदाता गुप्तपूजाग्निसत्क्रियः। पूज्यते सर्वलोकेषु सर्वदेवैः यतक्रतुः"। व्यासः "स्वयं नीत्वा तु यद्दानं भक्त्या पात्राय दीयते। तत् सहस्रगुणं भूत्वा दातारमुपतिष्ठति"। बृहस्पतिः "कृते प्रदीयते गत्वा त्रेतायां दीयते गृहे। द्वापरे च प्रार्थयति कलौ चानुगमान्विते"। प्रतिग्रहीतृगृहं गत्वा यद्दीयते तत् कृते युगे दत्तं भवति प्रतिग्रहीतारं स्वगृहमाहूय यद्दीयते तत् त्रेतायुगे दत्तं भवतीत्यर्थः एवमुत्तरत्रापि। वह्निपुराणे "तमोद्धतस्तु यो दद्याद्भयात् क्रोधात् तथैव च। नृप! दानन्तु तत्सर्वं भुङ्क्ते गर्भस्य एव च। ईर्षामन्युमनाश्चैव दम्भार्थं चार्थकारणात्। यो ददाति द्विजातिभ्यः स बालत्वे तदश्नुते। देशे काले च पात्रे च योददाति द्विजातिषु। परितुष्टेन मनसा यौवने तु तदश्नुते। वैश्वदेवविहीनं च सम्प्रयोगमनवर्जितम्। यद्दानं दीयते तत्तु वृद्धकाले समश्नुते"। आह मनुः "न विस्मयेत तपसा, वदेदिष्ट्वा न चान्यतम्। नार्त्तो विप्रवदेद्विप्रान् न दत्त्वा परिकीर्त्तयेत्। यज्ञोऽन्यतेन क्षरति तपः क्षरति विस्मयात्। आयुर्विप्रापवादेन दानन्तु परिकीर्त्तनात्"। यमः "आशां दत्त्वा ह्यदातारं दानकाले निषेधकम्। दत्त्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम्"। हारीतः "दानं ज्ञानं तपस्त्यागोमन्त्रकर्म विधिक्रियाः। मङ्गलाचारनियमाः शौचभ्रष्टस्य निष्फलाः"। आह प्रचेताः "स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि। पवित्राणां तथा लाभे दाने च विधिचोदिते"। वायुपुराणे "क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः। भवन्ति न तथा तस्य क्रियाः सर्वाः न संशयः"। याज्ञवल्क्यः "दानमाचमनं होमं भोजनं देवतार्चनम्। प्रौढ़पादेन कुर्वीत स्वाध्यायं पितृतर्पणम्। आसनारूढ़पादस्तु जान्वोर्वा जङ्घयोस्तथा। कृतावसक्थिकोयस्य प्रौढ़पादः स उच्यते"। वशिष्ठः "यज्जले शुष्कवस्त्रेण स्थले चैरार्द्रवाससा। जपोहोमस्तथा दानं तत्सर्वं निष्फलं भवेत्"। विष्णुपुराणे "होमदेवार्चनाद्यास्तु क्रियास्वाचमने तथा। नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे"। द्विजवाचनके द्विजस्वस्तिवाचनादौ। शातातपः "सव्यादंसात् परिभ्रष्टकटिदेशच्छताम्बरः। एकवस्त्रन्तु तं विद्यात् दैवे पित्र्ये च वर्जयेत्"। लोकगौतमः "स्नाने दाने जपे होमे दैवे पित्र्ये च कर्मणि। बभ्रीयाच्चासुरीं कक्षां शेषकाले यथारुचि। याज्ञवल्क्यः "परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत्। धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। बहिःकक्षा बहिर्निर्गता कक्षेत्यर्थः"।

मनुः "न कुर्यात् कस्यचित् पीड़ां कर्मणा मनसा गिरा। आचरन्नभिषेकन्तु कर्म्माण्यन्यन्यथा चरन्। मन्त्रयोरुभयोर्जप्ये भोजने दन्तधावने। पितृकार्य्ये च दैवे च तथा मूत्रपुरीषयोः। गुरूणां सन्निधौ दाने यागे चैव विशेषतः। एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः"। पराशरः "स्नाने दाने जपे होमे दैवे पित्रे च कर्मणि। सव्यापसव्यौ कर्त्तव्यौ सपवित्रौ करौ द्विजैः"। लघुहारीतः "जपे होमे तथा दाने स्वाध्याये पितृतर्पणे। अन्यून्यन्तु करं कुर्यात् सुवर्णरजतैः कुशैः। दर्भहीना तु या सन्ध्या यच्च दानं विनोदकम्। असंख्यातञ्च यज्जप्तं तत्सर्वं निष्प्रयोजनम्"। हारीतः "देवाश्च पितरश्चैव तपोयज्ञदानानामीशते मन्त्राः सर्वकार्य्यसाधनानामार्त्तिभयोपसर्गेभ्योरक्षितारो भवन्ति मन्त्रा देवतास्तदा एवंविद्वन्मन्त्रवत् करोति देववत्करोति यद्ददाति देवताभिरेव तद्ददाति यत् प्रतिगृह्णाति देवताभिरेव तत् प्रतिगृह्णाति तस्मान्मामन्त्रवत् प्रतिगृह्णीयात् यत्त्वमन्त्रतः प्रतिपादिता हि देवतास्तुष्णीं प्रतिगृह्णीयुर्हि शठा भवन्ति तस्मान्मन्त्रवद्भिरवोक्ष्य दद्यादालभ्य वा"। अवोक्ष्य प्रोक्षणं कृत्वा। आलभ्य सोदकेन पाणिना स्पृष्ट्वा। आपस्तम्बः "सर्वाणुदकपूर्वाणि दानानि यथाश्रुति वीहारे" वीहारे यज्ञे अन्वाहार्य्यदानादौ यथाश्रुति यावदेव श्रुतं तावदेव कुर्यान्नोदकपूर्वतादिनियम इत्यर्थः। वराहपुराणे "तोयं दद्यात् द्विजकरे दाने विधिरयं स्मृतः। सकुशोदकहस्तश्च ददामीति तथा वदेत्"। गौतमः "अन्तर्जानुकरं कृत्वा सकुशन्तु तिलोदकम्। फलानि चाभिसम्प्राप्य प्रदद्यात् श्रद्धयान्वितः" पात्रासन्निधाने तु नारदीयपुराणे विशेष उक्तः। "मनसा पात्रमुद्दिश्य जलं भूमौ विनिःक्षिपेत्। विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते"। धौम्यः "दानकाले तु सम्प्राप्ते पात्रस्यासन्निधौ जलम्। अन्यविप्रकरे दत्त्वा दानं पात्रे निवीयते"। षट्त्रिंशन्मतात् "पात्रं मनसि सङ्कल्प्य क्रियावन्तं गुणान्वितम्। देशे काले च संप्राप्ते देयमस्य विनिःक्षिपेत्"। उभयासन्निधाने तु विशेषस्तत्रैवोक्तः "द्रव्यपात्रविकर्षेत् परोक्षं दातुमुद्यतः। तत् ध्यायेद्दैवमुखं पात्रं द्रव्यमादित्यदेवतम्"। धौम्यः "परोक्षेऽपि तु यद्दत्तं तीर्थे स्नातेन सोदकम्। तद्दानं सोदकं प्राहुरनन्तफलदायकम्। परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु। परोक्षेऽपि च यद्दत्तं भावपूर्वेण चेतसा। गुरुमित्रद्विजातिभ्यस्तत्तु दानमनन्तकम्। परोक्षे खलु यद्दत्तं स्वस्यक्षरविवर्जितम्। दृश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते"। आपस्तम्बः "तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनः। त्रिमात्रस्तु प्रयोक्तव्यः कर्म्मारम्भेषु सर्वशः। तिस्रः साङ्गास्तु कर्त्तव्या मात्रास्तत्वार्थचिन्तकैः। देवताध्यानकाले न प्लुतं कुर्यात् न संशयः।" वृद्धवशिष्ठः "नामगोत्रे समुच्चार्य्य सम्प्रदानस्य चात्मनः। सम्प्रदेयं प्रयच्छन्ति कन्यादाने तु पुंस्त्वयम्। पुंस्त्वयमिति प्रपितामहादिपुरुषत्रयमित्यर्थः। तदुक्तं "नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्। नाम सङ्कीर्त्तयन् विद्वानन्यत्र पितृपूर्वकम्। तथा दानहोमजपान् कुर्वन्नासीनः कुशसंस्तरे। एषां फलमनन्तन्तु लभते प्राङ्मुखोनरः"। स्मृत्यन्तरात् "नामगोत्रे समुच्चार्य्य सम्यक् श्रद्धान्वितो वदेत्। सङ्कीर्त्य देशकालादि तुभ्यं सम्प्रददे इति। न ममेति स्वस्वत्वस्य निवृत्तिमपि कीर्त्तयेत्" षट्त्रिंशन्मतात् "प्रणीते तु समिद्धेऽग्नौ जुहुयाद्व्याहृतित्रयम्। उदगग्रेषु दर्भेषु पात्रं तेषूपपादयेत्। प्रागग्रेषु स्वयंस्थित्वा दाता च परमेश्वरम्। ध्यात्वा स्वपुण्यसङ्कल्प्य दक्षिणां प्रतिपादयेत्। समस्ता व्याहृतीर्जुहुत्वा तत्रोपरि समापयेत्। ब्राह्मणं प्रणिपत्याथ ततः पात्रं विसर्जयेत्। अनेन विधिना दानं दातव्यं होमपूर्वकम्। तत् कर्म दक्षिणावर्ज्जं होमवर्ज्जञ्च नार्हति"। एतच्च विहिताङ्गभूतहोमवैकेषु होमानुवादपुरःसरमुपदर्शितं तत्तद्गुणविधिपरम्। अन्यथा ह्यतथाऽदृष्टशिष्टाचारेषु ताम्बूलादिदानेष्वपि प्रसङ्गः स्यात्। ततःपरं प्रतिग्रहीतृधर्म्मास्तत्रोक्तास्ते च प्रतिग्रहीतृशब्दे द्रष्टव्याः।

दातृप्रतिग्रहीतृधर्म्मधर्म्मास्तत्रोक्ता यथा

गरुड़पुराणे "दैवं वा कर्म्म पित्र्यं वा नाशुचिः कर्त्तुमर्हति। स्नानमेव द्विजातीनां परं शुद्धिकरं स्मृतम्। अतः स्नातोऽहमेति दाने चैव प्रतिग्रहे। कृतमस्नायिना कर्म राक्षसत्वाय कल्पते। प्रजापतिः कर्म्मगुप्त्यै पवित्रमसृजत्पुरा। रक्षोघ्नमेतत् परमं मुनिभिः कल्पितं सदा। तस्मात्तत्करयोर्द्वार्य्यं ददता प्रतिगृह्णता। स्नानहोमजपादीनि कुर्वता च विशेषतः। संत्यज्य

वैष्णवं मार्गं ब्रह्ममार्गविनिर्गतम्। सकृत् प्रदक्षिणीकृत्य पवित्रमभिधीयते"। वायुपुराणे "दानं प्रतिग्रहो होमो भोजनं बलिरेव च। साङ्गुष्ठेन सदा कार्यमसुरेभ्योऽन्यथा भवेत्"। साङ्गुष्ठेन 'अङ्गुलीसङ्गताङ्गुष्ठेन। "एतान्येव च कार्याणि दानादीनि विशेषतः। अनजानु विधेयानि तद्वदाचमनं नृप!"। बौधायनः "भोजनं हवनं दानमुपहारः प्रतिग्रहः। बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतम्"। ब्रह्माण्डपुराणे "नाधिकारी सुक्तकच्छो सुक्तचूडस्तथैव च। दाने प्रतिग्रहे यज्ञे ब्रह्मयज्ञादिकर्मसु। देयाः समेत्य वस्त्रं हि तच्च पुंसामकल्पयन्। ततश्च वाससा हीनमसंपूर्णं प्रचक्षते। सोत्तरीयस्ततः कुर्यात् सर्वकर्माणि भावतः। अधौतं कारुधौतञ्च परिदध्याच्च वाससी। ददानः प्रतिगृह्णंश्च दध्यादहतमेव च"। वराहपुराणे "सुस्नातः सम्यगाचान्तः कृतसंध्यादिकक्रियः। कामक्रोधविहीनश्च पाषण्डस्पर्शवर्जितः। जितेन्द्रियः सत्यवादी पात्रं दाता च शस्यते" तथा "प्रमीते गोत्रपुरुषे सूतके वा समागमे। दशरात्रमनर्हः स्यात् कर्तुं दानप्रतिग्रहौ। पिण्डोदकादि मृतके दातुं प्रेताय युज्यते। अच्छिन्नायां तथा नाड्यां दानार्हौ मृतसूतके"। विष्णुधर्मोत्तरे "शुचिर्वाथ्यशुचिर्वापि दद्यादभयदक्षिणाम्। शुचिनाऽशुचिना वापि याच्ञा भय उपस्थिते"। छन्दोगपरिशिष्टे कात्यायनः "कुशोपरिनिविष्टेन तथा यज्ञोपवीतिना। देयं प्रतिग्रहीतव्यमन्यथा विफलं हि तत्"। व्याघ्र जातूकर्ण्यः "ओङ्कारेण दद्यात् प्रतिगृह्णीयाच्च"। स्कन्दपुराणे "प्रणवो जगतां बीजं वेदानामादिरेव च। एष एव वरं ब्रह्म पवित्रमयमुत्तमम्। तस्मात् प्रणवमुच्चार्य कार्यौ दानप्रतिग्रहौ" यमः "योऽर्चितं प्रतिगृह्णाति योऽर्चयित्वा प्रयच्छति। तावुभौ गच्छतः स्वर्गं विपरीते विपर्ययः"। लिङ्गपुराणे "दद्याद्दानं यथा शक्त्या सदाभ्यर्चनपूर्वकम्। ब्राह्मणश्चापि गृह्णीयाद्भक्त्या दत्तं प्रतिग्रहम्"। शातातपः "प्रश्नपूर्वन्तु यो दद्यात् ब्राह्मणाय प्रतिग्रहम्। स पूर्वं नरकं याति ब्राह्मणस्तदनन्तरम्"। प्रश्नपूर्वमिति एतमध्यायम् एतमनुवाकं वा यदि त्वमस्खलितं पठसि तदा तदेतावद्ददामीत्युक्त्वा तथा कृते यद्दीयते तत् प्रश्नपूर्वकम्। व्यासः "अयमानेन यो दद्याद्गृह्णीयाद्यः प्रतिग्रहम्। तावुभौ नरके मग्नौ वसेतां शरदां शतम्"। शातातपः "कार्यलोभेन योदद्याद्गृह्णीयाद्यः प्रतिग्रहम्। दाताधो नरकं याति ब्राह्मणस्तदनन्तरम्"। विष्णुधर्मोत्तरे "प्रतिग्रहोयोविधिना प्रदत्तः प्रतिग्रहो योविधिना गृहीतः। द्वयोः प्रयोगस्तरमन्तु कार्यं श्रेयस्तथाप्नोति न संशयोऽत्र"।

अथ मिश्रधर्माः। नन्दिपुराणे "दाने विधिमविज्ञाय नहि तद्दातुमर्हति। प्रतिग्रहानभिज्ञस्य गृह्णन्निरयमश्नुते। सावज्ञं प्रतिगृह्णानो गृहीतापि पतत्यधः। किन्त्वं वेत्सीति वक्तव्यो न दात्रा ब्राह्मणः क्वचित्। सोऽपि पृष्टः स्वयं तेन दानार्थं तं न कीर्त्तयेत्"। यदि त्वमेतत् पठसि तदा तुभ्यमेतद्ददामीति साक्षात् परीक्षणमत्र निषिध्यते, पात्रत्वबोधार्थमुपायान्तरेण परीक्षणं त्वनुमतमेव। तदुक्तं यमेन "शीलं संवसनाज्ज्ञेयं शौचं संव्यवहारतः। प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं परीक्ष्यते"। संकथनं शुद्धभावेन विद्याकथा। वराहपुराणे "अपि सर्वस्वमात्मं हि न देयं विचिकित्सता। मनसा ह्यननुज्ञातः प्रतिगृह्णीत नैव हि। ददानः प्रतिगृह्णंश्च यतो लोभभयादिना। नाप्नोति श्रेयसा योगं निरयं चैव गच्छति।" नारदीयपुराणे "देशकालविधानाद्यैर्हीनं दानं भयावहम्। दातुः प्रतिग्रहीतुश्च गृहीतमसतः सदा।" षट्त्रिंशन्मतात् नामगोत्रे समुच्चार्य प्राङ्मुखो देयकीर्त्तनात्"। उदङ्मुखाय विप्राय दत्त्वान्ते स्वस्ति वाचयेत्। देयकीर्त्तनादिति देयकीर्त्तनोत्तरकालं दत्त्वेत्यर्थः। "प्राक्प्रत्यगास्या वोहाहे दातृग्राहकयोः स्थितिः। दद्यात् पूर्वमुखो द्रव्यमेष एव विधिः सदा"। यत्तु कीर्त्तयन्ति "प्राङ्मुखः प्रतिगृह्णीद्विवाहे तु विपर्ययः" इति तस्य समूलत्वे सिद्धे अनुष्ठानविकल्पः, तत्राप्युदङ्मुखसंप्रदानवैशिष्ट्यस्मृतेस्तदेवानुष्ठेयम्। तदुक्तं स्मृत्यन्तरे "दद्यात् पूर्वमुखो दानं गृह्णीयादुत्तरामुखः। आयुर्विवर्द्धते दातुर्गृहीतः क्षीयते तु तत्"।

देयद्रव्याणां दानमन्त्राः हेमाद्रौ खं० दर्शिता यथा तत्र कपिलायाः मातृत्वे "कपिले! सर्वभूतानां पूजनीयासि रोहिणि!। सर्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे" गङ्गस्य "पुण्यस्त्वं गङ्गे! पुण्यानां मङ्गलानाञ्च मङ्गलम्। विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे"। वृषस्य "धर्मस्त्वं वृषरूपेण जगदानन्दकारकः। अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे"।

हेम्नः "हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे"

पीतवस्त्रस्य "पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्। प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छतु"।

श्वेताश्वस्य "यस्माद्विष्णुस्वरूपेण यस्मादमृतसम्भवः। चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे"।

धेनोः "यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा। सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे"।

लौहस्य "यस्मादायसकर्माणि त्वदधीनानि सर्वदा। लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे"।

छागस्य "यस्मात्त्वं छाग! यज्ञानामङ्गत्वेन व्यवस्थितः। यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे"।

श्वेतवस्त्रस्य "शरणं त्र सर्वलोकानां लज्जाया रक्षणं परम्। सुवेशधारि त्वं यस्माद्वासः! शान्तिं प्रयच्छ मे"।

रक्तवस्त्रयुगस्य "रक्तवस्त्रयुगं यस्मादादित्यस्य प्रियं सदा। प्रदानादस्य मे सूर्यो ह्यतः शान्तिं प्रयच्छतु"।

कृष्णवस्त्रस्य "धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम्। सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहम्"।

अन्नस्य "अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः। अन्नं ब्रह्माखिलब्राह्मणमस्तु मे जन्मजन्मनि"।

सोपदंशदध्यन्नस्य "चन्द्रमण्डलमध्यस्थं चन्द्राम्बुजसमप्रभम्। दध्यन्नं तस्य दानेन प्रीयतां वामनो मम। दध्यन्नं सोपदंशञ्च ब्रह्मविष्णुशिवात्मकम्। प्रीयतां धर्मराजो हि तद्दानान्मम सर्वदा"।

सपानीयदध्यन्नस्य "पानीयसहितञ्चैतत् सदध्योदनपात्रकम्। समर्चितं तत् सफलं सदक्षिणं गृहाण दध्योदनपात्रकं मम"।

कृसरान्नस्य "सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः। नारायणः प्रसन्नः स्यात् कृसरान्नप्रदानतः"।

पायसान्नस्य "पायसं परमान्नञ्च सर्वदानोत्तमोत्तमम्। सर्वदेवतयोग्यञ्च श्रेयःपुष्टिं प्रयच्छतु"।

अपूपान्नस्य "आदित्यतेजसा भक्तं जातिश्रेष्ठ्यकरं परम्। तदन्नं मम विप्र! त्वं प्रतीच्छापूपमुत्तमम्"।

सक्तूनाम् 'प्राजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि। तस्मात् सक्तून् प्रयच्छामि प्रीयतां मे प्रजापतिः"।

रजतस्य "असुरेषु समुद्भूतं रजतं पितृवल्लभम्। तस्मादस्य प्रदानेन रुद्रः सम्प्रीयतां मम"।

ताम्रपात्रस्य "परापवादपैशून्यादभक्ष्यस्य च भक्षणात्। तत्प्रजातञ्च यत् पापं ताम्रपात्रं प्रशाम्यतु"।

कांस्यपात्रस्य "यानि पापानि काम्यानि कामोत्थानि कृतानि च। कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा"।

स्वर्णगर्भतिलपात्रस्य "देवदेव! जगन्नाथ! वाञ्छितार्थफलप्रद!। तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितेरहम्"।

दर्पणस्य "दर्शनेन त्वमादर्श! नृणां मङ्गलदायकः। शौर्यसौभाग्यसत्कीर्त्तिनिर्मलज्ञानदो भव"।

शुक्लानाम् "ताम्रपर्ण्यर्णवोत्पन्ना वर्णाद्याकल्पवर्णिताः। शुक्लाः शुक्लप्रभवाः सन्तु भुक्तिमुक्तिप्रदा मम"।

सुवर्णपद्मस्य "त्वदुद्भवो जगत्स्रष्टुर्वेधसो हेमपङ्कजः। पद्मावासहरेर्नाभिजातो मां पाहि सर्वदा"।

सिंहस्य "कान्तारवनदुर्गेषु चौरव्याघ्राकुले पथि। हिंसकास्तु न हिंसन्तु सिंहदानप्रभावतः"।

अङ्गुलीयकस्य "हिरण्यगर्भसम्भूतं सौवर्णमङ्गुलीयकम्। धर्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः"।

वलयस्य "काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदम्। विभूषणं प्रदास्यामि विभूषयतु मां सदा"।

कुण्डलद्वयस्य "क्षीरोदमथने पूर्वमुद्भूतं कुण्डलद्वयम्। श्रिया सह यदुद्भूतं दद्रे श्रीः प्रीयतां मम"।

तुलस्याः "मणिकाञ्चनपुष्पाणि मणिमुक्तामयानि च। तुलसीपत्रदानस्य कलां नार्हन्ति षोडशीम्। तुलसीपत्रदानाद्वा ब्रह्मणः कायसम्भवम्। पापप्रशमनं यातु सर्वे सन्तु मनोरथाः"।

दुग्धस्य "अलक्ष्मीहरणं नित्यं नित्यं सौभाग्यवर्द्धनम्। क्षीरं मङ्गलमायुष्यं ततः शान्तिं प्रयच्छ मे"।

नवनीतस्य "कामधेनोः समुद्भूतं विष्णोस्तुष्टिकरं परम्। नवनीतं प्रदास्यामि बलं पुष्टिञ्च देहि मे"।

आज्यस्य "कामधेनुसमुद्भूतं देवानामुत्तमं हविः। आयुर्विवर्द्धनं दातुराज्यं पातु सदैव माम्"।

तैलस्य "तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम्। अमाङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे"।

पादुकायाः "कण्टकोच्छिष्टपाषाणवृश्चिकादिनिवारणम्। पादुकां सम्प्रदास्यामि विप्र! प्रीत्या प्रगृह्यताम्"।

चामरस्य "शशाङ्करसङ्काश! हिमडिण्डीरपाण्डुर। प्रोत्सारयाशु दुरितं चामरामरवल्लभ!"।

चन्दनखण्डस्य "चन्दनावासमन्दारसखे। वृन्दारकार्चित!। चन्दन! त्वत्प्रसादान्मे सान्द्रानन्दप्रदो भव"।

चन्दनाद्यनुलेपनस्य "श्रीखण्डकाण्डकर्पूरकस्तूरीकुङ्कुमा-

न्वितम्। विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम"।

कस्तूर्याः "समस्तेभ्योऽपि वस्तुभ्यः संस्तुतासि सुरासुरैः। विन्यस्ताऽङ्गेषु कस्तूरी सुखदाऽस्तु सदा मम"।

कर्पूरस्य "कन्दर्पदर्पदो यस्मात् कर्पूर! घ्राणतर्पण!। अमलात्मभवस्तापस्त्वद्दानादपसर्पतु"।

गोपीचन्दनस्य "यदभूदङ्गसंलग्नं कुङ्कुमादिविलेपनम्। जलक्रीडासु गोपीनां द्वारवत्यां जलार्पितम्। गोपीचन्दनमित्युक्तं मुनीन्द्रैः किल्बिषापहम्। तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितम्"।

शिवप्रतिमायाः "त्वया सुराणामसृतं पिबाय हालाहलं संहृतमेव यस्मात्। तथाऽसुराणां, त्रिपुरञ्च दग्धं मेकेषुणा लोकहितार्थमीश!। तव प्रदानादहमप्यदोषी दोषैर्विमुक्तस्तु गुणान् प्रपद्ये। तथा कुरु त्वं शरणं प्रपद्ये मयि प्रभो! देववर! प्रसीद"।

उमामहेश्वरयोः "प्रसीदतु भवोनित्यं कृत्तिवासा महेश्वरः। पार्वत्या सहितोदेवोजगदुत्पत्तिकारकः"।

शिवलिङ्गस्य "शिवशक्त्यात्मकं यस्मात् जगदेतच्चराचरम्। तस्मादनेन सर्वं मे करोतु भगवान् शिवम्। कैलासवासी गौरीशो भगवान् भगनेत्रभित्। चराचरात्मकोलिङ्गरूपी दिशतु वाञ्छितम्"।

मरकतलिङ्गस्य "इदं मारकतं लिङ्गं रौप्यपीठसमन्वितम्। धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम्। सम्प्रदद्यां विधानेन यथोक्तं फलमस्तु मे"।

काश्मीरलिङ्गस्य "काश्मीरलिङ्गपक्षे तु इदं काश्मीरजं वदेत्"।

सप्तसप्तभूमेः "सर्वभूताश्रया भूमिर्वराहेण समुद्धृता। अनन्तसप्तफलदा अतः शान्तिं प्रयच्छ मे"।

ऊर्णायाः "ऊर्णा मेषसमुत्पन्ना शीतवातभयापहा। यस्मात्तु-पारहारी स्यादतः शान्तिं प्रयच्छ मे"।

ऊर्णापटस्य "ऊर्णपटमनुष्येयं स्वर्णबीजं तव प्रभो!। दत्तं गृहाण देवेश! पापं संहर सत्वरम्"।

धान्यस्य "धन्यं करोषि दातारमिह लोके परत्र च। तस्मात् प्रदीयते धान्यमतः शान्तिं प्रयच्छ मे"।

गोधूमानाम् "यस्मादत्रमयोजम्बूद्वीपो गोधूमसम्भवः। गान्धर्वौषधदः अतः शान्तिं प्रयच्छ मे"।

सुक्तानाम् "सुक्तबीजानि वै यस्मात् प्रियाणि परमेष्ठिनः। तस्मादेषां प्रदानेन प्रीतिः सिद्धतु मे सदा"।

चणकस्य "पुरा गोवर्द्धनोद्धारसमये हरिभक्षिताः। चणकाः सर्वपापघ्ना अतः शान्तिं ददत्वमी"।

लवणस्य "रसानामग्रजं श्रेष्ठं लवणं बलवर्द्धनम्। ब्रह्मणा निर्मितं साक्षादतः शान्तिं प्रयच्छतु"।

यवानाम् "धान्यराजाय माङ्गल्या द्विजप्रीतिकरा यवाः। तस्मादेषां प्रदानेन ममास्त्वभिमतं फलम्"।

तिलानाम् "तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः। तिलदानेन सर्वं मे पापं नाशय केशव!"।

शर्करायाः "अमृतस्य कलोत्पन्नाः इक्षुधाराजशर्करा। सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे"।

खण्डस्य "मनोभवधनुर्मध्यादुद्भूतः शर्कराजनिः। तस्मादस्य प्रदानेन मम सन्तु मनोरथाः"।

गुडस्य "प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसोमतः। मम तस्मात् परां लक्ष्मीं ददस्व गुड! सर्वदा"।

मधुनः "यस्मात्पितॄणां श्राद्धे त्वं पीतं मध्वमृतोद्भवम्। तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात्"।

उदकुम्भस्य "वारिपूर्णघटोपेतं देवतयमयं यतः। प्रीयतां धर्मराजोऽस्तु दानेनानेन पुण्यदः"।

उपानहोः "उपानहौ प्रदास्यामि कण्टकादिनिवारणे। सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छतम्"।

व्यजनस्य "सुविता सर्वजन्तूनां शैत्यानन्दकरी शुभा। पितॄणां तृप्तिदा नित्यमतः शान्तिं प्रयच्छ मे"।

शालग्रामस्य "महाकोषनिवासेन चक्राद्यैरुपशोभितम्। अस्य देव! प्रदानात्तु मम सन्तु मनोरथाः"।

शिवनाभस्य "महाकोषनिवासी ते महादेवो महेश्वरः। प्रीयतां तव दानेन अतः शान्तिं प्रयच्छ मे"।

वैतरण्याः "यमद्वारे महाघोरे या सा वैतरणी नदी। तान्तर्तुकामोयच्छामि उत्तारय सुखेन माम्"।

धेनोः "यस्मात्त्वं पृथिवी सर्वा धेनुर्वैष्णवसन्निभा। सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे"।

उत्क्रान्तिधेनोः "मृत्युक्रान्तौ प्रदत्तस्य सुखक्रान्तिविवृद्धये। तुभ्यं सम्प्रददे नाम्ना गां सुतृक्रान्तिसंज्ञिताम्"।

मेष्याः "वाङ्मनःकायजनितं यत्किञ्चिन्मम दुष्कृतम्। तत् सर्वं विलयं यातु त्वद्दानेनोपसेविनाम्"।

शूलस्य "भगवन्! शूलहस्तेश! दक्षाध्वरविनाशन!। तवायुधप्रदानेन शूलं नश्यतु मे सदा"।

लोहपात्रस्य "यानि पापान्यनेकानि मया कामकृतानि च। लोहपात्रप्रदानेन तानि नश्यन्तु सर्वदा"।

रौप्यपात्रस्य "अगम्यागमनं चैव परदाराभिमर्षणम्। रौप्य-

पात्रप्रदानेन तानि नश्यन्तु मे सदा"।

हिरण्यतिलानाम् "तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः। विष्णुप्रीतिकरा नित्यमतः शान्तिं ददत्वमी"।

हिरण्यप्रतिलपात्रस्य "तिलाः पुण्याः पवित्राश्च सर्वकामकराः शुभाः। शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः। यानि कानि च पापानि ब्रह्महत्यासमानि च। तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा"।

कुष्माण्डस्य "ब्रह्महत्यादिपापघ्नं ब्रह्मणा निर्मितं पुरा। कुष्माण्ड! बहुबीजात्मन्नतः शान्तिं प्रयच्छ मे"

फलस्य "इदं फलं मया विप्र! प्रभूतं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि"।

मण्डकानाम् "आदित्यतेजसोत्पन्नाः सर्वमङ्गलकारकाः। मण्डकाः सर्वपापघ्ना अतः शान्तिं ददत्वमी"।

स्वर्णपात्रस्य "जन्मान्तरसहस्रेषु यत् कृतं दुरितं मया। स्वर्णपात्रप्रदानेन तस्य शान्तिरिहास्तु मे"।

आरोग्यार्थाज्यस्य "या याऽलक्ष्मीर्यदङ्गेषु सर्वगात्रे व्यवस्थिता। तत् सर्वं शमयाज्यं त्वं लक्ष्मीं पुष्टिं च वर्द्धय"।

पापक्षयार्थाज्यस्य "आज्यं तेजः सहृद्दिष्टमाज्यं पापहरं स्मृतम्। आज्यं सुराणामाहारं आज्ये देवाः प्रतिष्ठिताः"।

आयुधस्य "त्वं देवानां मनुष्याणां रक्षसामायुधो ह्यसि। तस्मात् सर्वप्रयत्नेन शान्तिर्भवतु सर्वदा"।

भक्ष्याणाम् "केशवप्रीतिदा भक्ष्याः शम्भुब्रह्मार्कतुष्टिदाः। पृथिव्यिन्द्रोपपूषाद्याः यच्छन्तु बलमीरसम्"।

काष्ठानाम् "सोमोद्भवानि दारूणि जातवेदःप्रियाणि च। तस्मादेषां प्रदानेन श्रियं देहि विभावसो!"।

कलशस्य "अग्निवर्णोद्भवो नाम बलकीर्तिप्रवर्द्धनः। कुलशः सर्वपापघ्नः अतः शान्तिं प्रयच्छ मे"।

कृष्णतिलस्य "सदा रोहन्ति बीजानि काले कृष्टे महीतले। तव प्रदानात्सफला मम सन्तु मनोरथाः"।

संक्रान्तिशूलस्य "सर्वग्रहर्क्षतारेश! सर्वेश! त्वं हि भास्कर!। संक्रान्तिशूलदोषं मे निवारय दिवाकर!"।

पुस्तकस्य "सर्वविद्याश्रय ज्ञानकरणं ललिताक्षरम्। पुस्तक सम्प्रयच्छामि प्रिया भवतु भारती"।

तण्डुलानाम् "यज्ञेन जायते विश्वप्राणिनां प्राणरक्षणम्। तण्डुला वैश्वदेवत्वात् पाकेनान्न भवन्ति ये। पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि। तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः"।

पुष्पाणाम् "आश्रयन्ति मनो यस्मात् तस्मात् सुमनसः स्मृताः। दत्ता ददतु मे नित्यमत्याहृद्युतां श्रियम्"।

जीरकस्य "जीरको जायते यस्मान्मङ्गलं शुभकर्मसु। तस्माज्जीरकदानेन प्रीयतां गिरिजा मम"।

ताम्बूलस्य "ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम्। अस्य प्रदानात् ब्रह्माद्याः शिवं ददतु पुष्कलम्"।

ताम्बूलकरङ्कस्य "पूरितं पूगपूरेण नागवल्लीदलान्वितम्। पूर्णेन पूर्णपात्रेण कर्पूरपूरकेण च। सपूगखण्डनं दिव्यं गन्धर्वाप्सरसां प्रियम्। करङ्क! त्वं गुणाधारस्त्वत् प्रदानात् कुरुष्व माम्"।

हरिद्रायाः "लक्ष्मीप्रिया या लक्ष्मीदा लक्ष्मीवद्वसनप्रिया। सौभाग्यकृद्वरस्त्रीणां हरिद्रा श्रीप्रदाऽस्तु मे"।

सौभाग्यवस्त्रयुग्मस्य "कञ्चुकीवस्त्रयुग्मैश्च तथा कर्णावतंसकैः। कण्ठसूत्रैश्च भूषाभिः प्रीयतां निशिनन्दिनी"(सीता)।

शूर्पस्य "रामपत्नि! महाभागे! पुण्यमूर्त्ते! निरामये!। गृहाणेमानि शूर्पाणि मया दत्तानि जानकि!"।

कमण्डलोः "कमण्डलुर्जलैः पूर्णः स्वर्णगर्भः सुलक्षणः। अर्पितस्ते महाशैव! प्रसन्नश्च सदा भव"।

यज्ञोपवीतस्य "ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितम्। ब्राह्मं जन्मास्तु मे देव! ब्रह्मसूत्रसमर्पणात्"।

अक्षमालायाः "अष्टाविंशतिसंख्याकैरक्षाक्षैर्योजिता मया। अर्पिता तव हस्ते च गृहाण सुरसैन्धक!"।

स्वर्णनागस्य "विधुन्तुद! नमस्तुभ्यं सिंहिकानन्दनाव्यय!। दानेनानेन नाराम्य रक्ष मां वेधजात्ययात्"।

इक्षुदण्डस्य "इक्षुदण्डं महापुण्यं रसाढ्यं सर्वकामदम्। तुभ्यं दास्यामि तेनाशु प्रीयतां परमेश्वरः"।

गन्धद्रव्यस्य "कर्पूरः कदलीभूतो देवदेवप्रियः सदा। भाग्योत्तमो नृपाणाञ्च तद्दानात् सुखमश्नुते। जटामांसुद्भवं देवीशशिनाभिसमुद्भवम्। भक्त्याहं संप्रदास्यामि मम सन्तु मनोरथाः"।

सूर्यमूर्त्तेः "ददाति भानुर्भवनं सर्वोपस्करसंयुतम्। मनोऽभिलषितावाप्तिं करोतु मम भास्करः"।

गणेशप्रतिमायाः "यमामनन्ति विघ्नेशं विघ्ननाशसुपासुतम्। विघ्नेशं तं विप्रवर! तुभ्यं दास्याम्यभीष्टदम्"।

गोमात्रस्य "अङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च"।

शय्यायाः "यस्मादशून्य शयनं केशवस्य शिवस्य च। शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि"।

रत्नस्य "यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः। तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः"।

भूमेः "यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्। दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह"।

दासाः "इयं दासी मया तुभ्यं श्रीवत्स! प्रतिपादिता। तव कर्म्मकरी भोग्या यथेष्टं भद्रमस्तु मे"।

रथस्य "रथाय रथनाथाय नमस्ते विश्वकर्म्मणे। विश्वभूताय नाथाय ब्रह्मणाय नमोनमः"।

कवचस्य "रक्षासलोभयत्राणं कुरु केशव! मे प्रभो!। कवचत्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम्"।

शिबिकायाः "देवदेव! जगन्नाथ! विश्वात्मन्! दत्तयानया। प्रभो! शिबिकया देव! प्रीतो भव जनार्दन!।

गृहस्य "इदं गृहं गृहाणेदं त्वं सर्वोपस्करसंयुतम्। तव विप्र! प्रसादेन ममास्त्वभिमतं फलम्"।

आश्रयस्य "समाश्रयं प्रयच्छामि प्रीत्यर्थं ते जगन्निधे!"। तव विप्र! प्रसादेन ममास्त्वभिमतं फलम्"।

कन्यायाः "गौरीकन्यामिमां विप्र! यथाशक्ति विभूषिताम्। गोत्राय शर्म्मणे तुभ्यं विप्र! त्वं तां समाश्रय"।

महिष्याः "चन्द्रादिलोकपालानां या राजमहिषी शुभा। महिषीदानमाहात्म्यादस्तु मे सर्वकामदम्। धर्म्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः। महिषासुरस्य जननी साऽस्तु मे सर्वकामदा"।

गवां महिष्याः "महिषीं वत्ससंयुक्तां सुशीलाञ्च पयस्विनीम्। रत्नवस्त्रेण पुष्पेण दत्त्वा मृत्युञ्जयेश्वरः"।

मेषस्य "रोमसङ्ग्रामसम्भाद्यैः सर्वोपकरणैः शुभः। जगतः, सम्प्रदत्तोऽसि त्वामतः प्रार्थये शिवम्"

अजायाः "देवानां योऽस्य हव्यवाहनः सर्वपूजितः। तस्य त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः। अग्निमान्द्यं पूर्वकर्मविपाकोत्थन्तु यन्मम। तत्सर्वं नाशय क्षिप्रं जठराग्निं विवर्द्धय। त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रा भवती परा। त्वत्प्रसूत्युत्थिता यस्याः तस्याच्छान्तिकरी भव"।

तुलापुरुषादीनां देयद्रव्याणां मन्त्रांस्तु तत्तच्छब्दे द्रष्टव्याः। अन्यद्रव्यदानमन्त्रा अपि केचित् क्वचिदुक्ता अनुसन्धेयाः।

दानक न० कुत्सितं दानम् "दान कुत्सिते" पा०ग०सू०यावा० कन्। कुत्सिते दाने।

दानकाम त्रि० दानं कामयते कम-स्वार्थे णिङ् अण्। दानशीले "गौतमस्तोमेन यदीक्षेद्दानकामा मे प्रजा स्यादिति" आश्व०श्रौ० ८।३।१४।

दानच्युत पुंस्त्री गोत्रप्रवर्त्तकभेदे कार्त्तकौ० बाभ्रवशब्देनास्य द्वन्द्वे पूर्वपदे प्रकृतिस्वरः बाभ्रवदानच्युताः।

दानधर्म्म पु० दानरूपो धर्मः। दानात्मके धर्मे स च भारते आनुशासनपर्व्वणि ५७ अध्यायावधिषु ६९ अध्यायान्तेषु विस्तरेणोक्तः। अन्यच्च "अथातः संप्रवक्ष्यामि दानधर्ममनुत्तमम्। अर्थानामुचिते पात्रे श्रद्धया प्रतिपादनम्। दानन्तु कथितं तज्ज्ञैर्भुक्तिमुक्तिफलप्रदम्। न्यायेनोपार्जयेद्वित्तं दानभोगफलञ्च तत्। अध्यापनं याजनञ्च वृत्तिर्विप्रे प्रतिग्रहः। रक्षणं विजयश्चैव क्षत्रवृत्तिरुदाहृता। कुसीदं कृषिवाणिज्यं वैश्यवृत्तिः सुभावना। यद्दीयते च पात्रेभ्यस्तद्दानं परिकीर्त्तितम्। नित्यं१ नैमित्तिकं२ काम्यं३ विमलं४ दानमीरितम्। अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे। अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम्१। यत्तु पापोपशान्त्यै च दीयते विदुषां करे। नैमित्तिकं२ तदुद्दिष्टं दानं सद्भिरनुष्ठितम्। अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते। दानं तत् काम्य(३)माख्यातमृषिभिर्धर्मचिन्तकैः। ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते। चेतसा सत्ययुक्तेन दानं तत् विमलं४ स्मृतम्" इत्युपक्रम्य गारुडे ५१अ०उक्तः। "दानधर्मात् परोधर्मो भूतानां नेह विद्यते" तत्रैवाध्याये

दानपति पु० ६त०। १अक्रूरे यादवभेदे। "गच्छत्वयं दानपतिः क्षिप्रमानयितुं व्रजात्। नन्दगोपञ्च गोपांश्च करदान् मम शासनात्" हरिवं० ७९ अ०। "यंसङ्घैः स्यन्दनेनाशु प्राप्तो दानपतिर्व्रजम्" ८२ अ०। २वस्तुप्रदे, त्रि० "यज्वा दानपतिर्धीमान् यथा नान्योऽस्ति कश्चन" भा० आ०२२२अ०। ३असुरभेदे पु०। "रथोत्कटो दानपतिः शैलभ्रंशी कुलाकुलः" हरिवं०१४० अ० असुरोक्तौ।

दानपात्र न०६त०। दानयोग्ये ब्राह्मणभेदे दानशब्दे दृश्यम्

दानफल न० ६त०। दानजन्ये फलभेदे तत्र दानभेदे कतिचित् फलभेदा वह्नि०पु०उक्ता यथा

"गत्वा यद्दीयते दानं भक्त्या पात्रे विधानतः। तदनन्तफलं विद्धि अवस्थात्रितये नृप!। तमोद्वतस्तु यो दद्यात् भयात् क्रोधात्तथैव च। नृप! दानन्तु तत् सर्वं भुङ्क्ते गर्भस्थ एव तु। ईर्ष्यामन्युमनाश्चैव दम्भार्थं चार्थकारणात्। यो ददाति द्विजातिभ्यः स वाच्यो तु तदम्रुते। वैश्वदेवविहीनञ्च सन्ध्योपासनवर्जितम्। यद्दानं दीयते तत्र उद्वकाले तदम्रुते। दयाजन्मानि

चत्वारि इथा दानानि षोडश । तान्यहं संप्रवक्ष्यामि यथावदनुपूर्वशः । अपुत्रस्य१ इथाजन्म धर्मवाञ्छा नराः२ सदा । परपाकं सदाश्नन्ति३ परतापरतास्४ ये । देव पितृविहीनं१ यत् ईश्वरेभ्यः स्वदोषतः२ । दत्त्वानुकीर्तनाच्चैव३ वेदाग्निव्रतत्यागिने४ । अन्यायोपार्जितं दानं५ व्यर्थं ब्रह्महणे६ तथा । गुरुवेऽन्नतवक्ते७ यत् स्तेनायट पतितायट च । क्षतघ्नाय१० च यद्दत्तं सर्वदा ब्रह्मविद्विषे ११। याचकाय१२ च सर्वस्य इषल्याः पतये१३ तथा । परिचारकाय१४ भृत्याय१५ सर्वत्र पिशुनाय१६ च । इत्येतानि तु राजेन्द्र ! इथा दानानि षोडश" ।

दानव पु० दनोरपत्यम् अण् । कश्यपपत्न्याः दक्षकन्याभेदस्य दनोरपत्ये । १दानवाश्च भा०आ०६५अ०उक्ता यथा "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत ! । तेषां प्रथमतो राजा विप्रचित्तिर्महायशाः । शंबरो नमुचिश्चैव पुलोमा चेति विश्रुतः । असिलोमा च केशी च दुर्जयश्चैव दानवः । अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान् । तथा गगनमूर्द्धा च वेगवान् केतुमांश्च सः । स्वर्भानुरश्वोऽश्वपतिर्वृषपर्वाजकस्तथा । अश्वपीवश्च हरश्च हयश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ । निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा । शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा । एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" "दानवांश्च विबुधा विजिग्यिरे" माघः । दानवस्येदम् अण् । २दानवसम्बन्धिनि त्रि० स्त्रियां ङीप् । "मायाश्चास्यै ददौ सर्वाः दानवीः कामरोहिता" हरिवं० १६३अ० ।

दानवगुरु पु० ६त० । शुक्राचार्य्ये

दानवज्र पु० दैवे गान्धर्वे च वैश्यजातिके अश्वभेदे । "देवगन्धर्ववाहास्ते दिव्यवर्णा मनोजवाः । क्षीणाक्षीणा भवन्त्येते न हीयन्ते च रंहसः । पुरा कृतं महेन्द्रस्य वज्रं वृत्तनिबर्हणम् । दशधा शतधा चैव तच्छीर्णं वृत्रमूर्द्धनि । ततो भागीकृतो देवैर्वज्रभाग उपास्यते । लोके यशोधनं किञ्चित् सा वै वज्रतनुः स्मृता । वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्ररथं स्मृतम् । वैश्या वै दानवज्राश्च कर्मराजा यवीयसः । क्षत्रं वज्रस्य भागेन अवध्या वाजिनः स्मृताः । रथाङ्गं यदश्वा स्मृते शूराश्वेषु ये मताः । कामवर्णाः कामजवाः कामतः समुपस्थिताः । इति गन्धर्वजा कामं पूरयिष्यन्ति ते हयाः" भा०आ०१७०अ० ।

दानवारि पु० ६त० । १देवे २विष्णौ च । दानं गजमदरूपं वारि । ३गजमदजले न० । "सेनाचरीभवदिभाननदानवारिवासेन यस्य जनिताऽसुरभी रणश्रीः" नैष० "कटस्थलप्रोषितदानवारिभिः" माघः ।

दानवीर पु० १वीररसभेदे तदाश्रये २नायकभेदे च । "स च दानधर्मयुद्धदयया च समन्वितश्चतुर्द्धा स्यात्" । स च वीरः दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः तत्र दानवीरो यथा परशुरामः । "त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिरिति" अत्र परशुरामस्य त्यागे उत्साहः स्थायी भावः । सम्प्रदानब्राह्मणैरालम्बनविभावैः सत्याध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावितो हर्षधृत्यादिभिः सञ्चारिभिः पुष्टिं नीतो दानवीरतां भजते" सा० द० ।

दानवेय पु० दन्वाः अपत्यं दनु–स्त्रियां मनुष्यजातित्वात् ञङ् । ततः "स्त्रीभ्यो ढक्" पा० ढक् । दनुनाम्न्या दक्षकन्याया अपत्ये "दैतेया दानवेयाश्च किमिच्छन्ति पराक्रमात्" हरिवं०२२१अ० "विष्णुना निहतेष्वेव दानवेयेषु ते हताः" भा०क०७३अ० ।

दानशील त्रि० दानं शीलं सततमनुष्ठानं यस्य । बहुदातरि "यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम्" भा० भी० १२८ अ० ।

दानशौण्ड त्रि० दाने शौण्डः दक्षः । बहुप्रदे अमरः "निर्गुणोऽपि विसुखो न भूपतेर्दानशौण्डमनसः पुरोऽभवत्" माघः ।

दानसागर पु० गौडदेशप्रसिद्धे भूम्यासनानादीनां षोडशानां पदार्थानां प्रत्येकं षोडशसंख्यान्विते देयद्रव्यभेदे । "यः कश्चित् कुरुते देवि ! गृहणे दानसागरम् । इषोत्सर्गं महादानं यत् किञ्चित् पृथिवीतले" कामधेनुत० २५ पटले । दानानां सागर इव प्रतिपादकतया आधार इव । २तुलापुरुषादिमहादानानां विधानज्ञापके स्मृतिनिबन्धभेदे ।

दानयोग्य त्रि० ६त० । दानशब्दोक्ते दानस्य पात्रे ।

दानीय त्रि० दीयतेऽसौ दा–बा०सम्प्रदाने अनीयर् । १सम्प्रदाने । "दानीयः प्रभयो लयः" सुश्रु० । दानमर्हति यत् । २दानयोग्ये दानपात्रे च ।

दानु त्रि० दा–दाने दो–खण्डने वा कर्त्तरि नु । १दातरि २विक्रान्ते मेदि० । ३वायौ ४सुखे च संक्षिप्तसा० उणा० । ५दानवे च । "दानुं शयानं स जनास इन्द्रः" ऋ०

२।१२।१३। "दानुं दानवम्" माधवः भावे तु । ६दाने ७वर्षणे ८ न० "यदं न दृष्टिर्दिव्येव दानुना" ऋ०१०५ ४३।७ "दानुना दानेन वर्षणेन वा" भा० "आदित्या दानुनस्पतो" ऋ० १।१३६।५। "दानुनः दानस्य" भा० कर्मणि नु ।८दये धने च । "करत्तिस्तोमघवा दानुचित्राः" ऋ०१।१७४।७ "दानुभिर्देयैर्धनैश्चित्राः" भा०

दान्त त्रि० दम–कर्तरि क्त । १बहिरिन्द्रियनिग्रहकर्त्तरि "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वात्मन्यात्मानमवलोकयेत्" वेदान्तमारभ्य श्रुतिः । दम–णिच्–क्त नि० । २दमिते ३शिक्षिते बलीवर्दादौ त्रि० ४दमनकवृक्षे पु० राजनि० । [न्द्रियनिग्रहे च ।

दान्ति स्त्री दम–क्तिन् । १तपःक्लेशादिसहिष्णुतायां २बाह्ये-

दापित त्रि० दा–णिच्–कर्मणि क्त । १साधिते २दण्डिते दापितघनके ३प्रतिवाद्यादौ च ।

दाप्य त्रि०दा–णिच्–कर्मणि यत् । १दण्ड्ये २दापनीये च ।

दाम न० दो–खण्डने बा०करणे मन् । १पश्वादिबन्धनरज्ज्वो "खगदामैरिव चित्रिता" भा० भी०५७अ० । "सन्तानमाल्यदामं च तैरेव कुसुमैः कृतम्" हरिवं०१४५ अ० । भावे मन् २सन्धाने । दम्यते अनुशिष्यते दम–कर्मणि घञ् बा०दीर्घः । लोके विश्वसंसारे दामोदरशब्दे दृश्यम् ।

दामकण्ठ पु० गोत्रप्रवर्त्तकर्षिभेदे तस्य गोत्रापत्यम् इञ् । दामकण्ठि तदीये यून्यपत्ये ततः उपका० द्वन्द्वे बहुषु युवप्रत्ययस्य लुक् । कलसीकण्ठदामकण्ठाः दामकण्ठा वा इत्येवम् ।

दामग्रन्थि पु० मत्स्यराजविराटस्य सेनापतिभेदे 'अथ मत्स्योऽब्रवीद्राजा शतानीकं जवन्यजम् । कङ्कवल्लभगोपालादामग्रन्थिश्च वीर्यवान् । युध्येयुरिति मे बुद्धिर्वर्त्तते नात्र संशयः" भा०वि०२१अ०

दामचन्द्र पु० द्रुपदस्य पुत्रभेदे "धृष्टद्युम्नः शिखण्डी च दौर्मुखिर्जनमेजयः । चन्द्रसेनो रुद्रसेनः कीर्त्तिवर्मा ध्रुवो धरः । वसुचन्द्रो दामचन्द्रः सिंहचन्द्रः सुतेजनः । द्रुपदस्य तथा पुत्रा द्रुपदश्च महास्त्रवित्" भा० द्रो० १५८ अ०

दामन् न०स्त्री दो–खण्डने करणभावादौ मनिन् । दोहनकाले पश्वादिपादबन्धनरज्ज्वौ (काँदनदड़ि) २मालायां ३रज्जुमात्रे अमरः बहुप्रग्रहयुक्ते एकस्मिन् यत्र पशवो बध्यन्ते (टोका) ख्याते ४पदार्थे च "भाति स्म दामापपदीनमस्य" माघः स्त्रियां नान्तत्वेऽपि मनन्तत्वात् न ङीप् । दामानौ दामानः किन्तु वा ङीप् । दाम्ने दामा इष्टादि

दामनपर्वन् न० दमनस्येदमण् दामन पर्व यत्र । दमनभञ्जनतिथौ १चैत्रशुक्लचतुर्दश्याम् २तन्नामीयद्वादशादिषु च दमनशब्दे मूल दृश्यम् । "सत्तीर्थेऽर्कविषुवाके तन्तुदामनपर्वणोः" नरसिंहपु० तन्तुपर्वशब्दे दृश्यम्

दामनि पु० दमनस्यापत्यम् इञ् । १दमनस्यापत्ये २आयुष्यजीविसंज्ञभेदे च ततः स्वार्थे दामन्यादि० क । दामनीय तत्रार्थे बहुत्वे तु तद्राजत्वात्तस्य लुक् । दामनय इत्येव

दामनी स्त्री दामैव प्रज्ञा० स्वार्थे अण् अणि न नलोपः ङीप् । पशुबन्धनरज्ज्वौ अमरः "दामनीदामभासैश्च केचित् कायावलम्बिभिः । कीलैरारोप्यमाणैश्च दामनीपाशपाशितैः" हरिवं०६६अ०

दामन्यादि पु० "दामन्यादित्रिगर्त्तषष्ठादेः" पा० छप्रत्ययनिमित्ते पा०ग० स्वरूपोक्ते शब्दगणे स च गणः "दामनि औलपि वैजवापि औटकि औटङ्कि आच्युतन्ति आच्युतदन्ति शाकुन्तकि आकिदन्ति औडपि काकदन्तकि शातुन्तपि सार्वसेनि विन्दुवैन्दवि तुलम मौञ्जायन कांकन्दि सावित्रीपुत्र" ।

दामलिप्त न० तमोलिप्तनगरे (तमलुक्) हेम०

दामलिह् पु०दाम–लेढि लिह–क्विप् । १दामलेहके । तमात्मन इच्छति क्यच् दामलिह्यति ततः क्विप् । २आत्मनो दामलेहकेच्छौ "दादेर्धातोर्घः" पा०उपदेशे दादेरिति विशेषणात् अस्य उपदेशे दादित्वाभावात् न घः सि०कौ० ।

दामाञ्जन न० दाम्नः अञ्जनम् । अश्वादेः पादबन्धनरज्ज्वौ (पिछाड़ि) हेमच०दामाञ्जनमयत्वार्थे हारावली "दामाञ्जनस्खलितलोलपदं तुरङ्गाः" माघः ।

दामिनी स्त्री भीमो भीमसेनेनवत् दामा सुदामा नगः स एकदेशत्वेनास्यस्य "संज्ञायां मन्माभ्याम्" पा० इनि ङीप् । भौदामन्यां विद्युति ।

दामोदर पु० दाम बन्धनसाधनं उदरे यस्य । यशोदानन्दने कृष्णे तत्कथा "ततो यशोदा संक्रुद्धा कृष्णं कमललोचनम् । आनाय्य शकटीमूले भर्त्सयन्ती पुनःपुनः । दाम्ना चैवोदरे बद्ध्वा प्रत्यबध्नादुदूखले । यदि शक्नोषि गच्छेति तमुक्त्वा कर्म साऽकरोत्" इत्युपक्रमे "स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् । घोषे दामोदर इति गोपिभिः परिगीयते" हरिवं० ६४अ० "विदारो रोहितोमार्गो हेतुर्दामोदरः सहः" विष्णु०स० । शाङ्करभाष्ये तु अस्याप्यपि व्युत्पत्तिर्दर्शिता यथा

"दमादिसाधनेनोदरा उत्कृष्टा गतिर्या तया गम्यत इति दामोदरः। "दमाद्दामोदरं विदुरिति" महाभारते यशोदया दाम्नोदरे बद्ध इति वा "दामानि लोकनामानि तानि यस्योदरान्तरे। तेन दामोदरस्त्वेषः श्रीधरस्त्विट्समाश्रितः" इति व्यासवचनात् वा दामोदरः। "दमो बहिरिन्द्रियनिग्रहः तज्जन्यो दामः तस्येदमित्यण् ऋगतावित्ति धातोर्भावे "ऋदोरप्"पा० अपि गुणे रपरत्वे च अरः अवगतिः गत्यर्थानां ज्ञानार्थकत्वात्तस्य विशेषणमुदिति उत्कृष्ट इत्यर्थः तथा च दामो दमसाधकः उत् उत्कृष्टः अरः अवगतिः साक्षात्काररूपास्येति दामोदरः। उत्कृष्टा च गतिः धूमादिगतिमपेक्ष्यार्चिरादिः दमादिसाधनाभ्यस्य सगुणस्येति दामोदरनामनिरुक्तिः। "तर्वोर्मध्यगतं बद्ध दाम्ना गाढं तथोदरम्। ततश्च दामोदरतां स ययौ दामबन्धनादिति" ब्रह्मपुराणम् इति आनन्दगिरिः। २अतीते अर्हद्भेदे हेमच०। वर्द्धमानपुरसन्निकृष्टे शनदभेदे च। ४शालग्रामभूर्त्तिभेदे तल्लक्षणं पद्मपुराणे यथा "स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत्तु सः। चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा"। ब्रह्माण्डपुराणे "दामोदरस्तथा स्थूलो मध्यचक्रः प्रतिष्ठितः" प्रतिष्ठित इत्यत्र प्रकीर्तित इति कश्चित् पाठः। "दुर्वीभं द्वारसङ्कीर्णं पीतरेखायुतं शुभम्"। "पीतरेखा तथैव चेति" ब्रह्मपुराणे पाठः। ब्रह्मपुराणे "उपर्य्यधश्च चक्रे द्वे नातिदीर्घं मुखे बिलम्। मध्ये च रेखा लम्बैका स च दामोदरः स्मृतः"। अन्यत्र "स्थूलो दामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु यः। चक्रे तन्मध्यदेशस्थे पूजितः शुभदः सदा"। ब्रह्मवैवर्त्तप्रकृतिखण्डे "द्विचक्रं स्फुटमत्यन्तं स्थूलं दामोदराभिधम्"। मत्स्यसूक्ते "त्रिचक्रेनमतिस्थूलं लघु दामोदरं स्मृतम्"

दामोष्णीष पु० गोत्रव्यावर्त्तकप्रवरर्षिभेदे "दामोष्णीषस्त्रैबलिश्च पर्णादो वरजानुकः" भा० स० ४ अ०। युधिष्ठिरसभासभ्योक्तौ। तस्यापत्यं कर्णा०ण्य। दामोष्णीष्य तदपत्ये पुंस्त्री

दाम्पत्य न० दम्पत्योरिदं पत्यन्तत्वात् यक्। १दम्पति सम्बन्धिनि अग्निहोत्रादौ २दम्पत्योरन्योन्यप्रीतौ च "ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम्" इत्युपक्रमे "विद्याकामस्तु सिरिश्रं दम्पत्यार्थसमां सतीम्" भाग०२।३।८।

दाम्भिक त्रि० दम्भेन चरति धर्मं ठक्। लोकेषु कीर्त्यादिख्यापनार्थं धर्मचारिणि १वैडालव्रतिनि, २दम्भयुक्ते च। "पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी" मनुना रसविक्रयकर्मविपाकः दाम्भिकत्वमित्युक्तम्। "दाम्भिको दुष्कृतः प्राज्ञः शूद्रेण सदृशो भवेत्" भा०व० २१५अ०। ३वकपक्षिणि पुंस्त्री०राजनि०।

दाय दाने भ्वा०आत्म०सक०सेट्। दायते अदायिष्ट अदायिष्टम् अदायिष्यम्। ऋदित् णिच् अददायत-त।

दाय पु० दा-दाने भावे घञ्। १दाने "मिथोदायः कृतो येन गृहीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः"। अस्वामिना कृतो यस्तु दायो विक्रय एव वा" मनुः। दोङ्क्षये भावे घञ्। २क्षये अजयपालः ३स्थाने मेदि०। दो-खण्डने भावे घञ्। ४खण्डने शब्दरत्ना०५शोल्लुण्ठनभाषणे मेदि०। तस्य परोक्षस्य खण्डनरूपत्वात् तथात्वम्। दा-दाने कर्मणि घञ्। ६देये धनादौ "ते तत्र विविधान् दायान् विजयार्थं नरेश्वराः" भा०आ०१८४ अ०। "संस्थाः स्युश्चारसंस्थित्यै दत्तदायाः शुभाशयाः" काम०नीति०। "दायन्तु विविधं तत्र शृणु मे गदतोऽनघ! यत्तार्थं राजभिर्दत्तं महान्तं धनसञ्चयम्" भा०स०५।३अ०। ७विवाहकाले कन्यायै दीयमाने यौतुकादिधने कन्यादानकाले जामात्रादिभ्यो दत्ते धने व्रतान्तभिक्षादौ समाहृतब्रह्मचारिभ्यो दत्तीयमाने धने च १० विभागार्हपित्रादिधने च दायभागशब्दे दृश्यम्।

दायक त्रि०दा-दाने ण्वुल्। १दातरि "तावता गोसहस्राणां फलं प्राप्नोति दायकः" भा०व०१८२अ० "चौराणां भक्तदायकाः" मनुः। दो-खण्डने ण्वुल्। २खण्डके च। दायेन धनेन कार्यति कै-क। ३दायादे "गृह्णा इति समाख्याता यजमानस्य दायकाः" गृह्णम् दायका दायादा इत्यर्थः।

दायबन्धु पु० दाये बन्धुः। भ्रातरि शब्दरत्ना०

दायभाग पु०दायस्य सम्बन्धिभिर्भागो यत्र। अष्टादशविवादान्तर्गते विवादपदभेदे तल्लिङ्गपर्णं जीमूतवाहनकृते दायभागे यथा "अथ दायभागो निरूप्यते तत्र नारदः "विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैः"। पितृत आगतं पित्र्यं तच्च पितृमरणोत्पन्नात्मत्वसूच्यते। पित्र्यस्येति पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणं सम्बन्धिमात्रेण सम्बन्धिमात्रधनविभागेऽपि दायभागपदप्रयोगात् अतएव दायभागं विवादपदमुपक्रम्य नारदोऽपि मात्रादिधन-

विभागमप्युपदर्शितवान् तथा मनुरपि पित्रादिपदमदत्त्वैव "एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश्च दायभागं निबोधत" इत्युपक्रम्य यावत्सम्बन्धिधनविभागसङ्गतवान्। दीयत इति व्युत्पत्त्या दायशब्दो ददातिप्रयोगश्च गौणः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात् न तु मृतादीनां तत्र त्यागोऽस्ति। ततश्च पूर्वस्वामिकसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः। ननु किं दायस्य विभागो विभक्ता वयवत्वं? यद्वा दायेन सह विभागोऽसंयुक्तत्वं? न तावत् पूर्वः दायविनाशापत्तेः नापि द्वितीयः संयुक्तेऽपि न ममेदं विभक्तं स्वं भ्रातुरिदमिति प्रयोगात्। न च सम्बन्धविशेषात् सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यं सम्बन्ध्यन्तरसद्भावप्रतिपक्षस्य सम्बन्धस्यावयवेष्वेव विभागव्यङ्ग्यस्वत्वापादकत्वात् कृतस्नपितृधनगतस्वत्वोत्पादविनाशकल्पनागौरवात् यथेष्टविनियोगफलाभावेनानुपयोगाच्च। उच्यते एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः। विशेषेण भजनं स्वत्वज्ञापनं वा विभागः। यत्रापि चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषे वहनदोहनफलेन स्वत्वं व्यज्यते। तदाह बृहस्पतिः "एकां स्त्रीं कारयेत् कर्म यथांशेन गृहे गृहे। उद्धृत्य कूपशाध्यमस्वनुसारेण गृह्यते। युक्त्या विभजनीयं तदन्यथानर्थकं भवेत्"। इदं श्लोकाद्वयं नानास्थानस्थं न तु क्रमिकम्। ननु "पितर्यूर्द्ध्वं गते पुत्रा विभजेयुर्धनं पितुरिति" नारदवचनात् पितुर्धनं विभजेयुरित्यन्वयात् विभागात् पूर्वं न तत्र पुत्राणां स्वत्वं न च विभागस्य स्वत्वकारणता असम्बन्धिधनेऽप्यतिप्रसङ्गात्। उच्यते पित्रादिनिधनानन्तरमेवास्मदीयं धनमिति प्रयोगात् एकपुत्रे च विभागं विनैव स्वत्वस्वीकाराच्च सम्बन्धिनिधनमेव स्वत्वकारणमतो नातिप्रसङ्गः। नन्वर्जयितव्यापारोऽर्जनम् अर्जनाधीनस्वामिभावश्चार्जयिता तेन पुत्रव्यापारोऽजन्मैवार्जनं युक्तम् अतो जीवत्येव पितरि पुत्राणां तत्र स्वत्वं न तु तन्निधनात् अतएवोक्तं "क्वचिज्जन्मनैव यथा पितेव धने"। नैतत् मन्वादिविरोधात्। यथा मनुः "अर्द्धं पितुश्च मातुश्च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः" जीवतोरपि पित्रोः पुत्राणां कुतो न विभाग इत्याशङ्कायामिदमुत्तरं तदानीमस्वामित्वादिति। न च भार्या पुत्रश्चेत्यादिवत् अस्वातन्त्र्याभिप्रायमिति वाच्यं तदानीं स्वत्वे प्रमाणाभावात् भार्यादिषु तु यत्ते समधिगच्छन्ति अर्जयन्तीति स्वत्वे सिद्धे युक्तमस्वातन्त्र्यवर्णनम्। किञ्च स्वोपात्तेऽपि तेषामस्वामित्वे स्वधनसाध्यवैदिककर्मोच्छेदात् श्रुतिविरोधः स्यात्। देवलश्च पितृधने अस्वाम्यमेव स्पष्टयति यथा "पितुर्यूर्ध्वं परते पुत्रा विभजेयुर्धनं पितुः। अस्वाम्यं हि भवेद्देवां निर्देशे पितरि स्थिते"। किञ्च जीवत्यपि पितरि पितृधने पुत्राणां स्वामित्वे पितुरनिच्छयापि विभागः स्यात् जन्मनैव स्वत्वमित्यत्र प्रमाणाभावाच्च अर्जनरूपतया जन्मनः स्मृतावनधिगमात्। क्वचिज्जन्मनैवेति च जन्मनिबन्धनत्वात् पितापुत्रसम्बन्धस्य पितृमरणस्य च स्वत्वकारणत्वात् परम्परया वर्णनम्"।

अस्य मते च पुत्राणां पित्राद्युपरमादावेव तद्धने स्वत्वं तच्चैकदेशनिष्ठम्।

मिताक्षरादिप्राचीनमते जन्मनैव पुत्राणां पितृधने स्वत्वं तच्च समुदितद्रव्यनिष्ठमिति भेदः।

तदेतत् प्राचीनमतं वीरमित्रोदये जीमूतवाहनमतनिराकरणेन परिष्कृत्य समर्थितं यथा

"यत्र मन्वादिवचनव्याख्यासु बहुधा बुधाः। विवदन्ते दायभागः स प्रबन्धेन वर्ण्यते"। तल्लक्षणमाह नारदः "विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैरिति"। पितोरयं पित्र्यम् इति कृतैकशेषात्पितृशब्दाद्यत् अर्थे मातृधनस्यापि विभागकथनात्। पित्र्यस्य पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणम् पत्नीत्यादिनान्येषामपि भर्त्रादिधने तत्तिरूपणात्। अतएवोपक्रमे मनुना पित्रादिपदमुपात्तम्। "एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश्च दायधर्मं निबोधतेति"। "दायधर्मोऽयत्र विभागरूपोऽभिप्रेतस्तस्यैवाग्रे लक्षणकथनपूर्वकस्तिरूपणात् उद्देशावसरेऽपि "स्त्रीपुन्धर्मो विभागश्चेति" तस्यैव विवादपदत्वेनोद्देशात्। अतएवाग्रे यावत्सम्बन्धिधनविभागमेव प्रदर्शितवान्मनुः। दायशब्दश्चायं स्वामिसम्बन्धमात्रलब्धस्वत्ववद्द्रव्यं वदति।

अथ च निबन्धकारः "विभक्तव्यं पितृद्रव्यं दायभाङ्मनीषिणः" इत्याह। यत्रापि पितृपदं सम्बन्धिमात्रोपलक्षणमन्यत्रापि दायशब्दप्रयोगात्। विभक्तव्यं विभागार्हमित्यर्थः अन्यथैकपुत्रादिस्वामिके विभागाभावाद्दायशब्दस्याचता न स्यात्। यत्तु जीमूतवाहनेन (दीयत इति व्युत्पत्त्या दायशब्दो ददातिपयोगत्व गौणः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात्। न तु मृतादीनां तत्र त्यागोऽस्ति। तच्च पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्येऽन्यस्य स्वत्वं तत्र निरूढोदायशब्द) इत्युक्तं, तन्न सुन्दरम् निरूढत्वाङ्गीकारे दायददातिशब्दयोर्गौणत्वोपन्यासानर्थक्यात्। सर्वथाऽवयवार्थराहित्ये हि निरूढत्वम्। न च योगरूढत्वम् अवयवार्थबाधस्य स्वयमेवोपन्यासात् गौणमवयवार्थं परिकल्प्य तदङ्गीकारस्य निष्प्रयोजनत्वमन्योन्याश्रयत्वमसम्भवविरोधो व्याघातश्च। तत्स्वाम्योपरम इति च। जन्मनापि स्वत्वस्योपपादयिष्यमाणत्वाद्व्यापकम्। विभागशब्दस्त्वनेकस्वाम्यानां द्रव्यसमुदायविषयाणां तत्तदेकदेशे व्यवस्थापने शक्तः। अतएवैकपुत्रादीनां पित्रादिधनस्वाम्ये विभागशब्दाप्रयोगो दायोऽनेन लब्ध इत्येव च प्रयोगः। यत्रापि चैकं दासीगवादि बहुसाधारणं तत्रापि तत्तत्काल विशेषनियतदासदोहनादिना तस्य तस्य सुखव्यञ्जनादस्त्येकदेशस्वाम्यव्यवस्थापनरूपो विभागशब्दार्थः। अतएव "एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे" इति "उद्धृत्य कूपवाप्यम्भस्त्वनुसारेण गृह्णते"। "युक्त्या विभजनीयं तदन्यथानर्थकम्भवेदिति" च बृहस्पत्यादिवचनेषु वक्ष्यमाणरीत्या तदुपपादयिष्यते। स च दायोद्विविधोऽप्रतिबन्धः सप्रतिबन्धश्च। पुत्रादीनां पित्रादिधने पुत्रत्वादिनैव सत्यपि स्वामिनि पित्रादौ जन्मनैव स्वत्वोत्पत्तेः तेषामप्रतिबन्धादायः स्वामिसद्भावस्याप्रतिबन्धकत्वात्। यत्तु विभक्तस्यासंसृष्टिनोऽपुत्रस्य मृतस्य भ्रात्रादीनां तद्धनरूपोदायः स सप्रतिबन्धः स्वामिसद्भावस्य प्रतिबन्धकस्यापगम एव तत्र स्वत्वोत्पत्तेः। तत्र द्वयोरपि सप्रतिबन्ध एव दायः। स्वामिसद्भावे पुत्रादीनामपि जन्ममात्रेण स्वत्वस्य वक्तुमशक्यत्वात्। तथाहि। यदि जन्मनैव पुत्रादीनां पित्रादिधने स्वत्वं स्यात्तर्ह्युत्पन्नमात्रस्य पुत्रादेस्तत् साधारणमिति तदनुमतिं विना द्रव्यसाध्येष्वाधानादिषु पित्रादीनामनधिकारापत्तौ "जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति" स्मृतिविरोधः। किञ्च विभागात् प्राक्पित्रादिप्रसादलब्धस्याविभाज्यत्ववचनं व्यर्थं स्यात्। यदि हि पित्रा पुत्रान्तरानुमत्या यदि दत्तं सर्वैरेव दत्तमिति विभागप्राग्भावादेव प्रतिषेधोऽनर्थकः। अननुमत्या तु साधारणद्रव्यस्य दानमेव न सम्भवतीति पित्रादिप्रीतिदत्तत्वादिवचने युक्तिरयुक्ता। एवं पुत्राद्यनुमतिमन्तरेण स्त्र्यादीनामपि भर्त्रादिभिः प्रीतिदानस्यासम्भवात्तदनुमतौ तु तैरपि दत्तत्वात्। "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथाकाममर्थीयाद्दद्याद्वा स्थावराद्ऋते इति"। वचने यथाकाममर्थीयाद्दद्याद्वेत्यनेनाविभाज्यत्वं भर्तृप्रीतिलब्धस्य यदभिहितं तदपि व्यर्थम्। न चेदमविभागावस्थायां प्रीतिदानं तस्य चाविभाज्यत्वं प्रतिपादयति किन्तु स्थावराद्ऋते यद्दत्तमित्यन्वयाद्विभागोत्तरमपि भर्त्रा स्त्रियै स्थावरस्य प्रीत्या देयमज्ञानाद्दत्तमपि तेन पुत्रादिभिरपहृत्य विभजनीयमस्थावरन्तु न प्रत्याहर्त्तव्यमित्यनुवादमात्रम् स्थावरस्य स्त्रियै प्रीतिदानप्रतिषेधमात्रं तात्पर्येण बोधयतीति शङ्कनीयम्। तथान्वयस्य व्यवहितयोजनाप्रसङ्गेनायुक्तत्वात्। स्थावरप्रीतिदानप्रतिषेधमात्रता समर्पकत्वेऽन्यांशस्यानुवादमात्रं व्यर्थत्वापरपर्यायत्वापद्यते।

अथ "मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः। स्थावरस्य तु सर्वस्य न पिता न पितामहः"। तथा "पितृप्रसादाद्भुञ्जन्ते वस्त्राण्याभरणानि च। स्थावरन्तु न भुञ्जीत प्रसादे सति मेदक इति" वचनमवश्यं विभागप्राक्कालीनस्थावरप्रसाददानप्रतिषेधपरं वाच्यं मणिमुक्तादिप्रसाददानानुमतिपुरःसरं तत्प्रतिषेधाभिधानात् अन्यथा तस्यानुवादमात्रत्वेन वैयर्थ्यापत्तेः; तथा च जन्मना पुत्रादीनां स्वत्वान्मणिमुक्तादिषु तदनुमतिमन्तरेणापि दाने पितुः स्वातन्त्र्यम्। स्थावरे तु तदनुमत्यैवेति विशेष इति वचनद्वयार्थस्य वाच्यत्वाज्जन्मना स्वत्वमायातीति, नैवम् तस्य पितामहोपात्तस्थावरविषयत्वात्। कृतीते पितामहे तत्स्वाम्यनाशात्पितापुत्रयोः साधारणे तदीयद्रव्यस्वत्वेऽपि स्थावर एव पुत्रानुमत्यपेक्षा मणिमुक्तादौ तु नेति तदर्थात्। यत्तु गौतमवचनम् "उत्पत्त्यैवार्थस्वामित्वं लभते इत्याचार्याः" इति। जन्मनः स्वत्वहेतुत्वे मिताक्षराकृता प्रमाणत्वेनोपन्यस्तान्दायभागदायतत्त्वकृता व्याख्यातमेव।

पितृस्वत्वोपरमे तज्जन्यत्वस्य हेतुभूतेनोत्पत्तिमात्रसम्बन्धे-नान्यसम्बन्धाधिकेन जनकधने पुत्राणां स्वामित्वात्तद्धनं पुत्रोलभते नान्यः सम्बन्धीत्याशयं मन्यन्त इति। न तु पितृस्वत्वे विद्यमानेऽपि तत्र पुत्रस्वत्वमिति तदर्थः। नारददेवलवचनविरोधात्। "पितर्यूर्ध्वं गते पुत्रा विभजेयुर्धनम्पितुरिति" नारदः पितुर्धनमित्याह। अन्यथा धनं विभजेयुरित्येवावक्ष्यत्। "पितर्युपरते पुत्रा विभजेयुर्धनम्पितुः। अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते इति"। देवलोऽपि पितुर्धनमित्युक्त्वोत्तरार्द्धेनास्वाम्यं हीति स्पष्टमेव तेषामस्वत्वं तत्र हेतुत्वेनोक्तवान्। निर्दोषे पातित्यादिस्वत्वापगमकदोषरहिते। मनुरपि "ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोरिति" जीवतोर्मातापित्रोस्तद्धने पुत्राणामस्वाम्यं व्यक्तमेवाह। यत्तु गङ्गाविखितावाहतुः "न जीवति पितरि पुत्रा रिक्थमभजेरन्। यद्यपि स्वाम्यमस्वादधिगतन्तैरनर्हा एव पुत्रा अर्थधर्मयोरस्वातन्त्र्यादिति" स्मृतिचन्द्रिकाकारेण च व्याख्यातम्। यद्यपि "तैः पुत्रैःस्वकीयजन्मनः पश्चादनन्तरमेव पितृधने स्वाम्यमधिगतं प्राप्तन्तथापि जीवति पितरि तद्धनं तदिच्छां विना न विभजेरन्नर्थधर्मयोरस्वातन्त्र्यात्पितृपारतन्त्र्यादिभागकरणेऽनर्हाः पुत्रा" इति। तेनानेन वचनेन जनना पुत्रादीना पित्रादिस्वामिकधने स्वत्वमिति" तदपि न मन्वादिवचनानां बहूनामस्वाम्यप्रतिपादकानामनुरोधेनास्वाम्यार्थस्य वर्णनीयत्वात्। वर्णितञ्च कल्पतरौ "यद्यपि पश्चादधिते पितृधनव्यापारनिरपेक्षैः पुत्रैर्विद्यादिभिरुपात्ते धने स्वाम्यन्तथापि तत्राप्यस्वाम्यञ्जीवति पितरि, किन्तु पितृधने अर्थधर्मयोस्तेषां पितरि जीवत्यस्वातन्त्र्यादिति। किञ्च स्वत्वं शास्त्रैकसमधिगम्यं तत्र च रिक्थक्रयादिवज्जन्मनः स्वत्वहेतुत्वेनानुक्तेर्जन्मना स्वत्वमप्रमाणकमेव। अतएव यथा भार्यादिवचनम् "भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति"। पारतन्त्र्यप्रमात्रप्रतिपादनपरन्तथाऽस्वाम्यवचनान्यपीत्यपास्तम्। भार्यादिष्वध्यग्न्यादिवचनैः कर्त्तृत्वादिसाधनकत्वेन स्वामित्वे सिद्धे युक्तमस्वातन्त्र्यप्रमात्रपरत्वमन्यथा श्रौतादिषु धनसाध्येषु पुराणादिश्रुतन्तेषामधिकारित्वमपि विरुद्धेत। अत्र तु प्रत्युत जन्मनः स्वत्वहेतुत्वे प्रमाणाभावादव्यर्थमेवान्यथानेकवचनवर्णनम्। किञ्च यदि स्वत्वं लौकिकं स्यात्तर्हि तदुपायानामपि लौकिकत्वात् "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्ध्वा, क्षत्रियस्य विजितम् निर्विष्टं वैश्यशूद्रयोरिति" गौतमवचनं व्यर्थमेव स्यादनुवादमात्रत्वाच्च हि पाकादोदनो भवतीत्यादि शास्त्रे निष्प्रयोजनमनुवादमात्रं सच्यते। तस्य हि वचनस्यायमर्थः। रिक्थं दायः क्रयः प्रसिद्धः। संविभागो दायस्यैकदेशनिष्ठस्वामित्वव्यञ्जकोविभागः। परिग्रहः पूर्वमपरेणास्वीकृतस्यारण्यादिसाधारणप्रदेशसम्बन्धिनस्तृणजलकाष्ठादेः स्वीकारः। अधिगमोऽज्ञातस्वामिकस्य निध्यादेः प्राप्तिः। एतेषु स्वत्वहेतुषु सत्सु स्वामी भवति। जातेषु च जायते। ब्राह्मणस्य लब्धं प्रतिग्रहादिप्राप्तमधिकमसाधारणं रिक्थादयस्तु सर्वसाधारणाः। अधिकमित्युत्तरत्र सर्वत्र सम्बध्यते। क्षत्रियस्य विजितं युद्धविजयदण्डादिप्राप्तमसाधारणम्। वैश्यस्य निर्विष्टं कृषिगोरक्षणादिभृतिलब्धम्। शूद्रस्य द्विजशुश्रूषादिभृतिलब्धम्। निपूर्वस्य विशेर्भृतिवाचकत्वम् "निर्वैशोभृतिभोगयोरिति" त्रिकाण्डाभिधानात्। वैश्यशूद्रयोरुपलक्षणत्वादन्येषामप्यनुलोमजप्रतिलोमजातानां "सूतानामश्वसारथ्यम्" इत्याद्यौशनसादिप्रतिपादितं वृत्तिजातं निर्विष्टशब्देन संगृह्यते सर्वस्य भृतिरूपत्वात्। किञ्च "योऽदत्तादायिनो हस्तान्निषेत ब्राह्मणोधनम्। याजनाध्यापनेनापि यथा स्तेनस्तथैव सः"। इत्यदत्तादायिनश्चौरस्य हस्ताद्याजनादिस्वतन्त्र्यापि धनमर्ज्जयतो दण्डविधानमनुपपन्नं स्वत्वस्य लौकिकत्वे। स्वतन्त्र्यार्ज्जयतोनिरपराधत्वात् मन्यते तु शास्त्रैकसमधिगम्यत्वात् स्वत्वस्य चौरदातृकयाजनादावेतद्वचनादेव स्वत्वानुत्पादकत्वात्तद्विधानमनुपपन्नतरम्। अपि च मम स्वमनेनापहृतमिति व्यपदेशो न स्यात् स्वत्वस्य लौकिकत्वे अपहर्त्तुरेव तत्र स्वत्वात्। मन्यते त्वपहारस्य निषिद्धत्वेन स्वत्वानुत्पादकत्वादुपपन्नोऽयं व्यपदेशः। यदि च सुवर्णत्वादिकमिव तत्र स्वत्वमपि प्रत्यक्षप्रमाणकन्तर्हि सुवर्णत्वादौ यथा न सन्देहस्तथास्य स्वमिदमस्य वेत्यपि सन्देहो न स्यान्निर्णीतत्वात्। इदमेवोक्तं संग्रहकारेण। "वर्त्तते यस्य यद्वस्तु तस्य स्वामी स एव न। अन्य स्वमन्यहस्तेषु चौर्याद्यैः किन्न दृश्यते। तस्माच्छास्त्रत एव स्यात् स्वाम्यं नानुभवादपि। अस्यापहृतमेतेन न

युक्तं वक्तुमन्यथा। विदितोऽर्थागमः शास्त्रे तथाऽवर्णि पृथक् पृथगिति"। शास्त्रे "स्वामी रिक्थक्रयेत्यादौ" साधारणासाधारणरूपोऽर्थागमः स्वतोपायः पृथक् पृथग्वर्णितस्तथा विदितो लौकिकत्वे तच्छास्त्रानर्थक्यं स्याल्लोकविदितत्वादित्यर्थः। अन्यत् स्पष्टम् यथावर्णमिति स्मृतिचन्द्रिकायां पाठः। पूर्वपाठस्तु मदनरत्नलिखितः। अथ यदयस्य यथेष्टं विनियोज्यं तत्तस्य स्वमिति लोकप्रसिद्धेर्यथेष्टविनियोज्यत्वं स्वत्वमिति चौर्यादार्जितेनातिप्रसङ्गस्तत्र चौरादेर्यथेष्टविनियोज्यत्वाभावाद्विनियोगकाले त्रासादिदर्शनात्। अतएव सन्देहोऽप्युपपन्नः सुवर्णत्वादितुल्यत्वाभावात् स्वत्वस्य। नैवम् असम्भवात्। शास्त्रेण सर्वस्य कुटुम्बभरणादौ विनियोगविशेषनियमादैच्छिकविनियोगविषयत्वस्य कुत्राप्यप्रसिद्धेः। तदयाह संग्रहकारः शङ्कोपन्यासपुरःसरम् "न च स्वमुच्यते तद्यत् स्वेच्छया विनियुज्यते। विनियोगोऽस्य सर्वस्य शास्त्रेणैव नियम्यते इति"। अत्र पूर्वार्द्धे शङ्कोपन्यास उत्तरार्द्धे तत्परिहारः। न च रिक्थादिवदुत्पत्त्यैवार्थस्वामित्वमिति गौतमवचने उत्पत्तेरपि जन्मापरपर्यायायाः स्वत्वहेतुत्वोक्तेः सत्यपि स्वत्वस्य तदुपायानाञ्च शास्त्रैकसमधिगम्यत्वे जन्मना पुत्रादेः पित्रादिधने स्वत्वमस्त्वतमेवेति वाच्यम् तस्यानेकदूषणैरन्यथा व्याख्यानस्य प्रागेवोक्तत्वात्। इदमेवाभिसन्धाय धारेश्वरेणापि शास्त्रैकसमधिगम्यमेव स्वत्वमिति सिद्धान्तितम्। अपि च। जीवत्यपि पित्रादौ पुत्रादेस्तद्धने जन्मना स्वत्वे तदनिच्छायामपि पुत्रादीच्छयैव विभागः स्यात्। अस्वातन्त्र्यवचनाच्चैवमिति चेत् न तथा सति दृष्टादृष्टविरोधमात्रं भवेद्व्यवहारस्तु सिद्ध्येदेव। यथा पित्रादिभिः सह पुत्रादिभिस्तुल्याद्व्यवहारे प्रवर्त्त्यमाने तेषां दृष्टादृष्टयोः श्रेयोविघातमात्रं शिष्ये पितुः पुत्र इत्यादि वचनार्थ इति प्राक्प्रपञ्चितं तथात्रापि स्यात्। अस्त्विति चेन्न सकलनिबन्धविरोधात्। क्वचिज्जन्मनैवेति प्राचीनग्रन्थलिखनमपि जन्मनिबन्धनत्वात्पितापुत्रादिसम्बन्धस्य पितृमरणस्य च तत्स्वत्वापगमहेतुत्वेन परम्परया वर्णनीयम्। किञ्च। ऊर्द्ध्वं पितुश्चेत्यादि मनुवचनं जन्मना पुत्राणां स्वत्वपरं जीवति पितरि सत्यपि पुत्राणां स्वाम्ये तदिच्छया विभाग विभागः ऊर्ध्वन्तु स्वेच्छयेति विभागनिषेधार्थं तदिति वाच्यं तन्न्याय्यम् अस्वाम्यपरत्वापत्तेः। न च पितुरपरमकालविधानार्थमिति युक्तम् दृष्टार्थत्वाद्विभागस्योभयस्याप्यनुपपत्तेः। नापि नियमविधिर्विभागस्य "एवं सह वसेयुर्वा पृथग् वा धर्मकाम्यया" इति मनुना विकल्पाभिधानात्। कालविधौ च पितुरपरमानन्तरकाल एव विभागो नैमित्तिकस्य निमित्तानन्तर्यबाधोऽयं स्यात्। जातेष्टिवज्जातप्राणवियोगापत्तिस्वरूपविशेषविरोधस्यात्राभावात्। अतो जीवतोः पित्रोस्तद्धने स्वाम्यं नास्ति किन्तु परतयोस्तयोरिति तत्कालीनास्वत्वज्ञापनार्थं मन्वादिवचनं विभागस्तु स्वातन्त्र्यात्तत्कालीन इच्छाप्राप्तोऽनूद्यते। तथा चैतद्वचनविरोधादपि न जन्मना स्वत्वं वक्तुं शक्यम्। उपरमवत्प्रतितत्वादिकमपि पित्रादिस्वत्वनाशकारणं वक्ष्यते। तस्मात् पित्रादिस्वत्वनाश एव तद्धने पुत्रादीनां स्वाम्यं न तत्स्वत्वसमकालीनमिति स्वाम्यादिसङ्कल्पस्य सर्वत्र प्रतिबन्धकत्वात् सर्वोऽपि सप्रतिबन्ध एव दाय इति द्वैविध्यमनुपपन्नमिति। अत्रोच्यते। यदि स्वत्वापगम एव पुत्रादीनां तद्धने स्वत्वं तर्हि निर्दोषे पित्रादौ जीवति तेषां धनसाध्यवैदिककर्मस्वनधिकारप्रसङ्गे "जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यादि श्रुतिविरोधस्तुल्यः स्वकपोलकल्पितहेत्वाभाससमर्थितस्मृत्यर्थानुरोधेन श्रुति सङ्कोचोऽयुक्तः। आहिताग्नाविष्टप्रथमयज्ञे पित्रादौ जीवत्यपि पुत्रादीन् प्रति तत्प्रवृत्त्यविशेषात्। सकलयाज्ञिकशिष्टानां तदनुष्ठानदर्शनाच्च। जातपुत्रकृष्णकेशपदाभ्यां वयोऽष्टवानतिक्रमस्यैव विवक्षा न तु तयोरव्यवस्थितयोः स्वरूपेणेति विरोधाधिकरणे भाष्यवार्त्तिकादौ स्थितत्वात्। न च यथा पुत्रानुमत्या पितुर्भवन्मते तदधिकारस्तथा मन्मतेऽपि पुत्रादीनामपि पित्राद्यनुमत्येति वाच्यम्। यतो द्वयोरपि मते पितुः स्वत्वस्य धने विद्यमानत्वात् स्वत्वत्यागरूपप्रधाननिष्पत्तिरविहता भवन्मते तु पुत्रादीनां स्वत्वस्यैवाभावादनुमतेश्च स्वत्वजनकत्वाद्यागादिप्रधाननिष्पत्तिरेव कथम्। वस्तुतस्तु पितुः पुत्रानुमतिरपि नापेक्षिता स्वातन्त्र्यात्। पित्राद्यनुमतिस्तु पुत्रादेरपेक्षिता पारतन्त्र्यादित्येतावान् विशेषो यथा स्त्रियाः स्वधनेनापीष्टापूर्त्तादिव्रतादौ भर्त्रादेरनुमतिस्तत्पारतन्त्र्यवचनात्। अननुमतौ तु स्वतन्त्रः प्रत्यवायो वैगुण्यं वा कर्मणि न तु प्रधानस्वरूपानिष्पत्तिः। पित्राद्यनुमतेः स्वत्वोत्पादकत्वञ्चैतदनुरोधात्कल्प्यमानमलौकिकमशास्त्रीयञ्च। तस्माच्छास्त्रैकसमधिगम्येऽपि स्वत्वे कथञ्चिज्जन्मनोऽपि

रिक्थादिवचनादधिगमादिपदेन संग्रह आवश्यकः श्रुति स्मृतिपुराणशिष्टाचारसिद्धस्य निर्दोषे जीवत्यपि पित्रादौ पुत्रादियज्ञाद्यनुष्ठानाधिकारस्यानुरोधात्। वस्तुतस्तु लौकिकमेव स्वत्वं लोके च जातमात्राणामेव पुत्रादीनां पित्रादिधने स्वाम्यव्यवहारोऽन्येषामपीति साधयिष्यामः। यच्च पित्रादीनामनुमत्ययोग्यपुत्रादिसाधारणस्वत्वे कथमनुमतिमन्तरेणाधानादिकं स्यादित्युक्तन्तदनुमतियोग्येष्वपि पुत्रादिषु स्वातन्त्र्यात्पित्रादीनां न तदनुमत्यपेक्षा किमुतानुमत्ययोग्येष्विति परिहृतप्रायमेव तद्विधिबलादेवाधिकारोऽवगम्यत इति तु विज्ञानेश्वराचार्यः। अतश्चोत्पत्त्यैवार्थस्वामित्वमिति गौतमवचनस्य यज्ञीमूतवाहनरघुनन्दनाभ्याम्मारम्मरिकोत्पत्तिस्वत्वहेतुत्वेन व्याख्यानं कृतन्तदपि व्यर्थमेव। यत्तु शङ्खवचनस्यापि स्मृतिचन्द्रिकोक्तव्याख्यैव साधीयसी। कल्पतरूक्तव्याख्यायान्तु विद्याद्युपात्ताध्याहारेऽनुपस्थितभूयःपदाध्याहारः प्रसज्येत। जन्मपदाध्याहारस्तु पुत्रत्वाद्याक्षेपस्थितेरल्पाध्याहाराच्च नायुक्तः। तेन स्मृत्युपष्टम्भस्मृत्यनुरोधान्मनुनारदवचनादिवचनानामेवास्वातन्त्र्यपरत्ववर्णनमुचिततरम्। यदप्युक्तं प्रीतिदत्तस्याविभाज्यत्ववचनानि जन्मना स्वत्वाभ्युपगमेऽनुपपन्नानीति। तदपि न अनुमत्यभिप्रायेण स्थावरप्रीतिदानाभावस्थिरीकरणार्थतयोपपत्तेः। स्वातन्त्र्याद्वा पितुरनुमतिमन्तरेणापि तेन दत्ते स्थावरव्यतिरिक्ते पुत्राणामविभाज्यत्वमुच्यते। अतएव स्थावरे विशेषवचनम् "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानन्न च विक्रयः" इति। मणिमुक्ताप्रवालानामित्यादिवचनन्तु जन्मना स्वत्वपक्ष एवोपपन्नतरम्। न च पितामहोपात्तस्थावरमात्रविषयत्वमिति युक्तम्। न पिता न पितामह इति द्वयग्रहणात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यपि न देयमिति वचनं जन्मना स्वत्वङ्गमयति। यथा परमते मणिमुक्ताप्रवालादीनां पैतामहानामपि पितुरेव स्वत्वन्तत्स्मरणात्तथास्मिन् मतेऽपि पुत्रादीनान्तत्र जन्मना स्वत्वे साधारणेऽपि पितुर्दानाधिकार इत्यविशेषः। तस्मात्पैतृके पैतामहे च द्रव्ये पुत्रादीनां यद्यपि जन्मनैव स्वत्वं तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु च प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति ध्येयम्। स्थावरादौ तु स्वार्जितेऽपि पित्रादिपरम्पराप्राप्ते च पुत्रादिपारतन्त्र्यं तुल्यमेव। "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानन्न च विक्रयः" इत्यादि वचनात्। अस्याप्यपवादो वक्ष्यते यच्च स्वत्वस्य शास्त्रैकसमधिगम्यत्वाच्छास्त्रे च जन्मनः क्वापि स्वत्वहेतुतानभिधानात् कथञ्जन्मना पुत्रादीनाम्पित्रादिधने स्वत्वस्वीकार इत्युक्तम्। तत्तु शास्त्रैकसमधिगम्यत्वमभ्युपेत्यापि गौतमादिवचन उत्पत्तेरपि स्वत्वोक्तेः परिहृतमेव प्राक्। वस्तुतस्तु न स्वत्वस्य शास्त्रैकसमधिगम्यत्वं युक्तियुक्तम्। सर्वथा शास्त्रज्ञानगन्धरहितानां प्रत्यन्तवासिनां म्लेच्छादीनामपि मम स्वमिदं नान्यस्य स्वमिति व्यपदेशस्तत्कृतश्च क्रयविक्रयादिव्यवहारो दृश्यते। तेनान्वयव्यतिरेकाभ्यां क्रयाद्युपायकं स्वामित्वमपि तैर्यथेष्टविनियोगार्हत्वरूपं पदार्थान्तररूपं वा प्रत्यक्षादिप्रमाणादेवावगतमित्यवश्यं वाच्यम्। एतत्तर्कौपष्टब्धोऽनुमानवाक्यप्रयोगोऽपि विज्ञानयोगिनोक्तः "स्वत्वं लौकिकं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवत्" इत्यन्वयदृष्टान्तः। आहवनीयादीनां हि शास्त्रैकसमधिगम्यानां न लौकिकार्थक्रियासाधनत्वमस्तीति व्यतिरेकदृष्टान्तः। तेनान्वयव्यतिरेकौ हेतुः। यद्यप्याहवनीयादीनामपि यागादिलौकिकक्रियासाधनत्वमस्ति। तथापि तल्लोकप्रमाणकाग्न्यादिरूपेण नालौकिकाहवनीयादिरूपेणेति न व्यभिचारः। इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैवेति सुवर्णत्वादिना भरणाद्यर्थक्रियासाधनत्वात्तद्यथालौकिकं रूपमेवं स्वत्वमपि सर्वानुगतं लौकिकमेव नह्यस्वत्वेन क्रयादिक्रियानिर्वाहो लोके। न चैवं स्वामी रिक्थेत्यादिस्मृतीनां लोकसिद्धार्थानुवादकत्वेनानर्थक्यापत्तिरिति वाच्यम्। धर्माधर्मोपयोगितया व्याकरणस्मृतावनादियाचकत्वतदभावरूपसाधुत्वासाधुत्वविवेकस्येव तस्योपपत्तेः। साधुशब्दाधिकरणे ह्येतदवस्थितं यत्सङ्कीर्णव्यवहारिणां लोकानामविविक्तं लौकिकमेव साधुत्वं शास्त्रेण विविच्यते। नत्वलौकिकसाधुत्वं साधुभिर्भवितव्यमित्यादिविधावन्योन्याश्रयप्रसङ्गादित्यादि। एवमत्रापि तथा च नयविवेके भवनाथः "लोकसिद्धञ्चार्जनञ्च-

न्मादि अतएवानिन्द्यं प्रथमलोकधीविषयव्यवस्थितं तच्चिबन्धनार्थां स्मृतिर्व्याकरणादिस्मृतिवदिति । जन्मादीत्यादिपदेन क्रयादिग्रहणम् । व्याकरणादित्यादिपदेन सङ्गीतरत्नपरीक्षासामुद्रिकाणां ग्रहणम् । रागादीनामपि हि लोकसिद्धानामेवानभियुक्तान् प्रति विवेकार्थमेव तल्लक्षणकथनमित्युक्तं स्मृत्यधिकरणे आचार्यचरणैः । स्वामी रिक्थेत्यादिवचनन्तु प्रागेव व्याख्यातम् । रिक्थशब्दस्तु निष्प्रतिबन्धदायपरः संविभागशब्दश्च सप्रतिबन्धदायपर इति मिताक्षरायां विज्ञानेश्वरेण व्याख्यातम् । स्मृतिचन्द्रिकाकृता तु रिक्थं पित्रादिधने पुत्रादीनां स्वामित्वापादकं जन्मनैवेति व्याख्याय संविभागः पित्रादिधने विशेषनिष्ठस्वामित्वसम्पादको विभाग इति संविभागशब्दो व्याख्यातस्तच्च स्वस्य सतो विभागात् स्वत्वहेतुत्वेन तत्प्रतिपादनानौचित्यात् । एकदेशव्यवस्थापनमात्रं हि स्वत्वस्य विभागेन क्रियते । सुख्यासुख्यहेतुत्वग्रहणे स्वामिपदे वैरूप्यापत्तेः । अतएवाह मिताक्षरायां विज्ञानेश्वराचार्यः 'विभागशब्दश्चानेकस्वामिकधनविषयः प्रसिद्धो नान्यदीयविषयो न प्रक्षीणविषय इति' । लोके पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरमेव । यदपि पत्नी दुहितरश्चेत्यादिवचनं तदपि स्वामिसम्बन्धनिबन्धनानेकदायहरप्राप्तौ लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिरासार्थम् । प्रायेण व्यवहारस्मृतीनां लोकसिद्धार्थानुवादकत्वमिति सकलनिबन्धृभिरभिधानात् । नियतौपायिकं स्वत्वं लोकसिद्धमेवेति भगवतोगुरोरपि संमतम् । लिप्सानये हि तृतीये वर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशङ्क्य द्रव्यार्जनप्रतिग्रहादीनां स्वत्वसाधनत्वं लोकसिद्धमेवेति पूर्वपक्षः समर्थितस्तेन । न च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संवर्त्तेत । प्रलपितमिदङ्केनापि । अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति' अन्येन । अस्यार्थटीकाकृता विवृत एवम् । यदा द्रव्यार्जननियमानां क्रत्वर्थत्वन्तदा नियमानां स्वत्वोपायतामिदं शास्त्रं न बोधयति क्रत्वर्थताबोधने व्यापृतत्वात् । तथा सति प्रतिग्रहादिप्राप्तस्य स्वत्वमित्यत्र प्रमाणाभावादस्येन च स्वत्वत्यागात्क्रयागासम्भवात् कस्येह द्रव्यार्जननियमा भवेयुरिति पूर्वपक्षासम्भव इति ग्रन्थार्थः । प्रलपितमित्याद्युत्तरस्तस्यार्थः । अर्जनप्रतिग्रहादेः स्वत्वहेतुतायाः लोकसिद्धत्वेन शास्त्रस्य तत्रानुपाराच्चियमानां क्रत्वर्थतैव तेन गम्यत इति न यागासम्भवो नियमानर्थक्यञ्चेति । सिद्धान्तेऽपि तेन स्वत्वस्य लौकिकत्वाभ्युपगमेनैव विचारप्रयोजनमुक्तम् 'अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति' । अस्यार्थ एवं विवृतः । यदा द्रव्यार्जननियमानां क्रत्वर्थत्वन्तदा नियमार्जितेनैव क्रतुर्न नियमातिक्रमार्जितेन द्रव्येण । न तु पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे । सिद्धान्ते अर्जननियमस्य क्रत्वर्थत्वाभावात्केवलपुरुषार्थत्वात्नियमातिक्रमार्जितेनापि द्रव्येण क्रतुसिद्धिरप्रत्यूहा पुरुषस्यैव तु नियमातिक्रमदोष इति अनेन नियमातिक्रमार्जितस्यापि स्वत्वमभ्युपगतमन्यथा क्रतुसिद्ध्यभिधानविरोधात् । तत्रैवाधिकरणे कुमारीस्वामिनोऽप्यत्रभवतः स्वत्वं लौकिकमित्येवाभिमतमिति । तत्रत्यवार्त्तिकतन्त्ररत्नाभियोगभाजां सुलभमेव । अतएवाह शास्त्रदीपिकायां, पार्थसारथिः रागप्राप्तं तावदर्जनञ्च शास्त्रीयम् । रागतश्च पुरुषार्थतया प्राप्तैः प्रत्यक्षेणैवार्जितं द्रव्यं पुरुषस्मीणयत् पुरुषार्थं विज्ञायते न तदनुमाने क्रत्वेकशेषतया शक्यं विज्ञातुम् । तस्मात् पुरुषार्थं द्रव्यं क्रतुरपि पुरुषकार्य्यामन्यतम इति कार्य्यान्तरवत् क्रतावप्युपयुज्यत इत्येतावान् विशेषः । नतु तस्यैवाङ्गं तथा सति जीवनलोपात् क्रतुरेव न प्रवर्त्तेतेति प्रभट्टकेन । अत्रार्जनस्य शास्त्रीयत्वन्निरस्यता स्वत्वस्य तदुपायानाञ्च लौकिकत्वं स्पष्टतरमेवोक्तम् । अन्यदपि तेनैवोक्तम् । तस्मात् पुरुषार्थेन्द्रव्यार्जनमेवञ्च दृष्टार्थम्भवति । नियमस्तु दृष्टाभावात्कामदृष्टार्थः स्यात् । अदृष्टमपि पुरुषार्थार्जनविषयत्वात् । नियमस्य पुरुषगतत्वमेव कल्प्यते । तेनासावुपायान्तरेणार्जयन् प्रत्यवेतीति गम्यत इति । ततश्च स्वामी रिक्थेत्यादिवचसां लौकिकमेव रिक्थादीनां स्वत्वोपायत्वमनूद्य तदतिरिक्तोपायनिवृत्तौ तात्पर्य्यन्नियमविधवेति नानर्थक्यशङ्कापि तृप्तिसाधनभोजनाश्रितदिङ्नियमवत् । द्रव्यार्जनमेव क्रत्वर्थपुरुषार्थत्वविचारो दाहरणन्नियमस्तु पूर्वपक्षयुक्तितयोपन्यस्तः । स एव तत्रोदाहरणमित्येव भट्टगुरुमतयोर्भेदः स्वत्वस्य लौकिकत्वं तूभयसम्मतमिति निष्कर्षः । तत्तद्भूषणभूमण्यादि तु तन्नाभियोगवतामाकरे एव व्यक्तं प्रस्तुतानुपयोगादिह नोच्यते । एतेन चौर्यादिप्राप्तस्यापि स्वत्वं

स्यादिति यत्संग्रहकारधारेश्वराभ्यां स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदपि परास्तम्। चौर्यादिषु स्वत्वोपायत्वस्य लोकप्रसिद्धेरन्यस्य स्वमिदमस्येत्येवं व्यवहारात्। क्रयाद्युपायसन्देहादेव स्वत्वसन्देहोऽपीदमस्य वान्यस्य वेत्याकारोनानुपपन्नः। मम स्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वादिति च यत्स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदप्येतेनामूलविशीर्णम्। यच्चोक्तं संग्रहकृता "शास्त्रेण सर्वस्य तत्र विनियोगनियन्त्रणाद्यथेष्टविनियोगार्हत्वरूपस्वत्वासम्भवः इच्छया क्वापि नियोगासम्भवादिति। तदप्यापाततः न हि वयमैच्छिकविनियोगोपस्थितत्वं ब्रूमोऽपि तु तदर्हत्वमात्रम्। अन्यथा राजादिभयादिच्छाप्रतीघातेऽपि तत्र विनियोगेच्छानिच्छादशयोश्च स्वत्वतदभावौ विरुद्धौ प्रसज्येयाताम् राजादिनियन्त्रणादिव शास्त्रनियन्त्रणादन्यत्रैच्छिकविनियोगाभावेऽपि तदर्हत्वस्यानपायात्। अतएव दुर्वृत्तेनाशास्त्रीयविनियोगे स्वत्वव्यवहारो नास्ति। प्रत्यवायमात्रपरं शास्त्रातिक्रमात्। तदर्हत्वं च तदर्जितत्वप्रयुक्तमस्त्येव। तथा च नयविवेकेऽप्युक्तम्। "तत्र तस्य तदर्हं यद्येनार्जितमिति"। तदर्हं यथेष्टविनियोगार्हमित्यर्थः प्रतिबन्धादङ्कुरमजनयतोऽपि कुमूलस्थबीजस्य बीजत्वप्रयुक्तमङ्कुरोत्पादनार्हत्वमिव। वस्तु तस्तु बीजत्वाङ्कुरार्हत्वयोरिव स्वत्वत्वयथेष्टविनियोगार्हत्वयोरपि भेद एव। अन्यथार्हतावच्छेदकाऽपरिचयेऽर्हताया दुर्निरूपत्वात्। तेन ब्राह्मण्यमिव स्वत्वमपि तदुपायज्ञानव्यङ्ग्यं पदार्थान्तरमेवोत्पत्तिविनाशशालि। ब्राह्मण्यन्तु जातिरूपं नित्यमित्येतावान् परं भेदः। इदञ्चाकरे व्यक्तं लीलावत्यादौ च। अत्र मिताक्षरायां स्वत्वलौकिकालौकिकत्वविचारप्रयोजनमुक्तं शास्त्रैकसमधिगम्ये स्वत्वे। मनुः "यद्गर्हितैरार्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुद्ध्यन्ति दानेन तपसैव च" इत्यादिस्मरणादसत्प्रतिग्रहादि यस्य यदर्जनोपायत्वेन निषिद्धत्वादर्जितं तस्य स्वत्वाभावाच्चौर्यादार्जितवत्तत्पुत्राणामपि तदविभाज्यमेव। लौकिकत्वे तु स्वत्वस्य तदर्जितेऽपि पितुः स्वत्वात्तत्पुत्राणां पितृधनत्वेन तद्विभाज्यम्। अर्जयितुरेव प्रतिषेधातिक्रमनिमित्तप्रत्यवायात् प्रायश्चित्तम्। तत्पुत्रादीनान्तु दायरूपधर्मोपायतस्तत्स्वमिति न प्रायश्चित्तमपि "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव चेति" मनुस्मरणात्। प्रयोगो दृढ्यर्थन्द्रव्यप्रयोगः कर्मयोग आर्त्विज्यादिकरणम्। तत्र दायादीनां त्रयाणां वर्णचतुष्टयसाधारण्येन जयस्य क्षत्रियं प्रति, योगस्य स्वयंकृतस्य वैश्यं शूद्रं च प्रति धर्म्यत्वम् अस्वयंकृतस्यापदि च स्वयंकृतस्यापि सर्वान् प्रति। कर्मयोगस्य तु विप्रं प्रत्येवेति विशेष इति। अत्र मदनरत्नकरो दूषणमाह 'स्वत्वस्य शास्त्रैकसमधिगम्यत्वेऽप्यसत्प्रतिग्रहादिनिषेधो न स्वत्वानुत्पादकतान्तेषां वदति किन्तु प्रत्यवायमात्रहेतुताम्। इतरथा "व्यापन्नतः सम्प्रगृह्णन् भुञ्जानो वा यतस्ततः। न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः। कुसीदं कृषिवाणिज्यं प्रकुर्वीतास्वयङ्कृतम्। आपत्काले स्वयं कुर्यात्तेनसा युज्यते द्विजः" इति वचनैरेनसा न युज्यत इत्यभिधानेनापदि प्रत्यवायाभावावगमेनानापदिप्रत्यवायस्यैवावगमात् प्रतिषेधप्रतिप्रसवयोः समानविषयत्वौचित्यात्। अतएवानापदि तत्र द्रव्यपरित्यागपूर्वकं जपतपोरूपं प्रायश्चित्तमेव विदधाति। न चौर्यादिवद्राजदण्डमपि किञ्चिद्वचनमसत्प्रतिग्रहादौ। तेनासत्प्रतिग्रहादेः पूर्वपक्षसिद्धान्तयोर्द्वयोरपि तेषां स्वत्वोत्पादकत्वाविशेषात्तदर्जितस्य पुत्रादिविभाज्यत्वमपि तुल्यमिति नैतत्प्रयोजनं विचारस्यास्य युक्तमिति'। अत्र वदामः। शास्त्रैकसमधिगम्यस्वत्ववादिनो मते यथा चौर्यादिनिषेधस्य स्वत्वानुत्पादकत्वदण्डप्रयोजनं विचारस्यास्य युक्तमिति अत्र कर्तुः प्रायश्चित्तार्हताप्रयोजकत्वपरता। तथाऽसत्प्रतिग्रहादिनिषेधस्याप्यस्तु यथा चापदुपाधिना 'तथैव सप्तमे भक्ते भक्तानि षडनश्नता। अश्वस्तनविधानेन कर्तव्यं कृच्छ्रकर्मणः। आख्यातव्यश्च तत्रस्थै पृच्छते यदि पृच्छतीत्यादि' प्रतिप्रसवबलाच्चौर्यं तन्निवृत्त्याभावस्तथाऽसत्प्रतिग्रहादेरप्यस्तु। अन्यथोभयत्रापि ततः पञ्चमहायज्ञाद्यनिष्पत्तिप्रसङ्गः। शास्त्रीयत्वे स्वत्वस्याप्रसक्तचौर्योपायकत्वनिषेधः कथमिति चेत्। अधिगमान्तर्भावेन कथञ्चित्तत्प्रसक्तेस्तेनावश्यवक्तव्यत्वात् अपरथा प्रतिषेधानुपपत्तेः। शास्त्रपाप्तप्रतिषेधे च विकल्पापत्तिभिया "दीक्षितो न जुहोतीत्यादिवद्द्वाप्रकारमतेन पर्युदासत्वं सामान्यविशेषभावेन विशेषनिषेधसामान्यविध्योर्बाध्यबाधकभावोऽपि वा मतान्तरेणेत्यपि स्वीकार्यमेवागत्या। प्रतिग्रहादेस्तु प्रसक्तिर्ब्राह्मणादेरस्त्येवेत्यापत्तदभावोपाधिकौ प्रतिप्रसवप्रति-

षेधावप्युपपन्नतरौ । तर्हि सत्प्रतिग्रहस्वयंकृतबाधिज्या-दावनापदि ब्राह्मणस्य राजदण्डोऽपि स्यादिति चेन्न दृष्टापत्तेः । न हि स्वधर्मत्यागिनो राजदण्डाभावः कस्यापि सम्मतः । स च क्वचित् सामान्यरूपेणोक्त एव गृह्यते क्वचिद्विशेषादाम्नात इत्यन्यदेतत् । अतएवाशौ-किकस्वत्वादिन इदमप्यपरदूषणम् । चौर्यादिनिषेधस्य त्रितयप्रयोजकतागौरवम् । पर्युदासत्वादिस्वीकारगौर-वञ्च लौकिकस्वत्वादिनस्तु दण्डप्रत्यवायमात्रपरत्वम् । तेषां स्वत्वानुपायत्वस्य लोकसिद्धत्वादिति रागप्राप्तिनिषेधे पर्युदासादिस्वीकारानापत्तिश्चेति लाघवमिति । तस्मा-च्छास्त्रैकसमधिगम्ये स्वत्वेऽसत्प्रतिग्रहादेस्तदनुपायत्वात्त-दर्जिते पितुः स्वत्वाभावः स्यादेवेति चौर्यार्जितपि-तृधनाविभागवदसत्प्रतिग्रहार्जितस्याप्यविभाज्यत्वम् । लौकिके तु तस्मिन् लोके तेषामपि तदुपायत्वात् सिद्धं तद्विभाज्यमिति मिताक्षरोक्तं साध्वेव प्रयो-जनम् । इदञ्चोपलक्षणम् । पूर्वपक्षे चौर्यार्जित-पितृधनस्वीकारे यथा पुत्रादीनामपि दण्डप्रायश्चित्तं भवत्येव तथाऽसत्प्रतिग्रहार्जिततदुपहर्तृष्वपीत्यपि प्रयोजनमवसेयम् अर्जयितुरेव प्रायश्चित्तमित्यभिधानेनो-चितत्वात् । इदन्त्विह विचार्यम् । स्वत्वस्य लौकिकत्वे चौर्यस्य लोके तदनुपायत्वे सिद्धे षड्भक्तानशनाद्या-पदि यश्चौर्यमनुमतस्तेन चोरिते स्वत्वमुत्पद्यते न वा । नाद्यः लोकेऽनुपायत्वेनावधारितत्वात्तदुत्पत्तेरभ्युपगन्तु-मशक्यत्वात् । न हि प्रत्यक्षविरुद्धं शास्त्रसहस्रेणापि जलादेर्दधिजनकत्वादि बोध्यते । न द्वितीयः अस्वेन पञ्चमहायज्ञादिप्रधानानिष्पत्तेः । नच क्षुत्प्रतिघात-मात्रमेव तेन क्रियतां नान्यदलौकिकमिति वाच्यम् । शिष्टाचारविरोधात् न हि "शिष्टाः पञ्चमहायज्ञाद्य-स्तेषां तदुपयुज्यते "यदन्नः पुरुषो लोके तदन्नास्तस्य देवताः" इति स्मरणाच्च । अतएव विश्वामित्रः स्व-आश्रमीं त्रपचण्डालात् हृत्वेन्द्रादिदेवोद्देशेन त्यक्त्वा भोक्ष्यामीति मनसिकृत्य यदा यथादैवतन्नद्भागांस्त्यक्तुं प्रवृत्तस्तदा तुष्टैरिन्द्रादिभिर्दृष्टिः सृष्टा यस्यच्च तनू-त्वमेव प्रभूतमभूदित्याख्यायिका पुराणेषु श्रूयते । शास्त्रैकसमधिगम्ये तु स्वत्वे यथाशास्त्रचौर्यादेरपि स्वत्वोत्पादकत्वमदभावो न विरुद्धो । लौकिकस्वत्वतदु-पायवादिनस्तूभयतः पाशारज्जुरिवामति । अत्र प्रति-विदध्मः । यद्यपि चौर्यस्य स्वत्वोत्पादकत्वन्तु लोकविद्धं तथाप्यनेनैव षड्भक्तानशनकाले षड्भक्तानशिनो विधानादु गम्यते । स्वत्वमात्रस्य हि शास्त्रीयत्वे विरु-द्धत्वमतज्ज्ञानानां क्रयादिस्वत्वसाध्यव्यवहारानुप-पत्तेः । अतश्चौर्यनिषेधोदण्डपापमात्रबोधक एव । चौर्यस्य स्वत्वोत्पादकत्वाप्रसक्तेर्न तदभावपरः । यथा ब्राह्मणस्य वैत्र प्रत्यक्षत्वेऽपि जात्युत्कर्षस्वे शास्त्री-यत्वमेव । पुरुषेयत्तानियमस्य शास्त्रैकगम्यत्वात् । यथाङ्कराचार्याः "एतावन्मात्रन्त्विहागमिकं प्रत्ये-तव्यम् नह्ययं पुरुषेयत्तानियमो लोकप्रमाणगम्य इति" । तत्रापि तावत् पुरुषपरम्पराजन्यव्यक्तौ ब्राह्मण्य-मभिव्यज्यत इति व्यङ्ग्यव्यञ्जकभाव एव परं शास्त्रीय व्यञ्जके ज्ञानवतस्तादृशव्यक्तौ ब्राह्मण्यं प्रत्यक्षमेव व्यक्तिप्रत्यक्षप्रसक्तजातिप्रत्यक्षसामग्रीसम्भारादित्यपि व-दन्ति । इह तु चौर्यमात्रस्यैव स्वत्वानुत्पादकत्व-पक्षात्तादृशस्य तस्य स्वत्वोत्पादकतैव शास्त्रेण बोध्यते । न च प्रत्यक्षविरोधः । नहि प्रत्यक्षविरुद्धं शास्त्रसहस्रे-णापि बोधयितुं शक्यमिति वाच्यम् नह्यनुत्पादकत्व-मपि लोकात् । तादृशेन व्यवहाराभावादन्वयव्यतिरेक-गम्या स्वत्वस्य चौर्योपायकता नावगम्यत इत्येतावत् । तथा च पुत्रेष्ट्यादीनां लोकानवगतपुत्रादिजनकता यथा शास्त्रादवगम्यते तेषां दृष्टोपायान्तरशून्यतायामपि, तथेहापीस्तु । स्वर्गोद्भवनीयादीनामलौकिकमात्ररूपाणां दृष्टोपायाभावोऽप्यधिक इत्यन्यदेतत् । प्रतिबन्धकप्र-तिबन्धकादिजनकता यथोत्तेजकमन्त्राणामथर्वादि शास्त्रगम्या लोकप्रमाणगम्यत्वात् उत्तेजकतायाश्च प्रति-बन्धकप्रतिबन्धकार्यजनकतातिरिक्ताया अनिर्वाच्यत्वात् । शक्तिनाशतदुत्पत्तिकल्पनायामतिगौरवात् । यत्तु जन्मना स्वत्वचिराकुर्वता जीमूतवाहनेन 'क्वचिज्जन्मनैवेति जन्मनिबन्धनत्वात्पितापुत्रस्य सम्बन्धस्य पितृमरणस्य च कारणत्वात्परम्परया वर्णनमिति' प्राचीनलिखनाभि-प्रायसङ्गा कथमुत्पादनरूपेण पितृगतव्यापारेण पुत्रे स्व-त्वोत्पत्तिरित्याशङ्कोक्ता "तत्रव्यापारेणाप्यन्यस्य स्वत्वम-विरुद्धं शास्त्रमनुकूलादेव । इदञ्च लोकेऽपि दाने हि चेतनोद्देश्यकत्यागादेव दातव्यापारात् वस्तुदानस्य द्रव्ये स्वामित्वम् । न च स्वीकारणात् स्वत्वं स्वीकर्तुरेव दातृत्वापत्तेः । पुरस्वह्यापत्तिफलेन हि दानरूपता तत्र फलं वस्तुदानाधीनम् । वृथा हि देवतोद्देशेन त्यागं कुर्वन्नपि यजमानो न होता किन्तु तस्यैव यागस्य

होमाभिधाननिमित्तभूतसम्प्रेषं कुर्वन्नृत्विगेव होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च। मनसा पात्रसंहिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु ग्रहणं स्वीकारः अभूततद्भावे च्विप्रयोगादस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति कथन्ततः प्रागेव स्वत्वम्। उच्यते। उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन यथेष्टव्यवहारार्हं क्रियते इति स्वीकारशब्दार्थः याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य स्वत्वमजनयतोऽप्यर्जनरूपता न विरुद्धा याजनादौ दक्षिणादानादेव स्वत्वात्। पितृनिधनकालीनस्त्रीजीवनमेव वा पुत्रस्यार्जनम्भविष्यति। किञ्च। भ्रात्रादिधने तन्मरणात्तन्मरणकालीनजीवनाद्वा भ्रात्रन्तरादेः स्वत्वमकामेनापि वाच्यन्तद्वदिहाप्यस्त्विति'। तदेतदुत्तानमति विलसितम्। तथा हि शास्त्रमूलत्वादस्येति तावत् स्वत्वस्य लौकिकत्वसाधनादेव निराकृतम्। यदपि दृष्टस्य लोकेऽपीत्यादि तदप्यापातसुन्दरम्। न हि प्रतिग्रहीतर्यस्वीकुर्वत्यपि तस्य स्वत्वमुत्पद्यते। पात्रविशेषोद्देशेन त्यागे तेनास्वीकृतेऽपि तत्स्वत्वोत्पत्तौ परस्य तस्य प्रतिपादनासम्भवप्रसङ्गात्। यदपि स्वीकर्तुरेव दातृत्वापत्तेरिति तदप्ययुक्तम्। परस्वत्वापत्तिफलकव्यापारस्य दानत्वात्सम्प्रदानस्वीकारानुकूलानुमानादिव्यापारस्य दानपदार्थत्वात्तत्फलोपहितता तु तस्य सम्प्रदानस्वीकारमन्तरेण न सम्भवतीति सम्प्रदानव्यापारस्तत्रटकः। न तु सएव दानशब्दार्थः। यदपि यथा होत्यादि तदपि न यजमानकर्तृकाग्निहोत्रहोमादौ तद्विरोधात्। यत्रापि दर्शपूर्णमासादौ त्यागमात्रं यजमानेन क्रियते। चरुवत्तस्य प्रक्षेपोऽध्वर्यादिभिस्तत्रापि विविक्तकर्तृकत्वाद्यथास्वन्तद्व्यवहारविरोधात्। अत्यक्तस्य प्रक्षेपपरहोमशब्दवाच्यता नास्ति। स तु त्यागः सकर्तृकोऽन्यकर्तृको वाऽवच्छेदकोऽस्तु न तावता कश्चिद्दोषः। अतएव वामस्य न प्रक्षेपापेक्षा आत्मलाभो होमस्य तु मदपेक्षएव। दानस्य तु प्रतिग्रहीतृव्यापारसापेक्षतैव तदभावे दानपदार्थानिष्पत्तेः। यच्च किञ्चेत्यादि। तदपि यत्किञ्चित् उत्सर्गस्यैव तत्र विधानात् न तु दानस्य। अतएव दाता तत् फलमाप्नोतीत्युक्तमन्यथा तस्यानुवादत्वापत्तेः। दानत्वे हि तस्य तत्फलभावाप्रसङ्गेऽपि तत् फलमाप्नोतीति व्यर्थमेव स्यात्। अतस्तत्र जलप्रक्षेपरूपः पात्रोद्देशकः उत्सर्गएव ददातिना विवक्षितोदानत्वनिष्पत्तिस्तु तस्य सम्प्रदानकर्तृकस्वीकारे सत्येवेति परमार्थः। अतएवोत्सृजे इत्येव तत्र सङ्कल्पवाक्यं शिष्टानाञ्चतु दास्ये इति सम्प्रददे इति वा। अतः प्रतिग्रहादेव दानस्य फलेऽपि सम्प्रदानस्य स्वत्वमिति प्रतिग्रहस्यार्जनरूपत्वमविरुद्धम्। स्वत्वजनकोहि व्यापारोऽर्जनशब्दार्थः। अतएवाह प्रभाकरः 'प्रक्षपितमिदं केनापि अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति'। अस्य ग्रन्थः प्रागेव विवृतः। किञ्च। प्रतिग्रहस्य ममेदमिति ज्ञानरूपस्य दातृव्यापारमात्रोत्पन्नस्वत्वव्यवहारार्थतामात्रसम्पादकतायामर्जनशब्दस्य तत्र गौणता स्यात्। अन्यथा तत्प्रतिपादनानुपपत्तिश्च पूर्वमुक्ता। तदस्वीकारे प्रागुत्पन्नतत्स्वत्वनाशश्च कल्प्यः स्यात्। न च दातृव्यापारात्तत्स्वत्वनाशात्साधारणसम्प्रदानस्वत्वोत्पत्तिरवश्याभ्युपेया त्वयापि। अपरञ्चैतत्स्वत्वनाशेऽन्यस्य च स्वत्वानुत्पत्तेर्मध्यस्थस्य तस्य परिग्रहादिनाऽन्यस्य यस्य कस्यापि वनगतास्वामिकतृणकाष्ठादाविव तत्र स्वत्वं स्यात्परिपालनाप्रसक्तिश्च। तथा मन्मतेऽपि पात्रविशेषोद्देश्यकत्यागे पात्रविशेषस्योत्पन्नमपि स्वत्वन्तदस्वीकारे नश्यत्यन्यस्य स्वीकारात्तस्योत्पद्यत इति न कोऽपि विरोधः साधारणस्वत्वविनाशासाधारणस्वत्वोत्पत्तिरिति वाच्यम्। यतस्तत्र साधारणस्वत्वव्यवहाराभावेन तदुत्पत्तिरप्रमाणिको नैव स्वीक्रियते गौरवाच्च। किन्तु दातुरेव यथेष्टविनियोगार्हस्वत्वापगमेऽपि परस्वत्वापत्तिफलाभावे दानशब्दार्थानिष्पत्तेर्विधिशिरस्कफलार्थिनः प्रतिपादनावधिपरिपालनीयत्वरूपं स्वत्वमस्त्येव। यथा हुते हविषि भस्मसाद्भावावधि अस्पृश्यस्पर्शादिनिषेधात्रयणनिमित्तदोषत्रयणानुरोधेन, तथा चान्यस्वत्वानुत्पत्तावपि न मध्यस्थपरिग्रहाद्यनिवारणादिदोषः। शिष्टाचारोऽप्युभयत्र परिपालनरूपस्तन्मूलकएव। न चोत्सर्गमात्रस्य तत्र त्वया बह्याभ्युपगमात्परस्वत्वापादनादरएव न स्यादिति वाच्यम्। तादृशोत्सर्गस्यैव विधितात्पर्यविषयत्वात्। होमस्यवेऽप्यन्यथा भस्मसाद्भावानादरापत्तेः। यच्च याजनाध्यापनसाहचर्यात् प्रतिग्रहस्यापि स्वत्वाजनकत्वेऽपि गौणमेवार्जनत्वमिति। तदप्यबोधात्। तत्र हि ये ये द्विजप्रभृतीनाञ्चामास्तेभ्यान्तेभ्यो श्रुतिरूपेणैव दक्षिणाकाले प्रतिपादनम्। परिक्रयव्यवहारोऽप्यतएव "स्वामिकर्मणि परिक्रयः" इति जैमिनिसूत्रादौ विस्तरेण

निर्णीतएव विस्तरस्तु तत्रैव द्रष्टव्यः। कर्म्मकरानतिजनिका भृतिरेव हि परिक्रयः। एवमध्यापनेऽपि शिष्योऽध्यापकायाध्यापनभृतिमेव तत्सन्नीधजननोमध्ययनान्नेऽर्पयन्ति। नियतभृतिकरणे तु भृतकाध्यापनसुपपातकम्। अतएव याजनाध्यापनयोः प्रतिग्रहाद्भृतिशब्दवाच्यनिर्वेगाच्च पृथगभिधानसुभयमिश्रितत्वात्। तेन तयोरपि सख्यमेवार्जनत्वम्। दक्षिणात्वव्यवहारोऽप्यतएव भृत्यिगध्यापकदेये। यदपि भ्रात्रादिधने भ्रात्रन्तरादि स्वत्वोत्पादकत्वन्तद्विधनस्य तत्कालीनभ्रात्रन्तरादिजीवनस्य वा क्लृप्तमिति पुत्रादावपि पित्रादिनिधनन्तत्कालीनञ्जीवनं वा स्वत्वोत्पादकमस्तु नत्वक्लृप्तं पुत्रादिजन्मनैवेत्युक्तम्। तदपि जन्मनोऽपि स्वत्वोत्पादकत्वस्यावश्यकत्वोपपादनादेव परिहृतम्। यच्चोक्तं ऊर्द्ध्वं पितुश्चेत्यादि मनुवचनमपि जन्मनः स्वत्वापादकत्वे न घटते प्राग्विभागनिषेधार्थत्वे तस्यास्वार्थपरत्वापत्तेः विभागस्य दृष्टार्थत्वेन तद्विधानकालविधानयोरसम्भवात्। विभागस्य पक्षप्राप्तस्य नियमार्थत्वे सहवासविधिविरोधाद्यापत्तेः। तस्मात्पितरि सति मातरि च स्वत्वान्तरनस्वाम्याभाव उपरतयोरेव तयोः पुत्रादेस्तद्धनस्वाम्यमिति प्रतिपादनार्थमेव तद्वाच्यमिति। तदनुत्थानाभिधानम् अस्वार्थविधानापत्तेस्तुल्यत्वात्। प्रागस्वातन्त्र्येच कालविधिपरत्वेबाधकाभावात्। दृष्टाप्राप्तकालानुवादेऽपि व्यवहारशास्त्रत्वेनाविरोधात्। एतेन जातेष्टिवच्छेषिविरोधादिनिमित्तानन्तर्यबाधकाभावात्पितृपरमाननन्तरक्षणएव विभागः प्रसज्येतेत्यपास्तम्। कालविधानेन पितृपरमस्य निमित्तत्वाबोधनाच्च। अन्यथा निमित्ते सति नैमित्तिकस्यावश्यकत्वात्पित्रोरूर्द्ध्वं विभागाकरणे प्रत्यवायोऽपि प्रसज्येत। पतितत्वपारिव्राज्ययोः पितृस्वत्वनाशोऽप्यधिकः जन्मना स्वत्वन्तुल्यमेव। पातित्ये तु प्रायश्चित्तानाचरण एव स्वत्वनाशो विभागानर्हता च। अन्यथा द्रव्यमाध्यं प्रायश्चित्तमपि पित्रोः स्वद्रव्येण न स्यात्। अतएव मातुर्निवृत्ते रजसोत्पाद्यपि कालविधिपरमेव। न तु पातित्यादिवत्तत्र स्वत्वाभावः। स तु नोक्त एव विभागनिषेधाच्च भ्रात्रादाविवेत्यादि वक्ष्यते। किञ्च। तदेवं पितृस्वत्वापगमएकः कालः अपरस्वानपगत एव पितस्वाम्ये पितरिच्छयेति कालद्वयमित्युक्त्वा मध्ये मिताक्षरोक्तं विभागकालद्वयं दूषयित्वा तस्मात्पतितत्वनिष्कृतयोरपि पितृस्वत्वापगम एकः कालः, अपरस्तु स्वत्वे तदिच्छात इति कालद्वयमेव युक्तमित्युपसंहृता जीमूतवाहनेनैव पितृस्वत्वानपगमेऽपि पुत्राणां विभागो स्वीकृतस्तत्र पुत्राणाम्पितृधने स्वत्वोत्पादः कथम्। कथञ्च जीवतोः पित्रोरस्वाम्यप्रतिपादकवचनैः सह न विरोधः। अस्वस्य विभागासम्भवात्कथन्तेषां विभागः। पितृस्वत्वापगमएवोर्द्ध्वं पितुश्चेत्यनेन विवक्षितोऽतएव मृतपदम्परित्यज्योर्द्ध्वमित्युक्तम्। पितृस्वत्वापगमोर्द्ध्वमित्यर्थः पितृस्वत्वापगमश्च तद्विधनादिवत्तस्य पतितत्वनिष्कृतत्वाभ्यामपीत्यादि स्वग्रन्थे पूर्वापरविरोधश्च न कथम्। अत्राप्युपरतस्कृतत्वादिना पुत्राणां स्वत्वम्पितृधने भवतीति ज्ञापनादयमेकःकाल इति उक्तम् तत्राप्युपरतस्कृतत्वादिनेत्यनेन पितृस्वत्वापगमएव यदि विवक्षितस्तर्ह्यनपगते पितृस्वत्वे तदिच्छाऽपरः काल इत्यभिधानं विरुद्धम्। पितृस्वत्वापगमकालीनपुत्रादिजीवनस्यैवार्जनस्य तदीयस्य स्वीकारात्पितृस्वत्वे सति पुत्राणान्तद्धने स्वत्वस्वीकारः कथम्। नह्यनाश्रमित्वमातृरजोनिवृत्तिमात्रेण पितुः स्वत्वापगमे पूर्वद्रव्यस्वामिसम्बन्धाधीनन्तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वन्तत्र निरूढोदायशब्द इति स्वोक्तदायशब्दार्थाभावात्पितृस्वत्वानपगमे यत्र विभाग स्तत्र दायशब्दप्रयोगोऽपि दुस्थ इत्यादि बहु व्याकुलीस्यात्। जन्मना स्वत्वस्वीकारे तु सर्वमनाकुलमित्यादिसुधीभिरूह्यम्। अतएव मिताक्षरादौ पूर्वस्वामिसम्बन्धाधीनं स्वत्वमन्यस्य यत्र धने तदेव दायशब्दवाच्यमित्युक्तन्तु पूर्वस्वाम्योपरमेऽपि तत्र प्रवेशितः। तत्सिद्धं द्विविधो दाय इति"।

यच्च जीमूतवाहनेनैव मिताक्षरोक्तम् विभागोनाम द्रव्यसमुदायविषयाच्चामनेकस्वाम्यानान्तदेकदेशेषु व्यवस्थापनमिति विभागशब्दार्थः। न च सम्बन्धाविशेषात् सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यमित्याशङ्क्य सम्बन्ध्यन्तरसद्भावप्रतिपन्नस्य सम्बन्धस्यावयवेष्वेव विभागव्यङ्ग्यस्वत्वापादकत्वात्। कृतस्वपितृधनगतस्वत्वोत्पादविभागकल्पनागौरवात्। यथेष्टविनियोगफलाभावेनानुपयोगाच्चेति दूषयित्वा उच्यते। "एकदेशोपात्तस्यैव भूहिरण्यादेरात्मनस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः। विशेषेण भजनं स्वत्वज्ञापनं वा विभाग इति व्युत्पत्त्येत्युक्तम्"। तद्धायतत्वकृतोपन्यस्य

दूषितम् "यस्मात् स्वत्वस्यैव गुटिकापात इति कथं वचनाभावात्सिद्धेतव्यम्। यत्र हि पितुर्निधनानन्तरन्दीयात्मयोरेकमादाय भ्राता यदर्जितन्तत्तार्जकस्य द्वौ भागावपरस्यैकः सर्वसम्मतः। तत्र यदि प्राचीनधनविभागकाले गुटिकापातादर्जकेन स एवात्मः पश्चाद्व्यवस्थदा-प्रादेशिकस्वत्वमिदमते प्रागर्जकस्यैव सोऽस्य इति तेनार्जितधने कथं भ्रात्रन्तरस्य विभागः। तत्रैवास्वत्वेन तदुत्पत्ते सुतरां स्वत्वाभावादस्य चाविभाज्यत्वात्। यदि वार्जकेतरेण सोऽस्योत्पन्नस्तदा तेनार्जितधनस्य समभाग एव युक्तः। एकस्य स्वायासेनापरस्यास्यायासेनार्जकत्वादिति। वस्तुतस्तु सम्बन्धाविशेषात् सर्वसम्बन्धिनां सर्वधनोत्पन्नस्य स्वस्य गुटिकापातादिना प्रादेशिकव्यवस्थापनं विभागः। तत्स्वधनगतस्वत्वोत्पादविनाशावप्यगत्या कल्प्येते। संसृष्टतायां प्रादेशिकस्वत्वोत्पादस्तत्स्वधनस्वत्वोत्पादविनाशाविव। तच्च "विभक्तो यः पुनः पित्रा भ्राता वैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स तु संसृष्ट उच्यते" इतिबृहस्पतिवचने येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपितामहोपार्जितद्रव्येष्वविभक्तं स्वतुत्पत्तितः सम्भवति। तएव विभक्ताः सन्तः पुनः परस्परप्रीत्या पूर्वस्तर्विभागाः एव यत्तव धनं तन्ममापि यन्मम धनन्तत्तवापीत्येकस्मिन् कार्ये एकरूपतया स्थितास्ते संसृष्टाः नत्वनेवंरूपाणामन्यसंसर्गमात्रेण सम्भूयकारिणां बन्धुजामपि संसृष्टित्वम्। नापि विभक्तानां द्रव्यसंसर्गमात्रेण। प्रीतिपूर्वकतादृगभिसन्धिं विनेत्यभिदधता दायभागकृतापि स्वरूपितम। साधारणस्वत्वादेव हि "बन्धूनामविभक्तानामभोगस्तैव प्रदापयेत्" इति कात्यायनवचनं यथा श्रुतमेव सङ्गच्छते। यावद्भुक्तधनमात्रे स्वस्वत्वस्यापि सत्त्वात्। अतएवात्र धने परस्परस्य चौर्यमपि नास्ति। एवञ्च।

"बान्धवत्वमातिभाव्यञ्च दानं ग्रहणमेव च। विभक्ताभ्रातरः कुर्युर्नाविभक्ताः परस्परम्" इति नारदवचने परस्परनिरूपितदानादिनिषेधोऽपि न्यायमूलक एव। दानादेःपूर्वमपि देयादौ प्रतिग्रहीतादेः स्वत्वसत्त्वाद्दानप्रतिग्रहादेरसम्भवात्। अविभक्तत्वादेव चाविभक्तद्रव्येण यत्कृतं दृष्टादृष्टार्थं कर्म तत्र सर्वेषां फलभागित्वम्; तथा च नारदः "भ्रातृत्वाद्यविभक्तानामेको धर्मः प्रवर्त्तते। विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्"। व्यासोऽपि "स्थावरस्य समस्तस्य गोत्रसाधारणस्य च। नैकः कुर्यात्क्रयन्दानं परस्परमतं विना"। अत्र समस्तस्येति विशेषणोपादानात् स्वतन्त्रधनगतमेव प्रत्येकं स्वत्वं स्वीक्रियते। तथान्तु स्वधनसम्बन्धान्तरसत्त्वेन सम्बन्धिसकाशात् संक्रान्तन्धनं यत्तव ममापीति सम्बन्धिनां प्रतीयते तद्विमतौ दानादिकं प्रतिषिद्धं स्वार्थम्। अतो नैकदेशगतं स्वत्वमिति। इदञ्च द्रव्यसमुदायविषयाणामनेकस्वाम्यानामेकदेशे व्यवस्थापनं विभाग इति वदतो मिताक्षरातोऽप्यभिमतमिति लभ्यते। इदन्त्विह विचार्यम्। द्रव्यसमुदायनिरूपितं स्वामिगतं स्वाम्यम् स्वामिनिरूपितञ्च द्रव्यसमुदाये स्वत्वं व्यासज्यवृत्ति प्रत्येकवृत्ति वा। नाद्यः एकैकस्वामित्वस्वत्वाश्रयनाशे तन्नाशस्यावशिष्टसमुदायगततदुत्पत्तेश्च कल्पनायामतिगौरवापत्तेः प्रत्येकस्य प्रत्येकद्रव्ये दानक्रयादिवदेष्टविनियोगानर्हत्वापत्तौ व्यवहारविसंवादापत्तेश्च। न द्वितीयः विभागे सति तावतास्वाशोत्पादकल्पनापत्तेः। स्वस्य सतोविभागो न तु विभागात् स्वत्वमिति अन्यविरोधाच्च। अत्र ब्रूमः। प्रत्येकवृत्तीनि सम्बन्धाविशेषात् स्वाम्यानि च सन्त्येव। परस्परविभागगते परस्परस्वाम्यान्यदीयद्रव्ये तानि नश्यन्ति परमते भरणपारिग्रव्यादिनेवेति न काप्यनुपपत्तिः। व्यवस्थापनमपीदमेव अन्यथैकदेश उत्पादनमित्येव वदेत्। अतएव विनाशमात्रकल्पना न तु स्वत्वान्तरोत्पादकल्पना। जीमूतवाहनमते च कुत्र वास्तवं मम स्वत्वमिति विभागात् प्राग्निरूपणात्तद्धीनश्चौतस्मार्त्तलौकिककर्मोच्छेदः। अनुमत्या विभागोत्तरकृतया परस्परद्रव्ये परस्परस्वत्वान्तरोत्पत्तिस्वीकारे तदुत्पादविनाशकल्पनागौरवं यत्त्वया मिताक्षरामतं प्रत्यापादितं ततोऽपि तवाधिकमापन्नम्। व्यवहारानुपयोगेन समुदायस्वत्वस्य निष्प्रयोजनता च योपन्यस्ता साप्येकदेशगतस्वत्वाभ्युपगमे तुल्यैवेति कृतमतिदूरंगत्वा"। अनयोश्च मतयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम्

"देशानां जातिसंघस्य धर्मो यो भृगुः। उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत्" भृगुवचनम्. भृगुराहेति शेषः। दायस्य भागः प्रतिपाद्यतयाऽस्यत्र अच्। २जीमूतवाहनादिकृते दायस्य विभागज्ञापके ग्रन्थे पृ०। दायभागपारिक्रमत्र उत्तराधिकारिसङ्घे १०६६ पृ० उक्तः।

दायाद पु॰ दायं विभजनीयधनमादत्ते आ+दा-क । दायमर्हति अद्-अण् उपपदसमासो वा । १सपिण्डे २पुत्रे च अमरः । "न तं भजेरन् दायादाः" मनुः । "भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः" कात्या॰। २दायाधिकारिणि त्रि॰ "तेषां यद् वस्वदायादाः" मनुः स्त्रियां टाप् "पुमान् दायादोऽदायादा स्त्री" निरु॰ कप्रत्यतान्तस्यैवेदं रूपम् सुग्धबोधमते घञन्तात् ङीप् स्यात् दायादीति भेदः । सा च ४कन्यायाम् शब्दार्थकल्प॰। पुत्रे "त्वया दायादवानपि त्वं मे वंशकरः सुतः" भा॰आ॰ ७५अ॰ ।

दायाद्य न॰दायादस्य भावः ब्राह्मणा॰ ष्यञ् । १सापिण्ड्ये दायरूपसम्बन्धे । २सापिण्ड्यनिबन्धने धने च "दायाद्यस्य प्रदानञ्च" मनुः "स एव पाण्डोर्दायाद्यं यदि प्राप्नोति पाण्डवः" भा॰आ॰ १४१ अ॰। "स्त्रीणां स्वपति दायाद्यमुपभोगफलं स्मृतम्" भा॰अनु॰४७अ॰

दायित त्रि॰ दायं दानं करोति दायि-कर्मणि-क्त । ऋतदाने दापिते भरतः एतन्मूलं मूल्यम् ।

दार पु॰ ब॰व॰। दारयति भ्रातॄन् दॄ-णिच् दारि-कर्त्तरि अच् । भार्यायां "दारांश्च कुरु धर्मेण मा निमज्जीः पितामहान्" भा॰आ॰ १०३अ॰ "दाराणां सुरवैरिणो रतिपतेर्मातुस्त्रिलोकजितः" धनञ्जयवि॰ । "याचिग्रहणिका मन्त्रा नियतं दारलक्षणम्" मनुः । "सदृशानाहरेत् दारान्" यमः । करणे घञ् । २औषधभेदे । भावे घञ् । ३विदारणे पु॰।

दारक त्रि॰ दॄ-ण्वुल् । १विदारके २बालके "चाण्डालदारकेष्वानुगम्यमानम्" काद॰ "एकैव त्वमिहागच्छ तिष्ठन्त्वत्रैव दारकाः । तच्छ्रुत्वा वचनं तस्यास्तत्रैवाधाय दारकान्" भा॰आ॰ १२६ अ॰ । "सुदुर्गरांश्च महाघोरान् समरे शत्रुदारकान्" भा॰द्रो॰ १५६अ॰ ३पुत्रे "कुमारो भर्तृदारकः" अमरः । ४कन्यायां स्त्री "सन्तानसन्धिर्विज्ञेयः दारिकादानपूर्वकः" कामन्दकी॰ "पूतनां दैत्यदारिकाम्" हरिवं॰४२अ॰ ५ग्रामसूकरे पुंस्त्री राजनि॰। तस्य भूमिविदारकत्वात् तथात्वम् ।

दारकर्म्मन् न॰दारानां तद्भावस्य प्रतिपादकं कर्म । भार्यात्वसम्पादके ज्ञानविशेषरूपे विवाहे त्रिका॰ "सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" । "सवर्णायां द्विजातीनां प्रशस्ता दारकर्मणि" मनुः । दारक्रियाऽप्यत्र स्त्री "पुनर्दारक्रियां कुर्यात् पुनराधानमेव च" मनुः "दारक्रिया योग्यदयञ्च पुत्रम्" रघु॰ । "स्त्रीवे दारक्रिया यादृक्" भा॰ स॰ ३६अ॰।

दारग्रहण न॰दाराणां दारत्वस्य सम्पादकं ग्रहणं ज्ञानम् । दारत्वसम्पादके ज्ञानरूपे विवाहे "तेन भार्यात्वसम्पादकं ग्रहणं विवाहः । तस्य स्त्रीकाररूपज्ञानविशेषस्य समवायविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्तृत्वकर्मत्वे अतएव "कन्यापुत्रविवाहेष्विति" विष्णुपुराणोक्तं संगच्छते । भार्यात्वस्य स्वरूपसद्विशेषणत्वेन नेतरेतराश्रयदोष इति" उद्वा॰ रघु॰। "तद्दारग्रहणे यत्नं सन्तत्यां च मनः कुरु" भा॰ आ॰१३अ॰। दारपरिग्रहादयोऽप्यत्र "अतःपरं समादत्तः कुर्याद्दारपरिग्रहम्" मनुः

दारण न॰दारयति जलमलम् दॄ-णिच् युच् । १कतकफले शब्दर॰। तस्य जलकालुष्यदारणात्तथात्वम् २दारकमात्रे त्रि॰। "समाधत्त शितं बाणं गिरीणामपि दारणम्" भा॰ क॰४६अ॰करणे ल्युट् । ३विदारणसाधने अस्त्रादौ त्रि॰ स्त्रियां ङीप् । "नमस्ते शुम्भहननी निशुम्भासुरदारणीम्" हरिव॰१६६अ॰। भावे ल्युट् । ४विदारणे भेदने "दारुदारणपर्वैः समाहतम्" "तदुदारुदारणपर्वसु चतुर्षु किं स्यात्" लीला॰। द्वैधीकरणे व्रणादिस्फोटनसाधके ५औषधभेदे तस्य सुश्रुतेनोक्तं यथा "चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः । कपोतवङ्क्रकन्दानां पुरीषाणि च दारणम् । क्षारद्रव्याणि वा यानि क्षारो वा दारणं परम्"

दारद न॰दरदि देशभेदे भवः स्निग्ध्वा॰अण् । १विषभेदे अमरः २पारदे ३हिङ्गुले च मेदि॰। दरदो देशस्य सन्निकृष्टः अण् । ४ससुद्रे हारा॰ ।

दारबलिभुज् पु॰दारेण चञ्चुपुटेन विदारणेन बलिं भुङ्क्ते भुज-क्विप् । वकपक्षिणि त्रिका॰।

दारव त्रि॰ दारुणः विकारः रजता॰ अञ् । दारुविकारे काष्ठमये पदार्थे "दारवाणां च तक्षणम्" मनुः । "अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम्" सू॰सि॰

दारि त्रि॰दॄ-णिच्-इन् । १दारके स्त्रियां वा ङीप् ।

दारिका स्त्री दारक+टाप् कापि अत इत्त्वम् । कन्यायाम् जटाध॰ दारकशब्दे उद्वा॰।

दारिद्र्य न॰ दरिद्रस्य भावः ष्यञ् । दरिद्रतायां दुर्गतौ धनादिराहित्ये "प्रणीय दारिद्र्यदरिद्रतां नृपः" नैष॰ दारिद्र्यवर्णनं मृच्छकटिकायां यथा "सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपः

दर्शनम् । सुखात्तु यो याति नरो दरिद्रतां मृतः शरीरेण स्मृतः स जीवति । दारिद्र्यमनन्तकं दुःखम् । पश्य ! न ममार्थान् प्रति दैन्यम् । पश्य "एतत्तु मां दहति यदुत्कटहस्तदीयं क्षीणार्थमित्यतिभयः परिवर्जयन्ति । संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कान्ताल्यये मधुकराः करिणः कपोलम्" । सत्यं न मे विभवनाशकृतास्ति चिन्ता, भाग्यक्रमेण हि धनानि भवन्ति यान्ति । एतत्तु मां दहति नष्टधनाश्रयस्य यत् सौहृदादपि जनाः शिथिलीभवन्ति । दारिद्र्याद्धि भयमेति लोपरिगतः प्रभ्रश्यते तेजसो, निस्तेजाः परिभूयते, परिभवाद्धि खेदमापद्यते । निर्विण्णः शुचमेति, शोकपिहितो बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् । दारिद्र्यं हि पुरुषस्य । निवासचिन्तायाः परपरिभवो वैरमपरं, जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् । वनं गन्तुं बुद्धिर्भवति च कलत्रात् परिभवो, हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च" । तत्रैव अन्यत्र स्थाने "दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्यं न सन्तिष्ठते, सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः । सत्यं ह्यासमुपैति शीलमशिनः कान्तिः परिम्लायते, पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते । सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाव्यते नादरात् सम्प्राप्तो गृहसत्त्ववेषु धनिनां सावज्ञमालोक्यते । दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया सन्ये निर्धनता प्रकामनपरं षष्ठं महापातकम् । दारिद्र्य ! शोचामि भवन्तमेवमकृतशरीरे सुहृदित्युक्त्वा । विपन्नदेहे मयि मन्दभाग्ये, समेति चिन्ता क्व गमिष्यसि त्वम्" ।

तत्सूचकयोगभेदा जातकपद्धतावुक्ता यथा "समस्तपापखेचरैर्युतेक्षितं धनाभिधम् दरिद्रताविधायकं विभोगतः कुशानुना" । "बुधगुरुकवयस्त्रिहिबगा वित्तनाशं विदधति यदि दृष्टाः सोमसौम्येन्दुपुत्रैः" "लोग्नः शशी सूर्येण विलोकितोऽर्थे पूर्वार्जितार्थस्य विनाशदः स्यात्" । "नवीनवित्तागमरोधकोभवेत् रविर्धनेऽस्यष्टमिते कुजोऽङ्गे षष्ठ्यंशके स्वे धननाशदः स्यात्" । नाभनयोगशब्दे वक्ष्यमाणलक्षणसूत्रयुगगोलकयोगैर्दरिद्रताग्रिः दृष्टव्या । उक्ता यथा "विधनश्च शूले" "धनविरहितः पापखेटो वा बुधे स्वथ गोलके विधनसहिते" इत्यादि "पुत्रवन्मार्किणयोगे स्यान्मूर्खो मूर्खो धनोज्झितः" । "तपनारार्कपुत्राणां योगे निःस्वोऽति दुःखितः" । "नृपतेर्वंशजातोऽपि क्षेमद्रुमभवो नरः । मलिनो दुःखितो नीचो निःस्वोदासः खलो भवेत्" । अस्य अपवादः "लग्नाद्विधोर्वा द्वादशैः शुभैः सर्वैः शुभं फलम् । द्वाभ्यां मध्यं तथैकेनाल्पं चेन्नास्ति दरिद्रता" । जातकपद्धतिः ।

दारित त्रि० दृ–णिच्–क्त । विदारिते अमरः ।

दारी स्त्री दारयति दृ–णिच्–इन्–ङीप् । क्षुद्ररोगभेदे । तल्लक्षणं सुश्रुते उक्तं यथा "परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः । पादयोः कुरुते दारीं सरुजां तत्र संचिताम्" ।

दारु पु०न० दीर्यते दृ–उण् । काष्ठे अमरः "प्रतिमुक्तस्तु विहांसु भक्षीभवति दारुवत्" । "वानस्पत्यं मूलफलं दार्वर्थं तथैव च" मनुः "शैक्यं कमण्डलुश्चैव द्विदलं दारुमेव च" हरिवं० २०१अ० । १पित्तले २देवदारुणि मेदि० । ३शिल्पिनि ४दारके त्रि० धरणिः । दा–दाने दो–अवखण्डने वा रु । ५दानशीले ६खण्डनशीले च त्रि० ।

दारुक न०दारु+स्वार्थे क । १देवदारुणि राजनिः । दारु+संज्ञायां कन् । २कृष्णस्य सारथौ पु० । "रथेष्वतिरथो यन्ता दारुकः केशवस्य वै" हरिवं० ११६अ० । "रैवतस्य गिरिं देवो गत्वा दारुकमब्रवीत् । मदीयं रथमेतं त्वं आहायेहैव दारुक !" १२२अ० "उत्कन्धरं दारुक इत्युवाच" माघः तस्यापत्यं फिञ् । दारुकि तदपत्ये "शिशिरो दारुकिसदा" भा०व०१८अ० ।

दारुकच्छ पु०देशभेदे तत्र भवः कच्छान्तदेशवाचित्वात् वुञ् । दारुकच्छक तद्भवे त्रि० । [२वनकदल्यां च राजनिः ।

दारुकदली स्त्री दारु इव कठिना कदली । १काष्ठकदल्यां

दारुका स्त्री दारुणा कायति कै–क । दारुणः प्रतिकृतिर्वा इवार्थे क । काष्ठमयपुत्तलिकायाम् शब्दरत्ना०

दारुकावन न०वनभेदरूपे तीर्थभेदे शिवपु०

दारुकेश्वर पु० शिवलिङ्गभेदे शिवपु० । [भेदे राजनि० ।

दारुगन्धा स्त्री दारुणि गन्धो यस्याः । (चोड़ा) गन्धद्रव्य-

दारुगर्भा स्त्री दारु तन्मयो गर्भोऽस्याः । काष्ठकदल्यां हारा०

दारुचिनी स्त्री स्वनामख्यातायां गुडत्वचि शब्दार्थचि० ।

दारुचीर्णक न० गुडत्वचि शब्दार्थचि० ।

दारुज त्रि० दारुणो जायते जन–ड । १काष्ठजाते २मर्दले वाद्यभेदे पु० शब्दर० ।

दारुण पु० दारयति भीषयति चित्तं दृ–भये णिच् "ऋतृदारिभ्य उनन्" उणा०उनन् । १चित्तदर्शके २भयानकरसे

अमरः । २तद्वति भयानके दुःखदे भीषणे ३भयहेतौ त्रि० "हृदयकुसुमशोभी दारुणो दीर्घशोकः" मा०द० । उत्तरत्र दत्तस्तु दॄ–विदारे इत्यस्यैव णिजन्तस्य रूपमिदमित्याह । ५रौद्रसंज्ञकनक्षत्रगणे ज्यो० । "उमेन्द्र ! वज्रादपि दारुणोऽसि" गीत० दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते" सुश्रुतः । "वाचा दारुणया क्षिपन्" मनुः । ६विदारके त्रि० । ततः भृशा०अभूततद्भावेऽर्थे क्यङ् दारुणायते "वियोगिहृद्दारुणि दारुणायसे" नैष० ७विष्णौ पु० "सुधन्वाखण्डपरशुर्दारुणो द्रविणप्रदः" विष्णुस० । "सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात्) दारुणः" भा० ।

दारुणक पु० सुश्रुतोक्ते क्षुद्ररोगभेदे क्षुद्ररोगशब्दे २२८२पृ० दृश्यम् । "शिरां दारुणके विद्धा स्निग्धस्विन्नस्य मूर्द्धनि" सुश्रु० ।

दारुणा स्त्री "तृतीयाऽक्षयसंज्ञा या दारुणा सा प्रकीर्तिता" इत्युक्ते १तिथिभेदे । २नर्मदाखण्डाधिष्ठातृदेवीभेदे च शब्दार्थचि० ।

दारुतीर्थ न० दारुवनभेदरूपे तीर्थभेदे शिवपु० ।

दारुनिशा स्त्री दारुप्रधाना निशा हरिद्रा । दारुहरिद्रायाम् रत्नमा० । [हिङ्गुपत्रयाम् राजनि० ।

दारुपत्री स्त्री दारुणः देवदारुणः पत्रमिव पत्रमस्याः ङीप् ।

दारुपात्र न० दारुणः पात्रम् । काष्ठमये जलाधारादिपात्रे "अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्" मनुः ।

दारुपीता स्त्री दारुणा काष्ठेन पीता । दारुहरिद्रायां राजनि० । [हारा० ।

दारुपुत्तलिका स्त्री दारुमयी पुत्तलिका । काष्ठपुत्तलिकायाम् ।

दारुमुख्याह्वया स्त्री दारुमुख्यमाह्वयते आ+ह्वे–य । गोधायां राजनि० । आ+ह्वे–क । दारुमुख्याह्वाऽप्यत्र शब्दार्थ० । [ओषधिभेदे शब्दार्थचि० ।

दारुमूषा स्त्री दारुप्रधाना मूषा । (दारुमूषीति) ख्याते

दारुयन्त्र दारुमयं यन्त्रम् । काष्ठनिर्मितयन्त्रभेदे "अस्वतन्त्रो हि पुरुषः कार्य्यते दारुयन्त्रवत् । केचिदीश्वरनिर्दिष्टाः केचिदेव यदृच्छया" भा० उ० १५८ अ० ।

दारुवधू स्त्री दारुमयी वधूः वधूप्रतिमा दारुमयी वधूरिव वा । १काष्ठपुत्तलिकायां २काष्ठमयीस्त्रीप्रतिमायाञ्च । "जलबिन्दुगिन्दुमणिदारुवधूम्" माघः । "इन्दुमणिः चन्द्रकान्तमणिः सैव दारुवधूस्तन्मयी वधूः स्त्रीप्रतिमा" मल्लि० दारुस्त्रीदारुपुत्रीदारुपुत्तलिकादयोऽप्यत्र ।

दारुवह न० दारु वहति वह–अच् "दृको वहेऽपीत्यादिभ्यः" पा० पीत्वा० न पूर्वपददीर्घः । दारुवाहके जलादौ ।

दारुसार पु० दारुषु सारः श्रेष्ठः । चन्दने शब्दार्थचि० ।

दारुसिता स्त्री दारुणि सितेव (दारुचिनीति) ख्यातायां गुडत्वचि । "त्रेया दारुसिता स्वादी तिक्ता चानिलपित्तहृत् । सुरभिः शुक्रलाबल्यसुखयोग्यतृषापहा" भावप्र० तद्गुणा उक्ताः । [हरिद्रायाम् रत्नमाला ।

दारुहरिद्रा स्त्री दारुमयी हरिद्रा । स्वनामख्यातायाम्

दारुहस्तक पु० दारुणोहस्त इव "दृवे प्रतिकृतौ" पा० कन् । काष्ठमयदर्वीभेदे अमरः ।

दार्घसत्र त्रि० दीर्घसत्रे भवः अण् "देविकाशिंशपेत्या" पा० आद्यच आत् । दीर्घसत्रे भवे ।

दार्ढ्य न० दृढस्य भावः ष्यञ् । दृढत्वे "उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता" कामन्दकी० ।

दार्तेय त्रि० दृतौ भवादि ढञ् । १दृतिभवे २तत्रस्थे च ।

दार्दुर पु० दर्दुरः मृत्पात्रभेदस्तदाकारोऽस्त्यस्य प्रज्ञा० ण । १दक्षिणावर्त्तशङ्खभेदे शब्दार्थचि० । दर्दुर स्येदम् अण् । २दर्दुरसम्बन्धिनि त्रि० स्त्रियां ङीप् । "चालितो गुरुपुत्रेण भार्गवोऽङ्गिरसेन वै । प्रविष्टो दार्दुरीं मायामनादृष्टिं चकार ह" हरिवं० ४१६१ अ० । दर्दुरस्येह राक्षसः तेन दार्दुरी राक्षसी

दार्दुरिक त्रि० दर्दुरः मृत्पात्रभेदः शिल्पमस्य ठञ् । मृत्पात्रभेदकारके (कुमार) कुलाले ।

दार्भ त्रि० दर्भस्येदम् अण् । कुशसम्बन्धिनि ।

दार्भि पुंस्त्री दर्भस्य गोत्रापत्यम् इञ् । दर्भर्षिगोत्रापत्ये आम्नायणे तु तस्मिन् फक् । दर्भायण इत्येव ।

दार्भ्य त्रि० दर्भे भवः कुर्वा० यत् । दर्भभवे ।

दार्व पु० देशभेदे स च देशः ६०स० कूर्मविभागे १४ अ० ऐशान्यामुक्तः "ऐशान्यां मेरुकनटराज्यत्वेषुपक्रमे ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः" । "कोनिसर्पाः समक्षिप्ता दार्वाश्चोलाः सकेरलाः" हरिवं० १४ अ० । २तत्रस्थे २नदीभेदे च तस्या इदम् नद्यादि० ढक् । दार्वेय तदीयजलादौ त्रि० दार्वेषु भवः बहुवचनार्थे वुञ् । दार्वक दार्वजनपदेषु भवे त्रि० ।

दर्वाट न० दारु इव निश्चलतया निरूपणीयविषयनिश्चयार्थमटत्यस्मात् अट–घञर्थे क । १चिन्ताभ्रष्टे, २मन्त्रभ्रष्टे च । हारा० ।

दार्वण्ड पु स्त्री दारु–इव कठिनोऽण्डोऽस्य । मयूरे शब्दार्थ-कल्प० । स्त्रियां जातित्वात् ङीष् ।

दार्वाघाट पुंस्त्री दारु आहन्ति आ+हन–अण् "दारावाहनोऽण् अन्तस्य च टः संज्ञायाम्" वार्त्ति० अण् नस्याने टः । (काटठोकरा) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष् । "पुरुषमृगश्चन्द्रमसो गोधा–कालका–दार्वाघाटास्ते वनस्पतीनाम् यजु०२४।३५। असंज्ञायां तु न टान्तादेशः । दार्वाघात काष्ठाघातमात्रे त्रि० । स च दार्वाघातखगे शब्दरत्ना० अत्रार्थे टान्तत्वमेव युक्तं वार्त्तिके संज्ञायां टान्तत्वस्यैव साधनात् ।

दार्विका स्त्री दारयति दृ+उल्वादित्वात् साधुः ङीष् दार्वी दारुहरिद्रा तद्विकाराऽपि दार्वी अभेदोपचारात् स्वार्थे क । १दारुहरिद्राक्वाथोद्भवे तत्थे अमरः २गोजिह्वौषधौ शब्दार्थचि० ।

दार्विपत्रिका स्त्री दार्व्या दारुहरिद्रायाः पत्रमिव पत्रमस्यस्याः ठन् संज्ञायां ह्रस्वः तत् तदाकारः पत्रोऽस्यस्या वा ठन् । गोजिह्वायां रत्नमाला ।

दार्वी स्त्री दारयति दृ–णिच् उन् स्त्रियां दारणस्य अवयवविभागरूपत्वेन गुणवचनत्वात् वा ङीष् दृ+उल्वा०नि० ङीष् वा । दारुहरिद्रायाम् ।

दार्वीक्वाथोद्भव न०दार्व्या दारुहरिद्रायाः क्वाथादुद्भवति उद्+भू–अच् । १रसाञ्जने राजनि०२क्षत्तिमरसाञ्जने रत्नमा० ।

दार्श त्रि० दर्शे भवम् अर्थे ठञ् बाधित्वा अण् । १दर्शभवे "दार्शमस्कन्दयन्पर्व पौर्णमासञ्च योगतः" मनुः । लोके तु कालात् ठञ् । दार्शिक इत्येव । दृशि नेत्रे भवः अण् । २नेत्रभवे त्रि० ।

दार्शपौर्णमासिक त्रि० दर्शे पौर्णमास्यां च भवः ठञ् । दर्शपौर्णमासीभवे । "दार्शपौर्णमासिकेतिकर्त्तव्यता" कात्या०श्रौ० ५।६।२१। सूत्रे कर्कः ।

दार्षद त्रि० दृषदि पिष्टः शैषिकः अण् । दृषद् प्रस्तरे पिष्टे सक्तुप्रभृतौ

दार्षद्वत न० दृषद्वत्या नद्यास्तीरे कर्त्तव्यम् अण् । सत्रभेदे तद्विधानादि यथा "दार्षद्वतमृत्विगाचार्य्ययोरन्यतरस्य गा रक्षेत् संवत्सरम्" कात्या०श्रौ० ८।६।२२ इत्यादिभिः "एत्य च दृषद्वतीतीरेण" इत्यन्तैः सूत्रैरुक्तः तस्याव भ्यविशेषस्तत उत्तरसूत्रेषु द्रष्टव्यः । "दार्षद्वतमेतत्सत्रं सत्रमभिधीयते" कर्कः ।

दार्ष्टान्तिक त्रि० दृष्टान्तेन युतः ठञ् । दृष्टान्तयुक्ते उपमेये "स्वापस्य दार्ष्टान्तिकत्वेन विवक्षितम्" ह०उ०गङ्गरमाश्रम

दाल न० दले मञ्जितम् अण् । पुष्पात् पतिते दलसाञ्जत १मधुरेदे भावप्र०उक्तलक्षणादि मधुशब्द दृश्यम् इन्द्रनीलदलाकारस्तूक्ष्ममक्षिकोत्पन्ने २वृक्षकोटरान्तमके मतनि च राजनि० । ३कोद्रवे धान्यभेदे पु०हेमच० ।

दालन पु०दालयति दल–णिच्–ल्यु । दलगते रोगभेदे रोमशब्दे २४६६ पृ०दृश्यम् । विषभेदे हेमच०

दालव पु० दलति दल–उन् तस्यायम् अण् । स्थावर-

दाला स्त्री दल्यते दल–कर्मणि–घञ् । महाकाले किमपाके वृक्षे भावप्र० स्वार्थे क । दालिका तत्रार्थे

दालि स्त्री दल–इन् । (डाल)इति ख्याते दलिते १यमीधान्ये शब्दार्थचि० । दाडि इत्य लः । २दाडिम्बशब्दार्थे च स्त्रीत्वात् वा ङीष् तत्रार्थे सा च ३देवदालीलतायां राजनि० ।

दालिम पु० दाडिम+इत्य लः । दाडिमवृक्षे भरतः

दालभ पु० व०व० । दाल्भ्यस्य दल्भगोत्रजस्य छात्राः अण् यलोपः । दाल्भ्यस्य छात्रेषु

दाल्भ्य पुंस्त्री दल्भस्य गोत्रापत्यम् गर्गादित्वात् यञ् । दल्भर्षिगोत्रापत्ये वर्के मुनिभेदे । "वर्कोदाल्भ्यः स्थूलशिराः कृष्णदैपायनः शुकः" भा०स०४अ० दल्भशब्दे छान्दोग्यवाक्यम् दृश्यम् । तस्य युवापत्यम् यूनि फिञ् । दाल्भ्यायनि दल्भ्यस्य यून्यपत्ये । २पुण्याश्रमरूपे तीर्थभेदे । "दाल्भ्यघोषस्य दाल्भ्यस्य धरणीस्थो महात्मनः । कौन्तेयानन्तयशसः सुव्रतस्यामितौजसः । आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु विश्रुतः" भा०व०९०अ०

दाल्मि पु० दल–णिच् मि० । इन्द्रे त्रिका० ।

दाव पु० दुनाति दु–कर्त्तरि ण । १वने २वनभवेऽनले च अमरः । "ददर्श दावं दह्यन्तं महान्तं गहने वने" भा०व० २६०श्लो० । "वनमिव दावपरीतम्" ह०स०२४अ० । "इदमिन्द्रः सदा दाव खाण्डवं परिरक्षति" भा०आ० २२३अ० 'दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये" भा०द्रो० २९४२ श्लो० । 'अधिज्यधन्वा विचचार दावम्' रघुः । भावे घञ् । ३उपतापे च ।

दावन् पु० दा–कर्मभावादौ उणा०वनि । १देये २दाने च "नियुत्वता रथेनायाहि दावने वायो मखस्य दावने" ऋ०१।१३४।१ "दावने दातव्याय हविषे तत्स्वीकाराय पुनः किमर्थं दावने अस्मभ्यमभिमतदानाय । उभयत्र ददातेः कर्मणि भावे च क्रमेणौणादिको वनिः । छान्दसः नीपधालोपः" सायण । लोके तु दावे इत्यादि ।

"व्यतो ननिन्कनिवनिपश्च" पा० सुप्युपसर्गे उपपदे च वनिप्। भूरिदावा इत्यादि बहुदातरि। अयं छन्दस्येव लोके तु न पाणिनिः सुग्धबोधे तु लोकेऽपीत्युक्तम्।

दावप पु० दावं वनवह्निं पाति पा-क। पुरुषभेदे "अरगवाय दावपम्" यजु०३०।१६ पुरुषमेधे एकादशयूपे आलम्भपुरुषभेदोक्तौ।

दावसु पु० अङ्गिरसो सुनौ पञ्चभाष्यब्रा०

दावाग्नि पु० ६त०। वनानले दावानलादयोऽप्यत्र। "दावाग्निसदृशो मेऽद्य दन्दहीति शुभां तनुम्" हरिवं० १५२अ० "जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः" भा० वि० १४अ०।

दाविक त्रि०देविकायां नदीभेदे भवः अण् "दाविकाशिंशपेत्यादिना" आद्यच आत्। देविकानद्यां भवे। एवं देविकाकूले भवः अण। दाविककूल तत्कूलभवे गाल्यादौ।

दाश(स) हिंसने स्वा० पर०सक० सेट्। दाश्नो(स्नो)ति अदाशी(सी)त् अयं वैदिकः। "यस्ते दाश्नोति नम उक्तिभिः" ऋ०८।४।६ "दाशद्दाशुषे हन्ति दृतम्" ऋ०२।१।९४ "यस्मै त्वं सुद्रविणो ददाशो अनागास्त्वमदिते!" ऋ०१।९४।१५

दाश दाने चु० उभ०सक० सेट्। दाशति-ते अदित् अदिदाशत्-त। "स वा एतेभ्यस्तत् पुरोऽदाशयत् तस्मात् पुरोडाशः" शत० ब्रा०१।६।२।५

दाश दाने भ्वा० उभ०सक० सेट्। दाशति ते अदाशीत् अदाशिष्ट अदित् दाशच् अदिदाशत्-त। "यस्तुभ्यं दाशान्न तमंहो अश्नवत्" ऋ०२।२३।४ "तुभ्यं दाशतः स्यामः" ७।१४।३

दाश(स) पुंस्त्री दाश्नो(स्नो)ति मत्स्यान् दस(श)ति मत्स्यान् वा घञ् नि०नलोपः दाश(स्य)ते दीयते मत्स्यस्य मूल्यमस्मै घञ् वा। १मत्स्योपजीविनि धीवरे स्त्रियां जातित्वात् ङीप्। "दाशानां भुजवेगेन नद्याः स्रोतोजवेन च। वायुना चानुकूलेन तूर्णं पारमवाप्नुयात्" भा० आ० ५८७५श्लो० "स्नेहात् संमोहमापन्नो नावि दाशो यथा तथा" भा० आश्र० १३९५श्लो०। "एष नौयायिनामुक्तो व्यवहारस्य निर्णयः। दाशापराधतस्तोये दैविके नास्ति निग्रहः। यद्यपि किञ्चिद्दाशानां विशीर्येतापराधतः। तद्दाशैरेव दातव्यं समागम्य स्वतोऽंशतः"। "निषादो मार्गवं सूते दा(शं)सं नौकर्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्यावर्तनिवासिनः" इति च मनुः स्वार्थे क। तत्रार्थे। ततः परं पुत्रशब्द आद्युदात्तस्तत्पुरुषे दाशकपुत्रः। दाश्यते भृतिरस्मै। २भृत्ये (चाकर) पु०रमानाथः।

दाशग्राम पु० दाशप्रधानो ग्रामः। धीवरप्रधाने ग्रामे ततः चतुरर्थ्यां कुसुदादि०ठञ् काशकृत्स्नादि० ठञ्जिठौ वा दाशग्रामिक तस्य सन्निकृष्टदेशादौ त्रि०। स्त्रियां ठञि ङीष् जीठि टाप् इति भेदः।

दाशतयी त्रि दश अवयवा यस्य तयप् दशतयः ततः स्वार्थे प्रज्ञा० ण। दशावयवके ऋग्भेदसंहितायां स्त्री तस्याः दशमण्डलात्मकत्वात्तथात्वम्।

दाश(स)नदिनी स्त्री ६त०। व्यासमातरि सत्यवत्यां धीवरकन्यायाम्। कालीशब्दे २०२१ पृ० दशग्रम्।

दाश(स)पु(पू)र न० दाशा(सा)नु कैवर्त्तान् पिपूर्त्ति पालयति पृ-क। पूरयति पूर-ऋण वा। कैवर्त्तीसुतके क्षीरस्वामी [धिभेदे शब्दार्थचि०।

दाश(स)फली स्त्री दाश(स)प्रियं फलमस्याः ङीप्। औष-

दाश(स)मेय पु० देशभेदे स च देशः दृ०स० १४अ० उत्तरतः कैलास इत्युपक्रमे "यौधेय दाश(स)मेय शूराभीराः" मधूकांश्च उत्तरस्यामुक्तः।

दाशरथ पु० दशरथस्येदम् अण्। १श्रीरामे "प्रदीयतां दाशरथाय मैथिलीति" महानाटकम्। दाशरथेः श्रीरामस्येदम् अण्। २दाशरथिसम्बन्धिनि त्रि०। "अजीगणद्दाशरथं न वाक्यम्" भट्टिः।

दाशरथि पु० दशरथस्यापत्यम् अत इञ्। दशरथस्यापत्येषु श्रीरामादिषु चतुर्षु। "जलधिं विलङ्घ्य शशिदाशरथिः" "एष दाशरथिभूयमेत्य च" "अरक्षदोदाशरथिर्भवन् भवान्" माघः। "सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम्" रघुः।

दाशराज्ञ त्रि० दशानां राज्ञामिदं तद्धितार्थद्विगोः अञ्। उपधालोपः। दशानां राज्ञां सम्बन्धिनि।

दाशरात्रिक त्रि० दशरात्रेण निर्वृत्तः ठञ्। दशरात्रसाध्ये १सत्रभेदे २दशरात्रस्येदम् ठञ्। दशरात्रसम्बन्धिनि "दाशरात्रिकाणाह्नानि द्व्यहादिष्वेकोऽन्वेन" कात्या०श्रौ० २३।१।५ "देवेभ्यो दशरात्रं दिग्भ्यो दाशरात्रिकं पृष्ठ्यम्" शत० ब्रा० १२।१।२।३

दाशु त्रि० दाश-दाने उनु। १दातरि २दक्षे च "यं युवं दाशध्वराय देवाः" ऋ०६।६८।६ "दाशध्वराय दक्षहविष्काय" भा०।

दाशुरि त्रि॰ दाश हिंसने उरिन्। हिंसके। "स्वयं चित्स मन्यते दाशुरिः" ऋ॰ ८।४।१२। "दाशुरिर्दाश्वान्" भा॰

दाशेय पुंस्त्री दाश्या धीवर्य्या अपत्यम् ढक्। धीवर्य्या अपत्ये। स्त्रियां ङीप्। सा च व्यासमातरि सत्यवत्यां शब्दर॰ "अभिगम्योपसंगच्छ दाशेयीमिदमब्रुवन्" भा॰ ७॰ १७२ अ॰। [स्त्रियां टाप।

दाशेर पुंस्त्री दाश्या अपत्यम् क्षुद्रा॰ढक्। धीवर्य्या अपत्ये

दाशेरक पु॰ दाशेरप्रधानः देशः संज्ञायां कन्। १मालवदेशे २तदधिपे नृपे पितादिक्रमेण १तद्देशवासिषु ब॰व॰। "दाशेरकगणैः सह" भा॰भी॰५॰अ॰।

दाशोदनिक पु॰ दश ओदना यत्र यज्ञे तस्य व्याख्यानो ग्रन्थः ठञ्। १दशौदनयज्ञव्याख्याने ग्रन्थे। दशोदनयज्ञस्य दक्षिणा यज्ञाख्यत्वात् ठञ्। २तदाख्ययज्ञदक्षिणायां स्त्री ङीप्।

दाश्य त्रि॰ दश-क दशस्य दंशकस्यादूरदेशादि वङ्गादा॰ चतुरर्थ्यां यत्। दंशकादूरदेशादौ।

दाश्व त्रि॰ दाश-वनु वा॰ इडभावः। दातरि जटाध॰। तत्र दाश्वस् इत्येव पाठो न्याय्यः।

दाश्वस् त्रि॰दाश-दाने क्वसु "दाश्वान् साहानित्यादिना" पा॰नि॰ १दत्तवति। दाश-हिंसने क्वसु। २हिंसितवति। दाश धातौ(दाशुषे)इत्युदाहरणम्। "पीपरो दाश्वांसम्" ऋ॰४। २।८ "दाश्वांसं हविर्दत्तवन्तम्" भा॰ "तस्मै मुनिर्दोरदक्षिणदर्शी दाश्वान् सुपुत्राशिषमित्युवाच" रघुः। "पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्य दाशुषे" भाग॰२।४।१२

दास-दाने भ्वा॰उभ॰सक॰सेट्। दासति ते अदासीत् अदासिष्ट। ऋदित् णिच् अददासत् त। हनने च "यो नः कदाचिदपि दासति द्रुहः" ऋ॰७।१०४।७। दासति हन्ति" भा॰ "खादिगणीयोऽयेव दाशधातौ दशग्रः।

दास त्रि॰ दस-दशने "दंसेष्टनौ नस्य आत्" उणा॰ १ज्ञातात्मनि २भृत्ये ३धीवरे च पुंस्त्री स्त्रियां ङीष्। दासते भृतिरक्षे दासति ददात्यङ्गं स्वामिने उपचाराय वा दास अच् वा। ४भृत्ये (चाकर)। दास-दाने सम्प्रदाने घञ् ५दानपात्रे सम्प्रदाने ६शूद्राणां नामान्त प्रयोज्योपाधिभेदे "शर्म्मान्तं ब्राह्मणस्य स्यात् वर्म्मान्तं क्षत्रियस्य तु। गुप्तदासान्तकं नाम प्रशस्तं वैश्यशूद्रयोः" उद्वाह॰त॰। दासशब्दनिरुक्तिभेदादिकं वीरमित्रोदये दर्शितं यथा

"शिष्टान्नेवासिभृतकाधिकर्मकरेभ्यो दासानामभेदन्दासशब्दव्युत्पत्तिप्रदर्शनमुखेनाह कात्यायनः "स्वतन्त्रस्यात्मनोदानाद्दासत्वं दारवद्भृगुरिति"। "यथा भर्त्तुः सम्भोगार्थं स्वशरीरदानाद्दारत्वम्। तथास्वतन्त्रस्यात्मनः परार्थत्वेन दानाद्दासत्वमिति भृगुराचार्योमन्यत इत्यर्थः। "अनेनात्यन्तपारार्थ्यमासाद्य शुश्रूषका दासाः। पारार्थ्यमात्रमासाद्य शुश्रूषकास्तु कर्मकरा इति भेदोऽप्युक्त इत्यवगन्तव्यम्। अत्यन्तपारार्थ्यं तु तेषामभवति यैः स्वपुरुषार्थवृत्तिनिरोधेन परार्थत्वमाश्रितमिति स्मृतिचन्द्रिका। दासत्वं ब्राह्मणव्यतिरिक्तेष्वेव "त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रस्य न क्वचिदिति" तेनैवाभिधानात्। अनेन दासानां जातितो भेद उक्तः। विप्रेतरेऽपि दास्यमानुलोम्येनैव भवति "वर्णानामानुलोम्येन दास्यत्र प्रतिलोमतः। राजन्यवैश्यशूद्राणान्त्यजताञ्च स्वतन्त्रतामिति" तेनैवोक्तत्वात्। स्वतन्त्रतां त्यजताम् अत्यन्तपारार्थ्यमजतामित्यर्थः। न प्रतिलोमत इति स्वधर्मपरित्यागिभ्योयतिभ्योऽप्यन्यत्र द्रष्टव्यम्। अतएव नारदः" "वर्णानां प्रातिलोम्येन दासत्वन्न विधीयते। स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मतेति"। "यथोत्तमवर्णं प्रति हीनवर्णा सवर्णा वा भार्या भवति न पुनर्हीनवर्णं प्रत्युत्तमवर्णा तद्वैव दासोऽपि भवेदित्यर्थः। एतच्च प्रव्रज्यावसितो हीनवर्णस्यापि दासोभवतीत्यभिधानं क्षत्रियवैश्यप्रव्रज्यावसितविषयञ्च तु ब्राह्मणप्रव्रज्यावसितविषयम् तस्य निर्वासित्वाभिधानेन दासत्वाभावात्। तस्य निर्वासित्वं दर्शितं कात्यायनेन" "प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः। निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविट् भृगुरिति"। "कारयेद्राजेति शेषः क्षत्रञ्च विट्च क्षत्रविट् सर्वेद्वन्द्वोविभाषैकवद्भवतीति वचनादेकवद्भावः। निर्वासनञ्च अपदेनाङ्कयित्वा कर्त्तव्यमित्याहतुर्दक्षनारदौ" "पारिव्रज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति। अपदेनाङ्कयित्वा तु राजा शीघ्रं प्रवासयेदिति"। न चैवं सति "राज्ञ एव तु दासः स्यात् प्रव्रज्यावसितो नरः। न तस्य प्रतिमोक्षोऽस्ति न विशुद्धः कथञ्चनेति" नारदेन प्रव्रज्यावसितोराज्ञ एव दासो नान्यस्येत्यभिधानात् स्वधर्मत्यागिनोऽन्यत्रेति यत्तेनैवोक्तं तन्निर्विषयमितीति वाच्यम्। यतोऽवेक्षाधिकरणन्यायेन क्षत्रियमात्रवचनेनापि राजशब्देनात्र लक्षणया प्रजापालस्य ग्रहणात् प्रजापालकत्वञ्च राज्याधिकृते वैश्यादावपि

सम्भवाद् यः क्षत्रियः प्रव्रज्यावसितः स हीनवर्णस्यापि प्रजापालस्य वैश्यस्य दासो भवतीति प्रतिपादनार्थत्वात्। केचित्तु प्रव्रज्यावसितस्य ब्राह्मणस्य दासत्वनिर्वासनयोर्विकल्पमाहुः तन्न पूर्वोक्तप्रकारेण सम्भवन्त्याङ्गतौ अष्टदोषदुष्टविकल्पाङ्गीकरणस्यान्याय्यत्वात् "दासं विप्रस्य न क्वचिदिति" निषेधाच्च। दारवद्दासतेति वचनाद्ब्राह्मणस्य सवर्णं प्रति दासत्वं प्राप्तं तन्निषेधार्थमाह कात्यायनः"। "सवर्णोऽपि हि विप्रं तु दासत्वञ्चैव कारयेदिति" यदि ब्राह्मणः स्वेच्छया दासम्भजते तदाऽसावशुभकर्म न कुर्यादित्याह स एव "शीलाध्ययनसम्पन्ने तदूनं कर्म कामतः। तत्रापि नाशुभं कर्म प्रकुर्वीत द्विजोत्तमः" इति। "यस्मात्परोपकारः कर्त्तव्य इति विधिः तत्तस्मादूनं कर्म मध्यमोत्तमव्यतिरिक्तमपि कर्म कामतो वेतनमन्तरेण स्वेच्छया परोपकारार्थं कुर्यादित्यर्थः पूर्वार्द्धस्य। तत्रापि तेष्वपि हीनकर्मसु यदशुभकर्म गृहद्वारशोधनादिकं तन्न कुर्यादित्युत्तरार्द्धार्थः। क्षत्रियवैश्यविषये स्वामिनः कर्त्तव्यमाह मनुः" "क्षत्रियस्यैव वैश्यस्य ब्राह्मणोवृत्तिकर्षितौ। बिभ्यादान्तरंशेन स्वामी कर्माणि कारयेदिति"। आन्तरंशेन अक्रौर्येण। अयमर्थः। वृत्तिकर्षितं क्षत्रियं वैश्यञ्च दासीभूतमक्रौर्येण स्वानि कर्माणि कारयन् स्वामी पोषयेदिति। अत्र स्वामीत्यनेन न सम्बन्धिजनककर्माणि कारयेदित्याह कर्माणीति सामान्याभिधानेन जघन्यकर्माण्येव कारयितव्यानीति नियमो नास्तीति सूचयति। वृत्तिकर्षितावित्यनेन, गत्यन्तराभावे एव क्षत्रियवैश्ययोर्दासत्वाङ्गीकारः कार्यो न तु गत्यन्तरसम्भवे इति दर्शयति। बलाद्दासीकरणे दण्डमाह मनुः" "दासन्तु कारयँल्लोभाद्ब्राह्मणः संस्कृतान् द्विजान्। अनिच्छतः प्रभावत्वाद्राज्ञा दाप्यः शतानि षड्डिति"। "प्रभोः भावः प्रभावम् तस्मात् प्रभुत्वादित्यर्थः। साधारणादिभ्यः स्वार्थे अञ्। वक्तव्य इति वार्त्तिकादञ्। द्विजातिपदाच्च दण्डः शूद्रविषय इति दर्शयति। अत एवाह "शूद्रन्तु कारयेद्दास्यं क्रीतमक्रीतमेव वा। दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवेति"। स च दासः पञ्चदशप्रकार इत्याह नारदः "गृहजातस्तथा क्रीतो लब्धोदायादुपागतः। अनाकालभृतश्चैव व्याहितः स्वामिना च यः। मोचितो महतश्चार्त्तात् युद्धप्राप्तः पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्यधैव बड़वाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः" इति। गृहजातः स्वगृहे दासीजातः। क्रीतो मूल्येन स्वाम्यन्तरात् प्राप्तः। लब्धः तत एव प्रातिपक्षादिना। दायादुपागतः रिक्थग्राहित्वेन लब्धः। अनाकालभृतोदुर्भिक्षे यो भरणाद्दासत्वाय रक्षितः। व्याहितः स्वामिना ऋणदातर्यर्पितां नीतः। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः। युद्धप्राप्तः समरे विजित्य गृहीतः। पणे जितः दासत्वपणके द्यूतादौ जितः, तवाहमित्युपगतः तवाहन्दासोऽस्मीति स्वयमेवोपगतः। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावन्तं तव दासोभवामीत्यभ्युपगतः। भक्तदासः सर्वकालम्भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः। भोक्षत यावत्ते मूल्यद्वारेण ददामि तावद्दास इत्यभ्युपगत इति स्मृतिचन्द्रिका। बड़वाहृतः बड़वा गृहदासी तया हृतस्तल्लोभेन तासुद्वाह्य दासत्वेन प्रविष्टः। यश्चात्मानं विक्रीणीते असावात्मविक्रेतेत्येवं धर्मशास्त्रे दासभेदाः पञ्चदशप्रकाराः स्मृताइत्यर्थः। अत्रादानां गृहजातक्रीतलब्धदायागतानाञ्चतुर्णां दासत्वापगमः स्वामिप्रसादादेव नान्यथेत्याह स एव" "तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते। प्रसादात् स्वामिनोऽन्यत्र दास्यमेषां क्रमागतमिति"। आत्मविक्रेतुरपि दासत्वं स्वामिप्रसादादन्यतो नापैतीत्याह स एव "विक्रीणीते स्वतन्त्रः सन् य आत्मानञ्चराधमः। सजघन्यतमस्तेषां सोऽपि दास्याच्च मुच्यत इति" अत्र प्रसादात् स्वामिनोऽन्यत्र इत्यनुषज्यते। ततश्चायमर्थः। आत्मविक्रेतापि गृहजातादिवत् स्वामिप्रसादं विना दास्याच्च विमुच्यत इति एवञ्च गृहदासादयोऽप्यात्मविक्रेतृपञ्चमाः स्वामिप्रसादादकालभृता इव दास्यान्मुच्यन्त इति वचोभङ्ग्यादर्शितमिति मन्तव्यम्। स्वामिप्राणरक्षणाद्गृहजातादयोऽकालभृताश्च सर्वेऽपि दास्यान् मुच्यन्ते इत्याह स एव "यश्चैषां स्वामिनं कश्चिन्मोचयेत् प्राणसंशयात्। दासत्वात् स विमुच्येत पुत्रभागं लभेत चेति"। एषामिति निर्द्धारणे षष्ठी पञ्चदशानां मध्ये अन्यतमइत्यर्थः। यत्तु "ध्वजाहृतोभक्तदासोगृहजः क्रीतदत्रिमौ। पैतृको दण्डदासश्च सप्तैते दासयोनयः इति मनुवचने सप्त विधत्वमुक्तं तेषां दासत्वप्रतिपादनाय न परिसंख्यार्थम्। ध्वजा गृहदासी। एतच्च स्वामिप्रसादात् प्राणरक्षणात् वा दास्यापगमनं प्रव्रज्यावसितभिन्नदासेषु द्रष्टव्यम्।

तस्य दासत्वोन्मोकाभावात्। अतएव याज्ञवल्क्यः "प्रव्रज्यावसितोराज्ञोदास आमरणान्तिकम्" इति। राज्ञो दासः पार्थिवस्यैव दासो नान्यस्येत्यर्थः। अनाकालभृतादीनां प्रव्रज्यावसितात्क्रिकेतव्यतिरिक्तानाञ्चयानान्दास्यापनयनप्रकारमाह नारदः "अनाकालभृतोदास्यान्मुच्यते गोयुगन्दत्वा। आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्। ऋणं तु सोदयं दत्त्वा ऋणी दास्यात् प्रमुच्यते। तवाहमित्युपगतो युद्धप्राप्तः रणेजितः। प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यमर्षणा। कृतकालव्यपगमात् कृतदासो विमुच्यते। भक्तस्योत्क्षेपणात् सद्यो भक्तदासः प्रमुच्यते। निगडाद्बद्धवायास्तु मुच्यते बद्धवाभृतः" इति। एतदुक्तं भवति दुर्भिक्षे पोषणेन कारितो दासो गोयुग्मार्पणान्मुच्यते। आहित दासस्तु स्वामिना गृहीते ऋणे प्रत्यर्पिते सति उत्तमर्णदास्याद्विमुच्यते। ऋणदासस्तु स्वकृतमृणं येनोत्तमर्णाय यावद्धनन्दत्त्वापाकृतं तस्मै तावद्धनं सवृद्धिकं दत्त्वा विमुच्यते। तवाहमित्युपगतादयस्त्रयोदासाः स्वनिर्वर्त्य स्वीयव्यापारनिर्वर्त्तकदासान्तरप्रदानाद्विमुच्यन्ते। कृतकालस्तु दासो दासावधित्वेन परिभाषितकालस्यातिक्रमणाद्विमुच्यते। भक्तदासस्तु भक्तस्योत्क्षेपणाद्वर्त्तितभक्तमूल्यसमर्पणाद्विमुच्यते। गृहदासीलोभेन दासत्वं प्राप्तस्तत्सम्भोगत्यागाद्विमुच्यत इति। बलात्दासीकृतानान्त्यागमाह याज्ञवल्क्यः "बलाद्दासीकृतश्चौरैर्विक्रीतस्यापि मुच्यते" इति। अपिशब्देन दत्ताहितौ गृह्येते। ततश्चायमर्थः। बलात्कारेण यो दासीकृतः यश्च चौरैरपहृत्य दासत्वेन विक्रीत आहितो दत्तो वा स यस्य पार्श्वे दासभावेन तिष्ठति तेन प्रागुक्तमोचनहेतुमन्तरेणैव शीघ्रं मोचनीय इत्यर्थः। यदि तेन लोभादिवशादसौ न मुक्तस्तदा राज्ञा मोचयितव्य इत्याह नारदः "चौरापहृतविक्रीता ये च दासीकृता बलात्। राज्ञा मोचयितव्यास्ते दासत्वेषु हि नेष्यते" इति। चौरेणापहृताश्च ते विक्रीताश्चेति कर्मधारयः। यस्त्वेकस्य दासं पूर्वमङ्गीकृत्यापरस्यापि दासत्वमङ्गीकरोति असावपरेणापि विवर्जनीय इति स एवाह। "तवाहमिति चात्मानं योऽस्वतन्त्रः प्रयच्छति। न स नं प्राप्नुयात्कामं पूर्वस्वामी लभेत तमिति"। अस्वतन्त्रः परदासत्वेनास्वतन्त्रः कामं नूतनस्वामिदासं काम्यमानम् इतरदासीभवन्तं दासं पूर्वस्वामी गृह्णीयादित्यर्थः। एव यदेतद्दासमधिकृत्योक्तन्तत्सर्वं दास्यामपि समानन्यायत्वाद् योजनीयम्। दासीस्वामिनमधिकृत्य विशेषमाह कात्यायनः "स्वां दासीं यस्तु सङ्गच्छेत् प्रसूता च भवेत्ततः। अवेक्ष्य बीजं कार्या स्याददासी मान्यया तु सेति"। स्वकृतगर्भाधानमनुसम्भाय सा दासी सन्तानसहिता दासत्वविमोकविधिना स्वकृतगर्भादेर्दासत्वपरिहारार्थं अदासीत्वेन कार्या स्यादित्यर्थः। कः पुनर्दासत्वविमोचकोविधिरित्याकाङ्क्षायामाह नारदः "स्वन्दासमिच्छेद् यः कर्तुमदासं प्रीतमानसः। स्कन्धादादाय तस्यासौ भिन्द्यात् कुम्भं सहाम्भसा। साक्षतानिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्। अदास इति चोक्त्वा त्रिः प्राङ्मुखस्तमथोत्सृजेदिति"। अत्रापि दासशब्देन दास्या अपि ग्रहणम् लिङ्गस्योद्देश्यविशेषणत्वेन ग्रहाधिकरणन्यायेनाविवक्षितत्वात्। एवमुत्सर्गे सति यद्भवति तदाह स एव "ततः प्रभृति वक्तव्यः स्वाम्यनुपकृष्यालितः। भोज्यान्नोऽप्यप्रतिग्राह्यो भवत्यभिमतः सतामिति"। स्वाम्यनुपकृष्टेण दास्यापाकरणरूपेण वक्तव्यः सम्भाषणार्हः। अदास्या अपि दासेन परिणीताया दासीत्वमेव भवतीत्याह कात्यायनः "दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्। यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः" इति। दासधनस्यापि तत्स्वामिधनत्वमित्याह स एव "दासस्य तु धनं यत्प्राप्तं स्वामी तस्य प्रभुः स्मृतः" इति। ब्राह्मण्यादिषु दासीकरणे दण्डमाह कात्यायनः "आदद्याद् ब्राह्मणीं यस्तु विक्रीणीत तथैव च। राज्ञा तदकृतं कार्यं दण्ड्याः स्युः सर्व एव ते। कामात्तु संश्रितां यस्तु कुर्याद्दासीं कुलस्त्रियम्। संक्रामयन् तथान्यत्र दण्ड्यास्तस्याकृतम्भवेत्। बालधात्रीमदासीञ्च दासीमिव भुनक्ति यः। परिचारकपत्नीं वा प्राप्नुयात्पूर्वसाहसमिति"। तत्कार्यं अकृत निवर्तनीयमित्यर्थः। तेन राज्ञा दण्ड्याः स्युरित्यर्थः। विष्णुरपि "यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसोदण्ड"इति। क्वचिद्दासीविक्रयणे दण्डमाह कात्यायनः "विक्रीणमानां यो भक्तां दासीं विक्रेतुमिच्छति। अनापदिस्थः शक्तः सन् प्राप्नुयात् द्विशतं दममिति"। द्विशतं पणानामिति शेषः। भक्तामित्यनेन दुष्टाया विक्रयणे दण्डाभाव इति दर्शितमिति"।

"चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ता-

व्यास्तनयास्ते स्युरन्यथा दास उच्यते" कालिकापुराणोक्ते निजगोत्रेण संस्कारं विना गृहीते ७दत्तकादौ च तेषां च दासवद्भरणीयतया तथात्वम् दत्तकशब्दे मूलं दृश्यम् । स्त्रियां ङीप् । दास—उपजीवे अच् । दत्तोपजीवके त्रि० । दृढत्वासुरे पु० दासपत्नीशब्दे दृश्यम् । १०दस्यौ च दासवेशशब्दे दृश्यम् । दासस्यापत्यं नडा० फक् । दासायन दासापत्ये पुंस्त्री० । दास+भृशा० अभूततद्भावे क्यङ् । दासायते अदासो दासो भवतीत्यर्थः । अदासं दासं करोत्यर्थे च्वि ब्रजाद्यनु प्रयोगः अदासो दासो भवति दासीभवति अदासं दासं करोति दासीकरोतीत्यादि संज्ञायां कन् । दासक गोत्रप्रवर्त्तकर्षिभेदे तस्य गोत्रापत्यम् अश्वा० फक् । दासकायन तद्गोत्रापत्ये पुंस्त्री ।

दासपत्नी स्त्री ब०व०, दासयति दास—उपजीवे अच् दासोऽत्तासुरः पतिर्यासाम् । १अप्सु । "दासपत्नीरहिगोपा अतिष्ठन्" ऋ०।।२२।।१ "दासो विन्नोपजीवकश्चेतर्दत्तः पतिः स्वामी यासामपां ता दासपत्नीः । दासपत्नीः दस उपक्षये दासयतीति दासोऽसुरः पचाद्यच् । चित इत्यन्तोदात्तत्वम् । दासः पतिर्यासां "विभाषा सपूर्वस्य" पा०ङीप् तत्संनियोगेनेकारस्य नकारः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्" भा०।"अश्विनाविन्दुमन्तं दत्तभूयौ तिरोधत्तामश्विनौ दासपत्नीः" भा० आ०२अ० । ६त० दासस्य पत्नीव दासस्त्रियाश्च सर्ववचनम् ।

दासमित्र न० ६त० । दासस्य मित्रे ततः अदूरदेशादौ काश्या० ठञ् ञिठौ । दासमित्रिक तदूरदेशादौ त्रि० । स्त्रियां ठञि ङीष् ञिठि टाप् । दासमित्रस्यापत्यम् इञ् । दासमित्रि तदपत्ये पुंस्त्री० । ततः ऐषुका०विषये देशे भक्तल । दासमित्रिभक्त तदीये विषये देशे न० ।

दासमीय त्रि०दंशमे देशभेदे भवः, दासं शूद्रं मिमते मानयन्ति मैथुनार्थिन्यस्तादासमयस्तासु भवोवा छ । १दशमदेशभवे २गृहस्थशूद्राभिरतस्त्रीजाते च । "ब्राह्मणानां दासमीयानां वार्द्धी कानामयस्वनाम्" भा०क० ४४अ० । नीलकण्ठेनोक्तैव व्युत्पत्तिर्दर्शिता ।

दासवेश पु० दासस्य दस्योर्विशः । दस्युनाशे "गुह्यये च दासवेशाय चावहः" ऋ०२।।१।।८ "दासवेशाय दासानां दस्यूनां वेशाय नाशाय" भा०

दासी स्त्री दास+ग्रौरा०ङीष् दासस्य पत्नीव, तज्जातिस्त्री वा ङीष । १पा चारिकायां कर्मकर्य्यां दासशब्दे दृश्यम् । "जातोऽपि दासां शूद्रेण कामतोऽशूद्रतो भवेत् । मृते पितरि कुर्य्यस्तं भ्रातरस्तद्भागिकम्" याज्ञ० २शूद्रकैवर्त्तयोर्भार्यायां ३तज्जातिस्त्रियाम् । ४काकलङ्कायां ५नीलाम्लाने ६नीलभिण्डाम्ब राजनि० । ७पीतभिण्डाम्रं रत्नमा० । ८वेद्यां विश्वः । दासाः पाद इव पादोऽस्य कृ० स्यादित्वान्नान्यलोपः । दासीपाद दासतुल्यपादयुक्ते त्रि० । स्त्रियां कृन्मपद्या०ङीष् पादस्य पद्भावश्च । दासीपदोक्तेव "पतितस्योदकं कार्यं सपिण्डैर्बान्धवा बहिः । निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ । दासी घटमपा पूर्णं पर्यस्येत् प्रेतवत् पदा" मनुः । अत्र शब्दकल्पद्रुमे दासीघटत्वेकपदकल्पनं प्रामादिकं तत्र दासाः कर्त्तृत्वेन घटस्य च कार्यत्वेन भिन्नपदार्थत्वेन पदद्वयम्

दासीभारादि पु० पूर्वपदे प्रकृतिस्वरनिमित्ते शब्दगणे स च पा०ग०सू० उक्तो यथा "दासीभारः देवकृतिः । देवभीतिः देवजातिः वसुनीतिः ओषधिचन्द्रमाः ।

दासीसभ न०दासीनां सभा संघातः"सभाऽराजमनुष्य पूर्वा" "अध्वाला च" पा० क्लीवता । दासीसंघाते अमरः दासा मनुष्यत्वात् संघातार्थकत्वे एव अध्वालापरत्वे क्लीवता शब्दकल्पद्रुमे विपक्षे दासाः सभेत्येकपदमेवोक्तिः प्रामादिकी एकस्याः संघातासम्भवात् शालार्थत्वे च क्लीवत्वाप्रसक्तेः ।

दासेर पुंस्त्री दासाः अपत्यम् युवत्वात् ढक् । दासा अपत्ये १शूद्रे २कैवर्त्ते च । स्त्रियां जातित्वात् ङीष् । दासां भवे त्रि० । दास—वा० यत् । ३उष्ट्रे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष् । स्वार्थे क । दासेरक उष्ट्रे राजनि० । दासीपुत्रादौ च हारा० ।

दास्य न० दासस्य भावः कर्म वा ष्यञ् । दासस्य १कर्मणि २तस्य भावे च । "निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम्" ब्रह्मवै० प्रक० "पशूनां रक्षणं चैव दास्यं शूद्रे द्विजन्मनाम्" मनुः । दासशब्दे उदा०दृश्यम् ।

दास्र न० दस्रौ देवते अस्य अण् । अश्विनोपजीवते ।

दाह पु० दह—भावे घञ् । १भस्मीकरणे "दाहशक्तिरिव कृष्णवर्त्मनि" रघुः"दाहादूर्द्ध्वमशौचं स्यात् यस्य वैतानिको विधिः" शु०त० स्मृतिः । "पांशुवर्षे निशां दाहे" मनुः । अवदाहप्रकारः छन्दोगपरिशिष्टे उक्तो यथा

"दुर्बलं स्नापयित्वा तं शुक्लवस्त्राभिसंवृतम् । दक्षिणाशिरसं भूमौ बर्हिष्यन्यां निवेशयेत् । ततोनाभ्यङ्गमाज्यं सुवस्तुसुपवीतिनम् । चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषयेत् । हिरण्यशकलान्यस्य जिह्वा जिह्वेषु सप्तसु । तस्येत्यथ पिधायैव निर्हरेयुः सुतादयः ।

आज्यपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम्। एकोऽनुगच्छेत्तस्यार्द्धमर्द्धं पर्य्युत्सृजेद्भुवि। अर्द्धमादहनं प्राप्य आसीनोदक्शिरास्सुखः। सव्यं जान्वाचरन् मनकैः सतिलं पिण्डदानवत्"। "अथ पुत्रादिराहृत्य कुर्य्याद्दाहरूपं महत्। भूप्रदेशे शुचौ देशे पश्चाच्छिवादिलक्षणम्। तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं सुखे। आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रं नखि स्रुवम्"। इत्याद्यस्यास्यावने विशेषमाह वराहपुराणम् "दक्षिणाशिरसं कृत्वा सचेलन्तु शवं तथा। तीर्थस्यावाहनं कृत्वा स्नानं तत्र कारयेत्। गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः। कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम्। कौशिकीं चन्द्रभागाञ्च सर्वपापप्रणाशिनीम्। भद्रावकाशां सरयूं गण्डकीं पनसां तथा। वेणवञ्च वराहञ्च तीर्थं पिण्डारकं तथा। पृथिव्यां यानि तीर्थानि सरितः सागरांस्तथा। ध्यात्वा तु मनसा सर्वं स्नानं मतायुषम्। देवाग्निमुखाः सर्वे गृहीत्वा तु हुताशनम्। गृहीत्वा पाणिना चैव मन्त्रमेतमुदीरयेत्"। ओम् "कृत्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता। मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्। धर्माधर्मसमायुक्तं लोभमोहसमावृतम्। दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु। एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्। ज्वलमानं तथा वह्निं शिरःस्थाने प्रदापयेत्। चातुर्वर्ण्येषु संस्थानमेवं भवति पुत्रिके!"। वाग्निपुराणे दाहप्रकारस्तु नारायणभट्टकृतान्त्येष्टिपद्धतौ द्रष्टव्यः।

२कुपितपित्तेजदेहसन्तापभेदे यथाह पित्तकोपकारणसङ्ग्रहे विदाहिलक्षणे भावप्र "विदाहि द्रव्यसङ्कारमम्लं कुर्य्यात्तथा लवणम्। हृदि दाहञ्च जनयेत् पाकञ्चाशु यच्चिरात्"। "अभिहितमतस्तु चैतेषु दाहः परम इष्यते"। "अतिदग्धे दाहपाकरागस्वाङ्गमर्द्दक्लमपिपासामूर्च्छाः स्युर्म्मरणं वा। पाकान्ते च गलतालोष्ठशोषदाहसन्तापान् जनयति" इति च सुश्रु०

दाहक[त्रि० दहति दह-ण्वुल्। १दाहकर्त्तरि "क्षेत्रवेश्म वनग्रामविवीतखलदाहकः" याज्ञ० स्त्रियां ङीपि अत इत्वम्। दाहिका "शक्तिर्यथाग्नौ खलु दाहिका स्थिता" ब्रह्मवै० पु०। २वह्नौ पु० ३चित्रके वृक्षे च ४रक्तचित्रकवृक्षे पु० राजनि०। वह्नौ च दाहिका शक्तिरतिरिक्तेति मीमांसकाः। तन्मतं च चतुर्मानचिन्तामणौ अतिरिक्तशक्त्यवाट-निरासे उत्थाप्य दूषितं प्रसङ्गादत्र दिङ्मात्रं दर्श्यते यथा

"स्यादेतत् ईश्वरवत् कार्य्येषु शक्तिरप्यनुमीयते तथा हि यादृशादेव करानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते अतो यदभावात् कार्य्याभावस्तदङ्गत्वादाभ्युपेयं तेन विना तदभावात् यत्सङ्गायानुपपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः। न चादृष्टवैगुण्यं दृष्टसाकल्ये तदभावात् तस्य तदर्थत्वात् अन्यथा दृढदण्डद्वन्द्वमपि चक्रं न भ्राम्येत्। अथादृष्टविलम्बादपि विलम्बो यथा वन्ध्यास्त्रीप्रयोगे, परमाणुकर्म्मणि, अध्ययनतुल्यत्वे एकत्र फलतारतम्यमिति चेन्न अदृष्टविलम्बे हि न तत्रा-शानुत्पादो मण्यपसारणानुपदं दाहाभावप्रसङ्गात्। किञ्च नियमतो मणिसद्भावे कार्य्याभावस्तदभावे कार्य्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणमु अन्यथा कदाचित् मण्याद्यभावेऽपि तदभावात् कार्य्यं स्यात् वन्ध्यासंप्रयोगे तु दृष्टव्यभिचारादृष्टविलम्बादेव विलम्बः। अदृष्टस्य कचित् साक्षाज्जनकत्वं अन्यथा परम्परया हेतुरपि न स्यात्। न च समप्रत्ययोः समत्वं निरपवादमभ्यस्तयोरेकप्रगल्भते नापर इति दृश्यते। न च सर्वोत्पत्तिमतामदृष्टं निमित्तं कारणम् अगस्त्यागमनसाध्ये सुखे तदभावात् तद्विनाऽधर्मात् सुखं स्यात् न धर्मात्। एतेन सुगस्त्यागमनादित्यादौ सुखमप्युक्तं तथा चागस्त्यागमनकारणत्वेन न स धर्मः स्वेनापूर्ववन्निमित्तफलकत्वेनानर्थत्वात्। दाहप्रतिकूलादृष्टादेव तदभाव इति चेन्न तस्योत्तेजकाभावसहितमण्यजन्यत्वे तत्र दाहार्थिनोऽप्रवृत्तिप्रसङ्गात् तज्जन्यत्वे ततस्तदुत्पादकादेव दाहाभाव इति नियमस्यादृष्टेन प्रयोगोपस्थितोपजीव्यत्वाच्च। प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात् अदृष्टात् शौचाचमनादेश्च साधारणस्यातात्पन्वयः स्यात्। अशुचेरेव तदुत्पत्तौ, शौचे सति तदभावापत्तेः प्रतिपक्षसन्निधापकस्य तत्त्वे, अदृष्टे सति मण्यप्रयोगेऽपि दाहानापत्तिः अग्निसंयोग एव सन्निधिदर्शनेन तदसिद्ध्यभावात्। अन्तु तर्ह्युत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम् एवं च केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टाभावयोऽनुमितोहेतुः प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वं तच्च मण्याद्यभावत्वेन, न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। एवं प्रतिबन्धकत्वाभिमतमण्याद्योनामभावकूट एव कारणं तेन मणिसद्भावे मण्याद्यभावेऽपि न कार्यम्। अनतिरि-

क्षाभाववादिमते च व्यवहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम्। न चाभावो न कारणं, भाववदुग्राहकतौल्यात्। दृष्टञ्च कुड्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताकरणस्य प्रत्यवाये, निषेधस्य वेदप्रामाण्ये जनकत्वमिति प्राञ्चः। मैवं विशिष्टं हि नार्थान्तरं येन तदभावोऽनुगतः स्यात् किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचित् विशेषणस्याभावः क्वचित् मणभावः क्वचिदुभयं कारणमिति व्यभिचाराच्चैकमपि हेतुः स्यात्। स्यादेतत् प्रतियोगिभेदादिव प्रतियोगितावच्छेदकविशेषणभेदेऽप्यभावो भिद्यते अन्यथा पृथिव्यां प्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात्। एवञ्च यथा केवलदण्डसद्भावे, दण्डपुरुषसद्भावे, द्वयाभावे च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावो विशेष्यविशेषणोभयाभावव्यापकोऽनुगत एव दाहकारणमस्तु। अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्यवहार एकशक्तिमत्त्वादिति चेन्न अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात् शक्तेश्चातीन्द्रियत्वात्। अथोत्तेजकप्रयोगकाले मणेः कोऽभावः? न तावत् प्रागध्वंसाभावौ तयोः प्रतियोगिसमानकालत्वात् न च ग्रामोऽयमासीदित्यत्र यथा ग्रामध्वंसप्रयुक्तग्रामघटत्वेन पक्वघटस्य ध्वंसएव, तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभावत्वेन मणिध्वंस एवेति वाच्यं ध्वंसस्यानन्तत्वे उत्तेजकापनयेऽपि दाहप्रसङ्गाभावात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत् यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशयान् अबाधितकेवलपुरुषाभावतदभावव्यवहारयोरुपपादयितुमन्यथाऽशक्यत्वात् तथोत्तेजकोपनयापनयदशायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः तुल्यन्यायत्वात्। यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नान्तर्भवति तदा तुरीय एव संसर्गाभावोऽस्तु न हि कृप्रविशेषबाधे सामान्यबाधो, विशेषान्तरमादायापि तस्य सम्भवात् अन्यथा कृप्रानादिसंसर्गाभाववैधर्म्येण ध्वंसोऽपि न सिद्ध्येत् व्यवहारानुपपत्तिश्च तुल्यैव सोऽयमस्माकं संसर्गाभावकलहो न तु शक्तिवादः। अस्तु वा ध्वंसएवासौ संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् न चैवं विनाशवत्त्वेन प्रागभाव एव सः परिभाषाया अपर्यनुयोज्यत्वात्। यद्वाऽत्यन्ताभाव एवासौ तस्य नित्यत्वेऽपि कादाचित्कप्रतीतिकार्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात् प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च तदैव विशिष्टात्यन्ताभावसत्त्वादिति तत्र यदि प्रतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेषस्य ध्वंसः स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्यात् इति क्षणभङ्गापत्तिः विद्यमानस्य विनष्टत्वे चाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधित प्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः ग्रामोऽयमासीत् पुरुष इत्यादौ सविशेषणे इति न्यायेन विशेष्यवति ग्रामकैवल्यध्वंस एव प्रतीयते ध्वंसस्य ध्वंसानुपपत्तेः न विद्यमानस्य ध्वंसः। एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्य उत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च सः कारणमिति न विफल उत्तेजकापनय इत्यपास्तं, विद्यमानध्वंसस्य ध्वंसाभावात्। न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम् उत्पन्नाभावस्य विशिष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः। तथा हि स एव क्वचित्विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमिति अननुगमस्तदवस्थ एव विशेषणविशेष्याभावयोः प्रत्यासत्तिव्यवच्छेदकानुगतधर्माभावात्। अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु कृतं तदुपजीविनातिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनये उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः तत्तदुत्तेजकाभावविशिष्टमणेरभावकूटस्य जनकत्वादिति चेन्न तत्तदुत्तेजकाभावानामननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्गः। अथ विशेष्यविशेषणाभावयोर्विशिष्टविरोधित्वमनुगतं कारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्ध-

त्वादिति चेन्न सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तेः तदभावस्य तत्त्वात् न चोभयाभाव उभयविशिष्ट एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकभावरूप इति प्रत्येकाभावाद्विशिष्टव्यवहारो न स्यात्। नापि परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च अभेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारविरोधित्वादिनानुगतत्वमपास्तं केनाप्यनुगतेन विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च अभेदे तयोरभावात्। विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः तदभावाभावस्य तत्त्वादित्युक्तत्वात् तस्माद्विशेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति।

"अत्रोच्यते विशेषणविशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहार इति घटतदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम्। न हि तयोरसम्बन्धे विशिष्टव्यवहारः। न च तदभावे सति न विशिष्टाभावव्यवहारः। यस्य च यत्र सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम् स च सम्बन्धाभावोविशेषणाभावाद्विशेष्याभावादुभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम् इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात्। अतएव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे च कैवल्यपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषतो व्यवहारः। एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणं स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः। नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरतिरिक्तसम्बन्धाभावादिति चेन्न तदभावेऽपि स्वरूपसम्बन्धास्याभावात् सर्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धः तयोरभावस्य प्रतिबन्धकाभाव उत्तेजकस्य दाहकारणं तथाचोभयाभावे उत्तेजकसत्त्वे पर दाहः स्यात् उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेन्न अधिकरणाभावावेव स्वरूपसम्बन्धस्तयोर्घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति घटवति कदापि घटाभावप्रत्ययानुदयात् तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः, अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः। तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव। यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी तस्य दण्डित्वाभावात् किन्तु तदन्यः, तस्य चाभावे दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति। तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः तदुक्तं न हि दण्डिनि सति अदण्डानामन्येषां नाभावः किन्तु दण्डाभावस्यैवेति युक्तम् अन्यथा तत्रान्येषामिति पदस्य व्यर्थत्वापत्तेः। तथा केवलप्रतिबन्धकाभावे उत्तेजकसहकृतः प्रतिबन्धको न तु प्रतियोगी तस्य केवलत्वाभावात् किन्तु तदन्यः, तदन्यस्य च प्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे विशिष्ट इति नाननुगमः उत्तेजकापनये केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवति। ननु न प्रतिबन्धकाभावः कारणम् एकदण्डान्वये घटोत्पत्तिवत् प्रतिप्रतिबन्धकसत्त्वेऽपि तदन्यप्रतिबन्धकाभावेऽपि कार्य्यानुदयात् न हि यावत्कारणतावच्छेदकावच्छिन्नं तावदन्वयेऽपि कार्य्यमिति चेन्न प्रतिबन्धकाभावत्वेन न हेतुत्वं अन्योन्याश्रयात् किन्तु तत्तन्मणयाद्याभावत्वेनेत्युक्तत्वात् तत्त्वेऽपि वा घटे दण्डसलिलादिकप्रतिबन्धकाभावकूटहेतुत्वात्। यद्वा प्रतिबन्धकतावच्छिन्नप्रतियोगिक एक एवाभावः कारणं स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्य्योदयः प्रतिबन्धकस्य च संसर्गाभावो हेतुः तेन तत्सत्त्वे तदन्योन्याभावेऽपि न कार्य्यम् अन्वयव्यतिरेकाभ्यां व्याप्यकारणत्वयोर्गृहे संसर्गाभावस्य त्वयाऽपि हेतुत्वाङ्गीकारात् अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे च कार्य्यव्याप्याभावापत्तौ कार्य्यकारणयोर्व्याप्यव्यापकभावाभावे व्याघातात्। किञ्च तथापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योभावमादाय शक्तिसत्त्वप्रसङ्गः। न च स दुर्वचः न वा प्रागभावत्वादिनाननुगमव्यभिचारौ। प्रतियोग्यधिकरणयोः संसर्गमारोप्य यो निषेधः स संसर्गाभावः भूतलं घटसंसर्गो नोवत्र भूतले घटसंसर्गस्य

संसर्गो नारोप्यते किन्तु तादात्म्यम् । वयन्तु ब्रूमः यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधागमः स संसर्गाभावः यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् घटत्वमेव च घटतादात्म्यम् । आरोपस्य हेतुत्वे किं मानमिति चेत् मा भूत्तावदन्यथा, इदमिह, नेदमित्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति । ननु प्रतिबन्धकात्यन्ताभावो न हेतुः तस्मिन् सत्यपि संसर्गाभावात् न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा मणेः स्वावयवद्वृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात् अतएव न तत्प्रध्वंसप्रागभावौ हेतू तयोः करादावद्वृत्तेः गुणकर्मादेश्च प्रतिबन्धकत्वानापत्तेश्च तस्य जन्यधर्मानाश्रयत्वेन तत्र तयोरभावात् न चान्यः संसर्गाभावोऽस्तीति चेन्न संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य प्रतिबन्धकेऽन्तर्भावात् न च समयावच्छेदेन संसर्गितया अत्यन्ताभाव एव तथैवान्वयव्यतिरेकावधारणात् । अथैवं प्रागभावप्रध्वंसस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपपत्तौ न तयोः सिद्धिः अत्यन्ताभावोह्यव्याप्यवृत्तिः तस्य चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित्काल इति चेन्न तत्र विद्यमानताविरोधित्वेनैव कपाले न घट इति प्रतीतिवैलक्षण्यात् नत्वेवं भूतले घटाभावप्रतीतिः । अन्ये तु भविष्यति घटो घटो नष्ट इति विलक्षणप्रतीत्या अत्यन्ताभावेनैकेन समयितुमशक्यत्वात् अन्य एवायं संसर्गाभाव इत्याहुः । एतेन विशेषणाभावविशेष्याभावतदुभयाभावघटितसामग्रीत्रयमेवास्तु हेतुः दाहे च जातित्रयकल्पनमिति प्रत्युक्तं अनुगतहेतुसत्त्वात् आहवैजात्यस्य योग्यानुपलब्धिबाधितत्वात् व्यक्तियोग्यतैव जातियोग्यत्वं मानं योग्येऽयोग्यजात्यभावात् । ननु प्रहर मा दहेत्यादौ सायधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात् न च संकल्पविषयकालविशेष एव तत्र प्रतिबन्धकः संकल्पनाशसमयस्य स्वतोऽविशेषात् । न च मन्त्रपाठजनितमदृष्टमेव तत्र प्रतिबन्धकं तत्कालदाहाप्राप्तिकफलनाश्यत्वेनाग्ने दाहाप्रतिबन्धादिति वाच्यं प्रतिबन्धकस्याविहितत्वेनानिश्चितत्वेनादृष्टाजनकत्वात् । तदाचारस्याविगीतत्वेन श्रुत्याद्यनुभावकत्वादिति चेत् मैवम् यद्देशप्राप्तानाहितसंस्कारविषयकालस्य प्रतिबन्धकत्वात् प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वात् न शक्तिमनपकर्षतां मन्त्रादीनां प्रतिबन्धकत्वमतः शक्तिसिद्धिः । न च कार्यानुत्पाद एव प्रतिबन्धः तज्जनकमेव प्रतिबन्धकमिति वाच्यं कार्यानुत्पादो हि तत्र न प्रागभावो न वा तदुत्तरकालसंसर्गः तस्य मन्त्राद्यजन्यत्वात् इति चेन्न मन्त्रदीक्षाप्रतिबन्धकत्वात् तत्प्रयोक्तारस्तु प्रतिबन्धकाः ते च किञ्चित्करा एव मन्त्रादौ कार्यकारणोपचारात् स्वार्थिकफलप्रत्ययात् वा तथा व्यपदेशः । प्रतिबन्धकस्य सामग्रीविरहः मन्त्राद्यभावघटितसामग्रीविरहः स च मन्त्रादिरेव तदभावाभावस्य तत्त्वात् । नव्यास्तु प्रतिबन्धकाभावो न कारणं न वा शक्तिः, किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धोत्तरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणं दण्डत्ववत् आकाशाद्येकव्यक्तिकेन यथा कारणत्वं क्वचित् प्रतिबन्धेऽप्यन्यत्र शब्दोत्पत्तेः किन्तु भेर्यादेस्तथा कारणत्वमिति तत्प्रतिबन्धे शब्दोत्पत्तिर्नेत्याहुः । तन्न वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्येनोभयस्यापि कारणत्वात् नत्वेकमवच्छेदकं विनिगमकाभावात् । किञ्च यस्मिन् सत्यपि यदभावात् कार्याभावस्तस्य कारणत्वमायाति न तु तदवच्छेदकत्वं न हि कार्येऽयोगव्यवच्छेदः कारणत्वं किन्तु नियतपूर्वसत्त्वं तच्च सहकारिविरहप्रयुक्तकार्याभावेऽप्यक्षतम् । अन्यथा चक्रसहितदण्डत्वेन कारणत्वे सहकार्यवच्छेदः । यस्य यद्धर्मावगत्यैव नियतपूर्ववर्त्तित्वमवगम्यते तदवच्छेदकं दण्डत्वमिव । सहकारी तु न तथा । ननु मा भूत् अर्थापत्तिः शक्तौ मानमनुमानन्तु स्यात् । तथाहि स्थिरोऽवयवी जनकदशाविशिष्टवह्निरजनकदशाव्याप्तत्वभावभूतधर्मवान् जनकत्वात् कुण्ठकुठाराक्षीणकुठारवत् दाह्यासंयुक्तवह्नेर्दाह्यसंयुक्तवह्नित्वादेः प्रतिबन्धकसत्त्वं संयोगादेरजनकदशाव्याप्तत्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मसिद्धिः । यद्यपि शक्तेर्भावहेतुत्वेन नाजनकदशाव्याप्तत्वं तथाप्युक्तविशिष्टाया सख्यत्वम् यद्वा धर्मेऽतीन्द्रियत्वं विशेषणं न च दृष्टान्तासिद्धिः तुल्यधारत्वेऽपि लौहविशेषघटितकुठारे विलक्षणच्छिदाक्रियारूपकार्यवत्त्वादतीन्द्रियत्वसिद्धेः । अथ वा तथाभूत एव वह्निः कार्यानुकूलविशिष्टातीन्द्रियधर्मसमवायी जनकत्वात् आत्मवत् । अतीन्द्रियत्वञ्च यद्यपि न साक्षात्कारविषयत्वं अनित्यसाक्षात्कारविषयत्वं योगजधर्मजन्यसाक्षात्कारविषयत्वं वा परं स्वं वा प्रत्यसिद्धेः संयोगादिपञ्चकजन्यज्ञाना-

विषयत्वमैन्द्रियकाणामपि। तथापि संयोगाद्यन्यतर-प्रत्यासत्तिजन्यसाक्षात्कारविषयत्वसंभवादिसिद्धम् अन्य-तरच्च तदन्यान्यत्वं न चाभावातीन्द्रियत्वं तस्यासिद्धेः। न च वह्नौ स्थितिस्थापकेनार्थान्तरं तत्र तदभावात् क्रियाया वेगेनादृष्टवदात्मसंयोगे वा उत्पत्तेः, नचात्मत्वं नित्यत्वं वोपाधिः स्वैकत्वादिमति द्व्यणुके साध्या-व्यापकत्वात् यद्वा पिण्डीभूतोवह्निः दाहानुकूलातीन्द्रियभावभूतधर्मवान् दाहजनकत्वात् आत्मवत्। नचा-र्थत्वमुपाधिः अदृष्टस्य दाहानुकूलत्वेनादृष्टसाध्याव्यापक-त्वात्। अथ वा करवह्निसंयोगः कार्यानुकूलातीन्द्रिय-धर्मसमवायी जनकत्वात् आत्मवत् द्व्यणुकवच्च। न चात्मत्वं द्रव्यत्वं वोपाधिः द्व्यणुकैकत्वस्पर्शादौ साध्या-व्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकल-दाहहेतुसमवहितोदाहाजनकोवह्निर्जनकदशादृत्तिकार्या-नुकूलभावभूतधर्मशून्यः अजनकत्वात् तीक्ष्णात् कुण्ठवत् यद्वा तथाभूतोवह्निः दाहजनकदशादृत्तिदाहानुकूल-भावभूतधर्मशून्यः दाहाजनकत्वात् दाहासंयुक्तवह्नि-वत् अनुकूलत्वञ्च कार्याभावव्याप्याभावप्रतियोगित्व कारणतदवच्छेदकसाधारणं दृढदण्डत्वेन कारणत्वदृढ-त्वाभावादपि कार्याभावदर्शनादिति। उच्यते। साध्यं विनाप्युभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भ-वात् विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वं यदि च सहचारदर्शनव्यभिचारादर्शनोपाध्युपलम्भमात्रादेव व्या-प्तिग्रहस्तदा शक्तिसिद्ध्यनन्तरं तेनैव हेतुना शक्त्यति-रिक्तत्वक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्म्म-सिद्धिः एवं तत्तदतिरिक्तत्वस्य प्रक्षेपात्तेनैव हेतुनाऽनन्त-तादृशधर्म्मसिद्धिप्रसङ्गः। द्वितीयादितादृशधर्म्मं वि-नापि प्रथमानुमितशक्त्यैव जनकत्वादुपपत्तेः न तादृशा-नन्तसिद्धिरिति चेत् हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या। यत्त्वीश्वरानन्त्यवच्च शक्त्यानन्त्यमित्युक्तं तदबोधात् कार्य्यमात्रे हि कर्तृत्वेन कारणत्वं नत्वी-श्वरत्वेन द्वितर्तृकत्वादिना वा गौरवात् घटे त्वार्थः समाजः। एवञ्च जनकदशाव्यापृत्तत्वेनैव प्रयोजकत्वं न तु भावभूतत्वेनेति गौरवात्। अपि च भावकार्य्य-मात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या एवं सापि समवायिकारणजन्येऽपि तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था। किञ्च प्रथमानुमाने जनकत्व न स्वरूप-योग्यत्वं वह्नौ कुठारे च तदभावात् किन्तु कार्यानुप-धानं तथा च तदुपधानदशायामपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधोदृष्टान्तासिद्धिश्च। लौहविशेषाणामेव सातिशयच्छिदाजनकत्वमतोनातीन्द्रियतैक्ष्ण्यसिद्धिः। अ-ग्निसंयुक्तपुं बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः तुल्ययोगक्षेम-त्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्। अपिच जनक-त्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकी न च जनकत्वाभावस्य शक्त्यावेव प्रसिद्धिः अन्योन्याश्रयात् न च गुरुवचनपरम्परातएव वाक्यार्थतया तत्सिद्धिः अन्वये सिद्धार्थस्याप्रमाणत्वात्। न च पराङ्गसंख्यायां साध्यजनकत्वव्यतिरेकयोः प्रसिद्धिः अप्रत्यक्षायाः शब्दैक-वेद्यायास्तस्याः प्रत्यक्षेण साध्यहेतुव्यतिरेकयोर्ग्रहीतु-मशक्यत्वात्। एतेन परङ्गापूर्वेऽपि तत्प्रसिद्धिरपास्ता। स्यादेतत् तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्त्व-मुखेयमेकता एकजातीयकार्य्ये एकजातीयकारणत्वनिय-मात्। वह्न्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेन्न वह्निजातीयत्वस्याकाञ्चिकतापत्तेः कारणगतैकरूप-मपहाय कार्य्यगतबहुतररूपकल्पने गौरवात् तृणा-रणिमणिप्रभववह्नित्वावान्तरजातेरनुपलब्धिबाधितत्वाच्च; यत्र च तत्तदिन्धनप्रयोज्यं प्रदीपदारुदहनादौ वैजात्य-मनुभूयते तत्र कारणे त्वेकशक्तिसत्त्वमपि नास्ति, किञ्च गोमयवृश्चिकप्रभववृश्चिकादिषु वैजात्यकल्पने तत्प्रभव-वृश्चिकेऽपि वैजात्यं कल्प्यम् एवं तत्प्रभवत्वं तत्प्रभवे-ष्वपीति वैजात्यानन्त्यं विजातीयकारणानां विजातीय-कार्य्यजनकत्वनियमात्। न च तयोर्नैको वृश्चिको बुद्धिव्यपदेश्ययोरविशेषात्। यदि विजातीयेष्वेककार्य्यं शक्तिः समवेयात् न कार्य्यविशेषात् कारणविशेषः तद-भावात्तदभावः काप्यनुमीयेत तदभावेऽपि तज्जातिशक्ति-मतोऽन्यस्मादपि तत्त्वापत्तिसम्भवादिति चेत् वह्निवृश्चि-कादावेवमेतन्निरूपितनियतवह्न्यादिकारणत्वे धूमादौ कुतो न तदनुमानम् अन्यथा कार्य्यवैजात्येऽपि तृणस्य वह्निविशेष एव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे तृणादिप्रभवत्वग्रहानन्तरं वह्न्यवान्तर-जातिग्रहवत् वह्नि-तदन्यजन्यत्वज्ञानानन्तरं धूमावान्तर-जातिग्रहो भविष्यतीत्याशङ्क्येत। बाधकं विना धूमत्वेन वह्निकार्य्यतेति चेत्तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम्। यत्तु तृणत्वेन कार-णत्वग्रहस्योपजीव्यत्वात्तद्रक्षार्थं वह्नौ जातिविशेष एव

कल्प्यते इति तत्र वह्नित्वेन कार्यत्वग्रहात्तद्रूपार्थं तृणादौ शक्तिकल्पनौचित्यात्। यथा चान्वयव्यतिरेकाभ्यां तृणफुत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वं तथैव कार्यदर्शनात एवं तृणारणिमणिफुत्कारनिर्मन्थनतरणिकिरणाना वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वेऽपि फुत्कारेण तृणादेव, निर्मन्थनेनारण्येरेव प्रतिफलिततरणिकिरणैर्मण्येरेवाग्न्युत्पत्तिः न तु मणिफुत्कारादिभ्यो, मणिफुत्कारशक्त्योः परस्परसहकारित्वविरहात्। यत्तु तृणफुत्कारादिस्तोमत्वे विगिष्टे शक्तिरिति तत्र तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति। उच्यते। तृणारणिमणिफुत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजाननशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यावान्तरवह्निव्यक्तिषु जातित्वयकल्पने लाघवमिति तदेव कल्प्यते न च जातौ योग्यानुपलब्धिबाधः गोमयप्रभवदृश्चिकप्रभवदृश्चिकयोर्वा पाटलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् तृणजन्यनानावह्निषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्त्याऽनुगतबुद्धिरस्ति। जातिविषया तृणजन्यत्वेनोपाधिनाऽसाविति चेन्न बाधकं विनानुगतबुद्धेस्तद्व्यङ्ग्यजातिविषयत्वनियमात् न च। गोमयदृश्चिकप्रभवदृश्चिकजातिपरम्परायामननुगतत्वापत्तिः गोमयजन्यदृश्चिक-प्रभवत्वजातेः सत्त्वात् वह्निमात्रे च दाहस्यर्थवानवयवः तत्संयोगः सेवनादिश्च कारणानि न तु तृणादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमादायैव सा, साध्यसामग्र्याजनकत्वात्। ननु तृणारणिमणीनां वह्नौ कारणत्वपक्षे शक्तिवैजात्ययोरन्यतरकल्पनं तदुपक्षे नान्वयव्यतिरेकाभ्यां व्यभिचारात्। अथारणिमण्यभाववति स्तोमविशेषे तृणं विना वह्निव्यतिरेकः तृणान्वयवह्निरित्यन्वयव्यतिरेकाभ्यां तत्रैव स्तोमे तदितरहेतुसकलसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादिकारणत्वपक्ष इति चेन्न तृणं विनापि वह्निरिति ज्ञाने सति नियतपूर्ववर्त्तित्वस्य कारणस्य गृहीतमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वपक्ष इति चेत् व्यभिचारेण वह्नौ तृणजन्यत्वापक्षे तदजन्यत्वस्याप्यग्रहात् वह्निमात्रस्यैव उपजन्यत्वाच्च। न च मण्यजन्यत्वेन तृणजन्यत्वग्रह इति, अन्योऽन्याश्रयात्। यत्तु यत्र कारणताग्राहकं नास्ति तत्र व्यभिचारस्तद्ग्रहपरिपन्थीति तत्र अबाधितनियतपूर्ववर्त्तिताभावग्रहे तद्ग्रहस्यासम्भवात् अभावप्रमायां भावज्ञानानुदयादिति उच्यते उक्तग्राहकैर्वह्निनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य तृणनिष्ठनिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वाऽकार्यकारणव्यावृत्तं परिच्छिद्यते। न तु तृणत्वेन कारणत्वं वह्नित्वेन वा कार्यत्वं तच्चोभयथापि सम्भवति वह्नित्वेन कार्यतया तदनुकूलशक्तिमत्त्वेन तृणादीनां कारणतया वह्नित्वाद्यान्तरजातिविशेषेण कार्यतया वा यत्र च विनिगमकसत्त्वमेव। अथ तृणारणिमणीनामभावत्रयेण कार्यमित्यन्वयव्यतिरेकाभ्याम् अभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः अभावाभावत्वस्य भावपर्यवसन्नत्वादिति चेत् अभावत्रयाभावः किं तृणादिप्रत्येकव्यापकोऽप्येक एव उत तृणादि प्रत्येकमेव। आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे, द्वितीये तृणस्य नारणिमण्यभावाभावत्वं भावाभावत्वतदुभयापत्तेः। एतेनाभावत्रये कार्यं न तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वग्रह इति परास्तम्"।

दाहकाष्ठ न० दाहस्य दाहार्थं काष्ठमस्य। दाहागुरुणि गन्धद्रव्यभेदे राजनि०।

दाहघ्न न० दाहं हन्ति हन-टक्। देहदाहनाशके औषधादिभेदे तत्र चक्रद० उक्तं यथा।

"घृतधौतदृताभ्यक्तं दिह्याद्वा यवसक्तुभिः। कोलामलकयुक्तैर्वा धान्याम्बुभिरपि बुद्धिमान्। आदद्येत् तस्य सर्वाङ्गमारनालाढ्यवारसा। लामज्जेनाथ शुक्लेन चन्दनेनानुलेपयेत्। चन्दनाम्बुकणासुन्दिताम्बुदलोपवीजितः। सुप्याद्दाहार्दितोऽम्भोजकदलीदलसंस्तरे। परिषेकावगाहेषु व्यजनानाञ्च सेवने। शस्यते शिशिरं तोयं तृष्णादाहोपशान्तये। क्षीरैः क्षीरिकषायैश्च सुशीतैश्चन्दनान्वितैः। अन्तर्दाहं प्रशमयेदेतैश्चान्यैश्च शीतलैः। कुशादिशालपर्णीभिर्जीवकाद्येन साधितम्। तैलं घृतं वा दाहघ्नं वातपित्तविनाशनम्। फलिनीलोध्रसेव्याम्बुक्षेमपत्रं कटम्बटम्। काञ्जीयकरसोपेतं दाहे शस्तं प्रलेपनम्। क्षीरेरपद्मकोशीरचन्दनक्षोदवारिणा। संपूर्णामवगाहेत क्रोशीं दाहार्दितो नरः"।

दाहज्वर पु० दाहप्रधानो ज्वरः। देहज्वाद्याविशेषरूपदाहकारके ज्वरभेदे "एतं दृश्चिकमूलन्तु पर्युषितजलेन वै। सार्द्रं विनाशयेद्दुर्दाहज्वरञ्च परमेश्वर।" गारुडे १६३ अ०।

दाहनागुरु न॰दाहनस्य दाहनाय अगुरु। दाहागुरुणि गन्धद्रव्यभेदे राजनि॰।

दाहमय त्रि॰दाहेन प्रचुरः दाहप्रधाने ज्वरादौ। "तत्र दाहमयत्वे भूमीच्छादयः" सा॰द॰। [त्रिका॰।

दाहसर पु॰दाहार्थं स्रियतेऽसौ सृ–आधारे अप्। श्मशाने

दाहहरण न॰दाहो ह्रियतेऽनेन हृ–ल्युट् णिच्-कर्त्तरि ल्यु वा। १वीरणमूले (वेणारमूल)शब्दचं॰।२दाहनाशके त्रि॰

दाहागुरु न॰ दाहस्य दाहार्थमगुरु। स्वनामख्याते गन्धद्रव्यभेदे राजनि॰। तत्काष्ठस्य दाहेनैव गन्धोत्पादनात् तस्य तथात्वम्। [गरदः" मनुः। स्त्रियां ङीप्।

दाहिन त्रि॰ दहति दह–णिनि। दाहके "अगारदाही

दाहुक त्रि॰ दह–बा॰उकञ्। दाहके "नास्याग्निर्दाहुको। भवतीति विज्ञायते" आश्व॰ गृ॰ २।८।१०

दाह्य त्रि॰दह–कर्म्मणि ण्यत्। १दहनीये दग्धव्ये २दाहार्हे च। "यच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता

दिक्क पु॰ दिक्षु कायते कै–क। विंशतिवर्षवयस्के करिशावके करभे शब्दर॰।

दिक्कन्या स्त्री दिग एव कन्याः। १दिग्रूपकन्यायाम्। "दिक्कन्याभिः पवनचमरैर्वीज्यमानः" भारतरत्नम्। दिग एव कन्याः ब्रह्मकन्याः। ब्रह्मणः कन्यारूपायां दिशि तासां ब्रह्मकन्यात्वे नोत्पत्तिकथा वराहपु॰ यथा "शृणु राजन्नवहितः प्रजापाल! कथामिमाम्। यथा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते!। ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते। चिन्ताभून्महती को मे प्रजाः सृष्टिं करिष्यति। एवं चिन्तयतस्तस्य व्यक्तार्थं प्रजात्विह। प्रादुर्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः। पूर्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा। ऊर्द्ध्व एव मनुष्येन्द्राः कन्या ह्यासंस्तदा नृप!। तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः। याः पश्यन्त्यो महाभागा गाम्भीर्य्येण समन्विताः। ता ऊचुः प्रणयाद्देवं प्रजापतिमकल्मषम्। अवकाशन्तु नो देहि देवदेव! प्रजापते!। यत्र तिष्ठामहे सर्वा भर्त्तृभिः सहिताः सुखम्। पतयश्च महाभाग! देहि नोऽव्यक्तसम्भव!। ब्रह्मोवाच ब्रह्माण्डमेतत् सुभोग्यः! शतकोटिप्रविस्तरम्। तस्मान्ने स्वेच्छया दृष्टा उष्यतां मा विलम्बथ। भर्त्तॄंश्च वः प्रयच्छामि सदा रूपस्विनोऽनघाः!। यथेष्टं गम्यतां देशो यस्या यो रोचतेऽधना। एवमुक्ताश्च ताः सर्वा यथेष्टं प्रययुस्तदा। ब्रह्मा ससर्ज तूर्णं तान् लोकपालान् महाबलान्। इन्द्रा तु लोकपालांस्तु ताः कन्याः पुनराह्वयत्। विवाहं कारयामास ब्रह्मा लोकपितामहः। एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च। निर्ऋताय च देवाय वरुणाय महात्मने। वायवे धनदेवाय ईशानाय च सुव्रतः। ऊर्द्ध्वं स्वयमधिष्ठाय शेषायाधो व्यवस्थिताम्। एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः। दशमीं भर्त्तृनाम्नस्तु अर्द्धनाम्नोऽहरत् प्रभुः। ततः प्रभृति ता देव्यः शेन्द्राद्याः परिकीर्त्तिताः"।

दिक्कर पु॰। दिशं स्रोतसदंशनं करोति कृ–टच्। १यूनि त्रिका॰ २शिवे च दिक्करवासिनीशब्दे दृश्यम्।

दिक्करवासिनी स्त्री दिक्करे शिवे वासिनी। देवीभेदे "एवं दिक्करवासिन्याः कथितः पूर्ववत् क्रमः। यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रतः। दिक्करस्तरुणः प्रोक्तस्तथा शम्भुश्च दिक्करः। तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी" कालिका॰ पु॰ ८२ अ॰।

दिक्करिका स्त्री १नदीविशेषे। तत् वा "अस्ति नाटकशैले तु सरो मानससन्निभम्। यत्र सार्द्धं शैलपुत्र्या जलक्रीडां सदा हरः। कुरुते नरशार्दूल! स्वर्णपङ्कजशोभिते। तस्य पश्चान्मध्यपूर्वभागेभ्यश्च सरित्त्रयम्। अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति। तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया। दिग्गजक्षेत्रसंजाता तेन दिक्करिका स्मृता" कालि॰ पु॰ ८२ अ॰। दिक् दन्तदंशनं करिका नखक्षतरेखा च यस्याः। २युवत्यां स्त्री दिक्करिनृशब्दे उदा॰।

दिक्करिन् पु॰ दिक्षु स्थितः करी। ऐरावतादौ दिग्गजे "परिणतदिक्करिकास्तटीर्बिभर्त्ति" माघः। ते च पूर्वादिक्रमेण स्थिताः अमरे दर्शिताः यथा "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"। दिक्षु स्थिताः गजाः दिग्गजाः इत्यर्थः। तत्स्त्रियां स्त्री ङीप्। तेषां क्रमेण स्त्रियश्च "करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात्। ताम्रकर्णी शुभ्रदन्ती चाञ्जना चाञ्जनावती" अमरोक्ताः।

दिक्करी स्त्री "दिग् दृष्टे वर्त्तुलाकारे करिका नखरेखिका" वैजयन्त्युक्तेः दिशः वर्त्तुलाकारा दन्तक्षतभेदा करी च नखक्षतभेदा यस्याः संज्ञात्वात् न कप्, दिक्करः ध्रुवा ततः "वयसि अचरमे" वा॰ तरुणवयोवाचित्वात् स्त्रियां ङीष् वा। २युवत्यां स्त्रियाम् हेमचं॰।

दिक्पति पु० ६त० । दिशां पत्यौ १इन्द्रादौ दिक्कन्या शब्दे दृश्यम् । "पवनोदिक्पतिर्भीम व्याकाशः खचरामराः" संकल्पप्रारम्भमन्त्रः "वितरसि दिशु रणे दिक्पतिकमनीयम्" गीतगो० । "सूर्यः सोमः क्षमापुत्रः सैंहिकेयः शनिः शशी सोमस्त्रिदशमन्त्री च पूर्वादिदिगधीश्वराः" इत्युक्तेषु २सूर्यादिग्रहेषु ।

दिक्पाल पु० दिशं पालयति पाल्-अण् उप०स० । दिक्पतौ इन्द्रादौ "तत्रार्चयन्ति विधिना दिक्पालांश्चैव कर्मिणः" पद्मपु० । कलशशब्दे १७८। पृ० उदा० ।

दिक्शब्द पु० दिशि दृष्टः शब्दः । दिग्वाचकशब्दे पूर्वापरादौ तस्य देशकालादिपरत्वेऽपि भूतपूर्वं गत्या दिग्वाचकत्वात्तथात्वम् "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" पा० "दिशि दृष्टः शब्दो दिक्शब्दः तेन सम्मति देशकालवृत्तिना योगेऽपि भवति" सि०कौ० ।

दिक्शूल न०दिशि दिग्भेदे गतो शूलमिव । प्राच्यादिदिक्षु गमने निषिद्धवारभेदे । "शुक्रादित्यदिने न वारुणदिशं न क्षे कुजे चोत्तरां मन्देऽहोऽथ दिने न शक्रकुभं याम्यां गुरौ न व्रजेत् । शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्तलाभाशया भ्रष्टाशाः पुनरापतन्ति यदि ते शक्रेण तुल्या अपि" ज्योतिःसारसंग्रहः । अन्यान्यिन्मते "बोधे गुरौ दक्षिणाम् । ईशाने ज्वलने चैव नैर्ऋते मारुते तथा । न गन्तव्यं सुराचार्ये प्रतीच्यां रविशुक्रयोः" इति

दिक्साधन न०दिशः साध्यन्ते ज्ञानार्थम् अनेन । दिग्ज्ञानसाधने उपायभेदे तच्च कुण्डार्के दर्शितं यथा "नृपाङ्गुलैः संमितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य । रज्ज्वङ्गुलं शङ्कुमसुप्त मध्ये निवेशयेत् खाक्षिमिताङ्गुलीभिः । चतुर्मिताभिश्च ऋजूत्तमाभिः संस्पृष्टशीर्षं तु शलाकिकाभिः । तच्छङ्कुभा यत्र विशेदधेयाद्वृत्ते क्रमात् स्रोवरुणेन्द्रकाष्ठे" नृपाङ्गुलैः परिमितेन कर्कटेन सूत्रेण वा वृत्तं विलिख्य तन्मध्ये द्वादशाङ्गुलं दृढसूत्रच्छिद्रं स्थापयेत् कीदृशं विंशत्यङ्गुलमिताभिश्चतस्रभिः ऋजुभिः समानाभिः शलाकाभिः कल्पितचतुर्दिग्गतसूत्रस्याभिः संस्पृष्टमस्तकम् एवं शङ्कुसमत्वं साधयित्वा तावशस्य शङ्कोश्छाया पूर्वाह्णे यत्र यस्मिन् प्रदेशे वृत्ते प्रविशति यत्र चापराह्णे वृत्ताद्बहिरपैति तत्र चिह्नयोः क्रमात् प्रतीची प्राची च भवत इति अत्र दिग्ज्ञानशब्दे वक्ष्यमाणम् "वृत्तेऽग्रः सुसमीकृतचित्तिगते इत्यादि सि० शि० वाक्यं प्रमाणम् । तत्र अर्धश्लोकस्योपपत्तिः यमि०उक्ता यथा "दोःकोट्योर्नाम भेदो न स्वरूपभेद इति दोःकोटिवर्गयोगपद कर्णः ।० वृत्तपरिधिस्पृष्टदिग्गताच्छङ्कुग्रं यावच्छीयमानाश्चतस्रः शलाकाः कर्णा भवन्ति समे देशे शङ्कुं निखाय शङ्कुसमितया रज्ज्वा मण्डलं परिलिख्य यत्र शङ्कुच्छाया पतति सा प्राचीति" अत्र शङ्कुसंमितयेत्युपलक्षणं तेनाधिकयापि रज्ज्वा वृत्तं कार्यम् । अन्यथा यत्राच्छाया षड्ङ्गुला तत्र धनुःसंक्रान्तौ द्वादशाङ्गुलशङ्कोश्छायाप्रवेशस्तादृशे वृत्ते न स्यादेव तस्मादस्माभिः षोडशाङ्गुलसूत्रेण वृत्तं कारितं तथा वृत्ते कृते लाघवं चैकेनैव वृत्तेन शङ्कुसमत्वसाधनं दिक्साधनं च सिध्यति । अतएव रामवाजपेयी "शङ्कुमानाधिके व्यासदले वृत्ते विशेद्यदि" इत्याह एवं स्थूलप्राचीसाधनं कृत्वा सूक्ष्ममपि शालिन्याह । "कर्के कीटे गोमृगे यूकया सा द्वाभ्यां चाल्या सिंहकुम्भाश्विकेऽपि । यां वै काष्ठां भानुमान् याति तस्यां चाल्या द्वन्द्वे कार्मुके चालनं न ।" सा प्राची कर्के कर्कसंक्रान्तौ कीटे वृश्चिकसंक्रान्तौ वृषमकरसंक्रान्तौ एकया यूकया चाल्या सूर्यस्यायनवशात् उत्तरायणे उत्तरतः दक्षिणायने दक्षिणतः एवं सिंहकुम्भाश्विके सिंहकन्यातुलासंक्रान्तौ कुम्भमीनमेषसंक्रान्तौ च द्वाभ्यां यूकाभ्यां चालनीया अयनवशात् मिथुनधनुःसंक्रान्तौ चालनं नास्तीति एवं प्राचीसाधनं कृत्वाथोत्तरदक्षिणयोः साधनं शालिन्याह "रज्ज्वुं द्विप्तां मध्यचिह्नां सपाशां प्राचीं शङ्कौ पश्चिमे चापि दत्त्वा । कर्णेऽङ्गीमान् दक्षिणे चोत्तरे च तच्चिह्ने स्याद्दक्षिणाशोत्तरा दिक्" । कुण्डमण्डपयोर्यावान् विस्तारस्तद्द्विगुणकृतमध्याङ्काद्भयतः पाशवती रज्ज्वुर्न्यस्या तां प्राची प्रतीचीचोर्दत्तशङ्कोर्विन्यसेत् ततो मध्याङ्के धृत्वा रज्ज्वुं दक्षिणे उत्तरे चाकर्षेत् विद्वान्, कर्णाङ्के दक्षिणा उत्तरा च स्यादिति अत्र स्पष्टैव युक्तिरिति । अथ रात्रौ दिक्साधनोपायं वक्ष्यन्नालिकयाह "निशि वा श्रवणोदये दिगैन्द्री गुरुभस्योदयनेऽथ वह्निभस्य । शरवर्षिकवायुभान्तरालेऽप्यसतः साधय पूर्ववच्च याम्याम्" अथवा रात्रौ श्रवणस्योदये प्राची अथ वा पुष्यस्योदये प्राची अथवा कृत्तिकोदये प्राची अथ शरवर्षिकस्वाटा वायुस्तयोर्भे चित्राख्यात्रौ तयोरन्तराले प्राची । असतः प्राचीतः पूर्ववत् पूर्वोक्तेन तथा याम्यां दक्षिणादिशं

साधयेदिति "कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम्। एतत् प्राचया दिशो रूपं युगमात्रोदिते पुरः" इति। अथ चित्रास्वात्योर्यदन्तरे प्राचीत्युक्तं तन्मध्यस्य दुर्विज्ञेयत्वात्तदुपायमनष्टुभाह "चित्रां विद्ध्वैकया स्वातीमन्ययापि शलाकया। तिर्यक्स्थान्तरचिह्नात् तु द्विमूलेऽन्या स्फुटेन्द्रदिक्। एकया कृत्वा शलाकया चित्रां विद्ध्वा अन्यया तादृशैव शलाकया स्वातीं विद्ध्वा तयोः शलाकयोरुपान्तं दक्षिणोत्तरा मध्याङ्कात् द्वितीयां शलाकां समतया दद्यात् प्रथमद्वितीययोः शलाकयोर्मूलम् एकीकृत्य तृतीयां मध्याङ्कादुभयसंपातं यावच्चतुर्थीं शलाकां प्रान्ते रज्ज्वा प्रोतलम्बद्वयवतीं पूर्वापरायतां दद्यात् यत्र लम्बको भूम्यां पतितौ तत्राङ्कयोः पूर्वापरस्थत्वदानात् सदा प्राचीत्यत्र सदा युक्तिरिति। अथ प्रकारान्तरेण सूर्योपायेनोदीचीसाधनमाह, दिनमानदले सप्ताङ्गुलच्छायायतो हि यत्। शङ्कुमूले नीयमानं सूत्रं स्यादुत्तरा दिशा"। तिथिपत्राद्दृगणितादा दिनमानमेतावदिति ज्ञात्वा ततो घटिकादिनां ज्ञाते दिनार्द्धे मध्याह्ने सप्ताङ्गुलशङ्कोर्यत्र छायाग्रं लगति तस्माच्छङ्कुमूलं याम्यीयमानं सूत्रं दक्षिणोत्तरसूत्रमिति अथ वा सप्ताङ्गुलशङ्कोर्गणितागतमाध्याह्निकछायातुल्या तस्यैव छाया यदा स्यात्तदा याम्यशङ्कुमूले नीयमानं सूत्रं दक्षिणोत्तरेति। अत्र युक्तिस्तस्मिन् समये रविर्दक्षिणोत्तरवृत्ते भवतीति ततः पूर्ववत् पूर्वापरे साध्ये एवं दिक्साधनं विधाय मण्डलस्य चतुष्कोणत्वाच्चतुष्कोणसाधनं विपरीताख्यानकयाह "दिग्नशङ्कुद्वयगं द्विपार्श्वं विस्तारतुल्यं तु गुणं दृलाङ्के। कोणे प्रकर्षे दिति वेदकोणेष्वेवं चतुःकोणमतीव साधु"। दिग्नयोः पूर्वदक्षिणयोः दक्षिणापरयोः अपरोत्तरयो उत्तरपूर्वयोः शङ्कुद्वयगं द्वौ पार्श्वौ यस्य तं विस्तारेण तुल्यगुणं सूत्रं अर्द्धचिह्ने धृत्वा कोणे आकर्षयेत्। एवं चतुर्ष्वपि कोणेष्विति कृते साधु चतुरस्रं स्यादिति" तद्व्याख्या। अधिकं दिग्ज्ञानशब्दे द्रष्टव्यम्।

दिक्स्रक्ति न० दिक्कोणे। "दिक्स्रक्ति पुरुषमात्रं मीयते" कात्या० श्रौ० २०।३।२।१८। "दिक्स्रक्ति दिक्कोणम्" संग्रह व्याख्या।

दिगंश पु० ७त०। सि०शि० उक्ते दिक्स्थे अंशभेदे यथा "चक्रांशकाङ्के क्षितिजाख्यवृत्ते प्राक्स्थस्तिकाभीष्टदिशस्तु मध्ये। येऽंशाः स्थितास्तेऽत्र दिगंशकाख्यास्तव्याप्तात् दिग्व्येत्यपरे विभागे" सि०शि० "कदाचिदभीष्टदिने यस्मिन् काले प्रच्छकः पृच्छति तत्र कालेऽर्कोपरि न्यस्तस्य दिग्मण्डलस्य क्षितिजस्य च सम्पाते याभीष्टा दिक् तस्याः प्राक् स्वस्तिकस्य चान्तरे क्षितिजवृत्ते येऽंशास्तेऽत्र दिगंशका ज्ञेयाः। तेषां व्या दिग्व्येति एवं पश्चिमभागेऽपि" प्र०मि०

दिगन्त पु० ६त०। १दिशामन्ते। दिगन्तविश्रान्तरथोद्धतसुतः "भुजार्जितानां च दिगन्तसम्पदाम्" रघुः। २शास्त्रीयज्ञानकर्मयुतजनाधिष्ठितमध्यदेशादतिरिक्ते देशे च

दिगन्तर न० दिशामन्तरमवकाशः। १दिशामवकाशे "सङ्ग्रारपूतानि दिगन्तराणि" रघुः। अन्या दिक् मयूर०। २प्रकृतदिशोऽन्यस्यां दिशि च न०।

दिगम्बर पु० दिक्शून्यमम्बरं यस्य। १शिवे २जैनभेदे पु० तन्मतमर्हच्छब्दे उक्तप्रायं किञ्चिदत्राधिकमुच्यते। "दिगम्बरा मध्यमतमाङ्गुराषादमस्तकम्। चैतन्यव्याप्तिर्वंदृष्टेरानखाग्रमुतेरपि"। अस्य भाषा प्राकृतान्तरभेदमिश्रा मागधी। अस्य स्वरूपन्तु गलन्मलपङ्केन पिच्छिलबीभत्सदुष्प्रेक्ष्यदेहच्छविलुञ्चितचिकुरो मुक्तवसनो वेषदुर्दर्शनः शिखिशिखण्डपिच्छिकाहस्तः इति। एतन्मतविद्धं जीवस्य मध्यमपरिमाणत्वं शा०सू० भाष्ययोर्निराकृतं यथा

"एवञ्चात्माऽकार्त्स्न्यम्" सू०। "शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते। शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत। शरीराणाञ्चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्मविपाकेन हस्तिजन्म प्राप्नुवन् कृत्स्नं हस्तिशरीरं व्याप्नुयात्, पुत्तिकाजन्म च प्राप्नुवन् कृत्स्नं पुत्तिकाशरीरे सम्भवेत्। समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः। स्यादेतत्, अनन्तावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे सङ्कुचेयुर्महति च विकाशेयुरिति। तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम्। प्रतिघाते तावद्यानन्तावयवाः परिच्छिन्ने देशे सम्भवेरन्। अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेः जीवस्याणुमात्रत्वप्रसङ्गः स्यात्। अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानन्त्यं नोद्वेजितुमपि शक्यम् अथ पर्यायेण

दृष्टशरीरप्रतिपत्तौ च केचिज्जीवावयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्ति इत्युच्येत तत्राप्युच्यते" भा० । "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" सू० । "न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेतद्दोषपरिमाणत्व जीवस्याविरोधेनोपपादयितुं शक्यते कुतः विकारादिदोषप्रसङ्गात् । अवयवोपगमापगमाभ्यां ह्यनियमापूर्य्यमाणस्यापचीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्य्यं विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्यते. ततश्च बन्धमोक्षाभ्युपगमो बाध्येत, कर्माष्टकपरिवेष्टितस्य जीवस्यालाबूवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध्वगामित्वं भवतीति । किञ्चान्यदागच्छताभपगच्छताञ्चावयवानामागमोपाधिधर्मवत्त्वादेवानात्मत्वं शरीरादिवत् । ततश्चाव्यवस्थितः कश्चिदवयवी आत्मेति स्यात्, न च स निरूपयितुं शक्यते अयमसाविति । किञ्चान्यदागच्छन्नयं ते जीवावयवाः कुतः प्रादुर्भवन्ति अपगच्छन्नयं क्व वा लीयन्त इति वक्तव्यम् । न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च लीयेरन् अभौतिकत्वाज्जीवस्य । नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात् । किञ्चान्यदनवधृतस्वरूपश्चैवं सत्यात्मा स्यात् आगच्छताभपगच्छताञ्चावयवानामनियतपरिमाणत्वात्, अत एवमादिदोषप्रसङ्गात् न पर्य्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते । अथ वा पूर्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरान्तरप्रतिपत्तावकारणत्वप्रसङ्गद्वारेणानित्यतायां चोदितायां पुनः पर्य्यायेण परिमाणानवस्थानेऽपि स्रोतःसन्तानानित्यतान्यायेनात्मनो नित्यता स्यात्, यथा रक्तपटादीनां विज्ञानानवस्थानेऽपि तत्सन्तानानित्यता तद्वद्विचानां(विवसनानाम्) अपीत्याशङ्कानेन सूत्रेणोत्तरमुच्यते । सन्तानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसङ्गः, वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति" ।

२नग्ने त्रि० "दिगम्बरत्वेन निवेदितं वहु" । कुमा० स्त्रियां गौरा०ङीष् । "तथा चैव दिगम्बरी" कालीध्यानम् "छोरूपाऽपि दिगम्बरी त्रिजगतां माताऽपि सद्यौवना" कालीस्तवः । दिगेवाम्बरम् । ४दिग्रूपे अम्बरे दिक् च अम्बरञ्च समा०द्व० । ५दिगाकाशसमङ्गारे च न० "आच्छादितायतदिगम्बरसङ्गकैर्गाम् माघः । ६तमसि न० मेदि० स्वार्थे क । दिगम्बरक अपरके हारा० ।

दिगादि पु० "दिगादिभ्योयत्" पा० विहितयत्प्रत्ययनिमित्ते शब्दगणभेदे स च गण पा०ग०सू०उक्तो यथा "दिक् वर्ग पूग गण पक्ष धाय मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त सुख जघन मेघ यूथ (उदकात्संज्ञायाम्)न्याय वंश वेश काल आकाश" ।

दिगीश्वर पु० ६त० । १इन्द्रादौ दिक्पाले २सूर्य्यादिग्रहे च "दिगीश्वरा भास्करशुक्रभौमा राहुर्भार्किचन्द्रज्ञसुरार्चिताः स्युः" ज्यो०त०दिगीशादयोऽप्यत्र "दिगीशवृन्दांशविभूतिरीशिता" नैष० [उदयाचलादौ ।

दिगुपाधि पु० ६त० दिशां प्राच्यादिव्यवहारोपाधौ

दिग्गज पु० दिशि स्थितो गजः । दिक्षु स्थिते ऐरावतादौ गजे दिक्करिशब्दे दृश्यम् । "नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" रघुः । "चिरस्य याथार्थ्यमलम्भि दिग्गजैः" माघः ।

दिग्जय पु० दिशां तत्स्थलोकरूपाणां जयः । जिगीषुर्यते यज्ञेन ?दिक्षु यत्तन्मन्त्रजपे विद्यया २दिक्स्थलोकादिजये च । दिग्विजयादयोऽप्यत्र

दिग्ज्ञान न० ६त० सि०शि० उक्ते दिशां प्राचीत्वादिज्ञानसाधने प्रकारभेदे स च तत्रोक्तो यथा

"वृत्तेऽम्भःसुसमीकृतक्षितिगते केन्द्रस्थशङ्कोः क्रमाद्छायाग्रं यत्र विशत्यपैति च यतस्तत्रापरेन्द्र्वौ दिशौ । तत्कालापमजीवयोस्तु विवराद्भाकर्णमित्या हतात्लम्बज्याप्रमिताङ्गुलैरपनदिश्यैन्दो स्फुटा चालिता । तन्मत्स्यादथ याम्यसौम्यकलभौ सौम्या ध्रुवे वा भवेदेकस्मादपि भाग्यतो भुजमितां कोटीमिमां शङ्कुतः । न्यस्येद्यष्टिमृजुं तथा भुवि यथा वज्र्यगयोः संयुतिः कोटिः प्राच्यपरा भवदिति कृते बाहुश्च याम्योत्तरा" सू० "उदकेन समीकृतायां भूमाविष्टमाणं वृत्तं विलिख्य तस्य केन्द्रे द्वादशाङ्गुलशङ्कुं निवेश्य तस्य छाया तस्मिन् वृत्ते यत्र प्रविशति पूर्वाह्णे वा अपराह्णे यतो निर्गच्छति तत्र पश्चिमपूर्वदिशौ किल भवतः । परन्तु यस्मिन् काले छायाप्रवेशो जातो यस्मिन् काले च निर्गमस्तात्कालिकयोरर्कयोः क्रान्तिज्ये साध्ये । तयोरन्तरात् तस्माच्छायायाः कर्णेन गुणिताल्लम्बज्यया भक्ताद्यल्लब्धमङ्गुलादि फलं तेनेन्द्रो दिगुत्तरतश्चालिता स्फुटा भवति यद्युत्तरेऽयने रविर्वर्त्तते तदा उत्तरतः यदि दक्षिणे तदा दक्षिणतः । एवं स्फुटा प्राची । अन्यथा स्थूलेत्यर्थः । तन्मत्स्यादुयाम्यसौम्यो दिशौ । अथ प्रकारान्तरेणाह । ध्रुवमयन्त्रस्थलेन विद्वा ध्रुवाभिमुखकी-

शकः सौम्या। स्वस्थानकोन्नतो याम्या। तन्मत्स्यात् पूर्वापरे। प्रथमं माच्छायाग्रदर्शने दिग्ज्ञानसुक्रम्। इदानीमथवैकस्मादपि भाग्यतः। तच्चैवम्। अभीष्टकाले शङ्कोर्भाग्यं चिह्नयित्वा तस्माच्छायाया वक्ष्यमाणप्रकारेण भुजं कोटिं चानीय भुजकोटिमिते शलाके गृहीत्वा शङ्कुमूलादुयथादिग्गतां कोटिशलाकां छायाग्राद्व्यस्तदिग्गतां भुजशलाकां च तथा भुवि न्यसेद्यथा शलाकाग्रयोः संयुतिः स्यात्। एवं कृते सति कोटिः प्राच्यपरा दिग्भवति। बाहुश्च याम्योत्तरा। अत्रोपपत्तिः। अहोरात्रवृत्ते इष्टानाडीघटिकानामग्रे पूर्वाह्णे समभण्डलेन यावदन्तरं तावदेवापराह्णे तावतीनां घटीनामग्रे भवति। अतस्तच्छायाग्रबिन्दुभ्यां दिग्ज्ञानमुपपद्यते। परं तत्कालान्तरेण यदर्कक्रान्त्यन्तरं तेनान्तरितं भवति। अतस्तत् सम्भेयम्। तच्चैवम्। तस्मित् काले यानि कर्णवृत्तान्याकुलानि पूर्वाह्णे यानि चापराह्णे तेषामन्तरं कार्यम्। तत्र लाघवार्थं तत्कालक्रान्त्योरेवान्तरं कृतम्। ततोऽग्राकरणायानुपातः। यदि लम्बज्याकोट्या त्रिज्या कर्णस्तदा क्रान्तिज्यान्तरेण किमिति। अत्र लम्बमग्रान्तरम्। ततोऽन्योऽनुपातः। यदि त्रिज्याभ्यासार्धे एतावदन्तरं तदा कर्णव्यासार्धे किमिति। अत्र तुल्यत्वाद्गुणकभाजकयोस्त्रिज्याभ्यासे हृते सत्युपपन्नं तत्कालापमजीवयोस्तु विवरादित्यादि। यद्युत्तरमयनं वर्तते उत्तरतोऽर्के चालिते शङ्कोर्भाग्यं दक्षिणतो याति तदोत्तरतश्चालनीयम्। अत उपपन्नमैन्द्री स्फुटा चालितेति। भुजकोटीनामुपपत्तिरग्रे। सन्निवेशमात्रेण दिग्ज्ञानमिव दर्शितम्" प्रमि०।

दिग्ज्या स्त्री दिगंशशब्दे दर्शिते सि०शि०उक्ते दिशांशभेदे।

दिग्दर्शन न० दिशो दृश्यान्तेऽनेन दृश-करणे ल्युट्। १दिग्ज्ञानसाधने यन्त्रभेदे(कम्पास)इत०। २दिशां दर्शने च

दिग्दाह पु० दिशां दाहः। बृ०सं० २१अ० उक्ते उत्पातभेदे तच्छुभाशुभादिकं तत्रोक्तं यथा

"दाहो दिशां राजभयाय पीतो देशस्य नाशाय कृताग्रवर्णः। यस्यारुणः स्यादपसव्यरश्मिः यस्यस्य नाशं स करोति दृष्टः। योऽतीव दीप्तो कुरुते प्रकाशं छायामपि व्यञ्जयतेऽर्कवत् यः। राज्ञो महद्भेदयते भयं सः यस्यप्रकोपं चतजानुरूपः। प्राक् क्षत्रियाणां सनरेश्वराणां प्रागुदक्षिणे शिल्पिकुमारपीड़ा। याम्ये शङ्कोपैः पुरुषैस्तु वैश्या दूताः पुनर्भूप्रमदाश्च कोणे। एवाम्बु शूद्राः सपिजीविनश्च चौरास्तुरङ्गैः सह वायुदिक्स्थे। पीड़ां प्रजन्त्युत्तरतश्च विप्राः पाषण्डिनो वाणिजकाश्च शाल्वाम्(ऐशान्याम्)। नभः प्रसन्नं विमलानि भानि प्रदक्षिणं याति सदामतिश्च। दिशां च दाहः कनकाद्रितो हितायं लोकस्य सपार्थिवस्य"।

दिग्देवता स्त्री दिशां तन्मर्यादानां देवता साक्षिभूतेव। दिशां मर्यादासाक्षीभूतदेवतायाम् "दिग्देवता अतिरजस्तमतिर्न विजानाति" भाग०४।१४।९

दिग्ध पु० दिह-क्त। १विषाक्तबाणे अमरः "हृदये दिग्धदग्धरैरवाहतः" कुमा०। २अग्नौ ३स्नेहे च पु०हेमच०। ४प्रबन्धे अजयपालः। ५लिप्ते त्रि० मेदि०।

दिग्बल न० दिङ्निमित्तं ग्रहाणाम् बलम्। लग्नादौ स्थितग्रहाणां दिग्भेदनियमिते बले यथाह ज्योतिषे "लग्ने सौम्यगुराचार्यौ कुजार्कौ दशमे तथा। द्यूने सौरिश्चतुर्थे तु सितेन्दू दिग्बलान्वितौ"। अत्र कोणदिग्बलित्वनिरासाय लग्नदशमद्यूनचतुर्थपदैः पूर्वदक्षिणपश्चिमोत्तरदिगुपादानम्। लग्ने स्थितौ बुधगुरू पूर्वदिग्बलिनौ यतो राशीनामादौ लग्नं तदयस्तु पूर्वदिश्येव भवति। लग्नात् दशमे स्थितौ कुजार्कौ दक्षिणदिग्बलिनौ यतो लग्नाद्दशमराशिरेव दक्षिणदिशि तिष्ठति। सप्तमे स्थितौ शनिः पश्चिमदिग्बली यतो लग्नात् सप्तमराशिरस्तमेति। अस्तश्च पश्चिमदिश्येव भवति। तथा लग्नाच्चतुर्थे स्थितौ शुक्रचन्द्रौ उत्तरदिग्बलिनौ यतो लग्नाच्चतुर्थराशिरेवोत्तरदिग्भागे तिष्ठति। तद्बलान्वितो ग्रहो दिग्बलीत्युच्यते" एतच्चायुर्दायादिषु बलगणनोपयोगि। यात्रादिषु यथास्थितपूर्वाद्यभेदेनैव ग्रहाणां दिग्बलित्वं ज्यो०त० उक्तं यथा- "प्राच्यां सौम्यगुराचार्यौ याम्यां भास्करभूमिजौ। प्रत्यक् सौरिरदीच्यान्तु सितेन्दू दिग्बलान्वितौ"।

दिग्बलिन् पु० दिग्बलमस्यास्ति इनि। १दिङ्निमित्तबलयुक्ते ग्रहे दिग्बलशब्दे दृश्यम्। २तादृशे राशिभेदे च "ऐन्द्र्यां मातुपराशयस्तु पश्चोयाम्ये सवीर्यौ बलिनौ कुजार्कौ बलयुक् तथैव बलिनः पानीयजाद्योत्तरे" ज्यो०त०

दिग्वदन न० दिग्भेदे वदनं यस्य। प्राच्यादिदिग्भेदेन तत्रस्थितमुखके राशिभेदे। "लग्ने दिग्वदनेऽतिदण्डगमनं प्राच्यादि मूलं विना" ज्यो०त० राशीनां दिग्भेदेन मुखसंज्ञं तत्रैव। "मेषाद्यास्त्रिभमात् त्रयाः

ग्रामादिदिङ्मुखास्त्रयी" तथा च मेषः प्राग्वदनः, वृषो-याम्यवदनः, मिथुनः पश्चिमामुखः, कर्कः उत्तरामुखः एवं सिंहादयः धनुरादयश्च । दिङ्नादयोऽप्यत्र ।

दिग्वस्त्र पु॰ दिग्रूपं वस्त्रमस्य । १शिवे २जैनभेदे च ३नग्ने त्रि॰ "दिग्वस्त्रावद्धकाञ्चीमणिमयमुकुटाद्यैर्युता-दीप्तजिह्वा" रत्नाकालीध्यानम् । दिग्वसनादयोऽप्यत्र ।

दिग्वारण पु॰ दिशु स्थितो वारणः । दिग्गजे ऐरावतादौ । "दिग्वारणमदाविलम्" "प्रभिन्नदिग्वारणवाहनो हरिः" कुमा॰ ।

दिग्विजय पु॰ दिशां तत्स्थानपलोकानां विजयः । विद्यायाद्वेन या दिक्स्थानपलोकजये "पाण्डवदिग्वि-जयः भीमदिग्विजयः शङ्करदिग्विजयः" इत्यादि ।

दिङ्ग पु॰ दिङ् इति वायसं शब्दायते कै-क । उलूकपक्षिणि शब्दकल्प॰ । तत्स्फोटने हि दिङ् इति शब्दो जायते इति तस्य तथात्वम् ।

दिङ्नक्षत्र न॰ दिशि दिग्भेदेन स्थितं नक्षत्रम् । "अत्ति-वाद्यास्तु पूर्वादौ वह्नि सप्तोदिताः क्रमात् । यद्दिग्यं यस्य नक्षत्रं तत्र तस्य शुभं गृहम्" ज्यो॰त॰उक्ते नक्षत्रभेदे

दिङ्नाग पु॰ दिशि स्थितो नागः । दिग्गजे "दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्" मेघदू॰ दिङ्नाग मदगन्धिषु" कुमा॰।

दिङ्मण्डल त्रि॰ ६त॰। १दिशां मण्डले २मण्डलाकारे तत्समूहे च । "उन्नादाम्बुदवर्द्धिताम्बुतमसप्रध्वस्तदिङ्मण्डले" उद्भटः ।

दिङ्मात्र न॰ दिशेव मात्रच् । एकदेशे शब्दार्थचिन्ता॰।

दिङ्मूढ त्रि॰दिशि मूढः । दिग्भ्रान्तियुक्ते पूर्वादिदिशां यथार्थतोऽपरिज्ञानम् दिग्भ्रमः तद्युक्ते दिशामयथार्थ-ज्ञानयुक्ते ।

दिण्डि पु॰ डिण्ड+पृषो॰वाद्यभेदे।

दिण्डिर पु॰ दिण्डर+पृषो॰ । वाद्यभेदे अमरः ।

दित त्रि॰ दो-खण्डने क्त इत्वम् । छिन्ने द्वैधीकृते अमरः।

दिति(ती) स्त्री दो-खण्डने क्तिच् वा ङीप् । १दैत्य-मातरि कश्यपपत्न्याम् । "प्रजज्ञिरे महाभागा दक्षकन्या-स्त्रयोदश । अदितिर्दितिः दनुःकाष्ठा" भा॰आ॰६५अ॰ । तासां कश्यपस्य पत्नीत्वं "ददौ च दश धर्माय कश्यपाय त्रयोदश" हरिव॰ ६अ॰ । भावे क्तिन् न ङीप् । २खण्डने च ।

दितिज पु॰ दितेर्जायते जन-ड । असुरे "इत्थं दितिज संघानाम्" भा॰अनु॰१४अ॰ । "दितिजसहस्रगणैर्निर्जेत्य-माणम्" हरिवं॰२३२अ॰"एकएव दितेः पुत्रो हिरण्यक-शिपुः स्मृतः"भा॰आ॰६५अ॰। उक्तेरेकस्यैव तत्सुतत्वेऽपि तद्वंशजानामप्युपचारात् तज्जन्यत्वं द्रष्टव्यम् ।

दितितनय पु॰ ६त॰ । दैत्ये दितिनन्दनदितिसुतादयोऽ-प्यत्र । "नष्टे दितिसुताधीशः पदे रोदसी" वा॰व॰।

दित्य पु॰ दितौ भवः यत् । १असुरे शब्दार्थकल्प॰ । दितिं खण्डनमर्हति यत् । २छेदनार्हे-धान्यादौ त्रि॰ ।

दित्यवाट् पु॰दित्यं छेदनार्हं धान्यादिकं वहति वह-क्विप् । द्विवर्षवयस्के पशौ । "दित्यवाट्योविराट् छन्दः"यजु॰१४ १४॰। "दो अवखण्डने क्तिन् प्रत्ययः दित्यं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् यद्वा द्विवर्षः पशुर्दित्यवाट् विराट् छन्दो भूत्वोत्क्रान्तं दित्यवाहं पशुं वयसा गच्छेत् "दित्यवाहं वयसाग्रोहिराट् छन्दः विराड्-भूत्वा दित्यवाह उत्क्रमतः" शत॰ब्रा॰ ८.२।४।१२। श्रुतेः, वेददी॰स्त्रियां ङीपि वाहयोः। दित्यौही त्यत्र।"दित्यवाट् त्व मे दित्यौही च मे" यजु॰ १८।२६। "द्विवत्सरो दयोदित्यवाट् तादृशी गौर्दित्यौही" वेददी॰ ।

दित्सा स्त्री दातुमिच्छा दा-सन् इस् अभ्यासलोपः भावे च । दानेच्छायाम् ।

दित्सु त्रि॰ दातुमिच्छुः दा-सन्-उ । दानेच्छावति "दित्सुः सुतां योधहरैस्तुरङ्गैः" भट्टिः क्वचित् आर्षे तु नाभ्या-सलोपः "संमङ्गलो यदा मल्लो दिदित्सुरपि जीवितम्" भा॰उ॰७अ॰ ।

दिदृक्षा स्त्री द्रष्टुमिच्छा दृश-सन्-भावे च । दर्शनेच्छा-याम् । "द्रौपदीं प्रार्थयन्तस्ते स्वयंवरदिदृक्षया"भा॰आ॰ १अ॰। "एकस्यसौदर्यदिदृक्षयेव" कुमा॰।

दिदृक्षु त्रि॰ द्रष्टुमिच्छुः दृश-सन्-उ । द्रष्टुमिच्छौ "लो-पितोऽसि मया दिदृक्षुणा" रघुः। "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः" मनुः ।

दिदृक्षेण्य त्रि॰ द्रष्टुमेष्टव्यः दृश-सन् केन्य । "द्रष्टुमे-ष्टव्ये । "दिदृक्षेण्यः परि काष्ठास्तु जैत्राः" ऋ॰१।१४६।५।

दिदृक्षेय त्रि॰ दिदृक्षामर्हति वा॰ढक् । दर्शनीये "दिदृ-क्षेयः सूनवे भाग्यजीकः" ऋ॰ २।११।१२। "दिदृक्षेयः सर्वैर्दर्शनीयः" भा॰

दिद्यु पु॰ दिद्युत्+पृषो॰ । १वज्रे निघण्टुः "ऋजदस्ता इ-नता दिद्युमन्तो" ऋ॰१।७१।५।' 'पाहि मा दिद्योः"यजु॰ २।२०। २वाणे च "अत्राणां अत्यतिरेभ्यति दिद्यून्

धाहि" यजु० १०।१७। दो अवखण्डने द्यन्ति अवखण्डयन्ति दिवसो वाथाः "इयमो वै दिवाव इदुवधमेवैनमेतदति नयतीति" शत०ब्रा०५।४।२।२।

दिद्युत् त्रि० द्युत–क्विप् नि०। १दीप्तिशीले २वज्रे पु०नि०।

दिधिषाय्य न० दधात्याङ्ग दस् धा–आय नि०द्वित्वं धुक् च। १मद्ये २धारोपितवस्तुभावे ३धारके त्रि०। "मित्र इव यो दिधिषाय्यो भूदुदेव" ऋ०२।४।१। "दिधिषाय्यो धारयिता" भा० उव्वटदत्तस्तु दधिषाय्य इति सूत्रं पठित्वा दधिपूर्वकादस्तेराय्यः इति व्याचख्यौ।

दिधिषु पु० दिधीं धैर्यम् इच्छति इष–क्विप् शकन्ध्वा०। द्विरूढायाः स्त्रियाः पत्यौ पुनर्भूपतौ अमरः

दिधिषू स्त्री दधाति पापं धिषूयते वा धा–धिष–वा ऊ अन्दृहनृभू इत्यादिना नि०। वारद्वयविवाहितायां स्त्रियाम्। "ज्येष्ठायां यद्यनूढायां कन्यायामुद्धतेऽङ्गज। । सा चाप्येदिधिषूर्ज्ञेया पूर्वां च दिधिषूः स्मृता" देवलोक्तायां ज्येष्ठाविवाहप्राप्तभावकालीनविवाहयुक्तायां २कनिष्ठायां भगिन्याञ्च।

दिधिषूपति पु०६त०। "भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः। धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः" मनूक्ते विधवायां भ्रातृभार्यायां रते भ्रातरे।

दिधीषू स्त्री दिधिष–ऊ०। दिधिषूशब्दार्थे शब्दरत्ना०।

दिन पु०न०द्यति तमः दे–खण्डने दी–क्ये वा नक् ह्रस्वः। १सूर्यकिरणावच्छिन्ने काले तद्भेदादिकं अहन् शब्दे ५७६ पृ० दृश्यम्। २षष्टिदण्डात्मके मानुषे अहोरात्रे चान्द्रे ३तिथिरूपे काले ४चान्द्रमासात्मके पैत्र्ये कालभेदे सौरवर्षरूपे ५दैवे कालभेदे ब्राह्मे ६कल्परूपे काले च "अजगोपतियुग्मञ्च कर्किधन्विमृगास्तथा। निशासंज्ञाः स्मृतास्तैव शेषास्त्वन्ये दिनाख्यकाः" इति ज्योतिषतत्त्वोक्ते ७राशिभेदे। "दिने दिने त्वं तनुरेधि रेऽधिकम्" नैष० "दिनानि दीनोद्धरणोचितस्य" "दिनेषु गच्छत्सु नितान्तपीवरम्" रघुः। "प्रौढध्वान्तं दिनमिह जलदाः" माघः जीमूतवाहनस्तु सूर्यकिरणावच्छिन्नं चतुर्थांशात्मकं दिनमित्याह। "दिनं दिनेशस्य यतोऽत्र दर्शने तमो तमोऽन्तरदर्शने सति। कृष्टश्यामानां द्युनिशं यथा तथा पितॄणां शशिसूर्यवासिनाम्" सि०शि० दिनमानशब्दे दृश्यम् "तिथिशान्द्रमसं दिनम्" सू०सि०।

दिनकर पु० दिनं करोति कृ–ट, दिने करःकिरणोवास्य। १सूर्ये २अर्कवृक्षे च "दिनकराभिसृता बहुरेणवः" रघुः। "ब्रह्माण्डसम्पुटपरिभ्रमणं समन्तादभ्यन्तरे दिनकरस्य करप्रसारः" सू० सि०।

दिनकरतनय पु० ६त०। अर्कनन्दने १शनौ २यमे च "चारवशात् द्वितीयमष्टमे दिनतनये" वृ०स०१०४अ०। दिनकरसुतादयोऽप्यत्र २कर्णे ४सुग्रीवे ५तपत्यां ६यमुनायां च स्त्री। ("दिनकर्त्ता न दृश्यते" हरिवं०१६२अ०।

दिनकर्त्ता पु०दिनं करोति कृ–तृच्। १सूर्ये २अर्कवृक्षे च

दिनकृत् पु० दिनं करोति कृ–क्विप्। सूर्ये हेमच०। "शुक्लाः करा दिनकृतो दिवादिमध्यान्तगामिनः स्निग्धाः" वृ०सं० ३०अ०। २अर्कवृक्षे च [शब्दर०।

दिनकेशव पु० दिनस्य केशव इवालङ्कारात्। अन्धकारे

दिनक्षय पु० दिनस्य तिथेः क्षयः। तिथिक्षये। "एकस्मिन् सावने त्वङ्गे तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साङ्गिकं फलम्" मलमा०त०वशिष्ठः। तिथिक्षयशब्दे दृश्यम्।

दिनचर्य्या ७त०। भावप्र० उक्ते दिने कर्त्तव्यभेदे यथा "मानवो येन विधिना स्वस्थस्तिष्ठति सर्वदा। तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम्। दिनचर्यां निशाचर्यां ऋतुचर्यां यथोदिताम्। आचरन् प्रेत्य स्वस्थः सदा तिष्ठति नान्यथा"। तत्र स्वस्थस्य लक्षणं माह सुश्रुतः "समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते"। क्रियात कर्म तेन समक्रियः शरीरानुरूपकर्मा। तत्र दिनचर्यामाह ब्राह्मे मुहूर्ते बुद्ध्येत स्वस्थो रक्षार्थमायुषः। तत्र दुःखप्रशान्त्यर्थं स्मरेद्धि मधुसूदनम्। दध्यक्षतदर्भसिद्धार्थविल्वगोरोचनाजलाम्। दर्शनं स्पर्शनं कार्य्यं प्रबुद्धेन शुभावहम्। स्वमानमं हृते पश्येत् यदीच्छेत् चिरजीवितम्। आयुष्प्रस्रवणे प्रोक्तं मलादीनां विसर्जनम्। तदत्र कूजनाध्मानोदरगौरवधारणम्। आदिशब्देन वातमूत्रादीनां ग्रहणम्। आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तयोर्द्वयातः। पुरीषमाध्मादथवा निरेति पुरीषवेगेऽभिहते नरस्य। परिकर्त्तिका गुदे परिकर्त्तनवत्पीडा। पुरीषस्य सङ्गो निरोधः। अर्द्धवातः सङ्गाद्वायुस्तम्भः। वातमूत्रपुरीषाणां सङ्गाध्माने क्रमो रुजा। जठरं वातजास्तान्ये रोगाःस्यु वातनिग्रहात्। वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजाः। विनामो वङ्क्षणानाह स्यात्तद्वद् मूत्रनिग्रहे। विनामः शरीरस्य नम्रता वङ्क्ष

चानाहः वङ्क्षणाकर्षणवत्पीडा। न वेगितोऽन्ल-
कार्यः खाद्य वेगान् धारयेद् बलात्। कामशोकभ-
यक्रोधान् मनोवेगान्विधारयेत्। गुदादिमलमार्गाणां
शौचं कालिबलप्रदम्। पवित्रकरमाख्यातमलक्ष्मीकलि
पापहृत्। प्रक्षालनं मतं पाण्योः पादयोः शुद्धिकार-
णम्। मलघ्नमहरं दृष्यं चक्षुष्यं राजसापहम्।
दन्तकाष्ठविधिः भक्षयेद्दन्तपवनं द्वादशाङ्गुलमायतम्।
कनिष्ठिकाग्रवत् स्थूलमन्त्यमध्ये तथाऽग्रगम्।
एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन तु। दन्तशोधनचूर्णेन दन्त-
मांसान्यवाधयन्। क्षौद्रत्रिकटुकाक्तेन तैलसिन्धुभवेन
वा। चूर्णेन तेजोवत्याश्च दन्तास्थित्वं विशोधयेत्। तेजो-
वती (तेजवङ्कल) इति लोके प्रसिद्धा। मधूको मधुरे
श्रेष्ठः करञ्जः कटुके तथा। निम्बं स्यात्तिक्तके श्रेष्ठः
कषाये खदिरस्तथा। समयन्तु समालोक्य दोषञ्च प्रकृतिं
तथा। यथोचितैरसैर्वीर्यैर्युक्तं द्रव्यं प्रयोजयेत्।
तेनास्य सुखवैरस्यदन्तजिह्वास्रजा गदाः। रुचिवैशद्य
लघुता न भवन्ति भवन्ति च। अर्के वीर्यं वटे दीप्तिः
करञ्जे विजयो भवेत्। प्लक्षे चैवार्थसम्पत्तिर्वदर्यां
मधुराशनम्। खदिरे सुखसौगन्ध्यं बिल्वे तु
विपुलं धनम्। उदुम्बरे तु वाक्सिद्धिरार्के त्वारोग्यमेव
च। कदम्बे तु धृतिर्मेधा चम्पके दृढवाक्स्मृतिः।
शिरीषे कीर्त्तिसौभाग्यमायुरारोग्यमेव च। अपामार्गे
धृतिर्मेधा प्रज्ञाशक्तिस्तथासने। दाडिम्यां सुन्दराकारः
कङ्कोले कुटजे तथा। जातीतगरमन्दारैर्दन्तःस्रग्रञ्च विन-
श्यति। गुञ्जाकातालहिन्तालं केतकञ्च दृढच्छदः।
खर्जूरं नारिकेलञ्च सप्तैते तृणराजकाः। तृणराज
सुतत्मन्न यः कुर्याद्दन्तधावनम्। नरस्याण्डालयोनिः
स्याद्यावद्भङ्गाच्च पश्यति। न खादेद्दु मलताल्वोष्ठजिह्वा
दन्तगदेषु तत्। सुखस्य पाके शोथे च श्वासकास
वमीषु च। दुर्बलो जीर्णभुक्तश्च हिक्कामूर्च्छामदा-
न्वितः। शिरोरुजार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः।
अर्दितः कर्णशूली च नेत्ररोगी नवज्वरी। वर्ज्ज्येद्दन्त-
काष्ठन्तु हृदामययुतोऽपि च। अजीर्णभुक्तः न जीर्णं
भुक्तं यस्य सः। जिह्वानिर्लेखनं हैमं राजतं ताम्रजं
तथा। पाटितं मृदु तत् काष्ठं मृदुपल्लवमेव तथा। तत्
काष्ठं दन्तशोधनयोग्यं काष्ठम्। दशाङ्गुलं मृदु स्निग्धं
तेन जिह्वां लिखेत् सुखम्। तज्जिह्वामलवैरस्यदुर्गन्ध
जड़ताहरम्। गण्डूषमपि कुर्वीत शीतेन प्रथमा
सकृत्। कफतृष्णामलहरं सुखान्तःशुद्धिकारकम्।
सुखोष्णोदकगण्डूषः कफाद्दन्तमलापहः। दन्त-
जाड्यहरश्चापि सुखजाड्यकारकः। विषमूर्च्छागदा-
र्त्तानां शोषिणां रक्तपित्तिनाम्। कुपित्ताग्निमलक्षीण
कृशानां स न शस्यते। सुखोष्णोदकगण्डूषो यथा
"सुखप्रक्षालनं शीतपयसा रक्तपित्तजित्। सुखस्य पीडि-
काशोषनीलिकाव्यङ्गनाशनम्। कुर्याद्वापि कटूष्णेन
पयसास्यविशोधनम्। कफशातहरं स्निग्धं सुख-
शोषविनाशनम्। कटुतैलादि तस्यार्थे नित्याभ्यासेन
योजयेत्। प्रातः क्षौद्रेण मध्याह्ने पित्ते सायं सशी-
रसे। सुगन्धवदनाः स्निग्धनिःस्वना विमलेन्द्रियाः।
निर्व्रणोपचितव्यङ्गा भवेयुर्नस्यशीलिनः। सौवीरमञ्जनं
नित्यं हितमक्ष्णोस्ततो भजेत्। लोचने भवतस्तेन
मनोज्ञे स्वच्छदर्शने। सौवीरं (श्वेतसुरमा) इति लोके
प्रसिद्धम्। स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भ-
वम्। दृष्टेः कण्डूयनहरं दाहक्लेदरुजापहम्।
अक्ष्णोरुपावहञ्चैव वहते माहनातपौ। नेत्रे रोगा न
जायन्ते तस्मादञ्जनमाचरेत्। स्रोतोऽञ्जनं (लक्ष्णसुरमा)
इति लोके। विशुद्धं शोधनं विनापि। सिन्धुसम्भवम्
सिन्धुनाम पर्वतः तत्र सम्भवम्। रात्रौ जागरितः
श्रान्तः अर्दितो भुक्तवांस्तथा। ज्वरातुरः शिरःस्नातो
नाक्ष्णोरञ्जनमाचरेत्। पञ्चरात्रात्रयस्त्वङ्मुखकेशरोमाणि
कर्त्तयेत्। केशश्मश्रुनखादीनां कर्त्तनं सम्प्रसाधनम्।
पौष्टिकं बलमायुष्यं शौचकान्तिकरं परम्। सम्प्र-
साधनम् शोभाजनकम्। उत्पाटयेत्तु लोमानि
नासायाः न कदाचन। तदुत्पाटनतो दृष्टेर्दौर्बल्यं
त्वरया भवेत्। केशपाशे प्रवर्त्तेत प्रसाधन्या प्रसाधनम्।
केशप्रसाधनं केशग्रं रजोजन्तुसमापहम्। आदर्श-
लोकनं प्रोक्तं माङ्गल्यं कान्तिकारकम्। पौष्टिक
बलमायुष्यं दारापत्यश्रीविनाशनम्। लाघवं कर्म-
सामर्थ्यं विभक्तघनगात्रता। दोषक्षयोऽग्निवृद्धिश्च
व्यायामादुपजायते। व्यायामे दृढगात्रस्य व्याधिर्नास्ति
कदाचन। विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विप-
द्यते। भवन्ति शीघ्रं नैतस्य देहे शिथिलतादयः। नचैनं
सहसाक्रम्य जरा समधिरोहति। न चास्ति दृढगात्रेण
किञ्चिद् स्थौल्यापकर्षकम्। स सदा गुणमाधत्ते यतिनां
स्निग्धभोजिनाम्। वसन्ते शीतसमये सुतरां स हितो
मतः। अन्यदापि च कर्त्तव्यो बलाद्वेग यथाबलम्।

हृदयस्थो यदा वायुर्वङ्क्षं शीघ्रं प्रपद्यते। सुखञ्च शोषं लभते तद् वक्षोऽस्य लक्षणम्। किं वा ललाटे नासायां गात्रसन्धिषु कक्षयोः। यदा सञ्जायते स्वेदो वक्षोऽन्तु तदादिशेत्। भुक्तवान् जलसम्भोगः कासी श्वासी क्षयः-क्षयी। रक्तपित्ती क्षती शोषी न तं कुर्यात् कदाचन। अतिव्यायामतः कासो ज्वरः कर्द्दिः भ्रमः क्लमः। तृष्णा-क्षयः प्रतमको रक्तपित्तञ्च जायते। अभ्यङ्गं कारये-न्नित्यं सर्वेष्वङ्गेषु पुष्टिदम्। शिरःश्रवणपादेषु तं विशेषेण शीलयेत्। सार्षपं गन्धतैलञ्च यत्तैलं पुष्प-वासितम्। अन्यद्द्रव्ययुतं तैलं न दुष्यति कदाचन। गन्धतैलम् गन्धद्रव्याणामगुर्वादीनामग्नियोगेन निष्का-शितः स्नेहः। अभ्यङ्गो वातकफकृच्छ्रमशान्तिकरं सुखम्। निद्रावर्णमृदुत्वायुः कुरुते देहपुष्टिकृत्। अभ्यङ्गः शीलितो मूर्ध्नि सकलेन्द्रियतर्पकः। दृष्टिपुष्टि-करो हन्ति शिरोभूमिगतान् गदान्। केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा। कृष्णतां कुरुते कुर्याच्छिरसः पूर्णतामपि। न कर्णरोगाश्च मलं न च मन्या-हनुग्रहः। नोग्रैःश्रुतिर्न व्याधिर्यं खालित्यं कर्ण-पूरणात्। रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते। तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते। पादाभ्यङ्गश्च तत्स्थैर्य्यं निद्राहृष्टिप्रसादकृत्। पादसुप्ति श्रमस्तम्भसङ्कोचस्फुटनप्रणुत्। व्यायामक्लमसम्पुष्टं पङ्गुत्वं समर्दितं तथा। व्याधयोनोपसर्पन्ति वैनतेयमिवोरगाः। लोमकूपं शिराजालं धमनीभिः कलेवरैः। तर्पयेद्बल-माधत्ते स्नेहयुक्तावगाहने। अद्भिः संसिक्तमूलानां तरूणामम्लवादयः। वर्द्धन्ते हि तथा नृणां स्नेह-संसिक्तधातवः। नवज्वरी अजीर्णी च नाभ्यङ्गेत कथ-ञ्चन। तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः। निरूढः दत्तो निरूहयस्तिः यस्य सः। पूर्वयोः लक्षणता व्याधेरसाध्यत्वमथापि वा। शोषाणां नत्विह प्रोक्ता वह्निवादादयो गदाः। पूर्वयोः तरुणज्वरिणोऽजीर्णि-नश्च। उद्वर्त्तनकृत्फकरं मेदोघ्नं शुक्रदम्परम्। बल्यं शोणितलञ्चापि त्वक्प्रसादमृदुत्वकृत्। सुखदेपात् दृढं चक्षुः पीनोरुगण्डस्तथानमम्। कान्तमव्यङ्गपिडकं भवे-त्कमलसन्निभम्। दीपनं दृष्टिमायुष्यं स्नानमोजो बलप्रदम्। कण्डूमलश्रमखेदतन्द्राजड्दाहपाकनुत्। बाह्यैश्च सेकैः शीताद्यैरुष्णान्नयाति पीडितः। नरस्य स्नातमात्रस्य दीयते तेन पावकः। शीतेन पयसा स्नानं रक्तपित्तप्रशान्तिकृत्। तदेवोष्णेन तोयेन बल्यं वात-कफापहम्। शिरःस्नानमचक्षुष्यमत्युष्णेनाम्बुना सदा। वातश्लेष्मकोपे तु हितन्तच्च प्रकीर्त्तितम्। "अशीतेनाम्भसा स्नानं पयःपानञ्चकाः स्त्रियः। एतद्दो मानवा! पथ्यं स्निग्धमल्पञ्च भोजनम्।" हरिचन्द्र-स्यैतत्। यः सदामलकैः स्नानं करोति स विनिश्चितम्। बलीपलितनिर्मुक्तो जीवेद्वर्षशतत्रयम्। स्नानं ज्वरेऽ-तिसारे च नेत्रकर्णाक्षिवार्त्तिषु। आध्मानपीनसाजीर्ण-मुक्तवत्सु च गर्हितम्। स्नानस्यानन्तरं सम्यग्वस्त्रेणा-ङ्गस्य मार्जनम्। कान्तिप्रदं शरीरस्य कण्डूत्वगदोष-नाशनम्। कौशेयौर्णिकवस्त्रञ्च रक्तवस्त्रन्तथैव च। वातश्लेष्महरन्तत्तु शीतकाले विधारयेत्। कौशेयं पट्टाम्बरम् तसरवस्त्रञ्च। मेध्यं सुशीतस्थितन्तं कषायं वस्त्रमुच्यते। तद्वारयेदुष्णकाले तत्रापि लघु शस्यते। कषायं (कोसुकी) इति लोके कषायरागरक्तं वा। शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम्। नचोष्णञ्च न वा शीतन्तत्तु वर्षासु धारयेत्। यशस्यञ्चाप्यमायुष्यं श्रीम-दानन्दवर्द्धनम्। त्वच्यं वशीकरं रुच्यं नवं निर्मल-मम्बरम्। काम्यं कामोद्दीपकम्। कदापि न जनैः वस्त्रधार्य्यं मलिनमम्बरम्। तत्तु कण्डूत्वमिकरं ग्लान्य-लक्ष्मीकरम्परम्। अलक्ष्मीः अशोभा हारिद्रञ्च। कुङ्कुमञ्चन्दनञ्चापि कृष्णागुरु च मिश्रितम्। उष्ण वातकफध्वंसि शीतकाले तदिष्यते। चन्दनं घनसारेण वालकेन च मिश्रितम्। सुगन्धि परमं शीतमुष्णकाले प्रशस्यते। घनसारः कर्पूरः वालकं ह्रीवेरम्। चन्दनं घुसृणोपेतं मृगनाभिसमायुतम्। न चोष्णं नच वा शीतं वर्षाकाले तदिष्यते। घुसृणं कुङ्कुमम्। मृग-नाभिः कस्तूरी। अनुलेपस्तृषामूर्च्छादुर्गन्धस्वेद-दाहजित्। सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः। स स्नानानर्हलोकानामनुलेपोऽपि नो हितः। सुगन्धि-पुष्पपत्राणां धारणङ्कान्तिकारकम्। पापरोगहरं कामदं श्रीविवर्द्धनम्। भूषणैर्भूषयेदङ्गं यथायोग्यं विधानतः। शुचिसौभाग्यसन्तोषदायकं काञ्चनं कृतम्। अहरिद्रिहरं पुष्टिकरं दुःस्वप्ननाशनम्। पापदौर्भाग्य-शमनं रत्नाभरणधारणम्। माणिक्यान्तरणैः सुजात्य-ममलं सुखाफलम् शीतगोर्मार्हेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम्। देवेज्यस्य च पुष्पराग मसुरा-चार्य्यस्य वज्रं, शनेः नीलशिर्मसमन्वयोश्च गदिते गोमेद-

वैदूर्यके। वासःस्रङ्गारररत्नानां धारणं प्रीतिवर्द्धनम्। रक्षोघ्नमर्च्यमौजस्यं सौभाग्यकरमुत्तमम्। सततं विष्णुमन्त्रस्य महौषध्यास्तथैव च। रोचनासर्षपादीनां माङ्गल्यानाञ्च धारणम्। आयुर्लक्ष्मीकरं रक्षोहरं मङ्गलदं शुभम्! हिंस्रादिभयविध्वंसि वशीकरणकारणम्। ततो भोजनवेलायां कुर्यान्माङ्गल्यदर्शनम्। तस्य प्रदर्शनन्नित्यमायुर्धर्मविवर्द्धनम्। लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः। पुष्पस्रक्सर्पिरादित्य आपो राजा तथाष्टमः। पादुकारोहणङ्कुर्यात् पूर्वं भोजनतः परम्। पादरोगहरं दृष्ट्य चक्षुष्यञ्चायुषो हितम्। शरीरे जायते नित्यं वाञ्छा नृणाञ्चतुर्विधा। बुभुक्षा च पिपासा च सुषुप्सा च रतिस्पृहा। भोजनेच्छाविघातात् स्यादङ्गमर्दोऽरुचिः श्रमः। तन्द्रालोचनदौर्बल्यं धातुदाहो बलक्षयः। विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत्। अवक्षावरोधश्च रक्तशोषो हृदि व्यथा। निद्राविघाततो जृम्भा शिरोलोचनगौरवम्। अङ्गमर्दस्तथा तन्द्रा स्यादन्नपाक एव च। बुभुक्षितो न योऽश्नाति तस्याहारेऽनलक्षयात्। मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः। आहारं पचति शिखी दोषानाहारवर्जितः। पचति दोषक्षये च धातून् धातुक्षये च प्राणान्। आहारः प्रीणनः सद्यो बलकृद्देहधारणः। स्वस्थायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः। यथोक्तगुणसम्पन्नं नरः सेवेत भोजनम्। विचार्य दोषकालादीन् कालयोरुभयोरपि। उभयोः कालयोः प्रातःसायञ्च। तथा च। सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम्। नान्तरा भोजनङ्कुर्यादग्निहोत्रसमोविधिः। प्रातः प्रथमयामादुपरि द्वितीययामादर्वाक्। तथा च। "याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्। याममध्ये रसोत्पत्तिर्यामयुग्माद् बलक्षयः"। अन्यच्च। "क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च। काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः"। रसादीनां पाकस्थानमाह उष्णरश्मिरत्याहो वेगात्मनो यथोचितः। क्षुधा क्षुत्पिपासा च जीर्णाहारस्य लक्षणम्। स्थानमाह आहारन्तु नरः कुर्याद्विहारमपि सर्वदा। उभाभ्यां लक्ष्मयुपेतः स्यात् प्रकाशे हीयते श्रियाः। निहारो मलमूत्रोत्सर्गः। आहारनिहारविहारयोगाः स देव सद्भिर्विजने विधेयाः"। अतः परम आहारविधिः स च आहारशब्दे सुश्रुतोक्तः उक्तप्रायः।

आहारानन्तर कृत्यानञ्च भावप्रकाशे दर्शितं यथा "एवं भुक्त्वा समाचामेद्भूयश्चरणपूर्वकम्। भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत्। दन्तान्तरगतं चान्नं शोधनेनाहरेत् शनैः। कुर्यादनिर्हृतं तद्धि सुखस्यानिष्टगन्धताम्। दन्तलग्ननिर्हार्यं शेषं मन्येत दन्तवत्। न तत्र बहुशः कुर्यात् यत्नं निर्हरणं प्रति। आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत्। शुक्रा च संस्करेन्नित्यमगस्त्यादीन् सुखावहान्। विष्णुरात्मा तथैवान्नं परिणामश्च वै यथा। सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदन्तथा। अगस्तिरग्निर्वैश्वानरश्च भुक्तं समान्नं ज्वरयत्वशेषम्। सुखञ्च मे तत्परिणामसम्भवं यच्चान्त्ररोगं मम चास्तु देहम्। अङ्गारकमगस्तिञ्च पावकं सूर्यनन्दिनौ। पञ्चैतान् संस्करेन्नित्यं भुक्तं तस्याशु जीर्यति। इत्युच्चार्य्य स्वहस्तेन परिमार्ज्य तथोदरम्। अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः। अतन्द्रितः निरन्तरं आपत् तिष्ठेत्तु स्वस्थात्। "भुक्तमात्रस्य तु स्वप्नादन्त्यन्निं कुपितः कफः" इति वचनात्। जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेधते। भुक्तमात्रे कफश्चापि क्लेदोऽस्य भोजनोपरि। विदग्धं किञ्चित् पक्वं किञ्चिदपक्वम्। ततः परं भुक्तमात्रे सञ्जातस्य कफस्य प्रतीकारोपायः ताम्बूलादिभक्षणम् तल्लोकं तच्च ताम्बूलशब्दे २२०७ पृ० उक्तम्। खदिरगुणादि च तल्लोकं खदिरशब्दे २४६४ पृ० उक्तम्। ततः क्षयशेषास्तल्लोक्ता यथा

"भुक्त्वा शतपदं गच्छेच्छनैस्तेन तु जायते। अङ्गसङ्घातशैथिल्यं शीघ्राजानुकटीसुखम्। भुक्तोपविशतस्तन्द्रा शयानस्य तु पुष्टता। आयुश्चङ्क्रमाणस्य मृत्युर्धावति धावतः। चङ्क्रमाणस्य पदशतं शनैर्गच्छतः। श्वासानष्टौ सुखानस्तान् द्विः पार्श्वे तु दक्षिणे। ततस्तद्द्विगुणान् वामे पश्चात् स्वप्याद् यथासुखम्। यामदिशायामनलो नाभेरूर्द्ध्वे स्थितो जन्तूनाम्। तस्मात्तु वामपार्श्वे शयीत भुक्तः प्रपाकार्थम्। त्रिदोषशमनी खड्गा तूली वातकफापहा। भूशय्या दृंहणी दृष्या कोशपट्टी तु वातला। अन्यः पुनराह "भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी। सुशय्या शयनं हृद्यं पुष्टिनिद्राधृतिप्रदम्। श्रमानिलहरं दृष्टं विपरीतमतोऽन्यथा"। संवाहनं मांसरक्तत्वक्प्रसादकरं परम्। प्रीतिनिद्राकरं दृष्टं कफवातश्रमापहम्।

प्रवातरौक्ष्यवैवर्ण्यं सन्मलदाहपित्तहृत्। स्वेदमूर्च्छा-पिपासाघ्नमप्रवातमतोऽन्यथा। सुखं प्रवातं सेवेत ग्रीष्मे शरदि चान्तरा। निर्वातमायुषे सेव्यमारोग्याय च सर्वदा। पूर्वोऽनिलो गुरुः सोष्णः स्निग्धः पित्तास्रदूषकः। विदाही वातलः श्रान्तिकफशोषवतां हितः। स्वादुः पटुरभिष्यन्दी त्वग्दोषार्शोविषम-लमीन्। सन्निपातं ज्वरं श्वासमामवातञ्च कोपयेत्। स्वादुर्मध्यद्रव्येषु बाहुल्येन मधुररसजनकः। दक्षिणः पवनः स्वादुः पित्तरक्तहरो लघुः। वीर्येण शीतलो बल्यश्चक्षुष्यो न तु वातलः। पश्चिमः पवनस्तीक्ष्णः शोषणो बलहृल्लघुः। मेदःपित्तकफध्वंसी प्रभञ्जन-विवर्द्धनः। उत्तरो मारुतः शीतः स्निग्धो दोषप्रकोप-कृत्। क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः। दोषप्रकोपकृत् आतुराणाम्। आग्नेयो दाहकृद्रूक्षो नैर्ऋतो न विदाहकृत्। वायव्यस्तु भवेत्तिक्त ऐशानः कटुकः स्मृतः। विश्वग्वायुरनायुष्यः प्राणिनां बहुरोग-कृत्। अतस्तं नैव सेवेत सेवितः स्यात् शर्मणे। व्यजन-स्यानिलो दाहस्वेदमूर्च्छाश्रमापहः। तालवृन्तभवो वातस्त्रिदोषशमको मतः। वंशव्यजनजस्तूष्णो रक्त-पित्तप्रकोपणः। चामरो वस्त्रसम्भूतो माधूरो वेत्रज-स्तथा। एते दोषजिता वाताः स्निग्धाः हृद्याः सुपू-जिताः। दिवास्वापं न कुर्वीत यतोऽसौ स्यात् कफा-पहः। ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नो निषिध्यते। उचितो हि दिवास्वप्नो नित्यं येषां शरीरिणाम्। वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा। व्यायाम-प्रमदाध्वाहनरतान् क्लान्तानतीसारिणः। सूक्ष्मश्वास-वतस्तृषापरिगतान् हिक्कामरुत्पीडितान्। क्षीणान् क्षीणकफान् शिशून् मदहतान् हृद्रोगिणो रात्रीजागरिताञ्चराञ्शिरशनान् कामं दिवा स्वापयेत्। दिवा वा यदि वा रात्रौ निद्रा सात्म्योकृता तु यैः। न तेषां स्वपतां दोषो जाग्रतां चोपजायते। स्वपतां दिवा। जाग्रतां रात्रौ। भोजनानन्तरं निद्रा वातं हरति पित्तहृत्। कफं करोति वपुषः पुष्टिसौख्यलभोति हि। शयनं पित्तनाशाय वातनाशाय मर्दनम्। वमनं कफनाशाय ज्वरनाशाय लङ्घनम्। आसीनं चूर्णितं यत्तु नाभिषन्दि न रूक्षकम्। अपरानमुदरेऽस्य संस्थापनहेतुनाह यद्वान् सर्वांस्तु रूपाणि रसान् गन्धान् मनःप्रियान्। भुञ्जानोऽपि सेवेत तेनाग्नं साधु तिष्ठति। उदरे इति विशेषः। अत्रस्योदरे-ऽस्तितिहेतुनाह यद्वः सर्वत्रया रूपं रसो गन्धो जुगुप्सितः। भुक्तमप्रवनस्यास्मतिहास्यञ्च वामयेत्। अप्रयतमपवित्रम्। अन्यदपि वर्ज्जनीयमाह शयनं चासनञ्चाति न भजेत् द्रवाधिकम्। नाग्न्वातपो न द्रवनं न वाहनं नापि वाहनम्। द्रवनं बाहुभ्यां जल-प्रतरणं यानं मार्गे चलनं, वाहनमश्वादि। व्यायामञ्च व्यवायञ्च धावनं यानमेव च। युद्धं गीतञ्च पाठञ्च मुहूर्त्तं भुक्तवान्त्यजेत्। परिवर्जनार्थमजीर्णस्य हेतु-नाह अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्न-विपर्य्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य। दैन्याभयक्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन। विद्वेषयुक्तेन न सेव्यमानमन्नं न सम्यक् परिपाकमेति। सन्धारणात् अधोवात-मलमूत्रादीनाम्। अध्यशनलक्षणमाह अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते। तस्निवारयन्नाह प्राग्भुक्ते चानले मन्दे हिरङ्गो न समाचरेत्। अस्याय-मर्थः प्रातर्भुक्तेऽजीर्णे सति अहन्येव पुनर्न भुञ्जीत इत्यर्थः। रात्रौ पुनस्तथापि सति भुञ्जीतैव। यत आह सुश्रुत एव "प्रातराशे त्वजीर्णे तु सायमाशे तु दुष्यति। पूर्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्"। अस्य अयमर्थः। पूर्वं भुक्ते रात्रिभुक्ते अन्ने विदग्धे किञ्चित् पक्वे प्रातर्भुञ्जानः पावकं हन्ती-त्यर्थः। यत आह "सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विशोषणमिति"। सायमाशाजीर्णे भोजनोपायमाह भवेद्यदि प्रातरजीर्णशङ्का तदाऽभयां नागरसैन्धवाभ्याम्। विचूर्णितां शीतजलेन युक्तां भक्षीत चाद्यं मितमन्नकाले। आयुःक्षयभयाद्विद्वान्नाक्ष सेवेत कामिनीम्। अवश्यो यदि सेवेत तदा ग्रीष्मवसन्तयोः। अवश्यः अजितेन्द्रियः। आख्या(स्थितिः)वर्णकफस्यौख्य सौकुमार्य्य सुखप्रदा। अ-ध्वा(गतिः)वर्णकफस्यौख्यसौकुमार्य्यविनाशनः। यत्तु चङ्क्रमणं नातिदेहपीडाकरं भवेत्। तदायुर्बलमेधाग्नि-प्रदमिन्द्रियरोधनम्। उष्णीषं कान्तिकृत् केश्यं रजोवात कफापहम्। लघु तच्छस्यते यस्मादगुरु पित्ताक्षि-रोगकृत्। उपानद्धारणं नेत्रमायुष्यं पादरोगहृत्। सुखप्रचारभोजस्थं छत्रञ्च परिकीर्त्तितम्। पादाभ्या-मनुपानद्भ्यां सदा चङ्क्रमणं रुचाम्। अनारोग्य धनायुष्यमिन्द्रियघ्नमदृष्टिदम्। रूपस्य धारणं वर्णातपु

वातरक्तोऽपहम्। हिमम् हितमल्पोष्णं माङ्गल्यमपि कीर्त्तितम्। सत्त्वोत्साहबलस्थैर्य्यधैर्य्यतेजोविवर्द्धनम्। अवष्टम्भकरञ्चापि भवेत् दण्डधारणम्। कर्म्मच्छादन संयुक्ता शिबिका सर्ववल्लभा। तस्यामारोहणं नृणां त्रिदोषशमकं मतम्। वातश्लेष्मगदार्त्तानामहिता भ्रमकृत्तरिः। पित्तानिलकरो हस्ती लक्ष्म्यायुःपुष्टिवर्द्धनः। घोटकारोहणं वातपित्ताग्निश्रमकृन्मतम्। मेदोवर्द्धकफघ्नञ्च हितं तद्वहिनां परम्। आतपस्वेदमूर्च्छास्रपित्ततृष्णाक्लमश्रमान्। दाहं विवर्णतां कुर्य्यादेतान् छाया व्यपोहति। दृष्टिर्हन्त्री हिमावस्था निद्रालस्यविधायिनी।"

दिनज्योतिस् न० ६त०। आतपे राजनि०।

दिनदुःखित पुंस्त्री० दिनमुद्दिश्य दुःखितः उत्कण्ठितः। चक्रवाके शब्दर०। स्त्रियां ङीष्। रात्रौ हि स्त्रीविरहेण दिनार्धसुतकण्ठायुक्तत्वात् तस्य तथात्वम्।

दिनप पु० दिनं पाति पा-क। १सूर्ये हारा० २अर्कवृक्षे ३सूर्यादिषु वारेषु च "दिनाब्दमासहोराद्यामधिपा न समाः कृतः" इति भयस्य प्रश्ने "मन्दादधः क्रमेणैव स्युश्चतुर्था दिवसाधिपाः। वर्षाधिपतयस्तद्वत् तृतीयाश्च प्रकीर्त्तिताः" सू० सि०। "शनेः सकाशादधः क्रमेण चतुर्थसङ्ख्याका यथा दिनाधिपतयो वारेश्वरा भवन्ति यथा शनिरविचन्द्रभौमबुधगुरुशुक्रा इति तत्क्रमः" रङ्ग० "सूतकानां परिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिस्तु सावनेनैव गृह्यते" सू०सि०।

दिनपति पु०६त०। १सूर्ये २अर्कवृक्षे च ३वारेशसूर्यादौ च दिनपशब्दे दृश्यम् दिननाथदिनेशादयोऽप्यत्र। ४दिनप्रवेशलग्नेशे दिनप्रवेशलग्नेश्वरादिषु मध्ये तल्लग्नदर्शिनि अधिकबलयुक्ते ५ग्रहभेदे च दिनप्रवेशशब्दे दृश्यम्। "दिननाथपूर्वशशिनोरसम्भवात्" माघः।

दिनपात पु० दिनस्य चान्द्रदिनस्य तिथेः पातः क्षयः। दिनक्षये "अधिवासे दिनपाते धनुषि रवौ भानुसङ्क्रान्ते मासि। चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च" भीमपराक्रमः।

दिनपिण्ड पु० ६त०। ज्योतिषोक्ते अहर्गणे।

दिनप्रथी पु०दिनं प्रथयति करोति प्र+थी-क्विप्। १सूर्ये २अर्कवृक्षे च।

दिनप्रवेश पु० ताजकोक्ते मासप्रवेशवत् वर्षमाससम्बन्धिदिनानां प्रवेशे तत्प्रवेशकालाधानयनं नीलकण्ठ० उक्तं यथा "मासार्कस्य तदासन्नपङ्क्त्यर्केण सहान्तरम्। कलीकृत्यार्कगत्याप्तदिनाद्येन युतोनितम्। तत् पङ्क्तिस्थं वारपूर्वं मासार्केऽधिकहीनके। तद्वारादौ मासवेशो दिवसेऽप्येव मेव तु"। अयमर्थः मासार्कः वर्षप्रवेशकालीन एव राश्यंशकलाविकलादियुक्तः सूर्यः प्रथममासार्कः द्वितीयमासार्कस्तु तथाभूतार्क एकैकराशिमात्रयुक्तः। तस्य तदासन्नपङ्क्त्यर्केण पाश्चात्यदेशप्रचलितमकरन्दानुसारितिथिपत्रिकास्थसूर्यग्रहस्थापकपङ्क्तिस्थेन स्फुटार्केण यदन्तरं तत् कलात्मकं कृत्वा तद्दिवसीयरविगत्या तद्दिवसीयस्फुटसूर्यगत्या कृतेन लब्धदिनाद्येन तत्पङ्क्तिस्थार्के वारादिना युतमूनितं वा कार्यं तथा सति यदि मासार्कस्ततोऽधिको भवति तदा पूर्वोत्तरीत्या युते वारादौ मासप्रवेशे वारादिर्भवति यदि मासार्कस्ततो हीनो भवति तदा ऊनितं कार्यम् एवं कृते तथाभूते वारादिके मासप्रवेशो भवति। दिनप्रवेशे त्वयं भेदः। वर्षप्रवेशप्रथममासप्रवेशकालयोरैक्यमिव प्रथमदिनप्रवेशस्यापि तत्कालैक्यम्। द्वितीयादिदिनप्रवेशकालस्तु इत्थम् मासार्कस्थाने दिनार्क इति विपरिणमनीयम् तथा च मासार्के एकैकांशयोजने द्वितीयादिदिनार्कौ भवति तस्य पूर्ववत् आसन्नपङ्क्तिस्थस्फुटार्केण यदन्तरं तत्कलात्मकं कृत्वा तद्दिवसीयार्थगत्या कृते लब्धेन दिनाद्येन पङ्क्तिस्थार्ककालवारादिकं युतमूनितं वा कार्यं तथा सति यद् अंशादिकं भवति तत्पङ्क्तिस्थार्ककालीनवारादिषु हीनमधिकं कार्यं तथा कृते यद्भवति तत् द्वितीयादिदिनप्रवेशे वारादि ज्ञेयम् तथा च तादृक्समये यस्य राशेरुदयः तत् अंशादिसहितं दिनप्रवेशलग्नम् इति।

दिनेशायन च तत्रैवोक्तं यथा

"तत्र मासतनोर्नाथो सन्ध्येशोजन्मपस्तथा। त्रिराशिपो दिननिशोरवीन्दुभपतिस्तथा। अब्दप्रवेशलग्नेश एषु वीर्याधिकस्तनुम्। पश्यन् मासपतिर्ज्ञेयस्ततो वाच्यं शुभाशुभम्। अपरे दिवलग्नेशं तथा प्राचुर्विचक्षणाः। मासपस्लेशयोर्ज्ञ्यं फलं वर्षेशवद्बुधैः" नी०क०० इत्युपक्रमे दिनपतिनिर्णयस्तत्फलं च तत्रोक्तं यथा

"दिनप्रवेशकालेऽपि खेटान् भावांश साधयेत्। चन्द्रलग्नांशकाभ्यां तु फलं तत्र वदेद्बुधः। चतुष्कमिन्दिरेशादि दिनमासाब्दलग्नपाः। एषां बली तनुं पश्यन् दिनेशः परिकीर्त्तितः"। इन्दिरेशादिचतुष्कम् दिनसन्ध्येशः लग्न-

मनर्कैग्रः, दिनरात्रिभेदेन दिने दिनप्रवेशे सूर्यः, रात्रौ दिनप्रवेशे चन्द्रः, एतच्चतुष्कं, दिनमासावदपाः दिनप्रवेशमासप्रवेशवर्षप्रवेशलग्नेशास्त्रयः इति सप्तानां मध्ये योऽधिकबलवान् दिनप्रवेशलग्नदर्शी च स दिनपतिरिति बोध्यम्। इदन्त्वत्रेयं सन्धा हि राशयंशादियुतं लग्नलग्नमेव वा च एकैकवर्षे एकैकराशिमतिक्रम्य राश्यन्तरे गच्छति तेन तस्या भासे त्रैराशिकेन वार्षद्रंशभोगः दिने च पञ्चकलाभोगः तदनुसारेणैव सन्धायाः राश्यादिकल्पनया तद्वीर्यनिरूपणम्। "त्रिकोणकेन्द्रायगताः शुभाश्चेच्छ्रात्तनोर्वा बलिनः खगास्तु। षडन्त्यगास्तत्र दिने सुखानि विलासमानार्थयशोयुतानि। षडष्टरिपुकोपगता दिनाद्दमाशैर्निरिक्षेयाः खलखेटयुक्ताः। गदप्रदा मानयशोहराश्च केन्द्रत्रिकोणायगताः सुखाग्र्यै। लग्नांशपः सौम्यखगैः समेतो दृष्टोऽपि वा त्रिकदगेन्दुनापि। नैरुज्यराज्यादिशरीरपुष्टिमांसोष्णबहुःखमतोऽन्यथात्वे। यदंशपः सूर्ययुगीक्षितो वा स्निग्धेक्षणाङ्गावजसौख्यलक्षत् षः। दुःखप्रदः प्रोक्तवदन्यथात्वे सर्वेषु भावेष्वियमेव रीतिः। षडंशकः सौम्ययुतो रोगटः पापयुक् शुभः। व्ययांशः शुभयुग्दृष्टः सद्व्ययः पापतस्त्वसत्। लाभांशः सौम्ययुग्दृष्टः खस्त्रीसौख्यविलासकृत्। पापैर्युक्तैः कलिर्दुःखं पापान्तःस्थे मृतिं वदेत्। शुभमध्यस्थिते स्त्र्यंशे बहुलं कामिनीसुखम्। तस्यां रतिर्गुरावन्यखगेऽन्यासु रतिं वदेत्। मृत्यंशे मृत्युगैः सौम्यैर्युग्दृष्टे मरणं रणे। मित्रैर्मित्रं खलैः सौख्यं वर्षलग्नानुसारतः। द्विद्वादशे खला हानिं त्यते सौम्याः शुभव्ययम्। कर्त्तरी पापजा रोगं करोति शुभजा शुभम्। लग्नेऽष्टमे वा क्षीणेन्दुर्दृष्टस्तु दः पापदलयुतः। रोगो वा मरणं वापि रिपुतः, शस्त्रभीरपि। चन्द्रे बलीमे निधनारिसस्थे नृणां भयं शस्त्रकृतं प्रवोर्वा पापैः सुखस्थैः पतनं गजाश्वयानात्ततः स्त्रीकृतजा च पीड़ा। शुभाः द्यूने विजयदा द्यूनार्थे सुखावहाः। नवमे धर्मभाग्यार्थराजगौरवकीर्त्तिदाः। दिनप्रवेशेऽस्ति विधुरवस्थायां तु यादृशि। तदवस्था तुल्यफलं दत्ते न संशयः। विहाय राशिं चन्द्रस्य भागा द्विघ्नाः शरोद्धृताः। लब्धं गता अवस्थाः स्युर्भोग्याद्याः फलदादिशेत्। प्रवासं प्रवासोपगते रात्रिनाथेऽर्थनाशस्तु गतोपगे मृत्युभीतिः। मृतावस्थिते स्वाज्जवायां लयस्तु विलाससु हास्योपगे कामिनीभिः। रतौ स्वाद्रतिः क्रीडिता सौम्यदाली प्रसुप्ता च निद्रां कलिर्देहपीड़ाम्। भयं तापराशिः सुखं स्वात्तु भुक्ता ज्वरार्कस्थितासु स्थितासु क्रमेण"।

दिनबन्धु पु० ६त०। १सूर्ये हेमच०। २अर्कवृक्षे च

दिनबल पु०दिने बलं यस्य। १द्विपदराशिषु। ते च राशयः वृहज्जा० भट्टोत्पलयोरुक्ता यथा

"क्रोरा स्वामिगुरुग्रवीक्षितयुता नान्यैश्च वीर्योत्कटाः केन्द्रस्था द्विपदादयोऽह्नि, निशि च प्राप्ते च सन्ध्याद्वये" सू० "वीर्योत्कटाः इत्यनुवर्त्तते द्विपदादयो द्विपदचतुष्पदकीटाः यथाक्रममह्नि, निशि, प्राप्ते च सन्ध्याद्वये वीर्योत्कटाः भवन्ति अह्नि दिने द्विपदा बलिनः, निशि रात्रौ चतुष्पदाः, सन्ध्याद्वये कीटाः। अत्र न केवलं दृष्टिकं कीटः यावदाद्याः कीटयरूपेणैव ज्ञेयाः। तत्र च श्रीदेवकीर्तिः "मिथुनतुलाकुम्भकन्या दिवाबला धर्मिनश्च पूर्वार्द्धम्। अजवृषसिंहा रात्रौ मृगहृययोः पूर्वपादार्द्धे। वृश्चिकमीनकुलीरा मकरान्त्यार्द्धं च सन्ध्यायामिति" भट्टो०। एवं स्थिते यद्वक्ष्य० पञ्चषष्ठादिराशीनां यद्दिन बलचक्रं तन्मूलं चिन्त्यम्। दिने बलं यस्य। २सूर्ययुक्तेषु ग्रहेषु यथाह वृहज्जा०"निशि शशिकुजशौरिराः सर्वदा शोऽह्नि, चान्ये, बलबलितगताः खुः क्रूरसौम्याः क्रमेण" "शशिकुजशौराचन्द्रभौमशनयः निशि रात्रौ वीर्यवन्तो बलिनः, बुधः सर्वदा सर्वस्मिन् काले निशि दिने च बली, अन्ये परे रविगुरुसहिता अह्नि दिने बलिनः" भट्टो०।

दिनमणि पु०दिने मणिरिव प्रकाशकत्वात्। १सूर्ये हारा०। २अर्कवृक्षे च "दिनमणिमण्डलमण्डन! भवखण्डन!" गीतगो०। "नहदृशः किमहो रजनी तद्दिनमणौ गणकोत्तरगोलके। नतु तनुर्दिवसो भवती निशा वद विचक्षण! दक्षिणदिग्गते" सि०शि०

दिनमयूख पु०दिने मयूखोऽस्य। १सूर्ये २अर्कवृक्षे च दिनकिरणादयोऽप्यत्र।

दिनमान न० दिनस्य मानम्। सूर्यदर्शनकालस्य मानभेदे तन्मानभेदे कारणं सि०शि० उक्तं यथा

"स्वस्य सौम्ये दिवसो महान् स्यात् रात्रिर्लघुर्याम्यमतस्य याम्ये। दुरात्वदत्ते क्षितिजादधःस्थे रात्रिर्यतः स्याद्दिनमानमूर्द्ध्वे। सदा समत्वं द्युनिशोर्निरक्षे नोन्नत्वकृत्तत्र कुजादयतोऽन्यत। वृत्तदृष्टिभागाभ्यधिकाः प्रलांशा बलाय तत्राल्पपरो विशेषः। सम्बाधिका क्रान्तिवटक

च यावत् तावद्दिनं वलतमेव तत्र । यावच्च याम्यां वलतं तमिस्रा ततस्तमेरौ वलतं वलार्द्धम् । विषुवद्वृत्तं द्युवृत्तं क्षितिजस्तमितं तथा च दैवानाम् । उत्तरयाम्यौ क्रमशो मूर्ध्नोर्द्ध्वगतौ ध्रुवौ वलस्थानाम् । उत्तरगोले क्षितिजादूर्द्ध्वं परितो भ्रमन्ति नादित्यम् । सव्यं निदशाः वलतं पश्चिमपुरा अपसव्यं याम्ये । दिनं दिनेशस्य यतोऽस्त दर्शने तमी तमोऽन्तरदर्शने यति । कृष्णानां द्युनिशं यथा नक्षत्रा तथा वितर्क्या शशिपुत्रयाशिनाम् । दिनं सुराणामयनं यदुत्तरं निशेतरत् दाक्षिणिकैः प्रकीर्तितम् । दिनोन्मुखेऽर्के दिवसेव तन्मतं निशा तथा तत्कृतकीर्तनाय तत् । इन्द्राग्नयारोहति वैः क्रमेण तैरेव वृत्तैरवरोहतीनः । यत्रैव दृष्टः प्रथमं स देवैस्तत्रैव निष्ठन् न विलोक्यते किम् ? । विषूर्ध्वभागे वितरो वसन्तः स्वाधः सुधादीधितयामनन्ति । यस्मिन् तैर्द्वे निजमस्तकोर्ध्वे दर्शे यतोऽस्माद् द्युदलं तदेवाम् । भाधौनरत्वाच्च विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम् । तस्मे रविः यत्रदृशेऽभ्युदेति शुक्लेऽस्तमेत्यत्र एव विद्वन् । यदतिदूरगतो दृष्टिपथः क्षितेः स्वतमाप्रदलं रविलीयते । भवति तावदयं शशिनश्च तद्युगलकृष्णदलं द्युनिशं विधेः । यो हि प्रदेशोऽयमनस्तमस्तस्य तिर्यक्स्थितो यात्युदयं तथास्तम् । योऽस्तेन कालेन स तस्मिन्नोऽस्तमेन सोऽस्माद्दुदया न तस्याः । य उत्तरे याम्यगता ग्रहनाद्याः स्वस्वादसेवापि निरक्षदेशे । याम्याद्यतस्तोऽतिनतत्वमाप्ता यस्मिन् कालेन ततोऽस्तमेन । कर्यादयः सौम्यगता हि येऽस्य ते यान्ति याम्याद्यवशादजुत्वम् । कालेन तस्माद्दुदयोदयन्तो तदन्तरे स्वं भरणस्तमेव । अयनवादाक्षिविशाहिकाभिः ग्रहक् दृश्यन्ति निरक्षदेशे । चक्रार्धं स्वं च तथा द्वितीयं सर्वत्र पूर्वोक्तिभिरेव । जेवादेभिर्भुवालो नाडीभिस्त्रिभिर्मिताभिरुदृष्टे । जगति कुजे तद्धःस्थे प्रथमं ताभिश्चरोनाभिः । अस्तान्नाडीत्रयोऽस्तक्षितिमितनाडीभिरुदयो । जगति कुजे चोर्ध्वस्थे पश्चात् ताभिश्चराढ्याभिः । तद्दक्षितिमितिभिः कल्पान्तो वा अभ्रान्तो वा । चरचक्रैकनाढ्याक्षेन निरक्षोदयाः स्वदेशे स्युः । क्षितिजेऽजादिं कृत्वा गोलं भ्रमयन् भदर्शयेत् सर्वम् । उक्तमनुक्तं चान्यच्चित्राणां बोधजननार्थम् । योऽभ्युदेति यमजेन येन तत्प्रमोऽस्तमेत्यति तेन च । राशिकूर्ध्वमपमण्डलं कुजादर्धमेव वलतं मतः स्थितम् । यत्र यत्र जयया २४ जिनोनकालतो मोदयचराद्यद्भवत् । नान्यथस्थितयान्यथोदितं येन नैव विषयो न गोचरः । यत्र यत्र मपमण्डलं कुजे तद्दृष्टहाद्यनिष्ठ यन्मतयते । प्राचि पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे" ।

दिनमुख न० ६त० । अहर्मुखे प्रभाते । [लिका० ।

दिनमूर्द्धन् पु० दिनस्य मूर्द्धेवाद्यस्थानत्वात् । उदयाचले

दिनयौवन न० दिनस्य यौवनमिव । मध्याह्ने शब्दार्थचि०

दिनरत्न न० दिनस्य रत्नमिव प्रकाशकत्वात् । १सूर्ये हेमच० २अर्कवृक्षे भ० ।

दिनराशि पु०६त० । ज्योतिषोक्ते १अहर्गणे "यथाक्षमनया अस्तो दिनराशिः कुवासरैः । विभाजितो मध्यगतो भवेत्" सू०सि० । २दिनसमूहे द्वयादौ राशौ च राशिशब्दे द्वयम् ।

दिनव्यास पु०दिनस्य अहोरात्रस्य कालस्य व्यासः । सू०सि० उक्ते अहोरात्रवृत्तव्यासे "क्रान्तौ क्रमोत्क्रमयोगे हे कृत्वा ततोत्क्रमयुतया । हीनाधिका दिनव्यासदलं तद्दक्षिणोत्तरम्" सू० "दिनव्यासदलमहोरात्रवृत्तस्य व्यासार्धम्" रङ्ग० ।

दिनांश पु०६त० । त्रिधा विभक्तस्य दिनस्य १प्रातर्मध्याह्नसायाह्नेषु भागेषु राजनि० । पञ्चधाविभक्तस्य दिनस्य २प्रातःसङ्गवादौ च "प्रातःकालो मुहूर्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततःपरम् । सायाह्नस्त्रिमुहूर्तः स्यात् त्रयं तत्र न कारदेत्" तिथित० ।

दिनागम पु० ६त० । प्रभाते "उदयन्नाहुतमक्षुभः स कदाचिदुदिताधगमे" हरिवं० ८१अ० ।

दिनादि पु० ६त० । प्रभातकाले राजनि० ।

दिनान्त पु० ६त० । सायाह्ने "कृत्वा दिनान्ते निलयाय गन्तुम्" रघुः । दिनावसानादयोऽप्यत्र । "दिनावसानोत्सुकबालवत्सा" रघुः । [लिका० ।

दिनान्तक पु० दिनमन्तयति अन्त+णिच्-ण्वुल् । अन्धकारे

दिनारम्भ ६त० । प्रभाते

दिनार्द्ध पु०दिनस्य सूर्यकिरणप्रकाशात्मककालस्यार्द्धम् । दिनभागस्यार्द्धे "एवं विषुवति छाया स्वदेशे या दिनार्द्धजा" सू०सि० ।

दिनिका स्त्री दिनं तत्प्रतं कर्मदेहतया अस्त्यत्र भतौ ठन् । दिने कर्मकरणशक्तौ(एकदिनेरमणीय) रत्नमाला ।

दिनेश पु०६त० । १सूर्ये हेमच० । २अर्कवृक्षे दिनप्रवेशशब्दोक्ते दिनप्रवेशकालो यादिषु मध्येऽधिकमवसुते तत्-

दर्शिनि २गवे ४सूर्यादौ वारेशे च दिनेश्वरादयोऽस्य ।

दिनेशात्मज पु० ६त० । १यमौ २यमे ३कर्णे ४सुग्रीवे च ५तपत्यां ६वसुनायां च स्त्री ।

दिन्भ संघाते चु० आत्म० सक० सेट् । दिम्भयते अदिदिम्भत

दिप्सु त्रि० दम्भ-सन् उ-छान्दसः न भ्रू । दम्भेच्छौ । "न यं दिप्सन्ति दिप्सवः" ऋ०१।२५।१७। "लोके तु धिप्सति धिप्सुः" इति भेदः । [दिम्भत्-त ।

दिभ नोदने चु० उभ० सक० सेट् इदित् । दिम्भयति-ते अदि-

दिम्प संघाते चुरा० उभ० सक० सेट् । दिम्पयति ते अदिदिम्पत्-त । [८।१६।२७।

दिय त्रि० देव+पृषो० । देवे "भुवद्वसुर्दिवामां पतिः" ऋ०

दिरिपक्क पु० कन्दुके त्रिका० ।

दिलीप पु० सूर्यवंश्ये १नृपभेदे । सूर्यवंशे दिलीपो च द्वौ जातौ एकः खट्वाङ्गतः सुतः खट्वाङ्गापरनामा । अपरोऽनुविदुरुक्ष सुतः रामदशरथपितामहः यथोक्तं हरिवंशे १५अ० "सुतः पञ्चजनस्यासीद्दंशुमान्नाम वीर्यवान् । दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः । येन स्वर्गादिहागत्य मुहूर्तं प्राप्य जीवितम् । त्रयोऽनुसञ्चिता लोका बुद्ध्या सत्येन चानघ ! । दिलीपक्क स दाशादो महाराजो भगीरथः" । "अनपत्यतया राजा विद्वान् दुःखितोऽभवत् । दिलीपस्तनयस्तस्य रामस्य प्रपितामहः । दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाऽभवत्सुतः । अयोध्यायां महाराजो रघुरासीन्महाबलः । अजस्तु रघुतोऽजज्ञे अजाद्दशरथोऽभवत् । रामो दशरथाज्जज्ञे धर्मात्मा सुमहाबलः" हरिवं० १५अ०रामस्य प्रपितामहः तस्य दशप्रपितामहः इत्यर्थः । तस्य रघुपितरि "दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" रघुः । [त्रिका० ।

दिलीपराज पु० दिलीप एव राट् राजा । दिलीपस्तस्य

दिलीर न०दल-वा०रैर पृषो० । गिलीञ्चे द्वारा० । [गीत् ।

दिव मीतौ भ्वा० पर०सक० सेट् इदित् । दिव्यति अदि-

दिव जिगीषायां क्रीडायां च भ्वा०पर०सक० व्यवहारे इच्छायां स्तुतौ च सक०दिवा०पर०सक०सेट् । अस्य करणस्य वा कर्मसंज्ञा । अक्षैरक्षान् वा दीव्यति अदेवीत् दिदेव । देवित्वा द्यूत्वा देवनं दिदिवान् दुद्यूवान् "अदीव्यद्दीप्तमत्युग्रम्" भट्टिः । "उवाच दीव्याव पुनर्वसुविद्यां मयाऽर्जितम्" भा०व०७८अ० "दिव्यामि शकुने ! त्वया" भा०व०७४अ० "ततस्तु भ्राते वार्ष्णेये अक्षद्यूतस्य दीव्यतः" भा०व०६१अ० "तदाऽदेवीत् पाण्डवोऽजातशत्रुः" भा०व०६५अ० आर्षे क्वचित् तङ् । "प्रत्रज्यावेव दीव्येत विना दुर्द्यूतदेविनम्" भा० वि० १८अ० "अक्षानुप्ता पुनर्द्यूतमेहि दीव्यस्व भारत !" भा०व०७४अ० । "के तत्राग्रे कितवा दीव्यमाना विना राज्ञो धृतराष्ट्रस्य पुत्रैः" ५६० श्लो० "दिवस्तदर्थस्य" पा० व्यवहारक्रीडार्थत्वेऽस्य कर्मणि सति यतस्तं दीव्यति । तदर्थस्य किं ब्राह्मणं दीव्यति स्तौति अर्थः सि० कौ० । द्यूतं जिगीषायामन्यत्र आद्युनः जिगीषाभावस्य इत्यर्थः । दिदेविषति दुद्यूषति, देवयति ते अदिदिवत् त । "तेनादुद्यूषयद्रामं स्वमेव मृगलोचना" भट्टिः । देदिवीति देद्योति

उपसर्गपूर्वस्य तत्तदुपसर्गद्योत्यार्थयुक्ते तदर्थे ।

दिव कूजने चु० आत्म० सक० सेट् । देवयते अदीदेवत ।

दिव अर्द्दे चु० उभ० सक०सेट् । देवयति ते अदीदिवत् त ।

दिव् स्त्री दीव्यत्यत्र दिव-वा० आधारे डिवि । १स्वर्गे २आकाशे च अमरः । द्यौः दिवौ दिवः द्युभ्याम् द्युषु । ३दिने "सौरेण द्युनिशोर्वामम्" सू०सि० "मनोजितं द्यौरपि येन दुग्धा" रघुः "व इत्यमस्याम्रमहर्दिवं दिवः" "दिवीव भ्रुवुरातताम्" ऋ०१।२२।५.

दिव न० दीव्यत्यत्र अजर्थे आधारे च । १स्वर्गे । दिवौकसः त्रिदिवः । २आकाशे मेदि० । ३दिने ४वने च हेमच० । तत्र स्वर्गे "लोकपालैर्महाभागैर्दिवं देववरैरिव" भा०व० १६१अ० दिने "शुभेऽभ्यधिकं राजन् ! दिवं ज्योतिर्गणैरिव" हरिवं० ६२ अ० ।

दिवङ्गम त्रि०दिवमाकाशं स्वर्गं वा गच्छति दिव-वा० खच् मुम् । १आकाशगामिनि "दिवं प्रतिष्ठमानानामस्तु ब्रह्मो दिवङ्गमः" भा०व० ४८अ० । २स्वर्गगामिनि च "दिवङ्गमं करोधाय मार्गं भीमस्य कारयात्" भा०व० १४६अ० ।

दिवन् न० दिव-वा० अप्रतिपूर्वादपि कनिन् उपधालो०। स्वर्गे त्रिदिवौकसः । अस्य भत्वे उपधाऽङ्गोपस्य दीर्घविधौ स्थानिवत्त्वाभावात् दीर्घः दीव्ना दीव्नि इत्यादि

दिवस पु० दीव्यत्यत्र दिव-असच् किच्च । "नाडीषष्टितमस्तस्य सावनो दिवसः स्मृतः । सिद्धान्तेऽर्कराशेस्तु दिवसः सौर उच्यते । चान्द्रस्तु तिथ्यवच्छिन्नो भौमो भूपरिवेर्मतः" इत्युक्तेषु सावनादिषु दिनेषु । "दिवसाः पश्चिमरात्रयोः" शकु० । "अयोजयत् स धर्मात्मा दिवसे दिवसे च च" । भा०व० १८२अ० ।

दिवसकर पु० दिवसे करोऽस्य दिवसं करोति कृ-अच्

पा। १सूर्ये हेमच० २अर्कवृक्षे च। "दिवसकरकचोऽस्तं ध्यानमलर्कहेषु" माघः। ज्ञ-क्विप् दिवसज्ञदयत पु०।

दिवस्पति पु० दिवः पतिः अलुक्स०रोःसत्वम्। १इन्द्रे अमरः। "इन्द्राणीमानयिष्यामो यदीच्छसि दिवस्पते!" भा०उ०११अ०।

दिवस्पुत्र पु० दिवः आकाशस्य पुत्रवत् प्रियः दिवः पुत्र त्रायते त्रै-क पृषो०वा। १द्युलोकप्रिये २द्युलोकपालके वा सूर्ये। "दिवस्पुत्राय सूर्याय गंसत" यजु० ४।३५ "दिवस्पुत्राय द्युलोकस्य पुत्रवत् प्रियाय द्युलोकाद्धि सूर्यो जायते दिवः पुत्र त्रायते च इति दिवस्पुत्राय दिवःपालकायेति" वा वेददी०।

दिवस्पृथिवी स्त्री द्वि०व०द्यौश्च पृथिवी च "दिवस्पृथिव्याम्" पा० दिव इत्येव चात् द्यावा च आदेशे अकारोच्चारणं वकारस्य रत्वं (क्वापि) मा भूदित्येतदर्थम्" सि०कौ०। रोदस्योः द्यावाभूम्योः हेमच० "तं देवा बुभ्रे रजसः सदंसे दिवस्पृथिव्योररतिम्" ऋ० २।२।१

दिवस्पृश् पु० स्पृशति स्पृश-क्विन् ६त०। पादेन स्वर्गं स्पर्शिनि १परमेश्वरे "दिवस्पृक् सर्वदृग्व्यासः" विष्णुस०। "दिवःस्पर्शनाद्दिवस्पृक्" भा० "पादोऽस्य सर्वभूतानि त्रिपादस्यामृतं दिवि" छा०उ० तस्य पादस्य दिवि स्थितत्वात् त्रिविक्रमावतारे वा तथात्वात् तत्त्वम्। २आकाशस्पर्शिनि शब्दादौ च।

दिवा अव्य० दिव-वा। दिवसे अमरः "दिवा मातर्युवा भरत्यपुरजध्यानिरमः" ऋग्वेदः "पश्चिमान्तु समाश्रयेनो भवं हनि दिवातम्" मनुः।

दिवाकर पु०-दिवा करोति कृ-ट। १सूर्ये २अर्कवृक्षे च "दिवाकरकरैः पूतं दिवाज्ञानं प्रशस्यते" तिं०त० "दिवाकराद्रक्षति यो गुहासु" "दिवाकराद्भुतविभूषणाय दाम्" कुमा०।

दिवाकरसुत पु० ६त०। १यमौ २यमे ३कर्णे ४सुग्रीवे च ५वसुनायां तपत्यां च स्त्री। अरुणात्मजशब्दे दृश्यम्। "गङ्गादिवाकरसुताजलचारुहारम्" द०सं०४२ अ०

दिवाकीर्त्ति पु० दिवैव कीर्त्तिः कृत्यं यस्य रात्रौ कुरुकर्मनिषेधात्। १नापिते अमरः। २चण्डाले हेमच०। तस्य दिवाचरत्वात्तत्त्वं दिवाचरशब्दे दृश्यम्। "दिवाकीर्त्तिसुदक्याञ्च पतितं सूतिकां तथा। शवं तद्बन्धुं स्पृष्ट्वा स्नानेनैव विशुध्यति" मनुना तस्याशुद्धत्वमुक्तम्। दिवाकीर्त्तिर्यस्य। उलूके मेघके हेमच०। दिवा तस्य नामोच्चारे हि तस्य भक्ष्यद्रव्ये तिक्तता जायते इति लोकसिद्धत्वात् तन्नाम्नो न दिवाकीर्त्तनीयता।

दिवाकीर्त्य न०दिवा दिवसे कीर्त्यं कीर्त्तनीयम्। वर्षमाध्ये गवामयने सत्रे द्वयोर्मांसषट्कयोर्मध्ये त्रिणवस्तोमके एकविंशहनि गेये सामभेदे तच्च ता०ब्रा०४।६।१ दर्शितं यथा "विषुवानेव भवति पूर्वेतरयोः पक्षयोर्मध्येऽनुष्ठेयं गवामयनस्य प्रधानभूतं विषुवद्दाख्यमहः प्रदर्शयति एष विषुवान् संवत्सरस्य मध्यतो भवतीत्युपक्रम्य एकविंशहनि सामानि विधत्ते" भा०। "दिवाकीर्त्यसामा भवति" ता०ब्रा० ४।६।१२। "दिवाकीर्त्यानि शुक्रियाणि सामानि तस्मिन् प्रयुज्यन्ते इति दिवाकीर्त्यसामा अत्र विषुवान् दिवाकीर्त्यसामा कार्यः" भा०। तस्य प्रशंसापूर्वकं तत्र गेयत्वं प्रतीकञ्च दर्शितं यथा "स्वर्भानुर्वा आसुर आदित्यन्तमसाविध्यत्तस्य देवा दिवाकीर्त्यैस्तमोऽपाघ्नन् यद्दिवाकीर्त्यानि भवन्ति तम एवाघ्नादपघ्नन्ति रश्मयो वा एत आदित्यस्य यद्दिवाकीर्त्यानि रश्मिभिरेव तदादित्यं साक्षादारभन्ते" ता०ब्रा० ४।६।११ "आसुरेण स्वर्भानुना तमसाविद्धमादित्यस्य वा एवं तमोऽन्धकारं देवा दिवाकीर्त्यैः सामभिरपाघ्नन् व्यनाशयन् अतः यद्दिवाकीर्त्यान्यस्मिन् भवन्ति तेन तम एवाघ्नादादित्यादपघ्नन्ति। कथमेषां साम्नां तमसोहननसामर्थ्यमिति चेत् उच्यते दिवाकीर्त्यसामानीति यत् एते आदित्यस्य रश्मयो वै रश्मिरूपा एव अत एवं युक्तमेव तमसो नाशकत्वं तत्तथासति रश्मिभिरेवादित्यं साक्षात् प्रत्यक्षमारभन्ते ते सन्तिचो विषुवति दिवाकीर्त्यानि प्रयुञ्जत इत्यर्थः। दिवाकीर्त्यसामभिस्तमसोऽपहननं सामान्योक्तं तदेव विवृणोति" भा० "भ्राजाभ्राजे पवमानसुखे भवतो सुखत एवास्य तमोऽपघ्नन्ति" ता०ब्रा० ४।६।१४। "पवमानसुखे माध्यन्दिनार्भवयोः पवमानयोर्सुखे प्रसुखे भ्राजाभ्राजे सामनी भवतः गायत्रस्य नित्यत्वात् ततः परस्तात् क्रमेण भवत इत्यर्थः। अस्य प्रस्तावस्तुतमिति तत्रे गातव्यं साम भ्राजं, तन्माध्यन्दिने पवमानसुखे, "परिस्रावोभिगिष्टा इत्यस्मिन् गेयं साम भ्राजं तदार्भवपवमानसुखे" भा०

दिवाचर त्रि० दिवा दिवसे चरति अच्-टच्। पक्षिभेदे स्त्रियां ङीप्। "दिवाचरो न सर्वदा न च नक्तञ्चरो दिवा" द०व० पञ्च० २चण्डाले तस्य रात्रौ ग्रामनगरे चारनिषेधेन दिवसे एव चारस्य मनुनाभि-

रहस्यात् तथात्वं यथा "रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च। दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः" श्यामाखगादौ च दिवाचरशब्दे दृश्यम्।

दिवाचारिन् त्रि॰ दिवा चरति चर-णिनि। दिवसचारिणि भूते। "स्वाहेत्यथ बलिहरणम्" इत्युपक्रमे "सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा" आश्व॰गृ॰ १।२।९सू॰।

दिवाटन पुंस्त्री॰ दिवाऽटति अट-ल्यु। १काके मेदिनीकोषः स्त्रियां जातित्वात् ङीप्। २दिवाभ्रमणयुक्ते त्रि॰।

दिवातन त्रि॰ दिवा भवः टुञ् तुट् च। दिवाभवे। "यथिन इव दिवातनस्य लेखा" कुमा॰। स्त्रियां ङीप्। "वधूजानां दिवातनीम्" भट्टिः।

दिवातर न॰ अतिशयेन दिवा प्रकाशकम् तरप्। अत्यन्तप्रकाशके दिवसे। "यः सुदर्शतरो दिवातरात् प्रायुवे दिवातरात्" ऋ॰१।१२७।५

दिवान्ध पुंस्त्री॰ दिवा दिवसे अन्धः। १मेचके त्रिका॰ २दिवान्धप्राणिमात्रे च। "दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथाऽपरे" देवीमा॰ २वल्गुलाख्ये स्त्री राजनि॰

दिवान्धकी स्त्री दिवान्ध-स्वार्थे क गौरा॰ ङीप्। कुरुन्द्याम् पुराणम्।

दिवाभीत पुंस्त्री दिवा दिवसे भीतः। १मेचके "लीनं दिवाभीतमिवान्धकारम्" कुमा॰। स्त्रियां जातित्वात् ङीप्। २कुमुदाकरे ३चौरे च पु॰ मेदि॰।

दिवाभीति पु॰ दिवा भीतिरस्य। १मेचके चन्द्र॰। २दिवसभीतियुक्ते त्रि॰। [दृश्ये च।

दिवामणि पु॰ दिवा मणिरिव। १सूर्ये चन्द्र॰ २अर्क-

दिवामध्य न॰ ६त॰। मध्याह्ने हेमच॰।

दिवावसु पु॰ दिवा वसुः किरणोऽस्य। १सूर्ये २अर्कवृक्षे च दीव्यति दिव-क्विप् द्यौः आवसुः हविरस्य दिवमावसति आ+वस-उनु वा। १दीप्तहविष्के २द्युलोकवासिनि वा त्रि॰। "दिवं वय दिवावसो!" ऋ॰८.२४।१।

दिवाशय पु॰ दिवा दिवसे शेते-शी-अच् ७त॰। १दिवाखापयुक्ते २दिवसेऽप्रकाशयुक्ते च "न मे दिवाशयाः पुत्रा न रात्रौ दधिभोजिनः। गुर्विणीं नाहुगच्छन्ति न स्मृशन्ति रजस्वलाम्" जैमि॰ भारतम्। "आरुरोह कुमुदाकरोपमां रात्रिकामरयरोदिवाशयः" रघुः।

दिवासञ्चर त्रि॰ दिवा दिवसे सञ्चरति अच-चर-ट। दिवसचारिणि हारिभेदे तथाभूताः पु॰सं॰८८अ॰कतिचिदुक्ता यथा "ग्रामाशौचमनशनञ्चवसुवशिष्टस्त्रीकर्णचक्राङ्कयाचाणडीरकखञ्जरीटकशुकध्वाङ्क्षाः कपोताखयः। भारद्वाजकुलालकुक्कुटखरा हारीतमद्गौ कपिः क्रेष्टुः कुक्कुटपूर्णकूटचटकाद्योक्ता दिवासञ्चराः"।

दिवास्वप्न पु॰ दिवा दिवसे स्वप्नः। दिवानिद्रायाम्। तद्दोषादिकं दिवस्वप्नशब्दे भावप्र॰ उक्तमुक्तम्। सुश्रुते च "वर्षर्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात्। प्रतिषिद्धेऽपि तु बालवृद्धस्त्रीकर्शितक्षतक्षीणमद्यनित्ययानवाहनाध्वकर्मपरिश्रान्तानामभुक्तवतां भेषजस्नेहकफरक्तक्षीणानामजीर्णिनाञ्च तद्वर्जं दिवास्वप्नप्रतिषिद्धं रात्रावपि जागरितवतां जागरितकालादर्द्धमिष्यते दिवास्वप्नः। विकृतिर्हि दिवास्वप्नो नाम तत्र स्वपतामधर्मः सर्वदोषप्रकोपश्च ततूप्रकोपाच्च कासश्वासप्रतिश्यायशिरागौरवाङ्गमर्दाऽरोचकज्वराग्निदौर्बल्यानि भवन्ति"। "स्वप्नयाचो दिवास्वप्नः परीवादः स्त्रियोमदः। तौर्यत्रिकं वृथाटया च कामजो दशको गणः" व्यवनोक्तौ मनुः रसाभियुक्तमद्यं वा दिवास्वप्नञ्च सेवते। अपकालगते काले स्वयं दोषान् प्रकोपयेत्" भा॰आश्र॰१७अ॰

दिवास्वाप पु॰ ७त॰। १दिवसनिद्रायाम्। दिवास्वप्नशब्दे दृश्यम्। "दिवास्वापोवस्य। २वल्लूकादौ च तेषां रात्रिचारित्वेन दिवास्वापवत्त्वात् तथात्वम् यथोक्तं द्र॰सं॰ ८८अ॰ "लोमाशिकाविडालाक्षिकाख्यौ वल्गुलुमूषौ यथक्रम रात्रौ।" २वल्गुलीखगे स्त्री राजनि॰।

दिवि पु॰ दीव्यति दिव-बा॰ कि। आकाशे चन्द्र॰।

दिविक्षित् त्रि॰ दिवि क्षयति वसति क्षि-क्विप् अलुक्स॰। स्वर्गवासिनि। "स्वर्यामाणाविचरन्ता दिविक्षिता" ऋ॰ १०।८२।१२। "दिविक्षिता दिविवसन्तौ" भा॰औ॰ स्वाध्यायेवेदे आच्। "नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यः" का॰श्रौ॰

दिविज पु॰ दिवि जायते जन-ड अलुक्स॰। द्युलोकजाते "तामेवातिदूरे अधूकरीमिव सुमनस उपलिप्सन्तीं दिविज मनुजमनोनयनाह्लादकरैर्गतिविहारविनयावलोकहसितरुचिरावयवैः भाग॰५।२।७ "व्युषा आवो दिविजा ऋते नाविष्कृण्वाना" ऋ॰७ ७५ १ "जे विभाषा" पा॰ पक्षे डुक् द्युजोऽन्यत्र

दिविमत् दीप्तिमत्+पृषो॰। दीप्तियुक्ते "नक्षत्राणि दिविमते" ऋ॰४।२१।११ "दिविमते दीप्तिमते" भा॰।

दिविता स्त्री दीप-बा॰ इतच् पृषो॰। दीप्तौ "आवाचो

वाचा दिविता दिवित्मता" ऋ०१०।७६।६ "दिवितायां दीप्तिमत्तायाम्" भा० ।

दिवियज् पु० दिवि द्युलोकेस्थितानीन्द्रादीन् यजते यज-क्विप् अलुक्स० । द्युलोकस्थितदेवयाजिनि "होतारो न दिवियजो मन्द्रतमाः" ऋ०९।९७।२६ "देवानिन्द्रादीनस्तुवन्त्येवं दिवियजो दिवि द्युलोकेस्थितानिन्द्रादीन् देवान् यजन्तः" भा० ।

दिविरथ पु० पौरवे भूमन्युसुते नृपभेदे "ततो दिविरथो नाम भूमन्योरभवत् सुतः" भा०आ०९४अ०२ अङ्गराजपुत्र दधिवाहनपुत्रे नृपभेदे च "अङ्गपुत्रो महानासीद् राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत् । पुत्रो दिविरथस्यासीच्चित्रतस्य पराक्रमः" हरिवं० २१अ० ।

दिविषद्(स) पु० दिवि सीदति सद-क्विप् अलुक्स० वा मत्वम् । देवे अमरः । "पृथिवीसदं त्वान्तरिक्षसदं दिविषदं देवसदं नाकसदम्" यजु० ९।२ "मान्द्रानन्दपुरन्दरादिदिविषद्दृष्टन्दैरमन्दादराद्" "हव्यहानवदूग्रमामदिविषद्दुर्वारदुःखापदाम्" गीतगो० ।

दिविष्टि त्रि० दिवमिच्छति दिव-कर्त्तरि क्तिच् । द्युलोकेच्छायुक्ते "इमा उ वां दिविष्टयः" ऋ०७।७४।१ "दिविष्टयो दिवमिच्छन्त्यः" भा० ।

दिविष्ठ त्रि० दिवि तिष्ठति स्था-क अलुक्स० मत्वम् । १ध्रुवलोकस्थे २स्वर्गस्थिते च "दिविष्ठस्य भुविष्ठस्य ब्रह्मीभूतो मम प्रियः" भा०आ०६अ० ।

दिविसृश् त्रि० दिवि सृजति क्विन् "न रपरेति" पा० पर्युदासात् न मत्वम् । द्युलोकस्पर्शिनि "आ हि स्थाथो दिविस्पृशम्" ऋ०४।४६।२ किञ्चित्तत्वात् झटिति प्रदाने च कः ।

दिवी स्त्री दिव वा० ङीप् । उपजिह्विकाकीटे हारा० ।

दिवेदिवे अव्य० दिव-वा० के द्वित्वञ्च । दिवसे निरु० ।

दिवोकस् पु० द्यौ स्वर्गं आकाशो वा ओकोयस्य । १देवे २चातकस्वर्गे च मेदि० ।

दिवोजा त्रि० दिवो जायते जन-ड । वा० अलुक्स० । द्युलोकाज्जाते "एषा सा नो दुहिता दिवोजा" ऋ०६।६५।२

दिवोदास पु० दिवः स्वर्गात् दासोदानं यस्य । यमस्य पुत्रभेदे "यमस्यानुनिधुनं यस्ते मेनकायामिति स्मृतिः । दिवोदासस्य राजर्षिरहल्या च यशस्विनी" हरिवं० ३२अ० । मनुवंश्ये रिपुञ्जयाख्ये २नृपभेदे च तत्कथा काशीख०४७अ० "ततश्चिन्तयता कृष्णा दृष्टो राजर्षिसत्तमः । अवि-तक्रे महाभागे तपसा शिवतेजिनः । मनोरन्वयजो वीरः शूलोधर्मरवोदितः । रिपुञ्जयेति विख्यातो राजा परपुरञ्जयः । अथ ब्रह्मा समाहाय बहुशोरवपूर्वकम् । उवाच वचनं राजन् ! रिपुञ्जय ! महामते ! । इमां पालय भूपाल ! सप्तद्वीपिकामनाम् । नागकन्यां नागराजः पत्यर्थन्ते प्रदास्यति । अनन्तमोक्षिनीत्याख्या पातुकिः शीलभूषणाम् । दिवोऽपि देवादास्यन्ति रत्नानि कुसुमानि च । प्रजापालनसन्तुष्टा महाराज ! प्रतिक्षणम् । दिवोदास इति ख्यातमतो नाम त्वमाप्स्यसि । मत्प्रसादात् नृपते ! दिव्यं सामर्थ्यमस्तु ते । परमेश्वरवचः श्रुत्वा ततोऽसौ राजसत्तमः । वेधसं बहुशः स्तुत्वा वाक्यञ्चेदमुवाच ह । राजोवाच । पितामह ! महाभाग्य ! त्रिलोकीकरणक्षम ! । कथ्यन्ते च राजानो मे कर्म कथ्यते त्वया । ब्रह्मोवाच त्वयि राज्यं प्रकुर्वाणे देवोऽपि विधास्यति । पापनिष्ठे च वै राज्ञि न देवो वर्षते पुनः । राजोवाच यद्यहं पृथिवीनाथः सर्वलोकपितामह ! । तदा दिविषदो देवा दिवि तिष्ठन्तु सा भुवि । देवेषु दिवि तिष्ठत्सु मयि तिष्ठति भूतले । अग्रपक्षेन राज्येन प्रजा सौख्यमवाप्स्यति । मयेति विश्वसृक्प्रोक्तो दिवोदासो नरेश्वरः । पठन् घोषयाञ्चक्रे दिवं देवा व्रजन्त्विति । मयि प्रशासति क्षौणीं सुराः सुखा भवन्त्विति । नागकन्यिके वै नागा नराः सुखा भवन्त्विति" इत्युपक्रमे

दिवोदासस्य काशीतो निर्वासनान्तकथा तत उत्तरेषु अध्यायेषु द्रष्टव्या । १धन्वन्तरेरवतारे काशीराजभेदे आयुर्वेदशब्दे तत्कथा ७८६पृ० सुश्रुतप्रादुर्भावे भाव०प्र० उक्ता द्रष्टव्या ।

दिवोद्भव त्रि० दिवे स्वर्गे उद्भवति उद्+भू अच् । स्वर्गाद्य स्वर्गयोजाते । २एलायां स्त्री शब्दार्थकल्प० ।

दिवोल्का स्त्री दिवा जाता उल्का । दिवसजातायां नभःस्थ्युतायामुल्कायाम् । "सधूमा न्यपतत् सार्चिर्दिवोल्का नभसश्च्युता" भा०उ०१०अ० ।

दिवौकस् पु० दिवं स्वर्गं ओकोयस्य दिवा ओकोयस्येति दिवनुशब्दे उभयपदवृद्धिः । देवे "पवि व्यजन्मन्न दिवौकसामपि" । "बभौनिशम्याधिपतेर्दिवौकसाम्" रघुः । "कौर्त्तयन्निव दिवौकसां प्रियम्" माघः "तारकेव दिवौकसः" कुमा० ।

दिवौकस (ओकस्) शब्दोऽन्योऽन्यलीलुप्तसदृशोक्तौ

दिवमोकसोऽस्य । देवे "वसुधामिह संप्राप्तैः सर्वैरेव दिवौकसैः" हरिवं० २१२अ० ।

दिव्य त्रि० दिवि भवः यत् । १स्वर्गभवे २आकाशभवे ३उत्पातभेदे पु० "संस्कृतयन्ति दिव्यान्तरीक्षभौमास्तदुत्पाताः" इ० सं० उक्तम् उत्पातशब्दे ४२२३पृ० दृश्यम् । ४यमे ५गुग्गुलौ च पु० राजनि० । कालीविलासतन्त्रोक्ते ६भावभेदे "शृणु भावत्रयं देवि ! दिव्यवीरपशुक्रमात् । दिव्यस्तु देवतुल्यो वीरश्चोद्धतमानसः । सत्यत्रेतार्द्धपर्यन्तं दिव्यभावविनिर्णयः । त्रेताद्वापरपर्यन्तं वीरभाव इतीरितम् । मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च । शक्तिसाधनं भद्रे ! चिताभाधनमेव च । एतत्ते कथितं सर्वं दिव्यवीरमतं प्रिये । दिव्यवीरमतं नास्ति कलिकाले सुलोचने !" । ७नायकभेदे रत्नमञ्जरी इन्द्रादयो दिव्यनायकाः । ८जवस्त्रे न० मेदि० ९हरिचन्दने न० राजनि० । १० गङ्गाजलादिस्पर्शपूर्वकशपथभेदे "ब्राह्मणो वचनं श्रुत्वा ज्ञानेशोऽज्ञानिनां वरः । गङ्गातोयं करे कृत्वा स्वीकारस्य चकार सः । गङ्गातोयस्पर्शमात्रं मिथ्या यदि वदेज्जनः । स याति कालसूत्रस्य यावद् ब्रह्मणोवयः" । ब्रह्म० वै० प्र० ख० । "तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा । सत्यं वा यदि वाऽसत्यं यदि दिव्यं करोति यः । कर्त्ता च शौरवं याति तथा कारयिता प्रिये ! । उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै । तस्मात्ति पुनरावृत्तिर्व्याघ्रसूकरयोनिषु । दिव्यं कर्त्तुः कारयितुर्वंशपूजा इयं तथा । गायत्रीरहितस्यापि नरकस्योत्तरोत्तरम्" इति गायत्रीतन्त्रे ५पटल० व्यवहारे प्रतिज्ञातार्थसाधनाय वादिप्रतिवादिनोरन्यतराभ्यां कर्त्तव्ये ११लौकिकसाक्ष्यादिप्रमाणासद्भावे तुलादिपरीक्षाभेदे । तद्भेदादिः तत्र तत्सामान्यविधिश्च वीरमि० दिव्यमातृकायां दर्शितो यथा

"तत्र दिव्यस्य मानुषप्रमाणाभावे वक्तव्यं यत् तदुच्यते । यत्तु स्मृतितत्त्वे एवकारस्थले अपिशब्दं कृत्वा मानुषप्रमाणसत्त्वेऽपि यत्र दिव्यस्वीकारस्तत्रापि तद्भवतीति प्रयोजनमुक्तं तदयुक्तम् "एषामन्यतमाभावे दिव्यान्यतममिति" वदता याज्ञवल्क्येन "प्रमाणहीने वादे तु निर्दोषा दैविकी क्रियेति" वदता बृहस्पतिना च "युक्तिव्यवसमर्थेषु शपथैरेनमर्दयेदिति" नारदेनापि मानुषप्रमाणासत्त्वे एव दिव्यस्य विधानात् । तत्र बृहस्पतिः दिव्यभेदानाह "घटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः । अन्यानि तत्सुताः प्रोक्ताः पञ्चमानप्रमाणकम् । अष्टमं फालमित्युक्तं नवमन्त्रमजन्यथा । दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवेति" । नारदः "युक्तिव्यवसमर्थेषु शपथैरेनमर्दयेत् । अर्थकालवनामेषमन्यमन्त्रसुकृतादिभिः । घटोऽग्निरुदकं चैव विषं कोशस्तु पञ्चमः । उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः । सन्दिग्धेऽर्थेऽभियुक्तानां परीक्षार्थं महात्मनाम् । प्राक्तानि नारदेनेह सत्यासत्यविशुद्धये" इति । अर्दयेत्पीडयेत् । अर्थापेक्षत्वं सिसाधयिषितार्थस्याल्पत्वमहत्त्वानुरूपमित्यर्थः । नन्वेषामपि शपथानां मानुषप्रमाणाभाव एव निर्णायकत्वेन दिव्यत्वात् कथं दिव्यानि सर्वेत्यभिधानम् । तथा च शङ्खः "तत्र दिव्यं नाम तुलाधारणं विषाशनमग्नौ प्रवेशो लोहधारणमिष्टापूर्तप्रदानमन्यांश्च शपथान् कारयेदिति" । तांश्च शपथानाह बृहस्पतिः "सत्यवाहनशस्त्राणि गोबीजकनकानि च । देवब्राह्मणपादांश्च पुत्रदारशिरांसि च । एते च शपथाः प्रोक्ताः स्वस्वार्थे सुकराः सदेति" । नारदोऽपि "सत्यवाहनशस्त्राणि गोरौजकनकानि च । देवतापितृपादांश्च दत्तानि सुकृतानि च । स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदान्तथा । अभियोगेषु सर्वेषु कोशपानमथापि वा । इत्येते शपथाः प्रोक्ता मन्त्रा स्वस्वकारणे" इति । सत्यम् । अत्र समनन्तरभाविनिर्णयनिमित्तस्य दिव्यत्वेन विवक्षितत्वात् । तादृशत्वञ्च घटादीनामेव न तु शपथानान्तेषां कालान्तरभाविनिर्णयनिमित्तत्वात् । नन्वेवं कोशस्य कथन्तेषु ग्रहणमिति चेत् सत्यम् । तस्य तेषु पाठोऽग्निहाभियोगविषयकत्वसाम्यात् सावष्टम्भाभियोगविषयत्वसाम्याच्च । वस्तुतस्तु शपथानामपि नारदादिवचनानुसाराद्गोबीजवीवर्दन्यायेन दिव्यत्वाभ्युपगमेन नवशब्दस्योपलक्षणत्वात् । तथाच नारदः "युक्तिव्यवसमर्थेषु शपथैरेनमर्दयेत् । अर्थकालवनामेषमन्यमन्त्रसुकृतादिभिः । घटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः । उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः" । दिव्यं नाम तुलारोहणम् । विषाशनमग्नौ प्रवेशो लोहधारणमिष्टापूर्तप्रदानमन्यांश्च शपथान् कारयेत् । अतः "अवाचिकेषु सर्वेषु मिथो विवदमानयोः । अविदंस्तत्त्वतः सत्यं शपथेनापि शम्भयेत् । अस्मिं वाक्यारवेदेनमग्नौ चैनन्निमज्जयेत् । पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत् पृथक् । यस्याद्देवैः प्रयुक्तानि पुष्करार्थं महात्मभिः । परस्परविशुद्ध्यर्थं

तस्माद्दिव्यानि नामतः" । असाक्षिकेऽपि मानुषप्रमाण-रहितेऽपीत्यर्थः । उद्दिष्टानां दिव्यानां मध्ये तुलादीनि महाभियोगे प्रयोक्तव्यानि तथा च याज्ञवल्क्यः "तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये । महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि । इच्छया वान्यतरः कुर्यादितरो वर्त्तयेच्छिरः" । अत्रापिशब्देन तप्ताङ्गारप्रण्डादयो गृह्यन्ते । शीर्षकं शपथया जय-पराजयनिमित्तो दण्डः तत्प्रयुक्तदण्डभागित्वं वा इच्छया इच्छया । इतरः अभियुक्ताभियोक्तोरन्यतरः । इतरः शिरोवर्त्तयेत् दण्डं स्वीकुर्यादित्यर्थः । ननु "कोश-मल्पेऽपि दापयेत्" इति स्वल्पाभियोगेऽपि कोशस्य विधानात् कथं महाभियोगेष्वेतानीति चेन्न तस्य तुला-दिषु पाठोऽवश्याभियोगेऽपि प्राप्त्यर्थः । न तु महाभियोगेष्वेवेति नियमार्थः । "अन्यथा कोशस्य शङ्का-भियोग एव प्राप्तिः स्यात् । "अवश्याभियुक्तानां घटादीनि विनिर्दिशेत् । तण्डुलाश्चैव कोशस्य शङ्का-स्तौ नियम्य चेति पितामहस्मरणात् । अवश्यः शीर्षकस्थः । अवश्यो ऽत्र नियम इति स्मृतितत्त्वे । यदा शीर्षकस्थोऽभियोक्ता न स्यात्तदा एतानि दिव्यानि न स्यादिति तथा च नारदः "शिरोवर्त्ती यदा न स्यात्तदा दिव्यं न दीयते" इति । दिव्यदाने नियममाह पितामहः "अभियोक्ता शिरःस्थाने दिव्येषु परिकीर्त्त्यते । अभियुक्ताय दातव्यं दिव्यं श्रुतिनिदर्शनात्" । कात्यायनोऽपि "न कश्चि-दभियोक्तारं दिव्येषु विनियोजयेदिति" । अभियुक्ताय दातव्यमित्यस्यापवादं इच्छयान्यतर इत्यनेनाह याज्ञ-वल्क्यः । नारदोऽपि "परियोक्ता शिरःस्थाने सर्व लोकः प्रकल्पितः । इच्छया त्वितरः कुर्यादितरो वर्त्तये-च्छिरः" इति । क्वचिद्दिव्यविशेषे शिरोविनापि दिव्यं देयमित्याह याज्ञवल्क्यः "विनापि शीर्षकात् कुर्या-न्नृपद्रोहेऽथ पातके" इति । शीर्षकाद्विनापि पराजय-प्रयुक्तदण्डभागिनोऽभियोक्तुरभावेऽपि । पातके ब्रह्म-हत्यादौ । कात्यायनोऽपि "याज्ञिकैः शङ्कितानाञ्च निर्दिष्टानाञ्च दस्युभिः । आत्मशुद्धिपराणाञ्च दिव्यं देयं शिरो विनेति" । कात्यायनोऽपि "परदाराभि-शापे च चौर्यागम्यागमेषु च । महापातकशङ्के च स्याद्दिव्यं तत्रशङ्कते । विप्रतिपत्तौ विवादेऽवश्यं स्थापने कृते । तत्रैव स्थापयेद्दिव्यं शिरःपूर्वं शङ्की-

पतिः । परदाराभिशापे च बहवो यत्र वादिनः । शिरोहीनस्यवेद्दिव्यमात्मनः शुद्धिकारणादिति" । विप्रति-पत्तौ परदारगमनाद्यभियोगरूपायां, विवादे ऋणा-दानादिविषये अवश्यंऽवश्यः । परदाराभिशापे चेति चौर्यादीनामप्युपलक्षणम् । विष्णुः "राजद्रोहे साहसे च विना शीर्षप्रवर्त्तनादिति" । विषयविशेषेषु दिव्य-विशेषानाह संग्रहकारः "घटादीनि विषान्तानि गुरु-ध्वर्थेषु दापयेत्" । पितामहोऽपि "अवश्याभि-युक्तानां घटादीनि विनिर्दिशेत् । तण्डुलाश्चैव कोशस्य शङ्कास्तौ नियोजयेत् इति" । कात्यायनः "शङ्का-विश्वासस्थाने विभागे रिक्थिनां सदा । क्रियासमू-हकर्तृत्वे घटादीनि विनिर्दिशेत् । क्रियासमूह कर्तृत्वे समूयैककिवाकारित्वे । पितामहोऽपि "विश्वस्ते सर्वशङ्कासु सन्धिकार्ये तथैव च । एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये । शिरःस्थापि विहीनानि दिव्यादीनि विवर्द्धयेत् । घटादीनि विषा-न्तानि कोश एकः शिरः स्मृतः" इति । तण्डुलानां विषयं च एवाह "चौर्ये तु तण्डुला देया नान्य-त्रेति विनिश्चयः" इति । अन्यत्र स्त्रीसंग्रहादौ न तु दत्तापहृते "तदर्धार्द्धस्य तण्डुला" इति वक्ष्यमाण-कात्यायनवचनेन तण्डुलदिव्यस्य विधानात् । एतदल्प-चौर्यशङ्कायां वेदितव्यम् । "चौर्येऽभिशङ्कायुक्तानां तप्तमाषो विधीयते" इति महाचौर्यशङ्कायां तप्त-माषस्य तत्रैव विधानात् । द्रव्यसङ्ख्यया दिव्यविशेषा-नाह विष्णुः "अथ शपथक्रिया राजद्रोहादिषु यथा-कामनिक्षेपर्णस्तेयेष्वर्थप्रमाणादिति" । शपथो दिव्यम् । राजद्रोहादिषु यथाकामं रात्रेऽन्यतरोभाहिव्यं निक्षे-पादिषु धनतारतम्यादित्यर्थः । यस्मादिविषयविवादे तु तन्मूल्यद्रव्यपरिमाणं याज्ञम् । दक्षस्मृतिरपि "विष सङ्कटेऽपहृते पादोने च हुताशनः । त्रिभागोने च सलिलमर्द्धे देयो घटः सदा । धनुःशतादियोगे तु दातव्यस्तप्तमाषकः । त्रियते तण्डुला देयाः कोशश्चैव तदर्द्धके । शतहृतेऽपहृते च दातव्यं धर्मशोधनम् । गोचरस्य प्रदातव्यं सद्यः कालविलेखनम् । एवं सङ्ख्या निरूपितानां मध्यानां द्विगुणा स्मृता । चतुर्गुणोत्तमा-नाञ्च कल्पनीया परीक्षकैरिति" । धर्मशोधनम् । धर्मस्य दिव्येन शोधनम् । निरूपितानां जातिशपथैः मध्य-मत्यमुत्तमत्वञ्च तैरेव । यत्तु "नाहसादुद्धरेत् फालञ्च

विषं न तु तां तथेति" याज्ञवल्क्यवचनं तन्मध्यमोत्तमपुरुषविषयम्। यत्तु "सहस्रे तु घटं दद्यात् सहस्रार्द्धे तथायसम्। अर्द्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतमिति" पितामहवचनं तद्यत्वाल्पद्रव्यापहारे पातित्यं भवति तद्विषयम्। एतत्क्षेयसाहसविषयम् दत्तापहृते तु कात्यायनः "दत्तस्यापहृतो यत्र प्रमाणं तत्र कल्पयेत्। क्षेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत्। सर्वद्रव्यप्रमाणन्तु ज्ञात्वा हेम प्रकल्पयेत्। हेमप्रमाणयुक्तन्तु तदा दिव्यं प्रयोजयेत्। ज्ञात्वा सङ्ख्यां सुवर्णानां शतनाशे विषं स्मृतम्। अशीतेस्तु विनाशेऽथ दद्याच्चैव हुताशनम्। षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम्। विंशद्दशविनाशे तु कोशपानं विधीयते। पञ्चाधिकस्य वा नाशे तदर्द्धार्द्धस्य तण्डुलाः। ततोऽर्द्धार्द्धविनाशे हि स्पृशेत्पुत्रादिमस्तकान्। ततोऽर्द्धार्द्धविनाशे तु लौकिकस्य क्रिया स्मृता। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते" इति। अत्र सुवर्णशब्दः षोडशमाषात्मकः। माषोऽपङ्कवः। विंशद्दशविनाशे विंशद्विनाशन इति स्मृतिचन्द्रिका। पञ्चाधिकस्य पञ्चभ्योऽधिकस्य षट्प्रभृतेरिति यावत्। तदर्द्धार्द्धस्य सुवर्णप्रभृतेः। ततोऽर्द्धार्द्धस्य अष्टमाषोन सुवर्णार्द्धप्रभृतेः। ततोऽर्द्धार्द्धस्य विनाशे सार्द्धसप्तमाषोनसुवर्णार्द्धप्रभृतेर्विनाशे। लौकिकास्य क्रियाः। अपङ्कवे तत्र दशगुणो द्रव्यनाशो भविष्यतीत्यादिकाः। चशब्दः स्मार्त्तशपथसंग्रहार्थः। अतएवाह विष्णुः "सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्। तत्र च क्षणलोने शूद्रं दूर्वाकरं शापयेत्, द्विक्षणलोने तिलकरम्, त्रिक्षणलोने जलकरं चतुःक्षणलोने सुवर्णकरम्. पञ्चक्षणलोने सीरोद्धृतमहीकरम्, तत्र सुवर्णार्द्धोने कोशो देयः शूद्रस्य ततःपरं यथार्हं घटाग्न्युदकविषाणामन्यतमं द्विगुणार्थे यथाभिहिता समयक्रिया। वैश्यस्य त्रिगुणेऽर्थे, राजन्यस्य कोशवर्जञ्चतुर्गुणेऽर्थे ब्राह्मणस्य कोशन्दद्यात् अन्यत्रागामिकालसमयनिबन्धनक्रियातः कोशस्थाने ब्राह्मणं सीरोद्धृतमहीकरमेव शापयेत्। प्रागुद्दिष्टदोषं स्वल्पेऽप्यर्थे दिव्यानामन्यतममेव कारयेत्। सतृस्तु प्रथितं सञ्चरितं न महत्यर्थेऽपीति"। सीरोद्धृतमहीकरं लाङ्गलोद्धृतलोष्टहस्तमित्यर्थः। अनपहृतमधिके शापनिष्टत्त्यर्थं शापे तु विशेषमाह मनुः "सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति" यद्यहमर्थापहृतो स्यात् तदा सत्याभिधानधर्मो मम निष्फलः स्यादिति शप कारिणं ब्राह्मणं वाचयेत्। एवं क्षत्रियादीनां वाहनादीनि निष्फलानि स्युरित्यादीत्यर्थः। पादस्पर्शादीनां विशेषः स्मृत्यन्तरे दर्शितः "निष्फे तु सत्यवचनं द्विनिष्फे पादतस्पर्शनम्। अनत्रिके तु पुष्पं स्यात् कोशपानमतःपरम्" इति। अत्र निष्फशब्देन कर्षचतुर्थांशो सुद्रासुद्रितः प्रतिपाद्यते क्वचिद्वेधे तत्रापि निष्फव्यवहारात् न तु मनूक्तो निष्फः तस्य राजतपलात्मकत्वेन मूलकाञ्चनकर्षादधिकत्वात् तत्र सत्यवचनविधौ चतुर्गुणेऽर्थे ब्राह्मणस्येति विरोधः स्यात्। दिव्ये दण्डे च मनूक्तं परिमाणम् ग्राह्यमिति बृहस्पतिराह "सङ्ख्या रश्मिरजोमूला मनुना संप्रकीर्तिता। कार्षापणान्ता सा दिव्ये नियोज्या विनये तथेति"। संख्या परिमाणं रश्मिरजोमूला त्रसरेण्वादिका। विनये दण्डे। तत्र परिमाणं प्रतिज्ञापूर्वकं मनुराह "लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि। ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः। जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानान्त्रसरेणुमुपचक्षते। त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः। ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः। सर्षपाः षड्यवो मध्यस्त्रियवस्त्वेककृष्णलम्। पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पलानि धरणन्दश। द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः। ते षोडश स्याद्धरणं पुराणश्चैव राजतः। धरणानि दश ज्ञेयः शतमानस्तु राजतः। कार्षापणस्तु विज्ञेयः कार्षिकस्ताम्रिकः पणः। चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः" इति। अत्र ताम्ररूप्यसुवर्णानामिति ताम्ररूप्ययोरल्पत्वात् प्राक्प्रयोगो न तु क्रमप्रदर्शनार्थः। पलानि धरणन्दशेत्यन्तं सुवर्णपरिमाणाभिधानात्। चतुःसौवर्णिको निष्क इत्युक्तं रूप्यपरिमाणाभिधानम्। अवशिष्टेन ताम्रपरिमाणाभिधानम्। जालान्तरप्रविष्टे सूर्यरश्मौ यत् सूक्ष्मं रजो दृश्यते तत् त्रसरेणुसंज्ञकम् अष्टौ त्रसरेणवो लिक्षा तास्तिस्रः राजसर्षपः। त्रयो राजसर्षपाः गौरसर्षपः। षड्गौरसर्षपा मध्यमो यवो न सूक्ष्मो न स्थूल इति। मध्यमयवस्य परिमाणमुक्तं मिताक्षरायाम् मध्यशब्दः पादपूरणार्थः। तथा च संपूर्णयवपरिमाणमुक्तमिति मनु-

माषेत्र । त्रयो यवाः कृष्णलम् । माषः पञ्च कृष्णलानि सुवर्णः षोडश माषाः । पलं सुवर्णाश्चत्वारः । धरणन्दश पलानि । रूप्यमाषो द्वे कृष्णले । रजतस्य धरणं षोडश रूप्यमाषाः । अस्य च पुराण इति संज्ञान्तरम् । राजतः शतमानः राजतदशधरणानि राजतपलसंज्ञाप्यस्य भवति । "शतमानन्तु दशभिर्धरणैः पलमेव त्विति" याज्ञवल्क्यस्मरणात् । पूर्वोक्तसुवर्णचतुष्टयपरिमित एको राजतनिष्कः । कार्षिकः कर्षसंमितः ताम्रिकस्ताम्रविकारः कार्षापणो विज्ञेयः । पण इति च संज्ञा अस्यैव विज्ञेयेत्यर्थः । चशब्दोऽध्याहार्यः । अतएव वृद्धस्मृतिः "निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" । ताम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पणः । स एव चन्द्रिका प्रोक्ता तावतस्तु धानकाः । ता द्वादश सुवर्णस्तु दीनाराख्यः स एव तु । इति कर्षः पलचतुर्थांशः । "ते षोडशाद्यः कर्षोऽस्त्री पलङ्कर्षचतुष्टयम् इत्यमरसिंहेनाभिधानात् । ते माषाः षोडशाद्यः कर्ष इति च संज्ञेत्यर्थः । तेनाद्यकर्षशब्दयोः सुवर्णपरिमाणवचनत्वमित्यवगम्यते । याज्ञवल्क्यः पले विकल्पमाह "पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम्" । इति तस्य चतुर्थोऽंशो विंशतिर्माषा तत्परिमितः कार्षापणः । अतएव कात्यायनः "माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु । काकिणी तु चतुर्भागा माषकस्य पणस्य चेति" । राजतोऽपि कार्षापणोऽस्तीत्याह नारदः "कार्षापणो दक्षिणस्यान्दिशि रौप्यः प्रवर्त्तत" इति । व्यासस्तु निष्कस्य प्रमाणमाह "पलान्यष्टौ सुवर्णस्तु ते सुवर्णाश्चतुर्दश । एतत् निष्कप्रमाणन्तु व्यासेन परिकीर्त्तितम्"

वर्णभेदेन दिव्यव्यवस्थामाह नारदः "ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः । वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु । साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः । विषं विना ब्राह्मणस्य सर्वेषां वा तुला मता" इति । अनित्या चेयं व्यवस्था "राजन्येऽग्निघटं विप्रे वैश्ये तोयं नियोजयेत् । सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे" इति कात्यायनस्मरणात् । व्यवस्थापक्षे वयोविशेषादिना व्यवस्थापनीयम् तदाह नारदः "स्त्रीबालुरान् सत्वहीनान् परितश्चार्दितान्नरान् । बालवृद्धातुरांस्तोये परीक्षेत घटं सदा । स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं मतम् । घटकोशादिभिस्तासामनस्तत्त्वं विचारयेत् । नार्त्तानान्तोये मज्जिः स्यात् न विषं पित्तरोगिणाम् । चित्रग्रन्थकनखादीनां नाग्निकर्म विधीयते । न मज्जनीयाः स्त्रीबाला धर्मशास्त्रविचक्षणैः । रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः । निरुत्साहान् व्याधिक्लिष्टान्नार्तांस्तोये निमज्जयेत् । सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते स्मृताः । साहसेऽप्यागतानेतान्नैव तोये निमज्जयेत् । न चापि हारयेदग्निन्न विषेण विशोधयेत्" याज्ञवल्क्यः "तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् । अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य चेति" । स्त्रीमात्रजातिवयोऽवस्थाविशेषानादरेण । बाल आषोडशाद्वर्षाज्जातिविशेषानादरेण । वृद्धोऽशीतिकावरः । अन्धो नेत्रविकलः । पङ्गुः पादविकलः । ब्राह्मणोजातिमात्रम् । रोगी व्याधितः ।

एतेषां शोधनार्थं सर्वदिव्यसाधारणेषु मार्गशीर्षचैत्रवैशाखेषु स्त्र्यादीनां सर्वदिव्यप्रसक्तौ तुलैवेति नियम्यते न तु सर्वकालं स्त्रीणां तुलानियमः कोशादिविधानात् । अग्निकालस्तप्तमाषस्य क्षत्रियस्य । जलमेव वैश्यस्य । यवा एवार्थे शूद्रस्य विषस्य सप्तैव यवा उक्तप्रमाणलक्षणा भवन्तीत्यर्थः । ब्राह्मणस्य तुलाविधानात् अग्निर्जलं वेति क्षत्रियवैश्यविषयमित्यवगम्यते । अतएव पितामहः "ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः । वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्" इति । कात्यायनोऽपि "न लोहशिल्पिनामग्निः सलिलं नाम्बुसेविनाम् । मन्त्रयोगविदाञ्चैव विषं दद्यात्तु न क्वचित् । तण्डुलैर्न नियुञ्जीत व्रतिनं सुखरोगिणाम्" इति । व्रतिनं पयोव्रतादिनियमस्थम् । हारीतोऽपि "कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां नित्यं विषं च परिवर्जयेत्" इति ।

विष्णुरपि "न श्लेष्मकारिणां व्याधितानां भीरूणां श्वासकासिकानामम्बुसेविनामुदकं हेमन्तशिशिरयोश्चेति" पितामहोऽपि "कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत् । मद्यपस्त्रीव्यसनिनां कितवानां तथैव च । कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः" इति । यत्तु पितामहेनोक्तम् "सव्रतानां भृशार्त्तानां व्याधितानां तपस्विनाम् । स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्मस्त्वपेक्ष्यते" इति तुलेतरविषयं तदिति केचित् तदयुक्तम् । "घटकोशादिभिस्तासामनस्तत्त्वं विचारयेदिति पूर्वोदाहृत-

नारदवचनेन स्त्रीणां कोशादेर्विधानात्। तदग्न्यम्बु-विषयमित्युक्तं विद्यारण्यश्रीपादैः। विज्ञानेश्वराचार्यास्तु पुंस्त्रियोर्विवादे रुच्या वान्यतरः कुर्यादित्यनेन पक्षे स्त्रीणामपि दिव्यप्रसक्तौ पुरुषस्यैव दिव्यं न स्त्रीणामित्येतत्परमिदम्। अन्यथा सर्वथा तासां दिव्यनिषेधे घटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेदित्यनेन विरोधः स्यादिति प्राहुः। कात्यायनः "गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव याचयेच्छूद्रवद्द्विजान्"। कालिकापुराणेऽपि "वर्णान्त्यस्य सदा देयं माषकं तप्तहेमजमिति"। वर्णानामन्त्यः प्रत्यन्तः तस्येत्यर्थः। नारदोऽपि "महापराधे निर्द्धर्मे कृतघ्ने क्लीवकुत्सिते। नास्तिके दृष्टदोषे च शप्तानां तु विवर्जयेत्" इति। कात्यायनोऽपि "मातापितृद्विजगुरुदृष्टस्त्रीबालघातिनाम्। महापातकयुक्तानां नास्तिकानां विशेषतः। लिङ्गिनां प्रमदानाञ्च मन्त्रयोगक्रियाविदाम्। वर्णसङ्करजातानां पापाभ्यासप्रवर्त्तिनाम्। एतेष्वेवाभियोगेषु निन्द्येष्वेवं प्रवर्त्तितः। दिव्यं प्रकल्पयेच्चैव राजा धर्मपरायणः। एतैरेव नियुक्तानां साधूनां दिव्यमर्हति। न सन्ति साधवो यत्र तत्र शोध्याः स्वकैर्नरैरिति"। साधूनां दिव्यमर्हति राजा कल्पयितुमिति शेषः। प्रतिनिधिद्वारा एतैर्दिव्यं कारणीयमिति दृढयितुमाह स एव "महापातकयुक्तेषु नास्तिकेषु विशेषतः। न देयं तेषु दिव्यन्तु पापाभ्यासरते भृगुः। येषु पापेषु दिव्यानि कर्त्तव्यानि प्रयत्नतः। तारयेत्सज्जनैस्तानि नाभिशस्तं त्यजेच्चर इति"। तारयेत् शोधयेत्। अभिशोधनं प्रतिनिधिद्वारा शोधनमकारयित्वा न त्यजेदित्यर्थः। यत्तु तेनैवोक्तम् "असृग्ग्राहमदासानां म्लेच्छानां पापकारिणाम्। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेदिति"। तत्तैर्नियुक्तानां साधूनामभावे विज्ञेयम्। तत्प्रसिद्धानि घटादीनि इति स्मृतितत्त्वे। साधूनामप्यसामर्थ्ये प्रतिनिधिमभ्युपजानाति स एव "कालदेशाविरोधे तु यथायुक्तं प्रकल्पयेत्। अन्येन हारयेद्दिव्यं विधिरेष विपर्ययः"। सामर्थ्याभावे सर्ववर्णविषये विशेषमाह हारीतः, "राजन्येऽग्निं घटं विप्रे वैश्ये तोयन्नियोजयेत्। न विषं ब्राह्मणे दद्याद्विषं वर्णान्तरे स्मृतम्। कोशतण्डुलधर्मांस्तु धर्मस्वभावमेव च। पुत्रदारादिपथान् सर्ववर्णे प्रयोजयेत्" इति। अथ दिव्यकालः तत्र पितामहः "यो यस्य विहितः कालो विधिर्यस्य च यो यथा। तं प्रवक्ष्यामि तत्त्वेन वादिनश्च बलाबलम्। चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः। घटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत्। अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः। शरद्ग्रीष्मे च सलिलं हेमन्ते शिशिरे विषमिति"। विष्णुरपि स्त्रीब्राह्मणविकलाऽसमर्थरोगिणां न तुला देया न वाति वायौ न कुष्ठ्यसमर्थलोहकाराणामग्निर्देयः शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं प्रावृषि च। न श्लैष्मिकाणां व्याध्यर्दितानां भीरूणां श्वासकासिनामम्बुजीविनामुदकं हेमन्तशिशिरयोश्चेति। हेमन्तनिषेधोऽत्र पौषमासविषय एव न तु मार्गशीर्षविषयोऽपि। मार्गशीर्षस्य "चैत्रो मार्गशिरा इति पूर्वोदाहृत पितामहवचनेन सकलदिव्यसाधारणत्वाभिधानात्। नारदोऽपि "विचार्य धर्मनिपुणैर्धर्मशास्त्रविशारदैः। धर्मं सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम्। वर्षासु समये वह्निर्हेमन्तशिशिरे तथा। ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले। न शीते तोयशुद्धिः स्याच्चोष्णकालेऽग्निशोधनम्। न प्रावृषि विषं दद्यात् प्रवाते न तुलां तथा। नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचनेति"। मध्याह्ने दिव्यनिषेधो जलव्यतिरिक्तविषयः। अतएव पितामहः "पूर्वाह्णेऽग्निपरीक्षा स्यात् पूर्वाह्णे च घटो भवेत्। मध्याह्ने तु जलं देयं धर्मतत्त्वगभीरता। दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे भागे विषं देयं सुशीतलमिति"। अत्र विषस्य वर्षासु निषेधात् सिंहरवावेव परीक्षामात्रे निषेधाच्च दिव्यान्तरं सिंहेतरवर्षास्वपि कुर्वन्ति। अतः "याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेदित्यस्य न विषयः। तथा च ज्योतिषे "सिंहस्थे मकरस्थे च जीवे चास्तमिते भृगौ। मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा"। तथा "रविशुद्धौ गुरौ चैव न शुक्रेऽस्तंगते पुनः। सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः। नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणे। न परीक्षाधिवासश्च शनिभौमदिने भवेत्"। रविशुद्धौ गुरौ चेदित्यत्र शस्यत इति शेषः तथा च दीपिकायाम् "न शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेऽब्दे

विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मताराश्च चाथ। नाड़ीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धौ प्रातः कार्य्यां परीक्षा द्विजतुचरग्रहांशोदये शस्तलग्ने"। इति। यद्यपि दिव्ये वारविशेषविधानाभावस्तथापि शिष्टाचारादादित्यवारे दिव्यानि दातव्यानीति मिताक्षरायाम्। अथ दिव्यदेशाः तत्र पितामहः। "प्राङ्मुखो नियतः कार्यः शुचौ देशे घटः सदा। इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे" इति। घटग्रहणं दिव्यान्तरस्याप्युपलक्षणम्। इन्द्रस्थानग्रहणञ्च प्रसिद्धदेवतायतनान्तरस्याप्युपलक्षणम्। अतएव दिव्यमात्रमुपक्रम्य नारदः "सभाराजकुलद्वारे देवायतनचत्वरे"। विषयविशेषे इन्द्रस्थानादीनां व्यवस्थामाह। कात्यायनः "इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम्। नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्। प्रातिलोम्यप्रसूतानां दिव्यं देयञ्चतुष्पथे। अतोऽन्येषु तु कार्य्येषु सभामध्ये विदुर्बुधाः" इति। इन्द्रस्थाने इन्द्रध्वजपूर्वस्थाने। दिव्यदेशानादरे दिव्यं विसंवदतीत्याह, नारदः "अदेशकालदत्तानि बहिर्वासप्रतानि च। व्यभिचारं सदर्थेषु कुर्वन्तीह न संशयः"। वासो जननिवासस्तस्माद्बहिष्कृतानि निर्जनप्रदेशप्रतानीति यावत्। अतएव पितामहः "प्रत्यक्षं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा। ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव चेति"। ब्राह्मणानां प्रकृतयोऽमात्यास्तेषाञ्चेत्यन्वयः।

अथ दिव्यसाधारणविधिस्तत्र बृहस्पतिः "स्नेहात् क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः। विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचिदिति"। विधिञ्च पितामहेन दर्शितः "दिव्येषु सर्वकार्य्याणि प्राङ्विवाकः समाचरेत्। अध्वरेषु यथाध्वर्युः सोपयासो नृपाज्ञया। तत आवाहयेद्देवान् विधिनानेन धर्मवित्। वादित्रतूर्यघोषैश्च गन्धमाल्यानुलेपनैः। प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राङ्विवाकस्ततो वदेत्। एह्येहि भगवन्धर्म! अस्मिन्दिव्ये समाविश। सहितो लोकपालैश्च वसादित्यमरुद्गणैः। आवाह्य तु घटे धर्मं पश्चादङ्गानि विन्यसेत्"। सर्वकार्य्याणि साधारणानि असाधारणानि च ततस्तदुपयोगिसामग्रीसम्पादनानन्तरमित्यर्थः। घटग्रहणमत्र दिव्यमात्रोपलक्षणम्। अस्मिन्दिव्य इति मन्त्रलिङ्गादेतेषां धर्माणां दिव्यमात्रसाम्यस्य। "इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनञ्च देवानां तथैव परिकल्पयेत्" इत्युपसंहरता तेनैवोक्तत्वात्। अङ्गानि कानीत्याकाङ्क्षायां स एवाह, "इन्द्रं पूर्वे तु विन्यस्य प्रेतेशं दक्षिणे तथा। वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा। अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्। इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः। कुबेरस्तु सुवर्णाभः अग्निश्चैव सुवर्णभः। तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते। ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान्। इन्द्रस्य दक्षिणे पार्श्वे वसूनास्थापयेद्बुधः। धरोध्रुवस्तथा सोम आपश्चैवानलोऽनिलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः। देवेशेशानयोर्मध्ये आदित्यानां तथाऽयनम्। धातार्यमा च मित्रश्च वरुणांशो भगस्तथा। इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः। अग्नेः पश्चिमभागे तु रुद्रा एकादश स्मृताः। वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः। स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः। प्रेतेश्वरस्योमध्ये च मातृस्थानं प्रकल्पयेत्। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चैव माहेन्द्री चामुण्डा गणसंयुता। निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः। वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते। पवनः स्पर्शनो वायुरनिलो मरुतस्तथा। प्राणाः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः। घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवतानान्तु स्वनाम्ना पूजनं विदुः। भूषावसानं धर्माय दत्त्वाचार्यादिकं क्रमात्। अर्घादि पश्चादङ्गानां भूषान्तमुपकल्पयेत्। गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत्। चतुर्दिक्षु तथा होमः कर्त्तव्यो वेदपारगैः। आज्येन हविषा चैव समिद्भिर्होमसाधनैः। सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत्"। अङ्गानाम् इन्द्रादिदुर्गान्तानाम् अर्घाद्युपकल्पनञ्च न कारणानुसमयेन। तथात्वे प्रयोगवचनावगताङ्गसहभावबाधापत्तेः। किन्तु पदार्थानुसमयेन तथा च दुर्गायै भूषणं दत्त्वा धर्मसेन्टादिदुर्गान्तानाञ्च गन्धादिपरिचर्यां विप्रकल्पयेदिति। गायत्रीं प्रणवादिकामन्त्यार्थं पुनः प्रणवं स्वाहाकारान्तमन्त्यार्थं समिदाज्यचरुभिः प्रत्येकमष्टोत्तरशतं जुहुयात्।

"अनुक्तसङ्ख्या यत्र स्यात् शतमशोत्तरं कृतमिति" स्मरणादित्यर्थः। होमामन्तरकर्त्तव्यं स एवाह "यमर्थमभियुक्तः स्यात्लिखित्वा तन्तु पत्रके। मन्त्रेणानेन सहितन्तत् कार्यञ्च शिरः क्रमात्"। मन्त्रश्च, "आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति" एतत् सर्वं पूर्वाह्णे कर्त्तव्यम् तस्य प्रधानकालत्वात् तथा च नारदः "अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे। पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति"। एतत् प्राङ्विवाकेनोपवासादिनियमपूर्वकं कर्त्तव्यम् तथा च नारदः "प्राङ्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः। श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः। सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः। उपोषितश्चार्द्रवासाः कृतदन्तानुधावनः। सर्वासां देवतानाञ्च पूजां कृत्वा यथाविधि"। कर्त्तुरुपवासादिकमाह "त्रिरात्रोपोषितोयः स्यादेकरात्रोपोषितस्तु वा। नित्यं देयानि दिव्यानि शुचये आर्द्रवाससे" इति। याज्ञवल्क्योऽपि "सचेलं स्नातमाहूय सूर्योदय उपोषितम्। कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधाविति"। अत्र सूर्योदयपदेन पूर्वाह्ण एव ग्राह्यः "पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति" नारदवचनानुरोधात्। त्रिरात्रैकरात्रोपवासयोः शक्ताशक्तविषयत्वेन व्यवस्था ज्ञेया। दिव्यप्रयोगानन्तरं दक्षिणादानम् शक्तेन विधिना दिव्यप्रयोगं कारयितुः राज्ञः फलञ्चाह पितामहः "सद्भिः परिवृतो राजा शुद्धिमेतां प्रपूजयेत्। ऋत्विक्पुरोहिताचार्यांस्तु दक्षिणाभिस्तु तोषयेत्। एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान्। महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते" इति। व्ययश्च विधिः सर्वदिव्यसाधारण इत्याह स एव "इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनञ्च देवानां तथैव परिकीर्त्तितमिति"। सर्वदेवावाहनादि संशोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणमित्यर्थः" दिव्यप्रमाटका। १२जलभेदे। "दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम्। तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम्" भाव०प्र०। १३स्नानभेदे न० "असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः। मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितम्। "आपोहिष्ठेति" वै मान्त्रं, मृदालम्भस्तु पार्थिवम्। आग्नेयं भस्मना स्नानं, वायव्यं गोरजः स्मृतम्। यत्तु स्नातं पयसैव स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाहश्च, मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्" योगियाज्ञवल्क्यः। दिवि द्योतात्मके आदित्ये परमव्योम्नि वा ब्रह्मणि स्वस्वरूपे भवः यत्। "दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा। द्वन्द्वातीतो वीतरागः सर्वभूतसमः शमी" इत्युक्ते १४तत्त्ववेत्तरि पु० १५आमलक्यां स्त्री मेदि०। १६बन्ध्याकर्कोटक्याम् १७शतावर्य्याम् १८महामेदायाम् १९ब्राह्मण्याम् २०स्थूलजीरके २१श्वेतदूर्वायाम् २२हरीतक्याम् २३पुरायाम् २४गन्धवल्लाञ्च स्त्री राजनि०। २५दैवे दिने २६वटीये माने च न० दिव्यदिनदिव्यमानशब्दयोर्द्वयम्। २७द्युलोकाज्जाते २८मनोज्ञे २९लोकातीते दिव्यदर्शी दिव्यचक्षुः त्रि०।

दिव्यकट न०प्रतीचीस्थे पुरभेदे "कृत्स्नं पञ्चनदञ्चैव तथैवामरपर्वतम्। उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम्" भा० स० ३१अ० नकुलप्रतीचीजये।

दिव्यकुण्ड न० कामरूपपीठस्थक्षोभकशैलपूर्वभागस्थे कुण्डविशेषे। "यथा तद्दक्षिणे महाशैलः क्षोभकोनामनामतः। तस्मिन् गिरौ शिलापृष्ठवक्त्रे देवी व्यवस्थिता। पञ्चपुष्करिणी नाम्ना प्रञ्चयोनिस्वरूपिणी। एकत्र पञ्चभिर्दुर्गा योनिभिः पञ्चवक्त्रकम्। स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा। तच्छैलपूर्वभागात्तु कान्ता नाम महानदी। दक्षिणं सागरं याति प्रयसां चोत्तरवहा। दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकागतम्। संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत्। दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम्। यः पूजयेन्महाभागः स योनौ न हि जायते"। कालि०पु०८१अ०

दिव्यगन्ध पु० कर्म०। १मनोज्ञे गन्धे। दिव्योगन्धोऽस्य। २गन्धके ३लवङ्गे च न० ४स्थूलैलायां महाचञ्चशाके च स्त्री राजनि०।

दिव्यगायन पु० कर्म०। गन्धर्वे अमरः।

दिव्यचक्षुस् पु०दिव्यं चक्षुर्यस्य ५ब०। १मर्कटे शब्दमाला। (चसमा) ख्याते २पदार्थे च ३सुगन्धभेदे ४सुलोचने च। दिव्यमन्तरीक्षभूतं चक्षुरस्य। ५अन्धे त्रि०मेदि०। कर्मधा०। ५अलौकिकपदार्थदर्शनयोग्ये नेत्रे न०"न च मा शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे

योगमैश्वरम्" गीता। दिव्यमलौकिकार्थदर्शनसाधनं चक्षुरस्य। ७तथाभूतनेत्रयुक्ते त्रि॰ "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः "नमस्तुभ्यं विरूपाक्ष! नमस्ते दिव्यचक्षुषे" नीलकण्ठस्तवः।

दिव्यतेजस् स्त्री दिव्यं तेजो यस्याः ५ब॰। १ब्राह्मीलतायाम्। २अद्भुततेजस्के त्रि॰।

दिव्यदर्शिन् त्रि॰दिव्यमलौकिकपदार्थं पश्यति दृश-णिनि। अतीन्द्रियार्थदर्शके। "व्याजहार सभामध्ये दिव्यदर्शी महातपाः" भा॰आश्र॰ २॰अ॰। दृश-क्विप्। दिव्यदृगप्यत्र।

दिव्यदिन न॰ दिवि भवम् यत् कर्म॰। दैवे दिने "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते" सू॰सि॰तन्मानसूक्तम्।

दिव्यदोहद न॰ "यत् दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः" हारा॰ उक्ते अभीष्टसिद्धये देवेभ्यो देये द्रव्ये।

दिव्यनदी स्त्री कर्म॰। आकाशगङ्गायाम्।

दिव्यनारी स्त्री अप्सरःसु स्वर्वेश्यायाम् दिव्यस्त्री प्रभृतयोऽप्यत्र। "दिव्यस्त्रीकरचारुचामरवरैः संवीज्यमानः कदा" गङ्गास्तवः।

दिव्यपञ्चामृतम् न॰ पञ्चानाममृतानां तत्तुल्यस्वादूनां समाहारः कर्म॰। मिलितगव्याज्यदधिक्षीरमधुसिताख्ये पदार्थे राजनि॰।

दिव्यपुष्प पु॰दिव्यं मनोज्ञं पुष्पमस्य। १करवीरे २महाद्रोणायां राजनि॰ संज्ञायां कन् क्वापि अतद्रूपम्। दिव्यपुष्पिका रक्तपुष्पकार्कदृष्टे स्त्री रत्नमाला।

दिव्यप्रश्न पु॰ कर्म॰। अनागततापके प्रश्ने। "उच्चावचं दैवयुक्तं रहस्यं दिव्यप्रश्नाः मृगचक्रासुहृत्ताः। क्षयं महान्तं कुरुसृञ्जयानां निवेदयन्ते पाण्डवानां जयञ्च" भा॰उ॰ ४७अ॰।

दिव्यमान न॰ कर्म॰। दैवे माने "सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। यत् प्रोक्तं तद्भवेद्दिव्यं भानो र्भगणपूरणात्"। "युगानां त्रिघनं यातं तथा कृतयुगं त्रिदम्। प्रोच्यते सृष्टेस्ततः कालं पूर्वोक्तं दिव्यसंख्यया"। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा। सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव" सू॰सि॰।

दिव्ययमुना स्त्री नित्यकर्म॰। कामरूपपीठस्थदमनिकाया नद्याः पूर्वभागस्थे नदीभेदे यथा "तस्या नद्याः पूर्वभागे गङ्गेव फलदायिनी। माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः। तथा दर्शनिकायाञ्च परं निर्वाणमाप्नुयात्। ततः पूर्वे परा देवी नाम्ना सा सरिदुत्तमा। महती दिव्ययमुना यमुनावत्फलप्रदा। दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी। तस्यान्तु कार्तिकं मासं स्नात्वा मोक्षमवाप्नुयात्" कालि॰पु॰८१अ॰।

दिव्यरत्न न॰कर्म॰। चिन्तामणौ मणौ शब्दार्थक॰।

दिव्यरथ पु॰ कर्म॰। व्योमयाने विमाने शब्दरत्ना॰।

दिव्यरस पु॰ नित्यकर्म॰। १पारदे राजनि॰। २मनोज्ञे रसे पु॰। दिव्योरसोऽस्य। ३रुचिररसयुक्ते त्रि॰।

दिव्यलता स्त्री कर्म॰। १मूर्वालतायाम् राजनि॰। २मनोज्ञे लतामात्रे च।

दिव्यवस्त्र पु॰ दिव्यं वस्त्रं यस्मात्। १सूर्यप्रकाशे शब्दरत्ना॰। ६त॰। २भास्वरवस्त्रयुक्ते त्रि॰कर्म॰। ३मनोज्ञे वसने न॰

दिव्यसरित् स्त्री कर्म॰ आकाशगङ्गायाम् "व्योम्नि दिव्यसरिदम्बुपङ्क्तिः" माघः।

दिव्यसानु पु॰ १विश्वदेवभेदे "विश्वे चाग्निसुखा देवाः" इत्युपक्रमे "पार्ष्णिक्षेमासमूहश्च दिव्यसानुस्तथैव च" भा॰आनु॰ ९१अ॰विश्वदेवोक्तौ। २दिव्यसानुके गिरौ च।

दिव्यसार पु॰ दिव्यः सारोऽस्य। शालवृक्षे राजनि॰।

दिव्यादिव्य पु॰ दिव्यश्चादिव्यश्च कर्म॰। नायकभेदे रसमञ्जरी यथा अर्जुनादयः। २नायिकाभेदे स्त्री यथा द्रौपद्यादयः। ३उपदेवीभेदे स्त्री शब्दार्थचि॰।

दिव्यासन न॰ "अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत्। एकहस्तमध्यदेशं भूमिहस्तञ्च नासया" रुद्रजा उक्ते आसनभेदे।

दिव्येलक पु॰ सर्पभेदे "तयाणां वैकरञ्जानां पुनर्दिव्येलकः लोध्रपुष्पकराजिचित्रिकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पोवेल्लितकः सप्त तेषामाद्ययोराजिलवत् शेषा मण्डलिवत्" सुश्रु॰।

दिव्योदक न॰ कर्म॰। १अन्तरीक्षभवे जले दिव्यशब्दे भाव॰ प्र॰ वाक्ये तद्भेदादि दृश्यम्। अम्बुशब्दे विवृतिः।

दिव्योपपादुक पु॰ उपपद्यते मातृपित्रादिदृष्टकारणमनपेक्ष्यैव अदृष्टसहकृताणुभ्य एव उत्पद्यते उप+पद-उकञ् कर्म॰ पिशाचादिव्यावृत्तये दिव्य इति विशेषणं तेषाञ्च मातृपित्रादिदृष्टकारणापेक्षाभावेऽपि दिव्यत्वाभावान्न तथात्वम्। देवे अमरः।

दिव्यौघ पु॰ तन्त्रोक्ते गुरुभेदे। "महादेवो महाकालस्त्रि-

पुरश्चैव भैरवः। दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते"। इति शक्तिरत्नाकरतन्त्रम्। "अथ तारा-गुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्। जर्द्धकेशो व्योमकेशी नीलकण्ठोऽष्टषष्ठ्यजः। दिव्यौघान् सिद्धिदान् वत्स! शृणुष्वावहितो सदा"। "शृणु वत्स! महादेव! गुरून् दुर्गामनूद्भवान्। परमात्मा परानन्दः परमेष्ठी शुभोदयः। कृष्णकाल। कालनाथो दिव्यौघा भैरवादि-काः" तन्त्रसारे देवताभेदात्तद्भेदा उक्ता २रुचिरौषधौ च

दिव्यौषधि स्त्री नित्यकर्म०। १मनःशिलायाम् शब्दार्थचि०।

दिश दाने आज्ञापने कथने च तु०उभ०सक०अनिट्। दिशति ते अदिक्षत् न दिदेश देष्टा दिष्टः दिष्टिः। दिष्ट्वा आदिश्य "साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेच्च यः" मनुः। दाने "दिष्टां गतिं तस्य सुरा दिशन्ति" भा० आनु०१८४१श्लो० आज्ञापने "महादेवेन दिष्टं ते पुत्रजन्म नराधिप!" भा० व० १०६अ०। "दिदेश तस्मै प्रयतां तनूजाम्" कुमा०।

अति+स्वविषयसङ्कल्पान्यविषये उपदेशे सक० अतिदेशशब्दे १००पृ०दृश्यम्। "यथाकालोपपाते तद्दैवते तद्दैवतं हुत्वा तद्वातिदिशत्यानेन जुहुयात्" कात्या०श्रौ० २५। २।४ उपदेशे च। "इत्यर्चितः स भगवानतिदिशत्यात्मनः पदम्" भाग०४।९।२८।

अनु+पश्चात्कथने। "यज्ञं देवेभ्योऽनुदिशति" तैत्ति० सं० १।५।४।१ "रामयाप्यनुदिश्यताम्" रामा०लङ्का०८९स०

अप+छलने यथार्थाङ्गवे अपदेशशब्दे दृश्यम्। "पश्चिम-कृतविद्या पुरोधसा रोगशान्तिमपदिशत्र मन्त्रिणः। सम्भृते शिखिनि गूढमादधुः" "तस्य निर्दयरतिश्रमा-जसाः मित्रकृत्यमपदिशत्र पार्थिवाः" रघुः।

वि+अप+संज्ञाभेदे "भ्रातरं राजराजानं महेश्वरसखं प्रभुम्। धनेश्वरं व्यपदिशन्" भा०व०२८०अ०। "मित्रं च मां व्यपदिशस्यपरं च यासि" मृच्छक० "ईश्वर इति व्यपदिश्यते" वेदा०सा० "निमित्तसङ्गावाद्विशिष्टोऽपदे-शोऽसत्यव्यवहारोव्यपदेशः" परिभाषेन्दुशेखरोक्तेऽर्थे।

अभि+अभिसन्धीकृत्योपदेशे। "यां यामभ्यदिशत् सैनमकाम-यत" पञ्चभीब्रा० १२।११।

आ+आज्ञायाम् उपदेशे "अथात आदेशो नेति" द०उ० "आदिशदादोग्रहणानुकल्पम्" भट्टिः। आदेशशब्दे २१९ पृ० उक्ते अर्थे च "धातोः स्थाने इवादेशम्" रघुः।

अनु+आ+पश्चादादेशे उपदेशे च अन्वादेशशब्दे २१९ पृ० उक्ते अर्थे च।

प्रति+आ+निराकरणे "प्रत्यादेशो निराकृतिः" अमरः "ऋजु प्रणामक्रियया एव तन्वी प्रत्यादिदेशैनमभाषमाणा" "अन्तः शरीरेऽपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता" रघुः "किमहमेतं जलधर्मयं न प्रत्यादिशामि" विक्र०

वि+आ+विशेषेणादेशे। "समीरणः प्रेरयिता भवेति व्यादिशत्ते केन हुताशनस्य" कुमा०

सम्+आ+सम्यगादेशे। "समादिदेशैकवधूर्भवित्री" कुमा०।

उद्+स्वरूपकथने "उद्देशोलक्षणं विभागः परीक्षा चेति" न्यायसमयः। उद्देशशब्दे ११७०उक्तेऽर्थे च। तच्छब्दे उदा० प्रश्ने उद्देशकशब्दे दृश्यम्।

उप+अनुशासने उपदेशशब्दे १२१० पृ०उक्तेऽर्थे च। "उप-दिशति कामिनीनां यौवनमद एव ललितानि" सा०द० "उपदिष्टमिहेच्छामि तापसं वीतकल्मषाः" भा०उ०१७४अ०

प्रति-उप+उपदेशस्य प्रतिरूपोपदेशे "व्याधिं प्रति प्रत्युपदे-क्ष्यामः" सुश्रु० "यद्यत्प्रयोगविषये भाविकसुपदिशत्ते मया तस्मै। तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे वाणी" माल०मि

निर्+निर्णयेन देशने कथने च "ऋतुषत् पीठमासन्ने निर-दिशच्च काञ्चनम्" भट्टिः उच्चारणे च "निर्दिश्यमाना स्यादेशा भवन्ति" व्या०परिभाषा "प्रच्छन्नं निर्दिश्यमा-नमुच्चार्यमाणम्" नागेशभट्टः।

प्रति+निध+प्रकृतानुरूपनिर्देशे। "तदिति प्रकृतं भावलक्षणं प्रतिनिर्दिश्यते"। येन पदेन उद्देशस्तेनैव पदेन पुनः-कथने। उद्देश्यप्रतिनिर्देश्ययोरेकपदप्रतिपाद्यत्वेऽपि न कथितपदत्वदोषः अन्यपदेन निर्देशे तु प्रत्युत भग्नप्रक्रम-तादोषः यथाह सा०द० "एवमुक्तो मन्त्रिमुख्यैरावणः प्रत्यभाषत" अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितं तेन रावणः प्रत्यवोचतेति पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रति-निर्देशव्यतिरिक्तविषयत्वात्। इह हि वचनप्रति-वचनयोरुद्देश्यप्रतिनिर्देश्यत्वं यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र। यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति। यथा वा "ते हिमालयमामन्त्र्य पुनःप्रेक्ष्य च शूलिनम्। सिद्ध-द्वारे निवेश्यार्थं तद्विसृष्टाः समुद्ययुः" अत्र अस्मै

इति इदमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतददःशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन । यथा वा "उद्भवच्छिन्ना भूः स च पतिरपां योजनशतम्" अत्र "मिता भूः पत्यापां स च पतिरपामिति" युक्तः पाठः ।

प्रति+प्रतिरूपदेशने । "भुजगगतिप्रतिदेशितात्मतत्त्वः" भा० शा० २६७ अ०

सम्+सम्यक्कथने सम्यक्तयादेशे वाचा कथने च "अभिदूति काचिदिति संदिदिशे" माघः "ननु सन्दिशेति सुदशोदितया त्वया न किञ्चन किलाभिदधे" माघः "ददौ स दयितां भ्रात्रे मालाञ्चाग्र्यां हिरण्मयीम् । राज्यं सन्दिशत्र भोगांश्च ममार व्रणपीडितः" भट्टिः "अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्" कुमा०।

दिश् स्त्री दिशति ददात्यवकाशं दिश–क्विन् । १आशायाम् प्राच्यादिव्यवहारहेतौ काष्ठायाम् । "क्षत्यैकमवधिं तस्मादिदं पूर्वञ्च पश्चिमम् । इति निर्दिश्यते देशो यया सा दिगिति स्मृतेति" उक्तेस्तस्या दैशिकपरत्वापरत्वा समवायिकारणत्वम् । सा चैका नित्या विभ्वी चेति "कालस्यात्मदिशां सर्वगतत्वं परमं महत्" भाषा० ।

दिक्परीक्षा च कणाद सूत्रोपस्करयोर्यथा

"इत इदमिति यतस्तद्दिश्यं लिङ्गम्" सू० । "काललिङ्गप्रकरणं समाप्य इदानीं दिग्लिङ्गप्रकरणमारभमाण आह । दिग इदं दिश्यं दिगनुमापकम् इतोऽस्मात्तरसंयुक्तसंयोगाश्रयादिदं बहुतरसंयुक्तसंयोगाधिकरणं परम् इतश्च संयुक्तसंयोगभूयस्त्वाधिकरणादिदं संयुक्तसंयोगाल्पीयस्त्वाधिकरणमपरमिति नियतदिग्देशयोः समानकालयोः पिण्डयोर्यतो द्रव्याद्भवति सा दिगित्यर्थः । न हि तादृश द्रव्यमन्तरेण भूयसां संयुक्तसंयोगानामल्पीयसां वा पिण्डयोरुपनयनायकमन्यदस्ति न च तदुपनयमन्तरेण तत्तद्विशिष्टबुद्धिः न च तामन्तरेण परत्वापरत्वयोरुत्पत्तिः न च तदुत्पत्तिं विना तद्विशिष्टप्रत्ययव्यवहारौ । न च काल एव संयोगोपनायकोऽस्तु किं द्रव्यान्तरेणेति वाच्यं कालस्य नियतक्रियोपनायकत्वेनैव सिद्धेः, अनियतपरधर्मोपनायकत्वकल्पनायान्तु काश्मीरकुङ्कुमपङ्करागं काणाटकामिनीकुचकलसं प्रत्युपनयेत् आकाशात्मनोरपि तथा परधर्मोपसंक्रामकत्वे म एव प्रसङ्गः, दिशस्तु अनियतपरधर्मोपसंक्रामकतयैव सिद्धत्वान्नातिप्रसङ्गः एवञ्च क्रियोपनायकात् कालात् संयोगोपनायिका दिक् पृथगेव । किञ्चाकाशात् पूर्वमिदम् अकाद्दक्षिणमिदम् अकात्पश्चिममिदम् अकादुत्तरमिदम् अकाद्दक्षिणपूर्वमिदम् अकादुदक्षिणपश्चिममिदम् अकात्पश्चिमोत्तरमिदम् अकादुत्तरपूर्वमिदम् अकादधस्तादिदम् अकादुपरिष्टादिदम् इत्येते प्रत्यया इत इदमितीत्यनेन संगृहीताः एतेषां प्रत्ययानां निमित्तान्तरासम्भवात् । किञ्च नियतोपाध्युन्नायकः कालः अनियतोपाध्युन्नायिका दिक्, भवति हि यदपेक्षया यो वर्त्तमानः स तदपेक्षया वर्त्तमान एव, दिगुपाधौ तु नैवं नियमः यं प्रति या प्राची तं प्रत्येव कदाचित्तस्याः प्रतीचीत्वात् एवमुदीच्यादिष्वपि वाच्यम्, यदपेक्षया सूर्योदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची यदपेक्षया सूर्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया प्रतीची, सन्निधानन्तु संयुक्तसंयोगाल्पीयस्त्वं तेन च सूर्यसंयोगा अल्पीयांसो भूयांसो वा दिगुपनेयाः । एवं प्राच्यभिमुखपुरुषवामप्रदेशावच्छिन्ना दिगुदीची, तादृशपुरुषदक्षिणभागावच्छिन्ना दिक् दक्षिणा, वामत्वदक्षिणत्वे तु शरीरावयवदृत्तिजातिविशेषौ । गुरुत्वासमवायिकारणक्रियाजन्यसंयोगाश्रयो दिक् अधः । अदृष्टवदात्मसंयोगजन्याग्निक्रियाजन्यसंयोगाश्रयो दिगूर्ध्वा । एवञ्चेन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशाननागब्रह्माधिष्ठानोपलक्षिता दश दिश इति व्यपदेशान्तरं प्राच्यादिव्यपदेशात्" उप०द०। "द्रव्यत्वनित्यत्वे वायुना व्याख्याते" सू० । दिशो द्रव्यत्वं नित्यत्वञ्च वायुपरमाणुवदित्याह । "गुणवत्त्वाद्द्रव्यत्वम् अनाश्रितत्वाच्च नित्यत्वमित्यर्थः" द० । एकत्वमतिदिशन्नाह । "तत्त्वभावेन" सू० । "दिग्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च सत्त्वावदेकत्वं तदनुविधानादेकपृथक्त्वम्" द० । ननु यद्येकैव दिक् कथं तर्हि दश दिश इति प्रतीतिव्यवहारावित्यत आह । "कार्य्यविशेषेण नानात्वम्" सू०। "कार्य्यविशेषः कार्य्यभेदस्तेन नानात्वोपचार इत्यर्थः" द० । तमेव कार्य्यभेदं दर्शयन्नाह । "आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची" सू० । "प्राक् अस्यां सविता अञ्चतीति प्राची तथाच यस्यां दिशि मेरुप्रदक्षिणक्रमेण भ्रमत आदित्यस्य प्रथमं संयोगो भूतपूर्वो भविष्यन् वा सा दिक् प्राची अत्र पुरुषाभिसन्धिभेदमाश्रित्य कालत्रयोपवर्णनम्, भवति हि कस्यचित्पूर्वेद्युः प्रातरस्यां दिशि आदित्यसंयोगः प्रथमं वृत्त इतीयं प्राचीति प्राचीव्यवहारः कस्यचिदपरेद्युरस्यां आदित्यसंयोगः प्रथमं भावीत्यभिसन्धाय प्राचीव्यवहारः

कस्यचिदिदानीं यस्याम् आदित्यसंयोगो भवन्नस्तीत्यभिसन्धाय प्राचीव्यवहारः, भूतादिति आदिकर्म्मणि क्तप्रत्ययः तेनाभिसन्धेरनियमात् यदाप्यादित्यसंयोगो नास्ति रात्रौ मध्याह्नादौ तत्रापि प्राचीव्यवहारानुगमः सिद्ध्यतीति भावः" उप०ह०। दिगन्तरव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह "तथा दक्षिणा प्रतीची उदीची च" सू०। "तद्वदेव दक्षिणदिग्वर्त्तिनगादिना सहादित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताद्वा दक्षिणव्यवहारः एवं प्रतीच्युदीच्योरपि व्यवहार उन्नेयः। वामतदक्षिणत्वे निरुक्ते एव" उप० ह०। दिगन्तरालव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह "एतेन दिगन्तरालानि व्याख्यातानि" सू०। "प्राचीदक्षिणयोर्दिशोर्लक्षणसङ्कर्षेण दक्षिणपूर्वा दिगिति व्यवहारः एवं दक्षिणपश्चिमा पश्चिमोत्तरोत्तरपूर्वेत्यूह्यम् एते चादित्यसंयोगा येन विभुना द्रव्येणोपनीयन्ते सा दिगिति कणादरहस्ये व्युत्पादितं विस्तरतः" उप०ह०। ऋक्षिपदान्ते च कुः। दिक्। "दिग्दक्षिणा गन्धवहं सुखेन"। "प्रसन्नदिक् पांशुविविक्तवातम्" कुमा०। सा चोपाधिभेदात् दशधा "पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा। वायवी चोत्तरैशानी ऊर्द्ध्वा चाधोदिशोदशेति" वराहपुराणम्। आशाशब्दे तत्तत्त्वे प्रमाणं प्राच्यादिभेदे उपाधिस्वरूपञ्च८२५ पृ०दृश्यम्। "यया दिशा धावति वेधसः सृष्टा" नैष० "परस्परालापमिवामला दिशः" किरा० भागुरिमते वा टाप् दिशाप्यत्र। दिशागज दिशापालशब्दे दृश्यम् दिशाञ्च यात्राद्युपयोगिसंज्ञाभेदः ज्यो० त० उक्तो यथा "अङ्गारिणी दिग्रविविप्रयुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता। प्रधूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च ताः स्युः"। "यत्र पूर्वादिकाष्ठायां द्वयराश्यादिगोरविः। सा दिगस्तमिता ज्ञेया शेषास्त्रिस्रः सदोदिताः। यात्रा युद्धं विवाहश्च द्वारं प्रासादहर्म्ययोः। न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः"। "अस्ताशायां स्थितं यस्य नाम्नः प्रथममक्षरम्। स आर्त्तः सर्वकार्येषु त्रेयोदैवहतो नरः" ज्योति० त० दिक्करशब्दोक्ते २दन्तवृते च वैजयन्ती ३दशसंख्यायाम् ४तत्संख्यान्विते च। "दिग्भिर्गुणैरष्टयमैः शरैवैः"नील० ता०। ५श्रोत्राधिष्ठातृदेवतायाम् "दिग्वातार्कप्रचेतोऽश्वि ब्रह्मेन्द्रोपेन्द्रमृत्युकाः"शारदातिलकम्। कः प्रजापतिः दिशि भवं दिगा०यत्। दिश्य दिग्भवे त्रि०। दिशा निर्वृत्तम् ठञ्। दैशिक दिक्कृते त्रि० दैशिकपरत्वापरत्वे।

दिश् त्रि०दिशति दिश्-क। १देशके। २विष्णौ पु०"चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः" विष्णुस०।

दिशम् स्त्री दिश-दा० कसन्। दिशि रमानाथः।

दिशागज पु० दिशायां स्थितो गजः। दिग्गजे "नागान् दिशागजसुतान् दिव्यानपि च भारत!" हरिवं०१४५अ०

दिशाचक्षुस् पु० गरुड़ात्मजभेदे। "वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा" भा० उ० १०० गरुड़पुत्रोक्तौ।

दिशापाल पु०दिशां पालयति पालि-अण् उप०स०। इन्द्रादौ १दिक्पाले २ब्रह्मनियोजिते वैराजादिप्रजापतिसुते दिशां पालकभेदे च। दिग्भेदेन तेषां नियोजनकथा हरिवं०४ अ०यथा "एवं विभज्य राज्यानि क्रमेण स पितामहः। दिशापालानथ ततः स्थापयामास भारत!। पूर्व्वस्यां दिशि पुत्रन्तु वैराजस्य प्रजापतेः। दिशापालं सुधन्वानं राजानं सोऽभ्यषेचयेत्। दक्षिणस्यां महात्मानं कर्दमस्य प्रजापतेः। पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयेत्। पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम्। केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयेत्। तथा हिरण्यरोमाणं पर्जन्यस्य प्रजापतेः। उदीच्यां दिशि दुर्द्धर्षं राजानं सोऽभ्यषेचयेत्। तैरियं पृथिवी सर्वा समद्वीपा सपत्तना। यथाप्रदेशमद्यापि धर्मेण परिपाल्यते"।

दिशोदण्ड पु० दिशमनादृत्य दण्डः अलुक् स०। दिशोऽनादरेण दण्डे त्रि० कौ०।

दिश्य त्रि० दिशि भवः दिगा० यत्। दिशि भवे। "ये सर्पाः पार्थिवा ये आन्तरिक्षा ये दिव्या ये दिश्यास्तेभ्य इमं बलिमहार्षम्" आश्व० गृ० २।१।९।

दिष्ट त्रि०दिश-कर्म्मणि क्त। १उपदिष्टे २कथिते। संज्ञायां कर्त्तरि क्त। ३भाग्ये न० अमरः।"न दिष्टमिष्टं कुरुते न तिष्ठति तु पौरुषे" विष्णुपु०। ४कालेपु०अमरः। ५वैवस्वतमनोः पुत्रभेदे। "नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते" भाग० ८।१३।२ वैवस्वतमनुपुत्रकथने। ६दारुहरिद्रायां शब्दमाला

दिष्टान्त पु० द्वन्द्व०। १भाग्यसमाप्तौ तदुपलक्षिते २मरणे च। "ततो दिष्टान्तमापन्नः सर्वेषां दुःखमावहन्" भा० आ० ४६अ० "दिष्टान्तमाप्स्यति भवानपि पुत्रशोकात्"रघुः

दिष्टि स्त्री दिश-भावे क्तिन् सज्ञायां कर्त्तरि क्तिच् वा। १हर्षे २परिमाणे च मेदि०। ३कथने उपदेशे ४उत्सवे "तथाचास्य दिष्टिवृद्धिमिव युयुधाय" काद०। ५भाग्ये च"राजकुले दिष्टिवृद्धिसम्पन्नीमस्तानभूत"काद०।

दिक्षा स्त्री० दिश–सम्पदा०भावे क्विप् दिशं देशनं स्त्यायति स्त्यै–ष्ठ्यै–वा क्विप् अम्नाद्यादि०नि०वा। १हर्षे २मङ्गले भाग्यार्थकदिष्टिशब्दस्य तृतीयान्तस्य रूपमित्यन्ये तेन १भागेप्रनेत्यर्थे। "अन्योऽन्यगतसौहार्दा दिष्ट्यादिष्टेप्रति चाब्रुवन्" भा० आ० १२९अ०

दिष्णु त्रि० दा–क्विष्णु। दातरि उणादि०।

दिह लेपने अदा० उभ० सक० अनिट्। देग्धि दिग्धे अधिक्षत् अधिक्षत-अदिग्ध अधिक्षन्त अदिहत।। दिदेह दिदिहे। देग्धा धेक्ष्यति दिग्धः। "अटिहंचन्दनैः शुभैः" भट्टिः। "स चन्द्रनोशीरन्यासदिग्धः" भट्टिः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तलेपने। प्रणिदेग्धि "दलास्तपसाभिदिग्धाः" ऋग्०५।१८।८ "दलरजसाव-देग्धि" कौ०त०ब्रा०३१ "कवचैः शोणितादिग्धैः" भा०भी० २१८४ श्लो० "ऊर्जं वा एतं रसं पृथिव्या उपदीका उद्दिहन्ति यद्बलमोकम्" तै०आ०५।२।८ "लोहानां च मणीनां च मलपङ्कोपदिग्धता" काम०नी० "शिरोगलं कफोपदिग्धम्" सुश्रु० "यथाधो भूमौ निदिग्धं तदुपया स्यादेवं तत्" शत०ब्रा० १।७।२।१२

दी धातौ दि० आत्म० सक० अनिट्। दीयते अदास्त। दिग्ये दीदिते दीनः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थत्वये "अध ध्वनो जवसा निरदीयम्" ऋ०४।२७।१ "आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परिदीयन्ति यह्वीः" ऋ०२। ३५।१४

दीक्ष मौण्ड्ये याग उपनयने नियमव्रतयोरादेशे च भ्वा० आ०सक० सेट्। दीक्षते अदीक्षिष्ट। दिदीक्षे दीक्षिष्यते। "दीक्षस्व सह रामेण त्वरितं तुरगाध्वरे" भट्टिः "यत्रादुह वा एष पुनर्जायते यो दीक्षते" ऐत०ब्रा०२।२२ "कथं नोमध्येऽदीक्षिष्ट" ऐत०ब्रा० २।१९ "ब्रह्मसत्रेण दीक्षिष्यमाणः" भाग० ३।१।६ क्वचित् वेदे पदव्यत्ययः "ते ह देवयजनं दिदीक्षुः पञ्चभी०ब्रा०२४।१८ णिच्। दीक्षयति "राजानं दीक्षयामासुः सर्पसत्रान्तये तदा" भा० आ० २०।७ श्लो०।

दीक्षण न० दीक्ष–भावे ल्युट्। यज्ञाद्यर्थनियमभेदे। "बन्ध मोक्षमन्त्रदीक्षणेष्वपि" राजमार्त्तण्डः।

दीक्षणीय न० दीक्षणाय हितादि छ। दीक्षासाधने हविर्भेदे। "यो दीक्षते आग्नावैष्णवं चरुं दीक्षणीयं हविर्भवति" शत०ब्रा० ३।३।४।२१। १इष्टिभेदे स्त्री "दीक्षणीयामायणीयातिथ्यरेवता" कात्या०श्रौ०५।४।१० "दीक्षणीयादीनां सकलानामिष्टीनां सदेवताकानां सुपांसुलुक्" कर्कः "वाग्लोन वा दीक्षणीयां नीचैस्तरांनीचैस्तरामितरे" कात्या०श्रौ० ७।२।२१ "अथ वा वाग्लोन उच्चमया वाचा उच्चैर्दीक्षणीयां कुर्युः इतरे हे इष्टी प्रायणीयातिथ्ये नीचैस्तरां कर्तव्ये, दीक्षणीया उच्चैस्तरां, प्रायणीया तदपेक्षया नीचैस्तरां, तदपेक्षया नीचैस्तरामातिथ्येति" कर्कः। २सौमिके इष्टिभेदे हेम०। ४वाजपेयाङ्गभूते इष्टिभेदे। "वाजपेयाङ्गभूतानां यजतीनां दीक्षणीयाप्रायणीयादीनामादिषु सकृदुष्टहीतमाज्यं जुहोति" यजु० ९।५। वेददी०।

दीक्षा स्त्री दीक्ष–भावे अ। १नियमे २उपनयनसंस्कारे "दीयते विमलं ज्ञानं क्षीयते कर्मवासना। तेन दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः" इति तन्त्रोक्ते ३अभीष्टदेवमन्त्रग्रहणे ४तदुपदेशे। यागाङ्गदीक्षा च द्वादशसंख्या अपरिमिता वा यथाह कात्या०श्रौ०७।१।२९सू० "द्वादश दीक्षाः" "अत्राग्निष्टोमे भवन्ति" कर्कः। "अपरमिता वा" द्वादशसंख्यातोऽतिशयेनाधिकसंख्या वा दीक्षा भवन्ति "अपरिमितं प्रमाणाद्भूय इति" परिशिष्टकारः अतश्चत्वारो दीक्षापक्षाः, "एका दीक्षा, तिस्रो दीक्षा, द्वादशदीक्षा अपरिमिता वा दीक्षेति" शास्त्रान्तरादेते दीक्षापक्षाः। आपस्तम्बः "उपाहसवरार्थं दीक्षितो भवति मासं संवत्सरं वा यदा क्रयः स्यादित्यपरं विज्ञायते च यद्वा वै दीक्षितः क्रयो भवत्यथ मेध्यो भवति यदास्मिन्नन्नं किं चन भवत्यथ मेध्यो भवति यदास्य क्रयणं चक्षुषोर्नश्यत्यथ मेध्यो भवति यदास्य त्वचास्थि संधीयतेऽथ मेध्यो भवति पीवा दीक्षेत क्रयो यजेत यदस्याङ्गानां हीयते जुहोत्येव तदिति विज्ञायते" इति। कर्कः "पुण्याहे दीक्षा क्रयः प्रसव उत्थानम्" ११सू० "तान्यत्र दीक्षा सोमक्रयः प्रसवः सुत्या उत्थानं उमाग्निः पुण्याहे विष्टिव्यतीपातादिज्योतिःशास्त्रनिषेधवर्जिते सुदिने भवन्ति यतएवं स्मरन्ति "आभ्युदयिकः पदार्थः पुण्येऽहनि कर्त्तव्यः एतानि चाभ्युदयिकानीति" कर्कः। तान्त्रिकमन्त्रदीक्षाकालादि मल०त० उक्तं यथा "अथ दीक्षाकालः सा च मलमासे न कार्या यथाऽगस्त्यसंहितायाम् "यदा ददाति सन्तुष्टः प्रसन्नवदनो मनुम्। अयमेव तथा चेवमिति कर्त्तव्यताक्रमः। विशुद्धेयकालेषु शुद्धात्मा नियतो गुरुः। सङ्कल्पपूर्वं कर्त्तव्यमङ्कुरारोपणं क्षणे!। कुर्यान्नान्दीमुखं

श्राद्धमादौ च स्वस्तिवाचनम्। स्वग्रहोक्तप्रकारेण तदेतद्विदधीत वै। मधुमासे भवेद्दुःखं माधवे रत्नसञ्चयः। मरणं भवति ज्यैष्ठे आषाढ़े बन्धुनाशनम्। समृद्धिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः। प्रजानामाश्विने मासि सर्वतः शुभमेव हि। ज्ञानं स्यात् कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि। पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनम्। फाल्गुनेऽपि विदद्भिः स्यान्मलमासं विवर्जयेत्। गुरौ रवौ दिने शुक्रे कर्त्तव्यं बुधसोमयोः। अश्विनी भरणी स्वातिविशाखाहस्तभेषु च। ज्येष्ठोत्तरत्रयेष्वेवं कुर्यान्मन्त्राभिषेचनम्। शुक्लपक्षे च कृष्णे वा दीक्षा सर्वसुखावहा। पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा। त्रयोदशी च दशमी प्रशस्ता सर्वकामदा। पञ्चाङ्गशुद्धदिवसे सोदये शशितारयोः। गुरुशुक्रोदये शुद्धे लग्ने द्वादशशोधिते। चन्द्रतारानुकूले च शस्यते सर्वकर्मसु। सूर्य्यग्रहणकालेन समानो नास्ति कश्चन। तत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत्। न मासतिथिवारादिशोधनं सूर्य्यपर्वणि। ददातीष्टं स्टहीत् यत्तस्मिन् काले गुरोर्ग्रहे। सिद्धिर्भवति मन्त्रस्य विनायासेन सेव्यतः"। मनुं मन्त्रम्। अङ्कुरारोपणमागमप्रसिद्धम्। शुद्धकालत्वं दर्शयति मधुमासे इत्यादि। पञ्चाङ्गशुद्धदिवसे तिथिवारनक्षत्रकरणयोगशुद्धदिवसे। तथाच महाकपिलपञ्चरात्रम् "एवं नक्षत्रतिथ्यादौ करणे योगवासरे। मन्त्रोपदेशो गुरुणा साधकस्य शुभावहः"। सोदये शशितारयोरिति लग्नचन्द्राद्यतारयोरानुकूल्यसहिते गुरुशुक्रोदये गुरुशुक्रानस्तमये। एतत्तु समयशुद्ध्यन्तरोपलक्षणम्। (अकालशब्दोक्ते "गुरोर्भोगोरस्तबाल्ये" इत्यादिके वचने "परीक्षारामकूपांश्च पुरश्चरणदीक्षणे" इत्यादिना अशुद्धकाले तस्यावर्जनीयत्वमुक्तम्)। द्वादशशोधिते द्वादशांशशोधिते। ज्ञानमालायाम् "रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा"। तथा "तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन"। दीक्षातत्त्वे "यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः। न तिथिर्न व्रतं होमो न स्नानं न जपः क्रिया। दीक्षायाः कारणं किञ्चित् स्वेच्छयाग्रे तु सद्गुरौ"। सद्गुरौ सिद्धमन्त्रगुरौ। दीपिकायाम् "ध्रुवमृदुनक्षत्रगणे रविशुभवासरेषु सत्सु सद्गुरौ दीक्षा। स्थिरलग्ने शुभचन्द्रे केन्द्रे कोणे शुभे गुरौ धर्मे"। ध्रुवाणि त्रीण्युत्तराणि रोहिणी च। मृदूनि चित्रानुराधामृगशिरोरेवत्यः। केन्द्रं लग्नचतुर्थसप्तदशकम्। कोणं नवपञ्चकम्। धर्म्मो नवमः। वीरतन्त्रे "रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम्। पुष्यः शतभिषगर्कौ च दीक्षामन्त्रमिष्यते"। अर्कौ हस्तः। रत्नावल्याम् "योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनो धृतिः। वृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः। वरीयांश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोडश"। तथा। शुभानि करणानि स्युर्दीक्षायाञ्च विशेषतः। शकुन्यादीनि विष्टिञ्च विशेषेण विवर्जयेत्"। शकुन्यादीनि शकुनिनागचतुष्पदकिन्तुघ्नानि। कृष्णेऽष्टम्यां चतुर्दश्यां पूर्वपञ्चदिने तथा"। कृष्णे कृष्णपक्षे। कालोत्तरे "भूतिकामैः स्थिते सदा" मन्त्र दीक्षायां प्रतिप्रसवः "राघवभट्टधृतसारसंग्रहे शिष्यप्रश्निजन्मदिवसे संक्रान्तौ विषुवायने। सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः। मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन् न शोधयेत्"। तन्तुपर्व परमेश्वरोपवीतदानतिथिः श्रावणी पूर्णिमा। दामनपर्व दमनभञ्जनतिथिश्चैत्रशुक्लचतुर्दशी। कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च। श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी। करालभैरवञ्चापि यामलं वाममाश्रितम्। एवंविधानि चान्यानि मोहनार्थानि तानि तु। मया सृष्टानि चान्यानि मोहायैषां भवार्णवे"। तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यसनीयम्। अर्थादिदुष्टमन्त्रप्रतीकारस्तु "एषु दोषेषु सर्वत्र मायां कामञ्चापि वा। चित्वा चादौ शिवं दद्यात् तद्दूषणविमुक्तये। तारसंपुटितो वापि दुष्टमन्त्रो विशुध्यति। यस्य यत्र भवेद्भक्तिः सोऽपि मन्त्रोऽस्य सिद्ध्यति। भुवनेश्वरीपारिजातेऽपि "मायाबीजसमायुक्तः चिह्नं सिद्धिप्रदो भवेत्। पिण्डस्तु केवलो मन्त्रो मायाबीजोज्ज्वलीकृतः। मायाबीजात् भवेत् प्राणो बीजञ्चैतन्यवीर्य्यवत्"। नारदीये "यदृच्छया श्रुतं मन्त्रं कुलनापि कुटेन वा। पत्रेचितं वा गायात्री तत्सेत्य त्वनर्घकृत्। प्रविश्य विधिवद्दीक्षामभिषेकावसानिकाम्"। अधिकं तन्त्रसारोक्तं देशाद्यनुपदं वक्ष्यते

तन्त्रसारे दीक्षाशब्दस्य व्युत्पत्तिप्रदर्शनपूर्वं कलापावश्यकता दर्शिता यथा

"दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते "दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्ष-

यम्। तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः। दीयते ज्ञानसंभारः क्षालनात् पापसन्ततेः। ततो दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः"। सर्वाश्रमेषु दीक्षाया आवश्यकत्वम् तथा च "दीक्षामूलं जपं सर्वं दीक्षामूलं परन्तपः। दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्"। शूद्रस्य निषेधमाह तन्त्रान्तरे "प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्वथा। आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रराजपसंज्ञकम्। स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः। शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम्"। नृसिंहतापनीये "सावित्रीं प्रणवं यजुर्लक्ष्मीं नतो शूद्रो यद्विजानीयात् स मृतोऽधोगच्छति"। लक्ष्मीं लक्ष्मीमन्त्रम्। विशेषमाह वाराहीतन्त्रे "गोपालस्य मनुर्देयो महेशस्यापि पादजे। तत् पत्न्याश्चापि सूर्यस्य गणेशस्य मनुस्तथा"।

अदीक्षितस्य निन्दामाह तन्त्रसारे

"अदीक्षिताये कुर्वन्ति जपपूजादिकाः क्रियाः। न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत्। देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः। तस्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत्। अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्। तस्माद्दीक्षां प्रयत्नेन सदा कुर्याच्च तान्त्रिकात्। कल्पे दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः। मन्त्रान्तर सहस्रेषु निष्कृतिर्नैव जायते। नादीक्षितस्य कार्यं स्यात् तपोभिर्नियमव्रतैः। न तीर्थगमनेनापि. न च शारीरयन्त्रणैः"। अतः सद्गुरोराहितदीक्षः सर्वकर्माणि साधयेत्। गोविन्दवृन्दावने "अदीक्षितस्य मरणे प्रेतत्वं न विमुञ्चति"। नवरत्नेश्वरः "सर्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम्। अविरोधाद्भवन्त्येव प्रासङ्गिक्यस्तु भूरयः"। दीक्षा कास्या च यथा कुलार्णवे "उपपातकलक्षाणि महापातककोटयः। क्षणाद्दहति देवेशि! दीक्षा हि विधिना कृता। दीक्षाह्यागमोक्तागमपदार्थमाह गामले "आगतः शिवमुखेभ्यो गतश्च गिरिजानने। मग्नस्तस्या हृदम्भोजे तस्मादागम उच्यते। आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः। न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः। पञ्चवर्णैर्भवेद्दीक्षा ह्यागमोक्तैः शृणु प्रिये!। यां कृत्वा कलिकाले च सर्वाभीष्टं नभेश्वरः" तन्त्रसा०

दीक्षाप्रकारश्च कलावतीशब्दे १७६२ पृ० दृश्यः

अन्यत्र च दीक्षाशब्दव्युत्पत्त्यादिकसङ्गं यथा

रुद्रजामले "ददाति शिवतादात्म्यं क्षिणोति च मलत्रयम्। अतो दीक्षेति संप्रोक्ता दीक्षातन्त्रार्थवेदिभिः"। लघुकल्पसूत्रे च "दीयते परमं ज्ञानं क्षीयते पापपद्धतिः। तेन दीक्षोच्यते तन्त्रे स्वागमार्थप्रभावतः"। योगिनीतन्त्रे तृतीयभागे षष्ठपटलेऽपि "दीयते ज्ञानमत्यर्थं क्षीयते पाशबन्धनम्। अतो दीक्षेति देवेशि! कथिता तत्त्वचिन्तकैः। मनसा कर्मणा वाचा यत् पापं समुपार्जितम्। तेषां विश्लेषकरणी परमज्ञानदा यतः। तस्माद्दीक्षेति लोकेऽस्मिन् गीयते शास्त्रवेदकैः। विज्ञानफलदा सैव द्वितीया लयकारिणी। तृतीया मुक्तिदा चैव तस्माद्दीक्षेति गीयते"। विश्वसारतन्त्रे द्वितीयपटले च "अथ दीक्षां प्रवक्ष्यामि शृणुष्व कमलानने!। यस्य विज्ञानमात्रेण देवत्वं लभते नरः। दिव्यज्ञानं यतो दद्यात् कुर्यात्पापक्षयं यतः। तस्माद्दीक्षेति सा प्रोक्ता सर्वतन्त्रस्य सम्मता"। अथ दीक्षामाहात्म्यम् रुद्रजामले पूर्वखण्डे तृतीयपटले "देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः। तस्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत्। अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्। तस्माद्दीक्षां प्रयत्नेन सदा कुर्याच्च तान्त्रिकीम्" पञ्चदशपटले "अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः। न भवन्ति प्रिये! तेषां शिलायामुप्तबीजवत्" कल्पसूत्रटीकाधृतकुलार्णवतन्त्रे "रसेन्द्रेण यथा विड्मयः सुवर्णतां व्रजेत्। दीक्षाविद्धस्तथात्मा शिवत्वं लभते प्रिये! दीक्षाग्निदग्धकर्मांशो पाशाद्विच्छिन्नबन्धनः। गतस्तस्य कर्मबन्धो निर्जीवश्च शिवो भवेत्। गतं शूद्रस्य शूद्रत्वं विप्रस्यापि च विप्रता। दीक्षासंस्कारसंभिन्ने जातिभेदो न विद्यते। शिवलिङ्गे शिलाबुद्धिं कुर्वन् यत् पापमाप्नुयात्। दीक्षितस्यापि पूर्वत्वं स्मरन् तत् पापमाप्नुयात्। दार्वश्मलौहस्थूलजातिलिङ्गं प्रतिष्ठितम्। यथोच्यते तथा शूद्राः सर्वे वर्णाश्च दीक्षिताः। येन पूजितमात्रेण चाब्रह्मभुवनान्नरः। पूजितं तेन सर्वं स्याद्दीक्षितेन न संशयः। नादीक्षितस्य कार्यं स्यात्तपोभिर्नियमव्रतैः। न तीर्थगमनेनापि न च शारीरयन्त्रणैः" पञ्चमखण्डे षष्ठोल्लासेऽपि "गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणम्। स्वकर्म चरितं दत्त पुनस्तामेव पोषयेत्। एवं सर्वशरीरस्थं सर्पिर्वत् परमेश्वरी। विना चोपासनाद्देवि! न ददाति फलं नृणाम"। पुरश्चरणरसोल्लासे प्रथमपटले "न च दीक्षा-

परं ज्ञानं न च दीक्षापरं तपः। न च दीक्षापरं कालं तस्मादुदीक्षा गीरयसी"

तत्र देशकालादि तन्त्रसारे निर्णीतं यथा "दृष्टे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके। चन्द्रतारानुकूले च कुर्याद्दीक्षाप्रवर्त्तनम्। स्थिरलग्नं विष्णुमन्त्रे शिवमन्त्रे चरः शुभः। द्विःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते। त्रिषडायगताः पापाः शुभाः केन्द्रा त्रिकोणगाः। दीक्षायान्तु शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः"। शुक्लपक्षे भवेदुदीक्षा कृष्णेऽप्या पञ्चमाद्दिनात्"। निषिद्धमासेऽपि तत्तद्विशेषो सुनिभिरुदितः रत्नावल्याम् "षष्ठी भाद्रपदे मासि तथा कृष्णा चतुर्दशी। कार्त्तिके नवमी शुक्ला मार्गे शुक्ल तृतीयिका। पौषे च नवमी शुक्ला माघे शुक्लचतुर्थिका। फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी"। त्रयोदशीति केचित्। "वैशाखेसाऽक्षया चैव ज्यैष्ठे दशहरा तिथिः। आषाढ़े नवमी शुक्ला श्रावणे कृष्णपञ्चमी। एतानि देवपर्वाणि तीर्थकोटिफलं लभेत्। अत्र दीक्षा प्रकर्त्तव्या न मासञ्च परीक्षयेत्। न वारं न च नक्षत्रं न तिथ्यादिकदूषणम्। न योगकरणञ्चैव शङ्करेण च भाषितम्"। अन्यच्च। "चैत्रे त्रयोदशी शुक्ला वैशाखेकादशी सिता। ज्यैष्ठे चतुर्दशी कृष्णा आषाढ़े नागपञ्चमी। श्रावणैकादशी भाद्रे रोहिणीसंयुताष्टमी। आश्विने च महापुण्या महाऽस्त्रयभीष्टदा। कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथा सिता। षष्ठी चतुर्दशी पौषे माघेऽप्येकादशी सिता। फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः"। योगिनीतन्त्रे "अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः। रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि!। मन्वन्तरासु सर्वासु महापूजादिने तथा। चतुर्थी पञ्चमी चैव चतुर्दश्यष्टमी तथा। तिथयः शुभदाः प्रोक्ताः" इत्यादिवचनात् चतुर्दश्यष्टमीति शक्तिविषयम् चतुर्थीति गणेशविषयम् तत्तत्कल्पोक्तत्वात् "निन्दितेष्वपि कालेषु दीक्षोक्ता ग्रहणे शुभा। सूर्य्यग्रहणकालस्य समानो नास्ति भूतले। विशेषतो महादेवि! दीक्षाग्रहणकर्मणि। तत्र यद्यत्कृतं सर्वमनन्तफलदं भवेत्। रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा। तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन। रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्। न वारतिथिमासादिशोधनं सूर्य्यपर्वणि"। एवं चन्द्रग्रहणेऽपि तथा च रुद्रयामले "न कुर्याच्छाक्तिकीं दीक्षामुपरक्ते विभावसौ। न कुर्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः"। एतच्च गोपालश्रीविद्योतरविषयम्। "अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्ययोरिति" गौतमीयात्। सूर्य्यग्रहणकाले तु नान्यदन्वेषितं भवेत्" इति योगिनीहृदयाच्च। वस्तुतस्तु "श्रीपराकालीबीजानि लोपादौर्गेच यो मनुः। सूर्य्यस्योपग्रहे लब्धे न्यां शीघ्रफलप्रदः" उक्तवचनानुरोधात् पूर्ववचने शक्तिमन्त्रपदं श्रीविद्याद्यतिरिक्तशक्तिमन्त्रपरमिति साम्प्रदायिकाः। "अमावास्या सोमवारे भौमवारे चतुर्थिका। सप्तमी रविवारे च सूर्य्यग्रहशतैः समा। शिष्यानाहूय गुरुणा कृपया दीयते यदि। तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन। तथा "सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः। यस्मिन्नहनि सन्तुष्टो गुरुः सर्वे शुभावहाः"। योगिनीतन्त्रे "ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः"। अथ वक्ष्यामि दीक्षायाः स्थानं तन्त्रानुसारतः। गोशालायां गुरोर्गेहे देवागारे च कानने। पुण्यक्षेत्रे तथोद्याने नदीतीरे च मन्त्रवित्। धात्रीबिल्वसमीपे च पर्वतागुहासु च। गङ्गायास्तु तटे वापि कोटिकोटिगुणं भवेत्"। दीक्षायां निषिद्धदेशमाह "गयायां भास्करक्षेत्रे विरजे चन्द्रपर्वते। चण्डाले च मतङ्गे च तथा कन्याश्रमेषु च। न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति!"। वाराहीतन्त्रे "शुक्रोऽस्तो यदि वा दृष्टो गुर्वादित्यो भवेद्यदि। मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते"। महाविद्यासु सर्वासु कालादिविचारो नास्ति तदुक्तं मुण्डमालातन्त्रे "कालादिशोधनं नास्ति न चाभिलादि दूषणम्"। ५.कर्मणि च "विवाहदीक्षां निरवर्त्तयत् गुरुः" "विवाहदीक्षातिलकं चकार" रघुः नियमे "एतान्यान्याशरेदेव दीक्षा विप्रो वने वसन्" मनुः।

दीक्षागुरु पु० दीक्षायां गुरुरुपदेष्टा। मन्त्राद्युपदेष्टरि।

दीक्षान्त पु० दीक्षायाः प्रधानयागस्य अन्तः अन्तोपलक्षितः तत्समापको यागभेदः। अवभृथस्नानरूपे यागभेदे अमरः।

दीक्षापति पु० ६त०। दीक्षापालके सोमे। "दीक्षां मे दीक्षापतिर्मन्यतामनु" यजु०५।६। "दीक्षायाः पतिः पालकः सोमः" वेददी०। दीक्षापालादयोऽत्यत्र।

दीक्षायूप पु०न० दीक्षाङ्गं यूपः। दीक्षाङ्गयूपादिमारणार्थं काष्ठमये पदार्थभेदे "रणयज्ञदीक्षायूपेन" काद०

दीक्षित त्रि॰दीक्ष–कर्त्तरि क्त दीक्षा जाताऽस्य तारं॰इतच् वा। १सोमादियागाङ्गव्रतभेदधारिणि २संजाततन्त्रोक्तदीक्षे च दीक्षाशब्दे उदा०। "वर्णानां ब्राह्मणश्चासि विप्रेण दीक्षितो द्विजः" भा॰अनु॰९१८क्षो॰ "अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्। भोभवत्पूर्वकन्त्वेनमभिभाषेत धर्मवित्" "नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च" मनुः। ३काम्पिल्लनगरस्थविप्रभेदे तत्कथा "आसीत् काम्पिल्लनगरे सोमयाजिकुलोद्भवः। दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः। वेदवेदाङ्गवेदार्थवेदोक्ताचारचञ्चुरः। राजमान्यो बहुधनो वदान्यः कीर्तिभाजनम्। अग्निशुश्रूषणरतो वेदाध्ययनतत्परः" काशीख॰ १३अ०। स दीक्षितः अयनं यस्याः गौरा॰ ङीष्। दीक्षितायनी तत्पत्न्यां स्त्री "महापतिव्रतां सम्यक् पत्नीं प्रोवाच तामथ। दीक्षितायनि! कुत्रापि क्व ते गुणनिधिः सुतः। अथ तिष्ठतु किन्तेन क्व सा मम शुभोर्मिका। अङ्गोद्वर्तनकाले या त्वया मेऽङ्गुलितो हृता। नवरत्नमयीं शीघ्रं तामानीय प्रयच्छ मे। इति श्रुत्वाय तद्वाक्यं भीता सा दीक्षितायनी" काशीख॰ १३अ० यज्ञमात्रे ४संजातदीक्षे च। "संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता" वेणीसं॰ "दीक्षितो न ददाति" श्रुतिः।

दीक्षित्र त्रि॰दीक्ष–शीलार्थे युच् बाधित्वा ष्ट्रन्। दीक्षाशीले

दीति स्त्री दीप–क्तिन् वेदे पस्योपः। दीप्तौ "सुदीतिरस्यादित्येभ्यः" ता॰ब्रा॰१९।११ "सुदीतिः सुदीप्तिरसि" भा॰।

दीदि पु॰ दीप बा॰ दि–पृषो॰। द्योतमाने। "अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता" ऋ॰ १।१५।१॰ दीद्यग्नी द्योतमानाग्नियुक्तौ" भा॰

दीदिवि पु॰ दिव–क्विन् अभ्यासे तस्य दीर्घः वलि वलोपः। १स्वर्गे २मध्ये च उज्ज्वल॰। ३अन्ने अस्त्री अमरः। पुनःपुनर्भृशं वा दीव्यति दिव–यङ्लुक् इन् न गुणः अभ्यासदीर्घः। ४पुनःपुनर्भृशं वा द्योतने त्रि॰ "राजन्नमध्वराणां गोपामृतस्य दीदिविम्" ऋ॰१।१।८ "दीदिविम् पुनःपुनर्भृशं वा द्योतकम्" भा॰

दीधिति स्त्री दीधी–क्तिन् यङ्लुगादित्वादिट "यीवर्णयोर्दीधीवेव्योः" पा॰ इकारलोपश्च। १किरणे "सन्निलमये रविदीधितयो मूर्च्छितास्तमोनैशम्। चपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थानः" वृ॰सं॰ "पुपोष वृद्धिं हरिदश्वदीधितेः" रघुः "अमृतदीधितिरेष विदर्भजे!" नैष॰। "स्वाधःसुधादीधितिमानमन्ति" सि॰शि॰ २रघुनाथशिरोमणिकृते चिन्तामणिटीकाभेदे ३अङ्गुलौ निघण्टुः।

दीधितिकृत् पु॰दीधितिं कृ–क्विप्। चिन्तामणिटीकाभेदकारके रघुनाथशिरोमणिपण्डिते

दीधितिमत् पु॰ दीधितयः भूम्ना सन्त्यस्य मतुप्। १सूर्ये "सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव"। "शरद्वनात् दीधितमानिवोच्चैः" कुमा॰। २अर्कवृक्षे च।

दीधी देवने दीप्तौ च अदा॰ जुहो॰ आत्म॰ अक॰ सेट्। दीधीते अदीधिष्ट। दीध्ये दीध्याञ्चक्रे। दीधिता दीधिष्यते दीधितिः। "दीधीवेवीसमः कश्चिद्गुणवद्भ्रोरभाजनम्" शा॰ द॰।

दीन त्रि॰ दी–क्त तस्य नः। १दुःखिते अमरः। २भीते च। ३तगरपुष्पे न॰ ४मूषिकायां स्त्री मेदि॰। "यद्वासुदेवेनादीनमनादीनवमीरितम् माघः। "दिनानि दीनोद्धरणोचितस्य" रघुः।

दीनदयालु पु॰ दीने दयालुः। दुःखिते १दयालौ "दीनदयालुतयाऽवनिपालः" नैष॰।

दीननाथ ६त॰। दुःखितजनभर्त्तरि।

दीनार पु॰दी–आरक् नुट् च। १स्वर्णभूषणे २मुद्रायां ३सुवर्णकर्षद्वये ४निष्क्रमाणे अमरभरतौ। "दीनारोरोपकैरष्टाविंशत्या परिकीर्त्तितः। सुवर्णसप्ततिसोभागोरोपक उच्यते" विष्णुगुप्तोक्ते सप्तमांशाधिकहेमरत्तिकारूपरोपकैरष्टाविंशत्या परिमिते ५द्वात्रिंशद्रत्तिकामिते हेम्नि च प्राय॰त॰ रघुः।

दीप दीप्तौ दि॰आत्म॰अक॰सेट्। दीप्यते अदीपि–अदीपिष्ट। दिदीपे दीप्तः। णिच् अदीदिपत्–त अदिदीपत् त। दीप्तिः। दीपनं दीपकः दीप्रः। "दीप्यमानः स्वतेजसा" मनुः। "पुनर्ददीपे सदृद्धिनम्रीः" रघुः "दैवाद्दवेज्ञदीपिष्ट" "सधूमदीप्ताग्निरुचीनि रेजुः" भट्टिः "ततः शकुनयो दीप्राः मृगाश्च क्रूरभाषिणः" हरिवं॰१७१ अ०। "हिंस्रेषु दीप्रास्त्वधरः कुमारः" भट्टिः "यावत् कर्माणि दीप्यन्ते तावत् संसारवासनाः" कुलार्ण॰। उपसर्गपूर्वकस्य तत्तदुपसर्गदीप्त्यर्थयुक्ते तदर्थे "आदित्यादीप्तकशानुकल्पम्" भट्टिः "यस्य यद्रेतसः प्रथमसुददीप्यत" ऐत॰ब्रा॰ ३।३४ "क्रुध्यन्ति परिदीप्यन्ति भूमिजस्याधिजिते" भा॰ शा॰ २०२६ श्लो॰ आर्षः पदव्यत्ययः। "ते शराः खसमस्त्रेन प्रदीप्ताग्निप्रभानुना" भा॰ उ॰१८१ अ०

दीप पु॰ दीपयति स्वं परञ्च दीप–णिच्–अच्। स्वपर-

प्रकाशके तैलादिस्नेहयोगेन वर्तिकादाहकशिखान्विते प्रदीपे कार्त्तिके तद्दानप्रशंसा पाद्मे उत्तरख० यथा "शृणु दीपस्य माहात्म्यं कार्तिके च हरिप्रिय !। यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत्। सूर्य्यग्रहे कुरुक्षेत्रे नर्मदायां शशिग्रहे। तुलादानस्य यत् पुण्यं तदूर्जे दीपदानतः। घृतेन दीपकं यस्तु तिलतैलेन वा पुनः। ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम्। तेनेष्टं क्रतुभिः सर्वं कृतं तीर्थावगाहनम्। दीपदानं कृतं येन कार्त्तिके केशवाग्रतः। तावद्गर्जन्ति पापानि देहेऽस्मिन्मुनिसत्तम !। यावत् कार्त्तिकमासे न दीपदानं कृतं भवेत्। तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले। यावत्तु ज्वलते दीपः कार्तिके केशवाग्रतः। श्रूयतेऽत्रापि पितृभिर्गाथा गीता महासने !। भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि। कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम्। अपि नस्ते भविष्यन्ति कुले सुचरिता गुणैः। दीपदानं कार्त्तिके ये दीपयन्ति हरिस्तुष्टिम्। गयायां पिण्डदानेन कृतं नः प्रीणनं सुतैः। यैश्चापि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः। दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः। कार्त्तिके तैर्न निश्चेष्ट ! नरकादुद्धृता वयम्। मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्दन !। व्रतं सम्पूर्णतां यातु कार्त्तिके दीपदानतः। अनेनैव हि मन्त्रेण दीपं सङ्कल्पयेन्मुने !। मधुसूदनतुष्ट्यर्थं कार्तिके मुनिपुङ्गव !"। वामनपुराणे च "दास्यते देवदेवाय दीपपुष्पानुलेपनम्। अपि नः स कुले भूयादेकादश्यां तिथौ नरः। करिष्यत्युपवासन्तु सर्वपातकहानिदम्। इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तमः। ददौ च दीपान् विधिवत् विष्णोरायतने बलिः। सुगन्धतैलसंपूर्णान् दीपान् सततैलकान्। सर्पिषस्य सुतैलेन मधुकातसिसम्भवैः। दीपप्रदानाद्वरकानन्धतामिस्रसंज्ञकान्। तीर्त्वा स भार्यया ब्रह्मन् ! विष्णुलोकमगात्ततः" वराहपुराणे दीपं स्पृष्ट्वा वैधकर्मकरणे दोष उक्तो यथा "दीपं स्पृष्ट्वा तु यो देवि ! मम कर्माणि कारयेत्। तस्यापराधाद्वै भूमे ! पापं प्राप्नोति मानवः। तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे !। जायते षष्टिवर्षाणि कुष्ठी गात्रे परिप्लुतः। चाण्डालस्य गृहे तत्र एवमेव न संशयः। एवं मुक्त्वा तु तत्कर्म सम क्षेत्रे मृतो यदि। सङ्गतश्चैव जायेत शुद्धे भागवते गृहे। प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि। तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु। यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी। चतुर्थभक्तमाहारमाकाशशयने स्वपेत्। दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि। शुचिर्भूत्वा यथान्यायं मम कर्मपथे स्थितः। एतत्ते कथितं देवि ! स्पर्शनात् दीपकस्य तु। संसारशोधनञ्चैव यत् कृत्वा लभते शुभम्"। वर्त्तिस्थज्वलदग्निशिखा हि दीपः तदङ्गस्नेहादिनियमो यथा वह्निपुराणे "घृतं तैलञ्च दीपार्थे स्नेहान्यन्यानि वर्जयेत्"। दीपभेदास्तद्दशाभेदाश्च कालिका० पु० ६८अ० उक्ता यथा "पुरश्चरणकृत्याञ्च दीपं शृणुष्व भैरव !। दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः। चतुर्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये" इत्युपक्रम्य "घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः। सार्षपः फलनिर्यासजातो वा राजिकोद्भवः। दधिजश्चाणुजश्चैव प्रदीपाः सप्त कीर्त्तिताः। पद्मसूत्रभवा दर्भगर्भसूत्रभवाऽथ वा। शणजा वादरी वापि फलकोषोद्भवाऽथ वा। वर्तिका दीपकार्य्येषु सदा पञ्चभिदाः स्मृताः। तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम्। शणभ्रजोद्भवं वापि दीपपात्रं प्रशस्यते। दीपवृक्षाश्च कर्तव्या तैजसाद्यैश्च भैरव !। वृक्षेषु दीपोदातव्यो न तु भूमौ कदाचन। सर्वंसहा वसुमती सहते न त्विदं द्वयम्। अकार्य्यपादघातञ्च दीपतापं तथैव च। तस्माद् यथा तु पृथिवी तापं नाप्नोति वै तथा। दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव !। कुर्वन्तं पृथिवीतापं यो दीपं सतृणेन्धनः। स ताम्रतापं नरकमाप्नोत्येव शतं समाः। सुवृत्तवर्त्तिसस्नेहपात्रेऽभग्ने सुदर्शने। मृण्मये वृत्तकोटौ तु दीपं दद्यात् प्रयत्नतः। लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात्। न स दीप इति ख्यातो ह्योषवह्निषु स स्मृतः। नेत्राह्लादकरः सार्चिर्दुरतापविवर्जितः। सुशिखः शब्दरहितो निर्धूमो नातिहस्वकः। दक्षिणावर्त्तवर्तिस्तु प्रदीपः श्रीविवृद्धये। दीपवृक्षस्थिते पात्रे शुद्धस्नेहप्रपूरिते। दक्षिणावर्तवर्त्या तु चारुदीप्रः प्रदीपकः। उत्तमः प्रोच्यते पुत्र ! सर्वतुष्टिप्रदायकः। वृक्षेण वर्जितो दीपो मध्यमः परिकीर्त्तितः। विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः। शणं वा वादरं वास्त्रं जीर्णं मलिनमेव वा। उपयुक्तन्तु नो दद्यात् वर्तिकार्थन्तु साधकः। उपादद्यान्नूतनमेव सततं श्रीविवृद्धये। कौषेयं रोमजं वस्त्रं

वर्तिकार्थं न चादद्यात्। न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् हृतादिकान्। कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत्। वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः। प्रदीपं नैव कुर्यात्तु कृत्वा पङ्के विशीदति। अस्थिपात्रेऽथ वा गर्त्ते दुर्गन्धाद्युपवासिनि। नैव दीपः प्रदातव्यो विबुधैः श्रोत्रिदृष्टये। नैव निर्वापयेद्दीपं कदाचिदपि यत्नतः। सततं लक्षणोपेतं देवार्थमुपकल्पितम्। न हरेज्जनतो दीपं तथा लोभादिना नरः। दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत्। उद्दीप्तदीपप्रतिमः काष्ठकाण्डसमुद्भवः। विल्वेध्मोद्भवमेवाथ दीपालाभे निवेदयेत्। उलूकं नैव दीपार्थे कदाचिदपि चोत्सृजेत्। प्रसन्नार्थन्तु तं दद्यादुपचाराद्बहिः कृतः। एवं वां कथितो दीपो धूपश्च शृणुतं सुतौ!"। श्राद्धे वस्त्रवर्तियुक्तदीपनिषेधो यथा "दीपं वर्जात् वस्त्रवर्त्तिप्रत्यक्षं तैलमेव च"। योगिनी॰ त॰ ३य भागे ५पटलः।

पुरुषस्य दीपनिर्वापणे दोषो यथा। "दीपनिर्वापणात् पुंसः कुष्ठाण्डच्छेदनात् स्त्रियः। अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम्" ति॰त॰। देवदत्तदीपस्य तु निर्वापणम् विधानपारिजाते उक्तं यथा "स्वयं निर्वापितं दीपमाजिघ्रन्ति सुरारयः। तस्मान्निर्वापयेद्दीपं देवानां ब्राह्मणस्य च"। कार्त्तिककृष्णचतुर्दश्यां नरकनिवृत्तये दीपदानं यथा "नरकाय प्रदातव्यो दीपः संपूज्य देवताः" तिथितत्त्वधृतलिङ्गपुराणम्।

"स्नाने धूमे तथा दीपे नैवेद्ये भूषणे तथा। घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च। विधानपारिजातोक्तः दीपदाने घण्टानादोविधेयः। शिवालये दीपोद्दीपनमाहात्म्यं काशीख॰ ११अध्याये दृश्या दिङ्मात्रमत्रोच्यते "स दीपवासनायोगात् बहून् दीपान् प्रदीप्य वै। अलकायाः पतिरभूद्रत्नदीपशिखाश्रयः"। दीपवर्तिश्च कर्पूरगर्भिणी कार्या "वर्त्या कर्पूर गर्भिण्याः सर्पिषातिलजेन वा। आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः" शारदाति॰। तन्त्रसारे "कर्पूरादियुता वर्त्तिः सा च कार्पास। निर्मिता। सम्पादृत्ता सुसंक्लृप्तो दीपः स्यात्तुरङ्गुलः" कार्त्तवीर्यप्रियार्थदीपविशेषस्तु कार्त्तवीर्यदीपशब्दे १६८४ पृ॰उक्तः। दीपदानफलादिकम् भा॰अनु॰६८अ॰उक्तं यथा

"दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमम्। यथा येन यदा चैव प्रदेया यादृशाश्च ते। ज्योतिस्तेजः प्रकाशं वाऽप्यूर्द्ध्वगञ्चापि वर्ण्यते। प्रदानं तेजसां तस्मात्तेजो वर्द्धयते नृणाम्। अन्धतमस्तमिस्रञ्च दक्षिणायनमेव च। उत्तरायणमेतस्माज्ज्योतिर्दानं प्रशस्यते। यस्मादूर्द्ध्वगमेतत्तु तमसश्चैव भेषजम्। तस्मादूर्द्ध्वगतेर्दीप्ता भवेदस्मेति निश्चयः। देवास्तेजस्विनो यस्मात् प्रभावन्तः प्रकाशकाः। तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते। आलोकदानाच्चक्षुष्मान् प्रभायुक्तो भवेन्नरः। तान् दत्त्वा नोपहिंसेत न हरेन्नोपनाशयेत्। दीपहर्त्ता भवेदन्धस्तमोगतिरसुप्रभः। दीपप्रदः स्वर्गलोके दीपमालेव राजते। हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैः। वसामेदोऽस्थिनिर्यासैर्न कार्यः पुष्टिमिच्छता। गिरिप्रपाते गहने चैत्यस्थाने चतुष्पथे। दीपदाता भवेन्नित्यं य इच्छेद्भूतिमात्मनः। कुलोद्योतो विशुद्धात्मा प्रकाशत्वञ्च गच्छति। ज्योतिष्मांश्चैव सालोक्यं दीपदाता नरः सदा" दीपस्य शुभाशुभलक्षणम् बृ॰सं॰ ८४अ॰ उक्तं यथा

"वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः क्षिप्रं नाशं व्रजति विमलस्नेहयुक्तोऽपि। दीपः पापं कथयति फलं यद्भवान् वेपनश्च व्याकीर्णार्चिर्विशलभमरुद् यश्च नाशं प्रयाति। दीपः संहतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान् निःशब्दोरुचिरः प्रदक्षिणगतिर्वैदूर्यहेमद्युतिः। लक्ष्मीं क्षिप्रमभिव्यनक्ति रुचिरं यश्चोद्यतं दीप्यते शेषं लक्षणमग्निलक्षणसमं योज्यं यथायुक्तितः"

"प्रवर्तितो दीप इव प्रदीपात्" निगीर्णदीपाः सहसा हुतत्विषः" रघुः। दीपयत्यर्थान् वा। २प्रकाशके यथा चित्रदीपादयः पञ्चदश्याम्।

दीपक पु॰त्रि॰दीपयति स्वं परञ्चार्थं दीपि-ण्वुल्। स्वपरप्रकाशके स्त्रियां टाप् अतइत्वम् दीपिका। षट्कर्मदीपिका ज्योतिषदीपिका २प्रदीपे पु॰३अलङ्कारभेदे अलङ्कारशब्दे २६६पृ॰दृश्यम्। ४यमान्यां रत्नमाला ५लोचमस्तके वृक्षे शब्दरत्ना॰ अनयोरग्निदीपकत्वात् तथात्वम् ६कुङ्कुमे न॰। ७खगपक्षिणि(बाज)(शिकरा) प्रसिद्धे खगे पुंस्त्री हेमच॰ ८मात्राद्वृत्तभेदे "तुरगैकसुपधाय सुनरेन्द्रमवधाय। इह दीपकमवेहि बहुमन्तमवधेहि" तल्लक्षणम्। ९रागभेदे पु॰ स च हनूमन्मते द्वितीयोरागः सूर्यनेत्राच्चिर्गतः षड्जस्वराश्रयः ग्रीष्मर्त्तौ मध्याह्ने गेयः। क्षुद्रोदीपःडीप्। स्वार्थे-क ह्रस्वः। दीपिका क्षुद्रदीपे "स शंवरारेर्वह्निदीपिका इव" नैष॰।

दीपकलिका स्त्री दीपस्य कलिकेव। १दीपशिखायां शूलपाणिकृते २याज्ञवल्क्यसंहिताटीकाभेदे च।

दीपकिट्ट न० ६त०। कज्जले शब्दार्थकल्पतरुः।

दीपकूर्पी स्त्री दीपस्य कूर्पीव। दीपवर्त्तिकायाम् दीपदशायाम् शब्दमा०।

दीपखोरी स्त्री खोर-गत्याघाते णिच-अच् गौरा० ङीष्। ६त०। दीपवर्त्तिकायां (शलुते) शब्दमाला।

दीपध्वज पु० दीपस्य ध्वज इव। कज्जले जटाध०।

दीपन त्रि० दीपयति वह्निम् दीप-णिच्-ल्यु। १तगरमूले रत्नमा० २कुङ्कुमे त्रिका०। ३मयूरशिखावृक्षे ४शालिञ्जशाके च पु० शब्दच० ५कासमर्दे ६पलाण्डौ च पु० राजनि०। ७दीपकमात्रे त्रि०। भावे ल्युट्। ८प्रकाशने न० ९याज्ञमन्त्रसंस्कारभेदे च "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा। अथाभिषेको विमलीकरणाप्यायने तथा। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः। "तारमायारमायोगो मनोर्दीपनमुच्यते" शारदाति०। दीप्यतेऽनया दीपि-करणे ल्युट् ङीप्। दीपनी १०मेथिकायां ११पाठायां १२यवान्यां च स्त्री राजनि०। १३दीपनसाधने त्रि० स्त्रियां ङीप्। "त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशिनी। चक्षुष्या दीपनी" "निहन्याद्दुदीपनं गुल्मपीनसाग्न्यल्पतामपि"। "कटुकोदीपनः पाचनो रोचनः शोधनः" इति च सुश्रु०।

दीपनीय पु० दीपनाय जठरानलोद्दीपनाय हितः छ। १यवान्यां राजनि० औषधवर्गभेदे "पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्। दीपनीयः स्मृतो वर्गः कफानिलगदापहः" चक्रपाणिदत्तः। दीप-णिच-अनीयर्। २ज्वालनीये त्रि०।

दीपपादप पु० दीपस्य पादप इव आश्रयत्वात्। (पिलसुज) दीपाधारे शब्दार्थकल्प० दीपवृक्षादयोऽप्यत्र।

दीपपुष्प पु० दीपः तत्कलिकेव पुष्पमस्य। चम्पके राजनि०।

दीपभाजन न० ६त०। दीपपात्रे तज्ज्वालनतैलाधारे पात्रे "वामनार्चिरिव दीपभाजनम्" रघुः।

दीपमाला स्त्री दीपानां माला। श्रीणीभूते प्रदीपसंघे "उडुबुद्धां च जगद्धात्रीं पूजयेदुदीपमालया" तिं०त०।

दीपवत् त्रि० दीप+अस्त्यर्थे मतुप् मस्य वः। १दीपयुक्ते गृहादौ स्त्रियां ङीप् ङीबन्तः २कामरूपीपीठस्थे नदीभेदे "शाश्वती कथिता या तु नदी मत्स्यध्वजा सिता। तस्याः पूर्वे समाख्याता नदी दीपवती मता। एषा च हिमवज्जाता छिन्दन्ती दीपवत्तमः। तेन देवमनुष्येषु नदी दीपवती स्मृता। दीपवत्याः पूर्वतस्तु शृङ्गाटोनाम पर्वतः" कालिका०पु० ८२अ०

दीपशत्रु पु० ६त०। कीटभेदे (जोनाकीपोका) पारस्करनि०

दीपशिखा पु०६त०। १प्रदीपज्वालायाम् उपचारात् तज्जाते २कज्जले च शब्दार्थचन्द्रिका।

दीपशृङ्खला स्त्री दीपानां शृङ्खलेव। दीपावल्यां हारा०

दीपान्वित त्रि० ६त०। १दीपयुक्ते गृहादौ श्मशानचत्वरादिषु देवदीपयुक्तायां सुख्याश्विनस्य गौणकार्त्तिकस्य २अमावास्यायाम् स्त्री तत्कर्त्तव्यादि यथा भविष्यपुराणे "येयं दीपान्विता राजन्। ख्याता पञ्चदशी भुवि। तस्यां दद्यात्तु चेद्दत्तं पितॄणां वै महालये। प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्। दीपवृक्षास्तथा कार्या भक्त्या देवगृहेष्वपि। चतुष्पथे श्मशानेषु नदीपर्वतसानुषु। वृक्षमूलेषु गोष्ठेषु हृत्वरेषु गृहेषु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्। अलङ्कृतेन भोक्तव्यं नवयस्त्रोपशोभिना। स्निग्धैर्बन्धुभिर्विदग्धैश्च बान्धवैर्भृतकैः सह" तिथित०।

निर्णयसिन्धौ तत्र विशेष उक्तो यथा

कालादर्शे "प्रत्यूष अश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः। भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये" अस्य व्याख्याने आदिशब्दात्पञ्चत्वगुदकस्नानादेरुपसंग्रहः तदुक्तं पद्मपुराणे "स्वातिस्थिते रवाविन्दुर्यदि स्वातिगतो भवेत्। पञ्चत्वगुदकस्नायी कृताभ्यङ्गविधिर्नरः। नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते। अश्वयुग्दर्श इति दर्शशब्दः प्रत्यूषे स्वातियुक्ततिथिपरः तदुक्तं ब्राह्मे "ऊर्जे शुक्लद्वितीयायां तिथिषु स्वातिवर्जगे। मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते"। तत्रैव "दर्शे भूते च दर्शे च कार्त्तिकप्रथमे दिने। यदा स्वातौ तदाभ्यङ्गस्नानं कुर्याद्दिनोदये"। कश्यपसंहितायां तु दीपावलिदर्शं प्रक्रम्य "इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये। तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये" इति। स्वातियोगं विनाप्यभ्यङ्ग उक्तः। मात्स्ये "दीपैर्नीराजनादत्र सैषा दीपावली स्मृता"। अत्र विशेषो हेमाद्रौ भविष्ये "दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्। प्रदोषसमये

लक्ष्मीं पूजयित्वा ततः क्रमात् । दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च" ततैवाभ्यङ्गमभिधाय "एवं प्रभातसमये त्वमावास्यां नराधिप ! । कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः । दीपान् दत्त्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि । स्वलङ्कृतेन भोक्तव्यं मितवस्त्रोपशोभिना" । अयं प्रदोषव्यापी प्राह्णः "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" इति ज्योतिषोक्तेः "दिनद्वये तस्य सत्त्वे परः "दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका" इति तिथितत्त्वे ज्योतिर्वचनात् । दिवोदासीये तु प्रदोषस्य कर्मकालत्वात् "अर्द्धरात्रे भवत्येव लक्ष्मीराश्रयितुं गृहान् । अतः स्वलङ्कृता स्निग्धा दीपैर्जाग्यज्जनोत्सवाः । सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः" इति ब्राह्मोक्तेश्च । प्रदोषार्द्धरात्रव्यापिनी सुख्या, एकैकव्याप्तौ परैव । प्रदोषस्य सुख्यत्वादर्धरात्रेऽनुक्तयामावाच्च । यत्तु "अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः । प्रदोषसमये राजन् ! कर्त्तव्या दीपमालिका" इति क्रमः स सम्पूर्णतिथावेव प्राप्तेरनुवादो न विधिः । तत्तत्कर्मकालव्याप्तेर्बलवत्त्वात् सम्पूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्चेत्युक्तम् । अतैव दर्शेऽपररात्रेऽलक्ष्मीनिःसारणमुक्तं मदनरत्ने भविष्ये "एवं गते निशीथे तु जने निद्रार्द्धलोचने । तावन्नगरनारीभिः सूर्पडिण्डिमवादनैः । निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात्" । दीपावली (देओयाली) इति ख्याता तत्रार्थे

दीपीय त्रि॰ दीप+छपूपा॰ हितार्थे पक्षे छ । दीपहिते पक्षे यत् । दीप्य तत्रार्थे त्रि॰ ।

दीपोत्सव पु॰ दीपैरुत्सवः । १दीपहेतुके उत्सवे उपचारात् २दीपान्वितामावास्यायाञ्च भविष्यपु॰ ।

दीप्त त्रि॰ दीप–क्त । १प्रकाशान्विते २समुज्ज्वलिते च मेदि॰ । "समिद्धगरया दीप्ता देहे सङ्गा मतेश्वरा" भट्टिः । ३स्वर्णे ४हिङ्गुनि च न॰राजनि॰ । ५निम्बूके पु॰ ६सिंहे पुंस्त्री॰ राजनि॰ स्त्रियां जातित्वात् ङीष् । ७ज्योतिष्मत्यां (शातला) स्त्री॰ रत्नमाला टाङ्कलिङ्गे स्त्री टाप् । "गुण्टी पादसिता कणार्थवमिता दीप्तायमान्योःक्रमात्" वैद्यकम् । १०नासारोगभेदे पु॰ "नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तसदाहरन्ति" सुश्रुतः नासारोगभेदोक्तौ । "दीप्ते रोगे पैत्तिकं संविधानं कुर्यात् सर्वं स्वादु यच्छीतलञ्च" सुश्रुतः स्वार्थे क । दीप्तक स्वर्णे न॰ राजनि॰ ।

दीप्तकीर्त्ति त्रि॰ दीप्ता कीर्त्तिर्यस्य । १प्रकाशमानयशस्के २कार्त्तिकेये पु॰ । "आग्नेयश्चैव स्कन्दश्च दीप्तकीर्त्तिरनामयः" भा॰व॰ २३१अ॰ कार्तिकनामोक्तौ । कर्म॰ । ३दीप्ते यशसि स्त्री ।

दीप्तकेतु पु॰ १नृपभेदे । "धृष्टकेतुर्धृतकेतुर्दीप्तकेतुर्निरामयः" भा॰आ॰ १अ॰ नानानृपोक्तौ । २दक्षसावर्णिमनुपुत्रभेदे । "नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः । धृष्टकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप !" । भाग॰८।१३।६ ३दीप्तः केतुरस्य । ३दीप्तध्वजके त्रि॰ कर्म॰ । ४दीप्ते ध्वजे पुंन॰

दीप्तजिह्वा स्त्री दीप्ता जिह्वा अस्याः । उल्कासुख्यां शृगाल्यां हारा॰तस्या रात्रौ जिह्वातोऽग्नेः स्वतः स्फुरणात्तथात्वम् ।

दीप्तपिङ्गल पुंस्त्री दीप्तं स्वर्णमिव पिङ्गलः जटायाम् । स्वर्णपिङ्गलजटायुक्तत्वात् सिंहे राजनि॰स्त्रियां जातित्वात् ङीष् ।

दीप्तमूर्त्ति त्रि॰ दीप्ता मूर्त्तिरस्य । १प्रकाशान्वितमूर्त्तिके २विष्णौ पु॰। "विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्" विष्णुस॰ "ज्ञानमयी स्वेच्छया या तैजसी मूर्त्तिरस्येति" भा॰ । [रात्रौ स्वयं ज्वलनात्तस्य तथात्वम् ।

दीप्तरस पु॰ दीप्तो रसोऽस्य । किञ्चुलके शब्दच॰ तद्रसस्य

दीप्तरोमन् पु॰ विश्वदेवभेदे । "जितात्मा मुनिवर्यश्च दीप्तरोमा भयङ्करः" भा॰ अनु॰ ९१अ॰ विश्वदेवोक्तौ ।

दीप्तलोचन पुंस्त्री॰दीप्तं लोचनं यस्य । बिड़ाले राजनि॰ । स्त्रियां जातित्वात् ङीष् । [२ज्वलिते ३लोहे च ।

दीप्तलोह न॰ नित्यकर्म्म॰ । १कांस्ये राजनि॰ कर्म॰ ।

दीप्तवर्ण त्रि॰ दीप्तं स्वर्णमिव वर्णोऽस्य । १स्वर्णतुल्यवर्णके २कार्त्तिकेये पु॰ "शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः" भा॰व॰ २३१अ॰ कार्त्तिकनामोक्तौ ।

दीप्तशक्ति त्रि॰ दीप्ता शक्तिरस्य । १प्रकाशमानसामार्थ्ये दीप्ता शक्तिरस्त्रविशेषोऽस्य । २कार्त्तिकेये पु॰। "दीप्तशक्तिः प्रशान्तात्मा भद्रकृत् कूटमोहनः" भा॰व॰ २३१अ॰ स्कन्दनामोक्तौ ।

दीप्तांशुक पु॰ कर्म॰ । ताजकोक्ते सूर्यादेरंशभेदे । "तिथ्यर्क्षदिनगाङ्गुलैश्चरचराः सूर्यादिदीप्तांशुकाः" नील॰ता॰ र।५। चा।२। मङ्गल बु७। बृह शु७।शनि। सूर्यादेः एतदंशमध्यवर्त्तिनि यद्दान्तरे इत्थशालादियोगः, लिप्ताङ्गौ-

नराले तु पूर्णेत्यगानः तदूर्द्ध्वं त्रैराशिकेन फलकल्पना।

दीप्तांशु पु० दीप्ता अंशवोऽस्य। १सूर्ये "यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा" भा० आ० १७१ अ०। २अर्कवृक्षे च।

दीप्ताक्ष पुंस्त्री० दीप्ते अक्षिणी अस्य अच्। १बिडाले त्रिका० स्त्रियां ङीष्। २दीप्तलोचनान्विते नृपराक्षसादौ त्रि०। "बाहुः सुन्दरवंशानां दीप्ताक्षाणां पुरूरवाः" भा०उ० ७३अ० स्त्रियां ङीष्। "एतान्यान्याश्च दीप्ताक्ष्यः करभोत्कटमूर्द्धजाः" भा०व० २७९अ०

दीप्ताग्नि पु० दीप्तोऽग्निरस्य। १अगस्त्ये मुनौ त्रिका० तेन भुक्तपीतमात्रेण वातापिसहृद्योर्जठरानलेन जारणात् तस्य तथात्वम्। २दीप्तजठरानलयुक्ते त्रि० "बहिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः"। "सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च" सुश्रु० कर्म०। ३दीप्ते यज्ञौ पु० "सधूमदीप्ताग्निरुचोनि रेजुः" भट्टिः "शब्दान् दीप्ताग्निसङ्काशान्" भा०व०१७अ०।

दीप्ताङ्ग त्रि०दीप्तमङ्गमस्य। १दीप्तियुक्तदेहके। २मयूरे पुंस्त्री शब्दच० स्त्रियां जातित्वात् ङीष्।

दीप्ति स्त्री दीप-भावे क्तिन्। १त्विषि प्रभायाम् "एवं दीप्त्या योजनं भाति सन्ध्या" हृ०मं०३१अ० २अभिव्यक्तौ च ज्ञानाभिव्यक्तिरूपदीप्तेः कारणानि पात०सू० भाष्ययोरुक्तानि यथा

"योगाङ्गानुष्ठानदशुद्धिक्षये ज्ञानदीप्तराविवेकख्यातेः" सू० "योगाङ्गान्यष्टावभिधायिष्यमाणानि तेषामनुष्ठानात् पञ्च पर्वणो विषयस्याशुद्धिरूपस्य क्षयोनाशस्तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिर्यथा यथा च साधनान्यनुष्ठीयन्ते तथा तथा ननुत्वमशुद्धिरापद्यते यथा यथा च क्षीयते तथा तथा च क्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्द्धते सा खल्वेषा विशुद्धिः प्रकर्षमनुभवति या विवेकख्यातेरा गुणपुरुषस्वरूपविज्ञानादित्यर्थः। योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणं यथा परशुः छेद्यस्य, विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य, नान्यकारणम्। इति चैतानि कारणानि शास्त्रे भवन्ति नवैवेत्याह तद् यथा "उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः। वियोगान्यत्वधृतयः कारणं नवधा स्मृतम्" इति। तत्रोत्पत्तिकारणं मनोभवति ज्ञानस्य, स्थितिकारणं मनसः पुरुषार्थता शरीरस्येवाहार इति अभिव्यक्तिकारणं यथा रूपस्यालोकस्तथा रूपज्ञानम्। विकारकारणं मनसो विषयान्तरम् यथाग्निः पाकस्य, प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य, प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः वियोगकारणं तदेवाशुद्धेः अन्यत्वकारणं, यथा सुवर्णकारः सुवर्णस्य, एवमेकस्य प्रत्ययस्याविद्यामूढत्वे द्वेषो, दुःखत्वे रागः, सुखत्वे तत्त्वज्ञानं माध्यस्थ्ये, धृतिकारणं शरीरमिन्द्रियाणां, तानि च तस्य महाभूतानि शरीराणां तानि च परस्परं सर्वेषाम्। तैर्यग्योनमानुषदैवतानि च परस्परार्थत्वादित्येवं नव कारणानि तानि च यथासम्भवं पदार्थान्तरेष्वपि योज्यानि" भा० स्त्रीणां यौवने अयत्नसाध्ये गुणभेदरूपे २सत्त्वजेऽलङ्कारे च "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्वयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता" इत्युपक्रमे "रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम्। शोभा प्रोक्ता, सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते" सा०द० लक्षयित्वा उदाजहार यथा "तारुण्यस्य विलासः समधिकलावण्यसम्पदोद्गमः। धरणितलस्याभरणं युवजनमनसोवशीकरणम्"। दीप-कर्त्तरि संज्ञायां क्तिच्। ४लाक्षायां ५कांस्ये च राजनि०। विश्वदेवभेदे पु० "उष्णीनाभो नभोदश विश्वायुर्दीप्तिरेव च" भा०अनु०९१अ० विश्वदेवोक्तौ।

दीप्तिक स्त्री दीप्ता कायति कै-क। दुग्धपाषाणवृक्षे राजनि०।

दीप्तिमत् पु० दीप्तिरस्यास्य मतुप्। दीप्तियुक्ते "तद्रश्मिशतधा भिन्नं ददृशे दीप्तिमन्मुखम्" रघुः। उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली" सू०सि० "दिवश्चरैर्भूरतिदीप्तिमद्भिर्नक्षत्रैर्ग्रहैर्धौरमलप्रदीप्तैः" भा०क०९४अ०। कृष्णस्य सत्यभामायां जाते २पुत्रभेदे पु० कृष्णस्येत्युपक्रमे "जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः। रोहितो दीप्तिमांश्चैव ताम्रजाम्बो जलान्तकः" हरिवं०१६२ अ०।

दीप्तोद न० दीप्तमुदकं यत्र उदकस्योद्भेदः। तीर्थभेदे "गच्छ पुत्र! नदीं पुण्यां वधूसरकताह्वयाम्। ततोऽपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि। दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः। भृगुर्देवयुगे राम! तप्तवानुत्तमं तपः। तत्तथा कृतवान् रामः कौन्तेय! वचनात् पितुः" भा०व० ८९अ० [कालमणौ (आतसी) राजनि०।

दीप्तोपल पु०दीप्तः सूर्यकरसंसर्गात् ज्वलितः उपलः। सूर्य-

दीप्य त्रि॰दीप्राय दीपनाय हितम् यत्। दीप्रिहिते।

दीप्य पु॰ दीपाय अग्निदीपनाय हितम् अपूपा॰पत्ते यत्। १यमान्यां २जीरके च राजनि॰। ३रुद्रजटायाम् अमरः ४प्रदीपहितादौ त्रि॰।

दीप्यक पु॰दीप्य+संज्ञायां कन् स्वार्थे क वा। १अजमोदायां २यमान्यां ३मयूरशिखायां रुद्रजटायाञ्च मेदि॰।

दीप्र त्रि॰दीप–र। दीप्तिशीले "हिंस्रेषु दीप्रास्त्रधरः कुमारः" "त्रातीनव्याजदीप्रास्त्रः सुतनः परिपूजयन्" भट्टिः

दीर्घ पु॰ दृ–विदारे बा॰घञ् घस्य नेत्वम्। १आयते (लम्बा) परिमाणभेदयुते दीर्घत्वञ्च परिमाणभेदे इति कणादाः महत्त्वावान्तरभेद इति सांख्याः। तथा हि कणाद सू॰ उपस्कारवृत्तौ च परिमाणसत्तां व्यवस्थाप्य मकारणं महत्त्वादिकं व्यवस्थापितं यथा "अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते" सू॰। "नित्ये इति विषयेण विषयिणं नित्यत्वप्रतिपादकं चतुर्थाध्यायमुपलक्षयति उपलब्ध्यनुपलब्धी इति यथायोगमन्वयः "येन यस्याभिसम्बन्धो दूरस्थस्यापि तस्य सः" न्यायात् तदेवं स्थूलो नीलः कलस इति प्रात्यक्षिकप्रत्यये यथा नीलं रूप विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्य्यन्तं परिमाणमन्नीयते द्रव्यत्वाच्च किञ्च द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं न हि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथाच द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते, यदि हि घटादिस्वरूपं परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानयेत् तथा च प्रैषसंप्रतिपत्ती विरुद्धे स्याताम्, एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति। मानव्यवहारासाधारणकारणत्वं द्रव्यकाक्षात्कारकारणविषयनिष्ठसामान्यगुणत्वं वा महत्त्वं मानव्यवहारोऽत्र हस्तवितस्त्यादिव्यवहारो न तु पलमञ्जादिव्यवहारः। तच्च परिमाणञ्चतुर्विधं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च, तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्त्तिनी त्रसरेणुमारभ्य महावयविषयेऽल्पं महत्त्वदीर्घत्वे,। एवञ्च सर्वाण्यपि द्रव्याणि परिमाणद्वयवन्ति। बिल्वामलकादावणुत्वव्यवहारःसमिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारोभाक्तः, भक्तिश्चात्र प्रकर्षभावाभावः। आमलके यः प्रकर्षभावस्तस्याभावः कुवले, बिल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणमुख्योभयभागित्वाद्भक्तिपदवाच्यः दीर्घत्वह्रस्वत्वे नित्ये न वर्तेते इत्येके, परिमाणे एव ते न भवत इत्यपरे, महत्तु दीर्घमानीयतामितिवत् महत्तु वर्त्तुलं त्रिकोणञ्चानीयतामिति निर्धारणबलाद्वर्त्तुलत्वादीनामप्याक्षेपेरिति तेषामाशयात्। इदानीं परिमाणकारणानि परिसङ्ख्ये "उप॰वृ॰। "कारणबहुत्वाच्च" सू॰ "चकारोमहत्त्वप्रचयौ समुच्चिनोति, परिमाणमुत्पद्यते इति सूत्रशेषः, तत्र कारणबहुत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहोनियामकः। एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामग्रथिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात्। यत्र च द्वाभ्यां तूलकपिञ्जाभ्यां तूलकपिञ्जारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य सतृत्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात्। एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तम् "द्वाभ्यामेकेन सर्वैर्वा" इति। प्रचयश्च आरम्भकः संयोगः, स च स्वाभिमुखकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः, स चावयवसंयोगः स्वावयवग्रन्थिलसंयोगापेक्षः परिमाणजनकः गुणकर्मारम्भे सापेक्ष इति वचनात्" उप॰वृ॰।

"एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" सू॰ "अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति। ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती। महत्त्वोत्पादकमेव दीर्घत्वोत्पादकमणुत्वोत्पादकमेव ह्रस्वत्वोत्पादकम्, कारणैक्यात् कथं कार्य्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र नित्यं ह्रस्वत्वमित्याद्यतिदेशार्थः" उप॰वृ॰। "अनित्येऽनित्यम्" सू॰। "इदानीं विनाशकमाह एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात्। घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुभङ्गेऽपि स एवायं घट इति प्रत्यभिज्ञेति चेन्न आश्रयनाशेन तत्र घटनाशावश्यकत्वात् न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य त्रसरेणोस्तदाश्रितस्य चूर्णशर्करादेरविनाश इति युक्तिरभ्युपगमो वा, कथं तर्हि प्रत्यभिज्ञेति चेत्,

सैवेयं दीपकलिकेति प्रत्यभिज्ञानवद्भ्रान्तित्वात् । प्रदीपप्रत्यभिज्ञाऽपि प्रमैव, ह्रस्वत्वदीर्घत्वे परस्परादविनाशशालिनी इति चेन्न तद्विनाशस्यान्यथाविनाशमन्तरेणानुपपत्तेरुक्तत्वात् । तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्वमपि नश्यतीत्यत आह उप॰ह्र॰। "नित्ये नित्यम्" सू॰ "नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात्" उप॰ ह्र॰ ।

सांख्यसूत्रभाष्ययोस्तु परिमाणद्वैविध्यं व्यवस्थापितं यथा "न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्" सू॰ । "अणु महद्दीर्घं ह्रस्वमिति परिमाणचातुर्विध्यं नास्ति । द्वैविध्यं तु वर्त्तत एव द्वाभ्यां तद्योगात् द्वाभ्यामेवाणुमहत्परिमाणाभ्यां चातुर्विध्यसम्भवादित्यर्थः । महत्परिमाणस्यावान्तरभेदावेव हि ह्रस्वदीर्घौ । अन्यथा क्रमादिरूपैः परिमाणानन्त्यप्रसङ्गादिति । तत्राणुपरिमाणमाकाशस्य कारणं गुणविशेषं वर्जयित्वा भूतेन्द्रियाणां मूलकारणेषु सत्त्वादिगुणेषु मन्तव्यम् । अन्यत्र यथायोग्यं मध्यमादिपरममहत्त्वान्तपरिमाणानि तानि च महत्त्वस्यैवावान्तरभेदा इति" ।

दीर्घत्वे कारणञ्च पार्श्वतोयोजितायववाहुल्यादिकम् स्थूलत्वे तु ऊर्द्ध्वाधःस्थितायववाहुल्यादिकमिति भेदः । कालस्य दीर्घत्वप्रयोजकं तदुपाधेर्बहुकालस्थायित्वं तदभिप्रेत्यैव "दीर्घकालनैरन्तर्य्यादरसेवितात्" योगशास्त्रे "दीर्घयामा त्रियामा" इति काव्ये च प्रयोगः । २व्याकरणपरिभाषिते द्विमात्रकालेनोच्चार्य्ये (आ ई ऊ) प्रभृतौ वर्णे च । "ऊकालोऽज्ह्रस्वदीर्घप्लुतः" पा॰ "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" शिक्षा । "गुहानिबद्धप्रतिशब्ददीर्घम्" रघौ शब्दस्य गुणत्वेऽपि दीर्घत्वं बहुकालस्थायित्वेन भाक्तम् । एवं "हृदयकुसुमशोषी दारुणोदीर्घशोकः" "सा दीर्घं रोदिति विक्षिपत्यत इतः क्षामा भुजावल्लरीम्" सा॰द॰ शोकरोदनयोर्दीर्घत्वं बहुकालस्थायित्वाद् भाक्तमेव । ३लतोशालवृक्षे ४इत्कटे पु॰ रत्नमाला । ५रामशरे पु॰ ६उष्ट्रे पुं॰स्त्री॰ राजनि॰ स्त्रियां जातित्वात् ङीष् । "वृश्चिककन्यामृगपतिवणिजो दीर्घाः" ज्यो॰त॰ उक्तेषु ७सिंहकन्यातुलावृश्चिकराशिषु पु॰ ।

दीर्घकणा स्त्री नित्यकर्म॰। श्वेतजीरके राजनि॰।

दीर्घकण्टक पु॰दीर्घः कण्टको यस्य। वर्बुरे (वावला) राजनि॰

दीर्घकण्ठ पुंस्त्री॰ दीर्घः कण्ठो यस्य। १यके शब्दच॰ स्त्रियां जातित्वात् ङीष् । २दानवभेदे पु॰ ३आयतकण्ठकमात्रे त्रि॰ "विचरोदीर्घकण्ठश्च मद्यपो मारुताशनः हरिवं॰२४०अ॰ कर्म॰। ४आयते कण्ठे पु॰। व कप् । दीर्घकण्ठक । वकखगे शब्दच॰

दीर्घकन्द न॰दीर्घः कन्दोऽस्य। १मूलके । दीर्घः कन्दो यस्याः कप् अत इत्त्वम् । दीर्घकन्दिका २मघल्याम् स्त्री राजनि॰ ।

दीर्घकन्धर पुंस्त्री दीर्घः कन्धरोऽस्य। १वकखगे राजनि॰ । स्त्रियां ङीष् । २दीर्घकन्धरयुक्ते त्रि॰ कर्म॰। ३दीर्घे कन्धरे पु॰ ।

दीर्घकाण्ड पु॰ दीर्घः काण्डोऽस्य। १गुण्डतृणे २पातालगरुडीलतायां ३तिक्ताङ्गायां स्त्री राजनि॰ ।

दीर्घकील पु॰दीर्घः कीलो यत्र । १अङ्कोटके वृक्षे वा कप् । दीर्घकीलक तत्रैवार्थे कर्म॰ । २दीर्घे कीले पु॰न॰ ।

दीर्घकूर न॰दीर्घं कूरम् । आन्ध्रदेशोद्भवे शालिभेदे राजान्ने राजनि॰

दीर्घकेश पुंस्त्री॰दीर्घः केश इव लोमास्य। १भल्लूके राजनि॰ स्त्रियां जातित्वात् ङीष् । २आयतकेशयुते त्रि॰ स्त्रियां स्वाङ्गत्वात् वा ङीष् । "दीर्घकेशी समध्या" वृहत्संहिताटकम् वृ॰सं॰१४अ॰कूर्म्मविभागे उक्ते पश्चिमोत्तरदिक्स्थे ३देशभेदे च यथा "एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च" ।

दीर्घकोशि(षि)का स्त्री दीर्घः को(शो)शो यस्याः कप् अतइत्त्वम् (झिनुक) दुर्णामायाम् अमरः । तालव्यमध्योऽपि भरतः ।

दीर्घगति पु॰दीर्घा गतिरस्य । १उष्ट्रे राजनि॰ तस्य पादविक्षेपस्य बहुदेशान्तरितत्वात्तथात्वम् । [राजनि॰ ।

दीर्घग्रन्थि पु॰ दीर्घो ग्रन्थिः पर्व यस्य । गजपिप्पल्याम् ।

दीर्घग्रीव पुंस्त्री॰दीर्घा ग्रीवा यस्य । १उष्ट्रे राजनि॰२नीलक्रौञ्चे हेमच॰। स्त्रियां जातित्वात् ङीष् । ३पश्चिमोत्तरदिक्स्थे देशभेदे पु॰ दीर्घकेशशब्दे दृश्यम् । [माला ।

दीर्घघाटिक पुंस्त्री॰ दीर्घा घाटाऽस्यस्य ठन् । १उष्ट्रे शब्द-

दीर्घचञ्चु पु॰ दीर्घा चञ्चुरस्य । खगभेदे पारस्करनि॰ ।

दीर्घच्छद पु॰दीर्घाश्छदा यस्य । १दलो शब्दार्थचि॰। २दीर्घच्छदके त्रि॰ कर्म्म॰। ३दीर्घे छदे पु॰ ।

दीर्घजङ्घल पुंस्त्री॰ नित्यकर्म॰ । भङ्गानमत्स्ये (भाङ्गन) शब्दमाला स्त्रियां ङीष् ।

दीर्घजङ्घ पुंस्त्री॰ दीर्घा जङ्घा यस्य । १उष्ट्रे जटाध॰।

२वके त्रिकाण्ड० स्त्रियां ङीष्। ३दीर्घजङ्घायुक्ते त्र्यसुरादौ त्रि० कर्म०। ४दीर्घायां जङ्घायाम् स्त्री

दीर्घजिह्व पुंस्त्री० दीर्घा जिह्वा यस्य। १सर्पे हेमच०स्त्रियां ङीष्। २दानवभेदे पु० "गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः" भा०आ० ६५अ० ४राक्षसभेदे स्त्रियां टाप्। "द्वाचीं त्र्यचीं ललाटाचीं दीर्घजिह्वामजिह्मिकाम्" भा०व० २७९ अ०। ५कुमारानुचरमातृगणभेदे "जाटालिका कामचरी दीर्घजिह्वा बलोत्कटा" भा०श० ४७अ० "दीर्घजिह्वी च छन्दसि" पा०नि०पुंस्यपि ङीष् ६ककुरे च "अप श्वानं स्पृधिष्ट न सखायो दीर्घजिह्व्रम्" ऋ० ८।१०१।१।

दीर्घजीविन् त्रि० दीर्घं बहुकालं जीवति जीव-णिनि। बहुकालजीविनि। "तत्र कालेन जायन्ते मानवा दीर्घजीविनः" मनुः।

दीर्घतन्तु पु० दीर्घास्तन्तवः स्तुतयोऽस्य। प्रभूतस्तुतिके देवादौ "दीर्घतन्तुर्बृहद्वा यमग्निः" ऋ० १०।६९।७ २दीर्घकालव्यापिसन्तानके। कर्म०। ३दीर्घे तन्तौ पु०।

दीर्घतपस् त्रि० दीर्घं बहुकालव्यापकं तपोऽस्य। १बहुकालव्यापकतपस्के २आयुर्वंश्ये नृपभेदे पु० "काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वन्तु दीर्घतपसो धन्वात् धन्वन्तरिः सुतः" हरिवं० २९ अ० आयुर्वंशोक्तौ।

दीर्घतमस् पु० उतथ्यर्षेः पुत्रे गुरुशापात् अन्धतां प्राप्ते ऋषिभेदे तत्कथा उतथ्यशब्दे १०७५पृ० उक्ता दृश्या "स वै दीर्घतमा नाम शापादृषिरजायत। बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा। जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया" भा०आ०१०४अ०, "ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः। त्वत्प्रसादाच्च चक्षुष्मांस्तेन सत्येन मोचय" हरिवं० २६३अ० "दीर्घतमामामतेयो जजुर्वान् दशमे युगे" ऋ०१।१५८।६

दीर्घतरु पु० नित्यकर्म०। तालवृक्षे शब्दार्थकल्प०। २दीर्घे वृक्षमात्रे च। [शब्दमाला।

दीर्घतिमिष स्त्री निम-बा क्विपन् नित्यकर्म०। कर्कटयाम्

दीर्घतुण्डा स्त्री दीर्घं तुण्डमस्याः। १कुकुन्दर्यां भावप्र०। २दीर्घमुखयुक्ते गजादौ पुंस्त्री०। कर्म०। ३दीर्घे तुण्डे न०

दीर्घतृण पु० दीर्घं तृणमत्र। १पल्लिवाहे राजनि० कर्म०। २दीर्घे तृणे न०

दीर्घदण्ड पु०दीर्घो दण्ड इव कायस्येव। १एरण्डवृक्षे २गोरक्ष्यां स्त्री भावप्र०गौरा०ङीष। ३गोरक्षीवृक्षे स्त्रीटाप् राजनि०।

दीर्घदर्शिन् पु० दीर्घं दीर्घात् वा पश्यति दृश-णिनि। १भाविकार्य्यज्ञे २पण्डिते च अमरः। ३गृध्रे पु०शब्दरत्ना०। ४भल्लूके राजनि०। ५दूरात् दर्शके त्रि०। "स हि धर्मं पुरस्कृत्य दीर्घदर्शी परं हितम्" भा०स० ४८अ० [येन ३व०। २दूरवीक्षणे यन्त्रभेदे हेमा०

दीर्घदृष्टि पु०दीर्घा दृष्टिरस्य। १पण्डिते। दीर्घा दूरगा दृष्टि-

दीर्घद्रु पु०नित्यकर्म०। १तालवृक्षे शब्दच०कर्म०। २दीर्घे वृक्षे

दीर्घद्रुम पु० नित्यकर्म०। शालमलिवृक्षे (शिमुल) राजनि०।

दीर्घनाद पु० दीर्घो दूरगामित्वात् विस्तीर्णो नादोऽस्य शुभ्रा० न णत्वम्। १शङ्खे राजनि० २बहुकालस्थायिशब्दयुक्ते घण्टादौ त्रि०। कर्म०। ३आयते शब्दे पु०।

दीर्घनाल पु० दीर्घं नालं यस्य। १यावनाले हेमच० गुण्डतृणे २दीर्घरोहिष्के न० राजनि०।

दीर्घनास त्रि०दीर्घा नासाऽस्य। १दीर्घनासिकान्विते। "वक्रघातो दीर्घनासो ददात् गां धवलप्रभाम्" शातातपेन तत्कर्मविपाक उक्तः। कर्म०। २दीर्घायां नासायां स्त्री

दीर्घनिद्रा स्त्री नित्यकर्म०। १मरणे कर्म०। २चिरकालव्यापिन्यां निद्रायाञ्च "अकाले बोधितो भ्राता प्रियस्त्रो वृथा भवान्। रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः" रघुः।

दीर्घपत्त्र पु० दीर्घौ पत्त्रौ यस्य। १कलिङ्गखगे शब्दच०। २दीर्घपत्त्रयुक्ते खगमात्रे पुंस्त्री०।

दीर्घपटोलिका स्त्री कुत्सिता पटोली कन् कर्म०। (धुँधुल) ख्यातायां लतायाम् राजवल्लभः।

दीर्घपत्र पु० दीर्घं पत्रं यस्य। १राजपलाण्डौ २विष्णुकन्दे ३हरिदर्भे ४कन्दरे ५तालवृक्षे च राजनि० ६कृपीलौ भावप्र० कप् संज्ञायां कन् वा। दीर्घपत्रक ७रक्तलशुने ८एरण्डे ९हिञ्जले १०वेतसे च राजनि०। ११करीरवृक्षे शब्दच०१२जलजमधूके जटाध० १३लशुने हेमच० कापि अत इत्वम्। दीर्घपत्रिका १४श्वेतवचायां १५शालपर्ण्यां १६श्वेतकुमार्य्याञ्च स्त्री राजनि०।

दीर्घपत्रा स्त्री दीर्घं पत्रं यस्याः। १चित्रपर्णिकायां (चाकुलिया) भेदे २क्षुद्रजम्बुवृक्षे रत्नमाला ३गम्भपत्रायां ४केतक्यां ५टोरीवृक्षे च राजनि०। गौरा०ङीष दीर्घपत्री ६पलाशीलतायां ७महाचञ्चुशाके स्त्री राजनि०।

दीर्घपर्णी स्त्री दीर्घं पर्णं यस्याः गौरा० ङीष्। पृश्निपर्ण्याम् राजनि०।

दीर्घपल्लव पु॰ दीर्घः पल्लवोऽस्य । १शणवृक्षे राजनि॰ २आयत पत्रयुक्ते त्रि॰ । कर्म॰ । ३आयते पल्लवे पुं॰ ।

दीर्घपाद् पु॰ दीर्घः पादोऽस्य अन्यलोपः समा॰। कङ्कपक्षि शब्दर॰ समासान्तविधेरनित्यत्वात् दीर्घपादोऽप्यत्र हेमच॰ २दीर्घपादयुक्ते त्रि॰। [कर्म॰। ३दीर्घे वृक्षे पु॰।

दीर्घपादप पु॰ नित्यकर्म॰ । १तालवृक्षे २पूगे च राजनि॰ ।

दीर्घपृष्ठ पुंस्त्री॰दीर्घं पृष्ठमस्य । सर्पे अमरः स्त्रियां ङीष् ।

दीर्घप्रज्ञ पु॰ १द्वापरयुगीये वृषपर्वासुरावतारे नृपभेदे "वृषपर्वेति विख्यातः श्रीमान् यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः !"। भा॰आ॰६७अ॰ "अमितौजसे तथोपाय हार्दिक्यायाहुकाय च । दीर्घप्रज्ञाय शूराय रोचमानाय वा विभो !" भा॰उ॰३अ॰ । २दूरदर्शिनि त्रि॰ "काममूर्तिधरः क्रूरः कालकल्पोऽव्यवस्थितः । तमुवाच ततो राजा दीर्घप्रज्ञो युधिष्ठिरः" भा॰ व॰११ अ॰ ।

दीर्घफल पु॰ दीर्घाणि फलान्यस्य । १आरग्वधे (सोन्याल) संज्ञायां कन् । दीर्घफलक । अगस्त्यवृक्षे पु॰ । वा कप् कापि अत इत्वम् । दीर्घफलिका १कपिलद्राक्षायां, २जतुकायाञ्च स्त्री राजनि॰ [चर्म्यां राजनि॰।

दीर्घबाली स्त्री दीर्घः बालः केशो यस्याः स्वाङ्गत्वात् ङीष् ।

दीर्घबाहु पु॰। दीर्घौ बाहू यस्य । १शिवानुचरभेदे "तस्याग्रे समपद्यन्त भूतसंघाः सहस्रशः" इत्युपक्रमे "दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः" हरिवं॰ २७७ अ॰ । २धृतराष्ट्रपुत्रभेदे "दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकाङ्गदः" भा॰आ॰ ६७अ॰। ३आयतबाहुयुक्ते त्रि॰"दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाऽभवत् सुतः" हरिवं॰१५अ॰

दीर्घभुज पु॰ दीर्घौ भुजौ यस्य । १शिवानुचरभेदे दीर्घबाहु शब्दे दृश्यम् । २दीर्घबाहुयुक्ते त्रि॰कर्म॰। ३दीर्घे भुजे पु॰।

दीर्घमारुत पुंस्त्री दीर्घो मारुतो वेगवायुरस्य । गजे त्रिका॰ स्त्रियां जातित्वात् ङीष् ।

दीर्घमूल पु॰ दीर्घं मूलं यस्य । १मोरटालतायां, २बिल्वभेदे च राजनि॰। ३लामज्जके न॰। कर्म॰संज्ञायां कन् । ४मूलके राजनि॰ । ५श्यामालतायां शालपर्ण्यां च स्त्री टाप् रत्नमाला । ६दुरालभायां स्त्री ङीष् शब्दमाला ।

दीर्घयज्ञ त्रि॰दीर्घः बहुकालव्यापको यज्ञो यस्य । १बहुकालव्यापकयज्ञकारिणि । २द्वापरयुगीये अयोध्याधिपराजभेदे पु॰"अयोध्यायान्तु धर्मज्ञं दीर्घयज्ञं महाबलम् । अजयत् पाण्डवश्रेष्ठो नातितीव्रेण कर्मणा" भा॰२९अ॰।

दीर्घयाय त्रि॰ या-कर्मणि घ । दीर्घकालेन याथः गन्तव्यः । दीर्घकालेन गन्तव्ये "वृथाऽसृजत् पथिभिर्दीर्घयाथैः" ऋ॰२।१८।३। "दीर्घायाथैर्दीर्घकालेन गन्तव्यैः" भा॰।

दीर्घरद पुंस्त्री॰ दीर्घौ रदोऽस्य । १शूकरे त्रिका॰ स्त्रियां ङीष् । २दीर्घदन्तयुते त्रि॰ कर्म॰। ३दीर्घे दन्ते पु॰।

दीर्घरसन पुंस्त्री॰ दीर्घा रसना जिह्वास्य । सर्पे शब्दच॰ स्त्रियां ङीष् । [ब॰। हरिद्रायाम् राजनि॰ ।

दीर्घरागा स्त्री दीर्घो बहुकालस्थायी रागो रञ्जनं यस्याः

दीर्घरात्र न॰ दीर्घा बहवो रात्रयः सन्त्यत्र अर्शआ॰ अच् । १चिरकाले त्रिका॰कर्म॰। सुखबोधमते च समा॰ । २दीर्घायां रात्रौ "रात्राह्नाहाः पुंसि"पा॰उक्तेः पुंस्त्वम् ।

दीर्घरोमन् पु॰दीर्घाणि रोमाण्यस्य । १भल्लूके शब्दार्थकल्प॰। २शिवानुचरभेदे दीर्घबाहुशब्दे दृश्यम् । ३धृतराष्ट्रपुत्रभेदे च "प्रमथश्च प्रमाथी च दीर्घरोमा च वीर्यवान्" भा॰आ॰ ११७अ॰ अत्र सर्वे नाना वदनाः सुरित्युक्तेरदन्तत्वाद्यस्य

दीर्घरोहिषक न॰नित्यकर्म॰। कत्तृणे सुगन्धवृणभेदे राजनि॰

दीर्घलोचन त्रि॰ दीर्घमायतं लोचनमस्य । १आयतनेत्रके २शिवानुचरभेदे पु॰"एते चान्ये च बहवो दीर्घासा दीर्घलोचनाः"हरिवं॰२७अ॰३धृतराष्ट्रपुत्रभेदे पु॰ "अनाधृष्यः कुण्डभेदी विराधी दीर्घलोचनः" भा॰आ॰ ६७अ॰ । धृतराष्ट्रपुत्रोक्तौ । कर्म॰ । ४आयते नेत्रे न॰

दीर्घवंश पु॰ दीर्घो वंश इव । नलवृक्षे राजनि॰ कर्म॰ । २सन्तते कुले च ।

दीर्घवक्त्र पुंस्त्री॰ दीर्घं वक्त्रमस्य । १गजे शब्दमा॰ स्त्रियां जातित्वात् ङीष् । २आयतमुखयुक्ते त्रि॰ स्त्रियां स्वाङ्गत्वेऽपि टाप् कर्म॰। ३आयते मुखे न॰

दीर्घवच्छिका स्त्री दीर्घवत् दीर्घेण तुल्यं शीकते सिञ्चति शीक-क पृषो॰ ह्रस्वः । कुम्भीरे शब्दार्थकल्प॰ ।

दीर्घवर्षाभू पुंस्त्री॰नित्यकर्म॰। श्वेतपतर्ण्यां पारस्करनि॰

दीर्घवल्ली स्त्री नित्यकर्म॰। १पलाश्यां, २पातालगरुडीलतायां ३माहेन्द्रवारुण्याम् राजनि॰ कर्म॰ । ४आयतायां लतायाञ्च [स्करनिघण्टुः ।

दीर्घवृक्ष पु॰ नित्यकर्म॰। १शालवृक्षे २तालवृक्षे च पार-

दीर्घवृन्त(क) पु॰ दीर्घं वृन्तमस्य । श्योनाके वृक्षे । वा कप् । तत्रार्थे । २इन्द्रचिर्भटयां स्त्री टाप् अमरः । संज्ञायां कन् अत इत्वम् दीर्घवृन्तिका । एलापर्ण्याम् स्त्री रत्नमाला ।

दीर्घशर पु॰ नित्यकर्म॰। यावनाले राजनि॰ ।

दीर्घशाख पु॰ दीर्घा शाखा यस्य । १शालवृक्षे संज्ञायां कन् टाप् अत इत्त्वम् । २एलापर्ण्याम् स्त्री राजनि॰ । या कप् अत इत्त्वम् । दीर्घशाखिका श्नीलाम्लग्राम् राजनि॰।

दीर्घशिम्बिका स्त्री दीर्घा शिम्बी यस्य कप् ह्रस्वः । क्षवे (नाकछिक्नी) वृक्षे राजनि॰।

दीर्घशूक पु॰ दीर्घः शूकोऽग्रमस्य । शालिभेदे संज्ञायां कन् । दीर्घशूके राजान्ने राजनि॰ कर्म॰। २दीर्घे शूके न॰

दीर्घश्रवस् पु॰ दीर्घं श्रवोऽस्य । दीर्घतमसः पुत्रे ऋषिभेदे "औशिजाय वणिजे दीर्घश्रवसे" ऋ॰ १।११२।११ "उशिक् संज्ञा दीर्घतमसः पत्नी तस्याः पुत्रो दीर्घश्रवानाम कश्चिदृषिरनादृष्टौ जीवनार्थमकरोत् वाणिज्यम्" भा॰ २दीर्घकर्णयुक्ते त्रि॰ कर्म॰। ३दीर्घे कर्णे न॰।

दीर्घसत्र न॰कर्म॰ । १दीर्घकालिके यज्ञभेदे ६व॰। २तत्कर्तरि त्रि॰। "हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः"रघुः। दीर्घाणि सत्राणि सत्रानि यत्र । ३तीर्थभेदे "ततो गच्छेत धर्मज्ञ! दीर्घसत्रं यथाक्रमम् । तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः । दीर्घसत्रमुपासन्ते दीक्षिता नियतव्रताः। गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ! । राजसूयाश्वमेधाभ्यां फलं प्राप्नोति भारत !" भा॰व॰८२अ॰ । ४यावज्जीवकर्तव्ये अग्निहोत्रे न॰ "दीर्घसत्रं ह वा त उपयन्ति येऽग्निहोत्रं जुह्वयेतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा" शत॰ब्रा॰ १२।४।१।१

दीर्घसत्रिन् पु॰ दीर्घसत्रमस्यस्य इनि । १बहुकालिकसत्रकारके २यावज्जीवकर्तव्याग्निहोत्रिणि च "यदेतस्य दीर्घसत्रिणोऽग्निहोत्रं जुह्वतोऽन्तरेणाग्नो युक्तं या वियायात्" शत॰ब्रा॰ १२।४।१।२

दीर्घसुरत पुंस्त्री॰दीर्घं बहुकालव्यापकं सुरतमस्य ।१कंकुरे त्रिका॰ स्त्रियां जातित्वात् ङीप् । कर्म्म॰ । २यायते सुरते न॰।

दीर्घसूक्ष्म पु॰ कर्म॰। पात॰सू॰ भाष्योक्ते प्राणायामभेदे तत्स्वरूपादि तत्रोक्तं यथा

"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" सू॰। "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः। कोष्ठ्यस्य वायोर्निःसारणं प्रश्वासः तयोर्गतिविच्छेद उभयाभावः प्राणायामः" भा॰। "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मः" सू॰। "यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद् भवति यथा तप्ते न्यस्तमुपले जलं सर्वतः सङ्कोचमापद्यते । तथा द्वयोर्युगपद्गत्यभावइति । तयोऽप्येते देशेन परिदृष्टाः, इयानस्य विषयो देशइति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः । सङ्ख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तद्वत् विष्टंभीतस्यैतावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्याभिः परिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा॰। "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" सू॰। "देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः उभयथा दीर्घसूक्ष्मः ततपूर्वको भूमिजयात् क्रमेणाभयोर्गत्यभावश्चतुर्थः प्राणायामः। तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्धएव देशकालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेषः" भा॰।

दीर्घसूत्र त्रि॰दीर्घेण चिरकालेन सूत्रमीप्सितव्यापारो यस्य । १चिरकालेन प्रारब्धकर्म्मानुष्ठातरि अमरः । "दीर्घसूत्रस्य आपत्प्राप्तिरितिहासस्मरेण"भा॰शा॰१३७अ॰दर्शिता तथा "अनागतविधाता च प्रत्युत्पन्नमतिश्च यः। द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति। अत्रैव चेदमप्यपरं शृणुष्वाख्यानमुत्तमम् । दीर्घसूत्रमुपाश्रित्य कार्याकार्य्यं विनिश्चये । नातिगाधे जलाधारे सुहृदः शकुनाश्रयः । प्रभूतमत्स्ये कौन्तेय ! बभूवुः सहचारिणः । तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभोऽपरः। दीर्घसूत्रश्च तत्रैकस्तयोर्वां सहचारिणाम् । कदाचित् तं जलाधारं मत्स्यबन्धाः समन्ततः । निःस्रावयामासुरथो निम्नेषु विविधैर्मुखैः । प्रक्षीयमाणं तं दृष्ट्वा जलाधारं भयागमे । अब्रवीद्दीर्घदर्शी तु तावुभौ सुहृदौ तदा । इयमापत् समुत्पन्ना सर्वेषां सलिलौकसाम् । शीघ्रमन्यत्र गच्छामः एन्या यावन्न दुष्यति । अनागतमनर्थं हि सुनयैर्यः प्रबाधयेत् । स न संशयमाप्नोति रोचतां भो व्रजामहे । दीर्घसूत्रस्तु यस्तत्र सोऽब्रवीत् सन्यगुष्यते । न तु कार्या त्वरा तावदिति मे निश्चिता मतिः । अथ सम्प्रतिपत्तिज्ञः प्राब्रवीद्दीर्घदर्शिनम् । प्राप्ते काले न मे किञ्चिन्नायतः परिहास्यते । एवं श्रुत्वा निरक्रामद्दीर्घदर्शी महामतिः । जगाम स्रोतसा तेन गम्भीरं

चलिनाशयम् । ततः प्रस्रुततोयन्तं प्रसमीक्ष्य जलाशयम् । बबन्धुर्विविधैर्योगैर्मत्स्यान् मत्स्योपजीविनः विलोड्यमाने तस्मिंस्तु स्रुततोये जलाशये । अगच्छद्बन्धनं तत्र दीर्घसूत्रः सहापरैः । उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः । प्रविशद्भिरन्तरमेतेषां स्थितः सम्प्रतिपत्तिमान् । गृह्णमेव तदुद्दानं गृहीत्वा तं तथैव सः । सर्वानेव च तांस्तत्र ते विदुर्ग्रथितानिति । ततः प्रक्षाल्यमाणेषु मत्स्येषु विपुले जले । मुक्त्वा रज्जुं प्रमुक्तोऽसौ शीघ्रं सम्प्रतिपत्तिमान् । दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः । मरणं प्राप्तवान् मूढो यथैवोपहतेन्द्रियः । एवं प्राप्ततमं कालं यो मोहान्नावबुध्यते । स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः । आदौ न कुरुते श्रेयः कुशलोऽस्मीति यः पुमान् । स संशयमवाप्नोति यथा सम्प्रतिपत्तिमान् । अनागतविधाता च प्रत्युत्पन्नमतिश्च यः । द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति" कर्म० । २दीर्घं सूत्रं न० । ६ब० । ३दीर्घतन्तुके त्रि० "दीर्घसूत्रमकरोत् परिधानम्" माघः ।

दीर्घसूत्रिन् त्रि० दीर्घं सूत्रं कर्तव्यव्यापारोऽस्त्यस्य इनि । चिरक्रियावति । "अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः । विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते" गीता । "यदङ्गा कार्यं तत्सामेनापि यो न सम्पादयति स दीर्घसूत्री" आ०त० रघु० ।

दीर्घस्कन्ध पु० दीर्घः स्कन्धः काण्डोऽस्य । तालवृक्षे राजनि० ।

दीर्घा स्त्री दीर्घ+टाप् । वृश्चिपर्ण्याम् राजनि० ।

दीर्घाध्वग पु० दीर्घमायतमध्वानं गच्छति गम–ड ६त० । (धाबोडिया) ख्याते पत्रवाहकभेदे ।

दीर्घायु त्रि० दीर्घमायुः यस्य । चिरकालजीविनि "जीवातुञ्च दीर्घायुत्वं मे" यजु० १८।६ "दीर्घायुत्वाय पति रतं न आयुः" ऋ० ८।५९।७

दीर्घायुध पु० नित्यकर्म० । कुलास्त्रे त्रिका० । दीर्घं दलरूपमायुधं यस्य दीर्घात् आयुध्यते आ+युध–क । १शूकरे पुंस्त्री शब्दमा० ।

दीर्घायुष्य पु० दीर्घमायुष्यं यस्य । १श्वेतमन्दारकवृक्षे २मार्कण्डेये च राजनि० । ३आयतायुर्युक्तेषु चिरजीविशब्दार्थोक्तेषु त्रि० कर्म० । ४दीर्घे बहुकालव्यापके आयुषि तत्कारणत्वात् मनुना । "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः" ।

दीर्घायुस् पु० दीर्घमायुरस्य । १दीर्घायुष्मयुक्ते २चिरजीविशब्दोक्तार्थे च । "दीर्घायुस्ते ओषधे ! खनिता" यजु० १।२१०

दीर्घालर्क पु० दीर्घोऽलर्क इव । श्वेतमन्दारवृक्षे राजनि० ।

दीर्घास्य त्रि० दीर्घमास्यं यस्य । १आयतमुखे २हस्तिनि च ३शिशानुचरभेदे दीर्घलोचनशब्दे दृश्यम् दीर्घमास्यं यत्र देशे । ४पश्चिमोत्तरदेशभेदे वृ०सं०१४अ०वाक्यं दीर्घग्रीवशब्दे दृश्यम् ।

दीर्घाह्न पु० दीर्घाण्यह्नानि यत्र । निदाघसमये बहु "बहुलज्ञादि" पा० सुलोपे प्रत्ययलक्षणेन "रोऽसुपि" पा० रकारनिषेधेन रुत्वस्यासिद्धत्वात् न नान्तलक्षण उपधादीर्घः" सि०कौ० । दीर्घाह्ना इत्यत्र "अह्नोऽदन्तात्" पा० नत्वम् कर्म० । "राजाहःसखिभ्यः टच्" पा० टच् । दीर्घाह दीर्घदिवसे पु० ।

दीर्घिका स्त्री दीर्घैव स्वार्थे कं कापि अत इत्वम् । १जलाशयभेदे तत्प्रमाणं जलाशयोत्सर्गतत्त्वे यथा नव्यवर्द्धमानश्चतयसिद्धः "शतेन धनुर्भिः पुष्करिणी । त्रिभिः शतैर्दीर्घिका, चतुर्भिर्द्रोणः पञ्चभिस्तडागः ! । द्रोणाद्दशगुणा वापी" इति संहितायामन्तरपदस्थतेरत्रापि तथावगम्यते । तेन चतुर्दिक्षु पञ्चत्रिंशद्धस्तानूनतायां द्वादशशतहस्तान्तरानूनत्वेन दीर्घिका" "शङ्खाहृतं क्रोशति दीर्घिकाणाम्" रघुः । २जलाशयमात्रे "स्वर्णदी सुरदीर्घिका" अमरः दीर्घिकाभिश्च पूर्णाभिस्तया पुष्करिणीभिर्हि" भा०आ० १२८अ० ।

दीर्घेवारु नित्यकर्म० । डङ्करीलताभेदे राजनि० । ४भये च न० ।

दीर्ण त्रि० दृ–क्त । १विदारिते २भीते च भावे क्त । ३विदारे

दीस त्रि० दी–क्षये क्विप् तां स्यति सो–क । क्षयनाशके गवादिगणे दीप्रेत्यत्र दीसेति पाठान्तरात् हितादौ यत् । दीस्य तद्धितादौ त्रि० ।

दु गतौ भ्वा०पर०अक०अनिट् । दवति अदौषीत् केचित्तु वेहयमित्याङ्गस्तेन अदावीदित्यपि । दुदाव वेट् कत्वेऽपि लिटि नित्येट् दुदुविव । दूनः । "पित्तेन दूने रसने सितापि" नैष० ।

दु उपतापे स्वा०प०सक०सेट् । उपतापः पीडनम् । दुनोति अदावीत् अदौषीत् लिटि नित्येट् दुदुविव । दुतः । "मृदुतया दुतया" माघः । "दुनोति निर्गच्छतया स चेतः" कुमा० "स भस्मसाच्चकारारीन् दुदाव च कृतान्मुखात्" भट्टिः "मृदु दूयेत यदङ्गमर्पितम्" रघुः कर्मकर्तरि रूपं दु–स्वे दैवादिकस्य वा रूपम् ।

दुःक(दुष्क)र्ण ६० वा बत्वम्। धृतराष्ट्रपुत्रभेदे "दुर्मर्षणोऽथ दुःशल दुष्कर्णः कर्ण एव च" भा० आ० ६७अ० तत्पुत्रोक्तौ।

दुःख दुःखकरणे कण्ड्वा० पर०अक० सेट्। दुःख्यति अदुःख्यीत् अदुःखीत्। [अदुःखत् त।

दुःख तत्क्रियायाम् अद-चु०उभ०अक० सेट्। दुःखयति ते

दुःख न० दुष्टानि खानि यस्मिन्, दुष्टं खनति खन-ड, दुःख-अच् वा। सांख्यादिमतसिद्धे प्रतिकूलवेदनीये रजःकार्ये १चित्तादिधर्मभेदे। न्यायमते २आत्मधर्मभेदे "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा। धर्माधर्मौ गुणा एते आत्मनः सुखतद्दिश। अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्" भाषा० "अधर्मत्वेन दुःखत्वेन कार्यकारणभावः। प्रतिकूलं, दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकविषयः प्रतिकूल इत्यर्थः सि० सं०। "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" गौ० सू० "यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलभ्यवान्। तज्जातीयमेवार्थं पश्चात्तदुपादातुमिच्छति सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनोदर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। एवमेकस्यानेकार्थदर्शिनोदर्शनप्रतिसन्धानाद्दुःखहेतौ द्वेषः। यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्चात्तदादातुम् प्रयतते, सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात् निबन्धविषये बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखस्मृत्या चायं तत्साधनमादत्तः सुखमुपलभते दुःखमुपलभते सुखदुःखे जेष्यते पूर्वोक्त एव हेतुः" भा० "द्वितीयसूत्रभाष्ये च "दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धपरद्रोहं परद्रव्याभीप्सा नास्तिक्यञ्चेति सेयं पापात्मिका प्रवृत्तिरधर्माय" उक्तम्।

कथा०सूत्रे उपस्कारवृत्तौ च सुखदुःखयोः परस्परभेदः, ज्ञानाद्भेदश्च साधितो यथा

"इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः" सू०। "आत्मगुणानां कारणभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह। सुखदुःखयोर्मिथः परस्परमर्थान्तरभावोभेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टम् इष्यमाणं स्रक्चन्दनवनितादि अनिष्टमनिष्यमाणमहिकण्टकादि, तद्रूपं यत्कारणं तस्य विशेषाद्भेदात् कारणवैजात्याधीनं कार्यवैजात्यमावश्यकं यतः। भेदकान्तरमाह विरोधात् सहानवस्थानलक्षणात् नह्येकस्मिन्नात्मन्येकदा सुखदुःखयोरनुभवः। चकारादनयोः कार्यभेदं भेदकं समुच्चिनोति, तथाहि अनुग्रहाभिष्वङ्गनयनप्रसादादि सुखस्य, दैन्यसुखमालिन्यादि दुःखस्य कार्यमिति ततोऽप्यनयोर्भेदः। तदुक्तं प्रशस्तपादाचार्यैः "अनुग्रहलक्षणं सुखं स्वगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोत्पन्नधीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगाद्दुःखदनुग्रहाभिष्वङ्गनयनादिप्रसादलक्षणकमुत्पद्यते तत् सुखम्" इति, तदिदमतीतेषु स्रक्चन्दनादिषु स्मृतिजम्, अनागतेषु सङ्कल्पजम्, गौतमीये सूत्रे सुखापरिगणनं वैराग्याय, सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उप०ह०। "नन्वासातां सुखदुःखे परस्परं भिन्ने, ज्ञानाद्भिन्ने स्यातां स्मृत्यनुभववदित्यत आह उप०ह० "संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः" सू० "सुखदुःखयोर्ज्ञानान्तरत्वे ज्ञानभिन्नत्वे संशयानिर्णयावान्तरत्वाभावो हेतुर्लिङ्गमित्यर्थः, तदयमर्थः सुखं दुःखं वा ज्ञानं भवत् संशयरूपं वा स्यात् निर्णयरूपं वा, नाद्यः कोटिद्वयानुल्लेखित्वात्, न द्वितीयः एककोटयनुल्लेखित्वात्, तथा च दाबद्विशेषबाधात् सामान्यबाधः, द्वावेव हि ज्ञानस्य विशेषौ संशयत्वं निर्णयत्वञ्च, तदुभयञ्च, सुखे दुःखे च बाधितमिति ज्ञानत्वमपि तत्र बाधितम्। चकारादनुभवबाधं समुच्चिनोति सुखदुःखयोरहं सुखी दुःखीति मानसोऽनुभवो नत्वहं ज्ञाने सन्देहि भिन्नोमोत्याकारोऽनुभव इति। भेदकान्तरमाह" उप०ह० "तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम्" सू० "तयोः संशयनिर्णयवोर्निष्पत्तिः प्रत्यक्षाल्लिङ्गाच्च सुखं दुःखं वा न प्रत्यक्षजन्यं न वा लिङ्गजन्यम् चतुर्विधं हि सुखं वैषयिकमानोरथिकम् आभिमानिकमाध्यात्मिकञ्च, तत्र तत्रा आभिन्द्रियसन्निकर्षप्रभवत्वं नास्त्येव। प्रथमेन्द्रियार्थसन्निकर्षजन्यत्वात् ज्ञानं स्यादिति चेन्न सामग्र्येकदेशस्य कार्यस्य साजात्यानापादकत्वात् अन्यथा टिक्कालसाधारण्येन सकलकार्यैकजात्यापत्तेः, किञ्च इन्द्रियार्थसन्निकर्षादुत्पद्यमानं सुखं निर्विकल्पकं वा स्यात् सविकल्पकं

वा, नाद्यः अतीन्द्रियत्वप्रसङ्गात्, न द्वितीयः विशेष्यविशेषणभावेन द्वयोरनाकलनरूपत्वात्। किञ्च सुखदुःखयोरवश्यसंवेद्यत्वात् ज्ञानस्यावश्यसंवेद्यत्वेऽनवस्थाप्रसङ्गात्। लैङ्गिकमिति लिङ्गमेव वैषयिकवत्। वृत्तिज्ञानस्तु तयोर्ज्ञानसुखयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां प्रत्यक्षलैङ्गिकज्ञानव्याख्यानाभ्यां व्याख्याता, प्रत्यक्षं ज्ञानमिन्द्रियजम्, लैङ्गिकन्तु लिङ्गजम्, सुखादिकन्तु नैतादृशमिति व्याचक्रुः" उप०टी०। "अभूदित्यपि" सू० "लैङ्गिकज्ञानाद् सुखादेः प्रकारभेदाधीनं भेदमाह इति शब्दः प्रकारे, अपिशब्दो भविष्यतीत्याकारान्तरसमुच्चये, तथाच पर्वते वह्निरभूद्भविष्यति वेति लैङ्गिके ज्ञानेऽतीतादिः प्रकारोदृश्यते न चैवं प्रकारं सुखं दुःखं वा उत्पद्यमानमुपलभ्यम्" उप०टी०। "सति च कार्यदर्शनात्" सू० "चशब्दः भेदकान्तरं समुच्चिनोति। सति इन्द्रियार्थसन्निकर्षे सति च व्याप्तिपक्षधर्मतादिप्रतिसन्धाने कार्यस्य सुखस्य दुःखस्य वाऽदर्शनात् न प्रत्यक्षमात्रं सुखं दुःखं वा न लैङ्गिकमात्रं वा, तदयमर्थः ज्ञानसामान्यं तावत् सुखदुःखे न भवत इत्युक्तं ज्ञानविशेषः प्रत्यक्षज्ञानं वा भवेदनुमितिरूपं वा इन्द्रियार्थसन्निकर्षे स्रक्चन्दनादिप्रत्यक्षे सुखत्वानुभवाभावात्, न द्वितीयः चन्दनाद्यनुमितौ वज्राद्यनुमितौ वा सुखत्वदुःखत्वान्यतरानुभवात्। एवं प्रत्यक्षविशेषेऽनुमितिविशेषे वा सुखदुःखयोरननुभवाच्च तद्विशेषोऽपीति" उप०टी०। "एकार्थसमवायिकारणान्तरेषु दृष्टत्वात्" सू०। "भेदकान्तरमाह सुखदुःखयोरिति शेषः, सुखं प्रति एकार्थसमवेतानि असाधारणकारणानि, धर्मः, सुखे रागः, सुखकारणेच्छा, तदुपादानयत्नः, स्रक्चन्दनादिज्ञानम्। दुःखं प्रति तु अधर्मः, अनिष्टकण्टकादिज्ञानम्, एषु एकार्थसमवायिषु कारणेषु दृष्टत्वादित्यर्थः, ज्ञानन्तु निर्विकल्पकमेकार्थसमवेतमसाधारणकारणं नापेक्षत एव, सविकल्पकन्त्वपेक्षते विशेषणज्ञानं तच्च कारणान्तरं स्वविजातीयं कारणं न भवति, मनःसंयोगस्तु साधारणत्वादविवक्षितः। यद्यपि स्मृतिः संस्कारमसाधारणमपेक्षते तथापि तद्भेदः स्फुटमिह एवेत्यनुभवमादाय भेदेऽचिन्तनात्। लैङ्गिके यद्यपि व्याप्तिस्मृतिपक्षधर्मतादिज्ञानापेक्षा तथाप्यन्तरशब्दमेव तद्व्युदासः। तदयं प्रमाणप्रयोगः सुखदुःखे अनुभवभिन्ने स्वसमानाधिकरणसजातीयासाधारणकारणजन्यत्वात् स्मृतिवदाद्यशब्दवत्" उप० टी०।

सांख्यास्तु तस्य रजःकार्यत्वम् चित्तस्य विषयाणाञ्च धर्मत्वं तत्त्वैविध्यञ्चोररीचक्रुः। तथा हि "दुःखत्रयाभिघातादित्यादि" सां० का० तत्त्वकौमुद्यामुक्तं यथा "दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधम् आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत् प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रिकेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः। यद्यपि न सन्निरुध्यते दुःखं तथापि तदभिभवः शक्यः कर्तुमित्युपरिष्टाच्चिवेदयिष्यते"

"भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीया वा मुद्गाद्यस्तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति" सा०प्र०भा०।

सर्वेषां त्रिगुणात्मत्वात् विषयस्यापि सुखदुःखात्मकत्वं त०कौ० व्यवस्थापितं यथा

"अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः? स्वामिनं प्रति तस्याः सुखरूपसम्बन्धात्। सैव स्त्री सपत्नीं दुःखाकरोति तत्कस्य हेतोः? ताः प्रति तस्या दुःखरूपसम्बन्धात्। एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः? तं प्रति तस्या मोहरूपसम्बन्धात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्वेकत्रान् युगपदुद्भावविरोधः सहदर्शनात्। तस्मात् सुखदुःखमोहैरेव

विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उद्भीयन्ते एवं दुःखोपष्टम्भकप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति"।

दुःखादीनाञ्च सा॰ प्र॰ भा॰ विषयगतत्वं यद्वर्णितं तच्च आनन्दशब्दे ७२२ पृ॰ दृश्यम् "प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यवैधर्म्यम्" सा॰ सू॰

'गुणानां सत्वादिद्रव्यत्रयाणामन्योऽन्यं सुखदुःखविषादाद्यैः साधर्म्यं कार्येषु तद्दर्शनादित्यर्थः। मोहादिकं च घटादेरपि रूपादिवदेव धर्मोऽन्तःकरणोपादानत्वादन्यकार्याणामित्युक्तम्। अत्वादिशब्दपाह्याः पञ्चशिखाचार्यैरुक्ताः यथा "सत्वं नाम प्रसादलाघवाभिष्वङ्गप्रीतितितिक्षासन्तोषादिरूपानन्तभेदं समासतः सुखात्मकम्। एवं रजोऽपि शोकादिनानाभेदं समासतो दुःखात्मकम्" सा॰ प्रवचनभाष्यम्।

दुःखस्य चित्तवृत्तिविशेषरूपत्वम् शङ्करभाष्ये उक्तम् तच्च व्यक्तानशब्दे ६४१ पृ॰ दर्शितम्।

कविकल्पलतायाञ्च लोकसिद्धानि कतिचित् दुःखकारणानि दर्शितानि यथा

पारतन्त्र्यं१ व्याधिः२ व्याधिः३ मानच्युतिः४ शत्रुः५ कुभार्या६ नैःस्वम्७ कुग्रामवासः८ कुस्वामिसेवनम्९ बहुकन्याः१० दरत्वं११ परगृहवासः१२ वर्षाप्रवासः१३ भार्याद्वयम्१४ कुभृत्यः१५ दुर्हलकरणकलधिः१६

वराहपुराणे दुःखतराणि कतिचिदुक्तानि यथा

'दुःखमेव प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!। उचितेनोपचारेण दुःखं मोहविनाशनम्। अहङ्कारकृतो नित्यं नरा मोहेन वाहताः। ये मां नैव प्रपद्यन्ते ततो दुःखतरञ्च किम्। सर्वाशी सर्वविक्रेता नमस्कारविवर्जितः। ये च मां न प्रपद्यन्ते ततो दुःखतरञ्च किम्। सर्वान्नानि तु सिद्धानि पाकभेदन्तु कारयेत्। अवैश्वदेवं योऽश्नाति ततो दुःखतरञ्च किम्। प्राप्तकाले वैश्वदेवे दृष्टं हृत्प्रतिथिमागतम्। अदत्त्वा तस्य यो भुङ्क्ते ततो दुःखतरञ्च किम्। असन्तुष्टस्तु वैधर्म्ये परदाराभिमर्दकः। परोपतापी मन्दात्मा ततो दुःखतरञ्च किम्। अकृत्वायुर्बलं कर्म्म गृहे संवसते नरः। मृत्युपाशवशं प्राप्तस्ततो दुःखतरञ्च किम्। हस्त्यश्वरथयानानि गच्छमानानि पश्यति। न वै तस्याग्रतः पृष्ठे ततो दुःखतरञ्च किम्। अश्नन्ति पिशितं केचित् हतशालिसमन्वितम्। शुष्कान्नं केचिदश्नन्ति ततो दुःखतरञ्च किम। वरवस्त्रावृतां भार्य्यां समासेवन्ति मूर्खिताः। केचित् तत्रैव शेरते ततो दुःखतरञ्च किम्। विद्वान् कृती गुणज्ञश्च सर्वशास्त्रविशारदः। केचिन्मूकाश्च दृश्यन्ते ततो दुःखतरञ्च किम्। विद्यमाने धने केचित् कृपणा भोगवर्जिताः। दरिद्रो जायते दाता ततो दुःखतरञ्च किम्। पुरुषस्य तु द्वे भार्ये तयोरेकां प्रशंसयेत्। एकापि दुर्भगा तत्र ततो दुःखतरञ्च किम्। लब्ध्वा तु मानसीं संज्ञां पञ्चभूतसमन्विताम्। मामेव न प्रपद्यन्ते ततो दुःखतरञ्च किम्। लब्ध्वा ब्राह्मणभावन्तु त्रयो वर्णाः सुमध्यमे!। पापकर्म्मरता ह्यासंस्ततो दुःखतरञ्च किम्। एतत्ते कथितं भद्रे! दुःखकर्म विनिश्चितम्। सर्वभूतहितार्थाय यत्तत्वया परिपृच्छ्यते"। 'अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः। निन्दन्तस्तव सामर्थ्यं ततो दुःखतरञ्च किम्" गीता। "मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" माघः। "सुखं हि दुःखान्यनुभूय शोभते" मृच्छ॰। दुःखमनुभवति दुःख+क्यङ् दुःखायते दुःखमनुभवतीत्यर्थः। "दुःखायते जनः सर्वः सएवैकः सुखायते" भट्टिः।

दुःखग्राम पु॰ दुःखानां ग्रामोऽत्र। १संसारे शब्दार्थचि॰। ६त॰। २दुःखसमुदाये च।

दुःखजात त्रि॰ जातं दुःखमस्य परनि॰। संजातदुःखे "जातिकालसुखादिभ्यः" इत्यादिना पा॰व्यस्यान्नोदात्तता ६त॰। २दुःखसमुदाये न॰।

दुःखत्रय न॰ ६त॰। आध्यात्मिकाधिभौतिकाधिदैविकरूपे दुःखत्रिके दुःखशब्दे सा॰का॰ त॰कौ॰वाक्यं दृश्यम्।

दुःखदिर पु॰ दुष्टः खदिरः वा मत्वम्। महासारे खदिरभेदे शब्दार्थचि॰। [हेमच॰।

दुःखदोह्या स्त्री दुःखेन दोह्या। दुःखेन दोह्यायां गवि।

दुःखशील त्रि॰ दुःखं शीलयति शील—ण्य् उप॰। दुःखानुभवशीलनकर्त्तरि "कामिकपत्नी व्रतदुःखशीलाम्" कुमा॰।

दुःखित त्रि॰ दुःख+तार॰ इतच्। संजातदुःखे "दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः" मनुः।

दुःखिन् त्रि॰ दुःख+इखा॰ मत्वर्थे इनि। सान्विते

दुःशकुन न॰दुष्टं शकुनं वा रोः शः। अशुभसूचके निमित्तभेदे "वन्ध्याचर्मतुषास्थि सर्पलवणाङ्गारेन्धनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः नग्नाभ्यङ्गविमुक्तकेशपतित व्यङ्गक्षुधार्त्ता असृक् स्त्रीपुष्पं शरटः खगेहदहनं मार्जारयुद्धं च्युतम्। कापायी गुड़-

तक्रपङ्कविधवाः कुजाः कुटुम्बे कर्त्तिर्स्वादेः स्वजनं लुलापसमरं कृष्णानि धान्यानि च। कार्पासं वमनञ्च गर्दभरवो दत्तोऽतिरुट् गर्भिणी सुरुडाङ्गाम्बरदुर्वचोम्ब वधिरोदक्या न दृष्टाः शुभाः। कृष्णाम्बरा कृष्णविलेपनाद्या कृष्णस्रजं मूर्द्धनि धारयन्ती। दृष्टा प्रकोपा यदि कृष्णवर्णा नारी नरैस्तद्विपदो भवन्तीति" शब्दार्थचिन्तवाक्यम्

दिग्भेदादिभिः शकुनभेदे फलभेदः दृ०सं०८६अ०उक्तो यथा "अन्यजन्मान्तरकृतं कर्म पुंसां शुभाशुभम्। यत्तस्य शकुनः पाकं निवेदयति गच्छताम्। आमारण्याम्बुभूव्योमद्युनिशोभयचारिणः। रुतयातेक्षितोक्तेषु ग्राह्याः स्त्रीपुन्नपुंसकाः। पृथग्जात्यनवस्थानादेषां व्यक्तिर्न लक्ष्यते। सामान्यलक्षणोद्देशे श्लोकाद्यधिकृताविमौ। पीनोन्नतविपुलांसाः पृथुग्रीवाः सुवक्षसः। स्वल्पगम्भीरविरुताः पुमांसः स्थिरविक्रमाः। तनूरुकशिरोग्रीवाः स्वच्छास्यपदविक्रमाः। प्रमक्तमृदुभाषिण्यः स्त्रियोऽतोऽन्यन्नपुंसकम्। आमारण्यप्रचाराद्यं लोकादेवोपलक्षयेत्। सञ्चिन्त्यसुरहं वक्ष्मि यात्रामात्रप्रयोजनम्। पश्यात्मानं नृपं सैन्ये पुरे चोद्दिश्य देवताम्। स्वार्थे प्रधानं साम्यं स्याज्जातिविद्यावयोऽधिकम्। सुक्तप्राप्तैश्च्यदकांसु फलं दिशु तथाविधम्। अङ्गारिदीप्तधूमिन्यस्तास्य शान्तास्ततोऽपराः। तत्पञ्चमदिशां तुल्यं शुभं त्वैकात्म्यमादिशेत्। परिशेषयोर्दिशोर्वाच्यं यथासन्नं शुभाशुभम्। शीघ्रमासन्ननिम्नस्थैश्चिराद्दूरतदूरगैः। स्थानदृष्ट्युपघाताच्च तद्वदुब्रूयात्फलं पुनः। क्षणतिथ्युडुवाताकैर्वैदीप्तो यथोत्तरम्। क्रियादीप्तो गतिस्थानभावस्वरविचेष्टितैः। दग्धैवं प्रशान्तोऽपि सौम्यस्तत्फलाशनः। मांसामेध्याशनो रौद्रो विमिश्रोऽन्नाशनः स्मृतः। हर्म्यप्रासादमङ्गल्यमनोज्ञस्थानसंस्थिताः। श्रेष्ठा मधुरसक्षीरफलपुष्पद्रुमेषु च। स्वकाले गिरितोयस्था बलिनो दानिशाचराः। क्लीबस्त्रीपुरुषाश्चैषां बलिनः स्युर्यथोत्तरम्। जवजातिबलस्थानहर्षसत्त्वस्वरान्विताः। स्वभूमावनुजीभाश्च तदूनाः स्युर्विवर्जिताः। कुक्कुटेभपिरिल्यश्च शिखिवञ्जुलछिक्कराः। बलिनः सिंहनादश्च कूटपूरी च पूर्वतः। क्रोष्टुकोलूकहारीतकाककोकर्क्षपिङ्गलाः। कपोतरुदिताक्रन्दक्रूरशब्दाश्च याम्यतः। गोशशक्रौञ्चलोमाशहंसोत्क्रोशकपिञ्जलाः। विड्वालोत्प्लवबादित्रगीतहासाश्च धारुणाः। शतपत्रकुरङ्गाखुसृगैकशफकोकिलाः। चाषगल्यकपुण्ड्राहचण्डाशङ्खरवा उदक्। न ग्राम्योऽरण्यगो ग्राह्यो नारण्यो ग्रामसंस्थितः। दिवाचरो न शर्वर्यां न च नक्तञ्चरो दिवा। दन्तरोगान्वितत्रस्ताः कलहाभिघ्नाङ्गिणः। आपगान्तरिता मत्ता न ग्राह्याः शकुनाः क्वचित्। रोहिताश्वाजवालेयकुरङ्गोष्ट्रमृगाः शयः। निष्फलाः शिशिरे ज्ञेया वसन्ते काककोकिलौ। न तु भाद्रपदे ग्राह्याः सूकरश्वदकादयः। शरदाजादगोक्रौञ्चाः श्रावणे हस्तिचातकौ। व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः। हेमन्ते निष्फला ज्ञेया बालाः सर्वे विमानुषाः। ऐन्द्रानलदिगोर्मध्ये त्रिभागेषु व्यवस्थिताः। कोशाध्यक्षानलाजीवितपोयुक्ताः प्रदक्षिणम्। शिल्पी भिक्षुर्विवस्त्रा स्त्री याम्यानलदिगन्तरे। परतश्चापि मातङ्गगोपधर्मसमाश्रयाः। नैर्ऋतीवारुणीमध्ये प्रमदास्तुतितस्कराः। शौण्डिकः शाकुनी हिंस्रो वायव्यपश्चिमान्तरे। विषघातकगोस्वामिकुहकक्षास्ततः परम्। धनवानीक्षणिकश्च मालाकारः परं ततः। वैष्णवश्चरकश्चैव वाजिनां रक्षणे रतः। एवं द्वात्रिंशतो भेदाः पूर्वदिग्भिः सहोदिताः। राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः। गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्। गच्छतस्तिष्ठतो वापि दिशि वस्त्रां व्यवस्थितः। विरौति शकुनो वाच्यस्तद्दिग्जेन समागमः। भिन्नभैरवदीनार्तपरुषक्षामजर्जराः। खरा नेष्टाः शुभाः शान्ता हृष्टप्रकृतिपूरिताः। शिवा श्यामा रक्ता कृष्णः पिङ्गला गृहगोधिका। सूकरी परपुष्टा च पुच्छामानश्च वामतः। स्त्रीमञ्जा भासभक्षकपिश्रीकर्णचिक्कराः। शिखिश्रीकण्ठपिप्पीकरूरुगध्रेनाश्च दक्षिणाः। क्रोडासोटितपुण्ड्राहगीतशङ्खाम्बुनिःस्वनाः। सतूर्याध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः। ग्रामौ मध्यमषड्जौ तु गान्धारश्चेति शोभनाः। षड्जामध्यमगान्धारा ऋषभश्च स्वरा हिताः। कृतकीर्तनदृष्टेषु भारद्वाजाजवर्हिणः। धन्या नकुलचाषौ च सरटः पापदोऽयतः। जाहकाहिशशक्रोडगोधानां कीर्त्तनं शुभम्। कृतसन्दर्शनं नेष्टं प्रतीपं वानरर्क्षयोः। ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः। चाषः सनकुलो वामो भृगुराहापराङ्मुखः। छिक्करः कूटपूरी च पिरिली चाङ्गि दक्षिणा। अपसव्याः सदा शस्ता दंष्ट्रिणः सबिलेशयाः। श्रेष्ठे हयस्थिते प्राच्यां शवमांसे च दक्षिणे। कन्यकादधिनी पश्चादुदग्गोविप्रसाधवः। जालश्चरणौ नेष्टौ प्राग्याम्यौ शस्त्रघातकौ। पश्चादा सवधस्तौ च

खलासनहलान्युदक्। कर्मसङ्गमयुद्धेषु प्रवेशे नष्टमार्गणे। यानव्यसनगता ग्राह्या विशेषशात् वक्ष्यते। दिवा प्रस्थानवद्ग्राह्याः कुरङ्गरुरुवानराः। अङ्गश्च प्रथमे भागे चाषवङ्गुलकुक्कुटाः। पश्चिमे शर्वरीभागे नग्नकौलूकपिङ्गलाः। सर्व एव विपर्यस्ता ग्राह्याः सार्थेषु योषिताम्। रूपसन्दर्शने ग्राह्याः प्रवेशेऽपि प्रयाणवत्। गिर्यरण्यप्रवेशे च नदीनां चावगाहने। यामदक्षिणगौ शस्तौ यौ तु तावग्रपृष्ठगौ। क्रियादीप्तौ विनाशाय यातुः परिषसञ्ज्ञितौ। तावेव तु यथाभागं प्रशान्तकृतचेष्टितौ। शकुनौ शकुनद्वारसञ्ज्ञितावर्थमिच्छये। केचित्तु शकुनद्वारमिच्छन्त्युभयतः स्थितैः। शकुनैरेकजातीयैः शान्तचेष्टाविरोधिभिः। विसर्जयति यद्येक एकश्च प्रतिषेधति। स विरोधोऽशुभो यातुर्यात्रां वा बलवत्तरः। पूर्वं प्रावेशिको भूत्वा पुनः प्रास्थानिको भवेत्। सुखेन सिद्धिमाचष्टे प्रवेशे तद्विपर्ययः। विमर्ज्य शकुनः पूर्वं स एव निरुणद्धि चेत्। प्राह यातुररेर्मृत्युं डमरं रोगमेव वा। अपसव्यास्तु शकुना दीप्ता भयनिवेदिनः। आरम्भे शकुनो दीप्तो वर्धान्तस्तद्भयङ्करः। तिथिवाय्वर्कमस्थानचेष्टादीप्ता यथाक्रमम्। धनसैन्यबलाङ्गेष्टकर्मणां स्युर्भयङ्कराः। जीमूतध्वनिदीप्तेषु भयं भवति मारुतात्। उभयोः सन्ध्ययोर्दीप्ताः शस्त्रोद्भवभयङ्कराः। चितिक्षेत्रकपालेषु मृत्युबन्धवधप्रदाः। कण्टकीकाष्ठभक्षास्याः कलहायासदुःखदाः। अप्रसिद्धिं भयं वापि निःसाराश्चमव्यवस्थिताः। कुर्वन्ति शकुना दीप्ताः शान्ता याप्यफलास्तु ते। असिद्धिसिद्धिदौ ज्ञेयौ निर्हादाहारकारिणौ। स्थानाद्रुवन् व्रजेद्दुयात्रां शंसते त्वन्यथागमम्। कलहः खरदीप्तेषु स्थानदीप्तेषु विग्रहः। उच्चमादौ खरं कृत्वा नीचं पश्चाच्च योपकृत्। एकस्थाने रुवन्दीप्तः सप्ताहाद्ग्रामघातकृत्। पुरदेशनरेन्द्राणामृत्वङ्गायनवत्सराः। सर्वे दुर्भिक्षकर्तारः स्वजातिपिशिताशनाः। सर्पमूषिकमार्जारपृथुरोमविवर्जिताः। परयोनिषु गच्छन्तो मैथुनं देशनाशनाः। अन्यत्र वैसरोत्पत्तेर्ष्टयां चाजातिमैथुनात्। वज्रघातभयानि स्युः पादोरुमस्तकान्तिगैः। अगम्यपिशिताशादैर्विषोपहतयग्रहाः। क्रूरोग्रदोषदुष्टैश्च प्रधानन्दपदत्तकैः। चिरकालेन दीप्ताद्याखागमो दिशु तद्भयाम्। सद्रव्यो बलवांश्च स्यात्सद्रव्यस्यागमो भवेत्। द्युतिमान् विनतग्रीवो सौम्यो दारुणदत्तकृत्। विदिक्स्थः शकुनो दीप्तो वामस्थेनानुयाशितः। स्त्रियाः संग्रहणं प्राह तद्विगाख्यातयोनितः। शान्तः पञ्चमदीप्तेन विरुतो विजयावहः। दिग्लरागमकारी वा दोषकृत्तद्विपर्यये। वामसव्यरुतो मध्यः प्राह स्वपरयोर्भयम्। मरणं कथयन्त्येते सर्वे समविराविणः। दक्षाग्रमध्यमूलेषु गजाश्वरथिकागमः। दीर्घाञ्जसुचिताग्रेषु नरगौरिविकागमः। शकटेनोन्नतस्थे च छायास्थे कृतसंयुतः। एकतिपञ्चसप्ताहात् पूर्वाद्यास्त्वनरास्तु च। सुरपतिकुबेरयमनिर्ऋतिवरुणपवनेन्दुशङ्कराः। प्राच्यादीनां पतयो दिशः पुमांसोऽङ्गना विदिशः। तरुतालीविदलाम्बरसलिलजशरचर्मपट्टलेखाः स्युः। द्वात्रिंशत्प्रभिन्नो दिक्चक्रे तेषु कार्याणि। व्यायामशिखिनिकूजितकलहाम्भोनिगङ्गमन्त्रगोगद्दाः। वर्णाश्च रक्तपीतकृष्णसिताः कोणगा मित्राः। चित्रं ध्वजो दग्धमथ श्मशानं दरी जलं पर्वतयन्त्रघोषाः। एतेषु संयोगभयानि विन्द्यात् अन्यानि वा स्थानविकल्पितानि। स्त्रीणां विकल्पे दहती कुमारी व्यङ्गा विगन्धा त्वथ नीलवस्त्रा। कुस्त्री प्रदीर्घा विधवा च ताश्च संयोगशिल्पापरवेदिकाः स्युः। पृच्छाश्च कृष्णकनकातुरभाभिनीनां मेषाव्ययानमखगोकुलसंत्रयास्तु। न्यग्रोधरक्ततरुलोध्रककीचकाख्याश्चूतद्रुमाः खदिरबिल्वनगार्जुनाश्च"।

अन्यानि शुभाशुभशकुनानि तत्रोक्तानि तत्तच्छब्दे उक्तानि

दुः(दुश्च)शला स्त्री धृतराष्ट्रकन्यायाम् वा रोः शः। दुश्चलाप्यत्र "कुण्डजश्चित्रकश्चैव दुःशला च शताधिका" भा० आ० ६७अ०। [दुःखेन शिष्यमाणे।

दुःशास त्रि० दुःखेन शिष्यतेऽसौ शास—कर्मणि वेदे खल्।

दुःशासन त्रि० दुःखेन शिष्यतेऽसौ "भाषायां शासियुधिदृशिक्षिभ्यो युच्" पा० भाषायां युचो विधानात् कर्मणि युच्। दुःखेन शिष्यमाणे दुर्योधनादिमध्ये २धृतराष्ट्रसुतभेदे पु०। "दुर्योधनो युयुत्सुश्च राजन्! दुःशासनस्तथा" भा०आ० ६७अ०

दुः(शी)शील त्रि० दुष्टं शीलमस्य वा रोः शः। दुष्टशीले "पूर्वमप्यतिदुःशीलो न धैर्यं कर्तुमर्हति" भा०स०२०अ०

दुःशोध त्रि० दुर्+शुध—कर्मणि खल्। दुःखेन शोधनीये प्रतीकार्ये च त्रि० "तथैव खलु दुःशोधान् शोधयेत् चारकर्मणा" सुश्रु०। [वा षः। दुष्टे सन्धौ

दुः(दुष्प्र)षन्धि पु० दुष्टः सन्धिः सुषामा० षत्वे विसर्गस्य

दु (दुष्ष)षमस् अव्य०दुष्टं समनस् तिष्ठद्गु० अव्ययी० षत्वे

रोर्वा षः । गर्हायाम् अमरः ६व०। अप्रत्यम् । असमञ्जसे त्रिका० ।

दुः(दुस्)सह त्रि० दुःखेन सह्यतेऽसौ सह–खल् वा रोः षः । १दुःखेन सोढव्ये "यो दुःसहासो वहुषा" ऋ० ६।६१।५ "तेषामापततां वेगः करिणां दुःसहोऽभवत्" भा०व०६५अ० "दुःसहेन हृदये निशाचरी" रघुः "भवत्यनिष्टादपि नाम दुःसहात्" कुमा० । २नागदमन्यां स्त्री राजनि० । [भावे क्त । २दुष्टे स्वप्ने न०।

दुःष(सु)प्त त्रि० दुर्+स्वप–क्त–वा षत्वम् । १दुष्टस्वप्नयुक्ते

दुःषूति त्रि० दुष्टा सूतिः रोर्वा षः । दुष्टायां सूतौ ।

दुः(दुष्प्रे)षेध त्रि० दर्–सिध–खल् सुषामा० षत्वे रोर्वा षः । सेढुमसाध्ये । [दुष्टसक्थियुक्ते ।

दुःसक्थ(कित्थ) त्रि० दुष्टं सक्थि यस्य वा अच् समा०।

दुःसाध(ध्य) त्रि०दुःखेन साध्यतेऽसौ खल् तत्वार्थे घञ् वा। साधयितुमशक्ये "छन्दोनुवृत्तिदुःसाधा" माघः "किं नाम मम दुःसाध्यं यत्नुणा निपहे रणे" हरिवं० २६७अ०

दुःसाधिन् त्रि० दुष्टं साधयति साधि–णिनि । १दुष्टसाधके २दौवारिके पु० शब्दमाला ।

दुः(दु)स्त्री स्त्री दुष्टा स्त्री प्रा०स० वा विसर्गलोपः । दुष्टायां स्त्रियां तस्याभावः कर्म वा अण् । दौस्त्रीण तस्याभावे कर्मणि च न० ।

दु (दु)स्थ त्रि०दुष्टं तिष्ठति स्था–क वा विसर्गलोपः । १दुर्गते २मूर्खे ३दुष्टं स्थिते च मेदि० ४लुब्धे शब्दार्थचि० । "दुःस्थं तिष्ठसि यच्च पश्यमधुना कर्त्तास्मि तत् श्रोष्यसि" अमरुश० ।

दुः(दु)स्पर्श त्रि० दुःखेन स्पृश्यतेऽसौ दुर्+स्पृश–कर्मणि खल् वा विसर्गलोपः । १स्पृष्टुमशक्ये मेदि०। "दुस्पर्शो सुहिना वायुः दुस्पर्शः पाणिना यशी" भा०आनु०३३अ० २दुरालभायाम् स्त्री अमरः ३लताकरञ्जे राजनि० ४कपिकच्छ्वाम् ५आकाशवल्लर्यां ६कण्टकार्य्याम् च स्त्री राजनि०। [१कर्मणि खल् । २दुष्टे व्रणे च अन्यादौ हेमच०।

दुः(दु)स्फोट पु०दुष्टं स्फोटयति स्फुट–अच् वा विसर्गलोपः ।

दुःस्वप्न पु० दुष्टः स्वप्नः प्रा०स० । अशुभसूचके स्वप्नभेदे स च छान्दोग्यो० "अथ स्वप्ने कृष्णदन्तं पुरुषं पश्यति सएनं हन्ति" इत्युक्तः ।

कतिचित् दुःस्वप्नभेदाश्च ब्रह्मवैवर्तजन्मख० उक्ता यथा "सर्वं श्रुतं महाभाग ! दुःस्वप्नं कथय प्रभो ! । उवाच तच्च भगवान् ! श्रूयतामिति तद्वचः । श्रीभगवानुवाच स्वप्ने हसति यो हर्षाद्विवाहं यदि पश्यति । नर्त्तनं गीतमिष्टञ्च विपत्तिस्तस्य निश्चितम् । दला यस्य विपोद्यन्ते विचरन्तञ्च पश्यति । धनहानिर्भवेत्तस्य पीडा चापि शरीरजा । अभ्यङ्गितस्तु तैलेन यो गच्छेद्दक्षिणां दिशम् । खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः । स्वप्ने चूर्णं जवापुष्पमशोकं करवीरकम् । विपत्तिस्तस्य तैलञ्च लवणं यदि पश्यति । नग्नां कृष्णां छिन्ननासां शूद्रस्य विधवां तथा । कपर्द्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात् । स्वप्ने दृष्टं ब्राह्मणञ्च ब्राह्मणीं कोपसंयुताम् । विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति गृहाद्ध्रुवम् । वनपुष्पं रक्तवर्णं पलाशञ्च सुपुष्पितम् । कार्पासं रक्तवस्त्रं च दृष्ट्वा दुःखमवाप्नुयात् । गायन्तीञ्च हसन्तीं वा कृष्णाम्बरधरां स्त्रियम् । दृष्ट्वा कृष्णाञ्च विधवां नरो मृत्युमवाप्नुयात् । देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च । आस्फोटयन्ति धावन्ति तस्य देशो विनश्यति । वान्तं मूत्रं पुरीषञ्च रैत्यं रत्नं सुवर्णकम् । प्रत्यक्षमथ वा स्वप्ने जीवितं दशमासिकम् । कृष्णाम्बरधरां नारीं कृष्णमाल्यानुलेपनाम् । उपगूहति यः स्वप्ने तस्य मृत्युर्भविष्यति । मृतवत्सञ्च सुप्तञ्च मृगस्य वानरस्य वा । यः प्राप्नोत्यस्थिमालां च विपत्तिस्तस्य निश्चितम् । अभ्यङ्गितस्तु तैलेन हविषा मधुनाऽपि वा । तक्रेणैव गुडेनापि पीडा तस्य विनिश्चितम् । पतितं नखकेशञ्च निर्वाणाङ्गारमेव च । भस्मपूर्णां चितां दृष्ट्वा लभते मृत्युमेव च । मसीञ्च किञ्चित् कृष्णं वा दृष्ट्वा दुःखं लभेद्ध्रुवम् । पादुकाफलकं रक्तपुष्पमाल्यं भयानकम् । मांसं मसूरं मुद्गं वा दृष्ट्वा सद्यो व्रणं भवेत् । करटं सरटं काकं भल्लूकं वानरं परम् । पूयगात्रमलं स्वप्ने केवलं व्याधिकारणम् । भग्नभाण्डं क्षतं शूद्रं यक्षत्कुष्ठैश्च रोगिणम् । रक्ताम्बरञ्च जटिलं शूकरं महिषं खरम् । कृष्णाकारं महाघोरं मृतजीवं भयङ्करम् । दृष्ट्वा स्वप्ने योनिलिङ्गं विपत्तिं लभते ध्रुवम् । कुबेररूपं म्लेच्छञ्च यमदूतं भयङ्करम् । पाशहस्तं पाशशस्त्रं दृष्ट्वा मृत्युं लभेन्नरः । ब्राह्मणो ब्राह्मणी बाला बालको वा सुतः सुता । विदायं कुरुते कोपात् दृष्ट्वा दुःखमवाप्नुयात् । कृष्णपुष्पञ्च तन्माल्यं शस्त्रशस्त्रधारिणम् । म्लेच्छाञ्च विकृताकारां दृष्ट्वा मृत्युं लभेद्ध्रुवम् । नाट्यञ्च नर्त्तनं गीतं गायनं रक्तवाससम् । मृदङ्गवाद्यमानन्दं दृष्ट्वा दुःखं लभेद्ध्रुवम् ।

प्राणत्यक्तं मृतं दृष्ट्वा मृत्युञ्च लभते ध्रुवम्। मत्स्यादिधारणं यो हि तद्भ्रातुर्मरणं भवेत्। छिन्नं भयङ्करं वापि विकृतं शुक्लकेशिनम्। क्षिप्रं मृत्युञ्च कुर्वन्तं दृष्ट्वा मृत्युं लभेन्नरः। मृतो वापि मृता वापि कृष्णा म्लेच्छा भयानका। उपगूहति यं स्वप्ने तस्य मृत्युर्विनिश्चितम्। उपगूहति यं स्वप्ने शृङ्गिणो दंष्ट्रिणोऽपि वा। बालका मानवाश्चैव तस्य राजकुलाद्भयम्। छिन्नवृक्षं पतन्तञ्च शिलावृष्टिं तुषं चुरम्। रक्ताङ्गारं भस्मवृष्टिं दृष्ट्वा दुःखमवाप्नुयात्। यदि पतन्तं शैलं वा धूमकेतुं भयानकम्। भग्नं स्कन्धं तरोर्वापि दृष्ट्वा दुःखमवाप्नुयात्। रथगेहवृक्षशैलगोहस्तितुरगोऽम्बरात्। भूमौ पतति यत्स्वप्ने विपत्तिस्तस्य निश्चितम्। उच्चैः पतन्ति गर्त्तेषु भस्माङ्गारचितासु च। क्षारकुण्डेषु चूर्णेषु मृत्युस्तेषां न संशयः। बलाद्गृह्णाति दृष्टञ्च छत्रञ्च यस्य मस्तकात्। पितुर्नाशो भवेत्तस्य गुरोर्वापि नृपस्य वा। सुरभी यस्य गेहाच्च याति तस्या भवत्यिका। प्रयाति पालतस्तस्य लक्ष्मीरपि वसुन्धरा। पाशेन बद्ध्वा बद्धञ्च यं गृहीत्वा प्रयान्ति च। यमदूताश्च ये म्लेच्छास्तस्य मृत्युर्विनिश्चितम्। गणको ब्राह्मणो वापि ब्राह्मणी वा गुरुस्तथा। परिरुष्टः शपति यं विपत्तिस्तस्य निश्चितम्। विरोधिनश्च काकास्तु कुक्कुरा भल्लुकास्तथा। पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्न संशयः। महिषा भल्लुका उष्ट्राः शूकरा गर्द्दभास्तथा। रुष्टा धावन्ति यं स्वप्ने स रोगी निश्चितं भवेत्"।

अस्य शान्तिस्तत्रोक्ता यथा

"रक्तचन्दनकाष्ठानि घृताक्तानि च यो जुहुयात्। गायत्र्या च सहस्रेण तेन शान्तिर्विधीयते। सहस्रधा जपेद्यो हि भक्त्या मां मधुसूदनम्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्। अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम्। हंसं नारायणञ्चैव एतन्नामाष्टकं शुभम्। शुचिः पूर्वमुखः प्राज्ञो दशकृत्वश्च यो जपेत्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्"। स्वापसमयलग्ने दुःस्वप्नदुश्चक्रपहयोगभेदः नी॰ख॰त॰ उक्तो यथा

"लग्नांशमेऽर्के तनुगेऽथ वाऽस्मिन् दुःस्वप्नमीक्षेत यथा कविम्बम्। रक्ताम्बरं वह्निमथापि चन्द्रे इत्येवमादि"।

"प्रोह्यते भक्ष्यते वापि पिशाचासुरवायसैः। भूतैः प्रेतैः नभिर्गृध्रैर्गोमायुखरशूकरैः। सुरभैः करभैः कीशैः श्येनैरन्यतरैर्द्वकैः। स्वप्ने स जीवितं त्यक्त्वा वर्षान्ते यममीक्षते। गन्धपुष्पांशकैः शोणैः स्वान्तनुं भूषितान्नरः। यः पश्येत् स्वप्नसमये सोऽष्टौ मासाननित्यहो" काशीख॰ अधिकं कालचिद्भेदशब्दे १९९७पृ॰द्रष्टव्यम्

दुकूल न॰ दु—ऊलच् कुक् च दुष्टं कूलति कूल—आवरणे क वा पृषो॰। १क्षौमाम्बरे २सूक्ष्मवस्त्रे ३सूक्ष्मवस्त्रे च मेदि॰। "गोपवधूटीदुकूलचौराय" भाग॰ "अथ सवल्क दुकूलकुथादिभिः" भट्टिः। "वधूदुकूलं कलहंसलक्षणम्" कुमा॰।

दुगूल न॰ दुकूल+पृषो॰। दुकूलार्थे पट्टवस्त्रे हेमच॰।

दुग्ध न॰ दुह—क्त। १पयसि क्षीरे स्त्रीजातिस्तननिष्यन्दिद्रवद्रव्ये। कर्मणि क्त। २कृतदोहायां धेन्वादौ स्त्री ३प्रपूरिते त्रि॰मेदिनी॰। भावे क्त। ४दोहने न॰ क्षीरवर्गशब्दे २२७७पृ॰ अस्य विवृतिः। तत्रानुक्तं भावप्रकाशे किं चिदत्राभिधीयते

"रात्रौ चन्द्रगुणाधिक्याद्दूर्व्यायामाकरणात्तथा। प्राभातिकं तदा प्रायः प्राटोषाद्गुरु शीतलम्। दिवाकरकरापातात् व्यायामानलसेवनात्। प्राभातिकात्तु प्राटोषं लघु वातकफापहम्"। अथ दुग्धसेवने समयादिविशेषे गुणमाह। "दुग्धं हृद्दहणमग्निदीपनकरं पूर्वाह्णकाले पयो मध्याह्ने तु बलावहं कफहरं पित्तापहं दीपनम्। बाले वृद्धिकरं क्षये क्षयकरं वृद्धेषु रेतोवहम् रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सेव्यते। वर्जन्ति येयं निशि केवलं पयो भोज्यं न तेनेह सहौदनादिकम्। भवत्यजीर्णे निशि पीतशर्करा क्षीराल्पपानस्य न शेषसंसृजेत्। विदाहोन्यन्नपानानि दिवा भुङ्क्ते हि यन्नरः। तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत्। दीप्तानले क्लेशे पुंसि वातवृद्धे पयःप्रिये। मतं हिततमं पथ्यं सद्यः शुक्रकरं यतः"। अथ मथितस्य दुग्धस्य गुणाः "क्षीरं गव्यमथाजं कोष्णं दण्डाहतं पिबेत्। लघु दुग्धं ज्वरहरं वातपित्तकफापहम्"। अथ गोजदुग्धगुणाः "गोदुग्धप्रभवं किं वा छागीदुग्धसमुद्भवम्। तद्भवेच्च त्रिदोषघ्नं रोचनं बलवर्द्धनम्। यच्छिद्धिकरं दुग्धं सद्यस्तृप्तिकरं लघु। अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते"। अथ निन्दितदुग्धम् "विवर्णं विरसं चाम्लं दुर्गन्धं मथितं पयः। वर्जयेद्गन्धलवणयुक्तं बुद्ध्यादिहृद्यतः"। अजादिदुग्धगुणादिभेदादिकं तत्तच्छब्दे उक्तम्।

"बैड्याविकं पञ्चतमं शृतोष्णं क्षीरं त्वजानां शृतशीत माहुः। दोहान्तशीतं महिषीपयस्तु गव्यन्तु धारोष्णमिदं प्रशस्तम्। दध्न्यं दृंहणमग्निवर्द्धनकरं पूर्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं हृच्छूल विच्छेदनम्। बाल्ये वह्निकरं ततो बलकरं वीर्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्वदा। क्षीरं शुद्धं तत्तितयोषितं यदतप्तमेतद्विकृतिं प्रयाति। प्रशान्तु दोषं कुरुते तदूर्द्ध्वं विषोपमं स्यादुषितो दशानाम्। जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम्। तदेव तरुणे पीतं विषवद्वह्नि मानुषम्"। क्षीरक्वाथगुणः। "चतुर्थभागं सलिलं निधाय यत्राढ्य वदावर्त्तितशुद्धसत्तम तत्। सर्वामयघ्नं बलपुष्टिकारि वीर्यप्रदं क्षीरमति प्रशस्तम्। गव्यं पूर्वाह्णकाले स्यादपराह्णे तु माहिषम्। क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्वदा। क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तञ्च नैतल्लवणेन सार्द्धम्। पिष्टाद्यसन्धानकमाषसूद्गकोशातकीकन्दफलादिकैश्च"। तथा

"मत्स्यमांसगुडसूद्गमूलकैः कुष्ठमावहति सेवितं पयः। शाकजाम्बवरसैश्च सेवितं मारयत्यबुधमाशु सर्पवत्। स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च। नित्यन्तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः। पुष्णन्ति धातवः सर्वं बलपुष्टिविवर्द्धनम्। क्षीरं गवाजकादेर्मधुरं क्षीरं नवप्रसूतानाम्। रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते। मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्। लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम्। गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्। मध्यमवयसां सुखमिदं दुर्बलन्तु दुग्धानाम्। तासां मातृवयादूर्द्ध्वं गुर्विणीनाञ्च यत् पयः। तद्धि लवणं क्षीरं मधुरं पित्तशोषकृत्। दुग्धाम्लं शीतलं स्वादु दध्न्यं वर्णकरं गुरु। वातपित्तापहं दध्न्यं दृंहणं बलवर्द्धनम्" राजनि०।

दुग्धतालीय न० दुग्धस्य तालाय प्रतिष्ठायै हितं छ। १दुग्धाम्ले २क्षीरफेने च मेदि०।

दुग्धपाचन न० दुग्धं पाच्यतेऽनेन पच—करणे ल्युट्। दुग्धपाकपात्रे हारा०।

दुग्धपाषाण पु० दुग्धं निर्यासः पाषाण इव यस्य। (गिरगोदा) ख्याते वृक्षभेदे राजनि०। स्वार्थे क। अत्रैवार्थे।

दुग्धपुष्पी स्त्री दुग्धमिव शुभ्रं पुष्पं मञ्जरी यस्याः गौरा० ङीष्। (दुधमेथा) ख्याते १वृक्षभेदे २सेवकाख्ये शब्दच०।

दुग्धफेन पु०दुग्धस्य फेनो यत्र। शर्करायुक्ते क्षीरक्षीरे राजनि०। गौरा० ङीष्। दुग्धफेनी १क्षुपभेदे स्त्री। स्वार्थे क तत्रार्थे पु०

दुग्धबन्ध पु०दुग्धार्थं बन्धः। दुग्धदोहनार्थं गोबन्धे "पीतदुग्धा तु धेनुर्या संस्थिता दुग्धबन्धकैः" हेमच०।

दुग्धबीजा स्त्री दुग्धमिव बीजं यस्यबीजं यत्र। यावनालाद्यतण्डुलचिपिटे राजनि०।

दुग्धसमुद्र पु०६त०। दुग्धोदके क्षीरसमुद्रे त्रिका०। दुग्धविन्दु प्रभृतयोऽप्यत्र। "लवणजलधिरादौ दुग्धविन्दुश्च तस्मादमृतममृतरश्मिं श्रीश्च यस्मात् बभूव" शि०शि०

दुग्धाङ्ग पु० दुग्धमिव शुभ्राऽङ्गः चिह्नभेदोऽस्य। उपलभेदे शब्दार्थक०। [वृक्षे राजनि०।

दुग्धाञ्जन पु० दुग्धं निर्यासः अञ्जसा इव। दुग्धपाषाण-

दुग्धाम्ल न० दुग्धपक्वमाम्लम्। दुग्धतालीये राजनि०।

दुग्धिका स्त्री दुग्धं क्षीरमिव निर्यासोऽस्त्यस्याः ठन्। (दुधि (क्षीरा) इति ख्याते वृक्षभेदे। "दुग्धिकोष्णा गुरुरूक्षा वातला पुष्टिदायिनी। स्वादुक्षीरा कटुस्निग्धा सृष्टमूत्रमला पटुः। साही विष्टम्भिनी दृष्टा कफकृष्टाभिप्रणुत्" भावप्र०। २गन्धिका इति प्रसिद्धायामुत्तमफलिन्याम् युग्मफलायाम् रत्नमा०।

दुग्धिनिका स्त्री दुग्धमस्त्यस्य इनि दुग्धिनि निर्यासैकायति कै—क ह्रस्वः। रक्तापामार्गे राजनि०।

दुग्धी स्त्री दुग्धमिव निर्यासोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष्। १दुग्धिकायाम् (दुधि) २क्षीरावीक्षायां मेदि०। २दुग्धपाषाणे राजनि०।

दुघ त्रि० दोग्धि—दुह—क ह्रस्व घः। दोहनकर्त्तरि "कामदुघा गौः" शि०कौ०। अस्य कचिदुपपदे एव साधुत्वं नान्यथा। "कामदुघाङ्घ्रिपेख" भाग० ३।२१।१५

दुच्छक पु० दु—सन्तापे सन्न० भावे क्विप् तस्य उपतापाय तच्छिक्षत्वे शक्नोति शक—अच्। सुरानामगन्धद्रव्ये विहाराद्यवकाशके च मेदि०।

दुच्छून पु० दुष्टः श्वा प्रा०स० पृषो०। दुष्टकुक्कुरे "आरेबाधस्व दुच्छुनाम्" यजु०१९।२८ "दुष्टाश्च ते श्वानश्च तेषाम्" वेददी०।

दुच्छून त्रि०दुष्ट उच्छूनः प्रा०स०। पृषो०। दुष्टे उच्छूने ततः भृशा०क्यङ्। दुच्छुनायते बाधते इत्यर्थः। "क्षिणुहि दुच्छुनायसे" ऋ०७।५५।२ "दुच्छुनायसे बाधसे" भा०।

दुडि स्त्री दुडि+उस्य डः। दुल्याम् रायमुकुटः।

दुण्डुक त्रि॰ दुण्डुभ इव कायति कै-क पृषो॰ भलोपः। दुष्टचित्ते शब्दार्थकल्पतरुः।

दुण्डुभ पुंस्त्री॰ दुण्डुभ+पृषो॰। (ढोडा) सर्पभेदे अमरः। "शरमीनां महारोहां प्राशशक्लाकृष्टि दुण्डुभाम्। मज्जामांसमहापङ्कां कबन्धावर्जितोडुपाम्" भा॰द्रो॰१५६अ॰।

दुण्डुभि पु॰ दुन्दुभि+पृषो॰। दुन्दुभिशब्दार्थे "दुण्डुभेर्भूमिकायां च कीटानां कल्प एव च" इति सूत्रस्थाने प्रतिज्ञाय सुश्रुतेन कल्पस्थाने दुन्दुभिस्वनीयाध्याय उक्तः अतस्तयोरेकार्थता।

दुत त्रि॰ टु उपतापे क्त। पीड़िते "मृदुतया दुतया" माघः। दुगतो इत्यस्य तु "दुग्वोर्धश्च" पा॰ मत्वे उदीर्घश्च दून इत्येव सि॰कौ॰।

दुत्थीत्यदवीय पु॰ नील॰ ताजकोक्ते वर्षप्रवेशे योगभेदे "वीर्योन्नितौ कार्यविलग्ननाथौ स्वर्क्षादिकेनान्यतरो युनक्ति। अन्यौ यदा द्वौ बलिनौ तदान्यस्वायतो वीर्यं सुयन्ति सन्तः" तल्लक्षणम्।

दुद पु॰पर्वतभेदे। "शृङ्गवान् मन्दरो नीलो निषधो दुदुदुस्तथा" भा॰अनु॰१६५अ॰। दर्दुरस्तथा इत्येव पाठः साधुः

दुदुह पु॰ अनुवंशे नृपभेदे। "अनोस्तु पुत्रोधर्मोऽभूद्धृतस्तस्यात्मजोऽभवत्। धृतात्तु दुदुहो जज्ञे प्रचेतास्तस्य चात्मजः" हरिवं॰ ३२अ॰

दुद्रुम पु॰ दुष्टो द्रुमः प्रा॰स॰। हरितपत्रे पलाशवृक्षे अमरः।

दुध छिंसने प्रेरणे च भ्वा॰पर॰सक॰सेट्। दोधति अदोधीत् दुदोध दुधितम् "नेशत्तमो दुधितं रोचत" ऋ॰ ४।१।१७ "दुधिः प्रेरण कर्मा" भा॰।

दुधि त्रि॰ दुधिहिंसाकर्मेति भाष्योक्तेः दुध-हिंसायां कि। १हिंसके "स्थूम रुजे दुधयेऽर्क ! ते" ऋ॰६।२६।२ "दुधये हिंसकाय" भा॰ उपचारात् २दुर्धरे च "दुधेर्युक्तस्य द्रवतः सहानसा" ऋ॰ १०।१०२।६ दुधेर्दुर्द्धरस्य" भा॰

दुध्र त्रि॰ दुध-बा॰ रक् दुट् वा धारयति धृ-मूल॰क पृषो॰। १हिंसके २प्रेरके ३दुर्द्धरे ४दुर्द्धर्षे ५दुष्टानां व्यवस्थापके च। "दुध्र आभूषु रामयन्ति दामनि" ऋ॰१।५६।३ "दुध्रः दुष्टानां धर्त्ता व्यवस्थापयिता वा" भा॰ "दुध्रव्रतो महतो आजदुष्यः" ऋ॰१।६४।११ "दुध्रकृत् दुध्रं दुष्टं नान्यैर्दुर्द्धर्षं वा आत्मना" भा॰ "विदन्ते दुध्रवाचः" ऋ॰७।२१।२ "दुध्रवाचः दुर्द्धरवाचः" भा॰। [शब्दर॰।

दुन्दभ पु॰ दुन्द इत्यव्यक्तं भणति भण-ड। दुन्दुभिवाद्ये

दुन्दु पु॰ १वसुदेवे त्रिका॰ २दुन्दुभिवाद्ये शब्दरत्ना॰।

दुन्दुभ पु॰ दुन्दु इत्यव्यक्तं शब्दं भणति भण-ड। दुन्दुभि वाद्ये शब्दर॰। दुन्दुम इति पाठान्तरम्।

दुन्दुभि पु॰ दुन्दु इत्यव्यक्तशब्दं नोभति पूरयति उभ-पूरणे कि शक॰। डहडढक्कायाम् अमरः। "दुन्दुभे ! त्वं सपत्नानां घोषाद् हृदयकम्पनः" दुन्दुभिपूजामन्त्रः "विजय दुन्दुभितामयुरर्णवाः" रघुः "दुन्दुभिश्च तदा देवैस्ताडितो देवकिङ्करैः" भा॰अनु॰ २६श्लो॰। १वरुणे २दैत्यभेदे मेदि॰ ३राक्षसभेदे पु॰शब्दर॰ ४विषे हेमच॰ ५पाणवे स्त्री अमरः स्वर्णशङ्खादिमये चतुःपार्श्वे बिन्दुयुक्ते द्यूतोपकरणे (पाशटी)ख्याते ६पदार्थे स्त्री ७गन्धर्वभेदे स्त्री वा ङीप्। "तेषां समक्षं गन्धर्वी दुन्दुभीं नाम नामतः। शशास वरदोदेवो गच्छ कार्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः। मन्थरा मानुषे लोके कुब्जानामाभवत्तदा" भा॰व॰ २७५ अ॰ दुन्दुभिर्नामासुरभेदश्च मायाविनामासुरपिता तत्कथा रामा॰ कि॰ ६सर्गे "मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः। तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा" "यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम्। प्रतिकालयते वाली मलयं प्रतिपर्वतम्। तदा विवेश महिषो मलयस्य गुहां प्रति। विवेश वाली तत्रापि मलयं तच्छिलासंवृतं" रामा॰ कि॰ ४६ अ॰ ४श्लो॰। "दुन्दुभिं नामेति अत्र दुन्दुभिशब्देन तत्पुत्रो मायाविनामा दानव उच्यते तद्वृत्तान्तस्यैवाग्रे वक्ष्यमाणत्वात् "मायावी नाम तेजस्वी दुन्दुभेः पूर्वजः सुतः" इति प्रोक्तेस्तस्य तत् पुत्रत्वं पितुर्महिषाकारत्वात् तत्पुत्रस्य तदाकारत्वमिति च बोध्यम्" तट्टीका

दुन्दुभिक पु॰ कीटभेदे कीटशब्दे दृश्यम्।

दुन्दुभिनिर्ह्राद पु॰ दुन्दुभे रिव निर्ह्रादोऽस्य। दानवभेदे स्कन्दपु॰। [रूपभेदे।

दुन्दुभिषेण पु॰ दुन्दुभिः सेनायां यस्य सुषमा॰ षत्वम्।

दुन्दुभिस्वन पु॰ ६त॰। १दुन्दुभिशब्दे दुन्दुभेर्वाद्यभेदस्य स्वने यत्र विषचिकित्सायाम्। सुश्रुतोक्ते विषचिकित्साभेदे "अथातो दुन्दुभिस्वनीयमध्यायं व्याख्यास्यामः धवाश्वकर्णतिनिशपलाशपिचुमर्दपाटलिपारिभद्रकाश्मोडुम्बरकरञ्जाटकार्जुनककुभसर्जकपीतनक्तमालातकाङ्कोठामलकप्रियङ्गुकुटजशमीकपित्थाश्मन्तकार्कश्रिरविल्वमहाश्वत्थारुष्करारालुमधुकमधुशिग्रुशाकगोजीयामूर्वातिल्वकेशुरकगोपवल्लारिमेदानां भल्लाद्याहृत्य गवां मूत्रेण क्षारकल्पेन परि-

साध्य विपचेद्द्याच्चात पिप्पलीमूलतण्डुलीयकवराङ्गत्रोचकमञ्जिष्ठाकरञ्जिकाहस्तिपिप्पलीमरिचोत्पलसारिवाविडङ्गमुष्टहपूमानन्तासोमसरलावाङ्गीकगुडूचीकोशाम्बुश्वेतसर्षपवरुणलवणशुक्तनिचुलकवर्द्धमानवञ्जुलपुत्रश्रेणीसप्तपर्णदन्दकैलबालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठहरिद्रावचाचूर्णानि लोहानाञ्च समभागानि ततः क्षारवद्गतपाकमवतार्य लोहकल्के निदध्यात् । अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च । अवगाहर्गनात् स्पर्शात् विधात् सम्प्रतिसुचयते । एष क्षारागदो नाम शर्करास्वश्मरीषुच । अर्शःसु वातगुल्मेषु कासशूलोदरेषु च । अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे । एष सर्वविषार्त्तानां सर्वथैवोपयुज्यते । तथा तत्कल्पस्थानामयं दर्पाङ्कुशोऽगदः" ।

दुन्दुभ्य पु० दुन्दुभौ दानवभेदे विप्रे वाद्यभेदे वा भवः प्रकृतो वा यत् । १रुद्रभेदे "नमो दुन्दुभ्याय वन्याय च" यजु० १६।३५ दुन्दुभवे तद्वादनाय साधु यत् । २दुन्दुभिवादन साधने मन्त्रभेदे "ऐन्द्राः क्षत्रियस्य चक्रदुन्दुभ्याः" कात्या०श्रौ० १४।३।११ "क्षत्रियस्य चक्रारोहणे दुन्दुभेर्वादनमन्त्रा ऐन्द्रा भवन्ति" कर्कः ।

दुन्दुमार पु० धुन्धुमार+पृषो० । धुन्धुमारदेशे शब्दार्थकल्प०।

दुफानिकुत्य न० नी० ता० उक्ते वर्षप्रवेशे योगभेदे तल्लक्षणं तत्रोक्तं यथा "मन्दः शुभोऽन्यादिपदस्थितश्चेत् पटोनशीघ्रेण कृतेत्यशालः । तत्रापि कार्यं भवतीति वाच्यं वक्रादिनिर्वीर्यपदेन चेत् स्यात्" ।

दुम्बक पु० (दुम्बा) इति ख्याते मेषभेदे शब्दार्थचि० ।

दुर्(स्) अव्य०दु–रुक् सुक् वा । १दुष्टे २निन्दायां ३निषेधे ४दुःखे च पुरुषोत्तमः ५ईषदर्थे ६कृच्छ्रार्थे ७क्षये ८असम्पत्तौ ९सङ्कटे च गणर०दुर्जीवनः दुर्बलः दुर्दिनम् "सदुरोरधिकरणे" पा०दुष्कृतम् । क्रियायोगेऽस्योपसर्गता उपसर्गशब्दे १२२१पृ० दृश्यम् ।

दुर् स्त्री दृ–क्विप् । द्वारे "दुरोद्यूतान्यक्षरम्" ऋ०१।१८८।५ "या दुरः यज्ञगृहद्वारः" भा० दुरो मानुषी देव या न" ऋ०५।४५।१ "मानुषीर्मनुष्य सम्बन्धिनीर्दुरः द्वारः" भा०

दुर त्रि० दु–बा० कुर । दातरि "दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इलसतिः" ऋ०१।५३।२ "दुरो दातासि" भा०

दुरक्ष पु० दुष्टोऽक्षः प्रा०स० । १कपटपाशके २दुष्टनेत्रे च "अदर्शे पुरुषस्याक्षि प्रधानमेति ह स्माह याज्ञवल्क्यो दुरक्ष इव ह्यास पूयोहैवास्य दूषीका ते एवैतदनरुक्करोति यदध्यायनक्ति" शत०ब्रा० ३।१।२।१० "दुरक्षमेव अञ्जनेन नाशयति" भा०६व०। दुष्टमक्षि यस्य षच् समा । २तद्युक्ते त्रि० "अश्वः शुक्ल उ दुष्टसुख इवाथोह दुरक्षोभावुकस्तम्" शत०ब्रा०७।३।२।१४ दुष्टोऽक्षो यत्र । ४दुष्टद्यूते

दुरतिक्रम त्रि०दुःखेनातिक्रम्यतेऽसौ दुर्+अति+क्रम–कर्मणि खल् । १दुःखेनातिक्रमणीये २दुर्लङ्घ्ये "सर्वन्तु तपसा साध्यं तपोहि दुरतिक्रमम्" मनुः । ३विष्णौ पु० "समावृत्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः" विष्णु०सं० "भयहेतुत्वादस्याश्च सूर्यादयोनातिक्रामन्तीति दुरतिक्रमः "भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" इति मन्त्रवर्णात्" भा० "तस्याज्ञाया दुर्लङ्घ्यत्वात् तस्य तथात्वम् ।

दुरत्यय त्रि०दुःखेनातीयते दुर्+अति–इ–खल् । १दुरतिक्रमणीये २दुस्तरे च । "स्वर्गमार्गपरिघो दुरत्ययः" रघुः ।

दुरत्येतु त्रि० दुर+अति+इ–कर्मणि–तुन् । दुरतिक्रमणीये "ता भूरि पाशावन्धतस्य सेतू दुरत्येतू रिपवे मर्त्याय" ऋ० ७।६५।३ "दुरत्येतू दुरतिक्रमणीयौ" भा०

दुरदृष्ट न० दुष्टमदृष्टम् प्रा०स०। दुर्भाग्ये पापे ।

दुरद्मनी स्त्री अद–भावे मनिन् वा ङीप् दुष्टा अद्मनिः (नी) प्रा०स०। दुर्भोजने । "पाहि दुरद्मन्या अविषं नः पितुम्" यजु० २।२०। "अदनमद्मनी दुष्टा अद्मनी दुरद्मनी दुर्भोजनम् ततः मां पाहि चतुर्थी पञ्चम्यर्थे" वेददी०।

दुरधिग त्रि० दुःखेनाधिगम्यतेऽसौ दुर+अधि+गम–बा० कर्मणि ड । १दुष्प्राप्ये २दुर्ज्ञेये च । "दिव्याक्षरैर्दुरधिगान्नृप ! विक्रियाभिः" भाग० ३।२३।८ ।

दुरधिगम त्रि० दुःखेनाधिगम्यते दुर्+अधि+गम–कर्मणि खल् । १दुष्प्राप्ये २दुर्ज्ञेये च । "द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान्" भाग०५।२३।३ "इह दुरधिगमैः किञ्चिदेवागमैः" किरा०।

दुरधीत न० दुष्टमधीतम् प्रा०स०। वर्णानां यथास्थानानुच्चारणेन यथास्वरानुच्चारणेन च अध्ययने "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति" दुष्टांश्छन्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्" महाभाष्योक्तेः "यदधीतमविज्ञातं निगदेनैव शब्द्यते । सोऽनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" श्रुतेश्चाध्ययनस्य दुष्टत्वं बोध्यम् । [अध्येतमशक्यो

दुरध्यय त्रि० दुःखेनाधीयते कृच्छ्रार्थे दुर्+अधि+इ–खल् ।

दुरध्व पु॰ दुष्टोऽध्वा प्रा॰स॰अच् समा॰। दुष्टवर्त्मनि अमरः।

दुरन्त त्रि॰दुष्टोऽन्तोऽवसानं यस्य प्रा॰ब॰। १मृगयादूतपानादिषु व्यसनेषु गद्धार्थेचि॰। तानि हि प्रथमं सुखयित्वा अन्ते दुःखाकुर्वन्ति।"व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्" मनुः। दुर्ज्ञेयोऽन्तः परिच्छेदो यस्य। २दुर्ज्ञेये ३गभीरे ४दुरतिक्रमणीये च "न्यत्यति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते" गीतगो॰। अम्। दुरन्तक अमङ्गलमर्यादे ५प्रिये पु॰ "दुर्विज्ञेयो महादेवो दुराधारो दुरन्तकः" भा॰ अनु॰४१अ॰।

दुरन्वय त्रि॰दुःखेनान्वीयतेऽसौ दुर+अनु–इ–कर्मणि खल्। दुःखेनानुगमनीये "दुरन्वयं दुष्प्रधर्षं दुरापं दुरभिक्रमम्। सर्वं वै तपसाध्येति" भा॰अनु॰ १२२अ॰

दुरभिग्रह पु॰दुःखेनाभिगृह्येन गृह्यतेऽसौ दुर्+अभि+ग्रह्। १अपाभागे २दुःखेन ग्राह्ये त्रि॰। ३दुराचभार्यां४कपिकच्छ्वाञ्च स्त्री राजनि॰।

दुरवग्रह त्रि॰ दुःखेनावग्रह्यते निग्रह्यतेऽसौ दुर्+अव+ग्रह–कर्मणि खल्। कष्टेनानिग्राह्ये "संयागतो रिपुर्वस्तु विधेत् दुरवग्रहः" कामन्दकी॰ [स्थायाम्।

दुरवस्था स्त्री दुष्टा अवस्था प्रा॰स॰। दारिद्र्यादौ दुष्टाव-

दुरस्य दुष्ट+क्यच् "दुरस्युर्द्रविणस्युर्धिषणस्यति" पा॰ वेदे नि॰। दुष्टीभवने पर॰अक॰ सेट्। दुरस्यति अदुरस्यीत्। "अग्नि घृतस्यन्तं तिष्ठाभि वोनो दुरस्यति" ऋग्॰१।२८।२ वोने तु दुष्टीयति इत्येव। [ऋग्वेदिको॰।

दुराक पु॰ दुर्+अक+संज्ञायां कर्त्तरि घञ्। म्लेच्छदेशभेदे

दुराचर त्रि॰दुःखेन आचर्यते दुर्+आ+चर–कर्मणि खल्। १कष्टेनाचरणीये "सोऽयं चतुर्णामेतेषामाश्रमाणां दुराचरः" भा॰आ॰६५६श्लो॰। आर्षत्वात् कर्तरि षष्ठी। दुष्टमाचरति अच्। २दुष्टाचारयुक्ते त्रि॰ "समीरणः शोभनतोऽन्यथाचरः। बभञ्जतः भूरुहमतीव कर्षयोः। करोति दोषैव यथा अनाहतः स कर्षणूलो कथितो दुराचरः" सुश्रु॰।

दुराचार पु॰ दुष्ट आचारः प्रा॰स॰। दुष्टे आचारे "प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः। दुराचाररताः सर्वे बलवार्त्तापराङ्मुखाः" अध्यात्मरामा॰। घाञ्भावोऽप्रीष्टा वहनामनादिलत् दुराचारात्" सा॰द॰। दुष्ट आचारो यस्य प्रा॰ब॰। १दुष्टाचारयुक्ते त्रि॰"दृष्टानि दुराचारा घोरकर्माणवक्रियाः" भट्टिः "दुराचारो हि पुरुषो लोके भवति निन्दितः" मनुः।

दुराढ्यङ्कर त्रि॰ दुःखेन आढ्यं क्रियते "कर्तृकर्मणोश्च भूकृञोः" पा॰कर्तृकर्मणोरीषदादिषु च उपपदेषु भूकृञोः खल् स्यात् यथासङ्ख्यं नेष्यते कर्तृकर्मणी धातोरव्यवधानेन प्रयोक्तव्ये ईषदायस्तु(ईष दुः सु)ततः प्राक्। "कर्तृकर्मणोश्च प्रथयोरिति वाच्यम्" वार्त्ति॰ सि॰कौ॰ कर्मणि उपपदे खल् सम्। दुःखेन अनाढ्ये आढ्ये करणीये

दुराढ्यम्भव न॰ दुःखेन अनाढ्येनाढ्येन भूयते दुर्+अव्यर्थे आढ्ये कर्तरि उपपदे भावे खल् सम्। दुःखेन अनाढ्यस्याढ्यभवने।

दुरात्मन् त्रि॰ दुष्ट आत्मा अन्तःकरणं यस्य। दुष्टान्तःकरणे "यस्तु धर्मेण कार्याणि मोहात् कुर्यान्नराधिपः। अचिरात् तं दुरात्मानं वशे कुर्वन्ति शत्रवः"। "यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत्। तस्य तत् वितथं कुर्यात् कन्यादातुर्दुरात्मनः" मनुः।

दुराधन पु॰ धृतराष्ट्रपुत्रभेदे। "अपराजितः पण्डितको विशालाक्षो दुराधनः" भा॰आ॰ ६७अ॰ धृतराष्ट्रपुत्रोक्तौ

दुराधर पु॰ धृतराष्ट्रपुत्रभेदे। अपराजितः कुण्डशायी विशालाक्षो दुराधरः" भा॰आ॰११७अ॰ तत्पुत्रोक्तौ।

दुराधर्ष पु॰ दुष्टान् राजसान् आधर्षति दुर्+आ+धृष अच्। १श्वेतसर्षपे तत्लेपणे हि वेतालादीनामपसर्पणं स्मृतौ दर्शितम्। दुःखेन ईषदपि धर्षयितुमशक्यम् दुर्+आ+धृष–कर्मणि खल्। २धर्षयितुमशक्ये त्रि॰। "जगन्नाथो दुराधर्षो गङ्गां भागीरथीं प्रति" भा॰अनु॰ ५८अ॰ "स प्रभावात् दुराधर्षो महाबलपराक्रमः" भा॰व॰ २०२अ॰। ३कुटुम्बिनीदत्ते स्त्री राजनि॰।

दुराधार पु॰ दुःखेनाधार्यते दुर्+आ–धारि–कर्मणि खल्। दुःखेन १आधारणीये २चिन्तनीये त्रि॰ ३महादेवे पु॰। दुरन्तशब्दे दृश्यम्।

दुरानम त्रि॰ दुःखेनानम्यते दुर्+आ+नम–णिच्–कर्मणि खल्। दुःखेन आनमनीये। "स विचिन्त्य च धनुर्दुरानमम्" रघुः।

दुराप त्रि॰ दुःखेनाप्यते दुर्+आप–खल्। १दुष्प्राप्ये। "दक्षाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" रघुः "अस्त्रं हरादाप्तवता दुरापम्" रघुः सम्बन्धविवक्षया कर्तरि षष्ठी। भावे खल्। २दुष्प्राप्तौ न॰।

दुरारिहा पु॰ दुष्टमियर्त्ति दुर्+ऋ–णिनि दुरारी दुर्गामी असुरः तं हन्ति हन्–क्विप्। विष्णौ "दुरावासो दुरारिहा" विष्णुसं॰ भाष्ये उक्तौ व्युत्पत्तिरत्ना।

दुरारुह पु॰दुःखेनारुह्यतेऽसौ दुर्+आ–रुह–अजर्थे कर्मणि क। १विल्वे २नारिकेलवृक्षे च। ३खर्जूर्यां स्त्री राजनि॰। ४दुरारोहणीये त्रि॰ "सुपूजितः स्यादफलः फलवान् स्याद्दुरारुहः" भा॰आ॰ १४०अ॰

दुरारोह पुंस्त्री॰ दुःखेनारुह्यते दुर्+आ+रुह–खल्। १वरटे स्त्रियां जातित्वात् ङीप्। २श्रीवल्लभ्यां स्त्री राजनि॰ ३शालमलिवृक्षे स्त्री त्रिका॰। ४दुरारोहणीये त्रि॰। "दुरारोहं पदं रात्रां सर्वलोकनमस्कृतम्" कामन्द॰ भावे खल्। ५दुःखेनारोहणे पु॰।

दुरालभा(भ्या)स्त्री दुःखेनालभ्यते लभ्यते वासौ दुर्+आ+लभ–खल् आगमविधेरनित्यत्वात् वा लुम्। (बालकुशी) १लतायाम् राजनि॰। "दुरालभा कटुस्तिक्ता चारोष्णा मधुरास्निका। वातगुल्मप्रमेहार्शोनाशिनी परिकीर्तिता" राजनि॰। "यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा" भावप्र॰ २दुःखदर्शनीयमात्रे त्रि॰। "चूर्णं श्यामा त्रिवृच्चोक्ता कटी सुस्ता दुरालभा" सुश्रु॰ "तीक्ष्णवीर्यास्तु भूतानां दुरालभ्याः सुखस्पृशः" भा॰अनु॰ ९६अ॰। [कल्पतरुः।

दुरालाप पु॰ दुष्टं आलापः प्रा॰स॰। गालिवचने शब्दार्थ-

दुराव्य न॰अव–गत्यादौ भावे क्यत् दुष्टमाव्यं मतिः प्रा॰स॰। दुष्टमतौ "सुवितत्य मनामहेऽतिसेतुं दुराव्यम्" ऋ॰ ६।४१।२ "दुराव्यं दुष्टमतिम्" भा॰।

दुराशय पु॰प्रा॰स॰। १दुष्टे आशये "स्फुटनिर्भिन्नदुराशयोऽधमः" माघः। दुष्टं आशयो यस्य प्रादि॰ब॰। २दुष्टाशययुक्ते त्रि॰ "उपेयिवान् मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य" भाग॰ २।२१।१५

दुराशा स्त्री प्रा॰स॰। दुस्तुरायामाशायाम्।

दुरासद त्रि॰ दुःखेनासद्यतेऽसौ दुर्+आ+सद–कर्मणि खल्। १दुष्प्राप्ये २दुर्गम्ये "त्रिलोचनैकांशतया दुरासदः" "स बभूव दुरासदः परैः" रघुः। "सम्वयानमपि बद्धदुरासदम्" माघः। "पाषाटव्या दुरासदाया दवतः" नलोदयः।

दुरित न॰ दुष्टमितं गमनं नरकादिस्थानप्राप्तिरस्यात्। १पापे २तद्वति त्रि॰ अमरः। "दुरितैरपि कर्तव्यमात्मवान् प्रयतन्ते न्यपस्तनयो हि यत्" रघुः "महानदीप्रवाहमिव सर्वदुरिततापहरम्" काद॰ "कामीवाद्रौपराधः स दहत्व दुरितं शाम्भवोवः शरारिः" अमरुश॰

दुरितदमनी स्त्री दुरितं दम्यतेऽनया दम–करणे ल्युट् ङीप्। १शमीवृक्षे राजनि॰ २पापदमनसाधनमात्रे त्रि॰ स्त्रियां ङीप्।

दुरितारि ह्वत॰। १दुरितनाशके। २जैनानां शासनदेवताभेदे च। "चक्रेश्वर्यजिता बाला दुरितारिश्च कालिका। महाकाली श्यामा शान्ता भृकुटिश्च सुतारका। आकाशा मानवी चण्डा विदिता चाङ्कुशी तथा। कन्दर्पनिर्वाणबला धारिणी धरणप्रिया। नरदत्ताऽथ गान्धार्यम्बिका पद्मावती तथा। सिद्धार्थिका चेति जैन्यः क्रमाच्छासनदेवताः" हेमच॰।

दुरिष्ट न॰ दुष्टमिष्टं यज्ञः। अभिचारार्थे यज्ञे। "देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः। स याति कृमिभक्षे वै क्रमीशे च दुरिष्टवादिति" विष्णुप॰

दुरिष्टि स्त्री दुष्टा इष्टिः प्रा॰स॰। अशास्त्रीये यागे "याहि दुरिष्टे" यजु॰२।२०। पञ्चम्यर्थे चतुर्थी।

दुरीश पु॰ दुष्ट ईशः प्रा॰स॰। निन्दिते प्रभौ

दुरीषणा स्त्री दुष्टा ईषणा प्रा॰स॰। शापे शब्दार्थकल्पतरुः।

दुरु पु॰ पर्वतभेदे। "शङ्खवान् मन्दरो नीलो निषधोदुरुदुर्दरयः" भा॰अनु॰१६५अ॰। दर्दुरयथेत्येव पाठः साधुः।

दुरुक्त न॰ दुष्टमुक्तं प्रा॰स॰। दुष्टवचने "दुरुक्तभाषाभिहितैः प्राप्नुवन्ति सुदुष्कृतम्" भा॰अनु॰५०२श्लो॰।

दुरुच्छेद त्रि॰ दुःखेन उच्छिद्यतेऽसौ दु+उद्+छिद–कर्मणि खल्। १दुर्धरे भावे खल्। २दुःखेन वारणे पु॰।

दुरुत्तर त्रि॰ दुःखेनोत्तीर्यतेऽसौ दुर्+उद्+तॄ–कर्मणि खल्। १दुस्तरे "दुरुत्तरे पङ्क इवान्धकारे" भट्टिः। भावे खल्। २दुःखेन तरणे पु॰। दुष्टमुत्तरम् प्रा॰ स॰। ४दुष्टे उत्तरवाक्ये न॰।

दुरुदाहर त्रि॰ दुःखेनोदाह्रियते दुर्+आ–हृ–कर्मणि खल्। दुःखेन वचनीये "अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः" माघः। प्रा॰स॰। २दुष्टे उदाहरणे पु॰

दुरुधुरा स्त्री जन्मकाले चन्द्रात् द्वितीयद्वादशस्थिते रवि भिन्नग्रहरूपे चान्द्रयोगभेदे तत्स्वरूपभेदफलादिकं दृढबला॰ भट्टोत्पलव्याख्यानयोर्दर्शितं यथा "हित्वार्कं सुनफाऽनफादुरुधुराः स्वान्योभयस्थैर्ग्रहैः शीतांशोः कथितोऽन्यथा तु यद्भिः केमद्रुमोऽन्यैस्त्वसौ। केन्द्रे शीतकरेऽथ वा यदयुते केमद्रुमो नेष्यते। केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न सा। त्रिग्रहरूपाः सुनफाऽनफाख्याः सदृशत्वं दौरुधुरे प्रभेदाः। दृष्ट्यादिकल्पैः क्रमशोऽभिनीय नीते त्रिवृत्तिः पुनरन्यनीतिः" दृढबला॰ "अथ सुनफानफादुरुधुराकेमद्रुमाख्यं योगचतुष्टयं

यार्दुबविक्रीडितेनाह हित्वार्कमिति । अर्कमादित्यं हित्वा त्यक्त्वा यदाऽन्यः कश्चिद्ग्रहो भौमादिकः शीतांशो चन्द्रात् स्वान्योभयस्थो भवति द्वितीयस्थो, द्वादशस्थो, वा द्वितीयद्वादशस्थौ वा द्वौ भवतस्तदा सुनफाऽनफादुरुधुराख्यं योगत्रयं भवति एतदुक्तं भवति अर्कं हित्वा यदाऽन्योग्रहः कश्चिच्चन्द्रात् द्वितीयस्थाने भवति तदा सुनफानामयोगो भवति अथार्कं वर्जयित्वा चन्द्रात् द्वादशगो भवति कश्चित्तदा अनफानामयोगो भवति एवं चन्द्रात् द्वितीयद्वादशगौ ग्रहौ भवतस्तदा दुरुधुरानाम योगो भवति योगत्रयेऽप्यादित्यो यदि द्वितीये द्वादशे वा स्थाने भवति तदा योगभङ्गकृद्भवति । किन्तु योगकर्त्रणां मध्ये न गण्यते । एते योगाः बहुभिराचार्यैः कथिताः अन्यथा तु बहुभिः केमद्रुमः उक्तः । अथास्य योगत्रयस्याभावे बहुभिरार्यैः केमद्रुमाख्योयोगोऽभिहितः एतदुक्तं भवति चन्द्रात् द्वितीये न द्वादशे कश्चिद्ग्रहो भवति तदा केमद्रुमाख्योयोगो भवति अन्यैस्त्वसाविति अन्येषां गर्गादीनामेवं मतं केन्द्रे जन्मलग्नकेन्द्रे शीतकरे चन्द्रे वा भौमादिग्रहयुते भौमादिग्रहविरहितयोरपि, चन्द्राद्द्वितीयद्वादशस्थानयोः केमद्रुमो न भवति,केन्द्रे ग्रहयुते इत्यत्र कैश्चिच्चन्द्रकेन्द्रमेव केवलं व्याख्यातम् तन्नायुक्तम् चन्द्रकेन्द्रे ग्रहयुते चन्द्रमसोऽपि योगोऽन्नभवति शीतकरे ग्रहयुत इत्येतदपार्थकं स्यात् अत्र च भगवान् गार्गिः "व्ययार्थकेन्द्रगश्चन्द्राद्विना भानुं न चेद्ग्रहः । कश्चित् स्यात् वा विना चन्द्रलग्नात् केन्द्रगतोऽथ वा । योगः केमद्रुमोनाम तदा स्याद्ग्रह रहिताः । भवन्ति निन्दिताचारा दारिद्र्यापत्तिसंयुताः" तथा च सारावल्याम् "सुनफानफा दुरुधुराः क्रमेण योगा भवन्ति रविरहितैः । वित्तान्योभयसंस्थैः कैरवबन्धुवाहिकगैः" एतेन "यदा योगाः केन्द्रे ग्रहवर्जितः यथाऽस्य । केमद्रुमोऽतिकष्टः शशिनि च सर्वग्रहाद्दृष्टे" । अन्ये आचार्या नेच्छन्ति वराहमिहिरस्तु पुनरिच्छत्येव अस्मिन्नर्थे तस्यैव तद्वाक्यम् अन्यथा केमद्रुम इति एवमुक्त्वा परमतमुक्तम् अन्यैरसौ इति "केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते" खल्पजातकेऽपि । तेन सुनफानफादुरुधराऽभावे केमद्रुमउक्तः तथा च "रविवर्जं द्वादशगैरनफा चन्द्रद्वितीयगैः सुनफा । उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञकोऽनोऽन्यः" । अत्रयस्यापि सुनफानफादुरुधराभावे केमद्रुमः तथा च "सुनफा स्वनफायोगोदौरुधुरश्चन्द्रसंस्थितश्चेत्तात् । प्राक् पृष्ठतो ग्रहेन्द्रैरुभयगतैस्तेषु रविवर्जम् । केमद्रुमोऽत्र योगोऽन्यथा भवेदात्र गर्हितं जन्म" केचित् केन्द्रनवांशकेष्विति केचिदाचार्याः केन्द्रेषु केचिच्च नवांशकेष्वेतद्योगत्रयं वदन्ति यथा चन्द्राद्द्वितीयद्वादशोभयस्थैः ग्रहैः सुनफाद्या योगाव्याख्याताः तथा कैश्चिच्छ्रुतकीर्तिजीवशर्मप्रभृतिभिः केन्द्रवशान्नवांशकवशाच्च व्याख्याताः एतदुक्तं भवति ताराग्रहैश्चन्द्राच्चतुर्थस्थानस्थैः सुनफा दशमस्थानस्थैरनफा चतुर्थदशमस्थितैः दुरुधुरा अतोऽन्यथा केमद्रुमः तथा च श्रुतकीर्तिः "चन्द्राच्चतुर्थैः सुनफा दशमस्थितैः कीर्तितोऽनफा विहगैः । उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञितोऽन्यथा योगः" केचिन्नवांशकेषु वदन्ति यत्र तत्र राशौ यद्राशिसम्बन्धिनवांशके चन्द्रमा भवति तस्माद्राशेः यो द्वितीयो राशिः तत्र यदि ताराग्रहोभवति तदा सुनफा अथ चन्द्रनवांशकराशेर्द्वादशे ताराग्रहो भवति तदाऽनफा अथ चन्द्रनवांशकराशेः द्वितीये द्वादशे च यदा ग्रहौ भवतस्तदा दुरुधुरा अतोऽन्यथा केमद्रुमः । तथा च चन्द्रनवांशकराशितोद्विद्वादशराशौ यदि ग्रहरहितो भवतः तदा केमद्रुमः तथा च जीवशर्मा "यद्राशिसंस्थे शीतांशुर्नवांशे जन्मनिस्थितः । तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः । द्वादशैरनफा ज्ञेया ग्रहैर्द्विद्वादशस्थितैः । प्रोक्तो दुरुधुरा योगोऽन्यथा केमद्रुमः स्मृतः" । उक्तिः प्रसिद्धा न वा वेत्रामेवंविधं मतं तेषामुक्तिः लोके न प्रसिद्धा तन्मतं दृष्टज्योतिषिकैः नाङ्गीकृतमित्यर्थः । अथ सुनफानफादुरुधराख्यप्रकारत्रानभिन्नत्वमाह त्रिंशत्सङ्ख्या इति सङ्ख्याः सैकाः त्रिंशदेकत्रिंशत् सुनफाख्यायोगाः तावन्त एवानफाख्याः षष्टित्रयमशीत्यधिकं शतं दुरुधुराप्रभेदानाम एषां पूर्ववद्विकल्पगणितम् । इच्छाविकल्पैरित्यादि । एतच्छ्लोके लोष्टुकप्रस्तारः पूर्वमेव नाभसयोगाध्याये व्याख्यातः इच्छाविकल्पैः क्रमशः परिपाट्याऽन्यत्र लोष्टुकमभिनीय नीते निवृत्तिः कार्या पुनः भूयोऽन्यनीतिरित्यन्यत्र स्थानान्तरे चालनम् । अथ सुनफादयो भौमबुधगुरुसितासितैः पञ्चभिर्निष्पाद्यन्ते तस्मादिच्छाविकल्पा पञ्च तेषां न्यासः अत्र प्राग्वत् पूर्वेण पूर्वेण गणितेऽयुक्तस्थानं विनान्यं प्रवदन्ति संख्यामिति कृत्वा जातम् ५ ४ ३ २ १ अथवा प्राग्वत् सैव संख्या जाता । एवं १ २ ३ ४ ५ मेकविकल्पाः पञ्च, द्विविकल्पा दश, त्रिवि-

कल्पा दश, चतुर्विकल्पाः पञ्च पञ्चविकल्पाः एकः, एवमेकत्रिंशत् ५।१०।१०।५।१ तद्यथा द्वितीये चन्द्राङ्गोमः१ बुधः२ बृहस्पतिः३ शुक्रः४ सौरः५ एवमेकविकल्पाः पञ्च। अथ द्विविकल्पाः भौमबुधौ१ भौमजीवौ२ भौमशुक्रौ३ भौमसौरौ४ बुधजीवौ५ बुधशुक्रौ६ बुधसौरौ७ जीवशुक्रौ८ जीवसौरौ९ शुक्रसौरौ१० एवं द्विविकल्पाः दश। अथ त्रिविकल्पाः भौमबुधजीवाः१ भौमबुधशुक्राः२ भौमबुधसौराः३ भौमजीवशुक्राः४ भौमजीवसौराः५ भौमशुक्रसौराः६ बुधजीवशुक्राः७ बुधजीवसौराः८ बुधशुक्रसौराः९ जीवशुक्रसौराः१० एवं त्रिविकल्पा दश १०। अथ चतुर्विकल्पाः भौमबुधजीवशुक्राः१ भौमबुधजीवसौराः२ भौमजीवशुक्रसौराः३ भौमबुधशुक्रसौराः४ बुधजीवशुक्रसौराः५ एवं चतुर्विकल्पाः पञ्च ५। अथ पञ्चविकल्पः भौमबुधजीवशुक्रसौराः१ एवं पञ्चविकल्प एक१। एवमेकत्रिंशत् ३१। सुनफायोगाः उत्पादिता अनेनैव प्रकारेण। द्वादशस्थैः अनफाभेदाः एकत्रिंशत्। अथ दुरुधराविकल्पाः एवं लोष्टुकप्रसारागावात् स्वबुद्ध्या इच्छाविकल्पैः क्रमशोभिनीवेति न्यायेन व्युत्पत्तिः। एको द्वितीये, द्वितीयो (अन्यः) द्वादशे, एको द्वादशे द्वितीयो (अन्यः) द्वितीये, यथा भौमबुधौ१ बुधभौमौ २। भौमजीवौ२ जीवभौमौ४ भौमशुक्रौ५ शुक्रभौमौ६ भौमसौरौ७ सौरभौमौ८ बुधजीवौ९ जीवबुधौ १० बुधशुक्रौ११ शुक्रबुधौ१२ बुधसौरौ१३ सौरबुधौ१४ जीवशुक्रौ१५ शुक्रजीवौ१६ जीवसौरौ१७ सौरजीवौ१८ शुक्रसौरौ१९ सौरशुक्रौ२०। अथैको द्वितीये द्वादशे द्वौ, द्वितीये द्व द्वादशे चैकः तद्यथा भौमः बुधजीवौ१ बुधजीवौ भौमः२। भौमः शुक्रबुधौ३ बुधशुक्रौ, भौमः४। भौमः, बुधसौरौ५, बुधसौरौ, भौमः६। भौमः जीवशुक्रौ७ जीवशुक्रौ, भौमः८। भौमः जीवसौरौ९ जीवसौरौ, भौमः१०। भौमः शुक्रसौरौ११ शुक्रसौरौ, भौमः१२। बुधः भौमजीवौ१३ भौमजीवौ, बुधः १४। बुधः भौमशुक्रौ१५ भौमशुक्रौ, बुध१६। बुधः भौमसौरौ१७ भौमसौरौ, बुधः १८। बुधः जीवशुक्रौ१९ जीवशुक्रौ, बुधः२० बुधः, जीवसौरौ२१ जीवसौरौ, बुधः२२। बुधः शुक्रसौरौ२३ शुक्रसौरौ बुधः२४। जीवः भौमबुधौ२५ भौमबुधौ जीवः२६। जीवः, भौमशुक्रौ२७ भौमशुक्रौ, जीवः२८। जीवः भौमसौरौ २९ भौमसौरौ जीवः३०। जीवः बुधशुक्रौ३१ बुधशुक्रौ जीवः३२। जीवः बुधसौरौ३३ बुधसौरौ, जीवः३४। जीवः शुक्रसौरौ३५ शुक्रसौरौ, जीवः३६। शुक्रः भौमबुधौ३७ भौमबुधौ, शुक्रः३८। शुक्रः भौमजीवौ३९ भौमजीवौ, शुक्रः४०। शुक्रः भौमसौरौ४१ भौमसौरौ, शुक्रः४२। शुक्रः बुधजीवौ४३ बुधजीवौ, शुक्रः४४। शुक्रः बुधसौरौ४५ बुधसौरौ, शुक्रः४६। शुक्रः जीवसौरौ४७ जीवसौरौ शुक्रः ४८। सौरः भौमबुधौ४९ भौमबुधौ सौरः५०। सौरः भौमजीवौ५१ भौमजीवौ, सौरः५२। सौरः भौमशुक्रौ५३ भौमशुक्रौ सौरः५४। सौरः बुधजीवौ५५ बुधजीवौ, सौरः५६। सौरः बुधशुक्रौ५७ बुधशुक्रौ, सौरः५८। सौरः जीवशुक्रौ५९ जीवशुक्रौ सौरः६०। एवमेकत्र जाताः८०। अथैको द्वितीये, द्वादशे त्रयः, त्रयो द्वितीये, द्वादशे चैकः, तद्यथा भौमः बुधजीवशुक्राः१ बुधजीवशुक्राः भौमः२। भौमः बुधजीवसौराः३बुधजीवसौराः, भौमः४। भौमः बुधशुक्रसौराः५ बुधशुक्रसौराः, भौमः६। भौमः जीवशुक्रसौराः७जीवशुक्रसौराः, भौमः८। बुधः भौमजीवशुक्राः९ भौमजीवशुक्राः, बुधः१०। बुधः भौमजीवसौराः११ भौमजीवसौराः बुधः१२। बुधः भौमशुक्रसौराः१३ भौमशुक्रसौराः, बुधः१४। बुधः जीवशुक्रसौराः१५ जीवशुक्रसौराः बुधः१६। जीवः भौमबुधशुक्राः१७ भौमबुधशुक्राः, जीवः१८। जीवः भौमबुधसौराः१९ भौमबुधसौराः, जीवः२०। एकत्र १००। जीवः भौमशुक्रसौराः१ भौमशुक्रसौराः, जीवः२। जीवः बुधशुक्रसौराः३ बुधशुक्रसौराः, जीवः४। शुक्रः भौमबुधजीवाः५ भौमबुधजीवाः, शुक्रः६। शुक्रः भौमबुधसौराः७ भौमबुधसौराः, शुक्रः८। शुक्रः भौमजीवसौराः९ भौमजीवसौराः, शुक्रः१०। शुक्रः बुधजीवसौराः११ बुधजीवसौराः, शुक्रः१२। सौरः भौमबुधजीवाः१३ भौमबुधजीवाः, सौरः१४। सौरः भौमबुधशुक्राः१५ भौमबुधशुक्राः, सौरः१६। सौरः भौमजीवशुक्राः१७ भौमजीवशुक्राः, सौरः१८। सौरः बुधजीवशुक्राः१९ बुधजीवशुक्राः, सौरः२०। एवमेकत्र१२०। अथ द्वितीये एको द्वादशे चत्वारः, चत्वारो द्वितीये द्वादशे चैकः तद्यथा भौमः बुधजीवशुक्रसौराः१ बुधजीवशुक्रसौराः भौमः२। बुधः, भौमजीवशुक्रसौराः३ भौमजीवशुक्रसौराः, बुधः४। जीवः भौमबुधशुक्रसौराः५ भौमबुधशुक्रसौराः, जीवः६। शुक्रः भौमबुधजीवसौराः७ भौमबुधजीवसौराः, शुक्रः८।

बौरः भौमबुधजीवशुक्राः९ भौमबुधजीवशुक्राः, बौरः१०। एवमेकत्र १२०। अथ द्वौ द्वादशे, द्वावेव द्वितीये तद्यथा भौ०बु०,जी०शु०१ जी०शु०,भौ०बु०२। भौ०बु०,जी०सौ०३ जी०सौ०,भौ०बु०४। भौ०बु०, शु०सौ०५ शु०सौ०,भौ०बु०६। भौ०जी०, शु०बु०७ शु०बु०,भौ०जी०८। भौ०जी०, बु० सौ०९ बु०भौ०जी०सौ०१०। भौ०जी०, शु०सौ०११ शु० सौ०, भौ०जी०१२। भौ० शु०, बु०जी०१३ बु०जी०, भौ०शु०१४। भौ०शु०, बु०सौ०१५ बु०सौ०भौ०शु०१६। भौ०शु०, जी०सौ०१७ जी०सौ०, भौ०शु०१८। बु०जी०, भौ०सौ०१९ भौ०सौ०बु०जी०२०। एवमेकत्र १५०। भौ०सौ०,बु०शु०१ बु०शु०,भौ०सौ०२। भौ०सौ०,जी०शु०३ जी०शु०,भौ०सौ०४। बु०जी०,शु०सौ०५ शु०सौ०,बु०जी०६। बु०शु०, जी०सौ०७ जी०सौ०,बु०शु०८। जी०शु०,बु०सौ०९ बु०सौ०जी०शु०१०। एवमेकत्र१६०। द्वौ द्वितीये त्रयो द्वादशे, द्वादशे द्वौ त्रयो द्वितीये तद्यथा भौ०बु०, जी०शु०सौ०१ जी०शु०सौ०, भौ०बु०२। भौ०जी०, बु०शु०सौ०३ बु०शु०सौ०, भौ०जी०४। भौ०शु०, बु०जी०सौ०५ बु०जी०सौ०, भौ०शु०६। भौ०सौ०, बु०जी०शु०७। बु०जी०शु०, भौ०सौ०८। बु०जी०,भौ०शु०सौ०९। भौ०शु०सौ०,बु०जी०१०। एवमेकत्र १७०। बु०शु०, भौ०जी०सौ०१ भौ०जी०सौ०, बु० शु०२। बु०सौ०, भौ०जी०शु०३ भौ०जी०शु०, बु०सौ०४। जी०शु०, भौ०बु०सौ०५। भौ०बु०सौ०, जी०शु०६। जी०सौ०, भौ०बु०शु०७ भौ०बु०शु०, जी० सौ०८। शु०सौ०,भौ०बु०जी०९। भौ०बु०जी०,शु०सौ०१०। एवमेकत्र१८०।

एवं दुरुधुरायोगभेदाः शतमशीत्यधिकं प्रदर्शितम् भट्टो०। "सम्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुरा प्रभवः सुभृत्यः। क्षेमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः" दृष्टव्या।

अस्य पुंस्त्वमपि। "प्रचुरधनसमेतो भोगसौख्यान्वितः स्याद्गजहयरथसुखैर्याहनैरन्वितश्च। बहुवितरणलब्धप्रापिताखण्डवृद्धिर्दुरुधुरजनितो नो भृत्यवर्गैः प्रपूर्णः" जातकपद्धतौ पुंस्त्वोक्तेः। "दधतेव योगसुभयप्रहान्तरस्थितिकारितं दुरुधुराख्यमिन्दुना" माघः।

दुरुफ पु० नी०ता० उक्ते योगभेदे। "तत्वीरकृत्यौ दुरुफस्य योगाः स्युः भोडशैषां कथयामि तद्वत्" प्रश्नुहिग्य "लग्नात् यत्रेऽष्टमेऽन्ये रिपुरिन्दुरगो वक्रगो नीच गामी क्रूरैर्दृष्टोऽस्तगो वा यदि तनयगतो क्रूरमीचारिभस्थैः। अनीचमाग्यस्तमस्तभागे स्थितः शुभोऽन्यादिपदैश्च शून्यः। क्रूरेक्षराफो न स वीर्ययुक्तः कार्यं विधातुं न विभुर्यतोऽसौ। चन्द्रः सूर्याद्द्वादशे दशिकाद्ये षष्ठे नेष्टोऽन्ये तुलायां विशेषात्। राशीशेनाऽष्टमूर्तिर्न सर्वैर्दृष्टो ज्ञेयः शून्यमार्गः पदोनः। शीघ्रो भान्ते नो शुभो लग्नकाले पृष्ठायां वा चन्द्र एवं विचिन्त्यः। शुक्ले भौमः लग्नपक्षेऽर्कसूनुः शुद्धश्चन्द्रं वीक्षते नो शुभोऽसौ। शुक्ले दिवा लग्नदृगोऽर्कसूतः शशाङ्कं लग्ने शुभो निशि समर्क्षगतः प्रपश्येत्। दोषास्तां वितनुतेऽपरथा बहुत्वम् प्रश्नेऽथ वा जनुषि बुद्धिमतोऽनीयम्"।

दुरुह त्रि० दुःखेन जह्यते दुर्+जह–कर्मणि खल्। दुर्वितर्क्ये। "जानीते जयदेव एव शरणः श्लाघ्ये दुरूहद्रुते" गीतगो०।

दुरेवा त्रि० दुर्+इ–बा० व। दुःखेन गम्ये "प्राद्देवीमांवाः सहते दुरेवाः" ऋ०५।२।९। "दुरेवाः दुःखगमनाः" भा०।

दुरोक त्रि० दुष्टं ओकः समवायोऽत्र प्रा०ब०। दुःखेन "दुरोकमभिरायवे शुशोच" ऋ०७।४।२ "दुरोकं दुःखेवम्" भा०

दुरोण पु० यज्ञे निघण्टुः। "नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन्" ऋ०३।१।१८। २यज्ञगृहे च। "काव्यो राजा नेषु क्रत्वा दक्षस्य दुरोणे" यजु०११।७२ "दुरोणे यज्ञगृहे" वेददी० "अपि दिवस्यायुर्दुरोणयुः" ऋ० ८।६०।१९ "दुरोणयुर्यजमानगृहस्य मिन्वयिता" भा० यु–मिन्वने बा० कु। "हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्" कठोप०।

दुरोदर पु० दुष्टम् आ समन्तादुदरमस्य। १द्यूतकारे २शठे मेदि०। ३अक्षे ४द्यूते न० अमरः। "दुरोदरक्षजितां सभीहते नयेन जेतुं जगतीं दुर्योधनः" किरा०। "न मृगयाऽभिरतिर्न दुरोदरम्" रघुः।

दुर्ग पुं न०दुःखेन गम्यतेऽसौ दुर्+गम–बा०ड। (गड़) (केल्ला) प्रसिद्धे राज्ञामाश्रयीये १कोट्टे। तत्स्वरूपभेदादिकं मत्स्यपुराणे २१६ अ० उक्तं यथा

"एवंविधं यथालाभं राजा विषयमावसेत्। तत्र दुर्गं नृपः कुर्यात् प्रयत्नेकतमं बुधः। धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च। वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव!। सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते। दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम्। शत-

श्रीयन्त्रसुस्थैव शतघ्न समाहतम्। गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम्। सपताकङ्गजारूढो येन राजा विशेत् पुरम्। चतस्रश्च तथा तत्र कार्यास्त्वायतवीथयः। एकस्मिंस्तत्र वीथ्यग्रे देवेशस्य भवेद्दृढम्। वीथ्यग्रे च द्वितीये च राजवेश्म विधीयते। धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके; चतुर्थे, त्वथ वीथ्यग्रे गोपुरञ्च विधीयते। आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। कक्षिहीनं त्रिकोणञ्च यवमध्यं तथैव च। आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसन्। अन्यत्तत्र न कर्त्तव्यं प्रयत्नेन विजानता। राज्ञा कोशगृहं कार्यं दक्षिणे राजवेश्मनः। तस्यापि दक्षिणे भागे गजस्थानं विधीयते। गजानां प्राङ्मुखी शाला कर्तव्या वाथ्युदङ्मुखी। आग्नेये च तथा भागे आयुधागारमिष्यते। महानसञ्च धर्मज्ञ! कर्मशालास्तथापराः। गृहं पुरोधसः कार्यं वामतो राजवेश्मनः। मन्त्रिवेदविदाञ्चैव चिकित्साकर्तुरेव च। तत्रैव च तथा भागे कोषागारं विधीयते। गवां स्थानं तथैवात्र तुरगाणां तथैव च। उत्तराभिमुखी श्रेष्ठी तुरगाणां विधीयते। दक्षिणाभिमुखी वाथ परिशिष्टास्तु गर्हिताः। तुरगास्तु तथा धार्याः प्रदीपैः सार्वरात्रिकैः। कुक्कुटान् वानरांश्चैव मर्कटांश्च विशेषतः। धारयेदश्वशालासु सवत्सां धेनुमेव च। अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा। गोगजाश्वादिशालासु ततपुरीषस्य निर्गमः। अस्तं गते न कर्त्तव्यो देवदेवे दिवाकरे। तत्र तत्र यथास्थानं राजा विज्ञाय सारतः। दद्यादावसथस्थानं सर्वेषामनुपूर्वशः। योधानां शिल्पिनाञ्चैव सर्वेषामविशेषतः। दद्यादावसथान् दुर्गे कालमन्त्रविदां शुभान्। गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च। आहरेत् भृशं राजा दुर्गे हि प्रबला रजः। कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते। न वङ्गनामतो दुर्गे विना कार्यं तथा भवेत्। दुर्गे च तत्र कर्त्तव्या नानाप्रहरणान्विताः। सहस्रघातिनो राजंस्तेषु रक्षा विधीयते। दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभुजा। सञ्चयश्चात्र सर्वेषामायुधानां प्रशस्यते। धनुषां क्षेपणीयानान्तोमराणां च पार्थिव!। शराणामथ खड्गानां कवचानां तथैव च। लगुडानां गुडानाञ्च गुडानां परिचैः सह। अश्मनाञ्च प्रभूतानां शङ्कराणां तथैव च। त्रिशूलानां पट्टिशानां कुठाराणाञ्च पार्थिव!। प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम!। परश्वधानां चक्राणां वर्मणाञ्चर्मभिः सह। कुद्दालतुरवेत्राणां पीठकानान्तथैव च। तुषाणाञ्चैव दात्राणामङ्गाराणाञ्च सञ्चयः। सर्वेषां शिल्पिभाण्डानां सञ्चयश्चात्र चेष्यते। यादित्राणाञ्च सर्वेषामौषधीनान्तथैव च। यवसानां प्रभूतानामिन्धनस्य च सञ्चयः। गुडस्य सर्वतैलानां गोरसानान्तथैव च। वसानामथ मज्जानां स्नायूनामस्थिभिः सह। गोचर्मपटहानाञ्च धान्यानां सर्वतस्तथा। तथैवाभ्रपटानाञ्च यवगोधूमयोरपि। रत्नानां सर्ववस्त्राणां लोहानामथशेषतः। कलायमुद्गमाषाणाञ्चणकानां तिलैः सह। तथा च सर्वशस्त्रानां पांशुगोमययोरपि। शणसर्जरसं भूर्जं जतुलाक्षा च टङ्कणम्। राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन। कुम्भाश्वाशीविषैः कार्या व्यालसिंहादयस्तथा। मृगाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम्। स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक्। कर्तव्यानि महाभाग! यत्नेन पृथिवीक्षिता। उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः। सुगुप्तानि पुरे कुर्याज्जनानां हितकाम्यया। जीवकर्षभकाकोलमामलक्याटरूषकान्। शालपर्णीं पृश्निपर्णीं मुद्गपर्णीं तथैव च। माषपर्णीं मदौ द्वौ च सारिवे द्वे बलात्रयम्। वारा श्वसन्ती दृष्टा च दृङ्गती कण्टकारिका। शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका। मधुपर्णी विदार्ये द्वे महाक्षीरा महातपाः। धन्वनः सहदेवाद्वा कटुकैरण्डकं विषः। पर्णी शताह्वा मृद्वीका फलगुण्डर्जूरयष्टिकाः। शुक्रातिशुक्रकाश्मर्यं कलातिच्छत्रवीरणाः। इक्षुरिक्षुविकाराश्च फाणितादयश्च सत्तम!। सिंही च सहदेवी च विश्वेदेवाश्वरोधकम्। मधुकं पुष्पहंसाख्या शतपुष्पा मधूलिका। शतावरीमधूके च पिप्पलं तालमेव च। आक्रगुप्ता कटुफलाख्या दार्विका राजशीर्षकी। राजसर्षप धान्याकमध्यप्रोक्ता तथोत्कटा। कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका। शीतपाकी कुवेराक्षी काकजिह्वोड्डपुष्पिका। पर्वतत्रपुसौ चोभौ गुञ्जातकपुनर्नवे। कसेरुकारुकाश्मीरी बल्या शालूककेसरम्। तुषधान्यानि सर्वाणि शमीधान्यानि चैव हि। क्षीरं क्षौद्रं तथा तक्रं तैलं मज्जा वसा घृतम्। नीपसारिष्टकाक्षोड्वातामसोमवाणकम्। एवमादीनि चान्यानि विज्ञेयो मधुरोगणः। राजा सञ्चिनुयात्सर्वं पुरे निरवशेषतः। दाडिमाम्रातकौ चैव

तिन्तिडीकाम्लवेतसम्। भव्यकर्कन्धुलकुचकरमर्दकरूपकम्। बीजपूरककण्डूरे मालतीराजबन्धुकम्। कोलकद्वयपर्णानि द्वयोराम्लातयोरपि। पारावतं नागरकं प्राचीनोलकमेव च। कपित्थामलकं चुक्रं फलं दन्तशठस्य च। जाम्बवं नवनीतञ्च सौवीरकरुषोदके। सुरासवञ्च मद्यानि मण्डतक्रदधीनि च। शुक्लानि चैव सर्वाणि ज्ञेयमाम्लगणं द्विज!। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। सैन्धवोद्भिदपाठेयपाक्यवासुद्रलोमकम्। कुष्ठसौवर्चलविड्वालकेयं यवाङ्कुरम्। और्वं क्षारं कालभक्ष विज्ञेयो लवणोगणः। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। पिप्पली पिप्पलीमूलचव्यचित्रकनागरम्। कुबेरकं मरीचकं शिग्रुभल्लातसर्षपाः। कुष्ठाजमोदाकिणिही हिङ्गुमूलकधान्यकम्। कारवीकुञ्चिका याव्या सुसुखा काकमाचिका। फणिज्झकोऽथ लशुनं भूस्तृणं सुरसन्तथा। कायस्था च वयस्था च हरितालं मनःशिला। अम्लता च रुदन्ती च रोहिषं कुङ्कुमं तथा। जया एरण्डकाण्डीरं सल्लकी हञ्जिका तथा। सर्वपित्तानि मूलानि प्रायो हरितकानि च। फलानि चैव हि तथा रुक्षैला हिङ्गुपत्रिका। एवमादीनि चान्यानि गणः कटुकसंज्ञितः। राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम! सुस्तं चन्दनह्रीवेरक्षतमालकदारवः। दरिद्रानलदोशीरनक्तमालकदम्बकम्। दूर्वा पटोलकटुका दीर्घत्वक् पत्रकं वचा। किराततिक्तभूतुम्बी विभा चातिविभा तथा। तालीशपत्रतगरसप्तपर्णविकङ्कताः। काकोदुम्बरिका दिव्या तथा चैव सुरोज्झिता। षड्ग्रन्था रोहिणी मांसी पर्पटश्चाथ दन्तिका। रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम्। दुःस्पर्शागुरुणी कामा श्यामाकं गन्धनाकुली। रूपपर्णी व्याघ्रनखं मञ्जिष्ठा चतुरङ्गुला। रम्भा चैवाङ्कुरास्फोता तालास्फोता हरेणुका। वेतसं वेतसस्तुम्बी विषाणी लोध्रपुष्पिणी। मालतीकरवीराख्या हस्तिका जीविता तथा। पर्णिका च गुडूची च स गणस्तिक्तसंज्ञकः। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। अभयामलके चोभे तथैव च विभीतकम्। प्रियङ्गुधातकीपुष्पं मोचाख्या चार्जुनासनाः। अनन्ता स्त्री तुवरिका श्योना च कट्फलं तथा। भूर्जपत्रं शिलापत्रं पाटलापत्रलोमकम्। समङ्गा तिष्टतामूलकाषायैर्नैरिकार्जुनम्। विडुम समधूच्छिष्टं कुम्भिका कुसुदोत्पलम्। अपोशोहस्वराजस्त्रकिंशुकाः शिंशुपा धनी। निवास-

पीलुकासारिशिरीषाः पद्मकं तथा। बिल्वोऽग्निमन्थः श्लक्ष्णश्च श्यामाकश्च वको घनम्। राजादनं करीरञ्च धान्यकं प्रियकस्तथा। कक्कोलाशोकबदराः कदम्बखदिरद्वयम्। एषां पत्राणि सारानि मूलानि कुसुमानि च। एवमादीनि चान्यानि काषायाख्यो मतो रसः। प्रयत्नेन नृपश्रेष्ठो राजा सञ्चिनुयात् पुरे। कीटाश्च मारणे योग्या व्यङ्गतायां तथैव च। वातधूमाश्च मार्गाणां दूषणानि तथैव च। धार्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि पार्थिव! विषाणां धारणं कार्यं प्रयत्नेन महीभुजा। विचित्राश्चाङ्गदा धार्या विषस्य शमनास्तथा। रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्धनाः। कालवद्दिव पुरुषाः पुरे धार्याः प्रयत्नतः। भीतान् प्रमत्तान् कुपितांस्तथैव च विमानितान्। कुभृत्यान् पापशीलांश्च न राज्ञा वासयेत् पुरे। यन्त्रायुधाट्टालचयोपपन्नं समग्रधान्यौषधिसम्प्रयुक्तम्। वणिग्जनैश्च हतमावसेत दुर्गं सुगुप्तं नृपतिः सदैव। मनुरुवाच। रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा। अगदानि समाचक्ष्व तानि धर्मभृतां वर! मत्स्य उवाच। बिल्वाटकी यवक्षारं पाटला वाह्लिकोषणाः। श्रीपर्णी शल्लकीयुक्तो निक्वाथः प्रोक्षणं परम्। सविषं प्रोक्षितं तेन सद्यो भवति निर्विषम्। सर्वसैन्धवपानीयवस्त्रशय्यासनोदकम्। कवचाभरणं क्षत्रं बालव्यजनवेश्मनाम्। शेलुः पाटलातिविषा शिग्रुमूर्वा पुनर्नवा। समङ्गाहपमूलञ्च कपित्थदधयोषितम्। महादन्तशठन्हत् प्रोक्षणं विषनाशनम्। लाक्षाप्रियङ्गुमञ्जिष्ठा समभेला हरेणुका। यष्ट्याह्वा मधुरा चैव बभ्रुपित्तेन कल्पिता। निखनेद्गोविषाणस्थं सप्तरात्रं महीतले। ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत्। संदष्टं सविषं तेन सद्यो भवति निर्विषम्। मनोह्वया शमीपत्रं तुम्बिका श्वेतसर्षपाः। कपित्थकुष्ठमञ्जिष्ठाः पित्तेन श्लक्ष्णकल्पिताः। शुनो गोः कपिलायाश्च शौम्याश्विघ्नोऽपरोगदः। विषजित् परमं कार्यं मणिरत्नञ्च पूर्ववत्। मूषिका जतुका चापि हस्ते बद्धा विषापहा। हरेणुर्मांसी मञ्जिष्ठा रजनी मधुका मधु। अक्षत्वक् सरसं लाक्षा सचित्तं पूर्ववद् भुवि। वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः। श्रुत्वा दृष्ट्वा समाघ्राय सद्यो भवति निर्विषः। लग्नूषणं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम्। रुक्षैला तिष्टतापत्रं विडङ्गानीन्द्रवारुणी। मधुकं वेतसं चौद्रं विडाले च

निधापयेत्। तस्मादुष्णाम्बुना मात्रं प्रागुक्तं योजयेत्ततः। शुक्लं सर्जरसोपेतैः सर्षपैः एलावालुकैः। सुवेगा तस्करपुरैः कुसुमैरर्जुनस्य तु। धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम्। न तत्र कीटा न विषं दर्दुरा न सरीसृपाः। न तत्याकर्मणाश्चापि धूपोऽयं यत्र दह्यते। कल्पितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः। मूर्वैलावालुसरसानाकुलीतण्डुलीयकैः। क्वाथः स विषकार्येषु काकमाचीयुतो हितः। रोचनापत्रनेपालीकुङ्कुमैस्तिलकान् वहन्। विषैर्न बाध्यते स्याच्च नरनारीनृपप्रियः। चूर्णैर्हरिद्रामञ्जिष्ठाकिंशुकीकणनिम्बजैः। दिग्धं निर्विषतामेति गात्रं सर्वविषार्दितम्। शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च। गोमूत्रघृष्टं हृद्गदः सर्वकर्मकरः स्मृतः। एकवीर! महौषध्यः शृणु चातः परं नृप! ब्रह्मा कर्कोटकी राजन्! विष्णुक्रान्ता तथोत्कटा। शतमूली सितानन्दा बला मोचा पटोलिका। सोमाप्रियङ्गा निशा चैव तथा दग्धरुहा च या। स्थले कमलिनी या च विशाली शङ्खमूलिका। घण्टाली हस्तिलगधा गोऽजापर्णी करम्भिका। रक्ता चैव महारक्ता तथा वह्निशिखा च या। कोशातकी नक्तमालं प्रियालश्च सुलोचनी। वारुणी वसुगन्धा च तथा वै गन्धनाकुली। ईश्वरी शिवगन्धा च शामला वंशनालिका! जतुकाली महा श्वेता श्वेता च मधुयष्टिका। वज्रकः पारिभद्रश्च तथा वै सिन्धुवारकाः। जीवानन्दा वसुच्छिद्रा नतनागरकण्टका। नालश्च जाती जातीं च तथा च पटपत्रिका। कार्तस्वरं महानीला कुन्दुरुर्हंसपादिका। मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके। सर्पाक्षी लवली ब्राह्मी विश्वरूपा सुखाकरा। रजापहा दृढिकरी तथा चैव विशल्यदा। पत्रिका रोहिणी चैव नक्तमाला महौषधी। तथामलकवन्दाकं ग्रामचित्रफला च या। काकोली क्षीरकाकोली पीलुपर्णी तथैव च। केशिनी दधिकाली च महानागा शतावरी। गरुडी च तथा वेगा जले कुमुदिनी तथा। स्थले चोत्पलिनी या च महाभूमिलता च या। उन्मादिनी सोमराजी सर्वरत्नानि पार्थिव!। विशेषान्मरकतानि कीटपत्रं विशेषतः। जीवजाताश्च मणयः सर्वे धार्याः प्रयत्नतः। रक्षोघ्नाश्च विषघ्नाश्च कृत्यावेताचनाशनाः। विशेषाच्चर नागाश्च गोखरोष्ट्रसमुद्भवाः। सर्पतित्तिरगोमायुवस्त्रमण्डूकजाश्च ये। सिंहव्याघ्रर्क्षमार्जारद्वीपिवानरसंभवाः। कपिञ्जला गजा वाजिमहिषैणभवाश्च ये। इत्येवमेतैः सकलैरुपेतैर्द्रव्यैश्च सर्वैः स्वपुरं सुरक्षितम्। राजा वसेत्तत्र गृहं सुगुप्तं गुणान्वितं लक्षणसंप्रयुक्तम्। मनुरुवाच "राजारक्षारहस्यानि यानि दुर्गे निधापयेत्। कारयेद्वा महीभर्ता ब्रूहि तत्त्वानि तानि च। मत्स्य उवाच। शिरीषोदुम्बरशमीवीजपूरं घृतप्लुतम्। चुल्लीयोगः कथितो राजन्! मासार्द्धं तु पुरातनैः। कशेरुफलमूलानि इक्षुमूलं तथा बिसम्। दूर्वाक्षीरघृतैर्मण्डः सिद्धोऽयं मासिकः परः। नरं शस्त्रहतं प्राप्तो न तस्य मरणं भवेत्। कल्माषवेणुना तत्र जनयेत्तु विभावसुम्। गृहे त्रिरपसव्यन्तु क्रियते यत्र पार्थिव!। नान्योऽग्निर्ज्वलते तत्र नात्र कार्या विचारणा। कार्पासास्थि भुजङ्गस्य तेन निर्मोचनं भवेत्। सर्पनिर्यासने धूपः प्रयत्नः सततं गृहे। सागद्रुसैन्धवयवा विदुद्दग्धा च मृत्तिका। तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप!। दिशा च दुर्गे रक्षोऽग्नि वाति वाते विशेषतः। विषाश्च रक्षोनृपतिस्तत्र युक्तिं निबोध मे। क्रीडानिमित्तं नृपतिर्धारयेन्मृगपक्षिणः। अन्नं वै प्राक् परीक्षेत वह्नौ चान्यतरेषु च। वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा। नापरीक्षितपूर्वन्तु स्पृशेदपि महामतिः। स्याच्चाशौ वक्त्रवल्गप्रः सोद्वेगश्च निरीक्षते। विषदोऽथ विषं दत्तं यश्च तत्र परीक्षते। स्वस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा। प्रच्छादयति चात्मानं लज्जते त्वरते तथा। भुवं विलिखति शीघ्रं तथा चालयते नृप!। कण्डूयति च मूर्धानं परिलोड्याननन्तथा। क्रियासु त्वरितो राजन्! विपरीतास्वपि ध्रुवम्। एवमादीनि चिह्नानि विषदस्य परीक्षयेत्। समाप्तैर्विचिपेद्वह्नौ तदन्नं त्वरयान्वितैः। इन्द्रायुधसवर्णन्तु रूक्षं स्फोटसमन्वितम्। एकावर्तन्तु दुर्गन्धि भृशमुट्टचटायते। तद्भक्षणेनाञ्जलोः शिरोरोगश्च जायते। सविषेऽन्ने विलीयन्ते न च पार्थिव! मक्षिकाः। निलीनाश्च विपद्यन्ते संस्पृष्टे सविषे तथा। विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम!। विक्रोशति स्वरो याति कोकिलस्य तथा नृप!। गतिः स्खलति हंसस्य भृङ्गराजश्च कूजति। क्रोञ्चो मदमथाप्येति लूकवाकुर्विरौति च। विक्रोशति शुको राजन्! सारिका वसते ततः। चामीकरोऽन्यतो याति मृत्युं कारण्डव स्तथा। मेहते वानरो राजन्! ग्लायते जीवजीवकः। कृष्टरोमा भवेद्भभ्रुः पृषतश्चैव रोदिति। हर्षमायाति च

शिखी विषसन्दर्शनान्नृप ! अन्नञ्च सविषं राजन्निरेण च विपद्यते । तदा भवति निःश्राव्यं पक्षपर्युषितोपमम् । व्यापन्नरसगन्धञ्च चन्द्रिकाभिस्तथायुतम् । व्यञ्जनानान्तु शुष्कत्वं द्रवाणां बुद्बुदोद्भवः । सस्नेहवानां द्रव्याणां जायते फेनमालिता । सस्यराजिश्च ताम्रा स्यात् नीला च पयसस्तथा । कोकिलाभा च मद्यस्य तोयस्य च नृपोत्तम ! धान्याम्बस्य तथा कृष्णा कपिला कोद्रवस्य च । मधुश्यामा च तक्रस्य नीला पीता तथैव च । दुग्धस्योदकसङ्काशा कपोताभा च सक्तुषु । हरिता माक्षिकस्यापि तैलस्य च तथारुणा । फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते । प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा । मृदुता कठिनानां स्यात् मृदूनाञ्च विपर्ययः । सूक्ष्माणां रूपदलनं तथा चैवातिरक्तता । श्याममण्डलता चैव वस्त्राणां वै तथैव च । लोहानाञ्च मणीनाञ्च मलपङ्कोपदिग्धता । अनुलेपनगन्धानां माल्यानाञ्च नृपोत्तम ! । विगन्धता च विज्ञेया तथा राजन् ! जलस्य च । दन्तकाष्ठत्वचः श्यामास्तनुसत्वास्तथैव च । एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम ! । तस्माद्राजा सदा तिष्ठेत् मन्त्रिमन्त्रौषधीगणैः । उक्तैः संरक्षितो राजा प्रमादपरिवर्जकः । प्रजातरोर्मूलमिहावनीशस्तद्रक्षणाद्राष्ट्रसुपैति वृद्धिम् । तस्मात् प्रयत्नेन नृपस्य रक्षा सर्वेण कार्या रविवंशचन्द्र !" दुर्गशुभाशुभलक्षणञ्च कालिकापुराणे ८५ अ० यथा

"दुर्गांस्तु सततं कुर्यात् प्राकाराट्टालतोरणैः । भूमिताचगराद्राजा दुर्गे दुर्गाश्रयं चरेत् । दुर्गं वक्षं नृपाणान्तु नित्यं दुर्गं प्रशस्यते । शतमेको योधयति दुर्गस्थायी धनुर्धरः । शतं दशसहस्राणि तस्मात् दुर्गं प्रशस्यते । जलदुर्गं भूमिदुर्गं इष्टदुर्गं तथैव च । अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् । दुर्गं कार्यं नृपतिना यथायोग्यं स्वदेशतः । दुर्गं कुर्वन् पुरं कुर्यात् त्रिकोणं धनुराकृति । वर्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् । मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् । यथा राक्षसराजस्य लङ्का दुर्गाजिता पुरा । वज्रैः पुरी शोणिताख्या तेजो दुर्गे प्रतिष्ठितम् । यतस्तत् व्यजनाकारमतो भ्रष्टः श्रियो बलिः । सौभाग्यं शाल्वराजस्य नगरं पञ्चकोणकम् । दिवि यद्वर्तते राजंस्तच्च भ्रष्टं भविष्यति । यत्रायोध्याङ्कयं भूप ! पुरमिक्ष्वाकुभूभुजाम् । धनुराकृति तत्रापि ततोऽभूद्विजयप्रदम् । दुर्गभूमौ यजेद्दुर्गं दिक्पालांश्चैव द्वारतः । पूजयित्वा विधानेन जयं भूपः समाप्नुयात् । अतो दुर्गं नृपः कुर्यात् सततं जयवृद्धये" । अधिकं दुर्गकर्मशब्दे दृश्यम् २असुरभेदे तत्कथा काशीख० ७० अ०

"दुर्गोनाम महादैत्यो रुरुदैत्याङ्गजोऽभवत् । यतस्तत्वा तपस्तीव्रं पुंभ्योऽजेयत्वमाप्तवान् । ततस्तेनार्दिता लोका भूर्भुवःस्वर्गता अपि । स्वसात्कृता विनिर्जित्य रणे स्वभुजसारतः !" ३देवीभेदे स्त्री

दुर्गासुरहननात् देव्या दुर्गेति नामाभूत् यथाह तत्रैव ७२अ० "अद्य प्रभृति मे नाम दुर्गेति ख्यातिमेष्यति । दुर्गदैत्यस्य समरे घातनादतिदुर्गमात्" दुर्गासुरस्यैव नामान्तरं दुर्गम इति । "तत्रैवं च वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति" देवीभा० । तत्र-शाकम्बरीप्रादुर्भावयुगे स च वैवस्वतमन्वन्तरे चत्वारिंशत्तमयुगकालः यथोक्तं बृहन्नीतन्त्रे वैवस्वतमन्वन्तरसङ्ख्या "तस्मिन्नेवान्तरे शक्र ! चत्वारिंशत्तमे युगे" यताक्षीशाकम्भर्योरवतारसङ्ख्या तत्रैव दुर्गासुरवधेन दुर्गानामताप्राप्तिरुक्ता । तेन श्वेतवराहकल्पे साऽद्यापि न प्रादुर्भूता कल्पान्तरे तस्याः प्रादुर्भावेण तस्या इदानीमर्चनीयतेति बोध्यम् । दुर्गाशब्दस्यान्यापि निरुक्तिरन्यत्र दर्शिता प्रसङ्गादिहोच्यते यथा

"दुर्गो दैत्ये ४महाविघ्ने ५भववन्धे ६कुकर्मणि । ७शोके ८दुःखे च ९नरके १०यमदण्डे च ११जन्मनि । १२महाभयेऽतिरोगे १३चाप्याशब्दो हन्तृवाचकः । एतान् हन्त्येव या देवी सा दुर्गा परिकीर्तिता" । अपिच "दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः । उकारो विघ्ननाशस्य वाचको वेदसम्मतः । रेफो रोगघ्नवचनोगश्च पापघ्नवाचकः । भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः । स्मृत्युक्तिश्रवणाद् यस्या एते नश्यन्ति निश्चितम् । ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्तिता" । "दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः । दुर्गं नाशयते या तु सा दुर्गा परिकीर्तिता" । विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः । तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता" । अस्याः स्थानं ब्रह्मावैवर्ते भद्रयोर्मध्यभागे सह्याद्रेरीषत्प्राच्यां प्रसिद्धम् । "सर्वस्वरूपिणी शक्तिः सा दुर्गेति च पठ्यते" यथा सप्तशतीमालायाम् "भूतानि दुर्गा भुवनानि दुर्गा नराः स्त्रियश्चापि सुरासुरादिकम् । यद्यद्धि दृश्यं खलु सैव दुर्गा दुर्गासह-

पादपरं न किञ्चिदिति" शब्दार्थचिन्तामणिधृतेषु महाविष्णादिषु च पु० १३गुग्गुलौ राजनि० १४दुर्गसमाने त्रि० १५दुर्गेये १६परमेश्वरे पु० "दुर्लभो दुर्गमो दुर्गो दुरावासो दुराधरः" विष्णुसं०। "अन्तरायप्रतिहतैर्दुराप्यते इति दुर्गे" भा०

दुर्गकर्म्मन् न०दुर्गार्थं दुर्गे वा कर्म कार्यम्। भा०शा०८६अ० उक्ते दुर्गसाधनकर्मभेदे यथा

"तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः। श्रुत्वा तथा विधातव्यमनुष्ठेयञ्च यत्नतः। षड्विधं दुर्गमास्थाय पुरराष्ट्रयोः निवेशयेत्। सर्वसम्पत्प्रधानं यद्वाहुल्यञ्चापि सम्भवेत्। धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च। मनुष्यदुर्गं मृद्दुर्गं वनदुर्गञ्च तानि षट्। यत् पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितम्। दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलम्। विद्वांसः शिल्पिनो यत्र निचयाश्च सुचिन्तिताः। धार्मिकश्च जनो यत्र दाक्षसुत्तमसंस्थितः। अर्जस्विनरनागाश्वं चत्वरापणशोभितम्। प्रसिद्धव्यवहारञ्च प्रशान्तमकुतोभयम्। सुप्रभं शान्तनादञ्च सुप्रशस्तनिवेशनम्। शूराढ्यजनसम्पन्नं ब्रह्मघोषानुनादितम्। समाजोत्सवसम्पन्नं सदा पूजितदैवतम्। यस्यामात्यवलो राजा तत् पुरं स्वयमाविशेत्। तत्र कोषं बलं मित्रं व्यवहारञ्च वर्द्धयेत्। पुरे जनपदे चैव सर्वदोषान्निवर्त्तयेत्। भाण्डागारायुधागारं प्रयत्नेनाभिवर्द्धयेत्। निचयान् वर्द्धयेत् सर्वांस्तथा मन्त्रायुधावयान्। काष्ठलोहतृणाङ्गारदारुवल्लास्थिवेणवान्। मज्जास्नेहवसाक्षौद्रमौषधग्रामसेव च। यन्त्रं सर्वरसन्धान्यमायुधानि शरांस्तथा। चर्मस्नायुं तथा वेत्रं सुञ्जवल्वजवल्कनान्। व्यायामोदपानाश्च प्रभूता सलिलाकराः। निरोढव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः। सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः। मल्लेष्वासाः स्थपतयः सांवत्सरचिकित्सकाः। प्राज्ञा मेधाविनो दान्ता दक्षाः शूरा बहुश्रुताः। कुलीनाः सत्त्वसम्पन्ना युक्ताः सर्वेषु कर्मसु। पूजयेद्धार्मिकान् राजा निग्रहीयादधार्मिकान्। नियुञ्ज्याच्च प्रयत्नेन सर्ववर्णान् स्वकर्मसु। बाह्यमाभ्यन्तरञ्चैव पौरजानपदं तथा। चारैः सुविदितं कृत्वा ततः कर्म प्रयोजयेत्। चरान् मन्त्रञ्च कोषञ्च दण्डञ्चैव विशेषतः। अनुतिष्ठेत् स्वयं राजा सर्वं ज्ञात्वा प्रतिष्ठितम्। उदासीनारिमित्राणां सर्वमेव चिकीर्षितम्। पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा। ततस्तेषां विधातव्यं सर्वमेवाप्रमादतः। भक्तान् पूजयता नित्यं द्विषतश्च निग्रहेण। यष्टव्यं क्रतुभिर्नित्यं दातव्यञ्चाप्यपीडया। प्रजानां रक्षणं कार्यं न कार्यं धर्मबाधकम्। कृपणानाथवृद्धानां विधवानाञ्च योषिताम्। योगक्षेमञ्च वृत्तिञ्च नित्यमेव प्रकल्पयेत्। आश्रमेषु यथाकालं चेलभाजनभोजनम्। सदैवोपहरेद्राजा सत्कृत्याभ्यर्च्य मान्य च। आत्मानं सर्वकार्याणि तापसे राष्ट्रमेव च। निवेदयेत् प्रयत्नेन तिष्ठेत् प्रच्छन्न सर्वदा। सर्वार्थत्यागिनां राजा कुले जातं बहुश्रुतम्। पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः। तस्मिन् कुर्वीत विश्वासं राजा कस्याञ्चिदापदि। तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः। तस्मिन् निधीनादधीत प्रज्ञां पर्यादधीत च। न चापि तीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत्। अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः। अटवीषु परः कार्यः सामन्तनगरेष्वपि। तेषु सत्कारमानाभ्यां संविभागांश्च कारयेत्। परराष्ट्राटवीस्थेषु यथा स्वविषये तथा। ते कस्याञ्चिदवस्थायां शरणं शरणार्थिने। राज्ञे दद्युर्यथाकामं तापसाः संशितव्रताः। एष ते लक्षणोद्देशः सङ्क्षेपेण प्रकीर्त्तितः। यादृशे नगरे राजा स्वयमावसुमर्हति"।

दुर्गकारक पु० दुर्गं करोति वेष्टनेन कृ-ण्वुल्। १दुर्गभेदे। २दुर्गकर्त्तरि त्रि०।

दुर्गत त्रि० दुर्गच्छति दुर्+गम-कर्त्तरि क्त। १दरिद्रे २दैन्यङ्गते च अमरः। "समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतः" भट्टिः। "निधानकुम्भस्य यथैव दुर्गतः" सा०द०।

दुर्गतरणी स्त्री दुर्गं तीर्यतेऽनया तृ-करणे ल्युट् ६त० ङीप्। देवीभेदे "सावित्री दुर्गतरणी वीणा सप्तविधा तथा" भा०स०१३अ०ब्रह्मस्वभावर्णने। २दुर्गतरणसाधने त्रि०

दुर्गति स्त्री दुष्टा गतिः प्रा०स०। १नरके अमरः। २दारिद्र्ये मेदि०। "न दुर्गतिमवाप्नोति स्वर्गलोकञ्च गच्छति" भा०शा० ५५९श्लो० दुःस्थिता गतिरस्य प्रा०ब०। ३तद्युते त्रि०।

दुर्गतिनाशिनी स्त्री दुर्गतिं नाशयति नाशि-णिनि ६त० ङीप्। दुर्गादेव्याम्। "ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः। ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी" ब्रह्मवै०गणे०ख०। २दुर्गतिनाशके त्रि०स्त्रियां ङीप्।

दुर्गन्ध पु० दुःस्थितो गन्धोऽस्य प्रा०ब०। १सौवर्चललवणे हेम०। २दुष्टगन्धयुक्ते त्रि०। प्रा०स०। ३दुष्टे गन्धे "मांस-

मेदोऽस्थिदुर्गन्धा" हरिवं ५३अ० "सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्" सुश्रुतः ।

दुर्गन्धाङ्ग त्रि० दुर्गन्धोऽङ्गे यस्य । पूतिगन्धान्वितदेहके स्त्रियां ङीप् । घ्राता० सौगन्धिकपुष्पाहरणेन तथाकृतेत्युक्तम् यथा "सौगन्धिकस्य हरणात् दुर्गन्धाङ्गः प्रजायते"

दुर्गन्धिन् त्रि० दुर्गन्धोऽस्त्यस्य नित्ययोगे इनि "तेन न कर्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यस्य न प्रवृत्तिः । १दुष्टगन्धयुक्ते त्रि० रायमुकुटः "चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः" मनुः । स्त्रियां ङीप् ।

दुर्गपति पु० ६तत्० । १दुर्गरक्षके दुर्गाध्यक्षभेदे । २दुर्गस्वामिनि च । "वयं जयेम त्वया युजा दर्दृतारो दुर्गपतिर्यथा" भाग० २।४।८

दुर्गपाल पु० दुर्गे दुर्गं वा पालयति पाल-अच् उप०स० । १दुर्गपालके 'यत्रोऽसुराणामपि दुर्गपालो विद्याभिवन्द्यैरभिवन्दिताङ्घ्रिः" भाग० ८।२१।५। २दुर्गरक्षके च

दुर्गपुष्पी स्त्री दुर्गं पुष्पमस्याः जातित्वात् ङीष् । (केशपुष्पा) ख्याते क्षुपभेदे राजनि० ।

दुर्गम पु० दुःखेन गम्यतेऽसौ दुर्+गम-कर्मणि खल् । १दुर्गनामासुरभेदे "दुर्गमाख्यं महासुरम्" देवीमा० । २दुर्गमनीये त्रि० । "कान्तारोवर्त्म दुर्गमम्" अमरः । ३दुर्ज्ञेये च ४परमेश्वरे पु० दुर्गशब्दे दृश्यम् "दुःखेन गम्यते ज्ञायते इति दुर्गमः" भाष्ये तन्नामनिरुक्तिः ।

दुर्गल पु० दुःस्थितो गलो यत्र लोकानाम् । देशभेदे "दुर्गलाः प्रतिमास्याश्च कुलत्थाः कोशलास्तथा" भा० भी० ९अ० जनपदोक्तौ । सोऽभिजनोऽस्य, तस्य राजा वा अण् । दौर्गल पित्रादिकमेष तद्देशवासिनि तद्भूपे च । बहुषु अणो लुक् । दुर्गला इत्येव ।

दुर्गलङ्घन पुंस्त्री० दुर्गं लङ्घ्यतेऽनेन लङ्घि-करणे ल्युट् । लङ्घे हेमच० स्त्रियां जातित्वात् ङीष् ।

दुर्गसंस्कार पु० ६तत्० । प्रतिपक्षस्य युद्धार्थोद्योगे राज्ञा स्वदुर्गस्य भग्नप्रायस्य पुनर्नवीकरणे "अतो दुर्गसंस्कारे आरब्धव्ये किं कौमुदीमहोत्सवेन" इति मुद्रारा०

दुर्गसञ्चर पु० दुर्गं संचर्यतेऽनेन सम्+चर-करणे अप् । (सांको) संक्रमे हेमच० घञ् । दुर्गसंचारोऽप्यत्र अमरटीकायां क्षीरस्वामी

दुर्गसिंह पु० कलापपरिशिष्टकारे विद्वद्भेदे

दुर्गा स्त्री दुर्गशब्दोक्ते १देवीभेदे तच्चरित्रादिकं तत्र दर्शितम् । २नीलीवृक्षे मेदि० । ३अपराजितायाम यज्ञच० ४श्यामाख्यगे राजनि० । ५हिमालयकन्यायाञ्च "सा दुर्गा मेनकाकन्या दैत्यदुर्गतिनाशिनी" ब्रह्मवै०पु०

दुर्गाढ त्रि० दुर्+गाह-कर्मणि क्त । लब्धप्रवेशे "दुर्गाढो नयमार्गोऽयमित्याकुलहृदो जनाः" हरिवं०२२६अ०

दुर्गाध्यक्ष पु० ६तत्० । दुर्गरक्षके सेनाभेदे "अनाकार्यश्च शूरश्च तथा प्राप्तः कुलोद्भवः । दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्वकर्मसु" मत्स्यपु० तल्लक्षणमुक्तम् ।

दुर्गानवमी स्त्री दुर्गाप्रिया तत्पूजाङ्गत्वात् नवमी । कार्तिकशुक्लपक्षीयनवम्याम् । दुर्गाया इयम् अण् ङीप् । दौर्गी तत्पूजयाङ्गनवमीतिथौ "आश्वयुजे दौर्गनवमी दूर्वा चैव सुताशनी । पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्" ति०त० । तत्पूजाविधानादि योगिनीतन्त्रे यथा "कार्तिकेऽसितपक्षे च नवम्यां विशेषतः । उद्बुद्धां तु जगद्धात्रीं पूजयेद् दीपमालया" तन्त्रान्तरे "त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण च (दुं) च । नानाविधिविधानेन गीतवाद्यपुरःसरम् । कार्तिकस्य सिते पक्षे नवम्यां विशेषतः । अत्रैव साधकश्रेष्ठो जपेद्दाव्यमकण्टकम्" कुलिकातन्त्रे "कार्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् । दुर्गां प्रपूजयेद् भक्त्या धर्मकामार्थसिद्धये । शक्तिसङ्गमतन्त्रे "कार्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् । त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् । निर्माय प्रतिमां भक्त्या जगद्धात्र्या विधानतः । पूजयित्वा परदिने प्रतिमां तां विसर्जयेत् । एवं कृत्वा चक्रवर्ती भवेत् साधकसत्तमः । पुत्रपौत्रधनैश्वर्यसंयुताश्च भवेत् पुरी । दासदासीगवैर्युक्तो मुक्तः स्यात् पापसङ्घतात् । विशेषतः वसुयुतां नवमीं प्राप्य साधकः । पूजयित्वा मन्त्रमयीं तां लभते वाञ्छितं फलम्" भविष्ये "मासैश्चतुर्भिर्यत् पुण्यं विधिना०० पूजया चण्डिकाम् । तत् फलं लभते धीर ! नवम्यां कार्तिकस्य च" । अधिकं जगद्धात्रीशब्दे २००४पृ०दृश्यम् ।

दुर्गास्मरण न० "दुर्गा जगदिदं सर्वं दुर्गा सर्वस्य कारणम् । अहञ्च दुर्गेत्येवं यत् तद्दुर्गास्मरणं विदुः" इत्युक्ते चिन्तनभेदे ।

दुर्गाह्व पु० दुर्गा आह्वास्य । भूमिजगुग्गुलौ राजनि० ।

दुर्ग्रभि त्रि० दुःखेन ग्रह्यतेऽसौ दुर्+ग्रह-बा० कर्मणि कि सम्प्रसारणम् नेदे हस्य भः । दुर्ग्राह्ये ग्रहीतुमशक्ये "न शङ्कादविधाय दुर्ग्रभिः" भा० १।१४०।६ "छलस्य यत्प्रवेशे दुर्ग्रभिमनः" १।५२।६ "दुर्ग्रभिमनः

दुर्ग्रहव्यापनः" भा० अम्बू व्याप्तौ वा० वन यक्० ।

दुर्गोत्सव पु० ६त०। दुर्गाया देवीभेदस्य पूजानिमित्ते उत्सवे स च शारदिकः वासन्तिकश्च ।

दुर्ग्रह त्रि० दुःखेन ग्रह्यतेऽसौ दुर्+ग्रह–कर्मणि खल् । १दुःखेन ग्राह्ये २दुर्ज्ञेये ३दुराग्रहे "दुर्गोऽपि दुर्ग्रहाग्यासन् तस्य रोद्धुरपि द्विषाम्" रघुः । ४अपामार्गे स्त्री शब्दार्थचि० ।

दुर्ग्राह्य त्रि० दुर्+ग्रह–कर्मणि ण्यत् । ग्रहीतुमशक्ये दुःखेन ग्राह्ये "जगाह तद्वनूरत्नं दुर्ग्राह्यं दैवतैरपि" हरिवं० ८४अ० ।

दुर्घट त्रि० दुर्+घट–कर्मणि खल् । घटयितुमशक्ये दुःसंपाद्ये । "कोऽन्वर्थो दुर्घट इव भवति सरूपद्वयाभावात्" पाग० ६।९।२४

दुर्घोष पुंस्त्री० दुष्टो घोषोऽस्य । १भल्लूके राजनि० स्त्रियां जातित्वात् ङीष् । २दुष्टशब्दयुक्ते त्रि० स्त्रियां टाप् । प्रा०स० । ३दुष्टे शब्दे पु० ।

दुर्जन पु०दुष्टो जनः प्रा०स० । खलपुरुषे "दुर्जनः परिहर्त्तव्यो विद्यया भूषितोऽपि सः । मणिना भूषितः सर्पः किमसौ न भयङ्करः" चाण० "शास्येत् प्रत्यपकारेण नोपकारेण दुर्जनः" कुमा० "पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्" मनुः श्या०चू० कर्मणि क्यङ् । दुर्जनायते अदुर्जनो दुर्जनो भवतीत्यर्थः ।

दुर्जय त्रि०दुःखेन जीयतेऽसौ दुर्+जि–कर्मणि खल् । १जेतुमशक्ये दुःखेन जेतव्ये । २परमेश्वरे पु० "समाहतो निहन्तात्मा दुर्जयो दुरतिक्रमः" विष्णुसं० । "क्लेशांश्च विविधांस्तांस्तान् सहस्रमेव च दुर्जयम्" मनुः ३शार्ङ्गवीर्यवंश्ये ऽनन्तरूपपुत्रे नृपभेदे कूर्मपु० ।

दुर्जयन्त पु० नृपभेदे । विष्णुपु० ।

दुर्जर त्रि० दुःखेन जीर्यति जॄ–अच् । दुःखेन जीर्यति "ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका" सुश्रु० "कफप्रकोपि तन्माद्यं दुर्जरञ्च विशेषतः" सुश्रु० । २ज्योतिष्मतीलतायाम् स्त्री राजनि० ।

दुर्जात न० दुष्टं जातम् प्रा०स० । व्यसने "दुर्जातबन्धुरयमन्धहरीश्वरोमे" रघुः । २असम्यग्जाते त्रि०मेदि० ३असमञ्जसे त्रि० त्रिका० । "यो न यातयते वैरमसहस्योद्यमः पुमान् । अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः" भा०व० ३५अ० "दुष्कुलेयस्तथा मूढो दुर्जातः शक्र ! दृश्यते" भा०शा० ८।२०श्लो० ।

दुर्जाति त्रि० दुःस्थिता जातिरस्य प्रा०व० । निन्दितवंश्ये "दुर्जातेः सूतपुत्रस्य शकुनेः । सौबलस्य च" भा०उ० ४८ अ० । दुःस्थिता जातिर्जन्म यस्य प्रा०व० । २निन्दितजनिके त्रि० "रुदितशरच्चा दुर्जातीनां बहुस्य दर्शं फलम्" अमरः दुष्टा जातिः प्रा०स० । १दुष्टायां जातौ तत्र भवः अ । दुर्जातीव दुष्टजातिभवे । "दुर्जातयेन येन त्वमीदृशोजनितः सुतः" हरिवं० ८०अ० ।

दुर्जीव त्रि० दुःस्थितो जीवो जीवनोपायो यस्य प्रा०ब० । १परभक्षादुपजीविनि । "यथा च मन्ये दुर्जीवमेवं न सुकरं भुवम्" रामा०२५६अ० । दुर्+जीव–भावे खल् । २निन्दितजीवने न० "सुजीवं नित्यशस्तस्य यः परैरुपजीव्यते । राम ! तस्य तु दुर्जीवं यः परानुपजीवति" रामा०२।१०५।५ दुःखं जीवति दुर्+जीव–अच् । ३परायत्ततया जीविनि त्रि० "सर्वं परवशं दुःखमिति" मनूक्तेः जीवनस्य पराधीनत्वे दुःखहेतुत्वात् तज्जीवनस्य तथात्वमुक्तः ।

दुर्ज्ञेय त्रि० दुःखेन ज्ञायते ज्ञा+कर्मणि यत् । ज्ञातुमशक्ये दुःखेन ज्ञेये "तद्भावचेष्टं भूतेषु दुर्ज्ञेयामकृतात्मभिः" मनुः ।

दुर्ण(र्न)य पु० दुष्टो नयः प्रा०स० यत्वम् । १दुष्टायां नीतौ दुःस्थितो नयोऽस्य प्रा०ब० । २तद्युते त्रि० । "चन्द्रव्योमम इहस्य दुर्णयस्य फलोदयः" हरिवं० ५१०अ० अत्रायत्वमेव न्याय्यम् पूर्वपदात् संज्ञायामेव णत्वविधानात् दुर्+नी–अचि तु अणत्वमेव णत्वविधौ दुरः प्रतिषेधात् ।

दुर्णश त्रि० दुःखेन नश्यति दुर्+नश–अच् वेदे णत्वम् । कृच्छ्रेण नष्टे "परएकेन दुर्णशं चिदर्वाक्" ऋ० ५।११।७ लोके तु दुर्नय इत्येवाणत्वयुक्तः ।

दु(र्ण)र्नामन् स्त्री दुःस्थितं नामास्य पूर्वपदात् संज्ञायां णत्वे प्राप्ते कुम्नादेराकृतिगणत्वात् न णत्वमित्येके वेदे तु णत्वमध्यपाठो दृश्यते । दीर्घकोषिकायां (भिक्षुक) ख्याते १पदार्थे अमरः २अर्शोरोगे च राजनि० तद्रोगस्यातिपातकशेषत्वादकीर्तनीयत्वेन निन्दितत्वात् तथात्वम् "अमी वा यस्ते गर्भं दुर्णामा योनिमाशये" ऋ० १०।१६२।१। "कृणोम्यस्यै भेषजं वजं दुर्णामचातनम्" । "दुर्णामा च सुनामा चोभा संहतमिच्छतः" अथ०८।६।२। वा ङीप् दुर्नामा उपधालोपित्वात् पक्षे ङीप् उपधालोपे दुर्नाम्नी

दुर्दम त्रि० दुःखेन दम्यतेऽसौ दुर्+दम–कर्मणि खल् । दमयितुमशक्ये "सन्तृप्ताश्वकीर्णास्ते न भविष्यन्ति दुर्दमाः" भा०आ०८८अ० । २रोहिणीगर्भजाते वसुदेवात्मजभेदे

"पौरवी रोहिणी नाम बाह्लीकस्यात्मजाऽभवत् । ज्येष्ठा पत्नी महाराज ! दयितानकदुन्दुभेः । लेभे ज्येष्ठं सुतं रामं शारणं शठमेव च । दुर्दमं दमनं शत्रुं पिण्डारकसुशीनरम् । चित्रां नाम कुमारीञ्च रोहिणी-तनयान् दश" हरिवं० ३६अ०

दुर्दमन त्रि०दुःखेन दम्यतेऽसौ बा० युच् दुःखेन दमनं यस्य वा । १दुःखेन दमनीये २जनमेजयवंशजे क्षत्रियुगीये शतानीकात्मजे नृपभेदे । "तिमेर्द्दहद्रथस्तस्माच्छतानीकः सुदासजः । शतानीकाद् दुर्दमनस्तस्यापत्यं महीनरः" भाग० ९। २२।२९

दुर्दर्श त्रि० दुःखेन दृश्यतेऽसौ दुर्+दृश–कर्मणि खल् । द्रष्टुमशक्ये दुःखेन दर्शनयोग्ये । "सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम" गीता । "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाशयं गह्वरेष्ठम् पुराणम्" कठो० वेदे तु दुःखेन दर्शोदर्शनमस्त्येव वाक्यम् "भाषायां शासियुधिदृशि-भ्यस्तव्यो युच्" पा० भाषायामेव युचो विधानात् । भाषायां तु युच् । दुर्दर्शन तत्रार्थे त्रि० "विशेषतस्तात दुर्दर्शनानि परुषाणि" सुश्रु० ।

दुर्दान्त त्रि० दुःखेन दान्तः दमितः दमि–क्त वा नि० । दुःखेन दमनीये १अशान्ते "एनसा युज्यते राजा दुर्दान्त इति चोच्यते" भा०शा०२४अ० । २कलहे ३वृषतरे च राजनि० ४शिवे पु० "दीक्षितोऽदीक्षितः शान्तो दुर्दान्तोदान्तनाशनः" भा० शा० २८६अ० शिवनामोक्तौ

दुर्दिन न०दुःष्टं दिनम् प्रा०स० १मेघाच्छन्ने २दिने अमरः दिनस्य प्रकाशकत्वेन मेघावरणेन तथात्वाभावात् तस्य दुष्टत्वम् । "३घनान्धकारे ४दुष्टो च दुर्दिनं कवयो विदुः" साहः । "दिनस्य अहोरात्रपरत्वेन च रात्रे-रपि दुर्दिनशब्दवाच्यता ।' तत्र घनान्धकारे "अनभि-ज्ञातमिसाणां दुर्दिनेष्वभिसारिकाः" कुमा० वर्षणे "द्विषां विषह्य काकुत्स्थः तत्र नाराचदुर्दिनम्" । "न प्रसेहे निरुद्धार्कमधारावर्षदुर्दिनम्" रघुः ५दुष्ट दिनमात्रे "यदच्युतकथालापरसपीयूषवर्जितम् । तद्दिनं दुर्दिनं प्रोक्तं मेघाच्छन्नं न दुर्दिनम्" शब्दार्थचि०धृतम् ।

दुर्दुरूट त्रि० दुर्+दुल–उत्क्षेपणे कूट पृषो०चिलोपः खस्य रः । १नास्तिके जटा० "कुत्सितानि कुत्सनैः" पा० अस्य समासे परनिपातः मीमांसदुर्दुरूटः नास्तिकमीमांसक इत्यर्थः तस्येश्वरप्रतिषेधेन नास्तिकत्वात् निन्दनीय-त्वेन तद्वाचकशब्दस्य परनिपातः ।

दुर्दृशीक न० दुर्+दृश–बा०कर्मणि ईकक् । दुर्दर्शनीये विषे "अजकाय सुदुर्दृशीकं तिरोदधे" ऋ०७।५०।२ "दुर्दृशीकं सुदुर्दर्शनम् विषम्" भा० ।

दुर्दृष्ट त्रि० दुष्टं दृष्टम् । रागादिदोषेण दृष्टे "दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु । सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणन्दमम्" याज्ञ० "दुर्दृष्टान् स्व-त्याचारप्राप्त धर्मोल्लङ्घनेन रागलोभादिभिरसम्यग्विचारि-तत्वेनाशङ्क्यमानान् व्यवहारान् पुनः स्वयं सम्यक् विचार्य निश्चितदोषाः पूर्वसभ्याः जयिसहिताः प्रत्येकं विवादे यो दमः पराजितस्य तं द्विगुणन्दाप्याः । अप्राप्तजेतृ दण्डविधिपरत्वाद्वचनस्य रागाद्यौभादित्यादिश्लोकेन अपौनरुक्तम् । यदा पुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टता तदा साक्षिण एव दण्ड्याः न जयी नापि सभ्याः यदा तु राजानुमत्या व्यवहारस्य दुर्दृष्टत्वन्तदाऽसौ एव राजसहिताः सभ्यादयो दण्डनीयाः । "पादो गच्छति कर्तरि पादः साक्षिणमृच्छति । पादः सभा-सदः सर्वान् पादो राजानमृच्छति" इति वचनात् । एतच्च प्रत्येकं राजादीनां दोषप्रतिपादनम् न पुनरेकस्यैव पापापूर्वस्य विभागाय, यथोक्तम् "कर्तृसमवायिफल-जननस्वभावत्वादपूर्वस्य" मिता० ।

दुर्दैव न० दुष्टं दैवम् । दुरदृष्टे दुर्भाग्ये पापे

दुर्द्यूत न० दुष्टं द्यूतम् प्रा०स० १कपटद्यूतक्रीडायाम् । "भ्रातरं च विगर्हेत ज्येष्ठं दुर्द्यूतदेविनम्" भा०व०८०अ० "अहं हि तावत् सर्वेषां तेषां दुर्द्यूतदेविनाम्" भा०आश्र०८अ०

दुर्द्रिता स्त्री खण्डितलताभेदे जटा०

दुर्द्रुम पु० दुष्टो द्रुमः प्रा०स० पलाण्डौ राजनि०

दुर्धर त्रि०दुःखेन धार्यते दुर्+धृ–कर्मणि खल् । १नरकभेदे २अघभौमधौ मेदि० ३पारदे ४भल्लातके राजनि० "दुर्धरं दुर्गसङ्घैर्भौ शरैर्निन्ये यमक्षयम्" देवीभा०७स्क०५अध्या-सुरसेनापतिभेदे पु० ६परमेश्वरे पु० "दर्पहा दर्पदो दृप्तो दुर्धरोऽन्यापराजितः" विष्णुसं० "न शक्यधारणा यस्य प्रणिधानादिषु सर्वोपाधिनिर्मुक्तत्वात्तथापि तत्प्रसादतः कैश्चित् दुःखेन हृदये धार्यते जन्मान्तरसहस्रेषु भावना योगात् तस्माद्दुर्धरः "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" भग-वद्वचनात्" भा० "सुभुजो दुर्धरो वाग्मी" विष्णुसं० अस्य चान्या व्युत्पत्तिः भाष्ये दर्शिता यथा "पृथिव्यादीन्यपि लोकधारकाणन्यैर्धारयितुमशक्यानि धारयन्ति केनापि

धारयितुं शक्यत इति दुर्द्धरः। दुःखेन ध्यानसमये सुमुक्षुभिर्हृदये धार्यत इति वा दुर्द्धरः" भा०। तेन व्युत्पत्तिभेदाच्चामभेदोपपत्तेः सहस्रसंख्यापूर्त्तिर्द्रष्टव्या। "वन्ये भटानानिलगन्धदुर्द्धरा" माघः। "दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः" रघुः।

दुर्द्धरीतु पु० दुर्+धृ-बा० कर्मणि ईतुन्। दुर्द्धरणीये। "अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्द्धरीतम्" ऋ०१०।२०।२ "दुर्द्धरीतम् दुर्द्धरणीयम्" भा०

दुर्द्धर्म त्रि०दुःस्थितो धर्मो यस्य प्रा०ब० समासान्तविधेरनित्यत्वात् आर्षे न क्वचित् अनिच्समा०। दुष्टधर्मयुक्ते "कर्कोटकान् वीरकांश्च दुर्द्धर्मांश्च विवर्जयेत्" भा० क० ४४ अ०। लोके तु अनिच्समा०। दुर्द्धर्मन् इत्येव तत्रार्थे

दुर्द्धर्ष त्रि० दुःखेन धृष्यतेऽसौ दुर्+धृष-कर्मणि खल्। १धर्षयितुमशक्ये दुःखेन धर्षणीये "संयिताता सुदुर्द्धर्ष उग्रे तपसि वर्तते" भा०आ०७१अ० भाषायां तु युच् दुर्द्धर्षण तत्रार्थे त्रि०"यद्धि दुर्द्धर्षणो वाली नित्यं समरकर्मसु" रामा०कि० ५५श्लो० २राजभेदे विन्दानुविन्दौ दुर्द्धर्षः सुबाहुः दुष्प्रधर्षणः" भा०आ० ६७अ०

दुर्द्धा स्त्री दुर्+धा-भावे अ। दुष्टधाने। "दुर्द्धां दधाति परमे व्योमन्" ऋ० १०।१०९।४ "दुर्द्धां दुर्धानम्" भा० व्योमन् व्योम्नि सप्तम्या लुकि न नलोपः।

दुर्द्धाव त्रि० दुर्+धाव-खल्। दुःशोधनीये।

दुर्द्धित त्रि०दुर्+धा-कर्मणि क्त वेदे न धाञो हिः। दुष्टं स्थापिते "इदमपे सुधितं दुर्द्धितादधि" ऋ०१।१४०।११ "दुर्द्धितात् दुष्टं स्थापितात्" भा० लोके तु दुर्हित इत्येव तदर्थे त्रि०।

दुर्द्धी त्रि० दुःस्थिता धीर्यस्य प्रा०ब०। १दुष्टबुद्धियुक्ते "अनुत्थानवता चापि दुर्विनीतेन दुर्द्धिया" भा०उ०१२४अ० अत्र "गतिकारकेतरपूर्वस्य यण् नेष्यते" वार्त्ति० न यण्। "प्रादिभ्यो धातुजस्य वा चोत्तरपदलोपः" वार्त्ति०दुःस्थितशब्दस्य उत्तरपदलोपे दुरित्यस्य धीशब्दं प्रति गतित्वं नास्ति किन्तु लुप्तस्थितशब्दं प्रति, अतोऽस्य गतिपूर्वकत्वाभावात् न यण् इति बोध्यम्। दुष्टं ध्यायति दुर्+ध्यै-क्विपि दुर्द्धीशब्दस्य गतिपूर्वकत्वात् यण् दुर्द्ध्यौ इत्यादि। अत्र संयोगपूर्वकत्वेऽपि धात्ववयवसंयोगपूर्वकत्वाभावात् न इयङः प्रवृत्तिरिति बोध्यम्।

दुर्द्धुर् त्रि० दुर्+धुर्व-हिंसने कर्मणि क्विप्। दुःखेन हिंस्ये "दृप्ता गावो न दुर्द्धुरः" ऋ० ५।५६।४ "दुर्द्धुरो दुःखेन हिंस्याः" भा०

दुर्द्धुरूट त्रि०दुर्+धुर्व-ऊट पृषो०। युक्तिं विना गुरुवाक्यमनन्यमाने "मीमांसकदुर्द्धुरूट इति पाठान्तरे तत्त्वबोधनी दुर्द्धुरूढ इति च तत्र पाठान्तरे दुष्टकर्मकर्त्तरि रूटोऽयं शब्द इत्यन्ये।

दुर्नय पु० दुर्+नी-अच्। १नीतिविरुद्धाचरणे दुष्टेष्टायां "अम्बिके! तव पौत्रस्य दुर्नयात् किल भारताः। मानुबन्धा विनङ्क्ष्यन्ति" भा०आ० १२८अ० "संचिन्त्यैव दुर्नयं घोरं सुतानां द्यूतजन्म यत्" भा०व० ५१०अ०।

दुर्नामक पु० दुष्टं नामास्य कप्। अर्शोरोगे अमरः।

दुर्नामारि पु० ६त०। अर्शोघ्ने स्मूरणे राजनि०।

दुर्निमित त्रि० दुर्+नि+मि-क्षेपणे क्त। दुष्टं क्षिप्ते सम्भ्रमादुत्क्षिप्ते "पदे पदे दुर्निमिता गलन्ती" कुमा०

दुर्निमित्त न० दुष्टं निमित्तम् प्रा०स०। भाविरिष्टसूचके शकुनभेदे "दृष्ट्वा तु दुर्निमित्तानि जरासन्धमदर्शयत्" भा०स० २०अ०।

दुर्नियन्तु त्रि० दुर्+नि-यम-तुन्। दुःखेन नियन्तव्ये। "सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः" ऋ० १।१२५।९ "दुर्नियन्तवः दुःखेन नियन्तव्याः" भा०

दुर्निष्प्रपतर न० दुःखेन निष्प्रपतति दुर्+निर्+प्र+पत-अच्। अतिशयेन तत् तरप् वेदे तकारलोपः। दुःखेन निष्क्रान्ततरे। "अतो वै खलु दुर्निष्प्रपतरं भवति" छा० उ०। "दुर्निष्प्रतरमिति तकारएको लुप्तो द्रष्टव्यः" भा०।

दुर्नीत न० दुर्+नी-भावे क्त। नीतिविरुद्धाचरणे "यस्य प्रसादाद् दुर्नीतं प्राप्तास्यमरतर्षभ!" भा०वि० २०अ० दुर्+नी-कर्तरि क्त। २तद्युक्ते त्रि०। भावे क्तिन्। दुर्नीति दुष्टे नये स्त्री।

दुर्बद्ध त्रि० दुष्टं बद्धः। यथादेशाबन्धनात् दुष्टतया बद्धे। "दुर्बद्धेनानुभिन्ने च विज्ञेयं भिन्ननेत्रवत्" सुश्रु०।

दुर्बल त्रि० दुःस्थितं बलमस्य प्रा०ब०। स्वल्पबलान्विते "स्थूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तरान्" "योऽधार्यो दुर्बलेन्द्रियैः" मनुः "तक्रं नैव क्षते दद्यात् नोष्णकाले न दुर्बले" सुश्रु०। २क्लिन्ने २शिथिले च "स्वार्थोपपत्तिं प्रति दुर्बलाशः" रघुः। दुःस्थितं बलं यस्याः प्रा०ब०। ४अम्बु, शिरीषिकायां स्त्री भावप्र०। दुर्बलस्य भावः ष्यञ्। दौर्बल्य न०, तल् दुर्बलता स्त्री; त्व दुर्बलत्व न० स्वल्पबलत्वे

दुर्बाल त्रि० दुष्टो बालोऽस्य। १दुष्टमरोगयुक्ते २स्खलनो

२कुटिलकेशे च मेधातिथिः "जटिलञ्चानधीयानं दुर्बालं कितवं तथा" मनुव्याख्याने तथार्थत्वस्य तेनोक्तत्वात्।

दुर्वीरण न॰ दुष्टं वीरणम् प्रा॰स॰। दुष्टे वीरणे तृणभेदे "श्मश्रूणयौषपक्ष्माणि दुर्वीरणानि जायन्ते" शत॰ब्रा॰ ११।४।१।६ "दुर्वीरणानि दुष्टवीरणानीवेति" लुप्तोपमा भा॰

दुर्बोध त्रि॰ दुःखेन बुध्यते दुर्+बुध–कर्मणि खल्। बोद्धुमशक्ये दुःखेन ज्ञेये "अतिदुर्बोधगिरः गिरोमणेः" गदाधरः "निसर्गदुर्बोधमबोधविक्लवाः" किरा॰

दुर्ब्राह्मण पु॰ दुष्टो ब्राह्मणः प्रा॰स॰। "यस्य वेदश्च वेदी च उत्सन्ना च त्रिपौरुषी। स वै दुर्ब्राह्मणो ज्ञेयः, इति धूर्त्तस्वामिनोक्ते निन्दितब्राह्मणभेदे तस्य आवश्यकवेदपाठविहितहोमयोस्त्रिपुरुषसन्तत्यत्वात् दुष्टत्वम्। "प्रतिग्रहाद्दुर्ब्राह्मणस्य ब्रह्मवर्चसकामस्य" आपस्तम्बः "यो दुर्ब्राह्मणः सोमं पिपासति" तैत्ति॰स॰२।१।१०।१

दुर्भग त्रि॰ दुःस्थितो भगो भाग्यमस्य प्रा॰ब॰। दुष्टभाग्यान्विते "दुर्भगोऽयं जनस्तत्र किमर्थमनुगर्ज्जितः" हरिवं॰१२६अ॰ पतिस्त्रेहशून्यायां (दुया) ख्यातायां २स्त्रियां स्त्री "कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत" भा॰आ॰१६९अ॰। प्रियादिषु पाठात् एतस्मिन् परे पूर्वस्थितस्त्रीलिङ्गशब्दस्य कर्मधारये न पुंवद्भावः।

दुर्भाग्य न॰दुष्टं भाग्यम् प्रा॰स॰। १दुरदृष्टे पापे। दुःस्थितं भाग्यमस्य प्रा॰ब॰। २दुष्टभाग्यान्विते त्रि॰

दुर्भिक्ष अव्य॰ भिक्षायाः अभावः। १भिक्षाया अभावे। दुर्लभा भिक्षा यत्र प्रा॰ब॰। यद्देशे यानि शस्यानि जायन्ते तद्देशे तद्द्रव्यस्यातुत्पत्त्या २तद्द्रव्याल्पाभावसमयभेदे न॰ तत्समयभेदसूचकाय षष्टिसंवत्सरान्तर्गता वर्षभेदाः ज्योति॰ त॰ भविष्यपु॰ उक्ताः संग्रह्य दर्शयन्ते यथा

"राष्ट्रभङ्गञ्च दुर्भिक्षं तस्करैरुपपीडनम्। जानीयाद्विग्रहं घोरं प्रमाथिनि१२ वरानने!। "दुर्भिक्षं जायते घोरं सर्वोपद्रवसंयुतम्। अनावृष्टिः समाख्याता व्यये२० संवत्सरे प्रिये!"। "क्वचिद्वर्षति पर्जन्यो देशे संक्षिप्तमण्डलः। दुर्भिक्षं सर्वरोगैश्च ३४ व्यवहारे विपर्ययः"। "दुर्भिक्षं जायते सर्वा मेदिनी दुष्यति प्रिये!। स्रवे३५ स्रवन्ति तोयानि पीडिता मानवा भुवि"। "दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम्। अनले५० च समाख्याता नात्र कार्य्या विचारणा"। "देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम्। पिङ्गले५१ चारु पद्माक्षि! दुर्भिक्षं नर्मदातटे"। "दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्तते। भवेद्वै मध्यमा वृष्टिर्दुर्मतौ ५५ समुपस्थिते"। "दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीडनम्। पापरोगो भवेद्देवि! रक्षाक्षे५८ऽमरवन्दिनि"!। "रोगो नरणदुर्भिक्षं विरोधोपद्रवाकुलम्। क्रोधे५९ तु विषमं सर्वं समाख्यातं हरप्रिये!"। ५९ "मेदिनी चलते देवि! सर्वभूतं चराचरम्। देशभङ्गस्य दुर्भिक्षं क्षये संक्षीयते प्रजाः। सौराष्ट्रे मालवे देशे दाक्षिणे कोङ्कणे तथा। दुर्भिक्षं जायते घोरं क्षये६० संवत्सरे प्रिये!"। क्वचिदङ्गुतोत्पातेऽपि दुर्भिक्षं भवति यथा

"मांसास्थिनी समादाय श्मशानाद् गृध्रवायसाः। श्वा शृगालोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत्। विकिरन्ति गृहादौ च श्मशानं सा मही भवेत्। चौरेण हन्यते लोकः परचक्रसमागमः। सुग्रामस्य महा घोरो दुर्भिक्षं मरकस्तथा। अङ्गतानि प्रसूयन्ते तत्र देशस्य विद्रवः। अकाले फलपुष्पाणि देशविद्रवकारणम्" इति ज्योत॰त॰। तत्र कालेऽशौचिभ्यो भिक्षाग्रहणे दोषाभाव इति हारलताप्रभृतयः। कौर्मे "सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे। डिम्बाहवे हतानाञ्च विद्युता पार्थिवैर्द्विजैः। सद्यः शौचं समाख्यातं शापादिमरणे तथा" इति शु॰त॰ "दुर्भिक्षयुक्तराष्ट्रे च मृतके सूतकेऽपि वा। नियमाश्च न दुष्यन्ति दानधर्मरतेष्वपि। दीक्षिताश्चाभिषिक्ताश्च व्रततीर्थपरास्तथा। दीक्षाकाले विवाहादौ देवद्रोणयां निमन्त्रिते। पूर्वसङ्कल्पिते चापि नाशौचं मृतसूतके" इति गारुडे २२६अ॰ "शकटः शाकिनी गावो जालमाकन्दनं वनम्। अनूपः पर्वतो राजा दुर्भिक्षे नव वृत्तयः" चाणक्यः "द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। दाताचास्य तु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः"। "एकग्रामे चतुःसाले दुर्भिक्षे राष्ट्रविप्लवे। पतिना नीयमानायाः पुरःशुक्रो न दुष्यति" ज्यो॰ त॰।

दुर्भिद त्रि॰ दुःखेन भिद्यते दुर्+भिद्–कर्मणि वज्रर्थे क। दुर्भेद्ये भेत्तुमशक्ये "गिरिमासाद्य दुर्भिदम्" भा॰द्रो॰ २५अ॰। खल्। दुर्भेद तत्रार्थे त्रि॰ यत्। दुर्भेद्य तत्रार्थे त्रि॰।

दुर्भिषज्य त्रि॰ दुर्+भिषज्–कण्ड्वा॰ यक् कर्मणि यत् यलोपः। १दुःखेन चिकित्स्ये। भावे यत्। दुःखेन २चिकित्सायाम् "दुर्भिषज्यं चास्य भवति यमेव न प्रतिपद्यते" छ॰उ॰ "तमिन्द्रियद्वारदेशं यस्माद्देशाच्छुक्रमादाय

प्रसृतस्तमिन्द्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते । कदाचिद् व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । तत आन्ध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषक्कर्मता हास्य देहाय भवति दुःखेन चिकित्सनीयोऽसौ भवतीत्यर्थः"भा०

दुर्भृत्य पु० दुष्टोऽसन् भृत्यः । भृत्यशब्दे वक्ष्यमाणभृत्यगुणविहीने निन्द्ये भृत्ये तत्स्वरूपं शुक्रनीतिशास्त्रपरिगिष्टे २अ० उक्तं यथा

"विपरीतगुणैरेभिर्भृतको निन्द्य उच्यते । ये भृत्याहीनभृतिका ये दण्डेन प्रकर्षिताः । शठाश्च कातरा लुब्धाः समक्षेऽप्रियवादिनः । मनोव्यसननिन्द्यार्त्ता उत्कोचेष्टाश्च देविनः । नास्तिकादाम्भिकाश्चैव सत्यवाचोऽप्यसूयकाः । ये चापमानिता येऽसद्वाक्यैर्मर्मणि भेदिताः । रिपोर्मित्रसेवकाश्च पूर्ववैरानुबन्धिनः । चण्डाः साहसिका धर्महीना नैते सुसेवकाः । नीचो विवर्द्धितो राज्ञा राज्यनाशाय संभवेत् । वीर्याधिको नीचकुलो दुःसङ्गेन समेधितः । महाजनैः स्पर्द्धमानो हन्ति राष्ट्रं सराजकम् । सदर्थवदनर्थं तु सदर्थं त्वयनर्थवत् । कृत्वा स्वबुद्धिमाहात्म्यात् महान्तमपि निन्दति । वञ्चयित्वान्यमर्वस्वं विश्वासेनाहरत्यनम् । स नीचस्तु गुणान् वक्तुं ब्रह्मापि खलु कातरः । संक्षेपतस्तु कथितं सदसद्भृत्यलक्षणम्" ।

दुर्भ्रातृ पु० दुष्टो भ्राता प्रा०स० । दुष्टे भ्रातरि "दुर्भ्रातुस्तस्य चोग्रस्य राजन् ! दुःशासनस्य च" भा०व० २७अ० तस्य भावः युवा० अण् । दौर्भ्रात्र तद्भावे न०

दुर्मति स्त्री दुष्टा मतिः । विवेकोत्पत्तिप्रतिबन्धकपापेन १मलिनबुद्धौ "निषीदन्नो अपदुर्मतिं जहि" यजु० ११।४७। "देवीरपां मतिं दुर्मतिं बाधमानाः" १७।५४ दुःस्थिता मतिर्यस्य प्रा०ब० । २तद्युक्ते त्रि० "न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्" मनुः दुःस्था मतिरत्र प्रा०७त० । घष्टिवर्षमध्ये ३संवत्सरभेदे "दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते । भवेद्वै मध्यमा वृष्टिर्दुर्मतौ ५५ समुपस्थिते" ज्योति०त० भवि०पु०

दुर्मद त्रि० दुरुत्सितो मदो यस्य प्रा०ब० । उन्मत्ते "दुर्मदं गन्धर्वाप्सरोभ्यः" यजु० ३०,८। "कुमारान् क्रीडमानांस्तान् दृष्ट्वा राजा च दुर्मदान्" भा०आ० १२९अ० । २धृतराष्ट्रपुत्रभेदे "दुर्मदो दुःप्रधर्षश्च विवित्सुर्विकटाननः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दुर्मनस् त्रि० दुष्टं मनः प्रा०स० । २दुष्टे मनसि "प्राप्य दुर्मनसा वीर ! गर्वेण च विशेषतः" रामा०अयो० ३१।२० दुःस्थितं मनोऽस्य प्रा०ब० । २दुःस्थितमनस्के ३व्याकुलचित्ते त्रि० "नापैति हृदयाद्राज्ञो दुर्मनाः स कृशोऽभवत्" भा०आ०१६६ अ० ततो भृशा० च्व्यर्थे क्यङ् सलोपश्च दुर्मनायते । [तस्य नाम" वृ०१०।१२।६।

दुर्मन्तु त्रि० दुर्+मन-तुन् । दुष्टं मन्यमाने "दुर्मन्तवास्त-

दुर्मन्त्रित त्रि० दुर्+मन्त्र-क्त । १दुष्टं मन्त्रिते मन्त्रणाविषये "त्वया दुर्मन्त्रितं द्यूतं सौबलेन च भारत !"भा०उ०१२७ अ० । भावे क्त । २दुष्टमन्त्रणायां न० पराभवो ह्येतन्नये य आसीत् दुर्मन्त्रिते घोषयात्रागतानाम्"भा०उ०११७अ०

दुर्मन्त्रिन् पु० दुष्टा मन्त्री प्रा० स० । मन्त्रिलक्षणगुणरहिते दुष्टे मन्त्रिणि । मन्त्रिलक्षणञ्च अमात्यशब्दे ३२१ पृ० उक्तम् । तद्वैपरीत्ये मन्त्रिणो दुष्टत्वम् । "सन्तापयन्ति कमपथ्यभुजं न रोगाः दुर्मन्त्रिणं कमपयान्ति न नीतिदोषाः" पञ्चत०

दुर्मर त्रि० दुष्टो मरो मृत्युः प्रा०स० । १दुष्टे मृत्यौ दुःखेन म्रियते दुर्+मृ-अच् । २श्वेतदूर्वायाम् स्त्री राजनि० । ३दूर्वायां स्त्री जटाध० दुःखेन मरो मरणं यस्य । ४दुःखेन मृत्युयुक्ते त्रि० "दुर्मरत्वमहं मन्ये नृणां कृच्छ्रेऽपि वर्तताम् । यत्र कर्णं हतं श्रुत्वा नात्यजत् जीवितं नृपः" भा०क०१अ० । ल्युट् । दुर्मरणमप्यत्र । मरणस्य दुष्टत्वं चण्डालादिहतत्वादिना भवति यथोक्तं नि० सि०

अङ्गिराः "चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् । उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति"। षट्त्रिंशन्मतेष्वेवम् ब्राह्मेपि,"शृङ्गिदंष्ट्रिनखव्यालविषवह्निक्रियाजलैः"। व्यालोगजः।"सुदूरात्परिहर्तव्यः कुर्वन् क्रीडां मृतस्तु यः । नागानां विप्रियं कुर्वन् हतश्चाथ विद्युता । निग्रहीतः स्वयं राज्ञा चौर्यादौपेष कुत्रचित् । परदारान् हरन्तश्च द्वेषात्तु पतिभिर्हताः । असमानैश्च सङ्ग्रामैश्चण्डालाद्यैश्च विग्रहम् । कृत्वा तैर्निहतास्तद्वच्चण्डालादीन् समाश्रिताः । शस्त्राग्निगरदाश्चैव पाखण्डा क्रूरबुद्धयः । क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् । गिरिवृक्षप्रपातं च ये कुर्वन्ति नराधमाः । कुशल्यजीविनो ये च स्त्रीनालङ्कारधारिणः । मुखे भगास्तु ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहता ये च ये चापि ब्राह्मणे

र्हताः। महापातकिनो ये च पतितास्ते प्रकीर्तिताः। पतितानां न दाहः स्यान्नान्येष्टिर्नास्थिसञ्चयः। न चाम्बुपातः पिण्डो वा कार्यं श्राद्धादिकं क्वचित्। एतानि पतितानां तु यः करोति विमोहितः। तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा"।

तत्र दुर्मरणनिमित्तं दानादि तत्रोक्तं यथा

"तत्र दुर्मरणनिमित्तं दानादिकार्यं तच्च विश्वप्रकाशादौ दर्शितं यथा

भ्रातातपीये च "व्याघ्रेण निहते विप्रैर्विप्रकन्यां विवाहयेत्। सर्पदष्टे नागबलिर्ज्ञेयः सपत्र काञ्चनः। चतुर्निष्कमितं हैमं गजं दद्याद्गजेहते। राज्ञा विनिहते दद्यात् पुरुषं तु हिरण्मयम्। चौरेण निहते धेनुं वैरिणा निहतं वृषम्। वृषेण निहते दद्याद्वृषया शक्त्या तु काञ्चनम्। शय्यामृते प्रदातव्या शय्या तूलीसमन्विता। निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता। शौचहीने मृते चैव द्विनिष्कं स्वर्णजं हरिम्। संस्कारहीने च मृते कुमारसुपनाययेत्। निष्कत्रयस्वर्णमितं दद्यादश्वं हयाहते। शुना हते क्षेत्रपालं स्थापयेन्निजशक्तितः। सूकरेण हते दद्यान्महिषं दक्षिणान्वितम्। कृमिभिश्च मृते दद्याद्गोधूमान् पञ्चखारिकाः। वृक्षं वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतम्। शकटेन हते दद्याद्वृद्धं सोपस्करान्वितम्। भृगुपातमृते चैव प्रदद्याद्धान्यपर्वतम्। अग्निना निहते कार्यमुदपानं स्वशक्तितः। टाङ्कया निहते चैव कर्तव्या सदने सभा। शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्विताम्। व्यसनेन निहते दद्यात्सवत्सां गां पयस्विनीम्। विषेण च मृते दद्यान्मेदिनीं हेमनिर्मिताम्। उदुम्बरेण च मृते कार्पं कनकनिर्मितम्। मृते जलेन वरुणं हैमं दद्याद्द्विनिष्कजम्। विषूचिकामृते खाडु भोजयेच्च शतं द्विजान्। हतधेनुः प्रदातव्या कण्ठाच्छकवले मृते। कासरोगेण च मृते चान्द्रकृच्छ्रं व्रतं चरेत्। अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत्। शाकिन्यादिग्रहग्रस्ते जपेद्धुदं यथोदितम्। विद्युत्पातेन निहते विद्यादानं समाचरेत्। अन्तरिक्षे मृते कार्यं वेदपारायणं तथा। सच्छास्त्रपुस्तकं दद्यादस्पृश्यस्पर्शतो मृते। पतिते च मृते कुर्यात् प्राजापत्यांस्तु षोडश। मृते चापत्यरहिते लक्षाणां नवतिं चरेत्। एवं कृते विधाने तु विदध्यादौर्ध्वदेहिकम्"। अनन्तभट्टेन तु दुर्मरणप्रकारादतःपरं प्रकारा उक्तास्ते च तत्रैवान्येष्टिपद्धतौ द्रष्टव्याः।

दुर्मर्ष पु॰ दुःखेन मृष्यते दुर्+मृष—कर्मणि खल्। दुःखेन मर्षणीये दुःखेन सहनीये "यच्छ्रुत्या इमं हवं दुर्मर्ष चक्रिया उत" ऋ॰ ८।४५।१८

दुर्मर्षण पु॰ दुर्+मृष—भाषायां खलं बाधित्वा युच्। १दुःखेन सहनीये २विष्णौ पु॰ "अजो दुर्मर्षणः शास्ता" विष्णुसं॰ मर्षितुं दानवादिभिर्न शक्यते इति दुर्मर्षणः" भा॰ २धृतराष्ट्रपुत्रभेदे "दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः" भा॰आ॰६३॰ तत्पुत्रोक्तौ

दुर्म(ल्ली)ल्लिका स्त्री दृश्यकाव्यरूपे उपरूपकभेदे सा॰द॰यथा "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्। प्रस्थानोद्भाण्यकाव्यानि प्रेङ्खणं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशोभाणिकेति च। अष्टादश प्राहुरुपरूपकाणि मनीषिणः। विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" इत्युद्दिश्य तल्लक्षणमुक्तं यथा

"दुर्मल्ली चतुरङ्का स्यात् कैशिकी भारती तथा। अगर्भा नागरनरा न्यूननायकभूषिता। त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडाश्रयो भवेत्। पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्। षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान्। चतुर्थो दशनालिः स्यादङ्कः क्रीडितनायकः। यथा विन्दुमती"।

दुर्मायु त्रि॰ दुष्टान्यायुधानि मिन्वन्ति मि—क्षेपे उण्। दुष्टायुधक्षेपके "दुर्मायवो दुरेवा मर्त्यासः" ऋ॰१।३०।१५

दुर्मित्र पु॰ दुष्टं मित्रम् प्रा॰स॰ अमित्रवत् पुंस्त्वम्। विरोधिलक्षणया १अमित्रे शत्रौ। दुःस्थितं मित्रं यस्य। २दुष्टमित्रके त्रि॰। "दुर्मित्रासः प्रकल्पिनू मिमानाः" ऋ॰७।१८।१५ स्त्रियां टाप्। दुर्मित्राया अपत्यम् बाह्वा॰ इञ्। दौर्मित्रि तदपत्ये पुंस्त्री॰

दुर्मित्रिय त्रि॰ दुर्मित्राय अमित्रत्वाय साधु च। अमित्रत्वेनावस्थिते। "सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु" यजु॰६।२२। "दुर्मित्रिया अमित्रत्वेनावस्थिताः" वेददी॰

दुर्मिलका स्त्री मात्रावृत्तप्रभेदे यथा "द्वात्रिंशन्मात्रं फणिपतिजल्पितसकलविभूषणवृत्तवरम् दशवसुभुवनैर्यतिरत्र प्रभवति कविकुलहृदयानन्दकरम्। यद्यष्टचतुष्कल गणनिर्मितपदमिति दुर्मिलकानामपरं नरपतिवरतोषणवन्दिविभूषणभुवनविदितसलापहरम्"।

दुर्मुख त्रि॰ दुष्टं मुखं तद्व्यापारो यास्य प्रा॰ ब॰। १अग्नौ हेमच॰। २वानरभेदे ३राक्षसभेदे "रक्षःपतिस्तद्बलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तकनरान्तकादीन्" भाग॰९। १०।८ ४नागभेदे मेदि॰। "नागश्रेष्ठो दुर्मुखश्चाम्बरीषः स्वयं राजा वरुणश्चापि राजन्" भा॰मौष॰४अ॰ ५महिषासुरसेनानीभेदे "दुर्द्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम्" देवीमा॰ ६शिवे "नन्दिसुखो भीमसुखः सुमुखोदुर्मुखोऽसुखः" भा॰गा॰२८६अ॰ शिवनामोक्तौ। ६धृतराष्ट्रपुत्रभेदे "दुःसहो दुःशलश्चैव दुर्मुखश्च तथा परः" भा॰आ॰६७अ॰। ७नृपभेदे। "संग्रामजिद्दुर्मुखश्च उग्रसेनश्च वीर्यवान्" भा॰स॰४अ॰ युधिष्ठिरसभागतनृपोक्तौ ९यक्षभेदे ब्रह्मपु॰। १०अप्रियवादिनि त्रि॰। ११रामस्यान्तःपुरचारिणि चरभेदे "गुह्यान्तचारी दुर्मुखः स मया पौरजानपदाग्रपर्षित् प्रयुक्तः" उत्तररामच॰। १२उत्तरद्वारगृहे ६॰वर्षमध्ये १३वर्षभेदे "तुषधान्यक्षयो देवि! सर्वस्यमहार्घता। व्यवहारास्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः" ज्यो॰त॰भवि॰पु॰

दुर्मुहूर्त्त अ॰ निन्दितो मुहूर्तः प्रा॰स॰। अप्रशस्ते मुहूर्त्ते "नक्षत्रेष्वासुरेष्वन्ये दुस्थितौ दुर्मुहूर्तजाः। संपतन्त्यासुरीं योनिं यत्नप्रवर्जिताः" भा॰शा॰१८०अ॰

दुर्मूल्य त्रि॰ दुःस्थितं मूल्यं प्रा॰स॰। १दुःस्थिते मूल्ये २महार्घे यस्य यन्मूल्यं क्रूप्तं तत आधिक्ये मूल्यस्य दुःस्थितत्वमिति बोध्यम् प्रा॰ब॰। २तद्युक्ते त्रि॰

दुर्मेधस् त्रि॰निन्दिता मेधास्य असिच् समा॰। १निन्दितमतौ विवेकासमर्थे २धारणवर्जितबुद्धिके "न किञ्चिदुक्त्वा दुर्मेधास्तस्थौ किञ्चिदवाङ्मुखः" भा॰व॰ १०अ॰ "प्रत्याख्यातोऽपि दुर्मेधाः" २८१अ॰। अर्थे तु समासान्तविधेरनित्यत्वात् कचिन्नासिच् समा॰। "तएव वेदा दुर्मेधैर्धार्य्यन्ते पुरुषैर्यथा" भाग॰ १।४।२५ "अन्नहृष्टानान् निःसत्वान् दुर्मेधान् हृषितायुषः" भाग॰१।४।१८

दुर्मोह पु॰ निन्दितं मुह्यत्यनेन मुह–करणे घञ्। १काकतुण्ड्यां राजनि॰। २काकादन्यां स्त्री शब्दार्थचि॰।

दुर्य्य पु॰ दुरं द्वारं याति या–क दुरि द्वारे भवः यत् वा। १गृहे "देवी दुर्ये आयुर्मा" शत॰ब्रा॰ ३।५।३।१८ "स्वं गोष्ठमावदतं देवी! दुर्ये" यजु॰५।१७। दुर्यशब्दो गृहवाची "दुर्या वै गृहाः" इति श्रुतेः वेददी॰। द्वारे भवेऽयूपे च। "निरेके पञ्चेषु स्तोमो दुर्य्यो न यूपः" ऋ॰१।५१।१४

दुर्यश्स् न॰ निन्दितं यशः प्रा॰स॰। विरोधिलक्षणया १अकीर्त्तौ "त्वदग्रसूचीसचिवः स कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ" नैष॰। दुःस्थितं यशोऽस्य प्रा॰ब॰। २दुष्टयशस्के त्रि॰

दुर्योग पु॰ दुष्टो योगः प्रा॰स॰। १दुर्भाग्यसूचके ग्रहयोगभेदे २दुष्टकौशले च "दासीभूताश्च दुर्योगात् सपत्न्याः पतगोत्तम!" भा॰ आ॰ २७अ॰ तस्या दाश्ये च सर्पाणां यथा कौशलभेदः तथा तत्रैवाध्याये दृश्यः।

दुर्योण न॰ दुष्टा योनिः स्थानमस्यस्य अर्श॰ अच् संघातात् अत्वम्। संग्रामे "नि दुर्योण आवृणङ् मृध्रवाचः" ऋ॰५।२९।१० "दुर्योणः संग्रामः" भा॰ [योधनीये।

दुर्योध पु॰दुःखेन युध्यतेऽसौ दुर्+युध–कर्मणि खल्। दुःखेन

दुर्योधन पु॰ दुर्+युध–भावायां युच्। १धृतराष्ट्रस्य ज्येष्ठे पुत्रे। "कलेरंशस्तु सञ्जज्ञे भुवि दुर्योधनो नृपः!। दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः। जगतो यस्तु सर्वस्य विद्वेष्टा कलिपूरुषः। यः सर्वां घातयामास पृथिवीं पृथिवीपते!। उद्दीपितं येन वैरं भूतानां कलहं महत्" भा॰आ॰६७अ॰ "स जातमात्र एवाथ धृतराष्ट्रसुतो नृप!। रासभारावसदृशं चुक्रोश च ननाद च। तं खराः प्रत्यभाषन्त गृध्रगोमायुवायसाः। यातास्च प्रववुश्चापि दिग्दाहश्चाभवत्तदा। ततस्तु भीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम्। समानीय बहून् विप्रान् भीष्मं विदुरमेव च। अन्यांश्च सुहृदो राजन्! कुरून् सर्वांस्तथैव च। युधिष्ठिरो राजपुत्रो ज्येष्ठोनः कुलवर्द्धनः। प्राप्तः स्वगुणतो राज्यं न तस्मिन् वाच्यमस्ति नः। अयन्त्वनन्तरस्तस्मादपि राजा भविष्यति। एतद्धि ब्रूत मे तथ्यं यदत्र भविता ध्रुवम्। वाक्यस्यैतस्य निधने दिक्षु सर्वासु भारत!। क्रव्यादाः प्राणदन् घोराः शिवाश्चाशिवशंसिनः। लक्षयित्वा निमित्तानि तानि घोराणि सर्वशः। तेऽब्रुवन् ब्राह्मणा राजन्! विदुरश्च महामतिः। यथेमानि निमित्तानि घोराणि मनुजाधिप!। उत्थितानि सुते जाते ज्येष्ठे तु पुरुषर्षभ!। व्यक्तं कुलान्तकरणो भवितैष सुतस्तव। तस्य शान्तिः परित्यागे गुप्तावपनयो महान्। शतमेकोनमप्यस्तु पुत्राणान्ते महीपते!। त्यजेनमेकं शान्त्यर्थं कुलस्येच्छसि भारत!। एकेन कुरु वै क्षेमं कुलस्य जगतस्तथा। त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्। स तथा

विदुरेणोक्तस्तैश्च सर्वैर्द्विजोत्तमैः। न चकार तथा राजा पुत्रस्नेहसमन्वितः" भा०आ०११५अ० २दुर्योधनीये त्रि०

दुर्योनि स्त्री निन्दिता योनिः प्रा०म०। १निन्दितायां जातौ दुःस्थिता योनिरस्य प्रा०ब०। २निन्दितजातिके त्रि० "न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति" मनुः।

दुर्लतिका स्त्री दुष्टा लतैव स्वार्थे क प्रा०स०। १निन्दितायां लतायां २छन्दोभेदे च "वसुभिश्च रसैरथ दिग्भिरुदीरितसद्यतिका विहिता हि सगणाष्टकभूषितसञ्चरणाञ्चितदुर्नय! दुर्लतिकेति तदा। फणभृत्कुलमङ्गलनामकनागवरस्पर्धिता सुकृतां सुखदा यशयन्न! धराधिप! गौडकुलोज्ज्वल! तामवधेहि हृदये सदा" छ०रत्ना०।

दुर्लभ त्रि० दुःखेन लभ्यते दुर्+लभ-कर्मणि खल्। १लब्धुमशक्ये कृच्छ्रेण लभ्ये २दुष्प्राप्ये मेदि० ३अतिप्रशस्ते शब्दर० ४प्रिये हेमच०। "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा" सा०द० "अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः" रामा० "दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः। दुर्लभा सदृशी भार्या दुर्लभः स्वजनः प्रियः" चाणक्य० ५कर्चूरे पु० मेदि० ६कर्चूरे पु० राजनि० ७दुरालभायां श्वेतकण्टकार्यां च स्त्री राजनि०। ८विष्णौ पु० "दुर्लभो दुर्जयो दुर्गः" विष्णुसं०। "दुर्लभया भक्त्या लभ्यत इति दुर्लभः "जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" इति व्यासवचनात् "भक्त्या लभ्यस्त्वनन्ययेति" भगवद्वचनात् भा० "आत्मनोः श्रियमन्विच्छेन्नां मन्येत दुर्लभाम्" मनुः। "मत्परं दुर्लभं मत्वा नूनमावर्जितं मया" रघुः "कुसुमायुधपत्नि! दुर्लभस्तव भर्त्ता न चिराद् भविष्यति" कुमा०।

दुर्ललित न० दुर्+ललि-ईप्मायां भावे क्त। दुष्टेच्छायां दुर्लभवस्तुवाञ्छायाम् (आब्दार) तस्या अन्यलाभाविषयत्वेन दुष्टत्वम्। २दुश्चेष्टिते च "स शशाप ततो रोषान्मुनिर्दुहितरं तव। अतिदुर्ललितैः कन्या शत्रुहस्तं गमिष्यति" हरिवं० १४९ अ०। कर्त्तरि क्त। ३तथाविधेच्छायुक्ते ४दुश्चेष्टान्विते ५चपले च त्रि० "बालस्य मे प्रकृतिदुर्ललितस्य पापः पापं व्यवस्यति समक्षमुदायुधोऽस्मी" वेणी०।

दुर्ललित न० दुर्+ललि-क्त। दुश्चेष्टायाम्।

दुर्लाभ पु० दुर्+लभ-घञ्। दुःखेन लाभे। "भोजदुर्लाभविषयं वडयासुखमागरम्" भा० आ० २०२ अ०)

दुर्लेख्य न० दुष्टं लेख्यम्। गर्हिते लेख्यपत्रे। "देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्" नार० सर्वैरेतैर्विशेषणैर्व्यवहाराक्षमता विवक्षिता। दुष्टं लिप्यक्षरपरिलोपेनावाचकतया वा यल्लेख्यं तत्तु दुर्लेख्यं, नष्टं सर्वथा नाशमुपगतम् उन्मृष्टं मसीदोषादिना अदृश्यलिप्यक्षरम्। यद्यपि दग्धमपि नष्टमेव तथापि कालमाहात्म्यात् शीर्णता नष्टपदेनात्र विवक्षिता। पत्रान्तरकरणस्वार्थिप्रत्यर्थिनोः परस्परसम्मतिपक्षे। विमतौ तु देशान्तरस्थपत्रानयनाय कालो देयोऽध्यापेक्षया व्यवहारो वाऽप्रवर्तनीयः दुर्लेख्यादौ तु सम्मतिपक्षे पत्रान्तरकरणमन्यथा व्यवहार स्थापनवृत्तिरेवेत्यवसेयं साक्षिषु सत्सु तैरेव निर्णयः"। तथाच नारदः "लेख्ये देशान्तरस्थे तु शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो द्रष्टृदर्शनमिति" वीरमि०

दुर्व बधे भ्वा०पर०सक०सेट्। दूर्वति अदूर्वीत्। ईदित्। दूर्त्तः

दुर्वच त्रि० दुःखेन उच्यते दुर्+वच-कर्मणि खल्। दुःखेन कथनीये वक्तुमशक्ये। "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" किरा०। खलर्थयोगे कर्त्तरि षष्ठ्या निषेधेन सम्बन्धविवक्षयाऽत्र षष्ठी" शोभराजसुपेत्याऽहमयोचं दुर्वचं वचः" भा० उ० १७७ अ०।

दुर्वचस् न० दुष्टं वचः प्रा०स०। गर्हिते वचने वचसो दुष्टत्वमप्रियावेदकत्वेन "असह्यं दुर्वचो ज्ञातेर्मेषान्तरितरौद्रवत्" पञ्च० "नारीं जित्वा विहन्त्यन्ये न च जल्पन्ति दुर्वचः" भा०द्रो० १४८ अ०। दुःस्थितं वचोऽस्य प्रा०ब०। २दुष्टवचनवक्तरि त्रि०।

दुर्वराह पुंस्त्री० गर्हितो वराहः प्रा०स०। १गर्हिते वराहे विड्वराहे ग्राम्यशूकरे स्त्रियां जातित्वात् ङीष्। "त्रयो ह वा पशवोऽमेध्या दुर्वराहरेडकः श्वा" शत० ब्रा०१२।४।१।४

दुर्वर्ण न० निन्दितो हेमापेक्षया निकृष्टो वर्णोऽस्य। १रजते अमरः। "दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा" माघः १एलवालुके मेदि०। २निन्द्यवर्णयुक्ते त्रि०। "न तत्र कश्चिद्दुर्वर्णो व्याधितो वापि दृश्यते" भा०व० १९६ श्लो० ४श्वेतकुष्ठिनि तस्य रजतवर्णत्वात् दुर्वर्णत्वम्। "दुर्वर्णः कुनखी कुष्ठी मायावी कुण्डगोलकौ" भा० व० १९९ अ०। दुष्टोवर्णः प्रा०स०। ३निन्द्ये ब्राह्मणादिवर्णे च। "दुर्वर्णोऽस्य भ्रातव्यः" तैत्ति०ब्रा० २।२।४।६। दुष्टे ३अक्षरे पु०।

दुर्वर्त्तु त्रि॰ दुर्+वृ–कर्म्मणि तुन्। दुर्वारे "दुर्वर्त्तुः स्वा भवति भीम कृष्णन्" ऋ॰ ४।३८।८ "दुर्वर्त्तुः दुर्वारः" भा॰।

दुर्वस त्रि॰ दुःखेनोषत्यतेऽत्र दुर्+वस–बा॰ आधारे खल्। कृच्छ्रेण वासयोग्ये वसुमशक्ये "त्रयोदशोऽयं संप्राप्तः कृच्छ्रात् परमदुर्वसः" भा॰वि॰१अ॰।

दुर्वसति स्त्री दुःखेन वसतिः। दुःखेनावस्थितौ "रोगोपसृष्टतनुदुर्वसतिं सुहृद्भिः" रघुः।

दुर्वह त्रि॰ दुःखेनोह्यतेऽसौ दुर्+वह–कर्म्मणि खल्। दुःखेन वहनीये वोढुमशक्ये। "न दुर्वहश्रोणिपयोधरार्त्ताः" कुमा॰ "अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्" रघुः। "दुर्वहो निग्रहो दण्डो हिरण्यवहनस्तथा" भा॰शा॰ ६१६॰श्लो॰।

दुर्वाच् स्त्री गर्हिता वाक् प्रा॰स॰। १निन्द्रे वाक्ये दुःस्थिता वागस्य प्रा॰ब॰। २निन्द्यवचनान्विते त्रि॰ "शय्यासनमलङ्कारमन्नपानमनार्यताम्। दुर्वाग्भरं रतिञ्चैव ददौ स्त्रीभ्यः प्रजापतिः" भा॰अनु॰४॰अ॰ "अतीव जल्पन् दुर्वाचो भवतीह विडेटकः" भा॰आ॰ २॰७६ श्लो॰।

दुर्वाच्य न॰ निन्द्रं वाच्यम् प्रा॰स॰। अपवादे १अकीर्त्तौ "क्रीडानिमित्तं न श्रुत्वा दुर्वाच्यं न भविष्यति" रामा॰सु॰ १५२४श्लो॰। २कष्टेन वाच्ये च।

दुर्वाद पु॰ दुष्टो वादः प्रा॰स॰। अकीर्त्तौ स्तुतिपूर्वकाप्रियवाक्ये १अपवादे जटाध॰ २निन्दितवाक्ये च।

दुर्वान्त न॰ दुष्टं वान्तं प्रा॰स॰। १विधानातिक्रमेण वमने दुःस्थितं वान्तमस्य प्रा॰ब॰। २दुष्टवमनयुक्ते त्रि॰। "दुर्वान्तस्य तु सहसा क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपीडकाज्वराङ्गमर्दनिस्तोदनानि कुर्वन्ति" सुश्रुतः।

दुर्वार त्रि॰ दुःखेन वार्यतेऽसौ दुर्+वारि–कर्म्मणि खल्। दुःखेन वारणीये वारयितुमशक्ये। "किञ्चायमरिदुर्वारः पाणौ पाशः प्रचेतसः" कुमा॰ "सा दुर्वारं कथममपि परित्यागदुःखं विषेहे" रघुः।

दुर्वारण त्रि॰ दुःखेन वारणमस्य। १दुःखेन वारणीये "संरब्धश्च शरानस्यन् द्रोणं दुर्वारणं रणे" भा॰द्रो॰ १९३अ॰। २शिवे पु॰ दुर्विग्रहशब्दे दृश्यम्।

दुर्वारि त्रि॰ दुःखेन वारिर्वारणमस्य। कम्बोजदेशीये योधभेदे "एते दुर्वारयो नाम कम्बोजा यदि ते श्रुताः" भा॰द्रो॰११२अ॰। [दुष्प्रवृत्तौ।

दुर्वार्त्ता स्त्री गर्हा वार्त्ता प्रा॰स॰। अप्रियावेदकवार्त्तायां

दुर्वासना स्त्री दुष्टा वासना प्रा॰स॰। पूरयितुमशक्येच्छायाम्

दुर्वासस् पु॰ मुनिभेदे स च शङ्करांशेनात्रेरनसूयागर्भजः। तद्भवकथा आत्रेयशब्दे ६९२ अ॰दृश्या तन्नामनिरुक्तिश्च यथा "निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः" भा॰ अनु॰ ४७अ॰। "ममांशस्तु क्षितितले महाभागो द्विजोत्तमः। दुर्वासा इति विख्यातः स हि त्वां याजयिष्यति" भा॰आ॰ २२३अ॰ शिववाक्यम्। तस्य रुद्रांशजत्वेन क्रोधवत्त्वं यथाह "दुर्वासाः क्रोधनः श्येनस्तथा दीर्घतमा मुनिः" भा॰स॰ ७अ॰ "शिष्यायुतसमोपेतो दुर्वासा नाम कामतः। तमागतमभिप्रेक्ष्य मुनिं परमकोपनम्" भा॰व॰२६१अ॰ तस्य क्रोधशीलत्वेन विशेषणम्। दुःसाध्यं वासः गृहे वासनमस्य इति वा व्युत्पत्तिः। गृहे तदीयवासनस्य दुःसाध्यत्वात् दुर्वासस्त्वं यथोक्तं भा॰अनु॰१५९अ॰ यथा "अवसन्नृगे गृहे तात! ब्राह्मणो हरिपिङ्गलः। चीरवासा विल्वखण्डो दीर्घश्मश्रुः कृशो महान्। दीर्घेभ्यश्च मनुष्येभ्यः प्रमाणादधिको भुवि। सर्वान् सञ्चरते लोकान् ये दिव्या ये च मानुषाः। इमां गाथां गायमानश्चरत्वरेषु शुभासु च। दुर्वाससं वासयेत् को ब्राह्मणं सत्कृतं गृहे। रोषणः सर्वभूतानां सूक्ष्मोऽप्यपकृते कृते। परिभाषाञ्च मे श्रुत्वा कोऽनुदद्यात् प्रतिश्रयम्। यो मां कश्चिद्वासयेत न स मां कोपयेदिति। यस्माद्विद्रायते कश्चित्ततोऽहं समवासयम्। स च भुङ्क्ते सहस्राणां बहूनामन्नमेकदा। एकदाह्नाल्पकं भुङ्क्ते न चैवेति पुनर्गृहान्। अकस्माच्च प्रहसति तथाऽकस्मात् प्ररोदिति। न चास्य वयसा तुल्यः पृथिव्यामभवत्तदा। अथ स्वावसथं गत्वा स शय्यास्तरणानि च। कन्यासालङ्कृता दग्धा ततो व्यपगतः पुनः। अथ मामब्रवीद्भूयः स मुनिः संशितव्रतः। कृष्ण! पायसमिच्छामि भोक्तुमित्येव सत्वरः। तदैव तु मया तस्य चित्तज्ञेन गृहे जनः। सर्वाण्यन्नानि पानानि भक्ष्याश्चोच्चावचास्तथा। भवन्तु सत्कृतानीह पूर्वमेव प्रचोदितः। ततोऽहं जायमानं वै पायसं प्रत्यवेदयम्। तं भुक्त्वैव तु स क्षिप्रं ततो वचनमब्रवीत्। क्षिप्रमङ्गानि लिम्पस्व पायसेनेति स च ह। अविस्मृत्यैव च ततः कृतवानस्मि तत्तथा। तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यमृक्षयम्। स ददर्श तदास्यासे मातरन्ते शुभाननाम्। तामपि स्वयमानः स पायसेनाभ्यलेपयेत्। मुनिः पायसदिग्धाङ्गीं रथे तूर्णमयोजयत्। तमारुह्य रथञ्चैव निर्ययौ च गृहान्-

मम। अग्निवर्णोज्वलन् धीमान् स द्विजो रथधूर्ववत्। प्रतोदेनातुदद्वाजां रुषिमर्षी मम पश्यतः। न च मे स्तोकमप्यासीद्दुःखमीषद्रौक्तं तदा। तथा स राजमार्गेण महता निर्ययौ बहिः। तद्दृष्ट्वा महदाश्चर्यं टाशाहाँ जातमन्यवः। तथाऽजल्पन् मिथः केचित् समाभाष्य परस्परम्। ब्राह्मणा एव जायेरन् नान्यो वर्णः कथञ्चन। को ह्येनं रथमास्थाय जीवेदन्यः पुमानिह। आशीविषविषं तीक्ष्णं ततस्तीक्ष्णतरो द्विजः। ब्रह्माशीविषदग्धस्य नास्ति कश्चिच्चिकित्सकः। तस्मिन् व्रजति दुर्बुद्धे प्राखलद्रुक्मिणी पथि। तमामर्षयत श्रीमांस्ततस्तूर्णमचोदयत्। ततः परमसंक्रुद्धो रथात् प्रस्कन्द्य सद्विजः। पदातिरत्यथेनैव प्राद्रवद्रुक्मिणासुखः। तस्तृपथेन धावन्तमन्वधावं द्विजोत्तमम्। तथैव पथसा दिग्धः प्रसीद भगवन्निति। ततो विलोक्य तेजस्वी ब्राह्मणो मामुवाच ह। जितः क्रोधस्त्वया कृष्ण! प्रकृत्यैव महाभुज!। न तेऽपराधमिह वै दृष्टवानस्मि सुव्रत!। प्रीतोऽस्मि तव गोविन्द! दृष्ट्वा कामान् यथेप्सितान्"।

दुर्विगाह त्रि॰ दुर्+वि+गाह्–कर्मणि खल्। १दुःखेन गाहनीये २धृतराष्ट्रपुत्रभेदे पु॰ "दुर्मदोदुर्विगाहश्च विविंशतिरुषिकटाननः" भा॰आ॰११७अ॰।

दुर्विदग्ध त्रि॰ दुष्टो विदग्धः प्रा॰स॰। गर्विते "अशोकवेगदुर्विदग्धं गरुत्मन्तम्" काद॰।

दुर्विदत्त त्रि॰विद्–लाभे विद्–ज्ञाने वा बा॰अत्र विदत्तं लभ्यं धनं ज्ञानं वा ततः प्रा॰व॰। १दुर्धनके २दुर्ज्ञानके च "आरे मन्युं दुर्विदत्तस्य धीमहि" ऋ॰१०।३५।४। "दुर्विदत्ता निर्ऋतिर्न" ऋ॰१०।३६।२।

दुर्विध त्रि॰ दुष्टा विधाऽस्य प्रा॰ब॰। दरिद्रे अमरः। (दमयन्तीवाक्ये) "अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्भदुर्विधम्" नैष॰ "विविनक्ति न बुद्धिदुर्विधः" माघः। २खले मेदि॰ ३मूर्खे शब्दर॰। "शास्त्रेष्वन्येषु कुवियो विद्यमानेषु दुर्विधाः। बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते" रामा॰ ३।१०९।२

दुर्विनय पु॰ दुर्+वि+नी–भावे अच्। विनयराहित्ये। दुर्+वि+नी–क्तिन्। दुर्विनीति तत्रार्थे स्त्री

दुर्विनीत त्रि॰ दुर्+वि+नी–कर्त्तरि क्त। १विनयाकर्तरि विनयशून्ये २अविचिताम्बे पुंस्त्री॰हेमच॰स्त्रियां जातित्वात् ङीष्।

दुर्विमोचन त्रि॰ दुःखेन विमोचनं यस्य। १दुःखेन मोचनीये २धृतराष्ट्रपुत्रभेदे पु॰ "चित्रवाहुश्चित्रवर्मा सुवर्मा दुर्विमोचनः" भा॰आ॰११७अ॰। तत्पुत्रोक्तौ तु ६७अ॰। दुर्विरोचन इति पाठान्तरम्। सोऽपि तत्पुत्रभेदे

दुर्विवाह पु॰निन्दितो विवाहः प्रा॰स॰। ब्राह्म्यादिचतुष्कभिन्नेषु आसुरादिषु चतुर्षु विवाहेषु ब्राह्म्यादीनष्टौ विवाहानुक्त्वा मनुनोक्तं यथा

"ब्राह्म्यादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः। ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः। रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः। पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः। इतरेषु तु शिष्टेषु नृशंसानृतवादिनः। जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितै र्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्"

दुर्विष पु॰दुःस्थितो विषोऽस्य प्रा॰ब॰। विषकृतविकारशून्ये शिवे "दुर्द्धर्षो दुष्प्रकाशश्च दुर्विषो दुर्जयोऽजयः" भा॰शा॰ २८६अ॰ शिवनामोक्तौ। तस्याकृतमन्थनकाले विषपानेऽपि तत्कृतविकारराहित्यात् विषविकारस्य तं प्रति दुःस्थितत्वात्तस्य तथात्वम्। दुष्टो विषो वा मेयत्वे नास्यस्य यच् वा। दुष्टविषपानाद्वा तस्य तथात्वम्।

दुर्विषह त्रि॰ दुःखेन विषह्यतेऽसौ दुर्+वि+षह–कर्मणि खल्। १सोढुमशक्ये दुःखेन सहनीये "सैषा दुर्विषहा माया देवैरपि दुरासदा" हरिवं॰ ४६अ॰ २शिवे पु॰ "दुर्धरो दुर्विषहोदुस्सहोदुरतिक्रमः" भा॰शा॰२८६अ॰। ३धृतराष्ट्रपुत्रभेदे "दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः" भा॰आ॰१८६अ॰ तत्पुत्रोक्तौ

दुर्वृत्त न॰ दुष्टं वृत्तम् प्रा॰स॰। १निन्दिते आचरणे "दुर्वृत्तं धार्त्तराष्ट्राणामासक्तवान् भगवान्ऋषिः" भा॰आ॰१अ॰ दुःस्थं वृत्तमस्य प्रा॰ब॰। २दुर्जने "दुर्वृत्तवृत्तशमनं तव देवि! शीलम्" देवीमा॰ "चाटुतस्कर दुर्वृत्तमहासाहसिकादिभिः" याज्ञ॰

दुर्वेद त्रि॰ दुःखेन विद्यते लभ्यतेऽसौ दुर्+विद+लाभे–कर्मणि खल्। १लब्धुमशक्ये दुःखेन लभ्ये "ये एव के च मारुत्यो स्यातां दुर्वेद एव वशा पृश्निर्यदि वशां पृश्निं न विन्देदपि" शत॰ब्रा॰ ५।१।२।१ दुरुत्सन्नो वेदोऽस्य प्रा॰व॰। २वेदपाठरहिते च। "दुर्वेदा वा सुवेदा वा प्राकृताः संस्कृतास्तथा। ब्राह्मणा नावमन्तव्या भस्माच्छन्ना इवाग्नयः" भा॰व॰१९९अ॰

दुर्व्यवहार पु॰ दुष्टो व्यवहारः प्रा॰स॰ । दुष्टशब्ददर्शिते रागलोभादिनाऽसङ्ख्यनिर्णीते व्यवहारे तच्छब्दे दृश्यम् ।

दुर्व्रजित न॰गर्हितं व्रजितम् प्रा॰स॰। निन्दितगतौ "दुर्व्यूहताच्छङ्कमाना दुःस्थिता दुरवेक्षितात्। दुरासिताद् दुर्व्रजितादिङ्गिताध्यासितादपि" भा॰व॰२३२अ॰

दुर्ह(ण)न त्रि॰दुःखेनाहन्यतेऽसौ दुर्+हन–कर्मणि खल् । हन्तव्ये दुःखेन हन्तव्ये "प्रकल्पयति च तस्यार्थो निकुम्भे दुर्हने हते" भट्टिः वेदे तु णत्वम् । "सो पु णः परापरा निर्ऋतिर्दुर्हणा वधीत्" ऋ॰१।२८।६ "त्वं नो अस्या इन्द्र ! दुर्हणायाः" ऋ॰१।१२१।१४

दुर्हणायु त्रि॰ दुष्टं हननमिच्छति क्यच् दुर्हणाय–उनू वेदे णत्वम् । दुष्टहननेच्छौ "स्त्रियं यद्दुर्हणायुवम्" ऋ॰४।३०।८। "दुर्हणायुवं दुष्टहननमिच्छन्तीम्" भा॰ छान्दस उवङ् ।

दुर्हणु त्रि॰ दुःखो हनुरस्य प्रा॰ब॰ दुर्+हन–उन् वा, वेदे णत्वम् । १दुःखेन हननीये २दुष्टहनुयुक्ते च "तदा रभस्व दुर्हणो !" ऋ॰ १०।१५५।३। लोके तु दुर्हनु इत्येव दुष्टहनुके त्रि॰ ।

दुर्हल(लि)त्रि॰दुष्टो हलिरस्य वा अच्समा॰। दुष्टहलियुक्ते

दुर्हित त्रि॰ निन्दितो हितः प्रा॰स॰ । विरोधिवचनया गवौ "न दुर्हितः स्यादघ्न्ये न पापया" ऋ॰८।१८।२६

दुर्हुत न॰ निन्दितं हुतम् प्रा॰स॰। अफलजनके होमे "यदैव याचमानेषु तथा दम्भान्वितेषु च । एतेषु दत्तिर्या दत्ता दावाग्नाविव दुर्हुतम्" भा॰शा॰१८अ॰

दुर्हृणायु त्रि॰ दुष्टं हृणीयते क्रुध्यति लज्जते वा दुर्+हृणी+क्रोधे लज्जायाञ्च कण्ड्वा॰ यक् तत उनू अल्लोपयलोपौ पृषो॰ वर्णव्यत्यासे ईकारस्याकारः, मृगय्वा॰ वा नि॰। १दुष्टक्रोधने २दुष्टं लज्जमाने च । "दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति" ऋ॰७।५९।८ "दुर्हृणायुरशोभनं क्रुध्यन्" भा॰ "ऋतस्य शिमीवतो भामिनो दुर्हृणायून्" ऋ॰१।८४।१६

दुर्हृत् त्रि॰ दुःखं हृदयमस्य प्रा॰ब॰ "सुहृद्दुर्हृदौ मित्रामित्रयोः" पा॰ निपा॰ । १अमित्रे गवौ । दुःस्थितं हृदयं प्रा॰ब॰। २दुःस्थितहृदये त्रि॰ "अश्मसारमयं नूनं हृदयं मम दुर्हृदः" भा॰व॰ ११२अ॰। तस्य भावः युवा॰अण् द्विपदवृद्धिः दौर्हार्द दुष्टान्तःकरणत्वे शत्रुत्वे च न॰ ।

दुर्हृदय त्रि॰ दुःखं हृदयमस्य प्रा॰ब॰ अशत्रुत्वेन न निपा॰ । १दुष्टान्तःकरणयुक्ते । दुष्टं हृदयम् प्रा॰स॰ । २दुष्टे मनसि न॰ ।

दुल उत्क्षेपे (दोलन) चुरा॰उभ॰ सक॰ सेट् । दोलयति ते अदूदुलत् । "नारी पदद्वयं स्थाप्य कान्तस्योरुद्वयोपरि । कटिं चेद्दोलयेदाशु बन्धः कन्दर्पशङ्खलः" रतिमञ्जरी "आन्दोलत् क दोलने" कविकल्पद्रुमः । अस्य वा चुरारत्वमपि । दुल–कि "दुलिः अम्बा दुली नितत्नीरभ्रयन्ती" तैत्ति॰ ४।४।५।१ दुलीति उत्क्षिपन्तीत्यर्थः ।

दुलि पु॰ दुल–कि । १शनिभेदे शब्दार्थचि॰। २कच्छपस्त्रियां स्त्री वा ङीष् । ३उत्क्षेपके त्रि॰।

दुलिदुह पु॰ दिलीपन्दपपितरि अनमित्रसुते "अनमित्रसुतो राजा विद्वान् दुलिदुहोऽभवत् । दोलिपस्तनयस्तस्य राज्ञस्य प्रपितामहः" हरिवं॰ १५अ॰ [शब्दार्थचि॰।

दुल्ल त्रि॰ दु+क्विप् दुतं लल्लति लल–अच् । रोमशे

दुवस् परिचरणे उपतापे च कण्ड्वा॰ नाम॰ यक् पर॰ सक॰ सेट् । दुवस्यति अदुवस्यीत् "अनेहसः स्तुभ इन्द्रो दुवस्यति" ऋ॰ ३।५१।२ "याभिर्वित्तजानिं दुवस्यथः" ऋ॰ १।११२।१५ "समिद्भिरग्निं नमसा दुवस्यन्" ऋ॰३१।१।२

दुवस् न॰दुवस् परिचरणे कण्ड्वा॰दुवस्–क्विप् अल्लोपयलोपौ । १हविषि २परिचरणे च "ऐभिरग्ने दुवोगिरोविश्वेभिः" ऋ॰१।१४।८ "दुवः परिचर्याम्" । दुव इच्छति क्यच् वा अनङि दुवन्यति "स त्वा भरिषो गरिषो दुवन्यसम्" ऋ॰४।४०२। दुवः परिचरणमिच्छन्तः दुवन्याः तत्र सीदति दुवन्यसम्" भा॰ कर्मणि ल्युट् अनङभावे पक्षे अल्लोपयलोपौ दुवसन परिचरणीये "ग्नेनासो न दुवसनासः" ऋ॰४।६।१०"दुवसनासः परिचरणीयाः"भा॰

दुवस्य त्रि॰नाम॰दुवस्–शक्यार्थे यत् अल्लोपयलोपौ । "परिचर्यार्हे "आ यद्दुवस्याद्दुवसे न कारुः" ऋ॰ १।१६५। १४। "दुवस्यात् परिचर्यार्हात् दुवसे परिचरणाय" भा॰

दुवस्यु त्रि॰ दुवः परिचरणमिच्छति क्यच् "क्याच्छन्दसि" पा॰उनू । परिचरणेच्छायुक्ते "गोसूतूर्वति पर्यग्रं दुवस्युः" ऋ॰१०।१००।१२ वेदे क्वचिदस्य स्त्रियामुवङ् । "स न ईलानया सह देवा अग्ने दुवस्युवा" ऋ॰८।१०२।२

दुवस्वत् त्रि॰ दुवोहविः परिचरणं वास्त्यस्य मतुप् मस्य वः सान्तत्वात् न पदकार्यम् । १हविर्युक्ते २परिचरणयुक्ते च "अवस्युरद्धि दुवस्वान्" यजु॰५।३२ "सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा" ८।३५ "दुवस्वाञ्छम्भूर्मे" १८।४

दुवोयु त्रि॰ दुवः परिचर्यामिच्छति क्यचि वेदे वा पदकार्यम् उनु। परिचरणेच्छौ। "स तु शुचि शुद्धा यो दुवोयुः" ऋ॰ ६।२६।५। "दुवोयुरस्मदीयं परिचरणमात्मन इच्छन्" भा॰ पक्षे दुवस्यु तत्रार्थे

दुश्चर त्रि॰ दुःखेन चर्यते दुर्+चर–कर्मणि खल्। चरितुमशक्ये १दुःखेन चरणीये "चरतः किल दुश्चरं तपः" रघुः "स्थाने तपो दुश्चरमेतदर्थम्" कुमा॰ "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्" मनुः। दुःखेन दुष्टं वा चरति चर्+अच्। १शम्बुके हारा॰ २भल्लूके पुंस्त्री॰ राजनि॰।

दुश्चरित न॰ दुष्टं चरितम् प्रा॰स॰। १दुष्कृते पापे "इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा। प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम्"। "यथा महाह्रदं प्राप्य क्षिप्तं लोष्ट्रं निमज्जति। तथा दुश्चरितं सर्वं वेदे त्रिष्टुपि मज्जति" मनुः। दुःखेन चरितम्। २कष्टेन कृते त्रि॰ दुस्थं चरितं यस्य प्रा॰ब॰। ३तद्युक्ते त्रि॰।

दुश्चर्मन् पु॰ दुःस्थितं चर्म यत्र प्रा॰७ब॰। १स्वभावतोऽनावृतमेढ्रे रोगभेदे। "हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" याज्ञ॰। २कोठरोगे राजनि॰।

दुश्चारित्र न॰चरित्रमेव स्वार्थे अण् चारित्रं दुष्टं चारित्रम् प्रा॰स॰। दुष्टे चरित्रे पापे। दुःस्थितं चारित्रमस्य प्रा॰ब॰। १दुष्टचरित्रयुक्ते त्रि॰ "मूढो राजन्! भवति ब्रह्मबन्धुर्दुश्चारित्रोऽयं धर्मादपेतः" भा॰शा॰६२अ॰।

दुश्चिकित्स्य त्रि॰ दुर्+कित–स्वार्थे यत् कर्मणि यत्। दुःखेन चिकित्सनीये प्रतिकार्ये रोगे। सुश्रुतोक्ताः ते च रोगा अवारणीयशब्दे ४४९पृ॰ दर्शिताः।

दुश्चिक्य न॰ लग्नात् तृतीये राशौ "त्रितिकोणस्य नवधं दुश्चिक्यं स्यात् तृतीयकम्" ज्यो॰त॰

दुश्चवन पु॰ दुःसहं च्यवनं चालनमस्य दुःसहश्चवनः शिवो वेन वा प्रा॰ब॰, दुर्+च्यु–ल्यु, "छन्दसि गत्यर्थेभ्यः" पा॰ युच् वा। इन्द्रे अमरः "युत्कारेण दुश्चवनेन धृष्णुना" ऋ॰ १०।१०२।२ "दुश्चवनेनान्यैरविचाल्येन" भा॰ बहुकालानन्तरं स्वस्थानात् पतनात् तस्य तथात्वम्। एकैकमन्वन्तरे हि चतुर्दश इन्द्रा भवन्तीति एकसप्ततिमहायुगस्य मन्वन्तरकालस्य चतुर्दशोभागः किञ्चिदधिकपञ्चसहस्रयुगात्मकस्तत्कालस्ततोऽनन्तरं तस्य पतनात् तथात्वम्। अतएव इन्द्राश्च कल्पभेदेन भिन्ननामानः इन्द्रशब्दे ९४५पृ॰ दर्शिताः। च्यवनेन शिवेनाभिभूतत्वात् तस्य तथात्वम् "अहल्यतस्य शक्रस्य वज्रेण प्रहरिष्यतः। सवज्रं स्तम्भयामास तं बाहुं परिघोपमम्" भा॰अनु॰ १६०अ॰ "बाहुं सवज्रं शक्रस्य क्रुद्धस्तस्तम्भयत् प्रभुः" मल्लिनाथधृतपुराणम्।

दुश्च्यावन त्रि॰ दुःखेन च्याव्यतेऽसौ दुर्+च्यु–णिच् कर्मणि खल्। १दुःखेन च्यावनीये। २महादेवे पु॰ "दुश्च्यावनश्च्यवनो जेता हन्ता ब्रह्मद्विषां हरः" भा॰क॰२४अ॰

दु(दुः)श्रव न॰ दुःखेन श्रूयतेऽसौ दुर्+श्रु–खल् वा रेफस्य षत्वम्। श्रुतिदुःखावहे परुषवर्णयुक्ते काव्यदोषभेदे "दुःश्रवं त्रिविधाश्लीलानुचितार्थप्रयुक्तता" इत्युपक्रमे परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वमिति सा॰द॰ लक्षयित्वा यथा "कार्त्तार्थं यातु तत्कृती" इत्युदाहृतम्। तस्य चापरनाम श्रुतिकटुरिति चन्द्रालोके उक्तम् "भवेच्छ्रुतिकटुर्वर्णः श्रवणोद्वेजने पटुः"। अत्र स्वघटकवर्णस्यैव परुषत्वेन तद्घटितकाव्यस्य तथात्वं "पदे पदांशे वाक्येऽर्थे सम्भवन्ति रसेऽपि ते" सा॰द॰ सामान्यतो दोषाणां पञ्चधोद्भावनेऽपि श्रुतिकटुदोषस्य पदतदंशवाक्येष्वेव सम्भवः इत्येव विशेषः।

दुष वैकृते दिवा॰पर॰अक॰ अनिट्। दुष्यति इरित् अदुषत् अदुषत् दुदोष दोष्टा दोक्ष्यति। "प्रसवानेष्वपि तेजसो पावको नैव दुष्यति" मनुः। "मेढ्रं प्रजापते रेतोऽदुषत्" ऐत॰ब्रा॰ २।२२ "राहुवे पट्टसूत्रे च स्त्रीविद्धं न दुष्यति" स्मृतिः। वैकृतत्वं यस्य यथास्वरूपं तद्वैपरीत्ये, यथा हेतोः साध्यानुमापकत्वं तद्वैपरीत्ये दुष्टत्वम् अशुद्धत्वञ्च। यथा मद्यादिना ब्रह्मादेरशुद्धत्वम्। अशुद्धिश्च स्वरूपतः यथा मालिन्यादिना, शास्त्रविध्युल्लङ्घने दुरदृष्टजनकत्वेन वा। यथा नीलीवस्त्रादिधारणादेः शास्त्रनिषिद्धत्वात् तद्धारणे दुरदृष्टोत्पत्तेः तस्य दुष्टत्वम्। एवमन्यत्राप्यूह्यम् "दुष्धातोरिवाशक्तं दोषसम्पत्तये गुणः" उद्भटः दोषः। दुष्टः। "अनेकदोषदुष्टोऽपि जायः कस्य न वल्लभः" पञ्चर॰ दोषी। णिचि। दूषयति चित्तविकारे तु दोषयति दूषयति वा चित्तम्। "न च किञ्चिदेवांशं काव्यस्य दूषयन्तः श्रुतिकटुत्वादयो दोषाः, किं तर्हि सर्वमेव काव्यम्" सा॰द॰। "दोषोविचारसुखभो यदि दूष्यते तद् व्याख्या मन प्रथममेव न दूषणीया" काव्यप्र॰व्या॰ सहेश्वरः "यः दौहृदे प्रथमं स्वादयित्वा पश्चादेनं दूषयते स बालः" भा॰स॰ ६२ अ॰ "यथा क्रतुषु विप्राणां सोमपानं न दूषितम्" कुल्ला-

र्थवतन्त्रम् । दूषयन् दूषणीयः दूषितः दूषयित्वा संदूषय्य । उपसर्गपूर्वकः तत्तदुपसर्गद्योत्यार्थयुक्तविकारे

दुष्कर त्रि॰ दुःखेन क्रियते दुर्+कृ–कर्मणि खल् । कर्त्तुमशक्ये १दुःखेन करणीये "अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्" मनुः "सुग्धे ! दुष्करमेतदित्यतितरां सङ्गा सहासं बलात्" अमरुश॰। २आकाशे न॰ यज्ञार्थकल्पतरुः तस्याऽन्यत्वेन दुष्करत्वात् । भावे खल् । ३दुःखेन करणे न॰ ।

दुष्कर्मन् न॰ दुष्टं कर्म प्रा॰स॰। १पापे । दुष्कर्मभिश्च नङ्क्ष्यो नाशं यास्यति दुर्मतिः" भा॰उ॰ १२अ॰ "दुष्कर्मजान्रोगां रोगा यान्ति चैव क्रमात् शमम् । जपैः सुरार्चनैर्होमैर्दानैस्तेषां क्षयोभवेत्" शातातपः । दुःस्थितं कर्मास्य प्रा॰ब॰। २पापकर्मकारके त्रि॰ "ततो वसति दुष्कर्मा नरके शाश्वतीः समाः" भा॰उ॰१११अ॰ ।

दुष्काल पु॰ दुष्टः कालः प्रा॰स॰। निन्दिते काले । यस्य यः कालोविहितस्तस्य ततो वैलक्षण्ये कालस्य दुष्टता २प्रलये च । दुःसहो कालः कलनमस्य प्रा॰ब॰ । ३शिवे "अकालश्चातिकालश्च दुष्कालः कालएव च" भा॰शा॰ २८६ अ॰शिवनामोक्तौ ।

दुष्कुल न॰ दुष्टं कुलम् प्रा॰स॰। १निन्दिते कुले "अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि" मनुः । दुःस्थं कुलमस्य प्रा॰ब॰ । २निन्दितकुलजाते त्रि॰ "मदमूर्खताभिमाना दुष्कुलतैश्वर्यसंयुक्ताः" भा॰द॰ दुष्कुले भवः यत्रे च । दुष्कुलीन, ढक् दौष्कुलेय निन्द्यकुलभवे त्रि॰

दुष्कृत न॰ दुष्टं कृतम् प्रा॰स॰ । १पापे "दाहयेत् दुष्कृतं किञ्चित् तत्सर्वं प्रतिपद्यते । निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते" मनुः २तज्जनके कर्मणि च "यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति" मनुः तदस्त्यस्मिन् इनि । दुष्कृतिन् तद्युक्ते "पुनःपुनर्दुष्कृतिनं निनिन्द" रघुः ।

दुष्कृति त्रि॰दुष्टा कृतिरस्य प्रा॰ब॰। दुष्कर्मकारके "पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम्"मनुः प्रा॰स॰। २पापे स्त्री

दुष्क्रीत त्रि॰ दुष्टं क्रीतम् प्रा॰स॰ । रूपसंख्यादिक्रमपरीक्ष्य क्रीते क्रीतानुशयशब्दे दृश्यम् "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी" नारदः । [अमरः ।

दुष्खदिर पु॰दुष्टः खदिरः प्रा॰स॰। काष्ठस्कन्धे क्षुद्रखदिरभेदे

दुष्ट त्रि॰ दुष–क्त । १दुर्बले २अधमे विश्वः । ३दोषाश्रिते च दोषशब्दे वक्ष्यमाणव्यभिचारादीनामन्यतमयुक्ते ४क्षेत्रौ । ५पित्तादिदोषयुक्ते ज्ञानकारणे नेत्रादौ यथा कथञ्चित् ६दोषयुक्ते च त्रि॰ ७कुष्ठे न॰ (कुड़) ख्याते गन्धद्रव्ये । "त्याज्यो दुष्टः प्रियोऽप्यासीत्" रघुः "दुष्टः शब्दः स्वरतो वर्णतो वा" महाभाष्यप्रष्टता श्रुतिः ।

दुष्टचारिन् त्रि॰ दुष्टं चरति चर–णिनि । दोषयुक्तकर्मकारिणि "अथ यत्नेनमासीनं शङ्केरन् दुष्टचारिणः" भा॰वि॰४अ॰ ।

दुष्टगज पु॰ नित्यकर्म॰ । गम्भीरवेदिनि गजे हेमच॰ ।

दुष्टनु त्रि॰ दुस्था तनुरस्य प्रा॰ब॰ वेदे षत्वम् । दुस्थदेहयुक्ते "क्षुधा किल त्वा दुष्टनो ! जक्षिवान्त्स न रुरुषः" ऋ॰ ४।७।२ लोके तु दुस्तनु इत्येव तत्रार्थे

दुष्टयोग पु॰ कर्म॰। १वैष्टितव्यतीपातादि योगे तस्य स्नानदानाद्यतिरिक्तकर्मसु वर्ज्यत्वमशुभसूचकत्वञ्च सू॰सि॰नानास्थाने उक्तं यथा

"तल्यांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः । तद्दृक्क्रोधभवो वह्निर्लोकाभावाय जायते । विनाशयति पातोऽस्मिन् लोकानामसकृद् यतः । व्यतीपातः प्रमिश्रोऽयं संज्ञाभेदेन वैष्टितिः । स कृष्णो दारुवपुर्लोहिताक्षो महोदरः । सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते । आद्यन्तकालयोर्मध्यः कालोऽग्नेयोऽतिदारुणः । प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः । एकायनगतं यावद्रेखोर्मण्डलान्तरम् । सम्भवस्तावदेवास्य सर्वकर्मविनाशकृत् । व्यतीपाततयं घोरं गण्डान्तत्रितयं तथा । एतद् भसन्धितितयं सर्वकर्मसु वर्जयेत् २अरिष्टसूचके गोचरविशेषादिस्थग्रहयोगभेदे च

दुष्ट(स्त)र त्रि॰ दुःखेन तीर्यतेऽसौ कर्मणि खल् वेदे सुषामादेराकृतिगणत्वात् षत्वम् । "अर्त्तत्यं मरुतः पत्सु दुष्टरम्" ऋ॰१।५४।१४ लोके तु न षत्वम् "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः ।

दुष्टरक्तदृक् त्रि॰ दुष्टा रक्ता च दृगस्य । पित्तादिदोषजरक्तनेत्रके । "दीक्षितः क्षीरसङ्गेन जायते दुष्टरक्तदृक्" शातातपेन तत्कर्मपाक उक्तः ।

दुष्टरीतु पु॰ दुर्+तॄ–तुन् वेदे दृट् दीर्घश्च षत्वम् । दुःखेन तरणीयेऽहिंस्रे "तविग्रवे वज्रये दुष्टरीतवे" ऋ॰२।२।३। लोके तु दुस्तर्तृ इत्येव ।

दुष्टवृष पु॰कर्म॰। शक्तत्वेऽपि अपूर्वरेते वृषे (गड़िया) ख्याते हेमच॰। [शब्दे दृश्यम् ।

दुष्टव्रण पु॰ नित्यक॰। अचिकित्सनीये व्रणभेदे हिव्रणीय-

दुष्टसाक्षिन् पु॰ कर्म॰ । नारदादुक्ते असाक्षित्वप्रयोजकदोष

युक्ते साक्षिणि। साक्षिणोदोषाश्च नारदेनोक्ताः यथा "यस्त्वात्मदोषदुष्टत्वादस्य इव लक्ष्यते। स्थानात् स्थानान्तरं गच्छेदेकैकश्चानुधावति। कासत्यकश्चाश्रुमश्चमभीक्ष्णं निःश्वसित्यपि। विलिखत्यवनीं पद्भ्यामाहू वासश्च धूनयेत्। भिद्यते सस्वेदोऽस्य ललाटं खिद्यते तथा। शोषमागच्छतश्चोष्ठावूर्द्ध्वं तिर्यङ्निरीक्षते। त्वरमाणश्चावद्धमपृष्टो बहु भाषते। कूटसाक्षी स विज्ञेयस्तं शापं विनयेद्दृढम्"। अवद्धमसम्बद्धम्। विनयेच्छिक्षयेद् यथा कौटसाक्ष्यादुद्विजेतीत्यर्थः। न तु दण्डयेदित्यर्थः। प्राकृतवैकृतिकविकारविवेकस्य दुःशक्यत्वात् सम्भावनामात्रेण च दण्डनस्यान्याय्यत्वादिति मिता० उक्तम्। मदनरत्ने त्वाविद्धमिति पठित्वा आकुलमिति व्याख्यातम्। यद्धलिखितावपि "मन्त्रिभिः शास्त्रज्ञैर्दुष्टलक्षणं साक्षिणिर्यक्प्रेक्षते समन्तादेवावलोकयति। अकस्मादनुभूतं पुरोभं विहजति देशाद्देशं गच्छति पाणिना पाणिं पीडयति नखान्निकृन्तति सुखमस्य विवर्णतामेति प्रस्विद्यति चास्य ललाटे चक्षुर्न च वाचं प्रतिपूजयत्यकस्माद्ददाति, प्रशंसति पुनः पुनरन्यमपवदति बहिर्निरीक्षते शस्त्रं पराम्रशति गिरः प्रकम्पयत्योष्ठौ निर्भुजति सक्थ्नी परिलेढि अतिविस्मितः कर्मसमकृत्सु भ्रुवौ संहरति तूष्णीं ध्यायति पूर्वोत्तरविरुद्धं व्याहरति एवमादिदुष्टलक्षणं क्रुद्धस्य च स्वामिनोऽन्यत्र प्रकृतिशीलादिति" अकस्मादिति तूष्णीमिति च यथायोगमनेकत्र सम्बन्धनीयम्। अन्यत्र प्रकृतिशीलादिति। प्रकृत्या स्वभावात् शीलनित्यक्प्रेक्षणादिधर्मो यस्य स तथोक्तस्ततोऽन्यत्रैतानि दुष्टक्रुद्धलक्षणानि, एते अवान्तरवैलक्षण्यस्य दुर्ज्ञेयत्वादित्यवधानेन परीक्ष्य वस्तुतत्त्वानुसरणीयमिति सूचितम्" वीरमि०

सुनिवाक्ये अन्येऽपि साक्षिदोषा असाक्षिलक्षणोक्ता वीरमि० भङ्ग्यादर्शिता यथा

मनुः "नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः। न साक्षी नृपतिः कार्यो न कारुककुशीलवौ। न श्रोत्रियो न लिङ्गस्थो न सङ्घेभ्यो विनिर्गतः। आध्यधीनो न बन्धक्यो न दस्युर्न विकर्मकृत्। न वृद्धो न शिशुर्नैको नाप्तो न विकलेन्द्रियः। नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः। न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः" इति। अत्र सर्वैर्विशेषणैरसत्यसम्भावना विस्मरणादिकमसाक्ष्यनिमित्तमुपलक्ष्यते। अतएव वृद्धविकलेन्द्रियविकर्मकृत्तस्करादीनां गोदुहन्यायेन पुनरुपादानम्। अत्र बहवः शब्दाः स्पष्टार्थाः। अन्ये मेधातिथ्यनुसारेण विव्रियन्ते। अर्थसम्बन्धिन उत्तमर्णाधमर्णाद्याः उत्तमर्णोऽधमर्णवचनेन पराजीयमानस्तदानीमेव रोषाविष्टोऽधमर्णाद्धनं प्रत्यादातुं प्रवर्ततेति तच्चित्तानुवृत्तिरधमर्णस्य तदनुगुणकौटसाक्ष्यहेतुत्वेन संभाव्यते। उत्तमर्णो निर्धनेऽधमर्णे स्वसाक्षितया धनं प्राप्य स्वयं तदर्पयिष्यतीति बुद्ध्या तदनुगुणवादी सम्भाव्यते। तथार्थः प्रयोजनन्तत्सम्बन्धिनोर्वादिप्रतिवादिनोरन्यतरस्याद् येषां स्वप्रयोजनं सिसाधयिषितन्तेऽप्युपकारगन्धाच्च साक्ष्यार्हा इत्यादि। सर्वत्र कौटसाक्ष्यसम्भावनोह्या। दृष्टदोषा अन्यत्र कृतकौटसाक्ष्याः। व्याध्यार्त्ता वचनविसंवादापादकव्याधिपीड़ावन्तः। दूषिता अभियस्ताः। नृपतेरसाक्षित्वमकृताभिप्रायेणातो न प्राक्तननारदोक्तिविरोधः। लिङ्गस्थोऽपत्यादिः। सङ्घेभ्यो विनिर्गतः परित्यक्तः पितादिगुरुजनसंसर्गात् वृद्धानुपसेवनादस्याऽसत्यसम्भावना। आध्यधीनो बन्धकीकृतः तस्य तदाज्ञावशवर्त्तित्वात्। बन्धक्यो निन्द्यास्त्रदम् विकर्मकृत् अधर्माभीरुः। वृद्धविकलेन्द्रिययोर्वार्द्धक्यस्वभावहेतुकेन्द्रियवैकल्येन भेदः। आर्त्तः शोकेन। नारदोऽपि "दासनैःकृतिकाश्चवृद्धस्त्रीबालचाक्रिकाः। मत्तोन्मत्तप्रमत्तार्त्ता कितवग्रामयाजकाः। सङ्घापथिकसाहसद्रव्यिकप्रव्रजितातुराः। व्यङ्गैकश्रोत्रियाचारहीनक्लीवकुशीलवाः। नास्तिकव्रात्यदारान्नित्यागिनोऽयाज्ययाजकाः। एकस्त्रीसहायारिचरस्त्रातिसनाभयः। प्रागदृष्टदोषश्चैलूषविप्रजीव्यहितुण्डिकाः। गरदाग्निदकीनाशशस्त्रापुत्रोपपातिनः। क्लान्तसाहसिकश्चान्तनिर्धूताग्न्यवसायिनः। भिन्नदृत्तासमाहृतजडतैलिकमूलिकाः। भूतादिष्टपहिष्टवर्षनक्षत्रसूचकाः। अवयंस्यात्मविक्रेतृहीनाङ्गभगहृत्तयः। कुनखी श्यावदन्तश्चिती मित्रध्रुक्शठशौण्डिकाः। ऐन्द्रजालिककुम्भीपश्चेषी गणविरोधिनः। बधलक्षितकृत् यज्ञी पतितः कूटकारकः। कुहकः प्रत्यवसितस्तस्करो राजपूरुषः। मनुष्यप्रेषुमांसास्त्रिमधुक्षीराम्बुसर्पिषाम्। विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः। ध्रुतः स्वधर्मादुत्कलिकः सूचको हीनसेवकः। पिता विवदमानश्च भेदकश्चेत्यसाक्षिणः। श्रेण्यादिषु तु वर्गेषु कश्चिद्वेद्वेष्यतामियात्। तस्य तेभ्यो न साक्ष्यं

स्यादुद्देशारः सर्व एव ते"। नैकृतिकः परापकारशीलः। चाक्रिकस्तौलिकः। प्रमत्तः सदाऽनवहितः। महापथिको महापथगामी। सासुद्रवणिग्वहित्रयाही। एकः श्रोत्रियो द्वयोरनुमतः। एकः, श्रोत्रिय इति पृथग्वा प्रायश्चित्तं च प्रागेव तत्। अपरार्केण तु युग्मैकेति पठित्वा युग्मो द्वाविति व्याख्यातम्। एकस्यालीसहाय एकपाकभोजीति। सहायन्यतरसाहाय्यकारी, मिथ्यचण्डेश्वरौ। मदनरत्नाकरस्तु एकस्यालोः सहाय इति विशेषणद्वयं पृथक्कृत्य एकस्यालो स्याल्यधिकरणकः पाकोनुज्ञायते। स एको यस्येत्येकस्यालीति व्याचख्यौ। समासान्तविधेरनित्यत्वादेकस्यालीत्यत्र "नद्युतश्चेति" पा० न कप्। अर्द्धपिप्पलीत्यादिवत्र ह्रस्व इति च समादधे। अरिचरः भूतपूर्वः शत्रुः। भूतपूर्वे चरट्। कल्पतरौ चस्त्रधर इति पठित्वा शस्त्रधर इति व्याख्यातम्। ज्ञातयः सगोत्राः सनाभयो मातुलतत्सुतमातृष्वस्रियादयः। शैलूषः स्त्रीणां नर्तयिता। कुशीलवस्तु रङ्गोपजीवी नट इति भेदः। विषजीवी विषक्रयजीवीति मदनरत्ने। विषवद्योपजीवीति रत्नाकरे। अहितुण्डिकः सर्पक्रीडोपजीवी व्यालग्राही। कीनाशः कर्कशः क्षुद्रो वा। कृपण इति तु मदनरत्ने। उपपातिन उपपातकीति कल्पतरुः। मदनरत्ने तूपपातक इति पठितम्। उपसमीपं पातकं यस्येति विग्रहश्च पातकयुक्त इति व्याख्यातश्च। क्लान्तोऽतिखिन्नः श्रान्तोऽनवरतकर्मकारीति मदनरत्ने। अशान्त इति पठित्वाऽयोग्यकर्मकारीति रत्नाकरे। निर्घृणो बान्धवैस्त्यक्त इति मदनरत्ने। ग्रामराजकुलश्रेण्यादिभिर्निःसारित इति रत्नाकरे। मूलिकः लोकभयशून्य इति भवदेवः। मूलं विप्रलब्धस्तत्कारीति तु युक्तम्। अपरार्केण तु पौषिक इति पठित्वा पौषिकः पूपादिविक्रयीति व्याख्यातम्। वर्षसूचको वर्षशकुनवेदी। नक्षत्रसूचको ज्यौतिषिकः। अवशंसी परकीयपापप्रकाशकः। हीनाङ्ग उचितपरिमाणन्यूनाङ्गः। व्यङ्गस्तु छिन्नाङ्गुल्यादिरिति भेदः। भगवृत्तिर्भार्यादास्यादिसम्भोगशुल्कोपजीवी शङ्खी वृषभमर्त्तनजीवीति मदनरत्नरत्नाकरयोः। कुहको दाम्भिकः। प्रत्यवसितः प्रव्रज्यादिच्युतः। कुशिको राज्ञा व्यवहारपरिच्छेदकतया नियुक्तः। अस्य च साक्षित्वकरणे निषेधो, विधिस्तु कृतसाक्ष्य इति कल्पतरुः। मदनरत्ने तु कुलं ब्राह्मणादिगणस्तदधिकारी कुशिक इति व्याख्यातम्। सूचको राज्ञा परदोषान्वेषणपूर्वकं स्वस्य तच्चिवेदने नियुक्तः। भेदकस्मित्रादिप्रीतिभङ्गकर्त्ता। श्रेण्यादिष्वित्यस्यायमर्थः। येषु श्रेण्यादिषु यस्यैकोऽपि द्वेषवतां शत्रुतामाप्तस्तदीयविवादे तच्छ्रेण्यादिनिविष्टाः सर्व एव न साक्षिणस्तत्र हेतुर्द्वेषारः सर्वएव त इति तच्छ्रेण्यान्तर्गतैकद्वेष्यनुरोधकृतवैरनिर्यातनार्थमन्यथावादित्वसम्भवात्। अतएव नारदः "बालोऽज्ञानादसत्यात् स्त्री पाषाण्यां स्याच्च कूटकृत्। विब्रूयाद्बान्धवः स्नेहाद्वैरनिर्यातनादरिरिति"। कात्यायनः "तद्वृत्तिजीविनो ये च तत्सेवाहितकारिणः। तद्बन्धुसुहृदो भृत्या आप्तास्ते तु न साक्षिणः। मातृष्वसृसुतायैव पितृष्वसृसुतास्तथा। मातुलस्य सुतायैव सोदर्यसुतमातुलाः। एते सनाभयः प्रोक्ताः साक्ष्यन्तेषु न योजयेत्। कुल्याः सम्बन्धिनश्चैव विवाह्यो भगिनीपतिः। पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा"। तथा बृहस्पतिः "मातृपितृपितृव्यभार्यायाभ्रातृमातुलौ। भ्राता सखा च जामाता सर्ववादेष्वसाक्षिणः। परस्त्रीपानसङ्गाश्च कितवाः सर्वदूषकाः। उन्मत्तार्त्ताः साहसिका नास्तिकाश्च न साक्षिणः" इति। अत्र मातृष्वस्रादिशब्दानां सम्बन्धिशब्दत्वादर्थिप्रत्यर्थिनोरन्यतरस्य एतादृशसम्बन्धिनो न साक्षिणः सम्बन्धिनि स्नेहादन्यत्र वैरसम्भवादिति ध्येयम्। शङ्खलिखितौ "शुल्कशुल्काधिकृतौ दूतो वेष्टितशिराः स्त्रियोगुरुकुलवासिनः परिव्राजकवानप्रस्थनिर्ग्रन्थाः शङ्खिनः व्यालग्राहिणः" इति अत्राऽसाक्षिणः इति प्रकृतम् शुल्काधिकृतः शुल्कग्रहणस्थानाधिकारी। शुल्मः स्वस्थाननिवेशितः पदातिसमूहस्तदधिकृतः। वेष्टितशिराः उष्णीषवेषोमूर्द्धव्याध्यभिभूतो वा इतरे प्रसिद्धा व्याख्याततराश्च। अनेन प्रपञ्चेन लोभादिकमसाक्षित्वनिमित्तमेव व्याख्यातम्। यथाह मनुः "लोभान्मोहाद्भयात् क्रोधान्मैत्रात्कामात्तथैव च। अज्ञानाद्बालभावाच्च साक्षी वितथ उच्यत" इति।

दुष्टु अव्य०दुर्+स्था—कु सुषामा०षत्वम्। १निन्दायाम् अमरः। २अविनीते त्रि० उणादिको० ततः उद्गतो० भावे अच्। दौष्ठव अविनये न०।

दुष्पतन न०दुष्टं पतत्यनेन दुर्+पत—करणे ल्युट्। १अपशब्दे त्रिका०। अपशब्दप्रयोगस्य दुरदृष्टजनकतया पतनहेतुत्वात् तथात्वम्। "नापभाषितवै न मेच्छितवै म्लेच्छो ह वा नाम यदपशब्दः" इत्यादिश्रुत्या हि अपशब्दप्रयो-

गस्य निषिद्धत्वेन तत्प्रयोगस्य पापजनकत्वं सूचितम्। भावे ल्युट्। २दुःखेन पतने न०।

दुष्पत पु०दुःखेन पतनस्य प्रा०ब०। चोरनामगन्धद्रव्ये अमरः

दुष्पद त्रि० दुःखेन पद्यते दुर्+पद्-कर्मणि खल्। दुःखेन प्राप्ये प्राप्तुमशक्ये "श्रुतो हि चक्रेण रथ्या दुष्पदा दृषक्" ऋ० १।५३।९ "दुष्पदा दुष्पदेन प्राप्तुमशक्येन चक्रेण" भा० ऋतोयास्थाने छान्दस आच्।

दुष्पराजय त्रि० दुःखेन पराजीयतेऽसौ दुर्+परा+जि कर्मणि खल्। १जेतुमशक्ये दुःखेन जेतव्ये २धृतराष्ट्रपुत्रभेदे पु० "उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः" भा०आ० ११७अ० तत्पुत्रोक्तौ।

दुष्परिग्रह त्रि० दुःखेन परिगृह्यतेऽसौ दुर्+परि+ग्रह-कर्मणि खल्। १परिग्रहीतुमशक्ये "लोकाधाराः स्त्रियो राज्ञां दुरापा दुष्परिग्रहाः" कामन्द०। प्रा०स०। २निन्द्यभार्य्यायाञ्च। दुःस्थितः परिग्रहो भार्या यस्य प्रा०ब०। ३दुष्टभार्य्यके पु०

दुष्परिहन्तु त्रि० दुर्+परि+हन-खलर्थे तुन्। १दुःखेन नाशयितव्ये २दुष्परिहार्ये च "यच्छता नो दुष्परिहन्तु शर्म्म" ऋ०२।२३।६ "दुष्परिहन्तु हन्तुमशक्यम्" भा०

दुष्पर्श त्रि० दुर्+स्पृश-कर्मणि खल् वा विसर्गलोपः। १दुःखेन स्पर्शनीये स्प्रष्टुमशक्ये २दुराचभार्यां स्त्री अमरः तत्तार्थे पु० भरतः।

दुष्पान त्रि० दुःखेन पीयतेऽसौ "आतो युच्" पा० खलर्थे कर्मणि युच्। दुःखेन पेये १पातुमशक्ये। भावे युच्। २दुःखेन पाने न०।

दुष्पुरुष पु० प्रा०स०। निन्द्ये पुरुषे ततः ब्राह्मणा० स्वार्थे भावे कर्मणि वा ष्यञ्। दौष्पुरुष्य तदर्थे पु० तद्भावे तत्कर्मणि त न०।

दुष्पूर त्रि० दुर्+पूरि-कर्मणि खल्। १पूरयितुमशक्ये दुःखेन पूरणीये। "काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः" गीता २अनिवार्य्ये च "कामरूपेण कौन्तेय! दुष्पूरेणानलेन च" गीता

दुष्प्रकाश त्रि० दुष्टः प्रकाशः प्रा०स०। विरोधिवस्तुतया अन्धकारे "पापस्य लोको निरयो दुष्प्रकाशो नित्यं दुःखं शोकभूयिष्ठमेव" भा०शा० ७३अ०।

दुष्प्रकृति त्रि० दुःखेन प्रकृतिरस्य प्रा०ब०। १दुष्टस्वभावे "त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः" भा०क० ६०अ०। प्रा०स०। २निन्दायां प्रकृतौ निन्द्ये स्वभावे स्त्री

दुष्प्रजस् त्रि० दुःखा प्रजाऽस्य अस्तिच् समा०। १निन्द्यप्रजायुक्ते। प्रा०स०नास्तिच्। दुष्प्रजा २निन्द्यप्रजायां स्त्री

दुष्प्रज्ञान त्रि० दुःखेन प्रज्ञायतेऽसौ दुर्+प्र+ज्ञा-खलर्थे कर्मणि युच्। १ज्ञातुमशक्ये। दुष्टं प्रज्ञानं प्रा०स०। २निन्द्ये ज्ञाने न० "दुष्प्रज्ञानेन निरयाः बहवः सम्प्रदाहृताः" भा०शा० १२७अ०।

दुष्प्रधर्ष त्रि० दुष्करः प्रधर्षोऽस्य प्रा०ब०। १धर्षयितुमशक्ये दुःखेन धर्षणीये "सा दुष्प्रधर्षा मनसाऽन्यहिंस्रैः" रघुः २दुराचभार्यां ३खर्जूर्याञ्च स्त्री राजनि०। ४धृतराष्ट्रपुत्रभेदे पु० "दुर्मुखो दुष्प्रधर्षश्च विविंशतिर्विकटः समः" भा० भी० ६४अ०। तत्र दुष्प्रहर्षश्चेति पाठान्तरम् भा०आ० ६४अ० तत्पुत्रोक्तौ तथोक्तेः

दुष्प्रधर्षण त्रि० दुर्+प्र+धृष-भावायां युच्। १दुःखेन धर्षणीये धर्षयितुमशक्ये। "विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः" भा०आ० ६७ अ० २धृतराष्ट्रपुत्रभेदे पु० ३वार्त्ताक्याम् स्त्री अमरः गौरा० ङीष्।

दुष्प्रधर्षिणी स्त्री दुष्प्रधर्षोऽस्त्यस्याः इनि ङीप्। १खण्डकार्य्यां राजनि० २दृढत्वाम् भावप्र०।

दुष्प्रवृत्ति स्त्री प्रा०स०। दुष्टायां प्रवृत्तौ वार्त्तायां "तेषां शूर्पणखे वैका दुष्प्रवृत्तिहराऽभवत्" रघुः।

दुष्प्रवेश त्रि० दुष्करः प्रवेशोऽत्र प्रा०ब०। १दुःखेन प्रवेश्ये प्रवेष्टुमशक्ये "महर्षिगणसम्बाधं ब्राह्मणा ब्रह्मणा समन्वितम्। दुष्प्रवेशं महाराज! नरैर्धर्मबहिष्कृतैः" भा०व० १४५अ०। २कन्यारीढ्ये स्त्री राजनि०।

दुष्प्रहर्ष त्रि० दुष्करः प्रहर्षोऽस्य प्रा०ब०। १दुष्करप्रहर्षयुक्ते २धृतराष्ट्रपुत्रभेदे पु० दुर्मदो दुष्प्रहर्षश्च विविंशतिर्विकटः समः" भा०आ० ६७अ०। तत्पुत्रोक्तौ

दुष्म(ष्य)न्त पु० १पौरवे भरतपितरि राजभेदे "उपदानवी सुतान् लेभे चतुरस्त्रैलिकात्मजान्। दुष्मन्तमथ सुमन्तं प्रवीरमनघं तथा। दुष्मन्तस्य तु दायादो भरतो नाम वीर्य्यवान्। स सर्वदमनो नाम नागायुतबलो महान्। चक्रवर्त्ती सुतोजन्ने दुष्मन्तस्य महात्मनः। शकुन्तलायां भरतो यस्य नाम्ना स्म भारताः। दुष्मन्तं प्रति राजानं वागुवाचाशरीरिणी। माता भस्त्रा पितुः पुत्रो येन जातः स एव सः। भरस्व पुत्रं दुष्मन्त! माऽवमंस्थाः शकुन्तलाम्। रेतोधाः पुत्र उच्यते नरदेव! यमक्षयात्।" हरिव० १२अ०। अस्य शकुन्तलापरिवेदनकथा शकुन्तलाशब्दे दृश्या

तुर्वसुवंश्यमरुत्तकन्यायां सम्मतायां संवर्त्तेः जाते २नृपभेदे तत्कथा हरिवं० २२अ० । तुर्वसुवंशवर्णने यथा "अन्वस्तावित्तितो राजा मरुतः कथितस्तय । अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः । दुहिता सम्मता नाम तस्यासीत् पृथिवीपतेः ! । दक्षिणार्थे तु सा दत्ता संवर्त्ताय महात्मने । दुष्मन्तं पौरवञ्चापि लेभे पुत्रमकल्मषम् । एवं ययातेः शापेन जरासंक्रमणे तदा । पौरवं तुर्वसोर्वंशः प्रविवेश नृपोत्तम ! । दुष्मन्तस्य तु दायादः करुत्तामः प्रजेश्वरः" । तस्यापत्यम् इञ् दौष्मन्ति भरते करुत्तामे च नृपभेदे

दु(दुः)स्थ त्रि० दुर्+स्था–क वा विसर्गलोपः । दुःखेन स्थिते "कल्पान्तदुःस्था वसुधा तथोहे" भट्टिः १कुक्कुटे २कुक्कुरे च पुं स्त्री शब्दार्थचि० स्त्रियां जातित्वात् ङीष् ।

दु(दुः)स्पृष्ट न० दुष्टं स्पृष्टम् प्रा०स० या विसर्गलोपः । जिह्वाग्रादिना वर्णोच्चारणस्थानस्य ईषत्स्पर्शरूपे आभ्यन्तरे वर्णोच्चारणप्रयत्ने तदस्यास्ति कारणत्वेन अच् । इतेनोच्चार्यवर्णे च "अचोऽस्पृष्टायणस्तीषत् नेमस्पृष्टाः यणस्तथा" "दुस्पृष्टेति विज्ञेयो ह्रकारः प्लुत एव च" पाणिनिशिक्षा । ह्रकारस्य हकारादित्वेन दुस्पृष्टत्वमिति व्याकरे स्थितम् । [अदुहत् । दुदोह दुहितः ।

दुह बधे भ्वा०पर०सक०सेट् । दोहति इरित् अदोहीत्

दुह दोहने अन्तःस्थितद्रवद्रव्यस्याकर्षणेन बहिर्निस्सारणे क्रम०अदा०द्विक०अनिट् । दोग्धि दुग्धे दुह्यात् अधोक् अदुग्ध । अधुक्षत् अदुग्ध अधुक्षन्त अधुक्ष्यति अदुक्षाहि दुदोह । दुदोहिथ दुदुहिव दुदुहे । दुह्यात् धोक्ष्यति ते । दोग्धव्यं दुग्ध्यं दोग्धम् । दोग्धा दोहनं दुग्धम् । दोग्धुम् दुग्ध्वा संदुह्य । "यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्" कुमा० "यः पयो दोग्धि प्राज्ञाणम्" "पयोवटोधोरपि गा दुहन्ति" भट्टिः एककर्मविवक्षायाम् अस्यैककर्मकत्वमपि "दुदोह यज्ञसिद्ध्यर्थं स्वग्रहःसामलक्षणम्" मनुः "दुग्ध्वा पयः पत्रपुटे सदीयम्" रघुः । निःसारणमात्रे च "दुग्धेऽस्मै सर्वं कामं यो वाचो दोहः" छा०उ० "न कर्मफलमाप्नोति योऽधर्मं दोग्धुमिच्छति" भा०व० ११६५श्लो० "यत्र धर्मदुघा भूमिः सर्वकामदुघा सती । दोग्धि स्वाभीप्सितानर्थान् यजमानस्य सर्वदा" भाग० ४।१९।७ दुह्यति । अस्य औणकर्मणि उकारादि "प्रधानकर्मणस्तस्मिन्नादौ-नाङ्द्विकर्मणाम् । अपधाने दुहादीनां यद्यन्ते कर्तुश्च कर्मणः" इत्युक्तेः । "तेषु तेषु तु पात्रेषु दुह्यमाना वसुन्धरा" हरिवं० ८१ श्लो० अस्य कर्मकर्त्तरि गौणकर्मणः कर्तृत्वविवक्षायाम् केवलं तङ् न यक् । गौःपयो दुग्धे । वा चिण् । अदोहि अधुक्षत अदुग्ध सि०कौ०

दुहादि पु० गौणे कर्मणि लकारविधानार्थे धातुसमूहे स च "दुह्याच्पच्दण्ड्रुधिप्रच्छि चिब्रूशासुजिमन्थ्मुषाम् । कर्मयुक् स्यादकथितं तथा स्यात् नीहृकृष्वहाम्" व्या० कारिकायां पठितः दुहप्रभृतिः सुप्रपर्यन्तः धातुसंघः । अस्य कस्यापि कारकसंज्ञाऽप्राप्तौ प्रधानकर्मोपयोगिनः कर्मसंज्ञा "दुहियाचिरुधिप्रच्छिभिक्षिचिञ्जासुपयोगनिमित्तसपूर्वविधौ । ब्रुविशासि गुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना" महाभाष्यकृतोक्तेः । [उदा०।

दुहि पु० दुह–धातुनिर्देशे इक् । दुहधातौ दुहादिशब्दे

दुहितृपति पु० ६त० षष्ठ्या वा अलुक् स० । जामातरि प्रत्ये लुक् । दुहितृपतिरयम् ।

दुहितृ स्त्री दुह–दह या तृच् । "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ" उणा० नि० । अजन्यस्त्रियां स्त्रीसन्तौ ऋदन्तत्वेऽपि स्वस्रादित्वात् न ङीष् । तृणन्तत्वाभावात् सर्वनामस्थाने परे न इडिः दुहितरौ दुहितर इत्यादि प्रियादिषु पाठात् अस्मिन् शब्दे परे पूर्वस्थितस्य उक्ता पुंस्त्रीलिङ्गस्य विशेषशब्दस्य न पुंवत् जातादुहितृकः । "मातृदुहितरः शेषस्त्रयाणाम्य ऋतेऽन्वयः" वाग्भ० । "माता स्वसा दुहिता वा न विविक्तासनो भवेत्" मनुः । कन्याशब्देऽनुक्तं तद्दानपात्रफलादिकमधिकमुच्यते ।

"ज्ञात्वा परीक्षां कान्तस्य दद्यात् कामिनी वरम् । वराय गुणहीनाय दुष्टाय ज्ञानिने तथा । दरिद्राय च मूर्खाय रोगिणे कुत्सिताय च । अत्यन्तकोपयुक्ताय चात्यन्तदुर्ज्ञाय च । जडाय चैव मूर्खाय क्लीवतुल्याय पापिने । ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च । शान्ताय गुणिने चैव यूने च विदुषेऽपि च । वैष्णवाय सुतां दत्त्वा दशवापीफलं लभेत् । कन्याविक्रये दोषो यथा "यः कन्यापालनं कृत्वा करोति विक्रयं यदि । विपत्तौ धनलोभेन कुम्भीपाकं स गच्छति । कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी । कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश । स्वतन्त्र आश्रयोगौ च स च लभेच्छमा निश्चितम् । विक्रीणीत

मांसभारं वहत्येव दिवानिशम्" कन्यादानफलं यथा "दशवापीसमा कन्या दीयते ब्राह्मणाय या। वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने। सन्ध्यावते वेदपाठकारिणे सत्यवादिने। यस्मै प्रदत्ता कन्या च दशवापीफलप्रदा। त्रिसन्ध्याकारिणे सत्यवादिने गृहशालिने। वेदज्ञाय च विप्राय दत्ताष्टफलदायिनी। प्रतिग्रहगृहीताय सन्ध्याहीनाय नित्यशः। मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी। परदारगृहीताय याजकाय द्विजाय च। शठाय सन्ध्याहीनाय वाप्येकफलदा स्मृता। त्यक्तसन्ध्याय गायत्रीविहीनाय शठाय च। विप्रोद्वाहाय दत्ता सा वाप्यर्द्धफलदा स्मृता। पापिने शूद्रजाताय विप्रचेतोद्वाहाय च। दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा। विष्णुभक्ताय विदुषे विप्राय सत्यवादिने। जितेन्द्रियाय दत्ता या तिग्मद्वापीफलप्रदा। षष्टिवर्षसहस्राणि दिव्यरूपं विधाय च। एवम्भूताय दत्त्वा च मोदते विष्णुमन्दिरे। दत्त्वा कन्यां सुशीलाञ्च हरये हरयेऽथ वा। नारायणस्वरूपञ्च भवेदेव श्रुतौ श्रुतम्। विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये। स लभेद्धरिदासञ्च ध्रुवं विप्रोद्वाहाय च" ब्रह्मवै०प्र०ख०।

दु(दोह्य त्रि० दुह्-गौणे कर्मणि वा ण्यप् पक्षे यत्। १दोहनगौणकर्मणि गव्यादौ गौणकर्मविवक्षायां दोहनप्रधानकर्मणि २दुग्धादौ च।

दु(द्रु)ह्यु पु० शर्मिष्ठायां जाते ययातिपुत्रभेदे। "व्यभजद्राज्यं प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे सम्मुदिता गुणैः। देवयान्यां महाराज! शर्मिष्ठायाञ्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे" भा० आ० ७५अ० हरिवंशे तु २०अ० द्रुह्युरिति अणुरिति पाठः। लिपिकरप्रमादात् द्विधा पाठः "तेषां ययातिः प्रज्ञानां विजित्य वसुधामिमाम्। देवयानीसुतस्तस्य सुतां भार्यामवाप सः। शर्मिष्ठामासुरीञ्चैव तनयां वृषपर्वणः। यदुञ्च तुर्वसुञ्चैव देवयानी व्यजायत। द्रुह्युञ्चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी"।

तस्य राज्यदेशश्च तत्रैव अ० उक्तो यथा

"सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागराम्। व्यभजत् पञ्चधा राजा पुत्राणां नाहुषस्तदा। दिशि दक्षिणपूर्वस्यां तुर्वसुं मतिमान्नृपः। प्रतीच्यामुत्तरस्याञ्च द्रुह्युञ्चानुञ्च नाहुषः। दिशि पूर्वोत्तरस्यान्तु यदुं श्रेष्ठं न्ययोजयत्। मध्ये पूरुञ्च राजानमभ्यषिञ्चत् स नाहुषः। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। ययाप्रदेशमद्यापि धर्मेण परिपाल्यते"। तद्वंशवर्णनञ्च तत्रैव १२अ० यथा "द्रुह्योश्च तनयो राजन्! बभ्रुः सेतुश्च पार्थिवः। अङ्गारः सेतुपुत्रश्च मरुता परिरक्ष्यते। यौवनाश्वेन समरे लब्धेन निहतो बली। युद्धं सुमहदस्यासीन्नासान् परि चतुर्दश। अङ्गारस्य तु दायादो गान्धारो नाम पार्थिवः। ख्यायते यस्य नाम्ना वै गान्धारविषयो महान्। गान्धारदेशजाश्चैव तुरगा वाजिनां वराः" तस्य पितुर्ययातेर्जरायाः अग्रहणे शापकथा भा० आ० ८४अ० "ययातिरुवाच। "यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्माद्दुह्यो! प्रियः कामो न ते सम्पत्स्यते क्वचित्। यत्राश्वरथसुख्यानामश्वानां स्यान्नतं न च। हस्तिनां पीठकानाञ्च गर्दभानान्तथैव च। वस्त्राणाञ्च गवाञ्चैव शिबिकायास्तथैव च। उडुपप्लवसन्तारो यत्र नित्यं भविष्यति। अराजशब्दभाजनं तत्र प्राप्स्यसि सान्वयः"

दू खेदे दिवा०आत्म०अक०सेट्। दूयते अदविष्ट। दुदुवे। ओदित् दूनः कविकल्पद्रुमः पा० दुनोतेरेव नत्वदीर्घौ इति भेदः। "तया हीनं विधातर्मां कथं पश्यन् न दूयसे" रघुः। "न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति" माघः। उपसर्गीकरणे सक०, "दूयते दीनं खलजनः" दुर्गादासः।

दूडभ त्रि० दुःखेन दभ्यतेऽसौ दुर्+दभ-कर्मणि खल्। "दुरो दाशनाशदभध्यूषणक्षत्तरपदादेष्टुत्वञ्च" पृषो० पा० गणसूत्रे ष्णोक्तकर्म नि० नलोपः। दुःखेन दम्भनीये

दूडाश्व त्रि० दुःखेन दाश्यते दुर्+दाश-कर्मणि खल्। दूडभशब्दोक्त पा०ग० सूत्रेण सिद्धम्। दुःखेन हिंसनीये

दूढी त्रि० दुष्टं ध्यायति दुर्+ध्यै-चिन्तायां कर्त्तरि सम्प० भावे वा क्विप्। दूडभशब्दोक्तकार्यम् पा०ग० सूत्रे ध्यायतेर्धातोर्निर्देशात्। १दुष्टं ध्यायिनि २दुष्टायां बुद्धौ स्त्री "अस्माकं शंसो अभ्यस्तु दूढ्यः" ऋ० १।९४।८। "बधेर्दुःशंसा अप दूढ्या जहि" ६)[ध्यम्। दुष्टं ध्यायिनि

दूढ्य त्रि० दुष्टं ध्यायति दुर्+ध्यै-क। दूडभशब्दवत् साध्यम्। १दुःखेन नाश्यते दुर्+नाशि-कर्मणि खल् दूडभशब्दवत् साध्यम्। १दुःखेन नाशनीये। "दूणाशेयं दक्षिणा पार्थिवानाम्" ऋ०६।२७।२८ "दूणाशा दुर्नाशा केनापि नाशयितुमशक्या" भा० २चातुर्मास्यान्तर्गते तृतीये सप्तदशे उत्तरे यज्ञभेदे पु० "द्विनामोत्तरो नडहिरण्यो

दूणाशश्चेति" कात्या०श्रौ०२२। ८।२६। "उत्तरस्तृतीयः सप्तदशः द्विनामा भवति बहुक्षिरण्य इत्येकं दूणाशश्च द्वितीयं नाम" संप्र०। तस्य च तथादक्षिणायुक्तत्वात् अर्थ० अचि तथात्वम्।

दूत त्रि० दु-गतौ "दुतनिभ्यां दीर्घश्च" उणा०त कित् दीर्घश्च दू-परितापे कर्त्तरि क्त वा दीर्घाभावस्य न नत्वम् "दुग्वोर्दीर्घश्च" पा० स्वरेण दुनोतेरेव नत्वदीर्घयोर्विधानात्। १सन्देशहरे अमरः। २उपतप्ते च "चारेक्षणो दूतमुखः पुरुषःकोऽपि पार्थिवः" माघः तत्र साधारणदूतलक्षणं तद्भेदाश्च सा०द० उक्ता यथा निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः। कार्य्यप्रैष्यस्त्रिधा दूतो दुत्यस्यापि तथाविधाः" तत्र कार्यप्रेष्यो दूत इति लक्षणम्। तत्र "उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः" उभयोरिति येन प्रेषितो यदन्तिकं प्रेषितश्च। "मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः"। नृपतिदूतलक्षणं युक्तिकल्पतरावुक्तं यथा

"परेङ्गितज्ञः परयाग्वाङ्मूर्त्यर्थस्यापि तत्त्ववित्। सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः। दूतश्चैव प्रकुर्वीत सर्वशास्त्रविशारदम्। इङ्गितज्ञं तथा सभ्यं दक्षं सत्कुलसम्भवम्। अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्। वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते। दूत एव ह्यसम्मन्त्रो भिनत्त्येव हि सङ्गतान्। विसृष्टार्थो१ मितार्थश्च२ तथा शासनहारकः३। दूतास्त्रयोऽमात्यगुणैः समैः पादार्द्धवर्जितैः। विसृष्टार्थं कार्यवशात् शासनं तु करोति यः१। मितार्थः२ कार्यमात्रोक्तौ स कुर्यादुत्तरोत्तरम्। यथोक्तवादी सन्देशहारको लेखहारकः३। तत्र दूतो व्रजन्नेव चिन्तयेदुत्तरोत्तरम्। वार्त्ताविशेषं भूपाय झटित्येवान्यवेश्मनि। दूतो हि न लिखेत् किञ्चित् निर्णेता वा विनिर्णयम्। पृच्छ्यमानोऽपि न ब्रूयात् स्वामिनः क्वापि वैशसम्" कामन्द० शास्त्रे च राजदूतलक्षणं चोक्तं यथा "कृतमन्त्रस्तु मन्त्रज्ञो मन्त्रिणां मन्त्रसम्मतम्। यातव्याय प्रहिणुयाद्दूतं दूत्याभिमानिनम्। प्रगल्भः स्मृतिमान्वाग्मी शास्त्रे चास्त्रे च निष्ठितः। अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति। निसृष्टार्थो१ मितार्थश्च२ तथा शासनवाहकः३। सामर्थ्यात्मादतो हीनो दूतस्तु त्रिविधः स्मृतः। स भर्त्तुः शासनाद्गच्छेदन्यस्तत्तरोत्तरम्। स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन्। अन्तःपालांस्तु कुर्वीत मित्राण्याटविकांस्तथा। जलस्थलानि मार्गांश्च विद्यात् स्ववलसिद्धये। नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदि। कालमीक्षेत कार्य्यार्थमनुज्ञातश्च निष्क्रमेत्। सारवत्ताञ्च राष्ट्रस्य दुर्गं तद्दुर्गमेव च। छिद्रं शत्रोर्विजानीयात् कोषमित्रबलानि च। उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत्। रागापरागौ जानीयात् प्रकृतीनाञ्च भर्त्तरि। भृत्यपक्षस्य चापायं कुर्यादनतिलङ्घितः। पृच्छ्यमानोऽपि न ब्रूयात् स्वस्वामिप्रकृतिच्युतिम्। ब्रूयात् प्रकृतया वाचा सर्वं वेद भवानिति। फलेन नाम्ना द्रव्येण कर्म्मणा च महीयसा। कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि। विद्याशिल्पोपदेशेन संश्लिष्योभयवेतनैः। भृत्यपक्षञ्च जानीयात्तद्भर्त्तुश्च विचेष्टितम्। तीर्थाश्रमाश्रयस्थाने शास्त्रविज्ञानहेतुना। तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवसेत्। सन्तापं कुलमैश्वर्य्यं त्यागसत्यानसौष्ठवम्। अनुद्धतां भद्रतां च भर्त्तुर्भेद्येषु दर्शयेत्। सहेतानिष्टवचनं कामक्रोधञ्च वर्जयेत्। नान्यैः श्रयीत, भावं स्वं रक्षेद्विद्यात्परस्य च। काले व्रजति मेधावी न खिद्येतात्मसिद्धये। क्षियमाणञ्च बुध्येत कालं नानार्थलोभनैः। एतेष्वहःसु गच्छत्सु न तत्र पृथिवीपतेः। पश्यति व्यसनं किञ्चित्स्वयं वा कर्त्तुमिच्छति। स्वान्तःप्रकोपमथ वा विनेतुं नीतिवित्तमः। सस्यादेः संग्रहं कर्त्तुं स्वदुर्गे दुर्गसत्क्रियाम्। स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते। तत्र यात्रास्वयं चित्तमाश्रयेत्स समीक्षते। यात्राकालक्षयार्थौ वा तत्र चायं विलम्बते। काले विक्षिप्यमाणे तु तर्कयेदिति पण्डितः। कार्य्यकालविपत्तिञ्च व्यक्तां ज्ञात्वा विनिष्क्रमेत्। तिष्ठन् वार्त्तांविशेषार्थान् भर्त्तुः सर्वान्निवेदयेत्। रिपोः शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम्। दुर्गकोषबलज्ञानं भृत्यपक्षोपसंग्रहः। राष्ट्रात् व्यपेतपालानामात्मसात्करणं तथा। युद्धापसारभूज्ञानं दूतकर्मेति कथ्यते। दूतेनैव नरेन्द्रस्तु कुर्वीतारिविकर्षणम्। स्वपक्षे च विजानीयात् परदूतविचेष्टितम्। तर्केङ्गितज्ञः स्मृतिमान् सुदुर्लङ्घ्यपराक्रमः। क्लेशायासस्पृहो दक्षश्चरः स्यात् प्रतिपत्तिमान्। तपस्विलिङ्गिनो धूर्त्ताः पण्यशिल्पोपजीविकाः। चराश्चरेयुः परितः पिबन्तो जगतां मतम्। निर्गच्छेयुर्विशेयुश्च सर्ववार्त्तांविदोऽन्वहम्। चराः सकाशान्नृपतेश्चक्षुर्दूर-

तरं हि ते। स्वल्पं स्वप्रचारण पश्येद्दे विनिचेष्टितम्। स्वपन्नपि च जागर्त्ति चारचक्षुर्महीपतिः। विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः। राजा चरैर्जगत् कृत्स्नं व्याप्नुयाल्लोकसम्मतैः। चारचक्षुर्नरेन्द्रः स्यात्सम्पतेत्तेन भूयसा। अनेनासम्मतन्मौढ्यात्मतन्त्रः समेऽपि हि। सर्वसम्मतसद्वयं सर्वावस्थाविचेष्टितम्। चरेण द्विषतां विद्यात्तद्देशप्रार्थनानि च। प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः। अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत उच्यते। चरेण प्रचरेद्राजा स्वलेखर्त्तिगियाध्वरे। दूते सन्धानमायाते चरचर्य्यां प्रतिष्ठिता। तीक्ष्णः प्रव्रजितश्चैव सत्री वनग एव च। एते ज्ञेयास्तु सञ्चाराः सर्वे नान्योन्यवेदिनः। संस्थानवत्यः संस्थाश्च कार्य्याः कार्य्यप्रसिद्धये। तिष्ठेयुः पार्श्वे सञ्चाराः परिचर्य्यापवादिनः। बालः क्षपीवलो लिङ्गी भिक्षुकोऽध्यापकस्तथा। संस्थाः सुचारसंस्थित्यै दत्तदायाः शुभाशयाः। सर्वस्मिंस्तत्र सञ्चारास्तिष्ठेयुस्तिवेदिनः। स्वचक्रे परचक्रे च यो हि वेद चिकीर्षितम्। जाग्रदपि सुषुप्तोऽसौ न भूपः प्रतिबुध्यते। कारणाकारणक्रुद्धान् बुध्येत स्वपरिग्रहे। पापानकारणक्रुद्धांस्तूष्णीं दण्डेन बाधयेत्। ये तु कारणतः क्रुद्धास्तान् वशीकृत्य संयसेत्। शमयेद्दानमानाभ्यां छिद्रञ्च परिपूरयेत्। अणुनापि विजयते छिद्रेण बलवत्तरम्। निःशेषं मज्जयेद्राष्ट्रं पानपात्रमिवोदकम्। जडमूकान्धबधिरच्छद्मानः सगुडकास्तथा। किराता वामनाः कुब्जास्तद्विधा ये च कारकाः। भिक्षुकाचारणा दासो नानाकार्य्यकलाविदः। अन्तःपुरगतां वार्त्तामाहरेयुरलक्षिताः। छत्रव्यजनभृङ्गारयानवाहनधारिणः। महामात्रे बहिर्वार्त्तां विदुरन्ये च तद्विधाः। स्नपनाञ्जनकर्त्तारस्तल्पका व्यजकास्तथा। प्रसाधका भोजकाश्च गात्रसंवाहका अपि। जलताम्बूलकुसुमगन्धभूषणदायकाः। कर्त्तव्याश्च सदा ह्येते ये चान्येऽभ्यासवर्त्तिनः। सज्ञाभिर्मूर्च्छितैर्लेख्यैराकारैरिङ्गितैरपि। सुसञ्चरेयुरव्यग्राश्चराश्चर्य्यां परस्परम्। समापिबन्तो जगतां मतानि जलानि भूमेरिव सूर्य्यपादाः। अनेकशिल्पाध्ययनप्रयोगाश्चराश्चरेयुर्बहुलिङ्गिरूपाः। येन प्रकारेण परानुमेयात् परापरज्ञश्च सदङ्गितेतोः। तमात्मनि स्वस्यमतिस्तु तज्ज्ञैर्वियुज्यमानं परतो हि विद्यात्"। २प्रेष्यमाणे त्रि॰ ततः भावे कर्मणि च "दूतवणिग्भ्याञ्च" पा॰ यत्। दूत्य तद्भावे तत्कर्मणि च "दूत्यं तद्भावकर्मणोः" अमरः। कामन्द॰ वाक्ये उदा॰ ष्यञ् दौत्य तत्रार्थे "न प्रयाति च दौत्येन" हितो॰ "द्विषां हृदैर्दौत्यपथः सितीकृतः" नैष॰। लिङ्गविशिष्टपरिभाषया दूतीशब्दादपि यत् ष्यञ् च। दूत्य दौत्य दूतीनां कर्मणि भावे च। स्वार्थे क। दूतक तत्रार्थे स्त्रियां कापि अत इत्त्वम् दूतिका दूत्याम्। भावे क्त। ४उपतापे न॰। [पुष्प्रां यन्द्रच॰।

दूतघ्नी स्त्री दूतं खेदं हन्ति हन-टक् ङीप्। कदम्ब-

दूति स्त्री दु-बा॰ ति दीर्घश्च ऊच्चनद॰। प्रेषणायां स्त्रियां "तां कामिनो दूतिमुदाहरन्ति" वर्णविवेकः या ङीप् दूती तत्रार्थे "उत्तिष्ठ दूति! यामोयामो यातस्तथापि नायातः" सा॰द॰ "रतिदूतिपदेषु कोकिलाम्" कुमा॰ "प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः" "तेन दूतिविदितं निशेटुषा" रघुः दूतीभेदलक्षणे सा॰द॰उक्ते "दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी। बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा। कला कौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः। माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः। एता अपि यथौचित्यादुत्तमाधममध्यमाः"

दून पु॰ दु-उपतापे क्त "दुग्वोर्दीर्घश्च" प्रा॰तस्य नः दीर्घश्च। मुग्ध॰ दू-खेदे ओदित्त्वात् तस्य नः। १अध्व.दिश्रान्ते २उपतप्ते ३दुःखिते च "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस!" नैष॰।

दू(र्) स्त्री दैप् शुद्धौ बा॰ कू। प्राणरूपे देवताभेदे "सा वा एषा देवता दूर्नाम दूरं ह्यस्यास्त्यदूरं ह वाऽस्यानृत्युर्भवति य एवं वेद" शत॰ब्रा॰ १४।४।१॰ "उपासक शरीरस्था प्राणरूपा देवता दूर्नाम दूरित्येवं ख्याताऽतः शुद्धा" भा॰अत्र शुद्धेति विशेषणात् दैपधातो रूपमिति सूचितम्। ब्राह्मणे तु दूरसम्बन्धात् तत्सिद्धिरुक्ता तथा च दूरं करोति मृत्युमुपासकस्य दूर+ऋयर्थे णिच् बा॰ न दवादेशः क्विप् णिलोपः रान्तोऽयमिति तु युक्तम्।

दूर त्रि॰ दुर्+दृण-"दुरीणो लोपश्च" उणा॰ रक् धातो रिकारलोपे रेफे परे पूर्वाणो दीर्घः। १विप्रकृष्टे महान्तरेण स्थिते दैशिकपरत्वयुक्ते अमरः। "दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते" भाषा॰ "दूरत्वमन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यम् तद्बुद्धेरसाधारणं बीजं दिगेव" सि॰मुक्ता॰ अतिदूरत्वञ्च प्रत्यक्षं नोत्पादयति यथाह

"अतिदूरात् सामीप्याद्दिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सा०का० "अनुपलब्धिरिति वक्ष्यमाणं सिंहावलोकितन्यायेनानुषङ्गनीयम् यथा उत्पतनं वियति पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते" त०कौ०। "त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे" शकु० "न खलु दूरगतोऽप्यतिवर्तते महमस्मावित्ति बन्धुजनोदितैः" माघः। भावप्राधान्यात् २दूरत्वे च "दूरान्तिकार्थेभ्यो द्वितीया च" पा० अस्त्यवचने प्रातिपदिकार्थे एभ्योद्वितीया स्यात् पञ्चमीतृतीये स्तः" सि०कौ० "ग्रामस्य दूरं दूरात् दूरेण वा। अस्त्यवचने इत्यनुवृत्तेर्नेह दूरः पन्थाः" सि०कौ० "रामाद्दुःखस्य यो दूरम्" सुग्रीवो० "नेत्रे दूरमनङ्गने पुलकिता तन्वी तवेयं तनुः" सा०द० "या तस्य कर्मनिर्वृत्तैः दूरं पश्चात् कृता फलैः" रघुः "दूरादपि क्रतुषु यज्वभिरिज्यते यः" माघः "दूरेण ह्यवरं कर्म बुद्धियोगात् धनञ्जय!" गीता "स्तुतिभ्योऽप्युत! रिच्यन्ते दूरेण चरितानि ते" रघुः एतच्छब्दयोगे पञ्चमी षष्ठी च। "दूरं ग्रामस्य ग्रामाद्वा" सि०कौ० अतिशायने दृघ्न् दृशादेशे दविष्ठ दैयसुन् दवीयस् अतिशयेन दूरस्थिते त्रि० दैयसुनि स्त्रियां ङीप्। "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। दूरं करोति दूर+णिच् वादेशः दवयति। "दवयदतिरयेण प्राप्तसुवीविभागम्" भट्टिः।

दूरङ्गम त्रि० दूरं गच्छति गम–वा० वेदे ख मुम् च। दूरगामिनि "दूरङ्गमं ज्योतिषां ज्योतिरेकम्" यजु०३४।१। लोके तु ड दूरा इत्येव

दूरत्व न० दूरस्य भावः त्व। दैशिके परत्वे तद्भ्रमविशेषे कारणम् यथोक्तं "दोषोऽप्रमायाजनकं प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः" भाषा० "क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः" सि०मुक्ता०।

दूरदर्शन पुंक्ली० दूरात् पश्यति दृश–ल्यु। १गृध्रे राजनि० जातित्वात् स्त्रियां ङीप्। २पण्डिते पु० दृश–भावे ल्युट्। ३दूरतोवीक्षणे न०। दूरतो दृश्यतेऽनेन दृश–करणे ल्युट्। ४दूरवीक्षणे यन्त्रभेदे (दूरबीन)

दूरदर्शिन् त्रि० दूरात् पश्यति कार्योत्पत्तेः प्राक् पश्यति जानाति वा दृश–णिनि। १दूरदर्शके २पण्डिते पु० अमरः ३गृध्रे पुंस्त्री० त्रिका० स्त्रियां ङीप्।

दूरदृश्य त्रि० दूरात् पश्यति दृश–क्विन्। १दूरदर्शिनि २पण्डिते गन्धर० ३गृध्रे हेमच०। क्विबन्तत्वात् भसि पदान्ते च कुः।

दूरमूल पु० दूरपर्यन्तं मूलमस्य। शुञ्जवृक्षे (सुँज)। राजनि०

दूरवेधिन् पु० दूरात् वेधोऽस्यास्ति साध्यतया इनि। दूरात् लक्ष्यभेदके

दूरापात त्रि० दूरमापतति आ+पत–कर्त्तरि अच्ला० ण। दूरपातिनि अस्त्रे णिनि दूरापातिन् तत्रार्थे हेमच०।

दूरूढा स्त्री दुर्+रुह–क्त रेफे परे पूर्वाणो दीर्घः। दुःखतया रूढे जाते दुरोरोगशब्दे ३२८ पृ० द्रष्टव्यम्।

दूरेअमित्र पु० दूरेअमित्रः शत्रुर्यस्य वेदे सप्तम्याः अलुक् प्रकृतिभावः। एकोनपञ्चाशन्मरुन्मध्ये मरुद्भेदे। ते च यजु० १७अ०।१ मन्त्रादौ ८० मन्त्रान्ते शुक्रज्योतिषेत्यादयोदर्शिताः। "अग्निमित्रश्च दूरेअमित्रश्च गणः" ८अ०

दूरेत्य त्रि० दूरे भवः एत्य। दूरभवे

दूरेपाक त्रि० दूरे पचति पच–ण्य ण्यङ्वा० कुत्वम् सप्तम्या अलुक् स०। दूरे पाचके स्त्रियां टाप्। तत्रैव गर्भे स्त्रीलिङ्गेनापि निर्देशात् विकुविशिष्टपरिभाषाया अनित्यत्वं ज्ञापितम्। [पाचके।

दूरेपाकु त्रि० पच–उण् ण्यङ्वा० कुत्वम् अलुक् स०। दूरे-

दूरेरितेक्षण त्रि० दूरे ईरितमीक्षणं येन। दूरपर्यन्तप्रेरितदर्शने केकरे (टेरा) शब्दभाषा।

दूरोह पु० दुःखेन रुह्यतेऽसौ दुर्+रुह–कर्मणि खल् रेफे परे पूर्वाणो दीर्घः। दुःखेन रोहणीये रोढुमशक्ये आदित्ये लोके तस्य निष्कामज्योतिष्टोमादियज्ञप्रयाजज्ञानज्ञानेन साध्यरोहणत्वात् दूरोहत्वम्। "असौ वै दूरोहो योऽसौ तपतीति" ऐत०४।१० श्रुतेस्तस्य तथात्वम्। २दूरारोहमात्रे त्रि०।

दूरोहण त्रि० दुःष्करमारोहणमस्य प्रा०ब०। आदित्ये दूरोह शब्दे तस्य तथात्वं द्रष्टव्यम् २छन्दोभेदे न०। असौ वा आदित्यो दूरोहणं छन्दः" इति श्रुतिः। "दुरोहणं छन्दः" यजु०१०।५ छान्दसं क्लीबत्वम्। ३दूरारोहणीये त्रि० दुःखेन रोहणं वा। ४दुःसाध्ये रोहणे ५तच्छन्दस्कमन्त्रसाध्यासभेदे च यथोक्तं आश्व०श्रौतसूत्रे

"हंसः शुचिषदिति पञ्चोऽर्धर्चशस्त्रिपद्या चतुर्थं मनवानमुक्त्वा प्रणुत्यावस्येत्। पुनस्त्रिपद्यार्धर्चशः पञ्च एव सप्तमम्" ८।२।१४ "एतान्यहमित्यं शंसेत्। प्रथमं पञ्चः द्वितीयमर्धर्चशः। तृतीयं त्रिभिः पादैरवसाय उत्तमेन पादेन प्रणुत्य चतुर्थमनवानमुक्त्वा प्रणवेनावस्येत्। एतदारोहणम्। अवापरोहणम्। पुनस्त्रि-

पद्मेत्येवमादिनोक्तं पञ्चमम् । अर्धर्चशः षष्ठं, पुनः पञ्चः सप्तमम् । एतत् दूरोहणं भवति । सप्तमवाननियमेन ऋक् सप्तकत्वोऽस्यस्ता दूरोहणमिति ज्ञापनार्थम् । एवकारः पौनर्वचनिकः" नारा० "एतत् दूरोहणम्" ८।२।१५ दूरोहणमिति प्रकृते पुनर्दूरोहणवचनं द्विविधं दूरोहणमस्तीति प्रदर्शनार्थं तेन स्वर्गकामस्य चतुरश्यस्तेन दूरोहणं भवति" नारा०।

दूर्य न०दूरे भवमार्यम् दूर+यत् । १पुरीषे विष्ठायाम् शब्दर० "ततः कल्यं समुत्थाय कुर्यान्मैत्रं नरेश्वर ! । नैर्ऋत्यामपुविक्षेपमतीत्याभ्यधिकं भुवः" विष्णुपु० तस्मेपुविक्षेपस्थानातिक्रमेण त्यागविधानेन दूरोत्सार्यत्वात् तथात्वम् । दूराय रोगदूरीकरणाय साधु यत् । २शय्याम् राजनि० ।

दूर्वा स्त्री दूर्वति रोगान् अनिष्टं वा दुर्व–हिंसायाम् अच् रेफे परे पूर्वाणो दीर्घः । १स्वनामख्याते घासभेदे तद्भेदादिकं भावप्र० उक्तं यथा

"नीलदूर्वा रुहानन्ता भार्गवी शतपर्विका । शतं सहस्रवीर्या च शतवल्ली च कीर्तिता । नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् । कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान्" । श्वेतदूर्वा "दूर्वा शुक्ला तु गोलोमी शतवीर्या च कथ्यते । श्वेतदूर्वा कषाया स्यात् स्वादी ग्राह्या च जीवनी । तिक्ता हिमा विसर्पास्रतृट् पित्तकफदाहहृत्" । गण्डदूर्वा "गण्डदूर्वा तु गण्डाख्या मत्स्याक्षी शकुलाशकः । गण्डदूर्वा हिता लोहहाविणी ग्राहिणी लघुः । तिक्ता कषाया मधुरा वातकृत् कटुपाकिनी । दाहतृष्णाश्वासास्रकुष्ठपित्तज्वरापहा" । तस्या उत्पत्तिकथा भविष्योत्तरे "क्षीरोदसागरे पूर्वं मथ्यमानेऽमृतार्थिना । विष्णुना बाहुजङ्घाभ्यां विधृत्य मन्दरं गिरिम् । भ्रमता तेन वेगेन क्षोभाद्यावर्षितानि वै । ऊर्मिभिस्तानि रोमाणि क्षीरोत्क्षिप्तानि तटान्तरे । अजायत शुभा दूर्वा रम्या हरितशाद्वला । एवमेषा समुत्पन्ना दूर्वा विष्णुतनूद्भवा । तस्या उपरि विन्यस्तं मथितामृतमुत्तमम् । देवदानवगन्धर्वयक्षविद्याधरोरगैः । तत्र येऽमृतकुम्भस्य निपेतुर्वारिबिन्दवः । तैरियं स्वर्गमासाद्य दूर्वा चैवाजराऽमरा । वन्द्या पवित्रा देवैस्तु सर्वदाभ्यर्चिता तथा" । "दूर्वा दहति पापानि धात्री हरति पातकम् । हरीतकी हरेद्रोगं तुलसी हरते भयम्" विष्णुधर्मोत्तरे । दूर्वा पूज्यत्वेनास्त्यस्याम् अर्श० अच् । २भाद्रशुक्लाष्टम्यां तद्दिने दूर्वायाः पूजाविधानात् तस्याः तथात्वम् "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी । पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" कालमाधवीयधृतवाक्यम् व्रतशब्दे दूर्वाष्टमीव्रते तत्पूजाविधानं द्रष्टव्यम् । ततः समूहे काण्डच् । दूर्वाकाण्ड दूर्वासमूहे न० "दूर्वाकाण्डमिव श्यामा" भट्टिः । दूर्वया दुर्गापूजननिषेधः "अक्षतैर्नार्चयेत् विष्णुं न तुलस्या विनायकम् । न दूर्वया यजेत् दुर्गां नोन्मत्तेन दिवाकरम्" आगमः । दुर्गायै अर्घ्यालवर्त्तिदूर्वादानं तु न निषिद्धमिति तु तत्त्वम् । जनमेजयवंशे श्रुतपभेदे पु० "नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति" भाग० ९।२२।२९

दूर्वाक्षी स्त्री वसुदेवभ्रातृभेदस्य हृकस्य पत्न्याम् "तच्चपुष्करमालादीन् दूर्वाक्ष्यां हृक आदधे" भाग०९।२४। २२श्लो०

दूर्वाद्यघृत न०चक्रदत्तोक्ते घृतभेदे तत्पाकविधिस्तत्रोक्तो यथा "दूर्वा श्वेतोत्पलकिञ्जल्का मञ्जिष्ठा सैन्धवालुका । सिता शीतसुशीरञ्च सुखं चन्दनपद्मकौ । विपचेत् कार्षिकैरेतैः सर्पिराजं सुखाग्निना । तण्डुलाम्बु, त्वजाक्षीरं दत्त्वा चैव चतुर्गुणम् । तत्पानं वमतो रक्तं स्रावनं नासिकागते । कर्णाभ्यां यस्य गच्छेत् तु तस्य कर्णे प्रपूरयेत् । चक्षुःस्राविणि रक्ते तु पूरयेत् तेन चक्षुषोः । मेढ्रपायुप्रवृत्ते तु वस्तिकर्मसु योजयेत् । रोमकूपप्रवृत्ते तु तदभ्यङ्गे प्रयोजयेत्" ।

दूर्वाष्टमी स्त्री दूर्वाप्रिया तत्पूजाङ्गत्वात् अष्टमी । भाद्रशुक्लाष्टम्याम् तस्या उभयदिनव्याप्तौ पूर्वदिने पूजा "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी । पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" ति०त० धृतवचनात् । दूर्वापूजाप्रकारश्च त्रिविधः हेमा० व्रतख० उक्तः व्रतशब्दे द्रष्टव्यः गौडदेशे तु भविष्योत्तरपुराणोक्तस्तत्प्रकारः प्रचलितः ।

दूर्वासोम पु० सुश्रुतोक्ते रसायनाङ्गे सोमलताभेदे यथोक्तं तत्र उत्तरतन्त्रे

"अंशुमान्मुञ्जवांश्चैव चन्द्रमा रजतप्रभः । दूर्वासोमः कनीयांश्च श्वेताश्वः कनकप्रभः । प्रतानवांस्तालडन्तः करवीरोऽश्ववानपि । स्वयम्प्रभो महासोमो यश्चापि गरुडाहृतः । गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा । अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः । गायत्रा त्रिपदा युक्तो यश्चोडुपतिरुच्यते । एते सोमाः समाख्याता वेदोक्तैर्नामभिःपुनः । सर्वेषामेव चैतेषामेको विधिरुपाचने । सर्वे तुल्यगुणाश्चैव विधानं ते

वक्ष्यते" । "अतोऽन्यतमं सोमसुपयुञ्जः सर्वप्रकारपरिचारकोपेतः प्रशस्तदेशे त्रिहतमगारं कारयित्वा कृतदोषः प्रतिसंस्कृतः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृतुं-मन्त्रमादायाध्वरकल्पेनाहृतमभिषुतमभिहुतं चान्तरान्तराहुतमङ्गतः सोमकन्दं सुवर्णसूच्या विदार्य्य पयोऽङ्गुलीयात्सौवर्णे पात्रेऽङ्गुलिमात्रं, ततः सकृदेवोपयुञ्जीत नास्वादयंस्ततउपसृष्य शेषमप्यस्वसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपासमानो विहरेत्" ।

दूर्वेष्टका स्त्री यज्ञाङ्गे चितिरूपेष्टकाभेदे "तमग्निरब्रवीत् । उपाहमायानीति केनेति पशुभिरिति तथेति पश्विष्टकयाह तदुवाचैषा वाव पश्विष्टका यद्दूर्वेष्टका तस्मात् प्रथमायै स्वयमातृण्णाया अनन्तर्हिता दूर्वेष्टकोपधीयते तस्मादस्या अनन्तर्हिता ओषधयोऽनन्तर्हिताः पशवोऽनन्तर्हितोऽग्निरनन्तर्हितो ह्येष एतयोपैत्" शत० ब्रा० ६।२।१।२ ।

दूलाश्व त्रि० दूडाश्व+डस्य वा लः । दुःखेन हिंस्ये ।

दूली स्त्री दूरं दूरताऽस्त्यस्याः अच्, दू-खेदे सम्प्र०भावे क्विप् तां राति ददाति वा रा-क रस्य लः दुरे खेदायलायते गच्छते ला--क यजर्थे क वा गौरा० ङीष् । नील्यां शब्दर० । "शृणुष्वेह महाबाहो नीलीरक्तस्य धारणात् । वाससोगणशार्दूल ! गदतो मम कृतस्त्रयः । पाखण्डाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् । पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति" भविष्यपु० तस्यावपनक्रियादेर्निषेधेन दूरीकार्यत्वात् तथात्वम् तदुपजीवने च पापोत्पादनेन तस्याः दुःखहेतुत्वात् वा तथात्वम् । स्वार्थे क । दूलिका तत्रार्थे

दूश्य न० दू-खेदे सम्प्र०भावे क्विप् तां श्यायते गमयति अन्तर्भूतण्यर्थे श्यै-गतौ क । वस्त्रनिर्मिते गृहे (तँबु) सारसुन्दरी ।

दूषक त्रि० दुष-णिच्-ण्वुल् । १दोषजनके "दूषकतापीजानिरुक्तेः" सर्वदर्शनसंग्रहः "वेदविक्रयिणश्चैव वेदानां चैव दूषकाः । वेदानां निन्दकाश्चैव ते वै निरयगामिनः" भा०अनु० १६४४श्लो० । "पाषण्डाऽदूषकाश्चैव समजानाञ्च दूषकाः । ये प्रत्यवसिताश्चैव ते वै निरयगामिनः" भा० अनु० १६४९श्लो० । "कूटशासनकर्तॄंश्च प्रकृतीनाञ्च दूषकान्" (हन्यात्) मनुः । २खले च त्रिका०

दूषण न० दूषि-भावे ल्युट् । सदोषतासम्पादने "दूषणादूषणार्थं च परित्यागो महीयसः । अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते" काम०नी० दूषि-कर्तरि ल्यु । २दोषजनके त्रि० "पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि च" मनुः । ३राक्षसभेदे पु० खरशब्दे २४६६ पृ० दृश्या ।

दूषणारि पु० ६त० । श्रीरामे शब्दरत्ना० तस्य रामेण वधकथा खरशब्दे २४६६पृ० दृश्या ।

दूषयित्नु त्रि० दूषि-शीलार्थे इत्नुच् । दूषणशीले [ङीप् ।

दूषि(षी) स्त्री दूषि-इन् । नेत्रमले (पँचुटि) शब्दमा० वा

दूषिका स्त्री दूषि+स्वार्थे क ण्वुल् वा । १नेत्रमले (पँचुटि) २तृणिकायां मेदि० । ३दूषणकर्त्र्यां स्त्रियाञ्च । दूषी+स्वार्थे क वा न ह्रस्वः । तत्रार्थे "वयसा प्रुष्वा अश्रुभिर्हृदिनीर्दूषीकाभिः" । यजु० २५।९ "शाल्मली कण्टकप्रख्याः कफमारुतशोणितैः । जायन्ते पिडका यूनां वक्षे या सुखदूषिका" सुश्रुतः "स्त्रियास्तथाऽपचारिण्या निष्कृतिः स्याद्दूषिका" भा०शा० २४अ० पुंसि त्वण्वुलि दूषक इत्येव । "नह्यहं प्रकृतिद्वेषी नाहं प्रकृतिदूषकः" हरिवं० १८९अ० ।

दूषित त्रि० दूषि-क्त । १दत्तदूषणे २प्राप्तदूषणे ३अभिशस्ते मैथुनापवादयुक्ते ४नष्टकन्याभावायां स्त्रियां स्त्री शब्दरत्ना० ।

दूषीविष न० दूषयति दूषि-बा० ई कर्म० । सुश्रुतोक्ते धातुदूषके विषभेदे यथा "यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत् । जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति । वीर्याल्पभावान्न निपातयेत्तत् कफाहतं वर्षगुणानुबन्धि । तेनार्दितो भिन्नपुरीषवर्णो विगन्धवैरस्यमुखः पिपासी । मूर्च्छन् यमन् गद्गदवाग्विपन्नो भवेच्च दूष्योदरलिङ्गजुष्टः । आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी । भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः । स्थितं रसादिष्वथ वा यथोक्तान् करोति धातुप्रभवान् विकारान् । कोपञ्च शीतानिलदुर्दिनेषु यात्याशु पूर्वं शृणु तत्र रूपम् । निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावयवाङ्गमर्द्दः । ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमेहान् । धातुक्षयं पादकराक्षिशोफं दकोदरं छर्दिमथातिसारम् । वैवर्ण्यमूर्च्छाविषमज्वरान्वा कुर्यात् प्रदुष्टां प्रबलां तृषां वा । उन्मादमन्यच्चलनवेत्तथान्यदाशाहमन्यत् चपयेच्च शुक्रम् । प्रगाढमन्य-

व्जनयेच्च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान्। दूषितं देशकालाच्च दिवास्वप्नैरभीक्ष्णशः। यस्मादुदूषयते धातून् तस्मादुदूषीविषं स्मृतम्"

दूष्य त्रि॰ दूषि–कर्मणि यत्। १दूषणीये "दूष्यं वचो मम पुनर्निपुणं विभाव्य" अनुमानदीधितिः। "राज्योपघातं कुर्वाणा ये पापाचारवल्लभाः। एकैकशः संहता वा दूषयांस्तान् परिचक्षते" कामन्दकी॰उक्ते २राजद्रोपघातके। ३वस्त्रे ४वस्त्रखण्डे न॰ मेदि॰ ५पूये न॰ हेमच॰ ६दूषिवन्धरव्यास् स्त्री हेमच॰।

दूष्युदर न॰दूषिभिर्दोषैः कृतमुदरं तन्नामा रोगः। सुश्रुतोक्ते दोषकृते उदररोगभेदे तन्निदानादि तत्रोक्तम् उदरशब्दे ११४६पृ॰दर्शितम् "प्रकीर्तितं दूष्युदरन्तु घोरम्" सुश्रुतः

दृ आदरे तु॰ आ॰ सक॰ अनिट्। द्रियते अदृत। अयमाङ्पूर्व एव प्रयुज्यते। "नियोय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि" नैष॰ आदृतः आदरः। "दरादराभ्यां दरकम्पिनी यथे" नैष॰ "न जातहार्देन न विद्विषादरः" किरा॰ "आदृत्यस्तेन दृत्येन" भट्टिः।

दृ वधे स्वादि॰ पर॰सक॰ अनिट्। दृणोति अदार्षीत् ददार स्वादिगणे छन्दसीत्यधिकारे "विचि जिरि दाशृ दृ–हिंसायाम्" पा॰ उक्तेः छान्दसोऽयम्। "क्षिणोतिर्भाषायामपीत्येके" सि॰कौ॰ उक्तेः अन्यस्यापि कचिद्भाषायां प्रयोग इति गम्यते मत्स्यघातिनि धीवरे दाशशब्दप्रयोगात्। [संक्षिप्तसारे

दृक न॰ दृ+विदारे वा॰. कक् लुक्च न कित्त्वम्। छिद्रे

दृकाण न॰ज्योतिषोक्ते राशेस्तृतीये दशांशरूपे अंशे द्रेक्काणे "त्रिंशत्त्वभे विंशतिरुच्चभे स्वे दृङ्ङ्शिचन्द्रादशकं दृकाणे" नारा॰ता॰ पञ्चवर्गविवेचने दृक्काणशब्दे विवृतिः।

दृक्कर्ण पुंस्त्री॰ दृक् नेत्रमेव कर्णोऽस्य। सर्पे हेमच॰ स्त्रियां जातित्वात् ङीष्।

दृक्कर्मन् न॰ दृगर्थं दृश्यर्थं कर्म। ग्रहाणां दर्शनयोग्यतासाधनार्थं सू॰सि॰ उक्तेः कर्मभेदे तच्च ग्रहनक्षत्रयोगाद्युपयोगि संस्कारभेदरूपं यथाह तत्र

"नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने। ऋङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम्" सू॰सि॰ "अत्र निमित्तसप्तमी ग्रहनक्षत्राणां बहुत्वादुपचनम्। नक्षत्रग्रहयोर्युगपदिदं द्वयं दृक्कर्म स्मृतं प्रागुक्तम् आदौ प्रथमं कार्यम्। ताभ्यामनन्तरं क्रिया कार्येत्यर्थः। अत नक्षत्रध्रुवकाणामायनदृक्कर्मसंस्कृतानामेवोक्तत्वादायनं दृक्कर्म न कार्यमिति ध्येयम्। ग्रहाणामस्तोदयौ नित्यास्तोदयौ सूर्यसान्निध्यजनितास्तोदयौ च ग्रहाणामुपलक्षणत्वान्नक्षत्राणामपि। तयोः साधननिमित्तं ग्रहस्य नक्षत्रस्य वा देयम्। अतोऽदृक्कर्मार्थं केवलः शरः साध्यः। न तु दिनमानरात्रिमानननतोन्नते साध्ये। क्षितिजसम्बन्धेन दृग्ग्रहरूपोदयास्तलग्नस्यावश्यकत्वेन क्षितिजातिरिक्तायनपरिणामस्य व्यर्थत्वात् युतौ तु समग्रोतचन्द्रदृक्के युगपद्दर्शनार्थं तत्परिणामस्यावश्यकत्वात्। ऋङ्गोन्नतिनिमित्तं चन्द्रस्य। तकारः सप्तम्यर्थकसकारपरः। अत्रापि स्त्रोके पूर्वार्द्धोक्तमाद्यदृक्कर्म संस्कार्यमिति ध्येयम्"। रङ्गना॰

दृक्कर्म द्विविधम् आयनमन्यजञ्च तत्रायनदृक्कर्मायनशब्दे ७७१पृ॰ सि॰शि॰ उक्तं दर्शितम् अन्यजं दृक्कर्मोच्यते

"इदानीमन्यजं दृक्कर्माह प्रसि॰ "स्फुटास्फुटक्रान्तिजयोश्चरार्धयोः समान्यदिक्के ऽन्तरयोगजाश्चवः। पलोद्भवाख्या भनभःसदां शरे महत्यधाल्ये यदि वा स्युरन्यथा। स्पष्टेषुरुच्चवलनेन हृतो त्रिभक्तो लब्धघ्नया रविहृतोऽभया हृतो वा। लब्धं हृतं त्रिभगुणेन हृतं द्युभौर्व्या स्युर्वाऽसवः पलभवा अथ तैः शरे तु। याम्योत्तरे क्रमविलोमविधानलग्नं खेटात् कृतायनफलादुदयास्तलग्नम्। सौम्ये क्रमेण विपरीतमिषौ तु याम्ये भार्धाधिकात् चरतोऽस्तविलग्नमेवम्"सू॰। "ग्रहस्य स्फुटक्रान्तेरस्फुटक्रान्तेश्चरार्धे साध्ये। यदि स्फुटास्फुटक्रान्ती तुल्यदिक्के तदा चरार्धयोरन्तरं कार्यम्। यदि भिन्नदिक्के तदा योगः। एवं येऽसवो भवेयुस्ते पलोद्भवा ज्ञेयाः। ग्रहस्य भस्य वा यदा महांश्चरस्तदैवम्। यदाल्पस्तदान्यथा वा पलोद्भवासवः साध्याः। ग्रहस्य स्पष्टः शरोऽन्यवलनेन गुणितो लब्धघ्नया भाज्यः। अथ वा चन्द्रभया गुणितो द्वादशभिर्भाज्यः। यल्लब्धं तत् त्रिघ्नया गुण्यं द्युघ्नया भाज्यं फलं पलोद्भवा असवो भवन्तीत्यनुकल्पः। अथ कृतायनदृक्कर्मकं ग्रहं रविं प्रकल्प्य तैः पलोद्भवासुभिर्लग्नं साध्यम्। यदि ग्रहस्य याम्यः शरस्तदा क्रमविलग्नम्। यदि सौम्यस्तदा विलोमलग्नम्। एवं कृते सति ग्रहस्योदयलग्नं भवति। अथ तमेव ग्रहं समार्धं रविं प्रकल्प्य तैरेवासुभिरुच्चरे शरे यत् क्रमलग्नं याम्ये विलोमं क्रियते तद्ग्रहस्यास्तलग्नम्"। "अत्रोपपत्तिः। अत्र गोले विषु-

उन्मण्डलं स्वाक्षांशैर्यावन्नामितं तावदुन्मण्डलसत्तरगोले क्षितिजादुपरि लगति याम्येऽधः। यतस्तत्रस्थो ग्रहः स्वचरार्धांशैरुन्नतिं नतिं च गतः। अतश्चरार्द्धस्य या वासना सैव पलोद्भवासनाम्। स्फुटास्फुटक्रान्तिजयोश्चरार्धयोरन्तरे यावन्तोऽसवस्तावन्तः शरभवा इत्यर्थोऽज्ञातम्। यतस्तयोरन्तरं शर एवं तुल्यदिक्कौ। यदा सहता शरेणान्यदिक्कं नीता क्रान्तिस्तदा शरस्यैकं खण्डमुत्तरतोऽन्यद्दक्षिणतः। तयोर्योगे यतः शरो भवति। अतस्तज्जनितयोश्चरार्धयोर्योगे शरजनिताः पलोद्भवासवः स्युः। एवं हि सहति शरे। अथाल्पे। ग्रहः किलोत्तरगोल उत्तरस्य तस्य शरस्तदाक्षवशाच्छरेण ग्रहस्य तदुन्नमनं तत् त्रैराशिकेन साध्यते। यदि लम्बज्यया कोटयाऽक्षवलनतुल्यो भुजस्तदा स्फुटशरतुल्यया किमिति। अत्र यत् फलं तदुपरिदृग्व्याहृत्ते ज्याहृत्यं भवति। अथ वा लघुना चेत्तेनानुपातः। यदि द्वादशाङ्गुलकोटया पलभा भुजस्तदा स्फुटशरकोटया किमिति। फलं तुल्यमेव। अथ त्रिज्याहृत्ते परिणामाग्रानुपातः। यदि दृग्व्याहृत्ते एतावती ज्या तदा त्रिज्याहृत्ते कियतीति। फलस्य धनुः कर्तुं युज्यते। तच्छरस्याल्पत्वात्तोपपद्यत इति न कृतम्। आयनदृक्कर्मण्यस्फुटयिष्ये पादसवः साधिताः इह तु स्फुटात्। तत्र कारणमुच्यते। तेन दृक्कर्मणा निरक्षदेशक्षितिजस्थो ग्रहः कृतः। तत् क्षितिजसन्यदेश उन्मण्डलम्। शरमूले यद्दृग्व्याहृत्तं शराग्रे च यत् तयोर्दृत्तयोरुन्मण्डले यावदन्तरं तावान् स्फुटः शरः। स तु कोटिरूपः। अतोऽत्र कोटिरूपेण पलोद्भवा असवः साधिताः कृतायनदृक्कर्मको ग्रहोऽक्षवशात् प्रागुदित उदेष्यति वा तैरसुभिस्तेऽत्र पलोद्भवास्याः। अथ याम्ये शरे तैरसुभिः क्षितिजादधःस्थो ग्रहो यावदुपरि क्षितिजं नीयते तावत् कृतायनदृक्कर्मग्रहादग्रतः क्रान्तिवृत्तं क्षितिजे लगति। यदि सौम्यः शरस्तदा तैरसुभिः क्षितिजादुपरिस्थो ग्रहः क्षितिजं यावदधो नीयते तावत् कृतायनदृक्कर्मकाद्ग्रहात् पृष्ठतः क्रान्तिवृत्तं क्षितिजे लगति। अत उक्तं शरे याम्योत्तरे क्रमविलोमविधानलग्नमित्यादि। एवं कृते उदयलग्नं जातम्। अस्मादुदयलग्नसाधनाद्ग्रहस्तमस्तलग्नसाधनम्। यतो यैरसुभिर्विक्षेपेण प्राच्यां ग्रहः क्षितिजादुन्नाम्यते तैरेव प्रतीच्यां नाम्यते। यैर्नाम्यते तैरेवोन्नाम्यते। अथ प्रतीच्यां ग्रहेऽस्तं गच्छति प्राच्यां यल्लग्नमुदेति तदस्तलग्नम्। अतो भाधाधिकात् खचरत इत्युक्तम्। इदं सर्वं गोलोपरि सम्यग्दृश्यते"।

दृक्काण न॰ ज्यो॰ उक्ते राशेर्दशांशरूपे तृतीयांशे द्रेक्काणे तथा च एकैकराशौ त्रयो द्रेक्काणास्तेन द्वादशराशिषु ३६ द्रेक्काणा भवन्ति मेषादिराशिस्थानां तेषां षट्त्रिंशतः क्रमेण स्वरूपाणि दृक्ज्या॰ ३६ श्लोकैरुक्तानि यथा "कन्यां सितवस्त्रवेष्टितः कृष्णः शक्र इवाभिरक्षितम्। रौद्रः परशुं सुसद्यतं धत्ते रक्तविलोचनः पुमान्१। रक्ताम्बराभूषणभव्यचित्ता कुमारतिर्वाजिसुखी तृषार्त्ता। एकेन पादेन च मेषमध्ये दृक्काणरूपं यवनोपदिष्टम्२। क्रूरः कलाज्ञः कपिलः क्रियार्थी भग्नव्रतोऽभ्युद्यत दण्डहस्तः। रक्तानि वस्त्राणि बिभर्त्ति चण्डो मेषे तृतीयः कथितस्त्रिभागः३। कुञ्चितलूनकचा घटदेहा दग्धपटा तृषिताशनचित्ता। आभरणान्यभिवाञ्छति नारी रूपमिदं वृषभे प्रथमस्य४। क्षेत्रधान्यगृहसेतुकलाज्ञो लाङ्गले सशकटे कुशलश्च। स्कन्धसङ्गतिगोपतितुल्यं श्वेतरोऽजदनो मलवासाः५। द्विपसमकायः प्राक्खुरदंष्ट्रः शरभसमाङ्घ्रिः पिङ्गलमूर्तिः। अविसृगलोभव्याकुलचित्तो वृषभवनस्य प्रान्तगतोयम्६। स्त्र्याश्रयं समभिवाञ्छति कर्म नारी रूपान्विता ऽऽभरणकार्यकृतादरा च। हीनप्रजोज्झितभुजर्त्तुमती त्रिभागमाद्यं तृतीयभवनस्य वदन्ति तज्ज्ञाः७। उद्यानसंस्थः कवची धनुष्मान् शूरोऽस्त्रधारी गरुडाननश्च। क्रीडाकलाचङ्करणार्थचिन्तां करोति मध्ये मिथुनस्य राशेः८। भूमिपो वरुणवद्वरुरत्नो बद्धतूणकवचः सधनुष्कः। कृत्यवादनकलासु च विज्ञान् काव्यकृन्मिथुनराश्यवसानेऽ९। पत्रमूलफलकन्दुद्विपकायः कानने मलयगः शरभाङ्घ्रिः। क्रोडतुल्यवदनो हयकण्ठः कर्कटे प्रथमरूपमुशन्ति१०। पद्मार्चिता मूर्द्धनि भोगियुक्ता स्त्री कर्कशारण्यगता विरौति। शाखां पलाशस्य समाश्रिता च मध्ये स्थिता कर्कटकस्य राशेः११। भार्याभरणार्थमर्णवं नौस्थो गच्छति सर्पवेष्टितः। हैमेन युतो विभूषणैश्चिपिटास्योऽन्त्यगतस्य कर्कटे १२। शालमलेरुपरि गृध्रजम्बुकौ श्वा नरश्च मलिनाम्बरान्वितः। रौति मातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्यते १३। हयाकृतिः पाण्डुरमाल्यशेखरो बिभर्ति कृष्णाजिनकम्बलं नरः। दुरासदः सिंह इवात्तकार्मुको नताननाशो मृगराजमध्यमः१४।

कृष्णाननो वानरतुल्यचेष्टो बिभर्त्ति दण्डं फलमाभिषं च । कूर्ची मनुष्यः कुटिलैश्च केशैर्मृगेश्वरस्यान्त्यगतस्त्रिभागः१५ । पुष्पप्रपूर्णेन घटेन कन्या मलप्रदिग्धाम्बरसंवृताङ्गी । वस्त्रार्थसंयोगमभीप्समाना गुरोः कुलं वाञ्छति कन्यकाद्यः१६ । पुरुषः प्रगृहीतलेखनिः श्यामो वस्त्रगिरा व्ययायकृत् । विपुलं च बिभर्त्ति कार्मुकं रोमव्याप्ततनुश्च मध्यमः१७ । गौरी सुधौतापघ्रङ्कुलगुप्ता समुच्छ्रिता कुम्भकटाहहस्ता । देवालयं स्त्री प्रयता प्रवृत्ता वदन्ति कन्यान्त्यगतस्त्रिभागम्१८ । वीथ्यन्तरापणगतः पुरुषस्तुलावाहुन्मानमानकुशलः प्रतिमानहस्तः । भाण्डं विचिन्तयति तस्य च मूल्यमेतद्रूपं वदन्ति यवनाः प्रथमं तुलायाः१९ । कलशं परिगृह्य विनिःपतितुं समभीप्सति गृध्रमुखः पुरुषः । क्षुधितस्तृषितश्च कलत्रसुतान्मनसैति तुलाधरमध्यगतः२०। विभीषयन् तिष्ठति रत्नचित्रितो वने मृगान् काञ्चनतूणवर्मभृत् । फलाभिषं वानररूपभल्लरस्तुलावसाने यवनैरुदाहृतः२१। वस्त्रैर्विहीनाऽऽभरणैश्च नारी महाशनद्वात् सृजपैति कूलम् । स्थानच्युता सर्पनिबद्धपादा मनोरमा दृश्चिकराशिपूर्वः । स्थानसुखान्यभिवाञ्छति नारी भर्तृक्षते भुजगाहतदेहा। कच्छपकुम्भसमानशरीरा दृश्चिकमध्यमरूपसुशान्ति२२। पृथुलचिपिटकूर्मतुल्यवक्त्रः श्वमृगवराहमृगालभीषकारी । अवति च मलयाकरप्रदेशं मृगपतिरन्त्यगतस्य दृश्चिकस्य २४ । मनुष्यवक्त्रोऽश्वसमानकायो धनुर्विगृह्यायतमाश्रमस्यः । क्रतूपयोज्यानि तपस्विनश्च ररक्ष पूर्वो धनुषस्त्रिभागः २५ । मनोरमा चम्पकहेमवर्णा भद्रासने तिष्ठति मध्यरूपा । सप्तद्वरत्नानि विवर्धयन्ती मध्यत्रिभागो धनुषः प्रदिष्टः२६ । कूर्ची नरोहाटकचम्पकाभोवरासने दण्डधरो निषण्णः । 'कौशेयकान्युद्वहतेऽजिनं च तृतीयरूपं नवमस्य राशेः२७ । रोमचितोमकरोपमदंष्ट्रः सूकरकायसमानशरीरः । योक्त्रकलालकबन्धनधारी रौद्रमुखो मकरप्रथमस्तु२८ । कलासभिन्नाजदलायताक्षी श्यामा विचित्राणि च मार्गमाणा । विभूषणालङ्कृतलोहकर्णा योषा प्रदिष्टा मकरस्य मध्ये२९ । किन्नरोपमतनुः सकम्बलसूणचापकवचैः समन्वितः । कुम्भसुद्वहति रत्नचित्रितं स्कन्धगं मकरराशिपश्चिमः३० । स्नेहमद्यलवभोजनागमव्याकुलीकृतमनाः सकम्बलः । कोशकारवसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः३१। दग्धे शकटे सशाखमूले लोहाम्याहरतेऽङ्गना वने । मलिनेन पटेन संवृता भाण्डैर्मूर्ध्निगतैश्च मध्यमः३२ । श्यामः सरोमश्रवणः किरीटी त्वक्पत्रनिर्यासफलैर्बिभर्ति । भाण्डानि लोहैरतिभिन्नितानि सञ्चारयत्यन्त्यगतो घटस्य३३ । स्रुग्भाण्डसङ्क्रामणिशङ्खमिश्रे व्याक्षिप्तहस्तः सविभूषणश्च । भावीविभूषार्थमपां निधानं नाथा स्रवत्यादिगतो झषस्य३४ । अत्युच्छ्रितध्वजपताकसुपैति पोतं कूलं प्रयाति जलधेः परिवारयुक्ता । वर्णेन चम्पकसुखा प्रमदा त्रिभागो मीनस्य चैष कथितो मुनिभिर्द्वितीयः३५ । शम्भालिके सर्पनिवेष्टिताङ्गीवस्त्रैर्विहीनः पुरुषस्त्वटव्याम् । चौरानवव्याकुलितान्तरात्मा विक्रोशतेऽन्त्योपगतो झषस्य३६ ।" एतेषां स्वरूपोत्कीर्त्तनेन नष्टजातकोद्धारः तत्रैव दर्शितः तथा षट्पञ्चाशिकायां चौरस्वरूपविज्ञानमपि एतदनुसारेण कार्यमित्युक्तम् यथा "अंशकाज् ज्ञायते द्रव्यं दृक्काणैस्तस्करास्तथा" "होरानवांशप्रतिमं विलग्नं लग्नाद्रवियौवति वा दृकाणे । "तस्माद्दृक्तावति वा विलग्नं प्रष्टुः प्रसूतावपि शास्त्रमाहु" दृष्टव्या०। राशिभेदे तदधिपाश्च "स्वपञ्चनवमानां ये राशीनामधिपाः ग्रहाः । ते द्रेक्काणाधिपा राशौ द्रेक्काणास्त्रयएव हि" ज्यो०त० यथा मेषस्य स्वामी कुजः १द्रेक्काणेशः । तत्पञ्चम सिंहराशेः स्वामी रविः स मेषस्य २द्रेक्काणेशःमेषतः नवमो धनुराशिस्तस्येशः जीवः मेषस्य ३द्रेक्काणेशः एवं वृषादेरूह्यम् । द्रेष्काण द्रेक्काण द्रेकाणा अपि तत्रार्थे

दृक्क्षेप ६त० । १दृष्टिपाते स्व०सि० उक्तं २दृग्वृत्तजग्रान्तरालस्थगरूपे क्षेपे च यथा

"अथाभ्यासमयुक्तं दृक्क्षेपं लम्बनोपयुक्तां दृग्नतिं चाह" रङ्गः। "मध्योदयव्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् । मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् । तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः" मु०। पूर्वोक्तमध्यज्या पूर्वानीतोदयाभिधयोदयज्यया। अस्या व्याहृतत्वाद्दृग्ज्ययेत्युक्तम् । गुणिता त्रिज्यया भक्ता फलं वर्गितं वर्गः सञ्जातो यस्य तत् । फलस्य वर्गः कार्य इत्यर्थः । मध्यज्याया वर्गे विश्लिष्टं हीनं वर्गितं फलं कार्यम् । शेषान्मूलं दृक्क्षेपः ततस्त्रिज्ययोर्यौ वर्गौ तयोरन्तरान्मूलं शङ्कुः । स आनीतः शङ्कुर्दृग्गतिसञ्ज्ञो भवति । न तु शङ्कुमात्रम् । अत्रोपपत्तिः । त्रिभोनलग्नस्य दृग्ज्यानयनार्थं क्षेत्रम् । मध्यलग्नदृग्ज्या कर्णस्त्रिभोनलग्नस्य याम्योत्तरवृत्तात् प्रागपरस्थितत्वेन

तत् खस्वस्तिकान्तरस्थिततदीयदृग्वृत्तप्रदेशांशज्या कोटिः। मध्यलग्नत्रिभोनलग्नान्तरांशज्या क्रान्तिवृत्तस्थो भुजः। अत्र भुजानयनं चोदयलग्नस्यक्रान्तिवृत्तप्रदेशः। प्राक्स्वस्तिकात् तद्यान्तरेणोत्तरदक्षिणो भवति। एवमस्तलग्नप्रदेशः परस्वस्तिकाद्दक्षिणोत्तरः। तदनुरोधेन च त्रिभोनलग्नप्रदेशक्रान्तिवृत्तीययाम्योत्तरवृत्तरूपतदुदग्वृत्तक्षितिजसम्पातात् तद्यान्तरेण लग्नमवश्यं भवति। अतस्त्रिजग्रातुल्यमध्यलग्नदृग्ज्यया लग्नायातुल्यो भुजस्तदाभीष्टतदुदृग्ज्यया क इत्यनुपातेन स फलतोऽत्तः। तद्भगोनान्मध्यलग्नदृग्ज्यावर्गान्मूलं त्रिभोनलग्नस्य दृग्ज्या दृक्क्षेपाख्या। एतद्वर्गोनात् त्रिज्यावर्गान्मूलं त्रिभोनलग्नशङ्कुर्दृग्गतिसञ्ज्ञः। अत्रेदमवधेयम्। त्रिप्रश्नाधिकारोक्तप्रकारेण त्रिभोनलग्नस्य शङ्कुदृग्ज्ये दृग्गतिदृक्क्षेपतुल्ये न भवतः। किन्तु दृग्गतिदृक्क्षेपाभ्यां क्रमेण न्यूनाधिके भवतः सर्वदा धूलीकर्मणानुभवात्। अत आनीतोऽयं दृक्क्षेपस्त्रिभोनलग्नदृङ्मण्डलस्थितोऽपि न त्रिज्यानुरूपः। किन्तु फलवर्गोनत्रिज्यावर्गपदरूपविलक्षणवृत्तव्यासार्धप्रमाणेन सिद्ध इति गम्यते। अतो दृग्ज्यायास्त्रिज्यानुरूपत्वेन त्रिज्यावृत्तपरिणतो दृक्क्षेपस्त्रिभोनलग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा। अस्यास्तत्त्रिज्यावर्गेत्यादिना दृग्गतिः स्फुटा त्रिभोनलग्नशङ्कुरूपा। एतदनुक्तिः स्वल्पान्तरत्वाद्गणितसुखार्थं कृपालुना कृता। त्रिप्रश्नक्रियागौरवभियैतन्मार्गान्तरं लाघवादुक्तमिति दिक्। अथ लाघवादुदृक्क्षेपदृग्गती गणितसुखार्थं श्लोकार्धेनाह" रङ्ग०"नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती। एकज्यावगतस्त्रिदो लब्धं दृग्गतिजीवया"सू०। "दशमभावनतांशानां भुजकोट्योर्नतांशतदूननवतिरूपयोरनयोर्ज्ये क्रमेण दृक्क्षेपदृग्गती अस्फुटे स्थूले। यत्तु स्फुटे प्रागुक्ते दृक्क्षेपदृग्गती विहाय गणितलाघवार्थं दशमभावनतांशभुजकज्योर्ज्ये तत्स्थानापन्ने ग्राह्ये। तत्तूदयज्याभावे नतांशबाहुकोटिज्ये दृक्क्षेपदृग्गती स्फुटे इति तत्र उक्तप्रकारेणैतत्सिद्धेस्तत्कथनस्य व्यर्थत्वात्। अतोपपत्तिः। त्रिभोनलग्नस्य दशमभावासन्नत्वेन दशमभावस्य याम्योत्तरवृत्तस्थत्वेन लाघवार्थं दशमभावमेव त्रिभोनलग्नं प्रकल्प्य तत्रतांशज्या मध्यज्यारूपा त्रिभोनलग्नदृक्क्षेपः। उन्नतज्या शङ्कुर्दृग्गतिः। इदमतिस्थूलम्। यैस्तु भगवतोक्तं मध्यलग्नं दशमभावपरतया व्याख्यातं तेषां मत एतदुक्तमिति सूक्ष्मम्। प्रयासाधितदृक्क्षेपदृग्गती प्रागुक्ते सूक्ष्मे व्यतिस्थूले इति ध्येयम्। भास्कराचार्यैस्तु" "त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये यदि वा सुखार्थम्"। इति यदुक्तं तदस्मात् सूक्ष्ममिति ध्येयम्" रङ्ग०। [तीर्णदृक्पथे" नैष०।

दृक्पथ पु० ६त०। दृष्टियोग्ये स्थाने। "क्रमेण तस्मिन्नघ-

दृक्प्रसाद स्त्री दृशं प्रसादयति अञ्जनेन प्र+सद+णिच् अण् दृशः प्रसादो यस्याः वा। कुलत्थायां राजनि० तदञ्जनेन नेत्रयोः प्रसादनात्तस्यास्तथात्वम्।

दृक्प्रिया स्त्री दृशं प्रीणाति प्री–ल। शोभायां राजनि०. शोभादर्शने हि, दृशोस्तद्द्वारात्मनः प्रीणनात्तस्यास्तथात्वम्

दृक्शक्ति स्त्री दृक् प्रकाशनमेव शक्तिः। १प्रकाशरूपे चैतन्ये २तद्युक्ते सर्वप्रकाशके चेतने पुरुषे च "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" पात०सू० "पुरुषोदृक्शक्तिर्बुद्धिर्दर्शनशक्तिः" भा०।

दृक्श्रुति पु० दृक् नेत्रमेव श्रुतिः श्रवणमस्य। चक्षुःश्रवसि सर्पे दृला०। [धिष्ठातृत्वेन तद्ध्यक्षत्वम्।

दृग्ध्यक्ष पु० ६त०। सूर्ये शब्दार्थकल्पतरुः। तस्य नेत्रा-

दृगल न० दृशे दर्शनायालति अल–पर्याप्तौ अच्। शकले खण्डे "पुरा दृगलं मत्तमिन्द्राभितः" आश्व०श्रौ० ५।७।२ "दृगलं शकलम्" नारा०।

दृग्गति स्त्री ६त०। १दृशोर्गतौ सू०सि० उक्ते अहस्सदोपयोगिनि २दृशोगतिभेदे दृक्क्षेपशब्दे दृश्यम्।

दृग्गोल न० खगोलान्तर्गते गोलभेदे यथोक्तं सि०शि०

"बद्ध्वा खगोले नलिकाद्वयं च ध्रुवद्वये तन्नलिकास्थमेव। बहिः खगोलाद्विदधीत धीमान् दृग्गोलमेवं खलु वक्ष्यमाणम्। भगोलवृत्तैः सहितः खगोलो दृग्गोलसंज्ञोऽयममण्डलाद्यैः। द्विगोलजातं खलु दृश्यतेऽत्र क्षेत्रं हि दृग्गोलमतो वदन्ति"। "तस्मिन् खगोले ध्रुवचिह्नयोर्नलिकाद्वयं बद्ध्वा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलत्रयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलवृत्तैर्वक्ष्यमाणैर्भगोलवृत्तैः क्रान्तिविषुवद्वाद्यैर्यो निबध्यते स दृग्गोलः। कथमस्य दृग्गोलसंज्ञेति तदर्थमाह। द्विगोलजातमित्यादि। यतोऽत्राकुज्याषमण्डलाद्यक्षक्षेत्राणि द्विगोलजातानि भगोलवृत्तैः खगोलवृत्तमिलितैस्तान्युत्पद्यन्ते। भिन्नगोलबन्धे सम्यङ् नोपलभ्यन्त इति दृग्गोलः कृतः" प्रमि०।

दृग्ज्या स्त्री सू०सि०उक्तायां दिनमानादिज्ञानार्थं शङ्कुच्छायोपयोगिन्या दृष्टियोग्यायां दृग्वृत्तक्षेत्रस्थजीवायाम् यथोक्तं

तत्र "त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता । अन्या नतोत्क्रमज्योना स्वाहोरात्रार्द्धसङ्गुणा । त्रिज्याभक्ता भवेच्छेदो लम्बज्याग्रोऽथ भाजितः । त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत् । त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्" सू०सि० "उत्तरगोले चरोत्क्रमया ज्यया चरज्यया चेत्यर्थः पूर्वचरानयने चरज्यायाश्चरजेति षड्भोक्तेः । युक्ता त्रिज्यान्या स्यात् । याम्यगोले तया चरज्ययोना त्रिज्यान्या स्यात् । नतोत्क्रमज्योना सूर्योदयाद्दिनगतघटयो दिनशेषघटयो वा दिनार्धान्तर्गता उन्नतसंज्ञास्ताभिरूनं दिनार्धं नतकालो घटयात्मकस्तस्यासुभ्यो लिप्तास्तत्त्वयमैरित्यादिविधिना मुनयो रन्ध्रयमला इत्याद्युक्तोत्क्रमज्यापिण्डैर्ज्योत्क्रमज्या । पञ्चदशघट्यधिकनते तु पञ्चदशघट्यूननतस्य क्रमज्याखण्डैः क्रमज्या तया युक्ता त्रिज्योत्क्रमज्या भवति । तया हीनेत्यर्थः । स्वाहोरात्रार्द्धसङ्गुणा । गृहीतचरज्यासम्बन्ध्यहोरात्रवृत्तव्यासार्धं द्युज्या तया गुणिता त्रिज्यया भक्ता फलं छेदसंज्ञः स्यात् । अथानन्तरं छेदो लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलमिष्टकाले शङ्कुः स्यात् । तस्य शङ्कोर्वर्गं त्रिज्यावर्गाच्छोधयेत् । शेषस्य मूलं दृग्ज्या । आभ्यां छायाकर्णौ तु पूर्ववत् पूर्वोक्तरीत्या भवतः । अत्र छायाकर्णौ त्विति कोणच्छायाकर्णसाधनश्लोकान्तभागस्य ग्रहणात् तच्छ्लोकोक्तरीत्याभीष्टशङ्कुदृग्ज्याभ्यां छायाकर्णौ साध्यावित्युक्तम् । अत्रोपपत्तिः । याम्योत्तरवृत्तोर्द्ध्वभागग्रहाधिष्ठितद्युरात्रवृत्तसम्पातात् क्षितिजद्युरात्रवृत्तसम्पातद्वयबद्धोदयास्तसूत्रक्षितिजसम्बद्धयाम्योत्तरवृत्तसूत्रसम्पातपर्यन्तमहोरात्रवृत्ते सूत्रं त्रिज्यानुरूपमन्या । सा तूत्तरगोले चरज्यायुता त्रिज्या दक्षिणगोले चरज्ययोना त्रिज्या उन्मण्डलयाम्योत्तरसूत्रावधिमहोरात्रवृत्तव्यासार्धं त्रिज्यात्वात् उन्मण्डलस्योत्तरदक्षिणक्रमेण क्षितिजादूर्ध्वाधःस्थत्वेन तद्याम्योत्तरसूत्रयोर्मध्ये चरज्यात्वाच्च । यद्वाहोरात्रवृत्ते याम्योत्तराहोरात्रवृत्तसम्पातादुभयत्र नतघट्यन्तरेण स्थाने तत्सूत्रं नतकालस्य सम्पूर्णज्या । तन्मध्यादूर्ध्वसूत्रं चरूपं नतोत्क्रमज्या । तया हीनान्या ग्रहस्थानादहोरात्रवृत्ते उदयास्तसूत्रपर्यन्तमृजुसूत्रं त्रिज्यानुरूपमिष्टान्या । तत्तुल्या याम्योत्तरोर्ध्वव्याससूत्रान्तर्गता सा द्युज्याष्टमांशाधिष्ठितेष्टकृतिः । द्युज्यागुणा त्रिज्याभक्ता फलं छेदः । अस्मात् त्रिज्याकर्णे लम्बज्या कोटिस्तदेष्टकृतिकर्णे काकोटिरित्यनुपातेनेष्टशङ्कुः । अस्मादृग्ज्याच्छायातत्कर्णौ उक्तरीत्या सिद्धान्तीत्युक्तसुप्रपञ्चम्" रङ्गनाथः ।

दृग्लम्बन न० सि०शि० उक्ते ग्रहणदर्शनोपयोगिनि दृक्क्षेत्रस्थलम्बभेदे यथा

"दृष्टावर्त्तितां पृष्ठीं कक्षे च शशिसूर्ययोः । भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तयोर्द्वगाम् । तिर्यग्रेखायुतौ कल्प्यं कक्षायां क्षितिजं तथा । ऊर्द्ध्वरेखायुतौ खार्धं दृग्ज्याक्षापांशकैर्नतौ । कृत्वार्केन्दू समुत्पत्तिं लम्बनस्य प्रदर्शयेत् । एक भूमध्यतः सूत्रं नयेच्चण्डांशुमण्डलम् । द्रष्टुर्भूपृष्ठतादन्यद्दृष्टिसूत्रं तदुच्यते । कक्षायां सूत्रयोर्मध्ये यास्ता लम्बनलिप्तिकाः । गर्भसूत्रे सदा स्यातां चन्द्रार्कौ समलिप्तिकौ । दृक्सूत्रान्तर्लम्बितश्चन्द्रस्तेन तल्लम्बनं स्फुटम् । दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम्" । "यत्र तत्र नतादर्कादधश्चन्द्रावलम्बनम् । तद्दृग्वृत्तेऽन्तरं चन्द्रभान्वोः पूर्वापरं च तत् । पूर्वापरं च याम्योदग्जातं तेनान्तरद्वयम् । अत्राप्यग्रगतं प्राची तत्तिर्यग्दक्षिणोत्तरा । यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम् । यदाम्योत्तरभावेन नतिसंज्ञं तदुच्यते । नतिलिप्ता भुजः कर्णौ दृग्लम्बनकलाक्षयोः । क्षयान्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः । परलम्बनलिप्ताश्च त्रिज्याप्ता रविदृग्ज्यका । दृग्लम्बनकलास्ताः स्युरेवं दृक्क्षेपतो नतिः । गत्यन्तरस्य तिर्यग्यः परलम्बनलिप्तिका । गतियोजनतिर्यग्यः कुर्दलस्य यतो मितिः । सूर्यलम्बनकला नाड्यो गत्यन्तरलवोद्धृताः । प्रागग्रतो रवेश्चन्द्रः पश्चात् पृष्ठेऽवलम्बितः" सि०शि० ।

दृग्विष पुंस्त्री दृशि विषमस्य । दृष्टिविषे सर्पभेदे हेमच० । स्त्रियां जातित्वात् ङीष् ।

दृग्वृत्त न०द्वगः प्रचारस्थानं वृत्तमिव । वृत्ताकारे दृक्प्रचारस्थले । "दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे क्रान्तिवृत्ते ततोऽन्तराभावाद् लम्बनाभावः । याम्योत्तरमन्तरं दृग्लम्बनं नतिरेवोत्पन्ना । दृग्वृत्ताकारक्रान्तिवृत्ते तु दृग्लम्बनमेव क्रान्तिवृत्ते तयोरन्तरमिति लम्बनमुपपन्नं नत्यभावश्च । तथा च दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे त्रिभोनलग्नस्थानेऽस्तो भवति तद्वृत्तस्य क्रान्तिवृत्तयाम्योत्तरत्वेनोदयास्तलग्नमध्यवर्त्तित्वेन लग्नस्थानात् त्रिभान्तरितत्वात्" सू०सि०टी० रङ्गना० २दृङ्मण्डले च

तस्य खगोलबन्धप्रकारो दृङ्मण्डलशब्दे वक्ष्यते

दृङ्नति स्त्री सि० शि० ग्रहणदर्शनोपयोगितया दर्शिते दृक्प्रचारस्य नतिविशेषे यथा

"त्रिभोनलग्नस्य रवेश्च शङ्कोर्वा दृग्जयोर्वर्गवियोगमूलम्। स्याद्दृङ्नतिर्वेदगुणा त्रिभौर्व्या भक्ताथवा लम्बननाडिकाः स्युः" भू० "त्रिभोनलग्नस्य यः शङ्कुः साधितस्तथा दर्शान्तकाले रवेः स्वोपकरणैर्यः शङ्कुरुत्पद्यते तावनष्टौ स्थापयित्वा तयोश्च दृग्जेऽत्र साध्ये। अथ तयोः शङ्कोर्यद्वर्गान्तरपदं तद्दृङ्नतिसंज्ञं भवति प्रथमप्रकारोऽयम्। अथ दृङ्नतेर्द्वितीयः प्रकारः। तयोर्दृग्जयोर्वर्गान्तरपदं दृङ्नतिसंज्ञं भवति। अथ दृङ्नतेर्लम्बनमुच्यते। दृङ्नतिश्चतुर्गुणा त्रिज्यया भक्ता फलं लम्बननाडिकाः स्युः। अत्रोपपत्तिः सैव। यदा त्रिभिभलग्नं खमध्ये भवति तदा दृङ्मण्डलमेव क्रान्तिवृत्तम्। त्रिभोनलग्नार्कयोर्यान्तरज्या सैव तदार्कस्य दृग्जया। सा चतुर्गुणा त्रिज्ययाप्ता मध्यमं किल लम्बनं भवति। तदेव स्फुटम् ऊर्ध्वस्थितत्वात् क्रान्तिवृत्तस्य। अथ यदा त्रिभिभलग्नं खार्धोन्नतम् तिर्यक्स्थितत्वात् क्रान्तिवृत्तस्य, तदा तत् प्राच्यपरया स्फुटं लम्बनं कोटिरूपं भवति। तच्च त्रिभिभलग्नशङ्कुनुपातेन तथा स्फुटं कोटिरूपं कृतम्। तत् कथमिति चेत् तदर्थमुच्यते। मध्यलम्बननानयने त्रिज्यैव त्रिभिभलग्नशङ्कुः। ततः स्फुटत्वार्थं यः साधितो त्रिभिभलग्नशङ्कुः स दृक्क्षेपमण्डले कोटिस्तद्दृग्जया भुजस्त्रिज्या कर्णः। त्रिभिभलग्नस्य यद्दृङ्मण्डलं तद्दृक्क्षेपमण्डलमिति गोले कथितम्। अतस्त्रिज्यापरिणतया नतज्यया यदानीतं तज्जातं कर्णरूपं तत् कोटिरूपस्य त्रिभिभलग्नशङ्कोरनुपातेन कोटित्वं नीतमित्युपपन्नम्। यदेव स्फुटलम्बनस्य कोटिरूपत्वमुपपन्नं तदेव प्रकारान्तरेणोपपादितम्। रवेर्दृङ्मण्डले या दृग्जया सा कर्णरूपिणी। त्रिभिभलग्नस्य या दृग्जया स एव दृक्क्षेपः स भुजरूपः। यतः क्रान्तिमण्डलप्राच्याः सम्यग्दृक्षिणोत्तरं खार्धाद्त्रिभिभलग्नोपरिगतं दृक्क्षेपमण्डलम्। तत्र त्रिभिभलग्नस्य या दृग्जया स दृक्क्षेपः। तज्जनिता नतिकलासन्द्रार्ककक्षयोर्याम्योत्तरमन्तरं यत्तदेव तुल्यमेव दृश्या पश्यति। अथाक्षं गोले। "कक्षयोरन्तरं यत् स्याद्त्रिभिभे सर्वतोऽपि तत्" अतः "नतिलिप्ता भुजः कर्णो दृग्लम्बनकलास्तयोः। तत्रान्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः"। "यत एव लम्बनक्षेत्रमतो दृक्क्षेपार्कदृग्जयोर्वर्गान्तरपदतुल्या दृङ्नतिर्भवितुमर्हति। परं यथा स्थिते गोले क्षेत्रोपरीयं न दृश्यते। यतो त्रिभिभलग्नार्कयोरन्तरज्या त्रिभिभलग्नशङ्व्यासार्द्धपरिणता सती दृङ्नतिर्भवति। अत एवानेनापि प्रकारेण क्षितिजस्थेऽर्के परमा दृङ्नतिर्त्रिभिभलग्नशङ्कुतुल्या भवति। अतोऽयमपि प्रकारः पूर्वतुल्य एव। किन्तु दृक्क्षेपार्कदृग्जयोस्तुल्ये शलाके भुजकर्णरूपे समायां भूमौ विन्यस्य तदन्तरे कोटिरूपां दृङ्नतिं दर्शयेत्। एवमनेकविधान्युपपत्त्यनुसारेण क्षेत्राणि परिकल्प्य धूलीकर्मोपसंहारमार्याः कुर्वते। अथ प्रस्तुतमुच्यते। अत्र किल त्रिभिभलग्नस्य रवेश्च दृग्जयोर्यद्वर्गान्तरपदं तावदेव तच्छङ्कोरपि भवति। तत् कथमिति चेत् तदुच्यते। अत्र स्वस्वशङ्कुवर्गोनौ त्रिज्यावर्गौ दृग्जयावर्गौ भवतः। तयोरन्तरे कृते त्रिज्यावर्गयोस्तुल्यत्वात्तयोः शङ्कुवर्गान्तरमेवावशिष्यते। एवं यत्र कुत्रचिद्व्यासार्द्धेऽपि भुजज्ययोर्वर्गान्तरतुल्यं तत्कोटिज्ययोर्वर्गान्तरं भवतीति। अत उक्तम् "त्रिभोनलग्नस्य रवेश्च शङ्कोर्वा दृग्जयोरिति" दृङ्नतितस्त्रिज्यानुपातेन लम्बनस्य घटीकरणम्" प्रमिता०। अत्रोपपत्तिरपि तत्रोक्ता यथा "अथ याम्योत्तरायां तु भित्तौ पूर्वोक्तमालिखेत्। ये कक्षामण्डले तत्र क्षेत्रे दृक्क्षेपमण्डले। त्रिभोनलग्नदृग्ज्या या स दृक्क्षेपो द्वयोरपि। तच्चापांशैर्नतौ विन्दू कृत्वा त्रिभिभसंज्ञकौ। तल्लम्बनकलाः प्राग्वज्ज्ञेयास्ता नतिलिप्तिकाः। कक्षयोरन्तरं यत् स्याद्त्रिभिभे सर्वतोऽपि तत्। याम्योत्तरं नतिः सा च दृक्क्षेपात् साध्यते ततः" "इदमेव क्षेत्रकं याम्योत्तरायां भित्तौ पूर्वपार्श्वे लिखित्वा तत्रोपपत्तिर्दर्शनीया। ये तत्र कक्षाक्षमण्डले ते दृक्क्षेपमण्डले। दर्शान्ते त्रिभोनलग्नस्य या दृग्ज्या स दृक्क्षेपः द्वयोरपि तावत्। ब्रह्मगुप्तमते तु तच्चापांशा त्रिभिभलग्नशरसंस्कृताचन्द्रदृक्क्षेपचापांशाः स्युः। तयोर्दृक्क्षयोः खाद्धात् स्वस्वदृक्क्षेपचापांशैर्नतौ विन्दू कार्यौ तौ च त्रिभिभसंज्ञौ। ततः प्राग्वद्भूमध्याद्भूपृष्ठाच्च स्वे प्रसार्य लम्बनलिप्तिका ज्ञेयास्ता नतिलिप्तिकाः नतिर्नाम चन्द्रार्ककक्षयोर्याम्योत्तरमन्तरम्। तद्त्रिभिभलग्नस्थाने यावत् सर्वतोऽपि तावदेव भवति। अतो दृक्क्षेपात् साधिता नतिः"।

दृङ्मण्डल न॰ दृशः तत्प्रचारस्य मण्डलमिव । मि॰शि॰ उक्ते गोलबन्धान्तर्गते वलयाकारे मण्डलभेदे यथोक्तं तत्र "जङ्घाधरस्वस्तिककीलयुग्मे प्रोतं स्वयं दृग्वलयं तदन्तः । कृत्वा परिभ्राम्य च तत्र तत्र नेयं ग्रहो गच्छति यत्र यत्र । ज्ञेयं तदेवाखिलखेचराणां पृथक् पृथग्वा रचयेत् तथाष्टौ । दृङ्मण्डलं वित्रिभलग्नकस्य दृक्क्षेपदृक्ताख्यमिदं वदन्ति" स्वस्तिके चाधःस्वस्तिके चान्तःकीलकौ कृत्वा तयोः प्रोतं स्वयं दृग्वलयं कार्यम् । तत्तु पूर्वदृक्तेभ्यः किञ्चिन्न्यूनं कार्यम् । यथा खगोलान्तर्भवति । यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम् । यो यो ग्रहो यत्र यत्र वर्तते तस्य तस्योपरीदमेव परिभ्राम्य विन्यस्य दृग्जग्राशङ्कादिकं दर्शनीयम् । अथ वा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत् । तथाष्टमं वित्रिभलग्नस्य तत्र दृक्क्षेपमण्डलम्" दृग्वलयमप्यत्र

दृढ़ त्रि॰ दृह दृहि वा दृढौ क्तः "स्यूनवलयोः" इडभावः इदितोऽपि नि॰ नलोपः । १स्थूले २अग्रिथिले प्रगाढे ३बलवति च मेदि॰ ४कठिने अमरः ५लौहे न॰ शब्दच॰ । भावे क्त । ६अतिशये न॰ अमरः । क्रियाविशेषणत्वे ऽस्य क्लीवता "दृढभक्तिरिति जज्ञे" रघुव्या॰ "दृढं भक्तिरस्येति विग्रहः" मल्लिना॰ । "दृढा भक्तिश्च केशवे" विष्णुस्तवः । दृढत्वं च कठिन्यं तच्च स्वर्गत्वव्याप्यं जातिभेदः, अग्रिथिलावयवसंयोगभेदः, उपचारात् अतिशयश्च । "दृढकारी मृदुर्दीनः क्रूराचारैरसंवसन्" मनुः "दृढपाणी करोमीति जप्यं जपति जापकः । न संपूर्णो न संयुक्तो निरयं सोऽनुगच्छति" भा॰शा॰ १९७अ॰ । दृढस्य भावः इमनिच् दृढिमन् तद्भावे पु॰ "बधान दृगेव दृढिमरमणीयं परिकरम्" गङ्गालहरी त्व दृढत्व न॰ तल् दृढता स्त्री ष्यञ् दार्ढ्य न॰ स्थौल्ये अतिशये च । अतिशयेन दृढः इष्ठन् ऋतोरः दृढिष्ठ ईयसुन् दृढीयस अतिशयेन दृढे त्रि॰ ईयसुनि स्त्रियां ङीप् । दृढं करोति णिच् ऋतोरः । दृढयति "वियोगो वैराग्यं दृढयति च" प्रबोधचन्द्रो॰ त्रयोदशभनोः रुचेः ७पुत्रभेदे पु॰ । "त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः । चित्रसेनो विचित्रश्च नयो धर्मभृतोऽमृतः । सुनेत्रः सत्यबुद्धिश्च सुतपा निर्भयो दृढः । रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे" हरिवं॰ ७अ॰ । ८धृतराष्ट्रपुत्रभेदे पु॰ "पुत्रास्तेऽभ्यर्दयन् भीमं दश दाशरथेः समाः । नागदत्तो दृढरथो वीरबाहुरयोभुजः । दृढः सुहस्तो विरजाः प्रमाथ्योग्रयायिपि । तान् दृष्ट्वा चुक्रुधे भीमोजग्दृहे भारसाधनान् । एकमेकं समुद्दिश्य पातयामास मर्मसु । ते विद्धा व्यसवः प्रेतुः स्यन्दनेभ्योऽमितौजसः" भा॰द्रो॰ १५७अ॰ ९विष्णौ पु॰ "वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः" विष्णुसं॰ "स्वरूपसामर्थ्यादेः प्रच्युत्यभावात् दृढः" भा॰ १०रूपकभेदे पु॰ "दृढः प्रौढोऽथ खचरो विभ्रमस्तुरक्रमः । निशारूकः प्रतितालः कथिताः सप्त रूपकाः" इत्युद्दिश्य "दृढाख्यः स्यादु लघुद्वन्द्वं तालेऽत्र हंसलीलके । चतुर्दशाक्षरयुतः षड्भारे परिकीर्तितः" सङ्गीतदा॰ । लीला॰ उक्ते ११कुट्टकबन्धितभेदे कुट्टकशब्दे दृश्यम् । [illegible] दृष्टकयुक्ते दृष्टभेदे शब्दर॰ ।

दृढकण्टक पु॰ दृढः कण्टकोऽस्य । (धला आकड़ा) क्षुद्रक-

दृढकाण्ड पु॰ दृढः कठिनः काण्डः स्कन्धोऽस्य । १वंशवृक्षे २दीर्घरोहिषके च राजनि॰ ।

दृढक्षत्र पु॰ धृतराष्ट्रपुत्रभेदे "दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः" भा॰आ॰ ६७अ॰ मत्स्यपुत्रोक्तौ ।

दृढक्षुरा स्त्री दृढं क्षुरमिवाग्रं यस्याः । वल्लजायाम् तृणभेदे राजनि॰ ।

दृढगात्रिका स्त्री दृढं गात्रमस्याः कप् कापि अत इत्वम् । मत्स्यण्ड्यां फाणिते शब्दच॰ ।

°दृढग्रन्थि पु॰ दृढो ग्रन्थिः पर्वास्य । १वंशे राजनि॰ २कठिनग्रन्थियुक्तमात्रे त्रि॰ ।

दृढच्छद न॰ दृढः छदोऽस्य । दीर्घरोहिषकेतृणे राजनि॰ ।

दृढच्युत पु॰ परपुरञ्जयन्यपात्मजायां जाते अगस्त्यमुनिपुत्रे इध्मवाहापरनामके मुनिभेदे "उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः । युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः । तस्यां संजनयाञ्चक्रे आत्मजामसितेक्षणाम् । यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः । अगस्त्यः प्रागुदुहितरमुपयेमे धृतव्रताम् । यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः" भाग॰ ४।२८।२८। पादपुरणार्थः सन्धिरार्षः । अयं गोत्रप्रवरविशेषः प्रवराध्याये दृश्यः ।

दृढतरु पु॰ नित्यकर्म॰ । धवद्रुमे राजनि॰ । दृढद्रुमोऽप्यत्र

दृढतृण पु॰ दृढं कठिनं तृणमस्य । १सप्ततृणे २वल्लजायां स्त्री राजनि॰ ।

दृढत्वच् पु॰ दृढा त्वगस्य । यावनालशरे राजनि॰ ।

दृढदंशक पुंस्त्री दृढं दंशति दन्श-ण्वुल् । (डाङ्गर) ख्याते जलजन्तुभेदे शब्दार्थकल्प॰ । स्त्रियां ङीष् ।

ङीप् । २दृढदंशनकारिमात्रे त्रि० स्त्रियां टाप् कापि अतइत्त्वमिति भेदः ।

दृढधन पु० दृढं धनं निश्चयरूपा सम्पत्तिरस्य । शाक्यमुनौ ललितवि० । दृढधनुरस्यत्र । समासान्तविधेरनित्यात् नानङ् ।

दृढधन्वन् पु० दृढं धनुरस्य अनङ् समा० । १दृढधनुष्के "राजानं दृढधन्वानं दिलीपं सत्यवादिनम्" भा०द्रो० १३१अ० । २पौरवे नृपभेदे "दक्षिणस्यश्च कम्बोजो दृढधन्वा च पौरवः" भा०आ० १८६अ० ।

दृढनिश्चय पु० दृढः कुतर्कैरभिभवितुमशक्यतया स्थिरः निश्चयः अहमकर्त्ता भोक्ता संसारिसच्चिदानन्दाद्वितीयं ब्रह्मास्मीत्यध्यवसायोऽस्य । स्थिरप्रज्ञे संसारादुपरते अहं ब्रह्मास्मीत्यध्यवसाययुते विदुषि ।

दृढनीर पु० दृढं कालेन दृढतां प्राप्तं नीरं यस्य । नारिकेले राजनि० । तस्य जलस्यैव क्रमशः कठिनशस्यरूपेण परिणतत्वात् तथात्वम् ।

दृढनेमि पु० अजमीढवंशजे सत्यधृतिनृपपुत्रे नृपभेदे । "अजमीढस्य दायादः" इत्युपक्रमे "जज्ञे सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान्" हरिवं०२०अ० । दृढा नेमिरस्य । २दृढनेमिके रथे पु० । [गौरा० ङीष् ।

दृढपत्र पु०दृढं पत्रमस्य । १वंशे २वल्लजायां स्त्री राजनि०

दृढपाद त्रि०दृढः पादः पदं स्थानमस्य । १दृढनिश्चये २वेधसि पु० "बहुत्वाद्दृढपादश्च विश्वात्मा जगतां पतिः" हरिवं० २०४० श्लो० । दृढः पादोमूलमस्याः समासान्तविधेरनित्यत्वान्नान्यत्रोपः समा० । २यवतिक्तायां स्त्री ३भूम्यामलक्ष्म्यां स्त्री राजनि० ङीष् ।

दृढप्ररोह पु० दृढः प्ररोहः अङ्कुरोऽस्य । वटवृक्षे राजनि०

दृढफल पु० दृढानि फलानि यस्य । नारिकेले राजनि० ।

दृढबन्धिनी स्त्री दृढं बध्नाति अधनाति स्वाश्रयं णिनि । १यष्टिमालतायां शब्दच० । २अधिगलबन्धकारके त्रि० ।

दृढभूमि पु० दृढा भूमिरवस्था यस्य । दीर्घकालनैरन्तर्यादरासेविते योगशास्त्रोक्ते मनसःस्थैर्यकरणार्थे अभ्यासभेदे "तत्र स्थितौ यत्नोऽभ्यासः" पात०सू० "चित्तस्याऽवृत्तिकस्य प्रशान्तवाहिता स्थितिः प्रयत्नः वीर्यसत्त्वाहः तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः" भा० "स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः" सू० "दीर्घकालासेवितः निरन्तरासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभूमिर्भवति । व्युत्थानसंस्कारेणानभिभूतविषय इत्यर्थः" भा० "ननु व्युत्थानसंस्कारेणानादिपरिपन्थिना प्रतिबद्धोऽभ्यासः कथं स्थैर्यं कल्पत इत्यत आह स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः यथोक्तः सोयमभ्यासो विशेषेण एव सम्पन्नः सन् दृढावस्थो न सहसा व्युत्थानसंस्कारैरभिभूतस्थितिरूपविषयो भवति यदि पुनरेवंभूतमप्यभ्यासं कृत्वोपरमेत ततः कालपरिपाकेणाभिभवेत् तस्मिन्नोपरन्तव्यमिति भावः" विवरणम् ।

दृढमुष्टि पु० दृढो मुष्टिर्धारणेऽस्य । १खड्गादौ हेमच० । दृढं बद्धः दानार्थमप्रसारितो मुष्टिरस्य । १कृपणे त्रि० दृढोमुष्टिस्तदाघातोऽस्य । दृढमुष्ट्याघातकारिणि "निष्टहीतः कन्धरायां शिशुना दृढमुष्टिना" हरिवं० २०अ० ।

दृढमूल पु० दृढं मूलमस्य । १सुञ्जतृणे २मन्थानकतृणे च राजनि० ३नारिकेले शब्दार्थकल्प० ।

दृढरङ्गा स्त्री दृढः रङ्गो रञ्जनं यस्याः ५त० । स्फट्टिकी (फटकिरी) राजनि० । तद्योगेन रागस्य स्थिरतेति तस्यास्तथात्वम् ।

दृढरथ पु० १धृतराष्ट्रपुत्रभेदे "अभयो रौद्रकर्मा च तथा दृढरथश्च यः" भा०आ०६७अ० तत्पुत्रोक्तौ अस्यैव नामान्तरं दृढरथाश्रय इति तत्र पाठान्तरम् । २कक्षेयुवंश्ये नृपभेदे तद्वंशवर्णने "दृढाश्मनास्तु राजेन्द्रो जनयामास वै सुतम् । नाम्ना जयद्रथं वीरं यस्माद्दृढरथो नृपः । आसीद्दृढरथस्यापि विश्वजिज्जनमेजय !" हरिवं० २१२अ० ।

दृढरुचि स्त्री दृढा रुचिरस्य । १स्थिररागयुक्ते २कुशद्वीपपतेर्हिरण्यरेतसः प्रियव्रतस्य पुत्रभेदे कुशद्वीपशब्दे २१४५ पृष्ठ्यम् ।

दृढलता स्त्री नित्यकर्म० । पातालगरुडीलतायां राजनि० ।

दृढलोमन् त्रि० दृढानि लोमान्यस्य । १कठिनलोमयुक्ते त्रि०स्त्रियां टाप् ङीप् वा दृढलोमा दृढलोम्नी । २शूकरे पु० शूकर्यां स्त्री शब्दच० ।

दृढवर्मन् पु० दृढं वर्म यस्य । १दुर्भेद्यसन्नाहयुक्ते २धृतराष्ट्रपुत्रभेदे दृढक्षत्रशब्दे दृश्यम् ।

दृढवल्कल पु० दृढं वल्कलमस्य । १पूगवृक्षे २अम्बष्ठायां स्त्री तत्र दृढत्वचापि राजनि० । ३कठिनवल्कलयुक्ते त्रि० ।

दृढवल्का स्त्री दृढं वल्कमस्याः । अम्बष्ठायां राजनि० ।

दृढबीज पु० दृढं बीजमस्य । १वदरे २चक्रमर्दे ३वर्बुरे च

राजनि० एतेषां कठिनबीजकत्वात्तथात्वम् ४कठिनबीजयुक्ते त्रि० कर्म० । ५कठिने बीजे न० ।

दृढव्य पु०ऋषिभेदे "दृढव्यश्चोर्द्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा" भा०अनु० १५०अ० ।

दृढव्रत त्रि० दृढं प्रतिपक्षैश्चालयितुमशक्यं व्रतमस्य । १अन्तरायैरचाल्यसङ्कल्पके फलपर्यन्तं प्रारब्धकर्मत्यागशीले भगवानेव भजनीयः स च एवंरूप एवेत्यत्राप्रामाण्यशङ्काशून्यसंकल्पके २विदुषि च । तत्र प्रथमार्थे "एवं दृढव्रतोनित्यं ब्रह्मचारी समाहितः" मनुः द्वितीयार्थे "अहिंसानिरतो यश्च सत्यवादी दृढव्रतः" भा०व० ६८१०लो० ३स्थिरसङ्कल्पयुक्ते च "स्थेयान् निगूढमानोधीरोदात्तो दृढव्रतः कथितः" सा०द० ।

दृढसन्ध त्रि० दृढा सन्धाऽस्य । १स्थिरसन्धाने २धृतराष्ट्रपुत्रभेदे पु० "जरासन्धो दृढसन्धः सत्यसन्धः सहस्रवाक्" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दृढसन्धि त्रि० दृढः सन्धिः सन्धानं यस्य । निश्छिद्रतया संहते अमरः । [सूर्वालतायाम् शब्दच० ।

दृढसूत्रिका स्त्री दृढं सूत्रं यस्याः कप् इत्वम् ।

दृढसेन पु० कलियुगीये जनमेजयवंश्ये नृपभेदे "क्षेमोऽस्य सुव्रतस्तस्माद्धर्मस्तस्य समन्ततः । दृढसेनोऽस्य सुमतिः सुबलो जनिता ततः" भाग० ९।२२।३० जनमेजयं प्रति तद्वंशभविष्यन्नृपोक्तौ ।

दृढस्कन्ध पु० दृढः स्कन्धोऽस्य । क्षीरिवृक्षे जटाधरः ।

दृढस्यु पु० अगस्त्यर्षेर्लोपामुद्रागर्भजाते इध्मवाहापरनामके ऋषिभेदे इध्मवाहशब्दे ९२८पृ०दृश्यम् ।

दृढहनु पु० आजमीढवंश्ये नृपभेदे "आजमीढाद्दृढहृदिपुत्रस्य पुत्रो दृढहनुः । दृढहनुकायस्ततस्तस्य पुत्रश्चासीन्नयद्रथः । ततस्ततोविशदस्तस्य सेनजित् समजायत । रुचिराश्वो दृढहनुः काश्यश्चोवत्सश्च तत्सुताः" भाग० ५।२१।१७।

दृढहस्त पु० दृढः हस्तः हस्तव्यापारोऽस्य । १खड्गादिधारणे दृढहस्तके योधे २धृतराष्ट्रपुत्रभेदे पु० "दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ" भा०आ० ६७अ०तत्पुत्रोक्तौ

दृढाक्ष पु० राजभेदे "एकलव्यो दृढाक्षश्च क्षत्रधर्मा जयद्रथः" हरिवं० ९९अ०।

दृढाङ्ग त्रि०दृढमङ्गमस्य । १कठिनाङ्गयुक्ते २हीरके न०राजनि० तस्यावयवस्य इतरापेक्षयाऽतीव कठिनत्वात्तथात्वम् ।

दृढादि पु० "वर्णदृढादिभ्यः ष्यञ् च" पा० "चात् इमनिच्" सि०कौ० उक्ते भावे ष्यञ्इमनिचोर्निमित्ते शब्दगणे स च गणः "दृढ दृढ परिदृढ भृश कृश वक्र शुक्र चक्र श्याम कृष्ण लवण ताम्र शीत उष्ण जड़ बधिर पण्डित मधुर मूर्ख मूक (त्रेयौतलातमतिमनःशारदानाम्) (समो मतिमनसोः) जवन" दृढादिः । गुणवचनत्वादेव सिद्धे इमनिग्रहणं वचनम् ।

दृढायु पु० तृतीयमनोः सावर्णस्य पुत्रभेदे "संवर्त्तगः सुशर्मा च देवानीकः पुरूवसुः । क्षेमधन्वा दृढायुश्च आदर्शः परण्डको मनुः । सावर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः" हरिवं० ७अ०। उर्वशीगर्भजाते ऐलन्टपपुत्रभेदे च "षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः । दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा०आ० ७४अ०

दृढायुध पु० दृढमायुधं तद्व्यापारोऽस्य । दृढायुधव्यापारके "दृढायुधौ ध्रुवपातौ युद्धे च कृतनिश्चयौ" (नकुलसहदेवौ) भा०व० ५१अ० । २धृतराष्ट्रपुत्रभेदे पु० "उग्रायुधो भीमरथः कनकायुर्दृढायुधः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दृढाश्व पु० धुन्धुमारन्टपपुत्रभेदे "धौन्धुमारिर्दृढाश्वश्च हर्यश्वस्तस्य चात्मजः" हरिवं० १२अ०।

दृढेयु पु० ऋषिभेदे "दृढेयुश्च कृतेयुश्च परिव्याधश्च कीर्तिमान् । एकतश्च द्वितश्चैव त्रितश्चैवादित्यसन्निभाः" भा० अनु० १५०अ० ।

दृढेषुधि पु० दृढं बद्धं इषुधिर्येन । दृढतया बद्धतूणके १योधे २राजभेदे "अविचित्रपलोधूर्त्तः कृतबन्धुर्दृढेषुधिः" भा० आ० १अ० ।

दृत त्रि० दृ+क्त १आदरयुक्ते आदृतः दृ–विदारे क्त बा० ह्रस्वः । २विदीर्णे "दृते दृंह मामित्रस्य" यजु० ३६।१८"दृते दृ विदारे विदीर्णे जराजर्जरितेऽपि शरीरे" वेददी० ३जीरके स्त्री शब्दच० ।

दृति स्त्री दृ–विदारे ति कित् ह्रस्वश्च । १चर्ममयपात्रे २मत्स्ये च मेदि० "इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्" मनुः "कपाले यद्वदापः स्युः स्रवन्ति च यथा पयः । आश्रयस्यानवोधेन वृत्तहीने तथा श्रुतम्" भा०शा०१३२४ श्लो० । दृतौ भवः ढञ् दार्त्तेय दृतिभवे स्त्रियां ङीप् । मत्स्ये "मांसादृतगुणा दृतिः" उज्ज्वलद०धृतवाक्यम् । ३रोमशचर्मणि ४गलकम्बले च "सयत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम्" भा०अनु० ७९अ०। "दृतिकण्ठां

प्रलम्बगलकम्बलाम्" नीलकण्ठः "दृतिकण्ठमनड्वाहं सर्वरत्नैरलङ्कृतम्" तत्रैवाध्याये । ५ मेघे निघण्टुः ६ सत्रविशेषकारके यजमानभेदे दृतिवातवतोरयनशब्दे दृश्यम् ।

दृतिधारक दृतिं दृत्याकारं धारयति धारि-ण्वुल् ६त० । (व्याकरणपाता) ख्याते दृत्ते शब्दच० ।

दृतिवातवतोरयन न०अलुक् स० । सत्रभेदे "दृतिवातवतोरयनमेकेकेन पृष्ठ्यस्तोमेन मासं मासम्" कात्या०श्रौ०२४।२४।१६ "दृतिवातवतोरयनमिति सत्रस्य संज्ञा" कर्कः । ताण्ड्यब्रा०२५।३। १वाक्यादौ अस्य विवृतिः । "अथ दृतिवातवतोरयनमाह भा० "अतिरात्रस्त्रिवृता मासं, पञ्चदशेन मासं, सप्तदशेन मासमेकविंशेन मासं, त्रिणवेन मासं, त्रयस्त्रिंशेन मासं, महाव्रतं, त्रयस्त्रिंशेन मासं, त्रिणवेन मासमेकविंशेन मासं, सप्तदशेन मासं, पञ्चदशेन मासं, त्रिवृता मासमतिरात्रः" । १"प्रथमं प्रायणीयोऽतिरात्रस्तत्रस्त्रिवृदादित्रयस्त्रिंशान्ताः आदितः षण्मासा आप्नुव्याः विष्णुवतः स्थाने महाव्रतं भवति तएव त्रिवृदादिमासा उत्तरस्मिन् पक्षसि द्वादशादिसप्तमासान्ताः षण्मासाः स्युः तत उदयनीयमहः एतानि त्रिपञ्चोत्तरशतत्रयमहानि स्युः अधिकयोर्द्वयोरङ्गोः व्यवस्थाविषये सूत्रकारः दृतिवातवतोरयने द्वावेकोनौ मासौ सुनुयुस्त्रिवृताविति गौतमस्त्रयस्त्रिंशाविति धानञ्जयः उभौ वा त्रिंशिनौ स्यातां यथैतद्ब्राह्मणमिति त्रयस्त्रिंशावेकोनाविति कल्पकारस्य मतम् । अथैतदयनं कर्तृद्वारा प्रशंसति" भा० । "एतद्वै दृतिवातवन्तौ खाण्डव उपेतो विष्णुवति वातवान्तुत्तिष्ठति, समापयति दृतिस्तस्मात्तनीयांसोवातवता भूयांसो दार्त्तेयाः" ६"एतत् सत्रायणं दृतिश्च वातवांश्चेत्युभौ यजमानौ खाण्डवे वने उपेतः अन्वतिष्ठतामित्यर्थः भूतकाले व्यत्ययेन वर्त्तमानप्रत्ययः एवमुत्तरयोरप्याख्यातयोर्द्रष्टव्यं तयोरनुष्ठानप्रयुक्तं किञ्चित् फलवैषम्यं वक्तुमाह वातवान् विष्णुवति महाव्रते सम्पूर्णे उत्तिष्ठति उत्तिष्ठन् सत्रं समापितवान् दृतिस्तु द्वादशापि मासानास्थाय समाप्नुवन् यस्मादेकं तस्माद्वातवता वातवतोवंश्यास्तनीयांसः अत्यर्थं तनवः जाता अभवन् दार्त्तेया दृतिवंश्यास्तु भूयांसो, बहुजनत्वात्तुत्तानं प्रशस्तफलवदित्युक्तं भवति । अत्र विवृतिभिः कृप्तम् इति वातवतोरयनमात्रिणवेऽस्त्रिवृद्वज्र उद्वरत्युक्थानि पञ्चदशेभ्यः प्रोडशिनमित्यादिकं द्रष्टव्यम्" ।

दृतिहरि पु० दृतिं चर्मभयं द्रव्यं हरति दृतौ+उपपदे हृ-पशौ कर्त्तरि इन् । कुक्कुरे उज्ज्व० । पशोरन्यत्र अण् दृतिहार चर्महारके ।

दृत्य त्रि० दृ-कर्मणि क्यप् । १आदरणीये भावे क्यप् । २आदरे न० आङि आदृत्य तत्रार्थे "आदृत्यस्तेन दृत्येन" भट्टिः ।

दृभ्र न० गवां निर्गमनद्वाररोधके "ते गव्यता मनसा दृभ्रमुर्वम्" ऋ० ७।१।१५ भाष्ये माधवः ।

दृन् अव्य० १हिंसायाम् सि०कौ० । २दृढार्थे शब्दार्थचि० ।

दृन्फ क्लेशे तु०प० अक०सेट् । दृफति दृम्फति अदृम्फीत् । क्लेशने सक० । दृनृफूः सर्पजातिः

दृन्फू स्त्री दृनृफ-कू नि० न नलोपः । १सर्पजातौ २वज्रे च मेदि० दृनृभू तत्रार्थे सि०कौ० ।

दृन्भू पु० दृन् हिंसायां भवति भुवः क्विप् । १वज्रे २सूर्ये हेमच० । ३दृपे शब्दच० ४अन्तके संज्ञिप्रसार "दृनृकर पुनःपूर्वस्य भुवो यण् वक्तव्यः" वार्त्ति० अजादौ यण् । दृनृभ्वौ दृनृभ्व इत्यादि दृभू तत्रार्थे सि०कौ० [कन्दर्पः

दृप बाधने तु० पर० सक० सेट् । दृपति अदर्पीत् । ददर्प ।

दृप सन्दीपने वा चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् । दर्पयति ते दर्पति । अदीदृपत्-त अददर्पत्-त अदर्पीत् ।

दृप हर्षे गर्वे च अक०दिवा०वेट् दृप्यति "दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखोपमाम्" गीतगो० इरित् अदृपत् अद्राप्सीत् अदर्पीत् केचिदिमं ऋदितं मन्यन्ते दर्पिष्यति द्रप्स्यति अस्य रधादित्वात् वेट् कत्वम् । तेन रूपे न वैलक्षण्यम् दर्पः दृप्तः । जीत् दृप्तः । शब्दस्तोमे ऋदित्त्वोक्तिः मतभेदेन ।

दृप्त त्रि० दृप-गर्वे हर्षे च वर्त्तमाने क्त । १गर्वान्विते २हर्षान्विते च ३विष्णौ पु० "दर्पदो दर्पको दृप्तोदुर्द्धरोऽन्यापराजितः" विष्णुसं० "दृप्तबालाकिर्हानूचानो गार्ग्य आस" शत०ब्रा० १४।५।१।१

दृप्र त्रि० दृप-बाधने रक् । बलयुक्ते उणादि० ।

दृफ क्लेशे तुदा० सुचादि० अक०पर० सेट् । दृम्फति अदर्भीत् क्लेशने सक० । राजा चौरं दृम्फति क्लिश्नातीत्यर्थः ।

दृब्ध त्रि०दृभ-यन्थने कर्मणि क्त । १ग्रथिते त्रि०अमरः । दृभ-भये कर्त्तरि क्त । २भीते भावे क्त । ३ग्रथनेऽभये च न०

दृभ ग्रथने वा चुरा०उभ०पक्षे तु०पर०सक०सेट् । दर्भयति ते दृभति अदीदृभत्-त अददर्भत् त अदर्भीत् । ऋदित् । दृब्धः दृब्धवान् । दर्भः

दृभ भये वा चुरा॰उभ॰पक्षे भ्वा॰पर॰अक॰सेट् । दर्भयति-ते दर्भति । अदीदृभत् त अददर्भत् त । अदर्भीत् ईदित् दृब्धः दृब्धवान् ।

दृभीक पु॰ दृभ-बा॰ ईकङ् । असुरभेदे "अध्वर्यवो यो दृभीकम्" ऋ॰ २।१४।२ "दृभीको नामासुरः" भा॰

दृमिचण्डेश्वर न॰ मत्स्यपुराणोक्ते शिवलिङ्गभेदे

दृतन् त्रि॰ दृ-विदारे क्तनिप् बा॰ वेदे हुस्वः । विदारके "दृताणि रथ्यानि क्षुमाणि" यजु॰१०।८ ।

दृश चाक्षुषज्ञाने भ्वा॰पर॰सक॰ अनिट् । पश्यति इरित् अदर्शत् अद्राक्षीत् । ददर्श ददर्शिथ दृष्ट दृदृशिव द्रष्टा द्रक्ष्यति । दर्शनीयं द्रष्टव्यं दृश्यः द्रष्टा दृष्टः द्रष्टुं दृष्टिः दृक् दृष्ट्वा प्रदृश्य । "ततोऽहं पश्यन् विदृश्यान्तरात्मा" भट्टिः पश्यतो हरः । "न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" । "अपश्यद् देवदेवस्य शरीरे पाण्डवस्तदा" गीता "ददर्श दूनः स्वतपश्चिनीं नलः" नैष॰ मानसज्ञाने च "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वा आत्मन्यात्मानं पश्यति" श्रुतिः "आत्मा वा अरे द्रष्टव्यः" बृ॰उ॰ श्रुतिः यङ्लुक् "तं विप्रदर्शं कृतघातयत्ना" भट्टिः "दृशेरनालोचने कङ् च" पा॰ कर्त्तरि कङ् अन्यादृशः कीदृशः चात् किन् क्स च अन्यादृक् अन्यादृक्षः । श पश्यः "अपाश्य पश्यं निजदृश्यखेटात्" नील॰ता॰ "उग्रम्पश्या कुलेऽरण्ये" भट्टिः दर्शयति ते अददर्शत् अदीदृशत् त । णिचि कर्मणः कर्तृत्वे तङ् दर्शयते भवो भक्तान् भक्तैर्वा आत्मानमिति शेषः । एवं विषये दृशेः कर्तृवा कर्मसंज्ञा "सीतां रामेण चात्मानमदर्शयत लक्ष्मणम्" सुग्रीवो॰ तनि तङ् दिदृक्षते । "दिदृक्षमाणः परितः ससीतं रामं यदा नैक्षत लक्ष्मणश्च" । भट्टिः दिदृक्षा कर्मणि दृश्यते "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" श्रुतिः "ज्वालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः" मनुः "अदर्शि सङ्कोच्य कदाप्यवीक्षितः" "रूपमदर्शि धृतोऽसि यदर्थम्" नैष॰ अस्यार्थे क्वचित्तङपि । "यं यं हि दृशे सेवं तं तं मेने नलं नृपम्" भा॰व॰२२०२श्लो॰। दर्शनयोग्ये प्रकाशे च अक॰ "मधुरात्मानमदर्शयत् पुरः" कुमा॰। दर्शनार्थत्वे तङ् स्यादिति बोध्यम् ।

अनु+अनुरूपदर्शने "रथे विलग्नाविव चन्द्रसूर्यौ घनान्तरेणानुददर्श लोकः" भा॰वि॰ १६८श्लो॰ इगिशब्दे पात॰सूत्रे उदा॰ दृश्यम् । "बहुविधमनुदृश्य चार्थहेतोः कृपणमिहार्यमनार्यमाश्रयन्तम्" भा॰शा॰ १७६ अ॰

अभि+आभिमुख्येन समन्ताद्वा दर्शने "तदा प्रभृति कौन्तेय ! नरा गिरिमिमं सदा । नाशक्नुवन्नभिद्रष्टुं कृत एवाधिरोहितुम्" भा॰व॰९९८२श्लो॰

अव+नीचतया दर्शने "यथा जलस्य आभासः स्वस्थेनावदृश्यते । स्वाभासेन यथा सूर्यो जलस्थेन दिविस्थितः" भाग॰ ३।२७।१२

आ+आभिमुख्येन समन्ताद्वा दर्शने आदर्शः । "उत्कलादार्शितपथः कलिङ्गाभिमुखो ययौ" रघुः ।

उद्+नीचस्थस्योन्नतया दृष्टौ उत्प्रेक्षणे च

उप+सामीप्येन दर्शने । "चक्षुषादु व्यवहारोऽयं विवादेषूपदर्शितः" याज्ञ॰ ।

नि+दृष्टान्ततया साम्मुख्येन वा दर्शने । "द्रष्टुमिच्छामि ते रूपमैश्वरं त्वं निदर्शय" भा॰आश्व॰ १५८८ श्लो॰ निदर्शनालङ्कारः "निदर्शयामास विशेषदृश्यम्" रघुः

परा+विपरीतदर्शने यस्य यथारूपं ततोऽन्यरूपेण दर्शने "धूममग्निं परादृश्या मित्वाहृत्स्वा दधतां भयम्" अथ॰ ८।८।२। "त्रीन् स्तनानुपेयुस्तं परादृश्युः । द्वौ स्तना उपेयुस्तद्वेदीयसः परादृश्युः" शत॰ ब्रा॰ ६।५।१।२।४।

परि+परितः समन्ताद्वा दर्शने "परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप !" भा॰आश्व॰७३अ॰ परिच्छिन्नतया दर्शने च । "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" पा॰सू॰ । दीर्घसूक्ष्मशब्दे २६१४ पृ॰ दृश्यम् ।

प्र+सम्यग्दर्शने "मनसैव प्रदीपेन महानात्मा प्रदृश्यते" भा॰आश्व॰ १६अ॰ "अहो त्वयाद्य विप्रेषु भक्तिरागः प्रदर्शितः" भा॰अनु॰ ७२११श्लो॰ एकदेशदर्शने च । प्रदर्शनार्थमिदमुक्तम् । "योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम्" भा॰आ॰५१० श्लो॰।

प्रति+तुल्यरूपदर्शने "कृताभ्यङ्गः शोणितेन रुद्रवत् प्रतिदृश्यते" भा॰भी॰ ४६७६श्लो॰ "निमित्तलक्षणं ज्ञानं शाकुनं स्वप्नदर्शनम् । अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते" रामा॰अयो॰ ५८।५श्लो॰

वि+विशेषेण दर्शने "विदर्शयन्तोविविधान् भूयश्चित्रांश्च निर्झरान्" रामा॰अयो॰ ४८अ॰ १२श्लो॰

सम्+सम्यग्दर्शने "संदृश्यन्ति. नरास्तान्ये स्वरूपेण विनाशनम्" भा॰शा॰ १०६८ श्लो॰

दृश् त्रि॰ क्वचिदुपपदे दृश–क्विन् झलि पदान्ते च कुः। १तत्तत्पदार्थदर्शके "वायुभक्षो दिवा तिष्ठन् रात्रिं नीत्वापतत्स्वयंदृक्" याज्ञ॰ "ऐन्द्रद्युम्ने ! यत्तदशाविहावां विवक्षू वै जनकेन्द्रं दिदृक्षू" भा॰व॰१०६२४श्लो॰ अनुपपदेऽपि क्विन्। २द्रष्टरि "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" पात॰सू॰। भावे क्विन्। ३दर्शने ४ज्ञानमात्रे च स्त्री "प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्" सा॰सू॰ "प्रतिबन्धोव्याप्तिर्व्याप्तिदर्शनात् व्यापकज्ञानमनुमानम्" भाष्यम्। करणे क्विन्। ५नेत्रे स्त्री "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः" सा॰द॰। "ज्वलकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्" रघुः ६द्वित्वसंख्यायाञ्च।

दृशति स्त्री दृश–बा॰ भावे क्यतिक्। दर्शने "स्मरो न यस्य दृशतिररेपाः" ऋ॰ ६।३।३ "दृशतिर्दर्शनम्" भा॰

दृशद् स्त्री दृषद्+पृषो॰। शिलायाममरे पाटान्तरम् "तथा दृशत्पुत्रश्च" गोभिलः "दृशत् पेषणाधारशिला, पुत्रं पेषणकरणरूपप्रस्तरस्तदुभयं पूर्ववदुपसादयतीत्यर्थः" सं॰त॰ रघु॰।

दृशद्वती स्त्री दृषद्वती+पृषो॰। १आर्य्यावर्त्तसीमास्थे नदीभेदे २कात्यायन्याञ्च मेदि॰। [काङ्क्षम्।

दृशा स्त्री दृश्+टलन्तत्वात् वा टाप्। नेत्रे शब्दच॰ दृशा-

दृशाकाङ्क्ष त्रि॰ दृशया आकाङ्क्षम्। पद्मे शब्दच॰।

दृशान पु॰ दृश–आनच् किच्च। १लोकपाले उज्वल॰ २विरोचने पु॰ ३ज्योतिषि न॰ मेदि॰। ४आचार्ये पु॰ उणादिकोषः। ५ब्राह्मणे ६उपाध्याये च पु॰ संक्षिप्तसारः।

दृशि(शी) स्त्री दृश–भावे क्वि वा ङीप्। १दृष्टौ २प्रकाशे च "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः" पात॰सू॰। "दृशिमात्र इति दृक्शक्तिरेव विशेषणेन परामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी बुद्धेर्न सरूपोनात्यन्तं विरूप इति न तावत् सरूपः कस्मात् ? ज्ञाताज्ञातविषयत्वात् परिणामिनी हि बुद्धिस्तस्याश्च विषयोगवादिर्घटादि ज्ञातस्याज्ञातस्येति परिणामित्वं दर्शयति। कस्मात् ? न हि बुद्धिश्च नाम पुरुषविषयश्च स्यादगृहीता चेति सिद्धं पुरुषस्य सदा ज्ञातविषयत्वं ततश्चापरिणामित्वमिति। किञ्च परार्था बुद्धिः संहत्यकारित्वात् स्वार्थः पुरुष इति। तथा सर्वार्थाध्यवसायकत्वात् त्रिगुणा बुद्धिस्त्रिगुणत्वादचेतनेति गुणानान्तु पद्रष्टा पुरुष इत्यतो न सरूपः। अस्तु तर्हि विरूप इति नात्यन्तं विरूपः, कस्मात् ? शुद्धोऽप्यसौ पश्यन्नतदात्मापि तदात्मक इव प्रत्यवभासते। तथा चोक्तम् अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्राम्येव तद्वृत्तिमनुपतति। तस्याश्च प्राप्तचेतनानुग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिलक्षणविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते" भा॰। सूर्यप्रकाशयोरिव दृष्टृदृश्ययोर्धर्मधर्मिणोरैक्यात् ३चेतने पुरुषे च "दृशिस्वरूपो गगनोपमोमतः"। "तदभावात् संयोगाभावोहानं तद् दृशेः कैवल्यम्" पात॰सू॰ "मिथ्याज्ञानस्याभावात् बुद्धिपुरुषसंयोगाभावः आत्यन्तिको बन्धनोपरम इत्यर्थः एतद्धानं तद् दृशेः कैवल्यं पुरुषस्याभिचीभावः पुनरसंयोगो गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा सरूपप्रतिष्ठः पुरुष इत्युक्तम्" भा॰ दृश–इक्। ४दृशधातौ "दृशेरनालोचने कङ् च" पा॰

दृशीक त्रि॰ दृश–कर्मणि बा॰ईकक्। १दर्शनीये २शोभने च "स्तोमं रुद्राय दृशीकम्" ऋ॰ १।२७।१० "दृशीकं दर्शनीयं समीचीनम्" भा॰

दृशेन्य त्रि॰ दृश–कर्मणि केन्यन्। दर्शनीये "दृशेन्यो महिना समिद्धः" ऋ॰ १०।८८।७ "दृशेन्यः दर्शनीयः" भा॰

दृशोपम न॰ दृशाया उपमा यत्र। श्वेतपद्मे शब्दमाला।

दृश्य त्रि॰ दृश–कर्मणि क्यप्। १दर्शनीये २मनोरमे च "चित्रं तदा कृष्णनवेशिनः सा नलस्य मूर्त्तिर्वृतते न दृश्या। बभूव तच्चित्रतरत्वथापि विद्धैकदृश्यैव यदस्य मूर्त्तिः"। "आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी" नैष॰ "तमेकदृश्यं नयनैः पिबन्त्योनावैं न जग्मुर्विषयान्तराणि" कुमा॰ "निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिव" रघुः। ३ज्ञेयमात्रे ४प्रकाश्ये च "द्रष्टृदृश्ययोः संयोगो हेयहेतुः" पात॰सू॰ "द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः, दृश्या बुद्धिसत्त्वोपारूढा सर्वे धर्माः, तदेतद् दृश्यमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वभवति पुरुषस्य दृशिरूपस्य स्वामिनः। अनुभवकर्मविषयतामापन्नमन्यस्वभावेण प्रतिलब्धात्मकं स्वतन्त्रमपि तदर्थत्वात् परतन्त्रम् उभयोर्दृष्टदर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः" भा॰ "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" पात॰सू॰ "प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः। स्थितिशीलं तम इति एते गुणाः परस्परोपरक्तप्रविभागाः परिणा-

मिनः संयोगविभागधर्माणः इतरेतरोपाश्रयेणोर्ज्जित मूर्त्तयः परस्पराङ्गाङ्गित्वेऽप्यसम्भिन्नशक्तिप्रविभागास्तुल्य जातीयाऽतुल्यातीयशक्तिभेदानुपातिनः। प्रधानवेला-यामुपदर्शितसन्निधाना गुणत्वेऽपि च व्यापारमात्रेणा-प्रधानान्तर्भीतानुमितास्तिताः पुरुषार्थकर्त्तव्या अव-स्कान्तमणिकल्पाः प्रत्ययमन्तरेण एकतमस्य इत्तिमनु-वर्तमानाः प्रधानशब्दवाच्या भवन्ति। एतद्दृश्यमि-त्युच्यते। तदेतद्भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना स्थूलस्वरूपेण परिणमते तथेन्द्रियभावेन श्रोत्रादिना सू-क्ष्मस्वरूपेण परिणमत इति। तत्तु नाप्रयोजनम् अपि तु प्रयोजनमुररीकृत्य प्रवर्तत इति भोगापवर्गार्थं हि तत् दृश्यं पुरुषस्येति तत्रेष्टानिष्टगुणरूपावधारणम् अविभा-गापन्नं भोगोभोक्तुः स्वरूपावधारणमपवर्ग इति द्वयो-रतिरिक्तमन्यद्दर्शनं नास्ति" भा० ग्रहाणां नक्षत्राणां च कालांशविशेषेण सूर्यसान्निध्ये अदृश्यत्वं सू० सि० उक्तम् अस्तशब्दे ५६२१पृ०दर्शितम् उदयशब्दे ११४४।४५ पृ० दृश्यत्वं च दर्शितं ततएवावगन्तव्यम्।

दृश्य(ष्ट) जाति न० लीला० उक्ते दृष्टकर्मरूपे गणित-भेदे दृष्टकर्मन् शब्दे ६६७ पृ० तत्प्रकारो दृश्यः।

दृश्यादृश्य त्रि० दृश्यश्च अदृश्यश्च द्वन्द्व०। १दृश्ये अदृश्ये च "अष्टादशशताभ्यस्तादृश्यांशाः स्वोदयासुभिः। विभज्य लब्धाः क्षेत्रांशैस्तैर्दृश्यादृश्यताथ वा" सू०सि०। "दृश्या चासौ अदृश्या च" कर्म०। "सा दृष्टेन्दुः सिनीवाली" अमरोक्तेः किञ्चिदंशेन दृश्यचन्द्रायाम् किञ्चिदंशेन अदृश्यचन्द्रायाञ्च २सिनीवाल्यां स्त्री तस्यां चन्द्रस्य दर्श-नादर्शनयोः सत्त्वात् तथात्वम्। ३तदभिमानिदेवतायाञ्च सा च अङ्गिरसस्तृतीयकन्या यथाह भा०व० २१७अ० "यां कपर्दिसुतामाहुर्दृश्यादृश्येति देहिनः। तनुत्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता"

दृशन् त्रि० दृश-कनिप्। दर्शके "विवेकदृशत्वमगात् सुराणाम्" भट्टिः "अनाकृष्टस्य विषयैर्विद्यानां पार-दृश्वनः"। "गुर्वर्थमर्थी श्रुतपारदृश्वा" रघुः।

दृषत्सार न० दृषदः सारमिव। सुवर्णायसे राजनि०।

दृषद् स्त्री दृ-अदि षुक् ह्रस्वश्च। १शिलायां २पेषणशिला-याञ्च भेदि० तत्र शिलायां "गुर्वीरजस्रं दृषदः समन्तात्" माघः। "दृषदो वासितोत्सङ्गा निषण्णसृगनाभिभिः" कुमा० "तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः" मेघ० पेषणशिलायाम् "पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्य" आश्व० श्रौ० १।७।३ "अपामग्नेः सुरेशस्य दृषदोलूखल-स्य च। चतुर्दैवानि चत्वारि द्वाराणि विद्धुश्च ते" हरिवं०११६अ०। दृषदोलूखलमित्यत्र राजदला०पूर्वनि०। दृषदि पिष्टाः अण्। दार्षद, दृषदि पिष्टे त्रि०

दृषदिमाषक पु० माषः गुञ्जत्वेन दीयते कन् दृषदि पेषणव्यवहारे राज्ञे देयः माषकः "कारनाम्नि च प्राचां हलादौ" पा० ञ्लुक् समा०। पेषणव्यवहारे राजदेये माषरूपे करे।

दृषद्वत् त्रि० दृषदः सन्त्यस्मिन् भूम्ना मतुप् मस्य वः। १दृष-द्युक्ते स्त्रियां ङीप्। सा च २नदीभेदे "सरस्वतीदृष-द्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते" मनुः "प्रययुर्ज्जाङ्गलीकूलात् कुरुक्षेत्रं सहा-नुगाः। सरस्वतीदृषद्वत्यौ यमुनाञ्च निषेव्य ते। ययु-र्वनेनैव वनं सततं पश्चिमां दिशम्" भा०व० ५अ०। "कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गो-मती" भाग० ५।१९।१८ भारतवर्षस्यमहानदीकथने। "दक्षिणेन सरस्वत्यादृषद्वत्युत्तरेण च। ये वसन्ति कुरु-क्षेत्रे ते वसन्ति त्रिविष्टपे" भा०व० ८२अ०। ३दृषद्भेदे पु० "संयातिः खलु दृषद्वतो दुहितरं वराङ्गीं नामोपयेमे तस्यामस्य जज्ञे सार्वभौमः" भा०आ० ९५अ०। विश्वामि-त्रस्य ४पत्नीभेदे स्त्री "दृषद्वतीसुतस्यापि विश्वामित्रात्तथा-ऽष्टकः। अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया" हरिवं०२७अ०

दृष्ट त्रि० दृश-कर्मणि क्त। १दर्शनकर्मणि विलोकिते "दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतनः" देवीमा० "द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्" "तस्येह भागिनौ दृष्टौ वीजी क्षेत्रिकएव च" मनुः २ज्ञातमात्रे च "दृष्ट-वदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सा० का० "दृष्टानुश्रविकविषयवितृष्णा वशीकारसंज्ञा वैराग्यम्" पात०सू०। "दृष्टं श्रुतञ्चेत्युपासीत" छा०उप०। भावे क्त। ३दर्शने ४राज्ञां स्वराष्ट्रस्यात् चौरादेर्भये ५परराष्ट्रात् दाहविलोपादेर्भये च न० अमरः। ६साक्षात्कारे न० "दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्" सा०का० उद्देशे तल्लक्षितं यथा

"प्रतिविषयाध्यवसायो दृष्टं, त्रिविधमनुमानमा-ख्यातम्" सा०का० "अत्र दृष्टमिति लक्ष्यनिर्देशः परिशिष्टन्तु लक्षणं समानासमानजातीयव्यवच्छेदो-लक्षणार्थः। अवयवार्थस्तु विषयन्ति विषयिणमनुवध्नन्ति

स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत् विषयाः पृथिव्यादयः सुखादयश्च अक्षादीनामविषयाश्च तन्मानलक्षणा योगिनामूर्द्ध्वस्रोतसाञ्च विषयाः। विषयं विषयं प्रति वर्त्तते इति प्रतिविषयमिन्द्रियवृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमिन्द्रियमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रितइत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसायइति वृत्तिरिति ज्ञानमिति चाख्यायते इदं तावत् प्रमाणम्। अनेन यश्चेतनाशक्तेरनुग्रहस्तत् फलं प्रमाबोधः। बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तद्दीयोऽध्यवसायोऽप्यचेतनो घटादिवत्, एवं बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषङ्गी चेतनः सोऽयं बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना तत्प्रतिबिम्बितस्तच्छायापन्नया ज्ञानसुखादिमानिव भवतीति चेतनोऽनुगृह्यते चितिच्छायापन्नया चाचेतनापि बुद्धिस्तदध्यवसायोऽपि चेतन इव भवतीति। तथा च वक्ष्यति "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः" इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशयस्य अनवस्थितग्रहणेनानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इत्यनर्थान्तरम्। विषयग्रहणेन चासद्विषयं विपर्य्ययमपाकरोति, प्रतिग्रहणेन चेन्द्रियार्थसन्निकर्षसूचनादनुमानसूत्रादयः पराकृता भवन्ति। तदेवं समानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्य सम्पूर्णं लक्षणम्" तत्त्वकौ०।

दृष्टदोष त्रि० दृष्टो दोषः रागलोभादिर्यस्य। १ज्ञातरागलोभादिदूषणके "न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः" साक्षिकरणनिषेधे मनुः। दृष्टो दोषो मिथ्याज्ञानजन्यवासना यत्र। २ज्ञातमिथ्याज्ञानजन्यवासनायुक्तविषये "दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतनः" देवीभा० दृष्टो ज्ञातो दोषोऽनेन। ३किद्रावलोकके रिपौ

दृष्टपृष्ठ त्रि० दृष्टम् प्रतियोधैः पृष्ठमस्य। पलायमाने शब्दार्थचि० रथात् पराङ्मुखस्य शत्रुभिः पृष्ठस्य दर्शनात् तथात्वम्।

दृष्टप्रत्यय त्रि० दृष्टेन दर्शनेन प्रत्ययः विश्वासो यस्य। अन्यत्र दर्शनेन कृतदृढनिश्चये।

दृष्टरजस् स्त्री दृष्टं रजः आर्त्तवं यया। १दृष्टरजस्कायां नायाम् अमरः। २तदुपलक्षितायां मध्यमायां प्रौढायाम् स्त्रियां राजनि०।

दृष्टान्त पु० दृष्टोऽन्तः विषयपरिच्छेदोयत्र। गौ० सूत्रोक्तेषु षोडशसु पदार्थेषु मध्ये पदार्थभेदे तल्लक्षणं तत्रोक्तं यथा "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" सू० "लोकसामान्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्तास्तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति, यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन हि प्रतिषेधव्या भवन्तीति। दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति तदुक्तावयवेषु चोदाहरणाव कल्पत इति" वात्स्या० भा०। २तत्रोक्तावयवमध्ये उदाहरणे च तल्लक्षणं तत्रोक्तं तच्च उदाहरणशब्दे ११६४ पृ० दर्शितम् अधिकमत्र तत्सूत्रभाष्यं प्रदर्श्यते यथा "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्" गौ०सू० "साध्येन साधर्म्यं समानधर्मता साध्यसाधर्म्यात् कारणात् तद्धर्मभावो दृष्टान्त इति तस्य धर्मस्तद्धर्मः तस्य साध्यस्य, साध्यञ्च द्विविधम् धर्म्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्। धर्म्मविशिष्टो वा धर्म्मी अनित्यः शब्द इति, इहोत्तरत्रान्यत्रग्रहणेन गृह्यत इति कस्मात्? पृथग्धर्म्मवचनात्। तस्य धर्म्मस्तद्धर्म्मस्तस्य भावस्तद्धर्म्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्म्मभावो भवति स चोदाहरणमिष्यते तत्र यदुत्पद्यते तदुत्पत्तिधर्म्मकम् यच्च भूत्वा न भवति आत्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्म्मकत्वं साधनमनित्यत्वं साध्यं सोऽयमेकस्मिन् द्वयोर्धर्म्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाह्रियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्" भा० "तद्विपर्य्ययाद्वा विपरीतम्" गौ०सू० "दृष्टान्त उदाहरणमिति प्रकृतं, साध्यवैधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणमिति। अनित्यः शब्द उत्पत्तिधर्मकत्वात् यथा अनुत्पत्तिधर्मकं नित्यमात्मादि सोऽयमात्मादिदृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावो योऽसौ साध्यस्य धर्मोऽनित्यत्वं स तस्मिन् भवतीति। अत्रात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्याभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्य्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति साध-

र्म्योक्तस्य हेतोः साध्यसाधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणम् वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यात्तद्धर्मभावो दृष्टान्त उदाहरणम् । पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोति । उत्तरस्मिन् दृष्टान्ते ययोर्धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये अनुमिनोतीति, तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासाः तदिदं हेतूदाहरणयोः साधर्म्यं परमसूक्ष्मं दुःखबोधं पण्डितैरुपवेदनीयमिति" भाष्यम् । अन्यत्र च "वादिप्रतिवादिनोः संप्रतिपत्तिविषयोऽर्थो दृष्टान्तः । यथा पर्वतो वह्निमान् धूमात् महानसवदित्यादौ महानसो दृष्टान्तः । स द्विविधः साधर्म्यदृष्टान्तः वैधर्म्यदृष्टान्तः । आद्यः पर्वते वह्निसाधने धूमवत्त्वस्य हेतोर्महानसः । द्वितीयः तत्रैव धूमवत्त्वस्य हेतोर्महाह्रदः । ३अर्थालङ्कारभेदे अलङ्कारशब्दे ३८८ पृ०दृश्यम् "दृष्टान्तोऽत्र महार्णवः" माघः ४शास्त्रे ५मरणे च मेदि०

दृष्टि स्त्री दृश-भावे क्तिन् । १दर्शने चाक्षुषज्ञाने "नान्वादृष्ट्या चक्षुश्चतामनुपलम्भः" सा०सू० । अक्षिपटलशब्दे ४२पृ० अक्षिशब्दे ४५पृ० च दृश्यम् । २ज्ञानमात्रे मेदि० "तथार्थैकतरदृष्ट्या एकतरसिद्धेर्नापलापः" । "विदितबन्धकारणस्य दृष्ट्या तद्रूपम्" सा०सू० । ३प्रकाशे च "न द्रष्टुर्दृष्टेर्विपरिलोपोऽस्ति" श्रुतिः । ग्रहदृष्टिभेदादिकं ग्रहदृष्टिशब्दे २७५२।५३ पृ० दृश्यम् । करणे क्तिन् । ४नेत्रे अमरः । "अस्मैस्तावन्मुखरूपचितैर्दृष्टिरालुप्यते मे" मेघ० "दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला" मृच्छ० "दृष्ट्या प्रसादमलया कुमारं प्रत्यगृह्णीत्" रघुः "दृष्टा दृष्टिमधो ददाति" सा०द० ।

दृष्टिकृत् त्रि० दृष्टिं करोति कृ-क्विप् । २दर्शके ३स्थलपद्मे न० शब्दच० । तस्य शोभया लोकानां दृष्टिसम्पादकत्वात् तथात्वम् ।

दृष्टिक्षत न० दृष्टिर्लोकानां दृष्टिः क्षता येन निष्ठान्तस्य परनिपातः । १स्थलपद्मे शब्दरत्नावली । २क्षतदर्शने त्रि० ।

दृष्टिक्षेप पु०दृष्टेः क्षेपः । १दृष्टिपाते ।

दृष्टिगत पु० दृष्टिं गतः विषयतया प्राप्तः । १नेत्रविषये । ७त० । २नेत्रगते रोगभेदे अक्षिपटलशब्दे ४३पृ०दृश्यम् ।

दृष्टिगुण पु० दृष्ट्या गुण्यतेऽभ्यस्यतेऽत्र चु० गुण-अभ्यासे आधारे अच् । १बाणादिलक्ष्ये शब्दमात्रा तस्य दृष्ट्यैव शरादिक्षेपणाभ्यासनात् तथात्वम् ६त० । २नेत्रगुणे रूपादौ ।

दृष्टिप पु० दृष्टिं पिबति पा-क । देवगणभेदे "गणा देवानामूष्मपाः सोमपाश्च लोकाः सुयामास्तुषिता ब्रह्मकायाः । आभास्वरा गन्धर्वा दृष्टिपाश्च" भा०आनु० १८अ०

दृष्टिबन्धु पु०दृष्टेर्नेत्रस्य बन्धुरिव सादृश्यापादनात् । १खद्योते शब्दर० अक्षिपटलशब्दे ४३ पृ० उक्तेन "खद्योतविस्फुलिङ्गाभामिति" सुश्रुतवाक्येन दृष्टेस्तत्तुल्यत्वस्योत्कीर्तनेन तस्य तत्सादृश्यापादकतया तथात्वम् ।

दृष्टिवाद पु० हेमच० उक्ते पञ्चात्मके बौद्धानां वादरूपकथाभेदे "दृष्टिवादो द्वादशाङ्गी स्याद्गणिपिटकाह्वया । प्रतिकर्मसूत्रपूर्वानुयोगो पूर्वगतचूलिकाः । पञ्च स्युर्दृष्टिवादभेदाः पूर्वाणि चतुर्दशापि पूर्वगते" ।

दृष्टिविक्षेप पु० दृष्टिस्तदेकदेशस्य विक्षेपः । १कटाक्षदर्शने हला० ६त० । २दृष्टिपाते ३दर्शनान्तराये च

दृष्टिविभ्रम दृष्टेर्विभ्रमः विलासभेदः । नेत्रविलासभेदे "विवर्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम्" शकु० २दर्शनभ्रान्तौ च

दृष्टिविष पु०स्त्री दृष्टौ विषोऽस्य । १सर्पभेदे स्त्रियां जातित्वात् ङीष् । "दृष्टीविषैः सप्तशीर्षैर्गुप्तं भोगिभिरद्भुतैः" भा०व०२२४अ० । दृष्टीविषेरित्यत्र आर्षो दीर्घः । "ते चाब्रुवन् नङ्गपो घोररूपो दृष्टीविषस्तस्य बिभीम देव !" भा०उ० १५अ० ।

दृह दृङ्ह भ्वा०पर०अक०सेट् । दर्हति अदर्हीत् ददर्ह । अयमिदित् तत्र दृंहति अदृंहीत् । "तमेतैः स्तोमैः सप्तदशैरदृंहन्" ताण्ड्य०ब्रा०४।५।६ इदित्त्वात् नलोपाभावः दृंह्यते दृंहितः "दिशे दृंह दृंहिता दृंहणेन" तैत्ति० २।८३।८ "दृंहणाय स्वनामसि" अथ० ६।१३६।१ अनिदितस्तु दृह्यते दृहितः इत्यादि ।

दृ भये भ्वा० पर० सक० सेट् । दरति अदारीत् चटा० णिच् दरयति । ददार दरीता दरिता । दीर्णः ।

दृ विदारे दिवा० पर०सक० सेट् । दीर्यति अदारीत् । ददार दरीता दरिता दीर्णः । [दरिता । दीर्णः । भगन्दरः

दॄ विदारे क्र्या०पा०पर०अक०सेट् । दृणाति अदारीत् दरीता

दे पालने भ्वा० आत्म०सक० अनिट् । दयते अदास्त दद्दे दाता दास्यते दातुम् दत्तः ।

देय त्रि०दा-कर्मणि यत् । १दातव्ये "स्वं कुटुम्बाविरोधेन देयं दारसुताद्दते । नान्वये सति सर्वस्वं यद्वान्यस्मै प्रतिश्रुतम्

यात्र० वचनोक्तनिषिद्धभिन्ने २दानार्हे दत्ताप्रदानिक-शब्दे २४५५।५६ पृ० दृश्यम् ।

देव देवने भ्वा०आत्म० अक० सेट् । देवते अदेविष्ट । अ-देविढ्म् अदेवि(ड्ढ)ध्वम् दिदेवे अदेविष्ट । देवयति ते अदि देवत् त । देवनमिह रोदनमिति भट्टमल्लः । परि+विलापे । "विलापः परिदेवनम्" अमरः । "खर-दूषणयोर्भ्रात्रोः पर्य्यदेविष्ट सा पुरः" भट्टिः ।

देव पु० दिव-अच् । १अमरे सुरे नाटकोक्तौ २राजनि अमरः । ३इन्द्रे ४मेघे पु० ५इन्द्रिये न० मेदिनि० ६पारदे पु० राजनि० । ७ब्राह्मणानामुपाधिभेदे "ततश्च नाम कुर्वीत पितैव दशमेऽहनि । देवपूर्वं नराख्यं हि शर्मवर्मादि संयुतम्" इति भवि०पु० । "नरमाचष्टे इति नराख्यं नरनाम. देवात् पूर्वं तच्च विशिष्टं शर्म-युतम् । "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः । भूतिगुप्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" इति यम-वचने समुच्चयोपलब्धेः । "शर्मान्तं ब्राह्मणस्य स्यात्" इति शातातपीयेन शर्मान्तता च । ८देवदारुणि श-ब्दार्थचि० ९पूज्ये १०दीप्ते च त्रि० ११परात्मनि पु० एकोदेवः सर्वभूतेषु गूढः" श्रुतिः । "भर्गोदेवस्य" गायत्री "दीव्यते क्रीडते यस्मात् रोचते द्योतते दिवि । तस्मा-द्देव इति प्रोक्तः स्तूयते सर्वदैवतैः" योगियाज्ञ० "उद्भवः क्षोभणो देवः" विष्णुसं० "यतः क्रीडति सर्गादिभिर्विजिगीषते शत्रून्, व्यवहरति सर्वभूतेषु आत्म-तया, द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतीति तस्मात् देवः" भा० । सुराश्च यद्यपि बहवस्तथापि प्राधान्यात् त्रयस्त्रिंशत्संख्यया त्रयस्त्रिंशत्पतिशब्दे ३२५९ पृ० दृश्याः तत्र सुरे "देवा अव्यस्य रूपस्य नित्यं दर्शन-काङ्क्षिणः" गीता । "देवान्दधीत मनुष्यांश्च पितॄन् ऋ-ह्मांश्च देवताः" मनुः । नृपे "देवाकर्णय सुश्रुतेन चरक-स्योक्तेन जानेऽखिलम्" नैष० नाटकोक्तौ नृपे "यथाऽऽ-ज्ञापयति देवः" भूरिनाटकेषु । मेघे देवो गर्जति देव-गर्जनम् देवे वर्षति । "देवाश्च आजानदेवाः कर्मदेवाश्च" कर्मदेवशब्दे १७२८ पृ० दृश्यम् ।

देवऋषभ पु० नित्यकर्म० प्रकृतिवद्भावः । कश्यपकन्यायां धर्मस्य पत्नीभेदे भानौ जाते पुत्रे दशधर्मायेत्युपक्रमे "भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती । वसुर्मु-हूर्ता सङ्कल्पो धर्मपत्न्यः सुतान् शृणु । भानोस्तु देवऋषभ इन्द्रसेनस्ततो नृप !" भा० ६।५।४।५

देवऋषि पु० देवानामृषिः, पूज्यत्वात् प्रकृतिवद्भावो वा । देवर्षौ नारदादौ "अथ देवऋषी राजन् ! संपरेतं नृपात्मजम्" भाग० ६।१६।१ पक्षे देवर्षिरप्यत्र । इक्ष-स्वतेष्टं हृत्कीर्त्तेर्देवर्षेर्विद्धि भारत" भा०आ० ६७अ० ।

देवंक त्रि० दिव-खुल् । १क्रीडके २गन्धर्वपतिभेदे ३श्रीकृ-ष्णस्य मातामहे आहुकपुत्रे नृपभेदे च पु० "यस्त्वासी-द्देवको नाम देवराजसमद्युतिः । स गन्धर्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः" भा० आ०६७अ० तस्यैव देवक-नाम्ना कलावतारः इत्यर्थः । "आहुकस्य तु काश्यायां द्वौ पुत्रौ सम्बभूवतुः । देवकश्चोग्रसेनश्च देवगर्भसमावुभौ । देवकस्याभवन् पुत्राश्चत्वारस्त्रिदशोपमाः । देववानुपदेवश्च सन्देवो देवरक्षितः । कुमार्यः सप्त चास्यासन् वसुदे-वाय ता ददौ । देवकी शान्तिदेवा च सन्देवा देवर-क्षिता । इकदेव्युपदेवी च सुनाम्नी चैव सप्तमी" हरिवं० ३८अ० । ४तत्कन्यायां स्त्री ङीष् । देवकीशब्दे दृश्यम्

देवकर्दम पु० देवप्रियः कर्दम इव । श्रीखण्डागुरुकर्पूर कुङ्कुमैर्मिलितैः कृते कर्दमरूपे गन्धद्रव्यभेदे राजनि० ।

देवकात्मजा स्त्री ६त० । देवकन्दपसुतायां देवक्यां प्राधान्यात् शब्दरत्ना० ।

देवकार्य न० देवप्रियार्थं कार्यम् । १देवप्रियार्थे होमपूजादौ कार्ये "देवकार्यात् द्विजातीनां पितृकार्यं विशेष्यते" मनुः । देवानामभिलषितं कार्यम् । २देवाभिलषिते कार्ये च "अनुष्ठितदेवकार्यम्" रघुः कृतरावणवधादिरूपदेवकार्य-मित्यर्थः । देवकर्मादयोऽप्यत्र "देवकर्मकृतश्चैव युक्ताः कामेन कर्मसु" भा०शा०१६७अ०

देवकाष्ठ न० देवप्रियं काष्ठमस्य । देवदारुवृक्षे रत्ना० । "मनःशिला देवकाष्ठं रजन्यौ त्रिफलौषधम्" सुश्रु० ।

देवकिरी स्त्री मेघरागस्य भार्याभेदे रागिणीभेदे तद्रागस्य रागिणीभेदाः तत्स्वरूपञ्च सङ्गीतदा०उक्तं यथा "ललिता मालती गौरी नाटी देवकिरी तथा । मेघ-रागस्य रागिण्यो भवन्तीमाः सुमध्यमाः" । अस्या स्वरूपं यथा "भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा । ख्याता देवकिरी ह्येषा करार्पितसखीकरा" देवगिरीति वा पाठः ।

देवकिल्बिष न० देवेन कृतं किल्बिषमनिष्टकर्म । देवकृते अनिष्टे कार्ये यथा वरुणकृतपाशबन्धनं यमकृतपादबन्ध-नमित्यादि । "मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात्" ऋ०१०।९७।१६।

देवकी स्त्री देवक+पुंयोगे ङीष् पुंयोगश्च न केवल दा-

मत्यलक्षणः किन्तु जन्यजनकत्वादिरूपोऽपीति हरदत्तः तेन केकयीति सिद्धम् । देवकराजकन्याभेदे देवकशब्दे दृश्यम् । देवकी च कश्यपपत्न्या अदितेरवतारः यथोक्तं हरिवं० ५६अ० "तस्य (कश्यपस्य)भार्याद्वयञ्चैव अदितिः सुरभिस्तथा । देवकी रोहिणी चैव वसुदेवस्य धीमतः"

देवकीनन्दन पु० ६त० । वसुदेवपत्न्या देवक्यानन्दने श्रीकृष्णे । "नन्दगोपस्य जायैका वसुदेवस्य चापरा । तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा । देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम् । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विमूर्द्धिते" हरिवं० । ६०अ० "देवकीनन्दनः स्रष्टा जितोऽपः पापनाशनः" विष्णुसं० "गृहीत्वा शरणं प्राप्ते कृष्णे देवकिनन्दने" भा०आ० १अ० संज्ञात्वात् ङीषो लुक्ः [तुग्रिष्टः कुक् च । देवसम्बन्धिनि ।

देवकीय त्रि० देवस्येदम् गहा० छ "देवस्य च" पा०ग०तद०

देवकीपुत्र पु० ६त० । १श्रीकृष्णे "बलदाद्यैव दास्यामि देवकीपुत्रमाश्रितः" हरिवं० १४२अ० । २पुरुषयज्ञदर्शनविद्यायां घोरनामकाङ्गिरसस्य शिष्यभूते कृष्णे च । यज्ञदर्शनमुपक्रम्य "तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचाऽपिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति" छा०उ० ३।१७।६ "तद्धैतत् यज्ञदर्शनं घोरोनामतः, आङ्गिरसो गोत्रतः कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादि व्यवहितेन सम्बन्धः । स चैतद्दर्शनं श्रुत्वाऽपिपास एवान्याभ्यो विद्याभ्यो बभूव । इत्यञ्च विशिष्टेयं विद्या यत् कृष्णस्य देवकीपुत्रस्यान्यां विद्यां प्रति तद्विच्छेदकरीति पुरुषयज्ञविद्यां स्तौति घोर आङ्गिरसः कृष्णायोक्त्वेमां विद्यां किञ्चवाचेति तदाह स एवं यथोक्तयज्ञविदन्तवेलायां मरणकाल एतन्मन्त्रत्रयं प्रतिपद्येत जपेदित्यर्थः । किं तत् अक्षितमक्षीणमक्षतं वाऽसीत्येकं यजुः" भा०अत्र परमेश्वरस्य वासुदेवात्मकेश्वरस्य अन्यशिष्यत्वानुपपत्तौ इह तदन्यस्यैव शिष्यत्वम् । श्रुतौ स्रष्टेः अनादिप्रवाहरूपतया वासुदेवस्य शिष्यत्वकल्पनया जनकयाज्ञवल्क्ययोरिव कल्पान्तरस्थयोरियमाख्यायिका स्तुत्यर्थेत्यन्ये । देवकीसुतादयोऽपि वासुदेवे । "अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे । अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ति०त० ब्रह्मपु० "न्यायाधायिपातामभिदेवकीसुतम्" माघः ।

देवकीमातृ पु०देवकी माता यस्य समासान्तविधेरनित्यत्वात् न कप्, देवकीं मिनोति प्रसूतित्वेन मा—तृच् या । वासुदेवे श्रीकृष्णे । "पश्यैतान् देवकीमातर्सुमूर्द्धन्यद्य संयुगे" भा०द्रो० १८अ० प्रथमे विग्रहे सर्वनामस्थाने परे गुणः देवकीमातरमित्यादि द्वितीये देवकीमातारमिति भेदः ।

देवकुण्ड न० देवकृतं कुण्डम् । देवखातके सुभूतिः

देवकुरुम्बा स्त्री महाद्रोण्यां राजनि० ।

देवकुल न० कुल—संहतौ क देवार्थं कुलमल्पद्वारतया संहतम् । अल्पसुखे (देउल) ख्याते देवगृहभेदे हारा० । देवानां २वंशे ३समूहे च

देवकुल्या स्त्री देवकृता कुल्या अल्पसरित् । १देवसरिति गङ्गायाम् ६त० । मरीचेः कन्यायाः पूर्णिमासः २कन्यायाञ्च "पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा । कश्यपं पूर्णमासञ्च ययोरापूरितं जगत् । पूर्णिमासस्तु विरजं विश्वगञ्च परन्तप । देवकुल्यां हरेः पादशौचादुयाऽभूत् सरिद्विः" भाग०४।१।१२। सा च भरतवंशस्य भूम्नः पत्नीभेदः यथाह भाग० ५।१५।६ "भरतस्यात्मजः सुमतिर्नाम" इत्युपक्रमे "प्रतिहर्त्तुः स्तुत्यामजभूमानायजनिष्यताम् । भूम्न ऋषिकुल्यायामङ्गोयः ततः प्रस्तारो देवकुल्यायाम्" ।

देवकुसुम न० देवप्रियं कुसुमम् । लवङ्गे अमरः ।

देवकूट न० वशिष्ठाश्रमसन्निकृष्टस्थे तीर्थभेदे "तत्राश्रमो वशिष्ठस्य त्रिषु लोकेषु विश्रुतः । तत्राभिषेकं कुर्वाणो वाजपेयमवाप्नुयात् । देवकूटं समासाद्य देवर्षिगणसेवितम्" भा०व० ८४अ० ।

देवक्षत्र पु० क्रोष्टुवंशजे नृपभेदे "तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः ! । देवक्षत्रोऽभवत्तस्य देवक्षत्रिर्महायशाः । देवगर्भसमो जज्ञे देवक्षत्रस्य नन्दनः" हरिवं० ३७अ० । देवानां क्षत्रं बलं यत्र । २यज्ञे च "उच्छन्त्यां मे यजता देवक्षत्रे रुशद् गवि" ऋ० ५।६४।७ "देवक्षत्रे यज्ञे" भा० ।

देवखात न० देवेन खातं खन—क्त । १अलिन्दे २जलाशये ७त० । ३देवसमीपस्थे खाते च "नदीषु देवखातेषु तडागेषु सरित्सु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" मनुः कार्यं क तत्रार्थे अमरः । ४गुहायां भरतः ।

देवखातविल पु० नित्यकर्म० । गुहायाम् अमरः ।

देवगण पु०६त० । १देवसमूहे "उदर्कस्य कल्याणि ! तुष्टो देवगणेश्वरः" भा०भी० १२३अ० । देवगणाश्च त्रयस्त्रिंशत्संख्यकाः शब्दे ३२५९ पृ० उक्ताः वस्वादीनुक्ता "त्रयस्त्रिंशत

इत्येते देवास्तेषामहं तव। अन्वयं संप्रवक्ष्यामि पञ्चधः कुलतो गणान्" इत्युपक्रमे "एते देवगणा राजन्! कीर्तितास्तेऽनुपूर्वशः" भा०व्या०६६अ० उक्ताः। देवसंज्ञकोगणः। २नक्षत्रभेदे उपयमशब्दे १२५० पृ० गणकूटे दृश्यम् ६त०। ३देवपक्षे ४देवानुचरादौ

देवगणग्रह पु० सुश्रुतोक्ते देवादिगणरूपे ग्रहे देवानाञ्च शुद्धस्वभावत्वात् ग्रहत्वासम्भवमाशङ्क्य तद्गणानामेव ग्रहत्वं च तत्रोक्तं यथा

"गुह्यानागतविज्ञानमनवस्था सहिष्णुता। क्रिया वाऽमानुषी यस्मिन् स ग्रहः परिकीर्त्यते। अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम्। हिंसुर्हिंसाविहारार्थं सत्कारार्थमथापि च। असंख्येया ग्रहगणा ग्रहाधिपतयस्तु ये। व्यज्यन्ते विविधाकारा भिद्यन्ते ते तथाष्टधा। देवास्तथा शत्रुगणाश्च तेषां गन्धर्वयक्षाः पितरो भुजङ्गाः। रक्षांसि या चापि पिशाचजातिरेषोऽष्टधा देवगणग्रहाख्यः। सन्तुष्टः शुचिरपि चेष्टगन्धमाल्यो निस्तन्द्रो ह्यवितथसंस्कृतप्रमाणी। तेजस्वीस्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति च यः स देवजुष्टः। संखेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः। सन्तुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति च देवशत्रुजुष्टः। क्लिष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः। नृत्यन् वा प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः। ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरोद्धुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं द्रुमे कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः। प्रेतेभ्यो विसृजति संस्करेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्रः। मांसेप्सुस्तिलगुडपायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिभूतः। भूमौ यः प्रसरति सर्पवत्कदाचित् स्रक्कण्ठो विलिहति जिह्वया प्रसक्तम्। निद्रालुर्गुडमधुदुग्धपायसेप्सुर्विज्ञेयो भवति भुजङ्गमेन जुष्टः। मांसास्रग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः। क्रोधालुर्विपुलबलो निशाविहारी शौचद्विड्भवति च रक्षसा गृहीतः। उद्भ्रान्तः क्षपणरुचिरप्रलापी दुर्गन्धो भृशमशुचिस्तथातिलोलः। बद्धाशी विजनहिमाम्बुरातिसेवी व्याचेष्टं भ्रमति रुदन् पिशाचजुष्टः। स्थूलाक्षस्त्वरितगतिः स्वफेनलेही निद्रालुः पतति च कम्पते च योऽति। यश्चाद्रिद्विरदनगादिविच्युतःसन् संस्पृष्टो न भवति वाङ्मकेन जुष्टः। देवग्रहाः पौर्णमास्यामासुराः सन्ध्ययोरपि। गन्धर्वः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ। कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः। रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च। दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा। स्वमणिभास्करार्चिश्च यथा देहं च देहिनः। विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणम्। तपांसि तीव्राणि तथैव दानव्रतानि धर्मो नियमश्च सत्यम्। गुणास्तथाष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावम्। न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान् क्वचिदाविशन्ति। ये वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः। तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतप्रश्नसंख्याः। असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तमाविशन्ति। निशाचराणां तेषां हि ये देवगणसंस्कृताः। ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तद्भजनाः। देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये। देववत् ते नमस्यन्ते प्रत्यर्थन्ते च देववत्"।

देवगणिका स्त्री ६त०। स्वर्वेश्यायामप्सरःसु।

देवगन्धर्व पु० देवानां गन्धर्वः गायनः। १देवसमीपे गायने गन्धर्वभेदे। देवगन्धर्वाश्च मौनेयाः प्राधेयाश्च गन्धर्वशब्दे २५२८ पृ० उक्ताः। [राजनि०।

देवगन्धा स्त्री देवप्रियोगन्धोऽस्याः। महामोदयामोषधौ

देवगर्भ पु०देवात् गर्भोयस्य। देवाहितगर्भके देवपुत्रे १नरादौ "प्रतिजग्राह तं राधा विधिवद्दिव्यरूपिणम्। पुत्रं कमलगर्भाभं देवगर्भं श्रियादृतम्" भा०व०३०८अ०। "देवकश्चोग्रसेनश्च देवगर्भसमावुभौ" हरिवं० ३८अ० "स तस्यां जनयामास देवगर्भोपमं सुतम्" ११९अ० २कुशद्वीपस्य २नदीभेदे स्त्री "रसकुल्या मधुकुल्या मित्राविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति यासां पयोभिः कुशद्वीपौकसः" भाग० ५।२०।११

देवगान्धार पु० देवप्रियः देवयोग्यो वा गान्धारः। स्वरभेदे "ततस्तु देवगान्धारं कालिक्यं श्रवणामृतम्। भौमस्त्रियः प्रजगिरे मनःश्रोत्रसुखावहम्" हरिवं० १५२अ० २श्रीरागस्य रागिणीभेदे स्त्री "गान्धारी देवगान्धारी मालवी श्रीश्च सारवी। राम(गि)किर्य्यपि रागिण्यः श्रीरागस्य प्रिया क्रमाः" सङ्गीतद०।

देवगायन पु० ६त०। गन्धर्वे हेमच०।

देवगिरि पु० देवानां प्रियः गिरिः। १पर्वतभेदे स च

भारतवर्षीयः स्वनामख्यातो गिरिः "भारतेऽस्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः इत्युपक्रमे "सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलः" भाग०५।१९।१७ उक्तेः श्रीरागस्य २रागिणीविशेषे स्त्री ङीप् देवगान्धारीशब्दे दृश्यम् ।

देवगुरु पु० ६त० । १सुराचार्ये बृहस्पतौ हेमच० देवानां पितरि २कश्यपे च "अपश्यन् कश्यपं तत्र मुनिं दीप्तं तपोनिधिम् । आद्यं देवगुरुं देवम्" हरिवं० २५७ अ०

देवगुही स्त्री गुह–बा० कि ङीप् देववत् गुही गुहा । सरस्वत्याम् "देवगुह्यां सरस्वत्यां सार्वभौम इति प्रभुः" भाग०८।१३।८।

देवगुह्य त्रि० ६त० । देवानामतिरहस्ये । "एकमासीनमेकान्ते देवगुह्यधरं प्रभुम्" हरिवं० ११६अ० "श्रुतार्थो देवगुह्यस्य भवान् यत्र वयं स्थिताः" तत्रैवाध्याये "तस्मिन् स्नातॄणां विग्रहे देवगुह्ये" भा०आ० १अ० २मरणे न० । शब्दार्थचि० । तद्धि प्राणिनां वैराग्यानुत्पादाय देवैर्गोप्यते इति तस्य तथात्वम् ।

देवगृह न० ६त० । देवालये तल्लक्षणं गरुडपु० ४७अ० यथा "चतुःषष्टिपदं कृत्वा दिग्विदिक्षूपलक्षितम् । चतुष्कोणं चतुर्भित्ति द्वाराणि स्वर्यसंख्यया । चत्वारिंशाष्टभिश्चैव भित्तीनां कल्पना भवेत् । जङ्घाक्षेत्रसमा जङ्घा जङ्घार्द्धद्विगुणं भवेत् । गर्भविस्तारविस्तीर्णा शुकाग्रा च विधीयते । तत्त्रिभागेण कर्तव्या पञ्चभागेन वा पुनः । निर्गमस्तु शुकाग्राया उच्छ्रयः शिखरार्द्धतः । चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् । चतुर्थे पुनरस्यैव कण्ठस्य मलसारकम् । अथ वापि समं वास्तु कृत्वा षोडशभागिकम् । तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् । भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् । चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः । द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः । शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः । चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः । पञ्चभागेन संभज्य गर्भमानं विचक्षणः । भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः । गर्भस्तत्समो भागादग्रतो मण्डपः । एतत् सामान्यसंदिष्टं प्रासादस्य हि लक्षणम् । लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् । द्विगुणेन भवेद्गर्भः समलाच्छौनक ! ध्रुवम् । तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा । द्विगुणं शिखरं प्रोक्तं जङ्घाया एव शौनक ! । पीठं गर्भाधरं कुर्यात् तन्मानेन शुकाग्रकाम् । निर्गमस्तु समाख्यातः शेषं मूलवदेव तु । लिङ्गमानं स्मृतं ह्येतद् द्वारमानमथोच्यते । कराग्रं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत् । विस्तरेण समाख्यातं द्विगुणं वेच्छया भवेत् । द्वारवत् पीठमध्ये तु शेषं शुषिरकं भवेत् । पादिकं शौषिकं भित्तिर्द्वाराद्धेन परिग्रहात् । तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् । शुकाग्रा पूर्ववज्ज्ञेया निर्गमोच्छ्रायकं भवेत् । मण्डपे मानमेतत्तु स्वरूपस्यापरं वदे । त्रैवेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः । इत्थं कृतेन मानेन बाह्यभागं विनिर्गतम् । नेमिः प्राचीन विस्तीर्णा प्रासादस्य समन्ततः । गर्भन्तु द्विगुणं कुर्यात् नेम्यामानं भवेदिह । स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः । प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः । वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः । त्रिपिष्टः पञ्च पञ्चैते प्रासादाः सर्वयोनयः । प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः । वृत्तो वृत्तायतश्चान्योऽष्टास्रश्चेह च पञ्चमः । एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः । सर्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च पञ्च च । मेरुश्च मन्दरश्चैव विमानश्च तथाऽपरः । भद्रकः सर्वतोभद्रो ! रुचकोनन्दनस्तथा । नन्द्यावर्त्तनसंज्ञश्च श्रीवत्सश्च नवेत्यमी । चतुरस्रात् समुद्भूता वैराजादिति गम्यताम् । वडभी गृहराजश्च शालागृहञ्च मन्दिरम् । विशालश्च तथा ब्रह्ममन्दिरं भवनं तथा । उत्तम्भं शिविका वेश्म नवैते पुष्पकोद्भवाः । वलयो दुन्दुभिः पद्मो महापद्मस्तथाऽपरः । वर्द्धनोऽप्यन्य उष्णीष शङ्खश्च कलसस्तथा । खपूरवृत्तकाश्चान्यो वृत्ताः कैलाससम्भवाः । गजोऽथ वृषभो हंसो गरुडः सिंहनामकः । भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः । वृत्तायतसमुद्भूता नवैते मालकाह्वयात् । वज्रं चक्रं तथान्यच्च स्वस्तिकं वज्रसंज्ञितम् । चित्रस्वस्तिकखड्गौ च गदा श्रीवृक्ष एव च । विजयो नामतश्चैते त्रिपिष्टपसमुद्भवाः । त्रिकोणपत्रमर्द्धेन्दु चतुष्कोणं द्विरष्टकम् । यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु । राज्यञ्च विजयश्चैवमायुर्वर्द्धनमेव च । पुत्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् । कुर्यात् ध्वजादिसंख्यां वा द्वारि गर्भगृहन्तथा । मण्डपः सप्तसंख्याभिर्गुणितः स्वतस्तथा । मण्डपस्य चतुर्थांशाद्भद्रः कार्यो विजानता । स्वर्द्धांगवाक्कोपेतो निर्गवाक्षोऽथ वा भवेत् । सार्द्धभित्तिप्रमाणेन भित्तिमाने-

न वा पुनः। भित्तेर्द्वैगुण्यतो वापि कर्तव्या मण्डपाः क्वचित्। प्रासादे मञ्जुरी कार्या चित्रा विषममूमिका। परिमाणनिरोधेन रेखा वैषम्यभूमिका। आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः। शतष्टङ्गसमायुक्तो मेरुप्रासाद उत्तमः। मण्डपास्तस्य कर्तव्या भद्रैस्त्रिभिरलङ्कृताः। घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये। कियन्तोऽपि साधारानिराधाराश्च केचन। प्रतिच्छन्दकभेदेन प्रासादाः समुद्भवन्ति ते। अन्योन्यसङ्करास्तेषां घटना नामभेदतः। देवतानां विशेषाय प्रासादा बहवः स्मृताः। प्रासादे नियमो नास्ति देवानां च स्वयम्भुवाम्। तान्येव देवतानाञ्च पूर्वमानेन कारयेत्। चतुरस्रायतास्तत्र चतुष्कोणसमन्विताः। चन्द्रशालान्विताः कार्या भेरीशिखरसंयुता। पुरतो वाहनानाञ्च कर्तव्या लघुमण्डपाः। नाट्यशाला च कर्तव्या द्वारदेशसमाश्रया। प्रासादा देवतानाञ्च कार्या दिक्षु विदिक्ष्वपि। द्वारपालाश्च कर्तव्या सुस्थाङ्गत्वात् पृथक् पृथक्। किञ्चिद्दूरतः कार्या मठास्तत्रोपजीविनाम्। प्राङ्मुखा जगती कार्या फलपुष्पजलान्विता। प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेच्चरः। वासुदेवे सर्वदेवान् स्वर्गभाक् तद्गृहादिकृत्"

प्रासादसामान्यलक्षणमग्निपुराणे १०४अ० यथा

"ईश्वर उवाच दक्ष्ये प्रासादसामान्यलक्षणं ते शिखिध्वज!। चतुर्भागीकृते क्षेत्रे भित्तेर्भागेन विस्तरात्। अद्रिभागेण गर्भः स्यात् पिण्डिका पादविस्तरात्। पञ्चभागीकृते क्षेत्रे द्व्यन्तर्भागेन पिण्डिका। सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात् भागौ द्वौ मध्यमे गर्भे त्र्यंशभागद्वयेन तु। त्रिभिस्तु कन्यसीगर्भः येषो भित्तिरिति क्वचित्। षोढाभक्तेऽथ वा क्षेत्रे भित्तिर्भागैकविस्तरात्। गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका। विस्तारात् द्विगुणो वापि सपादद्विगुणोऽपि वा। अर्द्धद्विगुणो वापि त्रिगुणः क्वचिदुच्छ्रयः। जगती विस्तरार्द्धेन त्रिभागेण क्वचिद्भवेत्। नेमिः पादोनविस्तीर्णा प्रासादस्य समन्ततः। परिधिस्त्र्यंशको मध्ये रथकान्तत्र कारयेत्। चाप्रखण्डमेवं तेषु नाम्नेशं च निवेशयेत्। प्रासादार्द्धेन देवानामष्टौ वा चतुरोऽपि वा। प्रदक्षिणं बहिः कुर्यात् प्रासादादिषु वा न वा। आदित्याः पूर्वतः स्थाप्याः स्कन्दोऽग्निर्वायुगोचरे। एवं यमादयो ज्ञाप्याः स्वस्वां स्वस्वां दिशि स्थिताः। चतुर्द्वा शिखरं कृत्वा शुकनासा द्विभागिका। तृतीये वेदिका त्वग्रे सकण्ठा मञ्जसारकः। वैराजः पुष्पकश्चान्यः कैलासो मालकस्तथा। त्रिविष्टपश्च पञ्चैव मेरुमूर्द्धनि संस्थिताः। चतुरस्रस्तु तत्राद्यो द्वितीयोऽपि तदायतः। वृत्तो वृत्तायतश्चान्यो ह्यष्टास्रश्चापि पञ्चमः। एकैको नवधा भेदैश्चत्वारिंशच्च पञ्च च। प्रासादः प्रथमो मेरुर्द्वितीयो मन्दरस्तथा। विमानश्च तथा भद्रः सर्वतोभद्र एव च। रुचको नन्दको नन्दिवर्द्धनश्च तथापरः। श्रीवत्सश्चेति वैराजान्वयाये च समुत्थिताः। वलभी गृहराजश्च शालागृहञ्च मन्दिरम्। विशालश्च तथा ब्रह्ममन्दिरं भुवनन्तथा। उत्तमः शिविका वेश्म नवैते पुष्पकोद्भवाः। वलयो दुन्दुभिः पद्मो महापद्मक एव च। वर्द्धनो वान्य उष्णीषः शङ्खश्च कलसस्तथा। खपूरवृत्तकश्चान्योः वृत्ताः कैलाससम्भवाः। गजोऽथ वृषभो हंसो गरुत्मान् सिंहनामकः। भूमुखो भूधरश्चान्यः श्रीजयः पृथिवीधरः। वृत्तायतात् समुद्भूता नवैते मालकाद्भवात्। वज्रं चक्रं तथा चान्यत् स्वस्तिकं वज्रस्वस्तिकम्। चित्रं स्वस्तिकखड्गश्च गदा श्रीवृक्ष एव च। विजयो नामतश्चैते त्रिविष्टपसमुद्भवाः। नगराणामिमाः सञ्ज्ञा लाटादीनामिमास्तथा। श्रीवार्द्धेनोन्नतस्थूलं पृथुलञ्च विभागतः। दशधा वेदिकां कृत्वा पञ्चभिः स्कन्धविस्तरः। त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु तदण्डकम्। दिक्षु द्वाराणि कार्याणि न विदिक्षु कदाचन। पिण्डिका कोणविस्तीर्णा मध्यमाना ह्युदाहृता। क्वचित् पञ्चमभागेन महतां गर्भपादतः। उच्छ्राया द्विगुणास्तेषामन्यथा वा निगद्यते। षष्ठ्याधिकात् समारभ्य अङ्गुलानां शतादिह। उत्तमान्यपि चत्वारि द्वाराणि दशहानितः। तीर्णयेव मध्यमानि सुस्तीर्णयेव कन्यसान्यतः। उच्छ्रायार्द्धेन विस्तारो ह्युच्छ्रायोऽभ्यधिकस्त्रिधा। चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः। उच्छ्रायात् पादविस्तीर्णा विशाखास्तदुदुम्बरे। विस्तरार्द्धेन बाहुल्यं सर्वेषामेव कीर्तितम्। द्विपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्टदम्। अधःशाखा चतुर्थांशे प्रतीहारौ निवेशयेत्। मिथुनैरश्वबल्लीभिः शाखाग्रेषु विभूषयेत्। स्तम्भविद्धेऽभ्यता स्यात् वृक्षविद्धे स्वमूर्तिता। कूपविद्धे भयं पूगवृक्षविद्धे धनक्षयः। प्रासादस्तम्भशालादिमार्गविद्धेषु बन्धनम्। सभाविद्धे तु दारिद्र्यं वर्त्मविद्धे निराकृतिः। उलूखले च दारिद्र्यं शिलाविद्धे तु मलुता। छायाविद्धे

तु दारिद्र्यं वेधदोषे हि जायते। छेदादुत्पाटनाद्वापि तथा प्राकारलङ्घनात्। सीमाया द्विगुणत्यागाद् वेधदोषो न जायते"।

देवगृहरूपप्रासादे विशेषस्तत्र ४२ अ० उक्तो यथा "मानेन प्रतिमाया वा प्रासादमपरं शृणु। प्रतिमायाः प्रमाणेन कर्तव्या पिण्डिका शुभा। गर्भस्तु पिण्डिकार्द्धेन गर्भमानास्तु भित्तयः। भित्तेरायाममानेन उत्सेधन्तु प्रकल्पयेत्। भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद् बुधः। शिखरस्य तु तुर्येण भ्रमणं परिकल्पयेत्। शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम्। अष्टमांशेन गर्भस्य रथकानान्तु निर्गमः। परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत्। तत्तृतीयेन वा कुर्याद्रथकानान्तु निर्गमम्। वामत्रयं स्थापनीयं रथकत्रितये सदा। शिखरार्थं हि सूत्राणि चत्वारि विनिपातयेत्। शुकनासोर्द्धतः सूत्रं तिर्यग्भूतं निपातयेत्। शिखरस्यार्द्धभागस्थं सिंहं तत्र तु कारयेत्। शुकनासां स्थिरीकृत्य मध्यसन्धौ निधापयेत्। तदूर्द्ध्वन्तु भवेद्वेदी सकण्ठा मञ्जरीकम्। स्तम्भभग्नं न कर्तव्यं विकरालं तथैव च। ऊर्द्ध्वं च वेदिकामानात् कलसं परिकल्पयेत्। विस्तारादुद्विगुणं द्वारं कर्तव्यं तु सुशोभनम्। उदुम्बरौ तदूर्द्ध्वञ्च व्यसेच्छाखां सुमङ्गलैः। द्वारस्य तु चतुर्थांशे कार्यौ चण्डप्रचण्डकौ। विश्वक्सेनवत्सदण्डौ शिखोर्द्ध्वोडुम्बरे श्रियम्। दिग्गजैः स्नाप्यमानान्तां घटैः साक्षां सुरूपिकाम्। प्रासादस्य चतुर्थांशैः प्राकारस्योच्छ्रयो भवेत्। प्रासादात् पादहीनस्तु गोपुरस्योच्छ्रयो भवेत्। पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका। गारुडं मण्डपं चाग्रे एकं भौमादिधाम च। कुर्याद्धि प्रतिमायान्तु दिक्षु चाष्टासु चोपरि। पूर्वे वराहं दक्षे च नृसिंहं श्रीधरं जले। उत्तरे तु हयग्रीवमाग्नेय्यां जामदग्न्यकम्। नैर्ऋत्यां रामकं वायौ वामनं वासुदेवकम्। ईशे प्रासादरचना देया वस्वर्कादिभिः। द्वारस्य चाष्टमादंशं त्यक्त्वा वेधो न दोषभाक्"।

इ०सं० ५७अ० क्वचिद्विशेषोऽत्रोक्तो यथा "कृत्वा प्रभूतं सचिवमारामान् विनिवेश्य च। देवतायतनं कुर्याद्यशोधर्माभिवृद्धये। दृष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभुक्षता। देवानामालयः कार्यो हयमध्यत्र दृश्यते। सचिवोद्यानयुक्तेषु कृतेष्वकृतकेषु च। स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः। सरःसु नलिनोच्छन्ननिरस्तरविरश्मिषु। हंसांसाच्छिन्नकल्लारवीचीविमलवारिषु। हंसकारण्डवक्रौञ्चचक्रवाकविराविषु। पर्वतनिचुलच्छायाविश्रान्तजलचारिषु। क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाः। नद्यस्तीरांशुका यत्र शफरीकृतमेखलाः। फुल्लतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः। पुलिनाभ्युन्नता रम्या हंसहासाश्च निम्नगाः। वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु। रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च। भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि। ता एव तेषां यस्तन्ते देवतायतनेष्वपि। चतुःषष्टिपदं कार्यं देवतायतनं सदा। द्वारं च मध्यमं तत्र समदिक्स्थं प्रशस्यते। यो विस्तारो भवेद्यस्य द्विगुणा तत्समुन्नतिः। उच्छ्रायाद् यस्तृतीयोऽंशस्तेन तुल्या कटिर्भवेत्। विस्तारार्धं भवेद्गर्भो भित्तयोऽन्याः समन्ततः। गर्भपादेन विस्तीर्णं द्वारद्विगुणसुच्छ्रितम्। उच्छ्रायात्पादविस्तीर्णा शाखा तद्वदुदुम्बरः। विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम्। त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते। अधःशाखाचतुर्भागे प्रतीहारौ निवेशयेत्। शेषं मङ्गल्यविहगैः श्रीवृक्षस्वस्तिकैर्घटैः। मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत्। द्वारमानाष्टभागोना प्रतिमा स्यात्पिण्डिका। द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पिण्डिका। मेरुमन्दरकैलासविमानच्छन्दनन्दनाः। सप्तद्रुपद्मगरुडनन्दिवर्द्धनकुञ्जराः। गृहराजो वृषो हंसः सर्वतोभद्रको घटः। सिंहो वृत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा। इत्येते विंशतिः प्रोक्ताः प्रासादाः संग्रहा मया। यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः। तत्र षडश्रिर्मेरुर्द्वादशभौमो विचित्रकुहरश्च। द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्वस्तविस्तीर्णः। त्रिंशद्वस्तायामो दशभौमो मन्दरः शिखरयुक्तः। कैलासोऽपि शिखरवान् अष्टाविंशोऽष्टभौमश्च। जालगवाक्षकयुक्तो विमानसंज्ञस्त्रिसप्तकायामः। नन्दन इति षडभौमो द्वात्रिंशः षोडशाण्डयुतः। वृत्तः सप्तद्रुनामा पद्मः पद्माकृतिः शयानश्च। शृङ्गैश्चैकेन भवेदेकैव च भूमिका तस्य। गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः। कार्यश्च सप्तभौमो विभूषितोऽर्धेन विंशत्या। कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलात्। गृहराजः षोडशकस्त्रिचन्द्रशाला भवेद्दशभौ। इत्र एकभूमिशृङ्गो द्वादशहस्तः समन्ततो वृत्तः। हंसो हंसाकारो घटोऽष्टहस्तः कलसरूपः। द्वारैर्युतश्चतुर्भिर्वृत्तशिखरो भ-

वति सर्वतोभद्रः। बहुरुचिरचन्द्रशालः षड्विंशः पञ्चभौमश्च। सिंहः सिंहाक्रान्तो द्वादशकोणोऽष्टहस्तविस्तीर्णः। चत्वारोऽङ्गनरूपाः पञ्चाण्डयुतस्तु चतुरश्रः। भूमिकाङ्गुलमानेन मयस्याष्टोत्तरं शतम्। सार्धं हस्तत्रयं चैव कथितं विश्वकर्मणा। प्राहुः स्थपतयश्चात्र मतमेकं विपश्चितः। कपोतपालिसंयुक्ता न्यूना गच्छन्ति तुल्यताम्। प्रासादलक्षणमिदं कथितं समासाद्गर्गेण यद्विरचितं तदिहास्ति सर्वम्। मन्वादिभिर्विरचितानि पृथूनि यानि तत्सम्मतिं प्रति मयात्र कृतोऽधिकारः"। तत्प्रतिष्ठाविधिश्च मठप्रतिष्ठाशब्दे वक्ष्यते।

देवग्रह पु॰ देवगणशब्दे सुश्रुतोक्ते ग्रहभेदे।

"यः पश्यति नरो देवान् जाग्रद्वा शयितोऽपि वा। उन्मादयति स तु क्षिप्रं तन्तु देवग्रहं विदुः" भा॰ व॰ १४५ अ॰

देवङ्गम त्रि॰ देवं गच्छति गम—डे ख। देवगामिनि "अस्यां राज्ञोत्तु होतायां देवङ्गमाय" शत॰ब्रा॰ १।९।१।१२ लोके तु णिनि देवगामीत्येव।

देवचक्र न॰ सत्राङ्गे १अभिप्लवभेदे "परि यद्वा एतद्देवचक्रं यदभिप्लवः" ऐत॰ब्रा॰ ४।१५ "देवचक्रे वा एते पृष्ठ्यप्रतिष्ठिते। यजमानस्य पाप्मानं तं हतो परिप्लवेते स यो हैवं विदुषां दीक्षितानां पापकं सत्रे कीर्तयत्येते हास्य देवचक्रे शिरश्छिन्नो दशरात्र उक्तिः पृष्ठ्याभिप्लवौ चक्रे" शत॰ब्रा॰ १२।२।२।२ यामलोक्ते देवताभेदोपास्यतात्पर्यके २चक्रभेदे यथा

"पूर्वपश्चिमभेदेन षष्ठरेखां समालिखेत्। वामादि दक्षिणान्तञ्च रेखा दश समालिखेत्। पञ्चगेहे पूरकाङ्कः सर्वाधोहारकाङ्ककान्। तन्मध्ये रचयेदङ्कं देवताष्टकसंयुतम्। पूरकाङ्कमाद्यगेहे सप्तर्षियुतमालिखेत्। तद्दक्षिणे द्वादशञ्च दक्षे च नवमन्तथा। तद्दक्षेऽष्टादशकं तद्दक्षे षोडशकं ततः। पूरकाङ्कं तले लेख्य इन्द्राद्यङ्कस्य दक्षतः। इन्द्रगेहे च शतकं विधिविद्याफलप्रदम्। धर्मगेहे शून्यसप्तयुगलं विलिखेत् बुधः। अनन्तमन्दिरे नाथ! शून्याष्टवसुरेव च। कालीगृहे शून्यवेदरामाङ्कं विलिखेत्ततः। धूमावतीमन्दिरे च शून्यखेषुनिशापतीन्। इन्द्राधो दक्षतो लेख्या अङ्गाश्चन्द्राधिदेवता। शून्यषष्ठचन्द्रयुक्तं सर्वत्र दक्षतो लिखेत्। तथाश्विनीकुमारौ च शून्यान् नयुगमेरुकौ। तत्पश्चात् सूर्यगेहे च सहस्राक्षसमन्वितम्। तारिणीमन्दिरस्याङ्कं शून्यवेदशतात्मकम्। वगलामुखीगेहस्थं शून्याष्टचन्द्रसंयुतम्। ततश्चन्द्रगृहस्याधो वायुगेहं मनोरमम्। रन्ध्रवेदात्मकं गेहं सर्वसिद्धिप्रदायकम्। राहुगेहं महापापं शून्यशून्यमणिप्रियम्। पश्चादर्कगृहस्यञ्च खशून्ययुगलात्मकम्। षोडशीमन्दिरे शून्यषष्ठचन्द्रसमाहितम्। मातङ्गीमन्दिरे शून्यरन्ध्रचन्द्रसमन्वितम्। वायोरधोवरुणस्य गृहं सप्तशशिप्रियम्। तारिणीगेहमध्ये च शून्याष्टकसमन्वितम्। बुधगेहस्थिताङ्कञ्च शून्यचन्द्रयुगात्मकम्। भुवनेशीमन्दिरस्थं शून्याष्टचन्द्रमण्डलम्। प्रत्यङ्गिरामन्दिरस्थं शून्यषष्ठशशिप्रियम्। वरुणाधः कुबेरस्य गृहस्थं षष्ठयुग्मकम्। आनन्दभैरवीगेहे दशकं परिकीर्तितम्। धरणीगृहमध्ये च शून्ययुग्मेन्दुसंयुतम्। भैरवीगृहमध्यस्थं शून्यं युगलचन्द्रकम्। बालागृहस्थं शून्यत्रिचन्द्रमण्डलसंयुतम्। कुबेराधः सुखं चक्रस्थिताङ्कं सर्वसिद्धिदम्। ईश्वरस्य गृहस्यञ्च सप्तशून्ययुगात्मकम्। तिरस्करिण्या गेहस्थं सहस्राङ्कसमन्वितम्। किङ्किणीमन्दिरं पश्चाद्दशचन्द्रसमन्वितम्। छिन्नमस्तागृहं पश्चात् शून्याष्टचन्द्रमण्डलम्। वागीश्वरीगृहं पश्चात् खसप्तचन्द्रमण्डलम्। महाफलप्रदातारं धर्मं चरति तस्य न। ईश्वरस्य ह्यधोगेहे वटुकस्य गृहं ततः। शून्याष्टमाद्यं खगृहं धर्मार्थकाममोक्षदम्। तत्पश्चात् डाकिनीगेहं खशून्यमुनिसंयुतम्। हन्ति साधकसख्यं हि क्षणादेव न संशयः। खगृहे स्त्रीयमन्त्रस्य फलदं परिकीर्तितम्। भीमादेवी गृहं पश्चात् खसप्तचन्द्रमण्डलम्। भयदं सर्वदेशे तु वर्जयेत्तु गृहान्तरम्। लक्षवर्णं लिखेत् शेषगृहयोः पण्डितोत्तमः। इन्द्रगेहावधि धीरो ककारादिकवर्णकम्। चकारान्तं लिखेत् तत्र गणयेत् साधकोऽन्ततः। पूरकाङ्कमूर्द्ध्वदेशे हारकाङ्कमधोलिखेत्। निजनामाक्षरं यत्र तत्कोष्ठाङ्कं परेश्वर!। नीत्वा च पूरयेद्विद्वान् खखगेहोर्द्ध्वदेशकैः। अङ्कैस्ततो हरेन्नाथ! अधोऽङ्के हार्यशेषकम्। विस्तारश्चेद्देवतानां तदङ्कः शुभदः स्मृतः। अल्पस्तु शुभदः प्रोक्तः साधकस्यासुखावहः। एकाक्षरे महासौख्यं तत्रापि गणयेन्न च। स्त्रीयाङ्कः शून्यगामी च देवताङ्कं ततः प्रभो!। तदा नैव शुभं विद्यादशुभाय प्रकल्प्यते। एके धनमवाप्नोति द्वितीये राजवल्लभः। तृतीये जयसिद्धिः स्यात् चतुर्थे मरणं ध्रुवम्। पञ्चमे पञ्चबाणः स्यात् षष्ठे दुःखोत्कटानि च। देवानां शक्तिवर्गाणामित्यङ्काः परिकीर्तिताः। वैष्णवानां विशेषो-

ऽत्र पञ्चमाङ्को निषेधकः । येषां यासां देवतानामिच्छा तिष्ठति चेतसि । तन्मन्त्रग्रहणादेव ऋष्टैश्वर्ययुतो भवेत् । यद्देवताश्रिताये तु तदुष्टहाङ्कं हरन्ति ते । जह्वाङ्केन पूरयित्वाह्यधोङ्केन हरेत् सदा" ।

देवचर्या स्त्री ६त० । १देवचरिते अद्भुते २देवार्थं चरणे होमादौ च "श्रिया युतमनिर्देश्यं देवचर्योपशोभितम्" (आश्रमम्) भा०व० १४५ अ० ।

देवचिकित्सक पु० द्वि०व० ६त० । स्वर्वैद्ययोरश्विनीकुमारयोः रत्ना० । आयुर्वेदशब्दे ७७९ पृ० तयोस्तथात्वकथा दृश्या । २द्वित्वसंख्यायां तदधिष्ठाटके २अश्विनीनक्षत्रे च

देवच्छन्द पु० देवैश्छन्द्यते प्रार्थ्यते छन्द्-कर्मणि घञ् । शतयष्टिके हारे अमरः । "शतमष्टयुतं हारो देवच्छन्दोऽशीतिरेकयुता" वृह०सं० उक्ते २हारे च ।

देवच्छन्दस न० देवप्रियं छन्दः टच् समा० । वैदिके श्रौतिये छन्दोभेदे ।

देवज त्रि० देवाज्जायते जन-ड । १देवजाते २सामभेदे न० । "तस्मादाहुः सत्यं साम देवजं सामेति" शत०ब्रा०३।४।२।१६। ऋषाश्वसहोदरे सूर्यवंश्ये ३संयमनृपपुत्रभेदे पु० । "तत्पुत्रात् संयमादासीत् ऋषाश्वः सहदेवजः" भाग० ९।२।२२ देवजेन सह वर्त्तमानः ऋषाश्वः । सूर्यसम्पादिते ४ऋतौ पु० "सप्तथमाहुरेकजं षड्डु यमा ऋषयो देवजाः" ऋ० १।१६४।१५। "सप्तानामृतूनां मध्ये सप्तथं सप्तमऋतुम् । "षट् च छन्दसि" पा० इति षट् । एकजमेकेनोत्पन्नमाहुः कालतत्त्वविदः । चैत्रादीनां द्वादशानां मासानां द्वयमेकेन वसन्ताद्याः षडृतवो भवन्ति । अधिकमासेनैक उत्पद्यते सप्तमर्तुः । न च तादृशो मास एव नास्तीति मन्तव्यम् । "अस्ति त्रयोदशो मास इत्याहुरिति"श्रुतेः । तदेवोच्यते । षड्डु यमाः । डुच्छन्द एव कारार्थः । षडेव ऋतवो मासद्वयरूपा ऋषयो गन्तारः । ते च देवजाः । देवादादित्याज्जाता इत्येवमाहुः । सप्तमधारस्य त्रयोदशस्य मासस्य देवाभावः । "निः सूर्योऽधिकमासो हि मण्डलं तपते रवेरित्यादि"श्रुतेः । तस्मात् षडेव देवजाः अदेवज एकः" भा० सूर्यसंक्रान्तिरहितत्वान्निःसूर्यकत्वं तेन ऋतूनां चान्द्रत्वमपि गम्यते ।

देवजग्ध त्रि० ६त० । १देवभक्षिते २कृष्णे न० हेमच०अल्पार्थे कन् । देवजग्धकम् अल्पकृष्णे अमरः ।

देवजन पु० देवरूपो जनः । देवरूपे जने "भक्षयित्वाभ्यात्मनः स्रुचा निनयते त्रिः सर्वदेवजनेभ्य। स्वाहेति"आश्व० श्रौ०२।४।१२। देवानां जनः । २उपदेवे तदुपकरणभूते गन्धर्वादौ । [शब्दार्थचि०।

देवजनविद्या स्त्री ६त० । गन्धर्वविद्यायां नृत्यगीतादौ

देवजात त्रि० १देवेभ्यो जातः । देवेभ्यो जाते "यद्वाजिनो देवजातस्य सप्तेः" ऋ० ।२६२।१ ६त० । २देवानां गणे न० "यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुतः इति" शत०ब्रा० १४।४।२।२६

देवजामि स्त्री देवानां जामिरिव । १देववन्धौ "वयामि घोष इन्द्र ! देवजामिरिरज्यन्" ऋ० ७।२३।२ "देवजामिर्देवानां बन्धुः" भा०। ६त० । २देवानां वध्वां च "विश्वा ते स्वप्न ! जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः" अथ० ६।४६।२

देवट त्रि० दिव-अटन् । शिल्पिनि उणादिकोषः

देवट्टी स्त्री देवं देवशब्दमट्टते अतिक्रामति अट्ट-अण् उप०स० शक० गौरा० ङीष् । गङ्गाचिह्नग्राम् हारा०।

देवतर त्रि० अतिशयेन देवः दीप्तः देवको वा तरप् । १अतिशयदीप्ते २अतिदेवके च ततः शुभ्रा० ढक् । दैवतरेय तदपत्ये पुंस्त्री० स्त्रियां ङीप् ।

देवतरु पु० देवप्रियस्तरुः । १मन्दारादिवृक्षे "पञ्चैते देवतरवः मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्"अमरः २चैत्यवृक्षे च शब्दार्थचि०

देवता स्त्री देव+स्वार्थे तल् "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" भाष्योक्तेः पुंस्त्वातिक्रमेण स्त्रीत्वम् । देवे निर्जरे । देवतात्वञ्च "वेदमेवत्यागोद्देश्यत्वम् उद्देश्यत्वञ्च तस्येदमित्यारोपज्ञानविषयत्वमिति" श्राद्धविवेकः । तच्च मन्त्रस्तुत्यत्वं वा । तदुभयं पितृनामप्यस्तीति श्राद्धादौ तेषां देवतात्वम् । मन्त्रेण द्योत्यत्वं वा देवतात्वं यथाह ऋग्वेदभाष्योपोद्घाते माधवः "तथा देवनार्थदीव्यतिधातुनिमित्तो देवशब्द इत्येतदाम्नायते । "देवनाद्देवोऽभूदिति तद्देवानां देवत्वमिति"। अतो दीव्यतीति देवः मन्त्रेण द्योत्यत इत्यर्थः । "यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या । तदाकारं भवेत्तस्य दैवतं दैवतोच्यते"योगियाज्ञ०। वैदिकमन्त्रभेदे देवताभेदाः सर्वानुक्रमिकायामुक्तास्ततएवावसेयाः । तन्मूलं हेमा०व्र०ख० उक्तमिह विस्तरभयान्नोद्धृतम् । मन्त्राणां तज्ज्ञाने फलमज्ञाने निन्दामाह हेमा०व्र० योगियाज्ञ० "आर्षं छन्दो दैवतञ्च विनियोगस्तथैव च । वेदितव्यं

प्रयत्नेन ब्राह्मणेन विशेषतः। अविदित्वा तु यः कुर्याद् यजनाध्ययनं जपम्। होमनन्तर्जले दानं तस्य चाल्पफलं भवेत्"। तथा "यो विजानाति मन्त्राणामार्षं छन्दश्च दैवतम्। विनियोगं ब्राह्मणञ्च मन्त्रार्थं ज्ञानकर्म च। एकैकस्य ऋचः सोऽपि बन्धोच्छ्रितिथिवद्भवेत्। देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः। पूर्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो द्विजः। अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु"। ब्राह्मणेन मन्त्रेतरवेदभागेन सह वेदितव्यमित्यर्थः उत्तरत्र विनियोगब्राह्मणयोर्ज्ञेयतया निर्देशात्। तद्विरुक्तिरपि तेनैवोत्तरत्र दर्शिता यथा "नैरुक्तं यस्य मन्त्रस्य विनियोग प्रयोजनम्। प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते। एवं पञ्चविधं योगं जपकाले ह्यनुस्मरेत्। होमे चान्तर्जले योगे स्वाध्याये यजने तथा" इति। २प्रदेयद्रव्यस्याधिपतौ च दानशब्दे २५१९ पृ० तद्विशेषो दृश्यः। देवताभेदाश्च निरुक्ते दैवतकाण्डे उक्ता यथा

"अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते। वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः। सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति"। त्रयस्त्रिंशत्पतिशब्दे २२५९पृ० देवतानां प्राधान्यतस्त्रयस्त्रिंशत्त्वमुक्तं किन्तु स्वस्वगणपत्नीसहितानां तासां त्रयस्त्रिंशत्कोटिसंख्यात्वं यथोक्तं पद्मपु०उत्तरख०"सदारा विबुधाः सर्वे स्वानां स्वानां गणैः सह। त्रैलोक्ये ते त्रयस्त्रिंशत्कोटिसंख्यतयाऽभवन्"। तेषां गणभेदाश्च गणदेवताशब्दे २५०२पृ०उक्ताः दृश्याः। तन्मध्येऽधिकारिभेदेन देवताभेदा यथा "या यस्याभिमता पुंसः सा हि तस्यैव देवता। किन्तु कार्यविशेषेण पूजिता चेष्टदा नृणाम्। विशेषात् सर्वदा नायं नियमोऽन्यथा नृप!। नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः। विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक्। देवानां दैवतं विष्णुर्दानवानां त्रिशूलभृत्। गन्धर्वाणां तथा सोमो यक्षाणामपि कथ्यते। विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः। रक्षसां शङ्करो रुद्रः किन्नराणाञ्च पार्वती। ऋषीणां दैवतं ब्रह्मा महादेवश्च शूलभृत्। मनूनां स्वायुमा देवी तथा विष्णुः सभास्करः। गरुडस्यानाञ्च सर्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम्। वैखानसस्याम्बिका स्याद् यतीनाञ्च महेश्वरः। नृणानां भगवान् रुद्रः कुष्माण्डानां विनायकः। सर्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः। इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत" इति कूर्म०पु०। देवानां वर्णभेदा भा०शा० मोक्षधर्मे

"आदित्याः क्षत्रियास्तेषां विशश्च मरुतस्तथा। अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ। स्मृतास्त्वाङ्गिरसा देवा ब्राह्मणा इति निश्चयः। इत्येतत् सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम्"। वैष्णवानां गणेशाद्यनन्तरं सनकादिवैष्णवानां पूज्यत्वेन देवतात्वमुक्तं यथा

"यत्र यत्र सुराः पूज्या गणेशाद्यास्तु कर्मिणाम्। विष्णुर्चने तत्र तत्र वैष्णवानां हि वैष्णवाः। विश्वक्सेनं सनकं सनातनमतःपरम्। सनन्दं सनत्कुमारञ्च पश्चैवं पूजयेत्ततः" पद्म० उत्तरख०। देवषट्कं यथा "गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्। देवषट्कञ्च संपूज्य नमस्कृत्य विचक्षणः" ब्रह्म०वै०प्रकृ०। मासविशेषे देवताभेदपूजा मन्त्रमहोदधावुक्ता यथा

"अन्येष्वप्युपरागार्द्धोदययाम्यायनादिषु। कुर्यादलभ्ययोगेषु विशेषाद्देवतार्चनम्। यथा यथेष्टदेवेषु नृणां भक्तिः समेधते। प्राप्यते तैरयत्नेन मनोऽभीष्टं तथा तथा। शुचौ तत्तद्दिने कुर्याद्देवप्रस्वपनोत्सवम्। ऊर्जे तथैव देवानामुत्थापनविधिं सुधीः। माघकृष्णचतुर्दश्यां विशेषाच्छिवपूजनम्। आश्विनाद्यनवाहेषु दुर्गां पूज्या यथाविधि। गोपालं पूजयेद्विद्वान्नभःकृष्णाष्टमीदिने। रामं चैत्रे सिते पक्षे नवम्यामर्चयेत् सुधीः। वैशाखाद्यचतुर्दश्यां नरसिंहं प्रपूजयेत्। यजेच्छुक्लचतुर्थ्यान्तु गणेशं भाद्रमाघयोः। महालक्ष्मीं यजेद्विद्वान् भाद्रकृष्णाष्टमीदिने। माघस्य शुक्लसप्तम्यां विशेषाद्दिनमानकम्। या काचित् सप्तमी शुक्ला रविवारयुता यदि। तस्यां दिनेशं संपूज्य दद्यादर्घ्यं पुरोदितम्। तत्तत्कल्पोदितानन्यान् देवताप्रीतिवर्द्धनान्। विशेषनियमान् कृत्वा भजेद्देवमनन्यधीः। आषाढीवार्त्तिकीमध्ये किञ्चिन्नियममाचरेत्। देवसम्प्रीतये विद्वान् जप पूजादितत्परः। एवं यो भजते विष्णुं रुद्रं दुर्गां गणाधिपम्। भास्करं श्रद्धया नित्यं स कदाचिन्न सीदति"।

देशनरदेशितचतुर्थ्यन्तपदनिर्देश्यत्वं देवतात्वम् अन्यत्रे स्वाहेत्यादिमन्त्रएव देवतेति मीमांसकाः। तन्मतस्तु पूर्वपक्षविधया शब्दचि० उक्ता दूषितं तत्र अधिकरणशब्दे ४५६ पृ० दर्शितम्। देवतानां चैतन्ये विग्रहवत्त्वे वा मन्त्राणामेव देवतात्वं आह्निक० समर्थितं यथा

"विग्रहवत्त्वं चेन्द्रादीनामपि तिर्यगधिकरणे दर्शितं देव-

तात्वं हि तथाविधानां नेष्टमिति। नन्विन्द्रादीनां विग्रहवत्त्वे किं प्रमाणम्? अर्थवाद इति चेन्न तस्य सिद्धेऽर्थेऽप्रामाण्यात्। कथं वा विग्रहवतामदेवतात्वम्? ऐन्द्रं हविरित्यादौ तद्धितादिभिः प्रकृत्यर्थस्य देवतात्वबोधनात् इन्द्रादिपदानि च सहस्रचक्षुरादिमतीषु व्यक्तिषु सुख्यानि मन्त्रपरत्वे लक्षणाप्रसङ्गात्। उच्यते ऐन्द्रादिपदकामाधिकारिकविधिवाक्यस्थकामिस्तुतिरत्र प्रमाणम् अन्यथा स्वर्गिशरीरेऽप्यनाश्वासः स्यात्। यत्राप्यर्थवादादैन्द्रादिपदप्राप्त्यवगतिः तत्रापि तत्फलपरत्वे रात्रिसत्रन्यायएव प्रमाणं विग्रहवतामिन्द्रादीनां सन्निधानस्य प्रत्यक्षबाधितत्वेन तथाविधानां पूज्यत्वासम्भवात् अगत्या तदाकारतया ध्यातस्य मन्त्रस्य लक्षितस्य देवतात्वमिति रहस्यम्। इन्द्राकारतया ध्यानादिन्द्रप्रीतिरभ्युपपन्ना। तथा च योगियाज्ञवल्क्यः "यस्य यस्य तु मन्त्रस्य उद्दिष्टा या च देवता। तदाकारं भवेत्तस्य देवत्वं देवतोच्यते" इति। ननु देवानां विग्रहवत्त्वे तेषामेवाराधितानां फलदातृत्वं कुतो न भवेत्? अक्रमपूर्वकल्पनया। तथा च भविष्यपुराणे "यद्यद्द्रव्यं नरोऽश्नीयादादित्याय प्रयच्छति। तत्तस्य शतसाहस्रमुत्पादयति भास्करः" याज्ञवल्क्यः "आयुः पूजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः"। तथा च देवताधिकरणसिद्धान्तविरोधः स्यात्। उच्यते देवानामिन्द्रादीनां पितॄणां वस्वादीनां युगमन्वन्तरादिभेदेन नानात्वावगमात् फलोदयकाले पूर्वस्य च्युताधिकारत्वेन फलदातृत्वायोगः। अन्यस्य चानाराधितत्वेन फलदातृत्वायोगात् तत्रापूर्वे शब्दशक्तौ वाचकशब्दसङ्गावात् सर्वत्रैव तदभिधानम् अतएव काम्ये कृप्रत्यक्तिर्लिङादिर्नित्ये निषेधे चापूर्वमाहेत्युक्तम्। एवञ्चापूर्वानुप्रवेशात् सहकारितया यदि देवतापि फलदात्री न कश्चित् कोऽपि विरोधः"।

देवताजित् पु॰देवतां जयति जि-क्विप्। १देवजयिनि असुरादौ भरतपुत्रसुमतेः २पुत्रभेदे च "भरतस्यात्मजः सुमतिर्नाम" इत्युपक्रमे "तस्याहृद्धसेनायां देवताजिन्नाम पुत्रोऽभूत्" भाग॰ ५।१५।२।

देवताड पु॰ देवः दीप्तः ताडः डस्य लः। (देताड) ख्याते १वृक्षे अमरः। २घोषकलतायाम् विश्वः। देवौ आदित्यचन्द्रौ ताडयति ताडि अण् उप॰स॰। ३राहौ। देवनाय दीपनाय ताड्यतेऽसौ ताडि-कर्मणि अच्। ४वज्रे च मेदि॰। तस्योद्दीपनाय ताड्यमानत्वात् तथात्वम्। देवताड़क स्वार्थे क। देवताडवृक्षे रत्नमाला।

देवतात पु॰तन-क्त वा ङा ततएव तातः स्वार्थे अण् वा देवार्थं तते १यज्ञे निघ॰ "एवा देव देवताते पवस्व" ऋ॰ ९।९७।२७। ६त॰। २देवजनके कश्यपे च। तेनादित्यामादित्यादीनामुत्पादनात्तथात्वम्। ३मरीच्यादिषु "एते (मरीच्यादयः) मनूंस्तु सप्तान्यानसृजन् भूरितेजसः। देवान् देवनिकायांश्च महर्षींश्चामितौजसः" मनुः। ४हिरण्यगर्भे च "कर्मात्मनां च देवानां सोऽसृजत् प्राणिनां प्रभुः। साध्यानाञ्च गणं सूक्ष्मम्" मनुः।

देवताति पु॰ देव+स्वार्थे तातिल्। देवे "स आवह देवतातिं यविष्ठ!" ऋ॰ ३।४९।४ देवतातिं देवं स्वार्थे तातिल्" भा॰

देवताधिकरण न॰ देवता कर्मसु तदधिकारित्वमनधिकारित्वं वाधिक्रियते विचार्यतेऽत्र अधि+कृ-आधारे ल्युट्। देवतानां यज्ञादावधिकारित्वतदभावयोरन्यतरसाधके न्यायभेदे। यज्ञादौ देवतानामनधिकारः इति मीमांसकाः। तच्च जै॰सू॰ भाष्ययोर्दर्शितं यथा

"फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" सू॰ "इदमामनन्ति, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्येवमादि। तत्र सन्देहः किं यावत्किञ्चित् सत्वं, तत् सर्वम् अधिकृत्य एतदुच्यते, उत समर्थम् अधिकृत्य? इति। किं प्राप्तम्? सर्वाधिकारः, अविशेषात्। ननु वृक्षादयो न किञ्चित् कामयन्ते, कथम् तेषाम् अधिकारः स्यात्? उच्यते, मा भूत् अचेतनानाम्, तिरश्चस्तु अधिकृत्य यजेत इति ब्रूयात्। ननु तिर्यञ्चोऽपि न किञ्चित् कामयन्ते। न इति ब्रूमः, कामयन्ते सुखम्, एवं हि दृश्यते, घर्म्मोपतप्ताः छायाम् उपसर्पन्ति, शीतेन पीडिताः आतपम्। आह, ननु तिर्यञ्च आसन्नं फलं चेतयन्ते, न कालान्तरफलं प्रार्थयन्ते, कालान्तरफलानि च कर्माणि। उच्यते, कालान्तरेऽपि फलं कामयमाना लक्ष्यन्ते, पुनः चतुर्दशग्रामं उपवसतः पञ्चग्रामः, शत्रोर्नांश्च अष्टग्रामः। न चैषां व्याघ्रशङ्का, नियतनिमित्तत्वात्, न अनाहाराणामपि तस्मिन् काले अदर्शनात्, समानाहाराणामपि अन्यस्मिन् काले अदर्शनात्। लिङ्गानि च वेदे भवन्ति, देवा वै सत्रमासत इत्येवमादीनि "देवतानाम् ऋषीणां वनस्पतीनाम् अधिकारं दर्शयन्ति। ननु कात्स्न्र्येन विधिम् उपसंहर्तुम् न शक्नुवन्ति इति अनधिकृताः।

उच्यते, यागं कर्तुम् शक्नुवन्ति केचित्, तस्मात् यजेत इत्येवमादीनि अधिकरिष्यन्ति शक्नुवतः, विष्णुक्रमादिवचनानि तु अशक्तान् न अधिकरिष्यन्ति। तत्र योऽनुपदिष्टविष्णुक्रमादिकः स केवलं यागं करिष्यति, कः तस्य दोषः ?। द्रव्यपरिग्रहोऽपि देवग्रामः, हस्तिग्रामः, ऋषभस्य ग्रामः इति उपचारात् अस्त्येव तस्मात् अमनुष्याणामपि शक्नुवताम् अधिकार इति" भा० "कर्तव्यं श्रुतिसंयोगाद्विधिः कार्त्स्न्येन गम्यते" सू० वाशब्दः पक्षं व्यावर्तयति। न चैतदस्ति, तिर्यगादीनामपि अधिकारः इति। कस्य तर्हि ?। यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम्। न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म इति, कथं यो न शक्यते कर्तुम्, सोऽभ्युपायः स्यात् ? इति। न देवानां, देवतान्तराभावात्, न हि आत्मानम्, उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात्, न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम्" (देवानां देवतान्तरभावादिति येषां शब्द एव देवताभिप्रेता, तेषामयमप्ययुक्तो ग्रन्थः, शक्यते हीन्द्रेणापीन्द्रशब्दोच्चारणेन हविस्त्यक्तुम्। तस्मात् अर्थमेव देवतामभिप्रेत्य एतद्भाष्यमिति तत्त्वरत्नम्)। यानि पुनर्लिङ्गानि, देवा वै सत्रमासत इत्येवमादीनि, अर्थवादाः ते विधिप्ररोचनार्थाः। विद्यते हि विधिरन्यः तेषु सर्वेषु, न च विधेर्विधिनैकवाक्यभावो भवति, वचनव्यक्तिभेदात्। स्तुतिस्तु सा, इत्यं नाम सत्राणि आसितव्यानि, यत् कृतकृत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्याः" भा०

देवानामधिकारित्वं विशेषतो ब्रह्मविज्ञानेऽधिकारित्वमिति वेदान्तिनः तच्च शा०सू० भाष्याभ्यां समर्थितम् तच्च अविग्रहशब्दे ४५५ पृ० दृश्यम्।

देवतानुक्रम ६त०। देवानामुद्देशे "नामधेयानि मन्त्रश्च दक्षिणाश्च व्रतानि च। देवतानुक्रमः कल्पः संकल्पस्तन्त्रमेव च" भाग० २।६।२६

देवताप्रतिमा स्त्री ६त०। देवतानां प्रतिमूर्त्तौ तदङ्गमानभेदादिकं सामान्यविशेषतः दृ०सं०५८अ०उक्तं यथा "देवागारद्वारस्याष्टांशोनस्य यस्तृतीयोऽंशः। तत्पिण्डिका प्रमाणं प्रतिमा तद्द्विगुणपरिमाणा। स्वैरङ्गुलप्रमाणैर्द्वादशविस्तीर्णमायतं च सुखम्। नग्नजिता तु चतुर्दश दैर्घ्येण द्राविडं कथितम्। नासाललाटचिबुकग्रीवाश्चतुरङ्गुलास्तथा कर्णौ। द्वे अङ्गुले च हनुके चिबुकं द्व्यङ्गुलं विस्तृतम्। अष्टाङ्गुलं ललाटं विस्ताराद् द्व्यङ्गुलात्परे शङ्खौ। चतुरङ्गुलौ तु शङ्खौ कर्णौ तु द्व्यङ्गुलं पृथुलौ। कर्णोपान्तः कार्योऽर्द्धपञ्चमे भ्रूसमेन सूत्रेण। कर्णस्रोतः सुकुमारकं च नयनप्रबन्धसमम्। चतुरङ्गुलं वसिष्ठः कथयति नेत्रान्तकर्णयोर्विवरम्। अधरोऽङ्गुलप्रमाणस्तस्यार्धेनोत्तरोष्ठश्च। अर्धाङ्गुला तु गोच्छा वक्त्रं चतुरङ्गुलायतं कार्यम्। विपुलं तु सार्द्धमङ्गुलं मध्यात्तत्त्र्यङ्गुलं व्यात्तम्। द्व्यङ्गुलतुल्यौ नासापुटौ च नासा पुटायतो ज्ञेया। स्याद् द्व्यङ्गुलसुच्छ्रायश्चतुरङ्गुलमन्तरं चाक्ष्णोः। द्व्यङ्गुलमितोऽक्षिकोशो द्वे नेत्रे तत्त्रिभागिका तारा। दृक् तारापञ्चांशोनेत्रविकाशोऽङ्गुलं भवति। पर्यन्तात्पर्यन्तं दश भ्रुवोऽर्द्धाङ्गुलं भ्रुवोर्लेखा। भ्रूमध्यं द्व्यङ्गुलकं भ्रूर्दैर्घ्येणाङ्गुलचतुष्कम्। कार्या तु केशरेखा भ्रूवन्मसमाङ्गुलार्द्धविस्तीर्णा। नेत्रान्ते करवीरकसुपन्यसेदङ्गुलप्रमितम्। द्वात्रिंशत्परिणाहाश्चतुर्दशायागतोऽङ्गुलानि शिरः। द्वादश तु चित्रकर्मणि दृग्रन्ते विंशतिरदग्राः। आस्यं सकेशनिचयं षोडश दैर्घ्येण नग्नजितप्रोक्तम्। ग्रीवा दशविस्तीर्णा परिणाहाद्विंशतिः सैका। कण्ठाद्द्वादश हृदयं हृदयान्नाभिश्च तत्प्रमाणेन। नाभीमध्यान्मेढ्रान्तरं च तत्तुल्यमेवोक्तम्। उरू चाङ्गुलमानैश्चतुर्युता विंशतिस्तथा जङ्घे। जानुकपिण्डे चतुरङ्गुले च पादौ च तत्तुल्यौ। द्वादशदीर्घौ षट् पृथुतया च पादौ त्रिकायताङ्गुलौ। पञ्चाङ्गुलपरिणाहौ प्रदेशिनी त्र्यङ्गुलं दीर्घा। अष्टांशाष्टांशोनाः शेषाङ्गुलयः क्रमेण कर्तव्याः। स चतुर्थभागमङ्गुलतृतीयोऽङ्गुष्ठकस्योक्तः। अङ्गुलस्य नखः कथितश्चतुर्थभागोनमङ्गुलं तज्ज्ञैः। शेषनखानामर्द्धाङ्गुलं क्रमात् किञ्चिदूनं वा। जङ्घायां परिणाहश्चतुर्दशोक्तस्तु विस्तरः पञ्च। मध्ये तु सप्त विपुला परिणाहात्त्रिगुणिताः सप्त। अष्टौ तु जानुमध्ये वैपुल्यं त्र्यष्टकं तु परिणाहः। विपुलो चतुर्दशोरु मध्ये द्विगुणश्च तत्परिधिः। कटिरष्टादशविपुला चत्वारिंशच्चतुर्युता परिधौ। अङ्गुलमेकं नाभिर्वेधेन तथा प्रमाणेन। चत्वारिंशद् द्वियुता नाभी मध्येन मध्यपरिणाहः। स्तनयोः षोडश चान्तरमूर्द्ध्वं कक्षे मडङ्गुलिके। कार्यावष्टावंसौ द्वादश बाहू तथा प्रबाहू

च। बाहू षड्विस्तीर्णौ प्रतिबाहू त्वङ्गुलचतुष्कम्। षोडश बाहुमूले परिणाहाद्द्वादशाग्रहस्ते च। विस्तारेण करतलं षडङ्गुलं सप्त दैर्घ्येण। पञ्चाङ्गुलानि मध्या प्रदेशिनी मध्यपर्वद्वहीना। अनया तुल्या चानामिका कनिष्ठा तु पर्वोना। पर्वद्वयमङ्गुष्ठः शेषाङ्गुलयस्त्रिभिस्त्रिभिः कार्याः। नखपरिमाणं कार्यं सर्वासां पर्वणोऽर्धेन। देशानुरूपभूषणवेषालङ्कारमूर्तिभिः कार्या। प्रतिमा लक्षणयुक्ता सन्निहिता हृद्विदा भवति। दशरथतनयो रामोऽबलिश्च वैरोचनिः शतं विंशम्। द्वादशहान्या शेषाः प्रवरसमन्यूनपरिमाणाः। कार्योऽष्टभुजो भगवांश्चतुर्भुजो द्विभुज एव वा विष्णुः। श्रीवत्साङ्कितवक्षाः कौस्तुभमणिभूषितोरस्कः। अतसीकुसुमश्यामः पीताम्बरनिवसनः प्रसन्नमुखः। कुण्डलकिरीटधारी पीनगम्भीरःस्कन्धांसभुजः। खड्गगदाशरपाणिर्दक्षिणतः शान्तिदश्चतुर्थकरः। वामकरेषु च कार्मुकखेटकचक्राणि शङ्खश्च। अथ च चतुर्भुजमिच्छति शान्तिद एको गदाधरश्चान्यः। दक्षिणपार्श्वे खेटं वामे शङ्खश्च चक्रश्च। द्विभुजस्य तु शान्तिकरो दक्षिणहस्तोऽपरश्च शङ्खधरः। एवं विष्णोः प्रतिमा कर्तव्या भूतिमिच्छद्भिः। बलदेवो हलपाणिर्मदविभ्रमलोचनश्च कर्तव्यः। बिभ्रत् कुण्डलमेकं शङ्खेन्दुमृणालगौरवपुः। एकोनांशा कार्या देवी बलदेवलक्ष्मणयोर्मध्ये। कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती। कार्या चतुर्भुजा सा वामकराभ्यां सपुस्तकं कमलम्। द्वाभ्यां दक्षिणपार्श्वे वरमर्थिभ्यश्चस्रजं च। वामेऽष्टभुजायाः कमण्डलुश्चापमम्बुजं शास्त्रम्। वरशरदर्पणयुक्ताः सव्यभुजाः साक्षसूत्राश्च। शाम्बश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च। अनयोः स्त्रियौ च कार्ये खेटकनिस्त्रिंशधारिण्यौ। ब्रह्मा कमण्डलुकरश्चतुर्मुखः पङ्कजासनस्थश्च। स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च। शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वम्। तिर्यग्ललाटसंस्थं तृतीयमपि लोचनं त्रिशूलम्। यस्योः शिरसीन्दुकला वृषध्वजोऽस्ति च तृतीयमप्यूर्ध्वम्। शूलं धनुः पिनाकं वामार्धे वा गिरिसुतार्धम्। पद्माङ्कितकरचरणः प्रसन्नमूर्तिः सुनीलकेशश्च। पद्मासनोपविष्टः पितेव जगतो भवेद्बुद्धः। आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्तिश्च। दिग्वाससरूपो रूपवांश्च कार्योऽर्हतां देवः। नासाललाटजङ्घोरुगण्डवक्षांसि शोभनानि रवेः। कुर्यादुदीच्यवेषं गूढं पादादुरो यावत्। बिभ्राणः स्वकररुहे पाणिभ्यां पङ्कजे सकुटधारी। कुण्डलभूषितवदनः प्रलम्बहारो वियद्वृतः। कमलोदरद्युतिमुखः कञ्चुकमुग्रः स्थितप्रसन्नमुखः। रत्नोज्ज्वलप्रभामण्डलश्च कर्तुः शुभकरोऽर्कः। सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रतिमा। क्षेमसुभिक्षाय भवेत् त्रिचतुर्हस्तप्रमाणायाम्। रूपमयमत्यङ्गायां हीनाङ्गायामकल्पता कर्तुः। शातोदर्यां क्षुद्भयम् अर्थविनाशः कृशायां च। मरणं तु सन्नतायां शस्त्रनिपातेन निर्दिशेत्कर्तुः। वामावनता पत्नीं दक्षिणविनता हिनस्त्यायुः। अन्यत्वमूर्ध्वदृष्ट्या करोति चिन्तामधोमुखी दृष्टिः। सर्वप्रतिमास्वेवं शुभाशुभं भास्करोक्तसमम्। लिङ्गस्य वृत्तपरिधिं दैर्घ्येणाष्टभक्तं तत् त्रिधा विभजेत्। मूले तच्चतुरस्रं मध्ये त्वष्टाश्रि वृत्तमतः। चतुरस्रमवनिखाते मध्यं कार्यं तु पिण्डिकाम्भ्रे। दण्डोच्छ्रायेण समा समन्ततः पिण्डिका स्यात्। लिङ्गदीर्घं देशभं पार्श्वविहीनं पुरस्य नाशाय। यस्य शतं भवेन्मस्तके विनाशाय तल्लिङ्गम्। मातृगणः कर्तव्यः स्वनामदेवानुरूपलक्षणचिह्नः। रेवन्तोऽश्वारूढो मृगयाक्रीडादिपरिवारः। दण्डी यमो महिषगो हंसारूढश्च पाशभृद्वरुणः। नरवाहनः कुबेरो वामः किरीटी वृषवृकोदरः। प्रमथाधिपो गजमुखः प्रलम्बजठरः कुठारधारी स्यात्। एकविषाणो बिल्वनृमूलककन्दं सुनीलकन्दम्"।

देवभेदेन मूर्त्तिभेदलक्षणानि अग्निपु० १०४ अ० उक्तानि तत्राङ्गभेदमानानि यथा

"भगवानुवाच। वासुदेवादिप्रतिमालक्षणं प्रवदामि ते। प्रासादस्योत्तरे पूर्वमुखीं वा चोत्तराननाम्। संस्थाप्य पूज्य च बलिं दत्त्वाथो मध्यसूत्रकम्। शिलां शिल्पी तु नवधा विभज्य नवमेऽंशके। सूर्यभक्तैः शिलायां तु भागं स्वाङ्गुलमुच्यते। द्व्यङ्गुलं गोलकं नाम्ना कालनेत्रं तदुच्यते। भागमेकं त्रिधा भक्त्वा पार्ष्णिभागं प्रकल्पयेत्। भागमेकं तथा जानौ योनायां भागमेव च। मुकुटं तालमात्रं स्यात्तालमात्रं तथा मुखम्। तालेनैकेन कण्ठन्तु तालेन हृदयं तथा। नाभिमेढ्रान्तरन्तालं द्वितालावूरुकौ तथा। तालद्वयेन जङ्घा स्यात् सूत्राणि शृणु साम्प्रतम्। कार्यं सूत्रद्वयं पादे जङ्घामध्ये तथापरम्। जानौ सूत्रद्वयं कार्यमूरुमध्ये तथापरम्। मेढ्रे तथापरं कार्यं कट्यां सूत्रत्रयापरम्। मेखला

वस्त्रसिद्ध्यर्थं नाभ्यां चैवापरन्तथा। हृदये च तथा कार्यं कण्ठे सूत्रद्वयं तथा। ललाटे चापरं कार्यं मस्तके च तथापरम्। सुकुटोपरि कर्त्तव्यं सूत्रमेकं विचक्षणैः। सूत्राग्यूर्द्ध्वं प्रदेयानि सप्तैव कमलोद्भव !। कलात्रिकान्तरेणैव षट् सूत्राणि प्रदापयेत्। मध्यसूत्रं तु सन्त्यज्य सूत्राग्येव निवेशयेत्। ललाटं नासिका वक्त्रं कर्त्तव्यञ्चतुरङ्गुलम्। ग्रीवाकर्णौ तु कर्त्तव्यौ आयामाच्चतुरङ्गुलौ। द्व्यङ्गुले चुबुके कार्ये विस्ताराच्चिबुकन्तथा। अष्टाङ्गुलं ललाटन्तु विस्तारेण प्रकीर्त्तितम्। परेण द्व्यङ्गुलौ शङ्खौ कर्त्तव्यावलकान्वितौ। चतुरङ्गुलमाख्यातमन्तरं कर्णनेत्रयोः। द्व्यङ्गुलौ पृथुकौ कर्णौ कर्णपाङ्गार्द्धपञ्चमे। भ्रूसमेन तु सूत्रेण कर्णस्रोतः प्रकीर्त्तितम्। विद्धं षड्ङ्गुलं कर्णमविद्धञ्चतुरङ्गुलम्। चिबुकेन समं विद्धमविद्धं वा षडङ्गुलम्। गण्डपालं तथावर्त्तं शष्कुलीं कल्पयेत्तथा। द्व्यङ्गुलेनाधरः कार्यस्तस्यार्द्धेनोत्तराधरः। अर्द्धाङ्गुलं तथा नेत्रं वक्त्रन्तु चतुरङ्गुलम्। आयामेन तु वैपुल्यात् सार्द्धमङ्गुलमुच्यते। अव्यक्तमेवं स्याद्वक्त्रं व्यक्तं त्वङ्गुलमुच्यते। नासावंशसमुच्छ्रायं मूले त्वेकाङ्गुलं मतम्। उच्छ्रायो द्व्यङ्गुलं चाग्रे करवीरोपमा स्मृता। अन्तरं चक्षुषोः कार्यं चतुरङ्गुलमानतः। द्व्यङ्गुलं चाक्षिकोणं च द्व्यङ्गुलं चान्तरं तयोः। तारा नेत्रत्रिभागेण दृक् तारापञ्चमांशिका। त्र्यङ्गुलं नेत्रविस्तारं द्रोणी चार्द्धाङ्गुला मता। तत्प्रमाणा भ्रुवोर्लेखा भ्रुवौ चैव समे मते। भ्रूमध्यं द्व्यङ्गुलं कार्यं भ्रूदैर्घ्यं चतुरङ्गुलम्। षट्त्रिंशदङ्गुलायामन्मस्तकस्य तु वेष्टनम्। मूर्त्तीनां केशवादीनां द्वात्रिंशद्वेष्टनं भवेत्। पञ्चनेत्रा त्वधोग्रीवा विस्ताराद्वेष्टनं पुनः। त्रिगुणं तु भवेदूर्द्ध्वं विस्तृताष्टाङ्गुलं पुनः। ग्रीवात्रिगुणमायामं ग्रीवाबाह्वन्तरं भवेत्। स्कन्धावष्टाङ्गुलौ कार्यौ त्रिकलावंसकौ शुभौ। सप्तनेत्रौ स्मृतौ बाहू प्रबाहू षोड़शाङ्गुलौ। त्रिकलौ विस्तृतौ बाहू प्रबाहू चापि तत्समौ। बाहुदण्डोर्द्वितो ज्ञेयः परिणाहः कला नव। सप्तदशाङ्गुलो मध्ये कूर्परोर्द्वे च षोड़श। कूर्परस्य भवेद्बाहुः त्रिगुणः कमलोद्भव !। नाहः प्रबाहुमध्ये तु षोड़शाङ्गुल उच्यते। अग्रहस्ते परीणाहो द्वादशाङ्गुल उच्यते। विस्तारेण करतलं कीर्त्तितं तु षडङ्गुलम्। दैर्घ्यं सप्ताङ्गुलं कार्यं मध्या पञ्चाङ्गुला मता। तर्जन्यनामिका चैव तस्माद्द्वाङ्गुलं विना। कनिष्ठाङ्गुष्ठकौ कार्यौ चतुरङ्गुलसम्मितौ। द्विपर्वाङ्गुष्ठकः कार्यः शेषाङ्गुल्यस्त्रिपर्विकाः। सर्वासां पर्वणोऽर्द्धेन नखमानं विधीयते। वक्षसो यत् प्रमाणन्तु जठरं तत्प्रमाणतः। अङ्गुलैकं भवेन्नाभी वेधेन च प्रमाणतः। ततो मेढ्रान्तरं कार्यं तालमात्रं प्रमाणतः। नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुलैः। अन्तरं स्तनयोः कार्यं तालमात्रं प्रमाणतः। चिबुकौ यवमानौ तु मङ्गलं द्विपदं भवेत्। चतुःषष्ट्यङ्गुलं कार्यं वेष्टनं वक्षसः स्फुटम्। चतुर्दशञ्च तदधोवेष्टनं परिकीर्त्तितम्। परिणाहस्तथा कट्यां चतुःपञ्चाशदङ्गुलैः। विस्तारोरुमूले तु प्रोच्यते द्वादशाङ्गुलः। तस्मादभ्यधिकं मध्ये ततो निम्नतरं क्रमात्। विस्तृताष्टाङ्गुलं जानुत्रिगुणा परिणाहतः। जङ्घामध्ये तु विस्तारः सप्ताङ्गुल उदाहृतः। त्रिगुणः परिधिश्चास्य जङ्घायां पञ्चविस्तरम्। त्रिगुणः परिधिश्चास्य पादौ तालप्रमाणकौ। आयामादुत्थितौ पादौ चतुरङ्गुलमेव च। गुल्फात् पूर्वं तु कर्त्तव्यं प्रमाणाच्चतुरङ्गुलम्। त्रिकलं विस्तृतौ पादौ त्र्यङ्गुलो गुल्फकः स्मृतः। पञ्चाङ्गुलस्तु नाहोऽस्य दीर्घा तद्वत् प्रदेशिनी। अष्टमाष्टांशतोन्यूनाः शेषाङ्गुल्यः क्रमेण तु। सपादाङ्गुलसुत्सेधमङ्गुष्ठस्य प्रकीर्त्तितम्। यवोनमङ्गुलं कार्यमङ्गुष्ठस्य नखं तथा। अर्द्धाङ्गुलं तथान्यासां क्रमान् न्यूनं तु कारयेत्। त्र्यङ्गुलौ दशनौ कार्यौ मेढ्रं तु चतुरङ्गुलम्। परिणाहोऽत्र कोषाग्रं कर्तव्यञ्चतुरङ्गुलम्। षडङ्गुलपरीणाहौ दशनौ परिकीर्त्तितौ। प्रतिमा भूषणाद्या स्यादेतदुद्देशलक्षणम्। अनयैव दिशा कार्यं लोके दृष्ट्वा तु लक्षणम्"।

वासुदेवस्य "दक्षिणे तु करे चक्रमधस्तात् पद्ममेव च। वामे शङ्खं गदाधस्ताद्वासुदेवस्य लक्षणम्। श्रीपुष्टी चापि कर्त्तव्ये पद्मवीणाकरान्विते। ऊरुमात्रोच्छ्रितायामे मालाविद्याधरौ तथा। प्रभामण्डलसंस्थौ तौ प्रभा हस्त्यादिभूषणौ। पद्माभं पादपीठन्तु प्रतिमास्ववमाचरेत्"।

मत्स्यादिलक्षणानि तत्र ४६अ० उक्तानि यथा

भगवानुवाच "दशावतारं मत्स्यादिलक्षणं प्रवदामि ते। मत्स्याकारस्तु मत्स्यः स्यात् कूर्मः कूर्माकृतिर्भवेत्। नराङ्गो वाथ कर्त्तव्यो भूवराहो गदादिभृत्। दक्षिणे

वामके शङ्खं लक्ष्मीर्वा पद्ममेव वा । श्रीवामकूर्म्मरस्या तु ध्यानन्तौ चरणानुगौ । वराहस्थापनाद्राज्यं भवाञ्छितरणं भवेत्। नरसिंहो विष्टत्तास्यो वामोरुक्षतदानयः। तद्वक्षोदारयन्माली स्फुरच्चक्रगदाधरः । छत्री दण्डी वामनः स्यादथवा स्याच्चतुर्भुजः । रामश्चापेषुहस्तः स्यात् खड्गी परशुनान्वितः । रामश्चापी शरी खड्गी शङ्खी वा द्विभुजः स्मृतः । गदालाङ्गलधारी च रामो वाथ चतुर्भुजः । वामोर्द्धे लाङ्गलं दद्यादधः शङ्खं सुशोभनम् । सुफलं दक्षिणोर्द्धे तु चक्रञ्चाधः सुशोभनम् । शान्तात्मा लम्बकर्णश्च गौराङ्गश्चाम्बरावृतः । ऊर्द्ध्वपद्मस्थितो बुद्धो वरदाभयदायकः । धनुस्तूणान्वितः कल्की खड्गोत्पाटकरो द्विजः । अथवाश्वस्थितः खड्गी शङ्खचक्रशरान्वितः" । "लक्षणं वासुदेवादिनवकस्य वदामि ते । दक्षिणोर्द्धे गदा वामे वामोर्द्धे चक्रमुत्तमम् । ब्रह्मेशौ पार्श्वगौ नित्यं वासुदेवोऽस्ति पूर्ववत् । शङ्खी च वरदो वाथ द्विभुजो वा चतुर्भुजः । लाङ्गली सुफली रामो गदापद्मधरः स्मृतः । प्रद्युम्नो दक्षिणे वज्रं शङ्खं भागे धनुः करे । गदानाभ्यावृतः प्रीत्या प्रद्युम्नो वा धनुःशरी । चतुर्भुजोऽनिरुद्धः स्यात्तथा नारायणो विभुः । चतुर्मुखचतुर्बाहुर्दृष्टकृष्णठरमण्डलः । लम्बकूर्चो जटायुक्तो ब्रह्मा हंसाग्रवाहनः । दक्षिणे चाक्षसूत्रञ्च स्रुवं वामे तु कुण्डिकाम् । आज्यस्थाली सरस्वती सावित्री वामदक्षिणे। विष्णुरष्टभुजस्तार्क्ष्ये करे खड्गस्तु दक्षिणे । गदा शरश्च वरदो वामे कार्मुकखेटके । चक्रशङ्खौ चतुर्बाहुर्नरसिंहश्चतुर्भुजः । शङ्खचक्रधरो वापि विदारितमहासुरः । चतुर्बाहुर्वराहस्तु शेषः पाणितले धृतः । धारयन् बाहुना पृथ्वीं वामेन कमलाधरः । पादलग्ना धरा कार्य्या पद्मा लक्ष्मीर्व्यवस्थिता । त्रैलोक्यमोहनस्तार्क्ष्ये अष्टबाहुस्तु दक्षिणे । चक्रं खड्गं च सुफलं अङ्कुशं वामके करे । शङ्खशार्ङ्गगदापाशा पद्मवीणासमन्विते । लक्ष्मीः सरस्वती कार्य्ये विश्वरूपोऽथ दक्षिणे । सुदर्शनं च तथा पाशं शक्तिशूलं शरं करे । वामे शङ्खञ्च शार्ङ्गञ्च गदां पाशं च तोमरम् । लाङ्गलं परशुं दण्डं कुरिकां चर्मखेटकम् । सिंहवाहनवक्त्रो दक्षिणस्योऽथ वामके । त्रिनेत्रो वामपार्श्वेन शयितो जलशायिपि । श्रिया धृतैकचरणो विमलाद्याभिरीडितः । नाभिपद्मचतुर्वक्त्रो हरिशङ्करको हरिः । शूलदृष्टिधारी दक्षे च गदाचक्रधरः पदे । रुद्रकेशवलक्ष्माङ्को गौरीलक्ष्मीसमन्वितः । शङ्खचक्रगदावेदपाणिश्चाश्वशिरा हरिः । वामपादधृतः शेषो दक्षिणः कूर्मपृष्ठगः । दत्तात्रेयो द्विबाहुः स्याद्वामोत्सङ्गे श्रिया सह । विष्वक्सेनश्चक्रगदी हली शङ्खी हरेर्गणः" ।

देवीप्रतिमालक्षणानि तत्रैव ५०अ० उक्तानि यथा "भगवानुवाच चण्डी विंशतिबाहुः स्याद्बिभ्रती दक्षिणैः करैः । शूलासिशक्तिचक्राणि पाशं खेटायुधाभयम् । डमरुं शक्तिकां वामैर्नागपाशञ्च खेटकम् । कुठाराङ्कुशचापांश्च घण्टाध्वजगदास्तथा । आदर्शसुदरान् हस्तैश्चण्डी वा दशबाहुका । तदधो महिषस्छिन्नमूर्द्धा पातितमस्तकः । शस्त्रोद्यतकरः क्रुद्धस्तदृपोवासम्भवः पुमान् । शूलहस्तो वमद्रक्तो रक्तश्मश्रुर्जेक्षणः । सिंहेनास्याद्यमानस्तु पाशबद्धो गले भृशम् । याम्याङ्घ्र्याक्रान्तसिंहा च सव्याङ्घ्रिर्महिषासुरे । चण्डिकेयं त्रिनेत्रा च सशस्त्रा रिपुमर्द्दिनी । नवपद्मात्मके स्थाते पूज्या दुर्गा स्वमूर्त्तितः । आदौ मध्ये च तन्त्रादौ नवतत्त्वात्मभिः क्रमात् । अष्टादशभुजैका तु दक्षे सुखड्गं च खेटकम् । आदर्शतर्जनीचापं ध्वजं डमरुकं तथा । पाशं वामे बिभ्रती च शक्तिसुदरशूलकम् । वज्रखड्गाङ्कुशशरान् चक्रन्देवी शलाकया । एतैरेवायुधैर्युक्ता शेषाः षोड़शबाहुकाः।। डमरुं तर्जनीं त्यक्त्वा रुद्रचण्डादयो नव । रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका । चण्डा चण्डवती चैव चण्डरूपातिचण्डिका । उग्रचण्डा च मध्यस्था रोचनाभारुणाऽसिता । नीला शुक्ला धूम्रिका च पीता श्वेता च सिंहगाः । महिषोऽथ पुमान् शस्त्री तत्कचग्रहसृष्टिकाः । आलीढ़ा नव दुर्गाः स्युः स्वाद्याः पुत्रादिवृद्धये । तथा गौरी चण्डिकाद्या कुण्डाग्नररदाग्निषट्क् । सैव रम्भावने सिद्धाऽग्निहोना ललिता तथा । स्कन्धमूर्द्धकरा वामे द्वितीये धृतदर्पणा । याम्ये फलाञ्जलिहस्ता सौभाग्या तत्र चोर्द्धिका । लक्ष्मीर्याम्यकराम्भोजा वामे श्रीफलसंयुता । पुस्ताक्षमालिकाहस्ता वीणाहस्ता सरस्वती । कुम्भाजहस्ता श्वेताभा मकरोपरि जाह्नवी । कूर्मगा यमुना कुम्भकरा श्यामा च पूज्यते । सवीणस्तुम्बुरुः शुक्लः शूली मातग्रतो दृशे । गौरी चतुर्मुखी ब्राह्मी अक्षमालासुरान्विता । कुण्डाक्षपात्रिणी वामे हंसगा शाङ्करी सिता । शरचापौ दक्षिणेऽस्या वामे चक्रं

धनुर्द्वये। कौमारी शिखिगा रक्ता शक्तिहस्ता द्विबाहुका। चक्रशङ्खधरा सव्ये वामे लक्ष्मीर्गदाजष्टक्। दण्डशङ्खासिगदया वाराही महिषस्थिता। ऐन्द्री वामे वज्रहस्ता सहस्राक्षी तु सिद्धये। चामुण्डा कोटराक्षी स्यान्निर्मांसा तु त्रिलोचना। निर्मांसा अस्थिसारा वा ऊर्ध्वकेशी कृशोदरी। द्वीपिचर्मधरा वामे कपालं पट्टिशं करे। शूलं कर्त्री दक्षिणेऽस्याः शवारूढास्थिभूषणा। विनायको नराकारो दृढकुक्षिर्जाननः। दृढक्षुण्णो ह्युपवीती सुखं सप्तकलं भवेत्। विस्ताराद्दैर्घ्यतश्चैव गुणं षट्त्रिंशदङ्गुलम्। कला द्वादश नाडी तु ग्रीवा सार्द्धकलोच्छ्रिता। षट्त्रिंशदङ्गुलं कण्ठं गुह्यमध्यर्द्धमङ्गुलम्। नाभिरूरू द्वादश च जङ्घे पादे तु दक्षिणे। स्वदन्तं परशुं वामे लड्डुकश्चोत्पलं शये। सुसूक्ष्मी च विडालाक्षी पार्श्वे स्कन्दो मयूरगः। स्वामी शाखी विशाखश्च द्विभुजो बालरूपधृक्। दक्षे शक्तिः कुक्कुटोऽथ एकवक्त्रोऽथ षण्मुखः। षड्भुजो वा द्वादशभिर्यामेऽरण्ये द्विबाहुकः। शक्तीषुपाशनिस्त्रिंशतोत्रदोस्तर्जनीयुतः। शक्त्या दक्षिणहस्तेषु षट्सु वामे करे तथा। शिखिपिच्छन्वनुः खेटं पताकाभयकुक्कुटे। कपालकर्तरीशूलपाशश्चेदुयास्यसौम्ययोः। गजचर्मधृद्ध्वांसपादा स्यात् रुद्रचण्डिका। सैव चाष्टभुजा देवी शिरोऽमरुकान्विता। तेन सा रुद्रचामुण्डा नाटेश्वर्यथ नृत्यती। इयमेव महालक्ष्मीरुपविष्टा चतुर्मुखी। नृत्यन्निमहिषेभांश स्यादनी च करे स्थितान्। दशबाहुस्त्रिनेत्रा च शस्त्रास्त्रिडमरुत्रिकम्। बिभ्रती दक्षिणे हस्ते वामे घण्टां च खेटकम्। खट्वाङ्गं च त्रिशूलञ्च सिद्धचामुण्डाह्वया। सिद्धयोगेश्वरी देवी सर्वसिद्धिप्रदायिका। एतद्रूपा भवेदन्या पाशाङ्कुशयुतारुणा। भैरवीरूपविद्या तु भुजैर्द्वादशभिर्युता। एताः श्मशानजा रौद्रयोह्याम्बाष्टकमिदं स्मृतम्। क्षमा शिवाहता दृढा द्विभुजा विहतानना। दन्तुरा क्षेमकारी स्याद्भ्रूमौ जानुकरा स्थिता। यक्षिण्यस्तु दीर्घाङ्गाः शाकिन्यो वक्रदृष्टयः। पिङ्गाक्ष्यः सुभंहारस्या रूपिण्योऽप्सरसः सदा। शाक्षमाली त्रिशूली च नन्दीशो द्वारपालकः। महाकालाविसुण्डी स्याच्छूलखेटकवांस्तथा। क्षेत्रो भृङ्गी च नृत्यन् वै कुष्माण्डस्थूलसर्वगान्। गजगोकर्णवक्त्राद्या वीरभद्रादयो गणाः। घण्टाकर्णोद्दादशदोः पापरोगं विदारयन्। वज्रासिदण्डचक्रेषुसुमलाङ्कुशसुद्गरान्। दक्षिणे तर्जनीं खेटं शक्तिं सुण्डञ्च पाशकम्। चापं घण्टां कुठारञ्च द्वाभ्यान्त्वेव त्रिशूलकम्। घण्टामालाकुलो देवो विस्फोटकविमर्दनः"।

सूर्यादिप्रतिमालक्षणानि ५१अ० तत्रोक्तानि यथा

"भगवानुवाच। सप्तप्राश्वे सैकचक्रे रथे सूर्यो द्विपद्मधृक्। मसीभाजनलेखन्यौ बिभ्रत् कुण्डी तु दक्षिणे। वामे तु पिङ्गलो हारि दण्डभृत् स रवेर्गणः। बालव्यजनधारिण्यौ पार्श्वे राज्ञी च निष्प्रभा। अथवाश्वसमारूढः कार्य एकस्तु भास्करः। वरदा द्व्यजिनः सर्वे दिक्पालास्त्रकराः क्रमात्। सुद्गरशूलचक्राब्जभृतोऽग्न्यादिविदिक्स्थिताः। सूर्यादुयमादिरत्नोत्पाशतर्हस्ता द्विषड्दले। वरुणः सूर्यनामा च सहस्रांशुस्तथापरः। धाता तपनसंज्ञश्च सविताथ गभस्तिमान्। रविश्चैवाथ पर्जन्यस्त्वष्टा मित्रोऽथ विष्णुकः। मेषादिराशिसंस्थाश्च मार्गादिकार्तिकान्तगाः। कृष्णो रक्तो मनाग्रक्तः पीतः पाण्डुरकः सितः। कपिलः पीतवर्णश्च शुक्लाभो धवलस्तथा। धूम्रो नीलः क्रमाद्वर्णाः शक्तयः केशराग्रगाः। इडा सुषुम्णा विश्वार्चिरिन्दुसंज्ञा प्रमर्दिनी। प्रहर्षिणी महाकाली कपिला च प्रबोधनी। नीलाम्बरा धनान्ता च अमृताख्या च शक्तयः। वरुणादेश तद्वर्णाः केशराग्रेषु विन्यसेत्। तेजसण्डो महावक्त्रो द्विभुजः पद्मखड्गभृत्। कुण्डिकाजपमालीन्दुः कुजः शक्त्यक्षमालिकः। बुधश्चरपाशपाणिः स्याज्जीवः कुण्ड्यक्षमालिकः। शुक्रः कुण्ड्यक्षमाली स्यात् किङ्किणीसूत्रवाञ्छनिः। अर्द्धचन्द्रधरो राहुः केतुः खड्गी च दीपभृत्। अनन्तस्तक्षकः कर्कः पद्मो महाब्जः शङ्खकः। कुलिकः सूत्रिणः सर्वे फणवक्त्रा महाप्रभाः। इन्द्रो वज्री गजारूढस्त्वागगोऽग्निश्च शक्तिमान्। यमो दण्डी च महिषे नैर्ऋतः खड्गवान् खरे। मकरे वरुणः पाशी वायुर्ध्वजधरो मृगे। गदी कुबेरो मेषस्थ ईशानश्च जटी वृषे। द्विबाहवो लोकपाला विश्वकर्मा सूत्रभृत्। हनूमान् वज्रहस्तः स्यात् पङ्क्त्यां सम्मीलिताश्रयः। वीणाहस्ताः किन्नराः स्युर्मालाविद्याधराश्च खे। दुर्बलाङ्गाः पिशाचाः स्युर्वेतालाः विकृताननाः। क्षेत्रपालाः शूलवन्तः प्रेता महोदराः कृशाः"।

६४योगिनी प्रतिमालक्षणं ५२अ०

"भगवानुवाच योगिन्यष्टाष्टकं वक्ष्ये ऐन्द्रादीशान्तः क्र-

मात्। अक्षोभ्या क्षत्रकर्णी च राक्षसी क्षपणा क्षया। पिङ्गाक्षी चाक्षया क्षेमा बाला लीला लया तथा। लोला लङ्का च लङ्केशी लालसा विमला पुनः। डुताशा च विशालाक्षी डुङ्कारा वडवामुखी। हाहारवा महाक्रूरा क्रोधना तु भयानना। सर्वज्ञा तरला तारा कृष्णा चैव हयानना। तथैव रसमङ्ग्याही शबरा तालुजिह्विका। रक्ताक्षी सुप्रसिद्धा तु विद्युज्जिह्वा करद्विषी। मेघनादा प्रचण्डोग्रा कालकर्णी वरप्रदा। चन्द्रावती चन्द्रहासा प्रपञ्चा प्रलयान्तिका। शिशुवक्त्रा पिशाची च पिशिताशा च लोलुपा। धमनी तपनी चैव वामनी विकटानना। वायुवेगा हृहत्कुक्षिर्विकटा विश्वरूपिका। यमजिह्वा जयन्ती च दुर्जया च यमान्तिका। विडाली रेवती चैव पूतना विजयन्तिका। अष्टहस्तायतर्हस्ता इत्यास्ताः सर्वसिद्धिदाः"।

भैरवप्रतिमालक्षणानि यथा ५२अ०

"भैरवश्चार्कहस्तः स्यात् कूर्पराखो जटेन्दुभृत्। खड्गाङ्कुशकठारेषुविश्वाभयभृदेकतः। चापत्रिशूलखट्वाङ्गपाशकार्द्धवरोद्यतः। गजचर्मधरो द्वाभ्यां क्षत्रिवासोहिभूषितः। प्रेतासनो मातृमध्ये पूज्यः पञ्चाननोऽथ वा। अविलोमाग्निपर्यन्तं दीर्घाष्टकैकभेदितम्। तत् षडङ्गानि लात्यन्तैरन्वितं च क्रमाद् यजेत्। मन्दिराग्निदलारूढं सुवर्णरसकान्वितम्। नादबिन्दुसंयुक्तं मातृनाथाङ्गदीपितम्। वीरभद्रो वृषारूढो मातृमध्ये स चतुर्भुजः। गौरी तु द्विभुजा लक्ष्मी शूलिनी दर्पणान्विता। शूलं गलन्तिका कुण्डी वरदा च चतुर्भुजा। अजस्या ललिता स्कन्दगणादर्शशलाकया। चण्डिका दशहस्ता स्यात् खड्गशूलारिशक्तिधृक्। दक्षे वामे भागपाशं चर्माङ्कुशकुठारकम्। धनुः सिंहे च महिषः शूलेन प्रहतोऽपतः"।

लिङ्गलक्षणसूक्तं तत्र ५३अ०

"भगवानुवाच। लिङ्गादिलक्षणं वक्ष्ये कमलोद्भव! तच्छृणु। दैर्घ्यार्द्धं वसुभिर्भक्त्वा त्यक्त्वा भागत्रयं ततः। विष्कम्भं भूतभागैस्तु चतुरस्रन्तु कारयेत्। आयामं मूर्तिभिर्भक्त्वा एकद्वित्रिक्रमान् न्यसेत्। ब्रह्मविष्णुशिवांशेषु वर्द्धमानोऽयमुच्यते। चतुरस्रेऽस्य वर्णार्द्धं गुह्यकोणेषु लाञ्छयेत्। अष्टाश्रं वैष्णवं भागं सिध्यत्येव न संशयः। षोडशास्रं ततः कुर्याद्वात्रिंशास्रं ततः पुनः। चतुःषष्ट्यस्रकं कृत्वा वर्तुलं साधयेत्ततः। कर्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः। विस्तारमथ लिङ्गस्य अष्टधा संविभाजयेत्। भागार्द्धार्द्धन्तु सन्त्यज्य कृताकारं शिरो भवेत्। त्रिषु भागेषु सदृशमायामं यस्य विस्तरम्। तद्विभागसमं लिङ्गं सर्वकामफलप्रदम्। दैर्घ्यस्य तु चतुर्थेन विष्कम्भं देवपूजिते। सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम्। मध्यसूत्रं समासाद्य ब्रह्मरुद्रान्तिके बुधः। षोडशाङ्गुललिङ्गस्य षड्भागैर्भालितो यथा। तद्वै यमनसूत्राभ्यां मानमन्तरमुच्यते। यवाष्टसुत्तरे कार्यं शेषाणां यवहानितः। अधोभागं त्रिधा कृत्वा त्वर्द्धमेकं परित्यजेत्। अष्टधा तद्द्वयं कृत्वा ऊर्ध्वभागत्रयं त्यजेत्। ऊर्द्ध्वं पञ्चमाङ्गागाद् भ्राम्य रेखां प्रलम्बयेत्। भागमेकं परित्यज्य सङ्गमं कारयेत्तयोः। एतत् साधारणं प्रोक्तं लिङ्गानां लक्षणं मया। सर्वसाधारणं वक्ष्ये पिण्डिकानां निबोध मे। ब्रह्मभागप्रवेशञ्च ज्ञात्वा लिङ्गस्य चोच्छ्रयम्। न्यसेद् ब्रह्मशिलां विद्वान् सम्यक्कर्मशिलोपरि। तथा समुच्छ्रयं ज्ञात्वा पिण्डिकां प्रविभाजयेत्। द्विभागसुच्छ्रितं पीठं विस्तरं लिङ्गसम्मितम्। त्रिभागं मध्यतः खातं कृत्वा पीठं विभालयेत्। समानार्द्धत्रिभागेण बाहुल्यं परिकल्पयेत्। बाहुल्यस्य त्रिभागेण मेखलामथ कल्पयेत्। खातं स्यान्मेखलातुल्यं क्रमात्त्रिभन्तु कारयेत्। मेखला षोडशांशेन खातं वा तत्प्रमाणतः। उच्छ्रायं तस्य पीठस्य विकाराङ्गं तु कारयेत्। भूमौ प्रविष्टमेकं तु भागैकैकेन पिण्डिका। कण्ठं भागैस्त्रिभिः कार्यं भागेनैकेन पट्टिका। द्व्यंशेन चोर्द्ध्वपट्टन्तु एकांशाः शेषपट्टिकाः। भागं भागं प्रविष्टन्तु यावत् कण्ठं ततः पुनः। निर्गमं भागमेकं तु यावद्वै शेषपट्टिका। प्रणालस्य त्रिभागेण निर्गमस्तु त्रिभागतः। मूलेऽङ्गुल्यविस्तारमग्रे त्र्यंशेन चार्द्धतः। ईषन्निम्नन्तु कुर्वीत खातं तच्चोत्तरेण वै। पिण्डिकासहितं लिङ्गमेतत् साधारणं स्मृतम्"।

लिङ्गभेदादिकथनं तत्रैव ५४अ०

"भगवानुवाच। वक्ष्याम्यन्यप्रकारेण लिङ्गमानादिकं शृणु। वक्ष्ये लक्षणं लिङ्गं हितकं बुद्धिवर्द्धनम्। भूतये वक्ष्यलिङ्गन्तु लिङ्गन्नात्कालिकं विदुः। पक्वापक्वं मृण्मयं स्यादपक्वात् पक्वजं वरम्। ततो दारुमयं पुण्यं दारुजात् शैलजं वरम्। शैलाद्वरं तु सुक्षाजं ततो लौहं सुवर्णजम्। राजतं कीर्तितं ताम्रं पैत्तलं भुक्तिमुक्तिदम्। रङ्गजं रसलिङ्गञ्च भुक्तिमुक्तिप्रदं वरम्।

रसजं रसलोहादिरत्नगर्भन्तु वर्द्धयेत्। मानादि नेष्टं सिद्धादि स्थापितेऽथ स्वयम्भुवि। वामे च स्वेच्छया तेषां पीठप्रासादकल्पना। पूजयेत् सूर्यबिम्बस्थं दर्पणे प्रतिबिम्बितम्। पूज्यो हरस्तु सर्वत्र लिङ्गे पूर्णार्चनं भवेत्। हस्तोत्तरविधं शैलं दारुजं तद्वदेव हि। चलमङ्गुलमानेन द्वारगर्भकरैः स्थितम्। अङ्गुलाद् गृहलिङ्गं स्याद् यावत् पञ्चदशाङ्गुलम्। द्वारमानात् त्रिसङ्ख्याकं नवधा गर्भमानतः। नवधा गर्भमानेन लिङ्गं धाम्नि च पूजयेत्। एवं लिङ्गानि षट्त्रिंशत् ज्ञेयानि ज्येष्ठमानतः। मध्यमानेन षट्त्रिंशत् षट्त्रिंशदधमेन च। इत्यमैक्येन लिङ्गानां शतमष्टोत्तरं भवेत्। एकाङ्गुलादिपञ्चान्तं कन्यसञ्चलमुच्यते। षडादिदशपर्यन्तञ्चलं लिङ्गञ्च मध्यमम्। एकादशाङ्गुलादि स्यात् ज्येष्ठं पञ्चदशान्तकम्। षडङ्गुलं महारत्ने रत्नैरन्यैर्नवाङ्गुलम्। रविभिर्हेममारोप्यं लिङ्गं शैलैस्त्रिपञ्चभिः। षोडशांशे च वेदांशे युगं लुप्तोर्ध्वदेशतः। द्वात्रिंशत् षोडशांशांश्च कोणयोस्तु विलोपयेत्। चतुर्निवेशनात् कण्ठो विंशतिस्त्रियुगैस्तथा। पार्श्वाभ्यां तु विलुप्ताभ्यां चललिङ्गं भवेद्वरम्। धाम्नो युगर्तुनागांशैर्द्वारं हीनादितः क्रमात्। लिङ्गद्वारोच्छ्रयादर्धाग् भवेत् पादोनतः क्रमात्। गर्भार्द्धेनाधमं लिङ्गं भूतांशैः स्यात् त्रिभिर्वरम्। तयोर्मध्ये च सूत्राणि सप्त सम्पातयेत् समम्। एवं स्युर्नव सूत्राणि भूतसूत्रैश्च मध्यमम्। द्वयन्तरो वामवामश्च लिङ्गानां दीर्घता नव। हस्ताद्विवर्द्धते हस्तो यावत् स्युर्नव पाणयः। हीनमध्योत्तमं लिङ्गं त्रिविधं त्रिविधात्मकम्। एकैकलिङ्गमध्येषु त्रीणि त्रीणि च पादगः। लिङ्गानि घटयेद्धीमान् षट्सु चाष्टोत्तरेषु च। स्थिरदीर्घप्रभेदात्तु द्वारगर्भकरात्मिका। भाग्येशञ्चाग्न्यनीशञ्च देवेज्यन्तुल्यसंज्ञितम्। चत्वारि लिङ्गरूपाणि विष्कम्भेण तु लक्षयेत्। दीर्घमायान्वितं कृत्वा लिङ्गं कुर्यात् त्रिरूपकम्। चतुरष्टाष्टतत्त्वञ्च तत्त्वत्रयगुणात्मकम्। लिङ्गानामीप्सितं दैर्घ्यं तेन कृत्वाङ्गुलानि वै। ध्वजाद्यायैः स्वरैर्भूतैः शिखिभिर्वा हरेत् कृतिम्। तान्याङ्गुलानि यच्छेषं लक्षयेच्च शुभाशुभम्। ध्वजाद्यध्वजसिंहेभवृषाः श्रेष्ठाः परे शुभाः। स्वरेषु षड्जगान्धारपञ्चमाः शुभदायकाः। भूतेषु च शुभा भूः स्यादग्निर्वाहवनीयकः। उक्तायामस्य चार्धांशे नागांशैर्भाजिते क्रमात्। रसभूतांशषष्ठांशर्तुत्रयाधिकरसैर्भवेत्। आढ्यानाढ्यसुरेज्याख्यतुल्यानाञ्चतुरस्रता। पञ्चमं वर्द्धमानाख्यं व्यासाच्चाहप्रवर्द्धितः। द्विधा मेरो बहून्यत्र यज्यन्ते विश्वकर्मतः। आढ्यादीनां त्रिधा स्थौल्याद्यवधूतं तदष्टधा। त्रिधा हस्ताञ्जिनाख्यञ्च युक्तं सर्वसमेन च। पञ्चविंशतिलिङ्गानि नाद्ये देवार्चिते तथा। पञ्चसप्तभिरेकत्वाञ्जिनैर्भक्तैर्भवन्ति हि। चतुर्दश सहस्राणि चतुर्दश शतानि च। इत्यष्टाङ्गुलविस्तारो नवैककरगर्भतः। तेषां कोणार्द्धकोणस्थैश्छिन्नैः कोणानि सूत्रकैः। विस्तारं मध्यतः कृत्वा स्थाप्यं वा मध्यतस्त्वयम्। विभागादूर्द्धमष्टास्रो द्वात्रिंशस्रः स्याच्छिवांशकः। पादाच्चाग्रान्तको ब्रह्मा नाभ्यन्तो विष्णुरित्यतः। मूर्ध्नान्तो भूतभागेशो व्यक्तेऽव्यक्ते च तद्वति। पञ्चलिङ्गव्यवस्थायां शिरो वर्तुलमुच्यते। कृतार्धं कुक्कुटाभं वा बालेन्दुप्रतिमाकृति। एकैकस्य चतुर्भेदैः कार्यभेदात् फलं वदे। लिङ्गमस्तकविस्तारं वसुभक्तन्तु कारयेत्। अर्द्धभागं चतुर्द्धा तु विस्तारोच्छ्रायतो भजेत्। चत्वारि तत्र सूत्राणि भागभागानुपातनात्। पुण्डरीकन्तु भागेन विशांशाख्यं द्विलोपनात्। त्रिभातनात्तु श्रीवत्सं शङ्खहृद्दलोपनात्। शिरः सर्वसमे श्रेष्ठं कुक्कुटाभं सुराङ्गये। चतुर्भागात्मके लिङ्गे त्रापुषं द्वयलोपनात्। अनाद्यस्य शिरः प्रोक्तमर्द्धचन्द्रं शिरः शृणु। अंशात् प्रान्ते युगांशैश्च त्वेकहान्याभूतात्मकम्। पूर्वबालेन्दुकुसुदं द्वित्रिवेदलवात् क्रमात्। चतुश्चिरेकवदनं सुखलिङ्गमतः शृणु। पूजाभागं प्रकर्तव्यं मूर्त्यग्निपदकल्पितम्। अर्कांशं पूर्ववत् त्यक्त्वा षट् स्थानानि विवर्तयेत्। शिरोवृत्तिः प्रकर्तव्या ललाटं नासिका ततः। वदनं चिबुकं ग्रीवा युगभागैर्भुजाक्षिभिः। कराभ्यां सुकलीकृत्य प्रतिमायाः प्रमाणतः। सुखं प्रति समः कार्यो विस्तारादष्टमांशतः। चतुर्मुखं मया प्रोक्तं त्रिमुखञ्चोच्यते शृणु। कर्णपादाधिकास्तस्य ललाटादीनि निर्दिशेत्। भुजौ चतुर्भिर्भागैस्तु कर्तव्यौ पश्चिमोन्नितम्। विस्तारादष्टमांशेन सुखानां प्रतिनिर्गमः। एकवक्त्रं तथा कार्यं पूर्वस्यां सौम्यशोभनम्। ललाटनासिकावक्त्रग्रीवायाञ्च विवर्तयेत्। भुजाञ्च पञ्चमांशेन भजेत्हीन विवर्तयेत्। विस्तारस्य षडंशेन मुखैर्निर्गमनं हितम्। सर्वेषां सुखलिङ्गानां त्रापुषं वाथ कुक्कुटम्।

विशेषेण देवतादीनां मूर्तिलक्षणं हेमाद्रिव्रतखण्डे विष्णुध

गणेशस्य "विनायकस्तु कर्त्तव्यो गजवक्त्रश्चतुर्भुजः। स्वलकश्चाक्षमाला च तस्य दक्षिणहस्तयोः। पात्रञ्चोदकपूर्णञ्च परशुश्चैव वामतः। दन्तश्चास्य न कर्त्तव्यो वामे रिपुनिसूदन!। पादपीठकतः पाद एक आसनगो भवेत्। पूर्णे चोदकपात्रे च कराग्रन्तस्य कारयेत्। लम्बोदरस्तथाकार्य्यस्तथकर्णश्च यादव। व्याघ्रचर्माम्बरधरः सर्पयज्ञोपवीतवान्"। स्वलकं, गजदन्ताकारम्।

सरस्वत्याः "देवी सरस्वती कार्य्या सर्वाभरणभूषिता। चतुर्भुजा सा कर्त्तव्या तथैव च समुत्थिता"। (समुत्थिता, ऊर्द्ध्वा) पुस्तकञ्चाक्षमाला च तस्या दक्षिणहस्तयोः। वामयोश्च तथा कार्य्या वैणवी च कमण्डलुः। समपादप्रतिष्ठा च कार्य्या सौम्यमुखी तथा"। वैणवी, वीणा

लक्ष्म्याः "हरेः समीपे कर्तव्या लक्ष्मीस्तु द्विभुजा नृप!। दिव्यरूपाम्बरधरा सर्वाभरणभूषिता। गौरी शुक्लाम्बरा देवी रूपेणाप्रतिमा भुवि। पृथक् चतुर्भुजा कार्य्या देवी सिंहासना शुभा। सिंहासनस्या कर्तव्यं कमलञ्चारुकर्णिकम्। अष्टपत्रं महाभाग! कर्णिकायान्तु सा स्थिता। विनायकवदासीना देवी कार्य्या महाभुजा। दृढ़ञ्चालङ्करे कार्य्यं तस्याश्च कमलं शुभम्। दक्षिणे यादवश्रेष्ठ! केयूरं प्रान्तसंस्थितम्। वामेऽमृतघटः कार्यस्तथा राजन्! मनोहरः। तस्याश्च द्वौ करौ कार्य्यौ विल्वशङ्खधरौ द्विज!। आवर्जितघटं कार्यं तत्पृष्ठेकुञ्जरद्वयम्। देव्याश्च मस्तके पद्मं तथा कार्यं मनोहरम्"।

श्रियः "पद्मस्था पद्महस्ता च गजोत्क्षिप्तघटस्रुता। श्रीः पद्ममालिनी चैव कालिकाकृतिरेव च"।

महालक्ष्म्याः विश्वकर्मशास्त्रे "क्षेत्रे कोलापुरादन्ते महालक्ष्मीर्य्य दोच्यते। लक्ष्मीवत् सा तदा कार्य्या" रूपाभरणभूषिता। दक्षिणाधःकरे पात्रमूर्द्ध्वे कौमोदकी ततः। वामोर्द्ध्वे खेटकं वत्ते श्रीफलन्तदधः करे। बिभ्रती मस्तके लिङ्गं पूजनीया विभूतये"।

भद्रकाल्याः विष्णुधर्मोत्तरे "अष्टादशभुजा कार्य्या भद्रकाली मनोहरा। आलीढस्थासनस्था च चतुःसिंहे रथे स्थिता। अक्षमाला त्रिशूलञ्च खड्गश्चन्द्रश्च यादव!। वाणचापे च कर्तव्ये शङ्खपद्मे तथैव च। स्रुक्स्रुवौ च तथा कार्य्यौ तथोदककमण्डलू। दण्डशक्ती च कर्तव्ये कृष्णाजिनञ्चतायनौ। हस्तानां भद्रकाल्यास्तु भवेत् यान्निकरः करः। एकश्चैव महाभाग रत्नपात्रधरो भवेत्"।

चण्डिकायाः "निगद्यते ह्यथो चण्डी हेमाभा सा सुरूपिणी। त्रिनेत्रा यौवनस्था च क्रुद्धा चोर्द्ध्वस्थिता मता। कृशमध्या विशालाक्षी चारुपीनपयोधरा। एकवक्त्रा तु सुग्रीवा वाहुविंशतिसंयुता। शूलासिशङ्खचक्राणि बाणशक्तिपवीनपि। अभयखड्गमरुश्चैव कृत्तिकां दक्षिणे करे। ऊर्ध्वादिक्रमयोगेन बिभ्रती सा सदा शुभा। नागपाशगन्तथा खेटं कुठाराङ्कुशकार्मुकम्। घण्टा, ध्वज, गदादर्शं, मुद्गरं वाम एव च। तदधोमहिषश्छिन्नमूर्द्धा पतितमस्तकः। शस्त्रोद्यतकरस्तस्यः तदुग्रोवासम्भवः पुमान्। शूलभिन्नो वमद्रक्तोरक्तभ्रूमूर्द्ध्वजेक्षणः। सिंहेन खादमानश्च पाशबद्धो गले भृशम्। याम्याङ्घ्र्याक्रान्तसिंहा च सव्याङ्घ्र्यालीढगासुरे। चण्डी चोद्यतशस्त्रे वज्राग्रेषरिपुनाशिनी" (असुरे, महिषे)

दुर्गायाः "शक्तिं वाणं तथा शूलं खड्गश्चक्रञ्च दक्षिणे। चन्द्रबिम्बमधो वामे खेटमूर्द्ध्वे कपालकम्। शूलं चक्रञ्च बिभ्राणा सिंहारूढा च दिग्भुजा। एषा देवी समुद्दिष्टा दुर्गा दुर्गोपहारिणी"। दिग्भुजा, दशभुजा

नन्दायाः "नन्दा भगवती देवी भारद्वाजाभिनन्दजा। वरपाशा ङ्कुशा-ज्ञानि बिभ्रती च चतुर्भुजा"।

"गौरवर्णा गजस्था वा खड्ग खेट-वराभया"।

अम्बायाः "अम्बा कुन्दवर्णाभा पाशाङ्काभीतिपात्रिणी"।

सर्वमङ्गलायाः "चतुर्बाहुः प्रकर्तव्या सिंहस्था सर्वमङ्गला अक्षसूत्रं कजं दत्ते शूलकुण्डीधरोत्तरे"।

कालरात्रेः "एकवीणा जया कर्णपूरा नग्ना खरस्थिता। वज्रोत्था कर्णिकाकर्णी तैलाभ्यक्तशरीरिणी। वामपादे लसल्लोहलत्यकण्टकभूषणा। वर्द्धयन्मूर्द्धजाकृष्टा कालरात्रिर्भयङ्करी"।

ललितायाः "शङ्खसुग्धकरादर्शं बिभ्रती वामपार्श्वतः। याम्ये फलाञ्जनीहस्ता ललितोर्द्ध्वा सुभूषणा"।

ज्येष्ठायाः "तुङ्गनासा च लम्बोष्ठी लम्बमानस्तनोदरी। आलोहिता स्मृता ह्येषा ज्येष्ठा लक्ष्मीरिति श्रिये। उत्पलाभयहस्तेयं द्विभुजा वीरवन्दिता"।

ज्येष्ठाभेदस्य "रक्तज्येष्ठा च नीला च भूतलार्पितपादिका। भूतलं स्पृशते दोर्भ्यां द्विभुजा वीरवन्दिता"।

गौर्याः "गौरी कुमारिकारूपा ध्यायमाना महेश्वरैः।

वरदाभयहस्ता सा द्विभुजा श्रेयसे सदा। अक्षस्रजाभये पद्मं तस्याधश्च कमण्डलुः। गौर्या मूर्तिश्चतुर्बाहुः कर्तव्या कमलासना"।

भूतमातृः "श्यामवर्णा विशालाक्षी क्षीरारुणनिभानना। द्विभुजा बिभ्रती लिङ्गं चर्म शस्त्रन्तु दक्षिणे। सिंहासनोपविष्टेयं सर्वाभरणभूषिता। भूतप्रेतपिशाचाद्यैः सेविता तु विशेषतः। इन्द्रयक्षैश्च गन्धर्वैः सिद्धविद्याधरादिभिः। अश्वत्थस्याधो देवी भूतमातेति विश्रुता"।

सुरभेः "सुरभिर्गोमुखी देवी सुरूपा सर्वभूषणा। घासमुष्टिं तथा कुण्डीं बिभ्राणा भूतिपुष्टिदा"।

योगनिद्रायाः "निद्रा तु शयनारूढा सुसौम्या सुकुलेक्षणा। पानपात्रधरा ज्ञेयं द्विभुजा परिकीर्तिता"।

मातृणाम् "अथातः सम्प्रवक्ष्यामि मातृरूपाणि ते जय"।

ब्राह्म्याः "तत्र ब्राह्मी चतुर्वक्त्रा षड्भुजा हंससंस्थिता। पिङ्गला भूषणोपेता भृगचर्मोत्तरीयका। वरं स्रुवं स्रुवं धत्ते दक्षबाहुत्रये क्रमात्। वामे तु पुस्तकं कुण्डीं बिभ्रती चाभयप्रदा"।

माहेश्वर्याः "माहेश्वरी वृषारूढा पञ्चवक्त्रा त्रिलोचना। शुक्लेन्दुदृज्जटाजूटा शुक्ला सर्वसुखप्रदा। षड्भुजा वरदा दक्षे सूत्रं डमरुकं तथा। शूलवराटाभयं वामे सैव धत्ते महाभुजा"।

कौमार्याः "कौमारी रक्तवर्णा स्यात् षड्वक्त्रा द्वादशलोचना। रविबाहुर्मयूरस्था वरदा शक्तिधारिणी। पताकां बिभ्रती दण्डञ्चापं बाणं च दक्षिणे। वामे चापमथो घण्टां कमलं कुक्कुटं त्वधः। परशुं बिभ्रती तीक्ष्णं तदधस्त्वभयान्विता"।

वैष्णव्याः "वैष्णवी तार्क्ष्यगा श्यामा षड्भुजा वनमालिनी। वरदा गदिनी दक्षे बिभ्रती चाम्बुजस्रजम्। शङ्खचक्राभया वामे सा चेयं त्रिलसद्भुजा"।

वाराह्याः "कृष्णवर्णा तु वाराही शूकरास्या महोदरी। वरदा दण्डिनी खड्गं बिभ्रती दक्षिणे सदा। खेटपाशाभया वामे सैव चापि त्रिसद्भुजा"।

"ऐन्द्र्याः ऐन्द्री सहस्राक्षी सौम्यहेमाभा गजसंस्थिता। वरदा स्रुक्विणी वज्रं बिभ्रत्यूर्द्ध्वन्तु दक्षिणे। वामे तु कलसं पात्रं त्वभयं तदधः करे"।

चामुण्डायाः "चामुण्डा प्रेतगा रक्ता विकृतास्याहिभूषणा। दंष्ट्रामा क्षीणदेहा च गर्त्ताक्षी भीमरूपिणी। दिग्वाहुः शुष्ककुक्षिश्च सुसंवं कवचं शरम्। अङ्कुशं बिभ्रती खड्गं दक्षिणे त्वथ वामतः। खेटं पाशञ्चतुर्दण्डं कुठारं चेति बिभ्रती"।

चण्डिकायाः "चण्डिका श्वेतवर्णा स्यात् शवारूढा च षड्भुजा। जटिला वर्तुलत्रया वरदा शूलधारिणी। वर्त्तिकां बिभ्रती दक्षे पानपात्राभयान्यतः। इत्येवं मातरः प्रोक्ता रूपभेदव्यवस्थया"।

नान्दीमुखमातृणाम् गौर्यादिमातरस्तु भविष्यत्पुराणे निरूपिताः। "गौरी पद्मा-शची-मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा तथान्या लोकमातृका। धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। पूज्या चित्रेऽथवाभ्यां वरदाऽभयपाणयः"।

नवदुर्गाणाम् "नवपद्मान्वितं स्थाने पूज्या दुर्गाः स्वमूर्त्तितः। आद्यौ मध्ये तथेन्द्रादौ नवतत्त्वाक्षरैः क्रमात्। अष्टादशभुजैका तु पीनवक्षोरुहोरुका। सर्वालङ्कारसंयुक्ता सर्वसिद्धिप्रदायिनी। मूर्द्धजं खेटकं घण्टामादर्शं तर्जनीं धनुः। ध्वजं डमरुकं पाशं बिभ्रती वामपाणिभिः; शक्तिमुद्गरशूलानि वज्रं शङ्खमथाङ्कुशम्। शलाकां मार्गणं चक्रं दधाना दक्षिणैः करैः। जयमिच्छद्भिरित्येताः पूजनीया महात्मभिः। शेषाः षोडशहस्ताश्च शलाकां मार्गणं विना। रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चैव चण्डरूपातिचण्डिका। नवमी चोग्रचण्डा च मध्यस्था वह्निसन्निभा। रोचनाभाऽरुणा कृष्णा नीला शुक्ला च धूम्रिका। पीता च पाण्डुरा ज्ञेया चालीढस्था हरिस्थिता। महिषस्था सशस्त्रोका दैत्यमूर्द्धजसुष्टिका। पद्माकृती रथ स्थाप्या इत्युक्तं स्कन्दयामले"।

वामायाः "वृत्तस्था जटिला त्रयी वह्निज्वालासमप्रभा। कपालाभयहस्तोग्रा वामा वामफलप्रदा। द्विबाहुरेकवक्त्रैषा विधातव्या विपश्चिता"।

ज्येष्ठायाः "पाठलाभा भवेदष्टाकपालशरधारिणी। उग्रा महाबला भूत्वै शत्रुघ्नी शेषपूर्वजा"।

रौद्र्याः "रक्तवस्त्रा तथा रौद्री कपालचमरीकरा। शेषपूर्वा तु विज्ञेया कृष्णवक्त्रा सुभीषणा"।

काल्याः "घनश्यामा ततः काली ताम्ररक्तनिभानना। कपाल कर्त्तिकाहस्ता विज्ञेया भयनाशिनी"।

कलविकर्णिकायाः "नीलशुभ्रा महादेवी विकर्णी कलपूर्विका। कपालशक्तिहस्तेयं भयहृच्च शुभप्रदा"।

बलविकर्णिकायाः "बभ्रुवर्णा विशालाक्षी कपालं जपमालिकाम्।

बिभ्राणा शान्तिदा भूत्यै बलपूर्वा विकर्णिका" ।

बलप्रमथन्याः "ताम्राभा श्वेतवर्णा स्यात् बलप्रमथनी शुभा । कपालपाशिनी चेयं सर्वशत्रुक्षयङ्करी" ।

सर्वभूतदमन्याः "जवाकुसुमवर्णाभा दंष्ट्रिणी च महोदरी । कपालवज्रिणी भूतदमनी सर्वपूर्विका" ।

मनोन्मन्याः विश्वकर्मशास्त्रात् "नीलताम्बारुणाभासा पृथुवक्त्रा मनोन्मनी । कपालखड्गिनी भूत्यै शत्रूणां भयवर्द्धनी" ।

कृष्णायाः मार्कण्डेयपुराणे "अक्षसूत्रञ्च कुण्डीं च हृदयाग्रे पुटाञ्जलिम् । पञ्चाग्निकुण्डमध्यस्था कृष्णान्नामनुधारयेत्"

उमायाः "अक्षसूत्रञ्च कमलं दर्पणञ्च कमण्डलुम् । उमा बिभर्त्ति हस्तैस्तु पूजिता त्रिदशैरपि" ।

पार्वत्याः "अक्षसूत्रं शिवं देवगणाध्यक्षं कमण्डलुम् । अग्निकुण्डद्वयं पार्श्वे पार्वती पर्वतोद्भवा" ।

महाकाल्याः विष्णुधर्मोत्तरात् "मा भिन्नाञ्जनसङ्काशा दंष्ट्राङ्कितवरानना । विशालनेत्रना नारी बभूव तनुमध्यमा । खड्ग, पात्र-शिरः खेटैरलङ्कृतचतुर्भुजा । कबन्धहारं शिरसा बिभ्राणां हि शिरःस्रजम्" ।

वारुणीचामुण्डायाः विष्णुधर्मोत्तरे "लम्बोदरी तु कर्त्तव्या रक्ताम्बरपयोधरा । शूलहस्ता महाभागा भुजप्रहरणा तथा । कार्पासकलुषा देवी वारुणी चातिसुन्दरी । दृढस्रक्षा च कर्त्तव्या बहुबाहुस्तथैव च । चामुण्डा कथिता चैव सर्वसत्त्वभयङ्करी" ।

शिवदूत्याः मत्स्यपुराणे "तथैवार्त्तसुखी शुष्का शुष्ककाया विशेषतः । बहुबाहुयुता देवी भुजगैः परिवेष्टिता । कपालमालिनी भीमा तथा खड्गाङ्कधारिणी । शिवदूती तु कर्त्तव्या शृगालवदना शुभा । कालीदासनसंस्थाना तथा राजंचतुर्भुजा । असृक्पात्रधरा देवी खड्गशूलधरा तथा । चतुर्थस्तु करस्तस्यास्तथाकार्यस्तु सामिषः"

कात्यायन्याः मयदीपिकायाम् "कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजं तथा । त्रयाणामपि देवानामनुकारानुकारिणीम् । जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणाम् । लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् । अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनाम् । नवयौवनसम्पन्नां सर्वाभरणभूषिताम् । सुचारुदर्शनां, तद्वत्पीनोन्नतपयोधराम् । त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम् । त्रिशूलं दक्षिणे दध्यात् खड्गञ्चक्रं तथैव च । तीक्ष्णबाणं तथा शक्तिं वामतो विनिबोधत । खेटकं पूर्णपात्रञ्च पाशमङ्कुशमेव च । घण्टाञ्च परशुञ्चापि चामरं सन्निवेशयेत् । अधस्तान्महिषं विद्याद्विशिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् । हृदि शूलेन निर्भिन्नं निर्यदन्त्र विभूषणम् । रक्तरक्तीकृताङ्गञ्च रक्तविस्तारितेक्षणम् । वेष्टितं नागपाशेन भृकुटीभीषणाननम् । सपाशवामहस्तेन धृतकेशञ्च दुर्गया । वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्" ।

अम्बिकायाः लक्षणसमुच्चये "सिंहारूढाम्बिका त्र्यक्षा भूषिता दर्पणोद्वहा" । (वामभुजे दर्पणोद्वहा दक्षिणे वरयुक्ता यदुक्तम् । "दक्षिणे तु करे प्रोक्तोवरः साधारणः सदा") खड्गखेटधरा द्वाभ्यां कर्तव्या च चतुर्भुजा" ।

योगेश्वर्याः "दशबाहुस्त्रिनेत्रा च शस्त्रशक्त्रसिद्धामरुम् । बिभ्रती दक्षिणे हस्ते वामे घण्टाञ्च खेटकम् । खट्वाङ्गञ्च त्रिशूलञ्च देवी योगेश्वरी मता" ।

भैरव्याः विश्वकर्मशास्त्रात् "एवंरूपा भवेदन्या पाशाङ्कुशयुतारुणा । भैरव्याख्या यदीष्टा तु भुजैर्द्वादशभिर्युता" ।

रम्भायाः देवीपुराणे "कमण्डलुञ्चसूत्रे च बिभ्रती वज्रमङ्कुशम् । गजासनस्थिता रम्भा सुरूपा सर्वकामदा" ।

शिवायाः "शिवा हयासना कार्या त्रिनेत्रा वरपाशिका । डमरूरगधारी च त्रिशूलाऽभयदायिका" ।

कीर्तेः "सुमध्याङ्कारयेत् कीर्तिं नीलोत्पलव्यवस्थिताम् । सर्वाभरणभूषाङ्गीं कलसोत्पलधारिणीम् । मदिरौदनगन्धाढ्या महार्घमणिभूषणा" ।

सिद्धेः "सिद्धिर्देवी प्रकर्तव्या सिद्धार्थकवरप्रदा । सितचन्दनगन्धाढ्या सितपङ्कजभूषिता । सितासनस्थिता देवी प्रतिहारोपशोभिता ।

ऋद्धेः "सुन्दरीङ्कारयेदृद्धिं पर्यङ्कासनसंस्थिताम् । दर्पणालोकसुरतां तिलकालकभूषिताम् । मालाचामरशोभाढ्यां वेणुवीणासदाप्रियाम्" ।

क्षमायाः "क्षमा तु सुसुखी कार्या योगपट्टोत्तरीयका । पद्मासनलताधारा वरदोद्यतपाणिका । शूलमेखलसंयुक्ता प्रशान्ता योगसंस्थिता" ।

वैष्णव्याः "सुसिद्धा वैष्णवी कार्या शङ्खचक्रगदाम्बुजा । वनमालालताबीडा पीतवस्त्रा सुशोभिता" ।

ऐन्द्र्याः "ऐन्द्री सुरवराध्यक्षा गजराजोपरिस्थिता । वज्राङ्कुशधरा देवी हारकेयूरभूषिता" ।

याम्यायाः "वैवस्वती प्रकर्तव्या दुर्द्धरा महिषोपरि । शूकराक्षा कपालेऽसृक् पिबन्ती दण्डधारिणी" ।

दीप्तेः "तेजोऽधिका प्रकर्तव्या दीप्तिश्चन्द्रासनस्थिता"।

रतेः "कमनीया रतिः कार्या वसनोज्ज्वलभूषणा। नृत्यमाना शुभा देवी समस्ताभरणैर्युता। वीणावादनशीला च मदकर्पूरचर्चिता। दण्डाक्षसूत्रधरा च व्रतस्थायोगसंस्थिता"।

श्वेतायाः "श्वेता पूर्णेन्दुसदृशा श्वेतपङ्कजसंस्थिता"।

भद्रायाः "भद्रा सुभद्रा कर्तव्या भद्रासनव्यवस्थिता। नीलोत्पलफलहस्ता शूलसूत्राक्षधारिणी"।

मङ्गलायाः "सिंहासनस्थिता देवी जटासुकुटमण्डिता। शूलाक्षसूत्रधरा च वरदाभयचापधृक्। दर्पणं शरखेटञ्च खड्गचन्द्रधरा शिवा। सुरूपा लक्षणोपेता सुस्तनी चारुहासिनी। सर्वाभरणभूषाङ्गी सर्वशोभासमन्विता"।

जयाविजययोः "जयाञ्च विजयां कुर्यात् शूलपद्माक्षधारिणीम्। वरोद्यताञ्च सिंहस्थां सर्वकर्मप्रसाधिनीम्"।

काल्याः "काली करालरूपा च चण्डपाशोद्यता भवेत्"।

घण्टाकर्ण्याः "घण्टाकर्णी प्रकर्तव्या घण्टात्रिशूलधारिणी"।

जयन्त्याः "जयन्ती सुन्दरी कार्या कुन्तशूलासिधारिणी। खेटकव्यग्रहस्ता च पूजनीया शुभान्वितैः"।

दितेः "दितिर्दैत्यनुता देवी सदा पूज्या महासने!। दण्डासनस्थिता भद्रा सर्वाभरणभूषिता। फलनीलोत्पलकरा चोत्सङ्गशिशुभूषिता"।

अरुन्धत्याः "अक्रोधाऽरुन्धती देवी सितवस्त्रा व्रतस्थिता। पत्रपुष्पोदककरा चन्दनेन सुचर्चिता"।

अपराजितायाः "अपराजिता च कर्तव्या सिंहारूढा महाबला। पिनाकेषुकरा चैव खड्गखेटकधारिणी। त्रिनेत्रेन्दुजटाभारा कृतवासुकिकङ्कणा"।

कौमार्याः "कौमारी चैव कर्तव्या मयूरासनशक्तिभृत्। त्रिदण्डीकालरूपा च रक्तमाल्या सकुक्कुटा"।

चतुःषष्टियोगिनीरूपाणि मयदीपिकायां

१अक्षोभ्यायाः "वज्रास्याऽभयभृद्याम्ये करे सा खेटभृत्ततः। हेमभूषणभूषा स्यादक्षोभ्या करिसंस्थिता"।

२कृष्णकर्ण्याः "कृष्णकर्णी तु गौराङ्गी कम्बुबाणाभयावहा। धनुःकपालभृत् सौम्ये कृष्णस्या तर्जनीस्थिता"।

३राक्षस्याः "राक्षसी हेमवर्णा स्याच्चारुगात्री दृढस्थिता। कुठाराशनिभृद्याम्ये वामे पाशाङ्कुशान्विता"।

४क्षपणायाः "क्षपणा चम्पकच्छाया दक्षिणे सृक्कराङ्कुशौ। कपालञ्च फलं सव्ये धत्ते कुक्षास्थिसंस्थिता"।

५जयायाः "जया कूर्मस्थिता गौरी जपस्था सा घटान्विता। वामे कपालपिण्डाभृत्सर्वालङ्कारभूषिता"। (जपस्था जपपरा)

६पिङ्गाक्ष्याः "पिङ्गाक्षी स्यादुदम्बुवर्णा त्रिनेत्रा च हृदयस्थिता। कौशेयपाशभृद्याम्ये वामे चाङ्कुशखेटिनी"।

७अजयायाः "अजया हेमवर्णा स्याच्चारुगात्री दृढस्थिता। कुठारखड्गभृद्याम्ये वामे पाशाङ्कुशान्विता"।

८क्षेमायाः "क्षेमा तु शबला पीता शक्तिभिन्दीधनुःकरा। याम्ये डमरुशूलेषुवस्त्रभृत् मृगसंस्थिता"।

९बालायाः "शक्तिखड्गधरा त्वच्छा खेटपाशकपालिनी। रक्ता वह्निस्थिता बाला क्रीडन्ती दहनैः सह"।

१०लीलायाः "लीला लीलावती रक्ता दक्षपाणिजयान्विता। बिभ्राणा पट्टिशम्पाशं वामे मस्तार्द्धमम्बुजम्"।

११जयायाः "हयारूढा जया रक्ता याम्ये दण्डासिधारिणी। कर्त्तरीकार्द्धभृद्वामे तर्जन्यासक्तसिक्थका"।

१२लोलायाः "कर्तरी मार्जनी याम्ये सौम्ये पीडनकङ्कते। शूलं रुरुयुतं धत्ते लोला तु खरगा सदा"।

१३लङ्कायाः "वामे लुलापमुण्डञ्च तत् पिबन्त्यसृक्रक्तिका। लङ्केशोरःस्थिता लङ्का खादन्ती पिशितङ्गनम्"।

१४लङ्केश्वर्याः "त्रिफलाशाकखेटोदामोदकाशी च दक्षिणे। शोणा लङ्केश्वरी कुम्भे डिम्बसुचौ बिभ्रती"।

१५लालसायाः "दक्षिणे वरदं चक्रं वामे कङ्कणकङ्कते। बिभ्राणा कोलगा रक्ता लालासृग्लालसा मता"।

१६विमलायाः "द्वीपिस्था विमला रक्ता त्वच्छालङ्कारभूषिता। कर्तरीकुम्भभृद्याम्ये वामे पाशकपालिनी"।

१७ऊताशनायाः "कृष्णा ऊताशनाजस्था ज्वालिनी दक्षिणे शुभा। वामे त्वभयहस्ता स्याद्विष्टराज्यघटान्विता"।

१८विशालाक्ष्याः "शूकरास्या विशालाक्षी त्रिसन्ध्यस्था सितेतरा। घण्टावाद्यधरा सौम्ये याम्ये कर्तरिकाभया"

१९ऊङ्कारायाः "ऊङ्कारा मीनवक्त्रा स्यात् मीनगा साक्षमालिनी। सुफलं बिभ्रती वामे सौम्ये तु फलपल्लवौ"।

२०बडवामुख्याः "अङ्काभ्यां बिभ्रती बालौ पर्यङ्के बडवामुखी। समतृस्कूर्मभृद्याम्ये कृष्णा नीलधरान्यतः"।

२१हाहारवायाः "तर्जन्यभयभृत्सौम्ये याम्ये दण्डकपालिनी। कृष्णा हाहारवा क्रूरा रासभस्या खरस्थिता"।

२२महाक्रूरायाः "लुलापास्या लुलापस्या महाक्रूरा सितेतरा। वामेऽस्याः पाशमालाञ्च दक्षिणे दण्डलेखनी"।

२३क्रोधनायाः "असिता क्रोधना याम्ये खादन्ती मांसमण्डकम्। वामे विद्युज्जिह्वा क्रूरा सव्ये सीरकपालिनी" चक्रस्याऽऽकण्ठमदिरां बिभ्रती जम्बुकस्थिता"।

२४भयाननायाः "कृष्णा भयानना गृध्रोदंष्ट्रोग्रास्त्रिविभूषणा। याम्ये स्यात् शिखरं शूलं घर्घरं लेलिहान्यतः"।

२५सर्वज्ञायाः "त्रिशूलपृष्ठभृद्वामे सुखड्गं डमरुकं शवम्। बिभ्राणा भाजनं हाभ्यां सर्वज्ञा प्रेतगाऽसिता"।

२६तरलायाः "जानुक्षिप्तौ करौ कृत्वा उद्यन्ती तरलायते। शूलडमरुहस्ता च गोधास्या तरलाऽसिता"।

२७तारायाः "तारा तारगुणैर्युक्ता कौशिकस्या सितेतरा। धत्ते शवार्द्धके सौम्ये शूलखट्वरमन्यतः"।

२८कृष्णायाः "कृष्णा पद्मस्थिता दत्ते ज्ञानमुद्राक्षमालिनी। ऋग्वेदं वामतो धत्ते पुस्तकञ्च कमण्डलुम्"।

२९हयाननायाः "रौद्रा कृष्णा तुरङ्गास्या कबन्धस्था हयानना। सुखड्गपूर्णधरा याम्ये सौम्ये संहारिकाङ्कभृत्"।

३०रससंग्राह्याः "छिन्नहस्ता शवारूढा सारा स्थूला जटाधरा। खट्वाङ्गं डमरुं सौम्ये शूलोत्कं बिभ्रती ततः। शवस्था रससंग्राही नृत्यन्ती जटिलाऽसिता। कुशूलान् चक्रकङ्कालान् बिभ्रती चर्मवासिनी"।

३१शबरायाः "सवेदनद्विजासक्ता वरिष्ठा शबराऽलिभा। वामे करोपधानासिधरा उल्काधरान्यतः"।

३२तालुजिह्विकायाः "स्फटिकाभा गरुत्मस्था सुकान्ता तालुजिह्विका। शङ्खखेटकहस्ताग्रा याम्ये स्वस्तिकखड्गभृत्"।

३३रक्ताक्ष्याः "रक्ताक्षी वाहमारूढा रक्तपाना शशिप्रभा। गदाखड्गधरा याम्ये वामे पाशकपालभृत्"। [दृश्यम्।

३४सुप्रसिद्धायारूपवाक्यं सुष्टितपुस्तके पतितं मयटीपिकायां

३५विद्युज्जिह्वायाः "विद्युज्जिह्वाऽसिता क्रूरा सव्ये सीरकपालिनी। चक्रस्था चक्रकर्तरीधारिणी दक्षिणे करे"।

३६करङ्किण्याः "प्राहस्था चामरच्छत्रभृद्दुतिद्वयसंयुता। कुम्भपाशधरा श्वेता क्रोधयुक्ता करङ्किणी"।

३७मेघनादायाः "मेघनादा तु चन्द्राभा खड्गखेटकधारिणी। जालैर्वृता घनारूढा तड़िन्मण्डलसन्निभा"।

३८प्रचण्डोग्रायाः "प्रचण्डोग्रा तु नक्रस्था याम्येऽस्याः कर्त्तरीफलम्। कपालं सुखड्गमन्यत्र शत्रुघ्नी स्फटिकप्रभा"।

३९कालकर्ण्याः "शुक्ला हंसासना रौद्रा बिभ्रत्यजाक्षसूत्रकम्। कालकर्णी जगत्ख्याता कर्णिकारविभूषणा"।

४०चन्द्रावल्याः "चन्द्रावली तु हेमाभा हेमसिंहासनस्थिता। याम्येऽक्षमाला मालाभृत् शेषेऽब्ज-ध्वजधारिणी"।

४१चन्द्रहासायाः "चन्द्रहासा स्थिता गौरी वेदास्या दोर्द्वयोः क्रमात्। कमण्डलुकुशग्रन्थ्या मन्त्रमालाक्षुचान्विता"।

४२वरप्रदायाः "कर्त्तरीमभयं याम्ये धत्ते श्वेता वरप्रदा। हंसदंशसमारूढा पूर्णपात्रधरान्यतः"।

४३प्रपञ्चिकायाः "फलस्रगन्विता याम्ये कुन्त-कुण्डीधरान्यतः। रौक्मिमाला प्रपञ्चास्या गौरी विश्वप्रपञ्चिका।

४४प्रलयान्तायाः "मकटस्था प्रलयान्ता बिभ्रती करयोर्द्वयोः। खादन्त्याम्रफलं कृष्टा गौराङ्गी यानराननां"।

४५शिशुवक्त्रायाः "शिशुवक्त्रा शृगालीढा पिङ्गाभा याम्यसौम्ययोः। भिन्दीपालकखेटाभ्यां पाशाभिभ्याञ्च संयुता।

४६पिशाच्याः "काकास्या श्येनगा गौरी पिशाची रक्तमण्डिता। कङ्काल-कर्त्तरीखड्गं बिभ्रती याम्यसौम्ययोः"।

४७पिशिताशायाः "फल-तूणधरा वामे सौम्ये-शस्त्रासिधारिणी। खड्गस्या नम्रुवर्णा स्यात् पिशिताशातिदुर्बला"।

४८लोलुपायाः "नृत्यन्ती लोलुपा पीना खरस्या याम्यसौम्ययोः। खड्गडमरुकर्त्तरीः पाशञ्चैव तु बिभ्रती"।

४९धमन्याः "धमनी पुष्पकस्था स्यात् गौरी यक्षगणान्विता। गदापट्टिशभृत्सौम्ये स्थूलतोमरिणी ततः"।

५०तपन्याः "तपनी सर्पगा गौरी वराङ्गी पद्मगानना। स्वकर्णयानयोर्भोगे न्यस्तहस्तोपरूपिणी"।

५१वामन्याः "पीता महाखुगा सा स्यात् वामनी बिभ्रती करे। कुठारं लगुडं वामेऽक्षमालां पनसन्ततः"।

५२विकृताननायाः "शूलभिन्नलुडापास्या सिंहारूढशरीरिणी। जिह्वे द्वे बिभ्रती चैव चतुर्दोर्विकृताननां"।

५३वायुवेगायाः "शङ्खपूरणिका द्वाभ्यां दृकामयधरा द्वयोः। द्विसिंहरथसंस्था स्यात्तालाभा वायुवेगिका"।

५४हृत्कुक्षेः "भासस्थिता हृत्कुक्षिः सौम्ये सुखड्गकपालभृत्। गौरी महातनुर्याम्ये कर्त्तरीपट्टिकाधरा"।

५५विकृतायाः "उष्ट्रस्था विकृता गौरी मयूरद्विकृताननां। तूणञ्च डमरुं याम्ये सौम्ये खड्गार्द्धमस्तकम्"।

५६विश्वरूपिकायाः "खेटक खड्भृद्वामे गदा-चक्रास्त्रभृत्ततः। वनमालावती पीता तार्क्ष्यस्था विश्वरूपिका"।

५७यमजिह्वायाः "सुसलं सुहरं याम्ये परशुम्बन्धनं ततः। बिभ्रती यमजिह्वा स्यात् कराला महिषस्थिता"।

५८जयन्त्याः "नृत्यन्ती खरगा श्वेता याम्ये डमरुतूणभृत्। सदैत्यशैलखण्डोग्रा जयन्ती यामहस्तयोः"।

५९दुर्जयायाः "आरूढा दुर्जया श्वेता रौद्री भूतगणाश्रिता। खड्गकुन्तोद्यतकरा दुर्गकाननवासिनी"।

६०यमान्तिकायाः "अक्षसूत्रं खेटिनी दोर्भ्यां चतुर्दोर्भ्यामसौम्ययोः। शूलबाणधरा याम्ये धनुःशक्तिकरान्यतः। शकटस्थातिघोराक्षा क्षीरवर्णा यमान्तिका"।

६१विडाल्याः "मार्ज्जारस्था विडाली च विडालाक्षी भवेत् सिता"।

६२रेवत्याः "वामे तूणञ्च खट्वाङ्गं शूलं टङ्कञ्च बिभ्रती। क्षया पिशाचवक्त्रोग्रा कपालस्था च रेवती"।

६३पूतनायाः "कुशूलयष्टिभृद्दामे भिन्दीपालकपालभृत्। कृष्णाभा पूतना तप्ता विकृताक्षा शवस्थिता"।

६४विजयन्तिकायाः "कर्त्तरीशूलभृद्याम्ये वामे सृक्कपालिनी। श्वेतवर्णा वृषारूढा विजया विजयप्रदा"।

ब्रह्मणः विष्णुधर्मोत्तरात् "ब्रह्माणं कारयेद्विद्वान् देवं सौम्यं चतुर्भुजम्। बद्धपद्मासनन्तुष्टं तथा कृष्णाजिनाम्बरम्। जटाधरं चतुर्बाहुं सप्तहंसरथस्थितम्। वामे न्यस्तेतरकरन्तस्यैकन्दोर्युगं भवेत्। एतस्मिन् दक्षिणे पाणावक्षमाला तथा शुभा। कमण्डलुं द्वितीये च सर्वाभरणधारिणम्। सर्वलक्षणयुक्तस्य शान्तिरूपस्य पार्थिव!। पद्मपत्रदलाभाभं ध्यानसंमीलितेक्षणम्। अर्च्चयाङ्कारयेदेवं चित्रे वा वास्तुकर्मणि"।

आदित्यपुराणे तु "पद्मपत्रासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः। सावित्री तस्य कर्तव्या वामोत्सङ्गगता तथा"।

प्रजापतेः "आदित्यवर्णं धर्मज्ञ! साक्षमालाकरं तथा। रूपं पूर्वोदितं कार्यं रूपमन्यज्जगत्पतेः"।

लोकपालब्रह्मणः "हंसयानेन कर्तव्यो न कार्यश्च चतुर्मुखः। ब्रह्माख्यमपरं रूपं सर्वकार्ये प्रजापतेः। अक्षसूत्रं पुस्तकञ्च धत्ते पद्मं कमण्डलुम्। चतुर्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे हिता"।

विश्वकर्मणः "विश्वकर्मा तु कर्तव्यः सुरसूत्रधरः प्रभुः। सन्दंशपाणिर्द्विभुजस्तेजोमूर्तिधरो महान्"।

धर्मस्य "चतुर्वक्त्रश्चतुष्पादश्चतुर्बाहुः सिताम्बरः। सर्वाभरणवान् श्वेतो धर्मः कार्यो विजानता। दक्षिणे चाक्षमाला च तस्य वामे च पुस्तकम्। मूर्तिमान् व्यवसायस्तु कार्यो दक्षिणभागतः। वामभागे ततः कार्यो वृषः परमरूपवान्। कार्यौ पद्मकरौ मूर्ध्नि विन्यस्तौ तु तथा तयोः"।

ऋग्वेदस्य विश्वकर्मशास्त्रात् "ऋग्वेदः श्वेतवर्णः स्यात् द्विभुजो राजभाननः। अक्षमालाधरः सौम्यः प्रीतश्चाध्ययनोद्यतः"।

सामवेदस्य "नीलोत्पलदलाभासः सामवेदो हयाननः। अक्षमालान्वितो दक्षे वामे कम्बूधरः स्मृतः"।

यजुर्वेदस्य "अजास्यः पीतवर्णः स्यात् यजुर्वेदोऽक्षसूत्रधृक्। वामे कुशिखपाणिस्तु भूतिदो मङ्गलप्रदः"।

अथर्ववेदस्य "आथर्वणाभिधो वेदो धवलो मर्कटाननः। अक्षसूत्रञ्च खट्वाङ्गं बिभ्राणोऽयं जयप्रियः"।

शिक्षायाः "शिक्षा शुभ्राभयकरा ज्ञानसङ्घान्विता शुभा। साक्षसूत्रा सकुण्डीका द्विभुजा दण्डपङ्कजा"।

कल्पस्य "कल्पस्तु कृष्णदाभासो वायसास्यो महोदरः। दण्डी कुण्डीधरोऽजस्यो मेखलाकुण्डलान्वितः"।

व्याकरणस्य "सितं व्याकरणं ज्ञेयं मयूरास्यं घटोदरम्। वीणाकलान्वितं दिव्यं दिव्यवस्त्रविभूषितम्"।

निरुक्तस्य "इन्दुवन्निर्मलं शान्तं वकवक्त्रं जयोदरम्। पाशपङ्कजहस्तं स्याच्छास्त्रं सपुस्तकम्। नरुक्तमिति निर्णीतं छन्दोनिर्णीयतेऽधुना"।

छन्दसः "जवाकुसुमसंकाशं छन्दो ज्ञेयं विपश्चिता। चमोरासङ्गपाशान्तु शक्तिं बिभ्रच्छिखान्विताम्। लोहकुण्डलकोपेतं प्रवालकृतकुण्डलम्"।

ज्योतिषस्य "ज्योतिषं तु विड़ालास्यमिन्द्रगोपनिभं शुभम्। अक्षसूत्रं कजं बिभ्रद्वस्तयोर्दक्षवामयोः"।

मीमांसायाः "सोमकान्तिसमाभासं मीमांसाशास्त्रसत्तमम्। अक्षसूत्रं दधद्दक्षे सुधापूर्णघटं करे"।

न्यायस्य "अतसीपुष्पसङ्काशो न्यायो ज्ञेयो विपश्चिता। सिंहास्यो दक्षिणे सूत्रं ध्वजं वामकरे दधत्"।

धर्मशास्त्रस्य "धर्मशास्त्रं सितं शान्तं चाश्ववक्त्रं कजासनम्। सुक्काजपाक्षभृद्दक्षे तथाहस्तन्तु वामतः"।

पुराणस्य "पुराणं चम्पकाभासं शुकवक्त्रं चतुर्दलम्। अक्षसूत्रं द्वये ज्ञेयं नानाभरणभूषितम्"।

इतिहासस्य "इतिहासः कजाभासः शूकरास्यो महोदरः। अक्षसूत्रं घटं बिभ्रत् पङ्कजाभरणान्वितः"।

धनुर्वेदस्य "पीतवर्णो धनुर्वेदः पिकवक्त्रो महातनुः। रत्नमालावलिं धत्ते मस्तके भूषिता जटा"।

आयुर्वेदस्य "आयुर्वेदो हरिद्राभो वानरास्यो विशालदृक्। अक्षसूत्रं सुधाकुम्भं बिभ्रदारोग्यदो भृशम्"।

नृत्यशास्त्रस्य "नृत्यशास्त्रं सितं रम्यं मृगवक्त्रं जटाधरम्। अक्षसूत्रं त्रिशूलञ्च बिभ्राणञ्च त्रिलोचनम्"।

पञ्चरात्रस्य "पञ्चरात्राभिधं शास्त्रं धवलं वृषभाननम्। अक्षसूत्रं हलं धत्ते वनमालाविभूषितम्"।

पाशुपतस्य "शास्त्रं पाशुपतं शुभ्रं व्याघ्रवक्त्रं जयोदरम्। स्रुक्पात्रधरं भीमं व्याघ्रचर्माम्बरावृतम्"।

पातञ्जलस्य "पातञ्जलाभिधं रक्तं सर्पवक्त्रं सुतेजसम्। अक्षस्रजं पृदाकुञ्च धारयन् कुण्डलान्वितम्"। (पृदाकुः सर्पः)।

साङ्ख्यस्य "साङ्ख्यं तत् कपिलं बभ्रुवक्त्रं सुज्वलतुन्दिलम्। जाप्यदण्डधरं दीर्घनखलोमजटाधरम्"।

अर्थशास्त्रस्य "अर्थशास्त्रं भवेद्गौरं सारिकावदनं शुभम्। अक्षस्रजं फलं बिभ्रदक्षहारं कमण्डलुम्"।

प्रसङ्गाद्देवादीनामधिदेवताः तत्रोक्ताः प्रदर्श्यन्ते विष्णुधर्मोत्तरात् "ऋग्वेदस्तु कृतो ब्रह्मा यजुर्वेदस्तु वासवः। सामवेदस्तथा विष्णुः शम्भुश्चाथर्वणो भवेत्। शिक्षा प्रजापतिर्ज्ञेयः कल्पो ब्रह्मा प्रकीर्तितः। सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः। छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः। मीमांसा भगवान् सोमो न्यायदेवः समीरणः। धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः। इतिहासः प्रजाध्यक्षो धनुर्वेदः शतक्रतुः। आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः। कलावेदो महीदेवी नृत्यशास्त्रं महेश्वरः। सङ्कर्षणः पञ्चरात्रं रुद्रः पाशुपतं तथा। पातञ्जलमनन्तश्च साङ्ख्यञ्च कपिलो मुनिः। अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्तितः। कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः। अन्यानि यानि शास्त्राणि यत् कर्माणि प्रचक्षते। स एव देवता तस्य शास्त्रं कार्यञ्च देववत्"।

ऋषीणाम् मयसंग्रहे "उदासीना सोपवीताः कमण्डल्वक्षस्रजिनः। जटिलाः श्मश्रुलाः शान्ताः आसीना ध्यानतत्पराः। सप्तर्षयो वसिष्ठश्च जीवा भार्यासमन्वितः। गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः। जमदग्निर्वसिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च। जटिलाः श्मश्रुलाः शान्ताः कृशा धमनिसन्ततः। कुसुम्भाक्षधराः कार्या मुनयो द्विभुजा दश"।

नारदस्य "नारदो देवगन्धर्वः साक्षस्रक्कमण्डलुः। सेव्यो वै वीणया वामभुजमूलोपगूढया"।

मुनीनाम् भविष्योत्तरात् "प्रकल्प्य काञ्चनं कृत्वा यथा शक्त्या तु शोभितम्। पुरुषाकृतिं प्रशान्तञ्च जटामण्डलधारिणम्। कमण्डलुकरं शिष्यैर्मृगैश्च परिवारितम्। मृत्युभुग्विषहन्तारं दर्भहस्तं वरं मुनिम्"।

भृगूणाम् "कर्तव्याः शक्ररूपेण भृगवो नाम देवताः। भुवनो भावनश्चैव सुजन्यः सुजनस्तथा। क्रतुः सुवः सुहुतांश व्रजश्च व्यसुनस्तथा। प्रसवश्चाव्ययश्चैव दक्षो द्वादशकस्तथा। भृगवो नामनिर्दिष्टा देवा द्वादश यज्ञियाः"।

अङ्गिरसः "जीवरूपेण कर्तव्या देवाश्चाङ्गिरसस्तथा। आत्मा ह्यायुर्मनो दक्षः परप्राणस्तथैव च। हविष्यश्च गविष्ठश्च ऋतः सत्यश्च तेजसः"।

विष्णोः विष्णुधर्मोत्तरात् "देवदेवं यथा विष्णुं कारयेद्रुद्रसंस्थितम्। कौस्तुभोद्भासितोरस्कं सर्वाभरणधारिणम्। सजलाम्बुदसच्छायं पीतदिव्याम्बरं तथा। सुखानि चास्य चत्वारि बाहवो द्विगुणास्तथा। सौम्येन्दुवदनं पूर्वं नारसिंहन्तु दक्षिणम्। कपिलं पश्चिमं वक्त्रं तथा वाराहसुत्तमम्। तस्य दक्षिणहस्तेषु वाणारिसुसलाभयम्। चर्मसीरवराविन्दुर्वामे च वनमालिनः। कार्याणि विष्णोर्द्विजेन्द्र! वामहस्तेष्वनुक्रमात्"। (अरि, चक्रं इन्दुः शङ्खः)।

लोकपालविष्णोः "एकवक्त्रो द्विबाहुश्च गदाचक्रधरः प्रभुः।

वासुदेवस्य "एकवक्त्रश्चतुर्बाहुः सौम्यरूपः सुदर्शनः। पीताम्बरश्च मेघाभः सर्वाभरणभूषितः। कण्ठेन शुभदेशेन कम्बुतुल्येन राजता। वराभरणयुक्तेन कुण्डलोत्तरभूषिणा। अङ्गदी बद्धकेयूरो वनमालाविभूषणः। उरसा कौस्तुभं बिभ्रत् किरीटं शिरसा तथा। शिरःपद्मस्तथैवास्य कर्तव्यश्चारुकर्णिकः। पुष्टिश्लिष्टायतभुजस्तनुस्तान्नतस्तान्नकुक्षिः। मध्येन त्रिवलीभङ्गशोभितेन सुचारुणा। स्त्रीरूपधारिणी चौणो कार्या तत्पादमध्यगा। तत्करस्थाङ्घ्रियुगला देवः कार्यो जनार्दनः। तालान्तरपदन्यासः किञ्चिन्निष्क्रान्तदक्षिणः। अनुदृश्या मही कार्या देवदर्शितविस्मिता। देवस्य कटिवासेन कार्यो जान्ववलम्बिना। वनमाला च कर्तव्या देवजान्ववलम्बिनी। यज्ञोपवीतं कर्तव्यं नाभिदेशसमागतम्। उत्फुल्लकमलं पाणौ कुर्याद्देवस्य दक्षिणे। वामभागगतं शङ्खं शङ्खाकारन्तु कारयेत्। दक्षिणे तु गदा देवी तनुमध्या सुलोचना। स्त्रीरूपधारिणी सुभ्रा सर्वाभरणभूषिता। पश्यन्ती देवदेवेशं कार्या चामरधारिणी। कुर्यात्तनूमूर्ध्नि विन्यस्तं देवहस्तन्तु दक्षिणम्। वामभागगतश्चक्रः कार्यो लम्बोदरस्तथा। सर्वाभरणसंयुक्तो वृत्तविष्कारितेक्षणः। कर्तव्यश्चामरकरो देवीक्षणतत्परः। कुर्यात् देवकरं वामं विन्यस्य तस्य मूर्ध्नि।

सङ्कर्षणस्य "वासुदेवसरूपेण कार्यः सङ्कर्षणः प्रभुः। स ढ

शुक्लवपुः कार्यो नीलवासा यदूत्तम ! । गदास्थाने च सुसलश्चक्रस्थाने च लाङ्गलम् । कर्त्तव्यौ तनुमध्यौ तु नटरूपौ रूपसंयुतौ" ।

प्रद्युम्नस्य "वासुदेवस्वरूपेण प्रद्युम्नश्च तथा भवेत् । स तु दूर्वाङ्कुरश्यामः सितवासा विधीयते । चक्रस्थाने भवेच्चापो गदास्थाने तथा शरः । तथाविधौ तौ कर्त्तव्यौ यथा सुसलाङ्कुशौ" ।

अनिरुद्धस्य "एतदेव तथा रूपमनिरुद्धस्य कारयेत् । पद्मपत्राभवपुषो रक्ताम्बरधरस्य तु । चक्रस्थाने भवेच्चर्म गदास्थानेऽसिरेव च । चर्म खाञ्चक्ररूपेण प्रांशुः खड्गो विधीयते । चक्रादीनां स्वरूपाणि किञ्चित्पूर्वं सदर्शयेत् । रथ्यागव्यायुधरूपाणि चक्रादीन्येव यादव ! । वामपार्श्वगताः कार्या देवानां प्रवराध्वजाः । सुपताकायुता राजन् ! यदिस्यात्ते यथेरितम्" ।

लक्ष्मीनारायणयोः विश्वकर्मशास्त्रात् "लक्ष्मीनारायणौ कार्यौ संयुक्तौ दिव्यरूपिणौ । दक्षिणस्या विभोर्मूर्त्तिर्लक्ष्मीमूर्तिस्तु वामतः । दक्षिणः कण्ठलग्नोऽस्या वामो हस्तः सरोजभृत् । विभोर्वामकरो लक्ष्म्याः कुक्षिभागस्थितः सदा । सर्वावयवसंपूर्णा सर्वालङ्कारभूषिता । सुचुनेत्रकपोलास्या रूपयौवनसंयुता । सिद्धिः कार्या समीपस्था चामरव्याहिणी शुभा । कर्तव्यं वाहनं सव्ये देवाधोभागगं सदा । शङ्खचक्रधरौ तस्य द्वौ कार्यौ पुरुषौ पुरः । वामनौ हारकेयूरकिरीटमणिभूषणौ । उपासकौ समीपस्थौ प्रभोर्ब्रह्मशिवात्मकौ । रथनां योगपट्टञ्च शिखामञ्जलिमास्थितौ" ।

योगेश्वरस्य सिद्धार्थसंहितायाम् "पद्मासनसमासीनः किञ्चिन्मीलितलोचनः । योगाग्रे दत्तदृष्टिश्च श्वेतपद्मोपरिस्थितः । वामदक्षिणगौ हस्तौ उत्तानावेकभागगौ । तत्करद्वयपार्श्वस्थे पङ्केरुहमहागदे । ऊर्द्ध्वे करद्वये तस्य पाञ्चजन्यः सुदर्शनः । योगस्वामी स विज्ञेयः पूज्यो मोक्षार्थियोगिभिः" । [तिमूर्त्तिशब्दे २८७८पृ० दर्शितानि चतुर्विंशतिमूर्त्तीनां लक्ष्माणि विष्णुधर्मोत्तरे उक्तानि चतुर्विंशहंसमत्स्यकूर्माणाम् "हंसोमत्स्यस्तथा कूर्मः कार्यास्तद्रूपधारिणः । पङ्खी मत्स्यस्तु कर्त्तव्यो देवदेवो जनार्दनः" ।

"वराहस्य "ऐश्वर्यसंनिरुद्धश्च वराहो भगवान् हरिः । ऐश्वर्यशक्त्या दंष्ट्राग्रसमुद्धृतवसुन्धरः । नटवराहोऽथ वा कार्यः शेषोपरिगतः प्रभुः । शेषश्चतुर्भुजः कार्यः चारुरत्नफणान्वितः । आश्चर्योत्फुल्लनयनो देवीलक्षणतत्परः । कर्त्तव्यौ सीरसुसलौ करयोस्तस्य यादव ! । सर्पभोगश्च कर्त्तव्यस्तथैव रविताञ्जलिः । आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान् भवेत् । वामारत्निगता तस्य योषिद्रूपा वसुन्धरा । नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा । यस्मिन् भुजे धरा देवी तत्र शङ्खकरो भवेत् । अन्ये तस्य कराः कार्याः पद्मचक्रगदाधराः । हिरण्याक्षशिरस्कृद्दचक्रोद्धृतकरोऽथ वा । स्मृतोद्धृतहिरण्याक्षः सुखो भगवान् भवेत् । मूर्त्तिमन्नमनैश्वर्यं हिरण्याक्षं विदुर्बुधाः । ऐश्वर्येणाविनाशेन स निरस्तोऽरिमर्दनः । नटवराहोऽथ वा कार्यो ध्याने कपिलवत् स्थितः । द्विभुजस्त्वथ वा कार्यः पिण्डनिर्वपनोद्यतः । समपक्रोडरूपेण बद्धदानवमध्यगः । नटवराहोवराहश्च कर्त्तव्यः क्ष्माविदारणः" ।

नरसिंहस्य "य एवं भगवान्विष्णुर्नरसिंहवपुर्द्धरः । ध्यानविधिः स एवोक्तः परमत्रानवर्द्धनः । पीनस्कन्धकटिग्रीवः क्षामध्यः क्षयोदरः । सिंहाननो नटदेहश्च नीलवासाः प्रभान्वितः । आलीढस्थानसंस्थानः सर्वाभरणभूषितः । ज्वालामालाकुलमुखो ज्वालाकेसरमण्डलः । हिरण्यकशिपोर्वक्षःपाटयन्नखरैः खरैः । नीलोत्पलाभः कर्तव्यो देवजानुगतस्तथा । हिरण्यकशिपुर्दैत्यस्तमत्रानं विदुर्बुधाः" ।

वामनस्य "कर्त्तव्यो वामनो देवः सङ्कटैर्गात्रपर्वभिः । पीनगात्रश्च कर्तव्यो दण्डो चाध्ययनोद्यतः । दूर्वाश्यामश्च कर्तव्यः कृष्णाजिनधरस्तथा" ।

त्रिविक्रमस्य "सजलाम्बुदसङ्काशस्तथा कार्यस्त्रिविक्रमः । दण्डपाशधरः कार्यः शङ्खचक्रगदाधरः । शङ्खचक्रगदापद्माः कार्यास्तस्य सरूपिणः । निर्देहास्ते न कर्तव्या शेषं कार्यन्तु पूर्ववत् । एकोर्द्ध्ववदनः कार्यो देवो विस्फारितेक्षणः" ।

परशुरामस्य "कार्यस्तु भार्गवो रामो जटामण्डलदुर्दृशः । हस्तेऽस्य परशुः कार्यः कृष्णाजिनधरस्य तु" ।

रामादीनाम् "रामो दाशरथिः कार्यो राजलक्षणलक्षितः । भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महायशाः । तथैव सर्वे कर्तव्याः किन्तु मौलिविवर्जिताः" ।

कृष्णस्य "कृष्णचक्रधरः कार्यो नीलोत्पलदलच्छविः । इन्दीवरधरा कार्या तस्य साक्षाद्व रुक्मिणी" ।

बलभद्रस्य "सीरपाणिर्बलः कार्यो सुसली चैव कुण्डली । श्वेतोऽतिनीलवसनो मदाघूर्णितलोचनः" ।

प्रद्युम्नस्य "चापबाणधरः कार्यः प्रद्युम्नश्च सुदर्शनः। राजद्विन्द्रमणिश्यामः श्वेतवासा मदोत्कटः"।

कामस्य "कामदेवस्तु कर्तव्यो रूपेणाप्रतिमो भुवि। अष्टबाहुः प्रकर्त्तव्यः शङ्खपद्मविभूषणः। चापबाणकरश्चैव मदादञ्चितलोचनः। रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोर्ध्वेला। चतस्रस्तस्य कर्त्तव्याः पत्न्यो रूपमनोहराः। चत्वारश्च करास्तस्य कार्या भार्यास्तनोपगाः। केतुश्च मकरः कार्यः पञ्चबाणसुखोमहान्"।

अनिरुद्धसाम्बयोः "कर्त्तव्यश्चानिरुद्धोऽपि खड्गचर्मधरः प्रभुः। साम्बः कार्यो गदाहस्तः सुरूपश्च विशेषतः। साम्बानिरुद्धौ कर्तव्यौ पद्माभौ रक्तवाससौ"।

देवक्याः "पद्मपत्राग्रगौराभा कर्तव्या देवकी तथा"।

यशोदायाः "मधूकपुष्पसच्छाया यशोदापि सदा भवेत्"।

गोपालस्य "गोपालप्रतिमां कुर्यात् वेणुवादनतत्पराम्। बर्हापीडां घनश्यामां द्विभुजामूर्ध्वसंस्थिताम्"।

बुद्धस्य "काषायवस्त्रसंवीतः स्कन्धसंसक्तचीवरः। पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्तितः"।

कल्किनः "खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः। म्लेच्छोच्छेदकरः कल्की द्विभुजः परिकीर्तितः"।

नरनारायणहरिकृष्णानाम् "दूर्वाश्यामो नरः कार्यो द्विभुजश्च महाबलः। नारायणश्चतुर्बाहुर्नीलोत्पलदलच्छविः। तयोर्मध्ये तु बदरी कार्या फलविभूषणा। बदर्यामवनौ कार्यावक्षमालाधरावुभौ। अष्टचक्रे स्थितौ याने मृतयुक्ते मनोरमे। कृष्णाजिनधरौ दान्तौ जटामण्डलधारिणौ। पादेन चैकेन रथस्थितेन पादेन चैकेन च जानुगेन। कार्यो हरिश्चात्र नरेण तुल्यः कृष्णोऽपि नारायणतुल्यमूर्तिः"।

हयग्रीवस्य "मूर्तिमान् पृथिवीहस्तन्यस्तपादः सितच्छविः। नीलाम्बरधरः कार्यो देवो हयशिरोधरः। विन्द्यात् सङ्कर्षणांशेन देवो हयशिरोधरः। कर्तव्योऽष्टभुजो देवः तत्करेषु चतुर्ष्वथ। शङ्खं चक्रं गदां पद्मं स्वाकारङ्कारयेद्बुधः। चत्वारश्च कराः कार्या वेदानां देहधारिणाम्। देवेन मूर्ध्नि विन्यस्ताः सर्वाभरणधारिणः"।

कपिलस्य "प्रद्युम्नं विद्धि वैराग्यात् कापिलीं तनुमास्थितः। मध्ये तु करकः कार्यस्तस्योत्सङ्गगतः परः। दोर्युगं चापरं तस्य शङ्खचक्रधरं भवेत्। पद्मासनोपविष्टश्च ध्यानसंमीलितेक्षणः। कर्तव्यः कपिलो देवो जटामण्डलमण्डितः। बाहुसंरोधपीनांसः पद्माङ्कचरणद्वयः। मृगाजिनधरो राजन्! शमस्त्रयज्ञोपवीतवान्। विभुर्मन्त्रमहापद्मकर्णिकासंस्थितः प्रभुः। वैराग्यभावेन महाद्भावो ध्यानस्थितः स्वमरमं पदन्तत्। ध्यायंस्तथास्ते भुवनस्य गोप्ता शाङ्ख्यप्रवक्ता पुरुषः पुराणः"।

व्यासस्य "कृशः कृष्णतनुर्व्यासः पिङ्गलोऽतिजटाधरः। सुमन्तुर्जैमिनिः पैलो वैशम्पायन एव च। तस्य शिष्याश्च कर्तव्याश्चत्वारः पारिशार्विकाः"।

वाल्मीकेः "गौरस्तु कार्यो वाल्मीकिस्तेजोमण्डलदुर्दृशः। तपस्यभिरतः शान्तो न कृशो न च पीवरः"।

दत्तात्रेयस्य "वाल्मीकिरूपं सकलं दत्तात्रेयस्य कारयेत्"।

धन्वन्तरेः "धन्वन्तरिः सुकर्तव्यः सुरूपः प्रियदर्शनः। करद्वयगतश्चास्य सामृतः कलसो भवेत्।

जलशायिनः "जलमध्यगतः कार्यः शेषपत्रगतल्पगः। फणापुञ्जमहारत्नदुर्निरीक्ष्यशिरोधरः। देवदेवस्तु कर्तव्यस्तत्र गुप्तश्चतुर्भुजः। तथापरश्च कर्तव्यः शेषभोगाङ्कसंस्थितः। एकपादोऽस्य कर्तव्यो लक्ष्म्यङ्कगतः प्रभोः। तथापरश्च कर्तव्यस्तत्र जानौ प्रसाधितः। कर्तव्यो नाभिदेशस्यस्तथा तस्यापरः करः। तथैवान्यः करः कार्यो देवस्य तु शिरोधरः। सन्तानमञ्जरीधारी तथैवास्यापरो भवेत्। नाभीसरसिजम्भूते कमले तस्य यादव!। सर्वपृथ्वीमयो देवः प्राग्वत्कार्यः पितामहः। नाभिलग्नौ च कर्तव्यौ पद्मस्य मधुकैटभौ। नरूपधारीणि भुजङ्गमस्य कार्याण्यस्त्राणि तथा समीपे। एतत्तवाग्रे यदुपुङ्गवोक्तं देवस्य रूपं परमस्य तस्य"।

गरुडस्य विष्णुधर्मोत्तरात् "तार्क्ष्यो मरकतप्रख्यः कौशिकाकारनासिकः। चतुर्भुजस्तु कर्तव्यो वृत्तनेत्रसुखस्तथा। स्थूलोरुजानुचरणः पक्षद्वयविभूषितः। प्रभासंस्थानसौवर्णकलापेन विराजितः। कृतान्तु पूर्णकुम्भञ्च करयोस्तस्य कारयेत्। करद्वयन्तु कर्तव्यं तथा विरचिताञ्जलि। यदास्य भगवान् पृष्ठे कृतकुम्भधरौ करौ। न कर्तव्यौ तु कर्तव्यौ देवपादधरौ शुभौ। किञ्चिन्नम्रोदरः कार्यः सर्वाभरणभूषितः"।

रुद्रस्य "देवदेवं महादेवं वृषारूढन्तु कारयेत्। तस्य वक्त्राणि कार्याणि पञ्च यादवनन्दन!। सर्वाणि सौम्यरूपाणि दक्षिणं विकटं सुखम्। कपालमालिकं भीमं जगत्संहारकारकम्। त्रिनेत्राणि तु सर्वाणि वदनं तूत्तरं विना। जटाकलापे महति तस्य चन्द्रकला भवेत्। तस्योपरि-

ष्टाङ्गदनं पञ्चमन्तु विधीयते। यज्ञोपवीतं च तथा वासुकिं तस्य कारयेत्। दशबाहुस्तथा कार्यो देवदेवो महेश्वरः। अक्षमालात्रिशूलञ्च चर्मदण्डमथोत्पलम्। तस्य दक्षिणहस्तेषु कर्तव्यानि महाभुज!। वामे च मातुलाङ्गञ्च चापादर्शं कमण्डलुम्। तथा चर्म च कर्तव्यं देवदेवस्य शूलिनः। वर्णस्तथास्य कर्तव्यश्चन्द्रांशु सदृशप्रभः"।

ईशानादीनाम् "ईशस्तत्पुरुषाघोरवामजातक्रमेण तु। सितपीतकृष्णरक्ताश्चतुर्वर्णाः प्रकीर्तिताः। पञ्चवक्त्राः स्मृताः सर्वे दशदोर्दण्डभूषिताः। खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः। वराभयकरोपेताः शूलपङ्कजपाणयः"। वामो, वामदेवः। जातः, सद्योजातः।

मूर्त्यष्टकस्य "शर्वो भीमो महादेवः रुद्रः पशुपतिर्भवः। उग्र ईशान इत्यष्टौ मूर्तयः शिवसन्निभाः। मृगाङ्कचूडामणयो जटामण्डलमण्डिताः। त्रिनेत्रा वरखट्वाङ्गत्रिशूलवरपाणयः"।

अर्द्धनारीश्वरस्य "अर्द्धं देवस्य नारी तु कर्तव्या शुभलक्षणा। अर्द्धन्तु पुरुषः कार्यः सर्वलक्षणभूषितः। ईश्वरार्द्धे जटाजूटं कर्तव्यं चन्द्रभूषितम्। उमार्द्धे तिलकं कुर्यात् सीमन्तमलकं तथा। भस्मोद्धूलितमर्द्धन्तु अर्द्धं कुङ्कुमभूषितम्। नागोपवीतिनं चार्द्धमर्द्धं हारविभूषितम्। वामार्द्धे तु स्तनं कुर्यात् घनं पीनं सुवर्त्तुलम्। उमार्द्धे तु प्रकर्तव्यं सुवस्त्रेण च वेष्टितम्। मेखलां दापयेत्तत्र वज्रवैदूर्यभूषिताम्। अर्द्धलिङ्गं महेशार्द्धं सर्पमेखलमण्डितम्। पादञ्च देवदेवस्य समपद्मोपरिस्थितम्। सालक्तकं स्मृतं वाममञ्जनेन विभूषितम्। त्रिशूलमक्षसूत्रञ्च भुजयोः सव्ययोः स्मृतम्। दर्पणञ्चोत्पलं कार्यं भुजयोरपसव्ययोः"।

दक्षिणामूर्तेः "दक्षेण सुद्रां प्रतिपादयन्तं सिताक्षसूत्रं च तथोर्द्धभागे। वामे च पुस्तामखिलागमाद्यां बिभ्राणमूर्द्धेन सुधाधरं च। सिताम्बुजस्थं सितवर्णमीशं सिताम्बरालेपनमिन्दुमौलिम्। ज्ञानं मुनिभ्यः प्रतिपादयन्तं तं दक्षिणामूर्तिमुदाहरन्ति"।

उमामहेश्वरयोः "युग्मं स्त्रीपुरुषं कार्यं उमेशौ दिव्यरूपिणौ। अष्टवक्त्रं तु देवेशं जटाचन्द्रार्द्धभूषितम्। द्विपाणिं द्विभुजां देवीं सुमध्यां सुपयोधराम्। वामपाणिन्तु देवस्य देव्याः स्कन्धे नियोजयेत्। दक्षिणन्तु करं शम्भोरुत्पलेन विभूषितम्। देव्यास्तु दक्षिणं पाणिं स्कन्धे देवस्य कल्पयेत्। वामपाणौ तथा देव्या दर्पणं दापयेच्छुभम्"।

हरिहरस्य "कार्यं हरिहरस्यापि दक्षिणार्द्धं सदा शिवः। वाममर्द्धं हृषीकेशः श्वेतनीलाकृतिः क्रमात्। वरत्रिशूलचक्राब्जधारिणो बाहवः क्रमात्। दक्षिणे वृषभः पार्श्वे वामभागे विहङ्गराडिति"।

विद्येश्वराणाम् विश्वकर्मशास्त्रात् "दिग्वर्णा जटिलाः सर्वाः शरत्रिशूलधारिणः। पुटाञ्जलिकराः सर्वे विश्वेशाश्चैकवक्त्रकाः। अनन्तश्च त्रिमूर्तिश्च सूक्ष्मः श्रीकण्ठ एव च। शिवः शिखण्ड्येकनेत्र एकरुद्रश्च ते क्रमात्"।

१रुद्रभेदानां तत्राजस्य "अथ रुद्रान् प्रवक्ष्यामि बाहुपोड्यकान्वितान्। अजनामा महारुद्रो धत्ते शूलमथाङ्कुशम्। कपालं डमरुं सर्पं सुद्गरञ्च सुदर्शनम्। अक्षसूत्रमथो दक्षे तथा वामे कराष्टके। तर्जनीमूर्द्ध्वतस्तत्र खट्वाङ्गन्तदधः करे। गदां च पट्टिशं घण्टां शक्तिपरशुकुण्डिकाः"।

२एकपादस्य "एकपादाभिधो विभ्रत् स्त्रेडादः स्राद्वहन् शरम्। चक्रं डमरुकं शूलं सुद्गरं तदधोवरम्। अक्षसूत्रमधो वामे खट्वाङ्गश्चोर्द्ध्वहस्तके। धनुर्घण्टां कपालञ्च कौसुदीं तर्जनीं घटम्। परशुञ्चक्रमाधत्ते क्रमाद् बाह्वष्टके त्विति। अनेकभोगसम्पत्तिं कुरुते यजनात् सदा"।

३अहिर्बुध्नस्य "अहिर्बुध्नो गदां चक्रं चासिं डमरुसुद्गरौ। शूलाङ्कुशाक्षमालाश्च दक्षोर्द्ध्वाधःकरैः क्रमात्। तोमरं पट्टिशं चर्म कपालं तर्जनीं घटम्। शक्तिं परशुकं वामे दक्षवद्धारयत्यसिम्"।

४विरूपाक्षस्य "विरूपाक्षस्ततः खड्गं शूलं डमरुकाङ्कुशौ। सर्पं चक्रं गदामक्षसूत्रं बिभ्रत् कराष्टके। खेटं खट्वाङ्गकं शक्तिं परशुं तर्जनीं घटम्। घण्टाकपोलकौ चेति वामोर्द्ध्वादिकराष्टके"।

५रेवतस्य "रेवतो दक्षिणे चापं खड्गशूलं गदामहिम्। चक्राङ्कुशाक्षमालास्तु धारयन्नूर्द्ध्वमादितः। भन्तुः खेटञ्च खट्वाङ्गं घण्टातर्जनिकां ततः। परशुं पट्टिशं पात्रं वामबाह्वष्टकेऽर्कवत्। सर्वसम्पत्करोत्येष जायते वाञ्छिताङ्कुशम्"।

६हरस्य "हराख्यो सुद्गरञ्चैव डमरुं शूलमङ्कुशम्। गदासर्पाक्षसूत्राणि धारयन् दक्षिणोर्द्ध्वतः। पट्टिशस्तोमरं शक्तिं परशुं तर्जनीं घटम्। खट्वाङ्गं पट्टिकाञ्चेति वामोर्द्ध्वादिक्रमेण तु"।

७बहुरूपस्य "बहुरूपोदधद्दण्डं डमरुञ्च सुदर्शनम्। सर्पं

शूलाङ्कुशौ चैव कौमुदीं जपमालिकाम्। घण्टाकपाल-खट्वाङ्गं तर्जनीं कुण्डिकां धनुः। परशुं पट्टिशं चैव वामोर्द्धादिकराष्टके"।

त्र्यम्बकस्य "त्र्यम्बकोऽपि दधच्चक्रं डमरुं सुदरं शरम्। शूलाङ्कुशाहिजाप्यञ्च दक्षोर्द्धादिक्रमेण हि। गदाखट्वाङ्गपात्राणि कार्मुकं तर्जनीवटी। परशुं पट्टिशं चेति वामोर्द्धादिकराष्टके"।

८सुरेश्वरस्य "सुरेश्वरोहि डमरुं चक्रं शूलाङ्कुशावपि। शरञ्च सुदरं चापं दक्षबाहुष्टके स्थिति। पङ्कजं परशुं घण्टां पट्टिशं तर्जनीं धनुः। खट्वाङ्गं कारयेत्पात्रं वामेऽष्टकरपल्लवे"।

१०जयन्तस्य "जयन्तो दशमो रुद्रोऽप्यङ्कुशं चक्रसुदरौ। शूलाहिडमरुं बाणमक्षसूत्रं यमे स्थिति। गदा-खट्वाङ्ग-परशुं कपालं शक्तिं तर्जनीम्। धनुः कुण्डी-मथोर्द्धादि वामबाहुष्टके दधत्"।

११अपराजितस्य "अथापराजितो दक्षे तोमरं खड्गमङ्कुशम्। शूलाहिचक्रडमरुमक्षमालां दधत् क्रमात्। शक्तिं खेटं गदां पात्रं तर्जनीं पट्टिशङ्कजम्। घण्टाखट्वरतथाथ धारयन्नूर्द्धमादितः। अजैकपाद्हिर्बुध्न्यः विरूपाक्षश्च रेवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः"।

स्कन्दस्य विष्णुधर्मोत्तरात् "कुमारः षण्मुखः कार्यः शिखण्डकविभूषणः। रक्ताम्बरधरः कार्यो मयूरवरवाहनः। कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः। पताका वैजयन्ती च शक्तिः कार्या च वामयोः"।

भैरवस्य "अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु। लम्बोदरन्तु कर्तव्यं वृत्तपिङ्गललोचनम्। दंष्ट्राकरालवदनं फुल्लनासापुटन्तथा। कपालमालिनं रौद्रं सर्वतः सर्पभूषणम्। व्याघ्रेन त्रासयन्तञ्च देवीं पर्वतनन्दिनीम्। सजलाम्बुदसङ्काशं गजचर्मोत्तरच्छदम्। बहुभिर्बाहुभिर्व्याप्तं सर्वायुधविभूषणम्। दहत् सालप्रतीकाशैस्तथा तीक्ष्णनखैः शुभैः। साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम्"।

महाकालस्य "महाकालस्य कथितमेतद्वै भैरवं सुखम्। देवीत्रासनकर्तास्य करे कार्यश्च पन्नगः। न चास्य पुरतः कार्या देवी पर्वतनन्दिनी। शुक्ला न कार्यास्य तथा न रक्ता समीपतो मातृगणप्रधाने। कार्यं तथा यत् परिवर्हमस्य गणाश्च कार्या बहुरूपरूपकाः"।

नन्दिनः "नन्दी कार्यस्त्रिनेत्रस्तु चतुर्बाहुर्महाभुजः। सिन्दूरारुणसङ्काशो व्याघ्रचर्मप्रच्छदः। त्रिशूलभिन्दिपालौ च करयोस्तस्य कारयेत्। शिरोगतं तृतीयन्तु तर्जयन्तं तथापरम्। आलोकयानं कर्तव्यं दूरादागमिनर्जनम्"।

वीरभद्रस्य "अनेनैव तु रूपेण वीरभद्रं विदुर्बुधाः"।

ज्वरस्य विश्वकर्मशास्त्रात् "ज्वरस्त्रिपादः कर्तव्यस्त्रिनेत्रैर्वदनैस्त्रिभिः। भस्मप्रहरणो रुद्रस्त्रिबाहुर्व्याकुलेक्षणः"।

१वसूनां विश्वकर्मशास्त्रात् तत्र धरस्य "अथातः संप्रवक्ष्यामि वसूरूपाणि ते जय!। पद्माक्ष-मालिके तस्य दक्षवामकरद्वये। सीरयष्टी दधानोऽयं धराख्यो वसुरादिमः।

२ध्रुवस्य "मालां पुष्करबीजोत्थां चक्रं शक्तिं कमण्डलुम्। दक्षाधरादिसिक्येन यस्य स्युः स ध्रुवो मतः"।

३सोमस्य "सुक्ताफललतामाला पङ्कजं शक्तिरङ्कुशः। स वसुः कीर्तितो वत्स सोमनामेति वै बुधैः"।

४आपस्य "सव्यवामोर्द्ध्वगौ यस्य करौ स्तः शक्तिसंयुतौ। सीराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः"।

५अनिलस्य "अक्षमालोपवीत्यूर्द्ध्वे ऋष्यिशक्तिकरावधः। यस्य स्तः सोऽनिलाख्यः स्याच्छुभदः पञ्चमो वसुः"।

६अनलस्य "स्रुवाक्षमालिके दक्षे वामे शक्तिकपालभृत्। सव्योर्द्धादिक्रमाद्द्वयोऽसौ अनलाख्यस्तु वसुः स्मृतः"।

७प्रत्यूषस्य "खट्वाङ्कुशधरः सव्ये शक्तिखेटकरोऽन्यतः। प्रत्यूषाख्यो वसुश्चायं सप्तमः परिकीर्तितः"।

८प्रभासस्य "सव्ये दण्डकपालोऽसौ वामे तु ऋष्यिशक्तिकः। शुभदः कीर्तितश्चायं प्रभासो-वसुरष्टमः। एते सर्वे समाख्याता नवकाञ्चनसन्निभाः। धरोध्रुवश्च सोमः स्यादापश्चैवानिलो नलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः"।

द्वादशादित्यानाम् "शृणु वत्स! प्रवक्ष्यामि सूर्यभेदांस्तु ते जय!। यावत् प्रकाशकः सूर्यो जायते मूर्तिभिर्यथा"।

१धातुः "दक्षिणे पौष्करी माला करे वामे कमण्डलुः। पद्माभ्यां शोभितकरा सा धात्री प्रथमा स्मृता"।

२मित्रस्य "शूलं वामकरे चास्याः दक्षिणे सोम एव च। मैत्री नाम त्रिनयना कुशेशयविभूषिता"।

३अर्यमणः "प्रथमे तु करे चक्रं तथा वामे च कौमुदी। मूर्तिरार्यमणी ज्ञेया सपद्मैः पाणिपल्लवैः"।

४रुद्रस्य "अक्षमाला करे सव्ये चक्रं वामे प्रतिष्ठितम्। सा मूर्त्तौ रौद्री ज्ञातव्या प्रधाना पद्मभूषिता"।

५वरुणस्य "चक्रं तु दक्षिणे यस्या वामे पाशः सुशोभनः। सा वारुणी भवेन्मूर्तिः पद्मव्यग्रकरद्वया"।

६सूर्यस्य "कमण्डलुर्दक्षिणतो माला चाक्षमयी भवेत्। सा भवेत् सम्मता सूर्यमूर्तिः पद्मविभूषिता"।

७भगस्य "यस्या दक्षिणतः शूलं वामहस्ते सुदर्शनः। भगमूर्तिः समाख्याता पद्महस्ता शुभा जय!"।

८विवस्वतः "अथ वामकरे माला त्रिशूलं दक्षिणे स्रुतम्। विवस्वन्मूर्तिरेषा स्यात् पद्मलाञ्छनलक्षिता"।

९पूष्णः "पूषाख्यस्य भवेन्मूर्त्तिर्द्विभुजा पद्मलाञ्छिता। सर्वपापहरा ज्ञेया सर्वलक्षणलक्षिता"।

१०सवितुः "दक्षिणे तु गदा यस्या वामे चैव सुदर्शनः। पद्मव्यग्रा तु सावित्री मूर्तिः सर्वार्थसाधनी"।

११त्वष्टुः "स्रुचं च दक्षिणे हस्ते वामे होमजकालिकाम्। मूर्तिस्त्वाष्ट्री भजेत् सा स्यात् पद्मरुद्रकरद्वया"।

१२विष्णोः "सुदर्शनकरा सव्ये पद्महस्ता तु वामतः। एषा स्यात् द्वादशी मूर्तिर्विष्णोरमिततेजसः। धाता मित्रोऽर्यमा रुद्रो वरुणः सूर्य एव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते"।

मरुताम् "अथातः संप्रवक्ष्यामि रूपाणि मरुतां तव"।

१ऋषभस्य "अक्षमालाम्बुजे दक्षे वामे कुण्डीध्वजान्वितः। ऋषभाख्यो भवेदेवं साधकानां सुसिद्धिदः"।

२सूर्यभस्य "चक्राक्षमालिकापात्रध्वजयुक् सूर्यनामभिः"।

३वायोः "कपालध्वजपाशाब्जधारको वायुनामकः"।

४मातरिश्वनः "मातरिश्वा कपालाब्जध्वजपात्रकरो मतः"।

५सदागतेः "ध्वजाक्षसूत्रपात्राब्जं बिभ्राणः स्यात्सदागतिः"।

६महाबलस्य "ध्वजासिखेटपात्राणि धारयंस्तु महाबलः"।

७बलवर्द्धनस्य "ध्वजपाशकपालाद्रिसंयुतो बलवर्द्धनः"।

८पृषदश्वस्य "पात्राक्षसूत्रपाशाब्जधारकः पृषदश्वकः"।

९गन्धर्वहस्य "अक्षसूत्रगदाकम्बुध्वजी गन्धर्वहाभिधः"।

१०गन्धवाहकस्य "कपालध्वजपात्राब्जहस्तको गन्धवाहकः"

११अनिलस्य "शालसुद्राक्षसूत्राब्जध्वजहस्तोऽनिलो मतः"।

१२आशुगस्य "अक्षमालासुनीलाब्ज-ध्वज-कम्बुधृगाशुगः"।

१३सुखस्य "ध्वजबाणधनुःकुण्डीकरयुक् सुखदो भवेत्"।

१४कर्करस्य "ध्वजाब्जपात्रसुद्राक्ष धारयेत् कर्कराभिधः"।

१५समीरणस्य "अक्षाक्षमालिकापात्रध्वजहस्तः समीरणः"।

१६समीरकस्य "ध्वजपात्रघनाब्जानि बिभ्राणस्तु समीरकः"।

१७अनुत्तमस्य "अक्षसूत्रध्वजाब्जानि सुखं बिभ्रत्यनुत्तमः।

१८मारुतस्य "अक्षमालाध्वजाब्जानि धारयन्मारुताभिधः"।

१९नागयोनिजस्य "पद्माक्षसूत्रपाशाब्जसंयुतो नागयोनिजः"।

२०जगत्प्राणस्य "ध्वजसुण्डाक्षपात्री स्याज्जगत्प्राणाभिधः स्मृतः"।

२१पवनस्य "ध्वजसूत्रसपाशाब्जसंयुतः पवनाभिधः"।

२२वातस्य "खट्वाङ्गध्वजखेटानि बिभ्राणो वातसंज्ञकः"।

२३प्रभञ्जनस्य "ध्वजाक्षसृगपात्राणि धारयंस्तु प्रभञ्जनः"।

२४पवस्य "अक्षसूत्रध्वजाब्जाहिपाणियुक् पवनामकः"।

२५नभस्वतः "शूलाब्जध्वजपात्राणि नभस्वानिति धारयन्"

२६अतिबलस्य "ध्वजाङ्कुशाक्षसुण्डानि बिभ्राणोऽतिबलो मतः"

२७तरस्विनः "सध्वजाम्बुजपात्राङ्कस्तरस्वी नाम कीर्त्तितः"।

२८द्रावणस्य "दण्डसुण्डध्वजाब्जानि धारयन् द्रावणो मतः"।

२९दैवयज्ञकस्य "ध्वजाक्षतर्जनीपात्रपाणियुग् देवयज्ञकः"।

३०गात्रजाहस्य "अक्षमालाकुठाराब्जध्वजयुग्गात्रजाहकः"।

३१अधरस्य "घण्टाक्षध्वजसुण्डानि धारयन्नधराभिधः"।

३२ऊर्द्ध्वदृशः "बोधिपद्मवसूत्राब्जध्वजहस्तः सदोर्द्ध्वदृक्"।

३३गतिरोधनस्य "अक्षसूत्रध्वजाशोकपात्रयुक् गतिरोधनः"।

३४पाणिकस्य "पाणिको नाम विज्ञेयो बाणाक्षध्वजसुण्डयुक्"।

३५साधकस्य "ध्वजाक्षवटपात्राणि धारयन् साधको मतः"।

३६विश्वपूरकस्य "बीजपूरध्वजाब्जाक्षसंयुतो विश्वपूरकः"।

३७जगदाश्रयस्य "घण्टाक्षध्वजमालाभिः संयुतो जगदाश्रयः"

३८विश्वातिरिक्तस्य "विश्वातिरिक्तको नाम ध्वजलाञ्छनपाशयुक्"

३९कुजागरस्य "अक्षमालाकजे घण्टाध्वजौ बिभ्रत् कुजागरः"

४०विश्वोदरस्य "विश्वोदरो भवेदेष शङ्खसूत्रघटध्वजी"।

४१अग्रहस्य "अग्रहो नाम विज्ञेयो ह्यक्षबाणधनुर्घटी"।

४२तीव्रकस्य "श्रीफलाक्षपात्राणि धारयंस्तीव्रको मतः"।

४३सुवहस्य "शक्तिसुण्डध्वजपाशी सुवहोऽयं प्रकीर्तितः"।

४४बीजवर्द्धनस्य "अक्षसूत्रध्वजपाशकपात्रयुक् बीजवर्द्धनः"।

४५भद्रजवस्य "ध्वजपाश-कपालाब्जैर्युतो भद्रजवो मतः"।

४६पुष्करोद्भवस्य "टङ्कपाश-ध्वजाब्जानि धारयन् पुष्करोद्भवः"।

४७अञ्जिनीपतेः "पलाशपत्रपाशाब्जध्वजहस्तोऽञ्जिनीपतिः"।

४८व्यक्तमूर्त्तेः "जम्बुबीज-ध्वजा-अक्षपाणियुग्व्यक्तमूर्तिकः"।

४९विश्वगस्य "परिघाक्षध्वजाब्जानि धारयन् विश्वगो मतः।

सर्वे चतुर्भुजा ज्ञेया युवानः कुटिलभ्रुवः। सव्योर्द्ध्वोत्तरोर्द्ध्वलक्रमेणायुधधारिणः। रक्ताक्षाश्च महावीर्याः सर्वभूषणभूषिताः। धूम्रवर्णा मृगारूढाः सर्वे ते शवनाशुकाः। इति तेऽत्र समाख्याता शुभदास्तु महद्गणाः। संख्यैकोनपञ्चाशत् सर्वरोगापनुत्तये"। स्कन्दपुरा०

साध्यानां ब्रह्माण्डपुराणे "साध्याः पद्मासनगताः कमण्डलुवस्त्रिणः। धर्मपुत्रा महात्मानो द्वादशामरपूजिताः"

विष्णुधर्मोत्तरे "मनोनुमन्ता प्राणश्च नरयानश्च वीर्यवान्। वित्तिर्हर्यो, नयश्चैव हंसो नारायणस्तथा। प्रभवो विष्णुविश्वश्च साध्या द्वादश जज्ञिरे"।

अश्विनोः "पद्मपत्रसवर्णाभौ पद्मपत्रसमाम्बरौ। द्विभुजौ देवभिषजौ कर्तव्यौ देहसंयुतौ। सर्वाभरणसम्पन्नौ विशेषाद्वारुलोचनौ। तयोरौषधयः कार्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तके कार्ये दर्शनीये तथा नृप!। एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव!। नारीयुगं प्रकर्तव्यं सुरूपञ्चारुदर्शनम्। तयोश्च नामनी प्रोक्ते रूपसम्पत् तथाकृतिः। मधूकपुष्पसङ्काशा रूपसम्पत् प्रकीर्तिता। व्याकृतिः कथिता लोके शरकाण्डनिभा तथा। रत्नभाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा"।

रेवन्तस्य "पृष्ठस्थः सूर्यवत् कार्यो रेवन्तश्च तथा प्रभुः"।

यक्षाणां मयसंग्रहे "तुन्दिला द्विभुजाः कार्या निधिर्हस्तो मदोत्कटः। गदी वैश्रवणः प्रेष्ठो रूपाक्षस्वष्टमो वरः। सिद्धार्थो मणिभद्रश्च सुमना नन्दनो यशाः। कण्डूतिः पाञ्चकः शङ्खो मणिमान् पद्मरामकौ। सर्वत्रभोजी पिङ्गाक्षश्चतुरो मन्दराश्रयः। शुभद्रचन्द्रप्रद्योतमेघवर्णजयावहाः। द्युतिमान् केतुमान् श्वेतोमौलिमान् विजयाकृतिः। पद्मवर्ण-महाघास-पुष्पदन्ताः सुदर्शनाः। पूर्णमास-हिरण्याक्ष-शतजिह्व बलाहकाः। बलाकविपुलौ पद्मनाभः कुसुदवीरकौ। सुगन्ध इत्यमी यक्षास्तेषां राजा धनाधिपः"।

राक्षसादीनां मयदीपिकायाम् "रक्तवस्त्रधराः कृष्णा नखदीर्घाः सदंष्ट्रिकाः। कर्त्तीखट्वाङ्गहस्ताश्च राक्षसा घोररूपिणः। हेतिः प्रहेतिः यज्ञघ्नः शङ्कुश्च सनिबन्धनः। विद्युत्सर्जमनुष्यादपौरुषेयसुकेशिनः। उग्रमालोत्कमो प्रोक्ताः प्रधाना राक्षसाः किल। भूतास्तथैव दानाश्च दीर्घवक्त्राः पिशाचकाः"।

गन्धर्वरूपमाह विश्वकर्मा "वरदो भक्तलोकानां किरीटी कुण्डली गदी। कार्यस्तु रूपी गन्धर्वो वीणावाद्यरतस्तथा"।

वासुकेस्तत्रैव "अनन्तो रक्तकायश्च सितपङ्कजमालिकः। शतसाहस्रभोगोऽहिः शिरःकुवलयान्वितः"।

तक्षकादिनागरूपमाह मयः "श्वेतदेहश्च कर्तव्यः स्फुरन्मौक्तिकसन्निभः। रक्ताङ्गः स्वस्तिकोपेतः सुतेजास्तक्षको महान्। कृष्णः कर्कोटक कण्ठे शुक्लरेखात्रयान्वितः। रक्तपद्मनिभः पद्मः शिरःशुक्लः सविद्रुमः। शङ्खवर्णो महापद्मो मस्तके कृष्णगुलक्। हेमाभः शङ्खपालः स्यात् सितरेखाधरो गले। कुलिको रक्तदेहस्तु चन्द्रार्द्धकृतमस्तकः। द्विजिह्वा वाङ्गवत्सप्तफणामणिसमन्विताः। अक्षस्त्रधराः सर्वे कुण्डिकापुच्छसंयुताः। एकभोगास्त्रिभोगाश्च ह्येतज्ज्ञाताः सुतादयः"।

पितॄणाम् विष्णुधर्मोत्तरे "क्रव्यपद्मविष्टरस्थाः पितरः पिण्डपातिनः"। ते च वायुपुराणोक्ता यथा

"आभास्वरा बर्हिषदो अग्निष्वात्तास्तथैव च। क्रव्यादाः सोमपाश्चैव आज्यपाश्च सुकालिनः"

विश्वदेवानाम् "क्रतुर्दक्षो वसुः सत्यः कालको धुरिलोचनौ। पुरूरवा माद्रवाश्च विश्वे देवा दश स्मृताः। विदेहास्तु प्रकर्तव्या दक्षिणे वाणपाणयः। कर्तव्या वामभागे तु शरासनपरायणाः"।

प्रसङ्गादस्त्ररूपाण्यपि तत्र विश्वकर्मोक्तानि यथा

"षड्त्रिंशदङ्गुले खड्गयष्टी तालाधिकौ मतौ। शूलपाशौ पद्मयष्टी तालमात्रौ प्रकीर्तितौ। गदा द्वितालो पाशश्च गोलकोऽष्टप्रमाणतः। बाणो द्वितालको दण्डो द्विगुणो द्वादशाङ्गुलः। कपालं षड्ङ्गं चर्म पार्श्वे खड्गोऽङ्गुलो मतः। डमरुस्तुल्यना घण्टा कुरिका षोडशाङ्गुला। वज्रं तत् पुरुषस्थूलं पट्टिशोऽतिदृढो बली। शक्तिस्तु योषिदाकारा लोहिताङ्गी दृकान्विता। दण्डोऽपि पुरुषः कृष्णो घोरो लोहितलोचनः। खड्गश्च पुरुषः श्यामशरीरः क्रुद्धलोचनः। पाशः सप्तफणः सर्पपुरुषः पुच्छसंयुतः। ध्वजस्तु पुरुषः पीतो व्याहृतास्यो महाबलः। गदा पीतप्रभा कन्या सुपीनजघनस्थला। त्रिशूलं पुरुषो दिव्यः सभ्रूः श्यामकलेवरः। शङ्खोऽपि पुरुषो दिव्यः शुक्लाङ्गः शुभलोचनः। हेतिर्बहुतिथी सा स्त्री भिन्दिः श्यामतनुः पुमान्। शरः स्यात् पुरुषो दिव्यो रक्ताङ्गो दिव्यलोचनः। भल्लः स्त्री पद्मरक्ताभा मूर्ध्नि पूरितचापभृत्। एवमस्त्राणि पूतानि जानीयात् परमेश्वरे। उक्तानां चैव सर्वेषां मूर्ध्नि स्वायुधलाञ्छनम्। भुजौ द्वौ तु प्रकर्तव्यौ स्कन्धलग्नौ सदा बुधैः।

धर्मज्ञानवैराग्यैश्वर्याणाम् "धर्मं ज्ञानं च वैराग्यमैश्वर्यं च तथैव हि। सितरक्तपीतकृष्णसिंहरूपाः प्रकीर्तिताः"।

पृथ्व्याः विष्णुधर्मोत्तरे "शुक्लवर्णा मही कार्या दिव्याभर-

भूषिता। चतुर्भुजा सौम्यवपुश्चन्द्रांशुसदृशाम्बराः। रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम्। पद्मं करे च कर्तव्यं भवो यादवनन्दन!। दिग्गजानां चतुर्णाञ्च कार्या पृष्ठगता तथा। सर्वौषधियुता देवी शुक्लवर्णा ततः स्मृता"।

लवणोदस्य "लवणोदः प्रकर्तव्यो द्विभुजः सर्वसिद्धये। धत्तेऽक्षमालिकां दक्षे वामे पात्रं तु रत्नभृत्। सोत्तरीयो पवंती च पाटलाभः सुवस्त्रधृक्। बर्हिःपवित्रपाणिस्तु लाभदो भूतिमण्डितः"।

क्षीरोदस्य "क्षीरोदः श्वेतवर्णस्तु द्विभुजो रत्नकुण्डलः। मकरस्थोऽम्बुजन्दक्षे वामे तु कलसं दधत्"।

दधिमण्डोदस्य "दधिमण्डोद एवात्र विज्ञेयो वारिजासनः। दण्डं शङ्खं च बिभ्राणो द्विभुजोऽसौ जटायुतः"।

घृतोदस्य "घृतोदः कपिलो ज्ञेयः कुलीरस्थो जटाधरः। कशेरुपीतं पात्रञ्च घटं बिभ्रत्तु दोर्द्वये"।

इक्षूदस्य "इक्षूदोऽत्र प्रकर्तव्यो गोमूत्रसदृशच्छविः। दर्दुरस्थो घटं दण्डं बिभ्राणो नीलकुण्डलः"।

सुरोदस्य "सुरोदो गण्डकान्तस्थो ज्ञेयो गोमेदसन्निभः। सुन्दरं कुण्डिकां बिभ्रत् द्विभुजो भूतिवर्द्धनः"।

स्वादूदस्य "स्वादूदो मौक्तिकाभासो दर्दुरस्थो सुवेशधृक्। सुक्तास्रवार्द्रपात्रे च धारयन् सर्पभूषणः। वैदूर्यसदृशाः सर्वे द्विभुजाः कलसान्विताः। पङ्कजस्थाः प्रकर्तव्याः देवतास्नपनाय तु"।

द्वीपादीनाम् विष्णुधर्मोत्तरात् "द्वीपवर्षनगाः सर्वे कामरूपधरा यतः। प्रेक्षायुधान्विताः कार्याः स्वस्वचिह्नधरा नराः"।

दिशाम् "पूर्वा१ गजगता बाला रक्तवर्णा तु दिग् भवेत्। पङ्कजस्था प्रतिज्ञेया करेणुकृतहस्तका। दृढवक्षा दृढत्काया पद्माभा पूर्वदक्षिणा२। रथस्था दक्षिणा३ पीता तथा स्यात् प्राप्तयौवना। उष्ट्रगा कृष्णपीता च तरुणी याम्यपश्चिमा४। यौवनाद्विच्युता कृष्णा पश्चिमा५ तुरगस्थिता। व्यासक्तपलिता नीला मृगगा तदनन्तरा६। श्वेता नरगता वृद्धा तथा भवति चोत्तरा७। अतिवृद्धा वृषस्था च शुक्ला पूर्वोत्तरा८ भवेत्। अधस्तात्तु पृथिवीतुल्या चोर्द्धा१० गगनसन्निभा"।

दिक्पतीनाम् तत्रेन्द्रस्य "चतुर्दन्ते गजे सक्तः श्वेतः कार्यः सुरेश्वरः। वामोत्सङ्गगता कार्या तस्य भार्या शची नृप!। नीलवस्त्रा सुवर्णाभा सर्वाभरणवांस्तथा। तिर्यग् ललाटकस्तार्क्ष्यः कर्तव्यश्च विभूषितः। शक्रश्चतुर्भुजः कार्यो द्विभुजा च तथा शची। पद्माङ्कुशौ च कर्तव्यौ वामदक्षिणहस्तयोः। वामं शचीपृष्ठगतं द्वितीयं वज्रसंयुतम्। वामे शच्याः करे कार्या रम्याः सन्तानमञ्जरी। दक्षिणं पृष्ठविन्यस्तं देवराजस्य कारयेत्"।

अग्नेः "रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम्। ज्वालामालाकुलं सौम्यं त्रिनेत्रं श्मश्रुधारिणम्। चतुर्बाहुं चतुर्दंष्ट्रं देवेशं वायुसारथिम्। चतुर्भिश्च शुकैर्युक्ते धूमचिह्नरथे स्थितम्। वामोत्सङ्गगता स्वाहा शक्रस्येव शची भवेत्। रक्तपात्रकरा देवी वह्नेर्दक्षिणहस्तयोः। ज्वालात्रिशूले कर्तव्ये त्वक्षमाल्यञ्च वामके"।

यमस्य "सजलाम्बुदसच्छायः तप्तजाम्बूनदाम्बरः। महिषस्थश्च कर्तव्यः सर्वाभरणवान् यमः। नीलोत्पलाभां धूम्रोर्णां वामोत्सङ्गे च कारयेत्। धूम्रोर्णा द्विभुजा कार्या यमः कार्यश्चतुर्भुजः। दण्डखड्गावुभौ कार्यौ यमदक्षिणहस्तयोः। ज्वाला त्रिशूला कर्तव्या त्वक्षमाला च वामके। दण्डोपरि मुखं कार्यं ज्वालामालाविभूषणम्। धूम्रोर्णादक्षिणो हस्तो यमपृष्ठगतो भवेत्। वामे तस्याः करे कार्यं भानुलाङ्कं सुदर्शनम्। पार्श्वे तु दक्षिणे तस्य चित्रगुप्तं तु कारयेत्। आपीच्यवेषं स्वाकारं द्विभुजं सौम्यदर्शनम्। दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत्। वामे पाशधरः कार्यः कालो विकटदर्शनः"।

निर्ऋतेः "विरूपाक्षो विदृत्तास्यः प्रांशुदंष्ट्रोज्ज्वलाननः। ऊर्द्ध्वकेशो खरस्थश्च द्विबाहुर्भीषणाननः। कर्णेन कृष्णरक्ताङ्गः कृष्णाम्बरधरस्तथा। सर्वाभरणवान् दंष्ट्रासङ्घैर्दण्डधरस्तथा। भार्यांश्चतस्रः कर्तव्या देवी च निर्ऋतिस्तथा। कृष्णाङ्गी कृष्णवदना पाशहस्ता तु वामतः"।

वरुणस्य "सप्तहंसे रथे कार्यो वरुणो यादसाम्पतिः। स्निग्धवैदूर्यसंकाशः श्वेताम्बरधरस्तथा। किञ्चित्प्रलम्बजठरो सुक्ताहारविभूषितः। सर्वाभरणवान् राजन्! महादेवश्चतुर्भुजः। वामभागगतं केतुं मकरं तस्य कारयेत्। कृतं तु सुषितं मूर्ध्नि भार्या सर्वाङ्गसुन्दरी। वामोत्सङ्गगता कार्या मध्ये तु द्विभुजा नृप!। उत्पलं कारयेत् वामे दक्षिणे देवपृष्ठगम्। पद्मपाशौ करे कार्यौ देवदक्षिणहस्तयोः। शङ्खञ्च रत्नपात्रञ्च वामयोस्तस्य कारयेत्। भागे तु दक्षिणे गङ्गा मकरस्था सचामरा। देवी पद्मकरा कार्या चन्द्रगौरी वरानना। वामे तु

यमुना कार्या कूर्मसंस्था सचामरा। नीलोत्पलकरा सौम्या नीलनीरजसन्निभाः"।

वायोः "वायुरम्बरवर्णस्तु तदाकाराम्बरो भवेत्। काष्ठपूरितचक्रस्तु द्विभुजो रूपसंयुतः। गमनेच्छुः शिवा भार्या तस्य कार्या च वामतः। कार्यौ गृहीतचक्राङ्कः कराभ्यां पवनो द्विजः। तथैव देवी कर्त्तव्या शिवा परमसुन्दरी। व्याहृतास्यस्तथा कार्यो देवोव्याकुलमूर्द्धजः"।

धनदस्य विष्णुधर्मोत्तरात् "कर्तव्यः पद्मपत्राभो वरदो नरवाहनः। चामीकराभो वरदः सर्वाभरणभूषितः। लम्बोदरश्चतुर्बाहुर्वामपिङ्गललोचनः। आपीच्यवेषः कवची हारभारी मनोहरः। द्वे च दंष्ट्रे सखे तस्य कर्तव्ये शस्त्रधारिणः। वामेन विभवा कार्या मौलिस्तस्यारिमर्दन!। वामोत्सङ्गगता कार्या ऋद्धिर्देवी वरप्रदा। देवपृष्ठगतं पाणिं द्विभुजायास्तु दक्षिणम्। रत्नपात्रधरं कुर्यात् वामं रिपुनिसूदन!। गदाशक्तौ च कर्तव्ये तस्य दक्षिणहस्तयोः। सिंहार्कलक्षणं केतुं, शिविकामपि पादयोः। शङ्खपद्मनिधी कार्यौ सरूपौ निधिसंस्थितौ। शङ्खपद्माङ्कविक्रान्तं वदनं तस्य पार्श्वयोः"

आकाशस्य "नीलोत्पलाभं गगनं तद्वर्णाम्बरधारि च। चन्द्रार्कहस्तं कर्तव्यं द्विभुजं सौम्यदर्शनम्"।

व्योम्नः "चतुरस्रं भवेन्मूलं ततो वृत्तं महाभुज। तत्तुल्यचतुरस्रञ्च मेरुवत् संस्थितं शुभम्। भद्रपीठमयः प्रोक्तो व्योमभागस्तृतीयकः। स्तम्भवच्चतुरस्रस्य मध्यभागः प्रकीर्तितः। भद्रपीठवदन्यच्च तत्र पद्मं निवेशयेत्। शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः। पत्राष्टके न्यसेत्तस्य दिक्पालान् सर्वतोदिशः"।

ध्रुवस्य "विष्णुरूपधरः कार्यो ध्रुवो ग्रहगणेश्वरः। चक्ररश्मिकरः श्रीमान् द्विभुजः सौम्यदर्शनः"।

रवेः मत्स्यपुराणात् "रविः कार्यः शुभश्मश्रुः सिन्दूरारुणसप्रभः। आपीच्यवेषः स्वाकारः सर्वाभरणभूषितः। चतुर्बाहुर्महातेजा कवचेनाभिसंवृतः। कर्तव्या रशना चास्य पानीयाङ्गेति संज्ञिताः। रश्मयस्तस्य कर्तव्या वामदक्षिणहस्तयोः। ऊर्द्ध्वं खड्गदामसंस्थाना सर्वपुष्पाचिता शुभा। स्वरूपरूपः स्वाकारो दण्डः कार्योऽस्य वामतः। दक्षिणे पिङ्गले भागे कर्तव्यश्चातिपिङ्गलः। आपीच्यवेषौ कर्तव्यौ तावुभावपि यादव!। तयोर्मध्ये च विन्यस्तौ करौ कार्यौ विभावसोः। लेखनीपत्रके कार्ये पिङ्गलश्चातिपिङ्गलः। चर्मस्थूलधरो देवस्तथा यत्नाद्विधीयते। सिंहो ध्वजश्च कर्तव्यस्तथा सूर्यस्य वामतः। चत्वारश्चास्य कर्तव्यास्तनयास्तस्य पार्श्वयोः। रेवन्तश्च यमश्चैव मनुहितयमेव च। ग्रहराजो रविः कार्यो ग्रहैर्वा परिवारितः। राज्ञी सवर्णा छाया च तथा देवी सुवर्चसा। चतस्रश्चास्य कर्तव्याः पत्रत्रश्च परिपार्श्वयोः। एकचक्रे च सप्ताश्वे षडश्वे वा रथोत्तरे। उपविष्टस्तु कर्तव्यो देवोऽरुणसारथिः"।

विष्णुधर्मोत्तरे तु "पद्मासनः पद्मकरः पद्मगर्भदलद्युतिः। सप्ताश्वरथसंस्थश्च द्विभुजश्च सदागतिः"।

चन्द्रस्य मत्स्यपुराणे "चन्द्रः श्वेतवपुः कार्यः श्वेताम्बरधरः प्रभुः। चतुर्बाहुर्महातेजाः सर्वाभरणभूषितः। कुमुदौ च सितौ कार्यौ तस्य देवस्य हस्तयोः। कान्तिर्मूर्त्तिमती कार्या तस्य पार्श्वे तु दक्षिणे। वामे शोभा तथा कार्या रूपेणाप्रतिमा भुवि। चिह्नं तथास्य सिंहाङ्कं वामपार्श्वेऽर्कवद्भवेत्! दशाश्वे च रथे कार्यौ द्विचक्रे वरसारथी"। विष्णुधर्मोत्तरे तु "श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी"।

भौमस्य मत्स्यपुराणात् "भौमोऽग्नितुल्यः कर्तव्यस्त्वष्टास्ये काञ्चने रथे"। विष्णुधर्मोत्तरे "रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः"।

बुधस्य "विष्णुतुल्यो बुधः कार्यो भौमतुल्ये तथा रथे"।

गुरोः "तप्तजाम्बूनदाकारो द्विभुजश्च बृहस्पतिः। पुस्तकं चाक्षमालाञ्च करयोस्तस्य कारयेत्। सर्वाभरणयुक्तश्च तथा पीताम्बरो गुरुः"।

शुक्रस्य "अष्टाश्वे काञ्चने दिव्ये रथे दृष्टिमनोरमे। शुक्रः श्वेतवपुः कार्यः श्वेताम्बरधरस्तथा। द्वौ करौ कथितौ तस्य निधिपुस्तकसंयुतौ। दशाश्वे वा रथे कार्यो राजते भृगुनन्दनः"।

शनेः "कृष्णवासास्तथा कृष्णः शनिः कार्योऽसिताननः। दण्डाक्षमालासंयुक्तः करद्वितयभूषणः। कार्ष्णायसे रथे कार्यस्तथैवाष्टतुरङ्गमे"।

राहोः "रौप्ये रथे तथाष्टाश्वे राहुः कार्यो विचक्षणैः। कम्बलं पुस्तकं कार्यं भुजेनैकेन संयुतम्। करमेकन्तु कुर्याच्च शस्त्रशून्यन्तु दक्षिणम्"।

केतोः "विश्वकर्मशास्त्रात् "भौमवच्च तथा रूपं केतोः कार्यं

विजानता। केवलं चास्य कर्तव्याः दश राजंस्तुरङ्गमाः"।
शुक्लपक्षस्य प्रतिपदः "तिथयोह्यधुनोच्यन्ते प्रतिपद् द्विभुजा-
रुणा। मेषगा शक्तिपात्रा सा भिन्नपक्षादिमा मता"।
द्वितीयायाः "द्वितीया हंसगा शुभ्रा पात्रपुस्तकधारिणी"।
तृतीयायाः "तृतीया वृषगा गौरी शूलपात्रधरा मता"।
चतुर्थ्याः "नीलोत्पलदलाभासा चतुर्थी मूषकस्थिता। परशुं
बिभ्रती पात्रं पीतवस्त्राऽहिसंयुता"।
पञ्चम्याः "पङ्कजस्था प्रवालाभा फणामस्तकभूषणा। शङ्खं
मुद्रां तथा पाशं बिभ्राणा पञ्चमी मता"।
षष्ठ्याः "मयूरगाऽरुणा षष्ठी पात्रकुक्कुटधारिणी"।
सप्तम्याः "ताम्रवर्णाब्जपात्रा सा हयस्था सप्तमी मता"।
अष्टम्याः "घण्टापात्रधरा गोस्था गोक्षीरधवलाऽष्टमी"।
नवम्याः "नवमी सिंहगा शुभ्रा पाशपात्रधरा शुभा"।
दशम्याः "कृष्णवर्णा लुलापस्था दशमी दण्डपात्रिणी"।
एकादश्याः "एकादशी मृगाजस्था तुला-कर्त्तरिकायुता।
सिंहाननाऽरुणगला-तुन्दिला लासिनी परा"।
द्वादश्याः "द्वादशी गरुड़ारूढा मेघवर्णारपात्रिणी" अरं, चक्रम्
त्रयोदश्याः "चापबाणधरा गौरी मकरस्था त्रयोदशी"।
चतुर्दश्याः "अजस्था पाटलाभा सा पलपात्रसुरामृता।
नीलकण्ठेन्द्रगोपाभलोचनेयं चतुर्दशी"।
पौर्णमास्याः "शशगा पूर्णिमा शुभ्रा मौक्तिकाभरणान्विता।
सुधापूर्णघटा धीर! वामदक्षिणबाहुका"।
कृष्णप्रतिपदः "धूसरा कृष्णपक्षाद्या मारसंस्था चतुर्मुखा।
अक्षस्रक् स्रुवं पुस्तीं पात्रं धत्ते चतुर्भुजा"। [खिडका"।
कृष्णद्वितीयायाः "द्वितीया कुसुदाभासा कृष्णस्था साक्षकु-
कृष्णतृतीयायाः "तृतीया तार्क्ष्यगा नीला शङ्खपात्रधरा
द्विदोः"। [धत्तेऽक्षमालिकां दण्डं पाशं पात्रञ्च दंष्ट्रिणी"।
कृष्णचतुर्थ्याः "चतुर्थी कज्जलाभा सा महिषस्था चतुर्भुजा।
कृष्णपञ्चम्याः "पाटस्था चन्द्रगौराभा पञ्चमी साक्षकुण्डिका"।
कृष्णषष्ठ्याः "तप्तची मयूरगा रक्ता शक्तिकुक्कुटधारिणी।
राकास्था द्विभुजा षष्ठी रक्तवस्त्रा सुभूषणा। नीलकुण्डल-
कण्ठा सा जटाखण्डेन्दुभूषिता"।
कृष्णसप्तम्याः "हंसस्था सप्तमी गौरी द्विभुजा वज्रपात्रिणी"।
कृष्णाष्टम्याः "प्रेतगा चाष्टमी रक्ता कृष्णग्रीवा सितांशुका।
अक्षं खड्गं तथा खेटं पात्रं धत्ते चतुर्भुजा"।
कृष्णनवम्याः "सर्पगा नवमी नीला दंष्ट्रिणी पात्रतर्जनी"।
कृष्णदशम्याः "सिंहासनस्थिता शुभ्रा दशमी पीतकुण्डला।
ज्ञानमुद्राक्षपात्रेयं पीतवस्त्राब्जमालिनी"।
कृष्णैकादश्याः "एकादशी वृषस्थाञ्जनीलशुभ्रारशूलिनी"।
कृष्णद्वादश्याः "ताम्रवर्णा रथारूढा पात्रखेटासिपङ्कजा।
द्वादशी शुभ्रवस्त्रेयं नीलकुण्डलभूषिता"।
कृष्णत्रयोदश्याः "अशोककलिकाबाणचापपात्रा त्रयोदशी।
मेचकाजासना श्यामा हरिदस्त्रा मदालसा। गदापात्र-
धरा गौरी निधिस्था वा त्रयोदशी"।
कृष्णचतुर्दश्याः "द्विभुजा तुरगारूढा कृष्णवर्णा चतुर्दशी।
खड्गमक्षधरा नीलकुण्डलांशुकभूषणा"।
अमावस्यायाः "अमावास्या विधातव्या द्विर्दोर्मरकतप्रभा।
दर्भासनस्थिता चेयं दर्भपिण्डधरा कृशा"।
नक्षत्राणाम् अश्विन्याः "अथ नक्षत्ररूपाणि कथयामि
समासतः। तत्रादावश्विनी ज्ञेया पद्मपत्रनिभा शुभा।
अश्ववक्त्राम्बुजारूढा द्विभुजा च सिताम्बरा। दक्षे
दिव्यौषधीपात्रं बिभ्रती पुस्तकं करे"।
भरण्याः "भरणी महिषारूढा गजवक्त्राञ्जनप्रभा। दण्ड-
पाशधरात्युग्रा रक्तदृक् परिकीर्तिता"।
कृत्तिकायाः "छागस्था छागवक्त्रास्या पिङ्गभ्रूकेशलोचना। स्रुवं
शक्तिञ्च बिभ्राणा पीनाङ्गजठराऽरुणा। कृत्तिका कीर्तिता
चेयं स्वर्णमालाविभूषणा"।
रोहिण्याः "रोहिणी तुहिनाभासा सर्पवक्त्रा तु हंसगा।
स्रुवकुण्डीधरा देवी कीर्तिता हारभूषणा"।
मृगशीर्षायाः "मृगानना हयास्या वा नागवक्त्राऽऽग्रहायणी।
गटप्रस्था चन्द्रगौराभकुण्डिकाजपमालिनी"।
आर्द्रायाः "शशमुखी कृष्णवर्णा तु रक्तार्द्रा शूलपाणिनी। नील-
वस्त्रा वृषारूढा चास्रिमालाविभूषणा"।
पुनर्वसोः "शूकरास्यो विडालस्यो गौरवर्णः पुनर्वसुः। स्रुव-
वज्राङ्कुशाभीतीर्बिभ्राणः परिकीर्तितः"।
पुष्यस्य "छागारूढश्च मेघाभः पुष्योऽयं मधुपिङ्गदृक्। अक्ष-
चण्डासनीकुण्डीं दधानोऽत्र चतुर्भुजः"।
अश्लेषायाः "कोकास्या वा विडालास्या रक्ताऽश्लेषा चतुर्भुजा।
अक्षकुण्डीधरा द्वाभ्यां सर्पाभिङ्गनधारिणी"।
मघायाः "कपिवक्त्रा मघा श्यामा कृशाङ्गी च मडोदरा।
दर्भपिण्डधराऽजस्था द्विभुजेयमुदीरिता"।
पूर्वफाल्गुन्याः "पूर्वा हस्तिमुखा स्रुक्स्था शुकनासाद्वयाऽ-
रुणा"। स्रुक्: खड्गः चक्रं वा।
उत्तरफाल्गुन्याः "व्याघ्राननोत्तरा गोस्था शुभ्रवर्णा चतुर्भुजा।
द्वग्रक्षिणी स्रुक्-खट्वाङ्गधारिणी परिकीर्तिता"।
हस्तस्य "गौरारुणो लुलापास्यो हस्तनामा हयस्थितः।

अक्षवज्रभुजद्वन्द्वो भूषितः परिकीर्तितः" । लुप्तापो महिषः

चितायाः "व्याघ्रास्या महिषारूढा चिता गौरी चतुर्भुजा । अक्षकुण्डी सपुत्री च सुधापूर्णघटान्विता" ।

स्वात्याः "महिषस्था मृगारूढा गौरी श्यामाथवा मता । पीना चतुर्भुजा स्वात्यक्षाङ्कुशध्वजपाणिनी" ।

विशाखायाः हर्यक्षवदना रक्ता नाभिपादान्तहेमभा । मेषच्छागस्थिता सेयं विशाखाङ्कुशवज्रिणी । वामे, शक्तिमधः पात्रं बिभ्राणा हेमभूषणा" ।

अनुराधायाः "हरिस्था च विडालास्या द्विभुजाम्बुजवज्रिणी । मूर्द्धादिनाभिपादान्तश्यामगौरी क्रमेण तु । अनुराधा परिज्ञेया पद्मरागविभूषणा" ।

ज्येष्ठायाः "पीतवर्णा गजारूढा भल्लास्या वा मृगानना । अक्षस्रजं पविम्बत्ते वामे ज्येष्ठाङ्कुशं शये" ।

मूलस्य "मूलरूपं विधातव्यं श्यामं कृष्णपवाहनम् । खड्गखेटधरं चोग्रं द्विभुजञ्च दृकाननम्" ।

पूर्वाषाढायाः "कुम्भीरवदना नीला मर्कटस्था चतुर्भुजा । अक्षस्रजं कजं पाशं पात्रं या बिभ्रती सदा । पूर्वाषाढा समुद्दिष्टा पीतवस्त्राङ्गभूषणा" ।

उत्तराषाढायाः "सर्पगा चोत्तराषाढा गौरवर्णा सुरूपिणी । नागबद्धजटाजूट-स्वर्णकुण्डलभूषिता । अक्षनागधरा दक्षे वामे पुत्री सकुण्डिका" ।

अभिजितः "अभिजित् कुसुदाभासा नक्रवक्त्रा तु हंसगा । वरस्रुक्पुस्तकाभीतिसंयुतेयं चतुर्भुजा" ।

श्रवणस्य "नीलरुक् तुरगारूढः प्रयणो मर्कटाननः । शङ्खचक्रगदाञ्जानि बिभ्राणः स्वर्णभूषणः" ।

धनिष्ठायाः "तप्तचामीकराभासा निषिस्था पङ्कजासना । पक्वबिम्बाधरा तन्वी पीनोन्नतपयोधरा । दीर्घवेणी सपुष्पा सा मौक्तिकाभरणान्विता । चारुनेत्रा सुवेषाढ्या द्विभुजा वसनारुणा । वराभयान्विता सौम्या धनिष्ठा परिकीर्तिता" ।

शततारायाः "शुभ्रा मकरगाऽशास्या द्विभुजा पाशपाणिनी । पाटला वस्त्रसंयुक्ता कीर्तिता शततारका" ।

पूर्वाभाद्रपदायाः "पूर्वा भाद्रपदा शुभ्रा गोवक्त्रा छागगामिनी । मेषशीर्षधरा सेयं सीधुपात्रञ्च बिभ्रती" ।

उत्तराभाद्रपदायाः "गर्दभास्या वृषारूढा सिता भाद्रपदोत्तरा । पात्रञ्च डमरुञ्चत्ते द्विभुजेयमुदीरिता" ।

रेवत्याः "रेवती करभास्या स्यात् द्विभुजा हस्तिगामिनी । कमलं कुण्डिकां धत्ते श्वेतवर्णा महास्वना" ।

योगानां विष्कुम्भस्य "विष्कुम्भः प्रथमो ज्ञेयः पीतवर्णस्तु षड्भुजः । रक्तास्यो नीलकण्ठस्तु वृत्तनेत्रः सुभीषणः । विशालभालो दीर्घाङ्गस्तुङ्गनासो जटाधरः । लम्बकर्णेन्द्रनीलोत्थखण्डरत्नजकुण्डलः । शुभ्रनीलेन्द्रगोपाभवसनः स्वर्णभूषणः । सुद्गरं प्रथमे दक्षे द्वितीये कर्त्तरीमिह । तृतीये कुलिशं पाणौ वामाद्ये टङ्कमेव च । श्वेतपुष्पं द्वितीये च तृतीये चामृतं घटम् । बिभ्राणः पूजनीयोऽयं पीतपुष्पैः सुगन्धिभिः । कार्यनिष्पत्तये नूनमन्यथा विघ्नदायकः" ।

प्रीतेः "प्रीतिनामा द्वितीयस्तु जवाकुसुमसन्निभः । श्वेतवस्त्रो विशालाक्षो लम्बकर्णेन्दुकुण्डलः । भालेऽलितिलकोपेतः सौम्यो शुक्लाविभूषणः । श्वेतवस्त्रो जटामौलिरष्टबाहुर्द्वकोदरः । बन्धुजीवोत्थपुष्पाङ्गमल्लिकामालिमे यमे । द्वितीये मोदकं पाणौ तृतीये कदलीफलम् । चतुर्थे वज्रजञ्चैव वामाद्ये चामृतं घटम् । द्वितीये चात्र वै पात्रं सोमपूर्णं मनोहरम् । तृतीये कुलिशं हस्ते चतुर्थे चात्र वैभ्रजम् । दधानो भूतये प्रीत्यै सर्वतापनिवृत्तये" ।

आयुष्मतः "आयुष्मांस्तु तृतीयोऽयं मौक्तिकाभोऽरुणोदरः । चोमवस्त्रान्वितश्चैव शुक्लासौवर्णभूषणः । दिग्भुजः प्रथमे दक्षे चाक्षस्रजञ्च मौक्तिकम् । दूर्वामत्र द्वितीये वै तृतीये चूतपल्लवम् । चतुर्थे पङ्कजञ्चैव पञ्चमे चातपत्रकम् । सुधाकुम्भन्तु वामाद्ये बीजपूरपिधानकम् । पात्रं दध्यक्षतोपेतं द्वितीये करपल्लवे । तृतीये श्रीफलं हस्ते चतुर्थे पविमेव च । पञ्चमे चामरं हस्ते स्वर्णदण्डं सितं शुभम् । धारयन्नेष वै पूज्यो भोगायुष्यविवृद्धये" ।

सौभाग्यस्य "सौभाग्याख्यश्चतुर्थोऽत्र स्फटिकाभस्त्रिलोचनः । स्कन्धारूढो महासत्वः सुन्दरः कुसुदाम्बरः । दशबाहुरयञ्चार्कौ (यमे)प्रथमे श्रीफलं करे । अक्षस्रजं प्रवालोत्थं द्वितीये करपल्लवे । तृतीये कमलं हस्ते चतुर्थे वाणवारकम् । पञ्चमे शक्तिमत्रैव वामाद्ये पात्रमेव च । द्वितीये चामृतं कुम्भं तृतीये तु प्रकीर्णकम् । चतुर्थे दर्पणं हस्ते वेणुदण्डञ्च पञ्चमे । बिभ्राणः सौम्य सौभाग्यवृद्धये चायुषे श्रिये" । (पूजनीय इति शेषः)

शोभनस्य "शोभनः पञ्चमो योगः श्वेतवस्त्रो वशी बली । शेषारुणः कृशाङ्गश्च प्रवालकृतकुण्डलः । शोणशुक्लाम्बरश्चैव शुक्लाविद्रुमभूषणः । अक्षस्रजं सुहेमोत्थं प्रथमे दक्षिणे करे । द्वितीये पङ्कजं हस्ते तृतीये श्रीफलं शये । तुर्ये शक्तिं कराम्भोजे वामाद्ये वै कमण्डलुम् ।

द्वितीये स्वर्णजं पात्रं तृतीये चैव दर्पणम्। चतुर्थे चामरं पाणौ धारयन्नष्टदोरिति। पूजनीयो महाभक्त्या सौख्यसौभाग्यवृद्धये"।

अतिगण्डस्य "अतिगण्डाभिधश्चाथ षष्ठो योगः प्रतीयते। गण्डारुणसितः क्रूरः कृष्णवस्त्रोऽर्कभूषणः। स्थूलो विद्रुमतिस्तुङ्गनासिकोऽरुणभूषणः। पिङ्गश्मश्रुजटामौलिः षड्भुजः कटिसूत्रवान्। अक्षसूत्रं यमादिस्थे लोहजं करपल्लवे। एणं मृगं द्वितीये च तृतीये चैव वारिजम्। पात्रं वामादिमे पाणौ द्वितीये शक्तिमेव च। पताकान्तु तृतीये वै दधानः कृष्णलोहिताम्। पूजनीयो महाभक्त्या दुष्टभीतिनिवृत्तये"।

सुकर्मणः "चतुर्भुजः सुकर्मा वै श्वेतबाहुदरद्युतिः। नीलशुभ्रांशुकोपेतः स्वर्णनीलविभूषणः। रुद्राक्षमालिकामार्कीं (यमे दक्षे) प्रथमे करपल्लवे। द्वितीये कमलं पाणौ वामादौ दण्डमेव च। पताकामत्र वै हस्ते द्वितीये सुमनोहरा। बिभ्रत्सुवृद्धये नृणां कर्मारम्भशुभप्रदः"।

धृतेः "धृत्याख्यश्चाष्टमो योगः कथ्यते वसुबाहुकः। भालारुणस्तु सर्वाङ्गे श्वेतवर्णोऽरुणाम्बरः। स्वर्णसक्तेन्द्रनीलाढ्यो विद्रुमान्वितभूषणः। भुक्ताक्षमालिकां दक्षे प्रथमे रत्नसङ्घिके। द्वितीये श्रीफलं पाणौ तृतीयेऽशोकपल्लवम्। चतुर्थे हेमजं दण्डं वामादौ वै कमण्डलुम्। द्वितीये चामृतं पात्रं तृतीये चाम्बुजं करे। पताकामत्र वै तुर्ये बिभ्राणः श्रीविवृद्धये"।

शूलस्य "नवमः शूलनामाथ कथ्यते व्यक्तभागतः। ताम्रारुणगलश्चैव श्वेतवर्णः कृशोदरः। भालरेखात्रयश्चैव त्रिजटो नीलकुन्तलः। अर्कहस्तो यमादिस्थे त्रिशूलं चातिभीषणम्। द्वितीये सुदरं पाणौ तृतीये चाक्षसूत्रकम्। चतुर्थे शङ्खलामत्र पञ्चमे दण्डमेव च। षष्ठे चैवाम्बुजं पाणौ कपालं चोत्तरादिमे। टङ्कं द्वितीयके चैव तृतीये वै कमण्डलुम्। सन्दंशन्तु करे तुर्ये पञ्चमे चैव दर्पणम्। पताकामत्र वै षष्ठे धारयन्नेष पूजितः। भवेदनिष्टनाशाय वैरिविध्वंसये नृणाम्"।

गण्डस्य "गण्डाख्यः कथ्यते योगो दशमः सोऽयमत्र हि। गण्डः शुभारुणाङ्गस्तु षड्भुजो मेघकाम्बरः। हरिन्मणिविभूषाढ्यो नीलविद्रुमकुण्डलः। अक्षसूत्रं यमादिस्थे द्वितीये चन्द्रहासकम्। तृतीये वारिजं नीलं वामादौ वै कमण्डलुम्। द्वितीये खेटकं हस्ते पताकाञ्च तृतीयके। दधानो यज्वनस्तुष्ट्यै रोगानिष्टनिवृत्तये"।

वृद्धेः "एकादशस्तु वृद्धाख्यः कथ्यते १६रसचन्द्रदोः। पादारुणोऽपरश्वेतो भालविस्तीर्णमण्डलः। विचित्रवसनोपेतो सुक्तासौवर्णभूषणः। अक्षसूत्रं यमादिस्थे द्वितीये चामृतं घटम्। तृतीये नन्दकं पाणौ चतुर्थे बाणमेव च। पञ्चमे सुदरञ्चैव षष्ठे सन्दंशमेव च। सप्तमे कम्बुमत्रैव पङ्कजञ्चाष्टमे शये। कुण्डिकामादिमे वामे द्वितीये पात्रमेव च। तृतीये खेटकं हस्ते चतुर्थे चैव कार्मुकम्। पञ्चमे टङ्कमत्रैव षष्ठे चैणविषाणकम्। सप्तमे चापमत्रैव पताकामष्टमे करे। बिभ्राणः श्रेयसो वृद्ध्यै चायुर्गौरवधनस्य च"।

ध्रुवस्य "द्वादशो ध्रुवनामा वै योगश्चात्रैव कथ्यते। वक्षःस्थलारुणश्चैव श्वेतसर्वाङ्ग एव च। माञ्जिष्ठवसनोपेतो हेमसुक्ताविभूषणः। चतुर्दशभुजोपेतो दक्षिणाद्येऽक्षसूत्रकम्। द्वितीये तु कलं खड्गं तृतीये चैव सुदरम्। चतुर्थे सायकं हस्ते पञ्चमे चैव पङ्कजम्। षष्ठे मनोहरं शङ्खं सप्तमे चामरं शये। पात्रं सौम्यादिमे पाणौ द्वितीये चैव खेटकम्। टङ्कं तृतीयके हस्ते चतुर्थे चैव कार्मुकम्। पताकामत्र वै हस्ते पञ्चमे वरलक्षणे। षष्ठे मनोहरादर्शं सप्तमे चक्रमादधत्। पूजनीयो महाभक्त्या लक्ष्मीस्थैर्यादिहेतवे"।

व्याघातस्य "कथ्यते चाधुना योगो व्याघाताख्यस्तयोदशः। नाभ्यूर्द्ध लोहितश्चायं श्वेतपूर्वस्त्रिलोचनः। अन्तश्वेतारुणप्रान्तवसनः सूर्यकुण्डलः। गले स्फटिकमालोऽसौ शेषरुद्राक्षभूषणः। मणिबन्धेऽलिवर्णस्तु षड्भुजः कुटिलाननः। पङ्कजं प्रथमे दक्षे द्वितीये परशुं शये। तृतीये चात्र वै पाशं वामे पात्रमिहादिमे। द्वितीये चामृतं कुम्भं तृतीये चाङ्कुशं शये। बिभ्राणोऽयं महापूज्यः कार्यभ्रंशनिवृत्तये"।

हर्षणस्य "अधुना कथ्यते योगो हर्षणाख्यश्चतुर्दशः। जानूर्द्ध लोहितश्चायं ततपूर्वं श्वेतएव च। पाटलाभांशुकोपेतो सुक्तावैदूर्यभूषणः। भुजद्वादशकोपेतो लम्बकर्णो विशालदृक्। कौस्तुभं प्रथमे दक्षे द्वितीये चाक्षसूत्रकम्। तृतीये पङ्कजं हस्ते चतुर्थे बाणमेव च। पञ्चमे शङ्खमत्रैव षष्ठे पाशं कराम्बुजे। वामादिमे करे पात्रं द्वितीये चामृतं घटम्। तृतीये परशुं हस्ते चतुर्थे चैव कार्मुकम्। पञ्चमे तु करे चक्रं षष्ठे चैवाङ्कुशं शये। बिभ्राणः श्रेयसे भूत्यै मानोन्नत्यै सुखाय च"।

वज्रस्य "अथ पञ्चदशो योगः कथ्यते वज्रसञ्ज्ञकः। श्वेताहि-

काञ्चीं बिभ्राणः कृष्णग्रीवोऽरुणाननः। रोचनावसनोपेतो विद्रुमकर्णस्त्रिलोचनः। वज्रवैदूर्यभूषाढ्यः कटिसूत्रसमन्वितः। जटां त्रिवलयां बिभ्रत् दिग्भुजः परितो बली। अक्षसूत्रं यमादिस्थे द्वितीये बाणमेव च। तृतीये पङ्कजं हस्ते चतुर्थे कुलिशं भये। पञ्चमे परशुं पाणौ वामाद्ये चामृतं घटम्। द्वितीये कार्मुकं चैव तृतीये पात्रमुत्तमम्। चतुर्थे कुलिशं चैव पञ्चमे पाशमेव च। बिभ्रद्विजयसौख्याय लक्ष्मीसन्तानवृद्धये"।

सिद्धेः "कथ्यते चाधुना योगः सिद्धिनामा तु षोडशः। पादजङ्घारुणश्वेतः श्वेतवर्णः शुभाननः। दिग्भुजो लोहितग्रीवो लोहितनिहिताम्बरः। शुक्लाहारमणिस्वर्णभूषणः सोनकुण्डलः। श्रीफलं प्रथमे दक्षे द्वितीये चैव पङ्कजम्। तृतीये पुस्तकं हस्ते चतुर्थे बाणमेव च। पञ्चमे च ध्वजं हस्ते वामे पात्रमिहादिमे। द्वितीये चामृतं कुम्भं तृतीये चैव चामरम्। चतुर्थे चैव कोदण्डं पताकामिह पञ्चमे। दधानः सिद्धये नृणां वाञ्छितार्थस्य सिद्धिदः"। (अस्यासृगित्यपरनाम)

व्यतीपातस्य "व्यतीपाताभिधश्चैव योगः सप्तदशस्त्विह। कण्ठेन लोहितश्यामं श्वेतग्रीवोऽलिमाननः। शुद्धमाञ्जिष्ठवसनो नीलस्वर्णजभूषणः। अष्टादशभुजो देवो भ्रुकुटीकुटिलाननः। दात्रमाक्ष्यादिमे हस्ते द्वितीये लोष्टभेदनम्। अक्षसूत्रं तृतीये तु तुर्ये बाणं मनोहरम्। पञ्चमे शृङ्खलां लौहीं षष्ठे कवचमेव च। सप्तमे मुद्गरं हस्ते पङ्कजं चाष्टमे करे। कुद्दालं नवमे हस्ते शृङ्गिकामादिमोत्तरे। पात्रं द्वितीयके चैव स्वर्णकुम्भं तृतीयके। चतुर्थे कार्मुकं पाणौ पञ्चमे कर्त्रिकामिह। समलन्तु करे षष्ठे सप्तमे टङ्कमेव च। अष्टमे च ध्वजं हस्ते नवमे प्राङ्कुटं भये। दधानो वैरिवर्गस्य ध्वस्तये चैव मृत्यवे। यजन्तः पुत्रसन्त्यै लक्ष्मीभोगसुखाय च

वरीयसः "अष्टादशो वरीयांश्च कथ्यते योग उत्तमः। आकण्ठशुभ्रवर्णस्तु लोहितग्रीव एव च। श्वेतवक्त्रो विशालाक्षो लम्बकर्णोऽर्ककुण्डलः। स्वर्णाभरणभूषाढ्यो लक्षणानेकसंयुतः। अक्षसूत्रं यमादिस्थे द्वितीये बीजपूरकम्। चन्द्रहासं तृतीये तु तुर्ये बाणं कराम्बुजे। पञ्चमे शङ्खमत्रैव षष्ठे परशुमेव च। सप्तमे मुद्गरं हस्ते चाष्टमे दात्रमेव च। नवमे चात्र वै शृङ्गं दशमे कलशं करे। एकादशे पविश्चात्र द्वादशे हलमेव च। दण्डं त्रयोदशे हस्ते शक्तिमस्त्रं चतुर्दशे। कजं पञ्चदशे हस्ते षोडशेऽथ त्रिशूलकम्। घटं वामादिमे पाणौ पात्रमत्र द्वितीयके। तृतीये खेटकश्चैव तुर्ये कार्मुकमेव च। चक्रन्तु पञ्चमे हस्ते षष्ठे चैव कुठारकम्। सप्तमे टङ्कमत्रैव चामरश्चाष्टमे भये। नवमे डमरुश्चैव दशमे चात्र वल्लकीम्। एकादशे शृणिश्चैव द्वादशे मुसलं भये। त्रयोदशे तु वै पाशं गदामत्र चतुर्दशे। दर्पणं तिथिमे हस्ते ध्वजमत्रैव षोडशे। दधानः श्रेयसे भूत्यै सर्वभोगसुखाय च"।

परिघस्य "एकोनविंशकश्चात्र कथ्यते परिघोऽनघ!। पादजानुनखोऽसौ शुक्लवक्त्रो जटाधरः। मध्यारुणोदरे नीलरेखासंयुत एव च। नीलाम्बरो महासत्वो हेमरत्नजकुण्डलः। सुवर्णभूषणोपेतो षड्भुजः क्रूरदर्शनः। गदामाक्ष्यादिमे हस्ते द्वितीये परिघं भये। तृतीये कमलं पाणौ वामाद्ये पात्रमेव च। द्वितीये पट्टिशं हस्ते तृतीये चात्र वै ध्वजम्। बिभ्राणः शत्रुनाशाय दुष्टभीतिनिवृत्तये"।

शिवस्य "अथ विंशतिमो योगः शिवाख्यश्चात्र कथ्यते। शुभ्रवर्णस्त्रिनेत्रस्तु मौक्तिकाभरणान्वितः। दक्षिणे प्रथमे हस्ते बीजपूरं मनोहरम्। अक्षसूत्रं द्वितीये च तृतीये कम्बुमेव च। चतुर्थे सायकं हस्ते पञ्चमे चन्द्रहासकम्। सद्गुरश्च करे षष्ठे सप्तमे परशुं भये। कुद्दालमष्टमे पाणौ नवमे दात्रमेव च। दशमे चात्र वै शृङ्गं पविमेकादशे त्विह। द्वादशे पञ्चशाखां वै लोष्टभेदनमेव च। त्रयोदशे हलञ्चैव शक्तिमस्त्रं चतुर्दशे। करे पञ्चदशे दण्डं षोडशे चाम्बुजं त्विह। त्रिशूलं शनिचन्द्रे(१७) च वसुचन्द्रे(१८) च तोमरम्। वामादिमे भये पात्रं द्वितीये चामृतं घटम्। तृतीये चक्रमत्रैव चतुर्थे वै शरासनम्। पञ्चमे खेटकं हस्ते षष्ठे टङ्कं कराम्बुजे। कुठारं सप्तमे पाणौ प्राङ्कुटञ्चाष्टमे त्विह। नवमे चामरं शुभ्रं दशमे डमरुन्त्विह। शृणिमेकादशे हस्ते द्वादशे चैव दर्पणम्। अष्टादशे भये कुन्तं बिभ्राणः शान्तिवृद्धये"। (अत्र त्रयोदशादिसप्तदशान्तवामहस्तानां चिह्नवाक्यानि सङ्कितपुस्तके पतितानि विश्वकर्मशास्त्रे द्रष्टव्यानि)।

सिद्धस्य "एकविंशोऽधुना योगः सिद्धनामाभिधीयते। जपाकुसुमसङ्काशः शुभ्ररेखात्रयोदरः। जटाभिरष्टभिस्तस्य मुकुटः खण्डचन्द्रयुक्। शोणशुभ्रांशुकोपेतः स्फाटिकाभरणान्वितः। वसुपञ्चभुजः२८ सौम्यस्सुन्दिवः सर्व-

लक्षणः। तोमरञ्चादिमे दत्ते द्वितीयेऽत्र त्रिशूलकम्। तृतीये पङ्कजं पाणौ तुर्ये दण्डं सुवर्णजम्। पञ्चमे तु करे शक्तिं षष्ठे वै लाङ्गलं भये। सप्तमे कुलिशं हस्ते शृङ्गमत्रैव चाष्टमे। नवमे दात्रमत्रैव दशमे तु परश्वधम्। सुद्गरं रुद्रहस्ते वै द्वादशे चन्द्रहासकम्। त्रयोदशे भये बाणं शङ्खमत्र चतुर्दशे। कुम्भं वामादिमे हस्ते द्वितीये डमरुं भये। पात्रन्तु नवमे हस्ते दशमे वै कुठारकम्। टङ्कमेकादशे हस्ते द्वादशे चैव खेटकम्। त्रयोदशे भये चापं चक्रमत्र चतुर्दशे। धारयन् पूजनीयोऽसौ भोगसौख्यश्रिये जये"। (अत्र तृतीयाद्यष्टमान्तवामहस्तचिह्नशक्यानि सुद्रितपुस्तके पतितानि विश्वकर्मशास्त्रे दृश्यानि)।

साध्यस्य "साध्यो द्वाविंशकश्चैव कथ्यते योग एव सः। शुभ्रवर्णो विशालाक्षो वह्निरेखगलाननः। कौसुम्भवसनोपेतो वज्रवैदूर्यकुण्डलः। वेदवह्निभुजोपेतो मेखलानेकरत्नयुक्। अक्षसूत्रं यमादिस्थे द्वितीये बीजपूरकम्। तृतीये शक्तिमत्रैव तुर्ये चैव त्रिशूलकम्। पञ्चमे सायकं हस्ते षष्ठे वज्रं कराम्बुजे। सप्तमे पङ्कजं पाणौ दण्डमत्रैव चाष्टमे। नवमे तोमरं पाणौ दशमे शक्तिमेव च। एकादशे हलं हस्ते द्वादशे शृङ्गमेव च। त्रयोदशे भये खड्गं परशुन्तु चतुर्दशे। करे पञ्चदशे रम्ये सुद्गरं कठिनाङ्गुली। षोडशे दात्रमत्रैव शङ्खं सप्तदशे त्विह। वामादिमे करे कुण्डीं द्वितीये पात्रमेव च। तृतीये चाभयं हस्ते तुर्ये डमरुमेव च। पञ्चमे कार्मुकं पाणौ षष्ठे चैवाङ्कुशं भये। सप्तमे तु ध्वजं दिव्यमष्टमे पाशमेव च। नवमे कुन्तमत्रैव दशमे तु गदामिह। मुसलं रुद्रहस्ते वै द्वादशे चैव चामरम्। त्रयोदशे करे खेटं कुठारन्तु चतुर्दशे। टङ्कं पञ्चदशे पाणौ षोडशे चैव दर्पणम्। चक्रं सप्तदशे हस्ते दधानः श्रीविहङ्गये"।

शुभस्य "शुभनामा त्रयोविंशो योगश्चात्रैव कथ्यते। नीलकालिकशोणस्तु मौक्तिकाभस्त्रिलोचनः। शोणरेखाङ्कितग्रीवः शोणशुभ्रांशुकावृतः। शुक्लाविद्रुममाणिक्यभूषणः स्वर्णकुण्डलः। द्वात्रिंशद्वह्निभुजसंयुक्तो जटाकलिलमण्डलः। वरं यमादिमे पाणौ द्वितीये चाक्षसूत्रकम्। तृतीये च त्रिशूलं वै तुर्ये बाणं कराम्बुजे। पञ्चमे पङ्कजं चैव षष्ठे कुलिशमेव च। सप्तमे शक्तिमत्रैव दण्डं वै चाष्टमे करे। नवमे तोमरं हस्ते दशमे शृङ्गिकामिह। हलमेकादशे चैव द्वादशे खड्गमत्र हि। दात्रं त्रयोदशे हस्ते सुद्गरं च चतुर्दशे। शङ्खं पञ्चदशे पाणौ षोडशे तु परश्वधम्। अभयं चादिमे वामे द्वितीये वै कमण्डलुम्। तृतीये पात्रमत्रैव तुर्ये कार्मुकमेव च। पञ्चमे डमरुं पाणौ षष्ठे चाङ्कुशमेव च। सप्तमे बीजपूरं वै ध्वजं वै चाष्टमे करे। नवमे पात्रमात्रञ्च दशमे कुन्तमेव च। गदामेकादशे हस्ते द्वादशे चैव खेटकम्। चामरं मन्मथे १३ पाणौ टङ्कमत्र चतुर्दशे। चक्रं पञ्चदशे चैव षोडशे तु कुठारकम्। विभाणो भुक्तये पूज्यः सौन्दर्याय सुखाय च"।

शुक्लस्य "चतुर्विंशतिमश्चात्र शुक्लाख्यः कथ्यतेऽधुना। चिबुके लोहितश्यामं चन्द्रगौरस्त्रिलोचनः। जटाशुकुटखण्डेन्दुर्नीलरेखासुधाधरः। सिन्दूरवदनोपेतो भालालितिलकाङ्कितः। प्रवालमौक्तिकस्वर्णभूषणः कण्ठकौस्तुभः। खड्गिशद्वाहुसंयुक्तो रत्नसुद्रासमन्वितः। शूर्पाक्षमालिकां वाम्ये प्रथमे करपल्लवे। द्वितीये च त्रिशूलं वै तृतीये बाणमेव च। परश्वधं करे तुर्ये पञ्चमे शङ्खमेव च। सुद्गरं चात्र वै षष्ठे सप्तमे दात्रमेव च। अष्टमे तु करे खड्गं नवमे चैव लाङ्गलम्। दशमे शृङ्गमत्रैव तोमरं रुद्रसम्मिते। द्वादशे तु करे दण्डं शक्तिमत्र त्रयोदशे। चतुर्दशे भये वज्रं करे पञ्चदशे कजम्। बीजपूरन्तु वामाद्ये द्वितीये पात्रमेव च। तृतीये कार्मुकं पाणौ तुर्ये चैव कुठारकम्। पञ्चमे चक्रमत्रैव षष्ठे टङ्कं कराम्बुजे। सप्तमे चामरं पाणौ खेटकं चाष्टमे भये। नवमे तु गदामत्र दशमे चाऽमृतं घटम्। कुन्तमेकादशे हस्ते द्वादशे पात्रमेव च। त्रयोदशे शृङ्गिं चैव दर्पणञ्च चतुर्दशे। ध्वजं पञ्चदशे हस्ते दधानस्तु सहाय च"।

ब्रह्मणः "पञ्चविंशतिमो योगो ब्रह्मनामा प्रतीयते। शोणोरः पाण्डुरांशेषचन्द्रगौरस्त्रिलोचनः। नीलकालिकशोणस्तु ग्रीवास्वर्णस्त्रिरेखिकः। जटात्रयप्रलम्बोऽसौ सौम्यः प्रहसिताननः। ताम्रवर्णांशुकोपेतः कण्ठरुद्राक्षमालिकः। शुक्लामाणिक्यहेमोत्थभूषणः सोमकुण्डलः। वियद्बाणपञ्चभुजोपेतः किङ्किणीजालमेखलः। सौम्याक्षमालिकां दत्ते प्रथमे तलशोभने। द्वितीये त्र वरं पाणौ खड्गमत्र त्रयोदशे। हलं चतुर्दशे हस्ते शृङ्गं पञ्चदशे त्विह। षोडशे चैव लोहासिं सुनिरन्ध्रे च तोमरम्। कष्टादशे भये दण्डं शक्तिमेको-

नविंशके । करे विंशतिमे चक्रं त्वेकविंशे शये कजम् । द्वाविंशे चमसं हस्ते त्रयोविंशे शयेऽर्बुदम् । चतुर्विंशतिमे पाणौ सुदृढं लोहभेदनम् । पञ्चविंशे तु रत्नास्त्रं वामाद्ये वै कमण्डलुम् । द्वितीये चाभयं हस्ते तृतीये चात्र वै ध्रुवम् । तुर्ये खट्वाङ्गमेवेह कुद्दालं चैव पञ्चमे । षष्ठे शरासनं पाणौ सप्तमे कवचं शये । अष्टमे पट्टिशं हस्ते नवमे वै सुदर्शनम् । दशमे बीजपूरं वै पाशमेकादशे करे । द्वादशे चात्र वै टङ्कं खेटमत्र त्रयोदशे । चतुर्दशे कुठाराख्यं डमरुन्निधिसंज्ञिते । षोडशे चामरं हस्ते कुम्भं सप्तदशे त्विह । अष्टादशे गदामत्र मुसलं नन्दचन्द्र१९मे । अङ्कुशं विंशके हस्ते पाशश्चैकविंशके । द्वाविंशके ध्वजं शुभ्रं वीरभद्रन्त्विपञ्चमे । जिने२४ मुनिभिर्नादर्शं पञ्चविंशेऽजिनं शये, दधानो यज्वनो गोत्रपरमायुर्विवृद्धये" । (अत्र तृतीयादित्रयोदशान्तदशहस्तचिह्नवाक्यानि सुद्रितपुस्तके पतितानि विश्वकर्मशास्त्रे दृश्यानि) ।

इन्द्रस्य "इन्द्रः षड्विंशकश्चात्र कथ्यते तव साम्प्रतम् । हस्तपादारुणश्यायं शेषशुभ्रायतेक्षणः । धम्मिल्लमल्लिकामाल्यचन्दनाद्यनुलेपनः । भालालितिलकश्चैव कर्णकुण्डलमेचकः । मुक्ताहारोज्ज्वलोरस्कः सर्वरत्नविभूषणः । शुभ्रशोणेन्द्रनीलाभवसनः सर्वलक्षणः । युग्मबाणपु२भुजोपेतो मनागरुणलोचनः । शक्तिमाल्यादिमे हस्ते द्वितीये मौक्तिकस्रजम् । तृतीये कमलं पाणौ चतुर्थे शुक्तिकामिह । स्रुवन्तु पञ्चमे पाणौ षष्ठे चात्र त्रिशूलकम् । सप्तमे चैव लोहासिं कुद्दालं चाष्टमे करे । नवमे पत्रिकाञ्चैव दशमे चन्द्रहासकम् । एकादशे हलं हस्ते द्वादशे शङ्खमेव च । तोमरं मन्मथे१२ पाणौ दण्डं चैव चतुर्दशे । करे पञ्चदशे शक्तिं षोडशे कुलिशं शये । चक्रञ्च मुनिचन्द्राङ्के१७ वसुचन्द्रे१८ परश्वधम् । एकोनविंशके कम्बुं विंशके पुस्तकं त्विह । त्रिशूलं त्वेकविंशे वै द्वाविंशे चैव मुद्गरम् । चमसन्तु त्रयोविंशे चतुर्विंशे त्विहार्बुदम् । पञ्चविंशतिमे हस्ते लोहभेदनमेव च । षड्विंशे च तुरस्कास्त्रं वामाद्ये चाभयं शये । द्वितीये कुण्डिकामत्र तृतीये बीजपूरकम् । तुर्ये वामे घृतं पात्रं पञ्चमे स्रुवमेव हि । षष्ठे खट्वाङ्गमेवेह सप्तमे डमरुं शये । अष्टमे प्राङ्कुटं पाणौ नवमे चै० कार्मुकम् । दशमे खेटकं हस्ते रुद्रे चैव कठारकम् । द्वादशे चामरं हस्ते कलसत्र त्रयादशे । गदां चतुर्दशे चैव मुसलन्निधिसंमिते । षडङ्कुशं षोडशे हस्ते पाशं सप्तदशे करे । पट्टिशं वसुचन्द्राङ्के१८ चक्रन्त्वेकोनविंशके । कवचं विंशके चैव दात्रञ्चैवैकविंशके । द्वाविंशके तु वै टङ्कं त्रयोविंशे ध्वजन्त्विह । वीरभद्रं चतुर्विंशे पञ्चविंशे तु दर्पणम् । अजिनं चात्र षड्विंशे विभ्राणः श्रीविवृद्धये" ।

वैधृतेः "वैधृत्याख्यस्तु वै योगः सप्तविंशतिमस्त्विह । शुभवर्णो महारौद्रो ग्रीवाशोणः सिताननः । जटापञ्च प्रलम्बस्तु मेचकारुणकुण्डलः । नीलशोणसुवर्णाद्यभूषणो मेचकाम्बरः । वेदबाण५४ भुजोपेतो बृहत्कुक्षिः सुमन्थरः । अचक्षुतं यमादिस्थे द्वितीये वरमेव च । तृतीये चैव सन्दंशं तुर्ये शुक्तिं समुद्रजाम् । पञ्चमे षड्कजं पाणौ षष्ठे चात्र स्रुवन्तथा । सप्तमे सायकं पाणौ शानखड्गमिहाष्टमे । नवमे चैव कुद्दालं दशमे च त्रिशूलकम् । शङ्खमेकादशे हस्ते द्वादशे हलमेव च । त्रयोदशे तु वै खड्गं तोमरन्तु चतुर्दशे । करे पञ्चदशे दण्डं षोडशे शक्तिमेव च । वज्रं सप्तदशे पाणौ कवचं वसुचन्द्रमे१८ । परशुं नन्दचन्द्राङ्के१९ विंशके चार्बुदं करे । एकविंशे शये चैव लोहभेदनमेव च । द्वाविंशे वै तुरस्कास्त्रं त्रयोविंशे तु शङ्खकम् । पुस्तकन्तु चतुर्विंशे पञ्चविंशे तु त्रिशूलम् । षड्विंशे मुद्गरं पाणौ चमसं सप्तविंशके । वामादिमे करे कुण्डीमभयन्तु द्वितीयके । भीनं तृतीयके हस्ते चतुर्थे बीजपूरकम् । पञ्चमे पात्रमत्रैव षष्ठे चैव स्रुवं करे । सप्तमे कार्मुकं पाणौ डमरुं चाष्टमे करे । नवमे प्राङ्कुटं हस्ते खट्वाङ्गञ्चैव दिक्करे । चामरं रुद्रमे चैव द्वादशेऽत्र कुठारकम् । खेटं त्रयोदशे चैव कुन्तमत्र चतुर्दशे । गदां पञ्चदशे पाणौ षोडशे मुसलन्त्विह । शङ्खं सप्तदशे हस्ते पाशमष्टादशे करे । पट्टिशं नन्दचन्द्राङ्के१९ वीरभद्रन्तु विंशके । एकविंशे शये टङ्कं द्वाविंशे चाजिनं करे । त्रयोविंशे तु वै चक्रं कवचं जिन२४हस्तके । पञ्चविंशे तु वै पात्रं षड्विंशे दर्पणं शुभम् । सप्तविंशे ध्वजं हस्ते धारयन् दुष्टघातकृत्" ।

करणानां वक्ष्य "करणानामथो वक्ष्ये रूपसम्बन्धिलक्षणम् । ववाभिधन्तु वै पीतं जटिलं रत्नकुण्डलम् । नीलवस्त्रन्तु रुद्राक्षभूषणं कण्ठपाशकुरम् । चतुर्दशभुजोपेतं पिङ्गभ्रूलोचनत्रयम् । वरं यमादिमे हस्ते द्वितीये बाण-

मेव च। तृतीये कुलिशं पाणौ चतुर्थे चैव पङ्कजम्। सुद्गरं पञ्चमे चैव षष्ठे सन्दंशमेव च। सप्तमे चाङ्कुशं दिव्यं पञ्चशाखे महोदरे। प्रथमे चाभयं वामे द्वितीये तु शरासनम्। तृतीये पुस्तकं हस्ते चतुर्थे मुकुरं शये। टङ्कन्तु पञ्चमे पाणौ षष्ठे कर्तरिकामिह। करे तु सप्तमे चात्र नामपाशं दधच्छ्रिये"।

बालस्य "बालवाख्यन्तु वै रक्तं नीलग्रीवं महोदरम्। श्वेतवस्त्रं जटाभारं पिङ्गलं तुङ्गनासिकम्। कण्ठरुद्राक्षमालं तद्भूतिमत्कालपाण्डुरम्। रसचन्द्र१६करोपेतं कक्षालग्नकरण्डकम्। प्रथमे मोदकं हस्ते दक्षिणे सुमनोहरे। द्वितीये केतकीपत्रं तृतीये शक्तिमेव च। चतुर्थे पङ्कजं पाणौ पञ्चमे वै सुदर्शनम्। षष्ठे सर्वायसं बाणं सप्तमे कुलिशं करे। सन्दंशमष्टमे हस्ते पात्रं वामादिमे त्विह। द्वितीये कुण्डिकामत्र तृतीये चैव पट्टिशम्। बीजपूरं करे तुर्ये पञ्चमे शङ्खमेव च। कोदण्डमत्र वै षष्ठे सप्तमे कुलिशङ्करे। अष्टमे पुस्तकं बिभ्रद्दयाय विजयाय च"।

कौलवस्य "श्वेताब्जकर्णिकाभासं तृतीयं कौलवाभिधम्। रक्तकण्ठं पिकाक्षं वै नीलश्वेतारुणाम्बरम्। सुक्तारुद्राक्षसौवर्णभूषणं चेन्द्रनीलकम्। अष्टादशभुजोपेतं किङ्किणीकटिसूत्रकम्। वरं यमादिमे हस्ते द्वितीये चाक्षसूत्रकम्। तृतीये स्वर्णजं दण्डं चतुर्थे चैव पुस्तकम्। पञ्चमे मोदकं हस्ते षष्ठे सन्दंशमेव च। सप्तमे डमरुं पाणौ वज्रमत्रैव चाष्टमे। नवमे शृङ्गिकामत्र शोणगुञ्जाद्यनामिकाम्। अभयं चादिमे वामे द्वितीये तु कमण्डलुम्। तृतीये चासवं पात्रं तुर्ये चाम्भोजसुत्तमम्। पञ्चमे चामरं शुभ्रं षष्ठे दात्रं कराम्बुजे। सप्तमे वह्निकीमत्र शृणिं चैवाष्टमे करे। नवमे कदलीपत्रं दधत् सम्पत्सुखाय च"।

तिलस्य "चतुर्थं तैतिलं नाम श्यामवर्णं कृशोदरम्। गोणवस्त्रं जवापुष्पमालिकं तैत्तिराननम्। वियत्पक्ष२० भुजोपेतं घण्टाघङ्घनितम्बकम्। प्रथमे दक्षिणे हस्ते श्रीफलं सुमनोहरम्। खड्गमत्र द्वितीये वै तृतीये चैव पुस्तकम्। अक्षसूत्रं करे तुर्ये पञ्चमे बाणमेव च। षष्ठे सुदर्शनं दिव्यं सप्तमे कुलिशं त्विह। अष्टमे तु स्रुवं पाणौ नवमे चैव सुद्गरम्। दशमे चाङ्कुशं हस्ते पात्रं वामादिमे करे। द्वितीये खेटकं चैव तृतीये वारिजं शुभम्। चतुर्थे कुण्डिकामत्र पञ्चमे चैव कार्मुकम्। षष्ठे मनोहरं शङ्खं सप्तमे चामरं सितम्। स्रुवं चैवाष्टमे हस्ते नवमे टङ्कमत्र हि। दशमे तु करे पाशं बिभ्राणं यज्वनः श्रिये"।

गरस्य "पञ्चमं चात्र विज्ञेयं करणन्तु गराभिधम्। गोमुखं चित्रितग्रीवं धूसरं लोहिताम्बरम्। पक्षपक्ष२२भुजोपेतं कृतपद्माक्षभूषणम्। आदिमे दक्षिणे शक्तिं द्वितीये चक्रमेव च। तृतीये श्रीफलं हस्ते चतुर्थे चैव पङ्कजम्। पञ्चमे पुस्तकं रम्यं षष्ठे बाणं मनोहरम्। सप्तमे गोदण्डं शृङ्गं कुलिशं चाष्टमे करे। नवमे वह्निकीमत्र दशमे वीरभद्रकम्। एकादशे तु सन्दंशं पञ्चशाखे मनोहरे। अभीतिसुत्तरादिस्थे द्वितीये शङ्खमत्र हि। पात्रमत्र तृतीये वै चतुर्थे चैव चामरम्। पञ्चमे डमरुं हस्ते षष्ठे चैव शरासनम्। सप्तमे कुण्डिकामत्र चाष्टमे दशचक्रकम्। नवमे तु करे वंशं दशमे चैव दर्पणम्। एकादशे तु रुद्रास्त्रं बिभ्रत् कीर्त्तिसुखश्रिये"।

वणिजः "वानरास्यं वणिक् धूम्रं पीतवस्त्रं हयासनम्। जिन२४बाहुयुतं चेदं षष्ठं कनकभूषणम्। वरमाद्यादिमे हस्ते द्वितीये चाक्षसूत्रकम्। तृतीये शुक्तिकामत्र मोदकन्तु चतुर्थके। पञ्चमे कुलिशं हस्ते षष्ठे शक्तिं कराम्बुजे। सप्तमे लेखनं दण्डं खड्गमत्रैव चाष्टमे। नवमे पाशमत्रैव दशमे चैव वै ध्वजम्। एकादशे तुरष्कास्त्रं द्वादशे वै सुदर्शनम्। सौम्यादिमे करेऽभीतिं द्वितीये वै कमण्डलुम्। बीजपूरं तृतीयेऽत्र पानपात्रं चतुर्थके। पञ्चमे पञ्चवक्त्राक्षं षष्ठे चैव तु पट्टिशम्। सप्तमे चामरं हस्ते खेटकं चाष्टमे शये। नवमे चाङ्कुशं पाणौ दशमे हलमेव च। एकादशे करे रम्यं दर्पणं चातिनिर्मलम्। द्वादशे धारयत् शङ्खं लक्ष्मीसौभाग्यवृद्धये"। (पञ्चवक्त्राक्षं पञ्चमुखरुद्राक्षम्)

भद्राथाः "व्याघ्रचर्माम्बरा भद्रा श्वेताभा गर्दभानना। सप्तबाहुसमायुक्ता त्रिपदा लोहभूषणा। कर्तिकामादिमे दक्षे द्वितीये तु गदामिह। तृतीये सायकं हस्ते चतुर्थे चन्द्रहासकम्। खेटमूर्द्ध्वकरे वामे तदधस्तैव कार्मुकम्। पात्रमस्यादधो वामे धारयन्ती रिपोर्भिये"

शकुनेः "अष्टमं शकुनिप्रख्यं करणं हरितप्रभम्। प्रवालभूषणोपेतं शक्रगोपनिभाम्बरम्। रसपक्ष२६भुजोपेतमेणवक्त्रं वृकोदरम्। आदिमे रविजे चक्रं द्वितीये वरमेव च। अक्षसूत्रं तृतीये तु तुर्ये चैव तु पङ्कजम्। प-

ञ्चमे मोदकं हस्ते षष्ठे वज्रं कराम्बुजे। सप्तमे तोमरं पाणौ शक्तिमत्रैव चाष्टमे। नवमे हस्तिजन्दन्तं दशमे चन्द्रहासकम्। एकादशे करे बाणं द्वादशे चाङ्कुशं शये। त्रयोदशे गदामत्र शङ्खं वामादिमे करे। अभयन्तु द्वितीयेऽत्र तृतीये वै कमण्डलुम्। बीजपूरं करे तुर्ये पञ्चमे पात्रमेव च। षष्ठे कराम्बुजे शङ्खं सप्तमे कुन्तमेव च। परिघं चाष्टमे हस्ते दण्डन्तु नवमे करे। खेटकं दशमे पाणौ धनुरेकादशे शये। द्वादशे पात्रमत्रैव त्रिशूलन्तु त्रयोदशे। दधानं श्रेयसे भूत्यै विजयाय सुखाय च। तापाय चैव शत्रूणां विशेषेण समर्चितम्"।

चतुष्पदस्य "चतुष्पदाभिधं चात्र नवमं कथ्यते जय!। कृष्णवर्णं चतुष्पादं चतुरास्यं जटान्वितम्। मनुष्यास्यन्तु वै पूर्वं दक्षिणं चैव गोमुखम्। अजास्यं पश्चिमन्तस्य चोत्तरं शूकराननम्। मनुष्याकारवत् सर्वं त्रिकपुच्छविनिर्गतम्। पीतवस्त्रं दृढत्कुक्षि नीलमुक्ताविभूषणम्। वसुपञ्चाष्टभुजोपेतं दीर्घनासं महाजवम्। दक्षिणाद्ये करे शक्तिं द्वितीये चाक्षसूत्रकम्। सुदर्शनं तृतीये तु चतुर्थे चैव पङ्कजम्। पञ्चमे मुद्गरं चैव षष्ठे मोदकमेव च। सप्तमे तु गदां पाणावष्टमे चाङ्कुशं शये। नवमे तु करे बाणं दशमे खड्गमेव च। एकादशे करे दन्तं द्वादशे शुक्तिमत्र हि। त्रयोदशे शये पात्र तोमरं सुदृढं शुभम्। चतुर्दशे तु वै वज्रं वामाद्योऽभीतिमेव च। कमण्डलुं द्वितीये वै तृतीये शङ्खमेव च। चतुर्थे बीजपूरं वै पञ्चमे टङ्कमेव च। षष्ठे पात्रं सुधापूर्णं सप्तमे च त्रिशूलकम्। अष्टमे पात्रमत्रैव नवमे धनुरेव च। दशमे खेटकं हस्ते दण्डमेकादशे करे। द्वादशे पट्टिशं पाणौ कुन्तमत्र त्रयोदशे। शङ्खं चतुर्दशे बिभ्रद्गोवृषौ सुपूजितम्"।

नागस्य "नागाख्यं दशमं रक्तं नीलवस्त्रं जटाधरम्। मनुष्याकारमेवैतन्मस्तकन्यस्ततक्षणम्। वियद्गुणाश्व भुजोपेतं मुक्तारुद्राक्षभूषणम्। प्रथमे मोदकं दक्षे द्वितीये चैव पङ्कजम्। अक्षसूत्रं तृतीयेऽत्र चरन्तुर्ये कराम्बुजे। पञ्चमे तु करे चक्रं षष्ठे वज्रन्तु वै शये। सप्तमे तोमरं पाणौ शक्तिमत्रैव चाष्टमे। नवमे सोज्ज्वलं दन्तं दशमे चन्द्रहासकम्। बाणमेकादशे हस्ते द्वादशे चाङ्कुशं शये। त्रयोदशे गदामत्र तुरन्काख्यं चतुर्दशे। करे पञ्चदशे दात्रं वामे पात्रन्तु चादिमे। बीजपूरं द्वितीयेऽत्र तृतीये वै कमण्डलुम्। चतुर्थे चाभयं हस्ते पञ्चमे शङ्खमेव च। षष्ठे कराम्बुजे शङ्खं सप्तमे कुन्तमुत्तमम्। पट्टिशं चाष्टमे हस्ते नवमे दण्डमत्र हि। दशमे खेटकञ्चैव धनुरेकादशे करे। द्वादशे पाशमत्रैव त्रिशूलञ्च त्रयोदशे। चतुर्दशे दशास्यं वै करे पञ्चदशेऽर्बुदम्। दधानं विजयारोग्यं कुर्वीताभयदं नृणाम्"। (दशास्यं दशमुखरुद्राक्षम्)

किन्तुघ्नस्य "एकादशन्तु किन्तुघ्नं करणं कथ्यतेऽधुना। गोक्षीरधवलं चैतत्पीतवस्त्रं हयाननम्। सर्वाभरणसंयुक्तं द्वात्रिंशद्बाहुसंयुतम्। वरञ्चैवादिमे दक्षे द्वितीये चाक्षसूत्रकम्। तृतीये सोज्ज्वलं चक्रं तुर्ये चाङ्कं कराम्बुजे। पञ्चमे मोदकं हस्ते षष्ठे वै कुलिशं शये। सप्तमे तोमरं पाणौ शक्तिमत्रैव चाष्टमे। नवमे गजदन्तञ्च दशमे खड्गमुत्तमम्। एकादशे तु वै बाणं द्वादशे शृणिमेव च। त्रयोदशे गदामत्र डमरुञ्च चतुर्दशे। करे पञ्चदशे पुस्तीं परशुञ्चैव षोडशे। अभयञ्चादिमे वामे द्वितीये वै कमण्डलुम्। शङ्खमत्र तृतीये वै चतुर्थे बीजपूरकम्। पञ्चमे चासवं पात्रं षष्ठे शङ्खं मनोहरम्। सप्तमे कुन्तमत्रैव चाष्टमे पट्टिशं शये। नवमे वैणवं दण्डं दशमे खेटमेव च। चापमेकादशे पाणौ द्वादशे पात्रमत्र हि। त्रयोदशे त्रिशूलं वै टङ्कमत्र चतुर्दशे। वीणाभिश्चोन्दुरुं हस्ते च ध्वजञ्चैव तु षोडशे। धारयद्वैरिणां ध्वस्त्यै पूजनीयं विपश्चिता। विद्यालाभाय सन्तुष्टिविजयादिसुखार्थिना"। किंसुघ्नमिति वा पाठः।

राशीनां मेषस्य विष्णुधर्मोत्तरात् "मेषवक्त्रो नरो रक्तो द्विभुजः पङ्कजासनः। भानसद्राकरः पीतवसनः कनकाङ्गदी"।

वृषस्य "वृषाननो नरः शुभ्रो रक्तवस्त्रात्तकुण्डिकः"।

मिथुनस्य "युग्मान् गदी सवीणा च योषिच्च मिथुनं सितम्"।

कर्कटस्य "कर्कटः कपिलः श्यामः कूर्मसुद्राधरो नरः"।

सिंहस्य "सिंहवक्त्रोऽरुणोऽजस्रो द्विभुजोऽभयपात्रयुक्"।

कन्यायाः "शुक्लाम्बरा सिता कन्या द्विभुजा पङ्कजासना"।

तुलायाः "तुलाधरो नरो गौरः पिङ्गनेत्रः कजासनः"।

वृश्चिकस्य "वृश्चिकस्थो नरः पिङ्गो द्विभुजो मर्कटाननः दक्षे वृश्चिकमालाढ्यं वामे पात्रं सुरायुतम्"।

धनुषः "अश्ववक्त्रो नरश्चापी व्याघ्रचर्मकरद्वयः"।

मकरस्य "मकरकण्ठीधरो नीलो मृगवक्त्रो नरो हि सः"।

कुम्भस्य "मकराक्षोऽसितोऽजस्रो रिक्तकुम्भो नरो घटः"।

मीनस्य "मत्स्ययुग्मस्थितः श्यामो मत्स्यहस्तो महोदरः। मत्स्यवक्त्रो नरो मीनो हरिन्मणिविभूषणः"।

कालस्य विश्वकर्मशास्त्रात् "कालः करालवदनो नित्यमग्नः विभीषणः। पाशहस्तश्च कर्तव्यः सर्पदण्डिकरोमवान्"।

निमेषस्य "निमेषस्तु भवेदत्र मेघकाभोऽर्द्धनीलदृक्। अक्षसूत्रं करे दक्षे ज्ञानमुद्रामथोत्तरे। दधानो योगसंसिद्ध्यै पूजनीयो विपश्चिता"।

काष्ठायाः "नीलवर्णा भवेत् काष्ठा पीतवस्त्रा त्रिलोचना। अष्टादशभुजोपेता ज्ञानपुस्तीशसन्निता"।

कलायाः "शुक्लवर्णा कला ज्ञेया नीलवस्त्रा त्रिलोचना। चोमवज्राङ्कुशाक्षकण्ठलम्बितमालिका। शुक्लाक्षमालिकाढ्या वामपङ्कजसंयुता। पूजनीया विशेषेण ज्ञानविज्ञानहेतवे"।

क्षणस्य "क्षणाभिधो भवेत् पीतः सुनिपक्षः सुमौक्तिकः। जटामौक्तिकोपेतचन्द्रनाभिकपाण्डुरः। शुक्लाम्बरार्किहस्तोऽयं वामे स्वर्णकमण्डलुः"।

१मुहूर्त्तानां तत्र दिने रौद्रस्य "मुहूर्त्तानधुना वक्ष्मि नामलक्ष्मपृथक्फलैः। तत्रादिमस्तु रौद्राख्यः श्यामश्वेतारुणच्छविः। श्वेतवस्त्रो महातुङ्गो दक्षिणे सर्पमादधत्। वामे पात्रं सुधापूर्णं क्षुद्रकर्मप्रसिद्धये"।

२सितस्य "सिताभिधो द्वितीयस्तु श्वेतवर्णो महोदयः। श्वेतगोक्षीरवस्त्रोऽयं श्वेतशुक्लाविभूषणः। दक्षिणे पङ्कजं शुभ्रं वामे चैव कमण्डलुम्। दधानस्तु श्रियै पूज्यो योगसिद्ध्यै सुखाय च"।

३सजपस्य "तृतीयोऽयाजपाख्यस्तु कृष्णः शुभ्रो महातनुः। दक्षिणे पङ्कजं नीलं वामे सर्पं महाफणम्। बिभ्रद्विपुलभोगाय पूजनीयो महाधिया"।

४चार्यभटस्य "तुर्यश्चार्यभटाख्यस्तु नीलः शुभ्रो महोदरः। दक्षिणे पुस्तकं हस्ते वामे चैव त्रिशूलकम्। दधानः श्रेयसे भूत्वै विजयाय सुखाय च"।

५सावित्रस्य "अधुना चैव सावित्रः पञ्चमः कथ्यते जय!। श्वेतवर्णोऽश्ववक्त्रस्तु मेघकवसनान्वितः। पुस्तकं दक्षिणे हस्ते वामे कुण्डलन्तु निर्व्रणम्। दधद्रोगविनाशाय पूजनीयोऽथ दर्शिनम्"।

६वैराजस्य "वैराजश्चात्र वै षष्ठः श्यामवर्णो जटाधरः। दक्षिणे तु करे दण्डं वामे चैव स्रुवं करे। बिभ्रद्दुष्टघ्नै च सौख्याय पूजनीयोऽतिभक्तितः"।

७गन्धर्वस्य "सप्तमश्चात्र गन्धर्वस्ताम्रवर्णः कृशोदरः। दक्षिणे वल्लकीं पाशौ वामे शक्तिञ्च धारयन्। सौख्यदृष्ट्यै यशोदृष्ट्यै पूजनीयो विपश्चिता"।

८अभिजितः (कुतपस्य) "अधुना चाभिजिन्नाम कथ्यतेऽष्टमः शुभः। पीतवर्णोऽतिहृस्वस्तु ताम्रवर्णो महोदरः। स्रुचहस्तद्वयोपेतः पूजनीयः सुखाप्तये। स एव कुतपो नाम विज्ञातव्यो मनीषिभिः। पितॄणां तृप्तिदश्चैव पिण्डहस्तोऽथवाप्ययम्"।

९रौहिणेयस्य "नवमो रौहिणेयाख्यो मुहूर्त्तः कथ्यते जय!। शुभ्रवर्णो विशालाक्षो नीलवस्त्रोऽभ्रकुण्डलः। दक्षिणे पङ्कजं पाशौ वामे मोदकमेव च। दधानः सुखसम्पत्त्यै विजयारोग्यवृद्धये"।

१०बलस्य "अधुना कथ्यते वत्स! दशमस्तु बलाभिधः। गौरवर्णोऽरुणः श्वेतवसनः स्वर्णकुण्डलः। दक्षिणे तु करे शङ्खं वामे पङ्कजमादधत्"।

११विजयस्य "एकादशोऽधुना ज्ञेयो मुहूर्त्तो विजयाभिधः। हेमवर्णो दृढगात्रः कृष्णश्वेतारुणांशुकः। अक्षसूत्रं करे दक्षे वामे चैव कमण्डलुम्। दधत् प्रजासुखार्थाय पूजनीयो विपश्चिता"।

१२नैर्ऋतस्य "नैर्ऋताख्योऽधुना ज्ञेयो द्वादशस्तु मुहूर्त्तकः। नीलवर्णोत्तमौलिः पीतवस्त्रो महाबलः। दक्षिणे तु करे चक्रं वामे चाभयमादधत्"।

१३सन्नमसस्य "त्रयोदशो भवेदत्र रक्षः सन्नमसाभिधः। ताम्रवस्त्रो महौजस्को रत्नहेमजकुण्डलः। शोणपङ्कजहस्तस्तु वामकुण्डीशसन्नितः"।

१४वरुणस्य "मुहूर्त्तः कथ्यते चात्र वरुणाख्यश्चतुर्दशः। शुक्लाफलनिभश्चैव शुक्लाहारविभूषणः। धनुर्बाणधरश्चैव पूजनीयः सुखाप्तये"।

१५सुभगस्य "अथ पञ्चदशो ज्ञेयः सुभगस्तु हरित्प्रभः"।

१रात्रौ अतिरौद्रस्य "अथो निशाचरान् वक्ष्यो मुहूर्त्तान् तिथिसंख्यकान्। तत्रादिमोऽतिरौद्राख्यः कृष्णवर्णोऽरुणांशुकः। चतुर्भुजोमहाक्रूरः खड्गसङ्कटकोबलः। आदिमे दक्षिणे बिभ्रत् कौशिकञ्चातिभीषणम्। द्वितीये तु करे सर्पं वामोर्द्ध्वे त्वथ वै करे। सन्दंशं तदधः पात्रं बिभ्राणः सर्वविघ्नहा"।

२महागन्धर्वराजस्य "महागन्धर्वराजाख्यो द्वितीयस्तत्र चैव हि। कृष्णशुभ्रारुणग्रीवो नीलवस्त्रो महाबलः। चतुर्भुजो विशालाक्षो गौरवर्णो जटाधरः। आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम्। वामोर्द्ध्वे कीरं

नटवस्त्रे तु पात्रकम्। धारयन्निष्टसम्पत्त्यै पूजनीयो विचक्षणैः"।

२६विष्णुः "तृतीयः कथ्यते चाथ रात्रिजो द्रविणाभिधः। तप्तचामीकराभासः कृष्णनीलारुणांशुकः। दक्षिणे प्रथमे पद्मं हेमजज्ञातिशोभनम्। द्वितीये तु करे वीणां वामोर्द्ध्वे बीजपूरकम्। दधानः सर्वसम्पत्तिसुखायुः-श्रीविवृद्धये"।

२७श्रावणस्य "श्रावणाख्यस्तृतीयो नीलवर्णोऽर्ककुण्डलः। नीलारुणांशुकोपेतः कण्ठनीलाब्जमालिकः। दक्षिणाद्ये करे खड्गं द्वितीये चैव पङ्कजम्। वल्लकीमूर्द्ध्वगे वामे पात्रमस्मादधःस्थिते। दधानः पूजनीयोऽयं ज्ञानविज्ञान-सिद्धये"।

२८वायोः "मुहूर्तः कथ्यते चायो वायुसंज्ञस्तु पञ्चमः। हरि-द्वर्णो जवाकर्णः श्वेतवस्त्रो महाबलः। कीरमार्कार्यादिमे हस्ते द्वितीये तु ध्वजं शये। वामोर्द्ध्वगे करे कीरं द्वितीये पात्रमादधत्"।

२९अग्नेः "अग्निसंज्ञस्ततः षष्ठो जवाकुसुमसन्निभः। कृष्ण-नीलांशुकोपेतः शिखारुद्राक्षसंयुतः। दक्षिणाद्ये करे पात्रं द्वितीये शक्तिमेव च। वामादिमे करे कीरं द्वितीये कीरमेव च। दधानः कीर्त्तये भुक्त्यै विज-यायुःप्रवृद्धये"।

३०राक्षसस्य "अधुना कथ्यते वत्स! राक्षसाख्यस्तु सप्तमः। नीलवर्णोऽपदंष्ट्रस्तु नीलशुभ्रारुणांशुकः। दक्षिणाद्ये करे पद्मं द्वितीये तु त्रिशूलकम्। खट्वाङ्गमुत्तरे वामे पात्रमस्मादधःस्थिते। दधद्वैरिविघाताय पूजनीयस्तु साधकैः।

३१धातुः "धाता चैवाष्टमः पीतवर्णः पाटलभांशुकः। कर्ण-स्फाटिकसौवर्णकुण्डलः कम्बुकन्धरः। पुस्तीमार्कार्यादिमे हस्ते द्वितीये चैव विष्टरम्। वामादिमे करे दण्डं द्वितीये स्वर्णकुण्डलम्। दधानः प्रीतये भुक्त्यै विज-याय सुखाय च"।

३२सौम्यस्य "नवमः सौम्यनामाथ शुभ्रवर्णो विशालदृक्। पीत-वस्त्रो महातेजा शुक्लास्वर्वाङ्गभूषणः। आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम्। वामादिमे करे पात्रं द्वितीये कीरमेव च। दधानस्तुष्टये भुक्त्यै पूजनीयस्तु सद्विदः"।

३३ब्रह्मणः "दशमश्चात्र विज्ञेयो मुहूर्त्तो ब्रह्मसंज्ञकः। पीत-वर्णः शुक्लवस्त्रो जटामुकुटसंयुतः। कण्ठरुद्राक्षमालोऽयं भालपाण्डुरचन्दनः। सुवर्णकुण्डलोपेतः काटसूत्रो-त्तरीयवान्। अक्षस्रक् यमादिस्थे द्वितीये चैव पङ्कजम्। वामोर्द्ध्वे तु स्रुवं हस्ते पुस्तकन्दधःकरे। दधत् सौवर्णसुक्कानां लाभाय विजयाय च"।

३४वाक्पतेः "एकादशोऽधुना ज्ञेयो वाक्पतिर्नाम नामतः। सुवर्णवर्ण एवायं कृष्णशुभ्रांशुकान्वितः। कुण्डोमार्क्यादिहस्ते तु द्वितीये कीरमेव च। वामादिमे करे कीरं द्वितीये नीरजं दधत्। प्रजालाभकरश्चैव कार्यनिष्पत्ति-साधकः"।

३५पौष्णस्य "द्वादशश्चात्र विज्ञेयो पौष्णनामा सुलोहितः। पीत-वस्त्रो जटामौलिर्सुनिपुष्पकृतस्रुतिः। तुन्दिलः सोप-वीती च नीलकीलकपाण्डुरः। दक्षादिमे करे बीज पूरकं शुभ्रवर्णकम्। द्वितीये वारिजं पाणौ पात्रं वामादिमे करे। सन्दंशन्तु द्वितीयेऽयं धारयन् वैरि-तापदः"।

३६वैकुण्ठस्य "जयाभुनात्र वै कथ्यो वैकुण्ठाख्यस्त्रयोदशः। पाट-लाम्बलशुभ्रोऽयं कण्ठालारुणवस्त्रकः। अलिवर्णस्तु, केशान्ते कुण्डलानेकरत्नजः। दक्षिणाद्ये करे पुस्ती-मम्बुजन्तु द्वितीयके। केकिपिच्छन्तु वामाद्ये द्वितीये चातपत्रकम्। दधानः कीर्त्तये भुक्त्यै पूजनीयः सिता-म्बुजैः"।

३७समीरणस्य "चतुर्दशोऽधुना ज्ञेयो नामतस्तु समीरणः। जलनीलनिभश्चैव शुभमारकतद्युतिः। पीतनीलारुण प्रान्तवसनः स्निग्धलोचनः। तालपत्रं यमादिस्थे द्वितीये नीलनीरजम्। वामादिमे करे पात्रं द्वितीये नीलरुक्म-जम्। दधानो यज्वनो भूत्यै बालवृद्धैः सुखाय च"।

३८नैर्ऋतस्य "अथ पञ्चदशो ज्ञेयो मुहूर्त्तो नैर्ऋतोऽरुणः। मेचकाभविनेत्रस्तु दंष्ट्रावान् वसनारुणः। स्वर्णेन्द्र-नीलभूयाढ्यः शोणालितिलकान्वितः। आदिमे दक्षिणे बाणं द्वितीये कमलं करे। वामादिस्थे धनुर्हस्ते द्वितीये चैव वारिजम्। दधच्छान्त्यै शुभोभाय बलाय विज-याय च"।

अहोरात्रस्य "एते निशाचराः ख्याता मुहूर्त्ताः सकलास्तव। अहोरात्राभिधश्चात्र कृष्णपीवादिमूर्द्धजः। कण्ठपादा-ग्रशुभ्रोऽयं द्विभुजो दीर्घगोधिकः। सार्द्धचन्द्रजटा-मौलिः पिङ्गलश्मश्रुलोचनः। ऋक्षखड्गमालिकोपेतः कृष्णशुभ्रांशुकान्वितः। अर्कं दक्षे दधानोऽयं वामे चैव विधुन्तुदम्। दृष्टापूर्त्तप्रसिद्ध्यर्थं पूजनीयो मनीषिभिः"।

शुक्लपक्षस्य "शुक्लपक्षो नरः शुक्लो जटामुकुटसंयुतः। शोणवस्त्रो विशालाक्षो भालालितिलकान्वितः। सूर्यमार्कौ दधानोऽयं वामे चन्द्रजबिम्बकम्। पूजनीयो महाभक्त्या प्रतिपक्षं सिते सिते। अस्य द्वादश भेदाः स्युर्विज्ञेया वर्णभेदतः। पूजनीयाबलार्थाय प्रतिमासन्तु भेदतः"।

कृष्णपक्षस्य "शशाभाभः कृष्णपक्षस्तु सितशोणाम्बरो बली। सूर्यबिम्बं यमे बिभ्रद्वामे दामं ससुज्ज्वलम्। पूजनीयो बलार्थं प्रतिमासन्तु भेदतः। इत्यस्यार्कप्रभेदाः स्युर्भपक्षादिजनामतः"।

मासस्य "स्वनामतस्तु मासः स्यात् द्विवर्णस्तु द्विदोरिति। नाभ्यूर्ध्वः श्वेतकृष्णः पिङ्गलोचनमूर्द्धजः। सूर्यचन्द्रान्वितः सोऽयं प्रतिमासन्तु पूज्यते। स्वनामपूर्वकैर्मन्त्रैर्होमपूजावसानकैः"।

ऋतूनां हेमन्तस्य "ऋतुषट्कमथो ब्रूमो लक्ष्मनामपृथक्फलैः। हेमन्ताख्यस्तु नवाद्यः कपिलः पिङ्गकुण्डलः। पीतवस्त्रसमायुक्तस्त्रिजटः कृष्णगोधिकः। (गोधिर्ललाटम्) धान्यमञ्जरिकाद्यस्तु वामपात्रपिधानकः। पूजनीयोविभूत्यर्थं धान्यसम्पत्तिहेतवे"।

शिशिरस्य "शिशिराख्यो द्वितीयस्तु हरित्पीतनिभारुणः। पीतकुण्डलकर्णस्तु कण्ठविद्रुममालिकः। मधुद्रुमप्रसूनाक्षपात्रमार्कौ कराम्बुजे। वामे धान्यशरावन्तु धारयन्निष्टहेतवे"।

वसन्तस्य "विष्णुप्रकरणोक्तस्तु ज्ञातव्योऽत्र वसन्तकः"।

ग्रीष्मस्य "ग्रीष्माभिधस्तृतीयस्तु धूसरो रुचमालकः। अक्षसूत्रार्कहस्तस्तु वामे शुभ्रातपत्रयुक्। रोमसन्तापनाशाय पूजनीयोऽरिपक्षहा"।

वर्षायाः "पञ्चमस्तोयदर्तुस्तु हारद्रुवर्णोऽरुणेक्षणः। ताम्रवर्णांशुकोपेतः कृष्णविद्रुमकुण्डलः। मीनमार्कौ दधानोऽयं तोयपूर्णघटं परे। मेघमालाहतश्चैव विद्युद्दहनदीप्तिमान्। हरिताजिदलैः पूज्यो पुष्टिसन्तुष्टिहेतवे"।

शरदः "शरदृतुरथो षष्ठश्चन्द्रगौरः सुलोचनः। कण्ठमौक्तिकमालस्तु कर्णचन्द्रकुण्डली। चन्द्रबिम्बं करे दधे वामे चामृतजं घटम्। दधानः पूजनीयोऽयमायुर्वृद्धये सुखाय च"।

हेमन्तायनस्य "हेमन्तायनसंज्ञोऽथ श्यामः सोमेन्द्रलोचनः। पीतवस्त्रो हरन्नुण्डः कर्णिकारदलस्रजः। बीजाङ्कुरशरावार्किः स्वनिवोत्तरहस्तकः। पूजितः सिद्धये नित्यं धनधान्यसमृद्धये"।

उत्तरायणस्य "उत्तरायणसंज्ञोऽथ शुभ्रवर्णो विशालदृक्। माञ्जिष्ठवसनोपेतः स्वर्णसूत्रादिभूषणः। पुस्तकं दक्षिणे हस्ते वामे तु रविबिम्बकम्। दधद्भुक्त्यै सुखे चैव पूजनीयस्तु कीर्तये"।

१।१वत्सराणाम् प्रभवस्य "अथ संवत्सरान् ब्रूमो नामलक्ष्मफलादितः। प्रभवाख्योभवेदाद्यः पीतवर्णो महोदरः। नीलवस्त्रसमायुक्तो दक्षे काञ्चनकुण्डलः। वामे स्फाटिकवर्णस्तु पृष्ठलम्बिजटात्रयः। दक्षिणे प्रथमे शक्तिं पङ्कजन्तु द्वितीयके। वामादिमे शरावन्तु बीजपूर्णं कराम्बुजे। द्वितीये चैव सन्दंशं दधानः पुष्टिहेतवे"।

१।२विभवस्य "विभवाख्यो द्वितीयस्तु नीलपीतारुणच्छविः। पीतशुभ्रान्तवस्त्रोऽयं कण्ठे पद्माक्षमालिकः। दक्षिणाद्ये शरं पाशो द्वितीये नीलपङ्कजम्। सन्दंशस्तत्तरादिस्थे द्वितीये चैव कार्मुकम्। दधद्विभूतये नित्यं पूजनीयो विपश्चिता"।

१।३शुक्लस्य "शुक्लनामा तृतीयस्तु श्वेतपङ्कजसन्निभः। कण्ठपद्माक्षमालोऽयं शुभ्रान्तालिवस्त्रधृक्। दक्षिणाद्ये शरावन्तु द्वितीये बाणमेव च। दर्भस्तोत्तरादिस्थे द्वितीये चैव कार्मुकम्। दधानो भूतये सर्वैः पूजनीयः कृतात्मभिः"।

१।४प्रमोदस्य "प्रमोदाख्यश्चतुर्थस्तु नीलग्रीवो महोदरः। श्वेतवस्त्रोऽञ्जसङ्काशो योगपट्टोत्तरीयवान्। दक्षिणाद्ये तु सन्दंशं द्वितीये सीरमेव च। वामादिमे शरावन्तु द्वितीये नीलपङ्कजम्। दधत् सौख्याय भोगाय विजयाय महाय च"।

१।५प्रजापतेः "प्रजापत्याख्य एवात्र पञ्चमः स्वर्णसन्निभः। शोणभूषणवस्त्राढ्यस्तुन्दिलो गौरपाण्डुरः। अक्षसूत्रं यमादिस्थे द्वितीये परशुं करे। शरावस्तत्तरादिस्थे द्वितीये पुस्तकं दधत्। प्रजावृद्ध्यै विभूत्यै च पूजनीयोविजानता"।

१।६अङ्गिरसः "अङ्गिराख्यस्ततः षष्ठो वर्णशुभ्रोऽतिलोमशः। ताम्रवस्त्रो महातेजा द्वादशाङ्गसचन्दनः। पवित्रदर्भपाणिस्तु जटामण्डितमस्तकः। ज्ञानखड्गन्तु दधाद्ये द्वितीये समिधङ्करे। वामादिमे शरावन्तु ब्रह्मदण्डं द्वितीयके। दधत् सुपूजितो भूत्यै श्रेयसे च सुखाय च"।

१।७श्रीसुखस्य "सप्तमः श्रीसुखाख्यस्तु पीतवर्णो विशालदृक्। पाटलावसनोपेतो दीर्घकर्णालकारवः। सुवर्णरत्नभूषाढ्यः सर्वानर्थविघातकृत्। श्रीफलं दक्षिणादिस्थे द्वितीये चैव पङ्कजम्। पुस्तकञ्चोर्द्ध्वे वामे तदधस्तु

शरावकम् । दधानः पुष्टये लक्ष्म्यै चन्दनादिभिरर्चितः"।

१।८भावस्य "भावाभिधोऽष्टमस्तत्र नीलशुभ्रारुणच्छविः । पीतकृष्णारुणप्रान्तवसनश्चित्रकुण्डलः । शुक्लाविद्रुममालोऽयं जटाविद्रुमाश्च एव च । दक्षिणे प्रथमे पुस्तमंशकन्तु द्वितीयके । वामोर्द्ध्वे करे शूलं तदधः पात्रमाश्रवम् । बिभ्रत्पूजनीयस्तु धान्यलाभाय वै त्रिये" ।

१।९यूनः "नवमोऽत्र युवाख्यस्तु पाटलाभोऽरुणेक्षणः । नीलवस्त्रजटोत्तुङ्गो रत्नमेचककुण्डलः । दक्षिणे प्रथमे शङ्खं द्वितीये तु सुदर्शनम् । वामादिमे करे पात्रं द्वितीये नीलपङ्कजम् । बिभ्राणः कान्तये पूज्यो लक्ष्मीसौभाग्यवृद्धये" ।

१।१०धातुः "धाता चैव प्रविज्ञेयो दशमः पिङ्गलोचनः । कृष्णशुभ्रारुणप्रान्तवसनः श्वेतकुण्डलः । शरावमादिमे दक्षे द्वितीये बीजपूरकम् । वामोर्द्ध्वे करे पुस्तं नीलसिन्दीवरस्त्वधः । जयाय पुत्रसम्पत्त्यै पूजनीयः सुमङ्गलैः" । (दधदिति शेषः)

२।११ईश्वरस्य "ईश्वराभिध एवात्र ज्ञेय एकादशोऽप्यसौ । कैरवाभस्त्रिनेत्रस्तु जटाखण्डेन्दुमौलिकः । शुक्लास्फाटिकरुद्राक्षभूषणस्तुङ्गनासिकः । त्रिशूलमादिमे दक्षे द्वितीये सीरमेव च । शरावमादिमे वामे द्वितीये चैव पुस्तकम् । बिभ्रत् सौख्याय पूज्योऽसौ योगवृद्ध्यै सुताप्तये" ।

१।१२बहुधान्यस्य "द्वादशो बहुधान्याख्यः पीतनीलारुणच्छविः । पीतवस्त्रो विशालाक्षस्तुन्दिलोदीर्घगोधिकः । जवाकुसुममालोऽयं कवची गजकुण्डलः । दक्षिणाद्ये करे कुम्भं सौवर्णं सर्वधान्यकम् । बीजपूरपिधानन्तत् खचितानेकरत्नकम् । द्वितीये डमरुं वामे चोर्द्ध्वे नीलकनीरजम् । द्वितीये तु करे सीरं दधानः सर्वधान्यकम् । त्रिदृशे पूजितो नित्यं खनामाद्यैस्तु संस्कृतः" ।

२।१प्रमाथिनः "प्रमाथिसंज्ञकश्चाद्यः शुक्लवर्णो महाभुजः । जटात्रितयसंयुक्तो दीर्घभालोऽर्ककुण्डलः । शोणनीलाम्बरोपेतः काञ्चनानेकसृक्किकः । पिकमाक्ष्यादिमे हस्ते द्वितीये कम्बुमेव च । पाशं वामोर्द्ध्वगे हस्ते तदधश्चाम्बुपात्रकम् । दधानो वैरिघाताय स्वर्गस्यैव पुष्टये" ।

२।२विक्रमस्य "विक्रमाख्यो द्वितीयस्तु नीलशुभ्रो महोदरः । पीतवस्त्रो दृढस्कन्धः कण्ठमौक्तिकालिकः । आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम् । वामादिमे करे पात्रं पाशमत्र द्वितीयके । दधानोऽतिबलायाथ पूजनीयस्तु यत्नतः" ।

२।३दृढस्य "दृढाभिधस्तृतीयस्तु श्वेतगौरो विशालदृक् । स्थूलरोमाऽतिसंहृष्टः केतकीदलकर्णयुक् । पीतप्रान्तारुणोपेतवसनः कटिघण्टकः । आदिमे दक्षिणे पाशं द्वितीये शङ्खमेव च । वामादिमे करे पात्रं द्वितीये मृगमेव च । धनधान्यप्रवृद्ध्यर्थं पूजनीयोऽतिसादरम्" ।

२।४चित्रभानोः "चतुर्थश्चित्रभान्वाख्यश्चित्रपीतोऽरुणांशुकः । शुक्लागर्भनिभश्चैव वरदः स्वर्णकुण्डलः । शुक्लास्रजन्तु दक्षाद्ये द्वितीये चैव पाशकम् । वामादिमे करे कम्बुं द्वितीये पङ्कजं शुभम् । बिभ्रदानन्दसम्पत्त्यै प्रतापार्थविवृद्धये" ।

२।५शुभानोः "पञ्चमस्तु शुभान्वाख्यः शुभ्रशोणरुचिः शुभः । कण्ठलिरेखाशोणस्तु जटाकाञ्चनसन्निभः । आदिमे दक्षिणे पद्मं द्वितीये शङ्खसञ्ज्ञकम् । वामोर्द्ध्वे तु करे पाशं तदधःस्थे शयेऽङ्कुशम् । बिभ्राणः सुखदः शान्त्यै रिपुपक्षक्षयाय च" ।

२।६तारकस्य "अत्र संवत्सरः षष्ठस्तारकाख्यः सिताम्बरः । श्वेतनीलारुणश्चैव स्वर्णकुण्डलभूषणः । प्रथमे दक्षिणे कुम्भं द्वितीये चैव पङ्कजम् । उत्तराद्ये करे पाशं द्वितीये शङ्खमादधत् । दुर्गत्यनेकनाशाय भूतये विजयाय च" ।

२।७पार्थिवस्य "सप्तमः पार्थिवाख्यस्तु तप्तकाञ्चनसन्निभः । पीतशोणाम्बरश्चैव कृष्णपीतोऽतिसुन्दरः । सर्वरत्नविभूषाढ्यः केतकीदलमस्तकः । आदिमे दक्षिणे पाशं द्वितीये चैव पङ्कजम् । कार्मुकञ्चोत्तरादिस्थे द्वितीये शङ्खमेव च । दधद्राज्यादिलाभाय पूजनीयः प्रयत्नतः ।

२।८व्ययस्य "अव्ययाख्योऽष्टमस्तत्र कैरवारुणसन्निभः । कृष्णनीलारुणश्वेतवसनश्चित्रकुण्डलः । कीरमाक्ष्यादिमे हस्ते द्वितीये सीरमेव च । शङ्खं वामादिमे हस्ते द्वितीये पाशमादधत् । यच्चनोभूतये नित्यं दृढये चायुषे त्रिये" ।

२।९सर्वजितः "सर्वजिन्नवमोऽत्रस्य श्वेतनीलोऽसितप्रभः । नीलवस्त्रजटोत्तुङ्गः कृष्णनीरजकुण्डलः । दक्षादिमे करे बाणं द्वितीये चैव पुस्तकम् । वामादिमे करे पाशं द्वितीये पात्रमेव च । दधानः पूजनीयोऽयं विजयाय सुखाय च" ।

२।१०सर्वधारकस्य "अधुना कथ्यते वत्स ! दशमः सर्वधारकः । कङ्कपत्रनिभश्चैव पाटलावसनान्वितः । नीलपङ्कजवर्णस्तु शुक्लाहारविभूषणः । पाशं दक्षादिमे हस्ते द्वितीये केतकीदलम् । शङ्खञ्चोत्तरादिस्थे द्वितीये चैव पुस्तकम् । दधानो विजयारोग्यवृद्धये चैव यत्नतः" ।

१।१विरोधिनः "एकादशोऽधुना ज्ञेयो विरोधी नाम वत्सरः। कृष्णपाण्डुरदेहस्तु वरदो नीलकुण्डलः। कृष्णप्रान्तारुणश्चैव वसनप्रान्तभूषणः। बिम्बीफलन्तु दक्षाद्ये द्वितीये श्वेतपङ्कजम्। वामादिमे करे सर्पं द्वितीये पाशमादधत्। पूजनीयोऽरिघाताय वलद्वयं च यज्वनः"।

२।१२विक्रतस्य "द्वादशो विक्रताख्यस्तु धूसरः पिङ्गलोचनः। नीलशुभ्रांशुकोपेतो मेषवृष्टङ्कजकुण्डलः। दक्षिणाद्ये करे पाशं द्वितीये मेषवृष्टङ्कम्। वामोर्द्ध्वे करे शङ्खं पाशमन्यादधः करे। दधानो रोगनाशाय दुष्टशत्रुविघातकृत्"।

३।१खरस्य "खराभिधानस्तत्राद्यो रक्तवर्णो महोदरः। नीलवस्त्रो दृढङ्गालो घनवर्वरमूर्द्धजः। दक्षिणाद्ये करे शक्तिं द्वितीये खड्गमेव च। वामादिमे करे पात्रं द्वितीये चामरन्दधत्। शत्रुतापाय पूज्योऽसौ विजयायैव यज्वनः"।

३।२नन्दनस्य "नन्दनाख्यो द्वितीयस्तु पीतशोणाननो बली। शुभ्रवस्त्रो जटालम्बी दीर्घकर्णः कजासनः। पङ्कजन्तु यमादिस्थे द्वितीये शक्तिमेव च। वज्रं वामादिमे पाणौ द्वितीये चाङ्कुशं भये। दधानः श्रेयसे भूत्यै पूजनीयोमहोदयः"।

३।३विजयस्य "विजयाख्यस्तृतीयस्तु श्वेतपीतारुणच्छविः। कृष्णवस्त्रः कशोत्तुङ्गजटारुद्राक्षमालिकः। अक्षस्रक्त्वं यमादिस्थे द्वितीये कुलिशं करे। शक्तिं वामादिमे हस्ते द्वितीये चैव पङ्कजम्। दधानो विजयारोग्यदृद्वये चैव पूजितः"।

३।४जयस्य "जयाभिधश्चतुर्थोऽत्र पीतशोणः शुचिः सुखी। पीतवस्त्रो जटैकस्तु पीतरुक्कर्णवेष्टितः। पुस्तकं प्रथमे दक्षे द्वितीये नीलपङ्कजम्। वामादिमे करे वज्रं द्वितीये शक्तिमेव च। दधानः शुभमाङ्गल्यदृद्वये चैव पूजितः"

३।५मन्मथस्य "पञ्चमो मन्मथाख्यस्तु नीलशोणशुचिः शुभः। स्वर्णकुण्डलसंयुक्तः कीरपक्षनिभांशुकः। मल्लिकाबन्धबाणस्तु मूर्वापुष्पजमालिकः। दण्डन्तु दक्षिणे हस्ते द्वितीये चैव पङ्कजम्। वामादिमे करे पुस्तीं द्वितीये शक्तिमेव च। दधानः सिद्धये भूत्यै योषिद्वर्गवशीकृतौ"।

३।६दुर्मुखस्य "षष्ठश्चैवात्र विज्ञेयो वत्सरो दुर्मुखाभिधः। शुकचञ्चुनिभश्चैव नीलकुण्डलसम्वरः। दक्षिणाद्ये करे शक्तिं द्वितीये वज्रमेव च। शुकं वामादिमे पाणौ द्वितीये सर्पमादधत्। पूजनीयो विधानेन भ्रूकुटीकुटिलाननः। दुष्टशत्रुविनाशाय सर्वरोगोपशान्तये"।

३।७हेमलम्बस्य "सप्तमो हेमलम्बाख्यो रक्तपीतनिभच्छविः। गृध्रपक्षांशुकश्चैव रत्नकुण्डलभूषणः। हेमजं पङ्कजं दक्षे प्रथमे करपल्लवे। द्वितीये कुलिशं पाणौ वामाद्ये पात्रमुत्तमम्। द्वितीये तु करे शक्तिं दधानो मुक्तये जय!"।

३।८विलम्बस्य "अष्टमस्तु विलम्बाख्यः पाटलाभः कृशोदरः। पीतवस्त्रो दृढङ्गालोजटाखण्डेन्दुमण्डनः। प्रथमे दक्षिणे सर्पं द्वितीये शक्तिमेव च। वामादिमे करे पात्रं द्वितीये चैव पङ्कजम्। दधानः शत्रुघाताय पूजनीयोविशेषतः"।

३।९विकारिणः "विकारी नवमश्चाथ कृष्णनीलारुणच्छविः ताम्रकुण्डलवस्त्राद्यः कण्ठशोणतिरेखिकः। दक्षिणाद्ये करे वाणं द्वितीये चैव पुस्तकम्। वामादिमे धनुर्हस्ते द्वितीये शक्तिमादधत्। पूजनीयोविशेषेण सर्वरोगोपशान्तये"।

३।१०शार्वरिणः "दशमः शार्वरिप्रख्यः कृष्णशुभ्रारुणच्छविः शोणवस्त्रोऽतिदीर्घाङ्गः स्थूलवर्वरमूर्द्धजः। दक्षिणाद्ये करे सर्पं द्वितीये शाल्मलीदलम्। कौशिकस्त्रोत्तरादिस्थे द्वितीये शक्तिमेव च। दधानः कीर्त्तये पुष्ट्यै शत्रुभङ्गाय पूजितः"।

३।११प्लवस्य "एकादशः प्लवाख्यस्तु शशकर्णनिभच्छविः। दर्दराभाम्बरोपेतो लोहकुण्डलसंवृतः। आदिमे दक्षिणे हस्ते दर्दरं मणिसंयुतम्। द्वितीये तु करे शक्तिं पात्रं वामादिमे करे। द्वितीये पङ्कजं बिभ्रत् पूजनीयोऽप्यमित्रहा"।

३।१२ शुभक्रतः "शुभक्रत् द्वादशोऽप्यत्र नागजाभः सुलोचनः। पाटलावसनोपेतः कृष्णकुण्डलभूषणः। दक्षिणे भीषणां शक्तिं प्रथमे करपल्लवे। द्वितीये हेमजं पद्मं वामाद्ये चैव दर्पणम्। द्वितीये कुलिशं हस्ते दधत्सौख्याय सम्पदे"।

४।१ शुभक्रतः "शुभक्रत् पीतभूवस्त्रः प्रथमो नीलाम्बरः नीलभूषणसंयुक्तो रत्नमुद्राकराङ्गुलिः। घटं दक्षादिमे हस्ते द्वितीये चैव पुस्तकम्। वामादिमे करे पात्रं द्वितीये ध्वजमेव च। दधानः श्रेयसे पुष्ट्यै पूजनीयोजयाय च"।

४।२ क्रोधिनः "क्रोधिसंज्ञो द्वितीयस्तु नीलशुभ्रः कृशोदरः

मंचकाम्बरसंयुक्तस्तुङ्गनासाक्षिपाण्डुरः। पद्मं दक्षादिमे हस्ते द्वितीये ध्वजमेव च। वामादिमे कजं पाशो द्वितीये सीरमेव च। दधानो वैरिनाशाय कृष्णद्रव्यैः सुपूजितः"।

४।३ विश्रावणोः "विश्रावणस्तृतीयस्तु कृष्णपीतः सुखोद्धटक्। कृष्णशुभ्रारुणप्रान्तवसनश्चित्रकुण्डलः। ध्वजं दक्षादिमे पाशो द्वितीये कुलिशं भये। दधानो भुक्तये प्रीत्यै नानाभोगफलाप्तये"।

४।४पराभवस्य "पराभवचतुर्थस्तु धूसरोऽरुणाम्बरः। नीलोत्पलस्तुतिश्चैव क्षुद्रघण्टिकमेखलः। नीलोत्पलन्तु दक्षाद्ये द्वितीये ध्वजमेव च। वामादिमे करे पाशं सन्दंशं तु द्वितीयके। धारयन्नरिघाताय पूजनीयो विपश्चिता"।

४।५ध्रुवकस्य "पञ्चमस्तु ध्रुवकाख्यो हरिचाजिनसन्निभः। मेघोदराभवस्त्रोऽयं संयुतः कृष्णकम्बरः। दक्षिणाद्ये ध्वजं पाशौ द्वितीये मेघसङ्कटम्। वामादिमे करे पाशं द्वितीये पाशमेव च। दधानो भूतये भुक्त्यै पूजनीयः सदा नृभिः"।

४।६ कीलकस्य "कीलकाख्यस्ततः षष्ठः कृष्णवर्णोऽतिदीर्घदृक्। नीलवस्त्रो जटाभारः कृष्णकुण्डलभूषणः। कीलकं दक्षिणादिस्थे द्वितीये ध्वजमेव च। वामादिमे करे पाशं सन्दंशन्तु द्वितीयके। दधानो विजयारोग्यदृढये चैव पूजितः"।

४।७सौम्यस्य "सप्तमः सौम्यनामाथ कीर्त्यते वत्सरः शुभः। नीलपीतजटायुक्तो रम्यादलनिभांशुकः। स्वर्णपत्रश्रुतिश्चैव कण्ठपङ्कजमालिकः। चन्द्रभास्यादिमे हस्ते द्वितीये केतकीदलम्। वामादिमे ध्वजं हस्ते द्वितीये नीरजं शुभम्। बिभ्रत्सौभाग्ययोगाय पूजनीयः सुभक्तितः"।

४।८ साधारणस्य "साधारणोऽष्टमो ज्ञेयो नीलगौरारुणच्छविः। पीतशोणान्तवस्त्रोऽयं स्वर्णकुण्डलरत्नयुक्। चन्द्रहासं यमादिस्थे द्वितीये चैव कीलकम्। वामादिमे ध्वजं पाशौ सन्दंशस्तोमरे दधत्। धनदृष्टौ सुखाप्त्यर्थं पूजनीयः सिताम्बुजैः"।

४।९ विरोधकृतः "विरोधकृच्च विज्ञेयो नवमो वत्सरो जय!। पिकाभः शुक्लवस्त्रोऽयं पिङ्गश्मश्रुजटोत्तमः। दक्षिणाद्ये करे शङ्खं द्वितीये चैव वै ध्वजम्। चन्द्रहासन्तु वामाद्ये द्वितीये परशुं भये। बिभ्राणो रोगनाशाय शत्रुबन्धापकृत् जय!।"

४।१० परिधाविनः "परिधावी तु विज्ञेयो दशमश्चैव वत्सरः। इन्दीवरारुणश्वेतः कृष्णपीतनिभांशुकः। ब्रह्मप्रसवकर्णस्तु कण्ठपङ्कजमालिकः। पिङ्गमार्क्यादिमे हस्ते द्वितीये ध्वजमेव च। घण्टां वामादिमे पाशौ द्वितीये चैव सुद्गरम्। दधानो दृढये चैव श्रेयोभूतिसुखायुषाम्"।

४।११प्रमादिनः "प्रमादी चापि विज्ञेयो रुद्रसङ्ख्योऽपि वत्सरः। अतसीपुष्पसङ्काशो हरिनीलारुणाम्बरः। मदघूर्णितनेत्रस्तु तन्द्रीभूत इवालसः। दण्डमार्क्यादिमे हस्ते द्वितीये दण्डमेव च। वामादिमे करे पाशं द्वितीये विधिनीदलम्। दधानो रोगविच्छित्त्यै शत्रुभङ्गाय यज्वनः"।

४।१२आनन्दस्य "आनन्दाख्यः सितः पीतवसनो द्वादशोऽब्दहि। शुक्लेन्द्रनीलसौवर्णभूषणो नीलकुण्डलः। पङ्कजं दक्षिणादिस्थे द्वितीये केतकीदलम्। वामोर्ध्वगे ध्वजं पाशौ तदधस्थे तु मोदकम्। योषिद्वशाय संपूज्यो गन्धपुष्पाक्षतादिभिः"।

५।१राक्षसस्य "तामसानां भवेदाद्यो राक्षसो नाम वत्सरः। इन्दीवरदलाभासो हेमवस्त्रोऽर्कभूषणः। अर्कमार्क्यादिमे हस्ते द्वितीये मुष्टिमेव च। नीलोत्पलन्तु वामाद्ये द्वितीये कुलिशं भये। दधद्रोगादिनाशाय पूज्यः स्थाणुभिरेव सः"।

५।२अनलस्य "अनलाख्यो द्वितीयस्तु नीलशुभ्रारुणच्छविः। पीतप्रान्ताञ्चितवस्त्रः वज्रकुण्डलभूषणः। चन्द्रहासं यमादिस्थे द्वितीये चाङ्कुशं दृढे। पिञ्चितस्तोमरादिस्थे परे चैव परश्वधम्। दधत् सुखसम्पदेऽरीणां विजयायैव यज्वनः"।

५।३पिङ्गलस्य "पिङ्गलाख्यस्तृतीयोऽब्द कुसुदारुणसन्निभः। श्वेतप्रान्तारुणानीलवसनः स्वर्णभूषणः। आदिमे पिञ्चितं वाम्ये द्वितीये सीरमेव च। कुलिशञ्चैव वामाद्ये सन्दंशन्तु द्वितीयके। बिभ्राणो विजयारोग्यदृढये चैव पूजितः"।

५।४कालयुक्तस्य "कालयुक्ताभिधस्तुर्यो नीलकण्ठो दृकोदरः। पीतारुणांशुकोपेतो नीलस्वर्णजभूषणः। यमादिमे करे सर्पं द्वितीये सीरमेव च। सीधुपात्रन्तु वामाद्ये द्वितीये कीलमेव च। पूजनीयो विशेषेण यज्वनो वैरिक्षत्यै"।

५।५सिद्धार्थस्य "अधुना कीर्त्यते वत्स! सिद्धार्थो नाम पञ्चमः।

तप्तकाञ्चनसङ्काशो नीलशुभ्रारुणांशुकः । नीलकुण्डल-संयुक्तो शुक्लाविद्रुमभूषणः । सौवर्णं कलशं यास्ये प्रथमे करपल्लवे । इन्दीवरं परे चैव कुलिशञ्चोत्तरोर्द्धगे । बीजपूरमधस्तस्माद्दधानः श्रेयसे सुदे" ।

५।६रौद्रस्य "रौद्राभिधस्ततः षष्ठः पिङ्गलः कृष्णलोहितः । पाटलावसनोपेतो हुस्ववर्वरमूर्द्धजः । कीरमाक्षादिमे हस्ते द्वितीये हलमादधत् । कुण्डीमिन्द्रादिमे पाशौ परे कुण्डलिनं शये । रोगनाशाय संभुक्तप्रै पूज्योऽयं परिपन्थिषु" । (इन्द्रो वामः)

५।७दुर्मतेः "सप्तमः कथ्यते चायं मेचकाभः स दुर्मतिः । शङ्खमाक्षादिमे हस्ते स्वर्णमेखलरत्नजम् । सर्पमत्र द्वितीये वै कुण्डीमिन्द्रादिमे शये । द्वितीये पुस्तकं पाशौ दधद्विद्वेषकृद्रिपोः" । (इन्द्रो वामः)

५।८दुन्दुभेः "अष्टमो दुन्दुभिप्रख्यो नीलश्यावो विशालदृक् । सोमवर्णः सितास्त्रोजवसनः कृष्णगोधिकः । जटाशकुट भालोऽयं स्वर्णपत्रद्युतिः शुभः । कदलीफलमाक्षाद्ये द्वितीये शङ्खमेव च । बीजपूरन्तु वामाद्ये द्वितीये सस्यमञ्जरीम् । बिभ्राणो धनधान्याय पूजनीयः सदा नृभिः" ।

५।९रुधिरोद्गारिणः "नवमो रुधिरोद्गारी नीलश्यामालिदेहयुक् । कृष्णप्रान्तारुणश्वेतवसनो नीलभूषणः । लोहिताक्षो जटापिङ्गः शोणचन्दनचर्चितः । रक्तोत्पलं यमादिस्थे द्वितीये कुलिशं शये । पिशितस्त्रोत्तरादिस्थे द्वितीये चाङ्कुशं दधत् । वैरिभङ्गाय वै पूज्यो बालदृष्टौ हि यज्वनः" ।

५।१०रक्ताक्षस्य "दशमश्चैव रक्ताक्षो नीलकण्ठः कृशोदरः । पीतनीलतनुश्चैव नीलश्यामालिकाम्बरः । शरमाक्षादिमे पाशौ द्वितीये चैव पङ्कजम् । सीरमिन्द्रादिमे हस्ते द्वितीये चैव कर्तरीम् । दधद्वैरिविघाताय पूजनीयः प्रयत्नतः" ।

५।११क्रोधनस्य "एकादशोऽधुना वत्स ! क्रोधनाख्यो निगद्यते । सजलाम्बुदसङ्काशः पीतश्यामाम्बरान्वितः । लोहभूषणसंयुक्तः क्षेमध्यमपङ्कजः । दक्षिणाद्ये करे शूलं पक्वशुष्कान्नसंयुतम् । द्वितीये कर्तरीमत्र वामाद्ये पात्रमाश्रयम् । सन्दंशन्तु द्वितीये वै दधानो वैरिमृत्यवे" ।

५।१२क्षयस्य "क्षयाभिधो भवेदत्र द्वादशो वत्सरो जय ! । कृष्णग्रीवः सुनीलाङ्गो रक्तनेत्रो जटाधरः । मेचकारुणवस्त्रस्तु नीलकारुणगोधिकः । आदिमे दक्षिणे सर्पं द्वितीये चैव पाशकम् । विषकुम्भन्तु वामाद्ये द्वितीये चैव केतनम्" । एवं पञ्चदशकमष्टिवत्सराणां मूर्त्तयः ।

यासां देवतानां प्रतिमानां यथारूपनिर्माणमुक्तं तासां तथारूपेणैव ध्येयता । अत्रानुक्तदेवतानां ध्यानभेदा ध्यानशब्दे वक्ष्यन्ते । देवताप्रतिमूर्त्त्यादयोऽप्यत्र । प्रतिमानिर्माणे द्रव्यभेदा मत्स्यपु॰उक्ताः ते च देवताप्रतिष्ठा शब्दे वक्ष्यते

देवताप्रतिष्ठा स्त्री द्वं॰ । देवताप्रतिमानां विधानेन तत्सान्निध्यापादके अग्ने वक्ष्यमाणनिरुक्तियुक्ते संस्कारभेदे देवप्रतिष्ठादयोऽप्यत्र । तद्विधानादि देवप्रतिष्ठातत्त्वे संक्षेपेणोक्तं यथा मत्स्यपु॰

"सौवर्णी राजती वापि ताम्री रत्नमयी तथा । शैलदारुमयी वापि लौहशङ्खमयी तथा । रीतिकाधातुयुक्ता च ताम्रकांस्यमयी तथा । शुभदारुमयी वापि देवतार्चा प्रशस्यते । अङ्गुष्ठपर्व चारभ्य वितस्तिं यावदेव तु । गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः" । रीतिका पित्तलं शुभदारुमयी यज्ञियकाष्ठसम्भवा । अर्चा प्रतिमा गृहेषु स्वगृहेषु । "प्रासादेष्वधिका शुभेति" वचनात् तत्राधिकापि शैलजा गृहे शुभदा । तन्त्रान्तरेऽप्युक्तम् "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना" । रूपकल्पना रूपस्थानां देवतानां पुंस्त्रग्रंथादिकल्पना । गौतमीयतन्त्रे "काश्मीरी शामदा प्रोक्ता स्वर्णजापि विसङ्गिदा । तैजोदा दारुजा चैव रैत्तिकी शत्रुनाशिनी । ताम्री धर्मविवृद्धिञ्च करोति बहुसौख्यदा । सुदे च मृण्मयी प्रोक्ता प्रतिमा शुभलक्षणा । भोगदा मोक्षदा सा तु प्रतिमा कथिता तव" । वराहपुराणे "कुड्ये लेख्ये च मे कश्चित् पटे कश्चिच्च मानवः । पूजयेद् यदि वा चक्रे मम तेजोऽंशसम्भवे" । कुड्ये लेख्ये भित्तौ लिखिते तथा पटे च लिखिते । चक्रे शालग्रामचक्रे । मत्स्यपुराणे लिङ्गमभिधाय "एवं रत्नमयं कुर्यात् स्फाटिकं पार्थिवं तथा । शुभदारुमयं वापि यद्वा मनसि रोचते । चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा । माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् । प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे" । अतीते दक्षे "पञ्चमी च द्वितीया च तृतीया सप्तमी तथा । दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी । तासु प्रतिष्ठा विधिवत् कृता वह्नफला भवेत्" । अवतारवस्तुने

"प्रतिष्ठा सर्वदेवानां केशवस्य विशेषतः। उत्तरायण-मासे शुक्लपक्षे शुभे दिने। कृष्णपक्षे च पञ्चम्याम् अष्टम्याञ्चैव शस्यते" भुजबलभीमे "युगादावयने पुण्ये कर्त्तव्या विष्णुवल्लभे। चन्द्रसूर्यग्रहे वापि दिने पुण्येऽथ पर्वसु। या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्तिता। मन्त्रागमविशेषेण प्रतिष्ठा मुक्तिदायिनी"। पद्मपुराणे "प्रतिपद्नवदशोक्ता पवित्रारोहणे तिथिः। त्रियोदेव्या द्वितीया च तिथीनामुत्तमा स्मृता। तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च। पञ्चमी नागराजस्य षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता भैरव-स्याष्टमी तथा। दुर्गायाः नवमी प्रोक्ता दशमी वासुकेस्तथा। एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः। त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्दशी। मम चैव मुनिश्रेष्ठ! पौर्णमासी तिथिः स्मृता"। चक्रपाणिन इति पद्म व्यवहारे इत्यस्मान्निप्रत्ययः "महिमासु-रहन्त्रीश्च प्रतिष्ठा दक्षिणायने"। कल्पतरौ देवी-पुराणम् "यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे। गर्त्तापूरणिकान्यासे शुभदस्तस्य पूजितः"। यस्य देवस्य प्रतिष्ठा ध्वजारोपणे यः कालः शुभदस्तस्य गर्त्तापूरणिका-न्यासे मन्त्रारम्भे स कालः पूजित इत्यर्थः। प्रतिष्ठासमु-च्चये "माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि। ज्येष्ठा-षाढकयोर्वापि प्रतिष्ठा शुभदा भवेत्"। भविष्ये "सोमो-ऽङ्गारस्तथैव शुक्रश्चैव तथा बुधः। एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्मणि"। एतद्वारेषु प्रतिष्ठा कर्तव्या इत्यर्थः। मत्स्यपुराणम् "आषाढे द्वे तथा मूलमुत्त-रात्रयमेव च। ज्येष्ठा श्रवणरोहिण्यः पूर्वभाद्रपद-स्तथा। हस्ताश्विनी रेवती च पुष्योमृगशिरस्तथा। अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते"। दीपिका-यामृ "प्राजेशवासवकरादितिभाश्विनीषु पौष्णामरेज्यशशि-भेषु तथोत्तरासु। कर्त्तुः शुभे शशिनि केन्द्रगते च जीवे कार्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा"। देवीपु-राणम् "तथा द्वादशगे जीवे अष्टमे वाथ भास्करे। प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता"। कल्पतरौ देवीपुराणम् "चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखा-र्थिभिः"। कालिकापुराणम् "प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना। प्राणप्रतिष्ठां कुर्वीत तस्या देवस्य वा हरेः। अचलायां प्रतिष्ठायां प्राणानां प्रति-माषु च। यथापूर्वं तथाभावः सर्वदोनां न वि-ष्णुता। अन्येषामपि देवानां प्रतिमासु च पार्थिव!। प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये"। प्रतिष्ठा ब्रा-ह्मणद्वारैव कर्तव्या। यथा हयशीर्षपञ्चरात्रे भगवद्वाक्यं "कर्त्तुमिच्छति यः पुण्यां मम मूर्तिं प्रतिष्ठया। अन्ये-ष्वणीयस्त्वाचार्यस्तेन लक्षणसंयुतः। ब्राह्मणः सर्व-वर्णानां पञ्चरात्रविशारदः। ब्राह्मणानामभावे तु क्ष-त्रियोवैश्यशूद्रयोः। क्षत्रियाणामभावे तु वैश्यः शूद्रस्य कल्पितः। कदाचिदपि शूद्रस्तु न चाचार्यत्वमर्हति"। हरिभक्तिविलासे "नमेद् यः शूद्रसंस्पृष्टं लिङ्गं वा हरि-मेव वा। स सर्वयातनाभोगी यावदाहूतसंप्लवम्"। आ-हूतसंप्लवं प्रलयपर्यन्तम्। तथा "स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर!। स्पर्शने नाधिकारोऽस्ति विष्णो वा शङ्करेऽपि वा"। कर्मादौ तु नवग्रहपूजामाह मत्स्य-पुराणम् "नवग्रहमखं कृत्वा ततः कर्म समारभेत्। अन्यथा फलदं पुंसां न कार्यं जायते क्वचित्"। प्र-तिष्ठाप्रकारस्तु विस्तरेण मत्स्यपुराणादावुक्तः। तदसम्भवे विद्याकरवाजपेयिसम्मतोभविष्यादावुक्तो ग्राह्यः यथा भविष्यपुराणम् "स्नपनादि यथाशक्ति कृत्वा तन्मूल-मन्त्रकम्। विन्यसेद्धृदयाम्भोजे प्रतिष्ठा सुलता भवेत्"। आदिपदात् पूजोत्सवहोमादि महाकपिलपञ्चरा-त्रोक्तकर्म च कर्तव्यं तद्यथा "सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके। पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्त-रम्। ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति। तत्त्व-न्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत्। पूजाञ्च महतीं कुर्यात् स्वतन्त्रोक्तां यथाविधि। प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत्"। लिपिन्यासः मातृकान्यासः। उक्तञ्च "जपादौ सर्वमन्त्राणां विन्यासेन लिपिं विना। कृतं तन्निष्फलं विद्यात् तस्मात् पूर्वं लिपिं न्यसेत्"। कादिमतेऽपि "मातृकायाः षडङ्गञ्च मातृकान्यासमेव च। सर्वासां प्रथमं कृत्वा पश्चात्तन्त्रोदितं न्यसेत्"। एत-द्वचनाच्च पूर्वं मातृकान्यासः पश्चात्तत्त्वन्यासः। क्रम-दीपिकायामप्येवं क्रमः। मन्त्रन्यासस्तु तत्तन्मन्त्रविशेषोक्त पदवर्णन्यासः। तदभावे शिरसि मूलमन्त्रेण तत्त्व-न्यासः। तत्त्वन्यासस्तु विष्णुविषयक एव न्यासप्रमा-णानि शारदाक्रमदीपिकोक्तान्यनुसन्धेयानि। प्राणप्रति-ष्ठामन्त्रस्तु शारदातन्त्रयोर्विंशतिपटलोक्तः यथा "पाशाङ्कु-शपुटा शक्तिर्वायुर्विन्दुविभूषितः। याद्याः सप्त सका-रान्ता व्योम सत्येन्दुसंयुतम्। तदन्ते हंसमन्त्रः स्यात्त

तोऽसुषप्र पदं वदेत् । प्राणा इति वदेत् पश्चादिह प्राणा-स्ततःपरम् । असुषप्र जीव इह च स्थितोऽसुषप्रपदं वदेत् । सर्वेन्द्रियाण्यसुषप्रान्ते वाङ्मनश्चक्षुरन्ततः । श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम् । तिष्ठन्त्वग्नि-वधूरन्ते प्राणमन्त्रोऽयमीरितः । प्रत्यसुषप्रपदात् पूर्वं पाशाद्यानि नियोजयेत् । प्रयोगेषु समाख्यातः प्राण-मन्त्रो मनीषिभिः" । पाशाङ्कुशघण्टा शक्तिरित्यनेन प्रथमं पाशबीजं आं, ततः शक्तिबीजं ह्रीं, ततोऽङ्कुशबीजं क्रोँ, वायुर्यकारः बिन्दुविभूषितः तेन यं, याद्याः सप्त सका-रान्ता उद्धृतयकारानुषादेन सप्त न तु तद्भिन्नं बीजं, पूर्णं पृथगुद्धारस्तु वर्णसप्तानामपि सबिन्दुनाख्यापनाय । अन्यत्रापि "अङ्कुशवाय्वनलायनीयरूपबीजान्युक्तानि अत्र वायुबीजस्यैकत्वं बीजत्वेन सर्वेषां सबिन्दुत्वं व्यक्तं राघ-वभट्टोऽप्येवम् । अन्यस्तु वाणीबिन्दुविभूषिताः इत्युक्त्वा नादबिन्दुविभूषिता इति व्याख्याय याद्या इत्यस्य विशे-षणं वदति । व्योम हकारः सत्यओकारः इन्दुर्बिन्दुः तेन होम् अतएव "पाशाङ्कुशान्तरितशक्तिमनोः पुरस्ताद्धार्य याद्यिसुनिवर्णगुणं सहंसमिति" प्रपञ्चसारोऽप्याह । गुणमित्यनेन होमिति पद्मपादाचार्यैर्व्याख्यातम् अग्नि-वधूः स्वाहा । तेनायं मन्त्रः आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः असुषप्र प्राणा इह प्राणाः । आमित्यादि असुषप्र जीव इह स्थितः । आमित्यादि असुषप्र सर्वे-न्द्रियाणि । आमित्यादि असुषप्र वाङ्मनश्चक्षुःश्रोत्रघ्राण-प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । असुषप्रेति षड्यन्तदेवतानामोपलक्षणम् "पदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते । साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्" इति नारदीयात् । वशिष्ठसंहितायाम् "हृदि हस्तं समादाय मूलमन्त्रञ्च संजपेत्" । मूलमन्त्रं तत्तद्देवतामन्त्रं स च वैदिकः तान्त्रिकश्च "ओङ्कारादि-चतुर्थ्यन्तं नमस्कारान्तमीरितम् । स्वनाम सर्वसत्वानां मन्त्र इत्यभिधीयते" इति ब्रह्मपुराणीयेन ओङ्कारा-दिचतुर्थ्यन्ततत्तद्देवतानामरूपो वा । कालिकापुराणेऽपि "प्रतिमायाः कपोलौ द्वौ स्मृत्वा दक्षिणपाणिना । प्राण-प्रतिष्ठां कुर्वीत तस्या देवस्य वा हरेः । वासुदेवस्य बीजेन तद्विष्णोरित्यनेन(१)च । तथैवाङ्गाङ्गिमन्त्राभ्यां प्रतिष्ठा-माचरेद्धरेः । तथैव हृदयेऽङ्कुशं दत्त्वा शक्त्या मन्त्रवित् । एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् । अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः चरन्तु च । अस्यै देवत्वसंख्यायै स्वाहेति यजुरीरयन् । अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेन च । प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत्" । देवी-प्रतिष्ठायाम् अस्या इत्यत्र अस्यै देवत्वसंख्यायै इत्यूहः सारस्वत्यां मेध्यां प्राणा इत्यत्र प्राणै इत्यूहवत् । अङ्गम-न्त्रैरङ्गन्यासमन्त्रैः अङ्गिमन्त्रैः प्रधानमन्त्रैः वैदिकैः ओं मनोजूतिर्जुषतामित्यादि(२)मन्त्रैः । (यजु०२।१२) । स्नप-नात् पूर्वं वल्मीकमृत्तिकादिभिस्त्रिभिः क्षालनमाह हय-शीर्षपञ्चरात्रम् "वल्मीकमृत्तिकाभिस्तु गोमयेन सुभस्मना । क्षालयेत् शिल्पिसंस्पर्शदोषाणामुपशान्तये । स्नापयेन्नव-तोयेन शुद्धवत्या तु देशिकः । नमस्तेऽस्तु सुरेशानि ! प्रणीते विश्वकर्मणा । प्रभाविताशेषजगद्धात्रि ! तुभ्यं नमोनमः । त्वयि संपूजयामीशे ! नारायणमनामयम् । रहिता शिल्पिदोषैस्तु शुद्धियुक्ता सदा भव" । तेन च यथाशक्ति स्नपनादीतिकर्तव्यताकः प्रतिमाहृदये तन्मू-लमन्त्रविन्यासोदेवताविशेषसन्निधिः प्रतिष्ठेति । राघव-भट्टधृतमहाकपिलपञ्चरात्रेऽपि "प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्वाच्च तिष्ठतेः । बहुर्थत्वाच्चिपातानां संस्कारादौ प्रतेः स्थितिः । अर्थस्तदयमेतस्य गीयते शाब्दिकैर्जनैः । विशेषसन्निधेर्या तु क्रियते व्यापकस्य तु । तन्मूर्तौ भा-वना मन्त्रैः प्रतिष्ठा सा विधीयते" । सुभस्मना गोमय-भस्मना गन्धतोयेन चन्दनादियुक्ततोयेन । देवतास्नानीय-द्रव्यपरिमाणमाह ब्रह्मपुराणम् "अष्टोत्तरं पलशतं स्नाने देयञ्च सर्वदा" । पलमाह मनुः "पञ्च कृष्णल-कोमाषस्ते सुवर्णस्तु षोडश । पलं सुवर्णाश्चत्वारः" इति । ततश्चाष्टरत्तिकाधिकलौकिकमाषद्वयाधिकतोलकत्वेन । १।२।८। वैधपलं भवति एवं तथाविधाष्टोत्तरशतपल-परिमितेन लौकिकषष्ट्यधिकशततत्रयतोलकाः ३६० इति । एवं वल्मीकमृत्तिकादिक्षालने सर्वाङ्गीणजलस्पर्शनस्ना-नरूपत्वात्तत्रापि अष्टोत्तरं शतपलमिति वदन्ति । वल्मी-कमृदादिस्नाने मन्त्रविशेषानुपादानात् "मन्त्रानादेशे गायत्रीति" मूलपाणिलिखितात् गायत्र्या तत्तन्मूलम-न्त्रेण वा स्नानं कारयितव्यम् । गन्धोदकस्नाने तु शुद्ध-वत्या(३) एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया । देशिको यजमानोगुरुर्वा विप्रः । नमस्ते इत्यादि विज्ञापनमन्त्रो देवतान्तरे च नारायणमित्यत्र तत्तद्देवतानामोहः । शिवलिङ्गस्यार्च्यत्वात् अर्चाविशेषणत्वात् स्त्रीलिङ्गमवि-रुद्धम् । यमः "कृत्वा देवमृहं सर्वं प्रतिष्ठाप्य च दे-वताम् । विधाय विधिवत् पूजां तल्लोकं विन्दते ध्रु-

वम्"। नारसिंहे "प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत्। सर्वपापानि संत्यज्य स तु विष्णुपुरं व्रजेत्। प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि। निष्कामो नरशार्दूल! देहबन्धात् प्रमुच्यते। सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते। विधिवत् स्नापयेद् यस्तु कारयित्वा जनार्दनम्। न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्च न"। नरसिंहस्य विष्णोः उपसंहारे तथा दर्शनात्। माधवोल्लासे "देवस्य प्रतिमायास्तु यावन्तः परमाणवः। तावद्वर्षसहस्राणि विष्णुलोके महीयते। राजमार्त्तण्डे "पुत्रोत्पत्तौ तथा श्राद्धमन्नप्राशनिके तथा। चूडाकार्ये व्रते चैव नाम्नि पुंसवनेषु च। पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मनः। एतदृद्धिकरं नाम गृहस्थस्य विधीयते"। वृद्धिकरं श्राद्धमित्यन्वयः। स्मृत्यन्तरे "कलौ चैकाहसाध्येन प्रतिष्ठां मन्दवित्तवान्। मध्यमेनाधमेनापि प्रकुर्यात्तान्त्रिकोत्तमः। नित्यं निर्वर्त्य मतिमान् कुर्यादभ्युदयन्ततः। विप्रान् संभोजयेन्नाथ ततो यागगृहं व्रजेत्। गणेशग्रहदिक्पालान् प्रतिकुम्भेषु पूजयेत्। स्थण्डिले पूजयेद्विष्णुं परिवारगणं यजेत्। स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि। पञ्चामृतैः पञ्चगव्यैः पञ्चमृत्पिण्डकैरपि। तिलतैलैस्तथा स्नेहैः कषायैरपि सत्तमः"। तथा "जम्बुशाल्मलिवाट्यालं वदरं बकुलं तथा। एतेषां वल्कलरसः कषायः परिकीर्तितः। पञ्चपुष्पोदकैर्वाथ त्रिपत्रैरपि सत्तमः। तुलसीकुन्दमालूरपत्रागण्डुस्त्रिपत्रकम्। चम्पकाम्रशमीपद्मकरवीरञ्च पञ्चकम्। मृत्तिका करिदन्तस्य पर्वताश्वखुरस्य च। कुशवल्मीकसम्भूतं मृत्पञ्चकमितीरितम्। गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्। कुर्यात् प्राणप्रतिष्ठाञ्च होमं कुर्याद् यथाविधि। दक्षिणां विधिवत् कुर्यात् पूर्णार्घ्यं तदनन्तरम्"। इति भविष्यपुराणे तृतीयभागे नवमोऽध्यायः। नरसिंहपुराणे "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते"। ब्रह्मकूर्चविधानेन कुशोदकयुक्तेन पञ्चगव्येन। स्नानीयानुलेपने तदुद्धर्तने फलमाह तत्रैव "यवगोधूमजैस्तूर्णैरुद्धर्त्योष्णेन वारिणा। प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात्"। स्मृतिः "चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि। पताका लोकपालानां दशानां परिकीर्तितः"। पञ्चहस्तश्च वै दण्डः पताकानां प्रकीर्तितः। ज्योतिषे "दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तं विधेयं सर्वकर्मसु"। प्रतिष्ठानन्तरं मातृके "ततः सहस्रं विप्राणामथ वाष्टशतं तथा। भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम्"। षोडशोपचाराः "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्काचमस्नानवसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा"। दशोपचारास्तु "पाद्यार्घ्याचमनीयं मधुपर्काचमने अपि। गन्धादिपञ्चकञ्चेति उपचारा दशोदिताः"। पञ्चोपचारास्तु "गन्धादयोनैवेद्यान्ताः पूजा पञ्चोपचारिका"। उपचारद्रव्याणि शारदायाम् "पाद्यं श्यामाकदूर्वाजविष्णुक्रान्ताभिरीरितम्"। विष्णुक्रान्ता अपराजिता एतद्द्रव्ययुक्तं जलमिति शेषः। "गन्धपुष्पाक्षतयवकुशाग्रफलसर्षपैः। सदूर्वैः सर्वदेवानामेतदर्घ्यसुदीरितम्"। एतद्युक्तं जलमित्यर्थः। "जातीलवङ्गकक्कोलैर्जलमाचमनीयकम्। आज्यं दधि मधून्निम्बं मधुपर्कं निवेदयेत्"। कात्यायनः "मधुपर्कं दधिघृतमधु पिहितं कांस्ये कांस्येन"। मधुपर्केति स्थाने स्नानीयेति पाठः पूर्वोक्तद्रव्ययुक्तं जलमात्रं वा "गन्धचन्दनकर्पूरकालागुरुभिरीरितः"। राघवभट्टधृतम् "शङ्खपात्रस्थितं गन्धं मन्त्रैः कुर्यात् कनिष्ठया। कनिष्ठाङ्गुष्ठसंयुक्ता गन्धमुद्रा प्रकीर्तिता"। पुष्पाणि तत्तद्देवदेयानि "अगुरुक्षीरगुग्गुलुमधुपर्ककुचन्दनैः। धूपयेदाज्यसंमिश्रैश्चूर्णैर्देवस्य देशिकः। तत्र तत्र जलं दद्यात् उपचारान्तरान्तरे"। राघवभट्टधृतम् "सर्वोपचारवस्तूनामभावे भावनैव हि। निर्मलेनोदकेनाथ पूर्णतेत्याह नारदः"। नारसिंहे "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते"। ब्रह्मकूर्चविधानेन कुशोदकयुक्तेन पञ्चगव्येन। ब्रह्मपुराणे "देवानां प्रतिमा यत्र घृताभ्यक्तक्षमा भवेत्। पलानि तस्यै देयानि श्रद्धया पञ्चविंशतिम्। अष्टोत्तरशतं स्नाने पलं देयञ्च सर्वदा। यवगोधूमजैस्तूर्णैरुद्धर्त्योष्णेन वारिणा। प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात्। पादपीठन्तु यो दद्यात् बिल्वपत्रैर्निघर्षयत्। उष्णाम्बुना च प्रक्षाल्य सर्वपापैः प्रमुच्यते" देवीपुराणम् "होमोग्रहादिपूजायां शतमष्टोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते"। कात्यायनः "आज्यद्रव्यमनादेशे जुहोतिषु विधीयते"। कालिकापुराणम् "यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा।

अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तदुत्सृजेत्"। नरसिंह-पुराणम् "स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्। अत्र नीराजनविधिः पूजारत्नाकरे देवीपुराणे "भक्त्या पिष्टप्रदीपाद्यैस्तान्त्रत्यादिपल्लवैः। ओषधीभिश्च मेध्याभिः सर्ववीजैर्यवादिभिः। नवम्यां पर्वकालेषु यात्राकाले विशेषतः। यः कुर्याच्छ्रद्धया वीर! देव्या नीराजनं नरः। शङ्खभेर्यादिनिनदैर्जयशब्दैश्च पुष्कलैः। यावतोदिवसान् वीर! देव्यानीराजनं कृतम्। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। यस्तु कुर्यात् प्रदीपेन सूर्यलोकं स गच्छति"। पर्वकाले उत्सवकाले। देव्या इति स्त्रीत्वमविवक्षितम्। अत्र प्रतिष्ठितमूर्त्तौ कदाचित् पूजाऽभावे महाकपिलपञ्चरात्रम् "एकाहं पूजाविहतौ कुर्याद्द्विगुणमर्चनम्। त्रिरात्रे तु महापूजा संप्रोक्षणमतःपरम्। मासादूर्द्ध्वमनेकाहं पूजनं चेद्विहन्यते। प्रतिष्ठैवोच्यते कैश्चित् कैश्चित् संप्रोक्षणक्रमः"। संप्रोक्षणक्रमः "संप्रोक्षणन्तु देवस्य देवस्य त्वेति(४)पूर्ववत्। गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च। प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम्। सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके। पञ्चवारं जपेन्मूलमष्टोत्तरशतं तथा। ततो मूलेन मूर्द्धादि पीठान्तं चैव संस्पृशेत्"। इति "तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत्। प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत्। पूजाञ्च महतीं कुर्यात् स्वतन्त्रोक्तां यथाविधि। यामहीनादिषु प्रायः संक्षेपेण विधिः स्मृतः"। अथास्मृग्यस्मर्यने तु बौधायनः "द्रव्यवत् कृतशौचानां देवार्चानां भूयः प्रतिष्ठापनमिति"। देवार्चा देवताप्रतिमा। तासामस्मृग्यस्मृष्टानां प्रकृतिद्रव्यस्य ताम्रादेर्यथेष्टं शौचं कृत्वा पुनः प्रतिष्ठापनात् पूज्यत्वमित्यर्थः इति। रत्नाकरे आदिपुराणे "स्खण्डिते स्फुटिते दग्धे भ्रष्टे स्थानविवर्जिते। यामहीने पशुस्पृष्टे पतिते दुष्टभूमिषु। अन्यमन्त्रार्चिते चैव पतित स्मर्गदूषिते। दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः। इति सर्वगतो विष्णुः परिभाषाञ्चकार ह"। अत्र द्विप्राङ्गहोमौ स्वावश्यकौ यथाशक्तीत्यभिधानात् इति कश्चित्। तथा चाल्पधनानां यज्ञं विनाऽपि पूजनमाह विष्णुधर्मोत्तरे प्रथमकाण्डम् "पूजाकर्म बहिर्वेद्यां श्रद्धया भृगुनन्दन!। न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कदाचन। विष्णुदेवनिकायस्य यथाश्रद्धमरिन्दम!। तपसा पूजयेन्नित्यं यस्मादल्पधनो नरः"। यदोकाहे वास्तुयागगृहोत्सर्गौ तदा तन्त्रेण द्विप्राङ्गं कुर्यात् तथा एकस्मिन्नग्नौ होमत्रयं विधेयं एकाग्नावनेकहोमकरणे एकं परिसमूहनादिकमाह गोभिलः। "गणेष्वेकं परिसमूहनमिध्मबर्हिः पर्युक्षणमाज्यभागाविति"। पूजादिकं प्रत्येकमेव"।

तत्र प्रतीकसूचितामन्त्राः क्रमेण यथा

(१) तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" ऋ० १।१२६

(२) "मनो जूतिर्जुषतामज्यस्य बृहस्पतिर्यज्ञमिमम् तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवास इह मादयन्तामो प्रतिष्ठ" यजु० २।१२

(३) अत्र शुद्धवत्या शुद्धपदवत्या तास्र तिस्र ऋचः ऋ०८।९७ सूक्तास्थिता यथा

"एतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु।७। इन्द्र! शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं निधारय शुद्धो मसद्धि सोम्यः। ८। इन्द्र! शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषासति। ९।

(४) "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि" यजु०१।६

विस्तरस्तु अग्निपु० ५६ अ०आदौ उक्तो यथा

"प्रतिष्ठापञ्चकं वक्ष्ये प्रतिमात्मा तु पूरुषः। प्रकृतिः पिण्डिका लक्ष्मीः प्रतिष्ठा योगकस्तयोः। इच्छाफलार्थिभिस्तस्मात् प्रतिष्ठा क्रियते नरैः। गर्भस्रुवं तु निःसार्य प्रासादस्याग्रतो गुरुः। अष्टषोडशविंशान्तं मण्डपञ्चाधमादिकम्। स्नानार्थं कलसार्थञ्च यागद्रव्यार्थमङ्गतः। त्रिभागेणार्द्धभागेन वेदिं कुर्यात्तु शोभनाम्। कलसैर्घण्टिकाभिश्च वितानाद्यैश्च भूषयेत्॥ पञ्चगव्येन सम्प्रोक्ष्य सर्वद्रव्याणि धारयेत्। अलङ्कृतो गुरुर्विष्णुं ध्यात्वात्मानं प्रपूजयेत्। अङ्गुलीयप्रभृतिभिर्मूर्त्तिपान् वलयादिभिः। कुण्डे कुण्डे स्थापयेच्च मूर्त्तिपांस्तत्र पारगान्" (मूर्तिपान् मूर्तिनिर्माणशिल्पिनः)। "चतुष्कोणे चार्द्धकोणे वर्तुले पद्मसन्निभे। पूर्वादौ तोरणार्थन्तु पिप्पलोदुम्बरौ वटम्। प्लक्षं सुशोभनं पूर्वं सुभद्रं दक्षतोरणम्। सुकर्म च सुहोत्रञ्च आग्ने सौम्ये सुसञ्चयम्। पञ्चहस्तं तु

संस्थाप्य स्योनापृथिवि(१) पूजयेत् । तोरणस्तम्भमूले तु कलसान्मङ्गलाङ्कुरान् । प्रदद्यादुपरिष्टाच्च कुर्याच्चक्रं सुदर्शनम् । पञ्चहस्तप्रमाणन्तु ध्वजं कुर्याद्विचक्षणः । वैपुल्यं चास्य कुर्वीत षोडशाङ्गुलसम्मितम् । सप्तहस्तोच्छ्रितं चास्य कुर्यात् दण्डं समाहितः । अरुणोऽग्निनिभश्चैव कृष्णः शुक्लोऽथ पीतकः । रक्तवर्णस्तथा श्वेतः कृष्णवर्णः क्रमाद् ध्वजाः । कुसुदः कुसुदाक्षश्च पुण्डरीकोऽथ वामनः । शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः । पूज्याः कोटिगुणैर्युक्ताः पूर्वाद्या ध्वजदेवताः । जलाढकसुपूरास्तु पक्वबिम्बोपमा घटाः । अष्टाविंशाधिकशतं कालमण्डलवर्जिताः । सहिरण्या वस्त्रकण्ठाः सोदकास्तोरणाद्बहिः । घटाः स्थाप्याश्च पूर्वादौ वेदिकायाश्च कोणगान् । चतुरः स्थापयेत् कुम्भानाजिघ्रेति (२) च मन्त्रतः । कुम्भेष्वावाह्य शक्रादीन् पूर्वादौ पूजयेत् क्रमात् । इन्द्रागच्छ देवराज ! वज्रहस्त ! गजस्थित ! । पूर्वद्वारञ्च मे रक्ष देवैः सह नमोऽस्तु ते१ । त्रातारमिन्द्रमन्त्रेण (३) अर्चयित्वा यजेद् बुधः । आगच्छाग्ने ! शक्तियुत ! छागस्थ ! बलसंयुत ! । रक्षाग्नेयीं दिशं देवैः पूजां गृह्ण नमोस्तु ते । अग्निर्मूर्द्धेति (४)मन्त्रेण यजेद्वा अग्नये नमः२ । महिषस्थ ! यमागच्छ दण्डहस्त ! महाबल ! । रक्ष त्वं दक्षिणद्वारं वैवस्वत ! नमोऽस्तु ते । वैवस्वतं सङ्गमनमित्यनेन (५) यजेद् यमम्३ । नैर्ऋतागच्छ खड्गाढ्य ! बलवाहनसंयुत ! । इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैर्ऋतीं दिशम् । एष ते इति (६) मन्त्रेण यजेदर्घ्यादिभिर्नरः ४ । मकरारूढ ! वरुण ! पाशहस्त ! महाबल ! । आगच्छ पश्चिमं द्वारं रक्ष रक्ष नमोऽस्तु ते । उरुं हि राजा(७) वरुणं यजेदर्घ्यादिभिर्नरः ५ । आगच्छ वायो ! सबल ! ध्वजहस्त ! सवाहन ! । वायव्यं रक्ष देवैस्त्वं समरुद्भिर्नमोऽस्तु ते । वात (८) इत्यादिभिश्चार्चेदोत्तमो वायवेऽपि वा ६ । आगच्छ सोम ! सबल ! गदाहस्त ! सवाहन ! । रक्ष त्वमुत्तरद्वारं सकुबेर ! नमोऽस्तु ते । सोमं राजानमिति (९) वा यजेत्सोमाय वै नमः ७ । आगच्छेशान ! सबल ! शूलहस्त ! वृषस्थित ! । यक्षसमण्डपस्यैशीं दिशं रक्ष नमोऽस्तु ते । ईशानादस्येति (१०) यजेदीशानाय नमोऽपि वा ८ । ब्रह्मन्नागच्छ हंसस्थ ! स्रुक्स्रुवव्यग्रहस्तक ! । सलोकोर्द्धां दिशं रक्ष यज्ञस्याज नमोऽस्तु ते । हिरण्यगर्भेति (११) यजेन्नमस्ते ब्रह्मणेऽपि वा ९ । अनन्तागच्छ चक्राढ्य ! कूर्मस्याहिगणेश्वर ! । अधोदिशं रक्ष रक्ष अनन्तेश ! नमोऽस्तु ते । नमोऽस्तु सर्पेति (११) यजेदनन्ताय नमोऽपि वा" १० ५६अ० ।

(अत्राध्याये प्रतीकसूचिता मन्त्राः क्रमेण दर्शयन्ते यथा

(१) "स्योना पृथिवि नो भवान्यक्षरा निवेशनी । यच्छानः शर्म सप्रथाः" यजु०३५।२१। ऋग्वेदे तु पृथिवी इति पाठः

(२) "आजिघ्र कलसं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सहस्रं धुक्षोरधारा पयस्वती पुनर्मा विशताद्रयिः" यजु० ८।४२

(३) "त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः" यजु० २०,५०

(४) "अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति" यजु० ३।१२

(५) "वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य" ऋ० १०।१४।१ अर्घर्चम् ।

(६) "एष ते निर्ऋते ! भागस्तं जुषस्व स्वाहा" यजु०९।३५

(७) "उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्" ऋ० १।२४।८

(८) "वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्रण आयूंषि तारिषत्" ऋ०१०।१८६।१

(९) "सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे । आदित्यान् विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिम्" ऋ०१०।१४१।२।

(१०) "ईशानादस्य भुवनस्य भूरेर्न वा उ । यो यज्जज्ञादस्तूर्यम्" ऋ०२।३३।९ अर्द्धर्चम्

(११) "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम" ऋ०१०।१२१।१

(१२) "नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये च दिवि तेभ्यः सर्पेभ्यो नमः" यजु०१३।६)

"भूमेः परिग्रहं कुर्यात् क्षिपेद्वीर्हीश्च सर्षपान् । नारसिंहेन रक्षोघ्नान् प्रोक्षयेत् पञ्चगव्यतः । भूमिं घटे तु संपूज्य सरत्ने साङ्गकं हरिम् । अस्त्रमन्त्रेण कवचं तत्र चाष्टशतं यजेत् । अच्छिन्नधारया सिञ्चन् व्रीहीन् संस्कृत्य धारयेत् । प्रदक्षिणं परिभ्राम्य कलश

विकिरोपरि। सवस्त्रे कलसे भूयः पूजयेदच्युतं श्रियम्। योगे योगेति मन्त्रेण (१) न्यसेच्छय्यान्तु मण्डले। कुशोपरि तूलिकाञ्च शय्यायां दिग्विदिक्षु च। विद्याधिपान् यजेद्विष्णुं मधुघातं त्रिविक्रमम्। वामनं दिक्षु वाय्वादौ श्रीधरञ्च हृषीकपम्। पद्मनाभं दामोदरमैशान्यां स्नानमण्डपे। अभ्यर्च्य पश्चादैशान्यां चतुष्कुम्भे सवेदिके। स्नानमण्डपके सर्वद्रव्याणयानीय निःक्षिपेत्। स्नानकुम्भेषु कुम्भांस्तांश्चतुर्दिक्षधिवासयेत्। कलसाः स्थापनीयास्तु अभिषेकार्थमादरात्। वटोदुम्बरकाश्वत्थांश्चम्पकाशोकश्रीद्रुमान्। पलाशार्जुनप्लक्षांस्तु कदम्बबकुलाम्रकान्। पल्लवांस्तु समानीय पूर्वकुम्भे विनिःक्षिपेत्। पद्मकं रोचनां दूर्वां दर्भपिञ्जूलमेव च। जातीपुष्पं कुन्दपुष्पञ्चन्दनं रक्तचन्दनम्। सिद्धार्थं तगरञ्चैव तण्डुलं क्षणे न्यसेत्। सुवर्णं रजतञ्चैव कूलद्वयमृदन्तथा। नद्याः समुद्रगामिन्या विशेषात् जाह्नवीमृदम्। गोमयञ्च यवान् शालींस्तिलांश्चैवापरे न्यसेत्। विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम्। सहदेवीं महादेवीं बलां व्याघ्रीं सलक्ष्मणाम्। ऐशान्यामपरे कुम्भे माङ्गल्यान्निनिवेशयेत्। वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत्। जाह्नवीवालुकातोयं विन्यसेदपरे घटे। वराहदशनागेन्द्रविषाणोद्धृतमृत्तिकाम्। मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे न्यसेत्। तीर्थपर्वतमृद्भिश्च युक्तमप्यपरे न्यसेत्। नागकेशरपुष्पञ्च काश्मीरमपरे न्यसेत्। वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च। एतान्येकत्र निःक्षिप्य स्थापयेद्देवसत्तमम्। नदीनदतडागानां सलिलैरपरं न्यसेत्। एकाशीतिपदे चान्यान्मण्डपे कलसान् न्यसेत्। गन्धोदकाद्यैः सम्पूर्णान् श्रीसूक्तं (२)नाभिमन्त्रयेत्। यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा। तिलान् फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत्। पद्मं श्यामलतां दूर्वां विष्णुपर्णीं कुशांस्तथा। पाद्यार्थं दक्षिणे भागे मधुपर्कं तु दक्षिणे। कक्कोलकं लवङ्गं च तथा जातीफलं शुभम्। उत्तरे ह्याचमनाय चाग्नौ दूर्वाक्षतान्वितम्। पात्रं नीराजनार्थं च तथोद्वर्तनमानिले। गन्धपुष्पान्वितं पात्रमैशान्यां पात्रके न्यसेत्। सुरामांसीं चामलकं सहदेवीं निशाद्वयम्। षष्टिदीपान्यसेदष्टौ न्यसेच्चीराजनाय च। शङ्खं चक्रञ्च श्रीवत्सं कुलिशं पङ्कजादिकम्। हेमादिपात्रे कृत्वा तु नानायर्णादिपुष्पकम्"५७अ०

(१) ("योगे योगे तवस्तरां वाजे वाजे हवामहे। सखाय इन्द्रमूतये"ऋ०१।३०।७)

(२) श्रीसूक्तं "हिरण्यवर्णामित्यादि पञ्चदशर्चं सूक्तम्" परिशिष्टोक्तं तुलादाना० १६५ पृष्ठादौ द्रष्टव्यम्।

"ऐशान्यां जनयेत् कुण्डं गुरुर्वह्निञ्च वैष्णवम्। गायत्र्याष्टशतं हुत्वा सम्पातविधिना घटान्। मोक्षयेत् कारुशालायां शिल्पिभिर्मूर्तिपैर्व्रजेत्। तूर्यशब्दैः कौतुकञ्च बन्धयेद्दक्षिणे करे। विष्णवे शिपिविष्टाय (१) ऋर्णासूक्तेन सर्षपैः। पट्टवस्त्रेण कर्तव्यं देशिकस्यापि कौतुकम्। मण्डपे प्रतिमां स्थाप्य सवस्त्रां पूजितां स्तुवन्। नमस्तेऽर्चे! सुरेशानि! प्रणीते! विश्वकर्मणा। प्रभाविताशेषजगद्धात्रि! तुभ्यं नमो नमः। त्वयि सम्पूजयामीशे नारायणमनामयम्। रक्षिता शिल्पिदोषैस्त्वमृद्धियुक्ता सदा भव। एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपम्। शिल्पिनन्तोषयेद्द्रव्यैर्गुरवे गां प्रदापयेत्। चित्रं देवेति (२) मन्त्रेण नेत्रे चोन्मीलयेत्ततः। अग्निर्ज्योतीति (३) दृष्टिञ्च दद्याद्वै भद्रपीठके। ततः शुक्लानि पुष्पाणि हृतं सिद्धार्थकं तथा। दूर्वां कुशाग्रं देवस्य दद्याच्छिरसि देशिकः। मधुवातेति (४) मन्त्रेण नेत्रे चाभ्यञ्जयेद् गुरुः। हिरण्यगर्भमन्त्रेण(५) इमं मेति(६) च कीर्त्तयेत्। हृतेनाभ्यञ्जयेत् पश्चात् पठन् हृतवतीं (७)पुनः। मसूरपिष्टेनोद्वर्त्य अतो देवेति(८) कीर्त्तयन्। क्षालयेदुष्णतोयेन सप्त तेऽग्नेति(९) देशिकः। द्रुपदादि(१०)वेत्यनुक्षिप्ते दापो हि ष्ठेति (११)सेचयेत्। नदीजैस्तीर्थजैः स्नानं पावमानीति(१२) रत्नजैः। समुद्रं गच्छ (१३) चन्दनैस्तीर्थमृत्कलसेन च। शन्नो देवीः(१४) स्नापयेच्च गायत्र्याप्युष्णवारिणा। पञ्चमृद्भिर्हिरण्येति (१५) स्नापयेत्परमेश्वरम्। सिकताद्भिरिमं मेति(१६) वल्मीकोदघटेन च। तद्विष्णोरित्यों (१७) पञ्चद्भिर्यां ओषधीति (१८) मन्त्रतः। यत्तायत्रेति (१९) काषायैः पञ्चभिर्गव्यकैस्ततः। पयः पृथिव्यां (२०) मन्त्रेण याः फलिनी (२१) फलाम्बुभिः। विश्वतश्चक्षुः (२२) सौम्येन पूर्वेण कलसेन च। सोमं राजानमित्येव (२३) विष्णोरराट (२४) दन्ततः। हंसः शुचिः (२५) पश्चिमेन कुर्यादुद्वर्तनं हरेः। मूर्द्धानन्दिवो (२६) मन्त्रेण धात्रीमांसीं च के ददेत्। मानस्तोकेति (२७) मन्त्रेण गन्धद्वारेति (२८) गन्धकैः। इदमापेति (२९) च घटैरेकाशीतिपदस्थितैः। एह्येहि भगवन्! विष्णो! लोका-

हुयहङ्कारक !। यज्ञभागं गृहाणेमं वासुदेव ! नमोऽस्तु ते। अनेनावाह्य देवेशं कुर्यात् कौतुकमोचनम्। सुञ्चामि त्वेति (२०) सूक्तेन देशिकस्यापि मोचयेत्। पाद्यं हिरण्मयेनार्घ्यं (२१)मतो देवेति(२२) चार्घ्यकम्। मधुवाता(२३)मधुपर्कं मयि गृह्णामि(२४) चाचमेत्। व्यक्षन्नमीमदन्तेति(२५)किरेदुदूर्वाक्षतं बुधः। काण्डात्(२६)निर्मञ्छनं कुर्याद्गन्धं गन्धवतीति(२७)च। तत्त्वा यामीति(२८)माल्यञ्च इदं विष्णुः(२९)पवित्रकम्। बृहस्पते (४०) वस्त्रयुग्मं वेदाहमित्युत्तरीयकम्। (४१) महाव्रतेन(४२)सकलं पुष्पं चौषधयः(४३)क्षिपेत्। धूपं दद्याद्धूरसीति (४४) विभ्राट्सूक्तेन (४५) चाञ्जनम्। युञ्जन्तीति (४६)च तिलकं दीर्घायुष्टेति(४७)माल्यकम्। इन्द्रं विश्वेति (४८)छत्रन्तु आदर्शन्तु विराजतः। (४९) चामरन्तु त्रिकर्णेन भूषां रथन्तरेण(५०) च। व्यजनं वायुदैवत्यैर्सुञ्चामि त्वेति (५१) पुष्पकम्। वेदाद्यैः संस्तुतिं कुर्याद्धरेः पुरुषसूक्ततः। सर्वमेतत्समं कुर्यात् पिण्डिकादौ हरादिके। देवस्योत्थानसमये सौपर्णं (५२) सूक्तमुच्चरेत्। उत्तिष्ठेति(५३)समुत्थाप्य शय्याया मण्डपे नयेत्। शाकुनेनैव सूक्तेन देवं ब्रह्मरथादिना। (५४) यतो देवेति (५५) सूक्तेन प्रतिमां पिण्डिकां तथा। श्रीसूक्तेन च शय्यायां विष्णोस्तु सकलीकृतिः। सृगराजं वृषं नागं व्यजनं कलसं तथा। वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलम्। दर्शयेदश्वसूक्तेन (५६) पाटदेशे त्रिपादिति (५७)। उखां पिधानकं पात्रमन्दिकां दर्विकां दद्यात्। सुषलोलूखलं दद्याच्छिलां सम्मार्जनीं तथा। तथा भोजनभाण्डानि गृहोपकरणानि च। शिरोदेशे च निद्राख्यं वस्त्ररत्नयुतं घटम्। खण्डखाद्यैः पूरयित्वा स्नपनस्य विधिः स्मृतः" ५८अ०

(५८अ० प्रतीकसूचितामन्त्राः यथा

(१) "विष्णवे शिपिविष्टाय स्वाहा" यजु०२०।२२

(२) "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेरापाद्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" ऋ० १।११५।१।

(३) "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा। सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा" यजु० ३।९

(४) "मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः" यजु० १३।२७ अत्र एकैव ऋक् पाठ्या।

(५) "हिरण्यगर्भः समवर्तताग्रे इत्यादि प्राग्वत्।

(६) "इमं मे वरुण ! श्रुधी हवमद्या च मृडय। त्वामवस्युराचके" यजु० २१।१

(७) "इतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा" यजु० ३४।४५

(८) यतो देवा अवन्तु व इत्यादि प्राग्वत्।

(९) "सप्त तेऽग्ने ! समिधः सप्त जिह्वाः सप्त ऋषयः सप्तधामप्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्तयोनीराप्रृणस्व घृतेन स्वाहा" यजु०१७।७९

(१०) द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः" यजु०२५।२०

(११) "आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे" ऋ०१०।९।१

(१२) "पावमानसूक्तम् स्वादिष्ठयेत्यादि हिन्वन्तीत्यन्तम् षड्षष्टिसूक्तात्मकम् मतृकृत तुलादानादिपद्धतौ ।६७ अवधि १८५पृ० पर्यन्ते द्रष्टव्यम्। यजुर्वेदोक्तं पुनन्तु पितर इत्यादि नवर्चं तत्रैव २०६पृ०द्रष्टव्यम्

(१३)समुद्रं गच्छ स्वाहा। अन्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहा। यजु० ६।२१

(१४) "शन्नोदेवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः" ऋ० १०।९।४

(१५) "हिरण्यगर्भः समवर्तताग्रे इत्यादि प्राग्वत्।

(१६) "इमं मे गङ्गे यमुने ! सरस्वति ! शुतुद्रि ! स्तोमं सचतापरुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया" ऋ०१०।७५।५

(१७) "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" ऋ०१।२२।२०

(१८) "याओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासामसि त्वमुत्तमारं कामाय शं हृदे" यजु०१२।९२

(१९) "यज्ञायज्ञा वो अग्नये गिरा गिरा च दक्षसे। प्रप्रवयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्" ऋ०६।४८।१

(२०) "पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्" ऋ०१८।३६

(२१) "याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः" यजु०१२।८९

(२२) "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जन-

यन् देवएकः" ऋ०१० मण्डले ८सूक्ते ।१।२ ऋक् ।

(२२) सोमं राजानमित्यादि प्राग्वत् ।

(२४) "विष्णोरराटमसि विष्णोः श्नप्त्रे स्थः । विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा" यजु० ५।२१।

(२५) "हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद् व्योमसदब्जागोजा ऋतजा अद्रिजा ऋतं बृहत्" यजु० १०।२४

(२६) "मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः" यजु०७।२४

(२७) "मा न स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मा नो वीरान् रुद्र ! भामिनो वधीर्हविष्मन्तः सदामित्त्वा हवामहे" यजु०१६।१६

(२८) "गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" श्रीसूक्ते ८मन्त्रः

(२९) "इदमापः प्रवहत यत्किञ्च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेष उतानृतम्" ऋ०१।२३।२२

(३०) "सुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् । याहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्रमुमुक्तमेनम् ।१ यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव । तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ।२ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् । शतं यथेमं शरदो न यातीन्द्रो विश्वस्य दुरितस्य पारम् ।३ शतं जीव शरदो वर्द्धमानः शतं हेमन्तान् शतमु वसन्तान् । शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः । ४ आहार्षं त्वाविदं त्वा पुनरागं पुनर्भव । सर्वाङ्ग ! सर्वं ते चक्षुः सर्वमायुष्यतेऽविदम्"५ऋ०१०।१६१

(३१) "अतो देवा अवन्तु न इत्यादि प्राग्वत् ।

(३२) "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम्" यजु०४०।१७

(३३) मधुवाता इत्यादि प्राग्वत् ऋगेका ।

(३४) मयि गृह्णाम्यग्ने ! अग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मामु देवताः सचन्ताम्" यजु०१३।१

(३५) "यत्रन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रा न विष्ट्या मतीयोजान्विन्द्र ! ते हरी" ऋ० २।८।२

(३६) "काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च" यजु०१३।२०

(३७) गन्धवती गन्धद्वारामित्यादि प्राग्वत् ।

(३८) "तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणस्य बोध्युरुशंस मा न आयुः प्रमोषीः" ऋ० १।२४।११

(३९) "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे" ऋ०१।२२।१७

(४०) "बृहस्पते ! अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्" यजु० २६।३

(४१) "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" यजु० ३१।१२

(४२) महाव्रतं यद्वर्चो हिरण्यस्येत्यस्यामृचि गेयं साम

(४३) "ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि" यजु० १२।९६

(४४) धूरसि धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः । देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्" यजु० १।८

(४५) "बिभ्राट् सूक्तं सप्रदगर्च्चं बिभ्राड् बृहत् पिबतु सोम्यम्, इत्यादि करतां नः सुराधसः इत्यन्तम्" यजु० ३३।३० मन्त्रावधि ४६ मन्त्रपर्यन्तं मत्कृततुलादानादि पद्धतौ १२२ पत्रावधि ११२ पत्रपर्यन्ते द्रष्टव्यम् ।

(४६) "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः । रोचन्ते रोचना दिवि" यजु०२३।५

(४७) दीर्घायुष्ट्वौषधे ! खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वं दीर्घायुर्भूत्वागत्वनु शाविरोहतम्" यजु०१२।१००

(४८) "इन्द्रं विश्वा अवीवृधन्त्समुद्रस्य व्यचसं गिरः । रथीतमं रथीनां राजानं सत्पतिं पतिम्" ऋ०१।११।१

(४९) "ततो विराडजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः" यजु०३१।५

(५०) रथन्तरं साम अभि त्वा शूर इत्यस्यामृचि गेयं तच्च मत्कृततुलादानादिपद्धतौ १९२।९३ पत्रे द्रष्टव्यम् ।

(५१) सुञ्चामि त्वा इत्यादि प्राग्वत् ऋगेका ।

(५२) सौपर्णं सूक्तम् ऋग्वेदप्रसिद्धम् ।

(५३) "उत्तिष्ठ ब्रह्मणस्पते ! देवयन्तस्त्वेमहे । उपप्रयन्तु

मरुतः सुदानव इन्द्र ! प्रागूर्भवा सचा" यजु०२४।५६

(५४) ब्रह्मरथं सामभेदः ।

(५५) अतो देवा इत्यादि षड्ऋचम् ऋ०१।२२। तच्च मत्कृत तुलादानादि पद्धतौ ८८।८९ पत्रे दृश्यम्।

(५६) अश्वसूक्तम् ऋग्वेद प्रसिद्धम् ।

(५७) त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत् साशनानशने अभि यजु०३१।४)

"हरेः सान्निध्यकरणमधिवासनमुच्यते। सर्वज्ञं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमम्। ओङ्कारेण समायोज्य चिच्छक्तिमभिमानिनीम्। निःसार्यात्मैकतां कृत्वा स्वस्मिन् सर्वगते विभौ। योजयेन्मरुता पृथ्वीं वह्निबीजेन दीपयेत्। संहरेद्वायुना चाग्निं वायुमाकाशतो नयेत्। अधिभूतादिदेवैस्तु साध्याद्यैर्विभवैः सह। तन्मात्रपात्रकान् कृत्वा संहरेत्तत्क्रमाद् बुधः। आकाशं मनसाहृत्य मनोऽहङ्करणे कुरु। अहङ्कारञ्च महति तच्चाप्यव्याकृते नयेत्। अव्याकृतं ज्ञानरूपे वासुदेवः स ईरितः। स तामव्याकृतां मायामवष्टभ्य सिसृक्षया। सङ्कर्षणाख्यः शब्दात्मा स्वशक्त्यासृजत् प्रभुः। तोभ्य मायां स प्रद्युम्नं तेजोरूपं स चासृजत्। अनिरुद्धं रसमात्रं ब्रह्माणं गन्धरूपकम्। अनिरुद्धः स च ब्रह्मा अप आदौ ससर्ज ह। तस्मिन् हिरण्मयञ्चाण्डं सोऽसृजत् पञ्चभूतवत्। तस्मिन् संक्रामिते जीवे शक्तिरात्मोपसंहृता। प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्द्यते। जीवो व्याहृतिसंज्ञस्तु प्राणेष्वाध्यात्मिकः स्मृतः। प्राणैर्युक्ता ततो बुद्धिः सञ्जाता चाष्टमूर्तिकी। अहङ्कारस्ततो जज्ञे मनस्तस्मादजायत। अर्थाः प्रजज्ञिरे पञ्च सङ्कल्पादियुतास्ततः। शब्दः स्पर्शश्च रूपञ्च रसो गन्ध इति स्मृताः। ज्ञानशक्तियुतान्येतैरारब्धानीन्द्रियाणि तु। त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वाबुद्धीन्द्रियाणि तु। पादौ पायुस्तथा पाणी वागुपस्थश्च पञ्चमः। कर्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु। आकाशवायुतेजांसि सलिलं पृथिवी तथा। स्थूलमेभिः शरीरन्तु सर्वाधारं प्रजायते। एतेषां वाचका मन्त्रा न्यासायोच्यन्त उत्तमाः। जीवभूतं भकारन्तु जीवोपाधिगतं न्यसेत्। हृदयस्थं वकारन्तु बुद्धितत्त्वं न्यसेत् बुधः। फकारमपि तत्रैव अहङ्कारमयं न्यसेत्। मनस्तत्त्वं पकारन्तु न्यसेत् संकल्पसम्भवम्। शब्दतन्मात्रतत्त्वन्तु नकारं मस्तके न्यसेत्। स्पर्शात्मकं धकारन्तु वक्त्रदेशे तु विन्यसेत्। दकारं रूपतत्त्वन्तु हृद्देशे विनिवेशयेत्। थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत्। तकारं गन्धतन्मात्रं जङ्घयोर्विनिवेशयेत्। णकारं श्रोत्रयोर्न्यस्य ढकारं विन्यसेत्त्वचि। डकारं नेत्रयुग्मे तु रसनायां ठकारकम्। टकारं नासिकायान्तु ञकारं वाचि विन्यसेत्। ङकारं करयोर्न्यस्य पाणितत्त्वं विचक्षणः। ञकारं पादयोर्न्यस्य ङं पायौ चक्षुषस्यके। विन्यसेत् पृथिवीतत्त्वं ङकारं पादयुग्मके। वस्तौ वकारं गं तत्त्वं तेजसं हृदि विन्यसेत्। खकारं वायुतत्त्वञ्च नासिकायां निवेशयेत्। ककारं विन्यसेन्नित्यं खतत्त्वं मस्तके बुधः। हृत्पुण्डरीके विन्यस्य मकारं सूर्यदैवतम्। द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः। कलाषोडशसंयुक्तं षकारं तत्र विन्यसेत्। तन्मध्ये चिन्तयेन्मन्त्री विन्दुं यङ्गेसु मण्डलम्। सकारं विन्यसेत्तत्र प्रणवेन सुरोत्तम !। ओं यं परमेष्ठ्यात्मने रं नमः पुरुषात्मने। लं नमोविश्वात्मने न्यस्य व निष्टत्त्यात्मने नमः। ओं यं नमः सर्वात्मने इत्युक्ताः पञ्च शक्तयः। स्थाने तु प्रथमा योज्या द्वितीया आसने मता। तृतीये शयने तद्वच्चतुर्थी पानकर्मणि। प्रत्यर्चायां पञ्चमी स्यात्पञ्चोपनिषदः स्मृताः। हकारं विन्यसेन्मध्ये ध्यात्वा मन्त्रमयं हरिम्। यां मूर्तिं स्थापयेत्तस्या मूलमन्त्रं न्यसेत्ततः। ओं नमो भगवते वासुदेवायेति च मूलकम्। शिरोघ्राणललाटेषु मुखकण्ठहृदि क्रमात्। भुजयोर्जङ्घयोरङ्घ्रेः केशवं शिरसि न्यसेत्। नारायणं न्यसेद्वक्षे ग्रीवायां माधवं न्यसेत्। गोविन्दं भुजयोर्न्यस्य विष्णुं च हृदये न्यसेत्। मधुसूदनकं पृष्ठे वामनं जठरे न्यसेत्। कट्यान्त्रिविक्रमं न्यस्य जङ्घायां श्रीधरं न्यसेत्। हृषीकेशं दक्षिणायां पद्मनाभं तु गुल्फके। दामोदरं पादयोश्च हृदयादिषडङ्गकम्। एतत् साधारणं प्रोक्तमादिमूर्तेस्तु सत्तम !। अथ या यस्य देवस्य प्रारब्धं स्थापनं भवेत्। तस्यैव मूलमन्त्रेण सजीवकरणं भवेत्। यस्या मूर्तेस्तु यन्नाम तस्याद्यं चाक्षरं च यत्। तत् स्वरैर्द्वादशैर्भेद्य स्वाङ्गानि परिकल्पयेत्। हृदयादीनि देवेशमूलञ्च दशमाक्षरम्। यथा देहे तथा देहे तत्त्वानि विनियोजयेत्। चक्राब्जमण्डले विष्णुं यजेद्गन्धादिना तथा। पूर्ववच्चासनं दद्यात् सपात्रं सपरिच्छदम् शुभचक्रं द्वादशारं ह्युपरिष्टाद्विचिन्तयेत्। त्रिनाभि चक्रं द्विनेमि स्वरैस्तच्च समन्वितम्। पृष्ठदेशे ततः प्राज्ञः प्रकृत्यादी-

त्रिवेशयेत् । पूजयेदारकाग्रेषु सूर्यं द्वादशधा पुनः । कलाषोडशसंयुक्तं सोमन्तत्र विचिन्तयेत् । सबलं त्रितयं नाभौ चिन्तयेद्देशिकोत्तमः । पद्मञ्च द्वादशदलं पद्ममध्ये विचिन्तयेत् । तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य च देशिकः । प्रतिमायां हरिं न्यस्य तत्र तं पूजयेत् सुरम् । गन्धपुष्पादिभिः सम्यक् साङ्गं सावरणं क्रमात् । द्वादशाक्षरबीजैस्तु केशवादीन् समर्चयेत् । द्वादशारे मण्डले तु लोकपालादिकं क्रमात् । प्रतिमामर्च्चयेत् पश्चाद्गन्धपुष्पादिभिर्द्विजः । पौरुषेण तु सूक्तेन (१) श्रियाः सूक्तेन(२)पिण्डिकाम् । जननादिक्रमात् पश्चाज्जनयेद्वैष्णवानलम् । हुत्वाग्निं वैष्णवैर्मन्त्रैः कुर्याच्छान्त्युदकं बुधः । तत् सिक्त्वा प्रतिमामूर्ध्नि वह्निप्रणयनं चरेत् । दक्षिणेऽग्निं दूतमिति (३) कुण्डेऽग्निं प्रणयेद्बुधः । अग्निनाग्निश्च (४) पूर्वे च कुण्डेऽग्निं प्रणयेद् बुधः । उत्तरे प्रणयेदग्निमग्निं दूतं हवीमभिः (५)। अग्निप्रणयने मन्त्रस्त्वमग्ने (६)द्युभिरुच्यते । पलाशसमिधानान्तु अष्टोत्तरसहस्रकम् । कुण्डे कुण्डे होमयेच्च व्रीहीन् वेदादिकैस्तथा । माष्यांस्तिलान् व्याहृतिभिर्मूलमन्त्रेण वै हुतम् । कुर्यात्ततः शान्तिहोमं मधुरत्रितयेन च । द्वादशार्णैः स्रुचेत् पादौ नाभिं हृन्मस्तकं ततः । हुतं दधि पयो हुत्वा स्रुचेनूर्ध्वन्यथो ततः । स्रुक्त्वा शिरोनाभिपादांश्चतस्रः स्थापयेच्चदोः । गङ्गा च यमुना गोदा क्रमाच्चाम्ना सरस्वती । दद्येत् विष्णुगायत्र्या (७) गायत्र्या स्थापयेच्चरुम् । होमयेच्च बलिं दद्यात्तदन्ते भोजयेद्द्विजान् । साधाधिपानां तुष्ट्यर्थं हेम गां गुरवे ददेत् । दिक्पतिभ्यो बलिं दत्वा रात्रौ कुर्याच्च जागरम् । ब्रह्मगीतादिशब्देन सर्वभागधिवासनात्" ५९अ०।

५९ अ० प्रतीकसूचितामन्त्राः यथा [१-१६

(१) ("पौरुषसूक्तं सहस्रशीर्षेत्यादि षोडशर्चम्" यजु०३१।

(२) श्रीसूक्तं हिरण्यवर्णामित्यादि ऋग्वेदपरिशिष्टोक्तं पञ्चदशर्चम् तुलादानां १६५ पत्रे द्रष्टव्यम् ।

(३) "अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ आसादयादिह" यजु० २२।१७

(४) "अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः" सामसं ४।११।१।१

(५) "अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम्" ऋ० १।१२।२

(६) त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधिभ्यस्त्वं नृणां नृपते जायसे शुचिः यजु० ११।२७

(७) तद्विष्णोः परमं पदमित्यादि प्राग्वत् वैष्णवी गायत्री ।)

"पिण्डिकास्थापनार्थन्तु गर्भागारं तु सप्तधा । विभजेद् ब्रह्मभागे तु प्रतिमां स्थापयेद् बुधः । देवमानुषपैशाचभागेषु न कदाचन । ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य चान्तरम् । देवमानुषभागाभ्यां स्थाप्या यत्नात्तु पिण्डिका । नपुंसकशिलायान्तु रत्नन्यासं समाचरेत् । नारसिंहेन हुत्वाथ कुर्यात् न्यासं च तेन वै । व्रीहीन् रत्नत्रिधातूंश्च लोहादींश्चन्दनादिकान् । पूर्वादिनवगर्तेषु न्यसेन्मध्ये यथारुचि । अथ चेन्द्रादिमन्त्रैश्च गर्त्तो गुग्गुलुनाहृतः । रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः । सशलाकैर्दर्भपुञ्जैः सहदेवैः समन्वितैः । सबाह्यान्तैश्च संस्कृत्य पञ्चगव्येन शोधयेत् । प्रोक्षयेद्दर्भतोयेन नदीतीर्थोदकेन च । होमार्थं स्थण्डिलं कुर्यात् सिकताभिः समन्ततः । सार्द्धहस्तप्रमाणं तु चतुरस्रं सुशोभनम् । अष्टदिक्षु यथान्यासं कलसानपि विन्यसेत् । पूर्वादिष्वष्टवर्णेन अग्निमानीय संस्कृतम् । त्वमग्ने ! द्युभिरिति च(१)गायत्र्या समिधो हुनेत् । अष्टार्णेनाष्टशतकं साज्यं पूर्णां प्रदापयेत् । शान्त्युदकमाम्रपत्रैः मूलेन शतमन्त्रितम् । सिञ्चेद्देवस्य तन्मूर्ध्नि श्रीश्च ते (२) ह्यनया ऋचा । ब्रह्मयानेन चोद्धृत्य उत्तिष्ठ ब्रह्मणस्पते (३)। तद्विष्णोरिति (४) मन्त्रेण प्रासादाभिमुखं नयेत् । शिबिकायां हरिं स्थाप्य भ्रामयीत पुरादिकम् । गीतवेदादिशब्दैश्च प्रासादद्वारि धारयेत् । स्त्रीभिर्विप्रैर्मङ्गलाष्टघटैः संस्नापयेद्धरिम् । ततो गन्धादिनाभ्यर्च्य मूलमन्त्रेण देशिकः । अतो देवेति (५)वस्त्राद्यमष्टाङ्गार्घ्यं निवेद्य च । स्थिरे लग्ने पिण्डिकायां देवस्य त्वेति (६) धारयेत् । ओं त्रैलोक्यविक्रान्ताय नमस्तेऽस्तु त्रिविक्रम ! । संस्थाप्य पिण्डिकायान्तु स्थिरं कुर्याद्विचक्षणः । ध्रुवा द्यौरिति (७) मन्त्रेण विश्वतश्चक्षुरित्यपि (८) । पञ्चगव्येन संस्नाप्याचाम्य गन्धोदकेन च । पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिम् । ध्यायेत् स्वं तस्य मूर्तिन्तु पृथिवीं तस्य पीठिकाम् । कल्पयेद्विग्रहं तस्य तेजसैः परमाणुभिः । जीवमावाहयिष्यामि पञ्चविंशतितत्त्वगम् । चैतन्यं परमानन्दं जाग्रत्स्वप्नविवर्जितम् । देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जि-

तम् । ब्रह्मादिस्तम्बपर्यन्तं हृदयेषु व्यवस्थितम् । हृदयात् प्रतिमाबिम्बे स्थिरो भव परेश्वर ! । सजीवं कुरु बिम्बं त्वं सबाह्याभ्यन्तरस्थितः । अङ्गुष्ठमात्रः पुरुषो देहोपाधिषु संस्थितः । ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकम् । सजीवीकरणं कृत्वा प्रणवेन निबोधयेत् । सान्निध्यकरणन्नाम हृदयं स्पृश्य वै जपेत् । स्वकन्तु पौरुषं ध्यायन् इदं गुह्यमनुं जपेत् । नमस्तेऽस्तु सुरेशाय सन्तोषविभवात्मने । ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुयायिने । गुणातिक्रान्तवेशाय पुरुषाय महात्मने । क्षत्रयाय पुराणाय विष्णो ! सन्निहितो भव । यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः । तत् सर्वमेकतो लीनमस्मिन्देहे विवर्त्तताम् । आत्मानं सन्निधीकृत्य ब्रह्मादिपरिवारकान् । स्वनाम्ना स्थापयेदन्यानायुधादीन् स्वमुद्रया । यात्रावर्षादिकं दृष्ट्वा श्रेयः सन्निहितो हरिः । नत्वा स्तुत्वा स्तवाद्यैश्च जप्त्वा चाष्टाक्षरादिकम् । चण्डप्रचण्डौ द्वारस्थौ निर्गत्याभ्यर्चयेद्गुरुः । अग्निमण्डपमासाद्य गरुडं स्थाप्य पूजयेत् । दिगीशान् दिशि देवांश्च स्थाप्य सम्पूज्य देशिकः । विश्वक्सेनं तु संस्थाप्य शङ्खचक्रादि पूजयेत् । सर्वपार्षदकेभ्यश्च बलिं भूतेषु चार्पयेत् । ग्रामवस्त्रसुवर्णादि गुरवे दक्षिणां ददेत् । यागोपयोगि द्रव्याद्यमाचार्याय नरोऽर्पयेत् । आचार्यदक्षिणार्द्धन्तु ऋत्विग्भ्यो दक्षिणां ददेत् । अन्येभ्यो दक्षिणां दद्याद्भोजयेद् ब्राह्मणांस्ततः । अवारितफलान् दद्याद्यजमानाय वै गुरुः । विष्णुं नयेत् प्रतिष्ठाता चात्मना सकलं कुलम् । सर्वेषामेव देवानामेष साधारणो विधिः । मूलमन्त्राः पृथक् तेषां शेषं कार्यं समानकम्" ६०अ० ।

(६०अ० प्रतीकसूचिता मन्त्रा यथा

(१) त्वमग्ने द्युभिरित्यादि प्राग्वत् ।

(२) "त्रीणि ते लक्ष्मीश्च ते पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण" यजु० ३१।२२

(३) उत्तिष्ठ ब्रह्मणस्पते इत्यादि प्राग्वत् ।

(४) तद्विष्णोः परमं पदमित्यादि प्राग्वत् ।

(५) अतो देवा अवन्तु न इत्यादि प्राग्वत् ।

(६) देवस्य त्वा इत्यादि प्राग्वत् ।

(७) "ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वतारमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्" ऋ०१०।१६७।४

(८) विश्वतश्चक्षुरित्यादि ३७२८ पृष्ठे प्रदर्शितम्) ।

प्रतिष्ठामयूखादौ तत्प्रयोगो दृश्यः । प्रतिष्ठायाः पूज्यताप्रयोजकता कुसुमाञ्जलौ हरिदासीये च व्यवस्थापिता यथा "कथञ्च प्रतिमादौ प्रतिष्ठादेरुपयोगः तथा च प्रतिष्ठाजन्य शक्तिश्चाण्डालादिस्पर्शनाग्या पूज्यताप्रयोजिका स्वीकार्या इत्यत्राह हरि० "निमित्तभेदसंसर्गादुद्भवानुद्भवादयः । देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा" मू० । "निमित्तभेदः अदृष्टभेदः । देवताः प्रतिष्ठाविधिना सन्निधानेनाहङ्कारममकारादिना आराधनीयतामासादयन्ति प्रतिष्ठाविधिना देवतानां प्रतिमादौ अहङ्कारममकारौ चाण्डालादिस्पर्शे च तादृशाभिमानाभावः । देवताचैतन्यविवादेऽपि यथार्थपूजितत्वधीः प्रतिष्ठितत्वधीश्च चण्डालादिस्पर्शाभावविशिष्टा पूज्यतानियामिका तत्र चोपयोगिनी प्रतिष्ठा । वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शनादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजकः प्रतिष्ठितं पूजयेदितिज्ञानेन प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति" हरिदासः ।

प्रतिमादौ प्रतिष्ठाजन्या पूज्यताप्रयोजिका शक्तिरस्त्यद्यते इति मीमांसकाभिमतमनुमानचिन्तामणौ शक्तिवादे निराकृतं यथा

"अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वप्रयोजकं भोगादिना तत्राशेऽपि पूज्यत्वात् तत्सत्त्वेऽपि चाण्डालादिस्पर्शेनापूज्यत्वात् अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च न प्रतिष्ठाध्वंसस्तथा, ततएव उपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेः । तस्मात् प्रतिष्ठाजन्याऽस्पृश्यस्पर्शादिनाग्या प्रतिमादिनिष्ठा शक्तिरभ्युपेयेति चेत् प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते स्वसादृश्यदर्शनश्चित्रादाविव, ज्ञानस्य नाशेऽपि संस्कारसत्त्वात् अस्पृश्यस्पर्शादिना तु तत्राशः अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्यास्पृश्यस्पर्शादिविरहसहकृतस्य तथात्वं प्रतिष्ठितं पूजयेदिति विधिबलात्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राञ्चः । नव्यास्तु प्रतिष्ठाविधिनैव तत्राधेयशक्तिवदपूर्वान्तरं जन्यते तदृष्टवदात्मसंयोगाश्रयपूज्यत्वम् अस्पृश्यस्पर्शेन तत्राशे चापूज्यत्वमित्याहुः । वयन्तु ब्रूमः प्रतिष्ठितं पूजयेदिति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते किन्तु भूतार्थे क्त्वानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते तथा च प्रतिष्ठाध्वंसः प्रतिष्ठाकालीनयावदस्पृश्यादिप्रतियोगिकानादिसंसर्गाभावस्य-

ष्ठितः पूज्यत्वप्रयोजकः स च प्रागभावोऽत्यन्ताभावश्च क्वचित्" । देवप्रतिष्ठादयोऽप्यत्र

तत्र विहितनक्षत्रलग्नादिकं सं०चि० उक्तं यथा

"जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कशुक्रे । दस्रे, मृदुक्षिप्रचरध्रुवे स्वात्मक्षे सिते स्वृक्षतिथिक्षणे वा । रिक्तारवर्जे दिवसेऽतिशस्ता शशाङ्कपापैस्त्रिभवाङ्गसंस्थैः । व्यष्टान्त्यगैः सतृखचरैर्महेन्द्रे सूर्यो, घटे को, युवतौ च विष्णुः । शिवो न्ययुग्मे, द्वितनौ च देव्यः, जुहाशुरे, सर्व इमे स्थिरर्क्षे । पुष्ये यहा, विप्रपयक्षसर्पभूतादयोऽन्ये, श्रवणे जिनश्च" ।

"देवप्रतिष्ठायां तु विशेषस्तत्र वशिष्ठः "अथ प्रतिष्ठां कथयामि सम्यक् शिवस्य विष्णोस्त्वथ वा परेषाम् । सौम्यायने देवगुरौ च शुक्रे सन्दृश्यमाने परिचारकाणाम्" । शिव विष्णुग्रहणं प्राधान्यख्यापनार्थम् । अत्र सौम्यप्रकृतीनां देवानामुत्तरायणे स्थापनमुक्त्वा उग्रप्रकृतीनां दक्षिणायनेऽपि कार्यं तदुक्तं वैखानससंहितायाम् "माहभैरववाराहनारसिंहत्रिविक्रमाः । महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने" । इति शैवसिद्धान्तशेखरे तु "त्रेष्ठोत्तरे प्रतिष्ठा स्यादयने सुक्तिमिच्छताम् । दक्षिणे तु सुखक्षूणां मलमासे न सा द्वयोरिति" इत्युक्तम् । अत्र दक्षिणे तु सुखक्षूणामित्यपि माहभैरवेत्यादिपरतया योज्यमन्यथा प्रतिपदं मासगणना वशिष्ठादिषु न युज्येत यदाह वशिष्ठः "मासे तपस्ये तपसि प्रतिष्ठा धनायुरारोग्यकरी च कर्तुः । चैत्रे महारुग्भयदा च शुक्रे समाघवे पुत्रधनाप्तये स्यात्" । नारदोऽपि "विचैत्रेष्वेव मासेषु माघादिषु च पञ्चसु" । वशिष्ठः "आषाढमासादिचतुष्टयेऽपि कलत्रसन्तानविनाशदा स्यात् । जर्जे च कर्तुर्निधनप्रदा च सौम्ये सपौषेऽखिलदुःखदा स्यात् । बलक्षपक्षः शुभदः समस्तः स दैव तत्रादिदिनं विहाय । अन्यत्रिभागं परिहृत्य कृष्णपक्षोऽपि शस्तः खलु पक्षयोश्च । रिक्तावमत्यक्तदिनेष्वनिन्द्ययोगेषु वैनाशकवर्जितेषु । दिने महादोषविवर्जिते च शशाङ्कताराबलसंयुते च" । वैनाशकनक्षत्राणि नारदेनोक्तानि "जन्मभाद्दशमं कर्म सङ्घातर्क्षञ्च षोडशम् । अष्टादशं साप्तदयं त्रयोविंशं विनाशभम् । मानसं पञ्चविंशर्क्षं नाचरेच्छुभमेषु तु" । इति अथ तिथीनाह नारदः । "यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः । द्वितीयादिद्वयोः पञ्चम्यादितस्त्रिसृषु क्रमात् । दशम्यादिचतसृषु पौर्णमास्यां विशेषतः । सुस्थतिथ्यसम्भवे उक्ततिथौ स्थापनं कार्यम्" इत्यर्थः । अथ वारानाह नारदः "कुजवर्जितवारेषु कर्तुः सूर्ये बलप्रदे । चन्द्रताराबलोपेते पूर्वाह्णे शोभने दिने" । इति प्रत्येकं वारफलमाह वशिष्ठः "कीर्तिप्रदं क्षेमकरं जयानुभयप्रदं दृढिकरं दृढं च । लक्ष्मीकरं सुस्थिरदं त्रिनादिवारेषु संस्थापनमामनन्ति" । अथ देवप्रतिष्ठानक्षत्राणि "हस्तत्रये मित्रहरित्रये च पौष्णद्वयादित्यसुरेज्यभेषु । स्वादुत्तराषाढशशाङ्कभेषु सर्वामरस्थापनमुत्तमं स्यात्" । अत्र षोडशभानि ध्रुवमृदुक्षिप्रलघुरूपाणि एवोक्तानि तत्र यन्थकर्त्रा जलाशयारामसुरप्रतिष्ठा नक्षत्राणि बहुधातुल्यत्वादेतानि उक्तानि द्वित्राणि तु भिन्नानि तान्युक्त विशेषवचनेभ्योऽवसेयानि । देवताघटनमुहूर्तस्तु उच्यते मया तत्र दीपिका "ध्रुवलघुमृदुवर्गे वारुणे विष्णुदैवे मरुददितिधनिष्ठे शोभने वासरे च । त्रिदशमदनजन्मैकादशे ३।१०।७।१।११। शीतरश्मौ विबुधगुरुतिरिष्टा नाडिनक्षत्रहीने" इति । नाडिनक्षत्राणि वैनाशिकनक्षत्राणि । अथ देवताप्रतिष्ठायां सामान्यतो लग्नशुद्धिं देवताविशेषे च तथा । पादोनोपजातिकाभ्यामाह शशाङ्केति । जलाशयप्रतिष्ठायामारामप्रतिष्ठायां च सुलग्नमात्रं विचार्यं देवप्रतिष्ठायां शशाङ्कचन्द्रः पापाः सूर्यभौमशनिराहुकेतवस्तैस्त्रिभवाङ्गसंस्थैस्तृतीयषष्ठैकादशस्थानस्थितैरुपलक्षिते लग्ने । तथा सतृखचरैः सोमबुधगुरुशुक्रैर्व्यष्टान्त्यगैरष्टमद्वादशव्यतिरिक्ताखिलस्थानस्थैः सद्भिर्देवप्रतिष्ठातिशस्ता तदुक्तं रत्नमालायाम् । "केन्द्रत्रिकोणभवमूर्तिषु सद्ग्रहेषु चन्द्रार्कभौमशनिषु त्रिषडायगेषु । सान्निध्यमेति नियतं प्रतिमासु देवः कर्तुः सुखार्थसुतसम्पदरोगता च । सौम्या लग्नाद्याश्रिता मूर्तिपूर्वान् भावान् वीर्यैरुत्कटावर्द्धयन्ति । षष्ठं हित्वाभावमेते हि तत्र यत्नध्वंसं कर्तुरुत्पादयन्ति" । शनिग्रहणं राहुकेत्वोरप्युपलक्षणं यदाह वशिष्ठः "सूर्येन्दुभौमार्क्यहिकेतवश्च लग्नस्थितानैधनदाश्च भर्तुः । सौम्यग्रहा लग्नगतास्तदैव ह्यायुर्बलारोग्यकराश्च नूनम्" । अन्यत्र तत्रैव "सर्वे ग्रहानैधनदास्त्वलग्नं सौम्या असौम्याः खलु मृत्युसंस्थाः" इति अथ प्रसङ्गाच्चवांशविचारः तत्र स्थिरद्विस्वभावनवांशग्राह्या न चरांशस्तत्रापि द्वयांशः साधीयान् यदाह वशिष्ठः "पञ्चेष्टकैः जीवशशाङ्कसूर्यसूर्यग्रहैः सौम्यनवांशयुक्तैः लग्ने

स्थिरे चोभयराशियुक्ते नवांशके चोभयगे स्थिरे वा"। उभयगे द्विस्वभावे "चरोदये लग्नगते न कार्यं संस्थापनं नैव चरांशकेऽपि। चरोऽपि मुख्यः सतुलांशकस्य सदा मृदुत्वात् सुरसन्निवेशे" इति मृदुत्वाच्छुभस्वामिकत्वात् नारदोऽपि "शुभलग्ने शुभांशे च कर्तुस्तेऽनिधनोदये। राशयः सकलाः सेष्टाः शुभग्रहयुतेक्षिताः" इति अथ लग्नदोषेऽपवादो वसिष्ठेनोक्तः "एकोऽपि जीवो बलवान् तनुस्थः सितोऽपि सौम्योऽथ वा बली चेत्। दोषानशेषान्विनिहन्ति सद्यः स्कन्दो यथा तारकदैत्यवर्गमिति" नारदः "गुणाधिकतरे लग्ने दोषोऽत्यल्पतरे यदि। सुराणां स्थापनं तत्र कर्तुरिष्टार्थसिद्धिदम्"। मृगेन्द्र इति सूर्यो मृगेन्द्रे सिंहलग्ने स्थाप्यः, तथा कोब्रह्मा घटे कुम्भलग्ने, विष्णुर्युवतौ कन्यालग्ने। शिवो महादेवोऽन्त्ययुग्मे मिथुनलग्ने च, पुनर्हितनौ मिथुनकन्याधनुर्मीनलग्नेषु देव्यो दुर्गादक्षिणामूर्त्यादयः। चरे मेषकर्कतुलामकरलग्नेषु क्षुद्रादेव्यश्चतुःषष्टियोगिनी प्रभृतयः। सर्व इमे उक्ता अनुक्ताश्च देवा इत्यर्थः। उक्ता महादेवादयः अनुक्ता इन्द्रादयः ते स्थिरर्क्षे वृषसिंहवृश्चिककुम्भलग्नेषु स्थाप्याः यदाह श्रीपतिः "सिंहोदये दिनकरो, मिथुने, महेशो, नारायणश्च युवतौ, घटभे विधाता। देव्यो द्विमूर्तिभवने च निवेशनीयाः क्षुद्राश्चरे स्थिरगृहे निखिलाश्च देवाः"। इति पुष्ये ब्रह्मा इति ब्रह्मचन्द्रादयोऽष्टौ पुष्यनक्षत्रे स्थाप्या इत्यर्थः। उपलक्षणं चैतत् तत्र सूर्यस्य हस्तनक्षत्रे स्थापनं, महादेवब्रह्मणोः पुष्यश्रवणाभिजित्सु स्थापनं, कुबेरस्कन्दयोरनुराधायां, दुर्गाप्रभृतीनां मूले स्थापनं, सप्तर्षीणां स्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासवाल्मीक्यगस्त्यानामपि सप्तर्ष्यधिष्ठितनक्षत्रे स्थापनम् उक्तञ्च रत्नमालायां "पुष्यमुत्यभिजित्सु, चेश्वरकयोर्वित्ताधिपस्कन्दयोर्मैत्रे तिग्मरुचेः करे, निर्ऋतिभे दुर्गादिकानां शुभम्"। कोब्रह्मा तथा "सप्तर्षयो यत्र चरन्ति धिष्ण्ये कार्या प्रतिष्ठा खलु तत्र तेषाम्। श्रीव्यासवाल्मीकिघटोद्भवानां तथा सुता वाक्पतिभे ग्रहाणामिति"। सप्तर्षयस्तु कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः" इति स्मृतेस्ते यस्मिन्नक्षत्रे सञ्चरन्तो दृश्यन्ते तस्मिन्नक्षत्रे तेषां स्थापनम्। श्रीव्यासवाल्मीकिघटोद्भवानां तथा सप्तर्ष्यधिष्ठितनक्षत्रे। ग्रहाणां वाक्पतिभे पुष्ये घटोद्भवोऽगस्त्यः। विघ्नमेति विघ्नपो गणेशः यक्षो देवयोनिः सर्पो वासुक्यादयः भूतो देवयोनिः "विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यभिधानात् आदिशब्देन राक्षसासुरप्रमथसरस्वतीप्रभृतयो गृह्यन्ते ते रेवत्यां स्थाप्याः। तथा श्रवणे श्रवणनक्षत्रे जिनो बुद्धः स्थाप्यः। उपलक्षणं चैतत् इन्द्रकुबेरवर्जितानां लोकपालानां धनिष्ठायां स्थापनम्, इतोऽवशिष्टानां देवतानान्त्रयुत्तरारोहिणीषु स्थापनं स्यादित्यर्थः एतदप्युक्तं रत्नमालायाम् "गणपरिष्टदरक्षोयक्षभूतासुराणां प्रमथफणिसरस्वत्यादिकानां च पौष्णे २७। श्रवसि सुगतनाम्नो वासवे लोकपानां निगदितमखिलानां स्थापनं हि स्थिरेष्विति"। परिष्टदः स्वामी! "प्रभौ परिष्टद" इति साधुः गणपरिष्टदौ गणेशः! प्रमथा महादेवस्य पारिषदाः। श्रवसि श्रवणनक्षत्रे सुगतो बुद्धः "सर्वज्ञः सुगतो बुद्धः इत्यमरः स्थिरेषु रोहिणीत्रयुत्तरास्वित्यर्थः" पी०धा०।

देवतामय त्रि०देवतात्मकं देवता+मयट्। १देवतात्मकेस्त्रियां ङीप्। २हिरण्यगर्भरूपे देवतामेदे च स्त्री ङीप् "या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत" कठोप०। ४।७। "या देवतामयी सर्वदेवतात्मिका प्राणेन हिरण्यगर्भरूपेण परस्माद् ब्रह्मणः सम्भवति शब्दादीनामदनात् अदितिस्तां पूर्ववत् गुहां (सर्वप्राणगुहां हृदयाकाशम्) प्रविश्य तिष्ठन्तीमदितिम्। या भूतेभिर्भूतैः समन्विता व्यजायत उत्पन्नेत्यर्थ" भा०।

देवतायतन न० ६त०। देवगृहे "सीमासन्धिषु कार्याणि देवतायतनानि च" मनुः "रूपेणाग्र्येण सम्पन्नां (रुक्मिणीं) देवतायतनान्तिके" हरिवं० ११७अ०। देवतालयादयोऽप्यत्र "उद्यानदेवतालयपिप्पलवनवल्मीकमार्गचितिजाताः" बृ०सं० ४३अ०

देव(वा)तिथि पु० पुरुवंश्ये अक्रोधनपुत्रे नृपभेदे "अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे तस्यामस्य जज्ञे देव(वा)तिथिः" भा०आ०८५अ० "ततश्चाक्रोधनस्तस्मात् देव(वा)तिथिरसुष्य च" भाग० ९।२२।९ देवातिथिरित्येव पाठः बहुषु पुस्तकेषु क्वचित् देवतिथिरिति पाठः।

देवत्रा अव्य०देवाय देयं करोति सम्पद्यते वा "देये त्रा च" पा०क्रादियोगे त्रा। करणादिविषये देवाय १देये २तदधीने

च । देवं वन्दे देवे रमे वा द्वितीयान्तात् सप्तम्यन्तात् वा देवशब्दात् त्रा । ३वन्दनादिकर्मणि देवे ४रमणविषये देवे च "देवत्रा यन्तमवसे" यजु०६।२० "देवान् प्रति वन्तं गच्छन्तम्" वेददी०उक्ते ५देवतां प्रतीत्यर्थे च "ता देवीर्देव त्रयं यज्ञं नयत" यजु० ६।३४ देवान् त्रायते त्रा-क । ६देवरक्षके त्रि० "देव एव सविता अपयति वर्षिष्ठेऽधिनाक इति देवत्रो एतदाह" शत०ब्रा० १।२।२।१४

देवदण्ड स्त्री देवात् मेघात् दण्डो यस्याः । नागबलायां राजनि० ।

देवदत्त पु० देवा एनं देयासुः संज्ञायां क्त । संज्ञाशब्दप्रतिपाद्ये १नरभेदे "ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" हरिः इत०।२देवेन दत्ते त्रि० "देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः । तां साध्वीं बिभृयाच्चित्यम् देवानां प्रियमाचरन्" मनुः "भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः" इत्यादि मन्त्रलिङ्गात् या देवदत्ता भार्या तां पतिर्लभते न तु स्वेच्छया तां सतीं देवानां प्रियं कुर्वन् बिभृयात्" कुल्लू० ३बुद्धानुजे पु० त्रिका० ४अर्जुनशङ्खे शब्दार्थकल्पतरुः । "पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः" गीता । ५देहस्थे जृम्भणकरे वायुभेदे "विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः" शारदातिलकटीकायां राघवभट्टधृतवाक्यम् । देवाय दत्तम् । ६देवार्थोत्सृष्टे ग्रामादौ त्रि० ।

देवदत्तक पु० देवदत्तो मुख्य एषाम् "स एषां ग्रामणीः" पा०कन् । १देवदत्तप्रधानकेषु ब०व०अनुकम्पितो देवदत्तः । बह्वचो मनुष्यनाम्नष्ठज् वा घनिलञौ" पा० ठच् घन् इलच् पक्षे कन् । २अनुकम्पिते देवदत्ते "ठाजादावूर्ध्वं द्वितीयादचः" पा० द्वितीयादचः परं सर्वं लुप्यते इति देविक देविय देविल इति रूपत्रयं तत्रार्थे तेषामजादित्वात् कनस्तु तदभावात् न लोपः । "अजादौ च विभाषा लोपोवक्तव्यः" वा० देवक इत्यपि तत्रार्थे "लोपः पूर्वपदस्य च" वा० दत्तिक दत्तिल दत्तिय दत्तक इत्येतेऽपि तत्रार्थे ।

देवदत्ताग्रज पु० ६त० । बुद्धे त्रिका० ।

देवदर्श त्रि० देवं पश्यति दृश-अण् उप०स० । १देवतादर्शके देवं दृष्ट्वेत्यर्थे णमुल् । देवदर्शम् देवं दृष्ट्वेत्यर्थे अव्यय०

देवदर्शन त्रि०देवं पश्यति दृश-ल्युट् । १देवदर्शके २ऋषिभेदे पु०तेन प्रोक्तमधीयते शौनका० णिनि । दैवदर्शनिन् तत्प्रोक्ताध्यायिषु ब०व०दृश-भावे ल्युट् ६त० । ३देवतानां दर्शने न० ।

देवदानी स्त्री देवानामिव दानं शुद्धिरस्याः दैप्-शोधे भावे ल्युट् गौरा० ङीष् । हस्तिघोषलतायां रत्नमा० ।

देवदारु न० देवानां दारु तत्प्रियं काष्ठं चन्दनमस्य । स्वनामख्याते वृक्षभेदे अमरः । अस्य पुंस्त्वमपि "अस्तु पुरः पश्यसि देवदारुम्" रघुः "पारिजातान् कोविदारान् देवदारूद्रुमांस्तथा" भा०व० १५८अ० । "वोढा सङ्कः कम्पितदेवदारुः" कुमा० "देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च । विबन्धाध्मानशोथामवातश्लेष्मज्वरास्रजित् । प्रमेहपीनसश्वासकण्डूसमीरनुत्" भावप्र० ।

देवदालिका स्त्री देवदालीव कायति इवार्थे कन् कोऽणो ह्रस्वः । महाकालवृक्षे राजनि० ।

देवदाली स्त्री देवेन मेघशब्देन दालीदलनमस्या गौरा० ङीष् । (घघरबेल) ख्याते लतामेदे "देवदाली रसे तिक्ता कफार्शःशोफपाण्डुताः । नाशयेद् वमनी तिक्ता क्षयहिक्कालमिज्वरान् । शीता परा खरस्पर्शा विषघ्नी गरनाशनी" भावप्र० । देवदालीफलं तिक्तं कृमिश्लेष्म विनाशनम् । स्वंसनं गुल्मशूलघ्नमर्शोघ्नं वातजित् परम् । देवदालीदलं तक्रे स्वेदितं स्वण्डितं भृशम् । वेसवारयुते साज्ये भर्जितं हिङ्गुना दृढम्" तत्रैव ।

देवदास पु० ६त० । देवानां दासे स्त्रियां ङीप् ।

देवदासी स्त्री देवमिन्द्रियं दास्नोति दास-बाहु० अण् । १वनबीजपूरके राजनि० । देवाय क्रीडायै दासीव । २वेश्यायाञ्च शब्दार्थकल्प० । ६त० । ३देवानां परिचारिकायाम् ।

देवदीप पु० देवार्थो दीपः । १देवार्थे दीपे देवं दीप्तशीलमालोकसंयुक्तं दीपयति दीप-णिच्-अण् उप० स० । २लोचने शब्दरत्ना० ।

देवदुन्दुभि पु० देवानां दुन्दुभिरिव हर्षप्रदत्वात् । १रक्ततलस्याम् । ६त० । २देवढक्कायाम् रत्नमा० । "देवदुन्दुभयो नेदुर्नेदुस्तुम्बुरुवाप्सरोगणाः" भूरिप्रयोगः ।

देवदूती स्त्री देवा इन्द्रियाणि दूयन्ते खिद्यन्तेऽनया दू-क्तिच् ङीप् । वनबीजपूरके राजनि० ।

देवदेव पु० देवेषु मध्ये दीव्यति दिव-अच् । १महादेवे "अयाचितारं न हि देवदेवमृद्धिः सुतां प्राहयितुं शशाक" कुमा० २ब्रह्मणि च शब्दरत्ना० देवानां देवः स्वामी ३विष्णौ । "द्रौपद्याः सङ्कटं ज्ञात्वा देवदेवो

जगत्पतिः। पार्श्वस्थां रुक्मिणीं त्यक्त्वा केशवः शयने प्रभुः" भा०व०२६२अ०।

देवदेवेश पु० देवप्रकारः देवदेवः तस्येशः। महादेवे "यदि मे भगवान् प्रीतः सर्वलोकनमस्कृत !। स्वयं मां देवदेवेश ! याजयस्व सुरेश्वर !" भा०आ० २२३अ०।

देवदोल पु० देवैः द्रष्टव्यो दोलः। प्रातःकरणीये दोलोत्सवे दोलशब्दे दृश्यम्।

देवद्युम्न पु० भरतवंश्ये देवाजितोऽपत्ये नृपभेदे "अथास्यां तत्तनयो देवद्युम्नः" भाग० ५।१५।२

देवद्रोणी स्त्री ६त०। १देवयात्रायां हारा०। २स्वयम्भूलिङ्गाद्यवस्थानगह्वरे च "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते" संवर्तः। "देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम्" प्रा०त० रघु०।

देवद्रयञ्च् त्रि० देवमञ्चति पूजयति अन्च-क्विन् देवस्य टेः अद्रयादेशः। १देवपूजके अमरः। गत्यर्थाञ्चतेस्तु नलोपः। देवद्रयच् देवगन्तरि। सर्वनामस्थाने परे उभयत्र देवद्रयाङ् देवद्रयाञ्चौ अन्यत्राजादौ देवद्रीचः देवद्रयञ्च इत्यादिर्भेदः।

देवधन न० देवार्थं धनम्। १देवोद्देशेनोत्सृष्टे धने देवतानां चेतनत्वपक्षे २देवस्वामिके धने च।

देवधानी स्त्री देवा धीयन्तेऽस्याम् धा-आधारे ल्युट् ङीप्। इन्द्रपुर्य्यां "तस्मिन्नैन्द्री पूर्वस्यामेरोर्देवधानी नाम" भाग० ५।२१।१० [हेमच०।

देवधान्य न० देवानां योग्यं धान्यम्। (देधान) धान्यभेदे।

देवधूप पु० देवानां प्रियो धूपः। गुग्गुलौ रत्नमा०।

देवन् पु० दिव-बा० अनि। पत्युरनुजाते भ्रातरि हेम०।

देवन पु० दीव्यत्यनेन दिव-करणे ल्युट्। १पाशके। भावे ल्युट्। २क्रीडायां ३दीप्तौ ४व्यवहारे ५जिगीषायां ६स्तुतौ च न०। दीव्यत्यत्र दिव-आधारे ल्युट्। ७क्रीडोद्याने ८पद्मे च।

देवनदी स्त्री ६त०। गङ्गायाम् अमरः। "अमंबाधा देवनदी स्वर्गसम्पादिनी शुभा" भा०आदि०चैत्ररथपर्व। "इरावती वितस्ता च सिन्धुर्देवनदी तथा" भा०आ०९अ०। "स्नातुं गतान् देवनद्यां दुर्वासःप्रभृतीन् मुनीन्" भा० व०२६२अ० २देवस्नातनदीमात्रे च "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्" मनुः। [द्वारपाले हेमच०।

देवनन्दिन् पु० देवं शक्रं नन्दयति नन्दि-णिनि। इन्द्र-

देवनल पु० देव इव श्रेष्ठत्वात् नलः। महानले स्थूलदण्डे नलभेदे राजनि०।

देवनामम् पु० कुशद्वीपपतिहिरण्यरेतसः पुत्रभेदे कुशद्वीपशब्दे २१४५ पृ० दृश्यम्। [२विलापे च।

देवना स्त्री च० दिव-भावे युच्। १क्रीडायां शब्दरत्ना०।

देवनामक पु०देवेति नाम यस्य कप्। देवयोनौ विद्याधरादौ हेमचन्द्रे देवनारक इति पाठः नरएव नारः। ततः स्वार्थे क देवरूपनरः। देवजन इति तस्यार्थः सोऽपि तत्रार्थे।

देवनाल पु० नलएव नालः स्वार्थे अण् देव इव श्रेष्ठत्वात् नालः। नलोत्तमे राजनि०।

देवनिंदु त्रि० देवं निन्दति निन्द-क्विप् ६त०। देवनिन्दके "देवनिंदोऽप्रथमा अजुर्यन्" ऋ० १।१५२।२

देवनिर्मित त्रि० ६त०। १देवे रचिते। "द्वीपेषु दिक्षु पूर्वादि नगर्यो देवनिर्मिताः" स्कं०पु०। २गुडुच्याम् स्त्री मन्दार्थचि०।

देवपति पु० ६त०। इन्द्रे हेमच०।

देवपत्नी स्त्री देवः पतिर्यस्याः। मपूर्वत्वात् वा नुक् ङीप् च। १देवभार्यायाम्। "उत ग्ना व्यन्तु देवपत्नीः" ऋ०५।४६।८ "देवपत्न्यो देवकन्या देवमातर एव च" भा०अनु०१४अ० २शब्दार्थचि० मध्वालुके।

देवपथ पु० ६त०। १छायापथे आकाशस्थिते छायाकारे पथि देवपथ इव कन् तस्य देवपथादि० लुक्। २तत्सदृशे च ३देवयाने अर्चिरादिमार्गे च। देवयानशब्दे दृश्यम्। देवस्थानगमनार्थः पन्थाः। ४देवस्थानगमनार्थे मार्गे च। स च अन्यैर्नरैर्गन्तुमशक्य इति हनुमता तस्य द्वारनिरोधः कृतः यथाह भा०व० १४८अ०।

"व्यक्तं मार्गो मर्त्यानामगम्यः कुरुनन्दन !। ततोऽहं रुद्धवान् मार्गं तवेमं देवसेवितम्। धर्षयेद्वा शमेद्वापि मा कश्चिदिति भारत। दिव्यो देवपथोह्येष नात्र गच्छन्ति मानुषाः"।

देवपथादि पु०"इवे प्रतिकृतौ" पा०कनो लुग् निमित्ते शब्दगणे सच गणः पा०ग०सू० उक्तो यथा

देवपथ हंसपथ वारिपथ रथपथ स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धिगति उष्ट्रग्रीव वायरक्षु हस्त इन्द्रदण्ड पृथ्य मत्स्य।

देवपर त्रि० देवः परोऽस्य। यज्ञविघ्ने देवायत्तसिद्धिचिन्तके आपदुद्धारार्थं पौरुषचेष्टारहिते।

देवपर्ण न० देवप्रियं पर्णमस्य। सुरपर्णे राजनि०।

देवपशु पु॰ देवाय उत्सृष्टः पशुः। देवोद्देशेन उत्सृष्टे पशौ। "अनिर्दशाहां गां स्तृतां दृष्टान् देवपशूंस्तथा। सपालान् वा विपालान् वा न दण्ड्यान् मनुरब्रवीत्" मनुः। भिन्नत्वेन २देवोपासके च। "अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानाम्" इति श्रुतौ तस्य देवोपकरणतुल्यतया पशुत्वप्रतिपादनात्तथात्वम्।

देवपात्र न॰ ६त॰। देवैः पीयतेऽत्र पा—आधारे ष्ट्रन्। अग्नौ "आसपात्रं जुहुर्देवानामिति देवपात्रं वा एष यदग्निस्तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति" शत॰ब्रा॰ १।४।२।१॰ "आसरूपं पात्रमास्यात्रम्। अग्नौ प्रक्षिप्तस्य हविषो देवैरद्यमानत्वादग्नेर्देवपात्रत्वम्" भा॰

देवपान पु॰ देवैः पीयतेऽनेन पा—करणे ल्युट्। चमसे सोमपानपात्रभेदे "चमसो देवपान इति चमसेन ह वा एतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान इति" शत॰ब्रा॰ १।४।२।१४

देवपाल पु॰ शाकद्वीपस्य वर्षपर्वतभेदे। शाकद्वीपोपक्रमे "एतस्य वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव। ईशानउरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोता देवपालो महानसः" इतिभाग॰ ५।२०।१९

देवपालित त्रि॰ देवेन मेघाम्बुना पालितः। १देवमातके देशे २सुररक्षिते च। देवाएनं पाल्यासुः आशिषि संज्ञायां क्त। ३संज्ञाभेदे तत्र च "कारकादृतश्रुतयोराशिषि" पा॰ दत्तश्रुतयोरेवेति नियमात् न अन्तोदात्तता

देवपीयु पु॰ देवान् पीयति हिनस्ति पीय—उन्। देवद्वेषिरि असुरे। "अमेतोयस्तु गणयोऽशुम्नां देवपीयवः" यजु॰ ३५।१ "देवपीयवः देवद्विषः" वेददीपः

देवपुत्र पु॰ ६त॰। १देवकुमारे "देवपुत्रोपमौ वीरौ बालाविव हुताशनौ" हरिवं॰ ८४अ॰ देवस्य पुत्रीव प्रियत्वात्। २एलायां स्त्री जटाधरः। ६त॰। ३देवकन्यायाञ्च स्त्री स्वार्थे क। देवपुत्रिका तत्रार्थे राजनि॰ स्त्री

देवपुर् स्त्री ६त॰ समासान्तविधेरनित्यत्वात् न अप्। अमरावत्याम् पुरशब्देन ६त॰ स॰। देवपुर तत्रार्थे न॰।

देवपुरी स्त्री पुरीशब्देन ६त॰ स॰। अमरावत्याम्।

देवपूज्य पु॰ ६त॰। सुराचार्ये बृहस्पतौ।

देवप्रतिकृति स्त्री ६त॰। १देवप्रतिमायाम् देवतानां जीविकार्थे २देवप्रतिमायाञ्च।

देवप्रतिमा स्त्री ६त॰। देवमूर्त्तौ देवतामूर्त्तिशब्दे दृश्यम्।

देवप्रश्न पु॰ देवानुद्दिश्य प्रश्नः। देवान् प्रति शुभाशुभविषयप्रश्ने उपश्रुतौ हेमच॰। उपश्रुतिशब्दे दृश्यम्।

देवप्रस्थ पु॰ सेनाविन्दुन्दपपुरे। "स देवप्रस्थमासाद्य सेनाविन्दो पुरं प्रति" भा॰स॰ २६अ॰

देवप्रिय पु॰ ६त॰। १पीतभृङ्गराजे २वकवृक्षे च राजनि॰। तत्पुष्पस्य देवप्रियत्वात् तथात्वम्।

देववधू पु॰ ६त॰। अप्सरःसु।

देवबला स्त्री देवानामिव बलं यस्या ५त॰। १सहदेव्यां २लायमाणामाञ्च राजनि॰

देवबलि पु॰ देवार्थं बलिः वर्ण—इन् बल्यादेशः। देवार्थे उपहारे।

देववाहु पु॰ यदुवंशजे हृदीकपुत्रभेदे "निमिस्तस्मात् स्वयं भोजो हृदीकस्तत्सुतो मतः। देववाहुः शतधनुः कृतवर्मेति तत्सुताः" भाग॰ ९।२४।२६ ऋषिभेदे च "गार्ग्यः पृथुस्तथैवाग्र्यो जान्यो वामन एव च। देववाहुर्यदुश्चैव पर्जन्यश्चैव सोमजः" हरिवं॰ २६।अ॰।

देवब्रह्मन् पु॰ देव इव ब्रह्मा। नारदे त्रिका॰।

देवब्राह्मण पु॰ देवपूजकः ब्राह्मणः। देवले देवोपजीविके उपजीविकार्थं देवपूजके।

देवभवन न॰ देवानां भवनमिव। १अश्वत्थवृक्षे। ६त॰। २स्वर्गे शब्दच॰। ३देवप्रतिमालये च।

देवभाग पु॰ ६त॰। सू॰सि॰ उक्ते लवणसमुद्रात् उत्तरस्थिते उत्तरगोलरूपे पदार्थे "ततः समन्तात् परिधिः क्रमेणायं महार्णवः। मेखलेव स्थितो धात्रा देवासुरविभागकृत्" सू॰सि॰ "तेन समुद्रादुत्तरं भूगोलस्यार्द्धं जम्बूद्वीपं देवानां, समुद्रादक्षिणं समुद्रातिरिक्तं भूगोलस्यार्द्धं षड्द्वीपषट्समुद्रोभयात्मकं दैत्यानामिति सिद्धम् मेरुदण्डानुबद्धभूगोलमध्ये परिधिरूपो लवणसमुद्रोऽस्ति। उत्तरगोलार्द्धं दक्षिणभूगोलार्धान्तर्गत समुद्रस्य प्रान्तपरिधिस्पृष्टमिति मेखलाया कट्यधःस्थितत्वेन तात्पर्यार्थः" रङ्ग॰।

"मेषादौ देवभागस्थो देवानां याति दर्शनम्। देवभागे सुराणां च हेमन्ते मन्दतान्यथा। धनुर्मकरस्थः सविता देवभागे न दृश्यते। देवभागेऽसुराणां तु दृश्याद्येभचतुष्टये। भूमण्डलात् पञ्चदशे भागे दैवेऽथ वाऽऽसुरे" सू॰सि॰।

देवाय देयो भागः। देवार्थं देवे २धनादिभागभेदे च।

देवभीति स्त्री ५त॰। १देवेभ्यो भये। ६त॰। २देवानां भये च अत्र पूर्वपदप्रकृतिस्वरः।

देवभू स्त्री ६त०। १स्वर्गे देवं देवत्वं भवते भू-प्राप्तौ क्विप्। २देवत्वप्राप्तिरिभावे क्विप्। तद्देवत्वप्राप्तौ शब्दर०।

देवभूति स्त्री देवेषु भूतिः प्राप्तिरस्याः। १मन्दाकिन्याम् शब्दरत्ना०। ६त०। २देवानामैश्वर्ये च।

देवभूमि स्त्री ६त०। १स्वर्गे। २देवप्रियभूमौ च

देवभूय न० भू-भावे क्यप् ६त०। देवभावे देवत्वे अमरः।

देवभृत् पु०देवं बिभर्ति पालयति भृ-क्विप्। १इन्द्रे २विष्णौ च "देवेशो देवभृद्गुरुः" विष्णुसं०। "देवभृत् शक्रस्तस्य गुरुः शास्तेति" भाष्यम् एकनाम। नामद्वयपक्षे तु भिन्नं पदम् देवभृद् गुरुः।

देवभ्राज् पु० देवेषु भ्राजते भ्राज-क्विप्। स्वयंवंशप्रे देवभेदे "पुरा विवस्वतः सर्वे मह्यस्तेषां तथादरः। देवभ्राट् तनयस्तस्य सुभ्राडिति ततः स्मृतः" भा०व्या० १अ०

देवमणि पु०देव इव मणिः देवप्रियो वा मणिः देवेषु मणिरिव वा। १सूर्ये २कौस्तुभमणौ ३अश्वरोमावर्तभेदे च मेदि०। "सम्पन्नदेवमणयो भृतरत्नभागाः" माघः। "सम्पन्नाः समपाः देवमणयो निगालावर्त्ताः कौस्तुभादि दिव्यमणयश्च येषान्ते "आवर्त्तो रोमजो देवमणिस्त्वेष निगालजः" मल्लिनाथधृतकोषः।

देवमत त्रि० ६त०। १देवसम्मते। २ऋषिभेदे पु०"अत्राप्युदाहरन्तीममितिहासं पुरातनम्। नारदस्य च संवादमृषेर्देवमतस्य च" भा०आश्व० २४अ०।

देवमातृ स्त्री ६त०। १सुराणां मातरि "देवकन्या देवपत्न्यो देवमातर एव च" भा०अनु० १४अ०। २अदित्यां च। ३दाक्षायण्यां मतृस्मपु०।

देवमातृक पु० देवः मेघवर्षः मातेव पालकत्वात् यस्य कप्। १वर्षाम्बुसम्पन्नव्रीहिपालिते देशे अमरः। तदुपलक्षिते २क्षेत्रादौ च "कच्चिद्राष्ट्रे तडागानि पूर्णानि च बहूनि च। भागशो विनिविष्टानि न कृषिर्देवमातृका" भा०स० ५अ०।

देवमान न० देवानां मानं कालपरिच्छेदभेदः। १दिव्यमाने मानुषसौरवर्षात्मके एकस्मिन् दैवे दिने तच्चिंशन्मिते तदीये "मासे तद्रीत्या तेषां वर्षे च"संक्रान्त्या सौर उच्यते। मासैर्द्वादशभिर्वर्षं दिव्यं तदशकृरुच्यते। सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। तत् षष्टिषड्गुणा दिव्यं वर्षमासुरमेव च"सू०सि०"ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरुस्तथा। सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव" सू०सि० "द्वितीयं दिव्यं देवमानम्। तत्र पूर्वोक्तम्" रङ्गना०। देवेषु मानोऽस्य रमणीयत्वात्। २देवयोग्ये गृहादौ च "वेश्म परिष्कृतं देवमानेव चित्रम्" ऋ० १०।१०७।१० देवमानेव देवमानमिव रमणीयमिति भा० प्रथमास्थाने आकारादेशश्छान्दसः।

देवमानक पु० देवेषु मानोऽस्य कप् संज्ञायां कन् वा। कौस्तुभमणौ देवमणौ शब्दरत्ना०।

देवमाया स्त्री ६त०। अविद्यायाम् बन्धहेतौ परमेश्वरमायायाम् "ते दुस्तरामतितरन्ति च देवमायाम्"भाग०२।७।४०

देवमार्ग पु०देवोपलक्षितो मार्गः। अर्चिराद्यभिमानिदेवाधिष्ठिते देवयाने पथि। १देवाधिष्ठितपथमात्रे च। "ते (वानरा) विकृष्टास्तु बाहुभ्यां देवमार्गं च दर्शिताः" रामा० सु०६१।४

देवमास पु० दीव्यत्यत्र दिव-आधारे घञ् कर्म०। गर्भावधिके अष्टमे मासि तिका० तत्र हि सूतेरोजसश्च प्रादुर्भावात् गर्भस्य देवनावत्त्वात्तस्य तथात्वं यथाह याज्ञ०

"सप्तमे चाष्टमे मासि त्वङ्मांससृतिमानपि। पुनर्धातौ पुनर्गर्भमोजस्तस्य प्रधावति। अष्टमे मासतो गर्भोजातः प्राणैर्वियुज्यते" "अनेनौजःस्थितिरेव जीवनहेतुरिति दर्शयति तत्स्वरूपञ्च स्मृत्यन्तरे दर्शितम् "हृदि तिष्ठति यत् शुद्धमीषदुष्णं सपीतकम्। ओजः शरीरे संख्यातं तन्नाशान्नाश उच्यते" मिता० ६त०। २देवानां मासे सौरत्रिंशद्दर्शात्मके मासे च।

देवमित्र पु० देवो मित्रमस्य। संज्ञाभेदयुक्ते मनुष्यादौ "संज्ञायां मित्रामित्रयोः" पा०बहु० अन्तोदात्तता। कुमारानुचरमातृभेदे स्त्री "कण्डूतिः कालिका चैव देवमित्रा च भारत!" भा०शल्य० ४७अ० मातृगणोक्तौ

देवमीढ पु० यदुवंश्ये नृपभेदे "यदोरभूदन्वयाये देवमीढ इति श्रुतः। यादवस्तस्य तु सुतः शूरस्तेनोक्यसम्मतः। शूरस्य शौरिर्न्दवरो वसुदेवो महायशाः" भा०द्रो०१४४अ०

देवमीढुष पु० कृदीकस्य पुत्रभेदे "तस्यापि (कृदीकस्यापि) शतधर्मशतधनुर्देवमीढुषाद्याः पुत्रा बभूवुः" श्रीधरधृत पराशरः। २देवमीढे वसुदेवपितामहे च "अश्मक्यां जनयामास शूरं वै देवमीढुषः। महिष्यां जज्ञिरे शूराद्भोज्यायां पुरुषा दश। वसुदेवो महाबाहुः पूर्वमानक दुन्दुभिः" इत्यादि हरिवं० ३५अ०।

क्रोष्टुवंश्ये नृपभेदे "गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः। गान्धारी जनयामास अनमित्रं महाबलम्। माद्री युधाजितं पुत्रं ततोऽन्यं देवमीढु-

ध्नम् । तेषां वंशस्त्रिधा भूतो दृष्णीनां कुलवर्द्धनः" हरिवं० ३५ अ०।

देवमुनि पु० देव इव मुनिः । देवर्षौ नारदादौ । १सुराख्ये ऋषौ च "एतेन वै सुरो देवमुनिः सर्वाम्हद्विमार्भोत्" पञ्चभीमब्रा० २५।१४

देवयज् पु० देवा इज्यन्तेऽत्र यज–आधारे क्विप् । देवयजन योग्ये वह्निभेदे "अपाग्ने ! अग्निमामादम् हि निष्क्रव्याद् सेध आ देवयजं वह" यजु० १।१७ "तत्र त्रयोऽग्नयः सन्ति । एकः आमात् । आममपक्वमत्तीत्यामाद्यौकिकोऽग्निः । द्वितीयः क्रव्यात् शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः । तृतीयो यागयोग्यः । तथाविधांस्त्रीनङ्गारान् गार्हपत्यात् प्रागभागे पृथक् कृत्य तेषां मध्ये यागयोग्यताहीनौ द्वावग्नी आमात्क्रव्यात्संज्ञौ त्याजयितुं गार्हपत्यं प्रत्युच्यते" वेददी०

देवयजन न० देवा इज्यन्तेऽत्र यज–आधारे ल्युट् । वेदिस्थाने "अपावरू पृथिव्यै देवयजनादु बध्यासम्" यजु० १।१५ २पृथिव्यां स्त्री ङीप् । "पृथिवि ! देवयजन्योषध्यास्ते मूलं मा हिंसिषम्" १।२४ हे देवयजनि हे पृथिवि इत्यर्थः । ३यागाधिकरणस्थानमात्रे च "स यदस्यै पृथिव्या अनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै देवयजनमित्यपि ह वा अस्यै तस्मिन् देवयजन इष्टं भवति तस्माद्वै प्रतिमार्ष्टि" शत०ब्रा० १।२।५।१८ "वेदीमार्जनप्रशंसार्थमितिहासमाह । या समन्तात् मृतं सर्वदा नश्वरमामृतं तद्विपरीतं यद्देवयागाधिकरणभूतं स्थानम्" भा० तत् स्थानं विशिनष्टि कात्या०श्रौ० २०।४ १४ "नित्योदकं देवयजनं पुरस्तात्"सू०"पुरस्तात् प्राच्यां दिशि नित्यं सदा स्याद्युदकं यत्र तद् देवयजनमध्यवसेयम्" कर्कः ।

देवयजि पु० देवं यजते यज–इन् । देवयाजके "अद्मो द्विजान् देवयजीन् निहन्मः" भट्टिः ।

देवयज्ञ पु० ६त० । देवानां यज्ञे पञ्चयज्ञान्तर्गते होमरूपे गृहस्थनित्यकर्त्तव्ये यज्ञभेदे । "अथातः पञ्च यज्ञाः "देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ" इति । "तद्यदग्नौ जुहोति स देवयज्ञो यद्बलिङ्करोति स भूतयज्ञो यत् पितृभ्यो ददाति स पितृयज्ञो यत् स्वाध्याय मधीयते स ब्रह्मयज्ञो यन्मनुष्येभ्यो ददाति स मनुष्ययज्ञ इति" आश्वा० गृ० सू० ३।१,२,३, "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते" मनुः । तत्र होमस्य देवता मनुनोक्ता यथा "आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् । अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः । विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च । कुह्वै चैवानुमत्यै च प्रजापतयएव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" । "तत्र च यज्ञशब्दो महच्छब्दश्च गौणः" इति कुल्लू० ।

देवयज्य स्त्री देवानां यज्यः यागः । "छन्दसि निष्ठर्ये"त्यादि" नि० य । देवार्थयागक्रियायाम दर्शादिकायाम् । "दैव्याय कर्मणे शुम्भध्वम् देवयज्यायै" यजु० १।१३। "देवयज्यायै देवसम्बन्धिन्यै यागक्रियायै दर्शादिकार्यै" वेददी० । "अशग्राम ते सुकृतं देवयज्यया" ऋ० १।११४।१ "वयं देवयज्यया देवयागेन तद्दैवत्येन यज्ञेनाशग्राम" भा० ।

देवयाजिन् पु० देवं यजते यज–णिनि । आत्मभेदेन देवार्थयागकारके । "अथ ह स देवयाजी यो वेद देवानेवाहमिदं यजे देवानृत्सृपर्यामीति स यथा श्रेयसे पापीयान् बलिं हरेद्वैशग्रो वा राज्ञे बलिं हरेदेवं स ह न तावन्तं लोकं जयति यावन्तमितरः" शत०ब्रा० ११।२।६।१४ आत्माभेदेन याज्यपेक्षया तस्य निकृष्टत्वमुक्तम् आत्मयाजी श्रेयान् देवयाजी इत्युपक्रम्य तथा वर्णनात् । २कुमारसैन्यभेदे च "यज्ञबाहुः प्रबाहुश्च देवयाजी च सोमपाः" भा०शल्य० ७६ अ० तत्सैन्योक्तौ

देवयात त्रि० देवं देवत्वं यातः । देवत्वप्राप्ते तस्य विषयो देशः राजन्या० बुञ् । दैवयातक तस्य विषये देशे । अत्र दैवयातव इति पाठान्तरं देवं देवत्वं याति या–तनु देवयातुः स्वार्थे अण् । दैवयातवं देवत्वप्राप्तरि ततः राजन्या० बुञ् । दैवयातवक तस्य विषये देशे ।

देवयात्रा स्त्री देवानां यात्रा । देवोत्सवादौ देवप्रतिमानां स्थानान्तरनयनरूपगतौ ।

देवयात्रिन् पु० दानवभेदे "सोमपो देवयात्री च प्रवरो वीर मर्द्दनः" हरिवं० २४०अ० ।

देवयान न० यायतेऽनेन या–करणे ल्युट् ६त० । १सुराणां गतिसाधने रथभेदे विमाने । देवो परेशः यायतेऽनेन मार्गेण या–करणे ल्युट् । २अर्चिरादिमार्गरूपे पथिभेदे

पु० अर्चिरादिमार्गशब्दे ३६४ पृ० दर्शितछान्दोग्य वाक्यम् ।"स एनान् ब्रह्म गमयतीत्येष देवयानः पन्थाः देवपथो ब्रह्मपथ इत्यपि तत्र स्थानान्तरे पाठः । तत्र सन्निवेशाद्यधिष्ठातृदेवभेदादिकं शा०सू०भा० दर्शितं यथा "अर्चिरादिना तत्प्रथितेः" शा० सू० ।

"आसृत्युपक्रमात् समानोत्क्रान्तिरित्युक्तम् । स्मृतिस्तु स्मृत्यन्तरेष्वनेकधा श्रूयते । नाड़ीरश्मिसम्बन्धेनैका "अथैतैरेव रश्मिभिरूर्द्ध्वं आक्रमते, इति । अर्चिरादिकैका "तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः" इति ; "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति"इत्यन्या । "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति" इत्यपरा । "सूर्यद्वारेण ते विरजाः प्रयान्ति" इति चापरा । तत्र संशयः किं परस्परं भिन्ना एताः स्मृतयः किं वैकैवानेकविशेषणेति । तत्र प्राप्तं तावद्भिन्ना एवैताः स्मृतय इति, भिन्नप्रकरणस्थितत्वाद्भिन्नोपासनशेषत्वाच्च । अपि च "अथैतैरेव रश्मिभिः" इत्यवधारणमर्चिराद्यपेक्षायामुपरुध्येत, त्वरावचनञ्च पीड्येत"स यावत् क्षिप्येन्मनस्तावदादित्यङ्गच्छति" इति तस्मादन्योन्यभिन्ना एवैते पन्थान इत्येवं प्राप्तेऽभिदधुमहे । अर्चिरादिनेति । सर्वो ब्रह्मप्रेप्सुरर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे । कुतः ? तत्प्रथितेः । प्रथितो ह्येष मार्गः सर्वेषां विदुषाम् । तथाहि पञ्चाग्निविद्याप्रकरणे "ये चामी अरण्ये श्रद्धां सत्यमुपासते" इति विद्यान्तरशीलिनामप्यर्चिरादिका स्मृतिः श्राव्यते । स्यादेतत् यासु विद्यासु न क्वाचिद्गतिरुच्यते तास्वेवेयमर्चिरादिकोपतिष्ठताम् यासु त्वन्याऽन्या श्राव्यते तासु किमर्चिराद्याश्रयणम् ? इति । अत्रोच्यते,भवेदेतदेवं यद्यन्यभिन्ना एवैताः स्मृतयः स्युः, एकैव त्वेषा स्मृतिरनेकविशेषणा ब्रह्मलोकप्रतिपादनी क्वचित् केनचिद्विशेषणेनोपलक्षितेति वदामः, सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः । प्रकरणभेदेऽपि तु विद्यैकत्वे भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारः । विद्याभेदेऽपि गत्येकदेशप्रत्यभिज्ञानाद्गन्तव्याभेदाच्च गत्यभेद एव । तथाहि "ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" "तस्मिन् वसति शाश्वतीः समाः" "सा या ब्रह्मणो जितिर्यां व्यष्टिस्तां जितिं जयति तां व्यष्टिं व्यश्नुते" "तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति" इति तत्र तत्र च तदेवैकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्रदर्श्यते । यत्त्वेतैरेवेत्यवधारणमर्चिराद्याश्रयणे न स्यादिति । नैष दोषः, रश्मिप्राप्तिपरत्वादस्य । न ह्येक एवशब्दो रश्मींश्च प्रापयितुमर्हति, अर्चिरादींश्च व्यावर्तयितुम् । तस्माद्रश्मिसम्बन्ध एवायमवधार्यते इति द्रष्टव्यम् । त्वरावचनं त्वर्चिराद्यपेक्षायामपि क्षेप्रार्थत्वान्नोपरुध्यते यथा निमिषमात्रेणात्रागम्यत इति । अपि च "अथैतयोः पथोर्न कतरेण चेति" मार्गद्वयभ्रष्टानां कृष्णं तृतीयं स्थानमाचक्षाणा पितृयाणव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पन्थानं प्रथयति । भूयांसि चार्चिरादिश्रुतौ मार्गपर्वाणि, अल्पीयांसि त्वन्यत्र, भूयसाञ्चानुगुण्येनाल्पीयसाञ्च नयनं न्याय्यमित्यतोऽपि अर्चिरादिना तत्प्रथितेरित्युक्तम्" भा० ।

"वायुमब्दादविशेषाविशेषाभ्याम्" सू० ।

"केन पुनः सन्निवेशविशेषेण गतिविशेषाणामितरेतरविशेषणविशेष्यभाव ? इति तदेतत् सुहृद्भूत्वाऽऽचार्यो ग्रथयति "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं इति कौषितकिनां देवयानः पन्थाः पठ्यते । तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र सन्निवेशक्रमः कश्चिदन्वेष्टव्यः, वायुस्त्वर्चिरादिवर्त्मन्यश्रुतः कतमस्मिन् स्थाने सन्निवेशयितव्य इति । उच्यते, "तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यम् इत्यत्र संवत्सरात् पराञ्चमादित्यादर्वाञ्चं वायुमभिसम्भवन्ति, कस्मात् अविशेषविशेषाभ्याम् । तथाहि "स वायुलोकम् इत्यत्राविशेषोपदिष्टस्य वायोः स्मृत्यन्तरे विशेषोपदेशो दृश्यते "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खण्डेन स ऊर्द्ध्वं आक्रमते स आदित्यमागच्छति" इति एतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषादब्दादित्यनयोरन्तराले वायुर्निवेशयितव्यः । कस्मात् पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोऽनन्तरं वायुर्न निवेश्यते । नैषोऽस्ति विशेष इति । वदामः । ननूदाहृता स्मृतिः "स एतं

देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकम् इति। उच्यते, केवलोऽत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दोऽस्ति। पदार्थोपदर्शनमात्रं ह्यत्र क्रियते "एतच्चैतच्च स गच्छति" इति उत्तरत्र पुनर्वायुप्रत्तेन रथचक्रमात्रेण छिद्रेणोर्द्ध्वं आक्रम्यादित्यमागच्छतीत्यवगम्यते क्रमः तस्मात् सूक्तमविशेषविशेषाभ्यामिति। वाजसनेयिनस्तु "मासेभ्यो देवलोकं देवलोकादादित्यम्" इति समामनन्ति, तत्रादित्यानन्तर्यार्थं देवलोकाद्वायुमभिसम्भवेयुः। वायुमध्यादिति तु छान्दोग्यश्रुत्यपेक्षयोक्तम्। छान्दोग्यवाजसनेययोस्त्वेकत्र देवलोको न विद्यते परत्र संवत्सरः, तत्र श्रुतिद्वयप्रत्ययादुभयथ्युभयत्र ग्रथितव्यौ, तत्रापि मासस्सम्बन्धात् संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यम्" भा०।

"तडितोऽधिवरुणः सम्बन्धात्" सू०।

"आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्" इत्यस्यां विद्युत उपरिष्टात् वरुणलोकमित्ययं वरुणः सम्बध्यते। अस्ति हि सम्बन्धो विद्युद्वरुणयोः। "यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषाः जीमूतोदरेषु प्रघट्टयन्ति अथापः प्रपतन्ति विद्योतते स्तनयति वर्षिष्यति वा" इति च ब्राह्मणम्। अपाञ्चाधिपतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः। वरुणाञ्चाधीन्द्रप्रजापती स्थानान्तराभावात् पाठसामर्थ्याच्चागन्तुकत्वादपि वरुणादीनामन्त एव निवेशः। वैशेषिकस्थानाभावात् विद्युच्चान्त्याऽर्चिरादौ वर्त्मनि" भा०।

"आतिवाहिकास्तल्लिङ्गात्" सू०।

इत्यादि सूत्रभाष्यन्तु आतिवाहिकशब्दे ६५२पृ०दर्शितम्

"कार्यं बादरिरस्य गत्युपपत्तेः" सू०। "स एनान् ब्रह्म गमयति" इत्यत्र विचिकित्स्यते, किं कार्यमपरं ब्रह्म गमयति आहोस्विन् परमेवाविकृतं सूक्ष्मं ब्रह्मेति। कुतः संशयः, ब्रह्मशब्दप्रयोगात् गतिश्रुतेश्च। तत्र कार्यमेव सगुणमपरं ब्रह्म नयत्येतानमानवः पुरुष इति बादरिराचार्यो मन्यते। कुतः? अस्य गत्युपपत्तेः। अस्य हि कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशवत्त्वात्, न तु परस्मिन् ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वाऽवकल्पते सर्वगतत्वाद् प्रत्यगात्मत्वाच्च गन्तॄणाम्" भा०।

"विशेषितत्वाच्च" सू०। "ब्रह्मलोकान् गमयति" "ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" इति श्रुत्यन्तरे विशेषितत्वात् कार्यब्रह्मविषयैव गतिरित्यवगम्यते। न हि बहुवचनेन विशेषणं परस्मिन् ब्रह्मण्यवकल्पते। कार्ये त्वस्याभेदोपपत्तेः सम्भवति बहुवचनम्। लोकश्रुतिरपि विकारगोचरायामेव सन्निवेशविशिष्टायां भोगभूमावाञ्जसी, गौणी त्वन्यत्र "ब्रह्मैव लोक एष सम्राट्" इत्यादिषु। अधिकरणाधिकर्तव्यनिर्देशोऽपि परस्मिन् ब्रह्मणि नाञ्जसः स्यात्, तस्मात् कार्यविषयमेवेदं नयनम्" भा०।

"ननु कार्यविषयेऽपि ब्रह्मशब्दो नोपपद्यते समस्तस्य हि जगतो जन्मादिकारणं ब्रह्मेति प्रतिष्ठापितमित्यत्रोच्यते"। "सामीप्यात्तु तद्व्यपदेशः" सू०।

"तुशब्द आशङ्काव्यावृत्त्यर्थः। परब्रह्मसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते। परमेव हि ब्रह्म विशुद्धोपाधिसम्बन्धात् क्वचित् कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः। ननु कार्यप्राप्तावनावृत्तिश्रवणं न लभ्यते। न हि परस्मात् ब्रह्मणोऽन्यत्र क्वचित् नित्यता सम्भवति। दर्शयति च देवयानपथप्रस्थितानामनावृत्तिं "एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" इति। "तेषामिह न पुनरावृत्तिरस्ति तयोर्द्ध्वमायन्नमृतत्वमेतीति" चेति। अत्र ब्रूमः" भा०।

"कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्" सू०। "कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परं पदं प्रतिपद्यन्त इति। इत्थं क्रमसन्निरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यञ्जस्यैव गतिपूर्विका परप्राप्तिः सम्भवति इत्युपपादितम्" भा० "स्मृतेश्च" सू०। "स्मृतिरप्येतमर्थमनुजानाति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति। तस्मात् कार्यब्रह्मविषया गतिः श्रूयत इति सिद्धान्तः" शा० भाष्यम्।

देवयानी स्त्री शुक्राचार्यस्य कन्यायां सा हि कचशापात् क्षत्रियेण ययातिनोढा तत्कथा भा० आ० ७५।७७अ०।

"देवयान्याश्च संयोगं ययातेर्नाहुषस्य च"। देवयानीञ्च दयितां सुतां तस्य महात्मनः। देवयान्यामजायेतां यदुस्तुर्वसुरेव च" ७५अ०।

देवयावन् त्रि॰ देवं याति या–वनिप्। देवं प्रति गन्तरि "द्रवद्दूतो देवयावा वनिष्ठः" ऋ॰७।१०।२

देवयित त्रि॰ चु॰ दिव–परिदेवने तच्। परिदेवके

देवयु त्रि॰ देवं याति या–स्मृगय्वा॰ नि॰ कु। १धार्मिके। देवं द्योतनस्वभावं विष्णुभावमात्मन इच्छति क्यच्–तत उ। २आत्मनो द्योतनस्वभावेच्छौ च "नरो यत्र देवयवोमदन्ति" ऋ॰१।१४५।५। ३लोकयात्रिके मेदि॰ ४देवे पु॰ देवं द्यौति यु–मिश्रणे क्विप् अनित्यमागमानुशासनमिति न तुक्। ४यज्ञादिना देवानां मिश्रीकारके "सुधातं यज्ञपतिं देवयुवम्" यजु॰१।१२ छान्दस उवङ्।

देवयुग पु॰ देवप्रियं युगम्। सत्ययुगे "पुरा देवयुगे ब्रह्मन् प्रजापतिसुते शुभे आस्तां भगिन्यौ "ते भार्ये कश्यपस्यास्तां कद्रूश्च विनता तथा" भा॰आ॰१६अ॰। "पुरा देवयुगे तात! देवेन्द्रेषु महात्मनः" भा॰अनु॰ ८३अ॰।

देवयोनि पु॰ देवानामिव कामिचारित्वात् योनिः यस्य। १विद्याधरादौ ते च अमरोक्ता यथा "विद्याधरोऽप्सरो यक्षोरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः"। २देवजातौ स्त्री "द्वे वै योनी इति ब्रूयात् देवयोनिरन्यो मनुष्ययोनिरन्यः" शत॰ब्रा॰७।४।२।१०

देवयोषा ६त॰। अप्सरसि। "सुषुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम्" भा॰शल्य॰ ४७अ॰। "शुभे कुन्ती च माद्री च देवयोषोपमे भुवि" हरिवं॰ ५४अ॰

देवर पु॰ दीव्यतेऽनेन दिव–करणे अरच्। भर्तुरनुजे भ्रातरि। "पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे" उद्भटः पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा" मनुः २भर्तृभ्रातृमात्रे च "देवराद्वा सपिण्डाद्वा स्त्रिया सम्यग्नियुक्तया" मनुः अत्र देवरशब्दः भर्तृः ज्येष्ठकनिष्ठोभयपरः। उत्तरत्र "विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि। गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम्" कनिष्ठस्य पूर्वजपत्नीत्वेन गुरुतुल्यत्वस्य ज्येष्ठस्य च कनिष्ठपत्न्याः स्नुषातुल्यत्वस्योक्तेः। स्वार्थे क तत्रार्थे। "देवा देवरकोमतः" उज्ज्वलद॰ धृतकोषः।

देवरक्षित त्रि॰ ६त॰। १देवेन २रक्षिते देवकन्दपपुत्रभेदे पु॰ तत्कन्यायां स्त्री "देवकस्याभवन् पुत्राश्चत्वारस्त्रिदशोपमाः। देववानुपदेवश्च सुदेवो देवरक्षितः। कुमार्यः सप्त चास्यासन् वसुदेवाय ता ददौ। देवकी शान्तिदेवी च सुदेवा देवरक्षिता। धृतदेव्युपदेवी च सुनाम्नी चैव सप्तमी" हरिवं॰ ३८अ॰

देवरथ न॰ देवस्यादित्यस्य रथः। सूर्यरथे "द्वात्रिंशत वै देवरथाङ्गन्यम्" शत॰ब्रा॰ १४।६।३।२ देव "आदित्यस्तस्य रथो देवरथः तस्य गत्या एकेनाङ्गा यावद्देशपरिमाणं परिच्छिद्यते तदेकं देवरथाङ्गन्यम् तद् द्वात्रिंशद्गुणितम् तावत् परिमाणोऽयं लोकः" भा॰ २प्रवरान्तर्गतर्षिभेदे ततः फिञ्। दैवरथायनि तदपत्ये पुंस्त्री। ३देवानां याने विमाने च

देवरहस्य न॰ देवानामपि रहस्यम्। अतिगोप्ये "श्रुतं देवरहस्यं ते नारदाद्देवदर्शनात्" भा॰आश्व॰३६अ॰

देवराज् पु॰ देवेषु राजते राज–क्विप्। इन्द्रे "हत्वा देवराट् श्रेष्ठभाग् वै" भा॰अनु॰ १अ॰

देवराज पु॰ देवानां राजा–टच् समा॰। सुरराजे इन्द्रे "यस्यासीद्देवको नाम देवराजसमद्युतिः" भा॰आ॰६७अ॰ "देवराजः महानुजः" वृ॰सं॰४०अ॰ "ततः कुलालादि॰ वुञ्। देवराजक तत्कृते त्रि॰।

देवरात पु॰ देवात्तनं रायासुः संज्ञायां क्त। १विष्णुना देवेन रक्षिते परिक्षिते नृपे परिक्षितशब्दे तत्कथा दृश्या २विश्वामित्रपुत्रभेदे "विश्वामित्रस्य च सुता देवरातादयः स्मृताः" हरिवं॰ २७अ॰। "पार्थिवा देवरातास्य शालङ्कायनवङ्कनम्" हरिवं २७अ॰। ३द्वापरयुगोद्भवे राजभेदे च "चानूरुर्देवरातश्च भोजो भीमरथश्च यः" "उपासते सभायां तु कुन्तीपुत्रं युधिष्ठिरम्" भा॰सभा॰४अ॰ उपसंहारे युधिष्ठिरसभासत्त्वेन तस्योक्तेः न तस्य परिक्षितादिरूपत्वम्। ततः काश्यपादि॰ ठञ् ञिठ् च। दैवरातिक तदपत्यादौ त्रि॰। ठञि स्त्रियां ङीप् इति भेदः।

देवर्षि पु॰ देव इव ऋषिः देवानामपि ऋषि पूज्यत्वात्। १नारदादौ न्यायादिकर्तरि कणादादौ च "देवर्षिरचितं गार्ग्य! कणादेयचिकित्सितम्। न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः" भा॰शा॰ २१०अ॰ "आब्रह्म भुवनात् लोका देवर्षिपितृमानवः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः" तर्पणमन्त्रः।

देवल पु॰ देव–दृशा॰ कलच्। १धार्मिके २देवद्रव्योपजीविनि ब्राह्मणे च "चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः" मनुः "देवलः देवप्रतिमापरिचारकः वर्तनार्थत्वेनैतत्कर्मणोऽयं निषेधः न धर्मार्थं "देवकोषोपजीवी च नाम्ना देवलको भवेत्" देवलस्मरणात्, कुल्लू॰। प्रत्यूषवसुपुत्रे ३ऋषिभेदे "प्रत्यूषस्य विदुः पुत्रमृषिं नाम्ना तु देवलम्" हरिवं॰

३अ०। आसतसुनेरपत्ये ४ऋषिभेदे। स च रम्भाशापेनाष्टावक्रतया बभूव ब्रह्मवै०पु०"असितपुत्रत्वात् तत्सहकारस्थले "असितो देवलो व्यासः" इत्यादौ तस्यैव बोधः। स च स्मृतिकर्त्ता यथाह हेमा०ब्र०ख० मनुः। "विष्णुः पराशरो दक्षः संवर्त्तव्यासहारिताः। शातातपो वसिष्ठश्च यमापस्तम्बगौतमाः। देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः। शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः"। ५धौम्यवैश्यजभ्रातरि च "यवीयान् देवलस्यैष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं दृणीध्वं यदीच्छथ" भा०आ० १८३ अ० तस्य धौम्याग्रजतोक्ता। ६नारदसुतौ त्रिका० ७देवरे शब्दरत्ना०। देवं लाति ला-क। जीविकार्थं देवप्रतिमायाः दस्यानान्तरनायके च। स्वार्थे क। देवलक तत्रार्थे।

देवलता स्त्री देवप्रिया लता शा० त०। १नवमल्लिकायाम् शब्दच०। देवलस्य भावः तल्। २देवलत्वे उपजीविकार्थं देवपूजने स्त्री।

देवलाङ्गुलिका स्त्री देवयत्नया चु० देव-परिदेवने करणे अच कर्म०। दृष्टिकालिकायां (विद्याति) राजनि०।

देवलाति स्त्री देवानां तत्प्रतिमानां लातिः ग्रहणम् ६त०। देवप्रतिमाग्रहणे तस्य दासीभारादित्वात् तत्पुरुषे पूर्वपदप्रकृतिस्वरत्वम्।

देवलोक पु० देवानां लोकः। १स्वर्गे त्रिका०। "आचार्य्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः। अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः" मनुः। भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः। तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्तिताः"मत्स्यपु०उक्तेषु २भूर्लोकादिषु च

देववक्त्र न० देवानां वक्त्रं मुखमिव। वह्नौ तत्र हुतस्यैव देवैरदनात् तस्य तन्मुखत्वम्।

देववर्त्मन् ६त०। सुरवर्त्मनि आकाशे हेमच०।

देववर्द्धकि पु० ६त०। विश्वकर्मणि हेमच०।

देववर्द्धन पु० देवक्षत्रपुत्रभेदे "चत्वारो देवकात्मजाः। देववानुपदेवश्च सुदेवो देववर्द्धनः" भाग० ९।२१।१२

देववल्लभ त्रि० ६त०। १देवानामिष्टे २सुरपुन्नागे पु० अमरः।

देववात पु० देवैर्वातः वा-गतिगन्धयोः कर्मणि क्त ३त०। देवैरिष्यमाणतया प्राप्ते ऋषिभेदे। "अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम्" ऋ०३।२३।२।

देववायु पु० द्वादशमनोः पुत्रभेदे "देववायुरदृश्यश्च देवश्रेष्ठो विदूरथः। मित्राविनृमित्रदेवश्च मित्रसेनश्च मित्रकृत्। मित्रवाहः सुवर्चाश्च द्वादशस्य मनोः सुताः" हरिवं० ७ अ०।

देववाहन पु० देवान् हवींषि वाहयति प्रापयति वह-णिच्-ल्यु। १वह्नौ "वृषो अग्निः समिध्यते अश्वो न देववाहनम्" ऋ०१।२७।१४ ६त०। २देवानां वाहने न०।

देवविद्या स्त्री देवज्ञानार्थं विद्या। निरुक्तविद्यायाम् "नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणपञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवं निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति" छा०उ०"ऋग्वेदं भगवोऽध्येमि स्मरामि। यद्वेत्येति विज्ञानस्य सृष्टत्वात्तथा यजुर्वेदं सामवेदमाथर्वणं चतुर्थवेदं वेदशब्दस्य प्रकृतत्वादितिहासपुराणं पञ्चमं येषां वेदानां तत् पञ्चमानां वेदानां वेदं व्याकरणमित्यर्थः व्याकरणेन हि पदादिविभागश ऋग्वेदादयोऽध्यायन्ते पित्र्यं श्राद्धकल्पम्। राशिर्गणितं दैवमुत्पातज्ञानं निधिं महाकालादिनिधिशास्त्रम्। वाको वाक्यं तर्कशास्त्रम्। एकायनं नीतिशास्त्रं देवविद्यां निरुक्तं, ब्रह्मण ऋग्यजुः सामाथर्वस्य विद्या ब्रह्मविद्या शिक्षाकल्पछन्दश्चितयस्ताः। भूतविद्यां भूततन्त्रम्। क्षत्रविद्यां धनुर्वेदम्। नक्षत्रविद्यां ज्योतिषं सर्पविद्यां गारुडम्। देवजनविद्यां गन्धयुक्तिनृत्यगीतवाद्यशिल्पादि विज्ञानानि। एतत् सर्वं हे भगवोऽध्येमि" भा०

देवविश् स्त्री ब०व० देवानां विशः। देवमनुष्येषु मरुत्सु। "मारुतस्तु सप्तकपालो विशो वै मरुतो देवविशस्ता हेदमनिषेद्धा इव चेरुस्ताः प्रजापतिं यजमानसुमेत्योचुर्विवैते मथिष्यामह इमाः प्रजा या एतेन हविषा सृज्यसे" शत० ब्रा० २।५।१।१२। अजादि वा टाप्

देववी त्रि० देवं वेति कामयते वी-कान्त्यादिषु क्विप्। देवकामे। "स वह्निः सोम! जाग्वविः पुरुस्पृहो देववीरति" ऋ० ९।२६।२।

देववीति स्त्री वी-खादने क्तिन् ६त०। देवानां भक्षणे। "देववीतये त्वा गृह्णामि" यजुः १।१५। देवानां भक्षणायेत्यर्थः। [२सप्तपर्णवृक्षे च मेदि०।

देववृक्ष पु०देवप्रियो वृक्षः शाक०। १मन्दारवृक्षे २गुग्गुलौ

देववृत्ति स्त्री देवकृता उणादिसूत्रस्य वृत्तिः। उणादिसूत्रवृत्तिभेदे ३।९८।१०१ सू० उज्ज्वलदत्तीये द्रष्टव्यम।

देवव्यचस् त्रि॰ वि+अञ्च गतौ कसुन् ३त॰। देवैर्व्याप्ते "स्तृणीमहि देवव्यचा विबर्हिः" ऋ॰ ३।४।४।

देवव्रत पु॰ १भीष्मे त्रिका॰ "गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत् प्रभुः। स तु भीष्म इति ख्यातः कौरवाणां पितामहः" हरिवं॰२अ॰। २अधिपते इत्यस्यामृचि गेये सामभेदे च तानि तदादीनि त्रीणि सामानि। ६त॰। ३देवत्वसाधने व्रते न॰।

देवव्रतिन् त्रि॰ देवतार्थं व्रतमस्त्यस्य इनि। देवार्थव्रतयुक्ते "देवव्रती स्यादृषभप्रदाने" भा॰आनु॰ ७१अ॰।

देवशत्रु पु॰ ६त॰। १देवारौ असुरे "स देवशत्रुनिव देवराजः" भा॰ द्रो॰ १४६ अ॰। २सुश्रुतोक्ते देवगणग्रहभेदे तदाविष्टनरलक्षणं तत्रोक्तं यथा "संस्वेदी द्विज गुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः। सन्तुष्टो भवति च न चान्नपानजातैर्दुष्टात्मा भवति च देवशत्रुजुष्टः"।

देवशर्मन् पु॰देव इव शर्मा अशुभनाशकः,कर्म॰वा। १ब्राह्मणस्योपनामनि "ततस्य नाम कुर्वीत पितैव दशमेऽहनि। देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम्" विष्णुपु॰। "नरमाचष्टे नराख्यं नरनाम। देवपूर्वं देवात् पूर्वं तच्च विशिष्टं शर्मयुतं तच्चान्ते" इत्याति हिनस्त्यशुभ शु—मनिन् शर्मा। देवपदं हि विप्राणां नाममात्रसम्बद्धम्" शु॰त॰। "शर्मा देवश्च विप्रस्य शर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" यमवचने शर्मदेवयोः क्रमेण निर्देशेऽपि "शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रियस्य तु" शातातपोक्तेः शर्मान्तमेव नामनि ज्ञेया अतएव तर्पणप्रयोगे "अमुकगोत्रः पिता अमुकदेवशर्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधेति" व्या॰ त॰। "शर्मन्नर्घादिके कार्ये शर्मा तर्पणकर्मणि" गोभिलेन च शर्मान्तता उक्ता। २ऋषिभेदे "देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च" भा॰ अनु॰ १६५।

देवशस् अव्य॰देव+वा॰ शस्। देवेत्यर्थे "त्वचि प्रति तान् देवशो विहि" ऋ॰ ३। १।५।

देवशिल्पिन् पु॰ ६त॰। विश्वकर्मणि।

देवशुनी स्त्री देव इव प्रभावान्विता शुनी। देवतुल्यप्रभावान्वितायां शुन्यां सरमायाम्। "पणिभिरसुरैर्निगूढागा अन्वेष्टुं सरमा देवशुनीमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुरिति" ऋ॰१।६।५ भा॰ धृता श्रुतिः "तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्त्ता तत्सत्रमुपागच्छत्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घं सत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति नावेक्षते इयोपि नावेक्षि किमर्थमभिहत इति। न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादयमभिहतोऽनपकारी तस्मादृष्टस्त्वां भयमागमिष्यतीति" भा॰व्या॰३अ॰।

देवशेखर पु॰दीव्यतीति देवः शेखरोऽस्य। १दमनकवृक्षे ६त॰। २देवानां शेखरे पु॰ न॰।

देवश्रवस् पु॰ १विश्वामित्रपुत्रभेदे "देवश्रवाः कतश्चैव यस्मात्कात्यायनाः स्मृताः" हरिवं॰ २० अ॰ विश्वामित्रपुत्रकथने। २वसुदेवभ्रातरि "वसुदेवं देवभागं देवश्रवसमानकम्। सृञ्जयं श्यामकं कङ्कं समीकं वत्सकं वृकम्" भाग॰ ९।२४।१७। "कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा" २३ श्लो॰

देवश्री पु॰ देवान् श्रयति हविर्दानेन सेवते श्री—क्विप्। यज्ञे "दैव्याय धर्त्रे जोष्ट्रे देवश्रीः" यजु॰ १७।५६। ६त॰। २देवानां लक्ष्म्यां स्त्री।

देवश्रुत् त्रि॰ देवेषु श्रूयते श्रु—क्विप् तुक्। देवेषु विख्याते। "देवश्रुतौ देवेष्वाघोषतम्" यजु॰५।१७ "निधाय्या स्थ देवश्रुतस्तर्पयत मा" यजु॰ ६।१०

देवश्रुत पु॰ देवेषु श्रुतः विख्यातः। १ईश्वरे २नारदे ३शास्त्रे च शब्दार्थकल्प॰। ४जिनभेदे हेमच॰। "स्वयंप्रभस्य सर्वानुभूतिदेवश्रुतौ च यौ"। अवसर्पिण्यां जिनोक्तौ।

देवश्रेणी स्त्री देवानां श्रेणीव। १मूर्वालतायां राजनि॰ ६त॰। २देवतापङ्क्तौ च।

देवश्रेष्ठ पु॰ द्वादशमनोः पुत्रभेदे। "देववायुरहरस्य देवश्रेष्ठो विदूरथः" हरिवं॰७अ॰। तत्सुतोक्तौ।

देवसदन त्रि॰ सीदत्यत्र सद—आधारे ल्युट। देवानामाधारे। "बर्हिर्देवसदनम्" श्रुतिः। "अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि" अथ॰ ५।४।३।

देवसभा स्त्री ६त॰। १देवानां सभायां सुधर्मायाम् अमरः। २राजसभायाञ्च।

देवसभ्य त्रि॰देवं देवः क्रीडा तस्य सभा तत्र सीदति यत्। क्रीडार्थसभागते सभिके त्रिका॰।

देवसर्षप पु॰ दीव्यति द्योतते दिव—अच् नित्यक॰। अश्वाख्ये रक्तमूलके क्षुद्रसर्षपे दृष्टभेदे राजनि॰।

देवसह न॰ देवं सहते सह—अच्। १भिक्षासूत्रभेदे २दशोत्पलौषधौ स्त्री विश्वः। ३सोमाकरे पर्वतभेदे पु॰ "हिमवत्यर्बुदे सह्ये महेन्द्रमलये तथा। श्रीपर्वते देव

गिरौ गिरौ देवसद्मे तथा। पारिपात्रे च विम्बे च देवसन्दे ह्रदे तथा। उत्तरेण वितस्तायाः प्रवहाये महीधराः। यत्र तेषामधोमध्ये सिन्धुर्नाम महानदः। हठवत् स्रवते तत्र चन्द्रमाः सोमसत्तमः" सुश्रुतः।

देवसात् अव्य० देवाधीनं करोति कातन्त्रेण सम्पद्यते क्रादियोगे, देवे वा देव+साति। १कातन्त्रेण देवाधीने सम्पन्ने २देवाय देवे च। "हता वा देवसात् भूत्वा लोकान् प्राप्स्यथ पुष्कलान्" भा०द्रो०१९० अ०

देवसायुज्य न० युज-सम्प० भावे क्विप् युक् योगः तया सह वर्त्तते सहशब्दस्य सादेशे सयुक् तस्य भावः ष्यञ् ह्रस्व०। देवत्वे अमरः।

देव(वेद)सावर्णि पु० मनुभेदे स च त्रयोदशो मनुः। यथा "मनुस्त्रयोदशो भव्यो वेद (देव) सावर्णिरात्मवान्। चित्रसेनविचित्राद्या वेद (देव) सावर्णिदेहजाः। सुकर्मसूत्रामसंज्ञा देवा इन्द्रो दिवस्पतिः। निर्मोहतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा। देवहोत्रस्य तनय उपहर्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति" भाग० ८।१३।१४

देवसुन्द पु० सोमाकारह्रदभेदे सुश्रुतः देवसद्मशब्दे दृश्यम्।

देवसुषि पु० देवैः प्राणादित्यादिभिः रक्ष्यमाणः सुषिः द्वारम्। प्राणादित्यादिभिः रक्ष्यमाणे हृदयस्य द्वारभेदे। स च पञ्चसंख्याकः छा० उ० यथा "तस्य ह वा हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद" "अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान् यशस्वी भवति य एवं वेद" "अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्व्यन्नादो भवति य एवं वेद" "अथ योऽस्योदङ्सुषिः स समानस्तन्मनः स पर्जन्यः तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्त्तिमान् व्युष्टिमान् भवति य एवं वेद" "अथ योऽस्योर्द्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीत ओजस्वी महस्वान् भवति य 'एवं वेद" "ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेव पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद" "तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनाङ्गत्वेन द्वारपालादिगुणविधानार्थमारभ्यते। तस्येति प्रकृतस्य हृदयस्येत्यर्थः। एतस्यानन्तरनिर्दिष्टस्य। पञ्च पञ्चसंख्याका देवानां सुषयो देवसुषयः स्वर्गलोकप्राप्तिद्वारच्छिद्राणि देवैः प्राणादित्यादिभिरक्ष्यमाणानीत्यतो देवसुषयस्तस्य स्वर्गलोकभवनस्य हृदयस्यास्य यः प्राङ्सुषिः पूर्वाभिमुखस्य प्रागगतं यच्छिद्रं द्वारं स प्राणः हृत्स्थस्तेन द्वारेण यः सञ्चरति वायुविशेषः स प्राग्गतिरिति प्राणः। तेनैव सम्बद्धमव्यतिरिक्तं तच्चक्षुस्तथैवादित्यः "आदित्यो ह वै बाह्यप्राण इति श्रुतेः" "चक्षूरूपप्रतिष्ठाक्रमेण हृदि स्थितः। "स आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुषीत्यादि" वाजसनेयके। प्राणवायुदेवतैव लोका चक्षुरादित्यश्च सहाश्रयेण। वक्ष्यति च "प्राणाय स्वाहेति हुतं हविः सर्वमेतत्तर्पयतीति"। तदेतत्प्राणाख्यं स्वर्गलोकद्वारत्वाद्ब्रह्म" "स्वर्गलोकं प्रतिपित्सुस्तेजस्व्यन्नादो भवति तच्चक्षुरादित्यस्वरूपेणान्नादत्वाच्च सवितृतेजोऽन्नाद्यमित्याभ्यां गुणाभ्यामुपासीत। ततस्तेजस्व्यन्नादश्चामयावित्वरहितो भवति य एवं वेद तस्यैतद्गुणफलम्। उपासनेन वशीकृतो द्वारपः स्वर्गलोकप्राप्तिहेतुर्भवतीति मुख्यञ्च फलम्" "अथ योऽस्य दक्षिणः सुषिः तत्स्थो वायुविशेषः स वीर्यवत्कर्म कुर्वन्विष्टम्भ वा प्राणापानौ नाना वाऽनिनीति व्यानस्तत्सम्बद्धमेव च तच्छ्रोत्रमिन्द्रियं तथा स चन्द्रमाः "श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्चेति" श्रुतेः। सहाश्रयं पूर्ववत्तदेतच्छ्रीश्च विभूतिः श्रोत्रचन्द्रमसोर्ज्ञानाङ्गहेतुत्वमतस्ताभ्यां श्रोत्रज्ञानाङ्गवतश्च यशः ख्यातिर्भवतीति यशोहेतुत्वाद्यशस्त्वमतस्ताभ्यां गुणाभ्यामुपासीतेत्यादि समानम्" "अथ योऽस्य प्रत्यङ्सुषिः पश्चिमस्तत्स्थो वायुविशेषः स मूत्रपुरीषाद्यपनयनयोऽनिनीत्यपानः सा तथा सा वाक्" "तत्सम्बन्धात्तथाग्निस्तदेतद्ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसमग्निसम्बन्धाद्वृत्तस्वाध्यायस्य। अन्नग्रसनहेतुत्वादपानस्यान्नाद्यत्वम्। समानमन्यत्। अथो योऽस्योदङ्सुषिरुदङ्गतः सुषिस्तत्स्थो वायुविशेषः सोऽशितपीते समं नयतीति समानः। तत्सम्बद्धं मनोऽन्तःकरणं स पर्जन्यो वृष्ट्यात्मको देवः, पर्जन्यनिमित्तास्यापः" इति। "मनसा

सृष्टा आपश्च वरुणश्चेति" श्रुतेस्तदेतत्कीर्त्तिश्च मनसो ज्ञानस्य कीर्तिहेतुत्वात्। आत्मपरोक्षं विश्रुतत्वं कीर्तिर्यशः स्वकरणसंवेद्यं विश्रुतत्वं व्युष्टिः कान्तिर्देहगतं लावण्यम्। ततश्च कीर्त्तिसम्भवात्कीर्त्तिश्चेति। समानमन्यत्" "अथ योऽयोर्द्ध्वः सुषिः स उदान आपादतलादारभ्योर्द्ध्वसूत्क्रमणादुत्कर्षाच्च कर्म कुर्वन्नित्युदानः स वायुस्तदाधारश्चाकाशस्तदेतत्। वाय्वाकाशयोरोजोहेतुत्वादोजो बलं महत्त्वाच्च महः इति। समानमन्यत्। ते वै एते यथोक्ताः पञ्च सुषिसम्बन्धात्मश्च ब्रह्मणो हार्दस्य पुरुषा राजपुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपालाः। एतैर्हि चक्षुःश्रोत्रवाङ्मनःप्राणैर्वहिर्मुखप्रवृत्तैर्ब्रह्मणो हार्दस्य प्राग्द्वाराणि निरुद्धानि। प्रत्यक्षं ह्येतदजितकरणतया वाह्यविषयासङ्गामृतप्ररूढत्वाच्च हार्दब्रह्मणि मनस्तिष्ठति। तस्मात्सत्यसङ्गमेते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा इति। अतः स य एतानेवं यथोक्तगुणविशिष्टान् स्वर्गस्य लोकस्य द्वारपान्वेदोपास्ते उपासनया वशीकरोति स राजद्वारपालानिवोपासनेन वशीकृत्य तैरनिवारितः प्रतिपद्यते स्वर्गं लोकं राजानमिव हार्दं ब्रह्म। किञ्चास्य विदुषः कुले वीरः पुत्रो जायते वीरपुरुषसेवनात्। तस्य चर्म्मोपाकरणेन ब्रह्मोपासनप्रवृत्तिहेतुत्वम्। ततश्च स्वर्गलोकप्रतिपत्तये पारम्पर्य्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैकं फलम्" भाष्यम्।

देवसू पु० सुवन्ति अनुजानन्ति सू–क्विप् देवाश्च ते सुवश्चेति कर्म०। अनुज्ञाकर्त्तृदेवभेदे। "स वै दीक्षते। स उपवसथेऽग्नीषोमीयं पशुमालभते तस्य वपया प्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनुदेवसुवां हवींषि निरुप्यते" शत०ब्रा० ५।२।२।१ "देवसुवां हवींषि विधित्सुस्तेषामग्नीषोमीयपशुपुरोडाशानन्तरभावित्वं वक्तुमाह उपवसथ इति उपवसथः सुत्यादिवसात् पूर्वमहः। तदनु देवसुवां हवींषि निर्वपति सुवन्त्यनुजानन्तीति सुवः देवाश्च ते सुवश्चेति देवसुवः तेषां देवसुवाम् "ओः सुपीति" पा०यणादेशः। प्रसविष्टत्वं चैषा माम्नायते "देवसुवामेतानि हवींषि भवन्ति एतावन्तो वै देवानां सवाः त एवास्मै सवान् प्रयच्छन्ति त एनं सुवत इति" भा०तत्तत्कर्मणि आधिपत्यादिकरणायानुज्ञाकर्त्तॄंश्च सवित्रादयो वरुणान्ता अष्टौ देवा यथाह यजु०९।३९ "सविता त्वा सवानां सुवतामग्निर्गृहपतीनां सोमो वनस्पतीनाम्। बृहस्पतिर्वाचं इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्योमित्रः सत्यो वरुणो धर्मपतीनाम्" "सविता सवानां प्रसवानामाज्ञानामाधिपत्ये हे यजमान! त्वा त्वां सुवतां प्रेरयतु सर्वेषामाज्ञादानेऽधिकारी भवेत्यर्थः। अग्निः गृहपतीनां गृहस्थानामाधिपत्ये त्वां सुवताम्। सोमो वनस्पतीनां वृक्षाणामाधिपत्ये त्वां सुवतां वृक्षाः सर्वे तवोपकारकाः भवन्त्वित्यर्थः। बृहस्पतिर्वागर्थं त्वां सुवतां पाण्डित्याय प्रेरयतु यद्वा षष्ठ्यर्थे चतुर्थी वाच आधिपत्ये सुवताम्। इन्द्रोदेवो ज्यैष्ठाय ज्येष्ठभावाय त्वां सुवताम्। रुद्रः त्वां सुवताम्। मित्रो देव सत्यः सुपां सुलुगित्यादिना पा० चतुर्थ्याः सु आदेशः सत्याय सत्यवाक्याय सत्यं वदितुं त्वां सुवताम्। वरुणो धर्मपतीनां धर्मेश्वराणां धर्मशीलानामाधिपत्ये त्वां सुवताम्। सवित्रादयोऽष्टौ देवस्तृविषां देवास्त्वां नानाधिपत्यानि ददत्विति वाक्यार्थः" वेददी०।

देवसृष्ट त्रि० ३त०। देवेन सृष्टे "देवसृष्टो वा एषेष्टिर्यदाप्रयणेष्टिरनया" शत०५।२।३।९ देवसृष्टा उ इति च्छेदः "देवसृष्टो वा एषेष्टिर्यत् सौत्रामाण्यनया" ५।५।४।१४ मदिरिकायां स्त्री हेमच०।

देवसेना स्त्री ६त०। १सुराणां सैन्ये। "देवसेनां दानवैर्हि भग्नां दृष्ट्वा महाबलः" भा०व०२२२अ०। २प्रजापतेः कन्याभेदे सा च स्कन्दस्य भार्य्या षष्ठीति प्रथिता तत्कथा भा०व०२२४अ० "अहं प्रजापतेः कन्या देवसेनेति विश्रुता। भगिनी मे दैत्यसेना सा पूर्वं केशिना हृता"

"सदेवावां भगिन्यौ तु सखीभिः सह मानसम्। आगच्छावेह रत्यर्थमनुज्ञाप्य प्रजापतिम्। नित्यञ्चावां प्रार्थयते हर्त्तुं केशी महासुरः। इच्छत्येनं दैत्यसेना न चाहं पाकशासन। सा हृताऽनेन भगवन्! सुक्षाहं त्वद्बलेन तु। त्वया देवेन्द्र! निर्दिष्टं पतिमिच्छामि दुर्जयम्" इन्द्र उवाच "मम मातृष्वसेया त्वं माता दाक्षायणी मम। आख्यातन्त्वहमिच्छामि स्वयमात्मबलं त्वया" कन्योवाच "अबलाऽहं महाबाहो! पतिस्तु बलवान्मम। वरदानात् पितुर्भावी सुरासुरनमस्कृतः" इन्द्र उवाच "कीदृशन्तु बलं देवि! पत्युस्तव भविष्यति। एतदिच्छाम्यहं श्रोतुं तव वाक्यमनिन्दिते!" कन्योवाच "देवदानवयक्षाणां किन्नरोरगरक्षसाम्। जेता यो हृष्टदैत्यानां महावीर्यो महाबलः। यस्तु सर्वाणि भूतानि त्वया सह विजेष्यति। स हि मे भविता

भर्त्ता ब्रह्मण्यः कीर्तिवर्द्धनः" मार्कण्डेय उवाच "इन्द्रस्तस्य वचःश्रुत्वा दुःखितोऽचिन्तयद्भृशम् । अस्या देव्याः पतिर्नास्ति यादृशं संप्रभाषते" इत्युपक्रमे ब्रह्मणा उपदेशेन स्कन्दस्य तत्पतित्वावधारणे स्कन्दोत्पत्तिसुपवर्ण्योक्तं "सस्मार तां देवसेनां या सा तेन विमोचिता । अयं तस्याः पतिर्नूनं विहितो ब्रह्मणा स्वयम् । इति चिन्तयानयामास देवसेनामनङ्गताम् । स्कन्दं प्रोवाच वनभिदिवं कन्या सुरोत्तम ! । अजाते त्वयि निर्दिष्टा तव पत्नी स्वयम्भुवा । तस्मात्त्वमस्या विधिवत् पाणिं मन्त्रपुरस्कृतम् । गृहाण दक्षिणं देव्या पाणिना पद्मवर्चसा । एवमुक्तः स जग्राह तस्याः पाणिं यथाविधि । बृहस्पतिर्मन्त्रविद्धि जजाप च जुहाव च । एवं स्कन्दस्य महिषी देवसेना विदुर्जनाः । षष्ठीं यां ब्राह्मणाः प्राहुर्लक्ष्मीमासां सुखप्रदाम् । सिनीवालीं कुहूञ्चैव सदृष्टिमपराजिताम । यदा स्कन्दः पतिर्लब्धः शास्त्रतो देवसेनया । तदा तमाश्रयल्लक्ष्मीः स्वयं देवी शरीरिणी । त्रीजुष्टः पञ्चमी स्कन्दस्तस्माच्छ्रीपञ्चमी स्मृता । षष्ठ्यां कृतार्थोऽभूद्यस्मात्तस्मात् षष्ठी महातिथिः" भा०व० २२८अ०।

देवसेनापति पु० ६त० । कार्त्तिकेये शब्दार्थ०। तस्य तत्पतित्वकथा देवसेनाशब्दे दृश्या "देवसेनापतिः स्कन्दो मातरो लोकमातरः" यजमानाभिषेकमन्त्रः ।

देवस्थान पु० देवानां स्थानमिव स्थानमस्य । ऋषिभेदे "द्वैपायनो नारदश्च देवलश्च महानृषिः । देवस्थानश्च कश्यश्च तेषां शिष्याश्च सत्तमाः" भा०शा०१अ०। ६त० । २स्वर्गे न० ।

देवस्यत्वक पु०देवस्यत्वेति आद्यशब्दोऽस्यत्वानुवाके अध्याये वा गोषदा० वुन् । देवस्यत्वेत्याद्यप्रतीकयुक्ते अध्याये अनुवाके च ।

देवस्व न० ६त० । देवप्रतिमार्थसुतसृष्टे धने । "ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्च हरेत्तु यः । कन्यां ददाति शुल्केन स प्रेतो जायते मृतः" भा० पञ्चप्रेतोपाख्याने "देवस्वं ब्राह्मणस्वं च लोभेनोपहिनस्ति यः" मनुः "यजनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः" मनूक्ते २यज्ञशीलधने च । [चित्तद्देवहविः" यजु० ६।१०

देवहविस् न० ६त० । पशौ "आपो देवीः स्वदन्तु स्वाहा"

देवहव्य पु० देवाय हव्यं यस्य । ऋषिभेदे "संवर्त्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान्" भा०स०७अ०शक्रसभ्योक्तौ ।

देवहित त्रि० ६त० । १देवानां हिते २त० । २देवैः स्थापिते च "नाना हि वा देवहितं यदस्ति" यजु० १९।७

देवह्व स्त्री देवाह्वयन्त्यत्र ह्वे-सम्प०भावे क्विप्, कर्त्तरि वा क्विप् । १देवाह्वाने "देवह्वयं यज्ञा च वक्षत्" यजु० १८।६२। २देवाह्वानकर्त्तरि त्रि० "यज्ञा हि देवहूतमा अग्ने रथीरिव" ऋ० ८।४।१।४ ३यज्ञार्थे व्रीहिपूर्णे शकटे च "पवित्रं जुष्टतमं देवहूतमम्" यजु० १।८ देवानामतिशयेनाह्वाहे यज्ञार्थं व्रीहिपूर्णं शकटं दृष्ट्वा देवा आहूता इव शीघ्रमागच्छन्ति" वेददी० । ४वामकर्णे "आपणो व्यवहारोऽत्र चित्रमन्यो बहूदनम् । पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः" भाग०४।२९।१२। ५ऋषिभेदे ततः गर्गा० यञ् । दैवहव्य तदपत्ये पुंस्त्री०

देवह्वति स्त्री स्वायम्भुवमनोर्मध्यमायां कन्यायाम् "यस्तु तत्र पुमान् सोऽभूनुमनुः स्वायम्भुवः स्वराट् । स्त्रीयासीत् शतरूपाख्या महिष्यस्य महात्मनः । तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे । स चापि शतरूपायां पञ्चापत्यान्यजीजनत् । प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ! । आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ! । आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम्" भाग० ३।१२।२८ सा च कपिलरूपस्य भगवतोमाता यथाह तत्रैव

"जन्मैव कर्दमगृहे हि ज ! देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं समीते । जज्ञे यमात्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलस्य गतिं प्रपेदे" भाग०२।३।४

तदुपदेशप्रकारश्च कपिलशब्दे भागवतवाक्योक्तः १६६२ पृष्ठादौ दर्शितः ।

देवह्वय पु० देवा ह्वयन्त्यऽसुरैः यत्र आधारे बा० क्यप् । १देवासुरसंग्रामे "स्पर्द्धन्ते वा उ देवह्वये" ऋ०७।८५।२। भावे क्यप् । २देवानामाह्वाने न० "ते वा एत ऋतवः । देवाः पितरः समो हैव विद्वान्देवाः पितरः. इति ह्वयत्याहास्य देवा देवह्वयं गच्छन्त्या पितरः पितृह्वयमवन्ति हैनं देवा देवह्वयेऽवन्ति पितरः पितृह्वये य एवं विद्वान् देवाः पितर इति ह्वयति" शत०ब्रा०२।१।३।२ "ऋत्वादीनां देवपित्रात्मनां द्वेधा विभागमाह वसन्त इत्युपक्रम्य य एवमृतूनां देवत्वं पितृत्वं च विद्वांस्तानृतून् देवाः पितर इति ह्वयति व्यवहरेत् अस्याह्वातुः

देवहूयं देवहूतं प्रति देवा आगच्छन्ति आगताश्च ते स्वसम्बन्धे कर्माणि एनमवन्ति" भा०

देवहेडन न० हेल–भावे ल्युट् ६त० लस्य डः। देवानामवहेलनरूपे अपराधे "यद्देवा देवहेडनं देवासश्चकृमा वयम्" यजु० २०।१४

देवहोत्र पु० त्रयोदशे मन्वन्तरे योगेश्वररूपस्य हरेरंशस्य पितरि। त्रयोदशमनूपक्रमे "देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः। योगेश्वरो हरेरंशो दृहत्यां संभविष्यति" भाग० ८।१३।१४

देवह्रद पु० श्रीपर्वतस्थे तीर्थभेदे "श्रीपर्वते महादेवो देव्या सह महाद्युतिः। न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह। तत्र देवह्रदे स्नात्वा शुचिः प्रयतमानसः। अश्वमेधमवाप्नोति परां सिद्धिञ्च गच्छति" भा० व० ८५अ०। [एर्याञ्च शब्दच०।

देवा स्त्री दिव–अच्। १पद्मचारिण्यां लतायाम् २अमनप-

देवाक्रीड पु० देवा आक्रीडन्त्यत्र आ+क्रीड–आधारे घञ् ६त०। १देवोद्याने इन्द्रारामे "देवराजाभ्यनुज्ञातो रत्नैश्च प्रतिपूजितः। वैनतेयं समारुह्य सहितः सत्यभामया। देवाक्रीडं परिक्रामन् पूज्यमानः सुरर्षिभिः। स ददर्श महावाहुराक्रीडं यासवस्य च" हरिवं० १२३अ०

देवागारिक त्रि० देवागारे नियुक्तः अगारान्तत्वात् ठन्। देवागारे परिचरणार्थं नियुक्ते।

देवाची स्त्री देवानञ्चति वेदे वा०नलोपः नाद्यादेशश्च ङीप्। १देवान् प्रति गन्त्र्यां २देवानां पूजिकायां च "देवान् प्रत्यक्तया ऋषेति" यास्कोक्तेः देवान् प्रत्यक्ततया सामर्थ्यलक्षणायां २ऋषायाञ्च "य ऋद्र्या स्वध्वरो देवाच्या ऋषा" ऋ०१। १२७।१ "ऋषा ऋषयेति" भा०

देवाजीव त्रि० देवं देवप्रतिमाद्रव्यमाजीवति जीव–अण् उपस०। (पूजारी) देवले। णिनि देवाजीवोऽप्यत्र।

देवाट त्रि० देवा अटन्त्यत्र अट–आधारे घञ्। देवगत्याधारे पाटलिपुत्रादुत्तरस्यां गङ्गापारे वर्तमाने १हरिहरक्षेत्रे "यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः। स्थितवान् तद्दिनादेव क्षेत्रं हरिहरात्मकम्। देवानामटनाच्चैव देवाट इति संज्ञितम्" वराहपु०। देवानटन्ति अट–अण् उप०स०। देवान् प्रति २गन्तरि त्रि०।

देवातिथि पु० पौरवनृपभेदे "ततश्चाक्रोधनस्तस्माद्देवातिथिरभूनृपः" भाग० ९।२२।९

देवातिदेव पु० देवानतिक्रम्य दीव्यति अति+दिव–अच्। विष्णौ "देवातिदेवो भगवान् प्रस्तुतिरंगे हरिर्यस्य जगत्प्रणेता" हरिवं० १५४अ०।

देवात्मन् पु० देव आत्मा यस्य। १अश्वत्थवृक्षे अश्वत्थशब्दे दृश्यम् कर्म०। २देवस्वरूपे च।

देवाधिदेव पु० देवानामधिदेवः। १सर्वेश्वरे परमेश्वरे २महादेवे च ३जिनदेवभेदे हेमच०।

देवाधिप पु०देवानामप्यधिपः। १सर्वनियन्तरि परमेश्वरे २द्वापरयुगीयवपुर्भेदे स च निकुम्भासुरांशात् द्वापरे भूमावावतार यथाह भा०आ०६७अ०"निकुम्भादजितः संख्ये महामतिरजायत। भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः"। ३इन्द्रे च "बलिं बद्ध्वा महादैत्यं शक्रो देवाधिपः कृतः" भा०उ० ९अ०

देवानांप्रिय त्रि० ६त०। "देवानां प्रिय इति च मूर्खे" वा० अलुक्स०। १मूर्खे "पशवो हि देवानां प्रीतिं जनयन्ति इति तेषां प्रियास्तथा च तत्प्रियत्वेन पशुतुल्यता प्रतीयते इत्यतः पशुवन्मूर्ख इति तदर्थः" तत्त्वबो०। २छागे पुंस्त्री त्रिका०।

देवानीक पु० सावर्णस्य तृतीयमनोः पुत्रभेदे "संवर्त्तनः सुशर्मा च देवानीकः पुरूरवाः" हरिवं०७अ० तत्पुत्रौ। सगरवंश्ये २नृपभेदे च "क्षेमधन्वसुतस्त्वासीत् देवानीकः प्रतापवान्" हरिवं० १५अ०। ६त०। १देवानां सैन्ये न० "उग्रं तच्च महानादं देवानीकं महाप्रभम्" भा०व० २२६अ०।

देवानुक्रम पु०वैदिकमन्त्राणां देवताज्ञापनायानुक्रमो यत्र। वैदिकमन्त्राणां देवताज्ञापके ग्रन्थभेदे। सामान्यतः छन्दोविशेषाणां देवताभेदाः सर्वानुक्रमणिकायामुक्ताः तत्र देवताशब्दे ३६८२ पृ० "गायत्र्या अग्निरुष्णिहः सवितेत्यादि" वाक्यम् दर्शितम्।

देवानुचर त्रि० देवाननुचरति अनु+चर–ट। १देवपश्चाद्गामिनि विद्याधरादौ उपदेवे "निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच" रघुः। देवानुयायिनि देवानुगमृतयोऽप्यत्र।

देवान्तक पु० ६त०। १राक्षसभेदे २दैत्यभेदे च।

देवान्धस् न० देवानामन्ध इव दर्शनेन प्रीतिकरम्। १अमृते हेमच० देवाह्वादयोऽप्यत्र। देवयोग्यमन्धः। २देवनैवेद्यार्थं संकल्पितेऽन्ने च "अनुपाकृतमांसानि देवान्नानि हवींषि च" मनुः।

देवापि पु० पौरवे प्रतीपराजपुत्रे नृपभेदे "प्रतीपस्य

त्रयः पुत्रा जज्ञिरे भरतर्षभ ! । देवापिः शान्तनुश्चैव बाह्लीकश्च महारथः । देवापिश्च प्रव्रज्य तेषां धर्मेहितेऽप्सया" भा०आ० ९४अ० "कृतस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः । देवापिः शान्तनुस्तस्य बाह्लीक इति चात्मजाः । पितृराज्यं परित्यज्य देवापिस्तु वनं गतः" भाग० ९।२२।११ "देवापिर्योगमास्थाय कलाप ग्राममास्थितः । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति" तत्रैव [शब्दच० ।

देवाभीष्ट त्रि० ६त० । १देवानामभिलषिते २ताम्बूल्यां स्त्री

देवायतन न० ६त० । देवप्रतिमालये "न देवायतनं गच्छेत् कदाचिद्वाऽप्रदक्षिणम् । न पीडयेद्वा वस्त्राणि न देवायतनेष्वपि" कूर्मपु० "न जीर्णदेवायतने न वल्मीके कदाचन" मनुना तत्र मूत्रोत्सर्गः प्रतिषिद्धः ।

देवायुध न० ६त० । इन्द्रधनुषि सूर्यप्रतिकूलदिशि सजलजलधरयुक्ते गगने सूर्यकिरणप्रतिबिम्बेन जाते धनुराकारे पदार्थे हेम०इन्द्रायुधशब्दे ९५४पृ० दर्शितं तदुत्पत्तिकारणं दृश्यम् । ६त० । २देवानामायुधे वज्रादौ च ।

देवायुस् न० ६त० अच् समा० । देवानां जीवनकाले "मन्त्रेणाहवनीये निर्वपति हुतीयसा गार्हपत्ये द्राघीयो हि देवायुषम्" शत० ब्रा० ७।३।१।१०

देवारण्य न०देवप्रियं देवभूयिष्ठं वा अरण्यम् । १तीर्थभेदे "प्रयागे देवरमणे देवारण्येषु चैव ह । भोगवत्यां महाराज ! कौशिकस्याश्रमे तथा" भा०उ०१८७अ० । ६त० । २देवनामारामे च "अलक्षद्योतयामासुर्देवारण्यमिवर्तवः" रघुः ।

देवारि पु० ६त० । १असुरे "येन देवारयः सर्वे महायुधि निपातिताः" भा०द्रो० ८।अ० ।

देवार्पण न० देवेषु अर्पणम् । देवोद्देशेन देयद्रव्यस्य तद्दानजन्यफलस्य वा त्यागे । देवेभ्योऽर्पणे यैः अर्पिकरणे ल्युट् । २ऋग्वेदादौ "पृथग्भूतानि चान्यानि यानि देवार्पणानि वै" भा० अनु०८६त० । "देवार्पणानि ऋग्यजुःसामानि पृथग्भूतानि मूर्तिमन्तीत्यर्थः" नीलक० ।

देवार्य्य पु० अर्हद्गणभेदे "अरिष्टनेमिस्तु नेमिर्वीरस्वरमतीर्थकृत् । महावीरो वर्द्धमानो देवार्यो ज्ञातनन्दनः । गणा नवास्यर्षिसंज्ञा एकादश गणाधिपाः" हेमच० ।

देवार्ह त्रि०देवानर्हति दाने अर्ह–अण् उप०स० । १देवाय दानयोग्ये २सुरपर्णे न० राजनि० ।

देवालय न० ६त० । १स्वर्गे २देवप्रतिमाभवने च शब्दार्थकल्प० । ३सहदेवीलतायां स्त्री राजनि० । [इला० ।

देवाला स्त्री देव इवालति अल–अच् । रागिणीभेदे

देवावास पु० ६त० । १अश्वत्थवृक्षे त्रि० । २स्वर्गे ३देवप्रतिमालये ४सुमेरौ च "देवावासः शुभः पुण्यो गिरिराजो हिरण्मयः" हरिवं० २३६अ०

देवावी पु० देवानवति अव–ग्रीणने औणादिक ई । १देवतर्पके सोमे "देवेभ्यस्त्वा देवाव्यं गृह्णामि" यजु० ७।२२। देवा अव्यन्ते तर्प्यन्तेऽस्मिन् आधारे ई । २देवतर्पणाधारे यज्ञे च "इमं नो देव ! सवितर्यज्ञं प्रणय देवाव्यम्" यजु० ११।८।

देवाबृध् पु०देवा वर्द्धन्तेऽत्र बृध–क्विप् पूर्वपददीर्घः । पर्वतभेदे "देवाबृत् पर्वतश्चैव तथा वै बालुको गिरिः" हरिवं० २३६अ० ।

देवाबृध पु०देवा वर्द्धन्तेऽनेन बृध–घञर्थे क दीर्घः । सात्वते नृपभेदे "सात्वतान् सत्वसम्पन्नान् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवाबृधं नृपम्" हरिवं० ३८अ० "कृतं देवाबृधो दत्त्वा सराष्ट्रोऽभ्यपतद्दिवम्" भा०शा० २३४अ०

देवाश्व पु० देवस्य शक्रस्याश्वः । उच्चैःश्रवसि अश्वे

देवाहार पु० देवयोग्य आहारः । १देवार्हे आहारे ६त० । २अमृते हेमच० ।

देवाह्वय पु० नृपभेदे "देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः" भा० आ० १अ० नानान्दीपोक्तौ

देविक पु०अनुकम्पितो देवदत्तः मनुष्यनामवद्बहुकत्वेन ठन् । द्वितीयादचः परस्य लोपः । १अनुकम्पिते देवदत्ते । दीव्यति दिव–ण्वुल् कापि अतइत्त्वम् । २नदीभेदे स्त्री "अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतावद्देविकामाहुर्देवर्षिपरिसेविताम्" पद्मपु० । ३धुस्तूरे भावप्र० देविकायां भवः अण् । एत आत् दाविक तत्रभवे त्रि० ।

देविन् त्रि० दिव–णिनि । क्रीडाकारके "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" याज्ञ० ।

देविय पु० अनुकम्पितो देवदत्तः बहुकमनुष्यनामत्वात् च द्वितीयादचः परस्य लोपः । अनुकम्पिते देवदत्ते ।

देविल त्रि० देव देवने इलच् । १धार्मिके । अनुकम्पितो देवदत्तः इलच् देवियवत् । २अनुकम्पिते देवदत्ते पु०

देवी स्त्री देवयति प्रवृत्तिनिवृत्त्युपदेशेन यथाधिकारं व्यवहारयति सर्वान् देव–णिच् अच् ङीप्, दीव्यति दिव–अच् पचादौ देवट् इति निर्देशात् टित्त्वात् ङीप्

देवस्य पत्नी ङीष् वा । १देवपत्न्यां "देवीनां दक्षिणायने" स्मृतिः । देवसेनाशब्दे उदा० दृश्यम् । २दुर्गायाञ्च धरणी "नमोदेव्यै महादेव्यै शिवायै सततं नमः" "देव्या यया ततमिदं जगदात्मशक्त्या" इति च देवीमाहात्म्यम् । "सकृत् कृत्वा महा पूजां देवीपादजलं पिबन् । न जातु जननीगर्भं गच्छेदिति विनिश्चयः" दीवीभागव० "अपराधं परं कृत्वा देवीभक्तस्य को नरः । सुखं लभेत यदपि भवेत् त्राता शिवः स्वयम्" इति देवीभाग० ३कृताभिषेकायां राजमहिष्याम् अमरः । ४भूर्वायां ५पृक्कायां च मेदि० । ६द्विजस्त्रीणामुपाधिभेदे "देव्यन्नाश्च स्त्रियः सर्वा दास्यन्नाः शूद्रयोनयः" कर्मविपाकः । ७आदित्यभक्तायां दक्षिङ्गिन्यां ८वन्ध्याकर्कोटक्यां १०यालपर्ण्यां ११महाद्रोण्यां १२पाठायां १३नागरङ्गतायाम् । १४मृगेर्वारुकायां १५हरीतक्याम् १६अतस्यां १७श्यामानामखगे च स्त्री राजनि० । १८रविसंक्रान्तौ तत्कालस्य यथा देवीस्वरूपत्वम् तथा एकादशीत० निरूपणे यथा "अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः । सान्निध्यन्तु भवेत् तत्र ग्रहाणां संक्रमे रवेः । व्यवहारो भवेल्लोके चन्द्रसूर्यौपलक्षितः । काले विकल्पते सर्वं ब्रह्माण्डं सचराचरम् । पुण्यपापविभागेन फलं देवी प्रयच्छति । एकाधिकक्रतं तस्मिन् कोटिकोटिगुणं भवेत् । धर्मोद्भवति ह्यायूराज्यं पुत्रसुखादि च । अधर्मोद्भवाधिशोकादि विष्णुपादसन्निधौ । विष्णुवेषु च यद्दत्तं जप्तं भवति चाक्षयम् । एवं विष्णुपदे चैव षडशीतिमुखेषु च" देवीपु० । "भोगोव्याप्तिः सूक्ष्मसंक्रमणकालसन्निधाने पुण्यतमत्वमिति यावदिति कल्पतरुः । वस्तुतस्तु भुज्यत इति भोगो भोग्यः रविसंक्रमणे अतीतानागतः कालो भोग्यस्तन्निमित्तपुण्यपापजननयोग्य इति यावत् । अतएव पुण्यपापविभागेन फलमित्युपसंहृतम् । स कालः कियानित्याह । नाड्यः पञ्चदशेति उभयतः पञ्चदशदण्डपुण्यत्वं दिवा विष्णुपदीविषयमिति तिथितत्त्वे वक्ष्यते । सान्निध्यमित्यादिना तस्यैव कालस्य स्तुतिः । विकल्पते स्वभावात् प्रच्यवते । देवी संक्रान्तिकालस्वरूपा संक्रान्त्युपक्रमे देवीपुराण एव "समायनर्तुमासैः पक्षोहश्च क्रमेण तु । स्थूलसूक्ष्मविभागेन देवी सर्वगता विभो !" । इत्यभिधानात् "कलाकाष्ठादिरूपेण परिणामप्रदायिनी" इति मार्कण्डेयपुराणाच्च" रघु० । तत्र कृताभिषेकायां राजमहिष्याम् "स्नातोऽनुलिप्तः सुरभिः स्रग्वी रुचिरभूषणः । स्नातां विशुद्धवसनां गच्छेद्देवीं सुभूषणाम् । न हि देवीगृहं गच्छेदात्मीयात् सन्निवेशनात् । अत्यर्थवल्लभोऽपीष्ट विश्वासं स्त्रीषु न व्रजेत् । देवीगृहगतं भ्राता भद्रसेनममारयत् । मातृशय्यान्तरे लीनं कारूषश्चोरसं सुतम् । लाजानु विक्षेप संयोज्य मधुनेति विलोडितः । देवी तु काशीराजेन्द्रं निजघान रहोगतम्" काम०नीति० ।

देवीकोट पु० शोणितपुरे बाणासुरपुरे त्रिका० ।

देवीन्धियक पु० देवीं धिया इत्याद्यप्रतीकशब्दोऽस्ति अत्र अनुवाके अध्याये वा गोषदा०वुन् । देवीं धियेत्याद्यप्रतीकयुक्ते अनुवाके अध्याये च ।

देवीपुराण न० देव्यामाहात्म्यादियुक्ते उपपुराणभेदे

देवीभागवत न० देव्या माहात्म्यावेदकं भागवताख्यं पुराणम् । पुराणभेदे तच्चोपपुराणं कल्पान्तरे महापुराणं वेति उपपुराणशब्दे निर्णीतं तत्र द्रष्टव्यम् ।

देवीमाहात्म्य न० ६त० । मार्कण्डेयपुराणान्तर्गते "सावर्णिः सूर्यतनय इत्यादिके सावर्णिर्भविता मनुरित्यन्ते त्रयोदशाध्यायात्मके ग्रन्थभेदे "श्रोष्यन्ति चैव ये भक्त्या देवीमाहात्म्यमुत्तमम्" मत्स्यपु० ।

देवीरापसक पु० देवीराप इत्याद्यप्रतीकमस्त्यत्रानुवाक्ये अध्याये वा गोषदा० ठन् । देवीराप इत्याद्यप्रतीकयुक्ते अध्याये अनुवाके च ।

देवीसूक्त न० देव्याः तद्देवताकं सूक्तमृक्समुदायः । ऋग्वेदे शाकलसंहितायामतिप्रसिद्धे देवीदेवताके १सूक्तभेदे "रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीं जपेत् । प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमात्" मरीचिकल्पः । तत्रैव पुरश्चरणप्रकरणे "कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशीम् । दृष्ट्वैकोत्तरमाजाप्यं पूर्वसंपुटितं तत् । एवं देव्या यथा प्रोक्तः पौरश्चरणिकः क्रमः । तदन्ते हवनं कुर्यात् प्रतिश्लोकेन पायसम् । रात्रिसूक्तं प्रति ऋचं तथा देव्याश्च सूक्तकम् । कृत्वान्ते प्रजपेत् स्तोत्रमादौ पूजादिकं सुते !" अत्र गुप्तवतीकारा आहुः । "पूर्वसंपुटितम् पूर्वाभ्यां पूर्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम्" प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागग्रन्थस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तेनैव वैधपदार्थनिर्णयावश्यकभावात् । रात्रिसूक्तदेवीसूक्ते च ऋग्वेदे

शाकलसंहितायां प्रसिद्धे । तथेत्यनेन जपे क्लृप्तक्रमः संपुटाकारो निर्दिश्यते तच्छब्दस्य पूर्वपरामर्शित्वात् । तस्य श्लोकपूरणमात्रार्थत्वं तु न न्याय्यम् । द्वाभ्यामपि सूक्ताभ्यां त्रिशतसप्तशतीहोमोत्तरमेव पाठक्रमानुसारेण होमः । "विश्वेश्वरीं जगद्धात्रीमिति" स्तवो रात्रिसूक्तम् । "नमोदेव्यै महादेव्यै इति" स्तवो देवीसूक्तमिति कश्चित् तन्न "प्रतिश्लोकं प्रतिऋचमिति" प्रतिनियतनिर्देशविरोधात् ऋक्सूक्तादिशब्दानां वैदिकमन्त्रेष्वेव रूढत्वप्रसिद्धेः । मत्स्यसूक्तमित्यादि क्वाचित्कतान्त्रिकव्यवहारस्य केवलयौगिकत्वेनोपपत्तेः । तेन ऋक्पदस्य श्लोके लक्षणेत्युक्तिरपि साहसमात्रम् । मसंद्रमनोध्यानादिविधौ बृहद्रथन्तरपदयोः प्रतिनियतनिर्देशबलादेव लक्षणाव्यवस्थाया इव प्रकृते क्लृप्ताया एव शक्तेर्व्यवस्थापादकस्य कैसुतिकन्यायेनैव सिद्धेः । यदि त्वेवमालोच्यते "विश्वेश्वर्यादिकं सूक्तं दृष्टं तद्ब्रह्मणा पुरा । स्तुतये योगनिद्राया मम देव्याः पुरन्दर ! । महिषान्तकरीसूक्तं सर्वसिद्धिप्रदं तथा । देव्या ययादिकं दिव्यं दृष्टं देवैः सहर्षिभिः । देवि ! प्रपन्नार्तिहरे ! प्रसीदेत्यादिकं तथा । नारायणीस्तुतिर्नाम सूक्तं परमशोभनम् । अस्याः स्तुतये दृष्टं ब्रह्माद्यैः सकलैः सुरैः । नमो देव्यादिकं सूक्तं सर्वकामफलप्रदम्" इति विशफलितवेषेण पाञ्चरात्रलक्ष्मीतन्त्रे व्यवहारदर्शनादेतेषां स्तोत्राणामपौरुषेयत्वस्य सिद्धान्तितत्वाच्च सूक्तत्वव्यवहारो युज्यत एवेति । तदा कात्यायनीतन्त्रमते विश्वेश्वरीमिति श्लोकात् पूर्वं ब्रह्मोवाचेत्यस्य पाठाभावात्तदुत्तरमेव तत्पाठाच्च । त्वं स्वाहेत्यारभ्यैव स्तोत्रारम्भः तस्य च योगनिद्रात्मकरात्रिदैवतत्वात् मरीचितन्त्रे रात्रिसूक्तपदेन निर्देश इति समाधेयं परं त्वेतत्तन्त्रमनुसरता विश्वेश्वरीमिति श्लोकेऽङ्गहोमदशायां न होतव्यम् । स्तोत्रान्तिमश्लोकस्य द्वेधा विभागोऽपि न कार्यः । देवीसूक्तेऽपि त्रेधा विभागोऽङ्गहोमे न विधेयः प्रधानविधिशेषस्याङ्गविधावन्वयेन प्रतिऋचमिति पदे लक्षणाकल्पने मानाभावादित्यवधेयम्" । २नमोदेव्यै महादेव्यै इत्यादिके देवीमाहात्म्यस्य पञ्चमाध्यायस्थे देव्याः स्तुतिरूपे मालामन्त्रे च "स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्" देवीमाहा० तत्र गुप्तवतीकारा आहुः "देवीसूक्तं बह्वृचेष्वतिप्रसिद्धमेकं । विश्वेश्वरीमित्यादीत्येके श्रीसूक्तमाथर्वणप्रसिद्धमित्यन्ये । वस्तुतस्तु देवीसूक्तं नमोदेव्या इत्यादिकं पञ्चमाध्यायस्य स्तुतिरूपं तच्च सर्वदेवताकूटस्याया महालक्ष्म्याः स्तोत्रं शुम्भादिवधार्थिभिर्ब्रह्मादिभिर्दृष्टं सर्वक्लेशपरिहारैश्वर्यादिफलकं तत्कामाभ्यां ताभ्यां जप्तम् अनुपदं श्रुतत्वात् बुद्धिसन्निहितत्वाच्चेदमेव देवीसूक्तपदेनात्र गृहीतमुचितं लक्ष्मीतन्त्रसम्मतस्यायमर्थः इति प्रागेव निरूपितमित्यपरे "प्राणाधः संस्थितं बीजं व्योम बीजं हुताशनः । त्रिकोणबिन्दुनादाढ्यं प्रणवादि नमोऽन्तकम् । अम्बिकासिद्धिदं ज्ञेयं देवीसूक्तं परं स्मृतम्" इति क्वचित्पठिते २मन्त्रभेदे च ।

देव्र पु० दिव–क्र । देवरे स्वामिनः कनिष्ठभ्रातरि अमरः ।

देवेज् पु० देवं यजते यज–क्विप् । देवयष्टरि

देवेज्य पु० देवानामिज्यः पूज्यः । सुराचार्ये जीवे शब्दर० ।

देवेन्द्र पु० ६त० । सुरेन्द्रे शक्रे "त्वमेव देवेन्द्र ! सदा निगद्यसे" रघुः ।

देवेश पु० ६त० । १देवनियन्तरि परमेश्वरे २महादेवे च "भगवांश्चापि देवेशो यत्र देवी च कीर्त्यते" भा०व्या० ६२अ० । ३तत्पत्न्यां स्त्री ङीष् । "देवेशि ! भक्तसुलभे । परिवारसमन्विते ! । यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव" तन्त्रसारः । ४विष्णौ पु० "देवेशो देवभृद्गुरुः" विष्णुस० देवेश्वरादयोऽप्यत्र ।

देवेशय पु० देवे अधिष्ठातृतया शेते शी–अच् अलुक्स० । देवेषु अधिष्ठातृतया वासिनि १परमेश्वरे २विष्णौ च "अच्युतेशय ! हिरण्येशय ! देवेशय ! कुशेशय !" भा०शा० ३४०अ० । [३गुग्गुलौ च पु० राजनि० ।

देवेष्ट त्रि० देवानामिष्टः । १देवानामभिलषिते २महामेदायां

देवोद्यान न० ६त० । देवानामुद्याने तद्भेदश्च नन्दनं चैत्ररथं वैभ्राजं सर्वतोभद्रमिति चत्वारि, त्रिकाण्डे तु वैभ्राजं मिश्रकं सिद्धकाननं चैत्ररथमिति उक्तानीति भेदः ।

देवौकस् न० ६त० । देवस्थाने सुमेरौ "राजसालयदेवौकःशैलयोर्मध्यसूत्रगाः । रोहितकमवन्ती च तथा सन्निहितं सरः" सूर्यसि० ।

देव्य न० देवस्य भावः ष्यञ् वेदे वा० न वृद्धिः । देवत्वे "महत्तद्वोदेव्यस्य प्रवाचनम्" ऋ० ४।३६।१ "देव्यस्य देवत्वस्य प्रवाचनं प्रख्यापकम्" भा० ।

देश पु० दिशति दिश–अच् । भूगोलान्तर्गते विभागभेदे जनपदशब्दे विवृतिः । विस्तरस्तु देशावलीग्रन्थस्य प्रामाण्ये

तत्र दृश्यः। [हेमच०। देश+स्वार्थे क। २देशशब्दार्थे

देशक त्रि० दिश–कर्त्तरि ण्वुल्। १उपदेष्टरि अनुशास्तरि

देशकारा(री) स्त्री रागिणीभेदे सङ्गीतशास्त्रम्। इयं च मेघरागस्य भार्या

देशधर्म्म पु० देशादृरूपः धर्मः। देशोचितधर्मे स च "यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः" मनूक्तः "देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान्। पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान् मनुः" मनुः शास्त्रविरोधस्थले देशधर्मः परित्याज्यः यथाह आ०ग्ट० सू० १।७ १ नारायणोपाध्यायः "वैदेहेषु सदाएव व्यवायोदृष्टः गृहे तु "ब्रह्मचारिणौ त्रिरात्रमिति" ब्रह्मचर्यं विहितं तत्र गृह्योक्तमेव कर्म कुर्यात् न देशधर्मेमिति"।

देशना स्त्री दिश–णिच्–युच्। नियोगे विध्यादौ "एकोद्दिष्टादिश्राद्धादौ ह्यासद्वद्धादि देशना" ति०त०व्याख्यः।

देशपरिच्छिन्न त्रि० ३त०। अधिकरणैकदेशवर्तिनि सर्वाव्यापिनि। यथा संयोगादि।

देशभाषा स्त्री देशप्रचलिता भाषा शा०त०। तत्तद्देशेषु प्रचलितभाषायाम् मातृभाषायाम्। "कुशला देशभाषासु जल्पन्तोऽन्योन्यमीश्वराः" भा०श० ४६ अ०।

देशराजचरित न०गद्यपद्यमयात्मके चम्पूभेदे सा०द०

देशरूप न० दिश–कर्मणि घञ् देशस्य दिश्यमानस्य उचितस्य रूपम्। उचिते समञ्जसे अमरः "लघुना देशरूपेण पन्थयोगेन भारत!" भा०शा०१०७अ०। देश+प्रशंसायाम् रूपप्। २प्रशंसिते देशे च।

देशाख्यो स्त्री रागिणीभेदे सा च हिन्दोलरागस्य द्वितीय भार्या संगीतशास्त्रम्।

देशान्तर न० अन्यो देशः मयूर०स०। १देशभेदे तच्च स्मृतौ परिभाषितं यथाह वृद्धमनुः

"वाशो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः। महानद्यन्तरं यत्र तद्देशान्तरमुच्यते। देशनामनदीभेदाल्लिकटोऽपि भवेद् यदि। तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा। दशरात्रेण या वार्त्ता न श्रूयेताथवा पुनः"। बृहस्पतिः "देशान्तरं वदन्त्येके घटियोजनमायतम्। चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च" "इत्युक्तसुनिश्चयवचनोक्तरागादियोजनादिभेदसामञ्जस्यार्थमेवं व्याख्यायते त्रितयवैशिष्ट्ये त्रिंशद् योजनाभ्यन्तरे, द्वितीयवैशिष्ट्ये तदुपरि, एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि, वाशीगिरिमहानद्यन्तरितत्तद्भेदाभावेऽपि घटियोजनोपरि, वैदेश्यमिति शुद्धिचिन्तामणिः" शु०त०रघु०। "देशान्तरगते प्रेते" शु०त० "क्लीबे देशान्तरगते पण्डिते भिक्षुकेऽपि वा। योगशास्त्राभियुक्ते च न दोषः परिवेदने" उ०त०गातातपः

भूगोलस्थमध्यरेखातः पूर्वापरस्थे उत्तरदक्षिणस्थे वा योजनविशेषान्तररूपे चरसंज्ञके २पदार्थे तत्स्वरूपं सि०शि० उक्तं तच्च चरशब्दे ८६८पृ० दर्शितम्। अधिकमत्र सि०शि० उक्तं तत्रादर्शितं दर्श्यते

"यल्लङ्काप्रायनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः" भू० "अतोपपत्तिर्गोले इदानीं देशान्तरमाह" प्रमिता० "यत्र रेखापुरे स्वाक्षतुल्यः पलस्तन्निजस्थानमध्यस्थितैर्योजनैः। खेटभुक्तिर्हृता स्वभूवेष्टनेनोद्धृता प्राग्घटं खं तु पश्चाद् ग्रहे" भू० "अतोपपत्तिस्तैराशिकेन गोलेऽभिहिता च। इदानीं देशान्तरघटिका आह" प्रमि० "प्राग्भूविभागे गणितोत्थकालादनन्तरं ग्रस्तग्रहणं विधोः स्यात्। आदौ हि पश्चाद्विवरे तयोर्यौ भवन्ति देशान्तरनाडिकास्ताः। तद्भग्नं स्फुटं घटिहृतं कुदत्तं भवन्ति देशान्तरयोजनानि। घटीगुणा घटिहृता द्युभुक्तिः स्वर्णं ग्रहे चोक्तवदेव कार्यम्। अर्कोदयादूर्द्ध्वमधश्च ताभिः प्राच्यां प्रतीच्यां दिनपप्रवृत्तिः। ऊर्द्ध्वं तथाधश्चरनाडिकाभी रवावुदग्दक्षिणगोलयाते" भू०। "यः किल मध्यरेखाया अपरिज्ञानात् ततः प्राक् पश्चाद्वा स्थितोऽस्मीति न वेत्ति तेनैवं ज्ञातव्यम्। विधुग्रहणदिने घटिकायन्त्रेण स्पर्शकाले रात्रिगतं ज्ञेयम्। अथ च गणितेन स्पर्शकालो ज्ञेयः। गणितोत्थकालादनन्तरं ग्रस्तग्रहणं यदि दृष्टं तदा द्रष्टा रेखातः प्राग्भूविभागे। यतो द्रष्टा यथा यथा रेखातः प्राग्व्रजति तथा तथा रेखोदयात् प्रागेवार्कोदयं पश्यति। इतोऽन्यथा चेत् तदा पश्चाद् द्रष्टा। दृग्ग्रहणग्रहणकालयोरन्तरं देशान्तरघटिकास्ताभिर्गुणं घटया हृतं स्वभूवेष्टनम् एवमनुपाताद्देशान्तरयोजनानि। अथ वा किं योजनैः। यदि घटीघट्या गतिर्लभ्यते तदा देशान्तरघटीभिः किमिति०। एवं यत् फलमुत्पद्यते तत् प्राग्घटं पश्चाद्घटमिति युक्तमुक्तम्। तथा प्राच्यां ताभिर्घटीभिर्दिनवारप्रवृत्तिरर्कोदयादूर्द्ध्वं भवति। प्रतीच्यां तु तत्रादधः। यतो लङ्कोदये वारादिः। अतएव च रवावुत्तरगोलस्थे चरार्द्धघटिकाभिरूर्द्ध्वम्। यतस्तदोन्मण्डलं क्षितिजादूर्द्ध्वम्। इत्यर्थे

त्वधोऽतस्तत्रोदयादधो वारप्रवृत्तिरिति सर्वं निरवद्यम्" प्रमि० ।

देशिक त्रि० देशे प्रसितः टन् । १पथिके हेमच० । देश उपदेशः तत्र प्रसितः । २गुर्वादौ "धर्माणां देशिकः साक्षात् स भविष्यति धर्मभाक्" भा०अ०१४७अ० ।

देशिन् त्रि०दिशति दिश–णिनि । १देशके स्त्रियां ङीप् सा च २तर्ज्जन्यां शब्दच० "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" याज्ञ०

देशी स्त्री रागिणीभेदे सा च दीपकरागस्य भार्या

देशीय त्रि० देशे भवः गहा० छ । देशभवे "इति पाश्चात्य देशीयाः पठन्ति" रघु० "सुरते कर्णमूलेषु यच्च देशीय भाषया । दम्पत्योर्जल्पितं मन्दं मन्मनं तद्विदुर्बुधाः" कामशास्त्रम् ।

देशित त्रि० दिश–णिच् कर्मणि क्त । उपदेशप्रेरिते "काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि देशितः । उपघातप्रधानत्वाच्च श्वादिभ्योऽपि रक्षति" मीमांसाकारिका ।

देशीयवराडी पु० रागिणीभेदे "देशीयवराडीरूपक तालेन गीयते" गीतगो०

देश्य त्रि० दिश–कर्मणि ण्यत् । १उपदेश्ये २पूर्वपक्षे न० शब्दरत्ना० देशे भवः दिगा० यत् । ३देशभवे त्रि० अस्य अकर्मधारये तत्पुरुषे उत्तरपदस्यस्य वर्ज्यां० आद्युदात्तता ।

देष्ठ त्रि० अतिशयेन दाता दाञ्+यतिशायने इष्ठन् ञ्लोपे गुणः । दातृतमे "वसुदेष्ठः सुन्वते भुवः" ऋ०८।६६।६

देष्णु त्रि० दा–इष्णुच् गुणः । दातरि उज्ज्वल०

देह पु०न० दिह–घञ् । १शरीरे स च स्थूलसूक्ष्मकारणभेदात् त्रिविधः । अङ्गशब्दे गात्रशब्दे च विवृतिः सूक्ष्मदेहस्यैव भोगो ब्रह्मवैवर्त्तपु० दर्शितो यथा तत्र यमं प्रति सावित्रीप्रश्नः "स्वदेहे भस्मसाद्भूते यान्ति लोकान्तरं नराः । केन देहेन वा भोगं भुञ्जते च शुभाशुभम् । देहो वा किंविधो ब्रह्मन् ! तन्मे व्याख्यातुमर्हसि" तत्र यमस्योत्तरम् "शृणु देहविवरणं कथयामि यथागमम् । पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् । देहिनां देहबीजञ्च स्रष्टुः सृष्टिविधौ परम् । पृथिव्यादिपञ्चभूतैर्यो देहो निर्मितो भवेत् । स क्षत्रियो नश्वरश्च भस्मसाच्च भवेदिह । दशाङ्गुष्ठप्रमाणञ्च यो जीवः पुरुषः कृतः । बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे । स देहो न भवेद्भस्म ज्वलदग्नौ यमालये । जलेन नष्टो देहो वा प्रहारे सुचिरे कृते । न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा । तप्तद्रवे तप्तलौहे तप्तपाषाण एव च । प्रतप्तप्रतिमाश्लेषेऽप्यत्यूर्द्ध्वपतनेऽपि च । न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च । कथितं देहवृत्तान्तकारणञ्च यथागमम्" स्थूलश्च नश्वरः । "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः" गीता । सूक्ष्मादित्रैविध्यं सां०का०त०कौ०

"सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । सूक्ष्मास्तेषां नियताः मातापितृजा निवर्त्तन्ते" सां०का० "त्रिधा विशेषाः स्युः । तान् विशेषप्रकारानाह सूक्ष्मा इत्यादि सूक्ष्मदेहाः परिकल्पिताः (?) मातापितृजाः षाट्कौशिकाः तत्र मातृतो लोमलोहितमांसानि, पितृतस्तु स्नाय्वस्थिमज्जान इति षट्कोशगणः । प्रकृष्टानि महान्ति भूतानि प्रभूतानि तैः सह सूक्ष्मशरीरमेकोविशेषः मातापितृजो द्वितीयः महाभूतानि तृतीयः । महाभूतवर्गं च घटादीनां निवेशः इति । सूक्ष्ममातापितृजयोर्देहयोर्विशेषमाह सूक्ष्मास्तेषां विशेषाणां मध्ये ये, ते नियताः, नित्याः मातापितृजा निवर्त्तन्ते रसान्ता वा भस्मान्ता वा विड्न्ता वेति सूक्ष्मशरीरं विभजते" त०कौ०

"पूर्वोत्पन्नम(श)सक्तं नियतं महदादिसूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" सां०का० प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् अस(श)मव्याहतं शिलामप्यनुविशति नियतम् आ आदिसर्गात् आ च महाप्रलयादवतिष्ठते । महदादिसूक्ष्मपर्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्य, कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह संसरतीति उपात्तमुपात्त षाट्कौशिकं शरीरं जहाति हायं हायं चोपादत्ते कस्मात् ? निरुपभोगं यतः, षाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरुपभोगं, तस्मात्संसरति । ननु धर्माधर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति यद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पकसम्पर्काद्वस्त्रं तदामोदवासितमवति तस्माद्भावैरेवाधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमित्र महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह

लिङ्गम् लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति भावः" त०कौ०। परिकल्पिता इत्यस्य अनुमिता इत्यर्थः तत्प्रयोगश्च परलोके कर्मफलभोगः सूक्ष्मदेहं विनाऽनुपपन्नः भोगत्वात् स्थूलस्वदेहारम्भकषट्पादिजनितस्य शस्यस्य स्वदेहेनैव भोगवत् यद्यत् स्वदेहारम्भ कर्मफलं तत्तत् स्वदेहेनैव भोग्यं नेतरेण अन्यथा कृतहान्यकृताभ्यागमप्रसङ्ग इत्यादि तर्कशास्त्रानुसन्धातव्यः।

"किन्तु देहमयोनिजम्" भाषा० "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः" शा०भा०कारिका "देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा। तथा देहान्तरप्राप्तिः" गीता। उत्पत्तिस्थानभेदैः देहश्चतुर्विधः "देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः। उद्भिज्जः स्वेदजोऽण्डोत्थश्चतुर्थश्च जरायुजः" राघवभट्टधृतवाक्यम्। ज्योतिषोक्ते २लग्ने च "देहाधीशः खगेहे बुधगुरुकविभिः संयुतो वीक्षितो या" जातका०। दिह-भावे घञ्। ३लेपने पु०

देहकर्त्तृ त्रि० देहं करोति कृ-तृच्। १देहकारके पृथिव्यादिभूते २ईश्वरे ३सूर्ये च पु० कर्मसाक्षित्वात्तयोस्तथात्वम् "देहकर्त्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः" भा०व० ३अ०। सूर्यनामोक्तौ।

देहकृत् त्रि० देहं करोति कृ-क्विप्। १देहकारके पृथिव्यादिभूते। २परमेश्वरे पु० "स एष भगवान् देवः" इत्युपक्रमे "देहकृत् देहभृत् देही" भा०अनु० १६अ० ईशस्तुतिः। ((पाखा) शब्दच०।

देहकोष पु० देहस्य कोष इव। देहावरके खगानां पक्षे

देहक्षय पु०देहस्य क्षयो यस्मात्। १रोगे शब्दच०। ६त०। २देहस्य नाशे च।

देहज पु० देहात् जायते जन-ड। १तनुजे पुत्रे "द्वैपायनादनयरो महित्वे तस्य देहजः"। २पुत्र्यां स्त्री। ३देहजातमात्रे त्रि० "व्यहितो देहजो व्याधिर्हितमारण्यमौषधम्" उद्भटः।

देहद पु० देहं दायति शोधयति देहं देहपुष्टिं ददाति रसायनेन वा दै-शोधने दा-दाने वा क। १पारदे राजनि०। २देहदातरि त्रि०।

देहधारक न० देहं धारयति धारि-ण्वुल्। १अस्थि देहधारिणि २शरीरिमात्रे त्रि०। णिनि। देहधारिन् तत्रार्थे स्त्रियां ङीप्। "संस्थिता परमा माया देहिनां देहधारिणी" ति०त० स्कं०प्रभा०ख०।

देहधि पु० देहोधीयतेऽत्र धा-आधारे कि। देहाधारे खगानां देहावरके पक्षे (पाखा) शब्दचन्द्रिकाकोषः।

देहधृज् पु० धृज-गतौ क्विन्। प्राणवायौ "वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्" सुश्रु०। २देहधारकमात्रे मनुष्यादौ त्रि०।

देहभुग् त्रि० देहे भुङ्क्ते कर्मफलानि भुज-क्विन्। १देहाभिमानिनि जीवे। देहं भुङ्क्ते भोजयति कर्मसाक्षित्वात् भुज-अन्तर्भूतणर्थे क्विन्। २सूर्ये पु० "देहभुग् देहिनां गतिः" भा० अनु० १६ अ० सूर्यनामोक्तौ।

देहभृत् पु० देहं बिभर्त्ति स्वकर्म्मानुसारेण भृ-क्विप्। स्वस्वकर्म्मानुसारेण देहाधिष्ठातरि कर्म्मात्मनि १जीवे। "कर्म्मात्मा त्वपरो योऽसौ बन्धमोक्षैः संयुज्यते" सा०प्र० भा०धृतवाक्ये तस्य कर्मयोगेन देहसम्बन्धरूपस्य बन्धस्योक्तेस्तथात्वम्। "धिगिमां देहभृतामसारताम्" रघुः।

"मनुष्योऽहं ब्राह्मणोऽहं गृहस्थोऽहमित्याद्यभिमानेनाबाधितेन देहं कर्माधिकारहेतुं वर्णाश्रमादिरूपं कर्त्तृत्वभोक्तृत्वाद्यात्मकं स्थूलसूक्ष्मशरीरेन्द्रियसङ्घातं बिभर्त्ति अनाद्यविद्यावासनावशात् व्यवहारयोग्यत्वेन, कल्पितमसत्यमपि सत्यतया स्वभिन्नमपि स्वाभिन्नतया पश्यन् धारयति पोषयति वेति देहभृत्। २ववकज्ञानशून्ये अविद्यावति कर्त्तृत्वाभिमानिनि। स च त्रिविधः। रागादिदोषप्राबल्यात् काम्यनिषिद्धादियथेष्टकर्मानुष्ठायी मोक्षशास्त्रानधिकार्येकः १। अपरस्तु यः प्राकृतः सुकृतवशात् किञ्चित् प्रक्षीणरागादिदोषः सर्वाणि कर्माणि त्यक्तुमशक्नुवन् निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्तिकानि च कर्माणि फलाभिसन्धित्यागेन सत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसन्न्यासी मोक्षशास्त्राधिकारी द्वितीयः २। ततो नित्यनैमित्तिककर्मानुष्ठानेनान्तःकरणशुद्धौ समुपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं सम्पादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासन्न्यासिसमाख्यस्तृतीयः ३।

देहम्भर त्रि० देहं बिभर्त्ति भृ-बा० खच् मुम् च। देहपोषके "जनेषु देहम्भरवार्त्तिकेषु" भाग०५।५।४

देहयात्रा स्त्री देहस्य लोकान्तरे यात्रा, देहरक्षार्थं यात्रा उद्यमादि वा। १यमपुर्यादिगमने मरणे २देहरक्षार्थं भोजनादौ च मेदि० "अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्य-

नुभवन्" वेदान्तसा० "अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चार्षया देहयात्रया" भाग०४।२२।१७ आर्षः टाप् ।

देहला स्त्री देहं भुक्तिलेपं राति ददाति सेवनात् रा-क रस्य लः । मद्ये शब्दच० ।

देहलि(ली) स्त्री देहं लेपनं लाति गृह्णाति आधारत्वेन ला-वा० कि वा ङीप् । द्वारपिण्ड्याम् (देऔयाल) शब्दर० । "विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः" मेघदू० । अमरादौ ह्रस्वान्तपाठः स च पु० ।

देहवत् त्रि० देह+अस्त्यर्थे मतुप् मस्य वः । देहात्माभिमानिनि जीवे "अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" गीता ।

देहवायु पु० देहस्थो वायुः । प्राणादिवायुपञ्चके त्रिका० ।

देहसाम्य न० ६त० । अङ्गानां समत्वे । तल्लक्षणमुक्तं यथा "अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते । नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत्" शब्दार्थचि० धृतवाक्ये ।

देहसार पु० ६त० । मज्जनि धातौ राजनि० ।

देहातीत पु० देहं देहाध्यासमतीतः । घटादिवत् देहस्य द्रष्टृत्वेन तदभिमानशून्ये विदुषि ।

देहात्मवादिन् पु० देहमात्मानं वदति वद-णिनि । चार्वाके तस्य यथा देहात्मवादित्वं तथा चार्वाकशब्दे २९२१ पृ० दर्शितम् ।

देहात्मप्रत्यय पु० देहस्यात्मतया प्रत्ययः । देहे आत्मत्वेन अभिमाने "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्" शा०भा०पृ० कारिका

देहाध्यास पु० देहस्य तद्धर्मस्य वा आत्मतया तद्धर्मतया वा अध्यासः भ्रमः । देहधर्मस्य मनुष्यत्वादेरात्मधर्मतया बोधे । यथा मनुष्योऽहं कृशोऽहं गौरोऽहमित्यादि देहधर्मस्य आत्मनि भ्रमः ।

देहिका स्त्री दिह-ण्वुल् । कीटभेदे उपजिह्विकायां त्रिका०

देहिन् स्त्री देहाः सर्वे भूतभविष्यद्वर्त्तमाना जगन्मण्डलवर्तिनोऽस्य सन्तीति इनि । १देहतादात्म्याध्यासापन्ने जीवे, एकस्यैव विभुत्वेन सर्वदेहभोगित्वाल्लिङ्गदेहोपाधिरात्मा देहीत्युच्यते । २देहाभिन्नात्मदर्शिनि च । जीवस्य विद्वांश्चेत् प्रवासीव परगेहे तत्पूजापरिभवादिभिरप्रहृष्यत्यविषीदन्नहङ्कारममकारशून्यस्तिष्ठति । अज्ञो हि देहतादात्म्याभिमानाद् देहमात्मतयाऽभिमन्यमानः देहाधिकरणमेवात्मनोधिकरणं मन्यमानो गृहे भूमावासने वाङ्मासे इति मन्यते न तु देहे आसे इति "देहिनामदृढयोगसंङ्गसाम्" माघः ।

दै शोधने भ्वा०पर०सक० शुद्धौ अक० अनिट्-पित् तेन न घुसंज्ञा । दायति अदासीत् ददौ दायात् दायते दातः । दातिः । [सितो गौरः" अमरः ।

अव+श्वेतीभावे अक० आवदायति शुक्लीभवति "अवदातः

दैतेय पुं स्त्री दितेरपत्यं ढक् । दितेरपत्ये असुरे अमरः । "दैतेयाश्चाप्यदैतेयाः परस्परजयैषिणः" हरिवं०२१४ अ० । स्त्रियां ङीप् । "दैतेयी चासुरी प्रजा" भा०शा० २२७अ० ।

दैत्य पु० दितेरपत्यं ण्य । दितेरपत्ये अमरः । "दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्" मनुः । योषधत्वात् जातावपि स्त्रियां टाप् । [दैत्यगुरुस्तृतीये" ह०सं० १०४अ० ।

दैत्यगुरु पु० ६त० । शुक्राचार्ये अमरः । "शत्रुक्षयान्

दैत्यदेव पु० ६त० । १वरुणे त्रिका० । २शायौ हेम० ।

दैत्यद्वीप पु० गरुडात्मजभेदे "दैत्यद्वीपः परिद्वीपः सारसः पद्मकेतनः" भा०उ० १०० अ० गरुडात्मजोक्तौ

दैत्यधूमिनी स्त्री तारादेव्यर्चनाङ्गे रुद्राभेदे "तारार्चने विशेषास्तु कथ्यन्ते पञ्च रुद्रिकाः । योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी । खेलिहानेति संप्रोक्ताः पञ्च रुद्रा विलोकिताः" तन्त्रसारे उद्दिश्य "दानवधूमकेत्वपरनामतया सा लक्षिता यथा "परिवर्त्य करौ स्पष्टौ कनिष्ठाङ्गुष्ठमध्यमे । अनामायुगलं चाधस्तर्ज्जनीयुगलं पृथक् । अन्योऽन्यं निविडां बद्ध्वाङ्गुष्ठाग्रेऽनामिकां ततः । दानवधूमकेत्वाख्या रुद्रैषा कथिता प्रिये !" ।

दैत्यनिसूदन पु० दैत्यान् निसूदयति हिनस्ति नि+सूदि-णिच्-ल्यु । विष्णौ तस्य दानवारित्वात्तथात्वम् ।

दैत्यपति पु० ६त० हिरण्यकशिपौ । "प्राणच्छिदां दैत्यपतेर्नखानाम्" माघः ।

दैत्यपुरोधस् पु० ६त० । शुक्राचार्ये हारा० "जिगीषया ततो देवावव्रिरेऽङ्गिरसं सुनिम् । पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे" भा०आ० ७६अ० तस्यासुरपौरहित्यवरणमुक्तम् । दैत्यपुरोहितादयोऽत्र ।

दैत्यपूज्य पु० ६त० । शुक्राचार्ये "कनकनिकषगौरे व्याधयो दैत्यपूज्ये" ह०सं० ९अ० ।

दैत्यमातृ स्त्री ६त० । कश्यपर्षेः कलत्रे १दितौ उपचारात् तेषां विमातृषु २अदित्यादिषु तत्कलत्रेषु च "अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः" हरिवं० १६८अ० ।

दैत्यमेदज पु॰ दैत्यस्य मेदाज्जायते जन—ड । १गुग्गुलौ २पृथिव्यां स्त्री राजनि॰मधुकैटभमेदजातत्वात्तस्यास्तथात्वम्

दैत्ययुग न॰ ६त॰ । दैत्ययुगवत् द्वादशसहस्रमितवर्षेषु शब्दार्थकल्पतरुः । दैत्ययुगशब्दे दृश्यम् ।

दैत्या स्त्री दितेरियम् गण टाप् । १सुरायां त्रिका॰ २सुरानामगन्धद्रव्ये अमरः । ३चण्डोषधौ मेदि॰ योषधत्वात् जातावपि टाप् । ४दैत्यजातिस्त्रियाम् । [मेदि॰।

दैत्यारि पु॰ ६त॰ । १विष्णौ अमरः । २देवतामात्रे च

दैत्याहोरात्र पु॰ ६त॰। मानुषे वर्षे शब्दार्थकल्पतरुः तन्मानस्य देवमानतुल्यत्वात्तथात्वम् ।

दैत्येजय पु॰ ६त॰। दैत्यगुरौ शुक्राचार्ये । [भवे त्रि॰।

दैन न॰ दीनस्य भावः । १दीनत्वे दिने भवः अण् । २दिन-

दैनन्दिन त्रि॰ दिनं दिनं भवः वीप्सायां द्वित्वम् अत्यन्तसंयोगे द्वितीया ततो भवार्थे अण् अणि परे द्वितीयविभक्तेर्लुक् मध्यस्थायास्तु प्रत्ययपरत्वाभावाच्च लुक् । दिने दिने भवे प्रत्यहं भवे "एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः । तिर्य्यङ्नृपितृदेवानां सम्भवोयत्र कर्मभिः" भाग॰ ३।११।२७।

दैनन्दिनप्रलय पु॰६त॰ । ब्रह्मणः स्वमानानुसारेण प्रतिदिनावसाने सर्वसृष्टवस्तूनां क्षये प्रलयविशेषे "चतुर्दशेन्द्रावच्छिन्नं ब्रह्मणो दिनमुच्यते । तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ! । कालरात्रिश्च सा ज्ञेया वेदेषु परिकीर्तिता । एवं सप्तकल्पजीवी मार्कण्डेयो महातपाः । ब्रह्मलोकादधः सर्वे लोका दग्धाश्च तत्र वै । उत्थितेनैव सहसा सङ्कर्षणमुखाग्निना । चन्द्रार्कब्रह्मपुत्राश्च ब्रह्मलोकं गता द्रुतम् । ब्रह्मरात्रे व्यतीते तु पुनश्च ससृजे विधिः । तस्य ब्राह्म्यां निशायाञ्च क्षुद्रप्रलयसम्भवः । एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च । वर्षं द्वादशमासैश्च ब्रह्मसम्बन्धि चैव हि । एवं परिमितावद्दे च गते च ब्रह्मणो नृप । दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्तितः । अहोरात्रश्च स प्रोक्तो वेदविद्भिः पुरातनैः । तत्र सर्वं प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः । आदित्यावसवो रुद्रा मन्विन्द्रा मानवादयः । ऋषयो मुनयश्चैव गन्धर्वा राक्षसादयः । मार्कण्डेयो लोमशश्च मेधकश्चिरजीविनः । इन्द्रद्युम्नश्च नृपतिर्वाकुपारश्च कच्छपः । नाडीजङ्घो वकश्चैव सर्वे नष्टाश्च तत्र वै । ब्रह्मलोकादधः सर्वे लोका नागालयास्तथा । ब्रह्मलोकं ययुः सर्वे ब्रह्मलोकादवस्तथा । गते दैनन्दिने ब्रह्मा लोकांश्च ससृजे पुनः । एवं शतायुःपर्यन्तं परमायुश्च ब्रह्मणः" ब्र॰वै॰प॰ ।

दैनिक त्रि॰ दिने भवः "कालाट् ठञ्" पा॰ ठञ् । दिनभवे स्त्रियां ङीप् । सा च दिने क्रियमाणकर्मभृतौ शब्दमा॰।

दैर्घवरत्र पु॰दीर्घवरत्रेण निर्वृत्तः कूपः अण् । दीर्घरज्जाकृष्टखननेन निष्पादिते कूपे ।

दैर्घ्य न॰ दीर्घस्य भावः ष्यञ् । दीर्घतायाम् ।

दैन्य न॰ दीनस्य भावः ष्यञ् । १दीनत्वे, कार्पण्ये च । "दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादि कृत्" सा॰द॰ उक्ते २व्यभिचारिगुणभेदे च "दैन्यचिन्तास्रनिश्वासवैवर्ण्यौत्सुक्यितादिकृत्" सा॰द॰ "इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्विभर्त्ति" मेघ॰।

दैलीपि पु॰ दिलीपस्यापत्यम् इञ् । दिलीपापत्ये ततः तौल्वल्या॰ युवप्रत्ययस्य फको न लुक् । दैलीपायनस्तदीय युवापत्ये ।

दैव त्रि॰ देवादागतः अण् । १भाग्ये फलोन्मुखे शुभाशुभकर्मणि "दैवाधीनं जगत्सर्वं जन्मकर्म शुभाशुभम् । संयोगाच्च वियोगाच्च न च दैवात् परं बलम् । कृष्णायत्तञ्च तद्दैवं स दैवात् परतस्ततः । भजन्ति सततं भक्ताः परमात्मानमीश्वरम् । दैवं वर्द्धयितुं शक्तुं क्षयं कर्तुं स्वलीलया । न दैवबलस्तद्भक्तस्याविनाशी च निर्गुणः" इति ब्र॰वै॰गणे॰। मनुश्चाह । "दैवे पुरुषकारे च किं ज्यायस्तद्ब्रवीहि मे । अत्र मे संशयो देव ! छेत्तुमर्हस्यशेषतः" मत्स्य उवाच "स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् । तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः । प्रतिकूलं तथा दैवं पौरुषेण विहन्यते । सङ्कल्पाचारयुक्तानां नित्यमुत्थानशीलिनाम् । येषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम ! । पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् । कर्मणा प्राप्यते लोके राजसस्य तथा फलम् । कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम् । पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः । दैवमेव विजानन्ति नराः पौरुषवर्जिताः । तस्माद्धि कालसंयुक्तं दैवेन सफलं भवेत् । पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! । । दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! । । त्रयमेव मनुष्यस्य पिण्डितं स्यात् फलावहम् । कर्मेष्टसिद्धयोगात् दृश्यन्ते फलसिद्धयः । तासु काले प्रदृश्यन्ते नैवाकाले कथञ्चन । तस्मात् सदैव कर्तव्यं स्वधर्मपौरुषं नृभिः । एवन्ते

प्राप्नुवन्तीह परलोके फलं ध्रुवम्। नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः। तस्मात् सदैव यत्नेन पौरुषे यत्नमाचरेत्। त्यक्तालसान् दैवपरान् मनुष्यानुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः। अप्यिषत्र यत्नादुद्गुणते त्वमेन्द्रं तस्मात् सदोत्थानवता हि भाव्यम्" मत्स्यपु०१९५अ०"तृणं वज्रायते नूनं वज्रं चैव तृणायते। बलवान् बलहीनश्च दैवस्य गतिरीदृशी" "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति" नीतिमाला "दैवायत्तं कुले जन्म ममायत्तं हि पौरुषम्" वेणीसं०देवमेदम् देवाद्यञ्जौ पा०अञ्। २देवसम्बन्धिनि स्त्रियां ङीप्। "दैवी ह्येषा गुणमयी मम माया दुरत्यया" गीता। "दैवी विचित्रा गतिः" उद्भटः। ३गीतोक्ते सम्प्रदे स्त्री "अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्। अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्। तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य पाण्डव!। दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता" गीता देवस्येदम् अञ्। ४मनूक्ते विवाहभेदे पु० "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" इत्युद्दिश्य "यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते। अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते" इति लक्षितम् "सुतादानं तन्निमित्तं यज्ञमिति तात्पर्यार्थः। विवाहानां ब्रह्मदेवादिदेवताकत्वाऽभावेन द्वयार्थगर्भितार्थकता कुल्लूकभट्टेनोक्ता। देवो देवताऽस्य अञ् ५मनूक्ते अङ्गुल्यग्रूपे आचमनाङ्गे तीर्थभेदे आचमनोपक्रमे "अङ्गुष्ठमूलस्यतले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैवतीर्थं तयोरधः" कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्म दैवतीर्थान्यनुक्रमात्" याज्ञवल्क्यैकवाक्यत्वात् अङ्गुल्यग्रस्यैव तथात्वम्। इदमर्थे अञ्। ६देवसम्बन्धिनि देवसर्गरूपे सर्गभेदे दैवसर्गश्चाष्टविधो "विबुधाः१ पितरो२ऽसुराः३ गन्धर्वाप्सरसः सिद्धा४ यक्षरक्षांसि चारणानि५ भूतप्रेतपिशाचाश्च ६ विद्याधृ:७ किन्नरादयः८ भाग०३। ९०।२६ उक्तः शाङ्खायनतन्त्रकौमुद्यान्तु अन्यविधैवाष्टविधतोक्ता यथा "अष्टविकल्पो दैवस्तिर्यग्योनश्च पञ्चधा भवति। मानुषश्चैकविधः समासतो भौतिकः सर्गः" सा० का० "ब्राह्मप्राजापत्यैन्द्रगान्धर्वराक्षसपैशाच इत्यष्टविधो दैवः सर्गः" त०कौ। देवोदेवभेदो देवताऽस्य अञ्। ७श्राद्धभेदे देवताभेदोद्देशेन कर्तव्ये श्राद्धभेदे न०। तस्य पितृश्राद्धात् पूर्वं कर्त्तव्यता मनुनोक्ता यथा "दैवकार्यात् द्विजातीनां पितृकार्यं विशेषतः। दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम्। तेषामारक्षभूतं तु पूर्वं दैवं नियोजयेत्। रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितम्। दैवाद्यन्तं तदीहेत पैत्राद्यन्तं न तद्भवेत्। पैत्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः"। देवलोऽपि "यत्तत्र क्रियते कर्म पैतृके ब्राह्मणान् प्रति। तत्पूर्वं तत्र कर्तव्यं वैश्वदेविकपूर्विकम्" आसनगन्धादिदाने दैवपूर्वकतां पैत्रश्राद्धे विधत्ते स्म। श्राद्धभेदे देवताभेदाश्च वि०सि० निरूपिताः कस्यचिच्छ्राद्धस्य चादैवपूर्वकता चोक्ता यथा

हेमाद्रौ शङ्खदृढस्मृतौ "दृष्टिश्राद्धे क्रतुदक्षौ सत्यो नान्दीमुखे वसुः। नैमित्तिके कामकालौ काम्ये च सुरिलोचनौ। पुरूरवार्द्रवौ चैव पार्वणे वसुदाहृतौ" तत्रैव "उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः। अयमुच्चारणीयस्तैः श्लोकः श्रद्धासमन्वितैः। आगच्छन्तु महाभागा विश्वेदेवा महाबलाः। ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते" इति। दृष्टिश्राद्धं प्रतिरुचिविहितमित्युक्तमिति कल्पतरुः। आधानादिकर्माङ्गमित्यन्ये। नैमित्तिकमेकोद्दिष्टम् "एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते" भविष्योक्तेः एतद् यद्यपि "एकोद्दिष्टं दैवहीनमिति" तत्र वैश्वदेवनिषेधस्तथापि "नवश्राद्धे द्वादशमासिके च कामकालौ ज्ञेयौ "नवश्राद्धं दशाहानि नवभिश्चन्तु षड्क्रतून्। अतःपरं पुराणं वै त्रिविधं श्राद्धमुच्यते। यस्मिन्नेव पुराणे वा विश्वेदेवा न लेभिरे। आसुरं तद्भवेच्छ्राद्धं दृष्टफलं मन्त्रवर्जितम्" इति बह्वृचपरिशिष्टात्। एतच्च बह्वृचानामेव। तेन तेषामेवोक्तेः अन्येषां तु नात्र विश्वेदेवा काण्वायनोक्तेस्तत्रैव एवेति पृथ्वीचन्द्रोदयः। अन्ये तु नैमित्तिकं सपिण्डीकरणमाहुः। भविष्ये यद्यप्येकोद्दिष्टं तच्छब्देनोक्तं तथापि "तदप्यदैवं कर्तव्यमयुग्मान् भोजयेद्द्विजानिति" तत्रैव विश्वेदेवनिषेधात्। यद्यपि सपिण्डीकरणेऽपि एकोद्दिष्टत्वं तथापि "सपिण्डीकरणं श्राद्धं दैवपूर्वं नियोजयेदिति" वचनात्तत्परत्वम्। हेमाद्रावादित्यपुराणे "विश्वेदेवौ क्रतुदक्षः सर्वास्विष्टिषु कीर्त्तितौ। नित्ये नान्दीमुखे श्राद्धे वसुसत्यौ च पैतृके। नवाञ्चलक्ष्मने देवौ

कामकालौ-सदैव हि। अपि कन्यागते सूर्ये काम्ये च धुरिलोचनौ। पुरूरवार्द्रयौ चैव विश्वेदेवौ तु पार्वणे"। क्वचित् विश्वेदेवापवादमाह हेमाद्रौ शातातपः "नित्यं श्राद्धमदैवं स्यादैकोद्दिष्टं तथैव च। मातुः श्राद्धं च युग्मैः स्यादैवं प्राङ्मुखैः पृथक्। योजयेद्दैवपूर्वाणि श्राद्धान्यन्यानि यत्नतः" नान्दीश्राद्धे भिन्नप्रयोगपक्षे मातुः श्राद्धमदैवमिति हेमाद्रिः। तत्र देवसम्बन्धिनि। "होमोदैवो बलिर्भौतो ह्यन्नोऽतिथिपूजनम्" मनुः। दिवि भवः अण्। ८आकाशभवे त्रि०।

दैवक पु० देवएव दैवः स्वार्थे क। १देवे "सर्वभूतानि सदैवकानि प्रस्थेऽजयत् खाण्डवे सव्यसाची" भा०व०४०अ० देवकस्यापत्यं स्त्री अण् ङीप्। २देवकन्यपस्यापत्यस्त्रियां वसुदेवपत्नीभेदे श्रीकृष्णस्य मातरि स्त्री। [ऽप्यत्र।

दैवकीनन्दन पु० ६त०। वासुदेवे श्रीकृष्णे दैवकीसुतादयो-

दैवकोविद त्रि० दैवे शुभाशुभज्ञापकहेतौ कोविदः। दैवज्ञे शब्दरत्ना० स्त्रियां टाप्।

दैवक्षत्रि पु० क्रोष्टुवंश्ये देवक्षत्रस्यात्मजे नृपभेदे "तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः। देवक्षत्रः सुतस्तस्य देवक्षत्रिर्महायशाः" हरिवं० ३७अ०।

दैवचिन्तक पु० दैवं लक्षणेन शुभाशुभं चिन्तयति चिन्ति-ण्वुल्। दैवज्ञे तल्लक्षणादिकं ह०सं० २अ० उक्तं तच्च २५०० पृ० गणकशब्दे दर्शितम् दैवविदादयोऽप्यत्र।

दैवज्ञ त्रि० दैवं जानाति ज्ञा-क। १दैवचिन्तके प्रश्नादिना शुभाशुभनिरूपिण्यां विप्रश्निकायां २स्त्रियां स्त्री २सङ्कीर्णजातिभेदे गणकशब्दे २५०२पृ०दृश्यम् तज्जातिप्राप्तिहेतुश्च ब्रह्मवै० प्र० खण्डे उक्तो यथा

"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः। स याति नागवेष्टश्च नागैर्वेष्टित एव च। वसेत् स्लोम मानावृद्धं तत्रैव नागदंशितः। ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु। गोपश्च चर्मकारश्च रङ्गकारस्ततः शुचिः" स च अपकृष्टब्राह्मणः "अब्राह्मणो भट्टदैवज्ञादि" मा०वि० अब्राह्मणशब्दे दृश्यम् तस्य च नक्षत्रसूचकत्वदोषेण दूषितत्वादपकृष्टत्वम्।

दैवत न० देवतैव स्वार्थे अण्। देवतायां "दैवतैरपकल्प्यन्ते सुदूरमतिवेगिताः" स्मृ० सि० "किमेकं दैवतं लोके" विष्णुसं० "ब्राह्मणो दैवतं महत्" मनुः "ब्राह्मणाः सम्भवेनैव देवानामपि दैवतम्" मनुः। अस्य अमरे पुंनपुंसकतोक्तावपि कविभिः पुंस्त्वेनाप्रयुक्तत्वात् तत्प्रयोगे अप्रयुक्ततारूपः काव्यदोष इति काव्यप्र०आह च यथा "यथायं दारुणाचारः सर्वदैव विभाव्यते। तथान्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा" अत्र दैवतशब्दः "दैवतानि पुंसि वा" इत्याम्नातोऽपि न केनचित् प्रयुज्यते। "आर्षं छन्दो दैवतञ्च विनियोगस्तथैव च" इत्युद्देशे योगियाज्ञ० "यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या। तदाकारं भवेत्तस्य दैवतं देवतोच्यते" अथातो दैवतम् तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते" निरु० देवतामधिकृत्योक्तः ग्रन्थः अण्। निरुक्तस्य ३तृतीये काण्डे तस्य देवताधिकारेण कृतत्वात्। "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा। तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा मतः" यास्कोक्तः तच्च "अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते" इति तत्रोक्तम्। देवतानां समूहः अण्। ४देवतासमूहे न० देवताया इदम् अण्। ५देवतासम्बन्धिनि प्रतिमादौ "मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" मनुः।

दैवतन्त्र त्रि० दैवं भाग्यं तन्त्रं प्रधानं यस्य। भाग्याधीने "किञ्च पुरा हरिश्चन्द्रामचन्द्रमुख्या महीन्द्रा ऐश्वर्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेक कालचिरराज्यमकुर्वन्" दश०कु०।

दैवतरस पु० प्रवरर्षिभेदे श्रौमतकामकायनानां वैश्वामित्र दैवश्रवस दैवतरसेति" आश्व० श्रौ० १२।१४।२

दैवतरेय पुंस्त्री० देवतरस्य श्रेष्ठदेवस्यापत्यं शुभ्रा० ढक्। श्रेष्ठदेवस्यापत्ये स्त्रियां ङीप्।

दैवति पुंस्त्री देवतस्यापत्यम् इञ्। देवतापत्ये ततः यूनि फक्। दैवतायन तस्य यून्यपत्ये तौल्वल्या०तस्य न लुक्।

दैवत्य त्रि० देवता स्वार्थे ष्यञ्। देवतायाम् "आर्षं छन्दश्च दैवत्यम्" याज्ञ० "ऋग्वेदो देवदैवत्यः यजुर्वेदस्तु मध्यमः" मनुः।

दैवदत्त त्रि० देवदत्तस्य ज्ञाता "या नामधेयस्य ह्रस्वसंज्ञा पक्ष्याः" वार्त्ति ह्रस्वत्वाभावपक्षे अण्। १देवदत्तज्ञातादौ। देवदत्तः भक्तिरस्य अचित्तत्वाभावात् न ठक् किन्तु अण्। २देवदत्तभक्तियुक्ते त्रि० अपत्ये तु इञ् दैवदत्ति तदपत्ये पुंस्त्री भवार्थे काशका० ठञ्जिठौ दैवदत्तिक तद्भवार्थे। स्त्रियां ठञि ङीप् जिठि टाप।

दैवदर्शनिन् पु० ब०व०। देवदर्शनेनर्षिणा दृष्टमधीयते शौनका० णिनि। देवदर्शनप्रोक्तछन्दोऽध्यायिषु।

दैवदारव त्रि॰ देवदारोर्विकारः "ओरञ्" पा॰ अञ्। देवदारुवृक्षविकारे यूपादौ

दैवदीप पु॰ दैवेन दीप इव। नेत्रे त्रिका॰। तस्य दीपवदर्थप्रकाशकत्वात् तत्तुल्यत्वं दैवाधीनतयैवान्धत्वादिशून्यत्वेन दीपतुल्यत्वमिति तस्य तथात्वम्।

दैवन्त्यायन पु॰ देवन्त+बा॰ गोत्रे यञ् ततोयूनि फक्। तत्प्रार्षेयगोत्रप्रवरभेदे "याज्ञवाधौलमौनमौकशार्करात्रिमार्ष्टिसावर्णिशालङ्कायनजैमिनिदैवन्त्यायनानां भार्गवत्रैतहव्यसावेतसेति" आश्व॰श्रौ॰ १२।१० "अयं गण" तत्प्रार्षेयः। प्रवरेषु क्वचिच्छास्त्रान्तरवशात् पदविपर्य्यासोवर्णविपर्य्यासो वा पदान्यत्वं वाऽस्ति न तेन प्रवरान्यत्वं भवतीति मन्तव्यम्" नारा॰

दैवपर त्रि॰ दैवं भाग्यं परं चिन्त्यं यस्य। कार्यसिद्धौ भाग्यस्य प्रधानतया चिन्तके यद्भविष्ये हेम॰ "सम्पत्तेश्च विपत्तेश्च दैवमेव हि कारणम्। इति दैवपरोध्यायन्नात्मना न विचेष्टते" कामं॰ नी॰।

दैवप्रश्न पु॰ दिवि आकाशे भवः दैवः कर्म॰। "नक्तं निर्गत्य यत्किञ्चिच्छुभाशुभकरं वचः। श्रूयते तद्विदुर्धीरा दैवप्रश्नसुपश्रुतिम्" हारा॰ उक्ते शुभाशुभसूचनार्थे आकाशभवे वाक्यभेदे उपश्रुतौ आकाशवाण्याम्।

दैवमति पुंस्त्री॰ देवमतस्यर्षेरपत्यम् इञ्। देवमतस्यर्षेरपत्ये स्त्रियां वा ङीप्। ततोयूनि फक्। दैवमतायन तदीये यून्यपत्ये तत्र तौल्व॰न फको लुक्। अत्र दैवमिति इति तौल्वल्या॰ गणे पाठान्तरं स च देवमितस्यापत्ये अन्यत्र दैवमतिवत्।

दैवयज्ञि पुंस्त्री॰ देवो देवार्थो यज्ञो यस्य तस्यापत्यम् इञ्। देवार्थयज्ञकारकस्यापत्ये स्त्रियां वा ङीप्। ततोयून्यपत्ये फक्। दैवयज्ञायन तदीये यून्यपत्ये। अत्र तौल्व॰ न फको लुक्।

दैवयुग न॰ देवस्येदम् अण् कर्म॰। दिव्ये युगे देवमानेन द्वादशसहस्रवर्षमितकाले "यदेतत् परिसंख्यातमादावेव चतुर्युगम्। एतत् द्वादशसाहस्रं देवानां युगमुच्यते" मनुः "सुरासुराणामन्योऽन्यमहोरात्रो विपर्ययात्। तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च" सू॰सि॰ "देवदैत्यानां बहुत्वाद्बहुवचनम्। अन्योऽन्यम् परस्परम् विपर्ययात् व्यत्यासात् अहोरात्रः। अयमर्थः। देवानां यद्दिनं तदसुराणां रात्रिः। देवानां या रात्रिस्तदसुराणां दिनम्। दैत्यानां यद्दिनं तद्देवानां रात्रिः। दैत्यानां या रात्रिस्तद्देवानां दिनमिति। तथा च देवदैत्ययोर्दिनरात्र्योरेव व्यत्यासाद्भेदो न मानेनेति। तयोरहोरात्रस्यैक्याद्देवाहोरात्रमानकथनेनैव दैत्याहोरात्रमानसङ्क्रमिति भावः" रङ्ग॰। "तद्द्वादशसहस्राणि चतुर्युगसुदाहृतम्। सूर्य्याब्दसङ्ख्यया द्विघ्नि सागरैरयुताहतैः। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया" सू॰सि॰।

दैवयोग पु॰ दैवस्य योगः फलोन्मुखतया सम्बन्धः। भाग्यस्य [फलोन्मुखतया सम्बन्धे।

दैवराजिक त्रि॰ देवराजे भवादि काश्या॰ ठञ् ञिठ् वा। देवराजभवे स्त्रियां ठञि ङीप् ञिठि टाप्।

दैवराति पुंस्त्री॰ देवरातस्यापत्यम् इञ्। १देवरातस्यापत्ये २जनकराजपितरि च जनकस्य देवरातित्वस्य भा॰शा॰ ३१२अ॰ उक्तेः यथा "याज्ञवल्क्यमृषिश्रेष्ठं दैवरातिर्महायशाः। पप्रच्छ जनको राजा प्रश्नं प्रश्नविदां वरम्" देवरातशब्दे दृश्यम्।

दैवल पु॰ देवलस्यापत्यं शिवा॰ अण्। देवलस्यर्षेरपत्ये मच शाण्डिल्यगोत्रस्य प्रवरर्षिभेदः यथाह आश्व॰गृ॰१२।१४। ७।८ "शाण्डिलानां शाण्डिलासितदैवलेति" "कश्यपासितदैवलेति वा"।

दैवलक पु॰ देवं देवयोनिं लाति गृह्णाति पूज्यत्वेन ला-क स्वार्थे कुत्सितार्थे क वा। १भूतसेवके हारा॰ देवलकस्येदम् अण्। २देवलसम्बन्धिनि त्रि॰। [त्रिका॰।

दैवलेखक पु॰ दैवं लिखति लिख-ण्वुल्। मौहूर्त्तिके

दैववंश पु॰ देवानामयम् अण् कर्म॰। देवानां वंशे तद्वंशवर्णनञ्च वायुपु॰ ३१अ॰ यथा "पितृवंशप्रसङ्गेन कथाह्येषा प्रकीर्तिता। पितॄणामानुपूर्व्येण देवान् वक्ष्याम्यतःपरम्। त्रेतायुगमुखे पूर्वमासन् स्वायम्भुवेऽन्तरे। देवा यामा इति ख्याताः पूर्वं ये यज्ञसूनवः। अजिता ब्रह्मणः पुत्रा जिताजिदजिताश्च ये। पुत्राः स्वायम्भुवस्यैते शुक्रनाम्ना तु मानसाः। तस्मिन्नोगणा ह्येते देवानान्तु त्रयः स्मृताः। छन्दोगास्तु त्रयस्त्रिंशत् सर्वे स्वायम्भुवस्य ह। यदुर्ययातिर्द्वौदेवौ दीधयः स्रवसो मतिः। विभासश्च क्रतुश्चैव प्रजातिर्विभतोद्युतिः। वायसो मङ्गलश्चैव यामा द्वादश कीर्तिताः। अभिमन्युरथदृष्टिः समयोऽथ शुचिश्रवाः। केवलो विश्वरूपश्च सुपक्षो मधुपस्तथा। तुरीयो निर्हृदश्चैव युक्तोपावाशिनस्तु ते। यमिनो विश्वदेवाद्यो यविष्ठोऽस्मृतवानपि।

अजिरो विभुर्विभावश्च सूलिकोऽथ विदेहकः। श्रुतिर्ह्यो हृदच्छुक्रोदेवा द्वादश कीर्तिताः। आसन् स्वायम्भुवस्यैते अन्तरे सोमपायिनः। त्रिषिमन्तो गणा ह्येते वीर्यवन्तो महाबलाः। तेषामिन्द्रः सदा ह्यासीद् विश्वभुक् प्रथमो विभुः। असुरा ये तदा तेषामासन् दायाद बान्धवाः। सुपर्णयक्षगन्धर्वाः पिशाचोरगराक्षसाः। अष्टौ पितृभिः सार्द्धं ते नासत्या देवयोनयः"।

दैववाणी स्त्री कर्म०। १दैवप्रश्ने उपश्रुतौ २संस्कृतवाक्ये "संस्कृतानाम दैवी वाक्" काव्यादर्शः।

दैवशर्मि पुंस्त्री० देवशर्मणोऽपत्यम् बाह्वा०इञ्। देवशर्मणोऽपत्ये ततः गर्गादि०भवाद्यर्थे ञ्। देवशर्मीय तद्भवादौ त्रि०

दैवसर्ग पु० कर्म०। देवादिसर्गभेदे देवशब्दे दृश्यम्।

दैवसृष्टि स्त्री देवस्येयम् अण दैवी कर्म०। स्वयम्भूतायां देवानां सृष्टौ। तत्प्रकारश्च वायुपु० ९अ० उक्तो यथा "सृष्ट्वा सुरांस्तु देवेशस्तनुमन्यामपद्यत। अरक्तां सत्त्वबहुलां ततस्तां सोऽभ्ययूयुजत्। ततस्तां युञ्जतस्तस्य प्रियमासीत् प्रभोः किल। ततो हर्षे समुत्पन्ना दीव्यतस्तस्य देवताः। यतोऽस्य दीव्यतो जातास्तेन देवाः प्रकीर्तिताः। धातुर्दिवीति यः प्रोक्तः क्रीडायां स विभाव्यते। तस्मान्नन्वान्तु दिव्यायां जज्ञिरे तेन देवताः"।

दैवस्थानि पुंस्त्री० देवस्थानस्यर्षेरपत्यम् इञ्। १देवस्थानस्यर्षेरपत्ये स्त्रियां वा ङीप्। ततः यूनि फक् तस्य पैला० लुक्। २देवस्थानि तदीये यून्यपत्ये च।

दैवहव पु० ब०व०। देवहव्यस्य देवह्वनामकर्षेरपत्यस्य छात्राः कण्वा० अण् यञो लुप्। देवहव्यस्य छात्रेषु।

दैवहीन त्रि० दैवेन भाग्येन हीनः। शुभभाग्यहीने तदनुमापकहेतवश्च दीपिकायामुक्ता यथा "व्यसनी विनष्टधर्मा त्रिविधोत्पातपीड़ितोयश्च। पुरुषः स दैवहीनः कथितो दैवान्वितोऽन्यः। दैवहीनं रिपुं जेतुं यायाद्दैवान्वितो नृपः। योज्यो दैवान्वितामात्या दैवहीने तथात्मनि तत्रैव।

दैवागारिक त्रि० देवागारे नियुक्तः "तत्र नियुक्तः" इत्यधिकारे अगारान्तात् ठक्। देवागारनियुक्ते देवागारिक इति क्वचित् पाठदर्शनात् ठना निष्पन्नमित्युक्तं प्राक्।

दैवात् अव्य० दृष्टादित्यर्थे शब्दार्थचि०।

दैवात्यय पु० दैवकृतोऽत्यय उत्पातः। दैवकृते उत्पाते "अन्यत्र दैवात्ययात्" इ०सं०२अ०। दिव्यान्तरिक्षभूमिजेषूत्पातेषु यद्भावि अशुभं स दैवात्यय इत्यर्थः।

दैवादिक पु० दिवादिगणे पठितः ठञ्। दिवादिगणे पठिते धातौ "सेधेति शपानिर्देशो दैवादिकनिवृत्त्यर्थः" मनो०।

दैवारिप पु० देवारीन् असुरान् पाति आश्रयदानेन पा—क देवारिपः समुद्रस्तत्र भवः अण्। शङ्खे तस्य समुद्रजातत्वात् तथात्वम् "भैरवं शब्दमत्यर्थं वानरस्य च कुर्वतः। दैवारिपाच्च बीभत्सुस्तस्मिन् दौर्योधने बले" भा० वि० ५अ० "दैवारिपात् शङ्खात् भैरवं शब्दं कुर्वतः इत्यर्थः" नीलक०।

दैवासुर न०देवासुरस्य वैरम् इत्वात् वैरे वुञि प्राप्ते "न वैरे देवासुरादिभ्यः" वार्त्ति०तन्निषेधे अण्। १देवासुरयोर्वैरे। देवासुरशब्दोऽस्यत्र अनुवाके अध्याये वा विसृक्ता०अण्। देवासुरशब्दयुक्ते २अनुवाके ३अध्याये च पु०।

दैवाहोरात्र पु० कर्म०। देवानां समानेन दिनरूपे मानुषे वर्षात्मके काले।

दैविक त्रि० देवस्येदम् देवानुद्दिश्य प्रवृत्तः वा० ठक्। देवमात्रोद्देशेन कर्तव्ये श्राद्धे। "देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते। हविष्येन विशिष्टेन सप्तम्यादिषु यत्नतः" भविष्यपु०। दैवशब्दोऽपि तत्रार्थे। "सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि" मनुना देवमात्रोद्देश्यक श्राद्धे तन्निमित्ते रुचितशब्दस्य वक्तव्यतोक्तेः दैवशब्दस्य निरपेक्षदेवमात्रोद्देश्यकश्राद्धपरत्वावगतेः। २देवसम्बन्धिनि त्रि०। "अहोरात्रे विभजते सूर्यो मानुषदैविके। दैविकानां युगानान्तु सहस्रपरिसङ्ख्यया। यत् प्राक् द्वादशसाहस्रमुदितं दैविकं युगम्" "दशापराधतस्तोये दैविके नास्ति निग्रहः" इति च मनुः।

दैवी स्त्री देवस्येयम् अण् अञ् वा। १देवसम्बन्धिन्यां स्त्रियां "दैवी सम्पद् विमोक्षाय" गीता। "कालो मे मन्तव्यो हेतुगहना दैवी सतां यातना" शान्तिक०। २देवविवाहेनोढायां स्त्रियां "ब्राह्मीपुत्रः पुरुषानेकविंशतिं पूयते दैवीपुत्रश्चतुर्दश आर्षीपुत्रः सप्त" विष्णुसं०।

दैवोदास पु० दिवोदासे भवः अण्। १दिवोदासभवे तस्यापत्यं शिवादिअण्। २तदपत्ये स च प्रवरभेदः यथाह आश्व०श्रौ० १२।१०।१२ मित्रयुवां वाभ्रवेति "त्रिप्रवरं भार्गवदैवोदासवाभ्रवेति" दिवोदासेनाह्वयमानः अण्। ३दिवोदासेनाह्वयमाने वह्नौ च "दैवोदासो अग्निर्देवा अच्छा न मज्मना" ऋ० ८।१०३।२ "दैवोदासः दिवोदासेनाह्वयमानोऽग्निः" भा० तस्यापत्यम् इञ्। दैवोदासि इत्येव स च प्रतर्द्दन।

दैव्य न० देवस्येदम् "देवात् यञञौ" पा० यञ्। १देवस-म्बन्धिनि २भाग्ये च "ब्रूषे नमसा दैव्यं जनम्" ऋ० २।३०।११।

दैशिक त्रि०देशेन निर्वृत्तः तस्येदम् वा ठञ्। १देशकृते २दे-शसम्बन्धिनि च स्त्रियां ङीप्। "परत्वञ्चापरत्वञ्च द्विविधं परिकीर्तितम्। दैशिकं कालिकञ्चापि मूर्त एव तु दैशिकम्"। परत्वं सूर्यसंयोगभूयस्त्वज्ञानतो भवेत्। अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम्। तयोरसम-वायी तु दिक्संयोगस्तदाश्रये। दिवाकरपरिस्पन्द पूर्वो-त्पन्नत्वबुद्धितः। परत्वमपरत्वन्तु तदनन्तरबुद्धितः। अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः। अपेक्षाबुद्धि-नाशेन नाशस्त्वेषामुदाहृतः" भाषा०। "दैशिकपरत्वं बहुतर सूर्यसंयोगान्तरितत्वज्ञानादुत्पद्यते। एवं तदल्पीयस्त्व-ज्ञानादपरत्वमुत्पद्यते। अत्रावधित्वार्थं द्वितीयापेक्षा। यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः। पाटलि पुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति। तयोर्दैशिक-परत्वापरत्वयोः। असमवायी असमवायिकारणम्। तदाश्रये दैशिकपरत्वापरत्वाश्रये। दिवाकरेति। अत्र परत्वं अपरत्वञ्च कालिकं ग्राह्यम्। यस्य सूर्यपरिस्प-न्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः। कालिकपरत्वापरत्वे जन्यद्रव्य एव। अत्र कालिकपरत्वापरत्वयोः। एषां कालिकदैशिकपर-त्वापरत्वानाम्" सि०मु०। [सम्बन्धभेदे।

दैशिकविशेषणता स्त्री कर्म०। देशकृते अभावीयस्वरूप-

दैष्टिक त्रि० दिष्टं भाग्यमिति मतिर्यस्य "अस्ति नास्ति दिष्टं मतिः" पा० ठक्। भाग्यप्रमाणके दैवपरे। "नाल-म्बते दैष्टिकतां न निगीर्णति पौरुषे" माघः।

दैहिक त्रि० देहे भवः तस्येदं वा ठक्। १देहभवे २देहस-म्बन्धिनि च "दैहिकानां मलानां च शुद्धिषु द्वादश-स्वपि। वसाशुक्रमसृङ्मज्जामूत्रविड् घ्राणकर्णविट्। श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः" मनुः "एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः" भाग० १।७।५६। स्त्रियां ङीप्। "प्रजाः ससर्ज कतिधा दैहि-कीर्मानसीर्विभुः" भाग० ३।१०।१

दैह्य त्रि० देहे भवः यञ्। देहभवे जीवे। "अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः" भाग० १।४।२० "सूर्यो-ऽग्निस्त्वं मरुद्देवः सोमः सन्ध्याहनी दिवा। कं कुः स्वयं धर्म इति ह्येते दैह्यस्य साक्षिणः" भाग० ६।११।२६।

दो छेदे दिवा०पर०सक०अनिट्। द्यति अदात् दितः दितिः।

दोःशिखर न० ६त०। स्कन्धे राजनि०।

दोःसहस्रभृत् पु०दोःसहस्रं बाहुसहस्रं बिभर्त्ति भृ-क्विप्। १कार्त्तवीर्यार्जुने २बाणासुरे च "सहस्रभुजभृत् श्रीमान् कार्त्तवीर्योऽभवत् प्रभुः" भा०अनु० १५२अ० कार्त्तवीर्यस्य तथात्वमुक्तम् "अथ वीर्यमदोत्सिक्तो बाणो बाहुसह-स्रवान्" हरिवं० १७५अ० बाणस्य सहस्रबाहुतोक्ता।

दोग्धृ त्रि० दुह-तृच्। १दोहनकर्त्तरि २गोपाले ३वत्से ४अर्थोपजीविनि ५अर्के ६दोहनशीले च मेदि० "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा०स्त्रियां ङीप्। सा च ७धेन्वाम्। "दोहावसाने पुनरेव दोग्ध्रीम्" रघुः "अ-चला ह्यक्षया भूमिर्दोग्ध्री कामानिवोत्तमान्। दोग्ध्री वासांसि रत्नानि पश्नून् व्रीहीन् यवांस्तथा" भा०अनु० ६२अ०। गौणार्थलक्षणत्वाद्गात कर्मणि षष्ठी।

दोघ पु० दुह-अच् वेदे नि० ह्रस्व घः। दोग्धरि "उरुं दोघं धरुणं देवरायः" ऋ०५।१५।५। "दोघं कामानां दोग्धारम्" भा०।

दोड़ी स्त्री दोल-अच् गौरा० ङीष् लस्य डः। (दाली) फलप्रधाने वृक्षभेदे तस्याः फलम् अण्। हरीतक्या० लुक्। दोडी तत् फलेऽपि स्त्री।

दोध पु० दुह-घञ् बा० ह्रस्व घः। गोवत्से "देव! सदोघ कदम्बतलस्थ! श्रीधर! तावकनामपदं मे" छन्दोम०।

दोधक न० एकादशाक्षरपादके वर्णवृत्तभेदे "दोधकवृत्तमिदं भभभाद् गौ" वृत्तर०।

दोर पु०डोर+डस् रः। (डोर) इति ख्यातायां रज्ज्वाम्।

दोरक न० डोरक+डस् रः। बाणावस्थानतन्तौ "ततस्तदुद्धृतं हिरण्यं सूत्रं दोरकेण बध्नाति" कात्या०श्रौ०७।६।११

दोर्गन्तु पु० दोषा बाहुना गन्तुः कुण्ठितः। कुण्ठितहस्ते कार्यासमर्थबाहौ त्रिका०।

दोर्ग्रह पु० ६त०। १बाहुस्तम्भे रोगभेदे। दोर्गृह्णात्यऽ-नेन करणे घञ्। २बलवति हारा०।

दोर्ज्या स्त्री स्त०सि० ज्यायां भुजकारज्यायाम् "दोर्ज्यान्तर-गुणाभुक्तिस्तत्त्वनेत्रोद्धृता पुनः" सू० "दोर्ज्यान्तरगुणा भुजज्यानयनावसरे यत् ज्यापिण्डान्तरं तेन गुणिता" रङ्गना०।

दोर्मूल न० ६त०। भुजमूले कक्षे हेम०।

दोल पु० दुल-घञ्। दोलने श्रीकृष्णस्य स्वनामख्याते उत्स-वभेदे स च फाल्गुनपौर्णमास्यां कर्तव्यः खण्डतिथौ

तस्य कुत्र खण्डे कर्तव्यता तच्च दोलोत्सवतत्त्वे उक्तं यथा "यदा अरुणोदयकाले पौर्णमासीलाभस्तदा तत्रैव दोलयात्रा। उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्वदिने सङ्गवमध्याह्नकालव्यापित्वात् त्रिमुहूर्त्तव्यापित्वेन तिथेर्बलवत्त्वाच्च। यदा तिथिक्षयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सहायभावेन चतुर्दश्यादरः। एतेन पूर्वदिने अरुणोदयं विना पूर्वाह्णे पौर्णमासीलाभः परदिने सुहूर्त्तोन्यूनतिथिलाभस्तदा फाल्गुत्सवः पूर्वदिने युग्मवचनानुरोधादिति निरस्तम् उभयदिने कर्मयोग्यप्रशस्तकालप्राप्ततिथिसन्देह एव युग्मवचनप्रवृत्तेः। एवं पञ्चमीपर्यन्तासु तिथिषु तत्करणे अनयैव दिशा व्यवस्थोन्नेयेति" दोलयात्रातत्त्वम् "विशेषतः कलियुगे दोलोत्सवो विधीयते। फाल्गुने च चतुर्दश्या अष्टमे यामसंज्ञके। अथ वा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ। पूजयेद्विधिवत् भक्त्या फाल्गुचूर्णैश्चतुर्विधैः। सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः। हरिद्राक्षारयोगाच्च रङ्गरम्यैर्मनोहरैः। अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम्। एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत्। पञ्चाहानि त्र्यहाणि स्युर्दोलोत्सवो विधीयते। दक्षिणाभिमुखं कृष्णं दोलयानं सकृन्नराः। दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः" पाद्मे पातालखण्डे। "जैमिनिरुवाच फाल्गुने मासि कुर्वीत दोलारोहणमुत्तमम्। यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै। प्रत्यक्षं देवदेवस्य गोविन्दाख्यान्तु कारयेत्। प्रासादं पुरतः कुर्यात् षोडशस्तम्भसुच्छ्रितम्। चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम्। चारुचन्द्रातप माल्यचामरध्वजशोभितम्। भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्मितम्। फाल्गुत्सवं प्रकुर्वीत पञ्चाहानि त्र्यहाणि वै। फाल्गुन्याः पूर्वतो विप्रश्चतुर्दश्यां निशामुखे। वह्न्युत्सवं प्रकुर्वीत दोलमण्डपपूर्वतः। गोविन्दानुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्तितम्। आचार्यवरणं कृत्वा वह्निं निर्मथनोद्भवम्। भूमिं संस्कृत्य विधिवत् तृणराशिं महोच्छ्रितम्। सपशुं कारयित्वा तु वह्निं तत्र विनिःक्षिपेत्। पूजयित्वा विधानेन कुशाण्डविधिनाऽनेन। गोविन्दं पूजयित्वा तु भ्रामयेत् सप्तधा विभुम्। तस्मिन् काले हरिं दृष्ट्वा सर्वपापैः प्रमुच्यते। यत्नात्तं रक्षयेद्वह्निं यावद् यात्रा समाप्यते। प्रान्तयात्रे चतुर्दश्यां गोविन्दप्रतिमां शुभाम्। वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम्। उपचारविशिष्टैस्तु प्रत्यर्चामपि पूजयेत्। ततो वरञ्च वसनं मालाञ्च द्विजसत्तमाः। अर्चायां विन्यसेन् मन्त्रं परं ज्योतिर्विभावयन्। ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः। रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम्। नानातूर्यनिनादैश्च शङ्खध्वनिपुरःसरम्। जयशब्दैस्तथा स्तोत्रैः पुष्पवृष्टिभिरेव च। कृतध्वजपताकाभिश्चामरव्यजनैस्तथा। निरन्तरं दीपिकाभिस्तथा कुर्यान्महोत्सवम्। आगच्छन्ति तदा देवाः पितामहपुरोगमाः। दृष्टसृष्टिगणैः सार्द्धं गोविन्दस्य महोत्सवम्। भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः। महास्नानस्य विधिना स्नपनं तस्य कारयेत्। पञ्चामृतैश्च वै सर्वैः तेषामन्यतमेन वा। स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत्। संमोज्य भूषयेद्देवं वस्त्रालङ्कारमाल्यकैः। नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत्। सप्रकृत्यस्ततो देवं दोलमण्डपमानयेत्। सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः। अधोदेशे मण्डपं तं सप्तगोभ्रामयेत्ततः। ऊर्द्ध्वदेशे पुनस्तद्वत् स्तम्भवेद्यान्तु सप्त वै। यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम्। इयं लीला भगवतः पितामहसुखेरिता" स्कान्दे उत्कलखण्डे। गारुडे "चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम्। दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ" तल्लिखिता च पद्मपुराणे "ऊर्जे रथं मधौ दोलां श्रावणे तन्तुपर्व च। चैत्रे मदनकारोपमकुर्वाणो व्रजत्यधः। विष्णुं दोलास्थितं दृष्ट्वा त्रैलोक्यस्योत्सवो भवेत्। तस्मात् कार्यशतं त्यक्त्वा दोलाहे उत्सवं कुरु"। दोलोत्सवविधिः "चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च। नित्यपूजां विधायाथ कुर्याद्दोलोत्सवं व्रती। तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत्। संमान्य वैष्णवांस्तैश्च गीतनृत्यादि कारयेत्। महानीराजनं कृत्वा प्रक्षिपेदच्युतोपरि। गन्धानुलेपचूर्णानि विचित्राणि विभागशः। सन्तोषयेद् वैष्णवांस्तैश्च गतिनृत्यादिभिः प्रभुः। नत्वाभ्यर्च्याऽप्रमत्तः सन् दोलामारोहयेच्छुभाम्। नीत्वा वह्निर्वेदिकायामुत्तुङ्गाया यथाविधि। अभ्यर्च्यान्दोलयेत् कृष्णं सर्वलोकावलोकितम्। एवमभ्यर्चयन् यामे यामे त्वान्दोलयन् प्रभुम्। महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः। एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः। प्रणम्य प्रार्थ्य निर्मल्यं कृष्णं स्नानयमानयेत्। चैत्रे मासि सिते पक्षे

तृतीयायां रमापतिम्। दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ। यत् फाल्गुनस्य राकादावुत्तरा फल्गुनी यदा। तदा दोलोत्सवः कार्यस्तत्र श्रीपुरुषोत्तमे" इति हरिभक्तिविलासः।

दोला स्त्री दुल–अच् अ वा टाप्। (डोली) १यानभेदे, २उद्यानादौ क्रीड़ार्थं दोलनयन्त्रे च। स्वार्थे क। दोलिका तत्रार्थे अमरः। ३स्वेदनार्थे यन्त्रभेदे शब्दार्थचि०। दोलां करोति क्यङ् दोलायते अदोलायिष्ट "मतिर्दोलायते न्यूनं सतामपि सलोकिभिः" हितो० "दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम्। रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते" स्का०पु०उत्क०।

दोलायुद्ध न० दोलेव युद्धम्। अनियतजयपराजययुतयुद्धे। दोलाया यथा दोलनेनान्यतरपार्श्वे स्थितिरनियता एवं जयपराजययोरेकतरपक्षे अनियततया स्थितिर्यत्र तादृशं युद्धं दोलायुद्धमिति व्यवह्रियते। "दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम्" माघः।

दोली स्त्री दोल्यतेऽनया दुल–बा० करणे इन् वा ङीप्। (डुली) ख्याते यानभेदे बाह्यखट्वायाम् हारा०।

दोष पु०दुष–भावे करणे वा घञ्। १अपकर्षप्रयोजके वस्तुनिष्ठे धर्मभेदे। यथा काव्यदोषा श्रुतिकटुत्वादयः हेतुदोषाः व्यभिचारादयः भ्रमदोषाः पित्तादयः। २दूषणे "दोषो विचारसुभगो यदि दृश्यते तत् व्याख्या मम प्रथमसेव न दूषणीया" महेश्वरः। "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" कुमा० "अदाता वंशदोषेण कर्मदोषात् दरिद्रता। उन्मादो मातृदोषेण पितृदोषेण मूर्खता"। काव्यदोषास्तु काव्य०प्र०उक्ता यथा "मुख्यार्थहतिर्दोषो रसस्य मुख्यस्तदाश्रयाद्वाच्यः। उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेऽपि सः" इतिरुक्तेः। "दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्। निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम्। सन्दिग्धमप्रतीतम् व्याख्यं नेयार्थमथ भवेत् क्लिष्टम्। अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव"। तत्र श्रुतिकटु परुषवर्णरूपम् १दुष्टम्। २च्युतसंस्कृति व्याकरणलक्षणहीनम्। ३ अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतम्। यथा दैवतशब्दः पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते। ४असमर्थं यत्तदर्थं पश्यते न च तत्राऽस्य शक्तिः यथा हन्तीति गमनार्थम्। ५निहतार्थं यदुभयार्थनप्रसिद्धेऽर्थे प्रयुक्तम्। यथा लोहितशब्दः उच्चनार्थे। ६अनुचितार्थं यथा, पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थम्। ७निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम्। ८ अवाचकं यथा जन्तुपदवदातर्यर्थे प्रयुक्तं न च तस्याभिधायकम्। यच्चोपसर्गसंसर्गादर्थान्तरगतम्। यथा दधात्यर्थे विदधातीति पदम्। ९त्रिधेति व्रीड़ाजुगुप्सामङ्गलव्यञ्जकत्वात् अश्लीलम्। यथा साधनवायुविनाशशब्दा व्रीड़ादिव्यञ्जकाः। १२सन्दिग्धं यथा बन्धामिति किं हठहृतमहिलायां, किं वा नमस्यामिति सन्देहः। १३अप्रतीतं यत् केवले शास्त्रे प्रसिद्धम्। यथा आशयशब्दः योगशास्त्रादावेव वासनार्थो नान्यत्र। १४व्याख्यं यत् केवले लोके स्थितम्। यथा कच्चादिशब्दाः। १५ नेयार्थम् "निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित् काश्चित्तैव त्वशक्तितः" इति यच्चिह्नं लाक्षणिकम् यथा चमेटापाटवेन निर्जितत्वं लक्ष्यते। १६ क्लिष्टं यत्तार्थपतिपत्तिर्व्यवहिता यथा अनिनेतजज्योतिरुद्गमभासिशब्दस्य कुमुदार्थपरत्वे क्लिष्टत्वम्। १७अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत्। यत्र अनुवाद्यमनुक्त्वा प्रथमं विधेयनिर्देशः यथा न्यक्कारोह्ययमेवैतत्र अनुवाद्यविधेययोरक्रमेण निर्देशो यत्र। समासान्तर्गतत्वेन विधेयांशस्य झटित्यबोधोऽपि यत्र। यथा तत्रैव पद्ये दृषोच्छूनैरित्यत्र दृषत्वसुच्छूनत्वे विधेयं तच्च समासान्तर्गततया नाशु बोध्यते। १८विरुद्धमतिकृत्। यथा भवानीपतिशब्दस्य भवान्याःपत्यन्तरप्रतीतिकारित्वम्। "अपास्य च्युतसंस्कारमसमर्थं निरर्थकम्। वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन"। वाक्यमात्रगतादोषास्तु।

"प्रतिकूलवर्णसुपहतलुप्तविसर्गं विसन्धि हतवृत्तम्। न्यूनाधिककथितपदम् अभवन्मतयोगमनभिहितवाच्यम्। अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम्। भग्नप्रक्रममक्रमम् अमतपरार्थं च वाक्यमेव तथा" रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं १प्रतिकूलवर्णम् यथा शृङ्गारे टवर्गादि रौद्रे मधुरवर्णादि। २ उपहत उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् एतच्च असकृत्प्रयोगे एव दोषो न सकृत्प्रयोगे। ३ विसन्धिः सन्धेर्वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वञ्च। संहितां न करोमीति स्वेच्छया सकृदपि दोषः प्रगृह्यादिहेतुकत्वे तु असकृत्। तत्र चलचण्डामरचेष्टितमित्यादौ अश्लीलता तर्यालोत्यादौ कष्टतेति बोध्यम्।

४हतं लक्षणानुसरणेऽप्यश्रव्यं अप्राप्तगुरुभावान्तलघुरसानुगुणञ्च वृत्तं यत्र तत् हतवृत्तम्। ५न्यूनपदं यथा "सुचिरसुषितं वल्कलधरैरिति" वेणीसंहारपद्ये अस्माभिरिति विशेष्यं पदं न्यूनम्। तथा तत्रैव पद्ये "गुरुः खेदं खिन्ने मर्यात्यत्र" खिन्ने इत्यस्मात् पूर्वं इत्यमिति पदं च न्यूनम्। ६अधिकं यथा स्फटिकाकृतिनिर्मल इत्यत्राकृतिपदमधिकम्। ७कथितपदं यथा एकत्र पद्ये एकस्यैव लोलादिशब्दस्य द्विधा प्रयोगे। ८एतत्प्रकर्षम्। यत्रादौ गाढबन्धनरूपप्रकर्षः अन्ते तु तद्धीनता तत्। ९समाप्तपुनरात्तम्। क्रिययैव वाक्यसमाप्तेर्नियमात् क्रियाप्रयोगादनन्तरं यत्र तत्क्रियासापेक्षकारकान्तरादिप्रयोगः तत्र समाप्तपुनरात्तत्वम्। १०द्वितीयार्द्धगतैकवाचकशेषप्रथमार्द्धम्। द्वितीयार्द्धगतमेकं पदं प्रथमार्द्धस्य समापकं यत्र तथाभूतं वाक्यं दुष्टमित्यर्थः। ११न भवन् मतः दृष्टः योगः सम्बन्धः यत्र तत्। १२अवश्यं वक्तव्यमनुक्तम्। १३अस्थानस्थपदम्। १४अस्थानस्थसमासञ्च। १५संकीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति। १६गर्भितं यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति। १७प्रसिद्धिमतिक्रान्तं यथा रवौ मण्डूकादिषु प्रसिद्धो, न तु सिंहादिनादे। १८भग्नः प्रक्रमः प्रस्तावो यत्र तत्। १९अविद्यमानः क्रमो यत्र तदक्रमम्। २०अमतः प्रकृतविरुद्धः परार्थो यत्र। अर्थदोषास्तु। अर्थोऽपुष्टः कष्टोव्याहतपुनरुक्तदुष्क्रमग्राम्याः। सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च। अनवीकृतः सनियमाऽनियमविशेषाविशेषपरिवृत्ताः। साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः। विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः"। यत्रातिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्त इत्यपुष्टास्तत्र, न त्वसङ्गताः पुनरुक्ता वा।

रसदोषास्तु "व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया व्यक्तिरनुभावविभावयोः। प्रतिकूलविभावादिग्रहो दीप्तिः पुनःपुनः। अकाण्डे प्रथनच्छेदौ अङ्गस्याथतिविस्तृतिः। अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः। अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः"।

चन्द्रालोके तु दोषसामान्यविशेषलक्षणान्युक्त्वा दिङ्मात्रमुदाहृतं यथा

"स्याच्चेतोविगता येन सज्जता रसणीयता। शब्दे ऽर्थे च कृतोन्मेषं दोषमुद्वमयन्ति तम्। भवेच्छ्रुतिकटुर्वर्णः श्रवणोद्वेजने पटुः। विख्यायते व्याकरणविरुद्धं च्युतसंस्कृतिः। अप्रयुक्तः देवतादौ शब्दे पुंल्लिङ्गतादिकम्। असमर्थन्तु हन्त्यादेः प्रयोगो गमनादिषु। स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः। निहतार्थं लोहितादौ शोणितादिप्रयोगतः। एकाक्षरं विना भूभृत्सूर्यादिकं खलतादिवत्। व्यनक्त्यनुचितार्थं यत्पदमाङ्कस्तदेव तत्। दयसुङ्कतशाखाग्रकेलिकौतुकवानरी। निरर्थकं तु हीत्यादि पूरणैकप्रयोजनम्। व्यर्थं विदधदित्यादौ दधदाद्यगवाचकम्। धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः। अश्लीलं त्रिविधं व्रीडाजुगुप्साऽमङ्गलात्मना। आह्लादसाधनं वायुः कान्तालाभे भवेत् कथम्। स्यादुद्व्यर्थमिह सन्दिग्धं न द्यां यान्ति पतत्त्रिणः। स्यादप्रतीतं शास्त्रैकगम्यं पीताऽनुमादिवत्। शिथिलं, शयने चित्ते मच्चित्तं ते शशिन्निव। मस्तपृष्ठकटीलोष्ठगल्लादि ग्राम्यमुच्यते। नेयार्थं लक्षणात्वत्तप्रसराद्मनोहरम्। हिमांशोर्हीरधिक्कारजागरे यामिकाः कराः। क्लिष्टमर्थो यदीयोऽर्थश्चेतः श्रेणिकृच्छति। हरिप्रियापितृवारप्रवाहप्रतिमं वचः। अविमृष्टविधेयांशः समासपिहिते विधौ। विशन्ति विशिखप्रायाः कटाक्षाः कामिनां हृदि। अपराधीन इत्यादिविरुद्धमतिकृन्मतम्। अन्यसङ्गतसुतुङ्गहारशोभिपयोधरा। रसाद्यनुचितं वर्णं प्रतिकूलाक्षरं विदुः। न मामङ्गद! जानामि रावणं रणदारुणम्। यस्मिन्नुपहतो लुप्तो विसर्गे दृश्यते तथा। कुसम्बिः वटवागच्छ विसम्बिः न्यपती इमौ। छन्दश्छन्दमनुक्तोऽपि छन्दोदोषश्चकास्ति चेत्। विशाललोचने! पश्याऽम्बरं तारातरङ्गितम्। न्यूनं त्वत्खड्गसम्भूतयशः पुष्पं नभस्तलम्। अधिकं भवतः शत्रून् दशत्यमिलताफणी। कथितं पुनरुक्ता वाक् ग्रामाङ्कग्रामलोचना। विकृतं दरविकृतैरैयरुः कुञ्जराः पुरम्। एतत्प्रकर्षहीनाऽनुप्रासादित्वे यथोत्तरम्। गम्भीरारम्भदम्भोलिपाणिरेष समागतः। समाप्तपुनरात्तं स्यादेष पीयूषभाजनम्। नेत्रानन्दी तुषारांशुरेत्यम्बुनिधिवान्धवः। अङ्गान्तरपदापेक्षि क्रीडान्टत्येषु सस्मितम्। मेघारम्भं स्तुमः शम्भुमङ्गारम्भोरुविग्रहम्। अभवन्मतयोगः स्याच्चेदभिमतोऽन्वयः। येन बद्धोऽम्बुधिर्यस्य रामस्यानुचरा वयम्। स एष लङ्कालङ्कारं रावणं हन्तुमुद्यतः। द्विषां सम्पदमाच्छिद्य यः शत्रून् समपूरयत्। अस्थानस्थसमासं सविहङ्गनमनोरमम्।

मिथः पृथग्वाक्यपदैः सङ्कीर्णं यत्तदेव तत्। वक्त्रेण भ्राजते रात्रिः कान्ता चन्द्रेण राजते। ब्रह्माण्डं त्वद्यशः पूरगर्भितं भूमिभूषणम्। आकर्णय पयः पूर्णसुवर्णकलशायते। भग्नप्रक्रममारब्धशब्दनिर्वाहहीनता। अक्रमः कृष्ण! पूज्यन्ते त्वामनाराध्य देवताः। अमताथान्तरं सुख्येऽसुख्ये वार्थे विरोधकृत्। त्यक्तहारसुरः कृत्वा शोकेनालिङ्गिताऽङ्गना। अपुष्टार्थो विशेष्यं चेन्न विशेषोविशेषणात्। विशन्ति हृदयं कान्ताकटाक्षाः खड्गनत्विषः। कष्टः स्वष्टावबोधार्थमक्षमो वाच्यसन्निभः। व्याहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः। सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते। कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः। दुःक्रमत्वाद्यसन्दिग्धास्त्रयो दोषाः क्रमादमी। त्वद्भक्तः कृष्ण! गच्छेयं नरकं स्वर्गमेव वा। एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम्। ब्रूत किं मेव्यतां चन्द्रसुखीचन्द्रकिरीटयोः। अनौचित्यं कीर्तिलतां तरङ्गयति यः सदा। प्रसिद्धया विद्यया वापि विरुद्धं द्विविधं मतम्। न्यस्तेयं पगत्र कन्दर्पप्रतापधवलद्युतिः। केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम्। सामान्यपरिवृत्तिः स्यात् कुण्डलच्छविविग्रहा। विशेषपरिवृत्तिः स्याद्दयिता मम चेतसि। द्वे स्तः सहचराऽचारुविरुद्धान्योन्यसङ्गती। ध्वाङ्क्षाः सन्त्य तनयं खं परञ्च न जानते। सरोजनेत्र! पुत्रस्य मुखेन्दुमवलोकय। पालयिष्यति ते गोत्रमसौ नरपुरन्दरः। पदे तदंशे वाक्यांशे वाक्ये वाक्यकदम्बके। यथानुसारमभ्यूहेदुदोषान् शब्दार्थसम्भवान्"। श्रव्यावृत्तिव्यवहारान्यतरप्रयोजनविघटके धर्मभेदे स च दोषस्त्रिविधः। अव्याप्तिः अतिव्याप्तिः असम्भवः। ४विध्यतिक्रमजनितेऽदृष्टभेदे मीमांसकाः। ५गुरुतल्पगमनाभक्ष्यभक्षणादिजनिते पापे मेदि०। दुष—वैकृत्ये करणे घञ्। ६वातपित्तकफेषु यथाह भाव०प्र०अथ दोषाः प्रवक्ष्यन्ते इत्युपक्रमे दोषस्वरूपमाह वाग्भटः "वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः। विकृताऽविकृता देहं घ्नन्ति ते वर्ड्यन्ति च। ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। वयोऽहोरात्रभुक्तानामन्तमध्यादिगाः क्रमात्" दोषशब्दस्य निरुक्तिमाह "धातवश्च मलाश्चापि दुषन्त्यभियतस्ततः। वातपित्तकफा एते त्रयो दोषा इति स्मृताः" दोषा इत्यत्र दुष वैकृत्ये इति दुषधातोः दुषन्त्यभिरिति वाक्ये अकर्त्तरि च कारके संज्ञायामित्यनेन सूत्रेण करणेऽर्थे घञ् प्रत्ययः। ७तेषां विकारे च। गौ०उक्तौ प्रवृत्तिप्रयोजके रागद्वेषमोहात्मके ८धर्मभेदे तल्लक्षणादिकं सू०भा०उक्तं यथा "प्रवर्त्तनालक्षणा दोषाः" सू० "प्रवर्त्तना प्रवृत्तिहेतुत्वम् ज्ञातारं हि रागादयः प्रवर्त्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति प्रत्यात्मवेदनीया ह्यमे दोषाः कस्मात्? लक्षणतो निर्दिश्यन्त इति कर्मलक्षणाः खलु रक्तद्विष्टमूढाः रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा भजते, तथा द्विष्टस्तथा मूढ इति दोषा रागद्वेषमोहा इत्युच्यमाने बहुनोक्तं भवतीति" भा० विवृतमेतत् तद्वृत्तौ यथा "दोषं लक्षयति। दोषा इति बहुवचनं रागद्वेषमोहात्मकलक्ष्यत्रयज्ञापनाय प्रवर्त्तना प्रवृत्तिजनकत्वं तदेव लक्षणं येषाम् यद्यपीदं शरीरादृष्टेश्वरेच्छादावतिव्याप्तं तथापि लौकिकप्रत्यक्षसविषयत्वे सतीति विशेषणीयं यागादिगोचरप्रमावारणाय प्रमान्यत्वे सतीति विशेषयन्ति"।

तद्भेदाश्च सू० भा० ४अ० १आह्निके उक्ता यथा "तथा दोषाः" सू० "परीक्षिता इति बुद्धिसमानाश्रयत्वादात्मगुणाः, प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः, संसारस्यानादित्वादनादिना प्रबन्धेन प्रवर्त्तन्ते, मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति प्रादुर्भावनिरोधधर्मका इत्येवमाद्युक्तं दोषाणामिति प्रवर्त्तनालक्षणा दोषा इत्युक्तं तथा चेमे मानेर्ष्यास्पृयाविचिकित्सामत्सरादयः ते कस्मान्नोपसङ्ख्रायन्ते इत्यत आह" भा०।

"तत्तैराश्यं रागद्वेषमोहार्थान्तरभावात्" सू० "तेषां दोषाणां त्रयोराशयस्त्रयः पक्षाः। रागपक्षाः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षाः—क्रोधः ईर्ष्याऽसूया द्रोहोऽमर्ष इति। मोहपक्षाः—मिथ्याज्ञानं विचिकित्सा मानः प्रमादः इति। तैराश्याच्चोपसङ्ख्रायन्ते इति, लक्षणस्य तद्भेदात् त्रित्वमनुपपन्नम्, नानुपपन्नं रागद्वेषमोहार्थान्तरभावात् कामक्लिन्नलक्षणो रागः, अमर्षलक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इति। एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्, विजानात्ययं शरीरी रागसत्पन्नम्, अस्ति मेऽध्यात्मं रागधर्म इति। विरागञ्च विजानाति नास्ति मेऽध्यात्मं रागधर्म इति। एवमितरयोरपीति। मानेर्ष्याऽसूयाप्रभृतयस्तु तैराश्यमनुपतिता इति नोपसङ्ख्रायन्ते" भा०। विवृतमेतत् वृत्तौ

"तेषां दोषाणां त्रयो राशयः त्रयः पक्षा न तु रागद्वेषमोहानामेकैकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात् तथा च भयशोकमानादीनामेष्वेवान्तर्भावान्न विभागन्यूनत्वं इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वाच्च विभागाधिक्यम् इच्छात्वादिकन्तु रागादावनुभवसिद्धं तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति कामो रिरंसा। रतिश्च विजातीयस्त्रीसंयोगः। नारीगताभिलाष इति तु न युक्तं स्त्रियाः कामेऽव्याप्तेः। मत्सरः स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा यथा राजकीयाद्दपानाच्छोदकं मेयम् इत्यादि। एवं परगुणनिवारणेच्छाऽपि। स्पृहा धर्माविरोधेन प्राप्तीच्छा। तृष्णा इदं मे न क्षीयतामितीच्छा उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः। परवञ्चनेच्छा माया कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः। द्वेषपक्षः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽभिमान इति क्रोधो नेत्रलोहित्यादिहेतुर्दोषविशेषः। ईर्ष्या साधारणे वस्तुनि परस्वत्वात्तदुपहीतरि द्वेषः यथा दुरन्तदायादानाम्। असूया परगुणादौ द्वेषः द्रोहो नाशाय द्वेषः हिंसा तु दोषजन्या। परे तु तान्द्रोहं मन्यते। अमर्षः कृतापराधे असमर्थस्य द्वेषः अभिमानोऽपकारित्वकिञ्चित्करत्वात्मनि द्वेषः। मोहपक्षा विपर्ययसंशयतर्कमानप्रमादभयशोकाः। विपर्ययो मिथ्याज्ञानापरपर्यायोऽयथार्थनिश्चयः एकधर्मिकविरुद्धभावाभावज्ञानं संशयः स एव विचिकित्सेत्युच्यते व्याप्यारोपाद्व्यापकप्रसञ्जनं तर्कः आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः गुणवति निर्गुणत्वधीरूपक्षयोऽपि मानेऽन्तर्भवति। प्रमादः पूर्वकर्त्तव्यतया निश्चितेऽप्यकर्त्तव्यताधीः एवं वैपरीत्येऽपि. भयमनिष्टहेत्वपनिपाते तत्परित्यागानर्हता ज्ञानं शोक इष्टवियोगे तल्लाभानर्हताज्ञानम्" इमिथ्याज्ञानजन्यवासनायां दुःखजन्यप्रवृत्तिदोषा मिथ्याज्ञानानामिति सूत्रवृत्तौ चरमे दोषशब्दस्य तथार्थत्वाभिधानात्। १०वसुपुत्रभेदे द्रोणशब्दे दृश्यम् भ्रमजनकादोषास्तु पित्तादयः भाषापरिच्छेदे उक्ता यथा "दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः।" "अप्रमां प्रति दोषः जनकः कारणम्। प्रमां प्रति गुणः कारणम्। तत्रापि पित्तादिरूपा दोषा अननुगताः। तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम्। गुणस्य प्रमांजनकत्वन्तु अनुमानात् सिद्धम्। यथा प्रमा ज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत्। न च दोषाभाव एव कारणमस्त्विति वाच्यम् पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात्। विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात्। न च गुणसत्त्वेऽपि पित्तप्रतिबन्धाच्छङ्खे न सैत्यज्ञानम्। अतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च। तत्र दोषाः के इत्याकाङ्क्षायामाह। पित्तेति। क्वचित् पीतादिभ्रमे पित्तं दोषः। क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः। क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः। ११गोवत्से। स्वार्थे क। दोषक तत्रार्थे। "धातपित्तकफा दोषाः दुष्टाः स्युः सप्त धातवः" भा० नि० दोषक्षयवृद्धिज्ञानादिकं सुश्रुते सूत्रस्थाने १६अ० उक्तं तत्रैव द्रष्टव्यम्। न्यायमतसिद्धहेत्वाभासाख्याः हेतुदोषाश्च हेत्वाभासशब्दे वक्ष्यन्ते तत्सामान्यलक्षणं च यादृशविशिष्टविषयकत्वेन ज्ञानस्यानुमितितत्कारणीभूतज्ञानप्रतिबन्धकत्वं तत्त्वम्। तत्पक्षकतत्साध्यकानुमितौ यावन्तो दोषाः सम्भवन्ति तावदन्यतमत्वम् वा "दुष्टधातोरिवास्माकं दोषसम्पत्तये गुणः" उद्भ०

दोषग्राहिन् त्रि० दोषं गृह्णाति ग्रह-णिनि। खले हला०। "विहाय सूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः। दोषग्राही गुणत्यागी चालनीव हि दुर्जनः" उद्भटः।

दोषघ्न त्रि० दोषं वातादिविकारं हन्ति हन-टक्। धातुवैषम्यरूपदोषनाशके औषधादौ "दोषघ्ना पटुपी पाण्डुरोगार्शः कुष्ठनाशनाः" सुश्रुतः।

दोषज्ञ त्रि० दोषं कर्त्तव्याकरणे दोषं जानाति ज्ञा-क। १पण्डिते अमरः। "अथ प्रदोषे दोषज्ञः संवेशाय विशां पतिम्" रघुः। २परकीयदोषज्ञात्मात्रे त्रि०। "अज्ञातदोषैर्दोषज्ञैः" माघः।

दोषण्य त्रि० दोष्णि भवः दोष+यत् दोषज्ञादेशः "वे चाभावकर्मणोः" प्रकृतिवद्भावः। ब्राह्मभवे "यक्ष्मं दोषण्यसंज्ञाभ्याम्" ऋ० १०.१६२।२

दोषत्रय न० द्वन्द्व०। वातपित्तकफानां त्रिके राजनि०।

दोषभेद पु० ६त०। द्विषष्टिप्रकारे दोषभेदे स च सुश्रुते उक्तो यथा

अथातो दोषभेदविकल्पनामाध्यायं व्याख्यास्यामः।

"द्विषष्टिर्दोषभेदा ये पुरस्तात्परिकीर्तिताः। कति तत्रैकशो ज्ञेया द्विशो वाप्यथ वा त्रिशः। तस्य तद्वचनं श्रुत्वा संशयच्छिन्नमहातपाः। प्रीतात्मा ऋषयो-ऽब्रूत सुश्रुतायाह तत्त्वतः। त्रयो दोषा धातवश्च पुरीषं मूत्रमेव च। देहं सन्धारयन्त्येते ह्यव्यापन्ना रसैर्हितैः। पुरुषः षोडशकलः प्राणश्चैकादशैव ये। रोगाणान्तु सहस्रं यच्छतं विंशतिरेव च। त्रयश्च पञ्च द्रव्याणां त्रिसप्तत्यधिकोत्तरम्। व्याप्ततः कीर्त्तितं तद्धि भिन्नदोषास्त्रयोगुणाः। द्विषष्टिधा वदन्त्येते भूयिष्ठमिति निश्चयः। त्रयएव पृथक् दोषा द्विशो नव समाधिकैः। त्रयोदशाधिकैकद्विसमध्योल्वणैस्त्रिशः। पञ्चाशदेवन्तु सह भवन्ति क्षयमागतैः। क्षीणमध्याधिकक्षीणक्षीणद्वैस्तथापरैः। द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा। मिश्रधातुमलैर्दोषा यान्त्यसंख्येयतां पुनः। तस्मात्प्रसङ्गं संयम्य दोषभेदविकल्पनैः। रोगं विदित्वोपचरेद्रसभेदैर्यथेरितैः। भिषक् कर्त्ता च करणं रसा दोषास्तु कारणम्। कार्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा"।

दोषल त्रि० दोष+मत्वर्थे लच्। दोषयुक्ते "केदारं मधुरं प्रोक्तं विपाके गुरु दोषलम्। तद्वत् पाल्वलमुद्दिष्टं विशेषाद्दोषलन्तु तत्" सुश्रुतः। [अध०१६।४६

दोषस् स्त्री दुष-असुन्। रात्रौ "सन्ध्यथोषसो दोषसश्च"

दोषा अव्य० दुष्यत्यत्र दुष-बा० आधारे आ स्वरा०। १रात्रावित्यर्थे "दोषाऽपि नूनमहिमांशुरसौ किलेति" माघः दोषापि रात्रावपीत्यर्थः। दिवाभूता रात्रिः दोषाभूतमहः इति भाष्यप्रयोगात् अस्यप्रत्ययेऽपि तस्य वृत्तिता। ततः ष्ण्ल् तट् च। दोषातन रात्रिभवे त्रि० "दोषातनं बुधवृहस्पतियोगदृश्यः" रघुः। (अभ्रवृन्दम्) अस्य टाबन्तस्त्रीत्वमपि "वर्षकालदिवस इव क्षयितदोषः" काद०। दोषाशब्दस्य टाबन्तत्वे एव गौणे सुखसम्भवः अव्ययत्वे न तत्सम्भवः इति बोध्यम्। दोस्+भागुरिमते स्त्रियां टाप्। २बाहौ स्त्री शब्दार्थचि०।

दोषाकर पु० दोषा रात्रौ करोऽस्य। १चन्द्रे "यामित्रवेध विहितानपहत्य दोषान् दोषाकरः सुखमनेकविधं विभत्ते" ज्यो०त०। ६त०। २द्रोषाच्चाकरे च।

दोषाक्लेशी स्त्री दोषां बाहुं क्लिश्नाति क्लिश-अच् गौरा० ङीष्। वनवर्दुरिकायां राजनिः।

दोषाङ्कुश पु० दोषाणां काव्यदोषाणामङ्कुश इव निरासकत्वात्। चन्द्रालोकोक्ते काव्यदोषनिवारके काव्यधर्मभेदे तल्लक्षणादि तत्रोक्तं यथा

"दोषमापतितं स्वान्ते प्रसरन्तं विशृङ्खलम्। निवारयति यस्तेषा दोषाङ्कुशमुशन्ति तम्। दोषो गुणत्वं तनुते दोषत्वं वा निरस्यति। भवन्तमथ वा दोषं नयत्यत्याज्यतामसौ। सुखं चन्द्रश्रियं धत्ते श्वेतमन्तुकराङ्कुरैः। अत्र हासरसोद्देशे ग्राम्यत्वं गुणतां गतम्। तव दुग्धाब्धिसम्भूतेः कथं जाता कलङ्किता। कवीनां समयाद्विद्याविरुद्धोऽदोषतां गतः। दधार गौरी हृदये देवं हि मकराङ्कितम्। अत्र श्लेषोदयाच्चैव त्याज्यं हीति निरर्थकम्"।

दोषातिलक पु० दोषा रात्रेस्तिलक इव। प्रदीपे त्रिका०

दोषास्य पु० दोषा आस्यमिव प्रकृष्टदीप्तिसाधनं वा यस्य। प्रदीपे शब्दच०। [रोगे शब्दच०।

दोषिक त्रि० दोषः वातादिविकारः कारणतयास्त्यस्य ठन्।

दोषिन् त्रि० दुष-णिनि। दोषयुक्ते शब्दलङ्कृते दोषशब्दात् अस्त्यर्थे इनिकल्पनं "नैकाच्चरात् कृतो जातेः षष्ठ्याश्च न तौ स्मृतौ" इत्यनुशासनविरुद्धम् (तौ। इनिठनौ)। सति च गत्यन्तरे अभियुक्तप्रयोगे तस्य सङ्कोचकल्पनस्य काचित्कत्वम् भाष्यकृता व्यवस्थापितम् यथा रसिक इत्यादिप्रयोगदर्शनात् न सर्वत्र।

दोषैकदृश् त्रि० दोषमेवैकं पश्यति दोषैकशब्दयोः कर्मधारये एकशब्दस्य पूर्वकालैकेत्यादि पा० परनिपाते तत्पूर्वकात् दृशः क्विप्। खले अमरः। दोषे एकस्मिन् दृग्ज्ञानं यस्येति विग्रहं वदन् भरतः भ्रान्तएव सति गत्यन्तरे व्यधिकरणबहुव्रीहेरसाधुत्वनियमात्।

दोस् पु०न० दस्यतेऽनेन दस-डोसि अर्द्धर्चा०। बाहौ "नूनमस्मद्विनाशाय विधिना दोः प्रसारितः" रामा०लङ्का० १२१ "दोर्ं तस्य तथा विधस्य भजते" मल्लिनाथधृतवाक्यम् "ककुद्दोष्णी" इति बहाभाष्यप्रयोगे अस्य क्लीवता "तस्योपाङ्गवदुद्यम्य दक्षिणं दोर्निशाचरः" रघुः। "दोर्दण्डेन धराधरैररिगिरस्तेनापि भूमण्डलम्" सुवन्धुः। "दुहितरमनुकम्प्रामद्रिराजाय दोर्भ्याम्" कुमा०। अस्य भत्वे याजादौ तद्धिते च वा दोष्शब्दादेशः। पुंसि दोः दोर्भ्यां दोषः क्लीबे दोः दोषणी दोष्णी दोंषि यस्यादौ च दोंषि दोषाणि दोष्णा दोषा दोषभ्यां दोर्भ्यामित्यादि।

दोह्य पु॰ दोषि दोर्व्यापारे तिष्ठति स्था–क वा रोर्लोपः। १सेवके २क्रीड़के च त्रिका॰ उपचारात् ३क्रीड़ायाम् ४सेवायाञ्च त्रिका॰ ५बाहुस्थिते त्रि॰।

दोह पु॰ दुह–भावे घञ्। १दोहने "दुग्धेऽर्थे सर्वान् कामान् यो वाचोदोहः" का॰उ॰ "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा॰ "दोहावसाने पुनरेव दोग्धीम्" रघुः। आधारे घञ्। २दोहनपात्रे शब्दच॰। कर्मणि घञ्। ३दुग्धे शब्दार्थचि॰।

दोहज त्रि॰ दोहात् दोहनाज्जायते जन–ड। १दोहनजाते २दुग्धे न॰ शब्दार्थकल्प॰।

दोहड़िका स्त्री मात्राछन्दभेदे (दोहा) तच्छब्दादि छन्दोम॰ उक्तं यथा "मात्रात्रयोदशकं यदि पूर्वं लघुकविरामि। पठ पुनरेदादशकं दोहड़िका द्विगुणेन"

दोहद पु॰न॰ दोहमाकर्षं ददाति दा–क। १गर्भे २लाक्षासामान्ये ३गर्भिण्या अभिलाषे च मे॰। सुश्रुते तु दौ॰(ह)दमिति पठित्वा तदुपहत्यां दोषादिकसुक्तं यथा "द्विहृदयाञ्च नारीं दौ(ह)दिनीमाचक्षते। दौ(ह)दविमाननात् कुब्जं कुष्ठिं खञ्जं जड़ं वामनं विकृताङ्गमार्यं वा नारी सुतं जनयति। तस्मात् सा यदादिष्टं तत्तस्यै दापयेत्। लब्धदौ(ह)हृदा हि वीर्यवन्तं चिरायुषञ्च पुत्रं जनयति"। भवन्ति चात्र "इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी। गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्। सा प्राप्तदौ(ह)हृदा पुत्रं जनयेत् गुणान्वितम्। अलब्धदौ(ह)हृदा गर्भे लभेदात्मनि वा भयम्। येषु येष्विन्द्रियार्थेषु दौ(ह)दे वै विमानना। प्रजायेत सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये। राजसन्दर्शने यस्या दौ(ह)दं जायते स्त्रियाः। अर्थवन्तं महाभागं कुमारं सा प्रसूयते। दुकूलपट्टकौशेयभूषणादिषु दौ(ह)हृदात्। अलङ्कारैश्चितं पुत्रं ललितं सा प्रसूयते। आश्रमे संयतात्मानं धर्मशीलं प्रसूयते। देवतापितृमायान्तु प्रसूते पार्षदोपमम्। दर्शने व्याघ्रजातीनां हिंसाशीलं प्रसूयते। गोधामांसाऽशने पुत्रं सुषुप्सुर्धारयात्मकम्। गवां मांसे च बलिनं सर्वक्लेशसहं तथा। माहिषे दौ(ह)हृदाच्छूरं रक्ताक्षं लोमसंयुतम्। वराहमांसात् खड्गाक्षं शूरं बहुनवेत् सुतम्। मार्गाहिकाननक्रीडं सदा वनचरं सुतम्। कूर्मराहिण्डमनसं नित्यभीतं च तैत्तिरात्। अजोऽनुक्रोशं सा नारी लभविष्यति दौ(ह)हृदम्। मयूराचारशीलैः सा समानं जनयिष्यति। कर्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्। यथा तथा दैवयोगाद्दौ(ह)हृदं जनयेद्वृदि"। यात्रायां दिग्भेदे दोषशान्त्यर्थं ४सेव्यपदार्थे यथाह स॰चि॰ "आज्यं तिलौदनं मत्स्यं पयश्चापि यथाक्रमम्। भक्षयेद्दोहदं दिग्भ्रमार्थं पूर्वादिकां व्रजेत्। रसालां पायसं काञ्चीं घृतं दुग्धं तथा दधि। पयोऽघृतं तिलान्नं च भक्षयेद्वारदोहदम्। पञ्चादितोऽर्कदलतण्डुलवारिसर्पिः आज्याहविष्यमपि हेमजलं त्वपूपम्। भुक्त्वा व्रजेद्दुचकमम्बु च धेनुमूलं यावान्नपायसगुडानसुगन्धसङ्घान्" स॰ चि॰ अथ दिग्दोहदमनुष्टुभाह आज्यमिति। आज्यं घृतं पूर्वस्याम्। तिलौदनं तिलमिश्रौदनं दक्षिणस्याम्। मत्स्यं प्रसिद्धं पश्चिमायाम्, पयोदुग्धमुत्तरस्याम्। एतद्यथाक्रमं दिग्भ्रमभीष्टदिग्भवं दोहदं भक्षयेत्ततः पूर्वादिकामाशां लिङ्गमिश्रितां दिशां व्रजेत्। यदाह श्रीपतिः "आज्यं तिलौदनं मत्स्यं पयः प्राक्प्रभृतिक्रमात्। भुक्त्वेति शेषः नारदेन त्वन्यथोक्तं "घृताज्यं तिलपिष्टाज्यं मत्स्याज्यं घृतपायसम्। प्रागादिक्रमशो भुक्त्वा याति राजा जयत्वरीन्"। वसिष्ठेनापि "घृताज्यं जलराज्यं च मत्स्याज्यं घृतपायसम्। पूर्वादिषु क्रमाद्भुक्त्वा याता सिद्धिमवाप्नुयात्" इति। अत्रैवं विरोधे विकल्पो यथादेशाचारं वा व्यवस्था। अथ वारदोहदमनुष्टुभाह रसालामिति। रसाला शर्करादधिमरीचकर्पूरैला संकृष्टा लोके शिखरिणीति प्रसिद्धा तां रविवारे। पायसकाञ्जी प्रसिद्धे सोममङ्गलवारयोः। घृतं पक्वं दुग्धं बुधे, घृतं पाक इति साधु। तत्रापि क्षीरकविक्षीरेवेति वार्तिकात् प्रस्तुते क्षीरे साधुत्वम्। दधि प्रसिद्धं गुरुवारे। अघृतमपक्वं दुग्धं शुक्रे, तिलान्नं तिलमिश्रौदनं शनौ। एतद्वारदोहदं रविवारादौ क्रमेण भक्षयेत्। यदाह श्रीपतिः "मल्लिकां घृतपायसं तथा काञ्जिकं घृतपयोऽदधि क्रमात्। क्षीरमामयं तत् कथितं तिलौदनं वारदोहदविधिर्बुधैः स्मृतः" इति वसिष्ठवारदाभ्यां दुग्धस्य पक्वापक्वविशेषो नाभ्यधायि "मल्लिकां परमान्नं च काञ्जिकं च पयोदधि। क्षीरं तिलौदनं भुक्त्वा भानुवारादिषु क्रमादिति"। मल्लिका रसाला। "स्यादृसाला तु मल्लिका" इत्यभिधानात्। गुरुस्तु विशेषमाह "सूर्यवारे घृतं प्राशेत् चन्द्रवारे पयस्तथा। गुरुमङ्गलवारे वारे बुधवारे तिलानपि। गुरुवारे दधि प्राशेत् शुक्रवारे वयानपि। मासान् भुक्त्वा

यनेवारे मूले गच्छद्दोषभागिति"। अथ तिथिदोहदं वसन्ततिलकाच्छन्दसाह पञ्चादित इति। पञ्चादिः प्रतिपत्तस्याः ल्यप्लोपे पञ्चमी। प्रतिपदादिपञ्चदशतिथिषु क्रमेण तिथिदोहदं भुक्त्वा व्रजेत्। यथा प्रतिपदि अर्कस्य वृक्षविशेषस्य दलानि पर्णानि। द्वितीयायां तण्डुलवारिणा सिततण्डुलजलम्। तृतीयायां सर्पिर्घृतम्। चतुर्थ्यां माषा यवागूः। पञ्चम्यां हविष्यं सुद्रादि। षष्ठ्यां हेमजलं प्रक्षालितसुवर्णजलम्। सप्तम्यामपूपम्। अष्टम्यां दधकं बीजपूरफलम्। "फलपूरो बीजपूरो दधको मातुलिङ्गके" इत्यमरः। नवम्यामम्बु जलम्। दशम्यां धेनुमूत्रं स्त्रीगवीमूत्रं न तु वृषमूत्रं धेनुशब्दग्रहणात्। एकादश्यां यावान्नं यवविकारम्। द्वादश्यां पायसम्। त्रयोदश्यां गुडमिश्रविकारं, चतुर्दश्यामसृक् रुधिरम्। पञ्चदश्यामन्नशुद्धानोदनमिश्रितशुद्धान्। यदाह बृहस्पतिः "अर्कपत्रं भवेद्यातुः प्रथमायान्तु भक्षणम्। द्वितीयायां भवेद्यातुर्भक्ष्यं तत्तण्डुलोदकम्। तृतीयायां तथा सर्पिर्यवागूः स्यात्ततः परम्। पञ्चम्यां तद्धविष्यं स्यात् षष्ठ्यां वा काञ्चनोदकम्। अपूपभुक्तिः सप्तम्यामष्टम्यां बीजपूरकम्। नवम्यां तोयपानं स्याद्गोमूत्रन्तु ततःपरम्। एकादश्यां यवान्नाद्यात् द्वादश्यां पायसं पिबेत्। त्रयोदश्यां गुडं लेह्यं रुधिरं स्यात्ततः परम्। शुद्धोदनं भवेद्भोज्यं पञ्चदश्यां यिवासतः। पञ्चयोरुभयोरेवं यात्रा योगे विधिः स्मृतः" इति। दैवज्ञमनोहरेऽपि क्वचिद्भेदः। यथा "अर्कदलतण्डुलोदकसर्पींषि हविष्यदधिसुवर्णपयः। तिलवारिबीजपूरकमध्वाज्यकमूलपिष्टिकासापि। तिलपिष्टकदम्बमूलानि शाकमथ शस्तदलपर्णानि प्रतिपत्प्रभृतिषु भुक्त्वा प्रस्थाता सिद्धिमाप्नोतीति"। ननु "व्यालभ्यालभ्य भक्ष्यान् वा स्नात्वा दद्याच्च तान् व्रजेत्। दत्त्वा वा सिद्धिमाप्नोति दुष्टभादिषु भूपतिरिति" गुरुक्तेः दुष्टवारादिषु दोहदाभिधानं सार्थकम्। विहितेषु पुनर्नक्षत्रतिथिवारादिषु दोहदाभिधानं व्यर्थम्। दोषनिवारणफलको हि दोहदशब्दभावे वैयर्थ्यप्रसङ्गात्। उच्यते। दुष्टभादिषु भूपतिरित्यत्र दुष्टत्वं किञ्चैषगिकसुताभ्यत् अहितनक्षत्रेष्वपि क्रूरग्रहसाहित्यादिमहान् दोषः सम्भावितोऽस्ति तदपाकरणाय दोहदाभिधानं सार्थकम् एवं सर्ववर्णानामपि पारिवदग्रहे विरुद्धताराक्रूरग्रहसाहित्यादिमहादोषनिवारणाय दोहदोक्तेः पार्थक्याच्च। एवं विहिततिथिदोहदाभिधानं योगिन्यादिदोषनाशार्थम्। "सक्रूरराशेरशुभा तिथिः स्यात्" इत्येतद्दोषनिवारणार्थं च। तद्दोषाभिधानं च रत्नमालायाम्। "आद्याश्चतस्रः क्रियपूर्वकाणां मेषाद्यृतूर्णामिह पञ्चमी स्यात्। पराः परेषां परतस्तथैव सक्रूरराशेरशुभा तिथिः स्यात्" इति। एवं वारदोहदोक्तिरपि वक्रिग्रहवारशूलादिदोषहान्या सार्थिका दिग्दोहोक्तिरपि त्रिविधप्रतिबुधप्रतिशुक्रप्रतिभौमादिदोषहान्या सार्थिका" पी०धा०

तत्र गर्भे "सुदक्षिणा दोहदलक्षणं दधौ" रघुः। अभिलाषे "उदकक्रीडादोहदागतानाञ्च" काद० गर्भिण्यभिलाषे "प्रजावती दोहदशंसिनी ते" रघुः ५पुष्पोद्गमौषधे च "कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति" रघुः "काङ्क्षत्यन्योवदनमदिरादोहदच्छद्मनास्याः" मेघः अशोकबकुलयोः स्त्रीपदताडनगण्डूषमदिरे दोहदमिति प्रसिद्धिः। "स्त्रीणां सशब्दं प्रियकुर्विकसति बकुलः शीधुगण्डूषसेकात् पादाघातादशोकस्तिलककुरुवकौ वीक्षणालिङ्गनाभ्याम्। मन्दारो मर्मवाक्यात् पटुमृदुहसनात् चम्पको वक्त्रवातात् चूतो गीतान्नमेरुर्विकसति च पुरोनर्तनात् कर्णिकारः" मल्लि० धृतवाक्यम्

दोहदलक्षण न० दोहदस्य गर्भस्य लक्षणं यत्र। १वयःसन्धौ ६त०। २गर्भलक्षणे च।

दोहदवती स्त्री दोहद+अस्त्यर्थे मतुप् मस्य वः। द्रव्यविशेषाभिलाषवत्यां गर्भिण्याम् अमरः। दोहदान्वितायत्र हेमच०।

दोहन न० दुह-भावे ल्युट्। १अन्तःस्थितद्रवद्रव्यस्य बहिर्निःसारणरूपे व्यापारे (दोयोवा) करणे ल्युट् ङीप्। २दोहनसाधनपात्रञ्च शब्दरत्ना०।

दोहल पु० दोहमाकर्षं लाति गृह्णाति ला-क। १इच्छायां २दोहदशब्दार्थे च शब्दार्थकल्प०। "अशोक! यदि सद्यएव मुकुलैर्न सम्पत्स्यसे सुधा वहसि दोहलं लषितकामिसाधारणम्" मालविका० ततः अस्त्यर्थे मतुप् मस्य वः। ङीप् दोहलवती। दोहदवत्यां स्त्रियां शब्दार्थचि०। २अशोकवृक्षे स्त्री राजनि० गौरा० ङीष् दोहली।

दोहस् पु०दुह-भावे असुन्। दोहने प्रकारणे "दृष्ट्वा तस्मै समूहे दोहसा दिवः" ऋ०१०११।१ "दोहसा दोहनेन" भा०

दोहसे अव्य०दुह-तुमर्थे "सेसेनऽसेन" इत्यादि पा० ३।४।९ सू० तुमर्थे असेन्। दोग्धुमित्यर्थे "भर्त्तेष्वन्यदोहसे"

ऋ० ६।६६।१ "मन्तु न येषु दोहसे" ऋ० ६।६६।५ "दोहसे कामान् दोग्धुम्" भाष्यम्।

दोहा स्त्री मात्रावृत्तभेदे "षट्कलत्रयगौ त्रिकलमपि विषमपदे विनिधेहि। समपादान्ते चैकलमिति दोहामव" धेहि" तल्लक्षणम्। [दुग्धे त्रिका०।

दोहापनय पु० दोहमपनयति स्वनिःसरणेन अप+नी-अच्।

दोहित त्रि०दोह+तार० इतच्। सञ्जातदोहे [ङीप्।

दोहिन् त्रि० दुह-शीलार्थे घिनुण्। दोहनशीले स्त्रियां

दोहीयस् त्रि० दोग्धृ+अतिशायने "तुश्छन्दसि" इयसुन् तृणोलोपः। अतिशयेन दोग्धरि। स्त्रियां ङीप् दोहीयसी एवं इष्ठन् दोहिष्ठ तत्रार्थे त्रि० स्त्रियां टाप्। शब्दकल्पद्रुमे अस्य दोहिनृशब्दप्रकृतिकत्वकल्पनं प्रामादिकमेव।

दोह्य त्रि० दुह-कर्मणि वा ण्यत्। १दोहनीये २दुग्धे ३धेन्वादौ स्त्री। "ईडवन्द्यवंसदुहां ण्यतः" पा० अस्याद्युदात्तता। "बीजायोबाह्मरत्नस्त्रीदोह्य पुंसां परीक्षणम्" याज्ञ०। [त्रि०।

दौःसाधिक पु० दुष्टः साधः तत्र नियुक्तः ठक्। द्वारपाले

दौकूल पु० दुकूलेन परिष्टयो रथः अण्। दुकूलेन परिष्कृते रथे अमरः पृषो० दौगूल तत्रार्थे हेमच०।

दौगर्ह पु० अश्वे निरु०।

दौत्य न० दूतस्य भावः कर्म वा ष्यञ्। १दूतकर्मणि २तद्भावे च "हनूमदाद्यैर्बलया मया पुनर्द्विषां हृदैर्दौत्यपथः वितीर्णतः" नैष० "दौत्यं तत्कृतं घोरे विग्रहे जनमेजय!" हरिवं० १७४अ०"भगवन् श्रूयतां वाक्यं दौत्येनाहमिहागता" हरिवं०१७७अ०।

दौरात्म्य न० दुष्ट आत्मा यत्नः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य तस्य भावः ष्यञ्। निन्दितयत्नादौ "दौरात्म्याद्राजसस्तां तु नात्मत्याः अहभुः प्रजाः" रघुः।

दौर्ग न०दुर्गस्य दुर्गाया वा इदम् अण्। १दुर्गसम्बन्धिनि २दुर्गासम्बन्धिनि च "आश्वयुजी दौर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्" कालमा० धृतवाक्यम्।

दौर्गत्य न० दुर्गतस्य भावः ष्यञ्। १दारिद्र्ये २दुःखित्वे च "दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्" वा०द० "भर्तुः कुर्वन्ति दौर्गत्यात् सोऽनर्थः तुमहात् स्मृतः" भा० स० ५अ०।

दौर्गन्ध्य न० दुष्टो गन्धोऽस्य ततो भावे ष्यञ्। दुष्टगन्धयोगे। "बहु तृष्णाहरं वक्त्रक्लेददौर्गन्ध्यनाशनम्" सुश्रुतः। गात्रे दौर्गन्ध्यकारणञ्च भृगुभारते उक्तं तत्र १७६२पृ० दर्शितम्।

दौर्गह पु० दुर्गहस्यापत्यम् शिवा० अण्। १दुर्गहस्यर्षेरपत्ये पुरुकुत्से स्त्री "सप्त स्त्रियो दौर्गहे बध्यमाने" ऋ०४।४२।८। "पुरुकुत्सस्य महिषी दौर्गहे बध्यमाने स्थिते। पत्यावराजकं दृष्ट्वा राष्ट्रं पुत्रस्य लिप्सया" भा० धृतवाक्यम् २अश्वे निरु० दौर्गह इत्यत्र पाठान्तरम्।

दौर्ग्रह पु० दुःखेन ग्रहो ग्रहणमस्य अश्वस्य, तत्साध्यो यागः अण्। अश्वमेधे "तेन ह पुरुकुत्सो दौर्ग्रहेणेजे" शत० ब्रा० १२।५।४५। दौर्ग्रहेणाश्वेन संहतेन क्रतुना अश्वमेधेनेजे इत्यर्थः" भा०।

दौर्गायण पु० दुर्गस्यापत्यं नडा० फक्। दुर्गस्यापत्ये

दौर्जन्य न० दुर्जनस्य भावः ष्यञ्। दुर्जनत्वे "तदिदं कस दौर्जन्यं बालिशस्य मतीयसि" भाग० ६।६८।५२

दौर्बल्य न० दुर्बलस्य भावः ष्यञ्। दुर्बलत्वे "अनादेयस्य चादानात् आदेयस्य च वर्जनात्। दौर्बल्यं ख्याप्यते राज्ञः" मनुः "पपात भूमौ दौर्बल्यात्" भा० शा० ५२श्लो०।

दौर्भागिनेय पुंस्त्री० दुर्भगाया अपत्यं बल्या० ठक् इनङ् च हृद्भगेत्यादिना द्विपदवृद्धिः। दुर्भगाया अपत्ये।

दौर्भाग्य न० दुर्भगाया दुर्भगस्य वा भावः ष्यञ् द्विपदवृद्धिः। दुर्भाग्यान्वितत्वे "भुङ्क्ते पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि। दौर्भाग्यं जायते तस्याः अपत्ति कुलदेवताः" इति ज्योतिःत० "यत्ते केशेषु दौर्भाग्यं सीमन्तेषु च मूर्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा" याज्ञ० "अद्य कैकेयि! दौर्भाग्यं राज्ञा ते ख्यापितं महत्" भा०व०२७६अ०तत्कारणञ्च भृगुभारतोक्तम् १७६२ पृ०दर्शितम्। [भ्रातृत्वे।

दौर्भ्रात्र न० दुष्टोभ्राता तस्य भावः युवा० अण्। दुष्ट-

दौर्मनस्य न० दुष्टं मनोऽस्य तस्य भावः ष्यञ्। खेदादिनिमित्ते चित्तस्य दौस्थ्ये दुष्टमनोयुक्तत्वे "तेषां कृते मे निश्वासो दौर्मनस्यञ्च जायते" देवीभा० "कृतस्मृतिः प्रोषितदौर्मनस्यम्" कु०सं० ७८अ०।

दौर्वासस न० दुर्वाससा प्रोक्तम् अण्। शिवधर्माख्ये उपपुराणभेदे उपपुराणशब्दे दृश्यम्। [मेदि०।

दौर्वीण न० दूर्वायाः इदम् खञ्। १दूर्वारसे २दूर्वार्थे च

दौर्व्रत्य न० दुष्टं स्वजनोचितनादि व्रतं यस्य तस्य भावः

ष्यञ्। दुष्टव्रतत्वे "मित्रं सौव्रत्येन रक्षं दौर्व्रत्येन" यजु०१६।९

दौर्हृ(हृ)द न० दुर्हृदो भावः अण् वा न द्विपदवृद्धिः। दोहृद+स्वार्थे अण् वा। इक्षादौ दोहृदशब्दार्थे दोहृदशब्दे सुश्रुतवाक्यं दृश्यम्।

दौर्हार्द न० दुर्हृदो भावः युवा० अण् द्विपदवृद्धिः। शत्रुत्वे

दौर्हृदय न० दुर्हृदयस्य दुष्टहृदययुक्तस्य भावः युवा० अण् न द्विपदवृद्धिः। दुष्टचित्तत्वे। [कच्छपे हेमच०।

दौलेय पु० दुवेरपत्यम् "इतश्चानिञः" पा० ढक्। दुवेरपत्ये

दौल्मि पु० दुल्म+अपत्ये इञ्। इन्द्रे शब्दार्थकल्प०।

दौवारिक पु०द्वारे नियुक्तः ठक् द्वारा० व्याभ्यां प्राक् ऐच्। १द्वारनियुक्ते २द्वारपाले ३प्रतीहार्यां स्त्री ङीप्। "दौवारिकी देवसरूपमेत्य" रघुः "प्रविश्य दौवारिकः" शकु०। दौवारिकलक्षणं मत्स्यपु० उक्तं यथा "प्रांशुः सुरूपोदक्षश्च प्रियवादी न चोद्धतः। चित्तज्ञाहश्च सर्वेषां प्रतीहारः स उच्यते"। औशनसनीतिशास्त्रपरिशिष्टे तु अन्यथोक्तं यथा "यश्चास्त्रकुशलो यस्तु दृढाङ्गश्च निरालसः। यथायोग्यं समाह्वयात् स ज्ञेयः प्रतिहारकः"। "इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः। अप्रमादी समो दक्षः स प्रतीहार उच्यते" चाणक्यः। इ०सं०उक्ते २एकाशीतिपदस्थे वास्तुदेवभेदे च "पितृदौवारिकसुग्रीवकुसुमदन्ताम्बुपत्यसुराः"।

दौवालिक पु० देशभेदे तत्रत्यराजादिषु ब०व०। "दौवालिकाः सागरकाः पत्तोर्णाः शैशिरास्तथा। कर्णप्रावरणायैव बहवस्तत्र भारत!। तत्रस्था द्वारपालैस्ते प्रोच्यन्ते राजशासनात्। कृतकाला: सुबलयस्ततो द्वारमवाप्स्यथ" भा०स०५१अ०।

दौशर्म्य न० दुशर्म्मणो भावः ष्यञ्। स्वभावतोऽनादृत भेदृत्वे "ब्रह्महा क्षयरोगित्वं दौशर्म्यं गुरुतल्पगः" मनुः।

दौष्क त्रि० दोषा चरति "दोष उपसंख्यानम्" वार्त्ति० ठण् "इणः षः" पा० षत्वम्। वाहुभ्यां चारिणि।

दौष्कुल दुष्टं कुलमस्य दुष्कुलः स्वार्थे अण्। दुष्टकुलयुक्ते "न दुर्जने दौष्कुले वा व्रतैर्वा न संस्कृतः" भा०शा० २६अ०।

दौष्कुलेय पु०दुष्कुलस्यापत्यं तत्र भवो वा "दुष्कुलाड्ढक्" पा० पक्षे ढक्। दुष्कुलजाते "कुलेजाताश्च क्लिश्यन्ते दौष्कुलेयवशाद्गताः" भा०व० १६१अ०।

दौष्कुल्य त्रि० दुष्कुल+स्वार्थे ष्यञ्। दुष्टकुलयुक्ते "दौष्कुल्या व्याधिबहुलाः दुरात्मानोऽप्रतापिनः" भा०व० १८२ अ०।

दौष्ठव न० दुष्टोः अविनीतस्य भावः उक्ष्णा०अण्। अविनीतत्वे

दौष्पुरुष्य न० दुष्टः पुरुषः तस्य भावः स्वार्थे वा ब्राह्मणा० ष्यञ्। १दुष्टे पुरुषे २तद्भावे च।

दौष्मन्त(न्ति) पु० दुष्मन्तस्यापत्यम् शिवा० अण् इञ् वा। दुष्मन्तस्यापत्ये भरते "दौष्मन्तं भरतं चापि भृतं सृञ्जय! शृणुमः" भा०द्रो०६७अ०। "भरतश्चैव दौष्मन्तिं भृतं सृञ्जय! शृणुमः" भा०शा०२९अ०। अस्य विसर्गमध्यता सम्भूत्यतापि "तेन हैतेन भरतो दौःषन्तिरीजे" शत०ब्रा० १३।५।४८ अत्र पृषो०मस्य लोप इति बोध्यम् समध्यो दौष्यन्तिरित्यपत्र "रूपौदार्य्यगुणोपेतं दौष्यन्तिं जनमेजय!" भा०आ०७४अ०।

दौष्यन्त्य त्रि० दुष्मन्तस्यायम् ष्यञ्। दुष्मन्तसम्बन्धिनि "सत्यवत्यचिन्तयन्ना दौष्मन्त्यो वंश उच्छेदं व्रजेदिति" भा० आ० ९५अ०। [भावे।

दौस्त्र न० दुष्टा स्त्री तस्याः भावः युवा० अण्। दुष्टस्त्रिया

दौहिक्क दोहं नित्यमर्हति ठञ्। नित्यं दोहार्हे

दौहित्र पुंस्त्री० दुहितुरपत्यम् विदा० अञ्। दुहितुरपत्ये स्त्रियां ङीप्। "पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन। तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः" मनुः "दौहित्रोऽपि ह्यसत्रैनं सन्तारयति पौत्रवत्।" मनुः। २खड्गादौ न०। "दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः। कपिलाया हृतं चैव दौहित्रमिति चोच्यते" मार्कण्डेयपु० "त्रीणि श्राद्धे प्रशस्तानि दौहित्रं कुतपस्तिलाः" तत्रैव। "त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। व्रतस्यापि दौहित्रं श्राद्धे यत्नेन भोजयेत्। कुतपश्चासने दद्यात् तिलैश्च विकिरेन् महीम्" मनुः "कुतपं नेपालकम्बलम्" इति कुल्लूकभट्टः। "ब्राह्मविवाहेनोढायाः कन्यायां पुत्रोत्पत्तिं विना तद्गृहभोजने दोषोऽभिहितः" वह्निपु०। "कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते। अथ भुञ्जीत यो मोहात् भुक्त्वा स नरकं व्रजेत्। अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन। दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि। महासत्त्वसमाकीर्णात् नास्ति ते नरकाद्भयम्। तीर्णस्त्वं सर्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि। दौहित्रस्य च दानेन नन्दन्ति पितरः

सदा। यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते"

दौहित्रायण पुंस्त्री० दुहितुरपत्यं युवा विदा० अञि अजन्तत्वात् यूनि हरिता० फक्। दुहितुर्यून्यपत्ये।

द्यविद्यवी स्त्री दिवसे निरु०।

द्यावाक्षमा स्त्री द्वि०व०। द्यौश्च क्षमा च दिवो द्यावादेशः। स्वर्गपृथिव्योः हेमच०। एवं द्यावापृथिवीद्यावाभूमि शब्दावपि तत्रार्थे द्वि०व० "द्यावापृथिवीयोयम्" शत०ब्रा० ११।५२ द्यावापृथिव्योरिदम् वैश्वदेवं तत्सम्बन्धि इत्यर्थः। "द्यावापृथिवी इह ज्यैष्ठे" शत०१२।५।१।११ "आर्षत्वात् एकवचनान्तता। "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता" अनुमानचिन्तामणिधृतश्रुतिः।

द्यु अभिगमने अदा०पर०सक०अनिट्। द्यौति अद्यौषीत्। दुद्याव। "गुहाया निरगात् बाली सिंहो मृगमिव द्युवन्" भट्टिः।

द्यु न० दिव-उनु किच्च वा०वलोपश्च। १दिने २गगने ३स्वर्गे च विश्वः ४अग्नौ पु० मेदि०।

द्युक्ष त्रि० दिवि द्युनि क्षयति क्षि-निवासे क। १स्वर्गलोकवासिनि त्रिका० "द्युक्षो राजा शिरामक्षितोतिः" ऋ०६।२४।१ "द्युक्षो द्युलोक निवासी" भा० २दीप्तियुक्ते च "द्युक्षमर्यमणं भगम्" ऋ०१।१२६।६ "द्युक्षं दीप्तिमन्तम्" भा०।

द्युग पुंस्त्री० द्युनि दिवि वा आकाशे गच्छति गम-ड। १पक्षिणि राजनि०। स्त्रियां जातित्वात् ङीष्। २आकाशगामिमात्रे त्रि० स्त्रियां टाप्।

द्युगण पु० द्यूनां दिवां वा दिनानां गणः। अहर्गणानां मध्यगतिसाधनाङ्गे दिनवृन्दे अहर्गणशब्दे ५७७ पृ०तदानयनादि द्रष्टव्यम्। "रविदिनान्तगताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः" सि०शि०।

द्युगत् न० दिव्+गम-क्विप्। शीघ्रे निरु० "अतस्त्वा गीर्भिर्द्युगदिन्द्र!" ऋ० ८।८६।४

द्युचर् त्रि० दिवि द्युनि वा आकाशे चरति चर-ट। १ग्रहे २पक्षिणि च "द्यौश्चाव तदा राजन्! द्युचराश्च सहस्रशः" हरिवं० १२२अ०।

द्युत्या स्त्री द्युत०। द्युतस्याहोपात्रवृत्तस्य द्रवरूपायां व्यायाम्। "क्रान्तेः क्रमोत्क्रमव्यत्ये हे कृत्वा तत्रोत्क्रमव्यया। हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम्" सू०सि० "स्पष्टक्रान्तेः क्रमोत्क्रमव्यत्ये हे अपि प्रसाध्य तत्र तत्रत्ये क्रान्त्युत्क्रमव्यया त्रिज्या हीना, दिनव्यासदलमहोरात्रवृत्तस्य व्यासार्द्धं द्युत्ये द्योत्यर्थः" रङ्ग०। "क्रान्तिज्या भुजः त्रिज्या कर्णश्चाहर्गान्तरपदमहोरात्रवृत्तस्यार्द्धं चैव द्युत्या" सि०शि० व्याख्यायां प्रमिता०।

द्युत दीप्तौ भ्वा०अक०आत्म०सेट्। द्योतते खुदित्त्वात् अङि प०अद्युतत् अद्योतिष्ट। दिद्युते। द्योतनः "अद्युतच्छब्दमाभ्यशम्" भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्ते द्योतने। "व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी" माघः। "विद्युद्युते वाडवजातवेदसाम्" माघः २शोभायाञ्च "पद्मैरनन्तीतवधूसुखद्युतः" माघः णिचि द्योतयति प्रकाशने व्यञ्जनादेस्त्या बोधने च द्योत्यार्थः अङ्गप्रवे

द्युत् पु०द्युत-क्विप्। १किरणे हेमच०। २द्योतमाने त्रि० "स हि द्युता विद्युता वेति साम" ऋ०१०।९९।२। "द्युता द्योतमानेन" भा०।

द्युत त्रि० द्युत-क। द्योतमाने सदवचरति क्विप् द्युतति अद्युतीत्। "द्युतद्यामानं हृतीमहेन" ऋ०५।८०।१

द्युतान त्रि० द्युत-शानच् वेदे गणव्यत्ययात् शपोलुक्। द्योतनशीले "द्युतानस्त्वा मारुतो मिनोतु" यजु० ५।२७ "द्युतानः दीप्यमानः" वेददी०।

द्युति स्त्री द्युत-इन्। १दीप्तौ २शोभायाम् "सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिः" रघुः। "रूपयौवनलालित्य भोगाद्यैरङ्गभूषणम्। शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते" सा०द० तत्सामान्यावान्तरभेदकथनेन स्त्रीणां रात्रिकालङ्कारतया उक्ते ३अर्थे। "देहजा कान्तिर्द्युतिरित्याचार्या मन्यन्ते।

द्युतित न०द्युत-भावे क्त वा न गुणः। १दीप्तौ पक्षे गुणः द्योतितमप्यत्र। २कर्तरि क्त। २दीप्तियुते त्रि०।

द्युतिधर पु० द्युतिं देहगतां कान्तिं धारयति अन्तर्भूतण्यर्थे ष-अच्। विष्णौ "तेजो दृषो द्युतिधरः" विष्णुसं० "द्युतिमङ्गगतां कान्तिं धारयन् द्युतिधरः" भा० "ओजस्तेजो द्युतिधरः" विष्णुसं०नामान्तरं बहुव्युत्पत्तिभीयत्रेऽन्यथा दर्शिता यथा "ज्ञानतेजसां दीप्तिं धारयन् द्युतिधरः" इति। तेनोभयविधयोगार्थवत्त्वात् तस्य नामद्वयमित्यपौनरुक्त्यम्।

द्युतिमत् त्रि० द्युतिः प्रशंसायामस्त्यर्थे मतुप्। १प्रशस्तकान्तियुक्ते "वस्तेतिहासो द्युतिमान्" भा०आ०९९अ० "द्युतिमतां निकरेण महाखनाम्" किरा०। स्त्रियां ङीप्। स्वायम्भुवस्य मनोः २पुत्रभेदे पु०। तद्वृत्तान्ते "द्योति-

मान् द्युतिमान् हव्यः सवर्णापुत्र एव च" हरिवं०७अ०। मेरुसावर्णमन्वन्तरे १सप्तर्षिभेदे च। तदुपक्रमे "ज्योतिष्मान् भार्गवस्तैव द्युतिमानङ्गिरास्तथा" तत्तैवाध्याये। मद्रराज ४नृपभेदे "सहदेवोऽपि भाद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतोदुहितरम्" भा०आ० ९५अ०। ५शाल्वदेशनृपभेदे च "नाम्ना च द्युतिमान्नाम शाल्वराजः प्रतापवान्" भा०शा०२२४अ०। ६मदिराश्वनृपपुत्रे च "मदिराश्वस्य पुत्रोऽभूत् द्युतिमान्नाम पार्थिवः। पुत्रोद्युतिमतस्त्वासीद्राजा परमधार्मिकः" भा०अनु० २अ०।

द्युतिला स्त्री द्युतिं लाति ला-क। औषधिभेदे रत्नमाला

द्युधुनि स्त्री ६त०। स्वर्गनद्यां गङ्गायाम् "सिद्धैर्नुतो द्युधुनि पातशिवस्वनाम्" भाग०२।२२।२७ द्युनद्यादयोऽप्यत्र।

द्युन न० लग्नावधिके सप्तमस्थाने "द्युनं द्यूनं तथास्ताख्यं षट्कोणं रिपुमन्दिरम्" ज्यो०तः।

द्युनिवास पु० दिवि द्युनि वा निवासोऽस्य। देवे "शोकाग्निनाऽगात् द्युनिवासभूयम्" भट्टिः। [वृक्षे च।

द्युपति पु० ६त०। १इन्द्रे हेमच०। २दिनपतौ सूर्ये ३अर्क-

द्युम त्रि० द्यु+अस्त्यर्थे म। दिनादिविशिष्टे [वृक्षे च।

द्युमणि पु०दिवः स्वर्गस्य मणिरिव। १सूर्ये अमरः। २अर्क-

द्युमत्सेन पु० शाल्वमहीपतिभेदे सत्यवतः पितरि "द्युमत्सेनसुतं वीरं सत्यवन्तमनिन्दिता" भा०वि०२०अ०। "आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः। द्युमत्सेन इति ख्यातः पश्चाच्चान्धो बभूव ह। विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः। सामीप्येन गतं राज्यं क्षिप्रेऽस्मिन् पूर्ववैरिणा। स बालपुत्रया सार्द्धं भार्यया प्रस्थितोवनम्। महारण्यं गतस्तापि तपस्तेपे महाव्रतः। तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने। सत्यवानुरूपो मे भर्तेति मनसा वृतः" भा०व०२९२अ०सावित्र्युक्तिः।

द्युमत् त्रि० द्यौः कान्तिरस्त्यस्य दिव-मतुप् दिव उत्वम्। कान्तियुक्ते "वीतिहोत्रं त्वा कवे! द्युमन्तम्" यजु० २।४ "द्युमत्तमा सुप्रतीकस्य सूनोः" २७।११

द्युमद्राम न० सामगानभेदे।

द्युमयी स्त्री विश्वकर्मकन्यायां सूर्यभार्यायाम् "सूरेणुर्द्युमयी त्वाष्ट्री प्रिये चैते विभावसोः" त्रिका०।

द्युम्न न० दिवं दीप्तिं मनति मन्-क। १धने अमरः। २यशे निघण्टुः। प्रद्युम्नः।

द्युलोक पु० द्यौरेव लोकः दिव उत्वम्। स्वर्गलोके

द्युवन् पु० द्यु-कनिन् उवङ्। सूर्ये उज्ज्वल०।

द्युष(स)द् पु० दिवि सीदति सद-क्विप् पूर्वपदात् छन्दसि षत्वम् लोकेऽषत्वम्। १देवे २यक्षे च "मनःसु येषां द्युषदां न्यधीयत" माघः।

द्यू त्रि० दिव्यति दिव-क्विप् जठ्। देवके अद्यद्यूः।

द्यूत न० दिव-भावे क्त जठ् अर्द्धर्चा०। १देवने क्रीडाभेदे २विवादपदभेदे च तत्स्वरूपादिकं वीर०मि० निरूपितम् "अक्षवञ्चनशलाकाद्यैर्देवनं जिह्मकारितम्। पणक्रीडा पयोभिश्च पदन्द्यूतसमाह्वयमिति" नारदः। अक्षाः पाशाः। वञ्चनमर्पाट्टका। शलाका दन्तादिमय्यो दीर्घचतुरस्राः। आद्यशब्दाच्चतुरङ्गादिक्रीडासाधनं करितुरगादिकं गृह्यते। तैरप्राणिभिर्यां पणपूर्विका क्रीडा। तथा पयोभिः पक्षिभिः पारावतादिभिः चशब्दान्मत्तमेषादिभिश्च प्राणिभिर्यां पणपूर्विका क्रीडा क्रियते तदुभयं यथाक्रमन्द्यूतसमाह्वयाख्यं व्यवहारपदमित्यर्थः। द्यूतञ्च समाह्वयश्च द्यूतसमाह्वयम्। अतएव मनुः। "अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते। प्राणिभिः क्रियमाणन्तु स विज्ञेयः समाह्वयः" इति। तत्र सभिकं प्रत्याह नारदः "सभिकः कारयेद्द्यूतन्देयं दद्याच्च तत्कृतम्। दशकन्तु शतं दद्यात्ततः स्याद्द्यूतकारिता। अथ वा कितवो राज्ञे दत्त्वा लाभं यथोदितम्। प्रकाशन्देवनं कुर्यादेवं दोषो न विद्यत" इति। तस्य वृत्तिमाह याज्ञवल्क्यः "ग्लहे शतिकवृद्धेन्तु सभिकः पञ्चकं शतम्। गृह्णीयाद्द्यूतकितवादितराद्दशकं शतमिति"। परस्परं सम्प्रतिपत्त्या कितवः परिकल्पितः पणोग्लहस्तत्र ग्लहे तदाज्ञया शतपरिमिता तदधिकपरिमिता वा वृद्धिर्यस्यासौ शतिकवृद्धिस्तस्मात्कितवात्पञ्चकं शतं जितस्य ग्लहस्यात्मवृत्त्यर्थं विंशतितमं भागं गृह्णीयादित्यर्थः। पञ्चकं शतं पञ्चपञ्चाशो यस्मिन् शते तत्पञ्चकं "तदस्मिन् वृद्धेति"पा०कन्। सभापतिस्तु कल्पितात्तादिनिखिलक्रीडोपकरणसमुपचितद्रव्योपजीवी दशरूपादपूर्णशतवृद्धेः कितवाद्दशकं शतञ्चितस्य दशमभागं गृह्णीयादित्यर्थः। एवं कृतवृत्तेः सभिकस्य यत्कर्त्तव्यं तदाह स एव "स सम्यक्पालितो दद्यात् राज्ञे भागं यथाकृतम्। जितस्तद्रूपाद्वेज्जेत दद्यात्सत्यं वचः शपेति"। यः कृतवृत्तिर्द्यूताधिकारी स राज्ञा पूर्वविभवेभ्योऽधिक-

सर्वे राज्ञे यथाप्रतिपत्तमंशं दद्यात्। तथा जितं द्रव्यं पराजितसकाशादाशेधादिना उद्धृत्य जेत्रे जयिने दद्यात्। तथा सभी भूत्वा द्यूतकारिणोऽतिविश्वासार्थं सत्यं वचो वदेदित्यर्थः। नारदोऽपि "सभिकः कारयेत् द्यूतं देयं दद्याच्च तत्कृतमिति"। बृहस्पतिरपि "सभिको पाटकसत्तं दद्याज्जेत्रे ऋषाय वेति" द्यूतपराजितकितवानां बन्धनादिना पणपाटको भवेत्। पणग्रहणात् प्रागेव स्वकीयं द्रव्यं जेत्रे ऋषाय च यथाभागं सभिको दद्यादित्यर्थः। तथा च कात्यायनः "जेतुर्दद्यात् स्वकं द्रव्यं जितं प्राप्तं त्रिपक्षिकम्। सद्यो वा कितवेनैव सभिकात्तु न संशयः" इति। त्रिपक्षिकमित्यनेन यथा सामर्थ्यमा त्रिपक्षात्कालो देय इति दर्शितमिति स्मृतिचन्द्रिकायाम्। यदा तु जेत्रे जितं द्रव्यं सभिको दापयितुमशक्तस्तदा राज्ञा दापयेदित्याह याज्ञवल्क्यः "प्राप्ते ऋषतिना भागे प्रसिद्धे धूर्त्तमण्डले। जितं ससभिके स्थाने दापयेदन्यथा न त्विति" प्रसिद्धे अन्यथा प्रच्छन्ने सभिकरहितेऽद्धत्तराजभागे द्यूते जित पणे जेत्रे न दापयेदित्यर्थः। प्राणिद्यूते प्राणिनां जयपराजयौ तत्स्वामिनोरित्याह बृहस्पतिः "द्वन्द्वयुद्धेन यः कश्चिदवसादमवाप्नुयात्। तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः" इति। पणपरिकल्पनं कृताकृतमित्याह नारदः "परिहासकृतं यत्तु यच्चाप्यविदितं ऋषे। तत्रापि नाप्नुयात्कामभयं वाऽनुमतं तयोरिति"। काम्यत इति कामः पणः। अत्र जयपराजयविप्रतिपत्तौ निर्णयप्रकारमाह याज्ञवल्क्यः "द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हीति"। द्यूतव्यवहाराणां द्रष्टारः सभ्याः त एव कितवा एव नियोक्तव्या राज्ञा। न तत्र श्रुताध्ययनसम्पन्ना इत्याद्युक्तनियमोऽस्ति। साक्षिणोऽपि त एव द्यूते द्यूतकरा एव कार्याः न तत्र स्त्रीबालवृद्धकितवेत्यादिसाक्षिनिरूपणोक्तनिषेधोऽस्तीत्यर्थः। विष्णुरपि "कितवेभ्यो तिष्ठेरन् कितवाः संशयं प्रति। य एव तत्र द्रष्टारस्त एवैवान्तु साक्षिणः" इति। साक्षिणां परस्परविरोधे चाह बृहस्पतिः "उभयोरपि सन्दिग्धे कितवाः स्युः परीक्षकाः। यदा विद्वेषिणस्ते तु तदा राजा विचारयेदिति।" अनिर्दिष्टद्यूतकारिणो दण्डमाह नारदः "अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः। न स तं प्राप्नुयात्कामं विनयस्तेन लोऽर्हतीति"। ये तु कूटं द्यूतं कुर्वन्ति तेषां दण्डमाह याज्ञवल्क्यः "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" इति। कूटैरक्षादिभिः उपधिना मणिमन्त्रादिना मतिवञ्चनेन च ये दीव्यन्ति तान् श्वपदादिनाऽङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेदित्यर्थः। निर्वासने विशेषमाह नारदः "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः" इति। दण्डने विशेषमाह विष्णुः। "द्यूते कूटाक्षदेविनां करच्छेदः उपधिदेविनामाच्छेदः" इति। यानि तु द्यूतनिषेधकानि मनुवचनानि "द्यूतं समाह्वयञ्चैव यः कुर्यात्कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजचिह्निनः। प्रकाशमेतत्तास्कार्यं यद्देवन समाह्वयौ। तयोर्द्वित्वं प्रतीघाते ऋषतिर्यत्नवान् भवेत्। द्यूतं समाह्वयञ्चैव राजा राज्ये निवारयेत्" इत्यादीनि तानि कूटाक्षदेवनविषयतया राजाध्यक्ष सभिकरहिततया वा योज्यानि। अतएव बृहस्पतिः "द्यूतं निषिद्धं मनुना सत्यशौचधनापहम्। अभ्यनुज्ञातमन्यैस्तु राजभागसमन्वितम्। सभिकाधिष्ठितं कार्यं तस्करस्थानहेतुकम्" इति। याज्ञवल्क्योऽपि "द्यूतमेकसुखं कार्यं तस्करस्थानकारणादिति" राज्ञा द्यूतम् एकं सुखं प्रधानं यस्य तत् तथोक्तं कार्यम्। राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः। तस्करस्थानकारणात्। ल्यब्लोपे पञ्चमी। तस्करस्थानरूपं प्रयोजनं पर्य्यालोच्येत्यर्थः। प्रायशश्चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकसुखं कार्यमित्याशयः"

द्यूतकर त्रि॰ द्यूतं करोति कृ-ट। (जुयारी) द्यूतकारके शब्दर॰।

द्यूतकार त्रि॰ द्यूतं करोति कृ-अण् कारयति कारि-अण् वा। १द्यूतकरे द्यूतस्य कारयितरि २सभिके च अमरः स्वार्थे क। कारि ण्वुल् वा। द्यूतकारक तत्रार्थे त्रि॰।

द्यूतकृत् त्रि॰ द्यूतं करोति कृ-क्विप्। द्यूतकरे त्रिका॰।

द्यूतपूर्णिमा स्त्री द्यूतार्थां पूर्णिमा। कोजागरपूर्णिमायां आश्विनपौर्णमास्यां त्रिका॰ कोजागरशब्दे तत्र द्यूतविधानसूक्तम्। द्यूतपौर्णमासी तत्रार्थे।

द्यूतप्रतिपद्(दा) द्यूतार्थां प्रतिपद् या टाप्। कार्त्तिकशुक्लप्रतिपदि तत्र द्यूतविधानं तिं॰त॰ यथा ब्रह्म॰पु॰ "शङ्करश्च पुरा द्यूतं चकर्त्त सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते!। जितश्च शङ्करस्तत्र जयं लेभे च पार्वती। अतोऽद्यापि शङ्करो दुःखी गौरी नित्यं

सुखोषिता । तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तव मानवैः" । "द्यूतप्रतिपदा नाम तव भावी महोत्सवः" ति०त० धृतं बलिं प्रति भगवद्वाक्यम् । [त्रिका० ।

द्यूतबीज न० द्यूतस्य बीजं साधनम् । कपर्दके (कडि)

द्यूतवृत्ति पु० द्यूतं वृत्तिर्जीविका यस्य । सभिके तस्य यथा द्यूतोपजीवित्वं तथा द्यूतशब्दे उक्तम् "मित्रभुक् द्यूतवृत्तिश्च पुत्राचार्य्यस्तथैव" मनुना तस्य हव्यकव्यदानाऽयोग्यतोक्ता ।

द्यून न० लग्नात् सप्तमस्थाने द्युनशब्दे दृश्यम् "द्यूनजन्मरिपुलाभखत्रिगयन्द्रनाः शुभफलप्रदस्तथा" ज्यो०त०

द्यै न्यक्करणे भ्वा०सक०अनिट् । द्यायति अद्यासीत् दद्यौ

द्यो स्त्री द्योतन्ते देवा अत्र द्यु-त-घा० आधारे डो । १स्वर्गे २आकाशे च अमरः । "धराविवृद्धद्योसलिलेषु विस्तृतम्" भा०क०९०अ० द्योषद् द्योभूमिः । सर्वनामस्थाने परे तस्य ओरौत् द्यौः द्यावौ द्यावः ।

द्योकार त्रि० द्योतत्यान् प्रासादादीन् करोति ञ-अण् । प्रासादादिकरे शिल्पिभेदे "एवं क्षत्रियदायादास्तत्र तत्र परिस्थिताः । द्योकारश्चेमकारादिजातिं नित्यं समाश्रिताः" भा०शा०४९अ०तत्र व्योकारेति ज्याकारेति वा पाठान्तरम् । व्योकारः लोहकारः ज्याकारो धनुष्कार इत्यर्थः ।

द्योत पु० द्युत-भावे घञ् । १प्रकाशे २आतपे अमरः । खद्योतः "चन्द्रार्ककिरणद्योतम्" हरिवं०४३अ० "विद्युद्योतनिकाशेन सकुटेनार्कवर्चसा" हरिवं० २४१अ० । उत्कृष्टो द्योत उद्योतः "निरवद्यविद्योद्योतेन द्योतितस्तत्त्वतोऽयमर्थः" दायभा०

द्योतन त्रि० द्युत-णीलार्थे युच् । १द्योतनशीले "विलोक्य द्योतनं चन्द्रं लक्ष्मणं शोचनोऽवदत्" भट्टिः २दीपे पु० ३ऊषसि स्त्री निरु० भावे ल्युट् । ४प्रकाशे न० "द्योतनाद्देवः" इति कृत्सू० द्युत-णिच-ल्यु । ५प्रकाशके त्रि० । भावे ल्युट् । ६प्रकाशने न० ।

द्योतनि त्रि० द्युत-णिच्-अनि । प्रकाशके "आ द्योतनिं वहति शुभ्रयाम्" ऋ०१।५८।१ "द्योतनिं प्रकाशकं सूर्यम्" भा०

द्योतिरिङ्गण पु० ज्योतिरिङ्गण+पृषो० । खद्योते हेमच० ।

द्योभूमि पु० द्यौराकाशो भूमिर्गतिस्थानं यस्य । १पक्षिणि शब्दच० । द्यौश्च भूमिश्च द्व० । २द्यावापृथिव्योः स्त्री द्वि०व०

द्योषद् पु०द्यवि सीदति सद-क्विप् षत्वम् । देवे शब्दरत्ना० यद्वादौ अषत्वम् द्योषदित्येव ।

द्यौत न० "दिवेर्द्युच्च" उणा० दिव-द्युन् द्यु-रादेशः डद्वित्व । ज्योतिःपदार्थे उज्ज्वलदत्तः ।

द्यौर्लोक पु० द्यौरेव लोकः द्यौलोक+पृषो० । द्युलोके स्वर्गे "किं ताभिर्जयति पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्यौर्लोकं शस्त्रया" शत०ब्रा०

द्रगड़ पु०द्रेति गडति गड-अच् । वाद्यभेदे (दगड़ काड़ा) त्रिका०।

द्रङ्गण न० तोलके शब्दमाला ।

द्रङ्ग पु० पुरीभेदे हेमच० । स च "कर्वटाद्धमोद्रङ्गः पत्तनाद्रुत्तमश्च सः" वाचस्पत्युक्तलक्षणः ।

द्रढि नामधातुः दृढं करोति दृढ+ञनो णिच् ऋतो रः दृढीकरणे सक०उभ०सेट् । द्रढयति ते । द्रढयन् द्रढयितुम्

द्रढिमन् पु०दृढस्य भावः इमनिच् ऋतो रः । दृढत्वे "बधान द्रागेव द्रढिमरमणीयं परिकरम्" गङ्गालहरी । "हृदयमरिबधोदयादुदूढद्रढिम दधातु पुनःपुरन्दरस्य" माघः ।

द्रधस् स्त्री रोदस्योः "द्वे द्रधसी सततो वस्त एकः नेशी विश्वा भुवनानि विद्वान्" तैत्ति०सं० ३।२।२।२

द्रप्स न०दृप्यति कफोऽनेन दृप-बा०क्स ऋतो रः । घनेतरदभ्रि(जलोदर) अमरः पृषो०द्रप्स द्राप्स इत्येते अपि तत्रार्थे अमरटीकायां भरतः । २रसे पु० । "भुवनानामूर्मिर्द्रप्सो अपामसि" यजु०१४।१ "द्रप्सो रसः" वेददी० "यस्ते द्रप्स स्कन्दति यस्ते अंशुरिति यो स्तोकः । स्कन्दति स द्रप्सस्तत्तमाह यस्ते अंशुरिति तदंशुमाह आवच्युतः" शत० ब्रा० ४।२।४।२ "सोऽष्टौ द्रप्सान् गर्भ्यं भवत्तेऽष्टौ वसवोऽस्मृज्यन्त तानस्यासुपादधात्" शत० ब्रा०६।१।२।६। ३द्रुतगतियुक्ते च "अनुद्रप्सास इन्दवः" ऋ०९।६।४ "द्रप्सासः द्रुतगतयः" भा०

द्रम गतौ भ्वा०पर०सक०सेट् । द्रमति अद्रमीत् द्रद्राम "वानरा दद्रमुश्चाथ संग्रामं च शशंसिरे" भट्टिः यङि दंद्रम्यते "दंद्रम्यमाणः परियन्ति मूढाः" कठोप० । दंद्रमणः

द्रमिल पु० देशभेदे । तत्र भवः अण् । द्रामिल चाणक्ये पु० तत्र भवे त्रि० हेम० ।

द्रम्म पु० लीला० उक्ते षोडशपणे "वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणचतस्रः । ते षोडश द्रम्म इहापि कीर्तितो द्रम्मैस्तथा षोडशभिश्च निष्कः"

द्रव पु० द्रु गतौ भावे अप् । १द्रवणे २पलायने ३परीहासे अमरः । ४गतौ ५आसवे । ६वेगे च द्रु-अच् । ७क्षरण

युक्ते त्रि० । ८द्रवत्वगुणयुक्तमात्रे त्रि० "व्याचिख्य काचिद्द्रवरागमेव" कुमा० "द्रवः सङ्घातकठिनः" कुमा० "सर्वाणि द्रवाणि उदङ्मुखेन जुहोति" श्रुतिः "गण्डस्थलाघर्षगलन्मदोदकद्रवकुमस्कन्धनिलायिनोऽलयः" "मदोदकद्रवकटभित्तिसङ्गिभिः" माघः न्यायोक्ते ९द्रवत्वरूपे गुणभेदे "द्रवोनैमित्तिकोद्रवः" भाषा० द्रवत्वशब्दे दृश्यम् । शीते च ।

द्रवक त्रि० द्रु–शीलार्थे ण्वुल् सुग्ध० । १पलायनशीले २चरणे ।

द्रवज पु० द्रवाज् जायते जन–ड । १गुडे राजनि० । २द्रवजातमात्रे त्रि० । [दृष्टे राजनि० ।

द्रवत्पत्री स्त्री द्रवत् पत्रं यस्याः गौरा०ङीष् । शिशुड़ी ।

द्रवत् उपभोगे अक०पर०सेट् द्रवस् इत्यत्र गणरत्ने कण्ड्वा० गणे पाठान्तरम् । द्रवत्यति । अद्रवत्यीत् ।

द्रवत् त्रि० द्रु–शतृ । १चरणयुक्ते २शीघ्रे न० निरु०

द्रवत्व न० द्रवस्य भावः । न्यायोक्ते संयोगके गुणभेदे भाषा० "सांसिद्धिकद्रवत्वं स्यान्नैमित्तिकमथापरम् । सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः । परमाणौ जले नित्यमन्यत्रानित्यमुच्यते । नैमित्तिकं वह्नियोगात्तपनीयद्रवतादिषु । द्रवत्वं स्यन्दने हेतुर्निमित्तं संयोगे तु तत्" भाषा० "द्रवत्वलक्षयति सांसिद्धिकमिति । द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्चेति । द्वितीयं नैमित्तिकं परमाणावेवेति । जलपरमाणौ द्रवत्वं नित्यम् । अन्यत्र पृथिवीपरमाणवादौ जलद्व्यणुकादौ च अनित्यम् । कुत्रचित्तेजसि कुत्रचित् पृथिव्याञ्च नैमित्तिकं द्रवत्वम् । तत्र को वा नैमित्तिकस्तद्दर्शयति नैमित्तिकमिति । वह्नीतिपदन्तोऽर्थकम् । तथा च तेजःसंयोगादग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि हुतजतुप्रभृतिपृथिव्यां च वर्तत इत्यर्थः । द्रवत्वं स्यन्दने हेतुरिति असमवायिकारणमित्यर्थः । संयोगे सक्तुकादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्धव्यम्" सुक्ता० । तत् द्रवताप्यत्र स्त्री "न च न द्रवता द्रवता परितो हिमहानलता न लता क्वचन" भट्टिः ।

द्रवद्रव्य न० द्रवतीति द्रवं कर्म० । १दुग्धदध्याज्यतक्राद्यवजलतैलादिषु २दैहिकमूत्रादिषु च ।

द्रवन्ती त्रि० द्रु–शतृ ङीप् । १द्रवयुक्तस्त्रियां स्त्री च २स्रवन्त्यां नद्यां ३मूषिकपर्ण्यां च राजनि० ।

द्रवरस त्रि० द्रवयुक्तो रसो यस्य । १सार्द्ररसे २लाक्षायां स्त्री राजनि० ।

द्रवस् उपभोगे कण्ड्वा० पर० सेट् । द्रवस्यति अद्रवस्यीत् ।

द्रवाधार पु० ६त० । १द्रवद्रवस्याधारे २चुलुके च शब्दार्थक०

द्रवाय्य त्रि० द्रु–आय्य । द्रुतिशीले सुग्धबो० ।

द्रवि त्रि० द्रावयति अन्तर्भूतणर्थे द्रु–इन् । स्वर्णादिद्रावके स्वर्णकारे "द्रविर्न द्रावयति दारु घ्नन्तः" ऋ०६।२।५

द्रविड पु० स्वनामख्याते देशभेदे स च देशः द्र०सं० कूर्मविभागे १४अ० नैर्ऋत्यामुक्तः "नैर्ऋत्यां दिशि देशाः" इत्युपक्रमे "हेमगिरिसिन्धुकालकरैवतकतुराष्ट्रवादर द्रविडाः" तेषां राजा सोऽभिजनोऽस्य वा अण् । द्राविड तद्देशरूपे पित्रादिक्रमेण तत्रवासिनि च । बहुषु अणो लुक् । २ब्राह्मणभेदे स च "आन्ध्राः कर्णाटकाश्चैव गुर्जरा द्रविडास्तथा । महाराष्ट्रा इति ख्याताः पञ्चैते द्रविडाः स्मृताः" वायुरसंहिता । ३सवर्णायां व्रात्यक्षत्रियजाते क्षत्रियभेदे यथाह मनुः "झल्लोमल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च । नटश्च करणश्चैव खसो द्रविड एव च" । जातदम्यभवेन क्षत्रियधर्मत्यागेन वृषलत्वं प्राप्ते तद्देशीये ४क्षत्रिये च यथाह भा०आश्व०२९ अ० "ततस्तु क्षत्रियाः केचिज्जामदग्न्यभयार्दिताः । विविशुर्गिरिदुर्गाणि मृगाः सिंहार्दिता इव । तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम् । प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् । एवं ते द्रविडाभीराः पुण्ड्राश्च शबरैः सह । वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्मिणः" ४रागिणीभेदे स्त्री गौरा० ङीष् ।

द्रविण न० द्रु–इनन् । १धने २काञ्चने मेदि० । ३बले ४पराक्रमे च निघ० "द्रविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते" उद्भ० "ज्ञातिभ्यो द्रविणं दत्त्वा कन्यार्थे चैव शक्तितः" मनुः । "तेषां सदश्वभूयिष्ठास्तुङ्गाद्रविणराशयः" रघुः । ५पृथुन्दपपुत्रभेदे पु० "वैन्यस्तु वीर्यमहतामित्युपक्रमे "पुत्रानुत्पादयामास पञ्चार्चिष्मान् प्रशंसितान् । विजिताश्वं धूम्रकेशं हर्यश्वं द्रविणं हकम्" भाग०४।२२।५० तत्र बले "बलेः पुत्रो महावीर्यो बाणोद्रविण वत्सरः" हरिवं०१६१अ०पराक्रमे "बभूवतुस्ततस्तस्य पुत्रौ द्रविणवत्सरौ" भा०उद्यो० ११२अ० । ५वाञ्छिते च द्रविणपदशब्दे दृश्यम् । ६क्रौञ्चद्वीपस्थे वर्षपुरुषभेदे पु० "क्रौञ्चद्वीपस्यवर्षनदीनां मन्मः पवित्रममलमुपयुञ्जानाः पुरुषर्षभद्रविणदेवक संज्ञाः" भाग० ५।२०।१६

द्रविणक पु० १वसुसुतान्नेः पुत्रभेदे "अग्नेर्भार्यां वसोर्धारा

पुत्रो द्रविणकादयः" भाग०६।६।१२श्लो० द्रविण+स्वार्थे क। २द्रविणशब्दार्थे न०।

द्रविणनाशक न० द्रविणं नाशयति नाशि–ल्यु। शोभाञ्जने शब्दरत्ना० तत्सेवने धननाशकत्वात्तस्य तथात्वम् अतः स्मृतौ शोभाञ्जनभक्षणनिषेधोदृष्टफलकएव।

द्रविणप्रद त्रि० द्रविणं प्रददाति प्र+दा–क। १धनदायके २विष्णौ पु०। तस्य वाञ्छितप्रदत्वात् तथात्वम् "सुधन्वा खण्डपरशुरारणो द्रविणप्रदः" विष्णुस० वाञ्छितप्रदत्वेन तस्य तथात्वम् भाष्ये उक्तम्।

द्रविणस् त्रि० द्रविणमिच्छति लालसायां क्यचि सुक् द्रविणस्यति ततः सम्प० भावे क्विपि अतो लोपे कौ लुप्ते न स्थानिवद्भवतीति यलोपः। धनेच्छायाम् "द्रविणोदा द्रविणसः ग्रावहस्तासः" ऋ०१।१५।७ भाष्ये च उक्ता व्युत्पत्तिर्दर्शिता। "द्रविणस्वन्त इह सन्त्विन्द्रवः" ऋ० ९।८५।१ "द्रविणस्वन्तो धनवन्तः" इति भाष्योक्तेः द्रविणशब्दात् कर्मसाधनात् धनवचनात् मतुप्।

द्रविणस्यु त्रि० द्रविणमात्मनो. लालसयेच्छति क्यचि सुक् द्रविणस्य–उन्। लालसया धनकामिनि "द्रविणस्युर्द्रविणसश्चकानः" ऋ०१०।६५।१६ "छन्दस्येव दुवस्युद्रविणस्युः" इत्यादिना पा० क्यचि निपातनम्। लोके तु द्रविणीयुरित्येव।

द्रविणोदस् त्रि० १धनदातरि "द्रविणोदाः धनप्रदम्" ऋ०१।१५।७ "धनप्रदोऽग्निः सोमं पिबत्विति शेषः। तमेतं मन्त्रं यास्क एवं निर्वक्ति। नि०८।१ "द्रविणोदाः कस्माद्धनं द्रविणसच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति। द्रविणोदा द्रविणसः इत्यादि। सोऽयं यास्कोक्तो निर्वचनप्रपञ्चस्तस्मिन्नेव ग्रन्थेऽवगन्तव्यः। द्रविणोदाः। "हुदत्तिभ्यामिनन्" उ०२।५१। नित्त्वादाद्युदात्तो द्रविण शब्दः। तद्ददातीति द्रविणोदाः। "क्विप् चेति" पा० क्विप्। पूर्वपदस्य संकारोपजनश्छान्दसः रुत्वोत्त्वे। उत्तरपदप्रकृतिस्वरत्वम्। देवविशेषणत्वे नैकवाक्यतापक्षे द्वितीयायाः स्यादेशः। अथ वा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति। सुप आत्मनः क्यच्। "सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः" वार्ति० क्यचि परतः सुगागमः। द्रविणस्यतेः सम्पदादित्वाद्भावे क्विप्। अतोलोपः। "कौ लुप्तं न स्थानिवद्भवति" पा० इति तस्य स्थानिवत्त्वप्रतिषेधाद्यलोपः। एवं द्रविणस् शब्दो धनेच्छावचनः। द्रविणेच्छां दस्यति यथेष्टधनप्रदानेनोपक्षपयतीत्यर्थे दसु उपक्षये इत्यस्मादन्तर्भावितण्यर्थात् "क्विप् चेति" पा० क्विप्। एवं द्रविणोदःशब्दः सकारान्तो भवति। तथा द्राविणोदसाः प्रवादा भवन्तीति नैरुक्तो व्यवहार उपपद्यते। अतो द्रविणोदस् शब्दो भिन्नवाक्यत्वे स्वार्थे प्रथमा एकवाक्यत्वे तु व्यत्ययेन द्वितीया भवति। द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे न उकारोपजनश्छान्दसः। आद्युदात्तत्वं तु नियमेन स्थितम्। ऋत्विग्विशेषणत्वे नैकवाक्यत्वपक्षे तु क्यजन्तात् क्विप्। अतो लोपादि पूर्ववत्। अत्र द्रविणोदाशब्दोऽपि तत्रार्थे। २अग्नौ च "द्रविणं धनमित्युक्तं बलञ्च द्रविणं स्मृतम्। ददाति तद्भवानेव द्रविणोदास्ततोभयान्" वराहपु०।

द्रविल्लु त्रि० द्रु–गतौ इल्लु। गतिशीले "शविष्ठस्य द्रविल्लवः" ऋ०८।७४।१४। "रथमस्तस्य द्रविल्लुम्" ऋ० १०।११।९

द्रव्य न० द्रोर्विकारः द्रोरिति यत् "द्रव्यञ्च भव्ये" पा०निपा०। १पित्तले २वित्ते ३पृथिव्यादिषु नवसु। ४विलेपने न० ५भेषजे ६द्रुमविकारे ७तत्सम्बन्धिनि च त्रि० मेदि०। ८जतुनि ९विनये न० हेम०। १०मद्रे न० राजनि०। द्रव्यलक्षणमौलुक्यशब्दे १५८६ पृ० उक्तं तद्भेदाश्च नव "पृथिव्यापस्तेजो वायुराकाशं कालोदिगात्मा इति द्रव्याणि" कणा० सू० "इदानीमपवर्गभागितया सर्वपदार्थाश्रयतया च प्रथमोद्दिष्टस्य द्रव्यपदार्थस्य विभागं विशेषोद्देशञ्च कुर्वन्नाह पृथिव्याप इति इतिकारोऽवधारणार्थः तेन नवैव द्रव्याणि नाधिकानि न न्यूनानि वेत्यर्थः। ननु विभागबलादेव न्यूनाधिकसङ्ख्याव्यवच्छेदसिद्धौ किमितिकारेणेति चेत् उद्देशमात्रपरतयाऽपि सूत्रसम्भवे विभागतात्पर्यस्फोरणार्थतयैवेतिकाराभिधानात् सुवर्णादीनामीश्वरस्य चात्रैवान्तर्भावात् अन्धकारस्य चाधिकत्वेनाशङ्क्यमानस्याभावत्वव्युत्पादनादेतदध्यवसेयम्। अस्मासकरणन्तु सर्वेषां प्राधान्यप्रदर्शनाय" उप०९०। वैद्यके तु तस्य पञ्चविधतोक्ता यथा "रसोगुणस्तथा वीर्य्यं विपाकः शक्तिरेव च। पञ्चानां यः समाहारस्तद्द्रव्यमिति कीर्त्यते" इति भिषग्वराः। प्रकारान्तरेण च पञ्चविधम् अत्यन्तकठिनकठिनार्द्रकोत्स्वणद्रवद्रव्यभेदात्। द्रव्यभेदानां गुणवत्तावधिश्च वैद्यकोक्तः यथा "गुणहीनं भवेद्द्रव्यं तद्रूपमौषधम्। मासद्वयात् तथा

चूर्णं लभते हीनवीर्य्यताम् । हीनत्वं गुटिका लेहो लभते यत्परात् परम् । हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकास्तथा । घृततैलाद्या इति योगविशेषणम् । चतुर्मासाधिकाः संवत्सरादुपरि चत्वारोमासा अधिका येषां ते । "घृतमब्दात् परं पक्वं हीनवीर्य्यत्वमाप्नुयात् । तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् । तदपि षोड़शमासाभ्यन्तरे पक्वतैलं गुणाधिकं बोद्धव्यम् । "ओषध्यो लघुपाकाः स्युर्निर्वीर्य्या वत्सरात्परम्" । ओषध्यो धान्यादयः । लघुपाकाः शीघ्रपाकाः "निर्वीर्य्याः स्युर्गुणैर्युक्ता आसवा धातवोरसाः" ।

सामान्यतो वैद्यकेऽभिनवानामेव गुणवत्ता घृतादीनां पक्वानामपि केषाञ्चित् गुणवत्ता उक्ता यथा "द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ । ऋते गुडघृतक्षौद्रधान्यकृष्णाविडङ्गतः" रसादिमध्येऽपि द्रव्यस्यैव सुश्रुते प्रधानत्वमुक्तं यथा

"अथातो द्रव्यरसगुणवीर्यविपाकविज्ञानीयमध्यायं व्याख्यास्यामः । केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं कस्माद्द्रव्यस्थितत्वादिह खलु द्रव्यं व्यवस्थितं न रसादयो यथाऽऽमे फले ये रसादयस्ते पक्वे न सन्ति । नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति । स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि । पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः । आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो भवन्ति । आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिभ्यारम्भः । शास्त्रप्रामाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते । क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्य क्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति । एकदेशसाध्यत्वाच्च द्रव्याणामेकदेशतोऽपि व्याधयः साध्यन्ते यथा महाद्रुचक्षोरेचेति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत्समवायिकारणमिति । नेत्याहुरन्ये रसास्तु प्रधानं कस्मादागमादागमोहि शास्त्रमुच्यते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च प्राणाः । उपदेशाच्चोपदिश्यन्ते हि रसा यथा मधुराम्ललवणा वातं शमयन्ति । अनुमानाच्च रसेन ह्यनुमीयते द्रव्यं यथा मधुरमिति । ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिच्छार्थं मधुरमाहरेदिति । तस्माद्रसाः प्रधानं रसेषु गुणसंज्ञा । रसलक्षणमन्यत्रोपदेक्ष्यामः । नेत्याहुरन्ये । वीर्य्यं प्रधानमिति कस्मात्तद्वशेनौषधकर्म्मनिष्पत्तेः । इहौषधकर्म्मागणूर्ध्वाधोभागोभयभागसंशोधनसंशमनसंग्रहणाग्निदीपनप्रपीड़नलेखनहृंहणरसायनवाजीकरणश्वयथुकरणविलयनदहनदारणदाहनप्राणघ्नविषप्रशमनानि वीर्य्यप्राधान्याद्भवन्ति । तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वाज्जगतः । केचिदष्टविधमाहुरुष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्य्याणि स्वबलगुणोत्कर्षाद्रसमभिभूयात्मकर्म कुर्व्वन्ति यथा तावन्महत्पञ्चमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्य्यत्वात् तथा कुलत्थः कषायः कटुकः पलाण्डुः स्नेहभावाच्च । मधुरयेक्षुरसो वातं वर्द्धयति शीतवीर्य्यत्वात् । कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लमामलकं लवणं सैन्धवञ्च । तिक्ता काकमाची पित्तं वर्द्धयत्युष्णवीर्य्यत्वान्मधुरा मत्स्याश्च । कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात् । अम्लं कपित्थं श्लेष्माणं शमयति रूक्षवीर्य्यत्वान्मधुरं क्षौद्रञ्च । तदेतच्चिदर्शनमात्रमुक्तम्" भवन्ति चात्र "ये रसा वातशमना भवन्ति यदि तेषु वै । रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम् । ये रसाः पित्तशमना भवन्ति यदि तेषु वै । तैक्ष्णैश्चाप्यौष्णलघुताश्चैव न ते तत्कर्म्मकारिणः । ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै । स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते" तस्माद्वीर्य्यं प्रधानमिति । नेत्याहुरन्ये । विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्वद्रव्याण्यभ्यवहृतानि सम्यक् विपक्वानि गुणं दोषं वा जनयन्ति । तत्राहुरन्ये प्रतिरसं पाक इति । केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तत्तु न सम्यक् भूतगुणादागमाच्छास्त्रो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यग्नेर्मन्दत्वात् । यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणमुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्वेषामिति केचिदाहुर्दृष्टान्तं चोपदिशन्ति यथा तावत् क्षीरस्यालोडितमभिपच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति । केचिदन्यथावदन्तो बलवतां बलमायान्ती-

त्वेवमनवस्थितिस्तस्मादसिद्धान्त एव । आगमे हि द्विविध एव पाको मधुरः कटुकश्च तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति गुणसाधर्म्याद्गुरुता लघुता च पृथिव्यापश्च गुर्व्यः शेषाणि लघूनि तस्माद्द्विविध एव पाक इति । भवन्ति चात्र । द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः । निर्वर्त्यन्तेऽधिकास्तत्र पाको मधुर उच्यते । तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु । निर्वर्त्यन्तेऽधिकास्तत्र पाकः कटुक उच्यते । पृथक्त्वदर्शिनामेष वादिनां वादसंग्रहः । चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः । तद्द्रव्यमात्मना किञ्चित्किञ्चिद्वीर्येण सेवितम् । किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा । पाको नास्ति विना वीर्याद्वीर्यं नास्ति विना रसात् । रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम् । जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षकं स्मृतम् । अन्योऽन्यापेक्षकं जन्म यथा स्याद्देहदेहिनोः । वीर्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः । रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः । द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः । श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः । अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः । आगमेनोपयोज्यानि भेषजानि विचक्षणैः । प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः । नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन । सहस्रेणापि हेतूनां नाम्बष्ठादिर्विरेचयेत् । तस्मात्तिष्ठेत्तु मतिमानागमेन तु हेतुषु" । "वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते । द्रव्यमित्युच्यते सोऽर्थो भेदत्वेन व्यवस्थितः" हरिणा परिभाषिते ॥वस्तुपदार्थे च । "स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च" हरिः लिङ्गसंख्यानन्वयित्वेन सत्त्वरूपतया च तस्य तथात्वम् । "क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः । असत्त्वभूतता तस्या द्रव्यमेवावधार्यताम्" हरिः । क्रियानाधारकारकत्वेन युज्यते इत्यर्थः । तेन लिङ्गसंख्याकारकत्वशून्यत्वं सत्त्वमेव द्रव्यत्वम् । "क्रदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यम् । द्रव्यविशेषहस्तादौ उच्छिष्टदोषादिगुद्विभेद उक्तः कूर्मपु० "उच्चावचान्नपानेषु द्रव्यहस्तो भवेन्नरः । भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत् । तैजसं वै समादाय यद्युच्छिष्टो भवेद्द्विजः । भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत् । यद्यद्द्रव्यं करे धृत्वा भवेदुच्छेषणान्वितः । आनिधायेतरद्द्रव्यमाचान्तः शुचितामियात् । वस्त्रादिषु विकल्पः स्यात् न तत्स्पृष्टाचमेदिह । अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि । कृत्वा मूत्रपुरीषं वा दुष्टहस्तो न दुष्यति" ।

द्रव्यक त्रि० द्रव्यं हरति वहति आवहति वा द्रव्य+कन् । १द्रव्यहारके २तद्वाहके ३द्रव्यावाहके च ।

द्रव्यकल्क पु० "द्रव्यकल्कः पञ्चधा स्यात् कल्कं चूर्णं रसस्तथा । तैलमष्टिः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये ! वैद्यकोक्ते कल्कादिपञ्चके ।

द्रव्यगण पु० । ६त० । सुश्रुतोक्ते ओषधिविशेषाणां सप्तत्रिंशन्मितानां गणभेदे ते च तत्र दर्शिता यथा "द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः

अथातः समासेन सप्तत्रिंशद्द्रव्यगणा भवन्ति, तद्यथा । विदारीगन्धा विदारी सहदेवा विश्वदेवा श्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहाहस्तिनौ पुनर्नवैरण्डौ हंसपदी हस्तिकाल्यृषभौ चेति । "विदारीगन्धादिरयं गणः पित्तानिलापहः । शोषगुल्माङ्गमर्दोर्द्ध्वश्वासकासविनाशनः॥ आरग्वधमदनगोपधोण्टाकुटजपाठाकण्टकीपाटलामूर्वेन्द्रयवसप्तपर्णनिम्बकुरण्टकदासीकुरण्टकगुडूचीचित्रकशार्ङ्गेष्टाकरञ्जद्वयपटोलकिराततिक्तकानि सुषवी चेति । आरग्वधादिरित्येष गणः श्लेष्मविषापहः । मेहकुष्ठज्वरयमीकण्डूघ्नो व्रणशोधनः२ । वरुणार्त्तगलशिग्रुतर्कारीमेषशृङ्गीपूतीकनक्तमालमोरटाग्निमन्थसैरीयकहयविम्बीवसुकवसिरचित्रकशतावरीविल्वाजशृङ्गीदर्भा हस्तीहयश्चेति । वरुणादिर्गणोह्येष कफमेदोनिवारणः । विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन्३ । वीरतरुसहचरहयदर्भहस्तादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटावसुकवसिरभङ्गुककुरण्टकेन्दीवरकपोतवङ्क्षाः श्वदंष्ट्रा चेति । वीरतर्वादिरित्येष गणो वातविकारसुखः अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः४ । सालसारालकर्णखटिरकदरकालस्कन्धकसुकभूर्जमेषशृङ्गीतिनिशचन्दनशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकास्वकर्णागुरूणि कालीयकञ्चेति । सालसारादिरित्येष गणः कुष्ठविनाशनः । मेहपाण्ड्वामयहरः कफमेदोविशोषणः५ । रोध्रसावररोध्रप्लाशकुटजवटाशोकफल्गीकट्फलैलवालुकसप्तकोजिङ्गिनीकदम्बसालाः कदली चेति । एष रोध्रादिरित्युक्तो मेदःकफहरो गणः

योनिदोषहरः स्तन्यो वर्गो विषविनाशनः६। अर्कालर्क-रञ्जहयनागदन्तीमयूरकभार्गीराज्ञेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतादविकाल्पलवणास्तापसवृक्षश्चेति। अर्कादिको गणो ह्येष कफमेदोविषापहः। कृमिकुष्ठप्रशमनो विशेषादुव्रणशोधनः७। सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणतुलसकसुसुखकालमालकारमर्दशवकखरपुष्पाविडङ्गकट्फलसुरसीनिर्गुण्डीकुलाहलोलोन्दुरुकर्णिकाफञ्जीप्राचीबलाकाकमाच्यो विश्वसुष्टिकश्चेति। सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः। प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः८। शुष्ककपलाशधवचित्रकमदनवृक्षगिरिशपावज्रवृक्षास्त्रिफला चेति। शुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहृत्। मेहार्शःपाण्डुरोगघ्नः शर्कराश्मरिनाशनः९। पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति। पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः निहन्याद्दीपनो गुल्ममूलघ्नश्चामपाचनः१०। एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिशुण्ठ्यस्थौल्येयकत्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्जरसतरुष्ककुन्दुरुकाऽगुरुस्थूलक्षीरीभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति। एलादिको वातकफौ निहन्याद्विषमेव च। वर्णप्रसादनः कण्डूपिडकाकोठनाशनः११। वचामुस्तातिविषाभयाभद्रदारूणि नागकेशरश्चेति १२। हरिद्राटारुहरिद्राकनशीकुटजबीजानि मधुकं चेति१३। एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ। आमातीसारशमनौ विशेषाद्दोषपाचनौ १२।१३। श्यामामहाश्यामाभद्रदन्तीशङ्खिनीतिल्वककम्पिल्लकरम्यकक्षुद्रकपत्रत्रैवीगवाक्षीराजवृक्षकरञ्जहयगुडूचीसप्तलाक्षगलान्त्रीसुधाः सुवर्णक्षीरी चेति। उक्तः श्यामादिरित्येष गणो गुल्मविषापहः। आनाहोदरविड्भेदी तथोदावर्त्तनाशनः१४। वृक्षतीक्ष्णकारिकाकुटजफलपाठा मधुकश्चेति। पाचनीयो वृक्षादिर्गणः पित्तानिलापहः। कफारोचकहृल्लासमूत्रकृच्छ्रतृडापहः१५। पटोलचन्दनकुचन्दनमूर्वागुडूचीपाठाः कटुरोहिणी चेति। पटोलादिर्गणः पित्तकफारोचकनाशनः। ज्वरोपशमनो ब्रण्यश्छर्दिकण्डूविषापहः १६। काकोलीक्षीरकाकोलीजीवकर्षभकसुद्गपर्णीमाषपर्णीमेदामहामेदाक्षिप्तरुहाकर्कटशृङ्गीतुगाक्षीरोपण्यकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्ती मधुकश्चेति। काकोल्यादिरयं पित्तशोणितानिलनाशनः। जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा।१७। जीवकर्षभकमेदाद्वयकाकोलीसहयहिङ्गूनि तुल्यकल्पेति। जीवकादिः कफं हन्ति गणो मेदोविशोषणः। अस्रदोषकरामूलकृच्छ्रगुल्मप्रणाशनः१८। सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधुकपुष्पागण्डीरश्चेति। सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः। पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः१९। अञ्जनरसाञ्जनलोध्रपुष्पप्रियङ्गुनीलोत्पलनलदनलिनकेशराणि मधुकश्चेति। अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः। विषोपशमनो दाहं निहन्त्याभ्यन्तरं तथा२०। पटुपञ्चकाद्राक्षाकट्फलदाडिमराजादनकतकफलशाकफलानि त्रिफला चेति। पटुपञ्चकादिरित्येष गणोऽनिलविनाशनः। मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः२१। प्रियङ्गुसमङ्गाधातकीपद्मागरक्तचन्दनकुचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेशरयोजनवल्ल्यो दीर्घमूला चेति २२। अम्बष्ठाधातकीकुसुमसमङ्गाकट्वङ्गमधुकबिल्वधेयिकारोध्रसावररोध्रपलाशनन्दीवृक्षपद्मकेशराणि चेति २३। गणो प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनो। सन्धानीयो हितो पित्ते व्रणानाञ्चापि रोपणो२२।२३। न्यग्रोधोदुम्बराश्वत्थप्लक्षमधूककपीतनककृष्णाम्रकोशाम्रचोरकपत्रजम्बूद्वयपियालमधुकरोहिणीवञ्जुलकट्वम्बदरीतिन्दुकोशल्लकीरोध्रसावररोध्रभल्लातकपलाशा नन्दीवृक्षश्चेति। न्यग्रोधादिर्गणो वर्ण्यः संग्राही भग्नसाधकः। रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत्२४। गुडूचीनिम्बकुसुम्बुरुचन्दनानि पद्मकश्चेति। एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः। हृल्लासारोचकवमीपिपासादाहनाशनः २५। उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुष्करीकाणि मधुकश्चेति। उत्पलादिरयं दाहपित्तरक्तविनाशनः। पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः२६। सुस्वादुहरिद्राद्वारुहरिद्राहरीतक्यामलकविभीतककुष्ठहैमवतीवचापाठाकटुरोहिणीशार्ङ्गेष्टातिविषाद्राविडीभल्लातकानि चित्तकश्चेति। एष सुस्वादिको नाम्ना गणः श्लेष्मनिषूदनः। योनिदोषहरः स्तन्यशोधनः पाचनस्तथा२७। हरितक्यामलकविभीतकानि त्रिफला। त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशिनी। चक्षुष्या दीपनी चैव विषमज्वरनाशिनी२८। पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकम्। त्र्यूषणं कफमेदोघ्नं मेहकुष्ठप्रणाशनम्। निहन्याद्दीपनं गुल्म-

पीनसाग्न्यल्पतामपि२८। आमलकीहरीतकीपिप्पल्यश्चि-तकश्चेति । आमलक्यादिरित्येष गणः सर्वज्वरापहः । चक्षुष्यो दीपनो हृद्यः कफारोचकनाशनः३०। त्रपुसीसता-म्ररजतलशुनोहसुवर्णानि लोहमलश्चेति । गणस्त्र-पादिरित्येष गरक्रिमिहरः परः । पिपासाविषहृद्रोग-पाण्डुमेहहरस्तथा३१ । लाक्षारेवतकुटजाऽश्मारकट-फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति । कषायतिक्तमधुरः कफपित्तार्शिनाशनः । कुष्ठक्रिमि-हरश्चैव दुष्टव्रणविशोधनः३२ । पञ्च पञ्चमूलान्यत ऊर्द्ध्वं वक्ष्यामः । तत्र त्रिकण्टकहृतीद्वयपृथक्पर्णी विदा-रीगन्धा चेति कनीयः१ । कषायतिक्तमधुरं कनीयः पञ्चमूलकम् । वातघ्नं पित्तशमनं हृद्यं बलवर्द्धनम्३२। बिल्वाग्निमन्थटुण्टुकपाटलाशाल्पर्णयश्चेति महत्२ । "स तिक्तं कफवातघ्नं प्राणे बह्वग्निदीपनम् । मधुरानुरस-श्चैव पञ्चमूलं महत् स्मृतम्३३। अनयोर्द्वयमूलसञ्ज्ञते । "गणः श्वासहरोऽयेष कफपित्तानिलापहः । आमस्य पाचनश्चैव सर्वज्वरविनाशनः३४। विदारीसारिवारजनी-गुडूच्योऽजशृङ्गी चेति वल्लीसंज्ञः १। करमर्दत्रिकण्टकसै-रीयकशतावरीस्थिरभ्रमस्य इति कण्टकसंज्ञः ४। रक्तपि-हरौ द्वौ तौ शोफक्षयविनाशनौ । सर्वमेहहरौ चैव शुक्र-दोषविनाशनौ३५।३६ कुशकाशानन्तदर्भकाण्डेक्षुका इति तृणसंज्ञकः ५। मूत्रदोषविकारश्च रक्तपित्तं तथैव च । अन्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत् । एषां वा-तहरावाद्यावन्यः पित्तविनाशनः । पञ्चको क्षेत्रशमना-वितरौ परिकीर्तितौ" ३७लिखितादिकमन्यत्रोपदेक्ष्यामः । "समासेन गणा ह्येते प्रोक्तास्तेभ्यान्तु विस्तरम् । चिकित्-सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम् । एभिर्लेपान् कषायश्च तैलं सर्पींषि पानकान् । प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक् । धूमवर्तिनिलक्केदैः सर्वर्तुष्वन-भिद्रुते । व्याहृत्या स्टहे न्यस्ते हिधिनौषधसंग्रहम् । समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत् । पृथङ्-मिश्रान् समस्तान्वा गणं वा व्यस्तसंहतम्" ।

द्रव्यगुण पु॰ द्रव्यस्य गुणः प्रतिपादकतया यत्र । द्रव्याणां ज्ञापके ग्रन्थभेदे यथा भावप्र॰ द्रव्याणां गुणज्ञापक-भाग इत्यादि ।

द्रव्यपति पु॰ द्रव्यभेदानां पतिः । इ॰सं॰ ४१अ॰ उक्ते द्रव्यभेदानां महार्घतादिप्रयोजके पत्यौ मेषादिराशौ यथा "ये येषां द्रव्याणामधिपतयो राशयः सप्तदृष्टाः । सुनिभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि । वस्त्रा-विकुसुमानां मसूरगोधूमराजकयवानाम् । स्थलसम्भ-वौषधीनां कनकस्य च कीर्तितो मेषः । गवि वस्त्रकुसु-मगोधूमशालियवमहिषसुरभितनयाः स्युः । मिथुनेऽपि धान्यशारदवल्लीशालूककर्पासाः । कर्किणि कोद्रवकट-कोदूषफलकन्दपत्रचोचानि । सिंहे तुषधान्यरसाः सिंहादीनां त्वचः सगुडाः । षष्ठेऽतसीकलायाः कुल-त्थगोधूमसुद्गनिष्पावाः । सप्तमराशौ माषा गोधूमाः सर्षपाः सयवाः । अष्टमराशाविक्षुः सैन्धं लोहान्य-जाविकं चापि । नवमे तु तगरखर्जूराम्बरास्ततिल-धान्यमूलानि । मकरे तरुगुल्मादा सैन्धे क्षुतुवर्षलण्ण-लोहानि । कुम्भे सलिलजफलकुसुमरत्नचित्राणि रू-पाणि । मीने कपालसम्भवरत्नान्यम्बूद्भवानि वस्त्राणि । स्नेहाश्च नैकरूपा व्याख्याता मतुसजातं च । राशेर्व-तुर्दशार्थायसप्तनवपञ्चमस्थितो जीवः । द्वादशदशम-स्थानेषु शशिजश्च वृद्धिकरः । षट्सप्तमगो हानिं वृद्धिं शुक्रः करोति शेषेषु । उपचयसंस्थाः क्रूराः शुभदाः शेषेषु हानिकराः । राशेर्यस्य क्रूराः पीडास्था-नेषु संस्थिता बलिनः । ततुप्रोक्तद्रव्याणां महार्घता दु-र्लभत्वं च । दृष्टस्थाने सौम्या बलिनो येषां भवन्ति राशीनाम् । तद्द्रव्याणां वृद्धिः सामार्घ्यमदुर्लभत्वं च । गोचरपीडायामपि राशिर्बलिभिः शुभग्रहैर्दृष्टः । पीडां न करोति तथा क्रूरैरेवं विपर्यासः" ।

द्रव्यमय त्रि॰ द्रव्य+प्राच्युर्ये मयट् । साधनतया द्रव्यप्रचुरे यज्ञे द्रव्यसाधनके यज्ञादौ "द्रव्ययज्ञास्तपोयज्ञा ज्ञान-यज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च इत्युपक्रमे "श्रे-यान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परन्तप ! । सर्वक-र्माखिलं पार्थ ! ज्ञाने परिसमाप्यते" गीता ।

द्रव्यविशेष पु॰ सुश्रुतोक्ते धर्मविशेषेण द्रव्याणां पार्थिव-त्वादिविशेषे यथा

"अथातो द्रव्यविशेषविज्ञानीयमध्यायं व्याख्यास्यामः । पृथिव्यप्तेजोवाय्वाकाशानां समुदायाद्द्रव्याभिनिर्वृत्ति-स्तत्कर्षस्तत्प्रभिव्यञ्जको भवतीदं पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति । तत्र स्थूलसा-रसान्द्रमन्दस्थिरखरगुरुकठिनगन्धबहुलमीषत्कषायं प्रा-यशो मधुरमितिपार्थिवं तत् स्थैर्य्यबलसङ्घातोपचयकरं विशेषतश्चाधोगतिस्वभावमिति । शीतस्निग्धस्नि-ग्धखरसान्द्रमृदुपिच्छिलरसबहुलमीषत्कषायाम्लबहुलं म-

पुररसप्रायमाम्लं तत् क्षेपनप्रक्षादनक्लेदनबन्धनविध्यन्दनकरमिति। उष्णतोक्षस्तूक्ष्मरूक्षखरलघुविशदं रूपगुणबहुलमीषदम्लमवयं कटुकरसप्रायं विशेषतस्तीक्ष्णगतिस्वभावमिति तैजसं तद्दहनपचनधारणतापनप्रकाशनप्रभावर्णकरमिति। स्तूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति। श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयं तन्मार्दवशैथिल्यलाघवकरमिति"।

द्रव्यशुद्धि स्त्री ६त०। द्रव्याणां प्रक्षालनादिना मलादेरपनयने। द्रव्यविशेषस्य शुद्धिभेदा २७६ पृष्ठादौ द्रष्टव्याः "प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च" मनुः

द्रष्टव्य त्रि० दृश-तव्य। साक्षात्कर्तव्ये "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" बृ०उ०।

द्रष्टृ त्रि० दृश-तृच्। १दर्शके २साक्षात्कारके ३प्रकाशके च "नान्योतोऽस्ति द्रष्टा" श्रुतिः "द्रष्टारोव्यवहाराणां साक्षिणश्च तएव हि" याज्ञ०। "दृश्यदृष्टृसंयोगो हेयहेतुः" योगसू० "चक्षुर्जन्यमनोवृत्तिश्चिद्युक्ता रूपभासिका। दृष्टिरित्युच्यते द्रष्टा दृष्टिकर्त्तेति चोच्यते शब्दार्थचि० धृतवाक्यम्।

सांख्यमते यथा पुरुषस्य द्रष्टृत्वं तथा सां०सू० निरूपायि यथा "द्रष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणाम् द्रष्टृत्वादिपञ्चकं वक्तृत्वादिपञ्चकं सङ्कल्पयितृत्वं चात्मनः पुरुषस्य, दर्शनादिवृत्तौ करणत्वं त्विन्द्रियाणामित्यर्थः। ननु द्रष्टृत्वश्रोतृत्वादिकं कदाचिदनुभवे पर्यवसानात् पुरुषस्याविकारिणोऽपि घटतां वक्तृत्वादिकं क्रियामात्रं तत्कथं कूटस्थस्य घटतामिति चेन्न अयस्कान्तवत् सान्निध्यमात्रेण दर्शनादिवृत्तिकर्तृत्वस्यैवात्र द्रष्टृत्वादिशब्दार्थत्वात्। यथा हि महाराजः स्वयमव्याप्रियमाणोऽपि सैन्येन करणेन योद्धा भवत्याज्ञामात्रेण प्रेरकत्वात् तथा कूटस्थोऽपि पुरुषश्चक्षुरादाविखिलकरणैर्द्रष्टा वक्ता सङ्कल्पयिता चात्रैवमादिर्भवति संयोगात्स्वसान्निध्यमात्रेणैव तेषां प्रेरकत्वादयस्कान्तमणिवदिति। कर्तृत्वं चात्र कारकचक्रप्रयोक्तृत्वं करणत्वं क्रियाहेतुव्यापारवत्त्वं तत्साधकतमत्वं वा कुठारादिवत्। यत्तु शास्त्रेषु पुरुषे दर्शनादिकर्तृत्वं निषिध्यते तदनुकूलतिमत्त्वं तत्तत्क्रियावत्त्वं वा। तथा चोक्तम् "अत आत्मनि कर्तृत्वमकर्तृत्वं च संस्थितम्। निरिक्षत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति अतएव कारकचक्रप्रयोक्तृताशक्तेरात्मस्वरूपतया द्रष्टृत्ववक्तृत्वादिकमात्मनो नित्यमिति श्रूयते। "न दृष्टेर्दृष्टेर्विपरिलोपो विद्यते न श्रोतुःश्रुतेर्विपरिलोपो विद्यत इत्यादिनेति"। ननु प्रमाणविभागे प्रत्यक्षादिवृत्तीनामेव करणत्वसङ्गमात् कथमिन्द्रियस्योच्यत इति चेन्न अत्र दर्शनादिरूपासु चक्षुरादिद्वारकबुद्धिवृत्तिष्वेवेन्द्रियाणां करणत्ववचनात्। तत्र पुरुषनिष्ठे बोधाख्यफले वृत्तीनां करणत्वस्योक्तत्वादिति" प्र० भाष्यम्।

सा०का० तत्त्वकौमुद्योक्तयैव व्यवस्थापितं यथा "तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृभावश्च" "तत्र चेतनत्वेन अविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते चेतनोहि द्रष्टा भवति नाचेतनः। साक्षी च दर्शितविषयो भवति यस्मै प्रदर्श्यते विषयः स साक्षी यथा हि लोके अर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न चाचेतनोविषयो वा शक्योविषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी अतएव द्रष्टापि भवति" त०कौ० न्यायमते च दर्शनादिज्ञानाश्रयत्वादात्मनोद्रष्टृत्वं सुव्यक्तमिति भेदः।

द्रह पु० क्षुद+ष्टघो०। अगाधजले क्षुद्रे हेमच०।

द्रह्यत् त्रि० दृंह-शतृ वेदे निपा०। दृढीकुर्वति। "दृप्यत् सोमं पाहि दृह्यदिन्द्र!" ऋ०२।११।१५ "दृह्यत् दृंहते रिदं रूपं दृढीकुर्वत्" भा०।

द्रा सम्प्रे पलायने अदा०अक० अनिट्। द्राति अद्रासीत्। दद्रौ पलायनं बहुलायासेन गतिः तत्र सक०। "मतयोदस्य दद्रुः" ऋ०१।६२।११। द्रापयति "एष वै तं द्रापयति यं दिद्रापयिषति" शत० ब्रा०६।१।१।२४। अप+अपसरणे "अप द्राह्यवीरहः" अथ०६।१४।२ "माप द्रान्त्वरातयः" ६।१२६।१

नि+मेध्यानाड्योसंयोगरूपनिद्रायाम् अक०। "तदा निद्राद्रुपपल्वलं खगः" नैष०।

प्र+प्रकर्षेण पलायने प्रद्राणः

द्राक् अव्य० द्रा-बा०कु। द्रुते शीघ्रे झटितीत्यर्थे अमरः "द्राक्पर्यस्तकपालसम्पुटमिलदित्यादि" वीरच० "धनस्य द्राग्वियुक्तता" कामन्द०"साक्षात्कृति कृतिषु निरस्तानन्दमिन्द्रादिषु द्राक्" नैष० ६स०।

द्राक्ष काङ्क्षायां भ्वा॰ पर॰ सक॰ सेट् इदित्। द्राङ्क्षति अद्राङ्क्षीत्। दद्राङ्क्ष दद्राङ्क्षतुः।

द्राक्षा स्त्री द्राक्षि–अ वा॰ नलोपः। लघ्वीकायां गोस्तन्यां (किसमिस) अमरः। "द्राक्षा पक्वा सरा शीता चक्षुष्या हृंहिणी गुरुः। स्वादुपाकरसा स्वर्या तुवरा स्वेदमूत्रविट्। कोष्ठमारुतकृद् हृद्या कफपित्तविरुचिप्रदा। हन्ति तृष्णाज्वरश्वासवातवातास्रकामलान्। कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान्। आमा साऽल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत्। हृद्या स्वादु गोस्तनी द्राक्षा गुर्वी च कफपित्तकृत्। अबीजाम्ला स्वल्पतरा गोस्तनीसदृशी गुणैः। द्राक्षा पर्वतजा लघ्वी साऽम्ला श्लेष्मास्रपित्तकृत्। द्राक्षा पर्वतजा यादृक् तादृशी करमर्दिका" इति भावप्र॰ तस्याः फलम् अण् हरीत॰ लुप्। तत्फलेऽपि स्त्री। "द्राक्षे! दृश्यन्ति के त्वामकृत! कृतमसि" गोतगो॰ "आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु" रघुः "पुष्पागतालीबकुलं द्राक्षारसघनं क्वचित्" हरिवं॰ ११४अ॰ अप्राणिषष्ठ्यन्तात् परस्य द्राक्षाशब्दस्य तत्पुरुषे चूर्णा॰ आद्युदात्तता। प्रस्थशब्दे परे मात्रादित्वात् पूर्वपदमाद्युदात्तम् द्राक्षाप्रस्थः। यथा॰मतोर्मस्य न वः। द्राक्षामान्

द्राक्षाघृत न॰ द्राक्षाभिश्चेन पक्वं घृतम्। "पुराणसर्पिषः प्रस्थो द्राक्षार्द्धप्रस्थसाधितः। कामलागुल्मपाण्ड्वर्शोज्वरमेहोदरापहः" चक्रदत्तोक्ते घृतभेदे

द्राख शोषणे सक॰ अलमर्थे अक॰भ्वा॰पर॰ सेट्। द्राखति अद्राखीत्। ऋदित् णिचि चङि अदद्राखत् त। दद्राख अयं बधेऽपि।

द्राघ आयासे शब्दे भ्रमे च भ्वा॰पर॰ अक॰ सेट्। द्राघति अद्राघीत्। ऋदित् णिचि चङि अदद्राघत् त। दद्राघ केचित् अस्य इदित्त्वमपीच्छन्ति द्राङ्क्षति अद्राङ्क्षीत्।

द्राघि नामधातुः दीर्घीकरणे दीर्घं करोति दीर्घ+कृतौ णिच्–द्राघादेशः सक॰ उभ॰ सेट्। द्राघयति ते अदिद्राघत् त। "द्राघयन्ति हि मे शोकं अर्थमाणागुणास्तव" भट्टिः

द्राघिमन् पु॰ दीर्घस्य भावः इमनिच् द्राघादेशः। दीर्घत्वे "वासांसि च द्राघिमवन्त्युदूढः" भट्टिः "वर्षिमा च मे द्राघिमा च मे" यजु॰१८।४

द्राघिष्ठ त्रि॰ अतिशयेन दीर्घः इष्ठन् द्राघादेशः। अतिदीर्घे ईयसुन् द्राघीयस् तत्रार्थे त्रि॰ स्त्रियां ङीप्।

द्राघमन् पु॰ द्राघिमन्+वेदे पृषो॰ इकारस्याकारः। दीर्घत्वे "दोषं द्राघम्ना सुरभि भूरक्षे" ऋ॰१०।७०।४ ततीयास्थाने आच् अनोऽङ्गोमे रूपसिद्धिः द्राघम्ना द्राघिम्ना इत्यर्थः।

द्राड विभेदे भ्वा॰आ॰ सक॰सेट्। द्राडते अद्राडिष्ट। दद्राडे

द्राण त्रि॰ द्रा–कर्त्तरि क्त तस्य नः। १सुप्ते २पलायिते च। भावे क्त। १सुप्ते पलायने च न॰ अमरः।

द्राप पु॰ द्रा–णिच्–पुक् अच्। १पङ्के २आकाशे ३कपर्दिनि ४मूर्खे च शब्दकल्पतरुः।

द्रापि त्रि॰ द्रापयति कुत्सितां गतिं प्रापयति पापिनम् द्रा–णिच् पुक् इन्। कुत्सितगतिप्रापके रुद्रे "द्रापे! अन्धसस्पते! दरिद्र! नीललोहित!" यजु॰१६।४७। २कवचे च "विद्रुद्रापिं हिरण्ययं वरूथो वस्व निर्णिजम्" ऋ॰१।२५।१३ "द्रापिं कवचम्" भा॰

द्रामिल पु॰द्रमिलो देशोऽभिजनोऽस्य अण्। १चाणक्ये हेमच॰ २पित्रादिक्रमेण तद्देशवासिनि त्रि॰ बहुत्वे अणो लुक्। द्रमिलाः। [तापे च।

द्राव पु॰ द्रु–गतौ स्रुतौ भावे घञ्। १गतौ २द्रवणे ३अनु-

द्रावक पु॰ द्रवति चन्द्रकरसम्पर्कात् द्रु–ण्वुल्। १चन्द्रकान्तमणौ २विदग्धे ३मोघके च मेदि॰। ४विडङ्गे जारे शब्दमाला। द्रावयति द्रु–णिच् ण्वुल्। ५द्रवकारके ६हृदयग्राहिणि त्रि॰ धरणिः। ७रसभेदे टङ्कने पु॰ शब्दमाला। ८लालायां स्त्री टापि अत इत्वम् शब्दरत्ना॰ ९प्लीहाद्यौषधभेदे पुं॰। ०१विकथके न॰ राजनि॰।

द्रावककन्द पु॰ द्रावकः कन्दोऽस्य। तैलकन्दे राजनि॰।

द्रावकर न॰ द्रावं द्रवं करोति स्वर्णादिकं स्वसम्पर्केण कृ–ताच्छील्ये ट। श्वेतटङ्कने राजनि॰ अण्। द्रावकार द्रवकारके त्रि॰।

द्रावण न॰ द्रावयति जलमलं स्वसंयोगात् द्रु–णिच् युच्। १कतकफले (निर्मौल्य) रत्नमाला। २पलायनकारके त्रि॰। "त्रैलोक्यद्रावणं क्रूरं दुराचारं महाबलम्" (रावणम्) हरिवं॰ ४अ॰।

द्रावयित्नु त्रि॰ द्रु–णिच्–इत्नुच् त्नुकरणेनैवेटिरूपसिद्धौ इत्नुच्करणं वा॰अन्योभ्यापि इत्नुच् भवतीति ज्ञापितम्। द्रावणशीले "सूर्यस्येव रश्मयो द्रावयित्नवः" ऋ॰९। ६९।६।

द्राविड त्रि॰ द्रविडोदेशोऽभिजनोऽस्य अण्। पित्रादिक्रमेण द्रविडदेशवासिनि। बहुषु अणो लुक्। द्रविडाः क्वचिदार्षे न लुक्। "कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः। आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः" स्कन्दपु॰।

द्राविडक न० द्रविडे भवः अण् संज्ञायां कन्। १विड्लवणे (जियतपती) ख्याते २वेधसख्यके पु० अमरः।

द्राविड़भूतिक पु० द्राविडी भूतिरुत्पत्तिर्यस्य कप्। विड्लवणे शब्दरत्ना०।

द्राविडी स्त्री द्रविडे भवा अण् ङीप्। एलायां राजनि०।

द्राह जागरे भ्वा० आत्म० अक० सेट्। द्राहते अद्राहिष्ट दद्राहे द्रदित् णिच् चङि अदद्राहत् त।

द्राह्यायण पु० द्रुहस्यर्षेर्गोत्रापत्यं युवा यञ् यूनि फक्। सामगानां कल्पसूत्रकारके ऋषिभेदे।

द्रु गतौ भ्वा० पर० सक० अनिट्। द्रवति स्वार्थे चङ् अदुद्रवत्। णिचि चङि तु अदि(द्रु)द्रवत् त। दुद्रवे। गतिश्चेह संयोगानुकूलव्यापारः द्रवद्रव्याणां दूरप्रसरणरूपं स्यन्दनं च "द्रवत्वात् स्यन्दनम्" कणा० सूत्रम् "स्यन्दनं द्रव्यत्वादसमवायिकारणादुत्पद्यते। तथा हि पतितानामपां बिन्दूनां परस्परं संयोगेन महत् जलस्रोतोयज्जायते तस्य यत् स्यन्दनं दूरप्रसरणं तत् द्रवत्वादसमवायिकारणादुत्पद्यते गुरुत्वान्निमित्तकारणादपसु समवायिकारणेषु" उप०वृत्तिः णिचः सनि दि(द्रु)द्रावयिषति। तत्र गतौ "ससुद्रमेवाभिसृत्या द्रवन्ति" गीता "ततः किरीटी सहसा पाञ्चालान् समरेऽद्रवत्" भा०आ०५४ ७८श्लो० "तं दुद्रावाद्रिणा कपिः" भट्टिः।

द्रु अनुतापे स्वा०पर० सक० अनिट्। द्रुणोति अद्रौषीत्। बधे च "स भस्मसात् चकारारीन् दुद्राव च कृतान्तवत्" भट्टिः।

द्रु पु०द्रवत्यूर्ध्वं द्रु-बा० डु। १वृक्षे २शाखायाञ्च। ३गतौ स्त्री। "अदादीनाथ षड्भागं द्रुमांसमधुसर्पिषाम्" मनुः द्रुघणः। ४वृक्षविकारे न० "द्रुण इङ्गूतिमूदिम" ऋ०१।१६१।१ "द्रुणो द्रुमविकारस्य" भा० विकारे प्रकृतिशब्दः ततश्च तत्स्थः तच्छब्द इति च तत्र न्यायोक्तिः। ५द्रवयुक्ते त्रि०। "द्रुणा सधस्थमासदत्" ऋ० ९।१।२ "द्रुणा द्रोणकलसेन" भा० तत्र पुस्त्वमपि "आ तु षिञ्च हरिणीं द्रोणपस्त्ये" ऋ०१०।१०१।१० "द्रोर्द्रुमविकारस्य" भा० [कर्म०। देवदारुवृक्षे अमरः।

द्रुकिलिम न०किलति किल-क्रीडनयोः बा०किमच्।

द्रुघण पु० द्रुः वृक्षः संसारगतिर्वा हन्यतेऽनेन द्रु-हन करणे अप् घनादेशो णत्वञ्च। १मुद्गरे लौहमुद्गरे सूत्रधारादीनां मुद्गराकारे लौहमयास्त्रभेदे २कुठारे ३ब्रह्मणि च मेदि० ४भूमचम्पके शब्दचान्द्रिका पूर्वपदात् संज्ञायामिति णत्वे विहिते शब्दकल्पद्रुमे दन्त्यमध्यतोक्तिः प्रामादिकी ५द्रुमयये धने च "काशाया मध्ये द्रुघणं शयानम्" ऋ०१०।१०२।९ "द्रुघणं द्रुमयघणम्" भा० छान्दसोऽसंज्ञात्वेऽपि णत्वम्। [द्रुड्रोड। द्रुडः।

द्रुड मज्जने तु०क्र०पर० सक० सेट्। द्रुडति अद्रोडीत्।

द्रुण कुटिलीभवने तु० पर० अक० सेट् कुटादि। द्रुणति अद्रुणीत्। दुद्रोण। गतौ कुटिलीचरणे हिंसायाञ्च सक० पा०।

द्रुण न० द्रुणति हिनस्ति कुटिलीभवति वा द्रु-क। धनुषि २खड्गे च हेमच०१वृश्चिके ४भृङ्गे च पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ५पिशुने त्रि० शब्दमाला।

द्रुणस त्रि० द्रुरिव दीर्घा नासिकाऽस्य अच् समा० नसादेशः पूर्वपदात् संज्ञायां णत्वम्। दीर्घनासायुक्ते शब्दस्तोमे द्रुणस् इति हलन्ततोक्तिः सुद्रादीपात्।

द्रुणह पु० द्रुणं खड्गं जहाति स्वावकाशस्थानतोऽपसारणात् हा-क। खड्गपिधाने हारा०।

द्रुणा स्त्री द्रुणयते कुटिलीक्रियतेऽनया द्रु-चञर्थे क। व्यायां मौर्व्याम् हेमच०।

द्रुणि स्त्री द्रोणी-पृषो०। १द्रोण्यां भरतः वा ङीप्। २कर्णजलौकसि ३कच्छ्यां ५काष्ठाम्बुवाहिन्याञ्च भरतः।

द्रुत त्रि० द्रु-क्त। १जातद्रवे घृतसुवर्णादौ "द्रुतं द्रुतं वह्निसमागतं यतम्" भट्टिः "द्रुतशातकुम्भनिभमंशुमतः" माघः। २शीघ्रे न० ३शीघ्रतायुक्ते त्रि०। "ससम्भ्रमेन्द्रद्रुतपातितार्गलाः" काव्यप्र० "द्रुतपदमिति मा वयस्य! यासीः" माघः। ४विडाले मेदि०

द्रुतपद न०द्रुतं शीघ्रगामि पदम्। १शीघ्रगामिपदे। ६ब०। २तद्युक्ते त्रि०। "द्रुतपदं भवति नभनयाश्चेत्" वृत्तर० उक्ते द्वादशाक्षरपादके वर्णवृत्तभेदे।

द्रुतमध्या स्त्री "भत्रयमोजगतं गुरुणी चेद् युजि च नजौ व्ययुतौ द्रुतमध्या" छन्दो० उक्ते अर्द्धसमाख्ये वर्णवृत्तभेदे।

द्रुतविलम्बित न० "द्रुतविलम्बितमाह नभौ भरौ" वृत्तर० उक्ते द्वादशाक्षरपादके १वर्णवृत्तभेदे "किञ्चित् द्रुतञ्च विलम्बितञ्च किञ्चित्। २किञ्चिच्छीघ्रे किञ्चिद्विलम्बिते च "तरणिजा पुलिने नववल्लवीपरिषदा सह केलिकुतूहलात्। द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे"। छन्दोमञ्जरी।

द्रुति स्त्री द्रु-भावे क्तिन। १द्रवे २गतौ च।

द्रुनख पु० द्रीर्नख इव न संज्ञात्वेऽपि णत्वम्। १कण्टके त्रिका०

द्रुपद पु० पञ्चालानामधिपे यज्ञसेनापरनामके नृपभेदे "गच्छताद्यैव पाञ्चालान् द्रुपदस्य निवेशने। स्वयंवरो महांस्तत्र भविता सुमहाधनः। एवमुक्ताः प्रयातास्ते पाण्डवा जनमेजय!। राज्ञा दक्षिणपाञ्चालान् द्रुपदेनाभिरक्षितान्" भा०आ० १८४अ० स च मरुद्गणांशाज्जातः यथाह भा०आ०६७अ० "सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्भवः। पक्षात् स जज्ञे मरुतां देवानामरिमर्दनः। द्रुपदश्चापि राजर्षिस्तत एवाभवद्गणात्। मानुषे नृपलोकेऽस्मिन् सर्वशस्त्रभृतांवरः" स च भरद्वाजसखस्य पृषतनृपस्य पुत्रः यथोक्तं भा० आ० १२०अ० "भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः। तस्यापि द्रुपदो नाम तदा समभवत् सुतः। स नित्यमाश्रमं गत्वा द्रोणेन सह पार्थिवः। चिक्रीडाध्ययनञ्चैव चकार क्षत्रियर्षभः। ततो व्यतीते पृषते स राजा द्रुपदोऽभवत्। पाञ्चालेषु महाबाहुरुत्तरेषु नरेश्वर!" तस्य द्रोणेन बालसख्येऽपि पश्चात् वैरं जातं यथोक्तं भा०आ०१३१अ० "ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान्। अब्रवीत् पार्थिवं राजन्! सखायं विद्धि मामिह। इत्येवमुक्तः सख्या स प्रीतिपूर्वं जनेश्वरः। भारद्वाजेन पाञ्चाल्यो नाभ्यनन्दत वचोऽस्य तत्। सक्रोधामर्षजिह्मभ्रूः कषायोक्षतलोचनः। ऐश्वर्यमदसम्मत्तो द्रोणं राजाऽब्रवीदिदम्। द्रुपद उवाच। अकृतेयं तव प्रज्ञा ब्रह्मन्नतिसमञ्जसी। यन्मां ब्रवीषि प्रसभं सखा तेऽहमिति द्विज। न हि राज्ञामदीर्णानामेवं भूतैर्नरैः क्वचित्। सख्यं भवति मन्दात्मन्! श्रिया हीनैर्धनच्युतैः। सौहृदं मे त्वया ह्यासीत् पूर्वं सामर्थ्यबन्धनम्। न सख्यमजरं लोके हृदि तिष्ठति कस्यचित्। कालोह्येनं विहरति क्रोधो वैनं हरत्युत। मैवं जीर्णमुपास्स्वं त्वं सख्यं भवत्यकृधि। आसीत् सख्यं द्विजश्रेष्ठ! त्वया मेऽर्थनिबन्धनम्। दरिद्रो न वसुमतो नाविद्वान् विदुषः सखा। न शूरस्य सखा क्लीवः सखिपूर्वं किमिष्यते। ययोरेव समं वित्तं ययोरेव समं श्रुतम्। तयोर्विवाहः सख्यञ्च नतु पुष्टविपुष्टयोः। नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा। नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते। वैशम्पायन उवाच। द्रुपदेनैवमुक्तस्तु भारद्वाजः प्रतापवान्। मुहूर्तं चिन्तयित्वा तु मन्युनाऽभिपरिप्लुतः। स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धिमान्। जगाम कुरुमुख्यानां नगरं नागसाह्वयम्" द्रोणश्चार्जुनादीन् शिष्यान् कृत्वा तद्द्वारा द्रुपदं पराजित्य बद्धमानाय्य राज्यार्द्धहरणपूर्वकं द्रुपदेन पुनः सख्यं यथास्थितमकरोत् यथाह भा०आ०१३९अ० "ते यज्ञसेनं द्रुपदं गृहीत्वा रथमूर्द्धनि। उपाजह्रुः संग्रामात्यं द्रोणाय भरतर्षभ!। भग्नदर्पं हृतधनं तं तथा बद्धमागतम्। स वैरं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत्। विमुच्य तरसा राष्ट्रं पुरन्ते मृदितो मया। प्राप्य जीवं रिपुवशं सखिपूर्वं किमिष्यते। एवमुक्त्वा प्रहस्यैवं किञ्चित् स पुनरब्रवीत्। मा भैः प्राणभयाद्वीर! ऋणिनो ब्राह्मणा वयम्। आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया सह। तेन संवर्द्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ!। प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप!। वरं ददामि ते राजन्! राज्यस्यार्द्धमवाप्नुहि। अराजा किल नो राज्ञः सखा भवितुमर्हति। अतः प्रयतितं राज्ये यज्ञसेन! मया तव। राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे। सखायं मां विजानीहि पाञ्चाल! यदि मन्यसे। द्रुपद उवाच। अनास्थर्यमिदं ब्रह्मन्! विक्रान्तेषु महात्मसु। प्रीये त्वयाहं तत्तस्य प्रीतिमिच्छामि शाश्वतीम्। वैशम्पायन उवाच। एवमुक्तः स तं द्रोणो मोक्षयामास भारत!। सत्कृत्य चैनं प्रीतात्मा राज्यार्द्धं प्रत्यपादयत्। माकन्दीमथ गङ्गायास्तीरे जनपदायुताम्। सोऽध्यावसद्दीनमनाः काम्पिल्यञ्च पुरोत्तमम्। दक्षिणांश्चापि पाञ्चालान् यावच्चर्मण्वतीं नदीम्। द्रोणेन चैवं द्रुपदः परिभूयाथ पालितः। क्षात्रेण च बलेनास्य नापश्यत् स पराजयम्। हीनं विदित्वा चात्मानं ब्राह्मेण स बलेन तु। पुत्रजन्म परीप्सन् वै पृथिवीमन्वसञ्चरत्। अहिच्छत्रञ्च विषयं द्रोणः समभिपद्यत। एवं राजन्नहिच्छत्रा पुरी जनपदायुता। युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता" इति०। २द्रोःकाष्ठस्य देशभेदे "आदित्यं द्रुपदेषु वत्सम्" ऋ०१।२४।१२ "द्रोः काष्ठस्य पदेषु यूपस्य प्रदेशविशेषेषु" भा०द्रुमयं काष्ठमयं पदम्। ३काष्ठपादुकायाम् "द्रुपदादिव मुमुचानः" यजु०२०।२० "द्रुस्तरुस्तन्मयं पदं पादुका तस्मात् मुमुचानः पृथग्भवन्। यथा पादुकादोषैरसम्बद्धोभवति" वेदटी० द्रुपदं तच्छब्दोऽस्यस्यामृचि अच्। ४द्रुपदशब्दयुक्तायामृचि स्त्री "गायत्र्यष्टसहस्रं तु द्रुपदां वा शतं जपेत्"

भा०त०। साच ऋक् "द्रुपदादिव मुमुचानः" इत्यादिका यजु०२०।२०"द्रुपदान्तु ततोऽप्त्वा जलमादाय पाणिना" काशी० ३५अ०

द्रुपदात्मज पु० ६त०। १द्रुपदस्य राज्ञो नन्दने शिखण्डिनि २धृष्टद्युम्ने ३याज्ञसेन्यां स्त्री। शिखण्डी च स्त्रीरूपेण पूर्वं जातः पश्चात् स्थूणयक्षवरेण पुंस्त्वमाप तत्कथा भा०उद्यो०१९२।९२ अ० दृश्या "एवमेव महाराज! स्त्रीपुमान् द्रुपदात्मजः। स सम्भूतः कुरुश्रेष्ठ! शिखण्डी भरतर्षभ!" इत्यत्र अन्ये द्रुपदशब्दे दर्शिते द्रोणद्रुपदयो वैरे जाते तन्मूलनिर्वेदात् द्रुपदस्य द्रोणान्तकपुत्रेच्छया याजोपयाजाभ्यां यज्ञस्य करणे अग्निमध्यात् धृष्टद्युम्न कृष्णयोरुत्पत्तिकथा भा०आ० १६७अ०

"द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्मवित्तमम्। द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम्। तत् कर्म कुरु मे याज! वितराम्यर्बुदं गवाम्। तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयन्। गुर्वर्थ इति चाकामसुपयाजमचोदयत्। याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः। ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः। आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै। स च पुत्रो महावीर्यो महातेजा महानलः। दृश्यते वह्निवो राजन्! भविता ते तथाविधः। भारद्वाजस्य हन्तारं सोऽभिषिच्याय भूपतिः। याजस्तु तत्तथा सर्वं द्रुपदः कर्मसिद्धये। याजस्तु हवनस्यान्ते देवीमाज्ञापयत्तदा। प्रैहि मां राज्ञि ब्रूयाः! मिथुनं त्वामुपस्थितम्। राज्ञ्युवाच। अवन्ध्यं सुखं ब्रह्मन्! दिव्यान् गन्धान् बिभर्मि च। सुतार्थे मोपसर्पाणि तिष्ठ याज मम प्रिये। याज उवाच। याजेन त्वर्पितं हव्यमुपयाजाभिमन्त्रितम्। कथं कामं न सन्दध्यात् सा त्वं विप्रैहि तिष्ठ वा। ब्राह्मण उवाच। एवमुक्ता तु याजेन हुते हविषि सत्वरे। उत्तस्थौ पावकात्तस्मात् कुमारो देववर्चसः। उद्यतार्चिर्घोररूपः किरीटी वर्म चोत्तमम्। बिभ्रत् सखड्गः सशरो धनुष्मान् विनदन्मुहुः। सोऽध्यारोहद्रथवरं तेन च प्रययौ तदा। ततः प्रचेदुः पाञ्चालाः प्रहृष्टाः साधु साध्विति। हर्षोत्फुल्लतया चैतान्येवं सेहे वसुन्धरा। भवापहो राजपुत्रः पाञ्चालानां यशस्करः। राज्ञः शोकापहो जात एष द्रोणवधाय वै। इत्युवाच महद्भूतमदृश्यं खेचरं तदा। कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता। सुभगा दर्शनीयाङ्गी श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्द्धजा। ताम्रतुङ्गनखी सुभ्रूश्चारुपीनपयोधरा। मानुषं विग्रहं कृत्वा साक्षादमरवर्षिणी। नीलोत्पलसमो गन्धो यस्याः क्रोशात् प्रधावति। या बिभर्त्ति परं रूपं यस्या नास्त्युपमा भुवि। देवदानवयक्षाणामीप्सिता देवरूपिणी। तस्यापि जातां सुश्रोणीं शत्रुवाचाशरीरिणी। सर्वयोधिहरा कृष्णा निनीषुः क्षत्रियान् क्षयम्। सुरकार्यमियं काले करिष्यति सुमध्यमा। अस्या हेतोः कौरवाणां महदुत्पत्स्यते भयम्। तं श्रुत्वा सर्वपाञ्चालाः प्रचेदुः सिंहसङ्घवत्। न चैतान् हर्षसम्मूर्छानियं सेहे वसुन्धरा। तौ दृष्ट्वा पार्षती याज्ञं प्रमेदे वै सुतार्थिनी। न वै मद्यां जननीं जानीयातामिमाविति। तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया। तयोश्च नामनी चक्रुर्द्विजाः सम्मूर्छमानसाः। धृष्टत्वादतिधृष्णुत्वाद्युम्नाद्युत्सम्भवादपि। धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति। कृष्णेत्येवाब्रुवन् कृष्णां कृष्णाभूत् सा हि वर्णतः। तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे। धृष्टद्युम्नन्तु पाञ्चाल्यमानीय स्वं निवेशनम्। उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान्। अमोघमेतं दैवं हि भावि मत्वा महामतिः। तथा तत् कृतवान् द्रोणः आत्मकीर्त्यनुरक्षणात्"। द्रुपदसुतादयोऽप्यत्र।

द्रुपदी स्त्री द्रुरिव दीर्घः पादोऽस्याः कुम्भपद्या० ङीपि पङ्गावः। द्रुमतुल्यपादयुक्तायां स्त्रियाम्।

द्रुपदादित्य पु० काशीस्थे द्रौपद्याः स्थापिते आदित्यलिङ्गभेदे तदाविर्भवकथा काशीख० ४९अ०

"आकर्णय मुने। पूर्वं पञ्चवक्त्रो हरेः स्वयम्। पृथिव्यां पञ्चधा भूत्वा प्रादुरासीज्जगद्धितः। उमापि च जगद्धात्री द्रुपदस्य महीभुजः। यजतो वह्निकुण्डाच्च पाण्डुवक्रेऽतिसुन्दरी। पञ्चापि पाण्डुतनयाः साक्षाद्रुद्रवपुर्धराः। अवतेरुरिह स्वर्गाद् दुष्टसंहारकारिणः। नारायणोऽपि कृष्णत्वं प्राप्य तत्साहचर्यकृत्। दुर्वृत्तदुष्टशमनः सद्वृत्तस्थितिकारकः। प्रतपन्तः पृथिव्यान्ते पार्थाश्चेरुः पृथक् पृथक्। उदवासुदयौ तस्मिन् सम्पदां विपदामपि। कदाचित्ते मन्त्रवीरा भ्रातृव्यप्रतिपादिताम्। विपत्तिमाप्य महतीं बभूवुः कानलौकसः। पाञ्चाल्यपि च तत्पत्नी पतिव्यसनकर्षिता। धर्मज्ञा प्राप्य तत्पुत्री ब्रह्ममाराधयद्भृशम्। आराधितोऽथ सविता तया द्रुपदकन्यया। वदतीं सपिधानाम्

स्यानिवामलयान्दद्दौ । उवाच च प्रसन्नात्मा भास्करो द्रुपदात्मजाम् । आराधयन्तीं भावेन सर्वत्र शुचिमानसाम् । स्वास्थ्येतया महाभागे ! यावन्तोऽत्रार्थिनोजनाः । तावन्तस्तृप्तिमाप्स्यन्ति यावत्त्वं न भोक्ष्यसे । भुक्तायां त्वयि रिक्तैषा पूर्वभक्षा भविष्यति । रसवद्भक्ष्यनिधिरिच्छाभक्ष्यप्रदायिनी । इत्थं वरस्तया लब्धः काम्यामादित्यतो सुने ! । अपरस्य वरो दत्तस्तस्यै देवेन भास्वता । रविरुवाच । विश्वेशाद्दक्षिणे भागे यो मां त्वत्पुरतस्थितम् । आराधयिष्यति नरः क्षुद्बाधा तस्य नश्यति । अन्यच्च मे वरो दत्तो विश्वेशेन पतिव्रते ! । तपसा परितुष्टेन तं निशामय वच्मि ते । प्राप्यते ! त्वां समाराध्य यो मां द्रक्ष्यति मानवः । तस्य त्वं दुःखतिमिरमपाकुरु निजैः करैः । अतो धर्मप्रिये ! नित्यं प्राप्य विश्वेश्वराद्वरम् । काशीस्थितानां जन्तूनां नाशयाम्यघसञ्चयम् । ये मामत्र भजिष्यन्ति मानवाः श्रद्धयान्विताः । त्वद्वरोद्यतपाणिश्च तेषां दास्यामि चिन्तितम् । भवतीं मत्समीपस्थां युधिष्ठिरपतिव्रताम् । विश्वेशाद्दक्षिणे भागे दण्डपाणेः समीपतः । येऽर्चयिष्यन्ति भावेन पुरुषा वा स्त्रियोऽपि वा । तेषां कदाचिन्नो भावि भयं प्रियवियोगजाम् । न व्याधिजं भयं क्वापि न क्षुत्तृट्क्लेशसम्भवम् । द्रौपदीचर्यतः काम्यां तव धर्मप्रियेऽनघे ! । इति दत्त्वा वरान्देव आदित्यः सर्वदः सताम् । अभ्यभाराधयामास धर्मं द्रौपद्युपाययौ । आदित्यस्य कथामेतां द्रौपद्याराधितस्य वै । यः श्रोष्यति नरो भक्त्या तस्यैनः कथमेष्यति । स्कन्द उवाच । द्रौपदादित्यमाहात्म्यं संक्षेपात् कथितं मया । मयूखादित्यमाहात्म्यं शृणु दानीं घटोद्भव !" "चतुर्थो द्रुपदादित्यः" काशीख० ४६अ० द्रौपदादित्योऽप्यत्र । "इदानीं द्रौपदादित्यं कथयिष्यामि तेऽनघ" तत्र ।

द्रुम पु० द्रुः शाखाऽस्यस्य म । १वृक्षे अमरः । २पारिजाते ३कुबेरे च मेदि० । "बद्धप्रलम्बपुटाञ्जलिं द्रुमम्" रघुः । "तस्य तद्वर्त्ते नित्यं सिच्यमान इव द्रुमः" मनुः ४किम्पुरुषाधीशभेदे "द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्" भा०स० ४१०श्लो० "किंपुरुषाधिराज्यमिव सुनिजनस्वहीतजलकलशपरिषिच्यमानद्रुमम्" काद० कृष्णमहिषीयां रुक्मिण्यां जाते ५पुत्रभेदे "प्रद्युम्नः प्रथमं जज्ञे शंबरान्तकरः सुतः । द्वितीयश्चारुदेष्णश्च दृष्णिसिंहो महारथः । चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च" हरिवं० १६२अ० । शिविनामदैत्यांशजाते द्वापरयुगीये नृपभेदे "यस्तु राजञ्छिविर्नाम दैत्येशः परिकीर्तितः । द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः" भा०आ० ६७अ० ७प्राचीने नृपवरभेदे "उशीनरः शतरथः कङ्को दुलिदुहो द्रुमः" भा०आ० १अ० प्राचीनन्नृपौ च ।

द्रुमनख पु० द्रुमस्य नख इव संज्ञात्वेऽपि न णत्वम् । कण्टके शब्दरत्ना० ।

द्रुमय पु० नि० । द्रुम+विकारे मयट् । वृक्षविकारे यूपादौ

द्रुमर पु० द्रुमोऽस्यतेऽनेन सृ-करणे अप् । कण्टके हारा० ।

द्रुमव्याधि पु० द्रुमस्य व्याधिरिव । द्रुमाश्रये १लाक्षायाम् राजनि० । ६त० । २वृक्षरोगे च

द्रुमशीर्ष न० द्रुमस्य शीर्षमिव शीर्षमग्रमस्य । वृक्षतुल्याग्रयुक्ते कुट्टिमभेदे "कपिशीर्षं द्रुमशीर्षं तथा चाखोटशीर्षकम् । इति कुट्टिमभेदाः स्युः शास्त्रिकैः समुदाहृताः" शब्दर० । ६त० । २वृक्षाग्रे न० । [शब्दार्थक० ।

द्रुमश्रेष्ठ पु० द्रुमेषु श्रेष्ठः । १प्रधानवृक्षे २तालवृक्षे च

द्रुमषण्ड न० द्रुमाणां समूहः द्रुम+षण्डच् । वृक्षसमूहे "जलेषु जलजैश्चित्रं स्थलेषु स्थलजैरपि । पङ्कजैर्द्रुमषण्डैश्च सर्वतः प्रतिभूषितम्" हरिवं० ९७अ०

द्रुमसेन पु० राजभेदे स च गविष्ठासुरांशाज्जातः द्वापरयुगीये नृपभेदः "गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः । द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः" भा०आ० ६७अ० । [वृक्षस्य रोगे च ।

द्रुमामय पु० द्रुमस्यामय इव । लाक्षायां अमरः । ६त० ।

द्रुमारि पु० ६त० । १हस्तिनि गजे राजनि० २वृक्षनाशकमात्रे च

द्रुमाश्रय त्रि० द्रुम आश्रयो यस्य । १वृक्षाश्रिते २सरटे पुंस्त्री० राजनि० । स्त्रियां जातित्वात् ङीष् ।

द्रुमिणी स्त्री द्रुमाणां समूहः खला०समूहे इनि ङीप् । वृक्षसमूहे ।

द्रुमेश्वर पु० द्रुमेषु ईश्वर इव श्रेष्ठत्वात् । १तालवृक्षे शब्दार्थक० । २द्रुमाणां श्रेष्ठे च "स्वर्गादिहानयित्वा च पारिजातं द्रुमेश्वरम्" हरिवं० १२६अ० । ३ओषधीशे चन्द्रे च

द्रुमोत्पल पु० द्रुमे उत्पलमिव पुष्पमस्य । कर्णिकारवृक्षे अमरः

द्रुम्म गतौ भ्वा०पर०सक० सेट् निघण्टुः । द्रुम्मति अद्रुम्मीत् दद्रुम्म । निघण्टौ दृम्मेति पाठान्तरम् ।

द्रुवय पु० "द्रोच मानेवयः" पा० द्रु+माने वय । माने अमरः ।

द्रुसल्लक पु० द्रुषु सल्लक इव । पियालवृक्षे शब्दर० ।

द्रुह अनिष्टचिन्तने दिवा०पर०सक०सेट् । द्रुह्यति अद्रौहीत्-

अभुक्षत् । द्रोहिता द्रोग्धा दोढा द्रोहिष्यति द्रोक्ष्यति । भ्रुक् भ्रुट् । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० कोपविषयस्य सम्प्रदानता । यत्रवे द्रुह्यति । उपकृतस्य तस्य सम्प्रदानस्य कर्मता भृत्यमभिद्रुह्यति । "न यजमानाय द्रुह्यति" शत०ब्रा० २।२।४।२८। "मा द्रुमेभ्यो महाभाग ! दीनेभ्यो द्रोग्धुमर्हसि !" भाग०६।४।७ "नाभिद्रुह्यति भृत्येभ्यः" भाग०४।२०।२ आर्षत्वात् न कर्मता । "मातरञ्चाभिद्रुह्यन्ति मनसा कर्मणा च ये" भा०शा० "भवांस्तानभिद्रुह्येत" कामन्दकी० अत्र तङ् असाधुः ।

द्रुह् त्रि०द्रुह-क्विप् । द्रोहकारके मित्रभुक्ट् ।

द्रुह त्रि०द्रुह-कर्तरि क । १द्रोहकारके "द्रुहा तन्वं गूहमाना" ऋ०७।१०।४।१७। २पुत्रे शब्दार्थकल्प० । पुत्रस्य वित्तार्थया पितुरनिष्टचिन्तनस्य प्रायशः सम्भावनात् तथात्वम् । ३दुहितरि स्त्री ङीष् शब्दार्थकल्प० ।

द्रुहण पु० द्रुं संसारगतिं हन्ति-हन अच् "पूर्वपदात् संज्ञायाम्" पा०णत्वम् । ब्रह्मणि । द्रुहणेन निर्वृत्तादि अरीहणादि० वुञ् । द्रौहणक तन्निर्वृत्तादौ त्रि० ।

द्रुहिण पु० द्रुह्यति कामक्रोधादिभ्यो दुष्टेभ्यो वा द्रुह-बा० इनन् किच्च । चतुर्मुखे ब्रह्मणि अमरः "दुरालभा दानशीला द्राविणी दुहिणस्तुता" काशीख०२९अ० गङ्गासहस्रनाम । २विष्णौ च "महादेव ! देवस्तुत ! द्रुहिण ! अनन्त ! विश्वकर्मन् नमोऽस्तु ते" हरिवं० २५९अ० ।

द्रुह्य त्रि० शिवादिगणे द्रुह्यति पाठात् द्रुह-न यत् किन्तु क्यप् । द्रोहविषये तस्यापत्यम् शिवा०ष्यण् द्रौह्य तदपत्ये बहुषु यस्कादि० अणो लुक् । द्रुह्या इत्येव ।

द्रुह्यु पु० ययातेर्नृपस्य शर्मिष्ठायां जाते पुत्रभेदे तुर्वसुशब्दे दृश्यम् । तस्य ययातिशापकथा "ययातिरुवाच "द्रुह्यो ! त्वं प्रतिपद्यस्व वर्षरूपविनाशिनीम् । जरां वर्षसहस्रं मे यौवनं स्वन्ददस्व च । पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् । स्वं चादास्यामि भूयोऽहं पाप्मानं जरया सह । द्रुह्युरुवाच । न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् । वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये । ययातिरुवाच । यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि । तस्माद्द्रुह्यो ! प्रियः कामो न ते सम्पत्स्यते क्वचित् । यत्राश्वरथसहस्राणामश्वानां स्यादुगतं च । हस्तिनां पीठकानाञ्च गर्दभानान्तथैव च । वस्त्राणाञ्च गवाञ्चैव शिबिकायास्तथैव च । उष्ट्रपञ्चवसनारो यत्र नित्यं भविष्यति । अराजभाजगच्छन्तं तत्र प्राप्स्यसि सान्वयः" भा०आ०८४अ० ।

द्रू गतौ वधे च स्वा०क्या० च उ०सक०सेट् । द्रूणोति द्रूणुते द्रूणाति द्रूणीते अद्रावीत् अद्रविष्ट । दुद्राव । दुद्रविथ । द्रविता द्रविष्यति ।

द्रू पु० द्रू-क्विप् । हिरण्ये उज्ज्वल० ।

द्रूघण पु० द्रूघण+पृषो० दीर्घः । मुद्गरे हिरूपकोषः ।

द्रूण पु० द्रू-हिंसायाम् बा० नक् । दस्यिके शब्दार्थकल्प० ।

द्रेक स्वने उत्साहे च भ्वा०आत्म०अक० सेट् । द्रेकते अद्रेकिष्ट । ऋदित् णिचि चङि अदिद्रेकत् त ।

द्रेक्क पु० द्रेक्काण+पृषो० । द्रेक्काणे राशेस्तृतीयांशे ।

द्रेक्काण पु० "खपञ्चनवमानां ये राशीनामधिपा ग्रहाः । एते द्रेक्काणपाराशौ द्रेक्काणास्त्रय एव हि" ज्यो०त०उक्ते राशेस्तृतीयाभागे तदधिपाश्च उक्तादिग्राह्याः । द्रेक्काणशब्दे दृश्यम् ।

द्रेश्य त्रि० दृश-कर्मणि क्यप् वेदे पृषो० । दृश्ये "यत्तद्द्रेश्यमप्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम्" श्रुतिः० । "अद्रेश्यम् अदृश्यं सर्वेषां बुद्धीन्द्रियाणामगम्यमित्येतत् दृशेर्बहिःप्रस्थितस्य पञ्चेन्द्रियवाचकत्वात्" भा०

द्रेष्काण पु० द्रेक्काण+पृषो० । द्रेक्काणे राशेस्तृतीये भागे ।

द्रोघ त्रि० द्रुह-कर्मणि घञ् बा० वेदे कुत्वम् । द्रोहविषये "हेमया द्रोघमित्रान्" ऋ०१०।८९।१२ "द्रोघमित्रान् द्रुग्धानि मित्राणि यैः ते द्रोघमित्राः" भा० । करणे घञ् । द्रोहसूचकवाक्यादौ "द्रोघाय चिद्वचस आनवाय" ऋ० ६।६२।९ "द्रोघायातिद्रोहाय वचसे" भा० "द्रोघवाचस्ते निर्ऋथं सचन्ताम्" ऋ०७।१०४।१४

द्रोण पु० द्रोणः कलशः उत्पत्तिस्थानत्वेनास्यास्य अच् । भारद्वाजे कौरवाणां धनुर्वेदाचार्ये तदुत्पत्तिकथा "गङ्गाद्वारं प्रति महान् बभूव भगवान् ऋषिः । भरद्वाज इति ख्यातः सततं संशितव्रतः । सोऽभिषेक्तुं ततो गङ्गां पूर्वमेवागमच्छुचिः । महर्षिभिर्भरद्वाजो हविर्द्वाने चरन् पुरा । ददर्शाप्सरसां साक्षात् घृताचीं साम्रुतामृषिः । रूपयौवनसम्पन्नां मदघ्नां मदालसाम् । तस्याः पुनर्नदीतीरे वसनं पर्यवर्तत । व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा । तत्र संसक्तमनसो भरद्वाजस्य धीमतः । ततोऽस्य रेतश्चस्कन्द तद्धिद्रोणे आदधे । ततः समभवद्द्रोणः कलशे तस्य धीमतः । अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः । अग्निवेशं महाभागं

भारद्वाजः प्रतापवान् । अग्न्यादयदाग्नेयमस्त्रमस्त्र विदां वरः । अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम !। भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्" भा० द्रो० १२०अ० । (डाँडकाक) २दण्डकाके पुं० स्त्री० स्त्रियां ङीष् मेदि० ३दृश्चिके राजनि० । चतुःशतधनुः परिमिते ४जलाशये "शतेन धनुर्भिः पुष्करिणी त्रिभिः दीर्घिका चतुर्भिर्द्रोणः" जला० त० । द्रु ण—क द्रु—न किद्वा । ५मेघनायकभेदे तदानयनादि ज्यो० त० यथा "त्रियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् । आवर्तं विद्धि संवर्तं पुष्करं द्रोणमम्बुदम् । आवर्तो निर्जलो मेघः संवर्तश्चरणोदकः । पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः" । "कोऽयमेवंविधे काले कालपाशस्थिते मयि । अनावृष्टिहते शस्ये द्रोणमेघ इवोत्थितः" मृच्छ० "केयमभ्युद्यते शस्ये मृत्युवक्त्रगते मयि । अनावृष्टिहते शस्ये द्रोणवृष्टिरिवागता" मृच्छ० (चलचचिया) ६पुष्पप्रधाने वृक्षे । "ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम्" दुर्गार्चाप्रयोगः । ७आढके पु० न० ८आढकचतुष्टये च (१२ सेर) "द्रोणस्तु खार्याः खलु षोडशांशः" लीला० उक्ते ९खार्याः षोड़शभागे । आढकशब्दे ६५६९० दृश्यम् । "धान्यद्रोणस्तु मासिकः" मनुः "दशद्रोणा भवेत् खारी कुम्भोऽपि द्रोण विंशतिः" १०उक्तमाने "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि आढकः परिकीर्तितः । चतुराढको भवेत् द्रोण इत्येतन्मानलक्षणम्" कल्पतरौ द्वात्रिंशत्प्रसृतिभिः कुडवस्तच्चतुर्गुणोत्तरप्रस्थाढकद्रोण इत्युक्तं कुडवचतुर्गुणादष्टाचत्वारिंशत्प्रसृतिभिः प्रस्थस्तच्चतुर्गुणादुद्विनवत्यधिकशतेन प्रसृतिभिराढकः । तच्चतुर्गुणादष्टषष्ट्यधिकसप्तशतप्रसृतिभिर्द्रोणः" प्रा० त० रघु० । गोपथब्राह्मणञ्च "द्वात्रिंशत् पलिकं प्रस्थमुक्तं स्वयमथर्वणा । आढकस्तु चतुःप्रस्थश्चतुर्भिर्द्रोण आढकैः" एषां कार्यविशेषे परिमाणभेदाव्यवस्थाप्याः । मानार्थे अयमर्द्धादिः । ११द्रुमे वृक्षमात्रे । द्रोणस्य गोत्रापत्यम् वा-फक् पक्षे इञ् । द्रौणायन द्रौणि तदपत्ये "अनादिरिह द्रोणः अश्वत्थाम्नननन्तरे तूपचारात्" सि० कौ० एतच्च पाणिनेर्द्रौणात् प्राचीनत्वस्थापनायोक्तं वस्तुतः कुर्वादि वृष्ण्यन्धकादीनां बहूनां पा० सूत्रे कीर्तनात् ततोऽर्वाचीनत्वं पाणिनेर्व्यक्तं प्रतिभाति सर्वेषामनादित्वकल्पने मानाभावात् इत्यवधारितं सरलाख्यव्याख्यानोपक्रमेऽस्माभिः "द्रौणस्तस्विमुष्टमिदं यदङ्गम" भाग० । कुशद्वीपस्थे १२वर्षपर्वतभेदे "चतुर्थः पर्वतो द्रोणो यत्रौषध्यो महागिरौ । विशल्यकरणी चैव मृतसञ्जीवनी तथा" मत्स्यपु० १२१अ० स्वार्थे क । द्रोणक तत्रार्थे ।

द्रोणकलश पुं० द्रोण इव कलशः । द्रुमये यज्ञपात्रभेदे "आहवनीयं गच्छन्त्यादाय यावद्द्रोणकलशसोमपात्राणि" कात्या० श्रौ० ८।७।५। पञ्चपात्राणोऽभिषवार्थाः ते च पूर्वमभिषवणे स्थापिता अपि वचनात्तत्र आनीयन्ते संस्कारार्थं द्रोणकलशः द्रुमयः कलशाकारोवैकङ्कतः यस्योपरिधाराग्रहा गृह्यन्ते" कर्कः । यज्ञपात्रभेदे "स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे" यजु० १८।२१।

द्रोणकाक पुं० स्त्री० कर्म० । (डाँडकाक) ख्याते दण्डकाके काकभेदे अमरः । [गवि अमरः ।

द्रोणक्षीरा स्त्री द्रोणमितं क्षीरमस्याः । द्रोणमितदुग्धवत्यां

द्रोणगन्धिका स्त्री द्रोणस्य तत्प्रमाणपुष्पस्य गन्ध इव गन्धो यस्याः कप् अत इत्वम् । राज्ञायां जटा० । [शब्दच० ।

द्रोणघा स्त्री द्रोणदुघा+ष्टुत्वे । द्रोणमितदुग्धवत्यां गवि

द्रोणचित् पु० यज्ञिये अग्निभेदे "एतया विक्लृप्तान्यां चितिं चिन्वन्ति द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगचिदुभयतः रुक्मश्च पुरीषः" कात्या० श्रौ० १६।५।६। "एते अग्निविशेषाः" कर्कः "तं हैके एतया विक्लृप्ताभिमन्त्र्यान्यां चितिं चिन्वन्ति द्रोणचितं वा रथचक्रचितं वा कङ्कचितं वा प्रउगचितं वा" शत० ब्रा० ६।७।२।८

द्रोणदुग्धा स्त्री द्रोणमितं दुग्धं यस्याः । द्रोणमितक्षीरायां द्रोणदुघायां गवि हेमच० । [णमितदुग्धायां गवि अमरः ।

द्रोणदुघा स्त्री द्रोणमितं दोग्धि दुह—कः घस्यान्तादेशः । द्रो-

द्रोणपदी स्त्री द्रोण इव पादोऽस्याः कुम्भपद्या० ङीबि पादोऽन्यलोमे पङ्गावः । द्रोणतुल्यपादयुक्तायां स्त्रियाम् ।

द्रोणपर्णी स्त्री द्रोणस्य वृक्षभेदस्य पर्णमिव पर्णमस्याः जातित्वात् ङीष् । भूमिकदल्याम् शब्दार्थ० ।

द्रोणपुष्पी स्त्री द्रोणस्य पुष्पमिव पुष्पमस्याः जातित्वात् ङीष् । (गुमक) इति ख्याते क्षुपभेदे "द्रोणपुष्पी गुरुः स्वादु रूक्षोष्णा वातपित्तकृत् । स क्षारलवणा स्वादुपाका कटुश्च भेदिनी । कफार्शोकामलाशोथतमकश्वासजन्तुजित्" भावप्र० । २द्रोणवृक्षे रत्नमाला । "द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत् । भेदकं कामलाशोथमेहपूयहरं कटु" वैद्यकम् ।

द्रोणमाना स्त्री द्रोणो मानं दुग्धेऽस्याः । द्रोणदुग्धायां गवि शब्दच० । द्रोणो मानं यस्याः । द्रोणमिते द्रव्यादौ त्रि०

द्रोणमुखम् न० चतुःशतग्राममनोहरग्रामे हारा० ।

द्रोणशर्म्मपद न० तीर्थभेदे "भरतस्थे कुशस्थे द्रोणशर्म्मपदे तथा । अपां प्रपतनामेवो सेव्यते सोऽप्सरो गणैः" भा०अनु० २५अ० ।

द्रोणसाच त्रि० द्रोणं द्रोणकलशं सचते सच–अण् । द्रोणकलशसेवके । "एवा पतिं द्रोणसाचमचेतसम्" ऋ०१० । ४४।४ "द्रोणसाचं द्रोणकलशस्य सेवितारम्" भा०

द्रोणा स्त्री १द्रोण्याम् २द्रोणपुष्पायां शब्दार्थ० ।

द्रोणाचार्य्य पु० कर्म० । कौरवाणां शस्त्रशिक्षके भारद्वाजे

द्रोणाहाव पु० आह्वयन्त्यत्र पानार्थं बलीवर्द्दान् आह्वावो जलाधारः जलाशयभेदः द्रोणमयः द्रुमयः आह्वावः । द्रुमये जलाधारभेदे "द्रोणाहावमवतमश्वचक्रम्" ऋ०१० । १०१।७ ।

द्रोणि(णी) स्त्री द्रवति गच्छति जलम् द्रु–नि वा ङीप् । १काष्ठाम्बुवाहिन्याम् अमरः । (डोङ्गा) २जलाधारे कदलीत्वगादि निर्मिते पात्रभेदे "तैलपूर्णे कटाहे वा द्रोण्यां वा शाययेत् नृपम्" सुश्रुतः "भरद्वाजस्य च स्नानं शुक्रं द्रोण्यामवर्द्धत" भा०आ०६२अ० ४काष्ठमये स्नानपात्रे ५पर्वतानामन्तरे देशभेदे च "शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः" शब्दार्थचि० धृतवाक्यम् । "पूर्यन्तां पयसा नद्यो द्रोण्यश्च विपुलायताः" हरिवं० ७४अ० । द्रोणस्य पत्नी ङीप् । ७द्रोणपत्न्यां स्त्री ८हिस्रर्पपरिमाणे वैद्यकभाषा ९कदल्यां मेदि० । १०नौकाद्वये शब्दरत्ना० ११शैलसन्धौ हेमच० १२इन्द्रचिर्भिट्यां १३द्रोणीजलवणे च राजनि० १४नदीभेदे उणादिको० १५द्रुते च

द्रोणीदल पु० द्रोणीव दलमस्य । केतकीवृक्षे हारा०

द्रोणीलवण न० द्रोण्यां भवं लवणम् । उपकर्णाटदेशभवे लवणे राजनि० । "विज्ञेयं द्रोणीलवणं पाके नात्युष्णतां गतम् । अविदाहि भेदकञ्च स्निग्धं स्थूलविनाशनम् । अङ्गपित्तकरं चैव भिषग्भिः सप्तदाहृतम्" राजनि० ।

द्रोण्य त्रि० द्रोणं द्रुमयं यूपमर्हति यत् । द्रुमययूपार्हे पश्वादौ "द्रुवद्द्रोण्यः पशुः" ऋ०५।५०।४। "द्रोण्यः यूपार्हः पशुः" भा०

द्रोण्यश्व त्रि० द्रोणिं द्रुतमश्नुते अश–व्याप्तौ वा० व । द्रुतव्यापके "द्रोण्यश्वास इरन्ते हतं वा" ऋ०१०९९।४ "द्रोण्यश्वासः द्रुतव्यापनाः" भा० ।

द्रोमिल पु० चाणक्ये मुनौ हेमच० द्रामिल इति वा तत्र पाठः । अन्यतरस्य ग्रामादिकत्वं सुद्रादीनात् ।

द्रोह पु०द्रुह–भावे घञ् । १अनिष्टचिन्तने २अध्वरधे ३हिंसा मात्रे च । "पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः द्रोहश्चाध्वरधः" कुल्लू० "द्रोहो जिघांसा" म०त० रघु० "विनापि शीर्षकात् कुर्यात् ऋषद्रोहे तु पातके" मनुः अत्र हन्तुमिच्छा अनिष्टचिन्तनं वा द्रोहपदार्थः । "द्रोहोद्रेकमहोर्मिभेदुरमदा मन्दाकिनी मन्दताम्" काव्यप्र० द्रोहः जातोऽस्य तारका० इतच् । द्रोहित जातद्रोहे त्रि० [अमरः ।

द्रोहचिन्तन न० द्रोहार्थं चिन्तनम् । परानिष्टचिन्तने

द्रोहाट त्रि०द्रोहेणाटति अट–अच् । १वैडालव्रतिके छद्मना परहिंसार्थं व्रतधारिणि २छद्मवृत्तके ३वेदशाखाग्रभेदे पु० मेदि० ।

द्रौण त्रि० द्रोणं सम्भवति अवहरति पचति वा अण् पक्षे ठन् । द्रोणमितधान्यादेः स्वामिन् १समावेशके २तदपहारके ३तत्पाचके च स्त्रियां ङीप् । पक्षे ठनि द्रौणिक तत्रार्थे स्त्रियां टाप् । तत्रार्थे द्रौणिक इति शब्दकल्पन ग्रामादिकमेव ठनि इत्ते रप्रसङ्गः ।

द्रौणीज न० द्रोण्यां जायते जन–ड । १द्रोणीजाते लवणे राजनि० । २द्रोण्यां जाते द्रोणाचार्य्ये द्रोणस्य पत्नी ङीष् द्रोणी तस्यां जाते ३अश्वत्थाग्नि च ।

द्रौणायन पु० अश्वत्थाग्नि द्रोणशब्दे दृश्यम् द्रौणिरश्वत्थ ।

द्रौणायनि पु०द्रोणस्यापत्यं वा०फिञ् । अश्वत्थाग्नि "सकर्ण दुर्योधनशाल्वशल्यद्रौणायनिकृपसुनीथवक्राः" भा०आ० १८७अ० । "द्रौणायने ! अलमलमर्थमात्मानं योकानले प्रक्षेप्तुम्" वेणीसं० ।

द्रौणिक त्रि० द्रोणस्य वापः क्षेत्रम् ठञ् । द्रोणमितबीजवपनयोग्ये क्षेत्रादौ अमरः । तेन क्रीतमित्याद्यर्थे असमासे ठञ् । २द्रोणक्रीतादौ, समासे तु निष्का० ठञ् । खरे भेदः ।

द्रौपद पुंस्त्री० द्रुपदस्यापत्यं शिवा० अण् । १द्रुपदराजपुत्रे तत्कन्यायां २कृष्णायां स्त्री । द्रुपदात्मजशब्दे दृश्यम् "द्रौपद्या च महातेजास्तथैव सुभद्रया" हरिवं० १३५अ० "द्रौपदी त्वथ संजज्ञे यज्ञीभागादनिन्दिता । नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी । पद्मायताक्षी सुश्रोणी सङ्गिताङ्गितमूर्द्धजा । . वर्णकाञ्चनसम्पूर्णा वैदूर्य

मचिरसिमा । पञ्चानां पुरुषेन्द्राणां चित्तप्रमथिनी रहः" भा०आ० ६७अ० तस्याः पञ्चपतिकत्वकारणं भा०आ० १९८।९९ अ० उक्ता दिङ्मात्रमत्रोच्यते तत्र द्रौपद्याः पूर्वजन्मवृत्तान्तकथनेन पञ्चपतिकत्वनिरूपणाय "व्यास उवाच आसीत्तपोवने काचिदृषेः कन्या महात्मनः । नाध्यगच्छत् पतिं सा तु कन्या रूपवती सती । तोषयामास तपसा सा किलोग्रेण शङ्करम् । तामुवाचेश्वरः प्रीतो वृणु कामिति स्वयम् । सैवमुक्ताऽब्रवीत् कन्या देवं वरदमीश्वरम् । पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः । ददौ तस्यै स देवेशस्तं वरं प्रीतमानसः पञ्च ते पतयो भद्रे ! भविष्यन्तीति शङ्करः । सा प्रसादयती देवमिदं भूयोऽभ्यभाषत । एकं पतिं गुणोपेतं त्वत्तोऽहमीत्यथ शङ्कर ! । तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः । पञ्चकृत्वस्त्वयोक्तोऽहं पतिं देहीति वै पुनः । तत्तथा भविता भद्रे ! वचस्तद्भद्रमस्तु ते । देहमन्यं गतायास्ते सर्वमेतद्भविष्यति । द्रौपद्येषा हि सा जज्ञे सुता वै देवरूपिणी । पञ्चानां विहिता पत्नी कृष्णा पार्षत्यनिन्दिता । स्वर्गश्रीः पाण्डवार्थन्तु समुत्पन्ना महामखे । सेह तप्त्वा तपो घोरं दुश्चरत्वं तवागता । सैषा देवी रुचिरा देवजुष्टा पञ्चानामेका स्वकृतेनेह कर्मणा । सृष्टा स्वयं देवपत्नी स्वयम्भुवा राजन् ! द्रुपदेष्टं कुरुष्व"। ब्रह्मवैवर्ते तु जन्मखण्डे ११५अ० अन्यथा वर्णितं यथा "वह्निरुवाच शृणु राम ! महाभाग ! सीतासंगोपनं कुरु । सप्ताहाभ्यन्तरे चैव रावणो दुष्टराक्षसः । दुर्निवार्यः प्राक्तनेन जानकीञ्च हरिष्यति । राम उवाच । सीतां गृहीत्वा त्वं गच्छ छायातैव तु तिष्ठतु । कलत्रवर्जनं कर्म सर्वेषाञ्च जुगुप्सितम् । सीतां गृहीत्वा प्रययौ रुदन्तीञ्च कृताञ्जलिः । सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ । सा च छाया हृता पूर्वं रावणेन बलीयसा । ससुहृद्धार तां रामो निहत्य तं सबान्धवम् । वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह । अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम् । सा च छाया तपश्चक्रे नारायणसरोवरे । तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः । वरं वृणुष्व भद्रे ! त्वमुवाच शङ्करश्च ताम् । उवाच तां शिवं व्यग्रा भर्तुर्दुःखेन दुःखिता । पतिन्देहि पञ्चधा सा वरं वव्रे त्रिलोचनम् । सर्वसम्पत्प्रदस्तुष्टस्तस्यै शर्वो वरं ददौ । महादेव उवाच । साध्वि ! त्वं पञ्चधा ब्रूहि पतिन्देहीति व्याकुला । पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव । ते च सर्वे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः । सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा । कृते युगे वेदवती त्रेतायां जनकात्मजा । द्वापरे द्रौपदी च्छाया तेन कृष्णा त्रिछायणी । वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्तिता । स्वर्गलक्ष्मीर्महेन्द्राणां सा च पञ्चाङ्गविग्रहा । राजा ददौ फाल्गुनाय कन्यायाञ्च स्वयंवरे । पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना । तमुवाच स्वयं माता गृहाण भ्रातृभिः सह । शम्भोर्वरेण पूर्वञ्च परत्र मातृराज्ञया । द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः । चतुर्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः" "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" प्रातःस्मरणीयकीर्त्तने । [दिन निर्वृत्तादौ ।

द्रौपदायनि त्रि० द्रुपदेन निर्वृत्तादि कर्मा० फिञ् । द्रुप-

द्रौपदेय पु० द्रौपद्या अपत्यम् ढक् । युधिष्ठिरादीनां द्रौपद्यास्तत्पुत्रे प्रतिविन्ध्यादौ ते च विश्वदेवगणांशेनोत्पन्नाः यथाह भा० आ०६७अ० । "द्रौपदेयाश्च ये पञ्च बभुवुर्भरतर्षभ ! । विश्वान् देवगणान् विद्धि सञ्जातान् भरतर्षभ ! । प्रतिविन्ध्यः सुतसोमः श्रुतकर्मा तथा परः । नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्यवान् । पाञ्चाल्यपि तु पञ्चभ्यः पतिभ्यः शुभलक्षणा । लेभे पञ्च सुतान् वीरान् श्रेष्ठान् पञ्चाचलानिव । युधिष्ठिरात् प्रतिविन्ध्यं सुतसोमं वृकोदरात् । अर्जुनाच्छ्रुतकर्माणं शतानीकञ्च नाकुलिम् । सहदेवाच्छ्रुतसेनमेतान् पञ्च महारथान् । पाञ्चाली सुषुवे वीरानादित्यानदितिर्यथा । शास्त्रतः प्रतिविन्ध्यन्तमूचुर्विप्रा युधिष्ठिरम् । परप्रहरणे स्थाने प्रतिविन्ध्यो भवत्वयम् । सुते सोमसहस्रे तु सोमार्कसमतेजसम् । सुतसोमं महेष्वासं सुषुवे भीमसेनतः । श्रुतं कर्म महत् कृत्वा निवृत्तेन किरीटिना । जातः सुतस्तवेत्येवं श्रुतकर्मा ततोऽभवत् । शतानीकस्य राजर्षेः कौरवस्य महात्मनः । चक्रे पुत्रं सनामानं नकुलः कीर्तिवर्द्धनम् । ततस्त्वजीजनत् कृष्णा नकुलं वह्निदैवते । सहदेवात् सुतं तस्मात् श्रुतसेनेति यं विदुः । एकवर्णान्तरास्ते ते द्रौपदेया यशस्विनः" भा० आ० २२२अ० ।

द्रौहिक त्रि० द्रोहं नित्यमर्हति छेदा०ठञ् । नित्यं द्रोहार्हे ।

द्रौह्य त्रि० द्रुह्यस्यापत्यं शिवा०ष्ण् । द्रुह्यस्यापत्ये

द्वन्द्व न० द्वन्द्व+पृषो० बलोपः । द्वन्द्वशब्दार्थे त्रिकाण्डशेषः ।

द्वन्द्व न० द्वौ द्वौ सहाभिव्यक्तौ "द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु" पा० द्विशब्दस्य द्विवचनं पूर्वपदस्याभावोऽन्त्यस्योत्तरपदस्य नपुंसकत्वञ्च निपात्यते एष्वर्थेषु" सि०कौ० उक्ते १रहस्यादौ "तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् इतरे विषयभूताः । द्वन्द्वमन्तर्यते रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेणापीति मर्यादार्थः । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः द्विवर्गसम्बन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति द्वन्द्वं संकर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्व इष्यते" सि०कौ "अत्र अन्यत्रापि तेन द्वन्द्वयुद्धान्यवर्त्तन्तेत्यादि सिद्धं द्वयोर्द्वयोर्युद्धान्यवर्तन्तेत्यर्थः वीप्सायां द्विर्वचनेऽप्यनेन तस्य रूपनिष्पत्तिः । द्वन्द्वसमाहारादौ तु द्वन्द्वशब्दप्रयोगः रूढ्या द्वन्द्वा अवयवार्थराहित्येनाव्युत्पन्नत्वादिति बोध्यम्" शब्देन्दु० । तत्र रहस्यं द्वाभ्यामेव ज्ञेयम् । २कलहे ३मिथुने स्त्रीपुंसयोर्द्वये ४युगले च मेदि० ५रोगभेदे ६समासभेदे च पु० सच द्विधा समाहारेतरेतरयोगभेदात् तत्र सङ्ख्यातप्राधान्ये समाहारद्वन्द्वः संख्यमानप्राधान्ये इतरेतरयोगः इति वैयाकरणाः इतरेतरयोगशब्दे ९२२ पृ० द्रष्टव्यम् शब्दश०प्र० अन्यथा निरूपायि यथा

"यद्यदर्थकयज्ञानव्यूहो यद्यत्प्रकारके । बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः ।" "यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामस्तोमस्य निश्चयस्तत्तदर्थप्रकारकान्वयबोधं प्रति तत्त्वेन समर्थस्तादृशनामनिवह एव तावदर्थको द्वन्द्वसमासः । पाणिपादं पादय धवखदिरौ किन्त्वीत्यादौ हि कर्मत्वाद्यंशे करचरणादिप्रकारकान्वयबोधं प्रत्यमादिधर्मिकः करचरणाद्युपस्थापकस्य पाणिपादादिक्रमिकनामस्तोमस्याव्यवहितोत्तरत्वसम्बन्धेन निश्चयः कारणम् अतः पाणिपादादिसमुदायः करचरणादितत्तदर्थे द्वन्द्वः । यत्तु पाणिपादमित्यादौ समाहारद्वन्द्वे सर्वत्रोत्तरपदे पाणिपादादिसाहित्ये लक्षणा अतएव नित्यं तत्रैकवचनं समाहारस्यैकत्वात् पदान्तरन्तु तादृशलक्षणायानिरूढत्वसम्पादकं तथाविधसाहित्यस्य च स्वाश्रयानश्वत्वादिसम्बन्धेनैव द्वितीयाद्यर्थकर्मत्वादौ साकाङ्क्षत्वात् पाणिपादं पादयेत्यादेर्नायोग्यत्वमिति प्राच्योक्तं तन्न युक्तं तुल्यपदैकक्रियान्वयित्वं बुद्धिविशेषविशेष्यत्वं वा पाणिपादयोः साहित्यं तस्य च नानात्वसम्भवेन तद्वत्त्वादिबोधार्थं समाहारद्वन्द्वादपि द्विवचनाद्यापत्तेर्दुर्वारत्वात् । साहित्यस्य द्विवद्भावेऽपि न समाहारद्वन्द्वस्य द्विवचनादिसाकाङ्क्षत्वं तादृशद्विगोरिवेति चेत् तर्हि पाणिपादप्रभृतीनां नानात्वेऽपि न तदर्थकस्य द्वन्द्वस्य द्विवचनाद्याकाङ्क्षत्वमित्येव वक्तुमुचितं कृतं साहित्यभक्त्या ह्रस्वत्वं धनमित्यादेरयोग्यतायां दुर्वारतापातात्त्व नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वेन ह्रस्वनामत्वानाञ्च साहित्यस्य स्वाश्रयत्वादिसम्बन्धेन धनादावन्वयायोगात् तादृशसाहित्ये धनादेरभेदविरहाच्च । समाहारपरिभाषा तु क्लीबलिङ्गत्वनित्यैकवचनत्वादिपदसंस्कारोपयोगितयैवोपपन्ना न द्वन्द्वस्यार्थव्यवस्थापिका । एतेन धवखदिरावित्यादावितरेतरद्वन्द्वेऽप्युत्तरपदे धवखदिरसाहित्यान्वये लक्षणा अन्यथा द्विवचनादेः प्रकृत्यर्थतावच्छेदकत्वेव पर्याप्तिसम्बन्धेन स्वार्थद्वित्वाद्यनुभावकत्वव्युत्पत्तेर्धवखदिरावित्यतो धवद्वयस्य खदिरद्वयस्य च प्रतीत्यापत्तेरिति मीमांसकानामप्यतमप्यपास्तं तुल्यपदैकक्रियान्वयित्वं धवखदिरविशेष्यकधीविशेष्यत्वं वा धवखदिरयोः साहित्यं तदाश्रयत्व धवद्वयादिरपीति तादृशसाहित्याश्रयत्वलक्षकत्वपक्षेऽपि धवखदिरावित्यतो धवद्वयादिबोधस्य दुर्वारतापत्तेः । न च त्रितयाविशेष्यकधवखदिरधर्मिकधर्माविशेष्यत्वमेव प्रकृते धवखदिरयोः साहित्यं तच्च न धवद्वयादेरिति वाच्यं तादृशसाहित्यान्वयस्यानुभवेनासम्भवनात् तस्माद्यत्र नानाधर्माणां प्रकृत्यर्थतावच्छेदकत्वं तत्र तत्तद्धर्मावच्छिन्ने समुदित एव पर्याप्तिसम्बन्धेन द्वित्वादिबोधने द्विवचनादिकं साकाङ्क्षं न तु तादृशैकधर्मावच्छिन्नं परित्यज्य तथाविधापरधर्मावच्छिन्ने, यतो धवखदिरावित्यादितो धवयोः खदिरयोश्च नानोधप्रसङ्ग इति तत्त्वम् । घटघटेत्यादिकस्य घटकलसेत्यादिकस्य घटतट्टेत्यादिकस्य च क्रमिकनामस्तोमस्य निश्चयस्तेन घटादेरन्वयबोधं प्रत्यहेतुत्वमतो न तादृशनामनिवहो घटाद्यर्थे द्वन्द्वः । अतएव समस्यमानपदार्थयोस्तत्तावच्छेदकयोर्वा यत्र मिथोभेदस्तत्रैव द्वन्द्वस्य साधुत्वसूचनाय "चार्थे द्वन्द्वः" इति पाणिनिः प्राह । अतएव भेदगर्भसमुच्चयार्थकं चशब्दमन्तर्भाव्य धवश्च खदिरश्चेत्यादिकं विग्रहस्य प्रयुञ्जते दक्षाः, सम्पादयते च तत्र मिथोभेदप्राप्त्यर्थश्चकारद्वयं, पीततत्पटयोस्तादात्म्यमित्यादौ तत्पटादेः पीताद्याभेदेऽपि पीतत्व-

तत्पटत्वाद्योः पदार्थतावच्छेदकयोरस्त्येव भेदः सुवर्णस्तु द्वित्वं न तत्र प्रकृत्यर्थेऽन्वेति पर्याप्तिसम्बन्धेन पीततत्पटे तस्य बाधात् सुवर्णद्वित्वादेस्तादृशसम्बन्धेनैव प्रकृत्यर्थसाकाङ्क्षत्वात् परन्तु प्रकृत्यर्थतावच्छेदकयोः पीतत्वतत्पटत्वयोरेव व्युत्पत्तिवैचित्र्यात्। अतएव द्व्यणुकारम्भकसंयोगनाशेभ्यः कार्यद्रव्यं नश्यतीति भाष्यस्य योग्यतासम्पत्तये-सुवर्णैकत्वस्य कार्यद्रव्यत्वेऽन्वयमभिधित्सुनाचार्येण जात्यभिप्रायकमेकवचनमिति गुणकिरणावल्यामभिहितम्। अतएव च "श्यालाः सुभ्रातरः पत्न्याः स्वामिनो देवदेवरौ" इत्यत्र च द्विवचनमहिम्ना स्वामिनो भ्राता देवदेवरोभयपदवाच्य इत्यर्थः सुभ्रात्रादिसिद्धः सङ्गच्छते। यदि च पटद्वयासत्त्वेऽपि भूतले पीतपटावित्यादिकः प्रयोगः स्यात् पीतत्वपटत्वोभयाश्रयस्य तत्र सत्त्वादेवं पीतपटयोरभेद इत्यादितः शुक्लपटत्वादेरबोधप्रसङ्गश्च तदंशे सुवर्णद्वित्वस्य प्रकारत्वादित्यादिसूक्ष्ममीक्ष्यते तदा गोदौ ग्राम इत्यादाविव साधुत्वार्थमेव तत्र द्विवचनमिति वदन्ति। विद्यतेविन्दतिविनत्तीनामनिट् इत्यत्र विद्यत इत्यादिशब्दो न विदधातुत्वेनोपस्थापकः किन्तु सत्तादार्थकतादृशधातुत्वेनैव। मृगपाण्डरयोः पदार्थयोर्भेदेऽपि हरिणहरिणावित्यप्रयोगात्। समानशब्दयोर्द्वन्द्वप्रसक्तावेकशेषोव्युत्पत्तिसिद्धस्तेन हरिणावित्यत्र लुप्तस्तत्राभ्यामेव हरिणपदाभ्यामुपस्थितयोर्मृगपाण्डरयोर्बोधः हरी नमस्यावित्यत्राप्युक्तरीत्यैव हरिपदाभ्यां विष्णुचन्द्रयोरवगतिः। अन्यथा हरिहरौ नमस्यावित्यपि प्रयोगापत्तेः हरी च हरयश्चेति विग्रहस्थले यत्र हरय इत्यादितः समस्यमानपदार्थानामवान्तरसंख्यावगमस्तत्र तत्तत्संख्यावच्छिन्नस्वार्थलक्षकस्य लुप्तस्य हर्यादिपदस्योत्तरत्वेन प्रतिसंहितमेव हर्यादिपदं तथाविधस्वार्थस्य लक्षणया बोधकं तदप्रतिसन्धाने तु श्रुतमेव हरिपदं-विष्णुद्वयोः सिंहत्रयस्य चैकया लक्षणया शक्तिभ्रान्त्यैव वा। नच विग्रहस्थसुवर्णस्य द्वित्वादेः समसाप्रतिपाद्यत्वनियमात्तथाविधद्वित्वत्रित्वानभावेण द्वन्द्वस्यैवासाधुत्वादुक्तक्रमेणैकशेषो न युक्तः, शक्लाकापरि हस्त्यश्वमित्यादौ व्यभिचारेणोक्तनियमस्यासत्त्वात् एकत्वे चैकत्वानि चेति विग्रहे च एकत्वानीत्येकशेषस्य गुणकिरणावल्यामाचार्यैरभिहितत्वाच्च। हंसश्च हंसी च इत्यर्थे हंसहंस्यावित्यप्रयोगात् तत्रापि "पुंसा स्त्रियाः सारूप्ये" इत्यनुशिष्टेर्हंसीपदस्य लोपे हंसावित्यत्र लुप्तमेव हंसीपदमनुसन्धाय स्त्रीपुंसयोर्बोधः तल्लोपमजानतस्तु हंसपदे स्त्रीहंसत्वपुरुषहंसत्वाभ्यां विभिन्नरूपाभ्यामेकस्याः शक्तेर्लक्षणया वा शक्तादेव। यत्तु तत्र हंसपदमेव लक्षणया हंसीत्वेन शक्त्या च हंसत्वेन बोधकं सुवर्णस्तु पुंस्त्वं हंस एवान्वेति न तु हंस्यामयोग्यत्वात् इति मतं तन्न तथासति स्त्रीहंसत्वहंसत्वयोः पदार्थतावच्छेदकयोर्भिन्नोभेदविरहेण द्वन्द्वाप्रसक्तावेकशेषस्य हंसश्च हंसी च इत्यस्य दुष्करत्वापत्तेः अन्यथा घटतद्घटावित्यपि द्वन्द्वप्रसङ्गात् हंसौ च हंसावेति विग्रहेऽपि हंसा इत्यतो हंसद्वयहंसत्वयोः प्रागुक्तरीत्यावगमः। दुन्दुभी च दुन्दुभिश्चेति विग्रहे दुन्दुभी सुन्दरावित्यत्राभेर्योर्बोधनस्थले पुंलिङ्गस्यैव दुन्दुभिशब्दस्य शिष्टतया तद्विशेष्यत्वादेव सुन्दरादेः पुंस्त्वम्। युवा च युवतिश्च इत्यर्थे युवानावित्यत्राप्युक्तरीत्यैव युवतीयौवनवतोर्बोधः वरटाहंसौ लक्षणासारसावित्यादौ तु स्त्रीपुंसयोर्द्वन्द्वेऽपि पदसारूप्यविरहात्तत्रैकशेषः दम्पत्यर्द्वन्द्वप्रकरणे ब्राह्मणाश्चानयेदित्यत्रापि ब्राह्मणश्च ब्राह्मणी च इति विग्रहे प्रागुक्तादिशा ब्राह्मणभार्यापत्योरवगमः। एकश्चैका चेत्यत्र एकौ, द्वौ च द्वे चेत्यत्र द्वौ, उभे चोभौ चेत्यत्र उभौ त्रयश्च तिस्रश्च इत्यत्र च विग्रहे त्रय इत्यादिरेकशेष इष्यत एव। ग्राम्यानेकशफेष्वतरुषु स्त्रीपुंसयोर्बहुत्वमन्तर्भाव्य सारूप्येण द्वन्द्वस्थले तु पुंस एव लुक् तेन मेषश्च मेषाश्चेत्यर्थे मेषा इत्यत्रापि लुप्तं बहुमेषाणां लक्षकं मेषपदं प्रतिसन्दधत एव बहुमेषाणामनेकमेषीणाञ्चावगमः। एवं महिषाश्च महिष्यश्चेत्यर्थे महिषा इत्यत्रापि महिषपदं बहूनां महिषाणां, मृगाश्च मृग्यश्चेत्यर्थे मृगा इत्यत्र तु मृगादेरग्राम्यत्वान्न पुंसो लुक् परन्तु स्त्रियाः। तथा गर्दभाश्च गर्दभ्यश्चेत्यर्थे गर्दभा इत्यत्रापि खराणामेकशफत्वात् वर्करांश्च वर्कर्यश्च इत्यर्थे वर्करा इत्यत्रापि तरुणार्थकत्वात्। स्वसा च भ्राता चेत्यर्थे भ्रातरावित्यत्र पुत्रश्च दुहिता चेत्यर्थे पुत्रावित्यत्र च विरूपैकशेषेऽपि स्वसृपदं दुहितृपदञ्च लुप्तं प्रतिसन्धायैव भ्रातृभगिन्योः, पुत्रकन्ययोश्चावगमः। "त्वेषपुत्रदुहितोश्च त्वैषे भाषि न कारयेत्" इत्यादिकस्तु प्रयोगः परिचिन्तनीयः। स च मैत्रश्चेति विग्रहे त्वदादिना तदन्यस्य द्वन्द्वे लुप्तावित्यत्रापि लुप्तं मैत्रादिपदमनुसन्धत एव मैत्रादावगमः स च त्वञ्चेत्यादि विग्रहेण किंपदान्यत्यदादिद्वयगर्भद्वन्द्वे तु पूर्वस्यैव वा लुक् अन्यस्यैव वा त्वदादेर्लुप्ति

युवामित्यत्र त्वादावप्युक्तक्रमेणैव तदर्थयुष्मदर्थयोर्बोधः स च स चेत्यत्रापि विभिन्नार्थयोर्विग्रहे स्वपूर्वांगणितोऽपि तदादिः स्वोत्तरापठित एव "तत्तन्मानुषतुल्योऽसौ यद्यद्विद्यातिनिर्म्मले"त्यादौ तु न त्यदादिगणेन द्वन्द्वः परन्तु तदाद्यव्ययेन यथा "तत्तत्तामसभूतभीतय"इत्यादौ यत्तदादिव्यतिरिक्तानामेवाव्ययानां सरूपैकशेषस्य व्युत्पन्नत्वात् प्रयोगानुरोधित्वात् कल्पनायाः। कच त्वञ्चेत्यादिविग्रहेण किमा तादृशद्वन्द्वे तु तदन्यस्यैव त्यदादेर्लुकि काविलादिक एव प्रयोगः चैत्रस्य पितराविलत्रापि विरूपैकशेषे युष्मस्य मातृपदस्य कारणान्मातृत्वगमः तदस्मरतस्य पितृपदे जनकशरीरत्वेन बलवया मातापित्रोरवगतिरिति प्राहुः। कौमारास्तु माता पितृद्वन्द्वे माता पितृभ्यां मातारपितराभ्यामिति प्रयोगद्वयीदर्शनाच्चैत्रस्य पितराविलत्र नैकशेषः परन्तु पुष्यवन्तादिपदवन्मातृत्वपितृत्वाभ्यां विभिन्नरूपाभ्यामेकशक्तिमदेव नियतद्विवचनाकाङ्क्षं पितृपदं प्रत्यन्तरम्। एवं श्वश्रूश्च श्वशुरश्चेत्यर्थे श्वशुराविलत्र श्वशुरपदमपि श्वश्रू श्वशुरस्य द्वन्द्वे श्वश्रूश्वशुराविलेव प्रयोगादित्याहुः"। द्वन्द्वं विभजते। "द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ। एकान्यवचनाकाङ्क्षाहीनोपादानतस्तौ"। "अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ तत्रैकवचनान्यसंबाकाङ्क्षाविहीनः समाहारः तथाविधसंबाकाङ्क्षश्चेतरेतरः पाणिपादं हस्त्यश्वमित्यादितो हि करचरणादीनां बहूनामप्यगतावेकवचनमेव प्रमाणं धवखदिराविलादौ द्विवचनादेः पदिस्कन्दिखिदेर्दादित्यादौ तु पदिस्कन्दिभ्यां सहितः खिदिरिति विग्रहस्य मध्यपदलोपी कर्म्मधारयो यथा अव्याप्तप्रतिव्याप्तेरिति मणिमन्थादौ"।

केचित् पदभेदे द्वन्द्वमिच्छन्तः "अथैकदन्तहेरम्ब लम्बोदरगजाननाः" इत्युदाजहुः तत्र समीचीनम् चोऽवधारणे इत्यादिवत् एकदन्तादिशब्दानामेवात्र पदार्थत्वात् तथाभूतशब्दानाञ्च विभिन्नानुपूर्वीकत्वेन भिन्नत्वात् एते शब्दा गणेशे वृत्तिमन्त इत्येवं कोषादावन्वयबोधात्। घटकलसयोरभेद इत्यादौ तु घटपदकलसपदप्रतिपाद्यस्वरूपपदार्थतावच्छेदकभेदात् न द्वन्द्वानुपपत्तिरिति दिक् "देवताद्वन्द्वे" "चार्थे द्वन्द्वः" पा०"द्वन्द्वः समासिकस्य च" गीता। तत्र युगले "द्वन्द्वं ते मन्दचेता यदि जपति जनोवारमेकं कदाचित्"कर्पूरस्तवः। "विरहविधुरकोकद्वन्द्वशोकं विभिन्दन्" उद्भटः। मिथुनम् स्त्रीपुंसयोर्द्वित्वम् तत्र "द्वन्द्वानि भावं क्रियया विवव्रुः"कुमा०"मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु" रघुः। "क्षुत्पिपासे शोकमोहौ रागद्वेषौ तथैव च। लाभालाभौ च शीतोष्णे तथा मानापमानौ। कामक्रोधप्रभृतयोः द्वन्द्वशब्देन वर्णिता" इत्युक्ते परस्परविरुद्धस्वभावे शीतोष्णादौ "न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि" माघः "तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता"वेदान्तसा०"द्वन्द्वातीतो विमत्सरः" गीता। आसनजये च द्वन्द्वदुःखैरनाभिभवः योगसू०उक्तः "ततो द्वन्द्वानभिघातः" "शीतोष्णादिभिर्द्वन्द्वैरासनजयाद्बाधिभूयते" भा०।

७दुर्गे युक्तिकल्प० तद्विशेषादिकं तत्रोक्तं यथा "राज्ञोबलं न हि बलं द्वन्द्वमेव बलं बलम्। अथवा बलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्" तथा च "एकः शतं योधयति प्राकारस्थो धनुर्धरः। शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते। अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्। यद्दैवसृष्टितं द्वन्द्वं गिरिनद्यादि संश्रितम्। अकृत्रिममिदं ज्ञेयं दुर्गमुत्तरिभूभुजाम्। प्राकारपरिखारथ्रसंश्रयं यद्भवेदिह। कृत्रिमं नामविज्ञेयं कङ्कालङ्कन्तु वैरिणाम्" तत्राकृत्रिमद्वन्द्वसक्तं तत्रैव यथा "अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः। सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः। सुखनिःसरणो द्वन्द्वः पर्वताख्यो महीभुजाम्। नद्योगभीरविस्तीर्णाश्चतुर्दिशु व्यवस्थिताः। तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते। यदन्यच्चिरकालीनं दुर्गङ्कुर्य्य विधिनादिकम्। तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते। वनद्वन्द्वमिति ख्यातं यथापूर्वं महत्तरम्" कृत्रिमद्वन्द्वसक्तं तत्रैव यथा "यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः। तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्। गजैरलङ्कृत्या विस्तीर्णा गम्भीराः पूर्णवारयः। द्वन्द्वत्वेन समादिष्टा परिखा वङ्कयादसः। विशालशालं सुघनं वङ्ककण्टकिसङ्कटम्। द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्। अधोऽधोबध्यमानोऽपि कन्दरोऽत्यजलंस्रवन्। द्वन्द्वत्वेन संसंहिष्टः दुर्गङ्कुर्य्यो हि स भूभुजा। सर्वतः परिखां कृत्वा निबन्धोपरिकन्दरम्। तज्जलप्रुतदेशत्वात् जलद्वन्द्वं तदुच्यते। एषामभावे निम्नस्य भूप्रदेशस्य बन्धनात्। वर्षासु स्रवते वारि जलद्वन्द्वं ततोभवेत्। एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्। आश्रित्य कृत्रिमं द्वन्द्वं बलवद्-

वैरिणो दिशि । अन्यत्र क्षत्रिणं द्वन्द्वं कृत्वा चरयति वेधेत् । रथपतिर्वदा वैरी स्वद्वन्द्वं तदाचरेत् । अजाश्वगावश्वैरी अश्वद्वन्द्वं तदाचरेत् । गिरिद्वन्द्वं रूपः वेधेत् यस्य स्वाद् दिविधो रिपुः । सर्वो हि त्रिविधो वृद्धः समाधाद्युपदिश्यते । प्रतिराजस्य राज्याग्रे प्रकटे गुप्त एव च । राज्याग्रे वैधिकान् रक्षेत् प्रकटे निवसेत् स्वयम् । गुप्तेऽस्त्रकोषदुर्गाणां संरक्षेदिति निश्चयः" । तस्य सामान्यतो युद्धा नीतिशास्त्रोक्ताः यथा "सप्तवेशावरणं द्वन्द्वतत्तमुच्यते । अन्यत्र वन्दिभावेव न ताहग्वयमाश्रयेत् । भूतद्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च । भूतद्वन्द्वमित्याहुर्वोढृद्वन्द्वं प्रकीर्तितम् । वोढृशून्यं हि यत् द्वन्द्वं भूतकावयवं हि तत्" । अन्यत्र च "यावत् प्रमाणं नगरं हि राज्ञां ततो भवेदुत्तमभध्यमान्तम् । त्रिंशत्सहस्रं च युधोत्तरेण त्रिंशेयजानां धरणीपतीनाम्" नर्मसु "यदन्यद् द्विविधं द्वन्द्वं चयूते धरणीभुजाम् । ताभ्यामेवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः । अन्येषु दैवात् भिन्नेषु मन्त्रद्वन्द्वात् जयेन्नृपः । मन्त्रद्वन्द्वे हि भिन्ने हि न चान्यत् कार्यकारणम्" । भोजः 'तदेव वैरिदुर्वृत्तं विस्तीर्णविषमस्य तत् । सप्तवेशावरणं तद्वन्द्वतत्तमं विदुः' ।

द्वन्द्वगद पु० दुःखरूपो गदः । रागद्वेषादिरूपे रोगे । "अहं कृरिः सर्वमिदं जनार्दनो नान्यं ततः कारणकार्यजातम् । दैवक्रमनो यस्य न तस्य भूयो भवोद्भवा दुःखगदा भवन्ति" विष्णुपु० ।

द्वन्द्वचर पुंस्त्री द्वन्द्वीभूय मिथुनीभूय चरति चर–ट । चक्रवाके हेमच० स्त्रियां जातित्वात् ङीप् । "यद्विना पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम्" रघुः । त्रिनि द्वन्द्वचारिन् अमर० त्रिका० स्त्रियां ङीप् ।

द्वन्द्वज त्रि०द्वन्द्वात् जायते जन–ड । वातपित्तश्लेष्मणां मध्ये द्वाभ्यां दोषाभ्यां जाते १रोगादौ बाधवनिदानम् २कलहात् जाते च ।

द्वन्द्वयुद्ध न० द्वयोर्द्वयोर्युद्धम् । द्वयोर्द्वयोर्युद्धे "कैराते द्वन्द्वयुद्धे च यदिदं समवर्तत" भा०उ०१८५अ० । "वज्रनि भुवि चित्राणि द्वन्द्वयुद्धानि सञ्जय !" भा०द्रो० १५अ० ।

द्वय न०द्वयवयम् द्वि–अवयवे तयप् तस्य वा अयच् । १द्वयोरवयवे २द्वित्वे अत्र स्त्रीत्वमपि ङीप् । "अतदुद्वयोलिखरसुन्दरानरे" नैष० "कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः" भा०र० द्वे अवयवे यस्य अयच् । २द्वित्वान्विते त्रि० अयचः तयप्स्थानिकत्वात् जसि सर्वनामता "द्वयेऽप्यच्छन्न विनीतमार्गाः" माघः "व्यथां द्वयेनापि मेदिनी भृतामिति" माघे द्वयेनामित्यत्राप्यन्ये तु द्वयं द्वित्वमिच्छन्ति द्वय–क्विप् तेनामिति समर्थन्ते । स्त्रियां ङीप् । "द्वयीषु निःशेष द्वयार्पितं द्वयम्" कुमा० अत्र द्वयेऽपीति पाठान्तरम् ।

द्वयाग्नि पु०द्वयः द्विरूपोऽग्निरत्र । पाठिद्रुमे चित्रके (चिता) इति भाषा इति शब्दच०तस्य प्रचुराग्निरूपत्वात्तथात्वम् ।

द्वयातिग त्रि० द्वयं रजस्तमसो द्वित्वमतिगच्छति अति+गम–ड । रजस्तमोभ्यामनभिभूतसत्त्वगुणयुक्ते अमरः ।

द्वयाविन् त्रि० द्वयमस्त्यस्य वेदे "बहुलं छन्दसि" मत्वर्थे विनि "छन्दोविनृप्रकरणे श्रोत्रामेखलाद्वयोभयरज्जा हृदयानां दीर्घश्चेति वक्तव्यम्" वार्ति०विनि पूर्वपददीर्घश्च । द्वित्वयुक्ते स्त्रियां ङीप् ।

द्वयु पु०द्वाभ्यां प्रकाराभ्यां युक्ता द्वि+यु–अ–कु पृषो० । प्रत्यक्षतो हितवादिनि परोक्षतोऽहितवादिनि एवं द्विप्रकारयुते यमौ "दुर्हणा वा उपद्वयुः" ऋ०८।१८।१४भाष्यभा० ।

द्वर त्रि० द्व–आवृतौ अच् । आवरणकारके द्व–ऽन् । हरि तत्रार्थे "स हि द्वरो द्वरिषु वन्ते" ऋ०१।५२।२ ।

द्वा:(द्वा)स्थ पु० द्वारि तिष्ठति स्था–क वा विसर्गलोपः । द्वारपाले अमरः । "ते यज्ञनि निरवैगात् दुष्टं वद्वाःस्थवीक्षिताः" कुमा० "विद्वानपि तयोर्द्वाःस्थः समय वज्रमोऽभिनत्" रघुः । [अमरः ।

द्वा:(द्वा)स्थित द्वारि स्थितः वा विसर्गलोपः । द्वारपाले

द्वा(द्वि)चत्वारिंश त्रि० द्वा(द्वि)चत्वारिंशतः पूरणः डट् । येन द्वाचत्वारिंत् संख्या पूर्यते तस्मिन् । स्त्रियां ङीप् ।

द्वा(द्वि)चत्वारिंशत् स्त्री द्व्यधिका चत्वारिंशत् द्विगुद्वन्द्वस्य वा आत्वम् । द्व्यधिकचत्वारिंशत्संख्यायाम् तदन्विते च । सामप्रमाणमस्य ठन् । द्वा(द्वि)चत्वारिंशतिक तत्प्रमाणे त्रि० पूरणे तमप् द्वा(द्वि)चत्वारिंशत्तम तत्संख्यापूरणे त्रि० ।

द्वाज पु० द्वाभ्यां जायते जन–ड पृषो० । द्वाभ्यां जाते "नाम निर्वचनं तस्य श्लोकमेकं पुरा जगुः । मूढे ! भर द्वाजमिमं भरद्वाजं वदन्त्यते ! । यातौ बहुज्ञा पितरौ भरद्वाजमथाब्रुवत्" भाग०९।२०।५ "तत्र प्रथमं पुत्रं त्यक्त्वा यान्तौ ममतां वदन्त्यतिराष्ट्रे मूढे ! इमं पुत्रं भर पुष्णीष्व । भर्तुर्बिभेमीति चेत्तत्राह द्वाजम् एकस्य क्षेत्रे अन्यस्य बीजेनेत्यादिरूपं द्वाभ्यां जातं अतस्तस्यायं पुत्र इति तस्मात् न भयमित्यर्थः । एवमुक्त्वा यतौ तं

प्रत्याह हे बृहस्पते ! त्वमिमं भर यतो द्वाजं द्वाभ्यां आवाभ्याम् अन्यायतो जातं अतो नाहमेकाकिनी भरामीत्यर्थः। यद्यप्यादेवसङ्घा पितरौ ममतांबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति" श्रीधरस्वामी।

द्वात्रिंशत् स्त्री द्व्यधिका त्रिंशत द्वादेशः। १द्व्यधिकत्रिंशत् संख्यायां २तदन्विते। तस्याः पूरणः डट्। द्वात्रिंशतमण् द्वात्रिंशत्तम तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

द्वात्रिंशदपराध पु० कर्म०। भक्तानामीश्वरविषये द्वात्रिंशत् संख्यकेषु अपराधेषु। ते च अपराधाः तन्त्रसारे दर्शिता यथा "तन्त्रान्तरे यानैर्वा पादुकाभिर्वा यानं भगवतो गृहे। देवोत्सवेष्वसेवा च अप्रणामस्तदग्रतः। उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम्। एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम्। पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम्। शयनञ्चाग्रतश्चापि मिथ्याभाषणमेव च। उच्चैर्भाषो मिथो जल्पो रोदनानि च विग्रहः। निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम्। कम्बलावरणञ्चैव परकीर्त्तेरपङ्क्तिः। अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम्। शक्तौ गौणोऽपचारश्च अनिवेदितभक्षणम्। तत्तत्कालभवानाञ्च फलादीनामनर्पणम्। विनिलुष्टावशिष्टस्य प्रदानं व्यञ्जनस्य यत्। अदीक्षितासनञ्चैव परनिन्दा परस्तुतिः। गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा। अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः"।

द्वात्रिंशल्लक्षण पु०द्वात्रिंशत् लक्षणानि शुभलक्षणानि यस्य। शुभलक्षणान्विते महापुरुषलक्षणयुते नरे। काशी०ख० ११ अ०। "पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः। त्रिपृथुलगुरुगम्भीरोद्वात्रिंशल्लक्षणस्त्विति" "पञ्च दीर्घाणि शस्यानि यथा दीर्घाश्चयास्य वै। भुजौ नेत्रे हनू नासा-वक्षश्चेति तनयस्य ते। त्वक्केशाङ्गुलिदशनाः पर्व्वाण्यङ्गुलि लान्यपि। तस्यास्य पञ्च सूक्ष्माणि टिक्पालपदभाक् यथा। पाण्यङ्घ्रितलनेत्रान्तं तालुजिह्वाधरौष्ठकम्। सप्तारक्तश्च सनखमस्मिन् राज्ञसुखपदम्। कक्षा कुक्षिनिकस्कन्धकरवक्त्रं षडुन्नतम्। तथात्र दृश्यते बाहे महदैश्वर्य्यभाग् यथा। ललाटकटिवक्षोभि स्त्रिविस्तीर्णो यथाह्यसौ। सर्वतेजोतिगैश्वर्य्यं तथा प्राप्स्यति नान्यथा। ग्रीवाजङ्घामेढ्रनेत्रं त्रिभिर्हस्वोऽयमीड्यितः। स्वरेण सत्वनाभिभ्यां त्रिगम्भीरः त्रिगुः शुभः।"

द्वादश त्रि०द्वादशानां पूरणः द्वादशन्+डट्। द्वादशसंख्यापूरणे स्त्रियां ङीप्। सा च द्वादश्याः चन्द्रकलायाः सूर्य्यकिरण-प्रवेशनिर्गमयोर्व्यापायां क्रियारूपायां तद्पलक्षित कालरूपायां वा तिथौ तस्यां व्रतकालनिर्णयः कालमा०उक्तो यथा "अथ द्वादशी निर्णीयते। सा च युग्मादिशास्त्रेषु पूर्व-विद्धा ग्राह्या। स्कन्दपुराणेऽपि "द्वादशी च प्रकर्त्तव्या एकादश्या युता विभो !। सदा कार्य्या च विद्धैर्विष्णु भक्तैश्च मानवैः" इति। उत्तरविद्धां प्रतिषेधति बृहद्वसिष्ठः। "द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी। चतुर्द्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी" इति। नन्वेवं सत्यमेकादश्युपवासो द्वादश्युपवासश्चेत्युभयमेकस्मिन्दिने प्राप्नोति सत्यम् तथापि चोभयस्यान्योऽन्यं विरोधा-भावात् सहैवानुष्ठानं भविष्यति। नन्वेकं व्रतमसमाप्य व्रतान्तरमनुष्ठातुमशक्यम्। असमाप्ते व्रते पूर्वे नैव कु-र्याद्व्रतान्तरम्" इति शास्त्रात् मैवम् इदं हि शास्त्र-मेकव्रतस्य मध्ये व्रतान्तरोपक्रमं निषेधति प्रकृते तु व्रतद्वयस्यापि सहैवोपक्रम इति तन्त्रेणानुष्ठानं भवि-ष्यति। नन्वस्त्वेवं सम्पूर्णतिथौ, सम्पूर्णतिथौ त्वेकादशी द्वादश्युपवासौ द्वौ नैरन्तर्येण प्राप्नुतः। तत्र पारण-मन्तरेण प्रथमोपवासस्यासमाप्तत्वात्। द्वितीयोपवासस्य प्रक्रमो न सम्भवतीति चेत् मैवम् अङ्गिः पारणं कृत्वा द्वितीयोपवासस्य प्रक्रमयितुं शक्यत्वात्। तादृशं तु पारणमशितानशितोभयात्मकम्। तत्राशितरूपत्वात् पूर्वोपवासं परिसमापयति। अनशितरूपत्वेनोत्तरोप-वासं न विघ्नन्ति। एतच्च ज्ञात्वा कृत्वं दर्शपूर्णमासप्रक-रणे याजमानब्राह्मणे श्रूयते "यदानश्नुपवसेत् क्षौधुकः स्याद्यदश्नीयात् रुद्रोस्य पशूनभिमन्येतापोऽश्नाति तत्रैवाशितं न क्षौधुको भवति नास्य रुद्रः पशूनभिम-न्यते" इति। तस्माद्रुद्रपारणेनोपवासद्वयनिर्वाहः। एतच्च सर्वतिथिसाधारणम्। प्रकृते तु कादशीद्वादश्योर्दै-वतैक्याद्रुद्रपारणमन्तरेणापि न कश्चिद्दोषः। अतएव स्मर्यते "एकादशीसमोपेत्रैव द्वादशीं समुपोषयेत्। न तत्र विधिलोपः स्याद्रुभयोर्दैवतं हरिः" इति। उपवासद्वयाशक्तौ केवलद्वादश्युपवासेनोभयोः फलं सिध्यति तथा च स्मृतिः "एवमेकादशीं सङ्गा द्वादशीं समुपोषयेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नो-त्यसंशयम्" इति। द्वादश्यां तु काम्योपवासो मार्कण्डे-येन दर्शितः "द्वादश्यामुपवासेन सिद्धार्थो भूप ! सर्वशः।

चक्रवर्तित्वमतुलं संप्राप्ता अतुलाः श्रियः" इति। अथाष्टौ महाद्वादश्यः, शुद्धैकादशीयुता द्वादशी उन्मीलिनीसंज्ञा १द्वादश्येव शुद्धाधिका वर्द्धते चेत् सा वञ्जुलीर वासरत्रयस्पर्शिनी त्रिस्पृशा२ अग्रे पर्वणः सम्पूर्णाधिकत्वे पक्षवर्द्धिनी४। जयादयश्चतस्र इत्यष्टौ निर्णं० सि० उक्ता जयादिकाश्चतस्रश्च हेमा०व्र० उक्ता यथा "जया१ च विजया२ चैव जयन्ती३ पापनाशिनी४। सर्वपापहरा चैषा कर्तव्या फलकाङ्क्षिभिः। एकादश्यां शुक्लपक्षे यदा ऋक्षं पुनर्वसुः। सा नाम्ना च जया१ ख्याता तिथीनामुत्तमा तिथिः। सप्तपोषव्रती पापात् मुच्यते नात्र संशयः। अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः१। यदा शुक्ले तु द्वादश्यां नक्षत्रं श्रवणं भवेत्। विजया२ सा तथा प्रोक्ता तिथीनामुत्तमा तिथिः। तस्यां स्नातः सर्वतीर्थे स्नातो भवति मानवः। दानं सहस्रगुणितं तथा चैव पयोव्रतम्। होमजपोपवासैश्च सहस्राणां फलं लभेत्। यदा च शुक्लद्वादश्यां रोहिणी च प्रजायते। जयन्ती३ नाम सा प्रोक्ता सर्वपापहरा तिथिः। सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु। तत् चाशयति गोविन्दस्तस्यामभ्यर्चितस्तथा। यदा च शुक्लद्वादश्यां पुष्यं भवति कर्हिचित्। तदा साऽतिमहापुण्या कथिता पापनाशिनी४। यो ददाति च वत्पुण्यं नित्यं संवत्सरे नरः। उपवासन्तु तस्यां च यः करोति महत्फलम्। तस्यां जगत्पतिर्देवः सर्वलोकेश्वरो हरिः। प्रत्यक्षतां प्रयात्याशु तदनन्तफलं स्मृतम्" एकादशीव्रतयोः साङ्ख्यादौ पारणे च विशेषः निं०सि० उक्तो यथा

"एकादशीद्वादश्योरेकत्वे तन्त्रेणोपवासः पार्थक्ये तु यत्रास्योपवासद्वयम् "एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्" इति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव "एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति तत्रैवोक्तेः यदात्वस्या द्वादशी यदोक्तं मातृस्मे "यदा भवति अल्पापि द्वादशी पारणादिने। अरुणोदये हयं कुर्यात् प्रातर्माध्याह्निकं तदा" नारदीयेऽपि "अल्पायामथ विप्रेन्द्र! द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दानहोमादि संयुताः" इति सङ्घटे तु माधवीये देवलः "संकटे विषमे प्राप्तं द्वादश्यां पारणेत्क्षयम्। अह्निस्तु पारणं कुर्यात् पुनर्भक्तं न दोषकृत्" इति सङ्घटे त्रयोदशीमाह-प्रदोषादौ अत्र केचिदाहुः "अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यम् "द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः" इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः। अत्र केचित् सङ्किरन्ते "यदा भूयसी द्वादशी तदापि प्रातर्मुहूर्त्तत्वे पारणं कार्यम् "सर्वेषामुपवासानां प्रातरेव हि पारणमिति वचनादिति"। अत्रान्तरवस्तु बहूनां कर्मकालानां विना कारणं बाधापत्तेः प्रागुदयवचनैश्च अल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्यम् प्रातः यद्वस्तु "सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति" यदपराह्णमाचित्तेऽप्युपपन्नः न च वाक्यवैयर्थ्यं पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः। प्रमादेन एकादश्युपवासातिक्रमे अपराह्णे वाराहे "एकादशी विशुद्धा चेद्द्वादशी परतःस्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम्"। निं०सि० स्थानान्तरे भाद्रपदशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् आभाकाशितपक्षेष्विति दिवोदासोदाहृतवचनात्।

"उपोष्य द्वादशीं सोऽहात् पारणं श्रवणे यदि। करोति कृत्स्नं तत्पुण्यं द्वादशद्वादशीभवम्" इति तत्रैव स्कान्दाच्च। अस्य तत्रैव प्रतिप्रसवः मार्कण्डेयोक्तः "विशेषेण महीपाल! श्रवणं वर्द्धते यदि। तिथिश्चैव भोक्तव्यं द्वादशीं लङ्घयेन्न हि" इति। केचित्तु यदा त्वपरिहार्योयोगस्तदा श्रवणनक्षत्रे लेखाविभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यं तदुक्तं विष्णुधर्मे "श्रुतेश्च मध्ये परिवर्तमेति सुप्रिप्रबोधपरिवर्तनमम्बुवर्ज्जमिति"। केचित्तत्रापि विभज्य मध्यपादद्वयं वर्ज्यमाहुः अत्र मूलं चिन्त्यम्। अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात्। सन्ध्यायां विष्णुं संपूज्य प्रार्थयेत मन्त्रस्तु तिथितत्त्वे उक्तः। यथा "वासुदेव! जयस्वाथ! प्राप्तेयं द्वादशी तव। प्राप्तेन परिवर्तस्व सुखं स्वपिहि माधव!" इति अत्रैव शक्रध्वजोत्थापनसक्रमपराह्णे गर्गेण "द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा। शक्रस्योत्थापयेद्राजा विश्वश्रवणवासवे" इत्यनेन श्रवणद्वादशी तत्रैकादश्यां द्वादशीश्रवणयोगे सैवोपाह्या "एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत्। तद्विष्णुपूजकं नाम विष्णुसायुज्यकृद्भवेत्" इति विष्णुधर्मोक्तेः नारदीयेऽपि "संसृजेत्र-

कादशीं राजन् द्वादशीं यदि संस्पृशेत् । अवश्यं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति । द्वादशी अवश्यस्पृष्टा स्पृशेदेकादशीं यदि । स एव वैष्णवोयोगो विष्णुपदसंज्ञितः" इति हेमाद्रौ दिनद्वये द्वादशीत्रयोगेऽपि पूर्वा, निर्णयामृते त्वस्य पूर्वार्द्धमन्यथा पठितम् । "द्वादशी अवश्यं च स्पृशेदेकादशीं यदि" इति तेन हेमाद्रिमते एकादशग्राः अवश्ययोगाभावेऽपि तद्युक्त द्वादशीयोगमात्रेण विष्णुपदत्वं भवति निर्णयामृतमते तु अवश्यत्वैकादशीद्वादशीभ्यां योग एव विष्णुपदत्वं नान्यथेति । यदा निशीथानन्तरं सूर्योदयावधि द्विकलामात्रमपि अवश्यं भवति तदापि पूर्वैव तदुक्तं तत्रैव नारदीये इमां प्रश्नं "तिथिनक्षत्रयोर्योगोयोगश्चैव नराधिप ! । द्विकलो यदि लभ्येत स श्रेयो ह्यहयामिकः" इति "द्वादशी अवश्यस्पृष्टा कृत्स्ना पुण्यतमा तिथिः । न तु सा तेन संयुक्ता तावत्येव प्रशस्यते" इति मदनरत्ने मात्स्याच्च । दिवहोषीये तु "रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे । तदा पूर्वोपवसेत्प्रातर्भोक्ते च पारणम्" इत्युक्तम् । इदं तु निर्मूलत्वात् पूर्वविरोधाच्छोमेयं इयं बुधवारेऽतिप्रशस्ता "बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् । अत्यन्तमङ्गती सा स्याद्दत्तं भवति चाक्षयम्" इति हेमाद्रौ स्कान्दात् । यानि तु पठन्ति "उत्तराषाढसंयुक्ता श्रोणामध्याङ्गगापि वा । आसुरी सैव तारा स्याद्दत्तं पुण्यं हरालतम् । उदयव्यापिनी पाह्या श्रोणाद्वादशिका युता । विष्णुर्क्षसंयुता सा च सैवोपोष्या शुभेप्सुभिः" इत्यादीनि विष्णुधर्मस्कान्दभविष्यादीनि वचनानि तानि निर्मूलानि । यदपि स्मृत्यर्थसारे उदयव्यापिनी पाह्योक्तम् यच्च हरहारदीये "उदयव्यापिनी पाह्या अवश्यद्वादशीव्रते" इति तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये अवश्ययोगः पूर्वेऽह्नि च तद्भिन्ने काले योगस्तत्परम् । दिनद्वये उदययोगे पूर्वैव वस्तुकर्मकालव्याप्तेरित्युक्तं मदनरत्ने । यदा त्वेकादश्येव अवश्ययुता न द्वादशी तदापि पूर्वैव "यदा न प्राप्यते श्रेष्ठं द्वादश्यां वैष्णवं क्वचित् । एकादशी तदोपोष्या पापघ्नी अवशान्विता" इति मदनरत्ने नारदीयोक्तेः यदा परैवर्क्षयुता तदा परा तत्र भक्तोपवासद्वयं कार्यम् "एकादशीमुपोष्यैव द्वादशीं वसुपोषयेत् । न चात्र विधिलोपः स्याद्दुभयोर्दैवतं हरिः" इति भविष्योक्तेः यत्तु विष्णुधर्मे "पारणान्तं व्रतं श्रेयं व्रतान्ते विप्रभोजनम् । अवश्याप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरम्" इति तदेतद्विप्रपरम् अत्र गौडाः "शृणु राजन् परं काम्यं अवश्यद्वादशीव्रतम्" इति स्मृतेर्वचनात् काम्यमेवेदम् तेनावश्यत्वं नित्यैकादशीव्रतमेवेति मन्यन्ते "द्वादश्यामुपवासेन शुद्धात्मा नृप सर्वथा । चक्रवर्तित्वमतुलं संग्राप्नोत्युत्तमां श्रियम्" इति गौडनिबन्धे मार्कण्डेयोक्तेश्च । दाक्षिणात्यास्तु "एकादश्यां नरो भक्त्या द्वादश्यां वसुपोषयात् । व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति वराहवामनपुराणोक्तेः अवश्यद्वादशीव्रतमेवेत्याहुः भुक्त्वेति फलाद्याहारपरम् नक्षत्रपरम् "अन्नाश्रितानि पापानीति" निषेधात् "उपवासद्वयं कर्तुं न शक्नोति नरो यदि । प्रथमेऽह्नि फलाहारी निराहारी परेऽहनि" इति दिवोदासीये भविष्योक्तेश्च अशक्तौ तु स्वीकृतैकादशीव्रतोपवासं प्रत्युक्तं मात्स्ये "द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि । उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम्" इति पूजयेन्न तूपवसेदित्यर्थः । अस्वीकृतैकादशीव्रतस्यैकादश्यां भुक्त्वा द्वादश्यामुपवसेत् "एवमेकादशीं भुक्त्वा द्वादशीं वसुपोषयेत् । पूर्वावासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति नारदीयोक्तेः । पारणं तूभयान्येऽन्यतरगते वा कुर्यात् "तिथिनक्षत्रनियमे तिथिभान्ते च पारणमिति" स्कान्दात् "तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् । पारणं तु न कर्तव्यं यावत्तैकस्य संक्षयः" इति नारदीयादिति हेमाद्रिः । यद्यपि नक्षत्रभान्तेऽपि पारणं प्रतिभाति तथापि तिथिभान्ते श्रेयम् नक्षत्रभान्ते तिथिमध्येऽपि "याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः । अन्ते पारणं कुर्याद्विना श्रवणरोहिणीम्" इति विष्णुधर्मे श्रवणान्तभान्ते पारणनिषेधात् "रोहिण्यान्तु भान्ते कुर्यात्तिथेर्वापि" इति वह्निपुराणात् तदन्तेऽप्यस्तु न त्वेवमसीति न, श्रवणान्तोऽनुकल्प इति मदनरत्ने । अथवा तु "तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् । यामलयोर्द्वयोर्यामिन्यां प्रातरेव हि पारणम्" इति श्रेयम् । यत्तु मदनरत्ने द्वादशीद्वयो श्रवणद्वयो वा श्रवणान्त एव पारणं कुर्यात् "पारणं तिथिद्वयो तु द्वादश्यामुपसंक्षयात् । द्वयो कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते" इति वह्निपुराणादित्युक्तम् तत्प्रकरणादेतद्भाषेव श्रवणयुक्तैकादश्यां विहितत्रिजवैकादशीव्रतपरं न तु श्रवण-

द्वादशीपरमिति मदनरत्ने। गौडास्तु श्रवणद्वादशीपरमाहुः अत्रविधिर्मदनरत्ने विष्णुधर्मे "तस्मिन् दिने तथा स्नानं यत्र क्वचन सङ्गमे। दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे। वस्त्रसंवेष्टितं दत्त्वा कृतोपानत्कमेव च। न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति"।

दशावतारद्वादश्यो हेमाद्रौ उक्तो यथा विष्णुपु० "मार्गशीर्षे सिते पक्षे द्वादश्यां समजायत। मत्स्यो विष्णुः समाख्यातस्तस्येष्टेयं सदा तिथिः। एकादश्यामुपोष्यादौ पठन् मत्स्यावतारकम्। श्रृण्वन् सौवर्णं मत्स्यं च कारयित्वा वदेदिदम्।' विष्णुर्मे प्रीयतां मत्स्य इत्युक्त्वा ब्राह्मणाय तम्। यो दद्यात् स सुखी भूत्वा विष्णुलोकं व्रजेच्छुभम्। पौषे मासि सिते पक्षे द्वादश्यां समजायत। कूर्मरूपी स भगवान् तस्येष्टेयं सदा तिथिः। एकादश्यामुपोष्यादौ पठन् कूर्मञ्च तारकम्। श्रृण्वन् सौवर्णं कूर्मञ्च कारयित्वा वदेदिदम्। विष्णुर्मे प्रीयतां कूर्म इत्युक्त्वा ब्राह्मणाय तम्। यो दद्यात्स सुखी भूत्वा विष्णुलोके महीयते। यो मर्त्यो माघशुक्लस्य द्वादश्यां तु विशेषतः। उपोष्य भक्त्या वाभ्यर्च्य वराहं रूपनिर्मितम्। दद्यात्पठेच्च चरितं वाराहं हरिसत्तमम्। वराहजन्मदिवसे विप्राय श्रद्धयान्वितः। सुरमेतं समासाद्य मोदते कालमक्षयम्। वराहविष्णुप्रीतिञ्च कूर्मदेवं यथातथम्। नारसिंहं फाल्गुने तु एकादश्यां सिते शुचिः। उपोष्याभ्यर्चयेद्भक्त्या नारसिंहमथे दिने। सौवर्णं नारसिंहं च कृत्वा भक्त्या द्विजाय तु। दद्यान्नृसिंहचरितमिदं श्रृण्वन् पठेच्च वा। यत्नन् विजित्येह लक्ष्मीं प्राप्य नित्यं नरोत्तमः। पातालस्वर्गमाप्नोति नागदैत्यार्चनायुतम्। चैत्रे मासि सिते पक्षे एकादश्यामुपोषितः। वामनस्य दिनेऽभ्यर्च्य वामनं पुरुषोत्तमम्। सौवर्णं वामनं दद्यात् पठेद्भक्त्या च यो नरः। स चिरं वामनस्येदं श्रृणुयाद्वाप्युपोषितः। स धनैरन्वितो भुक्त्वा भोगानिह च मानुषान्। ब्रह्मलोकमवाप्नोति विद्वान्मानुततमरः। वैशाखशुक्लैकादश्यामुपोष्याभ्यर्चयेच्छुचिः। जामदग्न्यं तथा रामं दद्याद्विप्राय रूपजम्। ज्येष्ठशुक्लैकादश्यामुपोष्य द्वादशीदिने। रामं दाशरथिं रौक्मं पूजयेद्भक्तिभावतः। इदं च रामचरितं श्रृणुयाद्वा पठेच्चरः। रामस्य जन्मदिवसे (कल्पभेदादविरुद्धम्) तथा दाशरथेर्द्विजः। सीतारामन्तु सौवर्णं यो विप्राय प्रयच्छति। द्वादश्यां रामचरितमिदं श्रृण्वन् पठेच्च वा। स इन्द्रलोकं लभते रामस्यैव प्रसादतः। इह कीर्तिमवाप्नोति धनं पुत्रांश्च जीवितम्। आषाढ़मासि शुक्लां य उपोष्यैकादशीं द्विजः। द्वादश्यामर्चयेद्रामं रौहिणेयं महाबलम्। रौहिणेयस्य रामस्य तिथौ जन्मनि सूत्तमे। सौवर्णं ब्राह्मणायापि रामं दद्यात्सपात्रकम्। स नागलोकमाप्नोति यावदिन्द्राश्चतुर्दश। इह स्त्रीभोगमाप्नोति बलवान्नीरुजो भवेत्। श्रावणे मासि शुक्लां य उपोष्यैकादशीं द्विजः। द्वादश्यामर्चयेत् कृष्णं रुक्मिणीसहितं शुचिः। रुक्मव्रतिकृति कृत्वा दद्याच्च ब्राह्मणाय च। पठेच्च कृष्णचरितं कृष्णजन्मदिने (कल्पभेदादविरुद्धम्) शुचिः। श्रावणे श्रृण्वुयाद्वापि य इदं पुरुषोत्तमः। स मुच्यतेऽस्मात् संसारात् भुक्त्वा भोगमनुत्तमम्। यस्तु भाद्रपदे मासि एकादश्यामुपोषितः। शुक्लायामर्चयेत् कल्किं विष्णुं सौवर्णमच्युतम्। द्वादश्यां जन्मदिवसे कल्किविष्णुः सुरेश्वरः। दद्याद्विप्राय तं वापि भक्त्यानुष्ठानतो सदा। पठेदिदं कल्किविष्णोश्चरितं श्रृण्वतोऽतः। जनलोकमवाप्नोति कृते जन्म लभेद्युगे। तस्मिँस्तस्मिंस्तु दिवसे दत्तं विष्णुवतारकम्। अर्चयन्तु सुराः सर्वे भवेयुः सर्वदार्चिताः'। तिथि० नारदीये 'वैशाखशुक्लपक्षे तु द्वादशी वैष्णवी तिथिः। तस्यां शीतजलेनैव स्नापयेत् केशवं शुचिः'। इयं विपीतकी द्वादशी। अत्र 'षष्ठीसमेता कर्तव्या सप्तमी नाष्टमीयुता। पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम्। एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः। उपासनाय द्वादश्यां विष्णोर्यद्दयितं तथा'। इति भविष्यपुराणेन एकादश्युपवासानन्तरं द्वादश्यां विष्णूपासनाया उक्तत्वादत्रापि तथा व्यवहरन्तीति नात्र युग्मादरः। द्वादशीत्वेतूपवासानन्तर्यं विनापि पूजेति। इयं पूर्ववचनोक्तषष्ठीयुता सप्तमीवत्। आषाढ़द्वादश्यादिषु शयनादिकं प्रागुक्तवचनात् भविष्योत्तरे 'द्वादशी श्रवणोपेता सर्वपापहरा तिथिः। बुधवारसमायुक्ता ततः शतगुणा भवेत्। तासूपोष्य समाप्नोति द्वादशद्वादशीफलम्'। उभयदिने तल्लाभे तु एकादशीयुता ग्राह्या। 'द्वादशी च प्रकर्तव्या एकादश्यायुता विभो। सदा कार्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः" इति स्कान्दात्। यदा त्वेकादश्यामेव श्रवणा तदा तासूपवसेत् तथाच नारदः "याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्वतं कुर्यात्

श्रवणद्वादशीं विना'। भविष्योत्तरे 'एकादशी यदा तु स्यात् श्रवणेन समन्विता। विजया सा तदा प्रोक्ता भक्तानां विजयप्रदा। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः। विशेषेण महीपाल! श्रवणं वर्द्धते यदि। तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत्'। तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः। अत्र हेतुः द्वादशीमित्यादिः। यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां तत् तदोपवासद्वयमाह ब्रह्मवैवर्त्तः 'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न चात्र विधिलोपः स्याद्भयोर्देवता हरिः'। अत्र च 'अक्षमाप्ते व्रते पूर्वे नैव कुर्यात् व्रतान्तरम्' इति स्मृतेः पारणाकरणेन पूर्वोपवासासमाप्तावुपवासान्तरारम्भे विधिलोपेन भवेदित्यर्थः। हेतुमाह उभयोरित्यादिः। उभयोपवासासामर्थ्ये तु श्रवणद्वादश्युपोष्या तथाच स्मृतिः 'वरमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत्। पूर्वोपवासजं पुण्यं तत्र प्राप्नोत्यसंशयः'। तथा 'उपोष्य द्वादशीं पुण्यां विष्णुर्व्यापेण संयुताम्। एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम्'। द्वादश्युपवासः वाम्यः। तथाच मार्कण्डेयः 'द्वादश्यामुपवासेन विद्यातप इव सर्वशः। चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम्'' तिथितः वाचिद्विशेषोऽनयोर्द्वयमेदाद्व्यवस्था।

मासभेदे द्वादशद्वादशीव्रतभेदा अग्निपु०१८८अ०उक्ता यथा अग्निरुवाच। द्वादशीव्रतकं वक्ष्ये भुक्तिमुक्तिप्रदायकम्। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन मैक्षेण चैव द्वादशिकव्रती। चैत्रे मासि सिते पक्षे द्वादश्यां मदनं हरिम्। पूजयेद् भुक्तिमुक्त्यर्थी मदनद्वादशीव्रती१। माघशुक्ले तु द्वादश्यां भीमद्वादशिकव्रती। नमो नारायणायेति यजेद्विष्णुं स सर्वभाक्२। फाल्गुने च सिते पक्षे गोविन्दद्वादशीव्रती३। विशोकद्वादशीकारी यजेदास्रवुजे हरिम्४। सगणं मार्गशीर्षे५ तु कृष्णमभ्यर्च्य यो नरः। ददाति शुक्लद्वादश्यां स सर्वरसदायकः। गोवत्सं पूजयेद् भाद्रे गोवत्सद्वादशीव्रती६। माध्यान्ते समतीतायां श्रवणेन तु संयुता। द्वादशी७. या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी। तिलैः स्नानस्तिलैर्होमो नैवेद्यस्तिलमोदकम्। दीपश्च तिलतैलेन तथा देयं तिलोदकम्। तिलाश्च देया विप्रेभ्यः फलं होमोपवासतः। सौ नमो भगवतेऽथो वासुदेवाय वै यजेत्। सकुलः स्वर्गमाप्नोति षट्तिलद्वादशीव्रती। मनोरथद्वादशीव्रतं फाल्गुने तु सितेऽर्चयेत्८। नामद्वादशीव्रतकं केशवाद्यैश्च नामभिः। वर्षं यजेद्धरिं स्वर्गी न भवेन्नारकी नरः। फाल्गुनस्य सितेऽभ्यर्च्य सुमतिद्वादशीव्रतीः९। माघि भाद्रपदे शुक्ले१० अनन्तद्वादशीव्रती। अर्चयेत्तं तु मूले वा माघे११ कृष्णाय वै नमः। यजेत्तिलांश्च जुहुयात्तिलद्वादशीकरः। सुगतिद्वादशीकारी फाल्गुने तु सिते यजेत्। जय कृष्ण नमस्तुभ्यं वर्षं स्याद् भुक्तिमुक्तिगः। पौषशुक्ले तु द्वादश्यां१२ सम्याग्निद्वादशीव्रती"।

द्वादशीनियमा तद्धर्मभेदनिषेधाश्च एका०त० उक्ता यथा "द्वादशीनियमाः। द्वादश्यामपि विष्णुपूजनम् "एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः। उपासनाय द्वादश्यां विष्णोर्यद्दियन्तथा" इति भविष्यपुराणात्। यद्वत् यथा द्वादश्यां विष्णूपासनाय एकादश्यामुपवासं प्रकुर्वन्ति तथा इयमपि षष्ठीयुक्ता सप्तमी उपोष्या सप्तम्यां सूर्योपासनायेत्यर्थः। तत्र ब्रह्मपुराणम्। "कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम्। व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम्। शिलापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः। द्वादश्यां वर्ज्जयेन्नित्यं सर्वपापैः प्रमुच्यते। पुनर्भोजनमध्वानं यानमायासमैथुने, उपवासफलं हन्युर्दिवा निद्रा च पञ्चमी"। वृद्धशातातपः "उपवासं द्विजः कृत्वा ततोऽश्नीयाद्भोजनम्। कुर्यात्तस्य सगुण उपवासो हि जायते"। सगुणः साङ्गः। नारायणमन्त्रजपस्य पाश्चात्यनिर्णयामृते कात्यायनः "मिथ्यावादे दिवास्वप्ने बहुशोजलसेवने। अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः" तथा "मन्त्रं निवेद्य हरये निवेद्योपोषणं व्रती। द्वादश्यां पारणं कुर्याद्दर्भयित्वा ह्युपोदकीम्"। उपोदकीम् पूतिकाशाकम्। कूर्मपुराणे "कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलं मसूरताम्। द्यूतक्रीडां दिवानिद्रां व्यायामं क्रोधमैथुनम्। द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्" संवत्सरप्रदीपे "अभ्यङ्गञ्च परान्नञ्च तैलं निर्माल्यलङ्घनम्। तुलसीचयनं द्यूतं पुनर्भोजनमेव च। वस्त्रपीडां तथा क्षारं द्वादश्यां वर्जयेद्बुधः"। अभ्यङ्गोयेन केनापि, तैलं तिलतैलं माषादीनपि निषिद्धम्। स्मृतिः

"घृतञ्च शार्षपं तैलं यत्तैलं पुष्पवासितम् । अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" इति अभ्यङ्गो द्वादशीतरपरः । नित्यश इति पर्ववाराद्यापि । वारे द्रव्यदानेनापि प्रतिप्रसवमाह स्मृतिः "रवौ पुष्पं गुरौ दूर्वां भूमिं भूमिजवासरे । भार्गवे गोमयं दद्यात्तैलदोषोपशान्तये" । दद्यात्तैले इति शेषः । स्मृरिसन्नोषे "कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् । शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम्" । निर्माल्यलङ्घनमन्यत्रापि निषिद्धमत्राधिकदोषकरं व्रतहानिकरं वा । क्षारं पर्यस्य । "मन्दमङ्गलषष्ठीषु द्वादश्यां श्राद्धवासरे । वस्त्राणां क्षारसंयोगोदहत्यासप्तमं कुलम्" । इति यमवचनात्" ।

द्वादशक त्रि० द्वादश संख्याऽस्य कन् । १द्वादशसंख्यान्विते पणरूपे दण्डादौ "वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशकोदमः" मनुः द्वादशानां संख्या कन् । २द्वादशसंख्यायाञ्च "ब्राह्मणस्य परिव्राजामृगां द्वादशकस्य च" मनुः

द्वादशकर पु०द्वादश करा भुजा यस्य । १कार्त्तिकेये त्रिका० "स्वामी शाखी विशाखश्च द्विभुजो बालरूप धृक् । दक्षे शक्तिः कुक्कुटोऽथ एकवक्त्रोऽथ षण्मुखः । षड्भुजो वा द्वादशभिर्यामेऽरण्ये दिवाङ्कुकः । शक्तीषुपाशनि स्त्रिंशतोत्तदोत्तर्जनीयुतः । शक्त्या दक्षिणहस्तेषु, षट्सु, वामे करे तथा । शिखिपिच्छं धनुः खेटं पताकाभयकुक्कुटे । कपालकर्तरीशूलपाशश्चेदुयाम्य सौम्ययोः" हेमा०व्र० । २शूलयोगे ३हर्षणयोगे च तयोर्द्वादशहस्तत्वम् २७६पृ० दृश्यम् । द्वादशभुजादयोऽप्यत्र । ४कुमारानुचरगणभेदे "अनन्तो द्वादशभुजस्तथा कृष्णोपलक्षणकौ" भा०शल्य० ४६अ० तद्गणोक्तौ । द्वादशकराः किरणा यस्य । ५द्वादशार्चिषि जीवे "ध्यात्वा पीताम्बरं पीतं सरोजस्थं चतुर्भुजम्" इत्युक्तेश्चतुर्भुजत्वस्यैव प्रतीतेर्नात्रकरस्य हस्तपरता "भैरवीरूपविद्या च भुजैर्द्वादशभिर्युताः" हेमा०व्र०उक्ते ६भैरवीभेदे स्त्री ।

द्वादशन् त्रि०द्वौ च दश च द्व्यधिका वा दश । १द्व्यधिकायां द्वियुतायां वा दशसंख्यायां २तद्युते च "द्वादश प्रतिमास्यानि आद्यं षण्मासिके तथा" तिं०त०

द्वादशपत्र न०द्वादशाक्षराणि पत्राणीव यस्य । "वैशाखादिरूपतया कल्पित द्वादशाक्षरयुक्ते भगवतो मन्त्रभेदे स च मन्त्रः ओं नमो भगवते वासुदेवाय" यथोक्तं वामनपु० "पितामहोऽपि तं पुत्रं साध्यं सद्विनये रतम् । सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम् । शिखायां चरणे ओंकारो मेढ्रोऽस्य शिरसि स्थितः । माधो वैशाखनामा च प्रथमं पत्रमं स्मृतम् । नकारः शिरसि प्रोक्तो दृग्भोऽस्य शिरसि स्थितः । त्र्यैष्मासश्च तत्पत्रं द्वितीयं परिकीर्त्तितम् । मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितम् । मास आषाढनामा च तृतीयं पत्रकं स्मृतम् । अकारं नेत्रयुगलं कर्कटस्थान संस्थितः । मासः श्रावण इत्युक्तश्चतुर्थं पत्रकं स्मृतम् । गकारं हृदयं प्रोक्तं सिंहो वसति तत्र च । मासो भाद्रपदो प्रोक्तः पञ्चमं पत्रकं स्मृतम् । वकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता । मासश्चाश्वयुजो नाम षष्ठं तत्पत्रकं स्मृतम् । तेकारमन्त्रभागश्च तुलाराशिकृताश्रयः । मासश्च कार्त्तिको नाम सप्तमं पत्रकं स्मृतम् । वाकारं नाभिसंयुक्तं स्थितं तत्र च वृश्चिकः । मासो मार्गशिरो नाम अष्टकं पत्रकं स्मृतम् । सुकारं जघनं प्रोक्तं तत्रस्थश्च धनुर्धरः । पुष्यो नाम्नि मासो नवमं परिकीर्त्तितम् । देकारश्चोरुयुगलं मकरस्थान संस्थितः । माघो निगदितो मासः पत्रकं दशमं स्मृतम् । वाकारो जानुयुगलं कुम्भस्थानापि संस्थितः । पत्रकं फाल्गुनं प्रोक्तं तदेकादशमुत्तमम् । यादौ यकारो मीनो हि स पैत्रे च वसेत् मुने ! । दृष्ट्वा द्वादशं प्रोक्तं पत्रं वै केशवस्य हि । द्वादशारमथा चक्रं यक्षामि द्विभुजस्तथा । त्रिव्यूहस्त्रेसमूर्त्तिश्च तथोक्तः परमेश्वरः । एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् । यस्मिन् ज्ञाते मुनिश्रेष्ठ ! न भूयो मरणं भवेत्"

द्वादशपुत्र पु०व०। संज्ञात्वात् कर्म० । औरसादिद्वादशविधेषु पुत्रेषु यथाह विष्णुः स०

"अथ द्वादश पुत्राभवन्ति । स्वे क्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथमः१ । नियुक्तायां सपिण्डगोत्रसमवर्णेन वोत्पादितः क्षेत्रजोद्वितीयः२ । पुत्रिकापुत्रस्तृतीयः३ । यस्यास्याः पुत्रः स मे पुत्रोभवेदिति या पिता दत्ता सा पुत्रिका । पुत्रिकाविधिना प्रतिपादिता पितृभ्रातृविहीना पुत्रिकैव । गौणभवस्तुर्थः४ । अक्षता भूयःसंस्कृता, पुनर्भूः भूयस्यसंस्कृतापि परपूर्वा । कानीनः पञ्चमः५ । पितृगृहेऽसंस्कृतयैकौत्पादितः । स च पाणिग्राहस्य । गृहे च गूढोत्पन्नः षष्ठः६ । यस्य तत्सजस्तस्यासौ । सहोढः सप्तमः७। गर्भिणी या संस्क्रियते तस्याः पुत्रः । स च पाणिग्राहस्य । दत्तकस्त्वष्टमः८ । स च मातापितृभ्यां यस्य दत्तः । क्रीतस्तु नवमः ९।

स च येन क्रीतः। स्वयमुपगतोदशमः१०। स च यस्योपगतः। अपविद्धस्त्वेकादशः११। पिता माता च परित्यक्तः। स च येन गृहीतः। यत्र क्वचनोत्पादितश्च द्वादशः१२। एतेषां पूर्वः पूर्वः श्रेयान्। स एव दायहरः'।

'बह्वीनां द्वादश ह्येव पुत्राः पुराणदृष्टाः। स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः१ तदभावे नियुक्तायां क्षेत्रजो द्वितीयः२। तृतीयः३ पुत्रिका विज्ञायते अभ्रांशका पुंसः पितृलभ्येति प्रतीचीनं गच्छति पुत्रत्वम्। श्लोकः। अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रोभवेदिति। पौनर्भवश्चतुर्थः४ पुनर्भूः कौमारं भर्त्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति। या च क्लीबं पतितमुन्मत्तं वा भर्त्तारमुत्सृज्यान्यं पतिं विन्दति मृते वा, सा पुनर्भूर्भवति। कानीनः पञ्चमो या पितुर्गृहेऽसंस्कृता कामादुत्पादयेन्मातामहस्य पुत्रोभवतीत्याहुः। अथाप्युदाहरन्ति। अपत्ता दुहिता यस्य पुत्रं विन्दति तुल्यतः। पुत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनमिति। गूढे च गूढोत्पन्नः षष्ठ इत्येते दायादा बान्धवास्तातारोमहतोभयादिद्याहुः। अथादायादास्तत्र सहोढएव प्रथमो या गर्भिणी संक्रियते तस्यां जातः सहोढः पुत्रोभवति। दत्तकोद्वितीयो यं मातापितरौ दद्यातां। क्रीतस्तृतीयस्तच्छुनःशेफेन व्याख्यातं हरिश्चन्द्रो ह वै राजा सोऽजीगर्त्तस्य तोपवन्यैः पुत्रं विक्राय स्वयं क्रीतवान्। स्वयमुपागतश्चतुर्थः तच्छुनःशेफेन व्याख्यातं शुनःशेफो ह वै यूपे नियुक्तो देवतास्तुष्टाव तस्मै ह देवताः पाशं विमुमुचुस्तस्मात्पिजञ्जचुर्ममैवायं पुत्रोऽस्त्विति तानाह न सम्पदे ते सम्पादयामासुरेष एव वं कामयेत तस्य पुत्रोऽस्त्विति तस्मै ह विश्वामित्रो होतासीत्तस्य पुत्रत्वमियाय। अपविद्धः पञ्चमो यं मातापितृभ्यामपास्तं प्रतिगृह्णीयात्। गूढापुत्रएव षष्ठोभवतीत्याहुरित्येतेऽदायादा बान्धवाः। अथाप्युदाहरन्ति। यस्य पूर्वेषां वर्णानां न कश्चिद्दायादः स्यादेते तस्यापहरन्ति' वसिष्ठसंहिता १७अ०। अत्र कानीनस्य मातामहसुतत्वमुक्तं विष्णु० स्मृते च पाणिग्राहस्य पुत्रत्वं मिथःसमयभेदेनात्र व्यवस्था

द्वादशप्रसृत त्रि० द्वादश प्रसृतयः सन्त्यत्र अच्। द्वादशप्रसृतियुक्ते सुश्रुतोक्ते वस्तिभेदे यथा "दत्त्वादौ सैन्धवस्याज्यं मधुनः प्रसृतिद्वयम्। विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम्। एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्। संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम्। वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम्। एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत्। ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितम्। अपहासे भिषक्कुर्य्यात्तद्वत्प्रसृतिहापनम्। यथावयो निरूहाणां कल्पनेयमुदाहृता। सैन्धवादिद्रवाणानां सिद्धिकामैर्भिषग्वरैः"।

द्वादशभाव पु० द्वादशगुणितो भावः। ज्यो०चक्रेषु तन्वादिषु द्वादशसु भावेषु तदानयनादि तत्स्थितग्रहफलञ्च नीन्ता०चक्रं यथा "पूर्वं नतं स्याद्दिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम्। दिवानिशोरिष्टघटीषु एवं दुरात्रिखण्डं त्वपरं नतं स्यात्। तत्काले सायनार्कस्य भुक्तभोग्याऽंशसंगुणात्। खोदयात् खाग्निलब्धं यत् भुक्तं भोग्यं रवेस्त्यजेत्। इष्टनाड़ीपलेभ्यश्च गतगम्याच्चिजोदयात्। शेषं खत्राहतं भक्तमशुद्धेन लवादिकम्। अशुद्धशुद्धमे हीनयुक् तनुर्व्ययभांशकम्। एवं लङ्कोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात्। पूर्वपश्चात्तदन्यत् प्राग्वत्तद्दशमं भवेत्। सप्तमे लग्नखे जायातुर्य्यौ लग्नोनतुर्य्यतः। षष्ठांशयुक् ततः सन्धिरग्रे षष्ठांशयोजनात्। त्रयः सप्तन्ययोभावाः षष्ठांशैकैकयुक् सुखात्। अग्रे त्रयः षडेवं ते भार्द्धयुक्ताः परेऽपि षट्। खेटे भावसमे पूर्वं फलं सन्धिसमे तु खम्। हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वापरे फलम्। भुक्तं भोग्यं खेष्टकालान्न शुद्ध्येत् त्रिंशच्चिन्नाङ्गोदयाग्रं लवाद्यम्। हीनं युक्तं भास्करे तत्ततः स्याद्भावौ लग्नं भार्द्धयुक्ताद्रवेस्तु। खेटे सन्धिदयान्तःस्थे फलं तद्भावजं भवेत्। हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वापरे फलम्। ग्रहसन्ध्यन्तरं कार्य्यं विंशत्या गुणितं भवेत्। भावसन्ध्यन्तरेणाग्रं फलं विंशोपकाः स्मृताः"। अयमर्थः। मेषादिराशीनामुदयकालोलग्नं तस्य च त्रिंशदंशरूपतया जन्मकाले मेषादीनां यतमोऽंशो गतः तदारभ्य तदुत्तरराशेस्ततोऽर्वाचीनांशान्तः तनुभावः एवं धनभावादि एवं तन्वादिद्वादशभावास्तेषां सन्धयोऽपि तथैव ज्ञेयाः। राशिभावगणनया फलं स्थूलं भावगणनया तु सूक्ष्मं फलादिकं भवतीति ज्ञेयम्। ते च तनुभावः, धनभावः, सहजभावः, बन्धुभावः, पुत्रभावः, रिपुभावः, कलत्रभावः, मृत्युभावः, धर्मभावः, कर्मभावः, आयभावः, व्ययभावश्चेति द्वादश। तेषां सन्धयश्च द्वादशेत्यवधेयम्।

द्वादशमद्य न॰ द्वादशविधं मद्यम्। "पानसं द्राक्षमाध्वीकं खार्जूरं तालमैक्षवम्। माध्वीकं टङ्कमाध्वीकं मैरेयं नारिकेलजम्। समानानि विकाराय मद्यान्येकादशैव तु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम्" पुलस्त्योक्ते द्वादशविधे मद्ये।

द्वादशमल पु॰ द्वादशगुणितो मलः। "वसाशुक्रमसृङ्मज्जं मूत्रविट्कर्णविड्नखाः। श्लेष्मास्थि दूषिका स्वेदो द्वादशैते नृणां मलाः" अत्रिसंहितोक्ते नृणां द्वादशविधे मले। तत्र "यस्यां यस्यां क्रमेणैव शुद्धिरुक्ता मनीषिभिः। मृद्वारिभिश्च पूर्वेषामुत्तरेषान्तु वारिभिः" शुद्धिप्रकारमाह तत्रैव।

द्वादशमास पु॰ द्वादशगुणितो मासः। १चैत्रवैशाखज्यैष्ठाषाढश्रावणभाद्राश्विनकार्तिकमार्गशीर्षपौषमाघफाल्गुनसंज्ञकेषु द्वादशसु मासेषु "क्वचित् द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः" श्रुतिः ६ब॰। २वर्षे पु॰

द्वादशमासकर्म्मन् न॰ द्वादशसु मासेषु कर्तव्यं कर्म। विष्णुस॰ उक्ते मार्गादिमासेषु तिथिभेदे दानहोमादिकर्मभेदे यथा

"मार्गशीर्षशुक्लपञ्चदश्यां स्नानशिरःसंयुक्तायां चूर्णितं लवणस्य सुवर्णनाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रदापयेत्। अनेन कर्मणा रूपसौभाग्यवानभिजायते। पौषी चेत् पुष्ययुक्ता स्यात्तस्यां गौरसर्षपकल्कोद्वर्त्तितशरीरो गव्यघृतपूर्णकुम्भेनाभिषिक्तः सर्वौषधीभिः सर्वगन्धैः सर्वबीजैश्च स्नातो घृतेन भगवन्तं वासुदेवं स्नापयित्वा गन्धपुष्पधूपदीपनैवेद्यादिभिरभ्यर्च्य वैष्णवैः शाक्रैर्वाहस्तत्रैव मन्त्रैः पावके हुत्वा सुवर्णेन घृतेन ब्राह्मणान् स्वस्ति वाचयेत्। वासोयुगं कर्त्रे दद्यात्। अनेन कर्मणा पुष्यते। माघी मघायुता चेत्तस्यां तिलैः श्राद्धं कृत्वा पूतोभवति। फाल्गुनी फल्गुनीयुता चेत्तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनं निवेद्य भार्यां मनोज्ञां रूपवतीं द्रविणवतीञ्चाप्नोति। नार्यपि भर्त्तारम्। चैत्री चित्रायुता स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति। वैशाखी विशाखायुता चेत्तस्यां ब्राह्मणसप्तकं चौद्रयुक्तैस्तिलैः सन्तर्प्य धर्मराजानं प्रीणयित्वा पापेभ्यः पूतोभवति। ज्यैष्ठी ज्येष्ठायुता चेत्तस्यां छत्रोपानहप्रदानेन गवामाधिपत्यं प्राप्नोति। आषाढ्यामाषाढायुक्तायामन्नपानदानेन तदैवाक्षय्यमाप्नोति। श्रावण्यां श्रवणयुक्तायां जलधेनुं साज्यां वासोयुगाच्छादितां दत्त्वा स्वर्गमाप्नोति। प्रौष्ठपद्यां प्रौष्ठपदायुक्तायां गोदानेन सर्वपापविनिर्मुक्तो भवति। आश्वयुज्यामश्विनीगते चन्द्रमसि घृतपूर्णं भाजनं सुवर्णयुतं विप्राय दत्त्वा दीप्ताग्निर्भवति। कार्त्तिकी कृत्तिकायुता चेत्तस्यां सितसुक्षाणमन्यवर्णं वा गवाङ्गोदये सर्वशस्त्रगन्धोपेतं दीपमध्ये ब्राह्मणाय दत्त्वा कान्तारभयं नगच्छति। वैशाखशुक्लतृतीयायामुपोषितोऽक्षतैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा च सर्वपापेभ्यः पूतोभवति। यच्च तस्मिन्नहनि प्रयच्छति तदक्षय्यमाप्नोति। पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः स्नातस्तिलोदकं दत्त्वा तिलैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा भुक्त्वा च पापेभ्यः पूतोभवति। माघ्यां समतीतायां कृष्णद्वादश्यां सोपवासः श्रवणं प्राप्य वासुदेवाग्रतोमहावर्त्तिद्वयेन दीपद्वयं दद्यात्। दक्षिणपार्श्वे महारजतरूपेण समग्रेण वाससा घृततुलामष्टाधिकां दत्त्वा वामपार्श्वे तिलतैलतुलां साष्टां दत्त्वा श्वेतेन समग्रेण वाससा एतत्कृत्वा कृतकृत्योयस्मिन् राष्ट्रेऽभिजायते यस्मिन् देशे यस्मिन् कुले स बलोज्ज्वलोभवति। आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं घृतं प्रदद्यादश्विनौ प्रीणयित्वा रूपभाग्भवति। तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा राज्यभाग्भवति। प्रतिमासं रेवतीयुते चन्द्रमसि मधुघृतयुतं रेवतीप्रीत्यै परमान्नं ब्राह्मणान् भोजयित्वा रेवतीं प्रीणयित्वा रूपभाग्भवति। माघे मासेऽग्निं प्रत्यहं तिलैर्हुत्वा सघृतं कुलमाषं ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवति। सर्वां चतुर्दशीं नदीजले स्नात्वा धर्मराजानं पूजयित्वा सर्वपापेभ्यः पूतोभवति। यदिच्छेद्दिव्यान् भोगान् चन्द्रसूर्यग्रहोपमान्। प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ"। कृत्यतत्त्वे दर्शितानि अन्यानि च मासभेदकार्याणि द्रष्टव्यानि।

द्वादशमासिक न॰ मासिभवं ठञ् मासिकम् कर्म॰। मृतदिनावधिद्वादशसंख्यापूरणे मासे कर्तव्ये प्रेतोद्देश्यके श्राद्धभेदे।

द्वादशयात्रा स्त्री द्वादशसु मासेषु द्वादशविधा यात्रा। यात्रातत्त्वे स्कन्दपुराणोक्ते मासभेदे देवोत्सवे यात्राभेदे तासु तत्र दर्शिता यथा

"इन्द्रद्युम्न उवाच वैशाखादिषु मासेषु यात्रापूजाविधिं मुने!। श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि। जैमिनिरुवाच। वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः।

या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते शृणु। वैशाखे चान्दनी यात्रा ज्यैष्ठे स्नापन्युदीरिता। आषाढे रथयात्रा स्यात् श्रावणे शयनी तथा। भाद्रे दक्षिणपार्श्वी सा आश्विने वामपार्श्विका। उत्थानी कार्तिके मासि ऊर्णनी मार्गशीर्षके। पौषे पुष्याभिषेकः स्यान्माघे शाल्योदनी तथा। फाल्गुने दोलयात्रा स्यात् चैत्रे मदनभञ्जिका। एकैका सुक्रिदा सर्वा धर्मकामार्थसाधनाः"। तद्विधिस्तु तत्रैव द्रष्टव्यः।

द्वादशराजमण्डल न० द्वादशानां राज्ञां मण्डलम् उत्तरपदद्विगुः। द्वादशानां राज्ञां मण्डले तच्च अग्निपु० २३९अ० उक्तं यथा

"राम उवाच। मण्डलं चिन्तयेत् मुख्यं राजा द्वादशराजकम्। अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्। तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्मृताः। पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्दस्तदनन्तरम्। आसारावनयोश्चैवं विजिगीषोश्च मण्डलम्। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतयोर्निग्रहे व्यस्तयोः प्रभुः। मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः। अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः"।

द्वादशरात्र पु०द्वादशभिः रात्रिभिः निर्वृत्तः तद्धितार्थद्विगुः अच् समा०। द्वादशदिनसाध्ये १द्वादशाहनामके अहीनयागभेदे २रात्रिसत्रभेदे स च यागः कात्यायनेनोक्तः "ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तद्गुणदर्शनात्" कात्या०श्रौ०१२।१।१ "द्वादशाहः सत्रमहीनश्च" ४सू० "अत्र विशेषमाह द्वादशाहस्मृद्धिकामा उपेयुरिति"। "तथा त्रयोदशरात्रमासीरन्निति सत्रलिङ्गम् द्वादशाहेन प्रजाकामं याजयेदित्यहीनलिङ्गम्। अस्यानुकथनप्रयोजनम्, सत्रे सत्रात्मको धर्मो दाक्षत्वेन प्रवर्तते, अहीने चाहीनात्मकः" कर्कः "उक्ता अहीनाः इदानीं सत्रागत्यभिधीयन्ते" कर्कः "द्वादशरात्रादीनि रात्रिसत्राणि" कात्या०श्रौ०२४।१।१ "रात्रिसत्राणि इति नाम तच्च द्वादशरात्रप्रभृतीनाम् पूर्वपदप्रधानोऽयं बहुव्रीहिः एकोऽयेन चत्वारिंशदहानि। तत्र द्वादशरात्रं द्वादशाह एव सत्रात्मकः स च पूर्वसूक्त एव ततो द्वादशरात्रादारभ्य एकैकाहवृद्ध्या चत्वारिंशद्रात्रान्तानि सत्राणि भवन्ति" कर्कः। द्वादशानां रात्रीणां समा० द्वि० अच् समा०। २समाहृतास्तु द्वादशरात्रिषु न०"अत ऊर्द्ध्वं त्रिरात्रं द्वादशरात्रं वा" आश्व०श्रौ०११।८।११ "अतः श्रौतप्रवेशनीयहोमादूर्द्ध्वं त्रिरात्रं द्वादशरात्रं वा नियतो नारा० द्वादश रात्रयः साधनकालत्वेन सन्त्यस्य अर्श आद्यच्। ४द्वादशरात्रिसाध्ये सत्रभेदे श्रौ० पूर्वसूक्तम्।

द्वादशलोचन पु०द्वादश लोचनान्यस्य। कार्तिकेये त्रिका० तस्य षड्वक्त्रत्वात् तथात्वम्।

द्वादशवर्गी स्त्री द्वादशानां वर्गाणां समाहारः समा०द्वि० ङीप्। नीलकण्ठताजकोक्ते वर्षकाले ग्रहाणां बलसाधने द्वादशमिते वर्गे सा च

"क्षेत्रं होरा त्रयस्त्रिंशद्भागसप्तवसुद्वाविंशेशार्कभागाः सुधीभिः। विज्ञातव्या लग्नसंख्याः शुभानां वर्गाः श्रेष्ठाः पापवर्गा अनिष्टाः। ओजे रवीन्दोः सम इन्दुरव्योर्होरे गृहार्द्धप्रमिते विचिन्त्ये। द्रेष्काणपाः स्वेषुनवर्क्षनाथास्तुर्यांशपाः स्वर्क्षजकेन्द्रनाथाः। ओजर्क्षे पञ्चमांशेशाः कुजार्कीज्यज्ञभार्गवाः। समभे व्यत्ययाज्ज्ञेया द्वादशांशाः स्वभात् स्मृताः। लवीकृतो व्योमचरोऽङ्गशैलवस्वङ्गदिग्युद्गुणः खरामैः। भक्तो गतास्तर्कनगाष्टनन्ददिग्युद्भागाः . कृयुतात् क्रियात् स्युः। एवं द्वादशवर्गी स्यात् ग्रहाणां बलसिद्धये। स्वोच्चमित्रशुभाः श्रेष्ठाः नीचारिक्रूरिशोऽशुभाः। एवं ग्रहाणां शुभपापवर्गपङ्क्तिद्वयं वीक्ष्य शुभाधिकत्वे। दशाफलं भावफलं च वाच्यं शुभं त्वनिष्टं त्वशुभाधिकत्वे। क्रूरोऽपि सौम्याधिकवर्गशाली शुभोऽतिसौम्यः शुभखेचरश्चेत्। सौम्योऽपि पापाधिकवर्गयोगान्नेष्टोऽतिनिन्द्यः खलु पापखेटः। राशीशमित्रोच्चरिपुक्रमेण चिन्त्यं तनोरप्यनयैव रीत्या। भावेषु सर्वेष्वपि वर्गचक्रं विलोक्य तत्तत् फलमूहनीयम्" इति द्वादशवर्गी।

द्वादशवार्षिक त्रि० द्वादश वर्षान् अधीष्टः भृतो भूतो वा उत्तरपदवृद्धिः। द्वादश वर्षान् व्याप्य १अधीष्टे सत्कृत्यनियोजिते २भृते कर्मकरे ३भूते स्वसत्तयाव्यापके ब्रह्महत्यानोदके व्रतभेदे च तच्च प्रा०वि० दर्शितं यथा

तत्र मनुः "ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्"। संवर्त्तः "ब्रह्महा तु वनं गत्वा वनवासी जटी ध्वजी। वन्यान्येव फलान्यश्नन् सर्वकामविवर्जितः। भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति। चातुर्वर्ण्यं चरेद्भैक्ष्यं खट्वाङ्गी संयतः पुमान्। भिक्षित्वैवं समादाय वनं गच्छेत्ततः पुनः। वनवासी स पापात्मा सदाकाल

मतन्द्रितः। ख्यापयन्नेव तत् पापं ब्रह्मघ्नः पापकृत्तमः। अनेनैव विधानेन द्वादशाब्दं समाचरेत्"। "तस्मादुक्तनिष्कृतिकेष्वपि प्राजापत्यादयो योजनीयाः। तत्र द्वादशवार्षिकव्रते द्वादशदिनान्येकैकं प्राजापत्यम्परिकल्प्य गण्यमाने प्राजापत्यानां षष्ट्यधिकशततयं द्वादशवार्षिकवैकल्पिकमनुष्ठेयं भवति। तदशक्तौ तावत्यो वा धेनवोदातव्याः" मिता०। रघु०मते तदर्द्धमिति भेदः। भाविनि तु "वर्षस्याभविष्यति" पा० नोत्तरपदवृद्धिः। द्वादशवर्षिक द्वादशवर्षान् भाविनि ज्वरादौ

द्वादशशुद्धि स्त्री द्वादशगुणिता शुद्धिः। तन्त्रसारोक्ते वैष्णवानां कायिकादिद्वादशशुद्धिभेदे "अथ द्वादशशुद्धिर्वै वैष्णवानामिहोच्यते। गृहोपसर्पणञ्चैव तथा चागमनं हरेः। भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः। पूजार्थं पत्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः। करयोः सर्वशुद्धीनामियं शुद्धिर्विधिष्यते। तन्नामकीर्त्तनञ्चैव गुणानामपि कीर्त्तनम्। भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते। तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम्। श्रोत्रयोर्मन्त्रयोश्चैव शुद्धिः सम्यगिहोच्यते। पादोदकस्य निर्माल्यमाज्ञानामपि धारणम्। उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुरः। आघ्राणकृन्मपुष्पादेर्निर्माल्यस्य तपोधन!। विशुद्धिः स्यादनन्तस्य ब्राह्मणस्यापि विधीयते। पत्रपुष्पादिकं यत्र कृष्णपादयुगार्पितम्। तदेकं पावनं लोके तद्धि सर्वं विशोधयेत्। ललाटे च गदा कार्या मूर्ध्नि चापं शरांस्तथा। नन्दकञ्चैव हृन्मध्ये शङ्खं चक्रं भुजद्वये। शङ्खचक्रान्वितो विप्रः श्मशाने म्रियते यदि। प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम!"।

द्वादशशोधित न० द्वादशं व्ययस्थानं प्रहराहित्येन शोधितम्। व्ययस्थाने प्रहराहित्येन शुद्धियुक्ते लग्ने "गुरुशुक्रोदये शुद्धलग्ने द्वादशशोधिते" दीक्षातत्त्वम्।

द्वादशसंग्राम द्वादशविधः संग्रामः। देवानामसुरैः सह द्वादशविधे युद्धे ते च संग्रामभेदा अग्निपु० २७५अ० उक्ता यथा "देवासुराणां सङ्ग्रामा दायार्थं द्वादशाऽभवन्। प्रथमो नारसिंहस्तु द्वितीयो वामनो रणः। सङ्ग्रामस्तथ वाराहश्चतुर्थोऽमृतमन्थनः। तारकामयसङ्ग्रामः५ षष्ठो ह्याजीवकोद् रणः। त्रैपुर७श्चान्धकवधोऽष्टमो वृत्रघातकः। जितो१० हालाहल११ श्चाथ घोरः कोलाहलो१२ रणः। हिरण्यकशिपोस्तीव्रो दार्य्य च नखैः पुरा। नारसिंहो देवपालः प्रह्लादं त्रातवान् रूपम्। देवासुरे२ वामनश्च छलित्वा बलिमूर्जितम्। महेन्द्राय ददौ राज्यं पुरुषोऽदितिसम्भवः। वराहस्तु३ हिरण्याक्षं हत्वा देवानपालयत्। उज्जहार भुवं मग्नां देवदेवैरभिष्टुतः। मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्। सुरासुरैश्च मथितं देवेभ्यश्चामृतं ददौ४। तारकामयसङ्ग्रामे५ तदा देवाश्च पालिताः। निवार्येन्द्रं गुरून् देवान् दानवान् सोमवंशजान्। विश्वामित्रवशिष्ठात्रिकश्यपश्च रणे सुरान्। अपालयन्न निर्वार्य रागद्वेषादिदानवान्६। पृथ्वीरथे ब्रह्मवन्तुरीशस्य शरणो हरिः। ददाह त्रिपुरं देवपालको दैत्यमर्दनः७। गौरीं जिहीर्षुणा रुद्रमन्धकेनार्दितं हरिः। अनुरक्तश्च रेवत्यां चक्रे चाम्बासुरार्दनम्८। अपां फेनमयो भूत्वा देवासुररणे हरम्। हत्वा देवहरं विष्णुर्देवधर्मानपालयत्९। शाल्वादीन् दानवान् जित्वा हरिः परशुरामकः। अपालयत् सुरादींश्च दुष्टघ्नं निहत्य च१०। हालाहलं११ विषं दैत्यं निराकृत्य महेश्वरात्। भयं निर्णाशयामास देवानां मधुसूदनः। देवासुरे रणे यश्च दैत्यः कोलाहलो जितः१२। पालिताश्च सुराः सर्वे विष्णुना धर्मपालनात्। राजानो राजपुत्राश्च मुनयो देवता हरिः। यदुक्तं यच्च नैवोक्तमवतारा हरेरिमे"।

द्वादशसप्तमीव्रत न० हेमा०व्र० भविष्यपुराणोक्ते माघादिपौषान्तेषु द्वादशसु मासेषु सप्तम्योः कर्तव्ये सूर्यव्रतभेदे

"अथान्यत्ते प्रवक्ष्यामि सप्तमीकल्पमुत्तमम्। माघमासात् समारभ्य शुक्लपक्षे युधिष्ठिर!। सप्तम्यां कृतसङ्कल्पो वर्षमेकं व्रती भवेत्। वरुणं माघमासे तु भानुं संपूज्य कारयेत्। ब्रह्मकूर्चविधानेन यथा भक्त्या नृपोत्तम!। अष्टम्यां भोजयेद्विप्रान् तिलपिष्टगुडोदनैः। अग्निष्टोमस्य यज्ञस्य फलं कृत्स्नमवाप्यते। तपनं फाल्गुने मासि सूर्यमित्यभिपूजयेत्। वाजपेयस्य यज्ञस्य फलं प्राप्नोति दुर्लभम्। सप्तम्यां चैत्रमासे तु वेदांगुरिति पूजयेत्। उच्छाध्वरसमं पुण्यं नरः प्राप्नोत्यसंशयम्। वैशाखस्य तु सप्तम्यां धाता इत्यभिपूजयेत्। पशुबन्धाध्वरं पुण्यं सम्यक् प्राप्नोति मानवः। सप्तम्यां ज्येष्ठमासस्य इन्द्रमित्यभिपूजयेत्। अश्वमेधफलावाप्तिर्जायते नात्र संशयः। तथाषाढस्य सप्तम्यां पूजयित्वा दिवाकरम्। वज्रस्वर्णस्य यज्ञस्य फलं प्राप्नोति पुष्क-

वम्। श्रावणे मासि सप्तम्यामर्यमाणं प्रपूजयेत्। सौवर्णमयीफलं पार्थ! नरः प्राप्नोति भक्तितः। रविं भाद्रपदे मासि सप्तम्यार्चयेच्छुचिः। तुलापुरुषदानस्य गुडेन फलमाप्नुयात्। अश्वयुक्शुक्लसप्तम्यां सवितारं प्रपूजयेत्। गोसहस्रप्रदानस्य फलमाप्नोति भक्तितः। कार्तिके शुक्लसप्तम्यां सप्तार्चं नाम पूजयेत्। योऽभ्यर्चयति पुण्यात्मा पौण्डरीकं फलं लभेत्। मार्गशीर्षे तथा भानुं पूजयित्वा विधानतः। राजसूयस्य यज्ञस्य फलमाप्नोति वै नरः। भास्करं पुष्यमासे तु पूजयित्वा विधानतः। चतुर्णामपि वेदानां स्वाध्यायस्य फलं लभेत्। तथैव कृष्णसप्तम्यां नामपूजादिकन्तु वो। सोपवासः प्रयत्नेन वर्षमेकं समाचरेत्। पारिते नियमे चाथ सूर्ययागं समारभेत्"।

द्वादशसाहस्र त्रि॰ द्वादश सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। द्वादशसहस्रसंख्यायुक्ते "एतद् द्वादशसाहस्रं देवानां युगमुच्यते"। "यत् प्राक् द्वादशसाहस्रमुदितं दैविकं युगम्" इति च मनुः। स्त्रियां ङीप्। द्वादशसाहस्री संहिता। अत्र पक्षे ठञ्। द्वादशसाहस्रिक तत्रार्थे।

द्वादशांशु पु॰ द्वादश अंशवोऽस्य। द्वादशतो "शुक्रः शोडशरश्मिस्तु यस्तु देवो ह्युपोमयः। सोऽहितो नवरश्मिस्तु स्थानमाप्नन्तु तस्य वै। द्वादशद्वादशरश्मीकं हरिद्रामन्तु वेधसः। अष्टरश्मिः शनिस्तत्तु कृष्णं दृढमवस्थयम्" मत्स्यपु॰ १२७अ॰। द्वादशरश्मिप्रभृतयोऽप्यत्र त्रिका॰।

द्वादशाक्ष पु॰ द्वादशाक्षीणि यस्य बच् समा॰। १कार्तिकेये। द्वादश मनोबुद्धिसहितज्ञानेन्द्रियादीनि अक्षिणीव यस्य। २बुद्धे च हेमच॰। "एकाक्षो द्वादशाक्षश्च तथा चैकजटः प्रभुः" भा॰ग॰४६अ॰उक्ते ३कुमारानुचरभेदे च।

द्वादशाक्षर पु॰ द्वादश अक्षराणि यस्य। द्वादशाक्षरयुक्ते मन्त्रभेदे यथा विष्णोः ओं नमो भगवते वासुदेवाय" "नमो भगवते वासुदेवायोङ्कारपूर्वकम्। महामन्त्रमिदं प्राहुस्तत्त्वज्ञा द्वादशाक्षरमिति" पद्म॰पु॰क्रिया॰। कृष्णस्य ओं क्लीं गोपीजनवल्लभाय स्वाहा" इत्येवं रूपावत्यां भक्तिविषयविद्यायां स्त्री गौरा॰ङीष्। ४द्वादशाक्षरयुक्तपादके जगतीच्छन्दसि न॰ "विश्वे देवा द्वादशाक्षरेण जगतीछन्दसा जयं जासुव्वेमम्" यजु॰९।२२

द्वादशाख्य पु॰ द्वादश ज्ञानकर्मेन्द्रियमनोबुद्धिरूपाः पदार्थाः पूजनीयत्वेनाख्याति आ+ख्या-क। बुद्धे हेमच॰। बौद्धशब्दे द्वादशायतनशब्दे च विस्तरतो दृश्यम्।

द्वादशाङ्गी स्त्री द्वादशानामङ्गानां समाहारः ङीप्। १जिनाभिमते आचाराङ्गाद्येकादशोपाङ्गसहिते दृष्टिवादरूपे द्वादशानामङ्गानां समाहारे "आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक्। पञ्चमं भगवत्यङ्गं ज्ञाता धर्मकथापि च। उपासकाऽन्तकृदनुत्तरोपपातिका दश। प्रश्नव्याकरणं चैव विपाकश्रुतमेव च। इत्येकादश सोपाङ्गान्यङ्गानि द्वादशं पुनः। दृष्टिवादो द्वादशाङ्गी स्याद्वणिष्टिकाङ्गया" हेमच॰। दृष्टिवादश्च पञ्चविधः दृष्टिवादशब्दे दर्शितः। द्वादशाङ्गान्यस्य। २धूपभेदे पु॰ "गुग्गुलुचन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम्। जातीकोशञ्च कर्पूरं जटामांसी च वालकम्। त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्तितः" तन्त्रम्।

द्वादशाङ्गुल पु॰ द्वादश अङ्गुलयः प्रमाणमस्य तद्धितार्थे द्वि॰ "द्विगोर्नित्यम्" मात्रचो कुक् अच् समा॰। वितस्तौ परिमाणभेदे अमरः।

द्वादशात्मन् पु॰ द्वादशात्मानो मूर्तयो यस्य। सूर्ये। आदित्यशब्दे ६९६पृ॰ धात्रादयो विष्णुपर्यन्ताः तस्य मूर्तय उक्ताः। द्वादशभेदादिराशयश्चास्य मूर्तयः सू॰सि॰ उक्ता यथा सूर्य इत्युपक्रमे "पुनर्द्वादशधात्मानं विभजन् राशिसंज्ञकम्"। २अर्कवृक्षे च।

द्वादशादित्य पु॰ संज्ञात्वात् कर्म॰। १धात्रादिषु विष्णुपर्यन्तेषु द्वादशसु आदित्येषु २काशीस्थेषु द्वादशसु लोलार्कादिषु च "इति काशीप्रभावस्तोलमश्चनुस्तमोनुदः। कृत्वा द्वादशधात्मानं काशीपुर्यां व्यवस्थितः। लोलार्कं उत्तरार्कञ्च साम्बादित्यस्तथैव च। चतुर्थो द्रुपदादित्यो मयूखादित्य एव च। खखोल्कसारणादित्यो दृढकेशवसङ्ज्ञकौ। दशमो विमलादित्यो गङ्गादित्यस्तथैव च। द्वादशश्च रमादित्यः काशीपुर्यां घटोद्भव!। तमोऽधिकेभ्योदुष्टेभ्यः क्षेत्रं रक्षन्त्यमी सदा" काशी॰ख॰४६अ॰

द्वादशाध्यायी स्त्री द्वादशानामध्यायानां समाहारः ङीप्। जैमिनीयसूत्ररूपायां द्वादशलक्षण्याम् "धर्मो द्वादशलक्षण्यां व्युत्पादस्तत्र लक्षणैः। प्रमाणभेदयेषस्तप्रयुक्तिक्रमसंज्ञकाः। अधिकारोऽतिदेशश्च सामान्येन विशेषतः। ऊहोऽवाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्" जैमिनीयन्यायमाला जैमिनिशब्दे २।४६पृ॰द्रष्टव्यम्। द्वादशलक्षण्यत्र। २मन्वादिसंहितायाञ्च तयोर्द्वादशाध्यायात्मकत्वात्तथात्वम्।

द्वादशान्यिक त्रि॰ द्वादश अन्ये अन्यथाभूता अपपाठा जाता अस्य "कर्मण्यध्ययने वृत्तम्" इत्युपक्रमे "बह्वृच् पूर्वपदाट्ठञ्" पा॰ ठञ्। जातद्वादशापपाठके कुत्सिताध्ययन कर्तृभेदे।

द्वादशायतन न॰ द्वादशविधमायतनम्। बौद्धमतसिद्धेषु द्वादशसु पूजास्थानेषु मनोबुद्ध्यादिषु यथा "अर्थानुपार्श्वं बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः। ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति"।

द्वादशायुस् पु॰ द्वादश वर्षाः आयुःकालोऽस्य। कुक्कुरे शब्दमाला। आयुस्शब्दे ७९३पृ॰ पुनः त्रयोदशवर्षायुष्कालत्वोक्तावपि प्रायिकत्वादत्र द्वादशवर्षोक्तिरिति विवेच्यम्।

द्वादशार न॰ द्वादश अरा रथाङ्गावयवभेदा इव यस्य। १द्वादशकोणे राशिचक्रादौ "द्वादशारं न हि तज्जराय वर्वर्त्ति चक्रं परि द्यामृतस्य" ऋ॰१।१६२।११ "ऋतस्योदकस्य सत्यात्मकस्य वादित्यस्य चक्रं पुनःपुनः क्रमणशीलं मण्डलाख्यं रथचक्रं वर्वर्ति पुनःपुनर्वर्तते। सञ्चरति। कुत्र। द्यां परि। द्युलोकस्यान्तरिक्षस्य परितः। कीदृशं तत्। द्वादशारम्। द्वादशसंख्याकैर्मेषादिराशिरूपैरारै रथाङ्गावयवैर्युक्तम्" भा॰ २तन्त्रोक्ते सुषुम्णानाडीमध्ये हृदयस्थे ककारादिठान्त द्वादशवर्णयुक्ते द्वादशदलकमले च द्वादशदलादयोऽप्यत्र।

द्वादशाशन न॰द्वादशविधमशनम् शाक॰त॰। सुश्रुतोक्ते अधिकारिभेदेन द्वादशविधे अशनभेदे यथोक्तं तत्र उत्तरतन्त्रे।

"अत ऊर्द्ध्वं द्वादशाशनप्रविभागान्वक्ष्यामः। तत्र शीतोष्णस्निग्धरूक्षद्रवशुष्ककैकालिकद्विकालिकौषधयुक्तमात्राहीनदोषप्रशमनवृत्तयः। तत्रोष्णमदहात्तान् रक्तपित्तविषातुरान्। मूर्च्छार्त्तान् स्त्रीषु च क्षीणान् शीतैः१रन्नैरुपाचरेत्। कफवातामयाविष्टान् विरिक्तान् स्नेहपायिनः। प्रक्लिन्नदेहांश्च नरानुष्णैः२रन्नैरुपाचरेत्। वातिकान् रूक्षदेहांश्च व्यायामोपहतांस्तथा। व्यवायिनश्चापि नरान् स्निग्धैः३रन्नैरुपाचरेत्। मेदसाभिपरीतांस्तु स्थूलान्मेहातुरानपि। कफाभिपन्नदेहांश्च रूक्षै४रन्नैरुपाचरेत्। शुष्कदेहान् पिपासार्त्तान् दुर्बलानपि च द्रवैः ५। प्रक्लिन्नकायान् व्रणिनः शुष्कैर्द्रव्यैर्हितमेव च। एककालं७ भवेद्देयो दुर्बलाग्निविवृद्धये। समाग्नये तथाहारो देयः कालमधोभयम् ८। औषधद्वेषिणे देयस्तथौषधसमायुतः ९। मन्दाग्नये रोगिणे च मात्राहीनः १० प्रशस्यते। यथार्थदत्तश्चाहारो दोषप्रशमनः ११ स्मृतः। अतःपरन्तु स्वस्थानां वृत्तयर्थं १२ सर्वमेव च। द्वादशान्नप्रविचारानेतानेव प्रचक्षते"।

द्वादशाह पु॰ द्वादशभिरहोभिर्निर्वृत्तः ठञ् तस्य लुक्, द्वादशमहः कर्म॰, द्वादशानामह्नां समाहारो वा टच् समा॰ अह्नाहान्तत्वात् पुंस्त्वम्। १द्वादशभिरहोभिः साध्ये यागभेदे द्वादशरात्रशब्दे दृश्यम्। २द्वादशे दिने "द्वादशाहः प्रशस्यते" स्मृतिः। ३द्वादशदिनसमाहारे "सूत्यं श्राद्धं मासि मासि अपर्य्याप्तावृत्तं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथ वा" त्रि॰त॰। अत्र अपवर्गे तृतीया द्वादशानां श्राद्धानां मध्ये प्रत्यहमेकैककरणेन द्वादशदिनव्यापकता बोध्या" द्वादश दिनानि च आद्यमाससम्बन्धीनि आहूयाणीति बोध्यम्। द्वादशाहम् अधीष्टो भूतोभूतो भावी वा" पा॰ ठञ् तस्य लुक्। द्वादशदिनं व्याप्य ४सत्कृत्यनियोजिते ५भृते कर्मकरे स्वसत्तया तद्व्यापके ६यागादौ ७तत्र भाविनि ज्वरादौ च "ऐकाहिकेषु विकारेषु द्वादशाहिकेषु च यथार्थं प्रयोगः" कात्या॰ श्रौ॰ १२।६।२५ सूत्रे कर्कः।

द्वापर पु॰ द्वौ परौ प्रकारौ विषयौ यस्य पृषो॰। १संशये। द्वाभ्यां सत्यत्रेताभ्यां परः पृषो॰। २सत्यत्रेतायुगानन्तरे युगभेदे च। ३द्व्यङ्कसंख्यान्वितपाशकेऽपि न॰ अयः शब्दे ३३४ पृ॰ दृश्यम्। द्वापरयुगमानञ्च "अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु। चतुःषष्टिः सहस्राणि वर्षाणां द्वापरं युगम्" मत्स्यपु॰ १४१अ॰। तद्धर्मभेदश्च तत्र १४३अ॰उक्तो यथा

"अत ऊर्द्ध्वं प्रवक्ष्यामि द्वापरस्य विधिं पुनः। तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते। द्वापरादौ प्रजानान्तु सिद्धिस्त्रेतायुगे तु या। परिवृत्ते युगे तस्मिंस्ततः सा वै प्रणश्यति। ततः प्रवर्त्तिते तासां प्रजानां द्वापरे पुनः। लोभोद्धतिर्बलिग्युद्धं तत्त्वानामविनिश्चयः। प्रध्वंसश्चैव वर्णानां कर्मणान्तु विपर्य्ययः। यात्रा बधः परोदण्डोमानोदर्पोऽक्षमा बलम्। तथा रजस्तमोभूतः प्रवृत्ते द्वापरे पुनः। व्याधे कृते नाधर्मोऽस्ति स त्रेतायां प्रवर्त्तितः। द्वापरे व्याकुलोभूत्वा कलौ धर्मः प्रणश्यति। वर्णानां द्वापरे धर्माः सङ्कीर्यन्ते

तथाऽऽश्रमाः । द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतिस्मृतौ । द्विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते । अनिश्चयावगमनाद्धर्मतत्त्वं न विद्यते । धर्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते । परस्परं विभिद्यन्ते दृष्टीनां विभ्रमेण तु । यतो दृष्टिविभिन्नैस्तैः कृतमत्याकुलन्त्विदम् । एको वेदश्चतुष्पादः संहृत्य तु पुनः पुनः । संक्षेपादायुषश्चैव व्यस्यते द्वापरेत्विह । वेदश्चैकश्चतुर्द्धा तु व्यस्यते द्वापरादिषु । ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः । ते तु ब्राह्मणविन्यासैः स्वरक्रमविपर्ययैः । संहिता ऋग्यजुःसाम्नां संहृतास्तैर्महर्षिभिः । सामान्याद्वैकताश्चैव दृष्टिभिन्नैः क्वचित् क्वचित् । ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च । अन्ये तु प्रस्थितास्तान्वै केचित्तान् प्रत्यवस्थिताः । द्वापरेषु प्रवर्तन्ते भिन्नार्थैस्तैः स्वदर्शनैः । एकमाध्वर्यवं पूर्वमासीद्द्वैधन्तु तत् पुनः । सामान्यविपरीतार्थैः कृतं शास्त्राकुलन्त्विदम् । आध्वर्यवञ्च प्रस्थानैर्बहुधा व्याकुलीकृतम् । तथैवाथर्वणां साम्नां विकल्पैः स्वस्य संचयैः । व्याकुलो द्वापरेष्वेवः क्रियते भिन्नदर्शनैः । द्वापरे सन्निवृत्ते ते वेदा नश्यन्ति वै कलौ । तेषां विपर्ययोत्पन्ना भवन्ति द्वापरे पुनः । अदृष्टिभिरयं चैव तथैव व्याध्युपद्रवाः । वाङ्मनःकर्मभिर्दुःखैर्निर्वेदो जायते ततः । निर्वेदाज्जायते तेषां दुःखमोक्षविचारणा । विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् । दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिस्तु जायते । तेषां मायाविनां पूर्वं मर्त्ये स्वायम्भुवेऽन्तरे । उत्पत्स्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः । आयुर्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च । अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम् । प्रक्रिया कल्पसूत्राणां भाष्यविद्याविकल्पनम् । स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् । द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम् । मनसा कर्मणा वाचा लक्ष्यादार्त्ता प्रसिध्यति । द्वापरे सर्वभूतानां कालः लोभपरः स्मृतः । लोभो धृतिर्वणिग्युद्धन्तस्त्रानामविनिश्चयः । वेदशास्त्रप्रणयनं वर्णानां सङ्करस्तथा । वर्णाऽऽश्रमपरिध्वंसः कामद्वेषौ तथैव च" ।

"कारिष्यते परिभवः कलिना नलस्य । तां द्वापरस्तु मृतनूमदुनोत् पुरस्तात् । भैमीनलोपयमनं पिशुनौ सहेते न द्वापरः किल कलिश्च युगे जगत्याम्" नैष० ।

द्वापराय पु० पाशकस्य द्वादशसंख्यान्वितं पार्श्वं द्वापरं तस्य अय उत्तानतया पतनम् । द्यूतभेदे द्वादशान्वितपार्श्वकपाशकस्योत्तानतया पतने अयशब्दे २१४पृ० दृश्यम् ।

द्वामुष्यायण पु०द्व्यामुष्यायण+पृषो० । द्वयोः पुत्रे द्व्यामुष्यायणशब्दे दृश्यम् २उद्दालके गोतमे मुनौ च शब्दार्थचि० ।

द्वार् स्त्री द्वारयति क्विब्वचीत्या० उणा० क्विप् । १गृहनिर्गमनस्थाने अमरः । २उपाये च "आद्यहेतुता तद्द्वारा" सां०सू० "मरुद्भ्य इति तु द्वारि" मनुः "विदग्ध निम्बपत्राणि नियता द्वारि वेश्मनः" याज्ञ० "वि श्रयन्नामृतादधो द्वारो देवीरमर्त्यतः" ऋ०१।१२।६ "यथाविहितायां द्वारि द्वारा प्रपद्येत" शत०ब्रा०११।१।१२२द्वाःस्थ द्वाःस्थितः अमरः । उपाये ज्ञानद्वारा भवेन्मुक्तिः" ज्ञानशास्त्रम् ।

द्वार न० द्वृ-णिच् अच् । १गृहनिर्गमस्थाने । गृहभेदे द्वारभेदास्तत्फलभेदाश्च गृहशब्दे २६२७ पृ० उक्ताः "मनोनवद्वारनिषिद्धवृत्ति" कुमा० "उटजद्वाररोधिभिः" रघुः । २मुखे च "भुजङ्गपिहितद्वारं पातालमधितिष्ठति" रघुः । ४शेषे अङ्गे च "सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् । तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि" सां०का० "द्वारि प्रधानं, शेषाणि करणानि बाह्येन्द्रियाणि तैरुपनीतं सर्वं विषयं समनोहङ्कारा बुद्धिर्यस्मादवगाहतेऽध्यवस्यति तस्माद् बाह्येन्द्रियाणि द्वाराणि द्वारवती च सान्तःकरणा बुद्धिरिति" त०कौ० । "तद् (व्याकरणम्) द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्" हरिः । [त्रिका० ।

द्वारक न० द्वारेण प्रशस्तेन कायति कै-क । द्वारकापुर्याम्

द्वारकण्टक पु०न० । द्वारस्य कण्टक इव । कपाटे त्रिका०

द्वारका स्त्री प्रशस्तेन द्वारेण कायते कै-क टाप् धातुस्थक पूर्वत्वात् न अत इत्त्वम् । द्वारवत्याम् पुर्याम् द्वारवतीशब्दे दृश्यम् "पेटकी तीर्थतुल्या सा किं तीर्थं द्वारका परम् । सर्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा । यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् । दानञ्च द्वारका यात्रा श्राद्धञ्च देवपूजनम् । चतुर्गुणञ्च तीर्थानां गङ्गादीनाञ्च भूमिप !" ब्रह्मवै०श्रीकृष्णजन्मखण्डे ।

द्वारगोप पु०द्वारं गोपायति गुप-अण् । द्वारपाले

द्वारकेश पु० ६त० । वासुदेवे शङ्करे द्वारकानाथादयोऽप्यत्र

द्वारदातु द्वारं ददाति दा-तुन् । भूमीसङ्घट्टे भावप्र०

द्वारप पु० द्वारं पाति पा-क । १द्वारपाले "स्वर्गस्य लोकस्य द्वारपाः" छा०उ०२विष्णौ पु० "विष्णुर्वैदेवानां द्वारपः" इति श्रुतिः ।

द्वारपाल त्रि॰ द्वारं पालयति पालि–अण् । १द्वाररक्षके दौवारिकशब्दे ३७७१पृ॰ अस्य लक्षणम् "ततो मङ्कणकं गत्वा द्वारपालं महाबलम् । तं यक्षमभिवाद्यैव गोसहस्रं फलं लभेत्" भा॰व॰८३अ॰। ततोऽर्घपात्रं विन्यस्य द्वारपालान् समर्चयेत्" तन्त्रसा॰ देवताभेदे द्वारपालभेदाः तत्र तत्र प्रकरणे तन्त्रोक्ता ज्ञेयाः । २तीर्थभेदे च "ततो गच्छेत राजेन्द्र ! द्वारपालं तरण्डकम् । तत्र तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः । तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत्" भा॰व॰८३अ॰ स्त्रियां ङीप् । अस्या अपत्यं रेवत्या॰ ठक् न ठक् । द्वारपालिक द्वारपाल्या अपत्ये पुंस्त्री॰ । स्त्रियां ङीप् [टाप् ।

द्वारपालक त्रि॰ द्वारं पालयति ण्वुल् । दौवारिके स्त्रियां

द्वारपिण्डी स्त्री द्वारस्य पिण्डीव । देहल्यां जटा॰ ।

द्वारबलिभुज् पु॰ द्वारदत्तं बलिं भुङ्क्ते भुज–क्विप् । वक खगे त्रिका॰ । [पदार्थे हेमच॰ ।

द्वारयन्त्रं द्वारे स्थितं यन्त्रम् । (ताला) (कुलुप) ख्याते

द्वार(रा)वती स्त्री द्वाराणि चतुर्वर्णमोक्षद्वाराणि प्रशस्तान्यत्र मतुप् मस्य वः संज्ञात्वेन वा पूर्वपददीर्घः । समुद्रोपान्तिके श्रीवासुदेवनिर्मिते पुरीभेदे तत्पुरीनिर्माणप्रकारस्यानादिकं हरिवं॰विस्तरतो वर्णितं दिङ्मात्रमत्रोच्यते ।

"आनर्तं सिन्धुराजस्य प्रपेदुर्यदुपुङ्गवाः । ते तत्र रमणीयेषु विषयेषु सुखप्रियाः । सुखदुर्यादवाः सर्वे देवाः स्वर्गगता यथा । पुरवासु विचिन्वन् स कृष्णस्तु परवीरहा । ददर्श विपुलं देशं सागरानूपशोभितम् । वाहनानां हितञ्चैव सिकतातास्वमृत्तिकम् । पुरलक्षणसम्पन्नं कृतास्वदमिव श्रिया । सागरानिलसंवीजं सागराम्बुनिषेवितम् । विषयं सिन्धुराजस्य शोभितं पुरलक्षणैः । तत्र रैवतकोनाम पर्वतोनातिदूरतः । मन्दरोदारशिखरः सर्वतोऽभिविराजते । तत्रैकलव्यसंवासो द्रोणेनाध्युषितश्चिरम् । प्रभूतपुरुषोपेतः सर्वरत्नसमाकुलः । विहारभूमिस्तत्रैव तस्य राज्ञः सुनिर्मिता । नाम्ना द्वारवती नाम स्वायताऽष्टापदोपमा । केशवेन मतिस्तत्र पुर्यर्थे विनिवेशिता । निवेशं तत्र सैन्यानां रोचयन्ति स्म यादवाः । ते रक्षार्थं दिवसे तत्र यादवपुङ्गवाः । सेनापालाश्च सङ्घक्रुः स्कन्धावारनिवेशनम् । ध्रुवाय तत्र न्यवसत् क्रोशयः सह यादवैः । देशे पुरनिवेशाय स यदुप्रवरो विभुः । तस्यास्तु विविधं नाम वास्तूनि च गदाग्रजः । निर्ममे पुरुषश्रेष्ठो मनसा यादवोत्तमः । एवं द्वारावतीञ्चैव पुरीं प्राप्य सबान्धवाः" । हरिवं॰ ११४ अ॰ । "इयं द्वारावती नाम पृथिव्यां निर्मिता मया । भविष्यति पुरी रम्या शक्रस्येवामरावती । तान्येवास्याः कारयिष्ये चिह्नान्यायतनानि च । चत्वरान् राजमार्गांश्च समान्तःपुराणि च । देवा इवात्र मोदन्तां वसन्तो विगतज्वराः । बाधमाना रिपूनुपानुपसेनपुरोगमाः । गृह्यन्तां गृहयास्तूनि कार्यन्तां त्रिकचत्वराः । मीयन्तां राजमार्गाश्च प्राकारस्य च या गतिः । प्रेष्यन्तां शिल्पिमुख्या वै नियुक्ता वेश्मकर्मसु । नियुज्यन्ताञ्च देशेषु प्रेष्यकर्मकराजनाः । एवमुक्तास्तु यदवो गृहसंग्रहतत्पराः । यथानिवेशं संहृष्टाश्चक्रुर्वास्तुपरिग्रहम् । स्तम्भहस्तास्ततोमानं चक्रुर्यादवपुङ्गवाः । पुण्येऽहनि महाराज ! द्विजातीन् प्रतिपूज्य च । वास्तुदैवतकर्माणि विधिनाऽकारयंस्ततः । स्थपतीनथ गोविन्दस्तत्रोवाच महामतिः । यत्कृतं सुविहितं क्रियतामत्र मन्दिरम् । विभक्तचत्वरपथं सुनिविष्टदैवतम् । ते तथेति महाबाहुमुक्त्वा स्थपतयस्तदा । दुर्गकर्मणि सम्भारानुपलभ्य यथाविधि । यथान्यायं निर्ममिरे द्वाराण्यायतनानि च । स्थानानि विदधुस्तस्यां ब्रह्मादीनां यथाक्रमम् । अथाग्नेः सुरेशस्य दण्डोलूखलस्य च । चातुर्द्वैवानि चत्वारि द्वाराणि विदधुश्च ते । गुह्यकेन्द्रं भल्लाटं पुष्पदन्तं तथैव च । ते वेश्मसु युक्तेषु यादवेषु महात्मसु । पुर्याः क्षिप्रं प्रवेशार्थं चिन्तयामास माधवः । तस्य दैवोत्थिता बुद्धिर्विमला क्षिप्रकारिणी । पुर्याः सा वै प्रियकरी यदूनामभिवर्द्धिनी । शिल्पिमुख्यस्तु देवानां प्रजापतिसुतः प्रभुः । विश्वकर्मा स्वमत्या वै पुरीं संस्थापयिष्यति । मनसा समनुध्याय तस्यागमनकारणात् । त्रिदशाभिमुखः कृष्णो विविक्ते समपद्यत । तस्मिन्नेव ततः काले शिल्पाचार्यो महामतिः । विश्वकर्मा सुरश्रेष्ठः कृष्णस्य प्रमुखे स्थितः । यदीच्छेत् सागरः किञ्चिदुत्सृष्टुमिह तोयराट् । ततः स्वायतलक्षणा पुरी स्यात् पुरुषोत्तम ! । एवमुक्तस्ततः कृष्णः प्रागेव कृतनिश्चयः । सागरं सरितां नाथमुवाच वदतां वरः । समुद्र ! दश च द्वे च योजनानि जलाशये । प्रतिसंह्रियतामात्मा यद्यस्ति मयि

मान्यता । अवकाशे त्वया दत्ते पुरीयं मामके बले । पर्य्याप्तविषयारामा समग्रं विधिहिष्यते । ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः । समारुतेन योगेन उत्समर्व्वं जलाशयम् । विश्वकर्मा ततः प्रीतः पुर्य्याः संदग्ध वास्तु तत् । गोविन्दे चैव सम्मानं सागरः कृतवां स्तदा" हरिव० ११६ अ० ततो देवस्य लीलासंवरणानन्तरं तत्कलत्रादीनां ततोऽपगमने समुद्रेण तत्पुर्य्याः प्लावनं कृतम् तत्कथा भा०मौ०७ अ० । "निर्यातेतु जने तस्मिन् सागरो मकरालयः । द्वारकां रत्नसम्पूर्णां जलेनाप्लावयत्तदा । यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्या व्यसृजत । तत्तत् संप्लावयामास सलिलेन स सागरः । तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः । तूर्णानूर्णतरं जग्मुरहो दैवमथाब्रुवन्" "काशी काञ्ची च मायाख्या त्वयोध्या द्वारवत्यपि । मथुराऽवन्तिका चैव सप्त पुर्य्योऽत्र मोक्षदाः । श्रीशैलः मोक्षदः सर्वः केदारोऽपि ततोऽधिकः । श्रीशैलाच्चापि केदारात् प्रयागं मोक्षदं परम् । प्रयागादपि तीर्थाग्र्यादविमुक्तं विशिष्यते । यथाऽविमुक्ते निर्वाणं न तथान्यत्र कुत्रचित् । अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि च । काशीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः" काशी० ७अ० निषिद्धमपि तप्तमुद्रादिधारणञ्च तन्माहात्म्यकथनात् तत्र विहितं तन्नाम निर्वचनञ्चोक्तं काशीख०७अ०

"सप्तरात्रमुषित्वा तु ययौ द्वारावतीं प्रति । चतुर्णामपि वर्णानां यत्र द्वाराणि सर्वतः । अतो द्वारवतीत्युक्ता विद्वद्भिस्तत्त्ववेदिभिः । अस्योन्यपि च जन्तूनां यत्र चक्राङ्कितान्यहो । किं चित्रं यत्र तत्र स्युः शङ्खचक्राङ्किताः करैः । अन्तकः शिक्षयत्येवं निजदूतान् सुदुर्मुखः । ते त्याज्या यैर्द्वारवत्या नामापि परिगृह्यते । श्रीखण्डे क्व स कामोदः स्वर्णे वर्णः क्व तादृशः । तत् पावित्रं क्व वै तीर्थे, तप्तोपीचन्दने यथा । दूताः ! शृणुत यद्बालं गोपीचन्दनलाञ्छितम् । ज्वलदिन्धनवत् सोऽपि दूरे त्याज्यः प्रयत्नतः । तुलस्य लङ्कृताये ये तुलसीनामजापकाः । तुलसीवनमालाये ते त्याज्या दूरतोभटाः । पवित्राणां च सर्वेषां सुपवित्रा बलाधिका । तुलां स्मृति यतस्तस्मात्तुलसीति निरुच्यते । युगे युगे द्वारवत्यारत्नानि परितोमुमुचुः । अम्भीरत्नाकरोऽद्यापि लोकेषु परिगीयते । द्वारवत्यां स्त्रियलोये जन्तवः कालचोदिताः । चतुर्भुजाः स्युर्वैकुण्ठे ते पीताम्बरधारिणः । तत्रापि सन्तर्प्य पितॄन् सहदेवर्षिमानवान् । तत्र तेषु च तीर्थेषु सस्नौ सर्वेषु तन्त्रितः" दीर्घे द्वारावती तत्रार्थे "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः । एतासु पृथिवीमध्ये न गणप्रन्ते कदाचन । पुरी द्वारावती विष्णोः पाञ्चजन्योपरिस्थिता । मुक्तिदा गणिता एताः सर्वाश्च मानिताः सुरैः । यानि कानि च क्षेत्राणि काशीप्राप्तिकराणि षट्" इति भूतशुद्धितन्त्रम् ।

द्वारशाखा स्त्री ६त० । द्वारस्यावयवे (वाजु) शब्दार्थक० ।

द्वारस्तम्भ पु० ६त० । द्वाराङ्गस्तम्भे शब्दार्थक० ।

द्वारस्थ त्रि० द्वारे तिष्ठति स्था—क । १द्वारपाले शब्दक० २द्वारस्थितमात्रे च ।

द्वारादि "द्वारादीनाञ्च" व्याख्यां पूर्वमैजागमनिमित्ते पा०ग०सू०उक्ते शब्दगणे स च गणः"द्वार स्वर स्वाध्याय व्यलकश स्वस्ति स्वर् स्फ्यात्कत स्वादुमृदु वस् स्व" द्वारे नियुक्तः ठक् । दौवारिकः ।

द्वाराध्यक्ष पु० द्वारेऽध्यक्षः । प्रतीहारे "वेत्रव्यासक्त हस्ताश्च द्वाराध्यक्षा विशां पते !" भा०स०३०अ०

द्वारिक त्रि० द्वारं पाल्यतयाऽस्त्यस्य ठन् । द्वारपाले सारसुन्दरी प्रशस्तानि चत्वारि द्वाराणि सन्त्यस्याम् ठन् टाप् । द्वारिका २द्वारवत्यां स्त्री शब्दरत्ना ।

द्वारिन् त्रि० द्वारं पाल्यत्वेनाऽस्त्यस्य इनि । १द्वारपाले २द्वारयुते त्रि० द्वारशब्दे दृश्यम् ।

द्वार्य्य त्रि० द्वारि भवः यत् । द्वारिभवे "द्वार्य्ये स्थूणे देवी द्वारौ" आश्व०श्रौ० ४।१२।१ द्वारिभवे द्वार्य्ये स्थूणे" भारा० वृत्तिः "चतुर्गृहीतं शालाद्वार्य्ये जुहोति" कात्या० श्रौ०८।३।२९

द्वा(द्वि)विंश त्रि० द्वा(द्वि)विंशतेः पूरणः डट् । द्वाविंशति संख्यापूरणे स्त्रियां ङीप् । द्वा(द्वि)विंशत्या युतं शतादि ड । २तद्युते शतादौ त्रि० ।

द्वा(द्वि)विंशति स्त्री द्व्यधिका विंशतिः द्वौ च विंशतिश्च वा द्वात् बहुत्वेऽपि एकव० । (वाइस) १द्व्यधिकविंशतिसंख्यायां २तत्संख्यायुते च "कर्णो द्वाविंशतिं भल्लान्" भा० द्रो०४७अ० द्वा(द्वि)विंशतिः प्रमाणमस्य ठन् । द्वा(द्वि)विंशतिक तत्संख्यान्विते त्रि० पूरणे तमप् । द्वा(द्वि)विंशतितम द्वाविंशतिसंख्यापूरणे त्रि० । एवं द्वा(द्वि)त्रिंशद्द्वा(द्वि)चत्वारिंशदादयोऽपितत्तत्संख्यायां

तत्संख्यान्विते स्त्री एकव०पूरणे ड तयपौ उच्चेयौ ठन् । एवं ड। द्वा(द्वि)त्रिंशादि तद्युते शतादौ त्रि०सा परिमाणमस्य ठन् । द्वा(द्वि)त्रिंशतिकादि तत्तत्संख्यापरिमाणके त्रि०।

द्वा(द्वि)षष्टि स्त्री द्व्यधिका षष्टिः द्वौ च षष्टिश्च वा वा स्यात् एकव०। १द्व्यधिकषष्टिसंख्यायां २तद्युते च । पक्षे द्विषष्टिरप्यत्र तया युतं शतादि ड। द्वा(द्वि)षष्ट तद्युते शतादौ । सा परिमाणमस्य ठन् । द्वा(द्वि)षष्टिक तत्परिमाणके त्रि० पूरणे तमप् । द्वा(द्वि)षष्टितम डट् द्वा(द्वि)षष्ट तत्संख्यापूरणे डटि स्त्रियां ङीप् ।

द्वा(द्वि)सप्तति स्त्री द्व्यधिका सप्ततिः द्वौ च सप्ततिश्च वा वा स्यात् एकव०। १द्व्यधिकसप्ततिसंख्यायां २तत्संख्याते च "द्वासप्ततिर्महत्यस्ते पादास्ते द्वादश क्रमात्" ज्यो०त०। द्विसप्ततिरप्यत्र । तया युतं शतादि ड । द्वा(द्वि)सप्तत तद्युते शतादौ त्रि० तस्याः पूरणे तमप् । द्वा(द्वि)सप्ततितम डट् । द्वा(द्वि)सप्तत तत्संख्यापूरणे त्रि० स्त्रियां डटि ङीप् ।

द्वि त्रि० द्वि०व०। द्वु-ड । १द्वित्वसंख्यायां "द्वौ कयोर्द्विवचनैकवचने" पा० द्वित्वार्थकताया भाषप्राद्युक्तेः । २द्वित्वसंख्यान्विते च । सर्वनामकार्यं तस्य जसादिप्राप्त्यभावात् त्यदादित्वात् अत्वम् । द्वौ द्वे । द्वयोः स्त्रियोः पुत्रः द्विपुत्र इत्यादौ सर्वनामत्वात् वृत्तिमात्रे पुंवद्भावः । अकच् । द्वके इत्यादि । स्वार्थे केनोपपत्तौ चित्स्वरार्थमकच् ।

द्विक त्रि० द्वि०व०। द्वि-अकच् । १द्वित्वसंख्यायां तद्युते त्रि० स्त्रियां टेरकचि द्वके इत्येव स्वार्थे के तु प्रत्ययस्वकात् पूर्वमत इत्त्वम् द्विके इति भेदः । द्वयोरवयवः द्वौ अवयवौ वा यस्य कन् । २द्वित्वे न० एकव०। ३तद्युते त्रि० "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा । अमी पञ्चैव सिद्धार्थाः" भर्तृहरिः । द्वौ दीयेते दद्यादिना अत्र शतादौ कन् । ४दद्यादिना दीयमानद्विरूपकादिके शतादौ । "द्विकं शतं वा गृह्णीयात् सतां धर्ममनुस्मरन्" "द्विकं शतञ्च गृह्णानो न भवत्यर्थकिल्बिषी" मनुः द्वौ कौ ककारौ वाचकशब्दे यस्य । १काके २कोके च पुंस्त्री० मेदि० । तयोर्वाचकशब्दे ककारद्वयस्य सत्त्वात् तथात्वम् । स्त्रियां जातित्वात् ङीप् ।

द्विककार पुंस्त्री० द्वौ ककारौ - वाचकशब्दे ऽस्य । १काके २कोके च शब्दरत्ना० । स्त्रियां जातित्वात् ङीप् । ३ककारद्वययुते शब्दादौ त्रि० ।

द्विककुद् पु०द्वे ककुदे यस्य अन्त्यलोपः समा०। उष्ट्रे हेमच०

द्विकर त्रि० द्वौ करोति संख्यापूर्वकत्वात् अच्छेत्वादौ ल-ट । १द्विसंख्यान्वितकारके । द्वौ करौ यस्य २द्विभुजे च । द्वयोः करयोः समाहारः । ३करद्वये "बुभुक्षितः किं ? द्विकरेण भुङ्क्ते" उद्भटः ।

द्विकार्षापण(णिक्) त्रि० द्वाभ्यां कार्षापणाभ्यां क्रीतं ठक् तस्य वा लुक् । द्वाभ्यां कार्षापणाभ्यां क्रीते पक्षे ठकोऽलोपे । द्विकार्षापणिक तत्रार्थे ।

द्विकौडविक त्रि० द्वौ कुडवौ प्रयोजनमस्य ठञ्, द्वाभ्यां कुडवाभ्यां क्रीतं वा ठक् न तस्य लुक् । उत्तरपदवृद्धिः । १द्विकुडवप्रयोजनके २द्वाभ्यां कुडवाभ्यां क्रीते च ।

द्विगु त्रि० द्वौ गावौ यस्य गौणत्वात् गोर्लुक्। १द्वयोर्गवोः सम्बन्धिनि द्विगवस्वामिके पुरुषे । "द्वन्द्वो द्विगुरपि चाहं सततमसदृष्टेह व्ययीभावः" उद्भटः । व्याकरणोक्ते तत्पुरुषान्तर्गते पा० सूत्रोक्ते २समासभेदे पु० स च सि०कौ० मनोरमादौ च दर्शितो यथा "दिक्संख्ये संज्ञायाम्" ।२।१।५०। पा० "समानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः । संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वेषुकामशमी । सप्तर्षयः । नेह उत्तरा वृक्षाः । पञ्च ब्राह्मणाः" सि०कौ०। "तद्धितार्थोत्तरपदसमाहारे च" पा० ।२।१।५१।पा०"तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायामभवः । पौर्वशालः । समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । आपरशालः । पूर्वाशाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । द्विगु समाहारो नास्त्यनभिधानात् । संख्यायास्तद्धितार्थे प्रस्थां मातुष्यामपत्यम् प्राग्मातुरः । पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहावन्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्" सि०कौ० "नियमार्थमिति विशेषणं विशेष्येणेत्यनेनैव सिद्धे तत्पुरुषे संज्ञायामेव दिक्संख्ये समस्येते नान्यत्रेति नियामकमिदमिति भावः। त्रिलोकनाथ इत्यादौ तु उत्तरपदद्विगुरिति अमंत्रकत्वेऽपि न क्षतिः। पूर्वसूत्रमित्यादौ संज्ञाभावेऽपि कालवाचकत्वात् समासो, न ह्यत्र दिग्विशेषबोध उदयगिर्यादिसम्बन्धाया एव दिक्त्वात् एवं देशवाचकेनापि समास इति दृष्ट-

यम्" मनो०। "तद्धितार्थोत्तरेत्यादिसूत्रे वैषयिके आधारे सप्तमी। विषयत्वज्ञानेकविधमित्याह तद्धितार्थे विषये इत्यादि तद्धितार्थे वाच्ये इति तु नोक्तं पाञ्चनापितिरित्यादौ समासेनोक्तत्वात्तदुत्तरं तद्धितानुत्पत्तिप्रसङ्गात्। अतएव द्विगोस्तद्धितस्य लुग्वचनं चरितार्थमन्यथा तदर्थस्य समासेनोक्ततयाऽप्रयोगात् तदनुत्पत्तौ कथं लोपः स्यात्"। "समाहारः समूहः स चावयवाभिन्नो बुद्धिकल्पितभेदवान्। अतएव समूहं प्रति तस्योपसर्जनत्वं तेन पञ्चखट्वीत्यादिषिद्धिः तत्र खट्वाशब्दस्योपसर्जनत्वेन ह्रस्वे कृत एवादन्तत्वे सत्येव लोपः प्रवृत्तेरित्यन्यत्र विस्तरः। अत्रेदं बोध्यं सामूहिकस्य तद्धितस्य लुकि पञ्चगवमित्यत्र गोरतद्धितलुकीति टच् न स्यादिति विषये इत्युक्तमेवञ्च समाहारे वाच्ये इति तस्य पृथग्ग्रहणसामर्थ्यादेव समाहारान्त इत्याशयेन वाच्ये इति व्याख्यातमिति" "तथाच समासेनैव समाहारस्योक्तत्वात् न सामूहिकतद्धितोत्पत्तिरिति भावः" मनो०"एतद्वार्त्तिकमुत्तरपूर्वेत्यादिद्वन्द्वविधिप्रार्थमवश्यमारम्भणीयं तेन प्रकृते पुंवद्भावेनोपपत्तावपि न विफलतेति बोध्यम्" "उदात्त इति अस्ति त्वन्तरततत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमेव स्यादिति भावः" मनो० "माणमात्रर इति "मातृदृत्-संख्यासंभद्रपूर्वायाः" पा० इत्युदाहरणं अनपत्य इत्युक्तेर्द्विगोर्लुगिति न लुक्" "विकल्पे प्राप्ते इति महाविभाषयेति शेषः। ततश्च टजभावे पञ्चगोधन इत्यपि स्यादिति भावः" "एतच्चोभयत्रापि नित्यताबोधकमिति बोध्यम् अतएवैतद्वार्त्तिकसङ्गा समुदायघटकावयवानां कदाचिदप्यवृत्तिर्मा भूदिति प्रयोजनमुक्तं भाष्ये" "द्वन्द्वोत्तरततत्पुरुषोदाहरणन्तु वाक्चटश्च प्रियेऽस्य वाग्घटप्रिय एवं लुलोपानहप्रिय इह त्रिपदे बहुव्रीहौ कर्तव्ये पूर्वं नित्यद्वन्द्वेन समासान्तोऽपि नित्य एव" मनो०।

शब्दशक्तिप्रकाशिकायामेतल्लक्षणादिकमुक्तं यथा

"द्विगुं लक्षयति। संख्याशब्दयुतं नाम तदलक्ष्यार्थबोधकम्। अभेदेनैव यत्स्वार्थे स द्विगुस्त्रिविधो मतः। संख्यावच्छिन्नशक्तं यत्पदोत्तरत्वविशिष्टं यन्नाम स्वार्थधर्मिकं तादात्म्येन तदलक्ष्यार्थस्यान्वयबोधं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तदलक्ष्यार्थाभिन्नस्वार्थे द्विगुरुच्यते। त्रिकटु त्रिभुवन चतुर्युग चतुर्वर्ग पञ्चगव्य पञ्चामृत षड्रस षट्पदार्थ सप्तर्षि अष्टनाग अष्टवसु नवरस नवग्रह दशमूल एकादशरुद्र एकादशेन्द्रिय द्वादशादित्य इत्यादिकस्तु कर्मधारयः गुणद्रव्यादिपर्याप्तित्वावच्छिन्नबोधकतया न पूर्वपदालक्ष्यार्थस्य बोधकस्त्रिकटुप्रभृतिभ्यः कटुत्वादिसामान्यस्य प्रतीतेः। पञ्चमूलीत्यादौ तु मूलपञ्चकत्वेनैव मूलविशेषेषु तात्पर्यं नतु विशेषरूपेणापि अतएव "कण्टकार्यादिकं स्वल्पं शाम्भार्यादि च यन्महत्। पञ्चमूलं तदुभयं दशमूलमुदाहृतमित्यादिकस्तादृश्येव बोधस्थलीयः प्रयोगः। "वर्षाकाले मघर्क्षेण युक्ता चापि त्रयोदशी" इत्यादिवदेकवचनस्य साधुत्वसम्भवात् त्रयोरुपमित्यादौ द्विरूपादिपदं नामेन द्विप्रभृतेरनुभावकम्। एकत्वसंख्याया विशिष्टं बोधयदपि एकपदं न पर्याप्तिसंसर्गेण तदवच्छिन्नस्य बोधकं, द्वितयादिपदं पर्याप्त्या द्वित्वावच्छिन्नं प्रतिपादयदपि न तत्र शक्तं वाक्यत्वादतोनैकघटद्वितयपटेत्यादिकर्मधारयेऽतिप्रसङ्गः। सप्तपती पञ्चतामित्यादौ च यद्यपि शते धर्मिणि सप्तानामभेदेन नाम्नयः बाधितत्वाच्चापि सप्तपदलक्षितस्य, द्विगुत्वहान्यापत्तेः तथापि शतपदार्थैकदेशे शतत्वसंख्यायां तस्याः सप्तत्वसम्भवादिति वदन्ति। द्विगार्ग्यं गच्छत इत्याद्यव्ययीभाववारणन्तु पूर्ववत्। स चायं द्विगुस्त्रिविधः तद्धितार्थोत्तरपदसमाहारभेदात्। तत्र तद्धितार्थं द्विगुं लक्षयति। तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः। तद्धितार्थे लाक्षणिकस्वान्यनामा त्वसर्वगः। यो द्विगुः स्वोत्तरतद्धितार्थान्वितस्वार्थकः स तद्धितार्थद्विगुः। द्विसट्टो दश इत्यादौ द्वाभ्यां सट्टाभ्यां क्रीतस्य द्विवर्षा गौरित्यादौ द्वाभ्यां वर्षाभ्यामभिव्याप्तस्य द्विदलं पवित्रमित्यादौ द्वाभ्यां दलाभ्यां निर्मितस्य, द्विगुणं स्वर्णमित्यादौ द्वाभ्यां गुणाभ्यां तुलितस्य, त्रिकाण्डः पुरुष इत्यादौ त्रिभिः काण्डैः परिमितस्य, पञ्चकपालश्चरुरित्यादौ पञ्चभिः कपालैः संस्कृतस्य, बोधने लुप्तस्यैव ठगादितद्धितस्य क्रीताद्यभिधायकत्वात्, परिगिष्टलताम्रतेनेदम्। उक्तप्रयोगेषु द्विगोरन्तिमनाम्नैव क्रीतादिरूपार्थो लक्ष्यते नतु लुप्तठगादिरप्यपेक्ष्यतेऽतस्तद्धितार्थलाक्षणिकस्वान्यनामको द्विगुरेव तद्धितार्थद्विगुरिति फणिभाष्यमतन्तु न युक्तम् असर्वगत्वात् पाञ्चपूरिरित्यादौ पञ्चानां पुरुषाणामपत्यस्य पञ्चगार्ग्यरूपो गौरित्यादौ पञ्चानां गर्गाणां भूतपूर्वस्य बोधने तद्धितेनैव स्वार्थस्यावत्प्रभृतेरुपस्थापनात् द्विगर्भसट्टः पञ्च-

रित्यादावुत्तरपदस्य शक्तिविरहेण क्रीताद्यर्थे लाक्षणिकत्वायोगात्। उत्तरपदद्विगुं लक्षयति। स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः। यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः। यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः यथा पञ्च गावो धनमस्येत्यादिविग्रहे पञ्चगवधनः पुरुष इत्यादौ बहुव्रीह्यादिनिविष्टः पञ्चगवादिः। समाहारद्विगुं लक्षयति। स्वार्थान्वितसमाहारलक्षकस्वान्त्यशब्दकः। उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः। स्वोपस्थाप्यार्थस्य समाहारलक्षको यदीयान्त्यशब्दः स द्विगुः समाहारद्विगुः पञ्चपुलीत्यत्र हि योगलभ्यानां पञ्चाभिस्पुलानां समाहारः परस्पुलशब्देन लक्ष्यते न तु तत्र द्विगोः शक्तिरन्यलभ्ये शक्त्ययोगात् अतएव न लक्षणापि शक्यसम्बन्धस्यैव लक्षणात्वेन वाच्ये तदसम्भवात्। यदि च पञ्चपुलीत्यतः पञ्चानां पुलानामेव बोधो न तु तत्समाहारस्यापि अतएव पञ्चपुलीं छिनत्ति इत्यादिकः प्रयोगः प्रमाणम् अन्यथा समूहात्मनः समाहारस्य छिदाद्यसम्भवेन तदयोग्यत्वापत्तेः पुलादेर्द्वित्वबहुत्वेऽप्येकवचनस्यानुशासनिकं दारादेर्बहुवचनवदुपपद्यते। न च द्रव्यप्राधान्ये पञ्चखट्वीत्यादौ ह्रस्वो न स्यात् गोशब्दस्येव स्त्रीप्रत्ययस्यापि समानान्यस्योपसर्जनस्यैव तद्विधानादिति वाच्यं समाहारसंज्ञकद्विगोरन्यस्य स्त्रीप्रत्ययस्य पृथगेव ह्रस्वविधेर्वक्तव्यत्वात् प्रयोगानुसारित्वात् कल्पनायाः, पञ्चपाचकीत्यादावव्याप्तिश्च तत्रोत्तरपदस्य वाक्यत्वेन लक्षकत्वायोगादिति सूक्ष्ममीक्ष्यते तदा पूर्वनिरुक्ताभ्यां तद्धितार्थोत्तरपदद्विगुभ्यां भिन्नोद्विगुरेव समाहारद्विगुर्वाच्यः। एवञ्च द्विगोः कर्मधारयान्तर्गतत्वेऽपि न क्षतिरिति तु विभावनीयम्"।

द्विगुण त्रि॰ द्वाभ्यां गुण्यते गुण–कर्मणि अच्। द्वाभ्यां गुणिते "एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्" "समसब्राह्मणे दाने द्विगुणं ब्राह्मणब्रुवे" इति मनुः।

द्विगुणाकृ द्विगुण+कृ–क्रियार्थे ङाच् द्विगुणकर्षणकरणे सक॰ उभ॰ अनिट्। द्विगुणाकरोति क्षेत्रकर्मकं द्विगुणवर्षणं करोतीत्यर्थः सि॰कौ॰

द्विगुणाकर्ण त्रि॰ द्विगुणौ कर्णौ लक्षणमस्य "कर्णे लक्षणस्य" पा॰ कर्णशब्दे परे पूर्वस्य दीर्घः। द्विगुणकर्णलक्षणान्विते।

द्विगुणित त्रि॰ द्वाभ्यां गुणितः। द्वाभ्यां गुणिते। द्विगुणितसान्द्रतराक्षिपक्ष्ममाला" माघः "क्षेत्रस्य यस्य वदनं मदनारितुल्यं विश्वम्बरा द्विगुणिता" लीला॰

द्विचरण त्रि॰ द्वौ चरणौ यस्य। १द्विपादे मनुष्यादौ "गतः कालो यत्र द्विचरणपशूनां क्षितिभुजां पुरः स्वस्तीत्युक्त्वा विषयसुखमास्वादितमहो" शान्तिश॰ द्विचरणा अपि पशवः पशुतुल्याः पशूनां चतुश्चरणत्वे प्रसिद्धेऽपि कपीनां द्विपदत्वेन पशुतुल्यत्वात् अपूर्वपशुत्वमिति गम्यते। २राशिभेदे द्विपदशब्दे दृश्यम्। ३पदद्वये न॰

द्विज पु॰ द्विर्जायते सुजर्थे इत्तौ द्विशब्दः जन–ड। १संस्कृत ब्राह्मणे "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" स्मृतिः। २ब्राह्मणक्षत्रियवैश्येषु च "मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जीबन्धनात्। ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः" याज्ञ॰। ३दन्ते तस्योत्पन्नस्य पतने पुनर्जन्मनो लोकप्रसिद्धेः। ४अण्डजे च अमरः। प्रसवानन्तरं पुनरण्डात् तस्य प्रकाशरूपोत्पत्तेर्द्विजत्वम्। ५तम्बुरुवृक्षे राजनि॰। ६द्विर्जातमात्रे त्रि॰। तत्र दन्ते "द्विजावलीबालनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः" माघः विप्रे अण्डजे च "हिमसक्तचन्द्रशिचरः सपद्मको मदयन् द्विजान् जनितमीनकेतनः" माघः।

द्विजकुत्सित पु॰ द्विजैः कुत्सितः। श्येनातकवृक्षे (नोनाआता) राजनि॰। द्विजानान्तद्भक्षणनिषेधात् तथात्वम्।

द्विजदास पु॰ ६त॰। शूद्रे राजनि॰।

द्विजन्मन् पु॰ द्वे जन्मनी यस्य। द्विजशब्दार्थे "वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च" मनुः

द्विजपति पु॰ ६त॰। १चन्द्रे त्रिका॰। "द्विजानामौषधीनाञ्च सोमं राज्येऽभ्यषेचयत्" हरिवं॰२२७अ॰। २कर्पूरे च अमरः। ३द्विजश्रेष्ठे "प्रशान्तोपद्रवं परिपूर्णं द्विजमण्डलसनाथम्" काद॰। ४पक्षिश्रेष्ठे ५गरुडे च त्रिका॰।

द्विजप्रपा स्त्री द्विजार्थं पक्षिणसुहिग्य प्रपा। आलवाले

द्विजप्रिया स्त्री ६त॰। १सोमलतायां राजनि॰ तस्याश्च द्विजानां सोमयागाङ्गसाधनत्वात् तथात्वम्। २द्विजप्रियमात्रे त्रि॰।

द्विजबन्धु पु॰ द्विजस्य बन्धुरिव। अब्राह्मणे भक्तदेवब्राह्मणे अपकृष्टद्विजे। "स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा" स्मृतिः।

द्विजब्रुव पु॰ द्विजमात्मानं आत्मा ब्रूते ब्रू–क। जातिमात्रेण द्विजातिमानिनि द्विजविहितकर्माकारके द्विजे

ब्राह्मणब्रुवोऽप्यत्र। "सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। अधीते शतसाहस्रमनन्तं वेदपारगे" मनुः

द्विजराज पु० ६त० टच् समा०। १चन्द्रे अमरः। द्विजपतिशब्दे दृश्यम्। "इत्थं द्विजेन द्विजराजकान्तिः" रघुः। २कर्पूरे ३द्विजश्रेष्ठे ४द्विजोत्तमे विप्रे ५पक्षीन्द्रे गरुडे च।

द्विजलिङ्गिन् पु० द्विजस्य लिङ्गमस्यास्य इनि। १क्षत्रिये त्रिका०। २विप्रवेशधारिणि च। "तान् सर्वान् घातयेद्राजा शूद्रांस्तु द्विजलिङ्गिनः" मनुः।

द्विजवाहन पु० द्विजः गरुडो वाहनमस्य। नारायणे "एवं त्वमसि देवानां मग्नानां द्विजवाहनः। तच्छरीरं शतं कृष्ण! जगत्प्रकरणं त्विदम्" हरिवं ७६अ०

द्विजव्रण पु०न० ६त०। दन्तार्बुदे दन्तरोगभेदे राजनि०।

द्विजशप्त पु० ३त०। राजमाषे (बरबटि) शब्दच०। तस्य द्विजैर्भोजनस्य निषिद्धत्वात् तथात्वम्।

द्विजसेवक पु०६त०। १शूद्रे शब्दक०। २द्विजसेविमात्रे त्रि०।

द्विजा स्त्री द्विजायते जन-ड। १रेणुकानामगन्धद्रव्ये अमरः २भार्य्यां मेदि०। ३पालङ्क्यां (पालङ्) शाकभेदे शब्दच०। तासां कर्तनेऽपि पुनर्जायमानत्वात् तथात्वम्। ४द्विजजातिस्त्रियां ४तत्पत्न्यां च स्त्री ङीप्।

द्विजाग्र्य पु० द्विजेषु अग्र्यः। विप्रे "अङ्गिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते"। "ब्राह्मं हुतं द्विजाग्र्याचौ प्राशितं पितृतर्पणम्" मनुः। [कटुकायां राजनि०।

द्विजाङ्गी स्त्री द्विजस्य दन्तस्याङ्गमिव मूलमस्याः ङीप्।

द्विजाति पु० द्विः जातिर्जन्म यस्य। १ब्राह्मणे अमरः। २ब्राह्मणक्षत्रियवैश्येषु। "शूद्राद्विजातिभिर्जातो न भूमेर्भागमर्हति" स्मृतिः "ब्राह्मणक्षत्रियविशस्त्रयोवर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो, नास्ति तु पञ्चमः" मनुः। तेषां द्विर्जन्मवत्त्वं द्विजशब्दे दृश्यम्। ३अण्डजे मेदि०। ४दन्ते च

द्विजानि पु०द्वे जाया यस्य निङ्। द्विभार्य्यके "अन्तर्योनेव चरति द्विजानिः" ऋ०१०।१०१।११

द्विजायनी स्त्री द्विजः अय्यते ज्ञायतेऽनया अय-गतौ गत्यर्थस्य ज्ञानार्थत्वात् ल्युट् ङीप्। यज्ञोपवीते त्रिका०।

द्विजालय पु० ६त०। १वृक्षस्य खगालये कोटरे शब्दच० २नीडे। ३द्विजानां गृहे च।

द्विजिह्व पुंस्त्री० द्वे जिह्वे नस्य। सर्पे स्त्रियां जातित्वात् ङीप्। तेषां द्विजिह्वत्वकथा भा० आ० ३४अ० यथा

"अथ सर्पानुवाचेदं सर्वान् परमहृष्टवत्। दृष्टमानीतममृतं निक्षेप्स्यामि कुशेषु वः। स्नाता मङ्गलसंयुक्तास्ततः प्राश्नीत पन्नगाः!। भवद्भिरिदमासीनैर्यदुक्तं तद्वचस्तदा। अद्यासौ चैव मातेयमद्यप्रभृति चास्तु मे। यथोक्तं भवतामेतद्वचो मे प्रतिपादितम्। ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तं तथेत्युत। शक्रोऽप्यमृतमाच्छिद्य जगाम त्रिदिवं पुनः। अथागतास्तमुद्देशं सर्पाः सुधार्थिनस्तदा। स्नाताश्च कृतजप्याश्च प्रहृष्टाः कृतमङ्गलाः। यत्रैतदमृतं चापि स्थापितं कुशसंस्तरे। तद्दृष्ट्वा हृतं सर्पाः प्रतिमायाकृतञ्च तत्। सोमस्थानमिदं चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधाकृता जिह्वा सर्पाणां तेन कर्मणा। अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः। एवं तदमृतं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना"। २सूचके च त्रि० अमरः। ३खले मेदि०। ४चौरे ५दुःसाध्ये च शब्दर०। तेषां सर्पतुल्यमर्माविधत्वात्तथात्वम्। "परस्य मर्माविधमुज्झतां निजम् द्विजिह्वतादोषमजिह्मगामिभिः"। "तमिद्धमाराधयितुं सकर्णकैः कुलैर्द्वं भेजे फणिनां भुजङ्गता" माघः।

द्विजेन्द्र पु० द्विज इन्द्र इव उपमितसमा०। १द्विजश्रेष्ठे ६त०। २चन्द्रे ३कर्पूरे च "द्विजेन्द्रकान्तं श्रितवत्तसंश्रिया" माघः।

द्विजेश पु० ६त०। १गरुडे २चन्द्रे हेमच० ३कर्पूरे च। द्विजेश्वरादयोऽप्यत्र। "तमृक्षयोगानुगतं शिशिरांशुं द्विजेश्वरम्" हरिवं० ४५अ०।

द्विजोपासक पु० द्विजमुपास्ते उप+आस-ण्वुल्। द्विजसेवके शूद्रे पारस्करनिघ०।

द्विजोत्तम पु० द्विजेषु उत्तमः। विप्रे।

द्विठ पु० द्वौ ठकारौ लेखनाकारे यस्य। १विसर्गे तस्य लेखनाकारस्य द्विठकाराकारत्वात्तथात्वम् शारदातिलक व्याख्याने राघवभट्टः। लक्षितलक्षणया २स्वाहायाम् तस्याः विसर्गशब्दवाच्यत्यागार्थकत्वात् तथात्वम् समा० द्विगुः। ३ठकारद्वये न०। [दृश्यम्।

द्वित पु० १देवभेदे २ऋषिभेदे च एकतशब्दे १४६५।६६१०

द्वितय न० द्वयोरवयवः संख्याया अवयवे तयप्। द्वित्वसंख्यायां "प्रसार्य्य हस्तद्वितयं तयोर्यत्र युतिर्भवेत्। "दृश्यन्ते पञ्चदशभिराषाढादितयं तथा"। "कटाक्षाद्वितयस्येव संपुटं गोलकाकृति" सू०सि० द्वावेवावयवावस्य।

२द्वित्वसंख्याविशिष्टे त्रि० अस्य जसि वा सर्वनामता द्वितये द्वितयाः। "द्रुमसानुमतोः किमन्तरं यदि वायौ द्वितयेऽपि तेऽचलाः" किरा० "अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव सङ्गतम्। पदमद्रुमजेन पैतृकं विनयेनास्य नवञ्च यौवनम्" रघुः। अस्य स्त्रीत्वमपि उभयत्र ङीप्।

द्वितीय त्रि० द्वयोः पूरणः तीय। द्वित्वसंख्यापूरणे तस्याः ङित्सु वा सर्वनामकर्म। "एकमेवाद्वितीयं ब्रह्म" श्रुतिः। "द्वितीयगामी न हि शब्द एष नः" रघुः "मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धनात्" मनुः २पुत्रे पु० त्रिका०। ३भार्यायां स्त्री टाप् अमरः। चन्द्रस्य द्वितीयकलायाः सूर्यकिरणप्रवेशनिर्गमयोग्ये क्रियारूपे तदुपलक्षिते कालभेदे वा ५तिथिभेदे स्त्री तस्याः व्रताद्याङ्गकालनिर्णयः कालमा० दर्शितो यथा

"प्रथमद्वितीयादीनां पञ्चदशकलानां क्रमेण चन्द्रमण्डलप्रवेशनिर्गमनाभ्यां शुक्लकृष्णपक्षयोः प्रतिपद्द्वितीयादिनामधेयास्तिथयो भवन्ति। तत्र प्रतिपदि योनिर्णयः पूर्वप्रकरणेऽभिहितः स एवोत्तरासु सर्वासु तिथिषु साम्येन सञ्चारयितव्यः। विशेषांस्तु तत्र तत्राभिधास्ये। प्रतिपदि दैवं पित्र्यं च व्यवस्थापितम्। दैवं षड्विधम् उपवासैकभक्तनक्तायाचितदानव्रतभेदेन, तीर्थस्नानजपहोमादयस्तु व्रतशब्देनैव संगृहीताः। पित्र्यं द्विविधम्। एकोद्दिष्टं पार्वणं चेति; तत्र सर्वत्र कर्मकालव्याप्तिवृत्तान्ता एव तिथेरनुष्ठानाङ्गत्वं स्मृतिष्वभिप्रेतम्। कर्मकालश्च द्विविधो मुख्यो गौणश्चेति। तद्यथा एकभक्ते मध्याह्नो मुख्यः। व्यासायमवशिष्टो गौणः। तिथिव्याप्तिर्द्विविधा स्वाभाविकतिथिव्याप्तिः साकल्यापादिततिथिव्याप्तिश्चेति। यदा सङ्गवपर्यन्तामावास्या तदानीमुपरितनो मध्याह्नोमुख्ययैव प्रतिपदा व्याप्ता भवति। यदा त्वपराह्णादिमारभ्य तिथिक्षयवशात्परेद्युः सङ्गवाला प्रतिपद्भवति। तदा पूर्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानुष्ठानस्वीकारे सति मध्याह्ने तथैवानुष्ठेयत्वात्तत्र स्वाभाविकप्रतिपद्व्याप्त्यभावेऽपि साकल्यवचनापादितप्रतिपद्व्याप्तिः स्वीकृता। एवं च सति कर्मकालव्याप्तौ सर्वस्मृतीनामत्यन्तनिर्बन्धदर्शनात् कर्मकालव्याप्तिगाम्भीर्यमितरेभ्यः प्रबलमिति निश्चीयते। तदनुसारेण द्वितीयाद्या अपि तिथय उपवासादौ दैवे, एकोद्दिष्टादौ पैत्र्ये च कर्मकालव्याप्तियुक्ताः स्वीकर्त्तव्याः। उपवासस्तु सर्वतिथिषु नारदीये दर्शितः। "शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रभृतीस्तिथीन्। उपोष्यैव बलिं दत्त्वा विधिनेत्यपरे दिने। ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते" इति। उपवासस्याहोरात्रः कर्मकालः। तस्यात्तद्व्यापिनी तिथिर्ग्राह्या। तदसम्भवे खण्डतिथिर्ग्राह्येति निरूप्यते। तत्र च सूर्योदयेत्रिमुहूर्त्ता ततोऽधिका वा प्रतिपद्भवति। उत्तरदिने चास्तमयादर्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया भवति सेयमुभयविद्धा द्वितीया। तत्र वेधकतिथेरुदयेऽस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततोन्यूनत्वं तदेव पैठीनसिवाक्येन पूर्वमुदाहृतम्। वेध्यतिथेश्च त्रिमुहूर्त्तसद्भावोऽपेक्षित इति "द्विमुहूर्त्तं त्रिरङ्गवेत्यनेन सुमन्तुवचनेन दर्शितम्। उदयास्तमययोरेव वेध इत्ययमर्थः "उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इत्यादिभिः कात्यायनवचनैरवगन्तव्यः। एवञ्च सति यथोदाहृते पूर्वविद्धोत्तरविद्धे द्वे द्वितीये, तयोरुत्तरविद्धा द्वितीयोपोष्या युग्मान्निवाक्येनान्वयव्यतिरेकाभ्यामुत्तरविद्धायाः प्राशस्त्याभिधानात्। यद्यप्युपोष्यत्वं साक्षान्नाभिहितं तथापि कर्मान्तरविशेषस्याङ्गपादानात् उपवासविषयत्वं परिशिष्यते। तथाहि। न तावत्पित्र्यविषयत्वं सम्भवति व्यासेन युग्मादिशास्त्रस्य खर्वादिशास्त्रस्य च दैवपित्र्यत्वेन व्यवस्थापितत्वात्। नाप्येकभक्तनक्तविषयत्वं तयोर्मध्याह्नप्रदोषव्याप्त्यधीनत्वेन युग्मादिशास्त्रानधीनत्वात्। अयाचितस्य तूपवासवदनुष्ठेयत्वेन न पृथग्विषयत्वं नच दानादिविषयत्वम् दानादेः पौर्वाह्णिकतिथौ कर्त्तव्यतया निर्णीतत्वात्। अत उपवासविषयत्वं परिशिष्यते। कदाचिदेकभक्तादितिथौ युग्मादिशास्त्रस्य संवादो भवति। तदा तच्छास्त्रमुपोद्बलकं भवतु। न वयं वारयामः। वचनान्तरे तु युग्मादितिथेरुपोष्यत्वं साक्षात् प्रतीयते। तथा च प्रतिपत्प्रकरणे प्रतिपदमावास्यायुग्मस्योपोष्यत्ववचनमुदाहृतम्। तत्रापि युग्माभिप्रायेणैव द्वितीयायाः परविद्धायाः उपोष्यत्वं भृगुस्मृतिविष्णुधर्मोत्तराभ्यां दर्शितम्। "एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी चतुर्थी च उपोष्याः स्युः परान्विताः" इति। यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्त्तं स्पर्शते। तदा

पर्वेद्युरेवोपवासः। न चोदाहृतेन परान्विता इति वचनेन विरोधः शङ्कनीयः परान्वितापूर्वान्वितयोः प्रसक्तयोः सत्योरस्य वचनस्य नियामकत्वात्। नचात्र परान्वितत्वं प्रसक्तमस्ति। पूर्वस्य दिनस्य सम्पूर्णतिथित्वात् सम्पूर्णखण्डयोः सम्पूर्णस्यासन्देहत्वेन प्रबलत्वात्। असङ्गातविरोधित्वकृत्स्नकर्मकालव्याप्तिभ्यां पूर्वदिनस्यैव प्राबल्यम्। तस्मात्तत्रैवोपवासः। ननु पूर्वोपवासं प्रतिषेधति व्यासः "तृतीयया युता कार्या द्वितीया न तु पूर्वया" नैवम् अस्य वचनस्य खण्डतिथिविषयत्वेन संपूर्णतिथावप्रवृत्तेः। खण्डतिथिविषयत्वञ्च पूर्वया युता नैव कार्येत्यभिधानादवगम्यते। ननु खण्डतिथावपि द्वितीया पूर्वविद्धैवोपोष्या "प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युता" इत्यापस्तम्बेन प्रतिपद्द्वितीययोर्युग्मत्वाभिधानात्। एतदेव वचनमुपजीव्य कृष्णप्रतिपत्परविद्धैवोपोष्येति पूर्वं निर्णीतं तर्हि द्वितीयापि क्वचित्पूर्वविद्धा भवतु तदुक्तं स्कन्दपुराणे "प्रतिपत्सम्मुखी कार्या या भवेदापराह्णिकी। पूर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो!" इति। तादृशी सम्मुखी पूर्वयुतेत्यर्थः। पूर्वेद्युरुदये मुहूर्तं परित्यज्यावशिष्टपूर्वाह्णसम्बन्धिनी यदा भवति तदा वेधकारिण्याः पूर्वतिथेः मुहूर्तत्रयाभावेन वेद्धुमसामर्थ्यात्स्वयंखण्डापि सती सम्पूर्णपरपूर्वतोपवासे युज्यते। अत्र द्वितीया नयधा भिद्यते पूर्वेद्युरुदयमारभ्य प्रवृत्ता१ प्रातरुदयं परित्यज्य प्रवृत्ता२ पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तेति३ त्रयोभेदास्तेष्वेकैकस्य परेद्युस्त्रिमुहूर्तत्वतत्त्र्यूनत्वन्यूनत्वैस्त्रैविध्ये सति मिलित्वा नवविधत्वं सम्पद्यते। अथ पूर्वेद्युरुदयमारभ्य प्रवृत्तायाः सम्पूर्णत्वेन परेद्युर्मुहूर्तत्रयत्वतत्त्र्यूनत्वान्यूनत्वेषु त्रिष्वपि पक्षेषु विवादाविषयत्वात् पूर्वत्रैवोपवासोयुक्तः। उदयं परित्यज्य कियत्पूर्वाह्णभागं प्रक्रम्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्तनायां सत्यपि परयुतोपवाससम्भवे तां परित्यज्य पौर्वाह्णिकवचनेन पूर्वेद्युरेवोपवासो विधीयते। परेद्युस्त्रिमुहूर्तन्यूनत्वे तु वेधकारिण्यास्तृतीयायाः सत्यपि वेद्धुं सामर्थ्ये वेध्याया द्वितीयायास्त्रिमुहूर्तत्वाभावेन वेधयोग्यत्वाभावात् तत्रोपवासो न प्रसक्तः। अतः परिशेषात् पूर्वाह्णवाक्याच्च पूर्वत्रैवोपवासः। पूर्वेद्युः पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्ततयोभयत्र तिथिसत्त्वात् कुत्रोपवास इति सन्देहे सति व्यासेनोत्तरविधानात् पूर्वदिननिषेधाच्चोत्तरत्रोपवासः। न चात्र शुक्लकृष्णव्यवस्था शङ्कनीया। युग्मवाक्ये शुक्लकृष्णपक्षसाधारण्येन परदिनविधानात् कृष्णपक्षेऽपि तत्प्रवृत्तौ बाधाभावाच्च। अन्ययोस्तु पक्षयोः पूर्ववद्वेधानर्हत्वेन पूर्वेद्युः पौर्वाह्णिकत्वाभावेऽपि परिशेषादापस्तम्बोक्तयुग्मवाक्याच्च पूर्वत्रोपवास इति स्थितम्। एकभक्तादिपार्वणश्राद्धान्तेषु कर्मसु द्वितीयाप्रयुक्तस्य विशेषस्य क्वचिदप्यस्मरणात् पूर्वोक्तन्यायो योजनीयः"।

सा च अश्विनीकुमारयोर्जन्मतिथिः। यथाह वराहपु०

तयोर्जन्मोपसंक्रमे "एतत् सर्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा। दत्तं यस्मात्ततस्तेषां तिथीनामुत्तमा तिथिः। एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः। संवत्सरं शुचिर्नित्यं सुरूपी भवेन्नरः। अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च"। मनोरथद्वितीया तु श्रावणशुक्लद्वितीया। "मनोरथद्वितीयायां दिवा यामुदेवार्च्चनम् रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तं भोजनादिकमुक्तम् नि०त० विष्णुधर्मोत्तरे "देवमभ्यर्च्य पुष्पैस्तु धूपदीपानुलेपनैः। उद्गच्छतश्च बालेन्दोर्देवाद्यर्घ्यं समर्पितः। नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः। अस्तं गते न भुञ्जीत व्रतभङ्गभयाच्चरः"। स्कन्दपु० "आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रकुर्वीत प्रीणयेच्च द्विजादुवच्छत्। कृष्णाभावे तिथौ कार्या सदा सा प्रीतये मम" रथद्वितीया।

भ्रातृद्वितीया भविष्यपुराणे "कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम्। या न कुर्यादिनग्रन्थि भ्रातरः सप्तजन्मनि"। तस्या इति शेषः। महाभारते "कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयम्। तस्यां निजगृहे पार्थ! न भोक्तव्यमतो बुधैः। यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्यो विशेषतः"। तथा "यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत्। अर्घ्यञ्च प्रदातव्यो यमाय सहजद्वयैः" "अत्र भोक्तव्यं पुष्टिवर्द्धनमिति समभिव्याहृतफलश्रुत्या भोजननियमस्य प्राधान्यात् तस्य सख्यकालोऽष्टधाविभक्तदिनस्य पञ्चमांशोग्राह्यः "पञ्चमे च तथा भागे संविभागो यथार्हतः पितृदेवमनुष्याणामित्यादि" दक्षोक्तेः अत्र

भोजनस्य रागप्राप्तत्वेऽपि तत्कालस्य "अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" इति कात्यायनीये न नियमितत्वात् वैधत्वेन शास्त्रीयत्वेन सामान्यशास्त्रप्राप्तानुपजीविपर्य्युदासासङ्गतिरिति। व०त० (तेन नातिप्रगे नातिसायमित्यत्र नञर्थः पर्युदास) "तथा यमद्वितीयायां यात्रायां मरणं भवेत्"। अनध्यायद्वितीया यथा "प्रेकोच्चैचा द्वितीयास्ताः प्रेतपक्षे गते तु या। या च कोजागरे जाते चैत्रावल्याः परेऽपि या। चातुर्मास्ये समाप्ते च द्वितीया या भवेत् तिथिः। परास्ते ताखनध्यायः पुराणैः परिकीर्त्तितः ति० त०। "मार्गं च फाल्गुने चैव आषाढे कार्तिके तथा। पक्षयोर्माघमासस्य द्वितीयां परिवर्जयेत्" मल०त० व्यक्तपनयनविषयः। पक्षयोरित्यस्योत्तरत्र श्रुतस्य सर्वत्रान्वयः। "द्वितीया मीनधनुषोः" ज्योति०त०उक्तेः रविचन्द्रयोर्मीनधनुषोः स्थितयोस्तस्या दग्धत्वम्। चन्द्रमास्थितत्वे चन्द्रदग्धत्वं केचिदिच्छन्ति "द्वितीया द्वादशी यत्रे" ज्यो०त० उक्तेस्तस्यासुत्तरस्यां दिशि योगिनी।

द्वितीयक न० द्वितीयेन रूपेण ग्रहणम् "तावतियं ग्रहणमिति लुग्वा" पा० कन् पूरणप्रत्ययस्य वा लुक्। १चैत्रादेर्द्वितीयरूपेण ग्रहणे। पक्षे तीयभागस्य लुकि द्विकमप्यत्र। द्वितीयेऽह्नि भवः कन्। २द्वितीयदिनभवे रोगे पु०

द्वितीयत्रिफला स्त्री द्वितीया त्रिफला। गाम्भार्यां (गाम्भार) शब्दच०।

द्वितीयाकृत त्रि० द्वितीयं कृतम् द्वितीय+डाच् कृ-क्त। द्वितीयवारकर्त्तव्यकर्मणि क्षेत्रादौ।

द्वितीयाभा स्त्री द्वितीयेन रूपेण हरिद्रायाः आभाति आ+भा-क। दारुहरिद्रायां शब्दच०।

द्वितीयाश्रम प्र० कर्म०। द्वितीये गार्हस्थ्ये आश्रमे "द्वितीयमायुषो भागं कृतदारो गृहे वसेत्" मनुः "कालोह्ययं सकमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते" रघुः।

द्वितीयिक त्रि० द्वितीयः छ्यायगुलकोपपदरूपः पदार्थो दीयते "पूरणार्द्धाद् ठ।" पा० ठन् छ्यादिरूपेण दीयते द्वितीयो यस्मिन् तस्मिन् पदार्थे

द्वितीयिन् त्रि० द्वितीयो भागो यास्यतयाऽस्यास्य इति। अर्द्धभागयाचके अर्द्धिनि अर्द्धिनशब्दे ३७८पृ०दृश्यम्। "षोडश षोडश द्वितीयिभ्यः" आश्व०श्रौ० ९।४।४ "द्वितीयिभ्यः अर्द्धिभ्यः अर्द्धमेषामस्तीत्यर्द्धिनस्तेभ्यः" भारा०

द्वित्र त्रि० द्व०य०। द्वौ वा त्रयो वा विकल्पार्थे बहु० सख्येयार्थत्वे ङ। द्वौ त्रयोवेत्यर्थे। "द्वित्राण्यहानि सेतुमहन्!" रघुः "दैवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः" सा०द०

द्वित्व न० द्वयोर्भावः। अयमेकः अयमेक इत्यनेकैकत्वबोधरूपापेक्षाबोधजन्ये द्रव्यनिष्ठे गुणभेदे। तच्च समवायेन वस्तुद्वये प्रत्येकं तिष्ठति, पर्य्याप्तसम्बन्धेन तु द्वयोरेव तिष्ठति न प्रत्येकम्। तदेवापेक्षाबुद्धिजन्यम् तेनैव एको द्वाविति व्यवहारः। समवायेन प्रत्येकं द्वित्वसत्त्वेऽपि न तेन तथा व्यवहारः। औलूक्यशब्दे १५८७पृ०तदुत्पत्तिविनाशप्रकारस्य दर्शनम्।

"द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः। अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः। अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते" भाषा० "द्वित्वादयो व्याख्यातवृत्तिसंख्या अपेक्षाबुद्धिजन्या"। "अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तलक्षणः कथन सम्बन्धाऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। अपेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानान्तरं न किमपि क्षणस्थायि योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्थायित्वं कल्प्यते अन्यथा निर्विकल्पकाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम्। कालान्तरेद्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशस्तन्नाशक इति कल्पनात्। अतएव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्वित वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचित्यात्। अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्। सर्गोटिकाजीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति"। "अपेक्षाबुद्धिः

पर्वेद्युरेवोपवासः। न चोदाहृतेन परान्विता इति वचनेन विरोधः शङ्कनीयः परान्वितापूर्वान्वितयोः प्रसक्तयोः सत्योरस्य वचनस्य नियामकत्वात्। नचात्र परान्वितत्वं प्रसक्तमस्ति। पूर्वस्य दिनस्य सम्पूर्णतिथित्वात् सम्पूर्णखण्डयोः सम्पूर्णस्यासन्देहत्वेन प्रबलत्वात्। अतश्चातविरोधित्वकृत्स्नकर्मकालव्याप्तिभ्यां पूर्वदिनस्यैव प्राबल्यम्। तस्मात्तत्रैवोपवासः। ननु पूर्वोपवासं प्रतिषेधति व्यासः "तृतीयया युता कार्या द्वितीया न तु पूर्वया" नैवम् अस्य वचनस्य खण्डतिथिविषयत्वेन संपूर्णतिथावप्रवृत्तेः। खण्डतिथिविषयत्वञ्च पूर्वया युता नैव कार्येत्यभिधानादवगम्यते। ननु खण्डतिथावपि द्वितीया पूर्वविद्धैवोपोष्या "प्रतिपत्सहितीया स्याद्द्वितीया प्रतिपद्युता" इत्यापस्तम्बेन प्रतिपद्द्वितीययोर्युग्मत्वाभिधानात्। एतदेव वचनमुपजीव्य कृष्णप्रतिपत्परविद्धैवोपोष्येति पूर्वं निर्णीतं तर्हि द्वितीयापि क्वचित्पूर्वविद्धा भवतु तदुक्तं स्कन्दपुराणे "प्रतिपत्सम्मुखी कार्या या भवेदापराह्णिकी। पूर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो!" इति। तादृशी सम्मुखी पूर्वयुतेत्यर्थः। पूर्वेद्युरुदये मुहूर्तं परित्यज्यावशिष्टपूर्वाह्णसम्बन्धिनी यदा भवति तदा वेधकारिण्याः पूर्वतिथेः मुहूर्तत्रयाभावेन वेद्धुमसामर्थ्यात्स्वयंखण्डापि सती सम्पूर्णवत्पूर्वत्रैवोपवासे युज्यते। अत्र द्वितीया नयधा भिद्यते पूर्वेद्युरुदयमारभ्य प्रवृत्ता१ प्रातरुदयं परित्यज्य प्रवृत्ता२ पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तेति३ त्रयोभेदास्तेष्वेकैकस्य परेद्युस्त्रिमुहूर्तत्यक्तत्रिमुहूर्तत्वस्त्रैविध्ये सति मिलित्वा नवविधत्वं सम्पद्यते। अथ पूर्वेद्युरुदयमारभ्य प्रवृत्तायाः सम्पूर्णत्वेन परेद्युर्मुहूर्तत्रयत्वत्रिमुहूर्तत्वान्यूनत्वेषु त्रिष्वपि पक्षेषु विवादाविषयत्वात् पूर्वत्रैवोपवासोयुक्तः। उदयं परित्यज्य कियत्पूर्वाह्णभागं प्रक्रम्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्तायां सत्यपि परयुतोपवाससम्भवे तां परित्यज्य पौर्वाह्णिकवचनेन पूर्वेद्युरेवोपवासो विधीयते। परेद्युस्त्रिमुहूर्तन्यूनत्वे तु वेधकारिण्यास्तृतीयायाः सत्यपि वेद्धुं सामर्थ्ये वेध्याया द्वितीयायास्त्रिमुहूर्तत्वाभावेन वेधयोग्यत्वाभावात् तत्रोपवासो न प्रसक्तः। अतः परिशेषात् पूर्वाह्णवाक्याच्च पूर्वत्रैवोपवासः। पूर्वेद्युः पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्तयोभयत्र तिथिसत्त्वात् कुत्रोपवास इति सन्देहे सति व्यासेनोत्तरविधानात् पूर्वदिननिषेधाच्चोत्तरत्रोपवासः। न चात्र शुक्लकृष्णव्यवस्था शङ्कनीया। युग्मवाक्ये शुक्लकृष्णपक्षसाधारण्येन परदिनविधानात् कृष्णपक्षेऽपि तत्प्रवृत्तेर्बाधाभावाच्च। अन्ययोस्तु पक्षयोः पूर्ववद्वेधानर्हत्वेन पूर्वेद्युः पौर्वाह्णिकत्वाभावेऽपि परिशेषादापस्तम्बोक्तयुग्मवाक्याच्च पूर्वत्रोपवास इति स्थितम्। एकभक्तादिपार्वणश्राद्धान्तेषु कर्मसु द्वितीयाप्रयुक्तस्य विशेषस्य क्वचिदप्यस्मरणात् पूर्वोक्तन्यायो योजनीयः"।

सा च अश्विनीकुमारयोर्जन्मतिथिः। यथाह वराहपु०

तयोर्जन्मोपसंक्रमे "एतत् सर्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा। दत्तं यस्मात्ततस्तेषां तिथीनामुत्तमा तिथिः। एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः। संवत्सरं शुचिर्नित्यं सुखरूपी भवेन्नरः। अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च"। मनोरथद्वितीया तु श्रावणशुक्लद्वितीया। "मनोरथद्वितीयायां दिवा यामुदेवार्च्चनम् रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तं भोजनाटिकसुक्तम् तिथ्य० विष्णुधर्मोत्तरे "देवमभ्यर्च्य पुष्पैस्तु धूपदीपानुलेपनैः। उद्गच्छतश्च बालेन्दोर्देद्यादर्घ्यं समाहितः। नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः। अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः"। स्कन्दपु० "आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रकुर्वीत प्रीणयेच्च द्विजादुबहून्। ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम रथद्वितीया।

भ्रातृद्वितीया निर्णयपुराणे "कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम्। या न कुर्याद्दिनश्यन्ति भ्रातरः सप्तजन्मनि"। तस्या इति शेषः। महाभारते "कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयम्। तस्यां निजगृहे पार्थ! न भोक्तव्यमतो बुधैः। यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्यो विशेषतः"। तथा "यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत्। अर्घश्चात्र प्रदातव्यो यमाय सहजद्वयैः" "अत्र भोक्तव्यं पुष्टिवर्द्धनमिति समभिव्याहृतफलश्रुत्या भोजननियमस्य प्राधान्यात् तस्य मुख्यकालोऽष्टमीविभक्तदिनस्य पञ्चमांशोत्पाद्यः "पञ्चमे च तथा भागे संविभागो यथार्हतः पितृदेवमनुष्याणामित्यादि" दक्षोक्तेः अत्र

भोजनस्य रागप्राप्तत्वेऽपि तत्कालस्य "अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" इति कात्यायनीये न नियमितत्वात् वैधत्वेन शास्त्रीयत्वेन सामान्यशास्त्रप्राप्तपुजीविपर्य्युदासाभावङ्गतिरिति। व०त० (तेन नातिप्रगे नातिसायमित्यत्र नञर्थः पर्युदास) "तथा यमद्वितीयायां यात्रायां मरणं भवेत्"। अनध्यायद्वितीया यथा "प्रेकोच्चैचा द्वितीयास्ताः प्रेतपक्षे गते तु या। या च कोजागरे जाते चैत्रावल्याः परेऽपि या। चातुर्मास्ये समाप्ते च द्वितीया या भवेत् तिथिः। परास्वेतास्वनध्यायः पुराणैः परिकीर्त्तितः ति० त०। "मार्गं च फाल्गुने चैव आषाढे कार्तिके तथा। पक्षयोर्मासमासस्य द्वितीयां परिवर्जयेत्" मल०त० व्यसुपनयनविषयः। पक्षयोरित्यस्योत्तरत्र श्रुतस्य सर्वत्रान्वयः। "द्वितीया मीनधनुषोः" ज्योति०त०उक्तेः रविचन्द्रयोर्मीनधनुषोः स्थितयोस्तस्या दग्धत्वम्। चन्द्रमास्थितत्वे चन्द्रदग्धत्वं केचिदिच्छन्ति "द्वितीया द्वादशी यत्रे" ज्यो०त० उक्तेस्तस्यामुत्तरस्यां दिशि योगिनी।

द्वितीयक न० द्वितीयेन रूपेण ग्रहणम् "तावतियं ग्रहणमिति लुग्वा" पा० कन् पूरणप्रत्ययस्य वा लुक्। १चैत्रादेर्द्वितीयरूपेण ग्रहणे। पक्षे तीयभागस्य लुकि द्विकमप्यत्र। द्वितीयेऽह्नि भवः कन्। २द्वितीयदिनभवे रोगे पु०

द्वितीयत्रिफला स्त्री द्वितीया त्रिफला। गाम्भार्यां (गाम्भार) शब्दच०।

द्वितीयाकृत त्रि० द्वितीयं कृतम् द्वितीय+ङाच् कृ-क्त। द्वितीयवारकर्षणकर्मणि क्षेत्रादौ।

द्वितीयाभा स्त्री द्वितीयेन रूपेण हरिद्रायाः आभाति आ+भा-क। दारुहरिद्रायां शब्दच०।

द्वितीयाश्रम प्र० कर्म०। द्वितीये गार्हस्थ्ये आश्रमे "द्वितीयमायुषो भागं कृतदारो गृहे वसेत्" मनुः "कालोह्ययं क्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते" रघुः।

द्वितीयिक त्रि० द्वितीयः दृष्टायगुलकोपपदाद्रूपः पदार्थो दीयते "पूरणार्थाद्वा ठ।" पा० ठन् दृष्टादिरूपेण दीयते द्वितीयो यस्मिन् तस्मिन् पदार्थे

द्वितीयिन् त्रि० द्वितीयो भागो याचनयाऽस्यास्य इनि। अर्द्धभागयाचके अर्द्धिनि अर्द्धिनशब्दे ३।७८पृ०दृश्यम्। "षोडश षोडश द्वितीयिभ्यः" ज्योत्स्नौ० ९।४।४ "द्वितीयिभ्यः अर्द्धिभ्यः अर्द्धमेषाञ्चीत्यर्द्धिनस्तेभ्यः" नारा०

द्वित्र त्रि० द्व०व०। द्वौ वा त्रयो वा विकल्पार्थे बहु० ख्येयार्थत्वे ङ। द्वौ त्रयोवेत्यर्थे। "द्वित्राण्यहान्यर्हसि सोढुमर्हन्!" रघुः "दैवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः" सा०द०

द्वित्व न० द्वयोर्भावः। अयमेकः अयमेक इत्यनेकैकत्वबोधरूपापेक्षाबोधजन्ये द्रव्यनिष्ठे गुणभेदे। तच्च समवायेन वस्तुद्वये प्रत्येकं तिष्ठति, पर्य्याप्तसम्बन्धेन तु द्वयोरेव तिष्ठति न प्रत्येकम्। तदेवापेक्षाबुद्धिजन्यम् तेनैव द्वौ द्वावित्यादि व्यवहारः। समवायेन प्रत्येकं द्वित्वसत्त्वेऽपि न तेन तथा व्यवहारः। औलुक्यशब्दे १५८७पृ०तदुत्पत्तिविनाशप्रकारस्य दृश्यः।

"द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः। अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः। अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते" भाषा० "द्वित्वादयो व्यावृत्तवृत्तिसंख्या अपेक्षाबुद्धिजन्या"। "अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तलक्षणः कथन सम्बन्धाऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। अपेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानान्तरं न किमपि विलक्षणस्यार्थ योग्यविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिलक्षणस्यार्थित्वं कल्प्यते अन्यथा निर्विकल्पकाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिक्रमपेक्षाबुद्धेर्नाशकं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम्। कालान्तरेद्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशस्तन्नाशक इति कल्पनात्। अतएव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्वित वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात्। अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्। सर्गादिकालीनपरमाण्वादीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति"। "अपेक्षाबुद्धिः

केत्यत आह। अनेकेति। अयमेकः अयमेकः। इत्याकारिका इत्यर्थः। इदन्तु बोध्यं यत्रानियतैकत्वज्ञानं तत्र द्वित्वादिभिन्ना बहुत्वसंख्योत्पद्यते। यथा सेनावनादाविति कन्दलीकारः। आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते। तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिः। सेनादौ चोत्पन्ने त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्यञ्च इतरतो बहुत्वेयं सेनेति प्रतीतिरुपपद्यते बहुत्वस्य संख्यान्तरत्वे तत्तारतम्याभावादित्यवधेयम्" सूक्ता०।

उप० वृत्तौ विशेषः कश्चिदुक्तो यथा

"तदयं द्वित्वाद्युत्पादविनाशक्रमः। समानजातीययोरसमानजातीययोर्द्रव्ययोश्चक्षुःसन्निकर्षे सति तन्निष्ठैकत्वसंख्ययोर्यत्सामान्यमेकत्वत्वं तयोर्निर्विकल्पकानन्तरं तद्विशिष्टगुणबुद्धिरुत्पद्यते सैव चापेक्षाबुद्धिस्तया तयोर्द्रव्ययोर्द्वित्वमुत्पद्यते, उत्पन्नस्य च द्वित्वस्य यत्सामान्यं द्वित्वत्वं तदालोचनेनापेक्षाबुद्धेर्नाशो द्वित्वत्वविशिष्टद्वित्वगुणविषया विशिष्टबुद्धिश्चैकदा भवति, तदग्रिमक्षणे च द्वित्वगुणस्यापेक्षाबुद्धिविनाशः द्वे द्रव्ये इति द्वित्वविशिष्टद्रव्यज्ञानञ्च युगपदुत्पद्यते, ततस्तस्माद् द्वित्वविशिष्टद्रव्यज्ञानात् संस्कारः। तदयं संक्षेपः उत्पत्तिसमानद्वित्वाधारेणेन्द्रियसन्निकर्षस्तत एकत्वगुणगतसामान्यज्ञानं तत एकत्वत्वसामान्यविशिष्टैकत्वगुणसमूहालम्बनरूपाऽपेक्षाबुद्धिस्ततो द्वित्वगुणोत्पत्तिस्ततस्तद्गतसामान्यस्य ज्ञानं ततस्तत्सामान्यविशिष्टद्वित्वगुणज्ञानं ततो द्वित्वगुणविशिष्टद्रव्यज्ञानं ततः संस्कार इतीन्द्रियसन्निकर्षमारभ्य संस्कारपर्यन्तमष्टौ क्षणाः। विनाशक्रमस्तु एकत्वत्वसामान्यज्ञानस्यापेक्षाबुद्धितोविनाशः द्वित्वत्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशः द्वित्वत्वसामान्यज्ञानस्य च द्वित्वगुणबुद्धितोविनाशः द्वित्वगुणबुद्धेश्च द्वित्वविशिष्टद्रव्यज्ञानात् तस्य च संस्कारात् विषयान्तरज्ञानादेति। नन्वेकत्वज्ञानात्तद्विशिष्टद्रव्यज्ञानमेव कथं नोत्पद्यते तत्सामग्रीसत्त्वात् न हि गुणज्ञाने सति द्रव्यज्ञाने विलम्बोऽस्ति तथा च तत एवापेक्षाबुद्धेर्विनाशे तन्नाशाच्च तदग्रिमक्षण एव द्वित्वनाश इति द्वे द्रव्ये इति विशिष्टज्ञानपूर्वक्षण एव द्वित्वविनाशापत्त्या द्वित्वविशिष्टद्रव्यज्ञानस्यानुत्पत्तिरेवेति चेन्न द्वित्वाद्युत्पत्तिसामग्र्यनभिभूताया एवापेक्षाबुद्धेर्द्रव्यविशिष्टज्ञानजनकत्वनियमात् फलबलेन कथाकल्पनात्। ननु तथापि स्वजनितसंस्कारेणैवापेक्षाबुद्धिविनाशे पुनः स दोषस्तदवस्थ एव, द्वित्वविशिष्टज्ञानपूर्वक्षण एव द्वित्वनाशस्य सम्भवादिति चेन्न केवलगुणज्ञानस्य संस्काराजनकत्वात् न हि केवलोगुणः क्वापि स्पर्श्यते, सर्वत्र द्रव्योपरागेणैव गुणस्मरणात्, ननु भवत्वेयं तथापि विशिष्टबुद्धिकालेऽपि द्वित्वनाशे विशिष्टप्रतीत्यनुदयस्तदवस्थ एव न हि वर्त्तमानावभासिनी विशिष्टप्रतीतिर्विशेषणनाशकाले सम्भवति तथाऽदर्शनादिति चेन्न विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य विशिष्टज्ञानसामग्र्याः प्रकृतेऽपि सम्भवात्। यदि तु विशेषेणेन्द्रियसन्निकर्षोऽपि स्पर्श्यते तदा पूर्वक्षणे तस्यापि सत्त्वात् पूर्वक्षणवर्त्तिन एव सन्निकर्षस्य कारणत्वेनाभ्युपगमात्, विशेषणं विशिष्टज्ञानागोचरोऽपि सम्भवति, विशिष्टज्ञानजनकज्ञानविषयत्वमात्रमेव हि विशेषणत्वे तन्त्रं नतु विशिष्टज्ञानविषयत्वमपि। उपलक्षणस्याप्येवं विशेषणत्वापत्तिरिति चेन्नाप्रत्ययव्यावृत्तिसामानाधिकरण्यस्य विशेषणत्वे तन्त्रत्वात् उपलक्षणन्तु तद्व्यधिकरणम्, एवं यदा देवदत्तगृहे काकवत्ता तदा काकोविशेषणं, यदा तु उपरिभ्रमन् श्यन् तदोपलक्षणम्। एवं सति रूपवति रस इत्यादौ रूपादेरपि विशेषणत्वापत्तिरिति चेन्न इष्टत्वात्, तर्हि तत्रापि रसोवर्त्तेतेति चेन्न विशिष्टवृत्तेर्विशेषणवृत्तित्वानावश्यकत्वात् न हि विशेषणं विशिष्टसत्तावेकं तन्त्रम्। द्वित्वनाशकाले विशेषणसम्बन्धो नास्ति कुतोविशिष्टप्रत्यय इति चेन्न अतद्व्यावृत्तेरेव वैशिष्ट्यपदार्थत्वात्, तद्ज्ञानन्तु तत्रापीति न किञ्चिदनुपपन्नमित्याचार्याः। एवं द्वित्वोत्पत्तिविनाशवत् त्रित्वोत्पत्तिविनाशावप्यूहनीयौ। द्वित्वमपेक्षाबुद्धिनाशनाश्यम्, आश्रयनाशविरोधिगुणान्तराभावे गुणस्य सतोऽविनाशित्वात् चरमज्ञानवत् चरमज्ञानस्याष्टनाशनाश्यत्वात्। क्वचिदाश्रयनाशादपि नश्यति यत्र द्वित्वाधारावयवकर्मसमकालैकत्वसामान्यज्ञानम्, तद्यथा अवयवकर्मसामान्यज्ञाने विभागापेक्षाबुद्धौ संयोगनाशगुणोत्पत्तौ द्रव्यनाशाद्द्वित्वसामान्यज्ञाने तत्र द्रव्यनाशाद्द्वित्वनाशः, सामान्यज्ञानादपेक्षाबुद्धिनाशः, अपेक्षाबुद्धिनाशस्य द्वित्वनाशसमानकालत्वात् कार्यकारणसमानभावात्। यदा तु द्वित्वाधारावयवकर्मापेक्षाबुद्ध्योर्युगपद्यं तदा द्वाभ्यामाश्रयनाशापे-

ज्ञानबुद्धिनाशाभ्यां द्वित्वनाशः, तद्यथा अवयवकर्मापेक्षाबुद्धौ विभागोत्पत्तौ संयोगनाशाद्द्वित्वसामान्यज्ञाने द्रव्यनाशापेक्षाबुद्धिनाशौ ताभ्यां द्वित्वनाशः प्रत्येकं सामर्थ्यात्। एवञ्च प्रक्रिया ज्ञानयोर्बाध्यघातकत्वपक्षे परस्पपद्यते स एव च पक्षः प्रामाणिकः। ननु द्वित्वत्रित्वादीनां सामग्रीसाध्ये कथं कार्यवैलक्षण्यं, द्वाभ्यामेकत्वाभ्यां द्वित्वं, त्रिभिरेकत्वैस्त्रित्वमिति चेन्न एकत्वे द्वित्वाद्यभावात्, समवायिकारणगतमेव द्वित्वत्रित्वादिकं तन्त्वमिति चेन्न द्वित्वाद्युत्पत्तेः पूर्वं तत्र द्वित्वाद्यभावात् तत्रापि कारणचिन्ताया अनिवार्यत्वात् अपेक्षाबुद्धावेकत्वेषु च तादृशविशेषस्यानुपलम्भबाधितत्वात् फलबलेन तत्कल्पने वा द्वित्वादिव्यवहारोऽपि तत एवास्तु किं द्वित्वादिना, अदृष्टविशेषाद्विशेष इति चेदेवं सति द्वित्वादिसामग्र्यां कदाचित्त्रित्वं चतुष्ट्वोत्पद्येतेत्यनियमप्रसङ्गः इति चेत् उच्यते प्रागभावविशेषाद्विशेषोपपत्तेः। तस्यया सामग्र्या पाकजानां रूपरसगन्धस्पर्शानामिव। प्रागभावोऽपि साधारण एवेति चेन्न स्वस्वप्रागभावस्यैव कार्यं प्रति कारणत्वावधारणात्। यदा गुणयाऽपेक्षाबुद्ध्या द्वित्वं द्वित्वसहितया त्रित्वमिति नेयम्, (अव्यवस्था) शतं पिपीलिकानां मया दृतमित्यादौ, समवायिकारणाभावे द्वित्वं तावन्नोत्पद्यते तथा च नोक्तस्तत्र संख्याव्यवहारोऽद्रष्टव्यः। सेनावनादौ नियतापेक्षाबुद्ध्यभावाद्बहुत्वमात्रमुत्पद्यते न तु शतसहस्रादिसंख्येति श्रीधराचार्याः। एवं सति शतसहस्रादिकोटिकस्तत्र संशयो न स्यात् न स्याच्च महती महत्तरा सेनेति नैवमित्युदयनाचार्याः। अत्रैवमालोचनीयं त्रित्वादिपराङ्गपर्यन्ता संख्यैव बहुत्वम्, तद्भिन्नं वा संख्यान्तरम्, नाद्यः सेनादावपि शतसहस्रादिसंख्योत्पत्तिनियमात्, न द्वितीयः त्रित्वादिविलक्षणस्य बहुत्वस्यानुभवात् तथा च प्रतिनियतैकत्वानालम्बनापेक्षाबुद्धिजनितशतादिसंख्यैव बहुत्वं शतादिव्यक्तिस्तु तत्र न भवति तादृशव्यञ्जकाभावात्। व्यन्तु ब्रूमः त्रित्वादिसमानाधिकरणं संख्यान्तरमेव बहुत्वं त्रित्वादिजनकापेक्षाबुद्धिजन्यं प्रागभावभेदादेव भिद्यते कथमन्यथा बहवस्तावत् सन्ति शतं वा सहस्रं वेति विशिष्य न जानीम इति। यथैकद्रव्ये महत्त्वं दीर्घत्वञ्च तथैकत्वैवाधिकरणे त्रित्वादिकं बहुत्वञ्च, भवति हि शतं वा सहस्रं वा चूतफलान्यानयानीति प्रश्ने बहवस्तावदानीयन्तां किं विशेषजिज्ञासयेति। एवञ्च द्वित्वसहितापेक्षाबुद्ध्या त्रित्वं त्रित्वसहितापेक्षाबुद्ध्या चतुष्ट्वमेवमुत्तरोत्तरम्। बहुत्वोत्पत्तौ तु नापेक्षाबुद्धौ पूर्वपूर्वसंख्याविशिष्टत्वनियमः, अतएव सेनावनादिषु बहुत्वमात्रमुत्पद्यते न तु संख्यान्तरं संशयस्यासत्कोटिकोऽपि भवत्येवेति"।

द्विदण्डि अव्य॰ द्वौ दण्डौ यस्मिन् प्रहरणे इत्य समा॰। दण्डद्वययुक्ते प्रहरणे। तिष्ठद्गुप्रभृतेरिव प्रत्ययः समासान्त इत्युक्तेः बहुव्रीह्यर्थे अव्ययीभावात् अव्ययत्वम् तेन न द्विदण्डा प्रहृतिरिति। न वा प्रहरणे इत्युक्तेः शालादौ वाच्येऽपि अव्ययीभावः।

द्विदण्ड्यादि पु॰ प्रहरणार्थे इत्यसमासान्तनिमित्ते पा॰ ग॰ उक्ते शब्दगणभेदे स च तत्रोक्तो यथा "द्विदण्डि द्विसुवर्णि उभाञ्जलि उभयाञ्जलि उभादण्डि उभयादण्डि उभाकर्षि उभयाकर्षि उभायाणि उभयायाणि उभाबाहु उभयाबाहु एकपदि प्रोक्षपदि आक्षपदि सपदि निकृष्यकर्षि संहतपुष्पि अन्तेवासि"। [पलक्षितवयस्के दण्डादौ स्त्रियां ङीप्।

द्विदत् त्रि॰ द्वौ दन्तावस्य वयसि दन्तस्य दन्तादेशः। द्विदन्तो-

द्विदल त्रि॰ द्वे दले यस्य। द्विशाखायुक्ते १दर्भपवित्रादौ "अग्र्यञ्च दारवं पात्रं द्विदलान् रेणुकान् बहून्" हरिवं॰ २द्विपत्रयुक्ते कमले तच्च सुषुम्णानाडीमध्ये भ्रूमध्यस्थितं (इत्य) वर्णयुक्तं सुक्ष्मकमलम् आज्ञाख्यं चक्रम्। द्विःपत्रादयोऽत्र "द्विःपत्रे षोड़शारे द्विशतदशदले द्वादशाङ्गे चतुष्के" तन्त्रम् आज्ञाचक्रशब्दे ६४२ पृ॰ द्रष्टव्यम्। द्विधा दल्यते दल-घञर्थे क। (डाल) ख्याते २पदार्थे पु॰।

द्विदश त्रि॰ द्व्यधिका द्विसहिता वा दशसंख्य॰ येषाम् "संख्यायाऽव्ययासन्नादूराधिकसंख्याः संख्येये" पा॰ संख्येयार्थत्वात् डच् समा॰ "द्व्यष्टनः संख्यायामबहुव्रीहावशीतौ" पा॰ अबहुव्रीहौ डीत्युक्तेर्नात्। द्विसहित दशसंख्यायुते। "द्विःपत्रे षोड़शारे द्विशतदशदले" तन्त्रम्

द्विदाम्नी द्वे दामनी बन्धनसाधने अस्या जनन्यास्त्वात् ङीपोनिषेधे पक्षे ङापः प्राप्तौ "दामहायनान्ताच्च" पा॰ ङीबेव। द्विरज्जुबन्धनयोग्यायां दुष्टायां स्त्रियां गवि।

द्विदिव पु॰ द्वाभ्यां दिवा दिनाभ्यां निर्वृत्तादि तद्धितार्थे द्विगुः "कालाट् ठञ्" तस्य लुक् लुक्तः। द्विदिनसाध्ये द्वितीयागभेदे "द्वितीये द्विदिवाख्योऽह्नः" काला॰

श्रौ० २२।७।६। "द्वितीये पर्वस्थाने ह्यहो भवति द्विदिव इत्याख्या तस्य" कर्कः।

द्विदेवत त्रि० द्वे देवते यस्य ६ब०। द्विदेवताके चर्वादौ "द्विदेवतोऽपि नियमसामर्थ्यात्" कात्या०श्रौ०५।।८।।० "द्विदेवतोऽपि पौष्णचरुः पिष्टानामेव भवति तत्र हीन्द्रसहितस्य पूष्णो देवतात्वम् तत्र पूष्णो नियमेन पिष्टम् प्राप्नोति (ऋदन्तत्वात्) इतरस्येन्द्रस्यानियमः" कर्कः इति पूर्वपक्षे "अर्द्धपिष्टं चोभयसामर्थ्यात्"।।१।। "पूष्णः पिष्टम् इतरस्यापिष्टमिति विकल्पप्रायेषु तण्डुलेषु पिष्टानामावापः करिष्यते अतः पाकद्वैधं नाशङ्क्यम्" कर्कः। इन्द्राग्निदेवताके २विशाखानक्षत्रे च द्विदेवादयोऽप्यत्र। "त्रिकोत्तरावारुणनैर्ऋतेन्द्रपूर्वात्रयब्रह्मभयुग्दशैव। मध्यानि नेष्टान्यनलानिलेशद्विदेवचित्राक्षिमधान्तकानि" वशिष्ठः

द्विदेह पु० द्वाभ्यां देहोऽस्य। गजानने गणेशे त्रिका०। इभाननशब्दे ९८१ पृ० दृश्यम्। चरांस्थिरद्यात्मकेषु २मिथुनकन्याधनुर्मीनाख्यराशिषु। राशिविशेषाणां द्व्यात्मकत्वं द्व्यात्मकशब्दे दृश्यम्। द्वितत्वादयोऽप्यत्र।

द्विद्वादश पु० द्वितीयः द्वादशश्च वरकन्ययोः राशिभेदः दोषसाधनमत्र द्वत्तौ संख्याशब्दस्य पूरणार्थत्वं त्रिभागयेणादिवत् ज्ञेयम्। वरकन्याराश्योर्द्वितीयद्वादशान्यतररूपे वैवाहिके अशुभसूचकदोषभेदे उपयमशब्दे १२४१पृ० दृश्यम्। "अनपत्यता त्रिकोणे द्विद्वादशे च दारिद्र्यमिति" दीपिका तत्र वरराशेरपेक्षया कन्याया द्वादशराशिकत्वे तु न दोषः। "कन्यायाः द्वादशे भर्त्ता भर्त्तुः कन्या द्वितीयगा। द्विद्वादशं विजानीयात् वर्जितं त्रिदशैरपि" विधिप्र निषेधात् "द्विद्वादशे धनगृहे धनहा च कन्या रिपुफे स्थिता धनवती पतिवल्लभा च" ज्यो०त० प्रतिप्रसवात्। समाहारद्विगुः। २द्वितीये धनस्थाने द्वादशे व्ययस्थाने च न०। "द्विद्वादशे खला हानिम्" नी० ता०।

द्विधा अव्य०द्वि+प्रकारे धाच्। द्विप्रकारे "षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः"। "द्विधेव भिन्नं बलिले विवस्वतः" रघुः। [क्षीरे पु० हेमच०।

द्विधागति त्रि०द्विधा गतिरस्य। १द्विप्रकारगतियुक्ते। २क्ष-

द्विधातु त्रि० द्वौ धातू यत्र। १धातुद्वयघटिते कांस्यरैत्यादौ २गणेशे शब्दरत्ना०। तस्य देवगजदेहद्वयघटितत्वात् तथात्वम्। [शब्दच० २द्विस्वभावेषु मिथुनादिराशिषु पु०।

द्विधात्मक पु०न० द्विधा आत्मा यस्य कप्। १जातीकोषे

द्विधालेख्य त्रि० द्विधा लेख्यम्। १द्विप्रकारे लेखनीये २द्विलाखद्वये पु० राजनि०। [रोगयुते हेमच०।

द्विनग्नक पु० द्विः नग्नकः। स्वाभाविकानाहतमेहे दुर्धर्म-

द्वि(द्वा)नवति स्त्री द्व्यधिका नवतिः वा स्यात्। १द्व्यधिकनवतिसंख्यायां २तद्युक्ते च। ततः पूरणे डट् द्वि(द्वा)नवत, तमप् द्वि(द्वा)नवतितम ३तत्संख्यापूरणे त्रि० डटि स्त्रियां ङीप्।

द्विनिष्क त्रि० द्वाभ्यां निष्काभ्यां क्रीतम् तद्धितार्थद्विगुः ततः ठञ् तस्य नित्यं लुकि प्राप्ते" "द्वित्रिपूर्वान्निष्कात्" पा० तस्य वा लुक्। द्वाभ्यां निष्काभ्यां क्रीते पक्षे ठञः अवसे "परिमाणान्तस्यासंज्ञाशाणयोः" पा० उत्तरपदवृद्धिः। द्वैनिष्किक तत्रार्थे, द्वौ निष्कौ परिमाणमस्य अण् तस्य लुक्। २द्विनिष्क तत्परिमाणयुते त्रि०।

द्विप पुंस्त्री० द्वाभ्यां सुखगुण्डाभ्यां पिबति पा-क। १गजे अमरः। "विपूर्ष्मसाण्यन्त्रवणोदरं द्विपाः" साधः। "स्कन्दनाग्नैः समे युध्येदनूपे नौद्विपैस्तथा" मनुः २नागकेशरे पु०।

द्विपत्त्र पुंस्त्री द्वौ पत्त्रौ यस्य। १खगमात्रे २माषे पु०

द्विपञ्चमूली स्त्री द्विधा पञ्चमूली। दशमूले "द्विपञ्चमूली क्षीरतगरमद्रदारुसरिवसमुष्विङ्गुदाशाद्विद्राक्षाद्विद्वाक्षिद्वम्" सुश्रु०। दशमूलं च दशमूलशब्दे २४९२ पृ० दृश्यम्।

द्वि(द्वा)पञ्चाशत् स्त्री द्व्यधिका पञ्चाशत् वा स्यात्। १द्व्यधिकपञ्चाशत्संख्यायां २तद्वति च। ततः पूरणे डट् द्वि(द्वा) पञ्चाश, तमप् द्वि(द्वा) पञ्चाशत्तम तत् संख्यापूरणे त्रि० स्त्रियां डटि ङीप्।

द्विपण्य त्रि० द्वाभ्यां पणाभ्यां क्रीतं "पणपादमाषशताद्यत्" पा० यत्। द्वाभ्यां पणाभ्यां क्रीते

द्विपत्त्रक पु० द्वे पत्त्रे अस्य संज्ञायां कन्। १चण्डालकन्दे पारस्करनिवण्टुः २द्विदलकमले वा कप्।

द्विपथ न० द्वयोः पथोः समाहारः समा०द्वि०-अच्समा०। (दोमाषापथ) १द्वयोः पथोः समाहारे। द्वौ पन्थानौ यत्र। २मार्गद्वययुक्ते देशादौ त्रि०।

द्विपद पु० द्वे पदे यस्य। "द्विपदे च चतुष्पदा ऋदेवपक्षिराक्षसाः" १प्रश्नसारोक्ते सप्तव्यादौ। २द्विपदघटिते समासे पु०। ३राशिभेदे च "मिथुनतुलाघटकन्या द्विपदाख्याचापपूर्वभागश्च" ज्यो०त०"द्विपदवशगाः सर्वे सिंहं विहाय चतुष्पदाः" ज्यो०त०। समा०द्वि०। ४पदद्वये न०। ५पदद्वयात्मके वास्तुमण्डलस्थे कोष्ठभेदे।

द्विपदा स्त्री द्वौ पादावस्य "संख्यासुपूर्वेति" पा॰पादस्यान्त्यलोपः"टाबृचि"टापि पादः पद्भावः। द्विपादयुक्तायाम्ऋचि

द्विपदिका स्त्री द्वौ पादौ दण्डौ यत्र वुन् स्त्रीत्वम्। द्वौ पादौ यत्र दण्डः १तत्रार्थे "द्वौ पादौ दण्डितो द्विपदिकां व्यवहरति द्विगुणं ददातीत्यर्थः" सि॰कौ॰ अत्र पादशब्दस्य गुणवाचित्वाभिप्रायेण द्विगुणमित्युक्तमिति बोध्यम्। द्विपदी स्वार्थे क स्वार्थः। २गीतिभेदे "गुरुद्वा द्विपदिका गीतिर्लम्बेत्यभिधीयते" भरतः। "द्विपदिकया दिशोऽवलोक्य निःश्वस्य सास्रम्" विक्रमो॰।

द्विपदी स्त्री द्वौ पादौ यस्याः पादः अन्त्यलोपे कुन्मपद्या॰ ङीप् पद्भावः। छन्दोभेदे १द्विपदयुक्तगीतिभेदे २मात्राछन्दोभेदे च "आदौ षट्कलसङ्घटितमेतत् तदनु पञ्चचतुष्कलमुर्वल्लं द्विपदी भवतीह विंशत्यष्टकलं दलम्" तच्छब्दम्। "गायत्र्यास्त्रेकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे" शत॰ब्रा॰ १४ ८।१५।१०। त्रैलोक्यात्मकपादैकपदी भवसि त्रैविद्यरूपपादेन त्वं द्विपदी" भा॰। तेन अवयवरूपचरणवाचित्वाभावात् टाबचीत्यस्य न प्रवृत्तिः गायत्र्यास्त्रिपादत्वात् इति दृश्यम्।

द्विपर्णी स्त्री द्वे पर्णे यस्याः जातित्वात् ङीप्। १वनकोल्यां रत्नमा॰ १पर्णद्वययुक्ते त्रि॰ स्त्रियां टाप्।

द्विपमद पु॰ ६त॰। १हस्तिमदे २गन्धद्रव्यभेदे च राजनि॰।

द्विपात्र न॰ द्वयोः पात्रयोः समाहारः समा॰ द्वि॰ पात्रा॰ न ङीप्। पात्रद्वये। तद् हरति आवहति वा "दिगोर्ङ्ग"पा॰ ङन् पक्षे च द्विपात्रिक द्विपात्रीण स्वपक्षे ठञ् तस्य अध्यर्द्धेति लुकि दिगोरिति ङीपि प्राप्ते पात्रादित्वात् न ङीप्। द्विपात्रहारके तदावाहके च

द्विपाद पु॰ द्वौ पादौ यस्य बहु नान्त्यलोपः। वानरादौ पशुभेदे "तद्वो द्विपादाः पशवस्तैरेवैनदेतद्व्यवहरति" शत॰ब्रा॰ ६।८।२।५। २वृक्षभेदे "एकपादा द्विपादाश्च तथा द्विशिरसोऽपरे" हरिवं॰१६८अ॰ नानार्थकोक्तौ। लोके तु अन्त्यलोपः द्विपाद् इत्येव। पादद्वययुक्ते मनुष्यादौ।

द्विपाद्य त्रि॰ द्वौ पादौ परिमाणमस्य "पण्मासपादशतात्यत्"पा॰ यत् पादः पदिति न, अस्योपस्य स्थानिवत्त्वात् "पद्यन्यतदर्थे" पा॰ इत्यपि न प्राग्यङ्गस्यैव तत्र ग्रहणात्। १द्विपादपरिमाणयुते दण्डप्रायश्चित्तादौ २द्विगुणदण्डे अमरः। तत्र पादशब्दस्य गुणवाचित्वात् द्विगुणपरतेति बोध्यम्।

द्विपाधिप पु॰६त॰। १ऐरावते २गजमात्रे च "तत्पूर्वमंशद्वयं द्विपाधिपाः" माघः गजाधिपादयोऽप्यत्र।

द्विपायिन् पु॰ द्वाभ्यां शुण्डाभ्यां पिबति पा-णिनि। गजे हारा॰ स्त्रियां ङीप्।

द्विपास्य पु॰ द्विपस्यास्यमेवास्यमस्य। गणेशे। स्वरनि॰।

द्विपुट पु॰ द्वे पुटे यस्य। सुगन्धिद्रव्यतुल्यमके छन्दोभेदे पार॰

द्विपुरुष त्रि॰ द्वौ पुरुषौ प्रमाणमस्य तद्धितार्थे द्विगुः"प्रमाणे लोहिगोर्नित्यम्" पा॰ मात्रचो लुक्। पुरुषद्वयप्रमाणयुक्ते स्त्रियां वा ङीप् द्विपुरुषी (षा) वा परिखा।

द्विपृष्ठ पु॰ ब्रह्मसत्रे राजभेदे हेमच॰।

द्विबन्धु पु॰ द्वयोर्लोकयोर्बन्धुः। द्वयोर्लोकयोर्बन्धौ वह्नौ। "स द्विबन्धुर्वैतरणः" भा॰१०।६१।१७

द्विभाव त्रि॰ द्वौ भावौ यस्य। द्विस्वभावयुक्ते ततः ब्राह्मणा॰ भावे कर्मणि च ष्यञ्। द्वैभाव्य द्वित्वे न॰।

द्विभूम त्रि॰ द्वे भूमी यत्र अच्समा॰। भूमिद्वययुक्ते प्रासादादौ (दोतला)

द्विमात पु॰ द्वे मातरौ यस्य समासान्तविधेरनित्यत्वात् न कप्। १गणेशे हेमच॰। कप् द्विमातकोऽप्यत्र। २जरासन्धे च

द्विमातृज पु॰ द्वाभ्यां मातृभ्यां जायते जन-ड। १गणेशे द्वैमातुरशब्दे दृश्यम्। २जरासन्धसूनौ च जरासन्धशब्दे २०६० पृ॰ दृश्यम्।

द्विमात्र पु॰ द्वे मात्रे उच्चारणकालभेदोऽस्य। दीर्घस्वरे आ ई इत्यादौ "एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते" शिक्षा। [युक्ते।

द्विमाष त्रि॰ द्वौ माषौ प्रमाणमस्य यत्। माषद्वयपरिमाण

द्विमास त्रि॰ द्वौ मासौ भूतः "द्विगोर्यप्" पा॰ यप्। मासद्वयं व्याप्य १भूते २तद्याभूतवयस्के च।

द्विमीढ पु॰ हस्तिनापुरकारकहस्तिनृपसुतभेदे "तेनेदं निर्मितं पूर्वं हस्तिनापुरमुत्तमम्। हस्तिनश्चापि दायादास्त्रयः परमधार्मिकाः। अजमीढो द्विमीढश्च पुरमीढस्तथैव च" हरिवं॰ २०अ॰

द्विमुख पुंस्त्री॰ द्वे मुखे यस्य। १मुखद्वययुक्ते राजसर्पे हला॰। २मुखद्वययुक्ते त्रि॰ स्त्रियां स्वाङ्गत्वात् वा ङीष्। ३क्षणिरोगभेदे पु॰ "शूरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः" सुश्रुतः। द्वे मुखाः स्वस्य मुखे यस्याः ङीष्। ४उभयतोमुख्यामर्द्धप्रसूतायां धेन्वां स्त्री। उभयतोमुखशब्दे १२६२ पृ॰ दृश्यम् "द्विमुखीगोप्रदातारः कपिलाद्यमतत्पराः" काशीख॰ ४अ॰ ङीप्।

द्विमुनि अव्य॰ द्वौ मुनी पाणिनिकात्यायनौ वंद्यौ । "संख्या-वंद्येन" पा॰ अव्ययी॰। तुल्यविद्यायुक्तमुनिद्वये। "द्विमुनि व्याकरणस्य, विद्याविद्यावतारभेदात् द्विमुनि व्याकरण मित्यपि साधु" सि॰कौ॰

द्विमूषलि अव्य॰ द्वे मूषले यत्र प्रहरणे अव्ययी॰ द्विदण्ड्या॰ रच् समा॰। मूषलद्वययुक्ते प्रहरणे ।

द्विमूर्द्ध त्रि॰ द्वौ मूर्द्धानावस्य बहु समा॰ । शीर्षद्वययुक्ते "बहुमूर्द्धौ द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां मृधे" भट्टिः अस्योन्नोदात्तत्वम् स्त्रियां ङीष् । संज्ञायान्तु क्वचित् न समा॰ । द्विमूर्द्धन् दनुपुत्रभेदे "अभवन् दनुपुत्राश्च इत्युपक्रमे "द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिराः प्रभुः" हरिवं॰ ४अ॰ ।

द्वियजुस् स्त्री द्वे यजुषी उपधाने अस्याः ।१इष्टकाभेदे द्वे यजुषी इव शरीरे अस्य । २यजमाने च यथोक्तं शत॰ब्रा॰ "अथ द्वियजुषमुपदधाति । इन्द्राग्नी अकामयेतां स्वर्गं लोकमियावेति तावेतामिष्टकामपश्यतां द्वियजुषमिमामेव तामुपादधातां तामुपधायास्यै प्रतिष्ठायै स्वर्गं लोकमैतां तथैवैतद्यजमानो यद्द्वियजुषमुपदधाति येन रूपेण यत् कर्म कृत्वेन्द्राग्नी स्वर्गं लोकमैतां तेन रूपेण तत्कर्म कृत्वा स्वर्गं लोकमयानीति सा यद्द्वियजुर्भवति द्वे ह्येतां देवते अपश्यतां यद्येव द्वियजुषमुपदधाति यजमानो वै द्वियजुः तदाहुः । यदसावेव यजमानो योऽसौ हिरण्मयः पुरुषोऽयं कतमदस्येदं रूपमिति दैवो वाअस्य स आत्मा आसुषोऽयं तद्यत्र हिरण्मयो भवत्यमृतं वा अस्य तद्रूपं देवरूपममृतं हिरण्मयमथ यदियं मृदः कृता भवति मानुषं ह्यस्येदं रूपम्। स यदमूमेवोपदध्यात्। नेमामपश्यिष्यत्क्षिप्रे हाप्राणो लोकाद्व्रजमानः प्रेयादथ यदि मामपश्यिष्यति यदेवास्येदं मानुषं रूपं तदस्यैतदपश्यिष्यति तथेहानेनात्मना सर्वमायुरेति" शत॰ब्रा॰ ७।४।२।१६ यतो द्वे देवते एतामपश्यतामत एव द्वाभ्यां यजुर्भ्यामुपधीयते । स हिरण्मयः पुरुषोऽस्य यजमानस्य दैवत्य प्रयुक्त आत्मा शरीरम् । द्वियजुरिष्टका मनुष्यत्वयुक्त आत्मेत्यर्थः हिरण्मयत्वात् पुरुषस्य देवशरीरत्वं मृण्मयत्वाद् द्वियजुषो मानुषशरीरात्मत्वम्" भा॰ । ते च यजुषी शत॰ब्रा॰ ७।४।२।२१ उक्ते "यास्ते अम्बे ! स्वर्गे रुचः"।। "याश्च देवाः ! स्वर्गे रुचः"२। इति ।

द्वियमुन अव्य॰ द्वयोर्यमुनयोः समाहारः "नदीभिश्च" पा॰ "नदीभिः संख्या प्राग्वत् समाहारे चायमिष्यते" सि॰कौ॰ "समाहारे चेति" पा॰सूत्रे चकार एवकारार्थकः समाहारान्यव्यवच्छेदकस्तेन द्विगोरयमपवादोऽव्ययीभावः" मनो॰। द्वयोर्यमुनयोः समाहारे ।

द्विर पु॰ द्वौ रौ रेफौ वाचकशब्दोऽस्य । रेफद्वयघटितभ्रमरशब्दवाच्ये १मधुकरे २वर्वरे च ।

द्विरद पु॰ द्वौ रदौ प्रधानतया यस्य । १गजे अमरः २नागकेशरे च "समसेव समाक्रान्तं द्वयं द्विरदगामिना" रघुः "दुर्व्यैरिव स्थितिभ्रष्टां द्विरदैरुद्धरम्" माघः ।

द्विरदान्तक पुंस्त्री॰ ६तत॰ । सिंहे राजनि॰ स्त्रियां जातित्वात् ङीष् । [२सिंहे च ।

द्विरदाराति पु॰ ६तत॰। १शरभे अष्टापदे जन्तुभेदे पार॰नि॰

द्विरदाशन पुंस्त्री॰ द्विरदमश्नाति अश-भोजने ल्यु । सिंहे पार॰नि॰ स्त्रियां जातित्वात् ङीष् ।

द्विरभ्यस्त त्रि॰ द्विर्वारमभ्यस्तः । द्विगुणिते द्विरुक्ते ।

द्विरशन न॰ द्विर्वारमशनम् । द्विवारभोजने "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां सर्व्ववासिनां नित्यम् । अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" कात्यायनसं॰

द्विरसन पुंस्त्री॰ द्वे रसने जिह्वे यस्य। द्विजिह्वे सर्पे दारा॰ स्त्रियां जातित्वात् ङीष् ।

द्विरागमन न॰ द्विर्द्विवारमागमनम् । विवाहात् परत्र पितृगेहात् पतिगृहे वध्वाः पुनरागमने । तत्र नक्षत्रादि तत्स्वरूपञ्च ज्यो॰त॰ उक्तं यथा

"श्रीपतिसंहितायां प्रचेताः "पुष्याश्विमृगरेवाद्यादितिवसुस्वात्युत्तरारेवतीतारानायकरोहिणीषु शुभदामेषाश्विकुम्भे रवौ । वारेज्यान्वितेन्दुवित्तु शुभदे तारे प्रशस्ते विधौ कन्यामन्मथमीनतौलिमृगभे स्याद्द्विरागमनाद्यागमः" । नारायणपद्धतौ "हस्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति । पुनरागमनं वध्वास्तद् द्विरागमनं विदुः" ज्योतिःसारसंग्रहे "विवाहमादि प्रथमं वध्वा नागमनं यदि । तदा सर्वमिदं चिन्त्यं युष्माद्यद्वद्विचक्षणैः" कृत्यचिन्तामणौ "अत्र कन्यादिमे वर्षे श्वशुरस्य तथाब्दके । संप्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे" मत्स्यसूक्ते "भुक्त्वा पितृगृहे कन्या भुङ्क्ते स्वामिगृहे यदि । दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः"

अत्र विहितनक्षत्रादि बहु॰णी॰ उक्तं यथा

"चरेदयोजकार्यने घटाग्निमेषगे रवौ रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे । नयुग्ममीनकन्यकातुलाद्वये विल-

स्नके द्विरागमं नवधूवे चरेऽस्मे मृदूडुनि। दैत्येज्योऽभिमुखदक्षिणे यदि स्याद्भर्त्तुर्न हि शिशुगर्भिणी नवोढाः। बालस्येत् व्रजति विपद्यते नवोढा चेद्वन्ध्या भवति च गर्भिणी त्वगर्भा। नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः। न्यपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृद्भृशं। पितृ ऋक्षे चेत् कुचपुष्पसम्भवः स्त्रीणां न दोषः प्रतिशुक्रसम्भवः। भृग्वङ्गिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वाजसुनेः कुले तथा" सु० चि० "पूर्वं नववधूप्रवेशे जाते तदनन्तरं पराङ्मुखापि पितृमृक्षप्राप्तायामपि वध्वा यथेष्टवर्षाणि स्थितायाः पुनर्भर्तृगृहप्रवेशो द्विरागमशब्दवाच्यः। अयंचाचारः प्राच्योदीच्यपाश्चात्यानामेवेति। चरेदिति। अथ वधूप्रवेशकथनानन्तरं पुनर्वधूप्रवेशं द्विरागमनं वक्ष्यमाणनक्षत्रादिषु चरेत् कुर्यात्कदा? ओजहायने विषमवर्षे प्रथमे तृतीये पञ्चमे वा वर्षे सति। तथा घटाखिमेषगे कुम्भवृश्चिकमेषस्थिते रवौ। तथा वरस्य रवीज्यशुद्धिः रवेः सूर्यस्य इज्यस्य गुरोः शुद्धिस्तयोर्योगतः। शुभग्रहस्य सोमबुधगुरुशुक्राणामन्यतमस्य वासरे सति। मिथुनमीनकन्यातुलाद्वयाणामन्यतमे लग्ने शुभग्रहावलोकिते शुभयुक्ते वा सति। लघुन्यश्विनीपुष्यहस्ताः ध्रुवाणि प्रसिद्धानि चराणि श्रवणादित्रयपुनर्वसुस्वात्यः अक्षपोराक्षसस्तङ्गं मूलं मृदूनि प्रसिद्धानि एषु भेषु द्विरागमः प्रशस्त इत्यर्थः। यदाह ऋक्षोक्तयः "तिष्यादित्यसमीरणादितिवसुक्षीणयुत्तराणश्विनीरोहिण्यः शुभदाश्च वर्षमसमं मेषाखिकुम्भे रविः। कन्यामन्मथमीनमे नववधूयानं शुभे तौलिके देवाचार्यसितेन्दुसौम्यदिवसे शुक्रे गुरौ भास्करे" इति। यन्थकर्त्ता कानिचिद्भान्यधिकानि सूक्तानि तानि राजमार्तण्डेनोक्तानि। "नीहारांशुधनोत्तरादितिगुरुब्राह्मत्वराधाश्विनीमूलाहस्करवारुणानिलहरित्वाष्ट्रेषु यत्ते तिथौ। कुम्भाजाखिगते रवौ शुभकरे प्राग्रोदये भार्गवे स्वर्गे कीटघटालगे शुभदिने पक्षे च कृष्णेतरे। कृत्वा दिक्प्रतिलोमगौ बुधसितौ वाखाटगं दिक्पतिं चानीता शुभशालिनी नववधूर्नित्योत्सवैर्मन्दिरम्"। खाखाटगान् यात्रायां वर्जयति। शुक्रास्तनिषेधस्तु सामान्यतो वाग्यारामेत्यादिनोक्त एवेति न पुनरुक्तः। यद्यपि प्राक् सामान्येन कालशुद्धिरुक्ता तथाप्यावश्यकत्वे। "चैत्रे पौषे हरिस्थाने गुरोरस्ते सचिन्तुचे। नवोढागमनं नैव कृते पञ्चत्वमाप्नुयादिति" बादरायणवाक्याच्चैव वधूप्रवेशः कार्यः। दैत्येज्य इति। यदि दैत्येज्यः शुक्रोऽभिमुखदक्षिणे गन्तव्यदिगभिमुखे गन्तुर्दक्षिणदिग्भागे वा स्थितः स्यात्तदा शिशुर्बालः गर्भिणी गर्भवती नवोढा नूतनपरिणीता व्रजेत्तदा बालः विपद्यते म्रियते। गर्भिणी त्वगर्भा गर्भरहिता स्यात् गर्भस्रावती भवेत्। नूतनपरिणीता नवोढा वन्ध्या अपत्यसम्भवरहिता स्यात्। यदाह बादरायणः "अस्तङ्गते भृगोः पुत्रे तथा सम्मुखमागते। नष्टे जीवे निरंशे वा नैव सञ्चालयेद्वधूः। गर्भिण्या कालकेनापि नववध्वा द्विरागमे। पदमेकं न गन्तव्यं शुक्रे सम्मुखदक्षिणे। गुर्विणी स्रवते गर्भं बालो वा मरणं व्रजेत्। नवा वधूर्भवेद्वन्ध्या शुक्रे सम्मुखदक्षिणे"। यदि शुक्रः पूर्वस्यामुदितस्तदा पूर्वदिशि गन्तुः सम्मुख एव पश्चिमां गन्तुः पृष्ठे, दक्षिणां गन्तुर्वामे, उत्तरां गन्तुर्दक्षिणे स्यात्। तदा पूर्वोत्तरे दिशौ न गच्छेत् किन्तु पश्चिमदक्षिणे दिशौ गच्छेत्। यदि पश्चिमायामुदितः शुक्रः तदा पश्चिमां गन्तुः सम्मुख एव दक्षिणां गन्तुः दक्षिणः। पूर्वां गन्तुः पृष्ठे उत्तरां गन्तुर्वामः। तदा पश्चिमदक्षिणे दिशौ न यायात्। किन्तु पूर्वोत्तरे दिशौ गच्छेत्। "पृष्ठे भृगौ पुत्रवतीं प्रयाणे कान्तां कुलीनां सुभगां करोति। अग्रे सुखो वै विदधाति शुक्रो वैधव्यशोकौ खलु चास्त शुक्रः" इति। केचिद्दीपोत्सवप्रतिपदि नक्षत्रादिनियमं विनैव वधूप्रवेशं वाञ्छन्ति। उक्तञ्च "अस्तङ्गते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ। दीपोत्सववशेनैव कन्या भर्तृगृहं विशेत्" इति तदेतच्छिष्टाचारतो ज्ञेयम्। अत्र लग्नशुद्धिमाह बादरायणः "उपचयगते जीवे भृगौ केन्द्रोपगते। शुद्धे लग्ने शुभाक्रान्ते गन्तव्यं भर्तृमन्दिरम्" नगरप्रवेशे, विषयोदेशः आदिशब्देन ग्रामः। तस्योपद्रवे अन्यराजकृतोपद्रवे सति दुर्भिक्षादिना वोपद्रवे सति। गन्तव्यदिशि प्रतिशुक्रकटोषो नास्ति। करपीडने विवाहोद्देशेन यात्रायां सत्यां विबुधा देवास्तेषां यात्रा नगरकोटयात्रा देवयात्रा तीर्थयात्रा प्रयागादियात्रा तयोः। न्यपीडने न्यपाद्रात्रः सकाशात्पीडायां दण्डादिकृतायां सत्याम् नववधूप्रवेशने नूतनपरिणीतायाः कन्यायाः भर्तृगृहप्रवेशे एतेषामन्यतमभावे सति भार्गवः सम्मुखदोषकृद्भृशं। यथाह बादरायणः "स्वभवनपुरप्रवेशो देशानां विभ्रमे तथोद्वाहे।

नूतनवध्वागमने प्रतिशुक्रो न दुष्यतीति" । नूतनवधूनां स्वामिगृहगमनं प्रतिशुक्रयात्रायां महान्दोषः । तद्वाक्यं प्रागुक्तम् । अथ प्रौढस्त्रीणां द्विरागने तथा गोत्रभेदपरत्वेन प्रतिशुक्रापवादान्तरमाह पित्रेत्र इति । पितुरिदं पित्र्यम् । तस्मिन् पित्र्ये गृहे कुचौ स्तनौ पुष्यस्तः तत्सम्भवः स्यात्तदा स्त्रीणां प्रतिशुक्रसम्भवो दोषो नास्ति । उपलक्षणत्वाद्गुरुः सूर्यगुरुशुद्धिराहित्यसम्भवेऽपि दोषो नास्तीति । तदुक्तं चण्डेश्वरेण "पित्र्यागारे कुचकुसुमयोः सम्भवो वा यदि स्यात्पत्युः शुद्धिर्न भवति रवेः सम्मुखो वाथ शुक्रः । तूले लग्ने गुणवति तिथौ चन्द्रताराविशुद्धौ स्त्रीणां यात्रा भवति सफला सेवितुं स्वामिसद्म" इति । वाशब्दाद्गुरुशुद्धिरपि चेन्न भवतीत्यर्थः । अथ भृग्वङ्गिरोवत्सवसिष्ठकश्यपात्रिभरद्वाजवंशोत्पन्नानामपि प्रतिशुक्रसम्भवो दोषो नास्ति । यदाह बादरायणः "कश्यपेषु वसिष्ठेषु चात्रिभृग्वङ्गिरःसु च । भारद्वाजेषु वात्सेषु प्रतिशुक्रो न दुष्यति" इति । अयं चापवादो यात्रामात्रसाधारणः" न द्विरागमने, सम्मतिवाक्ये विशेषानुक्तेः । एवं प्राक्पद्योक्तोऽप्यपवादोज्ञेयः । केचिच्छुभं तेषामाहुः । यदाह महेश्वरः "नो तेषां प्रतिशुक्रपावमशुभं ये वत्सभृग्वङ्गिरोभारद्वाजवसिष्ठकश्यपकुलोत्पन्नास्तथाऽत्रेः कुले । देशानां विप्लवे च नियतं न स्याद्विवाहे तथा तीर्थानां गमने तथैकनगरे ग्रामे च सौम्ये तथेति" । सोमस्यापत्यं सौम्यो बुधः । बुधसांमुख्येऽपि भृग्वादिगोत्रोत्पन्नानामपि तथा यानमशुभं नास्ति चकारात् दुर्भिक्षाद्युपद्रवगङ्गावेऽन्येषामपि यानमशुभं नास्तीत्यर्थः तद्भिन्नं मूलवाक्यस्यापवादरूपस्यानुपलम्भात् । किं च यथा साधारण्येन यस्यां कस्यांचिद्दिशि यात्रायां शुक्राधिष्ठितादिनिषिद्धा सा च बादरायणादिवाक्यैरपोह्यते । तथा बुधसाम्मुख्ये गमननिषेधानुक्तेरपवादस्यानुक्तत्वदर्शनात् । ननु "प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः । बलेन शक्रतुल्योऽपि हतसैन्यो निवर्तते" इति वसिष्ठोक्तिरेव बुधसाम्मुख्यदोषनिषेधबोधिकास्तीति । किं च "कृजाय वृषभं दद्यात् स्वर्णं दद्याद्बुधाय च । तत्तत् सम्मुखजो दोषस्तत्क्षणादेव नश्यति" इति बुधसाम्मुख्यदोषनिराकरणार्थं अपि तदुक्तिरेवास्ति प्रमाणमिति चेत् । सत्यम् । प्रतिशुक्रं प्रतिबुधं इत्यादिवाक्यैर्बुधसाम्मुख्यमपि दोषावहमेवेति प्रतीयते । अत्रार्थवादोऽयमपि श्रीपतिना "प्रतीन्दुजं भूमिपतेर्गतस्य नान्येग्रहास्त्राणविधौ समर्थाः" इति । त्राणं रक्षणम् । नारदेनापि "प्रतीन्दुजकृतं दोषं हन्तुं शक्ता ग्रहा न हि" इति । तत्र गोत्रादिविषयत्वेन परिहारो योऽभिहितः स शुक्रसाम्मुख्ये एव नतु बुधसाम्मुख्ये गोत्रपरिहारस्तु दोषकरवाक्याभ्ने प्रतिशुक्रं न विद्यते इत्युक्तम् । ननु प्रतिशुक्रमित्यादिवाक्योपात्तस्य प्रतिबुधस्यायं परिहारोऽस्तु दोषकथनानन्तरमेव तस्याभिधानात् प्रतिशुक्रपदं तु सुख्यतां सूचयितुम् उपात्तं तदभिप्रायेण सौम्ये तथेति महेश्वरोक्तिः साधीयसीति चेन्न यदोषोऽभिमतः स्यात् सौम्ये तथेतिवद्भौमे तथेति वक्तव्यं स्यात् । तन्न नोक्तम् । किं च प्रतिशुक्रपदं सुख्यतां सूचयितुम् उपात्तमित्युक्तं तदप्ययुक्तम् । कुतः "शुक्रास्तदोषस्य महत्त्वोक्तेस्तद्विषयकोऽयं गोत्रादिपरिहारः । "कामं व्रजेद्वा प्रतिशुक्रमस्तङ्गते च यायान्न जिगीषुरत्रेति" श्रीपत्युक्तेः शुक्रास्तदोषस्यापवादो बुधानुकूल्यमपि तेनैव "अस्तङ्गतेऽप्यास्फुजिति प्रयायाद्बुधो यदि स्यादनुकूलवर्तीति" । अनुकूलवर्ती यातव्यदिगीशवर्ती । बुधप्रातिकूल्यं तु महादोषावहमेतद्वाक्यं तैरपि प्रागभिहितम् । परन्तु बुधास्तः समीचीनो न वेति न वचनं युक्तिपदर्शी वा काञ्चिदभ्यधायि । तस्माद्वाचनिकेऽर्थे न युक्तिः प्रभवेदिति । बुधसाम्मुख्ये गोत्रादिपरिहारो न शिरोमणिपदवीमारोहति । आदिशब्दात् "स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे । नूतनवध्वागमने प्रतिशुक्रविचारणा नास्ति" "एकग्रामे पुरे वापि दुर्भिक्षे राष्ट्रविप्लवे । विवाहे तीर्थयात्रायां प्रतिशुक्रो न दुष्यति" इति । तुल्यन्यायत्वाद्भौमसाम्मुख्येऽपि विशिष्टग्रहवचनाभावात् । किन्तु शुक्रसाम्मुख्य एव स परिहारः । सोऽपि सर्वेषां यात्रामात्रसाधारणः । परन्तु शिशुगर्भिणीनववधूनां "अस्तङ्गते भृगोः पुत्रे" इत्यादिना बादरायणादिवाक्यात्तु विशेषफलावगतिमात्रे तत्रैषां शिशादीनां बुधसाम्मुख्यविचारस्तु दुरापास्त एवेत्यलमतिप्रसङ्गेनेति शिवम्" पी॰धा॰

द्यागमद्विरागमादयोऽप्यत्र ।

द्विरात्र त्रि॰ द्वाभ्यां रात्रिभ्यां निर्वृत्तः तद्धितार्थद्वि॰ ठक् तस्य लुक् अच् समा॰ । १रात्रिद्वयसाध्ये २यागभेदे पु॰ "एकरात्रो द्विरात्रः :" अथ॰११।९।१० "व्युष्टि

द्विरात्रः" कात्या० १५।८।२२। २व्रतभेदे न०। समा० द्विगुः अच् समा०। ३रात्रिद्वये न०।

द्विरात्रीण त्रि० द्वाभ्यां रात्रिभ्यां निर्वृत्तादि ख तस्य न लुक्। रात्रिद्वयसाध्ये पक्षे ठञ्। द्वैरात्रिक तत्रार्थे

द्विराप पुंस्त्री० द्विः द्विवारमापिबति आ+पा-क। हस्तिनि शब्दमा० तस्य शुण्डेन प्रथमपानोत्तरं मुखेन पानात् द्विवारपायित्वात् तथात्वम् स्त्रियां ङीष्।

द्विराषाढ पु० "माधवादिषु षट्केषु मासि दर्शद्वयं यदा। द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः" सिंहरोक्ते मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वये। स चाषाढमलमासे भवति यथा "मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे। पौर्णमास्यद्वयं यत्र पूर्वाषाढाद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे" गारुडोक्ते मासभेदे च।

द्विरुक्त त्रि०द्विः द्विवारमुक्तः। १अभ्यस्ते द्वित्वप्राप्ते धात्वादौ २द्विवारं कथिते च।

द्विरूढा स्त्री द्विवारमूढा वह-कर्मणि क्त। द्विवारविवाहयुतायां पुनर्भूस्त्रियाम् हेमच०।

द्विरेतस् पु० द्वे रेतसी कारणमस्य। द्वाभ्यां पशुभ्यां रासभाश्वाभ्यां जाते १अश्वतरे गोऽजाभ्यां २जाते गर्दभे च "तएतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपद्यन् रासभं गोश्वावेव तद्यदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपद्यन्त्स्मात्प्रदेषएकः सनुद्विरेताः" शत०ब्रा० ६।२।१।२१। अत्र गर्दभस्य तथात्वमुक्तमश्वतरस्य तथात्वं च लोकप्रसिद्धम्।

द्विरेफ पु० द्वौ रेफौ वाचकशब्दोऽस्य। द्विरेफयुक्तभ्रमरशब्दवाच्ये १मधुकरे अमरः २वर्वरे हेमच० "मधु द्विरेफः कुसुमैकपात्रे" द्विरेफमालाः सविशेषसङ्गाः" कुमा०।

द्विर्वचन न० द्विरुच्यते वच-कर्मणि ल्युट्। १द्विरुक्ते द्विःकथिते अभ्यस्ते धात्वादौ च "द्विर्वचनेऽचि" पा० "न पदान्तद्विर्वचनेत्यादि" पा०।

द्विलक्षण त्रि० द्वे लक्षणे प्रकारौ यस्य। प्रकारद्वययुते द्विधाभिन्ने "समानयानकर्मा च विपरीतस्तथैव च। तदात्वायतिसंयुक्तः सन्विज्ञेयो द्विलक्षणः" मनुः। द्विलक्षणः द्विप्रकारः" कुल्लू०।

द्विवक्त्र पु० द्वे वक्त्रे अस्य। १सुखद्वययुते राजसर्प २दानवभेदे "एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः" हरिवं० २६३अ० नानादानवनामरूपाद्युक्तौ।

द्विवचन न० द्वौ द्वित्वमुच्येते अनेन वच-करणे ल्युट् कर्म षष्ठ्या समासः। द्वित्वबोधके पा० परिभाषिते औभ्यामित्यादौ तसुथस्प्रभृतौ च। "द्वेकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति" पा०।

द्विवज्रक पु० द्विगुणितः वज्रः संज्ञायां कन्। षोडशकोणे गृहभेदे "वज्रोऽष्टाश्रिर्द्विवज्रको द्विगुणः" बृ०सं० ५३अ०।

द्विवर्ष त्रि० द्वे वर्षे वयोमानमस्य ठक् तस्य लुक्। १द्विवर्षवयस्के गवादौ स्त्रियां टाप्। द्वे वर्षे अधीष्टो भृतो भूतो भावी वा ठञ् तस्य चित्तवति नित्यं लुक्। द्विवर्षं २सतृक्रत्य नियोजिते ३भृते कर्मकरे ४स्वसत्तयाव्याप्ते ५भाविनि च। अचेतने तु "वर्षाल्लुक् च" पा० लुक् पक्षे ख ठञ् च। द्विवर्षे द्विवर्षीण अचेतने व्याध्यादौ भविष्यति तु "वर्षस्याभविष्यतीति" पा० उत्तरपदवृद्धिः। द्विवार्षिक द्विवर्षभृते धान्यादौ यागादौ च भविष्यति तु नोत्तरपदवृद्धिः। द्वैवार्षिक इत्येव। "जनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः" मनुवाक्ये चित्तवत्यपि न लुक् आर्षत्वात् बोध्यम्। स्वार्थे क। द्विवर्षवयस्के त्रि० स्त्रियां टापि अतइत्त्वं द्विवर्षिका तत्रार्थे हेमच०

द्विवाहिका स्त्री द्विप्रकारं वाहयति वाहि-ण्वुल्। दोलायां शब्दमा० तया उभयपार्श्वयोः स्थारूढस्य वाहनात्तथात्वम्।

द्विविंशतिकीन न० द्वाविंशतिकमर्हति तत्परिमाणमस्य वा ख। द्वाविंशतिकार्हे तत्संख्यापरिमिते

द्विविद पु० १वानरभेदे स च रामसेनान्तर्गतः। "मैन्दश्च द्विविदश्चापि हनूमांश्चानिलात्मजः। जाम्बवान्ऋक्षराजश्च सुषेणसचिवाः स्थिताः" भा०व० २७९अ०। द्वापरयुगीये सौभद्वारस्थे २वानरभेदे च "सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः" भा०उ० १२९अ०। "वानरौ द्वौ महावीर्यौ मैन्दोद्विविद एव च। विजितौ युद्धदुर्मर्षौ जाम्बवांश्चापराजितः" हरिवं० १७४अ०। "समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः। ऐकाहिकज्वरं हन्ति तस्य नामानुकीर्तनात्"।

द्विविध त्रि० द्वे विधे अस्य। द्विप्रकारे "निकामतप्ता द्विविधेन वह्निना नभस्तरेणेन्धनसम्भृतेन च" कुमा०

द्विविन्दु पु० द्वौ विन्दू-लेखनाकारोऽस्य। विसर्गे वर्णभेदे।

द्विविस्त त्रि० द्वे विस्ते अर्हति परिमाणमस्य वा आर्हीयः ठक् तस्य वा लुक्। विस्तद्वयार्हे तत्परिमिते पक्षे ठकोऽलुक्। द्वैविस्तिक तत्रार्थे। [ध्यायिनि

द्विवेद त्रि॰ द्वौ वेदावधीते वेद वा अण् तस्य लुक्। द्विवेदा-

द्विवेशरा स्त्री द्वौ वेशौ यानस्थानरूपौ राति ददाति रा-क। लघुरथे नरवाह्यायां गन्त्र्यां हारा॰।

द्विव्रण पु॰ द्विविधो व्रणः प्राक्॰त॰। सुश्रुतोक्ते शारीरे आगन्तुके च द्विविधे व्रणे। तस्येदम् अ। द्विव्रणीय तद्धिकारेण चिकित्सितादौ। द्विविधाव्रणतद्भेदनिदानादि सुश्रुते दर्शितं यथा "अथातो द्विव्रणीयचिकित्सितं व्याख्यास्यामः। द्वौ व्रणौ भवतः शारीर आगन्तुश्चेति। तयोः शारीरः पवनपित्तकफशोणितसन्निपातनिमित्तः। आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतनपीडनप्रहाराग्निक्षारविषतीक्ष्णौषधशकलकपालशस्त्रचक्रेषुपरशुशक्तिकुन्ताद्यायुधाभिघातनिमित्तः। तत्र तुल्ये व्रणसामान्ये द्विकारणोत्थानप्रयोजनसामर्थ्याद्द्विव्रणीय इत्युच्यते। सर्वस्मिन्नेवागन्तु व्रणे तत्कालमेव शतोष्णः प्रस्तुतस्योपशमार्थं पित्तवच्छीतक्रियावधारणविधिर्विशेषः सन्धानार्थञ्च मधुघृतप्रयोग इत्येतद्द्विकारणोत्थानप्रयोजनमुत्तरकालन्तु दोषोपप्लवविशेषाच्छारीरवत्प्रतीकारः। दोषोपप्लवविशेषः पुनः समासतः पञ्चदशप्रकारः प्रसरणसामर्थ्याद्यथोक्तो व्रणप्रश्नाधिकारे शुद्धत्वात् षोडशप्रकार इत्येके। तस्य लक्षणं द्विविधं सामान्यं वैशेषिकञ्च। तत्र सामान्यं रुक्, व्रण गात्रविचूर्णने व्रणतीति व्रणः। विशेषलक्षणं पुनर्वातादिभिरुक्तविशेषः। तत्र श्यावारुणाभस्तनुः शीतपिच्छिलाल्पस्रावी रूक्षस्फुटचटायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्मांसश्चेति वातात्। छिन्नजः पीतनीलाभः किंशुकोटकाभोष्णस्रावी दाहपाकरागविकारो पीतपिडकाजुष्टश्चेति पित्तात्। प्रततचण्डकण्डूबहुलः स्थूलो घनः स्नायुशिरास्नायुजालावततः कठिनः पाण्डुवभासो मन्दवेदनः शुक्लपीतस्नान्द्रपिच्छिलास्रावी गुरुश्चेति कफात्। प्रवालदलनिचयप्रकाशः कृष्णस्फोटपिडकालालोपचितस्तुरक्तस्थानगन्धः सवेदनो धूमायनशीलो रक्तस्रावी पित्तलिङ्गश्चेति रक्तात्। तोददाहधूमायनप्रायः पीताभाभास्तदर्थस्रावी चेति वातपित्ताभ्याम्। कण्डूयनशीलः घनस्तोदो दाहरुक्कण्डूः शीतपिच्छिलस्रावी चेति वातश्लेष्मभ्याम्। गुरुः सदाह उष्णः पीतः पाण्डुस्रावी चेति पित्तश्लेष्मभ्याम्। रूक्षस्तनुस्तोदबहुलः सुप्त इव च रक्ताभास्तदर्थस्रावी चेति वातशोणिताभ्याम्। हतमण्डाभो मीनधावनतोयगन्धिर्मृदुर्विसर्पुष्णकृष्णस्रावी चेति पित्तशोणिताभ्याम्। रक्तोगुरुः पिच्छिलः कण्डूप्रायः स्थिरः सरक्तपाण्डुस्रावी चेति श्लेष्मशोणिताभ्याम्। स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वातपित्तशोणितेभ्यः। कण्डूस्फुरणचुमुचुमायनप्रायः पाण्डुघनरक्तस्रावी चेति वातपित्तश्लेष्मशोणितेभ्यः। दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तस्रावी चेति श्लेष्मपित्तशोणितेभ्यः। त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः। निर्दहननिर्मथनस्फुरणतोददाहपाकरागकण्डूस्रावबहुलोनानावर्णवेदनास्रावविशेषोपेतः पवनपित्तकफशोणितेभ्यः। जिह्वातलाभो मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः सुव्यवस्थितो निरास्रावश्चेति शुद्धो व्रण इति।"

द्विशत न॰ द्विगुणं शतम्। १शतद्वये। पूरणे ड। २ततसंख्यापूरणे त्रि॰। ततस्समप् द्विशततम ततसंख्यापूरणे त्रि॰। द्विशतेन क्रीतम् कन्। "शताच्च ठन्यतावसमासे" पा॰ असमास इति विशेषणात् न ठन्यतौ द्विशतक। तत्क्रीते त्रि॰ द्वयोः शतयोः समाहारः द्वीप्। ३द्विशती शतद्वयसमाहारे स्त्री।

द्विशतिका द्वे द्वे शते ददाति "पादशतस्य संख्यादेर्वीप्सायां वुन्" पा॰ वुन् वुञ्न् स्त्रियामेव। द्विद्विशतदाने

द्विशत्य त्रि॰ द्विशतेन क्रीतम् "शतपादमाषशताद्यत्" पा॰ यत्। द्विशतेन क्रीते।

द्विशफ पुंस्त्री द्वौ शफौ यस्य। छिन्नखुरे द्विखुरे पशुभेदे "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चैमे स्वविरुद्धश्च सप्तमः" भाग॰२।१०।२ "कार्पासकौटजोर्णानां द्विशफैकशफस्य च" मनुः।

द्विशरीर पु॰ द्वे चरस्थिरात्मके शरीरे अवयवे अस्य। चरस्थिरात्मके मिथुनकन्याधनुर्मीनरूपे राशिभेदे तेषां च प्रथमार्द्धस्य स्थिरसान्निध्यात् स्थिरात्मकत्वं चरमार्द्धस्य चरसान्निध्याच्चरत्वम्। हितनुहिबुकादयोऽप्यत्र।

द्विशस् अव्य॰ द्वौ द्वौ ददाति करोति वा शस्। एकक्रियया द्वयोर्व्याप्तौ। "द्विशः पात्राणि संवादयति" कात्या॰श्रौ॰ २।३।६

द्विशाण त्रि॰ द्वाभ्यां शाणाभ्यां क्रीतम्। "द्विगुपूर्वादच्च" पा॰ ठञ् तस्यैव "अध्यर्द्धपूर्वेति" पा॰ लुक्। शाणद्वयक्रीते पक्षे अण् "परिमाणान्तस्यासंज्ञाशाणयोरिति" पा॰ पर्युदासादादिवृद्धिः। द्वैशाण पक्षे यत्। द्विशाण्य तत्रार्थे

द्विशीर्ष पु॰ द्वे शीर्षे अस्य। वह्नौ शब्दच॰।

द्विशूर्प त्रि॰ द्वाभ्यां शूर्पाभ्यां क्रीतम् "शूर्पादञन्यतरस्याम्" पा॰ अञ्ठञौ वा "अध्यर्द्धपूर्वद्विगोर्लुक्" पा॰ तयोः लुक्। द्वाभ्यां शूर्पाभ्यां क्रीते, द्वयोः शूर्पयोः समाहारः। द्विशूर्पी तया क्रीतमिति विग्रहे ठञेव, न अञ् शूर्पान्तत्वेऽपि प्रत्ययविधौ तदन्तग्रहणनिषेधात्। ठञश्च न लुक् तस्य द्विगुनिमित्तत्वाभावात् "परिमाणान्तस्येति" पा॰ उत्तरपदवृद्धिः। द्विशौर्पिक तत्रार्थे त्रि॰ स्त्रियां ङीप्।

द्विशृङ्गिका स्त्री द्वे शृङ्गे इव फले अस्याः कप् अतइत्वम्। मेढ्रवल्लत्रां पारस्करनिघ॰।

द्विष वैरे अदा॰ उभ॰ सक॰ अनिट्। द्वेष्टि द्विष्टे—अद्विषत्—अद्विषुः। अद्विक्षत् त द्विक्षे दिद्विषे। "यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि" "न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते" गीता "ततोऽद्विषुर्निरालोके स्वेभ्योऽन्येभ्यश्च राक्षसाः" भट्टिः "संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिम्" मनुः आर्षत्वात् तुम्।

द्विष् त्रि॰ द्वेष्टि द्विष—क्विप्। शत्रौ अमरः। "रन्ध्रान्वेषणदक्षाणां द्विषामाभिमतां ययौ" रघुः।

द्विष त्रि॰ द्विष—कर्त्तरि क। द्वेषकारके शत्रौ "तन्मित्रपूजा तद्रिद्विषत्वम्" दृ॰सं॰७८अ॰।

द्विषत् त्रि॰ "द्विषोऽमित्रे" पा॰ प्रथमासामानाधिकरण्येऽपि द्विष—शतृ। द्वेषकारके शत्रौ अमरः "पार्थेनाथ द्विषन्नृसरम्" माघः।

द्विषन्तप त्रि॰ द्विषन्तं तापयति "द्विषत्परयोस्तापेः खच्" पा॰ खचि हुखः "अरुर्द्विषदजन्तस्य" पा॰ मुम् संयोगान्यतकारस्य लोपः। शत्रुतापके। घटघटीग्रहणाद्विकृविशिष्टपरिभाषा अनित्या तेन द्विषतीं तापयतीत्यादौ न खच् किन्तु अण्। द्विषतीताप इत्येव सि॰कौ

द्विषष् त्रि॰ ब॰व॰। द्विगुणिताः षट्। द्वादश "तुष्टायां तोषमापन्नोऽजनयद्दाशात्मजान्। इत्युपक्रमे सुदेवोरोचनौ द्विषट्" भाग॰ ४।१।७

द्विषाष्टिक त्रि॰ द्वे षष्टी अधीष्टो भृतो भूतो भावी वा ठञ् उत्तरपदवृद्धिः। द्वे षष्टी दिनानि व्याप्य १भृते २भूते ३भाविनि च। [ठदा॰ दृश्यम्।

द्विषेण्य त्रि॰ द्विष—एण्यन् किच्च। द्वेषशीले अद्विषेण्यशब्दे

द्विष्ट त्रि॰ द्विष—कर्मणि क्त। द्वेषविषये "निष्टप्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः" भाषा॰ द्वेषशब्दे दृश्यम्। द्वेष्ट+पृषो॰। २ताम्रे न॰ सारसुन्दरी।

द्विष्ठ त्रि॰ द्वयोस्तिष्ठति स्था—क "अन्वाम्रेति" पा॰ षत्वम्। १द्वयोः स्थिते संयोगविभागादौ २स्थानद्वयस्थिते "द्विष्ठास्तिथिसंख्याभ्यस्तान्द्रवासरभाजिताः" सू॰सि॰। द्विः द्विवारं स्थितम् वा विसर्गलोपे न षत्वम। द्विस्थ द्विवारस्थिते त्रि॰ "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्धा द्विस्था भूरूनयुता दलिता बाधे तयोः स्यातां" लीला॰।

द्विस् अव्य॰ क्रियागणने द्वि+सुच्। द्विवारक्रियादौ "द्विः शरं नाभिसन्धत्ते द्विः स्थापयति नाश्रितान्। द्विर्ददाति न चार्थिभ्यो राजा द्विर्जेव भाषते"। "त्रिःप्राश्याप्यो द्विरभ्यूह्य सुखमेतान्युपस्पृशेत्" ति॰त॰ "द्विःप्रसूत्याक्षतोऽसुखम्" मनुः।

द्विसम त्रि॰ द्वे समे परिमाणमस्य ठञ् तस्य लुक्। १द्विवर्षपरिमाणे। द्विसमसधीष्ट इत्यादौ ठञ् "परिमाणान्तस्यासंज्ञाशाणयोः" पा॰सू॰काशपरिमाणस्यापवादम् "संख्यायाः संवत्संख्यस्य च" पा॰ संवत्सरस्य पृथगुपादानात् नोत्तरपदवृद्धिः, अध्यर्द्धेत्यादिना न लुक् अस्य ठञो द्विगुनिमित्तत्वाभावात्। द्वैसमिक द्विसमव्यापके ज्वरादौ।

द्विस(सा)हस्र त्रि॰ द्वाभ्यां सहस्राभ्यां क्रीतम् द्वे सहस्रे परिमाणमस्य वा अण्। ठञादेरपवादः तस्य वा लुक्। १द्विसहस्रक्रीते २द्विसहस्रपरिमिते च। द्विसहस्रपरोदायः स्त्रियै देयो धनस्य तु" दायभा॰। २द्विगुणितसहस्रे च

द्विसहस्राह पु॰ द्विराहृत्तं सहस्रं शाक॰ त॰ द्विसहस्रं द्विगुणसहस्रमहीणि यस्य बहु॰ समा॰। अनन्ते क्षेम॰ तस्य सहस्रवत्कालेन प्रतिसुखं द्विदिनेतत्वात् तथात्वम्।

द्विसांवत्सरिक त्रि॰ द्विवत्सरं भूतादि ठञ्। "संख्यायाः संवत्सरसंख्यस्य च" पा॰ उत्तरपदवृद्धिः। द्विवर्षं व्याप्य भूतादौ। [द्विसप्तति व्याप्य भूतादौ।

द्विसप्ततिक त्रि॰ द्विसप्ततिं भूतादि ठञ् उत्तरपदवृद्धिः

द्विसौत्य त्रि॰ द्विवारं सौतया कृतेन समितं "नौवयोधर्मेत्यादिना" पा॰ यत्। द्विवारं कृतसोमे।

द्विसुवर्ण त्रि॰ द्वाभ्यां सुवर्णाभ्यां क्रीतं ठक् अध्यर्द्धेति लुक् १द्वाभ्यां सुवर्णाभ्यां क्रीते। द्विसुवर्णेन क्रीतमिति विग्रहे तु न लुक् ठको द्विगुनिमित्तत्वाभावात् परिमाणान्तत्वादुत्तरपदवृद्धिः। द्विसौवर्णिक द्विसुवर्णेन क्रीते। समाहारद्विगुः। २सुवर्णद्वये स्त्री ङीप्।

द्विस्तना स्त्री द्वौ स्तनाविव स्तदवयवौ यस्याः अस्याकृत्वात् ङीप्। इष्टकाकृतिभेदे सा च कात्या॰ श्रौ॰ १६।४ सूत्रे दर्शिता। इष्टकाशब्दे ९९१ पृ॰ दृश्यम्। "स्तनाविवाप्येषूच्यन्ते द्विस्तनामष्टस्तनामेके" कात्या॰श्रौ॰१६।४।१,२।

द्विस्तावा स्त्री द्विर्द्विगुणिता तावती । "द्विस्तावा त्रिस्तावा वेदिः" पा० नि० । प्रकृतौ यावती वेदिः ततो द्विगुणायां वेद्यां सि० कौ० ।

द्वि(द्विः)स्विन्न न०द्विवारं स्विन्नं दत्तौ सुजर्थे द्विशब्दः विसर्गयुक्ते तु सुजन्तः । द्विवारपक्वे तण्डुले (उसना चाउल) एकवारं धान्यावस्थायां तस्य स्विन्नता द्वितीयवारं तण्डुलावस्थायामिति द्विःस्विन्नत्वम् । द्वि(द्विः)स्विन्नमन्नं पृथुकं शुद्धं देशविशेषके । नात्यन्तशस्तं विप्राणां भोजने च निवेदने । न भक्ष्यं तद्यतीनाञ्च विधवाब्रह्मचारिणाम् । ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम्" ब्रह्मवै० पु० ब्रह्मख० । हस्तिनि शब्दर० ।

द्विहन् पु० द्विर्हन्ति हन–क्विप् दत्तौ सुजर्थे द्विशब्दः ।

द्विहल्य त्रि० हलस्य कर्षे यत् द्विवारं हल्यः । द्विवारं हलकृष्टक्षेत्रे (दोचसा भूमि) अमरः ।

द्विहायन त्रि० द्वौ हायनौ वयःकालो यस्य । १द्विवर्षे [पश्चादौ स्त्रियां हायनान्तत्वात् ङीष् । "द्विहायनी द्विवर्षा गौः" अमरः । समाहारद्वि० । २वर्षद्वये न० पात्रा० न ङीप् । "शुक्लं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्" मनुः । द्विहायनं व्याप्य व्रतं कुर्यात् इत्यर्थः ।

द्विहीन त्रि० द्वाभ्यां स्त्रीपुंसाभ्यां हीनम् । क्लीवलिङ्गशब्दे "द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्" अमरः ।

द्विहृदया स्त्री द्वे हृदये यस्याः । गर्भिण्याम् दोहदशब्दे १७६८ पृ० द्रष्टव्यम् ।

द्वीन्द्रियग्राह्य त्रि० द्वाभ्यामिन्द्रियाभ्यां चक्षुषा त्वचा च ग्राह्यः उत्तरपदद्विगुः । "संख्यादिरपरत्वान्तो द्वन्द्वत्वं क्लेह एव च । एते तु द्वीन्द्रियग्राह्याः" भाषा० उक्ते त्वक्चक्षुषोर्ग्रहणयोग्ये पदार्थे ।

द्वीप पु० न० अर्द्धर्चा० द्विर्गता द्वयोर्वा दिशोर्गता आपोऽत्र अ समा० "द्व्यन्तरुपसर्गेभ्योऽप ईत्" पा० ईत् । जलमध्यस्थस्थलभेदे वारिवेष्टिते तटभेदे अन्तरीपे अमरः । भूम्यां प्रधानद्वीपाश्च नवैव तेषां नाम स्थानभेदाश्च सि० शि० उक्ता यथा "भूमेरर्द्धं चारसिन्धो रुद्रकस्य जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य वास्ये चारक्षीराद्यम्बुधीनां निवेशः । शाकं ततः शाल्मलमत्र कौशं क्रौञ्चञ्च गोमेदक पुष्करं च" । जम्बूद्वीपशब्दे २०४२ पृ० द्रष्टव्यम् । "द्वीपान्तरानीतलवङ्गपुष्पम्" अन्येऽपि उपद्वीपा रमणकादयः सन्ति तेऽपि नव मिलिता अष्टादश । "अष्टादशद्वीपनिखातयूपः" रघुः "नवद्वयद्वीपपृथग्जलयन्त्रियाम्" नैष० तोयोत्थिते २पुलिनमात्रे च द्वैपायनशब्दे द्रष्टव्यम् । "कूर्मपाहभमाकीर्णां विपुलद्वीपशोभिताम्" भा० व० ६४अ० । लक्षणया द्वीपतुल्ये श्रयवलम्बनस्थाने च । "वृकोदरः सव्यसाची यमौ च कोऽत्र द्वीपः स्यात्तुमुले वस्तदानीम्" भा० स० ६१अ० । "यस्यैषामभवत् द्वीपः कुन्तीपुत्रो वृकोदरः" भा० उ० ४९अ० । द्वौ वर्णौ ईयते ई–बा० पक् । ४व्याघ्रचर्म्मणि न० भरतः । तदस्यास्ति अच् । ५व्याघ्रे पु० । [राजनि० ।

द्वीपकर्पूर पु० द्वीपस्य द्वीपान्तरस्य कर्पूरः । चीनकर्पूरे

द्वीपखर्जूर न० द्वीपस्य द्वीपान्तरस्य खर्जूरम् । महापारे राजनि० । [राजनि० ।

द्वीपज न० द्वीपे द्वीपान्तरे जायते जन ड । महापारे

द्वीपवती स्त्री द्वीपोऽस्त्यस्याम् मतुप् मस्य वः ङीप् । १भूमौ २नद्याञ्च "अलङ्कृतं द्वीपवतीं माहिष्मतीं रम्यतीरयां" भा० आ० १६७ अ० । [राजनि० ।

द्वीप(पि)शत्रु स्त्री(पिनः)पस्य व्याघ्रस्य शत्रुरिव । शतावर्य्याम्

द्वीपिका स्त्री द्वीपः व्याघ्रः नाश्यतयाऽस्त्यस्याः ठन् । शतावर्य्याम् राजनि० ।

द्वीपिन् पु० द्वौ वर्णौ ईयते ईङ् गतौ बा० पक् द्वीपं चर्म तदस्यास्ति इनि । १व्याघ्रे (चिता बाघ) २चित्रके "सिंहद्वीपिरुरुव्याघ्रमहिषैश्च मृगैर्वृतम्" भा० व० ६४ अ० । व्याघ्रे "द्वीपिचर्मावृतकटीम्" तन्त्रम् ।

द्वीपिनख पु० द्वीपिनो नख इव । व्याघ्रनखे ।

द्वीप्य त्रि० द्वीपे जलान्तर्वर्त्तिनि स्थलभूमौ भवः यत् । १द्वीपभवे २रुद्रे पु० । "नादेयाय च द्वीप्याय च" यजु० १६।२१।

द्वीश त्रि०द्वौ ईशौ यस्य । १द्विदैवत्ये चर्चादौ २विशाखानक्षत्रे च तस्य इन्द्राग्निदेवताकत्वात् तथात्वम् ।

द्वृ(द्वृ)च पु०द्वे ऋचौ दत्त अ समा० । बा०वा सम्प्रसारणम् । ऋग्द्वययुतसूक्तात्मकमन्त्रभेदे "कुषुम्भकस्तटब्रवीत् आवटंस्त्वं शकुने ! भद्रमावद, मृणाना जमदग्निना धामन्ते विश्वमायुषमधिश्रितं, गत्वा नो यज्ञं यज्ञियाः, सुशमियो नखो चरणः प्रचक्ष्व विचक्षाग्ने या हि मरुत् सखायते राजञ्छ्रुतं हविरिति दृढचाः" आश्व०श्रौ० ३।५।७ "एते नव द्वृचाः" नारायण० "पतङ्गमक्तमसुरस्य मायया यो नः स नुत्यो अभिदासदग्ने भवानो अग्ने सुमना उमेताविति द्वृचाः" आश्व०श्रौ०४।६।१ ।

द्वेष पु॰ द्विष–भावे घञ्। न्यायनये आत्मवृत्तौ १गुणभेदे स च "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" गौ॰सू॰ दर्शितः "यज्जातीयस्यार्थस्य सन्निकर्षात् दुःखमात्मोपलभ्यवान् तज्जातीयमेवार्थं पश्यन् हातुमिच्छति सेयं हातुमिच्छा द्वेषः। एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् दुःखहेतौ द्वेषः इति भाष्यसम्मतोऽर्थः। तत्र दुःखं प्रतिकूलवेदनीयतया स्वतोद्वेषविषयः तत्साधनन्तु द्विष्टसाधनताज्ञानात्। "अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्" । भाषा॰ "प्रतिकूलमिति दुःखत्वज्ञानादेव सर्वेषां स्वभावतो विषय इत्यर्थः" मुक्ता॰। "द्विष्टसाधनताबुद्धिर्भवेत् द्वेषस्य कारणम्" भाषा॰ । "द्वेषं प्रति द्विष्टसाधनताज्ञानं कारणम्। बलवद्विष्टसाधनताज्ञानञ्च प्रतिबन्धकं तेन नान्तरीयदुःखजनके पाकादौ न द्वेषः" मुक्ता॰। द्वेषो द्विष्टसाधनज्ञानञ्च निवृत्तिकारणम् "निवृत्तिस्तु भवेत् द्वेषात् द्विष्टसाधनताधियः" तर्कोक्तेः "अयमर्थः दुःखे निवृत्तिर्द्वेषात् तदुपाये निवृत्तिस्तु द्विष्टसाधनत्वज्ञानात् द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यां स्थितम्" इति मुक्तावली।

"तस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः" गौ॰ सू॰। "अयं खलु जानीते तावत् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति ज्ञातं सुखसाधनमाप्तुमिच्छति दुःखसाधनं हातुमिच्छति। प्राप्तुमिच्छाप्रयुक्तस्यास्य सुखसाधनावाप्तये समीहाविशेष आरम्भः। जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्जनं निवृत्तिरेवं ज्ञानेच्छाप्रयुक्तसुखदुःखानामेकेनाभिसम्बन्धः एककर्तृकत्वं ज्ञानेच्छाप्रवृत्तीनां समानाश्रयत्वञ्च तस्माज्ज्ञेच्छाद्वेषप्रयत्नसुखदुःखानि धर्माः नाचेतनस्येति आत्मनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्वानुमानं वेदितव्यमिति" भा॰। सांख्यादिमते २बुद्धिधर्मभेदे। सांख्यादिमतसिद्धस्तु द्वेषः अष्टादशविधः तामिस्रशब्दे ३२७२पृ॰ दर्शितः स च बुद्धिधर्मः क्लेशविशेषः अस्मिताजन्यश्च। तल्लक्षणादिकं पात॰सू॰ भाष्यादावुक्तम् यथा "अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इत्युद्दिश्य "दुःखानुशयी द्वेषः" इति लक्षितम्। "दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वा प्रतिघो मन्युर्जिघांसा क्रोधः स द्वेष इति" भाष्यम्। दुःखमनुशेते कश्चिदन्तःकरणवृत्तिभेदः तमोऽनुगतपरिणामः दैन्यं सर्वदा मे मा भूदित्येवं तदयं दुःखानुशयीति भाष्यार्थः। "अनभिज्ञस्य स्मृतेरभावात् दुःखाभिज्ञस्येत्युक्तं स्मर्यमाणे दुःखे द्वेषः दुःखानुस्मृतिपूर्वकः, अनुभूयमाने तु दुःखे नानुस्मृतिमपेक्षते। तत्साधने तु स्मर्यमाणे अनुभूयमाने वा दुःखानुस्मृतिपूर्वक एव द्वेषः अनुभूयमानं हि दुःखसाधनं तज्जातीयस्य दुःखहेतुत्वं स्मृत्वा तज्जातीयतया चास्य दुःखहेतुत्वमनुमाय द्वेष्टि। प्रतिहन्तीति प्रतिघः द्वेषस्य प्रवृत्तेः प्रतिहननात् प्रतिघत्वम्" विव॰। तच्च शत्रुव्याघ्रादिषु सत्सु न नियारयितुं शक्यम्। न च सर्वे ते दुःखहेतवो हन्तुं शक्यन्ते अतः स द्वेषः सदा हृदयं दहति। यदा तु स्वस्येव परेषां सर्वेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैरादिद्वेषनिवृत्तौ चित्तं प्रसीदति। यद्यसौ पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वासनाभावात् स्वयमेवाप्रमत्तोऽशुक्लाकृष्णे पुण्ये प्रवर्त्तते। तथा पापपुरुषेषूपेक्षां भावयन् स्वयमपि तद्वासनाभावात् पापान्निवर्त्तते। ततश्च पुण्याकरणपापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति। एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्त्तते। किन्त्वसूयेर्ष्यादयोऽपि निवर्त्तन्ते। तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्त्तते तदा दुःखिप्रतियोगिकःसुखित्वप्रयुक्तो दर्षोऽपि निवर्त्तते। एवं दोषान्तरनिवृत्तिरप्यूहनीया। दुःखे तत्साधने च इदं मे मा भूदिति सूक्ष्माविरोधिनी चित्तवृत्तिः क्रोध इति दैन्यर्ष्येति चोच्यते। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" गीता।

द्वेषण त्रि॰ द्विष–युच्। १शत्रौ अमरः "पानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा" भा॰ शा॰ १६९अ॰।

द्वेषपक्ष पु॰ ६त॰। द्वेषावान्तरभेदेषु "द्वेषपक्षाः क्रोध ईर्ष्या द्रोहोऽसूय इति" न्यायभाष्यम्।

द्वेष्टृ न॰ द्विष–कर्त्तरि विच्। द्वेष्टरि। "बाधनां द्वेष्टो अभयं कृणोतु" ऋ॰ ६।४७।१२। "द्वेषोद्वेष्टृन्" भा॰

द्वेषस् न॰ द्विष–कर्मणि असुन्। द्वेषे पापादौ "द्वेषोयुतमाविवासन्ति" ऋ॰ ४।११।५ द्वेषसो पापस्य युतं पापयुतम्" भा॰।

द्वेषिन् त्रि॰ द्विष–णिनि। द्वेषकारके। "तथापि बहवे तस्य ततकारि द्वेषिणो यशः" रघुः। "मद्भक्तो यश्च रद्वेषी मद्द्वेषी शङ्करप्रियः। उभौ तौ नरकं यातस्छिन्नरज्जू घटाविव" पुरा॰ सारः।

भावे अतुन् । २द्वैधे २सप्रीतौ च पु० । "द्वैधोयुतो न दुरिता" ऋ०५।०१।६। द्वैधोयुतः सप्रीतियुतः भा० ।

द्वैष्य त्रि०द्वेष्टुमर्हः यत् कर्मणि ण्यत् । १द्वेषविषये २द्वेषार्हे च। "द्वैष्योऽपि सम्मतः शिष्टस्तस्यार्थस्य यथौषधम्" रघुः। "यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति" मनुः। स्वकृतापकारमपेक्ष्यापकारकर्त्तरि असहने ३शत्रौ च।

द्वै अ० द्वृ-बा० डै। वितर्के चादिगणः।

द्वैगुणिक त्रि० द्विगुणार्थं द्विगुणं "तत् प्रयच्छति गर्ह्यम्" पा ठक्। द्विगुणलाभाय धनप्रयोक्तरि दृष्टाजीवे वार्द्धुषौ।

द्वैत न०द्विधा इतं द्वीतं तस्य भावः स्वार्थे वा अण्। द्वैधीभावे २द्वये युगले च। द्वैताद्वैतयोरुभयोरपि सप्रमाणकत्वात् न्यायादिमते द्वैतम् वेदान्तिमते अद्वैतं रामानुजमते विशिष्टाद्वैतमित्येव स्थितम्। अन्ये शुद्धाद्वैतमिच्छन्ति। तत्राचार्या एवमाहुः। "अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम्। रजतमिव शुक्तिकायां मरुमरीचिकायामिवोदकस्फुरणम्। आरोपितं यदि स्यादद्वैतं वस्त्ववस्तुनि द्वैते। युक्तं नैव तदा स्यात् सत्येऽध्यासो भवत्यसत्यानाम्। यद्यारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिदुभावः। आरोपणं न शून्ये तस्माद्द्वैतसत्यता प्राप्ता। प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम्। द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्धत्वादिति। प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।"

द्वैतवन न०द्वे शोकमोहादिके इते यस्मात् द्वीतं स्वार्थे अण् कर्म्म०। १तपोवनभेदे "युधिष्ठिरं द्वैतवने वनेचरः" किरा०। २तादृशवनोपलक्षिते सरोवरभेदे च। "इदं द्वैतवनं नाम सरः पुण्यजलोचितम्।" "गच्छामः पुण्यं विख्यातं महद्द्वैतवनं सरः" भा० व० २४ अ०। "तेन हैतेन ध्वसा द्वैतवन ईजे मातृष्वो राजा यत्रैतद्द्वैतवनं सरस्तदेतद्गाथयाभिगीतं चतुर्दश द्वैतवने राजा संग्रामजिद्यान् इन्द्राय इतान्नेऽवभ्रात् तस्माद्द्वैतवनं सरः" शत० ब्रा० १२।५।४।९।

द्वैतवाद पु० द्वैतमधिकृत्य वादः। गौतमादिप्रणीते जीवेश्वरविभेदनिर्णायके १कथाङ्गपदार्थभेदे कपिलादिप्रणीते नानाजीवनिर्णायके २कथाभेदे च। तत्र सांख्यमते यथा जीवानां परस्परभेदस्तथा सां० का० तत्त्वकौ० उक्तो यथा "जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव" सां० का०। "पुरुषबहुत्वं सिद्धं कथाज्जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्द्वेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धोजन्म न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात् तेषामेव च देहादीनामुपात्तानां परित्यागो मरणं न त्वात्मनोविनाशः तस्य कूटस्थनित्यत्वात्। करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकरणानां प्रतिनियमोव्यवस्था सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेरन् अन्धादौ चैकस्मिन् सर्वे एवान्धादयः विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युरित्यव्यवस्था स्यात् प्रतिक्षेत्रं पुरुषभेदे तु भवति व्यवस्था। नचैकस्यापि पुरुषस्य देहोपाधानभेदाद्व्यवस्थेति युक्तं पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात्। न हि पाणौ छिन्ने, जाते वा स्तनादौ महत्यवयवे, युवतिर्जाता मृता वा भवतीति। इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह अयुगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्नलक्षणा-यद्यप्यन्तःकरणवर्त्तिनी तथापि पुरुषे उपचर्यते तथा च तस्मिन्नेकस्मिन् शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत सर्वाण्येव शरीराणि युगपच्चालयेत् नानात्वे तु नायं दोष इति। इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्ययाच्चैव एवकारोभिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः सिद्धमेव नासिद्धम्। त्रयोगुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः, केचित् खलु सत्वनिकायाः सत्वबहुला यथोर्द्ध्वस्रोतसः केचिद्रजोबहुलाः यथा मनुष्याः। केचित्तमोबहुलाः यथा तिर्य्यग्योनयः। सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावस्तेषु सत्वनिकायेषु न भवेत् यदेकः पुरुषः स्याद्भेदे त्वयम दोष इति" तत्त्वकौ०। "जन्मादिव्यवस्यातः पुरुषबहुत्वम्" नाद्वैत श्रुतिविरोधेः जातिपरत्वात्" सां० सू०।

द्वैतवादिन् त्रि० द्वैतं जीवभेदं जीवेश्वरयोर्भेदं वा वदति वद्-णिनि। जीवभेदवादिनि जीवेश्वरयोर्भेदवादिनि च नैयायिकादौ।

द्वैताद्वैत न० द्वैतञ्चाद्वैतञ्च। जीवेश्वरयोर्भेदाभेदयोः। "अद्वैतञ्च तथाऽद्वैतं द्वैताद्वैतं तथैव च। न द्वैतं नापि चाद्वैतमित्येतत् पारमार्थिकम्। न हि नैवान्यसम्बन्धो ब्रह्मभावेन भावितः। द्वैतच्छायामवस्थायामवाच्यं परमं पदम्। द्वैतपक्षाः समाख्याता वेऽद्वैते तु व्यवस्थिताः"।

द्वैतिन् त्रि॰ द्वैतं भेदः सम्मततयाऽस्त्यस्य इनि। द्वैतवादिनि नैयायिकादौ। "स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता इदम्। परस्परं विरुध्यन्ते तैरियं न विरुध्यते"। "अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते। तेषामुभयथाद्वैतं तेनायं न विरुध्यते"।

द्वैतीयीक त्रि॰ द्वितीय+स्वार्थे ईकक्। द्वितीये "द्वैतीयीकतया मितोऽयमगमत् तस्य प्रबन्धे महा" इत्यादि नैष॰।

द्वैधम् अव्य॰ द्वि+प्रकारे धमञ्। प्रकारद्वये एकेन सन्निरपरेण विपद्य इत्येवं प्रकारद्वयमित्यादि। "श्रुतिद्वैधं यत्र तु स्यात्तत्र धर्मावुभौ स्मृतौ" मनुः। "बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये। द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः" मनुः।

द्वैध त्रि॰ धमञ्जन्तात् स्वार्थे वार्त्ति॰ स्वार्थे ड ॥१द्विप्रकारे। "बहुलं परिगृह्णीयात् साक्षिद्वैधे नराधिपः" मनुः। "ततः साक्षिबलं साधु द्वैधवादकृतं भवेत्" भा॰शा॰ ८५ अ॰। राज्ञां सन्ध्यादिषु षट्सु गुणेषु २गुणभेदे "सन्धिनां विग्रहो यानमासनं द्वैधमाश्रयः" अमरः।

द्वैधीभाव पु॰ अद्वैधस्य द्वैधस्य भावः। द्वैध–च्वि भूप्रयोगः भावे घञ्। १द्विधाभावे षाड्गुण्यान्तर्गते २द्वैधरूपे भावे च। स च बाह्ये एकप्रकारः आभ्यन्तरे अन्यप्रकार इत्येवं द्विप्रकाररूपः यथोक्तं वह्निपु॰ षाड्गुण्योक्तौ "बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्। द्वैधीभावेन तिष्ठेत्तु काकाक्षिवदलक्षितः"। २द्विधा भवने "अक्षरश्च क्षरश्चैव द्वैधीभावोऽयमात्मनः" भा॰ आश्व॰ २८ अ॰।

द्वैप त्रि॰ द्वीपिनो विकारः "प्राणिरजतादिभ्योऽञ् पा॰ अञ्। १व्याघ्रविकारे २तच्चर्मणि न॰। द्वैपेन चर्मणा परिवृतो रथः "द्वैपवैयाघ्रादञ्" पा॰ पुनरञ्। २द्वीपिचर्मपरिवृते रथे पु॰ द्वीपिन इदम् अण्। ३तत्सम्बन्धिनि त्रि॰।

द्वैपक पु॰ द्वीपे भवः धूमा॰ वुञ्। द्वीपान्तरभवे।

द्वैपदिक पु॰ द्विपदाम्नातं वेदं अधीते वा उक्थादि॰ ठक्। १द्विपदाध्यायिनि २तद्वेत्तरि च।

द्वैपायन पु॰स्त्री द्वीपस्य गोत्रापत्यम् नडादि॰ फक्। १द्वीपर्षेः गोत्रापत्ये। द्वीपः अयनं जन्मभूमिर्यस्य स्वार्थे प्रज्ञा॰ वा अण्। २व्यासे "इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम्। पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा। जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्यवान्। स मातरमनुज्ञाप्य तपस्येव मनो दधे। स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्। एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्। न्यस्तो द्वीपे स यद्बालस्तस्माद् द्वैपायनः स्मृतः" भा॰ आ॰ ६३ अ॰। "द्वैपायनो विरहकातर आजुहाव" भाग॰ १।१ "तमहमरागमहण्णं कृष्णद्वैपायनं वन्दे" वेणीसं॰।

द्वैपारायणिक पु॰ द्वयोः पारायणयोः समाहारः द्विपारायणं वर्त्तयति ठञ् प्रत्ययविधौ तदन्तग्रहणप्रतिषेधेऽपि "इतः ऊर्द्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चालुकि" सि॰ कौ॰ उक्तेः संख्यापूर्वस्य तदन्तग्रहणम्। पारायणद्वयावर्तिनि।

द्वैमातुर पु॰ द्वयोर्मातोरपत्यं "मातृतः संख्यासुपूर्वेति" पा॰ अण् रपरत्वम्। १द्विमातृजे गणेशे २जरासन्धे नृपे च। वरेण्यन्यपजांबापुष्पकागर्भजातत्वात् दीपवत्सत्यापालितत्वाच्च गणेशस्य द्विमातृकत्वं तत्कथा स्कं॰ पु॰ गणेशखण्डे यथा। "आविर्बभूविथ वदने वरेण्यस्य नृपीपतेः। त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये। पालनाय स्वभक्तानां साधुत्राणाय भूसुराः। शिव उवाच। इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः। आगते नवमे मासि प्रासूत पुष्पका शिशुम्। चतुर्बाहुमिभास्यं च दन्तुरं सुन्दरेक्षणम्। आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्। दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम्। श्रुत्वा चाक्रन्दनं तस्याः वरेण्यः सगणो ययौ। ददर्श बालकं सोऽपि विस्मितः सह तैर्गणैः। उवाच सेवकान् राजा त्यजतैनं सरोवरे। शिशुमादाय ते याताः पार्श्वस्थैवाश्रमे शुभे। कासारे तं शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम्। अपरस्मिन् दिने पार्श्वमुनिः स्नानाय चागतः। तदैव ददृशे तेन बालकोऽद्भुतदर्शनः। आश्चर्यमकरोत्तत्र भयभीतस्तथाऽभवत्। आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम्। तपसां तु फलं दातुमीदृशीं कृतवांस्तनुम्। रक्षितुं सर्वलोकानां परमात्मा निजेच्छया। सुन्दरो बालकः केन त्यक्तोऽयमीदृशो बहिः। नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः। इत्युक्त्वा जटहे बालमालिलिङ्ग सदा मुनिः। तमानीतं मुनेः पत्नी ददर्श दीपवत्सला। उवाच निजभर्त्तारं सुप्रसन्नाननाम्बुजा। दीपवत्सलोवाच। किमानीतं महत् स्वामिन्! सूर्यमाश्चर्यकारकम्। इदं वैनायकं रूपं समाभाति द्विजर्षभ!। इदमेव श्रियः स्थानं इदमेव तपःफलम्। इदमेव परं ब्रह्म योगिध्येयं सनातनम्। इदमेव परं तेज आ-

दिव्ये यदधिष्ठितम्। इदमेव हि वेदान्ता नेतिनेति प्रचक्षते। शिव उवाच। इत्युक्त्वा हर्षसम्पन्ना भर्तुरादाय बालकम्। स्तनपानं ददौ तस्मै ततः सा दीपवत्सखा। द्वितीयाचन्द्रवद्बालो ववृधे यातो दिने दिने"। जरासन्धवधे तस्य द्वैमातुरत्वं दृश्यम्। "हते हिडम्बरिपुणा रात्रि द्वैमातुरे युधि" माघः।

द्वैमातृक पु॰ द्वे मातराविव पालिके अस्य द्विमातृक ततः स्वार्थे अण्। नदीवृष्टिजलनिर्गमस्थपालिते देशे राजनि॰।

द्वैयहकाल्य त्रि॰ द्व्यहरूपः कालो यस्य तस्य भावः ष्यञ्। द्वाभ्यां ष्यञ्भ्यां पूर्वमेव। द्व्यहकालजातस्य भावे। "द्वैयहकाल्ये तु यथान्यायम्" जै॰ सू॰ "द्वैयहकाल्ये क्रियमाणे यथान्यायं कृतं भवति तस्मात् द्वैयहकाल्यं स्यात्। चोदकः तथा अनुगृहीतो भवति पक्षतो हि श्रूयते। "पूर्वेद्युः अग्निं गृह्णाति उत्तरमहर्देवतां यजेत्" इति। तस्मात् द्व्यहकालम् एकमभिनिर्वर्त्य तदहरेवोपक्रम्याऽपरेद्युः परिसमापयेत् भा॰ "वचनाद्द्वैकाल्यं स्यात्" सू॰ "नैतदेवं द्व्यहकाला विकृतयो भवेयुः इति सद्यस्काला स्युः" शबरभा॰।

द्वैयह्निक त्रि॰ द्वयोरह्नोर्भवः "द्विगोर्वा रात्र्यहःसंवत्सराच्च" पा॰ पक्षे ठञ् समासान्तविधेरनित्यत्वात् न टच् स्मृते रात्र्यहरिति नान्यतया निर्देशात् सि॰ कौ॰। अह्नादेशः। द्वयोरह्नोर्भवे। [ऐच्। द्वयोराह्नयोर्भवे।

द्वैयाहाविक त्रि॰ द्वयोराह्नयोर्निपानयोर्भवः धूमा॰ वुञ्

द्वैरथ न॰ द्वौ रथौ यत्र युद्धे स्वार्थे अण्। द्वाभ्यामेव रथाभ्यामुपलक्षिते युद्धे। "द्वैरथेनास्तु वै शान्तिस्तव च प्रभ वा नृप!" भा॰ व॰ ७८ अ॰। "चिकीर्षन् द्वैरथं युद्धमभ्ययान्मधुसूदनम्" हरिवं॰ ११८ अ॰।

द्वैरात्रिक त्रि॰ द्वयो रात्र्योर्भवः "द्विगोर्वा रात्र्यहःसंवत्सराच्च" पक्षे ठञ्। द्वयोरात्र्योर्भवे। अत्रापि समासान्तविधेरनित्यत्वात् न समासान्तः स्मृते रात्रीति निर्देशात् पक्षे च द्विरात्रीण तत्रार्थे त्रि॰।

द्वैराश्य न॰ द्वौ राशी यस्य तस्य भावः ष्यञ्। द्विविधराशियुक्तत्वे।

द्वैविध्य न॰ द्विविधस्य भावः ष्यञ्। प्रकारद्वये "द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः" भाषा॰।

द्वैषणीया स्त्री द्वेषणमेव स्वार्थे अण् द्वैषणं तदर्हति छ। नागवल्लीभेदे राजनि॰।

द्वैसमिक त्रि॰ द्वयोः समयोर्वर्षयोर्भवः समावाः यत् "द्विगोष्ठंश्च" पा॰ पक्षे ठञ्। वर्षद्वयभवे।

द्वैहायन न॰ द्विहायनस्य भावः युवा॰ ष्यञ्। द्विवर्षवयस्कभावे

द्व्यंश न॰ द्वयोरंशयोः समाहारः पात्रा॰ न ङीप्। भागद्वये "वैश्यापुत्रो हरेद्द्व्यंशम्" मनुः। "द्व्यंशहरो द्व्यहरो वा पुत्रवित्तार्जनात् पिता" दायभा॰।

द्व्यक्ष त्रि॰ द्वे अक्षिणी यस्य ष समा॰। नेत्रद्वययुते स्त्रियां ङीप्। "द्व्यक्षीं त्र्यक्षीं ललाटाक्षीम्" भा॰व॰२७६ अ॰। नानारात्रसुक्तौ।

द्व्यक्षर न॰ द्वे अक्षरे यत्र। १वर्णद्वयात्मके मन्त्रभेदे शक्तिमन्त्ररूपायां २विद्यायां स्त्री शौरा॰ ङीप्। "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः"। "यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः" तैत्ति॰ सं॰ ३।६।१२।

द्व्यङ्गुल त्रि॰ द्वे अङ्गुल्यौ प्रमाणमस्य तद्धितार्थद्विगुः प्रमाणार्थकमात्रचः "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" वा॰ लुक् अच् समा॰। १अङ्गुलीद्वयमिते। द्वयोरङ्गुल्योः समाहारः अच् समा॰। २अङ्गुलीद्वये न॰। "फलके द्व्यङ्गुलान्तरे" कात्या॰ श्रौ॰८,५।२५। "अर्धाङ्गुला तु सूच्यग्रा काष्ठी द्व्यङ्गुलमूलिका" ज्यो॰ त॰।

द्व्यञ्जल त्रि॰ द्वयोरञ्जल्योः समाहारः अच् समा॰। १अञ्जलिद्वये। द्वाभ्यामञ्जलिभ्यां क्रीतः ठञ् तस्य अभ्यर्हपूर्वेत्यादिना लुकि न अच् समा॰। प्रमाणे द्वयोर्द्विगोर्नित्यम् वार्त्ति॰ लुपि तु वा अच्। २अञ्जलिद्वयमिते त्रि॰ "प्रस्तं जलं द्व्यञ्जलमन्निकेऽपाम्" भट्टिः।

द्व्यणुक न॰ द्वौ अणू कारणे यस्य कप्। परमाणुद्वयारब्धे कार्यद्रव्यभेदे "विप्रयोर्द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः" भाषा॰ आरम्भवादशब्दे ७६७ पृ॰ दृश्यम्।

द्व्यर्थ त्रि॰ द्वौ अर्थौ यस्य। १अर्थद्वययुते शब्दादौ "द्व्यर्थः पचिः" महाभाष्यम्। २द्विप्रयोजनके कार्यभेदे च "आत्मन्य सिक्तः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरीह लोके" वायुपु॰। समाहारद्वि॰ पात्रा॰। अर्थद्वये न॰।

द्व्यशीति स्त्री द्व्यधिका अशीतिः अशीतिपर्युदासात् न ष्यात्। १द्व्यधिकाशीतिसंख्यायां २तदन्विते च एकव॰ ततः पूरणे डट् द्व्यशीत तमप् द्व्यशीतितम तत्पूरणे त्रि॰। डटि स्त्रियां ङीप्। द्व्यशीतियुतं शतादि ङ। द्व्यशीत द्व्यशीतियुते शतादौ त्रि॰।

द्व्यष्ट न॰ द्वे त्रेमल्ये अश्नुते वारणतया व्याप्नोति अश-क्त। ताम्रे अमरः। [ङ्खम्। दिनद्वये।

द्व्यह पु० समाहारद्विगु टच्समा० । "अह्नान्वाः पुंसि" पा०

द्व्यहीन त्रि० द्वाभ्यामहर्भ्यां निर्वृत्तादि। "द्विगोर्वा रात्र्यहः संवत्सराच्च" वा ख स्यात् अहरिति निर्देशात् न टच्। १दिनद्वयसाध्ये २क्रतुभेदे पु० द्विरात्रशब्दे दृश्यम् ।

द्व्याचायण पु०ऋषिभेदे। तस्य विषयो देशः ऐषुकाऽभक्तल् । द्व्याचायणभक्त तदीये विषये देशे ।

द्व्याचित त्रि० द्वे आचिते सम्भवति अवहरति पचति वा "आढकाचितपात्रात् खोऽन्यतरस्याम्" पा० । द्विगोरेव ष्ठनृखौ पक्षे ठञ् तस्य अध्यर्द्धेति लुक् । आचितद्वयस्य १खस्मिन् समावेशके २अवहारके च ३पाचके च । स्त्रियां द्विगोरिति पा०ङीप् । पक्षे ख । द्व्याचितीन तदर्थे त्रि०पक्षे ष्ठन् । द्व्याचितिक तदर्थे नित्यात् स्त्रियां ङीष् इति भेदः ।

द्व्याढक त्रि० द्व्याचितवत् सर्वं साधनादि । आढकद्वयस्य स्वस्मिन् १समावेशके २तदवहारके तत्पाचके च । स्त्रियां द्विगोरिति पा० ङीप् । पक्षे ख । द्व्याढकीन ष्ठन् । द्व्याढकिक तत्रार्थे त्रि० स्त्रियां नित्यात् ङीष् ।

द्व्यात्मक पु०द्वौ द्विविधौ रूपौ आत्मानावस्य कप् । द्विस्वभावे राशिभेदे "चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टाः" ज्यो०त० । तस्य द्विस्वभावत्वेऽपि च पूर्वार्द्धम् चरसान्निध्यात् चरात्मकम् परोर्द्धन्तु स्थिरसान्निध्यात् स्थिरात्मकमिति द्विस्वभावत्वम् द्वितनुद्विस्वभावादयोऽप्यत्र ।

द्व्यामुष्यायण पु०अमुष्य प्रतिग्रहस्यापत्यम् फक् आमुष्यायणः द्वयोरामुष्यायणः द्वृत० । "उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः" इत्युक्ते तव, मम चायमिति समवेन परिगृहीते १पुत्रभेदे । "केवलदत्तको जनकेन प्रतिगृहीतस्यैव दत्तस्यैव पुत्रः । द्व्यामुष्यायणस्तु जनकप्रतिगृहीताभ्यामावयोरयमिति सम्प्रतिपन्नः स उभयोरपि पुत्रः" मिता० । विवृतिर्दत्तकशब्दे दृश्या ।

द्व्यायुष न० समाहारद्विगुः अचतुरेत्यादि अच्समा० । द्विगुणितायुःकाले ।

द्व्याहाव न० समा० द्वि० पात्रा० । आहावद्वये निपानद्वये ।

द्व्याहिक त्रि० द्व्यहे भवः ठञ् बा० न ऐच् । द्व्यहजाते ज्वरे पारस्करनिघण्टुः ।

द्व्येक त्रि० द्वौ वा एको वा वार्थे बहु०ड समा० । (दुइ वा एक) इति ख्याते पदार्थे "द्व्येकान्यरातुजातानां धर्म्यं विद्यादिमं विधिम्" मनुः ।

द्व्योग पु० द्वयोर्योगयोः समाहारः द्विगो० । योगद्वये पञ्चभीश्रवा० ।

द्व्योपश पु० द्वैषदुपशेते या+उप+शे-ड ओपशं शकं द्वे ओपशे यस्य । पशौ "द्व्योपशमिव द्याम्" ऋ०१।१७१।६। "संस्तुता भवन्ति तस्मात् द्व्योपशाः पशवः" पञ्चभीब्रा० १३।४।२ । ओपशशब्दार्थस्तु पूर्वं प्रमादान्न लिखितः अत्र लिखित इति बोध्यम ।

इति श्रीतारानाथतर्कवाचस्पति सङ्कलिते वाचस्पत्ये दकारादिशब्दार्थसङ्कलनम् ।

द्वारकाशब्दात् परम् ३८०८ पृष्ठस्य क्रोड़पत्रम् ।

द्वारकाशिला स्त्री द्वारकोद्भवा शिला । एकादिचक्रयुक्तायां द्वारकोद्भवशिलायां शालग्रामशिलावत् तस्याः पूज्यता लक्षणं पूजनादौ माहात्म्यञ्च नानास्थानात् प्रदर्श्यते पुराणसारे द्वारकाकार्त्तिकमाहात्म्ये "चक्रमेकं मध्यभागे श्वेतभागे खुरान्विता । शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा"। खुरान्विता योनियुक्ता । ब्रह्माण्डपुराणे "कूर्माकृतिरधोभागे लिङ्गभागे खुरान्विता । शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा" । नृसिंहपुराणे "कूर्मचक्रमधोभागे श्वेतभागे खुरान्विता । शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा। यवमात्रसुवर्णैः स्यात् यवार्द्धं लिङ्गमुच्यते। शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः" शिवनाभिलक्षणम् । ब्रह्माण्डपुराणे "जटाग्रावी अघोरा सा ऋषिभिर्यदि पूजिता । हेमवर्णजटायुक्ता हेमबिन्दुसमन्विता । मेरुवद्गोखुरा तावद्धनाचलसन्निभा । सद्योजाताभिधा श्रेष्ठा पुत्रपौत्रधनप्रदा" इति सद्योजातलक्षणम् । तत्रैव "शिरोमध्ये रक्तवर्णा श्वेतचन्द्रजटायुता । वामदेवाभिधा श्रेष्ठा ऋषिभिः पूजिता सदा" इति वामदेवलक्षणम् । तत्रैव "किञ्चित्कपिलसंयुक्ता कृष्णनीलजटायुता । पार्श्वरेखासमुपेता ऐशानीमुक्तिदा भवेत्" इति ऐशानलक्षणम् । "सूर्यविद्युत्समनिभा पार्श्वरेखे जटायुती ।

तत्पुनर्नामाभिधा सा स्यात् दुर्लभा सर्वकामदा" इति तत्पुरुषलक्षणम्। "द्विलिङ्गो वा त्रिलीङ्गो वा चतुरस्रादिलिङ्गवान्। तापिच्छकरकाकारो देवदेवः सदाशिवः" इति सदाशिवलक्षणम्। इत्यघोरादिपञ्चकलक्षणम्। प्रयोगपारिजाते वराहपु० "द्विनाभिचक्ररूपा या भवेद्धरिहरात्मिका। नाभौ लिङ्गेन युक्ता वा श्वेत भागे खुरान्विता। शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा। वासुदेवमयं क्षेत्रं लिङ्गं शिवमयं स्मृतम्। तस्माद्धरिहरक्षेत्रे पूजयेत् शङ्कराच्युतम्। भवेच्छिलाव्रतैः यस्तु चतुर्वर्गफलप्रदा"। तस्या माहात्म्यम् स्कन्दपुराणे "द्वाराधक्रशिला देवि! भद्रावास समन्विता। तत् पालसहितं यत् स्यात् तीर्थं द्वादशयोजनम्। म्लेच्छदेशे शुचौ वापि चक्राङ्को यत्र तिष्ठति। योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे!। तन्मध्ये म्रियते यस्तु पूजकः सुसमाहितः। शतबाधाविनिर्मुक्तो न पुनः सोऽपि जायते। चक्राङ्कितस्य सान्निध्ये यत्कर्म क्रियते नरैः। स्नानं दानं तपो होमः सर्वं भवति चाक्षयम्। संवत्सरन्तु यत् पापं मनसा कर्मणा कृतम्। तत्सर्वं नश्यते पुंसां सकृच्चक्राङ्कदर्शनात्। ज्वरदाहो विषञ्चैव अग्निचौरभयं तथा। सर्वे ते प्रशमं यान्ति सकृच्चक्राङ्कमार्जनात्। भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुन्धरे!। सर्वे ते प्रलयं यान्ति पञ्चचक्रान्वितं न्यसेत्। भक्त्या वा यदि वाऽभक्त्या चक्राङ्कं पूजयेद्धरः। अपि चेत् सुदुराचारो मुच्यते नात्र संशयः। संवत्सरन्तु यः कुर्यात् पूजाचर्चन दर्शनम्। विना साङ्ख्येन योगेन मुच्यते नात्र संशयः"। द्वारकाशिलावर्णविशेषलक्षणम् पद्मपुराणे "कृष्णा मृत्युप्रदा नित्यं कपिला तु भयावहा। औन्नत्यं कर्बुरा दद्यात् पीता धनविनाशिनी। धूम्राभा पुत्रनाशाय भग्ना भार्याधनापहा। श्वेतास्तिलाः सुसंपूर्णाः सर्वकामार्थदायिकाः। अच्छिद्रचक्रा सा पूज्या दुःखदारिद्र्यनाशिनी। वर्तुला चतुरस्रा च पूजिता सिद्धिदायिका। सुखदा समचक्रा च विषमा दुःखदा भवेत्। निश्छिद्रशिलापि तत्रैव "छिद्रा भग्ना त्रिकोणा च तथा विषमचक्रिका। अर्द्धचन्द्राकृतियाँ च पूज्यास्ता न भवन्ति हि"। प्रयोगपारिजाते तु विशेषः "भिन्नश्चैवार्थनाशाय स्थूलो बुद्धिविनाशकः। दीर्घश्चायुर्हरो ज्ञेयो रूक्ष ऋद्धिविनाशकृत्। शुक्लवर्णा शुभा ज्ञेया दलचक्रा तथैव च"। चक्रभेदे मूर्तिभेदोऽग्निपुराणे उक्तो यथा "सुदर्शनस्त्रिकचक्रे लक्ष्मीनारायणौ द्वये। अच्युतः स्यात्तत्त्रिकेण युतो देवस्त्रिविक्रमः"। जनार्दनश्चतुश्चक्रो वासुदेवश्च पञ्चभिः। षट्चक्रश्चैव प्रद्युम्नः संकर्षणश्च सप्तभिः। पुरुषोत्तमश्चाष्टचक्रो नवव्यूहो नवात्मकः। दशावतारो दशभिर्दशैकेनानिरुद्धकः। द्वादशात्मा द्वादशभिरत अर्द्धमनन्तकः"। गरुडपुराणे तु चतुश्चक्रचतुर्भुज इति विशेषः। चक्रभेदेन विशेषोऽपि तत्रैव। "एकचक्रशिला पूज्या भुक्तिमुक्तिफलप्रदा। द्विचक्रश्चाच्युतो देवो देवेन्द्रत्व फलप्रदः। श्रीप्रदो रिपुहन्ता च चतुश्चक्रो जनार्दनः। पूजयेद्भक्तिसंयुक्तः सुगन्धैः कुसुमादिभिः। पञ्चभिर्वासुदेवः स्यात् प्रभुचक्रैः सदार्चितः। जन्ममृत्युभयात्त्राता भवेन्नैवात्र संशयः। षड्भिश्चक्रैश्च प्रद्युम्नो लक्ष्मी कीर्त्तिप्रदो भवेत्। पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः। वलभद्रशिला ज्ञेया सप्तचक्राङ्किता खग!। पूजितस्तुष्यते देवः पुत्रपौत्रप्रदो भवेत्। वाञ्छितं वसुभिश्चक्रैर्ददाति पुरुषोत्तमः। नवव्यूहो नवचक्रो दुर्लभं यत् सुरैरपि। पूजितः केशवस्तस्य ददाति स्थानमुत्तमम्। राज्यदो दशभिश्चक्रैर्दशावतारसंज्ञकः। दशावतारपूजा स्याच्चक्राङ्कस्यास्य पूजनात्। एकादशभिरैश्वर्यमधिकञ्च प्रयच्छति। पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः। तत्रैव प्राप्यते देवश्चक्रैर्द्वादशभिश्चितः। पूजितः सर्वकामानामनन्तफलदायकः।' द्वादशात्मा स विज्ञेयो भुक्तिमुक्तिप्रदोऽर्चितः। अत अर्द्धं परात्मासौ सदा प्रीतिविवर्द्धनः। पूजितः सर्वलोकात्मा विष्णुलोकप्रदायकः इति चक्राङ्कितशिलाः कथिताः कुलनामतः"। एकचक्रविषये विशेषस्तु प्रयोगपारिजाते। "एकचक्रे विशेषोऽस्ति सविशेषस्तथोच्यते। शुक्लरक्तं तथा रक्तं हिवर्णं बहुवर्णकम्। यद्येकचक्रिणः स्युश्च तेषां संज्ञा भवेत् क्रमात्। पुण्डरीकः प्रसन्नश्रो रामो वैकुण्ठ एव च। विश्वेश्वर इति ब्रह्मन् तेषां पूजाफलं शृणु। मोक्षं मृत्युं विवादञ्च दारिद्र्यं परतन्त्रताम्। ददाति पूजकस्यासौ तस्मात्तां परिवर्जयेत्"।

ध

धकारः तवर्गीयः पञ्चमः व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानं दन्तमूलं "दन्त्या लृतुलसाः स्मृताः" इति तवर्गस्य दन्त्यत्वोक्तिः दन्तमूलपरत्वेन, अन्यथा भग्नदन्तस्य तवर्गोच्चारणानुपपत्तेः। व्यञ्जनवर्णत्वादर्द्धमात्रत्वम् तस्य। तस्योच्चारणे आभ्यन्तरप्रयत्नः स्पृष्टता जिह्वाग्रेण दन्तमूलस्य सम्यक्स्पर्शेन तस्योच्चारणात् तथात्वम्। बाह्यप्रयत्नाश्च संवारनादघोषा महाप्राणश्च, सि० कौ० मूलं द्रष्टव्यम्। अस्य वाचकशब्दा वर्णाभिधानतन्त्रोक्ता यथा "धो धनार्धो रुचिः स्थाणुः सात्वतो योगिनीप्रियः। मीनेशः शङ्खिनी तोयं नागेशो विश्वपावनी। धिषणा धारणा चिन्ता नेत्रयुग्मं प्रियो मतिः। पीतवासास्त्ववर्णा च धात्री धर्मः प्लवङ्गमः। सन्दर्शो मोहनो लज्जा वज्रतुण्डः सुकन्धरा। वामपादाङ्गुलीमूलं ज्येष्ठा सुर पुरं भवः। स्वर्गात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः" अस्य मातृकान्यासे वामपादाङ्गुलिमूले न्यासता। अस्याधिष्ठातृदेवताया ध्येयरूपम्। "षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम्। वरदां शोभनां रम्यां चतुर्वर्गप्रदायिनीम्। एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत्" अस्य स्वरूपञ्च। "धकारं परमेशानि! कुण्डली मोक्षरूपिणी। आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणमयं देवि! विसिनीसहितं सदा। त्रिबिन्दुसहितं वर्णं धकारं यदि भावयेत्। पीतविद्युल्लताकारं चतुर्वर्गप्रदायकम्" कामधेनु०। अस्य काव्यादौ प्रथमन्यासफलं द्र० र० टीकायामुक्तं यथा "दोधः सौख्यं मदं नः"।

ध पु० दधाति धा—ड। १धर्मे २कुबेरे ३ब्रह्मणि च। ४धने न० मेदि०। ५धकारवर्णे "धोधनार्धो रुचिः स्थाणुः" वर्णाभिधानम्।

धक्क नाशने चुरा० उभ० सक० सेट्। धक्कयति-ते अदधक्कत्-त।

धट पु० धन-शब्दे "पुंसि घः" पा० नस्य टः। १तुलायाम् उन्मानार्थं मानदण्डभेदे अमरः। तदुपलक्षिते २तुलाराशौ "सिंहो दृषश्च मेषश्च कन्या धन्वी धटो घटः। चक्रादीनां त्रिकोणानि गुणानि राशयः क्रमात्" ज्यो० त०। ३परीक्षाभेदे तन्निरुक्तिः पितामहेन दर्शिता यथा धकारादर्थसंदिष्टं टकारात् कुटिलं नरम्। धृतं धारयते यस्मात् धटस्तेनाभिधीयते"। तुलाशब्दे ३३३१ पृष्ठादौ द्रष्टव्यम्। "धटोऽस्त्रिरुटकश्चैव विघ्नं कोशस्तु पञ्चमः। अष्टन्तु तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम्। अष्टमं फालमित्युक्तं नवमं धर्मजं तथा। दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवेति" बृहस्पतिः। परीक्षायां नक्षत्रादिपरीक्षाशब्दे द्रष्टव्यम्। धटपरीक्षायां कालविशेषनिषेधौ "तुला स्यात् सर्वकालिकी" इति "वाते वाति विवर्जयेत्" च पितामहेनोक्तौ।

धटक पु० "तुल्या यवाभ्यां कथितात्र गुञ्जा वल्लस्त्रिगुञ्जो धरणं च तेऽष्टौ। गद्यानकस्तद्द्वयमिन्द्रतुल्यैर्वल्लैस्तथैवो धटकः प्रदिष्टः" लीला० उक्ते द्वाचत्वारिंशद्गुञ्जापरिमाणे

धटकर्कट पु० ६त०। तुलायाः शिक्याधारे दैर्घ्यदुष्के कर्कटशृङ्गनिभे आयसकीलकभेदे दिव्यत० रघु०। "कक्षच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा" बृहस्पतिः।

धटिका स्त्री "द्व्यब्धेन्दुसंख्यैर्धटकैस्तु सेरस्तैः पञ्चभिः स्याद्धटिका च ताभिः" लीला० उक्ते पञ्चसेरात्मके (धाडा पशरी) इति प्रसिद्धे परिमाणे। धटी स्वार्थे क। १चीरवस्त्रे २कौपीने (धड़ा)।

धटी स्त्री धन० रवे अच् नस्य टः गौरा० ङीष्। १कौपीने २चीरवस्त्रे मेदि० गर्भाधानोत्तरं स्त्रियै देये ३वस्त्रभेदे तद्धारणे नक्षत्रादि यथा "मूलश्रवणहस्तेषु पुष्यादित्योत्तरासु च। मृगपौष्णे धटी देया सौम्यवारे शुभे तिथौ" ज्यो० सा०।

धटिन् त्रि० धटोऽस्त्यस्य इनि। १तुलाधारके २तुलाराशौ ३शिवे च पु० "घण्टोऽघण्टो धटी चण्टी चरुचेली मिलीमिली" भा० शा० २८६ अ०। नीलकण्ठेन तु घटीति तत्र पठित्वा व्याख्यातम् "घटयति कर्मफलैर्योजयति नरानिति घटी इति" सुद्रादोषात् धटीत्यपपाठः। [दधाण।

धण शब्दे भ्वा० प० अक० सेट्। धणति अधाणीत् अधणीत्।

धत्तूर पु० धत्तति धाठ्तृ धा—ऊर पृषो०। धुस्तूरे। हेमच०

धन धान्योत्पादने जुहो० पर० सेट्। दधन्ति अधानीत् अधनीत् दधान। गृहीतकर्मकत्वात् अकर्मकत्वम्। तेन दधन्ति भूमिः धान्यवृषपाद्यतीत्यर्थः, वैदिकोऽयम्।

धन शब्दे भ्वा० पर० अक० सेट्। धनति अधानीत् अधनीत्।

धन न० धन—अच्। १गोधने २वित्ते च मेदि०। ३स्वेहपात्रे शब्दर० ४धनिष्ठानक्षत्रे ज्योतिषम्। अर्थशब्दे ३६७ पृ० धनभेदादिकमुक्तं विशेषस्तु कश्चित् गुह्यित० उक्तो यथा "धनं तु त्रिविधं ज्ञेयं शुक्लं शबलमेव च। लक्षणञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक्। क्रमायातं प्रीतिदायं

प्राप्नुयात् सह भार्य्यया । अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम् । वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम् । याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः । त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् । युद्धार्थलब्धं करजं दण्ड्यध्यापहारतः । वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् । कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात् । कुसीदकृषिवाणिज्यं प्रकुर्वीत स्वयंकृतम् । आपत्काले स्वयं कुर्वन्नैनसा युज्यते द्विजः" । तामसादिभेदेन तस्य त्रैविध्यं नारदेन उक्तं यथा "पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तु तत् कृष्णं समुदाहृतम्" । पार्श्विकः पात्रतया योऽर्जयति । आर्त्त्या परपीड़या प्रतिरूपकेण कृत्रिमरत्नादिना । साहसेन समुद्रयानगिर्यारोहणादिना । व्याजेन ब्राह्मणवेशेन शूद्रादिना । कृष्णं तामसम् । राजसधनं यथा "कुसीदकृषिवाणिज्यशुल्कगानानुवृत्तिभिः । कृतोपकाराद्याप्रच्च राजसं समुदाहृतम्" । अनुवृत्त्या सेवया । सात्त्विकधनं यथा । "श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम् । धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम्" । श्रुतेनाध्ययनेन शौर्य्येण जयादिना । तपसा जपहोमदेवार्चादिना । कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम् । शिष्यागतं गुरुदक्षिणादिना । याज्यागतं आर्त्विज्यलब्धम् । शुद्धं सात्त्विकम्" शुद्धितःदृश्यम् । ५युक्ते ६योज्ये च "खोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद्ग्रहाः । तत् तेषु धनमित्युक्तमृणं पश्चान्मुखेषु तु" सू०सि० । "खोच्चजीवाकर्षिता ग्रहाः पूर्वाभिमुखं भगणैः राशिभिर्भगोलस्य क्रान्तिवृत्तानुसृतखाकाशगोलान्तर्गतक्रान्तिवृत्ते द्वादशराश्यन्तिके यद्राशिविभागैरित्यर्थः । यद्यत्तत्सङ्क्रामितं गच्छन्ति तत्तत्सङ्क्रामितं भागादिकं फलरूपं तेषु पूर्वापरगतग्रहराश्यादिभोगेषु धनं योज्यम्" रङ्ग० । ७लग्नात् द्वितीयस्थाने तत्र जन्मलग्नात् द्वितीयस्थाने चिन्त्यपदार्थाग्रहयोगभेदेन शुभाशुभं च जातकपद्धतावुक्तं यथा "सुवर्णरत्नविक्रयक्रयाद्य कोशसंग्रहः । धनाभिधानमन्दिरे बुधैर्विचिन्त्य यादरात् । समस्तपापखेचरैर्युतेक्षितं धनाभिधम् । दरिद्रताविधायकं विशेषतः कृशानुना । शुद्धः शनिधनगतो धनिनं करोति दृष्टो बुधेन रविजान्यखगप्रदृष्टः । सूर्य्योऽपि, सौम्यखचरा अवगा धनानि नानाविधानि न यदा खलदृष्टदेहाः । बुधगुरुकवयश्चेद्वित्तगा वित्तलाभं विदधति यदि दृष्टाः सोमसौम्येन्दुपुत्रैः । क्रमश, दृष्ट कवित्रेत् सौम्यगेहे धनाप्रै भवति शुभखगानां दृष्टितो मानवस्य । क्षीणः शशी चेन विलोकितोऽर्थे पूर्वार्जितार्थस्य विनाशदः स्यात् । नवीनवित्तागमरोधकौ च धने कुजेन्दू त्वर्चि दोषदौ स्तः । रविर्धनेऽत्यष्टमिते कुजोऽङ्के षड्विंशके चेद्धननाशदः स्यात् । भावद्वे विधुः पीड़नमङ्गिरास्य भूपेऽल्पतायाञ्च कविः षडब्दे । द्वितीयस्य पतिर्नैवस्वामी शुक्रमतादिह । सेन्दुशुक्रोऽष्टमान्त्यस्थितो रात्रौ न्यूनश्च सः । सस्थ्यः शुक्रलग्नेशो जात्यन्धत्वाय कल्पते । एभिः पित्रादिभावेशैर्युक्तश्चेत्तत्तदान्धलत् । सशुक्रलग्नपश्चेत् स्यात्तेषयोर्वैपरीत्यलत् । भावाधीशः शुभैर्युक्तः केन्द्रकोणे शुभप्रदः" ।

वर्षलग्नात् द्वितीयस्थग्रहयोगादिफलम् नी०ता०उक्तं यथा "वित्ताधिपो जन्मनि वित्तगोऽब्दे जीवो यदा लग्नपतोत्यशाली । तदा धनाप्तिः सकलेऽपि वर्षे क्रूरेक्षराफे धनधान्यहानिः । जन्मन्यर्यावलोकीज्योऽब्देऽब्देशो बलवान् यदा । तदा धनाप्तिर्बहुला विनायासेन जायते । एवं यद्भावगोजन्मन्यब्दे तद्भावगो गुरुः । लग्नेशेनेत्यशाली चेत्तद्भावजसुखं भवेत् । यदा जनुषि यं पश्येत् भावमब्देऽब्दपो गुरुः । तदा तद्भावजं सौख्यमुक्तं तालकवेदिभिः । जन्मषष्ठाधिपः सौम्यः षष्ठोऽब्दे स्वल्पलाभदः । पापार्दिते गुरौ रन्ध्रेऽपवाद उपजायते । गुरुर्वित्ते शुभैर्दृष्टयुतो राज्यार्थसौख्यदः । जन्मन्यब्दे च सुखहारार्थि पश्यन् विशेषतः । एवं सितेऽब्दमे भूरिधनं धान्यं च जायते । वित्तलग्नेशसंयोगो वित्त सौख्यफलप्रदः । एवं बुधे सवीर्य्येऽस्मात्तिपिशानोद्यमैर्धनम् । जन्मलग्नगताः सौम्या वर्षेऽर्थे धनलाभदाः । लाभसद्मनि वित्ते वा बुधेज्यसितसंयुते । तैर्वा दृष्टे धनं भूरि स्वकुले राज्यमाप्नुयात् । अर्थार्थसहसेशौ चेत् शुभैर्मित्रदृशेक्षितौ । बलिनौ सुखतो लाभप्रदौ यत्नादरेर्दृशा । मित्रदृष्ट्या सुखाग्निलेऽङ्गार्थयोः सुखतो धनम् । तयोर्भूशरिफे वित्तनाशदुर्जनभीतयः । जन्मनीज्योऽस्ति यद्राशौ तद्राशिवर्षलग्नगः । शुभस्वामीक्षितयुतो नैरुज्यस्वाम्यवित्तदः । स्फुटौ लग्ने रविर्वर्षे धनस्थो धनसौख्यदः । शनौ वित्ते कार्य्यनाशो लाभोऽल्पोऽथ धनव्ययः । भ्रातृसौख्यं गुरुयुते भूतयः स्युः शुभेक्षणात् । क्रूरयोगेक्षणाद् सर्वं विपरीतं फलं वदेत् । वित्तेशो

जन्मनि गुरुर्वर्षे वर्षेशतां दधत्। यद्भावगस्तमाश्रित्य लाभदो लग्नमात्मनः। वित्ते सुवर्णरौप्यादेः भ्रात्रादेः सहजर्क्षगः। पितृमातृक्षमादिभ्यो वित्तं सुहृदि पञ्चमे। सुहृत्तनयषष्ठेऽरिवर्गाद्वानिप्रभीतिदः। स्त्रीभ्यो द्यूनेऽष्टमे मृत्युरर्थहेतुर्यशोऽङ्गगे। खे नृपादेर्नृपकुलादायेऽन्ये व्ययदो भवेत्। इत्थं विमृश्य सुधिया वाच्यमित्यपरे जगुः"। तद्भावानयनं द्वादशभावशब्दोक्तदिशावसेयम्। बीजगणितोक्ते ऽक्षणभिन्ने च। तत्र धनर्णसङ्कलनादिप्रकारस्तत्रोक्तो यथा

"धनर्णसङ्कलने करणसूत्रं वृत्तार्द्धम् योगे युतिः स्यात्क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः। उदाहरणम्। रूपत्रयं रूपचतुष्टयं च क्षयं धनं वा सहितं वदाशु। स्वर्णं क्षयं स्वं च पृथक् पृथङ्मे धनर्णयोः सङ्कलनामवैषि। अत्र रूपाणामव्यक्तानां चाद्याक्षरागयुगलक्षणार्थं लेख्यानि यानि ऋणगतानि तानूर्द्ध्वबिन्दूनि च।

न्यासः रू २ं रू ४ं योगे जातं रू ७ं

न्यासः रू १ रू ४ योगे जातं रू ७

न्यासः रू २ रू ४ं योगे जातं रू १ं

न्यासः रू २ं रू ४ योगे जातं रू १

एवं विभिन्नेष्वपि। धनर्णव्यक्कलने करणसूत्रं वृत्तार्द्धम् संशोध्यमानं स्वमृणत्वमेति स्वत्वं क्षयस्तद्युतिरूक्तवच्च। उदाहरणम्। त्वयाद्वयं स्वात् स्वमृणाद्रणं च व्यस्तं च संशोध्य वदाशु शेषम्।

न्यासः रू २ रू २ अन्तरे जातं रू १

न्यासः रू २ं रू २ं अन्तरे जातं रू १ं

न्यासः रू २ रू २ं अन्तरे जातं रू १ं

न्यासः रू २ं रू २ अन्तरे जातं रू १ं

। इति धनर्णसङ्कलनव्यक्कलने ।

गुणने करणसूत्रं वृत्तार्द्धम् स्वयोरस्वयोः स्वं धनं स्वर्णघाते क्षयोर्भागहारेऽपि चैवं निरुक्तम्। उदाहरणम्। धनं धनेनर्णमृणेन निघ्नं द्वयं त्रयेण स्वमृणेन किं स्यात्"।

न्यासः रू २ रू ३ धनं धनघ्नं धनं स्यादिति जातं रू ६ न्यासः रू २ं रू ३ं ऋणमृणघ्नं धनं स्यादिति जातं रू ६ न्यासः रू २ रू ३ं धनमृणगुणमृणं स्यादिति जातं रू ६ं न्यासः रू२ं रू३ ऋणं धनगुणमृणं स्यादिति जातं रू ६ं। इति धनर्णगुणनम्।

भागाहारेऽपि चैवं निरुक्तमिति। उदाहरणम्। रूपाष्टकं रूपचतुष्टयेन धनं धनेनर्णमृणेन भक्तम्। ऋणं धनेन स्वमृणेन किं स्यादु द्रुतं वदेदं यदि बोधुधीषि। न्यासः रू ८ रू ४ धनं धनहृतं धनं स्यादिति जातं रू २। न्यासः रू ८ं रू ४ं ऋणमृणहृतं धनं स्यादिति जातं रू २ न्यासः रू ८ं रू ४ ऋणं धनहृतं ऋणं स्यादिति जातं रू २ं। न्यासः रू ८ रू ४ं धनमृणहृतमृणं स्यादिति जातं रू २ं। इति धनर्णभागहारः। वर्गे करणसूत्रं वृत्तार्द्धम्। "क्षतिः स्वर्णयोः स्वं स्वमूले धनर्णे, न मूलं क्षयस्यास्ति तस्याक्षतित्वात्। उदाहरणम्। धनस्य रूपत्रितयस्य वर्गं क्षयस्य च ब्रूहि सखे! ममाशु। न्यासः रू ३ रू ३ं जातौ वर्गौ रू ९ रू ९ मूलोदाहरणम्। धनात्मकानामधनात्मकानां मूलं नवानां च पृथग्वदाशु। ८। न्यासः रू ९ मूलं रू ३ वा रू ३ं न्यासः रू ९ं एषामवर्गत्वान्मूलं नास्ति। धन-रवे अच्। ८ शब्दे च।

धनक पु० धनस्य कामः इच्छा धन+कन्। १धनस्येच्छायाम्। २कृतवीर्य्यजनके नृपभेदे "धनकः कृतवीर्य्यस्तः" भाग०९।२३।७

धनकेलि पु० धनेन केलिरस्य। कुबेरे त्रिका०।

धनच्छू स्त्री धनं छ्यति नाशयति छो-क। करेटुखगे। त्रिका०।

धनञ्जय धनं जयति सम्पादयति जि-खच् मुम्। १वह्नौ "धनमिच्छेत् हुताशनात्" इत्युक्तेस्तस्य धनदत्वात्तथात्वम् २चित्रकवृक्षे च अमरः। "सर्वान् जनपदान् जित्वा वित्तमादाय केवलम्। मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम्" भा० विरा० ४४ अ० उत्तरं प्रति अर्जुनेन स्वनामनिर्वचनयुक्ते ३अर्जुने "पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः" गीता। "विजित्य यः प्राच्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः। स वल्कलवासांसि तवाधुना हरन् करोति मन्युं न कथं धनञ्जयः" किरा०। ४तन्नामनामके अर्जुनवृक्षे रत्नमा०। ५विष्णौ च। "अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः" विष्णुसं०। धन-रवे अच् धनस्य शब्दस्य जयनात् शब्दावाच्यत्वात् तस्य तथात्वम् "धनञ्जयस्तथा घोषे महारजतवर्णकः। ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगादिषु" योगार्णवोक्ते ६देहस्थे वायुभेदे। ७नागभेदे च "शेषः प्रथमतो जातः वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" भा०आ० ३५ अ०।

धनद पु॰ धनं दयते देङ्-पालने धनं ददाति दा-दाने वा क । १कुबेरे अमरः । २धनदातरि त्रि॰मेदि॰ ३देवीभेदे स्त्री एवुल् धनदायिकाऽपि तत्र "ध्यायेत् कल्पतरोर्मूले देवीं तां धनदायिकाम्"। तन्त्रसारे तन्मन्त्रध्यानादिकं दृश्यम्। कुबेरश्च पुलस्त्यपुत्रस्य विश्रवसः पुत्रः तत्कथा रामा॰ उ॰ ३य॰ उक्ता । "अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः । अचिरेणैव कालेन पितेव तपसि स्थितः । सत्यवान् शीलवान् दान्तः स्वाध्यायनिरतः शुचिः । सर्वभोगेष्व संसक्तो नित्यं धर्मपरायणः । ज्ञात्वा तस्य तु तद्वृत्तं भारद्वाजो महामुनिः । ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम् । प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा । सदा परमया युक्तो विश्रवा मुनिपुङ्गवः । स तस्यां वीर्यसम्पन्नमपत्यं परमाद्भुतम् । जनयामास धर्मज्ञः सर्वैर्ब्रह्मगुणैर्युतम् । तस्मिन् जाते तु संहृष्टः संबभूव पितामहः । दृष्ट्वा श्रेयस्करीं बुद्धिं धनाध्यक्षो भविष्यति । नाम चास्याकरोत् प्रीतः सार्धं देवर्षिभिस्तदा । यस्माद्विश्रवसोऽपत्यं साहश्याद्विश्रवा इव । तस्माद्वैश्रवणो नाम भविष्यत्येष विश्रुतः" "स तु वैश्रवणस्तत्र तपोवनगतस्तदा । अवर्धताऽतिसुतो महातेजा यथाऽनलः । तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः । चरिष्ये परमं धर्मं धर्मो हि परमा गतिः । स तु वर्षसहस्राणि तपस्तप्त्वा महावने । यन्त्रितो नियमैरुग्रैश्चकार सुमहत्तपः । पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत् । जलाशी मारुताहारो निराहारस्तथैव च । एवं वर्षसहस्राणि जग्मुस्तान्येकवर्षवत् । अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह । गत्वा तस्याश्रमपदं ब्रह्मोदं वाक्यमब्रवीत् । परितुष्टोऽस्मि ते वत्स ! कर्मणानेन सुव्रत ! । वरं वृणीष्व भद्रन्ते वरार्हस्त्वं महामते ।। अथाब्रवीद्वैश्रवणः पितामहसुपस्थितम् । भगवन् ! लोकपालत्वमिच्छेयं लोकरक्षणम् । अथाब्रवीद्वैश्रवणं वाढमित्येव हृष्टवत् । अहं वै लोकपालानां चतुर्थं खलु सुव्रतः । यमेन्द्रवरुणानां च पदं यत्तव चेप्सितम् । तद्गच्छ वत्स ! धर्मज्ञ ! निधीशत्वमवाप्नुहि । शक्राम्बुपयमानां च चतुर्थस्त्वं भविष्यसि । एतच्च पुष्पकं नाम विमानं सूर्यसन्निभम् । प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज । स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम् । कृतकृत्यावयं तात ! दत्त्वा तव वरद्वयम् । इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह । गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम् । धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान् । भगवन् ! लब्धवानस्मि वरमिष्टं पितामहात् । निवासनं न मे देवो विदधे स प्रजापतिः । तं पश्य भगवन् ! कस्मिन्निवासं साधु मे प्रभो ! । न च पीडा भवेद्यत्र प्राणिनो यस्य कस्यचित् । एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः । वचनं प्राह धर्मज्ञ ! श्रूयतामिति सत्तम ! । दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः । तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा । लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा । राक्षसानां निवासार्थं यथेन्द्रस्यामरावती । तत्र त्वं वस भद्रन्ते लङ्कायां नात्र संशयः" । तस्य धनाध्यक्षत्वात् धनदत्वम् । "यथा साधारणीभूतं नामास्य धनदस्य च" रघुः । ४धनञ्जयरूपे वायौ पु॰ धनपतिशब्दे दृश्यम् । ५वङ्गौ ६चित्रकवृक्षे च पु॰ ।

धनदण्ड पु॰ धनेन दण्डः । मनूक्ते धनग्रहणदण्डे "वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डं तु वधदण्डमतःपरम्" ।

धनदात्री स्त्री धनदस्य कुबेरस्यात्रीव पिङ्गलं पुष्पमस्याः पचसमा॰ङीष् । कुबेराक्षीलतायां लताकरञ्जे राजनि॰ ।

धनदानुज पु॰ ६तत्॰ । १रावणे शब्द च॰ २कुम्भकर्णादौ च "द्वेषां विश्रवसः कैकसीतो जातत्वात् तथात्वं तत्कथा । "सा त्वं मुनिवरं श्रेष्ठं प्रजापतिकुलोद्भवम् । भज विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् । ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि ! न संशयः । तेजसा भास्करसमो यादृशोऽयं धनेश्वरः । सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् । तत्र गत्वा च सा तस्थौ विश्रवा यत्र तप्यते" । "कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुङ्गवः । उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम् । पश्चिमो यस्तवसुतो भविष्यति शुभानने ! । मम वंशानुरूपः स धर्मात्मा च न संशयः । एवमुक्ता तु सा कन्या रास ! कालेन केनचित् । जनयामास बीभत्सं रक्षोरूपं सुदारुणम् । दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम् । ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम्" "तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः । प्रमाणादु यस्य किञ्चिं प्रमाणं नेह विद्यते । ततः शूर्पणखा नाम संजज्ञे विकृतानना । विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः" "भुजमूर्ध्नोरबाहुल्यात् एकोऽपि धनदानुजः" रघुः ।

धनदायिन् त्रि॰ धनं ददाति दा–णिनि ६त॰। १धनदातरि २वङ्को पु॰ मन्दरत्ना॰ "धनमिच्छेत् कुतायनात्" इत्युक्तेस्तस्य तथात्वम्।

धनदेश्वर पु॰ काशीस्थे कुबेरस्थापिते शिवलिङ्गभेदे।

धनन्दा स्त्री धनं ददते दद–बा॰ खच् मुम्। बुद्धशक्तिभेदे त्रिका॰।

धनपति पु॰ ६त॰। १कुबेरे "सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य" "नत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तम्" मेघ॰। २धनस्वामिनि देहस्थे वायुभेदे च तस्य धनपतित्वकथा "शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम्। यथा वायुः शरीरस्थो धनदः संबभूव ह। आत्मं शरीरं यत्तस्मिन् वायुरन्तःस्थितोऽभवत्। प्रयोजनात् मूर्त्तिमत्त्वमादिशन् क्षेत्रदेवताः। तत्रामूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्त्यते मया। तां शृणुष्व महाभाग! कथ्यमाना मयाऽनघ!। ब्रह्मणः सृजतः सृष्टिं सुखाद्वायुर्विनिर्ययौ। प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत्। मूर्त्तो भवस्व शान्तश्च तत्रोक्तो मूर्त्तिमान् भवन्। सर्वेषाञ्चैव देवानां वह्नित्वं फलमेव च। तत् सर्वं वाहि मेनोक्तं तस्माद्धनपतिर्भव। तस्य ब्रह्मा ददौ तुष्टस्त्रिधिमेकादशीं प्रभुः। तस्यामनग्निपक्वाशी यो भवेन्नियतः शुचिः। तस्मै तु धनदो देवस्तुष्टः सर्वं प्रयच्छति। एषा धनपतेर्मूर्त्तिः सर्वकिल्बिषनाशिनी" वराह पु॰। (स्वामिनि) २धनाध्यक्षे त्रि॰।

धनपाल त्रि॰ धनं पालयति पालि–अण्। १धनरक्षके २कुबेरे पु॰।

धनपिशाची स्त्री धने पिशाचीव। अतिशयधनतृष्णायां स्वार्थे क। धनपिशाचिकाऽप्यत्र हारा॰।

धनप्रयोग पु॰ धनस्य बुद्ध्यर्थं प्रयोगः। ऋणरूपेण अधमर्णाय धनस्य दानरूपे प्रयोगे। तन्नक्षत्रादि मुहूर्त्तचिन्तामणौ पीयूषधारायाञ्चोक्तं यथा

"स्वात्यादित्यमृदुक्षिप्रदैवगुरुभे कर्णत्वयाश्वे चरे लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगः शुभः। नारे शास्त्रमृणं तु संक्रमदिने ऽष्टौ करेऽर्केऽङ्गि यत् तद्दंशेषु भवेदृणं न च बुधे देयं कदाचिद्धनम्"। "स्वात्यादित्येति। स्वातीपुनर्वसुचित्रानुराधामृगरेवतीविशाखाश्विमृद्यश्रवणधनिष्ठाशततारकाश्विनीत्येकादशसु नक्षत्रेषु द्रव्यप्रयोगः शुभः द्रव्यं परस्मै ऋणत्वेन देयं यदाह भीमपराक्रमः "मृदुपुष्याश्विनी चैव विशाखाश्रवणत्रयम्। पुनर्वसौ च शंसन्ति धनादिनिधिवर्त्तनम्। वर्त्तनमृणादिरूपेण दानं मिथुनकन्यादिशास्त्रानिषेधे प्राप्ते ऋणदाने एव न निषेध इति विशेषः। हृतनष्टादौ तु निषिद्धैव। अथ लग्ने धरे मेषकर्कतुलामकराणामन्यतमे धर्मो नवमं सुतः पञ्चमम् अष्टगश्चेन लग्नेनाष्टमस्थानमुच्यते तेषां शुद्धिः नवमपञ्चमस्थानयोः शुभग्रहसत्त्वं पापग्रहराहित्यञ्च अष्टमे तूभयराहित्यमित्यर्थः। एवं रूपया शुद्धा सहिते लग्ने ऋणं देयम्। उक्तञ्च रत्नमालायां "शुद्धेषु धर्मात्मजनैधनेषु चरे विलग्ने द्रविणप्रयोगः" इति। अथाऽऽरे मङ्गलवार ऋणं न शास्त्रं बहुक्तं ज्योतिःप्रकाशे "ऋणं भौमे न गृह्णीयान्न देयं बुधवासरे। ऋणच्छेदं कुजे कुर्यात् सञ्चयं सोमनन्दने"। अथ तुर्विशेषे संक्रमः संक्रान्तिः तद्दिवसे, ऽष्टौ ऽष्टद्वियोगे करेऽर्केऽङ्गि लग्नलग्नसहिते रविवारे हस्तार्के इति यावत्तत्रापि ऋणं न शास्त्रमिति प्रत्येकं सम्बन्धः। ननु कुतो न शास्त्रमित्यत आह यदिति यतश्चाष्टौ दोषनष्टं तद्दंशेषु ऋणग्रहीतृकुलेषु भवेत् तदृणं तत्पुत्रपौत्रादिभिरपि परिहर्त्तुमशक्यमित्यर्थः अर्थादेषु भौमसंक्रान्त्यादिदिनेषु ऋणमवश्यं परिहर्त्तव्यमिति ब्रह्मशौर्यः। "हस्तेऽर्कवारे संक्रान्तौ यदृणं स्यात् कुलेषु तत्। ऽष्टद्वियोगे तथा श्रेयस्ऋणच्छेदं तु कारयेदिति" ज्योतिःप्रकाशकारोक्तेश्च। अथ बुधे बुधवारे कदाचिदप्यृणं न देयम्। "न देयं बुधवासरे" इत्यधुनैवोक्तत्वात्। पी॰धा॰ तत्र निषिद्धनक्षत्रादि तत्रैवोक्तं यथा

"तीक्ष्णमिश्रध्रुवोपैर्यद्द्रव्यं दत्तं निवेशितम्। प्रयुक्तञ्च विनष्टञ्च विष्ट्यां पाते न याचते" स्मृ॰ चि॰ "तीक्ष्णेति तीक्ष्णमिश्रध्रुवोपसंज्ञकैर्नक्षत्रैर्यद्द्रव्यं सुवर्णादि दत्तं कलान्तरं विनैव दत्तं न तु स्वत्वपरित्यागेन, तद्दत्तमित्युच्यते निवेशितं स्वेष्टसमीपे प्रत्ययार्थं स्थापितं प्रयुक्तं कलान्तररीतिपुरःसरोत्तमर्णाधमर्णव्यवहारेण कस्मै चिद्दत्तं, विनष्टं चौरादिना हृतं स्वयमेव वा क्वचित्त्यक्तं तद्द्रव्यं निश्चयेन कदाचिदपि नाप्यते तथा विष्ट्यां भद्रायां पाते व्यतीपाते महापाते वा हृतं द्रव्यं न प्राप्यते चकाराद्ऋणेऽपि न देयमिति व्याख्येयं वसिष्ठवाक्यस्वरसात् उक्तञ्च वसिष्ठेन "ध्रुवोपसाधारणटारुणर्क्षे निक्षिप्तमर्थं त्वथ वा प्रनष्टम्। चौरैर्हृतं दत्तमुपप्लवे वा विष्ट्यान्तु पाते न च लभ्यते तत्"। उपप्लवे ग्रहणे। यन्तु केचिदुक्तवन्तः "निश्चयेन चौरहृतस्य द्रव्यस्य

प्राप्तप्राप्तिविचारोऽन्यकाटिनक्षत्रैरेव यात्राभोऽन्यके निकट एव हृतस्य चौरैरित्युक्तत्वात्। चोरानिर्णये-त्वनेनैव विचारः" तच्चिन्त्यं वसिष्ठवाक्येऽपि चौरैर्हृ-तमिति साक्षाच्चौरपदोपादानाद्येन केनापि विचारः कर्त्तव्य इति युक्तसत्यस्यामः। एवं चौरानिर्णयेऽपि स्वेच्छया विचारः तत्रोभयैक्ये प्राप्तप्राप्तिनिश्चय एव उभयैक्याभावे तु प्रयत्नेनेति"।

धनप्रिया स्त्री काकजम्बुवृक्षे राजनि०।

धनर्च पु० धनार्थमर्चा यस्य वेदे सक०। धनार्थार्चायुक्ते वह्नौ "नार्वणं धनर्चम्" ऋ० १०।४६।५।

धनवत् त्रि० धन+अस्त्यर्थे मतुप् मस्य वः। धनस्वामिनि "रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः" "धनवन्तं प्रजा-वन्तं दात्विकं धार्मिकं तथा" मनुः स्त्रियां ङीप्। सा च २धनिष्ठानक्षत्रे जटा०। तस्य च धनदेवताकत्वात् तथात्वम्।

धनसनि त्रि० सन-सम्भक्तौ इन् ६त०। धनलाभयुक्ते "तस्य इमे वीणायां गायन्त्येनं ते गायन्ति। तस्मात्ते धनसनयः" छा० उ०। "धनसनयो धनलाभयुक्ता धन-वन्तः" भा०। [स्थाने।

धनस्थान न० धनचिन्तनार्थं स्थानम्। कर्म्मात् द्वितीय-

धनस्य नामधातुः आत्मनः धनमिच्छति धन+क्यच् लाल-साया लुक् अक०.प० सेट्। धनस्यति अधनस्यीत्। पक्षे असुक् धनास्यति इति भेदस्तत्रार्थे।

धनस्यक त्रि० धनस्य नामधातुः ण्वुल्। १लालसया धनेच्छौ २गोक्षुरे पु० शब्दच०।

धनहर त्रि० धनं हरति हृ-नाच्छील्यादौ ट। १धनहरणशीले चोरे स्त्रियां ङीप् सा च २चोरनामग-न्धद्रव्ये स्त्री अमरः तस्या धनहरचोरनामतुल्यनामक-त्वात्तथात्वम्। [२चण्डालकन्दे पु० पारस्करनि०।

धनहृत् त्रि० धनं हरति हृ-क्विप् तुक्। १धनहारिणि

धनाधिकारिन् त्रि० धनमधिकरोति अधि+कृ-णिनि ६त०। धनाध्यक्षे (तहविलदार) ख्याते कोषाध्यक्षे। अधि+कृ-क्विप् तुक्। धनाधिकृदप्यत्र।

धनाधिगोप्तृ त्रि० धनमधिगोपायति अधि-गुप-वा आयामाव तृच्। १धनपालके (खाजाञ्चि) ख्याते कोषा-ध्यक्षे स्त्रियां ङीप्। २कुबेरे पु०। "स तदुत्कृष्टहर्म्यो-परि वर्त्तमान आलोकयामास धनाधिगोप्ता" भा० उ० १६२ अ०।

धनाधिप त्रि० धनमधिपाति अधि+पा-रक्षणे क ६त०। १धन-रक्षके (खाजाञ्चि) कोषाध्यक्षे २कुबेरे पु० अमरः। "धना-धिपेन विद्वस्य अनुह्लादस्य संयुगे" हरिवं० २५१ अ०।

धनाधिपति पु० ६त०। १कुबेरे "अनुचरेण धनाधिपतेरथो-नगविलोकनविस्मितमानसः" किरा०। "कौबेरं प्रययौ तीर्थं यत्र तत्वा महत्तपः। धनाधिपत्यं संप्राप्तो राज-राजेश्वरः प्रभुः" भा० शा० १८ अ०। अधिपतेर्भावः ष्यञ् आधिपत्यम् धनस्याधिपत्यमित्यर्थः।

धनाध्यक्ष त्रि० ६त०। (खाजाञ्चि) १कोषाध्यक्षे "कोष्ठ-वस्त्राजिनादीनां रत्नानाञ्च विधानवित्। विज्ञाता कल्पु-धाराणामनाहार्य्यः शुचिः सदा। निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः। आयद्वारेषु सर्वेषु धनाध्यक्ष समा नराः। व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवी-क्षिता" इति मत्स्यपु०२१४ अ० तल्लक्षणसूक्तं २कुबेरे पु०

धनाय नामधातुः आत्मनो धनमिच्छति क्यच् गर्द्धार्थे नि०। गर्द्धेन धनेच्छायाम्। परं० अक० सेट्। धनायति अधनायीत्। "शूद्रा यदर्यजारा न पोषाय धना-यति" यजु० २३।२०। "आनन्तर्य्यञ्चारभते न प्राणानां धनायते" ना० ता० १३२ अ०। आर्षत्वात्। अगर्द्धे तु धनीयतीत्येव।

धनायु पु० नृपभेदे विष्णुपु०।

धनार्थिन् त्रि० धनमर्थयते अर्थ+णिनि ६त०। धनप्रार्थके "न नाडगं भवत्येनो मृगहन्तुर्धनार्थिनः" मनुः।

धनाशा स्त्री ६त०। धनलोभे "जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः। धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति" हरिवं० २० अ०।

धनाश्री स्त्री रागिणीभेदे (धानसी) सा च हनुमन्मते श्री-रागस्य तृतीया भार्या। कल्लिनाथमते मेघरागस्य चतुर्थी भार्या।

धनिक त्रि० धनमादेयत्वेनाऽस्त्यस्य ठन्। उत्तमर्णे अधमर्ण-सकाशात् स्वप्रयुक्तधनयाचके। "एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि" याज्ञ०। २साधौ वणिजि। धन-वा० इक। ३धन्याके पु० मेदि० राजनि०क्लीबत्वम्। ४धने स्वामिनि पु० हेमच०। धनी स्वार्थे क। धानका ५धनिकभार्यायां वणिक् स्त्रियां स्त्री मेदि०। ६बध्वाम् हेमच० ७युवत्यां शब्दरत्ना० दप्रियङ्गुवृक्षे स्त्री शब्दच०। टशब्दकल्पद्रुमव्याख्यातरि ९विष्णुसूनौ विदङ्गदेशे पु०

धनिन् त्रि० धनमस्त्यस्य धन+इनि। धनवति "धनिनः श्रो-

त्रियो राजा नदी वैद्यश्च पञ्चमः" चाणक्यः । "महापथ्ये धनिन्याश्च निःक्षेपं निःक्षेपेद्बुधः" मनुः ।

धनिष्ठ त्रि॰ अतिशयेन धनी इष्ठन् इनो लोपः । १अतिशयधनयुक्ते स्त्रियां टाप् सा च अश्विन्यादिमध्ये २२तयोविंशे नक्षत्रे स्त्री तस्या वसुदेवताकत्वात् तथात्वम् । अस्येमा शब्दे तत्स्वरूपादिकं द्रष्टव्यम् । तत्र धनिष्ठा पञ्चतारा इत्येव पाठः सुश्रुतादौ पञ्चतारेति त्रुटितम् । "मस्तकोपरिसमागते धने मर्दलालतिनि पञ्चतारके । यान्ति कान्तिमति मेषलग्नतः सारसाक्षिरसचञ्चलिप्रियाः" कालिदासः ।

धनी स्त्री धनमस्त्यस्याः अच् गौरा॰ ङीष् । १युवत्यां स्वार्थे कापि वा न ह्रस्वः । धनीकापि तत्रार्थे शब्दच॰ ।

धनीय नामधातुः आत्मनोऽस्त्रोभेन धनमिच्छति क्यच् प॰ अक॰ सेट् । धनीयति अधनयीत् । गर्वे तु धनायतीत्येव

धनीयक न॰ धनाय हितः छ संज्ञायां कन् । धन्याके रत्नमा॰ ।

धनु पु॰ धन–उन् । १प्रियङ्गुवृक्षे २धनुर्द्धरे त्रि॰ मेदि॰ । ३शीघ्रगन्तरि च "अश्वाङ्गरो धनुतरौ" ऋ॰ ४।३५।५। "धनुतरौ शीघ्रगन्तृतरौ" भा॰ । ४धनुषि च धन्वन्तरिः ।

धनुःपट पु॰ धनुष इव पटो विस्तारोदेशे यस्य । (पियाशाल) वृक्षे वा पत्रे धनुष्पटोऽप्यत्र अमरः ।

धनुःशाखा स्त्री धनुषः शाखा यस्याः । १मूर्वायाम् शब्दच॰ । धनुरवयव इव शाखा यस्याः । २प्रियालतरौ शब्दच॰

धनुःश्रेणी स्त्री धनुषः श्रेणीव । १महेन्द्रवारुण्यां २मूर्वायाञ्च । राजनि॰ ।

धनुर्गुण पु॰ ६त॰ । १मौर्व्यां जीवायां शब्दच॰ । धनुषो गुणो यस्याः शक्त्यात् ५त॰ । २ मूर्वायां स्त्री शब्दर॰ ।

धनुर्ग्रह पु॰ धनुस्+अनुद्यमने ग्रह–अच् । धनुर्द्धरे तद्व्याहके तु अण् धनुर्ग्राह इत्येव । २धृतराष्ट्रपुत्रभेदे । "कवची निषङ्गी दण्डी दण्डधारो धनुर्ग्रहः" भा॰ आ॰ ६७अ॰ तत्पुत्रोक्तौ । ग्रह–भावे अप् ६त॰ । धनुर्विद्यायाम् "गान्धर्वं नारदो वेत्ति भरद्वाजो धनुर्ग्रहम्" भा॰ शा॰ ३१॰ अ॰ । ग्रहेक्षानार्थत्वात् तथात्वम् ।

धनुर्द्रुमः पु॰ धनुषः साधनं द्रुमः । वंशवृक्षे राजनि॰ । तस्य धनुःसाधनत्वात् तथात्वम् ।

धनुर्द्धर पु॰ धनुर्धरति धृञ् अच् ६त॰ । धानुष्के धन्विनि अमरः "धनुर्द्धरः केशरिणं ददर्श" "स्थितावभूदेकधनुर्द्धरोऽपि सः" रघुः । २धृतराष्ट्रपुत्रभेदे "कवची क्रथनः कुण्डी कुण्डधारी धनुर्द्धरः" भा॰ शा॰ ११७ तत्पुत्रोक्तौ । ३विष्णौ पु॰ । "धनुर्द्धरो धनुर्वेदः" विष्णुसं॰ ।

धनुर्द्धारिन् त्रि॰ धरति धृ–णिनि ६त॰ । धानुष्के । "शूरश्च रणदक्षश्च गजाश्वरथकोविदः । धनुर्द्धारी भवेद्राज्ञः सर्वक्लेशसहः शुचिः" मत्स्यपु॰ २१४ अ॰ तस्य लक्षणमुक्तम् ।

धनुर्भृत् पु॰ बिभर्त्ति भृ–कर्त्तरि क्विप् तुक् ६त॰ । धनुर्द्धरे धानुष्के । "धनुर्भृतोऽप्यस्य दयार्द्रभावम्" धनुर्भृतामग्रत एव रक्षिणाम्" रघुः ।

धनुर्मख पु॰ धनुरुपलक्षितो मखः । कृष्णाङ्गनार्थं कंसेन कृतः कृते यज्ञभेदे । "राजा धनुर्मखं नाम कारयिष्यति वै तुष्टो" हरिवं॰ ७९ अ॰ । धनुर्यौगादयोऽप्यत्र । "आरभ्यतां धनुर्यागस्तदर्थ्याम् यथाविधि । विशसन्तु पशून् मेध्यान् भूतराजाय मीढुषे" भाग॰१०।३६।२२। "सम्बद्धस्तत्र कंसस्य भविष्यति धनुर्मखः" हरिवं॰८अ॰।

धनुर्मध्य न॰ ६त॰ । धनुषो मध्यभागे हस्तके धन्विभिर्यत्र धनुर्गृह्यते तस्मिन् स्थाने अमरः ।

धनुर्माला स्त्री धनुषो मालः सम्बन्धो यस्याः । मूर्वालतायाम् शब्दच॰ ।

धनुर्यास पु॰ धनुरिव यासः । दुरालभायां सारसुन्दरी ।

धनुर्लता स्त्री धनुरवयवयोग्या लता । सोमवल्ल्यां राजनि॰ ।

धनुर्वक्त्र पु॰ धनुरिव वक्त्रमस्य । कुमारानुचरभेदे । "विद्युताक्षो धनुर्वक्त्रो जाठरोमारुताशनः" भा॰ श॰ ४६ अ॰ तदनुचरोक्तौ ।

धनुर्विद्या स्त्री धनुषो विद्या । धनुरादीनां प्रयोगसंहारज्ञापके विद्याभेदे तद्दारम्भनक्षत्रादि दीपिकायामुक्तं यथा "अदितिगुरुयमार्कस्वातिचित्राग्निपित्रध्रुवहरिवसुमूलाश्वीन्दुभाग्यान्त्यभेषु । विशनिशशिबुधाहे विष्णुबोधे विपौषे सुसमयतिथियोगे चापविद्याप्रदानमिति" ।

धनुर्वृक्ष पु॰ धनुः साधनं धनुरिव वा वृक्षः । १वंशे २धन्वनवृक्षे ३भल्लातकवृक्षे ४अश्वत्थवृक्षे च राजनि॰ ।

धनुर्वेद पु॰ धनूंषि तदादीन्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेन विद–ज्ञाने करणे घञ् । यजुर्वेदस्योपवेदभेदे स च लुप्तप्रायः अग्निपु॰ तत्र प्रतिपद्यविषयादिकमुक्तं यथा "अग्निरुवाच । चतुष्पादं धनुर्वेदं वदे पञ्चविधं द्विज ! । रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्त्तितम् । यन्त्रमुक्तं१ पाणिमुक्तं२ मुक्तसन्धारितं३ तथा । असुक्तं४ बाहुयुद्धञ्च५ पञ्चधा तत् प्रकीर्त्तितम् । तत्र यन्त्रास्त्र-

सम्मत्या द्विविधं परिकीर्त्तितम्। ऋजुमायाविभेदेन भूयो द्विविधमुच्यते। क्षेपणीचापयन्त्राद्यैर्यन्त्रमुक्तं, प्रकीर्त्तितम्। शिलातोमरपत्रादि पाणिमुक्तं२ प्रकीर्त्तितम्। शक्तसन्धारित श्चेयं प्रासाद्यमपि यद्भवेत्। खड्गादिकमसक्तञ्च० नियुद्धं विगतायुधम्५। इत्यादीन्यानि पात्राणि योद्धुमिच्छुर्व्वितन्त्रमः। धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च। तानि खड्गजघन्यानि बाहुप्रच्यवनानि च। धनुर्वेदे गुरुर्विप्रः प्रोक्तो वर्णद्वयस्य च। युद्धाधिकारः शूद्रस्य स्वयं वापदि शिष्यया। देशस्थैः सङ्करै राज्ञः कार्य्या युद्धे सहायता। अङ्कुशगुल्फपार्ष्ण्यङ्गुष्ठ श्लिष्टाः स्युः सहिता यदि। दृष्टं समपदं स्थानमेतद्धनुषतस्तथा। बाह्वाङ्कुशस्थितौ पादौ सव्यजानुबलायुभौ। निवितस्त्वन्तरास्थानमेतद्वैशाखसंज्ञकम्। हंसपक्षप्रतीकाशे दर्शयेते यत्र जानुनी। चतुर्वितस्तिविच्छिन्ने तदेतन्मण्डलं स्मृतम्। कृतालतिसमं यत्र सव्यजानूरुदक्षिणम्। वितस्त्यः पञ्च विस्तारे तदाढीढं प्रकीर्त्तितम्। एतदेव विपर्य्यस्तं प्रत्यालीढमिति स्मृतम्। तिर्य्यग्भूतो भवेद्बाहो दक्षिणोऽपि भवेदृजुः। गुल्फौ पार्ष्णिग्रहौ चैव स्थितौ पञ्चाङ्गुलान्तरौ। स्थानं जातं भवेदेतद् द्वादशाङ्गुलमायतम्। ऋजुजानुर्भवेद्बाहो दक्षिणः सुप्रसारितः। अथ वा दक्षिणञ्चापि कुर्य्यं भवति निश्चलम्। दण्डायतो भवेदेष चरणः सह जानुना। एवं विकटसंज्ञिष्टं द्विहस्तान्तरमन्यतम्। जानुनी द्विगुणे स्थाताञ्चतानौ चरणावुभौ। अनेन विधियोगेन सम्पुटं परिकीर्त्तितम्। किञ्चिद्विवर्त्तितौ पादौ समदण्डायतौ स्थिरौ। दृष्टमेव यथान्यायं षोडशाङ्गुलमायतम्। स्वस्तिकेनात्र कुर्वीत प्रमाणं प्रथमं द्विज!। कार्मुकं गृह्य वामेन बाणं दक्षिणकेन तु। वैशाखे यदि वा जाते स्थितो बाणस्य वायतौ। गुणान्तन्तु ततः कृत्वा कार्मुके प्रियकार्मुकः। अधःकटिन्तु धनुषः फलदेशन्तु पत्रिणः। धरणाग्रां स्थापयित्वा तु तोलयित्वा तथैव च। भुजास्थानत कुञ्जाभ्यां प्रकोष्ठाभ्यां शुभव्रत!। शस्त्र बाणं धनुःश्रेष्ठं पुङ्खदेशे च पत्रिणः। विन्यासो धनुषश्चैव द्वादशाङ्गुलमन्तरम्। त्रयया विधिष्टः कर्त्तव्यो नातिहीनो न चाधिकः। निवेश्य कार्मुकं नाभ्यां नितम्बे शरसञ्चयम्। जत्रुमेढ्रोत्थितं कृत्वमन्तरेणाङ्गुलद्वयोः। पूर्वेण सहिता पाश्चं स्तनाग्रे दक्षिणे शरः। कृरयन्तु ततः कृत्वा शीघ्रं पूर्वं प्रसारयेत्। नाभ्यन्तरा नैव बाह्या नोर्द्धका नाधरा तथा। न च कुब्जा न चोत्तानान चला नातिवेष्टिता। सना स्थैर्य्यगुणोपेता मौर्वी दण्डमिव स्थिता। छादयित्वा ततो लक्ष्यं पूर्वेणानेन सहिना। उरसा तृत्थितो यन्ता त्रिकोणविनतस्त्रिकः। लम्बाङ्गो निश्चलग्रीवो मयूराञ्चितमस्तकः। ललाटनासावक्षांसाः कुर्युरन्यसमन्वयेत्। अन्तरं त्र्यङ्गुलं श्रेष्ठं चिबुकस्यांसकस्य च। प्रथमन्त्र्यङ्गुलं श्रेयं द्वितीये द्व्यङ्गुलं स्मृतम्। तृतीयेऽङ्गुलसंश्लिष्टमायतञ्चिबुकांसयोः। गृहीत्वा सायकं पुङ्खात्तर्जन्याङ्गुष्ठकेन तु। अनामया पुनर्गृह्य तथा मध्यमयापि च। तावदाकर्षयेद्बाणं यावद्बाणः सुपूरितः। एवंविधमुपक्रम्य मोक्तव्यं विधिवत् खगम्। दृष्टिसंदृष्टिहृदं लक्ष्यं भिन्द्याद्बाणेन शुभ्रत!। सङ्गा तु पश्चिमं हस्तं चिमेद्देहेन पृष्ठतः। एतदुक्तं दमिच्छन्ति ज्ञातव्यं हि त्वया द्विज!। कूर्परन्तद्धः कार्य्यं नाभ्यां तु धनुषता। जर्द्धं विसृक्के कार्य्यं लक्षस्थितन्तु मध्यमम्। श्रेष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविचारदैः। ज्येष्ठस्तु सायको ज्ञेयो भवेद्द्वादशसंख्यः। एकादश तथा मध्यः कनीयान्दश संख्यः। चतुर्हस्तं धनुःश्रेष्ठं त्रयः सार्द्धास्तु मध्यमम्। कनीयस्तु द्वयं प्रोक्तं नित्यमेव पदातिनः। अश्वे रथे गजे श्रेष्ठे तदेव परिकीर्त्तितम्" २४८अ०। अग्निरुवाच। "पूर्णायतं द्विजः कृत्वा ततो मांसैर्गदायुधान्। सुनिर्भीतं धनुः कृत्वा रङ्गभूमौ निधापयेत्। ततो बाणं समाकृष्य दंशितः सुसमाहितः। तृणमासाद्य वल्लीयाद्दृढां कक्षाञ्च दक्षिणाम्। विलक्ष्यमपि तद्बाणं तत्र चैव प्रसंस्थितम्। ततः सप्तदरेहाणं तृणाद्दक्षिणपाणिना। तेनैव सहितं मध्ये शरं सङ्गृह्य धारयेत्। वामहस्तेन वै कक्षां धनुस्तस्मात्सुदरेत्। अविमस्तमतिर्भूत्वा गुणे पुङ्खं निवेशयेत्। सम्मोह्य सिंहकर्णेन पुङ्खेनापि समे दृढः। वामकर्णोपविष्टञ्च फलं वामस्य धारयेत्। वर्णान् मध्यमया तत्र वामाङ्गुल्या च धारयेत्। मनो लक्ष्यगतं कृत्वा सहिना च विधानवित्। दक्षिणे मात्रभागे तु कृत्वा बाणं विलोकयेत्। ललाटपुटसंस्थानं दण्डं लक्ष्ये निवेशयेत्। आकर्णं ताडयेत्तत्र चन्द्रकं षोडशाङ्गुलम्। सङ्गा बाणं ततः पश्चादुत्कालिकसदा तथा। निम्बङ्गीयानूमध्यमम। ततोऽङ्गुल्या हनः हनः। अक्षिवक्षं क्षिपेन्मूषाशतरत्नञ्च दक्षिणम्। चतुरक्ष-

नतं वेध्यमभ्यसेच्छादितः स्थितः। तस्मादनन्तरं तीक्ष्णं पराङ्मुखं गतञ्च यत्। निम्नमुन्नतवेधञ्च अभ्यसेत् क्षिप्रकान्ततः। वेध्यस्थानेष्वथैतेषु सम्यग्रस्य पुटकं धनुः। हस्तावापयतैश्चित्रैस्तर्जयेद्दुस्तरैरपि। तस्मिन् वेध्यगते विप्र! हे वेध्ये दृढसञ्ज्ञके। हे वेध्ये दुष्करे वेध्ये हे तथा चित्रदुष्करे। नतनिम्नञ्च तीक्ष्णञ्च दृढवेध्ये प्रकीर्त्तिते। निम्नं दुष्करसंज्ञितं वेध्यमूर्द्ध्वगतञ्च यत्। मस्तकायनमध्ये तु चित्रदुष्करसञ्ज्ञके। एवं वेध्यगुणङ्कृत्वा दक्षिणेनेतरेण च। आरोहेत् प्रथमं वीरो जितलक्ष्यस्ततो नरः। एवं एवंविधः प्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः। अधिकं भ्रमणं तस्य तस्माद्वेध्यात् प्रकीर्त्तितम्। लक्ष्यं संयोजयेत्तत्र पतिपत्रगतं दृढम्। भ्रान्तं प्रचलितञ्चैव स्थिरं यच्च भवेदिति। समन्तात्ताडयेद् भिन्द्यात्छेदयेद्व्यथयेदपि। कर्मणां संविधानज्ञो ज्ञात्वैवं विधिमाचरेत्। मनसा चक्षुषा दृष्ट्वा योगविद्भुः जयं जयेत्" २४९अ०"अग्निरुवाच। जितहस्तो जितमतिर्जितदृग् लक्ष्यसाधकः। नियतां सिद्धिमाप्नोति ततो वाहनमारुहेत्। दशहस्तो भवेत् पाशो दृष्टः करसमस्तथा। गुणकार्पासशुक्लानां भङ्गस्याथार्कवर्मिणाम्। अन्येषां सुदृढानाञ्च सुकृतं परिवेष्टितम्। तथा त्रिंशत्समं पाशं बुधः कुर्यात् सुवर्त्तितम्। कर्त्तव्यं त्रिकसैकस्य स्थानं कक्षासु वै तदा। वामहस्तेन सङ्गृह्य दक्षिणेनोद्धरेत्ततः। कुण्डलस्याकृतिं ज्ञात्वा भ्रामयेत् मस्तकोपरि। क्षिपेत् तृणमये तूर्णं पुरुषे चर्मवेष्टिते। वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च। सम्यग्योगविधिं कृत्वा प्रयुञ्जीत सुशिक्षितम्। विजित्य तु यथान्यायं ततो बन्धं समाचरेत्। कटाम्बद्ध्वा ततः खड्गं वामपार्श्वावलम्बितम्। दृढं निगडहस्तेन वामेन निष्कर्षेद्दक्षिणेन तु। षड्कुलपरीणाहं षण्महस्तसमुच्छ्रितम्। अयोमयः शलाकाश्च पर्माणि विविधानि च। अर्द्धहस्ते समे चैव तिर्य्यगूर्द्ध्वगतं तथा। योजयेद्विधिना येन तथा खड्गदृतः शृणु। तृणचर्मावमद्धाङ्गं स्थापयित्वा नवं दृढम्। करेणादाय लगुडं दक्षिणाङ्गुलकं नवम्। उद्यम्य घातवेद्यस्य नाशस्तेन रिपोर्दृढम्। उभाभ्यामथ हस्ताभ्यां कुर्याद्यस्य निपातनम्। अक्लेशेन ततः कुर्वन् वधे सिद्धिः प्रकीर्त्तिता। वाहानां भ्रमकरणं प्रचारार्थं पुरा तव २५० "अग्निरुवाच। भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम्। सम्पातं सृतदीर्णञ्च श्येनपातमथाकुलम्। उद्भूतमवधूतञ्च सव्यं दक्षिणमेव च। अनालक्षितविस्फोटौ करालेन्द्रमहाकुलौ। विकरालनिपातौ च विभीषणभयानकौ। समग्रार्द्धतृतीयांशपादपादार्द्धवारिजाः। प्रत्यालीढमथालीढं वराहं लुलितन्तथा। इति द्वात्रिंशतो ज्ञेयाः खड्गचर्मविधौ रणे। पराङ्मुखमपाङ्मुखं स्फीतं लघुसञ्ज्ञितम्। ऊर्द्ध्वोत्क्षिप्तमधःक्षिप्तं सञ्चारितविधारितम्। श्येनपातं गजपातं ग्राहग्राह्यन्तथैव च। एवमेकादशविधा ज्ञेयाः पाशविधा रणाः। कृत्वायतं विशालञ्च तिर्य्यग्भ्रामितमेव च। पञ्चकर्म विनिर्द्दिष्टं व्यस्ते पाशे महात्मभिः। छेदनं भेदनं घातो भ्रमणं शमनं तथा। विकर्त्तनं कर्त्तनञ्च चक्रकर्मेदमेव च। आस्फोटः स्फोटनं भेदस्तासान्दोलितकौ तथा। शूलकर्माणि जानीहि सप्तमाघातसञ्ज्ञितम्। दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम!। ऋजुपक्षे समाघातं तोमरस्य प्रकीर्त्तितम्। आहतं विहतं चैव प्रभूतङ्गलासनम्। ततोऽर्द्धगात्रं नमितं वामदक्षिणमेव च। आहतञ्च पराङ्मुखं पादोद्भूतमवप्लुतम्। हंसमार्गं विमर्दञ्च गदाकर्म प्रकीर्त्तितम्। करालमवघातञ्च दंशोपप्लुतमेव च। क्षिप्तहस्तं स्थितं शून्यं परयोस्तु विनिर्द्दिशेत्। ताडनं छेदनं विप्र! तथा चूर्णनमेव च। सुद्गरस्य तु कर्माणि तथा प्लवनघातनम्। संभ्रान्तमथ विभ्रान्तं गोविसर्गं सुदुर्द्धरम्। भिन्दिपालस्य कर्माणि लगुडस्य च तान्यपि। अन्यं मध्यं पराङ्मुखं निदेशान्तं द्विजोत्तम!। वज्रस्येतानि कर्माणि पट्टिशस्य च तान्यपि। हरणं छेदनं घातो बलोद्धारणमायतम्। कृपाणकर्म निर्द्दिष्टं पातनं स्फोटनं तथा। त्रासनं रक्षणं घातो बलाद्धरणमायतम्। क्षेपणीकर्म निर्द्दिष्टं यन्त्रकर्मैतदेव तु। सन्त्यागमवदंशश्च वराहोद्धूतकं तथा। हस्तावष्टम्भमासीनमेकहस्तावहस्तके। द्विहस्तबाहुपाशे च कटिरेचितकोद्धते। उरोलङ्घाटघाते च भुजाविधमनन्तथा। करोद्धूतं विमानञ्च पादाहति विपाटिकम्। गात्रसंश्लेषणं भ्रान्तं तथा गात्रविपर्य्ययः ऊर्द्ध्वप्रहारं घातञ्च गोमूत्रं सव्यदक्षिणे। पारकन्तारकं गण्डं कवचं विधमाकुलम्। तिर्य्यग्बन्धमपामार्गं भीमवेगं सुदर्शनम्। सिंहाक्रान्तं गजाक्रान्तं गर्द्दभाक्रान्तमेव च। गदाकर्माणि जानीयान्निबुद्धस्याथ कर्म च। आकर्षणं विकर्षञ्च बाहूनां

मूलमेव च। ग्रीवाविपरिवर्त्तञ्च पृष्ठभङ्गं सुदारुणम्। पर्य्यासनविपर्य्यासौ पशुमारमजाविकम्। पादप्रहारमास्फोटं कटिरेचितकन्यया। गात्राक्षेपं स्कन्धगतं महीव्याजनमेव च। उरोललाटघातञ्च विस्रष्टकरणन्यया। उद्भूतमवधूतञ्च तिर्य्यङ्मार्गगतं यथा। गजस्कन्धमवक्षेपमपराङ्मुखमेव च। देवमार्गमधोमार्गममार्गगमनाकुलम्। यष्टिघातमवक्षेपो वसुधादारणन्यया। जानुबन्धं भुजाबन्धं गात्रबन्धं सुदारुणम्। विपृष्ठं सोदकं शुभ्रं भुजावेष्टितमेव च। सन्नद्धैः संयुगे भाव्यं शस्त्रैस्तैर्गजादिभिः। वराङ्गुशधरौ चोभौ एको ग्रीवागतोऽपरः। स्कन्धगौ द्वौ च धानुष्कौ द्वौ च खड्गधरौ गजे। रथे रथे गजे चैव तुरङ्गाणां त्रयं त्रयम्। धानुष्काणान्त्रयं प्रोक्तं रक्षार्थं तुरगस्य च। धन्विनो रक्षणार्थाय चर्म्मिणन्तु नियोजयेत्। स्वमन्त्रैः शस्त्रमभ्यर्च्य शास्त्रन्त्रैलोक्यमोहनम्। यो युद्धे याति स जयेदरीन् सम्भावयेद्ध्रुवम्"।

धनूंषि धनुषः प्रयोगोपसंहारान् वेत्ति जानाति विद्—अण् उप० स०। २धानुष्के त्रि० ३विष्णौ पु०। "धनुर्द्धरो धनुर्वेदः" विष्णुसं०। भावे घञ्। ४विद्याभेदे अष्टादशविद्याशब्दे ५४२ पृ० दृश्यम्।

धनुष पु० धन—बा० उषन्। ऋषिभेदे "धनुषाख्योऽथ रैभ्यश्च अर्वावसुपरावसू" भा० शा० ३३८ अ०।

धनुषाक्ष पु० ऋषिभेदे "आससाद महावीर्य्यं धनुषाक्षं मनीषिणम्" भा० व० १२५ अ०।

धनुष्कपाल पु० धनुषः कपालमिव इसुसोः सामर्थ्ये अत्वम्। धनुरवयवे। कस्कादिषु पाठस्तु असामर्थ्यार्थः।

धनुष्कर त्रि० धनुः करोऽस्य इसुसोः सामर्थ्ये अत्वम्। धनुर्हस्ते १धानुष्के। धनुः करोति क्त—ट। २चापकारके शिल्पिभेदे त्रि०। अकृत्वादौ तु अण् धनुष्कार। तत्करमात्रे त्रि०। "इषुकारं क्षेत्रे धनुष्कारं कर्म्मणे ज्याकारं दिष्टाय" यजु० ३०।७।

धनुष्पाणि त्रि० धनुः पाणौ यस्य इसुसोः सामर्थ्ये अत्वम्। धनुर्हस्ते "युवजानिर्धनुष्पाणिः" भट्टिः।

धनुष्मत् त्रि०धनुः धार्य्यत्वेनास्त्यस्य मतुप्। धनुर्द्धरे अमरः। "भीष्मो धनुष्मानुपजान्वरात्मः। (जामदग्न्यः) भट्टिः।

धनुस् न० धन—शब्दे उसि। १चापे शरनिक्षेपयन्त्रभेदे अमरः। ज्याकर्षणोत्थशब्दयोगात्तस्य तथात्वम्। तल्लक्षणम्। "धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं बांशं तथैव च। कोमलं वर्षदृढता तयोर्गुण उदाहृतः। सुखसम्पत्तिकरणं समसुष्ट्रायतं धनुः। विपदो सुष्टिवैषम्ये तदङ्गे भङ्गमावहेत्" युक्तिकल्पतरुः। धनुर्वेदशब्दे तल्लक्षणादि दृश्यम्। २पियालवृक्षे पु० मेषावधिके १नवमे राशौ "नाकर्णभाः शैलसमोदयोऽतिशब्दोदिनं प्राक् दृढसुच्छ्रपीतः। रक्तोष्णपित्तो धनुरत्यसूतिसङ्गो द्विमूर्त्तिर्द्विपदोग्निरूपः" नी० ता०। अयञ्च राशिः २१६०० कलात्मकस्य राशिचक्रस्य १४४०० कलोत्तरं १८०० कलात्मकः मूलपूर्वाषाढोत्तराषाढा प्रथमचरणात्मकः। "मूलं पूर्वाषाढा प्रथमचाप्यतारांशको धन्वी" ज्यो०त०। अस्य स्वरूपं "चापी नरोऽश्वजघनः" वृहज्जा०। "अश्वतुल्यजघनः नरस्तेन चतुष्पादित्यर्थः। यथाह यवनेश्वरः। "धन्वी मनुष्यो हयपश्चिमार्द्धसमाङ्गः" भट्टोत्पलः। ४चतुर्हस्तमाने क्रोशशब्दे २२४०पृ० दृश्यम्। ५धनुर्द्धरे त्रि० शब्दार्थचि० गोलक्षेत्रस्य व्यासार्द्धात् न्यूने ६अंशभेदे चापशब्दे क्षेत्रशब्दे च दृश्यम्। "ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम्। सङ्घ्रातत्त्वाश्विसंवर्गे संयोज्य धनुरुच्यते" सू० सि०। "यस्य धनुः कर्त्तुमिष्टं तस्मिन् शुद्धपूर्वं ज्यापिण्डं न्यूनीकृत्य शेषं पञ्चाकृतिगुणं तद्विवरोद्धृतं तयोः शुद्धाशुद्धपिण्डयोरन्तरेण भक्तं फलं शुद्धज्या यतमा ततमसङ्घ्रातत्त्वाश्विनोः संवर्गे घाते संयोज्य सिद्धं धनुः कथ्यते। अत्रोपपत्तिः। ज्या यतमा शुद्धप्रति ततमायाश्चापकलायास्ततमसङ्घ्रातगुणिततत्त्वाश्विनः ज्यान्तरेण तत्त्वाश्विकलास्तदा शेषज्यायाः केत्यनुपातागतफलयुता इति वैपरीत्येन सुगमतरा" रङ्ग०। बहु० अनङ्। धृतधन्वः इत्यादि धन्वना शब्देनैव तत्प्रयोगोपपत्तौ धृतधनुरित्यादिप्रयोगनिरासार्थमनङ्विधानम्।

धनुस्तम्भ पु० सुश्रुतोक्ते विकृते वायुभेदे। "धनुस्तुल्यं नमेद्यस्तु स धनुस्तम्भसंज्ञकः" तत्र लक्षितम्।

धनू स्त्री धन—ऊ। धनुषि उज्ज्व०।

धनेयक न० धन्याक+पृषो०। धन्याके भरतः।

धनेश पु० ६०। १कुबेरे "इमे चैवाष्टकलशाः निधीनामंशसम्भवाः। ऋद्धया राजराजस्य धनेशस्य महात्मनः" हरिवं० १०८। २लग्नात् द्वितीयस्थानपतौ च। धनेश्वरादयोऽप्यत्र। "धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे" भा०उ० १९२अ०। "भाग्येशराज्ये धनेश्वराणामेकोऽपि चन्द्रादिकेन्द्रवर्त्ती। स्वपुत्रलाभाधिपतिर्गुरुश्चेद्दशाखसामाज्यपति-

त्वमेति"ज्यो०त०। २विष्णौ "रत्नगर्भो धनेश्वरः" विष्णुस०।

धन्व न० धन–वा–ध। अल्पाकारे त्रिका०। स्वार्थे मप्रत्य धान्यमप्यत्रार्थे त्रिका०।

धन्य त्रि० धनं लब्धा"धनगणं लब्धा"पा०यत्। धनस्य निमित्तं संयोग उत्पातो वा "गोद्व्यच" पा०यत्। धनाय हितं वा यत्। १धनस्य लब्धरि २धननिमित्ते संयोगादौ ३धनप्रयोजनके ४धनाय हिते ५श्लाघ्ये च। ६व्यश्वकर्णवृक्षे पु० राजनि० ७सुखवति ८सुकृतिनि त्रि० अमरः।"धन्यासि वैदर्भि! गुणैरुदारैः" नैष०। "धन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा" सा० द०। "धन्योऽसि यस्य हरिरेष समक्ष एव" माघः। "धन्यं यशस्समायुष्यं स्वर्ग्यं चातिथिपूजनम्" मनुः। ९कृतार्थे त्रि०। १०विष्णौ पु० "सुमेधा मेधजो धन्यः" विष्णुस०। "धन्यः कृतार्थः" भा०। ११आमलक्यां धात्र्याम् १२उपमातरि मेदि० १३पिण्डारकवनदेवताभेदे च स्त्री १४धन्याके स्त्री हेमच०। [व्रतभेदे।

धन्यव्रत न० धनाय हितं व्रतं धन्यं कर्म०। वराहपु० उक्ते

धन्याक पु० धन्यते भक्षार्थिभिः पिन्याकादि० नि०। (धनिया) ख्याते पदार्थे "शिलायां साधुसम्पिष्टं धन्याकं वस्त्रगालितम्। शर्करोदकसम्मिश्रं कर्पूरादिसुसंस्कृतम्। नवीने मृण्मये पात्रे स्थितं पित्तहरं परम्" भावप्र०।

धन्व गतौ सौ० भ्वा०प०सक० सेट्। धन्वति अधन्वीत् दधन्व। "राजाय धन्वाय धन्वसि" ऋ० ९।८६।३१ "परिषिच्यमानाः चयं सुवीरं धन्वन्तु सोमाः" ९।९७।२६।

धन्व न० धन्व–अच्। १चापे भरतः। "धनुर्धराय देवाय प्रियधन्वाय धन्विने" भा० द्रो० १०१ अ०। २धन्वन्तरिपितरि राजभेदे "काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वस्तु दीर्घतपसो धन्वात् धन्वन्तरिः सुतः" हरिवं० २९ अ०।

धन्वङ्ग पु० धनोः धनुषोऽङ्गमिवाङ्गमस्य। (धामनि) ख्याते वृक्षभेदे "धन्वङ्गः कफपित्तास्रकासकृत् तुवरो मधुः। तृष्णो बलकृद्वृष्यः सन्धिकृद् व्रणरोपणः" भावप्र०।

धन्वचर त्रि० धन्वना धनुषा सह चरति चर–ट। १धानुष्के। "धन्वचरो न वंसगः" ऋ० ५।२६।१।

धन्वज धन्वनि मरुदेशे जायते जन–ड। १मरुभवे "जङ्गलानां धन्वजानाञ्च पिप्पल्यासवम्" सुश्रुतः।

धन्वदुर्ग न० धन्वना वृतं दुर्गम्। चतुर्दिशं पञ्चयोजनमरुवेष्टिते दुर्गभेदे दुर्गशब्दे दृश्यम्।

धन्वन् पु० धवि–कनिन्। १अल्पोदकदेशे मरुदेशे अमरः। धन्वति शरोऽस्मात् अपादाने कनिन्। २चापे ३स्वल्पमात्रे च मेदि०। ४आकाशे माधवः"धन्वच्युत इवां न यामनि" ऋ०१।१६८।५। धन्वच्युतः आकाशच्युतः धन्वनृशब्दोऽन्तरीक्षस्य वचनः तेन तत्स्थमुदकं लक्ष्यते" भा०।

धन्वन पु० धन्व–सौ० ल्यु। (धामनि) इति ख्याते धन्वङ्गवृक्षे रत्नमाला। "चन्दनैः स्यन्दनैः सालैः सरलैर्देवदारुभिः। वेतसैर्धन्वनैश्चापि वे चान्ये वनवत्तराः" भा० शा० ११५ अ०।

धन्वन्तर न० चतुर्हस्तमिते दण्डरूपे परिमाणभेदे। "वितस्तिः स्यादतो द्वाभ्यां हस्तः स्यात्तच्चतुष्टयम्। दण्डो धन्वन्तरं तस्य सहस्रद्वितयेन तु" (क्रोशः) त्रिका०।

धन्वन्तरि पु० धनोः तच्चिकित्सशास्त्रस्यान्तं पारमृच्छति ऋ–गतौ इन् किच्च। १समुद्रोत्थिते देववैद्यभेदे। धन्वन्तरिस्ततो देवोऽवपुष्मानुदतिष्ठत" भा० आ० १८ अ०। द्वापरे तस्योत्पत्तिकथा हरिवं० १९ अ० यथा।

"धन्वन्तरेः समुद्भवोऽयं श्रूयतां भरतर्षभ!। स समुत्पतः समुद्रात्तु मथ्यमानेऽमृते पुरा। उत्पन्नः कलशात् पूर्वं सर्वतस्तु श्रिया वृतः। अभ्यसन् सिद्धिकार्यं हि विष्णुं दृष्ट्वा हि तस्थिवान्। अजस्रमिति होवाच तस्माद्जस्तु स स्मृतः। अजः प्रोवाच विष्णुं वै तनयोऽस्मि तव प्रभो!। विधत्स्व भागं स्थानञ्च मम लोकेश्वरेश्वर!। एवमुक्त्वा स वृद्धा वै तथ्यं प्रोवाच तं प्रभुः। कृतो यज्ञ विभागो हि यज्ञियैर्हि सुरैः पुरा। देवेषु विनियुक्तञ्च विधिहोत्रं महर्षिभिः। न शक्यमपहोमो वै तुभ्यं कर्तुं कदाचन। अवांगभूतोऽसि देवानां पुत्रस्त्वं हि महीश्वरः। द्वितीयायान्तु संभूत्यां लोके ख्यातिं गमिष्यसि। अणिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति। तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसे प्रभो!। चरुमन्त्रैर्व्रतैर्जप्यैर्यक्ष्यन्ति त्वां द्विजातयः। अष्टधा त्वं पुनश्चैवमायुर्वेदं विधास्यसि। अवश्यम्भावी ह्यर्थोऽयं प्राग्दृष्टस्त्वजयोनिना। द्वितीयं द्वापरं प्राप्य भवितां त्वं न संशयः। इमं तस्मै वरं दत्त्वा विष्णुरन्तर्दधे पुनः। द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स काशिराट्। पुत्रकामस्तपस्तेपे धन्वो दीर्घं महत्तदा। प्रपद्ये देवतां तान्तु या मे पुत्रं प्रदास्यति। अजं देवं स पुत्रार्थे तदाराधितवानृपः। ततस्तुष्टः स भगवानजः प्रोवाच तं नृपम्। यादृच्छसि वरं ब्रूहि तत्ते दास्यामि सुव्रत!। नृप

नानादेवगणव्याप्तत्वं लोकपालाष्टकोपेतामिति। एवं च असंख्येयपक्षान्वयश्चे पुराणान्तरोपदर्शितवर्षचतुष्टयादिपरिग्रहग्रहानिवृत्त्यर्थं नववर्षसमन्वितामित्युच्यते। तत्र जम्बुद्वीपस्तुपवर्णितं विष्णुपुराणे" ऐमा०२८०। "नववर्षन्तु मैत्रेय! जम्बुद्वीपमिदं मया। कथितं जनकस्तारं सङ्ग्रहात् कथितं तव। जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः। मैत्रेय! वलयाकारः स्थितः क्षारोदधिर्बहिः। जम्बूद्वीपः समस्तानां द्वीपानां मध्यतः स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रयोजनैरस्य चोच्छ्रयः। प्रतिष्ठा षोडशाद्रिस्तावाद्विस्तारमूर्ध्नि विस्तृतः। मूले षोडशसाहस्रो विस्तारस्तस्य पर्वतः" पुराणान्तरे तु, अष्टषष्टियोजनोच्छ्रय इत्युक्तम्। तथा "मेरोस्तु दक्षिणं तत्र नवसाहस्रविस्तृतम्। इलावृतं महाभाग! चत्वारश्चात्र पर्वताः विष्कम्भा रचिता मेरोर्योजनायुतसंस्थिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। वैभ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः" मर्यादापर्वतास्तु, ब्रह्माण्डपुराणे दर्शिताः" "जाठरो देवकूटश्च पूर्वस्यान्दिशि पर्वतौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। निषधः पारिया(पा)त्रश्च पश्चिमौ वर्षपर्वतौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ"। लोकनिषधपर्वतौ तु, अग्रे वक्ष्येते। "लोकपालाष्टकोपेतामिति, लोकपाला इन्द्राद्यष्टौ, तेषां लक्षणं पूर्वसूक्तं ब्रह्माण्डदाने" तत्प्रदिशेषाच्च मेरोरुपरि प्रदक्षिणक्रमेण पूर्वादिदिक्षु कर्त्तव्याः। नववर्षसमन्वितामिति। वर्षोपवर्षनञ्च, ब्रह्माण्डपुराणे "उत्तरं तत्पुरः हिमाद्रेश्चैव दक्षिणम्। एतद् भारतं नाम भारती यत्र सन्ततिः। भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज!। रम्यकं चोत्तरे वर्षं तथैवान्यं हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। मेरोः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे। वर्षे द्वे तु समाख्याते नवोर्मध्यमिलावृतम्। नवसाहस्रमेतेषामेकैकं द्विजसत्तम!" तथा। "हिमवान् हेमकूटश्च निषधश्चैव दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। सहस्रोच्छ्रायास्तावद्विस्तारिणश्च ते। शतप्रमाणौ द्वौ मध्ये देवहीनास्तु शेषाः" "शतप्रमाणाविलादि इलावृतस्योभयपार्श्ववर्त्तिनौ नीलनिषधौ द्वौ पर्वतौ दैर्घ्येण शतयोजनौ विदेशौ, तद्बाह्यवर्त्तिनौ श्वेतहेमकूटौ नवतियोजनौ शतयोजनप्रमाणौ विज्ञेयौ, तथा तद्बाह्यास्थितौ शृङ्गीहिमवन्तौ अशीतिसहस्रयोजनप्रमाणावित्यर्थः। अत्र युक्तिरुक्ता तत्रैव पुराणे, "द्वीपस्य मण्डलीभावात् छायाकृतिः प्रकीर्त्तितेति"। ब्रह्माण्डपुराणे "मेरोस्तु पश्चिमे भागे नवसाहस्रमुच्छ्रितं। चतुस्त्रिंशत्सहस्राणि गन्धमादनपर्वतः। चत्वारिंशत्सहस्राणि परिहारो महीतलात्। षट्सहस्रमवगाहे तु सति द्विगुणविस्तरः। पूर्वेण माल्यवान् शैलस्तत्प्रमाणः प्रकीर्त्तितः" "अत्र शतसहस्रादियोजनपरिमाणानां पृथिव्यादीनां कर्त्तुमशक्यत्वात् योजनसहस्रस्थाने अङ्गाङ्गुलादिमानं परिकल्प्य यथोक्तसंख्यातारतम्यमनुसंधेयम्। नदीनदसमेतमिति, नद्यो भागीरथीप्रभृतिकाः, नदाः शोणादयः, तेषां सम्पूर्णतया विधातुमशक्यत्वात् यावच्छक्यमनुकारः कर्त्तव्यः। अत्र सागरवेष्टितामिति, यद्यपि यावत्परिमाणा पृथ्वी तावानेव सागरः तथाप्यनुकारमात्रोपदेशात् शक्यानुकारमात्रमाचरणीयम्" ऐमा०"महारत्नसमाकीर्णां वह्निसूर्यार्कसंयुताम्। हेमाः पद्मसहस्रेण तदर्द्धं वाथ शक्तितः। यत्नवेष या कुर्यात् दियतेन धनेन वा। कुर्यात्तस्मात्पलादूर्द्ध्वमशक्तोऽपि विचक्षणः। तुलापुरुषवत् कुर्यात् लोकेशावाहनस्तुधः। अलिङ्गमण्डपसंस्कारभूषणाच्छादनादिकम्। वेद्यां कृष्णाजिनं कृत्वा तिलानामुपरि न्यसेत्। तत्राष्टादश धान्यानि रत्नानि सर्वाणि। तथाष्टौ पूर्णकलशान् समन्तात् परिकल्पयेत्। वितानकञ्च कौशेयं फलानि विविधानि च। तथांशुकानि रम्याणि श्रीखण्डशकलानि च। इत्येवं रचयित्वा तामधिवासनपूर्वकम्। शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः। प्रदक्षिणं ततः कृत्वाष्टोत्तरशतसङ्ख्याभिः" मत्स्यपु० "महारत्नेत्यादि, महारत्नानि, माणिक्यप्रभृतीनि परिभाषायां, दर्शितानि, वह्निसूर्यार्ककल्पसक्तं ब्रह्माण्डदाने, आच्छादनादिकमित्यादिशब्देन देशकालवृद्धिश्राद्धदेवादिपूजाब्राह्मणभोजनाधिवासनादिकं तुलापुरुषोक्तमनुसंधेयं. पूर्णकलशान् सुगन्धप्रवरत्नदूर्वाङ्कुरचूतपल्लवान्वितानित्यवधेयं. वितानं पञ्चवर्णमिति; प्रदक्षिणं कृत्वेति, त्रिःप्रदक्षिणमाहत्योत्यर्थः, प्रदक्षिणप्रदिक्षं च द्विर्गोपटिवेषे पर्याङ्कलक्षकर्म

शेषसमाप्तौ सर्वौषधिस्नानानन्तरमनुष्ठेयम्" हेमा "नमस्ते सर्वदेवानां त्वमेकं भवनं यतः। धात्री च सर्वभूतानामतः पाहि वसुन्धरे!। वसूनां धारयसे यस्मात् वसु चातीव निर्मलम्। वसुन्धरा ततोज्ञाता तस्मात्पाहि भयादनम्। चतुर्भ्योऽपि गोमध्ये दद्यादन्नं तथाचले। अनन्तायै नमस्तस्मात् पाहि संसारकर्दमात्। त्वमेव लक्ष्मीर्गोविन्दे शिव गौरीति संस्थिता। गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा। बुद्धिर्बृहस्पतौ ख्याता मेधा सनिषु संस्थिता। विश्वं व्याप्य स्थिता यस्मात्ततोविश्वम्भरा मता। धृतिः स्थितिः क्षमा क्षोणी पृथ्वी वसुमती रसा। एताभिर्मूर्त्तिभिः पाहि देवि! संसारसागरात्। एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत्। धराद्रं वा चतुर्भागं गुरवे प्रतिपादयेत्। शेषस्तैर्वाथ ऋत्विग्भ्यः प्रतिपत्य विसर्जयेत्" मत्स्यपु० यत्रापि पूर्ववद्दानवाक्यस्यार्थं जलपूर्वं दानमाचार्यायानुज्ञया अन्येभ्योपि दानं दीनानाथादिभ्यः। सर्वं लोकाग्निविधानं, भूमिपतिकर्त्तव्ये कर्मणि प्रामादिदक्षिणादानम् प्रयत्नतर्हके यथाशक्ति सुवर्णदक्षिणादानमित्यनुसन्धेयम्। अथ ब्राह्मणवाक्यानन्तरं देवताप्रजनविसर्जनानि कुर्यात्"। हेमा० आथर्वणगोपथब्राह्मणे, "अथ रोहिण्यां संकल्पितो ब्रह्मा यथाबीजं सरत्नगन्धावकीर्णतोयोदकपूर्णकलशमभिषेकाभिमन्त्रैर्मन्त्रैर्दातारमभिषिञ्चति। "व्रतेन त्वं व्रतपते" इति व्रतसुपेत्याचितायनावधःशायिनौ भवतो, ब्रह्मोपचरं यथाशक्त्येकरात्रं पञ्चरात्रं वा दाटयरात्रं ब्रह्मचरित्वा क्षोणीते तन्नमाच्छ्रमणान्तं कृत्वा आरभ्याथाश्च शुक्लपक्षे कामशक्तं धाशक्तं पुरुषशक्तमिति अथ सुवर्णमयीं भूमिं भूमेः प्रकृतिं गोचर्ममात्रां कृत्वानीय वेदुत्तरां वेदिमित्युपस्थाप्य "गिरयस्ते पर्वता" इति पर्वतानवस्थाप्य हिरण्यरजतमणिमुक्ताप्रवालकादिभिरुपशोभयेद्यदहः संप्रयतीरिति (सामसन्दृशा नेति नदीः कल्पयित्वा रसैश्च परिपूरयेत् "अपरमयवसि सस्यकृतस्याभ्यवहृजामीति सस्यकृतान्)वनस्पतिः सह देवैर्नाशयवर्त्तिति "इहस्पतिर्नेति" वनस्पतीनन्यांश्च यत्रेत्वा मनसा सङ्कल्पयेन्मनसा सङ्कल्पवतीह भवात विश्वान् बिभ्रतीति नमस्कारयित्वा सर्वं इहस्पत्यनुवाकीये देवासोदिव्येकादशस्येति, पुण्याहं वाचयेत् संस्थापयेच्च दिवो देवस्तातेनेत्यभिमन्त्र्य ब्राह्मणेभ्यो दद्याद्दातुरेषाक्षौरोहिणीयानं निकामं वा दुःखं इति। "यथा रोहन्ति बीजानि इहाजस्रे मङ्गीतले। एवं कामाः प्ररोहन्तु प्रेत्येह मनसा मम। सर्वेषामेव दानानां यत्फलं समुदाहृतम्। तत् प्राप्नोति च विप्रेभ्यो दत्त्वा भूमिं यथाविधि"। मत्स्यपुराणे "अनेन विधिना यस्तु दद्याद्वैष्णवरां शुभाम्। पुण्यकालेऽभिसंप्राप्ते स पदं याति वैष्णवम्। विमानेनार्कवर्णेन किङ्किणीजालमालिना। नारायणपुरस्कृत्या कल्पत्रयमयो वसेत्। पुत्रपौत्रप्रपौत्रांश्च तारयेद्विंशतिम्। इति पठति य इत्थं यः शृणोति प्रयत्नादपि कनकविमानैर्सङ्गदेहः समन्तात्। दिवसमरवधूभिर्याति संप्रार्थ्यमानः पदममरसहस्रैः सेवितं चन्द्रमौलेः" लिङ्गपु० उक्तविधिस्तु तत्र चरुके द्रष्टव्यः।

धराकदम्ब पु० धराजातः कदम्बः। धाराकदम्बे धारा०।

धराङ्कुर पु० धराया अङ्कुर इव। वायुफले शोकरे धारा०।

धरात्मज पु० ६त०। १मङ्गलग्रहे २नरकासुरे च ३सीतायां स्त्री तत्कथा कालिकापु० ३७ अ० दृश्या। धरापुत्रादयोऽप्यत्र।

धराधर पु० धरां धरति भृ-अच्। १पर्वते २अनन्ते ३विष्णौ च। "सहस्रधा। धराधरः" विष्णुस०। "अ-शेरशेषैः शेषादीरशेषां धारयन् धराम्" भाग्वतवाक्ये तच्छब्दः।

धराधिप पु० ६त०। नृपे "माहेश्वरीमथ सभां समासाद्य धराधिपः" भा० व० ४८अ०। धराधिनाथधराधीशादयोऽत्र

धरामर पु० धरायामर इव। १भूदेवे ब्राह्मणे धरासुरादयोऽप्यत्र।

धरित्री स्त्री भृ-इत्र गौरा० ङीष्। भूमौ अमरः "सारं धरित्रीधरणक्षमञ्च" कुमा०। "गुरुर्धरित्री क्रियतेतरां त्वया" माघः।

धरिमन् पु० भृ-इमनिच्। तुलापरिमाणे निरु०। "तथाधरिममेयानां शतादभ्यधिके वदः" मनुः।

धरीमन् पु० धरिमन्+छान्दसो टीवः। १सारभूते वेदिरूपे स्थाने। "अयं जातो मनुषो धरीमणि" ऋ० १।१२८।१ "धरीमणि सारभूते वेदिरूपे स्थाने" भा० २धारके त्रि०। "अमृतन् पयसा धरीमणि" ऋ० ९।८६।४ "धरीमणि धारके" भा०।

धरुण त्रि० भृ-उनन्। धारके "धरुणोऽस्य पानाय" तारुण्य भा० ९।१।६। "धरुणोऽसि सर्वधारकोऽसि अपानेन प्राणवायोः शरीरे धारणात् धारयिता अपानः" भा०। स्त्रियां गौरा० ङीष् वा। "धरुणवति शाखे! इहस्कन्दा पृतिधारणः" अथ० ३।१२।१ पक्षे टाप च। "धरुणि धरुणक

स्तृता विश्वकर्मणी" यजु० १२।१६ २उदके निघण्टुः ३वज्रो च "उपस्तृजन् धरुणं मात्रे धरुणो मातरं धयन्" यजु०८।५१ "धारयतीति धरुणोऽग्निः" वेददी० ४धारायाञ्च "अपामतिष्ठद्धरुणङ्गरम्" ऋ० १।५४।१० धरुणशब्दो धारावचनः धरुणङ्गरम् धारानिधकम्" भा० ५एकविंशतौ ६आदित्ये च तयोस्तथात्वं च यतस्ता० ८।४।१।१२ उक्तं यथा "धरुण एकविंशतिः" इति। य एवैकविंशस्तोमस्तं तदुपदधाति। तद्यत्तमाह धरुण इति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविंशोऽथो असौ वा आदित्यो धरुण एकविंशस्य द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावेवादित्यो धरुण एकविंशस्तद्यत्तमाह धरुण इति यदाह्येवैषोऽस्तमेत्यथेदं सर्वं म्रियते आदित्योऽमुं त्वा पश्चात्स्थो तदेव तद्रूपमुपदधात्यथ संवत्सरमुपाग्नुपदधाति" "धरुणमधिरुह" यजु०।।।१८ ७ब्रह्मणि ८स्वर्गे पु० ९नीरे १०सम्मते त्रि० मेदि०।

धर्णसि पु०ष्ठ-वा०नसि। १वज्रे निघण्टुः। २धर्त्तव्ये वज्रादौ च "नि गुण्ण इन्द्र धर्णसिं वज्रम्" ऋ०८।६।१४। "धर्णसिं धर्त्तव्यम्" ३धारके च "पृथादि धर्णसिम्" ऋ०१।११।११

धर्णि त्रि० ष्ठ-नि। "धारके "अग्निरीशे वसूनां रुचिं धर्णिरेषाम्" १।१२७।७ "धर्णिः धारयितृशब्दः" भा०।

धर्त्तूर पु० धुस्तुर+पृषो०। धुस्तुरे पारस्करनि०।

धर्त्र न० ष्ठ-त्र। १गृहे २यज्ञे ३धर्मे च उणादिको० ४धारके त्रि० "पञ्चानां त्वा वातानां धर्त्राय धर्त्राय गृह्णामि" तैत्ति० सं० १।६।।।२ "धर्त्रमसि दिवं दृंह ब्रह्मवनि वधाय" यजु० १।।८। धर्त्रं धारकम्" वेददी०।

धर्म्म पु०न०अर्त्तौ०म्रियते लोकोऽनेन धरति लोकं वा ष्ठ-मन्। "चोदनालक्षणोऽर्थोधर्मः" जै० सूत्रलक्षिते पदार्थे तत्र धर्मशब्दस्य यागादिपरत्वम् भाष्यसम्मतमन्यमते स्वर्गसाधनादृष्टभेदपरत्वं तथाहि "अथातो धर्मजिज्ञासेति" सूत्रभाष्ये "धर्मार्थं जिज्ञासा धर्मजिज्ञासा, सा हि तस्य ज्ञातुमिच्छा। स कथं जिज्ञासितव्यः? को धर्मः, कथंलक्षणः, कान्यस्य साधनानि कानि साधनाभासानि, किंपरश्चेति। तत्र को धर्मः, कथंलक्षणः—इति एकेनैव सूत्रेण व्याख्यातं—'चोदनालक्षणोऽर्थो धर्मः'—इति। कानि अस्य साधनानि, कानि साधनाभासानि, किंपरश्चेति शेषलक्षणेन व्याख्यातं, क पुरुषपरत्वं क वा पुरुषो गुणभूतः?—इत्येतासां प्रतिज्ञानां विवक्षयैतत् सूत्रम् 'अथातोधर्मजिज्ञासा'—इति। धर्मः प्रसिद्धो वा स्यात्, अप्रसिद्धो वा? स चेत् प्रसिद्धः, न जिज्ञासितव्यः; अथाप्रसिद्धः, नतरां; तदेतदनर्थकं धर्मजिज्ञासाप्रकरणं, अथवाऽर्थवत्?"। धर्मं प्रति हि विप्रतिपन्ना बहुविदः,—केचिदन्यं धर्मामाहुः, केचिदन्यं, सोऽयमविचार्य्य प्रवर्त्तमानः कश्चिदेवोपादद्दानो विहन्येतार्थात् अनर्थं च लभेत्, तस्माद्धर्मो जिज्ञासितव्य इति, स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे" भा० "तदभिधीयते चोदनालक्षणोऽर्थो धर्मः। २ सू० "चोदना"—इति क्रियायाः प्रवर्त्तकं वचनमाहुः, आचार्य्यचोदितः करोतीति हि दृश्यते। लक्ष्यते येन तल्लक्षणं धूमो लक्षणमग्नेरिति हि वदन्ति। तया यो लक्ष्यते, सोऽर्थः पुरुषं निःश्रेयसेन संयुनक्तीति प्रतिजानीमहे" चोदना हि भूतं, भवन्तं, भावयन्तं, सूक्ष्मं, व्यवहितं, विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं, नान्यत् किञ्चनेन्द्रियम्," य एव श्रेयस्करः, स एव धर्मशब्देनोच्यते। कथमवगम्यतां?। यो हि यागमनुतिष्ठति, तं 'धार्मिकः'—इति समाचक्षते, यच्च यस्य कर्त्ता स तेन व्यपदिश्यते, यथा पाचकः, लावक इति। तेन यः पुरुषं निःश्रेयसेन संयुनक्ति, स धर्मशब्देनोच्यते। न केवलं लोके, वेदेऽपि 'यज्ञेन यज्ञमयजन्त देवाः, तानि धर्माणि प्रथमान्यासन्'—इति यजतिशब्दवाच्यमेव धर्मं समामनन्ति। उभयमिह चोदनया लक्ष्यते, अर्थोऽनर्थश्च इति, कोऽर्थः? यो निःश्रेयसाय, ज्योतिष्टोमादिः। कोऽनर्थः? यः प्रत्यवायाय, श्येनो, वज्रः, इषुरित्येवमादिः। कथं पुनरस्यानर्थ?। हिंसा हि सा, सा सा भूत इति अर्थप्रकृष्टम्।"शाबरभाष्यम्

एतन्मतानुसारेण लौगाक्षिभास्करेणोक्तं यथा "अथ को धर्मः किं तस्य लक्षणमिति चेदुच्यते। यागादिरेव धर्मः। तल्लक्षणस्तु वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः। प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति। भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्येति। अनर्थफलकत्वादनर्थभूते श्येनयागादावतिव्याप्तिवारणायार्थ इति। न च चोदनालक्षणोऽर्थो धर्म इति सौत्रधर्मलक्षणविरोधः चोदनाशब्दस्य तत्र विधिरूपवेदैकदेशपरत्वादिति वाच्यम्। सर्ववेदस्य तात्पर्य्येण धर्मप्रतिपादकत्वात्। स च यागादिः। "यजेत स्वर्गकामः" इत्यादि वाक्येन स्वर्गसहिष्णु पुरुषं प्रति विधीयते"।

अन्यमते तु अदृष्टविशेषस्यैव धर्मत्वं तत्त्वबोधिन्यां तदुभयमतं संक्षिप्य दर्शितं यथा

"चोदनालक्षणोऽर्थो धर्मः" इति। चोदनैव लक्षणं प्रमाणं यस्य तादृशो योऽर्थः स धर्मः चोदना प्रवर्त्तको वेदो विधिरूपः। चुद् प्रेरणे इत्यस्माच्चौरादिकधातोः वेदमात्रस्यैवेयं परिभाषेत्यपरे। तथा च वेदैकप्रमाणगम्योऽर्थः पुण्यनामाऽदृष्टविशेषः धर्मः कार्यापूर्वापरनामा तथा च तार्किकाः विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः। प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म उच्यते"। भविष्ये "धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम्"। तैत्तिरीयश्रुतिरपि "धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदतीति" प्रशंसामभिदधती अभ्युदयसाधनं धर्म इति प्रतिपादयति। भाष्यमपि "कोऽर्थो योऽभ्युदयाय"। गुरुमते विधेरपूर्वे शक्त्याऽपूर्वस्य विधिवाच्यत्वात् वेदगम्यत्वं सुपपन्नमेव। अदृष्टोत्पादिकस्य प्रामाण्यरूपत्वाद्वेदमात्रलभ्यत्वमपूर्वस्य। अन्येषां मते तु यागादेरिष्टसाधनत्वान्यथानुपपत्त्या कल्प्यत्वेऽप्यपूर्वस्य, वेदस्य प्रवर्त्तकत्वान्यथानुपपत्त्या कल्पनीयत्वेन वेदमूलकत्वात् वेदप्रमाणकत्वम्। भट्टमते तु चोदना प्रेरणा फलभावना लिङाद्यर्थाभिधारूपा तया च केन कथमित्याकाङ्क्षायामाप्य लक्ष्यते आश्रीयते कर्त्तव्यत्वेन बोध्यते यः करणीभूतो धात्वर्थयागादिः स धर्म इत्यर्थः तथाच विश्वामित्रः "यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मोऽयं विगर्हन्ति तमधर्मं प्रचक्षते" इति। अतएव "चोदनागम्योऽग्निहोत्रादिर्धर्मो ज्ञातलक्षणश्चैत्यवन्दनादिरिति" शास्त्रदीपिका। तत्र चोदनागम्यो वेदबोधितकर्त्तव्यताक इत्यर्थः। अत्र मते धर्मशब्दो निरूढलाक्षणिकः अदृष्ट एव तस्य शक्तेः "स्याद्धर्मस्त्रियां पुण्यश्रेयसी सुकृतं दृषः" इत्युक्त्वा "शस्त्रस्वाय त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इत्यमरोक्तेः द्रव्ये तज्जनके धर्मिणि त्रिषु वाच्यलिङ्गमित्यर्थः। अतएव भट्टवार्त्तिकं "द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते। तेषामैन्द्रियकत्वेऽपि न तादूर्ध्येण धर्मता श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते। तादूर्ध्येण च धर्मत्वं तस्मान्नेन्द्रियगोचराः" इति। यद्यपि पुण्यनामाऽदृष्टविशेष एव धर्मस्तदर्थस्तथापि द्रव्यक्रियादीनामपि धर्मत्वं व्यवस्थापयिष्यते तेषां धर्मजनकतया कारणे कार्य्यत्वोपचारात् तेषु धर्मव्यपदेश इति भावः। न तादूर्ध्येण न स्वरूपतः, अपि तु धर्मजनकतयेति शेषः। धर्मजनकत्वे मानमाह श्रेय इति "श्रेयोऽभ्युदयसाधनम्" उक्तभविष्यद्वचनात् तत्र साक्षात् स्वर्गादिसाधनमदृष्टं तत्साधनता यागादेरित्यर्थः तादूर्ध्येण स्वरूपतः। अत्र च वेदमात्रप्रमाणलभ्यसत्ताकार्थत्वं लक्षणं गुणविशेषस्य स्वरूपं, द्वितीयमते वेदैकप्रमितकर्त्तव्यताकार्थत्वं लक्षणं द्रव्यक्रियागुणादयः स्वरूपम् उभयत्र वेदप्रामाण्यादेव प्रामाण्यम्"।

तद्भेदादिकं हेमाद्रिव्रतखण्डे उक्तं यथा भविष्यपु० "वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम्। वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा। वर्णत्वमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते। वर्णधर्मः१ स उक्तस्तु यथोपनयनं नृप। आश्रमञ्च समाश्रित्य यो धर्मः सम्प्रवर्त्तते। स खल्वाश्रमधर्मस्तु२ भिक्षादण्डादिको यथा। वर्णत्वमाश्रमत्वञ्च योऽधिकृत्य प्रवर्त्तते। स वर्णाश्रमधर्मस्तु३ स्यान्मौञ्जी मेखला यथा। यो गुणेन प्रवर्त्तेत गुणधर्मः४ स उच्यते। यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनम्। निमित्तमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते। नैमित्तिकः५ स विज्ञेयः प्रायश्चित्तविधिर्यथा" "वर्णत्वमेकमाश्रित्येति एकशब्दो वक्ष्यमाणोभयनिमित्तव्यावृत्तिपरः, वक्ष्यमाणधर्मभिन्नत्वात् अयं त्वाश्रमत्वमनपेक्ष्य वर्णत्वनिमित्तकोऽतः सत्यामप्युपनयनस्याश्रमधर्मत्वाद्यपेक्षायां नैकशब्दविरोध इति। अथवा वीप्सायामेकशब्दः ततश्चैकैकं वर्णत्वमुद्दिश्य यो विधीयते स वर्णधर्म इति अतएवाश्वमेधादिवाक्यैरनेकवर्णत्वोद्देशेन विधीयमानमुपनयनं दृष्टान्तीकृतम्। निमित्तमेकमाश्रित्येत्यत्र प्रायश्चित्तस्य नित्यकाम्यवैधर्म्यमात्रेण नैमित्तिकत्वं न तु राहुदर्शननिमित्तस्नानादिवदकरणजनितदोषपरिहारार्थतया, निषिद्धकर्मकृताधर्मपरिहारार्थतयैव तद्विधानोपपत्तेः। न च जातेष्टियदुभयार्थत्वं, तत्र फलनिमित्तयोरुभयोरुपात्तत्वान्न त्विह तथेति। साधारणधर्मस्तु महाभारते। "श्राद्धकर्म तपश्चैव सत्यमक्रोध एव च। स्वेषु दारेषु सन्तोषः शौचं विद्यानसूयिता। आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप!" चातुर्वर्ण्यस्येति शेषः। "तपश्चान्द्रायणादि। यदाह देवलः "व्रतोपवासनियमैः शरीरोत्तापनं तपः"। व्रतशब्दोऽत्र स्नानदानजपहोमपूजादिपरः। एतेन व्रतखण्डप्रतिपाद्यानां धर्माणामपि साधारणत्व सूचितम्। आत्म-

ज्ञानमित्यनेन मोक्षखण्डप्रतिपाद्यानामपि धर्माणां साधारणत्वम्। न च शूद्राधिकरणन्यायेन शूद्राणां विद्यायामनधिकार इति कथं मोक्षधर्माणां साधारणत्वमिति वाच्यम् तेषामुपनयनोभावेनाध्ययनासम्भवाद्वेदवाक्यविचार एवानधिकारः न पुनरवैदिके "श्रावयेच्चतुरो वर्णानिति" शूद्राणामपि पञ्चयज्ञादिवत् पुराणस्मृतिप्रतिपाद्यविद्योपदेशदर्शनात्। ननु तथापि कथं वेदान्तवाक्यविचारजनितज्ञानाभावे शूद्राणां मोक्षधर्माधिकार इति चेत् नैवम् मोक्षसाधनस्य ज्ञानस्य तदेकसाध्यत्वसिद्धेः, तथा च श्रुतिः "तरति शोकमात्मवित् ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परं विद्यामृतत्वमश्नुते" इति, मोक्षस्यात्मज्ञानसाध्यतां वदति। आत्मज्ञानस्य च पुराणादिवचननिश्चयविचारपरिचयादयुपपत्तेः श्रोतव्य इत्यादिवाक्यानां तु विचारनियमविधित्वानङ्गीकारात् अङ्गीकारे वा तस्य द्विजातिनियततया "श्रावयेच्चतुरो वर्णानित्यादिपुराणवचनविषयविधेरप्यध्ययनविधिवद्विचारपर्यन्तताया तत्र यथा द्रव्यसाध्यत्वाविशेषेऽपि क्रतूनामन्तर्हर्षविहितोपायनियमार्जितद्रव्यसाध्यत्वम् एवमात्मज्ञानसाध्यत्वाविशेषेऽपि मोक्षस्य तदुपायविशेषजनितज्ञानसाध्यत्वमिति सर्वमनवद्यम्" तथा चोक्तं भागवते "स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरः। इति भारतमाख्यानं कृपया कृतम्"। महाभारतेऽपि "मामुपाश्रित्य तु कौन्तेय! येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्"। विष्णुः। "क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः। अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया। आर्जवं लोभशून्यत्वं देव, ब्राह्मणपूजनम्। अनभ्यसूया च तथा धर्मः सामान्य उच्यते इति"। ब्रह्मवैवर्ते "विद्या, दया, दमः, शौचं, सत्यमस्तेयता तपः। जितेन्द्रियत्वमक्रोधो लज्जा धर्मः इति स्मृतिः"। विष्णुधर्मोत्तरे "तस्य द्वाराणि यजनं तपोदानं दया क्षमा। ब्रह्मचर्यं तथा सत्यं तीर्थानुसरणं शुभम्। साध्वायसेवा साधूनां सहवासः सुरार्चनम्। गुरूणां चैव शुश्रूषा ब्राह्मणानाञ्च पूजनम्। इन्द्रियाणां यमश्चैव ब्रह्मचर्यमनालस्यम्। गङ्गास्नानं शिवो देवो विष्णुपूजात्मचिन्तनम्। ध्यानं नारायणस्यैतत् संक्षेपाद्धर्मलक्षणम्" "दानमित्यनेन दानखण्डप्रतिपाद्यानाम्, तीर्थानुसरणमित्यनेनापि तीर्थखण्डप्रतिपाद्यानाम् देवब्राह्मणपूजनमित्यनेनापि परिशेषखण्डप्रतिपाद्यानाम् देवतापूजनादिधर्माणां साधारणत्वम्"। बृहस्पतिः "दया, क्षमाऽनसूया, च शौचानायासमङ्गलम्। अकार्पण्यं, मसृहत्वं सर्वसाधारणानि च। परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा। आपन्ने रक्षितव्यं तु दयैषा परिकीर्त्तिता। बाह्ये वाऽऽध्यात्मिके चैव दुःखे चौत्पातिके क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता। न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि। नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता। अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः। स्वधर्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्। शरीरं पीड्यते येन शुभेनापि कर्मणा। अत्यन्तं तत्र कुर्वीत अनायासः स उच्यते। प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। लोकादप्युपकर्त्तव्यमदीनेनान्तरात्मना। अहन्यहनि यत्किञ्चित् अकार्पण्यं हि तत् स्मृतम्। यथोपपन्ने सन्तोषः कर्त्तव्योऽत्यल्पवस्तुनि। परस्य चिन्तयन्नर्थं साऽस्पृहा परिकीर्त्तिता"। एवमेते निरूपिताः षट्प्रकारा धर्माः। अन्यथापि तद्भेदस्तत्रैवोक्तो यथा

विश्वामित्रः "यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते"। अत्रिः "प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम्। सर्गादौ सृजता सृष्टं ब्रह्मणा वेदरूपिणा। प्रवृत्तलक्षणो धर्मो गुणतस्त्रिविधो भवेत्। सात्त्विको राजसश्चैव तामसश्चेति भेदतः। काम्यबुद्ध्या च यत् कर्म मोक्षेऽपि फलवर्जितम्। क्रियते द्विज! कर्मैह तत् सात्त्विकमुदाहृतम्। मोक्षायेदं करोमीति सङ्कल्प्य क्रियते च यत्। तत् कर्म राजसं ज्ञेयं न साक्षान्मोक्षसाधनम्। कार्यबुद्ध्यानपेक्षं यत् कर्मविध्यनपेक्षया। क्रियते द्विजवर्य्यैह तत्तामसमुदाहृतम्"।

धर्माधिष्ठातृदेवस्योत्पत्तिः तत्र खण्डे वराहपु० दर्शिता यथा "अथोत्पत्तिं प्रवक्ष्यामि धर्मस्य महतीं नृप!। माहात्म्येन समायुक्तां विस्तरेण नराधिप!। पु ब्रह्माव्ययः शुद्धः परादपरसंज्ञितः। स सिसृक्षुः प्रजास्वादौ पालनं तासु चिन्तयत्। तस्य चिन्तयतस्तद्वाहुद्विधाख्यात् सकृद्वपुः। प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः। तं दृष्ट्वोवाच भगवांस्तत्प्रसादं लोकक-

तिम् । पालयेमाः प्रजाः पुत्र ! त्वं ज्येष्ठो जगतो भव। इत्युक्तः स समुत्तस्थौ चतुष्पादः कृते युगे। त्रेतायां स त्रिभिः पादैर्द्वाभ्यां वै द्वापरेऽभवत्। कलावेकेन पादेन प्रजाः पालयते विभुः। षड्भेदो ब्राह्मणानां स त्रेधा क्षत्रे व्यवस्थितः। द्वेधा वैश्येषु शूद्रेषु त्वेकधा जगतः प्रभुः। रसातलेषु सर्वेषु द्वापरेषु स्वयम्भुवः। चतुःषट्कस्त्रिपाच्चैव द्विशिराः सप्तहस्तवान्। त्रिधैव बद्धो विप्राणां सुखगः पालयन् प्रजाः"।

भाग० ४।११। अ०। तत्पत्नीपुत्रादिभेदा दर्शिता यथा "त्रयोदशाऽदाद्धर्माय तथैकामग्नये विभुः। पितृभ्य एकां यक्षेभ्यो भवायैकां भवच्छिदे। श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः। बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्त्तिर्धर्मस्य पत्नयः। श्रद्धाऽसूत शुभं मैत्री प्रसादमभयं दया। शान्तिः सुखं सदं तुष्टिः शमं पुष्टिरसूयत। योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत। मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम्। मूर्त्तिः सर्वगुणोपेतो नरनारायणावृषी। ययोर्जन्मन्यदोविश्वमभ्यनन्दत् सुनिर्वृतम्"।

वामनपुरा० अन्येऽपि तस्य भार्याःपुत्रा उक्ता यथा "धर्मस्य भार्याऽहिंसाख्या तस्यां पुत्रचतुष्टयम। सम्प्राप्तं मुनिशार्दूल ! योगशास्त्रविचारकम्। ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः। सांख्यप्रवेत्तारमपरं कपिलं वोढुमासुरिम्। दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्। ज्ञानयोगं न ते दद्युर्जायां सोऽपि कनीयसाम्"। देवादिभेदेन धर्मभेदा वामनपु० ११ अ० उक्ता यथा "किंलक्षणो भवेद्धर्मः किमाचरणसत्क्रियः। यमाश्रित्य न सीदन्ति देवाद्यास्तु तदुच्यताम् ऋषय ऊचुः। देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः। स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः१। दैत्यानां वाक्छलाजित्वं मात्सर्यं युद्धसत्क्रिया। विन्दर्भं नीतिशास्त्राणां हरभक्तिरुदाहृता २। सिद्धानामुदितो धर्मो योगयुक्तिरनुत्तमा। स्वाध्यायो ब्रह्मविज्ञानं भक्तिर्द्वाभ्यामपि स्थिरा ३। उत्पन्नदोषाशनं क्षेयं नृत्यवाद्येषु वादिता। सरस्वत्यां स्थिरा भक्तिर्गान्धर्वो धर्म उच्यते ४। विद्याधरत्वमतुलं विज्ञानं यौक्षे मतिः। विद्याधराणां धर्मोऽयं भवान्यां भक्तिरेव च ५। गान्धर्वविद्यावेदित्वं भक्तिः स्याम्यां तथा स्थिरा। कौशल्यं सर्वशिल्पेषु ६ः कैम्पुरुषः स्मृतः६। ब्रह्मचर्यं समानित्वं योगाद्वरतिर्दृढा। सर्वत्र कामचारित्वं धर्मोऽयं पैशकः स्मृतः ७। ब्रह्मचर्यं यताशित्वं लघ्यज्ञानञ्च राक्षस ! नियमोधर्मवेदित्वमार्षं धर्मं प्रचक्षते ८। स्वाध्यायो ब्रह्मचर्यञ्च दानं यजनमेव च। अकार्पण्यमनायासं दयाहिंसाक्षमादयः। जितेन्द्रियत्वं शौचञ्च माङ्गल्यं भक्तिरुच्यते। शङ्करे भास्करे देव्यां धर्मोऽयं मानवः स्मृतः ९। धनाधिपत्यं भोगाय स्वाध्यायः शङ्कराज्ञनम्। अहङ्कारमशौचञ्च धर्मोऽयं गुह्यकोत्थिति १०। परदाराभिमर्शित्वं परार्थेऽपि च लोलुपा। स्वाध्याय एके भक्तिर्धर्मोऽयं राक्षसः स्मृतः ११। अविवेकत आऽज्ञानं शौचहानिरनृतता। पिशाचानामयं धर्मः सदा चानिमन्त्रणा १२। योनयस्तु द्वादशैताः कथिता धर्मभेदाश्च राक्षस !। ब्रह्मणा कथिताः पुत्रा द्वादशैव गतिप्रदाः"। २धनुषि ३यमे ४सोमपे च पु० मेदि० ५सत्सङ्गे ६कर्हेति जिने च पु० हेमच०। ७न्यायेऽसभावे ९आचारे १०उपमायां ११क्रतौ १२अहिंसायाम्। १३उपनिषदि मेदि०पु०न०।१४आत्मनि तस्य सर्वस्य स्वस्मिन् धारणात् १५जीवे देहधारणादेर्धारणात् १६षट्कलप्रस्तावे प्रथमगुरुकेऽन्यलघुचतुष्टयके द्वादशभेदे। १७भाग्याख्ये लग्नेन्दुभ्यां नवमस्थाने तद्भावानयनं द्वादशभावशब्दोक्तदिशा बोध्यम्। तत्र चिन्त्यपदार्थो जन्मभावे तद्भावस्थग्रहयोगादिकफलं जातकपद्धतावुक्तं यथा "विहाय भावान् सकलान् प्रयत्नाद्भाग्याभिध दैवविदा विचिन्त्यम्। भाग्यान्वितो ना यदि शीलविद्याः कुलं तदायुश्च भवेत् सुधन्यम्। लग्नाच्चन्द्रात् यद्भवेदभसंस्थं भाग्यस्थानं प्राज्ञनैः कीर्त्तितं तत्। चिन्त्यो वीर्याढ्यात्तयोस्तत्पतिः कः कस्मिन् भावे कीदृशः कारको वा। भाग्यालयं स्वामियुतेक्षितं चेत् स्वदेशतो भाग्यविवृद्धिदं तत्। अन्येन दृष्टं त्वथ वा युतं चेदन्यत्र देशे फलदानदक्षम्। भाग्यगे शुभखगा मिलिताः स्युराज्यदा न रिपुनीचगृहे चेत्। धर्मधान्यसुखवृद्धिकराश्च स्वायुषः स्थिरधनस्य च दातृ। नीचारिसंस्थाश्च न सौम्यदृष्टाः पापाश्च भाग्ये न शुभप्रदाः स्युः। क्रूरा अपि स्वे भवने शुभाः स्युर्विशेषतः सद्युवतीक्षितास्चेत्। पूर्णचन्द्रसहितं शुभदृष्टं चेत् स्यात् प्रधानपुरुषः पुरुषोऽसौ। खेचरेक्षणसमागमयुक्तं सद्गुरोस्तु युतितोऽतिविशेषात्। कोणस्थिताः सर्वनगस्य

रेन्द्राः शुभाः शुभस्थानगता विदध्युः। नरं सुहृद्वं शुभदृष्टदेहा भूपं हतारिं सुशरीरकीर्त्तिम्। तत्रादि खेचरयुतिश्च भाग्यभे भूपतिं हि जनयेत् बुधोनिता। शौरिभूसुतगुरुनिता नरं कामकीर्त्तिधनसौख्यवर्जितम्। धर्मे तु तीर्थं दिनलग्नवाद्दे चन्द्रो नखे१० वातमरुक् च शक्रे१४। मातृस्मृतिर्भौङ्गयुगे२६ कविर्मां तिथ्यब्दके १५ तातस्मृतिं गुरुश्च"।

वर्षलग्नात् धर्मभावफलं नी० ता० उक्तं यथा "भौमेऽब्दपे त्रिनवगे क्रूरायुक्ते बलान्विते। गुणावहः सदा मार्गचिरं कार्य्यं स्थिरं तनु। त्रिधर्मस्थोऽब्दपः सूर्यः कन्दजीमार्गसौख्यदः। अन्यप्रेषणयानं स्यात् सं चेन्नाधिकतो भवेत्। शुक्रेऽब्दपे त्रिनवगे मार्गसौख्यं विलोमगे। अस्ते वा कुगतिः सौम्ये देवयात्रा तथाविधे। क्रूरार्दिते कुयानं स्यात् गुरावेवं विचिन्तयेत्। इत्यशाले लग्नधर्मपत्योर्यात्राऽस्त्यचिन्तिता। लग्नेशो धर्मपे यच्छन् स्वं सहचिन्तिताध्वगः। एवं लग्नाब्दयोर्योगे सुखहाङ्गपयोरपि। गुरुस्थाने कुजे धर्मे सदुयात्रा भवत्यचिरात्। शस्थाने लग्नपो भौमो दृष्टः सद्यानसौख्यदः। स्वस्थानगो हि बलवान् लग्नदर्शी सुखानदः। जन्माधिकारी शो मन्दस्थाने क्रूरयुतो यदा। पन्था रिपोः स्वकटकाद्गुरुशुक्रेन्दुजीवयोः। धर्मे शनिर्नाधिकारी पन्थानमशुभं वदेत्। इत्थं गुरौ दूरयात्रा रूपसङ्गस्ततो गुणः। कुजेऽब्दपे नष्टबले स्वजनाद्दूरतो गतिः। शुनेन्दिशा धर्मे इन्दौ सबलेऽध्वा विदेशजः। वर्षेशो बलवान् पापायुतः केन्द्रेऽधिकारवान्। अधिकारे गतिः सद्यो सेनापत्येऽपि वा वदेत्। एवंविधे कुजे जीवे युतेऽर्कान्निर्गते पुनः। परसैन्योपरिगतिलयस्थातिसुखावहा। जीवाद्यवसमे भौमे शुभां यात्रां नृणां वदेत्"। १८ आधेये स्वदृत्तिपदार्थे "धर्माट्टनिच् केवलात्" पा०बहु०अनिच्। विधर्मा सुधर्मा केवलादित्युक्तेः परमः स्वोधर्मो यस्येति बहुव्रीहौ न। सन्दिग्धसाध्यधर्मा इत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः समानविभक्तिकपदपूर्वकेतरत्वस्यैव केवलशब्दार्थत्वात् निष्टत्तिधर्मा अनुच्छित्तिधर्मा इत्यादौ अनिच्।

धर्म्मकर्म्मन् न० धर्मस्य धर्मार्थं कर्म। धर्मप्रतिपादककर्मभेदे "वेदप्रणिहितं धर्मकर्म तन्मङ्गलं परम्" ब्रह्मवै० पु०। धर्मकार्य्यधर्मक्रियादयोऽप्यत्र।

धर्म्मकथादरिद्र पु० धर्मार्थकथायां दरिद्रः। कविकाले जातमानवे कलौ नृणां धर्मकथाशून्यत्वात् तथात्वम्।

धर्म्मकाम पु० धर्मं कामयते फलानभिसन्धानेन कम-अण् उप०स०। कर्त्तव्यबुद्ध्या धर्मकारके "अथ ते (तव) यदि धर्मविचिकित्सा इतिविचिकित्सा वा स्यात्। ते तत्र ब्राह्मणा सम्यग्दर्शनयुक्ता आयुक्ता अरूक्षा धर्मकामाः स्युः" एका० धृता तैत्तिरीयश्रुतिः। "धर्मकामाः जीवन्मुक्तवत् कर्मण्यप्रोदासीन्यमकुर्वाणाः" एका०रघु०।

धर्म्मकाय पु० धर्मस्य धर्मार्थं कायोऽस्य। बुद्धे त्रिका०।

धर्म्मकील्ल पु० धर्मस्य कील्ल इव। राजशासने त्रिका०। संज्ञायां कन्। धर्मकीलक ब्रह्मशासने शब्दरत्न०।

धर्म्मकृत् त्रि० धर्मं धर्मसाधनं कर्म करोति कृ-क्विप् तुक्। १धर्मसाधनकर्मकरे। "ज्येष्ठासु च न बन्धुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः" बृ० सं०। २विष्णौ पु० धर्मगुप् "धर्मकृद्धर्मी" विष्णुस०। "धर्माधर्मविहीनोऽपि धर्ममर्यादास्थापनार्थं धर्ममेव करोतीति धर्मकृत्" भा०।

धर्मकेतु पु० धर्मः अहिंसारूपकर्म केतुर्यस्य। १बुद्धे शब्दा० तस्याहिंसारूपपरमधर्मकर्त्तृत्वात् तथात्वम्। काश्यपवंश्ये २सुकेतुनन्दपुत्रभेदे। "सुकेतुतनयश्चापि धर्मकेतुरिति स्मृतः" हरिवं० २९ अ०। "अलर्कात् सन्ततिस्तस्मात् सुनीतोऽथ निकेतनः। धर्मकेतुःसुतस्तस्मात् सत्यकेतुरजायत" भाग० ९।१७।६ ३निकेतनपुत्रे नृपभेदे च। धर्मः केतुरिवास्य। ४धर्मध्वजे त्रि०।

धर्मकोष पु० धर्मः कोष इव धर्मस्य कोषः समूहो वा। धर्मरूपे रत्नपेटिके १वस्तुनि २धर्मसमूहे च "ब्राह्मणो जायमानो हि पृथिव्यामधिजायते। ईश्वरः सर्वभूतानां धर्मकोषस्य गुप्तये" मनुः।

धर्मक्षेत्र न० तद्०। धर्मार्जनार्थक्षेत्रे कर्मभूमौ भारतवर्षे। धर्मस्य पूर्वमविद्यमानस्योत्पत्तेः विद्यमानस्य च वृद्धेर्निमित्ते शस्त्रेत्र २स्थानभेदे च "धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः" गीता। कुरुक्षेत्रञ्च श्रुतिस्मृतिप्रसिद्धं देवयजनस्थानमविशुद्धं वा कुरुक्षेत्रशब्दे दर्शितं तद्व्याहृत्तये धर्मक्षेत्रमिति विशेषणम्। "तस्मिन् याताः पाण्डवाः पूर्वाविधार्मिका यदि पञ्चद्वयहिंसानिमित्ता दधर्माद्भीता नियर्त्तेरन् ततः प्राप्तराज्या एव मम सुत. अथ वा धर्मक्षेत्रमाहात्म्येन यापिनामपि मत्पुत्राणां कदाचित् चित्तप्रसादः स्यात्तदा च तेऽनुतप्ताः कपटोपात्तं राज्यं पाण्डवेभ्यो यदि दद्युस्तर्हि विमापि युद्धं हृता एवेति स्वपुत्रराज्यलाभे पाण्डवराज्यलाभे च

दृढ़तरमुपायमपश्यतो महानुद्वेग एव प्रत्यवीजम्" मधुसू०

धर्मगुप् त्रि० धर्मं गोपायति गुप–आयाभावपक्षे क्विप् ६त०। १धर्मरक्षके २विष्णौ पु० "धर्मगुप् धर्मकृत् धर्मी" विष्णुस०। "धर्मसंरक्षणार्थाय सम्भवामि युगे युगे" गीतायां स्वस्य धर्मरक्षार्थमाविर्भावस्योक्तेस्तस्य तथात्वम्।

धर्मघट पु० धर्मार्थं देयो घटः। सौरवैशाखे प्रत्यहं धर्मार्थं दीयमाने गन्धोदकभोज्यादिसहिते घटे। तद्विधानादि भविष्यपु० उक्तं यथा "विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रविः। दोषादिरहिते काले चतुर्वर्षं समाचरेत्। तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम्। चन्दनेन समालिप्तं दक्षिणादिभिरन्वितम्। व्रतमेतत् समाकृत्यात् यावत् वर्षचतुष्टयम्"। इदन्तु व्रतरूपं दानम्। हेमाद्रिदानखण्डे तु अन्यविधं धर्माख्यघटस्य दानमुक्तं यथा "अथ धर्मघटदानमाह विष्णुः "शीतलेन सुगन्धेन वारिणा पूरितं घटम्। शुक्लचन्दनदिग्धाङ्गं पुष्पदामोपशोभितम्। दध्योदनयुतं कुर्याच्छरावं तस्य चोपरि। उपानच्छत्रसंयुक्तं धर्माख्यं कल्पयेद्घटम्। पुष्पाक्षतं गृहीत्वा तु इमं मन्त्रमुदीरयेत्। ओं नमो विष्णुरूपाय नमः सागरसम्भव!। अपांपूर्णोदराशान्तं दुःखसंसारसागरात्। उदकुम्भो मया दत्तो ग्रीष्मे काले दिने दिने। उदकुम्भप्रदानेन प्रीयतां मधुसूदनः"। भविष्योत्तरे "प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः। ब्राह्मणस्य गृहे नेयः शीतामलजलः शुचिः। वसन्तग्रीष्मयोर्मध्ये यः पानीयं प्रयच्छति। पले पले सुवर्णस्य फलमाप्नोति मानवः। मार्गशीर्षात् समारभ्य उदकुम्भन्तु यः क्षिपेत्। दिने दिने सहस्रस्य गवां पुण्यफलं लभेत्। तस्योद्यापनं कार्यं मासि मासि नरोत्तम। मण्डकावेष्टकाभिश्च पक्वान्नैः सार्वकामिकैः। उद्दिश्य शङ्करं विष्णुं ब्रह्माणमथ वा पितॄन्। सतिलं प्रोक्षयित्वा तु मन्त्रेणानेन मानवः। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात् सततं मम सन्तु मनोरथाः। अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति। वसन्ते ग्रीष्मसमये प्रपादानफलं लभेत्। प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः"। एतत् परमेव "दद्युर्धर्मघटांश्चापि सुगन्धोदकपूरितान्" काशीख० १२ अ० वचनम्। धर्मकुम्भादयोऽप्यत्र।

धर्मचक्र न० ६त०। धर्मसमूहे। "ग्रीष्मे च विहितं राज्ञे धर्मचक्रमवर्त्तत" भा० आ० १०९ अ०। "यत्र पूर्वाभिसर्गे वै धर्मचक्रं प्रवर्त्तितम्" भा० शा० १५७ अ०। धर्मस्य चक्रं यत्र। २बुद्धे पु० त्रिका०।

धर्मचक्रभृत् पु० धर्मचक्रं बिभर्त्ति भृ–क्विप् तुक्। १जिने धर्मणः २धर्मसमूहधारके त्रि०।

धर्मचारिन् त्रि० धर्मं तत्साधनकर्म चरति चर–णिनि ६त०। १धर्मसाधनकर्मकारके। "स चेत् स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः" रघुः। स्त्रियां ङीप्। सा च २शुद्धधर्मकारिण्यां जायायां शब्दरत्ना०। "ज्येष्ठायां धर्मचारिण्यां मांहिष्ठ्यां गर्भमादधे" भा० व० २९ अ०। [हेमच०।

धर्मचिन्तन न० चिन्ति–भावे ल्युट् ६त०। धर्मस्य चिन्तायां

धर्मचिन्ता स्त्री चिन्ति–भावे अ ६त०। धर्मस्य चिन्तने उपाधौ अमरः।

धर्मज पु० धर्मार्थं जायते जन–ड। १औरसे प्रथमे पुत्रे "यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते। स एव धर्मजः पुत्रः कामजानितरान् विदुः" मनुः। धर्मात् जायते जन–ड। २धर्मपुत्रे युधिष्ठिरे। "एवं सञ्चिन्त्य भगवान् स्वराज्ये स्वाप्य धर्मजम्। नन्दयामास हृद्वदः साधूनां वर्त्म दर्शयन्" भाग० ३।२। १७। युधिष्ठिरस्य धर्मतो जन्मकथा भा० आ० १२३अ०। "संवत्सरधृते गर्भे गान्धार्यां जनमेजय!। आह्वयामास वै कुन्ती गर्भार्थं धर्ममच्युतम्। सा वह्निं स्मरिता देवी धर्मायोपजहार ह। जजाप विधिवज्जप्यं दत्तं दुर्वाससा पुरा। आजगाम ततो देवो धर्मो गन्धवहात्ततः। विमाने सूर्यसङ्काशे कुन्ती यत्र जपस्थिता। विहस्य तां ततो ब्रूयाः कुन्ति! किन्ते ददाम्यहम्। सा तं विहसमानाऽपि पुत्रं देह्यब्रवीदिदम्। संयुक्ता सा हि धर्मेण योगमूर्त्तिधरेण ह। लेभे पुत्रं वरारोहा सर्वप्राणभृतां हितम्। ऐन्द्रे १८ चन्द्रसमायुक्ते मुहूर्ते ऽभिजितेऽष्टमे। दिवामध्यगते सूर्ये तिथौ पूर्णेऽतिपूजिते। सम्भृतयशसं कुन्ती सुषाव प्रवरं सुतम्। जातमात्रे सुते तस्मिन् वागुवाचा शरीरिणी। एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः। विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति। युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः"। ३बुद्धभेदे ४दिव्यभेदे न० घटशब्दे दृश्यम्। ५धर्मतो जातमात्रे त्रि०। ६नरनारायणयोः पु० द्वि० व०। धर्मशब्दे तयोर्मूर्त्तिरूपधर्मपत्नीजन्मकथा दृश्या।

धर्मजन्मन् पु॰ धर्मतो जन्म यस्य। युधिष्ठिरे "वीक्ष्य धर्ममथ धर्मजन्मना" माघः।

धर्मजन्य त्रि॰ धर्मेण जन्यः। धर्मतो जाते सुखे "सुखं तु जगतामेव कार्य्यं धर्मेण जन्यते" भाषायां तस्य तथोक्तेः स्वयात्वम्।

धर्मजिज्ञासा स्त्री धर्मार्थं धर्माचरणाय जिज्ञासा। वेदवाक्यविचारे धर्मसन्देहे वेदवाक्यानां विषयेत्याद्याकरणपञ्चकयुक्ते विचारभेदे धर्ममीमांसायाम् "अथातोधर्मजिज्ञासा" जै॰ सू॰ धर्ममीमांसाकर्ममीमांसाशब्दयोश्च समानार्थतया धर्मस्योपक्रमे तल्लक्षणनिर्देशाय प्रवृत्ते "चोदनालक्षणोऽर्थो धर्म" इति जै॰२२ सूत्रे धर्मशब्दस्य कर्मपरत्वं भाष्यसम्मतं युक्तम् न तु पुण्यपरत्वमिति।

धर्मजीवन पु॰ याजनप्रतिग्रहादिना परस्य धर्मस्योत्पाद्य जीवति जीव-ल्यु। याजनादिना परस्य धर्मोत्पादनेन जीवनोपाययुते ब्राह्मणभेदे। "यस्यापि धर्मसमयात् प्रच्युतो धर्मजीवनः" मनुव्याख्याने कुल्लू॰।

धर्मज्ञ त्रि॰ धर्मं जानाति ज्ञा-क। अयं धर्म इति ज्ञानयुते। "धर्मज्ञः सत्यवादी च" "अमात्यमुख्यं धर्मज्ञं प्राज्ञं दक्षं कुलोद्गतम्" मनुः।

धर्मण पु॰ धर्माय नम्यते नम-बा॰ कर्मणि ड। (धामनि) ख्याते १वृक्षभेदे। (ढेमना) ख्याते ४सर्पभेदे च मेदि॰।

धर्मतीर्थ न॰धर्मकृतं तीर्थम्। तीर्थभेदे "ततो गच्छेन्महाराज! धर्मतीर्थमनुत्तमम्। यत्र धर्मो महाभागस्तप्तवानुत्तमं तपः। तेन तीर्थं कृतं पुण्यं स्वेन नाम्ना च विश्रुतम्। तत्र स्नात्वा नरो राजन्! धर्मशीलः प्रजायते। आत्मप्रमं कुलञ्चैव पुनीते नात्र संशयः" भा॰ व॰ ८४ अ॰।

धर्मद पु॰ धर्मं स्वधर्मफलं ददाति अन्यस्मै संक्रामयति दा-क। १स्वधर्मफलस्य अन्यस्मिन् संक्रामके २धर्मोत्पादके च "एतदेव भगवानं धर्मिष्ठं धर्मदं तथा" हरिवं॰१२४अ॰। ३कुमारानुचरभेदे पु॰। "धर्मदोमन्त्रभवः सुचीवक्त्रश्च वीर्य्यवान्" भा॰ शा॰ ४६अ॰ तदनुचरोक्तौ।

धर्मदान न॰ "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवलं धर्मबुद्ध्या यत् धर्मदानं प्रचक्षते" देवलोक्ते प्रयोजनान्तरानुद्देशेन दाने

धर्मदार पु॰ ब॰व॰ धर्मार्थकस्याधानाद्यर्थम् दाराः। धर्मार्थदारेषु "धर्मदारान् वने त्यक्त्वा परकर्मकरोत् प्रभुः" कालन्दकीय नीतिशास्त्रम्।

धर्मदीपिका स्त्री तोडरमल्लिके मीमांसापक्षभेदे।

धर्मदुघा स्त्री धर्मान् दोग्धि आधारस्य कर्तृत्वविवक्षया कर्त्तरि दुह-क धर्मान्नादेशः। धर्मदानस्थाने वह्निवेदाम् यज्ञार्थचि॰।

धर्मदेश पु॰ धर्मसाधन देशः। "स्वभावात् यत्र चरति कृष्णसारः सदा मृगः। धर्मदेश स विज्ञेयो द्विजानां धर्मसाधनम्" संवर्त्तोक्ते देशभेदे। हेमाद्रिब्र॰ विस्तारः।

धर्मद्रवी स्त्री धर्मजनको द्रवो यस्याः गौरा॰ ङीष्। "विष्णुपादाब्जसम्भूते! गङ्गे त्रिपथगामिनि!। धर्मद्रवीति विख्याते! पापं मे हर जाह्नवि!।" इत्युक्तायां गङ्गायाम् प्रा॰ त॰ दृश्यम्।

धर्मद्रोहिन् पु॰ धर्माय परस्य धर्माचरणाय द्रुह्यति द्रुह-णिनि ४त॰। राक्षसे। [बुद्धे हेमच॰।

धर्मधातु पु॰ धर्मसहिंसारूपं परमं धर्मं दधाति धा-तुन्।

धर्म्मध्वजिन् पु॰ धर्मो ध्वजं चिह्नमिवास्यस्य इनि। लोके निजधार्मिकत्वख्यापनार्थं धर्मकारके धर्मचारिणि बिडालवृत्तौ "धर्मध्वजी बिडालवृत्तिः" अमरः। "धर्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः" मनुः।

धर्म्मन् पु॰ धृ-मनिन्। १धर्मे "पुण्ये शुभादृष्टभेदे "प्रीतिरविधर्मणे त्वा धर्मं जिन्व" याज्ञ्यमा॰ १।६।२। "धर्मणे धर्माय" भा॰। "निर्गुणत्वान्न चित्धर्मो" सां॰सू॰। आत्मनो निर्गुणत्वान्न तस्य चित् धर्मो धर्म इत्यर्थः। "ज्ञानं नैवात्मनो धर्मः" इति सां॰प्र॰श्रुतवाक्यात् तथात्वम्। धर्मिन्शब्दे दृश्यम्। २धारके त्रि॰। "धर्मतं तु लोकं महो धर्मणं तविषीम्" ऋ॰ १।१८७।१ "महो महान्तं धर्मणं सर्वस्य धारकम्" भा॰। अनेनैवोपपत्तौ बहुव्रीहौ "धर्मादनिच् केवलात्" पा॰ अनिच्करणं चित्स्वरार्थं धर्मशब्दान्तया प्रयोगनिरासार्थञ्च। [धर्मसुतादयोऽप्यत्र।

धर्म्मनन्दन पु॰ ६त॰। युधिष्ठिरे धर्मजशब्दे दृश्यम्।

धर्म्मनाभ पु॰ धर्मः नाभिरिवास्य अच् समा॰। विष्णौ हेमच॰।

धर्मनेत्र पु॰१यदुवंशजे हैहयस्य पुत्रे। यदुवंशोपक्रमे "हैहयस्याभवत् पुत्रो धर्मनेत्र इति श्रुतः" हरिवं॰ ३३ अ॰। २पुरुवंशजे नृपभेदे। "धार्त्तराष्ट्रसुतान् बाह्लीकान् प्रसृतान् भुवि। प्रतीपं धर्मनेत्रं च सुनेत्रं चापि भारत!" भा॰ आ॰ ९४ अ॰। अयञ्च प्रसिद्धात् धृतराष्ट्रात् भिन्नः धृतराष्ट्रस्य पितुः शान्तनोः प्रतीपपुत्र तया तत्र कीर्तनात्। "प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ। देवापिः शान्तनुश्चैव बाह्लीकश्च महारथः"। ३पौरवंशजातसुहृत्पुत्रभेदे च "तंसोः सुबोधो राजर्षिर्धर्मनेत्रः प्रतापवान्" हरिवं॰ १अ॰

धर्मनैपुण्यकाम पु॰ धर्मस्य नैपुण्यमतिशयं कामयते कम-अच्। पूर्वं गृहीतवेदप्राये पश्चाद् अध्ययनजन्यादृष्टविशेषेच्छौ। "नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च। धर्मनैपुण्यकामानां प्रतिगन्धे च सर्वदा" मनुः। "नैपुण्यमतिशयः धर्मातिशयार्थिनो ग्रामनगरयोः सर्वदानध्यायः स्यात्। कुत्सितगन्धे च सर्वस्मिन्नपि गम्यमाने। धर्मनैपुण्यकामं प्रत्ययं नित्यानध्यायोपदेशो, विद्यानैपुण्यकामस्य कदाचिदध्ययनमनुजानाति। ये शिष्याः केचिद् गृहीतवेदप्राया अध्ययननियमजन्यादृष्टेच्छवस्ते धर्मनैपुण्यकामाः। केचित् प्रथमाध्येतारो विद्यातिशयमात्रार्थिनस्ते विद्यानैपुण्यकामाः" कुल्लू॰।

धर्मप(ट्ट)त्तन न॰ ६॰ सं॰ १४ व॰ कूर्मविभागे दक्षिणस्थाशक्ते देशभेदे "वैदूर्यमङ्गसुक्तात्रिवारिचरधर्मपट्टनद्वीपाः" २त्रावन्त्यां धर्मपुर्याम्। त्रिका॰। तत् कारणतयाऽस्त्यस्य अच्। ३मरिचे न॰ अमरः।

धर्मपति पु॰ धर्मस्य पतिर्यस्मात्। १धर्माधिपत्यसाधने वरुणे "अथ वरुणाय धर्मपतये। वारुणं यवमयं चरुं निर्वपति तदेनं वरुण एव धर्मपतिर्धर्मस्य पतिं करोति परमता वै सा यो धर्मस्य पतिरसद्यो हि परमतां गच्छति तं हि धर्म उपयन्ति तस्माद् वरुणाय धर्मपतये" शतब्रा॰ ५।२।३।६। धर्मः पतिरिव यस्य। २धर्मशीले च "वरुणो धर्मपतीनाम्" यजु॰ ६।३६। "वरुणो धर्मपतीनां धर्मेश्वराणां धर्मशीलानामाधिपत्ये त्वां सुवतामं वेददी॰।

धर्मपत्नी स्त्री धर्मार्थं पत्नी। निर्दोषायां पत्न्याम्। "प्रथमा धर्मपत्नी च द्वितीया रतिवर्द्धिनी। इष्टमेव फलं तत्र नादृष्टमुपजायते। धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत्" दक्षसं॰। "पतिव्रता धर्मपत्नी पितृपूजनतत्परा। मध्यमन्तु ततः पिण्डमद्यात् सम्यक् सुतार्थिनी" मनुः। "औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः" याज्ञ॰। १धर्मदेवस्य पत्नीषु दक्षकन्यारूपासु। "नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे। कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा। बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश" भा॰ आ॰ ६६ अ॰।

धर्मपत्र न॰ धर्मसाधनं पत्रमस्य। यज्ञोदुम्बरे शब्दच॰।

धर्मपर त्रि॰ धर्मः परो यस्य। धर्मप्रधाने धर्मासक्ते "जितेन्द्रियो धर्मपरः" भा॰ व॰ २१६ अ॰। धर्मपरायणोऽत्र।

धर्मपरिणाम पु॰ धर्मरूपः परिणामः। पातञ्जलोक्ते चित्तस्य धर्मिणः व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावरूपे परिणामभेदे यथाह तत्र

"एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः" पात॰ सू॰।

"एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामश्चावस्थापरिणामश्चोक्तो वेदितव्यः तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः। लक्षणपरिणामश्च निरोधस्थितिलक्षणः त्रिभिरध्वभिर्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपद्यते। यत्रास्य स्वरूपेणाभिव्यक्तिरेषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां वियुक्तः। तथा व्युत्थानं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं वर्त्तमानं लक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपद्यतेऽस्य तृतीयोऽध्वा नचानागतवर्त्तमानाभ्यां लक्षणाभ्यां वियुक्तः। एवं पुनर्व्युत्थानमुपसम्पद्यमानमनागतलक्षणं हित्वा धर्मत्वमनतिक्रान्तं वर्त्तमानं लक्षणं प्रतिपद्यते यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापार एषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तमित्येवं पुनर्निरोध एवं पुनर्व्युत्थानमिति। तथाऽवस्थापरिणामो निरोधलक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्बला व्युत्थानसंस्कारा इत्येव धर्माणामवस्थापरिणामः तत्र धर्मिणोधर्मैः परिणामो धर्माणामध्वभिर्लक्षणैः परिणामो लक्षणानामवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि गुणवृत्तमवतिष्ठते। चलञ्च गुणवृत्तं गुणस्वाभाव्यन्तु प्रवृत्तिकारणमुक्तं गुणानामिति। एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात् त्रिविधपरिणामो वेदितव्यः। परमार्थतस्त्वेक एव परिणामो धर्मिस्वरूपमात्रो हि धर्मोधर्मिविक्रियैवैष धर्मद्वारा प्रपञ्च्यते इति तत्र धर्मस्य धर्मिणि वर्त्तमानस्यैवाध्वस्वतीतानागतवर्त्तमानेषु भावान्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भित्त्वाऽन्यथा क्रियमाणस्य भावान्यथात्वमिति।" भा॰

"ननु चित्तपरिणतिमात्रमुक्तं न तु तत्प्रकारा धर्मलक्षणावस्थापरिणामास्तत् कथं तेषामतिदेश इत्यत आह। तत्र व्युत्थाननिरुद्धयोरिति। धर्मलक्षणावस्थाशब्दाः परं नोच्चारिताः न तु धर्मलक्षणावस्था

परिणामो नोक्त इति संक्षेपार्थः। तथा हि व्युत्थान निरोधसंस्कारयोरित्यत्रैव सूत्रे धर्मपरिणाम उक्तः इमन्तु धर्मपरिणामं दर्शयता तेनैव धर्माधिकारिणो लक्षणपरिणामोऽपि तेन सूचित एवेत्याह लक्षणपरिणाम इति लक्ष्यते अनेनेति लक्षणं कालभेदः लक्षितवस्तु वस्त्वन्तरेभ्यः कालान्तरयुक्तेभ्योव्यवच्छिद्यत इति। निरोधस्त्रिलक्षणः व्यस्यैव व्याख्यानं त्रिभिरध्वभिर्युक्तः अध्वशब्दः कालवचनः स खल्वनागतलक्षणमध्वानं हित्वा तत् किमध्ववत् धर्मनिरोधत्वमप्यतिपतति नेत्याह धर्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपन्नं यत्र निरोधोऽनागत आसीत् स एव सम्प्रति वर्त्तमानो नतु निरोधोऽनिरोध इत्यर्थः। वर्त्तमानतास्वरूपव्याख्यानं यत्रास्य स्वरूपेण स्वोचितार्थक्रियाकारिण्याऽभिव्यक्तिः सतदाचारः एषोऽस्य प्रथममनागतमध्वानमपेक्ष्य द्वितीयोऽद्धा। स्यादेतत् अनागतमध्वानं हित्वा चेदुवर्त्तमानतामापन्नस्तान्न हित्वा अतीततामापद्यते हन्त भोः अध्वनासुत्पादविनाशौ स्यातां न चेष्यते नह्यसत उत्पादो नापि सतोविनाश इत्यत आह नचातीतानागताभ्यां सामान्यात्मनावस्थिताभ्यां वियुक्तइति। अनागतस्य निरोधस्य वर्त्तमानताबलक्षणं दर्शयित्वा वर्त्तमानव्युत्थानस्यातीततां तृतीयमध्वानमाह तथा व्युत्थानमिति तत् किं निरोध एवानागतो न व्युत्थानं नेत्याह। एवं पुनर्व्युत्थानमिति व्युत्थान लात्यमेक्षया पुनर्भावः न व्यक्तत्वमेक्षया न ह्यतीतं पुनर्भवतीति। स्वरूपाभिव्यक्तिरर्थक्रियात्मस्याविर्भावः सचैवं लक्षणपरिणाम उक्तः तज्जातीयेषु पौनःपुन्येन वर्त्तत इत्याह। एवं पुनरिति धर्मपरिणामसूचितमेवावस्थापरिणाममाह तथेति धर्माणां वर्त्तमानाध्वनां बलवत्त्वाबलवत्त्वाऽवस्था तस्याः प्रतिक्षणं तारतम्येन परिणामः। उपसंहरति एष इति परिणामभेदानां सम्बन्धिभेदाद्विधीरयति तन्त्रानुभवानुसारात् धर्मिण इति। तत् किमेष परिणामो गुणानां कादाचित्को नेत्याह। एवमिति कस्मात्? पुनरयं परिणामः सदातन इत्यत आह। चलश्चेति चोहेत्वर्थः इत्तं प्रचारः एतदेव कुत इत्यत आह। गुणस्वाभाव्यमिति उक्तमत्रैव पुरस्तात्। सोऽयं त्रिविधोऽपि चित्तपरिणामः भूतेन्द्रियेषु सूत्रकारेण निर्दिष्ट इत्याह एतेनेति। एष धर्मधर्मिभेदो धर्मधर्मिणोर्भेदमात्रस्य तत्र भूतानां पृथिव्यादीनां धर्मिणां गवादिर्घटादि र्वा धर्मपरिणामः। धर्माणां चातीतानागतवर्तमानरूपतालक्षणपरिणामः वर्तमानलक्षणापन्नस्य गवादेर्बाल्यकौमारयौवनवार्द्धक्यमवस्थापरिणामः। घटादीनामपि नवपुरातनतावस्थापरिणाम एवमिन्द्रियाणामपि धर्मिणां तत्तच्छीलाद्यालोचनं धर्मपरिणामो धर्मस्य वर्त्तमानादिलक्षणपरिणामो वर्त्तमानलक्षणस्य रक्ताद्यालोचनस्फुटत्वास्फुटत्वादिरवस्थापरिणामः। स चायमेवंविधो भूतेन्द्रियपरिणामो धर्मिणो धर्मलक्षणावस्थानां भेदमाश्रित्य वेदितव्यः। अभेदमाश्रित्याह परमार्थतस्त्विति तुशब्दोभेदपक्षाद्विशिनष्टि पारमार्थिकत्वमस्य ख्याप्यते नत्वन्यस्य परिणामस्य निषिध्यते। कस्मात्? धर्मिस्वरूपमात्रोहीति नतु यदि धर्मिविक्रियैव धर्मः कथमसङ्करप्रत्ययो लोके परिणामेष्विष्यत आह। धर्मद्वारेति धर्मशब्देन धर्मलक्षणावस्थाः परिगृह्यन्ते तद्द्वारेण धर्मिण एव विक्रियेत्येका चासङ्कीर्णा च द्वाराणामभेदोऽपि धर्मिणः परस्परासङ्करात्। नतु धर्माणामभिन्नत्वे धर्मिणोऽध्वनाञ्च भेदे धर्मिणोऽनन्यत्वेन धर्मेणापि इह धर्मिवदुभवितव्यमित्यत आह तत्र धर्मस्येति भावः संस्थानभेदः सुवर्णादेर्यथा भाजनस्य रुचकस्वस्तिक व्यपदेशभेदो भवति तन्मात्रमन्यथा भवति। न तु द्रव्यं सुवर्णभेदमुपैति अत्यन्तभेदाभावादिति वक्ष्यमाणोऽभिसन्धिः।" विवृतिः

धर्मपाठक पु॰ धर्मं धर्मशास्त्रं पठति पठ—ण्वुल्। मन्वादिधर्मशास्त्राध्येतरि। "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः" मनुः।

धर्मपाल त्रि॰ धर्मं पालयति पालि—अच् उप॰स॰। वर्णाश्रमधर्मरक्षके २दण्डे पु॰ तद्धीत्या लोकैर्धर्मस्य चरणात् तस्य तथात्वम्। "दण्ड एव च सर्वाङ्गो लोके चरति मूर्त्तिमान्। भिन्दन् छिन्दन् रुजन् जनन् दारयन् पाटयंस्तथा। घातयन्नभिधावंश्च दण्ड एव चरत्युत। असिर्विशसनो धर्मस्तीक्ष्णधर्मो दुराधरः। त्रीणर्भो विजयः शास्ता व्यवहारः सनातनः। शास्त्रं ब्राह्मणमन्त्राश्च शास्ता प्राग्वदतां वर!। धर्मपालोऽक्षरो देवः सत्यगो नित्यगोऽव्यजः। अवङ्गो रुद्रतनयो मनुर्व्येष्ठः शिवङ्करः। नामान्येतानि दण्डस्य कीर्त्तितानि युधिष्ठिर!" भा॰ शा॰ १२१ अ॰।

धर्मपुत्र पु॰ ६त॰। युधिष्ठिरे हेमच॰। नरनारायणयो-

र्द्धयोश्च द्वि०व० धर्मशब्दे दृश्यम् । धर्मतः कृतः पुत्रः । २धर्मतः कृते पुत्रे । "यावद्भूर्जटिधर्मपुत्र (परशुराम) परशुक्षुण्णक्षत्रियत्रैणीशोणितपिच्छिला वसुमती कोऽस्यामधास्यत् पदम्" महाना० । धर्मसुतादयोऽप्यत्र । धर्मजः पुत्रः । ३ज्येष्ठे औरसे धर्मपत्नीजे पुत्रे च । धर्मजशब्दे मनुवाक्यं दृश्यम् ।

धर्मप्रतिरूपक पु० धर्मस्य प्रतिरूपमिव कायति कै-क । "शक्रः परजने दाता स्वजने दुःखदायिनि । मध्वापातो विषास्वादः स धर्मप्रतिरूपकः" मनूक्तलक्षणयुक्ते धर्माभासे "यो बहुधनत्वाद्दानशक्तः सन् अवश्यभरणीये पितृमात्रादिज्ञातिजने दौर्गत्यात् दुःखमेते सति यशोऽर्थमन्येभ्यो ददाति स तस्य दानविशेषो धर्मप्रतिरूपको न तु धर्म एव मध्वापातो मधुरोपक्रमः प्रथमं यशस्कारत्वात् विषास्वादश्चान्ते नरकफलत्वात् तस्मादेतन्न कार्यम्" कुल्लू० ।

धर्मप्रवक्तृ पु० धर्मे सन्दिग्धार्थे अयं धर्म इति प्रवक्ति प्र+वच-तृच् । धर्मनिर्णायके राज्ञां व्यवहारस्थानस्थे सभ्यभेदे । स च ब्राह्मण एव तदभावे क्षत्रियवैश्यौ न शूद्रः यथाह मनुः 'जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणव्रुवः । धर्मप्रवक्ता ह्यपतेन्न तु शूद्रः कथञ्चन । यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम् । तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः" "ब्राह्मणो धर्मप्रवक्तेति विधानादेव शूद्रनिवृत्तिः सिद्धा पुनर्न तु शूद्र इति शूद्रनिषेधो योग्यब्राह्मणाभावे क्षत्रियवैश्ययोरभ्यनुज्ञानार्थः । अत एव कात्यायनः "यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् । वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" कुल्लू० ।

धर्मप्रवचन पु० धर्मं प्रवक्ति प्र+वच-ल्यु । शाक्यमुनौ शब्दार्थचि० ।

धर्मप्रस्थ पु० तीर्थभेदे "ततो गच्छेत राजेन्द्र ! धर्मप्रस्थं समाहितः । तत्र धर्मो महाराज ! नित्यमास्ते युधिष्ठिर ! । तत्र कूपोदकं कृत्वा ततः स्नातः शुचिस्तथा । पितॄन् देवांस्तु सन्तर्प्य शक्रपापोदिवं व्रजेत्" भा०व०८४अ० ।

धर्मवाणिजिक त्रि० धर्मे वाणिजिक इव । फलकामनया कर्मकरे तस्य फलकामनया कृतत्वेन धर्मं दत्त्वा फलस्य ग्रहणात् वाणिजिकतुल्यत्वम् "धर्मवाणिजिकामूढाः फलकामाः नराधमाः । अर्चयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत" भवि० त० विष्णुधर्मोत्तरपु० ।

धर्मभगिनी स्त्री धर्मतः कृता भगिनी । १धर्मतः कृतायां भगिन्यां २गुरुकन्यायाञ्च । [पाठके शब्दच० ।

धर्मभाणक पु० धर्मं धर्मार्थं भणति पठति । भारतादि-

धर्मभिक्षुक पु० धर्मार्थं भिक्षते भिक्ष-उक । मनूक्ते नवविधे धर्मार्थभिक्षाशीले । "सान्तानिकं यक्ष्यमाणमध्वगं सर्ववेदसम् । गुर्वर्थपितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः । नैतान् स्नातकान् विद्याद्ब्राह्मणान् धर्मभिक्षुकान् निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः" मनुः । "सन्तानप्रयोजनत्वाद्विवाहस्य, सान्तानिको विवाहार्थी यक्ष्यमाणो अवश्यकर्त्तव्यज्योतिष्टोमादियागं चिकीर्षुः अध्वगः पान्थः सर्ववेदसः कृतसर्वस्वदक्षिणविश्वजिद्यागः, विद्यागुरोर्वाऽसाच्छादनादिरर्थः प्रयोजनं यस्य स गुर्वर्थः एवं पितृमात्रर्थोऽपि स्वाध्यायार्थी स्वाध्यायाध्ययनकालीनाच्छादनाद्यर्थी ब्रह्मचारी, उपतापी रोगी एतान्नव ब्राह्मणान् धर्मभिक्षाशीलान् स्नातकान् जानीयात् । एतेभ्यो निर्धनेभ्यो गोहिरण्यादि दीयत इति दानविद्याविशेषमनुरूपेण दद्यात्" कुल्लू० ।

धर्मभृत् त्रि० धर्मं बिभर्त्ति भृ-क्विप् तुक् । धर्मधारके "एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः" भा० व० १२२ अ० ।

धर्मभृत त्रि० धर्मो भृतो येन । १रक्षितधर्मके २त्रयोदशस्य मनोः पुत्रभेदे पु० । "त्रयोदशस्य पुत्रास्ते विश्वेयास्तु रुचेः सुताः । चित्रसेनो विचित्रश्च त्रयो धर्मभृतो मताः" हरिवं० ७ अ० ।

धर्मभ्रात पु० धर्मतः कृतो भ्राता । १गुरुपुत्रादौ २भ्रातृत्वेन प्रतिपन्ने एकाश्रमिणि च "वानप्रस्थयतिब्रह्मचारिणामेकधर्मिणः । क्रमेणाचार्य्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः" याज्ञ० । "धर्मभ्राता प्रतिपन्नो भ्राता तीर्थशब्दस्याश्रमवाचित्वादेकतीर्थ्यैकाश्रमी । धर्मभ्राता चासावेकतीर्थी चेत्यर्थः" वीर०मि० ।

धर्ममूल न० तृ० । धर्मस्य प्रमाणे, तानि च मन्वादिभिर्दर्शितानि । तत्र मनुः "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" । विधिर्निषेधस्तर्कश्च वेदाङ्गानि षडेव चेति" विधिरज्ञातज्ञापको वेदभागः विधेयोमन्त्रः तर्को मीमांसा । अङ्गान्याह देवलः "शिक्षाव्याकरणनिरुक्तच्छन्दःकल्पज्योतींषीति वेदाङ्गानि" "शुभो तु चरिते शीलनित्याचारणेन

शीलत्वाभिधानात् कथं पृथगुपादानम् । न आचर्यानुष्ठानलक्षणक्रियारूपत्वादाचारस्य स्वरूपविशेषत्वाच्छीलस्य व्यक्त एव भेदः । "शुचौ तु चरिते शीलमिति" शीलस्य चरितविशेषहेतुत्वादुपचारेण चरितत्वाभिधानम् । अथ शीलं कस्य धर्मतां प्रमापयति । आत्मन एव पुरुषविशेषस्वभावोऽन्यथानुपपद्यमानः स्वस्य श्रेयःसाधनतां बोधयति । तथा च ब्राह्मणव्रतेत्यादिहारीतवचने भावप्रत्ययान्तताभिधानं शीलस्य क्रियाव्यतिरेकतां बोधयत् स्वभावतामेव ज्ञापयति यदाह हारीतः "ब्राह्मणव्रता१ देवपितृभक्तता२ सौम्यता३ अपरोपतापिता४ अनसूयता५ मृदुता६ अपारुष्यं७ मित्रता८ प्रियवादित्वम्९ कारुण्यं१० क्षमता११ शरण्यता१२ प्रशान्ति१३ रिति त्रयोदशविधं शीलम्"। आचारो विवाहादौ कङ्कणबन्धनाद्यनुष्ठानम् । आत्मतुष्टिरत्र धर्मसन्दोहे वैदिकसंस्कारवासितान्तःकरणानां साधूनामेकत्र यत्ने मनःपरितोषः । याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् । पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानाम् धर्मस्य च चतुर्दश" ।

धर्ममेघ पु० धर्मान् मेहति वर्षति मिह्–अच् चस्यानादेशः ह्रस्व० । पातञ्जलोक्ते असंप्रज्ञातसमाधौ । तल्लक्षणादि पात० सूत्रभाष्यविवृतिषूक्तं यथा "प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" सू० ।

"यदायं ब्राह्मणः प्रसङ्ख्यानेऽप्यकुसीदस्ततोऽपि न किञ्चित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयाद्भाव्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्ममेघोनाम समाधिर्भवति" भा०

"ततः प्रसङ्ख्यानाच्चकिञ्चित् सर्वभावाधिष्ठातृत्वादि प्रार्थयते प्रत्युत तत्रापि क्लिश्यति परिणामित्वदोषदर्शनेन विरक्तः सर्वथा विवेकख्यातेरेव भवति एतदेव विवृणोति तत्रापीति यदा व्युत्थानप्रत्ययाः भवेयुः तदा नायं ब्राह्मणः सर्वथा विवेकख्यातिः यतस्तस्य प्रत्ययान्तराणि न भवन्ति ततः सर्वथा यदा विवेकख्यातिरिति तदास्य धर्ममेघःसमाधिर्भवति । एतदुक्तं भवति प्रसङ्ख्याने विरक्तस्तन्निरोधमिच्छन् धर्ममेघं समाधिमुपासीत तदुपासने च सर्वथा विवेकख्यातिर्भवति" विवृतिः ।

"ततः क्लेशकर्मनिवृत्तिः" सू० ।

"तस्याभावादविद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवन्ति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात् यस्मादिपर्ययो भवस्य कारणं, न हि क्लेशविपर्ययः कश्चित् केनचित् क्वचिज्जातो दृश्यते इति" भा० ।

"तन्निरोधं पारयतीति तस्य च प्रयोजनमाह । ततः । कस्मात् पुनर्जीवन्नेव विद्वान् विमुक्तोभवति उत्तरं यस्मादिति क्लेशकर्मवासनेद्धः किञ्च कर्माशयो जात्यादिनिदानं, न चासति निदाने निदानी भवितुमर्हति यथाहात्र भगवानक्षपादः "वीतरागजन्मादर्शनादिति" विवृतिः ।

"तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम् ।" सू०

"सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति तमसाभिभूतमावृतं ज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्त्तितम् उद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलं भवति तदा भवत्यस्यानन्त्यं ज्ञानस्यानन्त्याज्ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः, यत्रेदमुक्तम् 'अत्योमध्यमविध्यत्तमनकुलिरथावयत् । अथोवत्तं प्रत्यक्षत्तमजिह्वोभ्यपूजयदिति" भा० ।

"अथैवं धर्ममेघे इति कीदृशं चित्तमित्याह । तदेति आव्रियते चित्तसत्त्वमेभिरिति आवरणानि मलाः क्लेशकर्माणि सर्वे च ते आवरणमलाश्चेति सर्वावरणमलाः तेभ्योऽपेतस्य ज्ञानस्य चित्तसत्त्वस्य ज्ञायतेऽनेनेति अनया व्युत्पत्त्या, आनन्त्यादपरिमेयत्वात् ज्ञेयमल्पम् । यथा हि शरदि घनपटलमुक्तस्य चन्द्राशिषः परितः प्रद्योतमानस्य प्रकाशानन्त्यात् प्रकाश्याः घटादयोऽल्पाः प्रकाशन्ते एवमपगतरजस्तमसश्चित्तसत्त्वस्य प्रकाशानन्त्यादल्पं प्रकाश्यमिति तदेतदाह सर्वैरिति एतदेव व्यतिरेकमुखेन स्फोरयति आवरणेन तमसाभिभूतमिति क्रियाशीलेन रजसा प्रवर्त्तितमतएवोद्घाटितं तमइत्यर्थः । अतएव सर्वान् धर्मान् ज्ञेयान् मेहति वर्षति प्रकाशनेनेति धर्ममेघ इत्युच्यते । नन्वयमस्तु धर्ममेघः समाधिः । सयासन्नक्लेशकर्माशयप्रशमहेतुः अथ सत्यप्यस्मिन् कस्मात् न जायते पुनर्जन्तुः इत्यत आह यत्रेदमुक्तमिति कारणसमुच्छेदेऽपि चेत् कार्यं क्रियते कुत्र भोः मस्तिष्केघटादयोऽन्यादिभ्यो भवेयुः प्रत्यक्षाः, तथाप्रातुपपद्यार्थतायामाभाषको लौकिक उपपद्यार्थः स्यात्। अविध्यदल्पोमध्यमिति आवयत् अथितवान्, प्रत्य-

सञ्चत् पिनद्धवान्, अभ्यपूजयत् स्तुतवानिति" विष्टतिः। "ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्।" सू०

"तस्य धर्ममेघस्योदयात् कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते नहि कृतभोगापवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहन्ते।" भा०

"ननु धर्ममेघस्य परा काष्ठा ज्ञानप्रसादमात्रं परं वैराग्यं समूलघातमपहन्तु व्युत्थानसमाधिः संस्कारान् सक्लेशकर्माशयान्, गुणास्तु स्वतएव विकारकरणशीलाः कथात्रादृश्यमपि पुरुषं प्रति देहेन्द्रियादि नारभन्ते इत्यत आह। ततो—गुणानाम्। शीलमिदं गुणानां यं प्रति कृतार्थास्तं प्रति न प्रवर्त्तन्ते इति भावः" विष्टतिः। [शब्दच०।

धर्म्मयु त्रि० धर्म+अस्त्यर्थे बा०यु। धर्मविशिष्टे धार्मिके

धर्म्मयुग न० धर्मप्रधानं युगं शाक० त०। सत्ययुगे "नात्रैर्थं धार्मिकस्तस्य स हि धर्मयुगेऽभवत्" हरिवं० १२अ०। (सः शकपुत्रो बाहुः)।

धर्म्मयुज् त्रि० धर्मेण युज्यते युज—कर्मणि क्विप्। १धर्मयुक्ते २न्यायार्जितद्रव्ये न०। "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुः" देवलः। "धर्मयुक् न्यायार्जितद्रव्यम्" गुद्धित० रघु० तथाच विष्णुध० "देशे काले तथा पात्रे धर्मं न्यायागतं तथा। यद्दत्तं ब्राह्मणश्रेष्ठास्तदनन्तं तत् प्रकीर्त्तितम्"

धर्म्मयूप पु० धर्मस्य यूप इव। विष्णौ। "धर्मयूपो महामखः" विष्णुस०। "यूपे पशुवत् भगवत्समाराधनात्मका धर्मास्तत्र बध्यन्तेऽतो धर्माणां यूपः" भा० यथा यूपः पशूनां नियोजनस्थानमेवं विष्णुः स्वसमाराधनात्मकानां धर्माणां स्थानमित्यर्थः।

धर्म्मरत्न न० जीमूतवाहनकृते स्मृतिनिबन्धभेदे।

धर्म्मरथ पु० सगरन्दपुत्रभेदे स च कपिलमुनिनेत्राग्निदग्धावशेषितानां वंशकराणां चतुर्णां मध्ये एकतमः। यथाह हरिवं० १३ अ०। "स धर्मविजयी राजा विजित्येमां वसुन्धराम्। अश्वं प्रचारयामास वाजिमेधाय दीक्षितः। तस्य चारयतः सोऽश्वः समुद्रे पूर्वदक्षिणे। वेलासमीपेऽप्रकृतो भूमिञ्चैव प्रवेशितः। तं तं देशं तदा तस्यैः खानयामास मार्गयः। आसीदुत्तं तदा तत्र खन्यमाने महार्णवे। नमादिदेवं पुरुषं हरिं कृष्णं प्रजापतिम्। विष्णुं कपिलरूपेण शयानं पुरुषोत्तमम्। तस्य चक्षुः समुत्थेन तेजसा प्रतिबुध्यतः। दग्धास्ते वै महाराज चत्वारस्त्वशेषिताः। यर्हकेतुः सुकेतुश्च तथा धर्मरथो नृपः। शूरः पञ्चजनो नाम तस्य वंशकरा नृप। प्रादाच्च तस्मै भगवान् हरिर्नारायणो वरम्। अक्षयं वंशमिक्ष्वाको! कीर्त्तिञ्चाप्यनिवर्त्तिनीम्। पुत्रं समुद्रञ्च विभुः स्वर्गं वासन्तथाऽक्षयम्। पुत्राणां चाक्षयान् लोकान् तस्य ये चक्षुषा हताः। समुद्रश्चार्घमादाय ववन्दे तं महीपतिम्। सागरत्वञ्च लेभे स कर्मणा तेन तस्य वै। तञ्चाश्वमेधिकं सोऽश्वं समुद्रादुपलब्धान्। आजह्राराश्वमेधानां शतं स सुमहायशाः। पुत्राणाञ्च सहस्राणि षष्टिस्तस्येति नः श्रुतम्।"

२अनुवंश्यस्य दिविरथस्य पुत्रभेदे च। "स्वनमानोऽङ्गदो जज्ञे तस्माद्दिविरथस्ततः। सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः" रोमपाद इति ख्यातः भाग० ९।२३।२

धर्म्मराज् पु० धर्मेण राजते राज—क्विप्। १यमे "सोऽग्निर्भवति वायुश्च सोऽर्कः सोमश्च धर्मराट्" मनुः। २धर्मेण राजमाने धार्मिके त्रि०। "अथोपविष्टं शयने गौतमं धर्मराट् तदा" भा० शा० १७०अ०। धर्मराट् इति नाडीजङ्घस्य विशेषणम्।

धर्म्मराज पु० धर्मेण राजते राज—अच् ६त०। धर्माणां राजा ईश्वरो वा टच्समा०। १जिने २यमे च अमरः। ३नृपे ४युधिष्ठिरे च शब्दरत्ना०। तत्र जिनस्य अहिंसारूपपरमधर्मेण राजनात् तथात्वं यमस्य च तथात्वमुक्तम् भा० व० २९६ अ०। "विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः। समेन धर्मेण चरन्ति नरः प्रजास्ततस्त्वमेवेश्वर धर्मराजता" "तथेत्युक्त्वा तु तं पार्थं सुक्त्वा वैवस्वतो यमः। धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत्" तथात्वञ्च "इन्द्रानलयमार्काणामग्नेश्च वरुणस्य च। चन्द्रवित्तेशयोश्चैव मात्रा विहृत्य शाश्वतीः। यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मिता नृपाः मनुना यममात्रातो निर्माणस्योक्तेः धर्मराजवद् अधर्मरतानां नराणां नियमनाद्वा तथात्वम् बोध्यम्। युधिष्ठिरस्य धर्मप्रधानत्वात् तथात्वम्। "सहायमध्वरधुरां धर्मराजो विवस्वते" माघः समासान्तविधेरनित्यत्वात् क्वचिदार्षे न टच्समा०। "जयाशीर्भिश्च तं विप्रो धर्मराजानमार्चयन्" भा० स० ५ अ०।

धर्म्मराट् त्रि० धर्मं राति ददाति रा—तृच्। १धर्मदातरि स्त्रियां ङीप् सा च २चम्पु "यापो देव्य कृमीणां विम्बरात्रो

दिव्यामदन्योयाः शङ्कराः धर्मराजः" हरिवं०१२८अ०

धर्म्मलक्षण न० धर्मो लक्ष्यते ज्ञायतेऽनेन लक्ष-करणे ल्युट्। १धर्मप्रमापके वेदादौ। धर्ममूलशब्दे दृश्यम्। २मीमांसायां स्त्री ङीप्। भावे ल्युट् ६त०। चोदनालक्षणोऽर्थो धर्मः" जै० सूत्रोक्ते १धर्मस्य लक्षणे इतरभेदानुमापके धर्मस्वरूपादौ च धर्मशब्दे दृश्यम्। "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" इति मनूक्ते। "पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्। श्रद्धा बलिर्गवां ग्रासः षड्विधं धर्मलक्षणम्" इत्युक्ते च ४धर्मस्य साधने च।

धर्म्मवत् त्रि० धर्म्म+अस्त्यर्थे मतुप् मस्य वः। धर्मयुक्ते धार्मिके। "मित्रावरुणवन्त उत धर्मवन्तः" ऋ० ८।३५।१३

धर्म्मवर्म्मन् त्रि० धर्म्म वर्म्म इव यस्य। १धर्ममात्रस्यैव आवरकत्वेन धारके २धर्मं कवचत्वेनाभिमन्यमाने। धर्मस्य वर्मेव। ३धर्मरक्षके न०। "ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि" भाग० १।११।३ [त्रिका०।

धर्म्मवासर पु०धर्मस्य तत्साधनस्य वासरः। पौर्णमास्यां

धर्म्मवाहन पु० धर्मं वाहयति प्रापयति नरान् वाहि-ल्यु। १यिने त्रिका०। भावे ल्युट्। धर्मस्य २प्रापणे न०। ६त०। धर्मस्य धर्मराजस्य याने ३महिषे।

धर्म्मविद् त्रि० धर्मं वेत्ति विद-क्विप्। धर्मज्ञे। "अङ्गिरसोर्थेन धर्मवित्" मनुः। [विष्णुसं०।

धर्म्मविदुत्तम पु० ६त०। विष्णौ "धर्मो धर्मविदुत्तमः"

धर्म्मविद्या स्त्री ६त०। १मीमांसादिविद्यायां २तदुपलक्षिते शास्त्रे च। ततः क्रत्वा० ठक्। धार्मविद्यिक तद्वेत्तरि तदुपन्याध्येतरि च।

धर्म्मविप्लव पु० ६त०। धर्मस्य व्यतिक्रमे।

धर्म्मविवेक धर्मस्य विवेकोऽत्र। हलायुधकृते धर्मनिबन्धभेदे

धर्म्मवीर पु० वीरभेदे "स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्" सा०द० उक्ते १वीररसभेदे २तद्युक्ते च "धर्मवीरो युधिष्ठिरादिः" सा० द०।

धर्म्मवृद्ध त्रि० धर्मेण वृद्धः। धर्मेण वृद्धे श्रेष्ठे अतिशयधर्मयुक्ते "न धर्मवृद्धेषु वयः समीक्ष्यते" कुमा०। २यादवे अक्रूरभ्रातृभेदे पु०। "यफल्कश्चित्रकश्चैव गान्धिन्यान्तु यफल्कतः। अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः। धर्मवृद्धः सुकर्मा च क्षेत्रोपक्षोऽरिमर्दनः" भाग० ९।२४।९।

धर्मवैतंसिक पु०धर्मे वैतंसिक इव आत्मनो धार्मिकत्वख्यापनाय दातरि। "धर्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा। ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्। पापेन कर्मणा विप्रो धनं लब्ध्वा निरङ्कुशः। रागमोहान्वितोऽशान्तः कलुषीं योनिमाप्नुयात्" वह्निपु०।

धर्मव्याध पु० धर्मप्रधानो व्याधः शाक०। धार्मिके व्याधभेदे तत्कथा भा० व० २१४ अध्यायादौ दृश्या। तस्य व्याधस्य ब्राह्मणं प्रति स्वकर्मविपाकस्वरूपोक्तौ यथा "शृणु सर्वमिदं वृत्तं पूर्वदेहे मयानघ!। अहं हि ब्राह्मणः पूर्वमासं द्विजवरात्मजः। वेदाध्यायी सुकुशलो वेदाङ्गानाञ्च पारगः। आत्मदोषकृतैर्ब्रह्मन्नवस्थामाप्तवानिमाम्। कश्चिद्राजा मम सखा धनुर्वेदपरायणः। संसर्गाद्वहुशः श्रेष्ठस्ततोऽहमभवं द्विज!। एतस्मिन्नेव काले तु मृगयानिर्गतो नृपः। सहितो बोधसख्यैश्च मन्त्रिभिश्च स संवृतः। ततोऽव्यहन्मृगांस्तत्र सुबहूनाश्रमं प्रति। अथ क्षिप्रः शरो घोरो मयाऽपि द्विजसत्तम!। वाहितश्च ऋषिस्तेन शरेणानतपर्वणा। भूमौ निपतितो ब्रह्मन्नुवाच प्रतिनादयन्। नापराध्याम्यहं किञ्चित् केन पापमिदं कृतम्। मन्वानस्तं मृगञ्चाहं सम्प्राप्तः सहसा विभो!। अपश्यं तमृषिं विद्धं शरेणानतपर्वणा। अकार्यकरणाच्चापि भयं मे व्यथितं मनः। तमुपतपसं विप्रं निष्टनन्तं महीतले। अजानता कृतमिदं मयेत्यहमथाब्रुवम्। क्षन्तुमर्हसि मे सर्वमिति प्रोक्तो मया मुनिः। ततः प्रत्यब्रवीद्वाक्यमृषिर्मां क्रोधमूर्च्छितः। व्याधस्त्वं भविता क्रूरः शूद्रयोनाविति द्विज!। २१४ अ०। व्याध उवाच। एवं शप्तोऽहमृषिणा तदा द्विजवरोत्तम। अभिप्रसादयमृषिं गिरा ब्राह्मीति मां तदा। अजानता मयाऽकार्यमिदमद्य कृतं मुने!। क्षन्तुमर्हसि तत्सर्वं प्रसीद भववच्छिति। ऋषिरुवाच। नान्यथा भविता शाप एवमेतदसंशयम्। आन्तशंसात्त्वहं किञ्चित्कर्तांऽनुग्रहमद्य ते। शूद्रयोन्यां वर्त्तमानो धर्मज्ञो हि भविष्यसि। मातापित्रोश्च शुश्रूषां करिष्यसि न संशयः। तया शुश्रूषया सिद्धिं महत्त्वं समवाप्स्यसि। जातिस्मरश्च भविता स्वर्गञ्चैव गमिष्यसि। शापस्यान्ते निवृत्ते तु भविताऽसि पुनर्द्विजः। एवं शप्तः पुरा तेन ऋषिणाऽक्लिष्टतेजसा। प्रसादश्च कृतस्तेन ममैव द्विपदांवर!। २१५ अ०।"

धर्मव्रत त्रि॰ धर्मे व्रतं संकल्पविशेषोयस्य। १धर्मरते। २धर्मस्य विश्वरूपाख्यपत्न्यां जातायां कन्यायां मरीचिकल्पे स्त्री तत्कथा वायुपु॰ "आसीद्धर्मो महातेजाः सर्वविद्यानपारगः। विश्वरूपा च तत्पत्नी भर्त्तृव्रतपरायणा। तस्यां धर्मात् समुत्पन्ना कन्या धर्मव्रता सती। सर्वलक्षणसम्पन्ना लक्ष्मीरिव कुलाधिका" इत्युपक्रमे "मरीचेर्वचनं श्रुत्वा कन्या प्रोवाच तं मुनिम्। अहं धर्मव्रतानाम धर्मपुत्री तपोन्विता। पतिव्रतार्थं विप्रेन्द्र! चरामि परमं तपः, धर्मव्रतां मरीचिस्तामुवाच प्रीतिपूर्वकम्। पतिव्रता दर्शनान्मे भविष्यसि शुभव्रते!। पतिव्रतेच्छया पृथ्वीं विचरामि ह्यहर्निशम्। त्वञ्चेत् पतिव्रता जाता भजे त्वां भज मां वरम्। लोके न त्वादृशी कन्या मम तुल्यो न ते वरः। धर्मव्रते! धर्मपुत्रि! तस्मात् त्वं भज माधुना। धर्मव्रता मुनिं प्राह धर्मं याचय सुव्रत! तत् श्रुत्वा धर्ममगमन्मुनिं धर्मोऽददर्श ह। तेजःपुञ्जवरं नत्वा ह्यासनाद्यर्घादिनार्च्चयत्। किमर्थमागतः पृष्टो मरीचिर्धर्ममब्रवीत्। कन्यार्थं भ्रमता पृथ्वीं दृष्टा ते कन्यका वरा। मह्यं कन्यां तां देहि श्रेयस्तव भविष्यति। अर्घ्यादिना समभ्यर्च्य धर्मः प्राचेतसेरितम्। धर्मव्रतां समानीय दत्तवांस्तां मरीचये"। धर्मस्य व्रतम्। हेमाद्रिव्र॰ उक्ते श्रव्रतभेदे न॰ व्रतशब्दे दृश्यम्।

धर्मशाला स्त्री धर्मार्थं शाला। धर्मार्थमन्नादिदानाधिकरणशालायाम्। धर्मसत्रादयोऽप्यत्र।

धर्मशासन न॰ शास—भावे ल्युट् ६त॰। १धर्मस्यानुशासने। करणे ल्युट्। २धर्मशास्त्रे च "शरीरकृत् प्राणदाता यस्य चान्नानि भुञ्जते। क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने" भा॰ आ॰ ७२ अ॰।

धर्मशास्त्र न॰ शिष्यतेऽनेन शास—करणे ष्ट्रन् ६त॰। धर्मशासने मन्वादिप्रणीते धर्मप्रतिपादके ग्रन्थभेदे स्मृतिशास्त्रे तस्य कर्त्तारश्च हेमाद्रिव्रतखण्डे दर्शिता यथा "याज्ञवल्क्यिलिखितौ स्मृतयो धर्मशास्त्राणि तेषां प्रणेतारोमनुविष्णुयमदक्षाङ्गिरोऽत्रिवृहस्पत्युशनआपस्तम्बवशिष्ठकात्यायनपराशरव्यासशङ्खलिखितसंवर्त्तगौतमशातातपहारीतयाज्ञवल्क्यप्राचेतसादयः"। यमः "मनुर्यमोवसिष्ठोऽत्रिः दक्षो विष्णुस्तथाङ्गिराः। उशना वाक्पतिर्व्यासः आपस्तम्बोऽथ गौतमः। कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः। संवर्त्तश्चैव शङ्खश्च हारीतो लिखितस्तथा। एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा। तान्येवाति प्रमाणानि न हन्तव्यानि हेतुभिः" "आदिशब्दाच्च रुद्रदेवलसोमशर्मदर्भिप्रजापतिविश्वामित्रदृढशातातपपैठीनसिपितामहबौधायनभागलेयजाबालिच्यवनमरीचिकश्यपाः" तथा हि भविष्यपुराणे "अष्टादशपुराणेषु यानि वाक्यानि पुत्रक!। तान्यालोच्य महाबाहो! तथा स्मृत्यन्तरेषु च। मन्वादिस्मृतयो याश्च षड्विंशत् परिकीर्त्तिताः। तासां वाक्यानि क्रमशः समालोक्य ब्रवीमि ते" इति। मन्वादिस्मृतीनां षड्विंशत्त्वसङ्ख्या, तच्चानन्तरोक्ताभिरेव पूर्य्यते। यानि पुनर्महाभारतरामायणविष्णुधर्मशिवधर्मप्रभृतीनि ग्रन्थपरिशिष्टानि च तानि च स्मृत्यन्तरेषु चेत्यनेनैवोक्तानि तथा चोक्तं भविष्यपुराणे "अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्माणि शास्त्राणि शिवधर्माश्च भारत!। कार्ष्णञ्च पञ्चमोवेदो यन्महाभारतं स्मृतम्। सौराश्च धर्मा राजेन्द्र! मानवोक्ता महीपते!। जयेति नाम चैतेषां प्रवदन्ति मनीषिण इति"। "तदपि स्मृत्यन्तरेषुचैवेत्यनेनैव परिगृहीतं वेदितव्यम्" हेमाद्रि॰ व्र॰।

धर्मशील त्रि॰ धर्मः धर्मसाधनं शीलमस्य धर्मं शीलयति शील—अण् वा। १धर्मस्वभावे २धर्मतत्परे। "तत्र स्नात्वा नरो राजन्! धर्मशीलः समाहितः" भा॰व॰ ८४अ॰।

धर्मसंहिता स्त्री धर्मज्ञापिका संहिता, धर्मः संहितो निरूपितो यत्र वा। धर्मशास्त्रे अमरः।

धर्मसहाय पु॰ धर्मे सहायः। सहाया इत्युपक्रमे "ऋत्विक्पुरोधसः स्युर्धर्मविद् द्विजतापसास्तथा धर्मे" सा॰ द॰ उक्ते ऋत्विगादौ।

धर्मसार पु॰ धर्मेषु सारः। १श्रेष्ठपुण्यकर्मणि २तत्साधने च स च गरुड़पु॰ २२५ अ॰ विस्तरेणोक्तः।

धर्मसारथि पु॰ धर्मः सारथिरिवास्य। धर्मसंघसहायके "शुद्धसत्तः शुचिस्तस्मात् चित्रकुर्धर्मसारथिः। भाग॰ ९।१७ ८

धर्मसावर्णि पु॰ एकादशे मनुभेदे। "मनुर्वै धर्मसावर्णिरेकादशम आह्वयात्। अनागतस्तत्सुतायं सत्यधर्मादयोदश" भा॰८।१३।१२

धर्मसू स्त्री धर्मं सुनोति सू—क्विप्। १भूम्याटरूपे शब्दरत्ना॰। २धर्मप्रेरके त्रि॰ "सोमो राजा वरुणः देवा धर्मसवः" तैत्ति॰ ब्रा॰ १।७।८।१।

धर्मसूत्र न॰ धर्मः सूत्रयतेऽनेन करणे अच् ६त॰। धर्म-

निर्णयार्थं जैमिनीप्रणीते धर्ममीमांसारूपे ग्रन्थभेदे ।

धर्मसेतु पु० धर्मस्य सेतुरिव धारकत्वात् । धर्मरक्षके "राजा दशरथो नाम धर्मसेतुरिवाचलः" रामा०आर०६२अ० । एकादशमन्वन्तरे आर्ष्टिषेणस्य सुते २हरेरंशभेदे च । तदुपक्रमे "आर्ष्टिषेणस्य सुतस्तत्र धर्मसेतुरिति श्रुतः । विष्टतायां हरेरंशस्त्रिलोकीं धारयिष्यति" भाग० ८।१३।१२

धर्मस्कन्ध पु० आर्हतमतसिद्धे धर्मास्तिकायपदार्थे अर्हत्ग्रन्थे दृश्यम् । [ङीष् ।

धर्माङ्ग पुंस्त्री धर्म इव शुद्धमङ्गमस्य । वके निघण्टुः स्त्रियां

धर्माचार्य्य पु० धर्मे आचार्य्यः । १धर्मशिक्षके गुरुभेदे ऋग्वेदिनां तर्पणीये २ऋषिभेदे च "सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या इत्युपक्रमे ये चान्ये आचार्यास्ते सर्वे तर्प्यन्तीति" आश्व० गृ०३।४।४ । धर्माचार्य्यास्तु नैमित्तिकादिप्रलयोत्तरं वैदिकधर्माचारयोः शिक्षार्थं बीजीभूता धर्मप्रवर्त्तका ऋषिभेदाः यदाह मिता० या० अध्याये "ननु नैमित्तिकादिप्रतिसञ्चरेऽखिलाध्यापकप्रलयादविदितवेदास्तस्योपरितनाजनाः कथमग्निहोत्रादिकं कर्म करिष्यन्ति । कथन्तराञ्चाहतकर्माणः स्वर्गमार्गमधिरोक्ष्यन्तीत्यत आह "तत्राष्टाशीतिसाहस्रा मुनयो गृहमेधिनः । पुनरावर्त्तिनो बीजभूता धर्मप्रवर्त्तकाः" याज्ञ० । तत्र पितृयाने ऋष्टाशीतिसहस्रसंख्या मुनयो गृहस्थाश्रमिणः पुनरावृत्तिधर्माणः सर्गादौ वेदस्योपदेशकतया धर्मतत्प्राकट्यार्थं बीजभूताः सन्तोऽग्निहोत्रादिधर्मप्रवर्त्तका अतो न प्रागुदितदोषसमागमः । किञ्च । सिद्धर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः । तावन्त एव मुनयः सर्वारम्भविवर्जिताः । तपसा ब्रह्मचर्य्येण सङ्गत्यागेन मेधया । तत्र यत्रावतिष्ठन्ते यावदाहूतसंप्लवम्" याज्ञ० । सिद्धर्षयः प्रसिद्धा नागवीथ्यैरावतपथः तदन्तराले तावन्त एवाष्टाशीतिसहस्रसंख्या मुनयः सर्वारम्भविवर्जिताः केवलज्ञाननिष्ठास्तपोब्रह्मचर्य्ययुक्तास्तथासङ्गत्यागिनो देवलोकं समाश्रिताः । आहूतसंप्लवप्राकृतप्रलयपर्य्यन्तमवतिष्ठन्ते । तत्र स्थिताः ऋष्यादयोऽध्यात्मिकधर्माणां प्रवर्त्तकाः । कथम्भूतास्ते मुनय इत्यत आह "यतो वेदाः पुराणानि विद्योपनिषदस्तथा । श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम्" याज्ञ० । यतो द्विविधादपि मुनिसमूहाच्चत्वारो वेदाः पुराणाङ्गविद्योपनिषदश्च नित्यभूता एवाध्येतृपरम्परायाताः प्रवृत्तास्तथा श्लोका इतिहासात्मकाः सूत्राणि च यद्वानुशासनमीमांसागोचराणि । भाष्याणि च सूत्रव्याख्यारूपाणि यदन्यदायुर्विद्यादिकं वाङ्मयं तदपि यत् सर्वागातृप्रवृत्तं तथाविधास्ते मुनयो धर्मप्रवर्त्तकाः । एवं सति वेदस्यापि नानित्यतादोषप्रसङ्गः" ।

धर्मात्मन् पु० धर्म आत्मा स्वभावो यस्य । धर्मशीले "स तानुवाच धर्मात्मा महर्षीन् मानवो भृगुः" मनुः ।

धर्माधर्म पु० द्वि० व० धर्मश्चाधर्मश्च द्व० । १पुण्यपापयोः "धर्माधर्मौ गुणा एते आत्मनः सुखदुःखयोः" भाषा० । धर्माधर्मौ परीक्षणीयतयाऽस्य स्तः अच् । धर्मलक्षणे दिव्यभेदे तद्विधानं वीरमित्रोदये यथा

"तत्र पितामहः "अधुना सम्प्रवक्ष्यामि धर्माधर्मपरीक्षणम् । हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां कृष्णामिति" । हन्तॄणां साहसाभियोगेषु, याचमानानामित्यर्थाभियोगेषु, प्रायश्चित्तार्थिनां कृष्णामिति पातकाभियोगेषु एतद्दिव्यं भवतीति सूचितम् । धर्माधर्मदिव्यप्रकारमाह स एव "राजतङ्कारवेद्धर्ममधर्मं शीसकावसम् । लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ । अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् । सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पवत् । एवंविधायोपलिप्य पिण्डयोस्तौ निधापयेत् । गोमयेन मृदा वापि पिण्डौ कार्य्यौ समन्ततः । मृद्भाण्डके उपहृते स्थाप्यौ चानुपलक्षितौ । उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ । आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत् । धर्माधर्मपूर्वन्तु प्रतिज्ञापत्रकं लिखेत् । यदि पापविशुद्धोऽहं धर्मस्त्रायातु मे करे" इति मन्त्रं विप्रोध्योब्रूयात् । अहमिति मन्त्रलिङ्गात् । हारीतस्तु "पत्रद्वये लेखयोर्यो धर्माधर्मौ सितासितौ । जीवदानादिकैर्मन्त्रैर्गोयत्रादीश्च सामभिः । आमन्त्र्य पूजयेद्गन्धैः कुसुमैश्च सितासितैः । अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः । समौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ । ततः कुम्भात्पिण्डमेकं प्रगृह्णीतानुयाचितः । धर्मं गृहीते शुद्धः स्यात् सम्पूज्यश्च परीक्षकैरिति" जीवदानादिकैर्मन्त्रैः, सा प्र गामपथोवसमित्यादि" ऋ० १०।५७।। सूक्तपठितषड्मन्त्रैः अन्यैर्वा आगमोक्तैः प्राणप्रतिष्ठामन्त्रैरित्यर्थः । ते च शारदातिलके उक्ताः" ।

धर्माधर्मविद् पु० धर्माधर्मौ वेत्ति विद-क्विप् तत्० । १मीमांसके स हि विधिनिषेधगतौ धर्माधर्मौ तत्त्वतो

जानातीति तस्य तथात्वम्। २तद्धेतुभूतविहितकर्माग्नि-ष्टोमादिनिषिद्धकर्महिंसादिवेत्तरि च।

धर्माधिकरण न॰ धर्मोऽधिक्रियतेऽत्र अधि+कृ-आधारे ल्युट्। न्यायानां तन्नियुक्तानाञ्च व्यवहारदर्शनयोग्ये १स्थानभेदे। तत्स्वरूपभेदादिकं वीरमि॰ उक्तं यथा बृहस्पतिः "दुर्गमध्ये गृहं कुर्याच्छालप्रकारान्वितं पृथक्। प्राग्दिशि प्राङ्मुखीन्यस्य लक्षणप्राङ्मुखयेत्सभाम्। माल्यभूषासनोपेतां वीजरत्नसमन्विताम्"। लक्षणञ्च वास्तुशास्त्रोक्तलक्षणेन तु लक्षितम्। सभायां धर्माधिकरणत्वं च "धर्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति" उक्तेः। तत्र सभ्योपवेशनमाह मनुः "यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञश्चाधिकृतो विद्वान् ब्राह्मणस्तां सभां विदुरिति" त्रय इत्युपलक्षणम् "अधिकानामपि कृतत्वात्। तच्च वक्ष्यते। अधिकृतो विद्वान् प्राड्विवेकः। अत्र "सभामेव प्रविशेत्" इत्यादिवचनात् सभा मुख्यं व्यवहारदर्शनस्थानम्। अन्यान्यमुख्यानि नानावचनादवगन्तव्यानि "देशस्थानानि वादानां यच्च चैवात्रवीद्भृगुः। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। आरण्यास्तु स्वकैः कुर्युः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवादिभिः। उभयानुमतश्चैव गृह्णते स्थानमीप्सितम्। कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्रेण्यश्चातुर्विद्याश्च वर्गिणः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथेति" स्वकैरारण्यकैः ग्रामेऽपोत्थपिशाचादौ ग्रामेऽरण्यग्रादौ च निवसन्ति ते उभयवादिभिर्निर्णयं कुर्युरुभयव्यवहाराभिज्ञत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठाः। सार्थो ग्रामदेवयात्रादौ मिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः। पुरं मुख्यनगरम्। तच्चादर्वाचीनो ग्राम इति पुरग्रामनिवासिनोर्भेदः। कुलिकादीनि पञ्च स्थानानि तानि आरण्यकादीनामेव ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितो जनः। पौरः पुरवासिनां समूहः। श्रेणिर्रजकाद्या हीनजातयः। चातुर्विद्याः आन्वीक्षिक्यादिविद्याचतुष्टयोपेताः। वर्गिणो गणप्रभृतयः। तत् अर्हत्वेनास्त्यस्य अच्। २तत्र नियुक्ते प्राड्विवेकादौ पु॰ "समः शत्रौ च मित्रे च सर्वशास्त्रविशारदः। विप्रवृद्धः कुलीनश्च धर्माधिकरणो भवेत्" मत्स्यपु॰ "पुरग्रामान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः। धर्माधिकरणे कार्या जनाङ्गानकरानराः इति मत्स्यपु॰।

धर्माधिकरणिन् पु॰ धर्माधिकरणं नियोगस्थानतयाऽस्त्यस्य इनि। विचारके प्राड्विवेकादौ धर्माध्यक्षे हेमच॰।

धर्माधिकारिन् पु॰ धर्मं व्यवहारे तन्निर्णयमधिकरोति अधि+कृ-णिनि ह्रस्व॰। प्राड्विवेकादौ।

धर्माध्यक्ष पु॰ धर्मे व्यवहारे धर्मनिर्णये अध्यक्षः। १प्राड्विवेकादौ। "कुलशीलगुणोपेतः सर्वकर्मपरायणः। प्रवीणः प्रेक्षणाध्यक्षो धर्माध्यक्षोऽभिधीयते" चाणक्यः। २विष्णौ च "लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः" विष्णुस॰। "धर्माधर्मौ साक्षादीक्षते तदनुरूपं फलं दातुं तस्माद्धर्माध्यक्षः" भा॰। अत्र धर्मपदं लक्षणया धर्माधर्मपदं तदभिप्रायेण धर्माधर्मौ इत्युक्तम्

धर्मान्धु पु॰ धर्मकृतोऽन्धु कूपः। तीर्थभेदे स्कन्दपु॰।

धर्माभास पु॰ धर्मं इवाभासति आ+भास-अच्। श्रुतिस्मृतीतरशास्त्रोक्ते असद्धर्मे। "श्रुतिस्मृतिभ्यामुदितोयः स धर्मः प्रकीर्त्तितः। अन्यशास्त्रेषु यः प्रोक्तो धर्माभासः स उच्यते" देवीभागवतम्।

धर्मारण्य न॰ तीर्थभेदे तदाविर्भावकथा वराहपु॰ यथा "स-धर्मः पीडितः सर्वैः सोमेनाद्भुतकर्मणा। तारां जिघृक्षता पत्नीं भ्रातुरङ्गिरसस्य च। सोऽप्ययाद्भीषितस्तेन वह्निना क्रूरकर्मणा। अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः" ब्रह्मोवाच। "यच्चारण्यमिदं धर्म! त्वयाव्याप्तं चिरं विभो!। नाम्ना भविष्यति ह्येतद्धर्मारण्यमिति प्रभो!" गयास्थे २तीर्थभेदे "प्रथमेऽह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत्। धर्मारण्यं तत्र धर्मो यस्मात् यज्ञमकारयत्" वायुपु॰ गयामाहात्म्ये "गया च क्रोशद्वयतीर्थञ्च धर्मारण्यं सुरैर्वृतम्। तथा देवनदीपुण्या सरस्वती ब्रह्म निर्मितम्" भा॰ आनु॰ १६५अ॰। ३धर्मसाधने अरण्यमात्रे च "तैरुक्तो यज्ञियान् देशान् धर्मारण्यं तथैव च" भा॰ आश्व॰ ८२ अ॰। बृ॰सं॰१४अ॰ कूर्मविभागोक्ते मध्यभागस्थे देशभेदे न॰ ४माथुरकोषज्योतिषधर्मारण्यानि शूरसेनाश्च" इत्युपक्रमे मध्यमिदमित्युक्तम्।

धर्मासन न॰ धर्मार्थं धर्मविचारार्थमासनम्। विचारनिर्णयार्थे आसनभेदे। "धर्मासनमधिष्ठाय संवीताङ्गः समाहितः" मनुः।

धर्मास्तिकाय प॰ आर्हतमतसिद्धे जीवाजीवधर्माधर्म-

पुद्गलास्तिकायमध्ये पदार्थभेदे अर्हत्शब्दे द्रष्टव्यम् ।

धर्मिक त्रि॰ धर्मोऽस्त्यस्य ठन् । धर्मयुक्ते । ततः पुरोहिता॰ तस्य कर्मभावादौ यक् । धार्मिक्य तद्भावे न॰ ।

धर्मिन् त्रि॰ धर्मोऽस्त्यस्य इनि । १धर्मविशिष्टे स्त्रियां ङीप् । सा च २जायायाम् । "त्रिगुणमचेतनं प्रसवधर्मि" सां॰का॰ । ३आधारे च "सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या" सां॰ प्र॰ भा॰ । "नित्यत्वान्न चित्धर्मो" सा॰ सू॰ भाष्ये पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धमात्रेणान्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पना गौरवमित्यपि बोध्यम् । तेजसस्य प्रकाशाख्यरूपविशेषाग्रहेऽपि स्पर्शपरस्परा-रेण ग्रहात् प्रकाशतेजसोर्भेदः सिद्ध्यति । आत्मनस्तु ज्ञानाख्यप्रकाशाग्रहकाले ग्रहणं नास्तीत्यतो लाघवात् धर्मधर्मिभावशून्यं प्रकाशरूपमेवात्मद्रव्यं कल्प्यते" "धर्म्यंशे सर्वमभ्रान्तं प्रकारे च विपर्ययः" न्यायका॰ । धर्मः श्रोतस्मार्त्तो कर्त्तव्यत्वेन मन्तव्य । ४धार्मिके त्रि॰ स्त्रियां ङीप् । धर्मः पाल्यत्वेनास्त्यस्य इनि ५विष्णौ पु॰ । "धर्मगुप् धर्मकृत् धर्मी" विष्णुस॰ ।

धर्मिष्ठ त्रि॰ अतिशयेन धर्मवान् इष्ठन् मतुपो लोपः । १अतिशयेन धार्मिके । २विष्णौ पु॰ ।

धर्मेन्द्र पु॰ धर्मे इन्द्र इव रक्षकत्वात् । धर्मराजे यमे "पितॄणामिव धर्मेन्द्रो यादसामिव चाम्बुराट्" भा॰द्रो॰ ६अ॰ । धर्मेश्वरधर्मेश्वरादयोऽप्यत्र ।

धर्मेयु पु॰ पौरवंशस्य रौद्राश्वस्य पुत्रभेदे । "धर्मेयुः सन्नतेयुश्च दशमो देवविक्रमः" भा॰ आ॰ ९४ अ॰ । तत्पुत्रोक्तौ

धर्मोत्तर त्रि॰ धर्म उत्तरः प्रधानमस्य । धर्मप्रधाने ।

धर्मोपदेश पु॰ धर्म उपदिश्यतेऽनेन उप+दिश-करणे घञ् ६त॰ । १धर्मशास्त्रे मन्वादिशास्त्रे "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः । भावे घञ् । २धर्मस्य उपदेशे "धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः । तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः" मनुः ।

धर्मोपदेशक त्रि॰ धर्मस्योपदिशति उप-दिश ण्वुल् ६त॰ । १धर्मस्योपदेशकर्त्तरि २गुरौ पु॰ ।

धर्म्य त्रि॰ धर्मादनपेतः "धर्मपथ्यर्थन्यायादनपेते" पा॰ यत् । धर्मेच प्राप्तः "तीरसोधर्मेलादिना" पा॰यत् वा । १धर्मयुक्ते धर्मादबहिर्भूते २धर्मेच प्राप्ते च "न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे" मनुः । ब्राह्माद्यष्टविवाहो॰ प्रक्रमे "यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ । तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् । षड्नानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान् राक्षसान् । चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः । पञ्चानान्तु त्रयोधर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन । पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गन्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ" ।

धर्ष पु॰ धृष-भावे घञ् । १प्रागल्भ्ये २अमर्षे ३शक्तिबन्धने ४संहतौ ५हिंसायाञ्च शब्दच॰ ।

धर्षक त्रि॰ धृष-ण्वुल् । १परिभवकारके २प्रगल्भे ३अवहसने च ४नटे पु॰ शब्दरत्ना॰ ।

धर्षकारिन् त्रि॰ धर्षं करोति कृ-णिनि ६त॰ । १परिभवकर्त्तरि २प्रागल्भ्यकारके च ३दूषितायाम् असत्यां स्त्री स्त्रियां ङीप् शब्दर॰ ।

धर्षण न॰ धृष-भावे ल्युट् । १परिभवे २अवहसने ३धर्षशब्दार्थे च । कर्मणि ल्युट् । ४अभिसारिकायां स्त्रियाम् स्त्री ङीप् । मेदि॰ । कर्त्तरि ल्यु । ५धर्षकारके त्रि॰ । ६शिवे पु॰ । "अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः" भा॰ अनु॰ १७ अ॰ शिवसहस्रनामोक्तौ चु॰ धृष-भावे युच् । ७धर्षणे स्त्री "शृत्वेमां धर्षणां तात ! तव तेन दुरात्मना" भा॰ आ॰ ४१ अ॰ ।

धर्षणि(णी) स्त्री धृष्यतेऽसौ धृष-कर्मणि अनि । असत्यां वन्ध्यायाम् उणादिवृत्तिः वा ङीप् तत्रार्थे भरतः ।

धर्षित त्रि॰ धृष-कर्मणि क्त इट् गुणश्च । १परिभूते असत्यां २कुलटायां स्त्री शब्दरत्न॰ । भावे क्त । ३अवहसने ४मैथुने च न॰ त्रिका॰ । ५परिभवे च ।

धलण्ड पु॰ दधाति धा-ड तं लण्डयति उत्क्षिपति लडि-उत्क्षेपे अण् । (धला आकड़) वृक्षे शब्दच॰ । ण्वुल् । धलण्डक तत्रार्थे तस्य कण्टकाढ्यतत्वेन धारकस्योत्क्षेपणात्तथात्वम् ।

धव गतौ भ्वा॰ प॰ सक॰ सेट् इदित् । धन्वति अधन्वीत् । इदित्त्वात् कर्मणि धन्व्यते धन्वधातोस्तु धव्यते इति भेदः ।

धव त्रि॰ धवति धुवति धुनोति धूनाति वा कर्त्तरि अच् । १कम्पनकारके २पत्यौ स्वामिनि ३नरे पु॰ अमरः ४धूर्त्ते त्रि॰ मेदि॰ । (धवा आकड़ा) ख्याते वृक्षे पु॰ रत्नमा॰ । "धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहा । मधुरस्तु-

वरस्तस्य फलञ्च मधुरं मनाक्" भावप्र० । "बिल्वार्क-खदिराकीर्णं कपित्थधवसङ्कुलम्" भा० आ० ६९ अ० । "मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति गम्यितः" हरिवं० २७९ अ० । भावे अप् । ६कम्पने ७विधूनने च पु० ।

धवनि स्त्री धू-करणे अनि । अनले यास्कः निं० ।

धवल पु० धाव-इला० बल वा०कुत्सः धवं कर्म्म खादि खा-क वा । "धवलः १बिन्दुरे २सिते । ३मङ्गोले चाथ धवली ४सौरभ्यां बहुदाहृता" विश्वः । सौरभ्यामेव गौरा०ङीष् । श्वेतवर्णयुक्ते त्रि० अमरः अत्रार्थे स्त्रियां टाप् । "गौता येन निशा यशाङ्कधवला" उद्भटः । ५निर्मले त्रि० त्रिका० । "क्रियते धवलः खनूस्वर्णैर्धवलैरेव क्षितेतरैरधः" माघः । ६धवलवृक्षे ७चीनकर्पूरे स्त्री । पद्मेतमरिचे न० राजनि० । ८रागभेदे स च भरतमते हिन्दोलरागस्य अष्टमः पुत्रः सङ्गीतशास्त्रम् । १०छन्दोभेदे "धवलः पाण्डुरुहिटो रक्तपित्तहरो हिमः । रसे वाके च मधुरः संग्राही वातशान्तिकृत्" भावप्र० । ११छन्दोभेदे तल्लक्षणं यथा "द्विजवर ! नवयुगसनगणन नवयुगसकं विमलवलयमपि च कलय सकलजन-सुखम् । फणिपतिवरमणितमनलमिह हितं विमल-कविसुहृदिव कवितमिति भुवि विदितम्" ।

धवलगिरि पु० कर्म० । स्वनामख्याते पर्वतभेदे ।

धवलपक्ष पुंस्त्री धवलौ पक्षौ यस्य । हंसे राजनि० स्त्रियां जातित्वात् ङीष् । "धवलपक्षविहङ्गमकूजितैः" माघः । कर्मधा० ।१चान्द्रमासघटके मासदयतिथ्यात्मके २शुक्ले पक्षे पु०

धवलपट्टिनी स्त्री कर्म० । श्वेतपाटलिकायाम् राजनि० ।

धवलमृत्तिका स्त्री कर्म० । (खड़ि) खटिन्यां राजनि० ।

धवलयावानल पु० कर्म० । श्वेतयावानले यावनालवेदे राजनि० ।

धवला स्त्री अनुदात्तत्वाच्च ङीष् । शुक्लवर्णायां स्त्रियाम् । अमरः । [धवलिम्नः मूलपाथेरभिख्याम्" माघः ।

धवलिमन् पु० धवलस्य भावः इमनिच् । श्वेतत्वे "अधिगत-

धवलोत्पल न० कर्म्म० । कुवलये राजनि० ।

धवाणक पु० धुनोति इत्यादीनि धू-आणक । वायौ उज्ज्वल०

धवित्र न० धू-करणे इत्र । रत्नचर्मनवव्यजने अमरः । "सञ्जनेद धवित्राणि परिवीय" कात्या० श्रौ० २६।२।१० । "धुनोत्यनिरिति धवित्रमपि कृष्णाजिनखण्डनिर्मिता-स्तवो व्यजनाः" देवजनाथः ।

धस् त्रि० धा-कसन् । १धारके रेतोधाः पुरोधाः । २ब्रह्मणि पु० मेदि० । ३दहस्यतौ उणा० ।

धा धारणे पोषणे दाने च जुहो० उभ० सक० अनिट् । दधाति धत्ते धत्से दध्यात् दधातु धेहि अदधात् अधत्त । अधात् अधित । दधौ दधे । दधिथ दधाथ । दधिव धाता धास्यति । धीयते अधायि अधाविधाताम् अधिधाताम् । हित्वा हित्वा हितिः । "त्वं सुग्धाणि ! विमेव कलुषिकवा धत्से मनोहारिणीम्" सा० द० । "इमं नो यज्ञमस्तेषु धेहि" ऋ० ३।२१।१ "तत्र त्वा देवा सविता दधातु" ऋ० १०।१७,४ "धर्मे दध्यात् सदा भवः" मनुः । "निवेशाय मनो दधुः" भा० व० ६५ अ० । "न नाशमधिगच्छेयुरिति ने धीयते मतिः" भा० विरा० २८ अ० । "हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतावृते । यद् यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत्" मनुः । "यथापमानमनमस्यं देयं भक्तेऽन्यदुर्वहम्" भट्टिः । "नामधास्यत् कथं नामो यथाभ्यस्तदुभिः कवैः" कुमा० धापयति धितृषति । "त्वं वज्रिं कुह धितृषथः" ऋ० १।४६।८

अति+अतिक्रम्य धारणे अतिशयधारणे च "आवुर्वन्ते अति-हितं पराचैः" अथ० ७।९२।२ ।

अधि+आधिक्येन धारणे "यज्ञार्थदाय भवो अध्यधत्त" ऋ० १।११७।८ ।

अनु+पश्चाद्धारणे । "अथान्यान् (तण्डुलान) कुताञ्जाश्वत्थीषु समित्सु अनुदधीरन्" लाट्या० ४।९।१४ ।

अन्तर्+आच्छादने वस्त्रान्तरेण व्यवधाने । "उदुम्बरशाखा-मन्तर्धायाभिषिञ्चति" ऐ० ब्रा० ८।७ । तिरोधाने "ते चान्तर्दधिरे नागाः" भा० आ० १२९ अ० ।

अपि+तिरोधाने आच्छादने । "धनेनाधर्म्मलब्धेन यच्छिद्र-मपिधीयते" भा० उ०३४अ० । वा अतो लोपः "पिधान-मपिधानम्" अमरः ।

अभि+कथने "वाचात् सङ्केतितं योऽर्थमभिधत्ते स वा-चकः" का० प्र० । "गणनव्यवहारे तु हेतोः संख्याभि-धीयते" भाषा० ।

प्रति+अभि+प्रत्युत्तरकथने । "मया च प्रत्यभिहितं देवका-र्यार्थदर्शनात्" भा० उ० १९ अ० ।

अव+मनःसंयोगविशेषे अभिनिवेशे "अवधानपरे चकार वा" कुमा० । अधःस्थापने पातने च "यां ते कृत्यां कूपे अवदधुः" अथ० ५।६१।७ । "नितः कूपेऽवहितः" ऋ० १।१०५।१७

वि+अव+आच्छादने (ढाकौ) अपवारणे। "प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्" रघुः। "व्यवदधाति दर्भपिञ्जूलानि" सांख्यश्रा० १८।८। "अन्तर्द्धा व्यवधा पुंसि अन्तर्द्धिरपवारणम्" अमरः। "उदयाचलव्यवहितेन्दुवपुः" माघः।

आ+आरोहे आरोपणे स्थापने च। खड्गस्य कृत्यशोधनकालपर्यन्तं धनिकसमीपे स्थापने आधिः आहितः। अग्न्यादेः संस्कारभेदे अग्न्याधानम्। "जनपदे न गदः पदमादधौ" रघुः। "आदध्यात् संभारान् दर्भान् दीर्घान् गर्भांश्च" द० स० ४८। "गर्भमाधत्त राज्ञी" रघुः। "ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे" भा० व० २९२ अ० ।

अति+आ+मर्यादातिक्रमेण धारणे। "कार्यमत्याहितं भविष्यति" प्रबोधच०। "यदि ह्यादिह गोविन्दो नैतदत्याहितं भवेत्" हरिवं० १७१ अ०।

अनु+आ+पश्चादाधाने। यदेकस्य निहितं द्रव्यं तेनापि अनु पश्चादन्यस्य कस्मै स्वामिने देहीति समयेन समर्पणे च। अन्वाहितशब्दे दृश्यम्।

अभि+आ+साम्मुख्येन स्थापने "अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत्" मनुः।

उप+आ+धर्मचिन्तायाम् "उपाधिना धर्मचिन्ता" काम०। स्वामीप्येनाधाने अग्न्युत्पाते मेदि०। "अग्न्युत्पात उपाहितः" अमरः। संयोजने च अमरः। "तस्य निष्क उपाहित आस" शत० ब्रा० ११।४।१।१

निर्+आ+निराकरणे "यः क्रव्यादं निरादधत्" अथ० १२।२।२९।

परि+आ+परितः स्थापने। "स्रुचा कुम्भीमध्यसौ अयास्या विस्रोदकमवधेह्येनम्। पर्याधत्ताग्निना" अथ० ९।५।५

वि+आ+विशेषेणाधौ पीडायाम्। आधिः "यद्यात्मना प्रजया वा व्याधीयेत" श्रुतिः "एतद्वै परमं तपो यद्व्याहितस्तप्यते" शत०ब्रा० १४।८।११।१

सम्+आ+पूर्वमाचिप्तस्य दोषस्य निराकरणे "समाहितः समाधिस्तेऽप्युक्तसिद्धान्त आहित" मेदि० उक्तेः च सिद्धान्तोक्त्या दोषसमाधाने। सम्यक्चित्तस्य ईश्वरादौ संस्थापने समाधिः। "अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्" गीता। सम्यगारोपणे "सोऽहं भारं समाधास्ये त्वयि त्वं वोढुमर्हसि" भा० द्रो० ११ अ०। "तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः" रघुः।

आविस्+आविर्भवने प्रकाशने "आविर्हितस्तत्तयुगं स हि सत्त्वतत्त्वाम्" भाग० २।७।२।

उप+सामीप्येन स्थापने उपलक्षणतया स्थापने च। "क्रिया हि वस्तूपहिता प्रवीदति" रघुः। "एतदुपहितचैतन्यम्" वेदा०सा०। "यदिन्द्रियैस्तूपहितं परस्तात् प्राप्तान् गुणान् न स्मरते चिराय" भा० शा० ७४।७ श्लो०। स्वकृते स्वरूपप्रच्छादने उपधयश्छद्मकैतवमित्यमरोक्तेः।

तिरस्+अन्तर्द्धाने प्रच्छादने। "इति वाक्शल्य विबुधान् विश्वयोनिस्तिरोदधे" कुमा०।

नि+स्थापने अज्ञातस्वामिकतया द्रव्यस्य स्थितौ स्थापने च "अनिधायैव तद्द्रव्यमाचन्तः शुचितामियात्" मनुः। "शिरसि निदधानोऽञ्जलिपुटम्" सा०द०। "अवं प्रयत्नेन वा तत्र मा निधाः पदं पदव्यां सगरस्य सन्ततेः" रघुः। "यस्तु पश्चेन्निधिं राजा पुराणं निहितं क्षितौ" मनुः।

प्र+नि+ऐकाग्र्ये च मनसः स्थापने। "ईश्वरप्रणिधानाद्वा" पात०सू०। "प्रणिधानं भक्तिविशेषः" भा०। प्रेरणे च "नीधिं प्रति प्रणिहिते तु करे प्रियेण" सा० द०। मनोऽभिवेशने च "किञ्चिन्न्याहितगुरुं गन्तुं मनः प्रणिदधे द्रुतम्" भट्टिः।

प्रति+नि+तत्स्वरूपतया वस्त्वादौ प्रतिनिधिः। "द्रव्येऽविद्यमाने यत् सामान्यतमं मन्येत तत्प्रतिनिदध्यात्" सा० श्रौ० २।२०।९ प्रतिनिधिशब्दे दृश्यम्।

सम्+नि+सम्यग्निधाने। "मेघेमूर्द्धं समिधत्ते प्राणानां पवनः पतिः। तत्र मेघगतं वारि शक्रो वर्षति भारत।" भा० अनु० ६त०। "दूरादाहृत्य समिधः संनिदध्याद्विहायसि" मनुः। नैकट्येन सम्बन्धे "समवेयं न कुर्वीत गोभैः सन्निहितो हसेत्" भा० वि० ४ अ०। "गुरौ गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्" मनुः। "अकिञ्चनं सतामस्मद्रूपे सन्निहितया त्वया भाव्यम्" शकु०। "भगवान् हरिरद्यापि तत्स्थानां निजजननां वात्सल्येन सन्निधाप्यत इच्छाकृपेण" भाग० ५।७।८। नैकट्येन स्थापने तु सक०। "स चाहं सहसख्या धनमिलेच तत्र संन्यधिषि" दशकुमा०।

परि+वेष्टने आच्छादने। "यं परिधिं पर्यधात्" यजु० २।१७। "वेनेन्द्रस्य हस्तस्तिर्यक्षः पर्यधात्" पञ्चभो० २।२ "वासस परिधायैकम्" भा० वि० ६ अ०। "परिहिते प्रातस्तुवाके" आ० श्रौ० ६।६।१। "हरिं परिदधे कृष्णे रौहिणेये च दारुणाम्" हरिवं० ७१ अ०।

वि+परि+परिवर्त्तनेन आच्छादने। "आचान्तः पुनराचामेत् वासो विपरिधाय च" याज्ञ०।

पुरस्+अग्रतः स्थापने। पुरोहितः। "त्वरासाहं पुरोधाय धाम स्वायम्भुवं ययुः" कुमा०।

प्र+प्रकर्षेण धारणे। "दिशस्तस्यः सहसा प्रधापिताः" भाग० २० अ०। प्रधानम्।

प्रति+प्रक्षेपे "तदग्ने चक्षुः प्रतिधेहि रेभे" ऋ०१०।८७।१२। प्रतीकारार्थे विधाने "दुष्टदैवतनाशाय वज्रो ध्यान समाधिना। सर्वत्राक्षतविक्षेपात् शान्तिकं प्रतिधास्यति" भवदेव० प्रतिविधाने।

वि+करणे "तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्" गीता। "विदधाति विभज्येह फलं पूर्वकृतं नृणाम्" भा० व० यच्चान्यदपि कर्त्तव्यं तद्विधत्स्व महामते" व० ७६ अ०। कर्त्तव्यतयोपदेशे "यज्ञविष्टाशनं ह्येतत् मतानन्दं विधीयते" मनुः। "चिकीर्षाकृतिसाध्यत्वहेतुधीविषयो विधिः" शब्द०म० विधिशब्दे दृश्यम्। "न पैतृयाज्ञियो होमो लौकिकेऽग्नौ विधीयते" मनुः।

अनु+वि+तुल्यरूपाचरणे पश्चात्करणे च। "आनुपूर्व्येण च विधां दैवत उच्चैरुपांशुतायां चाध्वर्युमनुविदधीत" शांख०श्रौ० १२।२ "वृत्तिं च तेभ्योऽनुविधाय काञ्चित्" भा०उ०२६अ०। "उपविशति तिष्ठन्तं गच्छन्तमनुगच्छति। करोति कुर्वतः कर्म छायेवानुविधीयते" भा० शा० १८१। "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते" गीता।

प्रति+वि+प्रतिरूपाचरणे "क्षिप्रमक्षिप्रमन्यत्र चारः प्रतिविधीयताम्" रामा०सुन्द० प्रतीकारे च "क्षिप्रमेव कृतान्तु प्रतिविहितमार्येण" सुद्रारा० चन्द्रगुप्तोक्तिः "न पारितं प्रतिविधा तुम्" तत्रैव चाणक्योक्तिः।

श्रद्धा+आदरे विश्वासे च। "श्रद्दधाति क इहेह न साधात्" नैष०।

सम्+सम्यग्विधाने योजने श्लेषणे अभिसन्धौ। "मनस्येतानि सन्धाय मनसा सम्प्रधारयेत्" भा० आश्व० ४२ अ०। "यथा सूच्या वासः संदध्यात्" ऐ० ब्रा० ८२।४८। "धनुष्यमोघं समधत्त सायकम्" कुमा०। "संदधे धनुषि वायुदैवतम्" रघुः। "भवति कृतसन्धानमिव तत्" मृच्छ०। मेलने "सन्दृष्टं यो हि मित्रं पुनः सन्धातुमिच्छति" चाणक्यः।

अति+सम्+अतिशयेन मल्लप्रादिना व्यथने संयोजने। "त्वया चन्द्रमसा च विप्रसनीयाभ्यामतिसन्धीयते कामिजनवार्त्ता" मृच्छ०।

अनु+सम्+अनुसन्धाने विचारजन्यज्ञानभेदे अनुचिन्तने "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः। अन्वेषणे च "दुर्गमनुसन्धेहि" हितो०।

अभि+सम्+तात्पर्य्ये अभिलाषभेदे। "अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्" गीता। "भवन्तमभिसन्धाय जिघांसन्ति भवत् प्रियम्" भा०शा०२१०५ श्लो०। "श्राद्धानि चैव कुर्वन्ति फलकामाः सदा नराः। अभिसन्धाय पितरं पितृंश्च पितरं तथा" हरिवं०१६अ० "मूढ़मभिसन्धिः मङ्गते" जनदीपः। "अभिसन्ध्यादिषु चैवम्" भा० व०।

प्रति+सम्+प्रतिरूपसन्धाने। "प्रतिसन्धाय चास्त्राणि तेऽन्योन्यस्य दिधाक्षते!। सुहृदः पाण्डवास्यैव कौरवाश्च महारथे" भा० भी० ७५ अ०। "यत्रतः प्रतिसन्धाय विध्यतः सव्यसाचिनः" भा० वि० ६१ अ०।

धाक त्रि० धा-उचा०क तस्य नेत्वम्। १धारके २ब्रह्मणि पु० मेदि०। ३दमे ४आहारे च ५थक्के ६लक्षे च वंचिप्र वा० उणादिवृत्तिः।

धा(घा)टी स्त्री घट्यते हिंस्यतेऽत्र घट-हिंसायां आधारे अच् गौरा० ङीष् पृषो० घस्य वः घाटी वा तत्र पाठः। अभ्यवस्कन्दने अनुसम्मुखगमने हेमच०।

धाणक पु० धा-आणक। दीनारभागे परिमाणभेदे। उज्ज्वलद०।

धातक पु० धातुं करोति क्विप् टिलोपः कन्। पुष्करद्वीपस्वामिनः वीतहोत्रस्य १पुत्रभेदे "तद्द्वीपस्वाधिपतिः प्रैयव्रतो वीतहोत्रो नाम तस्यात्मजौ रमणधातकनामानौ वर्षपती नियुज्य" भाग० ५।२०।२२। गौरा० ङीष्। (धाइफुल) २धातुपुष्प्राम् राजनि०। "धातकी कटुका शीता मदहृत् तुवरा लघुः। दाहातीसारपित्तास्रविषक्लिनिविसर्पजित्" भावप्र०तद्गुणाः। ३तीर्थभेदे शिवपु०।

धातक्यादिलेह चक्रदत्तोक्ते लेहभेदे "धातकीबिल्वधन्वाकवीजेन्द्रयवबालकैः। लेहः क्षौद्रेण बालानां ज्वरातीसारनाशनः" चक्र०।

धातु पु० धीयते सर्वं निःक्षिप्यते सुषुप्त्यादावस्मिन् धा-आधारे तुन्। १परमात्मनि। "स एष चिद्धातुः" श्रुतिः। दधाति शब्दान्। २सर्वेषां नाम्नां प्रकृतिभूते भूभृद्भर्तृ तस्य बहुविभागादिकं शब्दतत्त्वरत्नेऽस्माभिर्दर्शितं यथा

"धातुर्नाम क्रियावाचकोणादिपठितः शब्दविशेषः क्रिया च पूर्वोक्तफलाश्रयो व्यापार एव सर्वेषाञ्च काद-

कारणामन्वयोपपत्तये कालान्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात्। तथाहि। "क्रियाभेदाच्च कालस्तु संख्या सर्वस्य भेदिकेति" वाक्यपदीये कालानां क्रियाभेदकत्वमुक्तमुक्तञ्च तेनैव "क्रिया नियतसाधना" इत्यादिना साधनानां क्रियाकाङ्क्षित्वं तत्र यदि धातुभिः क्रिया न बोध्येत क्व तदा तेषामन्वयो विशेषणत्वं वा भवेदतोऽवश्यं सर्वेषां क्रियावाचकत्वं स्वीकार्यं धातूनां फलमात्रवाचकत्वे आख्यातानां व्यापारार्थकत्वे लादादिस्थले आख्याताभावेन कारकान्वयानुपपत्तेः नापि क्रियामात्रवाचकत्वं त्वजिगम्योः पर्य्यायतापत्तेः। तथाच फलवाचकत्वस्य तेषां प्रायशोगणपाठे एव उक्तत्वात् न तदंशे विवादः। किञ्च फलावच्छिन्नक्रियायाः पृथक्शक्त्या विशिष्टशक्त्या वा धात्वर्थत्वाभावे सकर्मकाकर्मकविभागोच्छेदः स्यात् स्याच्च फलमात्रधात्वर्थत्वे सर्वेषां कारकाणां तत्रानन्वयः तत्रैव कालान्वयोपपत्तेश्च व्यापारविगमकालेऽपि फलसत्त्वेन वर्त्तमानत्वादिप्रयोगापत्तिः। अतोऽवश्यं क्रियावाचकत्वं स्वीकार्यमतएव "धातोरर्थः क्रियोच्यते" इत्यनेन धात्वर्थत्वेनैव क्रियात्वस्वीकारः। अतएव च "भूवादयोधातवः" इतिपाणिनीयसूत्रमपि क्रियावाचकत्वं धातुमात्राणां प्रतिपादयति। तथाहि भूश्च वा च भूवौ आदिश्चादिश्चादी भूवौ आदी येषां ते धातवइति तथा चात्र प्रथम आदिशब्दोव्यवस्थावाची भुवा सह तदन्वयात् भूप्रभृतयइत्यर्थलाभः द्वितीयआदिशब्दः सादृश्यवाची वाधातुना तदन्वयेन वासदृशा इत्यर्थलाभः तत्सादृश्यञ्च क्रियावाचित्वेन वाधातोर्गत्यर्थतया क्रियावाचित्वप्रसिद्धेस्तया च भूप्रभृतयः क्रियावाचित्वेन वासदृशा धातव इत्येव फलितम्। भुवादित्वं गणपाठापेक्षया तस्य च क्रियावाचकत्वं पूर्वोक्तयुक्तेरिति संक्षेपः। अत्र क्रियावाचित्वानुक्तौ गणपठितत्वेन सर्वनामाव्ययादीनामपि धातुत्वापत्तिः तन्मात्रोक्तौ च हिरुगाद्यव्ययानां क्रियावाचित्वेन धातुत्वापत्तिरत उभयमुक्तम्। उक्तञ्च "किञ्च क्रियावाचकतां विना धातुत्वमेव नो। सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः। न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटमिति"। तत्पाठः गणपाठः। विटि व्यवये गड़ि वदनैकदेशे इत्यादिद्रव्यवाचिनामपि तत्साधनक्रियावाचित्वमस्त्येव कालकारकाद्यन्वयानुरोधात् तत्फलस्य द्रव्यरूपत्वेऽपि न क्षतिः। गण्यादीत्यादिपदेन स्तम्भसंघातस्तम्भपङ्क्तिं तेन स्तौताचां स्तम्भुप्रभृतीनां सनादयोधातव इत्यादीनाञ्च प्रत्ययान्तानां धातुत्वमव्याहतमेव दर्शितयुक्तेः तत्रापि क्रियावाचित्वादेरवश्यं स्वीकाराच्च नाप्रसङ्गइति दिक्।

ते च सर्वेऽपि धातवः सकर्मकाकर्मकभेदेन द्विविधाः। तत्र व्यापाराधिकरणमात्रावृत्तिफलवाचकः सकर्मकः पच्यादेः व्यापाराधिकरणावृत्तिविक्लित्तिरूपफलस्य बोधकतया सकर्मकत्वं कर्तृकर्मोभयनिष्ठफलबोधकस्यापि गम्यादेः व्यापाराधिकरणमात्रावृत्तिफलबोधकतया सकर्मकत्वम्। भूप्रभृतीनां तु व्यापाराधिकरणमात्रावृत्तिफलबोधकतया न सकर्मकत्वं फलस्य सत्तायास्तत्समवरूपव्यापारस्यैकत्वेनैव धर्मिणि घटादौ सत्त्वात्। उक्तञ्च वाक्यपदीये "आत्मानमात्मना विभ्रदस्तीति व्यपदिश्यते। अन्यभावाच्च तेनासौ कर्मणा न सकर्मकः" इति। अस्यायमर्थः आत्मानं स्वरूपं बिभ्रत् आत्मधारणानुकूलव्यापारान्वयः अस्तीतिपदेन समानाधिकरणतया व्यपदिश्यते तद्भेदबोधनाय तिङादिकं प्रयुज्यतेइति यावत् तेनात्मनात्मरूपेण कर्मणा धारणकर्मणा धातुः न सकर्मकः। अत्र हेतुरन्यभावश्च धात्वर्थ एव तस्य कर्मणः प्रवेशात् आत्मधारणानुकूलव्यापाररूपधात्वर्थेनात्मनउपसंग्रहादित्यर्थः। अथ वा अन्तरेव व्यापाराधिकरण एव भावात् फलस्य सत्त्वात् व्यापारसामानाधिकरण्यादित्यर्थः तेन भुवादेरुत्पत्त्यनुकूलव्यापारवाचितया धात्वर्थोपसंगृहीतकर्मकत्वाभावेऽपि फलसमानाधिकरणव्यापारवाचित्वात्कर्मकत्वम्। अतएव "फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातुस्तयोर्धर्मिभेदे सकर्मकउदाहृत" इति फलसामानाधिकरण्यादिष्टताकर्मकसकर्मकविभागोऽभिहितः। एकनिष्ठतायामेकमात्रवृत्तितायामित्यर्थः तेन गम्यादेर्व्यापाराधिकरणवृत्तिफलवाचित्वेऽपि नाकर्मकत्वमिति धर्मिभेदेऽधिकरणान्यत्वे इत्यर्थः। एवमेव शब्दकौस्तुभकारादयः। एतन्मते सकर्मकाकर्मकशब्दौ पारिभाषिकाविति द्रष्टव्यम्। मञ्जूषाग्रन्थस्तु "कर्मणा सहेति नास्ति कर्म यस्येति व्युत्पत्त्या सकर्मकाकर्मकशब्दौ योगिकौ तत्र साहित्यं तदन्वितस्वार्थबोधकत्वम् अन्यथा पृथक्पदोपस्थाप्ययोः सम्बन्धरूपोपस्थाप्यत्वेन जीवत्यादीनां प्राणधारणानुकूलव्यापारार्थकतया तत्कर्मणः प्राणादेर्धात्वर्थमध्यपातात् न सकर्मकत्वं धात्वर्थोपसंगृहीतकर्मकत्वेनाकर्मकत्वात्। कर्म च व्याकरणया-

स्वीयपारिभाषिकसंज्ञाविशिष्टमुच्यते तेनाधिश्रयते प्रासादस्यादौ कर्मणि सकारोपपत्तिः अधिशेतेः कर्म संज्ञाविशिष्टान्वितस्वार्थबोधकत्वात् अन्यथा पूर्वमते तस्य फलसमानाधिकरणव्यापारबोधकतयाऽकर्मकत्वेन "भावे चाकर्मकेभ्यः" इति भाव एव सकारापत्तेः। भवति च ग्रामं गच्छतीत्यादौ गम्यादिः ईप्सिततमत्वेन कर्म संज्ञाविशिष्टेन पृथगभूतेन ग्रामेणान्वितं स्वार्थं बोधयन् सकर्मकः, अधिवसतिस्तु अधिकरणत्वेन कर्मसंज्ञाविशिष्टेनेति विवेकः" इति प्राहुः। युक्तञ्चैतत् धात्वर्थोपस्थापकीभूतकर्मकाणां व्यापारव्यधिकरणफलवाचितया पूर्वकल्पे सकर्मकत्वापत्तेः तत्तद्विशिष्टत्वेन निवेशे गौरवं तथा कर्मणोऽविवक्षायां गम्यादेरपि अकर्मकत्वस्वीकारेण अविवक्षाविशिष्टत्वेन निवेशे गौरवञ्च। एतन्मते तु कर्मणभावादेव तदन्वितस्वार्थबोधकत्वाभावाद्धाकर्मकत्वस्यनिरिति सूक्ष्ममीक्षणीयम्। अत्र पक्षे अकर्मकस्तु तदन्वितस्वार्थबोधकइति बोध्यम्।

सकर्मकाश्च द्विविधाः एककर्मका द्विकर्मकाश्च। एककर्मान्वितस्वार्थबोधकाः गम्यादयः एककर्मकाः। द्विकर्मकाश्चापि द्विविधाः द्विकर्मान्वितैकव्यापारबोधकाः द्विकर्मान्वितद्विव्यापारार्थकाश्च। तत्राद्या दुह्यादयः। न च ते सिद्धान्ते द्विव्यापारार्थकाः तथात्वे ईप्सिततमाभ्यामेव कर्मभ्यां व्यापारद्वयेऽन्वयसम्भवेन द्विवीयाद्युत्पत्तौ "अकथितञ्चेति" सूत्रेण दुह्यादीनां कारकान्तरसंज्ञापापत्तेरकथितस्य कर्मसंज्ञाविधानानौचित्यात्। दर्शयिष्यते च दुह्यादीनामेकव्यापारार्थकता। यदा पुनः तेषां द्विव्यापारार्थकता विवक्षिता तदा ईप्सिततमसूत्रेणैव कर्मसंज्ञायां जातायां द्विकर्मान्वितद्विव्यापारार्थका एव ते भिजन्तादिवदिति बोध्यम्। द्विकर्मान्वितद्विव्यापारार्थकाश्च भिजन्ताः तत्र च धातुना एकव्यापारोऽभिधीयते द्वितीयस्तु विचा, तद्व्यापारद्वये च ईप्सिततमकर्मणः प्रयोज्यकर्तृरूपकर्मणश्च यथाक्रममन्वयः। अयात्वञ्च गम्यादीनामिति बोध्यम्। पाच्यादीनां तु नैवं, तद्योगे प्रयोज्यकर्तुः कर्मसंज्ञाभावेन व्यापारद्वये कर्मद्वयान्वयाभावात्। नन्वेवं पाच्यादेः क्रियाफलाश्रयत्वेनोद्देश्यतया प्रयोज्यकर्तुः कर्मसंज्ञा भविष्यत्येव गम्यादिवाक्ययोगेऽपि तत्त्वमात्। उक्तञ्च हरिणा "शुद्धक्रियायां स्वातन्त्र्यं प्रधाने कर्मतां गतम्। नियमात् कर्मसंज्ञाभाः स्वधर्मेणाभिधीयते" इति नियमात् गतिगुद्धादिसूत्रेण तदितरेषां निषेधात् स्वातन्त्र्यं कर्तृत्वमेव स्वधर्मेण तृतीययाऽभिधीयते इति तदर्थः। वस्तुतस्तु प्रयोज्यकर्तुरीप्सिततमत्वेऽपि परत्वात् कर्तृसंज्ञया तस्य बाधात् कर्मत्वाप्रसक्तौ गम्यादिसूत्रेण अप्राप्तप्रापकत्वरूपविधित्वात्रयेव गम्यादेः कर्मत्वं विहितं न पाच्यादेरिति द्रष्टव्यम्। उक्तञ्च हरिणा "परत्वादन्तरङ्गत्वादुपजीव्यतयाऽपि च। प्रयोज्यस्यास्तु कर्तृत्वं गम्यादेर्विधिबोधितेति"। परत्वात् "विप्रतिषेधे परं कार्यम्" इत्युक्तेः "अपादानसम्प्रदानकरणाधारकर्मणाम्। कर्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते" इति चोक्तेः "अन्तरङ्गत्वात् पाच्यादिरूपप्रत्ययाकाङ्क्षिकर्तृसंज्ञारूपकार्यात् "अन्तरङ्गं बलीय" इति न्यायात् पाच्याद्याकाङ्क्षितकर्मसंज्ञायाः प्रत्ययान्वितत्वेन दुर्बलत्वादिति भावः। उपजीव्यतया उपजीव्यजातीयतया सर्वेषामेव कारकाणां कर्तृप्रयोज्यत्वेन कर्तुरुपजीव्यजातीयत्वादिति फलितोऽर्थः तेन पाच्याद्यापेक्षया तस्योपजीव्यत्वाभावेऽपि न क्षतिः। एवं पाच्यादियोगे प्रयोज्यस्य कर्मसंज्ञायाश्चाप्रवृत्तेः न द्विकर्मकत्वं तेषामित्यन्यत्र विस्तरः। अकर्मका अपि धातवः हेतुचतुष्टयाधीनाकर्मकक्रियार्थत्वात् चतुर्विधाः। अकर्मकक्रियात्वे हेतवश्च चत्वारो हरिणा प्रदर्शिता यथा "धात्वोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति"। धातोः स्वबोधकधातोरर्थान्तरे स्वसजातीयभिन्ने वृत्तेः सामर्थ्यात् स्वविजातीयार्थबोधकत्वादित्येकः। यथा जानातिः ज्ञानं वदन् सकर्मकः प्रवृत्त्यादिकं बोधयन्नकर्मकः नन्वेवं गतिवाची गम्यादिः ज्ञानाद्यर्थेऽप्यकर्मकः तयोर्द्वयोरप्यर्थयोः सकर्मकत्वेन स्वसजातीयत्वात्। धात्वर्थेनोपसंग्रहादिति द्वितीयः। कर्मणो धात्वर्थेन उपसंग्रहात् स्वशरीरे प्रवेशनात् यथा जीवत्यादीनां प्राणधारणानुकूलव्यापाररूपक्रियार्थतया तत्कर्मणः प्राणादेर्धात्वर्थेएव प्रवेशः। प्रसिद्धेः सत्तालब्ध्यादिरूपाणामकर्मकत्वेन प्रसिद्धेः। सत्तादिकञ्चानुपदं प्रदर्शयते तेषां फलसमानाधिकरणव्यापारबोधकत्वादित्यर्थः। इति तृतीयो हेतुः। कर्मणोऽविवक्षातः अकर्मकः४। अत्र च कर्मपदं व्यपदेशिवद्भावेन फलस्याप्युपलक्षणं तेन फलस्याविवक्षायामेव गम्यादेरकर्मकत्वमिति कौस्तुभानुसारिणः तेषाञ्च व्यापारस्यात्रबोधकतया फलावाचित्वाच्च लकर्मकत्वमिति द्रष्टव्यम्। अत्र चाविवक्षा नाम येन

रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाभावः। तत्र क्वचित् कर्मणोऽविवक्षया यथा पच्यते इत्यादौ, क्वचिच्च कर्मत्वाविवक्षया यथा मातुः स्मर्यते इत्यादौ। अत्र मातुः कर्मत्वेनैव स्मरणान्वये कर्मसंज्ञा न पुनः सम्बन्धत्वेन, तथाविवक्षायामेव कर्मणि षष्ठीविधानात् स्मरणादेः कर्मान्वयसत्त्वेऽपि कर्मत्वेन तदन्वयाभावात्कर्मकत्वं तेन भावे लकारादय इति बोध्यम्। क्वचित्तु कार्यप्रवृत्तिवेलायामविवक्षा यथादिवक्षा। यथा कृतपूर्वी कटम् भुक्तपूर्वी ओदनमित्यादौ। तथाहि कृतं पूर्वमनेनेति विग्रहे तत्कृतमनेनेति पूर्वकृतादिनिमित्तमनुक्त्वा तपूर्वाच्चेति कृतेन विद्यमान पूर्वात् पूर्वशब्दादपि इनिर्विहितः तत्र यदि कृतमिति कर्मणि क्तः स्यात्तदा तस्य कटादिरूपकर्मविशेषणतया सापेक्षत्वेन समासादिवृत्तिर्न स्यात् एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात् दृष्टिवात्र जायते भाष्यादिषु तथाप्रयोगादतोऽवश्यं प्रथमं कर्माविवक्षयाऽकर्मकत्वेन भावि क्तप्रत्यये विहिते तदन्तेन पूर्वादिभिः सुपसुपेति समासे च कृते तत्पूर्वकात् पूर्वशब्दात् कर्त्तरि इनिप्रत्ययोभवति। पश्चाच्च कर्तृकृतक्रियायाः कर्मविशेषाकाङ्क्षायां कटादिकर्मणोऽन्वयः। उक्तञ्च हरिणा "अकर्मत्वे सत्येव क्लान्ते भावाभिधायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्मणाम्। अविवक्षा गतादिस्था यथा ग्रामादिकर्मभिः। क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति"। क्रियावतेत्यनेन क्रियाद्वारैव कर्मणोऽन्वय इति द्योतितम् क्रियायाश्च वृत्तिशब्दैकदेशतयाऽनन्वयशङ्कायामाह विवक्षेति। नास्ति विशेषेण प्रकोष्ठानं यस्याः सा पृथगुपस्थित्यभावेन ज्ञातुमशक्येत्यर्थः गतादिस्था कर्तृबोधकनिष्ठान्नगतपदोपस्थाप्यगमनकर्तृरूपार्थप्रविष्टापि यथा ग्रामं गतइत्यादौ विभिन्नपदोपात्तैरपि ग्रामादिकर्मभिः क्रिया सम्बध्यते तथेत्यर्थः यत्तदायशक्तिस्वीकारे एकदेशान्वयाभ्युपगमादवयवशक्तिस्वीकारे तु तदनुपगमे क्लृप्त्यभावादिति भावः। कृतपूर्व्यादिष्वित्यादिपदेनाध्वरेचिष्टोत्यादयोगृह्यन्ते तत्रापि इष्टादिभ्यश्चेत्यनेन कर्त्तरि इनिविधानात्। अत्रेदं बोध्यं "निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके" इत्युक्तेः कर्मणोऽपि स्वव्यापारद्वारा क्रियानिष्पत्तिहेतुत्वेन कर्तृत्वे स्थिते तद्व्यापारस्य धात्वर्थत्वविवक्षायां धात्वर्थक्रियाश्रयत्वेन तस्य कर्तृत्वं समानानुपूर्वीकसुख्यार्थबोधकधातूपात्तफलाश्रयत्वेन च कर्मत्वमित्येकस्यैव कर्मकर्तृता एवञ्च तत्र धातोरर्थान्तरे वृत्तेरेवाकर्मकत्वम्। तथाहि अन्नं पच्यते स्वयमेवेत्यादौ विक्लित्तिस्तदनुकूलो ऽवस्थाल्यादिसंयोगरूपो व्यापारश्च तद्विशिष्टो वा पच्यर्थः तयोः फलव्यापारयोरेकनिष्ठतया तद्बोधकधातोरकर्मकत्वं तेन अन्नेन पच्यते स्वयमेवेत्यादौ भावे लकारोपपत्तिः। द्विकर्मकाणान्तु एककर्मणः कर्तृत्वविवक्षया ऽपरस्याविवक्षयैवाकर्मकत्वं पचिदुह्योस्तु कर्मान्तरसत्त्वेऽपि कर्मवद्भावविधानात् सकर्मकत्वं तेन तयोर्न भावे लकारादयः किन्तु कर्मण्येव तेन दुह्यते गवा दुग्धं स्वयमेवेत्यादि। एवञ्च सर्वेषामेव धातूनां कर्मणः कर्तृत्वविवक्षायां कर्मवद्भावे प्राप्ते धातुविशेषयोग एव कर्मवत्कार्यातिदेशे न सर्व धातुयोगे तेन गम्यादियोगे कर्त्तरि वाच्ये न कर्मवद्भावः किन्तु कर्तृवत्कार्यं, भावे तु दृश्यते एव कर्मवत्कार्यम्। पच्यादियोगे तु कर्त्तरि भावे च वाच्ये कर्मवद्भाव इति विवेकः। उक्तञ्च "कर्मस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्मवत्। कर्तृस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्तृवदिति"। कर्मवत् कर्मवत्कार्यवानित्यर्थः यतएव "कर्मवत् कर्मणा तुल्यक्रिये" इति सूत्रे कर्मपदेन कर्मस्थक्रिया सूचिता भाष्यकारैस्तेन कर्मस्थक्रियातुल्यक्रियावति कर्त्तरि कर्मवत् कार्यमित्यर्थः क्रिययोस्तुल्यत्वञ्च एकाधिकरणमात्रवृत्तित्वेन तथाच कर्मस्थक्रियया फलेन व्यापारस्य सामानाधिकरण्येन एव कर्मवद्भावविधानात् पच्यादेस्तथाभूतार्थकतया तत्कर्त्तरि कर्मवत्कार्यं, गम्यादिषु व्यापारस्योक्तफलसामानाधिकरण्याभावात् कर्तृस्थभावकत्वमिति विवेकः। तथा तुल्यक्रिये कर्तरीत्यभिधानेन गम्यादीनामपि भावे कर्मवत्कार्यं यागादि भवत्येव। यद्यपि सर्वेषामेवाकर्मकाणां फलव्यापारयोः सामानाधिकरण्यबोधकतया कर्मवद्भावापत्तिस्तथापि सूत्रे कर्मणा तुल्येति निर्देशात् येषां धातूनां सुख्यार्थवाचिनां सकर्मकत्वं तेषामेव कर्मवद्भाव इति गम्यते अस्यादेः सत्तादिरूपसुख्यार्थे सकर्मकत्वाभावात् न तत्प्रसङ्गः। भवतेस्तु लाक्षणिकानुभवार्थे वर्त्तमानस्य सकर्मकत्वेऽपि सत्तारूपसुख्यार्थे तथात्वाभावान्न प्रसङ्गः। एवञ्च सर्वेषामेव सकर्मकाणां कर्तृकर्मोभयस्थभावकत्वेनाव्यवस्थायां हरिणा क्रियाकृतविशेषेण व्यवस्था दर्शिता यथा "विशेष-

दर्शनं यत्र क्रिया तत्र व्यवस्थिता। शब्दप्रवृत्तिरन्येषां शब्दैरेव प्रकल्पितेति"। यत्र कर्मणि कर्त्तरि वा विशेषः क्रियाकृतोऽसाधारणधर्मो दृश्यते तत्रैव क्रिया व्यवस्थितेत्यर्थः धात्वर्थयोः फलव्यापाररूपयोः क्रिययोरुभयनिष्ठत्वेऽपि तत्कृतविशेषादेव तत्रिष्ठत्वव्यवहार इति भावः। विशेषश्च द्विविधः धातूपस्थाप्यः तदनुपस्थाप्यश्च तत्राभ्यर्हितत्वेन उपस्थितत्वेन च धातूपात्तविशेषस्यैव प्रथमं ग्रहणं तदप्राप्तौ तु अपरस्येति विवेकः। तेन पच्यादयः स्वोपस्थाप्यस्य कर्त्रपेक्षयाऽसाधारणधर्मस्य व्यापाररूपक्रियाकृतस्य विक्लित्तिरूपफलस्य बोधकाः कर्मस्थभावकाएव गम्यादयस्तु नैवं तदुपस्थाप्यफलस्य संयोगादेरुभयनिष्ठतया साधारण्यात् धातूपस्थाप्यविशेषाभावात् धात्वनुपस्थाप्यस्य क्रियाकृतस्य क्रमादिरूपस्यासाधारणधर्मस्य ग्रहणं तस्य च कर्त्तरि दर्शनात् कर्तृस्थत्वम्। एवञ्च कर्तृस्थादिविभाग एतन्मते न्यायमूल एव। अन्येषां मते पुनः शब्दप्रवृत्तिः कर्मवद्भावार्थप्रवृत्तिः शब्दैरेव नियामकशास्त्रैरेव प्रकल्पितेति द्रष्टव्यम्। तच्च शास्त्रं यथा "कर्मस्थः पचतेर्भावः कर्मस्थाश्च भिदादयः। कर्तृस्थो बुद्ध्यतेर्भावः कर्तृस्थाश्च गमादयः" इति कर्मस्थाः कर्मस्थक्रियार्थका इत्यर्थः एवमन्येऽपि। सम्प्रदायविदस्तु एतच्छास्त्रमपि न्यायमूलकं पूर्वोक्तरीत्या एतेषां कर्मस्थत्वादिव्यवस्थापनात् अन्यथा प्रातस्विकरूपेण तद्गणनस्य कर्तुमशक्यतयाऽव्यवस्थापत्तेरित्याहुः। एवञ्च क्रियाकृतविशेषेणैव क्रियाव्यवस्थेति पञ्चमलम्बत्र "निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते। नतु प्राप्ते कर्मणि तु सिद्धान्तोऽयं व्यवस्थितः" इत्यभियुक्तैर्व्यवस्था भङ्ग्यन्तरेण दर्शिता। तथा च निवर्त्यविकार्ययोरेव क्रियाकृतस्य चतुष्प्रत्यादिरूपस्य विशेषस्य सत्त्वात्, प्राप्ते तदसत्त्वाच्च तेषु कर्मवद्भावाभावौ बोध्यौ। "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते" इत्यभिमतप्राप्यकर्मलक्षणे प्राप्यस्य क्रियाकृतविशेषाभावकथनात् व्यतिरेकेण निर्वर्त्यविकार्ययोस्तत्सत्त्वमर्थायातमित्यर्थं विस्तरेण। सनन्तधातूनां धात्वर्थेच्छार्थकत्वेन कर्तृस्थत्वेऽपि तत्प्रकृतीभूतधात्वोरेव कर्मस्थकर्तृस्थभावकतया व्यवस्था तत्प्रकृतेरात्मनेपदादिना तदन्तस्यात्मनेपदादिवदिति द्रष्टव्यम्' बोधस्तु कर्मकर्तरि कर्तरीव यथा ओदनः पच्यते स्वयमेवेत्यादौ ओदनामिन्नैकाश्रयकविक्लित्त्यनुकूलस्याख्यादिसंयोगरूपोव्यापारः।

अपरे तु कर्तुराश्रयांशे विशेषणत्ववत् व्युत्पत्तिवैचित्र्येण फलेऽपि विशेषणत्वमङ्गीचक्रुरङ्गीचक्रुश्चात्र नामार्थधात्वर्थयोरपि साक्षादन्वयम्। वस्तुतस्तु तिङर्थाश्रयस्यैव व्युत्पत्तिवैचित्र्येणोभयत्रान्वय इति द्रष्टव्यम्, अकर्मकत्वेन प्रसिद्धाः सत्ताद्यर्थका अभियुक्तैरन्यत्र संगृहीता यथा "सत्ताजीवनदर्पभीतिशयनक्रीडानिवासक्षयाव्यक्तध्वाननभोगतिस्थितिजराजल्पाप्रमादोदये। मोहे खेटनवेगयुद्धदहनख्यातिस्मरोन्मादके शुद्धिखेदपलायनभ्रमणकेशान्तौ सुप्तौ मज्जने। जाग्रौ जागरयोर्वक्रगमनोत्साहे मृतौ संशये स्नानौ मन्दगतौ च नृत्यपतने चेष्टाक्रुधौ रोदने। दृष्टौ हावकृतौ च सिद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभक्षयतनार्थे धातवोऽकर्मकाः। दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य यतस्तस्मादकर्मकाः। कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातवः। तद्भावेऽकर्मकाः स्युस्तद्वत्तत्वात्यां सकर्मकाः। क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः। प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः" इति। २आकाशादिमहाभूतेषु। ४इन्द्रियेषु ५शब्दाद्याकाशादिगुणेषु। ६देहस्थेषु "रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातव इत्युक्तेषु ६रसादिषु। ७मनःशिलाद्यश्मविकारे। ८कफादौ अमरः। अत्राह सुश्रुतः। "ते धातवोऽपि विद्वद्भिर्गदिता देहधारणात्। विसर्गादानविक्षेपैः सोमसूर्यानिला यथा। धारयन्ति जगद् देहं कफपित्तानिलास्तथेति"। ९अस्थि। १०स्वर्णादौ तत्राष्टधातवो यथा "हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च। रङ्गमायस्तथैवेत्यष्टौ धातवोऽष्टौ प्रकीर्त्तिता" इति दानसागरः। "सुवर्णं रजतं ताम्रं लौहं कृष्णञ्च पारदम्। रङ्गञ्च सीसकञ्चैव इत्यष्टौ देवसम्मताः" इति वैद्यकम्। सप्त धातवो यथा। "स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यसदमेव च। सीसं लोहञ्च सप्तैते धातवो गिरिसम्भवाः" इति भावप्र०। "वलीपलितखालित्यकार्श्यौदर्यजरामयान्। निवार्य देहं दधति नृणां तद्धातवो यथा। "सुवर्णरूप्यताम्राणि हरितालमनःशिला। गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः। गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः"। नव धातवो यथा "हेमतारारनागाख्य ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं काललौहञ्च धातवो नव कीर्त्तिताः"। माक्षिकं तुत्थिकाभ्रे च नीलाञ्जनशिलाऽवकाः। रसकश्चेति

विज्ञेया एते सप्तोपधातवः। शरीरस्थसप्तधातुभवसप्तोपधातवो यथा। "स्त्रन्यं रजश्च नारीणां काले भवति गच्छति। शुद्धमांसभवस्नेहो यः सा सङ्गीर्त्यते वसा। स्वेदोदन्तास्तथा केशास्तथैवौजश्च सप्तमम्। इति धातुभवाज्ञेया एते सप्तोपधातवः" इति सुश्रुतबोधः। ११लोकेषु १२वस्तुनि शब्दार्थचि०।

रसादेर्धातुवाच्यतायां निरुक्तिस्तत्कर्माणि च भावप्र० उक्तानि यथा "एते सप्तखयं स्थित्वा देहं दधति यत्नतः। रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः। प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे। गर्भोत्पादश्च कर्माणि धातूनां कथितानि च। रसादीनां धातूनां क्रमेण प्रीणनादिकर्माणीति बोध्यम्। एतेषाञ्च पूर्वपूर्वस्योत्तरोत्तरहेतुत्वं तच्च कायशब्दे १९०८ पृ० दर्शितम्। उपधातवः तद्गुणाश्च भावप्र० अन्यथोक्ताः यथा

"सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम्। हरितालं कांस्यञ्च रीतिश्च सिन्दूरं च शिलाजतु। उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि। सन्ति किन्त्वेषु तेऽल्पोनास्तत्तदंशाल्पभावतः"। तत्र स्वर्णादिधातौ "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः" मनुः। उपधातवश्च गौणधातवस्तेन तत्रापि धातुशब्दप्रवृत्तिः। अतएव उपधात्वभिप्रायेण गैरिकादीनां धातुशब्दवाच्यता दृश्यते यथा "न्यस्ताक्षरा धातुरसेन यत्र" "अकालसन्ध्यामिव धातुमत्ताम्" कुमा०। "यद्वर्यश्चिव तत् कूटान् उद्धूतैर्धातुरेणुभिः" रघुः। "त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्" मेघ०। "यद्रीणामिव कूटानि धातुरक्तानि शेरते" भा० आ० १९ अ०। १२देहादिधारके आत्मनि "स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते। पञ्च धातून् स्वयं षडः आदत्ते युगपत् प्रभुः" याज्ञ०। "पञ्च धातून् पृथिव्यादिपञ्चभूतानि शरीरारम्भकतया षडधिष्ठातुरात्मा प्रभुः शरीरारम्भकादृष्टकर्मयोगितया समर्थः युगपदादत्ते भोगायतनत्वेन स्वीकरोति" मिता० आकाशादौ "तदव्ययमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम्। नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम्" भा० आश्व० १६ अ०। "भूतेषु धातवः पञ्च ब्रह्मा तानसृजत् पुरा। आवृता यैरिमे लोकाः महाभूतानिसंज्ञिताः" भा० शा० १८४ अ०। "अन्नमयितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषम्" छा०उप०। प्रभृतौ "धातोः स्थाने इवादेशं सुप्तीवं संन्यवेशयत्"। "अवेक्ष्य धातोर्गमनार्थमर्थवित्" रघुः। रसादौ "शरीरधातवो ह्यस्य मांसं रुधिरमेव च। नेशुर्मज्जास्थिनिर्दग्धाः न च भस्माप्यदृश्यत" भा० व० २८६ अ०। परमेश्वरे "अनादिनिधनो धाता विधाता धातुरुत्तमः" विष्णुस०। धातुर्विरिञ्चेरुत्कृष्टः इति वा नामद्वयं कार्य्यकरणाद् प्रपञ्चधारणात् वा चिद्धातुः" भा०। "वायुं पूर्वमथो स्रष्टा यो धातुर्धातुसत्तमः। धारणाद्धातुशब्दञ्च लभते लोकसंज्ञितम्" हरिवं० २० अ०। केशाद्युपधातौ "काकपदमक्षिका केशधातुयुक्तानि शर्कराबिम्बम्" वृ० सं० ८० अ०। १४धारके। "अत्वं हविः शचते यच्च धातु चारिष्टगातुः" ऋ० ५।४४।२। "धातु सर्वधारकम्" भा०। १५प्रकारे "त्रिधातवः परमा अस्य गावः" ऋ० ५।५०।४ "त्रिधातुः प्रथयद्विभूम" "त्रिधातुः त्रिप्रकारः" भा०

धातुकासीस न० धातुरूपं कासीसम्। कासीसे उपधातुभेदे हेमच०। [२देशभेदे च। २कूर्म्मविभागशब्दे दृश्यम्।

धातुकुशल त्रि० धातुषु कुशलः। १धातुक्रियायां कुशले।

धातुक्षय पु० धातूनां क्षये यत्र। कासरोगभेदे।

धातुघ्न त्रि० धातुं स्वर्णादि हन्ति हन-टक्। १धातुनाशनशीले २काञ्चिके न० हेमच०। तस्य पारदादिधातुमारकत्वात् तथात्वम्।

धातुद्रावक पु० धातुं द्रावयति द्रु-णिच्-ण्वुल्। धातुद्रुतिकारके (सोहागा) ख्याते पदार्थे पारस्करनि०।

धातुनाशन त्रि० धातुं नाशयति नश-णिच् ल्यु। स्वर्णादिधातुमारके २काञ्चिके न० त्रिका०।

धातुप पु० धातुं पाति रक्षति पा-क। रसरूपे प्रथमधातौ शब्दच०। "आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः। पुष्णाति, तदनु स्त्रीयैर्व्याप्नोति च तनुं गुणैः" भावप्र० तस्य सर्वधातुपोषकत्वोक्तेस्तथात्वम्। "रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत्। केदारेषु यथा कुल्याः पुष्णन्ति विविधौषधीः। तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः" भावप्र०।

धातुपाठ पु० धातूनां पाठो यत्र धातवः पठ्यन्तेऽत्र आधारे घञ् वा। पाणिन्यादिप्रणीते धातूनामर्थबोधकग्रन्थभेदे। "धातुपाठः स्वदाद्यक्रमादन्तर्भिन्नक्रमः "धातवः पठिताः पाठस्तत्तल्लोकानभस्थिताः" इति च कविकल्पद्रुमः। एवं पाणिनीयः भूसत्तायामित्यादिधातुपाठोऽन्येयः।

धातुपारायण पु० धातूनां पारायणं यत्र । धातुप्रतिपादकग्रन्थभेदे ।

धातुपुष्पी स्त्री धातुरिव पुष्पं यस्या जातित्वात् ङीष् । (धाइफुल) ख्याते धातुपुष्प्यां भावप्र० । बहु० या कप् अत इत्त्वम् । धातुपुष्पिकाऽप्यत्र शब्दरत्ना० । धातकीशब्दे तद्गुणा द्रष्टव्याः । [६त० । पर्वते त्रिका० ।

धातुभृत् पु०धातुं गैरिकादिकमुपधातुं बिभर्त्ति भृ–क्विप् तुक्

धातुमल पु० ६त० । धातूनां रसादीनां पाकतो जायमाने केशादौ कफपित्तमलाः केशः प्रस्वेदो नखरोम च । नेत्रविट् चक्षुषः स्नेहो धातूनां क्रमशोमलाः" सुश्रुतः । शुक्रस्य तु मलोनास्ति यथाह भावप्र० ।

"स्वाग्निभिः पच्यमानेषु मलः षट्सु रसादिषु । षट्सु धातुषु जायन्ते मलानि मुनयो जगुः । यथा सहस्रधा क्षाते न मलं किल काञ्चने । तथा रसे सुद्धः पक्वे न मलं शुक्रताङ्गते" । "आहार्यस्य रसः सारः सारहीनो मलद्रवः । सिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्" भावप्र० । अहङ्कारशब्दे ५५९ पृ० तत्पाकप्रकारो द्रष्टव्यः ।

धातुमाक्षिक न० धातुरूपधातुरूपं माक्षिकम् । माक्षिके उपधातुभेदे राजनि० ।

धातुमारिणी धातुं मारयति मृ–णिच्–णिनि ६त० ङीप् । (सोहागा) सर्जिकायां शब्दच० ।

धातुराजक न० धातुषु राजते राज–ण्वुल् धातूनां राजा टच्समा० स्वार्थे क वा । शुक्रे तस्य च सर्वधातूनां चरमत्वात् तथात्वम् ।

धातुवल्लभ न० ६त० । टङ्कणे राजवल्लभः ।

धातुवादिन् धातुं वदति उपाबान्तरेण कर्तुम् । कारस्थमे कौशलभेदात् रसायनादिना स्वर्णरौप्यादिकरे हारा०

धातुवैरिन् पु० ६त० । गन्धके शब्दच० ।

धातुशेखर न० धातूनामुपधातूनां शेखरमिव । कासीसे उपधातुभेदे हेमच० । [(खड़ि) हारा०

धातूपल पु० धातुरूपधातुरूप उपलः । कठिनिकायां

धातृ त्रि० धा–तृच् । १धारके २पोषके ३ब्रह्मणि पु० अमरः "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" मन्त्रामन्त्रः ४विष्णौ । "अनादिनिधनो धाता" विष्णुस० । धातुशब्दे उदा० द्रष्टव्यम् । ५आत्मनि ६वायुभेदेऽनिलशब्दे १६६पृ० द्रष्टव्यम् । ७आदित्यभेदे आदित्यशब्दे ६९५ पृ० द्रष्टव्यम् । तत्रादित्यभेदे "कौशल्या सुषुवे रामं धातारमदितिर्यथा" रामा० बाल०९२ अ० । ८ब्रह्मणः पुत्रभेदे "द्वौ पुत्रौ ब्रह्मणस्तस्य यथोक्तिष्ठति लक्षणम् । लोके धाता विधाता च तौ स्थितौ मनुना सह" भा० आ० ६६अ० । ९भृगुसुतभेदे "भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् । धातारञ्च विधातारं श्रियञ्च भगवत्परम्" भाग०४।१।२५ १०प्रजासर्गकारकेषु सप्तर्षिषु "सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम् । पुरातनाः पुराविद्भिः धातार इति कीर्त्तिताः" कुमा० ।

धातृपुत्र पु० ६त० । ब्रह्मणः पुत्रे सनत्कुमारे शब्दर० ।

धातृपुष्पी स्त्री धातृ पुष्टिकर्तृ पुष्पमस्याः ङीप् । (धाइफुल) धातकीनाम् अमरः । या कप् अत इत्त्वम् । धातृपुष्पिका तत्रार्थे अमरः ।

धात्र न० धीयतेऽस्मादिकमत्र धा–आधारे ष्ट्रन् । १भाजने उणादिवृत्तिः । धाता ब्रह्मा आदित्यो वा देवताऽस्य अण् २आदित्यदेवताके ३ब्रह्मदेवताके च द्वादशकपालसंस्कृते पुरोडाशादौ त्रि० । "स यः स धाता सौ स आदित्यः । अथ यत्तद्दिशां परमं क्रान्तमेतत्तदाश्लिष्य एतत् प्रतिष्ठिन स्तपति । स यः स धातायमेव स धात्रः द्वादशकपालः पुरोडाशो द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्धाता" शतब्रा०९।५।१।३८। "अनुमतिराकाविनीवालीकुह्वयश्चरवो धात्रो द्वादशकपालः सर्वहुतः" कात्या० श्रौ० १८।६।२१ ।

धात्री स्त्री धीयते पीयते धेट–कर्मणि ष्ट्रन् धीयन्ते पुरुषार्था अनया वा धा–करणे ष्ट्रन्, विश्वं वा दधाति ष्ट्रन् विश्वात् ङीष् टच् ङीप् वा । १उपमातरि (धाइमा) ।

भावप्र० धात्रीलक्षणादि "धीताय (पानाय) यदि बालस्य विदध्यादुपमातरम् । सुविचार्य्य गुणान् दोषान् कुर्य्याद्धात्रीं तदीदृशीम् । सवर्णां मध्यवयसं सच्छीलां सुदितां सदा । शुद्धदुग्धाम्बुक्षीरां सवत्सामतिवत्सलाम् । स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम् । कैतवेनापरित्यक्तां निजपुत्रदृशं शिशौ । अथ निष्ठिवां धात्रीमाह । शोकाकुला क्षुधार्त्ता च श्रान्ता ध्याधिमती सदा । अत्युच्चानितरां नीचा स्थूलातीव भृशं कृशा । गर्भिणी ज्वरिणी चापि लम्बोन्नतपयोधरा । अजीर्णभोजिनी चापि तथा पथ्यविवर्जिता । आसक्ता क्षुद्रकार्य्ये तु दुःखार्त्ता चञ्चलापि च । एतासां स्तन्यपानेन शिशुर्भवति सामयः । अथ बालस्य स्तन्यपानविधिः । तत्र माता प्रशस्ताङ्गी चारुवक्त्रा पुरोमुखी । उपविश्याप्रा-

मने सम्यग्दक्षिणं स्तनमम्बुना। प्रक्षाल्येषत् परिस्राव्य मन्त्राभ्यामभिमन्त्रितम्। उदङ्मुखं शिशुं क्रोडे शनैः सन्धार्य्य पाययेत्। मातेत्युपलक्षणं धात्री च ईषत्परिस्राव्य। अन्यथा वैगुण्यमाह सुश्रुतः। अस्राविते स्तनं बालः पिबन् स्तन्येन भूयसा। पूर्णस्रोता वमीकासश्वासैर्भवति पीड़ितः। अभिमन्त्रणमाह। क्षीरनीरनिधिस्तेऽस्तु स्तनयोः क्षीरपूरकः। सदैव सुभगो बालो भवत्येष महाबलः। पयोऽमृतसमं पीत्वा कुमारस्ते शुभानने। दीर्घमायुरवाप्नोतु देवाः प्राप्यामृतं यथा। मन्त्रौ च पितृस्थानेन ब्राह्मणेन पठनीयौ। यावत् मन्त्र पाठस्तावन्माता धात्र्या वा दक्षिणहस्तेन स्पर्शः कार्य्यः" "उवाच धात्र्या प्रथमोदितं वचः" रघुः। "धात्रकुलीभिः प्रतिसाय्यमाणः" कुमा०। २क्षितौ च तस्या विश्वधारणात्। "मेखलेव स्थिता धात्र्या देवासुरविभागकृत्" स्कं० शि०। ३धारणकर्त्र्यां स्त्रियां। ४आमलक्यां च मेदि०। तस्याः धारणादेः पुरुषार्थसाधनत्वात् तथात्वम्। आमलकीशब्दे ७६४पृ० तद्गुणा उक्ताः। तस्या उत्पत्तिर्माहात्म्यञ्च पाद्मोत्तरखं० १२७ अ० उक्तं यथा "अथ क्षिप्तेभ्यो बीजेभ्यो वनस्पत्यः स्त्रियोऽभवन्। धात्री च मालती चैव तुलसी च नृपोत्तम!। स्वधाभवा स्मृता धात्री माधवा मालती तथा। गौरीभवा च तुलसी तमःसत्त्वरजोगुणा"

स्थानान्तरे तत्रैवतन्माहात्म्यं यथा

"शृणुष्व धात्रीमाहात्म्यं सर्वपापहरं शुभम्। यत् पुरा हरिणा प्रोक्तं वशिष्ठं प्रति नारद!। धात्री वत्स! नृणां धात्री मातृवत् कुरुते कृपाम्। दद्यादायुः पयः पानात् स्नानाद्धर्मसञ्चयम्। अलक्ष्मीनाशनं सद्योऽघ्न्ते निर्वाणमेव च। विघ्नानि नैव जायन्ते धात्रीस्नानेन वै नृणाम्। तस्मात् त्वं कुरु विप्रेन्द्र! धात्रीस्नानं हि यत्नतः। प्रयास्यसि हरेर्धाम देवत्वं प्राप्य नारद!। यत्र यत्र मुनिश्रेष्ठ! धात्रीस्नानं समाचरेत्। तीर्थे वापि गृहे वापि तत्र तत्र श्रियः स्थिताः। धात्रीस्नातानि दिवसे यस्यास्थीनि कलेवरे। प्रक्षालितानि विप्रेन्द्र! न स याति गर्भसम्भवः। धात्रीफलेन विप्रेन्द्र! येषां केशाश्च रञ्जिताः। ते नराः केशवं यान्ति नाशयित्वा कलेर्मलम्। धात्रीफलं महापुण्यं स्नाने पुण्यतरं स्मृतम्। पुण्यात् पुण्यतरं वत्स! भक्षणे मुनिपुङ्गव!। न गङ्गा न गया पुण्या न काशी न च पुष्करम्। एकैव च यथा पुण्या धात्री माधववासरे। कार्त्तिके माघि विप्रेन्द्र! धात्रीस्नानं समाचरेत्। यत्र तज्जलमश्नीयात् सोऽश्वमेधमवाप्नुयात्। धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम!। प्रागजन्मनि कृतात् पापात् मुच्यते नात्र संशयः। संस्मरेद्यस्तु धात्रीं तामहन्यहनि मानवः। मुच्यते पातकैः सर्वैर्मनोवाक्कायसम्भवैः। धात्रीफलान्यमावास्यामष्टमीनवमीषु च। रविवारे च संक्रान्तौ संस्मरेत् मुनिपुङ्गव!। यस्य गेहे मुनिश्रेष्ठ! धात्री तिष्ठति सर्वदा। तस्य गेहं न गच्छन्ति प्रेतकुष्माण्डराक्षसाः। धात्रीस्नाने हरेर्नाम्नि जागरे हरिवासरे। जन्मवन्धो विनश्येत हयमेधायुतं फलम्। स्नायाद्दामलकैर्यस्तु कार्त्तिके हरिवल्लभ!। हरितोषं समायाति तस्य वै माधवः स्वयम्। धात्रीच्छायां समासाद्य कुर्य्यात् श्राद्धन्तु यो मुने!। मुक्तिं प्रयान्ति पितरः प्रसादात्तस्य वै हरेः। मूर्ध्नि पादौ मुखे कण्ठे देहे च मुनिसत्तम!। धत्ते धात्रीफलं यस्तु स महात्मा स पुण्यभाक्। धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः। धात्रीफलकृताहारो नरो नारायणो भवेत्। यः कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं मुने!। प्रियो भवति विष्णोः स मनुष्याश्चाश्च का कथा। धात्रीफलानि यो नित्यं वहते करसंपुटे। तस्य नारायणो देवो वरमेकं प्रयच्छति। धात्रीफलं न मोक्तव्यं कदाचित् करसंपुटात्। य इच्छेद्विपुलान् भोगानन्ते यो मुक्तिमिच्छति। धात्रीफलकृतां मालां कण्ठस्थां यो वहेत्तु हि। स वैष्णवो न विज्ञेयो विष्णुभक्तिपरोऽपि च। न त्याज्या तुलसीमाला धात्रीमाला विशेषतः। तथा रुद्राक्षमालापि धर्मकामार्थमिच्छता। यावन्मुञ्चति कण्ठस्था धात्रीमाला नरस्य हि। तावन्मनसि कृतस्योऽपि सदा तुष्यति केशवः। यावद्दिनानि वहते धात्रीमालां करे नरः। तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत्। सर्वदेवमयी धात्री माधवस्य मनःप्रिया। आरोपणीया सेव्या च सेचनीया सदा बुधैः। एतत्ते सर्वमाख्यातं धात्र्या महात्म्यमुत्तमम्। श्रोतव्यञ्च सदा सद्भिश्चतुर्वर्गफलप्रदम्" अधिकमामलकीशब्दे द्रष्टव्यम्। २जनन्यां विश्वः। "पुनर्धात्री पुनर्गर्भमोजस्तस्य प्रधावति" यजु०। [६त०। आमलक्याः पत्रे।

धात्रीपत्र न० धात्र्या इव पत्रमस्य। तालीशपत्रे राजनि०

धात्रीपुत्र पु० ६त०। उपमातृः सुते हेमच०।

धात्रीफल न० ६त० । आमलकीफले तस्य पाकविशेषगुणाः । "अङ्गारपाकन्हदयत्रसुपाचितानि सिन्धूत्थहिङ्गुमरिचादिसमन्वितानि । तप्ते हते पुनरपि प्रतिभर्जितानि धात्रीफलानि जनयन्ति हि लाठराग्निम्" वैद्यके उक्ताः ।

धात्रेयी स्त्री धात्र्या अपत्यम् स्त्री स्वार्थे वा ढक् ङीप् । १धात्र्याः स्त्र्यपत्ये २धात्र्याञ्च । "दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी" सा०द० । स्वार्थे क तत्रार्थे । "अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्षते यदि । पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः" ति० त० । धात्रेयिकावाक्यञ्च "सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः । सुकुमारक! मा रोदीस्तव ह्येषस्यमन्तकः विष्णुपु० "अन्यं दृष्ट्वा च तं मत्वा न सा देवी जगाम ह । स्वान्तु धात्रेयिकां तस्मै दृष्ट्वाय प्राहिणोत् तथा" । "अवमत्य टदौ मूढा गृहां धात्रेयिकां मम" भा० आ० १०५ अ० ।

धात्र्यरिष्ट पु० "धात्रीफलसहस्रे द्वे पीड़यित्वा रसं भिषक् । क्षौद्राष्टभागं पिप्पल्यानूर्णार्द्धं जड़वान्वितम् । शर्करार्द्धतुलोन्मिश्रं पक्वं स्निग्धघटे स्थितम् । प्रपिबेत् पाण्डुरोगार्त्तो जीर्णे हितमिताशनः । कामलापाण्डुहृद्रोगवातासृग्विषमज्वरान् । कासश्वित्रकाऽरुचिश्वासानेषोऽरिष्टः प्रणाशयेत्" चक्रदत्तोक्ते धात्र्यारसपके रिष्टनाशके पदार्थे ।

धान न० धा-भावे ल्युट् । १धारणे २पोषणे च आधारे ल्युट् । ३धारणाधारे स्त्रियां ङीप् राजधानी मनुस्मधानी

धानक न० धन्याक+पृषो० । १धन्याके राजनि० २मानभेदे पु० भावप्र० । "षड्भिस्तु रक्तिकाभिः स्यात् माषको हेमधानकौ" । अत्र हेमधानको पाठान्तरम् ।

धाना स्त्री व० व० । धा-न टाप् । (बड़ुरी) ख्याते १भृष्टयवे अमरः । २धन्याके ३अग्निनवोद्भिन्ने अङ्कुरे ४चूर्णसक्तुषु च मेदि० । "यवास्तु निस्तुषा भृष्टाः कृता धाना इति स्त्रियाम् । धानाः स्युर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः । तथा मेदःकफच्छर्दिनाशिन्यः सम्प्रकीर्त्तिताः" राजनि० । "धाना मनुस्मानृ पयोमांसं शाकञ्चैव न निर्णुदेत्" मनुः । स्वार्थे क धानाका तत्रार्थे व०व० शब्दर० ।

धानाचूर्ण न० ६त० । सक्तुषु ।

धानी स्त्री धा-आधारे ल्युट् ङीप् । १आधारे राजधानी २धीनुकुच्चे स्त्री राजनि० । स्वार्थे क धानिका तत्रार्थे "अङ्गारधानिका" अमरः ।

धानुर्दण्डिक पु० धनुर्दण्ड इव तेन जीवति वेतना० ठक् । धनुरुपजीविनि धानुष्के ।

धानुष्क पु० धनुःप्रहरणमस्य धनुषा जीवति वा वेतना० ठक् इसुसुक्तान्तात् ठस्य कः । १धनुषा युध्यमाने २धनुषा जीविनि च अमरः । "पारश्वधिकधानुष्कशाक्तीकप्रासिकान्विता" भट्टिः । धनुरिवावयवोऽस्य वा०ठक् । ३अपामार्गे स्त्री शब्दच० ।

धानुष्य व० धनुषि साधुः वा० ञ्य । वंशे राजनि० ।

धानेय न० धानैव स्वार्थे ढक् । धन्याके राजनि० स्वार्थे क धानेयक तत्रार्थे न० जटाधरः ।

धान्धा स्त्री (एलादृच) एलायां शब्दच०

धान्य न० धाने पोषणे साधु यत् । १सप्तमे (धान) ख्याते व्रीहादौ "यस्यं क्षेत्रगतं प्रोक्तं सप्तमं धान्यसञ्ज्ञितं" स्मृतिः । धान्यवर्गः सगुणोऽभिहितो भावप्र० यथा "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् । शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् । शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः । यवोदिकं शूकधान्यं सप्तादयं शिम्बिधान्यकम् । कङ्गुदिकं क्षुद्रधान्यं तृणधान्यञ्च तत् स्मृतम् ।

तत्र शालिधान्यस्य लक्षणं गुणाश्च "कण्डनेन विना शुक्ला हैमन्ताः "शालयः स्मृताः" । अथ शालीनां नामानि । रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः । सुगन्धकः कर्दमको महाशालिश्च दूषकः । पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः । दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः । इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः । ग्रन्थविस्तरभीतेस्ते समस्ता नात्र भाषिताः" ।

अथ तेषां गुणाः "शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्च्चसः । कषाया लघवो रुच्याः स्वर्याः हृद्याश्च हृंहणाः । अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा । शालयो दग्धसम्ज्ञाताः कषाया लघुपाकिनः । स्वेदमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः । कैदारा वातपित्तघ्नाः गुरवः कफशुक्रलाः । कषाया अल्पवर्च्चस्का मेध्याश्चैते बलावहाः" । कैदाराः कृष्टक्षेत्रजाः उप्ताः । "स्थलजाः स्वादवः पित्तकफघ्ना वातपित्तदाः । किञ्चित्तिक्ताः कषायाश्च विपाके कटुका अपि । स्थलजाः अकृष्टभूमिजाताः स्वयंजाता । वापिता मधुरा हृद्या बल्याः पित्तप्रणाशनाः । श्लेष्मलाश्चाल्पवर्च्चस्काः कषाया गुरवो हिमाः" । वापिताः कृष्टक्षेत्रे अकृष्टक्षेत्रे

च। "वापितेभ्यो गुणैः किञ्चित् हीनाः प्रोक्ता अवापिताः"। कृष्टक्षेत्रे अकृष्टक्षेत्रे वा। 'रोपितास्तु नवा दृष्टाः पुराणा लघवः स्मृताः। तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः। छिन्नरूढाः हिमा रूक्षा बल्याः पित्तकफापहाः। बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः"।

अथ रक्तशालेर्गुणाः "रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित्। चक्षुष्यो मूत्रलः स्वर्ण्यः शुक्रलस्तृड्ज्वरापहः। विषव्रणश्वासकासदाहतृड्रक्तपुष्टिदः। तस्मादल्पान्तरगुणाः शालयो महदादयः"। रक्तशालिः (दाउदखानी) इति लोके मगधदेशे प्रसिद्धः।

अथ व्रीहिधान्यस्य लक्षणं गुणाश्च। "वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः। कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालासुखो जतुमुख इत्याद्याः व्रीहयः स्मृताः। कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः। पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते। कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कटाण्डकउच्यते। शालासुखः कृष्णशूकः कृष्णतण्डुल उच्यते। लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः। व्रीहयः कथिताः पाके मधुरा वीर्यतो हिमाः। अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः। कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे"।

अथ षष्टिकानां लक्षणं गुणाश्च। "गर्भस्था एव ये पाकं यान्ति ते षष्टिका मताः"। अथ षष्टिकानां नामानि। "षष्टिका शतपुष्पश्च प्रमोदकसुकुन्दकौ। महाषष्टिक इत्याद्याः षष्टिकाः सप्तदाहृताः। एतेऽपि व्रीहयः प्रोक्ता व्रीहिलक्षणदर्शनात्। षष्टिका मधुराः शीता लघवो बद्धवर्च्चसः। वातपित्तप्रशमनाः शालिभिः सदृशाः गुणैः"।

तत्र षष्टिकाया गुणाः। "षष्टिका प्रवरा तेषां लघ्वी स्निग्धा त्रिदोषजित्। स्वादी मृदी व्याहिणी च बलदा ज्वरहारिणी। रक्तशालिगुणैस्तुल्या ततः स्वल्पगुणाः परे। षष्टिका (षाठी) इति लोके।

अथ शूकधान्यानि। तेषु यवाः प्रसिद्धाः। कृतियवः पीतशूकः कृष्णारुणवर्णो यवः। तोक्यो हरितो निःशूकः स्वल्पो यवः यवेति प्रसिद्धः। तेषां नामानि गुणाश्च। "यवस्तु पीतशूकः स्यान्निःशूकोऽतियवः स्मृतः। तोक्यस्तद्वत्सहरितस्ततः स्वल्पश्च कीर्त्तितः। यवः कषायो मधुरः शीतलो लेखनो मृदुः। व्रणेषु तिलवत् पथ्यो रूक्षो मेधाग्निवर्द्धनः। कटुपाकोऽनभिष्यन्दी स्वर्यो बलकरो गुरुः। बद्धवातमलो वर्ण्यस्थैर्य्यकारी च पिच्छिलः। कण्ठत्वगामयश्लेष्मपित्तमेदप्रणाशनः। पीनसश्वासकासोरुस्तम्भलोहितलट्टप्रणुत्। अस्मादतियवो न्यूनस्तोक्यो न्यूनतरस्ततः।

अथ गोधूमस्य नामानि लक्षणं गुणाश्च। "गोधूमः सुमनोऽपि स्यात् विविधः स च कीर्त्तितः। महागोधूम इत्याख्यः पश्चाद्देशात् समागतः। महागोधूमः। (बड़गोहुम) इति लोके। "मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा। निःशूकौ दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः। गोधूमो मधुरःशीतो वातपित्तहरो गुरुः। कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः। जीवनो हृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत्। कफप्रदो नवीनो नतु पुराणः। पुराणयवगोधूमक्षुद्रजाङ्गलशूलभागिति" वाग्भटेन यवस्य गृहीतत्वात्। "मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः। शुक्रला हृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः"।

अथ शिम्बीधान्यानि तत्पर्य्यायानाह। "शमीजाः शिम्बिजाः शिम्बीभवाः सूर्य्याश्च वैदलाः। तेषां गुणाः। "वैदलामधुरा रूक्षाः कषायाः कटुपाकिनः। वातलाः कफपित्तघ्नबद्धमूत्रमलाः हिमाः। ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः। मुद्गमसूरयोरनाध्मानकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वात्।

तत्र मुद्गस्य गुणाः। "मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरोहिमः। स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा। मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा। श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वो लघुः स्मृतः। सुस्तुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः। चरकादिभिरप्युक्त एव एव गुणाधिकः।

अथ माषः (उरद)। माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः। स्वंसनस्तर्पणो बल्यः शुक्रलो हृंहणः परः। भिन्नमूत्रमलस्तन्वो मेदःपित्तकफप्रदः। गुदकीलार्द्दितश्वासपङ्क्तिशूलानि नाशयेत्। कफपित्तकरा माषा हृन्नाकं कफपित्तकृत्"।

अथ राजमाषस्य (बरबटी) राजमाषो महामाषश्चपलश्चबलः स्मृतः। राजमाषो गुरुःस्वादुस्तुवरस्तर्पणः

सरः। रूक्षो वातकरो रुच्यः स्तन्यो भूरिबलप्रदः। श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्त्तितः। यो महांस्तेषु भवति स एवोक्तो गुणाधिकः"।

अथ निष्पावः। स तु राजशिम्बीबीजं (मेटवासु) इति लोके। "निष्पावो राजशिम्बिः स्यादु बल्लकः श्वेतशिम्बिकः। निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः। कषायःस्तन्यपित्तास्रमूत्रवातविबन्धकृत्। विदाहृष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः"।

अथ मकुष्ठः। मकुष्ठोवनसुद्गः स्यान्मकुष्ठकसकुष्ठकौ। मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः। वह्निजिन् मधुरः पाके कृमिकुष्ठज्वरनाशनः"।

अथ मसूरः। "मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका। मसूरो मधुरः पाके संग्राही शीतलो लघुः। कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः।

अथ आढकी (रहरी)। "आढ़की तुवरी चापि सा प्रोक्ता शक्रपुष्पिका। आढ़की तुवरा रूक्षा मधुरा शीतला लघुः। ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्"।

अथ चणकः (छोला)। "चणको हरिमन्थः स्यात् शकलप्रिय इत्यपि। चणकः शीतलो रूक्षः पित्तरक्तकफापहः। लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः। स चाङ्गारेण सम्भृष्टस्तैलभृष्टश्च तद्गुणः। आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः। शुष्कभृष्टोऽतिरूक्षश्च वातकुष्ठप्रकोपणः। स्निग्धः पित्तकफं हन्यात् स्रपः क्षोभकरो मतः। आर्द्रोऽतिकोपलो रुच्यः पित्तशुक्रहरो हिमः। कषायो वातलो ग्राही कफपित्तहरो लघुः।

कलायः (केराव)। कलायो वर्त्तुलः प्रोक्तः सतीनश्च हरेणुकः। कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः।

अथ त्रिपुटः (खेसारी)। त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ। त्रिपुटो मधुरस्तिक्त स्तुवरो रूक्षो भृशम्। कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा। किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः।

अथ कुलत्थी। कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ। कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत्। लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान्। हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान्। स्वेदसंग्राहको भेदोज्वरकृमिहरः परः।

अथ तिलः। तिलः कृष्णः सितो रक्तः स वर्ण्योऽल्पतिलः स्मृतः। तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः। विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत्। बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः। दन्त्योऽल्पमूत्रकृद् ग्राही वातघ्नोऽग्निस्मृतिप्रदः। कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः। अन्ये हीनतराः प्रोक्तास्तज्जैरक्षादयस्तिलाः।

अथ अतसी (तिसि)। अतसी नीलपुष्पी च पार्वती स्वादुमा क्षुमा। अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः। उष्णासृक्शुक्रवातघ्नी कफपित्तविनाशिनी।

अथ तुवरी (तोरी तोड़ीति) लोके। तुवरी ग्राहिणी प्रोक्ता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोष्ठकृमिप्रणुत्।

अथ सर्षप (रक्तसरीषो पिअरी सरीसो)। सर्षपः कटुकः स्नेहस्तुन्दुभश्च कदम्बकः। गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते। सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः। तीक्ष्णोष्णः कफवातघ्नोरक्तपित्ताग्निवर्द्धनः। रक्तोहरो जयेत् कण्डूं कुष्ठकोष्ठकृमिग्रहान्। यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः।

अथ राजी (कृष्णा राइ)। राजी तु राजिका तीक्ष्णगन्धा कृष्णनिकासुरी। चवः स्रवाभिजनकः कृमिकृत् कृष्णसर्षपः। राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्। किञ्चिद्रूक्षाग्निदा कण्डूकुष्ठकोष्ठकृमीन् हरेत्। अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका।

अथ क्षुद्रधान्यम्। क्षुद्रधान्यं कुधान्यञ्च तृणधान्यमिति स्मृतम्। क्षुद्रधान्यमनुष्णं स्यात् कषायं लघु लेखनम्। मधुरं कटुकं पाके रूक्षञ्च क्लेदशोषकम्। वातकृत् बद्धविट्कञ्च पित्तरक्तकफापहम्।

तत्र कङ्गुः (काङ्नी)। स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णा रक्ता सिता तथा। पीता चतुर्विधा कङ्गुस्तासाम्पीता वरा स्मृता। कङ्गुस्तु भग्नसन्धानवातकृत् हृंहणी गुरुः। रूक्षा श्लेष्महरातीव वाजिनां गुणकृद् भृशम्।

अथ चीना। चीनाकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद्गुणैः। [पित्तकृत्।

अथ श्यामा। श्यामाकः शोषणो रूक्षो वातलः कफ-

अथ कोद्रवः। कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः। कोद्रवो वातलो ग्राही हिमपित्तकफापहः। उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्।

अथ चारुकः (सरबीज)। चारुकः सरबीजः स्यात्

कथ्यन्ते तद्गुणा अथ। चारुको मधुरो रूक्षो रक्तपित्तकफापहः। शीतलो लघुर्हृद्यश्च कषायो वातकोपनः।

अथ वंशबीजम्। यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः। बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः।

अथ कुसुम्भबीजम्। कुसुम्भबीजं वरटा सैव प्रोक्ता वरट्टिका। वरटा मधुरा स्निग्धा रक्तपित्तकफापहा। कषाया शीतला गुर्वी स्वादहृद्याऽनिलापहा।

अथ गवेधुका (गरहेडुका)। गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम्। गवेधुः कटुका स्वादी कार्य्यकृत् कफनाशिनी।

अथ नीवारः। प्रसाधिका तु नीवारस्तृणधान्यमिति स्मृतम्। नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्।

अथ (पुनेरा)। पवनाक्षोद्भिदः स्वादुर्लोहितः स्निग्धपित्तजित्। हृद्यस्तुवरो रूक्षः क्लेदकृत् कथितो लघुः। धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम्। तत्तु वर्षोषितं पथ्यं यतो लघुतरं हितम्। वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति। न तु त्यजति वीर्यं स्वं क्रमात्सञ्जायतः परम्। एतेषु यवगोधूमतिलमाषा नवा हिताः। पुराणा विरसा रूक्षा न तथा गुणकारिणः। पुराणा वर्षद्वयादुपरिस्थिताः। यवादयो नवाः स्वस्थान् प्रति हिताः। पथ्याशिनान्तु पुराणा हिताः। "पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यमुगिति वसन्ते वाग्भटेनोक्तत्वात्"।

आर्त्तादिकर्मोपयोगिधान्यभेदाश्च हेमा० दा० उक्ता यथा मार्कण्डेयपुराणे "जज्ञिरे तानि बीजानि ग्राम्यारण्याभिधानि च। ओषध्यः फलपाकान्ताः सर्वे सप्तदश स्मृताः। व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुकाणितलाः। प्रियङ्गवः कोविदाराः कोरदूषाः सतीनकाः। माषमुद्गामसूराश्च निष्पावाः सकुलीत्थकाः। आढक्यश्चणकाश्चैव चीनाः सप्तदश स्मृताः। इत्येता ओषधीनान्तु ग्राम्याणां जातयः स्मृताः। ओषध्यो यज्ञिया ज्ञेया ग्राम्यारण्याश्चतुर्दश। व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुसर्षपाः। माषामुद्गाः सप्तमाश्च कृष्णमाश्च कुलीत्थकाः। ग्रामाकाश्चैव नीवारा जर्तिलाः सगवेधुकाः। कोविदारसमायुक्तास्तथा वेणुयवाश्च ये। ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश" "स्कन्दपुराणे "यवगोधूमधान्यानि तिलाः कङ्गुकुलीत्थकाः। माषामुद्गामसूराश्च निष्पावाः ग्रामसर्षपाः। गवेधुकाश्च नीवारा आढक्योऽथ सतीनकाः। चणकाश्चीनकाश्चैव धान्यान्यष्टादशैवं तु" धान्यानि व्रीहयः। नीवाराः, आरण्यव्रीहयः। सतीनका वर्तुलकलायाः। चीनकाः षष्टिकविशेषाः। षट्त्रिंशन्मतात् "यवा गोधूमधान्यानि तिलाः कङ्गुस्तथैव च। ग्रामाकश्चीनकश्चैव सप्तधान्यमुदाहृतम्"।

"एकादश्यां विशेषेण शस्यमात्रं परित्यजेत्। फलं मूलं जलादीनि किञ्चिद्भक्ष्यं प्रकल्पयेत्। अन्नं तु धान्यसम्भूतं गिरिजे! भुवि जायते। धान्यानि विविधानीह जगत्यां शृणु तान्यथ। ग्रामामाषमसूराश्च धान्यकोद्रवसर्षपाः। मकुष्ठो राजमाषाश्च तुवरोजुमरस्तथा। यवगोधूमसुद्गाश्च तिलकङ्गुकुलत्थकाः। गवेधुकाश्च नीवारा आढकश्च कलायकाः। माणडूको वज्रको रङ्गः कौचको वङ्गकस्तथा। तिलकाश्चणकाद्याश्च धान्यानि कथितानि वै। एतद्धान्यसमुद्भूतमन्नं भवति शोभने!। अन्नत्यागे व्रते भक्ष्यमेतदेव विवर्जयेत्" पाद्मोत्तरखण्डम्।

धान्यमानन्तु हेमा० दा० उक्तं यथा भविष्यपुराणे "पलद्वयन्तु प्रसृतं द्विगुणं कुडवं मतम्। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः। कुम्भो द्रोणद्वयं सूर्पः खारी द्रोणास्तु षोडश"। विष्णुधर्मोत्तरे "पलञ्च कुडवः प्रस्थ आढको द्रोण एव च। धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः। द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते। कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्त्तिता"। वाराहपुराणे "पलद्वयन्तु प्रसृतम् सृष्टिरेकं पलं स्मृतम्। अष्टसृष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम्। पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः। चतुराढको भवेत् द्रोण इत्येतन्मानलक्षणम्। चतुर्भिः सेतिकाभिस्तु प्रस्थ एकः प्रकीर्त्तितः" सृष्टिर्यजमानस्येति केचित्। पाद्मे "चतुर्भिः कुडवैः प्रस्थः प्रस्थैश्चतुर्भिराढकः। चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणम्"। अथ गोपथब्राह्मणे। "पञ्चकृष्णलको माषस्तैश्चतुःषष्टिभिः पलम्। पलैर्द्वात्रिंशद्भिःप्रस्थो मागधेषु प्रकीर्त्तितः। आढकस्तैःश्चतुर्भिश्च द्रोणः स्याच्चतुराढकः"।

धान्यच्छेदनादिविहितनक्षत्रादि ज्यो० त० उक्तं दीपिकायां "ग्राम्याजपादहिधनानलतोयशक्रचित्रेतरेषु च कुजार्कजवारवर्जम्। शस्तेन्दुयोगकरणेषु तिथौ विरिक्ते या-

न्यच्छिदिः स्थिरनरर्क्षमृगोदयेषु । बलभद्रः "रेवतीहस्तमूलेषु श्रवणे नागयाम्ययोः । पितृदैवे तथा सौम्ये धान्यच्छेदं मृगोदये" अथ धान्यच्छेदनप्रकारः । "सपत्नौ मासमुद्गौ च यवधान्ये सकाण्डके । छिन्द्यात्तिलञ्च निष्पत्रमेतत् पाराशरं मतम्" पराशरः । "न सृष्टिग्रहणं कुर्यात् कदाचिद्वटपौषयोः । ईशाने लवनं कुर्यात् सार्द्धसृष्टिद्वयं शुचिः । पौष्णे पुष्ये शुभाहे वा पूजयित्वेष्टदेवताम् । शस्यविघ्नप्रशान्त्यर्थं क्षेत्रे वा हव्यभोजनम्" । बौधायनः "रथाश्वगजधान्यानां गवां चैव रजः शुभम् । अथाशस्तं समूहिन्याः श्वाजाविखर वायसाम्" । समूहिनी संमार्जनी । कल्पचिन्तामणौ-मेधिरुक्ता यथा । "वटश्च सप्तपर्णश्च गाम्भारी शालनी तथा । औदुम्बरी तथा धात्री या चान्या क्षीरधारिणी । स्त्रीनाम्नी कर्षकैर्नित्यं मेधिः कार्या फलप्रदा" । अधिकं कृषिशब्दे दृश्यम् ।

धान्यकोष्ठक न० ६त० । धान्यस्थापनार्थे गृहे (गोला) हला०

धान्यचमस पु० चम्यते चम-कर्मणि असन् । धान्यविकारभेद एव चमसः । चिपिटके त्रिका० ।

धान्यत्वच् स्त्री ६त० । तुषे अमरः ।

धान्यधेनु स्त्री दानार्थे धान्यकल्पितायां गव्याम् । तद्विधिः "विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः । तमिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् । यां दत्त्वा सर्वपापेभ्यः शशाङ्क इव राहुणा"(मुच्यते इति शेषः) । दशधेनुप्रदानेन यत्फलं राजसत्तम ! । तत्सर्वमेव प्राप्नोति व्रीहिधेनुप्रदो नरः । कृष्णाजिनं ततः कृत्वा प्राग्वदृतुसंन्यसेद्बुधः । गोमयेनानुलिप्ताङ्गीं शोभनां वस्त्रसंयुताम् । पूजयेद्वेदिमध्ये स्वाद्रोणैश्चापि चतुष्टयैः । मध्यमा च तदर्द्धेन विस्तृताष्टाग्रं न कारयेत् । चतुर्थांशेन धेन्वा वै वत्सन्तु परिकल्पयेत् । कर्त्तव्ये रुक्मशृङ्गे तु राजतक्षुरसंयुता । गोरूपः पूर्ववद्ब्राह्मणगुरुचन्दनलघा । मुक्ताफलमया दन्ता हेतक्षौद्रमयं मुखम् । प्रशस्तपत्रश्रवणा कांस्यदोहनकान्विता । इक्षुयष्टिमयाः पादाः क्षौमपुच्छसमन्विता । नागफलसमोपेता रत्नगर्भसमन्विता । पादुकोपानहौ कृत्वे भाजनं दर्पणं तथा । इत्येवं रचयित्वा तां कृत्वा दीपार्चनादिकम् । पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरो गृही । त्रिःप्रदक्षिणमावृत्य मन्त्रेणानेन कीर्त्तयेत् । तव विप्र ! महाभाग ! वेदवेदाङ्गपारग ! । या मेताञ्च मया दत्तां गृह्णीष्व त्वं द्विजोत्तम ! प्रीयतां मम देवेशो भगवान् मधुसूदनः । त्वमेका लक्ष्मीर्गोविन्दे स्वाहा चासि विभावसोः । शक्रे शची तु विख्याता मेधा सुनिषु सत्तमा । तस्मात् सर्वमयी देवी धान्यरूपेण संस्थिता । एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् । दत्त्वा प्रदक्षिणं कृत्वा तं क्षमाप्य द्विजोत्तमम् । यावच्च पृथिवी सर्वा वसुरत्नानि भूपते ! । तावत् पुण्यमयाधिक्यं व्रीहिधेनोश्च तत्फलम् । तस्मान्नरेन्द्र ! दातव्या भुक्तिमुक्तिफलप्रदा । इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् । विमानेनार्कवर्णेन किङ्किणीरत्नमालिना । स्तूयमानोऽप्सरोभिश्च प्रयाति शिवमन्दिरम् । यावच्च स्मरते जन्म तावत् स्वर्गे महीयते । ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् । एवं हरेण प्रोद्गीर्णं श्रुत्वा वाक्यं नरोत्तमः । सर्वपापविशुद्धात्मा रुद्रलोके महीयते" । वराहपुराणोक्तः ।

धान्यपञ्चक न० ६त० । भावप्र० उक्ते धान्यविशेषाणां पञ्चके । धान्यशब्दे भावप्र० वाक्यं दृश्यम् । २अतिसारे पाचनविशेषे यथा "धान्यपञ्चकविस्राभ्यं नागरैः पाचितं जलम् । आमशूलविबन्धघ्नं पाचनं नित्यसेवितमिति" भावमिश्रः ।

धान्यमात त्रि० धान्यं माति मा-टच् । धान्यमापके "मातुरुत् संख्यासंभद्रपूर्वायाः पा० ऊत्वे पूर्वायाः इति स्त्रीत्वनिर्देशात् स्त्रीत्वविशिष्टमातृशब्दस्यैव उत् नेतरस्येति सि०कौ० । तेन धान्यमातुरपत्यम् धन्यमात इत्येव

धान्यमाय त्रि० धान्यं माति मा-घञ् युक् । १धान्यमानकारके २तद्विक्रेतरि च तस्य धान्यमानेनैव विक्रेतृत्वात् ।

धान्यराज पु० धान्यानां राजा-टच् समा० । यवे राजनि०

धान्यवनि पु० धान्यस्य वनिः राशिः । धान्यराशौ उज्ज्वल०

धान्यवर्द्धन न० धान्यस्य वर्द्धनयुक्ततया वर्द्धनं यत्र । (बाड़ी) वृद्धिभेदे त्रिका० ।

धान्यवीर पु० धान्येषु वीर इव बलहेतुत्वात् । माषे (कलाइ) ।

धान्यशीर्षक न० ६त० । धान्यस्य मञ्जर्याम् धान्याग्रादयोऽप्यत्र । जटाधरः ।

धान्यशैल पु० दानार्थकल्पिते धान्यमये पर्वते तद्विधानादि हेमा० दा० पद्मपु० उक्तं यथा ।

"तस्माद्विधानं वक्ष्यामि पर्वतानामनुत्तमम् । प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः । गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः । पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः । सप्तमो घृतशैलश्च रत्नशैलस्तथाऽष्टमः ।

राजतो नवमस्तद्वद्गमः शर्कराचलः। वक्ष्ये विधान मेतेषां यथावदनुपूर्वशः। अयने विषुवे चैव व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायामुपरागे शशिक्षये। विवाहोत्सवयज्ञे वा द्वादश्यामथ वा पुनः। शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे च विधानतः। धान्यशैलादयो देया यथाश्रद्धं विधानतः। तीर्थे वायतने वापि गोष्ठे वापि भवाङ्कुशे। मण्डपं कारयेद्भक्त्या चतुरस्रसुदङ्मुखम्। प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधानतः"। मण्डपलक्षणन्तु, परिभाषायां प्रतिपादितम्; अत्र चायं विधानक्रमः दानदिवसात् पूर्वेद्युः पूर्वाह्णे कृत स्नानादिक्रियो यजमानः अमुकपर्वतदानमहं श्वः करिष्ये इति कृतसंकल्पो वृद्धिश्राद्धमाभ्युदयकं विधाय पूर्ववत् पुण्याहवाचनं कुर्यात्, तदनन्तरम् अद्य अमुकस्मिन् देशे अमुकस्मिन् काले अमुकपर्वतदानेनाहं यक्ष्ये तत्र तदङ्गभूतहोमादिके अमुकशर्माणं अमुकवेदाध्यायिनम् ऋत्विजं त्वामहं वृणे इति। पुराणवेदविदाञ्चतुर्णामृत्विजां वरणं, तथा ओम् अद्य अमुकस्मिन् देशे अमुकस्मिन् काले अमुकपर्वतदानेनाहं यक्ष्ये तत्र तदङ्गभूतानि कर्माणि कर्तुं कारयितुं च अमुकगोत्रं अमुकशर्माणं अमुकवेदाध्यायिनं गुरुं त्वामहं वृणे इत्याचार्यं वृणुयात् वृतोऽस्मीति सर्वत्र प्रतिवचनं तत्र तावत् मधुपर्केणार्च्चयेदितिसर्वपर्वतदानसाधारणोऽयं विधिः। "गोमयेनोपलिप्तायां भूमावास्तीर्य्य वै कुशान्। तन्मध्ये पर्वतं कुर्यात् विष्कम्भपर्वतान्वितम्। धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः। मध्यमः पञ्चशतिकः कनिष्ठः स्यात् त्रिभिः शतैः"। द्रोणलक्षणमुक्तं परिभाषायाम्। प्रमाणस्थकरचरणस्य पुंसो द्वादशभिः प्राकृतिभिः कुडवो भवति अनेन कुडवेन चतुर्गुणोत्तरं प्रस्थाढकद्रोणा भवन्ति अतः चतुःषष्ट्या कुडवैर्द्रोणो भवतीति कल्पतरुणा व्याख्यातम्। "मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णवृत्तत्रयसंयुतः स्यात्। पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः। पश्चाच्च मारकतनीलरत्नैः सौम्येन वैदूर्यसरोजरागैः। श्रीखण्डखण्डैरभितः प्रवालतान्वितः शुक्तिशिलातलः स्यात्। ब्रह्माऽथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्। मूर्द्ध्व्यवस्था गतमत्सरेण कार्याः सुवर्णेन तथा द्विजौघाः। चत्वारि शृङ्गाणि च राजतानि नितम्बभागेष्वपि राजतः स्यात्। आर्द्रेक्षुवंशाद्वृतकन्दरस्तु वृतोदकः प्रस्रवणश्च दिक्षु। शुक्लाम्बराण्यम्बुधरावली स्यात् पूर्वेण पीतानि च दक्षिणेन। वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोघनाली। रौप्यान्महेन्द्रप्रमुखानथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण। नानाफलाली च समन्ततः स्यात् मनोरमं माल्यविलेपनं च। वितानकं चोपरि पञ्चवर्णमम्लानपुष्पाभरणं सितञ्च"। मेरुरित्यादि, महाव्रीहयो, राजाक्षशालयः, वृत्तत्रयसंयुत, इति दक्षिणे मन्दारः, उत्तरे पारिजातो, मध्ये कल्पतरुरिति वृत्तत्रयं, तथा पूर्वतो हरिचन्दनं, पश्चिमे सन्तान इति तरुद्वयं च कुर्यात्, एते सर्वपर्वतेषु कर्त्तव्या इति शर्कराचले वक्ष्यमाणत्वात् सर्वेषाञ्च पञ्चशाखत्वमवधेयमिति। वज्रं, हीरकं। मारकतं, मरकतं। सरोजरागः, पद्मरागः। मुक्ताफलादीनि च यथादिशं वक्ष्यमाणराजतशृङ्गेषु निवेशनीयानि। पुरारिः, महेश्वरः। ब्रह्मादिलक्षणमुक्तं ब्रह्माण्डदाने। मूर्द्ध्व्यवस्था उपरिदेशस्थिताः। गतमत्सरेण, वित्तशाठ्यरहितेन। द्विजौघाः, पक्षिसमूहाः। दिवौका इति क्वचित्पाठः। तत्र आदित्यावसवोरुद्रा दिवौकाः। तेषु, वस्त्रादिलक्षणमुक्तं ब्रह्माण्डदाने, रुद्रलक्षणं विश्वचक्रे। इक्षुरेव वंशः, वृतमेवोदकं, वस्त्राण्येव मेघसमूहाः कर्बुराणि, चित्राणि। लोकपालक्षणमुक्तं ब्रह्माण्डदाने। "इत्थं निवेश्यामरशैलमग्रं मेरोश्च विष्कम्भगिरीन् क्रमेण। तुरीयभागेन चतुर्द्दिशन्तु संस्थापयेत् पुष्पविलेपनाढ्यान्। पूर्वेण मन्दरमनेककल्पैः युक्तं युक्तं गणैः कनकभृङ्गदण्डचिह्नम्। कामेन काञ्चनमयेन विराजमानमाकारयेत् कुसुमवस्त्रविलेपनाढ्यम्। क्षीरार्णोदरसाऽथ वनेन चैव रौप्येण शक्तिघटितेन विराजमानम्। याम्येन गन्धमदनस्य निवेशनीयो गोधूमसञ्चयमयः कलधौतलम्बा। हैमेन यक्षपतिना वृतमानसेन वस्त्रैश्च राजतवनेन च संयुतः स्यात्। पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पल-हिरण्मयहंसयुक्तम्। आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वितं दधिसितोदरसस्यपाद्ये। संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि माषमयं सवस्त्रम्। पुष्पैश्च हेमघटपादपशैलरत्नमाकारयेत्कनकपेतुविराजमानम्। माक्षीकरङ्गसरसा च वनेन तद्वद्रौप्येण भास्करवता च युतं विधाय"। इत्थन्निवेश्येत्यादि, एवं मेरुं निवेश्य तच्चतुर्थभागपरिमितेन पृथग्द्रव्येण एकैकं विष्कम्भगिरिं कुर्यात् न तु

चतुर्थभागेन चतुरोऽपीति, तथाच लवणाचले वक्ष्यति "चतुर्थांशेन विष्कम्भपर्वतान् कारयेत्, पृथगिति"। पूर्वेण मन्दरमिति, सन्निधानान्मन्दरोऽपि व्रीहिमय एव, गणैर्युक्तमिति, पुरुषाकृतिगणत्रयान्वितमित्यर्थः। अनेकफलाढ्यीयुक्तं यवैरिति क्वचित्पाठः। तस्य समूलत्वे यवानुष्ठानमपि कार्यम्। कनकघटितेन भद्रकदम्बाख्येन वृक्षेण लक्षितम्। कामलक्षणमाह विश्वकर्मा "चापबाणधरः कामो रतिप्रेयान् सुमध्यमः। आरोढो नन्दनो वाजी चापवान् विश्वमादकः" इति। क्षीरपूरितेन, अरुणोदसंज्ञितेन रूप्यघटितेन, सरसा वनेनापि रूप्यघटितेन विराजमानमिति सम्बन्धः। याम्येनेत्यादि, गन्धमदनो, गन्धमादनः, कलधौतजं वेति, सुवर्णजम्बुवृक्षेण। यक्षपतिरूपसक्तं श्रीप्रश्ने "हस्वगापिङ्गाक्षञ्च गदिनं पीतविग्रहम्। पुष्पकस्यन्दनाध्यक्षं ध्यायेत् शिवसखं सदेति"। वृतमानसेनेति वृतपूरितेन मानसाभिधानेन राजतेन सरसा। पश्चादिति, पश्चिमदेशे दधिपूरितसितोदं नाम रजतनिर्मितं सर इति, विपुलशैलं, विपुलं नाम पर्वतं माक्षीकभद्रसरसेति, माक्षीकं, मधु तत्पूरितेन रजतमयेन भद्राभिधानेन सरसा युतमित्यर्थः। अत्र च कामदेवस्य प्रत्यङ्मुखत्वं हंसस्य प्राङ्मुखत्वं कनकधेनोर्दक्षिणामुखत्वं यक्षपतेरुदङ्मुखत्वं च शर्कराचलस्थितदिग्विशेषापेक्षं दैवतेषु सर्वशैलेषु वेदितव्यं, चरमव्यवस्था कुतोऽपि शास्त्राद्व्यवस्थितिरिति। एते च कामदेवादयः कदम्बादीनां निजपर्वतवृक्षाणामधस्तात्कर्त्तव्याः। "होमैश्चतुर्भिरथ वेदपुराणविद्भिर्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः। पूर्वेण हस्तमितमत्र विधाय कुण्डं कार्यस्तिलैर्यवघृतेन समित्कुशैश्च। रात्रौ च जागरमनुव्रतगीतवृत्तैरावाहनञ्च कथयामि शिलोच्चयानाम्"। पूर्वेणेत्यादि मण्डपस्य पूर्वभागे हस्तमात्रं कुण्डं विधाय तस्य पूर्वोत्तरदिग्विभागे तुलापुरुषोक्तलक्षणां देवतावेदिं कृत्वा तत्र विनायकादिदेवताभ्यः पूर्ववत् पूजां विदध्यात् अनन्तरमृत्विजोऽग्निस्थापनान्ते "ग्रहाणां लोकपालानामित्यादिवक्ष्यमाण देवताभ्यस्तत्तल्लिङ्गमन्त्रैस्तिलादिद्रव्येण होमं कुर्युः। "यहस्ते त्वथ होतव्ये कुर्यात् कुण्डं करात्मकम्" इत्युक्तेरत्र हस्तपरिमितकुण्डोपदेशादाहुतिसहस्रं होतव्यमिति दानविवेककारः। अत्र विनायकादयो द्वात्रिंशद्देवा, द्वादशादित्याः, एकादशरुद्राः, दश लोकपालाः, अष्टौ वसवः, ब्रह्म-विष्णु-शिव-सूर्याश्चत्वारः काम धनद-हंस-कामधेनव चत्वारः इत्येवमेकाशीतिसंख्यकेभ्यो देवेभ्यः ग्रहादीनां प्रतिदैवतं त्रयोदशाहुतिहोमे त्रिपञ्चाशदधिकमाहुतिसहस्रं सम्पद्यते। अष्टशतन्तु होतव्यमिति ब्रह्माण्डपुराणे वक्ष्यति। तिलादीनि चत्वार्येव हविर्द्रव्याणि हुताशानीत्यवगन्तव्यम्। समिधः, साधारणत्वादुदुम्बरस्य। होमादनन्तरं पुष्पोपहारानादाय वक्ष्यमाणमन्त्रैर्यथाक्रमं पर्वतानावाहयेत्, तत्र मेरोरावाहनमन्त्रः। "त्वं सर्वदेवगणधामनिधे! विरुद्धमस्मद्दुष्टहेऽध्यमरपर्वत! नाशयाशु। क्षेमं विधत्स्व कुरुशान्तिमनुत्तमां नः सम्पूजितः परमभक्तिमता मया हि। त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः। मूर्त्तामूर्त्तपरं बीजमतः पाहि सनातनः। यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम्। रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे। यस्मादग्न्यमरैर्नारीभिश्च समं तथा। तस्मान्मामुद्धराशेषदुःखसंसारसागरात्। एवमभ्यर्च्य तं मेरुं मन्दरस्याभिपूजयेत्। अथ मन्दरस्य। यस्माच्चैत्ररथेन त्वं भद्राश्ववर्षकेण च। शोभसे मन्दर! क्षिप्रमतः पुष्टिकरो भव। अथ गन्धमादनस्य। यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन!। गन्धर्ववनशोभावानतः कीर्त्तिर्दृढास्तु मे। अथ विपुलपर्वतस्य। यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च। हिरण्मयाश्वत्थशिखस्तस्मात् पुष्टिर्ध्रुवास्तु मे। अथ सुपार्श्वस्य। उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च। सुपार्श्व! राजसे नित्यमतः श्रीरक्षयास्तु मे। एवमामन्त्र्य तान् सर्वान् प्रभाते विमले पुनः। स्नात्वाथ गुरवे दद्यात् मध्यमं पर्वतोत्तमम्। विष्कम्भपर्वतान् दद्यादृत्विग्भ्यः क्रमशो नृप। गावोदद्याच्चतुर्विंशादथ वा दश पार्थिव!। शक्तितः सप्त वाष्टौ वा पञ्च दद्यादशक्तिमान्। एकां वा गुरवे दद्यात् कपिलाञ्च पयस्विनीम्"। एवमामन्त्र्येति, दानदिनात् पूर्वदिवसे सर्वमिदमामन्त्रणादि विधाय गीतवादित्रादिभिर्निशामतिवाह्य ततः प्रभाते गुरुप्रभृतयो विहितस्नानादिक्रियाः पूर्णाहुतिपर्यन्तं सकलकर्म्मशेषं समाप्य कुण्डसमीपस्थापितकलसजलेन पूर्ववद्यजमानं स्नपयेयुः। यजमानोऽपि शुक्लाम्बरपरिधानः प्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रेण यथाक्रमं पर्वतान् प्रतिपादयेत्।

"पर्वतानामशेषाणामेष एव विधिः स्मृतः। त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः। ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्वशः। स्वमन्त्रेणैव सर्वेषु होमः प्र-

लेषु पठ्यते। उपवासो भवेन्नित्यमयक्तौ नक्तमिष्यते" सर्वत्राक्षारलवणमश्नीयादिति वक्ष्यमाणत्वादक्षारलवणं नक्तं वेदितव्यम्" "विधानं सर्वशैलानां क्रमशः शृणु पार्थिव! दानकालेषु ये मन्त्रा पर्वतेषु च यत्फलम्" अथ मन्त्रः "अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः। अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते। अन्नमेव यतोलक्ष्मीरन्नमेव जनार्दनः। धान्यपर्वतरूपेण पाहि तस्मान्नमोनमः"। एवमाचार्यादीन्, सम्पूज्य तदनुज्ञया अन्येभ्योऽपि दद्यात् ततोयजमानो वेद्यां पूर्ववद्देवताः सम्पूज्य नमस्कुर्यात्। गुरुस्तान्विसर्जयेत्, ततो 'यथाशक्ति ब्राह्मणभोजनम् कृतोपवासस्य यजमानस्य दानदिने क्षारलवणवर्जनं सर्वपर्वतोपस्कराणाञ्च ब्राह्मणगृहप्रापणं शर्कराचलोक्तं सर्वत्र द्रष्टव्यम्। "अनेन विधिना यस्तु दद्याद्धान्यमयङ्गिरिम्। मन्वन्तरशतं सार्द्धं देवलोके महीयते। अप्सरोगणगन्धर्वैराकीर्णेन विराजितः। विमानेन दिवः पृष्ठमायाति सुरसेवितः। कर्मक्षयाद्राजराज्यं प्राप्नोतीह न संशयः"। इत्यमेव मत्स्यपु०। धान्यपर्वतादयोऽप्यत्र। ब्रह्माण्डभविष्यपुराणोक्तो विधिश्च ततःपरं तत्र द्रष्टव्यः।

धान्या स्त्री धन्याक+पृषो०। (धनिया)ख्याते पदार्थे हेमच०।

धान्याक न० धन्याक+स्वार्थे अण् धान्यमकति अक—कुत्सितायां गतौ अण् उप०स०वा। (धनिया) ख्याते पदार्थे "धान्याकं तुवरं स्निग्धमहृद्यं मूत्रलं लघु। तिक्तं कटुष्णवीर्यञ्च दीपनं पाचनं स्मृतम्। ज्वरघ्नं रोचनं ग्राहि स्वादु पाके, त्रिदोषनुत्। तृष्णादाहवमिश्वासकासामार्शःक्रमिप्रणुत्। आर्द्रन्तु तद्गुणं स्वादु विशेषात् पित्तनाशनम्" भावप्र०।

धान्याकृत् त्रि० धान्यं कर्मणादिना करोति कृ—क्विप् वेदे पूर्वपददीर्घः। कर्मके "रूपन्तु बीजमिव धान्याकृतः" ऋ० १०।९४।१२।

धान्याम्ल न० "पादांशशालिसंयुक्तमम्ल बद्धाथ कम्बले। त्रिरात्रं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेत् करैः। कम्बलाद्गालितं स्वच्छं वालुकारहितञ्च यत्। तद्धान्याम्लमिति प्रोक्तमम्लसारणसिद्धये" भावप्र० उक्ते अम्लसारणोपयोगिवस्तुभेदे।

धान्याम्ल न० धान्येष्वभिषुतमम्लम्। काञ्जिके (आमानि)। "धान्याम्लं शालिचूर्णोत्थं कोद्रवादिकृतं भवेत्। धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम्। रुरुचौ वातरोगेषु सर्वेष्वास्थापने हितम्" भावप्र०।

धान्यायन पुंस्त्री धन्यस्य गोत्रापत्यम् कण्वा० फक्। धन्यगोत्रापत्ये।

धान्यारि पु० ६त०। धान्यशत्रौ अस्मिन्नर्थे शब्दकल्पद्रुमे त्रिलिङ्गतोक्तिः प्रामादिकी अरिशब्दस्य पुंलिङ्गत्वेन "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" पा० सूत्रेण तत्पुरुषे परवल्लिङ्गस्यैवानुशासनात्।

धान्यार्थिन् त्रि० "अर्थोऽस्यास्त्रिहिते" पा० "तदस्मिन्नस्ति" वार्त्ति० उक्तेः पुष्करा० अस्त्यर्थे इनि। धान्यरूपार्थविशिष्टे स्त्रियां ङीप्। "कालत इहास्तिधिर्न देशतः" यथात्र अस्तीत्यधिकरणान्वयाभावात् न इनिप्रसक्तिः।

धान्यास्थि न० ६त०। तुषे।

धान्योत्तम पु० धान्येष्वुत्तमः। शालिधान्ये राजनि०।

धान्व पु० धन्वदेशे भवः अण् वोपधत्वेऽपि वेदे नि० टिलोपः। धन्वदेशोद्भवे। "असितो धान्वो राजेत्याह" शत० ब्रा० १६।४।१४। लोके तु धान्वन इत्येव "उदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा" कामन्दकी०।

धान्वन्तर्य्य त्रि० धन्वन्तरिर्देवताऽस्य वा० ण्यत्। धन्वन्तरिदेवताके होमादौ "अग्नीषोमं वैश्वदेवं धान्वन्तर्य्यमनन्तरम्। प्रजानां पतये चैव पृथक् होमो विधीयते" भा० आनु० ९७ अ०।

धाम पु० धा—बा० मन्। गणदेवभेदे "देवाः साध्यास्तथा विश्वे तथैव च महर्षयः। यामा धामाश्च सौद्गल्या गन्धर्वाप्सरोगणाः" भा० व० २६ अ०। "पितरो जगतः श्रेष्ठो देवानामपि देवताः। तेऽपि तत्र समाजग्मुर्यामा धामाश्च सर्वशः" भा० श० ४५ अ०।

धामक पु० धानक+पृषो०। माषपरिमाणे भावप्र० हेमधानकौ इत्यत्र हेमधामकौ इति पाठान्तरम् धानकशब्दे द्रष्टव्यम्।

धामकेशिन् पु० धाम ज्योतीरूपः केशोऽस्यास्य इनि। ज्योतिर्मयकिरणयुक्ते सूर्य्ये "दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः" भा० व० ३ अ०।

धामच्छद पु० धामानि छादयति छादि—क्विप् सुलुक्। न्यूनानां पूरके अतिरिक्तानां समीकारके। "धामच्छदग्निरिन्द्रः" यजु० १८।७६। "वाग् वा अनुष्टुब् वाग धामच्छद्वाचैवास्य तदाप्नोति" शत०ब्रा०१०।१।३।१०।

धामन् न० धा—मनिन्। १गेहे २देहे ३त्विषि ४प्रभावे अमरः। ५रश्मौ ६स्थाने ७जन्मनि मेदि०। "आ ये धामानि दिव्यानि तस्थुः" ऋ० १०।१२। १"पुत्रं जनय सुश्रोणि धाम क्षत्रियतेजसाम्" भा० आ० १२३ अ०।

ष्टतेजसि "कार्शानवं धाम पतङ्गकान्तेः"। "पतत्यधो धाम विसारि सर्वतः" माघः। तत्र स्थाने "योगधारणयाऽग्नेय्या दग्ध्वा धामाविशत् स्वकम्" भाग०११।३।६। ६दामोपलक्षिते च "धाम्नो धाम्नो राजंस्ततो वरुण! नो मुञ्च" यजु० ६।२२। १०परमेश्वरे न०। "गुरुर्गुरुतमो धाम" विष्णुस०। "धाम ज्योतिः "नारायणः परं ज्योतिरिति" मन्त्रवर्णात्" भा० ११धने च "धामसाचमभिषाचं स्वर्विदम्" ऋ०३।५१।२। "धाम धनं तदर्थिभिः सह योजयितारम्" भा०।

धामनिका स्त्री धामन्येव स्वार्थे क। धमन्याम् रत्नमाला। धमनी स्वार्थे अण् ङीप्। धामनी धमन्यां शब्दच०।

धामनिधि पु० धामानि निधीयन्तेऽस्मिन् नि+धा-आधारे किप् ६त०। सूर्य्ये जटाधरः।

धामभाज् पुं० धाम यज्ञस्थानं भजते भज-क्विप् ६त०। यज्ञस्थानभागिनि देवे। "धामभाजो देवाः पाथोभाग् वनस्पतिः। धाम वै देवा यज्ञस्थाभजन्त पाथः पितरः" शांख्यब्रा०१०।६।

धामशस् अव्य० धाम्नि धाम्नि इत्यर्थे शस्। स्थाने स्थाने इत्यर्थे "तेषामिष्टानि विहितानि धामशः" ऋ०१।१६४।१५

धामार्गव पु० धाम्नोऽर्गं वाति-वा क। १अपामार्गे अमरः २पीतघोषायाम्, मेदि०३घोषके च रत्नमा०। "धामार्गवस्यापि मदनफलमज्जवदुपयोगो विशेषतस्तु परं गुल्मोदरकासश्वासश्लेष्मामयेषु" सुश्रुतः।

धाय त्रि० धा-ण। धारके "ददैर्दुःखस्य मादृग्भ्यो धायैरामोदसुत्तमम्" भट्टिः। "अनित्यत्वात् न कृद्योगे षष्ठी दुःखस्य धायैः पोषकैरित्यन्वयो वा" जयमङ्गलः।

धायस त्रि० वर्षेर्णित तोऽनुदत्तौ "बहिर्हाधाज्भ्यस्त्वन्दसि" उणा०असुन् युक् सावः १धारके "भूरसि भूमिरस्यदितिरसि विश्वधायाः विश्वस्य भुवनस्य धर्त्री" यजु० १३।१८। धेट-भावे असुन्। २पाने च "तुविष्टमाय धायसे" ऋ०१।१२०।२ "तुविष्टमाय प्रभूताय पानाय धायसे" भा०। [३।३०।७।

धायु त्रि० धा-उण् युक्। धारके "यस्मै धायुरदधाः" ऋ०

धाय्य पु०धा-कर्मणि ण्यत् युक्। १पुरोहिते धीयते समिदनया करणे नि० ण्यत्। २सामधेन्यामृचि स्त्री ततो दिगा० भवादौ यत् यत्योपान्त्योपौ। ३धाय्य तत्र भवे त्रि० "यजेति धाय्यारूपं प्रगाथा यजामहाः" यजु०१९।२४।

धार न० धाराया इदम् अण्। १वर्षोद्भवजले दिव्यपानीयप्रभेदे। तद्गुणभेदादि भावप्र० उक्तं यथा "धाराभिः पतितं तोयं गृहीतं स्फीतवासरा। शिलायां वसुधायां वा धौतायां पतितञ्च यत्। सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते। भाजने मृण्मये वापि स्थापितं धारमुच्यते। धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु। सौम्यं रसायनं बल्यं तर्पणं क्लादि जीवनम्। पाचनं मतिकृन्मूर्च्छा तन्द्रादाह श्रमक्लमान्। तृष्णां हरति तत् पथ्यं विशेषात् प्राङ्घि स्मृतम्"। राजनि० तु अन्यथोक्तं यथा "यदा स्वादाश्विने मासि सूर्य्यः स्वातीविशाखयोः। तदाम्बुजलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः। अन्यदा मृगशीर्षादिनक्षत्रेषु यदम्बुदैः। अभिवृष्टमिदं तोयं सामुद्रमिति संज्ञितम्। तयोर्गुणाः। "गाङ्गं जलं स्वादु सुशीतलञ्च रुचिप्रदं पित्तकफापहञ्च। निर्दोषमिष्टं लघु तच्च नित्यं गुणाधिकं व्योम्नि गृहीतमाहुः। सामुद्रं सलिलं शीतं कफवातकरं गुरु। चिलायामाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत्। पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा। स्वस्वाश्रयवशाद्गच्छेदन्यदन्यद्रसादिकम्"। धृ-णिच् अच्। २प्रावान्तरे ३वृष्टौ च मेदि० भावे अप्। ४जलधारावर्षणे हेमच०। ५खड्गादेरन्तभागे ६गम्भीरे पु० शब्दा०।

धारक त्रि० धारयति धारि-ण्वुल्। १अधमर्णे २धारणकर्त्तरि च। ३कलसे तस्य नामनिरुक्तिः देवीपु० "ब्रह्मानू धारयते यस्मात् मातराविविधास्तथा। दुरितानि च निघ्नन्ति तन ते धारकाः स्मृताः" ४योनौ स्त्री कापि वेदे व्यत इत्वं न। "निगलगलीति धारका" यजु०२१।२२ "धरति लिङ्गं धारका योनि" वेददी०।

धारण न० धारि-ल्युट्। १धरणे २विचारणे भावे युच्। ३बुद्धिभेदे ४राज्ञां न्यायपथस्थितौ च स्त्री अमरः। ४योगाङ्गभेदे स्त्री तल्लक्षणादिकं पात०सू०भा० उक्तं यथा "योगाङ्गानुष्ठानन्तु द्विधैव कारणत्वं लभते इति योगाङ्गान्यवधार्य्यन्ते" भा० "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" पा०सू०। "यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः" भा० इति उद्देश्य तेषां मध्ये पञ्चानां लक्षणानि पात० सू० समाधिपादे दर्शयित्वा धारणादेर्लक्षणानि विभूतिपादे उक्तानि तत्र धारणायाः लक्षणं दर्शितं यथा "उक्तानि पञ्च बहिरङ्गानि साधनानि धारणा वक्तव्या" भा० व्याभासः "देशबन्धश्चित्तस्य धारणा" पा० सू०।

"नाभिचक्रे हृदयपुण्डरीके मूर्द्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये

चित्तस्य वृत्तिमात्रेण बन्ध इति बन्धोधारणा" भा० ।
"प्रथमद्वितीयपादाभ्यां समाधिस्तत्साधनं चोक्तम् तृतीयपादे तत्प्रवृत्त्यनुगुणाः श्रद्धोत्पादहेतवो विभूतयो वक्तव्याः ताश्च संयमसाध्याः संयमश्च धारणाध्यानसमाधिसमुदाय इति विभूतिसाधनतया पञ्चभ्यश्च योगाङ्गेभ्यो बहिरङ्गेभ्योऽस्याङ्गत्रयस्यान्तरङ्गतया विशेषज्ञापनार्थमत्र त्रयस्योपन्यासः तत्रापि च धारणाध्यानसमाधीनां कार्यकारणभावेन नियतपौर्वापर्यत्वात्तदनुरोधेनोपन्यासक्रम इति प्रथमं धारणा लक्षणीयेत्याह उक्तानीति देशेति" आध्यात्मिकदेशमाह । नाभिचक्र इति । आदिशब्देन ताल्वादयो ग्राह्याः बन्धः सम्बन्धः । बाह्यदेशमाह बाह्यइति । बाह्ये च न स्वरूपेण चित्तस्य सम्बन्धः सम्भवतीत्युक्तं वृत्तिमात्रेण इति अत्रापि पुराणम् "प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् । वशीकृत्य ततः कुर्याच्चित्तस्यानं शुभाश्रये" शुभाश्रया बाह्या हिरण्यगर्भवासवप्रजापतिप्रभृतयः इदञ्च तत्रोक्तम् । "मूर्त्तं भगवतोरूपं सर्वोपाश्रयनिष्पृहम् । एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते । तच्च मूर्त्तं हरेरूपं तद्विचिन्त्य नराधिप ! । तत् श्रूयतामनाधारा धारणा नोपपद्यते । प्रसन्नवदनं चारु पद्मपत्रनिभेक्षणम् । सुकपोलं सुविस्तीर्णललाटफलकोज्वलम् । समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् । कम्बुग्रीवं सुविस्तीर्णं श्रीवत्साङ्कितवक्षसम् । वलीविभङ्गिना मग्ननाभिना चोदरेण च । प्रलम्बाष्टभुजं विष्णुमथ वापि चतुर्भुजम् । समस्थितोरुजङ्घञ्च स्वस्तिकाङ्कितकराम्बुजम् । चिन्तयेद् ब्रह्मभूतं तं पीतनिर्मलवाससम् । किरीटहारकेयूरकटकादिविभूषितम् । शार्ङ्गचक्रगदाखड्गशङ्खाब्जवलयान्वितम् । चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् । तावत् यावत् दृढीभूता तत्रैव नृप ! धारणा । एतदातिष्ठतोऽन्यद्वा स्वेच्छया कर्म सर्वतः । नापयाति यदा चित्तं सिद्धां मन्येत तां तदेति" विष्णुतिः ।

सां० सूत्रोक्ते पूरणरेचककुम्भकाख्यप्राणनिरोधरूपे चित्तवशीकरणे प्राणायामभेदे च । यथा "ध्यानस्यापि साधनान्याह" भा० "धारणामनसकर्मणा ततिभिः" सां० सू० "वक्ष्यमाणेन धारणादित्रयेण ध्यानं भवतीत्यर्थः । धारणादित्रयं क्रमात् सूत्रत्रयेण लक्षयति । "निरोधश्छर्दिविधारणाभ्याम्" सू० "प्राणस्येति प्रसिद्धया लभ्यते । प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति योगसूत्रे भाष्यकारेण प्राणायामस्य व्याख्यातत्वात् । छर्दिश्च वमनम् । विधारणं त्याग इति यावत् । तेन पूरणरेचनयोर्लाभः । धारणञ्च कुम्भकम् । तथा च प्राणस्य पूरकरेचककुम्भकैर्यो निरोधो वशीकरणं सा धारणेत्यर्थः । आसनादेः स्वशब्देन पश्चाल्लक्षणीयतयासूत्रे परिगणित एव धारणायालक्ष्यत्वलाभाद्धारणापदं नोपात्तम् । चित्तस्य धारणा तु समाधिवद्ध्यानशब्देनैव गृहीतेत्युक्तम्" प्र० भा० ।

"धारयेत्तत्र चात्मानं धारणां धारयन् बुधः" याज्ञ० प्राणायामविशेषरूपस्य धारणात्मकत्वसूक्तम् व्याख्यातञ्चैतत् "तत्र च हृद्यात्मानं मनोगोचरतया धारयेत् । तथा धारणाञ्च धारयेद्धारणास्वरूपञ्च जान्वग्रभ्रमणेन कोटिकादानकालोमात्रा ताभिः पञ्चदशमात्राभिरधमः प्राणायामस्त्रिंशद्भिर्मध्यमः । पञ्चचत्वारिंशद्भिरुत्तम इत्येवम्प्राणायामत्रयात्मिकैका धारणा । तास्तिस्रो योगशब्दवाच्यास्तांश्च धारयेत् । यथोक्तमन्यत्र "संभाव्य कोटिकान्द्यात्करायङ्घ्रातुमण्डले । मात्राभिः पञ्चदशभिः प्राणायामोऽधमः स्मृतः । मध्यमोद्विगुणः श्रेष्ठस्त्रिगुणो धारणा तथा । त्रिभिस्त्रिभिः स्मृतैकैका ताभिर्योगस्तथैव चेति" । धारणात्मकयोगाभ्यासे प्रयोजनमाह "अन्तर्ज्ञानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा । निजं शरीरसृत्सृज्य परकायप्रवेशनम् । अर्थानाञ्चन्दतः सृष्टिर्योगसिद्धेश्च लक्षणम् । सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते" मिताक्षरा क्षमा ।

वह्निपु० धारणास्वरूपभेदादिकमन्यद्योक्तं यथा
अग्निरुवाच "धारणा मनसोध्येये संस्थितिर्ध्यानवद्द्विधा । मूर्त्तामूर्त्तहरिध्यानं मनोधारणतो हरौ । यद्ब्रह्मावस्थितं लक्ष्यं तस्मान्न चलते मनः । तावत् कालं प्रदेशेषु धारणा मनसि स्थितिः । कालावधि परिच्छिन्नं देहे संस्थापितं मनः । न प्रच्यवति यल्लक्ष्याद्धारणा साऽभिधीयते । धारणा द्वादशायामा ध्यानं द्वादश धारणाः । ध्यानं द्वादशकं यावत्समाधिरभिधीयते । धारणाभ्याससंयुक्तात्मा यदि प्राणैर्विमुच्यते । कुलैकविंशमुत्तार्य स्वर्याति परमं पदम् । यस्मिन् यस्मिन् भवेदङ्गे योगिनां व्याधिसम्भवः । तत्तदङ्गं धिया व्याप्य धारयेत्तत्त्वधारणम् । आग्नेयी वारुणी चैव ऐशानी चामृतात्मिका । साग्निः, शिखा फडन्ता च विष्णोः

कार्यो द्विजोत्तम ! । नाड़ीभिर्विकटं दिव्यं शून्याग्यं वेधयेच्छुभम् । पादाङ्गुष्ठात् कपालान्तं रश्मिमण्डलमाहृतम् । तिर्य्यक् चाधोर्द्ध भागेभ्यः प्रयान्त्योऽतीव तेजसा । चिन्तयेत् साधकेन्द्रस्तं यावत् सर्वं महासने ! । भस्मीभूतं शरीरं स्वन्ततश्चैवोपसंहरेत् । शीतस्नेहादय स्तापा विनश्यन्ति द्विजाऽसमाः । शिरोग्रीवाकरे चैव कण्ठे चोरोसखे स्मरेत् । ध्यायेदच्छिन्नचित्तात्मा पयो भूतेन चात्मना । स्फुरच्छीकरसंस्पर्शप्रभूते हिमगाम्बुभिः । धाराभिरखिलं विश्वमापूर्य्य भुवि चिन्तयेत् । ब्रह्मरन्ध्राच्च संचोमाद्यावदाधारमण्डलम् । सुषुम्णान्तर्गतो भूत्वा संपूर्णेन्दुकलालयम् । संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्त्तिना । क्षुत्पिपासाक्लमप्रायसन्तापपरिपीड़ितः । धारयेद्वारुणीं मन्त्री तुष्ट्यर्थं चाप्यतन्द्रितः । वारुणी धारणा प्रोक्ता ऐशानीं धारणां शृणु । व्योम्नि ब्रह्ममये पद्मे प्राणापाने क्षयङ्गते । प्रसादं चिन्तयेद् विष्णोर्यावच्छिन्ना क्षयं गता । महातारञ्जमेत् सर्वं ततो व्यापक ईश्वरः । चन्द्रेन्दुं परमं शान्तं निराभासञ्चिरञ्जनम् । असत्यं सत्यमाभाति तावत्सर्वं चराचरम् । यावत् स्वस्वन्दरूपन्तु न दृष्टं गुरुवक्त्रतः । दृष्टे तस्मिन् परे तत्त्वे आब्रह्म सचराचरम् । प्रमातृमानमेयञ्च ध्यानहृत्पद्मकल्पनम् । मातृमोदनकृत् सर्वं जपहोमार्चनादिकम् । विष्णुमन्त्रेण वा कुर्य्यादमृतां धारणां वदेत् । संपूर्णेन्दुनिभं ध्यायेत् कमलं तच्चिमूर्त्तिकम् । शिरःस्थं चिन्तयेद् यत्नाच्छशाङ्कायुतवर्चसम् । सम्पूर्णमण्डलं व्योम्नि शिवकल्लोलपूर्णितम् । तथा हृत्कमले ध्यायेत्तन्मध्ये स्वतनुं स्मरेत् । साधको विगतक्लेशो जायते धारणादिभिः" । १७४अ० ।

काशीख० ४२ अ० विशेषोऽत्रोक्तो यथा

"प्राणायामद्विषट्केन प्रत्याहार उदाहृतः । प्रत्याहारैर्द्वादशभिर्धारणा परिकीर्त्तिता । भवेदीश्वरसङ्कल्पै ध्यानं द्वादशधारणम्" "प्रत्याहारेण सम्पन्नो धारणामथ चाभ्यसेत् । हृदये पञ्चभूतानां धारणं यत् पृथक् पृथक् । मनसो निश्चलत्वेन धारणा साऽभिधीयते । हरितालनिभां भूमिं सालङ्कारां समेधसम् । चतुष्कोणां हृदि ध्यायेदेषा स्यात् क्षितिधारणा । कण्ठेऽम्बु तत्त्वमर्द्धेन्दुनिभं विष्णुसमन्वितम् । वकारबीजं कुन्दाभं ध्यायेदम्बु जयेदिति । तालुस्थमिन्द्रगोपाभं त्रिकोणं रेफसंयुतम् । रुद्रेणाधिष्ठितं तेजोध्यात्वा वह्निं जयेदिति । वायुतत्त्वं भ्रुवोर्मध्ये धूम्रमञ्जनसन्निभम् । यं बीजमीशदैवत्यं ध्यायेद्वायुं जयेदिति । आकाशञ्च मरीचिधारसदृशं यद्ब्रह्मरन्ध्रस्थितं चन्द्राधेन सदाशिवेन सहितं शान्तं हकाराक्षरम् । प्राणं तत्र विलीय पञ्चघटिकं चिन्तान्वितं धारयेदेषा मोक्षकपाटनपटुः प्रोक्ता नभोधारणा । स्तम्भनी स्तावनी चैव शोषनी भामनी तथा । शमनी च भवन्त्येता भूतानां पञ्च धारणाः" ह०सं०उक्ते जलसूचके वायुविशेषधारणाद्यात्मके ६योगभेदे च "व्यैष्टसितेऽष्टम्याद्याश्चत्वारो वायुधारणादिवसाः । मृदुशुभपवनाः शस्ताः स्निग्धवनस्थगितगगनाश्च । तत्रैव खात्याद्ये दृष्टे भचतुष्टये क्रमान्मासाः । श्रावणपूर्वा ज्ञेयाः परिश्रुता धारणास्ताः स्युः । यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय । तस्करभयदाः प्रोक्ताः स्तोकाश्चाप्यत्र वासिष्ठाः । सविद्युतः सपृषतः सपांशूत्करमारुताः । सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः । यदा तु विद्युतः श्रेष्ठाः शुभाशाप्रत्युपस्थिताः । तदापि सर्वसस्यानां दृष्टिं ब्रूयाद्विचक्षणः । सपांशुवर्षाः सापाश्च शुभा बालक्रिया अपि । पक्षिणां सञ्चरा वाचः क्रीडा पांशुजलादिषु । रविचन्द्रपरिवेषाः स्निग्धा नात्यन्तदूषिताः । दृष्टिस्तदापि विज्ञेया सर्वसस्याभिवृद्धये । मेघाः स्निग्धा संहताश्च प्रदक्षिणगतिक्रियाः । तदा स्यान्महती दृष्टिः सर्वसस्यार्घसाधिका" २२अ०

धारणी स्त्री धारि-ल्युट् । १स्थैर्य्ये "शारीरिकधारणी शिथिलानू" दशकु० । २नाड़िकायां ३बुद्धानां मन्त्रभेदे मेदि० ४श्रेण्याम् हेमच० । [पु० राजनि० ।

धारणीय त्रि०धारि-कर्मणि अनीयर् । १धार्य्ये २धरणीकर्त्ते

धारणीययन्त्र न० धार्य्यते धारि-कर्मणि अनीयर् कर्म० । धार्य्ये देवताभेदानां यन्त्रभेदे -तच्च पूजायन्त्राद्विलक्षणं सारदायां २४ पटले दृश्यम् । तल्लेखनद्रव्यादि तत्रोक्तं यथा "काश्मीररोचनाताक्षाम्रगेभमदचन्दनैः । विलिखेद्भक्षेखन्या यन्त्राण्येतानि देशिकः" । निषिद्धयन्त्रमुक्तम् "भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्माल्यसङ्कुलम् । विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत्" मन्त्रमहोदधौ १९ तरङ्गे । तल्लेखनप्रकारद्रव्यादिकमुक्तं तत्रैव दृश्यम् । विस्तरभयात् न लिखितं. कर्मभेदे सामान्यतोलेखनद्रव्यादिकं २५तरङ्गे तत्रोक्तं यथा "चन्दनं रोचना रात्रिर्गृहधूमसितामवः । अङ्गारोऽष्टविषाणीति शान्त्यादौ यन्त्रलेखने । पूर्वोक्तलेखनद्रव्यं गृह्णीयात्तदपि ध्रुवम् ।

पिप्पलं मरिचं शुण्ठी श्येनविड्याथ चित्रकः। गृहधूमोत्तरसौ लवणञ्च विषाष्टकम्। शान्तौ वश्ये लिखेद्भूर्जे स्तम्भने द्वीपिचर्मणि। खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि। नरास्थनि लिखेद्यन्त्रं मारणे मन्त्रवित्तमः। ये त्वाधाराः स्मृता यन्त्रतरङ्गे तेऽपि सम्मताः"।

धारय त्रि॰ धारि–ण। धारके "धारयेः कुसुमोन्मीर्णाम्" भट्टिः।

धारयित्नु त्रि॰ धारि–तृच्। १धारणकर्त्तरि "त्वं हि धारयिता श्रेष्ठ! कुरूणां कुरुसत्तम!" भा॰ उ॰ ९४अ॰। स्त्रियां ङीप्। सा च २धृष्टिव्यां स्त्री शब्दरत्ना॰।

धारयिष्णु त्रि॰ धृ–णिच् वेदे नि॰ इष्णुच्। धारणशीले "इषदः धारयिष्णवः" सि॰कौ॰ लोकेऽपि क्वचित् इष्णुच्। "शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता। उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता। प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता। दया शीलं दमश्चेति गुणाः सम्पत्तिहेतवः" काम॰।

धारयु त्रि॰ धारमभिषवमिच्छति क्यच् वेदे॰ नि॰ न दीर्घः "क्यच्छन्दसि" पा॰उ। १अभिषवणकामे "त्वं सोमासि धारयुर्मन्द्रः" ऋ॰ ९।६७।१ "धारयुरभिषवणकामः" भा॰ धारयुर्धारावान् मत्वर्थीयोयुरिति भाष्ये पक्षान्तरे व्याख्यानात् २धारावति च।

धारवाक त्रि॰ धार्य्यते धारि–कर्मणि अच् धारो धार्य्यो वाकः स्तोत्रं येन। स्तोत्रधारके ऋत्विगादौ "धारवाकेष्वृजुगाय" ऋ॰५।४४।५।

धारा स्त्री धार्य्यन्ते अस्या अत्र अनया वा धारि–अङ्। अश्वानां १गतिभेदे अमरः। अश्वशब्दे दृश्यम् अन्यत्र च "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा। आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम्। धौरितं वल्गितं धारा प्लुतमुत्तेजितं क्रमात्। उत्तारितं चेति पञ्च शिक्षयेत् तुरगं गतीः। उत्तेरितोऽतिवेगाश्वो न शृणोति न पश्यति। धौरितं गतिमात्रे यदुयोजितं वल्गितं पुरः। अपकायसङ्कोचात् कुञ्चितास्यं नतत्रिकम्। उत्तेजितं मध्यवेगं योजनं ह्यपवल्गया। पूर्वापरोन्नमनतः क्रमादुत्तारणं प्लुतम्" अश्वशास्त्रे तु संज्ञान्तरेणोक्ताः। गतिः पुङ्खा चतुष्का च तद्वन्मध्या तथा परा। पूर्णवेगा तथा चान्या पञ्च धारा प्रकीर्त्तिताः। एकैका त्रिविधा धारा ह्यग्रिमाविधौ मता। लम्बो मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमादिति" "धाराः प्रसाधयितुमव्यतिकीर्णरूपाः" माघः। २सैन्याग्रिमस्कन्धे ४अविच्छिन्नसन्तत्या द्रवद्रव्यस्य प्रपाते ५खड्गादेर्निशितमुखे ६पाषाणभेदे ७क्षुरे च पु॰ मेदि॰। ८यशसि ९व्यतिषङ्गौ १०समूहे च शब्दरत्ना॰ ११प्रशान्ते १२उत्कर्षे १३रथचक्रे स्त्री हेम॰। १४दाक्षिणात्यपुरभेदे स्त्री "विश्वा उत त्वया वयं धारा उदन्या इव" ऋ॰२।७।३ "इतस्ततो धारा उपयन्ति विस्रुतः" ऋ॰ १।१२५।४ "धारां शितां रामपरश्वधस्य" रघुः। "ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" शकु॰। "धारा जवेन पतिता जलदोदरेभ्यः" ऋतु॰। "तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ" रामा॰ ६।१९अ॰। "अथ माहेश्वरीं धारां समासाद्य धराधिपः" भा॰ व॰ ८५अ॰। "वसोः पवित्रमसि शतधारम्" यजु॰ १।२ धाराधरशब्दे दृश्यम्। १५जनप्रवादे १६वाणि निरु॰ दुर्गा॰ ध्यादुदात्तता १७वर्षणे पु॰ धारयुः।

धाराकदम्ब पु॰ धाराकालोपलक्षितः कदम्बः। प्रावृट्काले पुष्पवति कदम्बभेदे हेमच॰।

धारागृह न॰ जलधारायुक्तं गृहम्। (फोआरा) जलस्रावयन्त्रयुक्ते गृहे "धारागृहेष्वातपसङ्विमन्तः" रघुः। "धारागृहे प्रगलितोदकदुर्दिनाभे क्लान्तः शयीत शिशिरानिलशीतकक्षौ" सुश्रुतः।

धाराङ्कुर पु॰ धाराया अङ्कुर इव। १शीकरे २करकाख्ये घनोपले ३नाशीरे च मेदि॰। [हेमच॰

धाराङ्ग पु॰ धारा अङ्गमिवास्य। १खड्गे २तीर्थभेदे च

धाराट पु॰स्त्री धारायै अटति धारया वा अटति अट–अच् १चातकखगे २अश्वे च स्त्रियां जातित्वात् ङीष्। ३मेघे पु॰ च शब्दरत्ना॰।

धाराधर पु॰ धारां धरति धृ–अच्। १मेघे २खड्गे च मेदि॰। "धाराधर! धरा वारिधारया परिपूर्य्यते। खगचञ्चुपुटद्रोणीपूरणे तव कः श्रमः" चातकाष्टकम् "प्रत्यग्रहृद्यात् प्रहृष्टात्मा धाराधरमिवाञ्चलः" भा॰ वि॰ ६४अ॰ [कमलान्यभ्यवर्षन् हुताशनि" मेघ॰।

धारापात पु॰ ६त॰। जलधारायाः पतने। "धारापातैस्तमिव

धारापूप न॰ धाराख्यम् अपूपम्। अपूपभेदे "घृतमिश्रा कनिक्या या दुग्धेनालोड़िता तु सा। धाराख्यापूपकं साज्यं पक्वं खण्डेन योजयेत्। धारापूपं सुमधुरं हृद्यं पित्तहरं परम्। सुस्निग्धं रोचनं हृद्यमत्यर्थं वातनाशनम्" भावप्र॰।

धाराफल पु॰ धारा अविधारेव फलेऽस्य। मदनवृक्षे राजनि॰

धारायन्त्र न॰ धाराया जलधारायाः प्रस्रवार्थं यन्त्रम्। (फोव्वारा) इति ख्याते जलप्रस्रवयन्त्रभेदे "धारायन्त्रजलाभिषेककलुषे धौताङ्गने लोचने" अमरुशतकम्।

धाराल त्रि॰ धारा अस्त्यस्य सिध्मा॰ लच्। धारायुक्ते खड्गादौ

धारावनि स्त्री धाराया अवनिरिव। वापी त्रिका॰। परवल्लिङ्गत्वात् स्त्रीत्वमेव युक्तं पुंस्त्वोक्तिः प्रामादिकी।

धारावर पु॰ धारया जलधारया आवृणोत्याकाशम् वृ-अच् ३त॰। मेघे "धारावरा मरुतो धृष्णुओजसः" ऋ॰ २।३४।१।

धारावर्ष पु॰ धारया रुन्तत्या अविच्छेदेन वर्षः। अविच्छेदेन वर्षणे। "अधारावर्षदुर्दिनम्" रघुः।

धारावाहिन् त्रि॰ धारया रुन्तत्या वहति वह-णिनि। १रुन्तत्या पातुके क्रमेणाविच्छेदेन २जायमाने च। स्वार्थे क। धारावाहिकोऽप्यत्रार्थे "किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः" वेदान्तप॰।

धाराविष पु॰ धारायां विषमस्य धारैव विषमस्य प्राणहारकत्वात् वा। खड्गे त्रिका॰। [छिन्नवर्त्मणि अमरः।

धारासम्पात पु॰ धाराणां सम्यक् पातः। महावृष्टौ अवि-

धारासुही स्त्री धारायुता सुही शाकत॰। तिग्मारायां सुह्याम् (तेकाँटा सिजु)। राजनि॰।

धारिन् पु॰ धृ-णिनि। १पीलुवृक्षे। २धारणकर्त्तरि। जटाधरः। ३अन्यार्थधारणायुक्ते च त्रि॰ "यत्तेभ्यो यन्त्रिनः श्रेष्ठायन्त्रिभ्यो धारिणो वराः" मनुः। स्त्रियां ङीप्। सा च ४धरण्यां शब्दर॰। ५शाल्मलीवृक्षे स्त्री शब्दच॰। धार कृष्णमस्त्यस्य शोभ्यत्वेन इनि। ६अधमर्णे त्रि स्त्रियां ङीप्।

धारु त्रि॰ धेट-रु। पानशीले जटाधरः।

धारेश्वरी स्त्री धाराख्यपुर्याः ईश्वरी। धारापुरीस्थे देवीभेदे

धारोष्ण न॰ धारायां दोहनेन निर्गमकाले उष्णम्। "दोहनेनोष्णधारया सद्यः पतिते दुग्धे। "धारोष्णन्त्वमृतं पयो भ्रमहरं निद्राकरं कान्तिदं दृष्यं दृंहणमग्निवर्द्धनमतिस्वादु त्रिदोषापहमिति" राजनि॰।

धार्त्तराज्ञ पुंस्त्री धृतराज्ञोऽपत्यम् अण् उपधालोपः। धृतराष्ट्रापत्ये स्त्रियां ङीप्।

धार्त्तराष्ट्र पुंस्त्री धृतराष्ट्रस्यापत्यम् अण्। १दुर्योधनादौ २दुःशलायां स्त्री ङीप्। ३धृतराष्ट्रवंशोद्भवे नागभेदे पु॰ स्त्री। धृतराष्ट्रे राजदेशे भवः अण्। ४कल्यवर्षे चक्षुचरणयुते श्वेतवर्णे हंसभेदे पु॰स्त्री (गँड़ोहँास) अमरः सर्वतः स्त्रियां ङीप्। "सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः। निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे" वेण्याम्। अत्र "शरत्समयवर्णनाशंसया हंसा धार्त्तराष्ट्रा इति व्यपदिश्यन्ते" वेणी॰ दुर्योधनादयस्तत्र व्यङ्ग्यार्थाः। "धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्तय" इति जनमेजयप्रश्ने "दुर्योधनो युयुत्सुश्चेत्यादुपक्रमे" "वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधिकः। एतदेकशतं राजन्! कन्या चैका प्रकीर्त्तिता" भा॰आ॰६७अ॰। उक्तश्लोकेषां तत्सुतत्वम्।

धार्त्तराष्ट्रपदी स्त्री धार्त्तराष्ट्रस्य हंसभेदस्य पाद इव मूलमस्याः अन्तलोपे कुम्भप॰ ङीषि पङ्गावः। हंसपदीलतायां राजनि॰।

धार्त्तेय पुंस्त्री धृतायाः अपत्यम् "द्व्यचः" पा॰ ढक्। धृतायाः अपत्ये स्त्रियां ङीप्। ततः यौधेयादि॰ स्वार्थे अञ्। तत्रार्थे

धार्म्म त्रि॰ धर्मस्येदम् अण्। १धर्मसम्बन्धिनि स्त्रियां ङीप् "धार्म्मी तनुरकिल्विषी" भा॰ आ॰ ६॰ अ॰। प्राचुर्य्ये अण्। २धर्ममये च। "यस्मादाय यस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यस्मायमध्यात्मं धार्म्मस्तेजोमयोऽमृतमयः पुरुषः" शत॰ ब्रा॰ १४।५।५।११।

धार्म्मपत त्रि॰ धर्मपतेरपत्यादि अश्वपत्या॰ अण्। १धर्मपतिसम्बन्धिनि स्त्रियां ङीप्। [गन्धद्रव्ये न॰ हेमच॰।

धार्म्मपत्तन त्रि॰ तत्र भवः अण्। १धर्मपत्तनभवे २कोलके

धार्मिक त्रि॰ धर्मं वेद तच्छास्त्रमधीते वा धर्मं चरति आसेवते वा ठक्। १धर्मशीले २धर्मासेवके। "चरणमिहासेवा तेन दैववशात् धर्मे प्रवृत्तोऽपि दुर्वृत्तो न धार्मिक इति" सि॰कौ॰। "विभागशीलो यो नित्यं क्षमायुक्तोदयापरः। देवतातिथिभक्तश्च गृहस्थः स तु धार्मिकः" इति दक्षोक्तलक्षणयुक्तस्यैव धर्मिकपदवाच्यत्वनिर्णयः। "आचार्य्यपुत्रः १शुश्रूषु२र्ज्ञानदो३धार्मिकः४ शुचिः ५आप्तः ६शक्तो७ऽर्थदः ८साधुः स्त्री१०ऽध्यापा दश धर्मतः" मनुः। ततः पुरोहिता॰भावे यक्। धार्मिक्य धर्मानुशीलने न॰।

धार्मिण न॰ धर्मिणां समूहः भिक्षादिगणे धर्मिन् धर्मिन् इति पाठान्तरस्य सत्त्वात् अण् "इनण्यनपत्ये" पा॰ इनः प्रकृतिभावे न नलोपः। धर्मवतां समूहे।

धार्मिणेय पुंस्त्री धर्मिण्याः अपत्यम् शुभ्रा॰ढक्। धर्मिण्याः अपत्ये स्त्रियां ङीप्।

धार्म्यायण पुंस्त्री धर्म्यस्य गोत्रापत्यम् अश्वा॰ फञ्। धर्म्यस्य गोत्रापत्ये स्त्रियां गोत्रत्वेन जातित्वात् ङीष्।

धार्य्य त्रि॰ धारि–यत्। धारणीये "धार्य्यः कथङ्कारमहं भवत्या वियद्विहारी यद्युधैकगत्या" नैष॰। "कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च" सा॰ का॰ "एवं धार्य्यम् अन्तःकरणादित्रिकस्य प्राणादिलक्षणया वृत्त्या शरीरं तच्च पार्थिवादि पाञ्चभौतिकं शब्दादीनां पञ्चानां समूहः पृथिवीति ते च पञ्च दिव्यादिव्यतया दशेति धार्य्यमपि दशधा" सा॰ कौ॰।

धार्ष्ट्य न॰ धृष्टस्य भावः कर्म वा ष्यञ्। प्रागल्भ्ये निर्लज्जत्वे। "धार्ष्ट्यमेतत्तयोर्विप्र! मत्तो यत्तु करग्रहः। अहो धार्ष्ट्यमहो धार्ष्ट्यं तयोः क्षत्रियवीरयोः" हरिवं॰२०६ अ॰

धार्ष्णक न॰ धृष्णोर्ष्टपस्य पुत्रभेदे "धृष्णोस्तु धार्ष्णकं क्षत्रं रणे धृष्टं बभूव ह" हरिवं॰१५ अ॰।

धाव जवे शुद्धौ अक॰ शुद्धीकरणे संमार्जने च सक॰ भ्वा॰ उभ॰ सेट्। स्वरितेत् पा॰। धावति धावते अधावीत् अधाविष्ट दधाव–वे। सार्वधातुके परतः वेगगतौ सर्व्वादेशस्तु पर॰। अनेनैवोपपत्तौ तदादेशविधानं वेगगतौ सरतेः सार्वधातुके प्रयोगवारणार्थं शब्दस्तोमे आत्मनेपदत्वोक्तिः सुद्रादोषात्। "गच्छति पुरःशरीरं धावति पश्चादसंस्थितं चेतः" शकु॰। "रेतः सिक्तमधावत्" ऐ॰ब्रा॰। "अधावीच्चारिसंसक्तम्" भट्टिः। "यया पराञ्चं धावन्तमनुलिप्सेत" शत॰ब्रा॰१।२।१।१६। "दिवस्पृष्टे धावमानं सुपर्णम्" अथ॰१३।२।२७ "सततं धावमानस्य चिन्तमानो विशाम्पते!" भा॰ व॰ १८८ अ॰। लवे अस्य न उदित्त्वम् तेन धावित्वा धावित इत्यादि "दिशश्चतस्रः सहसा प्रधाविताः" भा॰ श॰ २० अ॰। "वनान्तरे तोयमिति प्रधाविताः"। कातसं॰ अन्यत्रार्थे उदित् धावित्वा धौत्वा धौत इत्यादि। "बाह्योद्यानस्थित् हरशिरश्चन्द्रिकाधौतहर्म्या" "धौतापाङ्गं हरशशिरुचा" मेघ॰। "तुषारस्तुतिधौतरक्तम्" कुमा॰। प्राद्युपसर्गपूर्वकस्तु तत्तदुपसर्गद्योतार्थयुक्ते धावने।

धावक पु॰ धावति वस्त्रादिकं मार्ष्टि धाव–ण्वुल्। १रजके २वस्त्रादिप्रक्षालके ३शीघ्रगामिनि (धाउड़िया) च त्रि॰ ४नागानन्दरत्नावलीकारके कविभेदे पु॰ "श्रीहर्षादेर्धावकादीनामिव धनम्" काव्यप्र॰। "प्रथितयशसां धावकसौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्येति" मालविकाग्निमित्रम्।

धावन न॰ धाव–भावे ल्युट्। १शीघ्रगमने २प्रक्षालने च। "सरसादिहितस्तात धावने पूरणे तथा" सुश्रुतः। "उच्छिष्टं नैव भुञ्जीयां न कुर्य्यात् पादधावनम्" भा॰व॰ ६५ अ॰।

धावनि स्त्री धाव–अनि। १पृष्ठिपर्य्याम् अमरः। २कण्टकार्य्यां राजनि॰। स्वार्थे क धावनिका तत्रार्थे रत्नमा॰ वा ङीप्। धावनी तयोरर्थयोः मेदि॰ ३धातक्यां राजनि॰

धासस् पु॰ धा–"वहिहाधाञ्भ्यश्छन्दसि" उणा॰ असुन् "पचिवचिभ्यां सुट् च" उणा॰ युटोऽनुवृत्तिः उज्ज्वलदत्तः साधवस्तु "वसेर्णित्" उणा॰ इत्यतो णितोऽनुवृत्तिमाह न युट इति भेदः तेन तन्मते धाया इत्येव। धायसशब्दे दृश्यम्। पर्वते उज्ज्वलदत्तः।

धासि पु॰ धारयति प्राणान् धा–वा असि। अन्ने निरु॰ सद्यश्चिद्या दुदुहे भूरि धासेः" ऋ॰३।५७।१ "धासेरन्नस्य" भा॰ "महीं मित्रस्य वरुणस्य धासिम्" १०।१०।१।

धि धृतौ तु॰पर॰सक॰अनिट्। धियति अधैषीत्। दिधाय।

धिक् अव्य॰ धक्क–नाशने धा–धारणे वा बा॰ डिकन्। १अपकारशब्दैर्भयोत्पादने २निर्भर्त्सने ३निन्दायाञ्च। एतद्योगे निन्दाविषयवाचकशब्दात् द्वितीया। "धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा" सा॰ द॰। "धिगस्तु तृष्णातरलं भवन्मनः" नैष॰। निन्दनीयपरत्वे न द्वितीया किन्तु प्रथमैव। "धिङ्माता मम कैकेयी यया पापमिदं कृतम्" रामा॰ अयो॰ ८२ स॰।

धिक्कृ धिक्+निन्दने कृ–करणे प्रादिस॰ उभ॰ सक॰अनिट्। धिक्करोति धिगकार्षीत् धिक्चकार। धिक्कृतः (तिरस्कृतः) धिक्कारः धिक्क्रिया इत्यादि।

धित्त सन्दीपने सक॰ क्लेशे जीवने अक॰ भ्वा॰ आत्म॰ सेट्। धित्तते अधित्तिष्ट दिधित्ते।

धिग्दण्ड पु॰ धिगिति दण्डः। निर्भर्त्सनरूपे दण्डे "धाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम्" मनुः।

धिग्वण पुंस्त्री मनूक्ते सङ्कीर्णजातिभेदे "ब्राह्मणादुग्रकन्यायामष्टमो नाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः" मनुः। "शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यां ब्राह्मणाद्धिग्वणो जायते" कुल्लू॰। "धिग्वणानां चर्म कार्य्यं वेणानां भाण्डवादनम्" मनुना तद्वृत्तिरुक्ता।

धित त्रि॰ धा–क्त छान्दसो न हिः। हिते निहिते। "शुष्टीवानं धितावानम्" ऋ॰ ३।२७। २धृते च।

धिति स्त्री धि–धृतौ क्तिन्। धारणे

धिप्सु त्रि॰ दन्भ–सन् इडभावपक्षे "दम्भ इच्च अभ्यासलोपः ततः उ। दम्भितुमिच्छौ वञ्चयितुमिच्छौ "भूयस्तं धिप्सुमाहूय राजपुत्रं दिदम्भिषुः" भट्टिः।

धियसान त्रि॰ धि–धारणे वेदे बा॰ असानच् त्रिच्च । धारके "स त्वं न॰ इन्द्र धियसानः" ऋ॰५।३३।२ "धियसानः धारयन्" भा॰ ।

धियाम्पति पु॰ ६त॰ अलुक्समा॰ । बृहस्पतौ त्रिका॰ ।

धियायत् त्रि॰ई–कान्तौ (इच्छायाम्)शतृ यन् ३त॰ छान्दसः अलुक्समा॰ । कर्मण इच्छति "एष पुरू धियायते बृहते देवतातये" ऋ॰ ९।१५।२ "धियायते कर्मण इच्छते द्वितीयार्थे तृतीयायाः छान्दसोऽलुक्" भा॰ ।

धियायु त्रि॰धि–धारणे धीयते ज्ञायते अनया धि–बा॰ करणे श धिया तां प्रज्ञामात्मनः इच्छति क्यच् "क्यचश्छन्दसि" पा॰ उ॰ । आत्मनः प्रज्ञाकामशीले । "विप्रासो वा धियायवः" ऋ॰ १।८।६ ।

धियावसु त्रि॰धिया कर्मणा वसु यस्मात् वेदे अलुक्स॰। कर्मणा वसुनिमित्ते देवभेदे सरस्वतीरूपा देवतैव धियावसुः । "यत्तं वसु धियावसुः" ऋ॰१।३।१० "कर्महेतुधननिमित्तभूताया वागदेवतायास्तथाविधं धननिमित्तत्वमारण्यकाण्डे" "वाग्वै धियावसुः" श्रुत्या व्याख्यातम्" भा॰ ।

धिव प्रीणने गतौ च सक॰ स्वा॰ पर॰ सेट् इदित् सार्वधातुके धिः आदेशः । धिनोति अधिन्वीत् दिधिन्व । इदित् धिन्वन्ति ।"धान्यमसि धिनुहि देवान्" यजु॰१।२० "भर्गस्तद्धिन्वीं दधिरैर्धिनोमि" प्रबोधच॰ । "धिनोति नाशान् जलजेन पूजा" नैष॰ ।

धिष रवे जु॰ पर॰ अक॰ सेट् । दिधेष्टि अधेषीत् दिधेष । वैदिकोऽयम् । "क्षरीं चिद्यदि धिषा वेषि जनान्" ऋ॰ १।१७२।८ "धिषा यदि धिषणवन्तः सरण्यानृत्सदन्तो अद्रिमौशिजस्य गोहे" ऋ॰ ४।२१।६ ।

धिषण पु॰धृष्णोति धृष–"धृषेर्धिष च संज्ञायाम्"उणा॰क्यु । १बृहस्पतौ । धृष्णोत्यनया करणे ल्यु । २बुद्धौ स्त्री अमरः "पराय धिषणाभ्यः" ऋ॰ ९।५९।२ । "आर्य्यपुत्रार्य्य-धिषण ! प्राणनाथ ! शुभव्रत" काशीख॰ १० अ॰ । ३स्तुतौ ४वाचि ५पृथिव्याञ्च निघ॰ ६स्थाने च "तदा विकुण्ठधिषणात्तयोर्निपतमानयोः" भाग॰ ३।१६।२२ । "ये पार क्यं धिषणमधितिष्ठन्ति कश्मल प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः" भाग॰६।७।१२ ।

धिषणाधिप पु॰ ६त॰ । १वाक्पतौ सुराचार्य्ये मत्स्यपु॰

धिषण्य धिषणामिच्छति क्यच् छान्दसदीर्घाभावेऽलोपः आत्मनःस्तुतीच्छौ अक॰प॰सेट् । धिषण्यति अधिषण्यीत् "धिषा यदि धिषण्यन्तः" ऋ॰४।२१।६

धिष्ण्य न॰ धिष–अधृ॰ा॰ नि॰ । धिष्णप्रशब्दार्थे सुकृटः

धिष्णप्र न॰ धिष–"सानसिधर्णसीत्यादि" उणा॰ नि॰ । १स्थाने २गृहे ३नक्षत्रे च अमरः ४अग्नौ ५शक्रौ च पु॰ मेदि॰। ६शुक्राचार्य्ये । तत्र स्थाने "न भौमान्येव धिष्णप्राणि हित्वा ज्योतिर्मयाण्यपि" रघुः । "स्वर्गे लोके श्रवतां नास्ति धिष्णप्रम्" भा॰ मन्त्रा॰ ३ अ॰ । नक्षत्रे "भवन्त्यतीतधिष्णप्रानां भोगलिप्सायुता भ्रुवाः" सू॰सि॰। ७प्राणाभिमानिदेवे च "देवा ऋचिषे धिष्णप्रा ये"ऋ॰३।२२।३ "धियं बुद्धप्रुपहितं देहसुष्णन्ति उष्णीकुर्वन्ति धिषण्याः प्राणाभिमानिनो देवाः उप–टाहे "सानसिधर्णसीत्यादि" उणा॰ नि॰ यत् गुडागमः धातादिस्तोपोपपदस्तुस्त्राः"भा॰ धिष्णप्रं स्थानमर्हति यत् यस्तोपाक्षोपौ । दस्थानार्हे स्तुत्ये त्रि॰ ।"को धिष्णप्रां प्रति वाकं पपाद"ऋ॰१०।११४।९"धिषणार्हे स्तुत्यर्हे"भा॰ स्तुत्यस्य स्थानार्हत्वात् तथात्वम् । "आविवासन् रोदसी धि मे" ऋ॰ ७।७२।३ । "रोदसी धिष्णप्रे धिषणार्हे स्तुत्ये" भा॰ । उप–टाहे इति धात्वर्थानुगमात् । १॰उल्काभेदे स्त्री बृ॰ स॰ ३२अ॰ "दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः । धिष्णप्रोल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः" । "उल्का पक्षेण फलं तद्वद्धिष्णप्राशनिस्त्रिभिः पक्षैः" । "तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्णप्रा" सा च "धिष्णप्रा क्षणात्प्रपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम् । ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन" लक्षिता ।

धी अनादरे आराधने च दिवा॰ आत्म॰ सक॰ अनिट् । धीयते अधेष्ट । दिध्ये ओदित् धीनः । "सत्यं परं धीमहि" भाग॰१।१।१ कातन्त्रमतेऽस्य ओदित्त्वं नास्ति धीत इति । वेदे तु न ओदित् "धीतः विश्वान्यश्विनायुधं प्रधीतान्यमच्छम्" ऋ॰८।८।१० "सखीयते संधीतमन्नुतम्" ८।४०।३। आधारे अक॰इत्यन्ये ।

धी स्त्री ध्यै सम॰ भावे–क्विप् संप्रसारणञ्च । १बुद्धौ ज्ञाने अमरः । "प्रसीद कथयात्मानं न धियां पथि । वर्त्तसे" कुमा॰। २मानसवृत्तिभेदे "तत्रात्मानं धिया नग्ने-दाभासात्तु घटः स्फुरेत्" वेदान्त॰ "धियो योनः प्रचोदयात्" गायत्री सा च न्यायनये आत्मवृत्तिः । "बुद्ध्यादि षट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" भाषा॰। वेदान्तमते

मनोवृत्तिः। "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" श्रुतिः। ४कर्मणि च "उधः स धियासुदञ्चनः" ऋ० ५।११।१६। "धियां कर्मणाम्" भा० "धीभिश्चन मनसा स्वेभिरक्षभिः" ऋ० १।१३९।२ ५मनसि च "धीजवनोऽसि सोम!" ऋ० ९।८८।२ "धीजवनः मनोवेगः" भा० धीगुणशब्दे दृश्यम्।

धीक्ष दीक्षार्थे भ्वा०आत्म०सक०सेट्। धीक्षते अधीक्षिष्ट दिधीक्षे "स वै धीक्षते वाचे हि धीक्षते यज्ञाय हि धीक्षते यज्ञो हि वाग् धीक्षितोह वै नामैतद्यद्दीक्षते" शत०३।२।२३०। अयञ्च वैदिकः दीक्षसमानार्थकः। लोके तु दीक्षतेरत्यादि

धीगुण पु० ६०। "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा। ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" कामन्दकोक्तेषु अष्टसु बुद्धिधर्मेषु "धियां समस्तैः स गुणैरुदारधीः" रघुः।

धीत त्रि० धे-क्त। १पीते धी-क्त। धीनः लोके। वेदे तु धीतः। २अनादृते ३आराधिते च त्रि०।

धीति स्त्री धे-क्तिन्। १पाने २पिपासायां हेमच०। ३अनादरे ४आराधने च ५अङ्गुलौ निघ०। "तमीं हिन्वन्ति धीतयो दश व्रिशः" ऋ०१।१४४।५ "धीतयो दशसंख्यका अङ्गुलयः" भा०। "धीतिरुक्थाय शस्यते" ऋ० १।११०।१

धीदा स्त्री धियं ददाति दा-क। १मनीषायां २कन्यायां हेम० ३बुद्धिदायके त्रि०। [३१५१ पृ० दृश्यम्।

धीन्द्रिय न० धीजनकमिन्द्रियम्। श्रोत्रादौ ज्ञानेन्द्रियशब्दे

धीमत् पु० धीः प्रज्ञास्त्यस्य मतुप्। १बृहस्पतौ २बुद्धिमति पण्डितादौ त्रि०। "स्वायम्भवो मनुर्धीमानिदं शास्त्रमकल्पयत्" मनुः स्त्रियां ङीप्। [पृ०दृश्यम्।

धीर अवज्ञायाम् नित्यमवपूर्वकोऽयम् अवधीरवत् तच्छब्दे४२७

धीर त्रि० धियं राति रा-क। धियमीरयति ईर-अण् वा उप०स०। १पण्डिते २धैर्यान्विते अचञ्चले ३स्थैरे मेदि०। ४बलयुते शब्दर०। ५मन्द्रे त्रिका० ६विनीते संक्षिप्त०। ७कुङ्कुमे न०मेदि०। ८बुद्धप्रभौषधौ पु० राजनि०। ९बलिराजे पु०शब्दच०। १०चिदाभासद्वारा बुद्धिवृत्तिप्रेरके चिदात्मनि पु०। ११मनोहरे त्रि० "धीरसमीरे यमुनातीरे वसति वने वनमाली" गीतगो० "प्रवृद्धमन्द्राम्बुदधीरनादः" भाव०। "मृदङ्गधीरध्वनिमन्वगच्छत्" रघुः। "अथोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव" रघुः। तत्र पण्डिते "धीरैर्धीरोद्धतः कथितः सा० द०। "सोपधानान्वियं धीराः स्थेयसीं सङ्गयन्ति ये" माघः। १२काकोल्यां १३महाज्योतिष्मत्यां स्त्री राजनि० १४मानयुतायां मध्यायां प्रगल्भायां च नायिकायां स्त्री। तल्लक्षणभेदादिकं रसमञ्जर्यामुक्तं यथा

"मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे धीरा अधीरा धीराधीरा च व्यङ्ग्यकोपप्रकाशिका धीरा। अव्यङ्ग्यकोपप्रकाशिका अधीरा। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशिका धीराधीरा। इयांस्तु विशेषः। मध्यायाधीरायाः कोपस्य गीर्व्यञ्जिका। अधीरायाः परुषवाक्। धीराधीरायास्तु वदनरुदिते कोपप्रकाशके। प्रौढ़ाया धीरायास्तु रत्यौदासम्। अधीरायास्तु तर्जनताड़नादिः। धीराधीरायास्तु रत्यौदासतर्जनताड़नादि च कोपस्य प्रकाशकम्। यत्तु धीराभेदः स्वीयायामेव न तु परकीयायामिति प्राचीनलिखनम् तदज्ञानमात्रं धीरत्वमधीरत्वं तदुभयं वा मानियतं परकीयाया अपि मानस्य चेत्तासामप्यावश्यकम्। मानस्य स्वीयायामेव न तु परकीयाया इति वक्तुं न शक्यते"।

साहित्यदर्पणे तु अन्यथोक्तम् यथा

"ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे" ते मध्या प्रगल्भे तत्र। "प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दृढेर्ष्या। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। तत्र मध्याधीरा यथा "तदवितथमवादीर्व्यनृमम त्वं प्रियेति प्रियजनपरिभुक्तं यद् दुकूलं दधानः। मदधिवसतिमागाः, कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन"। प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा। उदाक्षे हरते तत्र दर्शयन्त्यादरान् बहिः। तत्र प्रिये। "एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरतस्ताम्बूलानयनच्छलेन रभसाऽश्लेषो संविभ्रितः। आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्निके कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्धीकृतः"। प्रत्येकं ता अपि द्विधा। कनिष्ठाज्येष्ठारूपत्वान्नायकप्रणयं प्रति"।

धीरता स्त्री धीरस्य भावः। १अचाञ्चल्ये २धैर्ये ३पाण्डित्ये च "सहजामप्यपहाय धीरताम्" रघुः। "प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि" मेघ०। त्वधीरत्व तत्रार्थे न० तच्च नायकयोर्गुणभेदे। "प्रागल्भ्यौदार्यमाधुर्य्यं शोभा धीरत्वकान्तयः। दीप्तिश्चायत्नजाभावहावहेलाः स्त्रियोऽङ्गजाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः।

शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः। पूर्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति किन्तु सर्वेऽमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति" तल्लक्षणमुदाहरणं च तत्रैव। "शक्तात्मश्लाघना धैर्य्यं मनोवृत्तिरचञ्चला। यथा "ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी दहतु मदनः किं वा मृत्योः परेण विधास्यति। मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया कुलममलिनं न त्वेवायं जनो न च जीवितम्"

धीरपत्री स्त्री धीरं मनोहरं पत्रमस्याः ङीप्। १धरणीकन्दे राजनि० २मनोहरपत्रयुक्ते त्रि० स्त्रियां टाप्।

धीरप्रशान्त पु० "सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्" सा०द० लक्षिते नायकभेदे यथा मालतीमाधवादौ माधवादिः।

धीरललित पु० "निश्चिन्तो मृदुरनिशं कलाधरो धीरललितः स्यात्" सा० द० १लक्षिते नायकभेदे यथा रत्नावल्यादौ वत्सराजादि। २षोडशाक्षरपादके छन्दोभेदे स्त्री "संकथिता भरौ नरनगाश्च धीरललिता" छ०र०टी०।

धीरस्कन्ध पुंस्त्री धीरः अचञ्चलः स्कन्धोऽवयवोऽस्यात्। मस्तिष्के हेमच०।

धीराधीरा स्त्री "धीराधीरा (मध्या) तु रुदितैरधीरा परुषोक्तिभिः" "धीराधीरा (प्रगल्भा) तु वोक्तुरुष्ठमाश्रितैः खेदयेदसम्" सा० द० उक्ते नायिकाभेदे व्यङ्गं नायकम् यथा "अनलङ्कृतोऽपि सुन्दर! हरसि मनो मे यतः प्रसभम्। किं पुनरलङ्कृतस्त्वं संप्रति नखरक्षतैस्तस्याः"। [शयाद्वत्ते नैवरुट्पार०।

धीरावी स्त्री धीरमवति अव-प्रीणने अण् ङीप्। शिं-

धीरोदात्त पु० "अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः" सा०द० लक्षिते नायकभेदे "अविकत्थनोऽनात्मश्लाघाकरः महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढमानो विनयक्षमगर्वः। दृढव्रतोऽङ्गीकृतनिर्वाहकः" सा०द० यथा रामयुधिष्ठिरादि।

धीरोद्धत पु० "मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः" सा०द० लक्षिते १नायकभेदे यथा भीमसेनादिः। कर्म० २धैर्य्यान्वितोद्धते च "धीरोद्धतः पापकारी व्यसनी प्रतिनायकः" सा०द०

धीरोष्णिन् विश्वदेवभेदे। "शैलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा" भा० अनु०९१ अ०। विश्वदेवनामोक्तौ

धीर्य्य त्रि० धीरे भवः "भवे छन्दसीति" पा० यत्। कातरे माधवः "पाक्या चिदसवो धीर्य्याः" ऋ० २।२७।११। "धीर्य्याः कातराः" इति भाष्यम्।

धीलटि स्त्री लट-बाल्योक्तौ इन् धिया कर्मणा लटिः। कर्मणा बाल्योक्तियुतायाम्। दुहितरि हारा०।

धीवत् त्रि० धीरस्त्यस्य मतुप् वेदे मस्य वः। बुद्धियुक्ते "धीवतो धीवतः सखा" ऋ० ६।५५।३ "धिया धीवन्तो ऋषयन्त तत्त्वः" ऋ० ७।८२।८।

धीवन् त्रि० ध्यै-कनिप् संप्रसारणम्। १ध्यानयुक्ते २कर्मयुते उणादिकोषः। स्त्रियां "वनो र च" पा० ङीप् रस्यान्तादेशः। धीवरी बहुव्रीहौ ङीप् रच वा। बहुधीवरी बहुधीवा।

धीवर पुंस्त्री दधाति मत्स्यान् जित्वरेत्यादिना नि०। १कैवर्त्ते २तद्भार्य्यायां स्त्री ङीष्। सा च बुद्धिकर्मभ्यां युतस्त्रियाम् धीवरशब्दे दृश्यम्।

धीशक्ति स्त्री हृत० बुद्धेर्गुणे अमरः धीगुणशब्दे दृश्यम्।

धीसचिव पु० धियि बुद्धौ मन्त्रणादौ सचिवः धीप्रधानः सचीवो वा शाकत०। मन्त्रणानिपुणे मन्त्रिणि धीसखा धीसहायादयोऽप्यत्र।

धु कम्पने अक० चालने सक० स्वादि० उभ० अनिट्। धुनोति धुनुते पर० सिचि इट् सुग्ध०। अधावीत् पा० निट् दुधाव दुधुविथ दुधोथ दुधुविव दुधुवे। धोष्यति "धूनोति चम्पकवनानि धुनोत्यशोकम्" कविरहस्यम्। अयं दीर्घान्तोऽपि स वेट् प० सिचि नित्येट् पा० अधावीत् अधविष्ट अधोष्ट क्रयादिनियमात् किति लिटि नित्यमिट् दुधुविव। थलि तु दुधविथ दुधोथ। धविष्यति ते धोष्यति ते। उभयोः धू(धु)तः। "धन्वन् सर्वपथीनं खे वितानं पक्षयोरसौ" "तानधावीत् समारूढान्" भट्टिः। "व्यघं धुन्वन्ति कार्तस्वरेन" भाग० ६।१।१५। णिचि धावयति दीर्घान्तस्य धूनयति "या धेनवो धूनयन्तामशिश्वीः" ऋ०१।५५।१६। "तुरस्य छान्दसः" भा० "निशानानारीपरिधानधूननस्फुटामसाऽप्यूरुषु लोलचक्षुषः" माघः। दोधूयते तत्र कम्पने चलने "दोधूयमानाश्च महापताकाः" भा० भी० ६० अ०।

उपसर्गपूर्वकस्तु तत्तदुपसर्गद्योत्यार्थयुते कम्पने चालने च

धु स्त्री धु-कम्पने बा० भावे डु। कम्पने एकाक्षरकोषः।

धुक्ष सन्दीप्तौ क्लेशे जीवने च अक० आत्म०। धुक्षते अधु-

ष्टिं दुधुक्षे । णिचि धुक्षयति ते "निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन" "करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव यथाङ्गलेखा' कुमा० "सत्वं समदुधुक्षत्" भट्टिः ।

धुङ्ग पु० धुक्ष-अच् पृषो० । पक्षिभेदे अजादेराकृतिगणत्वात् स्त्रियां टाप् । "दिशां कङ्को धुङ्ग्राग्नेयी" यजु०२४।३१ ।

धुत त्रि० धु-क्त । १त्यक्ते २विधूते च मेदि० ।

धुन त्रि० धूनयति धूनि अच् पृषो० । कम्पके । "धुनेतयः सुप्रकेतम्" ऋ० ४।५०।२

धुनि(नी) स्त्री धुनोति वेतसादीन् धु-निक् धूनयति वेतसान् धूनि-इन् पृषो० ह्रस्वो वा ङीप् वा । १नदीमात्रे अमरः । "दिवे दिवे धुनयो यन्त्यर्थम्" ऋ०२।३०।२ "धुनयोनद्यः" भा० । "खर्धून्यमूत्रभवि सा पतती निमार्ष्टि" माघ० ८।२१।६ २असुरभेदे पु० "खप्नेनाभ्युप्य चुक्षुरिं धुनिञ्च" २।१५।९ । "चुक्षुरिं धुनिम् एतन्नामासुरौ" भा० २कम्पके त्रि० ३जलप्रतिरोधके असुरभेदे पु० "त्वं धुनिरिन्द्र! धुनिमतीः" ऋ०१।३७५।९ "हे इन्द्र! त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेततरङ्गवती । अथ वा धुनिर्नाम जलप्रतिरोधकार्यसुरः स एव प्रतिरोधकतयास्ति यासां तादृशीरपः" भा०तरङ्गस्य कम्पनवत्त्वात् धुनित्वम् । धूनयति धू-णिच्-युक् इन् पृषो०ह्रस्वः । सप्तानां मरुतां मध्ये ५मरुद्भेदे । ते च मरुतः "उग्रश्च१ भीमश्च२ धान्वश्च३ धुनिश्च४ । सासङ्गां५साभियुग्वा६ च विक्षिपः७ स्वाहा" यजु० १९।७ उक्ताः ।

धुनीनाथ ६त० सप्तर्षे राजनि० । धुनीपत्यादयोऽप्यत्र ।

धुन्धु पु० मधुराजसुतापत्ये "उतङ्क उवाच । भवता रक्षणं कार्यं तत्तावत् कर्तुमर्हसि । निरुद्विग्नस्तपस्तप्तुं न हि शक्नोमि पार्थिव ! । मत्तोऽमरुसमीपे वै समेषु मरुधन्वसु । सप्तर्षो वालुकापूर्ण उज्जानक इति स्मृतः । देवतानामयश्चैव महाकायो महाबलः । अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान् । राजसस्य मधोः पुत्रो धन्धुर्नाम महासुरः । येते लोकविनाशाय तप आस्थाय दारुणम् । संवत्सरस्य पर्यन्ते स निश्वासं विमुञ्चति । यदा तदा भूयन्ति मयैत्रवनकानना । तस्य निश्वासवातेन रज उद्धूयते महत् । आदित्यपथमादृत्य सप्ताहं भूमिकम्पनम् । सविस्फुलिङ्गं साङ्गारं सधूममतिदारुणम् । तेन तात ! न शक्नोमि तस्मिन् स्थातुं स आश्रमे । तं मारय महाकाम लोकानां हितकाम्यया । लोकाः सुस्था भवन्त्वद्य तस्मिन् विनिहते त्वया । त्वं हि तस्य वधायैकः समर्थः पृथिवीपते ! । विष्णुना च वरो दत्तो मह्यं पूर्वयुगेऽनघ ! । यस्तं महासुरं रौद्रं हनिष्यति महाबलम् । तस्य त्वं वरदानेन तेज आप्याययिष्यसि । न हि धुन्धुर्महातेजास्तेजसाऽल्पेन शक्यते । निर्दग्धुं पृथिवीपाल ! दिव्यवर्षशतैरपि । वीर्यं हि सुमहत्तस्य देवैरपि सुरासदम् । स एवमुक्तो राजर्षिरुतङ्केन महात्मना । कुवलाश्वं सुतं प्रादात्तस्मिन् धन्धुविवर्हणे" हरिवं०११अ० ।

धुन्धुमार पु० धुन्धुं मारयति मारि-अण् उप०स० । राजभेदे "राजा हि वीर्यवांस्तात ! इक्ष्वाकुरपराजितः । दृढाश्व इति ख्यातो भविष्यति महीपतिः । तस्य पुत्रः शुचिर्दान्तः कुवलाश्व इति श्रुतः । स योगबलमास्थायनामकम् पार्थिवोत्तमः । शासनात्तव विप्रर्षे ! धुन्धुमारो भविष्यति" भा०व०२००अ० ।

"दृढाश्व उवाच । भगवन् ! न्यस्तशस्त्रोऽहमयन्तु तनयो मम । भविष्यति द्विजश्रेष्ठ ! धुन्धुमारो न संशयः । स तं व्यादिशत् तनयं राजर्षिर्धुन्धुमारये । जगाम पर्वतायैव तपसे संशितव्रतः । कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिवः । प्रायादुतङ्कसहितो धुन्धोस्तस्य निवर्हणे । तमाविशत्तदा विष्णुस्तेजसा भगवान् प्रभुः । उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया । तस्मिन् प्रयाते दुर्धर्षे दिवि शब्दो महानभूत् । एष श्रीमानसङ्गोऽद्य धुन्धुमारो भविष्यति । दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन् । देवदुन्दुभयश्चैव प्रणेदुर्भरतर्षभ ! । स मत्वा जयतां श्रेष्ठस्तनयैः सह वीर्यवान् । सप्तर्षं खानयामास वालुकापूर्णमव्रणम् । नारायणेन कौरव्य ! तेजसाऽप्यायितस्तदा । स बभूव महातेजा भूयो बलसमन्वितः । तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा । धुन्धुरासादितो राजन् ! दिशमादृत्य पश्चिमाम् । मुखजेनाग्निना क्रोधाल्लोकानुद्वर्तयन्निव । वारि सुस्राव वेगेन महोदधिरिवोदये । सोमस्य, भरतश्रेष्ठ ! धारोर्मिकलिलं महत् । तस्य पुत्रशतं दग्धं त्रिभिरुन्नन्तु रक्षसा । ततः स राजा कौरव्य ! राक्षसं तं महाबलम् । आससाद महातेजा धुन्धुं धुन्धुनिवर्हणः । तस्य वारिमयं वेगमपिबत् स नराधिपः । योगी योगेन वह्निं स शमयामास वारिणा । निहत्य तं महा-

कायं बलेनोदकराक्षसम् । एतद्धं दर्शयामास कृतकर्मा नराधिपः" हरिवं० ११ अ० २१४१श्लो० कुवलाश्वशब्दे अस्य चरितानीति यत् लिखितं तत् प्रमादात् किन्तु धुन्धुमारशब्दे तच्चरितानि इत्येव तस्य पाठो बोध्यः । एतच्छब्दे च हरिवं० तच्चरितादिकथाऽलोक्या २शक्रगोपे श्रुतहधूमे ४पदालिके च मेदि० ।

धुर् स्त्री धुर्व–क्विप् वा टाप् । १चिन्तायाम्, २रथाद्यग्रभागे, ३यानसुखे ४भारे च अमरः "धुर्याणां च धुरो मोक्षम्" रघुः । ५अग्रे न० "अपांगुणानां धुरि कीर्तनीया" रघुः । "गौरिव गुरुणा नित्यं धुरं नियोज्यमानः" भा० आ० २३अ० "तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे" रघुः । समासे च समा० "न गर्दभा वाजिधुरां वहन्ति" सुश्रु० । "अतस्तुभिर्युक्तधुरं तुरङ्गैः" रघुः । नञ्समा० न च समा० । "न मामधुरि राजेन्द्र ! नियोक्तुं त्वमिच्छार्हसि" भा० व० १२अ० । अक्षस्य तु न च समा० । अक्षधूः । "प्रतिगृह्याक्षधुरावनक्ति" का० श्रौ० १८।२।२२ । ५हिंसके त्रि० । "दश धुरो दशयुक्तम् यक्षग्रामम्" ऋ० १०।९४।७ "धुरोधूर्भिर्हिंसितृभिः तनीवार्थे प्रथमा" भा० असंज्ञायामपि टाबन्तस्य क्वचित् तत्पुरुषे ङ्याप्योरिति हुस्वः । "तार्क्ष्यं मारुतं रक्षोभिर्वाजिभि धुरवाहिभिः" भा० द्रो० ९९अ० भावे क्विप् । ६पीड़ायां च ।

धुरन्धर त्रि० धुरां धारयति खच् खचि हुस्वः । १भारवाहके इषादौ "यस्माद्देवगणाः सर्वे स्थावराणि चराणि च । धुरन्धराङ्गे तिष्ठन्ति तस्मात् भक्तिः शिवेऽस्तु मे" हेमा० दा० । २धवृक्षे पु० मेदि० । ३तत्तत्कर्मनिर्वाहरूप भारवाहे च । "सन्त एव सतां नित्यमापद्धुरणक्षमाः । गजानां पङ्कमग्नानां गजा एव धुरन्धराः" हितो० । ४श्रेष्ठे च । "धुरन्धरः पुण्यकृद्देव तापसः" भा० उ० ३७अ० ।

धुरीण त्रि० धुरं वहति सर्वधुरादित्वात् पा० योगविभागात् ख । १भारवाहके अमरः । २श्रेष्ठे शब्दच० ।

धुरीय त्रि० धुरमर्हति छ । इषे राजनि० ।

धुर्य्य त्रि० धुरं वहति "धुरो यड्ढकौ" पा० यत् । तद्धितयपरत्वाच्च दीर्घः । १धुर्वहे इषादौ २कार्य्यनिर्वाहके "प्रागल्भमात्मा धुरि धुर्य्यवाग्मिनम्" किरा० । "धुर्य्यः कर्मनिर्वाहकः" मल्लि० । "समस्तकार्य्येषु गतेन धुर्य्यताम्" माघः । ३भारवाहके अमरः । ४श्रेष्ठे शब्दार्थचि० । ५इषभे हेमचन्द्रौषधौ च पु० राजनि० इषादौ "नाविनीतैर्व्रजेद्धुर्य्यैः" मनुः । "येनेदं ध्रियते विश्वं धुर्य्यैर्योनिमिवाध्वनि" कुमा० । "रात्रिर्गता मतिमतां वर ! सह्य शय्यां भाला द्विधैव मनु धूर्जगतो विभक्ता । तामेकतस्तव बिभर्त्ति गुरुर्विनिद्रो यस्या भवानपरधुर्य्यपदावलम्बी" रघुः । ७विष्णौ पु० । "स्कन्दः स्कन्दधरो धुर्य्यः" विष्णु० । समस्तजन्तुजन्मादिलक्षणकार्य्यनिर्वाहकत्वात्तस्य तथात्वम् भाष्ये उक्तम् ।

धुर्व हिंसे भ्वा० पर० सक० सेट् । धूर्वति अधूर्वीत् । दुधूर्व । ईदित् धूर्त्तः । "अधूर्वन् भूधरैर्भग्नम्" भट्टिः ।

धुवक त्रि० धू–कन् । १गर्भमोचके उज्ज्वल० । (धुया) ख्यातायां २गीतिभेदे स्त्री । क्षिपका० पाठान्तरे न टापि अत इत्वम् । ततः चतुरस्रां प्रेङ्खादिं इनि धुवकिन् । तत्सन्निहितदेशादौ त्रि० । ततः पिच्छा० अस्त्यर्थे इलच् । धुवकिल धुवकयुक्ते त्रि० ।

धुवन पु० धु–धू–वा क्युन् । १वह्नौ उज्ज्वल० "ये यज्ञे धुवनं तन्वते" शत० ब्रा० ११।२।८।५ । २चालकमात्रे त्रि० । "अयमस्तु पञ्चशरातुचरो नवनीपवनीधुवनः पवनः" सा० द० टी० ।

धुविल न० धूयते अनेन कुटा० धु–विधूनने इल । यद्भिसंधुक्षणाय स्वगृहमंदिरचिते याज्ञिकानां १व्यजने २तालवृन्तके अमरः ।

धुसु(सू)र पु० धूसूर+पृषो० । (धुतरा) ख्याते वृक्षे अमरः

धू कम्पने भ्वा० उभ० सक० सेट् । धवति ते अधावीत् अधौषीत् सग्ध० पा० मते प० सिचि नित्येट् इतिभेदः अधमविष्ट अधोष्ट । दुधाव । "यत् कानने धवति चन्दनमञ्जरीव" कविर० ।

धू कम्पने वा० चुरा० उभ० पक्षे तुदा० कु० पर० सक० सेट् । धूनयति ते धुवति अदूधुनत् अधुवीत् । धूनयाम् बभूव आस चकार दुधाव । दुधुविथ "चूतं धुनाति धुवति स्फुरितातिमुक्तम् । वायुर्विधूनयति केशरपुष्परेणून्" कविरहस्यम् ।

धू कम्पने स्वा० क्र्यादि० पादिश्च उभ० सक० सेट् । धूनोति धूनुते धुनाति धुनीते । अधावीत् अधौषीत् अधविष्ट अधोष्ट "धूनोति चम्पकवतानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुरितातिमुक्तम्" कविरहस्यम् ।

धू स्त्री धू–क्विप् । विधूनने मेदि० ।

धूःपति पु० धुरः पतिः अहरादित्वात् पत्यादौ पत्वरत्वोपाध्यानीया वा । भारपतौ भारसहे पक्षे धुर्य्यति धूर्पति पति तत्रार्थे

धूक् पु० धुनोति इत्वादीनू धु-कनू दीर्घश्च । १वायौ उज्ज्वलद० । २धूर्त्ते ३काले संक्षिप्तसा० ।

धूत त्रि० धू-क्त । १त्यक्ते २कम्पिते ३भर्त्सिते मेदि०।४तर्किते भरतिः "पवनश्च धूतनवनीपवनः" माघः । "पादानतः कोपनयाऽवधूतः" कुमा० ।

धूतपाप त्रि० धूतं त्यक्तं पापं येन । १त्यक्तपापे २वेदशिरसो मुनेः शुचिनामाप्सरोजातायां कन्यायां स्त्री तस्या एव धर्मशापेन चन्द्रशिलात्मकतया नदीरूपेण प्रादुर्भावात् तद्रूपायां काशीस्थायां ३नद्याञ्च स्त्री तत्कथा । काशीखण्ड ५१ अ० यथा

"पुरा वेदशिरा नाम मुनिरासीन्महातपाः । भृगुवंशसंभूतपुत्रो मूर्त्तो वेद इवापरः । तपस्यतस्तस्य मुनेः पुरोदृग्गोचरं गता । शुचिरप्सरसां श्रेष्ठा रूपलावण्यशालिनी । तस्यादर्शनमात्रेण परिजज्ञे मुनेर्मनः । चस्कन्द स मुनिस्तूर्णं साथ भीता वराप्सराः" इत्युपक्रमे "इदानीं शृणु कल्याणि ! कर्त्तव्यं यत् त्वया शुचे । अमोघवीर्या हि वयं तद्वीर्यमुररीकुरु । एतस्मिन् रक्षिते वीर्य्ये परिरक्षे त्वदीयशात् । त्वमावह भवित्रत्र कन्यारत्नं महाशुचे ! । इत्युक्त्वा तेन मुनिना पुनर्जातेव साप्सराः । महाप्रसाद इत्युक्त्वा मुनेः शुक्रमजीगिलत् । अथ कालेन दिव्यस्त्री कन्यारत्नमजीजनत् । अतीव नयनानन्दनिधानं रूपजेयसाम् । शुचिरप्सरसां श्रेष्ठा जगाम त्रिदशालयम् । ताञ्च वेदशिराः कन्यां स्नेहेन समवर्द्धयत् । क्षीरेण, स्नात्रमस्याया हरिणप्रा हरिणीजयाम् । मुनिर्नाम दधौ तस्यै धूतपापेति चार्थवत् । ततः पितुरुपदेशेन तपश्चरणे तस्या ब्रह्मतो वरप्राप्तिः धर्मशापेन नदीभावप्राप्तिरित्यादि कथा तत्रैवाध्याये यथा

"धूतपापोवाच । पितामह ! वरो मह्यं यदि देयो वरप्रद ! । सर्वेभ्यः पावनेभ्योऽपि कुरु मामतिपावनीम् । श्रुत्वा तदिष्टमाकर्ण्य नितरां तुष्टमानसः । प्रत्युवाच च तां बालां विमलां विमलेक्षिणीम् । ब्रह्मोवाच धूतपापे ! पवित्राणि बानि सन्त्यत्र सर्वतः । तेभ्यः परिक्षमतुलं त्वमाप्य वरतो मम । तिस्रः कोट्यर्द्धकोटी च सन्ति तीर्थान्यनेकशः । दिवि भुव्यन्तरीक्षे च पावनान्युत्तरोत्तरम् । तानि सर्वाणि तीर्थानि त्वत्तनौ प्रतिलोम वै । वसन्तु मम वाक्येन भव सर्वातिपावनी । इत्युक्त्वान्तर्द्धधे वेधाः सापि निर्धूतकल्मषा । धूतपापोदकं प्राप्ताऽथोवेदशिरसः पितुः । कदाचित्तां समालोक्य खेलन्तीमुटजाजिरे । धर्मस्तत्तपसा हृष्टः प्रार्थयामास कन्यकाम् । धर्म उवाच । शृणुष्वोर्वि ! विशालाक्षि ! चारुमोदरि ! शुभानने ! । क्रीतः स्वरूपसम्पत्त्या त्वयाहं देहि मे रतिम् । नितरां बाधते कामस्त्वत्कृते मां सुलोचने ! । इत्थं सुसान्त्वा सा तेन प्रार्थितेत्यवदद्गृहः । उवाच सा पिता दाता तं प्रार्थय सुदुर्मते ! । पितृप्रदेया यत् कन्या श्रुतिरेषा सनातनी । निशम्येति वचो धर्मो भाविनोऽर्थस्य गौरवात् । पुनर्निबन्धयाञ्चक्रेऽपश्चतिर्धृतिशालिनीम् । धर्म उवाच । न प्रार्थयेऽहं सुभगे ! पितरं तव सुन्दरि ! । गान्धर्वेण विवाहेन कुरु मे त्वं समीहितम् । इति निर्बन्धवद्वाक्यं सा निशम्य कुमारिका । पितुः कन्या फलं दित्सुः पुनराहेति तं द्विजम् । अरे जडमते ! मा त्वं पुनर्ब्रूहीति याचतः । इत्युक्तोऽपि कुमार्यां स नातिष्ठन्मदनातुरः । ततः शशाप तं बाला प्रबला तपसोबलात् । जड़ोऽस्यतितरां यस्माज्जलाधारो नदो भव । इति शप्तस्तया सोऽथ तां शशाप क्रुधान्वितः । कठोरहृदये ! त्वं तु शिला भव सुदुर्मते ! स्कन्द उवाच । इत्यन्योऽन्यस्य शापेन सुने ! धर्मनदोऽभवत् । अविमुक्ते महाक्षेत्रे ख्यातो धर्मनदो महान् । साप्याह पितरं त्यक्त्वा स्वशिलात्वस्य कारणम् । ध्यानेन धर्मं विज्ञाय मुनिः कन्यामथाब्रवीत् । मा भैः पुत्रि ! करिष्यामि तव सर्वं शुभोदयम् । तच्छापो नान्यथा भूयाच्चन्द्रकान्तशिला भव । चन्द्रोदयमनुप्राप्य द्रवीभूता तनुस्तव । नदीभव सुते ! साध्वि ! धूतपापेति विश्रुता । स च धर्मो नदी कन्ये ! तव भर्त्ता सुशोभनः । तैर्गुणैः परिपूर्णाङ्गो ये गुणाः प्रार्थितास्त्वया । अन्यच्च शृणु सद्बुद्धे ! ममापि तपसोबलात् । द्वैरूप्यं भवतोर्भावि प्राकृतञ्च द्रवस्वरम् । इत्याश्वास्य पिता तां तु धूतपापां परन्तपः । चन्द्रकान्तशिलाभूतामनुजग्राह बुद्धिमान् । तदारभ्य सुने ! काश्यां ख्यातो धर्मनदो सुदः । धर्मोद्भवस्वरूपेण महापातकनाशनः । धुनी च धूतपापा सा सर्वतीर्थमयी शुभा" । "किरणा धूतपापा च तस्मिन् धर्मनदे शुभे । अवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभद्रवे । ततो भागीरथी प्राप्ता तेन देवीपिना सह । भागीरथ्या सहायाता यमुना च सरस्वती । किरणा धूतपापा च पूर्णतीर्थे सरस्वती । गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः" । "करीषिणीं चित्रवहां चित्रसेनाञ्च

निम्नगाम्। गोमतीं धूतपापाञ्च गण्डकीञ्च महानदीम्" भा० भी० ९ अ०। [दग्धम्।

धूति स्त्री धू-क्तिन् १विधूनने २हठयोगाङ्गभेदे हठयोगशब्दे

धून त्रि० धू-क्त त्वादि० तस्य नः। कम्पिते

धूनक पु० धूनयति संधुक्षयति वह्निम् चु० धू-ण्वुल् तुगागमः। (धुना) ख्याते यक्षधूपे त्रिका० २चालके त्रि०।

धूनन न० धू-णिच् भावे ल्युट्। चालने विधूनने।

धूनि स्त्री धू-भावे क्तिन् त्वादि० तस्य नः। कम्पने।

धूप दीप्तौ चुरा० उभ० अक० दीपने सक० सेट्। धूपयति-ते अदूधुपत्-त। धूपयाम् बभूव आस चकार। धूपितः। "वसवस्त्वा धूपयन्ति" यजु० ११।६ धूपशब्दे उदा०

धूप तापे अक० तापने सक० भ्वा० पर० सेट्। धूपायति अधूपायीत् अधूपीत्। धूपायाम् बभूव आस चकार दुधूप। धूपायितः धूपितः। "धूपायतीव पटलैर्नवनीरदानाम्" माघः।

धूप पु० धूपयति रोगान् दोषान् वा धूप-अच्। १गुग्गुलुप्रभृति सुगन्धद्रव्योत्थे धूमे, २तत्साधनद्रव्ये च तल्लिङ्गं यथा "धूताशेषमहादोषपूतिगन्धः प्रभावतः। परमानन्दजननाद्धूप इत्यभिधीयते" धूपद्रव्यभेदः प्रपञ्चसारे "गुग्गुल्वगुरुकोशीरसिताज्यमधुचन्दनैः। सारागारे विनिक्षिप्तैर्मन्त्री पीठैः प्रधूपयेत्"। योगिनीतन्त्रे "लक्षागुरु सकर्पूरं चन्दनं सिल्हकं तथा। भगवत्यै नरो यस्तु इदं दत्त्वा महेश्वरः। इह कामभवाप्नोति दुर्गालोके महीयते"। आह्निक०त० वामनपुराणे

"दहिकाख्यं कनं दारु सिल्हकं सागुरुं सितम्। यक्षी जातीफलं त्रीणि धूपानि स्युः प्रियाणि वै। दहिका मांसी कनो महिषाख्यगुग्गुलुः सितं कर्पूरं सितेति पाठे सिता शर्करा। यक्षी नखी। त्रीणि विष्णौ। विष्णुधर्मोत्तरे "धूपदः सर्वमाप्नोति धूपदः सर्वमश्नुते" वामनपुराणेऽस्य क्लीवतार्थी।

तन्त्रसारे विशेषः शारदायां "गुग्गुल्वगुरुकोशीरशर्करा मधुचन्दनैः। धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य दैशिकः"। विशेषस्तु तन्त्रान्तरे "सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम्। षड्ङ्गं धूपमेतत्तु सर्वदेवप्रियं सदा"। तथा "गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम्। क्षीरेरमगुरुं कुष्ठं गुडं सर्जरसं घनम्। हरीतकीं नखीं लाक्षां जटामांसीञ्च शैवलम्। मोदशाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि"। "मधु सुखं घृतं गन्धो गुग्गुल्वगुरुशैवलम्। सरलं सिल्ह सिद्धार्थं दशाङ्गो धूप इष्यते"। रोगारोग हर२रोगद२केशाः४ दारु५जातु६लघु७पत्रविशेषाः८ वक्रविवर्जितह्वारिलसुद्रा१०धूपवर्त्तिरिह सुन्दरिः भद्रा" अस्यार्थः कुड़ः हरीतकी२ गुड़३जटामांसी४ देवदारु५ लाक्षा६ अगुरु७ तेजपत्र८ सरल९ नखी१०"

"यथा गन्धं तथा देवि धूपं दद्याद्विचक्षणः। मध्यमानामिकाभ्यान्तु मध्यपर्वणि दैशिकः अङ्गुष्ठाग्रेण देवेशि! धृत्वा धूपं निवेदयेत्। तथा समर्पयेद्धूपं घण्टावाद्यजयस्वनैः"। तथा "धूपभाजनमस्त्रेण(फट्)प्रोक्ष्याभ्यर्च्य हृदाणुना(नमः)। अस्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्। शयनादौ तु भुवनेश्वरी बीजं पूर्वं दत्त्वा इमं मन्त्रं पठित्वार्पयेत्। "तथा जयध्वनिमन्त्रमातः! स्वाहेत्युदीर्य च। अभ्यर्च्य वादयेद् घण्टां सुधूपैर्धूपयेत्ततः"। तन्त्रान्तरे "धूपस्थानं समभ्यर्च्य तर्जन्या वामया स्पृशन्। धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना। एवं दीपदानेऽपि घण्टापादनमिति। तथाच गौतमीये "उत्तार्यदृष्टिपर्य्यन्तं घण्टां वामदिशि स्थिताम्। वादयन् वामहस्तेन दक्षहस्तेन चार्चयेत्"। यामले "निवेदयेत् पुरोभागे गन्धं पुष्पं च भूषणम्। दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः। वामतस्तु तथा धूपमर्घे वा न तु दक्षिणे। नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः"। वामदक्षिणभागस्तु देवताया एव न तु साधकस्य। "धूपदीपौ सभोज्यञ्च देवताग्रे निवेदयेदिति" दर्शनात् तिथितत्त्वे स्मृतिः "मधु सुखं घृतं गन्धो गुग्गुल्वगुरु शैवलम्। सरलं सिल्हसिद्धार्थौ दशाङ्गो धूप इष्यते। दशाङ्गो दशघटितः शैवलं खनामख्यातं सिद्धार्थः श्वेतसर्षपः। "तुरुष्कं ग्रन्थिकर्पूरनागरागुरु कुङ्कुमैः। सरामांसीसितामिश्रं धूपं दद्यात् मधु स्मृतम्"। तुरुष्कं सिल्हकं" ग्रन्थिः (गाँठीयाखीति) ख्याता। सिता शर्करा नागरः शुण्ठी। भविष्ये "लक्षहीने तु दुर्भिक्षं गन्धहीने त्वभाग्यताम्। धूपहीने तथोद्वेगं वस्त्रहीने धनक्षयम्" प्राप्नुयादिति शेषः कालिकापुराणे इष्य० यथा "एवं वां कथितो दीपो धूपञ्च शृणुतं सुतौ!। नानाद्विरन्ध्रसुखदः सुगन्धोऽतिमनोहरः। दह्यमानस्य काष्ठस्य प्रवतस्तेतरस्य वा। परागस्याथ वा धूमो निस्तापो यस्य जायते। स धूप इति विज्ञेयो देवानां तृप्तिदायकः। राशीकृतेन चैकत्र तेर्द्रव्यैः परिधूपयेत्। तथाग्निवत्तथा

कृत्वा न तत् फलमवाप्नुयात्। श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा। उदयः सुरथः कन्दो रक्तविद्रुम एव च। पीतसालः परिमलो विमर्दीकाऽसनस्तथा। नमेरुर्देवदारुश्च बिल्वसारोऽथ खादिरः। सन्तानः पारिजातश्च हरिचन्दनवल्लभौ। दक्षेषु धूपाः सर्वेषां प्रीतिदाः परिकीर्तिताः। अरालः सहस्रतेण श्रीवासः पटवासकः। कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ। सर्वौषधिरजोजातो वाराहचूर्ण उत्कलः। जातीकोषस्य चूर्णञ्च गन्धः कस्तूरिका तथा। क्षौद्रे दक्षे च गदिता धूपा एते उदाहृताः। यक्षधूपो दकधूपः श्रीपिष्टोऽगुरु भर्भरः। पत्रिवाहः पिण्डधूपः सुगोलकरण्ड एव च। अन्योन्ययोग निर्यासा धूपा एते प्रकीर्तिताः। एतैर्विधूपयेद्देवान् धूमिभिः कृष्णवर्त्मना। येषां धूपोद्भवैर्भावैस्तुष्टिं गच्छन्ति जन्तवः। निर्यासश्च परागश्च काष्ठं गन्धस्तथैव च। कृत्रिमश्चेति पञ्चैते धूपाः प्रीतिकरा मताः। न यक्षधूपं वितरेत् माधवाय कदाचन। न रक्तविद्रुमं मद्यं सुरथः स्कन्दिने तथा। यक्षधूपः पत्रिवाहः पिण्डधूपः सुगोलकः। कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः। यक्षधूपेन वा देवीं महामायां प्रपूजयेत्। मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत्। परकीयांस्तथा घ्रातान् स्त्रीनीलत्यभिमर्दितान्। पुष्पं धूपञ्च गन्धञ्च उपचारांस्तथा परान्। घ्रातान्निवेद्य देवेभ्यो नरो नरकमाप्नुयात्। न भूमौ वितरेत् धूपं नासने न घटे तथा। यथातथाधारगतं कृत्वा तद्विनिवेदयेत्। रक्तविद्रुमसालौ च सुरथः सरलस्तथा। सन्तानको नमेरुश्च कालागुरुसमन्वितः। जातीकोषाद्यसंयुक्तो धूपः कामेश्वरीप्रियः। त्रिपुरायास्तथैवायं मातृणामपि नित्यशः। सर्वेषां पीठदेवानां क्षेत्रपालादीनाञ्च पुत्रकौ। एष वां कथितो धूपः शृणु तं नेत्ररञ्जनम्"

केशवार्चायां षोड़शाङ्गादिधूपा यथा

"सुस्तकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम्। देवदारु जटामांसी जातीकोषञ्च बालकम्। सुरा मांसी त्वगुरुकं त्वगुशीरञ्च केशरम्। एला तथा तेजपत्रं सर्वमेतद् घृताक्तकम्। धूपोऽयं षोड़शाङ्गः स्याद्गोविन्दप्रीतिकारकः"।

द्वादशाङ्गो यथा "गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम्। जातीकोषञ्च कर्पूरं जटामांसी च बालकम्। त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः।

दशाङ्गो यथा "कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम्। केशरं बालकं पत्रं त्वग्जातीकोषशुक्तमम्। सर्वमेतद् घृताभ्यक्तं दशाङ्गो धूप ईरितः"।

अष्टाङ्गो यथा "गुग्गुल्वगुरुकं तेजपत्रं मलयसम्भवम्। कर्पूरं बालकं कुष्ठं नूतनं कुङ्कुमं तथा। अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः"।

पञ्चाङ्गो यथा "चन्दनं कुङ्कुमं नूत्नं कर्पूरं गुग्गुलोऽगुरु। धूपोऽयं घृतसंयुक्तः पञ्चाङ्गः सप्तदाहृतः"।

विष्णुधूपे वर्जनीयद्रव्यम् यथा "ऐक्षवं सालनिर्यासं पद्मकं सरलं लतु। यचा मधुरिका तैलं गन्धकाष्ठं कलम्बकम्। गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला। कक्कोलमूषरं दार्वी गन्धमार्जी रसाञ्जनम्। अष्टवर्गः शठी मेथी शिलाजिद् गन्धचन्दनम्। कुन्दुरु रेणुकं रास्नाऽजमोदा शतपुष्पिका। हरिद्रा जीरकं दक्षक्षीरञ्च रक्तचन्दनम्। कर्चूरकं मरुवकं यवानी ग्रन्थिका तथा। शैलजं धातकीपुष्पं नखी मोचरसादिकम्। शुकुन्दधूपे देवर्षे! सर्वमेतद्विवर्जयेत्" पाद्मोत्तरखण्डे

श्राद्धदेयो धूपो यथा वाह्ने "चन्दनागुरुणी चोभे तथैवोशीरपद्मकम्। तुरुष्कं गुग्गुलुञ्चैव घृताक्तं युगपद् दहेत्"। "उशीरं वीरणमूलं तुरुष्कं सिल्हकम्" श्राद्धतत्त्वविष्णुधर्मे "धूपस्तु गुग्गुलुर्देयस्तथा चन्दनसारजः। अगुरुश्च सकर्पूरस्तुरुष्कस्तक् तथैव च। विष्णुः "घृतमधुयुक्तं गुग्गुलुं श्रीखण्ड देवदारु सरलादि दद्यादिति"। देवलः "ये हि प्राग्यज्ञजाधूपा हस्तयाताहताश्च ये। न ते श्राद्धे नियोक्तव्या ये च के चोपगन्धयः। घृतं न केवलं दद्याद्दुष्टं वा हयगुग्गुलुम्" निर्णयसिं०।

"अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति। कृष्णपो जायते भूमे! यातुधानो न संशयः। वर्माणि चैकविंशानि नमस्कारनिरासकः। तिष्ठतेऽत्र महाभागे! एवमेतत् न संशयः" वराहपुराणम्।

विघ्नघ्नधूपो यथा "सक्तुः सार्जरसोमेतः सर्षपा एलवालुकैः। सुवर्णांतस्करतरोः कुसुमैरर्जुनस्य तु। धूपो यासगृहे हन्ति विषं स्थावरजङ्गमम्। न तत्र कीटा न विषं न दर्दुरसरीसृपाः। न ह्यत्याकर्मणस्तत्र धूपोऽयं यत्र दह्यते" मत्स्यपु०।

धूपान्तरं तत्रैव "कार्पासास्थि भुजङ्गस्य तथा निर्मोचनं भवेत्। सर्पनिर्मोचनो धूपः प्रशस्तः सततं गृहे"

रोगनाशकधूपो यथा "कूर्मसत्स्याखुसहिमगोष्टगाशाश्ववानराः। विड़ालबर्हिकाकाश्च वराहोलूककुक्कुटाः। हंस एषाञ्च विण्मूत्रं मांसं वा रोमशोणितम्। धूपं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये। एतान्यौषधजातानि धूपितानि महेश्वर!। निघ्नन्ति रोगजातानि दृष्टमिन्द्राशनिर्यथा" गारुड़पु०।

"धूपोष्मणा त्यजितमार्द्रभावम्" कुमा० "दोहदधूपिनि द्रुमे" नैष० २सन्तापके त्रि० "सुसुचुः स्वधूपान्" भट्टिः

धूपन पु० धूप-ल्यु। १यज्ञधूमे (धुना) शब्दमाला २धूमे च "धूपनाङ्गैश्च धूपयेत्" सुश्रु० भावे ल्युट्। २सन्तापने ३धूपकरणे च "परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः" मनुः।

धूपपात्र न० ६त०। (धुनची) ख्याते धूपाधारे पात्रभेदे धूपभाजनादयोऽप्यत्र। "धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना" तन्त्रसारः।

धूपमुद्रा स्त्री धूपप्रदानार्थं मुद्रा। देवपूजाङ्गे धूपदानार्थं दर्शनीये मुद्राभेदे स च धूपशब्दोक्ते "मध्यमानामिकाभ्यान्तु" इत्यादि तन्त्रवाक्ये दर्शितः।

धूपवास पु० धूपेन वासः सुगन्धिकरणम्। स्नानोत्तरं धूपोष्मणा आर्द्रीभावमोचनेन सुगन्धीकरणे "स्नानार्द्रयुक्तेष्वनुधूपवासम्" रघुः।

धूपवृक्ष पु० धूपसाधनं वृक्षः शा०त०। सरलवृक्षे त्रिका० स्वार्थे क। धूपवृक्षक तत्रार्थे शब्दर०।

धूपागुरु न० धूपाय तदर्थं दाह्यम् अगुरु शा०त०। दाह्ये अगुरुभेदे राजनि०। [२धूपस्याङ्गे न०।

धूपाङ्ग पु० धूपसाधनमङ्गमस्य। १सरलवृक्षे राजनि०। ६त०।

धूपार्ह न० धूपाय अर्ह्यते पूज्यते अर्ह-कर्मणि घञ्। १कृष्णागुरुणि राजनि०। धूपमर्हति अर्ह-अण्। उपसं०। धूपदानयोग्ये त्रि०।

धूपित त्रि० धूप-आयाभावपक्षे क्त। १सन्तप्ते २अध्वादिश्रान्ते असरः। "यवादिना दोहदधूपितो द्रुमः" वृक्षायुर्वेदः। आयपक्षे धूपायित तत्रार्थे। "प्रदीपपरिदीपिते विविधधूपधूपायिते" तन्त्रम्। धूप+तार०। इतच्। ३दत्तधूपे वृक्षादौ त्रि०।

धूम पु० धूनीते धू-कम्मे मक्। सार्द्रेन्धनवह्निजाते मेघाञ्जनयोजनके (धूँया) ख्याते पदार्थे "सहजमलिनवक्त्रभावभाजां भवति भवः प्रभवात्मनाशहेतुः। जलधरपदवीमवाप्य धूमोज्ज्वलनविनाशमस्तु प्रयाति नाशम्" प्रबो० "सधूमदीप्ताग्निरुचीनि रेजुः" भट्टिः "धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः" मेघ० "पुनानं पवनोद्धूतैर्धूमैराकृतिगन्धिभिः" रघुः। भीमो भीमसेनवत् धूमकेतुशब्दस्योत्तरपदलोपः। २धूमकेतौ ३उल्कापाते च "त्रिदिनं धूमे पञ्च दिनानि गर्गः"। ४अग्निमान्द्यलूचके वायुभेदे (चोकाँया ढेकुर) "धूमोद्गारे तथा वान्ते क्षुरकर्मणि मैथुने" आह्निकत०। जाठराग्नेर्मान्द्ये हि अन्नपाकस्यासम्भवात् जठरानलस्य दीप्तत्वाभावेन ततो धूम इवोद्गीर्यते इति लोकप्रसिद्धिः। सुश्रुतोक्ते ५धूमपाने च धूमपानशब्दे दृश्यम्। ६ऋषिभेदे ततः गर्गा० गोत्रे यञ्। धौम्य धूमर्षिगोत्रापत्ये पुंस्त्री। स च युधिष्ठिरस्य पुरोहितः धौम्यशब्दे दृश्यम्। अश्वा० फञ्। धौमायन तद्गोत्रापत्ये पुंस्त्री०। ७देशभेदे। देशवाचिनस्ततः धूमा० भवार्थे वुञ्। धौमक तत्र भवे त्रि०।

धूमकेतन पु० धूमः केतनं लिङ्गमस्यानुमाने। १वह्नौ वह्ने धूमलिङ्गेनानुमानात् तथात्वम्। २धूमकेतौ च मेदि० "निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः" रघुः

धूमकेतु पु० धूमः केतुर्लिङ्गमस्य। १वह्नौ अमरः २धूमाभतारकाभेदे उत्पातविशेषे केतुशब्दे दृश्यम्। "उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" कुमा०। ३ग्रहभेदे विश्वः केतुशब्दे २२१० पृष्ठादौ दृश्यम्। "केतुना धूमकेतोस्तु नक्षत्राणि त्रयोदश। भरण्यादीनि भिन्नानि नानुयान्ति निशाकरम्" हरिवं० ८०अ०।

धूमगन्धि न० धूमस्येव गन्धोऽस्य इत् समा०। १रोहिषतृणे धूमेन गन्ध्यते गन्ध्यतेऽसौ गन्ध-इन् २त०। २धूमेनानुमीयमाने वह्नौ "माग्निर्ध्वनयीद्धूमगन्धिः" ऋ०१।१६२।१५

धूमज पु० धूमाज्जायते जन-ड। १मेघे २सुस्तके च।

धूमजाङ्गज न० धूमजस्य मेघस्य अङ्गात् अङ्गरूपात् वज्रात् जायते जन-ड। वज्रक्षारे राजनि०।

धूमदर्शिन् त्रि० धूमं धूमाकृतिं पश्यति दृश-णिनि। सुश्रुतोक्ते पित्तेन कफेन च विदग्धदर्शने मानवे। "तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यस्त्वथ धूमदर्शी"

धूमध्वज पु० धूमः ध्वज इव यस्य। वह्नौ हेमच०।

धूमप त्रि० धूमं धूममात्रं पिबति पा-क। तपस्यार्थं धूममात्रपायिनि तपस्विभेदे "पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः" रघुः। "पिबन्ति मुनयो यत्र हविर्धूमस्य धूमपा" भा०उ०१०७अ० "अग्नपाः सोमपाश्चैव धूमपा आज्यपास्तथा" भा०शा० २८अ०

धूमपथ पु॰ धूमोपलक्षितः पन्थाः ष॰ समा॰ । १पितृयाने कर्मप्राप्यमार्गे "जगद्धे सामर्ववियत्तया गिरा शिवद्विषं धूमपथश्रमक्षयम् (दक्षम्)" भाग॰ ४।४।११। पितृयानशब्दे दृश्यम् । धूममार्गादयोऽप्यत्र । २धूमप्रचारमार्गे गवाक्षादौ च ।

धूमपान न॰ ६त॰ । सुश्रुतोक्ते नेत्रव्रणादिरोगहरे धूमविशेषस्य पाने तद्विधिस्तत्रोक्तो यथा "अथातो धूमनस्यकवलग्रहचिकित्सितं व्याख्यास्यामः । धूमः पञ्चविधो भवति । तद्यथा प्रायोगिकः स्नेहनो वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवृक्ष्येण श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं क्षौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्तिः प्रायोगिके । स्नेहफलसारमधूच्छिष्टसर्जरसगुग्गुलुप्रभृतिभिः स्नेहनिमित्तैः स्नेहने । सिराविरेचनद्रव्यैर्वैरेचने । कटुतीक्ष्णकारिकात्रिकटुकक्षारमहिङ्गिङ्गुदीत्वङ्मनःशिलाक्षिद्वरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्ने । स्नायुचर्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवज्रलमिप्रभृतिभिर्वामनीयैश्च वामनीये । तत्र वस्तिनेत्रद्रव्यैर्धूमनेत्रद्रव्याणि व्याख्यातानि भवन्ति । धूमनेत्रन्तु कनिष्ठिकापरिणाहमग्रे कलायमात्रं स्रोतोमूलेऽङ्गुष्ठपरिणाहं धूमवर्त्तिप्रवेशस्रोतोऽङ्गुलान्यष्टचत्वारिंशत् प्रायोगिके । द्वात्रिंशत् स्नेहने । चतुर्विंशतिर्वैरेचने । षोडशाङ्गुलं कासघ्ने वामनीये च । एते अपि कोलास्थिमात्रच्छिद्रे भवतः । व्रणनेत्रमष्टाङ्गुलं व्रणधूपनार्थं कलायपरिमण्डलं कुलत्थपरिच्छिद्र इति । अथ सुखोपविष्टः सुमना ऋज्वधोदृष्टिरतन्द्रितः स्नेहाक्तां प्रदीप्तां वर्त्तिं (प्रदीप्य) नेत्रस्रोतसि धूमं पिबेत् । मुखेन तं पिबेत्पूर्वं नासिकाभ्यां ततः पिबेत् । मुखपीतं मुखेनैव वमेत्प्रोतञ्च नासया । मुखेन धूममादाय नासिकाभ्यां न निर्हरेत् । तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते । विशेषतस्तु प्रायोगिकं प्राणेनादद्दीत, स्नेहनं मुखनासाभ्यां, नासिकया वैरेचनं, मुखेनैवेतरे । तत्र प्रायोगिके वर्त्तिं व्यपगतशरकाण्डां निवातातपशुष्कामङ्गारेष्वदीप्य नेत्रमूलस्रोतसि प्रयुज्य धूममाहरेति ब्रूयात् । एवं स्नेहनं वैरेचनिकञ्च कुर्य्यादिति । इतरयोर्व्यपेतधूमाङ्गारखिरे समाहिते शरावे प्रक्षिप्य वर्त्तिं मूलान्द्रव्याण्येव शरावेण पिधाय तन्निम्नं छिद्रे नेत्रमूलं संयोज्य धूममासेवत । प्रशान्ते धूमे वार्त्तमवशिष्टां प्रक्षिप्य पुनरपि धूमं पाययेदादोषविशुद्धेरेष धूमपानोपायविधिः । तत्र शोकश्रमभयामर्षोष्णप्रविषरक्तपित्तमदमूर्च्छादाहपिपासापाण्डुरोगतालुशोषच्छर्दिशिरोऽभिघातोद्धारापतर्पितक्षिमिरप्रमेहोदराध्मानोर्द्ध्ववातार्त्तबालवृद्धदुर्बलविरिक्तास्थापितजागरितगर्भिणीक्षतक्षीणक्षतोरस्कमधुघृतदधिदुग्धमत्स्यमद्ययवागूपीतात्मकफाश्च न धूममासेवेरन् । अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः । प्राणस्रोतोक्षिजिह्वानासोपघातञ्च दारुणम् । आद्यास्तु त्रयो धूमा द्वादशसु कालेषूपादेयाः । तद्यथा घृतदन्तप्रक्षालननस्यस्नानभोजनदिवास्वप्नमैथुनच्छर्दिमूत्रोच्चारकृतिशस्त्रकर्मान्तेष्विति । तत्र मूत्रोच्चारक्षवथुकृतिमैथुनान्तेषु स्नैहिकः स्नानच्छर्दनदिवास्वप्नान्तेषु वैरेचनः । दन्तप्रक्षालननस्यस्नानभोजनशस्त्रकर्मान्तेषु प्रायोगिक इति । तत्र स्नेहनो वातं शमयति स्नेहादुपलेपाच्च वैरेचनः श्लेष्माणमुत्क्लेशयत्यापकर्षति रौक्ष्यात्तैक्ष्ण्यादौष्ण्याद्वैशद्याच्च । प्रायोगिकः श्लेष्माणमुत्क्लेशयत्युत्क्लिष्टं चापकर्षति साधारणत्वात्पूर्वाभ्यामिति । भवति चात्र नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः । दृढकेशदन्तिलस्रग्वसुगन्धिविशदाननः । कासश्वासारोचकास्योपलेपस्वरभेदसुप्तास्यावबद्धमधुतन्द्रानिद्राहृत्तमन्यास्तम्भपीनसशिरोरोगकर्णाक्षिशूलवातकफनिमित्तास्यास्य सुखरोगा न भवन्ति । तस्य योगातियोगौ विज्ञातव्यौ तत्र योगो रोगप्रशमनोऽतियोगो रोगानप्रशमनस्तालुगलशोषपरिदाहपिपासामूर्च्छाभ्रमप्रमदकर्णाक्षिदृष्टिनासारोगदौर्बल्यानीत्यतियोगो जनयति । प्रायोगिकं त्रींस्त्रीनुच्छ्वासानाददीत । मुखनासिकाभ्यां पर्य्यायांश्चीसतुरो वेति । स्नैहिकं यावदस्यप्रवृत्तिः । वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीयः । प्रासान्तरेषु कासघ्न इति । व्रणधूमं शरावसम्पुटोपनीतेन नेत्रेण व्रणमानयेत् धूमनाहेदनोपशमो व्रणवैशद्यमाक्षावोपशमश्च भवति" । "शोफद्रावरुजायुक्तान् धूमपानैर्विशोधयेत्" सुश्रुतः ।

धूमप्रभा पु॰स्त्री॰ धूमस्य प्रभेव प्रभा यस्याः । धूमान्धकारयुक्तायां नरकभेदभूमौ हेमच॰ । "घनोदधिमरुद्वातततुवातनभःस्थिताः । रत्नशर्करावालुकापङ्कधूमतमःप्रभाः । महातमःप्रभा चेत्यधोधो नरकभूमयः" हेमच॰ । २धूमवर्णे त्रि॰ ।

धूमप्राप्य त्रि॰ धूमं प्राप्नोति प्र+अप्-ण्यत् । धूमसम्बन्धे

नपक्षिभेदे। "धूमग्रीवैरुग्रपैः क्षीरपैश्च सङ्कुटश्च ब्राह्मणेन्द्रैः समन्तात्" भा० अनु० १४ अ०।

धूममहिषी स्त्री धूमस्य महिषीव। कुज्झटिकायाम् त्रिका०

धूमयोनि पु० धूमो योनिरुत्पत्तिस्थानं यस्य। १मेघे २सस्तके च तत्र धूमविशेषजमेघफलं पुराणान्तरे उक्तं यथा "यज्ञधूमोद्भवं त्वभ्रं द्विजानाञ्च हितं सदा। दावाग्निधूमसम्भूतमभ्रं धनहितं स्मृतम्। स्मृतधूमोद्भवं त्वभ्रमशुभाय भविष्यति। अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः!"। [वर्णे २तद्वति त्रि० अमरः।

धूमल पु० धूमं धूमवद्वर्णं लाति ला-क। १लक्ष्मणलोहितभे

धूमसी स्त्री निस्तुषमाषाणां चूर्णे "माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः। आतपे शोषिताः पात्रे पिष्टास्ता धूमसी स्मृता। धूमसी रचिता सैव प्रोक्ता भुर्भुरिका बुधैः। भुर्भुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता" भावप्र०।

धूमाक्ष पु० धूम इवाक्षि यस्य बहु० समा०। धूमतुल्यनेत्रयुक्ते त्रि० स्त्रियां पित्त्वात् ङीष्। "धूमाक्षी संपतत्कर्णा च क्रोशत्" अथ० ११।१०।७

धूमाङ्ग पु० धूम इवाङ्गमस्य। १गिरिपादपे नैघण्टुपार०। २धूमतुल्याङ्गयुक्ते त्रि० स्त्रियां ङीष्।

धूमाग्नि पु० धूमशेषोऽग्निः शाक०त०। "विध्याती यो धूमशिखो धूमाग्निः स उदाहृतः" इत्युक्ते वह्निभेदे

धूमादि "धूमादिभ्यश्च" पा०वुञ् प्रत्ययनिमित्ते पा०ग० कृतोक्ते देशवाचकशब्दगणे स च गणः "धूम षड्रण्ड शयादन अर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रुकस्थली सप्तद्रुस्थली दाण्डायनस्थली राजस्थली विदेह राजगृह सातासाह शय्य मित्रवर्द्ध भल्ली मद्रकुल आलीकुल ब्राह्मव तद्राह्मव संस्कीय वर्वर वर्ष्य नर्त्त आनर्त्त माठर पाथेय घोष पल्लीआरात्री धार्त्तराष्ट्री आवय तीर्थ (कुलात्थौ-वीरेषु) (सप्तद्राविड मनुष्ये च)। कुक्षि अन्तरीय द्वीप अरण्य उज्जयनी पट्टार दक्षिणापथ साकेत"। धौमकः

धूमाभ पु०धूम इव आभाति आ+भा-क। १धूमवर्णे शब्दमाला २तद्वति त्रि०।

धूमाय अधूमो धूमो भवति भ्वा० चुरा० क्यङ् नामधातुः आत्म०अक०सेट्। धूमायते "अकस्मात् नगरोपान्ते कथं धूमायते चिता" हास्यार्णवः। ल्युट्। धूमायनम् "उष्णाचोपपरिदाहधूमायनानि पित्तस्य" सुश्रुतः। अत्र धूमशब्दः अग्निमान्द्यसूचकवायुभेदः तद्भवन धूमायनम्। (चोखाँ या डेकुर)

धूमावती धूम इव वर्णोऽस्यस्याः मतुप् मस्य वः शरा० पूर्वपददीर्घः संज्ञायाम्। दशमहाविद्यान्तर्गते देवीभेदे महाविद्याशब्दे दृश्यम्। "विद्या धूमावती तथा" तन्त्रसारः। तद्ध्यानं यथा "विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा। विमुक्तकुन्तला रुक्षा विधवा विरलद्विजा। काकध्वजरथारूढा विलम्बितपयोधरा। शूर्पहस्तातिरूक्षाक्षी धृतहस्ता वरान्विता। प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा। क्षुत्पिपासार्दिता नित्यं भयदा कलहासदा। जपेत् सप्तशतदर्श्यां पुरश्चरणसिद्धये" तन्त्रसारः। तन्मन्त्रादिकं तन्त्रसारे दृश्यम्।

धूमिका स्त्री धूमोऽस्यस्याः ठन्। कुज्झटिकायां त्रिका०।

धूमित त्रि० धूम-जातोऽस्य तारा० इतच्। १संजातधूमे "अविमृश्यव्यसनेन धूमिताम्" कुमा० २दीक्षणीयमन्त्रभेदे पु० "षडक्षरोजीवहीनः सार्द्धसप्ताक्षरो मनुः। सार्द्धद्वादशवर्णो वा धूमितः स तु निन्दितः" तन्त्रसा०३सूर्यगस्य दिग्भेदे स्त्री प्रधूमितशब्दे दृश्यम्।

धूमिन् त्रि० धूमोऽस्यस्य बाहुल्येन "नैकाहरात् जतो जातेः सप्तम्याञ्च न तौ स्मृतौ" इत्युक्तेः इनिठनौजातिवाचकात् निषेधेऽपि भूम्नि तस्यानिषेधात् इनि। १बाहुल्येन धूमवति अबाहुल्ये तु मतुबेव धूमवान् इत्येव। स्त्रियां ङीप्। सा च अजमीढस्य २पत्नीभेदे "अजमीढस्य पत्न्यस्तु तिस्रो वै यशसान्विताः। नीली च केशिनी चैव धूमिनी च वराङ्गनाः" हरिवं०३२अ०। ३वङ्गेर्जिह्वाभेदे स्त्री धूम्रवर्णशब्दे दृश्यम्।

धूमोत्थ न० धूमादुत्तिष्ठति परम्परया उद्-स्था-क। १वज्रक्षारे राजनि०. तस्य धूमयोनिमेघाज्जातत्वात् उत्पन्नत्वात् परम्परया तज्जातत्वम्। २धूमजातमात्रे त्रि०।

धूमोद्गार पु० ६त०। १धूमनिर्गमे "धूमोद्गारानुकृतिनिपुणा जर्जरानिष्पतन्ति" मेघ०। २धूमस्य जाठराग्निमान्द्यसूचकपदार्थस्य उद्गारे (चोखाँ याडेकुर) "धूमोद्गारे तथा वान्ते क्षुरकर्मणि मैथुने" आह्निक०त०

धूमोपहत पु० ३त०। सुश्रुतोक्ते धूमजनोपद्रवरूपरोगभेदे तल्लक्षणादि तत्रोक्तं यथा "अत ऊर्द्ध्वं प्रवक्ष्यामि धूमोपहतलक्षणम्। श्वसिति क्षौति चात्यर्थमत्यायमति वासते। चक्षुषोः परिदाहश्च रागश्चैवोपजायते सधूमकं निःश्वसिति ध्मायन्नश्नाति च। तथैव च

रसान् सर्वान् श्रुतिशास्त्रोपहन्यते। तृष्णादाहज्वरयुतः सीदत्यथ च मूर्च्छति। धूमोपहत इत्येवं शृणु तस्य चिकित्सितम्"।

धूमोर्णा स्त्री यमपत्न्याम् त्रिका०। "शक्रः शचीपतिर्देवो यमो धूमोर्णया सह। वरुणः सह गौर्या च सहर्द्ध्या च धनेश्वरः" भा०अनु० १६५अ०। २मार्कण्डेयपत्न्याञ्च "मार्कण्डेयस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य च" १४५ अ०। अत मार्कण्डेयस्येत्येव युक्तः पाठः। मार्कण्डपत्न्या अपत्यम् ढक्। मार्कण्डेयो यमः पूर्वोक्तैकवाक्यात्।

धूमोर्णापति पु० ६त०। यमे हारा०।

धूम्या स्त्री धूमानां समूहः पाशादि० य। १धूमसमूहे धूमाय हितं यत्। २धूमसाधने त्रि०

धूम्राट पु० धूम्या इव अटति अट-अच्। (फिङ्गा) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष्। धूम्राट इति पाठान्तरं तत्रार्थे

धूम्र पु०धूमं तद्वर्णं राति रा-क्रमुको० ५। १सिन्धुके शब्दरत्नावली २कृष्णलोहिते वर्णे च २तद्वति त्रि० "धूमधूम्रो वसागन्धिर्व्वालाबभ्रुशिरोरुहः" रघुः। कृष्णलोहितश्च कृष्णवर्णमिश्रो लोहितवर्णः "धूम्रा बभ्रुनीकाशाः पितृणाम्" यजु०२४।१८ "धूम्राः कृष्णवर्णमिश्रा लोहितवर्णाः" वेददी० "भूरेणवो नभसि नक्षपयोदचक्राश्चक्रीवदङ्गरुहधूम्ररुचो विसस्रुः" माघः। ५शिवे "विलोहितस्य धूम्रस्य नीलग्रीवाय वै नमः" भा०शा० २८६अ० ६मेघे "अजो धूम्रो न गोधूमैः" यजु० २१।२९ "धूम्रः मेघः" वेददी० ७कुमारानुचरभेदे "धूम्रः श्वेतः कलिन्दश्च सिद्धार्थो वरदस्तथा" भा०श० ४६अ० तदनुचरोक्तौ। ८बलिराजसेनाधिपासुरभेदे "यज्ञो रभसश्चण्डो धूम्रश्चैव प्रियङ्करः" हरिवं२४०अ० बलिसेनाधिपोक्तौ। एतेषां धूम्रवर्णत्वात् तथात्वम्। सङ्कर्तचि०उक्ते आनन्दादिषु रव्यादिवारे ९नक्षत्रविशेषेण योगभेदे यथा "आनन्दाख्यः१ कालदण्डश्च२ धूम्रो३ धाता४ सौम्यो५ ध्वाङ्क्षः६ केतु७ क्रमेण। श्रीवत्साख्योऽथ वज्रकंठ सुद्गरश्च१० छत्रं११ मित्रं १२ मानसं१३ पद्म१४ लुम्बी१५। उत्पाट१६ मृत्यू१७ किल काण१८ सिद्धी१९ शुभो२० ऽमृताख्यो२१ मुषलं२२ गदश्च२३। मातङ्ग२४ रक्ष२५ अर२६ सुस्थिराख्य२७ ध्रुवर्द्धमानाः२८ फलदाः स्वनाम्ना। टाचार्कं, मृगादिन्दौ, भार्गाङ्गारके, कराद्बुधे। मैत्रात् गुरौ, मृगो वैश्वाद्भृगौ मन्दे च वारुणात्" अस्यार्थः सामिजित्कैः अष्टाविंशतिनक्षत्रैरष्टाविंशतिर्योगाः इष्टनक्षत्रं रविवारे अश्वनीतो गणने यत्संख्यकं ततोयोगोभवति एवं सोमे रोहिणीतोयतमसं संख्यकं ततोयोग इति एवमन्यत्राप्युह्यम्। तत्र वर्ज्य नाडीः तत्रैवाह। "धाङ्क्षे वज्रे सुद्गरे चेषुनाड्यो, वर्ज्या, वेदाः४ पद्मलुम्बे, गदेऽश्वाः७। धूम्रे काणे मौषले भूर्द्वयं, द्वे, रक्षोऽस्त्यूत्पाटकालाश्च सर्वे"। १०ध्रुवनामकवसोर्मातरि स्त्री "धूम्रायाश्च धरापुत्रो ब्रह्मविद्यो ध्रुवस्तथा" भा० आ० ६६अ० वसुवंशोक्तौ। शार० उक्ते आदित्यस्य द्वादशकलाभेदे ११कलाभेदे स्त्री "तपिनी१ तापिनी२ धूम्रा३ मरीचि४र्ज्वालिनी५ रुचिः६। सुषुम्णा७ भोगदा८ विश्वा९ बोधिनी१०धारिणी ११ क्षमा १२"। १२ शशाङ्कस्त्रियां स्त्री राजनि०।

धूम्रक पु० धूम्र इव कायति कै-क। उष्ट्रे जटाधरः स्त्रियां ङीष्।

धूम्रकेतु पु० भरतन्यपस्यात्मजभेदे "भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय संचिन्तितः तद्नुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे। तस्यासहात्मजान् कान्त्रिनातृरूपानात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि। सुमतिं राष्ट्रभृतं पुरुदर्शनमावरणं धूम्रकेतुमिति" भाग० ५।७।२।२ २तृणबिन्दोः पुत्रभेदे "विशालः शून्यबिन्दुश्च धूम्रकेतुश्च तत्सुताः" भा० ९।२।२ तत्सुताः तृणबिन्दोः सुताः। ३धूम्रवर्णध्वजयुक्ते त्रि०।

धूम्रकेश पु० पृथुराजस्य पुत्रभेदे "वैन्यस्तु पुर्य्यो जगतामित्युपक्रमे "पुत्रानुत्पादयामास पञ्चार्चिष्प्रात्मसंमितान्। विजिताश्वं हर्य्यश्वं धूम्रकेशं द्रविणं हकम्" भाग०४।२२ ५०"विजिताश्वोधिराजासीत् पृथुपुत्रः पृथुश्रवाः। यवीयोभ्योऽददात् काष्ठा भ्रातृभ्यो भ्रातृवत्सलः। हर्य्यक्षायादिशत् प्राचीं धूम्रकेशाय दक्षिणाम्। प्रतीचीं हकमंत्राय तुर्य्यां द्रविणसे विभुः" २४।२।२ तथाश्वस्यार्चिषि भार्यायां जातपुत्रे च। "तथाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत्" भाग० ६।६।१८।४ ३धूम्रवर्णकेशयुक्ते त्रि० स्वाङ्गत्वात् वा स्त्रियां ङीष्।

धूम्रपत्रा स्त्री धूम्रं पत्रमस्याः जातित्वेऽपि अजादेराकृतिगणत्वात् टाप्। स्वयम्भुवायां क्षुपभेदे राजनि० १धूम्रवर्णपत्रयुक्ते त्रि०। [मूलीतृणे राजनि०।

धूम्रमूलिका स्त्री धूम्रं मूलं यस्याः अप् अत इत्वम्।

धूम्ररोहित पु० "वर्णो वर्णेन" पा० कर्म०। १धूम्रवर्ण-

मिश्रितरक्तवर्णे तद्वति त्रि० । "रोहितो धूम्रो रोहितः कर्कन्धुरोहितस्ते सौम्याः" यजु० २४।२ ।

धूम्रलोचन त्रि० धूम्रं लोचनमस्य । १धूम्रनेत्रयुक्ते स्त्रियां स्वाङ्गत्वेऽपि बहुव्रीहित्वात् टाप् । २शुम्भासुरसेनापतिभेदे पु० । "हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः । तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम्" देवीमा० ।

धूम्रलोहित पु० "वर्णो वर्णेन" पा० कर्म० । १कृष्णवर्णमिश्रितरक्तवर्णे २तद्वति त्रि० ३शिवे पु० । "गौरः श्यामस्तथा कृष्णः पाण्डुरो धूम्रलोहितः" भा० अनु० १४अ० शिवनामोक्तौ ।

धूम्रवर्ण पु० कर्म० । १कृष्णलोहितवर्णे २तद्वति त्रि० । ३तुरङ्गे सिन्धुके न० राजनि० । ४अग्नेः सप्तजिह्वान्तर्गतजिह्वाभेदे स्त्री जटा० शा०ति० ५पटले "विन्यसेदात्मनो देहे मन्त्रैर्जिह्वा हविर्भुजः" इत्युपक्रमे "जिह्वास्तास्त्रिविधाः प्रोक्ता गुणभेदेन कर्मसु । हिरण्या१ गगना२ रक्ता३ कृष्णा४ऽन्या सुप्रभा५ मता । बहुरूपा६ऽतिरक्ता च सात्त्विक्यो यागकर्मसु" । "पद्मरागा१ सुवर्णा२ऽन्या तृतीया मद्रलोहिता३ । लोहिता४ऽनन्तरं श्वेता५ धूमिनी६ च करालिनी७ । राजस्यो रसनाटङ्कविहिता काम्यकर्मसु" । "विश्वमूर्त्ति१स्फुलिङ्गिन्यौ२ धूम्रवर्णा३ मनोजवा४ । लोहिन्य५न्या करालाख्या६ काली७ तामस ईरिताः" जिह्वाशब्दे २१२१पृ० दर्शिते काली करालीत्यादिस्मृतिवाक्ये सामान्यतोऽग्निजिह्वाभिहितेति इति बोध्यम् । ६धूमिन्यां जाते अजमीढस्य ४पुत्रभेदे पु० "धूमिन्या स तया देव्या अजमीढः समीयिवान् । कृष्णं संजनयामास धूम्रवर्णं सुदर्शनम्" हरिवं० ३२ अ० ।

धूम्रशूक पुंस्त्री धूम्रः शूक इव रोमास्य । उष्ट्रे हारा० । स्त्रियां जातित्वात् ङीष् ।

धूम्राक्ष त्रि० धूम्रमक्षि यस्य बहुव्री० । १धूम्रवर्णनेत्रयुक्ते स्त्रियां वित्त्वात् ङीष् । २तृणबिन्दुवंशजे हेमचन्द्रन्यपस्ते पु० । "हेमचन्द्रः सुतस्तस्य धूम्राक्षस्य चात्मजः" भाग० ९।२।२२ । ३रावणसैन्यान्तर्गते राक्षसभेदे । "तं दृष्ट्वा निहतं सङ्ख्ये प्रहस्तं चमूदाचरम् । अभिदुद्राव धूम्राक्षो वेगेन महता कपीन्" "ततस्समतिकोपेन सायं वरयसारथिम् । धूम्राक्षमवधीत् क्रुद्धो हनूमान् मारुतात्मजः" भा० व० २८५अ० ।

धूम्रानीक पु० शाकद्वीपाधिपमेधातिथेः १पुत्रभेदे तद्वाचके २तत्तद्वर्णे च । चित्ररेफशब्दे भाग० ५।२०।१९ वाक्यं दृश्यम् तच्छब्दे ५।१ भाग० वाक्ये भागवताङ्गस्वरूपः ।

धूम्रायण पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः

धूम्रार्चिस् स्त्री शा०ति० उक्ते वह्नेर्दशकलान्तर्गते कलाभेदे "धूम्रार्चिः१ऊष्मा२ ज्वलिनी३ ज्वालिनी४ विस्फुलिङ्गिनी५ । सुश्रीः६ सुरूपा७ कपिला८ हव्यकव्यवहे (९।१०)अपि । यादीनां दशवर्णानां कला धर्मप्रदा इमाः ।

धूम्राह्वा स्त्री धूम्रं वर्णमाह्वयते स्पर्द्धते या+ह्वे-क" । धूम्रपत्रायां स्वयम्भुवायां क्षुपभेदे राजनि० ।

धूर वधे गतौ च दि०आ०सक० सेट् । धूर्य्यते अधूरिष्ट । दुधूरे । ईदित् धूर्त्तः ।

धूर्जटि पु० जटि-संघाते इन् धुरस्त्रैलोक्यचिन्तायां जटिः सङ्घातोऽस्य । शिवे अमरः भा०द्रो०२०२अ० तु अन्यथा तन्निरुक्तिर्यथा "धूम्रहृपस्य यत्तस्य धूर्जटिस्तेन चोच्यते" अस्मिन् पक्षे धूम्रवर्णस्य जटिः सङ्घातोऽस्य पृषो० ।

धूर्त्त पु० धूर्व-धूर-वा क्त उणा० तन् वा । १धुस्तूरवृक्षे (धूतरा)अमरः २चोरकवृक्षे राजनि० । ३लौहकिट्टे न० हेमच० । ४विडङ्गवृक्षे न० राजनि० भावे क्त । ५हिंसने तदस्त्यस्मिन्नर्थे अच् उणा० तन् वा । ६वञ्चके ७मायाविनि द्यूतकरे त्रि० हेमच० । ८शठनायके शठशब्दे तल्लक्षणं दृश्यम् "सार्द्धं मनोरथशतैस्तव धूर्त्त ! कान्ता सैव स्थिता मनसि लब्धिमहावरम्या" । "दृष्टे कासनसंस्थिते प्रियतमे पश्चादुपेत्याद्रराट् एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः । दैवक्रितकन्धरः सपुलकः प्रेम्णोल्लसन्मानसाम् अन्यर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति" सा० तत्र द्यूतकरे "प्राप्ते न्यूपतिना भागे प्रसिद्धे धूर्त्तमण्डले" "दृष्ट्वीयाद्धूर्त्तकितवादितराद्दशकं गतम्" याज्ञ० । वञ्चके "नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः । दंष्ट्रिणां च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम्" पञ्चत० "स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर ! । नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले । हृदयं क्षुरधाराभं तेषां च नास्ति सादरम् । शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ । सुबुद्धिः शिवभक्तश्च शास्त्रज्ञो धर्ममानसः । न विश्वसेत् तेषु तात । स्वात्मकल्याणहेतवे" ब्रह्मवैवर्त्त जन्मख० ८अ० । "प्रियाश्च धूर्त्ता मम सेविनः सदा" भा०वि० ७अ० । धूर्त्तशब्देन जातिवाचकस्य समासे पोटायुवतीत्यादि पा० परनिपाते वकधूर्त्त शृगालधूर्त्त कठधूर्त्त इत्यादि गौरादि०७त० । अक्षधूर्त्तः । धुर्व कर्मणि क्त । ९हिंसिते त्रि० ।

धूर्त्तक पु॰ धूर्त्त इव वञ्चक इव इवार्थे कन् । १शृगाले शब्दर॰ स्त्रियां जातित्वात् ङीष् । कौरव्यकुलजे २नागभेदे । तदुपक्रमे "बाष्कलः शङ्खवेरश्च धूर्त्तक प्रति वातकौ" भा॰आ॰७अ॰। स्वार्थे क । धूर्त्त शब्दार्थे । "स्त्री-धूर्त्ते कितवे भीरौ चण्डे पुरुषमानिनि । चौरे कृतघ्ने विश्वासो न कार्य्यो न च नास्तिके" भा॰उ॰ २८अ॰ ।

धूर्त्तकृत् पु॰ धुर्व–भावे क्त धूर्त्तं हिंसनं करोति कृ+क्विप् ६त॰। १धूस्तूरे शब्दमा॰ २हिंसके त्रि॰।

धूर्त्तचरित न॰ धूर्त्तस्य चरितं वर्णत्वेनास्यत्र अच् । सङ्कीर्णाख्ये १नाटकग्रन्थभेदे सा॰द॰। ६त॰। २धूर्त्तानां चरिते च । [तायाः लोकसिद्धत्वात् ।

धूर्त्तजन्तु पु॰ निम्बक॰ । मानुषे शब्दच॰ तज्जन्तोर्धूर्त्त-

धूर्त्तमानुषा स्त्री धूर्त्तो हिंसितोमानुषो यया । १राक्षस्यां शब्दच॰ २हिंसितमानुषके त्रि॰ ।

धूर्त्ति पु॰ धुर्वी हिंसायां क्तिच् । १हिंसके "मीनः सं देव अरस्यो धूर्त्तिः" ऋ॰१।१८।२ "धूर्तिर्हिंसकः" भा॰ भावे क्तिन् । २हिंसायां स्त्री

धूर्धर त्रि॰ धुरोधरः । धुरन्धरे रथादौ रमानाथः

धूर्वह त्रि॰ धुरं वहति वह–अच् । धुरन्धरशब्दार्थे

धूर्वी स्त्री धुरमञ्जति अञ्ज–क्विप् अञ्जोवीभावः रथाग्र-भागे हेमच॰ ।

धूलक न॰ धू–बा॰ लक धूलिराकारतयाऽस्त्यस्य अच् संज्ञायां कन् वा । विल्वे शब्दच॰।

धूलि स्त्री धू–लिक् वा ङीष् । धू–सं॰ क्विप् धुवा लीयते ली–कि लादेशे आङ्लोपः । १रजसि परागे अमरः । रेणूनां पवनचालनेन लीयमानत्वात्तथात्वम् । "गोपैर्यच्छा कृतानां खुरपुटदलिता वा तु धूलिर्दिनान्ते" द॰सं॰ ३०२अ॰। गोधूलिशब्दे दृश्यम् । "अनीता पङ्कतां धूली-सदकं नावतिष्ठते" "वधूरिव धूलीसदक्षिपत्" माघः "धूलिः परम्टङ्कादपि" नीतिसारः "धूलीपटले धूम-स्वभ्रमात् तत्रासता धूमत्वेनेत्यादि" अनुमानदीधितिः । २व्याकुलीभावे अव्य॰ उच्चा॰उप॰स॰। "धूलीलत्व व्याकु-लीलत्व" गणरत्न॰टी॰। [शब्दर॰ ।

धूलिका स्त्री धूलिरिव कायति कै–क । कृष्णटिकायाम्

धूलिकुट्टिम न॰ धूलीनां कुट्टिममिव । केदारे क्षेत्रे शब्दार्थकल्प॰ । तस्य कर्मत्वादिजातधूलिमत्त्वात्तथात्वम्

धूलिकेदार पु॰ धूलिप्रधानः केदारः मा॰त॰। क्षेत्रे केदारे त्रिका॰ तस्य कर्मत्वजातधूलिमत्त्वात्तथात्वम् ।

धूलिगुच्छक पु॰ धूलीनां गुच्छ इव इवार्थे कन् । कलमु-चूर्णे (फाग) त्रिका॰ ।

धूलिध्वज पु॰ धूलिरेव ध्वजोऽस्य । वायौ त्रिका॰

धूलिपुष्पी स्त्री धूलिप्रचुरं पुष्पमस्या ङीप् । केतक्याम् । स्वार्थे क ह्रस्वः । धूलिपुष्पिका तत्रार्थे राजनि॰ ।

धूलीकदम्ब पु॰धूलीनां कदम्बं यत्र । १कदम्बवृक्षे २वरुण-वृक्षे ३तिनिशवृक्षे च मेदि॰। ६त॰ । ४धूलीसमूहे न-

धूश(ष)(स) शोभने चुरा॰उभ॰ सक॰सेट् । धूश(ष)(स)यति ते अदूधुश (ष)(स)त् त ।

धूसर पुंस्त्री धू–सर किच्च न मत्वम् । १गर्दभे २उष्ट्रे ३कपोते राजनि॰स्त्रियां ङीष् । ४तैलकारे पु॰ हेम॰ धूस–रक् । ५रैवतमाण्डुवर्णे कृष्णश्वेतवर्णे शुक्लपीतवर्णे च पु॰ ६तद्वति त्रि॰ अमरः । "क्लान्तं रजोधूसरकेतुसैन्यम्" उत्क्रान्त-वर्णक्रमधूसराणाम्" रघुः । "किरणपरिचयधूसरप्रदो-षाम्" । "ललाटिकाचन्दनधूसरालका" कुमा॰ । ७पा-ण्डुरफलीक्षुपे स्त्री राजनिः टाप् । ८किन्नरीभेदे स्त्री मेदि॰ गौरा॰ ङीष् ।

धूसरच्छदा स्त्री धूसरः छदो यस्याः । श्वेतदुङ्गायां रत्नमा॰

धूसरपत्रिका स्त्री धूसरं पत्रमस्याः कप् कापि अत इत्त्वम् । हस्तिशुण्डीक्षुपे (हातशुँडा) राजनि॰ ।

धूसी अव्य॰ धूस–बा॰ इ । विस्तारे गणरत्नम् । जयादि॰। धूसीलत्व विस्तार्य्यत्वर्थः ।

धूस्तरा(मा) स्त्री अतिशयेन धूः तरप् तमप् व । "क्षुद्रा-त्तादौ तद्धिते" पा॰ क्षुद्रादेव मत्वविधानात् न मत्वम् । अतिशयभारे । [(धूतरा) ख्याते वृक्षे अमरः ।

धूस्तूर पु॰ धूस–क्विप् तुतोर्त्ति तुर–तुरचे क कर्म॰ ।

धूस्तूर पु॰ धूस–क्विप् तूरी गतिहिंसयोः क कर्म-धायः स॰ । (धूतरा) ख्याते वृक्षे अमरे पाठान्तरम् । "धूस्तूर ! धूर्त्त ! तरुणेन्दुनिवासयोग्यस्थाने पिशाचप-तिना विनिवाशितोऽसि । किं कैरवाणि विकसन्ति तमः प्रयाति किं वाहि रक्षसति किं वदनः स्रवन्ति" उद्भटः । "धूस्तूरो मदवर्चोग्निवातलज्वरकुष्ठहृत् । कषायो मधुरस्तिक्तो वृकाक्षिज्ञाविनाशकः । उष्णो गुरुर्व्रण-क्लेदकण्डूकृमिविषापहः" भावप्र॰ ।

धृ स्थितौ भ्वा॰धृतौ सक॰उभ॰भ्वा॰अनिट् । धरति ते अधार्षीत् अधृत । दधार दध्रे । धृतः धृतिः । "ततो दधार सा देवी गर्भम्" भा॰उ॰७१९९ श्लो॰ धर्त्ता धरिष्यति ते [धरिष्यते ।

धृ पतने भ्वा॰आत्म॰अक॰अनिट् । धरते अधृत । दध्रे धर्त्ता

धृ स्थितौ अक० धारणे सक० तुदा० आत्म० अनिट् । ध्रियते अधृत । दध्रे धर्त्ता करिष्यते । स्थितौ "ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम्" माघः "प्राणेषूत्क्रान्तेषु शरीरं शयितुमध्रियत" हु०उप०धारणे "ध्रियते कुसुमप्रसाधनम्" कुमा०"पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि" भा० उ० १८९ अ० ।

उद्+उत्तोल्य धारणे "चरणं त्विदमुद्धृतम्" वेणीस० । "पदमुद्धृतमुद्वहन्ती" कुमा० । "प्रसभोद्धृतारि" रघुः ।

धृ धारणे चुरा०उभ० सक० सेट् । धारयति ते अदीधरत्—त । धारयाम् बभूव आस चकार । "वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्" मनुः "समकायशिरोग्रीवं धारयन्नचलः स्थिरः" गीता । सर्वेषां धार्य्यः पूर्वेषां गद्यत् एतस्य अधो यत् इति भेदः धार्य्यशब्दे उदा० "धारेरुत्तमर्णः" पा० एतद्योगे उत्तमर्णस्य सम्प्रदानता । चैतस्य व्रतं धारयति ।

धृज गतौ भ्वा० पर० सक० सेट् इदित् । धृञ्जति अधृञ्जीत् । दधृञ्ज इदित् धृञ्जते । अस्य अनिदित्त्वमपि इच्छति । धर्जति अधर्जीत् दधर्ज । "हरो महेश्वरश्चैव शूलपाणिः पिणाकधृग्" शिवपूजायां तन्नामविशेषोक्तौ ।

धृत न० धृ—स्थितौ पतने च भावे क्त । १पतने २स्थितौ च । धृ—धारणे कर्मणि क्त । कृतधारणे ३गृहीते त्रि० भावे क्त । ४धारणे ग्रहणे न० । "धृतरुद्राक्षमधुव्रतं खगः" "रूपमदर्शि धृतोऽसि यदर्थम्" नैष० । ५त्रयोदशमनोःपुत्रभेदे पु० । "त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः । चित्रसेनो विचित्रश्च नयो धर्मधृतो धृतः" हरिवं० ७अ० । ६द्रुह्युवंश्ये धर्मसुते राजभेदे "द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः । आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः" भा० ९।२२।४ अत्र धृत इति पाठान्तरम् ।

धृतदेवा स्त्री "चत्वारो देवकात्मजाः । देववानुपदेवश्च सुदेवो देवरक्षितः । तेषां स्वसारः सप्तासन् धृतदेवादयो नृप !" भाग० ९।२४।१२ उक्तौ देवकात्मजाभेदे "त्रिपृष्ठो धृतदेवायामेक आनकदुन्दुभेः" २५श्लो० ।

धृतराजन् पु० धृतो राजा प्राशस्त्येन येन । सुराष्ट्रि देशे तत्र भवः अण् उपधालोपः । धार्त्तराष्ट्रतत्र भवे त्रि०

धृतराष्ट्र पु० धृतं राष्ट्रं सुपाख्यतया यत्र । १सुराष्ट्रि देशे २नागभेदे च मेदि० । ३कौरवो धृतराष्ट्रश्च बलवानिव वीर्य्यवान्" भा० आ० ३५ अ० । नामनामोक्तौ "धृतराष्ट्रकुले जातान् शृणु नामानि यानपम्" ५७अ० । ४गन्धर्वराजभेदे "गन्धर्वराजो यो धीमान् धृतराष्ट्र इति स्मृतः । स सर्वं मानुषो लोके धृतराष्ट्रः पतिस्तव" भा० आश्व० ११ अ० । विचित्रवीर्य्यक्षेत्रे सत्यवत्या नियोगेन व्यासेनोत्पादिते स्वनामख्याते कौरवे ४नृपभेदे "शान्तनुः खलु गङ्गां भागीरथीमुपयेमे तस्यामस्य जज्ञे देवव्रतो नाम यमाहुर्भीष्मिमिति । भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुद्वाहयत् यामाहुर्गन्धकालीमिति । तस्यां पूर्वं कानीनो गर्भः पराशरादृषेः द्वैपायनोऽभवत् । तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः । विचित्रवीर्य्यचित्राङ्गदश्च तयोरप्राप्तयौवन एव चित्राङ्गदो गन्धर्वेण हतः विचित्रवीर्य्यस्तु राजासीत् । विचित्रवीर्य्यः खलु कौशल्यात्मजे अम्बिकाम्बालिके काशिराजदुहितरावुपयेमे । विचित्रवीर्य्यस्त्वनपत्य एव विदेहत्वं प्राप्तः । ततः सत्यवत्यचिन्तयन्ना दौष्यन्तो वंश उच्छेदं व्रजेदिति । सा द्वैपायनमृषिं मनसा चिन्तयामास । स तस्याः पुरतः स्थितः किङ्करवाणीति । सा तामुपयाच भ्राता तवानपत्य एव म्रियतो विचित्रवीर्य्यः क्षेत्रपत्यं तस्योत्पादयेति । स तथेत्युक्त्वा त्रीन् पुत्रानुत्पादयामास । धृतराष्ट्रं पाण्डुं विदुरञ्चेति" भा० आ० ९५अ० । अस्य अन्वयादिकथा भा० आ० ११ अ० द्रष्टव्या । ५पक्षिभेदे हंसे पुंस्त्री हेमच० तस्य धृतराष्ट्रीजातत्वात् तथात्वम् स्त्रियां ङीप् । सा च कश्यपस्य ताम्रायां पत्न्यां जाते ६कन्याभेदे "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् । ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" "धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः" भा० आ० ६६ अ० । ताम्रा तु दक्षकन्या कश्यपपत्नी ताम्रशब्दाद्वृद्धेः अलोच्यते "सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा । कद्रूर्दनिश्च राजेन्द्र ! ताम्रपत्यानि मे शृणु" हरिवं० ३अ० ।

धृतवर्म्मन् पु० धृतं वर्म येन । १गृहीतकवचे २भारतप्रसिद्धे त्रिगर्तराजकेतुवर्म्मात्मजे नृपभेदे "केतुधर्मा तु तेजस्वी तस्यैवावरजो युवा । युयुधे भ्रातुरर्थाय पाण्डवेन यशस्विना । तमापतन्तं सम्प्रेक्ष्य केतुधर्मा महारथः । अभ्यर्दनृनिशितैर्बाणैर्भीमसुः परवीरहा । केतुधर्मण्यभिहते धृतवर्मा महारथः । रथेनाशु ससूतपत्य शरैर्भिष्मुमवाकिरत्" भा० आ० ७४ अ० ।

धृतव्रत त्रि०धृतं व्रतं येन । १गृहीतव्रते "संवर्त्तश्च धृतव्रतः" भा० आ० ६६ अ० । २पुरुसंग्रहे जयद्रथपुत्रविजयस्य-

पौत्रे नृपभेदे। "विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः" हरिवं०२१अ०। धृतिशब्दे दृश्यम्।

धृतात्मन् त्रि० धृत आत्मा येन। १धैर्यान्वितचित्ते २विष्णौ पु०। "धृतात्मा नियमो यमः" विष्णुस०। एकरूपेण जन्मादिरहिततया स्थित आत्मास्येति" भा०।

धृति स्त्री धृ-क्तिन्। १धारणे २तुष्टौ ३धैर्ये "धृतिरक्षमिता रतिश्रुता" रघुः "धृतिर्धैर्यं प्रीतिर्वा" मल्लि०। विष्कम्भादिमध्ये ४चतुर्थे योगभेदे मेदि०। "व्यतिपातः सुकर्मा च धृतिः शूलं तथैव" ज्यो०। ५सुखे हेमच०। गौर्यादिषोडशमातृमध्ये ६मातृकाभेदे। मातृकाशब्दे दृश्यम्। अष्टादशाक्षरपादकछन्दोभेदे "लक्ष्मीः कृतिः प्रकृतिराकृतिः" वृ० र०। ७मानसधारणाभेदे 'धृतिरधृतिर्धीर्धीरित्येतत् सर्वं मनएव" श्रुतिः। सा च सात्विकादिभेदेन त्रिधा यथाह गीतायाम् "धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ! सात्विकी। यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन!। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ! तामसी"। दक्षसुतारूपधर्मपत्नीभेदे "दद्यो स दश धर्माय" इत्युपक्रमे धर्मपत्नीशब्दे उक्त वाक्ये ३८५७पृ०दृश्यम्। ९जयद्रथस्य पौत्रे पु०जयद्रथस्तु राजेन्द्र! यशोदेव्यामजायत। ब्रह्मबलोत्तरः सत्यां विजयो नाम विश्रुतः। विजयस्य धृतिः पुत्रः" हरिवं० २१अ०। १०मैथिले राजभेदे पु० तदुपक्रमे "सुनक्षत्रसुतो जज्ञे धीतिरुग्रो धृतिस्ततः" भाग० ९।१३।१६। ११विश्वेदेवभेदे पु० तद्ग्रामोपक्रमे "बलं धृतिर्विपाप्मा च पुण्यलक्षणं यावनस्तथा" भा०अनु०९१अ०। सा०द० उक्ते १३व्यभिचारिभावभेदे। सा च "सधृतिचपलतानास्तानिश्चिन्तावितर्काः" इत्युद्दिश्य तत्र लक्षिता यथा "ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्य कृता धृतिः। सौहित्यवचनोल्लासकृतो प्रतिभादिकृत्" उदाहृतं च "कृत्वा दीननिषीदनां निजजने वक्त्रा वचोविग्रहम् नैवालोच्य गरीयसीरपि चिरादासन्निकीर्यातनाः। द्रव्यौघाः परिवर्धिताः खलु मया यस्याः कृते साम्प्रतं नीवाराञ्जलिनापि क्रियमहो नैवं कृतार्था तनुः" मा०द०। "ता धृतिरक्षि गताक्षि मन्मनीयम्" माघः। "स्थिता कर्म मैत्रजनाशुने धृतिः" किरा० "अम्बरालम्बृतेः" शा०सू० १४गुरुत्ववतां पतनाभावे हरिदासः "कार्यौचोजन धृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः कुसुमा०। धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकी भूतप्रयत्नवदधिष्ठितं धृतिमन्त्वात् वियति विहङ्गमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः" हरिदासः। मनसो भूतपञ्चकारब्धत्वात् चित्तं शरीरावयवत्वात् धृतिमत्त्वं बोध्यम्। धृतेर्भूमिगुणत्वञ्च भा० शा० २५५ अ० उक्तं यथा "भूमेः स्थैर्यं गुरुत्वं च काठिन्यं प्रसवार्थता। तस्योगुरुत्वं शक्तिश्च संघातः स्थापना धृतिः"। "स्थैर्यमचाञ्चल्यं गुरुत्वं पतनप्रतियोगी गुणः प्रसवो धान्याद्युत्पत्तिस्तदर्थता, गुरुत्वं प्रथिमा विग्रहपुष्टिः शक्तिर्गन्धग्रहणसामर्थ्यं सङ्घातः शिष्टावयवत्वम् स्थापना मनुष्याद्याश्रयत्वं धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः स पार्थिवः स्थैर्यशब्देनैवोपात्त इति धृतिशब्देनात्र भूतान्तरप्रवेशस्थानत्वमुच्यते" नीलकण्ठव्याख्या। तच्छन्दसोऽष्टादशसंख्यकत्वात्तत्तुल्यसंख्यायुते अष्टादशसंख्यायुक्ते च। १६ विपुलाख्य विष्कुम्भपर्वतस्थे वनभेदे विष्कुम्भपर्वतोपक्रमे "वनं तथा चैत्ररथं विचित्रं तेष्वप्सरो नन्दननन्दनञ्च। धृत्याह्वयं यद् धृतिवत् सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धम्" सि०शि०। "विपुलशैलमस्तके केतुवृक्षो वटो धृतिर्वनं महाह्रदः सरः" प्रमिता०।

धृतिमत् त्रि० धृतिरस्त्यस्य मतुप्। धैर्यान्विते "कृतज्ञं धृतिमन्तञ्च कृष्णमाहुररिं बुधाः" मनुः स्त्रियां ङीप्। "प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे" "धृतिमतीरुपकान्तमपि स्त्रियः" पञ्चमनोः २रैवतस्य पुत्रभेदे पु० "अथ पुत्रानिमांस्तस्य निबोध गदतो मम। धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः" हरिवं० ७अ०। अजमीढवंशस्य पौत्रे ३नृपभेदे पु० "अजमीढस्य दायादो विद्वान् राजा जयी नरः। धृतिमांस्तस्य पुत्रस्तु, हरिवं०२०अ०। ४कुशद्वीपस्थे वर्षभेदे न० कुशद्वीपोपक्रमे "धृतिमत् पञ्चमं वर्षं शुक्लं वर्षं प्रभाकरम्" भा०भी० १२०अ०। ५अग्निभेदे पु० "विष्णुर्नामेह योऽग्निस्तु धृतिमान् नाम सोऽङ्गिराः" भा०व०२२०अ० स च अग्निर्धृतिहोमाङ्गम् धृतिहोमशब्दे दृश्यम्।

६त्रयोदशमन्वन्तरे सप्तर्षिमध्ये अङ्गिरोऽपत्यभेदे। "त्रयो-

दशे तु पर्य्याये भाव्ये मन्वन्तरे मनोः। अङ्गिरावेव धृतिमान् पौत्रो व्यापकस्तथा"।

धृतिहोम पु० धृत्याद्यष्टकोद्देशेको होमः। विवाहाङ्गे होमभेदे "उत्थाप्य कुमारं ध्रुवा आज्याहुतीर्जुहोति" गोभिलः "अष्टाविह धृतिहोमाः ध्रुवा आवश्यकाः। कथञ्चिद् भर्त्रगृहगमनाभावेऽपि श्वशुरगृहे निवासेऽपि अवश्यं होतव्याः इति। अत्र "इह धृतिः स्वाहा" इत्यादिप्रयोगः। न तु स्वाहायोगे चतुर्थी "धृतिहोमे न प्रयुञ्ज्यात् गोनामसु तथाष्टसु। चतुर्थीमत्र इत्येतद्गोनामसु हि ह्यते" इति छन्दोगपरिशिष्टात्। धृतिहोमे धृत्यष्टकहोमे" स०क्ला० त०रघु०। स च तत्पद्धतौ भवदेवोक्तो यथा "ततः पतिः कुमारमुत्थाप्य पूर्ववत् कुशण्डिकोक्तविधाने धृतिनामानमग्निं संस्थाप्य समित्प्रक्षेपान्तं व्यस्तसमस्तमहाव्याहृतिहोमं कृत्वा अष्टाहुतीर्जुहुयात्। अष्टानां मन्त्राणाम् ऋष्यादयः साधारणाः। प्रजापतिर्ऋषिर्द्विपदा छन्दो वसूर्देवता धृतिहोमे विनियोगः। ओं इह धृतिः स्वाहा१। ओं इह स्वधृतिः स्वाहा२। ओं इह रतिः स्वाहा३। ओं इह रमस्व स्वाहा४। ओं मयि धृतिः स्वाहा५। ओं मयि स्वधृतिः स्वाहा६। ओं मयि रतिः स्वाहा७। ओं मयि रमस्व स्वाहा८"।

धृत्वन् पु० धृ-क्वनिप् तुक्। १विष्णौ उज्ज्वल०। २धर्मे ३गगने ४सप्तर्षे ५मेघाविनि ६विप्रे संक्षिप्तसारे उणा०। ७धारके त्रि० स्त्रियां "वनो र च" ङीप् रेफान्तादेशः। धृत्वरी सा च दभूमौ संक्षिप्तसारे उणा०।

धृष संहतौ अक० हिंसे सक० भ्वा० पर० सेट्। धर्षति अधर्षीत्। दधर्ष उदित् धर्षित्वा धृष्ट्वा। "धृषप्रसी वैयात्ये" पा० वैयात्ये एव अनिटोर्विधानात् क्त्वो नेट्कत्वेऽपि संहत्यर्थे बधार्थे च नित्यमिट्। धर्षितः

धृष प्रागल्भ्ये स्वा० पर० अक० सेट्। धृष्णोति अधर्षीत्। दधर्ष। "धृषप्रसी वैयात्ये" पा० निष्ठायामनिट्। धृष्टः अस्या आत्मं चिन्त्यप्रयोजनमिति क्त। भावादि कर्मणोर्वैयात्ये धृषिर्नास्ति अतएव नियमार्थमिदं क्तवमितीत्याह वृत्तिकारः" "विभाषा भावकर्मणोरिति विकल्पे प्राप्ते क्तवमिदं नित्यतार्थमित्याशङ्क्याह धृषिर्नास्तीति" तदर्थः" तत्त्व०। "आलोकयत् स काकुत्स्थमधृष्णोत् घोरमध्वनत्" भट्टिः। "तान् दृढातिदृढान् धृष्टान् प्राप्तान् परिदृढाशया" भट्टिः।

धृष सामर्थ्ये बन्धने चुरा० आत्म० अक० सेट्। धर्षयते अदीधृषत अदधर्षत। धर्षयाम् बभूव आस चक्रे "कस्त्वा धर्षयितुं शक्तः" हरिवं० ३१५२ श्लो०।

धृष क्रोधे अभिभवे च वा चु०उभ०पक्षे भ्वा०प०सक० सेट्। धर्षयति ते धर्षति अदीधृषत् त अदधर्षत् त अधर्षीत्। धर्षयाम् भूव आस चकार दधर्ष। "ग्रहस्तस्य पुरोऽमात्यान् जिहिंसुर्दधृषुस्तथा" भट्टिः। दधृषुरभिभूतवन्तः।

धृषज् त्रि० धृष-अभिभवे वा० कलिन्। १धर्षके २अभिभवे च। "ता अस्य संधृषजो न तिग्माः" ऋ०५।१९।५

धृषद् त्रि०धृष-अभिभवे वा०कर्तरि अदिक्। धर्षके "धृषद्वर्णं दिवे दिवे" ऋ०१०।८७।२ "धृषद्वर्णं धर्षकरूपम्" भा० "स्वभूत्योजा अयसि धृषन्मनः" ऋ०१।१५२।५२ धृषन्मनः धर्षकमनाः" भा०। भावे अदिक्। २धर्षणायाम् "ते यामन्ना धृषद्विनः" ऋ०५।५२।२ "धृषद्विनः धर्षणावन्तः" भाष्यम्

धृषु त्रि० धृष-कु। १प्रगल्भे २दृढे ३सङ्घाते पु० संक्षिप्तसारोणा०।

धृष्ट त्रि०धृष-वैयात्ये क्त। १निर्लज्जे २प्रगल्भे ३निर्दये च। ४नायकभेदे पु० तल्लक्षणोदाहरणे सा०द० उक्ते यथा "कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः। दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः" "शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं ततः पादेन प्रहृतं तया सपदि तं धृत्वा सहासे मयि। किञ्चित् तत्र विधातुमक्षमतया वाष्पं त्यजन्त्याः सखे! भ्रातस्तेऽपि कौतुकं वितनुते कोपोऽपि रामभ्रुवः"। "भूयोनिःशङ्कः कृतदोषोऽपि भूयोनिवारितोऽपि प्रश्रयपराङ्मुखः" रसमञ्जर्यां तल्लक्षणसूक्तम्। विदर्भराजसुतकुन्तेः ५पुत्रभेदे पु० "भीमो विदर्भस्य सुतः कुन्तिस्तस्यात्मजोऽभवत्। कुन्तेर्धृष्टः सुतो जज्ञे" हरिवं० ३७अ०। ६वन्दक्याम् असत्यां स्त्री शब्दरत्ना०। तस्य भावः तल् धृष्टता स्त्री त्व धृष्टत्व न० ष्यञ् धार्ष्ट्य न०। निर्लज्जत्वे प्रागल्भ्ये च "गुरुस्तवैवागमएव धृष्टताम्" माघः।

धृष्टकेतु पु० सन्नतिराजवंश्ये सुकुमारस्य १पुत्रभेदे "सुकुमारस्य दायादो धृष्टकेतुः सुधार्मिकः" हरिवं० २९अ०। नवम मनोः रोहितस्य २पुत्रभेदे च "दत्तपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः। मनोः पुत्रो धृष्टकेतुः पञ्चहोत्रोनिराकृतिः" हरिवं०७अ०। ३जनकवंश्ये धृतिसुते पु०। सुधृतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुस्ततः" भाग० ९।१३।१२ ४कैकये नृपभेदे च "कैकयो धृष्टकेतुश्च श्रुतकीर्त्तिम-

विन्दत" भाग०९।२४।२१। काशेय ५सत्यकेतुसुते "धर्मकेतुः सुतस्तस्मात् सत्यकेतुरजायत। धृष्टकेतुः सुतस्तस्मात्" भाग०९।१७। धृष्टद्युम्नस्य ६पुत्रभेदे च "धृष्टद्युम्नःसुतस्तस्य (द्रुपदस्य) धृष्टकेतुश्च तत्सुतः" हरिवं०२२ अ०"धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्" गीता।

धृष्टद्युम्न पु०द्रुपदनृपस्य पुत्रभेदे तदुत्पत्तिकथा "तथैव धृष्टद्युम्नोऽपि साक्षादग्निसमद्युतिः। वैताने कर्मणि तात! पावकात् समजायत। वीरो द्रोणविनाशाय धनुरादाय वीर्यवान्" भा०आ०६३अ०।"द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम्। तत्कर्म कुरु मे याज! वितरामर्बुदक्षयम्! तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयन्। गुर्वर्थ इति चाकामसुपयाजमचोदयत्। याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः। ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः। आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै। स च पुत्रो महावीर्यो महातेजा महाबलः। दृश्यते यद्विधो राजन्! भविता ते तथाविधः। भरद्वाजस्य हन्तारं सोऽभिसन्धाय भूपतिः। आजह्रे तत्तथा सर्वं द्रुपदः कर्मसिद्धये। याजस्तु हवनस्यान्ते देवीमाज्ञापयत्तदा। मैथि मां रात्रि! पृषति! मिथुनं त्वामुपस्थितम्। राज्ञ्युवाच। अवक्षिप्तं सुखं ब्रह्मन्! दिव्यान् गन्धान् बिभर्मि च। सुतार्थेनोपलब्धाऽस्मि तिष्ठ याज! मलप्रिय!। याज उवाच। याजेन अर्पितं हव्यमुपयाजाभिसन्धितम्। कथं कामं न सन्दध्यात्सा त्वं विप्रैहि तिष्ठ वा। ब्राह्मण उवाच। एवमुक्त्वा तु याजेन हुते हविषि सत्कृते। उत्तस्थौ पावकात् तस्मात् कुमारो देवसन्निभः। ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम्। बिभ्रत् सखड्गः सशरो धनुष्मान्विनदन्मुहुः। तथेत्युवाच तं याजो राज्ञः प्रियचिकीर्षया। तयोश्च नामनी चक्रुर्द्विजाः संपूर्णमानसाः। धृष्टत्वादतिधृष्णुत्वाद्द्युम्नाद्युत्पन्नवादपि। धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति"

धृष्टरथ पु०नृपभेदे "व्यवनो जनकश्चैव तथा धृष्टरथो नृपः" भा०अनु० १६२अ० नानानृपौक्तौ।

धृष्टि पु० धृष-क्तिच्। हिरण्यकशिपोर्ज्येष्ठस्य हिरण्याक्षासुरस्य पुत्रभेदे "हिरण्यकशिपुभ्रातुः संपरेतस्य दुःखितः। कृत्वा कटोदकादीनि भ्रातृपुत्रानसान्त्वयत्। शकुनिं शंबरं धृष्टिं भूतसन्तापनं तथा" भा०७।२।१६ २प्रगल्भे त्रि०।"धृष्टिरसि"यजु०१।१७ "हे उपवेष! त्वं धृष्टिरसि प्रगल्भोऽसि। तीव्राङ्गारापामितस्ततश्चालव प्रापकत्वादस्य प्रागल्भ्यम्" वेददी०१यज्ञिये उपवेषरूपे पात्रभेदे पु० उपवेषशब्दे १६२०पृष्ठे दृश्यम्। यज्ञपात्रोपक्रमे "धृष्टी शतमाने" कात्या०श्रौ० २६।२।१० "धृष्टी उपवेषौ औदुम्बरौ तत्र एकं रजतशतमानं द्वितीयं सुवर्णशतमानमिति" कर्कः "धृष्टिरसीत्युपवेषमादाय" कात्या०श्रौ०२।४।२६ "पलाशशाखायाः मूलदेशे छिन्नः काष्ठभाग उपवेषः" कर्कः। पलाशशाखाया इति यज्ञविशेषे "सामान्यतस्तु औदुम्बर इति पूर्वापरमीमांसा। धृष्टिरसीति मन्त्रेणोपादीयमानत्वात् उपवेषस्य धृष्टित्वमित्याश्वलायनेन"धृष्टी शतमाने" इत्युक्तम्। "धृष्टिभ्यां भग्नानां परिकीर्याङ्गारैः" कात्या०श्रौ० २६।२।९ [दृश्यम्।

धृष्णु पु० सात्वतवंशजे भजमानपुत्रभेदे क्रथनशब्दे २२०४पृ०

धृष्णुज् त्रि०धृष-नजिज्।१धृष्टे २प्रगल्भे ३निर्लज्जे अमरः।

धृष्णि पु० धृष-वा० नि। किरणे अमरः।

धृष्णु त्रि० धृष-क्नु। १धृष्टे २प्रगल्भे त्रिका०३कच्छुकायां पु० शब्दच०। ४रुद्रभेदे पु० "नमस्ते आयुधायानातताय धृष्णवे" यजु० १६।१४ "धृष्णवे धर्षणशीलरिपुं हन्तुं प्रगल्भाय" वेददी०। सावर्णिमनोः ५पुत्रभेदे पु० "सावर्णस्य मनोः पुत्राः" इत्युपक्रमे "चरिष्णुरार्यो धृष्णुश्च राजन्! सुमतिरेव च" हरिवं०७अ०। वैवस्वतमनोः ६पुत्रभेदे पु० तद्वंशोपक्रमे "इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च" हरिवं० १० अ०। सात्वतवंशकुकुरसुते ७नृपभेदे "कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा" हरिवं० ३८ अ०। दृषितामहपुत्रकविसुतभेदे "पितामहस्त्वपत्यं वै कविं जज्ञाह तत्त्ववित्। तदा स वारुणः ख्यातो भृगुः प्रसवकर्मकृत्। ब्रह्मणस्तु कवेः पुत्रा वारुणास्ते उदाहृताः। अष्टौ प्रसवजेर्युक्ता गुणैर्ब्रह्मविदः शुभाः। कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा। भृगुश्च विरजाश्चैव काशी चोशय धर्मवित्। अष्टौ कविसुताह्येते सर्वमेभिर्जगत्ततम्" भा० आनु० ८५अ०। वेदे सुपां स्थाने याच् "प्रधृष्णुया नमति वस्त्रो अक्षू" ऋ०४।२१।७ "धृष्णुया धृष्णुः" भा० "भ्राजन्त्यौ यन्ति धृष्णुया" ऋ०५।१०।५। "धृष्णुया धृष्णवः" भा०।

धृष्णुक पु० वैवस्वतमनुवंशजे नृपभेदे "धृष्णुकश्चाम्बरीषश्च दण्डकश्चेति ते त्रयः" हरिवं० १अ० तद्वंशोक्तौ

धृष्णोजस् पु०कार्तवीर्यनृपपुत्रभेदे "शूरसेनश्च शूरश्च धृष्णोजाः

क्रष्ण एव च । जयध्वजश्च नाम्नाभीदावन्त्यो नृपतिर्महान् । कार्तवीर्यस्य तनया वीर्यवन्तो महाबलाः" हरिवं० ३४अ० ।

धृष्य त्रि० धृष–कर्मणि ऋदुपधत्वात् क्यप् । धर्षणीये "भूतानामिह यो वै त्वां मया विनिहितां सतीम् । उपा हन्यात् स मे धृष्यः" भा०शा० २२५अ० "पश्यन्नदूरात् मनसाप्यधृष्यम्" कुमा० ।

धे पाने भ्वा० प० सक० अनिट् टित् । धयति अदधत् अधासीत् । दधौ धास्यति । खच् स्तनन्धयः स्त्रियां टित्त्वात् खचि ङीप् हरदत्तोक्तेः खच्येव ङीप् । स्तनन्धयी अन्यत्र टाप् ।

धेन पु० धयन्ति धे–नन् दत्व ।१सप्तर्षे २नदे च ३नद्यां स्त्री टित्त्वेऽपि खच्येव ङीप् इति हरदत्तोक्तेः न ङीप् । ४वाचि स्त्री निघण्टु "वाचो भय प्रष्टवती धेनाजिगातिदाशुषे" ऋ०१।२।२ "धेना वाक्" भा० । ५धन्वाके स्त्री गौरा० ङीष् । स्वार्थे क तत्रार्थे भावप्र० ।

धेनु स्त्री धयति सुतान्, धीयते पीयते वत्सैर्वा धेट्–नु दत्व । १गोमात्रे वत्सस्य धयनात् तस्यास्तथात्वम् । २नवसूतिकायाम् सवत्सायां गवि स्त्री अमरः वत्सैः पीयमानक्षीरत्वात् तस्यास्तथात्वम् ।

गोमात्रभेदाः दशविधा यथा वृह०पु०उत्तरखण्डे १५०अ० "गवां जातीस्तु वक्ष्यामि शृणुष्वैकमना द्विज ! । प्रथमा गौरकपिला द्वितीया गौरपिङ्गला । तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला । पञ्चमी शुक्लपिङ्गाक्षी षष्ठी तु शुक्लपिङ्गला । सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी । नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला । नाटशास्त्रेऽप्यनड्वाहः कपिलास्तु प्रकीर्त्तिताः" । २दानार्थकल्पिते धेन्वाकारे गुडादिपदार्थे यथाह हेमा०दा० "अत्र यद्यपि धेनुशब्देन स्वरूपतो गौरेवाभिधीयते तथापि धेनुशब्दसाधारण्यादिह प्रकरणे गुडधेन्वादीनामपि सन्निवेशो युक्तः तासु च क्रमेण निरूप्यमाणासु "दशमी स्यात् स्वरूपतः" इति स्वरूपधेनोरन्ते स्थितत्वात् गुडधेन्वादय एव प्रथमतो निरूप्यन्ते । तदुक्तं मत्स्यपुराणे "यास्तु पापविनाशिन्यः पठ्यन्ते दश धेनवः । तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ! । प्रथमा गुडधेनुः१ स्यात् घृतधेनुश्च२ रथापि च । तिलधेनुः३ तृतीया च चतुर्थी ४जलसंज्ञिका । क्षीरधेनुः५ च विख्याता मधुधेनुः६ रथापि च । सप्तमी शर्कराधेनुः७ दधिधेनुः८ रथाष्टमी । रसधेनुः९ च नवमी दशमी स्यात् स्वरूपतः" । "कृष्णाः स्युर्दधेनूनामितरासान्तु राशयः" । "सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः" तत्तच्छब्दे दृश्यम् । यशोधनोधेनुमप्रेर्त्तमोच । "अनिन्द्रा नन्दिनी नाम धेनुरावहते धनात्" रघुः ।

धेनुक पु० धेनुरिव "इवे प्रतिकृतौ" पा० कन् । १असुरभेदे "खर इत्युच्यते दैत्यो धेनुकः सोऽसुरोत्तमः" हरिवं० ५५अ० । "दारुणो धेनुको नाम दैत्यो गर्दभरूपवान् । खरयूथेन महताहतो बलवतां वरः । स तु तालवनं घोरं गर्दभः परिरक्षति । रूपचित्रापदगणांस्त्रासयन्नतिदर्पितः" हरिवं० ७०अ० । २रतिबन्धभेदे तल्लक्षणं रतिमञ्जर्यामुक्तं यथा "न्यस्तहस्तयुगला निले पदे योषिदेति कटिरूढवल्लभा । अग्रतो यदि शनैरधोमुखी धेनुकं तदवदन्ति प्रिये ! ।" "सुप्तां स्त्रियं समाश्लिष्य स्वयं सुप्तोरमेत् पुनः । बधु लिङ्गं चालयेद्यो बन्धोऽयं धेनुकः स्मृतः" । ३हस्तिन्यां स्त्री । संज्ञायां कन् । ४धन्वाके स्त्री मेदि० ।

धेनुकसूदन पु० धेनुकमनुपदोक्तमसुरं सूदयति सूदि–ल्यु । बलभद्रे तन्निसूदनकथा हरिवं० ७०अ० यथा "रौहिणेयं खरो दृष्टः सोऽदशद्दशनायुधः । पद्भ्यां सुभाभ्यां पुनः पश्चिमाभ्यां पराङ्मुखः । जघानोरसि दैत्योऽसौ रौहिणेयं निरायुधम् । ताभ्यामेव च जघान पद्भ्यां तं दैत्यगर्दभम् । आवर्जितखुरस्तस्य प्रेरयंस्तालमूर्द्धनि । स भग्नोरुकटीग्रीवो भग्नपृष्ठोदराननः । खरस्तालफलैः सार्द्धं पपात धरणीतले । तं गतासुं गतश्रीकं पतितं वीक्ष्य गर्दभम् । भ्रातॄंस्ततोऽपरांस्तस्य तत्पराजनि सोऽक्षिपत्" हरिवं० ७०अ० "पूतनाधेनुकारिष्टकेशिचाणूरसूदनः" त्रिकाण्डशेषे विष्णुनामपर्याये धेनुसूदनोक्तिः रामस्य विष्णोरवतारत्वात् इति बोध्यम् रामद्वारा तस्य हननात् तस्य तथात्वम् । भाग० १०१५ अ० अपि बलरामेणैव तस्य हननकथान्ते "नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे" इत्यनेन परमेश्वरकर्त्तृकस्य तद्धननस्य न चित्रत्वमित्युक्तम् । बलरामेण तद्धननेऽपि तस्य तद्द्वारा तद्धन्तृत्वमस्त्येवेति बोध्यम् धेनुकारिप्रभृतयोऽपि बलरामे ।

धेनुदुग्ध न० धेनोर्दुग्धमिव स्वादु फलमस्य । १चिर्भटे राजनि० ६त० । २धेन्वाः क्षीरे च ।

धेनुदुग्धकर पु० धेनोर्दुग्धमिव किरति कृ–अच् धेनो दुग्धं

करोति वर्द्धयति ज-क्च वा। गर्जरे (गाँजर) राजनि०। तत्पाने धेनोर्दुग्धस्य वर्द्धनात्तस्य तथात्वम्।

धेनुमत् त्रि० धेनुरस्त्यस्य मतुप्। १धेनुस्वामिनि स्त्रियां ङीप्। सा च भरतवंशप्रदेवद्युम्नस्य २भार्य्यायाम् "देवद्युम्नसुतो धेनुमत्यां सुतः परमेष्ठी" भाग०५।१५।२

धेनुमूल्य न० ६त०। प्रायश्चित्तरूपधेनुदानस्य निष्क्रयरूपे मूल्यभेदे तच्च प्रायश्चित्ततत्त्वे व्यवस्थापितं यथा "अथ धेनुमूल्यव्यवस्था। संवर्त्तः "प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीम्। धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः"। पयस्विनीमिति विशेषणं दुग्धोपयोगाय सा च वत्सं विना न सम्भवति। अतः सवत्साया एव दानं सुखं तदभावे यथोचितं तन्मूल्यं तदभावे पुराणत्रयम्। "द्वात्रिंशत्पणिका गावोवत्सः पौराणिको भवेत्" कात्यायनवचनात्। द्वात्रिंशन्मतमिति कृत्वा पठन्ति "धेनुः पञ्चभिराद्यानां मध्यानां त्रिपुराणिकी। कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता"। अत्र पुराणत्रयलभ्यं गोतमोक्तं हिरण्यादिकमेव देयं तद् यथा "हिरण्यं गौर्वासोऽश्वोभूमिस्तिला घृतमन्नमिति देयानि"। एतान्येवानादेशे विकल्पेन क्रियेरन्निति अन्यथा इदमनर्थकं स्यात् इति" प्रायश्चित्तविवेकः। तच्चिन्त्यं हिरण्यं गौरित्यादिना गोर्विकल्पकत्वेन हिरण्यादिकसक्तं न तु गोमूल्यत्वेन ततश्च "द्वात्रिंशत्पणिका गावः" इत्यादिवचनात् कार्षापणत्रयदानमेव युक्तम्। तत्र "तात्त्विकः कार्षिकः पणः" इति याज्ञवल्क्यवचनेन "गुञ्जाः पञ्चाद्यमाषकः। ते षोड़शाक्षः कर्षोऽस्त्री पणं कर्षचतुष्टयं" इत्यमरसिंहोक्तेन अशीतिरक्तिकापरिमितताम्रे पणशब्दः सङ्केतितः। स च तावत्संख्यकवराटकैर्लभ्यत इति वराटकेष्वपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यसूक्तयोर्वचनम्। "अशीतिभिर्वराटकैः पण इत्यभिधीयते। पुराणं ते षोड़शभिः रजतं सप्तभिस्तु मैः"। गोतमोक्तपरिगणनोपनियमस्तु अनादिष्टे प्राथमिककल्पाय आदिष्टे तत्तद्द्रव्यप्राधान्यं हिरण्यादेरानुकल्पिकत्वमिति विशेषः। अतएव यमेन सामान्यतो दानसूक्तं यथा "गोमध्येन शरीरस्य तपसाऽध्ययनेन च। पापकन्मुच्यते पापात् दानेन च दमेन च"। अतः कार्षापणत्रयलभ्यं रजतादि दीयते। यत्तु मिताक्षरायाम् "तदभावे निष्क्रयः स्यात्तदर्द्धं" पादएव च" इति स्मरणान्निष्क्रादिकसूक्तं तच्छक्तमाद्यपेक्षया तत्रापि "चतुःसौवर्णिको निष्कः" इति मनूक्तनिष्कस्य न ग्रहणम् अत्यन्तविसदृशमूल्यत्वात् साष्टशतसुवर्णनिष्कवत्। किन्तु दीनारनिष्कस्य ग्रहणं तथा चामरः। "साष्टे शते सुवर्णानां हेमन्युरोभूषणे पले" दीनारेऽपि च निष्कोऽस्त्री" इति। दीनार उक्तो विष्णुगुप्तेन "दीनारोरोपकैरष्टाविंशत्या परिकीर्त्तितः। सुवर्णसप्ततितमो भागोरोपक उच्यते"। सुवर्णस्त्वशीतिरक्तिकापरिमितं हेम। तथा च मनुः। "पञ्चकृष्णलकोमाषस्ते सुवर्णस्तु षोड़श" इति अत्र काञ्चनं व्यक्तमाहामरसिंहः। "सुवर्णविस्तौ हेम्नोऽक्षः" इति। एवञ्च सप्तमांशाधिकहेमरक्तिका रोपकः तदष्टाविंशत्या द्वात्रिंशद्रक्तिकापरिमितोदीनारो निष्कः" प्रा०त० रघु०।

धेनुमय्या स्त्री भव्या धेनुः "धेनोर्भव्यायाम्" गणसूत्रनिर्देशात् परनिपातः सम् च। भवद्भव्यां धेन्वाम्

धेनुष्टरी स्त्री अतिशयेन धेनुः तरप् ङीप् पारस्करादेराकृतिगणत्वात् सुट् षत्वञ्च। प्रशस्तधेन्वाम्। "सारस्वतीं धेनुष्टरीमालभेत" कठशाखाश्रुतिः।

धेनुष्या स्त्री धेनु-संज्ञायां यत् सुक् च। ऋणशोधनार्थसत्तमर्णाय बन्धकत्वेन दीयमानायां धेनौ अमरः। "गौर्महिषी वा या दुग्धबन्धके स्थिता सा धेनुष्येति" दुर्गाः। सा संजातास्य तार०इतच्। धेनुधिग्रत उत्तमर्णे

धेय त्रि० धा-कर्मणि यत् १धार्य्ये २पोष्ये च। स आदिः स मध्यः स चान्तः प्रजानां स धाता स धेयः स कर्त्ता स कार्यम्" भा० शा० ३४२अ० ईश्वरस्यैव सर्वरूपत्वात् तथात्वम्। धे-यत्। ३मेये त्रि०। भावे यत्। ४धारणे ५पोषणे ६पाने च।

धेष्ठ त्रि० अतिशयेन धाता इष्ठन् तस्य लोपे गुणः। धारकतमे "मित्राणां मित्रपते धेष्ठः" ऋ०१।१७०।५ "धेष्ठः अतिशयेन धारकः" भा०। नामधेयादौ स्वार्थे धेयप्रत्ययः।

धैनव पुंस्त्री धेनोरपत्यम् उत्सा० विदा० वा अञ्। धेन्वपत्ये स्त्रियां ङीप्।

धैनुक न० धेनूनां समूहः "अचित्तहस्तिधेनोष्ठक्" पा० ठक् "इसुसुक्तान्तात् कः" पा० ठस्य कः। १धेनुसमूहे स्त्रीणां २करणभेदे च मेदि०।

धैर्य्य न० धीरस्य भावः कर्म वा ष्यञ्। १धृतौ "स्थिरां चित्तोन्नतिर्यां तु तद्धैर्य्यमिति संज्ञितमिति" भूपालकोषः। २अप्रमादे ३अत्याकुलत्वे ४विघ्नादुपस्थितावपि प्रारब्धा-

परित्यागहेतावन्तःकरणवृत्तिविशेषे। ५निर्विकारचित्तत्वे। "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" एतदभिप्रायेण "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि तएव धीराः" इति कुमा० उक्तम्। "कुर्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। "अवधीर्य धैर्यकलिता दयितम्" माघः। ६नायकयोर्गुणभेदे धीरताशब्दे दृश्यम्। ७पुरुषगुणभेदे यथा "शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यं तेजसी। ललितौदार्य्यमित्यष्टौ सत्वजाः पौरुषा गुणाः" इत्युद्दिश्य "व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि" सा० द० लक्षितम् उदाहृतञ्च "श्रुताप्सरोगीतिरपि क्षणेऽपितु हरः प्रसंख्यानपरो बभूव। आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति"। स्वार्थे धन्। पुरुषमेधयज्ञे ८हौम्यदेवभेदे पु०। तदुपक्रमे "मेधायै रथकारं धैर्य्याय तक्षाणम्" यजु० ३०।७

धैवत पु० धीमतामयम् अण् पृषो०। तन्त्रीकण्ठोत्थित सप्तस्वरेषु षष्ठे स्वरे तल्लक्षणं यथा "गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्ध्वगः पुनः। धावन्निव च यो याति कण्ठं देशं स धैवतः" सङ्गीतदामो "अश्वस्तु धैवतं रौति" सङ्गीतशास्त्रोक्तेरश्वस्वरतुल्यत्वम्। अस्य च वायुभवत्वेऽपि आकाशगुणत्वम् भा० शा० १८४ अ० उक्तं यथा "तत्रैकगुणमाकाशं शब्द इत्येव तत् स्मृतम्। तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकम्। षड्जऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्। एष सप्तविधः प्रोक्तो गुण आकाशसम्भवः। ऐश्वर्य्येण तु सर्वत्र स्थितोऽपि पटहादिषु। मृदङ्गभेरीशङ्खानां स्तनयित्नोरथस्य च। यः कश्चिच्छ्रूयते शब्दः प्राणिनोऽप्राणिनोऽपि वा। एतेषामेव सर्वेषां विषये संप्रकीर्त्तितः। एवं बहुविधाकारः शब्द आकाशसम्भवः। आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह। अव्याहतैश्चेतयते न वेत्ति विषमस्थितैः"। [तः। धीवोभावे।

धैवत्य न० धीवोभावः ष्यञ् दाण्डिनायनेत्यादि० नि० नस्य

धैवर पुंस्त्री धीवरस्यापत्यं वा० अत इञ् बाधित्वा वेदे अण्। धीवरापत्ये "सरोभ्यो धैवरम्" यजु० ३०।१६ लोके तु इञ् धैवरिरित्येव।

धोयी पु० कविभेदे "धोयी कविः क्ष्मापतिः" गीतगो०

धोड पुंस्त्री धुर-वधे अच रस्य लस्य डः। (ढोँड़ा) सर्पभेदे डुण्डुभे शब्दर० स्त्रियां जातित्वात् ङीष्।

धोर गतौ सक०चातुर्य्ये अक०भ्वा० पर०सेट। धोरति अधोरीत्। दुधोर अदित् णिच् चङि अदुधोरत् त।

धोरण न० धोर-गतौ करणे ल्युट्। १यानमात्रे हस्त्यश्वरथादौ त्रिका०। भावे ल्युट्। २गतौ।

धोरणि(णी) स्त्री धोर-अनि वा ङीप्। परम्परायाम् जटाधरः। "यैर्मौकन्दवने मनोज्ञपवने सद्यःस्खलन्माधुरीधाराधोरणिधौतधामनि धराधीशत्वमालम्बते। तेषां नित्यविनोदिनां सुकृतिनां माधीकपानां पुनः कालः किन्न करोति केतकि! यतस्त्वाऽपि केलीस्थली"उद्भटः।

धोरित न० धुर-धोर-वा भावे क्त। १वधे २गतौ ३अश्वगतिभेदे हेमच०। स्वार्थे क। तत्रार्थे अमरः।

धौत त्रि० धाव-क्त ऊठ्। १प्रक्षालिते २मार्जिते ३शोधिते हेम० "ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च। अधौतं तत् विजानीयात् दशा दक्षिणपश्चिमे" कर्मलोचनम्। "धौतोत्तरीयप्रतिमच्छवीनि" "परितश्च धौतसुखरुक्मविलसदहिमांशुमण्डलाः" माघः। ४रौप्ये न० राजनि०। भावे क्त। ५प्रक्षालने न०।

धौतकट पु० नित्यकर्म०। स्वनिर्मितपात्रभेदे (धोकड़ा)जटा०

धौतकोषज न०धौतं प्रक्षालितं कोषजं नित्यक०। कृमिकोषजाते वस्त्रभेदे शब्दर०। [वस्त्रे अमरः।

धौतकौषेय न० नित्यकर्म०। प्रक्षालिते कृमिकोषजाते

धौतबली स्त्री धौताञ्जन्यां तत्रट्टे शिक्यभेदे हारा०।

धौतमूलक पु०१चीनराजभेदे "अर्कजश्च बलीहानां चीनानां धौतमूलकः" भा०उ० ७३अ०। धौतं मूलं यस्य कप्। २प्रक्षालितमूलयुक्ते त्रि०।

धौतय न०धौतमिव वर्णं याति या-क। सैन्धवे नैघण्टुकाः

धौतरि त्रि० धूतमेव धौतं कम्पनमर्हति अर्ह-कि। कम्पनकारके स्त्रियां ङीप्। "स सवान्तृप्तोलाभिर्धौतरीभिः" ऋ०६।४४।७ "धौतरीभिः कम्पनकारीभिः" भा०।

धौतशिल न० धौता शिला यस्य। स्फटिके त्रिका०।

धौताञ्जनी स्त्री तत्रट्टे शिक्यभेदे मेदि०।

धौती स्त्री धू-कर्तरि क्तिच् स्वार्थे अण् ङीप्। चलनकर्तरि "योधौतीनामहिहन्तारिणक् पथः" ऋ०२।१३।५ "धौतीनां कम्पनीनाम्" भा०। धूति-स्वार्थे अण् ङीप्। २हठयोगाङ्गभेदे हठयोगशब्दे दृश्यम्।

धौन्धुमार न० धुन्धुमारमधिकृत्य कृतो ग्रन्थः अण्। भारतवनपर्वान्तर्गतोपाख्यानभेदे "ऐन्द्रद्युम्नसुपाख्यानं धौन्धु-

मारं तथैव च" भा०आ०१अ०। तच्च वनपर्वणि २००अध्यायावधौ २०१ अध्यायान्ते दृश्यम्। [देशभवे।

धौमक पु० धूमे तत्प्रधानदेशे भवः धूमा० वुञ्। धूमप्रधान-

धौमतायन पु० राजभेदे। तेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमतायनकृतनिर्वृत्ते नगरादौ

धौमायनक त्रि० धौमायनेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमायननिर्वृत्तादौ।

धौमीय त्रि० धूमेन निर्वृत्तादि० चतुरर्थ्याम् कुशाश्वा०छण्। धूमनिर्वृत्तादौ।

धौम्य त्रि० धूमस्यापत्यं गर्गा० यञ्। १धूमर्षेरपत्ये स च युधिष्ठिरपुरोहितः यथा

"गन्धर्व उवाच यवीयान् देवलस्यैष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं दृशुध्वं यदोच्यथ"। "तत उत्कोचकं तीर्थं गत्वा धौम्याश्रमन्तु ते। तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत!। तान् धौम्यः प्रतिजग्राह सर्ववेदविदांवरः। वन्येन फलमूलेन पौरहित्येन चैव ह" भा०आ० १८२अ०। व्याघ्रपादऋषेः पुत्रभेदे २उपमन्योरनुजे च।

"पुरा कृतयुगे तात! ऋषिरासीन्महातपाः। व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः। तस्याहमभवं पुत्रो धौम्यश्चापि ममानुजः। कस्यचित्त्वथ कालस्य धौम्येन सह माधवः" भा०आनु०१४अ०। पश्चिमदिगाश्रिते ३ऋषिभेदे च "उष्णः कवषो धौम्यः परिव्याधश्च वीर्यवान्। एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः। अत्रेः पुत्रश्च भगवांस्तथा सारस्वतः प्रभुः। एते चैव महाभागाः पश्चिमामाश्रिता दिशम्" भा०शा० २०८अ०

धौम्र पु० धूम्रएव स्वार्थे अण्। ऋषिभेदे "धौम्यो विभाण्डो माण्डव्यो धौम्रः कृष्णानुभौतिकः" भा०शा० ४७अ०। स्वार्थे अण्। २धूम्रवर्णे ३तद्वति त्रि० भावे अण्। ४धूम्रवर्णत्वे धूम्रोदेवताऽस्य अण्। ५वास्तुस्थानभेदे पु०

धौम्रायण पुंस्त्री० धूम्रस्य गोत्रापत्यं अश्वा० फञ्। धूम्रर्षेः गोत्रापत्ये।

धौरादित्य पु० तीर्थभेदे शिवपु०।

धौरित न० धौरितमेव अण्। "धौरितं गतिभाणं यद्योत्थितं वल्गितं पुनः। अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम्" इत्युक्ते अश्वगतिभेदे। स्वार्थे क धौरितक तत्रार्थे अमरः। [अमरः। २धुर्ये वृषे पु० राजनि०।

धौरेय त्रि० धुर वहति "धुरो यड्ढकौ" पा० ढक्। १धूर्वहे

धौर्त्तक न० धूर्तस्य भावः मनोज्ञा० वुञ्। धूर्तत्वे शाठ्ये

धौर्त्तेय पुंस्त्री धूर्त्ताया अपत्यं "स्त्रीभ्यो ढक्" पा० ढक्। धूर्त्ताया अपत्ये बहुवचने योधेयादि० ततः प्रत्ययस्य न लुक्।

धौर्त्त्य न० धूर्तस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। १धूर्तत्वे २धूर्तकर्मणि च। "छेट छोट धौर्त्त्ये पूर्वभावे" कण्ड्वादिगणसूत्रम्।

धौर्य्य न०धोर-धुर-वा यत्। १अश्वगतिभेदे धोरणे हेम०।

धौवकि पुंस्त्री धुवकाया अपत्यं स्त्रीभ्यो ढक् बाधित्वा बाह्वादि० इञ्। धुवकाया अपत्ये।

ध्मा अग्निसंयुतौ दीर्घश्वासहेतुके शब्दभेदे अक० ताडशशब्देन वादने सक०भ्वा०पर० अनिट्। धमति अध्मासीत्। दध्मौ ध्मातः। ध्मापयति "सुखेनैव धमेदग्निं सुखादग्निः प्रजायते" सङ्कारतत्त्वम् "शङ्खान् दध्मुः पृथक् पृथक्" गीता। ध्मायते। अध्मायि। "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः" मनुः। "वाय्वग्निभ्यां यथा लौहं ध्मातं त्यजति वै मलम्" भाग० ३।२८।४०। आ-स्फीततायाम् आध्मानशब्दे दृश्यम्।

ध्माकार पु० ध्मा-इत्यव्यक्तशब्दस्य कारः। १(ध्मा) इति शब्दकरणे। कृ-कर्त्तरि अण्। २लोहकारके पु० नैघण्टुप्र०

ध्मा(ध्वा)क्ष आकाङ्क्षे सक० धोरवे अक० भ्वा० पर० सेट् इदित्। ध्मा(ध्वा)ङ्क्षति। अध्मा(ध्वा)ङ्क्षीत्। दध्मा(ध्वा)ङ्क्ष। पा० मते वोपधः।

ध्मा(ध्वा)ङ्क्ष पुंस्त्री ध्मा(ध्वा)क्ष-अच्। १काके २मत्स्यभक्षके पक्षिभेदे अमरः। ३भिक्षुके ४तक्षके च मेदि० ५कक्कोलिकायां स्त्री गौ०ङीष्।

ध्मा(ध्वा)ङ्क्षजङ्घा ध्मा(ध्वा)ङ्क्षस्येव जङ्घा अस्याः। काकजङ्घायाम् राजनि०। [राजनि०।

ध्मा(ध्वा)ङ्क्षजम्बु स्त्री ध्मा(ध्वा)ङ्क्षप्रिया जम्बुः। काकजम्बूं

ध्मा(ध्वा)ङ्क्षतुण्डी ध्मा(ध्वा)ङ्क्षस्येव तुण्डमस्याः ङीष्। काकनासातायां राजनि०।

ध्मा(ध्वा)ङ्क्षदन्ती स्त्री ध्मा(ध्वा)ङ्क्षस्येव दन्ता अवयवोऽस्याः ङीष्। काकतुण्डीलतायां राजनि०।

ध्मा(ध्वा)ङ्क्षनखी स्त्री ध्मा(ध्वा)ङ्क्षस्येव नखा अस्या ङीष। काकतुण्ड्यां राजनि०।

ध्मा(ध्वा)ङ्क्षनाम्नी स्त्री ध्मा(ध्वा)ङ्क्षं नामयति प्रियत्वात् नामि बा० मनि। काकोदुम्बरिकायां राजनि०।

ध्मा(ध्वा)ङ्क्षनाशिनी स्त्री इत०। हपुषायां भावप्र०

धा(ध्वा)ङ्क्षनासा स्त्री ध्मा(ध्वा)ङ्क्षस्येव नासा यस्याः । काकनासिकायाम् राजनि० । वा कप् अत इत्वम् ध्मा(ध्वा)ङ्क्षनासिकाऽपि तत्रार्थे । [जातित्वात् ङीष् ।

धा(ध्वा)ङ्क्षपुष्ट त्रि० ३त० । कोकिले हारा० स्त्रियां

धा(ध्वा)ङ्क्षमाची ध्मा(ध्वा)ङ्क्षमचते मच–अण् काकमाचीवत् साध्यम् । काकमाच्यां राजनि० । [राजनि० ।

धा(ध्वा)ङ्क्षवल्ली स्त्री तन्नामा वल्ली । काकनासायाम्

धा(ध्वा)ङ्क्षादनी स्त्री काकादनीवत् साध्यम् । काकतुण्ड्यां राजनि० । [प्रभृतयोऽपि तत्रार्थे ।

धा(ध्वा)ङ्क्षाराति पु० ६त० । मेषके हारा० । तदरि-

धा(ध्वा)ङ्क्षी स्त्री जातौ ङीष् । १काक्यां २काकोलिकायां च मेदि० । [राजनि० ।

धा(ध्वा)ङ्क्षोली स्त्री काकोलीवत् साध्यम् । काकोल्यां

धात त्रि० ध्मा–क्त । १संधुक्षिते श्वासभूयिष्ठतया दीर्घभावेन २लक्ष्यमाणे वर्णे च । ३शब्दिते ४वादिते च ।

धापन न० ध्मा–णिच् भावे ल्युट् । दंहणे शब्दार्थचि० ।

धापित त्रि० धमापि–क्त । दंहिते बहुलीकृते शब्दार्थचि० ।

ध्यात त्रि० ध्यै–क्त । चिन्तिते ध्यानविषयीभूते "तदात्मना ध्यातधया रते च का" नैष० ।

ध्यान न० ध्यै–भावे ल्युट् । १चिन्तने २अद्वितीयवस्तुनि विच्छिद्यविच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहे । "शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसन्तान एकायतेति यमाहुरिति" भाष्योक्तेः ३ध्येयप्रत्ययैकतानत्वे । एकत्रधृतस्य चित्तस्य भगवदाकारवृत्तिप्रवाहोत्तरोत्तराऽन्याकारप्रत्ययाव्यवहिते ४निदिध्यासनसंज्ञे चित्तस्यात्माकाराद्वयावृत्तौ । "ब्रह्मैवाऽस्मीति सद्वृत्त्या निरालम्बतया स्थितिः । ध्यानशब्देन विख्याता परमानन्ददायिनी" इत्युक्तेः ५परमात्मचिन्तने । धारणानिरुद्धस्य त्रिनेत्रपञ्चवक्त्राद्याकारविषयायां ६चिन्तायाम् । "चिन्ता तद्विषया ध्यान"मित्युक्तेः । "तत्र प्रत्ययैकतानता ध्यानम्" पा० सू० तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य यैकतानता विसदृशपरिणामपरिहारेण यदेव धारणयाऽवलम्बनीकृतम् तदालम्बनतयैव निरन्तरसत्प्रवृत्तिः सा ध्यानमुच्यते । ध्यानपदनिरुक्त्यादिकमुक्तं महानिर्वाणतन्त्रे यथा "ध्यै चिन्तायां स्मृतो धातुः चिन्ता तत्त्वेन निश्चला । एतद् ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा । सगुणं मन्त्रभेदेन निर्गुणं केवलं मतम्" इति । अपि च "ध्यानं तु द्विविधं प्रोक्तं सरूपारूपभेदतः । अरूपं तत्र यद् ध्यानमवाङ्मनसगोचरम् । अव्यक्तं सर्वतो व्याप्तमिदमित्यविवर्जितम् । अगम्यं योगिभिर्गम्यं कृच्छ्रैर्बहुसमाधिभिः । मनसो धारणार्थाय शीघ्रं स्वाभीष्टसिद्धये । सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते । अरूपायाः कालिकायाः कालमातुर्महाद्युतेः । गुणक्रियानुसारेण क्रियते रूपकल्पना" ब्रह्मचिन्तायां यथा

"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः । अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः" इति गारुडे ४६अ० । तत्कालभेदश्च "प्राणायामैर्द्वादशभिर्यावत् कालं कृतो भवेत् । यस्तावत्कालपर्यन्तं मनो ब्रह्मणि धारयेत् । तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः । द्वादशध्यानपर्यन्तं मनो ब्रह्मणि यो नरः । तिष्ठेत स यतो मुक्तः समाधिः सोऽभिधीयते । ध्येयाच्च चलते यस्य मनोऽभिध्यायतो भृशम् । प्राणायामकृतं कालं यावत् सा धारणा स्मृता । ध्येयसक्तं मनो यस्य ध्येयमेवानुपश्यति । नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्तितम् । ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् । यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः । ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः । पश्यति द्वैतरहितं समाधिः सोऽभिधीयते" इति गारुडे २४०अ० अग्निपुराणे च तल्लिरुक्त्यादिकमुक्तं यथा

"अग्निरुवाच । ध्यै चिन्तायां स्मृतो धातुर्विष्णुचिन्ता मुहुर्मुहुः । अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते । आत्मनः मनसस्तस्य मुक्त्याद्येषोपधस्य च । ब्रह्मचिन्ता समासक्तिर्ध्यानं नाम तदुच्यते । ध्येयालम्बनसंस्थस्य सदृशप्रत्ययस्य च । प्रत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते । ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् । ध्यानमेतत्समुद्दिष्टं प्रत्ययस्यैकतानता । एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् । कुलं स्वजनमित्राणि समुद्धृत्य हरिर्भवेत् । एवं मुहूर्तमर्धं वा ध्यायेद् यः श्रद्धया हरिम् । सोऽपि यां गतिमाप्नोति न तां सर्वैर्महामखैः । ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् । एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत तत्त्ववित् । योगाभ्यासाद्भवेन्मुक्तिरैश्वर्यं चाष्टधा महत् । ज्ञानवैराग्यसम्पन्नः श्रद्दधानः क्षमान्वितः । विष्णुभक्तः सदोत्साही ध्यातेयं पुरुषः स्मृतः । मूर्तामूर्तं परं ब्रह्म हरेर्ध्यानं हि चिन्तनम् । सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः । अणिमादिगुणैश्वर्यं सक्ति-

ध्यानप्रयोजनम् । फलेन योजको विष्णुरतो ध्यायेत् परेश्वरम् । गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन् निमिषन्नपि । शुचिर्वाप्यशुचिर्वापि ध्यायेत् सततमीश्वरम् । स्वदेहायतनस्थान्ते मनसि स्थाप्य केशवम् । हृत्पद्मपीठिकामध्ये ध्यानयोगेन पूजयेत् । ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः । तेनेहा मुक्तिमाप्नोति बाह्याशुद्धैश्च नाध्वरैः । हिंसादोषविमुक्तित्वाद्विशुद्धिश्चित्तसाधनः । ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः । तस्मादशुद्धं सन्त्यज्य ह्यनित्यं बाह्यसाधनम् । यज्ञाद्यं कर्म सन्त्यज्य योगमत्यर्थमभ्यसेत् । विकारमुक्तमव्यक्तं भोग्यभोगसमन्वितम् । चिन्तयेद्धृदये पूर्वं क्रमादादौ गुणत्रयम् । तमः प्रच्छाद्य रजसा सत्त्वेन छादयेत्ततः । ध्यायेत्त्रिमण्डलं पूर्वं कृष्णं रक्तं सितं क्रमात् । सत्त्वोपाधिगुणातीतः पुरुषः पञ्चविंशकः । ध्येयमेतदशुद्धस्तु त्यक्त्वा शुद्धं विचिन्तयेत् । ऐश्वर्यं पङ्कजं दिव्यं पुरुषोपरि संस्थितम् । द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम् । पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् । कर्णिकाकेसरं नालं ज्ञानवैराग्यमुत्तमम् । विष्णुधर्मस्य तत्कन्दमिति पद्मं विचिन्तयेत् । तद्धर्मज्ञानवैराग्यं शिवैश्वर्यमयं परम् । ज्ञात्वा पद्मासनं सर्वं सर्वदुःखान्तमाप्नुयात् । तत् पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिम् । अङ्गुष्ठमात्रममलं ध्यायेदोङ्कारमीश्वरम् । कदम्बगोलकाकारं तारं रूपमिव स्थितम् । ध्यायेद्वा रश्मिजालेन दीप्यमानं समन्ततः । प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्वरम् । ध्यायेज्जपेच्च सततमोङ्कारं परमक्षरम् । मनःस्थित्यर्थमिच्छन्ति स्थूलध्यानमनुक्रमात् । तद्भूतं निश्चलीभूतं समेतं सूक्ष्मेऽपि संस्थितम् । नाभिकन्दे स्थितं नालं दशाङ्गुलसमावृतम् । नालेनाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् । सकर्णिके केसराले सूर्यसोमाग्निमण्डलम् । अग्निमण्डलमध्यस्थः शङ्खचक्रगदाधरः । पद्मी चतुर्भुजो विष्णुरथ वाष्टभुजो हरिः । शार्ङ्गाद्यायुधधरः पाशाङ्कुशधरः परः । स्वर्णवर्णः श्वेतवर्णः सश्रीवत्सः सकौस्तुभः । वनमाली स्वर्णहारी स्फुरन्मकरकुण्डलः । रत्नोज्ज्वलकिरीटश्च पीताम्बरधरो महान् । सर्वाभरणभूषाढ्यो वितस्तिर्वा यथेच्छया । अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ओम् । ध्यानाच्छान्तो जपेन्मन्त्रं जपाच्छान्तश्च चिन्तयेत् । जपध्यानादियुक्तस्य विष्णुः शीघ्रं प्रसीदति । जपयज्ञस्य वै यज्ञाः कलां नार्हन्ति षोडशीम् । जपिनं नोपसर्पन्ति व्याधयश्चाधयो यथाः । भुक्तिर्मुक्तिर्मृत्युजयो जपेन प्राप्नुयात् फलम् ॥३७१ अ०।

ध्यानप्रकारादिकमुक्तं मिताक्षरायां यथा "ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् । उत्तानं किञ्चिदुन्नाम्य सुखं विष्टभ्य चोरसा । निमीलिताक्षः सत्वस्थो दन्तैर्दन्तानसंस्पृशन् । तालुस्थाचलजिह्वश्च संवृताक्षः सुनिश्चलः । संनिरुद्धेन्द्रियग्रामं नातिनीचोच्छ्रितासनः । द्विगुणं त्रिगुणं वापि प्राणायामसमुपक्रमेत् । ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः । धारयेत्तत्र चात्मानं धारणां धारयन् बुधः" याज्ञ०। "ऊरुस्थावुत्तानचरणौ यस्य स तथोक्तो बद्धपद्मासनः । तथोत्ताने सव्यकरे दक्षिणमुत्तानं न्यस्य सुखञ्च किञ्चिदुन्नाम्य उरसा च विष्टभ्य स्तम्भयित्वा तथा निमीलिताक्षः सत्वस्थः कामक्रोधादिरहितो दन्तैर्दन्तानसंस्पर्शयन् । तथा तालुनि स्थिता चपला जिह्वा यस्य स तथोक्तः संवृताक्षः पिहितानन: सुनिश्चलो निष्प्रकम्पस्तथा सम्यगिन्द्रियसमूहं विषयेभ्यः प्रत्याहृत्य नातिनीचासनो नात्युच्छ्रितासनो यथा चित्तविक्षेपो न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वा प्राणायामाभ्याससमुपक्रमेत् । ततो वशीकृतपवनेन योगिना योऽसौ हृदये दीपवत्प्रकम्पः प्रभुः स्थितोऽसौ ध्यातव्यः तत्र च हृद्यात्मानं मनोगोचरतया धारयेत् । तथा धारणाञ्च धारयेत् । धारणास्वरूपञ्च जाम्बूनदमयेन क्रोटिकादानकालो मात्रा । तामिः पञ्चदशमात्राभिरधमः प्राणायामस्त्रिंशद्भिर्मध्यमः । पञ्चचत्वारिंशद्भिरुत्तम इत्येवं प्राणायामत्रयात्मिकैका धारणा । तास्तिस्रो योगशब्दवाच्यास्तांश्च धारयेत् । यथोक्तमन्यत्र "ॐकारस्य क्रोटिकां दद्यात् करायमङ्गानुमण्डले । मात्राभिः पञ्चदशभिः प्राणायामोऽधमः स्मृतः । मध्यमो द्विगुणः श्रेष्ठस्त्रिगुणो धारणा तथा । त्रिभिस्त्रिभिः स्मृतैकैका ताभिर्योगस्तथैव चेति" मिता०। "हृदयस्थस्य योगेन देवदेवस्य दर्शनम् । ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वस्मात् योगतः शुभम्" "हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः । हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् । स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् । ध्याननिर्मथनाभ्यासात् विष्णुं पश्येद्धृदि स्थितम् । हृद्यन्तश्चन्द्रमाः सूर्यः सोममध्ये हुताशनः । तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितो-

ज्युतः। अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्। तेजोमयं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः" श्रुतिः। "प्राणायामद्विषट्केन प्रत्याहार उदाहृतः। प्रत्याहारैर्द्वादशभिर्धारणा परिकीर्त्तिता। भवेदीश्वरसङ्कल्पे ध्यानं द्वादशधारणम्" काशीख० ४१अ०। "समाहितेन मनसा चैतन्यान्तरवर्त्तिना। आत्मनोऽभीष्टदेवानां ध्यानं ध्यानमिहोच्यते" शा०ति०। ध्यायतेऽनेन ध्यै-करणे ल्युट्। देवानां ७ध्येयरूपभेदे "ध्यानमस्याः प्रवक्ष्यामि यथा ध्यात्वार्चयेदिमाम्" तन्त्रसारः। "तस्य (वटुकस्य)ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" तत्र सात्त्विकं यथा "वन्दे बालं स्फटिकसदृशं कान्तलोलाक्षिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः। दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्"। राजसं यथा "उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजम् क्षौमाढ्यं वरदं कपालमभयं शूलं दधानं करैः। नीलग्रीवसुदारभूषणयुतं शीतांशुचूडोज्ज्वलं बभ्रूकारुणवाससं भयहरं देवं सदा भावये" तन्त्रसा० तामसध्यानं तु तामसशब्दे पृ० उक्तम्

देवानां स्वरूपभेदेनैव ध्येयत्वात् स्वरूपस्य ध्यानत्वम्। देवताप्रतिमाशब्दे च २६८५पृ० येषां मूर्त्तिभेदा यथा दर्शिताः तत्रैव तेषां ध्येयता। अन्यदेवताध्यानं तु तन्त्रसार कालिकापुराणादौ दृश्यम् विस्तरभयात् न लिखितम्। "ज्ञानात् ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागः गीता। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" स्मृतिः। "इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः" रघुः "सर्वदेवाः प्राकृतिका यावन्तो मूर्तिधारिणः। अहमात्मा नित्यदेहो भक्तध्यानानुरूपतः" ब्रह्मवै० जन्मख० ८उपनिषद्ब्रह्मे उपनिषच्छब्दे १२२२ पृ० दृश्यम्।

ध्यानजप्य पु० विश्वामित्रवंश्ये ऋषिभेदे "पाचिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च" हरिवं० २७अ० विश्वामित्रवंश्यर्षिकथने।

ध्यानयोग पु० ध्यानमेव योगः। ध्यानरूपे योगे योगाङ्गभेदे "ते ध्यानयोगानुगता अपश्यन्" श्वेताश्वतरोप० "ध्यानं नाम चित्तैकाग्र्यं तदेव योगो युज्यतेऽनेन इति ध्यानस्वीकारोपायस्तमनुगताः समाहिता अपश्यन्" भा० "ध्यानयोगेन संपश्येद् गतिमस्यान्तरात्मनः" मनुः।

ध्यानाभ्यास पु० ध्यानानामभ्यासः। समाधौ "ध्यानहादयश्चैव समाधिरभिधीयते" काशीख० ४२अ० उक्तेः समाधेर्ध्यानाभ्यासरूपत्वम्। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" स्मृतिः।

ध्यानिक त्रि० ध्यानेन निर्वृत्तं ठक्। ध्यानसाध्ये "ध्यानिकं सर्वमेवैतत् यदेतदभिशब्दितम्" मनुः।

ध्याम न० ध्यायते पशुभिः ध्यै-कर्मणि मनु। १गन्धद्रव्ये २मदनवृक्षे च संज्ञायां कन्। ध्यामक। रोहिषतृणे राजनि०।

ध्यामन् पु० ध्यै-मनिन्। १परिमाणे २तेजसि च उज्ज्वलद्भावे मनिन्। चिन्तायां न० उणादिकोषः।

ध्येय त्रि० ध्यै-कर्मणि यत्। ध्यातव्ये "ध्येयः सदा सवितृमण्डलमध्यवर्त्ती" विष्णुध्यानम् "वेद्यञ्च वेदिता चापि ध्याता ध्येयञ्च यत्परम्" कुमा० ध्यानशब्दे उदा०।

ध्यै चिन्तने भ्वा०पर० सक० अनिट्। ध्यायति अध्यासीत्। दध्यौ "ध्यायतीव लेलायतीव" श्रुतिः। ध्यानशब्दे उदा०। "ध्यायेत् नित्यं महेशम्" शिवध्यानम्।

ध्र त्रि० कस्मिंश्चिदुपपदे धृ-मूलविभुजा० क। धारके महीध्रः कुध्र इत्यादि।

ध्रज गतौ भ्वा० पर० सक० सेट्। ध्रजति अध्राजीत् अध्रजीत् अयमिदिश्च ध्रञ्जति अध्रञ्जीत्। दध्राज दध्रञ्ज। ध्रज्यते ध्रञ्ज्यते। "उपध्रजन्तमद्रयो विधक्षत्" ऋ०१।१४९।१ "इषा न यो ध्रजसा पत्मना" ऋ०६।२।७ ध्रज-असुन्। "ध्रजसा गतिशीलेन" भा०।

ध्रजि त्रि० ध्रज-गतौ इन्। गतौ ततः अस्त्यर्थे मतुप् ध्रजिमत् गतियुक्ते त्रि०। "धुनिर्वात इव ध्रजीमान्" ऋ०१।७९।१ दीर्घश्छा ।४सः। अस्य यवादिगणे पाठचिन्त्यप्रयोजनः माद्युपधत्वाभावेनवस्याप्रसक्तेः। [णीत् दध्राज।

ध्रण ध्वाने भ्वा० पर० अक० सेट्। ध्रणति अध्रणीत् अध्राणीत्

ध्रस कथने आदाने क्र्या०पर० सक० सेट्। ध्रस्नाति अध्रसीत् अध्रासीत् दध्रास। उदित् प्रबित्वा ध्रस्ता। ध्रस्तः।

ध्र(ध्रा) गतौ निघण्टुः। भ्वा०पर० सक०सेट ध्रा अनिट्। ध्रति ध्राति अध्रीत् अध्रासीत्। दध्र दध्रौ "ध्रवति ध्रावति" इति तत्र निर्देशात् ध्रे ध्रै इत्यपि धातू गतौ भ्वा० पर० अनिटौ। तत्र ध्रे ध्रवति ध्रै ध्रायति इति आर्द्धधातुके ध्रावत्।

ध्राञ्ज काङ्क्षे घोररवे च भ्वा० पर० सक० सेट् उदित्। ध्राङ्क्षति अध्राङ्क्षीत्। दध्राङ्क्ष उदित् ध्राङ्क्षते।

भ्राजा स्त्री भ्राज् भावे अङ्। यवादिगणस्थत्वे भ्राजेति निर्देशात् उपधालोपः। १गतौ ततोऽस्त्यर्थे मतुप्, यवा०न मस्य वः। भ्राजामत् गतियुक्ते त्रि०स्त्रियां ङीप्

भ्राख शोधने अलमर्थे च भ्वा० पर० सक० सेट्। भ्राखति अभ्राखीत् दभ्राख। ऋदित् चङि अदभ्राखत् त। अलमर्थः पर्याप्नित्वेत् तत्र अक०।

भ्राघ शक्तौ भ्वा० आत्म० अक० सेट्। भ्राघते अभ्राघिष्ट। दभ्राघे। ऋदित् चङि अदभ्राघत् त।

भ्राजि त्रि० भ्रज–गतौ बा० भावे क्विप्। गतौ "भ्राजिरेकस्य ददर्श न रूपम्" ऋ० १।६४।४४ "भ्राजिर्गतिः" भा० णिच् कर्त्तरि इन्। १ऋषादेर्वैक्रगतिकारके २वातभेदे (बुरवा वाताद) उणादिकोषः।

भ्राड विभेदे भ्वा० आत्म० सक० सेट्। भ्राडते अभ्राडिष्ट। दभ्राडे। ऋदित् चङि अदभ्राडत् त।

भ्राडि पु० भ्राड–इन्। पुष्पचये उणादिकोषः।

भ्रिज गतौ भ्वा०पर०सक० सेट्। भ्रेजति अभ्रेजीत् दिभ्रेज

भ्रु स्थैर्ये अक० सर्पणे सक० तु०क० पर० अनिट्। भ्रुवति अभ्रुवीत् दुभ्राव। अयं जीत् भ्रुतो वर्त्तते। "बुद्धिपूर्वं भ्रुवन्न त्वा राजन्नत्वा पिता खटम्" भट्टिः गतौ "ततोऽगदया चारिं तं दुभ्रावाद्रिणा कपिः" भट्टिः "न स खो दक्षो वरुण! भ्रुतिः" ऋ०७।८६।६ "भ्रुतिः दैवगतिः" भा०

भ्रु गतौ भ्वा० प० अनिट् निघण्टुः। भ्रवति अभ्रौषीत् दुभ्राव।

भ्रुव त्रि० कु० भ्रु–अच्। १स्थिरे २निश्चिते ३क्षेमच० ४शन्नते ५शाश्वते ६तर्के न० मेदि०। ७गगने न० हेम०। ८शङ्खे ९विष्णौ ९हरे १०वटे ११उत्तानपादन्नृपसुतभेदे पु०मेदि० १२वसुभेदे विष्कुम्भादिषु १३द्वादशे योगे पु० मेदि०। १४स्थाणौ पु० अमरः १५शरारिखगे पुंस्त्री० त्रिका०। १६ध्रुवके (धुया)ख्याते पदार्थे पु० संगीतदा०। १७आकाशस्थिते ताराद्वये च पु०। ते च सर्वेषां नक्षत्रादीनामाधारभूते उत्तरदक्षिणयोः स्थिते स्व०सि० उक्ते यथा "मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते। निरक्षदेशसंस्थानामुभये क्षितिजाश्रये" भू०। "मेरोरुभयतो दक्षिणोत्तरायोराकाशस्थिते ध्रुवतारे दक्षिणोत्तरे क्रमेण मध्यआकाशमध्ये भवतः। निरक्षदेशसंस्थानां प्रागुक्तनगरस्थितमनुष्याणामुभये दक्षिणोत्तरे ध्रुवतारे क्षितिजाश्रये तद्गर्भक्षितिजस्थे भवत इत्यर्थः।" रङ्गना०। अतएव तेषामक्षांशाभावलम्बांशपरमत्वमिति वदन् मेरावक्षांशपरमत्वमित्याह "अतो नाक्षोच्छ्रयस्तत्र ध्रुवयोः क्षितिजस्थयोः। नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा" भू०। "तारुक्षनगरीषु। अत उभये क्षितिजाश्रये इति कारणात् अक्षोच्छ्रयो ध्रुवौ क्षेत्रे न। तथाच क्षितिजाद्ध्रुवौ क्षेत्रमक्षांशा इति तदभावात् तदभाव इति भावः। तुकारात् तद्नगरीषु ध्रुवयोः क्षितिजस्थयोः सतोर्लम्बांशा नवतिः शून्याक्षांशोननवतेर्लम्बांशत्वात्। समव्याद्ध्रुवयोः क्षितिजस्थ लम्बांशस्वरूपत्वाच्च मेरावक्षांशास्तथा नवतिः, ध्रुवस्य परमोच्चत्वात्। यथा निरक्षदेशेऽक्षांशाभावाल्लम्बांशाः परमास्तथा मेरावक्षांशपरमत्वाल्लम्बांशाभाव इत्यर्थसिद्धम्।" रङ्गनाथः। "निरक्षदेशक्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ। तदाश्रितं खे जलवन्नवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि। उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमक्षमण्डलम्। उदग् ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः। योजनसंख्याभांशैर्गुणिता स्वपरिधिहृता भवन्त्यंशाः। भूमौ कलायां वा भागेभ्यो योजनानि च व्यस्तम्। सौम्यं ध्रुवं मेरुगताः समध्ये याम्यं च दैत्या निजमस्तकोर्द्ध्वे। सव्यापसव्यं भ्रमदच्चचक्रं विलोकयन्ति क्षितिजप्रसक्तम्" सि०शि०। विष्णुवरेण उत्तानपादनृपपुत्रस्यैव तदधिष्ठानत्वं तथाभूतपदलाभकथा च काशीख०

"विष्णुरुवाच "अयि! बाल! विशालाक्ष! ध्रुव! ध्रुवमते!ऽनघ!। परिज्ञातो मया सम्यक् तव हृत्स्थो मनोरथः। अत्राहं भवन्ति भूतानि दृष्टेरत्रसंसङ्गः। तद्दृष्टेः कारणं सूर्यः सूर्याधारो ध्रुवो विभो!। ज्योतिश्चक्रस्य सर्वस्य ग्रहर्क्षादेः समन्ततः। गगने भ्रमतो नित्यं त्वमाधारो भविष्यसि। मेघीभूतः स वै सर्वान् वायुपाशैर्नियन्त्रितान्। आकल्पं तत्पदे तिष्ठन् भ्रामयन् ज्योतिषाङ्गणान्। आराध्य श्रीमहादेवं पुरा पदमिदं मया। आसादि यत्तदेतत्ते तपसा प्रतिपादितम्। केचिच्चतुर्युगं यावत् केचिन्मन्वन्तरं ध्रुव!। तिष्ठति त्वन्तु वै कल्पं पदमेतत् प्रयास्यसि। मनुनापि न यत् प्राप्तं किमन्यैर्मानवैर्ध्रुव!। तत्पदं विहितं वत्स! शक्राद्यैरपि दुर्लभम्। अन्यान् वरान् प्रयच्छामि स्तवेनानेन तोषितः। सुनीतिरपि ते माता त्वत्समीपे भविष्यति" भाग० ५।२३ अ० ग्रहनिलोकपर्यन्तवर्णनान्ते "अथ तस्मात् परतस्त्रयोदश लक्षयोजनान्तरतोयत्तद्विष्णोः

परमं पदमभिवन्दन्ति । यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेत्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुगभिः । सहवङ्गमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्य महानुभाव उपवर्णितः । स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते । यथा मेधीस्तम्भ आक्रमणपशवः संयोजिता स्त्रिभिः सवनैर्यथा स्थानमण्डलानि चरन्ति । एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्रे आयोजिता ध्रुवमेवालम्ब्य वायुनोदीर्यमाणा आकल्पान्तं परितः क्रामन्ति । नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते । एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ।" "सर्वे ध्रुवे निबद्धास्ते निबद्धा वातरश्मिभिः । एते वै भ्राम्यमाणास्ते यथायोगं वहन्ति वै । वायव्याभिरदभ्राभिः प्रबद्धा वातरश्मिभिः । परिभ्रमन्ति तद्बद्धाश्चन्द्रसूर्यग्रहादिवि । यावत्तमनुपर्येति ध्रुवं वै ज्योतिषाङ्गणः । यथा तृणूदके नौसु उदकेन सहोह्यते । तथा देव ग्रहाणि सुरुह्यन्ते वातरंहसा । तस्माद्यानि प्रगृह्यन्ते व्योम्नि देवग्रहा इति । यावन्त्यश्चैव ताराः स्युस्तावन्त्योऽस्य मरीचयः । सर्वा ध्रुवनिबद्धास्ता भ्रमन्त्यो भ्रामयन्ति च । तैलपीड़े यथा चक्रं भ्राम्यते भ्रामयन्ति वै । तथा भ्रमन्ति ज्योतींषि वातबद्धानि सर्वशः । अवातचक्रवद्यानि वातचक्रेरितानि च । यस्मात् प्रवहते तानि प्रवहस्तेन स स्मृतः । एवं ध्रुवे नियुक्तोऽसौ भ्रमते ज्योतिषाङ्गणः । एष तारामयः प्रोक्तः शिशुमारे ध्रुवो दिवि" मत्स्यपु० १२६अ०

वसुभेदश्च "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६अ० । औत्तानपादिकथा "प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु । द्वौ पुत्रौ सुमहावीर्यौ धर्मज्ञौ कथितौ तव । तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः । अभीष्टायामभूद्ब्रह्मन् ! पितुरत्यन्तवल्लभः । सुनीतिर्नाम या राज्ञस्तस्यामभूद्ध्रुवो द्विज ! । स ऋषोऽसौतिमांस्तस्यां तस्यामभूद्ध्रुवः सुतः" विष्णुपु०११अ०।

गानाङ्गे "ध्रुवाहि नाम्नः प्राणाः" तच्छब्दम् । १८रोमावर्तभेदे "आवर्तसाम्यादावर्तौ रोमसंस्थानमङ्गिनाम्" ते च दशधा "द्वावुरस्यौ शिरस्यौ द्वौ द्वौ च रम्ब्रौ परम्ब्रयोः । एको भाले ललाटे च दशावर्ता ध्रुवाः स्मृताः" शब्दार्थचि० "उपः पूर्वमघान्तको ध्रुवगणस्तीष्युत्तराणि स्वभूः ज्यो० उक्ते १९उत्तरात्रयरोहिणीषु नक्षत्रेषु "मित्र ध्रुवक्षिप्रभे" सु०चि० । "ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे" ज्यो० त० । २०नासायभागे "अरुन्धती भवेच्छिङ्गा ध्रुवो नासाग्रमुच्यते । विष्णोः पदानि भ्रूमध्यं नेत्रयोर्महमण्डलम्" काशीख० ४१अ० "अरुन्धतीं ध्रुवञ्चैव विष्णोस्तीणि पदानि च । आसन्नमृत्युर्नोपश्येत् चतुर्थं मातृमण्डलम्" तत्रैव । तत्र वितर्क उत्प्रेक्षा तत्र "ध्रुवं स नीलोत्पलपत्र धारया शमीलतां छेत्तुमृषिर्व्यवस्यति" शकु० स्थिरे "ध्रुवमपाये", पा० । "अपाये यदुदासीनं चलं वा यदि वाऽचलम् । ध्रुवमेवानुदावेशात्" हरिवा० निश्चिते "यो ध्रुवाणि परित्यज्य अध्रुवाणि विचिन्तयेत् । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो० । विष्णौ "व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः" विष्णुस० । २१यज्ञिये ग्रहपात्रभेदे पु० । "ततो ग्रहयज्ञमाध्रुवात्" कात्या० श्रौ० ७,५।१७ "आध्रुवग्रहणात्" कर्कः । २२ग्रहनक्षत्रादीनयतोपयोगिनि अङ्कभेदे तत्र नक्षत्रध्रुवः सू० सि० उक्तः खगोलशब्दे २४२१ पृ०दर्शितः । संक्षेपतस्तु सि० शि० ग्रहिताचरोक्तः २४२५ पृ० दर्शितः । ग्रहध्रुवानयनन्तु "कल्पजचक्रकृतास्तु गताब्दाः कल्पसमाविहृता भगणाद्याः । सुध्रुवका दिनकृद्गणान्ते पातमृदूच्चलोच्चखगानाम्" सू०सि० । अत्र स्वार्थे क । ध्रुवनक्षत्रे "उत्तोत्थायोपनिष्क्रम्य ध्रुवं दर्शयति" गो०सू० "ध्रुवं नक्षत्रविशेषं दर्शयति पतिः" सं०त०रघु० । "शरत्प्रवृत्तैर्ज्योतिर्भिः विभावर्य इव ध्रुवम्" रघुः । "स्फुटतरसुपरिष्टादल्पमूर्त्तेर्ध्रुवस्य स्फुरति सुरसुनीनां मण्डलं व्यक्तमेतत्" माघः । २३आवश्यके धृतिहोमशब्दे दर्शित गोभिलवाक्ये "ध्रुवा आहुतीर्जुहोति" । "अष्टकामाध्यभ्युदयास्तीर्थपात्रोपक्षयः । पितृणामतिरेकोऽयं मासिकाच्छ्राद्ध ध्रुवः स्मृतः" देवीपु० "मासिकाच्छ्राद्ध अमावस्याश्राद्धादतिरेकः अष्टकादिश्राद्धगणो ध्रुव आवश्यकः" श्रा०त० रघु० । आवश्यकत्वञ्च अवश्यकर्त्तव्यत्वं तेनाकरणे प्रत्यवायजनकत्वात् नित्यत्वमिति फलितम् । सन्ते निश्चिते "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" गीता "यदावगच्छेदात्मानाधिक्यं ध्रुवमात्मनः" मनुः

स्थिरे "ध्रुवोऽसि पृथिवीं दृंह ध्रुवक्षितिरसि" यजु०५।१२ "ध्रुवे स्थिरे यत्ते क्षीवति निवसति इति ध्रुवक्षित्" वेददी० २४सोमभेदे "उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः" यजु० ७।२५ "हे सोम ! त्वमुपयामेन पात्रेण गृहीतोऽसि ध्रुवनामकोऽसि कोटशस्त्वम् ध्रुवा स्थिरा क्षितिर्निवासो यस्य स ध्रुवक्षितिः" वेददी०। २५ शकुन्यादि करणतुल्के न० "ध्रुवाणि शकुनिनांगं तृतीयं च चतुष्पदम्। किंस्तुघ्नं च चतुर्दश्याः कृष्णायाश्चापरार्द्धतः" सू०सि०।

ध्रुवक पु० ध्रुव–कन् स्वार्थे को वा। १ध्रुवशब्दार्थे २गीताङ्गविशेषे स चोक्तः सङ्गीतदामोदरे "उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः। कनिष्ठस्तु चतुर्भिः स्याद् ध्रुवकोऽयं मयोदितः। उक्तं द्विखण्डमुद्ग्राहे द्विखण्डे ध्रुवके मतम्। ततो द्विखण्डमाभोगे तालमानरसैः सह। आभोगे कविनाम स्यात् तथा नायकनाम च। उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत् ततःपरम्। ततोऽन्तरा ध्रुवस्तस्मादाभोगध्रुवको ततः। उद्ग्राहः प्रथमः पादः कथितः पूर्वसूरिभिः। गीत्वा पूर्वपदं न्यासो यत्र स ध्रुवको मतः। यत्रैव कविनाम स्यात् स आभोग इतीरितः। ध्रुवकादिषु सर्वेषु भवेदेवं विधिः क्रमः"। स तु षोड़शधा यथा "जयन्तो भैरवोत्साहो मधुरो निर्मलस्तथा। कुलहः कमलश्चैव सानन्दश्चन्द्रशेखरः। सुखदः कुसुदो लाभी कन्दर्पो जयमण्डलः। तिलकोऽलिलतश्चेति ध्रुवकाः षोड़श स्मृताः। एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः। खण्डैर्ध्रुवाः षोड़श स्युः षड्विंशत्यक्षरावधि। द्विगुणैरक्षरैरेव षट्मेकमिहेष्यते। उद्ग्राहध्रुवकाभोगैरित्थं षट्पदनिर्णयः। पञ्चपादे तु ध्रुवके पदेनैकेन तद्ध्रुवः। चतुष्पादे तु ध्रुवके पृथङ् नास्त्येव तद्ध्रुवः" इति सङ्गीतदा०। ध्रुवशब्दार्थे ध्रुवशब्दे दर्शिते यद्वाणां स्वतोपयोगिनि २चक्रभेदे खगोलशब्दे २४२१। २५ पृ० द्रष्टव्यम् ध्रुवशब्दे सू०सि० वाक्यसूक्तम्। स्त्रियां स्त्रियकां० कापि न अत इत्वम्। ततः पिच्छा० अस्त्यर्थे इनच्। ध्रुवकिन् तद्युक्ते त्रि०। ततोऽपत्यादौ स्त्रीभ्योऽकं बाधित्वा बाह्वा०इञ्। ध्रौवकि ध्रुवकापत्ये पुंस्त्री ततः चतुरर्थ्यां प्रेक्षा०इनि। ध्रुवकिन् ध्रुवकानिष्टस्तादौ त्रि०। [प्रमाणाद्गतिर्भवति विष्वक्" वृ०दं०११अ०।

ध्रुवकेतु पु० केतुभेदे केतुशब्दे दृश्यम् "ध्रुवकेतुर्नियतगति

ध्रुवरत्ना स्त्री कुमारानुचरमातृभेदे "जयावती मालतिका ध्रुवरत्ना भयङ्करी" भा०अ० ४७अ० कुमारानुचरमातृकोक्तौ। [स्थानभेदे।

ध्रुवलोक पु० ध्रुवाधिष्ठितोलोकः। सत्यलोकान्तर्गते ध्रुव-

ध्रुवसन्धि पु० कुरुवंश्ये हिरण्यनाभस्य पौत्रे "पुत्रो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत्" भाग०९।१२।५

ध्रुवस् त्रि० कु० ध्रु–असन्। ध्रुवनिवासे "यत्सेदत्तु ध्रुवसे न योनिम्" ऋ०७।७०।१ "ध्रुवसे ध्रुवाय निवासाय" भा०।

ध्रुवा स्त्री कु० ध्रु–यच्। १यज्ञपात्रभेदे "साधारण्याज्ञ ध्रुवायां स्यात्" जै० १।५।६ सू०। "उपांशुयाजार्थं जुहूतो यद् ध्रुवायां शिष्टं तच्छेषभूतम्" भा० "अवत्तत्वाच्च जुहूं तस्य च होमसंयोगात्" ७ जै० "ध्रुवायां तस्य नास्ति शेषः" भाष्यम्। ध्रुवा च जुहूतो भिन्ना "तस्येवमेव जुहूरियमुपभृदात्मैव ध्रुवा आत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति तस्माद् ध्रुवाया एव सर्वो यज्ञः प्रभवति। प्राण एव स्रुवः। सोऽयं प्राणः सर्वाण्यङ्गान्यनुसञ्चरति तस्मात्स्रुवः सर्वो अनु स्रुचः सञ्चरति। तस्यासावेव द्यौर्जुहूः। अथेदमन्तरिक्षमुपभृदियमेव ध्रुवा तद्वा अस्या एवेमे सर्वे लोकाः प्रभवन्ति तस्माद् ध्रुवाया एव सर्वो यज्ञः प्रभवति" शत०ब्रा० १।२।२।२ "अथ जुहूपभृद्ध्रुवास्वेतस्याज्यस्य स्रुवेण ग्रहणं विधित्सुस्तत्सुतदायस्य पुरुषावयवकल्पनया स्रुग्यर्थं तत्साध्यस्य यज्ञस्य पुरुषतादात्म्यमाह तादात्म्यवक्तृत्वमभिनयेन दर्शयति। या जुहूः सेयमवं दक्षिणो बाहुः योपभृत् सेयं वामबाहुः ध्रुवा आत्मा देहमध्यः। तस्माद् ध्रुवास्यस्याज्यस्य सर्वयागसाधारणत्वम्" भा०। अत्र जुहूतो ध्रुवाया भिन्नत्वं स्पष्टमवगम्यते "ध्रुवालक्षणमाह आपस्तम्बः "खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृदेकहस्ता ध्रुवा" मानवे "खादिरं स्फ्यस्रुवं पालाशी जुहूराश्वत्थ्युपभृदेकहस्ता ध्रुवा"। काठके खरत्रिमाली स्रुगग्निहोत्रहवणी पालाशी सामान्यतया निर्वपणमितरासाम् बाहुमात्राः स्रुगदण्डाः प्रहसमात्राणि प्रसवनान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृदेकहस्ता ध्रुवा शमीमूल मय्यो वा स्वक्षोमिका हंसमुख्यो भवन्तीति" कात्या०श्रौ० १।२।२५ कर्कस्तु "ध्रुवा तु वैकहस्ता भवति वैकहस्तानि पात्राणीत्यनेनैव अपपादाभावाद् होमस्या

नत्वाच्च तया हि समिष्टयजुर्हूयते "तिष्ठन् ध्रुवया समिष्टयजुर्जुहोतीति" शाखान्तरश्रुतेः अवएव मैत्रकठाएस्तम्बमूलेषु "वैकङ्कती ध्रुवेति" पठ्यते तेषां हि वैकङ्कतानि पत्राणीति सामान्यवचनं नास्ति" कर्क०। अतः कोषान्तरे अस्य जुह्वर्थकताकथनं प्रामादिकमेव। २मूर्वायां ४आटव्यां ५शालपर्ण्यां (ध्रुवा) ख्याते ६गीतिभेदे च मेदि०। ७साध्व्यां स्त्रियां शब्दर०।

ध्रुवावर्त्त पु० ध्रुव संज्ञक आवर्त्तः रोमसंस्थानभेदः। ध्रुवशब्दोक्तः। अश्वानां रोमसंस्थानभेदे तस्य स्थानविशेषेण फलं ह०सं० ६६अ० उक्तं यथा

"अस्रुपात हनुगण्डहृद्गल प्रोथ शङ्खकटिवस्ति जानुनि। सुक्कनाभिकक्षुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः। ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः। ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः। तेषां प्रपाण एको ललाटकेशेषु च ध्रुवावर्त्तः। रन्ध्रोपरन्ध्रमूर्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ"।

ध्रुवाश्व पु० हृहदश्वभेदे मत्स्यपु०। [भवन्तु" ऋ०।२५।८

ध्रुवि त्रि० कु० ध्रु-इन्। १ध्रुवे स्थिरे "शं नः पर्वताः ध्रुवयो

ध्रेक उत्साहे शब्दे च भ्वा०आत्म०अक०सेट्। ध्रेकते अध्रेकिष्ट। दिध्रेके अदित् चङि अदिध्रेकत् त।

ध्रै तृप्तौ भ्वा०पर० अक०अनिट्। ध्रायति अध्रासीत्। दध्रौ गतौ तु ध्रधातौ दशग्रः।

ध्रौव त्रि०ध्रुवायां गृहीतम् अण्। ध्रुवाया गृहीते आज्यादौ "तस्मात् साधारणं धौवमाज्यमिति "यस्माय गृह्यते यत् ध्रुवायामाज्यम्" श्रुतेः जै० ३।५। ६सू० भाष्यम्। "क भूतलं क च ध्रौवं स्थानं यत् प्राप्तवान् ध्रुवः" मार्क०पु०। २आङ्गायाम् ३ध्रुवकायां स्त्री शब्दार्थचि०।

ध्रौव्य न०ध्रुवस्य भावः ष्यञ्। १स्थिरत्वे "ध्रौव्यगत्यर्थेत्यादि" सुग्ध०। "तत्कारणयोरविद्याकामयोश्चलत्वात् क्रतुक्षयध्रौव्योपपत्तिः" द०उ०भा०। स्वार्थे ब्राह्म०ष्यञ्। २स्थिरे त्रि० "ध्रौव्ये दत्तरालावराङ्गे" वांस्त्रो० २।१६।। ध्रुवाय हितम् ष्यञ्। ३ध्रुवस्थानप्रापके त्रि० "स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमचमर्षणम्। श्रुत्वैतत् (ध्रुवचरितम्) प्रयतोऽभीक्ष्णमच्युतप्रियचेष्टितम्" भा० ४।१२।३७।

ध्वंस पु०ध्वनस-भावे घञ्। विनाशेऽभावभेदे। "जन्याभावत्वं ध्वंसत्वमिति" सुक्तावली। जन्यत्वस्य प्रायश दुर्ज्ञेयत्वात् अभावत्वव्याप्यः अखण्डोपाधिरिति नव्यनैयायिकाः। सत्कार्य्यवादिमते तिरोभाव एव ध्वंस इति भेदः। "ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरिताम्" "तन्तूनां पञ्चानां लोम्नां स्याद् ध्वंसश्च विनाशयात्" कामन्दकी०

ध्वंसकला अव्य० ध्वंसं कलयति कलि-डा ऊर्या०। हिंसायां गणर०टी०। ध्वंसकलाकृत्य हिंसित्वेत्यर्थः।

ध्वंसन न० ध्वनस-भावे ल्युट्। १नाशे ध्वनस-णिच्-ल्यु। २ध्वंसकारके त्रि० "माहेन्द्रमिव शत्रूणां ध्वंसनं शरदृष्टिभिः" भा० उ० १५६ भावे ल्युट्। ३ध्वंसकरणे "कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः" गीतगो०। ध्वनस-भावे ल्युट्। ४भ्रंसे ५अधःपतने च।

ध्वंसिन् त्रि०ध्वनस-णिनि। नाशप्रतियोगिनि "जाज्वल्यमानगते सूर्य्यकरे ध्वंसी विलोक्यते। त्रसरेणुश्च स ज्ञेयः" वैद्यकप० ध्वंसीति त्रसरेणुविशेषणम् अतः शब्दकल्प० अस्य त्रसरेणुपरिमाणार्थतोक्तिः प्रामादिकी। ध्वनस-णिच्-णिनि। नाशकारके त्रि०। "क्रतुध्वंसी दशध्वजः" अमरः।

ध्वज गतौ भ्वा०पर०सक०सेट्। ध्वजति अध्वजीत् अध्वाजीत् दध्वाज अयमिदिदपि। धञ्जति अध्वञ्जीत् दध्वञ्ज ध्वञ्जते।

ध्वज पु० ध्वज-अच्। १शौण्डिके (शुण्डिकोपकरणभेदे) २भेदे ३चिह्ने ४खड्गाङ्गे मेदि०। ५गर्वे ६दर्पे च शब्दर०। ७पूर्वदिक्स्थे ८गृहे हेमच०। ९चतुष्कोणाकारे वंशदण्डोपरिस्थे वस्त्रखण्डभेदे च विधानपा० ऽपताकायां पु०न० अमरः। उक्तोभयवस्त्रयुक्ते १०दण्डभेदे च सामान्यतोऽस्य निर्माणप्रकारः युक्तिकल्पतरावुक्तो यथा "सेनाचिह्नं क्षितीशानां दण्डो ध्वज इति स्मृतः। सपताको निष्पताकः स ज्ञेयो द्विविधो बुधैः। पताका सार्द्धदैर्घ्येण सम्मा तु पृथिवीभुजाम्। सपताकध्वजस्याग्रे तदा हस्तं परिन्यसेत्। जयहस्तोध्वजोनाम नैनं सामान्यमर्हति। वंशोऽथ जाङ्गलः शालः पालाशश्चाम्बकस्तथा। नैपो नैम्बोऽथ वा दण्डस्तथा वैराजवारणः। अवन्त्यादिकसंज्ञानां वर्णरूपप्रकाशितः। सर्वेषामेव वंशस्तु दण्डः सम्पत्तिकारकः। अ क च ट त प जयाः। प्रतापाय पताकास्तु अष्टावेव प्रकाशिताः। पञ्चहस्तायता हस्तपरिणाहा जयाभिधाः। जया५ च विजया६ भीमा७ चपलाऽ वैजयन्तिकाऽ। दीर्घा१० विशाला११ लोला१२ च ज्ञेया हस्तैकवर्द्धितः। परिणाहे पादवृद्धिरथ वर्णस्य निर्णयः। रक्तः श्वेतोऽरुणः पीतचित्रोनीलोऽथ कर्बुरः। कृष्णश्चेति पताकानां वर्णरूपः

प्रकाशितः। ध्वजादिकसंज्ञानामष्टानामष्टकमयम्। कनकोदर्पणश्चन्द्रः पद्मं कोशो यथाक्रमम्। ब्रह्मक्षत्रिय विट्शूद्रजातीनां संप्रकाशितः। गजादियुक्ता सा प्रोक्ता लयन्ती सर्वमङ्गला। गजो हंसादिसंयुक्तो राज्ञां सैवाष्टमङ्गला। हंसः केकी शुकश्चाश्वो ब्रह्मादीनां यथाक्रमम्। चामरादिसमायुक्ता सा श्रेया सर्वसिद्धिदा। चामरश्चाष्टपक्षाणि चित्रवस्त्रं तथा सितम्। चतुर्णां वेदनयनपक्षेन्द्रगणितक्रमात्। तदग्रे यदि विन्यस्तं पताका द्वितीया भवेत्। इयं हि सर्वभोगदा पताका चक्रवर्त्तिनः। तदर्थः पूर्ववज्ज्ञेयः प्रमाणं विधिबोधितम्। कनकं रजतं ताम्रं नानाधातुमयं क्रमात्। कुम्भादिकं प्रशंसन्ति पताकाग्रे महीभुजाम्। तत्रापि रत्नविन्यासो विधेयो राजतक्रमः। चतुर्भिर्मकरास्याद्यैर्युक्ता चेत् सर्वसिद्धिदा। तदा श्रेयस्करीनाम सा पताका विजायते। मकरोऽथ गजः सिंहो व्याघ्रो वाजी मृगः शुकः। शुकश्चेति सप्तहिष्टमादित्यादिदशभुजाम्। इति प्रोक्तः पताकानां निर्णयः पृथिवीभुजाम्"।

देवाद्विप्रतिष्ठाक्रमखण्डपान्तर्गतध्वजमहाध्वजयोर्लक्षणादिकं कुण्डार्के उक्तं यथा "ध्वजान् द्विहस्तायतिकांश्च पञ्चहस्तान् सपीतारुणकृष्णनीलान्। श्वेतासितश्वेतसितान् दिगीशवाहान् वहेत् दिक्करवंशशीर्षे" इ०। "ध्वजान् द्विहस्तमितायामान् पञ्चहस्तदीर्घान् पीतारुणकृष्णनीलश्वेतकृष्णश्वेतश्वेतान् गैरिकादिलिखितदिक्पालवाहनान् दशहस्तवंशमस्तके योजितान् "हस्तद्वयनिष्ठातश्च ध्वजांस्तु अपि पूर्वतः" इति वक्ष्यमाणत्वात्। प्राचीनादितः वहेद्वारयेदिति" व्याख्या। प्रतिष्ठासारसंग्रहे "श्वेतरक्तादिवर्णाश्च पञ्चहस्ताध्वजाः स्मृताः। द्विपञ्चहस्तदैर्घ्यस्ते वंशजैः संयुता मताः" इति। क्रियासारे "मातङ्गवस्त्रमहिषान् सिंहमत्स्यैण वाजिनः। हंसं च यथान्याय ध्वजमध्ये क्रमाल्लिखेत्" पञ्चमांगं लिखनेदिति। अकरणे दोषः पञ्चरात्रे "चिन्तयन्त्यसुरश्रेष्ठा ध्वजहीनं सुरालयम्। ध्वजेन रहितं ब्रह्मखण्डं तु तथा भवेत्। पूजायागादिकं सर्वं जपाद्यं यत्कृतं बुधैरिति" ध्वजारोपणफलं तत्रैव "यं कृत्वा पुरुषः सम्यक् समस्तफलमाप्नुयादिति"। अथ पताकानिवेशनं महाध्वजानिवेशनं च नवमकुण्डपताकानिवेशनं तत्रोक्तं यथा "लोकेशवर्णास्त्रयुताः पताकाः शैलेन्दुदैर्घ्यायतिकाश्च मध्ये। चित्रं ध्वजं दिक्करदैर्घ्यवंशत्रिदोस्तं प्रान्तगकिङ्किणीकम्। श्वेतां च नवमीं पूर्वेशानयोर्मध्यतो बुधः। विन्यसेत्तु पताकां च ध्वजांस्तान् अपि पूर्वतः" इ० "लोकेशानां लोकपालानां ये वर्णाः पीतादयः पूर्वश्लोकोक्ताः गैरिकादिलिखितवज्रशक्तिदण्डखड्गपाशाङ्कुशगदाभिशूलानि तैर्युताः सप्तहस्तदीर्घा एकहस्तविस्तृताः पताका दशहस्तवंशशीर्षगाः। चित्रं ध्वजं त्रिहस्तविस्तृतं प्रान्ते वर्त्तमानकिङ्किणीकं शीर्षे सचामरं दशहस्तदैर्घ्यं वंशश्च तादृशं तं मध्ये विन्यसेत्। पूर्वादितः पताकाश्च विन्यसेदित्युत्तरश्लोकेनान्वयः। नवमीं पताकां पूर्वेशानयोर्मध्ये श्वेतां तादृशीमेवाचार्य्यकुण्डे विन्यसेत् ध्वजांस्तान् अपि पताकाश्च पूर्वादिक्रमेण भूमौ पञ्चांगरोपणेन विन्यसेदिति"। "हयशीर्षपञ्चरात्रम्। "ध्वजवंशः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः। तदूर्ध्वं ताम्रजं चक्रं सूक्ष्मं कुर्याद्द्विजोत्तमः। प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम्। ध्वजयष्टिर्वेष्टके ऐशान्यां दिशि देशिकैः। स्थापनीयाय वायव्ये साम्प्रतं ध्वजमुच्यते। षट्कार्षासशौमाद्यैर्ध्वजं कुर्यात् सुशोभनम्। एकवर्णं विचित्रं वा घण्टाचामरभूषितम्। किङ्किणीजालकोपेतं बर्हिपत्रविभूषितम्। शुक्लादिवर्णैर्विप्रादिक्रमादा कारयेत् ध्वजम्। दण्डाग्राद्वरणीं यावत् हस्तैकं विस्तरेण तु। महाध्वजन्तु विख्यातं सर्वकामप्रदं शुभम्। ध्वजेन रहितो विप्र! प्रासादस्तु तथा भवेत्। पूजाहोमादिकं सर्वं जपाद्यं यत् कृतं नरैः"। शिवसर्वस्वे "देवेभ्यश्च गृहं दद्याद्वाहनैरुपशोभितम्। तुरङ्गमेण सूर्य्यस्य, हरस्य वृषचिह्नितम्। विष्णवे गरुडाङ्कन्तु, दुर्गायै सिंहचिह्नितम्। कार्य्यं ध्वजपताकाश्च अन्यथा न कथञ्चन"। वह्नि० पु० ५९अ०। "प्रासादस्य तु विस्तारो मानं दण्डस्य कीर्त्तितम्। शिखरार्द्धेन वा कुर्यात् तदीयार्द्धेन वा पुनः। द्वारशाखाद्विगुणितं दण्डं वा परिकल्पयेत्। ध्वजयष्टिर्वेष्टके ऐशान्यां यावदेव्यथा। नानावर्णं ध्वजं कुर्याद्विचित्रं चैकवर्णकम्। घण्टाचामरकिङ्किण्या भूषितं पापनाशनम्। दण्डाग्राद्वरणीं यावत् हस्तैकं विस्तरेण तु"। इन्द्रध्वजशब्दे तल्लक्षणं दृश्यम्। हेमचन्द्रे पूर्वदिग्वृष्टे इत्यर्थोक्तिः ध्वजसंज्ञकस्यायस्य पूर्वदिक्स्थितत्वाभिप्रायेण वृहद्गणे २६१५ पृ० "ध्वजो यमो हरिः स

गोः खरेभो वायसोऽष्टमः। पूर्वादीनान्तु काष्ठानां ध्वजादीनामवस्थितिः इत्युक्तेः ध्वजरूपायस्य पूर्वदिक्स्थस्य कीर्त्तनात्। वस्तुतः ध्वजशब्द आयविशेषार्थे एव परिभाषितो न तु पूर्वदिगष्टके। तत्र गुण्डिकोपकरणे "दशगुणासमं चक्रं दशचक्रसमो ध्वजः" मनुः। "गुणादिशब्दैस्तद्वानुपलक्ष्यते दशगुणावत्सु यावान् दोषस्तावानेकस्मिन् चक्रवति तैत्तिके। यावान् दशसु तैत्तिकेषु दोषः तावानेकध्वजवति गौण्डिके" कुल्लू०। चिह्ने "तं बभ्रे वाहनं विष्णुर्गरुत्वन्तं महाबलम्। ध्वजं चक्रे च भगवानुपरि स्यास्यतीति तम्" भा०आ०३१अ०। "श्येनो वज्रं मृगस्त्यागो नन्द्यावर्त्तो घटोऽपि च। कूर्मो नीलोत्पलं शङ्खःफणी सिंहोऽर्हतां ध्वजाः" हेमच०। "शरेण शक्रस्य महाशनिध्वजम्" रघुः "ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्। भैक्षाशात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजम्" मनुः। वृषध्वजः मकरध्वजः धूमध्वज इत्यादि ततो बाह्वा० इञ्। ध्वाजि तत्सम्बन्धिनि त्रि०।

ध्वजगृह पु०ध्वजाययुक्तं गृहं शा०त०। ध्वजरूपाययुक्ते गृहे "ययौ स्वमेव भवनं यत्र ध्वजगृहं महत्" हरिवं०१७१अ०

ध्वजग्रीव पु०ध्वज इव ग्रीवास्य। राक्षसभेदे रामा०सु०१२२स०

ध्वजद्रुम पुः ध्वज इव दीर्घकाण्डो द्रुमः। तालवृक्षे राजनि० ध्वजवृक्षादयोऽप्यत्र।

ध्वजप्रहरण पु० ध्वजं प्रहरति प्र+हृ-ल्यु। वायौ शब्दर०

ध्वजभङ्ग पु० ध्वजस्य मेढ्रस्य भङ्गः। चरकोक्ते क्लीवताप्रयोजके रोगभेदे यथा "अत्यम्ललवणक्षारविरुद्धाशनभोजनात्। तथाम्बुपानाद्विषमात् पिष्टान्नगुरुभोजनात्। दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात्। कल्याणीगमनाच्चापि वियोनिगमनादपि। दीर्घरोमर्षीं चिरोत्सृष्टां तथैव च परिप्लुताम्। ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः। चतुःपदाभिगमनाच्छेफस्याभिघाततः। अधावनाच्च मेढ्रस्य शस्त्रदन्तनखक्षतात्। कण्टकप्रहारनिष्पेषमृद्गानाच्च निषेवणात्। रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते। चरकः। तस्य चिह्नं यथा "शुक्रेऽचिरात् प्रसिच्येत शुक्रं शोणितमेव वा। तोदोऽत्यर्थं वृषणयोर्मेढ्रं धूपायतीव च" इति वाभटः।

ध्वजवत् त्रि० ध्वजचिह्नमस्यास्य मतुप् मस्य वः। चिह्नयुक्ते "शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन्" "कृत्वा शवशिरो ध्वजमिति" मनूक्तेः "कृतब्राह्मणकपालरूपचिह्नवान् इत्यर्थः" मिता०। स्त्रियां ङीप्। सा च २रुचिमेधसः कन्यायाम् "अत्र ध्वजवती नाम कुमारी रुचिमेधसः" भा०उ०१०६अ०। ध्वजः गुण्डिकोपकरणभेदः अस्त्यस्य मतुप् मस्य वः। २गौण्डिके "शूनावतां ध्वजवतां वेशेनैव च जीवताम्" मनुः

ध्वजारोपण न० ६त०। ध्वजस्य देवप्रासादादौ आरोपणे तद्विधिः अग्निपु० १०२अ० यथा "चूडके ध्वजदण्डे च ध्वजे देवकुले तथा। प्रतिष्ठा च यथोद्दिष्टा तथा स्कन्द! वदामि ते। तडागार्द्धप्रवेशादा यदा सर्वार्द्धवेशनात्। ऐष्टके दारुजः शूलः शैलजे धात्रि शैलजः। वैष्णवादौ च चक्राढ्यः कुम्भः स्यान्मूर्त्तिमानवः। स च त्रिशूलयुक्तस्तु अग्रचूडाभिधो मतः। द्वियशूलः समाख्यातो मूर्ध्नि त्रिशूलसन्वितः। बीजपूरकयुक्तो वा शिवशास्त्रेषु तद्विधः। चित्रो ध्वजस्य जङ्घातो यथा जङ्घार्द्धतो भवेत्। भवेद्वा दण्डमानस्तु यदि वा तद्यदृच्छया। महाध्वजः समाख्यातो यस्तु पीठस्य वैष्टकः। शक्रे १४र्य हैरसैर्वापि हस्तैर्दण्डस्तु सम्मितः। उत्तमादिक्रमेणैव विज्ञेयः सूरिभिस्ततः। वंशजः शालजादिर्वा स दण्डः सर्वकामदः" इत्युपक्रमे तत्र दर्शितः

ध्वजाहृत पु० ध्वजेन तदुपलक्षितसंग्रामेणाहृतः। दासभेदे "ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैत्रकोदण्डदासश्च सप्तैते दासयोनयः" मनुः। "ध्वजाहृतः ध्वजे संग्रामे स्वामिसकाशात् जितः" कुल्लू० २अविभाज्यधनभेदे न० "संग्रामादाहृतं यत्तु विजित्य द्विषतां कुलम्। स्वाम्यर्थं जीवितं त्यक्त्वा तद् ध्वजाहृतमुच्यते" दायभा० कात्यायनः। "ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तद्भवेत्" स्मृतिः।

ध्वजिन् त्रि० ध्वजोऽस्त्यस्य इनि। १ध्वजयुक्ते "सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी" मनुः "उलूकपक्षिध्वजिभिर्देवतायतनैर्वृतम्" भा०शा० १४१अ० स्त्रियां ङीप् सा च २सेनायाम् अमरः। "सखैः प्रवृद्धध्वजिनी रजांसि" रघुः। ३पर्वते ४रथे ५गर्वे ६अश्वे ७ब्राह्मणे पु० मेदि०। ८मयूरे राजनि०। १०गुण्डिके हेमच०। "प्रतिपक्षे शूनी चक्री ध्वजी वेश्या नराधिपः" मनुः।

ध्वजोत्थान न० इन्द्रध्वजस्य उत्थानम्। १शक्रध्वजोत्थाने तदुपलक्षिते २उत्सवे च त्रिका०। इन्द्रध्वजशब्दे ९४७पृ० दृश्यम्।

ध्वण ध्वाने भ्वा॰ अक॰ परं॰ सेट्। ध्वणति अध्वाणीत् अध्वणीत् दध्वाण।

ध्वन रवे भ्वा॰ परं॰ अक॰ सेट्। ध्वनति अध्वानीत् अध्वनीत् दध्वान। मित् वा घटादि ध्वनयति ध्वानयति।

ध्वन शब्दे चु॰ उभ॰ सक॰ सेट्। ध्वनयति अदिध्वनत् अध्वनयीत्। शब्द इह अव्यक्तध्वनिरूपः। मृदङ्गः ध्वनयति" इत्यादि।

ध्वन पु॰ चु॰ "ध्वन" पा॰ एरच् भावे अच्। अव्यक्तशब्दे

ध्वनन न॰ध्वन्यते व्यज्यतेऽर्थोऽनेन घटा॰ध्वनि—करणे ल्युट्। १अलङ्कारोक्ते वाच्यलक्ष्यभिन्नार्थस्य बोधनात्मके व्यञ्जनावृत्तिरूपे शब्दनिष्ठे व्यापारभेदे "विरताखिलाद्यास्तु यथार्थो बोध्यतेऽपरः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च"। "वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम" सा॰द॰। भावे ल्युट्। २अव्यक्तशब्दकरणे "पापकं गन्धमाघ्रायाचिखन्दने कर्णध्वनने च" आश्व॰ श्रौ॰ १।६।८

ध्वनमोदिन् पु॰ ध्वनेन ध्वानेन मोदयति मुद—णिच्—णिनि। १भ्रमरे शब्दरत्ना॰। २मधुकर्य्यां स्त्री ङीप्

ध्वनि पु॰ ध्वन—इन्। १मृदङ्गादिशब्दे "शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः। कण्ठसंयोगजन्मानो वर्णाद्याः कादयो मताः" भाषा॰। शब्दविशेषस्य ध्वन्यात्मकता शब्दार्थरत्नेऽस्माभिर्व्यवस्थापिता यथा "स च शब्दः द्विविधः बुद्धिहेतुरबुद्धिहेतुश्च। तत्राबुद्धिहेतुर्मेघादिशब्दः बुद्धिहेतुश्च द्विविधः। स्वाभाविकः काल्पनिकश्च उभयत्रापि ध्वनेरुपकारकत्वात् ध्वन्यात्मकता। तत्र स्वाभाविको वर्णविशेषानभिव्यञ्जको हसितरुदितादिरूपः प्राणिमात्रसाधारणः। काल्पनिकोऽपि त्रिविधः वाद्यादिशब्दः गीतिरूपः वर्णात्मकश्च। तत्र भेरीशब्दादिरूपो वाद्यरूपः माधवादिरागाभिव्यञ्जकनिषादादिस्वररूपो गीतिरूपः ध्वनिविशेषसहकृतकण्ठताल्वाद्यभिघातजन्यश्च वर्णात्मकः। "ध्वनिर्नाम यो दूरादाकर्णयतो वर्णविशेषमनधिगच्छतः कर्णपथमवतरति प्रत्यासीदतश्च तारत्वादिविशेषमवगमयतीति" शारीरकभाष्योक्तेस्तारत्वादिधीहेतुर्ध्वनिरित्यवसेयम्। जिह्वाया ऐषदन्तरपाते वर्णानामनुत्पत्तेर्ध्वनुत्पत्तेश्च हसितरुदितादौ वर्णोत्पत्तिमन्तरेणैव तत्प्रतीतेश्च सर्वशब्दजनकता ध्वनेरवधीयते।"

तद्भेदस्वरूपादिकं तत्रैव स्थानान्तरेऽस्माभिर्निर्णीतं यथा "तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तथा च वाक्यपदीये "स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते" इति। "स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते" इति च। स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वलक्षितः। तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितञ्च तत्रैव वाक्यपदीये "स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते"। शब्दस्य स्फोटस्य नित्यतया अभिन्नकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरुपचर्यते इति तदर्थः। एवञ्च विलम्बितोच्चारणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्य्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात्। अतएव महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुण इत्यादिना ऽभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि मानम्। यथा "ध्वनिः स्फोटस्य शब्दानां ध्वनिस्तु खलु लक्ष्यते। ह्रस्वोमहांश्च केषाञ्चित् स्वयं नैव स्वभावतः" इति। न स्वभावतस्तद्रूपेण स्फोटोलक्ष्यत इत्यर्थः। ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे विलम्बितत्वम् अल्पकालस्थायित्वे द्रुतत्वमिति विवेकः।

२उत्तमकाव्ये "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" काव्यप्रका॰

"इदं काव्यं बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः तत्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य" वृत्तिः। "इदमिति वाच्यादतिशयिनि वाच्यादधिकास्वाद्ये व्यङ्ग्ये सति इदं काव्यमुत्तमं तदेव च बुधैर्ध्वनिः कथित इत्यर्थः। ननु ध्वनिपरिभाषा कापि केनापि न कृता तत्कथमलङ्कारशास्त्रे सा कृतेति आकाङ्क्षायां वैयाकरणरूपबुधसंवादं दर्शयन् व्याचष्टे बुधैः वैयाकरणैरिति एवञ्च सेयं

कारिकास्वनुपपद्याख्येत्यवधेयम्। अत्रायमर्थः अनेकवर्णात्मकस्य कलसादिपदस्य प्रत्यक्षं न सम्भवति आशुविनाशिनां क्रमिकाणां वर्णानां मेलकाभावेन तन्मेलात्मनः पदस्य गृहीतुमशक्यत्वात्। न च प्रत्येकवर्णानुभवजन्यसंस्कारैः सकलवर्णात्मनः पदस्य समूहालम्बनस्मृतिरेव नैयायिकमतसिद्धास्तिति वाच्यं वर्णपदयोरेकदेशैकदेशिभावेन भिन्नत्वात् वर्णविषयसंस्कारैः पदस्मरणजननस्यायक्यत्वादित्यभिप्रायवद्भिर्वैयाकरणैः पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितेनानुभूयमानचरमवर्णेन श्रोत्रे व्यञ्जनाख्योव्यापारोजन्यते तेनैव व्यापारेण नष्टवर्णघटितमपि पदं स्फोटपरिभाषितं श्रोत्रेण साक्षात् क्रियते इत्युच्यते। तदाह बुधैः वैयाकरणैरिति अर्थप्रत्यायकत्वादेकदेशित्वाच्च पदं वर्णापेक्षया प्रधानभूतं स्फोटसंज्ञकञ्च। तद्रूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य चान्त्यवर्णात्मन इत्यर्थः। अतएतन्मतेऽपि चरमवर्णात्मनि शब्दे तेषां ध्वनिव्यवहारः आलङ्कारिकाणामपि काव्यात्मनि शब्दे ध्वनिव्यवहार इति शब्दे व्यवहारसाम्यान्मतानुसरणम्" महेश्वरः।

ध्वनिभेदाश्च काव्यशब्दे २० २४।२५ पृ० द्रष्टव्याः।

शब्दभेदध्वन्यादुत्पत्तिप्रकारादिकं शारदातिः उक्तं यथा "सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः। शक्तिं ततो ध्वनिस्तस्मादस्तस्मान्निरोधिका। ततोऽर्द्धेन्दुस्ततो विन्दुस्तस्मादासीत् परा ततः। पश्यन्ती मध्यमा वाचां वैखरी ज्ञानजन्मभूः"। सा कुण्डलिनी शक्तिं प्रसूते। ततः शक्तेर्ध्वनिरासीत् ततस्तस्माद्ध्वनेर्नाद इत्यादि ज्ञेयम्। सत्वप्रविष्टा चित् शक्तिशब्दवाच्या परमाकाशावस्था सैव सत्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या अक्षरावस्था, सैव तमोऽनुविद्धा नादशब्दवाच्या अव्यक्तावस्था सैव तमःप्राचुर्यात् निरोधिकाशब्दवाच्या सैव सत्वप्राचुर्यात् अर्द्धेन्दुशब्दवाच्या तदुभयसंयोगाद्विन्दुशब्दवाच्यः सएव विन्दुः स्थानान्तरगतः पराख्यो भवति। तत्र परा मूलाधारे, पश्यन्ती स्वाधिष्ठाने, मध्यमा हृदये, वैखरी मुखे। तदुक्तं "सुप्ता कुण्डलिनी मध्ये ज्योतिर्मात्रस्वरूपिणी। स्वयंप्रकाशा पश्यन्ती सुषुम्णामाश्रिता भवेत्। अश्रोत्रविषया तस्मादुद्गच्छत्यूर्द्ध्वगामिनी। ततः संकल्पमात्रात् स्याद्देवि! ततोर्द्ध्वगामिनी। सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी। सैवोरःकण्ठतालुस्था शिरोघ्राणरदादिगा। जिह्वामूलोष्ठनिष्ठाता सैव वर्णपरिग्रहा। शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी" पदार्थः राघवभट्टः।

"ध्वनिश्चता निश्चताक्षरसुच्छ्रये" माघः।

ध्वनिकाव्य न०कर्म०। उत्तमकाव्ये काव्यशब्दे २०२४पृ०द्रष्टव्यम्

ध्वनिकृत् पु० ध्वनिं तत्प्रतिपादकं ग्रन्थं करोति कृ-क्विप् तुक् ६त०। अलङ्कारग्रन्थभेदकारके पण्डितभेदे "तदुक्तं ध्वनिकृता" सा० द०।

ध्वनिग्रह पु० ध्वनिं ध्वन्यात्मकं शब्दं गृह्णात्यनेन ग्रह-करणे अप्। कर्णे श्रोत्रेन्द्रिये त्रिका०।

ध्वनिनाला स्त्री ध्वनेः ध्वन्यात्मकशब्दस्य नालेव। वेणौ १वंशीभेदे २काहलवाद्ये च मेदि०।

ध्वनिबोधक पु० ध्वनिं बोधयति बुध-णिच्-ण्वुल्। रोहिणटणे नैघण्टुप्रकाशिका।

ध्वनिविकार पु० ६त०। घोषमयादिना ध्वनेरन्यथाभावे १काकौ हेमच०। २विकृतध्वनौ च।

ध्वन्य त्रि० घटादि० ध्वन-कर्मणि यत्। १ध्वननीये व्यङ्ग्यार्थे ऋग्वेदप्रसिद्धे २लक्ष्मणपुत्रात्मजे पु० "उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मणस्य सुरचोयतानाः" ऋ० ५।१२।१० "ध्वन्यस्य तन्नामकस्य लक्ष्मणस्य लक्ष्मणपुत्रस्य" भा०

ध्वन्स गतौ सक०अंशे नाशे अधःपतने च अक०भ्वा० आत्म० सेट्। ध्वसते दध्वसे-दध्वंसे। लङ्दत् अध्वसत्। उदित् ध्वंसित्वा ध्वस्त्वा। ध्वस्तः। ध्वसस्यातीतत्वाऽभावेऽपि तदुत्पत्त्यनुकूलव्यापारस्य कारणविशेषसंयोगस्य अतीतत्वात् तथा व्यवहारः। वैयाकरणमते सर्वत्र "फलव्यापारयोर्धातुः" इत्युक्तेः फलव्यापारयोर्धात्वर्थत्वात् तयोश्च सामानाधिकरण्ये धातोरकर्मकत्वम् नाशस्य प्रतियोगितया कारणसमवधानस्य एकत्वं घटादौ सत्त्वादकर्मकत्वम् "फलव्यापारयोरेकनिष्ठतायामकर्मकः" इति एतन्मते "आश्रये तु तिङः स्मृताः" इत्युक्तेः आश्रयरूपार्थस्य कर्तृत्वं तच्च निरुक्तव्यापाराश्रयत्वेन घटादावव्याहतमेव तिङर्थवर्त्तमानत्वादेः कारणसमवधानरूपव्यापारेऽन्वयसम्भवाच्च काचिदनुपपत्तिः। नैयायिकमते नाशमात्रस्यैव धात्वर्थत्वेऽपि तदुत्पत्तौ लक्षणा उत्पत्तिश्च आद्यक्षणसम्बन्धस्य चातीतत्वादिनैव ध्वस्तः ध्वंसते इत्यादि प्रयोगः। अस्य कर्तृत्वं प्रतियोगित्वं तु नाशान्वयि तथा च वर्त्तमानादुत्पत्तिकनाशप्रतियोगी घटादिरिति बोधः। व्युत्पत्तिवैचित्र्याच्च उत्पत्तेर्नाश एवान्वयः न प्रतियोगिनि इति बोध्यम्। सां-

ध्वादिषत्कार्यवादे नाशः तिरोहितावस्थेति भेदः। "तदप्यध्वसदाशाद्य माहेन्द्रं वज्रमणेरितम्" भाग० दध्वंसिरे गात्रं तस्मिन्ने च प्रिये हते" भट्टिः। आर्षे क्वचित् प० "भूतो देवानामन्नीदुग्रहूपो ध्वंसेत्युच्चै स्त्रिःस्रुतेन स्वरेण" भा०आ० ७९अ०। मालिन्यादिभावे च "जया विवर्णा मलिना पांशुध्वस्तशिरोरुहा" भा० व० ६४अ० "रविजेन बुधे ध्वस्ते" बृ०सं० १७अ०

ध्वसन् त्रि० अन्तर्भूतण्यर्थे ध्वनृष-कनिन्। ध्वंसकारके। "तेन हेतेन ध्वसा हैतवनरेजे" शत०ब्रा० १२।५।४।९ "ध्वसा पापध्वंसनः" भा०

ध्वसन न० ध्वंसतेऽस्मिन् ध्वनृष वा० आधारे क्यु। ध्वंसनस्थाने "मायुं ध्वसनावधिश्रिताः" ऋ० १।१६४।२९

ध्वसन्ति पु० ध्वनृष-झिच् किच्च। ऋग्वेदप्रसिद्धे ऋषिभेदे "याभिर्ध्वसन्तिं पुरुमन्तिमारतम्" ऋ०१।१२२।१६ "ध्वसन्तिमेतत्संघं पुरुमन्तिमेतन्नामानं च ऋषिमारतम्" भा०

ध्वसिर त्रि० ध्वनृष-किरच्। नाशप्रतियोगिनि "सं भूम्या अन्ता ध्वसिरा अदृश्रन्" ऋ०७।८२।२ "ध्वसिराः सैनिकैर्ध्वस्ताः" भा०।

ध्वस्त त्रि० ध्वनृष-कर्त्तरि क्त। १नाशप्रतियोगिनि अधःपतिते च्युते गलिते च अमरः। "येन ध्वस्तमनो भुवा" सा०द०। ध्वनृषधातौ उदा०।

ध्वस्ति स्त्री ध्वनृष-भावे क्तिन्। ध्वंसे नाशे। कर्मणि ध्वंसतेऽस्मिन् आधारे क्तिन्। कर्मक्षयाधारे विद्याभेदे। "कर्मणां शुभदुष्टानां जायते फलसंचयः। ध्वंसोऽपक्वकषायत्वं यत्र सा ध्वस्तिरुच्यते" मार्कण्डेयपु०

ध्वस्मन त्रि०अन्तर्भूतण्यर्थे ध्वनृष-वा०मनिन् किच्च। ध्वंसके "न ध्वस्मानस्तन्वो रेष आधुः" ऋ०४।६।६ "ध्वस्मानो ध्वंसकाः" भा० भावे मनिन् कित्। २ध्वंसे ध्वस्मन्वत्।

ध्वस्मन्वत् त्रि० ध्वस्मा ध्वंसोऽस्यास्य मतुप्। १ध्वंसवति "स त्वा ध्वस्मन्वद्भ्येतु" ऋ०७।४।९। २ऋटके निघ०।

ध्वस्र त्रि० ध्वनृष-रक्। १नष्टे अन्तर्भूतण्यर्थे ध्वनृष-रक्। ध्वंसके "कस्य ध्वस्रा भवथः कस्य वा नराः" ऋ०१०।४०।१। "ध्वस्रा ध्वंसको अपनः" भा० औस्थाने आच्। "ध्वस्रा अपिष्णन् युवतीर्ऋतस्राः" ऋ०४।१९।७ "ध्वस्राः कृतध्वंसिका युवतीः" भा०। २राजभेदे पु० "ध्वस्रयोः पुरुमन्त्यो वा सहस्राणि" ऋ० ९।५८।२ "ध्वस्रः कश्चिद्राजा पुरुमन्तिश्च कश्चित्, तयोः। अत्रेतरेतरयोगविवक्षया द्विवचनम्" भा०।

ध्वान पु०ध्वन-भावे घञ्। १शब्दे अमरः। "ध्वानेन वोपांशु वा पत्नीः संयाजयन्ति" आपस्तम्बसू०। पत्नीसंयाजप्रकारस्य कात्या० श्रौ० २।७।१ कण्डिकादौ दृश्यः।

ध्वानायन पुंस्त्री ध्वनस्यर्षेर्गोत्रापत्यम् अत्रा० फञ्। ध्वनर्षिगोत्रापत्ये स्त्रियां ङीप्।

ध्वान्त न० ध्वन-क्त। शुभ्रस्नान्तेत्यादिना या०अन्धकारे नि०। १तमसि अमरः। अन्यत्र ध्वनित इत्येव शब्दयुक्ते। ध्वान्तमस्यस्य अच्। २तमःप्रधाने नरकभेदे च शब्दार्थचि० ३मरुद्भेदे धुनिशब्दे यजु०वाक्यं दृश्यम् "ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्" सूर्यनतिः।

ध्वान्तवित्त पु० ध्वान्ते वित्तः प्रथितः। खद्योते शब्दरत्ना०

ध्वान्तशातव पु०ध्वान्तस्यान्धकारस्य शातवः। १सूर्ये शब्दार्ण० २अग्नौ ३चन्द्रे च शब्दार्थचि०। तद्रूपवर्णे ४श्वेतवर्णे पु० शब्दच०। ध्वान्तारातिप्रभृतयोऽपि सूर्यादौ। "ध्वान्तारिं सर्वपापघ्नम्" सूर्यनतिः। [हारा०।

ध्वान्तोन्मेष पु० ध्वान्ते उन्मिषति उद्-मिष अच्। खद्योते

ध्वृ कौटिल्ये भ्वा०पर०अक०अनिट्। ध्वरति अध्वार्षीत् दध्वार दध्वर्य। "ध्वृतीवा युधि गायाभिः" भट्टिः "कुटिलीकरणे सक०"ध्वाहृष्यमेवैतया ध्वरति"तैत्ति०ब्रा०२।५।८।६

ध्वृण शब्दे भ्वृणवत् सर्वम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये धकारादिशब्दार्थसङ्कलनम्।

न

नकारः व्यञ्जनवर्णभेदः तवर्गीयपञ्चमवर्णः अस्योच्चारणस्थानं दन्तमूलं नासिका च। "दन्त्यान्तस्तवर्गाः स्मृताः" "अमोऽनुनासिका नन्तौ" इति च शिक्षोक्तेः। तस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण दन्तमूलस्य सम्यक्स्पर्शः। अत एव व्यञ्जनानां स्पर्शवर्णत्वव्यवहारः। बाह्यप्रयत्नाच्च संवार नादघोषा अल्पप्राणश्च "खयां यमाः खयः+क पौ विसर्गः स्वर एव च। एते श्वासानुप्रदाना अघोषाश्च विदुर्बुधाः। कण्ठस्, अन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुग्मा वर्गयमगा यणश्चास्रावः स्मृताः" शिक्षा अस्य वाचकशब्दा वर्णाभिधानतन्त्रे उक्ता यथा "नो गर्जिनी क्षमा सौरिर्वारुणी विश्वपावनी। मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः। जङ्घागामी हिरण्यश्च वामपादाङ्गुलेर्नखः। वैनतेयः स्रुतिर्वत्सभवाऽनर्वा निरागमः। वामनो ज्वालिनी दीर्घो गिरीहः सुगतिर्वियत्। शब्दात्मा दीर्घघोषा च हस्तिनापुरमेचकौ। गिरिनायकनीलौ च शिवोऽनादिर्महामतिः"। अस्य ध्यानं यथा "ध्यानमस्य नकारस्य वक्ष्यते शृणु भाविनि!। दलिताञ्जनवर्णाभां जलजिह्वां सुलोचनाम्। चतुर्भुजां कोटराक्षीं चारुचन्दनचर्चिताम्। कृष्णाम्बरपरीधानामीषद्धास्यसमन्वितां सदा। एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत्" तत्स्वरूपं यथा "नकारं शृणु चार्वङ्गि! कोटिविद्युल्लताकृतिम्। पञ्चदेवमयं वर्णं स्वयं परमकुण्डली। पञ्चप्राणात्मकं वर्णं हृदि भावय पार्वति!" कामधेनुतन्त्रम्। मातृकावर्णन्यासे अस्य वामपादाङ्गुलिनखे न्यासता। काव्यादौ प्रथमप्रयोगे फलं यथा "दोषः सौख्यं सुदं नः" द०व० टीकोक्तम्।

धातुपाठे ये णादितया पठितास्ते प्रयोगकाले नादिपूर्वका भवन्ति, सति निमित्ते पुनर्णत्वमापद्यन्ते। ये च नादितया पठितास्ते न णत्वमापद्यन्ते इति विवेकः।

न अव्य० नह–बन्धने नञ नाशे–वा ड। १निषेधे २उपमायां च मेदि० ३वज्रार्थे च। अस्य समासे नलोपः तुडागमश्च न भवति। "संग्रामे नातिकोविदम्" भा० वि०४अ०। नञा समासे तु घनातकोऽस्मिति स्यात्। एकयोना विंशतिरित्यादिवाक्ये एकाद्वेर्विंशतिः एकान्नविंशतिरित्यादि। नासत्यौ नाकइत्यादौ च नञशब्दसमासेऽपि प्रकृतिवद्भावविधानात् न नलोपादि। नैकधानाराचनान्तरीयकादयस्तु नञशब्देन "सह सुपेति" पा० समासात् सिद्धा सि०कौ०। गणरत्ने अयं चादिषु पठितः। "किञ्चित् प्रत्युत यच्चकञ्चन न कं सत्रा समंसाकमः" इति तट्टीकायां "नेति निषेधोपमानयोरित्युक्त्वा उदाहृतम् "नैकः सुप्तेषु जागृयात्"। "तिष्ठा देवो न सविता" इति न सविता सवितेवेत्यर्थः" इति। ४नकारस्वरूपवर्णे पु०। "दोषः सौख्यं सुदं" न इति द०र०टीका "नोगर्जिनी क्षमा" इत्यादिवर्णाभिधानम्। नञर्थश्च नञ्शब्दे वक्ष्यते। भावे बा० ड। ५बन्धे पु०। नम–कर्त्तरि कर्मणि वा ड। ६सुगते ७हिरण्ये च पु० दस्रते त्रि० मेदि०। ८रत्ने पु०। एकाक्षरकोषः।

नंगुक त्रि० "पचिनश्योर्णुकन् कनुमौ च" उणा० णुकन् तुमागमश्च। अणौ उज्ज्वलद०। यावत्पर्यन्तं गत्वाभावो विनश्यति तावत्परिमाणे।

नं ट त्रि०नश–टच् तुम् च। नाशप्रतियोगिनि पक्षे नङ्गृ तत्रार्थे स्त्रियां ङीप्।

नःक्षुद्र त्रि० नसा क्षुद्रः। क्षुद्रनासिके हेम०।

नक् अव्य० नश–क्विप् बा० कुत्वम्। रात्रौ "अपक्षसुरमदो नगजिह्वीते" ऋ०७।७१।१। स्वरादिगणे ज्योक् योक् नक् कमिति क्वचित् पाठो दृश्यते। सि०कौ० गणरत्ने च योक् नक् च न दृश्यते।

नकिञ्चन त्रि० नास्ति किञ्चन यस्य नञर्थस्य नञशब्दस्य "सह सुपेति" पा० समासः। अकिञ्चने दरिद्रे "सर्वकामरसैर्हीनाः स्थानभ्रष्टा नकिञ्चनाः" भा०उ०१२२अ०। नञा मयू० समासे नञो नलोपे अकिञ्चन इत्येव। "स्थाने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्ति" रघुः। "अकिञ्चने किञ्चन नायिकाङ्गके किमारकूटाभरणेन न स्त्रियः" नैष०।

नकिम् अव्य० न किम् च चादिपाठात् अव्ययत्वं नञशब्देन स० तः। वर्जनार्थे मनोरमा। एवं पृथो० नकिम् न किर् नकीम् एतेऽपि वर्जने मनोरमा

नकुच पु० न कुचति कुच–ड्रोचे नञशब्देन समासः। (मान्दार) उड्डुडत्ते अमरः। [शब्दमा०।

नकुट न० न कुटति कुट–क नञशब्देन समासः। नासिकायां

नकुल पुंस्त्री नास्ति कुलमस्य "नञ्वाङ्नपान्नवेदानासत्यनक्तचिनकुलनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या" पा० नञो न नलोपादि। (बेजी) ख्याते १जन्तुभेदे स्त्रियां

ङीष्। "नकुलः पिच्छिलो वातनाशी श्लेष्मकपित्तजित्" राजनि॰ तन्मांसगुण उक्तः। २पाण्डोः क्षेत्रे माद्र्यामश्विनीकुमाराभ्यां जाते पुत्रभेदे "ततो माद्री विचार्यैवं जगाम मनसाऽश्विनौ। तावागम्य सुतौ तस्यां जनयामासतुर्यमौ। नकुलं सहदेवञ्च रूपेणा प्रतिमौ भुवि" "पूर्वजं नकुलेत्येवं सहदेवेति चापरम्। माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः" भा॰ आ॰ १२४अ॰। ३पुत्रे पु॰ शब्दमाला। ४शिवे च "युधिष्ठिरस्य या कन्या नकुलेन विवाहिता" विदग्धमु॰। ५कुलरहितमात्रे त्रि॰ मेदि॰। ६शङ्खिन्यां स्त्री ७कुङ्कुम्यां ७जटामांस्यां स्त्री॰ मेदि॰। ८शङ्खे हेमच॰ जातौ ङीष्। १०नकुलजातिस्त्रियाञ्च।

नकुलाख्या स्त्री न कुलाढ्या। गन्धनाकुल्यां राजनि॰।

नकुलान्धता स्त्री नकुलस्येवान्धता। सुश्रुतोक्ते नेत्रविकाररूपरोगभेदे "यो हुस्वजात्यो नकुलान्धता च गम्भीरसंज्ञा च तथैव दृष्टिः" इत्युद्दिश्य "विद्योतते या तु नरस्य दृष्टिर्दीपाभिपन्ना नकुलस्य यद्वत्। चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्धसंज्ञः" इति लक्षिता नकुलान्ध्यमध्यत्र।

नकुलीश पु॰ कालीपीठस्थे भैरवभेदे "नकुलीशः कालिपीठे दक्षपादाङ्गुली मता" पीठमाला २रुद्रकारे वर्णाभिधानम्। "नकुलीशोऽग्निमारूढो वामनेत्रार्द्धचन्द्रभृत्" तन्त्रसारे (ह्रो) बीजोद्धारः। नकुलेश्वरादयोऽत्र। [त्रि॰।

नकुलेष्टा स्त्री ६त॰। १रास्नायां अमरः। २नकुलस्य प्रिये

नक्क नाशने चुरा॰उभ॰सक॰ सेट्। नक्कयति ते अनक्कत् त। णोपदेशत्वाभावात् प्रनक्कति इत्यादौ न णत्वम्।

नक्त न॰ नज-क्त। रात्रौ "रुचद्दुग्धे दृशे नक्तया चित्" ऋ॰४।११।१ "नक्तया चिदु रात्रावपि" भा॰सप्तमीस्थाने याच्। तत् अकृत्वेनास्यस्य अच्। २व्रतभेदे तद्व्रतकालादि कालमाधवीये निर्णीतं यथा "अथ नक्तं निर्णीयते। तत्र वाराहपुराणे चान्यव्रते पठ्यते "मार्गशीर्षे सिते पक्षे प्रतिपद्दया तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं प्रपूजयेदिति"। अत्र नक्तशब्दो भोजनपरः कालपरत्वे प्रकुर्वीतेत्यस्यानन्वयात्। न हि कालः केनचित्कर्त्तुं शक्यते। तस्य भोजनस्य रात्राविति कालविधिः। अतो दिवाभोजनरहितत्वे सति रात्रिभोजनं व्रतस्य स्वरूपम्। अन्यथा अतःप्राप्तस्य रात्रिभोजनस्य विधानवैयर्थ्यात्। तस्य च नक्तभोजनस्य विष्णुपूजनमङ्गम् तत्सन्निधौ पठितत्वात्। तथा होमोऽपि तदङ्गम् "होमं च तत्र कुर्वीत" इत्यभिधानात्। एवं च सति प्रधानाविरोधेन पूजा होमयोरङ्गयोर्दिवानुष्ठानसङ्गं भवति। प्रधानस्य च नक्तस्य कालद्वयं भविष्यत्पुराणे दर्शितम् "मुहूर्त्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये नराधिप!" इति। अस्य च कालद्वयस्याधिकारिभेदेन व्यवस्थामाह देवलः "नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम्। यतेर्दिनाष्टमे भागे तस्य रात्रौ विधिष्यते" इति। अत्यन्तरेऽपि "नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च प्रिथवा चैव कुर्यात्तु सदिवाकरम्। सदिवाकरं तु तत्प्रोक्तमन्तिमे घटिकाद्वये। निशानक्तं तु विज्ञेयं यामार्द्धे प्रथमे सदेति" रात्रिनक्तभोजने व्यासः "त्रिमुहूर्त्तः प्रदोषः स्याद्भानावस्तंगते सति। नक्तं तु तत्र कर्त्तव्यमिति शास्त्रविनिश्चयः" इति तदेवं नक्तव्रतकालौ व्यवस्थितौ। तत्र नक्तं प्रदोषव्यापिन्यां तिथौ कार्यम् तदाह वसुः "प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। एकादशीं विना सर्वा शुक्ले कृष्णे तथा स्मृता" इति। एकादश्यां तु यन्नक्तं तत्रोदयव्यापिनी तिथिर्ग्राह्या तदुक्तं स्कन्दपुराणे "प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः" इति। अत्राप्येकभक्तन्यायेन षोडशविधभेदा उत्प्रेक्षणीयाः। मध्याह्नप्रदोषयोरेव भिन्नत्वात्। पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वतिथिर्ग्राह्या। परेद्युरेव प्रदोषव्याप्तौ परतिथिः। उभयत्र प्रदोषव्याप्तौ परतिथिरेव तदाह जाबालिः "सदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सायतः" इति। उभयत्रापि दिवारात्रौ च सा तिथिर्विद्यते यत इत्यर्थः। उभयत्र प्रदोषव्याप्त्यभावेऽपि परैव तदाह जाबालिः "अतथात्वे परत्र स्यादसादर्थाच्च यतो हि सेति"। प्रदोषे तदभावेऽप्यस्तमयादर्वागुयतः सा विद्यते ततः सा ग्राह्येत्यर्थः। अस्य च दिवारात्रव्रतत्वेन प्रदोषव्याप्तिवत्सायङ्कालव्याप्तिरपि निर्णयहेतुर्भवतीत्यनेनाभिप्रायेणार्थाद्गत्वा यादित्युक्तम्। दिवारात्रिव्रतत्वं च कूर्मपुराणेऽभिहितम् "प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता यदा दिवा। तदा नक्तव्रतं कुर्यात् स्वाध्यायस्य निषेधवत्" इति। यद्यप्यत्र प्रदोषकालसायङ्कालौ द्वावेव प्रयोजकौ प्रतिभाषेते

तथापि प्रदोषव्याप्तिर्मुख्यः कल्पः। सायङ्कालव्याप्तिरनुकल्प इति जाबालिवचनादवगम्यते। तत्र ह्यतथात्व इति प्रदोषव्याप्त्यभावमनूद्य तद्व्याप्तिविधेर्ह्यत्रे कर्वांगस्तादुयत इति हेत्वपन्यासात्। ईदृशे विषये गृहस्थोऽपि यतिवद्दिवा नक्तमाचरेत् तदुक्तं स्कन्दपुराणे "प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते। आत्मनो द्विगुणच्छायामतिक्रामति भास्करे। तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम्। एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुञ्जिक्रियाम्। कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति"। यत्तु सप्तमीभानुवासरादौ सौरनक्तं विहितं तत्र पूर्वोक्तविपर्यासेन सायङ्कालव्याप्तिर्मुख्यः कल्पः। प्रदोषव्याप्तिरनुकल्पः। एतदेवाभिप्रेत्य सुमन्तुः "त्रिमुहूर्त्तस्तु नेवाह्नि निशि वै तावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति" अत्र सायंव्याप्तेर्मुख्यकालत्वात् प्रथमतो निर्देशः। प्रदोषव्याप्तेरनुकल्पत्वात् पश्चान्निर्देशः। इतरनक्तेषु तु प्रदोषव्याप्तेरनुकल्पत्वादुदाहृतकूर्मपुराणवचने सैव प्रथमं निर्दिष्टा सायंकालव्याप्तिः पश्चान्निर्दिष्टेति विवेकः। तेष्वितरनक्तेषु प्रदोषव्यापितिथिग्रहणेऽपि भानुवासरसंक्रान्त्यादिना गृहस्थस्यापि यदा रात्रिभोजननिषेधः तदा दिवैव नक्तं कुर्यात् तथा च भविष्योत्तरपुराणे "ये त्वादित्यदिने ब्रह्मन्नक्तं कुर्वन्ति मानवाः। दिनान्ते तेऽपि भुञ्जीरन् निषेधान्नात्रिभोजने" इति। तस्मिंश्च दिवाभोजन उत्तमोऽन्तिमो मुहूर्त्तो, मध्यम उपान्त्यः, ततः प्राचीनो जघन्यः। एवं च सत्यन्तिमभागत्रिमुहूर्त्तवचनान्युपपद्यन्ते रात्रिभोजनेऽपि घटिकात्रयमुत्तमः कालः। घटिकाषट्कं मध्यमः कालः एतदेवाभिप्रेत्य वचनं कार्य्यते "प्रदोषोऽस्तमयादूर्द्ध्वं घटिकात्रयमिष्यते" इति। "त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तं गते सतीति"। निशीथपर्य्यन्तो जघन्यः कालः। "नक्तं प्रकुर्वीत रात्राविति" सामान्येनाभिधानात्। अथौर नक्तेषु साम्येन वैषम्येण वा दिनद्वये प्रदोषैकदेशव्याप्तौ परेद्युरेव नक्तं कार्य्यम् सायंकालस्य गौणस्य तत्तिथिव्याप्तत्वात्। अत्राप्येकभक्तवदन्याह्नं नक्तोपवासस्थानीयनक्तयोर्निर्णयो द्रष्टव्यः। यथोक्तलक्षणलक्षितयोरेकभक्तनक्तयोरेकस्मिन् दिने यदा प्रसक्तिस्तदा कार्यं कर्त्तव्यम्। न चैतादृशी प्रसक्तिरेव नास्तीति शङ्कनीयम्। भविष्योत्तरपुराणोक्ते रथसप्तमीव्रते कदाचित्तत्प्रसक्तेः। तथाहि तत्र तृतीयादिषु सप्तम्यन्तेषु पञ्चसु दिनेषु क्रमेणैकभक्तनक्तायाचितोपवासपारणानि विहितानि। तत्र यदा तृतीया यामत्रयपरिमिता तत्र अर्द्धं चतुर्थी तदा मध्याह्नव्यापित्वात् तृतीयैकभक्तं तत्र प्राप्तं प्रदोषव्यापित्वाच्चतुर्थीनक्तमपि तत्रैव तथा सति परस्परविरोधो दुःपरिहरः। अत्रोच्यते। एकभक्तस्य प्राथम्यात् प्रबलत्वेन तत्रैकमुख्यकल्प एवानुष्ठेयस्तद्विरोधिनि तु नक्तेऽनुकल्पः। स च द्विविधः दिनान्तरानुष्ठानात् कर्मान्तरानुष्ठानाच्च। यदा चतुर्थी परेद्युर्द्वा सायंकालं व्याप्नोति तदा तस्य गौणकालव्यापित्वादेक एव कर्त्ता दिनभेदेन व्रतद्वयमनुतिष्ठेत्। यदा चतुर्थी सभा चोषा च। तदा गौणकालस्याप्राप्तसम्भवेन पूर्वेद्युरेव भार्यापुत्रादिना कर्मान्तरेण तन्नक्तं करणीयम्।" "अहःसु तिसृषु पुत्राः कर्मानुष्ठानतो दिवा। नक्तव्रतादिव्रतयोगे तु रात्रिभोगो विधिष्यते" ति०त० सामान्योक्तिः भक्तविषयपरिहारेण प्रवर्त्तनीया। अस्य प्रशंसा देवीपु० यथा

"उपवासात् परं भैक्ष्यं भिक्षापरमयाचितम्। अयाचितात् परं नक्तं तस्मान्नक्तेन यत्तयेत्। देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा। पराह्णे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः। सर्ववेलामतिक्रम्य नक्ते भुक्तमभोजनम्। वामाचारे भज देव! नक्तभैरवरूपिणम्" विभुन्दपस्य रुषुत्वभेदे "विभोरत्याञ्च पुष्पेण तस्य नक्त आकूत्यां जज्ञे नक्ताहतिपुत्रो गयो राजर्षिप्रवरः" भाग० ५।१५। ४लब्धिते त्रि०। [टीकायां भरतः

नक्तक पु० नक्त इव कायति चै-क। (नेकड़ा) कर्पटे अमर०

नक्तचारिन् पु० नक्ते रात्रौ चरति चर-णिनि ७त०। १विड़ाले २प्रेचके त्रिका० रात्रिचारिमात्रे त्रि०। नक्तचरादयोऽप्यत्र "जयेन्नक्तचरान् सर्वान् सपुरोहित धूर्गतः" भा०व्या० १०अ०।

नक्तञ्चर पुंस्त्री नक्तं रात्रौ चरति चर-ट ७त०। १राक्षसे हला० स्त्रियां ङीप्। २गुग्गुलौ जटा०। ३चौरे ४प्रेचके शब्दार्थचि०। ५रात्रिचरमात्रे त्रि०

नक्तञ्चर्य्या स्त्री नक्तं चर्य्या चरणम्। रात्रौ चरणादौ "नक्तञ्चर्य्यां दिवास्वप्नमालस्यं पैशुनं मदम्। अतियोगमयोगञ्च श्रेयसोऽर्थी परित्यजेत्" भा०व्या०२८६अ०।

नक्तञ्चारिन् त्रि० नक्तं चरति चर-णिनि। रात्रिचारिमात्रे "दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्यएव च" मनुः

नक्तञ्जात त्रि॰ नक्तं रात्रौ जातः। १रात्रिजाते २ओषधिभेदे स्त्री "नक्तञ्जातया ओषधे! रामे लग्ने असिक्ने च" अथ॰ १।२१।४। नक्तप्रभवादयोऽप्यत्र

नक्तन् न॰ नज–बा॰ तनिन्। रात्रौ "वयो ये मूर्वी पतयन्ति नक्तभिः" ऋ॰७।१०४।१८ "नक्तभिः रात्रिभिः" भा॰

नक्तन्तन त्रि॰ नक्तम् रात्रौ भवः ष्युञ् तुट् च। रात्रिभवे "इदं नक्तन्तनं दाम पौष्यमेतद्दिवातनम्" भट्टिः। स्त्रियां ङीप्।

नक्तन्दिव न॰ नक्तं रात्रौ च दिवा दिने च समाहारार्थद्वन्द्वः दन्दः अचतुरेत्यादिना नि॰ अच्। रात्रौ दिने चेत्यर्थे। "विभज्य नक्तन्दिवमस्ततन्द्रिया" किरा॰

नक्तभोजिन् त्रि॰ नक्तं रात्रौ भुङ्क्ते भुज–णिनि। व्रतार्थं दिवाऽभोजनेन रात्रिभोजिनि दिवाभोजनाभावविशिष्टरात्रिभोजनकर्त्तरि हविष्यभोजनं स्नानं सत्यमाहारलाघवम्। अग्निकार्यमधः शय्यां नक्तभोजी यदाचरेत्" भविष्यपु॰।

नक्तम् अव्य॰नज–ब्रीडे बा॰ तस्। रात्रौ अमरः। "तुषार मूर्त्तेरिव नक्तसंभवः" माघः। "महौषधीर्नक्तमिवात्मभासः" कुमा॰।

नक्तमाल पु॰ नक्तम् रात्रौ या अलति अल–अच्। करञ्जवृक्षे अमरः। "नक्तङ्गिरानर्त्तितनक्तमाले" रघुः।

नक्तमुखा स्त्री नक्तं नक्तव्रताङ्गं मुखमाद्यभागोऽस्याः। रात्रौ कृत्या॰ यथा रात्रिप्रथमभागस्य नक्तव्रताङ्गं तथा नक्तशब्दे उक्तं दृश्यम्।

नक्तव्रत न॰ "नक्तं निशायां कुर्वीत व्रतस्यो विधिसंयुतः। निशि व्रतं तु विज्ञेयं यामार्द्धं प्रथमे सदा" इत्युक्तलक्षणे दिवाभोजनाभावविशिष्टे रात्रौ प्रथमयामार्द्धे भोजनरूपे व्रते नक्तशब्दे दृश्यम्। [कलिकार्य्यां राजनि॰।

नक्ता स्त्री नज–ब्रीडे क्त बा॰ तस्य नः। (रैवताङ्गजी)

नक्तान्ध्य न॰नक्ते अन्ध्यम्। भावप्र॰उक्ते रात्रौ दृष्टिराहित्यापादके नेत्ररोगभेदे "सप्त चेष्टा दृष्टौ पटलत्रयकृतो नक्तान्ध्यं करोतीत्याह त्रिषु स्थितोषु पटलेषु दोषो नक्तान्ध्यमापादयति प्रसन्नं। दिवा च सूर्यग्रष्टीतं दृष्टिः पश्यति तु रूपाणि कफाल्पभावात्"। दोषोऽत्र कफजः कफस्योपक्रान्तत्वात्। नक्तान्ध्यस्य चेष्टाविदग्धदृष्टावन्तर्भावात् न पृथग् गणना। "ऐर्म्म" - इत्यादर्म्म नक्तान्ध्यप्रकाचाक्षीलीरोगं तैमिरं चाञ्जनेन" सुश्रुतः। तद्युक्तमानने नक्तान्ध्य इत्येव "आगन्तुं नातिशीतोष्णं नक्तान्ध्यानां प्रशस्यते" सुश्रुतः। नेत्ररोगशब्दे दृश्यम्।

नक्र पुंस्त्री न क्रामति दूरस्थलम् क्रम–ड नञ्जाडित्यादिना नञः प्रकृतिभावः। १कुम्भीरे अमरः स्त्रियां जातित्वात् ङीष्। (भणकाट) २द्वारशाखापदार्थे ३नासिकायाञ्च न॰ मेदि॰। "सुदा प्रसन्ना इव गूढनक्राः" "आनायिभिस्तामपहृतनक्राम्" रघुः। "अण्डजाः पक्षिणः सर्पा नक्राः मत्स्याश्च कच्छपाः" मनुः नासिकायां स्त्री शब्दमाला। ४जलजन्तुभेदे मकरादौ च "तथा चेन्नाचरेयं नयेत नक्रकेतनः चक्षुनैकेनाकीर्त्तनीयां दशां जनस्वैनम्" काद॰। "नक्रकेतनः मकरध्वजः" इत्यर्थः।

नक्रराज पु॰ ६त॰ टच् समा॰। जलजन्तुप्रधाने (हाङ्गर) ख्याते जलजन्तुभेदे हारा॰।

नक्रहारक पु॰ नक्रमपि हरति हृ–ण्वुल् ६त॰। (हाङ्गर) ख्याते जलजन्तुभेदे हारा॰।

नक्ष गतौ भ्वा॰ पर॰ सक॰ सेट् निघण्टुः। नक्षति अनक्षी ननक्ष। "नक्षद्दाभं तत्तुरिं पर्वतेष्ठा" ऋ॰ ६।२२। "नि त्वा नक्ष्य! विश्पते! द्युमन्तम्" ७।१५।७ "हे नक्ष्य उपगम्य नक्षतिर्गतिकर्मा" भा॰

नक्षत्र न॰नक्ष–अत्रन् न क्षीयते क्षरते वा–बा॰ नि॰नञ्जाडित्यादिनिपा॰ नञः प्रकृतिभावः। अश्विन्यादिषु सप्तविंशतितारासु नक्षत्राभिमानिदेवतासु अश्विन्यादयः दक्षसुताः चन्द्रकलाश्च च तत्कथा कालिकापु॰२०अ॰ कालिकापु॰ शब्दे २०१४ पृ॰ दृश्यम्। ताश्च "अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षा तथैवार्द्रा तथा चैव पुनर्वसुः। पुष्याऽश्लेषामघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्ताचित्रास्वातयश्च विशाखा अनुराधिका। ज्येष्ठा मूला तथा पूर्वोत्तराषाढ़े ततःपरम्। श्रवणा च धनिष्ठा च तथा शतभिषाह्वया। पूर्वोत्तरे भाद्रपदे रेवती च सवंशकाः" ज्यो॰ तत्त्वानि अधिकशब्दे पृ॰ द्रष्टव्यम्। २सप्तविंशतिहारभेदे स च नक्षत्रसंख्यया सप्तविंशत्यारचितः। "नक्षत्रमालामरणमिव मदनद्विपस्य" काम्ब॰। नक्षत्रं च २१६००कलात्मकस्य राशिचक्रस्य अष्टशतकलात्मकम् "अभोगोऽष्टशती छिन्ना" सू॰सि॰ उक्तेः युक्तञ्चैतत् २१६०० कलात्मकस्य तस्य २७ विंशत्या भागे ८०० शतान्येव कला लभ्यन्ते। तेषां योगतारास्वरूपादिकमश्लेषाशब्दे ४९७पृ॰ उक्तम् विस्तरेणादयश्च खगोलशब्दे २४२४।२५ पृ॰ उक्ताः। तेषां प्रयोगे लिङ्गभेदश्च यथा "हस्तास्वातिश्रवणा

अक्लीबे मृगशिरा न पुंसि स्यात् । पुंसि पुनर्वसुपुष्यौ मूलन्त्वस्त्रियां ग्रेषाः स्त्रियां बोध्याः' इदं प्राविष्टम् ।

नक्षत्रकान्तिविस्तार पु० नक्षत्रकान्तीनां विस्तारो यत्र । धवलयावनाले राजनि० ।

नक्षत्रगण पु० नक्षत्रघटितो गणः सप्तदशभेदः । द०सं० उक्ते नक्षत्रविशेषाणां समूहात्मके गणभेदे । तत्र गणभेदस्य संज्ञाभेदाःकार्यविशेषोपयोगिनं च द०सं०९८५०उक्तं यथा "त्रीण्युत्तराणि तेषां रोहिण्यश्च ध्रुवाणि। तैः कुर्यात् । अभिषेकशान्तिकरनगरधर्मवीजध्रुवारम्भान् । मूलश्रवणचक्रभुजगाधिपानि तीक्ष्णानि२ तेषु विद्धन्ति । अभिघातमन्त्रवेताबन्धवधभेदसम्बन्धाः । उग्राणि३ पूर्वभरण्यौपित्र्याण्युग्रसादनाग्रशाठ्येषु । योज्यानि बन्धविषदहनशस्त्रघातादिषु च विद्भ्रे । ध्रुव४ हस्ताश्विनपुष्याः पशुरतिशानभूषणकलासु । शिल्पौषधयानादिषु विद्धिकराणि प्रदिष्टानि । मृदुवर्ग५ स्वनुराधाचित्रापौष्णैन्द्राणि मित्रार्थे । सुरतविधिवस्त्रभूषणसङ्कवगीतेषु च हितानि । क्षौतभुजं सविशाखं मृदुतीक्ष्णं६ तद्विमिश्रफलकारि" । इत० । ७ताराशङ्कौ च ।

नक्षत्रचक्र न०नक्षत्राणां चक्रं यत्र । १राशिचक्रे २तन्नोक्ते दीक्षोपयोगिचक्रभेदे चक्रशब्दे २८०९पृ० दृश्यम् ।

नक्षत्रजात न० नक्षत्रे तद्विशेषे जातं जन्म । द०सं० उक्ते नक्षत्रविशेषे जन्मनि । तत्फलचिन्तफलं तत्रोक्तं यथा "प्रियभूषणः सुरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च । अतनिश्चयसत्यारुग् दक्षः सुखितश्च भरणीषु । बहुभुक् परदाररतस्तेजस्वी कृत्तिकासु विख्यातः । रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरसुरूपश्च । चपलयतरो भीरुः पटुकलाज्ञो धनी सुगे भोगी । शठगर्वितचञ्चलतस्तस्करिंसपापश्च रौद्रर्क्षे६ । दान्तः सुखी सुशीलो दुर्मेधा रोगभाक् पिपासुश्च । अल्पेन च सन्तुष्टः पुनर्वसौ जायते मनुजः । शान्तात्मा सुभगः पण्डितो धनी धर्मसंश्रितः पुष्ये । शठसर्वसत्त्वपापः कृतघ्नधूर्तश्च भौजङ्गे८ । बहुभृत्यधनो भोगी सुरपितृभक्तो महोद्यमः पित्र्ये१० । प्रियवाग्दाता द्युतिमान् चटनो रूपसेवको भाग्ये११ । सुभगो विद्याप्रधनो भोगी सुखभाग् द्वितीयफल्गुन्याम् । उत्साही धृष्टः पानपोऽदृष्टो तस्करो हस्ते । चित्राम्बरमाल्यधरः सुलोचनाकृश्च भवति चित्रायाम् । दान्तो वणिक् कृपालुः प्रियवाग् धर्माश्रितः स्वातौ । दैर्घ्यर्बुध्यो द्युतिमान् वचनपटुः कलहलहिणाखाद्य । आद्यो विदेशवासी क्षुधासुरटनोऽसुराधाद्य । ज्येष्ठाद्य न बहुमित्रः सन्तुष्टो धर्मसत् प्रचुरकोपः । मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी । दृष्टानन्दसमस्तो वीरो दृढसौहृदश्च जलदेवे २० । वैश्वे २१ विनीतधार्मिको बहुमित्रसतत्त्वसुभगश्च । श्रीभाग्यद्रवणे श्रुतवान् [illegible]रदारो धनान्वितः ख्यातः । दाताऽभ्यरगीतप्रियो धनिष्ठाद्य धनवृद्धः । स्फुटवागव्यसनी रिपुहा साहसिकः शतभिषासु दुर्मोहः । मद्रूपदाक्षहिम्नः स्त्रीजितधनपटुर्दाता च । वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको द्वितीयासु२६ । सम्पूर्णाङ्गः सुभगः स्मरशुचिरर्थवान् पौष्णे २७ " ।

नक्षत्रदर्श त्रि० नक्षत्रं पश्यति दृश-अण् उप०स० । १नक्षत्रवीक्षके । नक्षत्रं तत्फलं दर्शयति सूचयति दृश-णिच्-अण् । २गणके ज्योतिर्विद्भेदे "प्रज्ञानाय नक्षत्रदर्शम्" यजु० ३०।१०पुरुषमेधे प्रज्ञानोद्देशकमेध्यपशुकथने

नक्षत्रदान न० नक्षत्रभेदे दानम् । नक्षत्रभेदे द्रव्यभेदस्य दाने तत्र हेमा० दा० उक्तं यथा भारते "नारद उवाच कृत्तिकासु महाभाग! पायसेन सर्पिषा। बलार्थं ब्राह्मणान् साधून् लोकान् प्राप्नोत्यनुत्तमान् । रोहिण्यां पाण्डवश्रेष्ठ! माषैरन्नेन सर्पिषा । पयोदुग्धान्नाहातव्यमान्दण्यार्थं द्विजातये । दीर्घायुः सबलान्तु नरो नक्षत्रे सोमदैवते ५ । दत्त्वादित्यविमानस्थः स्वर्गं प्राप्नोत्यनुत्तमम्" सोमदैवतं नक्षत्रं, मृगशीर्षम् । "आर्द्रायां जघरं दत्त्वा तिलमिश्रं समाहितः । नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् । पूर्वं पुनर्वसौ दत्त्वा घृतपूर्णं सुपाचितम् । यशस्वी रूपसम्पन्नो बहुश्रुतो जायते कुले । पुष्ये तु कार्मुकं दत्त्वा कृतं चाकृतमेव च । अनाक्षोभेषु दोषेषु सोमवत् स विराजते" । कृतं घटितम् अकृतमघटितम् । "अश्लेषासु तथा रौप्यं वृषभं यः प्रयच्छति । स सर्वमयनिर्मुक्तः शास्त्रवानभिजायते । मघासु तिलपूर्णानि वर्द्धमानानि मानवः । प्रदाय पशुमांश्चैव पुत्रवांश्च प्रजायते । फाल्गुनीपूर्वसमये ब्राह्मणानामुपोषितः । मध्यान् फाणितसंयुक्तान् दत्त्वा सौभाग्यमश्नुते । घृतक्षीरसमायुक्तं विधिवत् पृष्टिकौदनम् । उत्तराविषये दत्त्वा स्वर्गलोके महीयते । यद्वा प्रदीयते दानमुत्तराविषये नरैः । सदा फलमनन्तञ्च भवतीह विनिश्चयः" । फाल्गुनीपूर्वसमये, पूर्वफल्गुनीसमय इत्यर्थः । फाणितं गुडविकारः उत्तरा-

विषये उत्तरफाल्गुनीसमय इत्यर्थः। "हस्ते हस्तिरथं दत्त्वा चतुर्युक्तमुपोषितः। नरस्तरति दुर्गाणि दुरवारांश्च पर्वतान्"। चतुर्युक्तं, चतुर्भिर्हस्तिभिर्युक्तम्। "चित्रायां हयमं दत्त्वा पुण्याङ्गाङ्गां च भारत!। चरत्यप्सरसां लोके रमते नन्दने वने"। पुण्याङ्गाङ्गामिति शुभलक्षणवलितशरीरां धेनुमित्यर्थः। "स्वातीष्वथ धनं दत्त्वा यद्दिष्टतमात्मनः। प्राप्नोति लोकान् सुभगानिह चैव महद्यशः। विशाखायामनड्वाहं धेनुं दत्त्वाथ दुग्धदाम्। सप्रावरणं शकटं सधान्यं वस्त्रसंयुतम्"। प्रावरणो युगान्तरवाहम्। "पितॄन् देवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते। न च दुर्गाण्यवाप्नोति स्वर्गलोकं च गच्छति। दत्त्वा घटोक्षं विप्रेभ्यो दक्षिणिष्टा च विन्दति। नारकीयांश्च स लोकान्नाप्नोतीति विनिश्चयः। अनुराधासु प्रावारवस्त्रोत्तरसमोषितः। दत्त्वा युगशतं चापि नरः स्वर्गे महीयते"। प्रावारः प्रवारपटः, वस्त्रोत्तरं परिधानवस्त्रादिकम्। "कालशाकम्भरीं विप्रेभ्यो दत्त्वा मर्त्यः समूलकम्। ज्येष्ठायां जलभुक्तस्तु गतिमिष्टां च गच्छति। मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः। स्वपितॄन् प्रीणयेदेव गतिमिष्टां च गच्छति। अथ पूर्वाषाढासु दधिपात्राण्युपोषितः। कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे। प्रदाय जायते श्रेष्ठकुले बहुसुखान्विते। पुत्रपौत्रैः परिवृतः पशुमान् धनवांस्तथा। उदमन्थं ससर्पिष्कं प्रयतमधुफाणितम्। दत्त्वोत्तराषाढासु सर्वलोकानवाप्नुयात्"। उदमन्थः उदकमिश्राः सक्तवः। फाणितं दुग्धखण्डविकारः। "दुग्धमन्थमिश्रितो योगे दत्त्वा मधुघृतप्लुतम्। धर्मनिष्ठो मनीषिभ्यः स्वर्गलोके महीयते"। अयमर्थः। उत्तराषाढानक्षत्रचतुर्थपादः श्रवणस्याद्यघटिकाचतुष्टयमभिजिद्योगः। "श्रवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च। श्वेतेन याति यानेन स्वर्गलोकानसंशयान्। गोप्रयुक्तं धनिष्ठासु यानं दत्त्वा समाहितः। वस्त्रमक्षिप्तं दत्त्वा प्रेत्य राज्यं प्रपद्यते। गन्धं घृतमिश्रायोगे दत्त्वा शालुकचन्दनम्। प्राप्नोत्यप्सरसां लोकं प्रेत्य गन्धांश्च शाश्वतान्। पूर्वभाद्रपदायोगे राजमाषान् प्रदाय वै। सर्वभक्ष्यफलोपेतः स वै प्रेत्य सुखी भवेत्। औरभ्रमुत्तरायोगे यस्तु मांसं प्रयच्छति। पितॄन् प्रीणाति सकलान् प्रेत्यानन्त्यं समश्नुते"। उरभ्रो, मेषस्य मांसमौरभ्रम्। "कांस्योपदोहनीं धेनुं रेवत्यां यः प्रयच्छति। स प्रेत्य कामानादाय दातारमुपतिष्ठति। रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः। कृष्णमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः। सम्पन्ने वर्षकी जायते कुले। भरण्यीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै। गाः प्रसूताश्च प्राप्नोति नरः प्रेत्य यथेप्सिताः। भीष्म उवाच। इत्येष लक्षणोद्देशः प्रोक्तो नक्षत्रयोगतः। देवर्षिणा नारदेनेह सुगाथ्यः सोऽब्रवीदिदम्"। विष्णुधर्मोत्तरे "कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम्। रक्तवस्त्रस्य रोहिण्यां सौम्ये३ भे लवणस्य च। मघासु तथा ताम्रावामादित्ये७ रजतस्य च। घृतस्य तु तथा पुष्ये गन्धानामथ सर्पभे ९। तिलानाञ्च तथा पैत्ये१० प्रियगोर्भगदैवते११। आर्यम्णे १२ चाज्यदूपानां सावित्रे१३ पायसस्य तु। चित्रायां चित्रवस्त्राणां सक्तूनां वायुदैवते १५। ऐन्द्राग्ने१६ चैव लोहानां मैत्रे१७माल्यफलस्य च। क्षत्रस्य च तथा शाक्रे१८ मूले मूलफलस्य च। वैष्णवे मधुयुक्तस्य दानमाप्ये२० महाफलम्। विश्वेश्वरे२२ ऽन्नपानस्य श्रवणे वसनस्य च। धान्यस्य वासवे२३ विप्रा वारुणे२४ चौषधस्य च। आजे२५ पुराणबीजानां सस्यानां तदनन्तरे २६। गोरसानां तथा पौष्णे२७ स्नानानामथाश्विने। तिलानाञ्च सदा दानं भरणीषु महाफलम्"।

नक्षत्रनाथ पु० ६त०। १चन्द्रे "नक्षत्रनाथः ससुपाजगाम" हरिवं० ३१७ अ० "नक्षत्रनाथांघ्रिसरोरुहिन्दे" रघुः। तस्य नक्षत्राधिष्ठातृदेवतानामिन्द्रादि नाथत्वात् तथात्वम्।

नक्षत्रनेमि पु० नक्षत्रस्य तच्चक्रस्य नेमिरिव। १ध्रुवतारके २चन्द्रे ३रेवत्यां च हेमच०। ४विष्णौ "नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः" विष्णुस०। "शिशुमारस्य ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तको हृदयस्थिता" विष्णुरिति कथितो नक्षत्रनेमिः शिशुमारवर्णने "विष्णुर्हृदयमिति श्रुतेः" भा०

नक्षत्रपति पु० नक्षत्रं पाति पा—डति। चन्द्रे शब्दार्थचि०। नक्षत्रपत्यादयोऽप्यत्र।

नक्षत्रपथ पु० नक्षत्रोपलक्षितः पन्थाः अच् समा०। नक्षत्रचक्रस्य भ्रमणमार्गे। नक्षत्रमार्गादयोऽप्यत्र "अतीतनक्षत्रपथानि यत्र" माघः। खगोलशब्दे दृश्यम्।

नक्षत्रपदयोग पु० "मेषगे भास्करे मर्त्ये शीतगौ स्वोच्चगे यमे। नक्षत्रपदयोगोऽयं यस्तु मेषानिलोयथा" ज्यो०तत्त्वे राशां युद्धयात्राद्ययोगभेदे।

नक्षत्रपुरुष पु० नक्षत्रैरेवाङ्गविशेषैः पुरुष इव। नक्षत्रविशेषैरङ्गविशेषात्मकैः तत्त्वामङ्गताङ्गे पुरुषे यस्य व्रताङ्गता व्रतनिमित्तकालस्य ह०सं०१०५अ० उक्तो यथा

"यादौ मूलं, लङ्के च रोहिणी तथाश्विनः। अद्भ्यामाढाद्वयमथ गुह्यं फाल्गुनीयुग्मम्। कटिरपि च क्षत्रिकाः, पार्श्वयोश्च यमला भवन्ति भाद्रपदाः। कुक्षिस्था रेवत्यो, वित्तेशसुरेः श्रुराधा च। पृष्ठं विद्धि धनिष्ठा, भुजौ विशाखा, स्तनौ करौ हस्तः। अङ्गुल्यश्च पुनर्वसु, रक्षेषासंश्रिताश्च नक्षाः। ग्रीवा ज्येष्ठा, त्रपणी त्रवणः, पुच्छो मूलं, द्विजाः (दन्ताः)स्वातिः। कृशितं यतभिषगथ नाशिका मघा, मुखमिरा मेत्रे। चित्रा ललाटसंस्था, शिरो भरण्यः, शिरोऽहाचार्द्रा। नक्षत्रपुरुषो ऽयं कर्तव्यो रूपचिन्तकैः। चैत्रस्य बहुलपक्षे सप्तम्यां मूलसंयुते चन्द्रे। उपवासः कर्तव्यो विष्णुं सम्पूज्य शिष्यं च। दद्याद्घृते समाप्ते व्रतपूर्णं भाजनं सुवर्णयुतम्। विप्राय वाक्यविदुषे सरत्नवस्त्रं सगन्धा वा"। वामनपु० ७७अ० विस्तारो द्रष्टव्यः।

नक्षत्रभोग पु० राशिचक्रस्थनक्षत्राणामेकैकदिने भोगः। २१६०० कलात्मकस्य सप्तविंशत्या समं विभक्तस्य ८०० मतकलात्मके भोगे "अभोगोऽष्टमतो विप्राः" सू०सि०।

नक्षत्रमान न० सू०सि० उक्ते दिनादिमानभेदे अहर्गणशब्दे ५७६पृ० नाक्षत्रमानशब्दे च दृश्यम्।

नक्षत्रमाला स्त्री नक्षत्रसंख्यिका माला। १सप्तविंशतिमौक्तिकादिरचितमालायाम् अमरः। ६त०। २नक्षत्रमण्डलं च "यावन्नक्षत्रमाला विचरति गगने भूवलयीव भाति" ह०सं०१०१५अ०। ३हस्तिनां मालाभेदे च "निशार्द्धसमयेनैव परिस्फुरत्सार्द्धचन्द्रनक्षत्रमालेन" काद० (गन्धहस्तिना)

नक्षत्रयाजक पु० नक्षत्रनिमित्तं इत्यर्थं याजयति यज–णिच्–ण्वुल्। नक्षत्रनिमित्तदोषोद्भावनेन शान्तिकारके अपकृष्टब्राह्मणे "आह्वायका देवलका नक्षत्रयाजकाः। एते ब्राह्मणचाण्डाला महापातकिनः स्मृताः" भा०शा० ७६अ० तस्य निन्दोक्ता

नक्षत्रयोग पु०नक्षत्रभेदे योगः क्रूरग्रहादिभिर्योगः। नक्षत्रव्यूहशब्दे वक्ष्ये नक्षत्रेषु क्रूरादिग्रहयोगे "सांवत्सरा ज्योतिषि चाभियुक्ताः नक्षत्रयोगेषु च निष्ठयस्ताः" भा०उ०४७ अ०

नक्षत्रयोगिनी स्त्री नक्षत्रैरभिमानितया युज्यते युज–णिनुच्। दाक्षायणीषु अश्विन्यादिषु "तस्यै नक्षत्रयोगिन्यः सप्तविंशतिरुत्तमाः। रोहिणीप्रमुखाः कन्या दक्षः प्राचेतसेः ददौ" हरिवं० २२६अ०। रोहिण्याश्चन्द्रस्यातिप्रियत्वात् तन्मुखसप्तकमिति बोध्यम्।

नक्षत्रयोनि स्त्री ६त०। विवाहादौ योनिकूटे उपयमशब्दे १२५०पृ०दृश्यम्। [व्यभे ज्योतिर्मया इव" भा०शा०२९अ०

नक्षत्रराज पु० ६त० टच् समा०। चन्द्रे "नक्षत्रराजे वर्धन्ते

नक्षत्रलोक पु० ६त०। नक्षत्राधिष्ठितलोकभेदे "कस्मिन्नु चन्द्रलोका ओताश्च प्रोताश्च नक्षत्रलोकेषु गार्गीति कस्मिन्नु नक्षत्रलोका ओताश्च प्रोताश्च देवलोकेषु" शत०ब्रा० १४।६।६।१। तल्लोकस्थानादिकं च काशीख०अ०उक्तं यथा

"दक्षः प्रजाविनिर्माणे दक्षो जातः प्रजापतिः। यद्दुहितरस्तस्य रूपलावण्यभूषणाः। सर्वा लावण्यवाहिन्यो रोहिणीप्रमुखाः स्मृताः। ताभिस्तप्तं तपस्तीव्रं प्राप्य वैश्वेश्वरीं पुरीम्। आराधितो महादेवः सोमः(तमसा सहितः)सोमविभूषणः। भवतोऽपि महादेव! भव! तापहरो हि यः। रूपेण भवता तुल्यः स सोमस्तो भवत्विति। लिङ्गं संस्थाप्य सुमहन्नक्षत्रेश्वरसंज्ञितम्। वरणायाकटे रम्ये सङ्गमेश्वरसन्निधौ। दिव्यं वर्षसहस्रन्तु पुरुषायितसंज्ञितम्। तपस्तप्तं महत्ताभिः पुरुषैरपि दुश्चरम्। ततस्तुष्टो हि विश्वेशोऽभ्यतरदरदुत्तमम्। सर्वासामेकदासीनामेकार्थस्थिरचेतसाम्। श्रीविश्वेश्वर उवाच। न ख्यातं हि तपोऽत्युग्रमेतदस्माभिरीदृशम्। पुराऽबलाभिस्तप्तोनाम नक्षत्रमत्र वै। पुरुषायितसंज्ञेन तप्तं यत्तपसाऽधुना। भवतीभिस्ततः पुंस्त्वमिच्छया वो भविष्यति। ज्योतिश्चक्रे समस्तेऽस्मिन्नग्रगण्या भविष्यथ। मेषादीनाञ्च राशीनां योनयो यूयमुत्तमाः। ओषधीनां सुधायाश्च ब्राह्मणानाञ्च यः पतिः। पतिमत्यो भवत्योऽपि तेन पत्या शुभाननाः!। भवतीनामिदं लिङ्गं नक्षत्रेश्वरसंज्ञितम्। पूजयित्वा नरो गत्वा नक्षत्रलोकमुत्तमम्। उपरिष्टान्मृगाङ्कस्य लोको वसु भविष्यति। सर्वासां तारकाणाञ्च मध्ये वान्या भविष्यथ। नक्षत्रपूजका ये च नक्षत्रव्रतचारिणः। ते यो लोके वसिष्यन्ति नक्षत्रसदृशप्रभाः। नक्षत्रग्रहराशीनां बाधा तेषां कदाचन। न भविष्यति ये काश्यां नक्षत्रेश्वरपूजकाः"।

नक्षत्रविद्या स्त्री नक्षत्राणां तत्स्थितग्रहादीनां चारज्ञानाय विद्या। ज्योतिषविद्यायाम् "न चेत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया। नाहुषासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्" मनुः। "विज्ञानेन वा ऋग्वेदं विजानाति" इत्युपक्रमे "ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याम्" छा०उ०।

नक्षत्रवीथि स्त्री नक्षत्रैरुद्देशैः कृता वीथिः मा०त०। नक्षत्रव्याप्ते नक्षत्रविशेषकृतायां वीथौ तद्भेदादिकं ह०सं० ९अ० उक्तं यथा

"नागगजैरावतदुमगोजरदुष्टवृषभाजदहनाख्याः। अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः। नागा तु पवनवाय्वानलानि, पैतामहाश्विभास्विन्द्राः। सोमोऽग्न्यग्निश्चः पौष्णं द्वे चापि भाद्रपदे। आरद्वयं भवणात् त्रिभं मृगाख्या त्रिभं च मैत्राद्यम्। कृत्तिकाद्याः सप्तर्क्षाः त्रिभं त्रिभं च मैत्राद्यम्। तिस्रस्तिस्रस्तारा क्रमादुदङ्मध्ययाम्यमार्गस्थाः। तारामण्युत्तरमध्यदक्षिणस्थितैर्वैश्वा। वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्थ। नक्षत्राणां तारा याम्योत्तरमध्यमाः क्रमात्। उत्तरमार्गो वाय्वादिः२ निगदितो मध्यमस्तु भाग्याद्याः१०। दक्षिणमार्गोऽग्नादिः कैश्चिदेवं कृता मार्गाः। ज्योतिषमार्गमयास्तं विप्रतिपत्तौ न योग्यमस्माकम्। स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये। उत्तरवीथिषु युक्तः सुभिक्षशिवकृतोऽस्तसूर्यं वा। मध्यासु मध्यकलहः कष्टफलो दक्षिणस्थासु। अत्युत्तमोत्तमोत्तमं मध्यमध्यमध्यमकष्टफलम्। कष्टतमं मौस्याद्याः वीथिषु यथाक्रमं ब्रूयात्"।

नक्षत्रव्यूह पु०ष०सं०१५उक्ते नक्षत्रविशेषस्य क्रूरादिवेधेन पुरप्रविशेषाणां द्रव्यभेदानां च शुभाशुभसूचके नक्षत्रसमूहे यथा "कालेवेऽवितकुसुमाहितानिमन्त्रसूत्रभाग्रयाः। आकरिकनापितद्विजघटकारपुरोहिताद्दशाः। रोहिण्यां सुव्रतपण्यभूपधनियोगयुक्तयाकटिकाः। सोमयजनचरकर्मत्रिलोचयैर्वर्यवन्त्राः। मृगशिरसि सुरभिवस्त्राम्बरसुमफलरत्नवनचरविहङ्गाः। मृगसोमपीथिमाम्बर्वैशाखका वेणुहारश्च। रौद्रे६ वधबन्धनाकर्तपरदारस्तेयमाखभेदरताः। तुरधान्यतीक्ष्णमन्त्राभिचारवेतालवर्मज्ञाः। आदित्ये७ सत्यौदार्यशौचसुरूपवीर्यशौर्ययुताः। उत्तमधान्या वणिजः शैवाभिरताः सुशिल्पिजनाः। पुष्ये यवगोधूमाः शालीचुवनानि मन्त्रिणो भूपाः। मन्त्रिणोऽमलीविनः साधवश्च तथैव शिवकाश्च। अहिदेवे८ मन्त्रिणश्चन्दनमूलफलकीटपन्नगविषाणि। परधनपरदारानिरतास्तुरधान्यं सर्वमिश्रञ्च। पितृभे१०धनधान्याद्यं वागगारानि पर्वताश्रयिणः। पितृजनक्रमवणिजस्तुराः क्रमादाः स्त्रादिषो मद्यजाः। प्राक्फल्गुनीषु नटवृषतिलसमगान्धर्वशिल्पवस्त्राणि। उपांशुवसमाश्रितैतानि कुमारकाश्चापि। आर्यमृषे१२ भाद्रेवशौचविनयपाखण्डिदानशास्त्ररताः। शोभनधान्यवणिजाः धनधर्मातुरताः समस्तजेन्द्राः। हस्ते तस्करकुक्कुररविकमहामात्रशिल्पिपण्यानि। तुरधान्यं स्तनयुक्ता वणिजस्तेऽतोयुतानाश्च। त्वाष्ट्रे१४ भूषणमणिरागवेश्यमान्यवंगन्धयुक्तिज्ञाः। गणिकपटुतन्तुवायाः वाणाक्षारलधान्यानि। स्वाती वणजमतुरगा वणिजो धान्यानि वातवस्त्राणि। अस्थिरवौद्भिदवस्त्रतापसाः पण्यकुप्यताश्च। इन्द्राग्निदेवते१६ रत्नपुष्पफलवाणिजः वणिजस्तुराः। वर्षासमाश्रयाः पुरन्दरस्तुतामन्त्राश्च। मैत्रे१७ गौर्वसमेता वणवायवधाणगोविवन्नाः। ये साधवश्च लोके धर्मं च परस्तुत्यक्षम्। पौरन्दरे१८ अतिशूराः कुलविनयशोऽन्विताः परस्तुतः। विणिगीवरो नरेन्द्राः सेनानां चापि नेतारः। मूले भेषजभिषजो गणसंख्याः कुलनमूलफलवार्ताः। शोभाव्यतिधनयुक्ताः फलमूलैर्ये च वर्तन्ते। आप्ये२० नदशोलवमार्गगामिनः सत्यशौचधनयुक्ताः। सेतुकरवारिजीवकफलकुसुमान्यम्बुजातानि। विश्वेश्वरे२१ महामात्रमन्त्रकरितुरवदेवताभक्ताः। स्थावरयोधा भोगान्विताश्च ये चौजसा युक्ताः। श्रवणे गावापटवो मृत्योयुक्ताश्च कर्मसु समर्थाः। उत्साहिनः सत्यर्मा भागवताः सत्यवचनाश्च। वसुभे२२मानोन्मुक्ताः क्लीबाश्चलशौचदाः स्त्रियां दूषकाः। दानाभिरता बहुवित्तसंयुताः शमपराश्च नराः। वरुणे२४ पाशिकमत्स्यबन्धजलजानि जलचरा जीवाः। सौकरिकरजकशौण्डिकयाकुनिकाश्चापि वर्मेऽजिनम्। आजे२५ तस्करपशुपालकिंचलीनाशनीचघटचेष्टाः। धर्मव्रतैर्विरहिता नियुद्धमल्लाश्च ये मल्लाः। आहिर्बुध्न्ये२६ विप्राः क्रतुदानतपोयुता महाविभवाः। आश्रमिणः पाषण्डा नरेश्वराः शारदधान्यं च। पौष्णे २७ वणिजजलफलकुसुमवस्त्रप्रणिधनुर्मौक्तिकाजानि। सुरभिकुसुमानि गजा वणिजो नौकर्मधाराश्च। अश्विनामनक्षराः शैनाधतिवैद्यशिवकास्तुरगाः। तुरगारोहाश्च वणिग्पोषेनास्तुरगरक्षाः। याम्ये२९ऽस्त्रकृषितमुजः क्रूरा बधबन्धताडनाकाङ्क्षाः। तुरधान्यं नीचकुलोद्भवा विहीनाश्च यत्नेन। पूर्वाभाद्रपदसमानां राज्ञां तु पुष्ये च बहोत्तराणि। मौष्ण्य२७मैत्र१७ पितृदेवतं१०च प्रजापतेर्भं६ च जलीमशावाम। आदित्य७हस्ताभिजिदाश्विनानि वणिग्-

जनानां प्रवदन्ति भानि । मूलाश्लेषा ६ निऋ १५ वारुणानि२६ भाग्यु त्रजातेः प्रभविष्णुतायाम् । सौम्यै५ ऋ।र्द्धचित्रावसु२३दैवतानि सेवाजनस्याभ्यसुपागतानि । सार्पं९ विशाखा श्रवणो भरण्यश्वस्थान्त्यजातेरिति निर्दिशन्ति । रविरविसुतयोगभागतं क्षितिसुतभेदनवक्रदूषितम् । अज्ञजनतमयोजुक्या कृतं नियतसुपाकरपीडितं च यत् । तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययवातमेव वा । निगदितपरिवर्गदूषणं कथितविपर्ययं सम्प्रदये" ।

नक्षत्रव्रत न० नक्षत्रनिमित्तं व्रतम् या०त० । नक्षत्रनिमित्ते व्रतभेदे तत्र सामान्यतः कालनिर्णयः ति०त० उक्तो यथा "नक्षत्रद्वैधे तु बोधायनमार्कण्डेयौ "तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः । यस्मिन्नुदेति सविता नक्षत्रं दिनं स्मृतम् पूर्वाह्णमहोरात्रसाध्योपवासनक्षत्रेषु "तत्रैवोपवसेद्रात्रं यस्मिन्नीषादधोभवेत् । उपवासे सदर्भं स्यात् तद्दिने नक्षत्रयोः" इति स्कन्दपुराणात् निशीथादध इत्यनेन सूर्योदयपूर्वकालत्वेन सूर्यास्तसमयकालस्यापि लाभात् । "उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः । यत्र वा युज्यते राम ! निशीथे शशिना सह" इति विष्णुधर्मोत्तरात् उपवासवत्तत्रव्रतादौ नामहोरात्रसाध्यता अहोरात्रसाध्यभोजनदवस्त्रैकतरपरित्यागस्थितकालविशेषनियामकत्वात् । यस्मिन्नुदेतीति तु दिवसकर्त्तव्यस्नानदानादाविति बोध्यं, पितृकार्येऽपि शुक्लाष्टम्यप्रभृत्यां व्यवस्थामाह बोधायनः "सा तिथिस्तत्र नक्षत्रं यस्मिन्नभ्युदितो रविः । वर्द्धमानस्य पक्षस्य हीनेत्वस्तमयं प्रति" हीने चन्द्रस्य हीनत्वात् कृष्णपक्षे वर्द्धमानस्य चन्द्रस्य वर्द्धमानत्वेन शुक्लपक्षस्य । कालमाधवीयोऽप्येवम्" ति०त० रघु० ।

नक्षत्रकालि च हेमा० व० भविष्यपु० उक्तानि यथा "एते ते कथिताः कृष्ण ! तिथियोगा मया तव । नक्षत्रदेवताः सर्वाः नक्षत्रेषु व्यवस्थिताः । दद्यात् कामान् प्रयच्छन्ति यथास्थानं सुरेश्वर ! । चन्द्रमा यत्र नक्षत्रे तदा समधितिष्ठति । उक्तस्तु देवयज्ञस्तु तदा च सफलो भवेत् । देवताश्च प्रवक्ष्यामि नक्षत्राणां यथातथम् । नक्षत्राणि च सर्वाणि यत्रत्रैव पृथक् पृथक् । अश्विन्यामश्विनाविष्टा दीर्घायुर्जायते नरः । व्याधिभिर्मुच्यते क्षिप्रं योऽत्रर्चं व्याधिपीडितः । भरण्यां यमराड्दिष्टः कृतसैरक्षितैः शुभैः । तथा गन्धादिभिः शुभ्रैरमलैः विमोचयेत् । अनन्तः कृत्तिकायान्तु कर्त्तिं संपूजितः दद्यात् । रक्तमाल्यादिभिर्दद्याद्धुतहोमेन च ध्रुवम् । प्रजाः प्रजापतिः प्रीत इष्टो दद्यात्पशूंस्तथा । रोहिण्यां देवदार्वुच्च । गोजन्मदा जगत्पते ! । मृगशीर्षे तथा सोमं जातिमारोग्यमेव च । आर्द्रायान्तु शिवं पूज्य पशून् विजयमेव च । चितैः पद्मादिभिर्दिव्यैर्वस्त्रं रुचया च वै । पुनान् पुनर्वसौ दद्यात्सुरया तर्पिताः स्थितिः । तिष्ये बृहस्पतिर्बुद्धिं विपुलं सुखमेव तु । भोगान् गन्धादिभिर्नौगा अन्नेषावां प्रपूजिताः । तर्पिताश्च प्रयच्छन्ति भक्ष्यैर्मधुरैः शुभैः । मघाः पितरः पुष्टिं हतपायसतर्पिताः । पूर्वायां ११ विजयं दद्याद्भगो देवः सतर्पितः । भक्त्या प्रपूजितो दद्याद्धनरायां१२ तथार्यमा । भर्त्तारमीप्सितं नार्याः पुंसश्च वरयोषितम् । नीरोगत्वं तथायुष्यं सम्पद् चारुरूपताम् । पुष्यवस्त्रार्चितो हस्ते दद्यात्तेजोनिधिस्तथा । चित्रायां पूजितस्त्वष्टा दद्याद्दारोग्यमेव च । स्वात्यां संपूजितो वायुः पुत्रानिष्टान् प्रयच्छति । इन्द्राग्नी तु विशाखायां पीतरत्नैः प्रपूज्य च । धनं राज्यञ्च सम्पूर्णं तेजस्वी विवसेत्सदा । रत्नैर्मित्रमनूराधास्त्वेवं संपूज्य भक्तितः । प्रियो जनानां सर्वेषां चिरञ्जीवति सर्वदा । ज्येष्ठायां पूर्ववत्सेन्द्रमिष्टा पुष्टिमवाप्नुयात् । मूले सर्वैस्तु संपूर्णः कर्मणा वचनेन च । मूले निर्ऋतिमिष्टा च भक्ष्यैस्तु पक्वमादिभिः । पूर्ववत् फलमाप्नोति स्वस्थाने च ध्रुवो भवेत् । अप इष्टा जले २० चैतैर्जलं तत्रैव पूर्ववत् । मन्त्राधान्मुच्यते क्षिप्रं शारीरान्मानसात्तथा । आषाढासु तथा विश्वं विश्वेशुत्तरयोर्जनः । संपूज्य श्रियमाप्नोति परं विजयमेव तु । श्रवणे पूजितो विष्णुः सर्वान् कामान् प्रयच्छति । धनिष्ठासु वसुभिष्टा च सर्वं प्राप्नुयात् क्वचित् । महतोऽपि भयात्तीर्णो गन्धपुष्पादिभिः शुभैः । रक्षणं शतभिषास्वर्च्य व्याधिभिर्मुच्यते नरः । अजैकपादाख्यान्तु२५ पूजयेत्कटिसूत्रिभम् । संपूज्य शक्तिमाप्नोति नात्र कार्या विचारणा । उत्तरायां२६महिर्बुध्नं परं शान्तिमवाप्नुयात् । रेवत्यां पूजितः पूषा इष्टानि विविधान् पशून् । चितैः पुष्पैस्तथा दीपैर्धूपैर्विजयवर्द्धनैः । य एते वः समाख्याता यज्ञाः संक्षेपतो मया । नक्षत्रदेवतानां हि साधकानां हिताय वः । यज्ञाहुत्यानुसारेण भवन्ति फलदायकाः । गन्तुमिच्छेद्दूरदान्यत्र क्रियाप्रारम्भ एव च । नक्षत्रदेवतायश्च प्रत्यादौ

सर्वमाचरेत् । एवं कृते हि तत्सर्वं यात्राफलमवाप्नुयात् । क्रियाफलन्तु संपूर्णमित्युक्तं भानुना स्वयम् ।"

नक्षत्रशूल पु० "ज्येष्ठा पूर्वा भाद्रपदा रोहिण्युत्तरफाल्गुनी । पूर्वादिषु क्रमाच्छूलाः यात्रायां मरणप्रदाः" ज्योतिः उक्ते यात्रायां निषिद्धे पूर्वादिदिक्षु नक्षत्रभेदे तस्य शूलतुल्यमरणप्रदत्वात् शूलत्वम् ।

नक्षत्रसत्र न० नक्षत्रनिमित्तं सत्रम् । नक्षत्रनिमित्ते सत्रभेदे । तत्र नाक्षत्रमासमहस्रम् विष्णुध० उक्तं यथा "नक्षत्रसत्राण्यग्रयनादि चेन्दोर्मासेन कुर्याद्गणयात्मकेन" "नक्षत्रसत्राणि नाक्षत्रमाससाध्ययागभेदाः याज्ञिकप्रसिद्धाः" समयप्रदीपः ।

नक्षत्रसन्धि पु० नक्षत्रयोः सन्धिः । पूर्वनक्षत्रादुत्तरनक्षत्रे चन्द्रादेर्पहाणां वा गतिरूपसंक्रान्तौ । तिथिसन्धिशब्दे दृश्यम् ।

नक्षत्रसाधन न० नक्षत्रं साध्यते ज्ञायतेऽनेन साधि–करणे ल्युट् । मि०शि० उक्ते ग्रहाणां नक्षत्रमानसाधने गणनभेदे तच्च वाक्यं तिथिशब्दे १२९७ पृ० दर्शितम् ।

नक्षत्रसूचक पु० नक्षत्राणि शुभाशुभतया सूचयति ण्वुल् तृन० । "अविहिंसैव यः शास्त्रं देवत्वं प्रपद्यते । स षड्भिर्दुष्टकः पापी श्रेयो नक्षत्रसूचकः" इति द०सं०१अ० "तिथ्युत्पत्तिं न जानन्ति ग्रहाणां नैव साधनम् । परवाक्येन वर्त्तन्ते ते वै नक्षत्रसूचकाः" इत्युक्ते च सिद्धान्तमिश्रे ज्योतिर्विदि । त्रिषु नक्षत्रसूचीत्यपि ।

नक्षत्रामृत न० पारभेदे नक्षत्रयोगजाते अमृतयोगे अमृतशब्दे ९१४ पृ० दृश्यम् ।

नक्षत्रिन् पु० नक्षत्रनक्षत्र शब्देन नित्यमतया वा इनि । १चन्द्रे २विष्णौ च "नक्षत्रेभिर्गतस्तेषां भूमः शास्त्रः समीक्षनः" विष्णुध० । "नक्षत्राणामहं शशीति" गीतोक्ते नक्षत्रेशत्वेन स्थितत्वात् तस्य तथात्वम् ।

नक्षत्रिय पु० नक्षत्राय हितः घ । नक्षत्राधिष्ठातृदेवभेदे । "नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा" यजु०२२।२८। नक्षत्रेण "यह सुपा" पा० स० । २नक्षत्रियमित्रे च ।

नक्षत्रेश पु०६त० । चन्द्रे अमरः । "नक्षत्रेशकृतेऽब्धौ गिरिसुरौ गङ्गां रुचिं पारवम्" (उमामहेशः) सा०द० ।

नक्षत्रेश्वर पु० ६त० । १चन्द्रे नक्षत्राधिष्ठातृदेवताभिः काशीस्थापिते २शिवलिङ्गभेदे न० नक्षत्रलोकशब्दे दृश्यम् । [दृष्टिभेदे

नक्षत्रेष्टि स्त्री नक्षत्रनिमित्ता इष्टिः शा०त० । नक्षत्रनिमित्तके

नक्षत्रेष्टका स्त्री इष्टकाभेदे तैत्तिरीयसंहिता ५।४।११।१

नख सर्पणे भ्वा०पर०सक०सेट् । नखति अनखीत् अनाखीत् ननाख नेखतुः । अयोपदेशत्वात् न णत्वं प्रनखति ।

नख पु०न० न खं "छिद्रमत्र नभ्राडित्यादि" पा० नञो न नलोपः नखन्यते खन–ड वा नह बन्धने "नहेर्लोपश्च" ख वा उणा० । १करजे कराङ्गुल्यग्रस्थे कण्टके अमरः । "कामिनामनिभृतान्यपि रम्याण्यस्त्रकोमलतलेषु नखानि" माघः "न छिन्द्याद्यखलोमानि दन्तैर्नोत्पाटयेन्नखान्" मनुः "नखक्षतानीव वनस्थलीनाम्" कुमा० "शीन्द्रः किल नखैस्तस्या विददार स्तनौ द्विजः" रघुः "न नखैर्विलिखेद्भूमिम्" कूर्मपु० । खाङ्गुल्योऽपि उपसर्जने क्रोडा० स्त्रियां ङीषोनिषेधे संज्ञायां "नखमुखात् संज्ञायाम्" नियमात् ङीष् । शूर्पणखा क्रोरमुखा असंज्ञायान्तु ताम्रनखी कन्या सि०कौ० । नखस्य मूलं कर्णा० जाहच् । नखजाह तन्मूले न० "लोहमहीं तृणच्छेदी नखखादी च यो नरः" मनुना तस्य दन्तेन खादनं निषिद्धम् । २खण्डे पु० हेम० ३शुक्तिकायां गन्धद्रव्यभेदे न०स्त्री० स्त्रियां बहु० ङीष् । "द्विधा शङ्खनखाख्यान्या शुक्त्याख्या वदरीच्छदा" रत्नमा० "स्वल्पपत्रस्तथा शुक्तिर्नखरी वदरच्छदा । महापत्रस्तथा शङ्खनखः शङ्खाख्यो मध्यसारणः" शब्दार्थचि० "नखद्वयं ग्रहक्षेमघाटाक्षज्वरकृद्हृत् । लघूष्णं शुक्लं वर्ण्यं स्वादु त्रपविषापहम् । अवक्ष्मीकुष्ठदौर्गन्ध्यहृत् पाकरसयोः कटु" भाव० तद्गुणा उक्ताः । [त्रिका०।

नखकुट्ट पु० नखं कुट्टति कुट्ट–छेदे अप् उप०स० । नापिते

नखगुच्छफला स्त्री नख इव गुच्छः फलं च यस्याः । निम्बभेदे राजनि० ।

नखदारण न० नखं दार्यतेऽनेन दारि–करणे ल्युट् । नखनिकृन्तने नापिताम्रभेदे (नरहन) ।

नखनिकृन्तन न० निकृन्यतेऽनेन कृत–ल्युट् वा० सुम् तृन० । नखच्छेदनार्थे नापिताम्रभेदे (नरहन) तस्यापनत्वात् २लोहमात्रेऽपि "यथा सोम्यैकेन नखनिकृन्तनेन विज्ञातेन सर्वं कार्ष्णायसं विज्ञातं स्यात् वाचाऽऽरम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यम्" छा०उ० ।

नखनिष्पाव पु० नखं तत्तुल्यफलतया निष्पुनाति निष्पूयति निस्+पु–अण् । नखफलिन्याम् राजनि० ।

नखपर्णी स्त्री नख इव पर्णमस्या ङीप् वृश्चिकालिजुपभेदे राजनि० ।

नखपुष्पी स्त्री नख इव पुष्पमस्या ङीप् । पृक्कायां राजनि०

नखप्रच न० नखेन प्रचितस्य मयू०नि० । नखप्रचितयोः ।

नखफलिनी स्त्री नख इव फलमस्यस्य बाहुलकेन भूमि इनि ङीप् । नखनिष्पावहक्षे राजनि० ।

नखमुच त्रि० नखं मुञ्चति मुच–मूलविभु० क । नखमोचके धनुषि संक्षिप्तसार० ।

नखम्पच त्रि०नखं पचति तापयति नख+पच–खश् मुम् च । १नखतापके "कथमप्यभवत् क्षरानलोष्णः स्तनभारो न नखम्पचः प्रियस्य" माघः । २यवाग्वां स्त्री शब्दार्थचि०।

नखर पु०न० नखं राति रा–क नख–बा० ष्णा० अर वा १नखे अर्द्धर्चा० । "सकम्पनदिनखरा मृणालानि परन्नवाः" भा०द्रो० १२।८श्लो०"किं पुनरलङ्कृतस्त्वं सम्प्रति नखरक्षतैस्तस्याः" सा०द० । नखशब्देन "सङ्ख्या" पा० स० । २खरभिन्ने त्रि० ।

नखरजनी स्त्री नखो रज्यतेऽनया रञ्ज–करणे ल्युट् नखोपः ङीप् । (मेहँदी) प्रसिद्धे क्षुपे तस्याः फलम् अण् हरीतक्या० अणो लुप् प्रकृतिविकृतत्वात् तत्फलेऽपि स्त्री

नखरञ्जनी स्त्री नखं रञ्जयति रञ्ज–णिच्–ल्यु गौरा० ङीप् । नखनिरञ्जने नापितास्त्रभेदे (नरहन) "अनन्तरस्योपान्तचारिणी मनस्कारिणी । पुनर्भवच्छेदकरी नखेव नखरञ्जनी" उद्भटः ।

नखरायुध पुंस्त्री नखर एवायुधं यस्य । १सिंहे २व्याघ्रे ३कुक्कुरे च राजनि० । स्त्रियां जातित्वात् ङीप् ।

नखराङ्क पु० नखरमाङ्क्यते चर्च्यते आकारेण आ+कङ्क–क । करवीरे राजनि० ।

नखरी स्त्री नखरः पुष्पाकारेणास्त्यस्य अच् गौरा०ङीप् । १नखीनामगन्धद्रव्ये शब्दमाला । २क्षुद्रनख्यां रत्नमा० ।

नखलेखक त्रि० नखं लिखति जीविकार्थं "विलिखिर्वधयोरपूर्वस्यापि" उणा० लिख–कन् नित्यक० । जीविकार्थदन्तलेखनशिल्पकारके । अस्य "नित्यं क्रीडाजीविकयोः" पा०समासे "अन्ये जीविकार्थे" पा० आद्युदात्तता

नखविष पुंस्त्री नखे विषमस्य । नरादौ हेमच० "नागाः स्युर्दन्तिविषा मूलविषास्तु दधिकादयः । व्याघ्रादयो नखविषा नखविषा, नरादयः । वालाविषास्तु लूताद्याः कालान्तरविषाः पुनः । मूषिकाद्याः" हेमच० । जङ्गमविषशब्दे २०१२ पृ० आदिपदग्राह्यं दृश्यम् ।

नखविष्किर पुंस्त्री० नखैर्विकिरति वि+कृ–क "विष्किरः शकुनिर्विकिरो वा" पा० षुट् सत्वम् । नखैर्विकीर्य-भक्षके पक्षिमात्रे "प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्" अभक्ष्यमांसोक्तौ मनुः "नखविष्किरान् नखैर्विकीर्य ये भक्षयन्ति तानभ्यनुज्ञातान्यपि कुक्कुटादिव्यतिरिक्तान् पक्षिमात्रान्" कुल्लू० । [राजनि० ।

नखवृक्ष पु० नखति नख–सर्पणे अच् नित्यक० । नीलवृक्षे

नखशङ्ख पु० नख इव शङ्खः । क्षुद्रशङ्खे शब्दर० ।

नखाघात पु० नखैराघातः । नर्मार्थं सुरते नायकेन नायिकाङ्गे तद्विपर्ययेण वा नखैराघाते तत्स्थानानि कामशास्त्रे उक्तानि यथा "नखाघातः प्रदातव्यो यथा स्थानानि नर्मसु । पार्श्वयोः स्तनयोश्चैव जघने चैव नितम्बके । कक्षान्तरे च कक्षान्ते कपोले बाहुमूलके । ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत् । तथा सर्वशरीरेषु नखं दद्यान्मनैः मनैः" इति । नखपदनखक्षतादयोऽप्यत्र "नवनखपदमङ्गं गोपयस्यंशुकेन" सा०द० "नखक्षतानीव वनस्थलीनाम्" कुमा० २युद्धार्थं नखैराघाते च । [खाङ्कः । २नखाघातचिह्ने च पु० ।

नखाङ्क पु०नखमङ्क इव यस्य । १व्याघ्रनख्याम् शब्दर०नख-

नखाङ्क न० नख इवाङ्कमस्य । नख्यां रत्नमाला ।

नखानखि अव्य० नखैश्च नखैश्च प्रहृत्य वृत्तं युद्धम् "इष् कर्मव्यतिहारे" पा०इष् समा० । परस्परनखाघातेन प्रवृत्ते युद्धे "कचाकचि युद्धमासीत् दन्तादन्ति नखानखि" भा०क० ४६अ० । [१कुक्कुरे च राजनि० ।

नखायुध पुंस्त्री नख आयुधमिव यस्य । १व्याघ्रे २सिंहे

नखालि पु० नखानामालिरत्र । १क्षुद्रशङ्खे शब्दच० ६त० । २नखपङ्क्तौ च । [नीलवृक्षे राजनि० ।

नखालु पु० नख इव आलुः नख–सर्पणे वा०आलुच् वा ।

नखाशिन् पु० नखमश्नाति अश–णिनि ६त० । १मेषके त्रिका० । २नखखादिनि त्रि० ।

नखि पु० नखति सर्पति नख–इन् । १सर्पके । उष्णकालसर्पस्तु नखेनातिक्रामति नख+खि–नखयति "अच इः" उणा० इ । २नखेनातिक्रामके इत्याह च । इदं चिन्त्यं इत्यिनातिक्रामतीत्यादौ अतिइत्यतीतिवत् नखेनातिक्रामतीति वाक्ये अतिनखयतीत्येव स्यात् न नखयतीति

नखिन् पु० नखः अस्त्रस्य, प्राशस्त्येन वा इनि । १सिंहे राजनि० । २व्याघ्रे ३महानखयुक्तमात्रे त्रि० । "नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् । विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च" चाणक्यः । "भूत्वा केशरिणां सिंहा व्याघ्राश्च नखिनां वराः" हरिवं०७३अ० ।

नखी स्त्री नख आकारत्वेनास्त्यस्य षच् गौरा० ङीष् नख+मत्वा० ङीप् वा । स्वनामख्याते नखद्रव्ये अमरः धूपवर्ग्गे उदा० दशम् ।

नग पु० न गच्छति गम–ड "नगोऽप्राणिषु" पा० नञो न नञोपः । १पर्वते २वृक्षे च अमरः । "नगजा नगजा दयिता दयिताः" भट्टिः "नगाङ्गयो नाम नगारिकन्यः" भा०वि० २८अ०। अप्राणिषिति किम् । अतो इक्षिणः प्रीतेर्नेत्यादौ नञोपः इति बोध्यम् ।

नगज त्रि० नगाज्जायते जन–ड ५त० । १पर्वतजातमात्रे "नगजा नगजाः" भट्टिः २वृक्षादिनि च । हिमाद्रिकन्यायां १पार्वत्यां २क्षुद्रपाषाणभेदाख्यतायां स्त्री राजनि० ।

नगनदी स्त्री नगजाता नदी मा०त० । पर्वतनिःसृतनद्याम् । "विभ्रान्तः सन् व्रज नगनदीतीरजातानि सिञ्चन्" मेघ०

नगनन्दिनी स्त्री ६त० । हिमालयजातायां दुर्गायां शब्द० ।

नगपति पु० ६त० । १हिमालये त्रिका० यथोक्तं ब्रह्माण्डपु० "शैलानाम् हिमवन्तञ्च नदीनाञ्चैव सागरम् । गन्धर्वाणामधिपतिञ्चक्रे चित्ररथम् विधिः" नगानां इन्द्राणां पत्नौ २चन्द्रे च तस्य वनस्पतीयत्वम् ओषधीशब्दे दृश्यम् ।

नगभिद् पु० नगं भिनत्ति भिद–क्विप् ६त० । १पाषाणभेदनामकभेदे राजनि० । २इन्द्रे च तस्य तथात्वं गोत्रभिद्शब्दे २६९८ पृ० दृश्यम् ।

नगभू पु० नगे भवति भू–क्विप् ७त० । १क्षुद्रपाषाणभेदायां राजनि० । २पर्वतजातमात्रे त्रि० ६त० । १पर्वतभूमौ स्त्री

नगर न० नगा इव प्राकारादयः सन्त्यस्य मा० र । "पञ्चक्रियादिनिपुणैर्जातवर्णैर्जनैर्युतम् । अनेकजातिसम्बद्धं नैगमिस्त्रिसमाकुलम् । सर्वदेवसमायुक्तं नगरं त्वभिधीयते" इत्युक्तलक्षणे १पुरभेदे । गौरा० ङीष् । नगरीत्यपि अमरः । तस्य लक्षणं भविष्योत्तरे "दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः । तत्त्रिकं वर्त्तुलं वापि कदाचिदपि कारयेत् । दीर्घं प्रादैकप्रकारचतुरस्रं यथोचितम् । त्रिभिः प्रादैः समं त्रिकं वर्त्तुलं यथवाजति । दीर्घं चाहीर्घमुखचतुष्कसम्पत्तिहेतवे । चतुरस्रं चतुर्वर्गफलाय पृथिवीभुजः । त्रिकं त्रिवर्गसिद्धाय वर्त्तुलं बहुरोगकृत् । राज्ञः कक्षस्तु दशभी राजकक्षस्तदाहृतः । राजकक्षैश्च दशभी राजदण्डस्तदाहृतः । राजदण्डैश्च दशभी राजवाटस्तदाहृतम् । राजवाटैश्च दशभी राजकाण्डस्तदाहृतः । राजकाण्डैश्च दशभी राजपुरुष उच्यते । राजधानी तु कथिता दशभी राजपुरुषैः । राजधानी दशगुणा राजधानीशतैस्तदाहृतम् । यद्वैव परिमाणानि प्रोक्तानि पुरपत्तने । भवन्तीभोगसम्पत्तिर्जनकीर्त्तिसुखार्थिनाम् । राजधानीं नरपतिः पुरपत्तनमारभेत् । यत्रोर्जवः क्षमा सौख्यं पवित्रं भद्रं दक्षता । यत्रद्विविधं नाम्नश्च भद्रत्वञ्च यत्र जनम् । धान्याढ्यं भोगसम्पत्तिरिति भोगश्च कीर्त्तिताः । यत्रार्थसंज्ञा नगरे सुनिना तत्त्ववेदिना" इति युक्तिकल्पतरुः । "नृपनाशपुरी प्रोक्ता विद्याम्पुरमपीष्यते । एकतो वल्ल तु प्राणो नगरस्यैकतः स्थितम् । निम्नन्तु खर्वटं नाम नदीगिरिसमाश्रयम् । विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च । पञ्चक्रियादिनिपुणैर्जातवर्णैर्जनैर्युतम् । अनेकजातिसम्बद्धं नैगमिस्त्रिसमाकुलम् । सर्वदेवसमायुक्तं नगरत्वमिधीयते" इति विष्णुपु० टीकायां श्रीधरस्वामिधृतभृगुवचनम् । "नगरं सर्वतो भद्रं कर्त्तव्यं रोचकं हि वा । स्वस्तिकं मध्यगं कार्यं कुमारीपुरमेव वा । पद्मसञ्चतुरस्रं सर्वकामसुखावहम् । स्वस्तिकर्त्तं दिक्षुखञ्च दुःस्थितं जयदुर्मदम् । नगरं न प्रशंसन्ति गर्तविद्धं त्रिभेदितम् । अग्रतः स्वल्पप्राकारं स्वस्तिकर्त्तं विदुर्बुधाः । दिक्षुखं वर्त्तकीनन्तु जयमध्यं जयं विदुः । दुःस्थितं निम्नयाम्यन्तु नैर्ऋतं धनदुर्मदम् । शौर्यं वर्त्तुलाकारादपूरितं वारुणं यशः । वाम्यसावुः पद्मं पूर्वनगरं प्रीतिवर्द्धनम् । दैवयोगसमंपूर्णं सर्वारोग्यसुखप्रदम् । मध्यसूत्रप्रयोपेतं नगरं तत् प्रीतवेत्तमम् । ब्रह्मस्थानं हितं विप्र ! शिवस्थानं सदा स्थितः । चतुर्विंशतिनाडीस्तु कलाख्यश्चयतं परम् । यत्र मध्यं प्रशंसन्ति कुलोदयटविपर्ज्जितम् । अथ विष्णुपताकाष्टौ प्राकारैस्तं निवेशनम् । नगरार्द्धं विष्णुस्थं चेष्टं आसं ततोऽर्द्धतः । नगरार्द्धं शिवं चेष्टं चेष्टाद्ग्रामोऽर्द्धयोजनः । द्विक्रोशं परमा सीमा चेष्टसीमा चतुर्धनुः । त्रिभद्रनूनि विक्रीर्णो देशमार्गस्तु तैः कृतः । त्रिभद्रतुर्यमार्गः सीमाचार्यो दशैव तु । धनूंषि द्वय विस्तीर्णः सीमामार्गजयवः कृतः । स्तम्भाश्चिरयनाशानामवस्थार्थं सुसुस्वरः । धनूंषि चैव चत्वारि शाखा रथ्यास्तु निर्मिताः । त्रिकराद्योपरथ्यास्तु द्विकराणुपरथ्यिका । जङ्घापथाचतुष्पादाश्चिपादस्तु स्टङ्गान्तरम् । तृतीयादस्तु पादः प्राग्वंशपादकः स्मृतः" देवी पु० । नगरवस्त्रिवेशशब्दे दृश्यम् । नगरनिर्माणकालस्य "स्थिरराशिगते भानौ

चन्द्रे च स्थिरभोदये। शुभे काले दिने चैव नगरं कारयेन्नृपः" ज्यो० "सनगरं नगरम्बुकरौजसः" रघुः। नगरे काकः पात्रे सप्तमी ७त० स०। नगरकाक नगरस्थिते काकतुल्याचारवति एवं ७त०। नगरवायस तत्रार्थे युक्तरोद्धा० तयोरादुदात्तता।

नगरकीर्त्तन न० नगरे हरेर्नामकीर्त्तनम्। नगरे भजनेन हरिनामकीर्त्तने "नाचारो नाधिचारो वा न स्थान नियमस्तथा। ग्रामे वा नगरे साधुर्वने वा कीर्त्तयेद्धरिम्" हरिनामसाहस्रे।

नगरघात पु० नगरं हन्ति अमनुष्यकर्त्तृकत्वेन टक् वाधिष्ठा अच् उपस०। १हस्तिनि गजे सि० कौ०। हन–घाते घञ् ६त०। २नगरस्यलोकस्य हनने च।

नगरमर्द्दिन् त्रि० नगरं मृद्नाति मृद–णिनि २त०। १नगरावमर्द्दके २मत्तगजे पु०। ततः वाह्वा० अपत्यादौ इञ्। नागरमर्द्दिनि तदपत्यादौ।

नगरमार्ग पु० ६त०। राजमार्गे तत्करणप्रकारादि कौशलमुक्तं यथा "राजमार्गास्तु कर्त्तव्या वप्रहर्द्दिषु नवाधवात्। उत्तमो राजमार्गस्तु त्रिंशद्धस्तमिता भवेत्; मध्यमो विंशतिकरो दशपञ्चकरोऽधमः। पगवमार्गास्तथा चैत्ये पुरग्रामादिषु स्थिताः। करत्रयात्मिका पद्या वीथिः पञ्चकरात्मिका। मार्गो दशकरः प्रोक्तो ग्रामेषु नगरेषु च। प्राक्पश्चाद्दक्षिणोदक्स्थान् ग्राममध्यात् प्रकल्पयेत्। इदं दृष्ट्वा राजमार्गान् सर्वत्रून् कल्पयेन्नृपः। न वीथिं न च पद्यां हि राजमार्गान्तरे प्रकल्पयेत्। प्रकृयोजनमारेऽरत्रेत्र राजमार्गस्तथोत्तमम्। कल्पयेद् गजमं मध्ये तयोर्मध्ये तमाऽधमम्। दशहस्तोत्तमं नित्यं ग्रामे ग्रामे नियोजयेत्। भूमिपूजा मार्गभूमिः कार्या ग्रामैः सुवेतया। कुर्यान्मार्गान् मार्गमातान् निर्गमार्गं मलस्य च। राजमार्गसुमार्गानि सुमार्गाणि मलस्यापि। मार्गमूर्ध्वं सदा वीथिं मलनिर्गमयन्त्रकम्। पङ्कक्लिन्नमलाशोष गृहाणि कारयेत् तथा। मार्गान् सुधाकर्करैर्वा घटितान् समिवस्तरम्। अभियुक्तनिरुद्धैर्वा कुर्याद्ग्रामजनैर्जनैः। ग्रामदयान्तरे चैव पाकशालां प्रकल्पयेत्। नित्यं वर्मार्जितां चैव ग्रामपैव सुशोभिताम्। तत्रागतं तु संपृच्छेत् पान्थं शास्त्रविदः सदा। प्रयातोऽसि कुतः स्थानात् क्व गमिष्यसि तत् वद। सपत्नीकोऽसपत्नीको वा मयस्थः किमाकृतिः। का जातिः किं कुलं नाम स्थितिः कुत्रास्ति ते चिरम्। इति पृष्ट्वा विचेत् सार्थं मध्यं तस्य मध्यस्थ च। सावधानमना भूत्वा स्वार्थं कुर्वीत स्थापयेत्। तत्रस्थान् गमयित्वा तु शालाद्वारं विधाय च। संरक्षयेद् वाणिजैस्तु प्रभाते तान् प्रबोधयेत्। अज्ञानरक्षणाद्योद्गजेभ्यः क्रमतो हरेत्। भूतिं पचार्द्धदत्त्वा तु रक्षार्थं मार्गशालयोः। भक्तं दद्यात् गमयेत् द्वारदुद्घाट्य मोचयेत्। कुर्यात् सहायं सीमान्तं तेषां ग्रामजनं सदा"।

नगरम्बुकर पु० नगरस्य कौशस्य रम्बुं करोति कृ–ट ६त०। कार्त्तिकेये कौशदारपशब्दे दृश्यम्। "सनगरं नगरम्बुकरौजसः" रघुः।

नगरादिसन्निवेश पु० १०६त० अग्निपु० उक्तप्रकारे नगरादिस्थापने यथा

"ईश्वर उवाच नगरादिप्रवास्तुश्च राज्यादिकनिवेशने। योजनं योजनार्द्धं वा तदर्द्धं स्थानमाश्रयेत्। पञ्चाशं वास्तुनगरं प्राकाराद्यन्तु कारयेत्। ऐशादिषु चतुष्पदके पूर्वद्वारं च सूर्यके। गन्धर्वाभ्यां दक्षिणे स्याद्वारुणे पश्चिमे तथा। सौम्यद्वारं सौम्यपदे कार्या वृद्धाः सुविस्तराः। वेणेभादि सुखं गच्छेत् कुर्याद्द्वारं तु षट्करम्। त्रिकरणं विभिन्नञ्च चन्द्रार्द्धाभं पुरं न हि। वज्रसूचीमुखं नेष्टं सकृद् द्विस्त्रिसमागमम्। चापाभं वज्रनागाभं पुरारम्भे हि शान्तिकृत्। प्राच्यं विष्णुहराकांदीक्षत्वा दद्याद् बलिं बली। आग्नेये सूर्यकर्मारान् इरक्ष विनिवेशयेत्। दक्षिणे नृत्यहस्तीनां वेश्याक्षीणां गृहाणि च। भटानाञ्चक्रिकादीनां कैवर्त्तां देव नैर्ऋते। रथानामायुधानाञ्च क्षपणानाञ्च वारुणे। शौण्डिकाः कर्मशिल्पता वायव्ये परिकर्मिणः। ब्राह्मणा यतयः सिद्धाः पुण्यजनस्य चोत्तरे। कुबेरादिषु विप्रेन्द्रा ऐशाने च बलिग्रजाः। पूर्वतश्च बलाध्यक्षा आग्नेये विविधं बलम्। स्त्रीणामादेशिनो दक्षे भाण्डागाराद्यैर्ऋते न्यसेत्। पश्चिमे च महामात्यान् कोषपालांश्च वारुणान्। उत्तरे दण्डनाथांश्च नायकद्विजसङ्घान्। ईशेन्द्रः क्षत्रियान् दक्षे वैश्यान् शूद्रांश्च पश्चिमे। दिक्षु वैद्यान् वाजि[illegible]नि च चतुर्दिशम्। पूर्वेण सुरविद्वादीन् [illegible] न दक्षिणे। पश्चिमे गोधनाद्यञ्च कृषिकर्म[illegible]। न्यसेत् पक्षेच्छांश्च कोशेषु ग्रामादिषु तथा [illegible]तम्। त्रिकं वैश्रवणं द्वारि पूर्वे तो पश्यतां श्रियम्। ऐशादीनां पश्चिमतः पूर्वा-

स्थानि गृहाणि हि । पूर्वतः पश्चिमास्थानि दक्षिणे चोत्तरानगान् । नागेशविष्णुदिग्भाग रक्षार्थं नगरस्य च । निर्द्वैवतन्तु नगरमामदुर्गगृहादिकम् । भुज्यते तत् पिशाचाद्यैरोगाद्यैः परिभूयते । नगरादि सदैवं हि जयदं भुक्तिमुक्तिदम् । पूर्वायां श्रीगृहं प्रोक्तमाग्नेय्यां वै महानसम् । शयनं दक्षिणस्यान्तु नैर्ऋत्यामायुधाश्रयम् । भोजनं पश्चिमायान्तु वायव्यां धान्यसङ्ग्रहः । उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम् । चतुःशालं त्रिशालं वा द्विशालं चैकशालकम् । चतुःशालगृहाणान्तु शालालिन्दकभेदतः । शतद्वयन्तु जायन्ते पञ्चाशत् पञ्च तेष्वपि । त्रिशालानि तु चत्वारि द्विशालानि तु पञ्चधा । एकशालानि चत्वारि एकालिन्दानि यत्रिम च । अष्टाविंशदलिन्दानि गृहाणि नगराणि च । चतुर्भिः सप्तभिश्चैव पञ्चपञ्चाशदेव तु । षडलिन्दानि विंशच्च अष्टाभिर्विंशदेव हि । अष्टालिन्दं भवेदेवं नगराद्यौ गृहादिषु" गृहशब्दे दृश्यम् ।

नगराध्यक्ष पु० नगरे राज्ञा नियोजितः अध्यक्षः । राज्ञा नियोजिते नगररक्षार्थम् अधिकारिभेदे "नगरे नगरे वा स्यादेकः सर्वार्थचिन्तकः । तत्रैः स्थाने घोररूपो नक्षत्राणामिव ग्रहः । भवेत्, स तान् परिक्रामेत् सर्वानेव सभासदः" भा०शा० ८७अ० । २नगररक्षके च "उपसेनो नरपतिर्वसुदेवश्च भारत ! । निक्षिप्तौ नगराध्यक्षौ शेषाः सर्वे विनिर्गताः" हरिवं० १४७अ० ।

नगरीकाक पुंस्त्री नगर्याः काक इव । वर्के त्रिका० स्त्रियां जातित्वात् ङीष् ।

नगरीय त्रि० नगराद्भवति छ+घा—क ५त० । १नगरोत्पन्ने २नागरसम्बन्धिनि स्त्री राजनि० । [वा ङीप् ।

नगरौषधि(धी) स्त्री नगरजाता औषधिः । कदल्यां शब्दच०

नगाटन पुंस्त्री नगे वृक्षे अटनमस्य । १वानरे त्रिका० स्त्रियां जातित्वात् ङीष् । ७त० । २पर्वतवृक्षयोरटने गतौ च

नगाधिप ६त० । नगानामधिपः । १हिमालयपर्वते जटाधरः । तस्य तथात्वम् नगपतिशब्दे दृश्यम् । २सुमेरौ च नगाधिराजादयोऽप्यत्र । "हिमालयो नाम नगाधिराजः" कुमा० ।

नगानिका स्त्री "द्वितीये गुरुर्यदा नगानिका भवेत्तदा" श्रुतबोधे चतुरक्षरपादके छन्दोभेदे ।

नगारि पु० ६त० । पर्वतपक्षभेदकत्वात् तदरौ इन्द्रे "नगाद्रयो नाम नगारिरक्षनुः" भा०वि० ३९अ० ।

नगाश्रय पु० नगः पर्वतः आश्रयोऽस्य । १वृक्षिकन्दरवृक्षे राजनि० । २पर्वतवृक्षयोर्वासिनि त्रि० ।

नगेन्द्र पु०नग इन्द्र इव श्रेष्ठत्वात् । १हिमालये २पर्वतश्रेष्ठे च "रश्मिभिश्चादाय नगेन्द्रसक्तामम्" रघुः "नानाचेष्टैर्जलदललितैर्निर्विशेत्तं नगेन्द्रम्" (कैलासम्) मेघ० ।

नगौकस् पु० नगो वृक्षः पर्वतो वा ओकः निवासस्थानमस्य । १खगमात्रे अमरः । २सरमे ३सिंहे च मेदि० । ४काके शब्दच० । ५वृक्षपर्वतयोर्वासिनि त्रि० ।

नग्न त्रि०ओनजी वीडे कर्त्तरि क्त तस्य नः । १विवस्त्रे २कषायवस्त्र धारिणि कौपीनादृते सुक्तकच्छे दिगम्बरे जैनभेदे पु० नग्नभेदमाह भृगुः "विकच्छोऽनुत्तरीयश्च नग्नश्चायस्त्र एव वा । श्रौतं स्मार्त्तं तथा कर्म न नग्नश्चिन्तयेदपि" । "विकच्छः परिधानासंवृतकच्छः" तथा च योगियाज्ञवल्क्यः "परिधानाद्बहिः कच्छा निबद्धा ह्यासुरी भवेत्" स्मृतिः "वामे पृष्ठे तथा नाभौ कच्छत्रयसदाहृतम् । एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः" बौधायनः "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तदाच्छन्नसुभयोस्तयोः" आचारचन्द्रिकायाम् । "विकच्छः कच्छशेषश्च सुक्तकच्छस्तथैव च । एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः" आह्निकत० "न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन । न च मूत्रं पुरीषं वा न वै संस्पृष्टमैथुनम् । नोच्छिष्टं संविशेत् नित्यं न नग्नः स्नानमाचरेत् । न गच्छेन्न पठेद्वापि न चैव स्वशिरः स्पृशेत्" इति कूर्मपु०१५अ० । २पारिभाषिकनग्ने च "येषां कुले न वेदोऽस्ति न शास्त्रं नैव च श्रुतम् । ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम्" इति मार्कण्डपु० सदाचाराध्यायः "कज्जयनुः सामसंज्ञेयं त्रयी वर्णाष्टतिर्द्विजः । एतासुज्झति यो मोहात् स नग्नः पातकी स्मृतः । यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते । परिव्राडपि मैत्रेय ! स नग्नः पापकृत्तरः" इति विष्णुपु० १८अ० इत्यादिना परिभाषिताः "नग्नो मुण्डः कपालेन भिक्षार्थं चुल्लिपाशितः । अन्धः शत्रुकुलं गच्छेत् यः शास्त्रमनृतं वदेत्" मनुना अन्धतमाख्योक्तेः कर्त्तृ नग्नतादिकसूक्तम् ।

नग्नकरण न० अनग्नः नग्नः क्रियतेऽनेन कृ—ल्युट् समं च । अनग्नस्य नग्नतया करणसाधने ।

नग्नजित् पु०राजभेदे "नग्नजिन्नाम कौशल्य आसीद्राजाति धार्मिकः । तस्य सत्याऽभवत् कन्या नाम्ना नाग्नजिती

कंप !" भाग १०।५८।२२श्लो० "प्रीतिमहुमवधि नग्नजितः" माघः २वास्तुप्रबन्धकारके विद्वद्भेदे च "नग्नजिता तु चतुर्दशदैर्घ्येण द्राविडं कथितम्" "आसं सकेशनिचयं षोडशदैर्घ्येण नग्नजित् प्रोक्तम्" बृ०सं०५८अ० । नग्नजितोऽपि राजभेदे "वैदेहाम्बष्ठकम्बोजास्तथा नग्नजितास्तु ये" भा०क०७९अ० । तदपत्ये ब०व० । पुंयोगे केकयीतिवत् तदपत्येऽपि स्त्रियां ङीष् । २सत्यभामायां कृष्णकलत्रभेदे स्त्री "कालिन्दीं मित्रविन्दाञ्च सत्यां नग्नजितीं तथा" हरिवं०१४८अ० । अपत्ये अण् ङीप् । नाग्नजितीत्यपि सत्यभामायां दर्शितभागवतश्लोके उदा० ।

नग्नसुषित त्रि० सुषितो नग्नः राजद० । धनाद्यपहरणेन नग्नतापन्ने "को नग्नसुषितप्रख्यं वक्तुमन्येत राघवम्" भट्टिः ।

नग्नश्चविष्णु पु० अनग्नोनग्नो भवति भू-चङ्यर्थे खिष्णुच् सम् च । अनग्ने नग्ने भविष्णौ । तत्रार्थे खुकञ् नग्नश्चावुक तत्रार्थे त्रि० ।

नग्नहु(ह्व) पु०नग्नं ह्वयति करोत्यनेन सेवनात् ह्वे-बा०क्त हू वा । षड्विंशतिद्रव्यकृते सुरावीजे किण्वे अमरमाला "आतिथ्यरूपं मासरं महावीरस्य नग्नहुः" यजु०१९।१४ "सर्जत्वगादिषड्विंशतिवस्तून्येकीकृतानि नग्नहुः" कर्कः सर्जादीनि च "सर्ज१त्वक्२ त्रिफला५ गुण्ठी६ पुनर्नवा७ चतुर्जातक११पिप्पली१२ गजपिप्पली१३वंशा१४यवा१५ दृहच्छता१६चित्रके१७न्द्रवारुणी१८श्वगन्धा१९धान्यक२० यवानी२१जीरकद्वय२२ हरिद्राद्वय२५विरूढ़यवव्रीहय२६ एकीकृता नग्नहुः" "शष्पतोक्षालनग्नहूं दक्षिणद्वारेणाग्निष्टहं नीत्वा" यजु० १९।१ भाष्ये वेददी० ।

नग्नाट पु० नग्न एवाटति अट-अच् "सह सुपा" स० । दिगम्बरे शुक्लकच्छे जैनभेदे हलायुधः । स्वार्थे क अट-ण्वुल् वा । नग्नाटक तत्रार्थे हारा० ।

नग्निका स्त्री नग्ना+संज्ञायां कन् । अनागतार्त्तवायाम् अजातरजस्कायां स्त्रियाम् अमरः "त्रिंशद्वर्षो दशवर्षां भार्यां विन्देत नग्निकाम्" भा०अनु० ४५अ० ।

नघमार पु० नह-क बा० हस्य घः नघं मारयति ण्वि-अण् । कुष्ठरोगे "त्रीणि ते कुष्ठ ! नामानि नघमारो नघारिष्टो नघायं पुरुषः" अथ०१९। ३९।२। एवं नघारिष्ट नघाय इत्यपि तत्रार्थे

नघुष पु० नङ्घष+पृषो० । नङ्घषशब्दे मैत्रोप० । [उपपतौ लटा०

नङ्ग पु० नं बन्धं गच्छति गम-ड बा० सुम् च । जारे

नचिकेतस् पु० वाजश्रवसः पुत्रे १ऋषिभेदे २अग्नौ च । "उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य ह नचिकेता नाम पुत्र आस" कठोप० "सर्वे सान्ता अदन्ताः स्युः" इत्युक्तेर्नचितेऽप्यत्रार्थे "मृत्युप्रोक्तां नचितोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्" कठोप० उपसंहारे । "तवैव नाम्ना प्रथितोऽयमग्निं सृङ्काञ्चेमामनेकरूपां गृहाण" । "एतमग्निं तवैव नाम्ना प्रवक्ष्यन्ति जनासः" इति च कठोप० तत्र मृत्युदत्तद्वितीयवरकथने । "यएवं विद्वांश्चिनुते नचिकेतस्" कठोप० । स्वार्थे अण् नाचिकेतोऽप्युक्तार्थे "त्रिणाचिकेतस्त्रयमेतद् विदित्वा" कठोप० "त्रिणाचिकेतस्त्रिभिरेत्य सन्धिम्" कठोप० "छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" भा०भा० धृतिस्तुतिः । सर्वत्र "पूर्वपदात् संज्ञायामिति" पा० णत्वम् । नाचिकेतश्च उद्दालकर्षेः पुत्रः स च पित्रा कारणान्तरात् शप्तो यमलोकं गत्वा पुनरागतः इत्यादिः तत्कथा भा०आ० ७१अ० नाचिकेतोपाख्याने द्रष्टा । तेन वाजश्रवसोनामान्तरमुद्दालक इति गम्यते ।

नचिर न० नञ्शब्देन "सह सुपा" पा०स० । शीघ्रकाले "यथा नचिरकालं नो निष्कृतिः स्यात्त्रिलोकगे" भा०आ०९६अ० "योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति" । "भक्तानि नचिरात् पार्थ ! मय्यावेशितचेतसाम्" गीता । नञा समासे अचिरइत्येव स्यात् । अचिरशब्दे ८२४०६५म् ।

नच्युत त्रि० नञ्शब्देन "सह सुपा" पा०स० । च्युतभिन्ने मुग्धबोधकारस्तु "रात्रेः कृति विभाषा" पा० ६।३।७२ सूत्रात् विभाषानुवृत्तिं मन्यमानः "नञो नलोपः"७२तत्रात् नुडचि"७४ इत्यादि सूत्रात्यपि विभाषापराणीति अभिसन्धाय "नञोऽनौ वाञ्छसौ" सूत्रेण विभाषया अचि अनादेशं झलि च अङ्गादेशं विदधौ नञ्वाडित्यादि पा०७५ सूत्रञ्च नञः प्रकृतिवद्भावविधायकं ननलोपादिनियमपरमिति तस्याशयः । पाणिनीयास्तु न विभाषामनुवर्त्तयन्ति नान्तरीयकादौ तु नञ्शब्देनैव समास इति प्रतिपेदिरे ।

नज व्रीडायां भ्वा० आ० अक० सेट् । नजते अनजिष्ट । ननाज नेजतुः । ईदित् ओदित्च नग्नः । अणोपदेशत्वात् निमित्ते सति न णत्वं प्रनजति ।

नञ् अव्य०न+बा०अञ् न जित् जिदनुबन्धो नञो नलोपनुडर्थः अजितस्तु ननलोपादि नान्तरीयकनैकधेत्यादि" सि०कौ० "नञभावे १निषेधेन स्वरूपार्थे२ऽप्यतिक्रमेश्च ईषदर्थे४

च वादस्थेषु तद्विरुद्धतदन्यवोः" ।६।७ इति मेदिनी निषेधेन वाक्ये निषेधेन स्वरूपार्थे प्रकृतार्थे इत्येकम् तेनाभावेन न पौनरुक्त्यम् । "मघ्नामि कौरवशतं समरे न कोपात्" वेणी० । "द्वौ नञौ प्रकृतमर्थं गमयतः" यथा "नाविष्णुः कीर्त्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चयेत् । नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयात्" इति महाभारतम् । असन्देहार्थं "नञ्" पा० "तत्पुरुषो नञ्कर्मधारयः" पा० निर्देशाद्वा गदत्येऽपि न कुत्सम् । "तिङि चोदात्तवति" पा०च पचति लावुन इत्यादौ असमासेऽपि नञो नञोपः ।

मसमासादिनञर्थनिर्णयादिकं वैयाकरणभूषणसारे यथा "नञ्समासे अपरस्य प्राधान्यात्सर्वनामता । आरोपितत्वं नञ् द्योत्यं नञ्समोऽप्यतिसर्ववत्" । नञ् समासे अपरस्य उत्तरपदार्थस्य प्रधान्यात्सर्वनामता सिध्यतीति शेषः । अत एव आरोपितत्वमेव नञ् द्योत्यमित्यभ्युपेयमिति शेषः । असर्वदृत्यादावारोपितः सर्वदृत्यर्थे सर्वशब्दस्य प्रधान्याऽबाधात्सर्वनामता सिद्ध्यति । अन्यथा अतिसर्वदृत्यत्रैव सा न स्यात् । घटोनास्तीत्यादावभावविषयकबोधे तस्य विशेष्यतायाएव दर्शनात् । अत्रस्तीत्या न स आर्थोबोधो मानसः । तथा चान्यथाऽसर्वस्थे इत्याद्यसिद्धिप्रसङ्गइति । अत्रचारोपितत्वमारोपविषयत्वम् आरोपमात्रं वाधौ विषयत्वं संसर्गइति निष्कर्षः । द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य । घटोनास्ति अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्प्रकारान्तरमाह ।"अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् । विशेषणं विशेष्योवा न्यायतस्त्ववधार्यताम्" । तदर्थोनञर्थः अर्थपदं द्योत्यवाच्यत्वपक्षयोः साधारण्येन कीर्त्तनाय । भाष्यस्येति । तथाच नञ्स्थले महाभाष्यम् । "निवृत्तपदार्थकः" इति । निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" पा०इति क्त अभावार्थकइत्यर्थः । यत्तु निवृत्तः पदार्थोयस्मिन्नित्यर्थः साहश्यादिनाध्यारोपितब्राह्मण्यः क्षत्रियादयोऽर्थो यस्येत्यर्थःइति कैयटः तन्न आरोपितब्राह्मण्यस्य क्षत्रियादेरनञ्वाच्यत्वात् । अन्यथा साहश्यादेरपि वाच्यतापत्तेः । यत्तूक्तं "तत्साहश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" इति पठित्वा अब्राह्मणः अपापम् अनश्वः अतुदरा कन्या अपयोधा अन्येभ्योऽन्येभ्यः अधर्मा इत्युदाहरन्ति तत्तार्थिकार्थमभिप्रेत्येति कल्पनीयम् । विशेषणमिति प्रतियोगिनीति शेषः । तथा च सर्वपदे सर्वनामसंज्ञा । "अनेकमन्यपदार्थे" पा० "सेव्यतेऽनेकया सप्ततापाङ्या" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः । अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्, अत्रं भवति अनत्रं भवतीत्यादौ युष्मदस्मदादिदिव्यवस्था चोपपद्यते अन्यथा त्वद्भावोमद्भावइतिवद्भावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्सत्त्वात्युष्मदव्यवस्था न स्यात् । अत्रस्ते च भेदप्रतियोगित्वदभिन्नान्वयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः । विशेष्योवेति प्रतियोगिन इति शेषः । अयं भावः । गौणत्वेऽपि नञ्समासे "सुतत्तदोः सुप्तोपोऽक्षोरनञ्समासे हलीति" पा०ज्ञापकात्सर्वतासंज्ञा नानुपपन्ना । अतः शिव इत्यत्र सुप्तोपवाद्यादानञ्समास इति हि विशेषणम् । नच तत्र तच्छब्दस्य सर्वनामतास्ति गौणत्वात् । अकोरित्यकञ्ग्रहणाद्वा सर्वनाम्नोरेव तत्र अकारवाभावात्तयोरानञ्समास इति ज्ञापकं सुवचम् । "अनेकमन्यपदार्थे" पा०इत्यादावेकवचनं विशेष्यानुरोधात् । "सुवामन्त्रिते पराङ्गवत् स्वरे" पा० इत्यतोऽनुवर्त्तमानसुबग्रहणात् विशेष्यमेकवचनान्तमेव । विशामेकवचनात् द्विवचनोपादाने बहूनां, बहुवचनोपादाने द्वयोः बहुत्वोक्तिर्न सिध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा । सेव्यतेऽनेकयेत्यत्रापि योग्यतेति विशेष्यानुरोधात्स्त्रियां सेवनान्वयबोधनाय चैकवचनं न तूत्तरपदार्थप्राधान्यप्रयुक्तम् । अतएव "पतन्त्यनेके जलधेरिवोर्मय" इत्यादिकमपि सुपपादम् । अत्रं भवतीत्यादौ युष्मदस्मद्भिन्ने तथा नञ् द्योतकः तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्युष्मदव्यवस्था । त्वद्भिन्नाभिन्नान्वयिका भवनक्रियेति शाब्दबोधः । एवं न त्वं पचसि इत्यत्र त्वदभिन्नान्वयकपाकाश्रयभावनाभावः घटोनास्तीत्यत्र घटाभिन्नान्वयकास्तित्वाभाव इति रीत्या बोधः असमस्तनञः क्रियायामेवान्वयात् । अथाभावोऽत्यन्ताभावस्तदन्योन्याभावस्तद्रूपेण तद्रूपेण बोधादित्याद्यन्यत्र विस्तरः" ।

शब्दचिन्तामणौ तु अभावएव नञो लक्ष्यार्थ इति समर्थितम् यथा

"नञ्समासेऽब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नञ्युत्तरपदार्थसम्बन्धिनि क्षत्रिये वणिजि वा अघटः घट इत्यादौ प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभावस्य वा व्यासेऽपि न घटः घटइत्यादौ यथा शुक्लघटः इत्यत्र

शुक्लवस्त्रवत्। न पचतीत्यादौ क्रियावत्त्वे, भूतले न घटइत्यादौ प्रसज्यप्रतिषेधे नञो शक्त्यर्थता, सुबन्तसम्बन्धेऽपि न समासः विभाषाधिकाराद्विकल्पेन समासानुशासनात्। यजतिषु येयजामहं करोति नाहुयाजेष्वित्यत्र पर्युदासे नञ्, तेनायमर्थः यजतिषु नाहुयाजेषु अहुयाजव्यतिरिक्तेषु येयजामहे इति मन्त्रं करोति। अथ नाहुयाजेष्वित्यत्र न पर्युदासे नञ् तदा हि पदद्वयस्यान्यपरत्वं स्यात् समासापत्तिश्च तस्मादहुयाजात् करोतिना नञोऽन्वयात् प्रसज्यप्रतिषेधः तेनाहुयाजेषु ये यजामहे इति मन्त्रं न करोतीत्यर्थः एवञ्च नाहुयाजेष्विति पदद्वयस्यान्यपरता न वा नञो शक्त्यर्थत्यागः। समासाभावे न साधुता चेति चेत् न समासस्यानित्यत्वात् नाहुयाजेष्विति वाक्ये पर्युदासे नञ्। न चैवं वाक्यवृत्तिपदस्थनञोऽन्वयरत्वाभावः गौर्वाहिक इत्यादौ वाक्येऽपि गवादिपदस्यान्वयरत्वात्। यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्रविधायकतत्त्रिषेधयोर्भिन्नार्थत्वेन वाक्यभेदापत्तिः तस्मात् प्रतीतैकवाक्यत्ववत्त्वात् एकवाक्यत्वे सम्भवति वाक्यभेदस्यान्यथत्वात् नञ्पदे लक्षणा कल्प्यते न तु नञ्पदस्यार्थानुरोधादेकवाक्यत्वत्यागः न हि पदार्थानुरोधेन वाक्यार्थकल्पना किन्तु वाक्यार्थानुरोधात् पदार्थकल्पना नपदस्य केवलं नास्त्येव नञ्पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः अन्यथा प्रसज्यप्रतिषेधे नञ् न स्यादेव नपदेनैव चरितार्थत्वात् समासोना इत्यपदमेव निषेधवाचकं समासवाक्यभेदेन नञो द्वैविध्यादा तत्राभिधानम्"।

अभावत्वात् नञोर्थः इति नञ्वादे शिरोमणिनोक्तं यथा

(१) "संसर्गाभावोऽन्योऽन्याभावश्च नञोऽर्थः। [बहुविधम्

(२) तत्रान्वितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्ति-

(३) नीलघटवति घटो नास्तीति नीले घटो न घट इत्याद्यव्यवहाराद् इह पीतघटवति न नीलः घटः, पीतो घटो न नीलघट इत्यादि व्यवहाराच्च।

(४) प्रतियोग्यभावान्वयौ च तुल्यबोधजनकौ तेन बहुपदोपस्थापितस्य प्रतियोगिनोऽनुयोगिव्याधाराधेयसम्बन्धे नैवान्वयबोधः तत्र तत्संसर्गाभावस्यापि। यथा पचति चैत्रो न पचति चैत्रः। चैत्रस्येदं नेदं चैत्रस्य इत्यादि।

(५) तिङाद्यर्थस्य कालादेः प्रथमान्तपदोपस्थापिते एव तत्र बोधे, तदभावस्यापि तथा।

(६) पचत्यादेव चैत्रादिनिरूपितं स्वत्वादिकमर्थो न तथिव स्वामित्वादि तस्य धनाद्यनुवृत्तित्वेन चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रयुक्तात् निरूपकत्वादेः सम्बन्धस्य प्रतियोगितावच्छेदकत्वादेश्च दिक्।

(७) यत्र चाधाराधेयभावो न सम्बन्धमर्यादाव्यवस्थितानुयोगिनि सप्तम्यपेक्षा। यथा भूतले घटो न भूतले घट इत्यादि तत्र च तात्पर्यवशात् क्वचित् भूतलादौ घटाभावः क्वचित् घटादौ भूतलवृत्तित्वाभावः प्रतीयते।

(८) अतएव पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविषयत्वानुभवः।

(९) केचित्तु सर्वत्र विशेष्ये विशेषणाभावो नञा प्रत्याय्यते अतएव भूतले घटो नास्तीत्यादौ वचनैक्यनियमः इति प्राहुः।

(१०) तेन जातौ सत्तेत्यत्र प्रतिक्षिप्तमीक्षा जातिवचनेतत्सत्ताप्रविष्टत्वात् सम्बन्धान्तरेण जातिवृत्तित्वस्य सत्तायामपि सत्त्वात्। [इत्यपि कश्चित्।

(११) सप्तम्यर्थान्विताभावस्य विशेषणतया प्रतियोगिन्यन्वयः यत्र विशेषणविशेष्ययोरभेदेनान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा बोध्यते। यथायं घटो नीलो नायं घटो नील इति। तत्र च विशेषणविशेष्ययोः समानविभक्तिकत्वं निरुक्तविभक्तिकत्वविरहो वा तन्त्रम्।

(१२) अतएव यजतिषु ये यजामहं इत्यत्राहुयाजेष्वित्यादौ एकवाक्यत्वानुरोधात् [भेदो बोध्यते।

(१३) ये यजामहमित्यादेरनुपस्थितौरवात् यजतिष्वहुयाज-

(१४) विशेषणविभक्तिस्तु प्रयोगसाधुत्वार्था।

(१५) नामार्थयोर्भेदेनान्वयबोध एव प्रकारीभूतविभक्त्यर्थावच्छिन्नेतरान्वयात् लाघवेन तयोरन्वयमात्र एव तथात्वम्।

(१६) विशेषणविभक्तिस्तभेदार्थिका। [इति मते—

(१७) नीलोत्पलं चित्रगुरित्यादौ सुप्ताया विभक्तेरनुपस्थान-

(१८) न राज्ञः इत्यत्र षष्ठ्यर्थस्य स्वत्वस्येवात्रापि सप्तम्यर्थस्य तयोरभेदस्याभावो बोध्यताम्।

(१९) यत्तु कारणविशेषेविकल्पापत्तेः भेदपरतेति तदसत्

(२०) विशेषणविशेष्ये शाब्दान्वयविशेषादितरपरतायाः ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ व्युत्पत्तिवैचित्र्येण विकल्पानवकाशात्।

(२१) न च तत्रापि कौण्डिन्यभेदो बोध्यः कौण्डिन्यपदस्य विरुद्धैकवचनावदत्वात्।

(२२) न खलु महतो राज्ञो न महतो राज्ञः इत्यत्रैव महतां राज्ञां न महतां राज्ञः इत्यत्रापि राजनि महद-

भेदाभेदौ प्रतीयेते एकोनद्वाविंशादिवत् कथञ्चित् तत्-समर्थनेऽपि द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसङ्गात् ।

(२३) अतएव रात्रौ श्राद्धं न कुर्यादित्यादौ करणनिषेधेऽपि न विकल्पावकाशः ।

(२४) न हि तत्रापि रात्रीतरपरता,

(२५) रात्रिभिन्ने श्राद्धविधावपि अमावस्यायां पितृभ्योदद्यादित्यादौ रात्रौ श्राद्धप्रसक्तेर्दुर्वारत्वात् ।

(२६) न खलु क्रियारहितमपि श्राद्धविधायकं वाक्यान्तरमपि येनेदं तेन समभिव्याहृतमेकवाक्यतामासादयेत् ।

(२७) नापीदं नानुयाजेष्वितिवत् पृथक् क्रियारहितम् ।

(२८) अथ रात्रौ श्राद्धस्य प्रसक्तौ विकल्पापत्तिः अप्रसक्तौ कथं निषेधः प्रसक्तं हि प्रतिषिध्यते इति चेत् साधीयानयं मन्त्रपाठः कृष्टे दहनो नास्तीत्यादौ शाब्दबोधेऽपि परप्रयत्नेन तत्र दहनप्रसक्तिरूपादीयते ।

(२९) निषेधविधेर्वैयर्थ्यमिति चेत् तात्पर्य्यानवबोधात् रात्रि-श्राद्धकरणवारणस्य तदर्थत्वात् । [विकल्पः ।

(३०) एकविषयतया पुनरनन्यगत्या षोडशिग्रहणग्रहणयो-

(३१) तत्र च षोडशिग्रहणं नेष्टसाधनमित्यादिकं नार्थः ग्रहणविधिविरोधात् अपि तु षोडशिग्रहणाभाव इष्ट-साधनमित्यादि । [भङ्ग्यर्थान्वयः ।

(३२) व्युत्पन्नस्य नञ् समभिव्याहृतधात्वर्थस्याभावेऽपि वि-

(३३) अतएव प्राभाकराः न कलञ्जं भक्षयेदिति श्रुतेः कलञ्ज-भक्षणाभावविषयकं कार्यमर्थमाहुः ।

(३४) नियमस्तु तात्पर्य्यवशात् । [समविरुद्धम् ।

(३५) सुखफलाजनकत्वेऽपि चाङ्गस्य परमापूर्वरूपेष्टसाधन-

(३६) ग्रहणविध्यन्यथानुपपत्त्या च षोडशिग्रहणादतिशयितं परमापूर्वं तस्याश्चातिशयितं सुखं फलं कल्प्यते इति सर्वसमञ्जसम् ।

(३७) प्रतियोग्यनुयोगिभावः प्रतियोग्यनुयोगिरूपाभावाधिकरणयो राधाराधेयभावश्च सम्बन्धविधया भासते ।

(३८) निपातातिरिक्तस्य एव प्रातिपदिकार्थयोर्भेदेनान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात् ।

(३९) अतएव इत्यादयोऽन्वये न ब्रह्मादयमेष्टा

(४०) अघटं भूतलम् अशशोदेश इत्यादौ समासे सामानाधि-करण्याद्यनुरोधात् नञोऽभावस्तृप्तरता ।

(४१) केचित्तु प्रतियोगिपदोत्तरस्य सुपः प्रतियोगित्वम्

(४२) अनुयोगित्वं वा नञुत्तरस्य चाधिकरत्वं वार्थः

(४३) नञो वाऽभाववति लक्षणा ।

(४४) विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयोरन्योन्याभावसं-सर्गाभावबोधने नञोऽसामर्थ्यम् ।

(४५) तेन न घटति न राम इत्यादौ ज्ञत्यादेरन्योऽन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयते इत्याहुः" ।

अस्य गदाधरादिव्याख्यातसङ्गतोऽयमर्थः । अभावत्वम् अन्योन्याभावत्वञ्च नञ्पदशक्यतावच्छेदकम् । अभावत्वं च ध्वंसादिसाधारणसकलोपाधिः एवमन्योन्याभावत्व-मपि तदेतत् गदाधरादिभिः समर्थितं यथा

(१) अथ घटो नास्तीत्यादिवाक्याद् घटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वबोधने तच्छून्ययोर्ध्वंसप्रागभावयोर-न्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेणाप्रत्ययाद् ध्वंसप्रागभावसाधारण्यं नञ्पदशक्तेर्न सम्भवतीति चेत् न ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते अन्तरा श्यामे रक्तं रूपं नास्तीत्यादिव्यवहाराद्यनुरोधेन ध्वंसप्रागभा-वयोरपि समयविशेषावच्छेदेन सामान्यावच्छिन्नप्रति-योगिकत्वोपगमस्यावश्यकत्वात् तयोरपि नञा प्रतिपा-दनात् व्युत्पत्तिविरोधेन तयोरनाप्रतिपादनेऽपि सदा तनत्वघटितात्यन्ताभावत्वापेक्षया ध्वंसादिसाधारणाभा-वत्वस्य लाघवेन सदातनभावरूपाभावाभावसाधारण्याद्य-नुरोधेन प्रवृत्तिनिमित्ततया तयोरपि नञ्पदवाच्यता नपायात् । न चात्यन्ताभावत्वमखण्डधर्मान्तरं अनुयोगिता विशेषरूपं वा न सदातनत्वघटितमिति न गौरवादिक-मिति वाच्यं तादृशधर्मान्तरे मानाभावात् तद्वह्निर्नास्ती-त्यादि वाक्यात्तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताकयोर्ध्वंस-प्रागभावयोर्बोधनाच्च ध्वंसप्रागभावसाधारणशक्तेरावश्यकत्वात् । न च ध्वंसप्रागभावयोरत्यन्ताभावविरोधस्या-प्रामाणिकतया तद्वह्नित्वावच्छिन्नध्वंसस्याद्याधिकरणे तादृशात्यन्ताभावसत्त्वात् स एव शक्तवाक्यात् प्रतीयत इति वाच्यं ध्वंसाद्याधिकरणे तादृशात्यन्ताभावस्याप्रामा-णिकत्वात्" गदाधरः ।

"एवम् अन्योन्याभावत्वमखण्डोपाधिः । न तु तादा-त्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वम् । तत्तत्सं-योगितादात्म्यस्य संयोगरूपतया संयोगिनोऽत्यन्ताभावे-ऽतिव्याप्तेः । सम्बन्धविधया तादात्म्यनिष्ठावच्छेदकता-वानिवेशेऽपि संयोगसम्बन्धावच्छिन्नसंयोगावच्छिन्नप्रति-योगिताकाभावेऽतिव्याप्तेर्दुष्परिहरत्वादिति वस्तुतस्तु अन्योन्याभावस्य प्रतियोगितावच्छेदकसम्बन्धे मानाभावे-

न तादात्म्यस्य तत्प्रतियोगितावच्छेदकसम्बन्धत्वाभावात्तादृशलक्षणमसम्भवदुक्तिकमेव। न चैवमभावमात्रस्यैव प्रतियोगितावच्छेदकसम्बन्धसद्भावे प्रमाणाभाव इति वाच्यम्। अत्यन्ताभावस्य प्रतियोगितावच्छेदकसम्बन्धानङ्गीकारे बाधबुद्धिप्रतिबध्यतावच्छेदकनिर्वचनानुपपत्तेः। तथाहि घटाभावप्रकारकज्ञानस्य प्रतिबध्यतावच्छेदकं हि न घटप्रकारकज्ञानत्वम्। घटाभाववत्ताज्ञानकाले कदाचित् केन चित् सम्बन्धेन घटप्रकारकज्ञानसत्त्वप्रसङ्गात् केनचित् सम्बन्धेन तद्भेति नियमानुपपत्तेस्तथाच तादृशनियमानुरोधेन तेन सम्बन्धेन तत्प्रकारकबुद्धिं प्रति तत्सम्बन्धावच्छिन्नतच्चिद्भप्रतियोगिताकाभाववत्तानिर्णयस्य प्रतिबन्धकतायाः अवश्यवक्तव्यत्वेनात्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धसिद्धिः। न चैवमन्योन्याभावस्यापि तत्सिद्धौ युक्तिस्तुल्येति वाच्यम्। घटत्वप्रकारकबुद्धिं प्रति घटान्योन्याभाववत्तानिर्णयस्यैव विरोधित्वकल्पनेन सामञ्जस्ये विनान्योन्याभावप्रतियोगितावच्छेदकसम्बन्धं प्रतिबध्यप्रतिबन्धकभावानुपपत्तिरूपबाधकाभावेन युक्तेरतौल्यात्। ननूभयधर्मस्य नञ्शक्यतावच्छेदकत्वे गौरवेण लाघवादभावत्वरूपैकधर्मस्यैव तदवच्छेदकत्वस्वीकार उचित इति अन्योन्याभावत्वे त्यादि अन्योऽलग्नक इति चेन्न। घटो नास्तीत्यादौ संसर्गाभावत्वप्रकारकबोधानुभवानुरोधेन घटः पटो नेत्यादौ त्वन्योन्याभावत्वप्रकारकबोधानुभवानुरोधेन च तथोक्तत्वात्" रघुदेवः।

(२) तत्र चेति तत्र नञर्थे संसर्गाभावे भेदे च अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति येन रूपेण प्रतियोगिनोऽभावांशे विशेषणता तद्धर्मपर्याप्तप्रयोगितावच्छेदकताकत्वम्। व्युत्पत्तिबलतस्यमिति अपदार्थोऽपि तद्रूपावच्छिन्नोपस्थापकशब्दविशेषसमभिव्याहाररूपाकाङ्क्षाबलात् प्रतियोगिसंसर्गविधया बध्यमित्यर्थः। घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वञ्च घटत्वाद्यवच्छिन्नप्रतियोगिता निरूपितत्वविशेषिता अनुयोगिता सा च घटादिरूपविशेषणप्रतियोगिकेति तत्सम्बन्धतया भासते नञ्पदार्थतावच्छेदकानुयोगितायाः घटादेरन्वयोपगमे तु तत्र तादृशप्रतियोगितानिरूपितत्वमेव सम्बन्धः घटादिनिष्ठप्रतियोगिताप्रतियोगिकनिरूपयत्वं घटादिरूपप्रतियोगिप्रतियोगिकमपि इति तस्य घटादिसम्बन्धता" गदाधरः।

(३) "अन्वयितावच्छेदकावच्छिन्नत्वाविशेषितायाः प्रतियोगितायाः नञ्पदार्थे संसर्गाभावे प्रतियोगिसम्बन्धत्वोपगमे बाधकं दर्शयति नीलघटवतीति न घट इति इत्याद्य व्यवहारात् इत्यनेन सम्बध्यते। तादृश्याः प्रतियोगितायाः नञर्थे भेदे प्रतियोगिसम्बन्धत्वे बाधकमाह नीलो घट इति अव्यवहारादिति व्यवहारस्य प्रमाणत्वाभावादित्यर्थः शुद्धप्रतियोगितायाश्च सम्बन्धत्वे अबाधितविशेषान्तराभावबोधकतया तत्तद्वाक्यानां प्रामाण्यस्य दुर्वारतया व्युत्पन्नैरपि तथा प्रयुज्येतेति भावः। तद्रूपविशिष्टप्रतियोगिविशेषिते धर्मिणि शुद्धतद्रूपविशिष्टप्रतियोगिविशेषितधर्मिणि शुद्धतद्रूपविशिष्टप्रतियोगिविशेषितसंसर्गाभावस्य तद्रूपविशिष्टे प्रतियोगिनि शुद्धतद्रूपावच्छिन्नप्रतियोगिविशेषितभेदस्य च बोधने नञोऽसामर्थ्योपगमेन दर्शितप्रयोगवारणसम्भवेऽपि वस्तुगत्या नीलघटवति नीलघटादौ "अत्र न घटः इत्यादिप्रयोगस्य प्रामाण्यप्रसङ्गो दुर्वार इति बोध्यम्" गदाधरः।

(४) "एवं भूतले न घट इत्यादौ भूतलादौ घटसंसर्गाभावाधिकरणतावद् घटभेदाधिकरणता कुतो न प्रतीयते इत्यत आह प्रतियोग्यभावान्वयौ चेति अधिकरणे इत्यादिः अभावपदं संसर्गाभावपरं तथा चाधिकरणे यादृशपदोपस्थाप्यस्य प्रतियोगिनः प्रतियोगितावच्छेदकसम्बन्धस्य भानं यादृशञ्च अधिकरणबोधकं यादृशपदसमभिव्याहारसापेक्षं च तादृशपदोपस्थाप्यप्रतियोग्यन्विताभावस्यापि आधाराधेयभावरूपसम्बन्धस्य भानं तादृशम् अधिकरणबोधकं तादृशबोधकपदसापेक्षञ्चेत्यर्थः। अनुयोगिनि यादृशपदोपस्थाप्ये इत्यादिः आधाराधेयभावसम्बन्धेनान्वय इति आधाराधेयभावनियामकप्रतियोगितावच्छेदकसम्बन्धस्य संयोगादेः संसर्गमर्यादया भानमित्यर्थः तत्संसर्गाभावस्यापि तथेति। तत्पदोपस्थाप्यप्रतियोगिविशेषिततत्सम्बन्धावच्छिन्नाभावस्यापि आधारतासम्बन्धोऽपि तादृशपदोपस्थाप्ये अनुयोगिनि सम्बन्धमर्यादया भासते इत्यर्थः" गदाधरः।

(५) "तिङाद्यर्थस्येति नञोऽसत्त्व इत्यादिः आदिपदात् सुप्परिग्रहः क्त्वादेरित्यादिना तिङर्थाश्रयत्वादेः सुबर्थस्वत्वादेश्च परिग्रहः। प्रथमान्तपदोपस्थाप्यस्य विशेष्यतानियामकत्वाभिधानं तिङ्प्रत्यये चैत्रस्य धनं पश्यतीत्यादौ द्वितीयाद्यन्तपदोपस्थाप्येनापि धनादिना षष्ठ्याद्यर्थस्वत्वान्वयात् सुबर्थविशेष्यतयाऽन्वये प्रथमान्तपदोपस्थाप्यत्वस्यानियामकत्वात् सुपश्च कारकपदोत्तरस्य योऽर्थस्तद्विशे-

नञ्त्वे धातूपस्थाप्यत्वं नियामकं शेषषष्ठ्यर्थस्य विशेष्यत्वे च प्रातिपदिकोपस्थाप्यत्वं प्रत्ययान्योपस्थाप्यत्वं वा, "गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत" इत्यादौ प्रतीकारादिक्रियायामपि तदन्वयात्। उपपदविभक्त्यर्थस्य यद्यत्पदयोगे यायाविहितास्तत्तदर्थविशेषणत्वे तत्तत्पदोपस्थाप्यत्वं, यथा चैत्रादन्य इत्यादावन्यादिपदप्रयोगेऽनुगिष्टानां पञ्चम्यादीनामर्थस्य प्रतियोगित्वादेर्विशेष्यत्वे अन्यत्वादिनिष्ठे अन्यादिपदोपस्थाप्यत्वं, (तन्नम्) तत्रेत्यनुयोगिनीत्यर्थः तथा आधाराधेयतासम्बन्धेनान्वयः इत्यर्थः। तदभावस्यापि निङाद्युपस्थापितप्रत्याद्यभावस्यापि तत्र तथा प्रधमाद्यन्तपदोपस्थाप्ये आधाराधेयभावसम्बन्धेनान्वय इत्यर्थः। न पचति चैत्रेणेत्यादितश्चैत्रादौ नञर्थस्याभावस्य विशेषणत्वेनानन्वयात् चैत्रेण पाकक्रतिरित्यत्रैव चैत्रेण पचतीत्यादितश्चैत्रादिवृत्तित्वप्रकारेण पाकक्रत्याद्यभावस्यानोधाच्चेति भावः" गदाधरः।

(६) "चैत्रस्य धनमित्यादौ षष्ठ्याद्यर्थः स्वामित्वादिकं तस्य प्रकृत्यर्थचैत्रादिविशेषणतया भासते स्वामित्वप्रकारेण चैत्रादेरेव धनादौ स्वत्वादिसम्बन्धेनान्वयः विभक्त्यर्थविशेष्यतापन्नप्रातिपदिकार्थस्य प्रातिपदिकार्थे साक्षादपि भेदान्वयबोधोपगमात् नामार्थयोर्भेदेनान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्। अथ वा षष्ठ्याद्यर्थः स्वामित्वादिकं प्रकृत्यर्थविशेषणतयैव भासते धनादेस्तदनाश्रयत्वेऽपि तन्निरूपकतया निरूपकतासम्बन्धेन तत्र तदन्वय इति प्राचामस्तं दूषयति षष्ठ्यादेश्चेति आदिपदात् द्वितीयातृतीयापरिग्रहः। चैत्रादिनिरूपितमिति। स्वामित्वादिकमित्यादिना कर्मत्वक्रियाजन्यत्वादिपरिग्रहः निरूपितत्वसम्बन्धेन चैत्रादिरूपप्रकृत्यर्थान्वयीत्यर्थः। तन्निष्ठमिति आश्रयतासम्बन्धेन विशेषणतया चैत्राद्यन्वयि आधेयतासम्बन्धेन चैत्रादिरूपविशेष्येणान्वयि चेत्यर्थः। स्वामित्वमित्यादिना कर्तृत्वकर्मत्वादिपरिग्रहः। तस्येति चैत्रस्य चैत्रनिष्ठस्वामित्वादेश्चेत्यर्थः। धनाद्यवृत्तित्वेनेति। वृत्त्यनियामकस्वत्वनिरूपकत्वादिसम्बन्धेन धनादिसम्बन्धत्वेऽपि धनाद्यवृत्तितयेत्यर्थः। धनादौ आश्रयतासम्बन्धेन चैत्रादेस्तन्निष्ठस्वामित्वादेश्चाभावसत्त्वेनेति शेषः इति प्रसङ्गात् भवन्मते अबाधितताद्यचैत्राद्यभावबोधकस्य इत्यादिप्रयोगस्य प्रामाण्यप्रसङ्गात्। ननु स्वामित्वादेः प्रकृत्यर्थविशेषणतापक्षे स्वामित्वादेर्निरूपकतासम्बन्धावच्छिन्नाभावस्यैव प्रकृत्यर्थविशेषणतापक्षे तद्विशिष्टप्रकृत्यर्थचैत्रादेः स्वत्वादिसम्बन्धावच्छिन्नाभावस्य नञा प्रत्यायनोपगमात् तत्रातिप्रसङ्गावकाशः तादृशाभावस्य धनादौ बाधात् इत्यत आह निरूपकत्वादेरिति आदिपदात् स्वत्वादिपरिग्रहः। प्रतियोगितानवच्छेदकत्वादिति वृत्त्यनियामकतयेत्यादिः। वृत्त्यनियामकसम्बन्धावच्छिन्नसंसर्गाभावस्याप्रामाणिकत्वात् येन सम्बन्धेनायमिह इतिप्रत्ययस्तत्सम्बन्धमादायैव नायमिति प्रत्ययः, निरूपकतासम्बन्धेनात्र स्वामित्वमिति प्रत्ययाभावात् तेन सम्बन्धेन नात्र स्वामित्वमितिप्रत्ययस्याभावः। अतएव धनमात्रे स्वामित्वमात्रस्याश्रयतासम्बन्धावच्छिन्नाभावसत्त्वेन चैत्रीयधने चैत्रनिष्ठस्वामित्वमिति धनेषु चैत्रीयत्वस्य स्वामित्वे च चैत्रनिष्ठत्वस्याव्यावर्त्तकतया न व्यवच्छिद्यते अपि तु धने न स्वामित्वमित्येवम् अन्यथा निरूपकतासम्बन्धावच्छिन्नस्वामित्वाभावतात्पर्य्येण तथा व्यवहारस्य दुर्वारतापत्तेः। अतएव कृतिमत्त्वरूपकर्तृत्वसम्बन्धस्य वृत्त्यनियामकतया न पचतीत्यत्र तत्सम्बन्धावच्छिन्नक्रियाभावबोधासम्भवेन पचतीत्यादौ कृतिमत्त्वसम्बन्धेन पाकादेः कर्त्तृत्वत्वबोधं नोपजगाम। उपजगाम तु जानातीत्यादावाश्रयतासम्बन्धेन ज्ञानादेरिति भावः" गदाधरः।

(७) "यत्र चेति ययोरित्यर्थः। न संसर्गमर्यादया लभा इति भेदान्वये निराकृतयेत्यादिः तादृशौ च प्रातिपदिकार्थौ तत्रेति तत्पदार्थे तत्पदार्थसंसर्गाभावबोधे अनुयोगिनि अनुयोगिवाचकपदोत्तरं सप्तम्यमेवेति। तत्राभावसम्बन्धस्याधारतारूपस्य संसर्गत्वासम्भवेन तदर्थकविभक्तिं विना तज्ज्ञानासम्भवादिति भावः। ननु सप्तम्यन्तभूतलादिपदेन नञर्थाभावे आश्रयतासम्बन्धेन भूतलादिवृत्तित्वबोधवत् तादृशपदेनेदं चैत्रस्येत्यादौ षष्ठ्याद्यन्तपदेनेव प्रथमान्तार्थविशेषणक नञर्थाभावेऽपि कदाचित् प्रतियोगितया स्वार्थान्वयबोधस्य जननात् घटाद्यभावो भूतले, भूतलवृत्तित्वाभाववान् घट इति द्विविध एव भूतले न घटइत्यादिवाक्यजन्यबोधः। एवञ्च तादृशवाक्यात् कदाचित् प्रथमबोधः कदाचिच्च द्वितीय इत्यत्र किं नियामकमित्याकाङ्क्षायां तात्पर्य्यभेदस्य तन्नियामकत्वमित्याह तत्र चेति तत्र भूतले न घट इत्यादिस्थले" गदा

(८) "ननु सर्वत्र सप्तम्यन्तार्थस्याभावनिष्ठतयैवान्वयोऽस्तु न तु कदाचिदपि तत्प्रतियोगितया विनिगमकाभावे व्यक्तीभविष्यतीत्यत आह अतएवेति कदाचित् सप्त-

प्यन्तार्थप्रतियोगिकाभावस्यापि नञा बोधनादेवेत्यर्थः। पृथिव्यां गन्धे न जले इत्यादौ इत्यादिद्विविधवाक्ये प्रतीतेरेकविशेष्यकत्वानुभवः गन्धाद्येकविशेष्यकप्रतीतिजनकत्वानुभवः न जले इत्यतो गन्धाभावस्यैव जलवृत्तित्वबोधोपगमे तत्प्रतीतावभावस्यैव विशेष्यतया पृथिव्यां गन्ध इत्यतश्च तद्विशेष्यकबोधानुत्पत्त्या तयोरेकविशेष्यक बोधजनकत्वानुभवो विरुध्यतेति भावः" गदा०।

(९) "नञर्थाभावनिष्ठाधेयताबोधकत्वं सप्तम्याः खण्डयतां मतमुपन्यस्यति केचित्त्विति विशेषेण विशेषणस्याभाव इति नञोऽसत्त्वे यत्पदार्थे यत्पदार्थो विशेषणतया यत्र भासते तत्र नञा तत्पदार्थे तत्पदार्थाभावो विशेषणतया प्रतीयते इत्यर्थः। तथा च भूतले घट इत्यतो घटे भूतलवृत्तित्वस्य विशेषणतया बोधात् भूतले न घट इत्यतोऽपि घटे भूतलवृत्तित्वाभाव एव विशेषणतया प्रतीयते न तु घटाभावे भूतलवृत्तित्वम् एकाकारवाक्यस्य द्विविधबोधजनकत्वोपगमे नञ्पदे सप्तम्यन्तभूतलादिपदसमभिव्याहारज्ञानस्य द्विविधकारणत्वकल्पनापत्तेः। उभयसाधारणतत्कार्यतावच्छेदकैकस्य सम्भवेऽपि तादृशवाक्यधर्मिकद्विविधवाक्यार्थतात्पर्यज्ञानस्य पृथक्कारणतया तत्कारणताधिक्यस्य दुर्वारत्वादिति भावः। एतन्मते युक्त्यन्तरमाह अतएवेति घटो नास्तीत्यादाविवेत्यादिना घटौ न स्तः घटा न सन्तीत्यादिपरिग्रहः वचनैक्यनियम इति विशेष्यविशेषणपदयोः समानवचनत्वनियमेन सुप्तिङोर्वचनसाम्ये नियम इत्यर्थः भूतले घटोऽस्तीत्यादौ भूतलाद्यस्तित्वविशेष्यत्वे तदैक्येन नष्टोऽस्तीत्यादौ भावस्य भूतलाद्यस्तित्वविशेष्यत्वे घटौ न स्तइत्यादौ द्विवचनाद्यनुपपत्तेरिति भावः" गदाधरः।

(१०) "गतिश्चिन्तनीया सत्ताशब्दस्य सत्तासमवाये सत्ताप्रतियोगिकत्वविशिष्टसमवायानुयोगित्वे वा लक्षणया उपपत्तिप्रकारश्चिन्तनीयः। यथाश्रुतार्थेऽनुपपत्तिं दर्शयति जातीति अप्रसिद्धेरिति तदभावस्य सत्तायां नञा बोधयितुमशक्यत्वादिति शेषः। इदञ्चात्र समवायेन वृत्तेः सप्तम्यन्तार्थत्वे बोध्यम्। वृत्तिसामान्यस्य सप्तम्यर्थतोपगमेऽप्रसिद्धिविरहेण तत्पक्षे बाधमाह सम्बन्धान्तरेणेति एकार्थसमवायेनेत्यर्थः" गदाधरः।

(११) "मतान्तरमाह सप्तम्यर्थेति भूतले घटो नास्ति, जातौ न सत्तास्तीत्यादौ भूतलजात्याद्यस्तित्वरूपसप्तमीसमभिव्याहृतक्रियापदपर्यन्तार्थस्यान्वयव्यतिरेकयोरभावः प्रतियोगितासम्बन्धेन प्रकारीभवतस्तस्य विशेष्यतया प्रतियोगी भासत इत्यर्थः एवञ्च परम्परया क्रियाविशेष्यप्रतियोगिवाचकघटादिसमानवचनत्वं क्रियापदस्य निर्वहतीति दृष्टव्यम्। येन रूपेण प्रतियोगिनो विशेषणत्वं तद्रूपावच्छिन्नविशेषितैव प्रतियोगिता सम्बन्धतया भासते अतो घटादिमति विशेषाभावमादायात्र घटो नास्तीत्यादयो व्यवहाराः" गदाधरः।

(१२) "यजति ये यजामहे नानुयाजेष्वित्यादौ अनुयाजाख्ययागविशेषभिन्नयागेषु ये यजामहे पदवन्तं मन्त्रं करोति उच्चारयतीत्याकारकबोध उत्पद्यत इत्यर्थः कारणसत्त्वे कार्योत्पादस्यावश्यं भावादिति भावः। अत्र नञा निषेधबोधने बाधकमाह एकवाक्यत्वेति एकविधेयार्थकत्वानुरोधादित्यर्थः। अत्र नञाऽन्योन्याभावबोधनेऽनुयाजभिन्नेषु यागेषु ये यजामहेपदवन्मन्त्रकरणरूपैकार्थविधानसम्भवेनैकविधेयार्थकत्वरूपैकवाक्यत्वं सम्भवति तत्र नञा निषेधबोधने च नैवं यागेषु ये यजामहेपदवन्मन्त्रविधानं अनुयाजेषु तन्निषेधविधानमिति विधेयीभूतार्थद्वैविध्यात् एकविधेयीभूतैकार्थत्वस्य सम्भवे नानाविधेयार्थकत्वरूपविभिन्नवाक्यत्वकल्पनाया अन्याय्यत्वेन तत्रेष्टापत्तिकरणाशक्यत्वादिति भावः" रघुदेवः।

(१३) "तत्र च नञा निषेधबोधने दूषणान्तरमाह ये यजामहमित्यादेरित्यादि। तत्रादिना करोतेः क्रियात्वेन कारकबोधानुरोधात् करोतिपदस्य ये यजामहमिति पदस्य चानुषङ्गकल्पने गौरवाच्चेति। तथा चात्र नञा निषेधबोधने यागेषु ये यजामहं करोति, नानुयाजेषु येयजामहं करोतीत्यर्थः। अनुषङ्गकल्पनं विना तु तादृशबोधो न सम्भवति। अन्यथा करोतीत्यादि व्युत्पत्तिभङ्गप्रसङ्गादिति भावः" रघुदेवः।

(१४) "नन्वत्र नञा निषेधबोधने नानुयाजेष्वित्यत्र सप्तम्यर्थान्वयो भवति अनुयाजाधिकरणताद्यनिषेधस्य बोधात्। अन्योन्याभावबोधने च न तथेति सप्तम्यर्थान्वयभयेन पूर्वोक्तदोषद्वयमभ्युपेत्यात्र नञा निषेधबोधकत्वमवश्यमभ्युपेयमित्यत आह विशेषणविभक्तिरिति तथा चात्र नञान्योन्याभावबोधनेऽपि विशेषणविभक्तेः प्रयोगसाधुत्वरूपप्रयोजनसम्भवेन न नैरर्थक्यमिति भावः" रघुदेवः।

(१५) "ननु सर्वत्र विशेषणविभक्तेः प्रयोगसाधुत्वे नीलो घट इत्यादावभेदसम्बन्धेनैव घटे नीलस्यान्वयबोधः स च न

सम्भवति नामार्थयोः साक्षादन्वयस्याव्युत्पन्नत्वादित्यत आह नामार्थयोरित्यादि भेदेन अभेदादितिरिक्त सम्बन्धेन तन्त्रत्वात् हेतुत्वात् तथा चाभेदातिरिक्तसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विषयतासम्बन्धेन विभक्तिपदज्ञानजन्योपस्थितेर्हेतुत्वस्य कल्पनाद्योक्तानुपपत्तिः। तत्राभेदसम्बन्धेनैकनामार्थोपर्यपरनामार्थस्य प्रकारतया तादृशशाब्दबोधस्योक्तकार्यतावच्छेदकसम्बन्धेन तत्रोत्पत्त्यभावात्। मतान्तरमाह लाघवेनेत्यादि लाघवञ्च तत्र जनकतावच्छेदककोटावभेदातिरिक्तसम्बन्धावच्छिन्नत्वानिवेशेन तयोः नामार्थयोः तथात्वम् विभक्तिजन्योपस्थितेस्तन्त्रत्वम्" रघुदेवः।

(१६) "नन्वेवं सति नीलो घट इत्यादौ कथं विशेषणविभक्तिजन्योपस्थितिं विनाप्यभेदान्वयबोधस्तत्राह विशेषणविभक्तिस्थिति अभेदार्थिका सर्वत्राभेदार्थिका तथा च तत्र विभक्तिजन्याभेदोपस्थितिं विनाऽभेदानङ्गीकार इति भावः" रघुदेवः।

(१७) "ननु यत्र विशेषणविभक्तेरभावस्तत्र का गतिरित्यत आह नीलोत्पलमित्यादि तथा च तत्रापि यावत् लुप्तविभक्तेरनुसन्धानं नास्ति तत्र तावत् नाङ्गीक्रियत एव शाब्दबोध इति भावः। मतेत्वित्यनेनास्वरसः सूचितः स च तन्मतेऽपि नीलोत्पलमित्यादौ लुप्तविभक्तेरनुसन्धानं विनाप्यनुभवसिद्धस्य शाब्दबोधस्यापलापो द्रष्टव्यः" रघुदेवः

(१८) "न राज्ञ इत्यादि। न राज्ञः पुरुष इत्यादौ यथा पुरुषे षष्ठ्यर्थस्वस्वामिभावः प्रतीयते तथात्रापि(नानुयाजेष्वित्यत्र) प्रयोगे सप्तम्यर्थस्याभेदाभावः प्रतीयत इत्यर्थः। न चैवं सति एतन्मते नञोऽन्योन्याभावत्वेन शक्तिकल्पनमनर्थकम् सर्वत्र संसर्गाभावशक्तित एव नञ्जन्यशाब्दबोधनिर्वाहात् भूतलं न घट इत्यादौ विशेषणविभक्त्यर्थाभेदस्य संसर्गाभाव एव नञा प्रत्याय्यत इत्यभ्युपगमादिति वाच्यम्। तत्र भेदत्वप्रकारकशाब्दबोधस्यानुभवसिद्धतया ऽपलापमात्रेण निराकरणासम्भवेन तेन रूपेणापि नञः शक्तिकल्पनस्यावश्यकत्वादिति" रघुदेवः।

(१९) "केचित्तु यजतिषु ये यजामहे करोति नानुयाजेष्वित्यादौ नञो निषेधबोधकत्वेऽनुयाजेषु येयजामहेपदवन्मन्त्रविकल्पापत्तिः यजतिषु येयजामहे करोतीत्यनेन यागसामान्ये तत्प्राप्त्या, तदन्तर्गतानुयाजेष्वपि प्राप्तत्वात् नानुयाजेष्वित्यनेन तत्र तस्य प्रतिषिद्धत्वाच्चेति, तत्र नञ न प्रतिषेधबोधकत्वं किन्तु भेदबोधकत्वमिति नानुयाजेष्वित्यादौ नञो भेदबोधकत्वे युक्तिमाहुः तन्मतं दूषयितुमुपन्यस्यति यत्त्विति करणनिषेध इति। नानुयाजेष्वित्यादौ नञा येयजामहेपदवन्मन्त्रकरणनिषेधबोधने इत्यर्थः विकल्पापत्तेरिति अनुयाजेषु तादृशमन्त्रकरणाकरणापत्तेरित्यर्थः उपदर्शितरीत्या तादृशमन्त्रकरणस्य विहितनिषिद्धत्वादिति भावः" रघुदेवः।

(२०) "विशेषनिषेध इत्यादि ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ विशेषनिषेधस्यलोपस्य ब्राह्मणेभ्यो दधि दातव्यमितिसामान्यविधेः कौण्डिन्यातिरिक्तब्राह्मणसम्प्रदानकदधिदानबोधकत्वव्यवस्थावत् प्रकृतेऽपि यजतिषु येयजामहे करोतीति सामान्यविधेरप्यनुयागातिरिक्तयागे ये यजामहेपदवन्मन्त्रकरणप्रतिपादकत्वेनानुयाजे तथाविधमन्त्रकरणस्याप्राप्त्या विकल्पासम्भवादिति भावः" रघुदेवः।

(२१) "ननु ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादावपि सामान्यविधेर्न विशेषेतरपरत्वम्। न च तथा सति कौण्डिन्यस्य दधिदानप्रसक्त्या विकल्पापत्तिरिति वाच्यं तत्र नञोभेदबोधकत्वमभ्युपेत्य वाक्यैकवाक्यतया कौण्डिन्यान्यब्राह्मणसंप्रदानकदधिदानप्रतिपादनाभ्युपगमेन कौण्डिन्यस्य तदप्राप्त्या तन्निषेधाप्राप्त्या च विकल्पानवकाशात् तत्र सामान्यविधेर्विशेषेतरपरत्वकल्पनस्य निर्युक्तिकत्वात् प्रकृतस्थले नञोनिषेधबोधकत्वेन विकल्पापत्तिर्दुर्वारैवेत्यत आह न चेति। विरुद्धैकवचनत्वादिति। यथैकनामार्थेऽपरनामार्थान्योन्याभावबोधकनञ्स्थले विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वं तन्त्रम्। तथा समानवचनत्वस्यापि तन्त्रत्वेन प्रकृते तदभावात्तथा बोधासम्भवादिति भावः" रघुदेवः।

(२२) "नन्वेकनामार्थेऽपरनामार्थस्यान्योन्याभावबोधे विशेष्यवाचकपदविशेष्यवाचकपदयोः समानवचनस्य तन्त्रत्वे प्रमाणाभाव इत्यत आह न हि खल्वित्यादि। नामार्थयोरभेदान्वयबोधे विशेषणबोधकपदविशेष्यबोधकपदयोः समानवचनत्वस्य तन्त्रत्व एव नञ्जन्यान्योन्याभावबोधे तयोस्तदायाति नञ्जन्यान्योन्याभावविषयकशाब्दबोधं प्रत्येकपदार्थेऽपरपदार्थस्याभेदान्वयबोधकैकपदसमभिव्याहृतापरपदे नञ्समभिव्याहारस्यानस्य हेतुत्वादित्यतस्तत्प्रदर्शितं महतो राज्ञ इत्यनेन। नन्वेकपदार्थेऽपरपदार्थान्योन्याभावविषयकशाब्दबुद्धिं प्रति वि-

शेषणबोधकपदविशेष्यबोधकपदयोः समानवचनत्वनियामकत्वकल्पने एकोनद्वाविंशादौ नञोऽन्योन्याभावविषयकशाब्दबोधानुदयप्रसङ्ग इति तत्र तदनभ्युपगम आवश्यकस्तथा च ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ नञान्योन्याभावबोधने बाधकाभाव इत्यतः पूर्वोक्तदोषोद्धारपुरःसरं दोषान्तरमाह एको न द्वावित्यादिवदित्यादिना। अत्र च नित्यद्विवचनाद्यन्तशब्दातिरिक्तस्थले तथाविधनियमस्वीकारे तु पूर्वोक्तदोषस्यैव दुरुद्धरतेति सूचनार्थमुक्तं कथञ्चिदिति। ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्यायेत्यादिनैव कौण्डिन्यभिन्नब्राह्मणसम्प्रदानकदधिदानबोधसम्भवात् द्वितीयदातव्यपदं निरर्थकमिति भावः" रघुदेवः।

(२२) "अतएवेति। यतएव विशेषनिषेधस्थले सामान्यविधेर्विशेषेतरपरत्वम् अतएवेत्यर्थः। अन्यथाऽमावास्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धकरणप्राप्त्या रात्रौ श्राद्धं न कुर्वीतेत्यनेन तत्र श्राद्धकरणनिषेधस्य च प्राप्त्या तत्र तत्करणस्य विहितप्रतिषिद्धत्वाभ्यां विकल्पापत्तेर्दुर्वारत्वादिति भावः" रघुदेवः।

(२४) "नन्वत्राप्यन्योन्याभावार्थकतया रात्रीतरकाले श्राद्धकरणस्य विधानसम्भवेन सर्वसामञ्जस्ये व्यर्थं तत्र नञो निषेधार्थकत्वकल्पनमित्यत आह न हीति तत्रापि रात्रौ श्राद्धं न कुर्वीतेत्यत्रापि रात्रीतरपरता नञोन्यान्याभावार्थकतया रात्रीतरकाले श्राद्धकरणस्य बोधकतेत्यर्थः। तथा च व्यर्थं प्रतिषेधार्थकत्वकल्पनमिति भावः" रघुदेवः।

(२५) "रात्रिभिन्न इत्यादि। रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो न्योन्याभावार्थकतया रात्रीतरकाले श्राद्धकरणविधानाभ्युपगमेऽमावास्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धप्रसक्तेस्तत्करणापत्तेर्दुर्वारत्वादित्यर्थः" रघुदेवः।

(२६) "नन्वेवं तथाविधिवाक्ययोर्वाक्यैकवाक्यतया रात्रीतरामावास्यायां कुर्वीतेत्यर्थकत्वाभ्युपगमे न पूर्वोक्तकल्पोक्तदोष इत्यत आह न खल्वित्यादि। रात्रौ श्राद्धं न कुर्वीतेत्यतो भिन्नं वाक्यान्तरमस्ति। तेन क्रियारहितश्राद्धविधायकवाक्येन" रघुदेवः।

(२७) "नापीदम्। इदं रात्रौ श्राद्धं न कुर्वीतेति वाक्यम्। पृथक्क्रियारहितम्। अनुषङ्गिकक्रियातिरिक्तक्रियारहितम्। केवलं क्रियारहितमित्युक्तौ नानुयाजेष्विति वाक्यमपि तथा, तत्रानुषङ्गिककरोतिक्रियासत्त्वादतः पृथगित्युक्तम्। तथा च तयोरेकवाक्यतासम्भवे रात्रीतरवाक्यं क्रियारहितं भवति अन्यथा तयोरेकतरवाक्ये क्रियापदस्य वैयर्थ्यापत्तेः। श्राद्धकरणप्रापकवाक्यान्तरस्याभावेन प्रकृतवाक्यद्वयस्यैव क्रियापदवत्तयैकवाक्यत्वाभावेन पूर्वोक्तदोषो दुर्वार एवेति भावः रघुदेवः।

(२८) ननु रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञोनिषेधबोधकत्वं न सम्भवति तन्मते विशेषनिषेधस्थले सामान्यविधेर्विशेषेतरपरत्वनियमेनामावास्यायां पितृभ्यो दद्यादित्यादि सामान्यविधेः रात्रीतरामावास्याकाले श्राद्धकरणस्य विधायकत्वेन तत्र श्राद्धकरणप्रापकवाक्यान्तरस्य चाभावेन तत्र तस्याप्रसक्तत्वाद्दर्शितसामान्यविधेर्विशेषान्तरपरत्वं नाभ्युपगम्यते चेत्तदा तत्र तत्प्राप्तौ तु विकल्पापत्तिरित्याशङ्कते अथ रात्रावित्यादिना। उपहासपूर्वकं समाधानमाह साधीयानिति। तथा च प्रसक्तं हि प्रतिषिध्यत इति नियमे प्रमाणाभावेनाप्रसक्तस्यापि निषेधे बाधकाभावेन रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञोनिषेधबोधकत्वाभ्युपगमे क्षतिविरह इति भावः" रघुदेवः।

(२९) "निषेधविधेरिति। तादृशनियममस्वीकृत्याप्रसक्तस्यापि निषेधाभ्युपगमे इत्यादि पूरणीयम्। वैयर्थ्यमिति प्रसक्तस्यैव प्रतिषिद्धत्वमिति नियमे तु तत्र तत्करणस्यैव निषेधविधेः प्रयोजनत्वसम्भव इति तादृशनियमाभ्युपगमोऽत्यावश्यकस्तस्य च विशेषविशेषनियन्त्रितत्वान्न दोष इति भावः। तात्पर्यानवबोधादिति। रात्रीतरामावास्याकालाधिकरणश्राद्धकरणबोधतात्पर्याऽनिर्णयप्रसङ्गं यद् रात्रिश्राद्धकरणं तद्वारणस्य तत्प्रयोजनत्वादित्यर्थः। रात्रौ श्राद्धकरणनिषेधबोधकवाक्याभावेऽमावास्यायां पितृभ्यो दद्यादित्यादिवाक्यतो रात्रीतरामावास्याकाले श्राद्धकरणस्य बोधासम्भवः तथाविधतात्पर्यनिर्णयाभावात् तथा च रात्रावपि श्राद्धकरणं प्रसज्येन रात्रौ श्राद्धकरणस्य निषेधविधौ तु तथाविधवाक्यार्थपर्यालोचनक्रमेण तथाविधविधेरुपदर्शितार्थे तात्पर्यनिर्णयसम्भवेन तस्मात् तादृशबोधसम्भवेन रात्रौ तदप्राप्तौ तत्र तत्करणाप्रसक्तिरिति भावः" रघुदेवः।

(३०) "एवं सति विकल्पस्थलस्य दुर्लभत्वापत्तिरित्यत आह एकविषयतयेत्यादि। अनन्यगतिकतया विकल्पं विना गत्यन्तराभावतया तथा च तत्र विकल्पं विना प्रकारान्तरासम्भवेनावश्यं तत्र विकल्पस्वीकारेण न विकल्पस्थलदुर्लभत्वापत्तिरिति भावः" रघुदेवः।

(२१) "ननु नातिरात्रे षोड़शिनं गृह्णातीत्यत्र नञा इष्टसाधनत्वस्यैवाभावः प्रतीयते प्रकारान्तरस्याभावात् तच्च न सम्भवति षोड़शिग्रहणविधिविरोधादित्याशङ्क्य उपपादयति अत्र चेति न षोड़शिनं गृह्णातीत्यत्र चेत्यर्थः" रघुदेवः ।

(२२) "ननु धात्वर्थान्विते एव विभक्त्यर्थे नञर्थाभावस्यैवान्वयो व्युत्पन्न इत्यतआह व्युत्पन्नश्चेति तथा च तादृशव्युत्पत्तिकल्पने प्रमाणाभाव इति भावः" रघुदेवः ।

(२३) "अतएव तादृशव्युत्पत्तेरभावादेव" रघुदेवः ।

(२४) "ननु क्वचिद्धात्वर्थेऽपि विभक्त्यर्थप्रतियोगिकस्याभावस्य क्वचिच्च धात्वर्थाभावे विभक्त्यर्थान्वये नियामकाभाव इत्यत आह नियमस्त्वित्यादि तथा च यत्र धात्वर्थे विभक्त्यर्थाभावबोधे तात्पर्यं तिष्ठति विरोधेऽपि नास्ति तत्र तथा बोधः । यत्र तु धात्वर्थाभावे विभक्त्यर्थान्वयबोधे तात्पर्यं तत्र तथैवान्वयबोध इति नियम इति भावः" रघुदेवः ।

(२५) "ननु षोड़शिग्रहणस्याङ्गत्वेन इष्टसाधनत्वाभावात् नातिरात्रे षोड़शिनं गृह्णातीत्यादौ षोड़शिग्रहणे इष्टसाधनत्वाभावबोधनेऽपि न ग्रहणविरोधः किन्तु बाधेन तत्रेष्टसाधनत्वस्यान्वयबोधासम्भवः तथा च कथं तत्र ग्रहणविधिविरोधेन धात्वर्थाभावे इष्टसाधनत्वान्वयबोधाङ्गीकार इत्यत आह मुख्यफलाजनकत्वेऽपि चेत्यादि तथा च तत्रेष्टसाधनत्वाभावान्वयबोधस्य स्वीकारे ग्रहणनिषेधविरोधोदुरपह्नव इति भावः" रघुदेवः ।

(२६) "ननु ग्रहणाग्रहणयोस्तुल्यफलजनकत्वे कथं बहुदुःखसाध्ये षोड़शिग्रहणे प्रवृत्तिरित्यत आह ग्रहणविध्यन्यथानुपपत्त्या चेति । तथा च तयोस्तुल्यफलाभावेन नोक्ताशङ्काया अवकाश इति भावः" रघुदेवः ।

(२७) 'प्रतियोग्यनुयोगिभावः प्रतियोगित्वमनुयोगित्वम् आधाराधेयभावः आधारत्वमाधेयत्वम् उभयत्रोभयोत्कीर्त्तनं तुल्यवित्तिवेद्यत्वाभिप्रायेण" रघुदेवः ।

(२८) "ननु नञोऽभावार्थकत्वे कथं भूतले न घटः भूतलं न घट इत्यादौ भूतलेऽधिकरणतासम्बन्धेन नञर्थाभावस्यान्वयोऽन्योन्याभावे च प्रतियोगितासम्बन्धेन घटादेर्वान्वयो नामार्थयोर्भेदेनान्वयबोधानङ्गीकारादित्यत आह निपातेति । अव्ययनिपातातिरिक्तेत्यर्थः । तथा च फलवत्त्वाद्निपाता व्ययजन्यशाब्दबोधं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वस्याकल्पनेनानुपपत्त्यभाव इति भावः" रघुदेवः ।

(२९) "अतएवेति यतएव फलवत्त्वान्निपाताव्ययजन्यशाब्दबोधं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्न हेतुत्वमतएवेत्यर्थः । इवाद्यर्थान्वयबोधे चन्द्र इव मुखमित्यादाविवाद्यर्थान्वयबोधे आदिना नञतिरिक्तनिपातमात्रपरिग्रहः", रघुदेवः ।

(४०) "ननु नञोऽभावार्थकत्वेऽघट भूतलमित्यादौ कथं नानाधर्माभ्यामेकधर्मिबोधकत्वरूपसामानाधिकरण्योपपत्तिरित्यत आह अघटं भूतलमित्यादि। संसर्गाभावाऽन्योन्याभावार्थकनञ्भेदेनोदाहरणद्वयम् । अघटमित्यत्र नपुंसकलिङ्गनिर्देशस्तु न विद्यते घटो यत्रेति बहुव्रीहिसमासस्पष्टीकरणाय अन्यथाऽघट इत्युक्ते न घटोऽघट इति नञतत्पुरुषेऽपि तथा प्रयोगसम्भवे तत्र च नञोऽन्योन्याभाववत्परतया घटसंसर्गाभाववल्लाक्षणिकनञ उदाहरणासम्भव इति ध्येयम् । तत्र अभाववत्परताभाववद्बोधकता" रघुदेवः ।

(४१) "यैस्तु निपातजन्यशाब्दबुद्धिं प्रत्यपि प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वमुपेयते तन्मतमाह केचित्त्विति प्रतियोगिपदोत्तरस्य सुप इति भूतले न घट इत्यादौ घटादिबोधकपदोत्तरसुप इत्यर्थः" रघुदेवः ।

(४२) "ननु सर्वत्र प्रतियोगित्वस्य नञ्समभिव्याहृतप्रतियोगिबोधकपदोत्तरसुबर्थत्वे घटीयोऽभावो न घटस्येति प्रयोगापत्तिः तत्रापि घटनिष्ठप्रतियोगित्वस्य स्वरूपसम्बन्धेनाभावस्य घटाभावेऽविद्यमानत्वात् न च न घटस्येत्यत्र निरूपकत्वसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगितानिष्ठप्रतियोगिताकाभावबोधाभ्युपगमात् तथा प्रयोगः घटनिष्ठप्रतियोगितायां निरूपकतासम्बन्धेन घटाभावे विद्यमानत्वादिति वाच्यम् । इत्यनियामकसंसर्गस्याभावप्रतियोगितावच्छेदकत्वाभावेन तथोक्तेरशक्यत्वादित्यत आह अनुयोगित्वं वेति वाकारो व्यवस्थितविकल्पसम्पादकः तथा च क्वचित् प्रतियोगित्वं तथाविधसुबर्थः क्वचिदनुयोगित्वं वेति लभ्यम् । अतएव घटो न घटाभावस्येत्यादौ घटे घटाभावप्रतियोगित्वाभावबोधस्यानुभवोऽपि सुपपाद इति ध्येयम्" रघुदेवः ।

(४३) "नञुत्तरसुपोऽधिकरणार्थकत्वे सर्वत्र नञुत्तरसुपोऽनुसन्धानकल्पनं तत्र लक्षणाकल्पनं चेत्युभयकल्पने गौरवम् तदपेक्षया नञ एवाभाववति लक्षणाकरणकल्पनमुचितमित्याशयेनाह नञो वेति" रघुदेवः ।

(४४) "ननु नञोऽन्योन्याभावबोधने विशेषणवाचकपदविशेष्य-

वाचकपदयोर्विरुद्धविभक्तिराहित्यं तन्त्रमिति पूर्वसूक्तम् तत्र च विरुद्धविभक्तिकत्वं विरुद्धार्थप्रतिपादकविभक्तिकत्वम् अन्यथा व्ययानुशासनस्थले कर्मत्वाद्यर्थकप्रथमान्तपदार्थसाम्याभावेऽपि एकत्वाद्यर्थप्रथमान्तत्वसाम्येनान्वयबोधापत्तेः। तथा च प्रतियोगिवाचकपदोत्तरसुपः प्रतियोगित्वाद्यर्थकत्वे न न घट इत्यादौ नञोऽन्योन्याभावबोधकत्वासम्भवः तस्य विशेष्यवाचकपदात् भिन्नत्वेन तत्प्रतिपादकविभक्तेर्विशेष्यवाचकपदोत्तरविभक्त्यर्थप्रतियोगित्वादिति भवतीखोकारात् एवं नञर्थसंसर्गाभावे भेदेनेतरपदार्थान्वयानुभवेऽनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षेति यत्पूर्वसूक्तं तदपि न नञुत्तरसुपोऽधिकरणत्वे लक्षणायां भवति। एवं नञोऽभाववद्वाचकत्वे तत्कल्पे तथाविधभेदान्वयबोधाप्रसक्तौ तथाविधाभेदान्वयबोधे तु तादृशसप्तम्यन्तापेक्षा न सम्भवति अघटं भूतलमित्यादौ तदभावात् एवञ्च क्वचिन्नञान्योन्याभावः प्रतिपाद्यते क्वचित् संसर्गाभावः प्रतिपाद्यते इत्यत्र नियामकाभावः सर्वत्र तदुभयबोधप्रसङ्गात् इत्यत आह विभक्त्यर्थेति विभक्त्यर्थस्यान्योन्याभावबोधने अनुयोगिवाचकपदसमानविभक्तिकपदार्थस्य, संसर्गाभावबोधने च नञोऽसामर्थ्यमित्यर्थः तथा च फलानुरोधेन तत्र तत्तदानुपूर्वीज्ञानस्य हेतुत्वकल्पनाज्ञानियमप्रसङ्ग इति भावः" रघुदेवः।

(४१) "तथाविधकार्यकारणभावकल्पनं पूर्वमतेऽप्यावश्यकमित्याह तेनेति। तथाविधासामर्थ्यकल्पनेनेत्यर्थः। संसर्गाभावः संसर्गाभाववद्भेदो न प्रतीयते। तथा च तादृशकार्यकारणभावाकल्पने पूर्वमतेऽप्येतेषु स्थलेषु तत्तदन्वयबोधस्यापत्तिर्दुर्वारेति तादृशकार्यकारणभावकल्पनावश्यकत्वमिति भावः" रघुदेवः।

इदमत्रावधेयम् प्राप्तिपूर्वकत्वान्निषेधस्येति मीमांसकैर्मन्यते तेषामाशयः ह्रदे दहनो नास्तीत्यादौ प्रत्यक्षे अभावज्ञानस्य प्रतियोगिज्ञानसापेक्षतया प्रतियोगिनश्च ज्ञानलक्षणादिना पूर्वं ज्ञायमानत्वेन तस्याभावो ह्रदे बोधनेऽपि प्राप्तस्य ज्ञातस्य दहनस्य अन्यत्र प्रसक्तावपि ह्रदे वायौष्ण्यवत् निषेधो न विरुध्यते। शास्त्रीये तु निषेधे विधीयमानो निषेधः प्राप्तिमुपजीवति प्राप्तिश्च रागतोऽतिदेशशास्त्रतो वा। तत्र न कलञ्जं भक्षयेदित्यादौ रागप्राप्तस्य निषेधः। अतिदेशतः प्राप्तयोः "न तौ पशौ करोति" इत्यादौ अवाराज्यभागयोः पशुयागे निषेधः। अतिदेशशास्त्रस्यान्यत्र चरितार्थत्वेन अतुल्यबलत्वात् नात्र विकल्पः। किन्तु एकविषयतयाऽगत्या षोडशिग्रहणाग्रहणयोर्विकल्पः इति भेदः। अप्राप्तस्य विधीयमाननिषेधस्य प्राप्तिश्च प्रतियोगिप्राप्तेरित्येव तत्र प्राप्तिपूर्वकत्वम्। तत्र च पर्युदासः यथा "न तौ पशौ करोति" इत्यादौ करोतीत्यादेरनुवादत्वेन नानर्थक्यम् "सम्भेदे नान्यतरवैयर्थ्यमिति" न्यायात् तेन आवाराज्यभागकरणानुवादेन पशुयागभिन्नत्वमात्रं विधेयम् एवं रात्रौ श्राद्धं न कुर्वीतेति वाक्येऽपि क्रियापदस्यानुवादत्वेन तस्य वैयर्थ्याभावात् तत्र श्राद्धकरणानुवादेन रात्रिभिन्नकालत्वं विधेयम्। यथा वा दध्ना जुहोत्यादौ होममनूद्य दधिद्रव्यकरणकत्वमात्रं विधीयते एवं श्राद्धकरणमनूद्य रात्रीतरकालरूपद्रव्यविधाने अत्रभावः। अन्यथा कुत्र रात्रीतरकालो विधीयेत। अतः न रात्रौ श्राद्धं कुर्वीतेत्यादि वाक्यस्य श्राद्धकरणनिषेधपरताव्यवस्थापनं न युक्तिसहं "न कलञ्जं भक्षयेदित्यादाविव षण्ढापूर्वकल्पनाया तदतिक्रमे दुरदृष्टसाधनत्वकल्पनायाश्चापत्तेर्दुर्वारत्वात् सकलशिष्टाचारसम्मततया रात्रौ श्राद्धकरणेऽनिष्टाभावस्य विरोधापत्तेश्च। किञ्च इदं वाक्यं न केवलश्राद्धानुवादेन रात्रीतरकालविधानं किन्तु यावच्छ्राद्धानुवादेन रात्रीतरकालविधानपरमित्यपि मन्तव्यम्। यद्यपि अष्टकासु मघासु चेति मनुवचने अष्टकादिपदस्य बहुवचनान्ततया निर्देशेन तद्विरुद्धैकवचनावरुद्धत्वात् भेदपरता सम्भवति पूर्वोक्तव्युत्पत्तिविरोधात् तथापि सामान्ये न औत्सर्गिकमेकवचनं जातमभिप्रायमिति न विरोध इत्यवधेयम्।

क्रियायामिव विभक्त्यर्थेऽपि नञर्थाभावान्वय इति यदुक्तं तत्र न कलञ्जं भक्षयेदित्यादौ धात्वर्थे बलवदनिष्टाननुबन्धित्वरूपविध्यर्थस्य" एकादश्यां न भुञ्जीतेत्यादौ भोजनाभाव एव विध्यर्थेऽसाधनत्वस्य च बोध इति विषयभेदेन व्यवस्था। अतएव न कलञ्जं भक्षयेदित्यादि निषेधवाक्यम् एकादश्यां न भुञ्जीतेत्यादि निषेधविधिवाक्यमिति भेदः। तदेतत् शब्दशक्तिकाशिकायां समर्थितम्। "पङ्गुः सप्तद्रं न तरेदित्यादौ नञादिना सप्तद्रतरणादेः, पङ्गुप्रभृतिजतिसाध्यत्वनिषेधबोधानुरोधादवश्यं जतिसाध्यत्वं विज्ञेयः तथा तन्निकामोजलं न ताडयेदित्यादौ तन्निकामेऽसाधनत्वस्य, न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्षणादेः बलवदनिष्टाजनकत्वेऽपीष्टसाधनत्वस्य निषेधा-

नुपपत्त्या इष्टसाधनत्वादिकमपि (यथायथम्)। न चाहो रात्रावच्छेद्यभोजननिवृत्तिरूपस्योपवासस्य क्रत्यसाध्यत्वादृष्टस्यासुपवसेदिति विधेर्बाधः क्रत्यधीनसमयसम्बन्धरूपस्य चैहिकफलसाध्यत्वस्य नित्येऽप्यनपायात्, तादृशप्रयोगे भोजनादिप्रतिकूलव्यापारस्यैव वा धात्वर्थत्वात्" इति। मीमांसकमतानुसारेण कलञ्जाधिकरणशब्दे १७७७ पृ० नञर्थादिको दर्शितः। आम्नायस्य क्रियार्थत्वमित्येकान्ताश्रयणे दोषकथनावसरे शा०भा०रत्नप्रभयोश्च अत्यन्ताभाव एव नञः शक्तिर्भेदादौ लक्षणेत्युक्तं यथा

"अपि च ब्राह्मणो न हन्तव्यः इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रियासाधनम् इत्यतो निवृत्त्युपदेशानामानर्थक्यं प्राप्तं तन्नानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत् स्वसम्बन्धिनोऽभावं बोधयति अभावश्चौदासीन्यकारणं सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणो न हन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः" शा०भा०।

"नञः प्रकृत्यर्थेन सम्बन्धात् हननाभावो नञर्थः इष्टसाधनत्वं तव्यादिप्रत्ययार्थः इष्टस्य नरकदुःखाभावः तत्परिपालको हननाभाव इति निषेधवाक्यार्थः। हननाभावो दुःखाभावहेतुरित्युक्तार्थाद्धननस्य दुःखसाधनत्वधिया पुरुषो निवर्त्तते। नात्र नियोगः कश्चिदस्ति तस्य (नियोगस्य) क्रियातत्साधनदध्यादिविषयत्वात्। न च हननाभावरूपा नञ्वाच्या निवृत्तिः क्रिया अभावत्वान्नापि क्रियासाधनम् अभावस्य भावाहेतुत्वाद्धेतुत्वस्य सत्त्वरूपत्वाभावाच्चेत्यर्थः। अतो निषेधशास्त्रस्य सिद्धार्थे प्रामाण्यमिति भावः। विपक्षे दण्डमाह न च सा क्रियेति। ननु स्वभावतो रागतः प्राप्तेन हन्त्यर्थेनानुरागेण नञ्सम्बन्धेन हेतुना, हननविरोधिनी बहुत्यक्रिया बोध्यते। सा च नञर्थरूपा तत्प्राप्तत्वाद्विधीयते अहननं कुर्यात् इति। तथाच कार्यार्थमिदं वाक्यमित्याशङ्क्य निषेधति न चेति औदासीन्यं हननाभाव इति यावत् तद्व्यतिरेकेण नञः क्रियार्थत्वं कल्पयितुं न च शक्यमिति योजना मुख्यार्थस्याभावस्य नञर्थत्वसम्भवे तद्विरोधिक्रियालक्षणाया अन्याय्यत्वात् निषेधवाक्यस्यापि कार्यार्थत्वे विधिनिषेधभेदविप्लवापत्तेश्चेति भावः। ननु तद्भाववत्तदन्यतद्विरुद्धयोरपि नञः शक्तिः किं न स्यात् अब्राह्मणः अधर्म इति प्रयोगदर्शनादिति चेत् न अनेकार्थत्वस्याभाव्यत्वादित्याह नञश्चेति गवादिशब्दानान्तु अगत्या नानार्थत्वं स्वर्गेषुवाम्बजादीनां शक्यपशुसम्बन्धाभावेन लक्षणानवतारात्। अन्यविरुद्धयोस्तु लक्ष्यत्वं युक्तं शक्यसम्बन्धात् ब्राह्मणादन्यस्मिन् क्षत्रियादौ धर्मविरुद्धे वा पापे ब्राह्मणाद्यभावस्य नञ् शक्यस्य सम्बन्धात् प्रकृते च आख्यातयोगात् नञ्प्रसज्यप्रतिषेध एव न पर्युदासलक्षणमिति मन्तव्यम्। यद्वा नञः प्रकृत्या न सम्बन्धः प्रकृतेः प्रत्ययार्थोपसर्जनत्वात् प्रधानसम्बन्धाच्चाप्रधानानां, किन्तु प्रकृत्यर्थनिष्ठेन प्रत्ययार्थेनेष्टसाधनत्वेन सम्बन्धो नञः। इष्टञ्च स्वापेक्षया बलवदनिष्टानुबन्धि यत्तदेव न तात्कालिकसुखमात्रं विषयप्रयुक्तं निषिद्धाच्चभोगस्यापि इष्टत्वापत्तेः तथाच न हन्तव्यः हननं बलवदनिष्टासाधनत्वे सति इष्टसाधनं न भवतीत्यर्थः। अत्र हन्तव्यः इति हनने विशिष्टेष्टसाधनत्वं भ्रान्तिप्राप्तमनूद्य नेत्यभावबोधने बलवदनिष्टसाधनं हननमिति बुद्धिर्भवति हनने तात्कालिकेष्टसाधनत्वरूपविशेष्यसत्त्वेऽपि विशिष्टाभावबुद्धेर्विशेषणाभावपर्यवसानात् विशेषणं बलवदनिष्टासाधनत्वमिति तदभावो बलवदनिष्टसाधनत्वं नञर्थ इति पर्यवसन्नम्। तद्बुद्धिरौदासीन्यपरिपालिकेत्याह। अभावेति। चोऽप्यर्थः पक्षान्तरद्योती प्रकृत्यर्थाभावबुद्धिवत् प्रत्ययार्थाभावबुद्धिरपीत्यर्थः बुद्धेः क्षणिकत्वात्तदभावे सत्यौदासीन्यात् प्रच्युतिरूपा हनादौ प्रवृत्तिः स्याद् इति तत्राह सा चेति। यथाग्निरिन्धनं दग्ध्वा शाम्यति एवं सा नञर्थाभावबुद्धिः हननादाविष्टसाधनत्वभ्रान्तिमूलं रागेन्धनं दग्ध्वैव शाम्यतीत्यक्षरार्थः। रागनाशे कृते प्रच्युतिरिति भावः। यद्वा रागतः प्राप्ता सा क्रिया रागनाशे स्वयमेव शाम्यतीत्यर्थः। परपक्षे तु हननविरोधिक्रिया कार्येत्युक्तेऽपि, हननस्येष्टसाधनत्वभ्रान्त्यनिरासात् प्रच्युतिर्दुर्वारा। तस्मात्तदभाव एव नञर्थ इत्युपसंहरति तस्मादिति। भावार्थाभावेन तद्विषयकज्ञानाभावात् कार्याभावस्तच्छब्दार्थः। यद्वेत्युक्तपक्षे निवृत्त्युपलक्षितमौदासीन्यं यत्तद्विशिष्टभावापन्नमेवेति व्याख्येयं स्वतः सिद्धमौदासीन्यस्य नञर्थसाध्यत्वोपपादनार्थं निवृत्त्युपलक्षितत्वमिति ध्येयम्।" तस्य

पटोर्न्तर्भावितानुभेयक्रियावाचिना व्रतशब्देन कार्यसुपक्रम्य "नेत्येतोद्यन्तमादित्यम्" इति प्रजापतिव्रतसुक्तम् अत उपक्रमवशात्तत्र नञर्थलक्षणविरोधिशङ्कयक्रियावत्त्वाऽङ्गीकृता। एवमगौरसुरा अधर्म इत्यादीनामधात्वर्थयुक्तस्य नञः प्रतिषेधवाचित्वायोगात् अन्यविरुद्धलक्षणत्वम्। एतेभ्यः प्रजापतिव्रतादिभ्योऽन्यत्राभावस्यैव नञर्थता इत्यर्थः" रत्नप्रभा०।

नञः प्रसज्यप्रतिषेधाद्यर्थाभिधाने नियमविशेषकारणपूर्वकं सा०द० नञर्थो निर्णीतो यथा

"अशक्ता भवता नाथ! सुहृत्तमपि सा पुरा"। अत्राशक्तेत्यत्र नञः प्रसज्यप्रतिषेधार्थत्वमिति विधेयत्वमेवोचितम्। यदाहुः "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्"। तथा "नवजलधरः सन्नद्धोऽयं नदन्नभिनीधरः"। अत्रोदाहरणे तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतानवगमः। यदाहुः। "प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्"। तेन "जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः। अन्वग्रुराद्दे सोऽर्थानसक्तः सुखमन्वभूत्"। अत्रात्रस्तादितामनूद्यात्मगोपनाद्येव विधेयमिति नञः पर्युदासतया गुणभावो युक्तः। नन्वत्राब्रह्मभोजी ब्राह्मणः, असूर्यम्पश्या राजदारा इत्यादिवत् अशक्तेत्यत्रापि प्रसज्यप्रतिषेधो भविष्यतीति चेन्न अत्रापि यदि भोजनादिरूपक्रियांशेन नञः सम्बन्धः स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यं न च तथा, विशेषणतया प्रधानेन तद्भोजिनार्थेन कर्त्रंशेनैव नञः सम्बन्धात्। यदाहुः "ब्राह्मभोजनशीलो हि यतः कर्त्ता प्रतीयते। न तद्भोजनमात्रं तु कर्त्तरीनेविधानतः" इति। अशक्तेत्यत्र तु क्रिययैव सह सम्बन्ध इति दोष एव"।

अब्राह्मभोजीत्यादौ असमर्थसमासं वैयाकरणा मन्यन्ते "सुङ्नपुंसकस्य" पा०सूत्रे नपुंसकस्य नेत्यर्थस्य भाष्यादावुक्तत्वात् सामर्थ्याभावेऽपि समास इति हि तेषां राद्धान्तः

आचार्यिकनञर्थनिर्णयः शब्दशक्तिप्रकाशिकायां यथा "अतएवाघटः पट इत्यादावन्यस्य, असुरोदैत्य इत्यादौ विरोधिनः, अनिषुः शरः इत्यादौ सदृशस्य, अब्राह्मणो बार्हुषिक इत्यादावपकृष्टस्य, अनुदरसुदरन्तरुण्या इत्यादौ स्वल्पस्य बोधकेन नञ्निपातेन स्वार्थे प्रतियोगित्वादि सम्बन्धेनैव घटादेरनुभावनेऽपि तत्तत्तत्पुरुषे नाव्याप्तिः। पटस्याभाव इत्यर्थे प्रसज्यनञा अव्ययीभाव एव समासः प्रमाणं, तेनापटं वर्त्तते इत्याद्येव तत्र प्रयोगस्तत्पुरुषस्योत्तरपदलिङ्गकत्वनियमात् इति दृष्टाः। प्रसज्यनञाप्यपट इत्यादिस्तत्पुरुष एव साधुर्नाव्ययीभावः नञ्ततपुरुषविधेस्तदपवादकत्वात् अतएव वादिनामविवाद इत्यादिकः किरणावल्यादौ पुंसि प्रयोग इति तु पक्षधरमिश्राः"।

अत्रायं विशेषः प्रसज्यनञ्च तत्पुरुषः भावकृदन्तपदयोग एव न घटादिपदयोगे वादिनामविवाद इत्याद्युदाहरणेषु भावकृदन्तस्यैवोत्तरपदत्वादिति सम्प्रदायविदः।

नञर्थे तिङर्थान्वयश्च शब्दश० प्र० दर्शितो यथा "न च पचत्यपि चैत्रे नायं पचतीति प्रयोगः स्याद्वर्त्तमानायाः पाककर्तृतेरभावस्य समयान्तरावच्छेदेन चैत्रे सत्त्वादिति वाच्यं तत्र नञर्थ एव लडर्थवर्त्तमानत्वस्यान्वयेन वर्त्तमानकालावच्छेद्यस्य पाककर्तृत्वभावस्य चैत्रे बाधेन तदसम्भवात् गुरुमते न कलङ्कं भजयेदित्यादौ, अस्मन्मतेऽप्यतिरात्रे षोडशिनं न गृह्णाति इत्यादौ नञर्थेऽपि तिङर्थान्वयस्य व्युत्पन्नत्वात्। एतेन भाविदिने चैत्रो नापाक्षीदतीतदिने चैत्रो न पक्ष्यतीत्यपि स्याद्भाविदिनादौ चैत्रेऽतीतपाककर्तृत्वादेरभावसत्त्वादित्यपि समाहितं तत्राप्यतीतादिकालस्य नञर्थ एवान्वयेनातीतादिकालावच्छेद्यत्वविशिष्टस्य पाककर्तृत्वभावस्य भाव्यादिदिनावच्छेदेन चैत्रादावसत्त्वादेव तादृशप्रयोगात्। अतएव च निष्प्रत्यूहं न पक्ष्यतीत्यादौ निष्प्रत्यूहकर्मकभाविकर्तृतेरप्रसिद्धावपि न क्षतिः भविष्यत्कालावच्छेदेन तादृशकर्मकपाककर्तृतेरभावस्य तत्र बोध्यत्वादिति युक्तमुत्पश्यामः"। किलशब्दोत्तरत्वेऽस्यानुष्टार्थता किलशब्दस्योपक्रम्य "न नतु इत्येताभ्यां संप्रयुज्यतेऽनुष्टे न किलैवं ननु किलैवमिति" निरुक्तकारोक्तेः

नट घट धातुवत् सर्वं विशेषस्तु घटधातौ ३१९ पृ० द्रष्टव्यः। नट अवस्कन्दने (नटकृत्ये) णिचि नाटयति अनुकरोतीत्यर्थः "नवनगवनलेखाश्यामसध्याभिराभिः स्फटिककटकभूमीर्नाटयत्येष शैलः" माघः। [नटत् त न णत्वम्।

नट भ्रंशे त्विषि चु० उभ० अक० सेट्। नाटयति ते अनीनटत्

नटं पुंस्त्री नम—उणा०डट—नट—अच् वा। १शैलूषे स्त्रियां गौरा० ङीष्। "नटी विदूषको वापि पारिपार्श्विक एव वा" सा०द०। २नलीनामगन्धद्रव्ये स्त्री ङीष्।

३वेश्यायां च मेदि०। ४दृश्यकाव्यार्थाभिनयकर्त्तरि नर्त्तके त्रि०"प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम्" सा०का० "यथा नटस्तां तां भूमिकां विधाय रामो वा अजातशत्रुर्वा वत्सराजो वा भवति एवं तत्तत्स्थूल-शरीरग्रहणात् देवो वा मनुष्यो पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरम्" तत्त्वकौ०। ५शोनाकवृक्षे पु० अमरः। "शौचिक्यां शौण्डिकाज्जातो नटो द्रविड एव च" पराशरपद्धत्युक्ते ६वर्णसङ्करजातिभेदे पुंस्त्री स्त्रियां जातित्वात् ङीष्। "नटी कपिञ्जिनी वेश्या कुलटा नापिताङ्गना" तन्त्रवा०। "झल्लो मल्लश्च राजन्यात् व्रात्यात् निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड एव च" मनूक्ते व्रात्यक्षत्रियजाते ७व्रात्यक्षत्रियभेदे पुंस्त्री०। ८अशोकवृक्षे पु० मेदि०। ९किम्पुरुषणि नलाख्ये तृणेपु० जटा०। दीपकरागस्य १०रागिणीभेदे स्त्री।

नटकमेलक न० हास्यरसप्रधाने दृश्यकाव्यभेदे तस्य सङ्कीर्णाख्यम् "वृत्तं बह्वनां भटानां सङ्कीर्णं केचिदूचिरे। तत्पुनर्भवति द्व्यङ्कमथ वैकाङ्कनिर्मितम्" तल्लक्षणम्। "तत्र नटकमेलकादि" सा०द०।

नटचर्य्या स्त्री ६त०। नटस्य कृत्ये वाक्यार्थाभिनये अभिनेयपदार्थानुकारे "नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवास्य" भाग० १।३।२८

नटन न० नट-भावे ल्युट्। अङ्गविक्षेपरूपे कृत्ये अमरः।

नटनारायण पु० रागभेदे सङ्गीतशास्त्रम्।

नटभूषण पु०नटान् भूषयति भूषि-ल्यु। हरितालें रत्नमा०।

नटमण्डन पु०नटं मण्डयति मण्डि-ल्यु। हरितालें अमरः

नटसंज्ञक न० नटस्य संज्ञा सम्यक् ज्ञानं यस्मात् कप् "केऽणः" पा० ह्रस्वः। १गोदन्ताख्यहरितालें त्रिका०। नटेतिशब्दः संज्ञा यस्य कप्। २नटे।

नटसूत्र न० नटस्य नटकृत्यस्य ज्ञापकं सूत्रम् मा०त०। शिलालिना रचिते नटकृत्यज्ञापके ग्रन्थभेदे "पाराशर्य-शिलालिभ्यां भिक्षुनटसूत्रयोः" पा०।

नटान्तिका स्त्री नटस्य नटकृत्यस्यान्तोऽस्याः कप् कापि अत इत्वम्। लज्जायां मेदि०। लज्जायां सत्यां नटकृत्यस्यासम्भवात् तद्ज्ञानएव च तत्सम्भवात् तस्यास्तथात्वम्।

नटेश्वर पु० ६त०। शिवे हेमच० तस्य नृत्यप्रियत्वात् तत्क्रियायां तस्य निपुणत्वाच्च तथात्वम्।

नटा स्त्री नटानां समूहः पाया० य। नटसमूहे।

नड भ्रंशे चुरा०उभ०अक०सेट्। नाडयति ते अनीनडत् त। अयोपदेशत्वात् सति निमित्ते न षत्वम् प्रनाडयति।

नड(ल) पु०नल-बन्धे अच् वा डस्य लः। १गोत्रप्रवर्त्तकर्षिभेदे पु० तस्य गोत्रापत्यम् नडादि० फक्। नाडायन तद्गोत्रापत्ये पुंस्त्री०। २नलतृणे च।

नडक न० नल बन्धे अच् संज्ञायां कन्। अंसयोर्मध्ये वक्षसि नलाकारे अस्थिभेदे "हृदयं जिह्वा क्लोमं वृक्कौ वृक्कथि पूर्वनडकम्" "दक्षिणवृक्कथि पूर्वनडकम्" काल्या० श्रौ० ६।७।२।४। [वृक् च। बहुलनडयुक्ते।

नडकीय त्रि० नडाः सन्त्यत्र "नडादीनां कुक्च्" पा० क

नडप्राय पु० नडः प्रायेण यत्र। नडबहुले देशे अमरः।

नडभक्त न० नडस्य विषयो देशः ऐषुका० भक्तच्। नडविषये

नड(ल)मीन पु० नड(ल) स्थितो मीनः। नलमध्यस्थिते (चिङ्गिडो) मत्स्ये अमरः।

नडश त्रि० नड+अस्त्यर्थे तृणा० श। नडयुक्ते

नडागिरि पु० नडप्रधानो गिरिः किंशुका० संज्ञायां पूर्वस्य दीर्घः। नडप्रधाने गिरिभेदे असंज्ञायां तु नडगिरिरित्येव

नडादि पु० "नडादिभ्यः फक्" पा० गोत्रे फक्प्रत्ययनिमित्ते पा०ग० उक्ते १शब्दसमूहे स च गणः

नड चर वक सुञ्ज इतिक इतिय उपक एक लमक मलङ्ग मलङ्गस्य सप्तल वाजय तिक अग्निशर्मन् उप(गर्ग) ताच नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल कातर कातल कांशप काश्य काव्य अल असल लाणरथी (ब्राह्मण वाशिष्ठ) अमित्र विशु चित्र कुमार क्रोष्टु क्रोष्टस्य लोह दुर्ग लम्ब शिंशपा अम्ब तम्ब शकट सुमनस् सुमत मिमत कच् जलन्धर अध्वर युगन्धर हंसक दण्डिन् हस्तिन् पिण्ड पञ्चाल चमसिन् सुलभ्य स्थिरक ब्राह्मण चटक वदर अम्बष्ठ खरप बङ्ग दत्त अल्ल कासक ब्रह्मदत्त उदुम्बर शोण अशोक दण्डप"। नाडायनः चारायणः इत्यादि।

"नडादीनां कुक्च्" पा० उक्ते कप्रत्ययकुगागमनिमित्ते २शब्दगणे च। स च गणः पा०ग०सू० उक्तो यथा नडशण विल्व वेणु वेत्र वेतस इक्षु काश कपोत हंस क्रुञ्चा (कुञ्चलत्व) तलन्" नडकीयः।

नडिनी स्त्री नडाः सन्त्यस्यां "पुष्करिण्यो देशे" पा० इनि नडयुक्तनद्याम् देशवाच "देशो नदीभूधरकन्दरादिः" इत्युक्तः तेन भूधरे नडिनी पु० देशभिन्ने च नड्वान् भूमिभावः इत्यादि। स्वादौ।

नडिल त्रि० नडस्यादूरदेशादि काशप्रा० इल। बहुसमीप-

नड्या स्त्री नडानां समूहः पाया० य । नडसमूहे अमरः । तत्र गर्त्ते नटेत्यत्र नडेति पाठान्तरम् ।

नड्वत् त्रि० नडाः सन्ति प्रायेणात्र "कुसूदनडमेतसेभ्यो ड्वतुप्" पा० ड्वतुप् । बहुलनडयुक्ते

नड्वल त्रि०नडाः प्रायेण सन्त्यत्र "नडशादाड् ड्वलच्" पा० ड्वलच् । बहुलनडयुते देशे "यो नड्वलानीव बलानि गजः परेषाम्" रघुः । वैराजस्य मनोः २पत्नीभेदे स्त्री "मनोरजायन्त दश नड्वलायां महौजसः । कन्यायां भरतश्रेष्ठ ! वैराजस्य प्रजापतेः" हरिवं०२अ० । नड्वलः स्थानत्वेन अभिमतत्वेनास्त्यस्या अच् । ३नड्वलस्थे ४तदभिमानिनि च देवताभेदे स्त्री "नड्वलाभ्यः शौष्कलम् पाराय मार्गारम्" यजु०२०।१६ पुरुषमेधीयपशूक्तौ

नत त्रि० नम-कर्त्तरि क्त । १नम्रीभूते २कुटिले च मेदि० । "नतभ्रुवो नव्यजनापनेयः" उद्भटः । सि० शि० प्रमिता० उक्ते येन कालेन मध्याह्नात्ततोरविस्तादृशे २कालभेदे उन्नतशब्दे १८८८९ पृ० दृश्यम् "पूर्वं नतं स्यान्निशार्द्धं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं दूरात्तिखण्डं त्वपरं नतं स्यात्" नी०ता० उक्ते ३इष्टघटीहीने दिवारात्रार्द्धकाले इष्टघटीतो वा हीने ४तथाभूते काले च छायया दिनज्ञानार्थे ५धनुःकलाभेदे च सच सू० सि० रङ्गनाथाभ्यां दर्शितो यथा

"मध्यच्छाया भुजस्तेन गुणिता त्रिभमौर्विका । स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे । उत्तराशोत्तरे याम्यास्ताः सूर्यक्रान्तिलिप्तिकाः । दिग्भेदे मिश्रिताः सौम्ये विश्लिष्टाश्चलिप्तिकाः" सू०सि० "अभीष्टदिने माध्याह्निकी छाया भुजसंज्ञा ज्ञेया । तेन भुजेन त्रिज्या गुणिता मध्याह्नच्छायाकर्णेन भक्ता फलस्य धनुःकला नता नतसंज्ञाताः नतकला दक्षिणे भुजे मध्याह्नच्छायारूपभुजे प्राच्यापरसूत्रमध्याद्दक्षिणदिक्स्थे सति उत्तरदिक्का, उत्तरे भुजे दक्षिणाः । चो विषयव्यवस्थार्थकः । ता नतकलाः सूर्यक्रान्तिनतकलाः प्रागुक्ताः, दिग्भेदस्वदिशोर्भिन्नत्वे मिश्रिताः संयुक्ताः याम्येऽभिन्नदिक्के विश्लिष्टा अन्तरिताः । द्वादशाङ्गुलशङ्कुकोटौ मध्याह्नच्छायाकर्णे वा मध्यच्छाया भुजस्तया खस्वस्तिकान्मध्याह्नकाले सूर्यस्य याम्योत्तरवृत्ते यदन्तरेण नतत्वं ता नतकलास्तज्जन्या नतांशज्या मध्याह्नोन्नतांशज्यारूपभुजो त्रिज्याकर्णे वा भुज इति मध्याह्नच्छायाकर्णे मध्याह्नच्छाया भुजस्तदा त्रिज्यावर्त्ते को भुज इत्यनुपातेन नतज्या तद्धनुरत्र कलात्मकत्वान्नतकलास्ता अहःसम्बद्धा इति छायादिग्विपरीतदिक्काः । अथ क्रान्त्यंशाक्षांशयोरेकदिक्के योगेन नतांशा इति दक्षिणा नतकला दक्षिणक्रान्तिकलाभिर्हीना अक्षांशा भवन्ति । क्रान्त्यंशाक्षांशयोर्भिन्नदिक्के ऽन्तरेण नतांशा यदि दक्षिणास्तदा क्रान्त्यूनाक्षांशस्य नतत्वादुत्तरक्रान्तियुता अक्षांशाः यदि तूत्तरास्तदाक्षोनक्रान्तेर्नतत्वात्ततोनोत्तरक्रान्तिरक्ष इति सम्यगुपपन्नम्" रङ्ग० । अधिकं नतिशब्दे दृश्यम् ।

नतद्रुम पु० नित्यक० । लताशाखे रत्नमा० । [अमरः ।

नतनासिक त्रि०नता नासिकाऽस्य । (खँदा) नतनासायुक्ते

नतराम् अव्य० न+आप्तु तरप् । १अतिशयनञर्थे प्रतियोग्यसमानाधिकरणे अभावे २नितरामित्यर्थे च "तस्मादेतयोः सतोर्नतरां चन्द्रमा भाति" शत०ब्रा०११।८।२।१

नताङ्गी स्त्री नतमङ्गमस्या ङीष् । नार्य्यां राजनि० ।

नति स्त्री नम-भावे क्तिन् । नमने स्वापकर्षबोधकव्यापारभेदे करशिरःसंयोगादौ । नमस्कारभेदास्तु काशीषु०यथा "त्रिकोण१मथ षट्कोण२मर्द्धचन्द्रं३ प्रदक्षिणम्४ । दण्ड५मष्टाङ्ग६सप्तम७ सप्तधा नतिलक्षणम् । ऐशानी वाथ कौबेरी दिक् कामाग्न्याप्रपूजने । प्रशस्ता स्यण्डिलादौ च सर्वमूर्त्तेषु सर्वतः । त्रिकोणादिव्यवस्थास्तु यदि पूर्वमुखो भवेत् । पश्चिमाभ्यामभर्णी गत्वा व्यवस्थां निर्दिशेत् तदा । यदोत्तरामुखः कुर्यात् साधको देवपूजनम् । तदा याम्यान्तु वायव्यां गत्वा कुर्यात्तु संस्थितिम् । दक्षिणाद्वायवीं गत्वा दिशं तस्याश्च याम्यवीम् । ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् । त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः१ । दक्षिणाद्वायवीं गत्वा तां त्यक्त्वाग्नौ प्रविश्य च । अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् । उत्तराच्च तथाग्नेयीं भ्रमणं द्वित्रिकोण(३)वत् । षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः२ । दक्षिणाद्वायवीं गत्वा तस्याव्याहत्य दक्षिणाम् । गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः३ । सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृति साधकः । नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः४ । त्यक्त्वा स्वमासनस्थानं पश्चाद् गत्वा नमस्कृतिः । प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत् । दण्ड इत्युच्यते देवैः सर्वदेवौघमोददः५ । पूर्ववद् दण्डवद् भूमौ निपत्य हृदयेन तु । चिबुकेन मुखेनाथ

नाथवा हृत्तुकेन च। ब्रह्मरन्ध्रेण कर्णाभ्यां यद् भूमिस्पर्शनं क्रमात्। तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः६। प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृति। ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यान्नमस्कृतौ। स उग्र इति देवौघैरुच्यते विष्णुतुष्टिदः७। नदानां सागरो यादृग् द्विपदां ब्राह्मणो यथा। नदीनां जाह्नवी यादृग् देवानामिव चक्रधृक्। नमस्कारेषु सर्वेषु तथैवोग्रः प्रशस्यते। त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः। चतुर्वर्गं लभेद् भक्तो नचिरादेव साधकः। नमस्कारो महायज्ञः प्रीतिदः सर्वतः सदा। सर्वेषामपि देवानामन्येषामपि भैरव!। योऽसावुग्रो नमस्कारः प्रीतिदः सततं हरेः। महामायाप्रीतिकरः स नमस्कारणोत्तमः"। नतिविशेषस्तु यामले "त्रिकोणाकारा सर्वत्र नतिः शक्तेः समीरिता। दक्षिणाद्यावर्त्तीं गत्वा दिशं तस्माच्च याम्यवीम्। ततश्च दक्षिणं गत्वा नमस्कारस्त्रिकोणवत्। अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्। शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रं क्रमेण तु। व्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत्। (सोमसूत्रं जलनिःसरणस्थानम्) "प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः। त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्। एकहस्तप्रमाणश्च एकशोपि प्रदक्षिणम्"।

"गन्धर्वतन्त्रे देवमानुषगन्धर्वा यक्षराक्षसपन्नगाः। नमस्कारेण तुष्यन्ति महात्मानः समन्ततः। नमस्कारेण लभते चतुर्वर्गं महोदयम्। सर्वत्र सर्वसिद्ध्यर्थं नतिरेका प्रवर्त्तते। नत्या विजयते लोकान् नत्या धर्मः प्रवर्त्तते। नमस्कारेण दीर्घायुरच्छिन्ना लभते प्रजाः। चतुर्वर्गं लभेद्भक्तो नचिरादेव साधकः। नमस्कारो महायज्ञः प्रीतिदः सर्वतः सदा। नमस्कुरु जगद्देवीं प्रदक्षिणञ्च भक्तितः"। योगिनीतन्त्रे पूर्वखण्डेऽष्टमपटले "प्रदक्षिणत्रयं कुर्य्यात् पद्माकारं नमेत्ततः। दक्षिणादुत्तरं गत्वा देवस्य च महेश्वरि!" प्रदक्षिणत्रयम् आदि मध्यावसाने ज्ञेयम्। तथाच कुमारीपूजामधिकृत्य रुद्रयामले उत्तरखण्डे षष्ठपटले "प्रदक्षिणत्रयं कुर्य्यादादौ मध्ये तथान्ततः। पश्चात्तु दक्षिणां कुर्य्यात् रजतैः स्वर्णमौक्तिकैः"। "कृताञ्जलिं ततो बद्ध्वा भ्रामयित्वा नमेत्ततः। प्रत्येकमग्रमणे देवि! दण्डवत् प्रणिपातयेत्। योनौ नमेद्भ्रमित्वा तु अपराधो भवेत्तदा। अबद्ध्वा अञ्जलिना यस्तु नमस्कारं करोति सः। मोहान्धकारे नरके पच्यते नात्र संशयः। पातालेऽपि न प्रणमेन्मूर्ध्नां न च क्षितिं स्पृशेत्। शपन्ति देवतास्तस्य विफलं तत् प्रकीर्त्तितम्। प्रणामे देवदेवस्य यावत्यो मृत्तिकाः प्रिये!। शरीरे वा महेशानि! तस्य पुण्यफलं शृणु। यावन्तो रेणवस्तस्य यावच्च कालञ्च तिष्ठति। तावद्वर्षसहस्राणि ब्रह्मलोके महीयते"। योगिनी०गन्धर्वतन्त्रे "कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः। नमस्काराश्च विज्ञेया उत्तमाधममध्यमाः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति सर्वदा। नमस्कारेषु सर्वेषु कायिकः प्रथमः स्मृतः। जानुभ्यामवनीं गत्वा संस्पृश्य शिरसा क्षितिम्। क्रियते यो नमस्कारः प्रोच्यते कायिकस्तु सः। पुटीकृत्य करौ शीर्षे सर्वधर्मार्थसाधनम्। प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयन् दक्षिणं पार्श्वं भक्तिश्रद्धा समन्वितः। सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृति साधकः। स तु प्रदक्षिणो ज्ञेयः सर्वदेवैकतुष्टिदः। कृष्णोत्तरशतं यस्तु देव्याः कुर्य्यात् प्रदक्षिणम्। स सर्वकाममासाद्य पश्चान्मोक्षमवाप्नुयात्। त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम्। दण्डमष्टाङ्गकञ्चैव सप्तधा नतिलक्षणम्। दक्षिणाद्यावर्त्तीं गत्वा नम्राद्ग्राहत्य दक्षिणम्। गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रो मम प्रियः। नमस्कारेषु जानीयादासां प्राकृतमद्रिजे!। त्यक्त्वा क्षमासनस्थानं पश्चाद्गत्वा नमस्कृतौ। निपत्य दण्डवद्भूमौ दण्ड इत्युच्यते बुधैः। तथैव दण्डवद्भूमौ निपत्य हृदयेन च। चिबुकेन मुखेनाथ नासया हृत्तुकेन च। चक्षुषा चाथ कर्णाभ्यां ब्रह्मरन्ध्रेण चैव हि। तदष्टाङ्गमिति प्रोक्तं यद्भूमिं स्पृशते क्रमात्"। मेरुतन्त्रे "हस्ताभ्यां चरणाभ्याञ्च जानुभ्यां वचसा तथा। मूर्ध्ना दृष्ट्या तथा वाचा चित्तेनाष्टाङ्ग ईरितः। हस्तजानुशिरोवाक्यधीभिः पञ्चाङ्ग ईरितः"। गन्धर्वतन्त्रे ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यात् नमस्कृतौ। स उग्र इति विज्ञेयो विष्णोस्तुष्टिप्रदायकः। या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तेन वाचिकस्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा तान्त्रिकैः क्रियते नतिः। स मध्यमो नमस्कारो भवेदाचारवः सदा। परेषां गद्यपद्याभ्यां नमस्कारो यदा भवेत्। स वाचिकोऽधमो ज्ञेयो नमस्कारेषु सर्वतः। दृष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं भवेत्। नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्।

त्रिविधे च नमस्कारे कायिकश्रेष्ठतमः स्मृतः"। अन्यत्र विस्तरः २ऊर्द्ध्वस्थितस्याधःपतनानुकूलक्रियाभेदे(नोओया) ३चन्द्रार्ककक्षयोर्याम्योत्तरयोरन्तरे यथोक्तं सि० शि० प्रमिता० "यत् पूर्वापरभावेन लम्बनास्थं तदन्तरम्। नद् याम्योत्तरभावे नतिसंज्ञं तदुच्यते" सि०शि० "अथ याम्योत्तरायां तु भित्तौ पूर्वोक्तमालिखेत्। ये कक्षामण्डले तत्र ग्रहे ढक्षेपमण्डले। त्रिभोनलग्न ढग्ज्या या स ढक्षेपो द्वयोरपि। तच्चापांशैर्नतौ बिन्दू कृत्वा वित्रिभसंज्ञकौ। तद्भम्बनकलाः प्राग्वल्लग्नेयास्ता नतिलिप्तिकाः। कक्षयोरन्तरं यत् स्याद् वित्रिभे सर्वतोऽपि तत्। याम्योत्तरं नतिः सात्र ढक्षेपात् साध्यते ततः" सि० शि०। "तयोर्द्वयोः स्वाधात् स्वस्वढक्षेप चापांशैर्नतौ बिन्दू कार्य्यौ। तौ च वित्रिभसंज्ञौ। ततः प्राग्वद् मध्याद् भूपृष्ठाद् स्वस्वे प्रसार्य लम्बनलिप्तिका ज्ञेयास्ता नतिलिप्तिकाः। नतिर्नाम चन्द्रार्ककक्षयोर्याम्योत्तरमन्तरम् तद्वित्रिभलग्नस्थाने यावत् सर्वतोऽपि तावदेव भवति। अतो ढक्षेपात् साधिता नतिः"प्रमिता०

नद अर्चायाम् निघण्टुः स्तुतौ निरु०। भा०पर०सक० सेट्। नदति अन(ना)दीत् ननाद। यद यन्द इत्यस्य ण्योपदेशत्वात् सति निमित्ते यत्वं नास्येति भेदः। प्रणिनदति

नद सन्तोषे भा०पर० सक० सेट् इदित्। नन्दति अनन्दीत् इत्। नन्दथुः "यस्यासौ तस्य नन्दथुः" भट्टिः। अण्योपदेशत्वात् न यत्वम् प्रनिन्दति।

नद पु० नदति शब्दायते पचा० अच्। भिन्ने शोणसिन्धुभैरवदामोदरब्रह्मपुत्रादौ जलप्रवाहभेदे २समुद्रे च। नदस्य अलक्षितानाच्छिन्नजलप्रवाहः पुंस्त्वान्वितः।"अष्टमहिसु तीर्थानि नदाश्च तत कोटयः" पद्मपु०। नद–स्तुतौ कर्मणि अच्। ३ऋषौ पु०"ऋषिर्नदो भवति नदतेः स्तुतिकर्मणः" निरु०।

नदथु पु० नद–अव्यक्तशब्दे वा० अथुच्। वृषभझूलिते। "निनदमिव नदथुमिवाग्नेर्ज्वलन उपहृयोति" छा०उ० "नदथुमिव वृषभझूलितमिव" भा०।

नदनु पु० नद–अनु।१मेघे उणादिकोषः।२सिंहे शब्दार्थचि० भावे अनु। ३शब्दे "तविष्यन्तो नदनुमा ऋजीषी" ऋ० ६।१८।२ "नदनुमान् शब्दवान्" सा०

नदर त्रि० नदस्यादूरदेशादि अश्वा० र। १नदसन्निकटदेशादौ नास्ति दरो भयं यस्य। २भयशून्ये त्रि०।

नदराज पु० ६त० टच् समा०। समुद्रे "प्रथमं प्रबुद्धनदराजसुतावदनेन्दुनेव तुहिनद्युतिना"माघः। नदपत्न्यादयोऽप्यत्र

नदाल त्रि०नद वा०आल। भाग्ययुक्ते। अस्य भगालवाचित्वात् तत्पुरुषे प्रकृतिस्वरः तेन कुम्भीनदालमित्यत्र मध्योदात्तताऽस्य सि० कौ०

नदी स्त्री नद–अच् पचादिगणे नदट् इति निर्देशात् टित्त्वेन ङीप्। अष्टसहस्रधनुरन्यूनदेशव्यापिजलायामक्षत्रिमायां जलप्रवाहरूपायां गङ्गाप्रभृतौ। "धनुः सहस्राण्यष्टौ च नतिर्यासां न विद्यते। न ता नदीशब्दवहा गङ्गाद्यास्ते परिकीर्त्तिताः" छन्दोगप० उक्तपरिमाणवतीष्वेव नदीशब्दो रूढः। द्वीपभेदे नदीभेदास्तत्तद्द्वीपशब्दे द्रष्टव्याः। जम्बूद्वीपस्था नदीभेदाश्च विस्तरेण जम्बूद्वीपशब्दे १०४६पृ०भा०भी० पर्वोक्ता दर्शिताः। कासाञ्चिन्नदीनामुत्पत्तिस्थानादिकं मत्स्यपुराणोक्तं प्रदर्श्यते।

"प्रागुत्तरेण कैलासाद्दिव्यं सौगन्धिकं गिरिम्। सर्वधातुमयं दिव्यं सुवेलं पर्वतं प्रति। चन्द्रप्रभो नाम गिरिः स शुभो रत्नसन्निभः। तत्समीपे सरो दिव्यमच्छोदं नाम विश्रुतम्। तस्मात् प्रभवते दिव्या नदी ह्यच्छोदिका शुभा। तस्यास्तीरे वनं दिव्यं मन्दारैत्ररथं शुभम्"। "कैलासाद्दक्षिणप्राच्यां शिवं सर्वौषधिं गिरिम्। मनःशिलामयं दिव्यं शबलं पर्वतं प्रति। लोहितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान्। तस्य पादे महद्दिव्यं लोहितं सुमहत्सरः। तस्मात् प्रभवते पुण्यो लोहित्यश्च नदो महान्। दिव्यारण्यं विशोकञ्च तस्य तीरे महद्वनम्"। "कैलासात् पश्चिमोदीच्यां ककुद्मानौषधीगिरिः। ककुद्मति च रुद्रस्य उत्पत्तिश्च ककुद्मिनः। तदङ्गनं त्रैककुदं शैलन्त्रिककुदं प्रति। सर्वधातुमयस्तत्र सुमहान् वैदुर्यो गिरिः। तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम्। तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी। तस्यास्तीरे वनं दिव्यं वैभ्राजं नाम विश्रुतम्" "कैलासात् पश्चिमायां तु दिव्यः सर्वौषधिगिरिः। अरुणः पर्वतश्रेष्ठो रुक्मधातुविभूषितः। भवस्य दयितः श्रीमान् पर्वतो हेमसन्निभः। शातकौम्भमयैर्दिव्यैः शिखाजालैः समाचितः। शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन्। शृङ्गवान् सुमहादिव्यो दुर्गः शैलो महाचितः। तस्मिन् गिरौ निवसति गिरिशो धूम्रलोचनः। तस्य पादात् प्रभवति शैलोदं नाम तत्सरः। तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा। सा चक्षुःशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम्। अस्यु-

स्तरेण कैलासाच्छिवः सर्वौषधिर्गिरिः। गौरन्तु पर्वतश्रेष्ठं हरितालमयं प्रति। हिरण्यशृङ्गः शुभ्रान् दिव्यौषधिमयो गिरिः। तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम्। रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः" "दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा। अन्तरिक्षं दिवं चैव भावयित्वा भुवङ्गता। भवोत्तमाङ्गे पतिता संरुद्धा योगमायया। तस्या ये बिन्दवः केचित् रुद्रायाः पतिता भुवि। कृतन्तु तैर्बहुसरस्ततो बिन्दुसरः स्मृतः"। "त्रीणि प्राचीमभिमुखं प्रतीचीन्त्रीण्यथैव तु। स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्तधा। नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा। सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः। सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम्। तस्मात् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम्। सप्त चैताः स्रावयन्ति वर्षन्ति हिमसाह्वयम्। प्रस्रुताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भवाः। तान् देशान् स्रावयन्ति स्म म्लेच्छप्रायांश्च सर्वशः। प्रगेलान् कुकुरान् रौध्रान् बर्बरान् यवनान् खसान्। पुलिकांश्च कुलत्थांश्च अङ्गलोक्याम्बरांश्च यान्। कृत्वा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम्। अथ वीरमरुंश्चैव कालिकांश्चैव शूलिकान्। तुषारान् वर्बरानङ्गाननुष्णान् पारदान् शकान्। एतान् जनपदांश्चक्रुः स्रावयित्वोदधिङ्गता। दरदोर्जगुडांश्चैव गान्धारानौरसान् कुरून्। शिवपौरानिन्द्रमरून् वसतीन् समतेजसा। सैन्धवानुर्वसान् वर्वान् कुपथान् भीमरोमकान्। शुनासुखांश्चोर्द्धमरून् सिन्धुदेशाश्रितेयते। गन्धर्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान्। कलाप्रग्रामकांश्चैव तथा किंपुरुषाञ्चरान्। किरातांश्च पुलिन्दांश्च कुरून् वै भारतानपि। पाञ्चालान् कौशिकान् मत्स्यान् मागधाङ्गांस्तथैव च। ब्रह्मोत्तरांश्च वङ्गांश्च ताम्रलिप्तांस्तथैव च। एतान् जनपदानार्यान् गङ्गा भावयते शुभा। ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम्। ततस्तु ह्लादिनी पुण्या प्राचीनाभिमुखा ययौ। स्रावयन्त्युपकांश्चैव निषादानपि सर्वशः। धीवरान्धिकांश्चैव तथा नीलमुखानपि। केकरानेकर्णांश्च किरातानपि चैव हि। कालिन्दगतिकांश्चैव कुशिकान् स्वर्गभीमकान्। सा मण्डले समुद्रस्य तीरे भूत्वा तु सर्वशः। ततस्तु नलिनी चापि प्राचीमेव दिशं ययौ। कुपथान् स्रावयन्ती सा इन्द्रद्युम्नसरांस्तथा। तथा खरपथान् देशान् वेत्रशङ्कुपथानपि। मध्येनोज्जानकमरून् कुथप्रावरणान् ययौ। इन्द्रद्वीपसमीपे तु प्रविष्टा लवणोदधिम्। ततस्तु पावनी प्रायात् प्राचीमाशाङ्गमेन तु। तोमरान् स्रावयन्ती च हंसमार्गान् समूहकान्। पूर्वान्देशांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम्। वर्षप्रावरणान् प्राप्य गता शाम्बसुखानपि। सिद्धा पर्वतमेरुं सा गत्वा विद्याधरानपि। शैलिमण्डलकोडन्तु सा प्रविष्टा महत्सरः। तासां नद्युपनद्योऽन्याः शतशोऽथ सहस्रशः। उपगच्छन्ति ता नद्यो यतो वर्षति वासवः" "हेमकूटस्य पृष्ठे तु सर्पाणां तत् सरः स्मृतम्। सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या। अवगाढे शुभयतः समुद्रौ पूर्वपश्चिमौ। सरो विष्णुपदं नाम निषधे पर्वतोत्तमे। यस्मादग्रे प्रभवति गन्धर्वानुकूले च ते। मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान्। जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्मृतम्। पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान्। पुण्डरीकात् पयोदाच्च तस्माद्ह्रदे संप्रस्रवतः। सरसस्तु सरस्वेतत् स्मृतमुत्तरमानसम्। मृग्या च मृगकान्ता च तस्माद्ह्रदे सम्प्रस्रवतः। ह्रदाः कुरुषु विख्याताः पद्मपीनकुलाकुलाः। नाम्ना ते वै जया नाम द्वादशी दधिसन्निभा। तेभ्यः शान्ता च साध्वी च द्वे नद्यौ सम्प्रस्रवतः। किंपुरुषाद्यानि यान्यष्टौ तेषु देवी न वर्षति। उद्भिदान्युदकान्यत्र प्रवहन्ति सरिद्वराः। वलाहकस्य शृङ्गो यक्षो मैनाक एव च। विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्"

भारतवर्षे नदीभेदाः वराहपु० उक्ताः यथा "गङ्गा सिन्धुः सरस्वती शतद्रुः वितस्ता विपाशा चन्द्रभागा सरयूः यमुना इरावती देविका कुहूः गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निःचीरा गण्डकी चक्षुष्मती लोहिता च इत्येता हिमवत्पादनिर्गताः। वेदस्मृती वेदवती सिन्धुः अपर्णा चन्दना सदाचरा रोहिपारा चर्मन्वती विदिशा वेदवती वयन्ती च इत्येताः पारिपात्रोद्भवाः। शोणा ज्योतीरथा नर्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पला करतोया पिशाचिका चित्रोत्पला विशला वङ्कुला बालुकावाहिनी शुक्तिमती विरजा पङ्किनीरिणी च इत्येता ऋक्षपर्वतप्रसूताः। मणिलाला शुभा तापी पयोष्णी

शोणोदा रेवा विपाशा वैतरणी वेदीपाला कुसुदती तोया दुर्गा अन्यगिरा च एता विन्ध्यपादोद्भवाः। गोदावरी भीमरथी कृष्णा वेणा वञ्जुला तुङ्गभद्रा सुप्रयोगा ब्रह्मकावेरी शतमाला ताम्रपर्णी पुण्यावती उत्पलावती च इत्येता मलयभवाः। त्रियामा ऋषिकुल्या वङ्गुरा त्रिविदा लोकमूलिनी वंशधरा महेन्द्रतनया ऋषिकाऽऽतुमती मन्दगामिनी पलाशिनी च इत्येताः शुक्तिमत्प्रभवाः। एताः प्राधान्येन कुलाचलनद्यः। शेषाः क्षुद्रनद्यः" वराहपुराणे स्फुटं दृश्यम्।

"कैलासपादसम्भूतं पुण्यं शीतजलं शुभम्। मन्दोदकं नाम सरः पयस्तु दधिसन्निभम्। तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा। दिव्यञ्च चन्दनवनं तस्यास्तीरे महद्वनम्" कालिकापु०।

तत्रैव स्थानान्तरे प्रधानसप्तनदीप्रादुर्भावकथा यथा

"एवं विवाह्य विधिवत् सौवर्णे मानसाचले। अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह। तत्र यत् पतितं तोयं मानसाचलकन्दरे। विवाहावभृथार्थाय शान्त्यर्थं बहुधा कृतम्। ब्रह्मविष्णुमहादेवपाणिभिः सप्तदीरितम्। तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात्। हेमाद्रेः कन्दरे मानौ सरस्यास्य पृथक् पृथक्। तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे। तेन सिप्रा१ नदी जाता विष्णुना प्रेरिता क्षितिम्। महाकोशीप्रपाते च द्वारि पतितन्तु तैः। कोशिकी२ नाम सा जाता विश्वामित्रावतारिता। उमाचेले यत् पतितं तोयं तेन महानदी। कावेरी३ नाम सा जाता तदा कौवेरसंज्ञतः। महाबाहो सरःश्रेष्ठे पतितं तज्जलं गिरेः। हिमाद्रेः पार्श्वभागे तु दक्षिणे शम्भुसन्निधौ। गोमल्लिनाम तैर्जाता नदी गोमत्यु दीरिता ४। मैनाको नाम यः पुत्रः शैलराजस्य च प्रियः। यस्तु तस्मिन् सुतः पद्मो मेनकोदरतः पुरा। यत्तत्र पतितं तोयं तत्र जाता महानदी। देविकाख्या५ महादेवप्रेरिता सागरं प्रति। तत्तोयं सङ्गतं हंसैरितं वाडवसन्निधौ। तेनाभूत् सरयूनाम्ना नदी पुण्यतमा शुभा। यान्यम्भांसि महापार्श्वे खाण्डवारण्यसन्निधौ। हिमवत्कन्दरे याम्ये इरावद्भ्यूद्भवस्ततः। इरावती ७ नाम नदी तैस्तु जाता सरिद्वरा। एताः सर्वाः स्नानपानात् शरणैर्लाङ्गली यथा। फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा। धर्मार्थकाममोक्षाणां बीजभूताः सदा च ताः। महानद्यस्तु सप्तैताः सर्वदा देवभोगदाः। एवं नद्यः सप्त जाताः सदा पुण्यप्रतमोदकाः। अरुन्धत्या वशिष्ठस्य विवाहे देवसन्निधौ" इति

नद्यादीनां रूपद्वयं यथा "नद्यश्च पर्वताः सर्वे द्विरूपाश्च स्वभावतः। तोयं नदीनां रूपन्तु शरीरमपरन्तथा। स्थावरं पर्वतानान्तु रूपं कायस्वभावतः। गुल्मानामथ कम्बूनां तथैवान्तर्गता तदुः। बहिरस्थिस्वरूपन्तु सर्वदैव प्रवर्तते। एवं जलं स्थावरत्वं नदी पर्वतयोस्तथा। अन्तर्वसति कायस्तु सततं नोपलभ्यते। आप्याय्यते स्थावरेण शरीरं पर्वतस्य तु। तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा। नदीनां कम्बुरूपित्वं पर्वतानां तथैव च। जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः। तोयहानौ नदीदुःखं जायते सततं द्विजाः!। विशीर्णे स्थावरे दुःखं जायते गिरिकायगम्" कालिकापु० २२अ०

नदीभेदे जलगुणा राजनिघण्टौ उक्ता यथा

"सर्वा गुर्वी प्राङ्मुखी वाहिनी स्यात्तन्वी पश्चाद्वाहिनी निम्नगेव। देशे देशे तद्गुणा सा विशेषाद्धत्ते गौरवं लाघवञ्च। प्रायो मृदुवहा गुर्व्यो लघ्व्यः शीघ्रवहाः स्मृताः। नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः। हिमवत्प्रभवा याश्च जलं तासामतोपमम्। विन्ध्यात् प्राची प्रीण्यवाची प्रतीची या चोदीची स्यान्नदी सा क्रमेण। वातारोधं श्लेष्मपित्तार्त्तिकोपं पित्तोद्रेकं पथ्यपाकञ्च धत्ते। पारिपात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः। शिरोहृद्रोगकुष्ठानां ता श्रेष्ठः शीतदश्च च"।

"वनस्पतीनां सरसां नदीनाम्" मट्टिः।

नदीकदम्ब पु० नद्या इव कदम्बो जलसमूहोऽस्य। १जलप्रावणिकायां राजवि० ६त०। २नदीसमूहे न०।

नदीकान्त पु० ६त०। १समुद्रे नदी कान्ता यस्य। २हिज्जलवृक्षे तस्य तत्समीपजातत्वेन तत्प्रियत्वात् तथात्वम्। ३सिन्धुवारे च मेदि० ४जम्बूवृक्षे ५कालजङ्घावृक्षे च स्त्री मेदि० ६लतायां स्त्री हेमच०।

नदीकूलप्रिय पु० नदीकूलं प्रियमस्य। जलवेतसे जटाध०।

नदीज पु० नद्याः तत्समीपे जायते जन-ड ७त०। १अर्ज्जुनवृक्षे रत्नमा०। २यावनालशरे ३हिज्जलवृक्षे राजनि०। ४स्रोतोऽञ्जने न० हेमच०। ५नदीजातमात्रे त्रि० ६भीष्मे पु० "नदीज! कङ्कयवनारिकेतुः" भा०वि० १८अ०। "विदतर्यसत्तमसशेषपरिषदि नदीजधर्मजो" माघः। ७अग्निमन्थवृक्षे स्त्री राजनि० ८निम्बावृक्षभेदे पु० राजनि०।

नदीदोह पु० नदीतरणार्थं दोहः शाक०त०। नदीतरणाय आतरूपेण देये दोहे दोहकर्मणि दुग्धे।

नदीधर पु० नदीं धरति धृ-अच् ६त०। गङ्गाधरे शिवे।

नदीन पु० ६त०। १समुद्रे त्रिका० "कवित्वामृतनदी नदीनः पर्यन्ते परमपदलीनः प्रभवति" कर्पूरस्तव। २वरुणे च नशब्देन "सह सुपा" पा०स०। ३दीनभिन्ने त्रि०"रत्नैरलङ्करणभावमितैर्नदीनैः" उभयार्थे नैषधम्।

नदीनिष्पाव पु० नद्यां तत्समीपे जातः निष्पावः। नदीजे निष्पावरूपे धान्यभेदे राजनि०।

नदपति पु० ६त०। १समुद्रे २वरुणे च अपपतिशब्दे दृश्यम् "अथ नदीपतिं गच्छति अपां पतिरसीति" शत०ब्रा० ५।२।४।१० समुद्रोदकपदयोर्नौ "ध्रुवो मदुगुर्मतृस्त्वस्ते नदीपतये" यजु० २४।२४ अश्वमेधे घोडशावकाग्ये आलभ्यपशुदेवोक्तौ। नदीशनदीनाथादयोऽप्यत्र

नदीभव न०नद्यां भवति भू-अच् ७त०। १सैन्धवे लवणभेदे हेमच०। २नजीजातमात्रे त्रि०।

नदीमातृक त्रि० नदी मातेव पोषिकाऽस्य। नदीजलसम्भवव्रीहिपालिते देशे अमरः।

नदीमुख न०नदी मुखमिव निःसरणमार्गः। १नदीरूपे समुद्रस्य इदजलनिःसरणमार्गे "इदौ नदीमुखेनैव प्रस्थानं लवणाम्भसः" रघुः। २नदीनां जलनिर्गमद्वारे (वाहा) ख्याते पदार्थे च "इन्द्रकृष्टैर्वर्त्तयन्ति धान्यैर्यैः तु नदीमुखैः" भा०स० ५०अ०। [शब्दमाला।

नदीवङ्क पु० ६त०। नद्या वक्रभागे (बाँक) ख्याते पदार्थे

नदीवट पु०नद्यां तत्समीपे जातो वटः। वटीवृक्षे राजनि०

नदीष्ण त्रि० नद्यां स्नातं जानन्ति स्ना-क "निनदीभ्यां स्नातेः कौशले" पा० षत्वम्। नदीस्नानकुशले यस्यां यस्यां नद्यां यथावतरणीयं तज्ज्ञानयुक्ते पुरुषोत्तमः। "ततो नदीष्णान् पथिकान् गिरिज्ञान्" भट्टिः "आनाविनम्रादिषये नदीष्णान्" रघुः। [नदीज्ञे अमरः।

नदीसर्ज पु० नद्या सृज्यतेऽसौ सृज-कर्मणि अप्। अर्जुन-

नद्ध त्रि० नह-बन्धने कर्मणि क्त। बद्धे "सर्जूरीस्कन्धनद्धानाम्" रघुः। [रज्ज्वाम् अमरः।

नद्धी स्त्री नह्यतेऽनया नह-करणे ड्रन् ङीप्। चर्मनिर्मित-

नद्यादि पु० जातार्थे ठक्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा

"नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी काशपरी काशफरी खादिरी पूर्वनगरी पाठ्य माया शाला दार्वा सेतकी(वडवाया वृषे)"। "नद्यादिभ्योऽकः पा० नाडेयः इत्यादि।

नद्याम्र पु० नद्या आम्र इव। समष्टिलाटवृक्षे राजनि०।

नद्या(न्द्या)वर्त्तक पु० ज्योतिषोक्ते यात्रायोगभेदे "खराशिगे बुधे लग्ने स्थिते वा सुरवन्दिते। नद्या(न्द्या)वर्त्तकयोगोऽयं यात्रारिष्टार्थविद्विदः"। अन्योऽपि "भूसुते खोच्चगे लाभे मृगकुम्भगते यमे। नद्या(न्द्या)वर्त्तकयोगोऽयं रणे रिपुहणानलः"। ज्योतिषम्

नद्युत्सृष्ट त्रि० नद्या उत्सृष्टं स्थानम्। (चडा) इति ख्याते नदीजलत्यक्तभूभागे। तत्र स्वामित्वं निरूपितं विवादचिन्तामणिरत्नकरादौ यथा

"नद्युत्सृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः। अयोदयौ जीवनञ्च दैवराजवशाकृणाम्। तस्मात् सर्वेषु कार्येषु तत्कृतं न विचालयेत्" तेन यस्य भूमिसन्निकृष्टं तस्यैव तत्र स्वामित्वं नान्यस्येति बोध्यम्।

ननन्द स्त्री न नन्दति कृतायामपि सेवायां न तुष्यति नन्द-क्वन् "सह सुपा" पा०स०। भर्त्तृभगिन्याम् (ननद) "पिता माता ननन्दा वा श्वश्रूश्वशुरयातरः। जामाता दुहिता देवा न तथा नाहमे दश" इत्युक्तेः अस्य सर्वनामस्थाने परे तथा तत्स्वामावात् न वृद्धिः किन्तु गुणः। तेन ननन्दरौ ननन्दर इत्यादि। पृषो० दीर्घे ननान्दाप्यत्रार्थे "सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवेषु" ऋ०१०।८५।४६

नना स्त्री न नमति नम-ड "सह सुपा" पा०स०। १वाक्ये निघण्टुः। नम-बा० डु। २मातरि ३दुहितरि च स्त्री "उपत्र प्रजिघ्नी नना" ऋ० ६।११२।२ "नना माता दुहिता वा नमनक्रियायोग्यत्वात्। माता स्वस्वपत्यं प्रति स्तनपानादिना नमनशीला भवति। दुहिता वा शुश्रूषार्थम्" भा०।

ननु अव्य०नुद-डु। १प्रश्ने २अवधारणे ३अनुज्ञायाम् ४विनये ५आमन्त्रणे च अमरः। ६अनुनये विश्वः। ७विनियोगे ८परकृतौ ९अधिकारे १०सम्भ्रमे च मेदि०। ११आक्षेपे प्रत्युक्तौ १२वाक्यारम्भे च हेमच०। तत्र प्रश्ने "ननु गमिष्ये इत्यादि। अवधारणे "उपपन्नं ननु शिवम्" रघुः उपपन्नमेव। "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः "आमन्त्रणे (सम्बोधने) ननु मां प्रापय पत्युरन्तिकम्"

कुमा० (नतु हे वसन्त !) आत्मेमे "नतु प्रात्यहिकभोजनस्य कुञ्जरघोचवत् दुःखानिवर्त्तकत्वे कथं तत्र प्रवृत्तिस्तत्राह" सा०प्र०भा०।

ननुच अव्य० नतु+च+समा० द्व०। विरोधोक्तौ अमरः।

नन्त्व त्रि० नम-वा० कर्मणि त्व। नमनीये "यो नन्त्वान्यनमन्योजसोत" ऋ० २।२४।२ "नन्त्वानि नमनयोनि" भा०

नन्द पु० नन्द्-भावे घञ्। १हर्षे आनन्दे २तदात्मके परमेश्वरे च "आनन्दो नन्दनो नन्दः" विष्णुसं०। "सर्वाभिरुपपत्तिभिः सन्नन्दो नन्दः" भा०। नन्दति मेघवर्षणात् नन्द-अच्। ३मेघे शब्दरत्ना०। ४क्षत्रियभेदे "नव नन्दा भविष्यन्ति चाणक्यो वान् हनिष्यति" स्कन्दपु०। "महानन्दिसुतो राजन् ! शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चित् नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्राया ह्यधार्मिकाः। स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः। शासिष्यति महापद्मो द्वितीय इव भार्गवः। तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यन्ति महीं राजानश्च यतं समाः। नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ। स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति" भाग० १२।१।४ "नव नन्दान् नन्दं तत्पुत्रांश्चाष्टौ इत्येवं नव, प्रपन्नान् विश्वस्तान् विख्यातान् वा द्विजः कौटिल्यवात्स्यायनादिवर्ष्यवः चाणक्य उद्धरिष्यति उन्मूलयिष्यति" श्रीधरस्वामी विस्तरेण तत्कथा बृहत्कथायां द्रष्टव्या। तेषां सपुत्राणां नवसंख्यत्वेन तत्तुल्यसंख्याके ५नवसंख्यायुक्ते च "नन्दत्रिषड्लग्नभवर्क्षपुत्रव्यया इनार्द्धपट्टं स्वभोऽग्रम्" सी०ता० ६कुमारानुचरभेदे "दण्डो मेघप्रवाहश्च तथा नन्दोपनन्दकौ" भा० व० ४६अ०। ७भटङ्गभेदे "भटङ्गौ चाम विपुलौ दिव्यौ नन्दोपनन्दकौ" भा० द्रो० २२अ०। ८धृतराष्ट्रपुत्रभेदे "कर्णनामः पद्मनामस्तथा नन्दोपनन्दकौ" भा० आ० ६७ अ०। ९वसुदेवस्य मदिरायां जाते पुत्रभेदे "पौरवी रोहिणी भद्रा मदिरा रोचना इला। देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः। "वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्। सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च। पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन्। नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः" भाग० ९।२४।२४। १०क्रौञ्चद्वीपस्य वर्षपर्वतभेदे "तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपवर्हणो नन्दो नन्दनः सर्वतोभद्र इति" भाग० ५।२०।१५। तद्वर्षवर्णने ११वेणुभेदे सङ्गीतदामोदरः यथा "महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मानकृत्तुनिसम्मताः। दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः"। वसुनामक द्रोणावतारे व्रजस्थिते १२गोपभेदे "द्रोणो वसूनां प्रवरो धरया सह गोपया। करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह। जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिः स्यात् परमा लोके ययाञ्जोदुस्तरं तरेत्। अस्त्वित्युक्तः स एवेह व्रजे द्रोणो महायशाः। जज्ञे नन्द इति ख्यातो यशोदा सा धरा भवत्" भाग० १०।८अ० १३यज्ञेश्वरानुचरभेदे "दण्डो मटहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम्। सुनन्दनन्दाद्यनुगैर्वृतं सदा मटण्डन् प्रमेदे प्रयतः कृताञ्जलिः" भाग० ४।७।२२।

नन्दक पु० नन्दयति नन्द-ण्वुल्। १विष्णोः खड्गे अमरः "नाम्नापि तस्यैव स नन्दकोऽभूत्" माघः। २भेके त्रिका०। ३सन्तोषकारके ५कुलपालके च त्रि० स्वार्थे क। ६नन्दगोपे पु० ७नागभेदे "आर्य्यको नन्दकश्चैव तथा कालपोतकौ" भा०उ० १०२अ०। नागोक्तौ ८अग्निमाले च "गान्धर्वमस्त्रं दयितमसिरत्नं च नन्दकम्" हरिवं० २१४अ०। १०कुमारानुचरभेदे "रणोत्कटः प्रहासश्च श्वेतसिंहश्च नन्दकः" भा०उ० ४६अ०। ११धार्त्तराष्ट्रपुत्रभेदे "नन्दको वाहुशाली च दुष्कर्णो विकटस्तथा" भा०आ० १८६अ० तत्पुत्रोक्तौ।

नन्दकि नन्द-इन् वा० कुक्। पिप्पल्यां शब्दच०।

नन्दकिन् पु० नन्दको विद्यामयोऽसिरस्यास्य इनि। विष्णौ "शङ्खभृत् नन्दकी चक्री शार्ङ्गधन्वा गदाधरः" विष्णुसं० "विद्यामयो नन्दकाख्योऽसिरस्यास्य" भा०। [न्दच०।

नन्दगोपिता स्त्री नन्दाय हर्षाय गोपिता। रात्रायां श-

नन्दथु पु० नन्द-अथुच्। आनन्दे अमरः। "यस्यासौ तस्य नन्दथुः" भट्टिः।

नन्दन पु० नन्दयति नन्दि-ल्यु। १सुते २दुहितरि स्त्री ३भेके पुंस्त्री शब्दरत्ना०। ४इन्द्रस्योद्याने न० "अमित्राञ्छदपातानां क्रियन्ते नन्दनद्रुमाः" कुमा०। ५हर्षके त्रि०। ६विष्णौ पु० "आनन्दोनन्दनोनन्दः" विष्णुसं०। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुतेस्तस्य नन्दहेतुत्वान्नन्दनत्वम् "शिवतरगैस्तु नन्दनमिदं नजौ भजौ रद्वयम्" छ०टी० उक्ते ७अष्टादशाक्षरपादके

छन्दोभेदे । "बभूव भावेषु दिलीपनन्दनः" रघुः रघुनन्दनः यदुनन्दन इत्यादि "पुरीमवस्कन्द लुनीहि नन्दनम्" माघः ८मन्वादेवे "नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः" भा०अनु०१७अ० शिवसहस्रनामोक्तौ । ६कुमारानुचरभेदे "वर्द्धनं नन्दनञ्चैव सर्वविद्याविशारदौ । स्कन्दाय ददतुः प्रीतावाश्विनौ भिषजां वरौ" भा०व०४५अ० । १०पर्वतभेदे "तीरे तु चन्द्रकुण्डस्य नन्दनो नाम वै गिरिः । तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः । न्यग्रोधमूलं समासीनो सर्वदेवेश्वरो हरिः । सेवितुं सिद्धयोगानीं सततं वर्तते नतः । चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः । प्रतिदर्शं तथा चन्द्रं प्रदक्षिणयति त्रिधा । चन्द्रकुण्डजले स्नात्वा समारुह्य च नन्दनम् । आराध्य शक्रं लोकेशं महाफलमवाप्नुयात्" कालिकापु० ८१अ० । ११षष्टिवर्षमध्ये षड्विंशतिमे वत्सरे । "सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम् । बहुक्षीरास्तथा गावो नन्दन्ते नन्दने प्रिये !" भविष्यपु० ।

नन्दनज न० नन्दनवने जायते जन–ड । १हरिचन्दने राजनि० । २हर्षजातमात्रे त्रि० ३श्रीकृष्णे पु० ।

नन्दनन्दन पु० नन्दस्य नन्दनः आनन्दजनकः । श्रीकृष्णे वासुदेवे तस्य वासुदेवत्वेऽपि कंसभीत्या नन्दसुतां योगमायामानीय तत्स्थले रात्रौ निगूढतया कृष्णस्य स्थापनेन तस्य तत्पुत्राभिमानात् तन्नन्दनत्वम् । तत्कथा भाग० १०।२ अ० यथा "ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् । यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नन्दजायया । तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेषु च शायितेष्वथ । द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कवाटायसकीलशृङ्खलैः । कृष्णं वाहे वसुदेव आगते स्वयं व्यशीर्यन्त यथा तमो रवेः । ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवारयन् फणैः । मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयौघजवोर्मिफेनिला । भयानकावर्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः । नन्दव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्तानुपलभ्य निद्रया । शिशुं यशोदाशयने निधाय तत्–सुतां समादाय पुनर्गृहान्गात् । देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् । प्रतिमुच्य पदोर्लौहमास्ते पूर्ववदावृतः । यशोदा नन्दपत्नी च जातं पुत्रमबुध्यत । न तद्विदुः परिश्रान्ता निद्रयापगतस्मृतिः" नन्दपुत्रनन्दसुतादयोऽप्यत्र । २योगमायायां स्त्री ।

नन्दनन्दिनी स्त्री ६त० । दुर्गायां योगमायायां तस्यास्ततः उत्पत्तिकथा हरिवं०५८अ० "तान्होवाच ततो निद्रां विष्णुः सत्यपराक्रमः । गच्छ निद्रे ! मयोत्सृष्टा देवकीभवनान्तिकम् । इमान् प्राणेश्वरान् गृह्य षड्गर्भांस्तान् देहिनः । षट्सु गर्भेषु देवक्या योजयस्व यथाक्रमम् । जातेष्वेतेषु गर्भेषु नीतेषु च यमक्षयम् । कंसस्य विफले यत्ने देवक्याः सफले क्रमे । प्रसादं ते करिष्यामि मत्प्रभावसमं भुवि । येन सर्वस्य लोकस्य देवि ! देवी भविष्यसि । सप्तमो देवकीगर्भो योऽयं सौम्यो ममाग्रजः । स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम् । सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा । भविष्यत्यग्रजो भ्राता मम शीतांशुदर्शनः । पतितो देवकीगर्भः सप्तमोऽयं भयादिति । अष्टमे भवि गर्भस्ते कंसो यत्नं करिष्यति । या तु सा नन्दगोपस्य वसुदेवानुगस्य वै । यशोदा नाम भद्रन्ते भार्या गोपकुलोद्वहा । तस्यास्त्वं नवमो गर्भः कुलेऽस्माकं भविष्यसि । नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ । अहन्यभिजिते योगे निशायां यौवने स्थिते । अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखम् । अष्टमस्य तु मासस्य लाताबावां ततः समम् । प्राप्स्यावो गर्भव्यत्यासं प्राप्ते कंसस्य शासने । अहं यशोदां यास्यामि त्वं देवि ! भज देवकीम् । आवयोर्गर्भव्यत्यासात् कंसो गच्छतु मूढताम् । ततस्त्वां गृह्य चरणे शिलायां निरक्षिप्यति । निरस्यमाना गगने स्थानं प्राप्स्यसि शाश्वतम्" ।

नन्दनमाला स्त्री नित्यकर्म० । मालाभेदे "भूप ! नन्दनमालान्तु कुरुते कृष्णवेश्मनि । देवकन्यावृतैर्बद्धैः सेव्यते सुरनायकैः" ।

नन्दन्त पु० नन्दत्यनेन नन्द–झच् । पुत्रे उज्ज्वलद० ।

नन्दपाल पु० नन्दं हर्षं पालयति पालि–अण् उपस० । वरुणे शब्दरत्ना० । [लोपः । पुत्रे उणा० ।

नन्दयन्त पु० नन्दि–झच् णिलोपे अन्तपर्युदासात् णि-

नन्दा स्त्री नन्दयति नन्दि–अच् । १दुर्गामूर्त्तिभेदे "यथागतास्तथा जन्मुर्देवीं स्थाप्य हिमे गिरौ । संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दा तु या भवेत्" वराहपु० "नन्दते सुरलोकेषु नन्दने वसतेऽथ वा । हिमाचले महापुण्ये नन्दा देवी ततः स्मृता" देवीपु० । २अलिझरे (नाँदा) ख्याते पदार्थे पञ्चयोः प्रतिपदेकादशीषष्ठीरूपे ३तिथिभेदे च मेदि० । "नन्दा भद्रा जया रिक्ता पूर्णा च प्रतिपत्

क्रमात्" ज्यो॰त॰ "नन्दामन्दमहीजकाव्यदिवसे" ज्यो॰त॰ नयाङ्गे कालवर्जने। "आदित्यभौमयोर्नन्दा" ज्यो॰त॰ पापयोगोक्तौ। ४ननान्दरि शब्दर॰। ५सम्पदि शब्दार्थचि॰ ६संक्रान्तिभेदे "स्थिरे जीववारे तु नन्देति संज्ञा तदा विप्रवर्गः सुखी मासमेकम्" सु॰चि॰। रोहिण्युत्तरात्रयं स्थिरं तस्य गुरुवारयोगे रविसंक्रान्तिः सा विप्राणां सुखाय। अत्र वारनक्षत्रोभययोगे घोरादिसंक्रान्तीनां फलं सम्पूर्णं केवलवारवशेन केवलनक्षत्रवशेनापि घोरादिसंज्ञाः सिद्ध्यन्ति तत्र फलं न सम्पूर्णम्। उक्तञ्च निर्णयामृते रत्नमालायाञ्च "घोरा रवौ ध्वाङ्क्षामृतद्युतौ च संक्रान्तिरारे च महोदरी स्यात्। मन्दाकिनी ज्ञे च गुरौ च नन्दा भिन्ना कवौ राक्षसिकाऽर्कपुत्रे" "उग्रक्षिप्रचरैर्भौम ध्रुवमिश्रर्क्षदारुणैः। क्षत्रैः संक्रान्तिरर्कस्य घोराद्याः क्रमशो मता" इति।

७नन्दाश्रमतीर्थे धर्मपुत्रहर्षस्य च पत्न्याञ्च "नन्दा तु भार्या हर्षस्य यासु लोकाः प्रतिष्ठिताः" भा॰ आ॰ ६६अ॰। [२योगमायायां स्त्री।

नन्दात्मज पु॰६त॰। १श्रीकृष्णे वासुदेवे यशोदागर्भजातायां

नन्दापुराण नन्दां देवीमधिकृत्य पुराणम्। नान्दे उपपुराणभेदे "तृतीयं नान्दसंज्ञितं कुमारेण तु भाषितम्" कूर्मपु॰ उपपुराणोक्तौ। नन्दामधिकृत्य कृतो ग्रन्थः। अण्। नान्दम् "नन्दाया यत्र माहात्म्यं कार्त्तिकेन तु भाषितम्। नन्दापुराणं तल्लोके नन्दाख्यमिति कीर्त्यते" मत्स्यपु॰। [तथोलूकाश्रमे शुभे" भा॰उ॰ १८७अ॰।

नन्दाश्रम न॰न॰ ६त॰। तीर्थभेदे "नन्दाश्रमे महाराज!

नन्दि पु॰नन्द्-इन्। १विष्णौ परमेश्वरे "स्वतः स्वाङ्गः यतानन्दो नन्दिर्ज्योतिर्गणेश्वरः" विष्णुसं॰ परमानन्दविग्रहत्वात्तस्य नन्दित्वम् भाष्ये स्थितम्। २नन्दिकेश्वरे महादेवपार्श्वचरे च। ३द्यूताङ्के पु॰न॰ मेदि॰। ४गन्धर्वभेदे "युगपस्तृणपः कार्ष्णिर्नन्दिचित्ररथस्तथा" भा॰आ॰१२३ अ॰गन्धर्वोक्तौ। ५महादेवे "नन्दिर्नन्दिचरो हरः" भा॰ अनु॰१७अ॰ शिवसहस्रनामोक्तौ। भावे इन्। ६आनन्दे "कौशल्यानन्दिवर्द्धनो रामः" महानाटकम्। आनन्दे स्त्रीत्वमपि। "यतो मे भूयसी नन्दिर्यदेवमनुपश्यसि" भा॰उ॰१३४अ॰। तत्र वा ङीप्। नन्दीवृक्षः

नन्दिक पु॰नन्दो हेतुतयाऽस्त्यस्य ठन्। १नन्दीवृक्षे शब्दर॰ नन्दि+स्वार्थे क। २आनन्दे। ३इन्द्रक्रीडास्थाने ४अभिज्ञरे च (नाँदा) शब्दर॰ नन्दा+स्वार्थे क अत इत्वम्। प्रतिपदादिनन्दातिथौ स्त्री "कन्यासिंहे रवौ शक्र शुक्लाभारभ्य नन्दिकाम्" ति॰त॰

नन्दिकावर्त्त पु॰ मणिभेदे। "कुरुवकद्रुमा वज्रं वैदूर्यं नन्दिकावर्त्तं" बृ॰सं॰२९अ॰ सहार्थे तृतीया।

नन्दिकुण्ड न॰ नन्दिकृतं कुण्डम्। तीर्थभेदे "कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम्। अभ्येत्य योजनशताद् भ्रुणहा विप्रमुच्यते" भा॰अनु॰ २५अ॰।

नन्दिकेश्वर पु॰नन्दि+स्वार्थे क नन्दिक ईश्वर इव। १शिवपार्श्वचरे नन्दिनि २तेन प्रोक्ते शिवधर्माख्ये उपपुराणभेदे "चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्" कूर्मपु॰। उपपुराणोक्तौ "नन्दिकेश्वरयुग्मञ्च नन्दिकेश्वरभाषितम्" इति तत्र पाठान्तरम्।

नन्दिग्राम पु॰ ग्रामभेदे रामस्य वनवासे यत्र भरतेन तत्पादुके गृहीत्वा राज्यं कृतं यथाह भा॰व॰ २७६ अ॰ "विसर्जितः सः (भरतः) रामेण पितृवचनकारिणा। नन्दिग्रामेऽकरोद्राज्यं पुरःकृत्यास्य पादुके" स च इदानीं (दौलताबाद) इति प्रसिद्धः। "नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्" रघुः।

नन्दिघोष पु॰ नन्दिः हर्षजनको घोषोऽस्य। १अर्जुनरथे कर्म॰। २आनन्दयुक्तघोषे च मेदि॰। बहु॰। ३हर्षजनकघोषयुक्तमात्रे त्रि॰। "अष्टादशे यो दिवसे प्राश्नीयादेकभोजनम्। सदा द्वादश मासान् वै सप्त लोकान् स पश्यति। रथैः स नन्दिघोषैश्च पृष्ठतः सोऽनुगम्यते" भा॰ अनु॰ १०७ अ॰।

नन्दितरु पु॰ नित्यक॰। धववृक्षे भावप्र॰।

नन्दितूर्य्य न॰ नन्दिप्रियं तूर्य्यम्। वाद्यभेदे "नन्दितूर्य्यास्यवाद्यन्त तुष्टुवुश्च जनार्दनम्" हरिवं॰ ९॰ अ॰।

नन्दिन् त्रि॰ नन्दते नन्द्-णिनि। १हर्षयुक्ते २शालङ्कायने शिलादिपुत्रे च शिवद्वारपाले पु॰ ३सुनिभेदे नन्दीश्वरशब्दे दृश्यम्। स च शालङ्कायनमुनिपुत्रः यथा "अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे!। तपतस्तस्य तु मुनेरीश्वरेण समं सुतम्। तं प्राप्स्यामि परं भावं ज्ञात्वा देवो महेश्वरः। सुन्दरन्तु परं रूपं धृत्वा दृष्टिसुखावहम्। शालङ्कायनपुत्रत्वं योगमायामुपाश्रितः। प्राप्तोऽपि तं न जानाति दक्षिणं पार्श्वमास्थितम्। मायायोगबलोपेतस्त्रयो वै शूलपाणिधृक्। रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः। सत्यं न ज्ञायते जातं तस्यैवाराधने स्थितः। अथ नन्दी प्रहस्याह महादेवा॰

त्वया मुनिम्। उत्तिष्ठ मुनिशार्दूल! सफलस्ते मनोरथः। त्वद्वीर्याद्भाग्याज्जातोऽस्मि पुत्रस्ते शाधि मां प्रभो!। त्वया तपः समारब्धमीश्वरेण समं सुतम् प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन। विचार्य्येति तवाहं वै जातोऽस्मि स्वयमेव हि" वराहपु०। स एव कल्पान्तरे शिवांशजः शिलादमुनेः पुत्रः। यथा "जजाप दृढमनिशं यत्र नन्दी महातपाः। प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक्। दत्त्वा चात्मसमानत्वं मृत्युवञ्चनमेव च। अमूर्तत्वं स धर्मात्मा शिलादो नाम धर्मवित्। आराधयन् महादेवं पुत्रार्थं दृढमध्वजम्। तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत्। सर्वः सोमोऽथ विधृतो वरदोऽस्मीत्यभाषत। स वव्रे वरमीशानं वरेण्यं गिरिजापतिम्। अयोनिजं मृत्युहीनं त्वया चैवोमया समम्। तथास्त्वित्याह भगवान् देव्या सह महेश्वरः। पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः। ततो वियच्चुः खां भूमिं शिलादो धर्मवित्तमः। चकर्ष लाङ्गलेनोर्वीं भित्त्वाऽदृश्यत शोभनः। संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव। रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम्। कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा। शिलादं तात तातेति प्राह नन्दी पुनःपुनः। तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे। मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः" कूर्मपु० ४०अ०। "कृताष्टहारमतोऽथ नन्दी" कुमा०। ३शिवगणविशेषे। स च त्रिविधः यथा "आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः। सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः" वह्निपु०। ४मर्दभाण्डवृक्षे ५धवृक्षे च मेदि०। ६विष्णौ च "भगवान् भगहा नन्दी वनमाली हलायुधः" विष्णुस०. आनन्दीति पाठान्तरम्।

नन्दिनी स्त्री नन्द्-णिनि ङीप्। १दुर्गायां २गङ्गायां ३नन्दरि ४वसिष्ठधेन्वाञ्च मेदि०। ५रेणुकागन्धद्रव्ये राजनि०। ६कन्यायां च "नन्दगोपस्य नन्दिनी" हरिवं० वसिष्ठधेनुश्च सुरभिकन्या। "सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः। आराधय सपत्नीकः प्रीता कामदुघा हि सा। इति वादिन एवास्य होतुराहुतिसाधनम्। अनिन्द्या नन्दिनी नाम धेनुराहृते वनात्" रघुः। "इह नन्दिनीसजसैर्गुरुयुक्तैः" छ०र०टी० उक्ते ७त्रयोदशाक्षरपादके वर्णवृत्तभेदे

वसिष्ठधेन्वा प्रभावो रामा० बालका० उक्तो, यथा "युक्तःपरमहर्षेश्च वशिष्ठमिदमब्रवीत्। गवां शतसहस्रं च दीयतां शबला मम। एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः। विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम्। कारणैर्बहुभी राजन् दास्ये नन्दिनीं तव। कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः। ततोऽस्य शबलां राजा विश्वामित्रस्तदाहरत्। तस्याहम्भारवाज्जाताः काम्बोजा रविसन्निभाः। अवसन्नाभिसंजाताः पह्लवाः शस्त्रपाणयः। योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा। रोमकूपेषु चम्लेच्छास्तथा राम! किरातकाः। तैस्तन्निरुद्धितं सैन्यं विश्वामित्रस्य तत्क्षणात्"। व्याडिमातरि च।

नन्दिनीतनय पु० ६त०। व्याडिसनौ हेमा०। व्याडिश्च उपवर्षमुनेः शिष्यभेदः तत्कथा कथासरित्सागरे दृश्या। ततो दिङ्मात्रमत्र प्रदर्श्यते। "नन्दराजराज्यकाले उपवर्षपण्डितस्य कात्यायनापरपर्य्यायो वररुचिव्याडिः पाणिनिश्चेति त्रयो मुख्याश्छात्रा बभूवुः। तेषु पाणिनिरल्पबुद्धितया सकलशास्त्रपारिभिर्वादे पराजितो निर्वेदमापन्नो महादेवमाराध्य तत्प्रसादादधीत्य च कृतविद्यस्तत्प्रसादात् कृतपाठगणपाठधातुपाठलिङ्गानुशासनात्मकं चतुर्धा विभक्तं व्याकरणागमम् विदधे। अथ तद्ग्रन्थकौशलमुपलभ्य वररुचिना तदवशिष्टांशपरिपूरणेन संक्षेपार्थविवरणरूपं वार्त्तिकं चक्रे। व्याडिना च तत्तद्वार्त्तिकेषु न्यायप्रदर्शनार्थं लक्षश्लोकात्मकः संग्रहाभिधो ग्रन्थो निरमायि"। स च शोणविशेषकर्त्ता। नन्दिनीसुतादयोऽप्यत्र।

नन्दिपुराण न० नन्दिना प्रोक्तं पुराणम्। उपपुराणभेदे नन्दिकेश्वरग्रन्थे दृश्यम्।

नन्दि(न्दी)मुख पुं स्त्री पक्षिभेदे स्त्रियां ङीप्। तल्लक्षणं "स्थूला कठोरा दृढा च यस्याश्चञ्चू परि स्थिता। गुटिका चक्षुषोर्यस्य सा नन्दि(न्दी)मुखीति सा" पुंसोऽपि तथा लक्षणम्। "नन्दिमुखसुखानि मसूराकृतिभिः कीलैरवबद्धानि" सुश्रुतः। नन्द्याम् आनन्दे सुखमस्याः ङीप् दीर्घमध्यः। २तन्त्रायां हेमच० ३महादेवे पु० "नन्दीसुखः भीमसुखः सुखदो दुर्मुखोऽसुखः" भा०शा० २८६ अ०।

नन्दिवर्द्धन पु० नन्दिमानन्दं वर्द्धयति वृध-णिच-ल्यु। १शिवे पु० २पर्वतान्ते च मेदि०। ३मित्रे शब्दर०। आनन्दवर्द्धकमात्रे त्रि०।

नन्दिवारलक पुं॰स्त्री॰ साहुद्रे मत्स्यभेदे स्त्रियां ङीष्। "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिवारक नन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः साहुद्राः" सुश्रुतः।

नन्दि(न्दी)वृक्ष पु॰ ६त॰। सन्तोषहेतौ कोङ्कणदेशप्रसिद्धे सुगन्धिवृक्षभेदे। "नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः। कटुपाकरसो ग्राही विषपित्तकफास्रनुत्" राजनि॰। २अश्वत्थाकारे क्षीरयुक्ते (तुँद)ख्याते वृक्षभेदे शाम्बीराख्यवृक्षे शब्दार्थ॰। ४मेघशृङ्गीवृक्षे रत्नमा॰ ५स्थाल्लीवृक्षे भावप्र॰

नन्दिवेग पु॰ कलियुगीये पुरुषाधमवृषभेदे "समस्य नन्दिवेगानामित्येते कुलपांसनाः। युष्मान्ते कृष्ण! संभूताः कुलेषु पुरुषाधमाः" भा॰उ॰ ७३ अ॰।

नन्दिषेण पु॰ ब्रह्मदत्ते कुमारानुचरभेदे। "तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातवंहसः। कामवीर्यधरान् सिद्धान् महापारिषदान् प्रभुः। नन्दिषेणं लोहिताक्षं घण्टाकर्णञ्च सम्मतम्। चतुर्वर्मसानुचरं ख्यातं कुसुदमालिनम्" भा॰ग॰ ४६ अ॰।

नन्दीश पु॰ ६त॰। १शिवे हेमच॰। नन्दी रीश इव। २शिवपार्श्वचराधिपभेदे। ३तालभेदे स च "सिंहनन्दननन्दीशचन्द्रबिम्बद्वितीयकाः" इत्युद्दिष्ट सङ्गीत॰ उक्तितो यथा "गोलघुर्गौलघुः प्रुतस्तालो नन्दीश्वरे मताः"।

नन्दीश्वर पु॰ ६त॰। १शिवे २तालभेदे सङ्गीतदा॰। ३शिवगणाधिपभेदे पु॰ तस्य तथात्वकथा च वराहपु॰ उक्ता यथा "ततस्तेतायुगे काले नन्दी नाम महामुनिः। आराधयिषुः शर्वं तपस्तेपे सुदारुणम्। ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः। उवाच च वचः साक्षात्तमृषिं वरदः प्रभुः। वरान् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने!। तांस्ते सर्वान् प्रदास्यामि दुर्लभानपि मारिष!। इत्युक्तोऽसौ भगवता शर्वेण मुनिपुङ्गवः। प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना। यदि प्रीतोऽसि भगवन्! अनुक्रोशतया मम। अनुग्राह्यो ह्यहं देव! त्वयावश्यं सुराधिप!। यथाऽनन्या भवेद्भक्तिस्त्वयि नित्यं महेश्वर!। तथाहं भक्तिमिच्छामि सर्वभूताशये त्वयि। एतत्तु वचनं श्रुत्वा ननृदितः स महेश्वरः। प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा। सद्रूपधारी मत्तेजा स्त्रग्वी सर्वगुणोत्तमः। भविष्यसि न सन्देहो देवदानवपूजितः। अनेनैव शरीरेण जरामरणवर्जितः। दुष्प्राप्यमेवमवाप्या ते देवैर्गणेश्वरी गतिः। पार्षदानां वरिष्ठश्च मामकानां द्विजोत्तम!। नन्दीश्वर इति ख्यातो भविष्यसि न संशयः। अद्य प्रभृति देवाग्र्य! देवकार्येषु सर्वतः। त्वं प्रभुर्भविता लोके मत्प्रसादानुसनीश्वर!। त्वामेवाभ्यर्चयिष्यन्ति सर्वभूतानि सर्वतः। मत्तः समभिवाञ्छन्तः प्रसादं पार्षदाधिप!। यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु। नावयोरन्तरं किञ्चिदन्धकानिलयोरिव। द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप!। वामेन विभुना चापि महाकालेन सर्वदा" वराहपु॰।

नन्दीसरस् न॰ इन्द्रसरोवरे शब्दमा॰।

नन्द्य नन्द आनन्दे कण्ड्वादेराकृतिगणत्वात् यक् भ्वा॰पर॰ सेट्। नन्द्यति अनन्दी(न्दी)त्।

नन्द्यादि पु॰ ल्युप्रत्ययान्ततया पा॰ग॰सू॰पठिते शब्दगणे यथा "नन्दनः वाशनः मदनः दूषणः साधनः वर्द्धनः शोभनः रोचनः (सहितपिदमः संज्ञायाम्)। सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः सङ्घर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविलासनः कुसुदमनः शत्रुदमनः।

नन्द्यावर्त्त पु॰ नन्दी आवर्त्तो यत्र। "नन्द्यावर्त्तमलिन्दैः शाखाकुड्यां प्रदक्षिणान्नगतैः। द्वारं पश्चिममलिन् विहाय शेषाणि कार्याणि" बृ॰सं॰५३अ॰उक्ते १गृहभेदे भरतभृतसाङ्गवाक्ये तु तस्यान्यथा लक्षणमुक्तं यथा "दक्षिणानुगतालिन्दत्रयं यत् पश्चिमासुखम्। पूजनीयोत्तरोच्चायं नन्द्यावर्त्तं वदन्ति तत्"। तेन पश्चिमद्वारशून्यत्वे विकल्पः। २नगरवृक्षे विश्वः। ३मत्स्यभेदे राजवल्लभः। ४आलायोगभेदे नन्द्यावर्त्तकशब्दे दृश्यम्। "स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान्" भा॰द्रो॰८२अ॰ हस्तिदन्तस्य ५तदाकारच्छेदे च "दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम्" इत्युपक्रमे "श्रीवत्सवर्द्धमानच्छत्रध्वजचामरानुरूपेषु। छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि। प्रहरणसदृशेषु जयो नन्द्यावर्त्ते प्रनष्टदेशाग्निः" बृ॰सं॰ ९४अ॰

नपराजित् पु॰ न पराजीयते परा+जि—कर्मणि क्विप् नञ्शब्देन "सह सुपा" पा॰स॰। महादेवे "विलोहिताय धूम्राय व्याध्याय नपराजिते" भा॰द्रो॰ ८०अ॰।

नपात् त्रि॰ न। पाति पा—रक्षणे शतृ नञ्जाडित्यादिना पा॰ नञः प्रकृतिभावः। १अरक्षके "नपातो दुर्बहस्य मे"

ऋ०८.६५।१२ "नपातो अरक्षकस्य" भा०। नपात् यत्नः इति सि० कौ० तेन खादौ नपानृ नपानौ इत्यादि रूपम्। न पातयति पाति—क्विप्। २अपातके च अस्य नपात् नपातौ नपातः इति भेदः। तनूनपात् तनूरक्षकः। ३पुत्रे अपत्ये निरु०। तस्य पुन्नामनरकनिरासकत्वेन पातनाभावहेतुत्वात् तथात्वम्। "मनोर्नपातो अपसो दधन्विरे" ऋ०२।६०।२ "मनोः नपातः पुत्राः" माधवः "ऋभीणां नपादृष्णोतायं यजमानः" यजु० २१।६१ "हे ऋभीणां नपात् पुत्रः" वेददी०।

नपात पु० नास्ति पातो यत्र। देवयाने पथि "अवित्सि नपातं विक्रमणं च विष्णोः" यजु० १९।५६ "वेवेष्टि विष्णुः तस्य विष्णोः व्यापनशीलस्य यज्ञस्य "यज्ञो वै विष्णुरिति" श्रुतेः तस्य नपातं विक्रमणं च अवित्सि वेद्मि। नास्ति पातो यत्र स नपातो देवयानपथः यत्र गतानां पातो नास्ति, विविधं क्रमणं गमनागमनं यत्र स विक्रमणः पितृयानपथः यत्र गतानां पुनर्भोगान्ते पतनम्। यज्ञसम्बन्धिनौ देवयानपितृयानौ पन्थानौ वेत्सीत्यर्थः" वेददी०

नपुंसक पु०न० न स्त्रीपुंसौ नञ्जाडित्यादि पा० स्त्रीपुंसयोः पुंसकभावः नि० नञः प्रकृतिभावश्च। क्लीबे क्लीवशब्दे २३४५ पृ० द्रष्टव्यम्। "नपुंसको भवतीति" महाभाष्यप्रयोगात् अस्य पुंस्त्वमपि। लिङ्गस्य शब्दगतत्वेऽपि शब्दार्थे तद्व्यवहारस्तु अभेदारोपात् तदेतत् शब्दार्थरत्नेऽभिः समर्थितं यथा

"लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मकोधर्म एव तद्विशेषश्च पुंनपुंसकत्वादिः। तथा हि सर्वेषां त्रिगुणप्रकृतिकार्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु विशेष इति कल्प्यते। स च विशेषः शास्त्रे इत्यभ्यधायि। विकृतसत्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं, सत्वस्याधिक्ये पुंस्त्वम्, रज आधिक्ये स्त्रीत्वमिति। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् व्यवति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न कोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते" इति हर्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नोचेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽयभासते" इति हर्युक्तेश्च शब्दानां तदर्थतावगतेः। तथा प्रातिपदिकार्थः। अभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तश्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा० सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गानन्वयापत्तेर्व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वादुदृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानापूर्वीकत्वेनैव। वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्। अर्थरूपनपुंसकस्योत्पत्तौ कारणं या०ति०उक्तं यथा "बिन्दुरेको विशेद्गर्भसुभयात्मा क्रमादसौ। रजोऽधिको भवेन्नारी भवेद्रेतोऽधिकः पुमान्। उभयोः समतायां तु नपुंसकमिति स्मृतम्"। "सुडनपुंसकस्य" पा० "नपुंसकमनपुंसकेनेत्यादि" पा०। तत्र पुंसि "नैव स्त्री न पुमानेष न चैवायं नपुंसकः" श्वेताश्व०। क्लीबे "न यामनाः कुब्जकुब्जा न खञ्जाः नान्धो जडः स्त्री न नपुंसकश्च" भा०या०८२अ०।

नपुमस् पु०न पुमान् आर्षे न नपुंसकभावः। क्लीबे "हतास्म्यहं कृतानेन नपुंसा वीरमानिना" भाग० ९।१४।२०

नप्तृ न० न पतत्यनेन न+पत—तृच् नप्तृनेष्टृत्वष्टृ०पा०नि०। १पौत्रे २दौहित्रे च (नाति) हेमच०। "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते" इति "दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत्" मनूक्तेश्च तयोः उद्धारकत्वात् नप्तृत्वम्। "यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु। नत्वेव तु कृतोऽधर्मः कर्त्तुर्भवति निष्फलः" मनुः। ३कन्यापुत्रयोः कन्यायां स्त्री अमरः ङीप्।

नप्तृका स्त्री नप्तृ—संज्ञायां कन्। विष्किरे धुङ्कारकारिणीति प्रसिद्धे पक्षिभेदे "लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकायातीक" इत्याद्युपक्रमे विष्किरा लघवः शीतमधुराः कषाया दोषशमनाश्च" सुश्रु०।

नभ हिंसायां निघण्टुः भ्वा०आत्म० सक० सेट्। नभते अनभिष्ट नेभे। णभ हिंसे इत्यस्य णोपदेशत्वात् सतिनिमित्ते णत्वम् नास्तीति भेदः। तत्र धातौ आर्षेलङ् इत्यणुत्वम् तस्य अनुदात्तेत्त्वेन आत्मनेपदित्वात्।

नभ त्रि०नभ—हिंसायां पचा०अच्। १हिंसके २आवरणे नासि पु० शब्दर०। तस्य दृष्ट्या कीटादिहिंसकत्वात् तथात्वम्। ३आकाशे न० नभोकषशब्दे द्रष्टव्यम्। हिंसितसर्वप्राणिनां तेनैव गमनात्तस्य तथात्वम्। चाक्षुषमन्वन्तरे ४सप्तर्षिभेदे

"भृगुर्नभो विवस्वांश्च" हरिवं० ७अ०चाक्षुषमन्वन्तरोक्तौ। स्वारोचिषमनोः ५पुत्रभेदे "प्रथितश्च नभस्यश्च नभ ऊर्जस्तथैव च" हरिवं० ७अ० स्वारोचिषमन्वन्तरोक्तौ। रामवंश्ये राजभेदे "निषधस्य नभः पुत्रो नभः पुत्रो नभस्यतु" हरिवं० रामवंश्योक्तौ।

नभःक्रान्तिन् पु० नभः क्रान्तमनेन इनि। सिंहे शब्दमा०

नभःप्राण पु० नभसः प्राण इव। पवने त्रिका०।

नभःसद् पु० नभसि सीदति सद्-क्विप् ७त०। १देवे २खगादौ च। वा विसर्गस्य सत्वे नभस्सदुभयथत्र।

नभःसरित् स्त्री ६त०। गङ्गायां त्रिका० वा विसर्गस्य सत्वे नभस्सरिदप्यत्र।

नभःस्थल पु० नभःस्थलमिव यस्य। महादेवे "ऊर्द्ध्वरेता ऊर्द्ध्वलिङ्ग ऊर्द्ध्वायी नभःस्थलः" भा०अनु०१७अ० शिवनामोक्तौ। शरपरे खरि वा विसर्गलोपे नभस्थलोऽप्यत्र।

नभःस्थित त्रि०७त०। १गगनस्थिते तारागृहादौ २नरकभेदे हेमच०। वा विसर्गलोपे नभस्थितोऽप्यत्र।

नभःस्पृश् त्रि० नभःस्पृशति स्पृश-क्विन्। गगनस्पर्शिनि। वा विसर्गलोपे नभस्पृगप्यत्रार्थे। क्विन्नन्तत्वात् पदत्वे कुत्वम्। नभःस्पृक्। "भवन्ति ज्वलिता वृक्षाः कीर्त्तयश्च नभस्पृशः" कामन्द०। क। नभःस्पृशोऽप्यत्र। "नभःस्पृशैर्महावीरैः परिक्षिप्तं महावनम्" भा० द्रो०५अ०

नभग पु०वैवस्वतमनोः १पुत्रभेदे "इक्ष्वाकोर्नभगश्चैव धृष्टः गयोतिरेव च" भा०८।१५२ वैवस्वतवंशोक्तौ। २गगनगे त्रि० नास्तिभगो यस्य। ३भाग्यहीने त्रि०।

नभनु त्रि०नभ-हिंसायां वा०अनु। १हिंसके वेदे स्त्रियामूङ् "नभनू प्राप्नुवो नभन्वः" ऋ०४।१९।२। नभन्वः हिंसिकाः भन-वा० अनु पृषो०। २शब्दकारके उदके पु० निघण्टुः "पर्वतस्य नभनूँरचुच्यवुः" ऋ० ६।५९।७ "नभनून् भवते शब्दकर्मणः नभ्राडितिवत् नभनवः उदकानि" भा० दीर्घान्तः २नद्यां स्त्री निघण्टुः नभन्वा इति तत्र पाठान्तरं "प्राप्नुवो नभन्वः" ऋ०४।१९।७ बहुवचनान्तः।

नभन्य त्रि० नभ-हिंसायां कनिन् नञि हिंसायां साधु यत्, नभसि हितो वा यत् पृषो०। १आकाशभवे २हिंसके च। "गायत् साम नभन्यं' यथा वेरर्चाम तद्वादघानं स्वर्यत्" ऋ० १।१७३।१ "हे इन्द्र! नभन्यं नभस्यं नभसि भवं नभोव्यापिनं हिंसकं वा राक्षसादिकम्। नभतिर्वधकर्मा "नभति ऋदतीति बधकर्मसु गणनात्" भा०।

नभश्चक्षुस् न० नभसश्चक्षुरिव प्रकाशकत्वात्। सूर्ये शब्दमा०।

नभश्चमस पु० नभसश्चमस इव। १चन्द्रे २चिद्रापूपे ३इन्द्रजाले च मेदि०।

नभश्चर त्रि० नभसि चरति चर-ट। गगनचारिणि १खगे-२देव गन्धर्वग्रहादौ। ३नभःस्थायिमात्रे च "निकामतप्ता द्विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन च" कुमा० "नभश्चरैर्गीतयशाः स लेभे" व्यये ऽष्टमे वा सुतभे विलग्ने चैकोऽपि पापश्च नभश्चराणाम्" ज्योतिषम्।

नभस् न० नह्यते मेघैः नह-बन्धने "नहेर्भश्च" उणा०असुन् भश्चान्तादेशः। १गगने "ओमित्युक्त्वतोऽथ याज्ञिक इति व्याहृत्य वाचं नभस्तच्चिच्छ्रुतिते" माघः। २श्रावणे मासि पु०अमरः। बाहुल्येन मेघसम्बन्धात्तस्य तथात्वम्। "नभोनभस्यमनन्तमिव तदृशौ" नैष० "नभाश्च नभस्यश्च वार्षिकावृतू" यजु० १४।१५। "नभोनभस्ययोर्दृष्टिमवग्रहवान्तरे" रघुः। ३मेघे अमरः नभस्यशब्दे दृश्यम्। ४उदके निघण्टुः। ५प्राणे ६वर्षे ७पतङ्गपक्षे पु० मेदि० ८पञ्चितशीर्षे शब्दर० ९लग्नतोदशमस्थाने ज्यो०

नभस पु० नभ-शब्दे असच्। १शब्दाश्रये गगने। दशममन्वन्तरीये २सप्तर्षिभेदे "अङ्गिरा नभसः सत्यः सप्तैव परमर्षयः" हरिवं० ७अ० दशमन्वन्तरोक्तौ।

नभसङ्गम पुंस्त्री नभसं गगनं गच्छति गम-खच् मुम् च। खगे अमरः। स्त्रियां जातित्वात् ङीष्।

नभसमय पु० नभो मयते मय-गतौ अच् वेदे अयसयादि० न पदत्वम्। आदित्ये "ऋतोपस्तरणं नभसमयम्" ऋ०९।६९।५ "नभसमयमादित्यम्" भा०। लोके तु नभोमय इत्येव नभोगे त्रि०।

नभस्य पु० नभसे मेघाय उदकाय वा साधु यत्। १भाद्रपदमासे नभःशब्दे उदा०। "प्रथमा च द्वितीया च नभस्ये मासि निन्दिता" वसिष्ठः। "अथ नभस्य इव त्रिदशायुषम्" रघुः। २स्वारोचिषमनोः पुत्रभेदे "प्रथितश्च नभस्यश्च नभ ऊर्जस्तथैव च" हरिवं०७अ० तत्पुत्रोक्तौ नभसि गगने भवः यत्। ३गगनभवे त्रि०।

नभस्वत् पु० नभः सावनत्वेनास्त्यस्य मतुप् मस्य वा। पवने अमरः। "आकाशाद्वायुः" इति श्रुतेः वायोराकाशहेतुकत्वात् तथात्वम्। "मिलन्निमीलं विदधुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः" नैष० "नभस्वानिव दक्षिणः" रघुः। २अन्तर्द्धानस्य पत्न्यां स्त्री ङीप्। "अन्तर्द्धानो नभस्वत्यां हविर्द्धानमविन्दत" भाग०४।२४।६

नभाक पु०न० भाति भा-पिनाका० आक। १तमसि उष्ण-

तद्०। २राहौ च तस्यच्छायारूपत्वेन तथात्वम्। ततः शिवा० अपत्ये अण्। नाभाक तदपत्ये पुंस्त्री०।

नभोग त्रि० नभोगच्छति गम-ड। १नभचरे खगदेवग्रहादौ २खग्नतोदशमगे ३दशमसप्तमरोचे सप्तर्षिभेदे नभसशब्दे दृश्यम्।

नभोगज पु० नभसि गज इव। मेघे त्रिका०।

नभोगति स्त्री ७त०। १गगनगतौ नभसि गतिरस्य। २खगादौ त्रि० [तद्गमनोक्तौ।

नभोद पु० विश्वदेवभेदे "उष्णीनाभो नभोदश्च" हरिवं०७अ०

नभोदुह पु० नभसि दुहति दुह-क। १मेघे शब्दमाला। तस्य नभसि पयोनिःसारकत्वेन तथात्वम्।

नभोद्वीप पु० नभसि द्वीप इव। मेघे शब्दमा०।

नभोधूम पु० नभसि धूम इव। मेघे शब्दमाला।

नभोनदी स्त्री ६त०। स्वर्गगङ्गायाम्। [स्वर्गे हेयच०।

नभोमणि पु० नभसि मणिरिव प्रकाशकत्वात्। द्युमणौ

नभोमण्डल न० नभोमण्डलमिव। गगनमण्डले "नैतन्नभोमण्डलमम्बुराशेः" सा०द०"अथ च यावन्नभोमण्डलं सह-द्यावापृथिव्योर्मण्डलाभ्यां कालत्रयेण सह मुञ्चीतम्" भाग० ५।२२।९।

नभोमण्डलदीप पु० नभोमण्डले दीप इव रात्रौ प्रकाशकत्वात्। चन्द्रे "नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः। कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे" ति०त०

नभोऽम्बुप पुंस्त्री नभसि अम्बु पिबति पा-क। चातकखगे हेमच०। स्त्रियां जातित्वात् ङीष्।

नभोरजस् न० नभसि रज इव दृष्ट्यावरकत्वात्। अन्धकारे

नभोरूप त्रि० नभसो रूपमारोपितं रूपमिव रूपमस्य। नीलवर्णयुक्ते पश्वादौ "अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति" शा०भा० "खनीखनीलिमा" नैष० उक्तेः गगनस्यारोपितरूपवत्त्वेन तत्तुल्यरूपत्वात् श्यामसान्द्रवर्णयुक्तस्य तथात्वम्। "नभोरूपाः पार्जन्याः" यजु०२४।६०। "नभोवर्णा नीलवर्णाः" वेददी०। [त्रिका०

नभोरेणु स्त्री नभसि रेणुरिव आवरकत्वात्। कुज्झटिकायां

नभोलय पु०नभसि लीयते ली-अच् ७त०। १धूमे शब्दरत्ना० २गगनलीनमात्रे त्रि०।

नभोवीथी स्त्री नभसि वीथीव। आकाशस्थे वीथीरूपे पथि। "अथ च यावतार्द्धेन नभोवीथ्याः प्रचरति तं कालमयनमाचक्षते" भाग० ५।२२।८।

नभौकस् त्रि०नभ आकाशमेव ओकः स्थानमस्य। अन्तरिक्षचरे खगादौ "अन्ये च विविधा जीवा जलस्थलनभौकसः। यद्दर्शनेतवस्तारास्तडितःस्तनयित्नवः" भाग० २।६।१५

नभ्य त्रि० नाभये रथचक्रावयवभेदावहितम् तामर्हति वा गवादि० यत् "नाभिर्नभञ्च" पा० ग० नभादेशः। रथादिचक्रावयवहिते १तैलादौ २तदर्हे च "तदेतन्नभ्यं यदयमात्मा" शत० ब्रा० १४।४।३।२२ "तदेव रथचक्रदृष्टान्तेन स्पष्टयति नाभिश्चक्रापण्डिका नाभ्यै हितं नाभिमर्हतीति वा नभ्यम् तदेतल्लोके प्रसिद्धं चक्रपिण्डिकास्थानीयम्, किं तत् यदयमात्मा योऽयं शरीरम्" भा०। ३चक्रे ४रथचक्रानुगुणे अञ्जने च। "नभ्योऽक्षः नभ्यमञ्जनं रथचक्रनाभावेवेदम्" सि०कौ०। "नभ्योऽक्ष इति सच्छिद्रो रथाङ्गावयवो नाभिस्तदनुप्रविष्टः काष्ठविशेषोऽक्षः स च तदनुगुणत्वात् नाभये हितः। अञ्जनं तैलाभ्यङ्गः तदपि स्नेहमयत्वात् नाभये हितम्" मनो०। शब्दकल्पद्रुमे नभ्यशब्दस्य नभःप्रकृतिकत्वेन साधनमन्यार्थपरत्वकथनञ्च निर्मूलम्। "पश्चादुत्तरवेदेष्विष्टिषु प्रक्रमेषु सत्या वा नभ्यस्ये अभिमन्त्रयतेऽक्तरमेषामिति" कात्या०श्रौ०८।४।५ "नभ्यमं चक्रस्य फलकं नभ्यम् "नाभिर्नभं चेति" प्रत्ययसंनियोगेन नाभेर्नभभावः नभ्ये तिष्ठतो नभ्यस्ये मध्यमे च फलके स्थापयेदित्यर्थः" कर्कः।

नभ्राज् पु० न भ्राजति भ्राज-क्विप नभ्राड्नपात्" इत्यादिना पा०नञः प्रकृतिभावः। मेघे हेमच०पदत्वे प्रत्यङ्गत्वे

नमत त्रि० नम-यतच्। प्रह्वे १नम्रे २नटे च ३धूमे उणा०। कर्मणि यतच्। ४प्रभौ उणादिकोषः।

नमयिष्णु त्रि० नम-स्वार्थे णिच वा० इष्णुच्। नमनशीले "स्थिरा चित्तमयिष्णवः" ऋ०८।२०।१ "नमयिष्णवः नमनशीलाः" भा०।

नमस् अव्य० नम-भावे असुन् स्वरादि०। नमने १स्वापकर्षबोधकव्यापारे २त्यागे स्वस्वत्वध्वंसानुकूलव्यापारभेदे। पुष्पं विष्णवे नम इत्यादौ विष्णूद्देश्यकमन्त्रकरणकत्यागविषयः पुष्पमित्येवं बोधः यथाह शब्दशक्तिप्रकाशिकायाम्

"पुष्पमिदं विष्णवे नम इत्यस्य विष्णूद्देश्यक मन्त्रकरणत्यागस्य कर्मेदं पुष्पमित्यर्थस्य चतुर्थ्यां प्रीत्युद्देश्यकत्वं तदिच्छाधीनत्वरूपं नमःपदार्थे मन्त्रकरणत्यागे बोध्यते प्रकृत्यर्थस्य च विष्णादेः प्रीतौ तदिच्छायां वान्वयः। ब्राह्मणाद्युद्देश्यकस्य गवादित्यागस्य मन्त्रकरणत्वे प्रमाणाभावात् गौर्ब्राह्मणाय नम इत्यादिकोन प्रयोगः।

ब्राह्मणेभ्यो नमोनित्यमित्यादौ तु नमःपदार्थो नतिरेवेति तत्र विषयत्वं चतुर्थ्या बोध्यते। पुष्पमिदं परमात्मने नम इत्यादौ परमात्मनः प्रीत्यसत्त्वेऽपि तत्प्रीतित्वप्रकारकेच्छाविषयत्वात् तत्प्रीत्युद्देश्यकत्वाप्रसिद्धिः"। नम्यते कर्मणि अनुन् २अन्ने ४यज्ञे च निघण्टुः नमोऽष्टघ्नशब्दे दृश्यम्। साक्षादा० उप०स०। नमस्कारोति नमस्कृत्य। अत्र क्रियातोरेव नमनार्थता नमश्शब्दस्तु तदर्थद्योतकः तेन नारायणं नमस्कृत्येत्यादौ द्वितीया उपपदविभक्तेः कारकविभक्तिर्गरीयसी" इति न्यायात् नमसोवाचकत्वे नमस्कृत्य ब्राह्मणेभ्य इत्यादौ नमःशब्दयोगे चतुर्थी। "नमः स्वस्तीत्यादि" पा० सूत्रे त्यागार्थकनमनार्थकयोरुभयोर्ग्रहणम्। ५यज्ञे च न० "यज्ञो वै नमः" इति श्रुतेः।

नमस त्रि० नम–असच्। अनुकूले उज्ज्वद०।

नमसान त्रि० नामधा० नमस–बा० आनच् अस्योपयलोपौ। नमस्करणशीले "यशस्विनं नमसाना विधेम" अथ०६।३९।२

नमसि(स्यि)त नामधा० नमस्–कर्मणि क्त वा यलोपः। कृतनमस्कारे अमरः।

नमस्कार पु० नमस्+कृ–घञ्। १स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ २विषभेदे शब्दच०। नमस्कारे अधिकारिविशेषादिकं नानास्थानात् प्रदर्श्यते। अभिवादयेदित्यनुवृत्तौ शङ्खः "नाप्रयतायाप्रयतश्च" इति शु०त०। "स्त्रियो नमस्या दृष्ट्वाद्य वयसा पत्युरेव ताः" इति स्मृत्यर्थसारः। "देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात्। स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ। ब्राह्मणश्च गुरुं दृष्ट्वा न नमेद्यो नराधमः। यावज्जीवनपर्यन्तमशुचिर्यवनो भवेत्" इति ब्रह्मवै० जन्मख० "देवतायतनं दृष्ट्वा दृष्ट्वा तु दक्षिणन्तथा। नमस्कारं न कुर्याद्यः प्रायश्चित्ती भवेन्नरः। सभायां यज्ञशालायां देवतायतनेषु च। प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम्। उपविश्य नमेत् शूद्रो दीर्घायुर्ब्राह्मणो वदेत्। य शूद्रो नरकं याति ब्राह्मणो यात्यधोगतिम्। दूरस्थं जलमध्यस्थं धावन्तं मदगर्वितम्। क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्जयेत्। पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गी जलस्थितः। आशीःकर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत्" कर्मलोचनम्। "मातुः पितुः कनीयांसं न नमेद्वयसाधिकः। नमस्कुर्याद् गुरोः पत्नीं भ्रातृजायां विमातरम्" यमः। "अभिवादयतः पूर्वमाशिषं न प्रयच्छति। यदुद्धृतं भवेत्तस्य तस्याङ्गारं प्रपद्यते। जरसीति ब्राह्मणे ब्रूयात् आयुष्मानिति राजनि। वर्द्धतामिति वैश्येषु शूद्रे त्वारोग्यमेव च" म०त० "गुरुपत्नी तु युवती नाभिवाद्येह पादयोः। पूर्णषोडशवर्षेण गुणदोषौ विजानता" मनुः। "कुर्वीत वन्दनं भूयो भगोवोऽहमिति ब्रुवन्। विप्रोऽप्य पादग्रहणमन्वहञ्चाभिवादनम्। गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्। अभिवादनशीलः स्याच्चित्यं वृद्धेषु धर्मतः। असावहमो नामेति सम्यक् प्रणतिपूर्वकम्। आयुरारोग्यसिद्ध्यर्थं तन्द्रादि परिवर्जितः। आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरप्लुतः। यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः। व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः। लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा। आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्। ब्राह्मणान् कुशलं पृच्छेत् क्षत्रबन्धूननामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु" मनुः। अभिवादनीयाश्च "उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ। बन्धुज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः। माता मातामही गुर्वी पितृमातृश्च सोदरा। श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम्। इत्युक्तो गुरुवर्गोऽयं पितृतो मातृतो द्विजाः। अनुवर्त्तनमेतेषां मनोवाक्कायकर्मभिः। गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः" इति कूर्मपु० ११अ०। अधिकं नतिशब्दे दृश्यम्। "अयमेव नमस्कारो भूम्यादिप्रतिपत्तिभिः। प्रणाम इति विज्ञेयः स पूर्वं प्रतिपादितः" कालिकापु०७०अ०। रात्रौ तन्निषेधो यथा "रात्रौ नैव नमस्कुर्यात्तेनाशीरभिचारिका। अतः प्रातः पदं दत्त्वा प्रयोक्तव्ये च ते उभे" महाभारते।

नमस्कारी स्त्री नमस्कारः तदङ्गाञ्जलिरिव पत्रम् अस्त्यस्याः अच् गौरा० ङीष्। लज्जालुवृक्षे अमरः। तस्याः नमस्काराङ्गाञ्जलिरूपपत्रकत्वात् तथात्वम्।

नमस्य नामधा०नमस्करोति "नमस्तपोवरिवः" इत्यादि क्यच् पूजायाम् भ्वा० पर० सक० सेट्। नमस्यति अनमस्यी(स्यी)त्। कर्मणि नमस्यते "द्विजैः कश्चिन्नमस्यसे" "तेऽनमस्यँश्च शङ्करम्" "नो नमस्यन्ति ते बन्धून्" भट्टिः।

नमस्य त्रि॰ नामधातुः नमस्य–कर्मणि यत् अह्रोपयह्रोपौ । पूज्ये । "ब्रह्मक्षत्रियिर्नमस्यः" कठोप॰ ।

नमस्या स्त्री नमस्य–भावे अ । पूजायाम्

नमस्यु त्रि॰ क्यजन्तनमस्य–"क्याच्छन्दसि" पा॰ उ । १नमस्कारेण शीघ्रे "स इद्वने नमस्युभिर्वचस्यते" ऋ॰१।५५।४। पुरवंश्ये २नृपभेदे "जनमेजयोऽभूत् पूरोः प्रचिन्वांस्ततस्ततः । प्रवीरोऽथ नमस्युर्वै भाग॰९।२०।१ तत्र नभस्युरिति पाठान्तरं हरिवंशे २१अ॰ "प्रचिन्वतः प्रवीरोऽभून्नभस्युस्तस्य चात्मजः" इत्युक्तेः ।

नमित त्रि॰ नम–णिच् क्त वा ह्रस्वः । नामिते नतीकृते "सुधीः को वा कोपीरपि नमितमूर्द्धा न पिबति" विदग्धमाधवः ।

नमी पु॰ नम–बा॰ ई वातप्रमीवत् । ऋषिभेदे "प्रङ्क्षन्नमीं साय्यं सप्तम्" ऋ॰ ६।२० "नमीं तत्संज्ञकमृषिम्" भा॰ "प्र मे नमीं साय्यम् दृशे भुजे" ऋ॰ १०।४८।६ "एतेन वै नमी साय्योर्देहो राजाञ्जसा स्वर्गं लोकमैत्" पञ्चभी ब्रा॰ २५।१०।१७

नमुचि पु॰ न मुञ्चति मुच–इन् नञ्जाडित्वा पा॰नञः प्रकृतिभावः । १कन्दर्पे दनोः पुत्रे २असुरभेदे मेदि॰ । चत्वारिंशद्दनोः पुत्रा इत्युपक्रमे "शंबरो नमुचिश्चैव पुलोमा चेति विश्रुतः" भा॰आ॰६०अ॰ । "कश्यपस्य दनुर्नाम भार्यासीद्द्विजसत्तम ! । तस्यान्तु द्वौ सुतावास्तां सहस्राद् बलाधिकौ । ज्येष्ठः शुम्भः इति ख्यातो निशुम्भश्चापरोऽसुरः । तृतीयो नमुचिर्नाम महाबलसमन्वितः" वामनपु॰ ५३अ॰ ।

नमुचिद्विष् पु॰नमुचिं द्विष्टवान् द्विष–भूते क्विप् ह्रस्व॰। इन्द्रे नमुचिसूदनशब्दे दृश्यम् । "विष्टब्ध चक्रे नमुचिद्विषा बली" माघः ।

नमुचिसूदन पु॰ नमुचिं सूदयति हिनस्ति सूदि–ल्यु । इन्द्रे अमरः । तेन तस्य सूदनकथा भा॰ व॰ ४७अ॰ । "नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् । तेनेन्द्रः सख्यमकरोत् समयञ्चेदमब्रवीत् । न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि । वधिष्याम्यसुरश्रेष्ठ ! सखे ! सत्येन ते शपे । एवं स कृत्वा समयं दृढं नीहारमीश्वरः । चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः । तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वियात् । भो मित्र कृत ! पापेति ब्रुवाणं शक्रमन्तिकात्" नमुचिवत्र नमुचिहन् प्रभृतयोऽत्र ।

नमुर पु॰ नम–बा॰ उर । नमुचौ असुरे "भूयाद्विन्द्रो नमुरात् भूयानिन्द्राद्धि मृत्युभ्यः" अथ॰ १२।४।४६

नमेरु पु॰ नम–बा॰एरु । १सुरपुन्नागे विश्वः २रुद्राक्षे इति केचित् "नद्या नमेरुप्रसवावतंसाः" "प्रान्तेषु संसक्तनमेरुशाखम्" कुमा॰ "विमत्रसुर्नमेरूणां छायासध्यास्य सैनिकाः" रघुः ।

नमोगुरु पु॰ नमः नमस्कारविषये गुरुः । ब्राह्मणे शब्दर॰ । ब्राह्मणानां सर्ववर्णनमस्कृतया गुरुत्वात् तथात्वम् ।

नमोवाक पु॰ वच–भावे घञ् ह्रस्व॰, नमस्काराय उच्यते कर्मणि घञ् वा । २नमोवचने नमस्कारार्थं कथनीये त्रि॰ "इदं कविभ्यो पूर्वेभ्यो नमोवाकं प्रशास्महे" उत्तरच॰। "नमोवाके प्रस्थिते अध्वरे" ऋ॰ ८।१५।२२ "नमस्काराय प्रोच्यते स नमोवाकः तस्मिन्नध्वरे" भा॰

नमोदध् पु॰ दध–भावे सम्प॰ क्विप नमसोऽन्नस्य दध् वर्द्धनं यस्मात् ५त॰। यज्ञे "अग्नौ प्राणाहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" गीतायां यज्ञस्यान्नहेतुत्वोक्तेस्तस्य तथात्वम् । "आनो यज्ञं नमोदधम्" ऋ॰ २।४२।२ "नमोदधम् नमसोऽन्नस्य वर्द्धकं यज्ञम्"

नम्ब गतौ भ्वा॰ पर॰ सक॰ सेट् । नम्बति अनम्बीत् नमम्ब अचोपदेशत्वात् वृद्धि निमित्ते न चलम् । प्रनम्बति ।

नम्य त्रि॰ नम–पवर्गान्तत्वात् कर्मणि यत् न ण्यत् । नमनीये

नम्र त्रि॰ नम–र । १नते विनम्रताप्राप्ते २विनयान्विते च शब्दार्थचि॰ । "लोचनाभ्यां सनाभ्याम्" मेघ॰। "अभूत्र नम्रः प्रणिपातशिक्षया" रघुः ।

नम्रक पु॰ नम्र इव कायति कै–क । १वेतसवृक्षे भावप्र॰। स्वार्थे क । २नमनकर्त्तरि त्रि॰स्त्रियां काप् अत इत्वम्

नय गतौ भ्वा॰ आत्म॰ सक॰ सेट् । नयते अनयिष्ट । नेये

नय पु॰ नी–भावे अच् । १नीतौ अमरः । "विप्रसोऽपि विगाहते नयः ततीर्घः पवनामिवाशयः" किरा॰।२द्यूतभेदे मेदि॰ ३नैगमादौ हेमच॰। नयति संसारपारं भक्तम् नी–कर्त्तरि अच् । ४विष्णौ "रामोविरामोविरजो मार्गो नेयो नयोऽनयः" विष्णुसं॰। नैगमादिषु सिद्धान्तादिः "एवं न्यायनयश्रुतीयसक्तं निमित्तहेतुत्वम्" "तत्रापि परमाणौ स्यात् पाको वैशेषिके नये" भाषा॰। ५न्यायेऽनेतरि च त्रि॰ शब्दच॰ ततः आकर्षा॰ कुयङ्गाद्यर्थे वुन् । नयक नीतिकुशले त्रि॰ ।

नयन न॰नीयते बुद्धिदृष्टिः स्वसंबुद्धविषयान् अनेन नी–करणे

ल्युट्। १नेत्रे अमरः। तस्य बुद्धिइन्द्रियसंयोगिविषयप्रापकत्वात् तथात्वम्। "सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः" मेघ०। "अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः" रघुः अस्य स्वाङ्गत्वेऽपि बहुच्कत्वात् उपसर्जनत्वे स्त्रियां न ङीष्। "दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते" रसगङ्गा० भावे ल्युट्। २प्रापणे ३यापने च "नयनं पारिजातस्य द्वारकां मम रोचते" हरिवं०१२९ "कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः" भा०आ०६६अ० "कालस्य नयने युक्ता यमस्य पुरुषाश्च ये" भा०स० ८अ०।

नयनाभिघात पु० ६त०। सुश्रुतोक्ते नयनाभिहननरूपे रोगभेदे यथोक्तम् "अथातो नयनाभिघातप्रतिषेधं व्याख्यास्यामः। अभ्याहते तु नयने बहुधा नराणां संरम्भरागतमसाश्रुजाश्च धीमान्। नस्यप्रलेपपरिषेचनतर्पणाद्यैस्तं पुनः श्रमजपित्तजमूलपथ्यम्। दृष्टिप्रसादजननं विधिमाशु कुर्यात्तृप्तिग्धैर्हिमैश्च मधुरैश्च तथा प्रयोगैः। स्वेदाग्निधूमभयशोकरजाभिघातैरभ्याहतावपि तथैव भिषक् चिकित्सेत्। सद्योहते नयन एष विधिस्तदूर्द्धं स्यन्दैरितो भवति दोषसमेत्य कार्यः। अभ्याहतं नयनमीषदथास्य बाष्पसंखेदितं भवति तच्च रुजं जयेन। साध्यं यतं पटलमेकमुभे तु शुक्ले त्रीणि यतानि पटलानि विवर्जयेत्तु। स्रात्यिञ्चिटच्च नयनं स्रवति चावसन्नं चस्तं च्युतञ्च हतदृक्च भवेत्तु याप्यम्। विस्तीर्णदृष्टिबहुरागमसत्प्रदर्शि साध्यं यथास्थितमनाविलदर्शनञ्च। प्राणोपरोधवमनच्छवकण्ठरोधैरुन्मथ्यमाशु नयनं यदतिप्रविष्टम्। नेत्रे विलम्बिनि विधिर्विहितः पुरस्ताद्दुष्टिं हनं शिरसि कार्य्यवसेचनञ्च। षट्सप्रतिनयनजा य इमे प्रदिष्टा रोगा भवन्त्यसकृतां सकृताञ्च तेभ्यः। स्नन्यप्रकोपकफमारुतपित्तरक्तैर्बाह्याभिवर्त्म भव एव कुकूणकोऽन्यः। सन्द्राति नेत्रमतिकण्डुमथाभिकूटनासालताटमपि तेन शिरुः स नित्यम्। सूर्यप्रभां न सहते स्रवति प्रदग्धं तस्याहरेद्रुधिरमाशु विनिर्विशेच्च। क्षौद्रायुतैश्च कटुभिः प्रतिसारयेत्तु मातुः शिशोरभिहितञ्च विधिं विदध्यात्"।

नयनाभिराम पु० नयनमभिरमयति अभि+रम-णिच्-अण् नयनयोरभिरामो यस्मात् वा। १चन्द्रे "आयुः श्रवश्च कुरुते नयनाभिरामः" वैद्यकिकल्पतरुक्तौ ज्योतिर्बिम्बितः। २नेत्रानुरागकारके प्रियमात्रे त्रि०।

नयनी स्त्री नी-करणे ल्युट् ङीप्। नेत्रकनिकायां शब्दचि०

नयनोत्सव पु० नयनयोरुत्सवो यस्मात्। १दीपे शब्दर०। तस्यालोकेन हि नेत्रस्य दर्शनयोग्यत्वम् "स्फुटाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः" भाषा० आलोकसम्बन्धेन नयनस्य विषयग्राहित्वोक्तेः। २नेत्रोत्सवकारिमात्रे त्रि०।

नयनोपान्त पु० ६त०। अपाङ्गे राजनि०।

नयनौषध न० ६त०। पुष्पकासीसे हेमच०। [त्रिका०।

नयपीठी स्त्री नयस्य पीठीव। (कक्) द्यूताङ्गे अष्टकोष्ठे

नयवर्त्म ६त०। नीतेर्मार्गे षाड्गुण्यप्रयोगे मट् गुणाश्च "सन्धिविग्रहयानानि संस्थाप्यथ दमस्तथा। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्" नीतिसा०।

नयविशारद त्रि० ७त०। नीतिशास्त्रानुसारेण षाड्गुण्यप्रयोगाभिज्ञे "षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः। सान्धिविग्रहिकः कार्यो राज्ञा नयविशारदः" मात्स्ये ८९अ०।

नर पुंस्त्री० नृ-नये अच्। १मनुष्ये जातित्वात् स्त्रियां नारीत्वेऽपि "पुत्रे यशसि तोये च नराणां पुण्यलक्षणम्"। "नराणाञ्च नराधिपः" गीता "नरतीति नरः प्रोक्तः परमात्मा सनातनः" व्यासोक्तेः २परमात्मनि "नराज्जातानि तत्त्वानि नारायीति विदुर्बुधाः" वेदमन्त्रम् "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" मनुः। "जङ्घानारायणो नरः" विष्णुसं०। ३पुंसि राजनि०। ४देवभेदे "ततस्तदमृतं देवो विष्णुरादाय वीर्य्यवान्। जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः। एवं सुतुमुले युद्धे वर्त्तमाने महाभये। नरनारायणौ देवौ समाजग्मतुराहवम्" भा० आ०१९अ०स्वारोचिहारके ५अन्वे निषण्णः ६नरदेवस्यावतारे अर्जुने मेदि०।

"नरनारायणौ यौ तौ पुराणावृषिसत्तमौ। ताविमावनुजानीहि कृष्णौ वेद्यधनञ्जयौ। विख्यातौ त्रिषु लोकेषु नरनारायणावृषी। कार्य्यार्थमवतीर्णौ तौ पृथ्वीं पुण्यप्रतिश्रयाम्। यत्र शक्यं सुरैर्द्रष्टुमृषिभिर्वा महात्मभिः। तदाश्रमपदं पुण्यं बदरीनाम विश्रुतम्। स निवासोऽभवद्विप्र! विष्णोर्जिष्णोस्तथैव च। यतः प्रवहते गङ्गा सिद्धचारणसेविता। तौ सन्नियोगाद्ब्रह्मर्षे! स्थितौ जातौ महाद्युती। भूमेर्भारावतरणं महावीर्य्यौ करिष्यतः" भा०व० ४७अ०"तेषां मनश्च तेजश्चाप्यादद्याना विवौजसा। पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी।

बृहस्पतिस्तु पप्रच्छ ब्रह्माणं काविमाविति। भवन्तं नोपतिष्ठेते तौ नः शंस पितामह!" ब्रह्मोवाच "यावेतौ पृथिवीं द्यावा भासयन्तौ तपस्विनौ। ज्वलन्तौ रोचमानौ च व्याप्यातीतौ महाबलौ। नरनारायणावेतौ लोकाञ्लोकं समास्थितौ। अर्जितौ स्वेन तपसा महासत्त्व पराक्रमौ। एतौ हि कर्मणा लोकं नन्द्यामासतुर्ध्रुवम्। द्विधा भूतौ महाप्राज्ञौ विद्धि ब्रह्मन् परन्तपौ। असुराणां विनाशाय देवगन्धर्वपूजितौ" वैशम्पायन उवाच "जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः। सार्द्धं देवगणैः सर्वैर्बृहस्पतिपुरोगमैः। तदा देवासुरे युद्धे भये जाते दिवौकसाम्। अयाचत महात्मानौ नरनारायणौ वरम्। तावब्रूतां हृषीकेति तदा भरतसत्तम!। अथ तावब्रवीच्छक्रः सख्यं नः क्रियतामिति। ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि। ताभ्यां सहितः शक्रो विजिग्ये दैत्यदानवान्। नर इन्द्रस्य संग्रामे कृत्वा शत्रून् परन्तपः। पौलोमान् कालकञ्जांश्च सहस्राणि शतानि च। एवमेतौ महावीर्यौ तौ पश्यत समागतौ। वासुदेवार्जुनौ वीरौ समेतौ महारथौ। नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः। अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः। एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः। नारायणो नरश्चैव सत्त्वमेकं द्विधा कृतम्। एतौ हि कर्मणा लोकानभ्रुतोऽस्त्यजयान् ध्रुवान्" भा० उ० ४८अ०। ७धान्यकर्पूरतैले मेदि०। दशङ्कौ छायाव्यवहारोपयोगिकीलकभेदे "छायाकृते तु नरदीपतलान्तरस्थे शङ्कौ भवेच्छरयुते खलु दीपकोच्चम्" लीला०। छायाव्यवहारशब्दे दृश्यम् लीला० उक्ते रत्नमिश्रव्यवहारे ऽरत्नमिश्रणकारिनरसङ्ख्यायाञ्च "नरप्रदानोनितरत्नमेषैरिष्टे कृते स्युः खलु मौल्यसङ्ख्याः" लीला०। नरत्वस्य दुर्लभता विष्णुपु० उक्ता नरकभोगोत्तरं तत्तद्योनिभ्रमणानन्तरं सम्प्रसङ्गं पुराणस० दर्शिता यथा

"पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम्। यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः। पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना। कथं तं पापनिरता नरा रात्रिषु शेरते। नरकान्निरते येषां नरके तीव्रयातनाः। एवं क्लिष्टा विशुद्धाश्च सावशेषेण कर्मणा। ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः। स्थावरा विविधाकारास्तृणगुल्मादिभेदतः। तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु। निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः। संक्षिप्ता, पक्षिभावेन भवन्ति. तृणजातिषु। मार्गदुःखमतिक्रम्य जायन्ते पशुयोनिषु। क्रमाद् गोयोनिमासाद्य पुनर्जायन्ति मानुषाः। एवं योनिषु सर्वासु परिभ्रम्य क्रमेण तु। कालान्तरवशायान्ति मानुष्यमतिदुर्लभम्। व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात्। विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवात्। मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम्। द्वयोर्न साधयत्येकं स मृतस्तप्यते चिरम्। देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम्। तत् संप्राप्य तथा कुर्यात् न गच्छेन्नरकं यथा। स्वर्गापवर्गलाभाय यदि नास्ति सुखोद्यमः। सर्वस्य मूलं मानुष्यं तदुयत्नादनुपालय। धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम्। मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम्। न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः"।

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा" सा० द० अग्निपु०

नरक पु० नरति नयति पापिलोकं पापानुरूपभोगायात्र न—नये आधारे बा० वुन्। पापभोगस्थाने तस्य तथात्वञ्च विस्तरेण विष्णुपु० शिवधर्मोत्तरे च वर्णितं तदेव पुराणस० प्रदर्शितं तच्च कर्मविपाकशब्दे १७४५ पृष्ठादौ दर्शितम्। पापभेदेन नरकभेदप्राप्तिश्च पाद्मे उत्त० ख० ४८अ० यथा "कूटसाक्षी तथाऽसम्यक् पक्षपातेन यो वदेत्। यश्चान्यदन्यतं वक्ति स नरो याति रौरवम्। भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तमः!। यान्ति ते नरके रौधे यश्चोच्छ्वासनिरोधकः। सुरापो ब्रह्महा हर्त्ता सुवर्णस्य च शूकरे। प्रयाति नरके यश्च तैः संसर्गमुपैति वै। राजन्यवैश्यहा तात! तथैव गुरुतल्पगः। तप्तकुम्भे खड्गगामी हन्ति राजभटांश्च यः। माध्वीविक्रयकृद्बध्यपालः केशरिविक्रयी। तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत्"। (केशरी यथा:) "क्षुधां सुताञ्चापि गत्वा महाज्वाले निपात्यते। अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः। वेददूषयिता यश्च वेदविक्रायकश्च यः। अगम्यागामी यश्च स्यात्ते यान्त्यविवनं द्विज। चौरो विमोहे पतति मर्यादादूषकस्तथा। देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः। स याति क्रमिमल्ले वै क्रमीशे च दुरिष्टकृत्। पितृदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः। लालामल्ले स याम्ये शरकर्त्ता च रोधके। (पर्य्यश्नाति परित्यज्य यादौ भुङ्क्ते) "करोति कर्णिनो

यस्तु यस्तु खड्गादिक्षरः। प्रयान्ति ते विशसने नरके भृशदारुणे। असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे। अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः। वेगी पूयवहः क्रौको याति मिष्टान्नभुङ्नरः। (वेगी साहसकारी) (पुत्रादीन् वर्जयित्वा एक एव मिष्टान्नभुक्) "लाक्षामांसरसानाञ्च तिलानां लवणस्य च। विक्रेता ब्राह्मणो याति तमेव नरकं द्विज!। मार्जारकुक्कुटच्छागान् श्ववराहविहङ्गमान्। पालयन्नरकं याति तमेव द्विजसत्तम!। रक्तोएजीवी कैवर्त्तः कुण्डाशी गरदस्तथा। सूची माहिषिकश्चैव पर्वकारी च यो द्विजः"। (पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाशी माहिषिको महिषोपजीवी "वहा महिषीत्युच्यते भार्य्या भर्त्रोपार्जितं धनम्। उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः" इति श्रुतिः। पर्वकारी धनादिलोभेन पर्वसु अमावस्यादिक्रियाप्रवर्त्तकः) "अगारदाही मित्रघ्नः शाकुनिर्व्यालयाजकः। रुधिरार्द्रे पतत्येते सोमं विक्रीणते च ये। मधुहा ग्रामहन्ता च याति वैतरणीं नरः। रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये। ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये। असिपत्रवनं याति वनच्छेदी हवैव यः। औरभ्रिको मृगव्याधो वह्निज्वाले पतन्ति वै। यान्त्येते द्विज! तत्रैव यश्चापाकेषु वह्निदः। व्रतेषु लोपको यश्च स्वाश्रमादिच्युतश्च यः। सन्दंशयातनामध्ये पततस्तावुभावपि। दिवास्वप्नेषु स्कन्दन्ति ये नरा ब्रह्मचारिणः। पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने। एते चान्ये च नरकाः यतयोऽथ सहस्रशः। येषु दुष्कृतकर्माणः पच्यन्ते यातनागताः। यथैव पापान्येतानि तथान्यानि सहस्रशः। भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः। वर्णाश्रमविरुद्धञ्च कर्म कुर्वन्ति ये नराः। कर्मणा मनसा वाचा निरयेषु पतन्ति ते। अधःशिरोभिर्दश्यन्ते नारकैर्दिवि देवताः। देवाश्चाधोमुखान् सर्वानधः पश्यन्ति नारकान्। स्थावराः कृमयोऽन्ताश्च पक्षिणः पशवो नराः। धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम्। सहस्रभागप्रथमा द्वितीयाद्युक्रमास्तथा। सर्वे ह्येते महाभाग! यावन्मुक्तिसमाश्रयाः। यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः। पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः" इति विष्णुपु० द्वितीयांशे ६अ०। तत्रैव "कथयामि विचित्राणां कर्मणां विविधा गतीः। ताः शृणुष्व महाराज! याः श्रुत्वा मोक्षमाप्नुयात्। परवित्तं परापत्यं कलत्रं पारकञ्च यः। हरते बुद्धिमोहेन सोऽन्ते मृत्युवशङ्गतः। कालपाशेन सम्बद्धो यमदूतैर्महाबलैः। तामिस्रे पात्यते तावत् यावत् वर्षसहस्रकम्। तत्र ताडनसंतप्ताः कुर्वन्ति यमकिङ्कराः। पापभोगेन सम्मुक्तस्ततो योनिन्तु शौकरीम्। तत्र भुक्त्वा महादुःखं मानुषत्वं गमिष्यति। रोगादिचिह्नितं तत्र दुर्यशोऽपकं स्वकम्। भूतद्रोहं विधायैवं केवलं स्वकुटुम्बकम्। पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत्। ये नरा इह जन्तूनां वधं कुर्वन्ति वै मृषा। ते रौरवे निपात्यन्ते खाद्यन्ते रुरुभिर्वतः। यः स्वोदरार्थं भूतानां वधमाचरति स्फुटम्। महारौरवसंज्ञे तु पात्यते स यमाज्ञया। यो वै निजन्तु जनकं ब्राह्मणं द्वेष्टि पापकृत्। कालसूत्रे महादुष्टे योजनायतविस्तृते। यावन्ति पशुरोमाणि गवां द्वेषं करोति यः। तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः। यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत्। करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः। स शूकरसहस्रैर्दुष्टैः पीड्यते यमकिङ्करैः। पश्चाद्दुष्टासु योनीषु जायते पापभुक्तये। ब्राह्मणानां भयं ये तु द्रव्यं वित्तं तथाल्पकम्। वृत्तिं वा गृह्णते मोहाद्भुञ्जन्ति स्ववशाद्वराः। ते परतान्धकूपे च पात्यन्ते च महार्द्दिताः। योऽर्थं स्वयमपाहृत्य मधुकञ्चाप्ति लोलुपः। न देवाय न सुहृदे ददाति रसनातुरः। स पतत्येव नरके कृमिभोजनसंज्ञके। अनापदि नरो यस्तु हिरण्यादीनपाहरेत्। ब्रह्मस्वं वा महादुष्टः सन्दंशे नरके पचेत्। यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढधीः। मनसा कल्पितं द्रव्यं विदुषे यो ददाति न। स पुमान्नरकं याति यावदिन्द्राश्चतुर्दश। पश्चाद्दुष्टासु योनीषु जायते वर्षसङ्करः। दानानि वाडवे दत्त्वा पुनः शुद्धो भविष्यति। वचोदत्तं मनोदत्तमिति साहं वदेत् यदि। कल्पन्ते पितरस्तस्य नरकाय ससूत्रकाः। वचोदत्तं मनोदत्तं दत्तं पाणिकुशोदकम्। एतद्दत्तमदत्तं चेत् जिह्वास्तत्पाटयेद् यमः। स यात्यते तैलतप्ते कुम्भीपाकेऽतिदारुणे। ये नगस्यां स्त्रियं मोहाद्योषिद्भावाच्च कामयेत्। तं तया किङ्कराः स्मूर्य्याः परिबद्धञ्च कुर्वते। ये वडाहेदमर्य्यादां लुम्पन्ति स्ववलोद्धताः। ते वैतरण्यां पतिता मांसशोणितभक्षकाः। दुष्टर्त्तौ यः स्त्रियं गत्वा तया गार्हस्थ्यमाचरेत्। पूयोदे निप-

तत्रैव महादुःखसमन्वितः। ये दम्भानाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने। वैशसे नरके मूढाः पतन्ति यमताडिताः। ये सवर्णां स्त्रियं मूढाः पाययन्ति स्वरेतसम्। रेतःकुल्यासु ते यात्या रेतःपानेषु तत्पराः। ये चौरा वह्निदा दुष्टा गरदा ग्रामकुण्ठकाः। सारमेयादने ते वै यात्यन्ते पातकान्विताः। कूटसाक्ष्यं वदत्यज्ञा पुरुषः पापसम्भृतः। परकीयन्तु द्रव्यं यो हरति प्रसभं बली। सोऽवीचिनरके पापे स्रवाग्वक्त्रः पतत्यधः। तत्र दुःखं महद्भुङ्क्ते पापिष्ठां योनिमाव्रजेत्। यो नरो रसनास्वादात् सुरां पिबति मूढधीः। तम्पाययन्ति लोहस्य रसं धर्मस्य किङ्कराः। यो गुरुनवमन्येत स्वविद्याचारदर्पितः। स मृतः पात्यते क्षार संज्ञकेऽधोमुखः पुमान्। विश्वासघातं कुर्वन्ति ये नरा धर्मनिष्कृताः। शूलप्रोते तु नरके पात्यन्ते बहुयातनाः। यैर्न श्रुता रामकथा न परोपकृतिः कृता। तेषां सर्वाणि दुःखानि भवन्ति नरकान्तरे। अग्रे यस्य सुखं भूयस्तस्य स्वर्गं प्रतीर्यते। ये दुःखिनो रोगयुता नरकादागतास्तु ते॥ २असुरभेदे पु० स च वराहेण रसातलायां पृथ्व्याप्तत्यादितः सएव च वसिष्ठशापेन द्वापरयुगे स्वपितृधेनैव कृष्णेन निसूदितः। कालिकापुराणे ३६ अध्यायावधि ४१अध्याये तत्कथा विस्तरेण दृश्या। कालिकापुराणशब्दे ०२०१५पृ० संक्षेपतस्तत्कथा दर्शिता।

नरककुण्ड न० यातनास्थानभेदे "यम उवाच नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च। नानापुराणभेदेन नामभेदानि तानि च। भयङ्कराणि घोराणि शृणु वत्स। कुत्सितानि च। षडशीतिश्च कुण्डानि संयमन्याञ्च सन्ति च। निबोध तेषां नामानि प्रसिद्धानि श्रुतौ स्मृतौ" इति ब्रह्मवैवर्त्ते प्रकृतिख० २७।२८ अ०।

नरकभेदकुण्डानि पापभेदात् तत्र गामिनः

१ वह्निकुण्डम्—कटुवाचा बान्धवोत्पीडकः।
२ तप्तकुण्डम्—ब्राह्मणातिथिभोजनाप्रदायी।
३ क्षारकुण्डम्—निषिद्धदिने वस्त्रे क्षारसंयोजकः।
४ विट्कुण्डम्—ब्रह्मद्रव्यापहारकः।
५ मूत्रकुण्डम्—परतडागं स्वनिस्तोत्सर्जकः।
६ श्लेष्मकुण्डम्—एकाकी मिष्टभोजी।
७ नरकुण्डम्—पितृमातृगुरुभार्याद्यपोषकः।
८ दूषिकाकुण्डम्—अतिथिं दृष्ट्वा वक्रचक्षुःकारी।
९ वसाकुण्डम्—विप्राय प्रतिश्रुत्य तद्द्रव्यमन्यस्मै दाता।
१० शुक्रकुण्डम्—परस्त्रीगामी वा परपुंगामिनी च स्त्री।
११ असृक्कुण्डम्—गुर्वादिताडकस्तद्रक्तस्रावकश्च।
१२ अश्रुकुण्डम्—हरिसङ्कीर्तनेरुदन्नायद्रुगदभक्तोपहासकृत्।
१३ गात्रमलकुण्डम्—मद्यदग्धचित्तः खलताकारी च।
१४ कर्णविट्कुण्डम्—बधिरोपहासकृत्।
१५ मज्जकुण्डम्—लोभात् स्वभोजनार्थं जीवहन्ता।
१६ मांसकुण्डम्—अर्थलोभात् कन्याविक्रेता।
१७ नखकुण्डम्
१८ लोमकुण्डम्
} श्राद्धोपवासादिषु संयमत्यागी।
१९ केशकुण्डम्—स्वकेशपार्थिवशिवलिङ्गार्चकः।
२० अस्थिकुण्डम्—विष्णुपदे पितृपिण्डदायी।
२१ ताम्रकुण्डम्—गुर्वीशयागामी।
२२ लौहकुण्डम्—अतत्त्वाताऽवीरयोरन्नभोजी।
२३ तीक्ष्णकण्टककुण्डम्—कटुवाचा स्वामितर्जिका स्त्री।
२४ विषकुण्डम्—विषेण जीवहन्ता।
२५ चर्मकुण्डम्—स्वधर्महन्त्रेण देवद्रव्यस्वर्थी।
२६ तप्तसुराकुण्डम्—शूद्रातुल्यातः शूद्रान्नभोजी।
२७ प्रतप्ततैलकुण्डम्—दण्डेन हतताडकः।
२८ कुन्तकुण्डम्—कुन्तलौहवड्डिशैर्जीवहन्ता।
२९ कृमिकुण्डम्—श्यामांसमतृस्वभुग्विप्रो हरेरनैवेद्यभुक् च।
३० पूयकुण्डम्—शूद्रयाजी तस्य श्राद्धभुक् तच्छवदाही च।
३१ सर्पकुण्डम्—श्रीकृष्णपदचिह्नमस्तकस्य सर्पस्य हन्ता।
३२ मशककुण्डम्—विधिं हित्वा क्षुद्रजन्तुहन्ता।
३३ दंशकुण्डम्—विधिं हित्वा जीवहन्ता।
३४ गरलकुण्डम्—मक्षिकां हत्वा मधुग्राही।
३५ वज्रदंष्ट्रकुण्डम्—अदण्ड्यविप्रयोर्दण्डकृत् नृपः।
३६ वृश्चिककुण्डम्—अर्थलोभात् प्रजादण्डकृत् नृपः।
३७ शरकुण्डम्
३८ शूलकुण्डम्
३९ खड्गकुण्डम्
} शस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः।
४० गोलकुण्डम्—अल्पदोषेण कारायां प्रजाबन्धनकृत् नृपः।
४१ नक्रकुण्डम्—जलादुत्थितनक्रादिहन्ता।
४२ काककुण्डम्—कामेन परस्त्रीवक्षःश्रोणीस्पृष्टा।
४३ सुवर्णकुण्डम्—स्वर्णचौरः।
४४ वालकुण्डम्—ताम्रलौहचौरः।
४५ वलकुण्डम्—भूदेवदेवद्रव्ययोश्चौरः।
४६ तप्तपाषाणकुण्डम्—देवद्विजयोरौष्यगोवस्त्राणां चौरः।
४७ तीक्ष्णपाषाणकुण्डम्—देवद्विजयोःपित्तलकांस्यपात्रचौरः।

४८ लालाकुण्डम्—वेश्यान्नभुक् तद्वृत्तिजीवी च ।
४९ मसीकुण्डम्—म्लेच्छसेवी मसीजीवी च ब्राह्मणः ।
५० चूर्णकुण्डम्—देवद्विजयोः प्रसृताम्बूलासनचौरः ।
५१ चक्रकुण्डम्—विप्रद्रव्यं हृत्वा चक्रकारी ।
५२ वक्रकुण्डम्—विप्रवान्धवयोर्वक्रताचारी ।
५३ कूर्मकुण्डम्—हरिशयने कूर्ममांसभुक् ब्राह्मणः ।
५४ ज्वालाकुण्डम् } देवद्विजयोर्दत्ततैलादिहृत् ।
५५ भस्मकुण्डम् }
५६ दण्डकुण्डम्—देवद्विजयोर्द्वात्रीगन्धतैलद्रव्याणामपहर्त्ता
५७ तप्तगूर्मीकुण्डम्—बलखलत्वादिना परभूमिहरः ।
५८ असिपत्रकुण्डम्—अर्थलोभात् खड्गेन नरघाती ।
५९ क्षुरधारकुण्डम्—ग्रामनगरादिदाहकारी ।
६० सूचीमुखकुण्डम्—परकर्णे मुखं दत्त्वा परनिन्दकः परदोषोद्घोषी वेदब्राह्मणनिन्दकश्च ।
६१ गोधामुखकुण्डम्—गृहं भित्त्वा वस्तुगोक्षागमेषचौरः ।
६२ नक्रमुखकुण्डम्—सामान्यद्रव्यचौरः ।
६३ गजदंशकुण्डम्—गजतुरगनरचौरः ।
६४ गोमुखकुण्डम्—गोर्जलपानवारकः ।
कुम्भीपाककुण्डम्—गोस्त्रीभिक्षुभ्रूणब्रह्महाऽगम्यागामी दीक्षासन्ध्याहीनस्तीर्थप्रतिग्राही ग्रामयाजी देवतः भूरूपकारी दमनीपतिश्च ।
६६ कालसूत्रकुण्डम्—वेश्यान्नभुक् तत्संगी च ।
६७ अवटोदकुण्डम्—कुलटादिगङ्गेयगामी द्विजः ।
६८ अरन्तुदकुण्डम्—चन्द्रसूर्यग्रहणे निमित्तकाले भोजी ।
६९ पांशुभोजकुण्डम्—एकस्मै वाक्प्रदत्तकन्याया दोषं विना अन्यस्मै दाता ।
७० पाशवेष्टकुण्डम्—दत्तापहारी ।
७१ शूलप्रोतकुण्डम्—अभक्त्या शिवविष्णुपूजकः ।
७२ प्रकम्पनकुण्डम्—विप्रदण्डलत् तत्कम्पलङ्घयदायी च ।
७३ उल्कामुखकुण्डम्—सकोपवदना स्वामिनि कटुवादिनी ।
७४ अकूपकुण्डम्—शूद्रभोग्या ब्राह्मणी ।
७५ वेदनकुण्डम्—पञ्चषट्पुंगमनात् वेश्या ।
७६ दण्डताडनकुण्डम्—सप्ताष्टपुंगमनात् रण्डा ।
७७ जालबद्धकुण्डम्—अष्टाधिकपुंगमनात् महावेश्या ।
७८ देहचूर्णकुण्डम्—पुंद्वयगमनात् कुलटा ।
७९ दलनकुण्डम्—चतुःपुंगमनात् स्वैरिणी दमनी च ।
८० शोषणकुण्डम्—त्रिपुंगमनात् भृष्टा पुंश्चली ।
८१ कपकुण्डम्—सर्वार्थपरदारगामी ।
८२ सूर्पकुण्डम्—ब्राह्मणीगमनकारको क्षत्रियोवैश्यश्च ।
८३ ज्वालामुखकुण्डम्—करे तुलसीगङ्गाजलदेवशिलाश्च धृत्वा प्रतिग्राहकतदपालको मिथ्यागमयी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च ।
८४ जिह्वाकुण्डम्—नित्यक्रियाहीनो देवयजनेऽनास्तिकोमन्दोपहासी च ।
८५ धूमान्धकुण्डम्—देवविप्रयोर्धनहारी ।
८६ नागवेष्टनकुण्डम्—वेद्यदेवस्वहृत्तिहारी वाणाजीवव्यापारी रसादिविक्रयी च ब्राह्मणः" ।

नरकजित् पु० नरकम् असुरभेदं जयति ज जि–भूते क्विप् ६त० । वासुदेवे श्रीकृष्णे "नैर्ऋतो नरको नाम ब्रह्मणो वरदर्पितः । अदित्याः कुण्डले मोहाज्जहार दितिनन्दनः । देवानां विप्रिये नित्यमृषीणाञ्च स वर्त्तते । तव चैवान्तरप्रेप्सी जहि तं वापपूरुषम् । अयं त्वां गरुडस्तत्र प्रापयिष्यति कामगः । कामवीर्य्योऽतितेजस्वी वैनतेयोऽन्तरीक्षगः । अवध्यः सर्वभूतानां भौमः स नरकोऽसुरः । निसूदयित्वा तं पापं क्षिप्रमागन्तुमर्हसि । इत्युक्तः पुण्डरीकाक्षो देवराजेन केशवः । प्रतिजग्मे महाबाहुर्नरकस्य निवर्हणम्" इत्युपक्रमे तयोर्युद्धवर्णनानन्तरम् "मुहूर्त्तं योधयामास नरकं मधुसूदनः । अथोपचक्रचक्रेण प्रदीप्तेनाकरोद्द्विधा । चक्रद्विधाकृतं तस्य शरीरमपतद्भुवि । विभक्तं क्रकचेनेव गिरेः शृङ्गं द्विधाकृतम् । लब्धमासाद्य देवेशं जगामास्तमिवांशुमान् । चक्रोत्क्षिप्तनिकृत्ताङ्गमुत्तमं पतितं रथे । वज्रेणेव विनिर्भिन्नं यथा मेरिकपर्वतम् । भूमिस्तु पतितं पुत्रं निरीक्ष्यादाय कुण्डले । उपातिष्ठत गोविन्दं वचनञ्चेदमब्रवीत् । दत्तस्त्वयैव गोविन्द ! त्वयैव विनिपातितः । यथेच्छसि तथा क्रीड वालक्रीडनकैरिव । इमे ते कुण्डले देव ! प्रजां तस्यानुपालय" हरिवं० १२२अ० तद्वधकथा

नरकदेवता स्त्री नरकस्याधिष्ठात्री देवता । निर्ऋतौ शब्दर०

नरकपाल न० ६त० । मृतनरस्य शीर्षस्थे अस्थिभेदे "नरकपालं शुचि प्राशयङ्गत्वात् शङ्खवत् तस्य शुचित्वानुमानं बलवदागमविरोधात् अप्रमाणम् इति" मथुरानाथः । स च आगमः "मलमूलं पूरीषास्थि निर्गतं शुचि स्मृतम् । नारं शृङ्गा च सस्नेहं सचेलोजलमाविशेत्" मनुवचनम्

नरकभूमि स्त्री नरकस्य दुःखभेदस्य भोगयोग्या भूमिः । यमालयस्थायां दुष्कर्मणां दुःखभोगार्थं भूमौ । तास्तु हेमच० अधोधोवर्त्तमानाः दर्शिताः "जलोदधिजलवात

तनुवातनभःस्थिताः। रत्नशर्करावालुकापङ्कधूमतमःप्रभाः। महातमःप्रभा चेत्यधोधोनरकभूमयः"।

नरकमुक्त पु॰ नरकान्मुक्तः। नरकान्मुक्ते "कपूयचरणाः कपूयां योनिमापद्येरन्" श्रुतिः अनुशयशब्दे १८८पृ॰ दृश्यम्। गारुडे २२९अ॰ ततो मुक्तानां पापविशेषात् योनिभेदप्राप्तिरुक्ता यथा

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते। पतितात् प्रतिमुक्तस्तु खरयोनिं व्रजेद्बुधः। नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकी। उपाध्याये व्यलीकन्तु कृत्वा श्वा भवति द्विजः। तच्छायां मनसा वाञ्छंस्तद्द्रव्यं वाप्यसंशयम्। गर्दभो जायते जन्तुर्मित्रस्यैवापमानकृत्। मातोवितरमाक्रुश्य शारिका संप्रजायते। पितरौ पीडयित्वा तु कच्छपत्वञ्च जायते। भर्त्तुः पिण्डमुपान्नन् यो हित्वा ऽन्यानि च सेवते। सोऽपि मोहसमापन्नो जायते वानरो मृतः। न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः। असूयकश्च नरकान्मुक्तो भवति राक्षसः। विद्यापहर्त्ता च नरो हीनयोनौ प्रजायते। यवधान्यानि हृत्वा तु जायते मूषिको मृतः। परदारामिमर्शात्तु टको घोरोऽभिजायते। भ्रातृभार्यांप्रसङ्गेन कोकिलो जायते नरः। गुर्वादिभार्यागमनाच्छूकरो जायते नरः। यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः। देवतापितृविप्राणामदत्त्वा योऽश्नमश्नुते। प्रमुक्तो नरकादापि वायसः स प्रजायते। ज्येष्ठभ्रातरमानाम्य क्रौञ्चयोनौ प्रजायते। शूद्रस्य ब्राह्मणीं गत्वा कृमियोनौ प्रजायते। तस्यामपत्यमुत्पाद्य काष्ठान्तः कीटको भवेत्। कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा। अयस्कं पुरुषं हत्वा नरः संजायते खरः। कृमिः स्त्रीवधकर्त्ता च बालहन्ता प्रजायते। भोजनं चोरयित्वा तु मक्षिका जायते नरः। हृत्वाश्वञ्चैव मार्ज्जारस्तिलहृच्चैव मूषिकः। घृतं हृत्वा च नकुलः काको मधुगुरामिषम्। मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः। अपो हृत्वा तु पापात्मा वायसः संप्रजायते। हृते कांस्ये च हारीतः कपोतो वा प्रजायते। हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते। कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा। मयूरो वर्त्तकं हृत्वा शाकं पतङ्गश्च जायते। जीवञ्जीवकतां याति रत्नवस्त्रापहारकः। कुच्छुन्दुरिः शुभान् मन्त्रान् वंशं हृत्वा शशो भवेत्। मद्यतः कन्यापहरणे काष्ठहृत् काष्ठकीटकः। पुष्पापहृद्दरिद्रस्तु पङ्कुर्यवापहृच्चरः। शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः। एवङ्कृत्वा नरकान् गत्वा रौरवादीन् सुदारुणान्। नृणगुल्मलतावल्लीत्वकसार तरुतां व्रजेत्। एष एव क्रमो दृष्टो गोसुवर्णादिहारिणाम्। विद्यापहारी मूकश्च गत्वा च नरकान् बहून्। असमिद्धेऽग्नौ च हुते मन्दाग्निः संप्रजायते। परनिन्दाकृतन्तत्वं परमर्मावघातनम्। नैष्ठुर्यं निर्दयत्वञ्च परदारोपसेवनम्। परस्वहरणाऽशौचं देवतानाञ्च कुत्सनम्। निजत्या वञ्चनं नृणां कार्पण्यञ्च नृणां बुधः। उपलक्षणाद्विजानीयात् मुक्तानां नरकादनु" प्रसङ्गात् स्वर्गादागतलक्षणं तत्रैव यथा "दयाभूतेषु संवादः परलोकं प्रति क्रिया। सत्यं भूतहिता चोक्तिर्वेदमामान्य दर्शनम्। गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः। सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः। अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम्"। अधिकं कर्मविपाक शब्दे १७४२पृ॰ दृश्यम्।

नरकस्थ त्रि॰ नरके तद्भूमौ तिष्ठति स्था-क ७त॰। १नरकभूमौ स्थिते २वैतरणीनद्यां स्त्री हेमच॰।

नरकान्तक पु॰ ६त॰। विष्णौ नरकजिच्छब्दे दृश्यम्।

नरकामय पु॰ नरक आमय इव यस्य। १प्रेते शब्दरत्ना॰। नरक आमय इव कर्म॰। २नरकरूपे रोगे च।

नरकीलक पु॰नरेषु कीलक इव गर्हितत्वात्। गुरुघ्ने हेमच॰

नरकेशरिन् पु॰ नर एव केशरी। १नरसिंहे नरसिंहशब्दे दृश्यम्। नरः केशरीव शूरत्वात् २मानवश्रेष्ठे च।

नरगण पु॰१नक्षत्रभेदे उपयमशब्दे १५०पृ॰ दृश्यम्। ६त॰ २नरसमूहे च। [२मेढ्रे न॰ उणादि॰।

नरङ्ग पु॰ न-ऋङ्गच्। वरण्डे (नारङ्गा) प्रसिद्धे १व्रणभेदे

नरद न॰नलद+लस्य रः। नलदे ततः क्षिपरा॰ तदस्य पण्यमित्यर्थे ष्ठन्। नरदिक तद्विक्रेतरि त्रि॰।

नरदेव पु॰ नरो देव इव। नृपे। "ददर्श देवं नरदेवसम्भवः" रघुः। "भूमिदेवनरदेवसङ्गमे" माघः।

नरद्विष् पु॰ नरान् द्वेष्टि द्विष्-क्विप्। राक्षसे "ब्रह्मास्त्रं तेन मूर्द्धानमदध्वंसन्नरद्विषः" भट्टिः।

नरनगर न॰ नरप्रधानं नगरम् पूर्वपदात् संज्ञायां णत्वे प्राप्ते चुम्बादि॰ न णत्वम्। नगरभेदे

नरनारायणौ द्वि॰ व॰। नरश्च नारायणश्च। ऋषिभेदयोः तयोः सम्भवकथा "तदा दंष्ट्राग्रघातेन नरसिंहं महाबलम्। सरभो मन्त्रवान् भर्गो द्विधा मध्ये चकार ह।

नरसिंहे द्विधा भूते नरभागेण तस्य तु । नर एव समुत्पन्नो दिव्यरूपी महान्ऋषिः । तस्य पञ्चास्यभागेन नारायण इति श्रुतः । अभवत् स महातेजा मुनिरूपी जनार्दनः । नरो नारायणश्चोभौ सृष्टिहेतू महामती । ययोः प्रभावो दुर्ज्ञेयः शास्त्रे वेदतपःसु च" कालिकापु० २९अ० ।

एतच्च वाराहकल्पे । अन्यकल्पे तु तौ धर्मस्य पुत्रौ यथोक्तं भाग०२।६अ०"धर्मस्य दक्षदुहितर्यजनिष्ट सुत्यां नारायणो नर इति स्वतपःप्रभावौ" । स्वायम्भुवे मन्वन्तरे धर्मस्य चतुर्षु पुत्रेषु तौ च द्वौ यथा "नारायणो हि विश्वात्मा चतुर्मूर्त्तिः सनातनः । धर्मात्मजः सम्बभूव पितैवं मेऽभ्यभाषत । कृते युगे महाराज ! पुरा स्वायम्भुवेऽन्तरे । नरो१नारायण२श्चैव हरिः३ कृष्णः४ स्वयम्भुवः । तेषां नारायणनरौ तपस्तेपतुरव्ययौ । बदर्याश्रममासाद्य शकटे कनकामये" भा०शा०३३६अ० ।

नरन्धि पु० नरो धीयन्ते आरोप्यन्ते अस्मिन् धा–आधारे कि उपस० पृषो० सुम् । संसारे महीधरः नरन्धिषशब्दे दृश्यम् ।

नरन्धिष पु० विष्णौ "विष्णुर्नरन्धिषः प्रोह्यमानः"यजु०८।५५ "विष्णुर्नरन्धिषो भवति नरो धीयन्ते आरोप्यन्ते यस्मिन् स नरन्धिः संसारः तं स्यति नाशयति नरन्धिषः संसारसंहर्त्ता विष्णुः यद्वा रष–हिंसायाम् रष्यति हिनस्ति रन्धिषः हन्ता नरन्धिषो जगत्पालकः" महीधरः । उभयत्र पृषो० ।

नरपति ६त० ६त० । नृपे शब्दर० । "नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी" रघुः । नरेश्वरनरनाथनरनायकनरेशादयोऽप्यत्र । "नरनाथ ! न जानीमस्त्वत्प्रिया यद्यवस्यति" भाग०४।२६।१५।

नरपतिजयचर्य्या स्त्री नरपतीनां राज्ञां जयस्य चर्य्या । स्वरोदयमूलके मन्त्रभेदे चक्रशब्दे तद्वाक्यं भूरि दर्शितम् ।

नरपशु पु०नरः पशुरिव उपमितस०।१मानवाधमे २पुंरूपे पशौ च "विषयद्वेषोनरपशवोय उपासते विभूतीर्न परं त्वाम् । तेषामाशिष रैश ! तदनु विनश्यन्ति यथा राजकुलम्" भाग० ६।१६।२६ नृपशब्दादयोऽप्यत्र । "याश्च स्त्रियो नृपशून् खादन्ति" भाग० ५।२६।२९ [नृपे ।

नरपाल पु० नरान् पालयति पालि–ण्वुल् । मानवरक्षके

नरपुङ्गव पु० नरः पुङ्गवो इव श्रेष्ठत्वात् । नरश्रेष्ठे "शैब्यश्च नरपुङ्गवः" गीता ।

नरप्रिय त्रि० ६त० । १मनुष्यप्रहृद्ये वस्तुमात्रे २नीलवृक्षे पु० राजनि० । [भूमिरप्युभयत्र शब्दर० ।

नरभू स्त्री ६त० । १भारतवर्षे २नराणामुत्पत्तौ च । नर-

नरमानिनी स्त्री नरं मन्यते मन–णिनि ङीप् । श्मश्रुयुक्त सुख्यां नार्य्यां तिका०ण्वुल् । नरमानिका तत्रार्थे शब्दर०

नरमाला स्त्री नराणां तन्मुण्डानां माला । नरमुण्डरचित मालायां"विचित्रखट्वाङ्गधरा नरमालाविभूषणा"देवीमा०

नरमालिनी स्त्री नरस्येव माला केशमाला सुखेऽस्यास्याः इति ङीप् । श्मश्रुयुक्तवदनायां १नार्य्यां हेमच०।२नरमुण्डमालावत्यां स्त्रियां च ।

नरमेध पु० नरा मिध्यन्ते हिंस्यन्ते यत्र मिध–आधारे घञ् ६त० । पुरुषमेधाख्ये यज्ञभेदे स च यज्ञः यजु० ३०।३१ अध्याययोर्दर्शितः तत्राधिकार्यादिकम् ३०अध्याये वेददीपे उक्तं यथा "ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्चसुत्या इति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम् । आज्येन सकृदुद्गृहीतेन देव सवितिरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति" । देवताभेदेन तत्रालभ्यपशुभेदात्तत्र "ब्रह्मणे ब्राह्मणमित्यादिना" अध्यायसमाप्तिपर्यन्तेनोक्ताः अष्टाचत्वारिंशत्सङ्ख्यकाश्च ब्राह्मणादयो ब्रह्माद्यष्टाचत्वारिंशद्देवदेवत्याः पशवः "स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमदृश्यत्तमाहरत्तेनायजत तेनेष्ट्वात्यतिष्ठत् सर्वाणि भूतानीदं सर्वमभवदतितिष्ठति सर्वाणि भूतानीदं सर्वं भवति य एवं विद्वान् पुरुषमेधेन यजते यो वैतदेवं वेद । तस्य त्रयोविंशतिर्दीक्षाः । द्वादशोपसदः पञ्चसुत्याः स एव चत्वारिंशद्रात्रः सदीक्षोपसत्कः" शत० ब्रा० १३।६।१।२। अत्र पञ्चरात्रत्वोक्तिः पञ्चसुत्याभिप्रायेणेति न विरोधः । "त्रिंशदग्नीनहं ब्रह्मन्नयजं यज्ञ नित्यदा । अष्टाभिः सर्वमेधैश्च नरमेधैश्चसप्तभिः"भा०अनु०।०२अ० "राजसूयाश्वमेधौ च सर्वमेधश्च भारत ! । नरमेधश्च नृपते ! त्वमाहर युधिष्ठिर ।" भा०आश्र० ३अ०। १८०३पृ० कलिशब्दे दर्शितेन वृहन्नारदीयवचनेन नरमेधस्य कलौ "दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकावित्यनेन" निषेधेऽपि कलियुगोत्पन्न

युधिष्ठिरं प्रति नरमेधाहरणे नियोजनं तु न विरुध्यते हरेःस्वर्गारोहानन्तरमेव कलेः प्रकर्षेण प्रवृत्त्यवगमात् ततः प्राक्काले यथाविधानं सर्वे धर्मा व्यवस्थिता इत्यवगमाच्च तदूर्द्ध्वमेव कलेः प्रबलत्वात् दृष्टप्रारब्धीयादुत्कलिवर्ज्यस्यावकाश इत्यवधेयम्। भूमौ श्रीकृष्णस्थितिपर्यन्तं कलेः प्रादुर्भावाभावश्च भागवते उक्तः तच्च वाक्यं कलिशब्दे १७९५पृ० दर्शितम्। अतो युधिष्ठिरादीनां नरमेधाश्वमेधमहाप्रस्थानादिकं न विरुध्यते

नरमन्य पु० आत्मानं नरं मन्यते नृ+मन-खश् मुम् एकाचोऽमन्तवत् कार्यम्। आत्मानं नृतया मन्यमाने।

नरयन्त्र न० छायाद्वारा कालसाधके द्वादशाङ्गुलशङ्कुयन्त्रे "नरयन्त्रं तथा साधु दिने च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधकमुत्तमम्" सू०सि० "विमले मेघादिव्यवधानरूपमलेन रहिते सूर्ये एतद्रूपे दिने। चकार एवकारार्थत्वेन साभ्रदिनव्यवच्छेदः। नरयन्त्रं द्वादशाङ्गुलशङ्कुयन्त्रं तथा घटीयन्त्रवत् कालसाधकं साधु सूक्ष्मं रात्रौ नेत्यर्थसिद्धम्। ननु शङ्कोश्छायासाधकत्वं न कालसाधकत्वं तेन तस्य कथं यन्त्रत्वं कालसाधकवस्तुनो यन्त्रत्वप्रतिपादनादित्यत आह। छायासंसाधनैरिति। इदं शङ्कुरूपनरयन्त्रं छायायाः सम्यक्सूक्ष्मत्वेन साधनैरयनैः कृत्वा कालसाधनं दिनगतादिकालस्य कारणमुत्तमम्। अन्ययन्त्रेभ्योऽस्यान्तिरन्तरतयातिश्रेष्ठम्। तथा च छायासाधकत्वेनैव छायाद्वारा शङ्कोः कालसाधकत्वमिति न यन्त्रत्वव्याघातः। अतएव साभ्रदिने रात्रौ चेदमनुपयुक्तम्। नरस्य छायायन्त्रोपलक्षणत्वात् यष्टिधनुश्चक्राण्यपि तथेति बोध्यम्" रङ्ग०। "समतलमसमपरिधिभ्रमिशङ्कोर्दन्तिदन्तजः शङ्कुः। तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्" सि०शि०। शङ्कोः कालज्ञानसाधनत्वमुक्तम्।

नरयान न० नरवाह्यं यानम् (बग्घीगाड़ी) प्रभृतौ यानभेदे "नरयानेन तु ज्येष्ठः पिता पार्थस्य भारत!। अग्रतो धर्मराजस्य गान्धारीसहितो ययौ" भा० आ० ३७अ०। नरवाहन नररथादयोऽप्यत्र।

नरलोक पु० नराधिष्ठितो लोकः भुवनम्। १पृथिवीलोके नर एव लोकः। २मानवरूपे जने च "आकृष्टलोकान् नरलोकपालान्" रघुः "तया तवामी नरलोकवीरा विशन्ति वक्त्राण्यभितो ज्वलन्ति" गीता।

नरवाहन पु०नरो वाहनं यस्य। १कुबेरे २नरयानवाह्ये त्रि० "धनदया नरवाहनसम्पदः" रघुः "मणिग्रीवोत्तम वपुः कुबेरो नरवाहनः" हरिवं०४५अ०। ३नरवाह्ये याने न०।

नरविध्वण त्रि० नरं विध्वणति हिनस्ति वि+स्वन-अच् मुम्। नरहिंसके राक्षसे पुंस्त्री विका०। स्त्रियां ङीष्।

नरव्याघ्र पु० नरो व्याघ्र इव उपमितस०। श्रेष्ठमानवे।

नरशृङ्ग न० ६त०। अलीके पदार्थे शशशृङ्गादिवत् शृङ्गे पशोर्यत्वस्येव नरीयत्वस्याप्यभावाद्योग्यत्वेन अस्यालीकार्थत्वम् योग्यताभावादेवात्र शाब्दबोध इति बोध्यम्।

नरसिंह पु० नरश्चासौ सिंहः नरश्च सिंहश्चाकारोऽस्यस्य अच् वा। अर्द्धनराकारे अर्द्धसिंहाकारे १भगवच्छरीरभेदे तादृशशरीरग्रहणे कारणञ्च हरिवं०२३१अ० उक्तं यथा "हिरण्यकशिपुरुवाच "न देवासुरगन्धर्वा न यक्षोरगराक्षसाः। न मानुषाः पिशाचा वा निहन्युर्मां कथञ्च न। क्षयोनैव मां क्रुद्धाः सर्वलोकपितामह!। यमेयुस्तपसा युक्ता वर एष हृतो मया। न शस्त्रेण न चास्त्रेण गिरिणा पादपेन वा। न शुष्केण न चार्द्रेण स्यान्न चाग्न्येन मे वधः। न स्वर्गेऽथ पातालेऽथ नाकाशे नावनिस्थले। न चाभ्यन्तररात्राङ्गे नाप्यन्यत्र मे वधः। पाणिप्रहारेणैकेन सुभृशबलवाहनम्। यो मां नाशयितुं शक्तः स मे मृत्युर्भविष्यति" तथा वरप्राप्तौ हिरण्यकशिपुना जगतां निष्पीडने कृते तद्वधाय देवैः प्रार्थितो भगवान् नरसिंहरूपेणावततार यथाह तत्रैवाध्याये

"एवमुक्त्वा स भगवान् विरूप्य त्रिदिवौकसः। वधं संकल्पयामास हिरण्यकशिपोः प्रभुः। सोऽचिरेणैव कालेन हिमवत्पार्श्वमागतः। किं तु रूपं समास्थाय निहन्त्रेनं महासुरम्। यत् सिद्धिकरमाशु स्याद्वधस्य विबुधद्विषः। अनुत्पन्नस्ततश्चक्रे भीतस्तो रूपमीदृशम्। नारसिंहमनाधृष्यं दैत्यदानवरक्षसाम्। सहायन्तु महाबाहुर्जग्राहोद्धारमेव च। अथोद्धारसहायो वै भगवान् विष्णुरच्युतः। हिरण्यकशिपोः स्थानं जगाम प्रभुरीश्वरः। तेजसा भास्कराकारः कान्त्या चन्द्र इवापरः। नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं तथा। नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना। ततोऽपश्यत विस्तीर्णां दिव्यां रम्यां मनोरमाम्"। ततस्तदुक्तया "यदि दास्यसि मे वरान् हे वरदोत्तम!। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मां भून्मम प्रभो!। नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः। न भूमौ नाम्बरे मृत्युर्न

नरैर्न मृगैरपि । व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः । अप्रतिद्वन्द्वतां युद्धे ऐश्वर्यमत्यञ्च देहिनाम्" भाग०७।२।२४ एवं प्रार्थितवरप्राप्तौ खम्भात्हिरण्याक्षहन्तरि विष्णौ द्वेषात् तद्भक्तेऽपि प्रह्लादेऽतीव द्वेषेण तेन विरुद्धमाचरितम्। अनन्तरं च तेनोक्तः प्रह्लादः सर्वत्र विष्णोः स्थायित्वं प्रतिजज्ञे तेन स्तम्भेऽपि तत्सत्त्वसद्भावात् । तच्छ्रुत्वा तेन स्तम्भताडने कृते तत्र प्रह्लादकथां सत्यां चिकीर्षुः भगवान् नरसिंहरूपेण प्रादुर्बभूव यथाह

"सत्यं विधातुं निजभृत्यभाषितं व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः । अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् । स सत्यमेवं परितोविपश्यन् स्तम्भस्य मध्यादनुनिर्जिहासतम् । नायं मृगो नापि नरोविचित्रमहो किमेतन्नृ मृगेन्द्ररूपम्। मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपं तदलं भयानकम् । प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेशरजृम्भिताननम् । करालदंष्ट्रं करवालचञ्चलज्जिह्वं भ्रकुटीमुखोल्बणम् । स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्ताननाग्रं हनुभेदभीषणम् । दिविस्पृगत्युग्रकायमतीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् । चन्द्रांशुगौरैस्तनुरुहैर्विष्वग्भुजानीकशतं नखायुधम्"तं श्येनवेगं शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधोहरिः । कृत्वाट्टहासं खरमुत्खनोल्बणं निमीलिताक्षं जगदुद्भयावहम् । विध्यक् स्फुरन्तं प्रहसत्तरं हरिर्व्याप्तो यथाखुं कुलिशक्षतत्वचम् । हार्यूरुमापाद्य ददार लीलया नखैर्यथाहिं गरुडो महाविषम्" भाग० ७।८अ० । "द्वारि सभायां नालनं वह्निः" जरं जरौ निपात्य न भूमौ नचाम्बरे । नखैर्नच व्यसुभिरसुमद्भिर्वा । एवं दिवानक्तं परिहाराय सायमिति द्रष्टव्यम्"श्रीधरस्वामी । नरसिंहत्वं च तदीयदेहवृत्तिजातिभेदः यथोक्तं सि०शि० "अथवा चेष्टादन्यावयविमात्रवृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वं तत् (शरीरत्वम्) मानुषत्वचैतन्यजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया देवत्वस्येव जातित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्य जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्" । नरः सिंह इव [illegible]२मानवश्रेष्ठे नरहरिन्निसिंहादयोऽप्यत्र ।

नरसिंहपुराणम् न० नरसिंहोपवर्णनात्मकं पुराणम् । उपपुराणभेदे "पाद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनम् । तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते" मत्स्यपु० नरसिंहमधिकृत्य कृतो ग्रन्थः अण् नारसिंहमित्यर्थः । "आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम्" कूर्मपुरा० उपपुराणोक्तौ ।

नरसिंहमूर्त्तिदान न० ६त० । कालिकापुराणोक्ते स्वर्णादिरचिततन्मूर्त्तिदाने तद्विधानं हेमा०दा०कालिपु०यथा "नृसिंहं चाथ रौक्मन्तु कृत्वा चतुर्भुजं विभुम् । ताम्रपात्रे प्रतिष्ठाप्य रौप्यदंष्ट्रे प्रकल्पयेत् । चक्षुषी पद्मरागेण नखानां विद्रुमास्तथा । पुष्परागं भ्रुवोर्देशे कर्णयोर्हीरकाद्भुतौ" नृसिंहरूपन्तु विष्णुधर्मोत्तरे "कार्य्यस्तु भगवान् विष्णुर्नरसिंहवपुर्द्धरः । पीनस्कन्धकटिग्रीवक्षयमध्यः कृशोदरः । सिंहासनो (सिंहास्यः) नृदेहस्य नीलवासाः प्रभान्वितः । आलीढस्थानसंस्थानः सर्वाभरणभूषणः । ज्वालमालाकुलसुखोज्ज्वलत्केशरमण्डलः । हिरण्यकशिपोर्वक्षःपाटयन्नखरैः खरैः । देवजानुगतः कार्य्यो हिरण्यकशिपुस्तथा । देवस्य शङ्खचक्राभ्यां भूषितोर्द्ध्वकरद्वयः" इति । "राजवर्त्म च वैदूर्यं इन्द्रनीलं सुमस्तके । कृत्वा रूपमिदं रम्यं तत्तात्वं मधुना बुधः । पूरयेत् खण्डमिश्रेण तत्र देवं पुनर्नमेत् । वस्त्रयुग्मेन संछन्नं आसने विनिवेशयेत् । नैवेद्यं कल्पयेदग्रं भक्ष्यैर्नानाविधैर्बुधः । वितानोपरिसंयुक्तं पुष्पदामभिरर्चयेत् । गन्धपुष्पैस्तथा धूपैर्जागरं चाग्रं कारयेत् । कृत्वा समस्तमेतत्तु हरये पूर्ववद्दद्यात् । यत्किञ्चित् प्राग्विनिर्दिष्टं कुर्यात् सर्वमिहापि तत्" । प्राग्विनिर्दिष्टमिति वैष्णवमन्त्रेण पूजनं मूलमन्त्रेण अष्टोत्तरशतं तिलाज्यहोमः द्वादशभ्यो ब्राह्मणेभ्यः सदक्षिणमन्नदानमिति । "कार्त्तिक्यां वाथ वैशाख्यामाश्रित्य द्वादशीमथ । कृत्वा विधिमिमं सम्यक् नूनं तत्फलमश्नुते । अरण्ये वाथ संग्रामे तस्करैर्दंष्ट्रिभिर्हते । न भयं जायते तस्य सकृद्यस्त्वेतदाचरेत् । विदार्य चापदोघोराः धनमायुः प्रयच्छति । सन्ततिं चैव रूपञ्च सौभाग्यञ्च मनोरथान् । एवं भवति यत्पुण्यं नृसिंहाकृतिदानतः । तेन विष्णोः पदं प्राप्य तत्र क्रीडन्ति देहिनः । एतत् श्रुत्वा महत् पुण्यं सर्वपापैः प्रमुच्यते । धनमायुर्यिवर्द्धेत श्रावकस्य विशेषतः । श्रावके दक्षिणां दद्याद्भक्त्या चात्मविभूतये"

नरस्कन्ध पु०नर+समूहे स्कन्ध । नरसमूहे एवं मनुष्यस्कन्धादयोऽप्यत्रार्थे ।

नराङ्ग पु॰ नरमङ्गयति चु॰ अङ्ग–अण्। १मेढ्रे २परण्डे (नारङ्ग) व्रणभेदे मेदि॰।

नराची स्त्री नरमिवाचिनोति रोमभिरिव कण्टकैः आ+चि–ड गौरा॰ङीष्। १अमूलायां कण्टकिन्यां (फणीमनसा) वृक्षभेदे "यां ते चक्रुरमूलायां वलगं वा नराच्याम्" अथ॰५।२१।४। ततः शर्करा॰ स्वार्थे अण्। नाराच तत्रार्थे। २शौरेर्भार्याभेदे च "सुतनूश्च नराची च शौरेरास्तां परिग्रहौ। पौण्ड्रश्च कपिलश्चैव वसुदेवस्य तौ सुतौ। नराच्यां कपिलो जज्ञे पौण्ड्रश्च सुतनूसुतः। तयोर्द्वयोऽभवत् पौण्ड्रः कपिलश्च वनं ययौ" हरिवं॰ १६२अ॰।

नरा(च)ज पु॰ षोडशाक्षरपादके वृत्तभेदे "भुजङ्गराजभाषितं प्रकीर्णशास्त्रसागरे लघौ गुरौ निरन्तरे सतीह षोडशाक्षरे। प्रतापतापनिर्जितप्रभाकरप्रकाश! हे प्रवृत्तवृत्तराजकं नराज(च)मेव मन्महे"।

नराधम पु॰ नरेषु अधमः। विवेकादिशून्यतयापकृष्टे मानवे "अज्ञानोपहितो बाल्ये यौवने वनिताहतः। शेषे कलत्रचिन्तार्त्तः किं करोति नराधमः"।

नराधिप पु॰ ६त॰। नृपे "नराणाञ्च नराधिपः" गीता। नराधिपत्यादयोऽप्यत्र।

नरान्तक पु॰ अन्तयन्ति अन्ति–ण्वुल् ६त॰। मानुषनाशके रावणात्मजे १राक्षसभेदे "रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्" भाग॰ ९।१०। १८। २नरनाशकमात्रे त्रि॰।

नरायण पु॰नरा अयनमस्य। विष्णौ "नराणामयनं यस्मात् तेन नरायणः स्मृतः" ब्रह्मवै॰पु॰। नरस्य परमात्मनोऽपत्यं नडा॰ फक् संज्ञापूर्वकविधेरनित्यत्वाच्च वृद्धिः। तत्रार्थे

नराश पु॰ नरमश्नाति अश–भोजने अण् उप॰स॰। राक्षसे "यावच्चराशैर्न रिपुः प्रणाशान्" भट्टिः।

नराशंस पु॰ १यज्ञे २अग्नौ च। "नराशंसं महिमानमित्यृचमित्य निरु॰ ८।१ उक्तं यथा "नराशंसो यज्ञ इति कात्यकः। नरा अग्निमाशीनाः शंसन्ति, अग्निरिति शाकपूणिर्नरैः प्रशस्तो भवति"। तेनोभयनिरुक्तेः उभयार्थता "देव इन्द्रो नराशंसस्त्विष्टयः" यजु॰ २१।५५ "नराशंसो देवोऽनुयाजरूपी यज्ञः" वेददी॰ "नराशंसो अग्ने" यजु॰२७।१२ "नराशंसः नरैर्ऋत्विग्भिराशंस्यते स्तूयते नराशंसः अग्निः" वेददी॰।

आ+शंस–भावे घञ् ६त॰। २नराणामाशंसने पु॰ "जुष्टां नराशंसाय प्रजा वै नराः" शत॰ब्रा॰१।५।१।२० "यथा सर्वेऽपि नराः शंसन्ति तथाविधशंसनाय प्रियामिति" भाष्यम् अस्य वनस्पत्या॰ युगपत् उभयपदे प्रकृतिस्वरः।

नरासन नराकारे आसनभेदे तल्लक्षणभेदादिकं रुद्रयामलोक्तं यथा "अथ नरासनं वक्ष्ये षोडशादिप्रकारकम्। येन साधनमात्रेण योगी भवति साधकः। प्रकाराः षोडश प्रोक्ताः सत्कुलक्षैर्महीतले। एकमासात् भवेत् कल्पो द्विमासे द्रुतकल्पकम्। त्रिमासे योगकल्पः स्यात् चतुर्मासे स्थिराशयः। पञ्चमासे सूक्ष्मकल्पः षष्ठमासे विवेकधीः। सप्तमासे ज्ञानयुक्तो भावको भवति ध्रुवम्। अष्टमे मन्त्रसंयुक्तो जितेन्द्रियकलेवरः। नवमे सिद्धिमिलनो दशमे चक्रभेदवान्। एकादशे महावीरो द्वादशे खेचरो भवेत्। इति योगासनं ज्ञात्वा योगी भवति साधकः। नरासनं यः करोति स सिद्धो नात्र संशयः। अथोसुखं महादेव! नरासनस्य साधने। कारणीयं साधकाग्र्यैः योगशास्त्रार्थसम्मतैः" रुद्रजा॰।

नरिष्ठा स्त्री पुरुषमेधे भयङ्करपशूपालम्भनोद्देश्ये देवताभेदे "नरिष्ठायै भीमलम्" यजु॰ ३०।६

नरिष्यन्त पु॰ वैवस्वतमनोः पुत्रभेदे "वेनं पृष्णुं नरिष्यन्तं नाभागेक्ष्वाकुमेव च" भा॰आ॰ ७५अ॰। "इक्ष्वाकुर्नभगश्चैव पृष्णुः शर्याति रेव च। नरिष्यन्तोऽथ नाभागः सप्तमोऽरिष्ट उच्यते" भाग॰ ८।१३।१

नरी स्त्री नरस्य पत्नी ङीष्। मानवपत्न्यां जटा॰। तज्जाति स्त्रियां तु नारीत्येव।

नरेन्द्र पु॰नर इन्द्र इव। १नृपे २विप्रवैद्ये च मेदि॰। "नरेन्द्रकन्यासमवाप्य सत्पतिम्" रघुः "सुनिश्चला नरेन्द्रेण फणीन्द्रा इव शत्रवः" माघः ३ग्रहादिनिवारकवैद्यभेदे "तेषु कश्चिन्नरेन्द्राभिमानी मां निवर्त्य सुहृत्तन्त्रमन्त्रध्यानादिभिरुपक्रम्याकृतार्थः" दशकुमा॰। "सा च द्वारिका यत्नेन केनचिदधिष्ठिता न तिष्ठत्यपे नरान्तरस्य यास्यति च नरेन्द्रसार्थसंग्रहणेन तन्निराकरिष्यन्नरेन्द्रो नचास्ति सिद्धिरिति" दशकुमा॰। ४एकविंशत्यक्षरपादके वृत्तभेदे "चामररत्नरजज्वुवरपरिगतविप्रगणाहितशोभः पाणिविराजिपुष्पयुगविरचितकङ्कणसङ्कृतगन्धः। चारु सुवर्णकुण्डलयुगलक्षतिरोचिरलङ्कृतवर्णः पिङ्गलपन्नगेय इति निगदति राजति वृत्तनरेन्द्रः"। नरेशनरेश्वराटयोऽपि नृपे। [गुरुणि नैघण्टुप्रकाशिका।

नरेन्द्राश पु॰ नरेन्द्र इवाभाति काशेषु आ+भा–क। काशा

नरोत्तम पु॰ नरेषूत्तमः। १पुरुषोत्तमे नारायणे २नरश्रेष्ठे च "सभाजो भङ्कारात्तु नामेयश्च नरोत्तमौ। जज्ञाते गुणसम्पन्नौ विश्रुतौ रूपसम्पदा" हरिवं॰ ३९ अ॰ ३कृतकृत्ये ज्ञाततत्त्वे पुरुषे यथा "यः स्वकात् परतो वेह जातनिर्वेद आत्मवान्। हृदि कृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः"। स्वकात् स्वतएव, परतः परोपदेशाज्जातवैराग्यः" शब्दार्थचि॰।

नर्कुटक पु॰ नरस्य कुटकमिव पृषो॰। नासायां हेमच॰।

नर्त्त त्रि॰ नृत्यति नृत–पचा॰ अच्। १नृत्यकर्त्तरि "नृत्यप्रियो नित्यनर्त्तो नर्त्तकः सर्वलालसः" भा॰अनु॰१७अ॰। नृत–भावे घञ्। २नर्त्तने पु॰ ततः छेदा॰ नित्याहार्थे ठञ्। नार्त्तिक अभीक्ष्णनर्त्तनार्हे त्रि॰।

नर्त्तक त्रि॰ नृत्यति नृत–णाकविशेषे "शिल्पिनि ष्वुन्" पा॰ कर्त्तरि ष्वुन्। जीविकार्थं णाकविशेषभेदनृत्यकारके "भ्रुकुंसच भ्रूकुंसच भ्रकुंसचेति नर्त्तकः" अमरः। स्त्रियां विभाषात् ङीष्। "रङ्गाव दर्शयित्वा निवर्त्तते नर्त्तकी यथा तथात्" सा॰का॰ "नर्त्तकीवत् प्रवृत्तस्य निवृत्तिश्चारिताख्यातं" सा॰द॰। २शिवे पु॰ नर्त्तशब्दे दृश्यम्। ३सङ्कीर्णजातिभेदे पुंस्त्री॰ "वैश्यायां रङ्गकाज्जातो नर्त्तको गायको भवेत्" उशनाः। नर्त्तयति नृत–णिच् ण्वुल्। ४अङ्कुश्यादेशाबके। "तर्कोविचारः सन्देहात् भ्रूशिरोऽङ्कुशिनर्त्तकः" शा॰द॰। नृत–णा॰अच् संज्ञायां कन्। ५नलहृष्टे पोटगले ६चारणे ७केलके च शब्दरत्ना॰ ८गले ९रूपे हेम॰। १०करेणौ हस्तिन्यां स्त्री मेदि॰ ११नलिकानामगन्धद्रव्ये स्त्री राजनि॰। नृत्यकर्त्तुर्लक्षणं सङ्गीतशास्त्रोक्तं यथा "यादृशं नृत्यपात्रं स्याद्गीतं योज्यञ्च तादृशम्। नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः" "असम्बद्धप्रलापी च सदा भ्रुकुटितत्परः। हास्यप्रहासचतुरो वाचालो नृत्यकोविदः"।

नर्त्तन न॰ नृत–भावे ल्युट्। १अङ्गविक्षेपभेदे नृत्ये पूर्वपदस्थे निमित्ते सति उत्तरपदस्यस्थाने णत्वम् परिनर्त्तनम्। वर्त्तवेदिलतुदत्तौ "कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतिवादनम्" स्नातकव्रतोक्तौ मनुः। णिच्–भावे ल्युट्। २अङ्कुश्यादेशाबके च

नर्त्तनप्रिय पु॰नर्त्तनं प्रियमस्य। १शिवे २नृत्यप्रियमात्रे त्रि॰

नर्त्तनशाला स्त्री ६त॰। (नाचघर) नृत्यगृहे "यैश्च नर्त्तनशालेह मत्स्यराजाय कारिता" भा॰वि॰ २२अ॰ नर्त्तनगृहादयोऽप्यत्र।

नर्त्तित त्रि॰ नृत–णिच् कर्मणि क्त। ललताख्ये चालिते "सञ्चलितनर्त्तितवामपादपद्मा" माघः।

नर्त्तु पु॰ नृत–उण्। खड्गधारायां स्त्रियां नर्त्तकी त्रिका॰

नर्द शब्दे भ्वा॰ अक॰ गतौ सक॰ भ्वा॰ पर॰ सेट्। नर्दति अनर्दीत् ननर्द। "उदपानाश्च नर्दन्ति यथा गोवृषभास्तथा" भा॰उ॰ १४२अ॰। "ते नर्दमाना इव कालमेघाः" भा॰आ॰ १९२ अ॰ ताच्छील्ये चानश्। "अनर्दिषुः कपिव्याघ्राः"। "विदाङ्चकार धौताक्षः स रिपुं खे ननर्द च" भट्टिः प्राद्युपसर्गपूर्वकस्तु तत्तदुपसर्गोद्यत्यार्थयुक्ते शब्दे अणोपदेशत्वात् सति निमित्ते न णत्वम् प्रनर्दति।

नर्दटक न॰ "यदि भवतो नजौ भजजलागुरुर्नर्दटकम्" छन्दोम॰ उक्तलक्षणे सप्तदशाक्षरपादके छन्दोभेदे।

नर्दन न॰ नर्द–भावे ल्युट्। शब्दे "नर्दनं मृगपक्षिणाम्" हु॰सं॰ ४६अ॰।

नर्दिन् त्रि॰ नर्दति शब्दायते नर्द–णिनि। १शब्दकारके विकत्थके। पाते समिता॰ सम्प्रसान लुक नेष्टेनर्दी।

नर्ब गतौ भ्वा॰पर॰सक॰ सेट्। नर्बति अनर्बीत् ननर्ब। अणोपदेशत्वात् सति निमित्ते न णत्वम्। प्रनर्बति।

नर्म पु॰ न–मन्। पुरुषमेधीयालभ्यपशूद्देश्ये देवभेदे "नर्माय रेभम्" यजु॰ २०।६ "नर्माय पुंचलूम्" २०।२

नर्मकील पु॰ नर्मणः परिहासस्य कील इव बन्धनस्थानत्वात्। पत्यौ भर्त्तरि त्रिका॰।

नर्मट पु॰ नर्म–अटन् पृषो॰। १खर्परे २खर्वे च हारा॰।

नर्मठ पु॰नर्मणि कुशलः नर्मन्+अठन्। १नर्मकुशले २विदूषके जारे ३परिहासके शब्दर॰ ४चिबुके चुम्बुके च शब्दार्थ॰

नर्मद त्रि॰ नर्म ददाति दा–क ६त॰। १क्रीडिसचिवे मेदि॰। २पृक्कायां हेमच॰। ३नदीभेदे स्त्री मेदि॰। सा च नदी कलिङ्गदेशस्य पश्चाद्देशे स्थिता अमरकण्टकपर्वतसन्निकृष्टा यथाह मत्स्यपु॰ १८५ अध्यायावधि १९०अ॰ पर्यन्ते तत्कथा दिङ्मात्रमत्र दर्श्यते।

"मार्कण्डेय उवाच नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी। तारयेत् सर्वभूतानि स्थावराणि चराणि च। नर्मदायास्तु माहात्म्यं पुराणे यन्मया श्रुतम्। तदेतद्वि महाराज! तत्त्वं कथयामि ते। पुण्या कनखले गङ्गा कुरुक्षेत्रे सरस्वती। ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा। त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम्। सद्यः पुनाति गाङ्गेयं दर्शनादेव नार्मदम्। कलिङ्गदेशे पश्चाद्वे पर्वतेऽमरकण्टके। प्रभवा

च त्रिषु लोकेषु रमणीया मनोरमा। सदेवासुरगन्धर्वा ऋषयश्च तपोधनाः। तपस्तप्त्वा महाराज! सिद्धिञ्च परमाङ्गताः। तत्र स्नात्वा नरो राजन्नियमस्थो जितेन्द्रियः। उपोष्य रजनीमेकां कुलानां तारयेच्छतम्। जलेश्वरे नरः स्नात्वा पिण्डं दत्त्वा यथाविधि। पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लवम्। पर्वतस्य समन्तात्तु रुद्रकोटिः प्रतिष्ठिता। स्नात्वा यः कुरुते चार्चां गन्धमाल्यानुलेपनैः। प्रीतस्तस्य भवेच्छर्वो रुद्रकोटिर्न संशयः। पश्चिमे पर्वतस्यान्ते स्वयं देवो महेश्वरः। तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः। पितृकार्यञ्च कुर्वीत विधिवच्चियतेन्द्रियः। तिलोदकेन तत्रैव तर्पयेत् पितृदेवताः। आसप्तमं कुलं तस्य स्वर्गे मोदेत पाण्डव!। अष्टिवर्षसहस्राणि स्वर्गलोके महीयते। अप्सरोगणसंकीर्णे सिद्धचारणसेविते। दिव्यगन्धानुलिप्तश्च दिव्याभरणभूषितः। ततः स्वर्गात्परिभ्रष्टो जायते पिण्डके कुले। धनवान् दानशीलश्च धार्मिकश्चैव जायते। पुनः स्मरति तत्तीर्थं गमनं तत्र रोचते। कुलानि तारयेत् सप्त रुद्रलोकं स गच्छति। योजनानां शतं साग्रं श्रूयते सरिदुत्तमा। विस्तारेण तु राजेन्द्र! योजनद्वयमायता। अष्टिस्तीर्थसहस्राणि षष्टिः कोट्यस्तथैव च। सर्वं तस्य समन्तात्तु विद्यतेऽमरकण्टके"।

नर्मदासम्भव न० नर्मदायां सम्भवति सम्-भू-अच्। नर्मदे वाणलिङ्गभेदे तल्लक्षणादिकन्तु वायुवस्कन्दसंहितायां देवीं प्रति शिववाक्ये "प्रवक्ष्यं नार्मदं लिङ्गं पद्मजम्बुफलाकृति। मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम्। हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते। स्वयं संभवते लिङ्गं गिरितो नर्मदाजले। पुरा वाणासुरेणाहं प्रार्थितो नर्मदातटे। अध्यवात्सं गिरौ तत्र लिङ्गरूपी महेश्वरः। वाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले। अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत्। तत् फलं लभते मर्त्यो वाणलिङ्गैकपूजनात्"। तथा "ताम्रो वा स्फाटिकी श्यामी पाषाणी राजती तथा। वैदिका च प्रकर्तव्या तत्र संस्थाप्य पूजयेत्। प्रत्यहं योऽर्चयेल्लिङ्गं नार्मदं भक्तिभावतः। ऐहिकं किं फलं तस्य सन्निहितस्य करे स्थिता" नर्मदेशब्दे तत्तीरस्थपाषाणमात्रस्य शिवलिङ्गरूपित्वं वक्ष्यते। प्रसङ्गात्तस्य लक्षणपरीक्षादिकमुच्यते वीरमित्रोदयधृतकालोत्तरे "वाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम्। उत्पत्तिं वाणलिङ्गस्य लक्षणं गदतः शृणु। नर्मदादेविकयोश्च गङ्गायमुनयोस्तथा। सन्ति पुण्यजनदीनाञ्च वाणलिङ्गानि षण्मुख!। इन्द्रादिपूजितान्यत्र तल्लिङ्गैर्निर्मितानि च। सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः। इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च"

आग्नेयं तच्छक्तिनिभमथवा शक्तिलाञ्छितम्। इदं लिङ्गवरं स्याप्य तेजसाधिपतिर्भवेत्" "दण्डाकारं भवेद् याम्यमथवा रसनाकृति। यद्युक्तं सह तेनैव निर्मिक्तं जायते तदा। निर्मिक्तं निधनन्तेन क्रियते स्थापितेन तु" "राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम्। कर्करादिप्रलिप्तन्तु कुष्टकुक्षियुतं तथा। राक्षसं निर्ऋतेर्लिङ्गं गार्हस्थ्ये न सुखप्रदम्" "वारुणं वर्तुलाकारं पाशाङ्कं चाखिवर्चसम्। इक्षुसुखादेः सुखस्य संभोगाय्नन्तु मध्यमे" "लक्ष्मं धूम्रं च वायव्यं ध्वजगं ध्वजभूषणम्। सप्तनेस्थापितं तस्य न्यूनन्यूनमितस्ततः"

"चतुर्वर्णमयं वापि वैष्णवं ज्ञायतेऽग्रतः। वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम्। श्रीवत्सं कौस्तुभाङ्कञ्च सर्वसिंहासनाङ्कितम्। वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम्। वैष्णवं नाम तत्मोक्षं सर्वैश्वर्यफलप्रदम्" "शरस्थामादिसंस्थन्तु शशाङ्कं श्रीविवर्द्धनम्। पद्माङ्कं खड्गिकाङ्कं वा श्रीवत्साङ्कं विभूतये" हेमाद्रिधृतलक्षणकाण्डे नारद उवाच "अथ वक्ष्यामि ते विप्र चिह्नमेकादशं (पूर्वोक्तदशमेभ्यया एकादशम्) परम्। श्रवणाद्यस्य पापानि नाशमायान्ति तत्क्षणात्। मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम्। स्वयम्भुलिङ्गमाख्यातं सर्वसिद्धैर्निषेवितम्। नानावर्णसमाकीर्णं जटाभूतसमन्वितम्। स्वयुञ्जयाङ्गवं२ लिङ्गं सुरासुरनमस्कृतम्। दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम्। नीलकण्ठं३ समाख्यातं लिङ्गं पूज्यं सुरासुरैः। शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम्। त्रिलोचनं४ महादेवं सर्वपापप्रमोदनम्। ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम्। कालाग्निरुद्रं५ माख्यातं सर्वसर्वैर्निषेवितम्। मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम्। श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम्। प्रलयाग्निसमायुक्तं त्रिपुरारिं६ समाश्रयम्। शुभ्राभं पिङ्गजटं सुखमालाधरं परम्। त्रिशूलधरमीशानं७ लिङ्गं सुरार्थसाधनम्। त्रिशूलडमरुधरं शूलरक्तार्धभागतः। ऋषिनारीवराङ्गानंदसर्वदेवैरभीष्टदम्। दैवद्रुमयं कान्तं स्थूलदीर्घं सुसुज्ज्वलम्। महाकालं८ समाख्यातं

धर्मकामार्थमोक्षदम् । एतत्तु कथितं तुभ्यं लिङ्गचिह्न एहेगितः । एकेनैव कृतार्थः स्यात् बहुभिः किंतु सुव्रत !" वीरमित्रोदयधृतकालोत्तरे "उक्ताङ्गं श्रेयसे योज्यं शीर्षमन्तं विवर्जयेत् । यमवर्णन्तु यल्लिङ्गं यमाङ्गं वा कमण्डलुम् । दण्डाङ्गं स्वस्तिचिह्नं वा ब्रह्मप्राणान्वितं व्रतम् । अग्निवर्णं महाकालं नन्दीशं पद्मरागवत् । पद्मरागनिभं सर्वं महाभं विधिपूजितम् । मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् । वसुदेवैः सेन्द्रयक्षैर्यं गुह्यकैर्यातुधानकैः । नानावर्णमयं नीलं यथाङ्गमण्डलप्रभम्" "इत्येतल्लक्षणं प्रोक्तं परीक्षा तत्त्वकोविदैः । त्रिःसप्तपञ्चवारं वा तुलासाम्यं न जायते । तदा वाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम्" । तुलावरणन्तु तण्डुलेन अपरत्रवादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्यम् लिङ्गस्यैदधिकं तदोदासीनैः पूज्यमिति किंवदन्ती । हेमाद्रिधृतलक्षणकाण्डे सूतसंहितायान्तु "सप्तकल्पसुखाकृष्टं हरिमेति न हीयते । बाणलिङ्गमिति ख्यातं श्रेष्ठं नार्मदमुच्यते । त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते । तदा वाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम्" । वीरमित्रोदये "नद्यां वा प्रक्षिपेद्भूयो यदा तदुपलभ्यते । बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम्" । बाणशब्दव्युत्पत्तिरपि तत्रैव "अथ वाणं समाख्यातं यथा वक्ष्ये तथादितः । बाणः सदा शिवो देवो बाणोबाणासुरोऽपि च । तेन यस्मात् कृतं तस्माद्बाणलिङ्गमुदाहृतम् । सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः । कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च । पङ्कजस्य फलाकारं कुक्कुटाण्डसमाकृति" पङ्कजफलं पद्मबीजम् "पङ्कजस्य फलाकारं कुक्कुटाण्डसमाकृति" इति हेमाद्रिधृतलक्षणकाण्डे पाठः । "भुक्तिमुक्तिप्रदञ्चैव बाणलिङ्गमुदाहृतम्" ।

सूतसंहितायाम् "संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् । रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् । गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी । सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः" । केदारखण्डे "रत्नधातुमयान्येव लिङ्गानि कथितान्यपि । पवित्राण्येव पूज्यानि सर्वकामप्रदानि च । एतेषामपि सर्वेषां काश्मीरं हि विशिष्यते । काश्मीरादपि लिङ्गात् बाणलिङ्गं विशिष्यते । बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते । ऐहिकामुष्मिकं सर्वं पूजाकर्तुः प्रयच्छति" । निन्द्यलिङ्गमाह तत्रैव "कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् । चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् । एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः । शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च । छिद्रलिङ्गेऽर्चिते बाणे विदेशगमनं भवेत् । लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् । चत्युन्नतविलाग्रे तु गोधनानां क्षयो भवेत् । हेमाद्रिधृतम् "तीक्ष्णाग्रं वक्रशीर्षञ्च तत्रलिङ्गं विवर्जयेत् । अतिस्थूलं चातिलघु स्वल्पं वा भूषणान्वितम् । गृही विवर्जयेत्तादृक् तद्धि मोक्षार्थमीहितम्" वीरमित्रोदये "अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् । मधुवत् कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् । पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् । तत्पीठमपीठं वा मन्त्रसंस्कारवर्जितम् । सिद्धिमुक्तिप्रदं लिङ्गं सर्वप्रासादपीठगम्" सूतसंहितायां भैरववाक्यम् "बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः । जितक्रोधोऽतुरक्षय शिवपूजाविधौ रतः । विधिज्ञो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः । दिने दिने स्वयं कृत्वा लिङ्गं स्वाभ्यर्चपूजयत् । एवं वर्षशतं देवि ! दिव्यमानेनापूजयत् । तदा तद्भक्तिसुलभः प्रत्यक्षः शङ्करोऽभवत्" शङ्कर उवाच तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि । शङ्करस्य वचः श्रुत्वा बाणोवचनमब्रवीत् । यदि तुष्टोऽसि हे नाथ ! सदा त्वं मद्भागिने । क्लिष्टोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने । तत्तद्भक्तिसंसिद्धलक्षणं शास्त्रनिर्मितम् । शास्त्रार्थो दुर्लभो देव ! सिद्धयार्थस्य दुर्लभः । तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् । सर्वकामफलार्थञ्च सर्वसत्वानुकम्पनम् । सर्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ।। इत्येवं वचनं तस्य शिवः परमकारणम् । श्रुत्वा कैलासमूर्द्धभ्यः शङ्करेण विनिर्मिताः । लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश । सिद्धलिङ्गं तदा तत्तत्सर्वं सदोदयं स्वयम् । आयोज्यैवं सुसम्पूर्णं बाणस्य च समर्पितम् । अक्षयफलदं बाणः स्थापयानञ्च नित्यशः । संपूज्य बाणः सद्भावं कृत्वा प्रणयनन्दा । तद्भावं सपुरं नीत्वा नूनं भिन्नयते शुचिः । अक्षयां यदि संसिद्धिं स्थापयमानं दिने दिने । सत्वानां सिद्धिहेत्वर्थं बाणस्थाने सुसंस्थिते । लिङ्गानां कोटिकानन्तं सञ्चितास्तु त्रिकोटयः । त्रीणि कोटयस्तिस्रः कोट्येका मध्यकाश्रमे । माहेश्वरे च कोटिस्तु कन्यातीर्थे च कोटि-

टिका । माहेन्द्रे चैव नेपाले एकैका कोटिरेव च । बाणाङ्गार्थं कृतं लिङ्गं बाणलिङ्गमतः स्मृतम् । बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते । तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा । स्थितं तच्छिवसद्भावं शिवस्याकृति विग्रहे" । हेमाद्रौ तदाकृतिलक्षणसमुच्चयेऽपि "स्वयम्भुलिङ्गवत् बाणलिङ्गं भुक्तिमुक्तिसुखाय "बहुफलमन्यत्रादु यथास्थापनपूजने । श्रीशैले कालिकागर्त्ते लिङ्गाद्रौ कन्यकाश्रमे । कन्यातीर्थे वने शैले माहेन्द्रे वा सुरेश्वरे । स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु" सिद्धान्तशेखरे बाणलिङ्गान्यधिकृत्य "तदानेकप्रकारं स्यादन्यवर्णमपीठकम् । सूक्ष्ममूर्त्तिविहीनञ्च बाणं तत् पृथुबाणकम्" बाणलिङ्गेष्वावाहनादि न कर्त्तव्यं तदुक्तं भविष्ये "बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये । न प्रतिष्ठा न संस्कारस्तेषामावाहनं न चेति" । रौद्रलिङ्गलक्षणं वीरमित्रोदयधृते "नदीसङ्गवं रौद्रमन्योन्यस्य विघर्षणात् । नदीवेगात् समं स्निग्धं सञ्जातं रौद्रमुच्यते" लक्षणसमुच्चयेऽपि "सरित्प्रवाहसंस्थानं बाणलिङ्गं समाकृति । तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् । नदीसारनर्मदाया बाणलिङ्गसमाकृति । तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति" । रौद्रलिङ्गं तथा ख्यातं बाणलिङ्गसमाकृति । श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् । स्वभावात् कृष्णवर्णं वा सर्वजातिषु सिद्धिदम् । नर्मदासम्भवं रौद्रं बाणलिङ्गमुदीरितमिति" । अधिकं नर्मदेशशब्दे द्रष्टव्यम् ।

नर्मदेश न० नर्मदया स्थापित इशो यत्र । काशीस्थे शिवलिङ्गभेदे तदाविर्भवकथा काशीख० ९२ अ० यथा "निशम्येति विधेर्वाक्यं नर्मदा सरिदुत्तमा । धातुर्वरं परित्यज्य प्राप्ता वाराणसीं पुरीम् । सर्वेभ्योऽपि हि पुण्येभ्यः काश्यां लिङ्गे प्रतिष्ठिते । अपरा न कृतहिता कैश्चित् श्रेयस्करी क्रिया । अथ सा नर्मदा पुण्या विधिपूर्वं प्रतिष्ठितिम् । व्यधात् पिलिम्पिलातीर्थे त्रिपिष्टपसमीपतः । ततः शम्भुः प्रसन्नोऽभूत् तस्यै नद्यै शुभात्मने । वरं वृणीष्व सुभगे ! यत्तुभ्यं रोचतेऽनघे ! । सरिद्वरा निशम्येति रेवा प्राह महेश्वरम् । किं वरेणेह देवेश ! भवं तुच्छेन पूजिते ! । निर्द्वन्द्वा त्वत्पदद्वन्द्वे भक्तिरस्तु ममेश्वर ! । श्रुत्वेति नितरान्तुष्टो रेवागिरमनुत्तमाम् । प्रोवाच च सरित्श्रेष्ठे ! त्वयोक्तं यत्तथास्तु तत् । गृहाण पुण्यनिलये वितरामि वरान्तरम् । यावत्योऽश्वदः सन्ति तव रोधसि नर्मदे । तावत्यो लिङ्गरूपिण्यो भविष्यन्ति वरान्मम । अन्यच्च ते वरं दद्यां तमप्याकर्णयोत्तमम् । दुष्प्राप्यं यच्च तपसां राशिभिः परमार्थतः । सद्यः पापहरा गङ्गा सम्प्राप्तेन कलिन्दजा । त्वद्गङ्गा सरस्वती रेवे ! त्वन्तु दर्शनमात्रतः । अपरं च वरं दद्यां नर्मदे ! दर्शनावहे । भवत्या स्थापितं लिङ्गं नर्मदेश्वरसंज्ञितम् । एतल्लिङ्गं महापुण्यं मुक्तिं दास्यति शाश्वतीम् । अस्य लिङ्गस्य ये भक्तास्तान् दृष्ट्वा सूर्यनन्दनः । प्रणमिष्यति यत्नेन महाश्रेयोभिवृद्धये । सन्ति लिङ्गान्यनेकानि काश्यां देवि ! पदेपदे । परं हि नर्मदेशस्य महिमा कोऽपि चाद्भुतः । इत्युक्त्वा देवदेवेशस्तस्मिन् लिङ्गे लयं ययौ । नर्मदापि प्रहृष्टाऽऽसीत् पावित्र्यं प्राप्य चाद्भुतम् । स्वदेशं च परिप्राप्ता दृष्टिमात्रापहारिणी" ।

नर्मन् न० नृ-मनिन् । परिहासे अमरः । "न नर्मयुक्तं वचनं हिनस्ति" भा०आ० १८२अ० "नर्मपूर्वमनुद्धृतसंस्थितः" रघुः । "सुहृत्प्रयुक्ता इव नर्मवादाः" काम० "लिङ्गिनिह न भिन्द्याद्ब्रह्मचर्यं न चाक्षा । हृदयमनुदध्यात् स्वेच्छया नर्म कुर्यात्" मल्लिनाथधृतकामशास्त्रम् "साधुर्नर्मविज्ञानं वाग्मिता चेति तद्गुणाः" दूतीवचने वा० द० ।

नर्मरा स्त्री नर्मन्+बहुलं रः । १दर्वां २मञ्जायां ३सरलायां ४निम्बवाल्लायाञ्च मेदि० ।

नर्मवत् त्रि० नर्म अस्त्यस्य मतुप् मस्य वः । नर्मयुक्ते स्त्रियां ङीप् । सा च १नायिकाभेदे तदाख्यायिकारूपे २रासक नाटकभेदे वा० द० "तत्र सन्निहितवती यथा नर्मवती" ।

नर्मसचिव पु० नर्मसु सचिवः । परीहासकारके "न नर्मसचिवैः सार्द्धं किञ्चिदप्रियं वदेत्" कामन्दक० "न नर्मसचिव्यमकारि नेन्दुना" माघः ।

नर्य्य त्रि० नृभ्योहितं यत् । १मनुष्यहिते "नृणां नर्य्यो नृतमः शयावान्" ऋ०१०।२९।१ "नर्य्यो नृभ्यो हितः" भा० "चतुष्पदे नर्य्याय द्विपदे" ऋ०१।१२१।१ नरस्यापत्यम् वा० यत् । २मनुष्यमात्रे च "अपो नर्य्यः सुजातः" निरु० ११।२६ धृतास्कचमधित्योक्तं "मनुष्यः नृभ्योहितो नर्य्यः" "होतौ यक्षत् सुरेतसमृषभं नर्य्यापसम्" यजु० २१।१८ "नर्य्यं नरहितमपः कर्म यस्येति" वेददी० ।

नल पु० नल-बन्धे अच् । १तृणभेदे पोटगले अमरः । "नलस्तु मधुरश्चिक्कः कषायः कफरक्तजित् । उष्णो

कृद्स्त्रियोन्यर्त्तिदाहपित्तविसर्पजित्" भावप्र० तद्गुणाः। "जरठच्छेदा नलग्रन्थयः" वा०द०। २सूर्यवंश्ये नृपभेदे "रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः" इत्युपक्रमे "निषधस्य नलः पुत्रो नभः पुत्रो नलस्य तु" इति "सुधन्वनः सुतश्चैव ततो जज्ञे नलो नृपः। ऋक्षो नाम स धर्मात्मा नलपुत्रो बभूव तु"। "नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ!। वीरसेनात्मजश्चैकः यश्चेक्ष्वाकुकुलोद्भवः" हरिवं० १५अ० "नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे। वीरसेन सुतश्चैकश्च नराधिपः। एते वैवस्वते वंशे राजानो भूरिदक्षिणाः" मत्स्यपु० १२अ०। एवं वीरसेनस्य सूर्यवंशत्वे स्थितेऽपि नैषधचरिते "हिमांशुवंशस्य करीरमेव मामिति" उक्तेः चन्द्रवंश्यत्वम् तेन "आसीद्राजा नलोनाम वीरसेनसुतो नृप!" इति भा०व०५२अ० उक्तो वीरसेनः सूर्यवंश्यात् भिन्नएव भा०व० ६०अ० ततपुत्र नलस्य इन्द्रसेनाख्यपुत्र इत्युक्तं सूर्यवंश्ययोर्नलयोस्तु पुत्रनामनी भिन्ने हरिवं०१५अ० इति नास्य सूर्यवंश्यता

भा०व०५२अध्यायधि ७९अ० पर्यन्तं नलोपाख्यानं द्रष्टव्यम्। ततः संक्षिप्य दिङ्मात्रमत्र तच्चरितं प्रदर्श्यते। पुरा किल वीरसेनसुतः निषधदेशाधिपो नलनामा आसीत्। स च कुण्डिनेश्वरभीमन्नृपसुतां दमयन्तीं स्वयंवरविधिना लब्धाऽनुपयेमे तस्य इन्द्रसेनः पुत्रो बभूव। स च कलिप्रवेशात् पाशाक्षदुर्व्यसनितया पुष्करेण भ्रात्रा सह द्यूतदेवनात् सर्वस्वमहारयत्। अथ स कृतराज्यो दमयन्त्या सह वनं जगाम। तत्र महाकष्टमनुभवन् दयमन्तीं व्यसनासहिष्णुं मन्यमानश्च रात्रौ सुप्तां तां परित्यज्य पलायाञ्चक्रे। दमयन्ती तु प्रबुध्य बहु विलप्य पथिकसार्थेन सह मातृस्वसृगृहं गताऽपि कुप्रचिह्नतया मातृस्वसाऽप्रत्यभिज्ञातेव तत्सदनसुवास। अथ भीमादेशेन तदन्वेषणाय प्रेरिता दूतविशेषभेदेन तां दमयन्तीं ज्ञात्वा भीमाय न्यवेदयन्। ततस्तां ततः स्वगृहमानाय्य भीमो नलान्वेषणाय दूतान् प्रलिलाय। नलोऽपि ततसमये वरण्ये सङ्कटापन्नं कर्कोटनागं सङ्कटादुद्धार। अथ प्रत्युपकाराशया नागस्तद्देहस्थं कलिं तापयित्वा तस्य पदे दंदंश तेन तस्य विषज्वालया तद्देहस्थः कलिरेव नितान्तसन्तापितः। नलस्तु तेन रूपान्तरमात्मनाप। स्वेच्छया पुनः स्वदेहप्राप्तिर्भविष्यतीति नागेन तस्मै वरे दत्ते तदुपदेशेन ऋतुपर्णस्य नृपस्य बाहुकतया प्रविश्य आश्वसारथ्यं चकार। अथ भैमीदूतेन तस्य वचनविशेषेण नलत्वं सम्भाव्य दमयन्तीं प्रति निवेदिते सा तेन सस्य पुनः स्वयंवरमिषेण दूतेन ऋतुपर्णमाजुहाव। तस्याश्चाननसौपुण्यं पथि दृष्ट्वा तत्सौपुण्यं शिक्षितुमिच्छुः तस्मै स्वीयाक्षहृदयज्ञानदानविनिमयं चक्रे। अथ नलस्य तस्मादक्षज्ञानमात्रादेव देहात् कर्कोटकविषदग्धः कलिर्निर्जगाम। अथ कुण्डिनपुरे आगते दमयन्ती परिवर्त्तितरूपमपि नलं पाकादिकौशलेन तं नलं निश्चिकाय। अथ तेन रूपान्तरपरिवर्त्तनेन स्वरूपे गृहीते भैम्याः सह मेलने जाते नितान्तं भीमस्तुतोष नलं च प्रेषयामास निषधदेशम्। स च स्वदेशमागत्य स्वभ्रातारं पुष्करं देवनायाजुहाव। विदिताक्षज्ञानतया तं जिगाय च। इत्थं द्यूतहारितराज्योऽपि पुनर्लब्धराज्योऽभूदिति। "नलः सितच्छत्रितकीर्त्तिमण्डलः" "दृष्टेऽपि तस्मिन्नलनामनि श्रुते" नैष०"कर्कोटस्य नागस्य दमयन्त्या नलस्य च। ऋतुपर्णस्य राज्ञश्च कीर्त्तनं कलिनाशनम्" भा०व० नलोपाख्याने। "पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः" प्रातःस्मरणीयकीर्त्तने। ३पितृदेवभेदे कव्यवाडशब्दे १८२४ पृ० दृश्यम्। विश्वकर्मणः पुत्रे रामायणप्रसिद्धे ४वानरभेदे

"रामस्य वरदानाच्च शिवः पत्न्या बभूव ह। तस्मिन् दत्ते तदा कुद्धो ससुद्रः सरितां पतिः। राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत्। अयं सोम्य! नलोनाम तनयो विश्वकर्मणः। पित्रा दत्तवरः श्रीमान् प्रीतिमान् विश्वकर्मणः। एष सेतुं महोत्साहो करोतु मयि वानरः। तमहं धारयिष्यामि यथा स्थेम पिता तथा। एवमुक्तो दधिर्नष्टः ससुत्थाय नलस्ततः। अब्रवीद्वानरश्रेष्ठो वाक्यं राज्ञो महाबलम्। अहं सेतुं करिष्यामि विस्तीर्णं मकरालये। पितुः सामर्थ्यमासाद्य तत्त्वमाह महोदधिः"। "मम मातृवरो दत्तो मन्दरे विश्वकर्मणा। मया तु सदृशः पुत्रस्तव देवि! भविष्यति। औरसस्य पुत्रोऽहं सदृशो विश्वकर्मणा। न चाप्यहमनुक्रोशः प्रब्रूयामात्मनो गुणान्। समर्थश्चाप्यहं सेतुं कर्त्तुं वै वरुणालये। तस्मादद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः" रामा०लङ्का०२२अ०। नलसेतुशब्देऽधिकं दृश्यम्। ५पद्मे न० राजनि०। [शब्दार्थे हेमच०।

नलक न० नल इव कायति कै-क। शाखास्थि नलक-

नलकानन पु० नलप्रधानं काननमस्य। १देशभेदे "भि-

ल्लिकाः कुन्तलाश्चैव सोऽहदाः नलकानना:" भा०भी० ९अ० जनपदोक्तौ। ६त०। नलानां २वने च न०।

नलकिनी स्त्री नलकं नलाकारमस्ति विद्यतेऽस्य इनि ङीप्। लङ्कायां हेमच०।

नलकील पु० नल एव कीलोऽस्य। जानुनि हेमच०।

नलकूवर पु० कुवेरपुत्रे "यक्षराज्ञा कुवेरेण वरा लब्धाश्च पुष्कलाः। धनाधिपत्यं सख्यञ्च रुद्रेणामिततेजसा। सुरत्वं लोकपालत्वं पुत्रञ्च नलकूवरम्" भा०व० ४८अ०। स च नारदशापेन व्रजे स्थावरतां प्राप्तः कृष्णेन पुनर्देवत्वमासादितः। तत्कथा भाग० १०स्कन्धे यथा "कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः। यद्राजीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ"। "पुरानारदशापेन वृक्षतां प्रापितौ मदात्। नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ" ९अ० "रुद्रस्यानुचरौ भूत्वा गुह्यौ धनदात्मजौ। कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ। वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ। स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने। अन्तः प्रविश्य गङ्गायामम्भोजवनराजिषु। चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः। यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव!। अपश्यन्नारदो देवौ जीवाणौ समनुद्रुतौ। तं दृष्ट्वा व्रीडिता देव्यो विवस्त्रा शापशङ्किताः। वासांसि पर्य्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ" "यदिमौ लोकपालस्य सुतौ भूत्वा तमःश्रुतौ। न विवाससमात्मानं विजानीतः सुदुर्मदौ। अत इतः स्थावरतां स्यातां नैवं यथा पुनः। स्मृतिः स्यात् मत्प्रसादेन तत्रापि मदनुग्रहात्। वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते। वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः" १०अ०

नलद न० नलं दृणाबन्धं द्यति दो-खण्डने क। १उशीरे (वेणारमूल) उशीरशब्दे १२७६पृ० तद्गुणा दृश्याः २पुष्परसे ३जटामांस्याञ्च मेदि० "करिणां सुदे सनलदाऽनलदा" किरा० "नलदेनानुलिम्पन्ति" "नलदमाला प्रतिसङ्घन्ति" आश्व०श्रौ०६।१०।२।४। तत्गन्धमस्य किंशरा० इन्। ४नलदिक तद्विक्रेतरि त्रि० स्त्रियां ङीष्। नलं ददाति दा-क। ५नलदातरि त्रि० "स्यादस्या नलदं विना न दहने तापस्य कोऽपि क्षमः" नैषध०। रुद्राश्वनृपस्य दृताच्यां जाते ६कन्याभेदे स्त्री "नलदा चैव राजेन्द्र! नलदा सुरसाऽपि च" हरिवं० ३१अ० तत्सम्बन्धोक्तौ।

नलपट्टिका स्त्री नलनिर्मिता पट्टिकेव। (दरमा) ख्याते पदार्थे हारा०। [अमरः।

नलमीन पु० नलः नलाश्रयः मीनः। (चिङ्गडी) मत्स्यभेदे

नलसेतु पु० नलवानरकृतः सेतुः शा०त०। समुद्रोपरि नलवानरकृते सेतौ "अस्ति तत्र नलोनाम वानरः शिल्पिसम्मतः। त्वदुर्दैवस्य तनयो बलवान् विश्वकर्मणः। स यत् काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि। सर्वं तद्धारयिष्यामि स ते सेतुर्भविष्यति। इत्युक्त्वान्तर्हिते तस्मिन् रामो नलमुवाच ह। कुरु सेतुं समुद्रे त्वं शक्तोह्यसि मतो मम। तेनोपायेन काकुत्स्थः सेतुबन्धमकारयत्। दशयोजनविस्तारमायतं शतयोजनम्। नलसेतुरिति ख्यातो योऽद्यापि प्रथितो भुवि" भा०व० २८२अ०।

नलिका स्त्री नलः तद्रूपाकारोऽस्त्यस्याः ठन्। १नाड्यां(नली) इति ख्याते सुगन्धिद्रव्यभेदे उत्तरपथप्रसिद्धे (पँठारी) प्रसिद्धे प्रवालाङ्कुरौ २दृष्टभेदे च "नलिका विद्रुमलताकपोतपरणा नटी। धमन्यङ्कुतकेशी च निर्मध्या शुषिरा नली। नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत्। कण्ठास्यशरीरातृष्णाश्वासकुष्ठकण्डूज्वरापहा" भावप्र०। "काशाः कुशा वा नलिका नलो वा" इ०सं० ५४अ०। दकार्गलशब्दे दृश्यम्। तन्तुवायानां वयनसाधने ३द्रव्यभेदे (नली) ४तदाकारे अस्त्रे च।

नलित पु०नल-क्त। (नालता)शाकभेदे द्रव्यगुणाभिधानम्। "मधुरो नलितः पित्तनाशकः शुक्रवर्द्धकः" तद्गुणोक्तिः

नलिन न० नल-बन्धे इनन्। १पद्मे २जले ३नीलिकायां हेमच०४सारसखगे पुंस्त्री०अमरः। ५लक्ष्मणपाकफले प्राचीनामलके (पानि आमला) पु० शब्दच० "नलिनं मलिनं विदृण्वती स्मृयतीमस्मृयती तदीक्षणे" नैष० "नलिनाभवक्त्रः" रघुः।

नलिनी स्त्री नलाः (नालाः) सन्त्यस्य पुष्करा० इनि ङीप् ङस्य नः। १पद्मिन्यां "व्याकोशकोकनदतां दधते नलिन्यः" माघः। २पद्मयुक्तक्षेत्रे ३कमलाकरे ४नदीमात्रे मेदि०। नलानां नलयुक्तानां समूहः खला० इनि। पद्मसमूहे ५नलिकायां राजनि० ६नारिकेले त्रिका० "नलिनीवाम्बुसम्पत्त्या बुद्ध्या श्रीः परिपाल्यते" कामन्द० "ततोऽविदूरे नलिनीं प्रभूतकमलोत्पलाम्। सीताहरणदुःखार्त्तः परमां रामः समासदत्" भा०व०२७९अ०। "एषा सा दृश्यते परमा नलिनी चित्रकानना" रामा०

६।१०८अ० "प्रयाता नन्दनस्येव नलिनी सरितां वरा" हरिवं०६५अ०"नलिनी चतसेतुबन्धना"कुमा०। ७व्योमनद्याम् या च "ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते। वसोकसारा नलिनी पावनी च सरस्वती। जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी" भा०भी० ६अ० उक्ता पञ्चदशाक्षरपादके छन्दोभेदे "सगणैः शिववक्त्रमितैर्गदिता नलिनी" छ०र०टी० तल्लक्षणशब्दम्।

नलिनीखण्ड न० नलिनीनां समूहः कमला० समूहे खण्डच्। पद्मिनीसमूहे।

नलिनीनन्दन न० नलिन्या नन्दयति नन्दि-ल्यु ३त०। देवोद्यानभेदे "वनं चैत्ररथं दिव्यं नलिनीनन्दनं वनम्। यो विनाशितवान् क्रोधात् देवोद्यानानि वीर्यवान्"रामा० आरण्य० २६

नलिनोरुह न०नलिन्यां रोहति रुह-क। कह्लारे राजनि०

नलिनेशय पु० नलिने ब्रह्मनाभिकमले शेते-शी-अच् अलुक्स०। विष्णौ।

नली स्त्री नल-अच् गौरा० ङीष्। १मनःशिखायां विश्वः २नलिकायां भावप्र०। [शिवलिङ्गभेदे शिवपु०।

नलेश्वर पु०न० नलेन स्थापित ईश्वरो यत्र। नलस्थापिते

नलोत्तम पु० नलेषु उत्तमः। देवनले राजनि०।

नलोदय पु० कालिदासकृते काव्यभेदे

नलोपाख्यान न० नलस्योपाख्यानं यत्र। भारतवनपर्वान्तर्गते अवान्तरपर्वभेदे "नलोपाख्यानमत्रैव" भा०आ०१अ०। तच्च नलशब्दे दृश्यम्।

नल्य त्रि० नलस्यादूरदेशादि० वला० य। नलस्यादूरदेशादौ

नल्व पु०नल-बा०व। चतुःशतहस्तमिते अमरः शतहस्तमिते कालः "रावणस्य शरीरन्तु पञ्चनल्वान्तुविस्तृतम्" रामा०लङ्का०९२।६२ श्लो० "नल्वमात्रपरीणाहो वनच्छायो वनस्पतिः" भा०शा० १६४अ०।

नल्ववर्त्मगा स्त्री नल्वमितं वर्त्म गच्छति गम-ड। १काकाक्षीवतायां शब्दच० २तन्मितपथगामिनि त्रि०।

नव पु०नु-अवे भावे अप्। १स्तवे मेदि०कर्मणि अप्। २नूतने त्रि० अमरः ३रक्तपुनर्नवायाम् पु० राजनि० "नवाम्बुभिर्भूरिविलम्बिभिर्घनाः" शकु० "नवं नवं प्रीतिरहो करोति" "नवानघोघोद्धृतः पयोधरान्" माघः ४उशीनरस्य पुत्रभेदे पु० ५तत्पत्न्यां स्त्री "उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः। कृष्णा कृमिर्नवा दर्वा पञ्चमी च दृषद्वती। उशीनरस्य पुत्रास्तु पञ्च ताश्च कुलोद्वहाः। तपसा चैव महता जाता दृषद्वतीसुताः। कृष्णायास्तु कृमेः पुत्रः कृष्ण कृमिरजायत। नवायास्तु नवः पुत्रो दर्वायाः सुव्रतोऽभवत्। दृषद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः" हरिवं० ३१अ०।

नवक न० नवानामवयवः सङ्ख्यायाः कन्। १नवसंख्यायाम् नवपरिमाणमस्य। २नवसंख्यान्विते त्रि० नवनवकशब्दे वक्ष्यमाणदशोक्तानीव नवनवकान्युक्त्वा काशी०ख० ४०अ० दृश्यं नवकसङ्ख्यं यथा

"एतद्भवानाह्नवकं ज्ञात्वा श्रियमवाप्नुयात्। अन्यच्च नवकं वक्ष्ये सर्वेषां स्वर्गमार्गदम्। सत्यं शौचमहिंसा च शान्तिर्ज्ञानं दया दमः। अस्तेयं इन्द्रियाक्षोभः सर्वेषां धर्मसाधनम्। अभ्यस्य नवतिं ह्येतां स्वर्गमार्गप्रदीपिकाम्। सतामभिमतां पुण्यां गृहस्थो नावसीदति"। "इति वीराष्टकः प्रोक्तः सन्मातृगणोद्भवः। छागवक्त्रेण सहितो नवकः परिकीर्त्यते"भा०व०२२७अ० कानिचित् नवकानि का०ति० उक्तानि यथा

"गुप्तिता नवधा नित्या स्तुते मन्त्रं नवार्णकम्। नवकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी। नवकं पीठशक्तीनां शृङ्गारादीन् रसानपि। माणिक्यादीनि रत्नानि नववर्णयुतानि च। नवकं प्राणदूतीनां मण्डलं नवकं शुभम्। यदुयन्त्रात्मकं लोके सर्वमस्या उदञ्चति"। तत्र शक्तितत्त्वनवकं तत्रैव प्रथमपटले "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधासौ भिद्यते पुनः" नादबिन्दूनां प्रत्येकं त्रिधाभेदात् नवसंख्या। तेषां भेदाश्च तत्रैवोक्ता यथा "बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः। बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्वागमविशारदैः। रौद्री बिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत। वामा ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः। विज्ञानेच्छाक्रियात्मानो वह्नीन्दुर्कस्वरूपिणः। भिद्यमानात् पराद्बिन्दोरव्यक्तात्मा रवोऽभवत्"। पीठशक्तीनां नवकं तत्तन्मन्त्रभेदे तत्तत्प्रकरणे तत्रोक्तम्। शृङ्गारादिरस नवकमलङ्कारे प्रसिद्धं नवरसशब्दे दृश्यम्। रत्ननवकं नवरत्नशब्दे दृश्यम् तच्च ६पटले तत्रैवोक्तम्। वर्णानां नवकम् अकचट तप यशहानां नवकं ७पटले तत्रोक्तम्। मण्डलनवकं तत्रैव ८पटले "चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत्। पूर्वकोष्ठादिषु लिखेत् सप्तवर्णा

नतुक्रमात् । लक्षमीघे मध्यकोष्ठे खरयुग्मक्रमाल्लिखेत्" इत्युक्तम् । प्राणदूतीनां नवकं २२पटले तत्रोक्तं दृग्रम् ।

नवकारिका स्त्री नवं करोति क्ल–ण्वुल् । १नवोढायां स्त्रियां शब्दमा० कर्म० । २नूतनायां कारिकायां च । कारिका क्रिया कर्म० । ३नूतनत्वे च ।

नवकालिका स्त्री नवकं नूतनमलति अल–भूषणे ण्वुल् । नवीने हारा० अभिधानात् स्त्रीत्वम् ।

नवग्रह पु० कर्म० संज्ञात्वात् न द्विगुः । "सूर्यचन्द्रौ मङ्गलश्च बुधश्चापि बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतवश्च नव ग्रहा" इत्युक्तेषु नवसु ग्रहेषु खगोलशब्दे तत्कक्षादिमानमुक्तं तद्रथादिमानमत्रोच्यते ।

रवेः "योजनानां सहस्राणि भास्करस्य रथो नव । ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ! । सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै । योजनानान्तु तस्याक्षचक्रं यत्र प्रतिष्ठितम् । चत्वारिंशत् सहस्राणि द्वितीयोऽक्षो व्यवस्थितः । पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ! । अक्षप्रमाणसमयोः प्रमाणं तद्युगार्द्धयोः । सुखोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै । द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाच्चले । हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु । गायत्री च बृहत्युष्णिगनुष्टुब्जगती त्रिष्टुबेव च । अतुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः । स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा । गन्धर्वैरप्सरोभिश्च ग्रामणीसर्परक्षसैः । स्तुवन्ति सूनयः सूर्यं गन्धर्वैर्गीयते पुरः । नृत्यन्त्योऽप्सरसो यान्ति सूर्यस्याग्रे निशाचराः । वहन्ति पन्नगाः यज्ञैः क्रियतेऽभीषुसंग्रहः । बालखिल्यास्तथैवैनं परिवार्य समासते । सोऽयं सप्तगणः सूर्यमण्डले मुनिसत्तम । हिमोष्णवारिवृष्टीनां हेतुत्वं समुपागतः" ।

चन्द्रोः "रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः । वामदक्षिणतो युक्ताः दश तेन चरत्यसौ" ।

बुधस्य "वाय्वग्निद्रव्यसम्भूतो रथश्चन्द्रसुतस्य च । पिशङ्गैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः । सवरूथः सातुकर्षो युक्तोऽभूसम्भवैर्हयैः" ।

शुक्रस्य "सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् । अष्टाश्वः काञ्चनः श्रीमान्" । [वह्निसम्भवैः" ।

कुजस्य "भौमस्यापि रथो महान् । पद्मरागारुणैरश्वैः संयुक्तो

गुरोः "अष्टाभिः काञ्चननिभैर्वाजिभिः काञ्चने रथे । तिष्ठन्नरति वै वर्षं रामो रामो बृहस्पतिः" ।

शनेः "आकाशसम्भवैरश्वैः शबलैः स्यन्दनं युतम् । समारुह्य शनैर्याति मन्दगामी शनैश्चरः" ।

राहोः "सर्पाणोसुरगाश्चाष्टौ भङ्गाभा धूसरं रथम् । सकृद्युक्तास्तु मेनैव ! वहन्त्यविरतं सदा । आदित्यान्निःसृतो राहुः सोमं गच्छति पर्वसु । आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु" ।

केतोः "तथा केतुरथस्याश्वा अष्टौ ते वातरंहसः । पलाशधूमवर्णाभा वाताशनिभारुणाः । एते तथा ग्रहाणां वै तवाख्याता रथा नव" विष्णुपु० ।

सुश्रुतोक्ते नवविधे स्कन्दाद्यभिधे २नवग्रहभेदे ग्रहशब्दे २७३५ पृ० दृग्रम् । तेषामुत्पत्त्यादिकं उत्तरखण्डे तत्रोक्तं यथा

"अथातो ग्रहोत्पत्तिमध्यायं व्याख्यास्यामः । नव स्कन्दादयः प्रोक्ता बालानां व इमे ग्रहाः । श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः । एते गुहस्य रक्षार्थं लक्षितोमाग्निशूलिभिः । सृष्टाः शरवणस्यस्य रक्षितस्यामितेजसः । स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः । गङ्गोमाकृत्तिकानाञ्च ते भागा राजसा मताः । नैगमेयस्तु पार्वत्या सृष्टो मेषाननो ग्रहः । कुमारधारी देवस्य गुहस्यात्मसमः सखा । स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः । स च स्कन्दग्रहो नाम विशाख इति चोच्यते । स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा । बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः । बालक्रीडाधरो योऽयं देवो रुद्राग्निसम्भवः । मिथ्याचारेषु भगवान् स्वयं मैव प्रवर्त्तते । कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः । गृह्णन्तीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः । ततो भगवति स्कन्दे सुरसेनापतौ कृते । उपतस्थुर्ग्रहाः सर्वे दीप्तशक्तिधरं गुहम् । ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै । तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत् । ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत् । तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत् । परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च । देवा मनुष्यान् प्रीणन्ति तैर्य्यग्योनींस्तथैव च । वर्त्तमानैर्यथाकालं शीतवर्षोष्णमारुतैः । इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः । नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान् । भागधेयं विभक्तञ्च शेषं किञ्चिच्च विद्यते । तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति । कुलेषु येषु नेज्यन्ते

देवाः पितर एव च । ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा । निष्टत्ताचारशौचेषु परपाकोपभोजिषु । उच्छन्नवलिभिक्षेषु भिन्नकांस्योपभोजिषु । ग्रहेषु तेषु ये बालास्तान् गृह्णीध्वमयङ्कितः । तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति । एवं ग्रहाः सुतत्पन्ना बालान् गृह्णन्ति चाग्रतः । ग्रहोपसृष्टा बालास्तु दुःखितैस्सुतमा मताः । वैकल्यं मरणं चापि ध्रुवं स्कन्दग्रहे मतम् । स्कन्दग्रहोऽत्युपतमः सर्वेष्वेव यतः स्मृतः । अन्यो वा सर्वरूपस्तु न साध्यो ग्रह उच्यते" ।

अथ सूर्यादिग्रहाणां स्वरूपादि वृहज्जातकोक्तं प्रदर्श्यते

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखे सितस्तु मदनो दुःखं दिनेशात्मजः । राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः सूरिदानवपूजितश्च सचिवौ प्रेष्यः सहस्रांशुजः" वृहज्जा० । "कालस्यात्मा कालात्मा दिनकृत् सूर्यः । मनश्चैव तुहिनगुश्चन्द्रोमनः तुहिनेन हिमेन सदृशः शीतलागावोरश्मयो यस्य स तुहिनगुः । सत्वं कुजो भौमः सत्वस्य लक्षणं "अधिकारकरं सत्वं व्यसनाभ्युदयागमे" सत्वशब्दोऽत्र शौर्यपर्यायः तच्च सिंहादीनामस्ति तथा च एकाकिनि वनवासिन्यराजवच्छ्रण्यतीतयास्तम्भे । सत्वस्थिते मृगपतौ राजेति गिरः परिणमन्ति । उत्तरोत्तरस्वभाव इत्यर्थः ज्ञो बुधो वचो गोः जीवो वृहस्पतिः ज्ञानसुखे ज्ञानञ्च सुखञ्च ज्ञानसुखे । सितः शुक्रो मदनः कामः । दिनस्येशो दिनेशः सूर्यः तस्यात्मजः पुत्रः शनैश्चरो दुःखम् । अत्र कालग्रहणं कालस्य सर्वगतस्य प्रदर्शनार्थम् । अत्र न केवलं कालपुरुषस्य मेषाद्याराशयः शिरःप्रभृत्यङ्गविभागेन स्थिताः यावदादित्यादयश्चास्य विभागेन सर्वस्य जगतः स्थिताः । प्रयोजनम् पीडितैर्ग्रहैर्ग्रहवतोऽपि तदङ्गभावाङ्गपीडनं कर्तव्यम् पृष्टैः पृष्टिरिति । न केवलं यावत् जन्मनि बलवद्भिर्ग्रहैरेत एव भावा आत्मादयः शुभा भवन्ति दुर्बलैर्दुर्बलाः किन्तु सौरस्य विपरीतम् तथा च सारावल्याम् "आत्मादयो गगनगैर्बलिभिर्बलवत्तराः । दुर्बलैर्दुर्बला ज्ञेया विपरीतं शनेः स्मृतमिति" राजानाविन्द्वादि रविरादित्यः शीतगुश्चन्द्रः एतौ राजानौ नृपौ । क्षितिर्भूमिरस्याः सुतः पुत्रोऽङ्गारकः स नेता सेनापतिः । बुधः कुमारो युवराजः राजपुत्र इति केचित् । सूरिर्बृहस्पतिः दानवपूजितः शुक्रः च एतौ सचिवौ मन्त्रिणौ । सहस्रांशुः सूर्यात्मजाख्यातः शनैश्चरः स प्रेष्यो दासः । ननु जगत्पालनकरणे शनैश्चरः प्रेष्यः किमलोच्यते प्रेष्योऽपि स्वकर्मणां पालक एव । प्रयोजनम् जन्मनि प्रश्नकाले बलवान्पञ्चवर्गो ग्रहो भवति तदुक्तो राजादिवत्तस्य कार्यसाधनको भवति अन्यथा हानिकरः" "रक्तश्यामो भास्करो गौर इन्दुर्नीलश्चाङ्गारोरक्तगौरश्च वक्रः । दूर्वाश्यामोज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः । वर्णौस्याच्चसिताऽसितरक्तहरीतश्चापीतचित्रासितावङ्गारज्ञ्यग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् । प्रागाद्यारविशुक्रबोहिततमःसौरेन्दुवित्सूरयः क्षीणेन्दुक्षमहीसुतार्कतनयाःपापा बुधस्तैर्युतः । बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः" शिखिमूलपयोमरुद्गणानां वह्निनो भूमिसुतादयः क्रमेणः"

नवग्व त्रि० नवभिर्मासैर्गच्छति गम–उण्० डु । नवभिर्मासैरवाप्तफलतया उत्थिते । "सेनामयातयन्त क्षितयो नवग्वाः" ऋ० १।१२१।६ "सत्रमासीनानां मध्ये ये नवभिर्मासैरवाप्तफला उत्थितास्तेषां नवग्वा इति संज्ञा" भा० २नवीनगतिश्रुते च "अङ्गिरसो न पितरो नवग्वाः" इमान्ऋचमधिकृत्य निरु० ११।१९। उक्तं "नवग्वा नवीनगतयः" ।

नवचत्वारिंशत् स्त्री नवाधिका चत्वारिंशत् । १जनपञ्चाशत्संख्यायां २तदन्विते च । ततःपूरणे डट् । नवचत्वारिंश तत्पूरणे त्रि० । स्त्रियां ङीप् । तदर्थे तमप । नवचत्वारिंशत्तम तत्पूरणे त्रि० ।

नवच्छात्र पु० कर्म० । प्रथमाध्ययनप्रवृत्ते त्रिका० ।

नवच्छिद्र न० नव छिद्राणि यत्र । देहे देहस्य नवद्वारवत्त्वात् तथात्वम् । नवद्वारशब्दे दृश्यम् ।

नवज्वर पु० कर्म० । तरुणज्वरे "तरुणं तु ज्वरं पूर्वं लङ्घनेन जयं नयेत् । आमदोषमविज्ञाय लङ्घयेत्तु यथा विधि" भावप्र० । [२नवतिसङ्ख्यापूरणे त्रि० नवतिशब्दे दृश्यम्

नवत पु० नू–अतच् । १कुथे करिभूषणार्थे कम्बले हेमच० ।

नवतन्तु पु० कर्म० । १नवीने तन्तौ । बहु० । २तद्युक्ते पटे च ३विश्वामित्रपुत्रभेदे "नवतन्तुर्वकनकः समनोयतिरेव च" भा० आनु० ४अ० तत्पुरुषोक्तौ ।

नवति(ती) स्त्री नव दशतः परिमाणमस्य "षड्डिंशतीत्यादिना" पा० त्रि० वा ङीप् । (नब्बुद) १संख्यायां २तत्सङ्ख्यान्विते च "इत्थं त्रितीयो नवतिं नवाधिकाम्" रघुः "वीक्ष्यान्यो नवतेः काणः पटेः त्रिंशो यतस्त्वं

मनुः। ततः पूरणे डट्। नवत तत्सङ्ख्यापूरणे त्रि॰ स्त्रियां ङीप्। पूरणे तमप्। नवततम तत्सङ्ख्यापूरणे त्रि॰।

नवतिका स्त्री नवाय नूतनत्वाय तेकति तिक–गतौ क। १तूलिकायां हारा॰। स्वार्थे क। २नवतिसंख्यायाञ्च।

नवदण्डक न॰ नवो दण्डोऽत्र कप्। राज्ञां ऋणभेदे "मनोहरं च कनकदण्डं च नवदण्डकम्। ऋणं तु त्रिविधं ज्ञेयं त्रिविधानां महीभुजाम्" युक्तिकल्पतरुः।

नवदश पु॰ नव च दश च संख्याऽस्य डट्। ऊनविंशतिसंख्यायुक्ते "प्रतूर्तिरष्टादशस्तपो नवदशः" यजु॰१४।२२ "तपोरूपो नवदशः स्तोमः यद्वा संवत्सरस्तपः शीतोष्णवर्षैस्तपतीति स नवदशः द्वादश मासाः षडृतवः संवत्सर इति तद्रूपोऽसि" वेददी॰। "स एव नवदशस्तोमस्तं नवपदघात्यथो संवत्सरोवाव तपो नवदशस्तस्य द्वादश मासाःषडृतवः संवत्सर एव तपो नवदशस्तद्यत्तमाह तपति तदेव तद्रूपम्" शत॰ब्रा॰ ८।४।१।१४

नवदशन् त्रि॰ नवाधिका दश। (ऊनिश) १संख्यायां २तत्संख्यायुक्ते च। च अमरः।

नवदल न॰ कर्म॰। १नवीने पत्रे पद्मकेशरान्विकस्ये २पत्रे

नवदीधिति पु॰ नव दीधितयोऽस्य। मङ्गलग्रहे जटा॰।

नवदुर्गा स्त्री नवगुणिता दुर्गा कर्म॰ संज्ञात्वात् न द्विगुः। देवीनवके "प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी। तृतीयं चन्द्रघण्टेति कुष्माण्डेति चतुर्थकम्। पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्रिश्च महागौरीति चाष्टमम्। नवमं सिद्धिदा प्रोक्ता नव दुर्गाः प्रकीर्त्तिताः। उक्तान्येतानि नामानि ब्रह्मणैव महात्मना" ब्रह्मवै॰पु॰। "नवदुर्गे सरार्च्चिते" दुर्गोत्सवपद्धतिः। "पत्रिके नवदुर्गे त्वं महादेवि! मनोरमे!" नन्दिकेश्वरपुरा॰।

नवदोला स्त्री कर्म॰। नवीनदोलायाम्। प्रथमं तदारोहण दिनादि समयप्रदीपे उक्तं यथा "उपेन्दुमूलाहिशिवाग्निवर्जे शस्तेन्दुतारातिथिलग्नयोगे। विष्टिव्यतीपातयमार्कवर्जं दोलादिकारोहणमाद्यमिष्टम्"।

नवद्वार न॰ नव द्वाराणीव चित्तवृत्त्यादेर्बहिर्गमनसाधनत्वात् यत्र। देहे तत्र नवभिर्द्वारैश्चित्तादेर्बहिर्गमनात्तस्य तथात्वम्। तथा हि द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके च मुखमेकमिति शीर्षस्थानि सप्त, द्वे पायूपस्थे अधःस्थे इति नवच्छिद्ररूपाणि द्वाराणि देहे सन्ति। "नवद्वारे पुरे देही हंसो लेलायते बहिः", श्वेताश्वो॰ ३।१८। "नवद्वारे शिरसि सप्त द्वाराणि द्वे अधोऽधो यत्र तत्र पुरे देही विज्ञानात्मा भूत्वा कार्यकारणोपाधिः सन् हंसः परमात्मा हन्त्यविद्यात्मकं कार्यमिति। लेलायते चलति बहिर्विषयग्रहणाय" भा॰। देहरन्ध्राणां नवसंख्यकत्वात् रन्ध्रशब्दस्य लक्षितलक्षणया नवसंख्याबोधकत्वम्।

नवधा अव्य॰ नवन्+प्रकारे धाच्। नवप्रकारे "तुष्टिर्नवधाऽष्टधा सिद्धिः" सा॰का॰। "नवधा गुणिता नित्या" भा॰ति॰

नवधातु पु॰ नवगुणिता धातवः। नवप्रकारे धातुभेदे "हेमतारारजागाय ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं कान्तलोहञ्च धातवो नव कीर्त्तिताः" शब्दार्थचि॰।

नवन् त्रि॰ ब॰व॰। नु–कनिन् वा॰ गुणः। १संख्याभेदे (नय) संख्यायां २तद्युक्ते च।

नवनवक न॰ नवगुणितं नवकम्। दशसंख्यितोक्ते ज्ञातव्ये एकाशीतिपदार्थे

"सुधा नव गृहस्थस्य ज्ञेयानि नवैव तु। तथैव नवकर्माणि विकर्माणि तथा नव। प्रशस्तानि महान्यानि प्रकाश्यानि तथा नव। सफलानि नवान्यानि निष्फलानि नवैव तु। अदेयानि नवान्यानि वस्तुजातानि सर्वदा। नवका नव निर्दिष्टा गृहस्योन्नतिकारकाः। सुधा वस्तूनि वक्ष्यामि विशिष्टे गृहमागते। मनश्चक्षुर्मुखं वाचं सौम्यं दद्यात्तुतुष्यम्। अभ्युत्थानमिहागच्छ पृच्छालापप्रियान्वितः। उपासनमनुव्रज्या कार्य्याण्येतानि यत्नतः। दैवज्ञानि चान्यानि भूमिरापस्तृणानि च। पादशौचं तथाभ्यङ्ग आश्रयः शयनन्तथा। किञ्चिच्छाकं यथाशक्ति नास्यानन्नन् गृहे वसेत्। ऋजुत्वं चार्थिने देयमेतान्यपि सदा गृहे। सन्ध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवं तथातिथ्यसङ्गृतञ्चापि शक्तितः। पितृदेवमनुष्याणां दीनानाथतपस्विनाम्। मातापितृगुरूणाञ्च संविभागो यथार्हतः। एतानि नव कर्माणि विकर्माणि तथा पुनः। अकृतं पारदार्य्यञ्च तथाऽभक्ष्यस्य भक्षणम्। अगम्यागमनापेयपानं स्तेयञ्च हिंसनम्। अश्रौतकर्माचरणं आर्त्तधर्मबहिष्कृतम्। नवैतानि विकर्माणि तानि सर्वाणि वर्जयेत्। आयुर्विघ्नं गृहच्छिद्रं मन्त्रमैथुनमेषजम्। तपोदानावमानौ च नव गोप्यानि यत्नतः। प्राणोत्क्रमणमुद्विग्न दानाध्ययनविक्रयाः। कन्यादानं द्रवोत्सर्गो रहःपापमकृतस्तनम्। प्रकाश्यानि नवैतानि गृहस्थानन्निषेवया। माता-

पितोर्गुरौ मित्रे विनीते चोपकारिणि । दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत् । धूर्त्ते वन्दिनि मन्दे च कुवैद्ये कितवे शठे । चाटुचारणचौरेभ्यो दत्तं भवति निष्फलम् । सामान्यं याचितं न्यास आधिर्दारास तद्धनम् । क्रमायातञ्च निक्षेपः सर्वस्वञ्चान्वये सति । आपत्स्वपि न देयानि नव वस्तूनि सर्वदा । यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः । नवनवकवेत्तारमनुष्ठानपरं नरम् । इह लोके परे च श्रीः स्वर्गस्थञ्च न मुञ्चति" ।

नवनवति स्त्री नवाधिका नवतिः । १एकोनशतसंख्यायां २तद्युते च ।

नवनाडीचक्र न० २८१६पृ० चक्रशब्दोक्ते चक्रभेदे ।

नवनी स्त्री नवं नीयते नी-ड गौरा० ङीष् । नवनीते "हैयङ्गवीनानां नवनीनां परतरं सुदा । लड्डुकानां शर्करायाः खस्तिकानाञ्च यत्नतः" ब्रह्मवै०जन्मख० ६५ अ० ।

नवनीत न० नवं नीयते अ नी-क्त । (माखन) पयःसार भेदे तद्गुणादि सुश्रुते "नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरं कषायमीषदम्लं शीतलं मेध्यं दीपनं हृद्यं संग्राहि पित्तानिलहरं हृद्यमग्निविदाहि क्षयकासश्वासव्रणार्शोऽर्दितापहं गुरुकफमेदोविवर्द्धनं बलकरं हृंहणं शोषघ्नं विशेषतो बालानां प्रशस्यते । क्षीरोत्थं सुनवनीतमुत्कृष्टस्नेहं माधुर्ययुक्तमतिशीतं सौकुमार्यकरं लघुपथ्यं संग्राहि रक्तपित्तनेत्ररोगहरं प्रसादनञ्च" ।

तत्र नवनीतस्य नामानि गुणाश्च भावप्र०उक्ता यथा "स्वल्पं सरजं हैयङ्गवीनं नवनीतकम् । नवनीतं हितं ग्राह्यं हृद्यं वर्णबलाग्निकृत् । संग्राहि वातपित्तास्रकृच्छ्रार्शोऽर्दितकासहृत् । तद्धितं बालके वृद्धे विशेषादस्रतं शिशोः । माहिषस्य गुणाः "नवनीतं महिष्याश्च वातश्लेष्मकरं गुरु । दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम्" । पयसो नवनीतस्य गुणाः "दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् । हृद्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम्" । सद्यः सद्यःकृतनवनीतगुणाः "नवनीतन्तु सद्यस्कं स्वादु ग्राहि हिमं लघु । मेध्यं किञ्चित् कषायाम्लमीषत्तक्रांशसंक्रमात्" । चिरन्तननवनीतगुणाः "सस्वारकटुकाम्लत्वाच्छ्वर्द्यर्शःकुष्ठकारकम् । श्लेष्मलं गुरुमेदस्कं नवनीत चिरन्तनम्" ।

राजनि० छाग्यादिनवनीतगुणा उक्ता यथा "छागन्तु नवनीतं स्यात् क्षयकासास्रिरोगकृत् । कफनाशि च बल्यञ्च दीपनं परिकीर्त्तितम् । आविकं नवनीतन्तु हिमं लघु समीरितम् । योनिशूले कफे वाते गुदशूले हितञ्च तत् । ऐडकं नवनीतन्तु क्लिष्टगन्धं सुशीतलम् । पुष्टिस्वौल्यकरं मेधाविनाशि गुरु सम्मतम् । सन्दाग्निदीपनं तत्तु भिषग्भिः परिकीर्त्तितम्" । हस्तिनीनवनीतन्तु कषायं शीतलं लघु । तिक्तं विष्टम्भि तत् हन्ति जन्तुपित्तकफक्लमीन् । घोटकीनवनीतन्तु कषायं कफवातकृत् । चक्षुष्यं सुष्णकटु कमीप्रहातापहारकम् । गर्दभीनवनीतञ्च कषायं कफवातकृत् । पाके लघु दीपनञ्च बल्यं मूत्रस्य दोषकृत् । औष्ट्रं तु नवनीतं च पाके शीतं प्रकीर्त्तितम् । व्रणक्लमिकफार्त्तीनां वातस्य च विनाशनम् । मानवीनवनीतञ्च पाके लघु रुचिप्रदम् । चक्षुष्यं दीपनं ज्ञेयं सर्वरोगविनाशनम्" । "शीतं रुच्यं नवोद्धृतं सुमधुरं क्षय्यञ्च वातापहं कासघ्नं क्लमिनाशनं कफहरं संग्राहि शूलापहम् । बल्यं पुष्टिकरं तृप्तिशमनं सन्तापविच्छेदनम् चक्षुष्यं भ्रमहारि तर्पणकरं दध्युद्भवं पित्तजित्" ।

नवनीतक न० नवनीतात् जायते बा० वुन् । १घृते राजनि० स्वार्थे क । २नवनीते नवनीतशब्दे उदा० दृश्यम् ।

नवनीतधेनु स्त्री दानार्थकल्पितायां नवनीतमय्यां धेन्वां तद्दानविधिः वराहपु० उक्तो यथा "नवनीतमयीं धेनुं शृणु राजन् प्रयत्नतः । यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । गोमयेनाहतिप्राप्तायां भूमौ गोचर्ममात्रतः । कृष्णचर्म मृगस्यैव तस्योपरि च धारयेत् । कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् । वत्सं चतुर्थभागस्य तस्या उत्तरतो न्यसेत् । कृत्वा विधानेन च राजसिंह ! सुवर्णशृङ्गी सुखुरी च कार्य्या । नेत्रे च तस्या मणिमौक्तिकैस्तु कृत्वा तथाग्रञ्च गुडेन जिह्वाम् । ओष्ठौ च पुष्पैश्च फलैश्च दन्ताः प्रकल्प्य साक्षाच्च सितैश्च रत्नैः । नवनीतस्तनीं राजन्निमुपादां प्रकल्पयेत् । ताम्रपृष्ठीं कांस्यदोहां दर्भरोमकृतच्छवीम् । स्वर्णशृङ्गीं रौप्यखुरां पञ्चरत्नसमन्विताम् । चतुर्भिस्तिलपात्रैस्तु संयुतां सर्वतोदिशम् । आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलंकृताम् । दिक्षु दीपांश्च प्रज्वाल्य ब्राह्मणाय निवेदयेत् । वेदवेदाङ्गविदुषे आहिताग्निजितात्मने । मन्त्रास्त एव जप्याः सर्वधेनुषु ये स्मृताः । पुरा देवासुरैः सर्वैः सागरस्य तु मन्थने । उत्पन्नं दिव्यमद्भुतं नवनीतमिदं शुभम् । आप्यायनञ्च भूतानां नवनीत !

नमोस्तु ते । एवमुच्चार्य्य तां दद्याद्ब्राह्मणाय कुटुम्बिने । धेनुञ्च दत्त्वा सुखदा सोपधानां नयेद्गृहम् विप्रवर्य्यस्य भूयः । हविष्यमेवं सरसञ्चोषमुक्त्वा तिलेक्षुगृहं धेनुदत्तं विप्रः । यः प्रपश्यति तां धेनुं दीयमानां नरोत्तम ! । सर्वपापविनिर्मुक्तः शिवसायुज्यतां व्रजेत् । पितृभिः पूर्वजैः सार्द्धं भविष्यद्भिश्च मानवः । विष्णुलोकं व्रजत्याशु यावदाहूतसंप्लवम् । य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः । सर्वपापविशुद्धात्मा विष्णुलोके महीयते" ।

नवपञ्चम पु० नव च नवमं च पञ्चमश्च यत्र योगे । वरकन्ययोः विवाहाङ्गे राशिकूटभेदे । वरराशेः कन्याराश्यपेक्षया कन्याराशेश्च वरराश्यपेक्षया नवमत्वे पञ्चमत्वेवाऽयं योगः । उपयमशब्दे १२५१पृ० दृश्यम् । "पाणिग्रहोयदि भवेन्नवपञ्चमर्क्षे सन्तानहानिमतुलां तनयो वदन्ति" ज्योति०त० ।

नवपत्रिका स्त्री नवमिता पत्रिका । नवसु कदल्यादिषु "कदली दाडिमी धान्यं हरिद्रा मानकं कचुः । बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिकाः" दुर्गोत्सवपूजापद्धतिः । तत्प्रवेशः ति०त० निर्णीतो यथा ज्योतिषे "पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा आरोग्यं धनदा करोति विजयं चण्डी प्रवेशे शुभा । मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा सायाह्ने बधबन्धनादिकलहं सर्पक्षतं सर्वदा । सप्तम्यामसतायां यदि विशति गृहं पत्रिका श्रीफलाढ्या राज्ञः सम्राड्राज्यं जनसुखमखिलं हन्ति मूलानुरोधात् । तस्मात् सूर्योदयस्यां नरपतिशुभदां सप्तमीं प्राप्य देवीम् भूपालो वेशयेत्तां सकलजनहितां राजसर्वं विहाय" । राजसर्वं मूला । "पत्नीप्रवेशनं रात्रौ विसर्गं या करोति यः । तस्य राज्यविनाशः स्याद्राजाऽयविकलो भवेत्" ।

नवपद न० मात्राद्वत्तवृत्तभेदे "प्रथमसुपनयरामकलितव महिगणेन सह दण्डमिति पदानि विषमाणि सन्ति । समपदे च षट्पञ्चसप्तप्रतिकलमेतदातत एवं पञ्चपदानि कुरुदोहामग्रे देहि । भुजगराजपिङ्गलभणित नवपदमेतदवेहि" ।

नवपाठक पु० पूर्वकालेकेति पा० कर्म० उभयोरपि विशेषणत्वेऽपि एकस्य विशेष्यत्वे प्राप्ते पाठकस्यैव विशेष्यत्वनियमेन परनिपातः । नवीनाध्यापके सि०कौ० ।

नवप्राशन न० नवस्य नवान्नस्य प्राशनम् । नवान्नभोजने पारस्करगृह्यम् नवान्नशब्दे दृश्यम् ।

नवफलिका स्त्री नवं फलं यस्याः कप् कापि अत इत्वम् । १दृष्टरजस्कायां नार्य्यां २नव्यमाने च मेदि० ।

नवव(ब)धू स्त्री कर्म० । नूतनपरिणीतायां स्त्रियां तस्याः पितृगृहात् भर्त्तृगृहगमनं नववधूगमनं तत्र विहित नक्षत्रादि ज्योति०त० उक्तं यथा

दीपिकायां "स्त्रीशुद्धाविघटाजसंवुतरवौ काले विशुद्धे भृगुं संत्यज्य प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते । त्यक्त्वाऽस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभृगोर्नेच्छन्ति दोषं बुधाः । मैत्रामारे कुचकुसुमयोः सम्मुखो वा यदि स्यात् कालः शुक्रो न भवति यदा सम्मुखो वापि शुक्रः । मेषे कुम्भे ऽहिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नववधूं वेशयेन्मन्दिरं स्वम् । भर्त्तुर्गौचरशोभने दिनपतौ नाऽस्तंगते भार्गवे सूर्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे । हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा चानीता गुणशालिनी नववधूर्नित्योत्सवा मोदते । एकयामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । पतिना नीयमानायाः पुरः शुक्रो न दुष्यति" । तथा "काश्यपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसुच । भरद्वाजेषु वातूस्थेषु प्रतिशुक्रो न दोष मोक्" । द्विरागमनशब्देऽधिकं दृश्यम् । अत्र विशेषः शुद्ध० पी० धा० उक्तो यथा

"समाद्रिपञ्चाङ्गदिने विवाहाद्वधूप्रवेशोऽष्टदिनान्तराले । शुभः परस्ताद्विषमाब्दमासदिनेऽप्यपूर्वात्परतो यदेष्टम्" । "ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले । वधूप्रवेशः सद्वेष्टो रिक्तारार्के बुधे परैः" सु० चि० ।

"तत्र वधूप्रवेशोनाम नूतनपरिणीतायाः कन्यायाः प्रथमतः करिष्यमाणो भर्त्तृगृहप्रवेशो वधूप्रवेशशब्दवाच्यः । समाद्रीति विवाहाद्विवाहदिवसादारभ्याष्टदिनानि नोड्यदिनानि तेषामन्तराले समाद्रिपञ्चाङ्गदिने समदिनानि द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशसंख्यकानि विषममध्ये सप्तमपञ्चमनवमदिनानि तेषु वधूप्रवेशः वध्वा नूतनपरिणीतायाः कन्याया भर्त्तृगृहप्रवेशः शुभः शुभफलप्रदः । यदाह नारदः "आरभ्योद्वाहद्विरगात् भर्त्तुर्वाप्यष्टमे दिने । वधूप्रवेशः सम्पत्त्यै दशमेऽथ समे दिने" । मतादीनां समत्वादेव ग्रहणे पुनस्तदुक्तिरतिप्रायश्चित्तार्थम् । ज्योतिर्निबन्धे तु विशेषः "वधूप्रवेशनं कार्य्यं

पञ्चमे सप्तमे दिने। नवमे च शुभे वारे शुक्लपक्षे शशिनीवले" इति। परस्तात् प्रतिबन्धकवशात् षोडशदिनाभ्यन्तरे यदि वधूप्रवेशो न जातस्तदा तदनन्तरं विषमाब्दाभावदिने विषमवर्षे प्रथमतृतीयपञ्चमवर्षे विषममासे विवाहमासात् प्रथमतृतीयपञ्चमसप्तमनवमैकादशमासेषु विषमदिनानि सप्तदशादीनि तेषु वधूप्रवेशः शुभः। तत्रापि यदि प्रतिबन्धकवशात्कालातिक्रमः पञ्चवर्षात्मको जातस्तदा पञ्चवर्षोदनन्तरं यथेष्टं वर्षादिनियमो नास्ति किन्तु दोषरहिते काले वधूप्रवेशो विधेयः। तदुक्तं संग्रहे "विवाहमारभ्य वधूप्रवेशो युग्मे दिने षोडशवासरान्तः। जर्द्धं ततोऽब्देऽयुजि पञ्चमान्तं पुनः परस्ताद्नियमो न चास्ति"। अत्राब्देऽयुजीति पदच्छेदो द्रष्टव्यः। तदुक्तं विवाहपटले "वधूप्रवेशः प्रथमेऽत्र वर्षे तथा तृतीयेऽथ पञ्चमे वा। सूर्येन्दुदेवेज्यबलेन कुर्यात् पुंसो सुनिर्गौतम आह सत्यमिति"। समवर्षे दोषपरिहारश्च यदाह धर्मशास्त्रे नारदः "समे वर्षे समे मासे यदि नारीमृतं व्रजेत्। आयुष्मन्तं हरते भर्तुः सा नारी मरणं व्रजेदिति"। युग्मवत्सरनिषेधः पञ्चवर्षात् प्राग्ज्ञेयो न पश्चात्तद्वाक्यस्य प्रागभिधानात्। अथ वधूप्रवेशे नक्षत्रादि ध्रुवेति। ध्रुवाणि रोहिण्युत्तरात्रयं च क्षिप्राणि अश्विनीपुष्यहस्ताः मृदूनि चित्रानुराधारेवतीमृगः। क्रूरं त्रयः वसुर्धनिष्ठा मूलं प्रविक्षम्। अनिलः स्वाती एषु मेषु वधूप्रवेशः सन् शुभफलदः। रिक्तादिषु नेष्टः न शुभः अर्थात् रिक्तान्यास्तु तिथिषु अर्कारभ्यामन्यवारेषु च वधूप्रवेशः प्रशस्त इत्यर्थः। उक्तञ्च व्यवहारतत्त्वे "पौष्णात् कभाच्च त्रयाच्च युग्मे हस्तत्रये मूलमघोत्तरासु। पुष्ये च मैत्रे च वधूप्रवेशो रिक्तेतरे व्यर्कतुजे च शस्तः" इति। कर्मं रोहिणी। बुधे परैरिति अन्यैः शिष्टैर्बुधवारे वधूप्रवेशो नेष्यते। कस्मिंश्चिद्देशे शिष्टाचारो यद्बुधवारे वधूप्रवेशो न विधीयते इति। केचिदत्र हेतुमपि वर्णयन्ति यद्बुधो नपुंसक इति तन्मिथ्या शनेरपि नपुंसकत्वात्तस्यापि निषेधो वाच्यः स्यात्" पी० धा०। विवाहानन्तरं केषु चिन्मासेषु प्रथमं भर्त्रादिगृहे निवासे फलम् तत्रैवोक्तं यथा

"ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हन्त्यादिमे भर्तृगृहे वधूः शुचौ। नभ्यूं सहस्ये श्वशुरं त्रये तनुं तातं मधौ तातगृहे विवाहतः" सु० चि०।

"विवाहतो विवाहादनन्तरं भर्तृगृहे स्थिता आदिमे प्रथमे ज्येष्ठे मासि तिष्ठन्ती वधूः पतिज्येष्ठं भर्तृज्येष्ठभ्रातरं हन्ति। एवमादिमेऽधिके मासि स्थिता वधूः पतिं भर्तारं हन्ति। आदिमे शुचावाषाढे वधूः भर्तुः जननीं हन्ति। आदिमे पौषे श्वशुरं भर्तुः पितरं हन्ति आदिमे त्रये त्रयमासे भर्तृगृहे तिष्ठन्ती तनुं निजशरीरं हन्ति स्थित इत्यर्थः। तथादिमे मधौ चैत्रे तातगृहे पितृगृहे तिष्ठन्ती तातं पितरं हन्ती त्यर्थः। यदि कन्यायाः पित्राद्यभावस्तदा तत्तन्मासे तत्तद्गेहावस्थितौ इत्यामपि न कोपि दोष इत्यर्थः। उक्तञ्च सङ्गर्तमार्त्तण्डे "उद्वाहात् प्रथमे शुचौ यदि वसेत् भर्तृगृहे कन्यका हन्यात्तज्जननीं त्रये निजतनुं ज्येष्ठे पतिज्येष्ठकम्। पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रादये तिष्ठन्ती पितरं निहन्ति न सदं तेषामभावे भवेदिति"। मलिनेऽधिकमासे तत्रान्यवस्था विवाहानन्तरं ज्येष्ठाषाढपौषाधिकमासत्रयमासेषु भर्तृगृहे न स्थातव्यम्। चैत्रे मासि पितृगृहे न स्थातव्यं किन्तु भर्तृगृहे एव स्थातव्यमिति फलितोऽर्थः। तदुक्तं ज्योतिर्निबन्धे "विवाहात् प्रथमे पौषे आषाढे नाधिमासके। न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा"। आषाढो ज्येष्ठोपलक्षकः। अधिमासः त्रयमासोपलक्षकः अत्र प्रमाणं प्रागुक्तमिति" पी० धा०।

नवभाग पु० राशेर्नवमो भागः। १त्रिंशांशकात्मकस्य राशेः नवमे भागे २।२० विंशतिकलाधिकभागत्रयात्मके भागे नवांशपदे विहितः। २नवमे भागमात्रे च।

नवम त्रि० नवानां पूरणः नान्तत्वात् डटि सः। नवसङ्ख्यापूरणे। १लग्नावधिनवमराशौ २तद्भावे च तद्भावस्य तत्रादिहादयभावोक्तदिभावसेयः। स्त्रियां ङीप्। "नवमी तुहिनप्रभा" पद्माकारसन्निवेशे कृष्णोद्भातः। "त्रयमृषो नवमी" "पृष्ठो नवमी" यजु० २५।४।५ नवमी पञ्चतिरर्थमदेवत्या पूजदेवत्या च तदर्थः। उक्तञ्च स्वस्मिन् सूर्यकिरणप्रवेशयोग्यायां नवमकलातिरिक्तायां तदुपसन्निकटकालरूपायां वा अतिथौ। अमेयदिने तत्प्राप्तौ कलाः कर्मयोग्यतेति सन्देहे तन्निर्णय उक्तः आश्वला० यथा "अथ नवमी निर्णीयते। सा च विधिनिषेधरूपाभ्यामन्वयव्यतिरेकाभ्यां पूर्वविद्धैव ग्राह्या। तत्र विधिस्तु युग्मादिग्राह्ये "वसुरन्ध्रयोरिति" प्रयते। पद्मपुराणेऽपि "अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता। अर्द्ध-

नारीवरप्रदा उमामाहेश्वरी तिथिः"। भविष्यत्पुराणे द्वादशीकल्पेऽपि "नवम्या सह कार्य्या द्वादशी नवमी तवेति"। निषेधस्तु पद्मपुराणेऽभिहितः "न कार्य्या नवमी तात! दशम्या तु कदाचनेति"। सैवं नवमी भविष्यत्पुराणोक्तव्रतादौ द्रष्टव्या। "ननु कृष्णनवम्याः पूर्वविद्धत्वेऽपि शुक्लनवमी परविद्धाऽस्तु। "शुक्लपक्षे तिथिर्यांता यस्यामभ्युदितो रविरिति" वचनात् मैवम् पूर्वोक्तेषु वचनेषु दशमीविद्धायाः कार्य्यान्निषेधात्। ननु तस्य निषेधस्य सामान्यरूपत्वात् कृष्णपक्षे बहोर्योऽस्तिति चेत् न बहोर्यश्चेतोर्भवतोदाहृतस्यापि सामान्यरूपत्वात्। पक्षयोरुभयोरपि पूर्वविद्धैव ग्राह्या। रामनवमी तु "चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवेत्। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोष्यं नवम्यां वै दशम्यां पारणं भवेदिति" वचनादष्टमीविद्धा सर्वत्रापि नोपोष्या" इति भेदः। "या चाष्टमीयुता ग्राह्या युक्तात्। भविष्ये "माघेसितर्भियेत् पुण्यं विधिनाऽऽपूज्य चण्डिकाम्। तत्फलं लभते वीर! नवम्यां कार्त्तिकस्य च। तथा "नवम्यां नव वर्षाणि राज्ञः पिष्टाशनो भवेत्। तस्य तुष्टा भवेद्गौरी सर्वकामप्रदा शुभा" "माघे माघि तु वा शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम्। स्नानं दानं तपो होमो देवार्चनमुपोषणम्। सर्वं तदक्षयं याति यदस्यां क्रियते नरैः" शि० त०।

नवमल्लिका स्त्री नवा सुत्वा मल्लिका कर्म०। नवमालिकायाम् पुष्पप्रधाने वृक्षभेदे (नोयाळि) मन्दरत्ना० तस्याः पुष्पेऽपि "पुष्पे जातिप्रभृतयः मल्लिकाः" इत्युक्तेः स्त्रीत्वम्। "उपययौ विदधत्नवमल्लिकाः" माघः नवमल्लीत्यपि

नवमालिका स्त्री नवा सुत्वा मालिका। (नोयाळि) ख्याते १ नवमल्लिकावृक्षे अमरः। "वासन्ती" नेवारी इति लोके तस्याम्। तद्गुणाः "नेपाली कथिता तल्पैः सुमना नवमालिका। वासन्ती शीतला बद्धी तिक्ता दोषत्रयाऽजित्" भावप्र०। २ द्वादशाक्षरपादके छन्दोभेदे च "दृङ् नवमालिका नजभयैः स्यात्" छ०र०।

नवयज्ञ पु० नवधान्यनिमित्तो यज्ञः। नवान्ननिमित्ते यज्ञे आश्वायणशब्दे ६२२पृ० दृश्यम् "शरदसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये ग्रीष्माद्यो वनिनः स्मृतः" कर्मप्रदीपे कात्या०। वनिनः वानप्रस्थस्य।

नवयोनिन्यास पु० तन्त्रसारे निबन्धोक्ते न्यासभेदे "नवयोन्यात्मकं न्यासं कुर्याद्धीजैस्त्रिभिः क्रमात्। कर्णयोश्चिबुके मूर्ध्नि मस्तकयोर्वदने पुनः। नेत्रयोर्नासिकायां विनखेदंशयोर्जठरे पुनः। ततः कूर्परयोः कुक्षौ जानुनोर्ऊरुमूर्द्धनि। पादयोर्गुल्फदेशे च पार्श्वयोर्हृदयाम्बुजे। जघनयोः कण्ठदेशे च त्रीणि बीजानि विन्यसेत्"।

नवयौवन न० नवं यौवनम्। २ अभिनवे यौवने "नवयौवनसम्पन्नां सर्वालङ्कारभूषिताम्" दुर्गाध्यानम्। नवं यौवनं यस्याः। २ अभिनवयौवनवत्यां स्त्रियां स्त्री० टाप्।

नवरत्न न० नवगुणितं रत्नम्। नवविधे माणिक्यादिरत्ने तानि च कर्मभेदे भिन्नानि यथा

"उत्तमाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ। पद्मरागं मरकतं नीलञ्चेति यथाक्रमम्" इति तन्त्रसारः। नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा "वैदूर्यं धारयेत् सूर्ये स्फटिकं चन्द्रवाञ्छने। आवनेदेऽपि माणिक्यं पद्मरागं मयाङ्गजे। बुधे तन्त्रां शनौ वज्रं शनौ नीलं विदुर्बुधाः। राहौ गोमेदकं धार्यं केतौ मरकतन्तथा।" दीपिका। २ विक्रमादित्यराजसभायां नवसंख्यकपण्डिते च यथा "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदा०

नवरस पु० नवगुणितो रसः। अलङ्कारोक्ते शृङ्गारादिके रत्यादिस्थायिनवभावके नवविधे रसे "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चैवमष्टौ प्रोक्ताः शमोऽपि च" स्थायिभावाद्यङ्का

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः" सा०द०। पृथक्करणम् "अष्टौ नाट्ये रसाः स्मृताः" इत्युक्तेः नाट्ये अष्टविधत्वम् "निर्वेदस्थायिभावोऽपि शान्तोऽपि नवमो रसः" इत्युक्तेः काव्ये नवविधत्वमिति सूचनाय। प्रबोधचन्द्रोदयनाटके शान्तरसवर्णनं भारतादिशास्त्रविरुद्धम्। "नवरसरुचिरा भारती कवेर्जयति" काव्यप्र०।

नवरात्र त्रि० नवभिः रात्रिभिर्निर्वृत्तं तद्धितार्थे द्विगुः "द्विगोर्लुगनपत्ये" तद्धितस्य ठको लुक् अचसमा०। नवभी रात्रिभिस्तदुपलक्षितैर्दिनैर्यो निर्वृत्ते यागादौ "नवरात्रात्रयः" कात्या०श्रौ० ४।२।१४ "नवरात्रे त्रिकृत्वः" कात्या०श्रौ० १५।१२। नवरात्रशब्दे २व्रतभेदे तद्विधानकालनिर्णयादि नि० सि० उक्तं यथा

"अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तन्निर्णयः भार्गवार्चनदीपिकायां देवीपुराणे सुमेधा उवाच "शृणु राजन्! प्रवक्ष्यामि चण्डिकापूजनक्रमम्। आश्विनस्य सिते पक्षे प्रतिपत्सुशुभे दिने" इत्युपक्रम्योक्तम्। "शुद्धे तिथौ प्रकर्तव्यं प्रतिपच्छोर्ध्वगामिनी। आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा। अपराह्णे च कर्तव्यं शुद्धयन्तिथाङ्किभिः"। इदं चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयम्। तथा च तत्रैव देवीपुराणे डामरतन्त्रे च देवीवचः "अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम। सङ्कल्पमात्रा कर्तव्या द्वितीयादिगुणान्विता। आद्याः षोडश नाडीस्तु त्यक्त्वा यः कुरुते नरः। कलशस्थापने तत्र क्षयरिष्टं जायते ध्रुवम्"। मार्कण्डेय देवीपुराणयोः "पूर्वविद्धा तु या शुद्धा भवेत् प्रतिपदान्विता। नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता। देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते। तन्द्रायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति"। स्कान्देऽपि "प्रतिपद्यश्विने मासि सा शुद्धा शुभदा भवेत्। भाद्रपदशुक्लया तया युक्ता न शस्यते। विरुद्धफलदा सा हि पुत्रदारभयावहेति"। तथा "वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव!। द्वितीयादिगुणैर्युक्ता प्रतिपत् सर्वकामदा"। तथा देवीपुराणे "यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम्। प्रतिपच्छारदीं प्राप्य सोऽश्नुते सुखमव्ययम्। क्रियते चेदमायुक्ता प्रतिपत् स्थापने मम। तस्य पापायुतं दत्त्वा मत्प्रसादं करोम्यहम्। अपहाय कुरुते यस्तु कलशस्थापनं मम। तस्य सम्पद्विनाशः स्याच्छत्रोश्च पुत्रो विनश्यति। अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने। धनार्थिभिर्विशेषेण वंशहानिश्च जायते। न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने। उदये द्विमुहूर्तापि ग्राह्या षोडशगामिनी" इति देवीपुराणे "या चाश्वयुजि मासे स्यात् प्रतिपद्भद्रयान्विता। शुद्धा तत्रार्चनं तस्यां शतयज्ञफलप्रदम्"। भद्रयामले "अमायुक्ता सदा चैव प्रतिपच्चिन्तिता मता। तत्र चेत् स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम्। प्रतिपत् सद्वितीया तु कुम्भारोपणकर्मणि" इति। यद्यपि भद्रयामलं डामरं च निर्मूलं तथाप्यविरोधात् प्रचाराच्च तद्वचनानि लिख्यन्ते। तिथितत्त्वे देवीपुराणेऽपि "प्रातर्ब्राह्मणवेद्देवीं प्रातरेव प्रपूजयेत्। प्रातःप्रातश्च संपूज्य प्रातरेव विसर्जयेत्"। तत्रैव "यत्रत्राश्वे महापूजा क्रियते या च वार्षिकी। सा कार्योदयगामिन्यां न तत्र तिथियुग्मता"। तथा "कुम्भकाष्ठोपसंयुक्तां वर्जयेत् प्रतिपत्तिथिम्। राज्यनाशाय सा प्रोक्ता निन्दिता चात्रपूजने" इति। एषु वचनेषु कलशस्थापनग्रहणात् तदेव प्रथमदिने निषिद्धं न तूपवासादि तस्य "प्रतिपदाद्यवावाक्षेति युग्मवाक्यात्। "शुद्धा स्यात् प्रतिपत्तिथिः प्रथमतः" इति दीपिकोक्तेः "शुद्धपक्षे दर्शविद्धेति" माधवोक्तेश्च पूर्वदिने प्राप्तस्य बाधे मानाभावादिति केचित्। वस्तुतस्तु पूर्वोक्तवाक्येषु चण्डिकार्चनपूजाग्रहणादुपवासादेरङ्गत्वात् प्रधानदेवीपूजादावपि परेति युक्तम्। कलशस्थापनग्रहणं तूपलक्षणम्। अतएव देवलः "व्रतोपवासनियमे घटिकैकापि या भवेत्। सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके" इति। अत्र घटिका मुहूर्त्त इति गौडाः। यदा तु पूर्वदिने सम्पूर्णा शुद्धा च भूत्वा परदिने वर्द्धते तदा सम्पूर्णत्वादवाधोनाभावाच्च पूर्वैव यानि च द्वितीयायोगनिषेधकानि वचनानि केचित् पठन्ति तान्यपि शुद्धाधिकनिषेधपराणि परदिने प्रतिपदोऽल्पत्वाभावे तु दर्शयुतापि पूर्वैव ग्राह्या तदाह वसिष्ठः "तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति" यानि त्वमायुक्ता प्रकर्तव्येत्यादीनि ऋषिदर्शनादि वचनानि तानि समूलत्वे सत्येतद्विषयाणि। अतोऽयं तत्त्वम्। पूर्वोक्तवाक्यानां सर्वेषां क्षेमाद्रिग्रन्थविचितत्वेन निर्मूलत्वाशङ्कानिर्णयस्याकृतेः सामान्यनिर्णयात् पूर्ववत्प्राप्तावपि गौडनिबन्धेषु विशेषेण निर्णयाद्दैवज्ञी ग्राह्या तत्रापि घटिकैकेत्यस्य द्विमुहूर्त्तस्तुतित्वोक्तेर्द्विमुहूर्त्ता ग्राह्या "उदिते दैवतं भाना"वित्यत्र "द्विमुहूर्त्ता तिरङ्गेति" औदयिक्या द्विमुहूर्त्तत्वनियमात् तेन उदये द्विमुहूर्त्तापीत्याद्यनुसारोऽपि "मुहूर्त्तमात्रा कर्तव्येति" द्विमुहूर्त्तस्तुतिः। अन्यथा द्विमुहूर्त्तविधिवैयर्थ्यात्। केचित्तु मुहूर्त्तमात्रेति वचनात्ततो न्यूनत्वे परा वेलाग्राह्यः गौडा अप्येवम्। अत्र देवीपूजैव प्रधानम् उपवासादि त्वङ्गम् "अष्टम्यां च नवम्यां च जलमात्रमपि त्यजेत्। पूजयित्वाश्विने मासि विघ्नो जायते नरः" इति क्षेमाद्रौ भविष्ये तस्या एव प्रकरणत्वात् "नवमीतिथिपर्यन्तं दत्त्वा पूजाजपादिकमिति" तत्रैव देवीपुराणात्। "यत्रत्राश्वे महापूजा क्रियते या च वार्षिकी" इति मार्कण्डेयपुरा-

[illegible] "नक्षत्रैकलाभाद्यैः [illegible] साधकः । पूजयेद्वरदां देवीं नक्षत्रैः [illegible]" इति । [illegible] तु राजमृगेज्यायामैः [illegible] दक्षिणाया [illegible] विधानाच्च यथा [illegible] नवरात्रमध्यस्थाया अष्टम्या नवम्या वा फलार्थः द्वयमुपयोगी । कृष्णरायपद्धतदेवीपुराणे "नक्षत्रवर्त्मा पूर्वेण सर्वकामप्रदायिका । सर्वेषु सर्ववर्णेषु तव भक्तिः प्रकीर्तिता । लभ्यते यदि राज्यं [illegible]" इति च कामा नित्या च "एवमन्यैरपि तथा देव्याः सार्वं पूजनम् । विभूतिमन्त्रसं कुर्यात् चतुर्वर्गप्रदायकम्" इति "दो भोक्तादय वाऽऽयस्याहेवीं दुर्गां नवोत्सुकैः । अ पूजयति दत्त्वाहा देवादायात्र भैरव ! । क्रुद्धा भवती तस्य कामानिष्टान्निहन्ति वै" इति कालिकापुराणेऽकरणे निन्दास्तुतेः "वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्जनम्" इति तिथितत्त्वे देवीपुराणाच्च । अत्रोपवासादिकल्पं हेमाद्रौ भविष्ये "एवं च विन्ध्यवासिन्या नवरात्रोपवासतः । एकभक्तेन नक्तेन तथैकाशितेन च । पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे । स्थाने स्थाने शक्तिपरैर्मेषामे नवे नवे । स्नातैः प्रमुदितैर्हृष्टैर्नानोपचारैः सुविस्तरैः । वैश्यैः शूद्रैर्मेलियुक्तैर्वैश्यैरन्यैश्च मानवैः" इति वस्तु कृष्णरायपद्धतौ भविष्ये "एवं नामाष्टकैः पूज्यते सर्वदा सुभिरिति" तत्तामसपूजापरम् । "विना मन्त्रैस्तामसी स्यात् किरातानान्तु सन्मतेति" मन्त्रैर्योक्तेः । भद्रनरत्ने देवीपुराणेऽपि "कन्यासंस्थे रवौ शक्र ! शुक्लामारभ्य नन्दिकाम् । जयाद्यां शुभ वैकाशी नक्तायी वाथ वायुभुक् । भूमौ शयीत चामन्त्र कुमारी भोजयेन्नुटा । वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् । बलिञ्च प्रत्यहं दद्यादोदनं मांसभाषवत् । त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः" इति नन्दिका प्रतिपत्तिथिरिति मैथिलाः । प्रतीति गौडाः । तत्र पूजनं रात्रौ कार्यम् "आश्विने मासि मेषान्ते महिषासुरमर्दिनीम् । निशायां पूजयेद्भक्त्या सोपवासादिकः क्रमात्" इति देवीपुराणात् संग्रहेऽपि "आश्विने मासि मेषान्ते प्रतिपद्या तिथिर्भवेत् । तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् । रात्रिरूपा यतो देवी दिवारूपो महेश्वरः । रात्रिव्रतमिदं देवि ! सर्वपापप्रणाशनम् । सर्वकामप्रदं नृणां सर्वभक्तिविवर्द्धनम् । रात्रिव्रतमिदं तस्य रात्रौ कर्मकृतेष्यते । नक्तव्रतमिदं यस्मादन्यथा नरके गतिः" इत्यादिवचनाच्च रात्रिव्रतत्वमेवाभिप्रेत्य माधवेनोक्तम् तस्य नक्तव्रतत्वादिति । न तु रात्रिभोजनात् । "नतु मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः । संपूज्य नवदुर्गाञ्च नक्तं कुर्यात् समाहितः । नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम्" । आरम्भे नवरात्रस्येत्यादि स्कान्दात् माधवोक्तेन नक्तमेव प्रधानमिति चेत् नवरात्रोपवासत इत्यादेरुपपत्तेः तेन पाक्षिकनक्तानुवादोऽयं नित्यानित्यसंयोगविरोधात् नक्तान्निहोत्रे दध्नः पक्षे प्राप्तस्य दध्नाऽनुहोतीत्यस्येन्द्रियकाम्यहोमेऽनुवादो घटते नित्यवदनुवादायोगादित्युक्तं वार्त्तिके, तथात्राऽपि । तेनात्र तद्वदेव गुणात् फलमिति ज्ञेयम् । नतु रात्रेः कर्मकालत्वे तद्व्यापिनी पूर्वैव प्रतिपत् प्राप्नुयात् मैवम् व्यापतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्राप्तुक्तम् यथा वा निशीथे सतीमपि पूर्वां लब्धाष्टमीं त्यक्त्वा रोहिणीयुक्ता परैवेति माधवेनोक्तम् तथात्रापि । वस्तुतस्तु रात्रेः कर्मकालत्ववचसां हेमाद्रावाद्यविचनात् समूलत्वं विरुद्धमेव त्रिकालं पूजयेदित्यादिपूर्वविरोधाच्च । माधवोक्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तम् । तस्मात् सर्वपक्षेषु परैव प्रतिपदिति सिद्धम् । अत्र केचिन्नवरात्रशब्दो नवाहोरात्रपरः "इहो समाप्तिरष्टम्याम्" इत्यासेन प्रतिपत्तिथि । प्रारम्भो नवचन्द्रात्तु नवरात्रमतोऽर्थवत्" इति देवीपुराणादित्याहुः । तत्र ह्यासद्वयोर्न्यूनाधिकत्वापत्तेः अत्र मूलाभावाच्च तेन तिथिवाच्येवायं तद्वत्तम् "तिथिवद्वो तिथिह्यासे नवरात्रमपार्थकम् । अष्टरात्रे न दोषोऽयं नवरात्रं तिथिद्वये" इति । स च नवरात्रशब्दः क्वचिल्लक्षणया कर्मवाची यथा । प्रारम्भो नवरात्रस्येत्यत्रेति दिक्"

नवराष्ट्र न० औशीनरनृपस्य देशभेदे "नवस्य नवराष्ट्रन्तु समेस्तु समिला पुरी" हरिवं० ११अ० । तत्र दक्षिणदिक्स्थं "नवराष्ट्रञ्च निर्जित्य कुन्तिभोजसुपाद्रवत्" भा० स० ३०अ० सहदेवदक्षिणदिग्विजये ।

नवर्च न० नव+ऋचो यत्र ऋच् समा० । नवभिर्ऋग्भिर्युते सूक्तभेदे । नव च ता ऋचश्चेति ऋच् समा० । नवसु ऋग्भेदेषु "नवर्चेभ्यः स्वाहा" अथ० १९।२२६

नवलक्षण न० नवमितं लक्षणम् । विचित्रवर्णस्थितिप्रकया

सामान्यतमस्य तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वानामन्यतमरूपेषु नवसु पारमेश्वरेषु लक्षणेषु तदेतत् वेदा॰प॰ समर्थितं यथा

"प्रकृते च जगज्जन्मादिकारणत्वम् (तटस्थ लक्षणम्) अत्र जगत्पदेन कार्यजातं विवक्षितम्। कारणत्वञ्च कर्तृत्वम् अतोऽविद्यादौ नातिव्याप्तिः। कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते" इत्यादि श्रुतिर्मानम्। तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेति" श्रुतिर्मानम्। तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम्। ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः। अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवञ्च लक्षणानि नव सम्पद्यन्ते ब्रह्मणो जगज्जन्मादिकारणत्वे च "यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादि" श्रुतिर्मानम्। "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः" भाग॰।१।१।१ श्लोकस्य प्रतिपाद्यार्थसंग्राहकः श्रीधरस्वामिकृतः श्लोको यथा "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्। श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्" ।

नववरिका स्त्री नवो वरोऽस्यास्याः ठन्। नवोढायां दारा॰

नववर्ष पु॰न॰ नवमितं वर्षम्। १भारतादिषु नवसु वर्षेषु। दृश—भावे घञ् कर्म॰। २नूतनवर्षके पु॰,

नववल्लभ न॰ नवानां नवीनानां वल्लभम्। १दाहागुरुणि शब्दार्थचि॰। २नव्यजनप्रिये त्रि॰

नववस्त्र न॰ कर्म॰। अनाहते नूतने वसने

नववास्तु पु॰नवं वास्तु यस्य। राजर्षिभेदे "अग्निर्नय नवास्त्र दृढद्रथं तुर्वीतिम्" ऋ॰ १।२६।१८ "नव वास्तु यस्यासौ नववास्तुः" वा छन्दसीत्यनुवृत्तेः अमि पूर्वरूपत्वाभावे यण्। नववास्तुनामकं दृढद्रथनामकं तुर्वीतिनामकं च राजर्षीन् नय दूहानय" भा॰।

नवविंशति स्त्री नवाधिका विंशतिः। १नवाधिकविंशतिसंख्यायां २तद्युते च "नवविंशत्याऽस्तुवत" यजु॰ १४।२१ "करपादाङ्गुलयोविंशतिः नव च्छद्रूपाः प्राणास्तैरस्तुवत" वेददी॰ "दश हस्ताङ्गुलयो दश पाद्या नव प्राणाः" शत॰ ब्रा॰ ८।४।२।१७। ततः पूरणे डट्। नवविंश तत्संख्यापूरणे त्रि॰ स्त्रियां ङीप्।

नवविध त्रि॰ नव विधायस्य। नवप्रकारे नवविधपापानि च विष्णुना दर्शितानि यथा "अतिपातकं१ महापातकाऽनुपातकोऽपपातकेषु४ प्रवर्त्तते। जातिभ्रंशकरेषु५ सङ्करीकरणेषु६ अपात्रीकरणेषु७ मलावहेषु८ प्रकीर्णकेषु"९। प्राय॰वि॰ तद्विवरणं द्रष्टव्यम्।

नवव्यूह पु॰ नव व्यूहा अस्य। विष्णौ तस्य चतुर्षु पद्मदलेषु प्रद्युम्नादिरूपतया केसरस्थाने मध्ये वासुदेवरूपतया च नवव्यूहत्वात् तथात्वम्। तदर्चनप्रकारः वह्निपु॰ उक्तो यथा "नवव्यूहार्चनं वक्ष्ये नारदाय हरीरितम्। मण्डलेऽब्जेऽर्चयेन्मध्ये ॐ बीजं वासुदेवकम्। आं सङ्कर्षणं तथा वह्नौ आं प्रद्युम्नं च दक्षिणे। अनिरुद्धं नैर्ऋते तु नारायणन्तु पश्चिमे। तद्वद्ब्रह्माणमनिले शुं विष्णुं चौं ऋषिंहकम्। उत्तरे तु वराहञ्च ईशे वामनमेव च"

नवशक्ति स्त्री नवगुणिता शक्तिः। सा॰ति॰ उक्ते शक्तिनवके नवकशब्दे द्रष्टव्यम् काचित् नवविधा शक्तिः तन्त्रसारे उक्ता यथा "प्रभा माया जया सूक्ष्मा विशुद्धानन्दिनी पुनः। सुप्रभा विजया सर्वसिद्धिदा नव शक्तयः"।

नवशस्य न॰ कर्म॰। नूतने शस्ये।

नवशस्येष्टि स्त्री नवशस्यनिमित्ता इष्टिः। साग्निककर्त्तव्ये नवशस्यनिमित्तके इष्टिभेदे "शस्यान्ते नवशस्येष्ट्या"। "नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान् द्विजः" मनुः

नवशायक पु॰ नवविधः शायक इव। पराशरसंहितोक्ते नवविधे (नवशाक) ख्याते सङ्कीर्णजातिभेदे "गोपोमाली तथा तली तन्त्री मोदकवारुजी। कुलालः कर्मकारश्च नापितो नवशायकः"।

नवश्राद्ध न॰ प्रेतोद्देश्यके मरणाहाद्विषमदिवसे कर्त्तव्ये श्राद्धभेदे तद्विधानादि निर्णयसिन्धौ यथा

"अथ नवश्राद्धं पृथ्वीचन्द्रोदयेऽङ्गिराः "प्रथमेऽङ्गिरतीये च पञ्चमे सप्तमे तथा। नवमैकादशे चैव तच्छ्राद्धमुच्यते" शिवस्वामी "नव श्राद्धानि पञ्चाङ्गरामशायनशाखिनः। आपस्तम्बाः प्रतिपाद्यास्तुर्विभाषा त्वितरेषु हि" पक्षे ऐकादशाहिकं विना "मरणाहाद्विषमेषु दिनेष्वेकं नवश्राद्धं कुर्यादानवमाद्यादि नवमे विच्छिद्यैकादशे तत्कुर्यादिति" सुदर्शनरत्ने बौधायनोक्तेः। भविष्ये "नवसप्त विधां राज्ञां नवश्राद्धान्यनुक्रमात्। आद्यानयोर्वर्षयोस्तु प्रतिपाद्यास्तु मेहर्षयः" हेमाद्रौ दृढवशिष्ठः "अस्मा

द्वादशाहस्य कृत्वा तरति दुष्कृतम्" यतः षडेव । एतान्येव विषमश्राद्धानीत्युच्यते नागरखण्डे तु "पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा । दशमैकादशे चैव नवश्राद्धानि तानि च" इत्युक्तं कात्यायनस्तु "चतुर्थे पञ्चमे चैव नवमैकादशे तथा । यदन्नं दीयते जन्तोस्तत्रवश्राद्धमुच्यते" । प्रथमे सप्तमे चैवेत्याद्यपाठे व्याख्ये पाठः । वसूपानान्तु "नवश्राद्धं दशाहानि नवमिश्रन्तु षड्ढनम्" इत्युक्तं नारायणभट्टो दीपिकायां "अथ तनुयादाद्ये चतुर्थे दिने श्राद्धं पञ्चमसप्तमाष्टमनवदिग्रुद्देशु । युग्मे द्विजः प्रथमेऽह्नि तृतीयेऽह्नि पञ्चसप्तमनवस्वपि द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषेष्वेकैकन्तु विन्यसेत् । एको विषमश्राद्धेऽवयवपिण्डस्तैक इति तौ द्वाविति वर्षः । अत्र शाखाभेदात् व्यवस्था । अपरार्के भविष्ये "नवश्राद्धं त्रिपक्षञ्च पञ्चमासं माहिकाञ्च । न करोति सुतो यस्तु तस्याधः पितरो गताः" "नवश्राद्धं प्रपिण्डत्वं श्राद्धान्यपि च षोडश । पृथक् नैव तु कार्याणि संविभक्तधनेष्वपि" इति मिताक्षराधृतदक्षः । व्यासः "जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च" इत्युपक्रमे । "मासमाद्येऽपि कार्याणि नित्यं नैमित्तिकं तथा" "नवश्राद्धे यदुच्छिष्टं यदृष्टे पर्युषितञ्च यत् । दम्पत्योर्भुक्तशिष्टं च न भुञ्जीत कदाचन" मिताक्षराधृतव्यासः । नवश्राद्धञ्च आहिताग्निविषयं यदाह यमः "चतुर्थे पञ्चमे चैव नवमैकादशे तथा । यदन्नं दीयते जन्तोस्तत्रवश्राद्धमिष्यते । अग्निसञ्चयनादर्वागाहिताग्नेर्द्विजन्मनः । व्यत्युत्थानं भोजयेद्विप्रांस्तत्रवश्राद्धमिष्यते । नवमे पञ्चमे श्राद्धं प्रेतोपकारार्थं नावश्यकम् नवश्राद्धसंज्ञा एतद्द्रव्यपक्षे प्रायश्चित्तविशेषविधानार्थम् आहिताग्नेरग्निसञ्चयनादर्वाक् श्राद्धान्तरमस्तीति च दर्शितम्" प्रा० वि० ।

नवषष्टि स्त्री नवाधिका षष्टिः शा०त० । १जनसप्ततिसंख्यायां २ततृसंख्यान्विते च ततः पूरणे डट् नवषष्टितम त्रि० । एवं स्त्रियां ङीप् । ततृपूरणे तमप् नवषष्टितम त्रि० । नवसप्तति नवाशीतिप्रभृतयो नवाधिकतत्तत्संख्यायां ततृपूरणे तद्युते च । ततृपूरणे डट् तमप् च नवाधिकतत्तत्संख्या पूरणे त्रि० ।

नवसप्तदश पु० नव च सप्तदश चन्द्रोमायस्य ब समा० । अतिरात्रयागभेदे "अभिजुवं सर्वस्तोमनवसप्तदशावतिरात्रौ" कात्या० श्रौ० २७।२९ "प्रजातिकामस्य नवसप्तदशः" तत्रैव २२।२।१४ नवसप्तदशः प्रजाकिकामस्य" आप० श्रौ० १०।११।२ "नवसप्तदशोनाम एकाहः तेन प्रजातिकामो प्रजातिः प्रजासम्पत्तिस्तां कामयमानः यजेत" नारा० इ० ।

नवसार पु० "नवसारो भवेच्छुद्धसूर्यतोयैर्विपाचितः । दोषावस्थेच यत्नेन भिषग्भिर्योगविद्भवे" इति वैद्यचन्द्रिकोक्ते सूर्यतोयाभ्यां दोषावस्थेच पाचिते क्वाथभेदे नवसाद्दरमयत्न । "प्रतिश्यायेषु शिरसः पीडने नवसादरम्" वैद्यचन्द्रिका ।

नवसू स्त्री नवं सूते सू-क्विप् । अभिनवप्रसवायां स्त्रियां गोप्रभृतौ "वत्सं नवसू इव स्वम्" ऋ० ३।३३।५ "नवसूः नवप्रसवा गाव इव" भा० ।

नवसूति(का) स्त्री नवा सूतिः प्रसवो यस्या वा कप् । १धेन्वाम् अमरः २नवप्रसवायां स्त्रियाञ्च । नवप्रसूतिरत्र "नवप्रसूतिर्वरटा तपस्विनी" नैष० ।

नवांश पु० नवमोऽंशः । त्रिंशांशकरूपराशेर्नवमे भागे च च एकैकराशे २।२० विंशतिकलाधिकांशात्मकरूपः । राशिभेदे राशिभेदस्यैकैकांशादिकं त्र्यो० उक्तं यथा "मेषाद्यामकराद्याच तुलाद्याः कर्कटादयः । एतान्नवांशा राशीनां क्रांशाः वर्गोत्तमा स्मृताः" यथा मेषे प्रथमनवांशो मेषस्य, द्वितीयांशो वृषस्य, तृतीयांशो मिथुनस्य, चतुर्थांशः कर्कटस्य, पञ्चमांशः सिंहस्य, षष्ठांशः कन्यायाः सप्तमांशस्तुलायाः, अष्टमांशो वृश्चिकस्य, नवमांशो धनुषः । एवं वृषे प्रथमांशो मकरस्य१ कुम्भस्य२ मीनस्य३ मेषस्य४ वृषस्य५ मिथुनस्य६ कर्कटस्य७ सिंहस्य८ कन्यायाः९ । तथा मिथुने तुलायाः१ वृश्चिकस्य२ धनुषः३ मकरस्य४ कुम्भस्य५ मीनस्य६ मेषस्य७ वृषस्य८ मिथुनस्य९ । एवं कर्के कर्कस्य१ सिंहस्य२ कन्यायाः३ तुलायाः४ वृश्चिकस्य५ धनुषः६ मकरस्य७ कुम्भस्य८ मीनस्य९ । एवं सिंहे मेषाद्याः९। कन्यायां मकराद्याः९। तुलायां तुलाद्याः९ । वृश्चिके कर्कटाद्याः९ । एवमेव धनुषि मेषाद्याः९ । मकरे मकराद्याः९ । कुम्भे तुलाद्याः९ । मीने कर्काद्याः९। कुम्भनवांशा श्रेयाः उक्तञ्च "मेषे नवांशा मेषाद्याः वृषे च मकरादिकाः । मिथुने च तुलाद्याःस्युः कर्कटे कर्कटादिकाः" इति ।

नवाङ्ग त्रि० नवविधमङ्गं यस्य । नवविधाङ्गयुक्ते चक्रदत्तोक्ते कषायभेदे पु० "संक्षुण्णदोषेषु हितं संक्षुण्णमथ पाचनम् । विशाखताद्भूनिम्बैः पञ्चमूलीबलान्वितैः । कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्" । २कर्कटशृङ्ग्यां स्त्री टाप् राजनि० । ३वृत्तां स्त्री ङीष् ।

"नवाङ्गी कुरङ्गीदृगङ्गी करोतु" अनन्ताभपण्डितः

नवान्न न० कर्म० । नूतनान्ने तत् प्राप्यतयाऽस्त्यस्य अच् । नवान्नागमकाले तन्निमित्तकश्राद्धादिकं श्राद्धविवेके उक्तं यथा विष्णुधर्मोत्तरे "व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ! । नवावाप्तौ महाराज ! विना-श्राद्धं कथञ्चन । पौषमासी तथा माघी श्रावणी च नरोत्तम ! । प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी । एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः"। व्रीहिः शरत्प्रकाश्यं तत्रैव व्रीहिशब्दस्य रूढत्वात् । अन्यथा व्रीह्यपचारे शालिप्रतिनिधिविधानदर्शनं पृथगुपादानञ्च नोपपद्येत यथा छन्दोगपरिशिष्टे कात्यायनः "यद्योक्तवत्स्वसम्पत्तौ श्राद्धं तदनुकारि यत् । यवानामिव गोधूमा व्रीहीणामिव शालयः" । "व्रीहयः शालयोमुद्गा गोधूमाः सर्वपाश्चिताः" । यवाश्चौषधयः सप्त विपदोघ्नन्ति धारिताः" । वामनपुराणे "हविषा संस्कृता ये तु यवगोधूमशालयः । तिलमुद्गादयोमाषा व्रीहयश्च प्रिया हरेः" अतएव कामधेनुकृता आश्विनमासीयतिथिकृत्ये नवान्नश्राद्धविषयं ब्रह्मपुराणवचनं लिखितं यथा "शुक्लपक्षे नवं धान्यं पक्वं शालि सुशोभनम् । गच्छेत् चेत्री विधानेन गीतवाद्यपुरःसरम्" इत्यभिधाय "तेन देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा" इत्यस्यादेव वचनात् शुक्लपक्ष एवैतत् श्राद्धम् । हविषे व्रीहिपाकनिमित्तं श्राद्धं न स्यादिति चेन्न स्यादेव नवान्नागमनिमित्तन्तु तत् स्यादेवेति ब्रूमः"

आ० त० रघु० उक्तं यथा

अथ नवान्नश्राद्धम् । शातातपः "नवोदके नवान्ने च स्टहप्रच्छादने तथा । पितरः स्टृहयन्त्यन्नमष्टकासु नवासु च" । नवोदके वर्षोपक्रमे । आर्द्रास्थरवाविति यावत् "आर्द्रादितो विशाखान्तं रविचारेण वर्षति" इति ज्योतिर्वचनात् रविचारेण रविगत्या । "प्राट्टकाले समायाते रौद्रे ऋक्षगते रवौ । नाड़ीवेधसमायोगे अक्षयोगं वदाम्यहम्" इति रुद्रयामलाच्च । रौद्रमार्द्रा । नवान्ने नवान्नागमे अत्र "नक्षत्रग्रहपीड़ासु दुष्टस्वप्नावलोकने । इष्ट्वा श्राद्धानि कुर्वीत नवशस्यागमे तथा" इति विष्णुपुराणाद्यक्षमाण्यवक्तृतरवचनेषु नवान्नस्तुतेर्नवान्नागमत्वेनैव निमित्तत्वं ज्ञायते । अमावास्यास्त्रिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्ध कृष्णत्रयोदशी व्रीहिशस्यपाकौ च "एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः । श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते" इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहियवोभयप्राप्तिविषयकत्वेन विधायकं यवादिधान्यस्योदासाय । शालिधान्यस्य तु प्राप्तिः । "शरद्वसन्तयोः केचिद्वयवत्वं प्रचक्षते । धान्यपाकवशादन्ये श्यामाकौ वर्षिनः स्मृतः" इति छन्दोगपरिशिष्टे व्रीहिप्राप्तिप्रा नवशस्येष्टौ शालिविधानाद्यवस्तुतुल्यन्यायात् श्राद्धेऽपि तथा कल्पनात् । "हविके शुक्लपक्षे तु नवान्नं शस्यते बुधैः । अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् । धनुषि यत् कृतं श्राद्धं कृष्णनेत्रासु रात्रिषु । पितरस्तत्र स्टृह्यन्ति नवान्नाभिप्रकाङ्क्षिणः" इति वराहवचनाच्च । श्यामाकौ व्रीहिविशेषः । वर्षी वानप्रस्थः । अपरे कृष्णपक्षे धनुषि धनुःस्थार्के । "पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः । भक्षेत्कृष्णान्तरे रोगी पितॄणां नोपतिष्ठते" इति मोजराजवचनैकवाक्यत्वात् । एवञ्च सौरपौषवत् चैत्रोऽपि सौर एव साहचर्यात् । अत्र धनुर्गतपर्य्युदासात् यवश्राद्धस्यस्वकालपर्य्यन्तं माघफाल्गुनवैशाखेष्वपि नवान्नश्राद्धं कार्यम् "एवमागमियागीयमुख्यकालादधस्तनः । स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः । यदागमिक्रियामुख्यकालस्याप्यन्तरालवत् । गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्मणि" हरिहरपद्धतौ तथादर्शनात् । अधस्तनः इत्यवधारणे व्यवहारः । अन्तरालवत् मध्यकालस्येव । वस्तुतस्तु उत्तरक्रियामुख्यकालं विना उत्तरक्रियाकरणपूर्वकाल एव पूर्वक्रिया कर्त्तव्या । "संस्कारा अतिपत्तेरन् स्वकालाच्चेत् कथञ्चन । कृत्वैतदेव कुर्वीत ये तूपनयनादधः" इति छन्दोगपरिशिष्टात् संस्कारातिपाते तथा व्यवहारात् । अतएव श्राद्धविवेकेऽपि धनुषः पर्युदासान्माघादिरिति सामान्यत उक्तम् । एवं यवश्राद्धमपि हरिशयनात् पूर्वं कर्त्तव्यम् "नवान्नं नैव नन्दायां न च सुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत्" इति ज्योतिर्वचनात् "न च सुप्ते जनार्दने" इति आश्विनशुक्लपक्षेतरम् आश्विनाधिकारे "शुक्लपक्षे नवं धान्यं पक्वं शालि सुशोभनम् । गच्छेत् चेत्री विधानेन गीतवाद्यपुरःसरम्" इत्यभिधाय "तेन देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा" इति ब्रह्मपुराणात् । सुशोभनेता प्रापकोयासां रात्रीणामिति व्युत्पत्त्या नक्षत्रान्तरित्यनेनाज्ञविधानात् तत्पदं सिद्धम् । ततश्च कृष्णशिरः-

मूर्त्तौ न इत्यिकमेषे रात्र्यारम्भात् चत्वारिंशद्दण्डाधिकावशिष्टभद्रारात्रयो भगनेत्रा इति। यथोक्तं ज्योतिषे "ज्येष्ठाशेषार्द्धगे सूर्ये भगनेत्रानिशाभवे। नवान्नभोजनं श्राद्धं जन्मचन्द्रे तिथौ न च" अत्र जन्मतिथिनिषेधात् तथा "जन्मर्क्षतारं सितवासरञ्च" इति जन्मर्क्षनिषेधाच्च "नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मनि" इत्यत्र त्रिजन्मपदं जन्मचन्द्रतिथिनक्षत्रत्रिकपरं परवचने त्रिजन्मान्वित इत्यत्रापि तथा "सूर्ये चैव विशाखाग्ने भरतिथौ पापे त्रिजन्मान्विते। नन्दानन्दमहीजकाव्यदिवसे पौषे मधौ कार्त्तिके। भेषूपाहितिथिषु विष्णुभवने कृष्णे शशिन्यष्टमे श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रदम्"। सूर्ये चैव विशाखाग्ने मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयावस्थिते सूर्ये। भरतिथौ त्रयोदश्यां पापे पञ्चमतारात्रये नन्दा प्रतिपत् षष्ठी एकादशी नन्दः शनिः महीजो भौमः काव्यः शुक्रः। उपगणः पूर्वोत्तरमघाभरण्यः अहिरब्धेषा शिव आर्द्रा। भोजराजः "ब्राह्मे विष्णुदृहस्पतौ शशधरे मार्त्तण्डपौष्णादितौ मैत्रे चित्रविशाखवायुधनभे मूलाश्विवह्नौ तथा। शक्रे वारुण ऋक्षके शुभदिने श्राद्धं नवं शस्यते नन्दाभार्गवभूमिजेषु न भवेत् श्राद्धं नवान्नोद्भवम्"। ब्राह्मादयः रोहिणीश्रवणपुष्यहस्तमृगशिरो हस्तरेवती पुनर्वसु अनुराधा चित्रा विशाखा स्वाती धनिष्ठा मूलाश्विनी कृत्तिका ज्येष्ठा शतभिषाः। नवान्नश्राद्धे मूलाकृत्तिकाज्येष्ठाविधानात्तन्नेमभक्षणप्राप्ते "अश्लेषा कृत्तिका ज्येष्ठा मूलाजपदवैष्णवे च। अशुभौमदिने रिक्ततिथौ नाद्यान्नवौदनम्" इति श्राद्धेषाभोजिमात्रपरम् अजपदः पूर्वभाद्रपदः। चन्द्रताराद्यशुद्धौ प्रतीकारमाह देवलः "कर्म कुर्य्यात् फलावाप्त्यै चन्द्रादिशोभने बुधः। सुखकाले त्विदं सर्वं नार्त्तः कालमपेक्षते। चन्द्रे च शक्रं लवणञ्च तारे तिथावभक्रे सितगण्डुलांश्च। धान्यञ्च दद्यात् करणर्क्षवारे योगे तिलान् क्षेमसणिञ्च लग्ने"। अन्नमविहितमन्नं राजमार्त्तण्डे ताराभेदात् लवणपरिमाणमाह "एकत्रिपञ्चसप्त द्विजाय दद्यात् पलानि लवणस्य क्रमशो जन्मनि त्रिपदिप्रत्यरिमरणाख्यतारकाह"। पलन्तु सौ किर्कर्माणैः षोडशत्तिद्विमाषकम्। तोलकस्त्रितयं ज्ञेयं ज्योतिर्भिः स्मृतिसम्मतम्" वामनपुराणाच्च "विष्टयो व्यतिपाताश्च मेऽन्येद्युर्नीतसम्भवाः। ते नामस्मरणाद्विष्णोर्नाशं यान्ति महात्मनः" विष्णुधर्मोत्तरे "सर्वशुभानां परिमोषकारि संपूजनं देवगुरोः विष्णोः" इति ब्रह्मपुराणे "प्राश्नीयात् दधिसंयुक्तं नवं विप्राभिमन्त्रितम्" अभिमन्त्रितम् "मन्त्रानादेशे गायत्री" इति वचनाद्गायत्र्या। स्मृतिः "गृहीत्वा ब्राह्मणाद्वापि यदि विप्राश्रयेद्भवम्" अत्र व्रीहिभावे शालिना, नूतनाभावे पुरातनेनापि श्राद्धादिकमाह भट्टभाष्ये स्मृतिः "गृहमेधी व्रीहियवाभ्यां यद्वशमनयोर्वजेत। ग्रामाकैर्वनो वर्णांश्च यावत्वस्य अन्येन पुरातनैर्वेति"। गृहमेधीति मेध्यमेधाहिंसयोः मेध्य यज्ञमे चेत्यत्र चकारेण पूर्वगणस्य मेधाहिंसयोरनुवृत्तेः तेन मेध्य हिंसार्थः तेन गृहनिमित्तेन जातायाः "पञ्चसूनागृहस्थस्य चुल्लीपेषण्युपस्करः। कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन्" इति मनूक्तायाः पञ्चसूनाख्यहिंसायाः कारी गृहमेधी गृहस्थ इत्यर्थः। सूदयन्ति प्राणैर्वियोजयन्तीति सूना प्राणिवधस्थानानि चुल्लीपाकस्थानं पेषणी दृषदुपलादिः उपस्करः गृहसम्मार्जन्यादि कण्डनी मूषलोदूखलादि याश्च एताः सूना वाहयन् स्वस्वकार्ये योजयन् वध्यते पापेन सम्बध्यते इत्यर्थः। श्राद्धचिन्तामणावप्येवम्। प्रेतमातापितृकस्य पुरातनधान्याभावे नवेनैव वैश्वदेवं कृत्वा नवञ्च ब्राह्मणेभ्यो दत्त्वा ब्राह्मणानुज्ञां गृहीत्वा भोजनादिकं कर्त्तव्यमाह रेणुकाचार्य्यनव्यवर्त्तमानधृता स्मृतिः "दत्त्वैवं ब्राह्मणेभ्यश्च कृत्वा वा वैश्वदेविकम्। अन्योनवान्नमश्नीयादिति बौधायनोऽब्रवीत्"। अन्यः श्राद्धकरणासमर्थः श्राद्धानधिकारी च। अतएव विधवया नवमेकोद्दिष्टं दीयते भुज्यते चेति"।

नवायस न० नवभागा आयसा यत्र। सुश्रुतोक्ते लौहचूर्णभेदे "त्रिफला चित्रकत्रिकटुविडङ्गसुस्तानां नवभागस्तावन्तएव च कृष्णायश्चूर्णस्य तत्सर्वमेकध्यं कृत्वा यथायोगं मात्रां सर्पिर्मधुभ्यां संयुज्योपयुञ्जीत। एतन्नवायसमेतेन जाठर्य्यं न भवति सन्धोऽग्निराप्यायते दुर्नामशोफपाण्डुकुष्ठरोगाविपाकक्लासश्वासप्रमेहाश्च न भवन्ति"

नवार्चिस् पु० नव अर्चींषि यस्य। मङ्गले हारा० कर्म०। नवायां शेखायाञ्च।

नवासिका स्त्री मात्राछन्दोभेदे "जोलुनावयाम्बुधेर्विलोकः" "तद्युगलाद्या नवासिका स्यात्" छ०र० "तद्युगलात् अम्बुधिद्वयात् अष्टमात्रात् उपरीत्यर्थः। यदि जगणो मध्यगुरुः नगणलघू स्यातां तदा नवासिका स्यात्" तदर्थः।

नवाह पु॰ कर्म॰ टच् समा॰ । १अभिनवे दिने प्रतिपत्तिथौ । नवभिरहोभिर्निर्वृत्तः टञ् तस्य लुक् अच् समा॰। नवदिनसाध्ये २यागादौ । ५गवामयनाङ्गे नवरात्रसाध्ये यागभेदे च पु॰। "अभिजित्१ त्रयः स्वरसामानः४ दिवाकीर्त्यमहः५ (विषुवान्) त्रयः स्वरसामानोऽ विश्वजित्६ इति नवरात्रः इति नवरात्रो विधातव्यः । षष्ठे मासितानभिप्लवान् एवं पृष्ठं च कृत्वा अभिचिदनुदेयः ततस्त्रयः स्वरसामानः ततो विषुवानिति" ताण्ड्य॰ ४।५।१ भाष्ये स्थितम् ।

नविष्टि स्त्री त्रि॰ नवा इष्टिः वेदे यक॰ । अभिनवे इष्टिभेदे याग "वज्रिन्नपसो नविष्टौ" ऋ॰ ८।२।१७ "नविष्टौ अभिनवे याग" भा॰ ।

नविष्ठ त्रि॰ अतिशयेन नविता स्तोता इष्ठन् इयोस्तोपः । १अतिशयस्तोतृतमे "विप्रा नविष्ठया" ऋ॰१।८२।२ "नविष्ठया नवितृतमया यतो नत्वा स्तुत्वा" भा॰ करणभूतायाः अपि स्तुत्याः कर्तृत्वविवक्षया कर्त्तरि इष्ठन् । अतिशयेन नवः नूतनः इष्ठन् । २नव्यतमे त्रि॰ ।

नवीन त्रि॰ नव+स्वार्थे च नवस्य नूः ओर्गुणः । नव्ये "गदाधरविनिर्जिता विविधदुर्गतर्कोटवीनवीनपदवी सदं वितनुतां सतां धीमताम्" बाधे गदाधरः ।

नवीयस् त्रि॰ नव+अतिशये-ईयसुन् । नवतमे "प्रतरं नवीयः" ऋ॰१०।८९।१ "नवीयो नवतरम्" भा॰ स्त्रियां ङीप् नवशब्दस्य स्तुत्याद्यर्थत्वे २अतिशयेन स्तुत्ये च "नू नव्यसे नवीयसे सूक्ताय" ऋ॰८।९।८ "नवीयसेऽतिस्तुत्याय" भा॰ ।

नवेदस् त्रि॰ न विपरीतं वेत्ति विद्-असुन् नञ्तत्पुरुषादिना नञः प्रकृतिभावः । विपरीतज्ञानशून्ये मेधाविनि यथा ऋतं तत्रैव ज्ञानवति "नवेदसा विमुर्वाम्" ऋ॰१।२४।१

नवोढा स्त्री नवमूढा । १नूतनपरिणीतायां स्त्रियां २नायिकाभेदे "बध्नामरपराधीनरतिर्नवोढा" इति कथयित्वा "वक्षोजौ पार्श्वं तुलमहसत्वं नैव कुरुते धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ । हृदि न्यस्तं हस्तं क्षिपति गलनारोपितमना नवोढा वोढारं रमयति च सन्तापयति च" रसमञ्जर्यां उदाहृतम् ।

नवोदक न॰ नवं पतितमुत्थितं वा उदकम् । १नवजाते उत्थिते उदके २गगनादभिनवपतिते जले च तस्यापेयत्वादिकं प्रा॰त॰ निरूपितं यथा

हारीतः "मद्यमकष्टकयम्बूकयज्ञपुष्पिकपर्दकान् । पीत्वा नवोदकञ्चैव पञ्चगव्येन शुध्यति" । नवोदकं नवस्वातजलं वर्षोदकञ्च तथा ब्रह्मपुराणम् "नवस्वातजलं गावो महिष्यश्छागयोषितः । शुध्यन्ति दिवसैरेव दशभिर्नात्र संशयः" मिताक्षराधृता स्मृतिः "काले नवोदकं शुद्धं न पातव्यं तत् प्रयत्नतः । अकाले तु दशाहं स्यात् पीत्वा नाद्यादहर्निशम्" काले वर्षाकाले । यमः "स्नानमाचमनं दानं देवतापितृतर्पणम् । नूतनोदकेन कुर्वीत नवा मेघाहिनिःसृतैः" । पानादीतरत्र अर्थादौ च कुर्विवंशः । "अमौममध्योविसृजन्ति मेघाः पूतं पवित्रं पवनैः सुनन्त्रि" । नवोदकनिमित्तं च पार्वणं श्राद्धं नित्यं, तद्विधानादि तिं॰ त॰ उक्तं यथा

यातातपः "नवोदके नवान्ने च स्टहप्रच्छादने सदा । पितरः सृजयन्त्यन्नमष्टकासु मघासु च । तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च" अत्र सदेति अवश्यात् अस्य नित्यत्वम् । नवोदके वर्षोपक्रमे आर्द्रागते रवाविति यावत् । "आर्द्रादितो विशाखान्तं रविचारेण वर्षति" इति मध्यवर्द्धमानसूत्रात् "प्रावृट्काले समायाते रौद्रे ऋक्षगते रवौ । नाडीवेधसमायोगे जलयोगं वदाम्यहम्" इति वृद्धजाबालात् । रौद्रमार्द्रां नवोदकश्राद्धस्य सावकाशत्वात् नवोदयग्रादिषु निषेधमाह दीपिकायाम् "नवोदर्शी जन्मदिनञ्च नन्दां जन्मर्क्षतारां सितवासरञ्च । त्यक्त्वा हरीन्द्वेन्दुकरान्त्यमैत्रध्रुवेषु च श्राद्धविधानमिष्टम्" । सितवासरं शुक्रवारं ऋक्षं राशिः हस्तादयः त्रयस्त्रयस्त्रयशिरोहस्तारेवत्यनुराधा उत्तरात्रितयरोहिण्यः । कृष्णपक्षे चेन्नवोदकश्राद्धकालस्तदोमयोः श्राद्धयोस्तत्काल विधिः" । [त्रि॰

नवोद्धृत न॰नवमुद्धृतम् ।१नवनीते अमरः । २भूतलोद्धृतमात्रे

नव्य त्रि॰ नु-स्तुतौ यत् । १स्तुत्ये नव+स्वार्थे यत् नूरादेश ओर्गुणः २नवीने अमरः ; ३रक्षणुनर्थवायां पु॰राजनि॰। भावे यत् । ४स्तुतौ न॰ । [शङ्करोपाध्यायसुतः ।

नव्यवर्द्धमान पु॰ स्मृतिनिबन्धकारकभेदे वर्द्धमानस्य पुत्रः

नश् त्रि॰ नश-क्विप् । १नाशप्रतियोगिनि । भावे क्विप् २नाशे स्त्री । सुहा॰ ऋक्षि यदान्ते च वा च पक्षे नडगकाः यथाविधानम् । नक्ष् नट् ङ् ।

नशाक पुंस्त्री नश-आक । काकभेदे शब्दादिकोषः ।

नश्यत्प्रसूतिका स्त्री नश्यन्ती प्रसूतिर्यस्याः कप् । मृतवत्सायां स्त्रियां हेमच॰ ।

नश्वर त्रि॰ नश-करप् । नाशप्रतियोगिनि अवश्यनाश-

शीले अशाश्वते "वदन्ति विश्वं कवयः क्व नश्वरम्" माघ० ५।१८५ स्त्रियां ङीप् ।

नष्ट त्रि० नश्-क्त । १नाशप्रतियोगिनि २तिरोहिते अदर्शनं गते ३दुष्टाशये च । भावे क्त । ४नाशे ५अदर्शने च न० "नष्टं वर्षरवैमेतुव्यगणनाभावादपास्य तेषाम्" सा०द० "ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो०

नष्टचन्द्र पु० नष्टः दुष्टचन्द्रः । सौरभाद्रमासे उभयपक्षीय चतुर्थ्यांसुदिते चन्द्रे तस्य तद्दिवसे दुष्टत्वकारणं ब्रह्मवै०पु० ८० अ० उक्तं यथा

"नष्टचन्द्रो न दृश्यश्च भाद्रे मासि सिताश्विते । चतुर्थ्यांसुदितोऽशुद्धः प्रतिषिद्धो मनीषिभिः । चन्द्रस्तारापहरणं कलङ्कमतिदुष्करम् । तस्मै ददाति हे नन्द ! कामतो यदि पश्यति । अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत् । तदशुद्धो भवेत् सद्यो निष्कलङ्की महीतले । सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः । सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः । इति मन्त्रेण पूतस्य जलं साधु पिबेद्ध्रुवम्" इत्युपक्रमे "दृष्ट्वा तस्याश्च (तारायाः) सर्वाङ्गमनङ्गबाणपीडितः । भाद्रे चतुर्थ्यां चन्द्रश्च जगाराचेतनां व्रजन् । ज्ञानं क्षणेन संप्राप्य रथस्थो रसिको बली । रथमारोहयामास करे धृत्वा च तारकाम् । कामोन्मत्तः कामिनीनां समाश्लिष्य चुचुम्ब सः "यस्मात्तस्मिन् दिने वत्स ! पापदृष्टो युगे युगे । मा भुङ्क्ष्व जीयते कर्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । देहत्यागेन हे वत्स ! कर्मभोगो न नश्यति । प्रायश्चित्तात् सन्देहो ज्ञानमेव भविष्यति । तारापहरणं वत्स ! कलङ्कश्चन्द्रमण्डले । सूर्यजातं विघ्नश्च भविष्यति युगे युगे" ।

नष्टचेष्टता स्त्री नष्टा चेष्टा यस्य तस्य भावः तल् । १हर्षशोकादिभिः सकलचेष्टानाशे २प्रलये अमरः ३सात्त्विकभावभेदे मूर्च्छायामित्यन्ये ।

नष्टजातक न० नष्टं न ज्ञातं जातं जन्म जन्माधानकालो यत्र कप् । जन्माधानकालयोरपरिज्ञाने प्रश्नलग्नादिना जन्मकालज्ञानार्थे उपायभेदे स च दृष्टजातके २५अ० उक्तो यथा

"अथ नष्टजातकाध्यायप्रारम्भः "आधानजन्मापरिबोधकाले संपृच्छतो जन्म वदेद्विलग्नात् । पूर्वापराह्णे भवनस्य विद्याद्भानावुदग्दक्षिणगे प्रसूतिम्" ३ इ० आ० "एवमाधानजन्मकालयोरपरिबोधे अज्ञाने सति संपृच्छतः प्रष्टुः विलग्नात् प्रश्नलग्नाज्जन्म वदेद्ब्रूयात् येन लग्नेन प्रष्टा पृच्छति तस्य यदि पूर्वार्द्धे प्रथमहोरा भवति तदा प्रष्टुः भानावादित्ये उदगगते उत्तरायणस्थे जन्म वक्तव्यम् । मकरादिराशिषट्कस्थे जात इत्यर्थः । अथ लग्नस्यापरार्द्धे द्वितीया होरा भवति तदा भानौ दक्षिणगते दक्षिणायनस्थे जन्म वक्तव्यम् । कर्कटादिराशिषट्कस्थे जात इत्यर्थः । तथा च "आधानजन्मनी यस्य न विज्ञायेत देहिनः । जन्म संपृच्छतस्तस्य प्रश्नलग्नात् विनिर्दिशेत्" । अथ वर्षर्तुज्ञानमाह लग्नत्रिकोणेष्विति भट्टो० । "लग्नत्रिकोणेषु गुरुस्त्रिभागैर्विकल्पत्र वर्षाणि वयोनुमानात् । पीशोऽर्कलग्ने कथितास्तु शेषैरन्यायनर्त्तोद्गतरर्कचारात्" २सू० "त्रिभागैर्द्रेष्काणैः लग्नत्रिकोणेषु प्रथमपञ्चमनवमस्थानेषु गुरुः जीवो ज्ञेयः तद्यथा प्रश्नलग्नस्य यदि प्रथमद्रेष्काणो भवति तदा यएव लग्नराशिः तत्रस्थे गुरौ जन्म वक्तव्यम् । अथ लग्नस्य द्वितीयोद्रेष्काणस्तदा लग्नाद्यः पञ्चमो राशिस्तत्रस्थे गुरौ जन्म वक्तव्यम् । अथ यदि लग्नस्य तृतीयद्रेष्काणस्तदा लग्नाद्यो नवमोराशिस्तत्रस्थे गुरौ जन्मवक्तव्यम् । एवं केषाञ्चिन्मतम् । अन्यान्येषां मतम् । यथा प्रश्नलग्नस्य यदा प्रथमोद्रेष्काणोदयो भवति तदा लग्नतो राशितो यावत्संख्ये राशौ बृहस्पतिस्तिष्ठति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि । अथ लग्ने द्वितीयोद्रेष्काणस्तदा लग्नात् पञ्चमराशितो यावत्संख्ये राशौ बृहस्पतिर्भवति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि अथ लग्नस्य तृतीयोद्रेष्काणो भवति तदा लग्नाद्नवमराशितो यावत्संख्ये राशौ बृहस्पतिर्भवति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि । एतद्व्याख्यानं न शोभनं पूर्वमेव व्याख्यानं श्रेयः यस्माद्यवनेश्वरः "द्रेष्काणलग्ने क्रमशस्त्रराशौ गुरुर्विलग्नाट्यदि कोणगोऽभूत् । सप्तङ्गवेत् तद्भवनक्रमेण स्वाद्वारभाद्वद्गति प्रगण्या" यद्यप्यत्र सामान्योक्तं बृहस्पतेरवस्थानं तथा च द्वादशभागक्रमेण प्रतिराशौ सञ्चार्यः । तद्यथा यदि प्रश्नलग्नस्य प्रथमद्वादशभागोदयो भवति तदा लग्नस्थे जीवे जातः द्वितीयद्वादशभागश्चेत्तदा लग्नाद्द्वितीये गुरौ जातः एवं तृतीयादिद्वादशभागोदये तृतीयादिषु स्थानेषु ज्ञेयम् । विकल्पत्र वर्षाणि वयोनुमानादेवं बृहस्पतेरवस्थानं ज्ञात्वा तस्य एवं वयोनुमानात्स्थानतिं शरीरमवेक्ष्य वर्षाणि विकल्पत्र वयःप्रमाणं बुद्ध्वा द्वादशस्य

द्वादशसु वर्षेषु विकल्पना कार्या। किमस्मिन्नेव भमण्ड-परिवर्त्ते ज्ञातराशेः दृष्टस्यतेरवस्थानमभूत द्वितीय उत तृतीयादिषु एवं तस्याकृतिमवेक्ष्य वयोनुमानं वक्तव्यम्। यत्र द्वादशसु वर्षेषु भ्रान्तिर्भवति तत्र पुरुषलक्षणोक्तेन दशाविभागेन द्वादशवार्षिकीं दशां चेत्रेषु परिकल्प्य तत्तत्क्षेत्राङ्कसंस्पर्शाद्दर्शनं तथा च पुरुषलक्षणे प्रोक्ते "पादौ सगुल्फौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं तु सजानुवक्त्रे। मेढ्रोरुसक्थ्ना ततस्तृतीयं नाभिं कटिं चेति चतुर्थमाहुः। उदरं कथयन्ति पञ्चमं हृदयं षष्ठमथ स्तनान्वितम्। अथ सप्तममंसजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे। नवमं नयने च साभ्रुणी सललाटं दशमं शिरस्तथा। शुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनमिति" किं त्वत्र विंशत्याधिकं वर्षशतं यस्य जन्मनोऽतीतं तस्य तत्तज्जातकवर्षज्ञानोपाय एव नास्ति। एवं वर्षेषु ज्ञातेषु ऋतुज्ञानमाह शीघ्रोऽर्कलग्न इति येन लग्नेन प्रष्टा पृच्छति तत्र चेदर्कः सूर्यः स्थितस्त्रैष्काणो वा लग्ने तदा शीघ्रे जात इति वक्तव्यम्। कथितास्तु शेषैरिति शेषैरन्यैश्चन्द्रादिभिर्ग्रहैर्लग्नस्थैः ऋतुः पूर्वमेव कथित उक्तः द्रेष्काणैः शिशिरादय ऋत्वादिना अन्वेनोक्तः। तत्र यदा शनैश्चरेलग्ने भवति तद्द्रेष्काणो वा तदा शिशिरे जात इति वक्तव्यम्। एवं शुक्रे लग्नगते तद्द्रेष्काणो वा तदा वसन्ते जातः एवं भौमे शीघ्रे। एवमेव चन्द्रे लग्नगते तद्द्रेष्काणो वा वर्षासु, बुधे शरदि, जीवे हेमन्त इति। यदा बहवो लग्नगताः भवन्ति तदा तेषां मध्ये यो बलवान् तदुक्तौ जात इति वक्तव्यम्। अथ न कश्चिद् यदि लग्नगतो भवति तदा तस्य सम्बन्धे द्रेष्काणोदयो भवति तदा तदुक्तौ जात इत्येवं वक्तव्यम्। अन्यायनतोऽद्यतुरर्कचारादिति अन्यस्मिन्नयनेऽस्मन्तावर्कचाराद्ऋतुः अन्यस्मिन्नयने तदयना सम्भवत्येऽद्यतुरन्यो भवति तदर्तुरर्कचारवशेन वक्तव्यम् एतदुक्तं भवति सौरेण मानेन ऋतुर्वक्तव्यः न तु चान्द्रेण यथा शिशिरे ज्ञाते मकरकुम्भयोरन्यतमे राशौ सूर्यस्यावस्थानं ज्ञेयम् एवं शेषराशिष्वप्युह्यम् अनेन लौकिकचान्द्रमासो निराकृतो भवतीति भट्टो०।

"चन्द्रजीवाः परिवर्तनीयाः शुक्रारमन्दैरयने विलोमे। द्रेष्काणभागे प्रथमे तु पूर्वौ मासोऽनुपातात् तिथिविकल्पः" २मू०।

"अथायने विलोमे यद्रूपपरिज्ञानादृतुपरिज्ञानं मासपरिज्ञानं चेन्द्रवल्लयाह चन्द्रज्ञेति। अयने विलोमे सति चन्द्रजीवाः शुक्रारमन्दैः परिवर्त्तनीयाः शशिबुधगुरवः द्वितभौमशनैश्चरैः अयनव्यत्यये प्राप्ते सति परिवर्त्तनीयाः व्यत्ययेन व्यवस्थाप्याः एतदुक्तं भवति यदुत्तरायणे ज्ञाते प्रावृट्कालो ज्ञातस्तद् वसन्ते जात इति वक्तव्यम् चन्द्राशुक्रेणात्र परिवर्तितः। अथोत्तरायणे शरदि प्राप्तायां शीघ्रे जातः। दक्षिणायने शीघ्रे ज्ञाते शरदि जातः। अथ बुधो रविभौमयोरपवर्त्तितो। रविभौमौ बुधेन च। उत्तरायणे हेमन्ते ज्ञाते शिशिरे जातः दक्षिणायने शिशिरे प्राप्ते हेमन्ते जातः इति वक्तव्यम् अत्र जीवमन्दौ परस्परमपवर्त्तितौ एवमृतौ ज्ञाते मासज्ञानमाह द्रेष्काणभाग इति प्रश्नलग्ने यो द्रेष्काणो वर्त्तते तस्य च द्रेष्काणस्य यदि प्रथमभागो वर्त्तते तदा ज्ञातर्तौ प्रथमे मासि जातः इति वक्तव्यम् अथ लग्ने द्रेष्काणस्य द्वितीयो भागो वर्त्तते तदा ज्ञातर्तौ द्वितीये मासि जातः तृतीयद्रेष्काणे द्वौ विभागौ पूर्वापरौ अत्रापि अर्कावस्थानतएव मासज्ञानम्। तिथिज्ञानार्थमाह। अनुपातात् तिथिर्विकल्पः अनुपातात् त्रैराशिकात् तिथिर्विकल्पो विकल्पनीयः लग्नस्य भुक्तिप्राः यतानि द्रेष्काणः द्रेष्काणेन च ज्ञातर्तुः ऋतुज्ञानं तद्भुक्तिप्राः यतत्रयं भिन्नाशतत्रयेण मासज्ञानम् अत्रानुपातात् तिथिर्भिन्नादयकेनैकैको ज्ञेयः एवं च तिथिरादित्यभागा एवमादित्यराशयो भागा ज्ञेयाः मासा राशयस्तिथयो भागाः यस्मिंश्च तिथौ ज्ञातवर्षे यथाप्रदर्शितादित्यो भवति तस्मिन् तिथौ तस्य जन्म इति वक्तव्यम्" भट्टो०।

अथ चन्द्रमानतिथिज्ञानोपायमिन्द्रवल्लयाह।

"अत्रापि होरापटवो द्विजेन्द्राः सूर्यांशतुल्यां तिथिमुद्दिशन्ति। रात्रिद्युसंज्ञेषु विलोमलग्नं भागैव वेला क्रमशो विकल्पाः" ४मू०।

"अत्रापीति अत्रास्मिंस्तिथिज्ञाने द्विजेन्द्रा सूर्यो होरा ग्रास्तस्याः सूर्यांशतुल्यां अंशस्थाने स्फुटार्कभागसमां तिथिमुद्दिशन्ति कथयन्ति प्रश्नकाले तात्कालिकेनादित्येन यावन्तो भागा भुक्तास्तावन्तः शुक्लप्रतिपत्प्रभृतिज्ञातमासस्य तिथयो व्यतीताः, अत्र चान्द्रमाने मकरमासे ज्ञाते मासमासो ज्ञेयः एवमन्यर्तुष्वपि मासकल्पना कार्या। तथा च मणित्थः "प्रश्नाकाले रविणा यावन्तो भागाः स्फुटेन भुक्ताः। राशेस्तिथयः स्युः शुक्लादार्क-

मासस्य" एवं दिने ज्ञाते किमयं रात्रौ जातो दिवा वेति तदर्थमाह रात्रिद्युसंज्ञेति रात्रिद्युसंज्ञा पूर्वं व्याख्याताः गोजाश्विकर्किमिथुना इत्यादिना। तत्र प्रश्नकाले यदि रात्रिसंज्ञो लग्नो भवति तदा तस्य विलोमतो दिवाजन्म वक्तव्यम् अथ द्युसंज्ञो लग्नो भवति तदा रात्रौ जन्म वक्तव्यम्। एवं दिनरात्रिविभागे ज्ञाते वेलाज्ञानमाह भागैश्च वेलाः क्रमशो विकल्प्याः यस्मिन् दिने पुरुषस्य जन्मज्ञानं तस्मिन् दिने अंशादिलोऽपि ज्ञातः ततस्तस्य पुरुषस्य यदि दिवाजन्म तदा तस्मादादित्याद्दिनप्रमाणं कार्यम् अथ रात्रौ जन्म तदा रात्रिप्रमाणं तत्र प्रश्नलग्नस्य तस्मिन् काले यावन्तस्तस्य भुक्तांशैरनुपातः कार्यः यदि पुरुषस्य दिवाजन्म तदा दिनप्रमाणेन यदा रात्रौ रात्रिप्रमाणेन तत्कालभुक्तांशकानां गणनां कृत्वा तस्यैव लग्नस्य स्वदेशराश्युदयप्रमाणेन भागमपहृत्यावाप्तां वेलां तावता कालेन गतेन दिनस्य रात्रेर्वा जन्म वक्तव्यम्। एवं लग्नभागैः क्रमशः परिपाट्या वेलाः समयाः विकल्प्या विकल्पनीयाः" भट्टो०।

"केचिच्छशांकाध्युषितात्त्रयांशाच्छुक्लान्तसंज्ञं कथयन्ति मासम्। लग्नत्रिकोणोत्तमवीर्ययुक्तं चन्द्रोऽथवेऽस्तात्रभगादिभिर्वा" पृ०मू०।

"अथान्तरेण मासज्ञानमिन्द्रवज्रयाह केचिदिति केचिदाचार्याः यथाह्याध्युषितात्त्रयांशाच्छुक्लान्तसंज्ञं मासं कथयन्ति प्रश्नकाले यस्मिन्नवांशके नवमेऽंशे चन्द्रमा भवति तमपि नवांशकं त्रिधा परिकल्प्य तस्मिन्नवांशके नवमेऽंशे चन्द्रमा व्यवस्थित इति चन्द्रनवांशकगतं नक्षत्रमन्वेष्यम्। तत्रत्यशुक्लान्तसंज्ञके मासि तस्य जन्म वक्तव्यम् अथ यस्य नक्षत्रस्य शुक्लान्तसंज्ञो मासो नास्ति तस्य बृहस्पतिचारोक्तविधिना शुक्लान्तसंज्ञो मासः परिकल्प्यः तत्रोक्तम् "नक्षत्रेण सहोदयमस्तं वा येन याति शुक्रमन्त्री। तद्वर्षं वक्तव्यम् वर्षं मासं क्रमेणैव। वर्षाणि कार्त्तिकादीन्याग्नेयाद्यद्वादशोद्यानि क्रमशस्त्रिमन्तु पञ्चमसप्तमान्त्यमन्त्यं च यद्वर्षमिति" तत्र चन्द्रमा यदि वृषनवांशके तत्रवांशकसप्तकस्यावांग्भवति तदा कार्त्तिके मासि जात इति वक्तव्यम्। अथ वृषनवांशकस्योर्द्ध भवति मिथुननवांशके तत्रवांशकषट्कस्यावांग्यदा चन्द्रमा भवति तदा मार्गशीर्षे मासि जात इति वक्तव्यम्। अथ मिथुनवांशके तत्रवांशषट्कस्योर्द्ध कर्कटनवांशके तत्रवांशकपञ्चकस्यावांग्यदा चन्द्रमा भवति तदा पौषे मासि जात इति वक्तव्यम् अथ कर्कटे तत्रवांशकपञ्चकस्योर्द्ध सिंहनवांशके तत्रवांशकचतुष्टयस्यावांग्यदा चन्द्रमा भवति तदा माघे मासि जन्म इति वक्तव्यम्। अथ सिंहनवांशके तत्रवांशकचतुष्टयस्योर्द्ध कन्यानवांशके तत्रवांशकसप्तकस्यावांग्यदा चन्द्रमा भवति तदा फाल्गुने मासि जात इति वक्तव्यम्। अथ कन्यानवांशकसप्तकस्योर्द्ध तुलानवांशके तत्रवांशकषट्कस्यावांग्यदा चन्द्रमा भवति तदा चैत्रे मासि जात इति वक्तव्यम् अथ तुलानवांशके तत्रवांशकषट्कस्योर्द्ध वृश्चिकनवांशके तत्रवांशकपञ्चकस्यावांग्यदा चन्द्रमा भवति तदा वैशाखे मासि जात इति वक्तव्यम् अथ वृश्चिके तत्रवांशकपञ्चकस्योर्द्ध धनिनवांशके तत्रवांशकचतुष्टयस्यावांग्यदा चन्द्रमा भवति तदा ज्यैष्ठे मासि जात इत्यवगन्तव्यम्। अथ धनिनवांशके तत्रवांशकचतुष्टयस्योर्द्ध मकरनवांशकत्रयस्यावांग्यदा चन्द्रमा भवति तदा आषाढे मासि जात इति वक्तव्यम्। अथ मकरनवांशके तत्रवांशकत्रयस्योर्द्ध कुम्भनवांशके तत्रवांशकद्वयस्यावांग्यदा चन्द्रमा भवति तदा श्रावणे मासि जात इति वक्तव्यम्। अथ कुम्भनवांशके तत्रवांशकद्वयस्योर्द्ध मीननवांशे तत्रवांशपञ्चकस्यावांग्यदा चन्द्रमा भवति तदा भाद्रपदे मासि जात इति वक्तव्यम् अथ मीननवांशके तत्रवांशकपञ्चकस्योर्द्ध मेषनवांशे तत्रवांशषट्कत्रयस्यावांग्यदा चन्द्रमा भवति तदाश्वयुजि मासि जात इति वक्तव्यम्। अथ मेषनवांशके तत्रवांशाष्टकस्योर्द्ध यदि चन्द्रमा भवति तदा कार्त्तिके मासि जात इत्यवगन्तव्यम्। यस्मिन् कृत्तिका रोहिणी च कार्त्तिकः स्वगशिराद्रा च मार्गशीर्षः पुनर्वसुः पुष्यश्च पौषः" अश्लेषा मघा च माघः। पूर्वफाल्गुन्युत्तरफाल्गुनी हस्तश्च फाल्गुनः। चित्रा स्वाती च चैत्रः। विशाखा अनुराधा च वैशाखः। ज्येष्ठामूले ज्यैष्ठः। पूर्वाषाढोत्तराषाढा चाषाढः। श्रवणं धनिष्ठा च श्रावणः। शतभिषक्पूर्वभाद्रपदोत्तरभाद्रपदाश्च भाद्रपदः। रेवत्यश्विनीभरण्यश्चाश्वयुजः। यत्रोक्तम् "त्रिमन्तु पञ्चमसप्तमान्त्यमन्त्यं च यद्वर्षमिति। एवं शुक्लान्तस्य मासस्य शुक्लान्तपक्षेणैतत्प्रतिपादयति यथा शुक्लपक्षान्ते येन नक्षत्रेण युक्तश्चन्द्रस्तन्नामा मासो वक्तव्यः यथा कार्त्तिकशुक्लपक्षान्ते कृत्तिकारोहिणीभ्यामन्यतमेन युतश्चन्द्रमा भवति तेन कार्त्तिको मास उच्यते एवमन्येऽपि योज्यते। तदेतदनुपपन्नं

एतदुक्तं भवति न शुक्लान्तोमासः कृष्णान्त एव तथा च यवनेश्वरः "मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्वे यशोमध्यबलोदयस्थः"। तथा च "यद्राशिसंस्थे शीतांशुः प्रश्नकाले नवांशके। स्थितस्तद्राशिगः पूर्णो यस्मिन् भवति चन्द्रमाः। जन्ममासः स निर्दिष्टः पुरुषस्य तु पृच्छतः। कृष्णपक्षान्तिको मासो ज्ञेयोऽत्र तु विपश्चिता"। लग्नत्रिकोणेत्यादि लग्नस्य प्रश्नलग्नस्य त्रिकोणयोश्च नवमपञ्चमयोर्मध्याद्यस्तत्कालसुत्तमेन प्रधानवीर्येण बलेन युक्तस्तद्राशिः प्रोच्यते कथ्यते तस्मिन् राशौ गते चन्द्रमसि जात इति वक्तव्यम्। तथा च "यवनेश्वरः होरादिवीर्याधिकलग्नभाजि स्थानं त्रिकोणे शशिनो विधाय"। ऋक्षालभनादिभिर्वा कालाङ्गानीत्यनेन प्रदर्शितोयः कालपुरुषस्याङ्गविभागस्तदालभनाद्वानेन विधिना स्पृष्टः स्पृशतः यदेव कालपुरुषस्याङ्गं स्पृशति तत्स्थे चन्द्रमसि जात इति वक्तव्यम् आदिग्रहणात् प्रागुक्तसत्त्वदर्शनश्रवणे गृह्णीते" भट्टो०। "यावान् गतः शीतकरो विलग्नाच्चन्द्राद्दिनात्तावति जन्मराशिः। मीनोदये मीनयुगं प्रदिष्टं भच्छाकृताकारकृतैव चिन्त्यम्" ६मू०। "अथ प्रकारान्तरेण जन्मलग्नराशिज्ञानमिन्द्रवज्रयाह यावानिति विलग्नात् पृच्छालग्नाच्छीतकरचन्द्रो यावान् गतो यावति राशौ व्यवस्थितस्तस्माद्यस्तावति राशिः तत्स्थे चन्द्रमसि जात इति वक्तव्यम्। मीनोदये यदि मीनलग्नगतो भवति तदा मीनयुगमेव प्रदिष्टमुक्तम् मीनस्थचन्द्रमा इति वक्तव्यम् ननु दर्शितविधिना राशिरनेकप्रकारो यत्र प्राप्तो भिन्नरूपस्तत्र को वक्तव्य इत्याशङ्क्याह भच्छाकृताकारकृतैरिति यस्य राशेः सम्बन्धि भच्छद्रव्यं तस्मिन् काले कृत्रिमभानीयते तदाकारस्य कथिष्यते यथा मार्जारादिदर्शने सिंहो महिषादिदर्शने वृष इत्यादि अथ वा राश्युक्तरूपपुरुषस्य दृष्ट्याय वा कृतेन यस्य राशिषट्कप्राप्तिनो कृतं शब्दः क्रियते तत्स्थे चन्द्रमसि जात इति वक्तव्यम्" भट्टो०। "होरानवांशप्रतिमं विलग्नं लग्नाद्रविर्यावति च दकाणे। तस्माद्दिनात्तावति वा विलग्नं प्रष्टुः प्रसूतावपि शास्त्रमाह"७मू० "एवं जन्मराशौ ज्ञाते लग्नज्ञानमिन्द्रवज्रयाह होरेति होरायां प्रश्नलग्ने यस्य राशेर्नवांशकस्तत्कालं वर्त्तते तस्मात्तावति तमं ततप्रतिमलग्नमेवांशकराशिं तस्य जन्मलग्नं वक्तव्यम्। अथवा लग्नाल्लग्नद्रेष्काणादारभ्य रविः सूर्यो यावति यावत्संख्ये द्रेष्काणे व्यवस्थितस्तस्माल्लग्नादारभ्य तावति राशौ लग्नगते तस्य जन्म वक्तव्यम्। यत्र च द्वादशभ्योऽधिके द्रेष्काणे द्वादशकमपास्य संख्यानिर्देशः चतुर्विंशतेरधिके चतुर्विंशतिमपास्य शेषं वदेत् एवं शास्त्रमाह शास्त्रं कथयति न स्वमनीषयोक्तमित्यं ततप्रतिपादयति शास्त्रग्रहणेनैतत्प्रतिपाद्यते। उक्तञ्च "पृच्छालग्ननवांशस्य यो राशिः संख्यया समः। तस्मिन् लग्नगते राशौ प्रष्टुर्जन्म विनिर्दिशेत्"। पृच्छतस्तावत्संख्योपगते लग्नादुदकाद्ये दिनकृत् ततः प्रश्नलग्नात्तावत्संख्ये गते लग्नराशौ जन्म वक्तव्यम्" भट्टो०। "जन्मादिशेल्लग्नगे वीर्यगे वा छायाङ्गुलघ्नोऽर्कहतेऽवशिष्टम्। आसीनसुप्तोत्थिततिष्ठतां भच्छायाशुद्धाच्छोदयं प्रदिष्टम्" ८मू०। "अथ प्रकारान्तरेण लग्नानयनमिन्द्रवज्रयाह जन्मादिशेदिति लग्नगे यदि जन्मादिशेत् प्रश्नलग्ने यो ग्रहो व्यवस्थितस्तं तात्कालिकं कृत्वा लिप्तापिण्डीकार्यम् अथ बहवो लग्नगता भवन्ति तदा तेषां यो बलवान् तं तात्कालिकं कृत्वा लिप्तापिण्डीकार्यं ततः सलिलयमायामवनौ द्वादशाङ्गुलेन शङ्कुना तात्कालिकानि छायाङ्गुलानि गृहीत्वा तैरङ्गुलैरेकैकं ग्रहं दर्शितकाले लिप्तापिण्डीकृतं गुणयेत् अथ वा सर्वग्रहेभ्यो यो बलवान् ग्रहस्तं तात्कालिकं कृत्वा लिप्तापिण्डं कृत्वा छायाङ्गुलाहतं चार्कगुणं कारयेत् द्वादशभिर्विभजेत्तत्र यावत्तावशिष्टं तावत्संख्यो मेषादेरारभ्य यो राशिर्भवति तस्मिन् राशौ लग्नगते तस्य जन्म वक्तव्यम्। अथ प्रकारान्तरेणाह आसीनेत्यादि आसीन उपविष्टो यदा प्रष्टा पृच्छति तदा लग्नाद्यच्छायास्थानं सप्तमराशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ सुप्तः सुप्तोऽत्र शयनपतितोऽभिहितः आसनिद्रस्य प्रश्नाभावात्। तत्र पतितो यदा पृच्छति तदा लग्नाद्यत् सुखस्थानं चतुर्थराशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथोत्थितः पृच्छति तदा तस्माल्लग्नाद्यदाशा दशमोराशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ शयनादासनाद्वा नोत्थितः किन्तु उत्तिष्ठन् पृच्छति तदोदयलग्नराशौ तस्मिन्नेव जन्म वक्तव्यम्। उक्तञ्च "उत्तिष्ठतो विलग्नात्प्रष्टुः सुप्तस्य वन्धुलग्नाच्च। उपविष्टस्यासनमे व्रजतोमेषूरणस्थानादिति" भट्टो०। "गोसिंहौ जितुमाद्यौ क्रियतुले कन्याद्वगौ च क्रमात् संवर्ग्यां दशकाद्यसप्तविभजैः शेषाः स्वसंख्यागुणाः। जीवारास्फुजिदैन्दवाः प्रथमवच्छेषाग्रहाः सौम्यवत् राशीनां नियतो विधिर्मकरयुतैः कार्यो च तद्वर्गजाः"

ष्टम्। "अथ प्रकारान्तरेण सर्वमेव नष्टजातकं वक्ष्ये ततः प्रश्नकाले तात्कालिकं लग्नं कृत्वा लिप्तापिण्डीकार्यम् ततस्तस्य लिप्तापिण्डीकृतस्य गुणकारविधानार्थं शार्दूलविक्रीडितेनाह गोसिंहादिति गोसिंहादयो राशयो यथाक्रमं दशादिभिर्गुणकारैः संवर्ग्या गुणनीयाः तद्यथा गोसिंहौ दशसिंहौ दशभिः१०गुणयेत् दशलग्नं लिप्तापिण्डीकृतं दशभिर्गुणयेत्। एवं सिंहं दशभिरेव। मिथुनमाटमौ मिथुनवृश्चिकौ लग्नगतावष्टभिर्गुणयेत्। क्रियतुले मेषतुले एतौ सप्तभिर्गुणयेत्। कन्याझषौ कन्यामकरौ यतौ लग्नगतौ षड्भिर्गुणयेत्। एवमेते यथाक्रमं संवर्ग्यागुणनीयाः मेषा चतस्रो राशयः स्वसंख्यागुणा स्वात्मीयसंख्यया गुणनीयाः तत्र मेषादिगणनया चतुर्थं कर्कटमिति चतुर्भिर्गुणयेत् एवं षण्णिन नवभिः९ कुम्भमेकादशभिः११ एवं मीनं द्वादशभिः१२। एवं तावल्लग्नं स्वगुणकारेणावश्यमेव गुणयेत् दशकाष्टसप्तविषयैः ततस्तत्र यदि ग्रहो भवति तदा ग्रहगुणकारेणावश्यमेव गुणयेत् तत्र ग्रहगुणकारविधिः जीवारास्फुजिदिन्द्वाः प्रथमवद्दशकाष्टसप्तविषयैरिति जीवे गुरौ लग्नगते तमेव लग्नं स्वगुणकारेराहतं दशभिर्गुणयेत् आरे भौमे लग्नगते अष्टभिः, आस्फुजिच्छुक्रः तस्मिन् लग्नगते सप्तभिः, ऐन्दवे बुधे षड्भिः, मेषारविशशिसौरास्ते च सौम्यवत् बुधवत् षड्भिर्गुणनीया इत्यर्थः। एवं तात्कालिकं लग्नम् अवश्यं राशिगुणकारेण गुणयेत् ततः स ग्रहोक्तगुणकारैरपि तत्र च यदा ग्रहो भवति तदा ग्रहगुणकारेण गुणयेत्। यदा बहवो ग्रहा भवन्ति तदा सर्वेषां गुणकारैर्गुणयेत् एवं च तद्गुणितमेकान्ते स्थापयेत्" भट्टो०।

"सप्राहतं त्रिघनभाजितशेषलग्नं दत्त्वाथ वा नव विशोध्यनवाथ वा स्यात्। एवं कलत्रसहजात्मजगत्रुभेभ्यः प्रष्टुर्बटेदृयराशिवशेन तेषाम्"१०मू०। "अथ नक्षत्रानयनं यस्य लतिलकेनाह सप्ताहतमिति सप्ताहतं सप्तभिर्गुणयेत् दत्त्वाथ वेति ततस्तत्र नव देयाः शोध्या वा न किञ्चिद्वा देया इत्युच्यते यदि स चररात्रिर्लग्नगतो भवति तदा नव देयाः स्थिरे न देया नापि शोध्याः, द्विःस्वभावे विलग्ने नव शोध्याः एवं केचिदाचक्षते वयं पुनर्ब्रूमः यदि प्रश्नलग्ने प्रथमोद्देश्काणो भवति तदा न देयाः, द्वितीये न देया नापि शोध्याः, तृतीये नव शोध्याः एवं कृत्वा तस्य राशेस्त्रिघनेन सप्तविंशत्या भागमपहृत्यावाप्तं लाभ्यं तत्र यावत्संख्योऽङ्कोऽवशेषो भवति तावत्संख्यमश्विन्यादितो यन्नक्षत्रं तन्नक्षत्रं तस्य प्रष्टुर्वक्तव्यम्। केचित् वदन्ति तथास्थितस्य राशेः सप्तविंशत्याभागमपहृत्यावशेषाङ्कनवकदानेन विशोधनेन वा यथास्थितेनाङ्केन संवाद उत्पद्यते तथा नक्षत्रं वक्तव्यम् एवमित्यादि कलत्रसहजात्मजगत्रुभेभ्य इति भार्याभर्तृपुत्रारिषु नष्टजातकं यदा पृच्छति तदा तद्भेभ्यस्तद्भावेभ्यः एवं प्रष्टुः पृच्छकस्य वदेद्ब्रूयात् तमेवोदयराशिं परिकल्पयेदित्यर्थः। एतदुक्तं भवति यदि प्रश्नः स्वपत्न्या नक्षत्रं पृच्छति तदा तात्कालिके लग्ने राशिषट्कं देयम्। अथ भ्रातुः पृच्छति तदा राशिद्वयं देयमथ पुत्रस्य पृच्छति तदा राशिचतुष्कं देयमथ शत्रोः पृच्छति तदा राशिपञ्चकं देयम्। एवं कृत्वा यद्भवति तदेवोदयराशिं प्रकल्प्य तद्गुणकारेण गुणयेत् ततस्सप्तगुणकारेण च ततस्तत्र प्राग्वल्लवकदानविशोधने कृत्वा सप्तविंशत्याभागमपहृत्यावशेषाङ्कसमं यस्य प्रष्टा पृच्छति तस्य नक्षत्रं वक्तव्यम्। एतदप्युपलक्षणार्थमेव, त्रिराशिसहिताच्चात्कालिकाल्लग्नात् मित्रस्य वक्तव्यम्। एतन्नक्षत्रानयनमप्युपलक्षणमेवं सकलमपि नष्टजातकं वक्तव्यम्" भट्टो०।

"वर्षर्तुमासतिथयोदुनिशं क्षुडूनि वेलोदयर्क्षनवभागविकल्पनाः स्युः। भूयो दशादिगुणितात् स्वविकल्पभक्ताद्वर्षादयो नवकदानविशोधनाभ्याम्" ११मू०।

"अथ वर्षोत्पानयनं यस्य लतिलकेनाह वर्षर्तुमासेति वर्षादीनि सर्वाणि स्वविकल्पेन भागे हृते यथा पाठक्रमेणानयिष्यामि तद्यथा तात्कालिकं लग्नं त्रिप्तापिण्डीकृतं राशिगुणकाराहतं ग्रहसंयुक्तं चेद्ग्रहगुणकाराहतमपि यदेकान्ते स्थापितं तत्पुनरपि दशादिगुणं कार्यम्। एतदुक्तं भवति स राशिः स्थानचतुष्टये धार्यः एकत्र दशगुणोऽन्यत्र द्वितीयेऽष्टगुणोऽन्यत्र तृतीये सप्तगुणः चतुर्थे षड्गुणः कार्यः यत उक्तम्। भूयो दशादिगुणितात् भूयः पुनरपि दशकाष्टसप्तविषयैर्गुणनीयाः ततस्तस्मिन् राशिचतुष्टये प्राग्वल्लवकदानविशोधने कृत्वा स्वविकल्पैर्भागमपहृत्यावाप्तं वर्षादयो ज्ञेयाः" भट्टो०।

"विप्रेयादशकेऽब्दा ऋतुमासास्तथैव च। अष्टकेऽपि मासाद्वौ तिथयस्त्र तथा स्मृताः" १२मू०। "अथ न ज्ञायते कस्याङ्गाशेः कस्यानयनं कार्यं तदर्थमुपलक्षणेनाह विप्रेयादशकेऽब्दा इति अत्र बहुवचनं बहुधोपयोगि-

त्वात् कृतम् । यदुक्तं ज्ञविकल्पभक्तादर्यादयस्तद्व्याख्यायते एते चत्वारो राशयः स्थापितास्तेषां नवकदानविशोधनं कृत्वा कर्मयोग्याः सर्वे भवन्ति ततो दशगुणस्य पृथक्स्थस्य परमायुषा विंशत्यधिकेन वर्षशतेन भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमं तस्य वर्षसंख्याङ्कं भवति तस्यैव षड्भिर्भागमपहृत्य लब्धसंख्यया तस्य योऽङ्कोऽवशिष्यते तदङ्कसमे शिशिरादारभ्यर्तौ जात इति वक्तव्यम् । तस्यैव तु माससंख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा शातर्तौ प्रथमे मासि जात इति वक्तव्यम् । अथ शून्यमवशिष्यते तदा द्वितीये मासि जातः । एवं कृत्वा दशगुणः कर्मयोग्यो राशिरपास्तः यस्य विंशत्यधिकाद्वर्षशतादप्यधिकं जन्मनोऽतीतं तस्य नष्टजातकज्ञानोपाय एव नास्ति । अष्टकेष्वित्यादि योऽसावष्टकृतो राशिस्तस्य प्रथकस्थस्य कर्मयोग्यस्य यद्यसंख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा शुक्लपक्षे जात इति वक्तव्यम् । न किञ्चिदवशिष्यते तदा कृष्णपक्षे । तस्यैव तिथिसंख्यया पञ्चदशभिर्भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमाने तिथौ जात इति वक्तव्यम् एवं कृत्वाष्टगुणः कर्मयोग्यो राशिरपास्तः" भट्टो० ।

"दिवारात्रिप्रसूतिस्तु नक्षत्रानयनं तथा । सप्तकेष्वपि कर्मसु नित्यमेवोपलक्षयेत्" १२मू० । "दिवेत्यादि योऽसौ सप्तकृतो राशिस्तत्र प्राग्वदेव नवकदानविशोधने कृत्वा तत्कर्मयोग्यं राशिं स्थापयेत् तस्य दिवारात्रिसंख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा दिवसे जातोऽथ न किञ्चिदवशिष्यते तदा रात्रौ जात इति वक्तव्यम् । योऽसौ सप्तकृतो राशिस्तस्य नक्षत्रसंख्यया सप्तविंशत्या भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसंख्ये नक्षत्रेऽश्विन्यादित आरभ्य जातनक्षत्रमिति वक्तव्यम् । अस्य कर्मणः पुनरभिधानं नक्षत्रानयनस्य बाहुल्योपयोगित्वात्" भट्टो० ।

"वेलामथ विलग्नञ्च होरामंशकमेव च । पञ्चकेषु विजानीयान्नष्टजातकसिद्धये" १४मू० । "वेलेत्यादि यस्मिन्नहिनि पुरुषस्य जन्मज्ञानं तद्दिनप्रमाणं घटिकादिकं कर्तव्यं रात्रौ चेत्तदा रात्रिप्रमाणं ततः पञ्चगुणस्य राशेस्तेन दिवसप्रमाणेन रात्रिप्रमाणेन भागमपहृत्य योऽङ्कोऽवशिष्यते तस्मिन् काले दिनगते रात्रिगते वा तस्य जन्म वक्तव्यम् । अथ विलग्नमित्यादि अत्र शब्दः पादपूरणार्थः काले जाते राश्यादिलग्नं कर्तव्यं ततस्तस्य होराद्रेष्काणनवांशद्वादशांशत्रिंशांशभागाः कर्तव्याः तात्कालिका अष्टाश्च कर्तव्याः ततो यथाभिहितेन विधिना दशान्तर्दशाष्टकवर्गादेरभिहितस्य फलस्य निर्देशः कार्यः एवं नष्टजातकं साधयेत्" भट्टो० ।

"संस्कारनाममात्राद्विगुणाच्छायाङ्कुलैः समायुक्ता । शेषं त्रिनवकभक्ता लब्धं तद्धनिष्ठादि" १५मू० "अथ प्रकारान्तरेण नक्षत्रानयनमार्यया आह संस्कारनामेति संस्कारेण नाम संस्कारनाम तस्य मात्राः संस्कारेणागतस्य नाम्नो मात्राः संस्कारनाममात्राः संस्कारग्रहणेनैतत्प्रतिपादितं भवति संस्कारेण यत्पुरुषस्य नामकृतं तस्य मात्रा ग्राह्याः नान्यस्य कस्यचित् कृतनामादेः मात्राश्चेह गृह्यन्ते । इत्यर्द्धमात्रिकः अष्टमात्रिकः इत्यनया स्थित्या ताः संस्कारनाममात्राः संगृह्य द्विगुणीकार्याः ततस्तात्कालिकानि यद्भुक्तछायाङ्कुलानि गृहीत्वा ताद्विगुणमात्रास्तैरङ्कुलैः संयुक्ताः कार्याः एवं कृते यद्भवति तस्य त्रिनवकेन सप्तविंशत्याभागमपहृत्य यः शेषो भवति तदङ्कसमं तस्य धनिष्ठादित आरभ्य नक्षत्रं वक्तव्यम्" भट्टो० ।

"द्वित्रिचतुर्दशदशतिथि सप्तत्रिगुणानवाष्टचन्द्राद्याः । पञ्चदशप्राक्तद्विगुणस्वान्वितार्भं धनिष्ठादि" १६मू० । "अथ नक्षत्रानयनं प्रकारान्तरेणार्यया आह । द्वित्रिचतुर्दशेति पूर्वाभिमुखो यदा प्रष्टा पृच्छति तदा द्वयोरङ्काः स्थाप्याः अथाग्नेयाभिमुखस्तदा त्रयाणाम् । अथ दक्षिणाभिमुखस्तदा चतुर्दशानाम् अथ नैर्ऋत्यभिमुखस्तदा दशानाम् अथ पश्चिमाभिमुखस्तदा तिथिसंख्यानां पञ्चदशानाम् अथ वायव्याभिमुखस्तदा सप्तत्रिगुणायाः एकविंशतेः । उत्तराभिमुखस्तदा नवानाम् ऐशान्याभिमुखस्तदाष्टानां तद्यथा एवं दिङ्मिमुखप्रष्टृवशेनाङ्कं गृहीत्वा ततः पञ्चदशगुणः कार्यः ततस्तस्मिन् प्रदेशे यावन्तः पुरुषास्तदभिमुखाः स्थितास्तत्संख्ययान्वितो युक्तः कार्यः एवं कृते यद्भवति तस्य सप्तविंशत्या भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमं तस्य धनिष्ठाद्यारभ्य नक्षत्रं वक्तव्यम्" भट्टो० ।

"इति नष्टजातकसिद्धे बहुप्रकारं मया विनिर्दिष्टम् । ग्राह्यमतः सुकिष्यैः परीक्ष्य यत्राद्यथा भवति" १७मू० "इतिशब्दः उपसंहारे मया वराहमिहिराचार्येण नष्टजातकं बहुप्रकारं बहुभेदं विनिर्दिष्टमुक्तमिदम् । अतोऽस्माद्धेतोः सुकिष्यैः शोभनसच्छात्रैः ग्राह्यं यत्रात्परीक्ष्य विचार्य यथा येन प्रकारेण संवदति सत्यरूपं तथा ग्राह्यमिति येन प्रकारेण संवदति तथा गृहीतव्यमित्यर्थः बहुभिरागमैर्मया विचार्य परापर-

वशिष्ठयवनसत्यमणिस्वादीनां मतानि आलोड्य कृतं तदेव भूयो निर्मलसुधनिपुणबुद्ध्या विचार्य संवादेन कार्यं येन स्फुटसिद्धोऽसौ संपद्यते" भट्टो० ।

नष्टमार्गण न० नष्टस्यादर्शनं गतस्य मार्गणम् । अदर्शनगतस्यान्वेषणे । [भावशून्ये शास्त्रादौ ।

नष्टबीज त्रि० नष्टं बीजं बीजभावो यस्य । निष्फले बीज-

नष्टाग्नि पु० नष्टो लुप्तः प्रमादादस्यादिना अग्निः वैतानिकोऽग्निर्यस्य । प्रमादादिना लुप्ताग्निके द्विजे ।

नष्टाग्निसूत न० नष्टस्य चोरेणापहृतस्याग्नेः साधनं सूतं चिह्नम् । अपहृतद्रव्यस्य स्वामसाधने चिह्नभेदे लोप्त्रे । (वाग्भाव) । [कृष्णशब्दे २१६२ पृ० द्रष्टव्यम् ।

नष्टेन्दुकला स्त्री नष्टा इन्दुकला यस्याम् कृष्णामावस्यामरः ।

नस गतौ भ्वा०आत्म०सक०सेट् वेदनिघण्टुः । नसते अनसिष्ट कौटिल्येऽयं धोपदेशः स च सति निमित्ते णत्वं भजते । संश्लेषे च "स मोदते नसते साधते गिरा" ऋ० ९।७।।३ "नसते यज्ञादिषु संश्लिष्टो भवति" भा० ।

नस व्याप्तौ भ्वा० पर० सक० सेट् निघण्टुः नशदित्यत्र नसदिति माधवसम्मतः पाठः । नसति अना(न)सीत् । ननाश नेसतुः "सुरभिष्टमं नरां नसन्त" ऋ०१।।८६।७ "नसन्त व्याप्नुवन्ति नसतिर्व्याप्तिकर्मेति" माधवः "दर्भयो नसीमहि" ऋ०२।।१६।८ नसीमहि व्याप्नामेति छान्दसः प्रयोगः ।

नस् स्त्री नस–क्विप् । नासिकायाम् "अविनौ मेषो नसि वीर्याय" यजु० १९।।० "नसि नासिकायाम्" वेददी० नासिकाशब्दस्य सप्तम्येकवचनरूपमित्यन्ये ।

नसत्त न०न+सद–क्त नसत्तनिपत्तेत्यादिना नत्वाभावः त्रि० । सत्रभिन्ने "नसत्तमञ्जसा" शि०कौ० धृता श्रुतिः ।

नसा स्त्री नस्–हलन्तत्वात् वा टाप् । नासिकायां त्रिका० "विनसा कृतवान्भवा" भट्टिः ।

नस्त पु० नस–संज्ञायां त । १नासिकायां शब्दमाला । नासिकाभे हितः वा०त नसादेशश्च । नासिकायां हिते २वैद्यकोक्ते पञ्चविधे नस्ये न० । नस्यशब्दे सुश्रुतवाक्ये तेषां लक्षणानि द्रष्टव्यानि । नासिकायाः ३छिद्रे स्त्री "नस्ताभेदनदाहाभ्यां कर्णदाहास्थिभेदनैः । अतिदाहाति बाहाभ्यां वधे चान्द्रायणं चरेत्" स्मृतिः ।

नस्तस् अव्य० नासिका+विभक्त्यर्थे तसिल् "नस् नासिकाया यत्तस्छिद्रेषु" नसादेशः । नासिकायामित्याद्यर्थे "नस्तः कर्णेषु शस्यन्ते पानाभ्यङ्गाञ्जनेषु च" सुश्रुतः "स यत् नस्तोऽभवत् ततः सिंहः समभवत्" शत०ब्रा०५।।५४ "तस्तः प्राणा दिवं श्रोत्रात्" याज्ञ०

नस्तित त्रि० नस्ता नासाच्छिद्रं जातोऽस्य तारं० इतच् । छिन्ननासाछिद्रे रज्वास्यूतनासिके बलीवर्द्दे अमरः । (नाकफोडा) । [वर्द्दे रमानाथः ।

नस्तोत पु० नस्तायां नासास्थरज्वा जातः । नस्तोते बली-

नस्य त्रि०नासिकायै हितं तत्र भवो वा यत् नसादेशः । १नासिकाभवे २तद्धिते च ३सुश्रुतोक्ते नासिकाहिते क्रियाभेदे यथा "नस्यस्यातः प्रवक्ष्यामि विधिं निरवशेषतः । औषधमौषधसिद्धो वा स्नेहो नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च तद्द्विविधमपि पञ्चधा । तद्यथा नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीडः प्रधमनञ्च तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीडः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः । तत्र यः स्नेहनार्थं शून्यशिरसां शोषास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन्नैश्चिको नस्यशब्दः । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषाधबाहुकाकालजबलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु सुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति । शिरोविरेचनं श्लेष्माभिव्याप्ततालुकण्ठशिरसामरोचकशिरोगौरवशूलपीनसार्द्धावभेदकक्लमिप्रतिश्यायापस्मारतन्द्राज्ञानेष्वन्येषु चोर्द्ध्वजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तत्सिद्धेन वा स्नेहेनेति । तत्रैतद्द्विविधमभुक्तवतोऽकाले पूर्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् । अथ पुरुषाय शिरोविरेचनीयाय दन्तकाष्ठधूमपानाभ्यां विशुद्धकण्ठाय स्नेहे पाचितापरिक्लिन्नमृदितनखकपोलललाटप्रदेशाय वातातपरजोहीनवेश्मन्युत्तानशायिने प्रसारितकरचरणाय किञ्चित् प्रविलम्बितशिरसे वस्त्राच्छादितनेत्राय वामहस्तप्रदेशिन्यपोद्धामितनासापुटाय विशुद्धस्रोतसि दक्षिणहस्तेन स्नेहसुखोष्णतप्तं रजतसुवर्णताम्रमृत्पात्रशुक्तीनामन्यतमस्थं शुक्त्या पिचुना वा सुखोष्णं स्नेहमद्भुतमाशिश्वेदव्यवच्छिन्नधारं यथा नेत्रे न प्राप्नोति । स्नेहेऽवशिष्यमाणे तु शिरो नैव प्रकम्पयेत् । न कुप्येत् प्रभाषेत न क्षुयात् हसेत्तथा । एतैर्हि विकृतः स्नेहो न सम्यक्प्रतिपद्यते । ततः कासप्रतिश्या-

यशिरोऽक्षिगदसम्भवः" तस्य प्रमाणमष्टौ बिन्दवः प्रदेशिनीपर्वद्वयनिःसृताः प्रथममात्रा, द्वितीया शुक्ति, तृतीया पाणिशुक्तिरित्येतास्तिस्रो मात्रा यथाबलं प्रयोज्याः। स्नेहनस्यं नचोपगिलेत्किञ्चिदपि। "गृहङ्गाटकमभिघ्राय्य निरेति वदनाद्यथा। कफोत्क्लेशभयाच्चैव निष्ठीवेदविधारयन्" दत्ते च पुनरपि संस्वेद्य गलकपोलादीन्मृदुमासेवेत भोजयेच्चैनमभिष्यन्दि ततोऽस्याचारिकमादिशेत्। रजोधूमस्नेहातपमद्यद्रवपानशिरःस्नानातियानक्रोधादीनि च परिहरेत्। तस्य योगायोगानां विज्ञानं भवति। "लाघवं शिरसो योगे सुखस्वप्नप्रबोधनम्। विकारोपशमः शुद्धिरिन्द्रियाणां मनःसुखम्। कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः। लक्षणं मूर्ध्नि प्रतिस्निग्धे रूक्षं तत्रावचारयेत्। अयोगे चैव वैगुण्यमिन्द्रियाणाञ्च रूक्षता। रोगाशान्तिश्च तत्रेष्टं भूयो नस्यं प्रयोजयेत्। चत्वारो बिन्दवः सप्त तथाष्टौ वा यथाबलम्। शिरोविरेकस्नेहस्य प्रमाणमभिनिर्दिशेत्। नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः। शुद्धिहीनातिसंज्ञानि विशेषाच्छास्त्रचिन्तकैः। लाघवं शिरसः शुद्धिः स्रोतसां व्याधिनिर्जयः। चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम्। कण्डूपदेहौ गुरुता स्रोतसाङ्कफसंस्रवः। मूर्ध्नि हीनविशुद्धे तु लक्षणं परिकीर्त्तितम्। मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः। शून्यता शिरसश्चापि मूर्ध्नि गाढविरेचिते। हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्। सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं निषेवयेत्। एकान्तरं द्व्यन्तरं वा सप्ताहं वा पुनः पुनः। एकविंशतिरात्रं वा यावद्वा साधु मन्यते। मारुतेनाभिभूतस्य वात्यन्तं यस्य देहिनः। द्विकालञ्चापि दातव्यं नस्यं तस्य विजानता"। अवपीडस्तु शिरोविरेचनवदभिष्यन्दसर्पदृष्टविसंज्ञेभ्यो दद्याच्छिरोविरेचनद्रव्याणामन्यतमवपीड्यावसिच्य चेतोविकारक्लमविषाभिषङ्गानां चूर्णं विदध्यात्। शर्करेक्षुरसक्षीरदधिमांसरसानामन्यतमं क्षीणानां योषितपित्ते च विदध्यात्। "क्षयदुर्बलभीरूणां सुकुमारस्य योषिताम्। गृहताः स्नेहाः शिरःशुद्धे कल्कस्नेभ्यो यथोचितः"। नस्यदाने परिहर्त्तव्यो भुक्तवानपतर्पितोऽत्यर्थतरुणप्रतिश्यायी गर्भिणी पीतस्नेहोदकमद्यद्रवोऽजीर्णी दत्तवस्तिः क्रुद्धो गरार्त्तस्तृषितः शोकाभिभूतः श्रान्त बालो वृद्धो वेगावरोधितः शिरःस्नातुकामश्चेति। अनार्त्तेऽपि चाभ्रे नस्यधूमौ परिहरेत्। तत्र हीनातिमात्रातिशीतोष्णसहसाप्रदानातिप्रविलम्बितशिरस उच्छिङ्घतो विचलतोऽभ्यवहरतो वा प्रतिषिद्धप्रदानाच्च व्यापदो भवन्ति तृष्णोद्गारादयो दोषनिमित्ताः क्षयजाश्च। भवतश्चात्र "नस्ये शिरोविरेके च व्यापदो द्विविधाः स्मृताः। दोषोत्क्लेशनिमित्तांस्तु जयेच्छमनशोधनैः। अथ क्षयनिमित्तांस्तु यथास्वं दृंहणं हितम्"। प्रतिमर्शस्तु हेमन्ते कालेष्वपादेयः। तद्यथा तल्पोत्थितेन प्रक्षालितदन्तेन गृहाद्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्तेऽभुक्तवता छर्दितवता दिवास्वप्नोत्थितेन सायञ्चेति। तत्र तल्पोत्थितेनासेवितः१ प्रतिमर्शो रात्रावुपचितनासास्रोतोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रक्षालितदन्तेनासेवितो२ दन्तानां दृढतां वदनसौगन्ध्यं चापादयति। गृहाद्निर्गच्छतासेवितो३ नासास्रोतसः क्लिन्नतया रजोधूमो वा नाबाधते। व्यायाममैथुनाध्वपरिश्रान्तेनासेवितः४।५।६ श्रमसुपहन्ति। मूत्रोच्चारान्ते७।८ चासेवितो दृष्टेर्गुरुत्वमपनयति। कवलाञ्जनान्ते९।१० सेवितो दृष्टिं प्रसादयति। अभुक्तवता सेवितः११ स्रोतसां विशुद्धिं लघुतां चापादयति। वान्तेनासेवितः१२ स्रोतोविलग्नं श्लेष्माणमपोहत्र भक्तकाङ्क्षामापादयति। दिवास्वप्नोत्थितेनासेवितो१३ निद्राशेषं गुरुत्वं मलं चापोहत्र चित्तैकाग्र्यं जनयति। सायं चासेवितः१४ सुखनिद्राप्रबोधं चेति। "दृष्टदुच्छिङ्घतः स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तं तं विद्यात्प्रतिमर्शं प्रमाणतः। नस्येन रोगाः शाम्यन्ति नराणामूर्ध्वजत्रुजाः। इन्द्रियाणां च वैमल्यं कुर्यादास्यं सुगन्धि च। हनुदन्तशिरोग्रीवाक्षिबाहूरसां बलम्। बलीपलितखालित्यव्यङ्गानां चाप्यसम्भवः। तैलं१ कफे समीते स्यात्क्षौद्रं पवने वसामृ२। दद्यात्सर्पिः३ सदा पित्ते मज्जानं४ च समारुते। चतुर्विधस्य स्नेहस्य विधिरेव प्रकीर्त्तितः। स्नेहस्थानाविरोधित्वात्तेषु तैलं विधीयते"।

नस्योत त्रि॰ आ+वे-क्त स्रोतः नसि स्रोतः अलुक्स॰। नासिकायां कृतच्छिद्रायां रज्ज्वादौ बलीवर्दे "नस्योतः स्रुत इव प्रोतो नस्योत इव गोवृषः" भा॰व॰ १॰अ॰।

नह अव्य॰। न च ह च। प्रत्यारम्भे।

नहि अव्य॰ न च हि च चादि॰। निषेधे "नह्यस्मिन् युज्यते कर्म किञ्चिदामौञ्जिबन्धनात्" मनुः।

नहुष पु॰ नह-उष। १मरुद्रणभेदे "नहुषस्याङ्गतिश्चैव

चारित्रं ब्रह्मपद्मगम्" हरिवं० २०४अ०। २चन्द्रवंश्ये नृपभेदे "ययोः पुत्रास्तथा पञ्च सर्वे वीरा महारथाः। स्वर्भानुतनयायाञ्च प्रभायां जज्ञिरे नृप!। नहुषः प्रथमं जज्ञे दृढ़शर्मा ततःपरम्" २८अ०। स चागस्त्यशापात् सर्पतामाप्तः युधिष्ठिरेण तस्माद्मोचितः तत्कथा भा०व० १८१अ० "अहं हि दिवि दिव्येन विमानेन चरन् पुरा। अभिमानेन मत्तः सन् कञ्चिन्नान्यमचिन्तयम्। ब्रह्मर्षिदेवगन्धर्वयक्षराक्षसपन्नगाः। करान्मम प्रयच्छन्ति सर्वे त्रैलोक्यवासिनः। चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीपते!। तस्य तेजोहराम्याशु तद्धि दृष्टेर्बलं मम। ब्रह्मर्षीणां सहस्रं हि वोढा शिबिकां मम। स मामपनयो राजन्! भ्रंशयामास वै श्रियः। तत्र त्वगस्त्यः पादेन वहन् स्पृष्टो मया मुनिः। अगस्त्येन ततोऽस्मीक्तो ध्वंस सर्पेति वै रुषा। ततस्तस्माद्विमानाग्र्यात् प्रच्युतश्च्युतलक्षणः। प्रपतन् ददृशे त्वानं व्यालीभूतमधोमुखम्। अयाचन्तमहं विप्रं शापस्यान्तो भवेदिति। प्रमादात् संप्रमूढस्य भगवन्! क्षन्तुमर्हसि। ततः स मामुवाचेदं प्रपतन्तं कृपान्वितः। युधिष्ठिरो धर्मराजः शापात्त्वां मोचयिष्यति। अभिमानस्य घोरस्य पापस्य च नराधिप!। फले चीर्णे महाराज! फलं पुण्यमवाप्स्यसि" "नहुषो नाम राजाऽहमासं पूर्वस्तवानघ!। प्रथितः पञ्चमः सोमादायोः पुत्रो नराधिप!। क्रतुभिस्तपसा चैव स्वाध्यायेन दमेन च। त्रैलोक्यैश्वर्यमत्युग्रं प्राप्तोऽहं विक्रमेण च। तदैश्वर्यं समासाद्य दर्पो मामगमत्तदा। सहस्रं हि द्विजातीनामुवाह शिबिकां मम। ऐश्वर्यमदमत्तोऽहमवमत्य ततो द्विजान्। इमामगस्त्येन दशामानीतः पृथिवीपते!। न तु मामजहात् प्रज्ञा यावदद्येति पार्थिव!। तस्यैवानुग्रहाद्राजन्नगस्त्यस्य महात्मनः" १८०अ०। नह्यति सर्वाणि भूतानि मायया कर्तरि उप। २परमेश्वरे "शिखण्डी नहुषो हरः" विष्णुस०। नह्यते मायया कर्मणि उप। ४मनुपुत्रे वा० उत्रि नहुष इति मनुष्ये निघण्टुः। "आदौ विश्वा नहुषाणि जाता" ऋ०६।८८।२ "नहुषप्रा मनुप्रसम्बन्धीनि" भा०। "नहुषः खररोमा च शेषवासुकितक्षकाः" इति विक्रमादित्यकोषोक्ते ९नागराजभेदे च।

नहुषाख्य पु०म० नहुषं शेषसर्पवर्णमाख्याति स्ववर्णेन आ+ख्या-क। तगरपुष्पे राजनि०।

नहुषात्मज पु० ६त०। ययातिनृपे "ययातिर्नहुषात्मजः" भारते भूरिप्रयोगः। [चकाः"।

ना अव्य० नह-वा०डा। निषेधे "अमानोना निषेधवा-

नाक पु० न कमकं दुःखं तन्नास्ति यत्र नञ्बाडित्या० नि० प्रकृतिभावः। १स्वर्गे अमरः। "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्" श्रुतौ हि स्वर्गस्य दुःखशून्यत्वसूक्तम्। दुःखराहित्येन २सुखकरे त्रि०। "वैश्वानरः प्रत्नथा नाकमारुह दिवः पृष्ठे" तारण्ड्या० १।७।६ "नाकं दुःखराहित्येन सुखकरं रथम्" भा०। ३नभसि निघण्टुः स्वर्गान्तरिक्षसाधारणनामसु तस्य कीर्त्तनात्। ४राजभेदे पु० "नव नाकास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः। मथुरां च पुरीं रम्यां नागाः भोक्ष्यन्ति सप्त वै" वामनपु०।

नाकचर पु०नाके स्वर्गे नभसि वा चरति चर-ट। १गगनचरे देवे ग्रहादौ च २पितृदेवभेदे। "गार्हपत्या नाकचराः पितरो लोकविश्रुताः" भा० स०११अ०

नाकनाथ पु० ६त०। इन्द्रे त्रिका० नाकनायकादयोऽप्यत्र "नाकनायकपुरोहितो यदा" ज्योति० "नाकनायकनिकेतनमाप" नैष०।

नाकवनिता स्त्री ६त०। अप्सरःसु।

नाकसद् पु० नाके सीदति-सद क्विप्। १देवे "सन्तर्पणो नाकसदां वरेण्यः" भट्टिः।

नाकिन् पु० नाकः वासस्यानत्वेनास्त्यस्य इनि। देवे हेमच०। "सदनान्युदस्यत नाकिनामपि" "मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामिति" माघः। [२मुनिभेदे मेदि०।

नाकु पु०नम-उ नाक्यादेशः। १वल्मीके २पर्वते च अमरः

नाकुल पु०नकुलस्य गोत्रापत्यम् "ऋष्यन्धकवृष्णिकुरुभ्यः" पा० गोत्रे अण् न तु इञ्। १नकुलस्य गोत्रापत्ये। नकुल इव शर्करा०इत्यर्थे अण्। २नकुलसदृशे च। नकुलेन दष्टा तेन पीता वा अण् ङीप्। ३कुक्कुटीकन्दे ४राज्ञायां ५चविकायाञ्च स्त्री मेदि०। ६यवतिक्तायां ७श्वेतकण्टकार्य्यां ८कन्दभेदे च स्त्री राजनि०। "नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्। भोगिलताहृचिकाखु विषज्वरलमिव्रणान्" शब्दार्थचि० धृतवाक्यम्।

नाकुलक त्रि० नकुलो भक्तिरस्य "गोत्रक्षत्रियेभ्यो बहुलमिति" पा० वुञ्। नकुलभक्तिके मनुष्यादौ।

नाकुलि पु० नकुलस्येदम् अपत्यं वा अत इञ् गोत्रे

त्र अणेव । १नकुलसम्बन्धिनि २तदपत्ये च "शतानीकस्तु नाकुलिः" भा०आ० ६१अ० ।

नाक्षत्र न०नक्षत्राणामिदम् अण् । तद्घटितचक्रस्य परिवर्त्तनात्मके कालरूपे १दिनभेदे तच्चिंशद्घटिकात्मके सर्वनक्षत्रपरिवर्त्तनात्मके च २मासभेदे च "नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितम्" सू०सि० । "घटीनां षष्ट्याहोरात्रं नाक्षत्रसंज्ञकम् । तकारादहोरात्रस्य नाक्षत्रत्वोक्त्योक्तघट्या अपि नाक्षत्रत्वसंज्ञकम् । एतत् षष्टिघटीभिर्भचक्रपरिवर्त्तनात्" रङ्ग० । "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते" सू०सि० । "नित्यं प्रत्यहं भचक्रभ्रमणं नाक्षत्रसमूहस्य प्रवाहवायुकृतं परिभ्रमः । नाक्षत्रं नक्षत्रसम्बन्धि नाक्षत्रमासदिनं मानुषैः कथ्यते" रङ्ग० । स च मासो द्विविधः । सप्तविंशतिनक्षत्रपरिवर्त्तनात्मक एकः यथा "सर्वर्क्षपरिवर्त्तेन नाक्षत्र इह चोच्यते" इति "सर्वनक्षत्रभुक्त्या तु नाक्षत्रमास इष्यते" इति च अस्य प्रयोजनम् । "नक्षत्रवत्राण्ययनानि चेन्दोर्मासेन कुर्याद्गणात्मकेन" । सप्तविंशतिनक्षत्रात्मकेन जन्मनक्षत्रे शनिभौमवारयोगे मनोदुःखदानम् यथोक्तं दीपिकायाम् "जन्मन्यर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ । स मासः कल्मषो नाम मनोदुःखप्रदायकः" इति । द्वितीयः षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिनत्रिंशदात्मकः यथोक्तं सूर्यसिद्धान्ते "नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते । तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा" अस्य प्रयोजनमायुर्गणनायाम् यथा "आयुर्दाये कृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकमिति" मल०त० ।

नाक्षत्रिक त्रि० नक्षत्रादागतः ठञ् । १नक्षत्रतःप्राप्ते नक्षत्रनिमित्ते स्त्रियां ङीष् । सा च पद्मायां २दशाभेदे "सत्ये जन्मदशा चैव त्रेतायां हरगौरिका । द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा" भट्टोत्पलधृतवाक्यम् सा च दशा "षट्सूर्यस्य दशा ज्ञेया इत्यादिका उक्ता दशाशब्दे अष्टोत्तरदशाप्रकरणे ३४९५पृ० द्रष्टव्या ।

नाग न० नगे पर्वते भवः अण् न गच्छति अगः न अगो वा । १वङ्गे २सीसके ३तिथ्यर्द्धरूपकरणभेदे च मेदि० करणशब्दे १६९० पृष्ठे द्रष्टव्यम् । सीसके पुंस्त्वमपीति वैद्यकम् । अस्योत्पत्तिर्भावप्र० दर्शिता यथा "दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु समोच यत् । वीर्यं जातस्ततो नागः सर्वरोगापहो नृणाम् । सीसं वङ्गसुखं ज्ञेयं विशेषान्महनाशनम्" । "नागस्तु नागशतुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति । वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः" । भावप्र० पाकहीनयोर्वङ्गसीसयोर्दोषो यथा "पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान् । कण्डूप्रमेहानलमान्द्यशोथभगन्दरादीन् कुरुतः प्रभुक्तौ" । नागभस्मप्रकारो यथा "ताम्बूलरसपिष्टं शिलालेपात् पुनःपुनः । द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते" । प्रकारान्तरेण यथा "अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् । क्षतपात्रे विद्रुतो नागो लौहदव्यां च चालितः । याम्येकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला । काञ्जिकेन समं पिष्ट्वा पचेद् दृढपुटेन च । स्वाङ्गशीतं पुनः पिष्ट्वा शिलायां काञ्जिकेन च । पुनः पुटशराबाभ्यामेवं षड्भिः पुटैः स्मृतिः । नागः सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत् । सतिक्तमधुरो नागो मृतो भवति भस्मसात् । आयुः कीर्तिं वीर्यवृद्धिं करोति सेवनात् सदा । रोगान् हन्ति मृतो नागो वज्रवद्गुणकारकः" ४सर्पे ५हस्तिनि ६मेघे ७नागकेशरे ८पुन्नागे ९नागदन्तिके १०सस्यके ११देहस्थेऽनिलभेदे च पु० १२क्रूराकारे त्रि० मेदि० "उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः" सा० ति० टीका पदार्थादर्शे । अत्र नागशब्दस्य सर्पगजजातिवाचकत्वे द्विलिङ्गत्वम् । तत्र जातिवाचकत्वात् स्त्रियां ङीष् । जानपदादिस्तत्वे स्त्रीत्वगुणयोगादन्यत्र प्रयोगे स्त्रियां ङीष् । दीर्घगुणयोगादन्यत्र प्रयोगे स्त्रियां टाप् इति भेदः । १२देशभेदे १४ताम्बूल्यां च पु० भरतः । मनुष्याकारः फणाछत्रयुक्तः कर्कोटादिर्नागः देवयोनिभेदः । तेषामुत्पत्त्यादिकं वराहपु० उक्तं यथा "सृजता ब्रह्मणा सृष्टिं मरीचिः सूतिकारणम् । प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः । तस्य दाक्षायणी भार्या कद्रूर्नाम सुचिस्मिता । मारीचो जनयामास तस्यां पुत्रान् महाबलान् । अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम् । कर्कोटकञ्च राजेन्द्र ! पद्मं चान्यं सरीसृपम् । महापद्मं तथा शङ्खं कुलिकञ्चापराजितम् । एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः । एतेषान्तु प्रसूत्या तु इदमापूरितं जगत् । कुटिला हीनकर्माणस्तीक्ष्णास्तोत्रविषोल्बणाः । दष्ट्वा संदशमनुजान् भक्षं कुर्युः क्षयाद्भुवम्" एवं प्रजानाशे ब्रह्मणा आदेशात् ते पातालस्थानं जग्मुः यथाह तत्रैव

"अहं करोमि वो नागाः समयं मनुजैः सह। तदेव मनसः सर्वे शृणुध्वं मम शासनम्। पातालं वितलञ्चैव सुतलाख्यं तलीयकम्। दत्तं वै वसुकामानां गृहं तत्र गमिष्यथ। तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात्। तिष्ठध्वं सप्तमं यावद्रात्र्यन्ततः पुनःपुनः। ततो वैवस्वतस्यादौ कालप्रमेया भविष्यथ। दायादाः सर्वदेवानां सुपर्णस्य च धीमतः। तदा प्रसूतिर्वः सर्वा भोक्ष्यते चित्रभानुना। भवतां नैव दोषोऽयं भविष्यति न संशयः। ये वै क्रूरा भोगिनो दुर्विनीतास्तेषामन्तो भविता नान्यथैतत्। कालं प्राप्तं भक्षयध्वं दशध्वं तथा परान् चापहतोमनुष्यान्। भन्त्रौषधैर्गारुडमण्डलैश्च बुद्धैर्दृष्टा मानवा वै चरन्ति। तेषां भीतैर्वर्त्तितव्यं न चान्या चिन्ता कार्या चान्यथा वो विनाशः। इतीरिते ब्रह्मणा ते भुजङ्गा जग्मुःस्थानं ह्यातलाख्यं हि सर्वे। तस्युर्भोगान् भुञ्जमानाः समग्रान् रसातले कीलया संस्थितास्ते। एवं शापं ते तु लब्ध्वा प्रसादद्ब्रह्मर्षेस्तात्। तस्युः पातालनिलये सुदितेनान्तरात्मना। एतत् सर्वञ्च पन्नग्यां तेषां जातं महात्मनाम्। अतस्त्वियं तिथिर्धन्या सर्वपापहरी शुभा। एतस्यां संयतो यस्तु अन्नन्तु परिवर्जयेत्। क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम्"। नागाश्च प्रा[illegible] न भा०आ०३५अ० दर्शिता ततएवावसेयाः। तेषां केषाञ्चित् जनमेजयस्य सर्पसत्रे नाशो भविष्यतीति मातृशापकथा भा०आ० २०अ० "ततः पुत्रसहस्रन्तु कद्रुर्जिह्मं चिकीर्षती। आज्ञयामास च तदा बाला भूत्वाऽञ्जनप्रभाः। आविशध्वं ह्ययं क्षिप्रं दासी न स्यामहं यथा। नाभ्यपद्यन्त वै वाक्यं तान् शशाप भुजङ्गमान्। सर्पसत्रे वर्त्तमाने पावको वः प्रधक्ष्यति। जनमेजयस्य राजर्षेः पाण्डवेयस्य धीमतः। शापमेनन्तु गुप्ताव स्वयमेव पितामहः। अतिक्रूरं सुतृष्टं कद्रूं दैवादतीव हि। सार्द्धं दैवगणैः सर्वैर्वाचं तामभ्यमोदत। बहुत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया। तिग्मवीर्यविषा ह्येते दन्दशूका भवन्तु वः। तेषां तीक्ष्णविषत्वाद्धि प्रजानाञ्च [illegible]। युक्तं मातृकृतं तेषां परपीडोपदर्शिनाम्। अन्यत्रापि सत्वानां नित्यं दोषपरास्तु ये। तेषां प्राणान्तिको दण्डो दैवेन विनिपात्यते। एवं सम्भाव्य देवैस्तु पूज्य कद्रूञ्च तां तदा। आहूय कश्यपं देव इदं वचनमब्रवीत्। यदेते दन्दशूकाश्च सर्पा जाताः स्वयाऽनघ। विषोल्बणा महाभोगा मात्रा शप्ताः परन्तप। तत्र मन्युस्त्वया तात न कर्त्तव्यः कथञ्चन। दृष्टं पुरातनं ह्येतद्यत्ते सर्पविनाशनम्। इत्युक्त्वा सुदिलद्देवस्तं प्रसाद्य प्रजापतिम्। प्रादाद्विषहरीं विद्यां कश्यपाय महात्मने!" कम्बलाश्वतरनागयोः सरस्वत्या गानवरप्राप्तिर्यथा "एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती। प्रत्युवाच महात्मानं नागमश्वतरं ततः" सरस्वत्युवाच "वरन्ते कम्बलं भ्रातः प्रयच्छाम्युरगाधिप!। तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते"। अश्वतर उवाच "सहायं देहि देवि! त्वं पूर्वं कम्बलमेव मे। समस्तस्वरकम्बलतुम्बयोः संप्रयच्छ च" सरस्वत्युवाच "सप्तस्वरा ग्रामरागाः सप्त पन्नगसत्तम। गीतकानि च सप्तैव तावत्यश्चापि मूर्च्छनाः। तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत्। एतत् सर्वं भर्यानु नाना कम्बलश्चैव ते सखा। आस्यते मत्प्रसादेन भुजङ्गेन्द्र! परन्तप। चतुर्विधं ददे तालं त्रिःप्रकारं लयत्रयम्। यतित्रयं तथातोद्यं मया दत्तं चतुर्विधम्। इतङ्गवानु मत्प्रसादात् पन्नगेन्द्रापरञ्च यत्। अस्यान्तर्गतमापन्नं स्वरञ्जनयोश्च यत्। तदशेषं मया दत्तं भवतः कम्बलस्य च। यथा नान्यस्य भूर्लोके पाताले वापि पन्नग!। प्रचेतारौ भवन्तौ च सर्वस्यास्य भविष्यतः। पाताले देवलोके च भूर्लोके चैव पन्नगौ। इत्युक्त्वा सा तदा देवी सर्वजिह्वा सरस्वती। जगामादर्शनं सद्यो नागस्य कमलेक्षणा" मार्कण्डेयपुराणम्। "नागैरिवालुनशटं मृगेन्द्रम्" किरा० "अधिनागं प्रजविनोविकशत्पिच्छचारवः" "नागं पुनर्मृदुसरीलनिमीलिताक्षम्" माघः। १६अध्यायानन्तरे

नागकन्द पु० हस्तिकन्दे राजनि०। [त्रिका०।

नागकन्यका स्त्री ६त०। सर्पजातिस्त्रियां भोगिन्यां

नागकर्ण पु० नागस्य गजस्य कर्णः तदाकारः पत्रोऽस्य। १एरण्डे राजनि० ६त०। २हस्तिकर्णे च। [भावप्र०।

नागकिञ्जल्क पु० नागस्येव किञ्जल्कोऽस्य। नागकेसरे

नागकुमारिका स्त्री नागस्य कुमारीव कन्। १गुडूच्यां २मञ्जिष्ठायां च राजनि०।

नागकेसर पु० नागस्येव केसरोऽस्य। स्वनामख्याते पुष्पप्रधाने वृक्षभेदे अमरः (नागेश्वरचाँपा) भावप्र० तस्यागुणा उक्ता यथा "नागपुष्पः स्मृतो नागः केसरो नागकेसरः। चाम्पेयो नागकिञ्जल्कः कथितः काञ्चना-

हृयः। नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम्। खरकण्डूत्वाश्लेष्मर्दिहृद्रासनाशनम्। दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्"। त्रिजातकं नागकेसरसंयुक्तं चतुर्जातकं भवति यथा "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि स्त्रिजातकम्। नागकेसरसंयुक्तं चतुर्जातकमुच्यते। तद्द्वयं रोचकं रूक्षं तीक्ष्णोष्णं सुखगन्धकृत्। कफपित्ताग्निहृद्रोगं कफवातविषापहम्" भावप्र०।

नागगन्धा स्त्री नागस्य गन्ध इव गन्धोऽस्याः वा न इच्समा०। नाकुलीकन्दे राजनि०। [राजनि०।

नागगर्भ न० नागः सीसकं गर्भो जन्महेतुर्यस्य। सिन्दूरे

नागचूड़ पु० नागः सर्पः चूडायां यस्य। शिवे महादेवे

नागच्छत्रा स्त्री नागस्य फणेव छत्रं छादनं पत्रे यस्य। नागदन्तीवृक्षे राजनि०।

नागज न० नागात् सीसकात् जायते जन-ड। १सिन्दूरे २वङ्गे हेमच०। ३सर्पगजजातमात्रे त्रि०।

नागजिह्वा स्त्री नागस्य सर्पस्य जिह्वेवाकारोऽस्य। १अनन्तमूले। २शारिवौषधौ च रत्नमाला।

नागजिह्विका स्त्री नागस्य हस्तिनो जिह्वेव रक्तता यस्याः कप्। मनःशिलायाम् अमरः। [भेदे।

नागजीवन न० नागेन सीसकेन जीवनं यस्य। वङ्गे धातु-

नागदत्त पु० धृतराष्ट्रपुत्रभेदे "आदित्यकेतुर्बलवान्नागदत्तानुयायिनौ" भा० आ० ६७अ०।

नागदन्त पु० नागस्य हस्तिनो दन्त इवाकारोऽस्त्यस्य अच्। गृहभित्तिर्निर्गते काष्ठादिमये हस्तिदन्ताकारे (दाण्डा) (दाँतिया) ख्याते १पदार्थभेदे अमरः ६त०। २गजदन्ते च मेदि०। स्वार्थे क तत्रार्थे अमरः। "अवरवसतिरिव अवलम्बितचारुचामरनागदन्तघवलगृहाः" काद०। "हीपिचर्मावनद्धं नागदन्तलम्बतत्सदः" भा०शा० ९७अ०।

नागदन्तिका स्त्री नागस्य सर्पस्य दन्त इव विषाधारः पत्रं यस्याः कप् कापि अत इत्वम्। (विछाति) हस्तिकाख्यां रत्नमाला।

नागदन्ती स्त्री नागस्य गजस्य दन्त इव फलाद्याकारे यस्याः ङीप्। (हातिशुँड़ा) ख्याते १श्रीहस्तिन्याम्। २कुम्भाख्योषधौ च मेदि०। "अर्कार्कर्कहयनागदन्ती त्यादि" अर्कादिगणोक्तौ सुश्रुतः।

नागदमनी स्त्री नागो दम्यतेऽनया दम-ल्युट् ङीप्। १क्षुपभेदे "विज्ञेया नागदमनी बलामोटा विषापहा। नागपुष्पो नागपत्रा महायोगेश्वरीति च। बलामोटा कटुस्तिक्ता वृष्या पित्तकफापहा। मूत्रकृच्छ्रप्रणाशनी नाशयेच्छाकगर्दभम्। सर्वग्रहप्रशमनी निःशेषविषनाशिनी। जयं सर्वत्र कुरुते धनदा सुमतिप्रदा" भावप्र०

नागदलोपम पु० नागस्य ताम्बूल्याः दलस्योपमा यत्र। पद्मपत्रे रत्नमाला। [शब्दच०।

नागदु पु० नागाकारः दुः (सिज़) दक्षे वमनदुग्धायाम्

नागद्वीप पु० नागप्रधानो द्वीपः शा०त०। द्वीपभेदे "पार्श्वे यशस्य हे वर्षे उक्ते ये दक्षिणोत्तरे। कर्णौ तु नागद्वीपश्च कपिद्वीपश्च च ताम्रपर्णी शिला राजन् श्रीमान् मलयपर्वतः" भा०भी० ३अ०।

नागनक्षत्र न० नागाधिष्ठितं नक्षत्रम्। अश्लेषानक्षत्रे नागदेवतादयोऽस्य "नागदेवतमस्तके" ति०त०

नागनामन् पु० नागान् नामयति नामि-क्विन्। तुलस्यां मेदिनीप्रकाशिका।

नागनायक त्रि० ६त०। १प्रधाननागे "अनन्तो वासुकिः पद्मो महापद्मोऽपि तक्षकः। कर्कोटः कुलिकः शङ्खः श्वेतो नागनायकाः" त्रिका० नागवर्यादयोऽस्य। नागशब्दे उदा०। नागः नायकोऽस्य। २अश्लेषानक्षत्रे न०।

नागनिर्यूह पु० नाग इव निर्यूहः। नागदन्तशब्दार्थे जटा०

नागपञ्चमी स्त्री नागपूजाङ्गं पञ्चमी। आषाढ़कृष्णपञ्चम्यां तत्र नागाङ्गानां पूजाविधानात् तस्यास्तथात्वम्। देवीपुराणे "शुक्ले जलार्द्रने कृष्णे पञ्चम्यां भवनाङ्गने। पूजयेत् मनसादेवीं स्नुहीविटपसंस्थिताम्। पद्मनाभे गते यस्यां देवैः सर्वैरनन्तरम्। पञ्चम्यामसिते पक्षे सस्तिष्ठति पञ्चमी"। मनसादेवीं विषहरीम्। स्नुही सिजवृक्षः। देवैरिति कर्त्तरि तृतीया। "देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात्। पञ्चम्यां पूजयेन्नागानन्ताद्यान् महोरगान्। क्षीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम्"। गारुड़े "अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्कोटकं नागं धृतराष्ट्रं शङ्खकम्। कालियं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्। यजेत्तानसितान्नागान् दष्टस्तो दिवं व्रजेत्"।

नागपति पु० ६त०। श्रेष्ठाद्येषु अष्टसु १नागेषु २गजपतौ ऐरावते च। [भावप्र०। २अश्लेषानक्षत्रे राजनि०।

नागपत्रा स्त्री नागस्य सर्पस्य इव पत्रं यस्याः। १नागदन्त्यां

नागपद पु० "पादौ स्कन्धे तथा हस्ते शिश्नेक्षुरं भगे वपु। कामयेत् कामुको नारीं बन्धो नागपदो मतः" रतिमञ्जर्युक्ते १रतिबन्धभेदे। ६त०। २हस्तिपदे न०

नागपाश पु॰ नागः पाश इव । १वरुणस्यायुधभेदे "बाहुद्वयावर्त्तनात्तु नागपाश इति स्मृतः । ब्रह्मग्रन्थिमथो दद्यात् नागपाशमथापि वा" आगमोक्ते २बन्धभेदे "वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्" इति दुर्गाध्यानम् ।

नागपाशक पु॰ "स्वजङ्घाद्वयमध्यस्थां हस्ताभ्यां धारयन् कुचौ । रमेन्निःशङ्कितः कामी बन्धोऽयं नागपाशकः" रतिमञ्जर्युक्ते १रतिबन्धभेदे । स्वार्थे क । २नागपाशे च

नागपुर न॰ ६त॰ । १पाताले हस्तिनानामके२पुरभेदे तन्नामकारणं यथा "जटाजूटात् पपातोर्द्धं मेरोस्तस्मात्ततोऽगमत् । देवैः परिवृता गङ्गा हेमकूटञ्च पर्वतम् । मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्वतम् । ताभ्यायान्तीन्तु रोधाय स्वर्लोको नाम दानवः । पार्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः । ततो भगीरथो राजा धारयामास कौशिकम् । स तुष्टः प्रददौ नागं वाहनं तं भगीरथः । समारुह्यागमत्तत्र यत्र रुद्रा भगीरथी । तेन नागेन तं दैत्यं संविदार्य्य सुसङ्कृतः । शतधा तं समाधाय मूर्द्धन्यैरावतो गजः । महीतलं समापेदे स यावन्नागसाह्वयम्" वह्निपुराणे तच्च हस्तिनापुरस्य नामान्तरं "तत्सर्वं प्रतिजग्राह राजा नागपुराधिपः" (पाण्डुः) भा॰ आ॰ ११३अ॰ ।

नागपुष्प पु॰ नागः तद्दानगन्धयुक्तं पुष्पं यस्य । १पुन्नागवृक्षे २नागकेसरे ३चम्पके च मेदि॰ । ४नागदन्त्यां स्त्री भावप्र॰ ङीष् । [फलं यस्याः । कुष्माण्ड्यां राजनि॰ ।

नागपुष्पफला स्त्री नागस्य नागकेसरस्य पुष्पमिव पुष्पं

नागपुष्पिका स्त्री नागस्य पुष्पमिव पुष्पं यस्याः कप् कापि अत इत्त्वम् । स्वर्णयूथिकायां राजनि॰ ।

नागफल पु॰ नागः सर्प इव दीर्घं फलमस्य । पटोलभेदे (धुन्दुल) राजनि॰ । [अश्वत्थवृक्षे हेमच॰ ।

नागबन्धु पु॰ नागस्य हस्तिनो बन्धुरिव तत्तोषकत्वात् ।

नागबल पु॰ नागानां हस्तिनामयुतस्य बलं यस्य । १भीमे त्रिका॰ । २हस्तितुल्यबलयुक्ते त्रि॰ । भीमस्य तथा बलप्राप्तिकथा भा॰ आ॰ १२८ अ॰ । "यदि नागेन्द्र ! तुष्टोऽसि किमस्य धनसञ्चयैः । रसम्पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः । बलं नागसहस्रस्य तस्मिन् कुण्डे प्रतिष्ठितम् । यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम् । एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत । ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः । प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः । एकोच्छ्वासात्ततः कुण्डं पिबति स महाबलः । एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः । ततस्तु शयने दिव्ये नागदत्ते महाभुजः । अशेत भीमसेनस्तु यथासुखमरिन्दम !" "ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः । तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली । तं दृष्ट्वा प्रत्यबुध्यन्त पाण्डवं ते भुजङ्गमाः । सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् । यत्ते पीतो महाबाहो ! रसोऽयं वीर्यवर्द्धनः । तस्मान्नागायुतबलो रणेऽष्टष्टो भविष्यसि" भा॰ आ॰ १२९अ॰ । नागस्येव बलं यस्याः । (गोरक्षचाकुलिया) २लताभेदे स्त्री "नागबलाफलतिन्दुकमदनफलमधूकमञ्जिष्ठाः" सु॰सं॰ ५७अ॰

नागबलाष्टत न॰ चक्रदत्तोक्ते एकघृतभेदे "पादशेषे जलद्रोणे पचेन्नागबलाकुलाम् । तेन क्वाथेन तुल्यांशं घृतं क्षीरञ्च साधयेत् । पलार्द्धिकैश्चातिबलाबलायष्टिपुनर्नवैः । प्रपौण्डरीकशालूकैर्यपियालकपिकच्छुभिः । अश्वगन्धासिताभीरुमेदायुग्मत्रिकण्टकैः । मृणालविषशालूकशृङ्गाटकमधेरुकैः । एतन्नामबलासर्पीरुक्तपित्तक्षयज्वरम् । हन्ति दाहं भ्रमं तृष्णां बलपुष्टिकरं परम् । बल्यमौजस्यमायुष्यं बलीपलितनाशनम् । उपयुञ्जीत मासान् षड्वोऽपि तरुणायते" । [२०५७पृ॰ दशग्रम् ।

नागभगिनी स्त्री ६त॰ । वासुकेर्भगिन्यां जरत्कारौ तच्छब्दे

नागभूषण पु॰ नागो भूषणमस्य । महादेवे

नागमल्ल पु॰ नागेषु मल्लः । ऐरावते शब्दच॰ ।

नागमाता स्त्री नागस्य हस्तिनां मातेव भूषकत्वात् । १मनःशिलायां शब्दर॰ । २मनसादेव्याञ्च त्रिका॰ तस्याः स्वपुत्रद्वारा नागरक्षकत्वात् तथात्वम् । जगत्कारुशब्दे ३५०७पृ॰ दशग्रम् । [१हस्तिमारके२केशराजे पु॰ त्रिका॰ ।

नागमार त्रि॰ नागं मारयति मृ-णिच्-अण् उप॰स॰ ।

नागयष्टि स्त्री नागाधिष्ठानं यष्टिः । तडागादौ आरोप्ये वारुणादिकाष्ठमये नागविशेषस्याधिष्ठानरूपे स्तम्भभेदे (रदकाठ) तद्विधानं तदधिष्ठातृनागनामस्थापनं च जलाशयोत्सर्गे उक्तं यथा कापिले "नागानामष्ट नामानि लिखितानि पृथक् पृथक् । ततः कुम्भे च निःक्षिप्य गायत्र्या च विलोड्य वै । उद्धरेत् पत्रिकामेकां तत्र वै नागमीक्षयेत् । यस्य नामोद्धरेद्दक्षः स वै जलाधिपः स्मृतः । तं वै संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम्" । पत्राद्यग्राह्यस्य । योगीश्वरदृष्टवचनात् । "यथाऽष्टौ नामान्याज्यस्य पत्रे लत्वा तु

यत्नतः" तानि च गारुडे। "अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः" ततश्च अनन्तवासुकिकर्कोटकपद्ममहापद्मतक्षकशङ्खकुलीराणां नामान्याम्रपत्रे लिखित्वा कुम्भमध्ये निक्षिप्य गायत्र्या गोमूत्रेण वा "छन्दसामथ्यामीति" रघुनाथधृतमन्त्रेणाभ्युक्ष्य यस्य नामोत्तिष्ठति तं यष्ट्यां समावाह्यानेन नागेन अस्य जलाशयस्य रक्षा कर्त्तव्येति ब्राह्मणान् आवयेत्। हयशीर्षे "वैल्वकं वारुणञ्चैव पुन्नागं नागकेशरम्। बकुलं चम्पकञ्चैव विल्वञ्चैवाथ खादिरम्। एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता। सवक्रकोटरं त्यक्त्वा तस्यात् कुर्य्यात् यथेप्सितम्"। तथा च वृहस्पतिः "शूलचक्राङ्कितं कृत्वा स्थापयित्वा जलाशये। द्वादशाङ्गुलमानन्तु वाप्यां चक्रं प्रकल्पयेत्। षोडशं पुष्करिण्यान्तु विंशतिस्तु सरोवरे। सागरे वृत्तमानन्तु लौहं ताम्रञ्च पैत्तलम्। चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम्"। स्वार्थे क तत्रार्थे त्रिका०।

नागर त्रि० नगरे भवः अण्। १विदग्धे २नगरोद्भवे च मेदि० स्त्रियां ङीप्। अगं राति रा-क न अगः नगशब्देन(सह सुपा)पा०स०। ३ईश्वरे पु०त्रिका०। ५नागरङ्गे (नारङ्गानेबु) जम्बीरभेदे पु०शब्दरत्ना०। ६गुण्ड्रां न० अमरः। ८सुस्तामेदे (नागरमुथा) न० ९रतिबन्धभेदे विश्वः। १०देशभेदे तद्देशीये ब्राह्मणभेदे नागराब्राह्मणाः सि०कौ० नागरखण्डशब्दे दृश्यम् तद्देशे प्रथम प्रचलिते १२अक्षरभेदे न० "वयस्या नागरासङ्गादङ्गानां हन्ति वेदनाम्" वैद्यकम् नगराय हितम् अण्। १३नगरहिते च "धनुर्वेदस्य सूत्रं वै यन्त्रसूत्रञ्च नागरम्" भा० म० ५अ० "यन्त्राण्याग्नेयौषधबलेन सीसकांस्यदण्डोलम्बेपकाणि लोहमयानि भाषायां नालशब्दाभिधेयानि तेषां सूत्रं सूचकं शास्त्रं नागरं नगरहितम्" नीलक० "यः पयस्तीरतिपरिमलोद्गारिभिर्नागरोणाम्" मेघ० १४पौराख्ये महायुद्धभेदे महायुद्धशब्दे २१२७पृ०दृश्यम्।

नागरक त्रि० नगरे भवः कुत्सितः प्रवीणो वा "नगरात् कुत्सनप्रावीण्ययोः" पा० वुञ्। कुत्सने १चौरे प्रवीणे २शिल्पिनि च "अकुत्सनादौ तु अणेव नागरा ब्राह्मणाः" सि०कौ० ३रतिबन्धभेदे "ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं रमेत्। ग्रीवां धृत्वा कराभ्याञ्च बन्धो नागरकोमतः" तल्लक्षणम् नागर+स्वार्थे क। ४नागरशब्दार्थे

नागरक्त न० नागरक्तं रक्तम् शोणितवर्णचूर्णम्। सिन्दूरे हेमच०। तस्य सीसकेन रञ्जितचूर्णरक्तवर्णत्वात् तथात्वम्

नागरखण्ड न० स्कन्दपुराणान्तर्गते स्वनामख्याते खण्डभेदे तत्प्रतिपाद्यविषयाय दृढबारदीये उक्ता यथा "अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते। लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा। विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा। हाटकेश्वरमाहात्म्यं हत्वासुरवधस्तथा। नागबिलं शङ्खतीर्थं अचलेश्वरवर्णनम्। चमत्कारपुराख्यानं चमत्कारकरं परम्। गयशीर्षं बालशाख्यं बालमण्डं मृगाह्वयम्। विष्णुपादञ्च गोकर्णं युगरूपं समाश्रयः। सिद्धेश्वरं नागसरः सप्तार्षेयं द्विजस्तकम्। भ्रूणगर्त्तं नलेशञ्च भैम्नं दुर्वैरमर्कजम्। शार्म्मिष्ठं सोमनाथञ्च दौर्गमार्जकेश्वरम्। जमदग्निवधाख्यानं नैःक्षत्रियकथानकम्। रामह्रदं नागपुरं जडलिङ्गञ्च यज्ञभूः। सुखीराटिलिकाकञ्च सतीपरिचयस्तथा। बालखिल्यञ्च यागेशं बालखिल्यञ्च गारुडम्। लक्ष्मीशापः सप्तविंशः सोमप्रासादमेव च। अम्बाद्वं पादुकाख्यम् आग्नेयं ब्रह्मकुण्डकम्। गोमुखं लोहयष्ट्याख्यं अजापालेश्वरी तथा। शानैश्चरं राजयापी रामेशो लक्ष्मणेश्वरः। कुशेशाख्यं सनेशाख्यं लिङ्गं सर्वोत्तमोत्तमम्। षष्टषष्टिसमाख्यानं दमयन्त्या स्त्रीजातकम्। ततोऽम्बा रेवती चात्र भट्टिकातीर्थसम्भवम्। सेमहूरी च केदारं शुक्लतीर्थं सुखारकम्। सत्यसन्धेश्वराख्यानं तथा कर्णोत्पला कथा। जटेश्वरं याज्ञवल्क्यं गौर्य्यं गाणेशमेव च। ततो वास्तुपदाख्यानम् अजामङ्गकथानकम्। सौभाग्यान्धुक शूलेशं धर्मराजकथानकम्। मिष्टाम्बदेश्वराख्यानं गाणपत्यत्रयं ततः। लावालिचरितञ्चैव मकरेशकथा ततः। कालेश्वर्यम्बकाख्यानं कुण्डमाण्डरसन्तथा। पुष्पादित्यं रोहिताश्वं नागरोत्पत्तिकीर्त्तनम्। भार्गवं चरितं चैव विश्वामित्रं ततः परम्। सारस्वतं पैप्पलादं कंसारीशञ्च पैटकम्। ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम्। रैवतं भर्तृयज्ञाख्यं शुक्लतीर्थनिरीक्षणम्। कौरवं हाटकेशाख्यं प्रभासक्षेत्रकत्रयम्। पौष्करं नैमिषं धार्म्मारण्यत्रितयं स्फुटम्। वाराणसी द्वारकाख्याऽवन्त्याख्येति पुरीत्रयम्। वृन्दावनं खाण्डवाख्यं सदैताख्यं वनत्रयम्। कल्पः शालस्तथा नन्दो ग्रामत्रयमनुत्तमम्। अग्निकुण्डपिटसंज्ञतीर्थत्रयसदा-

कृतम्। अर्बुदो रैवतश्चैव पर्वतत्रयसत्तमम्। नदीनां त्रितयं गङ्गा नर्मदा च सरस्वती। सार्द्धकोटि त्रयफलमेकैकस्यास्य कीर्त्तितम्। कूपिका शङ्कतीर्थञ्चामरकं बालमण्डनम्। कपाटकेशं क्षेत्रफलप्रदं प्रोक्तं चतुष्टयम्। शाम्बादित्यं श्राद्धकल्पं यौधिष्ठिरमथाम्बकम्। जलाशयिचतुर्मासं अशून्यशयनं व्रतम्। मङ्गलेशं शिवरात्रिस्तुलापुरुषदानकम्। पृथ्वीदानं वामकेशं कपालमोचनेश्वरम्। पापपिण्डं वाप्रकेशं युगमानादिकीर्त्तनम्। दानमाहात्म्यकथनं द्वादशादित्य कीर्त्तनम्। इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते"

नागरघन पु॰ नागरमेव घनः कर्पूरसाधनम्। (नागरमुथा) मुस्ताभेदे राजनि॰।

नागरङ्ग पु॰ नागस्य नागभवस्य सिन्दूरस्येव रङ्गोऽस्य फले। (नारेङ्गा) जम्बीरभेदे अमरः। तत् फलगुणा यथा "नागरङ्गन्तु सुरभि विपाके गुरु दुर्जरम्। अत्यम्लमीषन्मधुरं हृद्यं वातविनाशनम्। तत्केसरन्तु रुच्यं स्यात् वातहारि निगद्यते"।

नागरमर्दिन् त्रि॰ नागरं मृद्नाति मृद्-णिनि। नागरमर्दके ततः बाह्वा॰ अपत्यादौ ठञ्। नागरमर्दिनि तदपत्यादौ।

नागरमुस्ता स्त्री नगरे भवा यत् ङीप् नागरी कर्म॰। (नागरमुथा) मुस्ताभेदे राजनि॰। "तिक्ता नागरमुस्ता स्यात् कषाया शीरला कटुः। कफपित्तज्वरहरी तृष्णादाहारुचि प्रणुत्। अतिसारामयहरी भिषग्भिः परिकीर्त्तिता" राजनि॰।

नागराज पु॰ ६त॰ टच्समा॰। १शेषे नागे "अधस्तान्नागराजाय सोमायोर्द्ध्वं दिशं ददौ" हरिवं॰ २६५अ॰। २छन्दोग्रन्थकारके पिङ्गलनागे च।

नागराद्यचूर्ण न॰ चक्रोक्ते चूर्णभेदे "त्रीफलशर्करा-टुकलको नागरचूर्णेन मिश्रितः सगुडः। अग्नीगदमत्युग्रं तक्रभुजाशीलितो जयति। जम्बूदाडिमगृह-कुटपाठाकच्छटपल्लवैः। पक्वं पर्युषितं बालबिल्वं सगुडनागरम्। हन्ति मर्वीनतीसारान् अग्नीमतिदुस्तराम्। नागरातिविषामुस्तक्वाथः स्यादामपाचनः। चूर्णं छिङ्गवटकं वातगुल्मघ्नान्तु हतानि च। नागरातिविषामुस्तं घातकीं मरसाञ्जनम्। बल्लकल्यकफलं बिल्वं पाठां कटुकरोहिणीम्। पिबेत् समांशं तच्चूर्णं सचौद्रं तण्डुलाम्बुना। पैत्तिके अग्नीदोषे रक्तं यचोपावेश्यते। अर्शांसि च गुदे शूलं जयेच्चैव प्रवाहिकाम्। नागराद्यमिदं चूर्णं कृष्णात्रेयेण भाषितम्। शीतकषायमानेन तण्डुलोदककल्पना। केऽप्यष्टगुणतो येन प्राहुस्तण्डुलभावनाम्"।

नागराङ्क न॰ नागरेति आङ्का यस्य। गुणग्राम राजनि॰।

नागरी स्त्री नागेभ्यो राति ददाति अत्र रा-घञर्थे क गौरा॰ ङीप्। १क्षुद्रीद्रुचे शब्दच॰ तस्यां नागपञ्चमीशब्दे नागपूजनस्योक्तत्वात्तस्यास्तथात्वम्। नगरे भवः अण् ङीप्। २विदग्धायां नार्य्यां च "हन्ताभीरीं स्मरतु च कथं संहतो नागरीभिः" उद्धवदूतम्।

नागरीट पु॰ नागरीमेटति इट-गतौ क। १शिङ्गे २जारे ३नागरीकृतमङ्गलध्वनौ च शब्दार्थ॰।

नागरुक पु॰ नागरङ्गे जम्बीरभेदे शब्दरत्ना॰। [राजनि॰।

नागरेणु पु॰ नागस्य शीसकस्य रेणुः। शीसकसम्भवे सिन्दूरे

नागरेयक त्रि॰ नगर्य्यां भवः कत्रप्रा॰ढकञ्। नगर्य्यां भवे

नागरोत्था स्त्री नागरादुत्तिष्ठति उद्+स्था-क। (नागरमुथा) ख्याते मुस्ताभेदे राजनि॰।

नागर्य्य न॰ नागरस्य भावः पुरो॰यक्। नागरभावे विदग्धत्वे

नागलक्षण ६त॰। नागानां भेदादिज्ञापके चिह्नभेदे अहिशब्दे ५८१ पृ॰ तल्लक्षणादिकं सुश्रुतोक्तं दर्शितम्। अग्निपुराणोक्तं शेषवासुकितक्षककुलक्षणादिकमत्र प्रदर्श्यते तच्च तत्र २९२अ॰ उक्तं यथा "अग्निरुवाच नागादयोऽथ भावादि दंशस्थानानि कर्म च। स्तुतकं दष्टचेष्टेति सप्तलक्षणमुच्यते। शेषवासुकितक्षाख्याः कर्कटोऽब्जो महाम्बुजः। शङ्खपालश्च कलिक इत्यष्टौ नागवर्यकाः। दशाष्टपञ्चत्रिगुणशतमूर्द्धान्विता क्रमात्। विप्रो नृपो विशौ शूद्रौ द्वौ द्वौ नागेषु कीर्त्तितौ। तदन्वयाः पञ्चशतं तेभ्यो जाता असंख्यकाः। मणिमण्डलिराजीलवातपित्तकफात्मकाः। व्यन्तरा दोषमिश्रास्ते सर्पा दर्वीकराः स्मृताः। रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः। गोनसा मन्दगा दीर्घा मण्डलैर्विविधैश्चिताः। राजिलाश्चित्रिताः स्निग्धास्तिर्यग्मूर्द्ध्वं राजिभिः। व्यन्तरा मिश्रचिह्नाश्च भूवह्न्यम्बुवायवः। चतुर्विधास्ते षड्विंशभेदाः षोडश गोनसाः। त्रयोदश च राजीला व्यन्तरा एकविंशतिः। येऽनुक्तकाले जायन्ते सर्पास्ते व्यन्तराः स्मृताः। आषाढादित्रिमासैः स्याद्गर्भो मासचतुष्टये। अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते। सर्पा भवन्ति स्तुतौ तान् विना

स्त्रीपुन्नपुंसकात् । उन्मीलतेऽक्षि सप्ताहात् कुचे-मांसाद्भवेद्वह्निः । द्वादशाहात् सरोमः स्यात् दन्ताः स्युः सूर्यदर्शनात् । द्वात्रिंशत्, दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः । कराली मकरी कालरात्री च यमदूतिका । एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः । षण्मासान्मुच्यते कृत्या जीवेत् प्रतिसमाहयम्१२०। नागाः सूर्यादिवारेशाः सप्त शक्रा दिवा निशि । स्वेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु । शक्रेन वा महाशक्रेन सह तस्योदयोऽथ वा । द्वयोर्वा नाडिकामन्त्रमन्त्रकं कुलिकोदयः । दुष्टः स कालः सर्वत्र सर्पदंशे विशेषतः । कृत्तिका भरणी स्वाती मूलं पूर्वत्रयाश्विनी । विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी । हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः । षष्ठी रिक्ता शिवा निन्द्या पञ्चदशी चतुर्दशी । सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः । एकद्विबहवो दंशा दष्टविद्धश्च खण्डितम् । अदंशमवगुप्तं स्याद्दंशमेवं चतुर्विधम् । त्रयो द्वे कथिता दंशा वेदना रुधिरोल्बणा । नक्तन्त्वेकाङ्घ्रिकुमीभा दंशाश्च यमचोदिताः । दाही पिपीलिकास्यर्शी कण्टशोथरुजान्वितः । सतोदो ग्रन्थितो दंशः सविषो न्यस्तनिर्विषः । देवालये शून्यगृहे वल्मीकोद्यानकोटरे । रथ्यासन्धौ श्मशाने च नद्याश्च सिन्धुसङ्गमे । द्वीपे चतुष्पथे सौधे गृहेऽब्जे पर्वतात्पतः । विलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके । शिम्बुकेशातकाक्षेषु जम्बूडुम्बरकेषु च । वटे च जीर्णप्राकारे स्वाक्षकृत्कच्छजालुषि । ताक्षौ शङ्खे गले मूर्ध्नि चिबुके नाभिपादयोः । दंशोऽशुभः शुभो दूतः पुष्पहस्तः सुवाक् सुधीः । सितवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः । अपदारमतः शस्त्री प्रमादी भूमतेक्षणः । विवर्णवासाः पाशादिहस्तो मद्गवर्णभाक् । शुष्ककाष्ठाश्रितः खिन्नस्त्रिवाक्तकरांशुकः । आर्द्रवासाः कृष्णरक्तपुष्पयुक्तशिरोरुहः । कुचमर्दी नखच्छेदी गुदसृक् पादलेखकः । केशखुन्नी तृणच्छेदी दुष्टा दूतास्त्वेकशः । दृढ़ाभ्या वा वहेद्द्वेधा यदि दूतस्य चात्मनः । आभ्यां दाभ्यां पुष्टयाभ्यान् विद्यात्स्त्रीपुन्नपुंसकान् । दूतः स्पृशति यद्गात्रं तस्मिन् दंशस्तदाहरेत् । दूताङ्घ्रिचलनं दुष्टस्त्रियतिर्निश्चला शुभा । जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः । जीवो गतागतैर्दुष्टः शुभो दूतनिवेदने । दूतस्य वाक् प्रदुष्टा सा पूर्वामलार्द्धनिन्दिता । विलक्षैस्तस्य वाक्यान्तैर्विषनिर्विषकालता । आद्यैः स्वरैश्च कादीश्च वर्गैर्भिन्नविपिर्द्विधा । स्वरजो वसुमान्वर्गी इति ज्ञेया च मातृका । वाताग्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम् । नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः । दुष्टो दूतस्य वाक्पादौ वाताग्नी मध्यमो हरिः । प्रश्नस्य वाक्या वर्णा अतिदुष्टा नपुंसकाः । प्रस्थाने मङ्गलं वाक्यं गर्जितं मेघहस्तिनोः । प्रदक्षिणं फले वृक्षे वामस्य च हतं जितम् । शुभा गीतादिशब्दाः स्युरीदृशं स्यादसिद्धये । अनर्थगीरथाक्रन्दो दक्षिणे विहतं च्युतम् । वेश्या च्युतो नृपः कन्या गौर्दीप्ती सुरजध्वजौ । क्षीराज्यदधिशङ्खाम्बु छत्रं भेरी फलं सुराः । तण्डुला हेम रूप्यञ्च सिद्धयेऽभिमुखा अमी । सकाशः सानलः कार्ष्णलिनाम्बरभावभृत् । गलस्फटङ्गो गोमायुगृध्रोलूककपर्दिकाः । तैलं कपालकार्पासा निषेधा भक्ष नष्टये । विप्ररोगाश्च सप्त स्युर्घातोर्धात्वन्तराग्निनः । विषदंशो ललाटं वात्यतोनेत्रं ततो मुखम् । आस्याच्च चरणौ नाड्यौ धातून् प्राप्नोति हि क्रमात्" ।

नागलता स्त्री नाग इव लता । १पुंसोलिङ्गे लिका॰नागाकारा लता । २नागदीर्घायां २ताम्बूल्याञ्च ।

नागलोक पु॰ ६त॰ । नागाधिष्ठिते लोके पाताले नागशब्दे तेषां पातालस्थितिकारणं दर्शितम् । पातालावस्थानभेदादि पुराणसर्वस्वे विष्णुपुराणादुक्तं यथा "पराशर उवाच विस्तार एष कथितः पृथिव्या भवतो मया । सप्तसु सहस्राणि द्विजोच्छ्रायोऽपि कथ्यते । दशसाहस्रमेकैकं पातालं मुनिसत्तम ! । सुतलं वितलञ्चैव नितलञ्च गभस्तिमत् । महाप्रभतलञ्चापि पातालञ्चापि सत्तम ! । भूमयो यत्र मैत्रेय ! वरप्रासादशोभिताः । तेषु दानवदैत्येयजातयः शतसंघशः । निवसन्ति महानागजातयश्च महामुने !" ब्रह्माण्डे "प्रथमेऽस्मिंस्तले ख्यातमसुरेन्द्रस्य मन्दिरम् । नमुचेर्दैवशत्रोश्च महानादस्य चानघ ! । पुरञ्च शङ्कुकर्णस्य कबन्धस्य च मन्दिरम् । किंविषयस्य च पुरं प्रहृष्टजनसङ्कुलम् । राजसस्य च भीमस्य शृङ्गदन्तस्य चालयः । लोहिताक्षकुविन्दानां नगरं शापदस्य च । धनञ्जयस्य सदनं नागेन्द्रस्य महात्मनः । कालियस्य च नागस्य नगरं कलशस्य च । एवं पुरसहस्राणि नागदानवरक्षसाम् । ज्ञेयानि प्रथमे चैव कृष्णभौमे तले द्विज ! । द्वितीयेऽस्मिंस्तले ज्ञेयं दैत्येन्द्रस्य सुरक्षसः । महाजम्भस्य च तथा

नगरं प्रवरस्य च। हयग्रीवस्य ब्रह्मस्य निलयं तस्य च मन्दिरम्। शङ्खाख्यस्य च दैत्यस्य नगरं गोमुखस्य च। राजरूपस्य च नीलस्य मेघस्य क्रथकस्य च। पुरञ्च लम्बपादस्य महोष्णीषस्य चालयः। कम्बलस्य च नागस्य पुरमन्यतरस्य च। कद्रुपुत्रस्य च पुरं तक्षकस्य महात्मनः। एवं पुरसहस्राणि नागदानवरक्षसाम्। द्वितीयेऽस्मिंस्तले विप्राः पाण्डुभौमे न संशयः। तृतीये तु तले ख्यातं प्रह्लादस्य महात्मनः। चतुर्थे ह्लादस्य च पुरं पुरमग्निमुखस्य च। तारकाख्यस्य च पुरं पुरं निर्मिर सत्तथा। शिशुमारस्य च पुरं कृष्टपुष्टजनाकुलम्। ध्वजनस्य च वित्तेयं राक्षसस्य च मन्दिरम्। मन्दरस्योरगपतेर्विशालस्य च मन्दिरम्। एवं पुरसहस्राणि नागदानवरक्षसाम्। तृतीयेऽस्मिंस्तले श्रेयं रक्तभौमे न संशयः। तत्रापि दैत्यसिंहस्य बाहुनेमेः पुरं महत्। तथालम्बस्य च पुरं नगरं कुञ्जरस्य च। राक्षसेन्द्रस्य च पुरं सुमालेर्बहुविस्तरम्। सुहस्य कोकनागस्य हृकवक्त्रस्य चालयः। बहुयोजनसाहस्रं बहुपक्षिगणाकुलम्। नगरं वैनतेयस्य चतुर्थेऽस्मिन्सारले। पञ्चमे शर्कराभौमे बहुयोजनविस्तृतम्। विरोचनस्य नगरं दैत्यसिंहस्य वामतः। व्यायताक्षाग्निजिह्वस्य हिरण्याक्षस्य चालयः। पुरञ्च विद्युज्जिह्वस्य राक्षसेन्द्रस्य धीमतः। महामेघस्य च पुरं रक्षसो देवविद्विषः। किर्मीरस्य च नागस्य स्वस्तिकस्य जयस्य च। एवं पुरसहस्राणि नागदानवरक्षसाम्। पञ्चमेऽस्मिंस्तले श्रेयं शर्करानिलये तथा। षष्ठे तले केशरिणो दैत्येन्द्रस्य पुरं स्मृतम्। सुपर्वणः पुलोम्नश्च नगरं महिषस्य च। राक्षसेन्द्रस्य च पुरं शुक्रोशस्य महात्मनः। तत्रास्ते सुरसापुत्रः शतशीर्षोऽसदा युतः। महेन्द्रस्य सखा श्रीमान् वासुकिर्नाम नागराट्। एवं पुरसहस्राणि नागदानवरक्षसाम्। षष्ठे तलेऽस्मिन् ख्यातानि शिखाभौमे रसातले। सप्तमे तु तले श्रेयं पाताले पूर्वपश्चिमे। पुरं बलेः प्रमुदितं नरनारीगणायुतम्। असुराणीविधैः पर्यसुहृतैर्दैवतैर्युभिः। सुचुकुन्दस्य दैत्यस्य तत्रैव नगरं महत्। अनेकैर्दितिपुत्राणां सहस्रैर्महासुरैः। तथैव नागनगरैर्ऋषिभिर्महात्मभिः। दैत्यानां दानवानाञ्च सहस्रैर्महासुरैः। सहस्रैः राक्षसावासैरनेकैश्च समाकुलम्। स्वर्लोकादपि रम्याणि पातालानीति नारदः। प्राह स्वर्गसभामध्ये पातालेभ्यो मतो दिवि। आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः। नागामरणभूषाणां पातालं केन तत्समम्। दैत्यदारिद्र्यरहितैरितस्ततश्च शोभिते। पातालेऽस्मिन्न भीतिर्विद्युत्स्वापि जायते। दिवाकरस्तयो यत्र प्रभां तन्वन्ति नातपम्। शशिनश्च न शीताय निशि द्योताय केवलम्। भक्ष्यभोज्यमहापानसुदिते रात्रिभोगिभिः। यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः। वनानि नद्यो रम्याणि सरांसि कमलानि च। पुंस्कोकिलादिनादाश्च मनोज्ञान्यम्बराणि च। भूषणान्यतिरम्याणि गन्धाश्चाद्भुतलेपनम्। वेणुवीणामृदङ्गानामुदितैर्नादितानि च। एतान्यन्यानि चोदारभोगभोग्यानि दानवैः। दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः। पातालानामधस्तात्ते विष्णोर्या तामसी तनुः। शेषाख्या तद्गुणान् वक्तुं न शक्ता दैत्यदानवाः। योऽनन्तः पश्यते विद्वद्दैवदेवर्षिभूषितैः। सहस्रशिरसा व्यक्तः स्वस्तिकालङ्कभूषणः। फणामणिसहस्रेण यस्य विद्योतयन् दिशः। सर्वान् करोति निर्वीर्यान् हिताय जगतोऽसुरान्। मदाघूर्णितनेत्रोऽसौ यः सदैवैककुण्डलः। किरीटी खड्गधरो भाति शाग्निः श्वेत इवर्क्षराट्। नीलवासा महोदग्रशिखः श्वेतहारोप शोभितः। सोऽभ्रे गङ्गाप्रपातोऽसौ कैलासाद्रिरिवोन्नतः। लाङ्गलासक्तहस्ताग्रो बिभ्रन्मूषलमुत्तमम्। उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्त्तया। कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः। सङ्कर्षणात्मको रुद्रो निर्गच्छति जगत्त्रयम्; समस्तपृथिवीभूतमग्रेमणितिमण्डलम्। आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः। तस्य वीर्यं प्रभावश्च स्वरूपं रूपमेव च। न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि। यस्यैषा सकला पृथ्वी फणामणिशिखारुणा। आस्ते कुसुममालेव कस्तदीर्यं वदिष्यति। यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः। तदा चलति भूरेषा साद्रितोयाब्धिकानना। यदा तु पर्वणि गजः खेदाच्छान्तयते शिरः। सपर्वतवना नाम तदेवं चलति क्षितिः। गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः। नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते। यस्य नागवधूहस्तैर्लेपितं हरिचन्दनम्। स्वनिश्वासानिलापास्तं याति दिक्पटवासताम्। यमामनन्ति देवर्षिगणैर्ज्योतींषि तत्त्वतः। भगवान् सकलश्चैव निमित्तं पटितं फणम्। तेनेयं नागवर्यैश्च शिरसा विधृता मही। बिभर्त्ति मायां

लोकानां सदेवासुरमानुषाम्" नागभुवनादयोऽप्यत्र ।

नागवर्त्मन् पु॰ तीर्थभेदे "ततः प्रायाद्ध्रुवो राजन् ! दक्षिणेन सरस्वतीम् । गत्वा चैवं महाबाहुर्नातिदूरे महायशाः । धर्मात्मा नागवर्त्मानं तीर्थमागममच्युतः । यत्र पन्नग राजस्य वासुकेः सन्निवेशनम् । महाद्युतेर्महाराज ! बहुभिः पन्नगैर्वृतम् । ऋषीणां हि सहस्राणि तत्र नित्यं चतुर्दश । यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् । सर्वे पन्नगराजानमभ्यषिञ्चन् यथाविधि । पन्नगेभ्यो भयं तत्र विद्यते न च गौरव ! । तत्रापि विधिवद्दत्त्वा विप्रेभ्यो रत्नसञ्चयान्" भा॰श॰ ३८अ॰।

नागवल्लरी स्त्री नाग इव दीर्घा वल्लरी । ताम्बूलीलतायां भावप्र॰ ।

नागवल्ली स्त्री नाग इव दीर्घा वल्ली । ताम्बूलवल्ल्याम् अमरः । सा च देशभेदात् मृत्तिकाभेदेन नानाकारगुणा यथोक्तं राजनि॰ "एकाग्रेषा देशमृत्तत्त्वाविशेषाद्वानाकारं याति कार्ये गुणे च" इत्युपक्रमे "श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा । रसाढ्या सरसा रुच्या विपाके शिशिरा स्मृता । स्वादुवाटी कटुकाम्लतिक्ता तीक्ष्णा तथोष्णा सुखपाककर्त्री । विदाहपित्तास्रविकोपनी च विष्टम्भदा वातनिवर्हणी च । शम्पनी मधुरा तीक्ष्णा कटुरुष्णा च पाचनी । गुरुमोदराध्मानहरी रुचिकृद्दीपनी परा" अन्यत्र "गुहागरे सप्तशिरा प्रसिद्धा तत्पर्णचूर्णातिरसातिरुच्या । सुगन्धि तीक्ष्णा मधुरातिरुच्या सन्दीपनी पुंस्त्वकरी च वल्ली" "नाम्ना यामुनरा सुतीक्ष्णमधुरा रुच्या हिमा दाहहृत् पित्तोद्रेककरी सुदीपनकरी बल्या सुखामोदिनी । स्त्रीसौभाग्यविवर्द्धिनी मदकरी ग्रेया सदा वल्लभा गुरुमाध्मानविदग्धजित् कथिता सा मानवे तृप्तिता । अग्निदुष्कलिका नाम कषायोष्णा कटुस्तथा । मलापकर्षी बलकृत् पित्तकृद्वातनाशिनी । हैवणीया कटुस्तीक्ष्णा सुरा दीर्घदला च सा । कफवातहरी रुच्या कटुदीपन पाचनी" स्वार्थे क । नागवल्लिकाऽप्यत्र "पर्णमूले भवेद् व्याधिः पर्णाग्रे पापसञ्चयः । जीर्णपर्णं हरेदायुः शिरा बुद्धिप्रणाशिनी" आह्निक॰त॰ ।

नागवारिक पु॰ नागस्य गजस्य सर्पस्य वा वारो वारणं प्रयोजनमस्य ठक् । १हस्तिपालके २गरुडे ३मयूरे ४राजकुञ्जरे ५यूथस्थगजराजे च मेदि॰ ।

नागवि(बिल) न॰ तीर्थभेदे नागरक्षणशब्दे दृश्यम् ।

नागवीट पु॰ नाग इव वीटति वि+इट-क । टाङ्कुरे(ढाकरा) त्रिका॰ ।

नागवीथी स्त्री आकाशमण्डलस्थे उत्तरदिक्स्थे अश्विन्यादित्रयघटितग्रहस्थानत्रयान्तर्गते मार्गभेदे

वियति हि मध्यमोत्तरदक्षिणमार्गत्रयमस्ति तत्र प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथा हि त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् "सर्वग्रहाणां भान्येव स्थानानि द्विजसत्तमाः । स्थानं जारद्गवं मध्ये तथैरावतमुत्तरम्" "वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः । अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता" विष्णुपु॰ जरद्गवशब्दे ३॰५८पृ॰ दृश्यम् । २कथ्रपपत्नीभेदे च "नाग वीथी च वामिन्याम्" ब्रह्म॰प्र॰ २अ॰ ।

नागवृक्ष पु॰ नागाख्यो वृक्षः । नागकेशरवृक्षे शब्दार्थचि॰ ।

नागशत पु॰ नागानां शतमत्र । पर्वतभेदे "जगाम सह पत्नीभ्यां ततो नागशतं गिरिम्" भा॰आ॰१९९अ॰ ।

नागशुण्डी स्त्री नागस्य शुण्डेवाकारोऽस्त्यस्ते शिखायाम् अच् गौरा॰ ङीष् । इक्षुरीफलनामके वृक्षे राजनि॰।

नागसम्भव न॰ नागात् शीसकात् सम्भवति सम्+भू-अच् ५त॰। सिन्दूरे अमरः ।

नागसम्भूत न॰नागात् शीसात् वासुक्यादितो वा सम्भूतम् ५त॰ शीसजन्मनि सिन्दूरे वासुक्यादिशिरसि वर्षच्छःपतिते २सुक्ताफलभेदे च "तक्षकवासुकिकुलजाः कामगमा ये च पन्नगास्तेषाम् । स्निग्धानीलद्युतयो भवन्ति मुक्ताः फणस्थाने । यस्तेऽवनिप्रदेशे रजतमये भाजने स्थिते च यदि । वर्षति देवोऽकस्मात् तज्ज्ञेयं नागसम्भूतम् । अपहरति विषमलक्ष्मीं जयति मृत्युन्यथो विकाशयति । भौजङ्गं नृपतीनां धृतमलतार्थं विजयदं च" बृ॰सं॰८१अ॰

नागसरस् न॰ तीर्थभेदे नागरक्षणशब्दे दृश्यम् ।

नागसाह्वय न॰ नागेन हस्तिना समानः आह्वयो यस्य । हस्तिनापुरे "जगाम तच्छकलूर्णं नगरं नागसाह्वयम्" भा॰आ॰१३अ॰। [शीसतायां शीरस्वामी ।

नागसुगन्धा स्त्री नागस्य सर्पस्येव सुगन्धोऽस्याः । भुजङ्गा-

नागस्तोक न॰ नागस्य तद्विषस्य स्तोकमल्पम् । बहुव्रीहौ नामविशे राजनि॰ । [वृक्षे च राजनि॰ ।

नागस्फोता स्त्री नाग इव स्फोता । १नागदन्तीवृक्षे २दन्ती-

नागहनु पु॰नागस्य हस्तिनो हनुरिव । नखीनामगन्धद्रव्ये राजनि॰ ।

नागहन्त्री स्त्री नागान् सर्पान् हन्ति हन् ङीप् । १मन्थाकर्कन्धाम् राजनि० । २सर्पगजयोर्हन्तरि त्रि० ।

नागाख्य पु० नागेति आख्या यस्य । नागकेसरे त्रिका० ।

नागाञ्चला स्त्री नागस्याञ्चलमिवास्य । नागवल्ली जटाधरः ।

नागाञ्जना स्त्री नागस्याञ्जनं यस्य । १नागयज्ञां २हस्तिन्यास्त्र मेदि० । [रधिपमाले च । नागाधिराजादयोऽप्यत्र ।

नागाधिप पु० ६त० । १अनन्ते नागे हेमच० । २गजसर्पयो-

नागानन पु० नागस्येवाननमस्य । गजानने गणेशे ।

नागान्तक ६त० । १गरुडे क्रमेण सर्पगजयोरन्तके २मयूरे ३सिंहे च । [नाटकभेदे ।

नागानन्द पु० नागानामानन्दो वर्णो यत्र । श्रीहर्षप्रणीते

नागाराति पु०नागस्य सर्पस्याराति: १वज्राकर्कन्धाम् राजनि० २सिंहे ३गरुडे ४मयूरे च । नागारिप्रभृतयोऽप्येषु ।

नागार्जुनीय पु० नागश्च अर्जुनश्च तौ अधिकृत्य कृतोग्रन्थः "इन्द्राच्छः" पा० छ । नागार्जुनाधिकारेण कृते काव्यभेदे कथाख्यायिकात्वात् वा लुक् । नागार्जुन तत्रार्थे । ।

नागालाबू स्त्री नागः नागकुम्भ इवालाबूः । गजकुम्भाकारायां तुम्बीम् राजनि० । [२मयूरे ३सिंहे च ।

नागाशन न० नागान् अश्नाति अश–ल्यु । गरुडे हारा०।

नागाह्व पु० नागेन युक्ताह्वा यस्य । हस्तिनापुरे । नागाह्वयादयोऽप्यत्र त्रिका० । [लक्ष्मणायाम् राजनि० ।

नागाह्वा स्त्री नागं नागकेसरमाह्वयते सर्वते आ+ह्वे–क ।

नागिन् पु० नागो भूषणत्वेनास्त्यस्य इनि । सर्पभूषणे शिवे "नागोपवीतिनं नग्नं नागिनमग्निवर्चसम्" हरिवं० २७६ अ० ।

नागेन्द्र पु० नाग इन्द्र इव श्रेष्ठत्वात् उपमितस० । १ऐरावत २शेषादिनागे च । "नागेन्द्रहस्तस्त्वचि वर्कमत्वात्" कुमा० । "कुबेर नागेन्द्रमिवेन्द्रवाहनम्" माघः ।

नागेश पु० ६त० । १अनन्ते शेषनागे । पाणिनिव्याकरणभाष्यविवरणादिग्रन्थकारके २विद्वद्भेदे "नागेशभट्टकृतेऽयुग्धन्दुशेखरम्" । ३शिवलिङ्गभेदे न० नागेश्वरोऽप्यत्र विष्णुपु० उक्ते तन्निकटस्थे ४तीर्थभेदे न० ।

नागोद(र) न०नाग इवोदर यस्मात् पृषो०वा रस्य लोपः । उदरत्राणे हेमच० । रात्रं तत्रार्थे हारा० । सुश्रुतोक्ते २गर्भिण्या गर्भोपद्रवभेदे च "शुक्रशोणितं वायुर्गर्भमभिप्रपद्यमानमवक्रान्तजीवमाच्छाद्य यस्मादुदर तत्कदाचिदुपदध्यात्योपयात्तं नैगमेषाप्तुतर्षिति भावनं । तमेव कदाचित् प्रवीयमानं नागोदरमिव्याहुस्तत्रापि तीनवत् प्रतीकारः"

नागोद्भेद न०सरस्वतीनदीप्रकाशस्थानभेदरूपे तीर्थभेदे "गच्छत्यनर्हिता यत्र मेरुपृष्ठे सरस्वती । चमसे च शिवोद्भेदे नागोद्भेदे च दृश्यते । नागोद्भेदे नरः स्नात्वा नागलोकमवाप्नुयात्" भा० व० ८२अ० ।

नाचिक पु० विश्वामित्रपुत्रभेदे "अराणिर्नाचिकश्चैव" भा० अनु० ४अ० विश्वामित्रपुत्रोक्तौ ।

नाचिकेत पु० नचिकेतशब्दार्थे १अनले २ऋषिभेदे ३तदुपाख्याने च । त्रिकाण्डे नाचिकेतुरिति पाठः विषिकरप्रमादजतः नाचिकेत इत्येव पाठः सुत्यादिसंवादी । नाचिकेतोपाख्यानञ्च भा०अनु० ७१अ० आदौ द्रष्टव्यम् ।

नाचीन पु० दक्षिणस्थे १देशभेदे २तद्भूपे च "नाचीनानर्बुदांश्चैव" भा०स०२०अ० सहदेवदक्षिणदिग्विजये ।

नाट पु० नट–घञ् । १नृत्ये २कर्णाटदेशे च शब्दरत्ना०

नाटक त्रि०नट–ण्वुल् । १नर्त्तके स्त्रियां टाप् । कामाख्या पर्वतान्तिकस्थे २पर्वतभेदे । "ऐशान्यां नाटके शैले शङ्करस्य महात्मनः । नित्यं वसति तत्रैव शक्तिभीना तु पार्वती" कालिकापु० । ३दृश्यकाव्यरूपे रूपकभेदे न० । तद्भेदलक्षणादिकं सा०द० उक्तं यथा "नाटकमथ प्रकरणम् भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश । किञ्च, "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासक तथा । संलापकं श्रीगदितं शिल्पकञ्च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च । अष्टादश प्राहुरुपरूपकाणि मनीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् । सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणाञ्च । तत्र । "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् । विलासर्द्धादिगुणवद्युक्तं नानाविभूतिभिः । सुखदुःखसमुद्भूति नानारसनिरन्तरम् । पञ्चादिका दशपरास्तदङ्काः परिकीर्त्तिताः । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः । एक एव भवेदङ्गी शृङ्गारो वीर एव वा । अङ्गमन्ये रसाः सर्वे कार्य्यनिर्वहणेऽद्भुतम् । चत्वारः पञ्च वा मुख्याः कार्य्यव्याप्तपूरुषाः । गोपुच्छाग्रसमाग्रन्थ वस्तु तस्य कीर्तितम्" । "देवतानां मनुष्याणां राज्ञां लोके महात्मनाम् । पूर्ववृत्तानुचरितं प्रख्यातोदात्तनायकम् । प्रवेशकविष्कम्भादिभिः सन्धिभिरन्वितम् । इतिहासकथोद्भूतं सुखदुःखदशै-

र्युतम्। षट्पञ्चदशसप्ताष्टनवाङ्कैरनुभूषितम्। नाना-विलासलीलाभिः सर्वसिद्धिभिरन्वितम्'। नानाभाव रसैराढ्यं नाटकं सूरयो विदुः। किञ्चिदङ्गविहीनन्तु न त्याज्यं नाटकं क्वचित्। आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च। नियता च फलप्राप्तिः फलयोगस्तथा परः। इत्यवस्थापञ्चकं स्यात् नाटके कार्य्यवस्तुनः। संस्कृतं प्राकृतं भूतभाषापभ्रंशिका गिरः। नाटके नियताः शस्ता एषा भाषा रसावहा। भाषाविभाषा-भेदेन प्राकृतन्तु चतुर्दश। मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी। वाह्लीका दाक्षिणात्याश्च भाषाः सप्त च प्राकृते। शकाराभीरचाण्डालशबरद्रविडौड्रजाः। वानौकसी विजातीनां विभाषाः सप्त कीर्त्तिताः। कैकेयी शौरसेनी च काञ्ची पाञ्चालमागधी। द्राविडी पाण्ड्य-देशी च भूतभाषाः प्रकीर्त्तिताः। वैदर्भी मागधी नाटी काम्बोजी चोपनागरी। पाञ्चाली षड्पभ्रंश-भाषाः स्युर्देशभेदतः। देवतादर्शनान्तञ्च कर्त्तव्यं नाटकं बुधैः। राजर्षिदर्शनान्तं वा तेऽपि देवैः समा मताः"। उदाहरणम् "सुरारिकवेरनर्घराघवं भवभूते-रुत्तरचरितं कालिदासस्याभिज्ञानशकुन्तलञ्च" सङ्गीतदा०। तत्र यथा कर्त्तव्यं नाटकादिविभागसङ्ग्रहो अग्निपु० २३७अ० तथा निरूपितं यथा

"सामान्यञ्च विशेषञ्च लक्षणस्य द्वयी गतिः। सामान्यं सर्वविषयं शेषः क्वापि प्रवर्त्तते। पूर्वरङ्गे निवृत्ते द्वौ देशकालावुभावपि। रसभावविभावानुभावा अभिनय-स्तथा। अङ्कः स्थितिश्च सामान्यं सर्वत्रैवोपसर्पणात्। विशेषोऽवसरे वाच्यः सामान्यं पूर्वसूच्यते। त्रिवर्ग-साधनन्नाट्यमित्याहुः करणञ्च यत्। इतिकर्त्तव्यता तस्य पूर्वरङ्गो यथाविधि। नान्दीसूक्तानि द्वात्रिंश-दङ्गानि पूर्वरङ्गके। देवतानां नमस्कारो गुरूणामपि च स्तुतिः। गोब्राह्मणनृपादीनामाशीर्वादादि गीयते। नान्द्यन्ते सूत्रधारोऽसौ रूपकेषु निबध्यते। गुरुपूर्वक्रमं वंशप्रशंसा पौरुषं कवेः। सम्बन्धार्थौ च काव्यस्य पञ्चै-तानेव निर्दिशेत्। नटी विदूषको वापि पारिपार्श्विक एव वा। सहिताः सूत्रधारेण संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुतालेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि सा। प्रवृत्तकं कथोद्घातः प्रयोगातिशयस्तथा। आमुखस्य त्रयो भेदा बीजांशेषूप-जायते। कार्यं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत्। तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवृत्तकम्। सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थसेवला। गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स उच्यते। प्रयोगेषु प्रयोगन्तु सूत्र-धृग्यत्र वर्णयेत्। ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः। शरीरं नाटकादीनामितिवृत्तं प्रचक्षते। सिद्धसृत्प्रेक्षितञ्चेति तस्य भेदावुभौ स्मृतौ। सिद्धमागम-दृष्टञ्च सृष्टसृत्प्रेक्षितं कवेः। बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात्। प्रारम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च। नियता च फलप्राप्तिः फलयोगश्च पञ्चमः। मुखं प्रति-मुखं गर्भो विमर्शश्च तथैव च। तथा निर्वहणञ्चेति क्रमात् पञ्चैव सन्धयः। अल्पमात्रं समुद्दिष्टं बहुधा यत् प्रसर्पति। फलावसानं यच्चैव बीजं तदभिधीयते। यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवः। काव्ये शरीरानु-गतं तन्मुखं परिकीर्त्तितम्। इष्टस्यार्थस्य रचना इत्तान्त-स्यानुपक्षयः। रागप्राप्तिः प्रयोगस्य गुह्यानाञ्चैव गूह-नम्। आश्चर्य्यदर्शनाख्यातं प्रकाशानां प्रकाशनम्। अङ्गहीनं नरो यद्वत् न्यूनं काव्यमेव च। देशकालौ विना किञ्चिन्नेतिवृत्तं प्रवर्त्तते। अतस्तयोरुपादान-नियमात् पदमुच्यते। देशेषु भारतं वर्षं काले कृत-युगत्रयम्। मर्त्ये ताभ्यां प्राणभृतां सुखदुःखोदयः क्वचित्। स्वर्गे स्वर्गादिवार्त्ता च प्रसज्जनी न दुष्यति"।

नाटकलक्षण न० नाटकस्य दशविधरूपकस्य लक्षणम्। सा०द० षष्ठे षट्त्रिंशन्मिते नाटकस्य लक्षणे यथा

"षट्त्रिंशल्लक्षणान्यत्र नाट्याङ्गानि तथा२६। त्रय-स्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश। लास्याङ्गानि दश यथालाभं रसव्यपेक्षया" इत्युद्दिश्य "भूषणान्यर्थसं-घातो शोभोदाहरणं तथा। हेतुसंशयदृष्टान्तास्तुल्यतर्कः प्रदोषयः। निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च। दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा। विशेषण-निरुक्ती च सिद्धिर्भंगविपर्य्ययौ। दाक्षिण्यानुनयौ मालाऽर्थापत्तिगर्हणे तथा। पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्त्तनम्। हेयो मनोरथोऽनुक्तसिद्धिः प्रिय-वचस्तथा। लक्षणानि" इति विभज्य क्रमेणलक्षितानि यथा

"गुणैः सालङ्कारैर्योगस्तु भूषणम्१। वर्णनाऽक्षर-संघातरचितार्थैरक्षरैर्मितैः। सिद्धैरर्थैः समं यत्र प्रसि-द्धोऽर्थः प्रकाशते। श्लिष्टलक्षणचित्रार्था सा शोभेत्यभि-धीयते२। यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।

साध्यतेऽभिमतस्यार्थस्तदुदाहरणं४ मतम् । हेतु५र्वाक्यं समाधोक्तमिष्टलक्षेतुदर्शनात् । संशयो६ ज्ञाततत्त्वस्य वाक्ये स्याद्यदनिश्चयः । दृष्टान्तो७ यस्तु पक्षार्थसाधनाय निदर्शनम् । तुल्यतर्कौ८ यदर्थेन तर्कः प्रकृतगामिना । सम्बन्धोऽर्थानुरूपो यः पदानां स पदोच्चयः९ । वक्तार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनम् । परपक्षव्युदासार्थं तच्चिदर्शन१०मुच्यते । अभिप्राय११स्तु साहस्यादद्भुतार्थस्य कल्पना । प्राप्ति१२ केनचिदंशेन किञ्चिद्यत्रानुमीयते । विचारो१३ युक्तवाक्यैर्यदप्रत्यक्षार्थसाधनम् । देशकालस्वरूपेण वर्णना दिष्ट१४मुच्यते । उपदिष्ट१५ मनोहारि वाक्यं शास्त्रानुसारतः । गुणातिपातः१६ कार्य्यं यद्विपरीतं गुणान् प्रति । यः सामान्यगुणोद्रेकः स गुणातिशयो१७ मतः । अर्थान् सिद्धान् बहूक्त्वा विशेषोक्तिर्विशेषणम्१८ । पूर्वसिद्धार्थकथनं निरुक्ति१९रिति कीर्त्तितम् । बहूनां कीर्त्तनं सिद्धि२०रभिप्रेतार्थसिद्धये । दृष्टादीनां भवेद्भेदो२१ वाच्यादन्यतरद्वयः । विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः२२ । दाक्षिण्यं२३ चेष्टया वाचा परचित्तानुवर्त्तनम् । वाक्यैः स्निग्धैरनुनयो२४ भवेदर्थस्य साधनम् । माला२५ स्याद्यदभीष्टार्थं नैकार्थप्रतिपादनम् । अर्थापत्ति२६र्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते । टूषणोद्घोषणायां तु भर्त्सना गर्हणं२७ तु तत् । अभ्यर्थनापरैर्वाक्यैः पृच्छा२८ऽर्थान्वेषणं२९ मतम् । प्रसिद्धि३०र्लोकसिद्धार्थैरुत्कटैरर्थसाधनम् । साहस्य३१ मभिभूतस्य साहस्यात् क्षोभवर्त्तनम् । संक्षेपो३२ यत्तु संक्षेपादात्मनार्थे प्रयुज्यते । गुणानां कीर्त्तनं यत्तु तदेव गुणकीर्त्तनम्३३ । स शेषो३४भण्यते वाक्यं यत् साहस्य पुरःसरम् । मनोरथ३५स्त्वभिप्रायस्तोक्तिर्भङ्ग्यन्तरेण यत् । विशेषार्थोऽतिप्रस्तावेऽनुक्तसिद्धि३६रुदीर्य्यते । स्यात्प्रमाणयितुं पूज्यं प्रियोक्ति३७र्हर्षभाषणम्" ।

नाटकीय त्रि॰ नाटके भवः तत्र वर्त्तः "दृङ्गाच्छः" पा॰छ । नाटके वर्त्तमे पदार्थे "पूर्वङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः" माघः । [ऽस्य । (तरमल) स्त्याते बतापनसे त्रिका॰ ।

नाटाम्ब(म्ब) पु॰ नटानां प्रियः अम्ब् नाटः अम्बो(म्बो)रस्यो-

नाटार पुंस्त्री नट्या अपत्यम् वा आरक् । नट्या अपत्ये

नाटिका स्त्री दृश्यकाव्यभेदे तल्लक्षणं यथा "नाटिका कृप्रख्या स्यात् स्त्रीप्राया चतुरङ्किका । प्रख्यातो धीरललितस्तत्र स्यान्नायकोऽपरः । स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताऽथ वा । नवानुरागा कन्यात्र नायिका नृपवंशजा । सम्भवत्येतं नेताऽस्यां देव्याख्यानेन शङ्कितः । देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा । पदे पदे मानवती तद्वशः सङ्गमो द्वयोः । इत्तिः स्यात् कैशिकी स्वल्पविमर्शः सन्धयः पुनः" । द्वयोर्नायकनायिकयोः । यथा रत्नावली विद्धशालभञ्जिकादि" सा॰द॰ । सङ्गीतदामोदरेऽत्र कश्चिद्विशेष उक्तस्तत्रैव दृश्यः ।

नाटित त्रि॰ चु॰ नट—क्त । १नताभिनये भावे क्त २अभिनये कार्ये क । नाटितक नटकर्त्ते ।

नाटेय पुंस्त्री नट्या अपत्यम् क्षुद्रत्वेऽपि ढ्रको॰भावपक्षे स्त्रीभ्योढक्" पा॰ ढक् । नट्या अपत्ये

नाटेर पुंस्त्री नट्या अपत्यं क्षुद्राभ्यो वा ढ्रक् । नट्या अपत्ये

नाट्य न॰ नटस्य इदं कर्म्म "छन्दोगौक्थिकयाज्ञिकेत्यादिना" पा॰ यञ् । १नटकर्म्मे नृत्यगीतवाद्यात्मके २नाट्ये वाक्यार्थाभिनये च तत्फलादिकं सङ्गीतदा॰ उक्तं यथा

"देवर्षिक्षितिपालपूर्वचरितान्यालोक्य धर्मादयस्तत्तत्तावान्वितभूमिकाभिनयने स्यादर्थसिद्धिः परा । सङ्गीतायुतचित्तवृत्तिकरणावस्था भवन्त्यङ्गना ज्ञानं शङ्करवेदवेति कथितं नाट्यं चतुर्वर्गदम् । यो यस्य दयितो भावः स तं नाट्ये निरीक्षते । अतः सर्वमनोहारि नाट्यं कस्य न रञ्जकम् । नाट्योत्पत्तिर्यथा "इहातुभूयते ब्रह्मा यक्रे चाभ्यर्थितः पुरा । चकारात्रत्र वेदेभ्यो नाट्यवेदन्तु पञ्चमम् । उपवेदोऽथ वेदाश्च चत्वारः कथिताः स्मृतौ । तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे । तेनापि भरताद्योक्तस्तेन मर्त्ते प्रचारितः । शिवाज्ञयोनिभरताः स्तस्मादस्य प्रयोजकाः" । नाट्यारम्भस्तु कर्त्तादिनिरूपणाय पौ॰धा॰ वसिष्ठ आह "त्रिकोणराशिलग्नस्थविशाखस्तेन्द्रवारीश्वरपौष्णभेषु । सङ्गीतकलादिसमस्तकर्म कार्यं विभौमार्कजवासरेषु" । श्रीपतिरपि "कृतः पुष्यो वासवं चानुराधा ज्येष्ठा पौष्णं वारुणं चोत्तराश्च । पूर्वाषाढैः कीर्त्तितचन्द्रवर्त्तैर्नटारम्भे शोभनोऽयं भवर्गः" । काश्यपः "लग्नसंस्थे बुधे चन्द्रे बुधराशौ च वीक्षिते । शुभग्रहैश्चतुर्थस्थैर्नाट्यारम्भः प्रशस्यते" । अतएव रत्नमालायाम् "बुधे विलग्ने शशिनि शराशौ शुभवीक्षिते । शिष्टकस्थैः शुभैर्नाट्यप्रारम्भः सद्भिरिष्यते" ।

नाट्यधर्मिका स्त्री नाट्यस्य धर्मोऽस्यत्र क्रियायाम् ठन् । "सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्मिका" शेषचन्द्रोक्ते दर्शनार्थे शास्त्रोक्ते तीर्थविशेषे नटकर्म्मे

नाट्यप्रिय पु० नाट्यं प्रियमस्य। शिवे महादेवे हेमच०।

नाट्यभाषा स्त्री नाट्ये प्रयोक्तव्या पात्रभेदेन भाषा। नाटके प्रयोक्तव्ये पात्रभेदेन भाषाभेदे साच सङ्गीतदा० उक्ता नाटकशब्दे दर्शिता विशेषस्तु सा०द० उक्तो यथा "पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्। शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्। आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्। अन्तःपुरचारिणाम्। चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी। प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका। योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्। शकाराणां शकादीनां शाकारीं सम्प्रयोजयेत्। वाह्लीकभाषा दिव्यानां द्राविड़ी द्रविड़ादिषु। आभीरेषु तथाऽभीरी चाण्डाली पुक्कसादिषु। आभीरी शाबरी चापि काष्ठपत्रोपजीविषु। तथैवाङ्गारकारादौ पैशाची स्यात् पिशाचवत्। चेटीनामप्यधीचानामपि स्यात् शौरसेनिका। बालानां प्रच्छन्नानाञ्च नीचप्रकृतिचारिणाम्। उन्मत्तानामाहतानाञ्चैव स्यात् संस्कृतं क्वचित्। ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपहतस्य च। भिक्षुबन्धकरादीनां प्राकृतं सम्प्रयोजयेत्। संस्कृतं सम्प्रयोक्तव्यं छिन्नीभूतमासु च। देवीमन्त्रिसुतावेश्यास्वपि केचित्तथोदितम्। यद्देशं नीचपात्रन्तु तद्देशं तस्य भाषितम्। कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः। योषित्सखीबालवेश्याकितवाप्सरसां तथा। वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा"। नाटकभाषाऽप्यत्र।

नाट्यरासक न० दृश्यकाव्यरूपकभेदे तल्लक्षणं सा०द० उक्तं यथा "नाट्यरासकमेकाङ्कं बहुतालयवस्थिति। उदात्तनायकं तद्वत् पीठमर्द्दोपनायकम्। हास्योऽङ्कुरत्र वस्त्रकारो नारी वासकसज्जिका। सुखनिर्वहणे सन्धी वास्याङ्गानि दशापि च। केचित् प्रतिमुखं सन्धिमिह वेच्छन्ति केवलम्"। "तत्र सन्धिद्वयवती यथा नर्म्मवती। सन्धित्रयवती यथा विलासवती"।

नाट्यशाला स्त्री ६त०। नाट्यस्य नाट्यार्थं शाला। (नाटमन्दिर) देवप्रासादसम्मुखस्थे गृहे "नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया" गरुडपु०।

नाट्याङ्ग न० ६त०। सा०द०उक्ते दशविधे नाट्यस्याङ्गे यथा "गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका। प्रच्छेदकस्त्रिगूढञ्च सैन्धवाख्यं त्रिगूढकम्। उत्तमोत्तमकञ्चान्यदुक्तप्रत्युक्तमेव च। वाक्ये दशविधं ह्येतदङ्गमङ्गं मनीषिभिः। तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः। शुष्कं गानं गेयपदं स्थितपाठ्यं तदुच्यते। सदोत्तापिता यत्र पठति प्राकृतं स्थिता। निश्चिन्तोद्यरहितं शोकचिन्तान्विताऽथवा। सुप्रसारितगात्रं यदासीदासीनमेव तु। आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च। स्त्रीपुंसयोर्विपर्य्यासचेष्टितं पुष्पगण्डिका। अन्यासङ्गं पतिं मत्वा प्रेमविच्छेदमन्युना। वीथ्यापुरःसरं गानं स्त्रियाः प्रच्छेदकोऽयं मतः। स्त्रीवेशधारिणां पुंसां नाट्यं सूक्ष्मं त्रिगूढकम्। कथन भृत्यसङ्केतः सुव्यक्तस्वरसान्वितः। प्राकृतं वचनं वक्ति यत्र तत्सैन्धवं विदुः। चतुरस्रपदं गीतं सुखप्रतिमुखान्वितम्। द्विगूढं रसभावाढ्यमुत्तमोत्तमकं पुनः। कोपप्रसादजमभिप्रेतयुक्तं रसोत्तरम्। हावहेलान्वितं चित्तस्त्रीवल्लभमनोहरम्। उक्तिप्रत्युक्तिसंयुक्तं वीपालम्भमनीलवत्। विद्यान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते"।

नाट्यालङ्कार पु० सा० द० उक्ते षट्त्रिंशद्विधे नाट्यस्यालङ्कारभेदे यथा "आशीराक्रन्दकपटाक्षमाभर्त्सनाश्रयाः। उत्प्रासनं स्फूर्जथोभयप्रशस्तापोपपत्तयः। आश्वासाध्यवसायौ च विसर्पोल्लेखसम्मितौ। उत्तेजनं परीवादो नीतिरर्थविशेषकम्। प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम्। उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम्। प्रवर्त्तनाख्यानयुक्तिप्रहर्षश्चोपदेशनम्। इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः" इत्युद्दिष्टाः। आशीः रिष्टजनाशंसाऽऽक्रन्दः प्रवर्त्तितं शुचा। कपटं मायया यत्र रूपमन्यद्विभाव्यते। अक्षमा सा परिभवः स्वल्पोऽपि नाभिसह्यते। गर्वोऽवज्ञेयजं वाक्यं कार्य्यसारम्य उद्यमः। यत्कृत्यं शुभवत्कार्य्यहेतोराश्रव उच्यते। उत्प्रासनं तन्नूपहासो योऽसाधौ साधुमानिनि। आकाङ्क्षा रमणीयत्वादस्तुनो या स्फुटा तु सा। अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु। मोहावधीरितार्थस्य पश्चात्तापः स एव तु। उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये। आशंसनं स्यादाशंसा प्रतिश्राध्यवसायकः। विसर्पो यत्समारब्धं कर्मानिष्टफलप्रदम्। कार्य्यमुत्तमसङ्क्षेपः। उत्तेजनं प्रतीयते। स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्। भर्त्सना तु परीवादः नीतिः नीतिः शास्त्रेण वर्त्तनम्। उक्तस्यार्थस्य

यत्तु स्यादुत्कीर्त्तनमनेकधा । उपाख्यानस्वरूपेण तत् स्यादर्थविशेषणम्२० । प्रोत्साहनं२१ स्यादुत्साहगिरा कस्यापि योजनम् । दाहाय्यं२२ सङ्कटे यत्स्यात् साहकृत्यं परस्य च । अभिमानः२३ स एव स्यात् प्रश्रयादनुवर्त्तनम्७ । अनुवृत्तिः भूतकार्य्याख्यानसत्कीर्त्तनं२८ मतम् । याच्ञा२९ तु कापि याच्ञा या स्वयं दूतसुखेन वा । परीहार२० इति प्रोक्तः कृतानुचितमार्जनम् । अवधीरितकर्त्तव्यकथनन्तु निवेदनम्२१ प्रवर्त्तनं२२न्तु कार्य्यस्य यत्स्यात् साधुप्रवर्त्तनम् । आख्यानं२३ पूर्ववृत्तोक्तिर्युक्ति२४रर्थावधारणम् । प्रहर्षः२५ प्रमदाधिक्यं शिक्षा स्यादुपदेशनम्२६" लक्षितानि ।

नाटयोक्ति स्त्री नाटये उक्तिर्विशेषोक्तिः । लौकिकप्रसिद्धार्थकशब्दान्तरेण नाट्ये पदार्थान्तराभाषणे तथा च केषाञ्चित् शब्दानामन्यार्थे पारिभाषिकत्वं नाट्ये श्लेषम् सा च सा०द० निर्णीता यथा

"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् । सर्वश्राव्यं प्रकाशं२ स्यात्तद्भवेदपवारितम्१ । रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते । त्रिपताककरेणान्यानपवार्यान्तरा कथा । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्४ । किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते । श्रुत्वेवानुक्तमर्थं तत्स्यादाकाशभाषितम्५ । दत्तां सिद्धास्त्र सेनाञ्च वेश्यानां नाम दर्शयेत् । दक्षप्रायाणि वचिजां चेटचेटीप्रोक्तया पुनः । वसन्तादिषु वर्णेषु वस्तुनो नाम यद्भवेत् । नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम् । नायिकानायकाख्यानां संज्ञा-प्रकरणादिषु । नाटिकाप्रकृतादीनां नायिकाभिर्विशेषणम् । प्रायेण चन्द्रकः साधिर्गमैः स्थाने प्रयुज्यते । राजा स्वामीति देवेति भर्त्तर्भट्टेति चाधमैः । राजभिर्भिर्भयस्येति तथा विदूषकेण च । राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च । स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः । वयस्येत्यथ वा नाम्ना वाच्यो राज्ञा विदूषकः । वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् । सूत्रधारो भवेद्भाव इति वै पारिपार्श्विकः । सूत्रधारो मारिषेति कृष्णे इत्यधमैः समाः । वयस्येत्युत्तमैर्हीनो मध्यैरार्य्येति चापरैः । भगवन्निति वक्तव्यः सर्वैर्देवर्षिभिर्द्विजैः । वदेन्नाट्ये चेटीञ्च भवतीति विदूषकः । आयुष्मन् रथिनं सूतो वदेत् तातेति चेतरः । वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः । शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः । विप्रैरयमिमात्येति सचिवेति च भण्यते । साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः । अन्तःपातिभिधः पूज्यः शिष्याद्यैर्विनिगद्यते । उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः । स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः । सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः । वाच्या प्रकृतिभीराज्ञः कुमारी भर्त्तृदारिका । पतिर्वयो तथा वाच्या ज्येष्ठमध्याधमैस्त्रियः । हलेति सदृशी प्रेम्णा हञ्जे वेश्यार्जका तथा । कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरतीजनैः । आमन्त्रणेन पाषण्डा वाच्याः स्वसमयागतैः । शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः । यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा । तेनैव नाम्ना वाच्योऽसौ श्रेयाशान्ये यथोचितम्" । "अमरे तु वासुराचार्य्यस्तु मारिषः" वासुरधिकः पठितः ।

नाड पु० नाल+अस्य ड । नालशब्दार्थे अमरः ।

नाडपित् न० कच्छप्रमो "शकुन्तला नाडपित्यप्सरा भरतं दधे" शत०ब्रा० १३।५।४।१२ "नाडपिति स्थाने कच्छप्रमे" भा० । [वा०ति० नाडीशब्दे दृश्यम् ।

नाडि स्त्री नड–इन् । नाड्याम् "कुक्षः सुः सप्त नाडयः"

नाडिक न० नाड्यां हितं ठक् । कालयाके भावप्र०तत्र स्त्री त्वमपि "लसुन्नं नाडिकायाकं वार्त्ताकुं पूतिकां तथा । भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ति०त० । अत्र नाडिकायाकमिति पाठान्तरम् श्वेतकलमीति तदर्थ इति कल्पतरुः ।

नाडिका स्त्री नाडी+स्वार्थे क । नाडीशब्दार्थे

नाडिकेल पु० नारिकेल+रस्य डः । नारिकेले भरतः ।

नाडिचीर न० नाडी चीरमिव । १नल्यां २निर्वेष्टने हारा० ।

नाडिन्धम त्रि० नाडीं नर्वीं धमति धा–खश् मुम च । १स्वर्णकारे अमरः । उष्णीषाधिरोहणात् मुखेन निःश्वासैर्नाडीं धमनं धमति धा–खश् । उष्णीषाधिरोहणेन २श्वासकारके त्रि० "कथं नाडिन्धमान् मार्गान्" भट्टिः । [पानकर्त्तरि ।

नाडिन्धय त्रि० नाडीं धयति धे–खश् मुम् मुम च । नाडी-

नाडिपत्र न० नाडिप्रधानं पत्रमस्य । नाडीके शाकभेदे

नाडी स्त्री पु० नड–गन्धे अच् ङीष् च । चु० नड–भ्रंशे अच् वा गौरा० ङीष् । शिरायां वायवस्थिरास्वरूपभेदादिकं भावप्र० उक्तं यथा

"अथ शिरामाह सन्धिबन्धनकारिण्यो दोषधातु

वहाः सिराः। नाभ्यां सर्वा निबद्धास्ताःप्रतन्वन्ति समन्ततः। शरीरं सकलञ्चैतत् सिराभिः पोष्यते सदा। प्रणालीभिरिवारामाः कुल्याभिः क्षेत्रधान्यवत्"। अत्र प्रणालीभिः कुल्याभिरिति दृष्टान्तद्वयं स्थूलसूक्ष्म सिराभेदात्। "प्रसारणाकुञ्चनादिक्रियाभिः सततं तनौ। सिरा एवोपकुर्वन्ति ताः स्युः सप्त शतानि तु। यथा द्रुमदले साक्षात् दृश्यन्ते प्रततः सिराः"। तथैव "नाभिस्थाः प्राणिनां प्राणाः प्राणाच्चाभिरुपाश्रिता। सिराभिराहृता नाभिचक्रनाभिरिवारकैः"। तद्यथा तासां खलु स्थूलसिराः चत्वारिंशत् तासां दश वातवहाः दश पित्तवहाः दश श्लेष्मवहाः दश रक्तवहाः। तासां खलु वातवहानां वातस्थानगतानां सपञ्चसप्ततिशतानि१७५ भवन्ति। तावत्य१७५ एव पित्तवहाः पित्तस्थानगताः। श्लेष्मवहाः तावत्यः१७५ श्लेष्मस्थानगता रक्तवहास्तावत्यः१७५ यकृत्प्लीहगता एवं सिराः सप्तशतानि भवन्ति। तत्र वातवहाः एकस्मिन् सक्थ्नि पञ्च विंशतिः एतेनेतरसक्थि२५ बाहू च व्याख्यातौ (५०)। विशेषतः कोष्ठे चतुस्त्रिंशत् तासां श्रोण्यां गुदमेढ्रादिश्रिता अष्टौ। द्वे द्वे पार्श्वयोः४। षट् पृष्ठे तावत्य ६ एवोदरे दश वक्षसि एवं (३४)। एकचत्वारिंशद् जत्रुण ऊर्द्ध्वम् तासां चतुर्दश १४ ग्रीवायां ४ चतस्रः कर्णयोः ९ नव जिह्वायां ६ षट् नासिकायां ८ अष्टौ नेत्रयोः (४१)। एवं वातवहानां सपञ्चसप्ततिशतं१७५ भवन्ति। एवं विभागः पित्तवहानामपि विशेषतस्तु पित्तवहा नेत्रयोर्दश १० कर्णयोर्द्वे २ एवं रक्तवहा श्लेष्मवहास्तु षोडश १६ ग्रीवायां कर्णयो द्वे एवं सिराणां सप्तशतानि व्याख्यातानि। "क्रियाणामप्रतीघातमसोहं बुद्धिकर्मणाम्। करोत्यन्यान् गुणांश्चापि स्राः सिराः पवनस्वरन्"। क्रियाणां प्रसारणाकुञ्चनादीनाम्। असोहं बुद्धिकर्मणाम् बुद्धीन्द्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये ज्ञानं न करोतीत्यर्थः। अन्यान् गुणान् रसादिव्यापनद्वारा शरीरपोषणादीन्। "यदा तु कुपितो वायुः स्राः सिराः प्रतिपद्यते। तदास्य विविधा रोगा जायन्ते वातसम्भवाः। भ्राजिष्णुतामक्षरुचिमग्निदीप्तिमरोगताम्। करोत्यन्यान् गुणांश्चापि पित्तमात्मसिरास्वरन्" अरोगतां पैत्तिकरोगानुत्पत्तिं करोति। अन्यान् गुणान् मेधाबुद्धिदर्शनशक्त्यादीन्। "यदा तु कुपितं पित्तं सेवते स्रवहाः सिराः। तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः। स्नेहभङ्गेषु सन्धीनां स्थैर्यं बलमरोगताम्। करोत्यन्यान् गुणांश्चापि बलासः स्राः सिरास्वरन्"। अरोगतां श्लैष्मिकरोगानुत्पत्तिम् अन्यान् गुणान् बलपुष्ट्यादीन्। "यदा तु कुपितः श्लेष्मा स्राः सिराः प्रतिपद्यते। तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः। धातूनां पूरणं सम्यक् सर्वज्ञानसंशयम्। स्रसिरासु चरद्रक्तं कुर्यान्नान्यान् गुणानपि" अन्यान् गुणान् बलपुष्ट्यादीन्। "यदा तु कुपितं रक्तं सेवते स्रवहाः सिराः। तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः। तत्रारुष्या वातवहाः पूर्यन्ते वायुना सिराः। पित्तदुष्टास्तु नीलास्ता पीता गौर्य्यः स्थिराः कफात्। अस्वच्छरास्तु ता रक्ताः सुखस्पर्शोष्णशीतलाः"। यास्तु० नाडीसंख्या अन्यथोक्ता। कायवज्रे १९१०पृ० दृश्या। पदार्थादर्शे च "पूर्वोक्तायाः सुषुम्णाया मध्यस्थायाः सुलोचने। नाभिहृत्कण्ठतालुभ्रू मध्यपर्व सप्तदशवाः। अधोमुख्यः सिराः काश्चित् काश्चिदूर्द्ध्वमुखास्तथा। सिरास्तिर्यग्गतास्ताश्च तत्र शतत्रयाधिकाः। नाड्योऽर्द्धलक्षसङ्ख्याताः प्रधानाः सप्तदीरिताः। तासु सर्वासु बलवान् प्राणो नादः समन्ततः" संस्थितः सर्वदेहान्तः" इति तत्रापि दशनाडीनां प्राधान्येनोत्कीर्त्तनं सा०ति० यथा "नाडीर्दश विदुस्तासु मुख्यास्तिस्रः प्रकीर्त्तिताः। इडा यामे तयोर्मध्ये सुषुम्णा पिङ्गलाऽपरे। मध्ये तासपि नाडी स्यादग्निसोमस्वरूपिणी। गान्धारी हस्तिजिह्वा च पूषा चालम्बुषा तथा। यशस्विनी शङ्खिनी च कुहूः स्युः सप्त नाडयः। नाड्योनन्ताः समुत्पन्ना सुषुम्णायाश्चपर्वसु"। रोगविशेषज्ञानार्थं नाडीपरीक्षा भावप्र०उक्ता यथा अथ नाडीपरीक्षामाह। "पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु। अङ्गुष्ठमूलगां नाडीं परीक्षेत भिषग्वरः। अङ्गुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत्। तत्रेष्टया सुखं दुःखं जानीयात्कुशलोऽखिलम्। सद्यःस्नातस्य सप्तस्य क्षुत्तृष्णातपशीलिनः। व्यायामक्लान्तदेहस्य सम्यक् नाडी न बुध्यते। वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले। पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे। तर्जनीमध्यमामध्ये वातपित्ताधिके स्फुटा। अनामिकायां तर्जन्यां व्यक्ता वातकफे भवेत्। मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके। अङ्गुलि

लितयेऽपि स्वात्प्रव्यक्ता सन्निपाततः। वाताद्वक्रगतिस्त्वन्ते पित्तादुत्सृत्य गामिनी। कफात्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता। वक्रसृत्सृत्य चलति धमनी वातपित्ततः। वहेद्वक्रस्तु मन्दस्तु वातश्लेष्माधिकत्वतः। उत्सृत्य मन्दस्त्वचति नाडी पित्तकफेऽधिके। कामात् क्रोधाद्गवहा क्षीणा चिन्ताभयद्रुता स्थिता स्थिता च जेया सा हन्ति स्थानच्युता तथा। अतिक्षीणा च शीता च प्राणान् हन्ति न संशयः। ज्वरकोपेन धमनी सोष्णा वेगवती भवेत्। मन्दाग्नेः क्षीणधातोश्च मन्दतरा मता। अपक्वा क्षुधितस्य स्यात् स्वस्थस्य भवति स्थिरा। सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता"। अत्र विशेषो नाडीप्रकाशे

"सार्द्धत्रिकोटयो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम्। नाभिकन्दनिबद्धास्तास्तिर्यगूर्ध्वमधः स्थिताः। द्विसप्ततिः सहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः। देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः। तासाञ्च सूक्ष्मसुषिराणि शतानि सप्त स्युस्तानि यैरसकृदम्बरसं वहद्भिः। आप्याय्यते वपुरिदं हि रसाममीषामभ्रैः स्रवद्भिरिव भिन्नगतैः सहस्रैः। आपादतः प्रततगात्रमशेषमेषामन्तस्तलादपि च नाभिपुरःस्थितेन। एतन् मृणाल इव मर्म च येन सर्वं कायं रसामिह सिराशतसप्तकेन। सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटास्तासाम्। एका परीक्षणीया दक्षिणकरमूलविन्यस्ता। "तिर्यक्कूर्मौ देहिनां नाभिदेशे वामे वक्रं तस्य पुच्छञ्च याम्ये। ऊर्ध्वे भागे हस्तपादौ च वामौ तस्याधस्तात् संस्थितौ दक्षिणौ तौ। वक्त्रे नाडीद्वयं तस्य पुच्छे नाडीद्वयं तथा। पञ्च पञ्च करे पादे वामदक्षिणभागयोः। वामे भागे स्त्रिया योज्या नाडी पुंसस्तु दक्षिणे। इति प्रोक्तो मया देवि! सर्वदेहेषु देहिनाम्"। नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटतामपेक्ष्य परीक्षा। साम्यन्तु न स्यादेव। क्लिन्नस्य तु प्रकृतिस्थता। "अंकुशस्य तु या मूले धमनी जीवसाक्षिणी। तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम्। वातं पित्तं कफं द्वन्द्वं सन्निपातन्तथैव च। साध्यासाध्यविवेकञ्च सर्वं नाडी प्रकाशयेत्। प्रातःकृतसमाचारः कृताचारपरिग्रहम्। सुखासीनः सुखासीनं परीक्षाथ हृदाचरेत्। सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातपसेविनः। आयामाक्रान्तदेहस्य सम्यङ्नाडी न दृश्यते। तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे। तथा न ज्ञायते नाडी यथा दुर्गतरा नदी। आदौ च वहते वातो मध्ये पित्तं तथैव च। अन्ते च वहते श्लेष्मा नाडिकात्रयलक्षणम्। भूलता गमनप्राया स्वस्था स्वास्थ्यमयी सिरा। प्रातःस्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता। सायाह्ने धावमाना च सिराक्लेशविवर्जिता। वाताद्वक्रगता नाडी अपक्वा पित्तवाहिनी। स्थिरा श्लेष्मवती ज्ञेया स्निग्धिते स्निग्धिता भवेत्। सर्पलवोकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाडीम्। पित्ते च काकलावकमेकादिगतिं विदुः सुधियः। राजहंसमयूराणां पारावतकपोतयोः। कुक्कुटादिगतिं धत्ते धमनी कफसंहता। सुप्तः सर्पगतिं नाडीं सुप्तः भेकगतिं तथा। वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः। भुजगादिगतिञ्चैव राजहंसगतिं सिराम्। वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः। मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा। पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः"।

"लावतित्तिरिवार्त्तीकगमनं सन्निपाततः। कदाचन्मन्दगा नाडी कदाचिच्छीघ्रगा भवेत्। त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः। यदा यं धातुमाप्नोति तदा नाडी तथा गतिः। तथाहि सुखसाध्यत्वं नाडीज्ञानेन बुध्यते"। "नाडी यथा कालगतिस्तथायाणां प्रकोपशान्त्यादिभिरेव भूयः"। "मन्दं मन्दं शिथिलशिथिलं व्याकुलाव्याकुलं वा स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा। नित्यं स्थानात् स्खलति प्रनरप्यकुलिं संसृजेद्वा भावैरेवं बहुविधविधैः सन्निपातादसाध्या। शक्रातापेऽपि शीतत्वं शीतत्वे तापिता सिरा। नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः। त्रिदोषे स्यन्दते नाडी मृत्युकालेऽपि निश्चला। पूर्वं पित्ततति प्रभञ्जनगतिं श्लेष्माण्यसाविभ्रतीम् स्थानभ्रमणं सुदुर्विदधतीं चक्राधिरूढामिव। तीव्रत्वं दधतीं कदापिगतिकां सूक्ष्मत्वमातन्वतीं न साध्यां धमनीं वदन्ति सुधियो नाडीगतिज्ञानिनः। यात्युच्चा च स्थिरात्यन्ता या चेयं मांसवाहिनी। या चं सूक्ष्मा च वक्रा च तामसाध्यां विदुर्बुधाः। मारप्रवाहमूर्च्छाभयशोषप्रसूतकारणाद्नाडी। संमूर्च्छितापि गाढं पुनरपि सा औविसं धत्ते। पातितः ग्रन्थितो भेदी नष्टसुक्रश्च यो नरः। ज्ञायते विज्ञयस्तस्य न किञ्चिन्मृत्युवा-

रथम्"। अन्यत्रापि। "तथा भूताभिषङ्गेऽपि त्रिदोष-वदुपस्थिता। समं वा वहते नाडी तथा च न क्रमं गता। अपमृत्युर्न रोगाङ्गा नाडी तत्सन्निपातवत्। स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदाः। भवन्ति निश्चला नाड्यो न किञ्चित् तत्र दूषणमिति"। अन्ये त्वाहुः "तोकवातकफैर्दुष्टं पित्तं वहति दारुणम्। पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति"। अत्र कश्चित् "स्वस्थानच्यवनं यावद्गमन्या नोपजायते। तावच्चिकित्सासत्त्वेऽपि नासाध्यत्वमिति स्थितिरिति"। प्रसङ्गात् कालनिर्णयमाह "भूलताभुजगाकारा नाडी देहस्य धंक्रमात्। विशीर्णा क्षीयतां याति मासान्ते मरणं भवेत्। क्षणाद्गच्छति वेगेन शान्ततां लभते क्षणात्। सप्ताहान्मरणं तस्य यद्यङ्गं शोषवर्जितम्। हिमवद्विषदा नाडी ज्वरदाहेन तापिनाम्। त्रिदोष-कार्यभजतां तदा मृत्युर्दिनत्रयात्। निरीक्ष्या दक्षिणे प्राणे तदा चैषा विशेषतः। सुखे नाडी वहेच्चित्रं ततस्तु दिनतुर्यकम्। गतिन्तु भ्रमरस्येव वहेदेकदिनेन तु। कम्पेन स्पन्दते नित्यं पुनर्जंगति चाकुली। मध्ये द्वादशयामानां मृत्युर्भवति निश्चितम्"। दक्षिण इति पुंसः। स्त्रियास्तु वाम एव नचेति। "स्थित्वा नाडी मुखे यस्य विद्युद् द्योतिरिवेक्ष्यते। दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम्। स्वस्थानविच्युता नाडी यदा वहति वा न वा। ज्वाला च हृदये तीव्रा तदा ज्वालावधि स्थितिः। अङ्गप्रहणे नाडीनां सान्निपातिकरूपेण भवन्ति सर्ववेदनाः"। ज्वररूपमाह। "ज्वरकोपे च धमनी शोष्णा वेगवती भवेत्। उष्णा पित्तादृते नास्ति ज्वरो नाम्युष्णया विना। उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते"। अन्यत्र च "ज्वरे च वक्रा धावन्ती तथाच मरुतः शुभे। रमणान्ते निशि-प्रातः तप्ता दीपशिखा यथा"। तत्रापि विशेषमाह "शोष्णा रूक्षा स्थिरा मन्दा नाडी सहजवातजा। स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते। द्रुता च सवला शीघ्रा दीर्घा पित्तज्वरे भवेत्। शीघ्रमाहननं नाड्याः कठिन्यास्तु चला तथा। अजीर्णेनातितरां सस्पन्दश्च प्रकीर्तितम् नाडी तन्तुसमा मन्दा शीतला शुद्धदोषजा"। इन्द्रजामाह "मन्दा तरला स्थूलकठिना वातपित्तजा। रैवम्ब दर्शते तृष्णा मन्दा स्यात् शेषवातजा। निरन्तरं खरं रूक्षं मन्दशुद्धाप्ति वातजम्। दक्षवातभवे तस्य नाडी स्यात् पित्तसन्निभा। रूक्षा शीता स्थिरा नाडी पित्तशुद्धसमुद्भवा"। "मध्ये करे वहेन्नाडी यदि सन्तर्पिता ध्रुवम्। तदा स्थूलं मनुष्यस्य रुधिरा पूरिता सदाः"। आगन्तुकरूपभेदमाह "भूतज्वरे सेक इवातिवेगा धावन्ति नाड्यो हि यथाम्बुवेगाः"। तथा "ऐकाहिके न कथन प्रदूरे अथान्तगा सा विषमज्वरेण। द्वितीयके वापि तृतीयतुर्ये गच्छन्ति तप्ता अभितस्तु क्रमेण"। अन्यत्रापि "उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते। उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च। भवेत् क्षीणगतिर्नाडी ज्ञातव्या वैद्यसत्तमैः"। "व्यायामे श्रमणे चैव चिन्तायां श्रमशोकतः। नानाप्रभावगमना शिरा गच्छति विज्वरे"। अजीर्णरूपमाह "अजीर्णे तु भवेन्नाडी कठिना परितोजडा। प्रसन्ना च द्रुता गुह्या त्वरिता च प्रवर्त्तते"। तत्र विशेषमाह "पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जडा। अस्रक्पूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी। नाड्या भक्षितद्रव्यज्ञानम् यथा "पुष्टिस्तैलगुडाहारे मांसे च लगुडाकृतिः। क्षीरे च स्निग्धवेगा मधुरे भेकवद्गतिः। रम्भागुडवटाहारे कृशगुल्कादिभोजने। वातपित्तार्त्तिरूपेण नाडी वहति निष्क्रमम्"। नाड्या पीतरसज्ञानम् "मधुरे वर्हिगमना तिक्ते स्याद्भूजता गतिः। अम्ले कोष्णा भुवगतिः कटुके भृङ्गसन्निभा। कषाये कठिना म्लाना लवणे सरला द्रुता। एवं द्वित्रिचतुर्योगे नानाधर्मवती शिरा"। तथा "द्रवेऽतिकठिना नाड्री कोमला कठिनाशने। द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च। क्षौद्रे पृथग्ग्रन्थिलेव पिष्टपुष्टेव जायते"। अग्निमान्द्यधातुक्षयलिङ्गम् "मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत्" तदुक्तम् "क्षीणधातौ च मन्दाग्नौ नाडी क्षीणतमा ध्रुवम्"। तथा "मन्देऽग्नौ क्षीणतां याति नाड्री हंसाकृतिस्तथेति" अन्ये तु "व्यामाश्रये पुष्टिविवर्द्धनेन भवन्ति नाड्योऽग्रभुजाभिवृत्ताः। आहारभाग्यादुपवासतो वा नश्यन्ति नाड्यो भुजगाप्रमाणा"। प्रसङ्गाद्दीप्ताग्निज्ञानमाह "लघ्वी भवति दीप्ताग्नेः करे मण्डूकसंप्लुता। तस्याग्नेर्मन्दता देहे तथ वा ग्रहणीगदे"। तथा "भवेन शान्ता प्रहणीगदेन निर्वीर्यरूपा लतिसारभेदे। पित्तत्रिकार्या द्रवगा कदाचिदामातिसारे प्रथुला जडा च"।

अथ विसूचिका ज्ञानम्। "निरोधो मूत्रशकृतोर्विड्-ग्रहे त्वितराश्रिताः। विसूचिकाभिभूते च भवन्ति मेकवत्क्रमाः"। प्रसङ्गादानाहमूत्रकृच्छ्रज्ञानमाह "आनाहे मूत्रकृच्छ्रे च भवेन्नाडीगरिष्ठता"। शूलज्ञानमाह "वातेन शूलेन मरुत्प्रवेन सदैव वक्रा हि सिरा वहन्ति। ज्वालामयी पित्तविचेष्टितेन साध्या न शूले न च शुष्करूपा"। अथ प्रमेहज्ञानम्। "प्रमेहे ग्रन्थि-रूपा या सतप्ता त्वामदूषणे"। विषविष्टम्भगुल्म-ज्ञानमाह "उद्वर्तिसदृशा विषरीष्टिकायां विष्टम्भ गुल्मेन च वक्ररूपा। अत्यर्थवातेन अधःस्फुरन्ती उत्तानभेदिन्यसमाप्तिकाले"। गुल्मे विशेषमाह क्वचित् "गुल्मेन कम्पोऽथ पराक्रमेण पारावतस्येव गतिं करोति" अथ भगन्दरज्ञानम् "व्रणार्धं कठिने देहे प्रयाति पैत्तिकं क्रमम्। भगन्दरातुरूपेण नाडीव्रणनिवेदने। प्रयाति वातिकं रूपं नाडी पावकरूपिणी"। अथ वान्तादिज्ञानम् "वान्तस्य यस्याभिहतस्य जन्तोर्वेगाव-रोधाद्विहितस्य भूयः। गतिं विधत्ते धमनी गजेन्द्र-नरावमानेव कफोल्वणेन। रोगादिक्रमपि रक्तादि-ज्ञानक्रमेण ज्ञातव्यम्। "क्वचित् प्रकरणोल्लेखात् क्वचि-दौचित्यमात्रतः। क्वचित् देशात् क्वचित् कालात् सङ्कीर्णं गदनिर्णयः"। नाडीपरिचयज्ञानं प्रायशो नैव दृश्यते। तेन धात्र्यात् मयोक्तं यत्तत् समाधेयस्तत्तमैः"।

"मातृस्तु खलु रसरक्तायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा" सुश्रु० "प्राग् नाडीच्छेदनात् पुंसो जातकर्म विधीयते" इति स्मृतिः "शतं चैका च हृदयस्य नाड्यः" श्रुतिः "प्रहृत्ता हृदयात् सर्वाः तिर्यगूर्ध्वमधस्तथा। वहन्त्यन्नरसान् नाड्यो दशप्राणप्रचोदिताः" भा०व० २१२अ०। २व्रणान्तरे ३गण्डदूर्वायाम् कुहकचर्यायाञ्च घटीरूपे दण्डात्मके ४समयभेदे च मेदि०। "दशगुर्वक्षरः प्राणः षड्भिः प्राणैर्विनाडिका। तद्द्वयं तु भवे-न्नाडी" सू०सि०। तत्कालज्ञाने यन्त्रादिकं घटीशब्दे दर्शितम्। "त्रिवारां रजनीं प्राङ्मध्याह्नाद्यन्तचतुष्टयम्। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति०त०। नक्षत्रविशेषज्ञापके ५नाड्याकारे रेखाभेदे उपयमशब्दे नाडीकूटनिरूपणे १२५४पृ० दृश्यम्। "एकराश्या-दियोगे च नाडीदोषो न विद्यते" ज्यो०त० "अश्वि-न्यादिखिलेचक्रं सर्पाकारं त्रिनाडिकम्" ज्यो०त०। चक्रशब्दे ब्रह्मनाडीनिर्णये २८१६ पृ० दृश्यम् "आद्रां-दिक्रं लिखेच्चक्रं मृगान्तञ्च त्रिनाडिकम्" "एकना-डीस्थधिष्ण्यानि यत्र स्युर्वरकन्ययोः" तत्रैव। स्वरोदये षड्नाडीचक्रनवनाडीचक्रयोस्तु चक्रशब्दे दर्शितयो-रपि रेखाविशेषस्यैव नाडीशब्दार्थत्वम्। सिराबोध-कस्य नाडीशब्दस्य स्वाङ्गवाचकत्वात् "नीडीतन्त्र्योः स्वाङ्गे" पा० बहु० न कप्। बहुनाडिः कायः। अस्वाङ्गत्वे तु कप्। घटिनाडीको दिवसः। ६ग्रहा-ख्यास्तु सौरीभिरिव नाडीभिरमृताख्याभिरन्वयः" रघुः नाले शाकादीनां (डाटा) ख्याते ७अवयवभेदे च।

नाडीक पु० नाड्या कायति प्रकाशते कै-क। (पाटशाक) काण्डप्रधाने शाकभेदे पट्टशाके "नाड़ीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः" भावप्र०।

नाडीकलापक पु० नाड़ीनां नालानां कलापः संघोऽत्र कप्। सर्पाकीलतायां भावप्रका०।

नाडीकूट न०नाड्या रेखाभेदेन कूटं नक्षत्रकूटं साध्यं यत्र। उपयमशब्दे दर्शिते १२५४ पृ० विवाहाद्यङ्गे नाड़ीचक्रस्थ चितनक्षत्रसमूहे।

नाडीकेल पु० नारिकेल+पृषो०। नारिकेले शब्दर०।

नाडीच पु० नाड्या चीयते चि-घञ् कर्मणि ड ३त० (नाडिता) शाकभेदे चुचुके "नाड़ीचशाकं द्विविध तिक्तं मधुरमेव च। रक्तपित्तहरं तिक्तं कृमिकुष्ठवि-नाशनम्। मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत्" राजवल्लभः।

नाडीचक्र न० नाड़ीनां चक्रमिव बन्धनस्थानम्। नाभिम-ण्डलस्थे। चक्रभेदे "नाभिमण्डलमासाद्य कुक्कुटाण्ड-मिव स्थितम्। नाडीचक्रमिह प्राहुस्तत्रान्नाड्यः सम-स्ताः" रेखाविशेषे नक्षत्रभेदज्ञापके २चक्रभेदे उपयम-शब्दे १२५४ पृ० दृश्यम्।

नाडीचरण पुंस्त्री नाड़ी नालमिव चरणौ यस्य। कन्द-माले त्रिका० स्त्रियां जातित्वात् ङीष्।

नाडीजङ्घ पुंस्त्री नाडीव नालमिव जङ्घाऽस्य। १नाले त्रिका० २चक्रभेदे। स च द्विविधस्तत्र इन्द्रद्युम्नसरसि स्थितश्चिर-जीवी एकः। यथोक्तं भा०व० १९८अ० "अस्ति खलि-न्द्रद्युम्नं नाम सरस्तस्मिन्नाडीजङ्घोनाम वकः प्रतिवसति सोऽस्मत्तश्चिरजाततरस्तं पृच्छेति" अन्यः कश्यपात्मजः राजधर्माख्यः। तत्कथा "ततोऽस्तं भास्करे याते सन्ध्या-काल उपस्थिते। आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः। नाडीजङ्घ इति ख्यातो दयितो ब्रह्मणः

सखा। वसुराजो महाप्राज्ञः कश्यपस्यात्मसम्भवः। राजधर्मेति विख्यातो बभूवाप्रतिमो भुवि। देवकन्यासुतः श्रीमान् विद्वान् देवसमप्रभः। महामरणसम्पन्नो मूषकैरर्कसन्निभैः। भूषितः सर्वगात्रेषु देवगर्भः प्रियाञ्जनम्" भा०शा० १६९अ०। २सुनिभेदे "नाडीजङ्घः सुरगुरुसुनिर्वक्रि दृष्टैरकाशौ मासवेतौ न शुभफलदौ पौषमासौ न शेषान्" मलमा०त०।

नाडीतरङ्ग पु० नाडी नाला तरङ्ग इव यत्र। १काकोले २हिण्डके ३रक्तहिण्डके च मेदि०।

नाडीतिक्त पु० नाड्या तिक्तः। नेपालनिम्बे राजनि०।

नाडीदेह पु० नाडीसारो देहोऽस्य। अतिक्रशे भङ्गिनि शिवस्य द्वारपालभेदे।

नाडीनक्षत्र नाड्यां षड्नाड़ीचक्रनवनाड़ीचक्रयोः स्थितं नक्षत्रम्। नाडीत्रापकरेखास्थनक्षत्रभेदे। २८।६पृ० चक्रशब्दे षड्नडयादिचक्रनिरूपणे दृश्यम्।

नाडीयन्त्र न० नाड़ीव नालीव यन्त्रम्। सुश्रुतोक्ते शल्योद्धारणार्थे विंशतिविधे यन्त्रभेदे "तत्र मनःशरीरबाधाकराणि शल्यानि तेषामाहरणोपाया यन्त्राणि। तानि षट्प्रकाराणि तद्यथा स्वस्तिकयन्त्राणि, सन्दंशयन्त्राणि तालयन्त्राणि, नाड़ीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति" इत्युपक्रमे "विंशतिर्नाड्यः"। "नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकार्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च" सुश्रु०

नाडीवलय न० नाड्या घटिकायाः ज्ञानार्थं वलयं वलयाकारं यन्त्रम्। सि०शि० उक्ते लग्नादिज्ञानार्थे नाडीरूपकालज्ञानोपाये यन्त्रभेदे

"अथ वृत्ते कुजलग्ने लग्नं चाधो खगोलनक्षिकान्तः। भूलग्नं ध्रुवयष्टिस्थं चक्रं यष्ट्या निजोदयैश्चाङ्कम्। व्यस्तैर्यष्टीभायासुदयेऽर्कं न्यस्य नाडिका ज्ञेयाः। दृष्टच्छायासूर्यान्तरेऽथ लग्नं प्रभायां च। केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र धृते। अथ वा कीलच्छायातलमध्ये स्युर्नता नाड्यः" भू०। "अत्र सारदारुमयमिष्टप्रमाणं चक्राकारं समं नेम्यां प्रतिघटिकाङ्कं यन्त्रं खगोलमध्यस्थायां ध्रुवयष्टौ पृथ्वीमध्यस्थाने प्रोतं कार्यम्। तथा स्वोदयप्रमाणैर्मेषादिराशिभिरसमैरुभयपार्श्वयोः षड्भिर्मेषं च बुद्धिमताङ्कनीयम्। तैश्चोदयैर्विलोमैरङ्कम्। मेषात् पश्चिमतो वृषो वृषात् पश्चिमतो मिथुनम् इत्यादि। च चाङ्कनप्रकारः सर्वतोभद्रयन्त्रे मया पठितः। "वृत्तौ चक्रभागैस्तदन्तर्घटीभिः स्वदेशोदयैश्चाङ्कयेदस्य पार्श्वम्। प्रतिस्रोटयं स्वाग्निभिः३० क्षेत्रभागैस्त्रिभागाभिधैर्दाशभागैः३।२०नैवांशैः३।२०। त्रिभागै०र्द्विभागै१५स्तथा सस्वनाद्यैः प्रयत्नेन षड्वर्गमेवं विमृश्य"। एवं यन्त्रं कृत्वा यस्मिन् दिने तेन कालज्ञानं तस्मिन् दिने यावानौदयिको रविस्तद्भुक्तान् राशीन् मेषादेर्दत्त्वा भुज्यमानराशेर्भागान् क्षेत्रभागेषु दत्त्वाग्रे रविचिह्नं कार्यम्। तस्मिन् दिन उदयकाले यष्टिच्छाया या पश्चिमतो गता तस्यां छायायां रविचिह्नं यथा भवति तथा यन्त्रं स्थिरं कार्यम्। ततोऽनन्तरं रविर्यथा यथोपरि याति तथा तथा छायाऽधो गच्छति। छायार्कचिह्नयोर्मध्ये या घटिकास्ता दिनगता ज्ञेयाः। तथा यष्टिच्छायायां यो राशिर्यो च क्षेत्रांशास्तल्लग्नं ज्ञेयम्। स च षड्वर्गः। अथ वा किं खगोलान्तःस्थेन यष्टिप्रोतेन, चक्रान्तरिष्टप्रमाणं कीलकं प्रोतं कृत्वा स कीलको ध्रुवाभिमुखो यथा भवति तथा केनचिदाधारेण चक्रं स्थिरं कार्यम्। तथा कृते दृष्टकाले कीलच्छाया यत्र लगति तस्य यन्त्राधश्चिह्नस्य च मध्ये नतनाड़िका ज्ञेयाः" प्रमिता०।

नाडीविग्रह पु० नाड़ीमात्रशरीरः विग्रहो देहोऽस्य। शिवानुचरभेदे अतिक्रशे भङ्गिनि हेमच०।

नाडीव्रण पु०न० नाड़ीव व्रणम्। माधवकरोक्ते व्रणभेदे (नालीघा) "यः शोथमामसमिति पक्वमपेक्षतेऽन्तो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः। अभ्यन्तरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः सपूयः। तस्यातिमात्रगमनाद्रतिरिष्यते तु नाडीव यद्वहति तेन मता तु नाडी"। वातादिदोषभेदेन तस्य रूपाणि यथा "दोषैस्त्रिभिर्भवति सा पृथगेकशश्च संमूर्छितैरपि च शल्यनिमित्ततोऽन्या। तत्रानिलात् परुषरूक्षसुखी सशूला फेनानुविद्धमधिकं स्रवति क्षणात्तु। पित्तात्तृषाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकसुष्णमहःसुतापि। ज्ञेया कफाद्बहुघनार्जनपिच्छिलासा स्तब्धा सकण्डूरकृष्णा रजनीप्रदुष्टा। दाहज्वरस्वेदनमूर्च्छनवक्त्रशोषा यस्यां भवन्त्यभिहितानि च लक्षणानि। तामादिशेत् पवनपित्तकफप्रकोपाद् घोरामसाध्यकरीमिव कालरात्रिम्। दोषद्वयाभिहतलक्षणदर्शनेन तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात्"। शल्यनिमित्तलक्षणं यथा

"नष्टं कथञ्चिदनुमार्गसदीरितेषु स्थानेषु शल्यमचिरेण गतिं करोति। सा फेनिलं मथितमच्छमसृग्विमिश्रमुष्णं करोति सहसा सरुजञ्च नित्यम्"। असाध्यलक्षणसाध्ययोर्लक्षणं यथा "नाडी त्रिदोषप्रभवा न सिध्येत् शेषाश्चतस्रः खलु यत्नसाध्याः"।

नाडीशाक पु॰ नाडीप्रधानः शाकः। नाडीके (पाटशाक)

नाडीशोषणतैल न॰ चक्रदत्तोक्ते तैलभेदे "पुटपाकविधिस्त्रिवृत्त्रिविड्जातगोक्षुरकः। रसः सतैलस्त्रिगुणः कर्णस्रावहरः परः। जम्बूकस्य तु मांसेन कटुतैलं विपाचयेत्। तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति। निशार्गन्धपले पक्वं कटुतैलं पलाष्टकम्। धूसूरपत्रजरसे कर्णनाडीजिदुत्तमम्"।

नाडीस्वरसञ्चार पु॰७त॰। नाडीभेदे वायोः वहनरूपे गतिभेदे। देहमध्ये वामभागस्थायाम् इडायां श्वासादिधिक्येन सञ्चारे चन्द्रोदयः, दक्षस्थायां पिङ्गलायां तथा वहने सूर्योदयः इत्येतत् स्वरोदयग्रन्थे प्रसिद्धम्। तस्य शुभाशुभफलादिकं कालविशेषनियमञ्च प्रदर्शयते यहयामले "आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपत्क्रमतोऽहानि त्रीणि त्रीणि तयोदयत्ययम्"। त्रिपुरासारसमुच्चये तु अमावास्यावध्युदयमाह यथा "आरभ्य दर्शं प्रथमाद्यहेति वामे पुटे त्रीणि दिनानि देवः। वामेतरे त्रीणि ततो दिनानि पूर्णां तिथिं यावदथैवमेवम्। एकस्य पक्षस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम्। पक्षद्वये बन्धुसुहृद्विपत्तिः पक्षत्रये व्यत्ययतो मृतिः स्यात्" ब्रह्मयामले "चन्द्रोदये यदा सूर्यश्चन्द्रः सूर्योदये यदा। अशुभं हानिरुद्वेगः, शुभं सर्वं निवारयेत्"। चन्द्रोदये वामनाड्यां वायुगमननिरूपितसमये एवं सूर्योदये दक्षिणनाड्यां वायुगमननिरूपितसमये। कर्मविशेषे नासिकयोर्वायोः प्रवेशनिर्गमाभ्याञ्च शुभत्वमपि तत्रैव "यात्राकाले विवाहे च वस्त्रालङ्कारधारणे। शुभकर्मसु सर्वेषु प्रवेशे च यगो शुभः। विग्रहद्यूतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भङ्गे भानुनाड्यां प्रशस्यते। मोहनं शान्तिकञ्चैव दिव्यौषधिरसायनम्। विद्यारम्भः स्थिरं कार्यं कर्तव्यञ्च निशाकरे। दूरयुद्धे जयी चन्द्रः समाजे दिवाकरः। वहनृनाड्योपदेशे चैव यात्रा भवति सिद्धिदा"। यस्यां नासिकायां प्राणवायोर्गतिर्भवति तद्दोषवशात्प्रकारान्तरपूर्विका यात्रा सिद्धिदा भवतीत्यर्थः "प्रवने च प्रसङ्गे वा युवत्याश्लिङ्गनेऽपि वा। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः"। सूर्येण दक्षिणनासिकास्थप्राणवायुना, चन्द्रं वामनासिकागतप्राणवायुं पिबति तत्सङ्गकाले स्त्रीयनिःश्वासमतिनिविष्टः सन्नाकर्षयति तत्फलं तत्रैव "चन्द्रचारो विषं हन्ति सूर्यो वाताविशं नयेत्। सुषुम्णायां भवेन्मोक्ष एको देवस्त्रिधा मतः। भुक्तमात्रेण मन्दाग्नौ स्त्रीणां वश्ये ऽथ कर्मणि। शयनं सूर्यवाहेन कर्तव्यं सर्वदा बुधैः। शान्ते शोके विवादे च ज्वरिते मूर्च्छिते तथा। सज्जनस्यापि बोधार्थं चन्द्रचारं प्रवाहयेत्"। भुक्तमात्रादौ वामपार्श्वेण, शान्तादिषु दक्षिणपार्श्वेण शयनं कार्यमिति तात्पर्यम्। चतुर्दिक्षूर्द्ध्वमधस्ताच्चान्यतरस्थानमाश्रित्य यदि दूतः पृच्छति तदा कस्यां नाड्यां वायुगतिः शुभेत्याह "ऊर्द्ध्वं वामागतो दूतो श्रेयो वामपथस्थितः। पृष्ठे दक्षे तथाधस्तात् सूर्यवाहगतो मतः। पूर्वनाड्यां गतो दूतो यत् पृच्छति शुभाशुभम्। तत्सर्वं सिद्धिमाप्नोति शून्ये शून्यं न संशयः। आदौ शून्यगतः पृच्छेत् पश्चात् पूर्णो विशेद् यदि। तदा सर्वार्थसिद्धिः स्यादिति जानीहि निश्चितम्"। इदानीं प्राणवायोः प्रवेशनिर्गमाभ्यां विशेषमाह "प्रवेशकाले यद्दूतो वाञ्छति स्वप्रयोजनम्। तत्सर्वं सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्"। कर्मविशेषे नाडीविशेषगतिमाह "मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं तथा। प्रेरणाकर्षणक्षोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकर्माणि कर्तव्यानि निशाकरे"। त्रिपुरासारसमुच्चये "भूतानामुदयं द्वयोरपि बुधः संलक्षयेत् पक्षयोस्तत्रादौ वसुधोदयं निहितधीर्ग्रीवस्य दण्डं स्पृशि। देवेऽधस्पृशि वारिषोडुतवहस्योर्ध्वं शनिश्चोदयं तिर्यक्संस्पृशि मारुतस्य परितः पृष्ठे मरुद्वर्त्मनः" देवे प्राणवायौ। फलं तत्रैव "पृथ्वीजले शुभे तत्त्वे तेजोभिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभयौ व्योममारुतौ" कर्मविशेषे भूतोदयफलं त्रिपुरासारे "वज्रस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः शान्तिकपौष्टिकादिषु शुभो वह्नाय वह्नेः पुनः। वातोर्मारणदारणादिकरणे उच्चाटनोच्चोदयोर्वायोः शान्तिकनिर्विषीकरणयोर्व्योम्नो हितस्योदयः। क्रियत्कालमेकनाडीगतो वायुर्भवति तत्रापि पञ्चभूतोदयः केन क्रम इत्यपेक्षायां नाडीगतिकालं स्थानक्रमेण भूतोदयञ्चाह तत्रैव "एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति ताः। पृथि-

व्यापस्तथा तेजो वायुराकाशमेव च । मध्ये पृथ्वी तथ-
साप ऊर्द्ध वहति चानलः । तिर्यग्वायुप्रवाहस्तु नभो
वहति संक्रमे"। प्रपञ्चसारेऽपि "पुटयोरुभयोश्च दण्ड-
संस्था पृथिवी तोयमधःक्षयानुरूर्द्धम् । पवनस्तथ पार्श्वगो
ऽपि मध्ये गमनं भूतगतिस्तनूद्भवेवम्" तत्रापि बाल्या-
द्यवस्थाभेदमाह रुद्रयामले उत्तरखण्डे एकादशपटले
"स्वकीयनासिकाग्रन्तु पञ्चमं परिकीर्तितम् । यन्नासा-
पुटमध्ये तु वायुर्भमति भैरव ! । तन्नासापथमध्ये तु
भावाभावं विचारयेत् । आकाशं वायुरूपं हि तैजसं
वारुणं प्रभो ! । पार्थिवं क्रमशोज्ञेयं बाल्यास्तादि क्र-
मेण तु । वामोदये शुभा वामा दक्षिणे पुरुषः शुभः ।
वायूनां गमनं ज्ञेयं गमनावधिरेव च । केवलं मध्य-
देशे तु गमनं पवनस्य च । तदाकाशं विजानीयाद्बा-
ल्यभावं प्रकीर्त्तितम् । तिर्यग्गतिस्तु नासाग्रे वायोरु-
दयमेव च । केवलं भ्रमणं ज्ञेयं सर्वमङ्गलमेव च ।
किशोरं तद्विजानीयाद्वायौ तिर्यग्गतौ विभो ! । केवला-
र्द्धनासिकाग्रे वायुर्गच्छति दण्डवत् । तत्तैजसं विजा-
नीयात्तेजसा बलवान् भवेत् । यौवनं तद्विजानीयात्
कर्मसिद्धिर्भवेद्ध्रुवम् । यदा व्याप्य गच्छतीह नासापुटमना-
कुलम् । जलोदयं विजानीयात् तदाव्यामोहमेव च ।
तद्वृद्धगतभावस्तु विलम्बोऽधिकचेष्टया । प्राप्नोति परमां
प्रीतिं वारुणार्थोदयोऽरुणम् । यद्यधोगच्छति क्षिप्रं
किञ्चिद्दुर्भगोत्वरम् । यदा करोति प्राग् बालं तदारो-
गाद्बलोदयः । पृथिव्या उन्नतं भागं रोगार्त्तं परि-
पीडितम् । अस्तमितं महादेव । अनुलोमविलोमतः ।
पवनोगच्छति क्षिप्रं वामदक्षिणभेदतः । वामनासापुटं
याति पृथिवी जलमेव च । यदा फलाफलं दातुस-
दिताकुलमण्डले । तथैव वायवी शक्तिः फलभागं तदा
लभेत्" । अवस्थाभेदे तत्फलकथनं तत्रैव "यद्येवं
वामभागे तु बालायाः प्रश्नकर्मणि । यदि तत्र पुमान्
प्रश्नं करोति वामगामिनी । तदा रोगमवाप्नोति क-
र्मार्द्धो न भवेद्ध्रुवम् । यदि वायूदयो वामे दक्षिणे
पुरुषः स्थितः । तदा कफलमाप्नोति द्रव्यागमनदुर्लभम् ।
अकस्माद्द्रव्यहानिः स्यान्मनोगतफलापहम् । सुहृद्भङ्गं
विवादस्तु मित्रे मित्रोदयात् शुभम् । केवलं वरुणस्यैव
पुरुषो दक्षिणे शुभः । अशुभं पृथिवीदेशे भेदोऽयं
वरदुर्लभः । सदोदयं दक्षिणे च वायोस्तेजसएव च ।
आकाशस्य विजानीयात् शुभाशुभफलं प्रभो ! । यदि
भाग्यवशादेव वायोर्मन्दा गतिर्भवेत् । दक्षनासा मध्यदेशे
तदा वामोदयं शुभम् । तदा वामे विचारश्च वायुतेजः-
स्वरस्य च । आत्मोदयं विजानीयान्मित्रे हानिः स्वरे
भयम् । एवं स्वभुवनागारे यदि गच्छति वायवी ।
तस्मिन् काले पुमान् वामदक्षभागस्थसम्मुखः । तदा
कन्यादानफलं यथा प्राप्नोति मानवः । तदा वायुप्रसादेन
प्राप्नोति धनमुत्तमम् । देशान्तरात् शुभा वार्त्ता आयाति
पुत्रसम्पदः" इति स्त्रीपुंसभेदेन फलकथनं सूक्ष्मस्वरोदये
"गुरुशुक्रबुधेन्दूनां वासरे वामनाडिकाः । सिद्ध्यन्ति
सर्वकार्येषु कृष्णपक्षे विशेषतः । अर्काङ्गारकशौराणां
वासरे दक्षनाड़िका । स्यात्तथा चिरकालेन शुक्ले नैवो-
दयःस्थितः । क्रमादेकैकनाड्यास्तु तत्रानां पृथगुद्भवः ।
अहोरात्रस्य मध्ये तु ज्ञेया द्वादश संक्रमाः । कर्कटक-
कन्याझिमृगमीननिशाकरे । मेषे सिंहे च धनुषि-
तुलायां मिथुने घटे । उदयो दक्षिणे ज्ञेयः शुभाशुभ
विनिर्णयः" । वारादिभेदेन नाड़ीविशेषफलकथनम् ।
"तिष्ठेत् पूर्वोत्तरे चन्द्रोभानुः पश्चिमदक्षिणे । दक्ष-
नाड्याः प्रवाहे तु न गच्छेद्दक्षपश्चिमे" इति नाड़ी-
विशेषेण दिग्गतिः । "वामचारप्रवाहे तु न गच्छेत्
पूर्व उत्तरे । परिपन्थो भवेत्तस्य ततोऽसौ न निवर्त्तते ।
तस्मादत्र न मन्तव्यं बुधैः सर्वहितेप्सुभिः । तदा तत्र तु
सङ्घाते मृत्युरेव न संशयः" इति वहन्नाड़ीकस्य दिग्-
विशेषगमननिन्दा । "शुक्लपक्षे द्वितीयायामर्के वहति
चन्द्रमाः । प्रदक्षिणे महाँल्लाभः पुंसः सौख्यं प्रजायते ।
सूर्योदये यदा सूर्यचन्द्रे चन्द्रोदयो भवेत् । सिध्यन्ति
सर्वकार्याणि दिवारात्रिगतान्यपि" वहन्नाड़ी-
फलकथनम् "चन्द्रकार्ये यदा सूर्यः सूर्यचन्द्रोदये भवेत् ।
उद्वेगः कलहो हानिः शुभं सर्वं निवारयेत्" इति
विपरीतनिन्दा "सूर्यस्य वाहे प्रवदन्ति लाभं प्रकाशने
युक्तमनःस्थिरत्वं । शशिन युक्तस्य तु शीतरश्मेः प्रवाह-
काले फलमन्यदस्यात् । यदा मृत्युप्रकाशे तु विपरीतोदयो
भवेत् । चन्द्रस्थाने स्थिते चार्के रविस्थाने च चन्द्रमाः ।
प्रथमे मानसोद्वेगं धनहानिं द्वितीयके । तृतीये गमनं
विद्यादिष्टनाशं चतुर्थके । पञ्चमे राज्यविभवं षष्ठे स-
र्वार्थनाशनम् । सप्तमे व्याधिदुःखानि अष्टमे मृत्यु-
मृच्छति" इति दिनभेदेन विपरीतफलम् "कालत्रयं
विनाऽनिष्टो विपरीतः यदा भवेत् । तदा दुष्टफलं प्रोक्तं
किञ्चिन्न्यूनेऽतिशोभनम् । प्रातर्मध्याह्नयोश्चन्द्रः सायं-

काले दिवाकरः। तदा नित्यं जयं लाभं विपरीतन्तु दुःखदम्" इति कालभेदेन फलम् "वामे वा दक्षिणे वापि यत्राप्याक्रम्यते स्वरः। कृत्वा तत्पदमाद्यञ्च यात्रा भवति सिद्धिदा" इति वहन्नाडीकस्य यात्राफलम्।

नाडीस्नेह पु॰ नाड्यामेव स्नेहोऽस्य। नाडीमात्रसारे अति कृशे शिवद्वारपाले भृङ्गिणि शङ्करः।

नाडीहिङ्गु पु॰ नाडीप्रधानो हिङ्गुः। हिङ्गुभेदे राजनि॰।

नाणक त्रि॰ न अणकः कुत्सितः नञ्सु॰। १कुत्सितभिन्ने २सुद्राचिह्नितनिष्कादौ "तुलाशासनमानानां कूटकृत्राणकस्य च। एभिश्च व्यवहर्त्ता यः स दाप्योदण्डतत्तमम्" याज्ञ॰।

नाथ दवे (उपतापे) प॰ आशिषि आत्म॰ ऐश्वर्य्ये च पर॰ भ्वा॰सक॰ सेट् नाथति दुनोति दृष्टे याचते इत्यर्थः नाथते आशंसते इत्यर्थः। अनाथीत् अनाथिष्ट। ननाथ-थे अदित् अननाथत्। नाथः। अणोपदेशत्वात् सति निमित्ते म अत्वम् प्रनाथति। याचने "सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम्" नैष॰ "आशिषि नाथः" पा॰ आशीर्वादे एवात्मनेपदविधानात् उपतापयाचनादौ परस्मैपदित्वम् अतएव काव्यप्र॰ "दीनं त्वामनुनाथते कुचयुगम्" इति च्युतसंस्कृतिदोषे उदाहृत्योक्तं यथा अत्र अनुनाथते इति। सर्पिषो नाथते इत्यादावशिषि एव नाथतेरात्मनेपदं विहितम्। "आशिषि नाथः" इति सू॰ अत्र तु याचनमर्थः तस्मात् "दीनं त्वामनुनाथति स्तनयुगमिति" पठनीयम्।

नाथ पु॰नाथ ऐश्वे अच्। स्वामिनि ईश्वरे हेमच॰। "अनर्घ्यमर्घ्येण तमद्रि नाथः" कुमा॰ "त्रिलोकनाथेन सतां मतद्विषः" रघुः।

नाथवत् त्रि॰ नाथ+अस्त्यर्थे मतुप् मस्य वः। पराधीने अमरः स्त्रियां ङीप्। "विष्णुना श्रीरिवेन्द्रेण भर्त्रा नाथवती सती" रामा॰ सुन्द॰ ३७अ॰ "याः स्म ता लोकनाथेन नाथवत्यः पुराऽभवन्" भा॰मौ॰५अ॰

नाथहरि पु॰ नाथं हरति स्थानान्तरं नयति हृ-इन्। पशौ मि॰कौ॰।

नाद पु॰ नद-घञ्। १शब्दे अमरः। २अनुस्वारयदुचार्य्ये अर्द्धचन्द्राकृतिवर्णभेदे ३ब्रह्मस्वरूपशब्दभेदे वर्णविशेषव्यञ्जके बाह्यप्रयत्नभेदे "कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः" पा॰शिक्षा "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादस्तस्माद्बिन्दुसमुद्भवः। नादो बिन्दुश्च बीजञ्च सएव त्रिविधो मतः। भिद्यमानात् पराद्बिन्दोरुभयात्मारवोऽभवत्। स रवः स्फुटिसम्पन्नः शब्द ब्रह्माऽभवत् परम्" शार॰ति॰। "तत्र सत्वप्रविष्टा चित् शक्तिशब्दवाच्या परमाकाशावस्था सैव सत्वप्रविष्टा रजोऽनुविद्धा नादशब्दवाच्या अव्यक्तावस्था" पदार्थदर्श॰। "नाभेरूर्द्ध्वं हृदि स्थानात् मारुतः प्राणसंज्ञकः। नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः" "आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन्। सुखेऽतिव्यक्तमायाति यः स नाद इतीरितः। स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः। आद्यः कायभवो वीणादिभवस्तु द्वितीयकः। तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः। यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः। तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः। वह्निमारुतसंयोगान्नादः समुपजायते। न नादेन विना गीतं न नादेन विना स्वरः। न नादेन विना रागस्तस्मान्नादात्मकं जगत्। न नादेन विना ज्ञानं न नादेन विना शिवः। नादं रूपं परं ज्योतिर्नादरूपी परं हरिः" सङ्गीतदा॰ ५श्लोत्तरि निघण्टुः। ६शब्दाभिव्यञ्जके कर्णशष्कुलीसंयोगविभागे शबरस्वामी "नादवद्भिपरा" जै॰१।१।१७सू॰ "यच्चैतत् बहुभिर्भेरीमाधमद्भिः शब्दसञ्चारयद्भिर्महान् शब्दः उपलभ्यते। तेन प्रतिपुरुषं शब्दावयवप्रचय इति गम्यते नैवं निरवयवो हि शब्दः अवयवभेदाववगमात् निरवयवत्वाच्च महत्त्वानुपपत्तिः अतो न वर्द्धते शब्दः। कर्णशष्कुलीमण्डलस्य सर्वां नेमिं व्याप्नुवद्भिः संयोगविभागैर्नैरन्तर्येण अनेकशोऽवहणात् महान् इव अवयववान् इवोपलभ्यते, संयोगविभागाः नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जयन्तो नादशब्दवाच्याः। तेन नादस्यैकत्वद्वित्वं न शब्दस्येति" शबरभा॰।

नादमुद्रा स्त्री "सुटिरूर्द्ध्वीकृताङ्गुष्ठा दक्षिणा नादमुद्रिकाः" तन्त्रसारोक्ते मुद्राभेदे।

नादवत् पु॰ नादो बाह्यप्रयत्नभेदः उच्चारणे साधनतयाऽस्त्यस्य मतुप् मस्य वः। १नादरूपबाह्यप्रयत्नोच्चार्य्यवर्णद्वितीयवर्णादौ "घोषवतो नादवतो महाप्राणस्य" सि॰कौ॰ २शब्दयुक्ते च। [२वर्णभेदे च।

नादविन्दु पु॰ उपनिषद्भेदे १उपनिषच्छब्दे पु॰ दृश्यम्।

नादिन् त्रि॰ नद-णिनि। १शब्दकारिणि स्त्रियां ङीप्। "प्रमथ्यमानार्णवधीरनादिनी" रघुः काहलरे त्रिणी

जातेषु जातिस्मरेषु सप्तसु स्वप्नेषु सप्तमे २भवे पु०। गुरोर्गां हत्वा पितृश्राद्धं कृतवतां गर्गशिष्याणां व्याधादि जन्मप्राप्ति कथा हरिवं० २१अ० दृश्या। तेषां दशार्णे व्याधजन्मानन्तरं कालञ्जरे गिरौ मृगजन्मप्राप्तानां संज्ञा यथा "उन्मुखो नित्यवित्रस्तः स्तब्धकर्णो विलोचनः। पण्डितो धक्करो नादी नामतस्तेऽभवन्मृगाः"। ३नादयुक्ते त्रि०

नादेय त्रि० नद्या इदं तत्र भवो वा नद्या नदस्य वा ढक्। १नद्याः सम्बन्धिनि २तत्र भवे च "नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्। नादेयमुदकं रूक्षं वातलं लघु दीपनम्। अनभिष्यन्दि विशदं कटुकं कफपित्तहृत्" भावप्र०। ३सैन्धवलवणे न० रत्नमा०। ४सौवीराञ्जने न० राजनि०। ५काश्मर्य्ये ६वानीरवृक्षे पु० राजनि०। ७अम्बुवेतसे ८भूमिजम्बूकायां ९वैजयन्तिकायां स्त्री ङीप् अमरः। १०नागरङ्गजम्बां ११व्यङ्कुषे स्त्री ङीप् मेदिनी। १२अग्निमन्थवृक्षे १३काकजम्बूवृक्षे च स्त्री राजनि०। न आदेयम् अदेयं वा १४अग्राह्ये १५देये च त्रि० "नादेयं नादेयं यदि वसने च नादेयम्" वैद्यकम् यदि नादेयं न ग्राह्यमित्यर्थः। वसने तु न अदेयं देयमित्यर्थः।

नादेश्वर न० काशीस्थे शिवलिङ्गभेदे "नादेश्वरं समभ्यर्च्य कैः कैर्नापि सुचिन्तितम्। तस्मात् काश्यां प्रयत्नेन सेव्यो नादेश्वरो नृभिः" काशीख० ३२अ०।

नाद्य त्रि० नद्यां भवः "नद्यादिभ्योढक्" वाचित्वा "पाथो नदीभ्यां ढञ्" पा० वेदे ढञ्। नदीभवे "चक्रोदधीत नाद्यो गिरोमे" ऋ०२।३५।१ "वाच क्रूया वाच नाद्याः सप्तक्रिया आपः" तैत्ति०२।१।२।४

नाध नाधार्थे भ्वा० आ०सक० सेट्। नाधते अनाधिष्ट ननाधे ऋदित् चङि अननाधत् त। अयं धोपदेशोऽपीत्यन्ये तेन सति निमित्ते धत्वम्। कविकल्पद्रुमेऽस्योभयथा कीर्त्तनादस्य उभयविधत्वम् "रोदसी नाधसी इतो" ऋ० १०।६५।५ "धाष्ट याच्ञौतापैश्वर्य्यादौ नाधसी याचमाने" भा०।

नाना अव्य०न+नाञ्। २विनार्थे "नाना नारीर्निष्फला लोकयात्रा" न नाना शम्भुना रामात्" सुग्धबोधम्। २अनेकार्थे "नानाविधं देहभृतां समाजम्" "मृत्योः स मृत्युमाप्नोति यइह नानेव पश्यति" श्रुतिः "बहूनि चैकजातानां नानास्त्रीषु निबोधत" । "प्रकामरक्तकाञ्चेत्रं नानापण्योपजीविनाम्" मनुः।

नानाकन्द पु० नाना कन्दोऽस्य। १पिण्डालौ राजनि०। २बहुमूलयुक्ते त्रि०।

नानाध्वनि पु० ६त०। काहलवीणादिशब्दे हारा०।

नानान्द्र पु०ननान्दुरपत्यम् विदा० अञ्। ननान्दुरपत्ये ततः यूनि हरिता० फक्। नानान्द्रायण ननान्दुर्युन्यपत्ये।

नानारूप न० कर्म०। १बहुविधे रूपे "नानारूपवती मता" भाषा० नाना रूपाणि यस्य। २बहुप्रकारे त्रि० "नानारूपाणि जायन्ते बीजानीह स्वभावतः" मनुः।

नानार्थ त्रि० नाना अर्था यस्य। १अनेकार्थे अजादिशब्दे "नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्त्तिताः" अमरः नानार्थशब्दानाञ्च यत्र शक्यतावच्छेदकतायां लाघवं तत्र शक्तिः बहूनां लाघवे निगमनाविरहेण सर्वत्रैव शक्तिः अन्यत्र लक्षणा। तत्रापि अनेकार्थस्य शब्दस्य सर्वत्र वृत्तिसाम्येन सर्वेषां पदार्थानां युगपदुपस्थितावपि संयोगादिना कस्यचिदर्थस्य शाब्दबोध इत्येवेषामाशयः अन्यार्थोपस्थितावेव संयोगादेः प्रतिबन्धकत्वमित्यन्ये। तदेतत् रसगङ्गाधरे व्यवस्थापितम्। अधिकं अनेकार्थशब्दे १९१ पृ० दृश्यम्। २नानाप्रयोजनयुक्ते त्रि० कर्म०। ३बहुप्रयोजने पु०।

नानावर्ण त्रि० नानावर्णा रूपाणि यस्य। चित्रवर्णयुक्ते "उडुका मन्त्रिविनाशं नानावर्णधनाय भयमतुलम्" बृह०सं०५४अ०। कर्म०। २ब्राह्मणादिवर्णचतुष्टये च।

नानाविध त्रि० नाना विधाः प्रकारा अस्य। बहुप्रकारे "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः" सां०का० "नानाविधानां द्रव्याणां शुद्धेः प्रच्युत निर्णयम्" मनुः

नान्तरीयक न० न अन्तरा विना भवः अन्तरा+छ अव्ययस्य टिलोपः ततः स्वार्थे क। अविनाभूते तद्भावे तद्भावरूपव्याप्तियुते "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" कारिकाव्या० "अविनाभावः सम्बन्धमात्रं न तु नान्तरीयकत्वम्" काव्यप्र०। व्याकृतञ्चेदं महेश्वरेण "नान्तरीयकत्वं तदभावे तदभावरूपा व्याप्तिः"। "प्रतिबन्धकाभावे नान्तरीयका अर्थोत्पत्तिः" नव्यन्यायवादार्थः।

नान्त्र न० नम-ष्ट्रन् दृढिच। स्तोमे उणादिकोषः। संक्षिप्तसारे नान्त्रमित्येव पाठः शब्दकल्पद्रुमे नान्त्रेति पाठकल्पनम् लिपिकरप्रमादपाठमालोक्येति बोध्यम्।

नान्दिकर पु० नान्दीं करोति कृ-ट हृत० "ङ्याप्पोः संज्ञाछन्दसोः" पा० ह्रस्वः। नाटके नान्दीपाठकरे सूत्रधारे

नान्दी स्त्री नन्दन्ति देवा अत्र नन्द-घञ् पृषो०दृद्धिः ङीप्।

१समन्ता २नाटकस्यादौ मङ्गलार्थे पाठ्ये श्लोकादौ "आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते। देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता"। नाटके विघ्नविघातायादौ नान्दी कार्या यदाह भरतः "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये। देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्ति देवतायस्मात्तस्मान्नान्दी प्रकीर्त्तिता" अन्यच्च "देवद्विजनृपादीनामाशीर्वचनपूर्विका। नान्दी कार्या बुधैर्यत्राश्रमस्कारेण संयुता। गङ्गा नागपतिः सोमः सुधानन्दाजयाशिषः। एभिर्नामपदैः कार्या नान्दी धाराभिरङ्किता। प्रशस्तपदविन्यासा चन्द्रसङ्कीर्त्तनान्विता। आशीर्वादपरा नान्दी योज्येयं मङ्गलात्मिका। काचिद्द्व्यपदा नान्दी काचिदष्टपदा तथा। सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः"। सा०द० अन्यथा उक्तं यथा "यत्राद्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुर्योत्तयाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते। प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये" "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता। मङ्गल्यमङ्गचन्द्राङ्ककैरवर्यसिनी। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत" । अष्टपदा यथा। अनर्घराघवे "निघ्नन्त्यूहमित्यादि" द्वादशपदा यथा मम तातपादानां पुष्यमानायाम्। "शिरसिष्टतसुरापगे स्मरारावरुणसुखेन्दुरुचिर्गिरीन्द्रपुत्री। अथ चरणयुगानते स्वकाले स्थितसरसा भवतोऽस्तु भूतिहेतुः"। एवमन्यत्र। "एतस्मान्नान्दीति" कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु "पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गमिति" उच्यते। यदुक्तम्। 'यस्मादभिनयो ह्यत्र प्राधान्यादवतार्यते। रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकमिति" उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात् प्रथमं नटैरेव कर्त्तव्यतया न महर्षिणा निर्देशः कृतः। कालिदासादिमहाकविप्रबन्धेषु च "वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः। अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः" एवमादिषु नान्दीलक्षणायोगात्। उक्तञ्च "रङ्गद्वारमारभ्य कविः कुर्यादिति"। अतएव प्राक्तनपुस्तकेषु "नान्द्यन्ते सूत्रधार" इत्यनन्तरमेव "वेदान्तेष्वित्यादि" श्लोकलिखनं दृश्यते। यच्च पश्चात् "नान्द्यन्ते सूत्रधार" इति लिखनं तस्यायमभिप्रायः "नान्द्यन्ते सूत्रधार इदं प्रयोजितवान् इतः प्रभृति मया नाटकस्योपादीयते इति कवेरभिप्रायः सूचितः इति"। इष्टौ "ते तु नान्दीमुखा नान्दी यज्ञविरिति कथ्यते" इति ब्रह्मपुराणम् "नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्" इति सम्बन्धविवेकपरिशिष्टवचनम्। "नान्दीमुखे पुत्रादिसम्बन्धिसाधनरूपे विवाहे विशेषणं तु विवाहादेः पुत्रादिलाभविशेषसाधनत्वं नान्दीमुखपदस्य श्राद्धपरत्वे अनेकवचनप्राप्तपिण्डपूर्वकाभिलापस्य बाधापत्तेः" सं०त० रघुनन्दनः।

नान्दीक पु० नान्द्यै कायति कै-क। १तोरणस्तम्भे त्रिका०। २नान्दीमुखश्राद्धे नान्दीमुखशब्दे दृश्यम्।

नान्दीकर त्रि० ६त०। १नान्दीश्लोकादिपाठकरे २नान्दीवादिनि च अमरः।

नान्दी(न्दि)घोष पु०नान्द्यै घोषः वा मुखः। भेर्यादिशब्दे

नान्दीपट पु० नान्द्याः इष्टार्थः पटः। कूपादिमुखबन्धनवस्त्रे वीणाहेमच०।

नान्दीपुर न०नान्द्यै पूः अच्छमा०। अग्राकस्थे डरभेदे ततः पुरान्तत्वात् भवार्थे वुञ्। नान्दीपुरक तत्र भवे त्रि०।

नान्दीमुख न० नान्द्या इष्टेर्मुखम्। १इष्टिश्राद्धे श्राद्धभेदे नान्द्यै मुखं यस्य। २पितादौ ३मातादौ स्त्री ङीष्। जीवत्पितादित्रिकस्य ४इष्टप्रपितामहादौ च ६त०। ५समृद्धेः साधने विवाहादौ "नान्दीमुखे विवाहे च" नान्दीशब्ददर्शितवाक्ये स०त० लिखनं दृश्यम्। अथ नान्दीश्राद्धाधिकारस्वरूपादि निर्ण०सि० दर्शितं यथा अथ इष्टिश्राद्धम् तन्निमित्तं पृथ्वीचन्द्रोदये ब्राह्मे "जन्मन्युपनयने विवाहे पुत्रकन्ययोः। पितॄन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्वकम्। देवव्रतेषु चाधानयज्ञपुंसवनेषु च। नवान्नभोजने स्नाने जटायाः प्रथमार्तवे। देवारामतडागादिप्रतिष्ठास्वत्सवेषु च। राज्याभिषेके बालान्नभोजने इष्टिसंज्ञकान्। वनस्थाद्याश्रमं गच्छन् पूर्वेद्युः सद्य एव वा। पितॄन् पूर्वोक्तविधिना तर्पयेत् कर्मसिद्धये" विष्णुपुराणे "यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः। पुत्रजन्मप्रमोक्षेषु इष्टिश्राद्धं समाचरेत्" तत्रैव "नामकर्मणि बालानां चूडाकर्मादिके तथा" इत्युक्तैर्नित्यक्रमात्प्राशनयोर्न श्राद्धमिति मैथिलाः तन्न पूर्वोक्तविरोधात् नानिष्टेति विरोधात् "सुतोत्पत्तौ तथा श्राद्धे अन्नप्राशनिके तथा" इति राजमार्त्तण्डाच्च

बह्वृचकारिकायाम् "आद्याभ्युदयिकं श्राद्धं वृद्धिपूर्त्तेषु कर्मसु। पुंसःसवनसीमन्तजोकोपनयनेष्विह। विवाहे चानलाधेयप्रभृतिश्रौतकर्मसि। वृद्धं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम्। अन्यैः षोडशसंस्कारश्राद्धस्यादिष्वपीष्यते। वाप्याद्युद्यापनादौ तु कुर्युः पूर्त्तनिमित्तकम्"। वोपदेवकाण्डदर्शौ "सीमन्तव्रतचौलनामकरणान्नप्राशनोपांशुनखानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंसूत्यावसथप्रवेशनसुताद्याखावलोकाश्रमस्वीकारक्षितिपाभिषेकदधिताद्यर्थौ च नान्दीमुखम्" यत्तु कामधेनौ "जलाशयप्रतिष्ठायां वृषोत्सर्गादिकर्मसु। यत्सराभ्यन्तरे पित्रोर्वृषोत्सर्गकर्मणि। वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाचरेत्" इति तत्र जलाशये वृद्धिश्राद्धस्य निषेधो न तु कर्मान्तरस्येति केचित्। अन्ये त्वस्य निर्मूलतामाहुः। श्राद्धकौमुद्यां निर्णयामृते च मातृस्ये "अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके। पुंसवे च निषेके च नववेश्म प्रवेशने। देवतालजलादीनां प्रतिष्ठायां विशेषतः। तीर्थयात्राद्वृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितम्"। इदं चावश्यकं "वृद्धौ न तर्पिता ये वै पितरो गृहमेधिभिः। तद्दीनमकलं श्रेयमासुरो विधिरेव सः" इति शातातपोक्तेः। अत्र श्राद्धत्रयं पराशर आह "मातृश्राद्धं तु पूर्वं स्यात् पितृश्राद्धं तदनन्तरम्। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्"। तत्कालमाह पृथ्वीचन्द्रोदये गार्ग्यः "मातृश्राद्धं तु पूर्वेद्युः कर्मोहनि तु पैतृकम्। मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्"। अत्राप्यशक्तौ स एव "पृथक् दिनेष्वशक्तस्येकस्मिन् पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति" वृद्धमनुरपि "अलाभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः। पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्"। अत्र "महत्तु पूर्वेद्युस्तदहरन्यथेति" स्मृतिपरिशिष्टाद्यवस्था ज्ञेया। तत्र प्रातरेव "पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति" शातातपोक्तेः अत्र प्रातः शब्दः सार्द्धप्रहरपरः "प्रहरोऽर्धसंयुक्तः प्रातरित्यभिधीयते" इति गार्ग्योक्तेरिति पृथ्वीचन्द्रः। इदं च पुत्रजन्मातिरिक्तविषयम्। तदाहाग्निः "पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तकम्। पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुधः" इति एतदनियतनिमित्तपरम् "नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम्। तेषामनियतत्वे तु तदानन्त्यं भिद्यते" इति कौणाक्षि स्मृतेः। आधानाङ्गं नान्दीश्राद्धं त्वपराह्ण एव "आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः। पार्वणं वाऽपराह्णे तु वृद्धिश्राद्धं तथाग्निकम्" इति निर्णयामृते गालवोक्तेः "नान्दीमुखाङ्गत्रयं प्रातराद्यदिकं त्वपराह्णतः" इति विष्णूक्तेश्च। इदं च मातृपितृमातामहादिकमेव नवदैवत्यं कार्यम्। तत्र मातामहाः सपत्नीकाः "वृद्धप्रमातामहप्रमातामहमातामहानां सपत्नीकानामिति" पृथ्वीचन्द्रोदये गारुडे मद्यरूपेण पाठात्। हेमाद्रौ यद्वः "नान्दीमुखे सत्यवसु संकीर्त्यौ वैश्वदेविके" वृद्धपराशरः "नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनम्। पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः" यत्तु वृद्धवसिष्ठः "नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्। नामसंकीर्त्तयेद्विद्वानन्यत्र पितृपूर्वकम्"। यच्च स्मृत्यर्थसारे "वृद्धसुरव्यास्तु पितरो वृद्धिश्राद्धेषु भुञ्जते"। इति यच्च गारुडे व्युत्क्रमप्रतिपादनं तच्च शाखान्तरविषयम्। "पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः" इति बह्वृचपरिशिष्टे कात्यायनेन चातुर्लोम्याम्नानात् पृथ्वीचन्द्रोदयेऽप्येवम्। यत्तु केचित् वृद्धिपदं पित्रादिषु प्रयुञ्जते तच्च "अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम्। अनाम्नामतिवाद्यैव नान्दीश्राद्धं तु सत्यवदिति" पृथ्वीचन्द्रोदये संग्रहोक्तेः न च निषेधादेव विधिः कल्प्यत इति वाच्यं प्रोष्ठपदीश्राद्धे प्रपितामहात् परेषां वृद्धपित्रादीनां देवतात्वान्नान्दीश्राद्धत्वाभावेनेहापि तत्प्राप्तौ निषेधात् गोत्रनामादिनिषेधस्तु "शुभार्थी प्रथमान्तेन वृद्धौ संकल्पमाचरेत्" इत्युपक्रम्यानस्मद्वृद्धशब्दानामित्युक्तेः संकल्पश्राद्धपरः सपिण्डके तु सर्वं भवतीति प्रयोगपारिजातः। "गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेदिति" छन्दोगपरिशिष्टे तद्विधानात् यत्तु ब्राह्मे "पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यमुमुखा ह्येते पितरः परिकीर्त्तिताः। तेभ्यः पूर्वतरा ये च प्रजायन्तः सुखे स्थिताः। ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते" इति यच्च मार्कण्डेयपुराणे "ये प्रपितामहाद्वृद्धं ते तु नान्दीमुखाः स्मृताः" इति तच्छ्रीवत्सितादिनिकर्तृकवृद्धिश्राद्धविषयम्। तेन तत्रेदमावश्यकम्। यत्तु विष्णुः "पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यादिति" तद्वृद्धिविषयमिति कल्पतरुः। मदनपारिजातोऽप्येवम्। हेमाद्रिस्तु "नान्दीमुखानां श्राद्धं तु कन्याराशिगते रवौ। पौर्णमास्यां तु कर्त्तव्यं वराह-

वचनं यथेति" प्रोष्ठपदीश्राद्धैकवाक्यत्वात् तत्रैव पूर्वेषां देवतात्वमित्याह। अत्र यत्यवस्तु विश्वे देवाविलुप्तं प्राग्वत्। यत्तु शातातपः "मातुः श्राद्धं तु युग्मैः स्यादेवं प्राङ्सुखैः पृथगिति" तद्भिन्नप्रयोगमातृश्राद्धपरम्। यत्र मार्कण्डेयपुराणे "विश्वेदेवविहीनं तु केचिदिच्छन्ति मानवाः" इति तद्भिन्नप्रयोगमातृश्राद्धे विश्वेदेवविकल्पार्थं प्रयोगैक्ये तु देवनियम इति हेमाद्रिः। एतच्च माहपूजापूर्वकं कार्यम्। "अकृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत्। तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः" इति शातातपोक्तेः कौर्मेऽपि "पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्मूलफलैरपि। पूजयित्वा मातृगणं कुर्याच्छ्राद्धमतन्द्रितः बुधः" इति छन्दोगपरिशिष्टे "कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः" प्रतिमासु च शुद्धासु लिखिता वा पटादिषु अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः। कुडुम्बेन्नां वसोर्धारां सप्तधारां घृतेन तु। कारयेत् पञ्चधारां वा जातिनीपां न चोच्छ्रिताम्। आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः। षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्"। अत्र सर्वेष्विति ग्रहणात् ग्रहयज्ञ तद्विकारेष्वपि नित्यं श्राद्धम्। "नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किञ्चित् समाचरेदिति" शातातपोक्तेः। इयं च वसोर्धारा तच्छ्राद्धीयानां नियताग्नेयां त्वनियता। यद्वसं वा खण्ड्योक्तमित्युक्तेः करणे त्वभ्युदयः "यज्ञाम्रातं खयाख्यायाम्" इत्युक्तेः आयुष्याणि "आनो भद्रा इत्यादीनि। षड्भ्य इति मात्रादिलिङ्गोपकल्पनमिति पृथ्वीचन्द्रोदयः। छन्दोगानां षड्दैवत्यमन्येषां नवदैवत्यमित्याशार्कः। अयं तु मतं कौथुमतानुसारिणां मातृमातामहीप्रमातामही इति मात्रा सहैव मातामहश्राद्धकरणात् तद्विषयमिदं षड्भ्य इति। मातरस्तु तत्रैवोक्ताः "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।"

चन्द्रिकायां चतुर्विंशतिमते त्वन्या उक्ताः "तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा। इत्येता मातरः प्रोक्ताः पितृमातृः स्वसाऽष्टमी" आद्यां जीवने प्रत्यक्षपूजनम्। मृतानां त्वक्षतपुञ्जेष्विति हेमाद्रिः "ब्रह्मण्याद्यास्तथा षष्ठ दुर्गालक्ष्मणाधिपान्। इत्यादौ पूजयित्वा तु यथान्नान्दीमुखान् पितॄन्। मातृपूर्वान् पितॄन् पूज्य ततो मातामहानपि। मातामहीमतः केचिदुन्मा भोज्यादिजातयः" इति। अत्र द्वादशदैवतस्य देशाचाराद्व्यवस्था। ब्रह्मण्याद्यान्तु "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा षष्ठ मातरः" इत्यपरार्के उक्ताः। अत्र चौडादीनां यौगपद्ये तन्त्रतोक्ता छन्दोगपरिशिष्टे "गणशः क्रियमाणानां मातृभ्यः पूजनं सकृत्। सकृदेव भवेच्छ्राद्धादौ न पृथगादिषु" मातृभ्य इति षष्ठ्यर्थे चतुर्थी। गणशः एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्मैक्यादित्यर्थः। तथा "असकृद्यानि कर्माणि क्रियेरन् कर्मकारिभिः। प्रतिप्रयोगं नैव स्युर्मातरः सगणाधिपाः" कर्माङ्गत्वावपि कुत्र श्राद्धं कार्यं कुत्र नेत्युक्तं तत्रैव "आधाने क्षोमयोश्चैव वैश्वदेवे तथैव च। बलिकर्मणि दर्शे च पूर्णमासे तथैव च। नवयज्ञे च यज्ञाङ्गे वदन्त्येवं मनीषिणः। एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक्" एतेषु प्रतिप्रयोगं नावर्त्तते किन्त्वादौ, एतद्भिन्न सोमयागादौ प्रतिप्रयोगमावर्त्तते एव श्राद्धमित्यर्थः। क्वचिदादावपि निषेधमाह स एव "नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते। न सोष्यन्तीजातकर्मप्रोषितामतकर्मसु"। "विवाहादिः कर्मणीय उक्तो गर्भाधानं शुद्धमो यस्य चान्ते। विवाहादावेकमेकान्तु कुर्याच्छ्राद्धं नादौ कर्मणः कर्मणः स्यात्"। सोष्यन्त्या आसन्नप्रसवायाः "सोष्यन्तीमभ्युक्षेत्युक्तं कर्म। कालावनोक्तस्य श्राद्धस्य पाकस्य प्राधान्यात्तस्य च "जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपीति" निषेधात् जातकर्मणि नान्दीश्राद्धमित्याशार्कः "आमान्नेन वा कार्यमित्यपि" तेनैवोक्तम्। नौडास्तु जातकर्मण्येव निषेधः पुत्रजन्मनिमित्तकं तु कार्यमेव "जन्मन्युपनयने" इत्युक्तेः "नैमित्तिकमथो मध्ये श्राद्धमभ्युदयात्मकम्। पुत्रजन्मनि तत्कार्यं जातकर्मसमं नरैरिति" मार्कण्डेयपुराणाच्चेत्याहुः। हारलतायां श्राद्धविवेके चैवम्। एतेन जातकर्मणि कालान्तरे श्राद्धनिषेधो न पुत्रजन्मदिने इति वाचस्पतिमतं परास्तम्। अत्र निषेककाले इति वचनात् गर्भाधाने न निषेधः "निषेककाले सोमे च सीमन्तोन्नयने तथा। एवं पुंसवने श्राद्धं कर्मार्हं विधिवत्कृतम्" इति पारस्करः। प्रोषितेति "प्रोष्यैत्य गृहानुपतिष्ठते पुत्रं ब्रह्म जपतीति" विहितं कर्म विवाहादिगर्भाधानान्तो यो गृह्यप्रवेशचतुर्थीकर्मादिकर्मसमूह उक्तः सूत्रकारेण तत्रापि प्रतिकर्म नेत्यर्थः। अन्येऽपि कृषामियोगादयोऽपवादविषयास्तत्रैव

द्वैधास्ते अग्नयाराक्षोच्यते । अत्राधिकारिणः विष्णुपुराणे "जातस्य जातकर्मादि क्रियाकाण्डमशेषतः । पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम्" । अत्र केचित् जीवत्पितृक सामेरेव दर्शश्राद्धेऽधिकारः न तु निरग्नेः "न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमते द्विजः । येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः । पितामहेऽप्येवमेव कुर्याज्जीवति साग्निकः । साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे" इति चन्द्रिकायां सुमन्तूक्तेरित्याहुः प्रयोगपरिजातेऽप्यनाहिताग्निर्न कुर्यादितीदं व्याख्यातम् । तत्र "अनग्निकोऽपि कुर्वीत जन्मादौ दर्शकर्मणि । येभ्यएव पिता दद्यात्तानेवोद्दिश्य तर्पयेत्" इति हारीतोक्तेः सोमलवन्तु न दर्शश्राद्धपरमित्युक्तं मदनरत्ने श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः । निर्णयामृते तु हारीतीयेऽनग्निको नाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निः स्मार्ताग्निश्चोच्यते तेनोभयाग्निहीनस्य नेत्युक्तं तत्र पूर्वोक्तादिना गतिसम्भवेऽग्निपदस्य स्मार्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् "पितरो जनकस्येष्ट्या यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात्स्वान् यजेत पितामहान्" इति पृथ्वीचन्द्रोदये यमवचनविरोधाच्च अपरार्केऽपि यमावर्त्ते ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्यादित्याह अतः पूर्वमेव वायु गोपदेवोऽप्येवमाह । वस्तुतः जीवत्पितृकः प्रत्यब्दकर्मादौ न दर्शश्राद्धम् । हारीतीये जन्मादावित्यादिशब्देन तत्प्राप्तावपि "उद्वाहे पुत्रजनने पितिष्ट्यां सोमिके मखे । तीर्थे ब्राह्मण आयाते वर्द्धते जीवतः पितुरिति" सैमपरिशिष्टे उद्वाह एव तस्योपसंहारात् एवं यत्र तु संस्कारादिपदं तदप्युद्वाहादिपरमेवेति, तत्र उद्वाहपदस्य स्वविवाहपरत्वस्यापि संभवात् पुत्रविवाहपरत्वे मानाभावात् "कामकर्मणि वा शानां चूडाकर्मादिके तथा" इत्यादिभिर्नित्यत्वाद्वस्य चौलाद्यङ्गत्वावगतौ नित्यानित्यसंयोगविरोधाच्च अतो जन्मादाविति सर्वसंस्कारसंग्रहः तथा च कात्यायनः "स्वपितृव्यः पिता दद्यात् सुतसंस्कारकर्मसु । पितृव्यानोद्वाहनात्तेषां तत्सामाने तु तत्क्रमात्" । सुतानां चौलादिसंस्कारेषु पिता स्वपितृव्यः पितृव्यान् श्राद्धम् "पितृव्यदोऽग्रहरचेत्यामिति" दर्शनात् चौलहनादिवाहपर्यन्तं दद्यात् विवाहस्य प्रथमः "नान्दीश्राद्धं पिता कुर्यादादौ पार्थिवपूर्वके वयः । अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्" इति स्मृतेः तस्य पितृरभावे तत्क्रमात् "असंस्कृतास्तु संस्कार्या आत्मभिः पूर्वसंस्कृतैः" इति यः कर्त्तृक्रमः तेन क्रमेण व्येष्ठभ्रात्रादिर्दद्यादिति चन्द्रिकादयः हेमाद्रिस्तु "तस्य पितृरभावे यः पितृव्यमातुलादिः संस्कुर्यात्स तत्क्रमात् संस्कार्यपितृक्रमाद्दद्यात् न तु स्वपितृव्य इति" व्याचख्यौ । समावर्त्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात्पितैव नान्दीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादि तदभावे स्वयमेव कुर्यात् उपनयनेन कर्माधिकारस्य जातत्वात् एवमाद्यविवाहेऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः मदनरत्नेऽप्येवम् । यदा तु पितरि संन्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रमन्यः संस्कुर्यात्तदा संस्कार्यपितृः पित्रादिभ्यो दद्यात् "पितरोजनकस्येष्ट्या यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात् स्वान् यजेत पितामहान्" इति पृथ्वीचन्द्रोदये यमोक्तेः । जीवत्पितृकस्य विशेषमाह कात्यायनः "उद्वाहे तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्यएव पिता दद्यात्तेभ्यो दद्यात् स्वयं सुतः" इति । यत्र बहूनां परिशिष्टे जीवत्पितृकाणां सुतसंस्कारेषु मातृमातामहयोः कुर्यात् तस्यां जीवन्त्यां मातामहस्यैवेति" तत्तच्छाखीयानामेवेति दिक् । मृतितत्त्वादिगोऽप्यन्येषु जीवन्मातृकः पितामहादिभ्यो दद्यात् "जीवन्मातरि दद्याद्वा प्रेतायाश्चोदके द्विजः" इति कात्यायनोक्तेः "जीवे तस्मिन् सुताः कुर्युः पितामहा यथैव तु । तस्यां चैव तु जीवन्त्यां तस्याः श्वश्रूरिति निश्चयः" इति हारीतोक्तेश्चेत्युक्तम् । तस्मिन् भर्त्तरि । दाक्षिणात्यास्तु पूर्वोक्तं सपिण्डीकरणादिविषयम् "जीवेत्तु यदि वर्णाद्यस्तं वर्गन्तु परित्यजेत्" इति वचनात्तद्वर्गस्य लोप एवेत्याहुः । यत्तु चन्द्रिकायां पारस्करः "निषेकाद्ये सोमे च सीमन्तोन्नयने तथा । श्रेयं पुंसवने श्राद्धं कर्माङ्गं द्विजस्य तत्" इति तत्र जन्मोपनयनादौ कर्माङ्गम् जातकर्मादावुक्तन्तु द्विजश्राद्धं पृथगेव विधिवत्त्वबोधकम् । जीवत्पितृके मातृके "अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके । पुंसवने च निषेके च नवश्राद्धप्रवेशने । वेदव्रतव्रताद्यानां प्रतिष्ठायां तथैव च । तीर्थयात्राद्युपोद्वाहे द्विजश्राद्धं प्रकीर्त्तितम्" नाविनिमित्तानामङ्गत्वे द्विजपदस्यानर्थकत्वेनेति देवार्थ इति गौडाः "अन्ये तु निषेकादौ कर्माङ्गद्विजश्राद्धयोः वस्तुतयाभावः नान्दीश्राद्धेऽभवात्तुगता । अत्रेतिकर्त्तव्यता पृथ्वीचन्द्रोदये व्यासः "मातृजाः मातृपक्षाया मन्त्रिकाङ्गजयोरपि ।

वेतस्याः पाठस्यावा वा देया नाडा न चोदिता" श्राद्धे नाडानिषेधस्यायमपवादः। तथा "सुवेषमूषणैस्तत्र सत्कारैस्तथा नरैः। कुटुम्बाद्यनुविप्रैः कर्मोद्यन्त ब्राह्मणैः सह। स्त्रियोऽपि सुखया भूता गीतनृत्यादिहर्षिताः"। हेमाद्रौ ब्रह्मपुराणे "कुशस्थाने च दूर्वाः सुमङ्गलस्यामिदृश्ये"। कुशा अपि वक्ष्यन्ते। छन्दोगपरिशिष्टे "मातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा"। उभयतः दैवे पित्र्ये च वैश्वदेवे द्वौ विप्रौ पित्रादीनामेवैकस्य द्वौ द्वाविति विंशतिः। त्रिके वा द्वौ द्वावित्यष्टौ विप्राः। अत्र विप्राभावे स्त्रियोऽपि भोज्या इत्याह्निकार्के हेमाद्रिः। "मातृश्राद्धे तु विप्राभावेऽपि पूजयेदपि। पतिपुत्रान्वितामध्या योषितोऽष्टौ कुलोद्भवाः। मातृत्रिके चतस्रः मातामहीत्रिके चेत्यष्टौ" इति हेमाद्रिः। "अत्र पित्र्ये प्राङ्मुखाविप्राः पार्श्वे पित्र्ये चतुरस्रं चस्रकमिति, अयन्तः" हेमाद्रौ ब्राह्मे "विप्रान् प्रदक्षिणावर्त्तं प्राङ्मुखानुपवेशयेत्"। छन्दोगपरिशिष्टे "गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेत्। नामापसव्यकरणं न पित्र्यं तीर्थमिष्यते। ज्येष्ठोत्तरकरान् युग्मान् कराभ्यामपवित्रकान्। कृत्वार्घ्यं सव्यदातव्यं नैकैकस्यात्र दीयते" पित्रादेर्द्वौ द्वौ विप्रौ तयोर्दक्षिणकरस्थौ संयोज्य प्रथमोपवेशितविप्रकरोपरि तन्त्रेण द्वयोरर्घ्यं दद्यादित्यर्थः। बह्वृचकारिकायां तु "दत्ताघ्यांदेकदेशः स्यादर्घ्यदानं प्रतिद्विजम्। आवृत्तिरपि मन्त्रस्य प्रतिब्राह्मणमिष्यते। प्रतिद्विजं पृथक्कुर्याद्विधोक्तार्घ्यानुमन्त्रणम्" इत्युक्तम् "मधु मध्विति यत्तत्र निर्जरोऽग्नितमिष्यताम्। गायत्र्यमन्त्रं क्षीरं मधुमन्त्रविवर्जितम्। मधाभावे तु यत्रेदं यदाचित् पितृभूतकम्" तथा "सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते। सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत्। अन्नस्योदकदानस्य चार्घ्यदानवदिष्यते। यच्चैव नियतं कुर्याच्च चतुर्थ्यां कदाचन"। चन्द्रोदये ब्राह्मे "पठेच्छ्रुतिसूक्तं तु अस्ति सूक्तं एवं तथा। नान्दीमुखान् पितॄन् मङ्गला ब्राह्मणैश्च समाहयेत्" तथा "ब्राह्मणं दधि मध्वन्नं यदराधि यवांस्तथा। मिश्रीकृत्य तु चतुरः पिण्डान् श्रीकामवर्द्धिभान्। दद्यान्नान्दीमुखेभ्यश्च पितृभ्यो विधिपूर्वकम्। ब्राह्मणस्य कमण्डूनि यवांश्च विनियोजयेत्। तान्येव दक्षिणार्थन्तु दद्यादिष्टेषु सर्वदा"। तत्रैव चतुर्विंशतिमते "द्वौ द्वौ चाभ्युदये पिण्डावेकैकस्य विनिःक्षिपेत्। एवं नाम्ना परं तृप्तौ दद्यात्पिण्डान् पृथक् पृथक्"। वसिष्ठः "प्राङ्मुखो दैवतीर्थेन प्राङ्मुखेषु कुशेषु च। दत्त्वा पिण्डान् कुर्वीत पिण्डपात्रमधोमुखम्"। "नान्दीमुखेभ्यः पितृभ्यः स्वाहेति वा पिण्डदानमन्त्रः"। इति दृष्टिः। अत्र पिण्डाः सवाहता इत्युक्तम्। तत्रैव भविष्ये "पिण्डनिर्वपणं कुर्याच्च वा कुर्याद्विचक्षणः। इद्धिश्राद्धे महाबाहो! कुलधर्मानवेक्ष्य तु" कालादर्शः "अग्नौ करणमर्घ्यं च वाहनं चावनेजनम्। पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्त्तते" तेनात्र भोजनस्यैव प्रधानत्वाद्यदि विप्रस्य वमनं तदा तस्यैव पार्वणस्य पुनराहत्तिरिति सिद्धम्। इद्धिश्राद्धस्य भूतनिमित्तं यथा पुत्रजन्मनिमित्तं भाविनिमित्तं च यथा विवाहादिनिमित्तमिति भेदः इति आ०त० रघु० समर्थितम्। तद्विधानस्य छन्दोगपरिशिष्टादौ दृश्यम्। इत्यर्दयाचरणादेवे छन्दोभेदे स्त्री "करमिदि वदि नौ नौ च नान्दीमुखो नो" छन्दोम० तल्लक्षणमुक्तम्।

नान्दीवादिन् पु० नान्दीं वदति वद्-णिनि। १नान्दीशब्दपाठके इत्यर्थे २भेर्यादिवादके च।

नान्दीश्राद्ध पु० नान्दीनिमित्तं नान्द्यर्थं वा श्राद्धम्। इद्धिश्राद्धे नान्दीमुखशब्दे उदा०।

नापित पुंस्त्री नृपादयो जातियात् जाते १बहीर्णजातिभेदे पट्टिकार्य्यां कुवेरिण्यां जाते २बहीर्णजातिभेदे च। "आर्द्रिकं कुलमित्रं च गोपालो दासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" मनुः। "सच्छूद्रो गोपनापितौ" "नराणां नापितो धूर्त्तः"। "ग्रामकामस्तु गोपालं वनकामस्तु नापितम्" भा०उ०१२अ०। "नटी कापालिनी वेश्या कुट्टनी नापितः कुनी" कुल नापितोऽस्त्री तन्त्रम्। तस्य वृत्तिः क्षुरकर्म। "उपोषितस्तु व्रतिनः क्षुरकेशस्तु नापितैः। श्रीकामवर्त्तिष्यति यदि यावत् तैलं न संस्पृशेत्" स्मृतिः। स्त्रियां त्वात् अपत्ये फिञ्। नापितानि तदपत्ये पुंस्त्री० पक्षे अञ् नापित्य तत्रार्थे पुंस्त्री०।

नापितशाला स्त्री ६त०। क्षौरगृहे त्रिका०।

नाभ् स्त्री नभ-क्विप्-क्लिप्। नभसो बाधिकायां सोमस्य दीप्तौ "चतस्रो नाभो निहिताः" ऋ०९।७३।६। नभो नभसो बाधिकाः सोमस्य दीप्तयः सायः" भा०।

नाभ पु० "सुतात् मनोरसो जज्ञे तस्य नाभोऽभवत् सुतः" भाग०९।६।११ उक्ते सूर्यवंशे नृपभेदे।

नाभक न० नभ-ण्वुल्। वनतिले हस्ते यन्त्रार्थवि०।

नाभस पु० १२अ०हरिवंशातकोक्ते अन्यतः तत्तत्स्थानभेदस्थित षड्भेदेन बोधभेदे ते च तत्र तत्तत्स्थानाद्या दृश्याः। जातकपद्धतौ तु ततः संख्योक्तास्तेऽत्र दर्शने यथा "चरादिसंज्ञैर्निखिलैर्ग्रहैः स्यात् योगस्तु रज्जुर्द्वयं२ नवं२च। नाला४ शुभैः पापगणैश्च सर्पः५ केन्द्रस्थितैः सत्यमते दलौ तौ। समीपकेन्द्रद्वयगैर्गदाख्यः सन्यसगैः स्याच्छकटो७ऽथ पद्मौ८। स्वाम्बुस्थितैः, पद्मनन्दसन्धिस्थितैस्तु ग्रहाटकनामनन्ति। धनारिकर्मसंस्थितैस्तृतीयसप्तमगैः। तुरीयरन्ध्ररिपुफगैस्त्रिधा हलः१० प्रकीर्त्तितः। सन्नास्तगाः सौम्यखगाः खवज्रौः पापा यदा स्यात् कुलिशं११ विलोमात्५ यवो१२ऽथ मित्रोः कमलं१३ यदा ते केन्द्रात् परे तत्परतोऽथ वापी१४। सन्नादिकेन्द्रात् सकलग्रहेषु चतुर्षु मेषु प्रवदन्ति योगान्। वृषेषुवज्रौ१५।१६।१७रपि दलं१८नद्रेः स्थानेषु नौकूटकमलचापान्१९।२०२१।२२।अर्द्धचन्द्राकृत्यं२२ केन्द्रवाह्यतः सप्तग्रहैर्यैः। सन्नादेकान्तरे षड्भे चक्रं२३मर्यादपांनिधिः२४। आश्रयाद्गतिजा योगा सन्नाः संख्याभवा अथ। गोल१ युग्म२त्रिशूलानि३ केदारः४ पाश५दामकौ६। वीणे७त्रेकचयस्थानस्थितैः खेटैर्विहायं तान्। यवयवौ न योगौ स्तः पूर्वोक्तत्वादिहोदितौ। क्रूरो कपाटयोऽटनो दुःखभावो रज्जौ१ प्राग्वत्तोमभेदन्यदेशे। नानाभावैः संयुतः कर्मयुक्तो राजेष्टः स्यान्नौशये२ भूरिप्रभः। नले३ऽतिनैपुण्ययुतो धनी स्यादूनाधिकाङ्गश्च धनी खवज्रौः। खजि४ प्रवक्तो बहुभोजनभोगे सर्पे५ऽतिदुःखी विषयोऽतिदीनः। नल्वा नानाभाग्ययोगातिविज्ञो नित्योद्युक्तो द्रव्ययुक् स्याद्दयायाम्६। रोगार्त्तः स्यात् स्यन्दनेनोपलीवी निःस्वो मूर्खो मित्रहीनो रथाख्ये७। योगे विहङ्गे८ बहुलोऽतिसौख्यो दूतोऽटनः स्यात् कलिजश्च निःस्वः। ग्रहाटके९ साहसवान्नृपेष्टः सुखी सभार्यः कलहप्रियश्च। कूपे१० दरिद्रः क्षणिकारकः स्यात् प्रेष्यः सदुःखी बहुभोजनश्च। वज्रे११ऽतिदुःखी वयसस्तु मध्ये स्थूरः सरूपः सुमनः खलद्विट्। यवे१२ऽव्रतो१३मङ्गलतत्परश्च दाता च मध्ये वयसः सुखाढ्यः। पद्मे१४ चिरायुर्बहुपतिर्यशस्वी सुखी धनी कीर्त्तिसमृद्धियुक्तः। वाप्यां१५ स्त्रिरार्थसुखमाप्नुयात् निधिलाभं सुतप्रो नेत्रोत्सवैस्तु रहितो बहुलो न दाता। वृषे१६ व्रती नियमकृत् बहुसत्यसौख्यस्त्यागाकरणात् भरवरोऽपि च वायवूयः। वाणे१७ऽतिसुप्रथितकः परकर्म शीलो भोगायनश्च स्वनयायनयुक्कुशिल्पः। शक्त्यां१८ धनेन रहितो विबलोऽतिदुःखी नीचोऽबलो स्वपरः पुरुषचिरायुः। दण्डे१९ऽलजातः पुत्रदारधनहीनो जनोज्झितः। निर्धनो ऽखिलो नीचः प्रेष्यश्च बहुलो भवेत्। नौयोगे२०ऽलजवसुखः कपटोऽतिकीर्त्तिर्भूपो जनाश्रयधनो जलिनोऽतिवृद्धः। कूटे२१ घटः कपटवञ्चनयोऽतिपापी निःस्वो वनाचलगडेषु कृताधिकारः। कमले२२ दवाधीखजनाश्रयः स्याद्दीर्घायुरायुलसुखी भवेत्। कदम्बे२३ शूरतरः सुखी स्यादायुधयोर्द्धग्रहविपश्च चौरः। चन्द्रार्द्धे२४लसकलसुखः सुमनः सुखाभोगी नराधिपतमश्च बली धनाढ्यः। चक्राकृतौ२५ नृपतिचक्रकिरीटरत्नभाभासुराङ्घ्रियुगलो बहुलाधिनाथः। बहुरत्नार्थयुक्तः स्याद्भोगी पुत्रजनान्वितः। साधुर्वरिष्ठियोगे२६ च स्त्रिरवैभवसंयुतः। योगे गोले१ सकलशास्त्रार्थविद्याहीनो नीतिः सर्वस्वं प्रवासी। युग्मे२ निःस्वोऽतीवपापबहुभुक्तो युक्तायुक्तज्ञानहीनान्तरः स्यात्। योगे त्रिशूले३ विबलश्च शूरः क्रूरः सतो घातकचित्तरः स्यात्। केदारे४जातः क्षणिकर्मकर्त्ता बहुपवोक्तः कुत्सितसत्यश्च। पाशे५ विशीलो बहुभृत्यबन्धुर्बहुप्रपञ्चो बहुमायकश्च। दाम्नि६ स्त्रयुक्तः परुषभाषकः स्यात् सेवोपकारी च वदान्यवीरः। वीणायोगे७ गीतनृत्यप्रियः स्यात् कीर्त्या युक्तः पोषकः स्याद्बहूनाम्। एते योगाः सर्वकार्यं विचिन्त्या वीक्ष्यात् खेटानां प्रपूर्णा अपूर्णाः"।

नाभाक पु० ऋषौ "ऋषिर्नाभाको बभूव" निरु०१०।५ "नाभाकस्य प्रशस्तिभिः" ऋ० ८।४१।२ "नाभाकस्य ऋषेः" भा०।

नाभाग पु० वैवस्वतमनोः १पुत्रभेदे "ऐक्ष्वाकुश्चैव नाभागः" हरिवं० १० अ०। वैवस्वतमनोःपुत्रोक्तौ। भगीरथसुतश्रुतपात्रजे २रूपभेदे "भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः। अम्बरीषस्तु नाभागिः विष्णुद्वीपपिताऽभवत्" हरिवं० १५ अ०।

नाभागारिष्ट पु० वैवस्वतमनोः पुत्रभेदे "नारिष्टप्रांशुकश्च नाभागारिष्टसुताः" हरिवं० १०अ० तत्पुत्रोक्तौ

नाभि पु० नह-इञ् मध्यनाडीयः। १चक्रिणे २सुखमण्डले ३चक्रमध्यांशे रथचक्रस्थपिण्ड्याम्। ४आग्नीध्रपुत्रभेदे ५तत्रामके वर्षभेदे च "तस्यासुरु वा आत्मजान् स

राजवर आग्नीध्रोनाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत्। आग्नीध्रसुतास्ते मातृतुल्यनामानि यथाभागं जम्बुद्वीपवर्षाणि बिभेजुः" भाग०५।२।२१ "नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवच्छिद्रतात्मावलतं" ५।२।१। भारतवर्षस्यैव जम्बुद्वीपवर्षमध्यस्थितत्वात् नाभिसंज्ञा नाभिवर्षशब्दे वक्तव्यकारणान्तराच्च तथा वा। ६प्राण्यङ्गे (नाड) पुंस्त्री मेदि० स्त्रियां ङीप् वा। ७उदरावर्त्ते (गोंड) राजनि०। सुषुम्णान्तर्गते नाभिस्थाने च मणिपूरं चक्रं यथाह तन्त्रसारे "तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः। मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्। शिवेनाधिष्ठितं पद्मं विश्वाशोकनकारणम्" इति। ८मृगनाभिजाते मृगमदे मेदि०। "प्राप्तनाभिनदमञ्जनमाशु" माघः "प्राप्तनाभिमुदिति" पाठः छन्दोमञ्जरीधृतः। पुंस्त्री "सुखच्छुषत्पङ्कजकोषकोमलैरुपाहितश्रीण्युपगीर्वि नाभिभिः" किरा०। ९छेदने "उपगतोऽपि हि मण्डलनाभिताम्" रघुः सोमधारास्रावणार्थं दशापवित्रस्य मध्ये आबध्यमानायां ७रज्जुवि च। "अवधूय पवित्रतदगृद्दशमवाङ् नाभि वितनुयुः" ताण्ड्य० ब्रा०१।२।७ भाष्यधृतब्राह्मणम् ऋतम्। संज्ञायामेतदन्तस्य अच् समा०। पद्मनाभः हिरण्यनाभ इत्यादि।

नाभिकण्टक पु० नाभेः कण्टक इव। (गोंड) नाभेरावर्त्तभेदे शब्दर०। [जनि०।

नाभिका स्त्री नाभिरिव कायति कै-क। कटभीवृक्षे रा-

नाभिगुलक पु० नाभौ गुलक इव। (गोंड) इति ख्याते नाभेरावर्त्तभेदे त्रिका०। [वर्त्तभेदे जटाधरः।

नाभिगोलक पु० नाभौ गोलक इव। (गोंड) नाभेरावर-

नाभिज पु० नाभौ विष्णोर्नाभौ जायते जन-ड। चतुर्दशे ब्रह्मणि त्रिका०। तस्य विष्णोर्नाभिकमलजातत्वात्तथात्वम्। नाभिजन्मादयोऽप्यत्र ज्ञेयाः।

नाभिनाडी स्त्री नाभेर्नाड़ी। नाभौ स्थितायां नाड्यां शिरायां नाडीभेदे "मातृस्तु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा" सुश्रु०।

नाभिनाल न० स्त्री नाभिस्थितं नालम्। नाभिस्थिते नाले "नाभिनालस्थायिनी" इत्यौध्यानम् "तद्दुग्धमाच्युत नाभिनाला" रघुः।

नाभिभू पु० नाभौ विष्णुनाभौ भवति भू-क्विप् ७त०। चतुर्दशे ब्रह्मणि नाभिभूवादयोऽप्यत्र।

नाभिवर्द्धन न० नाभेरुत्सन्नाङ्गावर्द्धनं छेदनम्। नाड्यो छेदने "प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते" संस्कारतत्त्वे धृतमनुवचनम्। संहितायान्तु नाडीवर्द्धनादित्येव पाठः।

नाभिवर्ष पु० नाभेराग्नीध्रस्यपुत्रस्य वर्षः। जम्बुद्वीपस्थे नववर्षमध्ये वर्षभेदे नाभिशब्दे दृश्यम् तस्य नाभिसंज्ञकत्वेऽपि पश्चात् ततकुलजभरतनाम्ना तत् ख्यातं तथाहि ऋषिंहपु० १०अ० नाभिपुत्रस्य ऋषभस्य पुत्रो भरतस्तेन चिरं पालितत्वादस्य भारतवर्षेति संज्ञोक्ता। नाभिवर्षस्य भारतवर्षनामता दर्शिता ऋषभशब्दे १४५।१४० दृश्या। अतएव विष्णुपु० "नाभिश्च प्रथमं वर्षमित्युपक्रमे नव वर्षाणि उक्त्वा "भारतस्यास्य वर्षस्य नव भेदान्निबोधत" इति। नाभिवर्षस्यैव भारतवर्षत्वेन उक्तिः।

नाभिल त्रि० नाभिरस्त्यस्य सिध्मा० लच्। दीर्घनाभियुक्ते

नाभिसम्बन्ध पु० नाभेरेकस्य गर्भजातनाड्यां सम्बन्धः। समानाभितायां गोत्रसम्बन्धे सपिण्डानां एकस्य गर्भे जायमानतया नाडीसम्बन्धत्वम्। "व्यश्नुते च ततः शोको नाभिसम्बन्धसम्भवः" भट्टिः।

नाभ्य त्रि० नाभये हितः शरीरावयवत्वात् यत् "नाभेर्नेमश्छेति" पा०ग० नभादेशस्तु इह न तस्य गवादियतसन्नियोगशिष्टत्वात् रथचक्रावयवार्थत्वे एव नभादेशो नेह। १नाभये हिते २नाभिसम्बन्धिनि च ३महादेवे पु० "नमो नाभाय नाभ्याय नमः कटकटाय च" भा०शा०२८अ०

नाम अव्य० नाम्यते नामि-ड। १कोपे २उपगमे ३प्राकाश्ये ४सम्भावनायां ५कुत्सने च अमरः।

तत्र कोपे "नमापि नाम दशाननस्य परैरभिभवः"। उपगमः साकल्योऽङ्गीकारः "एवं नामास्तु"। प्राकाश्ये "हिमालयो नाम नगाधिराजः"। हिमालयः प्रकाश्येनातिप्रसिद्ध इत्यर्थः। सम्भावनायां "इह नाम सीता भविष्यति"। कुत्सने "कोनामायं सवितुरुदये स्वापमेवं विधत्ते"। तद्रीकायां भरतः। ५विस्मये ६स्मरणे ७विकल्पे च मेदि०। विस्मये "अम्बोनाम गिरिमारोहति"। उत्प्रेक्षीके च "अहस्तु भीतोनामावस्तुतः" दशकु०। मिथ्याभीत इत्यर्थः।

नामकरण न॰ नाम्नः करणं यत्र। संस्कारभेदे तत्र तत्कालादिनिरूपणं ज्यो॰ त॰ यथा "एकादशे द्वादशे वाऽहनि पिता नाम कुर्यादिति" स्मृतिः। एकादशे इति कल्पः कल्पः "समर्थस्य लेपायोगादिति" न्यायात् एतच्च परपरप्रशस्ततरतमकालोदितकर्मेतरकर्मपरम्। गोभिलः "जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणमिति"। व्युष्टे गते। गर्गः "आदौ घोषवदक्षरं यत्रस्यान्मध्ये पुनः स्यादपवेदन्ते दीर्घविसर्जनीयरहितं नाम प्रयत्नात् कृतम्"। "कृते तिथिकरान्विशौम्यदस्रभे चित्रानुराधोत्तरे पौष्णे वादितिरोहिणीषु शुभकृत् पुंसां समैरक्षरैः" दीपिकाक्षरसात् स्वातीशतभिषाश्रवणा अत्र ग्राह्याः। गोभिलसम्मतं पूर्वार्द्धम् देवनामकम्" तेन नारायणजनार्दनादि नाम कुर्यात्। यत्तु नामकरणम् कुलदेवतानक्षत्रानिसम्बन्धं पिता नाम कुर्यादन्यो वा कुलवृद्धः" इति कल्पतरुधृतशङ्खलिखितवचनेनाभिजादनीयं नामधेयं कल्पयित्वा "देवताश्रयं नक्षत्राश्रयं गोत्राश्रयमन्यं वम्" इति गोभिलस्तेषोपनयनकाले च नक्षत्राभिसम्बन्धेन नामाधिधानं तत् शतपदब्राह्मणानुसारात् स्वनक्षत्रपदानुसारात् श्रेयम्। पाश्चात्यानां तथैव व्यवहारः। यत्र तु न तथा कृतम्। तत्र नामाक्षरानुसारनक्षत्रादपि फलं श्रेयम्। अत्र कुलवृद्ध इति दर्शनात् संस्कारान्तरे तथैव व्यवहारः। मनुः "स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्। मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्"। गोभिलः "अयुग्दान्तं स्त्रीणामिति"। यथा यशोदा वसुदेवेत्यादि। नारायणपद्धतौ। "नामकरणं स्थिरलग्ने केन्द्रपञ्चनवमस्थितसौम्ये। लग्नायषष्ठसमधिष्ठितपापे जीवशुक्रयुतिसौम्यदिनेषु" ज्यो॰ त॰। विष्णुपु॰ "ततश्च नाम कुर्वीत पितैव दशमेऽहनि। देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम्" इति। नरमाचष्टे इति नराख्यं नरनाम देवात् पूर्वं तच्च विशिष्टं शर्मयुतम्। "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्गुप्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" इति यमवचने शब्दयोपलक्षणे: "शर्मान्तं ब्राह्मणस्य स्यात्" इति शातातपीयेन शर्मान्तता च। गोभिलः "अयुग्दान्तं स्त्रीणाम्। अयुग्माक्षरं दान्तं यथा यशोदा इत्यादि। "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् सिद्धं सिद्धाधिकारांश्च त्रीपूर्वं वदेदीरयेत्" इति राघवभट्टधृतप्रसोनसारदर्शनात् स्वर्णनाभित्यादिना सिद्धः अधिकारी येषां मन्त्राणामित्यनेन जीवतां श्रीशब्दादित्वं नाम्नो न मृतानां तथेति शिष्टाचारः" संस्कारत॰। अत्र महाभाष्यं यथा दशम्यां यात्रिकाः पठन्ति। "दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमहद्वं त्रिपुरुषानुक्रमनरप्रतिष्ठितं तद्धि प्रतिष्ठितमं भवति द्व्यक्षरं चतुरक्षरं वा नाम "कृतं कुर्यात्तद्धितमिति"। नचान्तरेण व्याकरणं कृतस्तद्धिता वा यस्या विज्ञातुमिति"। "दशम्या उत्तर इति पञ्चमीति योगविभागात् समासः। ततः कालशब्देन बहुलोक्तिः क्रियाविशेषणं चैतत्। दशदिनान्यायौचं भवतीति दशम्युत्तरकालमित्युक्तम्। यदपि गृह्यकाराः पठन्ति दशम्यां पुत्रस्येति तैरपि दशम्यामिति सामीपिकमधिकरणं व्याख्येयम्। घोषवन्तो ये वर्णाः शिक्षायां प्रदर्शितास्तदादि। अन्तरन्तस्थमिति। मध्ये यरलवा यस्य तदित्यर्थः। त्रिपुरुषानुक्रमिति। नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्तानानुक्रायत्यभिधत्त इति त्रिपुरुषानुक्रम् अन्येषामपि दृश्यत इति दीर्घ" इति कैयटः।

नामग्राह त्रि॰ नाम-गृह्णाति ग्रह-अण् उप॰स॰। १नामग्राहके। भावे घञ्। २नामग्रहणे पु॰ "दैवेनसात् पितृत्रात् नामग्राहात्" ऋ॰१०।११२।

नामग्राहम् अव्य॰ नाम+ग्रह-"नाम्न्यादिशिग्रहोः" पा॰ णमुल्। नाम गृहीत्वेत्यर्थे "नामग्राहमरोदीत् स्वा भ्रातरौ रावणान्तिके" भट्टिः "नामग्रहणविशिष्टस्य रोदनक्रियाया व्याप्तुमिष्टत्वाद्द्वितीयेह सकर्मकः" जयम॰।

नामद्वादशी स्त्री द्वयोर्दशानां समाहारः द्वादशी द्वि॰। १गौर्य्यादिनाम्नां २द्वादशके तन्नाम्ना देव्युद्देश्यकव्रतभेदे च तानि नामानि च "गौरी काली उमा भद्रा दुर्गा कान्तिः सरस्वती। मङ्गला वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात्। मार्गशीर्षादिमासेषु पूर्वोक्तं लभते फलम्" देवीपु॰। पूर्वोक्तं फलं मार्गादिद्वादशमासेषु कृष्णाष्टमीव्रतफलम्।

नामधातु पु॰ नामपूर्वको धातुः। सुबन्तनामप्रकृतिके प्रत्ययान्तधातुभेदे पुत्रकाम्यादौ धातौ आत्मनः पुत्रमिच्छतीति वाक्ये द्वितीयान्तपुत्रनाम्नः काम्यच् तत्परे विभक्तिलोपे तदन्तस्य प्रत्ययान्तत्वात् धातुसंज्ञा।

नामधारक त्रि॰ नाममात्रं धरति न तदर्थं करोति धृ-ण्वुल्। नाममात्रधारके विहितक्रियावर्जिते विप्रादौ "अत ऊर्द्ध्वं तु ये विप्राः केवलं नामधारकाः। परिवर्त्य

न तेषां वै सहस्रमुचितेष्वपि। यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। ब्राह्मणास्त्वनधीयानास्त्रयस्ते नामधारकाः" पराशरः। "यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति" मनुः।

नामधेय न० नामन्+स्वार्थे धेय। नामशब्दार्थे "नामधेयानि पृच्छन्तो वन्यानां मार्गशाखिनाम्"। नामधेयं गुरुचक्रे जगत्प्रथमसङ्गवम्" रघुः। "नामधेयं दशम्यान्तु द्वादश्यां वाथ कारयेत्" मनुः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" छा०उप०

नामन् न० ज्ञायते अभ्यस्यते नम्यतेऽभिधीयतेऽर्थोऽनेन वा ज्ञा-नम-वा। "नामन्सीमन्नित्यादिना" नि०। १वाचकशब्दे २संज्ञाशब्दे च। वनति आख्यातार्थं प्रति स्वार्थविशेषणत्वेन नम-नि०। क्रियां प्रति विशेषणतापन्नार्थके प्रातिपदिकरूपे २शब्दभेदे "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तस्मैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि" निरु० १।१

एतल्लक्षणभेदादिकं शब्दश०प्र० उक्तं यथा "निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः। यत् प्रातिपदिकं प्रोक्तं तच्चान्यो नातिरुच्यते" "रूढस्तु लक्षकश्चैव योगरूढश्च यौगिकम्। तच्चतुर्धा परैरूढयौगिकं मन्यतेऽधिकम्। रूढं सङ्केतवच्चास्य संज्ञेति कीर्त्यते। नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा। जातिद्रव्यगुणस्वन्तैर्धर्मैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः। जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केतादग्रेमीनं सदुच्चरम्। उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी। औपाधिकी तद्गतोपाधिना या प्रवर्त्तते। यद्वाऽऽधुनिकसङ्केतयाचितत्वात् पारिभाषिकम्। स्याद्या नैमित्तिकी यत्नमौपाधिकमुपाधिना"। प्रकारान्तरेण तच्च पञ्चविधं यथा "उपाद्यन्तं तदन्तञ्च तद्धितान्तं समासजम्। यन्दाक्षरयुक्तैव नाम पञ्चविधं स्मृतम्"। "एवंविधैस्तानि नामानि परस्य ब्रह्मणोऽनघ!। कर्मणा नामानवाप्नोति कुमाराश्च जगद्गुरुम्। तन्नामयत्नेन गोविन्दमित्येतद्वाक्यम्। नान्यथा। तन्नयो वाच्छितान् कामान् यदवाप्नोति नामयः" विष्णुधर्मवचनम्। मुक्तौ परमेश्वरनामकीर्त्तनादेव श्रेयःप्राप्तिः "हरेर्नाम हरेर्नामैव केवलम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" अधिकं कलिशब्दे १७८७४० उक्तम्। हरेरित्युपलक्षणं देवीभागवते ६स्कन्धे ११अ० देव्यानाम्नः कीर्त्तनस्यापि कलौ श्रेयस्करत्वाभिधानात् यथा "न सन्त्यघानि तावन्ति यावन्ती यन्निरक्ति हि। नाम्नि देव्याः पापदाहे तस्याद्भीतिः कुतो नृप!। अवज्ञयापि यन्नाम कीर्त्तयेद्यारितं यदि। किं किं ददाति तज्जातं समर्थो न हरादयः। प्रायश्चित्तन्तु पापानां श्रीदेवीनामसंस्कृतिः। तस्मात् कलिभयाद्राजन् पुण्यक्षेत्रे वसन्नरः। निरन्तरं परास्वाया नामसंकीर्त्तनं चरेत्"। "उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव सः" रघुः। ४उदके निघण्टुः। नैमनैमादिसंज्ञायाः सर्वत्र मतपदचक्रानुसारेण कृतायाः लक्षणमता प्रसिद्धनाम तु ततोऽन्यदेव नम नन्नमहस्वादौ नाम्नो यथा

नामग्रहणप्रकारमाह पिङ्गलामते "प्रसिद्धं यद्यथेच्छान किं वास्य जन्म नामयत्। यतीनां पुण्यपातेन गुरुणा यत् कृतं भवेत्। लोकप्रसिद्धमथ वा माता पिता च यत् कृतम्" वामने। "सुप्तो जागर्त्ति येनासौ दूरस्थश्च प्रभाषते। यदन्यमनस्कोऽपि तन्नाम प्राणमन्त्र तु"। सनत्कुमारीये "पितृमातृकृतं नाम त्यक्त्वा यत्नाद्दिवैकान्। श्रीवर्णस्य ततो विद्वान् चक्रेषु योजयेत् क्रमात्"।

नामनामिक पु० नाम्नि नामः नमनं प्रकृता अस्यास्य ठन्। परमेश्वरे "जितमानसिक! नामनामिक!" भा०या०१ ४०अ० विष्णुनामोक्तौ।

नाममात्र त्रि० नाम संज्ञैव मात्रा यस्य। स्ववीर्यहीने संज्ञाधारिमात्रे "यथा काष्ठमयाः प्रोक्ता यथाऽश्मस्य भवास्तिकाः। नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः" पञ्चत०।

नाममाला स्त्री ६त०। कोषभेदे

नाममुद्रा स्त्री नामाक्षरस्य मुद्रा यत्र। अङ्गुलीयकभेदे यत्र नामाक्षराणि अङ्कितानि सन्ति तादृशे मुद्राभेदे

नामयशस् पु० नामप्रसिद्धिः यशः नामप्रसिद्धये वा यशः। दम्भते आत्मख्यातिलाभाय वा ददाते यशो यशोऽस्य "आत्मसम्भाविताश्चैव धनमानमदान्विताः। यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्" गीता "नामसाम्येन ये यज्ञास्ते नामयज्ञा यद्वा दीक्षितः कोमलाङ्गीत्येवमादिनामसाम्यप्रसिद्धये ये यज्ञास्ते नामयज्ञाः" श्रीधरः।

नामलिङ्ग न० नाम च लिङ्गं च ते नाम्नो वा लिङ्गम् । १शब्दलिङ्गयोः २शब्दभेदस्य लिङ्गभेदे च "नामलिङ्गानुशासनम्" अमरः । लिङ्गस्य शब्दशब्दप्र० निरूपितं यथा "स्त्रीलिङ्गमपि पुंलिङ्गं क्लीबलिङ्गमिति त्रिधा । शब्दसंस्कारसिद्ध्यर्थं भाषया नाम भिद्यते" स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमित्यपि त्रिधा नाम भिद्यते तत्र स्त्रीलिङ्गत्वादिकं न स्त्रीत्वादिवाचकत्वं तटः तटी तटमित्यादौ प्रकृत्यर्थस्य तटादेः स्त्रीत्वाद्यवगतावयोग्यतापत्तेः । परन्तु स्त्रीलिङ्गत्वादिना परिभाषितत्वमात्रं परिभाषायाः प्रयोजनञ्चेह पदसंस्कारः सोऽपि तट इत्यादौ पुंस्त्वेन सुबादिसङ्घावः । तटीत्यादौ स्त्रीत्वेन ङीबादिप्रत्ययः तटमित्यादौ क्लीबत्वेन सुबादेर्लुगादिरिति दुन्दुभी सुवर्णं इत्यादौ तु शब्दसंस्कारस्यैव प्रकृत्यर्थविशेषस्य वाच्यो न त्वयं दुन्दुभिरिदं सुवर्णमित्यादिनोऽयमाशौतिरसिद्धापरिमितत्वाच्चैवाप्रयोजकः । यत्र तु शब्दादिशब्दे स्त्रीलिङ्गत्वादिप्रयुक्तो नास्ति संस्कारस्य विशेषस्तत्राप्यभेदेन तत्प्राकाङ्क्षे शोभनादिपदे एवास्ति विशेषणपदानां विशेष्यपदलिङ्गप्राधिन्यस्य विना बाधकं निबन्धात् । यत्तु तटादिकं द्रव्यमिव तद्वत् स्त्रीत्वादिकं प्रकृत्यर्थान्तरमपि तटादिपदस्यार्थः प्रत्ययानान्तु तद्व्यञ्जकतामात्रमिति वैयाकरणैरुक्तं तत्र युक्तं तटादिपदेभ्यस्तटत्वादिनेव प्रकृत्यन्तरेण स्त्रीत्वादिना तटादेरननुभवेन तादृशपदान्तरे प्रमाणाभावात् न विप्रा वेदस्वरेदित्यादौ च टाबादिना प्रत्ययेनैव स्वार्थस्य योग्यादिमत्त्वस्य स्त्रीत्वस्य प्रकृत्यर्थेऽनुभावनात् न प्राणि प्राप्नुयाद्वायं न विप्रोऽध्ययनं लभेत्" इत्यादावपि कुप्राकुप्राभ्यां सुब्भ्यामेवोपस्थितं विलक्षणसंस्थानरूपं नपुंसकत्वं प्राणिनि पुंस्त्वस्य विप्रेऽनुभूयते" । [स्मृते हेमच० ।

नामशेष त्रि० नामशेषं शेषोऽस्य । कथामात्रशेषे देहशून्ये

नामसंग्रह पु० नाम्नां शब्दभेदानां संग्रहः । नाम्नामर्थवत्तया पर्यायशब्देन १एकत्र कीर्त्तने ७त० । २तदाधारे अभिधाने च

नामाख्यातिक पु० नाम च आख्यातञ्च (तत्प्रतिपादके) तयोर्व्याख्यानो ग्रन्थः नामाख्यात+ठञ् । नामाख्यातप्रतिपादकग्रन्थयोर्व्याख्याने ग्रन्थे

नामाङ्क त्रि० नाम नामाक्षरमेवाङ्को यत्र । नामाक्षरेणाङ्किते "नामाङ्कवाणाङ्कितकेतुयष्टिम्" रघुः ।

नामादेयम् अव्य० नाम आदियत्र नामन्+आ+दिय–यत् । नाम आदिश्येत्यर्थे ।

नामानुशासन न० अनुशिष्यते अर्थविशेषतया ज्ञाप्यतेऽनेन अनु+शास–करणे ल्युट् ६त० । शब्दानामर्थविशेषज्ञापके अभिधाने कोषे । तेन हि इमे शब्दा एतदर्थे इत्यिमन्तः इति प्रतिपाद्यते इति तस्य तथात्वम् ।

नामापराध पु० नाम्नि तद्विषये अपराधः । भगवदादिनामादिषु अवज्ञादिरूपे अपराधे नामापराधाश्च केचित् पाद्मोत्तरखं० १०२ अ० दर्शिता यथा

"यतो निन्दा नाम्नां परममपराधं वितनुते यतः ख्यातिं यातस्तदुपहसते गर्हयति च । तथा विष्णोरिष्टं य इह गुणनामादि सकलं धिया भिन्नं पश्येत् स खलु हरिनामाऽहितकरः । गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनम् । नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः । दिवौषधं गुरोः पित्रोर्भूसुराणाञ्च कर्हचित् । नामापराधं कुर्वन्ति नाम्नां तथा कचाम् । भोऽन्यत्रतपसीधालीर्ब्रह्मविन्दन्ति नारद ।। नामापराधी च भवेन्नामगोविन्दवैष्णवान् ।

नाम्य पु० नास्ति अम्बः अर्थादिलक्षणप्राचिहिंसा यत्र नञ्ब्रह्मे समासः । अकृष्टपच्ये स्वयंजाते व्रीहौ "अत्र पितायं स्वयं नाम्यानां चरुं निर्वपति तदेनं पित्र एव सतो ब्रह्मचे सुवत्यथ यन्नाम्यानां भवति वरुण्या वा एता ओषधयो वाः क्रष्टे जायन्ते अथैते नैला यन्नाम्यास्तन्नाम्यानां भवति" शत०ब्रा०५।२२।८ "नाम्या नाम अकृष्टपच्याः स्वयंजाता व्रीहयः अकृष्टेनोत्पन्ना ओषधयो वरुण्याः अर्थादिलक्षणहिंसाभावात्" भा० ।

नाय त्रि० नी–कर्त्तरि घञ् । १नेतरि २उपाये "नायः कोऽत्र स वेद स्वां वसाहं विहतस्वरः" भट्टिः । भावे घञ् । ३नीतौ नयने पु० "वात कूर्वं यमन्नायं दिशं नायेव दक्षिणाम्" भट्टिः ।

नायक त्रि० नी–ण्वुल् । १प्रापके २प्रभौ ३श्रेष्ठे ४प्रधाने हारमध्यमणौ च पु० मेदि० ५आपणवीथिके सेनापतौ त्रिका० ६शृङ्गारोद्भवने च । "स च त्रिविधः पतिरुपपतिर्वैशिकश्चेति । तत्र विधिवत् पाणिग्राहकः पतिः । अनुकूलदक्षिणधृष्टशठभेदात् पतिचतुर्धा । सार्वकालिकपराङ्मुखापराङ्मुखत्वे पति सर्वभावसहरसोऽनुकूलः । सकलनायिकाविषयसमदृष्टलाभरागो दक्षिणः । भूयो निःशङ्कः कृतस्नेहोऽपि भूयो निवारितोऽपि भूयः प्रत्यवपरायणो

धृष्टः। कामिनीविषयकपटपटुः शठः। आचारहानि हेतुः पतिरुपपतिः। वञ्चकवेश्याभोगोपरसिको वैशिकः। त्रिविधोऽपि उत्तममध्यमाधमभेदात् पुनस्त्रिविधः। दयिताभूयःप्रकोपेऽपि उपचारपरायण उत्तमः। प्रियायाः यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः। भयलज्जाव्याकुलः कामक्रीडायामलसतत्कालत्यविचारोऽधमः। नायकी चतुरश्च शठ एवान्तर्भवति। वाक्चेष्टाव्यङ्ग्यसमानसमश्चतुरः। प्रोषितश्च पतिरुपपतिर्वैशिकश्च भवति। अनभिज्ञनायकोनायकाभास एव। तेषाञ्च नर्मसचिवपीठमर्द्दविटचेटकविदूषकभेदाच्चतुर्धा सहायाः। कुपितस्त्रीप्रसादकः पीठमर्दः। नर्मसचिवोऽयमेव। कामतन्त्रकलाकोविदो विटः। सुरतज्ञानचतुरश्चेटकः। अङ्गादिचेष्टाभिर्हासकारी विदूषकः। तेषामष्ट सात्त्विकाणुणा यथा। स्वेदस्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलयावित्यष्टौ सात्त्विका गुणाः। तेषां दशावस्था यथा "अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम्। उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च। जड़ता निधनान्येव दशावस्थाः प्रकीर्त्तिताः" इति रसमञ्जरी। सा०द० अन्यथाभेदा दर्शिता यथा। "आलम्बनं नायकादिस्तमाश्रित्य रसोद्भवात्" तत्र नायकः। "त्यागी कृती कुलीनः सुश्रीको रूपयौवनोन्माद्री। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यप्रतीकवान् नेता। धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च। धीरप्रशान्त इत्ययमुक्तः प्रथमं चतुर्भेदः। अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थैर्य्यान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः। मायापरः प्रचण्डस्तपरोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः। निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्। सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्। एभिर्द्वित्रिचतुष्टयैकगुणैरष्टभिस्तु षोड़शधा। एषु स्वनेकमहिलासु समरागो दक्षिणः कथितः। कृतागा अपि निःशङ्कस्तर्ज्जितोऽपि न लज्जितः। दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः। अनुकूल एकनिरतः शठोऽयमेकत्र वल्लभो यः। दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति। एषाञ्च त्रैविध्यात् सर्वेषामुत्तममध्याधमत्वेन। उक्ता नायकभेदाश्चत्वारिंशत्तथाऽष्टौ च" तत्र प्रभौ "तव वरद! करो न सुप्रातमङ्गलमयं नायकः" माघः शक्तिसम्पन्ने श्रेष्ठे हारमध्यगतौ च "यातव्यपार्थिवाहादिमाहात्म्यमधिकद्युतिः। एकार्थतन्तुप्रोतायां नायको नायकायते" माघः "रामोहरिः करी भूष्टङ्गाहुः कर्त्ता च चन्द्रमाः। तस्मिन्यान् भगवानात्मा दृश्यते पुंसि नायकाः"।

नायकाधिप पु० ६त०। रूपे यक्षरत्ना०।

नायिका स्त्री नी-ण्वुल् टापि अत इत्त्वम्। १प्रापिकायां स्त्रियां २शृङ्गाररसालम्बनभूतायां स्त्रियां च तद्भेदादि सा०द० उक्तं यथा

"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति। नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता। विनयार्जवादियुक्ता मृदुकर्मपरा पतिव्रता स्वीया। साऽपि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति। प्रथमावतीर्णयौवनमदनविकारा रतौ वामा। कथिता मृदुरुपमाने समधिकलज्जावती मुग्धा। मध्या विचित्रसुरता प्रवृद्धमदयौवना। ईषत्प्रगल्भवचना मध्यमशीलेति मता। प्रगल्भा जाड़ताकृष्टा समस्तरतकोविदा। भावोन्नता दयीड़ा प्रगल्भाऽऽक्रान्तनायका। ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे। प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दृशेहुषा। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। प्रगल्भा यदि धीरा स्याच्चक्रोपालम्भतिस्तदा। उदासे सुरते तत्र दर्शयन्त्यादरान् बहिः। धीराधीरा तु सोत्प्रासभाषितैः खेदयेदसम्। तर्जयेत्ताडयेदन्या प्रत्येकं ता अपि द्विधा। कनिष्ठज्येष्ठपत्नीत्वान्नायकप्रणयं प्रति। मध्याप्रगल्भयोर्भेदास्तत्प्रादुर्भावादयः कीर्त्तिताः। मुग्धा स्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश। परकीया द्विधा प्रोक्ता परोढा कन्यका तथा। यात्रादिनिरताऽन्योढा कुलटा गणिकातथा। कन्या त्वज्ञातयौवना नवयौवना। धीरा कलाप्रगल्भा स्यादेषा सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि। वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः। कामसङ्कोचितमपि परिचोद्यधनं नरम्। मानो निष्क्रामयेदेषा पुनःसन्धानकाङ्क्षया। तस्करा: पण्डकामूर्खाः सुखप्राप्तधनास्तथा। विक्रिनश्चन्द्रभागाख्या आसां प्रावेश्य वल्लभाः। एषापि गृहगायत्ता क्वापि सत्यानुरागिणी। दूत्यां वा विरक्तायां रसमग्नां सुदुर्लभम्। अवस्थाभिर्भवन्त्यस्या एताः षोड़शभेदिताः। स्वाधीनभर्त्तृका तद्वत् खण्डिताऽभिसारिका। कल-

ष्टान्तरिता विप्रलब्धा प्रोषितभर्तृका। अन्या वासक-सज्जा स्वाधिरहोत्कण्ठिता तथा। कान्तोरतिगुणाकृष्टो न जहाति यदन्तिकम्। विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका। पार्श्वेति प्रियो यस्या अन्यसम्भोगचिह्नितः। सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता। अभिसारयते कान्तं या सन्मथवशंवदा। स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका। चाटुकारमपि प्राणनाथं रोषादपास्य या। पश्चात्तापमवाप्नोति सा कलहान्तरिता तु सा। प्रियः कलापि कलहे यस्या नायाति सन्निधिम्। विप्रलब्धा तु सा प्रोक्ता नितान्तमवमानिता। नानाकार्यवशाद् यस्या दूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका। कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्वाहितप्रियसङ्गमा। आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः। तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा। इति साष्टाविंशतिगतसप्तमध्यमाधमसङ्कलनाः। चतुरधिकाशीतिवृतं शतत्रयं नायिकाभेदानां स्यात्"। २देव्याः शक्तिभेदे "ततोऽष्ट नायिका देव्याः यत्नतः परिपूजयेत्। उग्रचण्डां प्रचण्डां च चण्डोग्रां चण्डनायिकाम्। अतिचण्डां च चाण्डालीं चण्डां चण्डवतीं तथा" ब्रह्मवै०प्रकृतिख० ६०अ०। ४कस्तूरीभेदे "चूर्णाकृतिस्तु चरिका तिलका तिलाभा कौलत्थबीजसदृशी च कुलत्थिकाख्या। स्थूला ततः कियदियं किल पिण्डिका स्यात्सस्यात् किञ्चिदधिकापि च नायिकैषा" राजनि०।

नार त्रि० नरस्येदम् अण्। १नरसम्बन्धिनि २परमात्मसम्बन्धिनि च "नारं स्मृत्वा तु सङ्केतं सचेलं जलमाविशेत्" स्मृतिः नरशब्दे उदा० दृश्यम्। ३जले "आपो नारा इति प्रोक्ताः आपो वै नरसूनवः" मनुः। आर्षत्वात् ङीषोऽभावः। लोके स्त्रियां ङीप् नारी इत्येव। ४तर्पणे बालके च मेदि०। नराणां समूहः अण्। ६नरसमूहे न०।

नारक पु० नरक एव प्रज्ञा० अण्। १नरके। नरको भोग्यतयाऽस्यास्ति अण्। २नरकस्थे प्राणिनि त्रि० अमरः।

नारकिन् त्रि०नरको भोग्यतयाऽस्यास्ति इनि। नरकभोगिनि "परेण विहितं कर्म स्वधर्मेति वदेत् यः। स उच्यते ब्रह्मवादी महापातकिनारकी" हरिहरभट्ट०।

नारकीट पु० नारकीव एटति इट-गतौ क। १ब्रह्मकीटे नारे मनुष्यसमूहे कीट इव। २खदत्तामाहन्तरि च मेदि०

नारङ्ग न० नारं गच्छति गा० ड तुम् नारमिवाङ्गं यस्य वा बहु०। १गर्जरे (गाँजर) राजनि०। २पिण्डीरमे श्वेतजलप्राणिनि इविटे। न नरङ्गो यत्र। ३फलप्रधानवृक्षविशेषे पु० मेदि० (नारङ्गी) ४नागरङ्गे जम्बीरभेदे "नारङ्गं मधुराम्लं स्यात् रोचनं वातनाशनम्। अपरं त्वम्लमत्युष्णं दुर्जरं वातपित्तकृत्" राजवल्लभः। "नारङ्गकेसरमपाञ्जतवीजपूरं योऽश्नाति खण्डमरिचोद्भवचूर्णमिश्रम्। अन्नं गले विशति तस्य नरस्य तीर्णं संदष्टमाशु इव राहुगलेन चन्द्रः"।

नारङ्गक्षीरिणी स्त्री नारङ्गमिश्रिता क्षीरिणी। क्षीरिकाभेदे "क्षिप्त्वा नारङ्गमज्जां वै पचेत् वर्षिणि तापिते। तत्र चाण्डं विनिःक्षिप्य पक्वं मत्याऽवतारयेत्। शीतो भूते विनिःक्षिप्य मात्रयार्द्धं हृतं पयः। नारङ्गक्षीरिणीत्येषा सुगन्धिसुरभीकृता। विष्टम्भी हरेद्वातं पित्तञ्च सुखपाचिका" भैषज्यरत्नावलीधृतवाक्यम्। [भैषज्यरत्नावलि०।

नारङ्गवर्णक न० नारङ्गस्येव वर्णोऽस्य फले कप्। मद्गुने

नारद पु० नरस्य धर्म्यम् "नराद्धेति वक्तव्यम्" इत्यञ् नारं ददाति दा-क। १देवर्षिवरे मुनिभेदे तद्धामनिरूपणं बहुधा दर्शिता यथा "नारं पानीयमित्युक्तं तत्पितृभ्यः सदा भवान्। ददाति तेन ते नाम नारदेति भविष्यति" इत्यागमः। नारदेन पुराकल्पाश्रितः कलभक्षणो व्यार्द्ध मति भाग०१।५।६अ० उक्तो यथा

"अहं पुराऽतीतभवेऽभवं सुते! दास्याश्च कस्याश्चन वेदवादिनाम्। निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम्। ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्त्तिनि। चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे सुनयोऽल्पभाषिणि" इत्युपक्रमे तेभ्यो मुनिभ्यो विनम्रतानम्र आत्मनो कामतृष्णा अनन्यभक्त्या परमेश्वरोपासने कृते भगवतः पार्षदेन जन्मान्तरे तव पारमेश्वररूपदर्शनं भविष्यतीति आत्मानं प्रति उपदेशं वर्णयित्वाऽन्ते स्वस्य जन्मान्तरं वर्णितं यथा "एवं कृष्णगतेर्मुह्यन्नासक्तस्याभवात्मनः। कालः प्रादुरभूत् काले तडित् सौदामनी यथा। प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्। आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः। कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः। शिशयिषोरनुप्राणं विविशान्तरहं विभोः। सहस्रयुगपर्यन्ते उत्थायेदं सिसृक्षतः। मरीचिमिश्रा ऋषयः प्राणेभ्योऽहञ्च जज्ञिरे। अन्तर्ब-

हिव लोकांस्त्रीन् पर्य्येत्यस्कन्दितव्रतः। अतएव महान्महाविष्णोरविघातगतिः क्वचित्। देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम्। मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम्"। कश्यपापत्यनारदवीर्येण तस्य बलभेदे गुह्यगर्भजातकथा ब्रह्मवै०प्र०ख० २।।२२अ० यथा "कान्यकुब्जे च देशे च द्रुमिलो गोपराजकः। कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता। स्वामिदोषेण, सा वन्ध्याकाले च भर्तुराज्ञया। उपस्थितं वने धीरे नारदं काश्यपं मुनिम्। क्रोधज्वालाग्नि श्रीतप्तं ज्वलन्तं ब्रह्मतेजसा। तस्यौ सुवेषं कृत्वा सा ध्यानान्तस्य मुनेः पुरः। उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि। गोपिकाहं द्विजश्रेष्ठ! द्रुमिलस्य च कामिनी। पुत्रार्थिनी चागताहं त्वन्मूलं भर्तुराज्ञया। वीर्याधानं कुरु मयि स्त्री मोमेच्छा सुपस्थिता। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा। इत्यस्य वचनं श्रुत्वा चुकोप मुनिपुङ्गवः। इत्यस्य तत् पुरस्तस्यौ शुष्ककण्ठोष्ठतालुका। एतस्मिन्नन्तरे तेन यथा गच्छति मेनका। तस्या जरस्वलं दृष्ट्वा मुनेर्वीर्यं पपात ह। ऋतुस्नाता च दयिता कृत्वा तद्भक्षणं सदा। सा विप्रगेहे साध्वी च सुषाव तनयं वरम्। तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा। अनाद्यावशेषे च काले बालो बभूव ह। नारं ददौ जन्मकाले तेनायं नारदाभिधः। ददाति नारं ज्ञानस्य बालकेभ्यश्च बालकः। जातिस्मरो महाज्ञानी तेनायं नारदाभिधः। वीर्येण नारदस्यैव बभूव बालको मुने!। मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः। कल्पान्तरे ब्रह्मकण्ठाद्बभूवुर्बहवो नराः। नरान्ददौ तत्कण्ठश्च तेन तन्नारदः स्मृतः। ततो बभूव बालश्च नारदात् कण्ठदेशतः। ततो ब्रह्मा नाम चक्रे नारद इति मङ्गलम्" आदिनारदश्च ब्रह्मणो ललाटाज्जातः यथोक्तं हरिवं० २१अ० "ललाटमध्यादसृजन्नारदं प्रियविग्रहम्। सनत्कुमारं पूर्वं च महायोगी पितामहः"। तस्य दक्षशापकथा "नष्टेषु सर्वलोकेषु दक्षः क्रुद्धोऽब्रवीद्वचः। नारद नाशमेहीति गर्भवासं वसेति च हरिवं०१०अ०। तस्याहर्निशं च भ्रमणं दक्षशापात् यथा "तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः। क्रोधं चक्रे महाभाग! नारदं स शशाप च" स च शापः "तस्माल्लोकेषु ते मूढ! न भवेद्भ्रमतः पदम्" भाग० ६।५।४१ स च भगवद्भक्तनारदभेदः यथाह भाग० १।२।९ "तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणामपि"। तस्य स्वरूपं यथा "ज्वलिताग्निप्रतीकाशो बालार्कसदृशेक्षणः। सव्यापदत्तं विपुलं जटामण्डलमुद्वहन्। चन्द्रांशुगौरे वसने वसानो रुक्मभूषणः। वीणां गृहीत्वा महतीं कक्षायक्षां सखीमिव। कृष्णाजिनोत्तरासङ्गो हेमयज्ञोपवीतवान्। दण्डी कमण्डलुधरः साक्षात्पद्म इवापरः। मेनाजगति गुह्यानां विग्रहाणां गुहोपमः। महर्षिर्विग्रहरुचिर्विद्वान् गान्धर्ववेदवित्। वैरक्तिकिको विभो ब्राह्मः कविरिवापरः। देवगन्धर्वलोकानामादिवक्ता मुनिः परः। गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजाम्। स नारदोऽथ विप्रर्षिर्ब्रह्मलोकपरोऽव्ययः" हरिवं० ५५अ०। २विश्वामित्रपुत्रभेदे "लोकाष्ठो नारदश्चैव तथा कूर्चाग्रतः स्मृतः" भा०अनु०४अ०। विश्वामित्रपुत्रोक्तौ। स्वायम्भुवमनुस्थिते ३प्रजापतिभेदे "अहं प्रजाः सिसृक्षुस्तु तपसाद्या हुतुरुत्तरम्। पतीन् प्रजानामसृजं महर्षीनादितो दश। मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च" स्वायम्भुवमनूक्तौ। कश्यपस्य मुनिपत्न्यां जाते ४गन्धर्वभेदे "कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः। इत्येते देवगन्धर्वा मोनेयाः परिकीर्तिताः" भा०आ० ६५अ०।

नारदपञ्चरात्र न० नारदप्रोक्ते पञ्चरात्रे तन्त्रभेदे तत्र प्रतिपाद्यविषयाश्च दिङ्मात्रमत्रोच्यन्ते। अभिगमनमुपादानमिज्या स्वाध्यायो योग इति पञ्चविधमुपासनं तत्राभिगमनं नाम देवतास्थानमार्गस्य संमार्जनोपलेपनादि। उपादानं नाम गन्धपुष्पादिपूजासाधनसम्पादनम्। इज्या नाम देवता पूजनम्। स्वाध्यायो नाम यथानुसन्धानपूर्वको मन्त्रजपो वैष्णवसूक्तस्तोत्रपाठो नामसंकीर्त्तनं तत्त्वप्रतिपादकशास्त्राध्ययनञ्च। योगो नाम देवतानुसन्धानम्। अन्यत् तत्र द्रष्टव्यम्।

नारदशिक्षा स्त्री नारदप्रोक्ते वर्णोच्चारणशिक्षाभेदे

नारदीय न० नारदप्रोक्तम् "ब्रह्मादयः" पा० वेदव्यासप्रोक्ते नारदं प्रति सनकाद्युपदेशात्मके महापुराणभेदे तत्प्रतिपाद्यविषयाश्च बृहन्नारदीये ९६अ० उक्ता यथा श्रीब्रह्मोवाच। "शृणु विप्र! प्रवक्ष्यामि पुराणं नारदीयकम्। पञ्चविंशतिसाहस्रं बृहत् चित्रकथाश्रयम्। कृतप्रोक्तसंवादः सृष्टिसंक्षेपवर्णनम्। नानाधर्मकथाः पुण्याः प्रकृतं सप्तदाहृताः। प्राक्तमाणे प्रथमे पादे सन-

क्षेत्र महात्मना । द्वितीये मोक्षधर्माख्ये मोक्षोपायनिरूपणम् । वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् । सनन्दनेन नदिता नारदाय महात्मने । महातन्त्रे सुसंदिष्टं पशुपाशविमोक्षणम् । मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारस्य पूजनम् । प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च । गणेशसूर्य्यविष्णूनां शिवशक्त्योरनुक्रमात् । सनत्कुमारमुनिना नारदाय तृतीयके । पुराणलक्षणञ्चैव प्रमाणं दानमेव च । पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम् । चैत्रादिसर्वमासेषु तिथीनाञ्च पृथक् पृथक् । प्रोक्तं प्रतिपदादीनां व्रतं सर्वाघनाशनम् । सनातनेन मुनिना नारदाय चतुर्थके । पूर्वभागोऽयमुदितो बृहदाख्यानसंज्ञितः । अथोत्तरे विभागे तु प्रश्न एकादशीव्रते । वशिष्ठेनाथ संवादो माहात्म्यः परिकीर्त्तितः । रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म च । वसुशापश्च मोहिन्यै पश्चाद्वरण क्रिया । भद्राख्या पुण्यतमा गयायात्रानुकीर्त्तनम् । काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् । वाराविधानं क्षेत्रस्य वज्राख्यानसमन्वितम् । प्रयागस्याहि माहात्म्यं कुरुक्षेत्रस्य तत्परम् । हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा । बदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च । प्रभासस्य च माहात्म्यं पुराणाख्यानकं ततः । गौतमाख्यानकं पश्चाद् वेदपादतपस्ततः । गोकर्णक्षेत्रमाहात्म्यं जलशाख्यानकं तथा । सेतुमाहात्म्यकथनं नर्मदातीर्थवर्णनम् । अवन्त्याश्चैव माहात्म्यं मथुरायास्ततःपरम् । वृन्दावनस्य महिमा यमोद्भ्रान्तिकेर्गतिः । मोहिनीचरितं पश्चादेवं वै नारदीयकम् । यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः । स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा । यस्त्वेतदिह पूर्वाह्णे धेनूनां शतकान्वितम् । प्रदद्याद्द्विजवर्य्याय स लभेत्मोक्षमेव च । यथानुक्रमणीमेतां नारदीयस्य वर्णयेत् । शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत् । [चरिताख्याने उपपुराणभेदे

नारसिंह न० नरसिंहमधिकृत्य कृतो ग्रन्थः अण् । नरसिंह-

नारा स्त्री नरस्येयमण् वा० ङीबोऽभावः । जले शब्दर० ।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः" मनुः ।

नाराच पु० नरान् आचामति आ+चम-ड स्वार्थे अण्, नारं नरसमूहमाचामति आ+चम-ड वा । सर्वलौहमये बाणे अमरः । "तत्र नाराचदुर्दिनम्" रघुः नाराचमन्दे दण्डम् "कुपित मदनसङ्कोचप्रनाराचलीलाम्" माघः "दृढ नमरचतुष्कसङ्घटन्तु नाराचमाचक्षते" उक्ते छन्दोभेदे न०

नाराचिका स्त्री नाराचस्तदाकारोऽस्त्यस्याः ठन् । नाराचाकृतियुक्ते स्वर्णकारादीनां तोलनार्थे यन्त्रभेदे (निकति) शब्दर० अस्त्यर्थे अण् ङीप् । नाराचीत्यपि तत्रार्थे । अल्पार्थे ङीपि तु अल्पे नाराचे स्त्री ।

नारायण पु० नानाविधा निरुक्तिः अनुपदं वक्ष्यते तदनुसारेण व्युत्पत्तिः । १विष्णौ परमात्मनि "जङ्गमनारायणो नरः" विष्णुस० । भाष्ये अस्य व्युत्पत्तिर्दर्शिता यथा "नर आत्मा ततो जातान्याकाशादीनि नाराणि तानि कार्य्याणि अयते कारणात्मना व्याप्नुते नारायणः "यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति मन्त्रवर्णात् "नराज्जातानि तत्त्वानि नारायणीति विदुर्बुधाः । तान्येवायनं यस्य तेन नारायणः स्मृतः" इति महाभारते । अयनत्वात् प्रणव इति वा "यत् प्रयन्त्यभि संविशन्तीति" श्रुतेः "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" मनुः । ब्रह्मवै० ब्र०खं० १०८अ० अन्यथा निरुक्तिर्दर्शिता यथा "साहस्रमुक्तिवचनो नारेति च विदुर्बुधाः । यो देवोऽयनं तस्य स च नारायणः स्मृतः । नाराच कृतपापाश्चाप्ययनं गमनं स्मृतम् । यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः । नारञ्च मोक्षणं पुण्यमयनं स्थानमीप्सितम् । तयोर्ज्ञानं भवेद् यस्मात् सोऽयं नारायणः स्मृतः" । "नारायणेति शब्दोऽस्ति वाणस्ति वशवर्त्तिनी । तथापि नरके मूढाः पतन्तीह किमद्भुतम्" । महाभारतम् । नरस्यापत्यम् नडा०फक् । २नरस्यापत्ये पु० स्त्री० ३अजामिलपुत्रभेदे "कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः । नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः । तस्य प्रवयसः पुत्रा दश तेषान्तु योऽवरः । बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् । दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् । ग्लपितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः" । "निशम्य म्रियमाणस्य सुखतो हरिकीर्त्तनम् । भर्त्तुर्नाम महाराज ! पार्श्वदाः सहसाऽपतन् । विकर्षतोन्मुहूर्त्तयाहासीपतिमजामिलम्" भाग० ६।१।अ० । नारायणस्येदम् अण् । ४नारायणसम्बन्धि सैन्यभेदे "मत्संहननतुल्यानां गोपानामर्बुदं महत् । नारायणा इति ख्याताः सर्वसंग्रामयोधिनः" भा०उ० ७अ०

मुखभेषजविभेदे मरकते दशग्रम्। शुक्लोधोक्ते हृतैल-भेदे न० तच्च त्रिविधं क्षुद्रं बृहन्महच्चेतिभेदात्। तेषां पाकद्रव्यादि क्रमेण तत्रोक्तं तत्र

सुश्रुतस्तु "बिल्वाग्निमन्थश्योनाकपाटलाशालिपर्णिभद्राः। प्रसारणीश्वगन्धा च बृहती कण्टकारिका। बला चातिबला चैव शृङ्गाटा सपुनर्नवा। एषां दश पलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्। पादशेषं परिस्राव्य तैलपात्रे प्रदापयेत्। शतपुष्पा देवदारु मांसी शैलेयकं वचा। चन्दनं तगरं कुष्ठमेलापर्णीचतुष्टयम्। रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्। एषां द्विपलिकान् भागान् पेषयित्वा विनिःक्षिपेत्। शतावरीरसश्चैव तैलतुल्यं प्रदापयेत्। छागं वा यदि वा मेष्यं क्षीरं दत्त्वा चतुर्गुणम्। पाने वस्तौ तथाभ्यङ्गे नस्ये चैव प्रयुज्यते। अश्वो वा वातसम्भिन्नो गजो वा यदि वा नरः। यक्ष्मकः पीठसर्पी च तैलेनानेन सिध्यति। अधोभागे च ये वाताः शिरोमध्यगताश्च ये। दन्तमूले हृत्तलमे मन्यास्तम्भे गलग्रहे। वक्षं शुष्यति चैकाङ्गं मतिर्यस्य च विप्लुता। क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः। बधिराः प्रह्वजिह्वाश्च मन्दमेधस एव च। अल्पप्रजा च या नारी या च गर्भं न विन्दति। वातार्त्तौ दन्तौ रोमहर्षिणश्च दारुणा। एतत् तैलवरं तेषां क्षुद्रं नारायणं कृतमिति"

बृहतः "शतावरी चांशुमती पृश्निपर्णी यष्टी बला। एरण्डस्य च मूलानि बृहत्याः पूतिकस्य च। गवेधुकस्य मूलानि तथा कण्टकारस्य च। एषां दश पलान् भागान् जलद्रोणे विपाचयेत्। पादशेषं रसे पूते तत्र तैलं समावपेत्। पुनर्नवाबलादारुशताह्वाचन्दनानि च। शैलेयं तगरं कुष्ठमेलामांसीस्थिरावचा। अश्वगन्धा-सैन्धवं रास्नापत्राणि च पेषयेत्। मध्यात्रपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्। शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्। अस्य तैलस्य विधिज्ञ शृणु वीर्यमतः परम्। अङ्गानां वातभग्नानां कुब्जराणां तथा नृणाम्। तैलमेतत् प्रयोक्तव्यं सर्ववातनिवारणम्। आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्। गर्भमन्वतरी विन्देत् किम्पुनर्मानुषी तथा। कृतस्यूतं पार्श्वशूलस्य तथैवार्द्धवभेदकम्। अपस्मारं नष्टसंज्ञाञ्च वातरक्तं कृतव्यथम्। कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्। तैलमेतद् भगवता विष्णुना परिकीर्तितम्। नारायणाभिधं

ख्यातं वातानलहरणं शुभमिति"। दृष्टचारायणतैलम्।

भैषतः "बिल्वाग्निमन्था बृहती शृङ्गाटा श्योनाकपाटलाशालिपर्णिभद्रम्। चुद्रा कटिल्लातिबलाग्निमन्थं मूलानि चैषां हरजातानाम्। मूलं विदद्यादथ पाटलीशं प्रत्येकमेषां प्रवदन्ति तज्ज्ञाः। सपादप्रस्थं विधिनोद्धृतञ्च द्रोणैरपामष्टभिरेव पक्त्वा। पादावशेषेण रसेन तेन तैलाढकाभ्यां समभेव दुग्धम्। क्षीरस्य मांसद्रवमेव तुल्यमेकत्र सम्यक् विपचेत् सुबुद्धिः। दद्याद्रसञ्चैव शतावरीणां तैलेन तुल्यं पुनरेव तत्र। रास्नाश्वगन्धाबृहदारुकाष्ठं पर्णी चतुष्का शुद्धदेवराणि। मिश्रीतुमांसीरजमोदयञ्च शैलेयकं चन्दनपुष्कराणि। एला सयष्टी तगराद्दपत्रं शृङ्गाटवर्णास्तु वचाफलाश्च। स्वौषधेद्वीरजचोरकाख्यमेभिः समस्तैर्द्विपलप्रमाणैः। कर्पूरकाक्षीरजगाख्यलानां दद्यात् सुगन्धाय वदन्ति केचित्। प्रस्वेददौर्गन्ध्यनिवारणार्थं चूर्णीकृतानाम् द्विपलप्रमाणम्। चाक्षोद्य सम्यग्विधिवद्विपक्वं नारायणं नाम महत् तैलम्। सर्वैः प्रकारैर्विधिवत् प्रयोज्यमनस्य पुंसां पवनार्दितानाम्। ये पङ्गवः पीठविसर्पणाश्च एकाङ्गहीनाहितवेपमानाः। बाधिर्यमूकत्वयपीडिताश्च मन्याहनुस्तम्भशिरोनदार्त्ताः। तस्मा नराणां नवनीर्यमुक्ताः संसेव्य तैलं बहुशः भवन्ति। वन्ध्या च नारी लभते च पुत्रं वीरोपमं सर्वगुणोपपन्नम्। शाखाश्रिते क्षोभमते च वाते हृद्दौ विशेषं पवनार्दितानाम्। जिह्वानिले दन्तमते च मूले क्षीणादकौजज्वरकर्शितानाम्। प्राप्नोति वृद्धिं प्रमदाप्रियत्वं जीवेच्चिरं चापि भवेत्सुवेष। देवासुरे युद्धवरे समीक्ष्य स्वाम्यस्त्रि भग्नासुरैः सुरांश्च। नारायणेनापि सुरक्षणार्थं स्वामस्तैलं विहितन्तु तेषाम्"।

नारायणक्षेत्र न० ६त०। नारायणस्वामिके गङ्गातटक्षेत्रभेदे "प्रयागमवधिं ज्ञात्वा यावद्धस्तचतुष्टयम्। तत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन" ब्रह्मपु०। अत्र च वर्त्तमानं दृष्टधर्मं पु० ४५अ०।

"अत्र किञ्चित् दद्याच्च साक्षात्पात्राय पुण्यवान्। अत्र प्रतिग्रहे राजन्! विक्रीता लाङ्कलो भवेत्। विक्रीतायाञ्च लाङ्कल्यां विक्रीतः स्याज्जनार्द्दनः। जनार्द्दने च विक्रीते विक्रीतं भुवनत्रयम्। कोऽपि न लाङ्कलस्तस्मात् निःस्वस्यात्प्रवङ्गतः"। तत्र वर्त्तमानि यथा "दीक्षाञ्च देवपूजाञ्च जपं गङ्गातटे चरेत्। शुक्लपक्षः विधानेन कार्त्तिकीजन्मनाचरेत्। श्राद्धञ्च तर्पणञ्चैव परोपकारकर्म

च । परोहेयञ्च मनसा त्यक्तद्रव्यस्य दापनम् । स्तवपाठञ्च मौनञ्च नीचालापविवर्जनम् । केवलं वारिपानञ्च कर्त्तव्यं ब्रह्मभावतः । एतानि किल कर्माणि चेमे नारायणे चरेत्" ।

नारायणतीर्थं न० तीर्थभेदे शिवपु० ।

नारायणप्रिय पु० ६त० । १शिवे २पीतचन्दने नैघण्टुप्रका० ।

नारायणबलि पु० नारायणसंहिग्य देयो बलिः । दुर्मरणमृतानामौर्द्ध्वदेहिकक्रियासम्प्रदानतायोग्यत्वार्थं नारायणादिपञ्चदेवतोद्देशेन देये बलिभेदे तस्य निमित्तञ्च आत्मघातिनृशब्दे ६६०पृ० उक्तं तद्विधानं निर्णयसिन्धावुक्तं यथा

"नारायणबलिस्तु हेमाद्रावाद्यलुप्तारेणोच्यते तत्रादौ क्रियानिबन्धे गारुडे तर्पणप्रकरणम् "कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि । दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन् । अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षयः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भवेति" । शुक्लैकादश्यां देशकालौ संकीर्त्याशुक्लगोत्रस्याशुक्लस्य दुर्मरणात्मघातजदोषनाशार्थम् और्द्ध्वदेहिकसम्प्रदानतायोग्यतासिध्यर्थं नारायणबलिं करिष्ये इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतञ्च पञ्चकुम्भेषु स्थापयेत् "विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्तथा । ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भवेत् । प्रेतोदर्भमयः कार्य्य इति देवप्रकल्पनेति" गारुडोक्तास्तु सर्वास्तु हैमीषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति स्वाहा देवानामपि दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुसूततिलकुशान् दत्त्वा पिण्डान् यज्ञोपवीत्येवाशुक्लगोत्राशुक्लशर्मन् ! प्रेत । विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा पुरुषसूक्तेनाभिमन्त्र्य तेनैव शङ्खोदकेनाभिषिच्याभ्यर्च्याशुक्लशर्माशुक्लगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एवमामात्रं ब्रह्मादिपञ्चभ्यो दद्यात् मन्त्रस्तु "ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः । बलिं गृहीत्वा तृप्यन्तु प्रेतस्य च शुभां गतिम्" । मिताक्षरायान्तु होमबल्यादि नोक्तम् । ततः प्रतिदेवतं त्रिविधं फलं शर्करामधुगुडतानि च निवेद्य पिण्डानभ्यर्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितो जागरं कृत्वा श्वोभूते पुनर्विष्णुं ब्रह्माणं रुद्रं यमं संपूज्यैकोद्दिष्टविधिना श्राद्धपञ्चकं करिष्ये इत्युक्त्वा विष्णुयमब्रह्मरुद्रप्रेतान् स्मरन् विप्रानुपवेश्य प्रेतस्थाने चैकं विष्णुं स्मरन् पाद्यावाहनार्घ्ययुतं तृप्तिप्रश्नान्तं कृत्वोल्लेखनादि कृत्वा स्वगोत्रेण विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे कृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाभ्यर्च्याचान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं कृत्वा विशेषतः सन्तोषं विप्रैः प्रेतायेदं तिलोदकमुपतिष्ठतामिति सतिलमुदकं दापयित्वा भुञ्जीतेति । अत्र विशेषान्तरं च अनन्तभट्टकृतान्त्येष्टिपद्धतौ ज्ञेयम्" ।

नारायणसरस् न० ६त० । तीर्थभेदे । "तेऽपि (यवक्रीताद्याः) पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः । नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः" भाग० ६।५।२१

नारायणाश्रम न० ६त० । तीर्थभेदे "वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा । नारायणाश्रमो नन्दा सीतारामाश्रमादयः" भाग० ७।१४।२६

नारायणी स्त्री नारायणस्येयम् अण् ङीप् । नारायणस्य १शक्तौ २लक्ष्म्यां ३दुर्गायाञ्च तन्निरुक्तिः "यशसा तेजसा रूपेणैनारायणसमा गुणैः । शक्तिर्नारायणस्येयं तेन नारायणी स्मृता" ब्रह्मवै० प्र०ख० ४५अ० । "नारायणाङ्गभूता तेन तुल्या च तेजसा । तथा तस्य शरीरस्था तेन नारायणी स्मृता" ब्रह्मख० २७अ० । नारस्य जीवसंघस्य जलस्य वा अयनी स्थानभूता । "जलायना नराधारा समुद्रशयनाऽपि वा । नारायणी समाख्याता नरनारीप्रवर्त्तिका । वसुस्तदृष्टा सर्वेषु भूतेष्वन्तर्हितायतः । देव्या व्याप्तमिदं सर्वं जगत् स्थावरजङ्गमम्" देवीपु० । ४यतावर्य्यां हेमच० । ५सङ्कलसुनिपत्रां च । "सर्वस्यार्त्तिहरे देवि ! नारायणि ! नमोऽस्तु ते" देवीभा०

नारायणीय त्रि० नारायणस्येदम् "दृष्टाच्छः" पा० छ । १नारायणसम्बन्धिनि २तदुपाख्याने । तच्चोपाख्यानं नारदनारायणर्षिसंवादरूपं भा०शा०३३६अ० अध्यायावधि "नारदस्य च संवादमृषेर्नारायणस्य च" इत्युपक्रमे "नारायणीयमाख्यानमेतत्ते कथितं तव" इत्यन्तेन ३४८ अध्यायान्तेन दर्शितम् । इतत्प्रतिपादकोपनिषद्भेदे च उपनिषच्छब्दे दृश्यम् । [१२२१ पृ०दृश्यम् ।

नारायणोपनिषद् स्त्री ६त० । उपनिषद्भेदे उपनिषच्छब्दे

नाराशंस पु० नरैराशस्यते आ+शंसु-कर्मणि घञ् नराशंसाः पितरः तेषामयम् अण् । नाराशंसानां पितॄणां सोमपानसाधने १चमसे "ते नाराशंसा

सावैश्वदेवात्" कात्या०श्रौ० ९।१२।८ "ते चमसा नाराशंससंज्ञाभवन्ति" कर्कः "आप्यायितांश्चमसान् खादयन्ति ते नाराशंसा भवन्ति" आश्व०श्रौ० ५।६।२०। नाराशंसा भवन्ति इत्यर्थः अन्वर्थसंज्ञेयं नाराशंसा नाम तय ! पितृगणा ऊमाः सोर्वाः काव्याश्चेति तेषामनुसवनं यथासङ्ख्येनाप्यायितानां चमसानां देवता भवन्तीति नाराशंसाश्चमसा भवन्ति"नारायण०। २तद्देवतासु पितृषु "अथ यदि नाराशंसेषु यज्ञः किञ्चिदापद्यते पितृभ्यः नाराशंसेभ्यः इति जुहुयात् पितरोहि तर्हि नाराशंसाः" शत०ब्रा०१२।६।२२। ३पितृचमसस्थसोमे च "मनो त्वा जुहोमहे नाराशंसेन सोमेन" ऋ०१०।५७।१ "नाराशंसेन चमसगतेन सोमेन। नरैः शस्यन्ते इति नराशंसाः पितरः तेषां चमसानां कल्पनमेव होमः। तथाविधेन सोमेन" भा०। ४मन्त्रभेदे "येन नराः प्रशस्यन्ते स नाराशंसोमन्त्रः" निरु० ९।९ स च रुद्रदेवतः यथाह "वाकोवाक्यं पुराणञ्च नाराशंसांश्च गाथिकाः" याज्ञ० व्याख्याने "नाराशंसान् रुद्रदैवत्यान्मन्त्रान्" मिता०।

नारिकेल पु० नल-इण् नालिः केन वायुना जलेन वा इलति चलति इल-क कर्म० रलयोरैक्यम्। स्वनामख्यातेऽन्ये अमरः। नालिकेरोऽपि तत्रार्थे शब्दरत्ना०। "नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम्। विष्टम्भि दृंहणं वल्यं वातपित्तास्रदाहनुत्। विशेषतः कोमलं नारिकेलं निहन्ति पित्तज्वरमूत्रदोषान्। तदेव जीर्णं गुरुपित्तकारि विदाहि विष्टम्भि मतं भिषग्भिः" भावप्र० गुणाः। "तस्मान्नः शीतलं हृद्यं दीपनं शुक्रलं लघु। पिपासा पित्तजित् स्वादु वस्तिशुद्धिकरं परम्"। तस्य मज्जिगुणाः "नारिकेलस्य तालस्य खार्जूरस्य शिरांसि च। कषायस्निग्धमधुरदृंहणानि गुरूणि च" भावप्र० "बालस्य नारिकेलस्य जलं प्रायो विरेचनम्" इति राजवल्लभः। कांस्यपात्रे तत् जलं मद्यतुल्यं यथाह "नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु। मद्यञ्च ताम्रपात्रस्थं मद्यतुल्यं हतं विना" इति धर्मबोधनम्। तस्येदमण्। २तदीये त्रि० "नारिकेलासवं तत्र शालवं च वयः पयुः"रघुः। अष्टम्यां तद्भक्षणनिषेधः"नारिकेले च मूर्खता" ति०त० तिथिभेदेऽभक्ष्योक्तौ "कोजागरव्रतौ सद्रकपानं कार्यं यथाह "नारिकेलोदकं पीत्वा कोजागर्त्तिमहोत्सवे" ति०त० कोजागरशब्दे दृश्यम्।

नारिकेलक्षीरी स्त्री क्षीरिकाभेदे "नारिकेलं तनूकृत्य क्षिप्तं पयसि नोः क्षिपेत्। सितागव्याज्यसंयुक्तं तत् पचेन्मृदुनाग्निना। नारिकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा। गुर्वी सुमधुरा हृद्या रक्तपित्तानिलापहा" भावप्र०।

नारी स्त्री नरजातिः स्त्री नृ+नर+वा जातौ ङीष् नि०। १नरजातिस्त्रियां तद्भेदा रतिमञ्जर्यामुक्ता यथा "पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। चतस्रो जातयो नार्यो रतौ ज्ञेया विशेषतः" अन्यथाऽपि त्रिधा "योषितस्त्रिविधा ब्रह्मन् गृहिण्यां मूढचेतसाम्। साध्वी भोग्या च कुलटा ताः सर्वाः स्वार्थतत्पराः। परलोकभयात् साध्वी तथेह यशसेऽर्थतः। कामस्त्रेहाच्च कुरुते भर्तुः सेवाञ्च सन्ततम्। भोग्या भोगार्थिनी शश्वत् कामस्त्रेहेऽथ केवलम्। कुरुते पतिसेवाञ्च न च भोगादृते शशम्। वस्त्रालङ्कारसम्भोगं सुस्निग्धाहारसत्तमम्। यावत् प्राप्नोति सा भोग्या तावच्च वशगा प्रिया। कुलाङ्गारसमा नारी कुलटा कुलनाशिनी। कपटात् कुरुते सेवां स्वामिनो न च भक्तितः। सदा पुंयोगमाशंसन्मनसा मदनातुरा। आहाराद्धिकं भारं प्रार्थयन्ती नवं नवम्। आरार्थे स्वपतिं तात ! हन्तुमिच्छति पुंश्चली। तस्यां यो विश्वमेन्मूढो जीवनं तस्य निष्फलम्। कथिता योषितः सर्वा उत्तमाधममध्यमाः। स्वाङ्गारामा विजानन्ति मनसा ता न पण्डिताः" ब्रह्मवै०ब्रह्म०ख० २२अ०। गुरुत्रयपादके छन्दोभेदे "भो नारी" छ०र०

नारीकवच पु० सूर्यवंश्ये कृष्णकस्य पुत्रे मूलकापरपर्य्याये नृपभेदे "कृष्णकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः। नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत्" भाग० ९।९।२२ "स्त्रीभिः संवेष्ट्य परशुरामतः परिरक्षितः। अतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मूलमभवत् अतो मूलक इति चोक्तः" श्रीधरः।

नारीकेल पु० नारिकेल+पृषो०। नारिकेलशब्दार्थे शब्दरत्ना० भौरा० ङीष्। नारीकेलीलम्बत स्त्री शब्दरत्ना०।

नारीच न० नाडीच+पृषो०। (नाडिका) शाकभेदे राजवल्ल०

नारीतरङ्गक पु० नारीं तरङ्गयति तरङ्ग+ज्ञतौ णिच् ण्वुल्। नाडीचित्तभ्रमकारके जारे पिङ्गे शब्दमा०

नारीतीर्थ न० तीर्थभेदे भा०श्रा० २२६।२७अ० तदाविर्भावकथा दृश्या "तीर्थानि पुण्यानि तीर्थानि तद्वः प्रभृति

चैव हि। नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वतः। पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम्" यत्र धर्मप्रभृतिपञ्चापुत्रराः विप्रशापेन राक्षसतां प्राप्ता अर्जुनेन मोचिताः अतस्तत्तीर्थनारीतीर्थत्वेन ख्यातम्।

नारीदूषण न० ३त०। "पापं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नोऽन्यगृहवासश्च नारीणां दूषणानि षट्" मनूक्ते स्त्रीणां दोषभेदे। पापं सुरापानम्।

नारीमुख पु० नाडी मुखं प्रधानं यत्र। इ०मं० १४अ० कूर्मविभागे नैर्ऋत्यासक्ते देशभेदे "वडवामुखारवाम्बष्ठ कपिलनारीमुखानन्तौः"।

नारीष्ट त्रि० ६त०। १नारीप्रिये २मल्लिकायां स्त्री राजनि०।

नारीष्ठ त्रि० नार्यां तदानुकूल्ये तिष्ठति स्था-क षत्वम्। गन्धर्वभेदे "गन्धर्वाभ्यां नारीष्ठाभ्यां महाहाहाहूहूभ्यां स्वाहा" सां० श्रौ० ४।१०।७

नारेय पु० सत्याजित्पुत्रमङ्कारस्य पुत्रभेदे "सभाजो मङ्कारात्तु नारेयश्च नरोत्तमौ। जज्ञाते गुणसम्पन्नौ" हरिवं० ३९ अ०।

नार्य पु०न-ण्यत् नरहिते नर्यं तस्येदं अण् वा। नरहितसम्बन्धिनि यज्ञे निघण्टुः "नार्यस्य दक्षिणा" ऋ०८।४।२९। [सम् च। नारङ्गे जम्बीरभेदे हेमच०।

नार्यङ्ग पु० नार्यं नरहितसम्बन्धिनं गच्छति गम-ड

नार्यतिक्त पु० नित्यकर्म०। किराततिक्ते नैघण्टुप्रकाशिका तस्य नरहितत्वात् तिक्तत्वाच्च तथात्वम्।

नाल स्त्री न०नल-बन्धे ज्वला० ण। १काण्डे २पद्मादिदण्डे हेमच० "नालाभरणानाद्यभुजो भजामः" नैष० "कचित् कराभ्यामुपगूढनालम्" रघुः "तयोरपर्यावृतनालदण्डः" कुमा०। नल-घञ्। ३जलनिर्गमे जलादेः प्रवाहे पु० "यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः" मार्कण्डेयपु०।

नालम्बी स्त्री शिवस्य वीणायाम् हेमच०।

नालवंश पु० नालं वंश इव। नले तृणभेदे राजनि०।

नालि(ली) स्त्री नल-णिच् इन् वा ङीप्। १नाड्यां दण्डे २शिरायां ३पद्मादिदण्डे ४शाकभेदे च हिरुपकोषः।

नालिक पु० नलमेव नालमस्त्यस्य ठन्। १पद्मे शब्दरत्ना०। २मल्लिके पुंस्त्री० त्रिका० नाला+स्वार्थे क। नालिका नालायां स्त्री नालिताशाके शब्दच०। चर्मकषायां स्त्री त्रिकाण्ड०। हस्तिकर्णवेधनिकायां स्त्री हारा०। "गजाः सकलकरतललोलनालिका" माघः। श्वेतकलम्बयां कल्पतरुः "कुसुम्भं नालिकायाकर्मिति" ति०त० पाठान्तरम्।

नालिकेर पु० नल-बा० इण् केन वायुना ईर्यते ईर-घञ् कर्म०। नारिकेले तच्छब्दे दृश्यम्। तस्य खण्डपाकविधिस्तथादि वैद्यके उक्तं यथा "कुडवं नालिकेरस्य सूक्ष्मं दृषदि पेषितम्। गुडखण्डस्य कुडवं गव्यक्षीरे चतुर्गुणे। आलोड्य नालिकेरस्य जले मृद्वग्निना पचेत्। धान्यकं पिप्पलीं शुण्ठीं चातुर्जातं सुचूर्णितम्। माष प्रमाणं प्रत्येकं शीतीभूते क्षिपेद्बुधः। नालिकेरस्य खण्डोऽयं पुंस्त्वनिदानबलप्रदः। अम्लपित्तं क्षयं कासं मूत्रं च परिणामजम्। नाशयेदुरक्तपित्तञ्च शुष्कं दावानलो यथा"। अत्र हतपलेन कुष्माण्डवन्नालिकेरस्य भर्जनं विधेयमिति सम्प्रदायः। इ०सं० १४अ० कूर्मविभागे आग्नेयासक्ते २देशभेदे "हृषनालिकेरचर्मद्वीपेत्यादि" तद्वाक्यम्। पृषो० रस्य लः। नालिकेलोऽप्यत्र।

नालिता स्त्री नल-णिच्-क्त। नारीचन्द्रोक्तगुणके पट्टशाके खनामख्याते शाकभेदे शब्दर०।

नाली स्त्री नालि+वा ङीप्। १शाककडम्बे (ढँटा) ख्याते पदार्थे मेदि०। "नालेन रहिता नाली सुस्निग्धा सुदृढीडिता। हते तप्ते परिक्षिप्ता चिञ्चिणीपत्रसंयुता। नाली सरा लघुः शीता पित्तघ्नी कफवातला। सुक्ता शोककरी त्रेया लिप्ता शोधनिका मता" शब्दार्थचि०। २हस्तिकर्णवेधन्याम् ३दण्डात्मककाले घट्याम् त्रिका०। ४पद्मे शब्दर०५पद्मदण्डे ६प्रणाल्याम् ७वाद्यविशेषे शब्दार्थचि०।

नालीक पु०नाल्या कायति कै-क। सुखमात्रे लौहसंयुक्ते अलम्बिद्धे १शरभेदे २शल्याङ्गे ३पद्मसमूहे च न०मेदि० ४शल्ये त्रिका० "कर्णिनालीकनाराचास्तुतुदुर्जनो महारथाः" भा०व० ६१अ० ५नारिकेलकमण्डलौ "तल्पे न शयीत दण्डो नालीकं बिभ्यादुव्रती" स्मृतिः "कासकानिव नालीकांस्त्रिशताः सहसाऽसृजन्" माघः। ततः पुष्करा० देशे इनि। नालीकिनी तत्समूहे स्त्री।

नालीघटी स्त्री नाड्या दण्डकालस्य बोधनार्था घटी डस्य लः। घटीवादनवाद्यभेदे स्त्री शब्दार्थचि०।

नालीप पु० कदम्बके नैघण्टुप्रकाशिका। [शब्दार्थे

नालीव्रण पु०न० नाडी तत्र व्रणः+डस्य लः। नाडीव्रण-

नाल्य त्रि०नलस्यादूरदेशादि सङ्ग्राम०ण्य। नलस्यादूरदेशादौ

नावयन्त्रिक पु० नवयन्त्रस्य तत्प्रतिपादकग्रन्थस्य व्याख्यानो

पन्थः ठञ्। नवयज्ञप्रतिपादकग्रन्थव्याख्याने १ग्रन्थे नवयज्ञो वर्त्तेऽस्मिन् काले तम इति वा ठञ्। २नवयज्ञविधानयोग्ये काले च।

नाविक पु० नावा तरति "नौद्व्यचष्ठन्" पा० ठन्। १नावा तारिणि। नौरस्यस्य वाहनतया व्रीह्या० पक्षे ठन्। नौपृष्ठस्थदण्डचालनेन नौकाचालके २कर्णधारे "महावातसमुद्भूतामपरीक्षितनाविकाम्। अन्यनौप्रतिबद्धां वानोपेयात्तावमात्तुराम्" काम०नी० "नाविकपुरुषे न विश्वासः"। "अख्यातिरिति ते कृष्ण! मग्नानौर्नाविके त्वयि" इति च उद्भटः।

नाविन् त्रि०नौरस्यस्य व्रीह्या० पक्षे इनि। नाविके स्वामी।

नावोपजीवन पु० नावा उपजीवनमस्य आर्थे अलुक्स०। १नौचालनोपजीविजातिभेदे "निषादो मद्गुरं सूते दासं नावोपजीवनम्" भा०व्यातु० ४८अ०सङ्करजात्युक्तौ।

नाव्य त्रि०नावा तार्यं यत् "वान्तोयि प्रत्यये" पा०आवादेशः। १नौकयातार्यं देशे २नौतार्यनद्यादौ च "नाव्याः सुप्रतराः नदीः" रघुः। नवस्य भावः ष्यञ्। ३नूतनत्वे न०

नाव्युदक न० नावि स्थितमुदकं नावि अग्निहोत्रसमाप्तिं यावदुदकम्। १नौकास्थिते जले अग्निहोत्रार्थमग्निप्रणने कृते जलमात्रे च "तयोर्जलयोराहिताग्निना पाननिषेधः कात्या०श्रौ० ४।१०।१५ उक्तो यथा "अन्नतातिथ्यपनोदपूतिदावौधानवीषपक्वनाव्युदकानि वर्जयेत्" सू० नाव्युदकम् नौशब्देन "नौर्हि वा एषा स्वर्ग्या यदग्निहोत्रमिति" श्रुतेरग्निहोत्रमुच्यते तेन अग्निहोत्रार्थमुद्धरणे कृते तत्समाप्तिं यावत् उदकपानं न कुर्यादित्यर्थः। अथ वा नावि नौकायां यदुदकम् तस्य पानं न कुर्यादिति मानवे "या अन्तर्नाव्यापः स्युर्न तासामाचामेन्न लिह्यं दावोदध्यादिति"। यजमान आधानानन्तरमेतानि यावज्जीवं वर्जयेत्" कर्क०।

नाश पु० नश–भावे घञ्। १ध्वंसे निधने २अदर्शने ३पलायने ४अनुपलम्भे च मेदि०। ध्वंसश्च जन्याभावः इति नैयायिकाः अतीतावस्थेति सांख्याः "नाशः कारणलयः" सा०सू० "लीङ् श्लेषणे इत्यनुशासनात् लयः सूक्ष्मतया कारणेऽवस्थितिः सएवातीतावस्थाख्यो नाश इत्युच्यते" प्र०व०भा०। आत्यन्तिकनाशश्च कारणेन सह नाशः इति भेदः "विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते" संक्षेप० "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" वेदा०प० "स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति" गीता।

नाशन त्रि० नाशयति नश–णिच् ल्यु। नाशके "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः" गीता। एवं नाशको ऽप्यत्र "ये परस्वापहर्त्तारः परस्त्रीणाञ्च नाशनाः" भा० अनु० २१अ०।

नाष्टिक त्रि०नष्टं द्रव्यं स्वामित्वेनार्हति वा० ठञ्। १नष्टद्रव्यार्हे तत्स्वामिनि। "अस्य मूलनाहार्थं प्रकाश क्रयशोधितः। अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्" इति मनुः "यदि स्वं नैव कुरुते ज्ञातिभिर्नाष्टिको धनम्। प्रसङ्गविनिवृत्त्यर्थं चोरवद्दण्डमर्हति" वी०मि० व्यासः। प्रसङ्गः चोरत्वसंशयः।

नाष्ट्र त्रि० नश+णिच्–ष्ट्रन्। नाशके स्त्रियां टाप् गौरादिगणे मातामहीशब्दस्यपठनात् पितां ङीष् अनित्य इति पित्त्वेऽपि स्त्रियां न ङीष्। "सूर्यो मा दिवाभ्यो नाष्ट्राभ्यः पातु" ताण्ड्य० ब्रा० १।४।२ "विद्याभ्यो मा नाष्ट्राभ्यःपाहि" यजु० १०।१२

नासत्य पु० द्वि०व०। नास्ति असत्यं यस्य नञ्जाडित्यादिना पा० नञः प्रकृतिभावः। अश्विनीकुमारयोः अमरः। "नासत्याभ्यां वयति वपुः" यजु० १९।८२ अश्विनीकुमारौ च द्वौ नासत्यदस्रनामानौ यथाह "देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति" हरिवं० ९अ०। तेनास्य प्रत्येकाभिप्रायत्वे-एकवचनान्तमपि हरिवंशे तथाप्रयोगात्। निरुक्तकारस्तु ६।१२ "तौ अध्वर उगतो यज्ञम्ने सुष्टी ऐभगं नासत्या पुरन्धिम्" इमास्वचमधिजल्प नासत्यशब्दस्य निरुक्तिभेदानाह। सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य २प्रणेतारावित्याग्रायणः, नासिकाप्रभवौ बभूवतुरिति वा"। तयोर्नासाभवत्वं च अरुणात्मजशब्दे ३५९पृ० दृश्यम्।

नासमौजस् पु० भजमानवंशस्य कम्बलबर्हिषः पुत्रभेदे "असमौजाः सुतस्तस्य नासमौजास्तावुभौ" हरिवं०१९अ० तत्पुत्रोक्तौ।

नासा स्त्री नास–शब्दे भावे अ। १शब्दे वा० करणे अ। २नासिकायां ३गन्धग्राहकेन्द्रियभेदे च। द्वारोपस्थित काष्ठे (भ्रमकाठ) (कपाणि) ख्याते ४पदार्थे अमरः ५वासकवृक्षे राजनि० तत्पुरुषस्य नासाकृतित्वात्तस्य तथात्वम्। नासायाः शुभाशुभलक्षणं गारुडे उक्तं यथा "शुकनासः सुखी स्यात्र शुकनासेऽतिजीवनम्। छिन्नाग्ररूपनासः स्यादगम्यागमने रतः। दीर्घनासे च सौभाग्यं चौर आकुञ्चितेन्द्रियः। स्त्रीमत्तुचिपिटनास

ऋजुर्भाग्यवतां भवेत् । अत्यच्छिद्रा सुपुटा च अवक्रा च नमेश्वरे । क्रूरे दक्षिणवक्रा स्याद्धनिनां च नुतं वक्रतः इति गरुडपु० ।

नासागतरोग इ० सुश्रुतोक्ते नासागतव्याधिभेदे यथा "अथातो नासागतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। अपीनसः१ पूतिनस्यं२ नासापाकश्चतथैव च । तथा-शोणितपित्तं४ च पूयशोणितं५ मेव च । क्षवथुर्ध्मं ७ शतु७-दीर्घोद नासानाहः९ परिस्रवः१० । नासाशोषेण११ सहिता दशैकं चेरिता गदाः । चत्वार्यर्थांसि चत्वारः शोफाः सप्तार्बुदानि च । प्रतिश्यायाच्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः । एकत्रिंशन्मितास्ते तु नासा-रोगाः प्रकीर्त्तिताः । आघ्रायते यस्य विधूयते च पापच्यते क्लिद्यति चापि नासा । न वेत्ति यो गन्ध-रसांश्च जन्तुर्जुष्टं व्यवस्येत्तमपीनसेन१ । तस्यानिलश्ले-ष्मभवं विकारं ब्रूयात्प्रतिश्यायसमानलिङ्गम् । दोषै-र्विदग्धैर्गलतालुमूले संवाहितो यस्य समीरणस्तु । निरेति पूतिर्स्वनासिकाभ्यां पूतिनस्यं२ प्रवदन्ति रोगम् । प्राणश्रितं पित्तमरूंषि कुर्याद्यस्मिन्विकारे बलवांश्च पाकः । तं नासिकापाकश्मिति व्यवस्येद्विक्लेद-कोथावपि यत्र दृष्टौ । चतुर्विधं द्विप्रभवं द्विमार्गं वक्ष्यामि भूयः खलु रक्तपित्तम्४ । दोषैर्विदग्धैश्च यदापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तु । नासा स्रवेत् पूयमसृ-ग्विमिश्रं तं पूयरक्तं५ प्रवदन्ति रोगम् । प्राणाश्रिते मर्मणि सम्प्रदुष्टे यस्यानिलो नासिकया निरेति । कफानुयातो बहुशः सशब्दस्तं रोगमाहुः क्षवथुं ६ वि-धिज्ञाः । तीक्ष्णोपयोगादतिजिघ्रतो वा भावान् क-टूनर्कनिरीक्षणाद्वा । क्षतादिभिर्वा तरुणास्थिमर्मण्यु-द्घाटिते यः क्षवथुर्निरेति । प्रभ्रश्यते नासिकयैव यस्य सान्द्रो विदग्धो लवणः कफस्तु । प्राक्सङ्गितो मूर्ध्नि च पित्ततप्तं तं ध्मं शथुं ७ व्याधिसदाहरन्ति । प्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः । नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तसदाहरन्ति । कफाहतो वायुरुदानसंज्ञो यदा खमार्गे विगुणः स्थितः स्यात् । प्राणं दृणीतीव तदा स रोगो नासानतीनाह ९ इति प्रदिष्टः । अजस्रमश्रु स्रवितप्रकाशं यस्याविवर्णं स्रवतीह १० नासा । रात्रौ विशेषेण हि तं नासापरि-स्रावमिति व्यवस्येत् । प्राणश्रिते श्लेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च । पश्चाच्छिरःपूर्वमथश्च कृच्छ्रादाच्छस्य नासापरिशोष ११ उक्तः । दोषैस्त्रिभिस्तैः पृथगेकशश्च ब्रूयात्तथार्थांसि तथैव शोफान् । शास्त्राक्य सिद्धान्तमवेक्ष्य वापि सर्वात्मकं सप्तकमर्बुदं तु । रोगः प्रतिश्याय इह प्रदिष्टः स वक्ष्यते पञ्चविधः पुरस्तात् । शोफाश्च शोफविज्ञाने नासास्रोतोव्यवस्थिताः । निदाने-ऽर्थांसि निर्दिष्टान्येवं तानि विभावयेत् । [त्रिका० ।

नासाच्छिद्री स्त्री नासा च्छिद्रा यस्याः ङीप् । पूर्णिकाखगे

नासादारु न० नासार्थं दारु । दारोर्ह्रस्वे काष्ठे (झन-काठ) (कपालि) अमरः ।

नासालु पु०नासाये नासिकाशब्दाय अलति पर्य्याप्नोति अल-उण् । कट्फलवृक्षे शब्दच० नासायां तत्फलचूर्णयोगे हि नासिकाशब्दो भवतीति तस्य तथात्वम् ।

नासावंश पु० नासा तन्मध्यभागोवंश इव उच्चत्वात् । नासा-पृष्ठस्यमध्यभागे । [काश्मीरजतायां राजनि० ।

नासासंवेदन पु० नासा संविद्यतेऽनेन सम्+विद्-ल्युट् ।

नासिकन्धम त्रि० नासिकां धमति नासिका+ध्मा-खश् सम् तुलच । नासिकां शब्दायमानां कुर्वति नासिकया शब्दकारके ।

नासिन्धय त्रि० नासिकां तत्स्थजलं धयति नासिका+धे-खश् सम् तुलच । नासिकास्थजलपायके नासिकया जलपायके ।

नासिका स्त्री नास-शब्दे ण्वुल् । १घ्राणेन्द्रिये २तदाधार-गोलके नासाशब्दार्थे । अस्य शसादौ मते च नसा-देशः । नसः नसा नोभ्याम् नस्यनित्यादि । [हारा० ।

नासिकामल पु०६त० । नासास्थिते मले शिङ्घाणे (शिकनी)

नासिक्य त्रि०नासिका+चतुरर्थ्यां सङ्ज्ञायां०ण्य । १नासिका-समीपादौ । स्वार्थे ष्यञ् । २नासिकायाम् । भवार्थे शरी-रावयवत्वात् यत् । ३नासिकाभवे त्रि०४अश्विनीकुमारयोः पु० द्वि०व० हेमच० । ५दक्षिणदेशभेदे "कर्णाटमहाटवि-चित्रकूटनासिक्यकोङ्कणगिरिः" बृ०सं० १४अ० दक्षिणस्थदे-शोक्तौ । स्वार्थे क । नासिक्यक नासायां शब्दमा० ।

नासीर न० नासाय शब्दाय ईरे ईर-क । १अग्रेसरसैन्ये त्रिका० २अग्रेसरमात्रे त्रि० शब्दर० "नवस्य नासीर गते वितेनतः" नैष० ।

नास्ति अव्य० अस्तीति विभक्तिप्रतिरूपमव्ययं "सह सुपा" पा० नञ्शब्देन स० । अविद्यमानतायां सत्ताभावे यथा नास्तिक्षीरा "अस्ति नास्ति न जानाति" इति चाणक्य

नास्तिक त्रि० नास्ति परलोकस्तत्साधनमदृष्टं तत्साक्षीश्वरो

वा इति मतिरस्य ठन् । १परलोकाभाववादिनि २तत्साधनादृष्टाभाववादिनि ३तत्साक्षिण ईश्वरस्यासत्त्ववादिनि च चार्वाकादौ चार्वाकादिषु चार्वाकः माध्यमिकः योगाचारः सौत्रान्तिकः वैभाषिकः दिगम्बरश्चेत षड्विधः । "अतिमात्रोज्झितभीरनास्तिकः" माघः ।

नास्तिकता स्त्री नास्तिकस्य भावः तल् । मिथ्यादृष्टौ परलोकाद्यभावज्ञानस्य मिथ्यात्वात् "प्रज्ञानाशात्मकोमोहस्तथा धर्मार्थनाशकः । तस्माच्चास्तिकता चैव दुराचारश्च जायते' भा॰शा॰ १२३अ॰ ।

नास्तिक्य न॰ नास्तिकस्य भावः ष्यञ् । नास्तिकतायाम् "नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्" मनुः ।

नास्तिट् पु॰ आम्रवृक्षे शब्दच॰ ।

नास्तिवाद पु॰नास्ति परलोकादिरिति वादः । नास्तिकतायाम् "नास्तिवादार्थशास्त्रं हि धर्मविद्वेषणं परम्" हरिवं॰ २८अ॰ ।

नास्य न॰ नासायां भवम् शरीरावयवत्वात् यत् । १बलीवर्द्दनासाबन्धनरज्ज्वाम् "छिन्ननास्ये भग्नयुगे तिर्य्यक्प्रतिसुखागते" मनुः । नासा+चतुरर्थ्यां ण्य । २नासासन्निकृष्टादौ त्रि॰ "मनुष्यान् स्वपुरो दृष्ट्वा नास्यप्राणं चकार यः" हरिवं॰ २१७अ॰ नासासन्निकृष्टस्थमित्यर्थः ।

नाह पु॰ नह–बन्धने भावे घञ् । १बन्धने २कूटे च मेदि॰।

नाहल पु॰ म्लेच्छजातिभेदे हेमच॰ ।

नाहुष(षि) पु॰ नहुषस्यापत्यं वा॰ अण् अत इञ् वा । नहुषनन्दापत्ये यजातौ । "ययातिर्नाहुषः सम्राडासीत् सत्यपराक्रमः" भा॰आ॰ ७५अ॰ ।

नि अव्य॰ नी–वा॰ डि प्रादिः उपसर्गः । १संधे २अधोभावे न्यग्भावे ३भङ्गे ४आदेशे ५नित्ये ६कौशले ७बन्धने ८अन्तर्भावे ९समीपे १०दर्शने ११उपरमे १२व्याप्तये च गणरत्नमहोदधिः उदाहृतं च तत्रैव क्रमशस्तेष्वर्थेषु १निकरो मक्षीणां, २निपतितः । ३निगृहीतं ४निदेशितं, ५निविशते ६निपुणः ७निबन्धः ८निपीतसुटकम् । ९निकटः १०निदर्शनं ११निवृत्तः १२निलयः । १३संयये १४क्षेमे १५टाने १६मोक्षे १७विन्यासे च मेदि॰ । १८निश्चये १९निश्चये दुर्गादासः ।

निःक्षेप पु॰ निर्–(नि)पा क्षिप–भावे घञ् । १न्यर्पणे (गच्छितराखा) अष्टादशविवादान्तर्गते २विवादभेदे । स च वीर॰मि॰ विस्तरेण दर्शितो यथा "अथ निः(नि)क्षेपाख्यव्यवहारपदम् । तत्र निः(नि)क्षेपो-नाम स्वद्रव्यस्य विश्वासेन पुरुषान्तरे स्थापनम् । तथा च नारदः "स्वद्रव्यं यत्र विश्रम्भान्निः(नि)क्षिपत्यविशङ्कितः । निः(नि)क्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति" नच न्यासोपनिध्योरतिव्याप्तिसयोर्लक्षणत्वान्निः(नि)क्षेप एव । याज्ञवल्क्यसमक्षं समर्पितो न्यास इत्युच्यते । अतएव बृहस्पतिः "राजचौरादिकभयाद्दायादानां च वञ्चनात् । स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्त्तितः" इति । अयमेवागन्तुद्रव्यस्थापने उपनिधिरित्युच्यते । तथा च नारदः "असङ्ख्यातमविज्ञातं सगुप्तं यन्निधीयते । तज्ज्ञानीयादुपनिधिं निः(नि)क्षेपङ्कथितं विदुरिति" । असङ्ख्यातम् अनाख्यातम् अविज्ञातम् अदर्शितम् । अतएव बृहस्पतिः "असमक्षं व्यवहितमसङ्ख्यातमदर्शितम् । सद्राङ्कितञ्च यद्द्रव्यं तदौपनिधिकं स्मृतमिति" व्यवहितं करण्डकादौ प्रक्षिप्य पिहितम् । अतएव याज्ञवल्क्यः "वासनस्थमविज्ञातं कृतेऽन्यस्य यदर्प्यते । द्रव्यन्तदौपनिधिकं प्रतिदेयन्तथैव तदिति" वासनं द्रव्याधारं करण्डकादि तत्स्थं वासनस्थम् । कृतपरीक्षणमुपलक्षणम् । अतएव नारदः "निः(नि)क्षिप्यते परगृहे तदौपनिधिकं स्मृतमिति" । तथा चायमेतेषामभेदः । याज्ञवल्क्यस्य समक्षं गणयित्वा स्थापितं निः(नि)क्षेपः । बृहस्पतिनोऽसमक्षं गणितं वा तस्मिन्नागते एतद्दातव्यमित्युक्त्वाऽन्यस्य तत्पुत्रादेर्हस्ते दत्तं न्यासः । सद्राङ्कितमसमक्षमगणितं स्थापितमुपनिधिरिति । निः(नि)क्षेपादीनां स्थापनप्रकारमाह मनुः "कुलजे वृत्तसम्पन्ने धर्मज्ञे सत्यवादिनि । महापक्षे धनिन्याढ्ये निः(नि)क्षेपं निः(नि)क्षिपेद्बुधः" इति । महापक्षे बहुतरबन्धुयुक्ते । निः(नि)क्षेपग्रहणमुपलक्षणम् । बृहस्पतिः "स्थानं गृहञ्च तद्वर्णं विधानञ्च गुणन्तथा । सत्यं शौचं बन्धुजनं परीक्ष्य स्थापयेन्निधिमिति" निधिरुपनिधिः । एतदप्युपलक्षणम् । निः(नि)क्षेपादीनां रक्षणं कथं कर्तव्यं याज्ञवल्क्येत्याह बृहस्पतिः "समाक्षिकं रक्षोदत्तं द्विविधं मनुदाहृतम् । पुत्रवत्परिपाल्यं तद्विनश्यत्यनवेक्षणे" इति । पालयितुः फलमपालयितुर्दोषञ्चाह "दद्यतो यद्भवेत् पुण्यं हेमकूप्याम्बरादिकम् । तत् स्यात्फलमतो न्यासो यथैव धरणागतः । भर्त्तृद्रोहं यथा नार्याः पुंसः पुत्रसुहृद्वधे । दोषो भवेत्तथा न्यासे भक्षितोपेक्षिते नृणाम् । न्याय-

द्रव्यं न गृह्णीयात्तद्भाग्यस्वयंकारः। गृहीतं पालयेद्यत्नात् सकलाचितमर्पयेदिति" न्यासग्रहणमुपलक्षणम्। तेन धनरक्षणादिकं निः(नि)क्षेपादिवयसाधारणमिति मन्तव्यम्। दैवराजोपघाते याचकस्य न दोष इत्याह बृहस्पतिः "दैवराजोपघातेन यदि तद्भाग्यमाप्नुयात्। गृहीतद्रव्यसहितं न तद्दोषोऽत्र विद्यते" इति। गृहीतुरिति शेषः उपेक्षादिद्रव्यदोषाभावादिति भावः। गृहीतद्रव्यसहितमित्युपेक्षाभावनिश्चयायोक्तम्। तेन कथञ्चिन्निः(नि)क्षिप्तमात्मस्य विनाशे प्रमाणान्तरादुपेक्षाभावे निश्चिते गृहीतदोषो न विद्यते इति मन्तव्यम्। दैवराजग्रहणमसमाधेयनिमित्तोपलक्षणार्थम्। अतएव कात्यायनः "राजदैविकचौरैर्वा निः(नि)क्षिप्तं यत्र नाशितम्। गृहीतः सह भाण्डेन दातुर्नष्टमुच्यते" इति। भाण्डेन अर्थेन। नारदोऽपि "गृहीतः सह योऽर्थेन नष्ट एव स दायिनः। दैवराजकृते तद्वत् चेत्तच्छिल्पकारितमिति" तद्वदितिपदेनैकसुपमेयमन्यदुपमानमित्यवगम्यते। तेनैवं योजना गृहीतुरर्थेन सह यो नष्टः स दायिन एव एवन्दैवराजकृते यो नष्टः सोऽपि दायिन एव नष्ट इति दैवग्रहणलक्षणोपलक्षणम्। अतएव याज्ञवल्क्यः "न दाप्योऽपहृतन्तु राजदैविकतस्करैरिति" दैविकपदस्यार्थो विवृतो मनुना "चौरैर्हृतन्तु यद्भोगेनोऽग्निना दग्धमेव वा। न दद्याद्यदि तत्तादृक् न संहरति किञ्चनेति"। यदि तत्तान्निः(नि)क्षेपादल्पमपि धनन्न संहरति न गृह्णाति तर्हि न दद्यादित्यर्थः। तथा च स एव "सप्तद्रे नाग्र्यात्किञ्चिद्यदि तत्तान्न संहरेदिति" क्वचित् केनचिद्धेतुना नष्टमपि गृहीता मूल्यद्वारेण न दाप्य इत्याह कात्यायनः "ज्ञात्वा द्रव्यवियोगन्तु दाता यत्र विनिः(नि)क्षिपेत्। सर्वोपायविनाशेऽपि गृहीता नैव दाप्यते" इति। निः(नि)क्षेपग्रहीतारं प्रत्याह कात्यायनः। "निः(नि)क्षिप्तं यस्य यत्किञ्चित् तत्प्रयत्नेन पालयेत्। दैवराजकृतादन्यो विनाशस्तस्य कीर्त्यते" इति। यस्य पार्श्वे यत् स्थापितन्तत्रावहितेन रक्षणीयम्। यतो दैवराजकृतादन्यो विनाशस्तस्य याचकस्य दोषेण कृतत्वेन कीर्त्यते इत्यर्थः। न केवलन्दुष्कीर्त्तिरेव तस्य किन्तु विनाशे जाते वस्तुमात्रा दोषो वक्तव्यहानिश्चेत्याह स एव "यस्य दोषेण यत्किञ्चिद्विनश्येत क्षियेत वा। तद्द्रव्यं तोदयन्दाप्यो दैवराजकृताद्विनेति"। दोषः प्रमादादिकृतः। बृहस्पतिरपि "भेदेनोपेक्षया न्यासं गृहीता यदि नाशयेत्। याच्यमानो न दद्याद्वा दाप्यस्तत्तोदयन्भवेदिति" कात्यायनोऽपि "न्यासादिकं परद्रव्यं प्रमत्तितमुपेक्षितम्। अज्ञाननाशितञ्चैव येन दाप्यः स एव तदिति" अत्र विशेषमाहतुर्व्यासकात्यायनौ "भक्षिते तोदयन्दाप्यः समन्दाप्य उपेक्षिते। किञ्चिदूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितमिति" किञ्चिदूनञ्चतुर्थांशन्यूनमिति मिताक्षरायाम्। याचनानन्तरमदत्तस्य पश्चाद्दैवराजकृतेऽपि विनाशे तन्मूलमात्रं दातव्यमित्याह व्यासः "याचनानन्तरं नाशे दैवराजकृतेऽपि सः। गृहीता प्रतिदाप्यः स्यान्मूलमात्रन्न संशयः इति। प्रत्यर्पणविलम्बमात्रापराधे सद्वृद्धिकदानस्यान्याय्यत्वात्। राज्ञे च तत्समो दण्डो देय इत्याह नारदः "याच्यमानस्तु यो दातुर्निः(नि)क्षेपन्न प्रयच्छति। दण्ड्यः स राज्ञो भवति नष्टे दाप्यश्च तत्समम्" नष्टे दैवतो राजतो वेति शेषः। याज्ञवल्क्योऽपि "भ्रंशयेन्मार्गितेऽदत्ते दाप्यो दण्डञ्च तत्समम्"। मार्गिते याचितेऽदत्ते सति यदि भ्रंशो दैवराजकृतो नाशो भवति तथापि तद्द्रव्यं मूल्यपरिकल्पनेन। "धनिने याचको दाप्योदण्डो राज्ञे च तत्समम्"। तत्समं दण्डमित्यर्थः। यः पुनःस्वापकानुज्ञया निः(नि)क्षेपमुपभुङ्क्ते तस्य दण्डमाह नारदः "यत्कार्यं साधयेत्तेन निः(नि)क्षेपे स्वमनुज्ञया। तत्रापि दण्ड्यः स भवेत्तच्च सोदयमावहेदिति" दण्डश्च साधितद्रव्यानुसारेण। याज्ञवल्क्योऽपि "आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तच्चापि सोदयमिति" आजीवन् भोगसत्यर्थप्रयोगादिना उपजीवन् स्वेच्छया स्वाम्यननुज्ञया। वृद्धिप्रमाणमाह कात्यायनः। "निः(नि)क्षेपं वृद्धिशेषञ्च क्रयविक्रयमेव च। याच्यमानं न चेद्दद्यादर्द्धं पञ्चकं शतमिति"। निः(नि)क्षेपहर्त्तारमत्याह विष्णुः "निः(नि)क्षेपापहारी वृद्धिसहितन्धनं धनिकस्य दाप्यः"। अस्य दण्डमाह मनुः "निः(नि)क्षेपस्यापहर्त्तारं तत्समन्दापयेद्धनम्। तथोपनिधिहर्त्तारमविशेषेण पार्थिवः" निः(नि)क्षेपापह्नवे कर्त्तव्यमाह व्यासः "निः(नि)क्षेपन्निह्नुते यस्तु नरो वस्तुवलान्वितः। साक्षिभिर्वाथ द्रव्येण विभाव्य प्रतिदाप्यते" दण्डमाह बृहस्पतिः "गृहीत्वापह्नुते यत्र साक्षिभिः शपथेन वा। विभाव्य दापयेद्राजा तत्समं विनयन्तथेति" विनयं दण्डम्। यथाधिकनिः(नि)क्षेपादौ स्वापकस्या-

ऋतवादित्वे साक्षिभ्यो यथास्थितमर्थमवगत्य दण्डनीयः स राज्ञेत्याह मनुः "निः(नि)क्षेपो यः कृतो येन यावांश्च कुलसन्निधौ। तावानेव स विज्ञेयो विब्रुवन् दण्डमर्हतीति" कुलं साक्षिवृन्दम्। असाक्षिके त्वाह बृहस्पतिः "रहोदत्ते निधौ यत्र विसंवादः प्रजायते। विभावकल्पत्र दिव्यमुभयोरपि च स्मृतमिति" उभयोर्मध्ये एकस्येत्यर्थः उभयग्रहणं "रूप्या वान्यतरः कुर्यादिव्यमेव पक्षे यथा स्यादिति। गृहीतस्यापकयोरऋतवादित्वे दण्डमाह मनुः "निः(नि)क्षेपस्यापहर्त्तारमनिः(नि)क्षेप्तारमेव च। सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः। यो निः(नि)क्षेपं नार्पयति यश्चानिः(नि)क्षिप्य याचते। उभौ तौ चोरवच्छास्यौ दाप्यौ वा तत्समं दममिति" चोरवच्छास्यौ चोरवद्दण्ड्यौ चोरवद्दण्डेन दण्डयावितियावत्। दण्डस्य प्रमाणमाह समममिति। मत्स्यपुराणे। यस्तु "यो निः(नि)क्षेपं नार्पयति यश्चानिः(नि)क्षिप्य याचते। तावुभौ चोरवच्छास्यौ दाप्यौ च द्विगुणं दममिति" द्विगुणो दण्ड उक्तः स दुर्वृत्तविषयो ब्राह्मणातिरिक्तविषयो वा अन्यथा समदण्डप्रतिपादकमनुवचनविरोधः स्यादिति। निः(नि)क्षिप्तं द्रव्यमकाले ददतो द्विगुणोदम इत्याह कात्यायनः "प्राह्यस्तूपनिधिः काले कालहीनन्तु वर्जयेत्। कालहीने ददद्दण्डं द्विगुणञ्च प्रदापयेदिति" प्राह्यः निः(नि)क्षेपकारिणेति शेषः यद्भयादुपनिधिरन्यस्य हस्ते न्यस्तस्तद्भयातीते काले न प्राह्य इत्यर्थः। भयातीते काले स्वयमेव नायाचितमर्पणीयम् "सकृद्याचितमर्पयेदिति" बृहस्पतिस्मरणात्। तद्भये वर्त्तमाने स्वयमेवायाचितन्दीयमानं कालहीनन्तस्य दानन्दौष्ट्येनैवेति तद्ददतोऽपि दण्डोयुक्तः। प्राड्विवाकं प्रत्याह मनुः "यो निः(नि)क्षिप्तं याच्यमानो निः(नि)क्षेप्तुर्न प्रयच्छति। स याच्यः प्राड्विवाकेन तन्निः(नि)क्षेप्तुरसन्निधौ। स यदि प्रतिपद्येत यथान्यस्तं यथान्वितम्। न तत्र विद्यते किञ्चित् यत्परेणाभियुज्यते" इति। यदा तु न प्रतिपद्येत तदा राजानं प्रत्याह स एव "तेषां न दद्यायद्यदि तु तद्विरणं यथाविधि। द्वयञ्चिष्टस्य दाप्यः स्यादिति धर्मस्य धारणा। निःक्षिप्तस्य धनस्यैव प्रीत्योपनिहितस्य च। राजा विनिर्णयं कुर्यादृक्षिणस्यास्यधारिणामिति" तेषां अभियोक्तॄणाम्। द्वयं द्विगुणम्। निग्रहस्य दण्डयित्वा अक्षिप्तम् अताडयन्। निः(नि)क्षेप गृहीतारं प्रत्याह बृहस्पतिः "स्थापितं येन विधिना येन यस्य यथाविधि। तथैव तस्य तद्देयं न देयं प्रत्यनन्तरे" इति। स्थापितेतरस्य यस्य स्थापितद्रव्यस्वामित्वं स इह प्रत्यनन्तर उच्यत इति स्मृतिचन्द्रिकायां, प्रत्यनन्तरे पुत्रादाविति कल्पतरौ। स्थापकं प्रत्याह मनुः "यो यथा निः(नि)क्षिपेद्धस्ते यमर्थं यस्य मानवः। स तथैव गृहीतव्यो यथा दायस्तथा ग्रहः। मिथोदायकृतो येन गृहीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः। समुद्रे नाप्नुयात् किञ्चिद्यदि तं तस्य संहरेदिति" दायो दानं स्थापनमिति यावत् गृहीतग्रहणं मिथः अन्योन्यमेव एतदुक्तमवति समासिकं स्थापितम् साक्षिसमक्षं गृहीतव्यम्। रहसि स्थापितं रहस्येवेति। समुद्रे समुद्रसहिते निःक्षेपेऽस्य मूषकादिनोपहते निःक्षेपं स्थापयित्वा न किञ्चिदुदूषणमाप्नुयात्। यदि तस्मान्निः(नि)क्षेपात् प्रतिसमुद्राकरणादिना न संहरेत्किञ्चिदित्यर्थः। स्थापयितुर्मरणे प्रत्यनन्तरे तद्देयमित्याह स एव "स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे। न स राज्ञाऽभियोक्तव्यो न निःक्षेप्तुश्च बन्धुभिरिति" अनेन वचनेन वचोभङ्ग्या स्थापके मृते प्रत्यनन्तरे प्रत्यर्पणं याचकेन कार्य्यमित्युक्तम्। स्वयमेव याचनमन्तरेणेत्यर्थः। याचनमन्तरेण दानमभयादिकालाप्राप्ते मन्तव्यम् अन्यथा दोषापत्तेः। प्रत्यनन्तर बहुत्वे तु नैकस्मिन् प्रत्यनन्तरे देयं किन्तु सर्वप्रत्यनन्तरसन्निधाविति न निःक्षेप्तुर्बन्धुभिरभियोक्तव्य इत्यनेन सूचयाम्बभूव। यदा तु याचकः स्वयमेव न ददाति तदा प्रत्यनन्तरकर्त्तव्यमाह स एव। "अन्विच्छेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्। विचार्य्य तस्य वा वृत्तं साम्नैव परिसाधयेदिति" अन्विच्छेत् अवधारयेत्परिसाधनं याचकसकाशादादानन्तद्याचकवृत्तिं विचार्य्य स तद्वृत्तयाचकविषये साम्नैव कार्य्यं न भयादिप्रदर्शनेन। दुर्वृत्तयाचकविषये तु ऋणादानप्रकरणोक्तेन भयादिप्रदर्शनाद्युपायान्तरेण ऋणादिना कार्य्यमित्यस्यादेव वचनादवगम्यते। तथा सद्वृत्ते विप्रतिपन्ने भूतानुसारेण साधयितुमशक्ये साक्ष्याद्यभावे प्रत्यनन्तरादिना साधयेत्। दुर्वृत्ते तु विप्रतिपन्ने ऋणादिना परिहरेदिति चास्यादेव वचनादवगम्यते। सद्वृत्ते ऋणादिप्रयोगवचनपथेन शोधनस्यायुक्तत्वात्। याचके तु मृते पश्चाद्यदधीनं निःक्षेपादि जायते तेनैव स्थापके प्रत्यनन्तरे

वा प्रत्यर्पणीयमित्यतिस्थूलत्वात् स्मृतिकारैरुपेक्षित-मित्यन्यादानप्रकारवदुपन्यस्यं यदि ग्राहकोऽसौ स्वयं न ददाति तदा स्थापकः प्रत्यनन्तरो वा पूर्वोक्तमार्गेणा-न्विच्छेत् यस्मतिपत्रं पूर्वोक्तेन प्रकारेण परिग्रहं बाध-मेदिस्तेतदपि स्मृतिकारैरुपेक्षितं ग्राह्यं यस्यत्वादिति । "द्वयीषु निः(नि)क्षेप इवार्पितं द्वयम्" कुमा० ।

निःप्रभ त्रि० निर्गता प्रभा यस्य "प्रादिभ्यो धातुजस्य वाच्यो-त्तरपदलोपः" वार्त्ति० । गतशब्दलोपः वा विसर्गस्य सत्वम्, १प्रभाशून्ये पक्षे सत्वे निष्प्रभ इत्यपि तत्रार्थे

निःशम पु० निर्गतः शमात् "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" वार्त्ति० निरा० ५त० । १क्रोधे त्रिका० पक्षे सत्वम् ।

निःशलाक त्रि० निर्गतः शलाकायाः निर्गता शलाका यस्मात् वा । १निर्जने रहसि अमरः । "अरण्ये निःशलाके वा मन्त्रयेदविभावितः" मनुः वा सत्वम् ।

निःशल्या स्त्री निर्गतं शल्यं यस्याः ५ब० । १दन्तीवृक्षे राजनि० तल्लेवने हि शीघ्रं शल्यं निर्गच्छति । २शल्य-वत्प्रतिबन्धकरहिते त्रि० "निःशल्यसुतसृजेयं जीवितम्" दशकुमा०पक्षे सत्वम् । [२अशल्यशून्यमात्रे त्रि० । वा सत्वम्

निःशूक पु० निर्गतः शूकोऽस्मात् । १हस्तशाखौ राजनि०

निःशेष त्रि० निर्गतः शेषो यस्य । समस्ते सकले "निःशेष च्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः" काव्यप्र० वा सत्वम् । निश्शेष तत्रार्थे [पक्षे सत्वम् ।

निःशोध्य त्रि० निर्गतं शोध्यमस्मात् । निर्मले शुद्धे अमरः ।

निःश्रयणी स्त्री निश्चितं श्रीयतेऽनया श्रि-करणे ल्युट् ङीप् । काष्ठमयसोपाने शब्दरत्ना० वा सत्वम् । निःश्रि-इनि ङीप् । निश्रयिणीत्यपि शब्दर० ।

निःश्रेणि स्त्री निश्चिता श्रेणिरत्र । काष्ठसोपाने अमरः । वा सत्वम् । "चक्रे त्रिदिवनिःश्रेणिः सरयूरनुया-यिनाम्" रघुः ।

निःश्रेयस न० नितराम् श्रेयः नि० अच् समा० । १मोक्षे २मङ्गले ३विज्ञाने ४भक्तौ ५अनुभावे च शब्दरत्ना० । "पण्डितो ह्यर्थकृच्छ्रेषु निःश्रेयसकरं वचः" भा०स० १६९श्लो० "तपो विद्या च विप्रस्य निःश्रेयसकरं परम्" मनुः । नितरां श्रेयो यस्मात् अच् समा० । ६शङ्करे पु० मेदि० वा सत्वम् । निश्श्रेयस तत्रार्थे

निःश्वास पु० निरे+श्वस-भावे घञ् । प्राणवायोर्नासया बहिर्निःसरणे "दृषत्फेनपीतस्य निःश्वासोपहतस्य च" मनुः । वा सत्वम् । निश्श्वास तत्रार्थे

निःषम अव्य० निर् षम+तिङन्तवत्० सुबामा० सत्वम् । निन्दायाम् अमरः ।

निःषन्धि त्रि०निष्क्रान्तः सन्धेः सन्धिटित्वात् निरादिब० सु-बामा० सत्वम् । १सन्धिशून्ये २दृढे त्रिका० वा सत्वम् ।

निःषामन् त्रि० निष्क्रान्तः सामः निरा० सुबामा० सत्वम् । सामरहिते वा सत्वम् ।

निःसम्पात पु० निर्गतः सम्पातो यत्र प्रादि० बहु० । गमन-शून्ये १निश्चेष्टे त्रिका०वा सत्वम् । २गतिशून्ये च "आका-शमपि बाणौघैर्निःसम्पातं विधीयताम्" हरिवं०९९अ० ।

निःसंशय त्रि० निर्गतः संशयोऽस्मात् प्रा०ब० । सन्देहशून्ये "ज्ञाते निःसंशये पापे न मुञ्चीतानुपस्थितः" प्रा०त० । पक्षे सत्वम् । निःसन्देहोऽप्यत्र ।

निःसङ्ग त्रि० निर्गतः सङ्गो यस्मात् प्रा० बहु० । सङ्गरहिते सङ्गस्य स्नेहः फलाभिसन्धिश्च "निःसङ्गता सुक्रिपटं यतीनाम्" विष्णुपु० "वेदोक्तमेव कुर्वाणो निःसङ्गोऽ-र्पितमीश्वरे" भव०त० भृत भाग०११ स्कन्धवचनम् ।

निःसरण न०निर्+सृ-भावे ल्युट् । १निर्गमे करणे ल्युट् । २गृहादिमुखे ३सरणे ४निर्वाणे ५उपाये च हेमच० । "दुःखनिःसरणं वेद सर्वज्ञः स सुखी भवेत्" भा०शा० २१५अ० वा सत्वम् ।

निःसार पु० निर्गतः सारो यस्मात् । १शाखोटकवृक्षे (सेयोडा) २श्योनाकभेदे राजनि० ३साररहिते त्रि० । "साहस्ये कदलीसन्निःसारे सारमार्गणम्" शु०त० "जगत् सर्वन्तु निःसारमनित्यं दुःखभाजनम्" का-लिकापु० २७अ० । ४कदल्यां स्त्री वा सत्वम् ।

निःसारण न० निर्+सृ-णिच् ल्युट् । १बहिष्करणे स्वार्थे णिच् करणे ल्युट् वा । २गृहादिमुखे ३निःसरणे च शब्दर० वा सत्वम् । [जटाधरः ।

निःसारित त्रि० निर्+सृ-णिच् कर्मणि क्त । बहिष्कृते

निःसीम(न्) निर्गता सीमा यस्मात् निरादि०बहु० । सीमा-रहिते अवधिशून्ये "निःसीमानन्दमाधीदुपनिषदुपमा तत्परीभूय भूयः" नैष० "अहह महतां निःसीमानश्च-रितविभूतयः" भार० र०अत्र डापोऽभावपक्षे नान्तत्वात् स्त्रियां वा टाप् सनन्तत्वात् न ङीप् इति भेदः । वा सत्वम्

निःस्नेह त्रि० निर्गतः स्नेहो यस्य प्रादि० बहु० । स्नेहशून्ये स्नेहस्य तैलादिद्रव्यं प्रीतिश्च । "निःस्नेहं कीटसञ्चि-तम्" स्मृतिः "ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गवा-सिनः" भा०अनु० २३अ० । २अतस्यां स्त्री त्रिका० तस्य

निष्काशितस्नेहत्वात् तथात्वम् । या विद्यमेव चत्वम् ।

निःस्नेहफला स्त्री निःस्नेहं फलं यस्याः । त्रेतकण्ट-कार्य्यां राजनि० । [ध्वपि निष्प्रकोऽभवत्" रघुः ।

निःस्पृह त्रि०निर्गता स्पृहाऽस्य । आशाशून्ये "निःस्पृहस्ये-

निःस्राव पु०निर्+स्रु–घञ् । अवशेषे "राजनि स्थापितो यो-ऽर्थः प्रत्यर्पं तेन विक्रयः । क्रयो वा, निस्रावलाभात् वणिजां लाभलात् स्मृतः" याज्ञ० "निःस्रावः अवशेषः" मिता० ।

निःस्राव पु०निःस्रवति निर्+स्रु–घ । (नाऊ)(नौका) १भक्त-रसे हेमच० भावे घञ् । २व्यये "यज्ञादानोऽस्यनिःस्रावः स्यात्तः पूजितदेवतः" कामन्द० ।

निःस्व त्रि० निर्गतं स्वमस्य प्रा०ब० । १दरिद्रे "मूर्खोकारो विरूपो च वक्रो वादी विराकको । संगुष्को वाक्षु-रनखो निःस्वः स्वरकाहुकी" गरुडपु० । २धनरहिते ३ज्ञातिरहिते च ।

निःस्वभाव त्रि० निर्गतः स्वभावो यस्य प्रा०ब० । स्वभाव-शून्ये । बौद्धमते वस्तुमात्रस्य निःस्वभावत्वम् यथोक्तं यज्ञावतारे "मुद्धा विविच्यमाणानां स्वभावो नावधा-र्यते । अतो निरभिलाप्यास्ते निःस्वभावाश्च दर्शिताः" (ते पदार्थाः)

निकट अव्य० कस्य समीपम् समीपेऽव्ययी० । पश्चिमापर-सन्निवेशे "चित्यं परिक्षिप्त्यग्नीहक्षिणे निकटे" कात्या०श्रौ०१८।२।१ "पश्चिमापरसन्निवेशः कस्यस्य समीपं निकटम्" वेददी० । अव्ययीभावे अदन्तात् सप्तम्या वा न लुक् ।

निकट त्रि० निकटम् निकटाद्यर्थात् नेः "सप्तोदश" पा० चात् कटच् । आसन्ने सम्बद्धे । "अदूरे मस्यतां विश्विकटं सरः" पञ्चत० ।

निकर पु० निक्+भावादौ अप् । १समूहे अमरः । २प्रारे ३न्यायदत्तधने ४निधौ च मेदि० "निम्बिनीरनिकरेण लताभिरेका" माघः ।

निकर्मण्य न०निर्गतं कर्मण्यमस्मात् प्रा०ब० । १कर्मणरहिते भू-भागे २गृहादिपरिक्षिप्तदेशे सन्निवेशे ३पुरग्रामादुबहि-र्भागस्थविहारभूमौ कर्मण्यशून्यत्वात् तथोक्तत्वात्म् ।

निकष(स) पु० नि+कष(स)–अच् निकष(स)त्यनेन घरसे सो वा । १कषणे २कषणपाषाणे च (कसटीपाथर) अमरः । "निकषे हेमरेखेव सीतासीद्दर्शनादिनी" रघुः कर्मणि च । ३परीक्षार्थं कृष्णचर्मरेखादौ त्रि० "यदा निर्गुणा आप्नोति ध्यानं मनसि पूर्वजम् । तदा प्रज्ञायते ब्रह्म निकषं निकषे यथा" भा०आ० २०५अ० । ४मार्गे अज्ञा-दितीक्ष्णतासाधनास्त्रे अमरः ।

निकषा अव्य० नि+कष–वा० आ । १निकटे अमरः । "विकङ्कत्र बहां निकषा कृनिकषति" माघः निकषायोगे योगार्थे द्वितीया २मध्ये च मेदि० । ३राक्षसमातरि स्त्री

निकषात्मज पु० ६त० । राक्षसे अमरः ।

निकषोपल पु० कर्म० । १मार्गे (कसटी) २प्रस्तरभेदे च ।

निकाम न० नि+कम–घञ् अभिधानात् क्लीवता । १इष्ट-वस्तिलाभे २पर्याप्ते ३अतिशये च अमरः । "निकामतप्ता हिविधेन वह्निना" कुमा० "नित्यं हरेः सन्निहिता निकामम्" माघः ।

निकामम् त्रि० नि+कम वा० अमिन् । विभरां वाक्षे "सिषक्ति स्वजमानानि कामभिः" ऋ०१०।९२।९।"निका-मभिः निकामभिर्वाक्षुकैः" भा० ।

निकाय पु० नि+चि–घञ् कुत्वम् । १निवासे २सजातीय-प्राणिसङ्घे ३समूहे ४परमात्मनि मेदि० "तथा देवनिका-यानां सेन्द्राणां दिवौकसाम्" भा०आ० १२३अ० । "तस्य सर्वनिकायेषु निर्झरेषु गुहासु च" रामा०४।४४।२१

निकाय्य पु० नि+चि–ण्यत् कुत्वम् । घटे अमरः । "स प्रयाणः क्षणः कश्चित् निकाय्यं तेऽधितिष्ठति" भट्टिः ।

निकार पु० नि+कृ–घञ् वा भावे घञ् । १प्रारब्धे २परिभवे अमरः "राज्ञां निकारे सहसा प्रहृत्तः" भा० आ० १८९अ० । "निकारोऽयं प्रसाधनमहत्त भोक्तारि निध-तम्" मालि०म० ३भर्त्सने च ४धान्यादेरर्द्धभागे अमरः । ५अस्वीकारे गङ्गा० ।

निकारण न० नि+कृ–णिच्–ल्युट् । १प्रारब्धे २वधे अमरः

निकाल्य त्रि० नि+चल–ण्यत् । चालनीये निका०।

निकाश पु०नि+काश–घञ् । १प्रकाशे २समीपे च । तस्यार्थे अस्य निभादित्वात् निकाश० वा दीर्घत्व । "तवाय पू-र्वेन्दुनिकाशवक्त्राम्" हरिवं १५४ अ० "आकर्षसङ्कलित-मम्बु विकाशिकाशनीकाशमाप जमतां वितथाभरस्य" माघः । वाक्यस्येऽस्य न पृथक्प्रयोगः ।

निकाष पु० नि+कष–भावे घञ् । कष्टक्षिपने कषणे "तेजोभिः कषनिकाषराजिरौकैः" किरा० ।

निकास पु०नि+कास–घञ् । प्रकाशे नीकाशशब्दार्थे वादस्थे भरतः निभादित्वात् नाक्ष पृथक्प्रयोगः ।

निकुब्जकर्णि अव्य० निकुब्जौ बहुनौ कर्णौ यत्र द्विदण्ड्या० दृष्टसमा० । बहुव्यकर्णके

निकुञ्चक पु० नि+कुच–ण्वुल् । १कुडवपादे प्रस्थपरिमाणे अमरः २वानीरभेदे जलवेतसे भावप्र० ।

निकुञ्ज पु०न० नितरां कौ जायते जन–ड पृषो० । लतादिपिहितोदरे कुञ्जे "कपिकुलसुपयाति क्लान्तमद्रेर्निकुञ्जम्" ऋतुव० ।

निकुञ्जिकाम्ला स्त्री निकुञ्जसुत्पत्तिस्थानत्वेनाम्लता ठन् कर्म० । कुञ्जवल्लर्यां श्रीफलतुल्यगुणायां लतायाम् राजनि० ।

निकुम्भ पु० नि+कुभि–अच् । १दन्तीवृक्षे २कुम्भकर्णराक्षसपुत्रभेदे च मेदि० । "स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ" रामा० लङ्का० ७५।४६श्लो० । ३दानवभेदे "निचन्द्रश्च निकुम्भश्च कपटः कपटस्तथा" भा०आ० ७५ अ० । ४प्रह्लादस्य ४पुत्रभेदे "प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत ! । विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत !" भा०आ० ६०अ० । ५सूर्य्यवन्दपुत्रे "सूर्य्यवर्च्च निकुम्भोऽभूत् आत्मधर्मरतः सदा" हरिवं० १२अ० । ६विश्वदेवभेदे "विश्वदेवाश्च विश्वायां धर्मोत्पन्ना इति श्रुतिः" इत्युपक्रमे "विश्वावसुसुपर्णौ निकुम्भश्च महाबलाः" हरिवं० २०४ अ० । तत्र निकुम्भ इत्यत्र विष्कुम्भ इति पाठान्तरम् । ७कुरुसेनाधिपान्तर्गते नृपभेदे "दुःशासनो निकुम्भश्च कुरुभेदी पराक्रमी" भा०द्रो०१५६अ० । ८कुमाराङ्गचरभेदे "महुकर्णो निकुम्भश्च पद्मः कुमुद एव च" भा०व०७६अ० तत्सेनाध्यक्षौ । ९राक्षसे शिवानुचरभेदे "पार्श्वे तिष्ठन्मांसुच्च निकुम्भमिदमब्रवीत् । राक्षसेश ! पुरीं गत्वा शून्यां वाराणसीं कुरु" हरिवं० २९अ० "अवेहि मां किङ्करमष्टमूर्त्तेः कुम्भोदरं नाम निकुम्भमित्रम्" रघुः १०दन्तीवृक्षे स्त्री गौरा० ङीष् वा राजनि० ।

निकुम्भाख्यबीज न० निकुम्भं दन्तिकाख्यबीजमाख्याति खबीजेन आ+ख्या–क । जयपाले राजनि० ।

निकुम्भित न० नि+कुभि–क्त । नृत्यकरणभेदे "करणानान्तु सर्वेषां सामान्यं लक्षणन्त्विदम् । प्रायो वामकरो वक्षःस्थितोऽन्यः पुरतोऽङ्गुलः । पादाभ्यां करणं ज्ञेयं शतमष्टोत्तरं मतम्" इत्युपक्रमे "निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तनम्" सङ्गीतदा० ।

निकुम्भिला स्त्री लङ्कायाः पश्चिमभागस्थायां १गुहायां २ततस्थदेव्याञ्च "मानुषं मांसमाहारं प्रगृह्यामो निकुम्भिलाम्" रामा०सु०२४।४५ "निकुम्भिला नाम लङ्कायाः पश्चिमभागवर्त्तिनी महाकाली तां ततस्समीपं गत्वा प्रगृह्णामः" इति तट्टीका । "तेन वीरेण तपसा वरदानात् स्वयम्भुवः । अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः । स एष किल सैन्येन प्राप्तः किल निकुम्भिलाम् । यद्युत्तिष्ठेत् कृतं कर्म कृतानृ सर्वांश्च विद्धि नः। निकुम्भिलामसंप्राप्तमक्षतास्त्रं च यो रिपुः" रामा०लङ्का०८५।११श्लो० ।

निकुरम्ब न०नि+कुर–मन्दे वा० अम्बच् । समूहे अमरः । "अनिशतरलकिशलयनिकरेण करेण लतानिकुरम्बम्" गीतगोविन्दम् ।

निकुलीनिका स्त्री निपाते "गतागतं प्रतिगतं चुट्टीच शिकुलीनिकाः" भा०क० ४९अ० । "निकुलीनिकाः निपाताः" नीलकण्ठः ।

निकूल पु० नरमेधाङ्गे षष्ठ्यूपे पशुभेदालम्भोद्देश्ये देवभेदे "उत्कूलनिकूलाभ्यन्निधिनम्" यजु० २०।१४।

निक्लात त्रि०नि+क्ल–क्त । १पराभूते २दूरीकृते ३घटे अमरः । ४पतिते ५नीचे च मेदि० ।

निक्लति स्त्री नि+क्ल–भावे क्तिन् । १भर्त्सने २खेदे ३याञ्चे मेदि० ४दैन्ये शब्दरत्ना० "निक्लतिपरेषु परेषु भूरिधाम्नः" किरा० "निक्लत्या कामये नाहं सुखान्युत धनानि वा" भा०व० २०४ श्लो० । ५पृथिव्यां निघण्टुः । साध्यायां धर्मस्य पुत्रे ६वसुभेदे "यज्ञस्य ततो वासुमहस्रं निक्लतिं वसुम् । धर्मस्यापत्यमित्येवं साध्यायां वै व्यजायत" हरिवं० २०४अ० । [अमरः ।

निक्लृष्ट त्रि० नि+क्लृष–क्त । अधमे आचाराद्विनिन्दिते

निकेचाय पु० नि+चि–यङ् लुक्–घञ् "आदेश कः" इति सूत्रे च कः इति वक्तव्ये आदेरित्युक्तिर्यङ्लुक्यादेरेव चि०कौ०उक्तेः आदेः चस्य कः । गोमलादीनां पुनःपुनः राशीकरणे

निकेत पु० नि+कित–निवासे आधारे घञ् । १गृहे निकेतने भरतः । "निकेतः श्रूयते पुण्यो यत्र विश्रवसो सुतः" भा०व० ८९अ० ।

निकेतन न० नि+कित–निवासे आधारे ल्युट् । १गृहे अमरः "अरण्येऽनियमस्तेषां इत्यमूस्तनिकेतनः" मनुः । कर्मणि ल्युट् । २पलाण्डौ पु० शब्दच० ।

निकोचक पु० नि+कुच–मन्दे वुन् । अङ्कोटे अमरः अच् निकोच तत्रार्थे "निचुलपिचु निकोचकोरमाचमलतोनि

पित्तरोगहरात्याल्डः स्निग्धोष्णानि गुरूणि च" सुश्रुतः।

निकोठक पु० नि+कुठि-बुन् पृषो० नलोपः। अङ्कोठवृक्षे भरतः।

निक्रमण न० नितरां क्रमते यत्र नि+क्रम-आधारे ल्युट्। स्थाने "निक्रमणं निगदनं निवर्त्तनं यत्र पट्टीशमर्पतः" रा० १६२।१४ "निक्रमणं स्थानम्" भा०।

निक्रष पु० नि+कष-यङ्ग "कषो वीथायाम्" पा० पक्षे अप्। वीथायाः यङ्गे अमरः।

निक्राण पु० कष-यङ्गे पक्षे घञ्। वीथादेः यङ्गे अमरः

निक्षा स्त्री निक्ष-अच्। निक्षायां (निक्षी) स्थाते जुहूवृक्षे उणादिकोषः।

निक्षुभा स्त्री नि+क्षुभ-क। १सूर्यपत्न्यां २ब्राह्मण्यां च हेमा० ब्र०ख० भविष्यपु० "निक्षुभार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम्" इत्युपक्रमे "निक्षुभा सूर्यपत्नी तया वहितोऽर्कः निक्षुभार्कः" तत्र व्याख्या, "निक्षुभा ब्राह्मणी प्रेया वाचकोऽर्कः प्रकीर्त्तितः" तत्रैव भविष्यपु०।

निक्षिप्त त्रि०नि+क्षिप-क्त। १त्यक्ते जटा०२क्षतनिःक्षेपदूरे च

निक्षेप पु० नि+क्षिप-घञ्। १निःक्षेपशब्दार्थे निःक्षेपशब्दे दृश्यम्। २शिल्पिहस्ते संस्कारार्थं द्रव्यादेरर्पणे च

निखर्व पु०१अयुतकोटिसंख्यायां २तत्संख्येये च "अर्बुदमज्जं खर्वनिखर्वमहापद्मशङ्कुवस्तस्मात्" लीला० नितरां खर्वः २वामने त्रि० हेमच०।

निखर्वट पु० रावणसैन्यगतराक्षसभेदे "विरूपाक्षेण सुग्रीवसारेण च निखर्वटः" भा०व० २८४अ०।

निखात त्रि० नि+खन-क्त। खनित्वाऽऽरोपिते "अष्टादशद्वीपनिखातयूपः" रघुः।

निखिल त्रि० निहतं खिलं येषां यस्मात्। सकले समग्रे अमरः। "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः।

निगड पु०न०। नि+गड-अच् यस्य डः। १पदबन्धायाम् (बेडी)। निहतो गडः सेचनमस्मात् कठिनत्वात्। २पादबन्धने हस्तिपादबन्धने अन्दुके अमरः। "संसारे संनिबद्धानां निगडच्छेदकर्त्तरि" ब्रह्मवै०पु० "बद्धापराधि परितो निगडान्यवागेत्" माघः। ३बद्धे त्रि० "बद्धस्य निगडस्य च" मनुः "निगडः निगडितः" कुल्लू०। यस्य नडः। निगडः तत्रार्थे हेमच०।

निगडित त्रि०निगडो जातोऽस्य तारा० इतच्। १बद्धे संयते

निगण पु० निगरच+पृषो०। १होमधूमे त्रिका०।

निगद पु० नि+गद-अच्। १भाषणे २शब्दमात्रे च अमरः। "यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते" मनुः भाष्यधृतमन्त्रः। "निगदस्तु जनैर्वेद्यः" आगमोक्ते २जपे च। कर्मणि घञ्। उच्चैर्जप्ये ४मन्त्रे च "य एवास्य मन्त्रो यो निगदः" शत०ब्रा० ११।२।१६।

निगम पु० निगम्यतेऽत्र अनेन वा नि+गम-घञ्। १पुरभेदे तत्र भवः अण् न वृद्धिः। २वाणिजे २कटभेदे ४वणिक्पथे हट्टे मेदि०। ५निश्चये ६अध्वनि पर्य्यायकथनेन वेदार्थबोधके ७न्यत्वभेदे हेमच० न्यायमतसिद्धे पञ्चावयवन्यायमध्ये चरमावयवे निगमनशब्दे दृश्यम्। ८न्यायशास्त्रे ९तन्त्रभेदे १०वेदे च। "निगमकल्पतरोर्गलितं फलम्" भाग० १।१।३

"आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" ऋ०अनुक्रमणिकायाम् "निगमशब्दो वेदवाची यास्केन तत्र तत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात् तस्मिन् निगम एव प्रायेण वर्त्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्" ऋग्वेदभाष्ये माधवः।

निगमन न० निगम्यतेऽनेन करणे ल्युट्। १न्यायस्य चरमावयवे। निगमनलक्षणं गौ०सू० उक्तं यथा

"हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्" गौ०सू० "साधर्म्योक्ते वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम् निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम् निगम्यन्ते समर्थ्यन्ते सम्बोध्यन्ते तत्र साधर्म्योक्ते तावद्धेतौ वाक्यम् अनित्यः शब्दः इति प्रतिज्ञा, उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम्। तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् वैधर्म्योक्तेऽपि अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टम् न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति" भाष्यम्।

तत्सूत्रं वृत्तौ तु अन्यथा व्याख्यातम्।

"हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य अपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनं निगमनं तथा च व्याप्तिविशिष्टपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्तपक्षधर्महेतुप्राप्तसाध्यविशिष्ट-

प्रत्ययोधकस्तादृशबोधको वान्यायावयवो निगमनम् इति" अनु०चिन्ता० तल्लक्षणं यथा

"उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्" ।

प्रतिकूलप्रमाणाभावस्तूचके २प्रतिज्ञोपसंहारवचने तस्मात् तथेति वचने यथा "असकृदनुचिन्तितानामव्याहततरनिजोपदेशानाम् । प्रामाण्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम्" वेदान्तप्र० ।

निगरण न० नि+गॄ–ल्युट् । गरणस्य वमनस्य प्रतिरूपे व्यापारे १भक्षणे मेदि० । निगीर्यतेऽनेन करणे ल्युट् । २गले पु०मेदि० । ३होमधूमे शब्दरत्ना० । रस्य णः । निग इव मन्यत्र ।

निगा(ग)ल पु० नि+गॄ–घञ् अप् वा रस्य णः । १भक्षणे करणे घञ् । २अश्वगजदेशे अमरः "घण्टागजमयीपस्त्री निगालः कीर्त्तितो बुधैः" अश्वशास्त्रम् । [शब्दार्थचि० ।

निगालवत् पु० निगाल+अस्त्यर्थे मतुप् मस्य वः । अश्वे

निगीर्ण त्रि० नि+गॄ–क्त । १भक्षिते २अन्तर्भाविते च "विषयविषारोपणयोरेऽन्तःक्षिप्ते–निगीर्णे अन्यस्मिन्नारोपविषये" काव्यप्र० ।

निगु पु० निश्चलते स्रावते पदार्थोऽनेन नि+चल वा० डु रस्योपच । १मनसि त्रिका० । २मले ३मूले ४चित्तकर्मणि च संचिप्तसारोपादिवृत्तिः ।

निगुत् त्रि० नि+गु–शब्दे क्विप् तुक् । मयादिना अव्यक्तशब्दकारके "प्रत्यक्षोपलब्धा निगुतः" ऋ०१०।१२८।६

निगूढ त्रि० नि+गुह–क्त । १गुप्ते २वनसर्पे पु० हेमच० "सुराजेव निगूढमन्त्रसाधनचिंतविग्रहः" काद० ।

निग्रन्थन न० नि+ग्रन्थ–भावे ल्युट् । मारणे हेमच० ।

निग्रह पु० नि+ग्रह–अप् । १भर्त्सने २सीमायाम् ३बन्धने ४अनुग्रहाभावे ५चिकित्सायां निग्रहे ग्रहणस्य ६तिरस्कारे ७मारणे ग्रहणवारणाय ८रोधे च निरोधरूपयोगेन अभ्यासवैराग्यां ९मनसोनिरोधे "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" । "तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्" गीता । १०परमेश्वरे पु० "प्रग्रहो निग्रहो व्यग्रः" विष्णुसं० । "सर्वं प्रग्रहे निग्रह्णातीति निग्रहः" भा० ।

निग्रहस्थान न० गौतमोक्ते वादिनोनिग्रहास्पदे वाक्यभेदे तल्लक्षणं यथा

"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" गौ० सू० "क्रमप्राप्तं निग्रहस्थानमुद्दिशति । निग्रहस्य स्वीकारस्य स्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिरप्रतिपत्तिः प्रकृतज्ञानं यद्यपि तदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोद्भावकधर्मवत्त्वं तदर्थः उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति" वृत्तिः । निग्रहस्थानानि द्वाविंशतिः यथा "प्रतिज्ञाहानिः१ प्रतिज्ञान्तरम्२ प्रतिज्ञाविरोधः३ प्रतिज्ञासंन्यासो४ हेत्वन्तर५मर्थान्तरं६ निरर्थक७मविज्ञातार्थ८मपार्थक९मप्राप्तकालं१० न्यूनं११मधिकं१२ पुनरुक्त१३मननुभाषणं१४मज्ञानम्१५मप्रतिभा१६विक्षेपो१७ मतानुज्ञा१८पर्यनुयोज्योपेक्षणं१९ निरनुयोज्यानुयोगो२०ऽपसिद्धान्तो२१ हेत्वाभासाश्च२२ गौ०सू०उक्तानि । [शापे ।

निग्राह पु० नि+ग्रह–घञ् । अनिष्टं ते भूयादित्येवं रूपे

निघ पु० निर्विशेषेण हन्यते हन–क नि० । समविस्तारदेश्ये तुल्यारोहपरिणाहे पदार्थे अमरः । निघा निघतदञ्चद्भिः"भट्टिः "निघो निमितम्" पा०निमितमिह समारोहपरिणाहाभ्यां मितं निमितमित्युच्यते" जयम० ।

निघण्टिका स्त्री शब्दभेदे राजनि० ।

निघण्टु पु०नि+घटि–उ । पर्यायनाम्नामेकत्रार्थकथनाय संपदे कोषाभिधानादौ तत्र कृत्वे दमाद्योपक्रमे उक्तं यथा "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" अस्यार्थः एकार्थवाचिनां पर्यायशब्दानां सङ्ग्रहो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः । तादृशेऽमरसिंहवैजयन्तीहलायुधादिषु दृश्य निघण्टव इति व्यवहारात् । एवमत्रापि पर्यायशब्दसङ्ग्रहोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम् । तस्मिन् काण्डे त्रयोऽध्यायाः । तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि, द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि, तृतीये तदुभयद्रव्यगततत्तद्गुणत्वत्वादिधर्मविषयाणि" ।

निघर्ष पु० नि+घृष–भावे घञ् । प्रघर्षे (घषा) "तद्व्याख्यान निघर्षलोऽनवः"किरा० । ल्युट् । निघर्षणमप्यत्र न० । यथा हि कनकं शुद्धं तापच्छेदनिघर्षैः" भा०शा० १२२ ५७श्लो० ।

निघस पु० नि+अद+अप् घसादेशः । भोजने अमरः ।

निघात पु॰ नि+हन–भावे घञ्। १आहनने अन्यस्वरेण २अन्यस्वरहनने उदात्तादिहननपूर्वके अनुदात्तस्वरे च कर्मणि घञ्। अनुदात्ते ३स्वरे "समानवाक्ये निघातयुग्रदञ्जदादेशाः" वार्त्ति॰। "उदात्तादिहननपूर्वकमनुदात्तस्वरं निघातः" मनोरमा। "ज्ञानिघातकठिनाकुचित्वचौ" रघुः। [घातिन्याम् उच्चादिकोषः।

निघाति पु॰ निहन्यतेऽनया निहन्–इञ् कुत्वञ्च। कोष-

निघृष्व त्रि॰ नि+घृष–क्वन् निपा॰। १क्षुरे २वस्त्रार्जने च उज्ज्वल॰ कर्मणि क्वन्। ३क्षुरे निघृष्टुः।

निघ्न त्रि॰ निहन्यते नि+हन–घञर्थे क। १अधीने अमरः। प्रियस्यत्वात् तस्य तथात्वम् "निघ्नस्य मे भर्त्तृनिदेशरौक्षम्" रघुः। २आहते ३पूरिते च "स्याद्योऽन्यवर्णो द्विगुणान्यनिघ्नः" लीला॰ "घनहीदशनिघ्नाच्च समते यत्फलं बुधैः" सूर्यसि॰। सूर्यवंश्ये ४अनरण्यसुते ऋषभेदे पु॰। "अनरण्यसुतो निघ्नो निघ्नपुत्रो बभूवतुः" हरिवं॰१७अ॰। अनमित्रपुत्रे ५ऋषभेदे च "अनमित्रसुतो निघ्नो निघ्नस्य तु बभूवतुः" हरिवं॰ २९अ॰। [दम्भम्।

निचन्द्र पु॰ दानवभेदे "निचन्द्रश्च निकुम्भश्च" निकुम्भशब्दे

निचय पु॰ नि+चि–भावे अच्। १समूहे २अवयवादीनां सङ्घाते ३निश्चये च शब्दर॰। "वस्त्रमाससिचयो वा स्यात् समानिचय एव वा" मनुः कर्मणि अच्। ४निश्चीयमाने अवयवादिना वर्द्धमाने "सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः" भा॰स्त्री॰ २अ॰। ऋक्ष्या॰ लतादिना चूर्णे त॰स॰। निचयलत निचयीलते त्रि॰।

निचयक त्रि॰ निचये कुशलः आकर्षा॰ कन्। निचये कुशले

निचाय पु॰ नि+चि–परिमाणाख्यायां घञ्। राशीकृते धान्यादौ "एकस्तण्डुलनिचायः अत्र राशेकत्वेन सङ्घातिनां परिच्छित्तिर्गम्यते" सि॰कौ॰।

निचि पु॰ नि+चि– बा॰ डि। गोकर्णगिरीदेशे रमणः।

निचिकी स्त्री निचिना काशते शोभते कै–क गौरा॰ ङीष्। उत्तमायां गवि नैचिक्याम् शब्दार्थचि॰।

निचित त्रि॰ नि+चि–क्त। १व्याप्ते २पूरिते ३सङ्घीर्णे ४निर्मिते च हेमच॰। ५नदीभेदे स्त्री "कौशिकीं निचितां लक्ष्यां निचितां लोहतारिणीम्" भा॰भी॰ ९अ॰।

निचिर न॰ नितरां चिरः प्रा॰स॰। १अत्यन्तचिरकाले २तद्वर्त्तिनि त्रि॰ "प्रसु त्वेशं निचिराभ्याम्" ऋ॰६।१२६।१

निचुम्पुण पु॰ निचमनेन पूर्यते नीचैरञ्चिनु क्वचन्ति दधतीति वा। पृषो॰। १सक्तुके २अवभृथे च "सक्तुष्टोऽपि निचुम्पुण उच्यते निचमेन पूर्यते। अवभृथोऽपि निचुम्पुण उच्यते नीचैरञ्चिनु क्वचन्ति नीचैर्दधतीति वा। नीचं कुर्वन्तीति वा" निरु॰५।१८। "अवभृथो निचुम्पुणो भवति" तद्वृता श्रुतिः "अवभृथ! निचुम्पुण निचेरुरसि निचुम्पुणः" यजु॰ ३।४८ "निचुम्पुण चुप मन्दायां गतौ नितरां चोपति मन्दं गच्छति निचुम्पुणः। उणप्रत्ययो सुगागमश्च। यद्वा नीचैरञ्चिनु क्वचन्ति नीचशब्देन कर्म कुर्वन्त्यवभृथो निचुम्पुणः। "नीचस्यूचप्रणम्भुचेत्यादिना नीचैः शब्दोपपदात् क्वचतेः कप्रत्ययान्तो निपातः धातोः पुम्भाव उपपदस्य निचुम्भावश्च निपातितः। तथा विद्यावभृथ! यद्यपि त्वं निचेरुरसि नितरां चरतीति निचेरुः। नितरां मनमनीषोऽपि तथा-अत्र निचुम्पुणो भव मन्दमनसो भव" वेददी॰।

निचुल पु॰ नि+चुल–क। १हिञ्जलवृक्षे अमरः। २वेतसवृक्षे राजनि॰। "स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खम्" मेघ॰।

निचुलक न॰ नि+चुल–बा॰ कन्। १योषादेर्योवालतिवस्त्राद्दे निचोलके हारा॰। २कञ्चिकामात्रे पुंस्त्री शब्दार्थचि॰।

निचेय त्रि॰ नि+चि–यत्। आचीयमाने स्त्रियां टाप्। आङि तु स्त्रियां शार्ङ्गरवा॰ ङीन्। आनिचेयी

निचेरु पु॰ नि+चर–उनु बा॰ आदेरेत्वं। नितरां चरत्यौचे "अवभृथ निचुम्पुण निचेरुरसि निचुम्पणः" यजु॰२।४८

निचोल पु॰नि+चुल–अच्। १प्रच्छदपटे येन शय्यादि प्रच्छाद्यते तस्मिन् अमरः २दोलिकाद्यावरणवस्त्रे ३स्त्रीपिधानपटे च हेमच॰। "शीतत्र नीलनिचोलम्" नीतगो॰

निचोलक पु॰ निचोल इव कायति कै–क। योषादेर्योवालतिवस्त्राद्दे कूर्पासे हेमच॰। [त्रिका॰।

निच्छवि पु॰ निर्गता छविरतः। (त्रिकोट्) तीरभुक्तदेशे

निच्छिवि पु॰ ज्ञात्यात् क्षत्रियात्स्वर्वर्णाद्वाक्षत्रपत्ये जातिभेदे "भल्लोमल्लश्च राजन्यात् ज्ञात्यात् विच्छिविरेव च" मनुः

निज त्रि॰ नितरां जायते नि+जन–ड। १स्वकीये २नित्ये च अमरः। "सेनागजेन मथितस्य निजप्रसूनैः" माघः। ३स्वाभाविके "स्वास्थं यस्य निजम्" न्याय कौ॰।

निजघास पु॰ पार्वत्या रोषसंभूते गणभेदे "निजघासो यस्यैव स्यूणाकर्णः प्रमोदनः" हरिवं॰ १६८अ॰।

निजघ्नि त्रि॰ नि+हन–क्वि द्वित्वम्। नितरां हननशीले "अथा निजघ्निरोदसी" ऋ॰८।५२।२।

निजधृति स्त्री शाकद्वीपस्थे १नदीभेदे तदुपक्रमे "एतेषां

वर्षमर्यादागिरयो नद्यः सप्त सप्तैव" इत्युक्त्वा "अनया चायुर्द्वा उभयदृष्टिरपराजिता पञ्चपदी सहस्रसुतिर्निजधृतिरिति" भाग०५।२०।१६। उक्तम्। निजा धृतिरस्य। २स्वभावतो धैर्यान्विते त्रि०। [illegible] वः। निजिमान्।

निजि त्रि० निज-शुद्धौ कि। शुद्धिमति। अतोयवा० मस्य

निटल पु० नि+टल-अच्। कपाले भालस्थले शब्दार्थकल्पतरुः "राजा निटलतले चुम्बितनिजचरणाम्बुजैः" दशकु०।

निटलाक्ष पु० निटले भाले अक्षि अस्य बहुव्री०। शिवे शब्दार्थकल्प० "रोषरूक्षेण निटलाक्षेण दूरीकृतचेतने मकरध्वजे" दशकुमा०।

निडीन न० नीचैर्डीनम्। अल्पमात्रयं वा डा अधःपतन रूपे खगगतिभेदे खगगतिशब्दे २४१४ पृ० दृश्यम्।

निण्डिका स्त्री सतीडायां (तैलोवाडा) कषायभेदे शब्दच०।

निण्य त्रि० अन्तर्हिते निघण्टुः "निण्यः संनद्धो मनसा चरामि" ऋ०१।१६४।२७

नितत्नी स्त्री ओषधिभेदे "देवी देव्यामधिजाता पृथिव्यामस्योषधे !। तां त्वा नितत्नि ! केशेभ्यः" अथ० ६।१२६।१

नितम्ब पु० नि+तम्ब-अच्, निश्चितं तम्यते काम्यते कामुकैः नितरां ताम्यति सुरतमर्दादु तम-बा० व वा। स्त्रीणां पश्चात् १कटितटे अमरः २स्थले ३कूले ४कक्षा अधोभागे कटके (पर्वतवस्तिस्थाने) ५कटिभागे च मेदि०। "तदस्याविद्धितः कण्ठे नितम्बस्थानमाश्रितः। गुरूणां बहिधानेऽपि कः कूजति सुसर्पकः" विदग्ध० "नितम्बमिव मेदिन्याः खर्वांशुकमलङ्कुर्वत्" रघुः "गिरेर्नितम्बे गरुता विभिन्नम्" भट्टिः "सेव्यो नितम्बः किल भूधराणां विलासिनानीम्" सा०द०।

नितम्बिन् त्रि० नितम्ब+अस्त्यर्थे इनि। १नितम्बयुक्ते "मेखलागुणपदैर्नितम्बिभिः" रघुः। प्राशस्त्ये इनि। २प्रशस्तनितम्बयुक्तायां स्त्रियां स्त्री ङीप्। "नितम्बिनीभिश्चिरं सुरतव्यलीकम्" कुमा०।

नितम्भू पु० ऋषिभेदे "वितम्भूर्भवनो धौम्यः शतानन्दोऽकृतव्रणः" भा०अनु०२६अ० नानर्मिकथने

नितराम् अव्य०नि+तरप् आम्। १सुतरामित्यर्थे २अतिशये च "सुतरां तुदन्ति चेतो नितरां विषादिनाम्" कथास० "तेभ्यो नितरां विरतिः" वेदा०।

नितल न० निश्चितं तलमधोभागः प्रा०स०। पातालभेदे शब्दरत्ना० "सुतलं वितलञ्चैव नितलञ्च गुभस्तिमत्। महातलञ्चापि पातालञ्चापि सप्तमम्" पुराणस० विष्णु०।

नितान्त न०नितान्यति स्म नि+तम-क्त। १एकान्ते २अत्यन्ते अमरः। "निद्राविनोदितनितान्तरतिक्लमानाम्" किरा० "नितान्तदीर्घैर्जनिता तपोभिः" कुमा०।

नित्य त्रि० नियमेन नियतं वा भवं नि+त्यप्। १सततं अमरः। अहरहः क्रियमाणत्वेन २विधिबोधिते ३प्रत्यवायसाधनाभावप्रतियोगिनि कर्मणि यथा अहरहः सन्ध्यामुपासीतेति अत्र सन्ध्याभावे प्रत्यवायसाधनत्वबोधः। ४अविच्छिन्नपरम्पराके च यथा वर्षा नित्याः। ५उत्पत्तिविनाशरहिते ६यावते कालत्रयस्थे वस्तुनि च त्रि० ७सहशे पु० राजनि०। शास्त्रबोधितसदातनकर्त्तव्यताकं च नित्यं तद्बोधकं ति०त० समाहृत्योक्तं यथा "नित्यं१ सदा२ यावदायुश्च३ कदाचिदतिक्रमेत्४। उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्। फलाश्रुतेर्वीप्सया च तन्नित्यमिह कीर्त्तितम्"। अत्र पूर्वार्द्धोक्तार्थवद्वाः स्वान्वितपदार्थस्य नित्यत्वबोधकाः। उत्तरश्लोकबोध्यार्थास्तु परम्परया नित्यतासमर्पका इति भेदः "तस्मादग्निं सदायुक्तो नित्यं स्यादात्मवान् द्विजः" "विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु" मनुः नित्यत्वस्य ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम् तेन उत्पत्तिविनाशशून्यत्वात् कालत्रयस्थत्वं गम्यते।

नित्यकर्मन् न०कर्म०। विहिते कर्मभेदे "नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा। ग्रहस्थस्य त्रिधा कर्म तन्निशामय पुत्रक !। पञ्चयज्ञादिकं नित्यं सदेतत् कथितं तव। नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम्। नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पण्डितैः" आ०त० मार्क०पु० तत्त्वागे दोषो यथा "नित्यानां कर्मणां विप्र ! तस्य हानिरहर्निशम्। अकुर्वन् विहितं कर्म यत्तः पतति तद्दिने। प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि। पक्षं नित्यक्रियाहानेः कर्त्ता मैत्रेय ! मानवः। संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते। तस्यावलोकनात् स्पर्शो निरीक्ष्यः साधुभिः सदा। स्पृष्टे स्नानं सचेलस्य शुद्धिः क्षेत्रमहाशने !। पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः" इति विष्णुपु०। व्रतादौ नित्यकर्मकरणनिषेधो यथा "जानूद्वे व्रतजे जाते नित्यकर्म न चाचरेत्। व्रतके च वसत्यन्ते क्षुरकर्मणि मैथुने। मूत्रोत्सारे तथा वान्तौ नित्यं कर्माणि संत्यजेत्। क्रय्ये भुक्ते त्वजीर्णे च नैव भुक्त्वा च किञ्चन। कर्म कुर्यान्नरो नित्यं व्रतके

स्मृतके तथा। पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्। कणादिपिण्यपल्यन्नञ्च फलं मुञ्जा न चाचरेत्। जलस्यापि नरश्रेष्ठ भोजनाङ्गेषजादृते। नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा। जलौकागूढपादञ्च क्रमिगण्डूपदादिकम्। कामाद्म्लेन संस्पृश्य नित्यकर्माणि संत्यजेत्। विशेषतः शिवापूजां प्रमीत पितृको द्विजः। यावद्दृतसरपर्य्यन्तं मनसापि नचाचरेत्। महागुरुनिपाते तु काम्यं किञ्चित्न चाचरेत्। आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं दैवयुतञ्च यत्। गुरुमाश्रित्य विप्रञ्च प्रकल्प्यैव च पाणिना। न कुर्य्यान्नित्यकर्माणि रेतःपाते च भैरव!" कालि०पु० ५४ अ०।

नित्यकर्मणि अशक्याङ्गवैगुण्येऽपि फलनिष्पत्तिर्भवतीति कात्या० श्रौ० १।२।।८ सूत्रे याज्ञिकदेवतसंग्रहे च व्यवस्थापितं यथा

"अथेदं विचार्य्यते द्विप्रकारं कर्म नित्यं काम्यञ्च तत्र नित्यं प्रकृत्येदं विचार्य्यते। किं सर्वाङ्गोपेतं कर्त्तव्यम् उत यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरङ्गैरुपेतमिति। किं तावत् प्राप्तम् सर्वाङ्गोपेतमेव कर्त्तव्यमिति कुतः भावनांशस्य कथंभावस्य सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतमेव कर्त्तव्यमित्येवं प्राप्ते आह" "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात्" सू०। "नित्ये कर्मणि अग्निहोत्रदर्शपूर्णमासादिके प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव। अङ्गप्रधानभेदात् यतोऽङ्गानि च प्रधानानि च भिन्नानि नित्येषु चेतिकर्त्तव्यता नास्ति अपूर्वाभावात् अपूर्वप्रयुक्ता हीतिकर्त्तव्यता सा च तस्मिन्नसति न भवितुमर्हति कथमपूर्वाभावः? फलाभावात् कालान्तरभाविफलसिद्ध्यर्थं ह्यपूर्वं कल्प्यम्। तच्चासति फले कल्पयितुं न शक्यते तस्मान्नित्येषु यागस्यैव भाव्यत्वम् न फलस्य। तस्मात् पौर्णमासाममावास्यायां वाग्निसुहिष्य पुरोडाशस्यक्रम्य इत्येतावदुपदिश्यते तेन दृष्टार्थानि यान्यङ्गानि संनिपत्योपकारकाणि यैर्विना प्रधानभूतयागनिष्पत्तिर्न भवति अन्यथानुपपत्त्या तावद्भिरुपेतं प्रधानं कर्त्तव्यम् नाङ्गानि अङ्गाम्नानं तु काम्यप्रयोगार्थम् अतोऽग्निकाण्डपुरोडाशमात्रमादरणीयम् अन्यदङ्गजातमदृष्टार्थं नादरणीयमिति। कथं तर्हीदमे निष्फले पुरुषस्य प्रवृत्तिरिति? चेत् उच्यते प्रत्यवायानुत्पत्त्यर्थं प्रवृत्तिर्न तु फलार्थं विहिताकरणाद्धि प्रत्यवायः स्मर्यते "अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नरः" इति (मनुना)। अतो नित्यकर्मणो निष्फलत्वादपूर्वाभावादितिकर्त्तव्यता नास्तीति हीनाङ्गस्यैव प्रयोग इति केचित् सिद्धान्तमाहुः। तदेतन्नोपपद्यते कथंभावनातो हि तिस्र आकाङ्क्षा जायते किं, केन, कथमिति तत्र कथमितीतिकर्त्तव्याकाङ्क्षा नित्येऽप्यस्ति तस्मादस्त्यस्तीतिकर्त्तव्यता। सत्यम् अस्त्येवेहाप्याकाङ्क्षायाः समानपदोपात्तेन यागेनैव पूरणात्तस्मिंस्तत्त्युपयोगिन्येनेतिकर्त्तव्यता कथमाकाङ्क्षया गृह्यते न त्वदृष्टोपयोगि प्रयाजाद्यङ्गम् अदृष्टस्य साध्यस्याभावादिति चेत् न यागस्य स्वतोऽपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपात्तं यागसंतृप्त्यै सर्वेषामभिमतस्य प्रत्यवाय परिहारस्येह भाव्यतया कल्पनात्। ननु चेत् सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते, तस्य शरीरारम्भहेतुतया मोक्षविरोधित्वेन सुसुक्षूणामनभिप्रेतत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यत एव कथं? तस्मिन् पापे एतज्जन्मोपार्जिते भवान्तरोपार्जिते वा स्थिते सति तदुपभोगहेतुभूतशरीरारम्भावश्यंभावेन मोक्षाभावात् अतो मोक्षार्थिनाप्यवश्यं पापक्षय एषितव्य एव समीहितफलाव,इतरथाऽप्रक्षीणे पापे फलाप्राप्तेः। तस्मान्नित्यानि कर्माणि पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्त्तव्यता मपेक्षन्त एव। धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतः तथैव करणादपि पापक्षयः स्मर्यते "पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति (मनुः) इत्यादिभिः "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति च"। तस्मान्नित्येऽप्यस्त्येव प्रत्यवायपरिहाररूपं फलम्। तस्मान्नित्यान्यपि कर्माणि सर्वाभिमतस्य तस्य पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्त्तव्यतामपेक्षन्त एव। ततश्च सर्वाङ्गोपेतानामनुष्ठानं कस्यचिदपि सर्वदा कर्तुं न शक्नोति जीवनादिनिमित्ते च तानि विधीयन्ते निमित्तस्य चैतदेव रूपं यत्तस्मिन् सति नैमित्तिकमवश्यं कर्त्तव्यम्। तेन यावज्जीवं कर्त्तव्यम्। तेन यथा शक्नुयादित्युपबोध्यते तत्रावश्यमन्यतरस्मिन्नुपात्तव्ये निमित्ते सति नैमित्तिकस्य कर्त्तव्यत्वं प्रधानवाक्ये श्रूयते तद्यदि कस्यचिदङ्गस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियते ततः प्रधानवाक्यविरोधः स्यात् प्रधानमात्रं श्रुत्या निमित्ते विधीयते अङ्गानि तु तदर्थतया प्रकरणेन गृह्यन्ते अतस्तानि प्रधानवाक्यगतावश्यकत्वानुरोधेन यथाशक्त्युपसंहर्त्तव्यानि इतरथा प्रधानस्यावश्यकर्त्तव्यत्वं श्रुतं

हीयेत तस्मात् प्रधानाविरोधेनाङ्गानि यथाशक्त्युपसंहर्तव्यानि। नन्वेवं हीनाङ्गादपि प्रधानात् फलसिद्धेरभ्युपगमात् समर्थोऽप्यङ्गानि परित्यक्ष्यतीति मैवम्। यत्तस्य कामतोऽङ्गे त्यज्यमाने वैगुण्यं स्यादेव अङ्गोपदेशं निमित्तं वाक्योभयानुरोधेन यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरुपेतं प्रधानमेनः क्षपयतीति शास्त्रार्थोऽवधार्यते तावतैव शास्त्रवशात् फलनिष्पत्तिः इति साधूक्तम् "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदादिति"। एतच्च प्रयोगविध्यनुजीव्येष्वङ्गेषूच्यते यद्धि कुर्यादित्युच्यते तत् यथाशक्तीत्युपबोध्यते। यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि वोपजीव्यन्ते यथा लोके धनार्जनादि वेदेऽपि काम्यो विद्याग्नयश्च तेषां स्वरूपेणैवाधिकारिविशेषणत्वम्। द्रव्यवान् विद्यावानग्निमानिति। एतदुक्तं भवति अङ्गं हि विधिबलादुपादीयते निमित्तानुरोधाद्वा त्यज्यते उभयानुग्रहार्थं वा यत्तं प्रत्युपादीयते अयत्तं प्रति त्यज्यत इति नान्या गतिरस्ति तत्रोभयानुग्रहो युक्तो यदि सम्भवति सम्भवश्चोपादेयेष्वङ्गेषु यथाशक्ति व्रीहीन् सम्पादयेत् यथाशक्त्यावहन्यादिति आहवनीयादिस्वरूपं तु नानेन विधिनोपादीयते तस्मादग्निमान् विद्यावान् द्रव्यवान् जीवंश्च यजेतेत्येवमाश्रीयते अतो विद्याग्निकाम्याद्यपरित्यागेनान्येषामङ्गानां यथाशक्त्यनुष्ठानं सिद्धम्। तथाचोक्तं तन्त्ररत्ने "यानि प्रयोगविधिना कर्तुमुपादेयत्वेनाङ्गानि चोद्यन्ते तेषामेव शक्तिपरिमितत्वम् यावन्ति शक्नुयात्तावन्ति कुर्यादिति यानि तु विध्यन्तरप्रयुक्तानि स्वयं सिद्धानि वाङ्गत्वेन गृह्यन्ते तानि स्वरूपत एवाधिकारिविशेषणम् यथाग्न्यादीनि तेषामुपादानस्य प्रयोगविधिनानुपादानस्य यावच्छक्तीत्युपबन्धः सम्भवति किन्तु तदपेक्षो विधिस्तद्वन्तमेवाधिकरोति तेन सपत्नीकस्यार्थेयस्य (वेदस्य)व्याख्यानोपात्तसंस्कारविशिष्टस्याग्निमतो विद्यावतः प्रदीपादिकालसंयोगिनोऽधिकारो नान्यस्येति। एवं चाप्रतिसमाधेयाङ्गवैकल्येऽप्यग्न्यादिमानधिक्रियेतैव आधानं तु न कुर्यात्तस्यानैमित्तिकत्वादिति"। "प्रायश्चित्तविधानाच्च" सू०। "प्रायश्चित्तविधानादप्येवं कल्प्यते यद्विगुणेऽपि फलनिर्वृत्तिर्भवतीति। यदि च विगुणात् फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत नहि निष्फलस्याङ्गैः कृत्यमस्ति अस्ति च विधानम् तस्माद्विगुणादपि फलं भवतीति। येषां मते नित्येषु फलाभावेनापूर्वाभावात्तदर्थैतिकर्तव्यताभावेन निमित्तभेदने जाते वैगुण्यात्तत्परिहारायापरं होमाख्यमङ्गं भिन्ने जुहोतीत्यादिकमनुपपन्नं न क्रियत एव। पक्षान्तरे असत्यामितिकर्तव्यतायां भेदने जातेऽपि नास्ति वैगुण्यम् गुणहानिर्हि वैगुण्यम् अस्ति गुणे कस्य हानिः स्यात् ततश्चात्रत्पक्ष एव प्रायश्चित्तविधानमुपपन्नमिति"। "तथा च दृष्टम्" सू०। "नित्यं कर्म यथा कथञ्चित् श्रुताङ्गपरित्यागेनापि यथाशक्त्यङ्गोपेतमनुष्ठातव्यत्वेन श्रुतौ दृष्टम्। तथा हि "यत्पयो न स्यात् केन जुहुया इति व्रीहियवाभ्यामित्यादि न वा इदं तर्हि किं च नासीदथैतदद्भुत सत्यं श्रद्धायाम्" इत्यत्र पयसि। तथा "तदेव यादृक्तादृक् च होतव्यमिति" शाखान्तराच्च तस्माद्विगुणेऽपि नित्ये प्रत्यवायपरिहाररूपं फलं भवति अतएवोक्तं कर्कार्यार्थैः "उपात्तदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबन्धो वा भवत्वेवेति"। "नित्यकर्मारम्भे अनारम्भे वा प्रतिनिधिर्भवति अवश्यकर्तव्यतया यथाशक्तिप्रयोगस्य व्यवस्थापितत्वात् इति" चान्यत्र तत्रोक्तम्। "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः" इत्युक्तेस्तत्र प्रतिनिधिरस्ति। "नित्यं नैमित्तिकं काम्यं त्रिविधं स्यात्तमिष्यते" ब्रह्मपु०

नित्यक्षौर न०अवैधकेशादिच्छेदने "चूडोदिते तिथावृक्षे बुधेन्दोर्दिवसे नरः। नित्यक्षौरं प्रकुर्वीत जन्ममासे न तु क्वचित्" ज्योतिषसारः। अधिकं क्षुरकर्मन् शब्दे २२८६ पृ०६४२म्

नित्यगति पु० नित्यं गतिरस्य। सदागतौ वायौ हेमच०। "यथा वायुर्नित्यगतिर्जलदानू यतश्चोऽम्बरे" भा०स०४६अ० नित्यगमनादयोऽप्यत्र।

नित्यदा अव्य० नित्य+दाच् स्वरादि। सर्वदेत्यर्थे "त्वमग्निः सर्वभूतानामन्तश्चरसि नित्यदा" भा०आ० ६अ०।

नित्यदान न० नित्यं प्रत्यहं कर्तव्यं दानम्। प्रत्यहकर्तव्ये दाने "नित्यं नैमित्तिकं काम्यं त्रिविधं दानमिष्यते। अहन्यहनि यत् विप्र! दीयतेऽनुपकारिणे। अनुद्दिश्य फलं तत् स्यात् ब्राह्मणस्य तु नित्यकम्" गरुडपु०।

नित्यनैमित्तिक न० कर्म०। नित्यत्वनैमित्तिकत्वयुक्ते कर्मभेदे पर्वश्राद्धादौ "नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पठ्यते" श्राद्धत० मार्कण्डेयपु०। प्रायश्चित्तेऽपि तथात्वम्। अवश्यकर्तव्यत्वेन नित्यत्वं यापनिश्चयवता कर्तव्यत्वेन नैमित्तिकत्वं यथाह प्रा०त० रघुनन्दनः "प्रायश्चित्तस्य नित्यत्वेनाङ्गवैकल्येऽपि फलसिद्धिः। तथा

च प्रायश्चित्तस्य नैमित्तिकत्वं नित्यत्वञ्च नितान्तराजदाह "नैमित्तिकोऽयं प्रायश्चित्ताधिकारः। अत्र चार्थवादावनतपापक्षयोऽपि जातेष्टिन्यायेन साध्यतया लौकिकते। न च दुरितपरिक्षिप्तेषु चाहुऽलोयते एतावता काम्याधिकारमात्रमङ्गा काम्यो यस्मात् "चरितव्य मतो नित्यं प्रायश्चित्तं विशुद्धये। निन्द्रैव यथाचैर्युक्ता आयन्तेऽनिन्दृते नरः" इति मनुवचनेऽकरणे दोषश्रवणे-नावश्यकतावगमात्। तथा च याज्ञवल्क्यः "प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः सर्वाश्चरकान् यान्ति दारुणान्"। प्रायश्चित्तमकुर्वाणा दुःखाश्चरकान् प्राप्नुवन्ति"।

नित्यप्रलय पु॰ नित्यः प्राकृतिकः प्रलयः। सुषुप्तौ "चतुर्विधस्तु प्रलयो नित्यो यः प्राणिनां लयः। यदा विनाशो जातानाम्" अग्निपु॰२६७अ॰ स च प्रलयश्चतुर्विध्यमङ्गा वेदान्तपरिभाषायां विवृतो यथा

"स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यप्रलयः सुषुप्तिः तस्याः स्वकार्य्यप्रलयरूपत्वात् धर्माधर्मपूर्वसंस्काराणाञ्च तदा कारणात्मनावस्थानं, तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः, वस्तुतः प्राणाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रमणात्मत्वात् सूक्ष्मशरीरोपलब्धवत्। नचैवं सुषुप्तस्य परेतादविशेषः सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टस्येति प्राणनाद्युपलम्भनमविरुद्धम्। "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथाप्येनं प्राण एवैकधा भवति वाक् सर्वैर्नामभिः सहाप्येति तदा सौम्य! तदा सम्पन्नो भवति स्वमपीतो भवतीत्यादि" श्रुतिरत्रसुषुप्तौ मानम्"।

नित्यमुक्त पु॰ नित्यं मुक्तः। बाधनमेऽपि बन्धशून्ये परमात्मनि "अहं देवो न चान्योऽस्मि—इत्युपक्रमे नित्यमुक्तस्वभाववान्" आ॰त॰। "नित्यमुक्तत्वम्"। सां॰सू॰

नित्ययज्ञ पु॰ कर्म॰। फलयोगं विना जीवनादिमात्रनिमित्तेन विहिते यथाकथञ्चित् प्रतिनिध्यादिना अक्षयद्रव्येण चानुष्ठेये अग्निहोत्रादौ यज्ञे। [स्त्री तिका॰।

नित्ययौवन त्रि॰ नित्य-यौवनमस्य। १स्थिरयौवने २स्त्रीपद्यां

नित्यवैकुण्ठ पु॰ सत्यलोकस्थे विष्णोः स्थानभेदे "अहं नमपि संविष्टो नित्यवैकुण्ठएव च। अक्षोभ्यमयवमो नित्यो विभुतत्वस्वरूपवत्। स्वरोच्चावस्थभूती निर्दोषश्च निरामयः। आकाशवत् सुविस्तारश्च सूक्ष्मरत्ननिर्मितः। तत्र नारायणः श्रीमान् वनमालो चतुर्भुजः। लक्ष्मीः सरस्वती गङ्गा तुलसी पतिरीश्वरः। सनन्दनन्दकुमुदपार्षदादिभिरन्वितः। सर्वैश्वः सर्वसिद्धीशो भक्तानुग्रहकारकः" ब्रह्मवै॰पु॰ प॰ख॰१५अ॰।

नित्यसत्त्वस्थ त्रि॰ नित्यमचलं यत् सत्त्वं धैर्यं" सुचभेदो वा तत्र तिष्ठति स्था—क। १निर्विघ्नैर्धैर्यवन्तमपि २रजस्तमसी अभिभूय सदा सत्त्वमुपावलम्बिनं च। "नित्यसत्त्वस्थो निर्वैमनस्येः आत्मवान्" गीता।

नित्यसम पु॰ न्यो॰ छलोक्ते जात्युत्तरभेदे नित्यानित्यधर्म्यं धर्मादीनां विभज्य "नित्यमनित्यभावाद्धनित्ये नित्यत्वोपपत्तेः नित्यवत्" इति चरितम् जातिशब्दे ६१०४पृ॰४अस्मम्

नित्यसमास पु॰ कर्म॰। व्याकरणोक्ते समासभेदे समासविशेषे वाक्यरचिते विग्रहवाक्यरचिते समासभेदे

नित्यहोम पु॰ नित्यं प्रत्यहं कर्त्तव्यो होमः। द्विजैः प्रत्यहं कर्त्तव्ये होमे। स च होमः "यावज्जीवमग्निहोत्रं जुहोति" इति श्रुतिः विष्णुर्वर्णितोऽस्त्यविधो यथा "अथाग्निं परिसमूह्य पर्युक्ष्य परिस्तीर्य परिधिभिः सर्वतः पाकादपसृत्य जुहुयात्। वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय सत्याच्युताय वासुदेवाय। अथाग्नये सोमाय मित्राय वरुणाय इन्द्राग्नीभ्यां विश्वेभ्यो देवेभ्यः प्रजापतये अनुमत्यै धन्वन्तरये धात्रोऽमतये अग्नये स्विष्टकृते च"। "वैश्वदेवस्य विहस्य लक्षणोऽस्यौ विधिपूर्वकम्। होमं कुर्याद्देवताभ्यो ब्राह्मणो होममन्त्रकम्। अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः। विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च। कुह्वै चैवानुमत्यै च प्रजापतय एव च। सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" मनुनोक्तविधिरन्यविधः शाखाभेदात् व्यवस्था।

नित्या स्त्री १दिव्याः शक्तिभेदे तदधिकारश्चैव नित्यातन्त्रं प्रवक्ष्यं तन्त्रागमन्त्रादिकं तन्त्रसारे दृश्यम्। २मनसादेव्यां शब्दरत्ना॰।

नित्यानध्याय पु॰ सर्वथा वर्जनीयवेदपाठकालादौ "द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिश्मशानमात्मानं चाशुचिं द्विजः" इति "इत्यादिनित्यमनध्यायान॰

जीवात्मो विवर्जयेत्" इति मनुना प्रदर्शितोऽनध्यायभेदः अनध्यायशब्दे १३६९ पृ० द्रष्टव्यम्।

नित्यानित्यवस्तुविवेक पु० नित्यञ्च अनित्यञ्च नित्याऽनित्ये ते च ते वस्तुनी च नित्यानित्यवस्तुनी नित्यानित्यवस्तुनोर्विवेकः पृथक्ज्ञानता। ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचने। "ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः" यज्ज्ञानार्थमिदं कृतवाक्यम्। अयञ्च ब्रह्मविद्यायाम् अधिकारप्रयोजकः।

नित्यानित्यसंयोगविरोध पु० नित्यत्वस्यानित्यत्वस्य एकत्र संयोगे सम्बन्धे विरोधः। एकत्र धर्मिणि नित्यत्वस्यानित्यत्वस्य च सम्बन्धरूपे भावाभावयोरेकत्र योगरूपे विरोधे। संयोगप्रयुक्तत्वस्यावश्यम्भावितिरिक्त एवास्य विरोधस्य दूषकतेत्याकारे द्रष्टव्यम्।

नित्याभियुक्त त्रि० नित्यमभि सम्यक्तया युक्तः योगे व्यापृतः। देहयात्रामात्रार्थं प्रयतमाने इतरत्यागासक्ते योगिनि

निद् न० निदि-क्र वा० नलोपः। १विषे शब्दच० २निन्दक त्रि० "अग्नेर्न निदावा विश्वेभिरग्निम्" ऋ० ६।१२।६ "निदावा निन्दिन्याः" भा०। [पुंस्त्री० शब्दच०।

निदृढ् त्रि० निहतो दृढ्रस्य प्रा०स०। १दृढ्रहिते २मनुष्ये

निदर्शन न०नि+दृश-ल्युट्। १उदाहरणे दृष्टान्ते "आत्मा ह्यात्मावस्थौवैघटाकाशैरिवोदितम्। घटादिषु यथाकाशैर्जातावेतन्निदर्शनमिति"। यदा मन्त्रब्राह्मणप्रतिपिपादयिषया श्रुत्यात्मनो जातिरुच्यते जीवादीनां तदा जातानुपलभ्यमानायामेतन्निदर्शनं दृष्टान्तो यथोदितं आकाशवदित्यादीनि भाष्यम्" शब्दार्थचि०। २अर्थालङ्कारभेदे स्त्री टाप्। अर्थालङ्कारशब्दे २६८९ पृ० द्रष्टव्यम्।

निदाघ पु० निशरां दहतेऽत्र नि+दह-आधारे घञ् न्यङ्क्वादि० कुत्वम्। १उष्णे २घर्मे ३घर्मकाले ज्येष्ठाषाढ़ाख्ययोः ४घर्मजले च मेदि०। ऋतुसंहारे १म सर्गे निदाघकाले यस्याः यदार्या मङ्गला प्रदर्शितास्तत्रैव द्रष्टव्याः। पुत्रस्यपुत्रे ऋभुपत्नीजाते ५ऋषिभेदे पु०।

निदाघकर पु० निदाघ उष्णः करः अस्य। १सूर्ये कारा० निदाघधामादवोऽयत्र "निदाघधामाननिवाधिदोधितिम्" माघः। २चन्द्रे च

निदाघकाल पु० निदाघस्य कालः। १ग्रीष्मर्तौ ज्येष्ठाषाढ़ाख्ययोः "हिमान्तरेखोऽम्बुधरान्तमध्यो निदाघकालः सुखमानतः प्रिये!" ऋतुसं०।

निदाह त्रि० नि+दो-ल्युट्। निरोधके "चरन्तृणोदयश्चिह्न निदातारम्" ऋ० ८।७२।५ "निदातारं निरोधकम्" भा०।

निदान न०नितरामसाधारणतया दयते कार्यम् नि+दैङ् पालने ल्यु। १आदिकारणे अमरः २कारणमात्रे ३बन्धदानानि निहत्त दानम् प्रा०स० ४कारणत्रये च मेदि० नि+दै शुद्धौ भावे ल्युट्। ५शुद्धौ हेमच०। ६रोगनिर्णये विद्यः ७रोगहेतौ। "निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्। निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः। निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते" इति माधवकरः सुश्रुते निदानप्रकरणे तद्भेदादिकं द्रष्टव्यम्। "निदानमिच्छाद्वेषस्य सन्ततेः" रघुः।

निदिग्ध त्रि० नि+दिह-क्त। १उपचिते २लेपनादिना वर्द्धिते च ३एलायां स्त्री शब्दच०। ततः संज्ञायां कन् कापि अत इत्वम्। निदिग्धिका वस्त्रकारिकायां स्त्री अमरः।

निदिग्धिकादिक्वाथ पु० चक्रदत्तोक्ते क्वाथभेदे "निदिग्धिकानागरकाञ्चनानां क्वाथं पिबेन्मिश्रितपिप्पलीकम्। जीर्णज्वरारोचककासगुल्मश्वासाग्निमान्द्यार्दितपीनसेषु। कृच्छ्रार्द्धगामयं प्रायः सायन्तनोपयुज्यते"

निदिध्यास पु० नि+ध्यै-सन्-भावे घञ्। श्रवणमननप्राप्तस्य एकतानतासाध्ये निरन्तरचिन्तने। भावे ल्युट् निदिध्यासन तत्कार्ये न०। तच्चलक्षणादि यथा "निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्मुखात्। तन्निदिध्यासनं प्रोक्तं तत्रैकाग्र्येण लभ्यते। अनात्मन्यात्मचित्तेन दृढ्यात्मनि चेद्भवेत्। पुण्यपुञ्जेन शुद्धं तच्चित्तमैकाग्र्यमर्हति"। विजातीयदेहादिप्रत्ययरहितद्वितीयवस्तुनि २सजातीयप्रत्ययप्रवाहे। विजातीयप्रत्ययानन्तरितेन सजातीयप्रत्ययप्रवाहेण ३श्रवणमननफलभूतेनात्मचिन्तने। निदिध्यासनं च विचारविशेषात्मकम्। स च विचारविशेषोऽध्यात्मात्मतत्त्वज्ञानरूपं निदिध्यासनम्। "ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्। एकतानत्वमेतद्धि निदिध्यासनमुच्यते"। ताभ्यां श्रवणमननाभ्याम्। ४अपरावत्तबोधे। "अपरावत्तबोधो हि निदिध्यासनमुच्यते" इति वार्त्तिकोक्तेः "तस्य वेदान्तवेद्यस्य निदिध्यासनतो विना" काशीख०१०अ०। "श्रुते मतगुणं विद्यात् मननं मननादपि। निदिध्यासं तद्गुणमनन्तं निर्विकल्पकम्" विवेकचू०।

निदेश पु॰ नि+दिश–घञ्। १शासने २आज्ञायां ३कथने अमरः ४निकटे ५भाजने च मेदिनिः "प्राचस्य तु यथानस्य निदेशे चैव तिष्ठतः" मनुः "निदेशात् स्वर्गिणः पितुः" रघुः।

निदेशिन् त्रि॰ नि+दिश–णिनि। १आज्ञाकारके स्त्रियां ङीप्। सा च २दिशि काष्ठायां राजनि॰।

निद्रा स्त्री नि+द्रा–भावे अ। १शयने अर्श। निद्रा च कालाग्निरुद्रपत्नी यथा "कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी। सर्वलोकाः समाच्छन्ना यया योगेन रात्रिषु" इति। रात्रिषु योगेन सम्बन्धेन। २तत्त्वाप्रतिबोधे। ३अभावप्रत्ययालम्बनायां वृत्तौ चतस्रृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रम्। सत्वरजउभयविरोधिन्यां तमोगुणालम्बनायां ४वृत्तौ। "निद्राभिमानिनी काली तामसी शक्तिरिष्यते। यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः। विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः"। कर्मात्मानः उभयविधानीन्द्रियाणि "सुखं स्वपित्यलब्धवान् व्याधिदुःखाच्च यो नरः। सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न वञ्चितः। कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च। परनारीप्रसक्तस्य परद्रव्यहरस्य च" निद्रा च मेध्या नाडीसंयोगरूपेति नैयायिका चित्तवृत्तिभेद इति योगाचार्याः यथा 'वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः पा॰सू॰ वृत्तीः पञ्चधा विभज्य "अभावप्रत्ययावलम्बना वृत्तिर्निद्रा" सू॰ निद्रावृत्तिर्बोधिताऽसा च सम्बोधे प्रत्यवमर्शात्प्रत्ययविशेषः कथं? सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशदीकरोति। दुःखमहमस्वाप्सं ध्यानं मे मनोऽभमत्वनवस्थितम्। गाढं मूढोऽहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमवसं सुप्तमिव तिष्ठतीति। स चास्वं प्रबुद्धस्य प्रत्यवमर्शो न स्यात् अवति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः। तस्मात्प्रत्ययविशेषो निद्रा। सा च समाधावितरप्रत्ययवन्निरोद्धव्येति" भा॰ "अधिकृतं हि वृत्तिपदमनुवादकं प्रमाणविपर्ययविकल्पस्मृतीनां वृत्तित्वं प्रतिपरीक्षकाणामविप्रतिपत्तेरतस्तदनूद्यते विशेषविधानार्थं निद्रायास्तु वृत्तित्वे परीक्षकाणां विप्रतिपत्तेरिति वृत्तित्वं विधेयम्। न च प्रकृतमनुवादकं विधानाय कल्पत इति पुनर्वृत्तिपदग्रहणम् आप्तवृत्तावृत्तीनामभावस्य प्रत्ययः कारणं वृत्तिसत्वाच्चादकं तमस्तदेवालम्बनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा। वृत्तिसत्वे हि त्रिगुणे यदा सत्वरजसी अभिभूय तमस्तमोरूपावरणमाविरस्ति तमस्तदा वृत्तेर्विषयाकारपरिणामाभावाद्वृत्ततमोमयोः वृत्तिमवबुध्यमानः पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते। कस्मात्पुनर्निद्रावैवल्ययोरिव वृत्त्यभाव एव न निद्रेत्यत आह। सा च सम्बोधे प्रत्यवमर्शोपपत्तिकात् कारणात्प्रत्ययविशेषः। कथं? यदा हि सत्वरजिवन्तम आविरस्ति तदेदृशः प्रत्यवमर्शः सुप्तोत्थितस्य भवति। सुखमहमस्वाप्सं प्रसन्नं मनः प्रज्ञां मे विशदीकरोति स्वच्छीकरोति इति यदा तु रजःसत्वविवन्तमः आविरस्ति तदेदृशः प्रत्यवमर्श इत्याह। दुःखमहमस्वाप्सं ध्यानमं अकर्मण्यं मे मनः कस्मात् यतो भ्रमत्यनवस्थितम्। नितान्ताभिभूतरजःसत्वे तमःसत्वाशे स्वापे प्रबुद्धस्य प्रत्यवमर्शमाह। गाढं मूढोऽहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमवसन्नमिव तिष्ठतीति। साध्यव्यतिरेके हेतुव्यतिरेकमाह। स चास्वयमिति। प्रबुद्धस्य प्रबुद्धमात्रस्य तदाश्रिताश्चेति बोधकाले प्रत्ययानुवृत्त्यभावे कारणानुभव इत्यर्थः। नन्वु प्रमाणादयो व्युत्थानचित्ताधिकरणा निरुध्यन्तां समाधिप्रतिपक्षत्वान्निद्रायास्त्वेकाग्रवृत्तिवत्त्वाया कथं समाधिप्रतिपक्षतेत्यत आह। स च समाधाविरिति। एकाग्रवृत्त्यापि तामसत्वेन निद्रा सबीजनिर्बीजसमाधिप्रतिपक्ष इति सापि निरोद्धव्येत्यर्थः" विवरणम्। इयञ्च वेदान्तिभिः सुषुप्तिरित्यभिधीयते।

निद्राण त्रि॰ नि+द्रा–क्त नः। निद्रायुक्ते अमरः।

निद्रालु त्रि॰ नि+द्रा–शीलार्थे आलु। निद्राशीले अमरः। "अङ्गानि निद्रालुसविभ्रमाणि" कुमा॰। [ब्रह्मा॰।

निद्रावृत्त पु॰ निद्राया इव वृत्तमवत्वात्। अन्धकारे ग॰

निद्रासंजनन न॰ निद्रां संजनयति सम्–जन णिच्–ल्यु। श्लेष्मणि धातौ मद्यमाद्या। कफधातोर्निद्राजनकत्वं वैद्यके प्रसिद्धम्।

निधन पु॰न॰। निधीयतेऽत्र नि+धा–क्यु। १मरणे अमरः जन्मतः २अष्टमस्थाने तत्र मरणस्य चिन्त्यत्वात्तस्य तथात्वम्। ३स्वजन्मनक्षत्रावधिकेषु सप्तमषोडशत्रयोविंशेषु नक्षत्रेषु "निधने त्रिकशोधनम्" ज्यो॰ त॰। "क्व गन्तासि भ्रातः! कृतवसतयो यत्र धनिनः। विनर्षं

प्राणानां स्थितिमनुविधातुं कथमपि । धनैर्याच्ञालब्धैर्नतु परिभवोऽभ्यर्थनफलम् निकारोऽन्ये पश्चाद्वनमहह मोसद्धि निधनमिति" शान्तिश० । पञ्चावयवस्य सप्तावयवस्य वा साम्नोऽन्तिमे ४अवयवे च तच्च यस्य कस्यचित्साम्नः अन्तिमभागरूपम् उद्गाहप्रस्तोहप्रतिहर्तृभिः मिलितैर्युगपद्गेयम् । "ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिङ्कारः ग्रीष्मः प्रस्तावः वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्" "वाचि सप्तविधं सामोपासीत यत्किञ्चित् वाचो हुमिति स हिङ्कारः यत्प्रेति स प्रस्तावो यदेति स आदिः यदुदिति स उद्गीथः यत्प्रतीति स प्रतिहारः यदुपेति स उपद्रवः यन्नीति तन्निधनम्" छा०उ० । निहतं धनं यस्मात् । ५दरिद्रे त्रि० "निधनता सर्वापदामास्पदम्" मृच्छकटिकम्

निधनवत् त्रि० निधन+अस्त्यर्थे मतुप् मस्य वः । १मरणयुक्ते निधनावयवयुक्ते २साम्नि न० "पञ्चत्रे निधनवत् । निधनवत आप्यावयम्" यजु०१२।५८ "निधनवत्साम" वेददी० ।

निधा स्त्री निधीयते धार्यते बन्धनेनानया नि+धा—अ । १पाशसमूहे "निधा पाशा भवति यन्निधीयते" निरु० ४।२ "यथुर्तेसत्यप्रज्ञानं निधयेव बद्धानृ" ऋ० १०। ७१।११ "निधा पाशा पाशसमूहस्तया बद्धानृ" भा० भावे अ । २निधाने ३अर्पणे च ।

निधान न० नि+धा—भावे ल्युट् । १स्थापने निधीयतेऽत्र । २आधारे आश्रये "निधानमूगतं सर्वं सद्यः समधिगच्छति" आगमः । ३अवस्थाने "एतन्नानावतारार्थं निधानं बीजमव्ययम्" भाग०१।३।६। ४निधिशब्दार्थे । ५अप्रकाशे सि०कौ० निमूलशब्दे दृश्यम् । "नेरनिधाने" पा० "निधानकुम्भस्य यथैव दुर्गतः" रघुः "हृत्वा निधानं प्रादेन सोऽर्थमिच्छति निश्चया" वाशीष्ठ०४६अ० । ततः अस्या० चतुरर्थ्यां क । निधानक तत्पत्रिलटरेयादौ ।

निधि पु० नि+धा—आधारे कि । १वस्तुन आधारे "निधिः स्त्रीणां धनस्यन्दाविव" माघः "तदित्यमेतस्य निधेः कलानाम्" नैष० । अन्ननिधिः सुखनिधिरित्यादि २नवसंख्यानामनन्यद्रव्ये ३सप्तद्वीपे राजनि० ४विष्णौ परेश्वरे तस्य सर्वाधारत्वात् तथात्वम् । "सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः" विष्णुस० "प्रलयेऽस्मिन् सर्वं निधीयते इति निधिः" भा० । ५भूस्थातात्मातस्थामिकधनादौ निताश० निधिविषये विधिभेदस्तत्रोक्तो यथा "अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह "राजा लब्ध्वा निधिं दद्यात् द्विजेभ्योऽर्धं द्विजः पुनः । विद्वानशेषमादद्यात् सर्वस्यार्थो प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनिवेदितविज्ञातोदाण्डस्तं दण्डमेव च" याज्ञ० । उक्तं लक्षणं निधिं राजा लब्ध्वार्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्तुं दत्त्वा शेषं निधिं स्वयमाहरेत् यथाह वसिष्ठः "अप्रज्ञायमानं वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्तुं षष्ठमंशं प्रदद्यात्" इति । गौतमोऽपि "निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्याब्राह्मणोऽप्याख्याता षष्ठमंशं लभेतेत्येके" इति । अनिवेदित इति कर्तरि निष्ठा । अनिवेदितश्चासौ विज्ञातश्च राज्ञा" इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा, स सर्वं निधिं दाण्डोदण्डश्च यत्प्रत्येषया । अथ निधेरपि स्वामित्वं रूपसङ्ख्यादिभिः स्वयं भावयति तदा तत्रो राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत्" यथाह मनुः "समायमिति यो ब्रूयान्निधिं सत्येन मानवः । तस्याददीत षड्भागं राजा द्वादशमेव वेति" । अंशविभागस्तु सर्वकालाद्यपेक्षया वेदितव्यः" । ३महापद्मादिरत्नविशेषे शेवधौ च च नवविधः "महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव" इति शब्दार्थः सर्वभिज्ञानामष्टानामेव निधित्वं तद्भेदश्च मार्कण्डेयपु० ६०अ०उक्तं यथा

"मार्कण्डेय उवाच । यन्निधीनां नाम या विद्या लक्ष्मीस्तस्याश्च देवता । तदाधाराश्च निधयस्तान् मे निगदतः शृणु । तत्र पद्ममहापद्मौ तथा मकरकच्छपौ । मुकुन्दकुन्दौ नीलश्च शङ्खश्चैवाष्टमो निधिः । सत्यां दशौ भवन्त्येते सङ्घः सह भवन्त्यमी । एते शृणु समाख्याता निधयस्तव क्रोष्टुके ! । एभिराक्षोकितं चित्तं मानुषस्य महाशने ! । यादृक् स्वरूपं भवति तन्मे निगदतः शृणु । पद्मो नाम निधिः पूर्वः स यस्य भवति द्विज ! । स तस्य तत्सुतानां च तत्पुत्राणां च नान्यतः । दाक्षिण्यवारः पुरुषस्तेन चाधिष्ठितो भवेत् । सत्याचारो

महाभागोऽयतोऽयौ सात्त्विको निधिः। सुवर्णरूप्यता-
म्रादिधातूनां च परिग्रहम्। करोत्यतितरां सोऽपि
तेषां च क्रयविक्रयम्। करोति च तथा यज्ञान् दक्षि-
णाश्च प्रयच्छति। सम्पादयति कामांश्च सर्वानेव यथा-
क्रमम्। सभादेवनिकेतांश्च स कारयति तन्मनाः ३।
सत्त्वाधारो निधिश्चान्यो महापद्म इति स्मृतः। सत्त्व-
प्रधानो भवति तेन चाधिष्ठितो नरः। करोति पद्म-
रागादिरत्नानाञ्च परिग्रहम्। स मौक्तिकप्रवालानां
तेषां च क्रयविक्रयम्। ददाति योगशीलेभ्यस्तेषामा-
वसथांस्तथा। स करोति च तच्छीलः स्वयमेव च जा-
यते। तत्प्रसूतास्तथाशीलाः पुत्रपौत्रक्रमेण च।
पूर्वेर्हि नाल्पः सम्प्राप्तो पुरुषांश्च न सृजति। महापद्मस्तु
विप्राणां यज्ञार्थमुपजायते २। तामसो मकरो नाम
निधिस्तेनावलोकितः। पुरुषोऽथ तमःप्रायः सुशी-
लोऽपि हि जायते। वाणखड्गर्ष्टिधनुषां चर्मणाञ्च
परिग्रहम्। दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः।
ददाति शौर्यवृत्तीनां भूभुजां ये च तत्प्रियाः। क्रय-
विक्रयशस्त्राणां नान्यत्र प्रीतिमेति च। एकस्यैव भव-
त्येष नरस्य न सुतानुगः। द्रव्यार्थं दस्युतो नाशं
संग्रामे वापि स व्रजेत् ३। कच्छपाख्यो निधिर्योऽन्यो
नरस्तेनाभिवीक्षितः। तमःप्रधानो भवति यतोऽयौ
तामसो निधिः। व्यवहारान् न शिष्टैश्च परद्रव्यजातं
करोति च। क्रियाः स्वा निखिलाश्चैव न विश्वसिति
कस्यचित्। समस्तानि यथाङ्गानि निगृह्णाति हि क-
च्छपः। तथावष्टभ्य वित्तानि तिष्ठत्याकुलमानसः। न
ददाति न वा भुङ्क्ते तद्विनाशभयाकुलः। निधानसुर्व्यां
कुरुते निधिः सोऽप्येकपुरुषः ४। रजोगुणमयश्चान्यो
मुकुन्दो नाम यो निधिः। नरोऽवलोकितस्तेन तद्गुणो
भवति द्विज!। वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम्।
करोति गायतां वित्तं नृत्यतां च प्रयच्छति। वृन्दिमा-
गधसूतानां विटानां वारयोषिताम्। ददात्यर्थं निधिं
भोगान् भुङ्क्ते तैस्तु समं द्विज!। कुलटासु रतिश्चास्य
भवत्यन्यैश्च तद्विधैः। प्रयाति सङ्गमेकं च स निधिर्भजते
नरम् ५। रजःसत्त्वमयश्चान्यः कुन्दोनाम महानिधिः।
उपैति सप्तमधिकं नरस्तेनावलोकितः। समस्तधातु-
रत्नानां पण्यधान्यादिकस्य च। परिग्रहं करोत्येष तथैव
क्रयविक्रयम्। आधारः सज्जनानां चाप्यागताभ्यागतस्य
च। वहते नापमानोक्तिं सत्यामपि महाहवे!।
स्तूयमानश्च महतीं प्रीतिं बध्नाति यच्छति। यं यमि-
च्छति वै कामं मृदुत्वमुपयाति च। बहवो मार्या भव-
न्त्यस्य सुतिमत्योऽतिशोभनाः। तदन्वये सप्त नरान् निधिः
कुन्दोऽनुवर्त्तते। प्रवर्द्धमानोऽनुनरमष्टमागेन सत्तम!।
दीर्घायुश्चैव सर्वेषां पुरुषाणां प्रयच्छति। बन्धूनामेव
मरणं वे च दूरादुपागताः। तेषां करोति वै कुन्दः पर-
लोकेन चादृतः। भवत्यस्य न च स्नेहः बहवाश्रितु
जायते। पूर्वमित्रैश्च वैमित्र्यं प्रीतिमन्यैः करोति च ६।
तथैव सत्त्वतमसी यो बिभर्त्ति महानिधिः। निधिः स
नीलसत्त्वाढ्यो नरस्तच्छीलमाप्नुयात्। वस्त्रकर्पासधान्यादि
फलपुष्पपरिग्रहम्। सुखाविद्रुमशङ्खानां शुक्त्यादीनां
तथा सुने!। काष्ठादीनां करोत्येष यज्ञान्वल्लव
सम्भवम्। क्रयविक्रयमप्येषां नान्यत्र रमते मनः।
तडागान् पुष्करिण्यादीन् तथाऽऽरामान् करोति च।
मन्यश्च सरितां दृष्टांस्तथारोपयते नरः। अनुद्वेगम
पुत्रादिभोगभोक्ताऽपि जायते। त्रिपुरश्चापि निधि-
र्नीलो नामेह जायते ७। रजस्तमोमयश्चान्यः शङ्ख
संज्ञो हि यो निधिः। तेनापि नीयते विप्र! बहुवित्तं
निधीश्वरः। एकस्यैव भवत्येष नरं नान्यमुपैति च।
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रोष्टुके! शृणु। एक
एवात्मना मिष्टमन्नं भुङ्क्ते तथाऽम्बरम्। बहुभुक्परि-
जनो न च शोभनवस्त्रधृक्। न ददाति सुहृद्भार्यां
सुतपुत्रस्त्रुषादिषु। स्वपोषणपरः शङ्खी नरो भवति
सर्वदा ८। इत्येते निधयः ख्याता नराणामर्थदेवताः।
मिश्रावलोकिता मिश्रस्वभावफलदायिनः। यथाख्यात
स्वभावस्तु भवत्येकविलोकनात्। सर्वेषामाधिपत्ये च
श्रीरेषा द्विज! पद्मिनी"। अथर्वाथर्वभूतपाठवृते
श्वेदे च। निधिगोपशब्दे ६ अत्र्म्।

निधिगोप पु० निधिमथर्वाङ्गिरसभूतपाठो वेदस्तं गोपायति
गुप–अण् उप०। अनूचाने "अथ यदेवानुब्रूयात् तेन
ऋषिभ्य ऋणं जायते। तद्वैभ्य एतत् करोति अथर्वाणं
निधिगोपं ह्यनूचानमाहुः" शत०ब्रा० १।७।२।२

निधिनाथ पु० ६त०। कुबेरे त्रिका० निधीशादयोऽत्र।

निधुवन न० नितरां धुवनं कम्पनादिधातुनमत्र। मैथुने
सुरतक्रीडायाम् अमरः। "विधुवनविनोदेन च नतम्"
कर्पूरस्तवः "नवनिधुवनक्रीडाः कौतुकेनाभिवीक्ष्य"
माघः। नितरां धुवनम् ६। २अत्यन्तकम्पने च

निधेय त्रि० नि+धा–यत्। स्थाप्ये स्त्रियां टाप्। "श्रीच

यद्भाक्या देवि ! निधेया वैष्णवोरसि" हरिवं० ९८अ० आङि तु यार्जुरवा० स्त्रियां ङीन् । आनिधेयी

निध्यान न० नि+ध्यै–भावे ल्युट् । निर्वर्णने दर्शने अमरः

निध्रुव पु० गोत्रप्रवर्त्तकर्षिप्रवरर्षिभेदे "निध्रुवाणां काश्यपावत्सारनैध्रुवेति" आश्व०श्रौ० १२।१४।७ गोत्रप्रवरोक्तौ

निध्रुवि त्रि० नितरां ध्रुवति ध्रु–स्थैर्ये कि । नितरां स्थैर्यान्विते । "वो मर्त्येषु निध्रुविर्वृतावा" ऋ०७।२।१

निध्वान पु० नि+ध्वन–भावे घञ् । शब्दमात्रे शब्दरत्ना०।

निनक्षु त्रि० नष्टुमिच्छुः नश–सन्–उ तुम् । अदर्शनं प्राप्तुमिच्छौ "अविस्फुरन्नन्यूनां निनक्षुर्विक्रमं छलः" भट्टिः ।

निनद पु०नि+नद–भावे अप् । १शब्दे अमरः २रवतुल्यशब्दे शब्दार्थचि० । उच्चचार निनदोऽन्यश्च तस्याः" रघुः।

निनयन न० नि+नी–ल्युट् । १निष्पादने "नाभिव्याहारयेत् ब्रह्म क्षुधानिनयनादृते" मनुः "निनयनं निष्पादनम्" कुल्लू० । २पराक्षेपने च निपूर्वस्य नयतेः परिभेकार्थत्वात् तथात्वम् । "बर्हिषि पूर्णपात्रं निनयेत्" आश्व० श्रौ०सू० १।१०।२२ "निनयेत् क्षिपेदित्यर्थः नारा० "एषोऽवध्यः" ४सू० "यदिदं पूर्णपात्रनिनयनं एषोऽस्य कर्मणोऽवध्यो भवति" नारा० "उदकं चमसं निनयेयुः" द्राह्या०सू० "निनयेयुः पराक्षिपेयुः" तास्य० ब्रा०भा०

निनर्त्तग्रतु त्रि० देवश्रवः उद्धवस्य पुत्रभेदे "निनर्त्तग्रतु ग्रतुश्च देवश्रवाव्यजायत" हरिवं० ३५अ०

निनर्द पु० नि+नर्द–भावे घञ् । वेदशब्दोच्चारणभेदे । तत्प्रकारः आश्व० श्रौ० ८।३।९ "तृतीये तु पादेष्वादितो यदक्षरं तदनुदात्तीकृत्य ब्रूयात् । एतदुक्तं भवति तृतीयेषु प्रथमादित इत्यर्थः । आदितो यद्वे अक्षरे तयोः पूर्वमनुदात्तं तस्मात् परं द्वितीयम् उदात्तं यथा भवेत् तथा निनर्दैत् नितरां ब्रूयादित्यर्थः । तदेवमुच्चारणं निनर्दशब्देनोच्यत इत्यर्थः" नारा० "तस्योत्तमावर्जं तृतीयेषु व्यूह्यो निनर्दश्च" ७।११।९ "तस्य उत्तमस्य वाः पुरस्तात् प्रागुत्तमाया ऋचस्तासां तृतीयेषु पादेषु व्यूह्यो निनर्दश्च कर्त्तव्यः । उत्तमापि व्यूह्यनिनर्दरहिता वर्जयेत्" नारा० "स्वरादिरन्त ओकारयतुर्निनर्दः" ११अ० तृतीयेषु पादेषु निनर्द उक्तः । तेषु कस्मिन् प्रदेश इत्युच्यते । पादान्ते । स्वरादिः स्वरो वाटिप्रदेश इत्यर्थः स चौकारयतुष्कृतो वक्तव्यः स निनर्दः इत्युच्यते" नारा० ।

निनाद नि+नद–भावे घञ् । शब्दमात्रे अमरः "ध्वनिनादमथ ध्वस्यती तयोः" रघुः ।

निनाह्य पु० नीचैर्नाह्यः भूमौ निखननीयः नि+नह–कर्मणि यत् । भूमौ नीचैः खननीये १मणिके २मठ्ठा घटे च "अस्तमितश्चेत् निनाह्यात् पुरेजानश्चेत्" कात्या० श्रौ०८।९।५८ "निनाह्यात् मणिकात्" संग्रहः "यदि पुरेजानः स्यात् निनाह्यात् गृह्णीयात्" शत०ब्रा० ३।९।२।८ "निनाह्यात् स्वस्तिकप्रभृतघटादेः" भा० ।

निनित्सु पु० निन्दितुमिच्छुः निन्दि–सन–उ वेदे नि०। निन्दितुमिच्छौ "आरे तं शंसं क्रमुहि निनित्सोः" ऋ० ७।२५।२ लोके तु निनिन्दिषु तत्रार्थे ।

निन्दक त्रि० निन्द–ण्वुल् । गर्हाकारके निन्दाकारके "परीवादात् खरो भवति श्वा वै भवति निन्दकः" मनुः

निन्दतल पु० निन्द–कर्मणि घञ् निन्दः निन्द्यं तलमस्य । निन्दितवृक्षे शब्दर०

निन्दन न० निन्दि–भावे ल्युट् । गर्हणे शब्दरत्ना०।

निन्दा स्त्री निन्दि–भावे अ । अविद्यमानदोषाभिधाने १गर्हणे "वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा । द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत् । न चात्मानं प्रशंसेदा परनिन्दाञ्च वर्जयेत् । वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत्" कौर्मपु०१५अ०। २अनिष्टसाधनत्वबोधनद्वारा विध्यर्थप्रशंसावचने च "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुम्" न्याय०।

निन्दार्थवाद पु० निन्दारूपोऽर्थवादः । मीमांसकोक्ते अर्थवादभेदे अर्थवादशब्दे २६९ पृ० दृश्यम् उदाहरणान्तरं लौगाक्षिभास्करेण दर्शितं यथा "तत्र निन्दार्थवादो यथा "असत्यं वा एतद् यदश्वन्द्रोसम् अश्वजं हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदन्ति"

निन्दास्तुति स्त्री निन्दया स्तुतिः । व्याजेन निन्दाद्वारा स्तुतौ अलङ्कारशब्दे व्याजस्तुत्यलङ्कारे ४०५पृ० दृश्यम् ।

निन्दित त्रि० निन्द–क्त । १गर्हिते २धिक्कृते जटा० "विहितस्यानुष्ठानात् निन्दितस्य च सेवनात्" याज्ञ० । निन्दितस्य शास्त्रलोकयोर्गर्हितम् । तत्र शास्त्रे निन्दितं शूद्रप्रतिग्रहादि लोकगर्हितमतिभोजनादि ।

"अस्वर्ग्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्" मनुः "यद्यपि शिष्टं लोकविरुद्धं नाचरणीयं नाचरणीयमिति मिताक्षराधृतवचनम् । [वतसायां हेमच० ।

निन्दु स्त्री निन्द्यतेऽप्रजस्त्वेनासौ निन्दि–कर्मणि उ । ऋत-

निप पु॰न॰ नितरां पिबत्यनेन नि+पा–करणे घञर्थे क। १कलसे अमरः नीप+पृषो॰। २कदम्बवृक्षे शब्दच॰।

निपक्षति स्त्री नीचा पक्षतिः प्रा॰स॰। अश्वस्य दक्षिणपार्श्वस्थास्थां त्रयोदशानां मध्ये द्वितीये अस्थि वेदी॰ "अग्नेः पक्षतिर्वायोः निपक्षतिः" "इन्द्राग्न्योः पक्षतिः सरस्वत्ये निपक्षतिः" यजु॰ २५।४४।४५ "पक्षस्य पार्श्वस्य मूलभूतानि अस्थीनि षड्क्रियशब्दवाच्यानि पक्षतिशब्देनोच्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति "षड्विंशतिरश्वस्य षड्क्रयः" इति कौषीत॰ब्रा॰ १०।४ श्रुतेः तेषां क्रमेण देवता। अग्नेः पक्षतिः प्रथमं दक्षिणपार्श्वस्थि, वायोर्निपक्षतिः नीचा पक्षतिः निपक्षतिः द्वितीयं दक्षिणपार्श्वस्थि" "एवं द्वितीयं वामपार्श्वस्थि सरस्वत्या इति च" वेदी॰। [अमरः

निप(पा)ठ पु॰ नि+पठ–भावे अप् पक्षे घञ् वा। पाठे

निपठितिन् त्रि॰निपठितमनेन इष्टा॰कर्त्तरि इनि। कृतपाठे

निपत्यरोहिणी स्त्री निपत्य रोहिणी रोहितवर्णा स्त्री मयू॰। निपत्यरोहितवर्णायां स्त्रियाम्

निपत्या स्त्री निपत्यस्याम् नि+पत–आधारे क्यप् नि॰। १पिच्छिलभूमौ २क्षुद्रभूमौ च।

निपरण न॰ निषिद्धं परणं प्रीतिः नि+(निषेधे) पृ–प्रीतौ भावे ल्युट् वा। प्रीत्यभावे तन्निरुक्तिश्च "निपरणात् पुत् नरकं ततस्त्रायते" इति पुत्रशब्दे निरुक्तिः नितरां प्रीतौ २प्रीणने च "निपरणं पित्र्येण तीर्थेन" आश्व॰श्रौ॰२।६।१५

निपलाश त्रि॰निपतितं पलाशं यस्य प्रा॰ब॰। निपतितपत्रे वृक्षे "साहाश्वे निपलाशमिवोवाद" शत॰ ब्रा॰ ३। २।१।२०

निपाक पु॰ नितरां पाकः प्रा॰स॰। अतिशयपाके शब्दर॰।

निपात पु॰ नि+पत–भावे घञ्। १पतने २च्युतौ त्रिका॰ ३अधःपतने च "पयोधरोत्सेधनिपातचूर्णिताः" कुमा॰ "क्व च निशितनिपाता वज्रसाराः शरास्ते" शकु॰। निपतन्ति अवयववर्णविनाशादिना अन्यथा निष्पद्यन्ते नि+पत–कर्त्तरि घञ्ता॰ च। वर्णागमादिना अन्यथोत्पद्यमाने स्वानिष्टाद्ये ४शब्दभेदे। वर्णागमादिप्रकारश्च कथ्यते "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"। "भवेद्वर्णागमात् कृंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृते र्वर्णनाशे पृथोदरम्" निपतनार्थेषु उच्चावचेषु नि+पत–कर्त्तरि घञ्ता॰च। नामाविधार्थेषु इत्या स्वार्थबोधकतया पतनशीले चाटौ ५शब्दभेदे "तद्यान्येतानि चत्वारि पदजातानि नामाख्याते उपसर्गनिपाताश्चेति" विभज्य अथ निपाता उच्चावचेष्वर्थेषु निपतन्तीति उपमार्थे वा कर्मोपसंग्रहार्थे पदपूरणाये वा" विरुक्तकारः। ते च "प्राग्रीश्वरान्निपाताः" "चादयोऽसत्त्वे" "प्रादयश्च" इत्यादिषु पा॰ सूत्रेषु पठिताः निपातसंज्ञाः भवन्ति। उपसर्गातिरिक्तनिपातानां च द्योतकत्ववाचकत्वोभयस्वीकारः "अव्ययविभक्तीति" पा॰ सू॰ भाष्ये स्थितः। उपसर्गाणान्तु द्योतकत्वमेवेति "गतिर्गताविति" पा॰सू॰भाष्ये स्थितम्। उपसर्गशब्दे १२२५पृ॰ वैयाकरणमतसिद्धार्थबोधकता उक्ता नैयायिकमते तल्लक्षणादि शब्दश॰प्र॰उक्तं यथा "निपातं कथयति। स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः। सुबाद्यन्यो निपातोऽसौ विविधस्तादिभेदतः। यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थः भेदेनान्वयबोधं प्रति योग्यः। न हि सूतमनुभूतञ्चेत्यादितः कस्यापि सूतः सहञ्च इत्यादिरनुभवः किन्तु सूतानुभूतयोः सहञ्च इत्यादिरेव। लोकं पचति इत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थ एव प्रत्ययस्तु सुबादिरेव। यः शब्द इत्यादौ नामार्थस्याभेदस्याकाङ्क्षकारादिः स्वपरत्वान्न निपातः किन्तु नामैव। पुरन्दरप्रभृतौ तु नाम्नि निपातव्यपदेशः स्वानिष्टाद्यत्वप्रयुक्तो भ्रान्तः। कार्त्तिक्यादौ यत्र दानं तदत्यन्तविनिन्दितम्" इत्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः किन्तु दानाद्यवच्छिन्ने। स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात्। प्रादयस्तूपसर्गा न सार्थकाः सार्थकाश्चेत् निपाता अपि"।

निपातन न॰ नि+पत–णिच् ल्युट्। १मारणे "परिचर्यं चलच्छ्रीनिपातने" रघुः। २अधोनयने ३पातने च "अवश्यं चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" मनुः निपातने दण्डपातने" प्रा॰त॰निपात्यतेऽनेन करणे ल्युट्। ४लक्षणानुसारेणानुत्पद्यमानशब्दसाधनोपाये "यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातनात् सिद्धम्" महाभाष्यम्। सर्वनामसंज्ञासू॰ "निपातनात् सत्त्वाभावः" "निपातनमप्येवं जातीयकमेव अविशेषेण चलसङ्ग्रा विशेषेण निपातनं

क्रियते तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते इदं न भवतीति" महाभाष्यम् ।

निपाद त्रि० निहतो न्यग्भूतो वा पादो यत्र । निम्नप्रदेशे "अवस्युहतो निपादाः" ऋ० ५।८२।७ "उहत उन्नत-प्रदेशाः निपादा न्यग्भूतदेशाः" सा० ।

निपान न० निपीयतेऽस्मिन् नि+पा--आधारे ल्युट् । कूपसमीपस्थे १जलाशये कूपोद्धृतजलाधारे कूपादिसमीपे पशूनां पानार्थसद्भावाधारे अमरः । करणे ल्युट् । २गोदोहनपात्रे त्रिका० । ३स्नातादिषु च "परकीयनिपानेषु न स्नायाद् कदाचन । निपानकर्त्तुः स्नात्वा च दुष्कृतांशेन लिप्यते" मनुः "गाहन्तां महिषा निपानसलिलम्" यजु० । भावे ल्युट् । ४निःशेषपाने

निपीडन नि+पीड–भावे ल्युट् । नितरां पीडने पीडि–कुच् । तत्रार्थे स्त्री "जलादीननिपीडनां निजलने वस्त्रा वधोविधानम्" वा०द० । [जलनिष्पीडने ।

निपीडित त्रि०नितरां पीडितः नि+पीड–क्त । (निंगडान)

निपुण त्रि० नि+पुष–क । १प्रवीणे क्रियादक्षे "शिल्पोपचारकुशलाश्च निपुणाः पण्यवोनिताः" मनुः । "यक्षिर्निपुणता लोकयात्रकाव्यमेवचात्" काव्यप्र० २सूक्ष्मे "शुभं वचो मम परं निपुणं विधाय" रघुनाथः । श्रेष्ठादि० अभूततद्भावेऽर्थे ज्ञतादिना च० । निपुणज्ञत निपुणीज्ञते "साधु निपुणाभ्यामाशिषावां वधूपतेः" वा० एतद्योगे अर्थावां गम्यमानायां षष्ठ्यपि भवति निपुणः । पत्यादियोगे तु न, भ्रातरं प्रति निपुणः" दि०कौ० ।

निपुर पु०निहतं पूर्यते पृ--कर्मणि क्विप् । क्षिप्तदेहे सूक्ष्मशरीरे "परा पुरो निपुरो ये भवन्ति" यजु० २।२० "निपुरः सूक्ष्मदेहान्" वेददी० । तत्राश्रितात्मादिना सूक्ष्मरूपेण पूरणेन तत्पूरणस्य निहतत्वात् तथात्वम् 'अस्य-मितं लोका विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः" छा०उ० इत्यादिश्रुत्या मनसः सूक्ष्मदेहान्तर्गतस्य सूक्ष्मभूतेनात्मनावेशेन उपचीयमानत्वात् निहतपूरणमेवं प्राणादीनामपि तदन्तर्गतानां तथात्वं तत्रोक्तमतो लिङ्गदेहस्य तथात्वम् ।

निफला स्त्री निहतं फलं यस्याः । ज्योतिष्मतीलतायाम् राजनि० ।

निबन्ध पु०नि+बन्ध-घञ् । १शास्त्रविशेषे देवस्वेन प्रतिष्ठिते वस्तुनि "दद्यात् भूमिं निबन्धं वा ज्ञात्वा शेषस्तु शेषमेत्" "निबन्धो द्रव्यमेव वा" वाच० २संग्रहग्रन्थभेदे भूमि-रोधरूपे ३रोगभेदे ४बन्धने च हेमच० "निबन्धायाऽऽसुरी मता" गीता । निबध्नाति कोष्ठम् अच् । ५निम्बवृक्षे जटाध० । तत्सेवने हि कोष्ठरोधो भवति ।

निबन्धन न० निबध्यतेऽनेनात्र वा ल्युट् । १हेतौ हेमच० । २वीणायाश्चन्द्रोनिबन्धनयोर्द्वभागे च अमरः । भावे ल्युट् । ३बन्धने ४ग्रन्थे च "अतुच्छतपदन्यासा सद्भिः सन्निबन्धना" माघः । ततः ग्रन्थादि० चतुरर्थी क । निबन्धनक तत्समीपस्थदेशादौ त्रि० । निबध्यते अनया करणे ल्युट् । ५निबन्धसाधने स्त्रियां ङीप् । "विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी" पात०सू०

निब(व)र्हण न० नि+(व)वर्ह–ल्युट् । मारणे "निबर्हणं धर्मधनैर्विगर्हितं विशिष्य विश्वासजुषां द्विषामपि" नैष० । अन्तस्थवर्णमध्यभिन्ने के

निभ त्रि०नि+भा–क । १नितरां भासमाने २सदृशे च वाहस्थेऽस्य नित्यस० न पृथक् प्रयोगः । "प्रफुल्लताविच्छुनिभैरधीषुभिः" "उडुपेन पूर्णेन्दुनिभाभिलोचना" माघः "प्रभत्यन्यो निभाद्यन्यः स वा प्रत्यय उच्यते" भट्टि० ।

निभालन न० नि+भु–भल–निष्ठायां भावे ल्युट् । दर्शने त्रिका० । [भवेन हि निश्चयं भवतीति तस्य तथात्वम् ।

निभृत त्रि० निश्चयं भृतः । अत्यन्तभीते राजनि० । अत्यन्त-

निभूयप पु० निभूय नितरां भूत्वा तत्स्थादिरूपेणावतीर्य पाति पा–क । विष्णौ "विष्णवे निभूयपाय जाष्टा" यजु० २२।२० ।

निभृत त्रि० नि+भृ–क्त । १हृते २विनीते ३निश्चले ४एकाग्रे ५गुप्ते ६निर्जने अत्यालोपलिते च भट्टिः "नभसा निभृतेन्दुना समाम्" रघुः "मधुकरालुनया कुसुमाट-ध्वनिभृता निभृतालयरक्षणे" माघः ।

निमग्न त्रि० नितरां मग्नः नि+मस्ज–क्त । जलादौ नितरां निविष्टे "निमग्नेभाजलमर्मनजलमेरमाहदरम्" रत्नगङ्गाधरः । निमग्नस्यादूरदेशादि० बहुव्री० क । नैषधन्तु निमग्नस्यादूरदेशादौ त्रि० ।

निमज्जथु पु० नि+मस्ज–भावे अथुच् । निमज्जने "तत्रे कालान्तरैः सार्द्धं अन्योऽहं धिङ्निमज्जथुम्" भट्टिः ।

निमज्जन न० नि+मस्ज–भावे ल्युट् । जलादावगाहने स्नाने "दृङ्निमज्जनसुपैति सुधायाम्" नैष० ।

निमज्जन न० नि+मस्ज–भावे ल्युट् । आवश्यकमाशुधोजलादौ प्रवर्त्तने । "यिधिनिमज्जनाभ्यां मज्जनाधीरुपमज्ज प्रार्थनासु सिङ्" पा० "यस्याकरणे प्रत्ययावस्तिमज्जनम्"

वि॰कौ॰। तथा च प्रत्यवायप्रयोजकाभावप्रतियोगि निमन्त्रणम्। "ब्राह्मणप्रातिवेश्यानामेतदेवा निमन्त्रणे" भाग॰ "निमन्त्रणार्थं दूतांश्च प्रेषयामास शीघ्रगान्" भा॰व॰ २५५अ॰। श्राद्धनिमन्त्रणप्रकारादि निमन्त्रितस्य नियमादि च नि॰सि॰ निरूपितं यथा चन्द्रिकायां मात्स्ये "पठन्निमन्त्र्य नियमान् श्रावयेत् पैतृकान् बुधः। अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा" यत्तु मनुः "सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नः श्रोभूते श्राद्धकर्मणीति" तत्पूर्वेद्युर्निमन्त्रणपरं न तदहः। तत्रैव देवलः "अपरेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत्। अज्ञातीनसमानार्थानबुद्धानात्मशक्तितः"। कात्यायनः अनिन्द्येनामन्त्रितो नापक्रामेत् केतनं त्यक्त्वा" । अथ श्राद्धकर्मभोक्तृनियमाः तत्र निमन्त्रितविप्रलक्षणेऽपराह्णे यमः "केतनं कारयित्वा तु योऽतिपातयति द्विजम्। ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते। आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत्। अतिक्रम्य तु मोहात् तिर्यग्योनिषु जायते"। प्रमदात्तप्राणे हारीतः "प्रमादाद्विस्मृतं ज्ञात्वा प्रवाद्यैनं प्रयत्नतः। तर्पयित्वा यथान्यायं सर्वं तत् फलमश्नुते"। प्रमदाभावे तु नारायणः "एकस्मिन्नपि प्राप्ते ब्राह्मणो नियतः शुचिः। व्रतियान्द्रायणं कृत्वा तस्मात् पापात् प्रमुच्यते" यमः "आमन्त्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति। नरकाणां शतं गत्वा चाण्डालेष्वभिजायते"। तत्रैव देवलः "पूर्वं निमन्त्रितोऽन्येन कुर्यादन्यत्रविग्रहम्। भुक्त्वाहारोऽथ वा भुङ्क्ते सुकृतं तस्य नश्यति"। यदि विप्रो विलम्बेत तद्दोषमादित्यपुराणे "आमन्त्रितश्चिरं नैव कुर्याद्विप्रः कदाचन। देवतानां पितॄणाञ्च दातुरन्नस्य चैव हि। चिरकारी भवेद्भोक्ता पच्यते नरकाग्निना"। पृथ्वीचन्द्रोदये यमः "निमन्त्रितस्तु यो विप्रो लघ्वान्नं याति दुर्मतिः। भवन्ति पितरस्तस्य तं मासं पांशुभोजनाः। आमन्त्रितस्तु यः श्राद्धे हिंसां वै कुरुते द्विजः। पितरस्तस्य तं मासं भवन्ति रुधिराशनाः। आमन्त्रितस्तु यो विप्रो भारसङ्कृते द्विजः। पितरस्तस्य तं मासं भवन्ति खेदभोजनाः। निमन्त्रितस्तु यो विप्रः प्रकुर्यात् कलहं यदि। पितरस्तस्य तं मासं भवन्ति कलभोजनाः"। शङ्खः "निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः। श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्मरुतैनसा"। ऋतावपि मैथुनं निषिद्धम् "स्वदारे नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित्। तत्र गच्छन्नवाप्नोति ह्यनिष्टानि फलानि तु" इति तत्रैव माधवीये च ब्रह्मपुराणे "श्राद्धं करिष्यन् कृत्वा वा भुक्त्वा वापि निमन्त्रितः। उपोष्य च तथा भुक्त्वा नोपेयाच्च ऋतावपि। भोक्ष्यन् करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः। अवायं भोजनञ्चापि ऋतावपि विवर्जयेत्" इति तत्रैवाश्वलायनोक्तेश्च। विप्रानेश्वरेण तु श्राद्धे कृते सद्भोजोऽपि न दोष इत्युक्तम् तत्त्वनिर्णये ज्ञेयम्। बृहस्पतिः "द्विनिर्यं ब्रह्मचारी स्याच्छ्राद्धबहुब्राह्मणैः सह। अन्यथा वर्त्तमानौ तु स्यातां निरयगामिनौ। पुनर्भोजनमध्वानं भारभाजासमैथुनम्। श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत्। स्वाध्यायं मलकर्षञ्च दिवास्वापं तथैव च"। यत्तु श्राद्धकाण्डिकायां पुराणसमुच्चये "कृत्वा तु रुधिरस्वापं न विद्वान् श्राद्धमाचरेत्। एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेत्" इति तन्मूलम्। पृथ्वीचन्द्रोदये यमः "पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्। सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताऽष्ट वर्जयेत्"। सन्ध्यानिषेधः प्रायश्चित्तात् पूर्वं ज्ञेयः यथाहोशनाः "दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि"। गौड़ास्तु "सायं सन्ध्यां परान्नञ्च छेदनञ्च वनस्पतेः। अमावस्यां न कुर्वीत रात्रिभोजनमेव च। द्यूतञ्च कलहञ्चैव सायंसन्ध्यां दिवाशयम्। श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तिञ्च वर्जयेत्" कामधेनौ वराहादुक्तेः श्राद्धकर्त्तुरपि सायंसन्ध्याविषेधमाहुः शिष्टास्तु निर्मूलत्वमाहुः। होमनिषेधस्तु स्वयंहोमविषयः "सूतके च प्रवासे च अशक्तौ श्राद्धभोजने। एवमादिनिमित्तेषु हापयेच्च तु हापयेत्" इति छन्दोगपरिशिष्टात्। तत्रैवादित्यपुराणे "निमन्त्रितस्तु न श्राद्धे कुर्याद्धाय्यादिताडनम्"। चन्द्रिकायां प्रचेताः "श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम्। श्राद्धकर्त्ता न कुर्वीत दन्तानां धावनं बुधः" हेमाद्रौ जाबालिः "दन्तधावनताम्बूले तैलाभ्यङ्गमभोजनम्। स्त्रीप्रधपरान्नञ्च श्राद्धवत् सप्त वर्जयेत्"। विष्णुरहस्ये "श्राद्धोपवासदिवसे खादित्वा दन्तधावनम्। गायत्र्या यतस्तम्भूतमम्भु प्राश्य विशुध्यति। पुनर्भोजनमध्वानं वा नमायाश्वमैथुनम्। दानप्रतिग्रहौ होमं श्राद्धभुक्

त्यक्त वर्जयेत्"। "निमन्त्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः। तैश्चापि संयतैर्भाव्यम् मनोवाक्कायकर्मभिः" याज्ञ०"पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत ब्राह्मणान् सम्यक् विप्रान् यथोदितान्" मनुः। "पूर्वेद्युर्निवेदनम् वेदनं परेद्युर्द्वितीयं, तृतीयमामन्त्रणम्" आपस्तम्बः "निवेदनं श्वोमया श्राद्धं कर्त्तव्यं तत्र भवन्तो निमन्त्रणीया इत्येवंरूपं निवेदनम्। द्वितीयं वेदनं त्वामहं निमन्त्रये इत्यनेन निमन्त्रणम्। त्वयि श्राद्धमहं करिष्ये" इति तृतीयमनुज्ञाग्रहणरूपम्" आ०त० रघु०

निमय पु० नि+मि-अच्। परिवर्त्तने द्रव्यान्तरदानेन द्रव्यान्तरग्रहणरूपे विनिमये तत्र अविक्रेयद्रव्याणां विनिमयेनैव ग्रहणं कर्त्तव्यं यथा भा०शा० ७८अ० "रसा-रसैर्निमातव्या नत्वेव सवर्णं रसैः। क्रताद्रसाकृतत्रेन तिलाधान्येन तत्समाः"। अविक्रेयाणि अपण्यशब्दे २२४पृ० दर्शितानि।

निमान न०निमीयतेऽनेन नि+मा-ल्युट्। मूल्ये "संख्यायागुणस्य निमाने मयट्" पा० "निमानं मूल्यम्" सि०कौ०।

निमि पु०अत्रिवंश्ये १दत्तात्रेयपुत्रे "स्वायम्भुवोऽत्रिः कौरव्य! परमर्षिः प्रतापवान्। तस्य वंशे महाराज! दत्तात्रेय इति स्मृतः। दत्तात्रेयस्य पुत्रोऽभून्निमिर्नाम तपोधनः" भा०अनु० ६१अ०। २कौरवंश्ये भाविन्द्रपभेदे "दण्ड-पाणिर्निमिस्तस्य क्षेमको कविता ततः। क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ" भाग० ९।२२।९। द्वापरयुगीये असुरांशनृपभेदे "अत्रप्रपातने चैव निमिर्हैं-यश्च दानवौ" हरिवं० १६१अ०। ४इक्ष्वाकुवंश्ये नृपभेदे "आसीद्राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम्। पुत्रो द्वादशमो वीर्ये धर्मे च परिनिष्ठितः" रामा०उ०५५ स० तस्य वसिष्ठशापेन विदेहप्राप्तिकथा "यस्मात्त्वयन्यं हतवान् मामवज्ञाय पार्थिव!। चेतनेन विनाभूतो देहस्ते पार्थिवेष्यति"। तत्प्रसंगे तस्य सर्वभूतानां नेत्रेषु निमेषरूपतया स्थितिकथा "सप्रीताश्च सुराः सर्वे निमेषे तस्तदाऽब्रुवन्। वरं वरय राजर्षे! क्व ते चेतो निरूप्यताम्। एवमुक्तः सुरैः सर्वैर्निमेषे तस्तदाऽब्रवीत्। नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः!। वाढमित्येव विबुधा निमेषे तस्तदाऽब्रुवन्। नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि। त्वदृते निमिषिष्यन्ति चक्षूंषि पृथिवीपते!। वायुभूतेन चरता विश्रमार्थं सुखार्थिनः"

निमित त्रि० नि+मि-क्त। समदीर्घविस्तारपरिमाणयुक्ते निघण्टौ दशग्रन्थम्।

निमित्त न० नि+मिद-क्त। "अनात्मनेपदनिमित्ते" पा० स्वतन्त्रनिर्देशात् न दस्य नः। १हेतौ २चिह्ने च अमरः "निमित्तेषु च सर्वेषु अप्रमत्तो च भवेश्वरः" स्मृतिः "मयैव पूर्वं निहता धार्त्तराष्ट्राः निमित्तमात्रं भव सव्यसाचिन्!" गीता "अतः कार्यं प्रवक्ष्यामि निमित्तं कर्मणामिह" ति० त० भविष्यपु० "माघपञ्चतिथीनाञ्च निमित्तानाञ्च सर्वशः। उल्लेखनमकुर्वाणो न तस्य फल-भाग् भवेत्"ति०त० भविष्यपु०। ब्रह्माण्डे "निमित्तानि च वक्ष्यामि शुभाशुभफलोदयम्" "निमित्तं मनश्चक्षुरा-दिप्रवृत्तौ" हलायुधकम्। शुभाशुभसूचके ३शकुने "निमित्तानि च पश्यामि विपरीतानि केशव!" गीता ४फले उद्देश्ये "निमित्तात् कर्मयोगे" वार्त्ति० निमित्त-मिह फलम्। ५निमित्तनिश्चये नैमित्तिकं निमित्तनिश्चयादागतम्। ६शब्दे च शब्दार्थचि० स्वार्थे क तत्रार्थे संज्ञायां कन्। निमित्तक चुम्बने शब्दमाला।

निमित्तकारण न० कर्म०। नैयायिकमते समवायिकारणाऽसमवायिकारणभिन्नकारणे तथाहि घटादौ मृत्तिकादि समवायि कारणम् कपालद्वयसंयोगोऽसमवायिकारणम्। कुलालचक्रदण्डसूत्रादि निमित्तकारणम्। एवमन्यदपि कालादि च। एवन्यत्र यथायथमूह्यम्।

निमित्तकृत् त्रि० निमित्तं शकुनं कृतेन करोति कृ-क्विप् तुक्। रवेण दुष्टादुष्टशकुनकारके काके राजनि०। तस्य रवेण शकुनसूचकत्वात् तथात्वम्। काकरुतशब्दे १८४४ पृ० दशग्रन्थम्।

निमित्तबध पु० निमित्तेन रोधादिहेतुना बधः। 'रोधादि-निमित्ते १गवादेर्बधे तत्र प्रायश्चित्तादि प्रा०त०उक्तं यथा "रोधादिनिमित्तकप्रायश्चित्तम्। तत्राङ्गिराः "रोधने बन्धने चापि योजने च गवां रजः। उत्पाद्य मरणं वापि निमित्तो तत्र लिप्यते। पादज्वरेद्रोधबधे द्वौ पादौ बन्धने चरेत्! योजने पादहीनं स्यात्ज्वरेत् सर्वं निपातने"। निमित्तो लिप्यत इति यथाकथञ्चित् मरण-निमित्ततारतम्येन "यो भूय आरभते तस्यानु फले विशेषः" इत्यापस्तम्बवचनात् पापविशेषेण लिप्यते तद्विशेषात् प्रायश्चित्तविशेषमाह पादज्वरेदित्यादि। रोधः कोशायाः गोराकारप्रचारनिर्गमविरोधः। बन्धन-मवधावन्धनमकाण्डबन्धनञ्च। योजनं हलशकटादौ

योजनं तत्रातिपाताद्दिनेति शेषः। अत्रैव विषये अवनः "प्राजापत्यद्वयं गोहत्याप्रायश्चित्तं रोधनबन्धनमोक्षवधे पादहत्या नखानि रोमाणि शिखावर्जं वपनं त्रिवर्षं गवानुगमनं सहशयनं सुमहत्तृणानि दद्याच्च चारयेत् प्रतान्ये ब्राह्मणभोजनमिति"। रोधनबन्धनयोर्मध्य इत्यादेरयमर्थः रोधनिमित्तवधे प्राजापत्यस्य पादः प्रायश्चित्तं नखच्छेदनमात्रम्। बन्धननिमित्तवधे प्राजापत्यस्य द्वौ पादौ नखानां रोम्णाञ्च छेदनम्। मोक्षनिमित्ते च वधे प्राजापत्यपादत्रयं नखरोमशिखावर्जमेवच्छेदनञ्च। दण्डादिप्रहारवधे सम्पूर्णं प्राजापत्यम् नखरोमशिखाच्छेदनञ्च इति। एतद्विषय एव जिताक्षराधृतं संवर्त्तवचनं तदीयवाक्यत्वात् तद्यथा "पादेऽङ्गुलीभवपनं द्विपादे ह्यङ्गुलीरपि च। त्रिपादे च शिखावर्जं सशिखन्तु निपातने"। अत्र प्राजापत्यस्य पादादित्वे किं मानमिति चेत् पराशरवचनम् "रोधने तु चरेत् पादं बन्धने चार्द्धमेव हि। मोक्षणे पादहीनं स्यात् प्राजापत्यं निपातने"। "कृच्छ्रमप्यनतात्मने" इति वार्द्धमत्वात्। दण्डोऽत्र हस्तप्रमाणो ग्राह्यः। तदधिके तु द्विगुणप्रायश्चित्तविधानात्। यथा अङ्गिराः "अङ्गुष्ठमात्रः स्थौल्येन बाहुमात्रः प्रमाणतः। दार्ढ्ये च वपसायत्र दण्ड इत्यभिधीयते"। "यस्यादूर्द्ध्वप्रहारेण यदि नां विनिपातयेत्। द्विगुणन्तु भवेत्तत्र प्रायश्चित्तमिति स्थितिः"। वपसायः वपत्रः। एतद्वचनविषय एव अवनोक्तप्राजापत्यद्वयमिति एतन्नाज्ञानतः यथा दक्षस्मृतिः "पादस्तु रोधवधे कृच्छ्रार्द्धं बन्धनातने। अतिबाधे च पादोनं कृच्छ्रमप्यनतात्मने"। अज्ञानस्य स्त्रीबालयोरल्पत्वम्। वैमनस्याने तु प्राविकमरणं ज्ञात्वा प्रदत्तस्य चान्द्रायणपादादिकम्। यथा हारीतः "नाथाच्छेदमहाशेषु कर्णच्छेदनबन्धने। अतिदोहातिभाराभ्यां कृच्छ्रं चान्द्रायणं चरेत्" इत्येति शेषः। कृच्छ्रं व्रतं तेन चान्द्रायणव्रतमित्यर्थः। इति मूलपाणिमहामहोपाध्यायाः। भवदेवभट्टैस्तु निपातने क्षुपादिषु इति व्याख्यातं तदपि युक्तं अन्यथा तत्र प्राजापत्यभयादिदर्शनस्य प्रायश्चित्तज्ञानध्वंसापत्तेः। "ब्रह्मादिभा तु कृत्वा नां मानवं व्रतमाचरेत्। दोषादिभा त्वाङ्गिरसायाज्ञवल्क्योक्तमेव चेति" इत्यत्रमुक्तं तत्र ब्रह्मादिपदाभ्युक्तिशोभुक्तमुक्तविधान्यादीनां प्राविकमरणानां लक्षणम्। दोषादिनेति यथा

यथाशक्तिनिमित्तमात्रस्य, बन्धादेरिति मूलपाणिव्याख्यानराज्। तत्राक्षिपातनपरम् उभयपरम्। एतच्च रात्रौ रक्षार्थं रोधबन्धनव्यतिरिक्तविषयम्। "सायं संयमनार्थन्तु न दुष्ट्रोधबन्धयोः" इति अङ्गिरोवचनात् बन्धने मिताक्षरायां विशेषमाह व्यासः "न नारिकेलैर्नच माषतालैर्नचापि मौञ्जैर्नच बन्धहृद्भिः। एतैस्तु गावो न हि बन्धनीया बद्धा तु तिष्ठेत् परशुं गृहीत्वा। कुशैः कार्यैच बध्नीयात् स्थाने दोषविवर्जिते"। निमित्तिशब्दे वक्ष्यमाणे मन्यूत्पादनद्वारा रक्षणे च।

निमित्तविद् त्रि॰ निमित्तं शकुनं शुभाशुभसूचकं जानाति वेत्ति विद्–क्विप्। निमित्तज्ञे दैवज्ञे शेषच॰ निमित्तशब्दादयोऽप्यत्र। "निमित्तज्ञस्तपोधनः" रघुः।

निमित्तिन् त्रि॰ निमित्तमस्यास्ति इति। निमित्तयुक्ते। कार्ये प्रा॰वि॰ उक्ते २वधकर्त्तृभेदे च यथा "कर्त्ता च पञ्चविधः कर्त्ता प्रयोजकोऽनुमन्ता अनुपाहकोनिमित्ती चेति"। निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्तो न्यायमर्थयते तु यः। यद्दिष्टं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" तद्वचनं प्रो॰वि॰ उक्तं "उद्देश्यत्वे सति कर्त्तुर्मन्यूत्पादको निमित्ती" इति मन्यूत्पादने निमित्तमाह तत्रैव दक्षः॰ "गोभूहिरण्यहरणे स्त्रीसम्बन्धतेऽपि च। यद्दिष्टं त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम्" दक्षस्मृतिः "प्रातिभिकफलार्थं कृतृणलार्थमेव च। यद्दिष्टं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गोभूहिरण्यहरणे स्त्रीणां चैतद्गृहस्य च। यद्दिष्टं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गुर्वर्थं पितृमातृर्थमात्मार्थमथ वा पुनः। यद्दिष्टं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" भट्टिमिश्रतमिति ज्ञात्वा पठितम् "आक्रोशितस्ताडितो वा धनैर्वा परिपीडितः। यद्दिष्टं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" अत्रोद्दिष्टेति सर्वत्र कीर्त्तनात् उद्देश्याभावे निमित्तितामात्रेच वधित्वं नास्ति अर्थादिहरणाक्रोशनताडनादीनां मन्युकारणानामुपात्तत्वादेतेषामभावे धनाद्यर्थं दण्डारोहणादिना ये म्रियन्ते (यदि मह्यं धनं न दास्यसि तदा दण्डारोहणेन मरिष्यामीति) तत्र कीर्त्तनमात्रेच निमित्तवधो नास्ति तथा च पठन्ति "अन्यस्मै यः कश्चित् द्विजः प्राणान् परित्यजेत्। तस्मै च तद्भवेत् प्राणं न तु कं परिकीर्त्तयेत्" अन्यस्मै चेति याज्ञवल्क्यादिकवाक्यस्य

त्यागादपरं यत् "सम्बन्धेन विना देव ! शुद्धभावेन कोपितः" इति भविष्यपुराणवचनं वार्णिकप्रायश्चित्तविधायकं तत् वाङ्मनोदण्डापराधसम्बन्धाभावपरं "शुद्धभावेन कोपितः" इत्यभिप्रायात् । एवं यथाक्रोधनादौ एवाद्भुते नापराधः तत्रापि न वधः यथा कृष्णोक्तिः "आक्रुष्टस्तु यदाक्रोशेत्ताडितः प्रतिताडयेत् । कृत्वा तत्ताडितस्यैव नापराधी भवेत्परः" । शास्त्रविहितताडनादौ कृते यत्र पुत्रशिष्यादिर्म्रियते तत्रापि वधो नास्त्येव यथा भविष्यपुराणे "पुत्रः शिष्यश्च भार्या च दासी दासश्च पञ्चमः । प्राप्तापराधास्ताडाः स्युरज्ञा वेणुदलेन वा । अथवाशु प्रहर्तव्यं नोपघातं कदाचन । अतोऽन्यथा तु प्रहर्तुरौरक्षाप्नोति किल्बिषम्" । एवञ्च विहितदण्डाचरणे प्राणीयकरणपक्षे म्रियमाणे यदि म्रियते तदापि वधो नास्त्येव दण्डादिप्राणविरोधाभिप्रेतत्वात् । वधनिमित्तस्तु प्रायश्चित्तं तत्रोक्तं यथा "निमित्तजस्तु वधजात् त्रैवार्षिकं सम्बन्धे, असम्बन्धे वार्षिकं यथा भविष्ये "असम्बन्धे यदा विप्रो हत्वात्मानं ततो गुरुं ! । निर्गुणः सहसा क्रोधादुष्टहस्तेनादितो विभो ! । त्रैवार्षिकं व्रतं कुर्यात् ब्रह्मचर्यं चरन् वने" । सम्बन्धयज्ञोऽत्र धनसम्बन्धपरः । ताडनादिना तिरस्कारेऽपि त्रैवार्षिकमाह सएव "तिरस्कृतो यदा विप्रो निर्गुणो म्रियतेऽत्र च ! । निमित्तं यदा विप्रस्तदेवं गुरवे चरेत् । त्रैवार्षिकं ब्रह्मचर्यं कृत्वा शुध्येत विप्रकः" । धनताडनादिसम्बन्धाभावे वाङ्मनोदण्डमात्रेण कृते वार्षिकमाह सएव "यस्तु द्विजो हन्यात् ब्राह्मणं स्वयमेव हि । आत्मानं सहसा क्रोधात्तस्य प्रायश्चित्तमुच्यते । सम्बन्धेन विना देव ! शुद्धभावेन कोपितः । त्रैवार्षिकं व्रतं कृत्वा वै वपनं गुरु ! । ब्रह्मचर्यं चरन् वीर ! वर्षेणैकेन शुध्यति" एतच्चितयकारणाभावेऽपि क्रोधादिना कृते प्रायश्चित्ताभाव इति प्राहुस्तत्" प्रा०वि० ।

निमिष पु० नि+कुटा० मिष–भावे घञ् । १चक्षुर्निमीलनरूपे व्यापारे तदुपलक्षिते "मुहूर्ते भरे सुखाधीने मावत् अवहति गोपालस्य" इति मनूक्ते २कालभेदे "सुरमदृक्षावनिमिषौ" अमरः । निमिषतस्यात् नि+मिष–अदादौ घञ् । ३परमेश्वरे "निमिषोऽनिमिषः सर्वो मानस्तिग्मदीधितिः" विष्णुस० सुश्रुतोक्ते नेत्रवर्त्मस्थिते ४रोगभेदे "अर्बुदं निमिषाणि" इत्यादिना विभज्य च तत्र कथितो यथा "निमेषयोः शिरा वायुः प्रविष्टो वर्त्मसंश्रयात् । पाकमेदमिवर्त्मानि निमिषः सगदो मतः" ।

निमिषित न० नि+मिष–क्त । नेत्रव्यापारभेदे पक्ष्मोन्मेषे

निमीलन न० नि+मील–भावे ल्युट् । १नेत्रनिमेषरूपव्यापारे २पक्षस्वमुद्रणे व्यापारे ल्युट् । ३परमे शेमच० ४व्यविकासे "अप्राप्य च भवेत् पश्चादेवं वापि निमीलनात्" सु०सि० ।

निमीला स्त्री नि+मील–भावे अ । १नेत्रमुद्रणे परमे च । २निद्रायां प्रमीलायाम् स्वार्थे क । निमीलिका तत्रार्थे निमीलयति चक्षुषी निमील–णिच् ण्वुल् । व्याघ्रे स्त्री मेदिनी० ।

निमीलिनेत्र पु०अतीतायामुत्सर्पिण्यां जाते जिनेश्वरभेदे हेमच०

निमूल त्रि० निर्गतं मूलं यस्य ब्रा०व० । १मूलरहिते । तद्भवपदे "निमूलस्थमूलयोः लमः" पा०सूत्रे । निमूलयति । नि+मूल–अ । २प्रकाशने च तत्र "नेरनिधाने" पा० नेःपरस्य मूलशब्दस्योदात्तता "निधानमप्रकाशता तदोऽन्यदनिधानं प्रकाशनमित्यर्थः तदर्थे मूलशब्दस्योदात्तत्वमिति सुबोधिनी प्रकाशनार्थता । [३परिवर्त्ते न० ।

निमेय त्रि०नि+माङ्–भावे यत् । १परिवर्त्तनीये भावे यत् ।

निमेष पु० नि+मिष–भावे घञ् । नेत्रस्य अन्दनरूपे व्यापारे नेत्रपक्ष्मणोः स्वाभाविकोन्मेषस्य विरोधिव्यापारे नरायामकलितविकायामम्बरं १पक्ष्मोन्मेषे । तद्रूपलक्षिते २कालभेदे च "द्वौ निमेषौ तु त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः" अग्निपु० "निमेषा दश पञ्चैव काष्ठा त्रिंशत्तु ताः कला । त्रिंशत् कला मुहूर्तः स्यात्" मनुः । "नोऽक्ष्णोर्निमेषस्य कालमा१०भागः स तत्परस्य शतभाग उक्तः । त्रुटिर्निमेषैर्दशभिः१०च काष्ठा तत्त्रिंशता सद्भवकैः कलोक्ता" सि०शि० "नोऽक्ष्णोर्लोचनयोः पक्ष्मपातः स निमेषो स यावताकालेन निष्पाद्यते तावान् कालोऽपि निमेषशब्देनोच्यते उपचारात्" प्रसि० । "निमेषमात्रादवधूय तद्रयात्" "अपौ निमेषाक्षपक्ष्मपक्ष्मिः" रघु० । स्वार्थे क निमेषक तत्रार्थे ४कनिष्ठार्थे च

निमेषवत् स्त्री निमेषं करोति क–क्विप् तुक् ह्रस्व० । तडिति अङ्गनाया तस्याः निमेषवर्तिन (अक्षस्वामिन) निमीलन तस्याधिकारवृत्तत्व तु तथात्वम् ।

निमेषणी स्त्री निमिषत्यनया नि+मिष–करणे ल्युट् ङीप्। नेत्रवैत्राश्रिते निमेषसाधने शिराभेदे भिषिमयन्त्रे हथ्रम्

निमेषरुच् पु॰ निमेषं तत्कालं व्याप्य रोचते रुच–क्विप्। खद्योते त्रिका॰ निमेषद्युदादयोऽप्यत्र तस्य क्षणमात्रमात्रद्योतनात् तथात्वम्।

निम्न त्रि॰ नि+म्ना–क्त। १गभीरे २गभीरे (नावाद)अमरः। "पयश्च निम्नाभिमुखं प्रतीपयेत्" कुमा॰ "आपो न निम्नैरुदभिर्जिगत्नवः" ऋ॰ १०।७८।५ "प्रयाति निम्नाभिमुखं नवोदकम्" ऋतुसं॰। इत्यादिषु कृतावेष्टनाख्याते २चित्रभेदे यन्त्रार्थचि॰।

निम्नगा स्त्री निम्नं गच्छति गम–ड। १नदीमात्रे २नीचगामिनि त्रि॰ "अनुरोदितीव करुणेन परिषां विकृतेन वृत्तवनतयैव निम्नगाः" माघः "उदधेरिव निम्नगाशतैरभवन्नास्य विमानना क्वचित्" रघुः।

निम्ब पु॰ निबि–सेचने अच् बबयोरैक्यात् मः।(निमू) ख्याते वृक्षे अमरः "निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातकृत्। अरुच्यः श्रमहृत् कासज्वरारुचिकृमिप्रणुत्। निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्। वातलं कटुपाकञ्च सर्वरोगकुष्ठनुत्। निम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्। स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत्"। निम्बगुणाः "निम्बस्य कोमलदलानि हृद्यलघूष्णान्याज्ये क्षिपेत्तदनु सैन्धवतक्रयुक्तान्। शालीयतण्डुलकणान् सह रामठेन चाचारितान् ददति रोचनमेव लेहात्"। "करञ्जनिम्बजफलं कृमिकुष्ठप्रमेहजित्। निम्बतैलन्तु कुष्ठघ्नं तिक्तं कृमिहरम् परमिति" राजवल्लभः। "भस्करं निम्बपत्रञ्च योऽत्ति मेषगते रवौ। अतिरोगान्वितस्तस्य तत्कः किं करिष्यति" ति॰त॰। प्रत्यां तिथौ तद्भक्षणनिषेधो यथा "कलङ्की जायते विप्रो तिर्यग्योनिश्च निम्बके" ति॰त॰। तिथिभेदे वल्लीकौ। निम्बक इत्यत्र स्वार्थे क।

निम्बतरु पु॰ निम्ब इव तत्संज्ञको वा तरुः। १मन्दारवृक्षे अमरः। २निम्बसंज्ञके तरौ च। [राजनि॰।

निम्बबीज पु॰निम्बस्य बीजमिव बीजं यस्य। राजादनीवृक्षे

निम्बू स्त्री निबि–सेचने कू बबयोरैक्यात् मः। (कागजीनेबु) अम्बीरभेदे ततः स्वार्थे क, वा लुप्तः अभिधानात् प्रत्यक्षम्। निम्बुक निम्बू च तत्स्वार्थे पु॰। तस्य फलम् अण् तस्य लुप्। तत्फले न॰ "निम्बूफलस्य वातलं दीपनं बाधनं लघु। निम्बुकं कृमिकफूनाशनं तीक्ष्णमम्लमतिरस्यपहम्। वातपित्तकफमूर्छिने हितं कण्ठहृद्यरुचिरोचनम् परम्। त्रिदोषक्षिप्तवातरोगनिपीडितानां विषविक्षतानाम्। मलयुक्ते वह्निगुदे प्रदेयं विसूचिकायां सुतयो वदन्ति" भावप्र॰। "भागैकं निम्बुकं तोयं षड्भागं मर्करोदकम्। कवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम्। निम्बूफलमयं पानमत्यम्लं वातनाशनम्। वह्निदीप्तिकरं रुच्यं वमथाहारपाचकम्" राजनि॰।

निम्लोच पु॰नि+म्लुच–भावे घञ्। अस्तगमने "लक्ष्यद्युमणि निम्लोचे" भाग॰१।२।८। भावे ल्युट् निम्लोचन तत्रार्थे न॰ आधारे ल्युट् ङीप् स्त्र्यांलस्थाने पुरीभेदे स्त्री। "पवाद् वारुणीं निम्लोचनीं नाम" भाग॰५।३१।१५

निम्लोचि पु॰ यदुवंश्ये मलमानन्दपस्य पुत्रभेदे "मलमानस्य निम्लोचिः किंलाशो हस्तिरेव च" भाग॰ ९।२४।५

नियत त्रि॰ नि+यम–क्त नितरां यतते यत–अच् वा। १संयते २नियमकारिणि ३नियमयुते "नियमो यमश्च नियतं मतिं यथा" माघः। कर्मणि क्त। ४कृतनियमे च। "प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपाकीनो वाग्यतस्त्रिभवर्षं स्मृशेत्" प्रा॰त॰ वह्निचितौ। "पाणिपद्मचिका मन्त्रा नियतं दारकर्मणम्" उद्वा॰त॰मनुः। "अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता" भाषा॰।

नियताग्नि स्त्री नियता निश्चिता अग्निः। शा॰ द॰ उक्ते नाके प्रारब्धकार्यस्य अवस्थाभेदे अवस्था विभज्य "अपायाभावतः प्राग्निर्नियताग्निर्विनिश्चिता" अपायाभावाद्विघ्नैरतैकालफलप्राग्निर्नियताग्निः। यथा रत्नावल्याम् "राजा देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामीति" देवीकलत्रापायस्य प्रसादनेन निवारणान्नियतफलप्राग्निः सूचिता" शा॰द॰।

नियति स्त्री नियम्यतेऽनया नि+यम–करणे क्तिन्। १भाग्ये दैवे अमरः "नियतिं लोक एवानुरुध्यते" किरा॰। "आसादितस्य तमसा नियतेर्नियोगात्" माघः "नियतिकृतनियमरहिताम्" काव्यप्र॰। २ईश्वरेच्छाभेदे अविद्यायाम्। "महामायेत्यविद्येति नियतिर्मोहनीति च। प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त! घोष्यते" इराघटनम्। करणे क्तिच् ङीप्। दुर्गायां देव्यां स्त्री "प्रकृतिः संस्करणाद्देवी नियती च निवासतः" देवीपु॰।

नियन्त त्रि॰ नि+यम–तृच्। १नियमकारिणि शास्त्रे स्त्रियां ङीप्। २अन्यनियमकारिणि सारथौ पु॰ अमरः

'रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्। न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः" रघुः। २परमेश्वरे पु० "अपराजितः सर्वसहोनियन्ता नियमोऽयमः"विष्णुस०।

नियन्त्रण न० नि+यन्त्रि–ल्युट्। प्रतिबन्धदूरीकरणे एकत्रस्थापनार्थव्यापारभेदे "अनेकार्थस्य शब्दस्यैकार्थे नियन्त्रणरूपं विशेषणम्" सा०द०। भावे युच्। नियन्त्रणापि तत्रार्थे स्त्री।

नियन्त्रित त्रि० नि+यन्त्रि–क्त। १कृतनियमने २प्रतिबन्धादिना एकत्रस्थापिते "अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते। एकत्रार्थेऽन्यधीहेतुः" सा०द०।

नियम पु०न+यम–घञ् वा कुत्वः। १प्रतिज्ञायाम् अङ्गीकारे अमरः। २नित्ये ३आगन्तुकसाधनकर्मरूपे व्रते ४निबन्धनायां ५निश्चये मेदि० या०स्मृ० उक्ते ६योगाङ्गभेदे "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" स्मृते उद्दिश्य "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" सू० विभज्योक्तं "तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्याभ्यन्तरं चित्तमलानामाचालनम्। सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्वसहनं द्वन्द्वं जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च व्रतानि चैवं यथायोगं कृच्छ्रचान्द्रायणसान्तपनादीनि। स्वाध्यायो मोक्षशास्त्राध्यानमध्ययनं प्रणवजपो वा ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणं "यथाश्वत्थोऽथ पथि व्रजन् वा स्वस्थः परिक्षीणचितर्कजालः। संसारबीजक्षयमीक्षमाणः स्यान्मित्यतृप्तोऽमृतभोगभागी" यत्तदुक्तं ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चेति" भा० "शौचादिनियमान् व्याचष्टे शौचमिति। आदिशब्देन गोमयादयो गृह्यन्ते। गोमूत्रयावकादि मेध्यं वस्त्राभ्यवहरणादि आदिशब्दात् यावपरिमाणसङ्ख्यानियमादयो ग्राह्या मेध्याभ्यवहरणादिजनितमिति वक्तव्ये मेध्याभ्यवहरणादि चेत्युक्तं तत्रार्थे कारणत्वोपचारात्। चित्तमलाः मदमानाक्रोधादयस्तदपनयो मनःशौचम् प्राणयात्रामात्रहेतोरभ्यधिकस्यानुपादित्सा सन्तोषः प्रागेव स्वीकरणपरित्यागादिति विशेषः। काष्ठमौनमिङ्गितेनापि स्वाभिप्रायाप्रकाशनम् अवचनमाकारमौनम्। परिक्षीणचितर्कजाल इति वितर्को वक्ष्यमाणः संशयविपर्ययौ चेति एतावता सूत्राभिप्रायमिदम्। एते च यमनियमाः विष्णुपुराणे उक्ताः "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः सेवितव्याः सततं नियमाः शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः सेवितव्याः सततं योगी निष्कामो योग्यतां गतः। स्वाध्यायशौचसन्तोषं तपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः। एते यमाः सनियमाः यश्च यश्च प्रकीर्त्तिताः। विधिष्टफलदाः काम्या निष्कामाश्च विशुद्धिदाः" विष्णु०। सर्वदर्शनसंग्रहे पातञ्जलदर्शनप्रसङ्गे स्वाध्यायशब्देन प्रणवजपवत् तात्त्विकमन्त्रजपोऽप्युच्यते इत्युक्तम्।

"नियमाः यश्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा। शौचं, तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः। स्वाध्यायो मोक्षशास्त्राध्यायोपस्थनिग्रहः। तपोऽक्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः। यमाः यस्माच्च नियमाः शौचं द्विविधमीरितम्। सन्तोषस्तपसां जप्यं वासुदेवार्चनं दमः" नारदपु० "तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपो व्रतम्। दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः" तन्त्रसारः। ७विधिभेदे तन्त्रचयादि योगाचिन्तामणिरेवोक्तं यथा

"विधिरत्यन्तप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" अस्यार्थः। प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः। यजेत स्वर्गकाम इत्यादि स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात्। पक्षे प्राप्तस्य प्रापको विधिर्नियमविधिः यथा व्रीहीनवहन्तीत्यादिः। कथमस्य पक्षेऽप्राप्तेः प्रापकत्वमिति चेत् इत्थम् अनेन हि अवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धात् किन्तु नियमः स चाप्राप्तांशपूरणं वैतुष्यस्य हि नानोपायसाध्यत्वादवघातं परित्यज्योपायान्तरं यदा गृहीतुमारभ्यते तदावघातस्याप्राप्तत्वेन तद्विधानमनन्यप्राप्तांशपूरणमेवानेन विधिना क्रियते। अतस्य नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेऽप्राप्तावघात विधानमिति यावत्"। मिताक्षरोक्तं विशेषोदाहरणादिकमृतुकालशब्दे १४३७पृ० दर्शितं तत्र दृश्यम्। नियमे च इतरसंवलने न दोषः। परिसंख्यायां दोष इति भेदः। पाक्षिके सतीत्यादिकारिकां व्याख्याय उदाहरणं परिसंख्यातो भेदस्य विधिरूपमन्वे दर्शितो यथा "नियमः पाक्षिके सतीति विधिं विना प्रवृत्तेः पाक्षिकत्वे सतीत्यर्थः प्रवृत्तिनियमे सतीति, यावत् तथाच तद्भोजनप्रवृत्तिनियमविषयकत्वो विधिस्तन्नियमविधिरिति

ऽधिकम् । तादर्थ्यवायवाताद्विधिः व्रीहीनवहन्तीति विधिं विना पुरोडाशनिष्पादकव्रीहिवैशद्यद्वारा यागोपकारकेऽवघाते इतरपरीहारेण नखदलनादावपि प्रवृत्तिप्रसङ्गात्अवघाते प्रवृत्तिनियमो न स्यादिति तादर्थे विधेः प्रवृत्तिनियमनिर्वाहकत्वं यागोपकारके व्रीहिवैशद्येऽवघाताधीनत्वनियमस्तादर्थ्यविधिनो यद्यपि दुर्लभः निरवकाशपदार्थत्वाद्वाक्यार्थत्वात्, तथापि तादर्थ्यविधिनो व्रीह्यवघातत्वेन नियोगसाधनताऽवगमात् यागस्यपरमापूर्वस्य तदवघातद्वारकं विनापि निष्पत्तिप्रतिबन्धानेन तत्र नियतप्रवृत्तिनिर्वाहः । तत्र चान्यत्र चेति बलोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि तदुद्देश्यत्वस्य तस्मिन् वा तदन्यस्यस्यस्य प्रवृत्तितः प्रवृत्तिविलयः । तादर्थ्य प्रयुक्तप्रवृत्तिविरोधिविधिः परिसंख्याविधिरित्यर्थः तत्र "दृषामन्त्रम् रथनाम्नस्तस्मै स्वाहानिधानीमादत्ते" इति । तत्रेषामित्यादिमन्त्रस्य रथनाम्नस्यपरस्यप्रकाशकतया अन्यरथनादाने एव गर्दभरथनाया आदानेऽपि मन्त्रस्य विनियोगो विहितः स्यात् तथाच तदादानकालेऽपि मन्त्रपाठप्रवृत्त्या तत्रापि तन्मन्त्रसम्बन्धः स्यात् एतस्मात् विधितः प्रथमन्यरथनाम्नस्तु एतन्मन्त्रविनियोगस्याभे निराकाङ्क्षतया गर्दभरथनाम्नस्तु न तद्विनियोगस्याभवति वैयर्थ्यं न तदाचरणमिति एतद्विधेर्विधेयस्येतरोद्देश्यसम्बन्धप्रवृत्तिविरोधिता । यथा व्रीहीनवहन्तीति नियमविधिदर्शितपरिसंख्याविध्योः को विशेषः नियमविधेरपि परिसंख्यावदितरनिवृत्तिफलकत्वात् नियमविध्युपस्थे पुरोडाशद्वारा यागोपकारकवैशद्यप्राप्तिर्विनोऽवघातेतरतद्भावे प्रवृत्तिप्रसक्तेः । यदि चावघातनियमविधेरवघातप्रवृत्तिनियमफलकत्वं परिसंख्यातो विशेषः दृषामन्त्रम् रथनामित्यादि परिसंख्याया अन्यरथनादाने मन्त्रपाठप्रवृत्तिनियमस्य मन्त्रविशेषेण मन्त्रस्यासाधारण्येनोपकारकताबोधनादेव निर्वाहात्तस्याः प्रवृत्तिनियमानुपपादकत्वादिति विभाव्यते तदा अस्तु परिसंख्याया नियमानन्तर्भावः नियमस्तु परिसंख्यायामन्तर्भवतु परिसंख्याफलस्य तत्साधारण्यात् इति चेन्न नियमस्थले इतरनिवृत्तेरर्थतः सम्भवेऽपि तत्र तत्तात्पर्यात्तुपगमात् नियतप्रवृत्तावेव तत्तात्पर्यात् न चोपायान्तरनिवृत्तायापि नियमतोऽवघातप्रवृत्त्युपपत्तेर्निवृत्तावेव तत्तात्पर्यं न तु नियतप्रवृत्तावित्येव किं नोपयेत इति वाच्यम् अवघातविधिनाऽवघातस्वाधारण्येन यागोपकारकत्वबोधनेऽपि अवघातमात्रेण वैशद्यनिर्वाहाप्रतिबन्धाने अन्योपायसंबन्धेनाप्यवघातप्रवृत्तिसम्भवादवघातविधेरितरनिवर्त्तकत्वायोगेन तत्रेतरनिवृत्तौ तात्पर्यानन्भवात् । एवम् ऋतौ भार्यागमनेयादित्यादिनियमो न तु परिसंख्या दोषत्वयवायादिति सर्वसिद्धान्तोऽपि व्याहन्येत स्वार्थमन्तरेणैवानिष्टानवबन्धिभार्यागमने ऋतुकालव्याप्तिबोधात् तदेकवाक्यतया परिसंख्याफलस्येतरकाले भार्यागमननिवृत्तिनिर्वाहाद्नियमानावश्यकत्वात् । न च ऋतुनभिगमने प्रत्यवायश्रुतेः ऋतुकालाभिगमस्यावश्यकत्वे तत्तात्पर्यमेवावश्यकमिति नियम इति वाच्यम् । अकृतावनभिगमस्यापि "इन्द्रियार्थेषु सर्वेषु न प्रवर्त्तेत कामतः" इत्यादिना निषेधात्तदेकवाक्यतया परिसंख्याया एवोचित्यात् इति चेन्न येन रूपेण उद्देश्यता तदन्यरूपस्यापकता उद्देश्यविधेयभावमर्यादातो न लभ्यते इति यत्र पञ्चनखान् भुञ्जीत इत्यादावुद्देश्यविधेयेन मन्त्रपञ्चनखत्वादौ प्रयुक्तायुद्देश्याप्रयुक्ताभ इत्यायवेन तत्र परिसंख्यायां स्वार्थहान्यादिदोषत्वस्य प्राचीनैरभिधानात् । मीमांसापरिभाषायाञ्च "यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः यथा व्रीहीनवहन्तीति । एतद्विध्यभावे दर्शपूर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यादनन्तपुरोडाशोपयोगि तण्डुलनिष्पत्तावतुल्यं वैशद्यकार्यार्थावहननवत् कदाचित्तण्डुलनिष्पत्तिं प्राप्नुयादिति तन्निवृत्तिपक्षेऽवहननस्य प्राप्तिभावात् कार्यान्वयोपयोगेरवहननस्य पाक्षिकी प्राप्तिः स्यात् अन्यस्मिन् विधौ अवहननेनैव वैशद्यं कार्यमिति नियमे इति विहितं सर्वत्रैव निवर्त्तत इति नियमविधिरयम् । न च वैशद्यस्य तण्डुलनिष्पत्तावपि यत्रावहननमियमो व्यर्थः प्रयोजनाभावादिति वाच्यम् अवघातेनैव वैशद्यकरणे किमिदानीं अन्यते इत्यदृष्टाङ्गीकारात् नियमेनादृष्टकार्यानाभेऽप्यदृष्टस्योत्पत्तेः । तस्मात्पूर्वं यागोत्पत्तिपूर्वद्वारा फलापूर्वे उपयुज्यते तेन नियमापूर्वाभावे फलापूर्वोत्पत्तिरुत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम् एवं व्रीहिप्रोक्षणादिनियमविधिषु बोध्यम्" । अधिकं विधिरसायनपक्षे द्रष्टव्यम् । कवितावर्णनियमभेदाः यथा "वर्णेन सदृशेनैव नियमोऽयं प्रदर्शितः । भूर्जत्वगुष्णिषत्वेन यस्यते स्वेन सम्मतम् । शाखाग्रवर्णने व्रीहूणां कृताम्नः-

पुष्पवाससाम् । कृष्णत्वं केशकाकाक्षिपयोनिधिपयोसुचाम् । रक्तत्वं रत्नबन्धूकविद्याम्भोजविवस्वताम् । तथा वसन्त एवान्यपुष्टानां कलकूजितम् । वर्षास्वेव मयूराणां रुतं नृत्यञ्च वर्णयेत् । नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते । कमलासम्पदोः कृष्णहरितोर्नागसर्पयोः । पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु । चन्द्रेशशैलयोः कामध्वजे मकरमत्स्ययोः । दानवासुरदैत्यानामैक्यमेवाभिसम्मतम् । बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता । मानवा मौलितो वर्ग्या देवाश्चरणतः पुनः" । नियममयति नि+यम–णिच्–अच् । ८सर्वनियामके परमेश्वरे "यतीन्द्रः संग्रहः सर्गो धृतात्मा नियमोऽयमः" विष्णुस० "स्वेषु स्वेष्वधिकारेषु प्रजा नियमयतीति नियमः" भा० ।

नियमन न० नि+यम–भावे ल्युट् । १नियमशब्दार्थे २निग्रहे ३बन्धे "नियमनादसतां च नराधिपः" रघुः इतरनिवारणरूपे४परिसंख्यार्थे च "युग्माग्निकृतभूतानि प्रणसुन्योर्वसरन्ध्रयोः । रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा । प्रतिपदाममावास्या तिथ्योर्युग्मं महाफलम् । एतद्व्रतं महाघोरं हन्ति पुण्यं पुराकृतम्" निगमवाक्यतात्पर्य्य कथने "एतत्प्रयोजनं तु तिथिविशेषविहिते कर्मणि तिथिखण्डविशेषनियमनम्" ति०त० रघु० । एतदुपदर्शित खण्डविशेषतिथावेव कुर्यान्नेतरत्रेति परिसंख्यातुल्यत्वं गम्यते । नियमपरत्वे विपरीतकरणे दोषाभावप्रसङ्गात् नियमे इतरसंवलनस्य शास्त्रार्थत्वात् नचेदृक्रम इतरत्र करणे निन्दाश्रवणात् । अतः परिसंख्याकार्य्यकारीह नियमनमिति स्थितम् ।

नियमसेवा स्त्री नियमेन सेवा विष्णोः । नियमपूर्वकम् आश्विनस्य शुक्लैकादश्यामारभ्य कार्त्तिकमासे विष्णोः सेवायाम् "आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् । कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः । अकृत्वा नियमं विष्णोः कार्त्तिकं यः स्थितेश्वरः । जन्मार्जितस्य पुण्यस्य फलं नाप्नोति नारद !"। किञ्च "नियमेन विना चैव न नयेत् कार्त्तिकं सुने !। चातुर्मास्यं तथा चैव ब्रह्महा स कुलाधमः" हरिभक्तिविलासः ।

नियमस्थिति स्त्री नियमेन स्थितिरत्र । तपस्यायाम् हेमच०

नियमित त्रि० नि+यम–णिच्–कर्मणि क्त । १कृतबन्धने "किञ्चिदुम्भ्रुभङ्गलीलानियमितजलधिरामसम्भ्रमयामि" महाना० । २कृतनियमे च

नियम्य त्रि० नि+यम–यत् । १निरोद्धव्ये २नियाम्ये च "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः ।

निययिन पु० नी–भावे क्विप् निये नयनाय इनः प्रभुः बा० अलुक्स० । प्रापणाय स्वामिनि रथादौ "त्वेषं निययिनं रथम्" ऋ०१०।७।२

नियव पु० नि+यु–मिश्रणे वेट् बा० अप् । मिश्रीभावे "गोषु युधो नियवं चरन्तीः" ऋ० १०।३०।१० लोके तु घञ् । नियाव तत्रार्थे ।

नियातन न० नितरां यात्यते याति–ल्युट् । १निपातने नितरां यातना यत्र प्रा०ब० । २भययुते नयनानन्दः ।

नियान न० नियमेन यान्ति गावोऽत्र या–आधारे ल्युट् । गोष्ठस्थाने । "यन्नियानं न्यासं संज्ञानम्" ऋ०१०।१९।४ "नियानं गोष्ठम्" भा० ।

नियाम पु० नि+यम–घञ् । नियमे

नियामक त्रि० नि+यम–णिच्–ण्वुल् । नियमकारके नियामकत्वम् अदृष्टकालादेः "कारणस्य कार्यं प्रति नियामकत्वम्" सर्वद० "कृत्तद्धितसमासानामभिधानं नियामकम्" अमरः । स्त्रियां टापि अत इत्वम् नियामिका । "विकल्पे आत्मप्रीतिर्नियामिका" मिता० २निरासके च "लोकप्रसिद्धमेवैतद्वारि वह्नेर्नियामकम्" कामन्द० ।

नियुक्त त्रि० नि+युज–क्त । १अधिकृते २नियोजिते ३प्रेरिते च "केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" व्या०त० प्रातःकृत्ये । "नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः" "स्त्रिया सम्यग्नियुक्तया" "विधवायां नियुक्तस्तु" "नियुक्तो यो विधिं हित्वा" इति च मनुः ।

नियुत् पु० नि+यु–कर्मणि क्विप् तुक् । १वायोरश्वे निघ० "सहस्रेण नियुता नियुत्वते" ऋ०१।१६।१ "जातावेकवचनम् । नियुत इति वायोरश्वानां नामधेयं "नियुतो वायोरिति निरुक्ते उक्तत्वात्" भा० कर्मणि क्विप् । २नियोजिते ३नियते च नियुद्यशब्दे दृश्यम् ।

नियुत न० १लक्षसंख्यायां २दशलक्षसंख्यायां ३तत्संख्येयेषु च "शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्री कोटिरर्बुदमिति क्रमाद्दशगुणोत्तरम्" इति रत्नकोषः । "एकं दश शतञ्चैव सहस्रमयुतं तथा । लक्षञ्च नियुतञ्चैव कोटिरर्बुद एव च । वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः । अन्त्यं मध्यं परार्द्धञ्च दशहीना यथोत्तरम्" पुराणम् ।

नियुत्वत् पु० नियुतोऽश्वाः सन्त्यस्य मतुप् मस्य वः तान्यस्यास्त्यर्थे परे पदत्वाभावात् न तस्य दः। वायौ "नियुत्वान् सोमपीतये" यजु० २७।२२। तस्येदं छ। नियुत्वतीय वायुदेवताके हविरादौ "एष वा प्राजापत्य एष वा नियुत्वतीयः" शत०ब्रा० ६।२।२।५।

नियुत्सा स्त्री भरतवंश्यस्य प्रस्तारन्यपस्य पत्न्याम् "प्रस्तारस्य नियुत्सायां हृदयज्ञ व्यजीजनत् विभुः" भाग०५।५।७ नियुत्सायामित्यत्र निरुत्सायामिति पाठान्तरं साऽपि तत्रार्थे।

नियुद्ध न० नि+युध–भावे क्त। बाहुयुद्धे अमरः। "नियुद्धं सङ्कटयुतम्" सा०द०। निपूर्वकस्य युध्यतेः बाहुयुद्धपरत्वम्। "तेन नियोद्धुकामे किंतु बहुवर्त्मनी" नैष०।

नियुद्रथ त्रि० नियुत्–नियोजितो नियतो वा रथोयस्य। गमनाय नियोजितरथे "स दक्षा नियुद्रथः" ऋ०१०।२६।१ "नियुद्रथो गमनाय सर्वदा नियतरथो नियुक्तरथो वा" भा०

नियोग पु० नि+युज–घञ् कुत्वम्। १प्रेरणे इष्टसाधनत्वादिबोधनेन २प्रवर्त्तने नियोज्यशब्दे दृश्यम्। ३व्याख्यायाम् ४अवक्लृप्तौ अवधारणे तत्रावधारणम् अन्ययोगव्यवच्छेदार्थकम्। "एवानियोगे" सुश्रु०। अनियोगे अनवक्लृप्तावित्यर्थः "तल्लिङ्गे नियोगेन च विकल्पपराङ्मुखः" रघुः। पुत्रोत्पादनाय विधवायाः ५नियोजने च। नियोगप्रकारश्च चेतनशब्दे २४०६पृ० दृश्यः। "उक्तो नियोगो मनुना निषिद्धः स्वयमेव हि" बृहस्पतिः।

नियोग्य त्रि० नियोक्तुमर्हति नि+युज–अर्हार्थे कर्त्तरि ण्यत् कुत्वम्। प्रभौ। शक्यार्थे कर्मणि तु न कुत्वम्।

नियोजन न० नि+युज–भावे ल्युट्। १प्रेरणे २प्रवर्त्तने भृत्यादेः कर्मकरणाय श्वपदेशात्मकव्यापारे "नियोजनकाले ऽष्टाचत्वारिंशतमाद्यानग्निके" कात्या० श्रौ०२१।१।८। ४नितरां योजने च "पाशं कृत्वा प्रतिमुञ्चत्यथातो नियोजनस्यैव" शत०ब्रा० ३।७।२।१३।

नियोज्य त्रि० नि+युज–शक्यार्थे कर्मणि ण्यत् "प्रयोज्यनियोज्यौ शक्यार्थे" पा०उक्तेः न कुत्वम्। १प्रवर्त्तनीये नियुञ्जतेः प्रवर्त्तनार्थकत्वात् कर्मणि ण्यता तत्कर्म उच्यते प्रवर्त्तनाकर्म च तज्जन्यप्रवृत्तिमान्। तथा च स्वर्गकामोयजेतेत्यादौ स्वर्गकामो यागे नियोज्यः स्वर्गकामादेव कामनाद्वारा यागे कृतिसाध्यताधीद्वारा प्रवृत्तिर्जायते इति तस्य तथात्वम्। तदेतत् शब्दचि० उक्तं यथा "स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यत्वं वा यदि विधिः समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा गुरुमते यागादिर्न कार्यतया लिङा बोधयितुं शक्यते स्वर्गकामनियोज्यान्वययोग्यताविरहात्। कामनाविशिष्टस्य हि ममेदं कर्त्तव्यमिति बोद्धृत्वं नियोज्यत्वं कामना च तद्बोधोपयोगे सति भवति स च कामनानन्तरं काम्यसाधनताबोधात् कार्यताबोधे सति स्यात् एवञ्च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वययोग्यता। न च कालान्तरे भाविस्वर्गे क्रिया साक्षात् परम्परया वा साधनमिति शब्दो बोधयितुमर्हति व्याप्तिविनाशित्वात् परम्पराघटकानुपस्थितेश्च तृतीय प्रकारस्याभावात् अन्यथा तमादाय साधनत्वसम्भवात् कल्पप्रसक्त्यपूर्वं न स्यात् इष्टसाधनताविधिपक्षे तु स्फुटैवानुपपत्तिः। कार्यताविधिपक्षे अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न विशेषः। अतः क्रियातोऽन्यत् स्वर्गसाधनताईं कार्यं क्रियाकार्यतानिर्वाहकमित्यर्थम्" गदाधरेणेदं नियोज्यान्वयग्रन्थे विहितं दिङ्मात्रमुच्यते "लिङोऽर्थः कार्यत्वं पाकादिक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामो यजेतेत्यादितो यागादौ प्रथमतस्तदन्वयः किन्तु कार्यत्वेनैव वैदिकलिङ्वाच्येऽपूर्वे प्रथमतो विषयतया यागाद्यन्वयः प्रतीयते विषयत्वन्तु अन्यत्वमृतत्वं च शक्यतावच्छेदककार्यत्वैकदेशे कृतौ स्वर्गकामान्वयः एवञ्च यागविषयकं स्वर्गकामकार्यमिति प्राथमिको बोधः तदनन्तरमपूर्वस्य कृतिसाध्यता यागद्वारैव, यागमकृत्वा अपूर्वस्य साधयितुमशक्यत्वादतो यागकार्यतां विनाऽपूर्वकार्यत्वमनुपपन्नमित्यनुपपत्तिप्रतिसन्धाने तत्सहकृतलोकस्यवक्लृप्तक्रियाकार्यतान्वयगोचरशाब्दसामग्रीतो यागे औपादानिकोबोधः। पुनरनुसन्धीयमानशब्दसहकृतानुपपत्तिज्ञानमेवोपादानमिति गीयते तदसहकृतं ज्ञानञ्चार्थापत्तिरिति। न च यागकार्यतायाः पूर्वमप्रतीतत्वेन यागकार्यताव्यतिरेकस्य दुर्ग्रहत्वात् उक्तानुपपत्तिधीरेव न घटते इति वाच्यं यागो यदि कार्यो न स्यात् तदाऽपूर्वमपि कार्यं न स्यात् इति तर्काकारानुपपत्तिप्रतिसन्धानस्य यागकार्यतासिद्धानधीनस्य यागकार्यताबाधकत्वोपगमात्। न चापाद्यापादकयोर्वैयधिकरण्यान्नोक्तं तर्कसम्भव इति वाच्यं यागो यदि कृतिसाध्यो न स्यात् असाध्यकृत्यसाध्यकृतिसाध्यव्यापारको न स्यादित्ये तादृशतर्कोपगमेन सामञ्जस्यात्। कृतिसाध्यज्वलनादिरूपव्यापारके कृत्यसाध्यकाष्ठादौ व्यभिचारवारणायासाध्यान्तं व्यापारविशेषणं, कृतिसाध्यव्यापारके नित्ये

व्यभिचारवारणायाऽननुकूलत्वमपेक्ष्य असाध्यकत्वं कृतौ विशेषणं शब्दानुपपत्तिबीजन्यतावच्छेदकधर्म्मयोः सङ्करो न दोषो गुणगतजात्यनभ्युपगमेन तयोर्ज्जातित्व विरहात्। अस्तु वा केवलशब्दादिप्रमाणजन्यबोधविजातीय एव औपादानिकबोधः अपूर्वविषयककामिकृतेरपूर्वसाधनक्रियाविषयकत्वं विनाऽपूर्वसाधनतानुपपत्तेः कृतौ क्रियाविषयकत्वोपपादकत्वं तस्याः काम्यसाधनत्वमप्यपूर्वकार्यत्वोपपादकम् इति यागादेः काम्यसाधनताऽप्यौपादानिकी, अस्माकं काम्यसाधनत्वस्य विधिप्रत्ययावाच्यत्वेऽप्यध्याहारितस्याप्यर्थस्य शाब्दधीगोचरतया पदाजन्याया अपि स्वर्गसाधनत्वोपस्थितेः पदजन्यक्रियादावुपस्थितिसहितायाः शाब्दसामग्रीत्वादिष्टसाधनत्वस्योपादानत्वमस्त्यता। वाजपेयेन यजेतेत्यादौ च तदाभिधानिकमेव स्वर्गादिपदोपस्थाप्ये इष्टे कथञ्चित् कृतीयार्थकरणत्वान्वय उपेयते इति गुरुमतं निराकृत्य आहत्यैव यागादौ विध्यर्थकृतिसाध्यत्वेष्टसाधनत्वयोरन्वयबोधं व्यवस्थापयितुकामो विचारार्थं विप्रतिपत्तिं दर्शयति अथेति स्वर्गकामोयजेतेत्यादाविति कालान्तरभाविफलकामबोधकघटितवेदवाक्ये इत्यर्थः प्रतिपादत्वं विधावन्वेति विधित्वञ्च विदधाति प्रवर्त्तयतीति व्युत्पत्त्या प्रवृत्तिप्रयोजकत्वं प्रवृत्तिजनकतावच्छेदकप्रकारतान्वयत्वम्। कार्यत्वस्य विधिष्वेव कथं न पक्षतोपेयते इत्याकाङ्क्षायाम् इष्टसाधनतासाधारणरूपावच्छिन्नःपक्षो, गुरुत्वाभावसाधने एव नैयायिकाभिमतस्याहत्यक्रियायामिष्टसाधनतान्वयस्यापि निराकरणं भवतीत्युक्तानुगतरूपेण पक्षकरणप्रयोजनमाविष्कर्त्तुं विधित्वेन संपाद्यमर्थद्वयं दर्शयति इष्टसाधनत्वं कार्यत्वं वेति वाकारोऽनास्थायां न विकल्पे। इष्टसाधनत्वस्य विधित्वपक्षे कार्यत्वस्याकृत्त्वात्। एवञ्चालौकिकक्रियागोचरकालान्तरभाविफलकामनाधीनप्रवृत्तिपरलिङ्पद तात्पर्य विषयप्रवर्त्तकधर्मत्वमेव पर्य्यवसितं पक्षतावच्छेदकम्" इत्युपक्रमे तु मध्ये

"स्वर्गकामेति काम्यस्वर्गसाधनतानिर्वाहकापूर्वरूपव्यापारे साधनत्वप्रत्यायके स्वर्गकामकृतिसाध्यत्वान्वयबोधजनकधीविषयतदन्वयप्रयोजक स्वर्गकामनियोज्यकत्वरूपयोग्यताविषयकशाब्दज्ञानस्य जनकीभूतं यन्नियोज्यतया स्वर्गकामरूपनियोज्यस्यान्वयप्रयोजकस्वर्गसाधनतायाज्ञानं तदस्माकमादित्यर्थः। कृतिविषयनिष्ठकाम्यसाधनतायाः कृतिविशेषप्रयोजकत्वेऽपि इष्टसाधनत्वस्यापि सन्न्यायवन्द्वारेः कृतित उत्पत्तेः। कृतिसाध्यत्वसामान्ये यद्यपि साक्षाच्चेष्टसाधनत्वं प्रयोजकं तथापि तत्र कर्त्तुः क्रियानियोज्यत्वं क्रियाविषयककृतिसाध्यताज्ञानवत्त्वरूपं प्रयोजकमिति कार्यतान्वयबोधसामान्ये कर्त्तुर्नियोज्यताज्ञानमन्वयप्रयोजकरूपयोग्यताज्ञानविधया कारणम् तदपि ज्ञानं शाब्दात्मकमेवोपेयम् प्रमाणान्तराभावात्। एवञ्च काम्यस्थले कामिनियोज्यतया बोधे कामनाविशिष्टस्यैव तथाभानमङ्गीकार्यं कामनाया विशेषणत्वावश्यकत्वात् कामनाया उपलक्षणत्वे आत्ममात्रस्यैवोपलक्ष्यतया निष्कामसाधारणनियोज्यताबोधो न, विधेरप्रामाण्यप्रसङ्गात्" "वस्तुतो वेदस्थले विशिष्टान्वयपरतायाः औत्सर्गिक्याः कथञ्चित्सम्भवे तत्त्यागायोगादपि कामनाया विशेषणत्वमावश्यकमेव"। स्थलान्तरे च.

"यद्यपि नियोज्यत्वं विधिकर्त्तृकप्रवर्त्तनारूपनियोगकर्मत्वं धात्वर्थतावच्छेदकप्रवृत्तिरूपफलाश्रयत्वमेव प्रवर्त्तकज्ञानानुकूलव्यापाररूप नियोगत्वे च तादृशज्ञानाश्रयत्वमेव तथापि निरुक्तं पारिभाषिकमेव वा नियोज्यत्वम् अथ वा प्रवर्त्तकज्ञानोपधायकतानिर्वाहकव्यापारो नियोग इति कामनासाधारणं तादृशज्ञानोपधायकत्वं नियोज्यत्वं कामनायास्तद्बोधोपयोगे कार्यताबोधजनकत्वे भवति निर्वहतीत्यर्थः। अन्यथा विशेषणांशे तद्बाधेन कामनाया विशेषणत्वायोगादिति भावः। स चेति कामनायास्तद्बोधोपयोगश्चेत्यर्थः। कामनानन्तरं काम्यसाधनताबोधात् कार्यत्वबोधे सतीति कामनाधीनकाम्यसाधनता बोधस्य कार्यताबोधोपयोगे सतीत्यर्थः साक्षात्तदनुपयोगादिति भावः। काम्यसाधनताबोधस्य कामनाधीनत्वं कामनाविषयकत्वेन बोध्यं तथा च कामनाविशिष्टस्य क्रियानियोज्यत्वं कामनायाः क्रियानिष्ठकाम्यसाधनताज्ञानोपयोगितानिर्वाह्यमिति तद्घटकक्रियानिष्ठकाम्यसाधनत्वमपि नियोज्यतान्वयप्रयोजकमिति पर्य्यवसितम्। एवञ्च स्वर्गकामसाधनताया नियोज्यतया स्वर्गकामान्वयप्रयोजकत्वे च सति सत्येव नियोज्यान्वययोग्यता नियोज्यत्वान्वयप्रयोजकयोग्यताघटितनियोज्यान्वयबोधसामग्रीसम्पत्तिः। एवञ्च यागः स्वर्गसाधनीभूत स्वनियोज्य स्वर्गकामकार्यतान्वयधीरेतन्मते तत्र स्वर्गकामे नियोज्यताज्ञानं क्रियायां स्वर्गसाधनताज्ञानञ्च योग्यताज्ञानमेव औपादानिकरूपमनुपपत्तिमात्रमूलकं वा अपेक्ष्यते इति तस्या अपि स्वर्गसाधनताविषयकतया तन्निर्वाहक-

फलसमयपर्य्यन्तस्याविव्यापारजनकत्वज्ञानमध्यमेक्षितमिति नाकृत्यक्रियाकार्यताधीरिति सप्रदायार्थः"।

एवं शुचित्वतत्कालादिरूपकर्त्तृविशेषयुतस्यापि नियोज्यत्वम् अत्र को नियोज्यः इत्याकाङ्क्षयोत्थापितस्य शुचित्वत् कालजीवित्वादेरधिकारिविशेषणस्य नियोज्यताप्रयोजकत्वात् इत्याकारे विस्तरः। [द्वकारिणि त्रि०।

नियोद्धृ पु० नि+युध–तृच्। १कुक्कुटे राजनि० २बाहुयु-

निर् अव्य० नृ–क्विप् न दीर्घः। १वियोगे २अत्यये ३आदेशे ४अतिक्रमे ५भोगे ६निश्चिते च गणरत्नमहो०। तत्र यथाक्रमसदाहृतं च यथा १निःसङ्गः २निर्मेघम् ३निर्देशः। ४निष्क्रान्तः ५निर्वेशः। ६निश्चितम्। ७निषेधे मेदि० निर्मक्षिकम्। अयं शब्दः प्रादिः सान्तः रान्तश्च "निसस्तपतावासेवने" पा० ८।२।१२० सूत्रे निस इति निर्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य "इदुदुपधस्य चप्रत्ययस्य यो विसर्जनीयः" इति भाष्योक्तेश्च सान्तत्वम्। "निरः कुषः" पा० ७।२।४६ सूत्रे निर इति निर्देशात् रान्तत्वम्। एवं दुस् दुर् सान्तोरान्तश्च दुष्कृतमित्यत्र भाष्योक्तेः सान्तत्वम् "सुदुरोरधिकरणे" वार्त्ति० सूत्रे सुदुरोरिति निर्देशात् रान्तत्वम्। उपसर्गप्रकरणे तु तन्त्रोद्धारितः" मनोरमा।

निरंश त्रि० निर्गतोऽंशात् निरा०त०। सूर्यभुज्यमानराशेः प्रथमे राशेस्त्रिंशांशरूपे भागे तद्राशिभोगस्य अंशशून्यत्वात् तथात्वम्। "राशेः प्रथमभागस्थः निरंशः सूर्य उच्यते" ज्योतिषम्। २रवे राश्यन्तरसंक्रान्तिदिने रघु०। निर्गतो भागो यस्य प्रा० ब० वा कप्। ३भागरहिते च। "पतितस्तृप्ततः क्लीवः पङ्गुन्नपुंसको जडः। अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरंशकाः" याज्ञ० "निरंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा" मनुः। अनंशौवेति पाठः

निरत्त त्रि० निर्गतः अन्तस्तदुन्नतिर्यस्मात् प्रा०ब०। अन्तोन्नतिशून्यदेशे स च देशः सू०सि० उक्तो यथा "समलान्नेरमध्यात् तु तुल्यभागेषु तोयधेः। द्वीपेषु दिक्षु पूर्वादि नगर्यो देवनिर्मिताः। भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता। भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा। याम्यायां भारते वर्षे लङ्का२ तन्नाम्नी पुरी। पश्चिमे केतुमालाख्ये रोमकाख्या३ प्रकीर्त्तिता। उदक् सिद्धपुरी४ नाम्ना कुरुवर्षे प्रकीर्त्तिता। भूवृत्तपादविवरास्तान्यान्योन्यं प्रतिष्ठिताः। ताभ्यश्चोत्तरगो मेरुस्तानेव सुरान्वयः। तासासुपरिगो याति विषुवस्थो दिवाकरः। न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते। मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते। निरक्षदेशसंस्थानामुभये क्षितिजाश्रये। अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः। भवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा"।

निरग्नि पु० निर्गतोऽग्निस्तत्साध्यकार्यं यस्मात् प्रा०ब०। श्रौतस्मार्त्ताग्निसाध्यकर्मरहिते द्विजे "एकोद्दिष्टं सदा कुर्यात् निरग्निः श्राद्धदः सुतः" उशनाः "वीरहा वा एष देवानां भवति योऽग्निमुद्वासयते" श्रुतौ अग्नित्यागस्य पुत्रहत्यातुल्यपापजनकत्वश्रुतेः। उपपातकशब्दे निरग्निताद्यैव उपपातकत्वेन मनुनोक्तो दर्शितः।

निरङ्कुश त्रि० निर्गतोऽङ्कुश इव प्रतिबन्धको यस्य प्रा०ब०। १प्रतिबन्धशून्ये २अनिवार्य्ये लटाध० "विक्रयार्थं हि यो हन्यात् भक्षयेद्वा निरङ्कुशः" भा०अनु०३६०८श्लो०। "निरङ्कुशाः कवयः"। "कुवलयदृशां वामः कामो निकामनिरङ्कुशः" गीतगो०।

निरङ्ग त्रि० निर्गतमङ्गं यस्य प्रा०ब०। १अङ्गहीने २रूपकालङ्कारभेदे न० सा०द० अलङ्कारशब्दे ४०२५०३श्यम्।

निरङ्गुल त्रि० निर्गतमङ्गुलिभ्यः प्रा०त० अच्समा०। अङ्गुलितोनिर्गते। [निरुदकादि० अन्तोदात्तताम्।

निरजिन न० निर्गतमजिनात् प्रा०त०। अजिनात् निर्गते

निरञ्छन न० यावाङ्गोपायाभ्यां चरज्जाः प्रथमे षष्ठे भागे कर्त्तव्ये उपचयभेदे यावाङ्गुलस्य परिमिते "विंशत्यरत्निः यावा स्यात्तद्वैन तु विकृतेति" तत्पाचनोपायश्च "प्रमाणार्द्धं वाभ्यस्याभ्यासमष्टे उपचयं करोति तन्निरञ्छनमिति अत्र विंशत्यरत्निर्भूचरज्जुः दशारत्निरभ्याचरज्जुः तस्याः प्रथमे षष्ठे भागे निरञ्छनम् तस्या अर्द्धं पञ्चारत्निमिते श्रोण्यङ्गनार्थमिति" कात्या०श्रौ० ७।१।२४ कर्कः।

निरञ्जन त्रि० निर्गतमञ्जनं कज्जलं तदिव समलमज्ञानं वा यस्मात् प्रा०ब०। १कज्जलरहिते नेत्रे २दोषरहिते ३अज्ञानशून्ये परमात्मनि पु० "तदा विद्वान् पुण्यपापे विधूय निरञ्जनं परमं साम्यमुपैति" मुण्डकोप० "निरवद्यं निरञ्जनम्" श्वेता०। ४शिवे पु० "दीर्घरोमा दीर्घभुजो दीर्घवाङ्मिरञ्जनः" हरिवं० २२७अ० शिवनामोक्तौ।

निरतिस्त्री नितरां रतिः, नि+रम–क्तिन् वा। अत्यन्तरतौ।

निरतिशय पु० निर्गतोऽतिशयो यस्मात् नितरामतिशयो वा। १अत्यन्तातिशये २स्वापेक्षयातिशयशून्ये ३परमेश्वरे

यदपेक्षया कस्याप्यतिशयाभावः ४तस्मिन् त्रि०। "तत्र निरतिशयं सार्वज्ञ्यबीजम्" पात०सू०। "यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसङ्ख्यातीन्द्रियग्रहणमल्पं वर्त्तमानं यत्र निरतिशयं स सर्वज्ञः। अस्ति काष्ठाप्राप्तिः सार्वज्ञ्यबीजस्य सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः स च पुरुषविशेषः" भा०। "व्याचष्टे यदिदमिति। बुद्धिसत्त्वावरकतमोऽपगमतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकं सङ्ख्येयेन च वर्त्तमानानामतीन्द्रियाणां ग्रहणं तस्य विशेषणमल्पं वर्त्तमानं सार्वज्ञ्यबीजं कारणम्। कश्चित् किञ्चिदेवातीतादि स्मरति कश्चिद् बहुतरं कश्चिद्बहुतमम् एतदिदमल्पं वर्त्तमानं यत्र निष्क्रान्तमतिशयात् स सर्वज्ञ इति तदनेन प्रमेयमात्रं कथितम्। अत्र प्रमाणमाह अस्ति काष्ठा प्राप्तिः सार्वज्ञ्यबीजस्येति साध्यनिर्देशः निरतिशयकाष्ठा यतः परमतिशयवत्ता नास्तीति। तेन नावधिमात्रेण विरुद्धसाधनं, सातिशयत्वादिति हेतुः। यत् सातिशयं तत् तत्पूर्वं निरतिशयं यथा कृषकामलकादिषु सातिशयमिति। व्याप्तिं दर्शयति परिमाणवत्। न च परिमाणादिगुणैर्व्यभिचार इति साध्यतम्, न खल्ववयवपरिमाणवदिनः किन्त्वा, परमाणुभ्य अन्यावयविभ्यो यावन्तः केचन तेषां प्रत्येकं वर्त्तिनं परिमाणं समाकृत्य परिमाणवर्त्तमानत्वाभिमानः ज्ञानन्तु प्रतिप्रत्येकं समाप्यते इत्येकद्विबहुविषयतया युक्तं सातिशयमिति न व्यभिचारः" विवरणम्।

निरन्वय त्रि० निर्गतोऽन्वयो यस्य प्रा०ब०। १अन्वयशून्ये "निरन्वयं साध न दान वर्जितम्" किरा०। २अभावेऽव्ययी०। २अन्वयाभावे अव्य०। [निष्क्रान्ते।

निरध्व त्रि० निष्क्रान्तोऽध्वनः प्रा०त० अध्वनो

निरनुनासिक त्रि० निर्गतमनुनासिकमनुनासिकत्वं यस्य। अनुनासिकभिन्ने वर्णभेदे "वर्णो द्विधाऽरो निरनुनासिकः सानुनासिकः" मुग्धबोधः।

निरनुयोज्यानुयोग पु० गौतमोक्ते निग्रहस्थानभेदे तल्लक्षणम् तत्रोक्तं यथा "निग्रहस्थानातियोगो निरनुयोज्यानुयोगः" सू०। "निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽसीति परं ब्रुवन् निरनुयोज्यानुयोगाभिगृहीतो वेदितव्यः" इति भा०। "अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः एतेनावसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नातिव्याप्तिः। सोऽयं चतुर्द्धा कृतं जातिराभासोऽनवसरग्रहणञ्च। आभासो व्यभिचारादावसिद्धाद्युद्भावनम् अनवसरग्रहणञ्चाकाले एतोद्भावनं यथा त्यक्षसि चेत् प्रतिज्ञाहानिः विशेषयसि चेत् हेत्वन्तरम्। एवमवसरमतीत्यकथनमपि, यथा उच्यमानप्राज्ञस्यापशब्दादेः परिसमाप्तौ एवमनुक्तप्राज्ञाज्ञानाद्यनुभाषणावसरेऽनुद्भाव्यबोधाविष्करणानुभाषणग्रहणे वादिनि तदुद्भावनमित्यादिकस्तस्मम्" इत्तिः।

निरन्तर त्रि० निर्गतमन्तरं यस्मात् प्रा०ब०। १सन्तते अविच्छिन्ने सन्ततियुक्ते सन्ततिश्च दैशिकी कालिकी च तत्र दैशिकविच्छेदशून्ये "कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्" ऋतुस० "भूभर्त्तुरायतनिरन्तरसन्निविष्टाः" माघः "निरन्तरास्तन्तर वातदृष्टिम्" कुमा० कालिकविच्छेदशून्ये निरवधौ यथा "कपिलानां सवत्सानां वर्षमेकं निरन्तरम्" भा०व०९७अ० २अपरिधाने ३अनन्तरीने ४अभेदे ५अतादार्थ्ये च। निरन्तराबादयोऽप्यत्र "निरन्तराबा करिणां कदम्बकैः" [त्रिका०

निरन्तराभ्यास पु० कर्म०। १सततादृत्ते व०व०। २स्वाध्याये

निरन्वय त्रि०नास्ति अन्वयः सम्बन्धो यत्र। १सम्बन्धरहिते "का त्वमेकाकिनी भीरु! निरन्वयजने वने" भट्टिः। २स्वामिसम्बन्धाद्यपसम्बन्धशून्ये स्तेयभेदे "स्यात् साहसं सान्वयवत् प्रसभं कर्म यत् कृतम्। निरन्वयं भवेत् स्तेयं कृत्वाऽपह्नूयते च यत्" मनुः (निरन्वयं)"स्वामिपरोक्षापहृतं स्तेयम्" कुल्लू०। ३स्वामिसम्बन्धशून्ये स्तेये च "परिपूतेषु धान्येषु शाकमूलफलेषु च। निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः" मनुः "निष्पुराणीकृतेषु धान्येषु शाकादिषु चापहृतेषु सम्बन्धो द्रव्यस्वामिनां सम्बन्धः येन सह कश्चिदपि सम्बन्धो नास्ति" कुल्लू०। ४निर्वंशे च।

निरपत्रप त्रि० निष्क्रान्तः अपत्रपायाः प्रा०त०। निर्लज्जे धृष्टे जटा०। "अप्सरो मेनका ब्रह्मन् निर्दया निरपत्रपा" भा०आ० ८अ०।

निरपेक्ष त्रि० निर्गता अपेक्षा यस्य प्रा०ब०। १अपेक्षाशून्ये स्वार्थबोधनाय अन्यापेक्षाशून्ये "निरपेक्षो रवः श्रुतिः" भट्टवार्त्तिकम्। "तत्तत्कर्मसु विनियोगसाधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतेः (श्रूयमाणविभक्तेः)इतरानपेक्षत्वेन विनियोगसाधकत्वात् तथात्वं लिङ्गादीनां तु द्विती-

यादिस्मृतिं कल्पयित्वा तदुद्धारैव तथात्वमिति सापेक्षत्वमिति भेदः। २आशाशून्ये "अध्यात्मरतिरासीनो निरपेक्षो निरामिषः" मनुः। ३अशक्तविषयके "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च। सापेक्षनिरपेक्षाणि स्मृतिवाक्यानि कोविदैः"। "सापेक्षनिरपेक्षाणि शक्याशक्तविषयाणि" ज्योति॰त॰ रघु॰।

निरमण न॰ नियतं रमणम्। नियतरतौ अत्यन्तानुरागे "निर्ऋतिर्निरमणात्" निरु॰ २।७ नियतं रमत्यस्मिन् नि+रम+आधारे ल्युट्। २नियतरागाधारे "अन्वयतं निरष्टं निरमणम्" शत॰ब्रा॰ १२।४।२।५

निरमित्र पु॰ पाण्डवनकुलस्य पुत्रभेदे "नकुलस्तु वैद्यां करेणुमतीं नाम भार्यामुदवहत् तस्यां पुत्रं निरमित्रं भामाजनयत्" भा॰आ॰४५अ॰। निर्गतोऽमित्रो यस्य। २शत्रुरहिते त्रि॰। ३त्रिगर्त्तराजपुत्रभेदे पु॰"हाहाकारो महानासीत् त्रिगर्त्तानां जनेश्वर!। राजपुत्रं हतं दृष्ट्वा निरमित्रं महारथम्" भा॰द्रो॰ १५७अ॰। ४वार्ष्णेयवंश्ये भाविनि नृपभेदे पु॰ "ततो युतायुतस्यापि निरमित्रोऽथ तत्सुतः" भाग॰ ९।२२।३० भाविवार्ष्णेयवंशोक्तौ।

निरय पु॰ निर्गतोऽयोऽत्र प्रा॰ब॰ नीचैरेत्यत्र निर्+इ आधारे अच् वा। नरके अमरः "निरये चैव पतनं यातनाश्च यमक्षये" मनुः।

निरयण न॰निर्+अय-भावे ल्युट्। निर्गमने। करणे ल्युट्। निर्गमनोपाये "पश्चात् निरयणं कृतम्" ऋ॰१०।१२२।६ "निरयणं निर्गमनोपायः" भा॰। [न्यशून्ये अमरः।

निरर्गल त्रि॰निर्गतमर्गलमिव प्रतिबन्धो यस्य प्रा॰ब॰। प्रतिब॰

निरर्थ पु॰ निर्गतोऽर्थो यस्य प्रा॰ब॰। अर्थशून्ये १निष्फले २अभिधेयशून्ये च "निरर्था साध्यमूर्त्तत्वात् पुरुषस्य गृहीपते" मार्कण्डेयपु॰।

निरर्थक त्रि॰ निर्गतोऽर्थो यस्य प्रा॰ब॰ वा कप्। १निष्फले "प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः" भा॰उ॰ २५अ॰। "इत्थं जन्म निरर्थकं क्षितितलेऽरुग्ये यथा मालती" सा॰द॰। २अभिधेयशून्ये ३काव्यदोषभेदे च "निरर्थकं तृतीयादि पूरणैकप्रयोजनम्" चन्द्रा॰ गीतसो॰। ४नियमस्थानभेदे "वर्णक्रमनिर्देशवच्चिरर्थकम्" सू॰ "यथा भिस्थः शब्दः कचटतपयजयगडदशत्वात् कचजपडवदिति एवम्प्रकारं निरर्थकम् अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद् यथा एवं क्रमेण निर्दिश्यन्त इति" भा॰। "वर्णानां क्रमेण निर्देशो जवगडेत्यादिप्रयोगस्तत्तुल्यो निर्देशोनिरर्थकं नियमस्थानम् अयाचकपदप्रयोग इति फलितार्थः। अयाचकत्वं च शक्त्या निरूढलक्षणया शास्त्रपरिभाषया वा बोध्यं समयबन्धव्यतिरेकेणेति विशेषणीयं तेन यत्रापभ्रंशेन विचारः कर्तव्य इति समयबन्धस्तत्रापभ्रंशे न दोषः। झटिति संवरेण तु न दोष इत्युक्तमाचार्यम्। अस्य सम्भवः प्रमादादित्यवधेयम्" इत्तिः। क्रमश्चेहाक्षरसमाम्नाये माहेश्वरे सूत्रे यथा पठितास्तथेत्यर्थः।

निरवकाश त्रि॰ निर्गतोऽवकाशो यस्य प्रा॰ब॰। १असम्भवत्कालान्तरकर्त्तव्यताके कार्ये २अवकाशशून्ये च।

निरवग्रह त्रि॰ निर्गतोऽवग्रहः प्रतिबन्धो दृष्टिप्रतिबन्धो नियमनं वा यस्य प्रा॰ब॰। १स्वच्छन्दे स्वतन्त्रे अन्येच्छाधीनप्रवृत्तियुक्ते अमरः। "केचित् क्रोधसमाविष्टा महात्मा निरवग्रहाः" भा॰भी॰८४अ॰। २दृष्टिप्रतिबन्धशून्ये च।

निरवद्य त्रि॰ निर्गतमवद्यं दोषः अज्ञानं रागद्वेषादि वा यस्य। १निर्दोषे उत्कृष्टे "तस्य निरवद्यविद्योदुद्योतेन द्योतितस्तत्त्वतोऽयमर्थः" दायभा॰। २अज्ञानशून्ये ३रागादिशून्ये परमात्मनि च "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्वेता॰उ॰।

निरवयव त्रि॰निर्गतोऽवयवो यस्य। न्यायमते १अवयवशून्ये परमाण्वाकाशादौ सर्वथावयवशून्ये २अङ्गशून्ये च "नाशकारणाभावेन निरवयवद्रव्याणां नाशाभावः" सा॰प्र॰भा॰

निरवशेष त्रि॰ निर्गतोऽवशेषो यस्य। अवशेषशून्ये समग्रे "यावत् निरवशेषं भवति तावत् दाहयित्वा" आश्व॰श्रौ॰ २।११।५।

निरवसित त्रि॰ निर्+अव+सो-क्त। येन भुक्ते पात्रे संस्कारेणापि न शुध्यति तस्मिन् पात्रबहिष्कृते चण्डालादौ। [शब्दमाला।

निरवहानिका स्त्री निर+अव+हन-ण्वुल्। प्राचीरे

निरविन्द पु॰ पर्वतरूपे तीर्थभेदे "अश्मपृष्ठे गयायाञ्च निरविन्दे च पर्वते" भा॰आनु॰ २५अ॰।

निरशन अव्य॰ अशनस्याभावः अव्ययी॰। १भोजनाभावे। निर्गतमशनं यस्य प्रा॰ब॰। २भोजनरहिते त्रि॰ "अश्नकुट्टा निरशना दयपञ्चतपास्ये" हरिवं॰ ४६अ॰।

निरष्ट पु॰ निर्गतानि अष्टौ वयोव्यञ्जनानि यस्मात् ऊट्समा॰। चतुर्विंशतिवर्षीये २अश्वे "अन्वयतं निरष्टं निरमणम्" शत॰ब्रा॰ १२।४।२।५ "अन्वस्य दन्तगतानि वयोव्यञ्जनानि

भवन्ति तेषामेमैकं त्रीणि त्रीणि वर्षाणि अनुवर्त्तते तान्यष्टौ व्यञ्जनानि निर्गतान्यक्षादिति निरष्टं चतुर्विंशतिवर्षीयम्" भा० । निर+अक्ष–क्त । २निराकृते त्रि० "हयायुधो न वध्रयो निरष्टाः" ऋ०१।२२।६ "निरष्टा निराकृताः" भा० ।

निरस त्रि० निष्टो रसो यस्मात् प्रा०ब० । १निष्टरसे रसहीने २निःश्रेणिकाहये स्त्री राजनि० ।

निरसन न०निर्+अस–क्षेपे भावे ल्युट् । प्रत्याख्याने अमरः "स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा" भा०आश्व० ४अ० । आधारे ल्युट् । २वधे निष्कृष्य असनम् क्षेपणम् । ३निष्ठीवने च मेदि० । ष्टिवु निरसने इत्युक्तेः ष्ठीवनस्य निष्कृष्यक्षेप्यादेः क्षेपणरूपत्वात्तथात्वम् ।

निरस्त त्रि० निर–अस–क्षेपे कर्मणि क्त । १प्रत्याख्याते निवारिते अमरः "निरस्तगाम्भीर्यमपास्तपुष्पकम्" माघः "निरस्तः परावसुः" ब्रह्मादाग्निभागत्यागे मन्त्रः । २त्वरितोदिते न० । ३त्यक्तशरे पु० अमरः । ४निष्ठ्यूते ५प्रतिहते ६प्रेषिते त्रि० मेदि० । भावे क्त । ७निष्ठीवने ८निवारणे ९क्षेपणे च न० ।

निरस्थि न० निर्गतमस्थि यस्मात् प्रा०ब० । दूरीकृतास्थिके मांसे "मांसं निरस्थि सुस्विन्नं पुनर्दद्यात् चूर्णितम्" सुश्रुतः ।

निरहङ्कार त्रि० निर्गतोऽहङ्कारो यस्य प्रा०ब० । १अभिमानशून्ये देहेन्द्रियादावहमित्यभिमानशून्ये २धनविद्यावत्त्वादिनिमित्तात्मोत्कर्षसम्भावनाहीने च "निर्वैरा निरहङ्कारा विगतक्रोधमत्सराः" भा०आश्र० २२अ० ।

निरहम् त्रि० निर्गतमहमिति बुद्धिर्यस्य प्रा०ब० । अहङ्कारशून्ये "प्रत्यक् प्रशान्तं सुधियोपलब्धं ज्ञानमहमं निरहं प्रपद्ये" भाग० ५।१९।४ श्लो० ।

निरङ्क पु० निर्गतमङ्कः प्रा०ब० टच्समा० "अङ्कोऽङ्क एतेभ्यः" पा० अङ्कादेशः अङ्कोऽदन्तात्" पा० नियमात् न अत्वम् "अङ्काहान्ताः पुंसि" पा० पुंस्त्वम् । १निर्गते दिने निष्क्रान्तोऽङ्कः निरा०त० साधनं प्राग्वत् । २दिनात् निर्गते त्रि० ।

निराक पु०निर्+अक–वक्रगतौ भावे घञ् । १पाके २खेदे च कर्मणि घञ् । असत्कर्मफले हेमच० ।

निराकरिष्णु त्रि० निर्+आ+कृ–णीलार्थे इष्णुच् । निराकरणशीले निवारणशीले "निराकरिष्णु वर्द्धिष्णु वर्द्धिष्णू परितो रणम्" भट्टिः "निराकरिष्णोर्दलिनादृतेऽपि" रघुः "निराकरिष्णुता चैव विज्ञेयाः पापबाधुषाः" सुश्रुतः ।

निराकाङ्क्ष त्रि० निर्गता आकाङ्क्षा अपेक्षा इच्छा वा यस्य प्रा०ब० । १शाब्दबोधोपयोग्यपेक्षाशून्ये २इच्छाशून्ये च "तेषां वाक्यं निराकाङ्क्षम्" कात्या०श्रौ० १।१।२ "यावत् पदसन्दर्भं निराकाङ्क्षं पूर्वापरपठितपदान्तराकाङ्क्षारहितम्" संग्रहव्याख्या । आकाङ्क्षास्वरूपञ्च आकाङ्क्षाशब्दे द्रष्टव्यम् ।

निराकार त्रि० निर्गतः आकारोऽवयवोऽस्य प्रा०ब० । १अवयवहीने २देहाद्याकारवर्जिते ब्रह्मणि च "तेजःस्वरूपो भगवान् निराकारो निराश्रयः" ब्रह्मवै० जन्मख०७अ० । "निराकरणानवादेऽपि योग्यतावयेन प्रतिकर्मव्यवस्थायाः स्थितत्वात्" सर्वद० । आकार आह्वानम् । ३निर्गताह्वाने च "निराकारा निरानन्दा दीना प्रतिहतस्वना" (अयोध्या) रामा०अयो० ११२६० ।

निराकुल नितरामाकुलः प्रा०ब० । अत्यन्ताकुले "अलिकुलसङ्कुल कुसुमसमूहनिराकुलबकुलकलामे" गीतगो० । "सुपात्रनिक्षेपनिराकुलात्मनः" माघः ।

निराकृति स्त्री निर्+आ+कृ–क्तिन् । १प्रत्यादेशे निराकरणे निवारणे अमरः । "प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः" भा०द० । निर्गता आकृतिराकारोऽस्य प्रा०ब० । २निराकारे "योऽसौ विष्णुरगाधात्मा परमात्मा निराकृतिः" हरिवं० २१८अ० । निर्+आ+कृ–कर्त्तरि क्तिच् । ३पञ्चयज्ञत्यागिनि पु० "यज्ञो च पशुशास्त्र परिवेत्ता निराकृतिः" मनुः "यस्तु पञ्च महायज्ञविहीनः स निराकृतिः" कुल्लू०धृतवचनम् । "निराकर्त्ता सुरादीनां स विज्ञेयो निराकृतिः" शब्दार्थचि० धृतवाक्यम् । तस्य देवयज्ञनिराकर्त्तृत्वात् तथात्वम् । ४रोहितमनुपुत्रभेदे पु० "दृष्टपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः । मनोः पुत्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः" हरिवं०७अ० ।

निराकृतिन् त्रि० निराकृतमनेन इष्टा० इनि । निराकरणकर्त्तरि "यस्तोकुपोऽव्ययोदान्तो न कृती न निराकृती" भा०शा० २१६अ० ।

निरातङ्क त्रि० निर्गता आतङ्का यस्य यस्माद्वा प्रा०ब० । १भयशून्ये २रोगरहिते राजनि० "पुरुषायुषजीविन्यो निरातङ्का निरीतयः" रघुः । ३शिवे पु० ।

निरातप त्रि० निर्गत आतपो यस्मात् प्रा०ब० । १आतपशून्ये २रात्रौ स्त्री शब्दच० ।

निराबाध त्रि॰ निर्गता आबाधा यस्य। १आबाधाशून्ये २व्यथाशून्ये ३प्रतिबन्धशून्ये च "दवीयान् महीधरो नेदीयान् दीर्घो बहुरिति व्यवहारश्च निराबाधं लोकस्वभावात्" सर्वदर्शनसं॰। ४पक्षाभासभेदे पु॰ "अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्" मिता॰ धृतवचनम्। "निराबाधम् अखण्डदृष्टप्रदीपप्रकाशेनायं खण्डदेहे व्यवहरतीति" मिताक्षरा।

निरामय त्रि॰ निर्गत आमयात् प्रा॰त॰। १आमयरहिते रोगशून्ये अमरः। २वनच्छगले पुंस्त्री॰ मेदि॰ ३शूकरे शब्दमाला उभयत्र स्त्रियां जातित्वात् ङीष्। [शब्दच॰।

निरमालु पु॰ नितरां रमतेऽत्र रम—कालु। कपित्थवृक्षे

निरामिष त्रि॰ निर्गतमामिषमभिलाषो मांसाद्यामिषं वा यस्मात् प्रा॰ब॰। १लोभशून्ये "अध्यात्मरतिरासनो निरपेक्षो निरामिषः" मनुः २मांसाद्यामिषहीने च "वामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः सुखमेधते" भा॰शा॰ ११९अ॰। ३आमिषरहिते अन्नादौ। "नैवेद्यैव निरामिषैः" ति॰त॰।

निरालक पुंस्त्री निर्+अल—ण्वुल्। शाक्तद्वे मतस्यभेदे "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारकमकरगरगरकचन्द्रकमहामीनराजीवप्रभृतयः शाक्तद्वाः" तन्त्र॰।

निरालम्ब त्रि॰ निर्गत आलम्बः अवलम्बनं यस्य प्रा॰ब॰। १अवलम्बनशून्ये "एवं मयि निरालम्बे आपात् स्थितिं गतं" हरिवं॰ ८७अ॰ "निरालम्बो लम्बोदरजननि! कं यामि शरणम्" जगन्नाथः। २आकाशमांस्यां स्त्री राजनि॰। तस्या मूलरूपालम्बनशून्यत्वात्तथात्वम् ३ब्रह्मणि न॰ तदधिकारेण प्रवृत्ते ४उपनिषद्भेदे न उपनिषच्छब्दे १२२२पृ॰ दृश्यम्।

निरालोक त्रि॰ निर्गत आलोक उद्योतो दृष्टिर्वा यस्मात् प्रा॰ब॰। आलोकशून्ये १अन्धकारे २आलोकनरहिते च "कृत्वा लोकान् निरालोकान्" भा॰आ॰ २२अ॰।

निराश त्रि॰ निर्गता आशा यस्य प्रा॰ब॰। आशारहिते "निराशाः पितरो यान्ति श्राद्धं दत्त्वा सुदारुणम्" ति॰त॰ "सनो बभूवेन्दुमतीनिराशम्" रघुः। तस्य भावः ष्यञ्। नैराश्य आशाशून्यत्वे "आशा बलवती राजन्! नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला" भा॰शा॰ १७८अ॰।

निराशिष् त्रि॰ निर्गता आशी राशंसनं यस्य प्रा॰ब॰। १आशंसनशून्ये "जगच्छरण्यस्य निराशिषः सतः" कुमा॰ "निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः" गीता। वैराग्यदार्ढ्येन २विगततृष्णे च।

निराश्रय त्रि॰ निर्गत आश्रय आधारोऽवलम्बनं वा यस्य। १आश्रयरहिते २आलम्बनरहिते च "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" सां॰का॰ "निराश्रयं मां जगदीश! रक्ष" स्तुटः "त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः" गीता "निराश्रयः योगक्षेमार्थमाश्रयणीयरहितः" श्रीधरः। ३अद्वैतदर्शनेन देहेन्द्रियाद्यभिमानशून्ये शब्दार्थचि॰।

निरास पु॰ निर्+अस—भावे घञ्। १प्रत्याख्याने निराकरणे "तथा विज्ञानपक्षनिरासहेत्वसंभवप्रतीत्यादि" सां॰प्रभा॰। निर्+आ+अस—अच्। २निराकृते त्रि॰ "निरासैरसदैः आत्मैस्त्यजमानैः स्वकर्मभिः" भा॰आ॰ २७०अ॰।

निराहार त्रि॰ निर्गत आहारो यस्य प्रा॰ब॰। १आहारशून्ये "निराहाराश्च ये लोकाः" तर्पणमन्त्रः। निहत आहारः प्रा॰ब॰। २निहते आहारे "पश्चात्तापो निराहारः सर्वेऽमी सुखिहेतवः" वाग्भ॰अध्यायो॰। ३आहाराभावे न॰

निरङ्गिणी स्त्री निश्चितमङ्गं निरङ्गं तदस्त्यस्या आच्छादत्वेन इति ङीष्। तिरस्करिण्यां प्रच्छदपटे त्रिका॰

निरिन्द्रिय त्रि॰ निर्गतं निहतमिन्द्रियं यस्य प्रा॰ब॰। इन्द्रियशून्ये "ये च केचिन्निरिन्द्रियाः" मनुः।

निरीति त्रि॰ निर्गता ईतिर्यत्र। अतिवृष्ट्यादीतिशून्ये "निरीतिभावं गमितेऽतिवृष्टयाः" नैष॰ "निरातङ्का निरीतयः" रघुः।

निरीष न॰ निर्गतमीषायाः निरा॰त॰। फाले अमरः।

निरीश्वर त्रि॰ निश्चयेन ईश्वरो यत्र प्रा॰ब॰। १ईश्वररहिते वादे "निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्" सां॰प्र॰ भा॰पद्मपु॰। २तद्वादयुते नास्तिके। निरीशादयोऽप्यत्र।

निरीह त्रि॰ निर्गता ईहा यस्य प्रा॰ब॰। चेष्टाशून्ये "निरीहस्य कृतद्विषः" रघुः निहता ईहा प्रा॰त॰। चेष्टाविरोधिव्यापारे स्त्री "यमो निरीहावस्थायामात्मविश्रावजं सुखम्" सा॰द॰।

निरुक्त न॰ निर—वच—भावे क्त। १निर्वचने पदानामवयवार्थाः सम्भाविता निःशेषेण निश्चयेन उच्यन्ते यत्र आधारे वा॰ क्त। पदानामवयवार्थनिर्वचनप्रतिपादके

यास्कादिप्रणीते २ग्रन्थभेदे तदेतत् ऋग्वेदभाष्योपक्रमे उक्तं यथा

"पञ्चाध्यायरूपकाण्डत्रयात्मके एतस्मिन् ग्रन्थे परमिरमेक्षितया पदार्थस्फोटसाधनं ग्रन्थस्य निरुक्तत्वम्। तद्व्याख्यानं च "समाम्नायः समाम्नातः" इत्यारभ्य "तस्मात्तस्यास्माङ्गाव्यमनुभवत्यनुभवति" इत्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे। तदपि निरुक्तमित्युच्यते एकैकस्य पदस्य सम्भाविता अवयवार्थास्तस्य निःशेषेणोच्यन्त इति व्युत्पत्तेः। तथा हि "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति" प्रतिज्ञाय "उच्चावचेष्वर्थेषु निपतन्तीति" निपातस्वरूपं निरुच्यैवमुदाहृतम् "नेति प्रतिषेधार्थीयो भाषायामुभयसम्प्रत्ययम् "नेन्द्रं देवममंसतेति" प्रतिषेधार्थीय इति। "दुर्मदासो न सुरायाम्" इत्युपमार्थीयः इति च। तच्च लोके केवलप्रतिषेधार्थकस्यापि नकारस्य वेदे प्रतिषेधोपमानेषेधार्थादाहरणमस्मिन् ग्रन्थेऽवगम्यते। एवं ग्रन्थकारेणोक्तास्तत्पदनिर्वचनविशेषास्तत्तन्मन्त्रव्याख्यानावसरे एवाभिधास्यन्ते। न च निर्वचनानां निर्मूलत्वं शङ्कनीयम् एतद्व्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषाञ्चिदुक्तत्वात्। "तदाहुतीनामाहुतित्वमिति" "तमिदन्द्रं सन्तमिन्द्रम् इत्याचक्षते" इति "यदप्रथयत्तत् पृथिव्याः पृथिवीत्वमिति च"। ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति केषाञ्चिन्निर्वचनानां आकरग्रन्थेन विद्यापि न सर्वेषां विदुरिति। अतएव ग्रन्थकार आह "तदिदं विद्याख्यानं आकरग्रन्थस्य कार्त्स्न्यं कार्त्स्न्यार्थं चेति"। तस्मात् वेदार्थबोधाय उपयुक्तं निरुक्तम्"। तत्र निर्वचने पदस्यानेकप्रकारस्य "वर्णागमो वर्णविपर्ययश्चेत्यादिनोक्तो निपातशब्दे उदाहृतः। "शिक्षा वेदस्य आकरणं निरुक्तं छन्दो ज्योतिषमिति" सुश्रुतोपः "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" तस्मैतत् निरुक्तं हृदयमिति हृदयम्" का०उप०। हेमचन्द्रे तु पदमञ्जनं निरुक्तमित्युक्तं तेनावयवार्थज्ञापनार्थं तत्तद्घटकपदस्य विभागकरणमेव निरुक्तमिति तदर्थः। १निरोजेन उक्ते ३निरुक्ते च निरुक्तलक्षणे उक्ते।

निरुक्तकार पु० निरुक्तं ग्रन्थं करोति ज-अण् उपप०। १यास्के मुनौ २शाकपूणिनामकमुनौ च। ल-क्षि० निरुक्तकृदपि तयोरर्थयोः।

निरुक्तज पु० निरुक्तः निरुक्तः अर्थः पुत्रस्तत्पादयेत्युक्तः अन्यस्तस्मात् जायते जन-ड। क्षेत्रजपुत्रे "आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः। निरुक्तजश्च विज्ञेयः सुतः प्रकृतजस्तथा" भा०अनु० ४९अ०। "निरुक्तजः स्वक्षेत्रेऽन्योरेतःसेकार्थसुतस्तथा" नीलक०।

निरुक्ति स्त्री निर्-वच-क्तिन्। १निर्वचने प्रकृतिप्रत्ययाद्यवयवार्थकथनद्वारा वस्तुदितार्थबोधने "किं कारणं अरत्नकारोऽमैनत् प्रथितं भुवि। अरत्नात्रनिरुक्तिं त्वं यथावत् वक्तुमर्हसि" सौतिरुवाच "अरेति अयमाहूतैर्दारणं कारणं स्मृतम्। अरीरं चाह तस्याकीर्त्तस्य धीमाञ्छनैः शनैः। अपयामाह तीव्रेण तपसेत्यत उच्यते। अरत्नात्रनिरिति ब्रह्मन्! वाहुकेर्भगिनी तथा" भा०आ०३०अ०। २९९पृ०अलङ्कारशब्दोक्ते २अलङ्कारभेदे

निरुत्सुक त्रि० निरतोत्सुकः प्रा०स०। १अत्यन्तोत्सुके निर्गतोत्सुकम् उत्सुकता यस्य प्रा०ब०। २औत्सुक्यहीने च "ममापि कथमुत्तमोत्तम भगवां प्रति निरुत्सुकं चेतः" रैवतकमनोः ३पुत्रभेदे पु० "धृतिमान्यमनोपमस्तत्त्वदर्शी निरुत्सुकः" हरिवं० ७अ० रैवतपुत्रोक्तौ। प्रबोधमन्वन्तरे सप्तर्षिमध्ये आर्गवे ऋषिभेदे "गौरवस्तत्त्वदर्शी तु आर्गवश्च निरुत्सुकः" तत्रैव तत्रोद्धवमन्वन्तरे सप्तर्षिकथने।

निरुदकादि पु० षा०स० उ० उक्ते अन्योदाहरणनिमित्ते शब्दगणभेदे स च "निरुदक निरुपल निर्मशक निर्मदन निष्पावक निष्पाविक निर्व्रण दुष्करीष निष्करीष निष्करी निरजिन उदजिन उपाजिन (परेर्हस्वादयोऽपि गणाः)" "निरुदकादिराकृतिगणः" सि०कौ०।

निरुध त्रि०नि+रुध-कर्मणि क्त। १संरुद्धे स्तनपानादिप्रतिरोधे "यत्रनिरुद्धवाहैः" भाग०। पात०भा० उक्ते २चित्तस्यावस्थारूपभूमिभेदे तच्च तल्लक्षणं यथा

"चित्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्त्तते यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्लेशान् कर्मबन्धनानि शिथिलीकरोति स सम्प्रज्ञातो योग इत्याख्यायते" भा० "चित्तं यदैव रजसा तेषु तेषु विषयेषु विक्षिप्यमाणमस्तमितरजस्कं मूढन्तु तमःसङ्गेनाभिभूतमिव। चित्तं

क्षिप्तादिविष्टं विशेषो हि स्वेमवस्तुनः कादाचित्कः स्वेमा वा चाला स्वेमवस्तुता सांसिद्धिकी वा वक्ष्यमाणव्याधिस्थानाद्यन्तरायजनिता वा। एकाग्रमेकतानम्। निरुद्धवकस्तदस्तिकं संस्कारमात्रशेषं चित्तं निरुद्धम्। तत्र क्षिप्तमूढयोः सत्यपि परस्परामेलया इतिनिरोधे पारम्पर्येणापि निर्बीजत्वाभावात् तदुपजातकत्वाच्च योगपक्षादुद्धरोत्पादितत्वमिति न तयोर्योगत्वं निषिद्धम्। विक्षिप्तस्य तु कादाचित्कसद्भूतविषयस्वेमशालिनः समाध्येत योगत्वमिति निषेधति तत्र विक्षिप्ते चेतसि समाधिः कादाचित्कः सद्भूतविषयस्य चित्तस्य स्वेमा न योगपक्षे वर्त्तते। कस्मादुपसर्गद्विपक्षविक्षेपोपसर्जनीभूतः विषयवर्गान्तर्गतस्य हि स्वरूपमेव दुर्लभं प्रागेव कायकरत्वात्। न खलु दहनान्तर्गतं बीजं त्रिचतुरक्षणावस्थितस्य प्रमाङ्कुराय कल्पते इति भावः। यदि विक्षेपोपसर्जनीभूतः समाधिर्न योगः कस्तर्हि इत्यत आह यस्त्वेकाग्रे चेतसि इति। भूतमिति समारोपितमर्थं निवर्त्तयति। निरुद्धचित्तेऽपि स्वालम्बने तत्त्वे भूते भवत्येकाग्रेत्यत उक्तम् सदिति। शोभनं नितान्तमाविर्भूततत्त्वं, तमःसमुद्रेकस्वशोभनस्य क्लेशहेतुत्वादिति। द्योतनं हि तत्त्वज्ञानमागमाद्वाऽनुमानाद्वा भवदपि परोक्षरूपतया न साक्षात्कारवतीमविद्यां छिनत्ति द्विचन्द्रादिज्ञानोत्पादिष्वनुच्छेदकत्वादत आह प्रेति प्रयत्नो हि प्रकर्षं द्योतयन् साक्षात्कारं सूचयति। अविद्यामूलत्वादस्मितादीनां क्लेशानां विद्यायाश्च अविद्याच्छेदरूपत्वात् विद्योदये चाविद्याक्लेशसमुच्छेदो विरोधित्वात् कारणविनाशात्मेत्याह क्षिणोति चेति। अतएव कर्म्म रूपाणि बन्धनानि क्षपयति। कर्म चात्रापूर्वमभिमतं कार्यं कारणत्वोपचारात्। क्षपयति स्वकार्याद्ध्वंसयति। वक्ष्यति हि "सति मूले तद्विपाकः"। इति किञ्च निरोधमभिमुखं करोत्यभिमुखीकरोति" विप०

निरुद्धप्रकाश(स) न० सुश्रुतोक्ते क्षुद्रोगभेदे "वातोपसृष्टमेवन्तु चर्म संजायते यथिम्। यथिमध्यौषधस्तु मूलस्रोतोरुधहि च। निरुद्धप्रकाशे(ब) दक्षिणे मन्दधारे वहनम्। मूलं प्रवर्त्तते तस्मीर्यथिर्म च विदीर्यते। निरुद्धप्रकाशं(ब) विद्याद्दुष्टा चापवाहिनीम्"।

निरुपाख्य त्रि० निर्गता उपाख्या यस्मात् प्रा०ब०। अवस्तुदार्ढे १सम्बन्धाभावी २अभावपदार्थे च वाचोगतयस्य विषयतयोल्लेखनायोग्ये अस्फुटस्वरूपे ३असङ्गाधि च। "ज्ञानविज्ञानयुक्तानां निरुपाख्या निरञ्जना। केवलया या गतिर्देव! परमा या गतिर्भवान्" भा०अनु०१७अ०। ४निःस्वरूपे "तदपि चैतद्वस्तु अभावमात्रं निरुपाख्यमिति" भारी०भा० "निरुपाख्यं निःस्वरूपम्" रत्नप्र०।

निरुपाय त्रि० निर्गत उपायोयस्य प्रा०ब०। १उपायरहिते "उच्छिद्यमानोवलिना निरुपायप्रतिक्रियः" कामन्द०।

निरुप्त त्रि० निर्+वप-कर्म्मणि क्त। यस्मादौ भागशः पृथक्कृत्य दत्ते "न च सृष्टिमात्रेण निरुप्तेन प्रयोजनम्" काल्या०श्रौ० १५।१।६सू० कर्कः।

निरूढ़ त्रि०निर्-रुह-क्त। १नितरां रूढे २शक्तिलक्षणया अवार्थबोधके शब्दे "पूर्वस्मिन्नस्य धीर्यं तत्स्याद्यु परमे यत्र द्रव्ये सत्वं तत्र निरूढोदायशब्दः" इति दायभागः। ३पशुयागभेदे "निर्मित ऐन्द्राग्नः" आश्व० श्रौ० ३।८।४ "ऐन्द्राग्नो निरूढो नाम पशुः कर्त्तव्यः। अवमपि पशूनां प्रकृतिः। तेनाङ्गभूतानामग्नीषोमीयः प्रकृतिः। अतस्तस्यां निरूढः प्रकृतिरिति तेनैव पशुष्टिमीङ्गभूतेष्विष्टेषु स्वर्थं निरूढप्रकृतित्वाज्ज्ञानम्" नारा०। "माण्मासः संवत्सरो वा" ६सू० "सोऽयं निरूढः पशुः षट्सु षट्सु मासेषु कर्त्तव्यः संवत्सरे संवत्सरे वा। अतोऽयं षोडशावयवान् निरोऽयं पशुरिति गम्यते" नारा०।

निरूढलक्षणा स्त्री निरूढा शक्तिलक्षणा लक्षणा। व्याकरणकोशादिरूढेऽर्थे शक्तिलक्षणायां लक्षणाकरणायां शब्दकार्यबोधनायाम्।

निरूढि स्त्री नि+रुह-क्तिन्। १प्रसिद्धौ "रूप! विद्यासु निरूढिमागता" किरा०। २निरूढलक्षणायाम्।

निरूपक त्रि० निरूपयति नि+रूप-ण्वुल्। निरूपणकर्त्तरि तस्य भावः तल्। निरूपकता स्वरूपसम्बन्धभेदे यथाऽऽधारतानिरूपकताऽऽधेयत्वे इत्यादि।

निरूपण न० नि+रूप-ल्युट्। तत्त्वज्ञानाहङ्कृतयत्नप्रयोगे १विचारे २निदर्शने ३व्याख्याने च "निरूपणं लक्षणादिप्रकारेण ज्ञानाहङ्कृतयत्नम्" न्याय०भा० श्रीकण्ठः।

निरूपित त्रि० नि+रूप-क्त। निरूपणकर्म्मणि तस्य भावः त्व। निरूपितत्वं न्यायोक्ते स्वरूपसम्बन्धविशेषे।

निरूह पु० निर्+ऊह-करणे घञ्। सुश्रुतोक्ते दोषनिर्हरणोपाये वस्तिभेदे "तत्र द्विविधो वस्तिः नैरूहिकः स्नैहिकश्च। आस्थापनं निरूह इत्यनर्थान्तरम्। तस्य

विकल्पोमाधुतैलिकः। तस्य पर्यायशब्दो यापनोयुक्त-रवः सिद्धवस्तिरिति। स दोषनिर्हरणाच्छरीरदोषहर-त्वाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वाऽऽस्थापनम्। माधुतैलिकविधानस्य निरूहक्रमचिकित्सिते वक्ष्यामः"। "तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः। अनुवासनमपि न दुष्टत्वन्नुदिवसं वा दीयते इत्यनुवासनः। तस्यापि विकल्पोऽर्द्धमात्रावकृष्टोऽपरिहार्यो मात्रावस्तिरिति"। "निरूहः शोधनो-ऽशोधनो स्नेहनो ह्रंहणो मतः। निरूहशोधितान्मार्गान् सम्यक्स्नेहोऽनुगच्छति। अमेतसर्वदोषाश्च नाडीस्विव वहज्जलम्। सर्वदोषहरश्चायं शरीरस्य च जीवनः। तस्माद्विशुद्धदेहस्य स्नेहवस्तिर्विधीयते। ततोन्नादम-यशोकपिपासारोचकाजीर्णभःपाण्डुरोगभ्रमसदमूर्च्छा-छर्दिकुष्ठमेहोदरस्त्रीत्वप्लीहाश्मरीगुल्मशोफशोफोपहतत्वच जीर्णज्वरक्षिमासगर्भिणीदुर्बलाग्न्यसहावालवृद्धौ च वा-तरोगार्दिते शीणा नानुवास्या नास्थापयिव्याः"। उ-दरी च प्रमेही च कुष्ठी स्थूलश्च मानवः, अवश्यं स्था-पनीयाश्च नानुवास्याः कथञ्चन। अश्राध्यता विकाराणां स्यादेषामनुवासनात्"।

तत्प्रयोगप्रकारश्च तत्रैवोक्तो यथा

"अथातो निरूहोपक्रमचिकित्सितं व्याख्यास्यामः। अथानुवासितमास्थापयेत्स्वभ्यक्तस्विन्नशरीरमुपसृष्टवह्नि-र्वेगप्रवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्यायां-मधःशुपरिस्तरायां शोभितदेशव्यूढायामनुपधानायां वामपार्श्वशायिनमाकुञ्चितदक्षिणसक्थिमितरप्रसारितसक्थिं सुमनसं जीर्णान्नं वाग्यतं शनिश्चलदेहं विदित्वा ततो वामपादस्योपरि नेत्रं कृत्वेतरपादाङ्गुष्ठाङ्गुलिभ्यां वर्तिकासपरि निष्पीड्य सव्यपार्श्विकनिष्ठिकानामिकाभ्यां वस्तेर्मध्यार्द्धं सङ्गोच्य मध्यमप्रदेशिन्यङ्गुष्ठैरन्तं विद्ध-ताग्रं कृत्वा वस्तावौषधं प्रक्षिप्य दक्षिणहस्ताङ्गुष्ठप्रदे-शिनीभ्यां चानुक्षिप्तमनायतमवृद्धुदमसङ्कुचितमवातमौ-तमाशयस्थमसंस्पृष्टं पुनरितरेण गृहीत्वा दक्षिणेनावक्षि-प्तेततः स्नेहेनैवौषधान्ते द्विस्त्रिर्वा वेष्ट्य दद्यात्। अथ दक्षिणेनोत्तानेन पाणिना वस्तिं गृहीत्वा वामहस्तम-ध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रमुपसंस्पृश्याङ्गुष्ठेन नेत्रद्वारं पिधाय एताभ्यां नेत्रं एताङ्गुलीभ्यां प्रयच्छेदतश्चल-नं समसुखमाकर्षकं नेत्रं प्रविधत्स्वेति ब्रूयात्। वस्तिं वाम करे कृत्वा दक्षिणेनावपीडयेत्। इत्येनेना-पपीडनेन न द्रुतं न विलम्बितम्" ततो नेत्रमपनीय तिर्यग्भावाः पीडनकालादुपेक्षोत्तिष्ठेत्यातुरं ब्रूयात्। आतुरस्तपवेशयेदुत्कटुकं वस्त्यागमनार्थम्। निरूहप्रत्याग-मनकालस्तु सङ्कल्पो भवति। "अनेन विधिना वस्तिं दद्यात्तस्त्रिविधारदः। द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्थतः। सम्यग्निरूढविक्ते तु प्राप्ते वस्तिं निवा-रयेत्। अपि हीनक्रमं कुर्यान्न तु कुर्यादनिक्रमम्। विशेषात्सुकुमाराणां हीनएव क्रमो हितः। यस्य चा-द्वस्तिरत्यल्पवेगो हीनमलानिलः। दुर्निरूढः स विज्ञेयो मूलान्त्यं रुचिजाद्यवान्। यान्येव प्राक्प्रयुक्तानि लि-ङ्गान्यतिविरेचिते। तान्येवातिनिरूढेऽपि विज्ञेयानि विपश्चिता। यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः। लाघवं चोपजायेत सुनिरूढं तमादिशेत्। सुनिरूढं ततोऽन्तं स्नानवन्न तु भोजयेत्। पित्तक्षेत्रानिलाविष्टं क्षीरयूषरसैः क्रमात्। सर्वं वा जाङ्गलरसैर्भोजयेद्विष-कारिभिः। त्रिभागहीनमर्द्धं वा हीनमात्रमथापि वा। यथाग्निदोषं मात्रेयं भोजनस्य विधीयते। अनन्तरं ततो युञ्ज्याद्यथास्वं स्नेहवस्तिना। विविक्तता मन-स्तुष्टिः स्निग्धता व्याधिनिग्रहः। आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम्। तदहस्तस्य पवनाद्वयं बलवद्द-दिष्यते। रसौदनस्तेन बलस्तदहश्चानुवासनम्। यथा-दग्निबलं मत्वा पवनस्य च चेष्टितम्। अशोपलब्धिते क्रोडे स्नेहवस्तिर्विधीयते। अनायासं सुकल्पांस्तु नि-रूहं शोधनैर्हरेत्। तीक्ष्णैर्निरूहैर्मतिमान् क्षारमूला-ज्जयुतैः। विशुद्धानिलविष्टब्धं चिरं तिष्ठन्निरूह-यम्। मूलाऽरतिज्वरागाढं गरयं वा प्रवर्त्तयेत्। तत्तु भुञ्जवते देयमास्थापनमिति स्थितिः। निरूहचिकां वा जनदेशर्द्धि वापि सुदारुणम्। कोपयेत्सर्वदोषाश्च तस्य हृद्यादभोजिने। जीर्णान्नस्यापये दोषाः पुंसः प्र-व्यक्तिमागताः। निःशेषाः सुखमायान्ति भोजनेनाग्रपी-डिताः। न वास्थापनविक्षिप्तमन्नमग्निः प्रधावति। त-स्मादास्थापनं देयं निराहाराय जानता। आवलिकं क्रमस्त्वापि मत्वा चाद्यं निरूहयम्। गतेऽपकृष्टेऽदोषाणां बलवत्त्वं न विद्यते"। वस्तिभेदश्च (पिचकारी) ख्यातः "वस्तिर्द्विधानुवास्यो निरूहश्चेति संज्ञितः। यः स्नेहैर्दीयते स आदनुवासनसंज्ञकः। कषायक्षीरतै-लैस्तु निरूहः स निगद्यते" इति वैद्यसारकौ०। खुट। निरूहचमसम् न०

निर्ऋ(र्त)ति पु॰ नियता ऋतिर्ऋ या यत्र प्रा॰ब॰ समो वा। १दक्षिणपश्चिमदिक्पतौ। "सृगव्याधश्च सर्पश्च निर्ऋतिश्च महाबलाः" भा॰आ॰ ६६अ॰। २अलक्ष्म्याम् स्त्री ३निरुपद्रवे त्रि॰। ४अधर्मस्य भार्यायां स्त्री "अधर्मस्तस्य संजातः सर्वभूतविनाशकः। तस्यापि निर्ऋतिर्भार्या नैर्ऋता येन राक्षसाः" भा॰आ॰६६अ॰। ५अधर्मस्य कन्यायाञ्च स्त्री "हिंसा भार्या त्वधर्मस्य तस्यां जज्ञे तथाऽनृतम्। कन्या च निर्ऋतिस्तस्यां सुतौ द्वौ नरकं भयम्" मार्कण्डेयपु॰५अ॰। ६मृत्युभार्यायाम्। "निर्ऋतिश्च तथा भार्या मृत्योर्भार्याऽभवन्नृप!" तत्रैवाध्याये। अलक्ष्मीव लक्ष्म्या ज्येष्ठा भगिनी अमरसिंहे ५॰६पृ॰ दृश्यम्। ७मूलानक्षत्रे तस्य तद्देवताकत्वात् तथात्वम्। निर्ऋतिर्नीलपाशश्च पिङ्गाक्षश्चाथः कार्पटिकादीनां रक्षार्थं यतमानस्तारात्रश्च तद्विपक्षत्वेन घातितः मरुत्कालेन तेषामाधिपत्यं स्वमेवमितीच्छया प्रार्थितोऽभवत् तदीयतामाप तत्कथा काशीख॰१२अ॰ यथा "अस्मदेवियमेतांस्तदभविष्यं यदीश्वरः। अभिलष्योऽभवति प्राणानत्याक्षीत् च परार्थतः। वा अतिस्वल्पकाले स्वाकृतिस्तदनुरूपतः। दिगीशत्वमतः प्राप्तो नैर्ऋत्यां नैर्ऋतेश्वरः" इति। एतत्तोषप्राप्तिकारणादिकं तत्रैव यथा "दिक्पतेर्नैर्ऋतस्याथो पुण्यापुण्यजनोषिता। राक्षसा निवसन्त्यस्यामपरद्रोहिणः सदा। जातिमात्रेण रक्षांसि हन्तुः पुण्यजना इमे। आत्मक्षतिपरा लोको जाता वर्षा वरेऽपि! नाद्रियन्ति ज्ञवामानामस्मत्तुल्यं कदाचन। परदारपरद्रव्यपरद्रोहपराङ्मुखाः। जाता जातौ निकृष्टायामपि पुण्यानुसारिणः। द्विजातिभक्त्युत्पन्नाः नैराश्यानं पोषयन्ति ये। सदा बहुचिताश्चाथ द्विजसन्ध्यादिषु। आहुता कृष्टवदना वदन्ति द्विजसन्निधौ। जय जीव भगोनाथ स्वामिन्निति हि वादिनः। तीर्थे स्नानपरानित्यं नित्यदेवपरायणाः। द्विजेषु नित्यं प्रणताः स्वनामाख्यानपूर्वकम्। दमदानदयास्नानशौचेन्द्रियविनिग्रहाः। अस्तेयसत्याऽहिंसाश्च सर्वेषां धर्महेतवः। नवस्वेषु सदोद्युक्ता ये जातायत्र कुत्रचित्। सर्वभोगसमृद्धाश्च वसन्त्यत्र पुरोत्तमे। स्त्रेच्छा अपि सुतीर्थेषु ये मृता नात्मघातकाः। विहाय कार्यं निर्वाच विश्वाचान्ते इत्र भोगिनः। अन्यत्रमो विमेयुस्ते ये चैवाऽत्रहनो जनाः। भुक्त्वा निरयवाहस्तं ते च सुपापिनूपराः। आत्मघातो न कर्त्तव्यस्तस्माद् क्वापि विपश्चिता। इहापि च परत्रापि न शुभान्यात्मघातिनाम्। यथेष्टमरणं केचिदाङ्गस्तत्त्वावबोधकाः। प्रयागे सर्वतीर्थानां राशि सर्वाभिलाषदे। अन्यत्रा अपि ये केचिद्व्याधमांतुसारिणः। परोपकृतिनिष्ठास्ते वसन्त्यत्र तु सत्तमाः। अस्य स्वरूपं वक्ष्यामो दिक्पतेः शृणतः शृणु। मध्ये विन्ध्याटवि पुरा पक्षस्य जनापणीः। पल्लीपतिरभूदुग्रः पिङ्गाक्ष इति विश्रुतः। निर्विन्ध्यायाटवि शूरः क्रूरकर्मपराङ्मुखः"।

निर्ऋथ पु॰ निर+ऋ-थक्। वामभेदे उज्ज्वलद॰।

निरोद्धव्य त्रि॰नि+रुध-कर्मणि तव्य। १आवरणीये लोकानां यथेष्टप्रचारवारणाय रक्षणीये "आश्रयाणोदपानाच्च प्रभूतधिलाकराः। निरोद्धव्याः सदा राज्ञा चौरिकाच्च महीरुहाः" भा॰शा॰८६अ॰। यथेष्टगमनादिभिर्जलमाविलसम्भवात् तन्निवारणार्थं तस्यावरणादिना रक्षणं कार्यम्। २प्रतिरोधनीये च

निरोध पु॰ नि+रुध-भावे घञ्। १नाशे २गन्धादिप्रतिरोधे मेदि॰ ३नियोगे च तत्र नाशे (प्रलये) "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" सां॰प्र॰भा॰धृता श्रुतिः। ४निरुद्धाख्यचित्तावस्थाभेदे निरुद्धशब्दे उक्तस्वरूपादिकमुक्तम्। "योगश्चित्तवृत्तिनिरोधः" पात॰सू॰ "अनयोर्द्वयोरेवाप्रतिरुद्धयोर्भूयोर्यचित्तस्यैकाग्रताख्यः परिणामः स योग इत्युक्तं भवति एकाग्रे बहिर्वृत्तिनिरोधः निरुद्धे च सर्वासां वृत्तीनां संस्कारशेषायां प्रविलय इत्यनयोरेव भूयोयोगस्य सम्भवः" भोजवृत्तिः। तस्य कारणञ्च तत्र दर्शितं यथा "अभ्यासवैराग्याभ्यां तन्निरोधः" पात॰सू॰ "अभ्यासं निरोधे क उपायः? इति चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च। या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भाराऽविवेकविषयनिम्ना पापवहा। तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यते इत्युभयाधीनचित्तवृत्तिनिरोधः" भा॰। "अभ्यासवैराग्ये दक्षमाधनसंपन्ने ताभ्यां प्रकाशप्रवृत्तिनिबन्धनरूपा या इत्तयस्तासां निरोधो भवतीत्युक्तं भवति तासां विनिवृत्तयाङ्गानिनिवेशानाम् अनर्थकतया स्वकारण एव चित्ते प्रलीनरूपतयाऽवस्थानम्। तस्य विषयदोषदर्शनजेन वैराग्येण तद्वैमुख्यमुत्पाद्यते। अभ्यासेन च सुखजनकं शान्तप्रवाहप्रदर्शनद्वारेण हृदयस्यैकाग्र्य-

यते । एवं तान्यां भवति चित्तवृत्तिनिरोधः" भोजवृत्तिः । "अन्यतो विपरीता । विवेकख्यातिरित्यतस्तां विरक्तं चित्तं तामपि निरुणद्धि । तदवस्थं चित्तं संस्कारोपगं भवति । स निर्बीजः समाधिः, न तत्र किञ्चित् वस्तु भासत इत्यवस्तुज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति । तदवस्थे चेतसि विषयाभावात् बुद्धिबोधात्मा पुरुषः किं स्वभावः इति" यात॰भा॰ "अतश्चितिशक्तेर्विपरीतेति । यदा च विवेकख्यातिरपि हेया तदा कैव कथा इत्यन्तराया दोषवद्भावानामिति भावः । ततश्च हेतोर्निरोधसमाधेरवतारो युज्यते इत्याह अतस्तस्यामिति । ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः । अथ अनिरुद्धाऽप्येवंवृत्तिचित्तं कीदृशमित्यत आह तदवस्थमित्यादि । स निरोधः अवस्था यस्य तत्तथोक्तम् । निरोधस्य स्वरूपमाह स निर्बीज इति । क्लेशवासनाः कर्माशयो जात्यायुर्भोगबीजम् तस्मान्निर्गत इति निर्बीजः । अस्यैव योगिजनप्रसिद्धामन्यर्थसंज्ञामादर्शयति न तत्रेति । उपसंहरति । द्विविधः सः यं मनश्चित्तवृत्तिनिरोध इति । संप्रत्युत्तरसूत्रमवतारयंस्तोदयति । तदवस्थे चेतसीति । विषयाभावे तत्तदाकारपरिणतबुद्धिबोधात्मा स्वयं पुरुषः तदाऽनुभवते नतु बुद्धिबोधरहितोऽतोऽस्य पुरुषस्य बुद्धिबोधस्वभावः क्वचित्तरि प्रमाणः न च संस्कारशेषे चेतसि बोऽस्ति न च स्वभावस्यपह्नवो भावो वर्त्तितुमर्हति इति भावः । स्यादेतत् संस्कारशेषात्मापि बुद्धिं कथात् पुरुषो न बुध्यते इत्यत आह विषयाभावादिति । न बुद्धिज्ञानं पुरुषस्य विषयोऽपि तु पुरुषार्थवती बुद्धिः विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः" विव॰। "तदा द्रष्टुः स्वरूपेऽवस्थानम्" पात॰सू॰ "स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये, व्युत्थानचित्ते तु सति तथापि भवती न तथा" भा॰ "मूलेच परिहरति तदा द्रष्टुः स्वरूपेऽवस्थानम् । स्वरूप इत्यारोपितम् शास्त्रादेरमूलकत्वं निवर्त्तयति । पुरुषस्य हि चैतन्यं स्वरूपमनौपाधिकम् । न तु बुद्धिबोधः शास्त्रादिवत्। औपाधिकी हि सः, स्फटिकस्येव स्वभावस्वच्छत्वस्य जपाकुसुमरक्तिमोपाधिरक्तिमा, न चोपाधिनिष्ठत्वानुपपत्तिरनिवृत्तिरनिमित्तत्वादिति भावः । स्वरूपस्य धर्मेऽपि भेदं निरस्य अधिकरणभाव उक्त इति । अवमेवार्थोऽभ्यक्ता द्योत्यते स्वरूपप्रतिष्ठेति । तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः । स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता स्वरूपे, चित्तशक्तिः निरोधावस्थायां प्रतितिष्ठती परिणामिनी स्याद् व्युत्थाने वा स्वरूपप्रतिष्ठाने सति व्युत्थाननिरोधयोरविशेष इत्यत आह व्युत्थानचित्ते त्विति । न ज्ञातृ कूटस्थनित्या चितिशक्तिः स्वरूपात् च्यवते । तेन यथा निरोधे तथैव व्युत्थानेऽपि । न खलु शुक्तिकायाः प्रमाणं विपर्ययज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः प्रतिपन्ना तु तथाभूतमप्यतथात्वेनाभिमन्यते । निरोधसमाधिमपेक्ष्य सम्प्रज्ञातोऽपि व्युत्थानमेवेति" विवरणम् २निरुध्यते यस्मै सम्प्रदाने घञ् । निरोधजनिते वशीकरणे च "निरोधच्छर्दिविधारणाभ्याम्" सां॰सू॰ "प्राणस्येति प्रसिद्ध्या लभ्यते "प्रच्छर्दनविधारणाभ्यां प्राणस्येति" योगसूत्रे भाष्यकारेण प्राणायामस्य व्याख्यातत्वात् । छर्दिश्च वमनम्, विधारणं त्याग इति यावत् । तेन पूरकरेचनयोर्लाभः । विधारणं च कुम्भकम् । तथा च प्राणस्य पूरकरेचकुम्भकैर्योनिरोधो वशीकरणं वा धारणेत्यर्थः" सां॰प्र॰भा॰ ।

निरोधक त्रि॰ नितरां रुणद्धि नि+रुध-ण्वुल् । १निरोधकारके स्त्रियां टाप् अत इत्वम् । सा च सत्प्रविष्टचित्तस्तेः तमःप्राचुर्यात् २निरोधकारिण्यां स्त्री रायमुकुटः । ध्वनिशब्दे २९२१पृ॰ दृश्यम् ।

निरोधन न॰ नि+रुध-ल्युट् । कारागारादौ प्रवेशनेन १गतिरोधने २विषयसंप्रचाररहितकरणे च ।

निर्ग त्रि॰ नितरां गच्छत्यत्र "सुदुरोरधिकरणे" वार्त्ति॰ "अन्यत्रापि दृश्यते इति वक्तव्यम्" निर्+गम-अधिकरणे ड । देशे शेषच॰ । [निःसृते ।

निर्गत त्रि॰ निर्+गम-कर्त्तरि क्त । निष्क्रान्ते बहिर्भूते

निर्गन्थ त्रि॰ निर्गतो ग्रन्थोऽस्य । ग्रन्थशून्ये "निर्गन्था इव किंशुकाः" भाषावृत्तः । [भारते यद्वार्थचि॰।

निर्गन्थन न॰ निर्+ग्रन्थ-घटने-भावे ल्युट् । नितान्तार्द्रने

निर्गन्धपुष्पी स्त्री निर्गतं गन्धपुष्पं पुष्पं यस्याः ङीप् । शाल्मलिवृक्षे वृक्षभे॰ ।

निर्गमन न॰ निर्+गम-करणे ल्युट् । १द्वारे २प्रतिकारिणि यद्वार्थचि॰ । भावे ल्युट । ३निःसरणे

निर्गुण पु॰ निर्गतो गुणेभ्यः । सत्त्वरजस्तमोरूपगुणत्रयशून्ये निर्धर्मके ।परमात्मनि । "आकारस्य निराकारं सगुणं निर्गुणं

निर्गुंडं विमुक्तं ब्रह्म०वै०पु० । "गुणवज्जिर्गुणो महान्" विष्णुध० । निर्गताः गुणाः औदार्यादयोऽस्यादयो वा यस्मात् प्रा०ब० । २गुणहीने त्रि० वैशेषिकमते ३गुणादौ "गुणादिर्निर्गुणक्रियः" भाषा० ।

निर्गुंठी स्त्री निर्गता गुण्ठात् गुण्ठनात् निरा०त० गौरा० ङीष् । (निसिन्दा) इति अमरटीकायां भरतः ।

निर्गुंडी स्त्री निर्गुंडति गुड-रक्षायां च पृषो० । निर्गता गुण्डात् वेष्टनाद्वा ङीष् । नीलसेवालिकायां (निसिन्दा) इति अमरः । "श्वेतनीलद्वयभेदात् निर्गुण्डी द्विविधा मता" २अरण्टे ३पञ्चकन्दे त्रिकः । "वमूलजलयलायाः निर्गुण्ड्याः स्वरसैर्जलम् । पिष्टं पीत्वा जयेत्तोषो निर्व्याधिर्भाति देववत्" चक्रद० ।

निर्गूढ त्रि० निर्+गुह-क्त । १संवृते २निर्मान्तगूढे ३उपगोदरे पु० शब्दरत्ना० ।

निर्ग्रंथ पु०निर्गतो ग्रन्थेभ्यः निरा०त० । १अपगते द्विगम्बरे २बौद्धभेदे ३द्यूतवरे ४सन्निभेदे च मेदि० । ५निर्धने ६मूर्खे ७निःसंशये ८निर्वेदं गते त्रि० हेमच० । तस्य अपगतः ग्रन्थः ग्रन्थिभूयत्वात् धनेर्हृदयग्रन्थिभूयत्वात् च तथात्वम् "आत्मरामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे" भाग० १।७।१० "ग्रन्थोपाध्यायार्थप्रतिनिर्ग्रन्थनिमित्तनिग्रहैर्वैः" इ०सं०५१अ० । स्वार्थे क । निर्ग्रन्थक अपगते पु० निष्पाके वस्त्ररहिते त्रि० लटाधरः ।

निर्ग्रंथन न० निर्+ग्रन्थि-णौ टिलोपे ल्युट् । मारणे अमरः

निर्ग्रंथिका पु० निर्गतो ग्रन्थिर्ग्रन्थिर्वा कप् प्रा०ब० । १अपगते २निर्धने ३ग्रन्थिहीने च त्रि० शब्दरत्ना० "कोऽपि कथञ्चित् निर्ग्रन्थिकपरुषोचितालापः सहसा निष्कोपितसमः स्वकर्मणैव प्रलापवान्" दशकुमा० ४जैनग्रन्थविज्ञां स्त्रियां स्त्री "इन्द्रकाटिकायां गतो नितम्बवतीं निर्ग्रन्थिकाप्रयत्नेनोपनीतां पारे परानयन्निव" दशकुमा० ।

निर्ग्राह्य त्रि० निर्+ग्रह-ण्यत् । निश्चयेन ग्रहीतुं योग्ये "अस्य सुमनसस्तुल्यमहं क्षमनिर्ग्राह्यम्" इ०उप० ।

निर्घट त्रि० निर्गतो घटो यस्मात् प्रा०ब० । १घटशून्यदेशे २राजकरशून्यगृहे शब्दर० । ३यज्ञजनसंकीर्णगृहे हारा० । अभावे अव्ययी० । ४घटाभावे अव्य० ।

निर्घट्ट निर्+घट्ट-अच् । १पन्थानां सूचीपत्रे २निर्धनो च शब्दार्णव० ।

निर्घात पु० निर्+हन-घञ् । पवनाहतपतनस्य मेघनादसूचौ पतनजन्ये शब्दभेदे तद्यथा आदिकं इ०सं०१८अ० उक्तं यथा "पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तदा निर्घातः स च पापो दीप्तविष्फुरतः । अर्धोदयेऽधिकरविबिम्बपथनियोधाकुलाभिन्नेभ्याः । आ प्रहरादर्धोऽस्ताभिमुखपरिन्यास्तूर्यो रांव । आ मध्याह्नाद्वाऽस्तोपसेविनो ब्राह्मणांश्च पीडयति । वैश्यजनवदांस्तृतीये चौरान् प्रहरे चतुर्थे च । अस्तं याते नीचान् प्रथमे यामे निहन्ति यक्षाणि । रात्रौ द्वितीययामे पिशाचशकुनाश्चिपीडयति । तुरगकरिचस्तृतीये विनिहन्याद्दुर्वाणिनश्चतुर्थे च । भैरवजर्जरशब्दो याति यतस्तां दिशं हन्ति" । "निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने । एतानाचार्यिकान् विद्यादनध्यायान्वतावपि" मनुः । "निर्घातोपैः कुञ्जरीनाम् लिघांसुः" रघुः । "उल्कापाते च निर्घाते तत्रैवाभ्रावलम्बिते । छिद्रे सर्वे विनिर्दिष्टे न कुर्यान्मङ्गलक्रियाम्" ज्योतिषतत्त्वे गर्गः ।

निर्घातन न० निर्+हन-स्वार्थे णिच्-भावे ल्युट् । उक्ततोक्ते यन्त्रनिष्पाद्ये क्रियाभेदे यन्त्रकर्माणि तु निर्घातनपूरणयन्त्रनेत्रादिना तद्विषयं निर्घातनञ्च कथं कार्यं तत्राह "उत्सुचिह्नं छित्त्वा निर्घातनेत् छेदनीयवस्तुम् । छेदनीयवस्तुन्यपि कुचिरयःस्थापयन्त्यपर्यन्तान् पतितानि च कृत्यकर्म्म यथाकामं कृत्वैवापकर्षं प्रयतेत । अहमुच्छितयन्त्राणि छेदनीयवस्तूनि च । अनिर्घातानि जानीयात् भूयस्त्वेदाहवस्तुतः" ।

निर्घृण त्रि०निर्गता घृणा दया यस्मात् । निर्दये "यस्त्रीदासस्तिनिर्घृणः" मार्कण्डेयपु० ।

निर्घोष पु० निर्+घुष-घञ् । यन्त्रशब्दे अमरः "अश्वानिर्घोषैः क्षोभयामास सिंहान्" । "स्त्रिग्धगम्भीरनिर्घोषम्" इति च रघुः । [विजने ।

निर्जन त्रि० निर्गतो जनो यस्मात् प्रा० ब० । जनैरनाकीर्णे

निर्जर पु० निर्गता जरा यस्मात् । १देवे २जराशून्ये त्रि० । ५य० । ३अमृते न० । जराशब्दस्य नीचत्वेऽपि अजादौ प्रत्यये परे वा जरसादेशः निर्जरसो निर्जरो । आर्हतमतसिद्धे जीवाजीवादिषु सप्तसु पदार्थेषु ४पदार्थभेदे आर्हतशब्दे २८५पृ० दृश्यम् । ५सुदूर्वा ६शाकपर्णी च स्त्री मेदि० । [राक्षसि० ।

निर्जरसर्षप पु० निर्जरप्रियः सर्षपः षा०त० । देवसर्षपे

निर्जरायु पु० निर्गतो जरायुतः निरा०त० । जरायुतो

निर्गते जलवादौ । निर्गतो जरायुर्यस्य । २जरायुहीने त्रि० । "अमूः पारे पृदाक्षिप्तमानिर्जरायवः । तासां जरायुभिर्व्यमच्छायापि" रघु० १।२७।

निर्जर्जल्प पु० नितरां जर्जरः पूर्वो० । अत्यन्तजर्जरीभूते "निर्कृतिं निर्जर्जल्पेन शीर्णां (शीर्णानि) वसु०२५।२ "नितरां जर्जरीभूतेन शिरोभागेन" वेददी० ।

निर्जल त्रि० निर्गतं जलं यस्मात् प्रा०व० । जलशून्ये देशे "कोशस्य जलमेदाला निर्जलेभ्यो यथा जलम्" भा०शा० ११० अ० ।

निर्जलैकादशी स्त्री कर्म० । ज्येष्ठस्य शुक्लैकादश्याम् व्रतभेदपाठे भीमसेनं प्रति व्यासः । "द्वयस्ते मिथुनस्थेऽर्के शुक्ला स्यादशमी हि या । ज्येष्ठे मासि प्रयत्नेन सोपवासा जलवर्जिता । स्नाने चाचमने चैव वर्जयित्वा जलं बुधः । उपवसेत् नैवान्यद् व्रतमस्योऽन्यथा भवेत् । उदयादुदयं यावद् वर्जयित्वा जलं बुधः । अमयत्वादवाप्नोति द्वादशद्वादशी फलमिति" ।

निर्जित त्रि० निर्+जि-क्त । १पराजिते २वशीकृते "निर्जितैरावता नलाः" कुमा० । निर्जितेन्द्रियग्रामः अमरः ।

निर्जिह्व त्रि० निर्गता सुखाद्विःकृता जिह्वा यस्य । १सुखादृष्टिर्गतरसने । "निर्जिह्वैव श्वसद्भिर्व कूजद्भिर्व नताननैः । कथैवमो नरश्रेष्ठ !" भा०भी०६०अ० । २जिह्वाशून्ये भेके च जाजिह्वयन्ते ६२४० दशम् ।

निर्जीव त्रि० निर्गतो जीवो यस्मात् प्रा०व० । जीवात्मरहिते देहे "वाजिभिश्चापि निर्जीवैः शस्त्रैः कोपितोपितैः" भा०द्रो० ३६अ० । निर्जीवदेहैरित्यर्थः . "चिता दहति निर्जीवं चिन्ता दहति जीवितम्" प्राचीनगाथा ।

निर्झर पु०निर्+झृ-अप् । १पर्वतादिःकृतजलप्रवाहे(झरना) अमरः । २सूर्यांशे रतुमाणके च मेदि० "भागीरथीनिर्झरशीकराणाम्" कुमा० । "प्रस्रवणैरिव निर्झराणाम्" रघुः । स कारयत्येनाम्यस्या अच् नीरा० ङीष् । ३नद्याम् स्त्री शब्दर० । "लटाकटाहसम्भूतजलमन्दिरिम्बनिर्झरी" इत्यादि रावणकृतशिवस्तवः ।

निर्झरिणी स्त्री निर्झरः पर्वतादिःकृतजलप्रवाहः कारयत्येनाम्यस्या इति ङीप् । नद्याम् त्रिका० । "स्रवत्तरुणकरभूरिक्षोणसो निर्झरिण्यः" महावीरचरितम् ।

निर्णय पु० निर्+णी-भावे अच् । १निश्चये तदभावाभावादिषि तद्भावादिषि ज्ञाने । वस्तुदेहे यथा भावाभावौ द्वावेव विषयतया भासेते नैवं निश्चये किन्तु तत्र एकविध एवावभासते । निश्चयत्वं च न जातिः प्रत्यक्षत्वादिना बाधकात् किन्तु विषयितावच्छेद एवान्तरे स्थितम् । २विरोधपरिहारे मीमांसोक्ते पञ्चावयवन्यायमध्ये ३चरमावयवे न्यायोक्ते सन्दिग्धे पक्षप्रतिपक्षयोः ४साधनबाधनाभ्यामवधारणे स च गौतमोक्तेषु षोडशसु पदार्थेषु पदार्थभेदः तद्लक्षणादिकं गौ०सू०भा०उक्तं यथा "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" सू० "स्थापना साधनं, प्रतिषेध उपालम्भः, तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रितौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्यते, तयोरन्यतरस्य निवृत्तिरेकतरस्यावस्थानम् अवश्यम्भावि, यस्यावस्थानं तस्यावधारणं निर्णयः । नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति एको हि प्रतिज्ञातमर्थं हेतुतः स्थापयति प्रतिषिद्धं चोद्धरतीति द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुरुद्भाव्यते च निवर्त्तते तस्य निवृत्तौ योऽवतिष्ठते तेनार्थावधारणं निर्णय इति उभाभ्यामेवार्थावधारणमित्याह । यथा कुक्कुटा दक्षस्य पक्षयोः द्वितीयस्यापक्षस्यः तावेतौ पक्षपक्षाभावौ विमर्शं सह निवर्त्तयतः, उभयपक्षे उभयापक्षे त्वनिवृत्तौ विमर्श इति । विमृश्येति विमर्शं कृत्वा, योऽयं विमर्शः पक्षप्रतिपक्षाभावद्योतकं न्यायं प्रवर्त्तयतीत्युपादीयते इति । इतश्च विरुद्धयोरेकधर्मिणोर्द्वयं यत्र च धर्मिणोरन्यतरो विरुद्धौ धर्मौ हेतुतः सम्भवतः तत्र बलाबलहेतुतोऽर्थस्य तत्त्वाभावोपपत्तेः, यथा क्रियावद् द्रव्यमिति वचनवचने यस्य द्रव्यस्य क्रियायोगो हेतुतः सम्भवति तत् क्रियावत् यस्य न सम्भवति तदक्रियमिति, एकधर्मिणोश्च विरुद्धयोर्युगपद्भाविनोः कालविकल्पः यथा तदेव द्रव्यं क्रियायुक्तं क्रियावत् अतुलसोपरतक्रियं पुनरक्रियमिति । न चायं निर्णयो नियमो विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति किन्त्विन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षेऽर्थावधारणं निर्णय इति । परीक्षाविषये तु विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः प्राक्षे वादे च विमर्शवर्जम् । मीमांसोक्तस्याधिकरणस्यावयवाश्च "विषयोऽविषयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णय इति विद्वान्तः प्राक्षेऽधिकरणं स्मृतम्" इत्युक्ताः । "तत्र निर्णयः सिद्धान्तसिद्धविचार्यवाक्यतात्पर्यावधारणम्" तत्त्वदी० ।

निर्णयपाद इ० चतुष्पादुव्यवहारश्च निर्णयात्मके विधि वादापरपर्याये संशयभेदे "प्रमाणोत्तरक्रियाबाध्यसिद्धिभिः त्रिभिर्लक्षितैः। साक्षिप्रत्ययतरंगस्तु चतुष्पादनिर्णीयते" इति० इतवचनम्। स च वीरमि० विस्तरतो दर्शितो यथा

"अथ निर्णयापरपर्यायः विधिपादः। तेषां प्रमाणकथित व्यवहारपादे इत्यभिमतं तेषां विधेः केवलाद्व्यवहारपृथक्त्वं वीरमित्रोक्तं प्रमाणकथितस्य चतुष्पादत्वमेव हि धर्मशास्त्रे व्यवहारश्च। याज्ञवल्क्यः "तत्र विधौ विधिमाप्नोति विपरीतमथोऽन्यथा" इति। तस्य प्रमाणस्य विधौ नि यद्यप्रामाण्यव्यवस्थितौ यत्रां प्रमाणोपन्यासकर्त्ता विधिं जया ज्ञानमाप्नोति। अन्यथा प्रामाण्याविधौ विपरीतमविधिं पराजयलक्षणमाप्नोति। नारदः वारश्च व्यवहाराणां प्रतिज्ञा चतुष्पादकृता। तद्यानी क्रीयते वादी तरंस्तासुत्तरो भवेत्"। तरन्निर्णयन्। उत्तरः उत्कृष्टो विजयीति यावत्। निर्णयप्रकारानाह व्यासः "प्रमाणैर्हेतुचरितैः शपथेन क्रियाफलया। वादिसभ्यतिपत्त्या वा निर्णयोऽष्टविधः स्मृतः। विवृतवानेतत् स एव "विधिर्तं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्। अनुमानं विदुर्हेतुस्तर्कश्चेति मनीषिणः। देवस्थितिः पूर्वस्मृतिरं चतुष्पादकृतम्। अर्थानुरूपाः शपथाः स्मृताः सत्यघटादयः। तेषामभावे राजाज्ञां निर्णयन्तु विदुर्बुधाः"। इति प्रमाणत्रयं स्मृतकौपष्टव्यमनुमानं चरितादिचतुष्टयमिलष्टविधहेतुकत्वान्निर्णयस्याष्टविधत्वं यद्यपि भुक्तिरप्यनुमानमेव। तथापि प्रमाणकथितकालीनं सभ्यानामनुमानमिहानुमानपदेन विवक्षितम्। "धर्मेण व्यवहारेण चरित्रेण च पार्थिवः। चतुःप्रकारोऽभिहितः सन्निग्धेऽर्थे विनिर्णयः" इति इहस्पत्युक्तानां धर्मादीनां निर्णयहेतुत्वं प्रागेव "तत्र सत्ये स्थितो धर्मः" इत्यादिना तेनैव विवृतं प्रागेव निरूपितम्। स एव "एकैको त्रिविधः प्रोक्तः क्रियाभेदात्मनीषिभिः"। क्रियाभेदात् धर्मनिर्णयस्य द्वैधमाह। स एव "सम्यग्विचार्य कार्यं तु युक्त्या संपरिकल्पितम्। परीक्षितन्तु शपथैः स श्रेयो धर्मनिर्णयः। प्रतिवादी प्रपद्येत यत्र धर्मः स निर्णयः। दिव्यैर्विशोधितः सम्यक् द्वितीयः स उदाहृतः"। प्रतिवादी प्रपद्येतेत्यस्य आज्ञाक्षिवदुभयत्र सम्बन्धः। यत्र प्रतिवादी युक्त्या सम्यग् विचार्य सम्परिकल्पितं, निर्धारितं पुनः शपथैः इत्यादिरः शपथादिभिः परीक्षितं कार्यं प्रपद्येताङ्गीकुर्यात् स आद्यो धर्मनिर्णयः दिव्यैर्घटादिभिर्विशोधितः प्रतिवादी यत्र कार्यं प्रपद्येत स द्वितीयो धर्माख्यो निर्णयः इत्यर्थः। व्यवहारनिर्णयस्यापि द्वैविध्यमाह स एव "प्रमाणैर्निश्चयो यस्तु व्यवहारः स उच्यते। वाक्छलानुत्तरत्वेन द्वितीयः परिकीर्तितः" प्रमाणपदेनात्र साक्षिणो विवक्षितस्य व्यक्त्यभिप्रायेण च बहुवचनम्। भुक्तेरनुमानत्वाद्विध्यस्य धर्मनिर्णयात्मभावात्। वाक्छलानुत्तरत्वेन वाक्छलेनानुत्तरत्वेन च यो निश्चयो द्वितीयो व्यवहारः स इत्यर्थः। चरित्रनिर्णयस्यापि भेदद्वयमेवाभिहितम् "अनुमानेन निर्णीतं चरित्रमिति कीर्तितम्। देवस्थित्या द्वितीयन्तु शास्त्रविद्भिरुदाहृतम्" अनुमानेन भुक्तिलक्षणेन यो निर्णयस्तदेकं चरित्रम्। देवस्थित्या यो निर्णयस्तद्द्वितीयं चरित्रमित्यर्थः। राजाज्ञानिर्णयस्यापि द्विभेदताभिहिता तेनैव "प्रमाणरहिताद्यस्तु राजाज्ञा निर्णयः स्मृतः। शास्त्रसभ्यविरोधे च तथान्यः परिकीर्तितः" प्रमाणरहिता राजाज्ञा आद्यो निर्णय इत्यन्वयः। शास्त्राणां सभ्यानाञ्च विरोधे परस्परं विप्रतिपत्तौ या राजाज्ञा स द्वितीयो राजाज्ञानुरूपो निर्णय इत्यर्थः। ननु शास्त्राणां सभ्यानाञ्च विरोध एवासम्भवी सत्यमेतानामधिकारिणां सभ्यानां दण्ड्यत्वात्। न च शास्त्राणां परस्परविरोधे सभ्यानाञ्चेत्यर्थ इति वाच्यम् सभ्यविरोधोपन्यासानर्थक्यात्। शास्त्रविरोधे न्यायोपष्टम्भशास्त्रानुसारेण निर्णयः कार्य इत्यस्यार्थस्य "श्रुतीनां विरोधे न्यायस्तु बलवान् व्यवहारतः। धर्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः। केवलं शास्त्रमाश्रित्य न कर्त्तव्यो हि निर्णयः। युक्तिहीनविचारे हि धर्महानिः प्रजायते" "न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेदित्यादि" योगीश्वरनारदबृहस्पतिमीमांसादिभिर्निर्धारितत्वात्। तादृशि विषये राजाज्ञानवधारात् अनीदृशराजाज्ञाया निषिद्धत्वाच्चेति चेत् उच्यते यत्र शास्त्रविरोधे बलवान्न्यायोऽन्यतरार्थविनिश्चायकः सभ्यप्रमाणविवाकस्य समापतेर्न हृदयमारोहति चिरतरं मीमांसितोऽपि तादृशशास्त्रविरोधे तन्मूलकं वा समाधेये सभ्यविरोधे राजकृतव्यवस्था वादिप्रतिवादिभ्यां मन्तव्येत्येतदर्थकमिदं वचनम्। अतएव पितामहः "वचनं प्राज्ञिकस्तिष्ठेत् नेत्र मन्त्राः स्युः" इत्यादि

धर्मादीनां चतुर्णां पूर्वपूर्वोत्तरोत्तरापेक्षया दुर्बलत्वमाह नारदः "धर्मश्च व्यवहारश्च चरितं राजशासनम्। चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः" इति। व्यवहारस्य धर्मबाधकतामाह बृहस्पतिः "शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः। व्यवहारः स विज्ञेयो धर्मस्तेनावहीयते"। शास्त्रशब्देन शास्त्रोक्तं साक्ष्यादिप्रमाणं तेन यो निर्णयः क्रियते स व्यवहारः। तेन धर्मः शपथादिकृतो निर्णयोऽवहीयते बाध्यते मानुषप्रमाणे सति दिव्यानवस्थरात्। अतएवाह कात्यायनः "युक्तियुक्तन्तु कार्यं स्याद्दिव्यं यत्र विवर्जितम्। धर्मस्तु व्यवहारेण बाध्यते तत्र नान्यथा" चरित्रस्य व्यवहारबाधकतामाह बृहस्पतिः "देशस्थित्यानुमानेन नैगमानुमतेन वा। क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते"। नैगमाः वौरवणिजः। नैगमानुमतेनानुमानेनेति सम्बन्धः सामानाधिकरण्येन शब्दाद्देशस्थित्यपेक्षः। अमुमेवार्थं स्फुटयति कात्यायनः "प्रतिलोमपरस्तेषु तथा दुर्गनिवासिषु। विरुद्धस्थितयं प्राहुस्तं धर्मं न विचालयेत्। निर्णयन्तु यदा कुर्यात्तेन धर्मेण पार्थिवः। व्यवहारचरित्रेण तदा तेनैव बाध्यते" इति। स्मृतिविरुद्धमपि नियतत्वान्न विचालयेद्राजा। राजशासनस्य चरित्रबाधकतामाह बृहस्पतिः "विहाय चरिताचारं यत्र कुर्यात् पुनर्नृपः। निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तथा" इति चरिताचारं पूर्वपूर्वाचरितमाचारम्। यद्यपि तं धर्मं न विचालयेदित्युक्तमत्र तु विहाय चरिताचार मित्युच्यते तेन विरोधः प्रतिभाति। तथापि यदि तद्विचालने पुरराष्ट्रादिक्षोभो न भवति तदा स्मृत्यादिविरुद्धत्वात्तं दूरीकृत्य स्मृत्याद्यविरोधी राजाज्ञया निर्णयः कार्य इति तात्पर्यम्। अतएव पुरराष्ट्रस्य विरुद्धस्य विवादस्थानादेयत्वसूक्तम् पुरराष्ट्रक्षोभापादकतया तदनापादकतया तु स्मृत्याद्यनुरोध एव कार्यो राज्ञेति। अतएवाह कात्यायनः "विरुद्धं न्यायतो यत्तु चरित्रं कल्प्यते बुधैः। एवन्तत्र निरस्येत चरित्रन्तु नृपाज्ञया" इति नृपैर्यन्न्यायविरुद्धं चरित्रं न तदुपाद्यमिति कल्प्यते। तत्र नृपाज्ञया तच्चरित्रं निरस्यते बाध्यत इत्यर्थः। यथोक्तप्रकारातिरिक्तप्रकारेणैषां बाध्यबाधकतालक्षणे दोषमाह कात्यायनः "अनेन विधिना युक्तं बाधकं यदुयदुत्तरम्। अन्यथा बाधकं यत्र तत्र धर्मो विहन्यते"।

निर्णाम पु० नितरां नामो नमनम् प्रा०स० णत्वम्। नितरां नमने "अथ निर्णामौ पक्षयोः करोति। निर्णामौ हि वयसः पक्षयोर्भवतो द्वितीये, द्वितीये हि वयसः पक्षयोर्निर्णामौ भवतोऽन्तरे द्वितीयेऽन्तरे वयसः पक्षयोर्निर्णामौ भवतः स चतुरङ्गुलमेव पुरस्तादुद्वृहति चतुरङ्गुलं पश्चादुपसमूहति तद्यावदेवोद्वृहति तावदुपसमूहति तद्यावदेवातिरेचयति नो कनीयः करोति। स तस्मिन्निर्णामे एकामिष्टकामुपदधाति तस्मिन्नेवं वयसः पततो निर्णामादेका नाद्युपगेते तां तत्करोति" शत०ब्रा०१०।१।२।५।

निर्णायन न० निर्+नी-णिच्-ल्युट्। १निर्णयकरणे २गजापाङ्गदेशे नियोगे शब्दरत्ना०।

निर्णिक्त त्रि० निर्+निज-क्त। १शोधिते २अपगतपापे च। "एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित् सहाचरेत्" मनुः।

निर्णिज् पु० निर+निज-शौचपोषणयोः क्विप्। १रूपे निघण्टुः "विभ्रद्दुद्रापि हिरण्ययं वरुणोवस्त निर्णिजम्" ऋ०१।२५।१३। २शोधके त्रि०। क। निर्णिज तत्रार्थे त्रि०

निर्णेक पु० निर्+निज-घञ्। नितरां शुद्धौ "दानेन बधनिर्णेकं सर्पादीनामशक्नुवन्"। "अपामग्नेश्च संयोगात् हेम रूप्यञ्च संबभौ। तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तयः" मनुः।

निर्णेजक पु० निर्+निज-ण्वुल्। रजके (धोपा) अमरः। "अवतां शौण्डिकानाञ्च चेलनिर्णेजकस्य च"। "कारुकाञ्च प्रजां हन्ति बलं निर्णेजकस्य च" मनुः।

निर्णेजन न० निर्+निज-भावे ल्युट्। १शुद्धौ करणे ल्युट्। २शोधहेतौ प्रायश्चित्ते "लतनिर्णेजनांश्चैव न विगर्हेत कर्हिचित्" मनुः। [णायके च।

निर्णेतृ त्रि० नि+णी-तृच्। निश्चयकर्त्तरि विवादपदनि-

निर्द(र्दि)ग्धिका स्त्री निर्+दह-दिह-वा क्त संज्ञायां कन् कापि अत इत्वम्। निर्दिग्धिकायाम् हेमच०।

निर्दट त्रि० निर्दय(र)+पृषो०। १दयाहीने २परापवादके ३निष्प्रयोजने च मेदि०। ४मन्त्रे ५तीव्रे च शब्दरत्ना०।

निर्दण्ड त्रि० निःशेषेण दण्डो यस्य प्रा०ब०। सर्वप्रकारदण्डार्हे १शूद्रे "वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम्। दानदण्डाः स्मृता वैश्या निर्दण्डः शूद्र उच्यते" भा०शा० १५अ०। २दण्डनार्हे च

निर्दर पु० निर्+दृ-कर्मणि अप्। १निर्झरे २गिरौ च "गिरिनिर्दरवासिनाम्" रामा० अयो० २८स०।

निर्गतोदरो यस्मात् प्रा०ब० २निर्भये त्रि० ३सारे न० ५कठिने ६उपलभे च त्रि० मेदि० ।

निर्दश त्रि० निर्गतानि दश दिनानि यस्य उपमा० । अतिक्रान्तदशाहे "निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च" मनुः "यथा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति" ऐत०ब्रा०७ १४

निर्दहस् अव्य० निर्+दह्-असुन् । निर्दग्धुमित्यर्थे "अपशब्दे ठ वा ईश्वरा पशुश्चिर्दहः" ता०ब्रा० २ ७ २

निर्दहन पु० नितरां दहति निर्+दह्-ल्यु । १भल्लातके शब्दर० । २मूर्वालतायां स्त्री राजनि० । निर्गतोदहनो वह्निः दहनं वा यस्मात् प्रा०ब० । २वह्निशून्ये ३दाहशून्ये च त्रि० ।

निर्दाल त्रि०निर्+दो-खण्डने दा-दाने दै-शोधने वन् । नितरां १छेत्तरि २दातरि ३शोधके च "यथोद्धरति निर्दाता धान्यस्य रजतिं बहुः ।

निर्दिग्ध त्रि० निर्+दिह्-क्त । १बलवति मांसले हेमच० । २निर्लिप्ते च ।

निर्दिष्ट त्रि० निर्+दिश्-क्त । १उपदिष्टे २प्रदर्शिते ३कथिते च "निर्दिष्टविषयं किञ्चित् उपात्तरिषयं तथा" हरि०

निर्देश पु०निर्+दिश्-भावे घञ् । १याचने याच्ञायां २कथने ३उपदेशे च । निर्दिश्यतेऽभिधीयतेऽनेन करणे घञ् । ४प्रतिपादकशब्दभेदे नाम्नि "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" गीता । ५वेतने च "कालमेव प्रतीक्षेत निर्देशं भृतको यथा" इति पुराणम् । निर्गतो देशात् निरा०त० । २देशान्निर्गते त्रि० ६उपाल्ले च मेदि० ।

निर्दोष त्रि० निर्गतो दोषो यस्मात् प्रा०ब० । दोषरहिते "निर्दोषे पितरि स्थिते" दायभा० "निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति" ।मता० धृतवचनम् ।

निर्द्वन्द्व त्रि०निर्गतो द्वन्द्वात् निरा०त० ।शीतोष्णादिद्वन्द्वरहिते "निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्" गीता

निर्द्धन त्रि० निर्गतं धनमस्य । १धनशून्य दरिद्रे "शशिनस्तुल्यवंशोऽपि निर्द्धनः परिभूयते" चाणक्यः ।२अरङ्गरे पु० शब्दच० ।

निर्द्धर्म त्रि० निर्गतो धर्मात् निरा०त० । धर्मबहिर्भूते "निर्द्धर्मार्थं कर्म कुर्युः न पार्थाः" भा०उ० २४अ० ।

निर्द्धार पु० निर्+धृ-णिच्-भावे घञ् । निश्चये ज्ञानभेदे ।

निर्द्धारण न० निर्+धृ-णिच्-ल्युट् । १निश्चये जातिगुणक्रियाभिः बहुदायादिकदेशस्य २पृथक्करणे "यतश्च निर्द्धारणम्" पा० तदर्थे षष्ठी सप्तमी च भवति । तत्स्वरूपान्वयादिकं शब्दश०प्र० उक्तं यथा

"विशेषस्य स्वेतरसामान्यव्यावृत्तधर्मवत्त्वं निर्धारणं तच्च बहुदितं न बह्वर्थः सामान्यतत्त्रिधर्मयोः स्वपदोपात्तत्वात् । किन्तु विशेषान्यत्वं व्यावृत्तं च । विशेषस्तत्समभिव्याहृतक्षत्रियादिविशेष्य एवाह्नः । व्यावृत्तत्वञ्च भेदप्रतियोगित्वं तथा च नराणां क्षत्रियः शूरतम इत्यत्र क्षत्रियस्य नरविशेषतया बह्वर्थेन क्षत्रियान्यत्वेन विशिष्टस्य तत्प्रकृत्यर्थस्य नरस्य तादृशनरत्वावच्छिन्नाधेयत्वसंसर्गेण भेदेऽन्वयस्तस्य क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे शूरतमस्य च क्षत्रिये तादात्म्येनान्वय इति क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्ववच्छूरतमाभिन्नः क्षत्रिय इत्याकारकस्तत्र बोधः । क्षत्रियान्यनरस्याधेयतामात्रेण भेदेऽन्वये नराणां क्षत्रियः सुन्दर इत्यपि प्रयोगापत्तेः क्षत्रियान्यत्वरूपनरनिष्ठभेदप्रतियोगित्वस्य सुन्दरे सत्त्वात् । एवञ्च नरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे बाधादुक्तवाक्यस्यायोग्यतापत्तिरतः बह्वर्थेन क्षत्रियान्यत्वेन तत्प्रकृत्यर्थो नरो विशेषितः । नच घटानां क्षत्रियः शूर इत्यपि स्यात् क्षत्रियान्यघटत्वावच्छेदेन शूरभेदस्य सत्त्वादिति वाच्यं राहोः शिर इत्यादाविव प्रकृते क्षत्रियान्यविनः स्वप्रकृत्यर्थतादात्म्यस्य बह्वा बोध्यत्वात् । न च सङ्ख्यान्यसर्वस्य प्रकृत्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वरूपस्य बह्वर्थस्य प्रकृत्यर्थनरे प्रकारत्वायोग इति वाच्यं सम्बोध्यत्वादौ व्यभिचारेण तादृशव्याप्तेः प्रायिकत्वस्य प्रागुक्तत्वात् । न च नराणां क्षत्रियो द्रव्यमित्यपि स्यात् क्षत्रियान्यनरत्वावच्छेदेन द्वित्वाद्यवच्छिन्नद्रव्यप्रतियोगिताकभेदसत्त्वादिति वाच्यं द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्द्धारणषष्ठ्याः समर्थत्वात् । यद्यपि भेदः प्रतियोगित्वञ्च द्वयमेव निर्द्धारणषष्ठ्यर्थः क्षत्रियशब्देनोपस्थापितस्य क्षत्रियस्य षष्ठ्यर्थभेदे तस्य च नरे नरस्य च पुनर्भेदे पुनर्भेदस्य प्रतियोगित्वेऽन्वयादेव क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमान्वयसम्भवः । तथापि क्षत्रियादिनामोपस्थापकस्य क्षत्रियादेस्तादृशनामोत्तरविभक्त्यर्थ एव भेदान्वयस्य व्युत्पन्नत्वात् नरप्रदोत्तरषष्ठ्यर्थे तदन्वयासम्भवात् क्षत्रियान्यत्वं विशिष्टमेव षष्ठ्यर्थो नत्व-

न्यतामात्रम् न च नरस्य क्षत्रियः शूर इत्यपि स्यात् पाणिपादस्य पाणिः पवित्र इत्यत्रेवान्यतापि एकवचनस्य निर्द्धारणार्थकत्वे क्षत्यभावात् । अतएव द्वन्द्वः सामासिकस्य चेति गीतापि सङ्गच्छते। एकवचनभिन्नयोरेव षष्ठीषष्ठ्योरुक्तनिर्द्धारणबोधकत्वव्युत्पत्तिस्वीकाराद्वा । ननु पाथःपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नयोः पाथःपृथिव्योरप्रसिद्ध्या पाथःपृथिव्युभयवृत्तिभेदप्रतियोगित्वस्य स्नेहवति बाधेन च जलान्यपाथःपृथिव्युभयत्वावच्छिन्नवृत्तिकभेदप्रतियोगिनः स्नेहवतो बोधासम्भवः । न च द्विपदद्वन्द्वोत्तरनिर्द्धारणषष्ठ्या अन्यतरवृत्तिभेदप्रयोगित्वमेवार्थः तच्चिन्त्यं चान्यतरशब्दैकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयः तथाच जलान्यो यः पाथःपृथिव्योरन्यतरस्तच्छिष्टस्य भेदस्य प्रतियोगित्वं स्नेहवति वर्त्तत एवेति वाच्यं तावतापि पाथःपृथिव्युभयतादात्म्यस्य जले बाधादुक्तवाक्यस्यायोग्यतातादवस्थ्यात् पाथःपृथिव्योस्तेन उष्णमित्याद्यप्रयोगेन निर्द्धारणषष्ठ्यास्तादात्म्यबाधितार्थत्वात् घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमानित्यादौ घटतद्भिन्नान्यतरत्वाप्रसिद्ध्या तादृशान्यतरवृत्तिभेदस्य बोधयितुमशक्यत्वाच्चेति चेन्न द्वन्द्वोत्तरनिर्द्धारणषष्ठ्याः पर्य्याप्तसंख्यायामपि शक्तत्वेन तस्य स्वैकपदोपात्तत्वेन षष्ठ्यर्थस्य जलाद्यन्यत्वरूपनिर्द्धार्य्यभेदस्यान्वयेन सर्वसामञ्जस्यात् । पाथःपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नो यः पाथःपृथिवीपर्य्याप्तसंख्यान्वयस्तत्त्वावच्छिन्नवृत्तिकभेदप्रतियोगिस्नेहाभिन्नं पाथःपृथिवीपर्य्याप्तसंख्यान्वयो जलमित्यन्वये बाधकाभावात् । पटघटमठानां घटः कम्बुग्रीवादिमानित्यादावप्युक्तरीत्यैवान्वयधीः । इदन्तु बोध्यं यत्रोद्देश्यविधेययोस्तादात्म्येनान्वयबोधसामग्री तत्रैव निर्द्धारणषष्ठ्या भेदप्रतियोगित्वमर्थः यत्र तु सम्बन्धान्तरेण, तत्रात्यन्ताभावप्रतियोगित्वमतो नराणां क्षत्रिये शौर्य्यमित्यादौ क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकस्यात्यन्ताभावस्यैव प्रतियोगित्वं शौर्य्यादौ प्रतीयते न तु तादृशभेदस्य नराणां क्षत्रिये क्वापीत्यपि प्रयोगापत्तेः । नरणां मध्ये क्षत्रियः शूर इत्यादौ तु निर्द्धारणवाचिनो मध्ये इत्यव्ययस्य तदर्थकषष्ठ्या सह सम्भेदे देहे चैत्र इत्यादाविव नान्यतरवैयर्थ्यम् । नरेषु क्षत्रियः शूर इत्यादौ निर्द्धारणसप्तमीस्थलेऽप्युक्तदिशैवान्वयो द्रष्टव्यः । यत्तु नराणां क्षत्रिय, शूरतम इत्यादौ राज्ञोः शिर इत्यत्रेवाभेदएव षष्ठ्यर्थस्तादात्म्यं वा तथा च नराभिन्नक्षत्रियत्वाच्छेदेन शूरतमत्वाभेदस्य वाक्यार्थत्वेन नराणां क्षत्रियोऽर्जुन इत्यादिकोन प्रयोगः नरभिन्नक्षत्रियत्वावच्छेदेनार्जुनाभेदस्याप्रसक्तत्वात् न वा नराणां वानरः पशूरित्यादिकः, कीशे पशुभेदसत्त्वेऽपि मानुषभेदस्य विरहादिति तत्तुच्छं नराणां क्षत्रियः प्राणी क्षत्रियाणां नरः शूर इत्यादिवाक्यस्य दुर्वारतापत्तेः । केचित्तु नराणां क्षत्रियः शूर इत्यादौ क्षत्रियान्यो नरः शूरभिन्नो नराभिन्नः क्षत्रियश्च शूरइत्येवमन्वयितावच्छेदकधर्मावच्छेदेन धियस्तरीकुर्वन् भेदभेदश्च निर्द्धारणवाचिषष्ठीसप्तम्योरर्थमाहुस्तच्चिन्त्यं नामार्थसम्बन्धविशेषकान्वयबोधे नाम्नः प्रथमान्तत्वापेक्षायाः परित्यागापत्तेः स्वप्रकृत्यर्थावच्छिन्नस्यैव संख्यान्यसुवर्णस्य शब्दान्तरार्थेन सहान्वयस्य व्युत्पन्नत्वेन षष्ठ्यर्थे केवलभेदे शूरादेरन्वयोनाशंत्वास्तां विस्तरः" । "पञ्चमी विभक्ते" पा० यत्र निर्द्धार्य्यनाम्नः भेदएव प्रतीयते तत्र पञ्चमी स्यात् सि० कौ० पञ्चम्यास्तु भेदएवार्थः यथा माथुरा पाटलिपुत्रेभ्य आढ्यतर इति "यतश्च निर्द्धारणमित्यनुवर्त्तते विभागोऽत्र भेदः तत्र निर्द्धारणे सर्वत्र यथा कथञ्चित् भेदस्य सत्त्वेऽपि विभक्तिप्रकृत्यसामर्थ्यात् यत्र भेद एव न तु केनाप्युपाध्यादिरूपेणाभेदस्तत्रैवास्याः प्रवृत्तिरित्याह भेदएवेति न तु शब्दान्तरोपात्ते सामान्याक्रान्तेति भावः । यत्र पञ्चम्यर्थो निर्द्धारणविषयरूपएव तत्र च अवधिमत्त्वसम्बन्धेन पाटलिपुत्रस्यान्वयः तेन पाटलिपुत्रावधिकनिर्द्धारणविषया माथुरा आढ्यतरा इति बोधः । न चात्र निर्द्धा णावधेर्निर्द्धार्य्यमाणस्य च गोषु कृष्णेत्यादाविव सामान्यविशेषभावोऽस्ति प्रत्युत शब्दोपात्तयोर्धर्मयोर्विरोध एव" मनोरमा ।

निर्द्धारित त्रि० निर्+धारि–क्त । १निर्द्धारणविषये २निश्चिते च "निर्द्धारितेऽर्थे लेखेन कृतो खलु वाचिकम्" माघः ।

निर्द्धार्य्य त्रि० निर्+धारि–कर्मणि यत् । १निर्द्धारणकर्मणि सामान्यतः पृथक्कार्य्ये विशेषे यथा नराणां क्षत्रियः शूरतमः इत्यत्र शूरत्वेन नरान्तरेभ्यः पृथक् कार्यरूपविशेषः क्षत्रियः । २निश्चेये च । भावे यत् । ३अवधारणे न० । तादर्थ्यतेऽस्य अच् । ४निःशङ्कर्मकर्त्तरि रमानाथः । "निर्द्धार्य्यः कर्मकर्त्ता च संवृतः सत्यसम्मदा । व्यसनेऽभ्युदये वापि कृविकारं वदा मनः । तत्तु सत्यकृति प्रोक्तम्" शब्दार्थचि० धृतयाज्ञम् ।

निर्धूत त्रि॰ निर्+धू–कर्मणि क्त। निरस्ते "निर्धूतशीतमपि बालकसुङ्गतत्वम्" माघः।

निर्धापन निर्+धा–णिच्–भावे ल्युट्। सुश्रुतोक्ते शल्योद्धरणार्थे व्यापारभेदे "शल्योद्धारणहेतूपक्रमे "प्रमार्जनं निर्धापनं वमनम्" इत्यादिना विभज्य "आहारशेषस्नेहहीनानुशल्यानि स्वसनोत्कासनप्रधमनैर्निर्धमेत्" सुश्रु॰।

निर्बन्ध पु॰ निर्+बन्ध–भावे घञ्। आग्रहे अभिनिवेशभेदे "अवस्तुनिर्बन्धपरे कथं नु ते"कुमा॰"निर्बन्धसंजातरुषार्थकार्श्यम्" रघुः। निरः बध्नातेस्तदर्थत्वम् "तथापि निर्बन्धति! तेऽथ वा स्पृहाम्" नैष॰ प्रयोगात्।

निर्ब(र्ब)र्हण न॰ निर्+ब(ब)र्ह–भावे ल्युट्। निबर्हणे मारणे नीलकण्ठः।

निर्बाध त्रि॰ निर्गता बाधा यस्मात् प्रा॰ब॰। १अप्रतिबन्धे २निरुपद्रवे ३विविक्ते च शब्दार्थचि॰। ४निष्काश्ये च "परिमण्डलो ह्येष एकविंशतिनिर्बाध एकविंशो ह्येष बहिष्टाद्विबाधं विभर्त्ति रश्मयो वा एतस्य निर्बाधा वाहत उवा एतस्य रश्मयः"शत॰ब्रा॰ ६।७।१।२ "निर्बाधम् निर्बाध्यन्ते निःकाश्यन्ते उद्धताः स्वरूपाद्बहिर्निःसृता भवन्ति"यजु॰संपत्तव्याख्या। "परिमण्डल एकविंशतिनिर्बाधस्तस्योक्तो बन्धुरधस्ताद्विबाधस्तपदधाति रश्मयः" शत॰ब्रा॰७।४।१।१०"परिमण्डलोयर्तुलाकृतिः एकविंशतिसंख्याकैःपुञ्जकैर्युक्तः। उपधानसमये यथा निर्बाधानामधोभागाऽवस्थानं भवति तथा कर्त्तव्यम्" भा॰ ५मण्डलभागभेदे च पु॰"निर्बाधेनाग्निम्" यजु॰ २५।२"निश्चितं बाध्यते शिरोऽस्थिमध्यसंलग्नो मज्जाभागः तेन"। वेददी॰।

निर्बुष त्रि॰ निर्गतं बुषं यस्मात्। बुष–(भासडा) रहिते पूते धान्ये हेमच॰। निरुदकादि॰ अन्तोदात्तताऽस्य

निर्भट त्रि॰ निर्+भट–अच्। दृढे त्रिका॰।

निर्भय त्रि॰ निर्गतं भयमस्मात् प्रा॰ब॰। १भयरहिते त्रिका॰ 'निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्"मनुः। रौच्यमनोः २पुत्रभेदे पु॰ "सुनेतः चलदृष्टिश्च सुतपा निर्भयो दृढः" हरिवं॰ ७अ॰।

निर्भर न॰ निःशेषेण भरो भरणं भृतिर्वाऽत्र प्रा॰ब॰। १अतिमात्रे २तदुक्ते त्रि॰ अमरः "द्रुतपीतमाधवरसो सुनिर्भरैः सरजसभकरन्दनिर्भरासु" माघः। ३वेतनशून्ये भृत्ये च।

निर्भर्त्सन न॰ नितरां भर्त्सनम् प्रा॰स॰। १खनीकारे २अभिभवे। कर्मणि ल्युट। ३अनर्थके न॰ मेदि॰ "निर्भर्त्सनापवादैश्च तत्रैवाप्रियया गिरा" भा॰व॰ ३०२अ॰।

निर्भाग्य त्रि॰ निर्गतं भाग्यं यस्मात् प्रा॰ब॰। भाग्यरहिते अमरः। (बेगार) हेमच॰।

निर्भृति त्रि॰ निर्गता भृतिरस्य। वेतनशून्ये कर्मकरे

निर्मक्षिक अव्य॰मक्षिकायाः अभावः अव्ययी॰। १मक्षिकाया अभावे। निर्गता मक्षिका यस्मात् प्रा॰ब॰। २मक्षिकाशून्ये देशे ३तदुपलक्षिते निर्जने देशे"कृतं भवतेदानीं निर्मक्षिकम्"शकु॰प्राकृतानुवादः। निरुदकादि॰अन्तोदात्तताऽस्य।

निर्मज् त्रि॰ निर्–मृज–क्विप् वेदे पृषो॰। नितान्तशुद्धे "मृष्टं सुहस्तानु निर्मजामजे" ऋ॰ ८।४।२॰ "निर्मजां निःशेषेण शुद्धानां मवाम्" भा॰।

निर्मथ पु॰ निर्मथ्यतेऽनेन निर्+मथ–करणे ल्युट्। अग्निमन्थनदारुणि अरणौ हेमच॰। निर्मथननिर्मन्थनिर्मन्थन शब्दा अप्यत्र।

निर्मद त्रि॰ निर्गतो मदो दानजलं हर्षो गर्वो वा यस्मात्। १निरभिमाने २हर्षशून्ये ३दानजलशून्ये च "निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्" भा॰व॰ ९९अ॰।

निर्मन्थ्य न॰ निर्मन्थ्यते अग्न्युत्पादनार्थं दृश्यते नि+मन्थ–कर्मणि यत्। अग्न्युत्पादनार्थं दृश्यमाने दारुणि अमरः।

निर्मर्य्याद त्रि॰ निर्गतो मर्य्यादायाः निरा॰त॰। १मर्य्यादातीते २अविनीते "निर्मर्य्यादा स्वेच्छा ये पश्चिमदिक्स्थितास्ते च" बृ॰सं॰ १४अ॰।

निर्मल त्रि॰ निर्गतो मलो यस्य प्रा॰ब॰। मलहीने "नितान्तनिर्मलस्तात्तः" वेदान्तसारः "निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा" मनुः। मलश्च रागादिदोषः कालुष्यञ्च।

निर्मलोपल नित्यकर्म॰। स्फटिकोपले राजनि॰।

निर्मशक त्रि॰ निर्गतो मशको यस्मात् प्रा॰ब॰। मशकरहिते देशे निरुदका॰ अन्तोदात्तताऽस्य। अभावे अव्ययी॰। २मशकाभावे अव्य॰।

निर्मांस त्रि॰निर्गतं मांसमस्य प्रा॰ब॰। १मांसविहीने २आहाराभावेनातिकृशे तपस्विदरिद्रप्रभृतौ च "निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशान्" बृ॰सं॰ २अ॰।

निर्मांसवक्त्र पु॰ निर्मांसं वक्त्रमस्य। कुमारानुचरभेदे "कृष्णा निर्मांसवक्त्राश्च स्थूलपृष्ठास्तनूदराः" भा॰श॰ ४अ॰।

निर्माण न॰ निर्+मि–भावे ल्युट्। १घटादेः २रचनायाम्। "निर्माणदक्षस्य समीहितेषु" भट्टिः 'निर्माणस्य शरीरस्य

ततो धैर्य्यमवाप्नुहि" भा०व० २५१अ०। निर्मीयतेऽनेन करणे ल्युट्। निर्माणसाधने २कायादौ। क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय समुदाय प्रवर्त्तकः" कुसुमा०। कायस्य निर्माणसाधनत्वात् तथात्वम्। निर्माणार्थं कायं निर्माणकायमिति हरिदासः तत्तु न युक्तं कायाधिष्ठानस्यैव निर्माणार्थत्वेन कायस्य तथात्वाभावात्। निर्गतो मानात् निरा०त०। ३मानातीते। "पूर्वपदादिति"पा० असंज्ञायामपि आर्षे णत्वम्। "अनभ्रगणं व्योम निर्माणं घनगर्जितम्" रा०कि०४४अ०

निर्माल्य न० निर्+मल-ण्यत्। देवदत्ते तद्विसर्जनोत्तरसंस्पृष्टे द्रव्ये "अर्वाक् विसर्जनादुद्रव्यं नैवेद्यं सर्वमुच्यते। विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात्" गारुड़पु०। विद्यानन्दनिबन्धे "सूर्य्ये गणापतावुमे शाक्ते शैवेऽथ वैष्णवे। तेजश्चण्डमयोच्छिष्टसोमसुच्छिष्टपूर्विकाम्। चाण्डालीं शेषिकां चण्डं विष्वक्सेनं क्रमाद्यजेत्। सोमो गणेशः।" "हृदये च बहिर्देवी समर्थ्य विधिवत्ततः। निर्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः" तन्त्रान्तरे आ०त० निर्माल्यस्य धारणप्रकारादिकं निरूपितं यथा "निर्माल्यं शिरसा धार्य्यं सर्वाङ्गे चानुलेपनम्। नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्भक्तियालिने"। तद्भक्तियालिने विष्वक्सेनादये "उद्दास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः। अद्यादात्मविशुद्ध्यर्थं सर्वकामसमृद्धये"। स्वे धाम्नि स्वीयहृदये उद्दास्य संस्थाप्य तथाच कालिकापुराणे "ध्यायंस्तु मन्त्रेणानेन तत्तस्यं स्थापयेत् हृदि। तिष्ठ देवि! परे स्थाने स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि"। भविष्ये "निर्माल्यं नोपभोक्तव्यं रुद्रस्य तपनस्य च। भक्ष्यते यदि तन्मोहात्तरके पच्यते ध्रुवम्"। निर्माल्यमात्रे तु "उदके तरुमूले वा निर्माल्यं तस्य संत्यजेत्" कालिकापुराणे "यो यद्देवार्च्चनरतः स तत्रैवेद्यभक्षकः" ब्रह्मपु० "अम्बरीष! नवं वस्त्रं फलमन्यद्रसादिकम्। कृत्वा कृष्णोपभोग्यन्तु सदा सेव्यं हि वैष्णवैः" तत्रैककर्त्तरि ब्राह्मणत्वात् स्वदत्तनैवेद्यभक्षणेऽप्यधिकार उक्तः "केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्"। विष्णुयामले "पीत्वा पादोदकं देवि! नैवेद्यं स्वयमुद्धरेत्। त्यजेत् पादोदकं यस्तु नैवेद्यं वा त्यजेच्च यः। षष्टिवर्षसहस्राणि रौरवे नरके पचेत्"। उद्धरेत् अभ्यवहरेत्। स्कन्दयामले "उद्दास्य देवं स्वे धाम्नि सन्निवेदितमात्मनः। भक्षयेत् पापशुद्ध्यर्थं सर्वदा साधकः प्रिये!" शिवधर्मोत्तरे रुद्रनैवेद्यभक्षणमुक्तं यथा "अथ भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत्। तदन्नं स्वयमश्नीयात् तत् सर्वं विनिवेदयेत्"। "फलं पुष्पञ्च ताम्बूलम् अन्नपानादिकञ्च यत्। अदत्त्वा तन्महादेव्यै न भोक्तव्यं कदाचन"। एतेन यत् पठन्ति "अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत्" इति तदेकान्तवैष्णवपरमिति भूषणः। यत्तु "शूद्रान्नं याजकान्नञ्च नैवेद्यञ्चापि वर्जयेत्" इति लैङ्गवचनम्। तन्नैवेद्यत्वेनोपकल्पितानिवेदितपरं लोभादिना भोजननिषेधकं वा यथोक्तं शास्त्रे "नोपभुक्त्वा च नैवेद्यं प्रयाति प्रेतयोनिषु।" द्रव्यविशेषस्य कालभेदे निर्माल्यतोक्ता तन्त्रसा० योगिनीतन्त्रे यथा "मणिमुक्ता सुवर्णानि देवे दत्तानि यानि वै। न निर्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च। षट्पाटी च षण्मासं नैवेद्यं दत्तमात्रतः। मोदकं क्षरञ्चैव मासार्द्धेन महेश्वरि! षट्रसस्य त्रिमासाच्च यातयाममहः स्मृतम्। यावदुष्णं भवेदन्नं परमान्नं तथैव च। मस्तकं रुधिरञ्चैव अहोरात्रेण पार्वति!। सुहृर्त्तन्दधि-दुग्धञ्च आज्यं यामेन शङ्करि। करवीरमहोरात्रं बिल्वपत्रं तथैव च। जवारक्तञ्च माष्यं च निर्माल्यं सार्द्धयामके। माल्यं वै करवीरस्य पद्मस्य बिल्वजस्य च। यामार्द्धेन महेशानि! ताम्बूलं दत्तमात्रतः। अनिर्माल्यञ्च दाडिम्बं तथा बिल्वफलं प्रिये!। सौगन्धिकञ्च कदलीं प्रयत्नेन नियोजयेत्। कदलीबीजपूरञ्च दुग्धपक्वं निवेदयेत्।" शिवनिर्माल्यधारणे विशेषः ति०त० उक्तो यथा स्कान्दे "निर्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति। अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः। नरके पच्यते घोरे तिर्य्यग्योनौ च जायते। ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते!।" शुचिःस्नानादिनेति शेषः। एवञ्च "स्पृष्टा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः" इति कालिकापुराणीयमशुचिविषयम्। अनुपनीतविषयमिति श्रीदत्तः। बहुचण्डाद्यपरिशिष्टम्। अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलास्पर्शात् सर्वं याति पवित्रताम्" उदके निर्माल्यत्यागश्च नङ्गेतरपरः। यथोक्तं ब्रह्मपु० "गङ्गां पुण्यजलां प्राप्य चतुर्दश विवर्जयेत्। शौचमाचमनं केशं निर्माल्यं मलवर्षणम्"। २शुक्रायां स्त्री शब्दर०।

निर्मित त्रि॰ निर्+मा–क्त। कृतरचने "निजनिर्मितकारिकावलीम्" सि॰कौ॰।

निर्मिति स्त्री निर्+मा–भावे क्तिन्। निर्माणे करणे। "नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति" काव्यप्र॰।

निर्मुक्त पु॰निर्+मुच–क्त। १सुक्तकञ्चुके सर्पे (खोलसकाड़ा साप) निःशेषेण मुक्तः। निष्परिग्रहे २सङ्गरहिते ३बन्धशून्ये च अमरः। ४वियुक्ते मेदि॰ "हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव" रघुः।

निर्मुट न॰निर्गतं मुटं यस्मात् प्रा॰ब॰। १करशून्यहट्टे (मुटिशून्यहाट) हारा॰। २वनस्पतौ पु॰ त्रिका॰ ३सूर्य्ये ४खर्परे पु॰ हारा॰।

निर्मूल त्रि॰ निर्गतं मूलमस्य प्रा॰ब॰। मूलरहिते "आरुह्य दन्तान् निर्मूलान् गजः परिवृढश्चिव" भा॰उ॰ ७४अ॰।

निर्मूलन न॰निर्मूलं+कृतौ णिच–भावे ल्युट्। उत्पाटने

निर्मृजस् अव्य॰ निर्+मृज–"ईश्वरे तोसुन्कसुनौ" पा॰ तुमर्थे कसुन्। निर्मार्ष्टुमित्यर्थे "सूक्ष्मेव तु वा ईश्वराः पन्थानिर्मृजः" ताण्ड्यब्रा॰२ २ ३। "निर्मार्ष्टुमपगमयितुं विनाशयितुमीश्वराः समर्थाः" भा॰।

निर्मृष्ट त्रि॰ निर्+मृज–क्त। प्रोञ्छिते। "निर्मृष्टरागोऽधरः" सा॰ द॰।

निर्मोक पु॰निर्+मुच्–घञ्। १सर्पकञ्चुके (खोलस) २मोचने ३सन्त्राणे ४आकाशे च मेदि॰। "निर्मोकपत्रैः फणिभिर्विमुक्ताः" रघुः। ४सावर्णिमनोःपुत्रभेदे पु॰। "निर्मोकविरजस्काद्याः सावर्णेस्तनया नृप!" भाग॰८ १३ ६ अत्र निर्मोकेति पाठान्तरं तत्रार्थे।

निर्मोक्ष पु॰ निःशेषेण मोक्षः प्रा॰ स॰। निःशेषेण मोक्षे "अनिर्मोक्षप्रसङ्गः" भा॰प्र॰भा॰।

निर्मोह त्रि॰ निर्गतो मोहो यस्मात् प्रा॰ब॰। १मोहशून्ये रैवतमनोः २पुत्रभेदे पु॰ "अरण्यश्च प्रकाशश्च निर्मोहः सत्यवान् कृती। रैवतस्य मनोःपुत्राः" हरिवं॰ ७अ॰। ३सावर्णिमनोःपुत्रभेदे निर्मोकशब्दे दृश्यम्। त्रयोदशमन्वन्तरे काश्यपे ४सप्तर्षिभेदे "त्रयोदशेऽथ पर्य्याये भव्ये मन्वन्तरे मनोः" इत्युपक्रमे "निष्प्रकम्पस्तथात्रेयः निर्मोहः काश्यपस्तथा" हरिवं॰ ७ अ॰।

निस्त्रेतुका स्त्री निर्+स्त्रा–तनू संज्ञायां कन् पृषो॰। स्त्रानिशून्ये ओषधिभेदे "निस्त्रेतुकास्तत्र भवन्ति" पञ्च॰भी॰ ब्रा॰१२।८।१४।

निर्यन्त्रण न॰ निर्+यन्त्र–ल्युट्। १निष्पीडने निर्गतं यन्त्रणं यस्मात् प्रा॰ब॰। २यन्त्रणाशून्ये बाधाशून्ये ३निरर्गले ४उच्छृङ्खले त्रि॰जटा॰।

निर्याण न॰ निर्याति मदोऽनेन निर्+या करणे ल्युट्। १गजापाङ्गदेशे। भावे ल्युट्। २मोचने ३अध्वनिर्गमे च मेदि॰। ४निःसरणे ५प्राणवायोर्देहनिःसरणरूपमरणे च बन्धावधिकस्थानभेदस्यपरभेदैस्तज्ज्ञानं दृष्टज्ञातके निरूपितं यथा "मृत्युर्मृत्युगृहेशेन बलिभिस्तद्वातकोपोद्भवस्तत्संयुक्तभगात्मजो बहुभवो वीर्यान्वितैर्भूरिभिः। अन्यस्त्वायुधजो ज्वरामयकृतस्तृट्क्षुत्कृतश्चाष्टमे सूर्याद्यैर्निधने चरादिषु परस्थाध्वप्रदेशेऽपि। शैलाप्राभिहतस्य सूर्यकुजयोर्मृत्युः खबन्धुस्थ१ ४योः कूपे मन्दशशाङ्कभूमितनयैर्बन्धुस्तकर्म४।७ १०स्थितैः। कन्यायां स्त्रजनाद्रिमोक्षकरयोः पापग्रहैर्दृष्टयोः स्यातां यद्युभयोदयेऽर्कशशिनौ तोये तदा मज्जतः। मन्दे कर्कटगे जलोदरकृतो मृत्युर्मृगाङ्के मृगे शस्त्राग्निप्रभवः शशिन्यशुभयोर्मध्ये कुजार्के स्थिते। कन्यायां रुधिरोत्थशोषजनितस्तद्वत् स्थिते शीतगौ सौरे यदि तद्वदेव हिमगौ रज्ज्वग्निपातैः कृतः। बन्धाद्वी५नवमस्थयोरशुभयोः सौम्यग्रहादृष्टयोर्हिंस्राणैश्च सर्पपाशनिगडैः छिद्रस्थितैर्बन्धतः। कन्यायामशुभान्वितेऽस्तमयगे चन्द्रे स्थिते मेषगे सूर्ये कन्यगते च तद्वि मरणं स्त्रीहेतुकं मन्दिरे। शूलोद्भिन्नततुः सुखेऽवनिसुते सूर्येऽपि वा खे१० यमे सप्तस्थेषु हिमांशुभिश्च युगपत्पापैस्त्रिकोणाद्य५ ९ १गैः। बन्धु४स्थे च रवौ१० वियत्यवनिजे क्षीणेन्दुसंबोधिते काष्ठेनाभिहतः प्रयाति मरणं सूर्यात्मजेनेक्षिते। रन्ध्रास्त्रदाङ्गुहिबुकैः १० १ ४ खगुड़ाहताङ्गः प्रक्षीणचन्द्ररुधिरार्किदिनेशयुक्तैः। तैरेव कर्म१० नवमोदय१पुत्र५संस्थैर्धूमाग्निबन्धनशरीरनिकृन्तनाद्यैः। बन्धुस्तकर्म४।७।१०सहितैः कुजसूर्यमन्दैर्निर्याणमायुधशिखिक्षितिपालकोपात्। सौरीन्दुभूमितनयैः स्वसुखास्त्रदस्थै२ ४ १०र्क्षैयः क्षतलमिश्रतश्च शरीरपातः। ख१०स्थेऽर्केऽवनिजे रसातलगते वानप्रपातादुदधौ यन्त्रोत्पीडनजः कुजेऽस्तमयगे सौरेन्दिनाभ्युद्गमे। विष्णुमध्ये रुधिराकिशीतकिरणैर्भूकाजसौरर्क्षगैर्यातैर्वा गलितेन्दुसूर्यरुधिरैर्व्योमास्त्रबन्धा१० ७ १ह्रयात्। वीर्यान्वितवक्रवीक्षिते क्षीणेन्दौ निधनस्थितेऽर्कजे। गुल्मोद्भवरोगपीड़या मृत्युः स्यात् क्रमिशस्त्रदाहजः। अस्ते७

रवौ सरुधिरे निधनेऽर्कपुत्रे क्षीणे रसातलगते हिमगौ खगान्तः। लग्नात्मजाष्टमतपः१५८६स्थिते भौममन्दचन्द्रैस्तु शैलशिखराशनिकुञ्जपातैः। द्वाविंशः कथितस्तु कारणं द्रेक्काणो निधनस्य सूरिभिः। तस्याधिपतिर्भवोऽपि वा निर्याणं स्वगुणैः प्रयच्छति। क्रोरानवांशकपयुक्तसमानभूमौ योगेक्षणादभिरतः परिकल्प्यमेतत्। मोहस्तु मृत्युसमयेऽनुदितांशतुल्यः खेऽंशेऽन्विते द्विगुणितस्त्रिगुणः शुभैश्च। दृङ्नजलविमिश्रैर्मसंक्रान्तिदशोभैर्निधनभक्रसंस्थैर्व्यालवर्गैर्विहीनः। इति शवपरिणामश्चिन्तनीयो यथोक्तः पृथुविरचितशास्त्राद्यत्यनूकादि चिन्त्यम्। गुरुरङ्गपतिशुक्रौ सूर्यभौमौ यमस्तौ विबुधपितृतिरश्चोर्नीरकीयांश कुर्युः। दिनकरशशिवीर्याधिष्ठिता लग्नगनाथात् प्रवरसमनिकृष्टास्तुङ्गहासादनूके। गतिरपि रिपुरन्ध्रलग्नयोऽस्तस्थितो वा गुरुरथ रिपुकेन्द्रच्छिद्रगः स्वोच्चसंस्थः। उदयति भवनेऽन्ये सौम्यभागे च मोक्षो भवति यदि बलेन प्रोज्झितास्तत्र शेषाः। इति नैर्याणिकाध्यायः"। "नेष्टा योगा जातकं कामिनीनां निर्याणं स्यात्सृष्टजन्मद्रिकाणः" इत्युपसंहाराध्याये तथोक्तम्। निर्गतं यानमस्मात् प्रा०ब० "संज्ञायां पूर्वपदात्" पा० अत्वम्। पशूनां पादबन्धने ह्रदामनि वैज० "निर्याणहस्तस्य पुरो दुधुवतः" माघः।

निर्यातक त्रि० निर्यातं निर्याणं बहिष्करणं तत् करोति णिच्-ण्वुल्। निर्हारके। "अनग्नयश्च ये विप्राः प्रेतनिर्यातकास्तथा" भा० अनु० २३ अ०। "मृतनिर्यातकाश्चैव परदाररताश्च ये" मार्कण्डे २५ अ०।

निर्यातन न०निर्+यत-णिच् ल्युट्। १वैरशुद्धौ, २प्रतीकारे ३प्रतिदाने ४न्यासमर्पणे च अमरः। ५मारणे हेमच०। ६ऋणादेः शोधने च। "विगणनऋणनिर्यातनम्" सि० कौ०। "नह्यन्यस्य भवेच्छक्तिर्वैरनिर्यातनं प्रति" हरिवं०

निर्यात्य त्रि० निर्+याति-कर्मणि यत्। १शोधनीये २प्रतिदेये च "कन्या चैवं न चान्यस्य निर्यात्यानेन सङ्गता" हरिवं० १७७ अ०।

निर्याम पु० निर्+यम-घञ्। पोतवाहे हेमच०।

निर्यास पु०न० निर-यस-घञ् अर्ज्जा०। १क्वाथे २काथे शब्दमा०। ३वृक्षादिक्षीरे वृक्षात् निर्गत्य कठिनतां याते वृक्षरसभेदे (आठा) रत्नमा०"गालनिर्यासनस्निग्धैः" रघुः। "लोहितान् वृक्षनिर्यासान्" मनुः। ४निष्यन्दि लवादौ च कंसस्याथ सुखखेदो भूमेर्दान्तरगोचरः। अभवद्रोषनिर्यासः" हरिवं० ८७अ०। निर्यासस्यादूरदेशादिः कुत्सदा०ठच्। निर्यासिक तत्सन्निकृष्टदेशादौ त्रि०।

निर्यूष पु० नितरां यूषः प्रा० स०। निर्यासशब्दार्थे शब्दमा०

निर्यूह पु० निर्+ऊह-क पृषो०। १मत्तवारणे वैजयन्ती तद्दन्ताकारतया निर्मिते २नागदन्ते द्वारवेदिकायां काष्ठभेदे अमरः। ३शेखरे ४आपीडे ५द्वारे ६काथे निर्यासे मेदि०। "वितर्दिनिर्यूहविटङ्कनीड़ः" माघः। द्वारतोरणनिर्यूहैर्युक्तमभ्रचयोपमैः" भा०आ०१०८ अ० तत्र आपीडे "खड्गकार्मुकनिर्यूहैः शरैश्च विविधैरपि" भा० उ०१८ अ०। कार्मुकस्य निर्यूहैः आपीडैरिव शरैरित्यर्थः। [२पाण्डुरपृष्ठे हेम०।

निर्लक्षण त्रि० निर्गतं लक्षणमस्य प्रा०ब०। १शुभलक्षणशून्ये

निर्लिप्त त्रि० निर+लिप-क्त। १लेपरहिते २सम्बन्धशून्ये निःसङ्गे। "निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः" ब्रह्मवै०पु०।

निर्लुञ्चन न० निर्+लुञ्च-भावे ल्युट्। वितुषीकरणादौ "नखनिर्लुञ्चनादिभिरपि तत्कार्यसिद्धेः" कात्या०श्रौ० १६६ सू० कर्कः।

निर्लुण्ठन न० निर्+लुठि-भावे ल्युट्। अपहरणे (लोटा) "अङ्गानीव परस्परं विदधते निर्लुण्ठनं भ्रुवः" सा०द०।

निर्लेखन न० निर्+लिख-भावे ल्युट्। १मलादेरपसारणे (आँचड़ान) करणे ल्युट्। २तत्साधने "जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्त्तमेव च" सुश्रुतः।

निर्लेप त्रि० निर्गतो लेपः सम्बन्धोऽङ्गलेपनं वा यस्य प्रा०ब०। १परिणामहेतुसंयोगादिशून्ये २अङ्गलेपनरहिते च "लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रयेति सहापाशुपताः" कुसुमा०। "निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" मनुः।

निर्लोमन् त्रि० निर्गतं लोम यस्य। लोमरहिते (टाक) रोगयुक्ते। तद्रोगस्तु "पट्टसूत्रस्य हरणात् निर्लोमा जायते नरः" शाता० उक्तेः पट्टसूत्रहरणाज्जायते।

निर्व्वयनी स्त्री नितरां वयति अहिरस्याम् त्वचि ल्युट ङीप् पृषो०। सर्पत्वचि (खोलस) "तद्यथाऽहिनिर्व्वयनी वल्मीके मृता प्रत्यस्ता शयीत" बृह०उप०। "अहिनिर्व्वयनी सर्पनिर्मोकः वल्मीके सर्पाश्रये वल्मीकादावित्यर्थः प्रत्यस्ता प्रतिक्षिप्ता मृताऽनात्मभावेन सर्पेण परित्यक्ता मृता शयीत" भा०।

निर्वक्तव्य त्रि० निर्+वच-कर्मणि तव्य। अवयवार्थकथनेन प्रतिपाद्ये निर्वाच्यनिर्वचनीयावयव।

निर्वचन न० निर्+वच–भावे ल्युट्। १निरुक्तौ अवयवार्थ कथने। २प्रसिद्धे च "न निर्मन्युः क्षत्रियोऽस्ति लोके निर्वचनं स्मृतम्" भा० व० २७ अ०। "सत्यं स्नेने बलं नार्यां राज्यं दुर्योधने तथा। दातं लोके निर्वचनं लोके चरति भारत" भा० व० ३३अ०।

निर्गतं वचनं यस्य प्रा० ब०। वचनशून्ये ३तूष्णीमित्यर्थे "माल्येन तां निर्वचनं जघान" कुमा०। ४वचनरहिते वक्तव्यताशून्ये त्रि० "येषां तडागानि महोदकानि वाप्यश्च कूपाश्च प्रतिश्रयाश्च। अन्नस्य दानं मधुरा च वाणी यमस्य ते निर्वचना भवन्ति" भा० व० १९९ अ०।

निर्वण त्रि० निर्गतो वनात् निरा०त० प्रणिरन्तरित्यादिना असंज्ञायामपि अत्वम्। वनान्निष्क्रान्ते "निर्वणो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम्" भा०उ० २८अ० अस्य "वनं समासे" पा० समासमात्रे वनान्तत्वेनान्तोदात्तता।

निर्वपण न० निर्+वप–भावे ल्युट्। १दाने २अन्नादीनां संविभागे च। "परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि" कात्या० श्रौ० ८।२।१। "अनवेक्षिता कार्य्यं पिण्डनिर्वपणं सुतैः" मनुः।

निर्वर त्रि० निर्गतो वरो वरणमस्य। १निर्लज्जे कठिने २निर्भये ३सारे च हेमच०। अत्र निर्दर इत्येव पाठः सुहृद्दोषात् निर्वर इति पाठोऽसाधुः। अतएव मेदिनीकोषे निर्दरं निर्भये सारेऽन्यवत्तु कठिनेऽत्रपे" इत्युक्तम्।

निर्वर्णन न० निर्+वर्ण "सत्यापपाशेति" पा०णिच् भावे ल्युट्। दर्शने त्रिका०।

निर्वर्त्तित त्रि०निर्+वृत–णिच्–कर्म्मणि क्त। निष्पादिते।

निर्वर्त्य त्रि० निर्+वृत–णिच्–कर्मणि यत्। निष्पाद्ये व्याकरणपरिभाषिते कर्मभेदे न०"तन्निर्वर्त्यं विकार्य्यञ्च कर्म द्वेधा व्यवस्थितम्" हरि० कर्मनृशब्दे १७७१ पृ०दशग्रम्।

निर्वहण न० निर्+वह-भावे ल्युट्। १नाट्योक्तौ प्रस्तुतकथासमाप्तौ २प्रकृताभिनयस्य निर्वाहे, नाटकसन्ध्यादेरङ्गभेदे तस्याङ्गानि सन्ध्यादीनि यथोक्तं सा०द० "सन्धिर्विबोधो यत्नं निर्णयः परिभाषणम्। छतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्। भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च। प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः"। युच्। निर्वहणा निष्ठायाम् स्त्री।

निर्वाच् त्रि० निर्+अच–अनृच–क्विप् अवोपसर्गस्य अङ्लोपः। निर्गते "तस्मादिमे प्राणा विष्वञ्चोऽवाङ्चोऽहुनिर्वाञ्चि" शा०ब्रा० ७।९।

निर्वाण त्रि० निर्+वा–क्त। "निर्वाणोऽवाते" पा० तस्य नः। १शान्ते वह्निसुन्यादौ २चरमाश्रमस्थे सुनौ ३निश्चले ४शून्ये शब्दर०। भावे क्त। ५अस्तगमने ६निर्वृतौ ७गजमज्जने ८सङ्गमे ९अपवर्गे मोक्षे मेदि०। १०विनाशे यादवः ११विम्लानौ हेमच०। "निर्वाणोत्थानशयनानि त्रीणि गजकर्माणीति" पालकाव्योक्ते १२गजकर्मभेदे। "अरुन्तुदमिवाज्ञानमनिर्वाणस्य दन्तिनः" रघुः। "अनिर्वाणस्य मज्जनरहितस्येति" मल्लि०। "कुरुतेऽस्मिन्नगोचेऽपि निर्वाणाज्ञातलाघवम्"। "निर्वाणभूयिष्ठमथास्य वीर्य्यम्" कुमा०। निर्वृतौ "स्वर्लोकस्थो गात्रनिर्वाणमत्र" माघः। "यतितव्यं समत्वेन निर्वाणमपि चेच्छता" "समत्वबुद्धेर्निर्वाणं फलमुक्तं श्रुतौ स्मृतौ सर्वदुःखोपरमणलक्षणं ब्रह्मणि स्थितिः" "स्थित्वाऽस्यामन्तःकालेऽपि ब्रह्म निर्वाणमृच्छति" "स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति" गीता। सर्वदुःखोपरमात्मकत्वात् निरतिशयानन्दरूपत्वाच्च परमपुरुषार्थकैवल्यरूपं ब्रह्म निर्वाणमृच्छति इत्यर्थः। १२चादिगुरुके (ऽ।) त्रिकले मात्रागणभेदे १३विद्योपदेशग्रन्थभेदे यथा निर्वाणतन्त्रादि। नाभिदेशे जप्ये १४प्रणवपुटितमातृका पुटितस्वाभीष्टमन्त्रे। "कुलुकां मूर्द्ध्नि संजप्य हृदि सेतुं विचिन्तयेत्। महासेतुं विशुद्धे तु षोडशारे समुच्चरेत्। मणिपूरे तु निर्वाणं महाकुण्डलिनीमधः। स्वाधिष्ठाने कामबीजं राकिणीमूर्ध्नि संस्थितम्। विचिन्त्य विधिवद् देवि! मूलाधारान्निकाच्छिवे!। विशुद्धान्तं चरेद्देवि! विसतन्तुतनीयसीम्। देवीस्थानं द्विजिह्वान्तं मन्त्रमूलाहतं सुधः"। तत्र निर्वाणं यथा "अथ वक्ष्यामि निर्वाणं शृणु सारहितानघे। प्रणवं पूर्वसञ्चार्य्य मातृकाद्यं समुच्चरेत्। मातृकार्णां समस्ताञ्च पुनः प्रणवमुच्चरेत्। एवं पुटितमूलन्तु प्रजपेन्मणिपूरके। एवं निर्वाणमीशानि! यो न जानाति पामरः। कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते" आगमविलासतन्त्रम्।

निर्वाणमण्डप पु० काशीस्थे शक्तिमण्डपाख्ये तीर्थभेदे।

निर्वाणमस्तक पु० निर्वाणं निर्वृतिर्मस्तकमिव यत्र। मोक्षे त्रिका०।

निर्वाणरुचि त्रि० निर्वाणे रुचिरस्य। १मोक्षसाधनासक्ते एकादशमन्वन्तरे २देवभेदे "महर्षिर्धर्मसावर्णिरेकादशम आत्मवान्" इत्युपक्रमे "विरजसः कामगमा निर्वा-

चरचयः सुराः" भागवते ८ १: १२ श्लोकः ।

निर्वाणी स्त्री जैनानां १शासनदेवताभेदे हेम० । निर्गता वाणी यस्य बा० कप् न । २वाक्यरहिते तूष्णीम्भूते कपि निर्वाणीकोऽप्यत्र त्रि० ।

निर्वात त्रि० निर्गतो वातो यस्मात् प्रा० ब० । वायुशून्यदेशे । निर्+वा–क्त निर्वाणोऽवाते पा० न तस्य नः । २निर्गते वाते हेमच० । "अक्षुब्धमिव सूर्य्येण निर्वातं इव वायुना" भा० स० ३५ अ० ।

निर्वाद पु० निर्+वद–घञ् । निकृष्टवादे १लोकापवादे अमरः । "किमात्मनिर्वादकथाप्रसङ्गे" रघुः । नितरां वादः । २निश्चितवादे क्षीरस्वामी । अभावेऽव्ययी० । ३वादाभावे अव्य० ।

निर्वाप पु० निर्+वप–भावे घञ् । १दाने, प्राग्रपिण्डलोकोद्देशेन २दाने च । "अमावास्यां तु निर्वापात् सर्वकामानवाप्नुयात्" भा० अनु० ८७ अ० ।

निर्वापण न० निर्+वप णिच्,–वा–वा णिच्–पुक् ल्युट् । १मारणे वधे अमरः । २दाने च हलायु० । (निवान) ३निर्वाणतासम्पादने । "तप्तायःपिण्डसिकतानां वा निर्वापणं प्रवाधनञ्च कर्त्तव्यम्" सुश्रुतः । "दाहपाकस्वरवतां कार्य्यं निर्वापणं भवेत्" सुश्रुतः । "दीपनिर्वापणात् पुंसः कुष्ठाण्डच्छेदनात् स्त्रियः" ति०त० ।

निर्वार्य्य न० निर्+वृ–ण्यत् । निःशङ्ककर्म्मकर्त्तरि सत्वसम्पदा उद्यमेन कार्यकर्त्तरि अमरः । भयविक्रमव्यसनाभ्युदयादौ निर्विकारं मनः सत्वम् तत् सम्पदा सम्पतन् उद्यमं कुर्वन् योनिःशङ्को भूत्वा कर्म्म कुरुते स निर्वार्य्य इत्युच्यते ।

निर्वासन पु० निर्+वस–णिच् भावे ल्युट् । पुरादितो बहिष्करणे १निःसारणे २मारणे हिंसने ३विसर्ज्जने च मेदि० "ततो दुर्योधनः क्रूरः कर्णश्च बहुसौबलः । तेषां निर्यातनिर्वासान् विविधांस्ते समारभन्" भा०आ० ६१ अ० "निर्वासनञ्च नगरात् प्रव्रज्या च परन्तप !" भा० उ० ८९ अ० ।

निर्वास्य त्रि० निर्+वस–णिच्–कर्म्मणि यत् । नगरादितो बहिष्कार्य्ये "कन्यां लताङ्गो निर्वास्यः स्त्रियं वाऽस्यावकर्त्तयेत्" मनुः । "निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च" याज्ञ० ।

निर्वाह पु० निर्+वह–घञ् । १कार्य्यसम्पादने २निष्पादने ३समाप्तौ च । "यावता स्यात् स्वनिर्वाहः साकुर्य्यात्तावदेव हि" नारदीयपु० "स्वतिथ्या कर्म्मनिर्वाहे" ति०त० ।

निर्विकल्प(क) त्रि० निर्गतो विकल्पो ज्ञातृज्ञेयादिविभागो विशेषणविशेष्यतासम्बन्धो वा यस्मात् प्रा०ब० वा कप् । १वेदान्तोक्ते ज्ञातृज्ञेयादिविभागशून्ये ब्रह्मात्मैकात्मविषये अखण्डाकारके एकविषयके विशेषणविशेष्यतासम्बन्धरहिते ज्ञाने, "आत्मारामा विहितरतयो निर्विकल्पे समाधाविति वेणी० । "तत् प्रमा नाप्रमा नापि ज्ञानं यन्निर्विकल्पकम् । प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत्" इति न्यायोक्ते अलौकिके आलोचनात्मके २ज्ञानभेदे । "ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते" भाषा० । आलोचनशब्दे ८२६ पृ० द्रष्टव्यम् । बौद्धमते निर्विकल्पकज्ञानमेव प्रमाणं कल्पनाशून्यत्वात् तद्भिन्नं सर्वमप्रमाणं यथोक्तं सर्वदर्शनसंग्रहे "ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात् । तदुक्तम् "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम् । विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः । ग्राह्यं वस्तु प्रमाणं हि ग्रहणं यदितोऽन्यथा । न तद्वस्तु न तज्ज्ञानं शब्दलिङ्गेन्द्रियादिजमिति" च । ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्वद् मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्य्येणार्थप्रतिबन्धसम्भवेन तदुपपत्तेः" ।

निर्विकार पु० प्रकृतेरन्यथाभावः विकारः स निर्गतोयस्मात् प्रा०ब० । जन्मादिषड्भावविकारहीने १परमात्मनि । २विकारशून्ये त्रि० । "त्वयेह भवने मह्यं वस्तव्यं निर्विकारया" हरिवं० ९अ० । "सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्विक उच्यते" गीता ।

निर्विचार त्रि० निर्गतो विचारो यतः प्रा०ब० । १विचाररहिते "रे रे स्वैरिणि ! निर्विचारकविते ! मामत् प्रकाशीभव" चन्द्राको० । पात० सूत्रोक्ते सूक्ष्मविषयके समापत्तिरूपे २समाधिभेदे च "एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता" पात० सू० । "तत्र भूतसूक्ष्मेत्वभिव्यक्तधर्म्मकेषु देशकालनिमित्तानुभवावच्छिन्नेषु या समापत्तिः सा सविचारेत्युच्यते । तत्राप्येकबुद्धिनिर्ग्राह्यमेवोदितधर्म्मविशिष्टं भूतसूक्ष्ममालम्बनीभूतं समाधिप्रज्ञायामुपतिष्ठते । या पुनः सर्वथा सर्वतः शान्तोदिताव्यपदेश्यधर्म्मानवच्छिन्नेष

सर्वधर्म्मानुपातिषु सर्वधर्मात्मकेषु समापत्तिः सा निर्विचारेत्युच्यते एवं स्वरूपं हि तत् भूतसूक्ष्मम् एतेनैव स्वरूपेणालम्बनीभूतमेव समाधिप्रज्ञास्वरूपमुपरञ्जयति। प्रज्ञा च स्वरूपशून्येव अर्थमात्रा यदा भवति तदा निर्विचारेत्युच्यते। तत्र महावस्तुविषया सवितर्का, निर्वितर्का च सूक्ष्मविषया सविचारा निर्विचारा च एवमुभयोरेतयैव निर्वितर्काया विकल्पहानिर्व्याख्यातेति" भा॰ "निर्विचारवैशारद्ये अध्यात्मप्रसादः" सू॰। "अणुत्वावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यं यदा निर्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा योगिनो भवति अध्यात्मप्रसादः भूतार्थविषयः क्रमानुरोधी स्फुटप्रज्ञालोकः। तथाचोक्तं "प्रज्ञाप्रासादमारुह्य अशोच्यः शोचतो जनान्। भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुपश्यति" भाष्यम्। [न्देहे।

निर्विचिकित्स त्रि॰ निर्गता विचिकित्सा यस्य प्रा॰ब॰। निःस-

निर्वितर्क त्रि॰ निर्गतो वितर्को यस्मात् प्रा॰ ब॰। १वितर्कशून्ये पात॰सू॰ उक्ते २समाधिभेदे तल्लक्षणादिकं तत्रोक्तं यथा "स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का" सू॰ "शब्दार्थस्मृतिप्रविलये सति प्रत्युदितस्वरूपाकारप्रतिभासिततया व्यङ्ग्यभूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः" भा॰।

निर्विण्ण त्रि॰ निर+विद्-क्त निर्विण्णस्योपसंख्यानात् दस्य नत्वं षत्वटुत्वे। १निर्वेदयुक्ते २खिन्ने ३प्राप्तवैराग्ये विरक्ते च। "निर्विण्णोऽहं दृढ़ेन मार्गेण गतागतलक्षणेन" दशोप॰ भा॰।

निर्विन्ध्य त्रि॰ निर्गतः विन्ध्यात् नि॰त॰। १विन्ध्यपर्वतनिःसृते। तथाभूते २नदीभेदे स्त्री "गोदावरी निर्विन्ध्या पयोष्णी इत्यादि" भाग॰ ५ २१८ भारतवर्षनद्युक्तौ। "निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य" मेघ॰। "नर्म्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः। तापी पयोष्णी-निर्विन्ध्या-कावेरीप्रमुखा नदी" विष्णुपु॰।

निर्विशेष न॰ निर्गतो विशेषो यस्य प्रा॰ ब॰। सर्वदैवरूपे विशेषरहिते परब्रह्मणि। "निर्विशेषं परं ब्रह्म साक्षात्कर्त्तुमनीश्वराः। ये मन्दास्ते तु कल्प्यन्ते सविशेषनिरूपणैः" विशेषरहिते तत्स्वरूपे त्रि॰। "प्रवातनीलोत्पलनिर्विशेषम्" कुमा॰।

निर्विष त्रि॰ निर्गतं विषं यस्मात् प्रा॰ ब॰। १विषरहिते २अविषायां तृणभेदे स्त्री। "निर्विषा कटुका शीता कफवातास्रदोषनुत्। अनेकविषहन्त्री च व्रण भूतकारिणी" राजनि॰। गौरा॰ ङीष् निर्विषी श्यामकन्दायां स्त्री। इयं चतुर्विधा भवति "रक्ता श्वेता भृशं कृष्णा पीतवर्णा तथैव च। यथापूर्वञ्च विज्ञेया बल्या श्रेष्ठा गुणोत्तमा। सर्वदोषहरी लेपाद्भुक्ताश्वयथुनाशिनी। श्लेष्मजान् विंशतिरोगान् सद्यो हन्यात् निषेवणादिति" भावप्र॰।

निर्विष्ट त्रि॰ निर्+विश-क्त। १कृतनिर्विशे २कृतभोगे ३प्राप्तवेतने ४कृतविवाहे ५कृताग्निहोत्रे च। "ज्येष्ठेऽनिर्विष्टे कनीयान् निर्वेशात् परिवेत्ता भवति" उद्दा॰ त॰ स्मृतिः। ६भोग्ये च। "स्वनिर्म्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान्" भा॰ १२ अ॰। ७भुक्ते च "निर्विष्टविषयस्नेहः" रघुः। "निर्विष्टं वैश्यशूद्रयोः" गौतम॰। निर्विष्टं वेतनकर्म्म" निर्वेशो भृतिभोगयोरित्युक्तेः" एका॰ त॰ रघु॰। निर्वेशः भृतिर्वेतनं भोगश्च।

निर्वीज त्रि॰ निर्गतं बीजमस्य। १बीजशून्ये २कारणरहिते पात॰ उक्ते ३समाधिभेदे पु॰।

"तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" पात॰ सू॰ "स न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृतानां संस्काराणामपि प्रतिबन्धा भवति। कस्मात्? निरोधजः संस्कारः समाधिजान् संस्कारान् बाधते इति निरोधस्थितिकालक्रमानुभवेन निरोधचित्तकृतसंस्काराणां स्थितिमनुमेयम्, व्युत्थाननिरोधसमाधिप्रभवैः सह कैवल्यभागीयैः संस्कारैश्चित्तं स्वस्यां प्रकृतावस्थितायां प्रविलीयते तस्माच्चे संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवो भवन्तीति यस्मादवस्थिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं विनिवर्त्तते तस्मिन्निवृत्ते पुरुषः स्वरूपप्रतिष्ठः। अतः शुद्धो मुक्त इत्युच्यते" भा॰ "तस्यापि निरोधे सर्वनिरोधात् निर्बीजः समाधिः। परेण वैराग्येण ज्ञानप्रसादमात्रलक्षणेन सर्वसंस्कारोपजननद्वारा तस्यापि प्रज्ञाकृतस्य संस्कारस्य निरोधे न केवलं प्रज्ञाया इत्यपिशब्दार्थः सर्वस्योत्पद्यमानस्य संस्कारप्रज्ञाप्रवाहस्य निरोधात् कारणाभावेन कार्य्यानुत्पादनात् सोऽयं निर्बीजः समाधिः। व्याचष्टे स निर्बीजः समाधिः समाधिप्रज्ञाविरोधिनः परस्मात् वैराग्यात् उपजायमानसंस्कारद्वारेण न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृता-

नासम्यसौ संस्काराणां परिपन्थी भवति । ननु वैराग्यजं विज्ञानं सदविज्ञानं प्रज्ञामात्रं बाधतां संस्कारस्त्वविज्ञानं कथं बाधते दृष्टा हि स्वप्नदृष्टार्थस्मृतिरित्याशयवान् पृच्छति । कथमिति उत्तरं निरोधज इति निरुध्यतेऽनेन प्रज्ञेति निरोधः परं वैराग्यं ततो जातो निरोधजः संस्कारः, संस्काराद्येव दीर्घकालनैरन्तर्यसत्कारासेवितपरवैराग्यजन्मनः प्रज्ञासंस्कारबाधो नतु विज्ञानादित्यर्थः । स्यादेतन्निरोधजसंस्कारसद्भावे किं प्रमाणं स हि प्रत्यक्षेण नानुभूयते स्मृत्या वा कार्य्येणानुमीयेत न च सर्ववृत्तिमात्रनिरोधे प्रत्यक्षमस्ति योगिनः, नापि स्मृतिः तस्य वृत्तिमात्रनिरोधितया स्मृतिजनकत्वासम्भवादित्यत आह निरोधेति । निरोधे स्थितिः चित्तस्य निरुद्धावस्थेत्यर्थः । तस्याः कालक्रमो मुहूर्त्तार्द्धयामयामाहोरात्रादिस्तदनुभवेन । एतदुक्तं भवति वैराग्याभ्यासप्रकर्षानुरोधी निरोधप्रकर्षो मुहूर्त्तार्द्धयामादिव्यापितयानुभूयते योगिना, न च वैराग्यक्षणाक्रमनियततया परस्परमसम्भवन्तस्तत्तत्कालव्यापितया सातिशयं निरोधं कर्त्तुमीशत इति तत्तद्वैराग्यक्षणप्रचयजन्यः स्थायी संस्कारः प्रचयएवितव्य इति भावः । ननु छिद्यन्तां प्रज्ञासंस्काराः, निरोधसंस्कारास्तु कुतः सहच्छिद्यन्ते अनुच्छेदे वा साधिकारत्वमेव इत्यत आह व्युत्थानेति । व्युत्थानस्य तस्य निरोधसमाधिश्च सम्प्रज्ञातः तत्प्रभवाः संस्काराः कैवल्यभागीया निरोधजाः संस्कारा इत्यर्थः । व्युत्थानप्रज्ञासंस्काराचित्ते प्रलीना इति भवति चित्ते व्युत्थानप्रज्ञासंस्कारवत्, निरोधसंस्कारस्तु प्रत्युस्थित एवास्ते चित्ते । निरोधसंस्कारे सत्यपि चित्तमनधिकारवत्, पुरुषार्थजनकं हि चित्तं साधिकारं शब्दाद्युपभोगविवेकख्याती च पुरुषार्थौ संस्कारशेषतायां तु न बुद्धेः प्रतिसंवेदी पुरुष इति नासौ पुरुषार्था विदेहप्रकृतिलयानां न निरोधभागितया साधिकारं चित्तमुपैति तु क्लेशवासितमेत्याशयवानाह यस्मादिति । शेषं सुगमम्" विव० । २काकलीद्राक्षायां स्त्री राजनि० ।

निर्वीर त्रि० निर्गतो वीरः शूरः पतिः पुत्रो वा यस्य यस्या वा प्रा०ब० । १वीरशून्ये "केनापीदमहो महद्वनुरतो निर्वीरसर्वोर्वितलम्" महाना० । २पतिपुत्रविहीनायामवीरायां स्त्रियां स्त्री हेमच० ।

निर्वृत त्रि० निर्+वृ-क्त । सुखे ।

निर्वृति स्त्री निर्+भावे क्तिन् । १स्वास्थ्ये सुखे २मोक्षे हेमच० । "न जातु कामो कामानामुपभोगेन शाम्यति" । "सर्व्वर्त्तुनिर्वृतिकरे निवसन्नुपैति" माघः ।

निर्वृत्त त्रि० निर्+वृत-क्त । १निष्पन्ने अमरः । "विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी । निर्वृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते" शु० त० अङ्गिराः ।

निर्वृत्तशत्रु पु० द्वापरयुगीये यदुवंश्ये नृपभेदे । "दृष्ट्वा प्रन्वेषु चान्येषु सुख्येषु मधुसूदनः । गुरुमासाद्य तं भारं ययौ द्वारवतीं पतिः" "रामे भारं समासाद्य युयुधाने च वीर्य्यवान् । अक्रूरे विपृथौ चापि" इत्युपक्रमे "निर्वृत्तशत्रौ विक्रान्ते भङ्गाकारे विदूरथे" इत्यभिहितम् हरिवं० ११७ अ० ।

निर्वृत्ति स्त्री निर्+वृत-भावे क्तिन् । निष्पत्तौ "वाचि प्राणे च पश्यन्तो यत्तन्निर्वृत्तिमद्भयाम्" मनुः । "न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः" सां०का० । "यथा दृष्टेन दोषेण यथा चाहुविषर्पता । निर्वृत्तिरामयस्यैव संप्राप्तिर्जातिरागमैः" माधवनिदानम् । निर्गता वृत्तिर्जीविका यस्य । २जीविकारहिते त्रि० ।

निर्वेद पु० निर्+विद-भावे घञ् । १स्वावमाननायाम् । स च व्यभिचारिभावभेदः "निर्वेदो वेगदैन्यश्रमगर्वजडतेत्यादिना व्यभिचारिभावान् विभज्य सा० द० उक्तो यथा "तत्त्वज्ञानापदीष्टार्थैर्निर्वेदः स्वावमानना । दैन्यचिन्ताऽश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत्" अस्य व्यभिचारिभावत्वेऽपि क्वचित् स्थायिभावत्वद्योतनार्थं प्राग् निर्देशः अतएव "निर्वेदस्थायिभावोऽपि शान्तोऽस्ति नवमो रसः" काव्यप्र० उक्तम् । एतन्मते निर्वेद एव शान्तरसे स्थायिभाव इति भेदः । २परमवैराग्ये "ततः कदाचिन्निर्वेदात् निराकारान्त्रितेन च । लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मया" भा० शा० "तदा गन्तासि निर्निर्वेदं श्रोतव्यस्य श्रुतस्य च" गीता "जातनिर्वेदशङ्का स कर्मनिर्वेदमब्रवीत् । कर्म्मनिर्वेदशङ्का च धर्म्मनिर्वेदमब्रवीत्" भा०शा०२१८अ० । ३खेदे "अनिर्वेदः सदा कार्य्यो निर्वेदाद्धि कुतः सुखम् । प्रयत्नात् प्राप्यते ह्यर्थः कस्माद् गच्छत निर्दयाः" १५२ अ० । ४बहुकालेनाप्यसिद्धपदार्थेषु निष्प्रयोजनत्वज्ञानेनानुतापभेदे च । [शब्दे १७१२ पृ० दृश्यम् ।

निर्वेधिम पु० सुश्रुतोक्ते कर्णवेधनाकारभेदे कर्णव्यधविधि-

निर्वेश पु० निर्+विश-घञ् । १भोगे, २वेतने , ३मूर्च्छने,

मेदि० । ४विवाहे च अमरः । "कालमेव प्रतीक्षते निर्वे(र्दे)शं भृतको यथा" मनुः । "अर्थानुक्रमतनिर्वेशो जन्मकोच्चं हसामपि" भाग० ६ २ ७ श्लोकः ।

निर्वेष्टन न० नितरां वेष्टनमत्र । १स्फुटवेष्टनवल्लिकायां नाडीकरे हारा० प्रा०व० । वेष्टनरहिते त्रि० ।

निर्वेष्टुकाम पु० निर्वेष्टुं कामो यस्य तुमोऽन्लोपः । वियोढ्रुकामे । "निर्वेष्टुकामो रोगार्त्तो वियच्चुर्व्यसने स्थितः । अभियुक्तस्तथाऽन्येन राजकर्मोद्यतस्तथा" । आसेधमिवेधे नारदः ।

निर्व्यथम न० निर्+व्यथ–भावे ल्युट् । १नितरां व्यथने २छिद्रे अमरः । निर्गतं व्यथनं यतः प्रा०व० । ३व्यथाशून्ये त्रि० ।

निर्व्यापार त्रि० निर्गतो व्यापारो यस्मात् प्रा०व० । व्यापारशून्ये तूष्णीं स्थित्यादौ । (तं यथिम्) "दधार मैथिलीकण्ठनिर्व्यापारेण बाहुना" रघुः ।

निर्व्यूढ त्रि०निर्+वि–वह–क्त । १निर्व्यूढे २समाप्ते ३सम्पन्ने अप्रतिबन्धे ४अवेष्टवियोगार्हे । यथा स्त्रीणां पतिपुत्रादिधने न निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढं स्वत्वम् अप्रतिबन्धकतया अवेष्टवियोगार्हत्वात् । पुत्रिकारूपाया दुहितुः पुत्रोत्पत्त्यनन्तरं पितृधने निर्व्यूढं स्वत्वं पुत्रोत्पत्तेः पूर्वन्तु न निर्व्यूढमिति भेदः इति दायभागमतम् । मिताक्षरामते तु स्त्रीसंक्रान्तधनस्यापि स्त्रीधनतया अवेष्टवियोगार्हत्वेन तत्र स्त्रीणां निर्व्यूढं स्वत्वम् ।

निर्व्यूह पु० निर्व्यूह+घञो० । १निर्व्यूहे नागदन्ताकारकाष्ठे हेमच० । "द्वारतोरणनिर्व्यूहध्वजसंवाहशोभिना" भा० व०१६०अ० । प्रा०व० । २व्यूहरहिते सैन्यादौ त्रि० ।

निर्हरण न० निःशेषेण हरणम् । १दाहार्थं अवादेर्बहिर्हरणे, निःसारणे च । तस्य निर्हरणादीनि सम्परेतस्य भार्गव ! । युधिष्ठिरः कारयित्वा सङ्गर्त्तं दुःखितोऽभवत्" शु० त० भागवतवाक्यम् । २नाशने च "तस्माद्भवद्भिः कर्त्तव्यं कर्म्मणां त्रिगुणात्मनाम् । बीजनिर्हरणम्" भाग० ७ ७ २८ ।

निर्हा(र्ह्रा)द पु० निर्+हृद (ह्रद) वा घञ् । शब्दभेदे खगादीनां शब्दे "सारसानाञ्च निर्हादमत्तोदकमसंशयम्" भा० व० २११० । "सारसैः कलनिर्ह्रादैः कश्चिदस्मिता ननौ" रघुः ।

निर्हार पु० निर् +हृ–घञ् । १निर्यातयत्यादेः उद्धरणे २मलमूत्रादित्यागे "आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्य्याः" आ०त० । ३प्रेतदेहस्य दाहार्थं बहिर्नयने, ४अवेष्टवियोगे च । "न निर्हारं स्त्रियः कुर्युः कुटुम्बात् बन्धुमध्यगात् । स्वकादपि च वित्तात्तु स्वस्य भर्तुरनाज्ञया" मनुः ।

निर्हारक त्रि० निर्हरति बहिर्गमयति निर्+हृ–ण्वुल् । अवादेर्दाहात् बहिष्कारके "प्रेतनिर्हारकाश्चैव वर्ज्जनीयाः प्रयत्नतः" मनुः प्रेतनिर्हारकस्य अपाङ्क्तेयत्वोक्तिर्धनग्रहणेन तन्निर्हारकविषया । धर्म्मार्थं तन्निर्हारे तु न दोषः "एतद्वै परमं तपो यत् प्रेतमरण्ये हरन्तीति" कुल्लूकभट्टधृतश्रुत्या तद्विधानात् ।

निर्हारिन् पु० निर्हरति दूरं गच्छति निर्+हृ–णिनि । १दूरगामिगन्धे अमरः । २निर्हरणकर्त्तरि । ३अवादेर्बहिर्निष्कारके त्रि०च ।

निर्हिम अव्य० हिमस्याभावः अव्ययी० । १हिमाभावे निर्गतं हिमं यतः प्रा० ब० । २हिमशून्ये त्रि० ।

निर्हास पु० निःशेषेण ह्रासः । नितान्तह्रासे "निर्ह्रास एवैकचिन्" आश्व० श्रौ० ६ ६ ६ ।

निलय पु० निलीयतेऽत्र ली–आधारे अच् । १गृहे २आवासस्थाने च अमरः । "निलयः श्रियः सततमेतदिति" माघः । ३निःशेषेण लये ४अदर्शने । उभयत्र "सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् । प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेय धेनुः" रघुः ।

निलयन न० निलीयतेऽत्र नि+ली आधारे ल्युट् । नीडादावाश्रये । "निलयनञ्चानिलयनञ्च" तैत्ति०उप० "निलयनं नीडमाश्रयो मूर्त्तस्यैव धर्मः" भा० । "विह्वलं तत् ससृद्राभं सभयं भारतातुरम् । बलमासीत् तदा सर्वमृते द्रोणार्जुनावुभौ । तावेवास्तां निलयनं तावास्तां यमनमेव च" भा०द्रो० १८८ अ० । भावे ल्युट् । २श्लेषणे सम्बन्धे "उत्तमाङ्गे निलयनं कपोतकङ्कप्रभृतीनाम्" सुश्रु० ।

निलिम्प पु० नि+लिप कर्त्तरि ड । १देवे "जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी" रावणकृतशिवस्तोत्रम् । "वेऽस्यां स्य ध्रुवायां दिशि निलिम्पा नाम देवास्तेषाम्" अथ० ३ २६ ५ । २स्त्रीगव्यां स्त्री त्रिका० । स्वार्थे क । निलिम्पिका सौरभेय्यां स्त्रीगव्यां स्त्री हेम० ।

निलीन त्रि० नितरां लीनः । अत्यन्तसम्बद्धे तस्मादूरदेशादि कण्ठादि० क । निलीनक तत्सन्निकृष्टदेशादौ त्रि०

निवचन न० निरन्तरं वचनम् प्रा० त० । निरन्तरवचने । "तदेतन्निवचनमिवास्ति" शत०ब्रा०२ १ ४ ४ "निवचनं निरन्तरवचनम्" भा० । अभावे अव्ययी० । २वचनाभावे अव० ।

निवचने अव्य०निवचनं वचनाभावः एतदन्तत्वं निपातनात् । वचननियमे "मध्ये पदे निवचने च" पा०"अनत्याधानं (उपस्त्रेषणाभावे) एतैः सह क्रमो विभाषया उप०स० । "निवचनेकृत्य निवचने कृत्वेति वा वाचं नियम्येत्यर्थः" सि० कौ० ।

निवत् त्रि० नि+ "उपसर्गाच्छन्दसि धात्वर्थे" पा० "धात्वर्थविशिष्टे साधने वर्त्तमानादुपसर्गादुत्तरे स्वार्थे वतिः स्यात्" सि० कौ० वेदे वति । निम्नगतादावर्थे "निवतः निम्नगतानित्यर्थः" सि०कौ० । "तृणं निवतस्वपः स्वपस्यया नरः" ऋ०१ १६१ ११ "निवतस्तु प्रवणदेशेषु" भा० नीचैर्भावयति २निम्नदेशे च "य ऊहतो निवतो याति वेविषत्" ऋ० ३ २ १० । "निवतः नीचैर्भावयतः प्रदेशान्" भा० "वल्गेव निवता चरन्" ऋ०८ ४५ २८ । "अग्रे रीयन्ते निवतेव सिन्धवः" ऋ० १० ४० ६ । "निवतेव प्रवणेनेव" भा० छान्दसः तस्य नः ।

निवपन न० नि+वप-भावे ल्युट् । पित्रादुद्देशेन दाने "ऋषयो धर्मनित्यास्तु कृत्वा निवपनान्युत । तर्पणस्नाप्यकुर्वन्त" भा० अनु० ९२ अ० । "अत्र वा निवपनम्" कात्या० ७ ७ २ "अस्मिन् काले वा उपरदेशे सोमनिवपनं भवति" कर्कः ।

निवर त्रि० नि+अन्तर्भूतण्यर्थे वृ-कर्त्तरि अच् । १निवारके "आढ्ये मे निवरो भुवत्" ऋ० ८ ९१ १५ । "निवरो निवारयिता" भा० । नितरां व्रियते वृ-वरणे कर्मणि "अचङ्गुनिचिगमश्च" पा० अप् । "कुमार्यामविवाहितायां स्त्रियां स्त्री सि० कौ० ।

निवर्त्तन न० नि+वृत-णिच्-भावे ल्युट् । १निवारणे "सेतुश्च द्विविधो ज्ञेयः स्वेयो बन्ध्यस्तथैव च । तोयप्रवर्त्तनात् स्वेयो बन्ध्यः स्यात् तन्निवर्तनात्" मिताक्षरा । "तथा करानां दशकेन वंशः । निवर्त्तनं विंशतिसंख्यैः क्षेत्रं चतुर्भिश्च भुजैर्निबद्धम्" लीलावतीपरिभाषिते (१विघा) क्षेत्रभेदे "विष्णवे विषयं ग्रामं ग्रामार्द्धमपि भक्तितः" इत्युपक्रमे "निवर्त्तनसमं वा यो विष्णवे विनिवेदयेत् । सर्वगोवीणनिलये स क्रीडति युगावधि । निवर्त्तनशतेनापि यः प्रीणयति केशवम् । शतयोजनविस्तीर्णे स राजा भूतले भवेत्" हेमा०दा० वराहपु० । अन्यथाऽपि निवर्त्तनमानम् यथाह बृहस्पतिः "दशकस्तेन दण्डेन त्रिंशद्दण्डो निवर्त्तनम्" । मत्स्यपु० "दण्डेन सप्तहस्तेन त्रिंशद्दण्डो निवर्त्तनम्" । देशभेदात् शक्तप्रेक्षया वा दाने फलतारतम्यद्योतनाय मानभेदोक्तिः ।

निवसति स्त्री नि+वस-आधारे अतिच् । गृहे शब्दरत्ना०

निवसथ पु० न्युप्यतेऽत्र नि+वस-आधारे अथच् । ग्रामे हेमच० ।

निवसन न० न्युप्यतेऽत्र नि+वस-निवासे आधारे ल्युट् । १गृहे शब्दर० । नि+वस-आच्छादने ल्युट् । २वस्त्रे इवायुधः । "प्राप्तनाभिनदमञ्जनमाशु प्रस्थितं निवसनग्रहणाय" माघः । "हेमनैर्निवसनैः समध्यमा" रघुः ।

निवह पु० नितरामुह्यते वह-घ । १समूहे अमरः "भाग्ये (११श्लो) भवरपुञ्जिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय" वृ० सं०९अ० । नि+वह-अच् । २सप्तवायुमध्ये वायुभेदे । अभिधानरत्ने १६६ पृ० दृश्यम् । "निवहो यत्र वा वाति केषाञ्चित्र सुखप्रदः । न प्रचण्डो न च मृदुः प्रमादी च प्रभञ्जनः" ज्यो०त० ।

निवाकु त्रि० नि+वच-वा० घुण् । निवचनशीले । ततः वाह्वा० अपत्यादौ इञ् । नैवाकवि-तदपत्यादौ ।

निवात पु० निवृत्तो निरुद्धो वा वातोऽस्मात् प्रा०ब० । १दृढकवचे शस्त्राद्यभेद्यकवचे, २आश्रये च अमरः । निवा-(वा)त निष्कम्पमिव प्रदीपम्" कुमा० । "निवा(वा)तनिष्कम्पतया विभाति" रघुः ।

निवातकवच पु० हिरण्यकशिपोः पुत्रस्य संह्लादस्य पुत्रे १दैत्यभेदे अग्निपु० । निवातमभेद्यं कवचं येषाम् । २दानवभेदे ते च इन्द्रप्रेरितेनार्जुनेन निहतास्तत्कथा भा०व०१६८अध्यायादौ । "निवातकवचानाम दानवा भग्नसत्वः । सप्तद्वीपिमाश्रित्य दुर्गं प्रतिवसन्त्युत । तिस्रः कोट्यः समाख्यातास्तुल्यरूपबलप्रभाः । तांस्तत्र जहि कौन्तेय ! गुर्वर्थस्ते भविष्यति" १६८ इत्युपक्रमे ५ अध्यायैस्तद्वधो वर्णितः ।

निवान्या स्त्री नितरां वाति गच्छति पाहत्वेन नि+वा-क-निवः पाता अन्यः परकीयोवत्सो यस्याः । परकीयेण वत्सेन या स्तनवत्सा गौर्दुह्यते तस्यां गवि । "अभिमृष्टार्द्धमपिष्टा निवान्या दुग्धे" कात्या०श्रौ० ५ ८ १८

निवान्यवत्सा स्त्री निवः पाता अन्यस्यावत्सः अन्यवत्सो यस्याः । स्वदुग्धपायिपरकीयवत्सयुक्तायां गवि "निवा-

न्यवत्सामेष्टवै ब्रूयात् तस्मै पयसा जुहुयादार्त्तं वा एतत् पयो यन्निवान्यवत्सायाः आर्त्तमेतदग्निहोत्रं यन्मृतस्य तदार्त्तेनैव तदार्त्तं निष्कृत्य श्रेयान् भवति" शत०ब्रा० १२ ५ १ ४ ।

निवाप पु० न्युप्यते नि+वप–घञ् । १पित्राद्युद्देशेन दाने २दानमात्रे च अमरः । "भर्त्तृलोकप्रपन्नानां निवापान् विदुः पृथक्" । "अनुगृह्णीध्व निवापदत्तिभिः" रघुः

नि(नी)वार पु० नि+वृ–"नौ वृ-धान्ये" कर्मणि घञ् वा दीर्घः । नीवाराख्ये धान्यभेदे । नीवाङ्गुलिनाऽपि केवलमहो सेयं कृतार्था तनुः" सा०द० । निवारयति पापानि नि+वारि अच् वा० दीर्घः । दीर्घयुक्तः नदीभेदे स्त्री "नीवारां महितां चापि सुप्रयोगां जनाधिप !" भा० भी०९ अ० । ["कण्डूयनैर्दंशनिवारणैश्च" रघुः ।

निवारण न० नि+वृ–णिच्–भावे ल्युट् । नितरां वारणे

निवास पु० नि+वस–आधारे घञ् । १गृहे २आश्रये च हेमच० "जगन्निवासो वसुदेवसद्मनि" माघः । भावे घञ् । ३वासे "कुम्भकारस्य शालायां निवासं चक्रिरे तदा" भा० आ० १८५ अ० । ततः धान्या० चतुरर्थ्यां क । निवासक तत्सन्निकृष्टदेशादौ त्रि० ।

निवासिन् त्रि०नि+वस+णिनि । १निवासकारके "क्रव्यादान् शकुनीन् सर्वांस्तथा ग्रामनिवासिनः" मनुः । "अयानाथा प्रकृतयो मालवबन्धुनिवासिनम्" रघुः ।

निविड त्रि०निरन्तरं विडति संहन्यते नि+विड–क । १सान्द्रे घने २नीरन्ध्रे ३दृढे च "गुरुनिविडनितम्बविम्बभारा" माघः । निनता नासा नि+नासायाः विडच् । ४नतनासिकायां स्त्री हेमच० निनतनासिकायुक्ते ५अघटोटे त्रि० ।

निविद् स्त्री नि+विद–करणे क्विप् । १वाचि निघण्टुः । वैश्वदेवस्य शस्त्रे शंसनीये २मन्त्रपदभेदे च "कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे, यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा" छ०उप० । "स याज्ञवल्क्योऽपि एतयैव वक्ष्यमाणया निविदा प्रतिपेदे, यां संख्यां पृष्टवान् शाकल्यो यावन्तो यावत्सङ्ख्याका देवा वैश्वदेवस्य शस्त्रस्य निविदि, निविद्धाम देवतासंख्यावाचकानि मन्त्रपदानि कानिचिद्वैश्वदेवे शस्त्रे शस्यन्ते तानि निविद्संज्ञकानि तस्यां निविदि यावन्तो देवाः श्रूयन्ते तावन्तो देवा इति । का पुनः सा निविदिति तानि निविद्पदानि प्रदर्श्यन्ते । त्रयश्च त्री च शता त्रयश्च देवा देवानां त्रीणि च शतानि पुनरप्येवं त्रयश्च त्री च सहस्राण्ये तावन्तो देवाः" भा० । इवक्ष्यमाणन्यूङ्खशब्दार्थं "पदैराप्नोति निविदः" यजु०१९ २५ "पदैः निविदः न्यूङ्खानाप्नोति" वेददी० "सावित्रं शस्त्रैकाहिके निविदं दधाति" "चतुर्थकं द्यावापृथिवीयं शस्त्रैकाहिके निविदं दधाति" "अच्छेत्याभवं शस्त्रैकाहिके निविदं दधाति" वैश्वदेवं शस्त्रैकाहिके निविदं दधाति" इत्यादीनि शत० ब्रा० १२ ५ १ ११ पठितानि ।

निविद्धान न० निविद् न्यूङ्खो धीयतेऽस्मिन् धा–आधारे ल्युट् । ऐकाहिके यज्ञादौ "तद्यदैकाहिकानि निविद्धानानि भवन्ति" शत०ब्रा० १२ ५ १ १२ यत्र यत्र निविद् धीयते तत् निविद्धितिशब्दे उक्तम् द्रष्टव्यम् ।

निविरीस स्त्री निनता नासा "नेर्विडजविरीसचौ" पा० विरीसच् दन्त्योष्ठारण्यसामर्थ्यात् न षत्वम् । १नतायां नासिकायां २तद्युक्तपुरुषादौ त्रि० । ३सान्द्रे घने जटा० "उरुनिविरीसनितम्बभारखेदि" माघः ।

निविष्ट त्रि०नि+विश–क्त । १चित्ताभिनिवेशयुक्ते २एकाग्रे च "भवन्ति साम्येऽपि निविष्टचेतसाम्" कुमा० ।

निवीत न० नि+व्यज–क्त व्यादेशः । १कण्ठलम्बिते यज्ञसूत्रे । व्येञ् संवरणे क्त संप्रसारणादि । २प्राकृतवस्त्रे अमरः "उपवीतं भवेद्धित्यं निवीतं कण्ठसञ्जनम्" कूर्मपु० "अधो वासः प्रतिमुच्योष्णीषं संवेष्ट्य निवीते" कात्या०श्रौ०१५ ५ १२ "निवीतञ्च कण्ठेसञ्जनम्" कर्कः ।

निवीतिन् त्रि० निवीतमस्त्यस्य इनि । कण्ठलम्बितयज्ञसूत्रयुक्ते "कृतोपवीतो देवेभ्यो निवीती च भवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रान्पितॄंस्तथा" व्याङ्गि०त०ब्रह्मपु० । "उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजैः । सव्ये तु प्राचीनावीती निवीती कण्ठसञ्जने" मनुः । स्त्रियां ङीप् "त्वगुत्तरासङ्गवतीं निवीतिनीम्" कुमा० ।

निवृत् स्त्री "जनाधिकेनैकेन निवृद्दुभुरिजौ" छन्दोऽनुक्रमणिकायां कात्यायनोक्तेषु गायत्र्याद्यष्टछन्दःसु एकाक्षरन्यूनपादके छन्दोभेदे । [२परिवृते त्रि० ।

निवृत न० नि+वृ–क्त । (उडनी) १उत्तरीये स्त्रामी ।

निवृत्त न० नि+वृत–भावे क्त । १निवृत्तौ यत्नभेदे चित्तस्य विषयेभ्य २उपरमे च । ३अभावे न० । नञ्सुबमात्रे "निवृत्तपदार्थक" इत्युक्तम् । "तस्यार्थः निवृत्तमभावः पदार्थो यस्येति नपुंसके भावे क्त इति" वैयाकरणभूषणे

उक्तं, हरिणाप्युक्तं यथा "अभावो वा तदर्थस्तु भावस्य हि तदाश्रयात्" । कर्त्तरि क्त । ४निवृत्तियुक्ते त्रि० "निवृत्ततर्षैरुपगीयमानात्" भाग० १।१अ०। "निवृत्ते भरते धीमानत्रेरामस्तपोवनम्" भट्टिः । ५निवृत्तिपूर्वके कर्मणि न० "प्रवृत्तञ्च निवृत्तं च द्विविधं कर्म वैदिकम् । सर्गादौ सृजता सृष्टं ब्रह्मणा वेदरूपिणा" हेमा० व्रत० भृगुः । धर्मभेदस्य निवृत्तिपूर्वकत्वादुपचारादत्र निवृत्तपदव्यपदेश्यता ।

निवृत्तसन्तापन न० निवृत्तं सन्तापनं यस्य । सन्तापविहीने । तत्रै हितमृ ७ । निवृत्तसन्तापनीय रसायनभेदे यथोक्तं सुश्रुते "यथा निवृत्तसन्तापा मोदन्ते दिवि देवताः । तथौषधीरिमाः प्राप्य मोदन्ते भुवि मानवाः । अथ सप्त पुरुषा रसायनं नोपयुञ्जीरन् तद्यथा अनात्मवानलसो दरिद्रः प्रमादी व्यसनी पापकर्म्मा वृद्धोऽजायमानो चेति । सप्तभिरेव कारणैर्न सम्पद्यते । अज्ञानादनारम्भादस्थिरचित्तत्वाद्दुदारिद्र्यादनात्मवत्त्वादधर्मादौषधाभावाच्चेति" औषधशब्दे दृश्यम् ।

निवृत्तात्मन् त्रि० निवृत्तः विषयेभ्य उपरत आत्मा अन्तःकरणं यस्य । १विषयरागशून्यचेतस्के २विष्णौ० पु० "अनिवर्त्ती निवृत्तात्मा" विष्णुस० "स्वभावतो विषयेभ्यो निवृत्त आत्मा यस्येति विग्रहः" भा० ।

निवृत्ति स्त्री नि+वृत भावे क्तिन् । न्यायमतसिद्धे १यत्नभेदे "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् । एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम् । निवृत्तिश्च भवेद् द्वेषात् द्विट्साधनाधियः" भाषा० "द्विट्साधनतज्ज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति" सुक्ता० मीमांसकमते कलञ्जाधिकरणशब्दे "प्रवृत्त्युपाधिना विनाशं प्राप्स्यन् प्रागभाव एव प्रवृत्तिनिराकरणस्य साध्यमानो निवृत्तिरित्युच्यते" इत्युक्ते २पदार्थे । अधिकं तच्छब्दे नञ्शब्दे च दृश्यम् "औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः" सा०का० ।

निवृत्त्यात्मन् त्रि० निवृत्तिः आत्मा स्वरूपं यस्य । निषेधे "निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते" ति०त० ।

निवेश पु० नि+विश–भावे घञ् । १प्रवेशे २उपवेशने आधारे घञ् । ३निवेशाधारे गृहादौ अस्य क्षुभ्ना० उत्तरपदस्य संज्ञायामपि न णत्वम् अन्यनिवेशः । "श्रीमतां हरिसखवाहिनीनिवेशः" किरा० । आधारे घञ् । ४शिविरे भावे घञ् । ५उद्वाहे विवाहे मेदिनिकोषः ।

निवेशन न० नि+विश–आधारे ल्युट् । १गेहे २नगरे हेमच० । ३निवेशाधारे पृथिव्यां स्त्री ङीप् । "स्योना पृथिवि ! नो भवान्तरा निवेशनी" "निविशन्ति जना यस्यां साधुप्रतिष्ठाना पृथिवी" वेददी० । भावे ल्युट् । ४प्रवेशे ५स्थितौ च जटाध० नि+विश+णिच्–भावे ल्युट् । ६विन्यासे "स्वा गौरसिद्धार्थनिवेशवद्भिः" कुमा० ।

निवेष्य न० नि+विष–भावे ण्यत् । १व्याप्तौ । कर्मणि ण्यत् । २व्याप्ये त्रि० वा० कर्त्तरि ण्यत् । ३व्यापके देवभेदे पु० "निवेष्यं (देवभेदम्) मूर्द्धा" यजु० २५।२। ४आवर्त्ते ५नीहारजले पु० "अथ निवेष्यं गृह्णाति" शत०ब्रा० ५।१।४।११ "निवेष्य आवर्त्तः" भा० निवेष्यो भवः यत् । ६तत्र भवे त्रि० । ७तत्र भवे रुद्रे पु० "हृदयाय च निवेष्याय च" यजु० १६ ४४ "निवेष्य आवर्त्तः नीहारजलं वा तत्र भवो निवेष्यः" वेददी० ।

निव्याधिन् पु० नितरां विध्यति हन्ति यत्नून् नि+व्यध–णिनि । १रुद्रभेदे "नमः सहमानाय निव्याधिने" यजु० १६ २० २नितान्तव्याधके त्रि० ।

निश् स्त्री नितरां श्यति तनूकरोति व्यापारान् शो–क पृषो० । १रात्रौ २हरिद्रायाञ्च निशाशब्दस्य शसादौ भत्वे च वा निश् आदेशः । "विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि" मनुः निशाशब्दे दृश्यम् ।

निशठ पु० बलदेवपुत्रभेदे "रामाच्च निशठो जज्ञे रेवत्यां दयितः सुतः" हरिवं० ३६अ० ।

निशमन न० नि+शम–णिच्–ल्युट् वा ह्रस्वः । १दर्शने दृष्टौ २श्रवणे च मेदि० । निपूर्वकात् शमयतेः श्रवणार्थत्वं यथा "निशामय तदुपत्ति विस्तरात् गदतो मम" देवीभा० । "अहिहिषस्तद्भवता निशम्यताम्" । "निशम्य ताः शेष गवीरभिधातुमधोक्षजः" माघः

निशा स्त्री नितरां श्यति तनूकरोति व्यापारान् शो–क । १रात्रौ २हरिद्रायाम् "अजगोपतियुग्मञ्च कर्किधन्विमृगा निशा" इति ज्योतिषोक्तेषु ३मेषादिराशिषु च । शसादौ भत्वे च वा निश् आदेशः । "अग्निहोत्रं जुहुयात् आद्यन्ते द्युनिशोः सदा" मनुः 'न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि" मनुः "संविशन्ति कृतशयने निशां निनाय" रघुः "त्रिभागशेषायु निशासु च जगम्" कुमा० "निशातुषारैर्नयनाम्बुकल्पैः" भट्टिः । तत्पुरुषेऽस्य "विभाषा सेनासुराच्छायाशालानिशानाम्"

क्लीवता "श्वनिशं श्वनिशा वा" सि० कौ०। समाहारद्वन्द्वेऽपि क्लीवता। "इन्द्रियाणां जये योगं स याति चेदु दिवानिशम्" मनुः।

निशाकर पु० निशां करोति "दिवाविभानिशेति" पा० ख-ट उप०स०। १चन्द्रे २कर्पूरे च अमरः। "द्विजावलीबालनिशाकरांशुभिः" माघः "बहुलेऽपि गते निशाकरः" कुमा०। ३कुक्कुटे शब्दरत्ना०।

निशाख्या स्त्री निशाया आख्या आख्या यस्याः। निशाह्वयायां हरिद्रायाम् अमरः।

निशाचर पुंस्त्री निशायां चरति चर-ट। १राक्षसे २भृगाले ३पेचके ४सर्पे च मेदि० "अर्जुनस्य वचः श्रुत्वा वितस्तोऽभून्निशाचरः" भा०अनु०१५२अ० "तस्यपाद्रवदुदस्य दक्षिणं दोर्निशाचरः" रघुः स्त्रियां जातित्वात् ङीष्। ५रात्रिचारिमात्रे त्रि० स्त्रियां टित्त्वात् ङीप्। सा च हृकुबटायां ७क्रोशिनीनामगन्धद्रव्ये च जटाधरः। "रामसन्नयशरेण ताडिता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा" रघुः। ८पिशाचादौ त्रि०।

निशाचरपति निशाचरणां भूतानां पतिः। प्रमथपतौ १शिवे "ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः" भा०द्रो० ५२अ० २राक्षसेश्वरे रावणे च। [त्रिका०।

निशाचर्मन् पु० निशाया चर्मेव आवरकत्वात्। अन्धकारे

निशाजल न० निशाजातं जलम् शा०त०। हिमजले त्रिका०।

निशाट पुंस्त्री निशायामटति अट-अच्। १पेचके हेमच० स्त्रियां जातित्वात् ङीष्। २निशामतियुक्तमात्रे त्रि०

निशाटक पु० निशेव लक्षणत्वात् अटति निशायामटति वा अट-ण्वुल्। १गुग्गुलौ राजनि०। २रात्रिचरमात्रे त्रि०।

निशाटन पुंस्त्री निशायामटति अट-ल्यु। १पेचके हला० स्त्रियां जातित्वात् ङीष्। २रात्रिचरमात्रे त्रि० स्त्रियां टाप्।

निशात त्रि० नि+शो-क्त पक्षे इत्वाभावः। तेजिते तीक्ष्णीकृते "पुराणि दुर्गाणि निशातसायकम्" माघः "तद्यतनिशातासिं प्रत्युवाच जिजीविषुः" भट्टिः।

निशात्यय पु०६त०। १निशावसाने। ७त०। २प्रभाते च हेमच०

निशाद पु० निशायामत्ति अद-अच्। १रात्रिभोजिनि २निशादे रमानाथः। [न्दार्थकल्पतरुः।

निशादर्शिन् पु० निशायां पश्यति दृश-णिनि। पेचके श०

निशादि पु० ६त०। सायंसन्ध्यायां राजनि०।

निशान न० नि+शो-भावे ल्युट्। तीक्ष्णीकरणे तेजने "क्रमादेतेऽत्र सन्देहे चान्तिनिन्दाविचारणे। निशानार्जवनिन्दासु रुग्जयेऽपि कितोमतः" सुश्रुतः। "तेषां (शस्त्राणां) निशानार्थं शालूमलिशिलामाषवर्णम्" सुश्रुतः

निशानाथ पु० ६त०। १चन्द्रे "अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः। प्रवासी सुखमायाति सौम्यैर्वांसमन्वितः" षट्पञ्चाशिका। २कर्पूरे च अमरः।

निशान्त न० नितरां शम्यते विश्रम्यतेऽत्र आधारे क्त। १भवने अमरः। "तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं विवेश" रघुः "निशान्तनारीपरिधानधूनमेत्यादि" माघः हृत०। २निशायाः अन्ते। ७त०। ३ऋषि। "न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्" मनुः। प्रा०त०। ४नितान्तशान्ते च मेदि०। ततः उत्करा०। चतु० रर्थां ञ। निशान्तीय तत्सम्बन्धदेशादौ त्रि०।

निशान्ध त्रि० निशायामन्धः ७त०। १रात्रान्धे नक्तान्धशब्दे दृश्यम्। २ऋतुकालतायां स्त्री रात्रान्धस्त्रीकयोगभेदो हृद्व्याख्याते उक्तो यथा "गुरुःस्तब्धो विकलनयनो निर्दयोऽर्के तनुस्थे मेषे सस्त्रिमिरनयनः सिंहसंस्थे निशान्धः"। "सिंहलग्ने तनुस्थे चार्के निशान्धः रात्रान्धो भवति" भट्टोत्पलः।

निशापति पु० ६त०। १चन्द्रे २कर्पूरे च अमरः "स्वयम्भिभुक्तिसंयुक्ता मध्यभुक्तिर्निशापतेः" सू०सि०।

निशापुत्र पु० निशायाः पुत्र इव। खेचरे नक्षत्रादौ तेषां रात्रौ पुष्टज्योतिष्कत्वात् रात्रिपुत्रतुल्यत्वम्। "खेचराश्च निशापुत्रास्तथा पातालवासिनः" हरिवं० २२६अ०।

निशापुष्प न० निशायां पुष्पमिति पुष्प-विकल्पे अच्। कुसुदे उत्पले राजनि०।

निशाबल पु०निशायां बलं वीर्यमस्य। मेषवृषधनुःकर्कटमिथुनमकराख्येषु षट्सु राशिषु यथोक्तं हृद्व्याख्याते "मोऽजाश्विकर्किमिथुना सन्मृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्तएव। शीर्षोदया दिनबलाश्च भवन्ति शेषा लग्नं समेत्युभयतः पृथुरोमयुग्मम्"। "निशाख्या निशाबलसंज्ञा उत्तरत्र दिनबला इत्युक्तेरत्रापि निशाबला इति, व्याख्यातं तत्प्रयोजनं, वातायां तथोक्तं यथा च "शस्तं दिवा दिनबले निशि नक्तवीर्ये रात्रौ विपर्ययवतो गमनं न शस्तम्"। नक्तवीर्यादयोऽप्यत्र।

निशाभङ्गा पु०निशाया हरिद्राया भङ्गः इव भङ्गः यस्याः। दुग्धपुष्प्याम् (दुधमेथा) शब्दच०।

निशामणि पु० निशायां मणिरिव प्रकाशकत्वात् । १चन्द्रे त्रिका० २कर्पूरे च ।

निशामन पुंस्त्री नि+शम–णिच्–ल्युट् । १दर्शने २आलोचने च मेदि० ३श्रवणे हेमच० ।

निशामुख न० ६त० । प्रदोषे "स चोमेन्द्रो दृप्तं हत्वा कालचन्द्रे निशामुखे" हरिवं० ७८अ० "व्रतं निशामुखे पाह्यम्" प्रा०त० ।

निशामृग पुंस्त्री निशाचरः मृगः पशुः शा०त० । शृगाले शब्दर० । स्त्रियां जातित्वात् ङीष् ।

निशारण न० नि+शृ–हिंसायां स्वार्थे णिच्–भावे ल्युट् । १मारणे अमरः । स्वार्थे णिजभावे निशरणमपत्र ।

निशारत्न न० निशायां रत्नमिव प्रकाशित्वात् । १चन्द्रे हेमच० २कर्पूरे च ।

निशारुक पु० १सङ्गीतशास्त्रप्रसिद्धे रूपकभेदे यथा "दृढः प्रौढोऽथ खचरो विभवश्चतुरक्रमः । निशारुकः प्रतितालः कथिताः सप्त रूपकाः" तस्य लक्षणं यथा "लघु द्वन्द्वं गुरुद्वन्द्वं तन्त्यासतालकः स्मृतः । चतुर्विंशतिवर्णैस्तु रसे हास्ये निशारुकः" सङ्गीतदामोदरः । स च तालविशेषः । तथा हि "प्रविशन्नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम् । निशारुकेण तालेन कोमलं नृत्यमाचरेत्" सङ्गीतदा० । २नितान्तहिंसके त्रि० । [राजनि० ।

निशावन पु० निशानां हरिद्राणामिव वनमत्र । शणवृक्षे

निशाविहार पुंस्त्री निशायां विहारोऽस्य । राक्षसे "इत्थं प्रवादं युधि संहारं प्रचक्रतुः रामनिशाविहारौ" भट्टिः । स्त्रियां जातित्वात् ङीष् ।

निशाशब्द न० ६त० । रात्रिगर्भे शब्दरत्ना० ।

निशावेदिन् पु० निशा तन्मानं तत्परिच्छेदं वेदयति ज्ञापयति विद्+णिच्–णिनि । कुक्कुटे हेमच० ।

निशाशस पु० निशायां हसति पुष्पविकाशेन हस–अच् । कुसुदे त्रिका० । [हरिद्रायाम् अमरः ।

निशाह्वा स्त्री निशाया आह्वा आह्वाऽभिधानं यस्याः ।

निशित त्रि० नि+शो–क्त पक्षे इत्वम् । १शाणिते तेजिते २लौहे न० राजनि० । आधारे क्त । ३निशीथे स्त्री "निशितायां निर्वपेन्निशितायां हि रक्षांसि प्रेरते" तैत्ति० ब्रा० ३।२।२।२।

निशिति स्त्री नि+शो–कर्मणि क्तिन् । तनूकृते "आहुतिं निशितिं मर्त्यो नयत्" ऋ० ६।२।५ "निशितिं तनूकृताम्" भा० ।

निशिपालक न० पञ्चदशाक्षरपादके १छन्दोभेदे "निशिपालकमिदं भजसनाश्च रः" वृ०टीका० । २निशिपालके प्रहरिभेदे पु० ।

निशिपुष्पा स्त्री निशि रात्रौ पुष्प्यति पुष्प–अच् अलुक्स० । शेफालिकायाम् । पाककर्णेति ङीष् । निशिपुष्पीत्यपत्र

निशीथ पु० निशेरतेऽत्र नि+शी–आधारे घञ् । १अर्द्धरात्रे अमरः । "यन्निशीथादधो भवेत्" ति०त० २रात्रिमात्रे मेदिनिः । "निशीथदीपाः सहसा हतत्विषः" रघुः ।

निशीथिनी स्त्री निशीथोऽस्त्यस्या इनि । रात्रौ अमरः ।

निशीथिनीश पु० ६त० । १चन्द्रे हला० । २कर्पूरे च ।

निशुम्भ पु० नि+शुभ–भावे घञ् । १वधे हेमच० । २हिंसने ३मर्दने "प्रागप्राप्तनिशुम्भशाम्भवधनुर्दण्डावभङ्गोद्यतः" वीरच० । ४असुरभेदे "कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां सहस्राद्बलाधिकौ । ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः । तृतीयो नमुचिर्नाम महाबलसमन्वितः" वामन पु० ५२अ० । "पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः । त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्" देवीमा० । देव्या तस्य वधकथा "शूलहस्तं समायान्तं निशुम्भममरार्दनम् । हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका । भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः । महाबलो महावीर्य्यस्तिष्ठेति पुरुषो वदन् । तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्तदा । शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि" मार्कण्डपु० ८६अ० । अन्योऽपि निशुम्भासुर आसीत् यथाह देवीभा० "वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे । शुम्भो निशुम्भश्चैवान्यावुत्पन्नौ महासुरौ । नन्दगोपगृहे जाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" मार्क०९१अ० । "तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः । कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि । स ते विन्ध्ये नगश्रेष्ठे स्थानं दास्यति शाश्वतम् । ततः स्थानसहस्रैस्त्वं पृथिवीं शोभयिष्यसि । तत्र शुम्भनिशुम्भौ द्वौ दानवौ नगचारिणौ । मां च कृत्वा मनसि तौ सानुगौ नाशयिष्यसि" हरिवं० ५८अ० ।

निशुम्भन न० नि+शुभ–भावे ल्युट् । मारणे ।

निशुम्भमर्दिनी स्त्री निशुम्भं मृद्नाति मृद–णिनि ६त० । दुर्गायाम् अमरः । तत्कथा निशुम्भशब्दे दृश्या । [त्रि० ।

निशुम्भिन् पु० नि+शुभ–णिनि । १बुद्धभेदे त्रिका० । २नाशके

निशृम्भ पु० निश्चय्य सम्बध्य हरति नि+ऋनृथ-वा० भक्-वा० सम्प्रसा० पृषो०। निश्चय्य सम्बध्य हर्त्तरि पूषणश्चाग-भेदे "आलासः पूषणं रथे निशृम्भास्ते जनाश्रयम्" ऋ०६।५५।६ "निशृम्भा निश्चय्य सम्बध्य हर्त्तारः पूषणो वाहनतया प्रसिद्धाः" भा०। इमामेव ऋचमधिकृत्य निरु० ६।४ "निशृम्भा निश्चय्य हारिणः" इत्युक्तम्।

निशैत पुंस्त्री निशायामेतम् ऐषइतं यस्य। वके त्रिका० स्त्रियां जातित्वात् ङीष्। [त्वारिंशतोनिर्गते।

निशत्वारिंश त्रि० निर्गतः चत्वारिंशतः शदन्तात् ड। च-

निशप्रच त्रि० निश्चितं च प्रचितश्च मयूरव्य० नि०। निश्चिते अथच प्रचिते वस्तुनि।

निश्चय पु० निर्+चि-अच्। १संशयान्यज्ञाने निर्णये २सिद्धान्ते इदमित्थमेवेति ३विषयपरिच्छेदे च "तद्भावाप्रकारा धीः तत्प्रकारा तु निश्चयः" भाषा०। "तद्भावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वं निश्चयत्वम्" सुक्ता० अनुमित्यादौ निश्चयत्वमेव न सन्देहत्वम् "परोक्षज्ञान-मनाहार्य्यं निश्चयश्च" अनु०चि० उक्ते। "संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च" भाग०३।२६।२० ४बुद्धेरसाधारणवृत्तिभेदे "मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" वेदान्तपरिभा० "बुद्धिर्नाम निश्चयात्मकान्तःकरणवृत्तिः" वेदा०सा०। "अध्यवसायो बुद्धिः" सा०सू० "महत्तत्त्वस्य पर्य्यायो बुद्धिरिति अध्यवसायश्च निश्चयाख्यस्तस्यासाधारणी वृत्तिरित्यर्थः अभेदनिर्देशस्तु धर्मधर्म्यभेदात्" भा०। ५अर्थालङ्कारभेदे अलङ्कारशब्दे १८८पृ० दृश्यम्।

निश्चर पु० एकादशमन्वन्तरीये सप्तर्षिभेदे तन्मन्वन्तरप्रक्रम्य "अङ्गिरायोदधिश्चैव पौलस्त्यो निश्चरस्तथा। प्रवहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः" हरिवं०७अ०।

निश्चल त्रि० निर्+चल-अच्। १स्थिरे २अचले ३असद्भावनाविपरीतभावनारहिते च। ४भूमौ ५शालपर्य्यां च स्त्री राजनि०। "तासुस्थाचलनिश्चलं संहतास्योऽथ निश्चलः" भाग०। "श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। "समाधावचला बुद्धिस्तदा योगमवाप्स्यसि" गीता।

निश्चलाङ्ग पुंस्त्री निश्चलं मत्स्यधारणाय स्पन्दरहितमङ्गं यस्य। २वके राजनि० स्त्रियां जातित्वात् ङीष्। २स्पन्दरहिते त्रि०। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

निश्चायक त्रि० निर्+चि-ण्वुल्। निश्चयकर्त्तरि निर्णायके

नेश्चारक त्रि० निर्+चर-ण्वुल्। १वायौ २परीक्षके

१स्वच्छन्दे त्रि० मेदि०। निर्गतश्चारो यस्मात् प्रा०ब० कप्। ४चारहिते त्रि० चारस्य गतिर्दूतभेदश्च।

निश्चित त्रि० निर्+चि-कर्मणि क्त। १निश्चयज्ञानविषये अवधारिते "वेदान्तविज्ञानसुनिश्चितार्थाः" वेदा०। २नदीभेदे स्त्री "कौशिकीं निश्चितां क्षय्यां निश्चितां वाहनारिणीम्" भा०भी० ९अ० नानानद्युक्तौ।

निश्चिन्त त्रि० निर्गता चिन्ता यस्मात् प्रा०ब०। चिन्तारहिते "निश्चिन्तो मदुरनिशं कलापरोधीरवलितः स्वात्" सा०द०

निश्चि(श्री)रा स्त्री नदीभेदे विष्णुपु०। [(निशि) त्रिका०।

निश्चक्रण न० निःशेषेण चुक्रणम्। दन्तशोधके चूर्णभेदे

निश्चेष्टाकरण निश्चेष्टा चेष्टारहित्यं क्रियतेऽनेन ल-करणे ल्युट्। १कामवाणभेदे त्रिका०। २मनःशिलाघटितौषधभेदे वैद्यकम्।

निश्च्यवन पु०वैवस्वतमन्वन्तरे सप्तर्षिमध्ये १ऋषिभेदे तदुपक्रमे "प्राणो बृहस्पतिश्चैव दक्षो निश्च्यवनस्तथा" हरिवं० ७अ०। २अग्निभेदे "यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया। अग्निर्निश्च्यवनो नाम पृथिवीं स्तौति केवलम्" भा०व० ११८अ०। निर्गतं च्यवनमस्य प्रा०ब०। ३च्युतिहीने त्रि०।

निश्छन्दस् त्रि० निर्गतं छन्दो वेदोऽस्य प्रा०ब०। वेदाध्ययनहीने "हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्" (कुष्ठम्) मनुः।

निश्र त्रि० निश-समाधौ वा० नङ्। समाहिते ततः। प्राज्ञा० भावे कर्मणि च घञ्। नैश्र्य समाहितत्वे न०।

निश्वास पु० नि+श्वस-भावे घञ्। प्राणवायोर्बहिर्गमनरूपे व्यापारे हेमच०। "निश्वासधूमं सह रत्नभाभिः" माघः।

निश्वाससंहिता शिवप्रणीते पाशुपते शास्त्रभेदे "एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तमाः। वेदक्रियासमायुक्तां कृतवानस्मि संहिताम्। निश्वासाख्यां ततस्तस्यां शोना गाम्भव्यशाण्डिलाः। निश्वाससंहिता या हि सप्तमात्प्रमाणतः। सैव पाशुपती दीक्षा योगः पाशुपतस्य हि। एतस्माद्देवमार्गाद्धि यदन्यदिह जायते। तत् क्षुद्रकर्म विज्ञेयं रौद्रं शौचविवर्जितम्" वराहपु०।

निषङ्ग पु० नितरां सजन्ति शरा यत्र सृज-आधारे घञ्। १तूणीरे अमरः। "जाताभिषङ्गो व्यपतिर्निषङ्गात्" ततो निषङ्गादथमप्तमुद्धृतम्" रघुः। भावे घञ्। २नितान्तसङ्गे च "केन कार्यनिषङ्गेण तमाख्याहि महाबल!" भा०आ० २०१अ०। ३खड्गे च वेददी०निषङ्गधियन्दे दृश्यम्।

निषङ्गथि पु० नि+सन्ज–भावे गथिन् कुत्वम् । समाश्लिष्टे भज्ज्वट्० ।

निषङ्गधि पु० निषङ्गः खड्गः धीयतेऽस्मिन् धा–आधारे कि १खड्गपिधाने कोशे (खाप्) "आतुरस्य निषङ्गधिः" यजु० १६।१० "निषङ्गः खड्गः स धीयतेऽस्मिन्निति निषङ्गधिः कोशः" वेददी० ।

निषङ्गिन् त्रि०निषङ्गोऽस्त्यस्य इनि । १धनुर्द्धरे अमरः । नि+सन्ज–घिणुन् । २तूणीरे शब्दार्थचि० ४खड्गधारिणि च "नमो नमो निषङ्गिणे कक्षभाय स्तेनानां पतये" यजु० १६ २० "निषङ्गिणे खड्गधारिणे" वेददी० । "निषङ्गप्रस्त्री धनुर्द्धरः" इत्यमरे पाठात् निषङ्गीन इति शब्दक० उक्तिः प्रामादिकी अत्राप्यत्वञ्च चिन्त्यम् । ५निषङ्गान्तसङ्गयुक्ते च "स्याणौ निषङ्गिण्यनघि शयं पुरः" माघः "निषङ्गिणि सङ्गे अनघि" मल्लि० ६तूणीरवति च "रथी निषङ्गी कवची धनुष्मान्" रघुः । ७धृतराष्ट्रपुत्रभेदे पु० "कवची निषङ्गी दण्डी दण्डधारो धनुर्धरः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

निषण्ण त्रि० नि+सद–कर्त्तरि क्त । उपविष्टे "संनिषण्णा सितासने" सरस्वतीध्यानम् । "निषण्णा पङ्कजे पुण्या नमो देव्यै त्रिया इति" ति०त० । स्वार्थे–क । तत्रार्थे त्रि० संज्ञायां कन् । सुनिषण्णके शाकभेदे शब्दरत्ना० ।

निषतृण्णु त्रि० नि+सद–बा०त्नु । निषण्णे "निषतृण्णुं च यः सरीसृपम्" ऋ०१० १६२ २

निषद् स्त्री निषीदत्यस्याम् नि+सद–आधारे यङ् । १यज्ञदीक्षायाम् "या वै दीक्षा सा निषत् तत्सत्यं तदयनं तत्प्रायणम्" शत०ब्रा०३ ६ ७ २ निषीदति नेद्यत्वेन देवता अत्र आधारे क्विप् । २वेदवाक्यविशेषे "यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । स्टथन्ति यत्कर्मोक्तम्" भा० शा० ७७ अ० । "वाकेषु मन्त्रेषु सामान्यतः कर्मप्रकाशकेषु अनुवाकेषु मन्त्रार्थविवरणभूतेषु ब्राह्मणवाक्येषु निषत्सु कर्माङ्गावबद्धदेवतावज्ञानवाक्येषु उपनिषत्सु केवलात्मप्रापकेषु स्टथन्ति ध्यायन्ति" नीलक० । सम्प० भावे क्विप् । ३उपसदने स्त्री "अभिस्वरा निषदा गा अवस्रवः" ऋ० २ २१ ५ "निषदा उपसदनेन" भा० । नि+सद–कर्त्तरि क्विप । ४उपवेष्टरि निषद्वरशब्दे दृश्यम् ।

निषदन न०निषीदत्यत्र आधारे ल्युट् । १गृहे शब्दार्थचि० । २उपवेशनस्थाने च "निक्रमणं निषदनम्" यजु०२५।३८ "निषदनमुपवेशनस्थानम्" वेददी० । भावे ल्युट् । ३स्थितौ "अन्यत्रे वो निषदनम् पूर्वे वो वसतिस्कृता" यजु० १२। ७९ "निषदनं स्थानम्" वेददी० । निषीदति पापकमत्र ल्युट् । ४निषादे पु० "निषादः कस्मान्निषदनो भवति निषद्यत्यत्र पापकमिति" निरु० २ ८

निषद्या स्त्री निषीदन्त्यस्याम् जनाः नि+सद–आधारे क्यप् । १पण्यविक्रयशालायां (हाटशाला) २हट्टे अमरः ३क्षुद्रखट्वायाञ्च शब्दार्थचि० "केचित् गुर्वीमेव संयन्निषद्याम् क्रीणन्ति स्म प्राणमूल्यैर्यशांसि" माघः ।

निषद्वर पु० नि+सद–क्विप् निषद् आवरणं तां इयाति इ–अच् वरः आवरकः इत० । जम्बाले १कर्दमे अमरः । नि–सद आधारे बा० वरच् । क्विपात् ङीष् । २निशायां स्त्री मेदि० । उभयत्र हि गतेर्निषद्यत्वात् तथात्वम् । इत० । ३निषद्वामुपवेष्टुं वरे श्रेष्ठे इषभेदे "निषद्वरं इषभं नर्यापसम्" यजु० २८।४ "निषीदन्ति निषद् उपवेष्टारस्तेषां वरम् श्रेष्ठम् इषभम्" वेददी० ।

निषध पु० पर्वतभेदे स च त्रि०शि० उक्तो यथा

"तस्मादेषामिमगिरिरुदन्वेन्मूर्धोऽस्य तस्मात् तस्मान्यो निषध इति ते सिन्धुपर्यन्त दैर्घ्याः" । एवं त्रिशादुदगपि पुरात् पद्मकञ्चनीला वर्षाण्येषां जगुरिह बुधा अन्तरे द्रोणिदेशान् । भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम्" भू० "अतो तस्मात् उत्तरतो हिमवान् नाम गिरिः पूर्वं सिन्धुपर्यन्तदैर्घ्योऽस्ति । तस्योत्तरे हेमकूटः, सोऽपि समुद्रपर्यन्तदैर्घ्यः । तथा तदुत्तरे निषधः" । तेषामन्तरे द्रोणिदेशा वर्षसंज्ञाः, तत्रादौ भारतवर्षम् । तदुत्तरं किन्नरवर्षम् । ततो हरिवर्षमिति" प्रमिता० । स च किंपुरुषवर्षस्य सीमापर्वतः यथाह भाग० ५।१६। १०श्लो० । "एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्राणायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्" । सूर्यवंश्ये रामात्मजकुशस्य पौत्रे २रूपभेदे "अतिथिस्तु कुशाच्छ्रेष्ठे निषधस्तस्य चात्मजः" हरिवं १५अ० । "स (अतिथिः) नैषधस्यार्थपतेः सुतायाम् उत्पादयामास निषिद्धशत्रुः । अनूनसारं निषधाभिधानेन्द्रात् पुत्रं यमाहुर्निषधाख्यमेव" रघुः । चन्द्रवंश्ये ३जनमेजयान्तरस्यात्मजभेदे "जनमेजयस्य तनयाः सुविख्याता महाबलाः । धृतराष्ट्रः प्रथमजः पाण्डुर्बाह्लीक एव च । निषधश्च महातेजास्तथा जाम्बूनदो बली" भा०आ०९४अ० । ४देशभेदे पु० ब०व० । "प्रश्ना

निषादा निषधास्तथैवानर्त्तनैर्ऋताः" भा० भी० ९अ० जनपदोक्तौ। "निषधेषु महीपालो वीरसेन इति श्रुतः" भा०व०५२अ०। निषधानां राजा ते अभिजनोऽस्य वा अण्। नैषध तद्देशवासिनि च। "न नैषधे कार्यमिदं निगाद्यम्" नैष० बहुषु अणो लुक्। ५कठिने त्रि० मेदि० ६निषादस्वरे हेमच०। ७कुरुनामकक्षत्रपुत्रे च "तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः। परीक्षित् सुधनुर्मेन्युर्निषधश्च कुरोः सुताः" भाग० २२।२

निषाद पुंस्त्री निषीदति पापमत्र नि+सद्-आधारे घञ्। १चण्डाले जातिभेदे अमरः तन्निरुक्तिः "निषादः कस्मान्निषदनो भवति निषण्णमत्र पापकमिति" निरु० ३।८। वेनोरुमन्थनाज्जाते २जातिभेदे तत्कथा "दग्धस्य पापतीकाशो विकटाक्षोऽतिहस्वकः। किङ्करोमीति तान् सर्वान् विप्रानाह स चातुरः। निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत्। ततस्तत्प्रभवा जाता विन्ध्यशैलनिवासिनः। निषादा सुनिशार्दूल! पापकर्मोपजीविनः। तेन द्वारेण विप्रक्रान्तं तत्पापं तस्य भूपतेः। निषादास्ते ततो जाता वेनकल्मषनाशनाः" स्त्रियां जातित्वात् ङीप्। "निषादाद्याः पञ्चपुत्रायाः सप्तायाः जतुवेश्मनि" भा०आ० १अ०। तन्त्रीकण्ठोत्थिते ३स्वरभेदे पु० अमरः। "षड्जादयः षड्जेऽत्र स्वराः सर्वे मनोहराः। निषीदन्ति यतो लोके निषादस्तेन कथ्यते। यतस्तः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रोऽत्र गान्धारनिषादके" सङ्गीतदामोदरः "निषादं रौति कुञ्जरः" इत्युक्तेः तस्य हस्तितुल्यस्वरता। ४ब्राह्मण्याच्छूद्रकन्यायाञ्जाते पारशवाख्ये जातिभेदे च "ब्राह्मणात् वैश्यकन्यायामम्बष्ठो नाम जायते निषादः। शूद्रकन्यायां यः पारशव उच्यते" मनुः। "मातृस्वसोनिषादानाम्" मनुना तद्वृत्तिरुक्ता ५देशभेदे स च देशः सरस्वती नद्यन्तर्द्वीपस्थानं यथोक्तं भा०व०१३०अ० "एतद्विनशनं नाम सरस्वत्या विशाम्यते॥ द्वारं निषादराष्ट्रस्य येषां दोषात् सरस्वती। प्रविष्टा पृथिवीं वीर मा निषादा हि मां विदुः"।

निषादकर्ष पु० देशभेदे ततः शैषिकः ठञ् "इसुसुक्तान्तात् कः" पा० ठस्य कः, "केऽणः" पा० हस्वः। नैषादकर्षक तत्सम्बन्ध्यादौ त्रि०।

निषादवत् पु० निषादोऽस्त्यस्य मतुप् मस्य वः। १निषादस्वरे "षड्ज ऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्" भा०शा० १८४ अ०। २निषादस्वरयुक्ते गानादौ त्रि० स्त्रियां ङीप्।

निषादित न०नि+सद्-णिच्-भावे क्त। १निषादने उपवेशनकरणे। निषादितमनेनेत्यर्थे दृष्टा० इनि। निषादितृ निषादनकर्त्तरि त्रि० स्त्रियां ङीप्। कर्मणि क्त। २उपवेशिते त्रि०।

निषादिन् पु० निषादयति हस्तिनं नि+सद्-णिच्-णिनि। हस्त्यादेरुपवेशनादिकारके १हस्तिपके अमरः "नियोज्य निर्यदस्त्रजं चलितं निषादी" माघः। नि+सद्-णिनि। २उपविष्टे "आतपात्ययसंक्षिप्तनीवाराणां निषादिनिः" रघुः। स्त्रियां ङीप्। "इक्षुच्छायानिषादिन्यः" रघुः।

निषिक्त त्रि० नि+सिच्-क्त। १नितान्तसिक्ते आहिते २शुक्रादौ च ३तज्जे गर्भे च "योनेः शरीरम्" भा० स्तवभाष्ये "योनौ निषिक्ते रेतसि" उक्तम् "विष्णुं निषिक्तपामवोभिः" ऋ० ७।३६।९ "निषिक्तपाम् निषिक्तस्य गर्भस्य रक्षं तारम्" भा०।

निषिद्ध त्रि० नि+सिध-कर्मणि क्त। १निषेधविषये २बाधिते "निषिद्धैरप्यभिलुलितमकरन्दैर्मधुकरैः" वेणीसं०। ३अभावगतेष्टसाधनतानिषेधिनञ्पदयोगिवाक्यगम्ये ४अनिष्टसाधनताबोधकविध्याद्यनुषक्तनञ्पदयोगिवाक्यगम्ये च यथा "न कलञ्जं भक्षयेत्" इत्यत्र "कलञ्जभक्षणं निषिद्धम्" "काम्यनिषिद्धवर्जनपुरःसरम्" वेदान्तसा०।

निषेक पु० नि+सिच्-भावे घञ् ह्रस्वम्। १जलादेः नितान्तसेचने २गर्भाधाने च "निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः" मनुः "योषितस्तु तदीर्ण्यं निषेकभूमिः" कुमा०। "वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः" मनुः। "निषेककाले सोमे च सीमन्तोन्नयने तथा। श्रेयं पुंसवने चैव श्राद्धं कर्माङ्गमेव च" श्रा०त० भविष्यपु०। "निषेककाले गर्भार्थशुक्राधानदिने" रघु०।

निषेदिवस् त्रि० नि+सद्-क्वसु। निषण्णे उपविष्टे स्त्रियां ङीप् सेटोवस उः। "निषेदुषी स्वण्डिल एव केवले" कुमा०

निषेध पु० नि+सिध-भावे घञ्। १वारणे २निवर्त्तने। निषिध्यतेऽनेन करणे घञ्। ३अनिष्टसाधनताबोधकवेदादिवाक्यभेदे "स च (वेदः) विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चविधः" सौमाचिभास्करः। तद्व्याख्यानं तत्र निरूपितं यथा

"पुरुषस्य निवर्त्तकं वाक्यं निषेधः निषेधवाक्यानामर्थहेतुक्रियानिष्टत्तिजनकत्वेनैवार्थवत्त्वात्। तथाहि यथा विधिः प्रवर्त्तनां प्रतिपादयन् स्वप्रवर्त्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्त्तयति। तथा "न कलञ्जं भक्षयेत्" इत्यादि निषेधोऽपि निवर्त्तयन् स्वनिवर्त्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्त्तयति। ननु निषेधवाक्यस्य कथं निवर्त्तनाप्रतिपादकत्वमिति चेत्? उच्यते न तावदत्र धात्वर्थस्य नञर्थेनान्वयः अव्यवधानेऽपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः। न ह्यन्योपसर्जनत्वेनोपस्थितमन्यत्रान्वेति। अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्वयापत्तेः। अतः प्रत्ययार्थस्यैव नञर्थेऽन्वयः। तत्रापि नाख्यातांशवाच्यार्थभावनायाः, तस्या लिङंशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः। किन्तु लिङंशवाच्यशाब्दभावनायाः, तस्याः सर्वापेक्षया प्रधानत्वात्। नञर्थस्य स्वभावो यत् स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्। यथा "घटोनास्तीत्यादौ" अस्तीति शब्दसमभिव्याहृतो नञ् घटवत्ताविरोधिनिवर्त्तनामेव बोधयति विधिवाक्यश्रवणेऽयं मां प्रवर्त्तयतीति प्रतीतेः। तस्मान्निषेधवाक्यस्यैव निवर्त्तनैव वाक्यार्थः! यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च बाधकं द्विविधम्। तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च। तत्राद्यं "नेक्षेतोद्यन्तमादित्यम्" इत्यादौ तस्य व्रतमित्युपक्रमस्यैतद्वाक्यपाठात्। तथा चात्र पर्युदासाश्रयणम्। तथा हि व्रतशब्दस्य कर्त्तव्यार्थरूढत्वात्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वेनोपक्रमात् किं तत् कर्त्तव्यमित्याकाङ्क्षायां "नेक्षेतोद्यन्तमादित्यम्" इत्यादिना कर्त्तव्यार्थ एव प्रतिपादनीयः। अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात्। तथा च नञर्थेन प्रत्ययार्थान्वये कर्त्तव्यार्थानवबोधात् विध्यर्थप्रवर्त्तनाविरोधिनिवर्त्तनाया एव तादृशनञा बोधनात् तस्याश्च कर्त्तव्यार्थत्वाभावात्। तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसङ्कल्प एव लक्षणया प्रतिपाद्यते। तस्य कर्त्तव्यत्वसम्भवात्। आदित्यविषयकारोक्षणसङ्कल्पेन भावयेदिति वाक्यार्थस्तत्र भाव्याकाङ्क्षायाम् "एतावता कैनसा वियुक्तो भवतीति" वाक्यशेषावगतः एषणयो भाव्यतयान्वेति। एवञ्च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव। न चात्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि सम्भवात् कथमनीक्षणसङ्कल्पस्यैव भावनान्वय इति वाच्यम् तत्र कर्त्तव्यत्वाभावेन प्रकृते भावनान्वयायोग्यत्वात्। द्वितीयं "यजतिषु ये यजामहङ्करोति नानुयाजेषु" इत्यादौ। अत्र विकल्पप्रसक्त्यैव पर्युदासाश्रयणात्। तथाहि यद्यत्र वाक्ये नञर्थे प्रत्ययार्थान्वयः स्यात्तदा "अनुयाजेषु ये यजामहे" इति मन्त्रस्य प्रतिषेधः स्यात्। अनुयाजेषु ये यजामहे" न कुर्यादिति। स च प्राप्तिपूर्वक एव प्राप्तस्यैव प्रतिषेधात्। प्राप्तिश्च यजतिषु "ये यजामहङ्करोतीति" शास्त्रादेव वाच्या। शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः। प्राप्तिमूलरागस्यैव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधायोगात्। न च यदि जुहोतीत्यादौ हि विशेषशास्त्रेणाहवनीये जुहोतीति शास्त्रस्यैव नानुयाजेष्वित्यनेन यजतिषु ये यजामहङ्करोतीत्यस्य बाधः स्यादिति वाच्यम् परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वम्। प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं "यजतिषु ये यजामहम्" इत्यस्यानपेक्षणान्न निरपेक्षत्वम्। तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्पएव, स च न युक्तः। विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यापातात्। न "ह्यनुयाजेषु ये यजामहम् इत्यस्यानुष्ठाने नानुयाजेष्वित्यस्य प्रामाण्यं सम्भवति, व्रीहियागानुष्ठाने यवशास्त्रस्येव। द्विरदृष्टकल्पना च स्यात्, विधिप्रतिषेधयोरपि पुरुषार्थत्वात्। अतोऽत्र न प्रतिषेधस्याश्रयणम्। किन्तु अनुयाजसम्बन्धमाश्रित्य पर्युदासस्यैव। इत्यस्यानुयाजव्यतिरिक्तेषु "यजतिषु ये यजामहे" इति मन्त्रं कुर्यादिति वाक्यार्थबोधः नञोऽनुयाजव्यतिरिक्ते लाक्षणिकत्वात्। एवञ्च न विकल्पः। अत्र च वाक्ये "ये यजामहे" इति न विधीयते। "यजतिषु ये यजामहे" इत्यनेनैव प्राप्तत्वात्। किन्तु सामान्यशास्त्रप्राप्तये "ये यजामहे" इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते यत् यजतिषु ये यजामहङ्करोति तदनुयाजव्यतिरिक्तेष्वेवेति। नन्वेवं सामान्यतः प्राप्तस्य विशेषसङ्कोचरूपादुपसंहारात् पर्युदासस्य भेदो न स्यादिति चेन्न उपसंहारो हि तन्मात्रसङ्कोचार्थः। यथा पुरोडाशे "चतुर्धा करोतीति" सामान्यप्राप्तचतुर्धाकरणम् "आग्नेय चतुर्धा करोतीति" विशेषादाग्नेयपुरोडाशमात्रे सङ्को

ष्यते पर्युदासस्तु तदन्यमात्रसङ्कोचार्थ इति ततो भेदात्। कुत्रचिद्विकल्पप्रसक्तावप्यनगत्या प्रतिषेधाश्रयणम्। यथा "नातिरात्रे षोडशिनं गृह्णाति" इत्यादौ। अत्र "अतिरात्रे षोडशिनं गृह्णातीति" शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणम्, असम्भवात्। तथाहि यद्यत्र षोडशिपदार्थे नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधः स्यात्। स च न सम्भवति "अतिरात्रे षोडशिनं गृह्णातीति" प्रत्यक्षविधिविरोधात्। यदि चातिरात्रपदार्थेनान्वयस्तदातिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीति वाक्यार्थबोधः स्यात्। सोऽपि न सम्भवति, तद्विधिविरोधात्। अतोऽनन्यगत्या शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः। न च विकल्पप्रसक्तिः तस्याप्याश्रयणीयत्वात्। इयांस्तु विशेषो यद्विकल्पादावेकप्रतिषिध्यमानस्य नानर्थहेतुत्वम्। यथा "न कलञ्जं भक्षयेत्" इत्यादौ कलञ्जभक्षणादेः, तत्र भक्षणनिषेधस्यैव पुरुषार्थत्वात्। न च "दीक्षितो न ददाति न जुहोति" इत्यादौ शास्त्रप्राप्तदानहोमादीनां निषेधाद्विकल्पापत्तिरिति वाच्यम्। स्वतः पुरुषार्थभूतदानहोमादीनां निषेधस्य पुरुषार्थत्वाभावेपि निषिध्यमानस्यानर्थहेतुत्वम् यथा क्रतौ स्त्रीगमनादेः। तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसम्पादकत्वात्"। [निषेधकाः" मार्कण्डपु०।

निषेधक त्रि० नि+षिध-ण्वुल्। निवारके "ये चाह्नाद०

निषेधविधि पु० निषेधे अभावे विधिरिष्टसाधनताधीहेतुः। अभावे इष्टसाधनताबोधकवाक्ये यथा "एकादश्यां न भुञ्जीतेत्यादौ" भोजनाभावे एव इष्टसाधनत्वं बोधयति न तु भोजने विध्यर्थेष्टसाधनत्वभावम्, अतो निषेधवाक्यादस्य भेदः। "अष्टम्यां मांसं नाश्नीयात्" इत्यादौ तु निषेधे मांसभोजने अनिष्टसाधनत्वं बोधयति "एकादश्यां न भुञ्जीत" इत्यादौ तु भोजनाभावे इष्टसाधनत्वमिति विधिस्वरूपे गदाधरः। एवं नेक्षेतोद्यन्तमादित्यमित्यादावपि निषेधविधित्वमित्याकरे स्थितम्। अतएव एकादशीभोजनाभावस्य अभोजनसंकल्पस्वरूपस्य व्रतत्वम् तिथिस्वरूपविशेषनियमनं च। निषेधत्वे कालमात्रामेयतया तत्कालमात्रेण निवृत्तिः स्यात् "निषेधस्तु निवृत्त्यात्मा कालमात्रममेयते" इति भट्टोक्तेः।

निष्क माने चु० आत्म०सक० सेट्। १निष्कयते अनिनिष्कत। अचोपदेशत्वात् सति निमित्ते न क्षत्वम्। प्रनिष्कयते।

निष्क पु०न० निश्चयेन कायति निस्+कै-क निष्क-अच वा। शास्त्रीयषोडशमाषकपरिमितसुवर्णानामष्टाधिकशते, २व्यवहारिकरूपके (टाका) ३चतुःसुवर्णपरिमिते पलपरिमाणे मानभेदे, ४वक्षोभूषणे ५हेमपाले ६दीनारे च अमरः। दीनारशब्दे दीनारार्थः दृश्यः। ७पणे ८षोडशद्रुमे (काहन) परिमाणे "वराटकानां दशकद्वयं यत् सा काकिणी तास्य पणश्चतस्रः। ते षोडश द्रुम इहावगम्यो द्रुमैस्तथा षोडशभिश्च निष्कः" लीला०। "हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्" कुमा० "चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः" मनुः "गवामभावे निष्कः स्यात् तदूर्द्धं पादमेव वा" मिता० धृता स्मृतिः।

निष्कण्टक त्रि० निर्गतः कण्टकोऽस्य प्रा०ब०। १उपसर्गहीने २बाधकरहिते "राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः" भा०वि० ६अ०।

निष्कण्ठ पु० निर्गतः कण्ठः स्वरोऽस्य। वरुणद्रुमे शब्दच०

निष्कम्प त्रि० निर्गतः कम्पो यस्य प्रा०ब०। कम्पहीने "निवातनिष्कम्पमिव प्रदीपम्" "निष्कम्पवृक्षं निष्टतहिरेफम्" कुमा० "दिशः पपात पत्रेण वेगनिष्कम्पकेतुना" रघुः।

निष्कम्भु पु० देवसेनाधिपभेदे "बलिना हयपर्वा तु सह निष्कम्भुना रणे" हरिवं० २४४अ० देवासुरयुद्धोक्तौ।

निष्कर्ष पु० निस् कृष+भावे घञ्। १निश्चये २दयत्तादिना स्वरूपपरिच्छेदे "एतद्विदन्तोविद्वांसस्त्रयीनिष्कर्षमन्वहम्" मनुः। "स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते" भाषा०। ३निःसारत्वे च

निष्कर्षण न०निस्+कृष-भावे ल्युट्। १निष्कासने २निःसारत्वे "ब्राह्मणस्य प्रियाशोकशल्यनिष्कर्षणौषधम्" रघुः

निष्कल त्रि० निर्गता कला यस्य प्रा०ब०। १कलाशून्ये २निरवयवे सम्पूर्णे "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्वेता०उ० "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः" एका० जामदग्न्यवाक्यम्। ३कलादिव्यापारशून्ये च "दग्धाश्च निष्कलाः शान्तं ग्रहीष्याः स्वकर्मभिः" भा०व० २०अ०। ४मतार्थवायां द्रव्यावां स्त्रियां स्त्री शब्दरत्ना० नीरक्षायां स्त्रियां स्त्री ङीप् शब्दरत्ना०।

निष्कषाय त्रि० निर्गतः कषायः चित्तमलभेदो यस्य प्रा०ब०। १चित्तदोषशून्ये निर्मलचित्ते तत्त्वज्ञे। अत्यर्थिष्यां २जिनभेदे पु० हेमच०।

निष्कादि पु० "असमासे निष्कादिभ्यः" पा० तेन क्रीतमित्यर्थे असमासे ठगन्निमित्ते शब्दगणे स च गणः पा०ग० सू० उक्तो यथा "निष्क पण पाद माष वाह क्रोण षष्टि" । निष्केण क्रीतं नैष्किकं निष्केण क्रीते त्रि० स्त्रियां टाप् । समासे तु ठञ् स्त्रियां ङीप् इतिभेदः

निष्काम त्रि० निर्गतः कामोऽभिलाषो यस्य यत्र वा प्रा०ब० । विषयभोगेच्छाशून्ये १कामनयाऽकृते कर्मादौ च "निष्कामं ज्ञानपूर्वं च निवृत्तमुपदिश्यते" मनुः । "निष्कामादन्त्यौगजपादिकर्मणो न दुःखं प्रत्युत मोक्षफलं प्राप्यते" सा०प्र०भा० "विशिष्टफलदाः पुंसां निष्कामाणां विसृष्टिदाः" बल०त० विष्णु पु० "निष्कामाणां सुक्तिप्रतिकूलकामनारहितानाम्" रघुनन्दनः ।

निष्कालक पु० निर्गतः कालकः केशादिः सञ्जनेन यस्य प्रा०ब० । २सुखितकेशलोमादौ "निष्कालको हताश्यक्तक्षप्तां भूमीं परिष्वज्य मरणात् पूतो भवतीति विज्ञायते" वसिष्ठः । प्रा०ब०कप् । ३निर्गतसमयके अभावे अव्ययी० । ४कालकाभावे अव्य० । निरुदकादि० अन्तोदात्तता

निष्कालन न०निर्+कल–भावे ल्युट् । १चालने २मारणे च

निष्कालिक अव्य० कालिकस्याभावः अव्ययी० । कालिकाभावे निरुदकादि० अस्य अन्तोदात्तता । काले कालने साधु तदर्हति वा ठञ् कालिकः कालो कालयिता जेता वा स निर्गतो यस्य प्रा०ब० कप् वा । २कालयितृहीने जेतृशून्ये अजये च त्रि० । "तं सूतपूतं रविनां वरिष्ठं निष्कालिकं कालवशं नयाद्य" भा०व० ७२अ० । निष्कालिकः निर्गतः कालो कालयिता जेता यस्येति विग्रहः" नीलकण्ठः ।

निष्का(श)स पु० निर+कश(स)–भावे घञ् । निष्कासने बहिष्करणे १निःसारणे "सन्ध्ये रजनीदिवोः प्रवेश निष्काशौ(सौ)" हला० "न च पश्यामि निष्काश(स)म्" रामा०कि० ५२सर्गः । कर्त्तरि घञ् । प्रासादाद्युपरितो बहिर्गतमार्गे (साला) ख्याते पदार्थे च ।

निष्काशि(सि)त त्रि० निस्+क(श)स–गतौ णिच्–क्त । १निःसारिते दन्त्यमध्यस्तु टूरीकृते समसारिते जटा० । २निर्गमिते ३आहिते अधिकृते च त्रि० मेदि० ।

निष्काष पु० निर्–कष घञ् । अग्नयवशादधःस्थाधोतवलग्ने पयस्यावशेषे "वारुणीनिष्काषेणावशेषम्" कात्या०श्रौ० ५।५२८। उक्तार्थएव कर्कैणोक्तः ।

निष्किञ्चन त्रि० निर्गतं किञ्चन गम्यं धनं वा यस्य प्रा०ब० । १किञ्चनशून्ये विषयान्तरशून्ये "प्रज्ञानं शौचमेवात्र शरीरस्य विशेषतः । तथा निष्किञ्चनत्वं मनसश्च प्रसन्नता" भा०अनु०१०८अ० । २अकिञ्चने दरिद्रे च ।

निष्कुट पु० निस्+कुट–क । १गृहसमीपस्थे उपवने अमरः २केदारे क्षेत्रे ३राज्ञाम् अन्तःपुरे च मेदि० । "अवस्करे चिरं स्थानं निष्कुटेषु च वर्जयेत्" भा०व०२२३अ० । ४पर्वतभेदे "स विनिर्जित्य संग्रामे हिमवन्तं सनिष्कुटम्" भा०स० २६अ० । "सपर्वतवनाकाशां ससमुद्रां सनिष्कुटाम्" भा० व० २५१अ० ।

निष्कुटि(टी) स्त्री कुट–इन् कौटिल्यम् निर्गतः कुटिर्यस्याः बा० ङीप् । एलायाम् अमरः ।

निष्कुटिका स्त्री निष्कुटः अस्त्यस्याः वाशब्देन ठन् । कुमारानुचरमातृभेदे "कृष्णाऽम्बिका निष्कुटिका वामा चलरवासिनी" भा०श० ४७अ० स्कन्दमातृगणोक्तौ ।

निष्कुम्भ पु० नि+ष्कुनुभ–अच् षत्वम् । १दन्तीवृक्षे रावणकुटः । निर्गतः कुम्भोऽस्य प्रा०ब० । २कुम्भशून्ये च त्रि० ।

निष्कुल त्रि०निर्गतं कुलमवयवानां समूहो यस्मात् प्रा०ब० । अवयवसमूहशून्ये । ततः निष्कोशयति क्लिशि डाच् । निष्कुलाकरोति दाडिमम् निष्कोशयतीत्यर्थः । निर्गतं कुलं सपिण्डादिर्यस्य प्रा०ब० । २सपिण्डादिकुलरहिते त्रि० "यथाऽपुत्रास्तु चैवं स्यात् रक्षणं निष्कुलास्तु च । पतिव्रतास्तु च स्त्रीषु विधवास्वातुरासु च" मनुः "निष्कुलास्तु सपिण्डरहितास्तु" कुल्लू० ।

निष्कुलीकृत त्रि०निष्कुल+अभूततद्भावे च्वि–कृ–कर्मणि क्त । निष्कुलिते "काश्यपीयानां निष्कुलीकृतानाम्" सुश्रुतः ।

निष्कुषित त्रि० निस्+कुष–निष्कर्षे क्त । १निस्तुषीकृते खण्डिते "काकैर्निष्कुषितं शमिः कवलितं वीचिभिरान्दोलितम्" गङ्गास्तोत्रम् । "चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः" भट्टिः "उपान्तयोर्निष्कुषितं विहङ्गैः" रघुः । २मरुद्रथभेदे पु० "अश्वत्थं चित्ररश्मिञ्च तथा निष्कुषितं नृपम्" हरिवं० २०४अ० मरुद्रथोक्तौ ।

निष्कुह पु० निःशेषेण कुहयते विस्मापयति कुह–अच् । उच्चादिस्थे अवंजाते रन्ध्रे कोटरे अमरः ।

निष्कृति स्त्री निर्+कृ–क्तिन् । १निस्तारे २निष्कृतौ पापादिभ्य ३उद्धारे च अमरः "कामतो ब्रह्मणवधे निष्कृतिर्न विधीयते" मनुः "कृतघ्ने नास्ति निष्कृतिः" स्मृतिः

निष्कृष्ट त्रि० निर+कृष–क्त । १सारांशे २निश्चिते च

निष्कैवल्य पु॰ यज्ञिये स्तोमकारितशंसनात्मके शस्त्रभेदे "माध्यन्दिने तु होतुर्निष्कैवल्ये स्तोमकारितं शस्त्रम्" आश्व॰ श्रौ॰८।१।१४ "तत्र तु ऋग्भिरेव निष्कैवल्यस्य स्तोमकारितशंसनं स्वस्तोमातिशंसनञ्च कर्त्तव्यं न स्वतेन । यदि स्वस्तोमाधिको निष्कैवल्यस्तोमस्तदा तस्मादप्यतिशंसनञ्च कर्त्तव्यं यदा हीनं तदास्मादतिशंसनमिति निष्कैवल्ये स्तोमकारितमिति पाठः कर्त्तव्यो न निष्कैवल्यस्तोमकारितमिति" नारा॰ । "निष्कैवल्यसुक्त्यमव्यथायै" यजु॰१५।१२ "प्रउगं शंसति निष्कैवल्यं शंसतीति" श्रुतिः तच्छब्देन प्राह्ये २यज्ञपात्ररूपे यज्ञभेदे पु॰ "मरुत्वतीयाश्च मे निष्कैवल्यश्च मे" यजु॰ १८।२० ।

निष्कैवल्य त्रि॰ केवलस्य भावः कैवल्यम् निश्चितकैवल्यमसहायत्वमस्य प्रा॰व॰ । निश्चितकैवल्यत्वे अन्यासहकारिणि "निष्कैवल्येन पापेन तिर्य्यग्योनिमवाप्नुयात् । पुण्यपापेन मानुष्यं पुण्येनैकेन देवताम्" भा॰शा॰ २०४ अ॰ । २निवृत्तकैवल्ये ३मोक्षहीने च ।

निष्कोषण न॰ निर्+कुष–ल्युट् । अन्तरवयवानां बहिर्निःसारणे "शर्करासिकतामेहवातकुण्डलिकाष्ठीलादन्तशर्करोपकुशकण्टशालूकनिष्कोषणदूषिताश्च दन्तवेष्टाः" सुश्रुतः

निष्कौशाम्बि त्रि॰ निर्गतः कौशाम्ब्या नगर्याः निरा॰त॰ तत्पुरुषे गोणत्वेन हुस्वः । कौशाम्ब्या नगर्या निर्गते ।

निष्क्रम पु॰निर्+क्रम–घञ् । १गृहादितो बहिर्गमने प्रथमनिष्क्रमनिमित्तं कर्त्तव्ये शिशोः २संस्कारभेदे च "अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः" याज्ञ॰ ।

निष्क्रमण न॰ निर्+क्रम–ल्युट् । १गृहादितो बहिर्गमने चतुर्थे मासि शिशोः कर्त्तव्ये प्रथमनिष्क्रमनिमित्ते २संस्कारभेदे च । तन्मुहूर्त्तादिकं सुहू॰ पी॰ उक्तं यथा "दोलाधिरूढिरथ निष्क्रमणं चतुर्थमासे गमोक्तसमयेऽर्कमितेऽह्नि वा स्यात्" स्मृ॰ "अथ निष्क्रमणमुहूर्त्तः तत्र चतुर्थमासे गमोक्तसमये यात्राभिहितसमीचीनतिथिवारनक्षत्रादिसहिते काले शिशूनां निष्क्रमणम् । निष्क्रमाख्यसंस्कारपूर्वं गृहाद्बहिर्गमनं कुर्यात् । वा अथवाऽर्कमितेऽह्नि द्वादशे दिवसे निष्क्रमणं कुर्यात् । यदाह मनुः "चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्" । गुरुरपि "गृहात् निष्क्रमणं सूतेश्चतुर्थे मासि कारयेत् । यात्रोक्ते समये मासि तृतीये द्वादशेऽहनि" अत्र तृतीयमासोऽप्युक्तः । राजमार्त्तण्डेनापि "मासे तृतीये शशिदृङ्मिपक्षे क्षपाकरे शोभनगोचरस्थे । उत्पातपापग्रहवर्जिते भे निष्क्रामणं सौख्यकरं शिशूनाम्" । तदेतयोः पक्षयोर्यथागृह्यं व्यवस्था । मुहूर्त्तसंग्रहे तु निष्क्रमणे विशिष्य तिथ्याद्युक्तं यथा "पूर्वः पक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विना । रिक्ताषष्ठ्यष्टमीदर्शद्वादशीश्च विवर्जयेत् । चत्वार्यार्यमणतस्त्रीणि वैश्वात् त्रीणि च बुध्नभात् । बुध्नभादुत्तराभाद्रपदात्तस्त्रीणि भानि । मैत्रमादित्यपुष्यौ च रोहिणी च शुभावहाः । भरणीमेषा वर्ज्याः स्युस्तथैवाधोमुखानि च । सतां तु वारवर्गाश्च शुभदास्तूदयास्तथा । केन्द्रत्रिकोणगाः सौम्याः पापाः षष्ठत्रिलाभगाः । उपनिष्क्रमणे शस्ता मातुलो वाहयेच्छिशुमिति" । अधोमुखानि मूलाश्लेषाग्नेयमधोमुखं भवेदित्युक्तानि । उदयाः लग्नानि । एवंविधे सुलग्ने क्रियमाणस्य शिशुनिष्क्रमणफलमाह बृहस्पतिः । "अथ निष्क्रमणं नाम गृहात् प्रथमनिर्गमः । अक्षतायां क्रियायां स्यादायुःश्रीनाशनं शिशोः" । क्षते संपद्विवृद्धिः स्यादायुर्वृद्धिनमेव चेति" अत्र विशेषमाह यमः "तृतीये मासि कर्त्तव्यं शिशोः सूर्यस्य दर्शनम् । चतुर्थे मासि कर्त्तव्यमग्नेश्चन्द्रस्य दर्शनम्" इति । वेदभेदेन व्यवस्था ज्यो॰त॰ दर्शिता यथा "चतुर्थमासीति ऋग्वेदियजुर्वेदिनोः । यथाह विष्णुः "चतुर्थमासादित्यदर्शनमिति" । शौनकोऽपि "चतुर्थे मासि पुण्यर्क्षे शुक्ले निष्क्रमणं शिशोः" पारस्करः "चतुर्थे मासि नष्क्रमणिकां सूर्यसंदीक्षयति तच्चक्षुरितीति" मासे तृतीय इति तु छन्दोगानां गोभिलेन जननान्तरं तृतीयशुक्लपक्षतृतीयायां चन्द्रदर्शनरूपनिष्क्रामणविधानात् यथा गोभिलः "जननादुपस्तृतीयोज्योत्स्नस्तृतीयायामित्यादि" । ज्योत्स्नः शुक्लपक्षः । अत्रैव कृत्यचिन्तामणिः "तस्मात् स्वस्वविधानतोऽर्कशशिनोरर्घ्यं शिशुं दापयेत्" । ततः तारका॰ संजातार्थे इतच् । निष्क्रमणित संजातनिष्क्रमणे त्रि॰।

निष्क्रय पु॰ निष्क्रीयते प्रत्याह्रियतेऽनेन परगृहीतम् निस्+क्री–करणे अच् । १भृतौ वेतने २विनिमयद्रव्ये तुल्यमूल्यद्रव्येण विनिमिते द्रव्ये । भावे अच् । ३क्रये ४बुद्धियोगे ५सामर्थ्ये ६निर्गमने च वैजय॰ । ७प्रत्युपकारे ८विनिमये च शब्दार्थचि॰ "ससृत्तिपन् यः पृथिवीभृतां वरम् वरप्रदानस्य चकार गूहिनः । त्रसत्तुषाराद्रिसुतासमक्षमस्वयंग्रहस्वेमसुखेन निष्क्रयम्" माघः ।

९विक्रये "न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्या विसृज्यते" मनुः ।

निष्क्रिय त्रि॰ निर्गता क्रिया यस्य प्रा॰ब॰ अत्वम् । क्रियादिव्यापारशून्ये "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्रुतिः "निष्क्रियस्य तदसम्भवात्" वा॰सू॰ "अथ द्रव्याश्रिता ग्रेया निर्गुणा निष्क्रिया गुणाः" भाषा॰ । [क्षाये (भोज) हेमच॰ ।

निष्क्वाथ पु॰ निःसृतः क्वाथः प्रा॰ त॰ अत्वम् । मांसादि-

निष्टक्वन् त्रि॰ निर्+तक्ष–क्वनिप् वेदे अत्वटुत्वे । नितरां तक्षणशीले स्त्रियां "वनो र च" पा॰ ङीप् रचयोरादेशः । निष्टक्वरी । "दार्वो निष्टक्वरीमिव" ऋ॰ ५ २२ ६

निष्टानक पु॰ नितान्तस्तानकः मध्यपदलोपी कर्म्मधा॰ प्रा॰त॰ वा॰अत्वटुत्वे । वाद्यशब्दे "निष्टानकश्च सुमहांस्तव सैन्यस्य चाभवत्" भा॰भी॰४८अ॰ ।

निष्टि स्त्री निष–समाधौ क्तिच् । अदितिसपत्न्यां १दितौ "निष्टिद्याः पुत्रमाच्छावयोतवः" ऋ॰१॰१॰१ १२"निष्टिं दितिं सपत्नीं गिरतीति निष्टिर्दितिः तस्याः पुत्रम्" भा॰ ।

निष्टुर् त्रि॰निष्+तु–क्विप् वेदे वा॰ षः रषरत्वम् अत्वटुत्वे । निस्तरते अत्यन्ताभिभावके "प्र व उग्राय निष्टुरे" ऋ॰ ८ ३२ २७ "निष्टुरे अत्यन्तं निस्तरते" भा॰ ।

निष्ठ पु॰ निर्गत स्थायते स्थै–क निस्+गतार्थे त्यप् वा । विसर्गलोपअत्वटुत्वे १चण्डवादो २म्लेच्छजातिभेदे हेमच॰ ३पुत्रादौ च । "वं मे निष्ठो अनमात्यो निचखान" यजु॰ ५ २१ "म्ले स्थे यद्यसङ्गातयोः नितरां स्थायति सङ्गातरूपेण यत्र वर्त्तते इति निष्ठः यद्वा निर्गत्य शरीरात् स्थायति विलीयो भवतीति निष्ठः पुत्रादिः । यद्वा निर्गतो वर्णाश्रमेभ्यो निष्ठः चण्डालादिः "निष्ठो गते" इति पा॰ वार्त्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति पाणिकायाम्" वेददी॰ ।

निष्ठ त्रि॰ नि+स्था–क अत्वटुत्वे । नितरां स्थितिशीले "अथ वा हेतुमत्स्थिरविरक्तामतियोगिना" भाषा॰ ।

निष्ठा स्त्री नि+स्था–भावे अ अत्वटुत्वे । १निश्चयो २नाशे ३शास्त्रसीमायां ४निर्वहणे च अमरः । ५वाक्यजायां मेदि॰। (६मादौ अन्यायाम "द्वौकेऽस्मिन् द्विविधा निष्ठा उदा प्रोक्ता मयाऽनघ ! ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" गीता "तस्मिन्नस्य मोक्षोपदेशात्" भा॰ सू॰ "तस्मिन्नात्मनि चेतने निष्ठा यस्येति विग्रहः। "तेषां निष्ठा तु का कृष्ण ! सत्त्वमाहो रजस्तमः" गीता । ७अवधारणे च "ग्राम्यं निष्ठा च चक्षुश्च लक्ष्मीलं मनश्च च । न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति" भा॰ आश्व॰ ६६५ श्लो॰ । व्याकरणपरिभाषिते क्तक्तवतुप्रत्यये "क्तक्तवतू निष्ठा" पा॰ "स्वरनिष्ठनिष्ठः" धातुपाठः । नितरां तिष्ठन्ति भूतान्यत्र आधारे वा॰ अ । प्रलये सर्वभूतस्थित्याधारे ९विष्णौ स्त्री "निष्ठा शान्तिः परायणः" विष्णुस॰ ।

निः(नि)ष्ठा त्रि॰ नि(निर्)+स्था–क्विप् अत्वटुत्वे वा विसर्गलोपः । नितरां यथा भूतस्थितौ "लातो निःष्ठामदधुर्नौषु धीरान्" ऋ॰१ ३१ १॰"निष्ठां पूर्वं यथास्थितिमकार्षुः तथा" भा॰ अस्य यथाद्यजादौ निःष्ठः निःष्ठा निःष्ठे इत्यादिरूपमिति भेदः । [तिमने व्यञ्जने अमरः।

निष्ठान न॰ नि+स्था–करणे ल्युट् अत्वटुत्वे । भक्षाद्युपसेचने

निष्ठानक पु॰ नागभेदे "निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा" भा॰आ॰ ३५अ॰ ।

निष्ठान्त त्रि॰ निष्ठा नाशोऽन्ते यस्य । नाशान्ते वस्तुनि । "निष्ठान्तं यस्य चापि तं शान्तं धर्मस्य केवलम्" भा॰ स्त्री॰ ११अ॰। २नितरांस्थितवति च "नामादिरत निष्ठान्तो मातृका बहवो यथा" अनु॰ १॰१अ॰ ।

निष्ठित त्रि॰ नि+स्था–क्त अत्वटुत्वे । १नितरांस्थिते वस्तुनि २निष्ठायुक्ते च "बुद्धियोगपरोत्तृष्णाद्वेषः सर्वाक्लेषु च निष्ठितः" भा॰आ॰ १२२अ॰ ।

निष्ठी(ष्ठे)व पु॰ नि+ष्ठिव–भावे घञ् वा दीर्घः । ष्ठीवने श्लेष्मादीनां मुखान्निरसने हेमच॰ ।

निष्ठी(ष्ठे)वन न॰ नि+ष्ठिव–भावे ल्युट् वा दीर्घः । श्लेष्मादीनां मुखेन निरसने "वान्तं निष्ठीवनं चैव कुर्वते चाप्यसन्निधौ" भा॰आ॰ ५६अ॰ "श्रुतेऽवलोके वान्ते च तथा निष्ठीवनादिषु । कुर्वीताचमनं सम्यक् गोपृष्ठस्यार्कदर्शनम्" मार्कण्डपु॰ २४अ॰ ।

निष्ठीवित न॰ निष्ठीवं करोति कर्त्ता निष्ठीव+क्विप्–भावे क्त । निष्ठीवनकरणे "वाचः पारुष्यं निष्ठीवितं श्रुतं चाशुभं वचितम्" द॰सं॰ ५२अ॰ ।

निष्ठुर न॰ नि+स्था–उरच् मद्गुरादि॰नि॰अत्वटुत्वे । १परुषवाक्ये २कठोरे त्रि॰ । "शुष्कार्द्रामेध्यवस्त्राणां वचनं निष्ठुरं विदुः । यदन्यद्वा वचो लोके स्त्रीषु चैशुनाभवम्"

इत्युक्ते १अश्लीलवाक्ये न० ४तत्तद्विशिष्टे त्रि० अमरः। "हिंसा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम्" भट्टिः। "संरब्ध कुलिपकनिष्ठुर चोदनाभिः" माघः।

निष्ठुरिक पु० नागभेदे "आप्तः कोटरकश्चैव शिखी निष्ठुरिकस्तथा" भा०उ० १०२अ०।

निष्ठ्यूत त्रि० नि+ष्ठिव–क्त ऊठ्। १सुखेन निरस्ते श्लेष्मादौ "अकुष्ठनिष्ठ्यूतमिवोर्द्धसत्त्वैः" माघः "श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः" मनुः भावे क्त। २निष्ठीवने न०।

निष्ण त्रि० नि+स्ना–क "निनदीभ्यां स्नातेः कौशले" पा० षत्वे टुत्वम्। कुशले "आतिथ्यनिष्णा वनवासिसख्याः" भट्टिः।

निष्णात त्रि० नि+स्ना–क्त "निनदीभ्यां स्नातेः कौशले" पा०षत्वे टुत्वम्। १कुशले निपुणे अमरः। "निष्णातैरथ सरसा प्रियासमूहैः" माघः। २पारङ्गते च "वैशम्पायनएवैको निष्णातोयजुषामुत" भाग० ११२अ०।

निष्पक्व त्रि० नितान्तं पक्वम्। "दृढदृढपक्षस्य चाप्रत्ययस्य" पा० षत्वम्। १अतिशयेन पक्वे व्यञ्जने २काथिते द्रव्यमूलादौ च "पर्णकषायनिष्पक्वा एतामापो भवन्ति" शत०ब्रा०६,५,१।

निष्पतिष्णु त्रि० निष्+पत–क्त्वा० इष्णुच् षत्वम्। नितान्तपतनशीले "इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः। सर्वतो निष्पतिष्णूनि" भा०शा० २५०अ०।

निष्पतिसुता स्त्री निर्गतो पतिः सुतश्च यस्याः प्रा०ब०षत्वम्। अवीरायां पतिपुत्रविहीनायां स्त्रियाम् अमरः।

निष्पत्ति स्त्री निर्+पद–क्तिन् षत्वम्। १समाप्तौ २सिद्धौ च "कथमप्यसामान्तरा निष्पत्तेः प्रतीक्षते" कुमा० "निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थिता" मार्क०पु०४२अ०।

निष्पत्र त्रि० निर्गतमन्यपार्श्वेन निःसृतं पत्रं शरपुङ्खो यस्य प्रा०ब०षत्वम्। १एकपार्श्वनिक्षिप्तसपुङ्खशरस्यापरपार्श्वेन निर्गमयुक्ते मृगादौ ततः "सपत्रनिष्पत्राट्टिलयने" पा० ऊठोयोगे डाच्। निष्पत्राकरोति मृगं सपुङ्खस्य शरस्यापरपार्श्वेन निर्गमनात् निष्पत्रं करोतीत्यर्थः णि०कौ०। निर्गतं पत्रं यस्य। निर्गतपत्रके त्रि०। "विध्यन्त्यनिष्पत्रम्" कात्या० श्रौ० १२,२२,३ "अनिष्पत्रमनिःसृतपत्रं विध्यन्ति क्षत्रियाः" कर्कः।

निष्पत्रक त्रि० निर्गतं पत्रं पर्णं यस्य कप्। १पत्रशून्ये स्त्रियां टाप् क्वापि अत इत्वम्। सा च २करीरवृक्षे राजनि०। [धने हेमच०।

निष्पत्राकृति स्त्री निष्पत्र+डाच् ञ–भावे क्तिन्। अतिश्य-

निष्पद न० निर्गतं पदं पादोऽस्य प्रा०ब०षत्वम्। १पादहीने २तादृशयाने नौकादौ युक्तिकल्पतरुः।

निष्पदयानञ्च नौकादिरूपं तद्विवरणञ्च तत्र यथा "नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते। अश्वादिकन्तु यद् यानं स्थले सर्वं प्रतिष्ठितम्। जले नौकैव यानं स्यात् तस्यां यत्नतो वहेत्"। तद्घटनादिकालो यथा "शुक्रवारवेला तिथिचन्द्रयोगे चरे विलग्ने मकरादिषट्के। कर्मेऽन्यसप्तव्यतिरेकलोऽन्ये वदन्ति नौकाघटनादि कर्म। अश्विकरांशुसुधानिधिपूर्वोमित्रधनाच्युतभे शुभलग्ने। तारकयोगतिथीन्दुविशुद्धौ नौगमनं शुभदं शुभवारे। वृक्षायुर्वेदगदिता वृक्षजातिश्चतुर्विधा। समासेनैव गदितं तेषां काष्ठं चतुर्विधम्"। तद्यथा "लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत्। दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत्। कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते। दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते। लक्षणद्वययोगेन द्विजातिकाष्ठसंग्रहः। क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पदि नौका। अन्ये बहुभिः सुदृढैर्विदधति जलदुःखदे नौकाम्। विभिन्नजातिद्वयकाष्ठजाता न श्रेयसे नापि सुखाय नौका। नैषा चिरं तिष्ठति भुज्यते च विभिद्यते वारिषु मज्जते च। न सिन्धुगाद्याऽर्हति लौहबन्धं तल्लोहकान्तैर्ह्रियते हि लौहम्। विपद्यते तेन जलेषु नौका गुणेन बन्धं निजगाद भोजः"। अथ लक्षणानि "सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम्"। तत्र सामान्यम्। "राजहस्तमितायामा तत्पादपरिवाहिनी। तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः। अतः सार्द्धमितायामा तदर्द्धपरिवाहिनी। त्रिभागेणोन्नता नौका मध्यमेति प्रचक्षते। क्षुद्राऽथ मध्यमा भीमा चपला पटला भया। दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा। नौकादयंकमित्युक्तं राजहस्ताद्यनुक्रमात्। एकैकहस्तैः सार्द्धैश्च विज्ञानीयाद् इमं द्वयम्। उन्नतिश्च प्रवीणा च हस्तादर्द्धांशसम्मिता। अत्र भीमा भया चैव गर्भराख्या शुभप्रदा। मन्थरा परतोयासु तासां सेवाप्रसिद्धोगतिः। तासां गुणस्तु संक्षेपाद् दृढता च प्रकीर्त्तिता"। अथ विशेषः "दीर्घा चैवोन्नता चेति विशेषे द्विविधा भिदा। तत्र दीर्घा यथा "राजहस्तद्वयायामा अष्टांशपरिवाहिनी। नौकेयं दीर्घिका नाम दर्शांशेनोन्नतापि च। दीर्घिका तरणिर्नौका

मत्वरा गामिनी तरिः, जङ्घाला स्रावि नी चैव धारिणी वेगिनी तथा। राजहस्तैकैकवृद्ध्या नौकानामानि वै दश। उच्छ्रितिः परिणाहश्च दशाष्टांशमितौ क्रमात्। यत्र लोला गामिनी च स्रावि नी दुःखदा भवेत्। लोलायमानामारभ्य यावत् भवति मत्वरा। लोलायाः फलमाधत्ते एवं सर्वासु निर्णयः। वेगिन्याः परतो या तु साखिलायोत्तरा तथा"। भोजोऽपि "नौकादीर्घं यत्रेच्छं स्यात् तत्रैतानि विवर्जयेत्। हस्तसंख्या परिज्ञाय दशाष्टवेदद्व्यहोत्तरैः। षष्ट्युत्तरमिता नौका कुलं हन्ति बलं धनम्। नवतेरुत्तरे यापि या चत्वारिंशतः परा"। यावदपरदशकं तावदेव तत् फलमिति। अथोच्छ्रता। "राजहस्तद्वयमिता तावत् प्रसरणोच्छ्रता। इभमूर्ध्वाभिधा नौका क्षेमाय पृथिवीभुजाम्। ऊर्ध्वानूर्ध्वा सर्वतश्च गर्भिणी मन्थरा तथा। राजहस्तैकैकवृद्ध्या नाम पञ्च त्रयं भवेत्। आत्मानूर्ध्वा गर्भिणी च निन्दितं नाम युग्मकम्। मन्थरायाः परायास्तु ताः शुभाय यथोद्भवम्"। भोजोऽपि। बाणाग्न्युत्तरतो यानं नौका नाम शुभा वहेत्। पञ्चाग्रदूर्ध्वा दुःखार्थं धनलाभं त्रयोर्द्वतः। इत्युच्छ्रता "वाताद्यो नामतो यत्ते निर्णयं तरिसंश्रयस्। कनकं रजतं ताम्रं त्रितयं वा यथाक्रमम्। ब्रह्मादिभिः परिन्यस्य नौकाचित्रणकर्मणि। चतुःषड्ङ्गा त्रिषड्ङ्गा वा द्विषड्ङ्गा चैक षड्ङ्गिणी। सितरक्तपीतनीलवर्णास्ताःस्युर्यथाक्रमम्। केसरी महिषो नागो हिरदो व्याघ्र एव च। पक्षी भेको मनुष्यश्च एतेषां वदनाष्टकम्। नावां सखोपरिन्यस्य आदित्यादिदशाभुवाम्। कलशो दर्पणश्चन्द्र क्षेदशानां महीभुजाम्। हंसः केकी शुकः सिंहो मयूरोऽहिर्व्यालमृष्टपदौ। आदित्यादिदशाजातनौकोपरि परिन्यसेत्। नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत्। सुतुक्कास्तवकैर्युक्ता नौका स्यात् सर्वतो भद्रा। ततुसंख्या चेदथ रसवेदद्वयसम्मिता क्रमशः। कनकादीनां माला त्रयमालेति गद्यते सद्भिः। ब्रह्मक्षत्रे द्वितये एकैके वैश्यशूद्रयोर्नौ। निर्गृहं सगृहं वाथ तत्सर्वं द्विविधं भवेत्। निर्गृहं पूर्वसूचितं सगृहाणि यथा शृणु। सगृहा त्रिविधा प्रोक्ता सर्वमध्यायनन्दिरा। सर्वतो मन्दिरं यत्र सा ज्ञेया सर्वमन्दिरा। राज्ञां कोशाश्वनारीणां फलमत्र प्रशस्यते। मध्यतो मन्दिरं यत्र सा ज्ञेया मध्यमन्दिरा। राज्ञां विद्याश्रयादिवर्णासु च प्रशस्यते। अग्रतो मन्दिरं यत्र सा ज्ञेया ह्यग्रमन्दिरा। चिरप्रवासयात्रायां रथे काले धनात्यये। मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम्"। भोजस्तु दीर्घदृत्तवसुषड्दिवाकरानेकदिङ्नवमिता यथाक्रमम्। राजपञ्चभुजसम्मितोच्छ्रितिर्मन्दिरे तरिगते क्षोणीभुजाम्। भास्करादिकदशाभुवां पुनर्धातुनिर्णयनमत्र पूर्ववत्। पताकाकलसादीनां निर्णयो नवदण्डवत्। काष्ठजं धातुजं चेति मन्दिरं द्विविधं भवेत्। काष्ठजं सुखसम्पत्त्यै विलासे धातुजं मतम्। अत्र मयासनादीनां मन्थरोच्छ्रोपवोरपि। अन्येषाञ्चैव मुनिभिर्निर्णयः पूर्ववन्मतः। दिङ्मानमिदमुद्दिष्टं नौकाकलसमप्रजम्। प्रधानेष्वेव नियमो ह्यप्रधाने न निर्णयः। लघुता दृढता चैव गामिताऽस्थिदृता तथा। समतेति गुणोद्देशो नौकानां सम्प्रकाशितः' एवं विचिन्त्य यो राजा नौकायानं करोति च। स चिरं सुखमाप्नोति विजयं समरे श्रियम्। योऽध्वानादन्यथा यानं नौकानां कुरुते नृपः। तस्यैतानि विनश्यन्ति यशोवीर्यं बलं धनम्"। जघन्यजलयानानि यथा "नौकाग्रतो जले यानं जघन्यमिति गद्यते। तद्देशावहवस्ते तु पाषाणानां प्रकीर्त्तिताः। द्रोणीरूपन्तु यद्यानं द्रोणीयानं तदुच्यते। घटीभिर्घटितं यानं घटी नौकेति गद्यते' तुम्बादीनां फलैर्यानं फलयानं प्रचक्षते। चर्मभिस्तूलपूर्णैश्चर्मयानं तदुच्यते। यानं यन्त्रभुजिर्द्वैश्चैर्द्वैश्चयानं तदुच्यते। जन्तुभिः सलिले यानं जन्तुयानं प्रचक्षते। बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः"

निष्पदी स्त्री निर्गतः पादोऽस्याः पादः अनलोपः समा० कुम्भपद्या० ङीष्, पद्भावः विसर्गस्य षः। १पादहीनायां स्त्रियाम्। निर्+पद्-क्विप्। २निर्गते "निष्पदो मृगजानाम्" ऋ० १०.१०२ ६ "निष्पदः निर्गच्छन्तः" भा०।

निष्पन्द त्रि०निर्गतः स्पन्दो यस्य प्रा०व०। विसर्गलोपाभावे "इदुदुपधस्य चाप्रत्ययस्य" पा० षत्वष्टुत्वे। स्पन्दनरहिते "व्यावर्त्तनिष्पन्दभुजेन यस्य"। "मैथिलीतनयोद्गीतनिष्पन्दमृगमाश्रमम्" रघुः। विसर्गलोपे न षत्वम्।

निष्पन्न त्रि० निर्+पद्-क्त षत्वम्। १सिद्धे २समाप्ते च।

निष्परिग्रह त्रि०निर्गतः परिग्रहः यस्य प्रा०व०। १विषयादिसङ्गरहिते अन्नाकङ्कादिभिरङ्गीकाररहिते २यत्नादौ च "आत्मन्यात्मानमाधाय निर्द्वन्द्वो निष्परिग्रहः" मार्क० पु० १६अ०।

निष्प्रवण न० निष्+पू–भावे ल्युट् नत्वम् । धान्यादेर्निस्तुषीकरणे । निष्प्रावणशब्दार्थे "निष्प्रवणादिफलीकरणान्तं भेदेन धान्यानामभिनन्नत्वादिफलनिधानान्तं कल्पनम्" वात्या० चो० पद्धतौ वर्णः ।

निष्पाद पु० निर्गतौ पादौ यस्य प्रा०ब० अन्यथोपः समा० विसर्गस्य षः । निर्गतपादके तः विष्णा० अस्त्यर्थे मत् । निष्पाद्य तद्युक्ते देशादौ त्रि० ।

निष्पादक त्रि० निर्+पद–णिच्-ण्वुल् विसर्गस्य षः । निष्पत्तिकारके "न चार्थविज्ञाने तस्य मन्त्री सहायः किन्तु स्वयमेव निष्पादकः" वा०द० ।

निष्पाव पु० निष्पूयते तुषाद्यपनयनेन शोध्यतेऽनेन निर्+पू–करणे घञ् नत्वम् । १सूपादिपाकौ तेन हि सस्यधान्यादिकं संस्कारादिशून्यं करोति । कर्मणि घञ् । २सस्कारे (आनडा) ३राजमाषे (बरबटी) ४श्वेतशिम्बीधान्ये ५निर्विकल्पे त्रि० मेदि० । भावे घञ् । ६धान्यादीनां विशुद्धीकरणे अमरः । "चौरवित्ता तु निष्पावान् आवते स्टकशोणकः" मार्क० पु० १५अ० संज्ञायां कन् । श्वेतशिम्बां राजनि० "निष्पावो मधुरो रूक्षो विषाहेऽग्नो गुरुः वरः । कषायस्तस्तपित्तास्रकफमूत्रातिबन्धकृत् । विदाह्यग्निविक्लेदशोषकृत् यमुनाभवः" भावप्र० । ततः विष्णा० अस्त्यर्थे मत् । निष्पावत् विशुद्धीकरणयुक्ते धान्यादौ त्रि० गौरा० ङीप् । निष्पावी शिम्बीभेदे स्त्री राजनि० ।

निष्पुत्राक त्रि० निर्गतः पुत्राको यतः प्रा०ब० नत्वम् । १पुत्ररहिते धान्यादौ (आगडा) तच्च धान्यरहिते चतुर्वर्णिस्यां २जैनभेदे पु० हेम० ।

निष्पेष पु०निर्+पिष–घञ् । १निष्पीडने २निष्पर्मणे ३घर्षणे "नाराचक्षेपणीयास्त्रनिष्पेषोत्पतितानलम्" रघुः । तस्मै प्रभवति तत्रापादि० ठञ् । नैष्पेषिक निष्पेषसम्बन्धिनि । अभावे अव्य० ४भेदाभावे अव्य० निरुदका० अन्तोदात्तताख्ये भावे ल्युट् । निष्पेषणमपत्र न० ।

निष्प्रकम्प त्रि० निर्गतः प्रकम्पो यस्य प्रा०ब० नत्वम् । १प्रकम्पशून्ये त्रयोदशमन्वन्तरोक्ते २सप्तर्षिभेदे पु० । तदुपक्रमे "निष्प्रकम्पस्तथात्रेयो निर्मोहः काश्यपस्तथा । सुतपाश्चैव वाशिष्ठः सप्तैते तु महर्षयः" हरिवं० ७अ० ।

निष्प्रतिभ त्रि० निर्गतः प्रतिभायाः निरा०त० नत्वम् । १जडे मन्दे २प्रागल्भ्यरहिते च जटाध० "शोचाचाराद्यनाराद्य सुप्तनिष्प्रतिभाद्य च" हरिवं० ८२अ० ।

निष्प्रत्यूह त्रि० निर्गतः प्रत्यूहो यस्य प्रा०ब० नत्वम् । निर्विघ्ने निरुपद्रवे "निष्प्रत्यूहसुपाकाय भगवतः कौमोदकीचक्रभृतः" उत्तरिमाटकम् ।

निष्प्रभ त्रि० निर्गता प्रभाऽस्य प्रा०ब० नत्वम् । १दीप्तिशून्ये अमरः । "निष्प्रभश्च रिपुराज भूभृताम्" रघुः । २दानवभेदे पु० । "निष्प्रभः सुप्रभश्चैव तथैव च निरुद्धरः" हरिवं०२६२अ० ३स्नानादानवोक्तौ ।

निष्प्रयोजन त्रि० निर्गतं प्रयोजनमस्य प्रा०ब० नत्वम् । प्रयोजनशून्ये "गुरुणासुपदेशो हि निष्प्रयोजनतां व्रजेत्" प्राय०त० "निरानन्दं निराशाढ्यं निष्प्रयोजनमाहतम्" हरिवं०अ० ।

निष्प्रवाण न० प्रकर्षेण वयति अनेन प्र+वे–ल्युट् करणे ल्युट् प्रवाणं तन्त्रवयनसाधनद्रव्यं निर्गतं प्रवाणात् निरा०त० । नवाम्बरे हारा० ।

निष्प्रवाणि त्रि० प्रोयन्तेऽस्यामनया वा प्र+वेञ्–करणे ल्युट् ङीप् प्रवाणी तन्त्रवायशलाका निर्गतः प्रवाणीतः निरा० ब० नोत्वेन सुप्तः नत्वम् । नवाम्बरे अभिनवे (तांतबाटा) वसने अमरः ।

निष्प्राण त्रि० निर्गतः प्राणः तत्सम्बन्धोच्छ्वासादिर्वा प्रा०ब० नत्वम् । प्राणप्रयाणादिशून्ये "स्थानिर्निष्प्राणताकस्मात्-स्तोत्तरसहतादिकृत्" वा० द० "संस्तम्भितमिवाभाति निष्प्राणवटपादपम्" (वनम्) हरिवं० ४६अ० ।

निष्फल त्रि० निर्गतं फलं यस्मात् प्रा०ब०नत्वम् । १फलरहिते "अवगम्य कथीकृतं वपुः प्रियवन्त्रोत्सव निष्फलोदयः" कुमा० । फलशून्ये धान्यकाण्डे २पलाशे (पाडा) पु० अमरः । ३विगतार्त्तवायां स्त्रियां स्त्री गौरा० ङीष् । निष्फली विगतरजस्कायां स्त्रियां स्त्री शब्दरत्ना० ।

निष्फेन त्रि० निर्गतं फेनं यस्य प्रा०ब० नत्वम् । फेनरहिते उपरतफेने "यत् काञ्चमानं निर्फेनं निष्फेनं निर्मलं वपुः" सुश्रुतः । पक्षे विसर्गोपधानीयौ

निष्य(स्य)न्द पु० नि+स्यन्द -भावे घञ् वा नत्वम् । करणे अन्यादेः स्वयंस्रवणे "हिमनिष्यन्दशीतलम् ।" अच् । २निष्यन्दयुक्ते त्रि० ।

निष्यूत त्रि० नि+षिव–क्त सट् नत्वम् । नितान्तसीविते

निष्पन्धि त्रि० निर्गतः सन्धिः सन्धानं यस्य प्रा०ब०सुपाकाभावम् ष्टुत्वम् । सन्धिरहिते ।

निष्पमम अव्य० निर्गता समा यस्य तिङ्गुप्र० अव्ययी० नत्वट्ट्वे । यत्सदृशातीते ।

निष्यामन् त्रि॰ निर्गतं यामं यस्य प्रा॰ब॰ सुयामा॰ मत्वम् ह्रस्वश्च। सामशून्ये। [नितान्तद्वेषे।

निष्द्वेष पु॰ निस्+द्विष–भावे घञ् सुयामा॰ मत्वम् ह्रस्वश्च।

निस् अव्य॰ निस्–क्विप् उपसर्गभेदः। १निर्गमे २निश्चये ३साकल्ये ४अतिक्रमे च यद्व्यर्थचि॰। निर् यन्दे दृश्यम्

निसम्पात पु॰ निहतः सम्पातः सञ्चारो यत्र। निशीथे अर्द्धरात्रे यद्रत्ना॰ निरा समाधे निःसम्पातोऽयत्र।

निसर त्रि॰ निसरति नि+सृ–अच्। नितान्तसर्त्तरि नितान्तगामके "सन्यवेऽयस्तापं क्रोधाद निसरम्" यजु॰ ३० १४ अ॰।

निसर्ग पु॰ नि+सृज–घञ्। १अभावे २स्वरूपे ३स्वृष्टौ च मेदि॰ "वर्णोनिसर्गोज्ज्वलः" नैष॰ "मधुराद्यापनिसर्गपण्डिताम्" कुमा॰ "निसर्गदुर्बोधमबोधविक्लवाः" किरा॰ "निसर्गस्य तु तस्य कस्तत्कारणमदोषकृति" मनुः। अहाणां निसर्गवत्वम् अहवत्वयन्दे २७५४ पृ॰ दृश्यम्।

निसार पु॰ नि+सृ–घञ्। सपूरे त्रिका॰।

निसिन्धु पु॰ नितरां सिन्धुरिव बहुत्वपत्वादिमत्त्वात्। सिन्धुवारे (निसिन्दा) यन्दच॰।

निसुन्ध(न्द) पु॰ असुरभेदे "वादिता भीरवाः वाद्या निसुन्ध(न्द) कृतश्च कृतौ" भा॰व॰ १२अ॰ "इयमयोगो निसुन्ध(न्द)वध वीरः पद्मनखसमा" हरिवं॰ १२२अ॰।

निसूदक त्रि॰ निसूदयति नि+सूदि–ण्वुल्। हिंसके "तथालेवीनिसूदकः" वाच॰।

निसूदन न॰ नि+सूद–भावे ल्युट्। १मारणे वधे अमरः। कर्त्तरि ल्यु। २मारके नाशके त्रि॰ "यनिन्द्रयन्द्रार्थनिसूदनं हरेः" माघः "यत्रनिसूदनमर्थपतिश्च तम्" रघुः।

निसृता स्त्री नितरां सृता नि+सृ–क्त। २विद्युतायाम् (तेजोवि) रत्नमा॰। २नितान्तगते त्रि॰।

निसृष्ट त्रि॰ नि+सृज–कर्मणि क्त। १त्यक्ते अमरः २समर्पिते त्रिका॰। "न स्वामिना निसृष्टोऽपि गृह्णीयादाददीत वा" मनुः।

निसृष्टार्थ पु॰ "उभयोर्भाषितस्यैव स्वयं वदति चोत्तरम्। सन्दिष्टः कुरुते कर्म निसृष्टार्थस्तु स स्मृतः" शा॰द॰ दृष्टुक्ते १दासभेदे "निसृष्टार्थोमितार्थश्च तथा सन्देशहारकः। कार्य्यप्रेष्यस्त्रिधा दूतो दूतश्चापि तथाविधाः" शा॰द॰ "यः स्वामिना नियुक्तोऽपि धनावमवपातने। कुर्वीतक्रमिवाचिन्त्ये निसृष्टार्थस्तु स स्मृतः" २दूतस्य स्मृते "धीरः स्थिरमतिः शूरः स्वामिकार्य्यविधायकः। स्वपोरुषप्रकाशी च निसृष्टार्थः स उच्यते" वृद्धौशना॰ च॰ उक्ते २पुरुषे।

निसोढ त्रि॰ नि+सह क्त ओत् ओत्वत्वात् नः। नितान्तसहे एवं निसोढवत्। निसोढि इत्यादावपि न नः।

निस्तत्त्व त्रि॰ निर्गतं तत्त्वं वास्तवं रूपं स्वरूपं वा यस्य प्रा॰ब॰। अवस्तुदा।

निस्तनी स्त्री नितरां स्तनस्तदाकारोऽस्त्यस्याः अच् गौरा॰ ङीष् वा रोर्वीपः। वटिकायां (वडि) अत्र निस्तनीशब्दे पाठः यन्दच॰। निर्गतौ स्तनौ यस्याः वा निस्तनं कोपः। स्तनहीनायां स्त्रियाञ्च स्वाङ्गत्वात् वा ङीष् पक्षे टाप् इति भेदः।

निस्तन्द्र त्रि॰ निष्क्रान्ता तन्द्रा यस्य प्रा॰ब॰। १तन्द्रारहिते २आलस्यरहिते च "निस्तन्द्रो ह्यवितथसंस्कृतप्रमाणो" शकु॰

निस्तन्द्रि त्रि॰ निर्गता तन्द्रिरालस्यं यस्य प्रा॰। आलस्यरहिते। निर्गता तन्द्र्याः निरा॰त॰। निस्तन्द्री इत्येव स्त्रीप्रत्ययान्तत्वाभावात् नोत्वेऽपि न ह्रस्व इति भेदः।

निस्तरण न॰ निर्+तृ–करणे ल्युट्। १उपाये। भावे ल्युट्। २निस्तारे ३पारगमने ४तरणे च मेदि॰ ५निर्गमे विश्वः।

निस्तरीक अव्य॰ तरे देवः दैव तरीकः अभावे अव्ययी॰। १तरणार्थदेवकरामने निरुक्ता॰ अन्तोदात्तताऽस्य। प्रा॰ब॰। २तरीकशून्ये त्रि॰।

निस्तीप त्रि॰ तरीं पाति पाः क निर्गतस्तरीपो यस्मात् प्रा॰ब॰। १नौकापालकशून्ये अभावे अव्ययी॰। २तरीपाभावे अव्य॰। निरुक्ता॰ अन्तोदात्तता। [अमरः।

निस्तर्ईण न॰ नि+तृह–हिंसायां भावे ल्युट्। मारणे

निस्तल त्रि॰ निरस्तं तलं प्रतिष्ठा यस्य। १पर्द्धते २तलशून्ये अतले न॰ अमरः। ३पदे मेदि॰ अतलस्य प्रतिष्ठाराहित्यात् तथ त्वम्। निस्तान्तं तलं प्रा॰ब॰। ५तले हेमच॰ ५पटिकायां स्त्री यन्दच॰ गौरा॰ ङीष्।

निस्तार पु॰ निःशेषेण तारः पारगमनम्। १उद्धारे २पारगमने ३अभीष्टप्राप्तौ च "ओघो नदिः सरिदतीवगभीरनीरा बाहा वयं सकलमित्यनर्थहेतुः। निस्तारबीजमिदमेव कृपोदरीणां यन्नाथ! त्वमपि सम्यति वर्त्तधारः" उद्भटः। "कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे। निस्तारबीजमेतद् यद् ब्रह्मनन्दस्य साधनम्" नृसिंहतं॰।

निस्तुष त्रि॰ निर्गतं तुषा यतः प्रा॰ब॰। १विशुद्धीकृते धान्यवयादौ "पूर्वेद्युर्दधिचान्नौ निस्तुषवष्टयवानाम्" काला॰ श्रौ॰ ५।२२ २निर्मले च।

निस्तुषक्षीर पु॰निस्तुषं निर्मलं क्षीरं यस्य । गोधूमे राजनि॰

निस्तुषरत्न न॰ निस्तुषं निर्मलं रत्नम् । स्फटिके राजनि॰ ।

निस्तुषित त्रि॰ निस्तुष+क्तौ णिच्–क्त । १त्वग्विहीने कृते तण्डुलादौ २लघूकृते १त्यक्ते च मेदि॰ ।

निस्तेजस् त्रि॰ निर्गतं तेजोऽस्य प्रा॰ब॰ । तेजोहीने "नभेतव्यं भृशं चैते मात्रा निस्तेजसः कृताः" मार्कण्डपु॰ १८अ॰ ।

निस्तोद पु॰ निस्+तुद–भावे घञ् । निष्कासनव्यथने "स्तोभिरिव निस्तोदः" "तेषु कालेषु किं नेहो जायतेनोपजायते" सुश्रुतः भावे ल्युट् । निस्तोदनमप्यत्र न॰ । "पार्श्वभङ्गो गुदवस्तिनिस्तोदनम्" सुश्रुतः ।

निस्त्रिंश पु॰ निर्गतस्त्रिंशतोऽङ्गुलिभ्यः डच् समा॰ । १खड्गे अमरः त्रिंशदङ्गुल्यधिकस्यैव खड्गत्वात् ततो न्यूनत्वे क्षुरिका । तत्तुल्यहिंसकत्वात् २निर्दये त्रि॰मेदि॰ "हे निस्त्रिंश (निर्दय) विमुक्तकण्ठकरुणं तावत् यक्षी रोदिति" अमरुशतकम् "बधतुर्बहुनिस्त्रिंशः पादचारीव पर्वतः" भा॰व्या॰ १२६अ॰ । ३मन्त्रभेदे "नवाक्षरो ध्रुव युतो मनुर्निस्त्रिंश ईरितः" तन्त्रसा॰ ।

निस्त्रिंशपत्रिका स्त्री निस्त्रिंशः खड्ग इव पत्रमस्या कप् कापि अत इत्वम् । क्षुद्रोदके राजनि॰ ।

निस्त्रिंशिन् त्रि॰निस्त्रिंशः धार्य्यत्वेनास्त्यस्य इनि । खड्गधारिणि "सन्नद्धा लोहितोष्णीषा निस्त्रिंशिनो याजयेयुः" आश्व॰श्रौ॰ ९ ७ ४ स्त्रियां ङीप् ।

निस्त्रैगुण्य त्रि॰ निष्क्रान्तः त्रैगुण्यात् त्रिगुणकार्य्यात् संसारात् तत्कार्येभ्यः कामादिभ्यो वा निरा॰त॰ । १कामानादिशून्ये २संसारातीते च "निस्त्रैगुण्यो भवार्जुन !" गीता ।

निस्त्रैणपुष्पी स्त्री निर्गतं स्त्रैणं स्त्रीरागादि यस्मात् प्रा॰ब॰ निस्त्रैणं पुष्पमस्याः ङीष् । राजधुस्तूरवृक्षे राजनि॰।

निस्स्नेह त्रि॰ निर्गतः स्नेहः प्रेम तैलादिकं वास्य प्रा॰ब॰। १प्रेमशून्ये २तैलशून्ये च ३मन्त्रभेदे पु॰ "शतद्वयं द्विनवतिरेकहीना तथापि वा । वावच्छतत्रयं सङ्ख्या निस्स्नेहाख्ये प्रकीर्त्तिताः" तन्त्रसा॰पक्षे विसर्गः । निःस्नेहः

निस्स्नेहफला स्त्री निःस्नेहं फलमस्याः । श्वेतकण्टकार्य्यां राजनि । पक्षे विसर्गः ।

निस्यन्द पु॰ निर्गतः स्यन्दो यस्य प्रा॰ब॰ वा विसर्गलोपः । १स्यन्दनरहिते "स्तब्धे घने नैषधक्षोणिपाशे निपत्य निःस्यन्दतरीमवङ्गराम्" नैष॰ । २चेष्टाशून्ये पक्षे विसर्गः ।

नि(ष्पृ)स्पृह त्रि॰ निर्गता स्पृहा यस्य वा विसर्गलोपाभावे विसर्गस्य दृढुपधत्वेन षत्वे ष्टुत्वम् झरोझरीति ष लोपे एकषः । १विषयादिषु इच्छाशून्ये "व्यासादीनां निस्पृहाणां पारार्थ्यमिह दृश्यते" "निस्पृहः सर्वकामेभ्यो युक्तइत्युच्यते तदा" गीता । २अग्निशिखावृक्षे स्त्री शब्दर॰। अव्ययी॰ ३स्पृहाया अभावे अव्य॰। विसर्गलोपे न षः ।

निस्यन्द पु॰नि+स्यन्द–घञ् वा षत्वम् । १स्यन्दने रैवतक्षरणे । कर्त्तरि अच् । २तद्युते त्रि॰ । यशाङ्कुकिरणाहतचन्द्रकान्ते निस्यन्दनीरनिकरेण कृताभिषेका" माघः "तदङ्गनिस्यन्दजलेन लोचने" रघुः ।

निस्र(स्रा)व पु॰नि+स्रु–अप्, संज्ञायां घञ् वा । १भक्तमण्डे (माड) अमरः । भावे अप् घञ् वा । २अपचरणे च ।

निस्स्व त्रि॰ निर्गतं स्वमस्य प्रा॰ब॰ । दरिद्रे पक्षे विसर्गः ।

नि(स्व)स्वान पु॰ नि+स्वन–अप् घञ् वा । शब्दे अमरः । "सुखश्रवा मङ्गलतूर्यनिस्वनाः" रघुः "वायुं कृत्वाथ वालाभ्यां इष्टे वैवस्वतं यमम् । विद्युत् कृत्वाथ निस्वानं मेरुं कृत्वाथ वै ध्वजम्" भा॰द्रो॰ २०२अ॰ । आर्षे विद्युत्मित्वत्व अमो लोपः ।

निस्सीम त्रि॰ निष्क्रान्ता सीमा यस्मात् प्रा॰ब॰ विसर्गस्य वा षः । अवधिशून्ये अपर्य्यन्ते "निः(स)सीमानन्दमाधीदुपनिषदुपमा तत्परीभूय भूयः" नैष॰ ।

निह त्रि॰ निहन्ति नि+हन–ड । निहन्तरि "अति निहो अति क्षिपः" यजु॰ २७।६

निहनन न॰ नि+हन–ल्युट् । १वधे अमरः । उदात्तस्वरेणानुदात्तादेरनुदात्तरूपे निघाते च । निघातशब्दे दृश्यम् ।

निहन्तृ त्रि॰ नि+हन–तृच् । १नाशकर्त्तरि "निहन्ता वैरकाराणाम्" भट्टिः स्त्रियां ङीप् । २महादेवे पु॰ "भगहारी निहन्ता च कालो ब्रह्मा पितामहः" भा॰अनु॰ १७अ॰ "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी" मनुः एकपदे अन्यस्वरोच्चारणाप्रयोजके निघातकर्त्तरि उदात्ते स्वरभेदे च अतएव "निहन्त्यरीनेकपदे य उदात्तः स्वरानिव" माघे उदात्तस्वरस्य एकपदे अन्यस्वराणां निहन्तृत्वस्योपमानविषयोक्तम् "अनुदात्तं पदमेकवर्जमिति" पा॰ परिभाषावशेन तस्य तथात्वम् निघातशब्दे दृश्यम् ।

निहव पु० नि+ह्वे–अप् "ह्वः संप्रसारञ्च" पा० सम्प्रसार ञम् वाऽयादि पा०सू० अस्य अन्तोदात्तता । आह्वाने "आदित्य ञकारः निहव एकारः" ऋ०भ० "निहव इत्या-ह्वानमेकारः स्तोभः । एहीति चाह्वयन्तीति तत्सामा-न्यात्" भा०। "इन्द्र ! नेदीय एदिहीन्द्रो निहवः प्रशस्यः" आश्व०श्रौ० ५ १४ ५

निहाका स्त्री नियतं जहाति भुवं हा–कन् तुसः । गो-धिकायाम् अमरः "साकं नग्न निहाकया" ऋ०१०।९७ १२ "नीहाराय स्वाहा निहाकायै स्वाहा" तैत्ति० सू० ५ ५ ११ ११

नि(नी)हार न० निह्रियते नि+हृ–कर्मणि घञ् वा दीर्घः। तुसमध्यः । १हिमे शब्दरत्ना० । दीर्घमध्यः । तत्रार्थे अमरः २कुज्झटिकायां कुल्लू० "नीहारे वाद्यशब्दे च सन्ध्ययोरेव चोभयोः" मनुः । "नीहारः कुज्झटिका" कुल्लूकः स च अनीभूतं शिशिरं (बरफ) इति ख्यातं कुज्झटिका च "नीहारमन्तो दिनपूर्वभागः" रघुः "एवं तयोक्तो भगवान्नीहारमसृजत् प्रभुः" भा० आ० ६०अ०। मत्स्यगन्धयोश्चः पराशरः कुज्झटिकारूपं नीहारं कृत्वानिति प्रसिद्धम् ।

निहिंसन न० नि+हिंस–भावे ल्युट् । मारणे अमरः ।

निहित त्रि० नि+धा–क्त हिरादेशः । १स्थापिते २स्थापिते ३निक्षिप्ते च "धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः" भा०व० ३१२अ० ।

निहीन त्रि० नितरां हीनः प्रा०स० । १नीचे २पामरे अमरः । "निहीनैः परिक्लिश्यन्तीं सुखमेवन्ति मां कथम्" भा०व०१२अ०। सुखमेवन्तीत्यत्र आर्षः पदव्यत्ययः ।

निह्नव पु० नि+ह्नु–अप् । १शाठ्ये अन्यथा स्थितस्य वस्तुनो ऽन्यथात्वेन २स्वरूपने अपलापे । "निह्नवे साक्षिभावि-तम्" मनुः "निह्नवे याचितो दद्यादनं राज्ञे च तत्समम्" याज्ञ०। नि+ह्नु–क्तिन् । निह्नुतिरप्यत्र स्त्री अमरः ।

नी त्रि० नयति नी+कर्त्तरि–क्विप् । प्रापके । ङौ न्याम्

नीक पु० नी–कक् । दृष्टभेदे [२अवहेलने शब्दार्थचि० ।

नी(नि)कार पु० नि+कृ–भावे घञ् वा दीर्घः । १तिरस्कारे

नीकाश पु०नि+काश–घञ् । उत्तरपदस्थः १उपमाने अमरः अस्य निमादित्वेन नित्यसमास एव पृथक्प्रयोगाभा-वात् । २निश्चये पु० मेदि० "आकाशनीकाशतटां तीरवा-नीरसङ्कुलाम्" भा०व० १८२अ० ।

नीकुलक पु० प्रवरभेदे हेमा०प्र० प्रवरोक्तौ दृश्यम् ।

नीक्षण न० नीक्ष्यतेऽनेन नि+ईक्ष–करणे ल्युट् । पाकादि-परीक्षासाधने काष्ठभेदे "यन्नीक्षणं मांसपचन्याः" ऋ० १ १५२ १२ "नीक्षणं पाकपरीक्षासाधनं काष्ठम्" भा०।

नीच त्रि० निकृष्टार्थी शोभां चिनोति चि–ड । जातिगुण कर्मादिभिः निकृष्टे १अधमे अमरः । २वामने खर्वे च अमरः । ३चोरनामसम्बन्धे पु० राजनि० । ४निम्ने च । नीचसङ्गदोषो यथा "न प्राप्नोति सुखं किञ्चिन्नीच-सङ्गान्महानपि । प्रेतसङ्गात् महादेवो नग्नो भस्मविभू-षितः । प्रविश्य निलयं नीचः स्वोधनादिकमिच्छति । स्वयं नेतुं च शक्नोति तदा बाधयति ध्रुवम् । स्थिते गुणेऽपि नीचस्तु यत्राहोभं प्रपद्यते । किञ्चित्तु सङ्गमा-साद्य तद्दत्तं स्यात् सनातनम् । सतां श्रुत्वा गुणं नीचः श्रोतुमायाति बन्धुवत् । ततः समयमासाद्य प्रकाशयति तद्वसु । मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् । मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम्" पाद्मे क्रिया योगसारे ५अ०। "बुद्धिश्च हीयते पुंसां नीचैः सह स-ङ्गमात् । मध्यमे मध्यतां याति श्रेष्ठतां याति वि-त्तमे" भा० शा० । "प्रायो नीचानपि मेदिनीभूतः" माघः । "नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि" मनुः । मनुभेदानाम् उच्चशब्दवर्णितोच्चस्थानात् सप्त-मस्थाने तत्र रव्यादीनां यद्यद् भवति तत् नीचस्थाव-शब्दे दृश्यम् । स्वार्थे क । नीचक तत्रार्थे

नीचकदम्ब पु० नीचः कदम्बो यस्मात् ५त० । मण्डीरे वैद्यरत्नप्रकाशिका ।

नीचका स्त्री निकृष्टार्थी शोभां चकते प्रतिहन्ति चक–प्रतिघाते अच् । उत्तमायां गवि भरतः ।

नीचकिन् त्रि० निकृष्टार्थी शोभां चकते चक–प्रतिघाते वा० इनि । उच्चे हला० ।

नीचकैस् अव्य० नीचैस् अव्ययस्य चैः पूर्वमकच् । नीचैरित्यर्थे

नीचग त्रि० नीचं निम्नं गच्छति गम–ड । १निम्नगामिनि २जले च । ३नीचवर्णगामिन्यां स्त्रियां स्त्री "नीचगामङ्गनां प्राप्य चन्द्रनैर्मण्डलं लिखेत्" तन्त्रम् । ४स्वस्योच्चस्थानात् सप्तमं स्थानं नीचं तत्स्थानस्थिते ग्रहे "तत्सप्तमं भवेन्नीचम्" ज्यो०ति०। "तुनीचगेऽस्तगेऽपि वा दृष्टफलं प्रकीर्त्तितम्" नील०ता० । उच्चशब्दे दृश्यम् । ५निम्न-गायां नद्यां स्त्री "सङ्गमयति विद्यैव नीचगाऽपि नरं सरित् । सुसङ्गमिव दुर्लभं रूपं भाग्यं यतः पृथक्" प्रिता० ।

नीचगृह न० रव्यादीनां स्वस्वोच्चस्थानात् सप्तमे राशौ यथा रवेस्तुला, चन्द्रस्य वृश्चिकः, कुजस्य कर्कः। बुधस्य मीनो गुरोर्मकरः शुक्रस्य कन्या शनेर्मेषः। "स्वोच्चात्तु वामिनस्तस्मिन् नीचम् यवनेश्वरोक्तेः। उच्चमन्दे दृश्यम्

नीचभोज्य पु० नीचैर्भोज्यः। १पक्वान्नो शब्दच०। २नीचभोज्यमात्रे त्रि०।

नीचयोनिन् त्रि० नीचा योनिरस्यस्य ब्रीह्या० इनि। नीचजातिमति। "एतत् ज्ञानयुगे दत्तं सर्वेषामेव भारत! । प्राचिनां धर्मबुद्धीनामपि चेन्नीचयोनिनाम्" हरिवं० १९८अ०। इन्भावे ब०व०। नीचयोनिरप्यत्र।

नीचवज्र पु०न० नीचप्रियं वज्रम्। वैक्रान्तमणौ राजनि०।

नीचा अव्य०निकृष्टार्थी नीचां चिनोति वा० डा। १नीचैरित्यर्थे २नीचे च "नीचा हस्तसृतयः" ऋ० १ ११.१२ "नीचा नीचम्" भा० "नीचा वर्त्तन्त उपरि" ऋ०१०। २४ ९

नीचात् अव्य० निकृष्टार्थी चिनोति वा० डाति। नीचैरित्यर्थे "नीचादुच्चा चक्रथुः पातवे वा" ऋ० १।११६ २२

नीचायक त्रि० नितरां निश्चयेन वा चिनोति नि+चि-ण्वुल् नपुंसकनिर्देशात् दीर्घः। नितान्तचायके। ततः अतएरा० चातुरर्थ्यां क। नीचायकीय तद्वत्सम्बन्ध्यादौ

नीचावया त्रि० नीचा त्यगुभावमवयाति अव+या-क्विप्। त्यगुभावप्राप्ते "नीचावया अभवत् द्वयुलेन्द्रः" ऋ० १ ५२ ९ "नीचावयाः त्यगुभावं प्राप्तः कृतः" भा०।

नीचीन त्रि० त्यगेव स्वार्थे ख अस्तेर्नलोपाद्धोपे पूर्वाचो दीर्घः। त्यगुभूते अधोमुखे "नीचीनाः स्युरुपरि मुष्णः" ऋ० १ २४ ७ "नीचीनवारं बहवः अवन्यम्" ऋ०५ ८५ २ "नीचीनवारमधोमुखविद्धम्" भा०।

नीचैर्गति स्त्री कर्म०। १मन्दगमने २निम्नगमने च।

नीचैस् अव्य० नि+चि-"नौ दीर्घश्च" डैसि दीर्घश्च। १नीचे २स्वैरे ३अल्पे ४अनुच्चे च अमरः "नीचैर्गच्छत्युपरि च दशाचक्रनेमिः क्रमेण" मेघ०। तथापि नीचैर्विनयादटशग्रत" "प्रविश्य चैनं पुरमभ्ययायी नीचैस्तथोपचरदर्पितश्रीः" रघुः। ततः अदूरे अतएव तरप् तमप् च आह। नीचैस्तराम्(माम्)वा। दूरे तु नीचैस्तरस्तः। [दीर्घश्च। निम्नभवे त्यगुभूतभवे।

नीच्य त्रि० नीचि भवः त्यगृष्-यत् नलोपाद्धोपो पूर्वाचो

नीड पु०न० नितरामिद्यन्ति शकुना अस्मिन् नि+इद-क अस्य त्वा। शकुनानां १वासस्थाने (वासा) अमरः २आम्रवृक्षे च "वितर्दिनिर्यूहविटङ्कनीडाः" माघः "नीडारम्भैर्मृदुबलिभुजामाकुलग्रामचैत्याः" मेघ०। नितरामीड्यते नि+ईड-कर्मणि घञ्। ३रथावयवभेदे "प्रदक्षिणं रथनीड परिहारः" काट्या० श्रौ० १८५ १८ "भग्नचक्राक्षनीडाय निपातितमहाध्वजाः" भा०भी० ७१अ०। स्वार्थे क। तत्रार्थे "कुर्वाणो नीडकं तत्र जटाभु तच्च तन्तुभिः" भा०आ० २६२अ०।

नीडक पुंस्त्री नीडे कायति प्रकाशते कै-क ७त०। खगे शब्दार्थचि०। स्त्रियां जातित्वात् ङीष्।

नीडज पुंस्त्री नीडे जायते जन-ड ७त०। खगे हेमच०। स्त्रियां जातित्वात् ङीष्।

नीडि पु० नितान्तमिद्यन्त्यस्मिन् नि+इद-अप्रे इन् डस्य डः। निवासे आवासस्थाने "श्येनासो अस्मरस्य नीडयः" ऋ० १० ९२ ६

नीडोद्भव पुंस्त्री नीडे उद्भवति उद्+भू-अच्, उद्भवस्यात् उद्-भू-अपादाने अच् नीड उद्भवो यस्य वा। खगे अमरः स्त्रियां जातित्वात् ङीष्।

नीत त्रि० नी-कर्मणि क्त। १प्रापिते २यापिते ३व्यतीते च "नीतं अन्न नवीननीरजवने पीतं मधु स्वेच्छया" भ्रमरा० "नीते पञ्चाशिन्युचिते शरीरवद्ध नलान्तवेनान्तमदान्त कर्मणा" माघः।

नीति स्त्री नीयन्ते उन्नीयन्तेऽर्था अनया वा नी-क्तिन्। १शुक्राद्युक्तराजविद्यायां कार्यकारणयोरभेदात् २तच्छास्त्रे च। भावे क्तिन्। ३प्रापणे ४नये च मेदि०। ५तदधिष्ठातृदेवीभेदे "मिष्टान्न देव्यः प्रवराः स्त्रीः कीर्त्तिर्द्युतिरेव च। प्रभा धृतिः क्षमा भूतिर्नीतिर्विद्या दया मतिः" हरिवं०२५६अ०। "नीतिरापदि यद्वस्यः परस्तनुकानिनो हिते" माघः नीतिश्च कामन्दकीयशास्त्रादौ दृश्या।

"नीतिस्ते पुष्करोक्ता तु रामोक्ता लक्ष्मणाय वा। जयाय तां प्रवक्ष्यामि एकु धर्मादिवर्द्धनीम्। न्यायेनार्जनमर्थस्य वर्द्धनं रक्षणं चरेत्। सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्। नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात्। विनयो ज्ञानेन्द्रियजयस्तैर्युक्तः शास्त्रवेत्तृभिः। शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारणिष्णुता। उत्साहो वाग्मितौदार्यमापत्प्रतिपत्तिष्णुता। प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता। कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः। प्रतीर्घविचारश्च शीघ्रं विप्रमाणिनम्। शास्त्रानुगेन कुर्वीत

वशमिन्द्रियदन्तिनम् । कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा । षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नृपः । आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिं च पार्थिवः । तद्विद्यैस्तत्क्रियापैतैश्चिन्तयेद्दिनयान्वितः । आन्वीक्षिक्यार्थविज्ञानं धर्माधर्मौ च त्रयीस्थितौ । अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ । अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा । वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते । प्रजाः समनुगृह्णीयात् कृत्यादाचारसंस्थितिम् । वाक्सूनृता दया दानं हीनोपगतरक्षणम् । इति वृत्तं सतां साधु हितं सत्पुरुषव्रतम् । आधिव्याधिपरीताय अद्य श्वो वा विनाशिने । को हि राजा शरीराय धर्मापेतं समाचरेत् । न हि स्वसुखमन्विच्छन् पीडयेत् कृपणं जनम् । कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् । क्रियतेऽभ्यर्हणीयाय स्वजनाय यथाशक्ति । ततः साधुतरः कार्यो दुर्जनाय विशेषतः । प्रियमेवाभिधातव्यं सतस्तु नित्यं हितस्तु च । देवाले प्रियवक्तारः पशवः क्रूरवादिनः । शुचिस्तान्विक्यपूतात्मा पूजयेद्देवता सदा । देवतावद्गुरुजनमात्मवच्च सुहृज्जनम् । प्रणिपातेन हि गुरुं वशीकुर्यादभिगमनैः । कुशीतमभिगम्यात् भृत्यैर्देवात् यतस्ततः कर्मणा । सद्भावेन हरेच्चित्तं सम्भ्रमेण च बान्धवान् । स्त्रीभ्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् । अभिन्दा परस्वेषु स्वधर्मपरिपालनम् । कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः । प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे । गृहागते परिष्वङ्गः यत्नात् दानं सहिष्णुता । स्वसद्भिश्चतुरोक्तः परदोषानवत्वरः । परोपतापि वचनं मौनव्रतचरिष्णुता । सभ्यैर्मिलद्भिसंयोगः स्वजने चतुरज्ञता । उचितानुविधायित्वमिति वृत्तं महात्मनाम्" अग्निपु २१७अ०।

नीतिघोष पु० नीत्यात्मकः घोषो यस्य । बृहस्पतिरथे त्रिका०

नीतिज्ञ त्रि० नीतिं जानाति ज्ञा-क । नीतिवेदिनि त्रि-ष्णि । नीतिवेदिन् तत्रार्थे "त्रिवर्गो नीतिवेदिनाम्"

नीतिमत् त्रि० प्राशस्त्येन नीतिर्विद्यते नञ्यस्य मतुप् । प्रशस्तनीतियुक्ते "कदाचिदथ माङ्गेयः सर्वनीतिमतां वरः" भा०आ० १७६अ० स्त्रियां ङीप् ।

नीतिशास्त्र न० शिष्यतेऽनेन शास-करणे घञ् । नीतिशास्त्रे ओशनसलक्षणामन्दकपञ्चतन्त्रनीतिसारनीतिमाला नीतिमयूखहितोपदेशचाणक्यसारसंग्रहाद्यात्मकशास्त्रे "भार्गवो नीतिशास्त्रं तु जगाद जगतोहितम्" भा० शा०२१०अ० ।

नीथ त्रि०नी-क्थन् । १नेतरि प्रापके । करणे क्थन् । २स्तोत्रे ३नयनहेतौ च पु० "प्रति यत् सा नीथादर्षि" ऋ०१।१०४।६ "नीथा नयनहेतुभूता" भा० । भावे क्थन् । ४प्रापणे पु० "सहस्रचेताः शतनीथ ऋभुः" ऋ १।१००। १२ "शतनीथः बहुस्तुतिः बाहुप्रापणो वा" भा० "नीथाविदो जरितारः" ऋ० १।१२।५ "नीथाविदः स्तोत्राभिज्ञाः" भा० ।

नीध्र(त्र) न० नितरां ध्रि(त्रि)यते धृ-धृ-त्रा मूलवि० क दीर्घः । १वसतौ पटलप्रान्ते २वने ३नेमौ ४चन्द्रे ५रेवतीनक्षत्रे हेमच० । नीत्रमिति पाठान्तरं तत्रार्थे "गृहाणि नीध्रैरिव यत्र रेजुः" माघः ।

नीनाह पु० नि+नह-भावे घञ् दीर्घः । निबन्धे निवरां बन्धने "स्वप्राय इव कल्यासम इव नीनाहम्" अथ०१९। ५७।४

नीप पु० नी-प किच्च । १कदम्बवृक्षे अमरः २धाराकदम्बे राजनि० । ३वम्बूकवृक्षे ४नीलाशोकवृक्षे च मेदि० "नवनीपवनीधुवनः पवनः" सा०द० टीका । "तस्य नीपरजसाङ्गरागिणः" रघुः । ५देशभेदे स च देशः बृह०सं० १४अ० कूर्मविभागे मध्यदेशवर्तयोक्तः यथा "भङ्गारिमेदमाण्डव्यपास्वनीपोज्जिहानसंख्याताः" इत्युपक्रमे "गजाङ्गयाचेति मध्यमिदम्" इत्युक्तम् । जनपदवाचित्वात् अभिजने राजनि० च अण् । नैप तद्देशवासिनि तद्भूपे च बहुषु अणो लुक् । "शतं सहस्रा ऋषयः शतं नीपाः शतं हयाः" भा०स० ८अ० । निपतिता नीचैः पतिता आपो यत्र अस्मा० न्युपसर्गेतिपरस्याप आदेरत ईत्वम् । ६गिर्यधोभागे पु०तत्र भवः यत् । नीप्य तत्र भवे त्रि० बृहत्संहि० पु० "नमः काट्याय च नीप्याय च" यजु०१६। २७। "नीपो गिर्यधोभागस्तत्र भवः" वेददी० ।

नीर न० नी-रक् निर्गतं रादग्नेः निरान्तं । निर्गतो रोऽग्निर्यस्मात् प्रा०ब० वा । १जले अमरः । "आपोमयः प्राणः" छा०उ० उक्तेः जलस्य प्राणाग्निहेतुत्वात् अग्नेरापः" श्रुत्या तस्य अग्नेर्जातत्वात् "अङ्गारोऽग्निः ब्रह्मणः क्षत्रमिति" श्रुतेश्च वज्राद्याग्नेर्जलजातत्वेन च तस्य तथात्वम् । "निष्यन्दनीरनिकरेण कृताभिषेकाः" माघः । तद्गुणादि अम्बुशब्दे उक्तं तद्यथा । पूर्वमनुक्तत्वात् सम्प्रति कश्चिद्विशेषोऽत्रोच्यते

दक्षस्मृतिः "भूमिस्थमुदकं मेध्यं यत्र गोर्विड्रजोभवेत् । अव्याप्तं चेदमध्येन तद्देव शिखागतम् । शिखागतमिति शिखा नीहारस्तद्गतमित्यर्थः । उशनाः "नद्यः कूपं तडागानि सरांसि सरितस्तथा । असंहतान्यदोषाणि मनुः स्वायम्भुवोऽब्रवीत्" । देवलः "अपि गन्धरसोपेता निर्मलाः पृथिवीगताः । अधोगाश्चैव गोपानदापः शुद्धिकराः स्मृताः । उद्धृतास्तु प्रशस्ताः स्यु शुद्धैः पात्रैर्यथाविधि । एकरात्रोषितास्तास्तु त्यजेदपः समुद्धृताः" इति । सर्वथाप्ता प्रक्रान्तगोडपि मानपर्य्याप्ता अल्पा एवेत्यर्थात् परामर्शश्चान्ते अतो बहुकालात् तडागादेरुद्धृतानां रात्र्युषितानां च न दोषः । तडागोद्धृता अप्यापः रात्र्युषितोदकान्तरसम्भवे अशुद्धा एवेति महनमारिजाते । इदं गङ्गाव्यतिरिक्तविषयम् "त्यजेत् पर्युषितं पुष्पं त्यजेत् पर्युषितं जलम् । गङ्गातोयं च तुलसी पवित्रं सर्वदा स्मृतम्" इति विशेषोक्तेः । "कूपोद्भवानि तडागानि नदी वापीसरांसि च । चण्डालाद्यशुचिस्पर्शैस्तोयं तत् परिवर्जयेत्" । चण्डालाद्यवतरणमार्गमित्यर्थः । हारीतः "वापीकूपतडागेषु मानुषोऽम्रियते यदि । अस्थिचर्मविनिर्मुक्तैर्दूषितं च खरादिभिः । उद्धृत्य तज्जलं सर्वं शोधनं परिकल्पयेत्" । "अस्थिचर्मविनिर्मुक्तैश्चिरकालवासेन विशीर्णैरित्यर्थः । दक्षस्मृतिः "मृतपशुनखात् कूपादल्पोपहतात्तथा । अपः समुद्धरेत् सर्वाः शेषं वस्त्रेण शोधयेत् । वह्निप्रज्वालितं कृत्वा कूपे एकैष्टकाचिते । पञ्चगव्यं न्यसेत्पश्चात्ततोयं समुद्धरेत्" । देवलः "उद्धरेदुदकं सर्वं पञ्चपिण्याकमृत्तया" । अचिरकालोपघाते स्वल्पघाते च हारीतः "घटानां शतमुद्धृत्य पञ्चगव्यं क्षिपेत्ततः । अभिषेकाकचाण्डालैर्दूषितेषु विशोधनम्" । आपस्तम्बः "उपानत्स्रग्विण्मूत्रं स्त्रीरजो मद्यमेव च । एभिर्दूषिते कूपे कुम्भानां शतमुद्धरेत्" । विष्णुः "जलाशयेष्वल्पाल्पेषु स्थावरेषु महीतले । कूपवत् कथिता शुद्धिर्महत्सु न तु दूषणमिति" । स्थावरेषु महीतलेऽप्रवाहिषु । यमः "चाण्डालभाण्डं स्पृष्टं भीत्वा कूपगतं जलम् । गोमूत्रयावकाहारस्त्रिरात्रेणैव शुध्यति" । तथा 'नदीवेगेन शुध्यति' कश्यपः "हतीनां रञ्जनं शुद्धिः" । इतिः चर्मकोशा रञ्जनं कषायद्रव्येण शोधनम् । यमः "प्रवासरण्येष्वथ वान्यकूपे क्रोडस्य जलं कोशगता तथापः । अतेऽपि शुद्धं द्विजमेषमाहुरापद्गतः शाङ्कुतवत् पिबेत्तु" । अस्यार्थः यद्यपि गृद्धानिरिस्तविप्रादिवर्यसम्बन्धि प्रपादि तथापि तद्गतजलं धर्मार्थं दीयमानमनापदि न पेयम् । आपदि पेयं यद्यरण्यगतं प्रपादिर्भवति । क्रोधिः अङ्गादिमयी जलपात्री सर्वसाधारणी । कोशो इतिः तथा "अजागावोमहिष्यश्च ब्राह्मणी च प्रसूतिका । दशरात्रेण शुद्ध्यन्ति भूमिस्थं च नवोदकम्" । योगीश्वरः "शुचि गोदग्धिकक्षोयं प्रकृतिस्थं महीगतम्" । प्रकृतिस्थं रूपरसगन्धस्पर्शान्तरमनापन्नं महीगतमित्यशुद्धित्वनिवृत्त्यर्थं न तु अन्तरिक्षोदकस्य शुद्धत्वव्यावृत्त्यर्थं नाप्युद्धृतस्य । "उद्धृतानामिति" प्रागुक्तदेवलवचनादिति विज्ञानेश्वरः । हेमाद्रौ पराशरः "वापीकूपतडागेभ्य आपो याह्यास्तु सर्वतः । यस्तातृप्यस्तेदमेध्यन्तु पञ्चगव्येन शुध्यति । अस्थिचर्मावसिक्तेन मार्जारेण समूषिकैः । दूषितं तद्भवेत्तोयं यथाधस्तात् सुशोधनम् । अस्थिचर्मावपतितं खरवानरसूकरैः । उद्धरेदुदकं सर्वं शोधनं परिमार्जनम्" । इदं चिरकालविषयमित्युक्तमेव । यमः "वापीकूपतडागेषु दूषितेषु कथञ्चन । उद्धृत्य यतकुम्भांश्च पञ्चगव्येन शुद्ध्यति । खनिकूपतडागेषु दन्तिश्वेषु विशेषतः । अधोद्धृत्य पञ्चशतं पञ्चगव्येन शुद्ध्यति । शाद्वलोपनदविण्मूत्रं कूपे यदि निमज्जति । यदिकुम्भान् समुद्धृत्य पञ्चगव्येन शुद्ध्यति" । मातृस्थेऽपि "दूषितं च शवैः क्लिन्नं यच्च विज्ञातुमेषितम् । अद्भिः शुध्यति तत्सर्वमपां शुद्धिः कथं भवेत् । गवां कूर्चपूरीषेण शोधनस्यास्मिन्नरश्मिभिः । मारुतस्य च वेगेन त्वापः शुद्धिमवाप्नुयुरिति" । स्वल्पार्थसारेऽपि "वापीकूपतडागेषु श्वमार्जारादिशवक्लिन्ने जीर्णरोधसि तज्जलं सर्वं निःसार्य्य मृत्तिकां परित्यज्योद्धृत्य पञ्चगव्यप्रोक्षणात् शुद्धिः । पाषाणैरिष्टकाभिर्वा बद्धे तच्छोधनाने दशनम् । मृद्दा बद्धे प्रक्षालनमेव बद्धजले तु तज्जिनु मृत्तिकुम्भोद्धारः । मूषकादिक्षुद्रप्राणिघाते त्रिंशत्कुम्भोद्धारो गोमूत्रादिप्रक्षेपश्च । जले जलप्राणिमहीघाते न दोषः । वापीकूपादिजले मरणे स्थितेऽस्थ्युपघाते घटशतमुद्धृत्य पञ्चगव्यप्रक्षेपात् शुद्धिः । पशुशवपातेऽप्येवं शुद्धिः कार्या । तत्र जलेन मरणे जलस्य त्रिरात्रमाशौचम् । अशौचान्ते पूर्वोक्ता शुद्धिः कार्या । वापीकूपजले उपानच्छ्रग्विण्मूत्ररक्तवसामज्जास्थि-

मांसदूषिते घटिकुम्भातुद्धृत्य पञ्चगव्येन शुद्धिः। जल बाहुल्ये घटकुम्भोद्धारात् पञ्चगव्यप्रोक्षणाच्च शुद्धिः। कूपादिषु दूषितेषु दिवा सूर्यरश्मिवायुस्पर्शनात् शुद्धिः। रात्रौ वायुचन्द्रनक्षत्ररश्मिस्पर्शनात् शुद्धिः। सन्ध्यायां वायुस्पर्शनात् शुद्धिः। नद्यादौ अन्त्यजादिभिर्दूषिते तत्स्रोतजलस्यानादन्यत्र जलं शुद्धमेवेति। एवं स्वबुध्या शुद्धिर्विवेचनीया" विधा०पा०।

अथ प्रसङ्गादुपहतजलपाने प्रायश्चित्तमभिधीयते। तत्र विष्णुः "मृतपञ्चनखात् कूपादत्यन्तोपहताद्वोदकं पीत्वा ब्राह्मणस्त्र्यहमुपवसेद् द्व्यहं राजन्य एकाहं वैश्यः शूद्रो नक्तं सर्वे तेऽन्ते पञ्चगव्यं पिबेयुरिति"। अत्यन्तोपहतात् मूत्रपुरीषादिभिः। इदमकामविषयं कामतो मानुष शवोपहतकूपादिजलपाने हारीतः "क्लिन्नं भिन्नं शवे तोयं तत्स्थं यदि तत् पिबेत्। शुद्ध्यै चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा"। अथवा तप्तकृच्छ्रमिति धर्मप्रदीपः। "यदि कश्चित्ततः स्नायात् प्रमादेन द्विजोत्तमः। जपंस्त्रिषवणस्नायी अहोरात्रेण शुद्ध्यति"। अकामतो देवलोक्तम् "क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते। पयः पिबेत् त्रिरात्रेण वातुमे द्विगुणं घृतम्"। अङ्गिराः "कूपे विण्मूत्रसंसृष्टे पीत्वा तोये द्विजोत्तमः। त्रिरात्रेण विशुध्येत कृच्छ्रं सान्तपनं घृतम्"। स्नाने तु लघु विष्णुः "अपो मूत्रपुरीषाद्यैर्दूषिताः प्राशयेद्यदा। तदा सान्तपनं कृच्छ्रं व्रतं कार्यं विशुद्धये"। चाण्डालकूपादिजलपाने आपस्तम्बः "चाण्डालकूपभाण्डस्थं नरः कामात् जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत्। चरेत् सान्तपनं विप्रः प्राजापत्यं तु भूमिपः। तदर्धं तु चरेत् वैश्यः शूद्रे पादं विनिर्दिशेत्। तथा "म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां क्षुद्रेऽपि वा। आहृदग्धं शुचि ध्येयमधस्तादशुचि स्मृतम्। तत्तोयं यः पिबेद् विप्रः कामतोऽकामतोऽपि वा। अकामाच्चक्रभोजी स्यादहोरात्रं तु कामतः"। अत्रैवाभ्यासे प्राजापत्यम् "अन्त्यजैः खानिताः कूपाः तडागं वाथ वा। तेषु स्नात्वा च पीत्वा च प्राजापत्येन शुद्ध्यति" इत्यापस्तम्बस्मरणात्। इदमनापद्विषयम्। यत्तु "अन्त्यजैः खानिताः कूपा तडागादि तथैव च। तेषु स्नात्वा च पीत्वा च पञ्चगव्येन शुद्ध्यति"। तदयत्नावसाध्ये वा आपदि तु यातातपः "अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके कृते। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते"। इदमत्यन्तापद्विषयमिति शुद्धपाणिः। "ब्राह्मणक्षत्रियो वैश्यः शूद्रश्चैवान्त्यजातयः। एभिर्यैः कारिताः कूपाः स्नानं तेषु तु कारयेत्"। अन्त्यजातयो मूर्धावसिक्ताद्या अनुलोमाः। अन्यस्वानितचण्डालपरिगृहीतकूपादिजलपानेऽङ्गिराः "चाण्डालपरिगृहीतं योऽज्ञानादुदकं पिबेत्। तस्य शुद्धिं विजानीयात् प्राजापत्येन नित्यशः"। एतदभ्यासे यत्त्वापस्तम्बेन पञ्चगव्यप्राशनमात्रमुक्तम् "प्रपास्वरण्ये घटके च सौरे द्रोण्यां जलं कोशविनिःसृतं च। श्वपाक चाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्ध्येदिति" तदयत्नविषयमापद्विषयं वा" विधा०पा०।

अथ प्रसङ्गात्तडागादिविक्रयप्रायश्चित्तम्। तत्र "देवगृहप्रतिश्रयोद्यानारामसभाप्रपातडागपुष्पसेतुसुतविक्रयं कृत्वा तप्तकृच्छ्रं समाचरेदिति" यद्वचनमकामतद्विषयम्। यत्तु पैठिनसिनोक्तम् "आरामतडागोद्यानपुष्करिण्यो विक्रीते त्रिषवणस्नायी अधःशायी चतुर्थकालभोजी स्यात् तदहरुपविषयम् उत्सृष्टस्य तु सर्वसत्त्वोद्देशेन त्यक्तत्वात् तत्साधारण्येन स्वत्वाभावाद्विक्रयासम्भवात्। सर्वोद्देशेन कर्तुमशक्यत्वात् साधारणस्वामिकत्वेन इवेति दिक्" विधा०पा०।

"तिलकल्कं जलं क्षीरं दधि चौद्रं हतानि च। न त्यजेदर्द्धजग्धानि" विधा०पा० धृतवाक्यम्।

वर्ज्यजलमुक्तं हेमाद्रौ ब्रह्मपुराणे "दुर्गन्धि फेनिलं क्षीरं पङ्किलं पल्वलोदकम्। न भवेद् यत्र गोऽग्निर्नक्तं यच्चाप्युपाहृतम्। यत्र सर्वाभिसृष्टं यच्चाभोज्यनिपानजम्। तद्वर्ज्यं सलिलं तात! सदैव श्राद्धकर्मणि। निपानं जलाशयः। शुद्धितत्त्वे यमः "स्नानमाचमनं दानं देवतापितृतर्पणम्। शूद्रोदकेन कुर्वीत तथा मेघाहिनिःसृतैः" हेमाद्रावादित्यपुराणे "चिरं पर्युषितं वापि शूद्रस्पृष्टमथापि वा। आङ्ग्याः स्नानदानादौ पुनात्येव सदा पयः"। कात्यायनः "अपो निशि न गृह्णीयान्न पिबेच्च कदाचन। उद्धृत्याग्निसपर्यन्ते घोषो यत्र इतीरयेत्"। रक्तोदोषे तु प्रायुक्तम् नारदीये "त्यजेत् पर्युषितं पुष्पं त्यजेत् पर्युषितं जलम्। न त्यजेत् जाह्नवीतोयं तुलसी बिल्वपत्रकम्" नि०सि०।

"पानीयं पायसं सर्पिर्दधि क्षीरं हतानि च। निरस्यं शेषमेतेषां न प्रदेयन्तु कस्यचित्" आह्नि०त० भविष्यात्तम्। जलप्रमाणप्रकारः विधानपारिजाते उक्तो यथा-

"जलपानं तु निःक्षिप्य मणिवन्ये च दक्षिणे। विप्रो भोजनकाले तु पिबेदामेन पाणिना" अन्यकाले तु "धारया नोदकं पेयं पीत्वा दोषमवाप्नुयात्। जलपात्रेण तत् पेयमिति शातातपोऽब्रवीदिति"। आ०त० विशेष उक्तो यथा "करेण च पिबेत्तोयं यावन्मांसं न लेपयेत्। मांसविप्रकारे तोयं सद्यो गोमांसभक्षणम्" ब्रह्माण्डे मांसविप्रकरेण जलपाननिषेधयात् मांसविप्रकरेण अपोशानं न कर्त्तव्यम्" रघु० भट्टिभन्नतम् "पिबतो यत् पतेत् तोयं भोजने उच्छिष्टसम्। अभक्ष्यं तत् भवेदन्नं भुक्त्वा चान्द्रायणं चरेत्। वामपार्श्वे स्थिते तोये यो भुङ्क्ते ज्ञानदुर्बलः। तोयं पिबति यक्ष्मेण स्वाऽसौ भवति नान्यथा। आपे पाणे मलं भुक्त्वा पानीयं रुधिरं पिबेत्। विद्यमाने तु हस्ते तु ब्राह्मणो ज्ञानदुर्बलः। उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः। सुरापानेन तुल्यं तदित्युवाच प्रजापतिः"। "वामहस्तेन केवलवामहस्तेनेति" रघु०। "अदुष्टा सन्तताधारेति" तु शुद्ध्यर्थं न तु पेयतार्थम् "अभियुःसरसोमधुसम्भृतां कमलिनीमलिनीरपतच्छ्रियः" माघः

नीरज न० नीरे जायते जन-ड। १पद्मे २कुशोदधौ मेदि०। ३सस्याफले राजनि०। ४उद्भाण्डे जलौ(उद्दिडाव) पुंस्त्री स्त्रियां जातित्वात् ङीष्। ५उशीरेऽपि च राजनि०। ६जलजातमात्रे त्रि० "नीतं जलं नवीननीरजवने पीतं मधुस्वेच्छया" भ्रमराष्टकम् निर्गतं रजात् प्रा०व० रजोपदोषौ "सर्वे सान्ताः सदन्ताःस्युः" इत्युक्तेः रजश्चब्दोऽपि रजःसमानार्थकः। ७रजोगुणकार्यरागगुणे ८महादेवे पु०। "उद्धित् त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः" भा०अ०१७अ०।

नीरजस् त्रि० निर्गतं रजो धूलिः परागः स्त्रीरजः रजो गुणो वा यस्य प्रा०व० वा कप् रजोपे दीर्घः। १निर्धूलिदेशे "नीरजोकारितच्छायम्" भट्टिः अभूततद्भावे चौ-स्त्रीपः। "स्त्रोत्तरीयैरकुर्वन्नीरजस्कं महीतलम्" ८अ०। २परागशून्ये ३पुष्पादौ रजोगुणकार्यरागादिशून्ये "नीरजस्कतया सत्वगुद्विनिस्सृतायया" याज्ञ० "नीरजस्के सदानन्दे पदे चाहं निवेशितः" प्रबोध०। "वेदशैलावतीर्णेन नीरजस्का महीकृता" मार्क०पु० १अ०। ४गतार्त्तवायां स्त्रियां स्त्री।

नीरजात त्रि०नीरात् जायते जन-ड ५त०। १जलजातमात्रे अत्रादौ "दृष्टेरत्नं ततः प्रजाः" मीतामाम् "अङ्गोऽत्रम्" इति श्रुतौ चात्रस्य जलाज्जातत्वात् तथात्वम्। "अत्रस्यापि प्रभवति पानीयात् कुरुसत्तम!। नीरजातेन (अन्नेन) रहितं न किञ्चित् सम्प्रवर्त्तते। नीरजातस्य भगवान् सोमो ग्रहगणेश्वरः। अमृतं च सुधा चैव सुधा चैवामृतं तथा। अन्नौषधध्यो महाराज! वीरुधश्च जलोद्भवाः" भा० अनु० ६७अ०। २कमलादौ न०।

नीरद पु० नीरं ददाति-दा-क। १मेघे २मुस्तके च राजनि० "धूपायतीव पटलैर्नवनीरदानाम्" माघः "नवीननीरदश्यामं रामं राजीवलोचनम्" रामकवचम्। "आखाद्य निरवशेषं विरहिवधूनां कदूनि मांसानि। करकानिषेध मन्ये निष्ठीवति नीरदोऽस्त्रीनीति" ऋतुसं०।

निरधि पु० नीराणि धीयन्तेऽत्र धा-कि उप०स०। समुद्रे यद्वा० नीरनिधिरप्यत्र। "पारे जलं नीरनिधेरपश्यत्" माघः।

नीरन्ध्र त्रि० निर्गतं रन्ध्रं छिद्रमस्य प्रा०व० रजोपे दीर्घः। छिद्रशून्ये "नीरन्ध्रामतमालिकान्तु जरठच्छेदा नवप्रन्थयः" सा०द०। "नीरन्ध्रकुसुमशिशिरां भुवं व्रजन्ति" माघः

नीरप्रिय पु० नीरं प्रियमस्य प्रा०व०। १जलवेतसे नैघण्टुप्रकाशिका। २जलप्रियमात्रे त्रि०।

नीरस पु० निःसार्यौरसी यस्य निर्गतो रसः शृङ्गारादिर्यस्मादा प्रा०व० रजोपे दीर्घः। १दाडिमे हारा० २शृङ्गारादिरसादिशून्ये त्रि०। "अलब्धकदनीरसं मम विधाय तस्मिन्नते समागमनीरसं भवतु पञ्चबाणः कृती" विक्रमोर्वशी। [हारा०।

नीराज पु०नीरमजति अज-अच् उपपदसमासः। जलविडाले

नीराजन(ना) निर्-राज-भावे ल्युट् युच् वा रजोपे पूर्वाणो दीर्घः। दीपादिना प्रतिमादेरारात्रिके। युजनः स्त्री। "नीराजनां जनयतां निजबान्धवानाम्" नैष०। तत्प्रकारस्य त्रि० त० देवीपु० उक्तो यथा "यवपिष्टपदीपाद्यैर्घृतास्वादिपल्लवैः। औषधीभिश्च मेध्याभिः सर्वबीजैर्यवादिभिः। नवम्यां पर्वकाले तु यात्राकाले विशेषतः। यः कुर्यात् श्रद्धया वीर! देव्या नीराजनं नरः। शङ्खभेर्यादिनिनदैर्जयशब्दैश्च पुष्कलैः। यावतो दिवसान् वीर! देव्या नीराजनं कृतम्। तावत् कल्पसहस्राणि दुर्गालोके महीयते"। "यस्तु कुर्यात् प्रदीपेन सूर्यलोके महीयते"। पर्वकाले चतुर्दशकाले। देव्या इति स्त्रीत्वमविवक्षितं विष्णुप्रतिमायां तथाचारात्" रघु०। पञ्च नीराजनानि यथा "पञ्चनीराजनं कुर्यात् प्रथमं

दीपमालया। द्वितीयं षोडशाङ्गेन तृतीयं धौतवाससा। घृताक्तवर्त्तिदीपेन चतुर्थं परिकीर्तितम्। पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि" कालोत्तरतन्त्रम्। तस्य वर्त्तिकादिप्रमाणं यथा "कुङ्कुमागुरुकर्पूरघृतचन्दनमिश्रिताः। वर्त्तिकाः सप्त वा पञ्च कृत्वा वन्दापनीयकम्। कुर्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः। हरेः पञ्चप्रदीपेन वह्नेर्भक्तितत्परः" पद्मोत्तरखण्डे १०७अ०। राज्ञां। २शान्तिभेदे तद्विधानादि अग्निपु०२६७अ० यथा "नीराजनविधिं वक्ष्ये ऐशान्यां मन्दिरे चरेत्। तोरणत्रितयं तत्र मृष्टे देवान् यजेत् सदा। चित्रां त्यक्त्वा यदा स्वातिं रविः प्रतिपद्यते। ततः प्रभृति कर्त्तव्यं यावत् स्वातौ रविः स्थितः। ब्रह्मा विष्णुश्च शम्भुश्च शक्रश्चैवानलानिलौ। विनायकः कुमारश्च वरुणो धनदो यमः। विश्वे देवा वैश्रवणो गजाद्याष्टौ च तान् यजेत्। कुशैरावणौ पद्मः पुष्पदन्तश्च वामनः। सुप्रतीकोऽञ्जनो नीलः पूजा कार्या मृदादिके। पुरीषा जुहुयादग्नौ समित्सिद्धार्थकं तिलाः। कुम्भा अष्टौ पूजिताश्च तैः स्नाप्याश्च गजोत्तमाः। अश्वाः स्नाप्याः दद्यात् पिण्डान् ततो हि प्रथमं गजान्। निष्क्रामयेत्तोरणैस्तु गोपुरादि न लङ्घयेत्। विक्रमेयुस्ततः सर्वे राजलिङ्गं मृदे यजेत्। वारुणे वरुणं प्राच्यां रात्रौ भूतबलिं दद्यात्। विशाखायां गते सूर्ये आश्रमे निवसेन्नृपः। अवहृत्यात् दिने तस्मिन् वाहनन्तु विशेषतः। पूजिता राजलिङ्गाश्च कर्त्तव्या वरहस्तगाः; हस्तिनं तुरगं छत्रं खड्गं चापञ्च दुन्दुभिम्। ध्वजं पताकां धर्मज्ञः कालज्ञस्तमभिमन्त्रयेत्। अभिमन्त्र्य ततः सर्वान् कुर्यात् कुञ्जरधूर्गतान्। कुञ्जरोपरिगौ स्यातां सांवत्सर पुरोहितौ। मन्त्रितांश्च समारुह्य तोरणेन विनिर्गमेत्। निष्क्रम्य नागमारुह्य तोरणेनाथ निर्गमेत्। बलिं विभज्य विधिवद्राजा कुञ्जरधूर्गतः। उल्मूकानान्तु निचयमादीप्तदिगन्तरम्। राजा प्रदक्षिणं कुर्यात्त्रीन् वारान् सुसमाहितः। चतुरङ्गबलोपेतः सर्वसैन्येन नादयन्। एवं कृत्वा गृहं गच्छेद्विसर्जितजनाञ्जलिः। शान्तिर्नीराजनाख्येयं दुष्टघ्ने रिपुमर्दनी"।

अन्योऽपि हेमाद्रिव्रतखण्डे विष्णुधर्मोत्तरोक्तो दशग्रः। "भगवति जलधरपटलपाकरार्केन्दुक्षणे कमलनाभे। उन्मीलयति तुरङ्गमवरिनरनीराजनं कुर्यात्। द्वादशग्रामस्यां कार्त्तिकशुक्लस्य पञ्चदशग्रां वा। आश्वयुजे वा कुर्यान्नीराजनसञ्ज्ञितां शान्तिम्। नगरोत्तरपूर्वादि प्रशस्तभूमौ प्रशस्तदारुमयम्। षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम्। सर्जोदुम्बरशाखाकुसुमस्थं शान्तिसङ्घ कुशवल्लवम्। यंत्रविनिर्मितमत्स्यध्वजचक्रालङ्कृतद्वारम्। प्रतिसरणे तुरगाणां भल्लातकशालिकुशसिद्धार्थान्। कण्ठेषु निबध्नीयात् पुष्ट्यर्थं शान्तिमङ्गानाम्। रविवरुणविश्वदेवप्रजेशगुरुहुतवैष्णवैर्मन्त्रैः। सप्ताहं शान्तिगृहे कुर्याच्छान्तिं तुरङ्गाणाम्। अभ्यर्चिता न परुषं वक्तव्या नापि ताड्नीयास्ते। पुण्याहशङ्खतूर्यध्वनिगीतरवैर्विसृष्टमयाः। प्राप्ते ऽष्टमेऽह्नि कर्याद्दुदङ्मुखं तोरणस्य दक्षिणतः। कुशचीराहृतमाश्रममग्निं पुरतोऽस्य वेदीं च। चन्दनकुशसमिद्धाहरितालमनःशिलाप्रियङ्गुत्वचाः। दन्त्यमृताञ्जनरजनीसुवर्णपुष्पाग्निमन्थाश्च। श्वेतामपूर्णकोशां कटम्भरात्रायमाणसहदेवीः। नागकुसुममात्मगुप्तां शतावरीं सोमराजीं च। कलशेष्वेतान् कृत्वा सम्भारांस्तुपहरेद्बलिं सम्यक्। भक्ष्यैर्नानाकारैर्मधुपायसयावकप्रचुरैः। खदिरपलाशोदुम्बरकाश्मर्यवत्यनिर्मिताः समिधः। सुकृतकाकृतताद्या कर्त्तव्या भूतिकामेन। पूर्वाभिमुखः श्रीमान् वैयाघ्रे चर्मणि स्थितो राजा। तिष्ठेदनलसमीपे तुरगमभिमृष्टैर्वितृप्तिसहितः। यात्रायां यदभिहितं यद्वयन्नविधौ महेन्द्रकेतौ च। वेदीपुरोहितानलतत्त्वमभिसंस्तदवधार्यम्। कलशयुक्तं तुरगं हिरण्मयं चैव दीक्षितं स्नातम्। अहतसितांबरगन्धस्रग्धूपाभ्यर्चितं कृत्वा। आश्रमतोरणमूलं समुपनयेत्प्राग्वयस्कृतैर्वाचा। वादित्रशङ्खपुण्याहनिःस्वनापूरितदिगन्तम्। यद्यानीतस्तिष्ठेद् दक्षिणचरणं हयः समुत्क्षिप्य। स जयति तदा नरेन्द्रः शत्रूनचिराद्विना यत्नात्। तस्यचेष्टो राज्ञः परिग्रहं चेष्टितं द्विपहयानाम्। यात्रायां व्याख्यातं तदिह विचिन्त्यं यथायुक्ति। पिण्डमभिमन्त्र्य दद्यात् पुरोहितो वाजिने स यदि लिह्येत्। अग्रीयाद्वा जवनद्विपरीतोऽतोऽन्यथाऽभिहितः। कलशोदकेषु शाखानाम्राद्योदुम्बरीं स्पृशेत्तुरगान्। शान्तिकपौष्टिकमन्त्रैरेवं सेनां शस्त्रपनागाम्। शान्तिं राष्ट्रविहत्रै कृत्वा भूयोऽभिचारकैर्मन्त्रैः। मृण्मयमरिं विभिन्द्याच्छूलेनोरःस्थले विप्रः। खलिनं हयाय दद्यादभिमन्त्र्य पुरोहितस्ततो राजा। आरुह्योदक्पूर्वां यायान्नीराजितः मवलः। मृदङ्गशङ्खध्वनिहृष्टकुञ्जरसंयन्मदामोद-

सुगन्धिमारुतः। शिरोऽवचिन्नातपवत्प्रभाचयैर्व्यनु विवस्वानिव तोयदात्यये। हंसपङ्क्तिभिरितस्ततोऽद्रिराट् सम्पतद्भिरिव शुक्लचामरैः। भृङ्गगन्धपवनानुवाहिभिर्धूयमानरुचिरस्तगम्बरः। नैकवर्णमणिवज्रभूषितैर्भूषितो मुकुटकुण्डलाङ्गदैः। भूरिरत्नकिरणौघरञ्जितः शक्रकार्मुकरुचं सुखद्रुनू। उत्पतद्भिरिव खं तुरङ्गमैर्दारयद्भिरिव दन्तिभिर्धराम्। निर्जितारिभिरिवामरैर्नरैः शक्रवत्परिवृतो व्रजेन्नृपः। सवज्रमुक्ताफलभूषणोऽथ वा स्रितस्रगुष्णीषविलेपनाम्बरः। धृतातपत्रो गजपृष्ठमाश्रितो घनोपरीवेन्दुतले भृगोः सुतः। सम्मृष्टनरवाजिकुञ्जरं निर्मलप्रहरणांशुभास्वरम्। निर्विकारमरिपक्षभीषणं यस्य सैन्यमचिरात्स गां जयेत्!" ह०चं० ४४अ०। "स्नाने धूपे च नैवेद्ये दीपे वस्त्रे च भूषणे। घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च" विधानपारिजातधृतवाक्यम्।

नीरिन्दु पु० नि+ईर–क्विप् तथाविधः सन् इन्दति इन्द–उनु। अश्वशाखोटके वृक्ष (आसगेहोडा) शब्दच०।

नीरुच् त्रि०निश्चितं रोचते निर्+रुच–क्विप् रलोपे दीर्घः। भिन्नान्दीप्तिशीले।

नीरुज् अव्य० रुजोऽभावः अभावे अव्ययी० रलोपदीर्घौ। १रोगाभावे। २निर्गता रुग् प्रा०त०। आरोग्ये। निर्गता रुग् रोगो यस्य प्रा०ब०। ३रोगशून्ये त्रि० "स्निग्धो मृदुः पाण्डुरनिष्टगन्धोमेदःकृतो नीरुगथातिकण्डूः" सुश्रुतः। ततः भावे अञ्। नैरुज्य रोगाभावे स्वास्थ्ये न०

नीरुज त्रि० निर्गता रुजा रोगो यस्य यस्मात् वा प्रा०ब० रलोपदीर्घौ। १रोगरहिते "पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाहिसङ्कवान्" साम्बपु० २कुष्ठौषधौ जटा० रोगभेदे (व्यजगल्लिकारोगे) स्त्री "स्निग्धा समर्णा ग्रथिता नीरुजा सदृशवर्णिभा" सुश्रुतः।

नीरूप त्रि० निर्गतं रूपमस्य प्रा०ब०। रूपहीने "नीरूपस्यापि कालस्य षडिन्द्रियवेद्यत्वाभ्युपगमेन" वेदा०परि०।

नील पु० नील–अच्। स्वनामख्याते वर्णे १श्यामवर्णे २तद्वति त्रि० अमरः। ३पर्वतभेदे ४वानरभेदे च मेदि०। ५नीलीओषधौ ६निधिभेदे ७लाङ्गूले च पु० हेमच०। ८मृद्गुणोपे त्रिका० ९वटवृक्षे राजनि०। नीलपर्वतश्च रम्यकवर्षस्य सीमापर्वतः यथोक्तं भाग० ५।१६ श्लो० "उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रायता उभयतः क्षारोदावधयोद्विसाहस्रपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरेण दशांशाधिकांशेन दैर्घ्यं एव सुषन्ति"। भारतवर्षदक्षिणस्थे स्वनामख्याते १०गिरौ च ११इन्द्रनीलमणौ शनिग्रहार्थं धार्ये हेमे च मणिभेदे। तस्योत्पत्त्यादिपरीक्षा गरुडप्र० उक्ता यथा "तत्रैव सिंहलवधूकरपल्लवाग्रव्याकुलनवालवनीकुसुमप्रवाले। देवे पपात दितिजस्य नितान्तकान्तं प्रोद्फुल्लनीरजसमद्युति नेत्रयुग्मम्। तत्प्रत्ययादुभयशोभनकीचीभाषा विस्तारिणी जलनिधेरुपकण्ठभूमिः। प्रोद्भिन्नकेतकवनप्रतिबद्धलेखा सान्द्रेन्द्रनीलमणिरत्नवती विभाति। तत्प्रासिताञ्जनसमप्रदसनासिश्यामाङ्गीयुधाभहरकण्ठकलायपुष्पैः। शुक्लेतरैश्च कुसुमैर्गिरिकर्णिकायास्तस्मिन् भवन्ति मणयः सदृशावभासः। अन्ये प्रसन्नपयसः पयसां निधातुरम्बुत्विषः शिखिगलप्रतिमास्तथान्ये। नीलीरसप्रभवबुद्बुदभाश्च केचित् केचित्तथा समदकोकिलकण्ठभासः। एकप्रकारा विसदृशवर्णशोभावभासिनः। जायन्ते मणयस्तस्मिन्निन्द्रनीला महागुणाः। मृत्पाषाणशिलावज्रकर्बुराभासंयुताः। अवश्यिकापटलच्छाया वर्णदोषैश्च दूषिताः। तत एव हि जायन्ते मणयस्तत्र भूरयः। शास्त्रसम्बोधितधियस्तान् प्रशंसन्ति सूरयः। धार्यमाणस्य ये दृष्टाः पद्मरागमणेर्गुणाः। धारणादिन्द्रनीलस्य तानेवाप्नोति मानवः। यथा च पद्मरागाणां जातु वर्णभयं भवेत्। इन्द्रनीलेऽपि तथा द्रष्टव्यमविशेषतः। परीक्षाप्रत्ययैर्यैश्च पद्मरागः परीक्ष्यते। तएव प्रत्यया दृष्टा इन्द्रनीलमणेरपि। यावल्लघु क्रमेदग्निं पद्मरागः प्रयोगतः। इन्द्रनीलमणिस्तस्मात् क्रमेत सुमहत्तरम्। तथापि न परीक्षार्थं गुणानामतिवृत्तये। मणिरग्नौ समाधेयः कथञ्चिदपि कश्चन। अग्निमात्राऽपरिज्ञाने दाहदोषैश्च दूषितः। सोऽनर्थाय भवेद्भर्तुः कर्तुः कारयितुस्तथा। श्यामोत्पलकरवीरस्फटिकाद्या इह बुधैः सवैदूर्याः। कथिता विजातय इमे सदृशा मणिनेन्द्रनीलेन। गुरुभावकठिनभावाश्चैतेषां नित्यमेव विज्ञेयाः। काचाद्यायावदुत्तरविवर्द्धमाना विशेषेण। इन्द्रनीलो यदा कश्चित् बिभर्ति ताम्रवर्णताम्। रक्षणीयो तथा ताम्रो करवीरोत्पलाद्युभौ। यस्य मध्यगता भाति नीलसेन्द्रायुधप्रभा। तदिन्द्रनीलमित्याहुर्मणीनां मणिनां भुवि दुर्लभम्। यस्य वर्णस्य भूयस्त्वात् वीरे यत

गुणे स्थितः । नीलतां तत्त्वयेत् सर्वं महानीलः स उच्यते । यत् पद्मरागस्य महागुणस्य मूल्यं भवेन्माष सुसन्मितस्य । तदिन्द्रनीलस्य महागुणस्य सवर्णसंख्यातुलितस्य मूल्यम्" १२नागभेदे पु० "नीलानीलौ तथा नागौ कल्माषशबलौ तथा" भा०आ० ३५अ० । क्रोधवशगणांशजाते द्वापरयुगीये १३नृपभेदे "गयः क्रोधवशो नाम यस्तं राजन् ! प्रकीर्त्तितः । ततः संजज्ञिरे वीराः क्षितावित्र नराधिपाः" इत्युपक्रमे "क्रथोविक्षिप्तः सुरथः श्रीमान् नीलश्च भूमिपः" भा०आ० ६७० उक्तम् । १४अजमीढस्य नील्यपरनाम्न्यां नीलिन्यां जाते पुत्रभेदे "अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्रोऽभवत्" विष्णुपु० ४अंशे १९अ० । अजमीढस्य १५पत्नीभेदे स्त्री ङीप् । "अजमीढस्य पत्न्यस्तु तिस्रो वै यशसान्विता । नीली च केशिनी चैव धूमिनी च वराङ्गना" हरिवं०२२अ० वानरभेदस्य रामसेनान्तर्गतः "नलनीलाङ्गदक्राथसुन्दद्विविदपालिता । ययौ समहती सेना राघवस्यार्थसिद्धये" भा०व० २८२अ० । नील+ओषधिजातौ ङीप् । १६नील्योषधौ स्त्री नील्या रक्तम् अनु । नील १७नीलीरक्ते त्रि० १८वसनभेदे पु० "वैश्यस्वाय काषाय नीलाय परमेष्ठिने" यजुर्वेदमन्त्रः । १९काञ्चिकायन्त्रिभेदे स्त्री "नीला वला वलाका च माला सुद्रा मिता च माम् काञ्चीवलयम् । २०काचवलये २१ताडीपत्रे २२विषे शब्दार्थचि० । २३स्वल्पाङ्गाटोत्तरवतकरणाभर्गतकरणे संगीतदा० । नीलवस्त्रधारणादिनिषेधः मिताक्षरायाम् यथा

"नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति" "रोमभूषे यदा गच्छेद्रजो नील्यास्तु कस्यचित् । त्रिवर्णेषु च सामान्यत्प्रलक्षं विशोधनम् । पालनं विक्रयश्चैव तद्वृत्त्या चोपजीवनम् । पातनञ्च भवेद्विप्रे त्रिभिः कृच्छ्रैर्व्यपोहति । नीलीदाह यदा भिन्द्याद्ब्राह्मणस्य शरीरतः । शोणितं दृश्यते यत्र द्विजश्चान्द्रायणञ्चरेत् । स्त्रीणां क्रीडार्थसम्भोगे शयनीये न दुष्यति" स्मृतिः हरगुणाप्युक्तम् "स्त्रीक्रीडाशयने नीली ब्राह्मणस्य न दुष्यति । नृपस्य दण्डो वैश्यस्य पर्ववर्णं विधारणम्" तथा वस्त्रविशेषस्य प्रतिप्रसवः "कम्बले बृहत्सूते च नीलीरागो न दुष्यति" इति स्मरणात् । "नीलीरक्तं यदा वस्त्रं विप्रः स्वाङ्गेषु धारयेत् । तन्तुसन्ततिसंख्याके वसेत् स नरके ध्रुवम्" । स्कान्दे काशीखण्डे "नीलीरक्तं तु यद्वस्त्रं दूरतस्तद्विवर्जयेत् । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति । मृते भर्त्तरि या नारी नीलीवस्त्रं तु धारयेत् । भर्त्तारं नरकं याति सा नारी तदनन्तरम् । कम्बले पट्टसूत्रे च नीलीदोषो न विद्यते" । शूद्रे विशेषः "ब्राह्मणस्य सितं वस्त्रं क्षत्रे रक्तमुल्बणम् । पीतं वैश्यस्य शूद्रस्य नीलं सलवदिष्यते । नीलं सलवदुल्बणमिति" विधा०धा० कतिचित् नीलवस्तूनि कविकल्पलतायां दर्शितानि यथा "गुञ्जः शैवालं दूर्वा बालतृणं बुध्नपत्रः वंशाङ्कुरः मरकत इन्द्रनीलमणिः । २४मालाटसभेदे न० "तालपयोधरनायकतोमरयज्ञधरम् पाणियुतञ्च विधाय भामिनी हस्तवरम् । नीलमिदम् क्षणिनायकपिङ्गलसंलपितम् पण्डितमण्डलिकासुखदं वच्मि ! कथैतम्" "परिचीलय नीलनिचोलम्" गीतगो० । "शुक्लाङ्गनीलोपलनिर्मितानाम्" माघः "कण्ठप्रभासङ्गविशेषनीलां कृष्णस्वचं पन्थिभर्तां दधानम्" कुमा० । नीलयग्रामलकालानामीषद्भेदात् एकपर्यायता अमरे पर्यायतया तेषामुक्तेः । २५दिग्गजभेदे नीराजनशब्दे दृश्यम् ।

नीलक न० नील+स्वार्थे संज्ञायां कन् वा । १वाचलवणे २वर्त्तलोहे ३असनवृक्षे राजनि० । नीलेन वर्णेन कायति कै-क । ४भ्रमरे कीटभेदे पु० । "यथा मधुकरीं ध्यायन् नीलकस्तन्मयो भवेत्" दक्ष०सं० ७५अ० पाठान्तरम् । बीजगणितोक्ते ५अव्यक्तराशिसंज्ञाभेदे पु० "यावत्तावत् कालको नीलकोऽन्योवर्णः पीतो लोहितश्चैवमाद्याः" बीजग० ।

नीलकण्ठ पुंस्त्री नीलः कण्ठो यस्य । १मयूरे अमरः । २दात्यूहे कालकण्ठे ३श्यामचटके ५खञ्जने च हेमच० स्त्रियां सर्वत्र ङीप् । ५पीतसारे पु० हेमच० विशेषे कालकण्ठे द्वित्रे पु० अमरः । "स्कन्धाधिरूढोज्ज्वलनीलकण्ठाद्युर्वीरुहः श्लिष्टतनूनहीन्द्रैः" "अवाप बाल्योचितनीलकण्ठ !" माघः "क्व नीलकण्ठ ! व्रजसीत्यवस्थवाक्" कुमा० । ७मूलके न० राजनि० ८राक्षसभेदे पु० "षष्टालाखावसङ्ख्यास्तु नीलकण्ठा विभीषणाः" भा०सौ० ८अ० नानारावसोक्तौ शिवस्य नीलकण्ठनामनिर्वचनम् हरिवं० १२२अ० अन्यथोक्तं यथा "दक्षः प्रहारः कुलिशेन पूर्वं तवेशान ! सुरराजाऽतिधीर्य्य । कण्ठे नैल्यं तेन ते यत् प्रदत्तं तस्मात् ख्यातस्त्वं नीलकण्ठेति कल्पः" २२२अ० । अन्यथापि तस्य तथात्वलक्षणम्

"ततः प्रसन्नमाप्लुत्य रुद्रं विष्णुः सनातनः। जघ्राह कण्ठे भगवान्नीलकण्ठस्ततोऽभवत्" । भागवते ५८अ०
"तद्विषं जग्धुमारेभे प्रभावज्ञानुमोदतः। ततः करतलीकृत्य व्याप्ति ज्ञात्वाहरं विषम्। अभक्षयत् महादेवः कृपया भूतभावनः। तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः। यच्चकार गले नीलं तच्च साधोर्विभूषणम्। नीलग्रीवादयोऽप्युक्तार्थे "नीलग्रीव! शुभग्रीव! सर्वकामफलप्रद"। "यस्तौ यो अवसर्पति नीलग्रीवो विलोहितः" यजु०१६।७ रुद्राध्याये। खञ्जनश्च खनामख्यातः पक्षिभेदः खञ्जनशब्दे २४५६पृ० द्रष्टव्यम्।

नीलकण्ठाक्ष पु० नीलकण्ठप्रियः शिवप्रियोऽक्षो जपमाला यस्य। रुद्राक्षे राजनि०। नीलकण्ठस्य खञ्जनस्याक्षी वाक्षि यस्य यच् समा०। खञ्जनतुल्यनेत्रयुक्ते स्त्रियां विभाषात् ङीष्। [कन्दे च वृक्षे राजनि०।

नीलकन्द पु० नीलः कन्दो मूलमस्य। १विषकन्दे २महि-

नीलकमल न० नीलं कमलम्। १नीलपद्मे नित्यक०। २नीलोत्पले राजनि "गणेशाय नमो नीलकमलासनकान्तये" लीला०।

नीलकुन्तला स्त्री नीलाः कुन्तला यस्याः। दुर्गासखीभेदे "सखी रक्तसखो नाम ललाटैवं सुचिस्मिता। तां निगायांपरा प्राह सखी या नीलकुन्तलाम्" दुर्गासप्तशती।

नीलकुरण्टक पु० कर्म०। नीलझिण्टीरामे रत्नमाला।

नीलकुसुमा स्त्री नीलं कुसुमं यस्याः। नीलझिण्टीरां राजनि०

नीलक्रान्ता स्त्री नीलेन वर्णेन क्रान्ता। कृष्णापराजितायां राजनि०। [जातित्वात् ङीष्।

नीलक्रौञ्च पुंस्त्री (कोँचक) कारवके राजनि० स्त्रियां

नीलगङ्गा स्त्री नदीभेदे शिवपु०।

नीलगणेश पु० नीलवर्णे गणक्रीडाख्ये गणेशे "कर्णिकायां चतुर्दिक्षु प्रथमं पूजयेद्दिशम्। गणाधिपं गणेशानं तृतीयं गणनायकम्। गणक्रीडं पीतगौररक्तनीलरुचः क्रमात्" शा०ति०१२पटले "गणेशाय नमो नीलकमलासनकान्तये" लीला०।

नीलगिरिकर्णिका स्त्री कर्म०। गिरिकर्णिकाभेदे राजनि०

नील(ला)ङ्गु नि+खनि-कु उपसर्गदीर्घः धातोरपि दीर्घ इति केचित् १भ्रमिजातौ भ्रमरादौ २कृसमे च उज्ज्वलट्०। ३देवभेदे पु० "चित्रग्रीवाय वर्त्तिका नीलाङ्गोः कृमिः" यजु०२४।१०

नीलचर्म्मन् न० कर्म०। १नीलवर्णचर्मणि। ६त०। २तथा चर्मयुक्ते त्रि०।

नीलज न० नीलात् पर्वतात् जायते जन-ड ५त०। १वर्त्तलोहे राजनि० २नीलजातमात्रे त्रि०।

नीलझिण्टी स्त्री कर्म०। नीलवर्णझिण्टयां राजनि०।

नीलतन्त्र न० चीनाचारादिप्रकाशके तन्त्रभेदे

नीलतरु पु० नित्यकर्म०। १नारिकेले राजनि०। २नीलवर्णवृक्षमात्रे च।

नीलताल पु० तलमेव तालं स्वरूपं नीलं तालमस्य। १हिन्तालवृक्षे २तमालवृक्षे च राजनि०।

नीलदूर्वा स्त्री कर्म०। हरिद्वर्णदूर्वायां राजनि०।

नीलद्रुम पु० नित्यकर्म०। नीलवर्णे अश्मन्तवृक्षे राजनि०।

नीलध्वज पु० नीलवर्णो ध्वज इव। १तालवृक्षे ६त०। २नीलध्वजवति त्रि० राजनि० ३नृपभेदे पु० "अर्जुनस्य हयो राजन् पुरीं माहिष्मतीं ययौ। नीलध्वजेन वीरेण रक्षितां दुर्गमण्डिताम्। नीलध्वजस्य महिषी स्वाहानाम्नी सुमध्यमा। स्वाहां कन्यां प्रसूतां वा सुन्दरीं धर्मतत्परा" जैमिनीभारते आश्वमेधिके १५अ०।

नीलनिर्गुण्डी स्त्री कर्म०। नीलसिन्धुवारे राजनि०।

नीलनिर्यासक पु० नीलवर्णो निर्यासो यस्य कप्। १नीलवर्णेऽश्मन्तवृक्षे राजनि०। ६त०। २कृष्णवर्णनिर्यासयुक्ते त्रि०।

नीलपङ्क पु०न० नीलं पङ्क इव। अन्धकारे त्रिका०।

नीलपत्र न० नीलं पत्रं पर्णं पुष्पदलं वा (पावडि) यस्य। १नीलवर्णे उत्पले। २गुण्डवृक्षे ३अश्मन्तकवृक्षे ४नीलाश्मन्तवृक्षे ५दाडिमे च राजनि० कर्म०। ६नीलवर्णपर्णे न० ६त०। ७तद्वति नीलवर्णपत्रयुक्ते त्रि०। ८इन्दीवरे शब्दच०।

नीलपद्म न० कर्म०। नीलवर्णे पद्मे शब्दच०।

नीलपिङ्गल त्रि० "वर्णो वर्णेन" पा०कर्म०। १नीलवर्णयुक्ते अथ च पिङ्गलवर्णयुक्ते च २गोजातिभेदे पुंस्त्री० "गवां जातीस्तु वक्ष्यामि शृणुध्वैकमना द्विज!। प्रथमा गौरकपिला द्वितीया गौरपिङ्गला। तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला। पञ्चमी शुक्लपिङ्गाक्षी षष्ठी च शुक्लपिङ्गला। सप्तमी चित्रपिङ्गाक्षी अष्टमी वभ्रुरोहिणी। नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला। तादृशास्त्वेऽप्यनड्वाहः कपिलासु प्रकीर्त्तिताः" हरिवंशे ६० १५अ०।

नीलपिच्छ त्रं स्त्री नीलं पिच्छं यस्य । मयूरे राजनि० । स्त्रियां जातित्वात् ङीष् ।

नीलपिष्टोडी स्त्री नीलाण्डीरूपे (अलङ्कुलगुड) भाषाप्रसिद्धे क्षुपभेदे राजनि० । [जनि० ।

नीलपुनर्णवा स्त्री कर्म० । कृष्णवर्णपुनर्णवायाकभेदे रा

नीलपुष्प प० नीलं पुष्पमस्य । १नीलझङ्गराजे २नीलाण्डाने च । ३मन्थिपर्णे न० ४कृष्णापराजितायां स्त्री राजनि० ५घृतस्थां (मदिरा) स्त्री ङीप् । स्वार्थे क तत्रैव ।

नीलपृष्ठ पु० नीलं पृष्ठं धूमरूपेणास्य । वह्नौ "स्वा बोधयं नीलपृष्ठम् वहन्तम्" ऋ०५।४३।१

नीलपोरक पु० इक्षुभेदे सुश्रुतः इक्षुशब्दे ९०९पृ० दृश्यम् "सुपोषको नीलपोरो नैपालो दीर्घपत्रकः । वातलाः कफपित्तघ्नाः सकषाया विदाहिनः" सुश्रुते तद्गुणादि ।

नीलफला स्त्री नीलं फलं यस्याः । जम्बूवृक्षे राजनि० ।

नीलभृङ्गराज पु० कर्म० । नीलवर्णभृङ्गराजे (नीलकेशरिया) राजनि० ।

नीलमक्षिका स्त्री कर्म० । नीलवर्णमक्षिकायाम् । सातादृशिम यद्यपि भजन्ते नीलमक्षिताः । सुनिश्चितं योऽकथात् व्रजन्ति ते मतायुषः" सुश्रुतः ।

नीलमणि पु० कर्म० । १इन्द्रनीलमणौ हारा० । नीलशब्दे दृश्यम् । तद्वर्णत्वात् २कृष्णे वासुदेवे च नीलरत्नमयत्व

नीलमल्लिका स्त्री नित्यकर्म० । बिल्वे मेदिनी । मल्लिका ।

नीलमाधव पु० कर्म० । जगन्नाथदेवे "प्रेषितोऽहं हरिं द्रष्टुं मह्यं नीलमाधवम्" स्कं०पु० उत्कं० ७अ० ।

नीलमाष पु० नित्यकर्म० । राजमाषे राजनि० । [मङ्गलाका ।

नीलमौलिक पु० नीला मौलिका निमीलनं यस्य । खद्योते

नीलमृत्तिका स्त्री नीला मृत्तिकेव । १पुष्पकाशोके राजनि० कर्मधा० । २नीलवर्णमृत्तिकायाम् । नीला मृत्तिका यत्र । ३तद्युक्तदेशादौ त्रि० ।

नीलमेहिन् पु० नीलं तद्वर्णं शुक्रं मेहति मिह्-णिनि । नीलवर्णमेहयुक्ते "पैत्तिकेषु नीलमेहिनम्" सुश्रुतः ।

नीलराजि पुं० ६त० । तमस्ततौ "निशा यथाकृष्णतनीलराजयः" ऋतुसं० ।

नीललोचन त्रि० नीलं लोचनं नेत्रं यस्य । नीलवर्णनेत्रयुक्ते "शाकहारी च पुरुषो जायते नीललोचनः" शाता० शाकहरणपापेन तथात्वमपि जायते" इत्युक्तम् ।

नीललोहित पु० "वर्णादर्शन" पा० कर्म० । कृष्णेन नीलेन लोहितवर्णयुक्ते १शिवे अमरः । "कंसारातेः शिखिकण्ठ नीललोहितसंतनः" शिवा० "द्वापे अद्यतस्ते दरिद्र ! नीललोहित !" यजु०१६।४७ "प्रजार्थं वरयामास नीललोहितसंतनम्" भा०आनु० १६अ० । २चित्रितनीललोहितवर्णे ३तद्युते त्रि० । ४भूमिजम्बौ स्त्री भङ्गच० ।

नीललोह न० नित्यक० । वर्णलोहे राजनि० ।

नीलवर्णाभू पु० वर्णानां भवति भू-क्विप् कर्म० । १कृष्णवर्णमूर्वालतायां २कृष्णभेके च ।

नीलवल्ली स्त्री कर्म० । वन्दायाम् (परगाछा) रत्नमाला ।

नीलवसन त्रि० नीलया रक्तम् वसनं नीलं वसनमस्य । १नीलवस्त्रयुक्ते २बलदेवे पु० हारा० । ३बलरामे च पु० कर्म० । ४नीलवर्णे वस्त्रे नीलवस्त्रादयोऽपि एवमेव । "स्त्रीक्रीडाशयनीयादौ नीलवस्त्रं न दुष्यति" नीलशब्दे दृश्यम् । "परिगोत्रय नीलनिचोलम्" गीत०गो० "नीलवासा एककुण्डलोऽलकवृन्दे लसदुभयसुन्दरभुजः" (बलरामः) भाग० ६।२५।८।

नीलवोज पु० नीलं वोजमस्य । १नीलाश्वे राजनि० २नीलवर्णबीजयुक्तमात्रे त्रि० ।

नीलवृक्षा स्त्री कर्म० । नीलवर्णे वृक्षभेदे राजनि० ।

नीलवृत्त पु० कर्म० । अजान्तायां नीलाश्वे वृत्तभेदे राजनि० ।

नीलवृन्त(क) न० नीलं वृन्तमस्य वा कप् । तूले राजनि० ।

नीलवृष पु० नित्यकर्म० । विशेषवनस्पतिभेदे तद्गुणश्च उक्तं यथा० भद्रेण "लोहितो यस्तु वर्णेन सुखे पुष्पे च गाण्डरः । श्वेतः खुरविषाणाभ्यां स वृषो नील उच्यते" "स वृषो नील उच्यते" इत्युक्तेः नीलशब्दस्यैव तत्रार्थे पारिभाषिकत्वं तस्य सामानाधिकरण्यद्योतनायैव वृषशब्दप्रयोगः । अतएव "नीलं वा वृषमुत्सृजेत्" देवीपु० वाक्ये व्यवहारप्रयोगः । नीलवृषस्य प्रमोक्षेण अमावास्यां तिलोदकैः" भा०अनु० १६५ अ० वृषार्थकपदस्य शब्दप्रयोगस्य । "लोहितो यस्तु वर्णेन शङ्खवर्णसुखे वृषः । लाङ्गूलशिरसोर्यश्च स नीलवृषः स्मृतः" इति वचनेऽपि न वृषशब्दे पारिभाषिकत्वम् किन्तु नीलशब्दस्यैव सामान्याधिकरण्यद्योतनाय वृषशब्दप्रयोगः पूर्वोक्तहेतोः । एवं लोहितवृषशब्देऽपि लोहितशब्दस्यैव पारिभाषिकत्वम् यथोक्तं विष्णुसं० "लोहितवृषायाः पयस्विन्याः पुत्रं सर्वलक्षणोपेतं नीलं लोहितं वा सुखं पुच्छपादशृङ्गयुक्तं यूथस्याच्छादकम्" । नीलवृषादयोऽप्यत्र ।

नीलतृणा स्त्री नीलवर्णं पत्रं पुष्पं फलं च वर्षति प्रसूते तृण-क। वार्त्ताकीभेदे राजनि०।

नीलव्रत न० व्रतभेदे "यस्तु नीलोत्पलं हेमं शर्करापात्रसंयुतम्। एकान्तरितमश्नाती समाप्ते वृषभं ददेत्। स वैष्णवपदं याति नीलव्रतमिदं स्मृतम्" मत्स्यपु०।

नीलशिखण्ड त्रि० नीलः शिखण्डोऽस्य। १नीलवर्णशिखण्डयुक्ते २रुद्रभेदे पु० "रुद्र! जटीश! भेषज! नीलशिखण्ड! कर्मजित्!" अथ० २ २७ ६। [राजनि०।

नीलशिग्रु पु० कर्म०। नीलवर्णपुष्पयुक्ते शोभाञ्जनभेदे

नीलसन्ध्या स्त्री नीला सन्ध्येव। ज्ञ्यापराजितायां राजनि०

नीलसरस्वती स्त्री द्वितीयविद्यायां तारायाम् "नीलनीलसरस्वति! प्रत्यक्षतां सौभाग्यसम्पत्प्रदे!" इति तत्स्तोत्रम्। "नीला च वाक्प्रदा चेति तेन नीलसरस्वती" तन्त्रसारे तल्लाभनिरुक्तिः। तन्मन्त्रस्तु तत्रैव "ताराद्या पञ्चवर्णैवं नीलनीलसरस्वती। सर्वभाषामयी गुह्या सर्वदेवैर्नमस्कृता" ("ओं ह्रीं ह्रूं क फट्") ३२८।१ तारिणीशब्दे दर्शिते तारिणीमन्त्रे सरस्वतीपदं नीलसरस्वतीपरम्।

नीलसार पु० नीलः सारोऽस्य। तिन्दुवृक्षे (तेंद)राजनि०।

नीलसिन्धुवार पु० कर्म०। नीलनिर्गुण्ड्याम् राजनि०।

नीलस्कन्धा स्त्री नीलः स्कन्धोऽस्याः। नीलकण्ठीलतायाम् नैघण्टुप्रकाशिका।

नीला स्त्री १नीलमक्षिकायाम् अमरः। २नीलपुनर्नवायां ३नील्योषधौ च राजनि० अस्य वा० न ङीप्। ४मथुरायाम् स्त्रीभेदे वृहद्भूमपु०। अस्यान्योऽर्थो नीलशब्दे दृश्यः

नीलाङ्कितदल पु० नीलाङ्कितं दलमस्य। तैलकन्दे नैघ०प्र०।

नीलाङ्ग पुंस्त्री नीलमङ्गं यस्य। १सारसपक्षिणि राजनि० स्त्रियां जातित्वात् ङीष्। २नीलवर्णाङ्गयुक्तमात्रे त्रि० स्त्रियां स्वाङ्गत्वात् ङीष्।

नीलाञ्जन न०कर्म०। १सौवीराञ्जने (तूँते)राजनि० "नीलाञ्जनचयप्रख्याम्" तन्त्रसारः। नीलं मेघमञ्जवति अनृजि-यिच्-ल्यु। २विद्युति जटा० करणे ल्युट् ङीप्। ३कालाञ्जनीतुपे राजनि०।

नीलाञ्जसा स्त्री नीलमञ्जति अनृजि-यिच्-असच्। १अप्सरोभेदे २नदीभेदे ३विद्युति च मेदि०।

नीलाद्रिकर्णिका स्त्री कर्म०। ज्ञ्यापराजितायां राजनि० नीलापराजिताऽप्यत्र।

नीलाम्बर पु० नीलमम्बरं यस्य। १बलदेवे २शिवेश्वरे च कर्म०। ३नीलीरक्ते वस्त्रे न०। ६ब०। ४तद्वति त्रि०। नीलमम्बति अवि-अरच्। ५ताक्षीयपत्रे राजनि०।

नीलाम्बुज न० कर्म०। नीलपद्मे रत्नमाला नीलाम्बुजातादयोऽप्यत्र।

नीलाम्बुजन्मन् न० नीलवर्णमम्बुजन्म। नीलोत्पले अमरः

नीलाम्ला पु० ईषत्कालेन आम्लायति आ+म्ला-क कर्म०। १नीलभिण्टयाम्। तस्या हि पुष्पमल्पकालेनैव गलति। २श्यामाम्लवृक्षे स्त्री गौरा० ङीष्। नीलाम्लानीलपत्र।

नीलालु पु० कर्म०। श्यामवर्णकन्दे आलुभेदे राजनि०।

नीलाशी स्त्री नीलं वर्णमश्नुते व्याप्नोति अश-अण् उप०स० गौरा० ङीष्। नीलनिर्गुण्ड्यां नीलसिन्धुवारे राजनि०।

नीलाशोक पु० कर्म०। नीलवर्णे अशोके "वाहेन कल्पनाशी, रक्ताशोकेन रक्तास्त्रानी च। पाण्डूकः क्षीरिकया नीलाशोकेन सुकरकः" सु०सं० २८अ० वनरक्षिभेदस्तत्रा यस्यभेदस्तत्र्युक्तौ।

नीलाश्मन् पु० कर्म०। नीलमणौ "नीलाश्मद्युतिमाखण्डाद्दयां सेवे महाकालिकाम्" महाकालीध्यानम्। "नीलाश्मद्युतिमिदुराम्यशोऽपरत्र" माघः।

नीलासन पु० कर्म०। (पियासाल) वृक्षभेदे राजनि०।

नीलि पु० नील-इन्। जलजन्तुभेदे "नद्यां नीलिञ्च वाचाञ्च सर्वाश्चैकशफांस्तथा" याज्ञवल्क्योक्तौ मह०। "नीलिर्जलजन्तुः" कुल्लू०।

नीलिका स्त्री नीली इवार्थे क नील-एलुच् च कापि अत्र इत्वं वा। १नीलसिन्धुवारे राजनि० २नीलिन्यां ३नीलशेफालिकायां मेदि०। ४नेत्ररोगभेदे "स एव बिन्दुर्जायत नीलिकाकाचसंज्ञितः" सुश्रुतः। ५क्षुद्ररोगभेदे "क्रोधाय संप्रकुपितो वायुः पित्तेन संयुतः। मुखमागत्य गण्डस्य मण्डलं विडुलत्वतः। नीलं तनुकं श्यावं तं व्यङ्गमिति निर्दिशेत्। तन्मसेवंगुणं गात्रे कृष्णे वा नीलिका विदुः" माधवकरः। जलस्य इत्वरावियोगे "भूमेरुपरा इवस्य कोटरः जलस्य नीलिका" इत्यादि।

नीलिन् त्रि० नीलो भूम्ना प्राशस्त्येन वाऽस्त्यस्य इनि। प्रशस्तनीलवर्णयुक्ते स्त्रियां ङीप्। सा च २आलक्षीतरुवयस्य पत्नीभेदे पु० नीलशब्दे दृश्यम् "आलक्षीतरुवयस्य नीलिन्या प्रयालिरुदपद्यत" हरिवं० ३२अ०। ३नील्योषधौ च।

नीलिमन् पु० नीलस्य भावः इमनिच्। नीलवर्णे "कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम् नीलमो०

नीलीराग पु॰ "नचातिशोभते यद्रागेति प्रेम मनोगतम् । तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः" सा॰द॰ उक्ते १प्रेममेदे। सोऽस्यास्ति अच्। २पूर्वोक्तप्रेमयुक्ते त्रि॰ ३तथाविधस्त्रियां स्त्री हेमच॰। नीलीराग इव। ४नीलवर्णे शब्दच॰। स्वार्थे क। नीलिकाऽप्यत्र नेत्ररोगभेदे च "नीलिकाकाचसंज्ञितः" सुश्रुतः।

नीलीरोग पु॰ अक्षिरोगभेदे "ऐर्ष्यं कृत्वादार्म्मनक्षान्यकाचान् नीलीरोग तैमिरं चाञ्जनेन" सुश्रुतः।

नीलीवृक्षाकृति पु॰ नीलीवृक्षस्याकृतिरिवाकृतिरस्य। शरपुङ्खे शब्दार्थचि॰।

नीलोत्पल न॰कर्म॰। नीलवर्णे उत्पले "विलम्बिनीलोत्पलकर्णपूराः" माघ॰ "नीलोत्पलं बिभ्रती" ताराध्यानम्। इदञ्च अञ्जनादिगणे सुश्रुते पठित्वा तद्गुणा उक्ता यथा "अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिननेत्ररोगिणामधूकस्येति। अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः"।

नीलोत्पलाद्यघृत न॰ चक्रपाणिदत्तोक्ते घृतभेदे "नीलोत्पलोशीरमधूकयष्टीद्राक्षा विदारीकुणपद्मभूलैः। क्षाणीवनीयैश्च हृतं विपक्वं घृतावरीकारवदुग्धमिश्रम्। तत्कर्करापाटवुतं प्रयत्नात् अङ्गमर्दे वातरक्तार्दितेषु। स्त्रीषु बले रेतसि संप्रनष्टे कृच्छ्रे च रक्तप्रभवे च हृद्ये"

नीलोत्पलिन् पु॰ नीलोत्पलं धार्य्यत्वेन बह्वर्थी वाऽस्यास्ति। मञ्जुघोषे शिवांशभेदे त्रिका॰। [च मेदि॰।

नीवर पु॰ नी-अरष् नि॰। १परिव्राजि २यतिव्रते ३वाणस्थे

नीवाक पु॰ नियतं वाको वचनं नि-वच-घञ् दीर्घः। १मङ्गलहेतोर्धान्यस्य संप्रयोगकारके अमरः। निहन्तौ अव्ययी॰। २वचननिहन्तौ अव्य॰।

नीवार पु॰ नि+वृ-घञ् दीर्घः। तृणधान्यभेदे "नीवारवाकादिकङ्कटीयैः" "अपस्यैरिव नीवारभागधेयोचितैर्धनैः" रघुः "नीवारफलमूलाशाञ्जीवन्त्यति ग्रेरते" भट्टिः। स च कृधान्यं यथोक्तं सुश्रुते "कोरदूषकश्यामाकनीवारश्यामतण्डुलवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखीकुरुविन्दनवेणुकावरकतोदपर्णीकुन्दकरेषु यवप्रभृतयः क्षुद्धान्यविशेषाः। तेषां कषायमधुराः रूक्षाः कटुविपाकिनः। लेखना बद्धविण्मूत्रवातपित्तश्लेष्मणाः। कषायमधुराश्चैषां शीतवित्तापकाः स्मृताः। नीवारः शीतलोऽत्यन्तं पित्तश्लेष्मकफापहः" भावप्र॰। स्वार्थे क। तत्रार्थे "नीवारकादयो मुद्गादयश्च समाश्चैव कषायोष्णाः" सुश्रु॰।

नीवि(वी) स्त्री निव्यते निवीयते वा नि+व्ये-इन् यलोपः दीर्घौ ङिच्च वा ङीप्। १वस्त्रिकां मूलधने २स्त्रीकटीवस्त्रबन्धे अमरः "नीविं प्रति प्रचिक्षिपे च करे प्रियेण" भा॰द॰ "नीवीरतिक्रमस्य शिथिलतरस्य" कुमा॰ "आलोच्य प्रियतमसंगुके विनीवौ" माघः "निवीप्रविस्रंसनकरः" भा॰ स्त्री॰ २४अ॰। ३वस्त्रग्रन्थौ "अवनिज्य पूर्ववद्वो दिं विस्रस्य नमोव इत्यादि" कात्या॰ ४।१५ ४राजपुत्रा देर्बन्धके सुभूतिः तत्र मूलधने "निलम्टहमिवातुप्रविस्रं नीविं वारमहतीमादाय गिरगामृ" दशकु॰।

नीव्र न॰ नीभ्रयञ्चार्थे पटले अमरे पाठान्तरम्।

नीशृत् पुंस्त्री नियतं वर्त्ततेऽत्र नि+वृत-आधारे क्विप् दीर्घः। देशे जनपदे अमरः "गमिकर्मीलितनैकनीशृता" नैष॰।

नीशार पु॰ नितरां शीर्य्यते हिमानिलाद्यत्रानेन वा नि+शृ-करणे आधारे वा घञ् दीर्घः। हिमानिलनिवारणे १प्रावरणे २कार्पासपटे च (कानात्) अमरः।

नीष्टार पु॰निष्ठिवते नि+ष्ठ-कर्मणि घञ् दीर्घः। घनीभूते १शिशिरे २हिमे च अमरः "नीष्टारलालमलिनाः पुमरुक्षवान्द्राः" भावः द॰र॰टीकोक्ते त्रयोविंशतिरगणाङ्के २दण्डकभेदे।

नु अव्य॰ नुदति नौति वा नुद्-नु-वा नित॰ डु। १विकल्पे २अनुनये ३अतीते ४प्रश्ने ५हेतौ ६वितर्के ७अवधारणे ८आदेशे ९अनुतापे च मेदि॰ "आशितं नु नशितं नु वधूनाम्" माघः अवधारणोत्प्रेक्षाद्योतकः। क्वचित् संशयालङ्कारद्योतकश्च। [अधोपदेशत्वात् न अत्र प्रतुदति।

नुड वधे तु॰ उ॰ पर॰ सक॰ सेट्। नुडति अनुडीत्। नुनोड्

नुति स्त्री नु-क्तिन्। १स्तवे २प्रणामे च।

नुत्त(न्न) त्रि॰ नुद-क्त। १प्रेरिते २क्षिप्ते च अमरः "अदस्तया नुत्तमनुत्तमं तमः" माघः। यत्ते कृतस्य नः पूर्वदत्तं नः। "न नोनुत्तनोनुत्तनोनानेनानुत्तनुत्तनुत्" किरा॰।

नूतन त्रि॰ नवएव "नवस्य न्नपूतनपूस्वार्थ" पा॰ स्वार्थे तनप् नूरादेशश्च। नवीने अमरः "नूतनलक्षधरदत्तवे" भाषा॰ "प्रशमस्थितपूर्वपार्थिवम् कुलमभ्युत्तनूतनेश्वरम्" रघुः।

नूत्न त्रि॰ नव एव नव+नूतनवत् स्नप् नूरादेशश्च। नवीने अमरः "नूत्ना इन्द्र! ते रथमाहुर्वीती भूमः" ऋ॰८।२१।७

नूद पु॰ नुदति पापं क दुश्चो॰ दीर्घः। अश्वत्थाकारे ब्रह्मदारुवृक्षे अमरः।

नूनम् अव्य॰ नु+ऊन-पि। १विकल्पे २निश्चिते ३स्मरणे

अमरः ४वाक्यस्मरणे ५उत्प्रेक्षाद्योतने च मेदि० "कृष्णेऽपि नूनं भरतं प्रपन्ने" "न मेऽस्ति नूनं वनवासमात्रात्" कुमा० "नूनं यद्वा ध्रुवं प्रायोऽनुमित्येवमादयः" सा०द० उत्प्रेक्षाद्योतकौ ।

नूपुर न० नू–क्विप् तुवि पुरति पुर–अलमनने क । (नेपुर) पादाङ्गदे अमरः "अप्सरोनूपुररवैः प्रबुद्धहरबर्हिणाः" भा०व० १४६ अ० ।

नृ नये भ्वा० प० अक० अनिट् । नरति अनार्षीत् ननार अयोपदेशत्वात् न अत्वं प्रनरति "योपदेशात्ननर्दनाटिनाग्राम्नन्दुकक् नटतः" । "नर्द शब्दे नट अवस्रन्दने चुरादिः नाटीति दीर्घनिर्देशात् घट अतावित्ति घटादिर्वेह नटन्ते नाथ् नाट्ट नाट्यादौ तु नदि बहुशो नक नाशने नृ नये नटो नाट्यविशेषे एतद्विद्या योपदेशाः" इति मनोरमा । नृ नये दिव् दृत्यर्थे

नृ इ०नी–ऋन् डित्व । १मनुष्ये २पुरुषे च अमरः । भा नरौ नरः नृन् नृः नरां नरयाम् । "नरामेकोनसप्तत्यधिकशतसर्वं एव पुष्पदन्तस्तोत्रम् । "अन्ये कृतयुगे नरां युगस्वाभानुरूपतः" मनुः । ३नेतरि त्रि० ४शङ्खौ पु० । मनुष्यजातौ स्त्रियां ङीष् दत्तो नारी "नारीणामनुकूलाचरणे चेष्टानाम्" सा०द० । [टिकाधान स्त्री ।

नृकपाल न० ६त० । नरस्य कपाले शीर्षास्थि नरकरोटि

नृकेशरिन् पु०ना चासौ केशरी च । नरसिंहे विष्णोरवतारभेदे नरसिंहशब्दे दृश्यम् ।

नृग पु० शोशीनरे १रूपभेदे २ततपत्नां स्त्री० । इन्द्रशब्दे १४७२ पृ० मूलं दृश्यम् । "राजर्षेस्तस्य च धरिष्यस्य भरतर्षभ ! । रम्यतीर्था बहुजला पयोष्णी द्विजसेविता" भा०व० ८८अ० । स च अज्ञानात् स्वकीयधेनुदत्ता ब्राह्मणधेनुं विप्राय दत्त्वा कृकलासतां प्राप्त इन्द्रेण कथा भा० अनु० ७०अ० दृश्या ।

नृगधूम ६० तीर्थभेदे शब्दार्थ० ।

नृचक्षस् पु० नृन् चष्टे पश्यति भक्षयतीव चक्ष–असुन् न ह्रस्वादेशः । १राक्षसे हेमच० । २मनुष्यदर्शके च "ग्रसेनो अनक्षा अन्धेहा चक्षुषावपश्यामि" ताण्ड्य०ब्रा० ३रेवे च "नृचक्षसां भागोऽसि" यजु० १४।२४ "नृन् शुभाशुभकर्तॄन् चक्षते आनन्ति ये ते नृचक्षसो देवाः" वेददी०

नृचक्षुस् पु० क्षीरवे तनीयपुत्रे भाविनि रूपभेदे "तनीयसस्य भविता नृचक्षुर्वदतुष्टो नलः" भाग० ९।२२। ३दृष्टौ० ।

नृजङ्घ न० ६त० । १मनुष्यनेत्रजले अनिःसृतं जलम् शा०त० । २मानवमूत्रे हेमच० ।

नृत नर्त्तने दिवा० प० अक० सेट् । नृत्यति अनर्तीत् ननर्त्त नर्तिष्यति नर्तृष्यति । नृत्तम् नृत्यम् । निनृत्सति नरीनृत्यते । नरीनर्त्ति नर्त्ति नरीनरीति नर्नरीति । अयोपदेशत्वात् सति विभिक्ते न णत्वम् । प्रनृत्यति नर्त्तकः नर्त्तकी । "नृत्यति युवतिजनेन समं सखि ! विरहिजनस्य दुरन्ते" गीतगो० "नृत्यन्ति योषितः शरीरभङ्गाः" चौरप० । [त्वम् । नर्त्तने यङ्लुच० ।

नृति स्त्री नृत–भावविशेषे क्तिन् स्त्रियां अभिधानात् स्त्री०

नृतु पु० नृत–कु । नर्त्तके "तेऽपरीतं नृतो भवः" ऋ०८।२४।८ "नृतु नमिनन् वध्रिवानाम्" ऋ०६।६२।५ "नृतु नर्त्तकावश्विनौ" भा० "वज्रेण दासुषे नृतो !" ऋ०१।१२०।७

नृतू त्रि०नृत–कू । १नर्त्तके । नृतू तूर्यति क्षिपति तूर्य–क्विप् । २नरक्षिपके च "नृतूरिवापोर्णुते" ऋ०१।९२।४

नृत्त(त्य) न० नृत–क्त यत् वा । तालमानयुक्ते सविलासाङ्गविक्षेपरूपे नर्त्तने "ताण्डवं नटनं नृत्यं लास्यं नृत्तञ्च नर्त्तने" अमरे ऐन्द्रे देऽपि पर्यायता । तल्लक्षणादि यथा "देवस्त्रीप्रतीतो यस्तालमानरसाश्रयः । सविलासो ऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः । ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते । अङ्गविक्षेपवाहुल्यं तत्राभिनयमुच्यते । यत्र सा मेरविस्तस्याः संज्ञा देवीति लोकतः । छेदनं भेदनं यत्र बहुरूपा छलावली । ताण्डवं बहुरूपन्नहारचारणसङ्कुलम् । कुरितं यौवतस्त्रैणं लास्यं द्विविधमुच्यते । यत्राभिनयाद्यैर्भावैरवैराक्षेपपुष्पनैः । नाविष्कारावकौ रङ्गे नृत्यतस्तत्कुरितं हि तत् । मधुरं बहुशोऽभिनयैर्यत्र नृत्यते । वशीकरणविद्याभं तल्लास्यं यौवतं मतम् । गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः । लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते" सङ्गीतदा० । अपरूपस्य नृत्यं व्यर्थं यथा "नृत्येनाङ्गमरुमेव विहितोऽस्य रूपतः । चार्मपिष्टानवत्तूर्यं नृत्यमन्यद्विडम्बना" इति सार्ध०पु० "रङ्गस्य दर्शयित्वा नर्त्तकी निवर्त्तते यथा नृत्यात्" सा०का० । "गोपाङ्गना नृत्यमनन्दयत्तम्" भट्टिः ।

नृत्यप्रिय त्रि० नृत्यं प्रियमस्य । १नर्त्तनप्रिये २ताण्डवप्रिये शिवे पु० ३कुमारानुचरमातृभेदे स्त्री "नृत्यप्रिया च राजेन्द्र ! यतोलूखलमेखला" भा०व० ३७अ० ।

नृत्यशाला स्त्री ६त० । (नाचघर) नाट्यगृहे

नृत्यस्थान न० ६त०। नृत्याधिकरणे रङ्गस्थाने अमरः।

नृदुर्ग न० नृवेष्टितं दुर्गम् शा०त०। मनुष्यरथादिवेष्टिते नृपस्याश्रयणीये दुर्गभेदे (गड) भेदे "नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् नृपः" मनुः "नृदुर्गं चतुर्दिगवस्थायिहस्त्यश्वरथयुक्तबलपादातरक्षितम्" कुल्लू०।

नृदेव पु० ना देव ६त। नरदेवे नृपे "अज्ञानमात्रां विदुषां च पत्रैर्देवा नृदेवाश्च भिदां न भेजुः" नैष०।

नृधर्मन् पु०नरस्येव धर्मोऽस्य अनिच् समा०। १कुबेरे हेमच० २मनुष्यधर्मयुक्तमात्रे त्रि० स्त्रियां वा ङीप्।

नृनमन न०६त०। नृभिर्नम्यते नम-कर्मणि ल्युट् पूर्वपदादिति णत्वे प्राप्ते क्षुब्धा० न णत्वम्। १मनुष्यनमनीये देवादौ।

नृप पु० नॄन् पाति रक्षति पा-क। "चतुर्योजनपर्यन्तेऽधिकारी नृपो भवेत्" इत्युक्ते १राजविशेषे २राजमात्रे च अमरः। "नृपादिलक्षणं यथा "चतुर्योजनपर्यन्तमधिकारो नृपस्य च। यो राजा तच्चतुर्गुणः स एव मण्डलेश्वरः। तस्माद्द्विगुणो राजा राजेन्द्रः परिकीर्त्तितः" ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६अ०। तत्प्रशंसा यथा "अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः। अमातुर्जननी राजा अतातस्य पिता नृपः। अनाथस्य नृपो नाथो ह्यभर्त्तुः पार्थिवः पतिः। अपुत्रस्य नृपो भृत्यो नृप एव नृणां सखा। सर्वदेवमयो राजा तस्मात्त्वामर्थये नृप!" कालिकापु०५०अ०। "व्यवहारान्नृपः पश्येद्विद्वद्भिः ब्राह्मणैः सह" याज्ञ० "नृपेण साधिपत्यस्य हेतिः" नैष०। २षोडशसंख्यायाम् भारते षोडशानामेव राज्ञां माहात्म्यविशेषकथनात् नृपशब्दस्य तत्सङ्ख्यावाचित्वम् षोडश नृपाश्च भा०द्रो० ५५अध्यायादौ षोडशराजिकपर्वण्युक्ताः तत्रैव द्रष्टव्याः। "भुवि नृपमितहस्तेष्वङ्गलग्नं तदग्रम्" लीला०। राज्ये एकनृपकरणस्यावश्यकता तत्र विशेषश्च औशनसनीतिपरिशिष्टे १अ० उक्तो यथा

"सदैकनायकं राज्यं कुर्यान्न बहुनायकम्। नानायकं क्वचिदपि कर्त्तुरोषितदूतये। राजकुले तु बहवः पुरुषा यदि सन्ति हि। तेषु ज्येष्ठो भवेद्राजा शेषास्तत्कार्यसाधकाः। सरीयांसोपराः सर्वे सहायेभ्यो विवृद्धये। ज्येष्ठोऽपि बधिरः कुष्ठी मूकोऽन्धः षण्ढ एव यः। स राज्यार्हो भवेत्तेषां भ्राता तत्सुत एव वा। न कनिष्ठोऽपि, ज्येष्ठस्य भ्रातुः पुत्रस्तु राज्यभाक्। दायादानामेकमतं राज्ञः श्रेयस्करं परम्। पृथग्भावो विनाशाय राज्यस्य च कुलस्य च। अतः सभोगसङ्घातान् दायादान् कारयेन्नृपः। कन्याहृतान्तः संतुष्टैश्छलसिंहासनैरपि। राज्यविभजनाच्छ्रेयो न भूपानां भवेत् खलु। अल्पीकृतं विभागेन राज्यं शत्रुर्जिघांसति। राज्यतुर्यांशदानेन स्थापयेत्तान् समन्ततः। चतुर्दिक्षु वा देशाधिपान् कुर्यात् सदा नृपः। गोगजाश्वोष्ट्रकोशाणामाधिपत्ये नियोजयेत्। सेनाधिकारे संयोज्या बान्धवाः स्यालकादयः। स्वदोषदर्शकाः कार्य्या गुरवः सुहृदश्च ये। वस्त्रालङ्कारपात्राणां स्त्रियो योज्यास्तु दर्शने। स्वयं सर्वं च विमृशेत् पर्यायेण च दुर्नयेत्। मन्त्रयेन्मन्त्रिभिः सार्द्धं भावि कृत्यं तु निर्जने। अन्तर्वेश्मनि रात्रौ वा दिवा वाऽन्यविशोधिते। सुहृद्भिर्भ्रातृभिः सार्द्धं सभायां पुत्रबान्धवैः। राजकृत्यं सैन्यपेक्षं सम्भाद्यैश्चिन्तयेन्नृपः"। [राजनि०।

नृपकन्द पु० कन्दानां नृपः श्रेष्ठः राजद०। राजपलाण्डौ

नृपगृह न० ६त०। राजमन्दिरे तल्लक्षणादि द्र०सं० ५३अ० "उत्तमसप्ताभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन। अष्टोनान्येवं पञ्च सपादानि दैर्घ्येण" औशनसनीतिपरिशिष्टे १अ० तद्विवृतिर्यथा

"राजगृहं सभामध्यं सयानगजशालिकम्। प्रशस्तं वापीकूपादिजलयन्त्रैः सुशोभितम्। सर्वतः स्यात् समभुजं दक्षिणोत्तरदङ्मुखम्। शालां विना नैकभुजम् तथा विषमबाहुकम्। प्रायःशाला नैकभुजा चतुःशालं विना शुभा। प्रस्तारधारिभिर्युक्तप्राकारं सुदृढान्तकम्। सन्निविष्टचतुर्द्वारं चतुर्दिक्षु सुशोभनम्। दिवारात्रौ सशस्त्रास्त्रैः प्रतिकक्षासु गोपितम्। चतुर्भिः पञ्चभिः षड्भिर्यामिकैः परिवर्त्तकैः। नानाग्रहोपकार्य्यादृसंयुतं कल्पयेत् सदा। वस्त्रादिमार्जनार्थं च स्नानार्थं यजनार्थकम्। भोजनार्थं च पाकार्थं पूर्वस्यां कल्पयेत् गृहम्। निद्रार्थञ्च विहारार्थं पानार्थं रोदनार्थकम्। शान्त्यर्थं द्वारपालार्थं दासीदासार्थमेव च। उत्सर्गार्थं ग्रहान् कुर्यात् दक्षिणस्यामनुक्रमात्। गोखरोष्ट्रगजाद्यर्थं ग्रहान् प्रत्यक् प्रकल्पयेत्। रथवाजयर्थशस्त्रार्थव्यायामशामकार्थकम्। वस्त्रार्थकं तद्भरार्थं विद्याभ्यासार्थमेव च। उदक् ग्रहान् प्रकुर्वीत सुगुप्तान् सुमनोहरान्। यथासुखानि वा कुर्यादुदग्ग्रहान्यतानि वै नृपः। धर्माधिकरणं शिल्पशालां कुर्यादुदग्ग्रहान्। पञ्चमांशाधिकोच्छ्रायां भित्तिं विस्तरतो गृहे।

कोष्ठविस्तारमर्धांशस्थूला सा च प्रकीर्त्तिता। एकभूमे रिदं मानमूर्द्ध्वमूर्द्ध्वं समन्ततः। सम्भेद्य भित्तिभिर्वापि पृथक् कोष्ठानि संन्यसेत्। त्रिकोष्ठं पञ्चकोष्ठं वा सप्तकोष्ठं मृदं कृतम्। द्वारार्धमष्टधा भक्तं द्वारस्यांशौ तु मध्यमौ। द्वौ द्वौ शेषौ चतुर्दिक्षु घनपुञ्जपदौ स्मृतम्। तत्रैव कल्पयेत् द्वारं नान्यत्र तु कदाचन। वातायनं पृथक् कोष्ठे कुर्याद्वाहक् सुखावहम्। अन्यत्रेहद्वारविद्धं गृहद्वारं न कारयेत्। हस्तकोष्ठस्तम्भमार्गं पीठकूपैश्च वेधितम्। प्रासादमण्डपद्वारे मार्गवेधो न विद्यते। गृहपीठं चतुर्थांशमुच्छ्रायस्य प्रकल्पयेत्। प्रासादानां मण्डपानां चार्द्धांशं चापरे जगुः। पर वातायनैर्विद्धं नापि वातायनं कृतम्। स्फीता निम्ना कृदिर्न स्यात्तदक् कोष्ठस्य विस्तरः। स्तोच्छ्रायस्यार्द्धमूलैक प्राकारः समभूतकः। तृतीयांशकमूलो वा क्षुल्लस्यार्द्धं प्रविस्तरः। उच्छ्रितस्तु तथा कार्यो दस्युभिर्न विलङ्घ्यते। यामिकैरक्षितो नित्यं नालिकास्त्रैश्च संयुतः। बहुहृद्गुल्मसंयुक्तः सुगवाक्षप्रचालिकः। खट्टीनसङ्घाप्राकारो ह्यसमीपमहीधरः। परिखा तत्र कार्या च खातात् द्विगुणविस्तरा। नातिसमीपमाकारा क्षुगाधसलिला शुभा। युद्धसाधनसम्भारैः सुयुद्धकुशलैर्विना। न श्रेयसे दुर्गवासे राज्ञः स्याद् बन्धनाय वै"।

नृपञ्जय पु० अन्यान् नृपान् जयति जि-खश्। पौरवे नृपभेदे "तस्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः। नृपञ्जयो बहुरथ इत्येते पौरवाः स्मृताः" हरिवं० २०अ०।

नृपति पु० नॄन् पाति पा-डति ह्रस्वः। १कुबेरे २नृपाले राजनि च शब्दरत्ना० "जातामिषक्तो नृपतिर्निषङ्गात्" रघुः। नृनाथादयोऽपि राजनि। ३क्षत्रिये "नृपतेर्वैश्यैर्द्वयोः" मनुः।

नृपतिवल्लभ पु० ६त०। १वटिकात्मके औषधभेदे "जातीफलं लवङ्गाद्यमेलाटङ्करामठम्। जीरकञ्च यवानी च विश्वाधैस्त्वपलकम्। लौहमभ्रं रसं गन्धं ताम्रं प्रत्येकशः पलम्। मरिचं त्रिपलं दत्त्वा छागीदुग्धेन मेलयेत्। धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नतः। श्रीमद्गणनाथेन विचिन्त्य परिनिर्मितः। सूर्य्यवत्तेजसा चायं रसो नृपतिवल्लभः। अष्टादशवटी खादेत् पवित्रः सूर्य्यदर्शकः। हन्ति मन्दानलं सर्वमामदोषं विलक्षिकाम्। प्लीहगुल्मोदरार्शांसि बलदं पाण्डुहलीमकम्। कृच्छ्रमूत्रं कण्ठगूलञ्च चक्षुःशूलञ्च कामलाम्। शिरःशूलं कटीशूलमानाहशोथशूलकम्। कासश्वासमवातञ्च क्षीपदं शोथमर्बुदम्। गलगण्डं गण्डमालामस्रपित्तञ्च गर्दभीम्। क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम्। उपदंशमतीसारं मूत्रस्वर्शःप्रमेहकम्। अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातमहोदरम्। ज्वरं जीर्णज्वरं कण्डूं तन्द्रालस्यं वमिं भ्रमिम्। हाहविद्रधि हिक्काञ्च जडगद्गदमूकताः। बाधिर्य्यं स्वरभेदञ्च शुक्रदुर्विषमान्। उरस्तम्भं रक्तपित्तं गुदभ्रंशमरुचिं तथा। वर्णनाशानुशोथांश्च दन्तरोगञ्च पीनसम्। स्त्रीक्लैब्यञ्च शीतपित्तञ्च स्थावराणि विषाणि च। वातपित्तकफोत्थांश्च हन्त्यजान् सान्निपातिकान्। सर्वरोगक्षयान् हन्ति भस्मांशुरिव पापहा। बलवर्णकरो ह्येष आयुषो वीर्यवर्द्धनः। परं दाहोत्करः श्रेष्ठः पटुतामन्त्र सिद्धिदः। अरोगी दीर्घजीवी स्यात् रोगी रोगं विमुञ्चति। रसस्यास्य प्रसादेन सुखाङ्गजायते नरः" भैषज्यरत्नावली। २राज्ञां प्रिये त्रि० ३राजपत्न्यां स्त्री नृपवल्लभादयोऽप्यत्र।

नृपत्नी स्त्री नॄणां पतिः पालयित्री "विभाषा ऽपूर्वस्य" पा० नान्नादेशः नान्नत्वात् स्त्रियां ङीप्। नॄणां पालयित्र्यां स्त्रियां "अभि नो देवीरवसा महः शर्मणा नृपत्नीः" ऋ०। २२।। "नृपत्नीः सहवीराणां पालयित्र्यः" भा० अन्दहि लसः स्थाने यस्। नृपद्रुम पु० नृपस्यादनो द्रुमः शा०त०। राजादने आरग्वधे राजनि०। नृपवृक्षादयोऽप्यत्र "स्यादेवाश्वकुरान् धट्टान् पूतीकनृपवृक्षजान्" सुश्रुतः।

नृपप्रिय पु० ६त०। (वेकुर्वाग) १वंशभेदे तस्य दुर्गवेष्टनकारित्वात्तत्प्रियत्वम्। २राजयवाख्ये ३शालिधान्ये ४आम्रे च शब्दच०। ५राजवल्लभे त्रि० ६केतक्यां ७राजवर्चूर्यांश्च स्त्री राजनि०। [राजनि०]

नृपप्रियफला स्त्री नृपप्रियं फलं यस्याः। वार्त्ताक्यां

नृपबदर पु० बदराणां नृपः राजदला० पूर्वनि०। राजबदरे राजनि०।

नृपमन्दिर न० ६त०। राजगृहे सौधे हेमच०।

नृपमाङ्गल्यक न० नृपस्य माङ्गल्यं यस्मात् कप्। माङ्गल्यवृक्षे राजनि०।

नृपमान न० नृपस्य तद्भोजनस्य मानमानेदकं माद्यम्। नृपस्य भोजनपात्रमानेदके माद्यभेदे त्रिका०।

नृपलक्ष्मन् न० ६त०। नृपचिह्ने छत्रे चामरादौ च नृपचिह्नादयोऽत्र "निजयाहोजसा वीरः कलिं दिग्विजये क्वचित्। नृपचिह्नधरं शूद्रं म्लेच्छं गोमिथुनं पदा" भाग०

नृपवल्लभ न०चक्रपाणिदत्तोक्ते पक्वे १तैलभेदे २घृतभेदे च। "गवां यकृत्काथविपक्वसत्तमं हितञ्च तैलं तिमिरेषु नस्ततः। घृतं हितं केवलमेव पैत्तिके तथाहुतैलं पवनास्रगुल्मयोः। जीवकर्षभकौ मेदाद्राक्षांशुमती निदिग्धिका हृद्ती। मधुकं वला विडङ्गं मञ्जिष्ठा शर्करा राक्षा। नीलोत्पलं त्रदंष्ट्रा प्रपौण्डरीकं पुनर्नवा लवणम्। पिप्पल्यः सर्वेषां भागैरन्यांशिकैः पिष्टैः। तैलं वा यदि वा सर्पिर्दत्त्वा क्षीरं चतुर्गुणं पक्वम्। तिमिरं पटलं काचं नक्तान्ध्यं चार्बुदन्यान्यत्र। श्वेतञ्च बिन्दुनाशं नाशयति नीलिकासंज्ञम्। सुखनाशादौर्गन्ध्यं कलितस्नायुकाबद्धं हृद्रोगाश्मम्। कासं श्वासं शोषं हिक्कां क्लमं तथा व्यथां नेत्रे। सुखजैक्षुत्रमर्दभेदं रोगं बाहुपर्वं शिरसस्थम्। रोगानशेषांश्चलतोः सर्वानचिरेण नाशयति। नस्यार्थं कृष्णं तैलं पक्वव्यं नृपवल्लभे। अर्थार्थैः शाविकैः कल्कैरन्ये चक्रादितैलवत्"।

नृपशासन न० ६त०। राजशासने तत्प्रकारः औशनसनीतिपरिशिष्टे १अ० उक्तो यथा

"शासनं कोशसं कार्यं राज्ञा नित्यं प्रजासु च। दासे भृत्येषु भार्यायां पुत्रे मित्रेऽपि वा क्वचित्। वाग्दण्डं परुषं नैव कार्यं तद्देशसंस्थिते। सुताशासनं मानानां नाशनस्यापि वा क्वचित्। निर्यातानां च धातूनां सजातीनां एतस्य च। कटुदण्डपरुषातैरपिटादीनाञ्च सर्वदा। कूटं नैव तु कार्यं स्यात् बलात् निर्मितं जनैः। कलोऽप्यपहृतं नैव स्वामिकार्यविलोपनम्। दुर्वचनारिणं क्षीरं सारं यद्दुर्विधं द्विषम्। भरत्नस्वप्रकाशं हि तथाम्बानपकारकम्। भ्रातॄणां पितॄणां चैव पूज्यानां विदुषामपि। नाशमात्रं नोपहासं न कुर्युः पितृपुत्रयोः। वापीकूपारामसीमाधर्मकालासुराबयान्। मार्गांश्चैव प्रबाधेयुर्दीनान्धविकलाङ्गकान्। द्यूतञ्च मद्यपानञ्च मृगया शस्त्रधारणम्। नोगलाम्बोद्रकहिमीनृणां च स्वाम्यरस्य च। रत्नस्वर्णरत्नानां मादकस्य विषस्य च। क्रयं वा विक्रयं वापि मद्यबन्धानमेव च। क्रयपत्रं दानपत्रमृणनिर्णयपत्रकम्। राजाज्ञया विना नैव जनैः कार्यं चिकित्सितम्। महापापाधिपतनं निधिपत्रमथैव च। न वा समाजनियमं निर्णयं शास्त्रिदूषणम्। अस्त्रामिनाटिकधनसंग्रहमन्त्रभेदतः। नृपतेर्ग्रन्थोपस्थं नैव कुर्युः कदाचन। अधर्मं कलिमनृतं परदाराभिमर्शनम्। कूटसाक्ष्यं कूटलेख्यमप्रकाशप्रतिग्रहम्। निर्धारितकराधिक्यं स्तेयं साहसमेव च। मनसापि न कुर्वन्तु स्वामिद्रोहं तथैव च। भृत्या शुद्धेन भागेन दृष्टा दर्पात्ववज्ञात् कदाचित्। आधर्षयं न कुर्वन्तु यस्य कस्यापि सर्वदा। परिमाणोन्मानं धार्यं नृपविहितम्। सुखसाधनसंदृष्टा भवन्तु निश्चिता जनाः। साहसाधिकृतो न स्युर्विना चैवाततायिनम्। सत्कृष्टा दमभाग्या येस्तेस्ते धार्याः सुयन्त्रिताः। इति मन्त्रायनं श्रुत्वा वेऽन्यथा वर्त्तयन्ति तान्। नाशयिष्यन्ति दण्डेन महता पापकारकान्। इति प्रबोधयेन्नित्यं प्रजाशासनडिण्डिमैः। लिखित्वा शासनं राजा धारयेच्च चतुष्पथे। तथा चोद्यतदण्डः स्यादशासुषु च शत्रुषु"।

नृपशु पु० ना पशुरिव ना चासौ पशुश्चेति वा। १मूर्खे २पुरुषपशौ च "वाच स्त्रियो नृपशून् स्यादन्ति" भाग० ५ २६ २९ श्लो०।

नृपसभ(भा) न०स्त्री नृपाणां सभा "राजामनुष्यपूर्वेति" पा० राजपर्यायसङ्ख्यात् ङीबत्वम्। बहूनां नृपाणां सभायाम्। एकस्य सभायां ङे स्त्री। तत्सभाप्रकारश्च औशनसनीतिपरिशिष्टे १अ० उक्तो यथा

"राज्ञा राजसभा कार्या सुगुप्ता च मनोरमा। त्रिकोष्ठैः पञ्चकोष्ठैर्वा सप्तकोष्ठैः सुविस्तृता। दक्षिणोदक् तथा दीर्घा प्राक् प्रवण द्विगुणाऽथ वा। त्रिगुणा वा यथाकामं एकभूमिर्द्विभूमिका। त्रिभूमिका वा कर्त्तव्या सोपकार्याशिरोमुखा। परितः परिकोष्ठेषु वातायन विराजिता। पार्श्वकोष्ठास्तु द्विगुणा मध्यकोष्ठेषु विस्तृता। पञ्चमांशाधिकं स्तोत्रं मध्यकोष्ठस्य विस्तरात्। विस्तारेण समं स्तोत्रं पञ्चमांशाधिकं तु वा। कोष्ठानां च भूमिं च यदि वा तत्र कारयेत्। द्विभूमिके पार्श्वकोष्ठे मध्यमं त्वेकभूमिकम्। पृथक्स्तम्भा तु यद्वत् कोष्ठा चतुर्भागसमा शुभा। जलोद्वारादिवन्नैव युता सुखरयन्त्रकैः। वातप्रेरणयन्त्रैश्च बन्ती कालवशोपकैः। प्रतिष्ठिता च पादर्भिस्तया च प्रतिरूपकैः। एवंविधा राजसभा बन्धार्थी कार्यदर्शने। तथाविधाश्चाध्यक्षाधिकृतशालिकाः। कर्त्तव्याः प्राग्दक्षिणास्तदर्थाश्च पृथक् पृथक्। शतहस्तमिता भूमिं

त्यक्त्वा राजगृहात् सदा । उदङ् द्विगतकृत्वा प्राक् सेना सन्निवेशनार्थिका । आराद्राजगृहस्यैव प्रजानां निवेशनानि च । वणिग्नैष्टिकानुक्रमतश्च सदा ततः । वमनाच्च चतुर्दिक्षु विन्यसेच्च ततःपरम् । प्रकृत्यनुप्रकृतयो ह्याधिकारिगणस्ततः । सेनाधिपपदातीनां गणः सादिगणस्ततः । सादश्च सगजश्चापि गजपालगणस्ततः । दृढ्यालिकयन्त्राणि ततः सत्वरगोगणः । ततः खगोलूमिकगणो ह्यारण्यकगणस्ततः । क्रमादेषां गृहाणि स्युः शोभनानि परे सदा । पान्थशाला ततः कार्या सुगुप्ता सजलाशया । सजातीयगृहाणां च समुदायेन षड्क्रितः । निवेशने पुरे ग्रामे प्रागुदक् सुखमेधते । सजातिपण्यनिवहैरापणे पण्यवेशनम् । धनिकादिक्रमेणैव राजमार्गस्य पार्श्वतः । एवं हि पत्तनं कुर्यात् ग्रामं चैव नराधिपः" । तदधिवेशनप्रकारः तत्रैव "सभायां प्रत्यगर्द्धस्य मध्ये राजासनं भवेत् । दक्षसंस्था वामसंस्थाः विशेयुः पार्श्वपृष्ठगाः । पुत्राः पौत्राः भ्रातरश्च भागिनेयाश्च पृष्ठतः । दौहित्रा दक्षभागास्तु वामसंस्थाः क्रमादिमे । पितव्याः स्वकुलज्येष्ठाः सभ्याः सेनाधिपास्तथा । स्वाग्रे दक्षिणभागे तु प्राक्संस्थाः पृष्ठगासनाः । मातामहकुलज्येष्ठा मन्त्रिणो ऽन्यवास्तथा । श्वशुराद्यैव श्यालाद्या यावाग्रे चाधिकारिणः । वामदक्षिणपार्श्वस्थो जामाता भगिनीपतिः । स्वसृदयस्तीमे वा स्वाङ्गसंगतः सुहृत् । दौहित्रभागिनेयानां स्थाने स्युर्दत्तकादयः । भागिनेयाश्च दौहित्राः पुत्रादिस्थानसंस्थिताः । यथा पिता तथाचार्या यथा भ्रेष्ठासने स्थितः । पार्श्वयोरग्रतः सर्वे सेवका मन्त्रिणस्तथा । परिवारगणाः सर्वैः सर्वेभ्यः पृष्ठसंस्थिताः । स्वर्णदण्डधरौ स्यातां प्रवेशननिवेदकौ । विशिष्टचिह्नधृक् राजा स्वासने प्रवदेत् स्वके । सुभूषणः सुवसनः कवची सकुटान्वितः । स्निग्धास्त्रलग्नयस्तु धावधानः मनाः सदा" ।

नृपसुता स्त्री ६त० । १राजकन्यायां २कुलुन्दर्यां स्त्री पृ० मं०८८अ० "कुलुन्दरी नृपसुता वाहेयोगर्दभः प्रोक्तः" ।

नृपांग ६त० । १नृपाय देये करे षष्ठांशादौ २राजपुत्रे पु० ।

नृपाक्रुष्ट ३त० । चतुरङ्गशब्दे २८६४ पृ० दर्शिते क्रीडार्थराजाक्रुष्टे राजनि । "नृपाक्रुष्टो यदा राजा गमिष्यति युधिष्ठिर ! । तदा राजा हि राजानं घातेऽपि तं हनिष्यति ।

नृपात्मज पु० ६त० । १राजपुत्रे २राजकन्यायां स्त्री "स्वयं वरं भीमनृपात्मजाद्याः" नैष० । नृपस्यात्मजेव । ३कटुतम्बूरां स्त्री रत्नमाला ।

नृपाध्वर पु० नृपमात्रकर्त्तव्योऽध्वरः शाक०त० । राजमात्रे कर्त्तव्ये राजसूययज्ञे "राजा राजसूयेन यजेत" श्रुत्या राजमात्रस्यैव तदाधिकारस्य विधानात्तस्य तथात्वम् ।

नृपान्न न०नृपप्रियमन्नम् । १राजान्ननामके धान्यभेदे राजनि० ६त० । २राज्ञोऽन्ने च ।

नृपाभीर न० नृपं तद्भोजनकालमभीरयति अभि+ईर–अच् उप०स० । राज्ञो भोजनकालावेदके नृपमानाख्ये वाद्यभेदे त्रिका० ।

नृपामय पु० आमयानां नृपः राजदन्ता० पूर्वनि० । १राजयक्ष्मरोगे राजनि० ६त० । २राज्ञोरोगे च ।

नृपाल पु० नृन् पालयति पाल–अण् उप०स० । १नृपतौ राजनि । "अस्मै नृपालाः किलतत्र तत्र बलिं हरिष्यन्ति सलोकपालाः" भाग०४।१६।२०नरपालादयोऽप्यत्र

नृपावर्त्त न० नृप इवावर्त्तते आ–वृत–अच् । राजायर्के मणिभेदे राजनि० । [आसनभेदे अमरः ।

नृपासन न० । राज्ञो भद्रासने सिंहासने मण्यादिरचिते

नृपाह्वय पु० नृपमाह्वयति गन्धेन आ+ह्वे–य । राजपलाण्डौ राजनि० ।

नृपीट न० शङ्के निघण्टु नपीटमित्यत्र पाठान्तरम् ।

नृपीति स्त्री पा–रक्षणे भावे क्तिन् आत ऐत्वम् ६त० । १मनुष्यरक्षणे । "अनाष्टो नृपीतये" ऋ० ७।१५।१४। कर्त्तरि क्तिच् । २मनुष्यरक्षके त्रि० "वरूथे अस्मतो नृपीतौ" ७।२०।८ "नृपीतौ नृणां रक्षके" भा० ।

नृपोचित पु० नृपेषु उचितः । १राजमात्रे २राजयोग्ये त्रि० राजनि० ।

नृभोजा त्रि० नभसि जायते जन–विट् ङा । आकाशजाते "नभोजाः पुत्रं दुर्यतस्य दर्शि" ऋ० १०।१२३।२ नभो अस् यद्वल्लनं प्रामादिकम् ।

नृमयस् त्रि० नृषु यजमानेषु मनो यस्य "छन्दस्यृदवग्रहात्" पा० यत्वम् । रक्षितव्ययजमानेषु अनुग्राहकबुद्धियुक्ते इन्द्रादौ देवे "त्वं पिप्रोर्नृमयः प्रारुजः पुरः" ऋ०१।५१।५ नृणां मनोयत्र यत्वम् । २धने नृमय शब्दे दृश्यम् । ३जम्बूद्वीपस्थे महानदीभेदे स्त्री आवन्तः "अरुणा नृमणाङ्गिरसी सावित्री सम्भाता ऋतम्भरा सत्यम्भरेति महानद्यः" भाग० ५।२०।६

नृमिथुन न० ६त० । मनुष्यस्य स्त्रीपुरुषयुग्मे । "मनुष्यौ घटी नृमिथुनं सगटं सयोषम्" वृहज्जा० मिथुनराशिस्वरूपोक्तौ । नृयुग्मादयोऽप्यत्र । "उच्चं नृयुग्म घटमं त्रिकोणम्" ज्योति०त० ।

नृमेध पु० ना मिध्यतेऽत्र मिध–आधारे घञ् । पुरुषमेधे १यज्ञभेदे । तद्विधिः यजु० ३०अ० दृश्यः । २ऋषिभेदे "नृमेधं प्रजयासृजतृसम्" ऋ० १० ८० १३ "नृमेधमेतन्नामानमृषिम्" भा० ।

नृमृण न० नृभिर्म्रीयतेऽभ्यस्यते उपार्जयितुम् म्रा–घञर्थे–क "छन्दसृदवपहात्" पा० णत्वम् । धने निघण्टुः । "अस्मभ्यं नृमृणमाभराश्व्यं नृमणस्यसे" ऋ० ५।३८। नृमृणं धनम् । नृमणस्यसे धनमिच्छसि" भा० नमणस्+क्यच् ।

नृयज्ञ पु० नृनरार्थो यज्ञः । प्रत्यहं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते अतिथिपूजनरूपे यज्ञे "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः" "ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्वदा । नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्" इति च मनुः ।

नृवत् त्रि० ना–परिचारकादिरस्यस्य मतुप् वेदे मस्य वः लोके तु न वः ऋमदित्येव । परिचारकनरयुक्ते "भरद्वाजे नृवत इन्द्र ! सूरीन् दिवि" ऋ० ६ १७ १४

नृवराह पु०ना वासौ वराहश्च । अंशाभ्यां मनुष्यवराहाकृतौ भगवदवतारभेदे "दैत्यस्ततोऽसौ नृवराहमाहवे निपातयामास रुषा ज्वलन्तीम् । शक्तिं यथा विद्युतमाशु कुञ्जे प्रवर्धमानोऽपि गिरिं सुमेघः । स हन्यमानो गदयाऽप्रमेयः प्रोवाच दैत्यं नृवराहमूर्त्तिः । प्रजापतेः सेतुमिमं निहत्य व्रजेत्र कः स्वस्ति यथा सुरेन्द्र !" अग्निपु० । "नृवराहस्य वसतिर्महर्लोके प्रतिष्ठिता । नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः" । सएव बलेर्द्वारी यथा "शौकरं रूपमास्थाय द्वार्यस्य च दुरात्मनः । भविष्यामि न सन्देहो व्रज शक्र ! त्वरान्वितः" पाद्मे सृष्टिखण्डे २८अ० ।

नृवाहन पु० ना वाहनमस्य । १नरवाहने कुबेरे नुर्नेतृवाहनम् "छन्दसृदवपहात्" पा० वेदे णत्वम् । २नेतृवाहने "अर्वाञ्चमद्य यय्यं नृवाहणम्" ऋ० २ १७ ५

नृवाहस् पु० नृन् वहति वह–वेदे असुन् णिच् । मनुष्यवाहके "गोषा इन्द्रो नृवाहसा" ऋ०१ ६ २

नृशंस त्रि० नृन् शंसति शनृषु–हिंसायाम् अण् । १घातुके क्रूरे अमरः २परद्रोहिणि च "भगो नृशंस ! उर्वन्तरिक्षम्" ऋ० ०।५।१५ "इतरेषु (विवाहेषु) तु शिष्टेषु नृशंसानृतवादिनम्" मनुः ।

नृशृङ्ग न० नुः शृङ्गम् । अलीकपदार्थे नरस्य शृङ्गाभावात् अयोग्यत्वेऽपि अलीकत्वविवक्षायामस्य साधुत्वम् "नासद्वृत्तादौ नृशृङ्गवत्" सां०सू० "नरशृङ्गतुल्यस्यासत उत्पादो न सम्भवतीति" प्र०भा० ।

नृषद् पु० नरि पुरुषे अन्तर्यामितया सीदति षद–क्विप् वेदे णत्वम् । १परमात्मनि २कश्यपर्षेः पितरि ऋषिभेदे "उत कण्वं नृषदः पुत्रमाहुः" ऋ०१०।३१।११ ३मनुष्यस्थायिनि च "ध्रुवसदं त्वा नृषदं मनःसदम्" यजु०९।२।

नृषदन न० नरः नेतारः ऋत्विजः तेषाम् सदनम् वेदे णत्वम् । यज्ञगृहे "यमृतौ रण्वा नरो नृषदने" ऋ० ५ ७ २ "नृषदने यागगृहे" भा० ।

नृसिंह पु० ना चासौ सिंहश्च । अंशाभ्यां मनुष्यसिंहाकृतियुक्ते १भगवतोऽवतारभेदे "सिंहस्य कृत्वा वदनं मुरारिः सदा करालञ्च सुरक्तनेत्रम् । अर्द्धं वपुर्वै मनुजस्य कृत्वा ययौ सभां दैत्यपतेः पुरस्तात्" अग्निपु० । २रतिबन्धभेदे तस्य लक्षणं यथा "पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम् । हस्तयोर्वेष्टयेद्गात्रं बन्धो नृसिंहसंज्ञकः" रतिम० । ना सिंह इव उपमितसमासः । ३पुरुषश्रेष्ठे च

नृसिंहचतुर्दशी स्त्री नृसिंहस्याविर्भावदिनं चतुर्दशी मा० त० । वैशाखशुक्लचतुर्दश्याम् । आगमे "वैशाखे शुक्लपक्षे च चतुर्दश्यां महातिथौ । सायं प्रह्लादधिक्कारमसहिष्णुः परोहरिः । सद्यः कटकटाशब्दविस्मापितसभाजनः । लीलया स्तम्भगर्भान्तादुद्भूतः शब्दभीषणः । नृहरेरवतारार्त्तां यत्नतः समुपोषयेत् । महापुण्यतमायाञ्च सायं विष्णुं प्रपूजयेत्" । वृहन्नारसिंहे "वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत् । मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्" किञ्च "स्वातीनक्षत्रयोगे तु शनिवारे हि मद्व्रतम् । सिद्धियोगस्य योगे च लभ्यते दैवयोगतः । सर्वैरेतैस्तु संयुक्तैर्हत्याकोटिविनाशनम् । केवलञ्च प्रकर्त्तव्यं मद्दिनं फलकाङ्क्षिभिः । वैष्णवैर्न तु कर्त्तव्या शरदिज्ञा चतुर्दशी" । तत्र व्रतनित्यत्वादि वृहन्नरसिंहपुराणे "वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम् । महापुण्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः" किञ्च "विज्ञाय मद्दिनं यस्तु लङ्घयेत् स तु पापभाक् । एवं ज्ञात्वा प्रक-

र्त्तव्यं मद्दिने व्रतमुत्तमम् । अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ" तत्राधिकारिनिर्णयः तत्रैव "सर्वेषामेव लोकानामधिकारोऽस्ति मद्व्रते । मद्भक्तैस्तु विशेषेण प्रणेयं मत्परायणैः" ।

नृसिंहपुराण न० उपपुराणभेदे उपपुराणशब्दे दृश्यम् ।

नृसिंहवन न० द्व०सं० १६अ० कूर्मविभागे उक्ते पश्चिमोत्तरदिक्स्थिते देशभेदे कूर्मविभागशब्दे दृश्यम् ।

नृसेन(ना) न०स्त्री नृणां सेना "विभाषा सेनेत्यादि" पा० वा क्लीवता । बहुमनुष्यसेनायाम् ।

नृसोम पु० ना सोम इव । १मनुजश्रेष्ठे २सोमोद्भवायाः सरितो नृसोमः" रघुः ।

नृहरि पु० ना चासौ हरिश्च । नरसिंहे भगवदवतारभेदे "नृहरिवामनजामदग्न्यः" सुग्धबो० ।

नॄ नीतौ क्र्यादि० पृादि० पर० सक० सेट् । नृणाति अनारीत् अणोपदेशत्वान्न णत्वम् कविकल्पद्रुमः पाणिनिमते नॄ नये इति क्र्यन्तस्यैव पाठः । तस्यैव णोपदेश पर्युदासता । [णिच् नरयति । न णत्वम् ।

नॄ नये भ्वा० पर० सक० सेट् । नरति अनारीत् । घटा०

नेउ(ड्)ली स्त्री हठयोगभेदे तत्प्रकारस्तु हठ्यामले "धौतीयोगाननन्तरं हि ने(उ)डुलीकर्म समाचरेत् । ने(उ)डुलीयोगमार्गेण आसने ने(उ)डुलोपमः । नेउ(ड्)लीसाधनादेव चिरजीवी निरामयः । तत्कारणं प्रवक्ष्यामि सावधानावधारय । भुक्त्वा सुखासनं कृत्वा वारैकं प्रतिचालयेत् । प्रतिचालयेत् खोदरञ्च कठिनाशाविवर्जितः । पुनःपुनश्चालनञ्च कुर्यात् खोदरमध्यकम् । कुलालचक्रवत् कुर्यात् भ्रमणञ्चोदरस्य च । सर्वाङ्गचालनादेव कुण्डलीशक्तिचालनम् । चालनात् कुण्डलीदेव्याश्चेतना सा भवेत् प्रभो ! । एतस्यानन्तरं देव ! चालनं परिकीर्त्तितम् । नाडीनां चालनादेव सर्वविद्यानिधिर्भवेत् । वायुसिद्धिर्भवेत्तस्य पञ्चभूतसुसिद्धिभाक् । सुखासनं हि सर्वत्र सर्वदा कारयेद्बुधः । बद्धपद्मासनं कृत्वा अधोहस्ते जपं चरेत् । तदा त्रिदिनमाकर्त्तुं समर्थो सुखिकासनम् । तदा हि सर्वनाड्यश्च वशीभूता न संशयः । नाडीचालनयोगेन सिद्धिमाप्नोति साधकः । ने(उ)डुलीं यो न जानाति स कथं कर्त्तुं सद्यतः । स धीरो मानसचरोमतिमान् स जितेन्द्रियः । यो ने(उ)डुलीयोगसारं कर्त्तुं सद्यमपारगः । स चावश्यं चालनञ्च कुर्यान्नाड्यादिसाधनम् । ने(उ)डुलीयोगमार्गेण नाडीचालनतत्परः । भवत्येव महाकाल ! राजराजेश्वरो यथा । केवलं प्राणवायोश्च धारणात् चालनं भवेत् । विना चालनयोगेन देहशुद्धिर्न जायते । चालनं नाडिकादीनां कफपित्तादिनाशनम् । करोति यत्नतो योगी सुखासनानिलाशनात् । वायुपहणमेवं हि ने(उ)डु(ड)लीवशकालके । न कुर्यात् केवलं नाथ ! अन्यकाले सदाचरेत् । यावन्ने(उ)डु(ड)लीं न जानाति तावद्वायुं न संपिबेत् । बहुतरं न संग्राह्यं वायोरोगमनादिकृत् । केवलं श्वासगणनं यावन्ने(उ)डु(ड)ली न सिद्ध्यति । पञ्चारामसाधनाच्च पञ्चवायुवशो भवेत्" ।

नेजक पु० निज–ण्वुल् । १रजके "याज्ञमलीफलके श्लक्ष्णे नेनिज्यात् नेजकः शनैः । न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्" मनुना तत्कल्पसूक्तम् । २शोधकमात्रे त्रि० ।

नेजन न० निज्यतेऽस्य निज–आधारे ल्युट् । १नेजकाख्ये "राशयः प्रत्यहशश्च वाससां नेजनेष्विव" भा०द्रो० १८८अ० । भावे ल्युट् । २शोधने

नेत(द) अव्य० नी–क्विप् वा० तुक् नेद–क्विप् वा चादि० १शङ्कायां २प्रतिषेधे ३सम्बन्धे च मनोरमा । न इत् । ४नैवेत्यर्थे । "अन्यो नेत् क्षुरिरोहते" ऋ० ८।५।६। "नेत्त्वदपचेतयातै" यजु० २।१७

नेतीयोग पु० हठयोगभेदे सच हठ्यामले उत्तरखण्डे उक्तो यथा "नेतीयोगविधानानि शृणुष्व वीरपूजित ! । येन सर्वमस्तकस्थकफानां दाहनं भवेत् । सूक्ष्मसूत्रं दृढतरं प्रदद्यान्नासिकाबिले । मुखरन्ध्रे समानीय सन्धानेन समाश्रयेत् । पुनःपुनः सदा योगी यातायातेन घर्षयेत् । क्रमेण वर्द्धनं कुर्यात् सूत्रस्य परमेश्वर ! । नेतीयोगेन नासाया रन्ध्रं निर्मलकं भवेत् । वायोर्गमनकाले तु महायुद्धानिति प्रभो !" ।

नेट त्रि० नी–तृच् । १प्रभौ अमरः २निर्वाहके ३नायके ४प्रवर्त्तके ५प्रापके च स्त्रियां ङीप् । ६निम्बवृक्षे पु० राजनि० "इतो नेता हि तत्र त्वं यापानृभोक्ष्यसि मत्कृतात्" भा०व०६६अ० "स नेता शासिता च नः" मनुः । ७विष्णौ पु० "न्यायो नेता समीरणः" विष्णुस० "जगद्यन्त्रनिर्वाहकोनेता" भा० । नक्षत्रवाचकात् परमेतच्छब्दात् बहु० अच्समा० । मृगोनेता यस्याः मृगनेत्रा रात्रिः । यस्यां रात्रौ आरम्भावधिशेषपर्य्यन्तं मृगशीर्षनक्षत्रस्य दर्शनं तस्यारात्रेर्मृगस्य नेतृतुल्यत्वात् तथात्वम् ।

नेत्र न० नयति नीयते वाऽनेन ष्ट्रन् । १मन्थनदामनि २वस्त्रभेदे ३वृक्षमूले ४रथे ५जटायाम् ६नाड्याम् मेदि० । ७चक्षुषि अमरः । ८प्रापयितरि ९नयनसाधने १०प्रवर्त्तके च त्रि० । ११वस्तिशलाकायां राजनि० । १२चक्षुर्गोलकावस्थिते अग्निदेवताके तैजसे इन्द्रियभेदे न० "विजित्य नेत्रप्रतिघातिनीं प्रभाम्" कुमा० तत्र अग्निमन्थनदामनि "ग्रामप्रमाणं नेत्रं स्यात् प्रमथ्यस्तेन पावकः" कर्मप्रदीपे कात्या० "मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम्" भा०आ० १८अ० । चक्षुषि "नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं ततुः" सा०द० । १३हैहयवंशपुत्रभेदे पु० "धर्मस्तु हैहयसुतो नेत्रः कुन्तिपिता ततः" भाग०९।२३।६६। १४द्वित्वसंख्यायां न० "सुनिषङ्यमनेत्राणि (२२६७) सू० सि० व्यार्द्धपिण्डोक्तौ । वस्तिशलाकामानादि सुश्रुते उक्तं यथा "अथातो नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः" इत्युपक्रमे सप्रपञ्चमुक्त्वा नेत्रप्रमाणादि उक्तं यथा "पञ्चविंशतेरूर्द्ध्वं द्वादशाङ्गुलं मूलेऽङ्गुष्ठोदरपरीणाहमग्रे कनिष्ठिकोदरपरीणाहमर्द्धं त्र्यङ्गुलसन्निविष्टकर्णिकं षट्प्रयत्ननाडीतुल्यप्रवेशं कोलास्थिमात्रं छिद्रं छिद्रकलायमात्रं छिद्रमित्येके । सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि । आस्थापनद्रव्यप्रमाणं तु विहिता द्वादशप्रसृतयः । सप्ततेस्तूर्द्ध्वं नेत्रप्रमाणमेतदेव द्रव्यप्रमाणन्तु द्विरष्टवर्षवत् । तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि श्लक्ष्णानि दृढानि गोपुच्छालतीन्यृजूनि गुटिकासुखानि । वस्त्रयन्त्रादीनां बहवो नातिबहुला दृढाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणाम्" । "नेत्रालाभे हिता नाड्यो नलवंशास्त्रिसम्भवा । वस्त्रलाभे हितं चर्म सूक्ष्मं वा तान्तवं घनम्" । वस्तिशलाकारूपं च उत्तरवस्तिशब्दे १०९८० पृ० सुश्रुतोक्तं दृश्यम् । "चतुर्दशाङ्गुलं नेत्रमातुराङ्गुलमानतः" इत्यादिनोक्तं दृश्यम् । "कृत्वा सूक्ष्मेण नेत्रेण चक्रतैलेन तर्पयेत्" सुश्रुतः ।

नेत्रकोष पु० ६त० । नेत्रपटले

नेत्रच्छद पु० नेत्रे छादयति अनेन छद+णिच्-क सुडागमः । नेत्रपिधायके चर्ममये नेत्रपुटे (चकोरपाता) अमरः ।

नेत्रपर्य्यन्त पु० नेत्रयोः पर्यन्तः कोणसीमा । १अपाङ्गे राजनि० । २नेत्रावधिके त्रि० ।

नेत्रपाक पु० नेत्ररोगभेदे तल्लक्षणं सुश्रुते उक्तं यथा "कण्डूपदेहान्वयुतः पक्वोदुम्बरसन्निभः । दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः । जुष्टो युक्तः स्वेदाश्च उष्णशीताम्बुपिच्छिलम् । संरम्भी पच्यते यत्र नेत्रपाकः स शोफजः । शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे । अन्तःशिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् । हताधिमन्थं जनयेत्तमसाध्यं विदुर्बुधाः" ।

नेत्रपिण्ड पुंस्त्री नेत्रं पिण्ड इव यस्य । विडाले हारा० स्त्रियां जातित्वात् ङीष् । ६त० । नेत्रगोलके न० ।

नेत्रपुष्कर न० नेत्रस्य पुष्करं जलं यस्याः ५ब० । रुद्रजटायां राजनि० । तत्सेवने हि नेत्रात् जलं स्रवतीति तस्यास्तथात्वम् ।

नेत्रप्रबन्ध पु० नेत्रे प्रबध्यते अनेन प्र+बन्ध-करणे ल्युट् । नेत्रपुटे "कर्णस्रोतः सुकुमारकं च नेत्रप्रबन्धमयम्" हे०सं० ५८अ० ।

नेत्रबन्ध पु० ६त० । पृष्ठतोऽवस्थितेनागत्य करतलाभ्यां नेत्रयोः पिधानरूपे बालानां क्रीडाभेदे "अदृश्यनेत्रबन्धाद्यैः कश्चिन्मृगयुगेहया" भा० १०।१८।८ रामकृष्णयोर्बालक्रीडावर्णने ।

नेत्रमल न० ६त० । चक्षुर्मले दृष्टिकायाम् (पिचुटि) अमरः ।

नेत्रमीला(ना) स्त्री नेत्रयोः मीला सङ्घर्षणं यस्याः ५ब० पृषो० वा लस्य नः, लान्तपाठः साधुः । यवतिक्तायां राजनि० । तत्सेवने हि नेत्रयोर्मीलनं जायते इति तस्यास्तथात्वम् ।

नेत्रसुष् त्रि० नेत्रं तत्प्रकारं सुष्णाति सुष-क्विप् । दृष्टेरुपघातके दृष्टिप्रचारनाशके "वहन्ति ये नेत्रसुषं दिव्यं मायामयं रथम्" भा०व० ४२अ० ।

नेत्रयोनि पु० नेत्राणि योनय इवास्य । १इन्द्रे शब्दमाला । नेत्रमत्रिनेत्रं योनिरुत्पत्तिस्थानं यस्य । २चन्द्रे च

नेत्ररञ्जन न० नेत्रे रज्यते अनेन रञ्ज-करणे ल्युट् । कज्जले "एष वा कथितो धूपः शृणुतं नेत्ररञ्जनम्" कालिकापु० ६१अ० ।

नेत्ररुज् स्त्री ६त० । नेत्ररोगे

नेत्ररोग पु० ६त० । नयनस्य रोगभेदे तन्निदानादि माधव करेणोक्तं यथा "उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्ययाच्च । स्वेदाश्रुजोधूमनिषेवणाच्च क्षुर्दैर्विघातादमनातियोगात् । श्रवात्तथाग्न्यादिभि सेविताच्च विण्मूत्रवातक्रमनिग्रहाच्च । प्रसक्तसंरोदनशोककोपाच्छिरोऽभिघाताटतिमद्यपानात् । तथा ऋतूनाञ्च विपर्ययेः

क्रोधाभिघातादतिमैथुनाच्च। वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः। वातात् पित्तात् कफाद्रक्ताद्भिषन्द्वत्तुर्विधः। प्रायेण जायते घोरः सर्वनेत्रामयाकरः"। तस्य सम्प्राप्तिर्यथा "निस्तोदनस्तम्भनरोमहर्षसंघर्षपारुष्यशिरोऽभितापाः। विशुष्कभावः शिशिरास्रुता च वाताभिपन्ने नयने भवन्ति। दाहप्रपाकौ शिशिराभिवन्दनात् धूमायनं वाष्पसुतुच्छ्रयश्च। उष्णास्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति। उष्णाभिवन्दो गुरुतातिशोथः कण्डूप दिग्धावतिशीतता च। स्रावो बहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति। ताम्रास्रुता लोहितनेत्रता च बाह्यः समन्तादतिलोहितश्च। पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति"।

नेत्ररोगहेतुदोष उक्तो वैद्यके

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथाऽरुणम्। कोटरान्तप्रविष्टञ्च तथास्रञ्च विलोकनम्। हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा। दीप्तेऽपि वदाहञ्च नेत्रं स्यात् पित्तकोपतः। चक्षुर्बहुस्रवाद्रुक्षात् स्निग्धं स्यात् सलिलस्रुतम्। तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम्। नेत्रं दिदीर्घबाहुल्यात् स्याद् दोषद्वयलक्षणम्। त्रिदोषलिङ्गं सन्ज्ञेयं तन्नाशयति रोगिणम्। त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत्। त्रिलिङ्गं सलिलस्रावि प्रायेणोन्मीलयत्यपि"। नेत्ररोगभेदाश्च सुश्रुते उत्तरतन्त्रे अष्टभिरध्यायैः सलक्षणसंख्यास्तत्रैव द्रष्टव्याः। "मधुकारी च पुरुषो जायते नेत्ररोगवान्"। "मधुकारी च पुरुषो जायते नेत्ररोगवान्" भाता० मधुमधुरयोगेन वह्नोगवान् जायते" इत्युक्तम्।

नेत्ररोगहन् पु० नेत्ररोगं हन्ति हन-क्विप्। हचिकाबीजे राजनि०तस्य हि नेत्ररोगनाशकत्वं वैद्यके प्रसिद्धम्

नेत्ररोमन् न० ६त०। नेत्रपक्ष्मणि हेम०।

नेत्रवस्त्र न० नेत्रयोर्वस्त्रमिवाच्छादकम्। (चक्षुरपाता) नेत्रच्छदे।

नेत्रविष् स्त्री ६त०। नेत्रमले (पिचुटि) "नेत्रविट् चक्षुषः स्नेहो धातूनां क्रमशो मलाः" सुश्रुतः।

नेत्रविष पुं स्त्री नेत्रे विषं यस्य। दिव्ये सर्पभेदे "दृष्टिनिःश्वासविषा दिव्याः सर्पाः" सुश्रुतः। "आशीविषान् नेत्रविषान् कोपयेत्तु च पण्डितः" भा०स० ६२अ०।

नेत्रस्तम्भ पु० ६त०। नेत्रयोः स्तम्भे नयनोन्मीलनादिव्यापारराहित्ये "नेत्रस्तम्भं निमेषञ्च तृष्णां कासं प्रजागरम्। जभते दन्तचालञ्च तांस्तानन्यानुपद्रवान्" सुश्रुतः।

नेत्रान्त पु० ६त०। अपाङ्गदेशे "नेत्रान्तपादकरतालुधरोष्ठजिह्वाः रक्ता नखाश्च खलु सप्त सुखावहानि" इ०सं०६८अ०

नेत्राभि(स्य)ष्यन्द पु० ६त०। नेत्रस्य रोगभेदे अभिष्यन्दशब्दे ३०४ पृ० दृश्यम्। "नेत्राभिषन्द्यभिष्यन्दयोमध्ये दोषजाः" सुश्रुतः। स च संक्रामिरोगः यथाह सुश्रुते "प्रसङ्गाद्गात्रसंस्पर्शात् निःश्वासात् सह भोजनात्। सह शय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्। कुष्ठं ज्वरश्च शोषश्च नेत्राभिषन्द्य एव च। औपसर्गिकरोगाश्च संक्रामन्ति नराद्नरम्"।

नेत्रामय पु० ६त०। नयनरोगे "वातात् पित्तात् कफाद्रक्ताद्भिषन्द्वत्तुर्विधः। प्रायेण जायते घोरः सर्वनेत्रामयाकरः" माधवनि०।

नेत्राम्बु न० ६त०। चक्षुर्जले अश्रुणि अमरः।

नेत्रारि पु० ६त०। मेण्डकवृक्षे राजनि०।

नेत्री स्त्री नी-तृन् ङीप्। १वल्गायां २नाड्यां च शब्दर०। ३नद्यां मेदि०। नी-तृन् स्त्रियां ङीप्। ४प्रापयित्र्यां स्त्रियां स्त्री।

नेत्रोपमफल पु०नेत्रे उपमा यस्य तादृशं फलमस्य। (बादाम) वृक्षभेदे भावप्र०. [मात्रे च

नेत्रौषध न० ६त०। १पुष्पकासीसे राजनि० २नेत्रकोरौषध-

नेत्रौष(धि)धी स्त्री ६त० वा ङीप्। अजशृङ्ग्याम् (गाडरशिङ्गी) रत्नमाला।

नेद् गतौ भ्वा० प० सक० सेट्। गतिकर्मसु निघण्टुः। नेदति अनेदीत्। निनेद "या कृता उलूखलस्य या कृता अतिनेदन्ते" इ०उप०।

नेदिष्ठ त्रि० अतिशयेनान्तिकः ईयसुन् नेदादेशः। १अतिशयनिकटस्थे "नेदिष्ठे यश्चिरहन्यधि योषा तु लभते" ऋ० १।१२२।१ २निपुणे त्रि० राजनि०। ३अङ्गोटवृक्षे पु० जटाध०।

नेदिष्ठिन् पु० नेदिष्ठं जन्मतः सन्निकृष्टस्थानं विद्यतेऽस्य इनि। स्वोदरभ्रातरि "स्त्रियेत चेन्निर्मन्थ्येन शमित्राद्यास्त्रीण्युपनह्य नेदिष्ठिनसपदीक्ष्य तेन सह यजेरन्" कात्या०श्रौ० २५।१२।२८ "मृतं यजमानं निर्मन्थ्येन शमित्रेण वा दग्ध्वास्त्रीण्युपनह्य तस्य यो नेदिष्ठी स्वोभ्राता स्यात् तं दीक्षयित्वा तेन सह यजेरन्" कर्कः।

नेदीयस् त्रि॰ अतिशयेनान्तिकः ईयसुन् नेदादेशः। अत्यन्तसमीपस्थे स्त्रियां ङीप्।

नेप पु॰ नी–प। १पुरोहिते उज्ज्वल॰। २उदके निघण्टुः

नेपथ्य न॰ नी–विच् ने नेता तस्य पथ्यम्। १भूषणे अमरः २वेशे ३वेशस्थाने नाटकादेरभिनयार्थसज्जाभूमौ च मेदि॰ "न पथ्यं नेपथ्यं बहुतरमनङ्गोत्सवविधौ" सा॰द॰ "उदारनेपथ्यभृतां स मध्ये" रघुः "नेपथ्योक्तं शुभं यत्र त्वाकाशवचनं तथा" सा॰द॰।

नेपाल पु॰ देशभेदे "नेपालश्चङ्गिमध्यकच्छसुराष्ट्रमद्राः" बृ॰सं॰ ४अ॰ "नेपालादागतोऽयं नवकम्बलवत्त्वात्" कथोदाहरणे विश्वनाथः "जटेश्वरं समारभ्य योगेशान्तं महेश्वरि!। नेपालदेशो देवेशि! साधकानां सुखिदः" शक्तिसङ्गमत॰। "नेपाले माहिषं मांसम्" अनाचारोक्तौ

नेपालजा स्त्री नेपाले देशे जायते जन–ड ७त॰। नेपालजातायां मनःशिलायाम् "नेपालजामरिचशङ्करचाञ्जनानि" सुश्रुतः। जन–कर्त्तरि क्त ७त॰। नेपालजातायत्र। "मरिचं च शुक्लं नेपालजाता च समप्रभा" सुश्रुतः।

नेपालकम्बल पु॰ ६त॰। कृष्णाख्ये चित्रकम्बले शब्दार्थचि॰।

नेपालनिम्ब पु॰ ६त॰। ज्वरानाशे तक्तनिम्बे नेपालजाते निम्बभेदे राजनि॰।

नेपालमूलक न॰ कर्म्मधारयसमासे मूलभेदे राजनि॰।

नेपालिका स्त्री नेपाल उत्पत्तिस्थानत्वेनास्त्यस्याः ठन्। मनःशिलायां राजनि॰।

नेम पु॰ नी–मन्। १काले २अवधौ ३खण्डे ४प्राकारे ५कैतवे च मेदि॰। ६अर्द्धे ७भर्त्ते च हेमच॰। ८नाम्नादौ अन्यार्थे च शब्दरत्ना॰। ९शायंकाले १०मूले च ११जङ्घे च सुमतिः। अर्द्धार्थेऽस्य सर्वनामता। नेमस्थे नेमस्थिन् इत्यादि। जसि वा, नेमे नेमाः। १२अग्रे १३दिग्भेदे उत्तरवर्त्तिनि च निघण्टुः। "हितं जनिम नेमसुद्यतम्" ऋ॰ ९ ६८५ "नेमसर्द्धम्" भा॰ "आयन् पचाति नेमो नहि यज्ञदर्धः" ऋ॰ १०१७१८

नेमधित त्रि॰ नेमं हितः नेम+धा–क्त "सुधितनेमधितेत्यादिना" पा॰ निपा॰। अर्द्धहिते "सुधीता यज्ञयामसि त्वा वृध्यन्तो नेमधिता हृतस्य शूर!" ऋ॰६ ३३ ४ भावे क्तिन्। नेमधिति। अर्द्धधाने स्त्री। नेमं धीयतेऽत्र धा–क्तिन् निपा॰। संग्रामे निघण्टुः।

नेमन् त्रि॰ नी–म॰मनिन्। प्रापके "तं गूर्त्तयो नेमन्निषः" ऋ॰। ५६ २ "इन्द्र नर्तो वा॰ क्विप् नेमानः प्रापका इन्द्रो येषाम्" भा॰। छान्दसो नकोपाभावः।

नेमि पु॰ नी–मि। १तिनिशवृक्षे। २कूपसमीपे रज्जुधारणार्थे त्रिकाष्ठद्वयन्त्रे ३चक्रान्ते च (रथचक्रस्य भूमिस्पर्शनयोग्ये भागे) ४कूपान्तिकस्थे-समानस्थलभागे स्त्री अमरः वा ङीप्। ५जिनभेदे पु॰ हेमच॰। ६वज्रे पु॰ निघण्टुः "नियन्तुर्नेमिदृत्तयः" रघुः "आनेमिभिर्नेमिः शितिकण्ठपक्षैः" "अपतन् द्रुतभ्रमितनेमिदृत्तयः" माघः

नेमिचक्र पु॰ परीक्षितवंशस्थे भाविन्द्रपभेदे "अशीनकृष्णस्यापि नेमिचक्रस्तु तत्सुतः। गजाह्वये हृते नद्या कौशाम्ब्यां स निवत्स्यति" भाग॰ ९ २२ २७

नेमिन् पु॰ नी–वा॰ मिनि। तिनिशवृक्षे भरतः।

नेयार्थता स्त्री नेयः रूढिप्रयोजनाभावादशक्यप्राप्तो लक्ष्यार्थो यत्र तस्य भावः। काव्यदोषभेदे "प्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थता" सा॰द॰ "कमले चरणाघातं सुखं सुमुखि! तेऽकरोत्"। अत्र चरणाघातेन निर्जितत्वं लक्ष्यते" सा॰द॰। तत्र रूढिप्रयोजनयोरभावात् तथात्वम्।

ने(नै)मिश न॰ नेमिः शीर्य्यतेऽत्र शॄ–वा॰ आधारे ड। नेमिशारण्ये ततः स्वार्थे अण्। नैमिशतत्रार्थे वायुपु॰ यथा "एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते। यत्रास्य शीर्य्यते नेमिः सदेशस्तपसः शुभः। इत्युक्त्वा सूर्यसङ्काशं चक्रं सृष्ट्वा मनोमयम्। प्रक्षिप्तस्य महादेवं विससर्ज पितामहः। तेऽपि सृष्टतरा विप्राः प्रणम्य जगतां प्रभुम्। प्रययुस्तस्य चक्रस्य यत्र नेमिर्विशीर्य्यते। तदनं तेन विख्यातं नैमिशं भुवि पूजितम्"।

नेष्ट त्रि॰ न इष्टम् नञर्थनञ्शब्देन "सह सुपा" पा॰स॰। १अनिष्टे २तत्साधने निषिद्धे च। "अतिकुदाः क्षमदेहा नेष्टाः हीनाधिकाङ्गश्च" वृ॰सं॰ ६१अ॰।

नेष्टु पु॰ निश–तुन्। खोटे शब्दाम्बुधिः। "यथा महार्घ्ये क्षिप्रः क्षिप्रं नेष्टुर्विनश्यति" भा॰अनु॰ १२अ॰ "नेष्टुः पांशुपिण्डः" नीलकण्ठः।

नेष्टृ पु॰ नी– तृन् नि॰ गुक्। ऋत्विग्भेदे उज्ज्वलद॰। "ग्नावो नेष्टः! पिब ऋतुना" ऋ॰ १ १५३ "समानरान् ब्राह्मणाच्छंसिपोतृनेष्टृन्यावाकानाम्" कात्या॰८ ६ २१।

नेष्ट्र त्रि॰ नेष्टुरिदम् वा॰ अण्। नेष्टृसम्बन्धिनि "नेष्ट्राद्यृत्विग्भिरिष्यते" ऋ॰ १ १५ ९ [अण्यत्र न॰।

नैःस्व न॰ निःस्वस्य भावः अण्। निर्द्धनत्वे ष्यञ् नैःस्व।

नैक त्रि॰ न एकः नञर्थनञ्शब्देन "सह सुपा" पा॰स॰।

अनेके १एकभिन्ने २विष्णौ पु० "एकोऽनेकः सवः कः किम्" विष्णुस०"मायया बहुरूपत्वान्नैकः "इन्द्रोमायाभिः पुरुरूप ईयते इति श्रुतेः" भा० ।

नैकचर त्रि०नैकः संघीभूय चरति चर-ट । संघीभूयचारिणि शूकरादौ "अपि न हन्यः शाखादृकोऽन्यतमोनैकचरोह वा भक्षयति" भाग० ५।८।२०

नैकज पु० नैकधा-जायते जन-ड पृषो० धात्वोपः । धर्मगुप्तये अनेकधा जायमाने परमेश्वरे "सुखदो नैकजोऽपजः" विष्णुस०। "धर्मसंरक्षणार्थाय संभवामि युगे युगे" भगवद्गीतेः भा० ।

नैकटिक त्रि० प्रयोजनाय निकटे वसति ठक् । भिक्षादिलाभहेतोः ग्रामादिनिकटवासिनि भिक्षुकादौ । भिक्षुणा हि ग्रामात् निकटे स्थातव्यमिति शास्त्रात् तद्गतत्वम् "आट नैकटिकान्ममान्" भट्टिः ।

नैकती स्त्री नैकं तायते ताय-ड गौरा० ङीष् । गौर्यां तत्र भवः पलद्या० अण् नैकत तत्रार्थे त्रि० ।

नैकधा अव्य० नैक+प्रकारे धाच् । अनेकप्रकारे "शीर्षयोः पतिता इत्यादिभिर्नैकधा तयोः" भा०व० ११अ० ।

नैकभेद त्रि० नैकोभेदोऽस्य । उद्भावने अनेकप्रकारे अमरः

नैकमाय त्रि० नैका माया यस्य । १अनेककपटे २परमेश्वरे पु० "नैकमायो महाशनः" विष्णुस० "इन्द्रोमायाभिः पुरुरूप ईयते" श्रुतेस्तस्यानेकमायत्वात्तथात्वम् ।

नैकरूप त्रि० नैकं रूपं यस्य । १नानारूपे २परमेश्वरे पु० "नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः" विष्णुस० । "इन्द्रो मायाभिः पुरुरूप ईयते"श्रुतेस्तस्य तथात्वम् । कर्म० ३अनेकेषु रूपेषु "नैकरूपधरोऽव्ययः" विष्णुस्तुतिः ।

नैकशृङ्ग पु० नैकानि चत्वारि शृङ्गाण्यस्य । परमेश्वरे "नैकशृङ्गो गदाग्रजः" विष्णुस०। "चत्वारि शृङ्गास्त्रयो अस्य पादाः" इति मन्त्रवर्णात् तस्य तथात्वम् स्त्रियां ङीष् ।

नैकषेय पुंस्त्री निकषाया अपत्यम् ढक् । राक्षसे इला०

नैकसानु पु० नैके सानवोऽस्य । पर्वतभेदे तत्र चरतीति चर-ट । नैकसानुचर शिवे "नैकसानुचरस्वरः" भा०आनु० १७अ० ।

नैकात्मन् पु० नैक आत्मा स्वरूपमस्य । परमेश्वरे "नैकात्मा नैककर्मकृत्" विष्णुस०। "तदैक्षत बहु स्यामिति"श्रुतेस्तस्य तथात्वम् ।

नैकृतिक त्रि० निकृत्या परापकारेण जीवति निकृत्या निष्ठुरतया चरति वा निकृति+ठक् । स्वकिञ्चुपकारिस्व भ्रमसत्यादि परवृत्तिच्छेदनेन १स्वार्थपरे २शाठ्येन चारिणि च "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः" मनुः "न नास्तिको नैकृतिकोऽथ वापि" हरिवं० १५४अ० ।

नैगम पु० निगम एव स्वार्थे-अण् । ब्रह्मप्रतिपादके उपनिषद्रूपे १वेदभागे २नये नीतौ हेमच० । निगमे भवः अण् । ३वणिग्जने अमरः । ४नागरे मेदि० तस्येदमण् । ५निगमसम्बन्धिनि त्रि० "तेषां प्रतिविधानार्थं प्रवक्ष्याम्यथ नैगमम् । कार्याणां सर्वसिद्ध्यर्थं तानुपायान् निबोध मे" भा०शा० १००अ० तत्र वणिजि "श्रेणीनैगमपाषण्डिगणानामयं विधिः" याज्ञ०"मार्गे च महति निगमे नैगमानाम्" दशकुमा० ६निघण्टुपर्यायभेदे "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" निघण्टु भाष्यम् । "अहादुल्वमधीयानं नैगमं संप्रचक्षते" इति च तद्भाष्यम् ।

नैगमिक त्रि० निगमे भवः तस्य व्याख्यानो वा छगयना० ठक् । १निगमभवे २तद्व्याख्यानग्रन्थे ३तद्ध्याये च ।

नैगमेय(ष) पु० १कुमारानुचरभेदे "तस्य (कार्त्तिकेयस्य) शाखो विशाखश्च नैगमेयश्च पृष्ठजः" भा०आ० २६अ० सुश्रुतोक्ते २बालग्रहभेदे"स्कन्दग्रहस्तु प्रथमः" इत्युपक्रमे "नवमो नैगमेयश्च यः पितृग्रहर्क्षितः" इत्युक्त्वा "यः फेनं वमति विमथ्यते च मध्ये शोद्वेगं विलपति चोर्द्ध्वजीवमाणः । उच्यर्थं प्रततमथोवसासगन्धिर्निःसङ्गो भवति हि नैगमेयजुष्टः" इति लक्षितः । अत्र नैगमेष इत्यपपाठः ।

नैघण्टुक न० निघण्टुः पर्यायशब्दमधिकृत्य प्रवृत्तम् ठक् । "गोरादापारेपर्यन्तमाद्यं नैघण्टुकं मतम्" भाष्योक्ते प्रथमाध्यायत्रयात्मके निघण्टुग्रन्थस्य प्रथमकाण्डे "नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति तद्यदन्यदेवते मन्त्रे निपतति नैघण्टुकं ततः" निरुक्तकारः १।२०।

नैचाशाख न० नीचाशु शूद्रयानिषु शाखा पुत्रपौत्रादिपरम्परा यस्य नीचाशाखः पतितः "शूद्रावेदी पतत्यत्रेः" मनुस्मरणात् तस्येदमण् । शूद्रावेदिसम्बन्धिधने "नैचाशाखं मघवन् ! रक्षया नः" ऋ०२।५२।१४ तद्भाष्ये च उक्तैव व्युत्पत्तिर्दर्शिता ।

नैचिक न० नीचां-भवतीति ठक् । गोःशिरोभागे हेमच० ।

नैचिकी स्त्री नीचैश्चरति ठक् अव्ययस्य टिलोपः । प्रशस्ता निधिः गोकर्णशिरोदेशः । प्राग्रक्ष्योक निधिकाख्यस्याः

ज्योत्स्ना० णः वा। २उत्तमायां स्त्रीगव्याम् अमरः।

नैचित्य त्रि० निचिते भवः नादित्वात् ष्यः। निचितदेशभवे

नैचुल न० निचुलस्येदम् फलस्य पृथक्प्रयोगे अणो न लुप्। १निचुलसम्बन्धिनि इञ्जलफलादौ "पिप्पली सर्षपांश्चैव नागरं नैचुलं फलम्" सुश्रुतः। निचुलशब्दस्यैव फलपरत्वे तु लुप् निचुलमित्येव न०।

नैतोश पुंस्त्री नितोशयतीति नितोशतिर्बधकर्मा निघण्टुः। ततः अच् नितोशः हिंसकः तस्यापत्यम् अण्। हन्तुरपत्ये "नैतोशेव तुर्फरी पर्फरीका" ऋ०१०।११०६।६

नैत्य त्रि० नित्ये दीयते नित्य+ष्यु टा० अण्। १नित्ये दीयमाने। नित्यं विहितः अण् स्वार्थे अण् वा। नित्यविहिते कर्मणि। २नित्ये कर्मणि च। ततः स्वार्थे क। नैत्यक तत्रार्थे "अपां समीपे नियतो नैत्यकं विधिमास्थितः" "वेदोपाकरणे चैव स्वाध्याये चैव नैत्यके" "नैत्यके नास्त्यनध्यायः" इति च मनुः।

नैत्यशब्दिक त्रि० नित्यं शब्दमाह माशब्दा०ठक्। नित्यशब्दवादिनि शब्दं नित्यतया यो वदति मीमांसकस्तस्मिन्।

नैत्यिक त्रि०नित्यं विहितः ठक्। नित्यविहिते "सन्ध्यां प्रश्च महायज्ञान् नैत्यिकं स्मृतिकर्म च" मनुः।

नैदाघ त्रि० निदाघस्येदम् वेदे शैषिकोऽण्। निदाघसम्बन्धिनि "जघन्ये नैदाघे समिवेव कोपयति" शत० ब्रा०१।३।१।६ लोके तु निदाघस्तुर्वाचित्वेन "कालाट् ठञ्" पा० ठञ्। नैदाघिक ग्रीष्मर्तुसम्बन्धिनि त्रि०।

नैदान त्रि०निदानं कारणं वेत्ति अण्। कारणवेत्तरि "स्थाल आसन्नासंयोगेनेति नैदानाः" निरु० ६।९

नैदानिक त्रि० निदानं रोगकारणं वेत्ति तत्प्रतिपादकं ग्रन्थमधीते वा ठक्। १रोगनिदानाभिज्ञे २तत्प्रतिपादकग्रन्थाध्येतरि च "यथाङ्गनैदानिकाः" मल्लिनाथः।

नैदेशिक त्रि० निदेशं करोति ठक्। १किङ्करे दासे "नैदेशिकैर्यस्य वशे जनोऽयम्" भाग० ६८२।२

नैधन न० निधनमेव स्वार्थे अण्। १निधने मरणे २लग्नामे चया अष्टमस्थाने च "गुरुदैर्दयकेन्द्रनैधनगृहैः पापैस्त्रिषडायगैः" वृ०सं०९८८अ०।

नैधान त्रि०निधानेन निर्वृत्तं सङ्कुला० अञ्। निधानसाध्ये

नैधेय पु०त्रि० निधेरपत्यादि० बाह्वा०ठक्। १निधेरपत्ये तस्येदं ठक्। २तत्सम्बन्धिनि त्रि०।

नैध्रुव पु० निध्रुवगोत्रप्रवर्त्तिभेदे "निध्रुवाणां काश्यपावत्सार नैध्रुवेति" आश्व० श्रौ० ६।१४।६

नैध्रुवि पु०समस्तयजुर्वेदाध्यापकपरम्परास्थे काश्यपे ऋषिभेदे "काश्यपान्नैध्रुवेः काश्यपो नैध्रुविः" शत०ब्रा०१४।९।४।३३

नैप त्रि० नीपस्य विकारः रजतादि० अञ्। नीपविकारे

नैपात्य न० निपातस्य भावः ब्राह्मणा० ष्यञ्। निपातस्य भावे

नैपाल पु० नेपाले भवः तस्येदम् वा अण्। १नेपालभवे निम्बे राजनि०। २नवमल्लिकायां स्त्री टाप्। ३मनःशिलायां ४मेषशालिकायां स्त्री मेदि० ५नीलीस्त्रां स्त्री ङीप् शब्दर०६नेपालदेशभवे ७तत्सम्बन्धिनि च त्रि०स्त्रियां ङीप्

नैपालिक न० नेपाले भवः बा० ठक्। ताम्रे राजनि०।

नैपुण न० निपुणस्य भावः युवा० अण्। निपुणत्वे "अधमसमवरिष्ठान्यर्कक्षेन्द्रादिसंस्थे शशिनि विनयवित्तज्ञानधी नैपुणानाम्" ज्योति०त०। "प्रकटान्यपि नैपुणं महत् परवाच्यानि चिराय गोपितुम्" माघः।

नैपुण्य न० निपुणस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। १निपुणत्वे २निपुणकर्मणि च। "धर्मनैपुण्यकामानां पूतिगन्धे च सर्वदा" मनुः। [समीपादौ।

नैबन्धक त्रि० निबन्धस्यादूरदेशादि वराहा० कक्। निबन्ध-

नैभृत्य न० निभृतस्य भावः ब्राह्मणा० ष्यञ्। निभृतत्वे अचाञ्चल्ये "धृत्या च पुरुषव्याघ्रो नैभृत्येन च पाण्डवः। अनृशंसो वदान्यश्च ह्रीमान् सत्यपराक्रमः" भा०उ० ५२अ०। [स्वादूरदेशादौ।

नैमग्नक त्रि० निमग्न+चतुरर्थ्यां वराहा० कक्। निमग्न-

नैमित्त त्रि० निमित्ते भवः निमित्तस्य शकुनशास्त्रस्य व्याख्यानो ग्रन्थो वा क्रमयनादि० अण्। १निमित्तभवे २शकुनरूपनिमित्तसूचकग्रन्थव्याख्याने च।

नैमित्तिक त्रि० निमित्तं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा तद्व्या० ठक्। १निमित्ताभिज्ञे २निमित्तरूपशकुनशास्त्राध्येतरि च। निमित्तादागतः ठक्। ३निमित्तमात्रमाश्रित्य कर्त्तव्ये कर्मणि तच्च पुत्रजन्माश्रित्य विहितं जातेष्ट्यादि ग्रहणादिनिमित्तमाश्रित्य स्नानादि च "नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते" ति०त० "नैमित्तिकत्वं तु निमित्तनिश्चयवदधिकारिकर्त्तव्यत्वम्" आत्मा०। "यत्तु पापोपशान्त्यै च दीयते विदुषां करे। नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम्" इति गरुड़पु० "निमित्तमात्रमाश्रित्य यो धर्मः सम्प्रवर्त्तते। नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा"। चण्डालश्ववपूवादि स्पृष्ट्वा ऽस्नातां रजस्वलाम्। स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं तु तत्"। "नैमित्तिकानि कार्याणि नियतन्ति

यथा यथा" भग०त० ५ निमित्ताधीने च "पुरुषो हि रथवती हयोर्नैमित्तिकोद्भवः" "सांसिद्धिकं द्रव्यत्वं स्यात् नैमित्तिकमथापरम्। नैमित्तिकं वह्नियोगात् तपनीयहतादिषु" भाषा० "पुरुषार्थहेतुकमिदं निमित्तं नैमित्तिकप्रसङ्गेन" सा०का०।

नैमित्तिकलय पु० "चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः" इत्युक्ते प्रलयभेदे "चतुर्दशगुणो ह्येष कालो ब्राह्मदिनक्षयः स्मृतम्। तस्यान्ते प्रलयः प्रोक्तो ब्रह्मन्! नैमित्तिको बुधैः" मार्कण्डेयपु०।

नैमिश न० निमिषमेव स्वार्थे अण्। निमिषारण्ये तीर्थभेदे निमिषशब्दे दृश्यम्। "पृथिव्यां नैमिषं क्षेत्रमन्तरीक्षे च पुष्करम्। त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते" भा०व० ७५ ७० श्लो०। नैमिषारण्यमप्यत्र।

नैमिशि पु० निमिशस्यापत्यम् इञ्। नितरां मिशस्यापत्ये ततः यूनि फक्। तस्य तौल्वल्या० न लुक्। नैमिशायण तद्वंशे अपत्ये

नैमिष न० अरण्यरूपे तीर्थभेदे अमारण्ये निमिषेण दानवबलं विष्णुना निहतमिति तस्य अथात्वं तद्विवचनं यथा वराहपु० "तेन चक्रेण तत् सैन्यमासुरं दुर्जयं बलात्। निमिषान्तरमात्रेण भस्मवद्भुवि धा कृतम्। एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा। उवाच निमिषेणेदं निहतं दानवं बलम्। अरण्येऽस्मिंस्ततस्तेन नैमिषारण्यसंज्ञितम्। भविष्यति यथार्हं वै ब्राह्मणानां विशेषतः"। "नैमिषे तु महास्थाने देवी सा लिङ्गधारिणी" इति देवीभागवतात्। तस्येदम् "तद्वाच्यः" पा० ६। नैमिषे। तत्सम्बन्धिनि "स ह नैमिषीयाणामुद्गाता बभूव" छा०उ०।

नैमिषकुञ्ज न० तीर्थभेदे नैमेयशब्दे दृश्यम्।

नैमिषि पुंस्त्री निमिषति नि+मिष—क्त निमिषस्यापत्यम् इञ्। निमेषपुत्रस्यापत्ये ततः यूनि फक्। तस्य तौल्वल्या० न लुक्। नैमिषायण तद्वंशे अपत्ये पुंस्त्री०।

नैमिषेय त्रि० निमिषे भवः निमिषस्येदं वा वा० ढक्। १निमिषारण्यस्थे २नैमिषसम्बन्धिनि च "ततः नैमिषकुञ्जस्य वनानाद्य कुरूद्वह!। ऋषयः किल राजेन्द्र! नैमिषेयास्तपस्विनः" भा०व० ८२अ०।

नैमेय द०नि+मि—यत् स्वार्थेऽण्। विनिमये परीवर्ते अमरः

नैयग्रोध न० न्यग्रोधस्य विकारः दुस्या० अण् तस्य न लुक्। महाफलात् पर्वमेत्। पटकवादौ अमरः। "नैयग्रोधं भवति स्वधामेवावरुन्धे" शत०ब्रा०१२ ७२२ १४ [मांदी।

नैयङ्कव त्रि० न्यङ्कोरिदम् अण् यातपूर्वमेत्। न्यङ्कुमृगस्य च।

नैयमिक त्रि० नियमादागतः ठक्। नियमविधिप्राप्ते धर्मेषि ऋतुभार्यागमनादौ। [न्यायव्याख्याने ग्रन्थे।

नैयाय त्रि० न्यायस्य व्याख्यानो ग्रन्थः भृगवादि० अण्।

नैयायिक त्रि० न्यायं वेत्त्यधीते वा०या०ठक्। न्यायवेत्ते "नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा०।

नैयासिक त्रि० न्यासं वेत्ति अधीते वा०या० ठक्। १हरदत्तकृतपदमञ्जर्यपरनामकन्यासग्रन्थाभिज्ञे २माहकादिन्यासवेत्तरि च।

नैरन्तर्य्य न० निरन्तरस्य भावः ष्यञ्। अविच्छेदे "स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः" पात० सू० "नैरन्तर्य्यात्तु संक्रान्तेर्ध्यानं विष्णुपदीदृशम्" सू०सि०

नैरपेक्ष्य न० निरपेक्षस्य भावः ष्यञ्। अपेक्षाशून्यत्वे "नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तम्" सां०सू०

नैरयिका त्रि० निरये वसति ठक्। नरकवासिनि "पञ्चेन्द्रिया एव देवा नरा नैरयिका अपि" हेमच०।

नैराश्य न० निराशस्य निष्कामस्य भावः ष्यञ्। आशाशून्यत्वे "आशा हि परमं दुःखं नैराश्यं परमं सुखम्। यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला" सां०प्र०भाष्यधृत वाक्यम् नैराश्यस्य सुखरूपत्वं तत्र समर्थितं यथा "निराशः सुखी पिङ्गलावत्" सां०सू० "नन्वाशानिवृत्त्या दुःखनिवृत्तिः स्यात् सुखं तु कुतः साधनाभावनादिति" उच्यते। चित्तस्य सत्त्वप्राधान्येन स्वाभाविकं यत् सुखमाशया पिहितं तिष्ठति तदेवाशाविगमे स्वव्यक्तिकं भवति तेजःप्रतिबन्धजलशैत्यवदिति न तत्र साधनापेक्षा" सां०प्र०भा०।

नैरुक्त त्रि० निरुक्तस्य व्याख्यानो ग्रन्थः तत्र भवो वा भृगवादि०अण्। १निरुक्तव्याख्याने ग्रन्थे तत्र २भवे(आसक्ते) च "त्रैविद्योहैतुकस्तर्की नैरुक्तो धर्मपाठकः" मनुः।

नैरुक्तिक त्रि० निरुक्तं निर्वचनं वेत्ति तद्ग्रन्थं वाऽधीते वा०या०ठक्। १निर्वचनाभिज्ञे २निरुक्तग्रन्थाध्येतरि च।

नैरूहिक पु० निरूहः प्रयोजनमस्य ठक्। सुश्रुतोक्ते वस्तिभेदे निरूहशब्दे ४०८८ पृ० दृश्यम्।

नैर्ऋत पुंस्त्री निर्ऋतेरपत्यम् अण्। १राक्षसे अमरः स्त्रियां ङीप्। "तस्यापि (यमस्य) निर्ऋतिर्भार्या नैर्ऋता येन राक्षसाः" भा०आ० ६६अ०। निर्ऋतिशब्दे इदं सूत्रोभार्य्यत्वं वक्तभेदादविरोधः। "अथनमत-

योहेनादाचल्य नैर्ऋतोदधे" रघुः। निर्ऋतेरिदम् अण् २निर्ऋतिसम्बन्धिनि स्त्रियां ङीप्। सा च ३दक्षिणपश्चिमदिशि ४राक्षसयक्षौ च "नैर्ऋतौ दिशमाश्रयेत्" आ०त०। ५मूलनक्षत्रे न०तस्य तद्देवताकत्वात् तथात्वम्।

नैर्ऋतेया पुंस्त्री० निर्ऋत्याः अपत्यम् स्त्रीपत्ययान्तत्वात् ढक्। निर्ऋत्या अपत्ये "नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः" सुश्रु०।

नैर्ऋत्य त्रि० निर्ऋतिर्देवताऽस्य आर्षे वा० यञ्। निर्ऋतिदेवताके पत्रादौ "गर्दभं पशुमालभ्य नैर्ऋत्यं स विशुध्यति" याज्ञ०। लोके तु अण्। नैर्ऋत इत्येव

नैर्गुण्य न०निर्गुणस्य भावः ष्यञ्। सत्वादिगुणसङ्गराहित्ये "नैर्गुण्यात् ब्रह्म चाप्नोति सगुणत्वान्निवर्त्तते" भा०शा० २०५अ०।

नैर्मल्य न० निर्मलस्य भावः ष्यञ्। निर्मलत्वे १स्वच्छत्वे। "विषयेष्वतिसंरागो मानसो मल उच्यते। तेष्वेव हि विरागस्तु नैर्मल्यं समुदाहृतम्" इत्युक्ते २विषयवैराग्ये च "शशाङ्कस्येव ते कोपं नैर्मल्यं प्रापयिष्यति" भा०द्रो० २०० अ० "वाक्यार्थः शब्दोच्चारणमात्रेण वेद्यः एष (व्यङ्ग्यार्थः) तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः" सा०द०।

नैलायनि पुंस्त्री नीलस्यापत्यं तिका० फिञ्। नीलवानरस्यापत्ये [उदा०।

नैल्य न० नीलस्य भावः ष्यञ्। नीलवर्णे नीलकण्ठशब्दे

नैवकि(ति) पुंस्त्री निवक(त)स्यार्षेरपत्यम् इञ्। निवक(त)र्षेरपत्ये ततः यूनि फक् तस्य तौल्वल्या० न लुक्। नैवका(ता)यनि यूनि तदपत्ये

नैवाकव त्रि० निवाकोरिदम् अण्। निवचनशीलसम्बन्धिनि तस्यादूरदेशादि० उत्करा० छ। नैवाकवीय तस्यादूरदेशादौ। [वातशून्यदेशसमीपादौ।

नैवातायन त्रि०निवातस्यादूरदेशादि पञ्चा०चतुरर्थ्यां फक्।

नैवासिक त्रि० निवासे साधु गुडा० ठञ्। निवाससाधौ

नैविड्य न० निविडस्य भावः ष्यञ्। १घनत्वे अविच्छेदेन संयोगे २वंशीफुत्कारगुणभेदे च "नैविड्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता। माधुर्य्यमिति पञ्चामी फुत्कारेषु गुणाः स्मृताः" संगी०।

नैवेद्य न० निवेद्यं निवेदनमर्हति यञ् नि+विद्-णिच् कर्मणि यत् स्वार्थे अण् वा। "निवेदनीयं द्रव्यन्तु नैवेद्यमिति कथ्यते" इति स्मृयुक्ते देवतोद्देशेन त्यक्तव्ये द्रव्ये तस्य व्युत्पत्तिर्यथा "चतुर्विधं कुलेशानि! द्रव्यं तु षड्रसान्वितम्। निवेदनात् भवेत् तद्भिन्नैवेद्यं तदुदाहृतम्" कुलार्णवे १७उल्लासे। तद्द्रव्याणि यथा "सशितेन सुशुद्धेन पायसेन समर्पिता। सितोदनं सकदलिकं दध्यादौच निवेदयेत्" इति प्रपञ्चसारः। "निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा। तद्भक्ष्यार्हं पञ्चविधं नैवेद्यमिति कथ्यते। भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चोष्यञ्च पञ्चमम्। सर्वत्र चैतन्नैवेद्यमाराध्यस्य निवेदयेत्"। तत्पात्रं यथा "तैजसेषु च पात्रेषु सौवर्णे राजते तथा। ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथ वा पुनः। यज्ञदारुमये वापि नैवेद्यं स्थापयेद्बुधः। सर्वाभावे च माहेये स्वहस्तघटितं यदि" इति तन्त्रसारः। तद्दानफलं यथा "नैवेद्येन भवेत् स्वर्गो नैवेद्येनामृतं भवेत्। धर्मार्थकाममोक्षाश्च नैवेद्येषु प्रतिष्ठिताः। सर्वयज्ञफलं नित्यं नैवेद्यं सर्वतुष्टिदम्। ज्ञानदं मानदं पुण्यं सर्वभोग्यमयं तथा। मनसापि महादेव्यै नैवेद्यं दातुमिच्छति। यो नरो भक्तियुक्तः सन् दीर्घायुः स सुखी भवेत्। महामायां कदा देवीमर्चयिष्यामि भक्तितः। नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः। स सर्वकामान् संप्राप्य मम लोके महीयते" इति कालिकापु० १६९।७०अ०। तत्कालो यथा "अर्वाक् विसर्जनादुद्रव्यं नैवेद्यं सर्वसुच्यते। विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात्। पञ्चरात्रविदो सुख्या नैवेद्यं भुञ्जते सुखम्" गरुड़पु०। तस्य स्थापनस्थानं यथा गौतमीये "वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे। नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः"। दक्षिणभागस्तु देवताया एव न तु साधकस्य। "पक्वञ्च देवतावामे आमाद्यञ्चैव दक्षिणे" पुरश्चरणचन्द्रिका। "दक्षिणं तु परित्यज्य वामे चैव निधापयेत्। अभोज्यं तद्भवेद्दत्तं पानीयञ्च सुरोपमम्" इति तन्त्रसारः। तन्मुद्रा यथा "नैवेद्यमुद्रामङ्गुष्ठकनिष्ठाभ्यां प्रदर्शयेत्। कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता। तर्जनीमध्यमाङ्गुष्ठैरपानस्य तु मुद्रिका। अनामामध्यमाङ्गुष्ठैरुदानस्य तु सा स्मृता। तर्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका। सर्वाभिः सा समानस्य प्राणादन्येषु योजिता। तारपूर्वां जपेन्मुद्रां प्राणादीनां प्रदर्शयेत्" इति यामलः। ब्राह्मणाय तत्समर्पणं यथा "साक्षात् खादति नैवेद्यं विप्ररूपो जनार्दनः। ब्राह्मणे परितुष्टे च तत्तुष्टाः सर्वदेवताः।

देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति । भक्षीभूतश्च नैवेद्यं पूजनं निष्फलं भवेत् । देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः । प्रशस्तं सर्वदेवेषु विष्णोर्नैवेद्यभोजनम्" । शूद्रस्य तद्भक्षणविधिर्यथा "शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः । आमान्नं हरये दत्त्वा पाकं कृत्वा तु खादयेत्" श्रीकृष्णजन्मखण्डे ११अ० । नारसिंहे "मोचकं पनसं जम्बु तथाऽन्यल्लवलीफलम् । प्राचीनामलकं श्रेष्ठं मधुकोडुम्बरन्तथा । यत्पक्वमपि ग्राह्यं कदलीफलमुत्तमम्" मोचकं कदलकम् । प्राचीनामलकं करमर्दकम् । वराहपुराणे "अपर्युषितपक्वानि दातव्यानि प्रयत्नतः । खण्डाद्यादिकृतं पक्वं नैव पर्युषितं भवेत्" । वामनपुराणम् "हविषा संस्कृता ये च यव गोधूमशालयः । तिलमुद्गादयो माषा व्रीहयश्च प्रियाः हरेः" विष्णुः "नाभक्ष्यं नैवेद्यार्थं भक्षेष्वजामहिषी क्षीरं वर्जयेत् । पञ्चनखश्च मत्स्यवराहमांसानि चेति" । अभक्ष्यमिति यद्दर्शस्य यदभक्ष्यं स्वरूपतोऽगुणादि तत् तेन न देयम् । न तु रात्र्यादौ दध्यादि । पञ्चनखश्च यथातिरिक्तः । "मार्गं मांसं तथा छागं गव्यं मांसन्तथैव च । एतानि हि प्रियाणि स्युः प्रयोज्यानि यदुन्नरे !" इति वराहपुराणे भगवाक्यात् तथा "माहिषञ्चाविकं मांसमयाज्ञिकमुदाहृतम् । माहिषं वर्जयेन्मांसं क्षीरं दधि हतन्तथा" देवलः । "चाण्डालेन गुना यापि दृष्टं हविरयज्ञियम् । विड्वराहादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्" । "अन्यत्र हिरण्योदकस्पर्शादिति" । श्रीभागवते "यदुयदिष्टतमं लोके यच्चापि प्रियमात्मनः । तत्तन्निवेद्य मद्यं तदानन्त्याय कल्पते" मद्यं वासुदेवाय आह्निकतं० । नैवेद्यञ्च पञ्चोपचारादिपूजाङ्गम् । तद्दाने च घण्टावादनं कर्त्तव्यम् "धूपे दीपे च नैवेद्ये स्नपने वसने तथा । घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च" विधा० पा० धृतवाक्यात् । ६ तत्त्वे । निवेशो विवाहः ।

नैवेश त्रि० निवेशेन निर्वृत्तम् सङ्घला० अण् । निवेशनि-

नैवेशिक त्रि० निवेशाय विवाहाय हितम् ठक् । विवाहार्थं दीयमाने द्रव्ये "नैवेशिकं स्वर्णधूर्य्यं दत्त्वा स्वर्गं महीयते" याज्ञ० "नैवेशिकं विवाहोचितं द्रव्यम्" शु०त० रघु० ।

नैश त्रि० निशाया इदम् शैषिकोऽण् । निशासम्बन्धिनि "पूर्वां सन्ध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति" मनुः । यज्ञिलमये यज्ञिनि रवेर्दीधितयस्तमोनैशम् । अपयन्ति" इ०सं०४अ० "जगति नैशमशीतकरः करैः" माघः

नैशिक त्रि० निशायां भवः निशाया व्यापको वा "कालाट् ठञ्" पा०ठञ् । १निशाभवे २रात्रिव्यापके स्त्रियां ङीप् । "न्यासमक्षतकूडानां विशुद्धिर्नैशिकी स्मृता" मनुः । "आदन्तजनानः सद्य आचूडान्नैशिकी स्मृता" याज्ञ०

नैश्श्रेयस त्रि० निश्श्रेयसाय हितमण् । निःश्रेयससाधने "शुश्रूषैव तु शूद्रस्य धर्मो नैश्श्रेयसः परः" मनुः पक्षे विसर्गः नैःश्रेयस तत्रार्थे ।

नैश्श्रेयसिक त्रि०निश्श्रेयसं प्रयोजनमस्य ठक् । निश्श्रेयससाधने "सुखाभ्युदयिकञ्चैव नैश्श्रेयसिकमेव च" मनुः । पक्षे विसर्गः नैःश्रेयसिक तत्रार्थे ।

नैषध पु० निषधानां राजा अण् । १निषधदेशनृपे "स नैषधस्यार्थपतेः सुतायाम्" रघुः । २नलनृपे स्त्रिका० "न नैषधे कार्यमिदं निगद्यताम्" "देवः पतिर्विदुषि ! नैषधः राजगत्या" नैषध० । निषधोऽभिजनोऽस्य अण् । ३पित्रादिक्रमेण निषधदेशवासिनि त्रि० बहुषु उभयत्र अणो लुक् । निषधाः तद्रूपा तद्देशवासिनश्च । नैषधं नलमधिकृत्य कृतो ग्रन्थः अण् । ४नलनृपचरितरूपे द्वाविंशतिसर्गात्मके श्रीहर्षकविकृते महाकाव्यभेदे महाकाव्योदाहरणे "यथा रघुवंशशिशुपालवधनैषधादिः" सा०द०

नैषधीय त्रि० नैषधस्येदम् "दृद्राच्छः" पा० छ । नलसम्बन्धिनि । "काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः" नैषधम् ।

नैषध्य पुंस्त्री निषधस्य स्त्रीत्वेन तद्रूपस्यापत्यम् नादित्वात् ष्य । निषधस्त्रीरूपस्यापत्ये स्त्रियां टाप् ।

नैषाद पुंस्त्री निषादस्यापत्यम् विदा० अञ् । निषादस्यापत्ये ततः हरिता०यूनि फक् । नैषादायन यूनि तदपत्ये

नैषादक त्रि० निषादेन कृतम् कुलाला० संज्ञायां वुञ् । निषादकृते पदार्थभेदे ।

नैषादकि पुंस्त्री निषादस्यापत्यं विदा० अञ् । "व्याघ्रकङ्क निषादेत्यादि" वार्त्ति० अकङ् । निषादस्यापत्ये ।

नैषादि पुंस्त्री निषादस्यापत्यम् आर्षं इञ् । निषादापत्ये "न स तं प्रतिजग्राह नैषादिरिति चिन्तयन्" भा०आ० १३२अ० । लोके तु विदा० अञ् । नैषाद इत्येव ।

नैषिध पु० निषधः नलो वाचकतयाऽस्त्यस्य अण् पृषो० । तन्नामनामके नलरूपे दक्षिणाग्नौ "कव्यवाहो नलश्चैवेति" नलस्याग्निनामत्वात् लक्षितलक्षणया तस्य तथात्वम् "तस्मिन्यज्ञे सर्वान्द्रो यमो राजा नलो नैषिधोऽन

श्रन्त्सांगमनोऽसन् पांसवः" शत०ब्रा०२।२।१। "नलो नैषध इति निषधदेशाधिपतिर्नलः प्रसिद्धो राजा अन्वाहार्य्यपचनोऽग्निः एष एव नलो नैषध इति निर्दिष्टः। निषधराजस्य च नलस्य दक्षिणाग्नेश्च साम्यमाह तद्यदिति अग्निहोत्रहोमकाले एतमन्वाहार्य्यपचनं यत् यस्माद्दक्षिणत आहरन्ति तस्मादेव नैषधो नलोऽपि यमस्य राज्ञो दक्षिणत उपगच्छतीति लोकप्रसिद्धिः" भा०। "तत्र निष्क्रमणं कुर्वन्नड़ाय नैषधायान्वाहार्यपचनाय नम इति मनसा दक्षिणाग्निमुपस्पृशेत्" कात्या०श्रौ० ४।१४ पद्धतिः।

नैष्कर्म्य न० निष्कर्मणो भावः ष्यञ्। विधिना सर्वकर्मत्यागे "न कर्मणामनारम्भात् नैष्कर्म्यम् पुरुषोऽश्नुते" गीता। "अलभ्यमिच्छन्नैष्कर्म्यानुमूढबुद्धिरिहोच्यते" भा०शा० ३२अ०।

नैष्कशतिक त्रि०निष्कशतमस्यस्य "शतसहस्रान्ताच्च निष्कात्" पा० मत्वर्थे ठञ्। निष्कशतमानयुक्ते एवं नैष्कसहस्रिक तन्मानयुक्ते।

नैष्किक पु० निष्के हेम्नि दीनारे तद्गारे नियुक्तः ठक्। १कोषाध्यक्षे टङ्कशालायां नियुक्ते अमरः। निष्केण क्रीतम् "असमासे निष्कादिभ्यः" पा० ठञ्। २निष्केण क्रीते समासे तु ठक्। परमनैष्किक खरे भेदः। निष्कस्य विकारः "क्रीतवत् परिमाणात्" पा० ठञ्। ३निष्कविकारे।

नैष्क्रमण त्रि०निष्क्रमणे शिशोर्गृहाद्बहिर्गमनकाले दीयते तत्र कार्यं वा व्युष्टा० अञ्। शिशोर्निष्क्रमणकाले १दीयमाने २तत्र कार्ये पदार्थे च

नैष्ठिक त्रि०निष्ठा नाशपर्य्यन्तं ब्रह्मचर्य्येण तिष्ठति निष्ठायां मरणे वा विहितम् निष्ठायां भवः (आसक्तः) वा ठक्। उपनयनोत्तरं मरणपर्य्यन्तं ब्रह्मचर्य्येण गुरुकुले वासिनि १ब्रह्मचारिभेदे २मरणकाले विहिते कर्मणि ३व्रतविशेषासक्ते च "नैष्ठिको ब्रह्मचारी तु वसेदाऽऽचार्य्यसन्निधौ। तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा। अनेन विधिना देहं साधयन् विजितेन्द्रियः। ब्रह्मलोकमवाप्नोति नचेह जायते पुनः" याज्ञ० "निषेदितो नैष्ठिकसुन्दरस्त्रया" कुमा० "विदधे विधिमस्य नैष्ठिकम्" रघुः स्त्रियां ङीप्। "इमावयस्यां पश्यन्त्यः पश्चिमां तव नैष्ठिकीम्" हरिव० ८८अ०।

नैषणिष्ठ्य न०निस्स्नेहस्य भावः ष्यञ् आवे पत्वम्। रागा०भावे "यः कामयेत नैषणिष्ठ्यं पाप्मना इयामिति स व्रतमेवेन यजेत" आश्व०श्रौ०९।७।२५। निस्स्नेहस्य भावो नैषणिष्ठ्यम्। पाप्मनो नैषणिष्ठ्यं गच्छेयमिति यः कामयेत स व्रतमेवनामकेन एकाहेन यजेत" नारा०। लोके तु नैस्स्निह्य इत्येव। पक्षे विसर्गः नैःस्निह्य तत्रार्थे

नैसर्गिक त्रि०निसर्गादागतः ठक्। स्वाभाविके "अज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" शा०भा०। तदेव नैसर्गिक सुव्रतत्वम् "नैसर्गिकोऽप्युत्सृजे विरोधः" रघुः स्त्रियां ङीप्। "पृच्छामस्त्वामियं भक्तिः क्व लब्धा परमात्मनः। कस्य वा शिक्षिता राजन्! किं वा नैसर्गिकी तव" कल्किपु० २६अ०। [खड्गेन योद्धरि अमरः।

नैस्त्रिंशिक पु० निस्त्रिंशः खड्गः प्रहरणमस्य ठक्।

नो अव्य०नञ्-डो। नञर्थे अभावादौ। "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ वापिते"। "वैश्यवृत्त्या तु जीवन्नो विक्रीणीत कदाचन" याज्ञ०।

नोचेत् अव्य०नो च चेत् च। नयदीत्यर्थे [नोटी नटग्राम्।

नोट त्रि० नट-अच् पृषो०। नटे ततः गौरा० स्त्रियां ङीष्।

नोत् अव्य० न च उच्च। नैवेत्यर्थे अतिमात्रमवर्धन्न नोदिव दिवमस्य शृन्" ऋग० ५।१९।१ "प्रजाऽनाथकेन नोत्परा बभूवुः" शत०ब्रा० २।४।३।२

नोदन न० नुद-भावे ल्युट्। १खण्डने णिच्-भावे ल्युट्। २प्रेरणे ३संयोगभेदे च "अभिघातो नोदनञ्च शब्दहेतुरिहादिमः" भाषा० युच्। नोदना प्रेरणायां विधिरूपायां चोदनायां स्त्री।

नोधस् पु० नु-असि धुट् च। ऋषिभेदे। तेन दृष्टं साम अण्। नौधस सामभेदे न० तच्च माध्यन्दिनसवने गेयेषु सप्त स्तोत्रेषु षष्ठम् साम यथोक्तं सामसंहितासायणभाष्ये "एवमन्यस्मिन् सवने सप्त स्तोत्राणि तेषु गायत्रमाहीयवं चेति द्वे सामनी, द्वितीये रौरवं यौधाजयं च तृतीये औशनम्, चतुर्थे रथन्तरम्, पञ्चमे वामदेव्यम्, षष्ठे नौधसम्, सप्तमे कालेयम्"।

नोधा अव्य० नव-धाच्-पृषो०। नवप्रकारे नवभेदेत्यर्थे "नोधा विधाय रूपं स्वं सर्वसंकल्पविद् विभुः" भाग० ३।२३।४५।

नोपस्थात त्रि० न उपतिष्ठति उप+स्था-क्त। १दूरस्थे "अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः" इति स्मृत्युक्ते हीने २प्रतिवादिनि च।

नौ स्त्री नुद-डो। जलोपरिप्लवनसाधने १तरणौ "नोदके

शकटं याति न च नौर्गच्छति स्थले" हितो० "स्यन्दनाश्वैः समे युध्येदनूपे नौहिपैस्तथा" मनुः "विप्रक्षत्रविशस्तरन्ति च यथा नावा तथैवेतरे" मृच्छ० २यन्त्रचालनीये नौभेदे च "ततः प्रवासितो विद्वान् विदुरेण नरस्तदा। पाण्डवानां दर्शयामास मनोमारुतगामिनीम्। सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम्। शिवे भागीरथीतीरे नरैर्विस्रम्भिभिः कृताम्" भा०आ०१४६अ०। ततः तार्य्ये यत्। नाव्य नावा तार्य्ये ब्रीह्यादि यवखादि० ठक। नाविक नौविशिष्टे त्रि०। नावा तरति "नौद्व्यचष्ठन्" ठन्। नाविक नावा तारिणि त्रि० 'नावोद्विगोः' पा०। नौशब्दान्नात् द्विगोष्टच् नतु तद्धितलुकि। द्वाभ्यां नौभ्यामागतः द्विनावरूप्यः "द्विगोर्लुगनपत्ये" पा०अचीत्यस्यापकर्षणात् अत्र इलादेर्न लुक्। पञ्चनावप्रियः उत्तरपदद्विगुः द्विनावं त्रिनावम् समा० द्वि०। अतद्धितलुकीति किं? पञ्चभिर्नौभिः क्रीतः आर्हीयष्ठक् अध्यर्द्धपूर्वेत्यादिना तस्य लुकि न, द्विनौः इत्येव। अर्द्धं नावः एकदेशितत्पु० टच्। अर्द्धनावम् क्लीबत्वं कोषात्।

नौकर्णधार पु० नावः कर्णं धारयति धारि-अण् उप०स०। नाविके नावः कर्णतुल्यस्य (हाल) पदार्थस्य धारके "सुरभिमधुकुसुमानि गन्धा वणिजो नौकर्णधाराश्च" ह०सं० ५अ०।

नौकर्णी स्त्री नौरिव कर्णौ यस्याः ङीष्। कुमारानुचरमातृभेदे "नौकर्णी शिवकर्णी च वसुधा महिमा तथा" भा०श० ४७अ०।

नौकर्म्मन् न० नावि कर्म चालनादिव्यापारः नौकायां चालनादिव्यापारे "निषादोभार्गवं स्मृते दाशं नौकर्मजीविनम्" मनुः।

नौका स्त्री नौ+स्वार्थे०क। नौशब्दार्थे अमरः निष्पदशब्दे ४१२०पृ०तल्लक्षणादि दृश्यम्। "अथमिह सज्जनमङ्गतिरेका भवति भवार्णवतरणे नौका" मोहमुद्गरः चतुरङ्गक्रीडाङ्गे पदार्थभेदे स्त्री तस्यास्तदाकारत्वात् तथात्वम्। चतुरङ्गशब्दे २८६२ पृ० दृश्यम्।

नौकाकृष्ट न० चतुरङ्गक्रीडाभेदे चतुरङ्गशब्दे २८६४पृ० दृश्यम् "काककाष्ठं दृढस्नोका नौकाकृष्टपकारकम्"।

नौकादण्ड पु० ६त०। नौकायां चालनार्थं पार्श्वद्वयबद्धे काष्ठदण्डे (दाँड) अमरः।

नौचर त्रि० नावा चरति चर-ट। नावा चरणशीले "वादोनाथः शिवजलपथः कर्मणे नौचराणाम्" रघुः।

नौजीविक त्रि० नावा जीविका यस्य। नौचालनादिजीविकायुक्ते "पण्यमिषन्नौजीविकसलिलजतुरगोपघातकरः" ह०सं० ७अ०।

नौतार्य्य त्रि० नावा तार्य्यम्। नौकया तरणीयदेशादौ।

नौयायिन् त्रि० नावा याति या-णिनि। नौकया नद्यादेः पारगामिनि तेषां नदीतरणे पणादिनिरूपणम् मनूक्तं यथा "पणं यानं तरे दाप्यमित्यादितरशब्दे १२४१पृ०दृश्यम् "तत्र भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः। रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः। दीर्घां ध्वनि यथादेशं यथाकालं तरोभवेत्। नदीतारेषु तद्विद्यात् समुद्रे नास्ति लक्षणम्। गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे। यद्यपि किञ्चिद्दाशानां विशीर्य्येतापराधतः। तद्दाशैरेव दातव्यं समागम्य स्वतोऽंशतः। एष नौयायिनामुक्तो व्यवहारस्य निर्णयः। दाशापराधस्त्वोघे च दैविके नास्ति निग्रहः"।

नौवाह त्रि० नावं वाहयति वाहि-अण् उप०स०। नौकावाहके (दाँडी) प्रसिद्धे नौकाचालके त्रिका०।

नौषेचन न० ६त० सुषामा० षत्वम्। नौकायाः सेचने

न्यका स्त्री नि+अकि-क बा०नलोपः। विट्कीटे शब्दाम्बु०

न्यकारुका स्त्री विट्कीटे कृमिभेदे हारा०।

न्यक्कार पु० न्यक्+कृ-घञ्। १नीचकरणे च २तिरस्कारे च "न्यक्कारो ह्ययमेव मे यदरयः" वा०द० "न्यक्कारमासन्नतरं निगम्य" हरिवं०१७८अ०। क्लिन् न्यक्कृतिरप्यत्रार्थे स्त्री

न्यक्त त्रि० नि+अनज-क्त कृत्वम्। नितान्ताञ्जनयुक्तीकृते "अग्निन्यक्ताः पत्नीसंयाजानामृचः स्युः" तै०ब्रा० १।३।१।४।

न्यक्ष पुंस्त्री नियते निकृते वा अक्षिणी यस्य बहुव्री०। १महिषे मेदि० स्त्रियां ङीष्। २जामदग्न्ये परशुरामे हेमच०। ३कार्त्तस्वरे ४महिषवृषे न० ५निकृष्टे अधमे त्रि० अमरः

न्यग्भाव पु० नीचो भावः। नीचत्वे।

न्यग्रोध पु० न्यक् रुणद्धि रुध-अच्। १वटवृक्षे अमरः २शमीवृक्षे बाहुद्वयविस्तारकृतव्यामरूपपरिमाणे (याँओ) ३बाहौ च न्यग्रोधपरिमण्डलशब्दे दृश्यम्। सर्वाणि न्यक्कृत्य स्थिते ४विष्णौ "न्यग्रोधोदुम्बरोऽश्वत्थः" विष्णुसं०। "सर्वाणि भूतानि न्यक्कृत्य निजमायया रुणद्धि इति न्यग्रोधः" भा० ५विषपर्णयां स्त्री ङीष्। मेदि० एवं हमोहनौषधौ च ७मूषिकपर्ण्यां विश्वः उग्रसेन

ह्रपस्य दपुत्रभेदे पु० "नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः। न्यग्रोधश्च सुनामा च" हरिवं० ३८अ०। तस्यादूरदेशादि कृशग्रा० क। न्यग्रोधक तत्सन्निकृष्टदेशादौ कुत्सदा० ठन्। न्यग्रोधिक तत्सन्निकृष्टदेशादौ त्रि० तत्रार्थे प्रेक्षादि० इनि। न्यग्रोधिन् तत्रार्थे त्रि०।

न्यग्रोधपरिमण्डल पु०न्यग्रोधःव्यामः परिमण्डलं परिणाहो यस्य। १व्यामपरिमितोच्छ्रायपरिणाहे पुरुषे। तल्लक्षणं यथा "महाधनुर्द्वराश्चैव त्रेतायां चक्रवर्त्तिनः। सर्वलक्षणसम्पन्नान्यग्रोधपरिमण्डलाः। न्यग्रोधौ तु स्मृतौ बाहू व्यामौ न्यग्रोध उच्यते। व्यामेन उच्छ्रयो यस्य अध ऊर्द्ध्वं च देहिनः। समोच्छ्रयपरिणाहो न्यग्रोधपरिमण्डलः" मत्स्यपु० ११८अ०। २अङ्गनाविशेषे स्त्री "स्तनौ सुकठिनौ यस्या नितम्बे च विशालता। मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला" इति शब्दमा० दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला" भट्टिः।

न्यङ्कु पु० नितरामञ्चति नि+अनुच-उ न्यङ्कु० कुत्वम्। १मुनिभेदे मेदिनिः। २बहुग्रन्थे मृगभेदे अमरः। ३नितरां गन्तरि त्रि० "सद्योहतन्यङ्कुभिरस्तदिग्धम्" रघुः "न्यङ्कुः स्वादुर्लघुर्बल्यो दृष्टो दोषत्रयापहः" भावप्र०। न्यङ्कोर्विकारः अण्। नैयङ्कव तदीयचर्मादौ

न्यङ्कुभूरुह पु०न्यङ्कुरिव भूरुहः। ग्रीवाकाष्ठे शब्दार्थचि० तस्य बहुशृङ्गाकारशाखत्वात्तथात्वम्।

न्यङ्कुादि कुत्वनिमित्ते शब्दगणभेदे सच पा०ग०सू०उक्तो यथा "न्यङ्कु मङ्कु भ्रंशु दूरेपाक फलेपाक अग्रेपाक दूरेपाका फलेपाका दूरेपाकु फलेपाकु तक्र वक्र व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग अपाक मांसपाक मूलपाक कपोतपाक उलूकपाक (संज्ञायां मेघनिदाघावदाघार्घाः)। न्यग्रोध बीरत् न्यङ्कुादिः।

न्यङ्ग पु० नि+अनृज-घञ्। नितरामञ्चने "सोमस्य न्यङ्गो यदरुणपुष्पाणि फाल्गुनानि" शत०ब्रा०४।५।१०

न्यच्छ न०१सुश्रुतोक्ते क्षुद्ररोगभेदे "मण्डलं महदल्पञ्च श्यामं वा यदि वा सितम्। सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते" तल्लक्षणम् २नितरामच्छे त्रि०।

न्यच्छ् त्रि० निम्नतयाऽञ्चति अनृच-विच्। निम्ने किन् न्यच् तत्रार्थे त्रि०। यसादौ भवे च नीचः नीचा चन्यत्र कुत्वम्। न्यक् न्यग्भ्याम्।

न्यञ्चन न० नितरामञ्चनं गमनम्। १नितरां गमने न्यञ्चने दुर्गेचिदाशु यरचम्" ऋ०८।२७।१८। २न्यग्भावे च।

न्यञ्चित त्रि० नि+अनृच-णिच्-क्त। अधःक्षिप्ते हेमच०।

न्यन्त पु० नितरामन्तः। चरमभागे।

न्यय पु० नि+इण्-भावे अच्। १नाशे २अपचये च।

न्यर्थ पु० नि+ऋ-गतौ थन्। निकृष्टायां मतौ "न भोजा मम्रुर्न न्यर्थमीयुः" ऋ० १०।१०७।८ "न्यर्थं निकृष्टां गतिम्" भा० समासे थाथादिस्वरः। निकृष्टोऽर्थो यस्य। २निकृष्टार्थे त्रि०।

न्यर्बुद न० १दशगुणितार्बुदसंख्यायां २तत्सङ्ख्येये च "प्रयुतश्चार्बुदश्च न्यर्बुदश्च समुद्रश्च" यजु०१७।२ "अर्बुदं दशगुणं न्यर्बुदम्" वेददीपः।

न्यर्बुदि पु० निकृष्टः अर्बुदिर्देवो देवान्तरं यतः। रुद्रभेदे "अर्बुदिर्नाम यो देव दैवानच न्यर्बुदिः" अथ० ११।९।४

न्यस्त त्रि०नि+अस-कर्मणि क्त। १क्षिप्ते २त्यक्ते ३विसृष्टे ४निहिते च अमरः "न्यस्तशस्त्रं दिलीपञ्च तञ्च गुप्तसुषां प्रभुम्" रघुः।

न्यस्तशस्त्र पु० न्यस्तं शस्त्रं शस्त्रसाध्यं युद्धं येन। "न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः" मनूक्ते १पितृलोके २त्यक्तायुधे च "न्यस्तशस्त्रं दिलीपञ्च" रघुः।

न्यस्य त्रि० नि-अस-क्षेपे कर्मणि वा० आर्हे यत्। स्थापनीये अक्षय्ये "अर्जुनार्जुन! बीभत्सो! न न्यस्यं गाण्डिवं त्वया" भा०द्रो० २००अ०। लोके तु ण्यत्। नास्य इत्येव

न्याक्य न० नि+अकि-ण्यत् वा०नलोपः। भटतण्डुले(चुड़ि) (भाजाचाल) शब्दच०।

न्याद पु० नि+अद-घञ् म यसादेशः। आहारे अमरः।

न्याय पु० नि+इण्-भावकरणादौ घञ्। १उचिते २गोतमप्रोतमोक्तपदार्थनिरूपके शास्त्रभेदे प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मके ३वाक्यभेदे "अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यत्वम्" तल्लक्षणमिति चिन्तामणिः। "उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वमिति" गिरीशमिः। अवयवशब्दे ४२२९०दृश्यम्। यथा पर्वतो वह्निमान् (प्रतिज्ञा) धूमात् (हेतुः) यो यो धूमवान् स वह्निमान् यथा महानसम् (उदा०) वह्निव्याप्यधूमवांश्चायम्। (उपनयनम्) तस्माद्वह्निमान् (निगमनम्) एतद्दर्शनमतञ्च सर्वदर्शनसंग्रहे दर्शितं यथा

"तत्त्वज्ञानादुदुःखात्यन्तोच्छेदलक्षणं निःश्रेयसमभवतीति समानतन्त्रेऽपि प्रतिपादितं तदाह सूत्रकारः प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानां तत्त्व०

ज्ञानाद्धि श्रेयसाधिगमः" इति। इदं न्यायशास्त्रस्यादिमं सूत्रम्। न्यायशास्त्रञ्च पञ्चाध्यायात्मकं तत्र प्रत्यध्यायस्याह्निकद्वयम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणं कृतम्। द्वितीयस्य प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम्। तृतीयस्य प्रथमे शरीरेन्द्रियार्थपरीक्षणं द्वितीये बुद्धिमनःपरीक्षणम्। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणं द्वितीये दोषनिमित्तकत्वनिरूपणम् अवयवादिनिरूपणञ्च। पञ्चमस्य प्रथमे जातिभेदनिरूपणं द्वितीये निग्रहस्थानभेदनिरूपणम्। "मानाधीना मेयसिद्धिरिति" न्यायेन प्रमाणस्य प्रथमतो हेयः तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य प्रथमं लक्षणं कथ्यते। साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम्१। एवञ्च प्रतितन्त्रसिद्धान्तसिद्धं परमेश्वरप्रामाण्यं संगृहीतं भवति यदुक्तवत् सूत्रकारः "मन्त्रायुर्वेदप्रामाण्यवत्तत्प्रामाण्यमाप्तप्रामाण्यादिति"। तथाच न्यायपारावारं दृष्ट्वा विश्वविख्यातकीर्त्तिरुदयनाचार्योऽपि कुसुमाञ्जलौ चतुर्थे स्तवके "मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता। तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते"इति।"साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः। वेशाद्दृष्टिनिमित्तदुष्टिविगमप्रध्वस्तशङ्कातुषः शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः" इति। तच्चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। २प्रमेयं द्वादशप्रकारकम् आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदात्। अनवधारणात्मकं ज्ञानं ३संशयः स त्रिविधः साधारणधर्मासाधारणधर्मविप्रतिपत्तिलक्षणभेदात्। यमधिकृत्य प्रवर्त्तन्ते पुरुषास्तत्प्रयोजनं४ तद्द्विविधं दृष्टादृष्टभेदात्। व्याप्तिसंवेदनभूमिर्दृष्टान्तः५ स द्विविधः साधर्म्यवैधर्म्यभेदात्। प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः६ स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमभेदात्। परार्थानुमानावयवैकदेशोऽवयवः७ स पञ्चविधः प्रतिज्ञाहेतूदाहरणोपनयननिगमनभेदात्। व्याप्यारोपे व्यापकारोपस्तर्कः८ स चैकादशविधः व्याघाताश्रयेतरेतराश्रयचक्रकाश्रयानवस्थाप्रतिबन्दिकल्पनाप्रत्यवस्थानगौरवोत्सर्गापवादवैजात्यभेदात्। यथार्थानुभवपर्य्याया प्रमितिर्निर्णयः९ सा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दीभेदात्। तत्त्वनिर्णयफलः कथाविशेषो वादः१०। उभयसाधनवती विजिगीषुकथा जल्पः११। स्वपक्षस्थापनाहीनः कथाविशेषो वितण्डा१२। कथा नाम वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः। असाधको हेतुत्वेनाभिमतो हेत्वाभासः१३ स च पञ्चविधः सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालभेदात्। शब्दवृत्तिव्यत्ययेन प्रतिषेधहेतुस्तूत्तरं१४ तच्चतुर्विधं अभिधानतात्पर्य्योपचारव्यत्ययवृत्तिभेदात्। स्वव्याघातकस्तरं जातिः१५। सा चतुर्विंशतिविधा साधर्म्यवैधर्म्यौत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुपपत्तिसंशयप्रकरणहेत्वर्थापत्तिविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदात्। पराजयनिमित्तं निग्रहस्थानं१६ तद्द्वाविंशतिप्रकारं प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तरार्थान्तरनिरर्थकाविज्ञातार्थापार्थकाप्राप्तकालन्यूनाधिकपुनरुक्ताननुभाषणाज्ञानाप्रतिभाविक्षेपमतानुज्ञापर्य्यनुयोज्योपेक्षणनिरनुयोज्यानुयोगापसिद्धान्तहेत्वाभासभेदात्। अत्र सर्वान्तर्गणिकस्तु विशेषस्तत्र शास्त्रे विस्तरो विस्तरभिया न प्रलूयते। नन्वेवं प्रमाणादिपदार्थषोडशके प्रतिपाद्यमाने कथमिदं न्यायशास्त्रमिति व्यवदिश्यते सत्यं तथापि "व्यवसायाधारेण व्यपदेशा भवन्तीति" न्यायेन न्यायस्य परार्थानुमानापरपर्य्यायस्य सकलविद्यानुग्राहकतया सर्वकर्मानुष्ठानसाधनतया प्रधानत्वेन तथा व्यपदेशो युज्यते। तथाऽभाणि सर्वज्ञेन, "सोऽयं परमो न्यायः विप्रतिपन्नपुरुषप्रतिपादकत्वात् तथा प्रवृत्तिहेतुत्वाच्चेति"। पक्षिलस्वामिना च "सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तितेति"। ननु तत्त्वज्ञानान्निःश्रेयससम्भवतीत्युक्तं तत्र किं? तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते नेत्युच्यते किन्तु तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति। तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित् समस्ति परस्परानुबन्धाच्च रागादीनां, मूढो रज्यति द्वेष्टि हन्ति मूढः कुप्यति कुपितो हन्तीति ततश्च

दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेयादीन्याचरति, वाचा अनृतादीनि, मनसा परद्रोहादीनि, सेयं पापरूपा प्रवृत्तिरधर्मसाधनीति। शरीरेण प्रशस्तानि दानपरपरित्राणादीनि, वाचा हितसत्यादीनि, मनसा अहिंसादीनि, सेयं पुण्यरूपा प्रवृत्तिर्धर्मः। सेयमुभयी प्रवृत्तिः। ततः स्वस्वानुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावः। तस्मिन् सति प्रतिकूलवेदनीयतया वासनात्मकं दुःखं भवति। त इमे मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः संसारशब्दार्थो घटीयन्त्रवच्चिरमधिरनुवर्त्तते। यदा कश्चित् पुरुषधौरेयः पुराकृतसुकृतपरिपाकवशादाचार्योपदेशेन सर्वमिदं दुःखायतनं दुःखमनुषक्तञ्च पश्यति तदा तत्सर्वं हेयत्वेन बुध्यते ततस्तन्निवर्त्तकमविद्यादि निवर्त्तयितुमिच्छति तन्निवृत्त्युपायञ्च तत्त्वज्ञानमिति कस्यचित्तत्त्वनिर्विद्याभिर्विभक्तं प्रमेयं भावयतः सम्यग्दर्शनपदवेदनीयतया तत्त्वज्ञानं जायते तत्त्वज्ञानान्मिथ्याज्ञानमपैति मिथ्याज्ञानापाये दोषाः अपयान्ति दोषापाये प्रवृत्तिरपैति प्रवृत्त्यपाये जन्मापैति जन्मापाये दुःखमत्यन्तं निवर्त्तते आत्यन्तिकी निवृत्तिरपवर्गः। निवृत्तेरात्यन्तिकत्वं नाम निवर्त्यसजातीयस्य पुनस्तत्रानुत्पाद इति तथा च पारमर्षं सूत्रं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः" इति। ननु दुःखात्यन्तच्छेदोऽपवर्ग इत्येतदद्यापि कक्षीणगुडायितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवस्थियत इति चेन्नैवं सर्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्वतन्त्रसिद्धान्तसिद्धतया यथापयत्वात् न ह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्येतावत्तावदविवादम्। अथ मन्येथाः शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तन्न शङ्क्यते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तद्रिक्तो वा। प्रथमे न विप्रतिपत्तिः कः स्वस्वतन्त्रमाचरति प्रतिकूलमाचरेत। द्वितीये तस्य नित्यत्वे निवृत्तिरशक्यविधानैव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं, न खलु कश्चित् प्रेक्षावान् "आत्मनस्तु कामाय सर्वं प्रियं भवतीति" सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्वो हि प्राणी सुखं इति व्यवहरति।

धर्मिनिवृत्तौ निर्धर्मज्ञानोदयो मन्दोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च। भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधारासम्भवात् अङ्कुराभ्यासादिवदनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न शङ्क्यते।

आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निरर्गलः अङ्ग भवान् पृष्टो व्याचष्टां किमावरणं? धर्माधर्मश्चान्तय इति चेत् दृष्टमेव। अथ देहमेवावरणं तथा च तन्निवृत्तौ पञ्जरान्मुक्तस्य शुकस्येवात्मनः सततोर्द्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्त्तोऽमूर्त्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मवदात्मधर्माणामतीन्द्रियत्वं प्रसज्येत्। सावयवत्वे यत्सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम्। अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्तप्रतिबन्धात्।

पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवादम् ऐश्वर्यं चेत् सातिशयतया सापेक्षतया च प्रेक्षावतां नाभिमतम्।

प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं प्रकृत्याश्रयं वेति प्रतावदवशिष्यते तत्र पुरुषाश्रयमिति न शिष्यते पुरुषस्य कूटस्थात् स्याद्विनिरोधापातात्तापि प्रकृत्याश्रयः अचेतनत्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वा आद्ये अनिर्मोक्षः स्वभावस्यानपायत्वात् द्वितीये प्रसक्ति संसारोऽस्तमियात्।

नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते। श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा यावद्भावेऽपि तथा भावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकपक्षस्य सौवीरदधिमन्तुहरतीति चेत्तदेतन्नाटकपक्षपतितं तद्वच्च इत्युपेक्ष्यते। सुखस्य सातिशयत्वेन प्रत्यक्षतया बहुप्रत्य-

नीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखा-
विनाभूतत्वेन विषानुषङ्गमधुवत् दुःखपक्षनिःक्षेपात्। नन्
"एकमनुसन्धिसतोऽपरं प्रच्यवते" इति न्यायेन दुःखवत्
सुखमप्युज्झित इति अकाम्योऽयं पक्ष इति चेन्नैवं
मस्याः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन
तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात्
तथा हि न्यायोपार्जितेषु विषयेषु कियन्तः सुखखद्योताः
कियन्ति दुःखदुर्दिनानि अन्यायोपार्जितेषु तु यद्भवि-
ष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानु-
भवमनाच्छाद्यन्तः सन्तोविदाङ्कुर्वन्तु विदांवरा भवन्तः।
तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमे-
णात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्ति-
रात्यन्तिकी निःश्रेयसमिति निरवद्यम्। नन्वीश्वरसद्भावे
किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्र-
त्यक्षं क्रमते, रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनु-
मानं तदग्निलिङ्गाभावात् नागमः विकल्पासहत्वात्
किं नित्योऽवगमवत्यनित्यो वा। आद्ये अपसिद्धान्ता-
पातः द्वितीये परस्पराश्रयापातः। उपमानादिकमप्यक्ष-
ग्रहं नियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते
इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्क-
रोति। विवादास्पदं नगसागरादिकं सकर्त्तृकं कार्य-
त्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य
सुसाधनत्वात्। नन्वसिद्धमिदं सावयवत्वम् अवयवसंयो-
गित्वम् अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभि-
चारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात्। तस्मादनु-
पपन्नमिति चेन्नैवं वादीः समवेतद्रव्यत्वं सावयवत्व-
मिति निरुक्तेर्वक्तुं शक्यत्वात्। नापि विरुद्धो हेतुः
साध्यविपर्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षाद-
न्यत्र दृष्टेरदर्शनात् नापि कालात्ययापदिष्टः बाधकानु-
पलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात्। नन्
नगादिकमकर्त्तृकं शरीराजन्यत्वात् गगनवदिति चेन्ने-
तत् परीक्षाक्षमीक्ष्यते नहि कठोरकण्ठीरवस्य कुरङ्ग-
शावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीर-
विशेषणवैयर्थ्यात्। तस्माज्जन्यत्वमेव साधनमिति चेन्ना-
सिद्धेः। नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी
अनुकूलतर्कसम्भवात् यद्ययमकर्त्तृकः स्यात् कार्य्यमपि
न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकच-
क्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम्। यच्च सर्वं
कर्त्तृविशेषोपहितमर्थादं कर्त्तृत्वं चेतरकारकाप्रयोज्यत्वे
सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानक्रियाप्रयत्ना-
धारत्वम्। एवञ्च कर्त्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्या-
वृत्तावकारणकार्य्योत्पादप्रसङ्गः। इति स्थूलः प्रमादः।
तथा निरटङ्कि शङ्करकिङ्करेण "अनुकूलेन तर्केण
सनाथे सति साधने। साध्यव्यापकताभङ्गात् पक्षे नो-
पाधिसम्भवः" इति। यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी
स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्य-
विशिष्ट्यां व्याघातात् तदुदितदूषणेन "आगमादेः प्रमा-
णत्वे बाधनादनिषेधनम्। आभासत्वे तु सैव स्यादा-
श्रयासिद्धिरुद्धता" इति। न च विशेषविरोधः शक्य-
शङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात्। तदेतत्
परमेश्वरस्य जगन्निर्माणे प्रवृत्तिः किमर्थां स्वार्थां परार्थां
वा आद्येऽपीष्टप्राप्त्यर्थां अनिष्टपरिहारार्थां वा नाद्यः
अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः।
द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं
प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्युपपत्तिरि-
त्याचक्षीत कश्चित् प्रत्याचक्षीत तर्हि सर्वान् प्राणिनः
सुखिन एव सृजेदीश्वरः न दुःखवत्त्वात् करुणाविरो-
धात्। स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यं
तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः
"प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते। जगच्च सृ-
जतस्तस्य किं नाम न कृतं भवेत्" इति। नास्तिकशि-
रोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभाव-
यतु भवान् करुणया प्रवृत्तिरस्त्वेव, न च निसर्गतः
सुखमयसर्गप्रसङ्गः वृद्धप्राणिकृतसुकृतदुष्कृतपरिपाकवि-
शेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः "स्वाङ्गं
स्वव्यवधायकं न भवतीति, न्यायेन प्रत्युत तच्चिर्वाहाच्च।
"एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र
प्रमाणम्। यद्येवं तर्हि परस्पराश्रयबाधव्याधिं समाध-
त्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः
शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वे-
ऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्वं ज्ञप्तौ, आग-
मानित्यत्वस्य तीव्रादिधर्मोपेतत्वादिना सुगमत्वात्। तस्मा-
न्निवर्त्तकधर्मानुष्ठानवशादीश्वरप्रसादसिद्धावभिमतेष्टसिद्धि-
रिति सर्वमवदातम्"।

४नये नीतौ ५नीतिसाधने उपाये ६विष्णौ च "व्यपणी-
र्यामणीः श्रीमान् न्यायो नेता समीरणः" विष्णुस०

"प्रमाणानुग्राहकस्तर्को न्यायः" भा० तदनुगृहीतप्रमाणगम्यो भगवानपि न्यायशब्देन लक्षितलक्षणया प्रतिपाद्यते" आनन्दगिरिः। "न्यायप्रसूनाञ्जलिः" कुसुमाञ्जलिः "समस्तोपपत्तिलिङ्गप्रतिपादकं वाक्यं न्यायः" हरिदासः। निश्चितीयते निर्णीयतेऽनेन करणे घञ्। ७वेदार्थनिर्णयसाधने अधिकरणात्मके पदार्थे अधिकरणशब्दे १२६पृ०द्रष्टव्यम्। स च न्यायः पूर्वोत्तरवेदसम्बन्धो जैमिनिवेदव्यासाभ्यां बहुप्रकारो दर्शितः। ततएव संक्षिप्य माधवाचार्येण जैमिनीयन्यायमालायां वैयासिकन्यायमालायाञ्च प्रायशः सर्वे न्याया दर्शितास्ते च ततएवावगन्तव्याः। लोकशास्त्रप्रसिद्धदृष्टान्तभेदेषु ते च लौकिकन्यायतया प्रसिद्धाः। ते च नानास्थानात् संगृह्यात्र प्रदर्श्यन्ते

१ "अक्रे चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" इति न्यायः यत्रात्यायासेनाभीष्टसिद्धिर्जायते तत्र बह्वायाससाध्ये प्रेक्षावतां न प्रवृत्तिरिति प्रदर्शनायास्य न्यायस्य प्रवृत्तिः।

२ अजाकृपाणीयन्यायः अजाकृपाणपदे तत्स्थितक्रियाविशेषपरे अजागमनकालीनं कृपाणपतनं यथायस्मिकम्। तथा चायस्मिकाजागमनकालीनकृपाणपतनतुल्ये आयस्मिकानिष्टलाभस्थलेऽस्य न्यायस्य प्रवृत्तिः। [प्रवृत्तिः।

३ अजातपुत्रनामोत्कीर्तनन्यायः भाविसंज्ञया निर्देशेऽस्य

४ अधिकं तु प्रविष्टं न च तद्धानिरिति न्यायः यत्राधिकप्रवेशेऽपि प्रकृतस्य न हानिस्तत्रायं प्रवर्त्तते।

५ अध्यारोपन्यायः अध्यारोपो नाम वस्तुन्यवस्त्वारोपः यथाऽरजतभूतायां शुक्तौ रजतारोप इति वेदान्तिनः। ननु कथमवस्तुनोनिरात्मकस्य आरोपः क्वचिद्दृष्टपूर्वस्य सतः क्वचिदारोपदर्शनात् यथा जवायां दृष्टस्य लौहित्यस्य स्फटिके आरोपः इति चेत्सत्यं तत्सिद्धयेऽनुभवमात्रमपेक्ष्यते न तु पूर्वमनुभूतस्य तात्त्विकत्वमपि व्यतिरेकाभावात् सन्दिग्धविपर्ययेष्वपि अत्र स्थाणौ मे नरो वा राजपोवेति सन्देह आसीत् अस्यां रज्ज्वां सर्पोऽयमिति विपर्ययं आसीत् इत्यादिसंस्कारकार्यस्मृतिदर्शनात्। न च सन्देहविपर्ययोरेवेयं स्मृतिर्न तदर्थयोरिति वाच्यम् अर्थविरहिणोस्तयोः स्मृतिगोचरत्वायोगात्। तस्मात्तु स्मृतेरस्य पूर्वपूर्वभ्रमानुभूतस्याभ्युत्तरोत्तरारोपोपपत्तिः। भ्रमप्रवाहस्य च बीजाङ्कुरप्रवाहन्यायेनानादितयाऽन्योन्याश्रयानवस्थादिप्रसङ्गानवकाशात्। तथा च परमार्थसति सच्चिदानन्दब्रह्मणि वस्तुनि अवस्तुनोऽनिर्वचनीयस्याज्ञानतत्कार्याद्यारोपः। ब्रह्मतत्त्वसाक्षात्कारेण चाध्यारोपिताज्ञानादेर्निवृत्तिः यथा शुक्तिकादिज्ञानेन रजतादिनिवृत्तिः। अतएवाज्ञानादीनां ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या अध्यारोपितत्वं कल्प्यते इत्याकरे स्थितम्।

६ अन्धकूपपतनन्यायः अनेन यथा गन्तव्यमिति सत्पुरुषेणोपदिष्टस्तत्पथं परित्यज्यान्धो यथा कूपे पतति एवं वेदाद्युपदिष्टमार्गं परित्यजन्नरः नरकादौ पततीत्यस्य न्यायस्य तत्र प्रवृत्तिः"।

७ अन्धगजन्यायः अन्धैर्निर्धारितो गजः शा०त० अन्धगजः। तत्तुल्यन्यायः। यथा हि जन्मान्धा बहवः कश्चिदनन्धं पुरुषमूचुरस्मान् गजं ज्ञापयेति। स च गजशालायां नीत्वा कश्चित् कश्चित् गजावयवं केनचित् केनचित् पाणिभिस्तोषाच अयं गज इति ते चान्धास्तदुपदिष्टास्तदवयवं गजत्वेन निश्चित्य स्वस्वगृहे आगताः परस्परं विवदन्ते। तत्र कर्णसंगी सूर्पाकारो गज इति, शुण्डाग्रगी महासर्पतुल्य इति जङ्घाग्रगी स्तम्भतुल्य इति पुच्छग्राहकः स्थूलरज्जुसम इति शुण्डाग्रगी चतुरस्रसमो गज इति। एवमुपदिष्टाज्ञपुरुषबुद्धिवैचित्र्यात् ईश्वरस्य नानारूपकल्पनमित्यत्र न्यायावतारः। अन्धहस्तीत्यादिन्यायोऽप्यत्र प्रसरति।

८ अन्धगोलाङ्गूलन्यायः अन्धेन गृहीतं गोलाङ्गूलम् शा०त० अन्धगोलाङ्गूलतत्तुल्यन्यायः "तद्विदस्य मोक्षोपदेशात्" शा०सू० भाष्ये "यदि चाज्ञस्य यतो सुखमोक्षचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं स च श्रद्दधानतयाऽन्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत् तदतिरिक्तं चात्मानं न प्रतिपद्येत् तथा सति पुरुषार्थाद्विहन्येत अनर्थञ्च गच्छेत्" इत्युक्तम्। विवृतञ्चैतत् रत्नप्रभायां यथा "यथा कश्चित्किल दुष्टात्मा महारण्ये पतितमन्धं वस्तुनगरं जिगमिषुं बभाषे किमत्रायुष्मता दुःखितेन स्थीयते इति। स चान्धः सुखयाणीमाकर्ण्य तमाप्तं मत्वोवाच अहो भद्रागमेयं यदत्रभवान् दीनं मां स्वाभीष्टनगरं गन्तुमसमर्थं भाषते इति स च विप्रलिप्सुः दुष्टं गोयुवानमानीय तटीयलाङ्गूलमन्धेन ग्राहयामास उपदिदेश च एनमन्धम्, एष गोयुवा त्वामिष्टनगरं नेष्यति मा त्यजास्य लाङ्गूलमिति स चान्धः श्रद्धालुतया तदत्यजत् स्वाभीष्टमप्राप्यानर्थपरम्परां प्राप्तः तेन न्यायेनेति"। एवमन्यत्राप्येवं विषयेऽस्य प्रचारः।

९ अन्धघटकन्यायः अन्धस्य हस्ते पतितघटकः शा०त०। यथा दैवात् अन्धस्य हस्ते पतितघटकोऽन्धेन गृहीत इति लोकप्रसिद्धिः। एवं दैवादभीष्टलाभे कस्यचिदकारणस्यापि कारणत्वकल्पनं घुणाक्षरन्यायविषये इत्यस्य प्रवृत्तिः।

१० अन्धपरम्परान्यायः एकेनान्धेन यथोपदिष्टमन्धान्तरं पुनरन्यमन्धं तथैवोपदिशति इत्येवमन्धस्यान्धान्तरं प्रत्युपदेशपरम्परा न प्रामाणिकीति विवक्षायामस्य प्रवृत्तिः।

११ अपवादन्यायः अधिष्ठाने भ्रान्त्या प्रतीतस्य तदतिरेकेणाभावनिश्चयोऽपवादः, यथा स्थाण्वादौ भ्रान्त्या प्रतीतस्य पुरुषादेः स्थाण्वाद्यतिरेकेणाभावनिश्चयः। अयमेव बाधो विज्ञापनमिति चोच्यते स चायं बाधस्त्रिविधः श्रौतो यौक्तिकः प्रत्यक्षश्चेति। "अथात आदेशो नेति नेति" "नेह नानास्ति किञ्चन" इत्यादिश्रुतेर्ब्रह्मातिरिक्ताभावनिश्चयः श्रौतो बाधः। कनकाद्यतिरेकेण कटकाद्यभावनिश्चयवन्निश्चितकारणब्रह्मातिरेकेण निश्चितप्रपञ्चाभावं निर्द्धार्य दृश्यमानस्य मिथ्यात्वनिर्धारणात् प्रपञ्चस्य ब्रह्मभावात्मकत्वनिश्चयो यौक्तिको बाधः। इयं रज्ज्वाः न सर्प इत्युपदेशसहकृतप्रत्यक्षेणैव तत्त्वमस्यादिवाक्यजनितेन चिन्मात्रोऽहमिति प्रत्यक्षेण ब्रह्मात्मनिश्चयः प्रत्यक्षबाधः।

१२ अर्द्धजरतीयन्यायः इत्यर्थे ८। अयं च १७४पृ०दर्शितः।

१३ अयोऽवनिकानन्यायः अयोऽवनिकागमने यथेच्छायाश्चौरभलाभेन अन्यत्र गमनाकाङ्क्षा यथा न भवेत् एवं यत्रेष्टलाभादन्यत्रेच्छाभावस्तत्रायं प्रवर्त्तते।

१४ अश्मलोष्टन्यायः लोष्टस्य तूलाद्यपेक्षया काठिन्येऽपि अश्मापेक्षया मृदुत्वं यथा। तथा यत्र यदपेक्षया वैषम्यापेक्षं विवक्ष्यते तत्रास्य प्रवृत्तिः। अत्यन्तरत्वविवक्षायां तु पाषाणेष्टकान्यायोऽवतरति।

१५ असाधारण्येन व्यपदेशभवतीति न्यायः यथा गोतमोक्तशास्त्रे प्रमाणादिषोडशपदार्थप्रतिपादनेऽपि तदेकदेशे न्यायपदार्थस्य अनन्यशास्त्रापेक्षयाप्राधान्येन प्रतिपादनात् न्यायशास्त्रमिति तस्य संज्ञा एवमन्यत्र प्राधान्यविवक्षया तत्तत्संज्ञेति तत्रास्य प्रवृत्तिः।

१६ अहिकुण्डलन्यायः अहेः सर्पस्य यथा कुण्डलाकृतिवेष्टनं स्वाभाविकं तथा यस्य स्वाभाविकधर्मो व्यपदिश्यते तत्रास्य प्रवृत्तिः। [प्रसिद्धाभाषकं तत्रास्य प्रवृत्तिः।

१७ आपाणकन्यायः लोकप्रसिद्धकथनमाभाषकं तद्वद्यस्य

१८ आम्रवणन्यायः वने इतरवृक्षसत्त्वेऽपि आम्राणां बाहुल्ये यथा आम्रवणव्यपदेश एवमेकस्य प्राधान्ये "भूयस्त्वात्तद्वाद इति" न्यायेन तद्व्यपदेशो यत्र तत्रास्य प्रवृत्तिः।

१९ उदकनिमज्जनन्यायः सत्याभिसन्धस्य उदकनिमज्जनरूपे दिव्ये शोध्यस्य जलनिमज्जनसमये तत्स्थानान्निःक्षिप्तं शरमादाय तत्पतनस्थानादितोऽपरो नरो यद्यतिवेगेन शोध्यस्थानमागत्य तच्छिरोतिरिक्तं सुखनासिकाद्यवयवं न पश्यति तदा शुद्धिः मिथ्याभिसन्धस्य तद्दर्शनादशुद्धिरित्येवं दिव्ये प्रसिद्धिवत् यत्र सत्यासत्ययोर्ज्ञानं तत्रास्य प्रवृत्तिः।

२० उपयन्नपयन् धर्मीविकरोति हि धर्मिणमिति न्यायः यथा पूर्वस्य रूपरसादिरूपधर्मापरावृत्तौ रूपरसाद्यन्तरोत्पत्तौ च घटादेर्धर्मिणोविलक्षणतिरेवं यस्य धर्मिणः पूर्वधर्मस्यापगमे अन्यधर्मस्योत्पत्तिस्तत्रायं न्यायोऽवतरति।

२१ उपवासादरं भैक्ष्यमितिन्यायः भिक्षायाः क्लेशजनकत्वेऽपि उपवासस्याधिकदुःखप्रदस्यापेक्षया इष्टत्वेन यथा वरत्वं तथा क्लेशदायकतारतम्येन बहुदुःखदायकापेक्षया स्वल्पदुःखदायकस्य वरत्वं यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२२ उभयतः पाशारज्ज्वन्यायः रज्ज्वां यथा उभयपार्श्वे पाशसत्त्वे उभयपार्श्वयोर्गमने बन्धनम् एवमुपन्यस्तयोः प्रत्ययोर्दुष्टत्वे दोषोद्धारणाभावेन बद्धत्वाभावेऽस्य प्रवृत्तिः।

२३ उष्ट्रकण्टकभक्षणन्यायः उष्ट्रस्य यमीकण्टकवेधजनदुःखकालेऽपि यमीपत्रभक्षणजसुखलेशो यथा तथाभीष्टविषयोपार्जनदुःखकाले तदुपार्जितद्रव्यजसुखलेशो यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२४ एकं सन्वितृसतोऽपरं प्रच्यवत इति न्यायः यथा एकं कांस्यपात्रावयवभेदं सन्धातुमिच्छतोऽपरं तदवयवसत्यन्तानलसंयोगेन नष्टमिव प्रच्यवते एवमन्यत्र एकस्य सन्धानेच्छया कृतव्यापारभेदेऽन्यस्य यत्र प्रच्यवः, तत्रास्य प्रवृत्तिः। तथा एकामसिद्धिं परिहरतोद्वितीयासिद्धिप्रसङ्गः। यथोदाहृतं बौद्धाधिकारे उदयनेन यथा अङ्कुराद्यकर्तृकं शरीराजन्यत्वादित्यत्र शरीरीति विशेषणेन स्वरूपासिद्धिं परिहरतो बौद्धस्य व्याप्यत्वासिद्धिरापद्यते इत्यत्रेन"।

२५ एकवाक्यतापन्नानां समूयैकार्थप्रतिपादकत्वमिति न्यायः समूय मिलित्वा इतरसाचिव्येनेत्यर्थः। यथा प्रयाजादयस्तत्रवाक्यसमूयानां दर्शपूर्णमासाधकत्वेनैकवाक्यत्वमित्येवं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः।

२६ एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायः यथा हस्तिदर्शनात् तत्सम्बन्धिनो हस्तिपकादेः स्मरणमेवं शब्दज्ञानात् वृत्तिसम्बन्धेन शब्दसम्बन्धिनोऽर्थस्य स्मरणमित्यादि यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२७ एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायः एकाकिनी हेत्वादिचतुष्कहीना परार्थानुमाने हि प्रतिज्ञादिपञ्चकेनैवार्थसिद्धिः न केवलप्रतिज्ञामात्रेणार्थसिद्धिः तथात्वे सर्वत्र सर्वसिद्धिप्रसङ्गात्। प्रतिज्ञादिपञ्चकञ्चानुपदरुक्तम्। न हि प्रतिज्ञामात्रेणार्थसिद्धिरिति न्यायोऽप्येतादृशएव शब्दमात्र भेदः।

२८ औपाधिकाकाशभेदन्यायः यथा औपाधिकाकाशगोचरं ज्ञानं सविशेषणे हीति न्यायेनोपाधिभेदविषयं तथा जीवब्रह्मभेदविषयं प्रत्यक्षादिकं तदुपाधिभेदविषयमित्येवं यत्र विवक्ष्यते तत्रायं प्रवर्त्तते। "घटसंहत आकाशे नीयमाने यथा पुनः। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः" इति श्रुत्युक्तिस्तैत्न्यायमूलिका।

२९ कण्ठचामीकरन्यायः चामीकरशब्दः चामीकरनिर्मितभूषणपरः। तद्धि यथा कण्ठगतमपि चिरप्राप्तमपि विस्मृतं सत् दुःखाकरोति आप्तोपदेशात् प्राप्तमिव भवत् सुखाकरोति न तु वस्तुतोऽज्ञानातिरिक्ता तस्य प्राप्तिरस्ति प्राप्तत्वात्। एवं यस्य प्राप्तस्य नष्टभ्रान्त्या दुःखं सदुपदेशेन तज्ज्ञानाच्च सुखं यत्रोपदिश्यते तत्रास्य प्रवृत्तिः। तथा जीवस्य स्वतःसिद्धब्रह्मात्मकस्य अज्ञानादिदोषात् तद्विस्मरणं तत्त्वमस्यादिवाक्यजसाक्षात्कारेण अप्राप्तस्य प्राप्तिरिव भवतीत्युपचर्यते।

३० कदम्बगोलकन्यायः कदम्बगोलकस्य गोलाकारकदम्बस्य सर्वावयवेषु यथा युगपत् पुष्पोद्गमः एवं सर्वप्रदेशेषु युगपत् यत्र प्रसरस्तत्रास्य न्यायस्य प्रवृत्तिः। "कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मये" भाषा०।

३१ कफोणिगुड़न्यायः कफोणौ गुड़ाभावेऽपि तदाशया यथा लेहनमेवं यत्र वस्त्वसद्भावेऽपि तत्प्रत्याशया व्यापारभेदस्तत्रास्य प्रवृत्तिः।

३२ करकङ्कणन्यायः कङ्कणं करभूषणमित्यमरोक्तेः कङ्कणशब्दस्यैव करभूषणवाचित्वेऽपि तत्पूर्वं करशब्दप्रयोगे यथा प्रयोगकाले तस्य करसम्बन्धिता द्योत्यते एवमन्यस्यापि तत्काले तत्सम्बन्धद्योतनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः।

३३ काकतालीयन्यायः इवार्थे छ। काकतालीयशब्दे १८४१पृ० दृश्यः। अत्रायं विशेषः अतर्कितेष्टलाभे अतर्कितानिष्टलाभे चायमवतरति तथा हि काकस्याम्रफलस्याग्रे पतनात् काकस्योपभोगलाभः। एवं तत्फलस्य शिरसि पतनात् मरणमपि सम्भवति। तत्रानिष्टलाभे "फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति" वेणीस०। इष्टावाप्तौ "यत्तया मेलनं तत्र लाभो मे यत्र सम्भवः। तदेतत् काकतालीयमवितर्कितसम्भवम्" चन्द्रालोकः। "पतत् तालफलं यथा काकेनोपभुक्तमेवं रहोदर्शनक्षुभितहृदया तन्वी मया भुक्तेति" कुवलयानन्दः।

३४ काकदध्युपघातकन्यायः यथा काकेभ्यो दधि रक्ष्यतामित्यादौ उपघातकमात्राभिप्रायत्वेन काकशब्दस्य दध्युपघातकमात्रे लक्षणा एवं यत्र तात्पर्यवशेनेतरार्थपरत्वं तत्रास्य प्रवृत्तिः। तदुक्तमभियुक्तैः "काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि देशितः। उपघातप्रधानत्वात् न श्वादिभ्योऽपि रक्षति ?"।

३५ काकदन्तगवेषणान्यायः काकस्य दन्ताः सन्ति नवा तेषां शौक्ल्यं नवेत्यन्वेषणं यथा निष्फलं तथा यस्यान्वेषणं निष्फलं तत्रास्य प्रवृत्तिः।

३६ काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम् इति न्यायः अत्यन्तनिकृष्टस्यातितुच्छस्यापि दुर्लभत्वेऽयं न्यायः प्रवर्त्तते।

३७ काकाक्षिगोलकन्यायः एकस्य काकचक्षुषः प्रयोजनवशाद्यथा उभयगोलके सञ्चारः तथा एकस्य पदार्थस्योभयत्र सम्बन्धविवक्षायामस्य प्रवृत्तिः।

३८ कारणगुणप्रक्रमन्यायः कारणगुणाः सजातीयगुणान् कार्ये आरभन्ते यथा तन्तुरूपादयः स्वकार्ये पटे सजातीयरूपादीनारभन्ते न विजातीयानेवं यत्र कारणगुणानुगमस्तत्रास्य प्रवृत्तिः।

३९ कारयितुः कर्त्तृत्वन्यायः यः कारयति स करोत्येव यथा राजा भटादिभिर्युद्धं कारयन् तत्कर्त्तेति व्यपदिश्यते युद्धफलविजयराज्यलाभादेस्तद्गामित्वात्। तथा यत्र विवक्षा तत्रास्य प्रवृत्तिः।

४० कार्येण कारणसंप्रत्ययन्यायः कार्येण धूमादिना यथा वह्न्यादेरनुमानरूपः संप्रत्यय एवं यत्र कार्येण कारणसंप्रत्ययस्य विवक्षा तत्रास्य प्रवृत्तिः।

४१ कुशकाशावलम्बनन्यायः नद्यादौ पतितस्य सन्तरणानभिज्ञस्य यथ कुशकाशावलम्बनं निरर्थकमेवं प्रबलयुक्तिषु निराकृतासु दुर्बलयुक्त्यावलम्बनं निरर्थकमित्येवमवलम्बनस्य निरर्थकत्वविवक्षायामस्य प्रवृत्तिः।

४२ कूपखानकन्यायः कूपखानकस्य कूपखननकाले गात्रे संलग्नं

पङ्कं कूपोत्थितजलेन यथापयाति एवं विग्रहावच्छिन्नेश्वरभेदबुद्धिजनकोदोषस्तदुपासनजनकसुकृतविशेषजेनाहैतबोधेन समूलं निवर्त्य तेत्येवं विवक्षायामस्य प्रवृत्तिः ।

४१ कूपमण्डूकन्यायः ससुद्रमण्डूकं कथञ्चित्तीरसमीपस्थकूपं गतं कूपस्थमण्डूकः पप्रच्छ कुत आगतोभवानिति स च समुद्रादिति प्रत्युक्तवान् । पुनः कूपमण्डूकः कीदृशः समुद्र इति पप्रच्छ तेन चातीव महानिति प्रत्युक्तं तत्किं कूपसदृश इत्युक्ते तेन प्रत्युक्तं नहि नहि नास्ति तत्तुल्योऽनयः सहि सरितां पतिरनवगाह्यगाम्भीर्योऽलङ्घ्यपारोऽतीव महत्तम इति । कूपमण्डूकस्तु कूपात् महान् नास्ति त्वं तु मिथ्यैव प्रलपसीत्युक्तवान् । समुद्रभेकस्तु तत् श्रुत्वा मनसा तत्तपसहासेति लोके गाथा गीयते तथा च यथा समुद्रमज्ञात्वा तन्महिमानं निराकुर्वन् कूपमण्डूक उपहास्यतां प्राप्तस्तथा परसिद्धान्तानभिज्ञस्तदुदूषणाय प्रवर्त्तमान उपहास्यतां गच्छतीति विवक्षायामस्य प्रवृत्तिः ।

४४ कूपयन्त्रघटिकान्यायः कूपात् गभीरादपि यन्त्रेण यथा घटिका उत्तोल्यते एवं अतिदुर्बोधत्वेन गम्भीरादपि शास्त्रात् उपदेशादिरूपयन्त्रेण सारोद्धरणं यत्र विवक्षते तत्रास्य प्रवृत्तिः ।

४५ कूर्माङ्गन्यायः कूर्मः स्वेच्छया यथा निजाङ्गस्य सङ्कोचविकाशौ करोति एवं यस्येच्छावशात् स्वोपाध्यङ्गानकार्यजातस्य स्वोपाधौ सङ्कोचविकाशकारित्वमित्येवं विवक्षाविषयेऽस्य प्रवृत्तिः "यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः" गीता ।

४६ कैसुतिकन्यायः यत्र दुर्बोधस्य दुःसाध्यस्य सुखेन बोधसाधनादि तत्र सुबोधस्य सुसाध्यस्य नितरां सिद्धिरित्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः ।

४७ कोद्रपानन्यायः कोद्रपानं दिव्यभेदः । तत्र यथा सर्वदिव्यसाधारणधर्मपूर्वदिनोपवासवतोऽभिशस्तस्य मिथ्यावादिनः प्रभूतभयजलपानकाले कश्चित् सुखविशेषो भवति शास्त्रनिर्दिष्टातधिकाले तु महद्दुःखं तथा हरिहरादिष्वेकस्मिन् भक्तिव्याजेनेतरनिन्दां कुर्वतो निन्दाव्यसनिनो यद्यपि तत्काले कश्चित् सुखविशेषः स्यात् तथापि निन्दाजन्यदुरितपरिपाककाले कुम्भीपाकादिजन्यं घोरतमं दुःखं भवतीत्यस्य विवक्षायामस्य न्यायस्य प्रवृत्तिः ।

४८ क्रिया हि विकल्प्यते न वस्तुनि न्यायः क्रिया हि कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यत्वात् विकल्प्यते न तु वस्तु एवं नैवं वेति विकल्प्यते । तदेतदुक्तं शा० भाष्ये "कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यं लौकिकं वैदिकञ्च कर्म यथा अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति उदिते जुहोति अनुदिते जुहोति" रथेन पङ्गुगमनवद्वा गच्छति न गच्छति वेति । न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते विकल्पना हि पुरुषबुद्धिसापेक्षा न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं किं तर्हि वस्तुतन्त्रमेव न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्योवेति तत्त्वज्ञानं भवति तत्र पुरुषो वान्योवेति मिथ्याज्ञानं स्थाणुरेवेति तत्त्वज्ञानम् एवमन्यत्राप्यूह्यम् ।

४९ खले कपोतन्यायः "दृष्टा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनोभवन्ति" इत्युक्तरीत्या यत्र पदार्थानां युगपदन्वयस्तत्रास्य प्रवृत्तिः ।

५० गड्डलिकाप्रवाहन्यायः गड्डलिकानामवीनां संघाटे का चेत् गन्धादौ पतति तदा तत्सङ्घान्तर्गताः सर्वेऽपि वार्यमाणा अपि तत्र पतन्तीति लोकप्रसिद्धा यत्र वार्यमाणानामपि अनिष्टमार्गे धावनं तत्रास्य प्रवृत्तिः ।

५१ गुडजिह्विकान्यायः यथा तिक्ततामिच्छा निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपं दत्त्वा पित्रादिस्तं निम्बं पाययति एवमर्थवादवाक्यानि बहूनावबाध्य कर्मण्यप्रवर्त्तमानं पुरुषं स्वर्गाद्यादिकं भावयित्वा प्रवर्त्तयन्ति । फलश्रुतिरपि रोचनार्था तदुक्तं भग० त० भाग० ११स्क० "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" "फलश्रुतिरियं नृणां श्रेयो रोचनं परम् । श्रेयोविमूढया प्रोक्ता यथा भैषज्यरोचनम्" अस्य तात्पर्य्यं तत्रैव "पिब निम्बं प्रदास्यामि खलु खण्डकलङ्कुकान् । पित्रैवमुक्तः पिबति तिक्तमप्यतिबालकः" । तत्र यथा निम्बादिपानस्य न खलु खण्डादिलाभएव प्रयोजनं किन्त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्माणि विधत्ते" ।

५२ गोबलीवर्द्दन्यायः बलीवर्द्दस्य गोविशेषत्वेऽपि बलीवर्द्दस्य झटिति गोत्वेन बोधनार्थं यथा प्रयोगः तथाऽन्ययोः सामान्यविशेषरूपयोर्झटिति बोधनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः । एवं गोडन्यायोऽप्येतादृशार्थेऽवतरति ।

५३ भट्टकुटीप्रभातन्यायः तन्त्रवा० २७८।१० अस्य विवरणम् ।

५४ घुणाक्षरन्यायः घुणः कीटभेदः तेन यदृष्टं वंशस्य खोदने कृते ततो रेखासन्निवेशभेदेन दैवाद् यथाऽक्षराकारनिष्पत्तिः एवमन्यार्थप्रवृत्तस्य दैवादन्यार्थस्य यत्र निष्पत्तिर्विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५५ चतुर्वेदिन्यायः यथा गोहिरण्यादिरूपं बहुधनं चतुर्वेदविदे मया देयमिति कस्यचित् दातुर्वचनं श्रुत्वा कश्चित् मूढः वेदाश्चत्वार इत्यहं जाने मह्यमिदं सर्वं धनं देयमिति वदन् तद्धनं न लभते प्रत्युत उपहसनीयश्च भवति एवं सच्चिदानन्दरूपं प्रत्यगभिन्नं ब्रह्मेति शब्दमात्राभिज्ञस्तदर्थशाब्दबोधमात्रशाली वा यस्तत्त्ववित्त्वाभिमानेन तत्त्ववित्तां गतिं वाञ्छति स न तां प्राप्नोति प्रत्युत उपहासश्च भवति । तथा च वेदसङ्ख्यामात्रज्ञाने तद्विभेदस्वरूपार्थयोरज्ञाने यथा तदभिज्ञयोर्व्यवस्थानपूजामानाद्याभः तथा सच्चिदानन्दादिशब्दमात्रज्ञाने तदर्थस्य साक्षात्कारामावे न ब्रह्मभावापत्तिस्तथा च तत्त्वप्राप्तिरित्येवं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५६ चालनीयन्यायः चालनीभ्रामणे तत्स्थतण्डुलानां स्वच्छिद्रद्वारा सर्वेषां यथा पतनम् । एवं कश्चित्स्थितवस्तूनां सर्वेषां स्वस्वादिबहिर्भावो यत्र सम्भाव्यते तत्रास्य प्रवृत्तिः । यथा व्यापकतावच्छेदे साध्यप्रतियोगिकाभावप्रमेये महानसीयवह्न्यधिकरणे पर्वतीयवह्न्यभावस्य एवं पर्वतीयवह्न्यधिकरणे महानसीयवह्न्यभावस्य च सत्त्वेन वह्निप्रतियोगिकाभावस्य तत्तदधिकरणे सत्त्वात् सर्वेषां वह्नीनां व्यापकतावच्छेदबहिर्भावः ।

५७ चौरापराधेन माण्डव्यदण्डन्यायः चौरस्यापराधेन यथा माण्डव्यस्य शूलारोपणं पुराणप्रसिद्धम् । एवमेकस्यापराधेनान्यस्य दोषारोपणं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५८ जलतम्बिकान्यायः यथा पङ्कलिप्ता तुम्बिका नद्यादौ निमज्जति पङ्कलेपापगमे च उन्मज्जति तद्गतिप्रतिरोधकविरहादेवं जीवः देहादिसम्बन्धहेतुमलादौ लीने सति चालोकाकाशे स्वयमेव गत्वा तिष्ठति तादृशएव तस्य मोक्ष इति दिगम्बरमते स्थितम् ।

५९ जलानयनन्यायः यथा जलमानीयतामित्युक्ते अनुक्तमपि तत्रानयनं नान्तरीयकतया प्रतिभाति एवमेकस्योक्तौ तदाधारादेरनुक्तस्यापि अन्यस्य यत्र प्रतीतिस्तत्रास्य प्रवृत्तिः ।

६० तण्डुलभक्षणन्यायः यथा चौरस्य तण्डुलभक्षणरूपदिव्ये शीघ्रमेव लोहितादिनिष्ठीवनं दृश्यते "लोहितं दृश्यते यस्य मुखे हस्तश्च शीर्यते । गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत्" पितामहेन तस्य सद्योऽनिष्टस्योक्तेस्तथा यत्र सद्योऽनिष्टसम्भवस्तत्रास्य प्रवृत्तिः ।

६१ तप्तपरशुग्रहणन्यायः सत्याभिसन्धस्य मोक्षो मिथ्याभिसन्धस्य बन्ध इति विवक्षायामस्य न्यायस्य प्रवृत्तिः । तप्तपरशुग्रहणञ्च दिव्यभेदः । तथा हि चोरत्वसन्देहे निर्णयार्थं तादृशसन्देहविषयं पुरुषमुद्दिश्य पञ्चाशत्पलसम्मितमस्त्रिरहितमष्टाङ्गुलायामं लोहपरशुमग्नौ प्रक्षिप्याग्निवर्णं कृत्वा अष्टपलदधिपूर्णाञ्जलिरतयोः शोध्यस्य हस्तयोर्विधिना प्राङ्विपाको निःक्षिपेत् स चेदनृतवादी नाहं चौर इति तदा तादृशपरशुग्रहणे दह्यते यस्तु नाहं चौर इति सत्यवादी स तादृशपरशुग्रहणेऽपि न दह्यते तत्र दाहाभावप्रयोजकं नाहं चौर इति विषयस्य सत्यत्वं दाहप्रयोजकं तु तद्विषयस्यानृतत्वम् । तथा शुद्धौ प्रयोजकमहं ब्रह्मेति वाक्यविषयस्य सत्यत्वं बन्धप्रयोजकं तु नाहं ब्रह्मेति वाक्यविषयस्यानृतत्वम् । अयमेव न्यायः छा० उ० श्रुत्या प्रतिपादितो यथा "तद्यथा पुरुषं सोम्योत हस्तगृहीतमानयत्यपहार्षीत् स्तेयमकार्षीत् परशुमग्नौ तपतेति स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते गोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते अथ यदि तस्याकर्त्ता भवति ततएव सत्यमात्मानं कुरुते सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते स यथा तत्र नादह्यतैतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि श्वेतकेतो" इति ।

६२ तप्तमाषकोद्धरणन्यायः तप्तपरशुग्रहणन्यायविषयेऽस्य प्रवृत्तिः तप्तमाषकग्रहणमपि दिव्यभेदः । तत्रापि अतितप्तत्वादितः सौवर्णमाषकोद्धरणे शोध्यस्य करे स्फोटाद्यभावे शुद्धिः अन्यथा अशुद्धिः ।

६३ तुष्यतु दुर्जन इति न्यायः यत्र प्रतिवाद्युक्तपक्षं दुष्टमपि वादिना प्रौढिवादेन अङ्गीकृत्यापि दूषणान्तरस्य दानं तत्रास्य प्रवृत्तिः ।

६४ तृणजलौकान्यायः यथा जलौका तृणान्तरमवलम्ब्यैव पूर्वमाश्रितं तृणं त्यजति तथा जीवः स्वाविद्याकामकर्मवासनादिभिर्देहान्तरसत्त्वाद्यैव पूर्वं देहं त्यजतीति विवक्षायामस्य प्रवृत्तिः ।

६५ तृणारणिमणिन्यायः तार्णवह्निं प्रति तृणस्य, आरणेय

वह्निं प्रति अरण्योः मणिजन्यवह्निं प्रति मणेश्च कारणत्वं न तु वह्नित्वावच्छिन्नं प्रति तृणादेः कारणत्वं परस्पर-व्यभिचारात्। एवं यत्र कार्य्यकारणभावबाहुल्यं कार्य्यतावच्छेदकं कारणतावच्छेदकञ्च नाना तत्रास्य प्रवृत्तिः।

६६ दग्धपटन्यायः पटस्य दग्धत्वेऽपि यथा पूर्वाकारेणावस्थानं गृह्यते एवं यत्र वस्तुनो दाहेऽपि तदाकार-प्रतीतिस्तत्रास्य प्रवृत्तिः एवं दग्धपटन्यायोऽप्येवं विषयः।

६७ दग्धबीजन्यायः दग्धस्य बीजस्य यथा नाङ्कुरोत्पादकता एवमविवेकनाशे न संसारवृक्षप्ररोह इत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

६८ दण्डचक्रन्यायः दण्डचक्रसूत्रसलिलादेर्यथा घटत्वादेकधर्मावच्छिन्नं प्रति कारणत्वमेवं विवक्षायामस्य प्रवृत्तिः।

६९ दण्डापूपन्यायः दण्डस्यासुना भक्षणे प्रतीते तत्संलग्नापूपस्य भक्षणमर्थात् यथा प्रतीयते एवं यत्र इन्धारे कस्मिंश्चिदर्थे कृतेऽन्यस्य सुकरस्य कृतत्वमर्थात् सिद्धं प्रतीयते इत्यस्य विवक्षायामस्य प्रवृत्तिः।

७० देवदत्तापुत्रन्यायः पुत्रस्य मातापितृसम्बन्धित्वेऽपि मातुः प्राधान्यविवक्षायां यथा देवदत्तापुत्र इत्युच्यते तथाऽन्यत्र यत्र मातुः प्राधान्यविवक्षा तत्रास्य प्रवृत्तिः। पितुः प्राधान्ये देवदत्तपुत्र इति व्यपदेशः। अतएव यजुर्वेदवंशकीर्त्तने स्त्रीप्राधान्येनैव निर्देशो यथा "अथ वंशः तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवी पुत्राद्वात्सीमाण्डवीपुत्रः इत्यादि" शत०ब्रा०१४।९।४।२०।

७१ धटारोहणन्यायः धटारोहणं तुलारोहणं दिव्यभेदः। तत्र सत्याभिसन्धस्य शुद्धिः मिथ्याभिसन्धस्याशुद्धिः तथा हि "तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः। समावा हीयमानो वा न विशुद्धो भवेन्नरः" इत्युक्तदिशा शुद्धाशुद्धी ज्ञेये। एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

७२ धर्माधर्मग्रहणन्यायः धर्माधर्ममूर्त्तिग्रहणरूपादिव्ये सत्याभिसन्धस्य यथा धर्ममूर्त्तिग्रहणं मिथ्याभिसन्धस्याधर्ममूर्त्तिग्रहणम् ताभ्यां च जयपराजयौ यथा भवतः। एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः। तच्च दिव्यं पितामहेनोक्तं यथा "राजतं कारयेत् धर्ममधर्मं सीसकायसम्। लिखेद्भूर्ज्जे पटे वापि धर्माधर्मौ सितासितौ। अभ्युक्ष्य वस्त्रगव्येन गन्धमाल्यैः समर्चयेत्। सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पभृत्। एवंविधावथानेष्य पिण्डयोस्तौ निधापयेत्। गोमयेन मृदा वापि पिण्डौ कार्य्यौ समन्ततः। मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ। आवाहयेत् ततो देवान्लोकपालांश्च पूर्ववत्। धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं ततः। यदि पापविसक्तोऽहं धर्मस्त्वायातु मे करे" "अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः। धर्मं गृहीते शुद्धिः स्यादधर्मे तु स हीयते"।

७३ नष्टाश्वदग्धरथन्यायः इत्यं लोकप्रसिद्धिः द्वौ हि रथिनौ कञ्चिद्ग्रामं प्रविश्य रथाभ्यामवतीर्य्यौषधं मोचयित्वा खट्वायां निविष्टौ दैवेन तदानीं दन्दह्यमाने तस्मिन् ग्रामे तयोरेकः पश्चादश्वान्निःसारयिष्यामीति धिया रथमादौ निःसारितवान् अपरस्त्वश्वान्, तावता तस्मिन्स्थले दग्धे एकस्याश्वानष्टा द्वितीयस्य रथोदग्धः तौ चान्योन्यापेक्षया एकं रथं कृत्वा यथेष्टदेशं यथा प्रजग्मतुस्तथार्थवादविधिवाक्ये प्रधानाङ्गवाक्ये चेतरेतराकाङ्क्षयैकवाक्यतां प्राप्य प्रवृत्त्यादिकं जनयतः।

७४ न हि करकङ्कणदर्शनायादर्शापेक्षेति न्यायः यथा प्रत्यक्षबोध्यं करे स्थितं कङ्कणं प्रत्यक्षेणैव गृह्यते न तद्दर्शनायादर्शापेक्षा एवं प्रत्यक्षसामग्र्यसत्त्वे तयैव पदार्थप्रतीतिर्नानुमित्यादिसामग्र्यपेक्षेति विवक्षायामस्य प्रवृत्तिः "न हि करिणि दृष्टे चीत्कारेण तमङ्गमिमतेऽनुमातारः" वाचस्पत्युक्तमेतन्न्यायमूलकम्। अनुमित्यायां तु तदपेक्षा "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति वाचस्पत्युक्तेः।

७५ न हि त्रिपुत्रोद्विपुत्रः कथ्यते इति न्यायः त्रित्वस्य द्वित्वव्यापककत्वेऽपि वाक्यस्य सावधारणत्वात् पुत्रत्रयवतः पुत्रद्वयवत्त्वेऽपि न तस्य द्विपुत्रशब्दवाच्यता न्यूनसंख्याव्यवच्छेदकत्वेन त्रिशब्दस्य न यथा द्विपुत्रवाचकतेत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

७६ न हि दृष्टेऽनुपपन्नं नामेति न्यायः न प्रत्यक्षविषये प्रमाणान्तरान्वेषणमिति यत्र विवक्षा तत्रास्य प्रवृत्तिः तथा हि प्रत्यक्षस्य सर्वप्रमाणबाधकत्वात् अनुपपत्तेरर्थापत्तिरूपतया व्यभिचारानुमितिरूपतया वा प्रत्यक्षस्य बाध्यत्वात् प्रत्यक्षविषये विरोधिन्या अनुपपत्तेर्न सम्भवः।

७७ न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते किन्तु विधेयं स्तोतुमिति न्यायः निन्दार्थवादस्य तदितरत्र प्राशस्त्यविधानार्थमेव प्रवृत्तिर्न तु तस्य निन्दार्थं निन्दायां प्रयोजनाभावादित्येवं मीमांसायां लोके च प्रसिद्धम्।

७८ निम्नगाप्रवाहन्यायः नदीप्रवाहो हि यां दिशं स्वभावतो गच्छति ततोऽनत्र तस्य नयने महाप्रयासेऽपि न

बन्धव एवं जन्मान्तरीयसंस्कारवशाद्यत्किञ्चीशविषये ध्यानाद्यात्मकचित्तप्रवाहस्ततोऽन्यत्र नयने महाप्रयत्नस्यापि वैफल्यम् इत्येवं विवक्षायामस्य प्रवृत्तिः

७९ नृपनापितन्यायः इत्यं हि लौकिकी गाथा कस्यचिन्नृपस्य भृत्यो नापितः कश्चित्, प्रातः समस्तनगरमन्विष्य प्रातिरमणीयतमो बालो मे दर्शनाय त्वयाऽऽनेतव्य इति, नृपेणाज्ञप्तः प्रातस्तस्मै सर्वं पुरमन्विष्य दृष्टापि च तत्र तत्प्रातिरमणीयतमान्बालान् स्वपुत्रवल्लालनमत्वा तमेव राजवेश्मनि नीत्वा निवेदयामास स्वामिन्नानीतोऽयं द्वितीय इव रतिपतिरतिमनोज्ञाकृतिर्बाल इति राजा च तस्योपशान्तानलाङ्गाराभं स्वल्पाटकार्थं स्थूलस्वोदरं क्षयप्रस्खलद्बाहुजङ्घमालोक्य उपहासमयं मे खलु कृतवानिति मत्वा चुकोप उवाच च अरे लालम् किमिदमुपहसनं क्रियते इति। नापितश्च कुपितं नृपं ज्ञात्वा कृताञ्जलिर्भूत्वोवाच राजेन्द्रमौले! तव चरणस्तुपालभे नायमुपहासः किन्तु मे मनसीत्थमेव निश्चयो नास्येदृशश्चिन्तोक्यां तव पुत्रौ मु का कथेति राजा च सत्यमेतादृश्येव स्नेहातिशयवशंवदस्य चित्तस्य दशेति मत्वा कोपं तत्याजेति। तथा च यथाऽतिक्षुद्रेऽपि पुत्रे रागातिशयवशात्तापितस्य सर्वोत्तमत्वधीस्तथा अन्धियां केषाञ्चिज्जन्मान्तरीयसंस्कारप्रयुक्तरागातिशयवशात् कस्मिंश्चिदतिक्षुद्रेऽपि देवे सर्वोत्तमत्वधीः परित्यज्य च हरिहरादीन्सदुपासने प्रवृत्तिरित्येवं विषयेऽस्य प्रवृत्तिः

८० पङ्गुप्रक्षालननन्यायः "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इत्युक्तदिशा पङ्कलेपने प्रक्षालनमपेक्ष्य पङ्कस्पर्शनमेव न कर्त्तव्यमिति लोकप्रसिद्धिवदन्यत्रापि अनिष्टसाधनस्य कारणान्तरेण निवारणमपेक्ष्य अनिष्टसाधनमेव न कर्त्तव्यमिति यत्र विवक्षा तत्रास्य प्रवृत्तिः।

८१ पञ्जरचालननन्यायः यथा दशभिः पञ्जरस्थपक्षिभिः स्वस्वयत्नैरेकं पञ्जरे क्रियाजातं तस्य चालनं तिर्यग्गूर्ध्वनयनं च क्रियते तथा दशभिरिन्द्रियैरेकं प्राणनरूपां क्रियाजातं देहचालनं क्रियते इति सांख्ये स्थितम्।

८२ पञ्जरसङ्क्रमणन्यायः पञ्जरस्था विहगास्तुल्या यथेष्टसत्त्वा यथा देशान्तरं गच्छन्ति तथा जीवः बन्धनान्मुक्त ब्रह्मलोके तिष्ठतीति जैनमते स्थितम्।

८३ पाषाणेष्टकान्यायः यथा मृदादपेक्षया कठिनाया अपि इष्टकायाः पाषाणापेक्षयामृदुत्वम् एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

८४ पिष्टपेषणन्यायः पिष्टस्य पुनःपेषणं यथा निरर्थकम् एवं कृतस्य करणं इत्येवं विवक्षायामस्य प्रवृत्तिः। तथाचोक्तं "कृतस्य करणं नास्तीति"।

८५ पुत्रलिप्सया देवं भजन्त्या भर्त्तापि नष्ट इति न्यायः अभीष्टान्तराशया व्यापारवतस्तन्मूलं यत्र नश्यति तत्रास्य प्रवृत्तिः तथा च इष्टमिष्टवतोमूलं विनष्टमिति न्यायविषयेऽस्य प्रवृत्तिः।

८६ मृपाण्डकन्यायः सितादिनानाद्रव्यैर्मिलितैर्यथा एकोऽद्भुतरसोनिष्पाद्यते तथा यत्र अनेकसाधनैर्मिलद्रूपः पदार्थो जायते तत्रास्य प्रवृत्तिः। यथा विभावानुभावादिभिः शृङ्गारादिरसाभिव्यक्तिः एवमन्यत्रापि!

८७ प्रासादवासिन्यायः एक एव देवदत्तः प्रासादस्योपर्यधस्ताच्च कालभेदेन वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते तथाऽन्यस्य प्राधान्यधर्मेण व्यपदेश विवक्षायामस्य प्रवृत्तिः।

८८ फलवद्वृक्षकारनन्यायः यथातिमधुरपक्वफलनमितशाखोऽतिसौरभ आम्रवृक्षः स्वसमीपस्थं छायार्थिनं जनं फलं परिमलं चाप्रार्थितमपि ददातीति तथा विवक्षायामस्य प्रवृत्तिः।

८९ बहुराजपुरनन्यायः एकस्मिन् पुरे यदा बहवो राजानस्तदा तेषामैकमत्याभावेन यथा प्रजानां क्लेशस्तथा एकस्मिन् देहे नानेन्द्रियाणां कर्त्तृत्वे स्वीक्रियते मिथोविरोधान्नैकमपि सिध्येत्। तथा हि यदा चक्षुर्दर्शनाय प्रवर्त्तमानं भवति तदा अन्यानि च इन्द्रियाणि स्वस्वक्रियानिर्वाहोद्यतानि भवन्ति चेत्तदा दर्शनादि नैकमपि न जायते एवं विवक्षायामस्य प्रचारः।

९० बहुदृष्टाकृष्टमृगनन्यायः यथा तुल्यबलैः बहुभिर्दृष्टैराकृष्टस्य मृगस्य न नियतैकत्र स्थितिरेवं यत्र बहूनां परस्परविरोधस्तत्र नैकस्य स्थिरतेत्येवं विषयेऽस्य प्रवृत्तिः।

९१ बहुनामनुपहोनाथ इति न्यायः अनुपहः साहाय्यं न्यायः न्यायाच्चीतेरनपेतोऽर्थस्तदुपेतः कार्यसाधक इति यावत् यथाहुः "बहूनामप्यसाराणां मेलनं कार्यसाधकम्। तृणैः संपाद्यते रज्जुस्तया नागोऽपि बध्यते" इति तथा विवक्षायामस्य प्रवृत्तिः।

९२ बिलवर्त्तिगोधान्यायः बिले गर्त्ते वर्त्तमानायाः गोधायाः विभजनं विभाजकधर्मेण निर्देशो यथा न सम्भवति तस्य अदृष्टत्वादेवमज्ञातपरसिद्धान्तस्य तद्दूषणाय प्रवृत्तिर्भवतीत्येवं विवक्षायामस्य प्रवृत्तिः।

९३ ब्राह्मणग्रामन्यायः यथा ग्रामे अनेकेषु वर्णेषु वसत्स्वपि ब्राह्मणानां बाहुल्ये ब्राह्मणग्राम इत्युच्यते एवं विवक्षायामस्य प्रवृत्तिः। एवं मल्लग्रामन्यायादयोऽपि प्राधान्यविवक्षायां "प्रधान्येन व्यपदेशा भवन्तीति" न्यायविषये प्रवर्त्तन्ते

९४ ब्राह्मणश्रमणन्यायः श्रमणो बौद्धयतिः तस्याशास्त्रीयविधिना त्यक्तशिखासूत्रकक्षादेरस्यकृतित्वादिकर्मणश्च तदानीं ब्राह्मणत्वाभावेऽपि यथाभूतपूर्वेण ब्राह्मणत्वेन निर्देशस्तथा यत्र भूतपूर्वतया निर्देशस्तत्रास्य प्रवृत्तिः।

९५ भिक्षुपादप्रसारणन्यायः यथा कश्चिद्भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद्धनिनो गृहे प्रविश्य युगवत् स्वाभीष्टलाभं मन्यमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयसत्वाद् सर्वं स्वाभीष्टं संपादयिष्यामीति धिया स्वल्पामपि भिक्षां वस्तु मन्यमानः पश्चात् क्रमेण स्वाभीष्टं सम्पादयति एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९६ मज्जनोन्मज्जनन्यायः यथा नद्यादौ पतितः सन्नरश्चानभिज्ञः कदाचिन्मज्जति कदाचिदुन्मज्जति। एवं दुष्टवादिना स्वपक्षसमर्थनाय यतमानेन प्रबलयुक्तिमनासाद्य क्लिश्यते इति यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९७ मणिमन्त्रन्यायः मणिमन्त्रादीनां वह्नेर्दाहं प्रति यथा स्वातन्त्र्येण प्रतिबन्धकत्वम् लोकसिद्धम् न च तत्र युक्तयपेक्षा एवं कामिनीजिह्वायाया अपि ज्ञानवाक्यं प्रति प्रतिबन्धकत्वमित्येवं यत्र पृथक् प्रतिबन्धकत्वं तत्रास्य प्रवृत्तिः।

९८ मरुकृतोलनन्यायः केनचित् कापटिकवणिजा स्वाभीष्टमानपूरणार्थं मरुकृतेन मेयद्रव्यसङ्कारेण सुवर्णारोपितेषु मध्ये कतिचिदुत्सृतत्वं यदा पश्यन्ति तदा तस्य यथा कपटव्यक्तिर्भवति एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९९ मरणादरं व्याधिरितिन्यायः वरमिति स्वानन्तरेण क्लीवम्। अत्यन्तदुःखजनकविषयोपस्थितौ यथा तदपेक्षयाऽल्पदुःखजनकस्वीकारो तथा विवक्षायामस्य प्रवृत्तिः। अत्रैव विषये "मारणाय गृहीतोऽङ्गुष्ठं स्वीकरोतीति, न्यायोऽपि प्रवर्त्तते "सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः" इति सर्वजनीनप्रसिद्धेः।

१०० मुद्गादिभोजोद्वरणन्यायः मुद्गादेस्तामसतृणविशेषादिभोजा गर्भस्थं भोजनं तृणम्। बहिरावरणतया स्थितानां स्वतृणानां मुद्गाद्यानां विभजनेन यथेप्सिता समुद्धियते तथा यत्र विवक्षा तत्रास्य प्रचारः।

१०१ यत्कृतकं तदनित्यमिति न्यायः कृतकं कार्यं जन्यभाव इति यावत् तथा च कार्यभावस्य उत्पत्तेः प्रागसत्त्वेन प्रागभावप्रतियोगित्वात् न प्रागभावाप्रतियोगित्वघटितनित्यत्वम्। ध्वंसस्य प्रागभावप्रतियोगित्वेऽपि भावत्वाभावात् न व्यभिचार इति तार्किकाः। वेदान्तिमते तु ध्वंसस्यापि नाशास्युपगमेन न भावत्वं विशेषणीयमिति भेदः।

१०२ यत्रोभयोः समोदोषो न तत्रैकोऽनुयोज्य इति न्यायः वादिप्रतिवादिभ्यां न्यूनपक्षयोर्यत्र तुल्योदोषो न तत्र एकः पर्यनुयोज्यः स्वपक्षेऽपि तद्दोषसत्त्वात् इत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः "यत्रोभयोः समोदोषः परिहारोऽपि वा समः। नैकः पर्यनुयोज्यस्तादृशार्थविचारणे" इति वा०प्र०मा० धृतवाक्यम्।

१०३ यद्विशेषयोः कार्यकारणभावोऽस्ति बाधके तत्सामान्ययोरपीति न्यायः यथा तार्किकाणां घटत्वकुलालकृतित्वादिना कार्यकारणभावे सिद्धे कार्यत्वेन कृतित्वे न च कार्यकारणभावः नतु कुलालकृतेर्जातित्वेन द्रव्यत्वेन घटादिकं प्रति कारणत्वं तथात्वे तयोरनन्यथासिद्धत्वेनाकारणत्वं स्यात् कारणतां प्रति अनन्यथासिद्धेर्बाधकत्वात् अतएव न द्रव्यत्वेन दण्डादेर्घटादिं प्रति, कारणत्वं नापीन्द्रियत्वेन प्रत्यक्षत्वावच्छिन्नं प्रति, इन्द्रियत्वस्यैकस्याभावदिति "

१०४ यादृशं सुखं तादृशो चमेटेति न्यायः तुल्यरूपपरिहार विवक्षायामस्य प्रवृत्तिः। [विवक्षायामस्य प्रवृत्तिः।

१०५ यादृशो यस्तस्तादृशो बलिरिति न्यायः तुल्यरूपोपहार

१०६ येनोक्तस्यते येन चोपसंह्रियते स वाक्यार्थ इति न्यायः यथा गिरिरग्निमान् इति प्रतिज्ञावाक्येन पर्वतस्यैवोपक्रमः तस्याहङ्क्रियानिति निगमनवाक्येऽपि गिरेरेव वह्निमत्त्वेन बोधात् सएव वाक्यार्थएवमन्यत्रापि।

१०७ योजनप्राप्यायां कावेर्यां मल्लबन्धनमिति न्यायः कावेरी नदीविशेषः मल्लः कैवर्त्तभेदस्तद्देशः वस्त्रभेदश्च बन्धनं यद्वा मल्लो बाहुयुद्धकुशलस्तदद्वन्द्वोऽन्वितवाससां कटौ बन्धनं मल्लबन्धनं तच्च नदीतारणाय कार्यमिति लोकप्रसिद्धम्। तद्यथा योजनमार्गेण प्राप्यायां तस्यामयुक्तं तथा यत्र विवक्षा तत्रास्य प्रचारः।

१०८ रत्नपटनन्यायः यदा तु निराकाङ्क्षेऽपि वाक्ये आकाङ्क्षा-

सत्याप्येकवाक्यता क्रियते तदा रक्तपटन्यायप्रवृत्तिः यथा पटोऽस्तीति वाक्यस्य निराकाङ्क्षस्यापि कीदृश इत्याकाङ्क्षासत्याप्य रक्त इत्यनेनैकवाक्यता क्रियते तथा प्रकृतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थाङ्गैर्निष्टसोपकाराकाङ्क्षाणामनारभ्याधीताङ्गैः, विकृतीनां चातिदिष्टाङ्गैः परिपूर्णानां शरमयादिभिः सहोत्थिताकाङ्क्षाविरहेऽप्युत्थापिताकाङ्क्षयान्वय इत्येवं विषयेऽस्य प्रचारः।

१०९ राजपुरप्रवेशन्यायः विष्टङ्कलतया राजपुरप्रवेशे राजपुररक्षकैस्ताडनादिकं क्रियेतेतिभिया श्रेणीभूततया यथा तत्पुरप्रवेश एवं सुष्टङ्कलतया यत्र कार्यकरणस्य विवक्षा तत्रास्य प्रवृत्तिः।

११० लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायः सजातीयविजातीयव्यावर्त्तको लक्ष्यवस्तुगतः कश्चिद्धर्मो वेदे वा प्रसिद्धो धर्मः लक्षणं तेन लक्ष्ये वस्तुनि सम्भावनायां जातायां प्रमाणसद्भावः प्रमाणेन तदवगच्छति यथा ताभ्यां वस्तुसिद्धिस्तत्तद्व्यवहारयोग्यतया ज्ञानं, तथा च यथा गन्धवत्त्वादिलक्षणेन प्रत्यक्षादिप्रमाणेन च पृथिव्यादिसिद्धिस्तथा यत्र विवक्षा तत्रास्य प्रवृत्तिः।

१११ लूतातन्तुन्यायः लूता कीटविशेषः सा यथा स्वदेहात् तन्तून् निर्मिमीते संहरति च स्वदेहे, यथा च तस्याः स्वतः तन्तुनिर्माणे स्वतः निमित्तकारणत्वरूपकर्तृत्वं, स्वदेहामेद्यया उपादानकारणत्वम् एवं ब्रह्मणः जगतां स्वतः कर्तृत्वं, स्वशक्तिमायाद्वारा उपादानत्वं च एवञ्च जगत् स्वशक्त्या निर्मिमीते स्वशक्तौ संहरति च इत्येवं विवक्षायामस्य प्रवृत्तिः।

११२ लोष्टलगुडन्यायः लोष्टस्य उपमर्दकः लगुडो यथा, तथा उपमर्द्योपमर्दकयोः साचिव्यविवक्षायामस्य प्रवृत्तिः।

११३ लोहचुम्बकन्यायः चुम्बकः मणिभेदः स यथा निष्क्रियोऽपि सन्निधिमात्रेण लोहस्याकर्षकः तत्क्रियाहेतुश्च भवति एवमसङ्गस्याकर्तुरपि पुरुषस्य प्रकृत्यादिक्रियाप्रवर्त्तकत्वमित्यादि यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११४ वरगोष्ठीन्यायः गोष्ठी बहूनरपत्ययोः अन्योन्यवार्त्ता करस्य वरलाभाय गोष्ठी वरगोष्ठी वरवधूबन्धूनामन्योन्यगोष्ठी तथा ऐकमत्ये सति वरलाभरूपमेकं कार्यं यथा निष्पाद्यते एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११५ वरघाताय कन्यावरणमिति न्यायः विप्रकन्यायां हतायां यत्र वरस्य घातः सम्भाव्यते तत्र तां नोद्वहेत् एवं विवक्षायामस्य प्रवृत्तिः। तथा च अनिष्टान्तरणानादिसम्भावनायाम् अभीष्टहेतुरपि वस्तु न वरणीयमित्येवं तन्न्यायतात्पर्यम्। अयमेव न्यायः क्वचित् "नहि वरघाताय कन्यामुद्वाहयतीति" न्यायतया पठ्यते।

११६ वह्निधूमन्यायः धूमरूपकार्यदर्शनात् यथा कारणरूपवह्नेरनुमानं तथा यत्र कार्यविद्धेन कारणानुमानं तत्रास्य प्रवृत्तिः।

११७ विल्वखट्वाटन्यायः अयं न्यायः श्लोकेनाभियुक्तैर्निबद्धो यथा "खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके वाञ्छन् देशमनातपं विधिवशाद्विल्वस्य मूलं गतः। तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायोगच्छति यत्र भाग्यरहितस्तत्रापदां भाजनमिति"। तथा च इष्टान्तरं समीहमानस्याभीष्टप्राप्तिर्दूरतःप्रत्युतानिष्टप्राप्तिरित्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११८ विशेष्ये विशेषणं तत्रापि च विशेषणमिति न्यायः भूतलं जलवद्घटवदित्यादौ भूतले घटोविशेषणं स च भूतलांशे विशेषणमितिरीत्या यत्र भाषते तत्रास्य प्रवृत्तिः।

११९ विषभक्षणन्यायः विषभक्षणं दिव्यभेदः। तस्य यथा सत्याभिसन्धस्यानिष्टासुत्पादकत्वम् मिथ्याभिसन्धस्यानिष्टहेतुत्वमेवं यत्र विवक्षा तत्रास्य प्रवृत्तिः। तत्प्रकारमाह नारदः "दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ। धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम्। द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते। उदङ्मुखः प्राङ्मुखो वा विषं दद्यात् समाहितः" इति। विषस्य वत्सनाभादि प्राह्यम् "मृद्भिन्नो हत्सनाभस्य हिमजस्य विषस्य च" इति पितामहस्मृतेः। शुद्धत्वाशुद्धत्वपरीक्षा तु याज्ञवल्क्येनोक्ता "यस्य वेगैर्विना जीर्णैर्च्छर्दिं तस्य विनिर्दिशेत्" इति। विषवेगो नाम धातोर्धात्वन्तरप्राप्तिः "धातोर्धात्वन्तरं प्राप्तिर्विषवेग इति स्मृतः" इति वचनात् तेषां लक्षणानि तु विषतन्त्रादवबोध्यानि। "पूर्वाह्णे शीतले देशे विषं देयं तु देहिनाम्। घृतेन योजितं श्लक्ष्णं पिष्टं स्निग्धगुणान्वितम्" इति पितामहोक्तमितं देयम्। तथा च एवं विषे पीते यावत्करतालिकाशतपञ्चकं तावत्कालः प्रतीक्षणीयः अनन्तरं चिकित्सनीयः "पञ्चतालशतं कालं निर्विकारो यदा भवेत्। तदा भवति संशुद्धस्ततः कुर्यात् चिकित्सितम्" इति वचनात् यदा तु सविकारस्तदाऽशुद्ध इत्यर्थात् सिद्धम्।

१२० विषदृष्टन्यायः अन्योदृष्टस्तावदास्तां विषस्य दृष्टोऽपि कृतविस्तारणात् सम्यग्वर्द्धयित्वा स्वयं क्षेतुमनर्हः

इति न्यायार्थः एवं स्वार्जितस्यानिष्टस्यापि स्वयं नाशनन्यायुक्तमिति विवक्षायामस्य प्रवृत्तिः ।

१२१ वीचितरङ्गन्यायः यथा वीच्यान्तरङ्गान्तरमुत्पद्यते तेन च पुनस्तरङ्गान्तरमित्येवं यत्र परम्परया उत्पत्तिस्तत्रास्य प्रवृत्तिः "वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता" भाषा० "प्रथमशब्देन बहिर्दिगवच्छिन्नोऽन्यः शब्दस्तेनैव चान्यः शब्दो जन्यते तेन चानन्यसहायकः एवं क्रमेण श्रोत्रोत्पन्नो दृश्यते" सि०मुक्ता० ।

१२२ बीजाङ्कुरन्यायः बीजं विना नाङ्कुरो जायते अङ्कुरं विना च न बीजोत्पत्तिः इत्येवं यत्र परस्परकार्यकारणभावस्तत्रायं न्यायः प्रवर्त्तते तथा च बीजजातीयं प्रति अङ्कुरजातीयं, अङ्कुरजातीयं प्रति च बीजजातीयं कारणमतो बीजाङ्कुरप्रवाहोऽनादिः तथा च यद्बीजं प्रति यदङ्कुरस्य कारणत्वं तदङ्कुरं प्रति तद्बीजस्य न कारणत्वमतो नान्योन्याश्रयः एष न्यायः प्रामाणिकत्वात् दृश्यते यत्र च न प्रामाणिकत्वं तत्र नानादित्वकल्पनेति प्रामाणिकप्रवाहस्यैवानादित्वकल्पना नान्यस्येति सिद्धान्तात् सूचितं च तथा शा०भा० यथा "तत्कृतधर्माधर्मनिमित्तं शरीरत्वमिति चेत् न शरीरसम्बन्धस्याविद्यात्वाद्धर्माधर्मयोरात्मकृतत्वाविद्धेः । शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्यपरम्परैवेयं अनादित्वकल्पना" भा० "आत्मनः शरीरसम्बन्धे जाते धर्माधर्मोत्पत्तिः तस्यां च सत्यां सम्बन्धरूपजन्मेत्यनयोरन्योन्याश्रयादेकस्याविद्यात्वा द्वितीयस्याविद्धिः स्यादिति परिहरति नेत्यादिना नन्वेतद्देहजनकधर्माधर्मकर्मणा एतद्देहसम्बन्धहेतुत्वे स्यादन्योन्याश्रयः पूर्वदेहकर्मणा एतद्देहसम्बन्धोत्पत्तिः, पूर्वदेहश्च तत्पूर्वदेहकर्मणः तद्देहसम्बन्धोत्पत्तिः, तत्पूर्वदेहश्च तत्पूर्वदेहकृतकर्मणा इति बीजाङ्कुरवदनादित्वान्नायं दोष इत्यत आह अन्येति अप्रामाणिकीत्यर्थः । न हि बीजादङ्कुरः ततो बीजान्तरञ्च यथा प्रत्यक्षेण दृश्यते तथात्मनो देहसम्बन्धः पूर्वकर्मकृतः प्रत्यक्षः नाप्यस्ति कश्चिदागमः प्रत्युतासङ्गो हीत्यादि श्रुतिः सर्वकर्तृत्वं वारयतीति भावः" आनन्दगिरिणा ।

१२३ वृक्षप्रकम्पनन्यायः यथा वृक्षमारूढः अधःस्थितेन केनचित् नरेण प्रथमशाखा प्रकम्पयितव्या अन्येन च प्रथमशाखा प्रकम्पयितव्येति भिन्नभिन्नशाखा प्रकम्पने नियोजितस्तदधःस्थितेन केनचित् सर्ववृक्षप्रकम्पने नियोजितः सन् सर्वैः प्रथमशाखाविशेषप्रकम्पनस्थानप्रत्येन यौगपद्यासम्भवेन क्रमविकल्पोपगमेऽपि सर्वाविरोधाविद्धेः तत्रिकीर्षया सर्वं वृक्षं प्रकम्पयति तत्प्रकम्पनेन हि सर्वाः शाखा अपि प्रकम्पिताः स्युरिति भवति सर्वैरविरोधः एवं यत्र सर्वाविरोधेनाचरणं तत्रास्य प्रवृत्तिः ।

१२४ वृद्धकुमारीवाक्यन्यायः अयं न्यायो महाभाष्ये व्याख्यातः "तद्यथा वृद्धकुमारी इन्द्रं याचेत वरं वृणीष्वेति सा च वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं काञ्चनपात्रीं भुञ्जीरन्निति न च तावत्तस्याः पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यादिकं तत्रानया एकेन वाक्येन पतिः पुत्रा गावो धान्यं हिरण्यञ्चेति सर्वं संगृहीतं भवतीति तथा तत्तद्वाक्यानया मोक्षप्रतिपादकवाक्यैरपि चित्तशमादिश्रवणादिसाधनसहिततत्त्वज्ञानं च यदन्तरेण मोक्षाविद्धिस्तत्सर्वं संगृहीतं भवतीति एवमेकवाक्यैर्यत्र नानार्थप्रतिपादनं तत्रास्य प्रवृत्तिः अयं च वृद्धकुमारीवरन्यायः इति क्वचित् पठ्यते ।

१२५ दद्विमिष्टवतो मूलमपि विनष्टमिति न्यायः दद्विर्धनप्रयोगे अधमर्णात् प्राप्यांशभेदलाभः तामिष्टवतः उत्तमर्णस्य अधमर्णदौष्ट्यात् यथा मूलं नश्यति एवं यत्र अभीष्टान्तरसम्पादनाय प्रयतमानस्य मूलं नश्यति तत्रास्य प्रवृत्तिः ।

१२६ शङ्खवेलान्यायः वेलाविशेषे शङ्खध्वनिविशेषः यत्र नियमितः तत्र शङ्खध्वनिना वेलाविशेषज्ञानं यथा जायते तथा यत्र विवक्षा तत्रास्य प्रवृत्तिः । यथा चैत्रोत्तरं वैशाखः वैशाखोत्तरं ज्यैष्ठ इति क्रमविशेषज्ञानं शङ्खवेलान्यायादिति म०त० रघु० ।

१२७ शतपत्रपत्रभेदनन्यायः यथा सूच्या शतपत्रभेदने लाघवयौगपद्यप्रतीतिर्भ्रमः तथा हि प्रथमक्षणे सूचीक्रियया तस्याः पत्रेण संयोगः द्वितीये पत्रावयवयोः क्रिया तृतीये तयोर्विभागः चतुर्थे चारम्भसंयोगनाशः पञ्चमे पत्रनाश इति प्रतिपत्रभेदने बहुक्षणविलम्बस्य युक्तिसिद्धत्वात् तथा दीर्घशष्कुल्यादिभक्षणादौ रसिनादिज्ञानानां यौगपद्यप्रतीतिर्भ्रम इति एवं क्रमेण लाघवानायां यौगपद्यभ्रमो यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

१२८ शते पञ्चाशदिति न्यायः व्यापकशतसंख्यायां यथा व्याप्यपञ्चाशत्संख्या निविष्टा एवं यत्र व्यापके व्याप्यस्य निवेशस्तत्रास्य प्रवृत्तिः ।

११९ शालिसम्मतौ कोद्रवाशननयायः शालिः उत्तमधान्यभेदः कोद्रवः अधमधान्यभेदः उत्तमवस्तुसद्भावे यत्राधमवस्तुसेवनं तत्रास्य प्रवृत्तिः ।

१२० श्यामरक्तनयायः घटादौ श्यामगुणनाशे यथा रक्तगुणोत्पत्तिरेवं यत्र पूर्वगुणनाशे अपरगुणसमावेशस्तत्रास्य प्रवृत्तिः ।

१२१ श्यालशुनकनयायः इत्थं लौकिकाख्यायिका कश्चित्पुरुषः स्वगृहे वर्त्तमाने शुनि श्यालनामसङ्केतं कृतवान् सुप्ता च तद्भार्या तं भ्रातरं मन्यते स च यदा तस्याः कोपोत्पादनाय तं श्वानं प्रति गाढीर्ददाति स्म तदा सालिकोपप्रपीतात्मीयतथाऽतिदुःखवती बभूवेति तथा च स्वाभ्रातरि शुनके भ्रातृताभ्रान्तिमत्त्वा भार्यायाः कोपोत्पादनाय भर्त्रा शुनकनिन्दा क्रियते तथात्यन्ताभिन्नेऽपि तत्तद्विषयावच्छिन्ने परमेश्वरे भेदभ्रमवतां कोपोत्पादनाय शास्त्रेण तद्दृष्टविषयावच्छिन्नपरमेश्वरनिन्दाव्याजेनेतरविषयावच्छिन्नेश्वरस्तुतिः क्रियते इति केचित् । वस्तुतस्तु यथा अत्रालगालिप्रदाने वक्तृतात्पर्याभावेऽपि श्यालैक्येन तात्पर्यभ्रमात्तस्याः कोपोत्पादस्तथा शास्त्रस्य ब्रह्मविष्ण्वाद्युपकर्षे तात्पर्याभावेऽपि तेषां स्वतविराडादिनामसाम्येन तात्पर्यभ्रमवतां कोपादिः । इयांस्तु विशेषो यत्तस्य कुपितप्रियासन्तावलोकनाय प्रवृत्तिः शास्त्रस्य तु भारताय रुष्टेति इति नयायेन कथञ्चिदैक्यबोधनायेति भेदः ।

१२२ बन्दंशपतितनयायः संदंशः । (साँडाशी) इति यस्य प्रसिद्धिः तेन स्वावयवयोर्मध्यपातिनः पदार्थस्य यथा ग्रहणम् एवं पूर्वोत्तरयोः पदार्थयोर्ग्रहणेन तन्मध्यस्थपदार्थस्य ग्रहणं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

१२३ सन्निहितादपि व्यवहितं साकाङ्क्षं बलीय इति नयायः शब्दबोधयोग्यतया साकाङ्क्षस्य स्वार्थान्वयबोधप्रयोजकतेति नियमेन तस्य चासत्तिक्रममनादृत्य अन्वययोग्यपदार्थवाचकशब्दस्य व्यवहितत्वेऽपि आसत्तिं पृकल्प्य यथा काव्यादावन्वयः एवं यत्र साकाङ्क्षकत्वं तत्रैव तस्यान्वय इति यत्र विवक्षा तत्रास्य प्रवृत्तिः ।

१२४ सन्निहिते बुद्धिरन्तरङ्गमिति नयायः सन्निकृष्टविप्रकृष्टयोर्यत्रोभयोरन्वयसम्भावना तत्र सन्निहितस्यैव आसत्तिबलादन्वयः न विप्रकृष्टस्येत्येवं विवक्षायामस्य प्रवृत्तिः ।

१२५ समूहालम्बननयायः यत्र उपस्थितपदार्थानां विशेषणविशेष्यभावेनान्वयासम्भवः तत्र उपस्थितपदार्थानां समूहमालम्ब्यैव बोधः यथा घटः पटश्च इत्यादौ घटपटयोरुभयोरेव विशेष्यता । समूहालम्बनबोधे च विशेष्यताद्वयम् संशये तु एका विशेष्यतेति भेदः ।

१२६ सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते इति नयायः पशुना यजेतेत्यादौ यागे एकत्वविशिष्टपशुकरणकत्वं विधेयं न तु पशौ एकत्वं यागे च पशुकरणकत्वमित्येवं विधेयद्वयम् । एवमन्यत्रापि ।

१२७ सर्वं विशेषणं सावधारणमिति नयायः यथा श्वेतः शङ्ख इत्यादौ श्वेत एवेत्यर्थपरत्वमेवन्यत्रापि ।

१२८ सर्वं वाक्यं सावधारणमिति नयायः अवधारणवाचकस्यभावे यत्रावधारणं प्रतीयते तत्रास्य प्रवृत्तिः । एवकारादिसत्त्वे तु तस्यैवावधारणवाचकत्वम् न तत्रास्य प्रवृत्तिः ।

१२९ सर्वापेक्षानयायः बहुषु निमन्त्रितेषु एकस्मिन् आगतेऽपि यथा न तस्मै भोजनं दीयते अपेक्षते च सर्वान् एवं यत्र सर्वापेक्षा तत्रास्य प्रवृत्तिः ।

१३० सविशेषणे हि वर्त्तमानौ विधिनिषेधौ विशेषणसुपसंक्रामतः सति विशेष्ये बाधे इति नयायः यथा घटाकाशमानय न मण्याकाशमित्यानयनविषयौ विधिनिषेधौ विशेष्ये आकाशे बाधाद्घटादिरूपं विशेषणसुपसंक्रामतस्तथा यत्र विवक्षा तत्रास्य प्रचारः । न च निषेधस्य कथं बाधः तस्य प्रसक्तिपूर्वकतया तदभावेऽनुपपत्तेः किं चात्र विधिनिषेधशब्दौ भावाभावमात्रबोधकौ तथा च घटाकाशोऽत्रानीतो न मण्याकाशः घटाकाश उत्पन्नः शरावाकाशो विनष्ट इत्यादौ भावाभावौ विशेष्ये बाधाद्विशेषणसुपसंक्रामतस्तथा विवक्षायामस्य प्रवृत्तिः । विशेष्ये बाधाद्विशेषणे तयोः पर्यवसानमित्यर्थः ।

१३१ साक्षात् प्रकृतौ विकारलय इति नयायः यथा घटादीनां लयः स्वप्रकृतौ कपालादावेव न तु परमाणौ तथैवानुभयादित्येवं विकारस्य स्वप्रकृतिलयो यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

१३२ सावकाशनिरवकाशयोर्मध्ये निरवकाशो बलवान् इति नयायः सम्भवद्विषयान्तरः सावकाशः अतथाभूतो निरवकाशः तेन निरवकाशेन सावकाशो विधिर्बाध्यते यथा माहिंस्यात् सर्वभूतानीति निषेधवाक्यं निरवकाशेन श्वेतमालभेतेति वाक्येन बाध्यते हिंसाया वैधेतरविषयकत्वसम्भवेन तत्र तस्य सावकाशत्वात् पश्वालम्भस्य विषयान्तराभावात् न तस्य सङ्कोच एवमन्यत्रापि ।

१३३ सिंहावलोकनयायः सिंहो यथा कञ्चिन्मृगं हत्वापि

गच्छन्नन्योऽपि कश्चित् मृगयेत् स्यात्तदा तमपि हन्यामिति बुद्ध्या पृष्ठदेशावलोकनं पुरोदेशावलोकनञ्च करोति हन्ति च दृष्टिपथमागतं मृगादिकं इति प्रसिद्धम् तथा एकस्य शब्दस्य पुरतः पृष्ठे च यत्र उभयोरन्वयस्तत्रास्य प्रवृत्तिः ।

१४४ सूचीकटाहन्यायः अल्पायाससाध्या सूची बह्वायाससाध्यः कटाहः यथा तयोर्निर्माणाय प्रयतमानस्य प्रथमं स्वल्पायाससाध्ये सूचीनिर्माणे प्रवृत्तिः ततो बह्वायाससाध्यकटाहनिर्माणे एवं यत्र बह्वायाससाध्यमपेक्ष्य स्वल्पायाससाध्यस्य निर्देशादि तत्रास्य प्रवृत्तिः ।

१४५ स्वशाटिकान्यायः स्वस्य शाटिकोपादानत्वेऽपि यथा भाविन्या शाटिकासंज्ञया निर्देशस्तथा यत्र भाविन्या संज्ञया उपादानस्य कार्यसंज्ञया निर्देशस्तत्रास्य प्रवृत्तिः ।

१४६ सोपानारोहणन्यायः यथा प्रासादमारोढुकामः कश्चिद्युगपदारोढुमशक्नुवन् पूर्वां पूर्वां कक्षां परित्यजन्नुत्तरामुत्तरां च कक्षामारोहन् क्रमेण प्रासादमारोहति तथा स्वस्वरूपभूतमपि ब्रह्म अज्ञानेन व्यवहितमिवापन्नमात्मत्वेन ज्ञातुकामो मुमुक्षुः सहसा साक्षात्कर्तुमशक्नुवन् पुत्रादाराद्यानन्दमयान्तेष्वुत्तरोत्तरान्नात्मत्वबुद्ध्या पूर्वेषु पूर्वेष्वात्मत्वबुद्धित्यागे कृते सति क्रमेण प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमात्मत्वेन जानातीति एवमादिषु तस्य प्रवृत्तिः ।

१४७ सोपानावरोहणन्यायः यथा हि येन क्रमेण सोपानमारोहन्ति तद्विपरीतक्रमेण ततोऽवरोहन्तीति लोके प्रसिद्धं तथा पञ्चकोषावतरणक्रमेण अद्वैततत्त्वे बुद्धिमारोहयितुमशक्तो भोग्यभोगायतनतदाश्रयचतुर्दशभुवनतदाधारब्रह्माण्डानि पञ्चीकृतपञ्चभूतमात्राणि न तेभ्योऽतिरिच्यन्ते इति सम्भावयेत् पञ्चीकृतानि । भूतानि सूक्ष्मशरीराणि चापञ्चीकृतभूतेभ्यो नातिरिच्यन्ते इति जानीयात् । एवं गन्धतन्मात्रात्मिकां पृथिवीं रसतन्मात्रात्मकाम्मात्मत्वेन भावयेत् अपञ्च रूपतन्मात्रात्मकतेजोमात्रत्वेन, तच्च तेजः स्पर्शतन्मात्रात्मकं वायुमात्रत्वेन, तच्च वायुं शब्दतन्मात्रात्मकाकाशमात्रत्वेन, तच्चाकाशं स्वकारणभूतमायोपहितमहेश्वरमात्रत्वेन भावयेदिति एवं च यथा पूर्वोक्तक्रमेणावरोहणात् सुखेन भूमिं प्राप्नोति तथैवानेन विपरीतक्रमेण भावनात् सुखेन भूमानमद्वितीयं शिवमाप्नोतीति । प्रकृतोऽप्यनेनैव व्युत्क्रमेण भवतीति बोध्यं यत्तात् प्रकृतौ विकारस्य इति नयायात् तथा च कथ्यते "जगत् प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते ज्योतिषि आपः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते । वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयत इति ।

१४८ स्थविरगुडन्यायः दृढहस्तपातितगुडस्य यथा यथास्थानं न पतनमेवं बद्धस्थानेऽपातेऽस्य प्रवृत्तिः ।

१४९ स्थूणानिखननन्यायः स्थूणा कटहस्तम्भभेदः तस्या निखननदाढर्यार्थसुतोत्तोल्यः पुनःपुनः कराभ्यां चालयित्वा यथा निखननं क्रियते एवं समर्थितपक्षस्य दाढर्यार्थसदाहरणयुक्त्यादिभि पुनःपुनर्यत्र समर्थनं तत्रास्य प्रवृत्तिः ।

१५० स्थूणारुन्धतीन्यायः यथा हि ध्रुवमरुन्धतीञ्च दर्शयतीति विधिबलाद्वरवध्वोरुन्धतीदर्शने प्राप्ते सूक्ष्मतमायास्तसाभाद्धिति दर्शयितुमशक्यतया अरुन्धती दृश्यतामित्युक्ते चन्द्राद्यपेक्षयाल्पारुन्धत्या अतिदूरस्थत्वेन नभस्यवस्थमेव किञ्चिदरुन्धतीत्वेन इयं दृश्यतामित्यङ्गुलिनिर्देशेन तावच्चन्द्रमरुन्धतीत्वेन वदति ततश्चन्द्रेतरास्तत्समीपस्थास्तारकाः, तत इतरतारकाभिन्नाः सप्तर्षिसंज्ञिकाः समीपतराः, ततस्तन्मध्यवर्तिनीं वसिष्ठरूपां समीपतमां तारकामरुन्धतीयामित्युक्ताः तत्पार्श्ववर्तिनीमरुन्धतीमेवारुन्धतीत्वेन बोधयति एवं यथातिसूक्ष्मदुर्विज्ञेयवस्तुविज्ञानाय क्रमेण तत्समीपसमीपतरसमीपतमं वस्तु शास्त्रेण तत्तयोच्यते तत्र स्थूणारुन्धतीन्यायोऽवतरति । अयमेव केनचिदरुन्धतीप्रदर्शननयायत्वेनोदाह्रियते ।

१५१ स्वामिभृत्यन्यायः स्वामिन उपकारार्थं प्रवर्त्तमाना भृत्यास्तदुपकारकरणेन सन्तोषितात् स्वामिनः प्रसादलब्धासुपलब्धिं यथा लभन्ते एवं यत्र परस्परोपकार्योपकारकभावो विवक्ष्यते तत्रास्य प्रवृत्तिः ।

सांख्यसूत्रे ४अ० कतिचित् प्रसिद्धदृष्टान्ता उक्तास्तेऽपि न्यायशब्देनानुक्ता अपि प्रसिद्धदृष्टान्तदर्शनप्रसङ्गादत्र प्रकारादिक्रममनादृत्य सूत्रक्रमेणैव प्रदर्श्यन्ते यथा "राजपुत्रवत् तत्त्वोपदेशात्" सां०प्र०४।१सू०"राजपुत्रस्येव तत्त्वोपदेशाद्विवेको जायत इत्यर्थः । अत्रेयमाख्यायिका कश्चिद्राजपुत्रो गण्डर्त्तजन्मना पुराद्भिःसारितः शबरेण केनचित् पोषितोऽहं शबर इत्यभिमन्यमान आसीत् तं जीवन्तं ज्ञात्वा कश्चिदमात्यः प्रबोधयति न त्वं शबरो राजपुत्रोऽसीति स यथा झटित्येव चाण्डालाभिमानं त्यक्त्वा तात्त्विकं राजभावमेवाश्रयते राजाहमस्मीति । एवमे-

वादिपुरुषात् परिपूर्णचिन्मात्रे चाभिव्यक्तादुत्पन्नस्य तं स्वांश इति कारुणिकोपदेशात् प्रकृत्यभिमानं त्यक्त्वा ब्रह्मपुत्रत्वादहमपि ब्रह्मैव न तु तद्विलक्षणः संसारीत्येवं स्वस्वरूपमेवावलम्बत इत्यर्थः। तथा च गारुडे "यथैकक्षेममणिना सर्वं क्षेममयं जगत्। तथैव ज्ञातजीवेन ज्ञातेनाप्यखिलं भवेत्। यद्वाविष्टो द्विजः क्वचिच्छूद्रोऽहमिति मन्यते। यद्वनाशात् पुनः स्वीयं ब्राह्मण्यं मन्यते यथा। मायाविष्टस्तथा जीवो देहोऽहमिति मन्यते। मायानाशात् पुनःस्वीयं रूपं ब्रह्माहि मन्यते" भा०। "पिशाचवदन्यार्थोपदेशेऽपि" ४।२सू० "अर्जुनार्थं श्रीकृष्णेन तत्त्वोपदेशे क्रियमाणेऽपि समीपस्थस्य पिशाचस्य यथा विवेकज्ञानं जातमेवमन्येषामपि भवेदित्यर्थः" भा०। "श्येनवत् सुखदुःखी त्यागवियोगाभ्याम्" ४।५सू० "परिग्रहो न कर्तव्यो यतो द्रव्यार्थी त्यागेन लोकः सुखी वियोगेन च दुःखी भवति श्येनवदित्यर्थः। श्येनो हि स्वामिभिः केनाप्यपहृत्यामिषादिलोभ्यं दुःखी म्रियते स्वयं चेत् त्यजति तदा दुःखादिमुच्यते तदुक्तम् "आमिषं कुररं जघ्नुर्बलिनोऽन्ये निरामिषाः। तदामिषं परित्यज्य स सुखं समविन्दत" इति भद्रनाथोक्तम् "नदीभूतं यथा हस्तो हस्तं वा शकुनिर्यथा। तथा प्रलक्षिमं देहं तत्त्वाद् त्याक्षादिमुच्यते" भा०। "अतनिर्वर्णिवत्" ४।६सू० "यथा जीर्णां त्वचं परित्यजत्यनायासेन श्येनवद्वा तथैव सुखसुः प्रकृतिं बहुत्वाद्योपभुक्तां जीर्णां श्येनवद्वा त्यजेदित्यर्थः। तदुक्तम् "जीर्णां त्वचमिवोरगः इति" भा०। "छिन्नहस्तवद्वा" ४।७सू० यथा "छिन्नहस्तं पुनः कोऽपि नादत्ते तथैवेतत् त्यक्तं पुनर्नाभिमन्येतेत्यर्थः" भा०। "असाधनानुचिन्तनं बन्धाय भरतवत्" ४।८सू० "विवेकस्य यदन्तरङ्गसाधनं न च चेद्दोषोऽपि स्यात् तथापि तदनुचिन्तनं तदनुष्ठाने चित्तस्य तात्पर्यं न कर्तव्यं यतस्तद्बन्धाय भवति विवेकविचारवत्तया भरतवत् यथा भरतस्य राजर्षेर्धर्मस्यापि दोषानाधरिणशावकस्य पोषणमित्यर्थः। तथा च जडभरतं प्रकृत्य विष्णुपुराणे "चपलं चपले तस्मिन् दूरं दूरगामिनि। चारोपितः समासक्तं तस्मिन् हरिणपोतके" भा०। "बहुभिर्योगे विरोधो रागादिभिः कुमारीशङ्खवत्" ४।९सू० "बहुभिः सङ्गो न कार्यः। बहुभिः सङ्गे हि रागाद्यभिव्यक्त्या बहुको भवति योगभ्रंशकः। यथा कुमारीशङ्खयोर्नामग्रीवाग्रवलयेन अन्योन्यकारो भवतीत्यर्थः" वाक्यप्रवचनभाष्यम्।

"अनारम्भेऽपि परगृहे सुखी सर्पवत्" ४।१२सू० "सुखी भवेदिति शेषः शेषं सुगमम्। तदुक्तम् "गृहारम्भो हि दुःखाय न सुखाय कथञ्चन। सर्पः परगृहं वेश्म प्रविश्य सुखमेधते" भा०।

"बहुयाजनगुरुपालनेऽपि एकाहानं षट्पदवत्" ४।१३सू० "कर्तव्यमिति शेषः। तदुक्तं "यथुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः। सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः"। "सारभूतमुपासीत ज्ञानं यत् स्वार्थसाधकम्। ज्ञानानां बहुता यैषा वीजविघ्नकरी हि सा। इदं श्रेयमिदं श्रेयमिति यस्तृषितश्चरेत्। स्वल्पकालेषु नैव ज्ञानमवाप्नुयात्" मार्क०पु० भा०।

"इषुकारवद्वैकचित्तस्य समाधिहानिः" ४।१४सू० "यथा शरनिर्माणायैकचित्तस्येषुकारस्य पार्श्वे राज्ञो गमनेनापि न हस्तान्तरविरोधो जीवत एवमेवाप्यचित्तस्य सर्वथापि न समाधिहानिर्हस्तान्तरविरोधवत्तिर्भवति। ततश्च विषयान्तरसञ्चाराभावे ध्येयस्वात्मात्मारोऽप्यवश्यं भवतीत्येवापत्तौ कुर्यादित्यर्थः। तदुक्तं "तदैवमात्मनश्चैकचित्तो न वेद किञ्चिद् बहिरन्तरं वा। यथेषुकारो नृपतिं व्रजन्नभिमुखो गतात्मा न ददर्श पार्श्वे" भा०।

"अतनियमसङ्गनादानर्थक्यं लोकवत्" ४।१५सू० "यः शास्त्रेषु यतो योगिनां नियमसङ्गनने ज्ञाननिष्ठायाश्चोऽर्थो न भवति लोकवत्। यथा लोके भैक्ष्यादौ विहितपथाहीनां सङ्गने तत्सिद्धिर्न भवति इदित्यर्थः। यथवा ज्ञानरक्षार्थं वा सङ्गने तु न ज्ञानप्रतिबन्धः। "अपेतव्रतकर्मा तु केवलं ब्रह्मचिन्तितः। ब्रह्मभूतचरन् लोके ब्रह्मचारीति कथ्यते" भा०। "तद्विरक्तेऽपि भेकवत्" ४।१६सू० "सुगमम्। भेकाख्येयमाख्यायिका प्रसिद्धाजा सुगयां गतो विपिने सुन्दरीं कन्यां ददर्श। सा च राज्ञा भार्याभावाय प्रार्थिता नियमं चक्रे यदा मह्यं त्वया जलं प्रदर्श्यते तदा त्वया गन्तव्यमिति। एकदा तु क्रीडया परिचारा राजानं पप्रच्छ कुत्र जलमिति। राजापि सभयं विकल्पजलमदर्शयत्। ततः सा भेकराजदुहिता कामरूपिणी भेकी भूत्वा जलं विवेश ततश्च राज्ञा जायाहिभिरनिषद्यापि न तामवाप्तवानिति" भा०।

"नोपदेशवत्त्वेऽपि प्रतिज्ञातता परामर्शोऽते विरोधवत्" ४।१७सू० परामर्शो हेतुव्याप्यतात्मकं निर्वाचक

विचारस्तं विनोपदेशवाक्यश्रवणेऽपि तत्त्वज्ञाननियमो नास्ति प्रजापतेरुपदेशश्रवणेऽपीन्द्रविरोचनयोर्मध्ये विरोचनस्य परामर्शाभावेन भ्रान्तत्वश्रुतेः (छा०८०) अतो गुरूपदिष्टस्य मननमपि कार्यमिति। दृश्यते चेदानीमप्येकस्यैव तत्त्वमसीत्युपदेशस्य नानारूपैरर्थैः सम्भावना। अखण्डत्वमवैधर्म्यं लक्षणाभेदोऽविभागश्चेति" भा०।

"न कालनियमो वामदेववत्" ४.२० सू० "ऐहिकसाधनादेव भवतीत्यादिर्ज्ञानोदये कालनियमो नास्ति वामदेववत्। वामदेवस्य जन्मान्तरीयसाधनेभ्यो गर्भेऽपि यथा ज्ञानोदयस्तथात्रास्यापीत्यर्थः। तथा च श्रुतिः "तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं भवतीत्यादिरिति"। अहं मनुरभवमित्यादिकमवैधर्म्यं लक्षणाभेदपरं सर्वव्यापकताख्यब्रह्मतापरं वा। "सर्वं समाप्नोषि ततोऽसि सर्वः" इत्यादि स्मरणात् भा०।

"विरक्तस्यैव हेयहानमुपादेयोपादानं हंसक्षीरवत्" ४.२२सू० "विरक्तस्यैव हेयानां प्रकृत्यादीनां हानमुपादेयस्य चात्मन उपादानं भवति। यथा दुग्धजलयोरेकीभावापन्नयोर्मध्येऽसारजलत्यागेन सारभूतं क्षीरोपादानं हंसस्यैव न तु काकादेरित्यर्थः" भा०।

"न कामचारित्वं रागोपहते शुकवत्" ४.२४सू० "रागोपहते पुरुषे कामतः सङ्गो न कर्त्तव्यः शुकवत्। यथा शुकपक्षी प्रकृष्टरूप इति ज्ञात्वा कामचारं न करोति रूपलोलुपैर्बन्धनभयात् तद्वदित्यर्थः" भा०।

"गुणयोगाद्बद्धः शुकवत्" ४.२६ सू० "तेषां सङ्गे तु गुणयोगात् तदीयरागादियोगाद्बद्धः स्यात् शुकवदेव। यथा शुकपक्षी व्याधस्य गुणैरज्जुभिर्बद्धो भवति तद्वदित्यर्थः। अथ वा गुणितया गुणलोलुपैर्बद्धो भवति शुकवदित्यर्थः। तथैवोक्तं सौभरिणा "स मे समाधिर्जलवासमित्रमत्स्यस्य सङ्गात् सहसैव नष्टः। परिग्रहः सङ्गकृतो ममायं परिग्रहोत्थाश्च महाविधित्साः" भा।

"न भोगाद्रागशान्तिर्घृतवत्" सां० ४.२७सू० "यथा घृतेः सौभरेर्भोगाच्च रागशान्तिरभूत् एवमन्येषामपि न भवतीत्यर्थः। तदुक्तं सौभरिणैव "या मृत्युतो नैव मनोरथानामन्तोऽस्ति विद्मातमिदं मयाद्य। मनोरथासक्तिपरस्य चित्तं नो जायते वै परमार्थसङ्गि" भा०।

"न मलिनचेतस्युपदेशबीजप्ररोहोऽजवत्" ४.२९सू० "उपदेशरूपं यज्ज्ञानवृक्षस्य बीजं तस्याङ्कुरोऽपि रागादिमलिनचित्ते नोत्पद्यते अजवत्। यथाऽजनाम्नि नद्ये भार्यायोकमलिनचित्ते वशिष्ठेनोक्तस्याप्युपदेशबीजस्य नाङ्कुर उत्पन्न इत्यर्थः" भा०।

"नाभासमात्रमपि मलिनदर्पणवत्" ४।२० सू० "आपातज्ञानमपि मलिनचेतस्युपदेशान्न जायते विषयान्तरसञ्चारादिभिः प्रतिबन्धात् यथा मलैः प्रतिबन्धात् मलिनदर्पणेऽर्थो न प्रतिबिम्बति तद्वदित्यर्थः" भा०।

"न तज्जस्यापि तद्रूपता पङ्कजवत्" ४।२१सू० तस्मादुपदेशाज्जातस्यापि ज्ञानस्योपदेशानुरूपता न भवति सामग्र्या ज्ञानबोधात्। पङ्कजवत्। यथा बीजस्योत्तमत्वेऽपि पङ्कदोषाद्बीजानुरूपता पङ्कजस्य न भवति तद्वदित्यर्थः। पङ्कस्थानीयं शिष्यचित्तम्" भा०।

न्यायपथ पु० न्यायोपेतः पन्थाः शा०त० अच् समा०। मीमांसाशास्त्रे [ब०व०। २तद्वति त्रि०।

न्यायवृत्त न० न्यायोपेतं वृत्तं शा०त०। १शास्त्रविहिताचारे

न्यायसारिणी स्त्री न्यायं सरति सृ–णिनि। युक्तिपूर्वककर्मानुसारिण्याम् रीतौ बुद्धाद्यां त्रिका०।

न्याय्य त्रि०न्यायादागतः न्यायादनपेतो न्याये भवः वा दिगा० यत् वा। १न्यायसिद्धे २न्यायोपेते यौक्तिके ३न्यायभवे च "सर्वेषामपि तु न्याय्यं दाल्भ्यशक्त्या मनीषिणः"। "न्याय्यं वः शिशुरक्षवान्" मनुः "इदमत्रोत्तरं न्याय्यमिति बुद्धा विसृष्टस्य सः" कुमा०। वर्ग्यादि०आद्युदात्तताख्य।

न्यास पु० नि+अस–कर्मणि, भावे वा घञ्। १स्थापद्रव्ये (गच्छित) अमरः निःक्षेपशब्दे ४०५२४० तल्लक्षणादि दृश्यम्। "राज्यं न्यासमिवाभुनक्"रघुः २अर्पणे ३विन्यासे च हेमच०। "अलसवलितैरङ्गन्यासैः लताङ्कुरितर्जनैः" सा०द०। "नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम्" कुमा०। ४त्यागे "काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः" गीता। "वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः। हेतू विदेहमुक्तौ च जीवन्मुक्तौ च तौ क्रमात्" जीवन्मुक्तिविवेकः। ५हरदत्तप्रणीते पदमञ्जर्यपरपर्याये व्याकरणग्रन्थभेदे "अतुतस्तत्पदन्यासा सद्वृत्तिः सन्निबन्धना। शब्दविद्येव नो भाति राजनीतिरपस्पशा"माघ०"तन्त्रपुराणादावुक्ते पूजाजपादौ प्राक्कर्त्तव्ये देहावयवभेदेषु वर्णाद्युच्चारणरूपे हस्तव्यापारभेदे "अङ्गन्यासकरन्यासौ बीजन्यासं तथैव च" षट्कस्तोत्रम्। सामान्यपूजाङ्गन्यासास्तु "आदावृष्यादिकन्यासः करणहृन्मतःपरम्। अङ्गुलीव्यापकन्यासौ हृदादिन्यास एव च"

तन्त्रसा०। तत्कालस्तु "प्रातःकाले ऽथ वा पूजासमये होमकर्मणि। जपकाले समस्ते वा विनियोगः पृथक् पृथक्। पूजाकाले समस्तं वा कुर्यात् साधकसत्तमः" इति योगिनीहृदयम्। यामले "भूतशुद्धिलिपिन्यासौ विना यस्तु प्रपूजयेत्। विपरीतफलं दद्यादभक्त्या पूजनं यथा"। सामान्यन्यासेऽङ्गुलिनियमो गौतमीये "मनसा विन्यसेन्न्यासान् पुष्पेणैवाथ वा सुने!। अङ्गुष्ठानामिकाभ्यां वा चान्यथा विफलं भवेत्"। यामले "हृदयं मध्यमानामा तर्जनीभिः, स्मृतं शिरः। मध्यमातर्जनीभ्यां, स्यादङ्गुष्ठेन शिखा स्मृता। दशभिः कवचं प्रोक्तं, तिसृभिर्नेत्रमीरितम्। प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गुष्ठाग्रियं मता" इति। तिसृभिस्तर्जनीमध्यमानामभिः। "तर्जनीमध्यमानामाः प्रोक्ता नेत्रत्रयक्रमात्। यदि नेत्रद्वयं प्रोक्तं तदा तर्जनिमध्यमे" इति भट्टपतवचनात् "हृदयादिषु विन्यस्येदङ्गमन्त्रैः सतः सुधीः। हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा (स्वाहा)। शिखायै वषडित्युक्तं कवचाय हुमीरितम्। नेत्रत्रयाय वौष्ट् स्यादस्त्राय फडिति क्रमात्। षडङ्गमन्त्रानित्युक्तान् षडङ्गेषु नियोजयेत्। पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत्" इति शारदाति०। वैष्णवे तु "अनङ्गुष्ठा ऋजवो हस्तशाखा भवेन्मुद्रा हृदये शीर्षके च। अधोऽङ्गुष्ठा खलु सुष्टिः शिखायां करहन्द्वाङ्गुलयोर्वर्मणि स्युः। नाराचसञ्ज्ञ्युद्धृत बाहुयुग्मकाङ्गुष्ठतर्जन्युदितो ध्वनिस्तु। विश्वग्विपक्षाः कथितास्तु सुद्रा यत्राङ्गिणी तर्जनिमध्यमे च। अङ्गहीनस्य मन्त्रस्य स्वेनैवाङ्गानि कल्पयेत्" तन्त्रसारः।

न्यासिक त्रि० न्यासेन चरति पर्या० ठन्। न्यासकारिणि स्त्रियां स्त्रित्वात् ङीष्।

न्यासिन् त्रि०नि+अस–णिनि। १त्यागिनि २सन्न्यासिनि च

न्यु(न्यू)ङ्ख नि+उङ्ख घञ् पृषो०वा दीर्घः। १ऋग्भेदे गीतिषु उदात्तानुदात्तरूपेषु षोडशसु ओकारेषु तत्र त्रयः प्लुताः त्रयोदश अर्द्धौकारा इत्येवं षोडश ओकाराः तत्प्रकारादिः आश्व० श्रौ० ७।११ प्रथमादिसूत्रे ब्रूते यथा "चतुर्थेऽहनि यत् प्रातरनुवाकं प्रतिपद्यर्धर्चाद्योर्न्युङ्खः" १सू० "पार्ष्ठिके चतुर्थेऽहनि यत् प्रातरनुवाकं तस्याद्याया ऋचोयावर्धर्चयोरादौ तयोर्न्युङ्खो भवति। अहरधिकारे पुनरहनीतिवचनम् अहर्धर्नोऽयं न्युङ्ख इति प्रदर्शनार्थम्। तेनात्र यान्युङ्खभाञ्जि ऋचस्तासामन्यत्र यत्रमाहते न्युङ्खो न भवति" नारा०टी० "द्वितीयं स्वरमोकारत्रिमात्रमुदात्तम्भिः" २सू० "इदानीं न्युङ्खस्य लक्षणमुच्यते तयोरर्धर्चयोर्यो द्वितीयः स्वरः संहितावस्थायामोकारं त्रिमात्रं कृत्वा त्रिः ब्रूयात् पञ्चोऽर्धर्चयः कच्छ्य इति सर्वत्र शंसनविधानात्। संहितावस्थायामेव मन्त्राणां शंसनमुक्तं भवति। अत्र संहितावस्थायामेवमित्युक्तम्। पूर्वसूत्रेऽर्धर्चाद्योरित्याद्ययोरक्षरयोर्न्युङ्खो विहितः इह तु द्वितीययोर्विधीयते कथमनयोः सम्बन्ध इति पूर्वसूत्रस्यायमभिप्रायः ब्राह्मणोक्तो यो न्युङ्खविधिरेकाक्षरद्व्यक्षरत्र्यक्षरचतुरक्षरैरिति सोऽयमर्धर्चाद्योरित्यनेन सूचितो भवति। यस्तु खलु पञ्चसूत्रैव सिद्धान्तितः तस्मात् द्व्यक्षरेणैव न्युङ्खयेत् इति तमेव पञ्चमङ्गीकृत्येदानीं न्युङ्खो विधीयते द्वितीयं स्वरम् इत्यादिना" नारा०टी०। "तस्य तस्य चोपरिष्टादपरिमितान् पञ्च वार्धौकारानुदात्तान्" ३सू० "तस्य तस्योकारस्योपरिष्टादर्धौकारानुदात्तानपरिमितान् त्रीन् चतुरः पञ्च वा ब्रूयात्। यत्र सङ्ख्याविशेषनिर्दिष्टस्यापरिमितशब्दं ब्रवीति तत्र निर्दिष्टसङ्ख्याविशेषादुपरिष्टादपरिमितशब्दार्थो ग्रहीतव्यः। यत्र पुनरुपरिष्टात् संख्याविशेषेण निर्दिष्टस्तत्र प्रागेव संख्याविशेषात् बहुत्वे सत्येवानियता ग्रहीतव्येति सिद्धम्। अर्धसासौ ओकारश्चार्धौकार इति कर्मधारयः" नारा०टी०। "उत्तमस्तु तु त्रीन्" ४सू० "उत्तमस्योकारस्योपरिष्टात् त्रीनेवार्धौकारान् ब्रूयात्" नारा०टी०। "पूर्वमक्षरं निहन्यते न्युङ्खमाने" ५सू० "निहन्यत इत्यनुदात्तीक्रियत इत्यर्थः। न्युङ्खाधिकारे पुनर्न्युङ्खमान इति वचनं प्रथमे द्वितीये तृतीये चतुर्थे वाक्षरे न्युङ्खमानेऽपि तस्मात् पूर्वमक्षरं न निहन्यत इत्येवमर्थम्" नारा०टी०। "तदपि निदर्शनायोदाहरिष्यामः" ६सू० "उक्तलक्षणस्यापि न्युङ्खस्यार्धौकारस्वरूपस्यालौकिकत्वादन्यदप्येवं जातीयकं सन्देहं व्यवर्त्तयितुं निदर्शनं क्रियते" नारा०टी०। "आपोऽउउउउओऽउउउउओऽउउउउ स्यः स्वपस्य पत्नीः सरस्वती तद्गृणते। वयोधोऽमापोऽ"७सू०"आपोऽ प्लुतः रायोऽप्लुतः वयोधोऽ मापोऽप्लुत इत्येवं न्युङ्खस्य पुनरावृत्तिप्रदर्शनं प्रत्यावृत्ति न्युङ्खप्रापणार्थम्। अयमेव पाठः अवाञ्छब्दसम्प्रदायागतः। यस्तु पुनःसंहितानुरूपेण पाठः स प्रमादकृतत्वात् त्यक्तव्यः" नारा०टी०। अत्र प्लुतस्य ओकारत्रयस्य उपरिष्टात् पञ्च पञ्च च अर्द्धौकारा एव बोध्या उकाराकारेण ये दर्शितास्ते अर्द्धौ-

द्वारा इति बोध्यम् "यज्ञकर्मण्यजपन्यूङ्खसामसु" जै० "यज्ञक्रियायां मन्त्रएकश्रुतिः स्याच्छब्दादीनवर्ज्जयित्वा "अग्निर्मूर्द्धादिवः ककुत्" । यज्ञेति किम् ? स्वाध्यायकाले त्वैस्वर्य्यमेव । अजपेति किम् ? ममाग्ने ! वर्चो विहवेष्वस्तु । जपोनाम उपांशुप्रयोगः यथा जले निमग्नस्य । न्यूङ्खानाम षोडश ओकाराः गीतिषु समाख्याः" सि०कौ० कात्या०श्रौ० भाषाद्यौ द्वादश ओकारा दीर्घसंध्या न्यूङ्खतया उक्ता यथा

"एकश्रुतिर्दूरात् सम्बुद्धौ यज्ञकर्मणि सुब्रह्मण्यासामजपन्यूङ्खयाजमानवर्जम्" कात्या० श्रौ० १।८।१९ "एकश्रुतिर्दूरात्सम्बुद्धावित्यनुवर्त्तमाने यज्ञकर्मणि मन्त्राणामेकश्रुतिर्भवति न केनचित् स्वरेण प्रयोगः किं सर्वत्र सुब्रह्मण्यासामजपन्यूङ्खयाजमानवर्जम् । एतानि वर्जयित्वा अन्येषु मन्त्रेष्वेकश्रुतिर्भवति । सुब्रह्मण्योऽमिन्द्रागच्छेत्यादिर्निगदः सुब्रह्मण्या सामानि उद्गातृभिर्यज्ञे गीयमानानि । जपाय धूरसि इन्द्रस्य बाहुरसि मयिदित्याद्या जपतीति शब्देन चोदिता मन्त्राः । न्यूङ्खास्तु पृष्ठ्ये प्रउगे स्तोत्रवेदे प्रसिद्धा ओकारा द्वादश पिबा सोममिन्द्र मन्दतु त्वा यं ते ओ ओ ओ३ ओ ओ ओ३ ओ ओ ओ ओ३सुषाव । हर्य्यश्वाद्रिरित्यादयः । याजमानं च सर्वं विष्णुक्रमादिकम् । तत्सम्बन्धिनो ये मन्त्रादिवि विष्णुरित्याद्याः यत्र वा यजमानस्येमे याजमानाः एषु सुब्रह्मण्यादिषु याजमानान्तेषु यथा प्राग्एव संहिता स्वरो भवति नैकश्रुतिः" कर्कः । उभयोः पक्षयोः वेदभेदादविरोधः । २अतिशये ३मनोहरे त्रि० ।

न्युञ्ज न० नि+उञ्ज-अच् । १कर्मरङ्गफले २दर्भमयकुशे पु० ३अधोमुखे त्रि० मेदि० । "प्रथमपात्रे संस्कृतान् समवनीय पात्रं न्युञ्जं कुर्यात् पितृभ्यः स्थानमसीति" गोभि० न्युञ्जमधोमुखम् "पितृभ्यः स्थानमसीति न्युञ्जं पात्रं करोत्यधः" यास्क० । "पितृपात्रे निधायाथ न्युञ्जमुत्तरतोन्यमेत्" मत्स्यपु० । "न्युञ्जानि च विमानानि" हरिवं० ४२अ० । ४कुशे स्तम्भाले च पु० हेमच० वक्रीकृतपृष्ठाधोमुखे मानुषे ५कुशे त्रि० अमरः ।

न्युञ्जखड्ग पु० न्युञ्जः कुञ्ज इव खड्गः (तरवार) इति प्रसिद्धे खड्गभेदे त्रि० । [च अमरः ।

न्यून त्रि० न्यूनयति नि+ल्यु-परिमाणे अच् । १ऊने २गर्ह्ये

न्यूनपञ्चाशद्भाव पु० न्यूनपञ्चाशतः ऊनपञ्चाशतो वा यस्य विकारो यत्र । वातुले (पागल) "उदीरितेन्द्रियो धाता वीक्षाङ्चक्रे यदालक्षाम् । तदैव न्यूनपञ्चाशद्भावो जातः शरीरतः" काशिपु० २अ० ।

न्योकस् त्रि० नियतमोको यस्य । नियतस्थानयुक्ते "सुतेजसे न्योकसे" ऋ० १।९।१० "न्योकसे नियतस्थानाय इन्द्राय" भा० ।

न्योचनी स्त्री नि+उचतिः सेयाकर्मा निघ० ल्यु गौरा० ङीष् । दासाम् "रैभ्यासीदनुदेयी नारांशसी न्योचनी" ऋ० १०।८५।६ "न्योचनी वधूशुश्रूषार्थं दीयमाना दासी" भा० ।

न्योजस् त्रि० नि+उज-असि बहोपे गुणः । आर्ज्जवशून्ये कुटिले ।

नृसिंहमालिन् त्रि० नृसिंहमाला अस्यास्ति इति । १नरास्थिमालाभूषणे स्त्रियां ङीप् । २शिवे पु० त्रिका० । शुभम्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये नकारादिशब्दार्थसङ्कलनम् ।

इतः परं ग्रन्थसंक्षेपाशया पकारादिशब्दावधि फकारादिशब्दानां निरुदाहरणा अर्थाः सङ्कलयितव्याः । परिशिष्टे खण्डे च उदाहरणानि वक्तव्यानि ।

परिशिष्टम् ।

१८२६ पृष्ठस्थनकुलीशब्दार्थपरिशिष्टम् । १शिवे तत्प्रणीतञ्च पाशुपतशास्त्रं तन्मतञ्च सर्वदर्शनसंग्रहे दर्शितं यथा "तदेतद्वैष्णवमतं दासत्वादिपदवेदनीयं परतन्त्रत्वदुःखावहत्वात् दुःखं जिहीर्षुभिर्मोक्षार्थिभिरसदभिलषणीयमानाः पारमैश्वर्यं कामयमानाः पराभिमता सुखा न भवन्ति परतन्त्रत्वात् पारमैश्वर्यरहितत्वादस्मदादिवत् सुखात्मानश्च परमेश्वरगुणसम्बन्धिनः पुरुषत्वे सति समस्तदुःखबीजविधुरत्वात् परमेश्वरवदित्याद्यनुमानं प्रमाणं प्रतिपद्यमानाः केचन माहेश्वराः परमपुरुषार्थसाधनपञ्चार्थप्रपञ्चनपरं पाशुपतशास्त्रमाश्रयन्ते । तत्रेदमादिमं सूत्रम् "अथातः पशुपतेः पाशुपतयागविधिं व्याख्यास्यामः" इति । अस्यार्थः अथाशब्दः पूर्वप्रक्रमापेक्षः । पूर्वप्रक्रमश्च गुरुं प्रति शिष्यस्य प्रश्नः । गुरुस्वरूपं गणकारितायां निरूपितम् "पञ्चकाण्डविधेया गणकैवल्यिकात्मकः । वेत्ता नवगणस्यास्य संस्कर्त्ता गुरुरुच्यते" इति । "लाभामलव्यायाय देयावस्थाविशुद्धयः । दीक्षाकारिबलान्यष्टौ पञ्चकाण्डीति हेतयः" इति । तिस्रो हेतय इति प्रयोक्तव्ये तीति हेतय इति छान्दसः प्रयोगः । तत्र विधी-

यमानसुपायफलं लाभः ज्ञानतपोदेवनित्यत्वस्थितिशुद्धि-भेदात् पञ्चविधः। तदाह हरदत्ताचार्यः "ज्ञानं तपोऽथ नित्यत्वं स्थितिः शुद्धिश्च पञ्चमीति"। आत्माश्रितो दुष्टभावो मलः स मिथ्याज्ञानादिभेदात् पञ्चविधः। तदाह सएव "मिथ्याज्ञानमधर्मश्च सक्तिर्हेतुश्च तिस्तथा। पशुत्वमूलं पञ्चैते तन्त्रे हेया विविक्तितः" इति। साधकस्य शुद्धिहेतूपायः वासचर्यादिभेदात् पञ्चविधः। तदाह "वासचर्या जपो ध्यानं सदा रुद्रस्तुतिस्तथा। प्रतिपत्तिश्च लाभानामुपायाः पञ्च निश्चिताः"। येनार्थानुसन्धानपूर्वकं ज्ञानतपोदृष्टी प्राप्नोति स देशो गुरुजनादिः यदाह "गुरुर्जनो गुहा देशः श्मशानं रुद्र एव चेति" आ लाभप्राप्तेरेकतमादौ यदवस्थानं साऽवस्था व्यक्ताव्यक्तादिविभेदेन विभिन्ना, तदुक्तम् "व्यक्ताव्यक्तजपा दानं निष्ठा चैव हि पञ्चमीति"। मिथ्याज्ञानादीनामन्यतमव्यपोहो विशुद्धिः सा प्रतियोगिभेदात् पञ्चविधा। तदुक्तम् "अज्ञानस्याप्यसङ्गस्य हानिः सङ्कल्पस्य च। च्युतिर्हानिः पशुत्वस्य शुद्धिः पञ्चविधा स्मृतेति" दीक्षाकारिपञ्चकं चोक्तम् "द्रव्यं कालः क्रिया मूर्तिर्गुरुश्चैव हि पञ्चमः" इति मलपञ्चकञ्च "गुरुभक्तिः प्रसादश्च मतेर्ज्ञानजयस्तथा। धर्मश्चैवाप्रमादश्च बलं पञ्चविधं स्मृतमिति" पञ्चमलक्षयकरणार्थं मानाज्ञानविरोधिनोऽर्थार्जनोपाया इत्तयः भैक्ष्योत्पन्नयाचनाभिधा इति। शेषमशेषमाकर एवावगन्तव्यम्। अत्राथशब्देन दुःखात्मनः प्रतिपादनम् आध्यात्मिकादिदुःखव्यपोहप्रयोजनत्वात्तस्य पशुशब्देन कार्यस्य, परतन्त्रत्ववचनत्वात्तस्य, पतिशब्देन कारणस्य, ईश्वरः पतिरीयितेति जगत्कारणत्वीभूतेश्वरवचनत्वात्तस्य। योगविधी तु प्रसिद्धौ। तत्र दुःखात्मो द्विविधः अनात्मकः सात्मकश्चेति तत्रानात्मकः सर्वदुःखानामत्यन्तोच्छेदरूपः। सात्मकस्तु दृक्क्रियाशक्तिलक्षणसैन्यम्। तत्र दृक्शक्तिरेकापि विषयभेदात् पञ्चविधा उपचर्यते" दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वञ्चेति। तत्र सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पर्शादिविषयं ज्ञानं दर्शनम्। अशेषशब्दविषयं सिद्धिज्ञानं श्रवणम्। समस्तचिन्ताविषयं सिद्धिज्ञानं मननम्। निरवशेषशास्त्रविषयं अन्यतोऽर्थतश्च सिद्धिज्ञानं विज्ञानम्। उक्तानुक्ताशेषार्थेषु समासविस्तरविभागविशेषतश्च तत्त्वज्ञानप्रदोदितसिद्धिज्ञानं सर्वज्ञत्वम् इत्येषा धीशक्तिः। क्रियाशक्तिरेकापि त्रिविधोपचर्यते मनोजवित्वं कामरूपित्वं विकरणधर्मित्वञ्चेति। तत्र निरतिशयशीघ्रकारित्वं मनोजवित्वम्। कर्मादिनिरपेक्षस्य स्वेच्छयैवानन्तपलक्षणविलक्षणसरूपकरणाधिष्ठातृत्वं कामरूपित्वम्। उपसंहृतकरणस्यापि निरतिशयैश्वर्यसम्बन्धित्वं विकरणधर्मित्वमित्येषा क्रियाशक्तिः। यदस्वतन्त्रं सर्वं कार्यं त्रिविधं विद्या कला पशुश्चेति। तत्र पशुगुणो विद्या, सापि द्विविधा बोधाबोधस्वभावभेदात् बोधस्वभावा विवेकाविवेकप्रवृत्तिभेदात् द्विविधा तत्र या विवेकप्रवृत्तिः प्रधानमहदहङ्कारा चित्तमित्युच्यते। चित्तेन हि सर्वः प्राणी बाह्यार्थात्मकाशानुगृहीतं सामान्येन विवेचितमविवेचितञ्चार्थं चेतयते इति। पञ्चार्थधर्मार्थधर्मिका पुनरबोधात्मिका विद्या अज्ञानं येनोच्यते। चेतनपरतन्त्रत्वे सत्यचेतना कला सापि द्विविधा कार्याख्या कारणाख्या चेति। तत्र कार्याख्या दशविधा पृथिव्यादीनि पञ्च तन्मात्राणि रूपादयः पञ्च गुणाश्चेति। कारणाख्या त्रयोदशविधा ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकम् अध्यवसायाभिमानसङ्कल्पाभिवृत्तिभेदात् बुद्ध्यहङ्कारमनोलक्षणमन्तःकरणत्रयञ्चेति। पशुत्वसम्बन्धी पशुः सोऽपि द्विविधः साञ्जनो निरञ्जनश्चेति। तत्र साञ्जनः शरीरेन्द्रियसम्बन्धी निरञ्जनस्तु यज्ञार्थभाष्यदीपिकादौ द्रष्टव्यः। समस्तसृष्टिसंहारानुग्रहकारि कारणं तद्रूपेणापि गुणकर्मभेदापेक्षया विभाग उक्तः पतिः साद्य इत्यादिना। तत्र पतित्वं निरतिशयदृक्क्रियाशक्तिमत्त्वं तेनैश्वर्येण नित्यसम्बन्धित्वम्। आद्यन्तमनाद्यन्तुकैश्वर्यसम्बन्धित्वम् इत्यादर्थकारादिभिस्तीर्थकरैर्निरूपितम्। चित्तद्वारेणात्मेश्वरसम्बन्धो योगः स च द्विविधः क्रियालक्षणः क्रियोपरमलक्षणश्चेति तत्र जपध्यानादिरूपः क्रियालक्षणः क्रियोपरमलक्षणस्तु संविद्रूपा संज्ञितः। धर्मार्थसाधकव्यापारो विधिः। स च द्विविधः प्रधानभूतो गुणभूतश्च तत्र प्रधानभूतः साक्षाद्धर्महेतुः चर्या। सा द्विविधा व्रतं द्वाराणि चेति। तत्र भस्मस्नानप्रथोपहारजपप्रदक्षिणादि व्रतम्। तदुक्तम् भगवता नकुलीशेन "भस्मना त्रिपुण्ड्रं स्नायीत भस्मनि शयीतेति"। अत्रोपहारो शिवस्य स च षडङ्गः। तदुक्तम् सूत्रकारेण "हसितगीतनृत्यडुङ्कारनमस्कारजपप्रदक्षिणोपहारेण उपतिष्ठेतेति"। तत्र हसितं नाम कण्ठोष्ठपुटविस्फूर्जनपुरःसरमट्टहासः। गीतं गान्ध-

र्वशास्त्रसमयानुसारेण महेश्वरसम्बन्धिगुणधर्मादिनिमित्तानां चिन्तनम्। नाट्यमपि नाट्यशास्त्रानुसारेण हस्तपादादीनामवस्थेषणादिकमङ्गप्रत्यङ्गोपाङ्गसहितं भावाभावसमेतञ्च प्रयोक्तव्यम्। ङुङुङ्कारो नाम जिह्वातालुसंयोगाच्छिष्यमाणः पुष्टपमनादसदृशो नादः। ङुङुगिति शब्दानुकारो वषड्डितिवत्। यत्र लौकिका न भवन्ति तत्रैतत् सर्वं गूढं प्रयोक्तव्यम्। शिष्टं प्रसिद्धम्। द्वाराणि तु क्राथनस्यन्दनभन्दनशृङ्गारणावितत्कारणावितङ्गाधणानि। तत्रासुप्तस्येव सुप्तलिङ्गवद्दर्शनं क्राथनम्। वाय्वभिभूतस्येव शरीरावयवानां कम्पनं स्यन्दनम्। उपहतपादेन्द्रियस्येव गमनं भन्दनम्। रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तत् शृङ्गारणम्। कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमवितत्कारणम्। व्याहतापार्थकादिशब्दोच्चारणमवितङ्गाधणमिति। गुणभूतस्तु चर्यानुग्राहकोऽनुस्नानादिः भैक्षोच्छिष्टादिनिर्मिता योग्यताप्रत्ययनिवृत्त्यर्थः। तदप्युक्तं सूत्रकारेण "अनुस्नाननिर्माल्यलिङ्गधारीति"। तत्र समासो नाम धर्मिमात्राभिधानं तच्च प्रथमसूत्र एव विवृतम्, पञ्चानां पदार्थानां प्रमाणतः प्रपञ्चाभिधानं विस्तरः। स खलु राशीकरभाष्ये द्रष्टव्यः। एतेषां यथासम्भवं लक्षणतोऽसङ्करेणाभिधानं विभागः स तु विहितशास्त्रान्तरेभ्योऽमीषां गुणातिशयेन कथनं विशेषः। तथा हि अन्यत्र दुःखनिवृत्तिरेव दुःखान्तः इह तु पारमैश्वर्यप्राप्तिश्च। अन्यत्राऽभूत्वा भावि कार्यमिह तु नित्यं पश्वादि। अन्यत्र सापेक्षः कारणम् इह तु निरपेक्षो भगवानेव। अन्यत्र कैवल्यादिफलको योगः इह तु पारमैश्वर्यदुःखान्तफलकः। अन्यत्र पुनरावृत्तिः स्वर्गादिः इह पुनरपुनरावृत्तिरूपः सामीप्यादिफलकः। ननु महदेतदिन्द्रजालं यन्निरपेक्षः परमेश्वरः कारणमिति तथात्वे कर्मवैफल्यं सर्वकार्याणां समसमयसत्त्वादयेति दोषद्वयं प्रादुःष्यात् मैवं मन्येथाः व्यधिकरणत्वात्। यदि निरपेक्षस्य भगवतः करणत्वं स्यात्तर्हि कर्मणो वैफल्ये किमायातम्। प्रयोजनाभाव इति चेत् कस्य प्रयोजनाभावः कर्मवैफल्ये कारणं किं कर्मणः? किं वा भगवतः। नाद्यः ईश्वरेच्छानुगृहीतस्य कर्मणः सफलत्वोपपत्तेः। तदनुगृहीतस्य ययातिप्रभृतिकर्मवत् कदाचित् निष्फलत्वसम्भवाच्च। न चैतावता कर्मस्वप्रवृत्तिः कर्मकादिवदुपपत्तेः ईश्वरेच्छायत्तत्वाच्च पशूनां प्रवृत्तेः। नापि द्वितीयः परमेश्वरस्य पर्याप्तकामत्वेन कर्मसाध्यप्रयोजनापेक्षाया अभावात्। यदुक्तं "समसमयसत्त्वात्" इति तदप्ययुक्तम् अचिन्त्यशक्तिकस्य परमेश्वरस्येच्छानुविधायिन्या अव्याहतक्रियाशक्तेः कार्यकारित्वाभ्युपगमात्। तदुक्तं सम्प्रदायविद्भिः "कर्मादिनिरपेक्षस्तु स्वेच्छाचारी यतो ह्ययम्। ततः कारणतः शास्त्रे सर्वकारणकारणमिति"। ननु दर्शनान्तरेऽपीश्वरज्ञानान्मोक्षो लभ्यत एवेति कुतोऽस्य विशेष इति चेन्नैवं वादीः विकल्पानुपपत्तेः किमीश्वरविषयज्ञानमात्रं निर्वाणकारणं किं वा साक्षात्कारः अथ वा यथावत्तत्त्वनिश्चयः। नाद्यः शास्त्रमन्तरेणापि प्राकृतजनवद्देवानामधिपो महादेव इति ज्ञानोत्पत्तिमात्रेण मोक्षसिद्धौ शास्त्राभ्यासवैफल्यप्रसङ्गात्। नापि द्वितीयः अनेकमलप्रचयोपचितानां पिशितलोचनानां पशूनां परमेश्वरसाक्षात्कारानुपपत्तेः। तृतीयेऽस्मन्मतापातः पाशुपतशास्त्रमन्तरेण यथावत्तत्त्वनिश्चयानुपपत्तेः। तदुक्तमाचार्यैः "ज्ञानमात्रे यथाशास्त्रं साक्षाद्दृष्टिस्तु दुर्लभा। पञ्चार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चयः" इति। तस्मात् पुरुषार्थकामैः पुरुषधौरेयैः पञ्चार्थप्रतिपादनपरं पाशुपतशास्त्रमाश्रयणीयम्"। नकुलीश्वरोऽपि शिवे काशीस्थशिवलिङ्गभेदे च काशीख० १००अ०।

४०० पृष्टस्यनष्टशब्दार्थपरिशिष्टम्। छन्दःशास्त्रसिद्धे प्रस्तारे इयत्सङ्ख्यत्वमात्रज्ञाने तत्स्वरूपावधारणाय ४क्रियाभेदे "प्रस्तारो नष्टसहितमेकद्व्यादिजक्रिया" इत्तर० उपक्रमे "नष्टस्य यो भवेदङ्कस्तस्यार्द्धेऽर्द्धे समे च लः। विषमे चैकमाधाय तस्यार्द्धेऽर्द्धे गुरुर्भवेत्"। नष्टस्य अज्ञातस्वरूपस्य योऽङ्कः प्रस्तारमध्यपातिसंख्याज्ञापकः अङ्कः तस्य तत्संख्यायाः समत्वे लोलघुर्लेख्यः तस्य अर्द्धे कृते तस्य समत्वे च सति लो लघुर्लेख्यः। पुनस्तस्याप्यर्द्धे समे लघुः एवं यावदक्षरसंख्या तावत्। नष्टस्य संख्याया विषमत्वे गुरुः, तत्रैकमाधाय संयोज्य तस्यार्द्धे कृते विषमत्वे गुरुः समत्वे लघुः विषमत्वे एकयोजिते पुनरर्द्धे कृते समत्वे लघुः विषमत्वे गुरुः, यथा त्र्यक्षरप्रस्तारे चतुर्थो भेदः कीदृशः इति प्रश्ने, तत्संख्यायाः समत्वात् प्रथमं लघुः तस्यार्द्धे कृते तस्य समत्वेन पुनर्लघुः शिष्टे द्व्यङ्केऽर्द्धीकृते तस्य विषमत्वात् गुरुः एवञ्च चतुर्थो भेदः अन्त्यगुरु इत्युत्तरम् इत्यर्थः।

प

पः पञ्चमवर्गस्य प्रथमोवर्णः स्पर्शवर्णेषु एकविंशतितमः। तस्योच्चारणस्थानमोष्ठः। तस्योच्चारणे आभ्यन्तरप्रयत्नः ओष्ठेन सह जिह्वाग्रस्य स्पर्शः। बाह्याः प्रयत्नाः विवारश्वासघोषाः अल्पप्राणश्च। अस्मिन् परे विसर्गस्य स्थाने उपाध्मानीयः। वर्णाभिधाने अस्य वाचकशब्दाउक्ता यथा "पः सुरप्रियता तीक्ष्णा लोहितः पञ्चमो रमा। शुद्धकर्त्ता निधिः शेषः कालरात्रिः सुरारिहा। तपनः पालनः पाता देवदेवो निरञ्जनः। सावित्री पातिनी पानं वीरतन्त्रो धनुर्द्धरः। दक्षपार्श्वश्च सेनानीर्मरीचिः पवनः शनिः। उड्डीशं लविनी कुम्भोऽनलरेखा च मोहकः। मूलं द्वितीयमिन्द्राणी लोलाक्षी मनकात्मकः" तदधीशदेवताध्यानं यथा "द्विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्। रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्। मणिरत्नादिकेयूरहारभूषितविग्रहाम्। चतुर्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्। एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य स्वरूपं यथा "अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्। चतुर्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम्। पञ्चदेवमयं वर्णं स्वयं परमकुण्डली। पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं तथा। त्रिगुणावस्थितं वर्णमात्मादितत्त्वसंयुतम्। महामोक्षप्रदं वर्णं हृदि भावय पार्वति!" इति कामधेनुतन्त्रे ५पटले। अस्य मातृकन्यासे दक्षपार्श्वे न्यासता। काव्यादौ अस्य प्रथमप्रयोगे सुखं फलम्। "सुखभयमरणक्लेशदुःखं पवर्गः" इ०टी०। पवर्गस्थानां पञ्चानां वर्णानां क्रमेण फलपञ्चकोक्तेः। [एकाक्षरकोषः।

प पु० पत-पा-वा ड। १पतने २पर्णे ३पाने ४पातने चरित्रे [अमरः।

पकार पु० प+स्वरूपे कार। पवर्ण

पक्कण पु० पचति पच-क्विप् कण-अच् कर्म०। शबरालये

पक्कपौड पु० (पाखौडा) इति प्रसिद्धे वृक्षभेदे राजनि०।

पक्तृ त्रि०पच-तृन्। १पाककर्त्तरि २अग्नौ पु० अग्निपु०२अ०

पक्ति स्त्री पच-भावे क्तिन्। १पाके २गौरवे मेदि० ३परिणामे च। [काले जायमाने शूले रोगभेदे राजनि०।

पक्तिशूल न० पक्तौ अन्नपरिणामे शूलम्। अन्नादिपाक-

पक्त्र न० पच-त्र। गार्हपत्ये गृहस्थधर्मे उज्ज्वलदत्तः।

पक्त्रिम त्रि० पच-क्त्रि ततो-मप्। पाकनिर्वृत्ते

पक्थ पु० पच-बा० थल्। १राजभेदे ऋ०८ २२।१०भा० भावे थल् २पात्रे च। ततोऽस्त्यर्थे इनि पक्थिन्। पाकयुक्ते ऋ०६।२०।१२ भा०।

पक्व त्रि० पच-क्त तस्य वः। १परिणते २दृढे ३विनाशोन्मुखे ४कृतपाके च अमरः। भावे क्त ५पाके न०

पक्वकृत् पु० पक्वं करोति कृ-क्विप् तु०। १निम्बवृक्षे शब्दच० २पाककर्त्तरि त्रि०।

पक्वरस पु० पक्वस्य अन्नगुड़ादेः रसः। मद्ये शब्दरत्ना०।

पक्ववारि न० पक्वस्यान्नादेर्वारि। काञ्जिके(आमानि)शब्दच०।

पक्वश पुंस्त्री पुक्वश+पृषो०। म्लेच्छजातिभेदे हला०।

पक्वशस्योपमोन्नति पु० पक्वशस्यस्योपमा यत्र तादृशी उन्नतिरस्य। राजकदम्बे नैषधट्प्र०।

पक्वातीसार पु० सुश्रुतोक्ते आमातिसारभिन्ने पञ्चप्रकारे अतिसारभेदे अतिसारशब्दे १०६पृ० द्रष्टव्यम्।

पक्वाधान न० पक्वस्य पाकस्याधानम् तु०। नाभेरधोभागस्थे पाकाशये सुश्रुतः पक्वाशयोऽप्यत्र "पक्वाशयस्त्वधोनाभेरूर्द्ध्वमामाशयः स्थितः" वैद्यकम्।

पक्वान्न न० कर्म०। १कृतपाके अन्ने "आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" स्मृतिपरिभाषिते शूद्रस्य २आमान्ने च। [चत् त।

पच्च परिग्रहे अद० चु० उभ० सक० सेट्। पच्चयति ते अपप-

पच्च परिग्रहे चु० उभ० सक० सेट् अयं भ्वादिस्थ परः पच्चति पच्चयति ते अपपच्चत् त अपच्चीत्

पच्च पु० पच्च-अच्। १शुक्लकृष्णप्रतिपदादिपञ्चदशान्तपञ्चदशतिथ्यात्मके काले २खगानां पतत्रे (पाका) ३शरस्य पुङ्खस्य पक्षे। केषांतु परः समूहार्थे पच्चप्रत्ययान्तः। ४केशसमूहार्थे यथा केशपच्च इत्यादि ५पार्श्वे ६गृहे न्यायोक्ते ७सन्दिग्धसाध्यवति पदार्थे, पच्चताशब्दे द्रष्टव्यम् यथा पर्वतो वह्निमान्। ८विरोधे ९सहाये १०बले ११सख्यौ १२चक्रवीरव्ये १३राजकुञ्जरे १५खगे १६वलये १७समूहे १८पिच्छे १९देहार्द्धे च अमरमेदिन्यौ। २०विहगे २१शुद्धे शब्दरत्ना०। २२वर्गे २३देहे २४देहाङ्गभेदे वादिप्रतिवादिभ्यां दर्शितविप्रतिपत्तौ २५कोटिभेदे च।

पच्चक पु० पच्च इव कायति कै-क। १पार्श्वद्वारे (खिड़की) अमरः। २पार्श्वमात्रे मेदि०। ३सहाये शब्दर०।

पच्चग्रहण न० भावप्राधान्यं तु०। साहाय्यपरिग्रहे।

पच्चचर पु० पच्चे शुक्लादौ चरति चर-ठ। १चन्द्रे २पृथक् चरे ३गजे च मेदि०।

पक्षज पु॰ पक्षे शुक्ले जायते जन–ड। १चन्द्रे त्रिका॰ २पक्षे जातमात्रे त्रि॰। पक्षजन्माद्यत्र यद्रत्ना॰

पक्षता स्त्री पक्षस्य भावः। न्यायोक्ते अनुमानेच्छाभाव समानाधिकरणे १साध्यवत्तानिश्चयाभावे यत्र वह्न्यादिकं साध्यते तत्र धर्मिणि वह्निमत्त्वनिश्चयाभावे एव पक्षत्वं तत्र तन्निश्चयसत्त्वे तु अनुमानेच्छासत्त्वएव पक्षता नेतरथेति न्याये स्थितम्। "विपाधयिषया भूम्या सिद्धिर्यत्र न विद्यते। स पक्षस्तत्र दृष्टित्वं ज्ञानादनुमितिर्भवेत्" भाषा॰

पक्षति स्त्री पक्षस्य मूलम् ति। पक्षारम्भके १प्रतिपदि तिथौ खगानां २पक्षस्य मूले च (डाना) अमरः। [अमरः।

पक्षद्वार न॰ पक्षे पार्श्वे द्वारम्। (खिडकी) पार्श्वस्थे द्वारे

पक्षधर पु॰ पक्षं धारयति धृ–अच्। १चन्द्रे जटाध॰ पक्षं पञ्चदशतिथ्यात्मककालम् ततृतिथिमानादिकं धारयति अच् तत्कारके २विद्वद्भेदे स हि चिन्तामण्याद्योक्तं प्रसन्नराघवनाटकं च चकार तस्य जयदेवेति नामान्तरम् पक्षस्यतिथिमानादिधारणाशक्तिमत्त्वात्तस्य तथात्वसिद्धिः।

पक्षपात पु॰ पक्षे अन्याय्यसाहाय्ये पातः अभिनिवेशः। १अन्याय्यसाहाय्ये "पक्षपातः पतङ्गानामिति" विजयरक्षितोक्ते खगानां २ज्वरभेदे च।

पक्षपातिता स्त्री पक्षपात+अस्त्यर्थे इनि तस्य भावः तल्। १साहाय्यकरणायाभिनिवेशे २पक्षाभ्यां पतने च "न परं पथि पक्षपातिताऽनवलम्बे किन्तु आदर्शेऽपि सा"नैषधम्।

पक्षपालि स्त्री पक्षस्य द्वारभेदस्य पालिरिव (खिड़की) द्वारभेदे यद्रत्ना॰।

पक्षभाग पु॰ पक्षस्य इव भागः। कुक्षिपार्श्वभागे अमरः।

पक्षमूल न॰ ६त॰। (पाचारमूल) पक्षस्य १मूले २प्रतिपत्तिथौ च अमरः। [स्त्रियां जातित्वात् ङीष्।

पक्षवाहन पुंस्त्री पक्षौ वाहनमिवास्य। खगे यद्रत्न॰।

पक्षस् न॰ पच–असुन् हट् च। पक्षशब्दार्थे 'पक्षसी तु अतौ पक्षौ" उत्तररत्नम्। यजु॰ २६।१ उद॰ट्यम्।

पक्षसन्धि पु॰ पक्षयोः सन्धिः। पर्वसन्धिकाले

पक्षसुन्दर पु॰ पक्षे सुन्दरः। शोभे हारा॰। [होमभेदे।

पक्षहोम पु॰ पक्षव्यापको होमः। पक्षपर्यन्तं कर्त्तव्ये

पक्षाघात पु॰ वातरोगभेदे तल्लक्षणादि सुश्रुतोक्तं यथा "अथोगमः शतियंगङ्गा धमनीरुद्धदेहगाः। यदा प्रकुपितोऽत्यर्थं मानरिक्ता प्रपद्यते। तदन्यतरपक्षस्य सन्धिबन्धान् विमोचयन्। हन्ति पक्षं तमाहुर्हि पक्षाघातं भिषग्वराः। यस्य कायं शरीरार्द्धमकर्मण्यप्रचेतनम्। ततः पतत्यसन् वापि जहात्यनिलपीडितः। शुद्धवातहतं पक्षं लक्षसाध्यतमं विदुः। साध्यमन्येन संसृष्टमसाध्यं चयकोपकम्। वायुरूर्द्ध व्रजेत्स्थानात् कुपितो हृदयं शिरः। मन्यां च पीडयत्यङ्गान्याक्षिपेच्चमयेच्च सः"। पक्षवधोऽत्र।

पक्षान्त पु॰ पक्षस्यान्तो यत्र काले। १अमावास्यायां २पूर्णिमायाञ्च तिथौ "पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्" ज्यो॰त॰। ६त॰। ३पक्षस्यावसाने च।

पक्षादि पु॰ ६त॰। पक्ष आदिर्यस्य चतुरर्थ्यां फक् प्रत्ययनिमित्ते यद्रत्ने स च गणः या॰ ग॰ सू॰ उक्तो यथा पक्ष त्वक् तम कुक्ष अण्ड कम्बलिका वलिक चित्र अक्षि पक्षिन् (पक्ष च) कुम्भ शीरक संख सकल सरस समल अतिक्षन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाकसिंहक अङ्कुश तुषर्णक हंसक हिंसक कुल्य चित्र चित्र यमल हस्त कलाप कर्णक"। पाचायण इत्यादि।

पक्षालिका स्त्री कुमारानुचरनाटकाभेदे भा॰ग॰ ४७अ॰

पक्षालु पु॰ पक्ष+अस्त्यर्थे आलुच्। विहगे यद्रत्न॰।

पक्षावसर पु॰ पक्षस्यावसरोऽपसरणं यत्र काले। पौर्णमास्याम् अमावास्यायाञ्च यद्रत्न॰।

पक्षिणी स्त्री पक्षतुल्यौ दिवसौ यस्या अस्ति इनि ङीप्। आगामिवर्त्तमानाद्युक्तायां रात्रौ अमरः। "द्वावङ्गावेव रात्रिश्च पक्षिणीत्यभिधीयते" शुद्धि॰त॰। तत्र पूर्वदिन रात्रौ तन्निमित्ते जाते पूर्वदिवसीयदिनमादायैव पक्षिणी व्यवहारः" शु॰त॰ स्थितम्। "यापयेत् पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवैस्तु च" मनुः। २विहगजातिस्त्रियां स्त्री

पक्षिन् पु॰ पक्ष+अस्त्यर्थे इनि। १खगे तेषामुत्पत्तिर्यथा "अत्रेश्च भार्या श्येनी वीर्यवती महाबली। सम्पातिश्च जटायुश्च प्रासोष्ट पक्षिसत्तमौ। सम्पातिर्जनयन् पुत्रान् बाहूंश्च जटायुषः। भार्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी। धृतराष्ट्री गरुत्मांस्तु शुन्यां जज्ञे च षट् सुतान्। विनिश्चय सुनेत्रश्च सुमुखं सुनसन्तथा। सुरूपन्तु सुपर्णाख्यं तेषां पुत्रा अनन्तकाः। चतुर्दश सहस्राणि क्रूराणां पन्नगाशिनाम्। सप्तहीपेष्विमे सन्ति गारुडास्ते महाबलाः। भासीपुत्रास्तथा भासा उलूकाः काककुक्कुटाः। मयूराः कलविङ्काश्च कपोतौ चैव तित्तिरी। क्रौञ्चां बाभ्रीयसा जातन् कुररा सारसारकाः। धृतराष्ट्री कलहंसान् धार्त्त-

राङ्गांश्च भाषिनी। चक्रवाकांश्च विहगान् सद्यो जातोदकान् द्विजान्। अन्यानपि द्विजान् जग्धे पुत्रपौत्राननन्तकान्" अग्निपु०। गुरुभक्षणक्षुभक्षस्थूलकायपक्षिणां पूर्वार्द्धस्य श्रेष्ठत्वं यथा "गुरुभक्षा बहुभुजो ये चोपचितमेदसः। एकदेहेऽपि पूर्वार्द्धं मृगाणां पक्षिणां वरम्" पक्षिणामङ्गभेदानामुत्तरोत्तरं गुरुत्वं यथा "सर्वेषाञ्च शिरःस्कन्धश्रोणिहृत्पर्शवस्तदुद्गमः। पादपुच्छान्त्रमस्तिष्कशुक्रक्रोड़ाः मनोहनाः। धातवः शोणितादयश्च गुरवः स्युः परस्परम्"। तन्मांसगुणाः। "मत्स्यकूर्मखगाण्डानि स्वादुवाजीकराणि च। कटुपाकानि तानि स्युर्वातश्लेष्महराणि च" राजवल्लभः। तद्भेदमांसगुणाः सुश्रुतोक्ता यथा

"लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनघृकावातीकचकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रकक्रुतित्तिरिकुररवाङ्कयवलकप्रभृतयस्त्वाहृष्या विष्किरा लघवः शीतमधुरा कषाया दोषशमनाश्च। "संग्राही दीपनश्चैव कषायमधुरो लघुः। लावः कटुविपाकश्च सन्निपाते च पूजितः। दैष्टगुरुष्णमधुरो दृष्यो मेधाग्निवर्द्धनः। तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः। रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः। कफोत्थेषु च रोगेषु मन्दवाते च शस्यते। वातपित्तहरा दृष्या मेधाग्निबलवर्द्धनाः। लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः। कषायः स्वादुलवणस्त्वच्यः केश्यो रुचिप्रदः। मयूरः स्वरमेधाग्निदृक्शोत्रेन्द्रियदार्ढ्यकृत्। स्निग्धोष्णोऽनिलहृद्दृष्यः स्वेदस्वरबलावहः। दृंहणः कुक्कुटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु सः। वातरोगज्वरवमीविषमज्वरनाशनः"। "कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गटहकुलिङ्गगोक्षोड़कडिंडिमाणकशतपत्रकमातृनिन्दकभेदाग्निशुकसारिकावल्लकुलीगिरियालङ्गालटूषकसुग्टहोच्छङ्गरीटकहारीतदात्यूहप्रभृतयः प्रतुदाः। कषायमधुरा रूक्षाः फलाहारा मरुत्कराः। पित्तश्लेष्महराः शीता बहुमूत्रालवर्चसः। सर्वदोषकरस्तेषां भेदायी मलदूषकः। कषायस्वादुलवणो गुरुः काणकपोतकः। रक्तपित्तप्रशमनः कषायविशदोऽपि च। विपाके मधुरश्चापि गुरुः पारावतः स्मृतः। कुलिङ्गो मधुरःस्निग्धः कफशुक्रविवर्द्धनः। रक्तपित्तहरो वेग्रसकुलिकस्त्वतिशुक्रदः"।

पक्षिराज पु० ६त० टच्समा०। गरुडे पक्षीन्द्रादयोऽप्यत्र।

पक्षिल पु० पक्ष-बा० इलच्। वातृस्यायने गौतमसूत्रभाष्यकारके मुनिभेदे त्रिका०। [२नीडे च त्रिका०।

पक्षिशाला स्त्री ६त०। (चिड़ियाखाना) १पक्षिवासस्थाने

पक्षिसिंह पु० पक्षी सिंह इव उपमितस०। गरुडे त्रिका०

पक्षिस्वामिन् पु० ६त०। गरुडे हेमच०।

पक्ष्णु त्रि० पच-स्नु। पाकशीले

पक्ष्मकोप पु० सुश्रुतोक्ते नेत्ररोगभेदे "पक्ष्माशयगता दोषाः कीकोपाश्रिताश्च ये। निर्वर्त्तयन्ति पक्ष्माणि तैर्जुष्टत्वाच्च दूयते। उत्पाटितैः पुनः शान्तिः पक्ष्मभिः सोपजायते। वातातपानलद्वेषी पक्ष्मकोपः स उच्यते" पक्ष्मप्रकोपोऽप्यत्र पु०।

पक्ष्मन् न०पच-मनिन्। १नेत्रावरके लोम्नि २पद्मादेः केसरे अमरः ३स्त्रजादेरलभागे ४खगादेः पक्षे च अमरमाला।

पक्ष्मल त्रि० पक्ष्मन्+विभा० मत्वर्थे इलच्। पक्ष्मयुक्ते

पङ्क पु०न० पचि-विस्तारे कर्मणि करणे वा घञ् कुत्वम्। अर्द्धर्चा०। १कर्दमे २पापे च अमरः। [त्रिका०।

पङ्ककर्वट पु० पङ्केषु कर्वटः मनोहरः। जलयुक्तपङ्के

पङ्ककीर पुंस्त्री पङ्कप्रियः कीरः। (कादाखोंचा) पक्षिभेदे त्रिका० स्त्रियां जातित्वात् ङीष्।

पङ्कक्रीड़ पु० पङ्केन क्रीड़ति क्रीड़-अच् ३त०। शूकरे त्रिका० ह्रस्व। पङ्कक्रीड़नोऽप्यत्र। [त्रिका०।

पङ्कगड़क पु० पङ्के स्थितः गड़कः। (पाँकाल) मत्स्यभेदे

पङ्कगति पु० पङ्के गतिरस्य। (पाँकाल) मत्स्यभेदे शब्दमा०

पङ्कग्राह पुंस्त्री पङ्के स्थितः ग्राहः। मकरे जलजन्तुभेदे हारा०।

पङ्क(ङ्के)ज न० पङ्के जायते जन-ड ७त०- वा अलुक्समा०। १पद्मे २सारसपक्षिणि च राजनि० पङ्कजनिकर्त्तव्यविशिष्टे अस्य शब्दस्य योगरूढता कुमुदादीनां पङ्कजातत्वेऽपि न तत्र रूढिः किन्तु जलकर्तेत्याकारे स्थितम्।

पङ्कजन्मन् न० पङ्के जन्म यस्य। १पद्मे राजनि० २सारसपक्षिणि च। २पद्मसमूहे च हेमच०।

पङ्कजिनी स्त्री पङ्कज+पुष्करा०इनि। १पद्मयुक्तदेशे पद्माकरे

पङ्कण पु० पङ्कण+पृषो०। शबरालये शब्दमाला।

पङ्कप्रभा स्त्री पङ्कस्येव प्रभा यस्याः। कर्दमतुल्यप्रभान्वित नरकभेदभूमौ हेमच०।

पङ्कमण्डूक पुंस्त्री पङ्के मण्डूक इव। शम्बुके (शामुक) जलशुक्तिभेदे हारा०।

पङ्क(ङ्कि)रुह न० रुह–क ७त० या अलुक्। १पद्मे अमरः २सारसखगे च।

पङ्कवास पु० पङ्के वासोऽस्य। कर्कटे (काँकड़ा) जलजन्तुभेदे राजनि० स्त्रियां जातित्वात् ङीप्। हारा०।

पङ्कशुक्ति स्त्री पङ्के स्थिता शुक्तिः (झिनुक) जलशुक्तिभेदे

पङ्कशूरण पु० पङ्के शूरण इव। शालूके राजनि०

पङ्कार पु० पङ्कमृच्छति कृ–अण् उप०स०। १शैवले २सेतौ च ३सोपाने ४जलकुञ्जकपुष्पभेदे मेदि०।

पङ्किल त्रि० पङ्क+अस्त्यर्थे पिच्छा० इलच्। पङ्कयुक्ते

पङ्केशय त्रि० पङ्के शेते शी–अच् ७त० अलुक्स०। १पङ्कस्थायिनि २जलौकाभेदे स्त्री "न च सङ्कीर्णचारिण्यो न च पङ्केशयाश्च ताः" सुश्रु०।

पङ्क्ति स्त्री पचि–विस्तारे क्तिन्। १स्वजातीयपदार्थानां स्थितिभेदे (शारि पाँति) इति ख्याते पदार्थे "भौगिति पङ्क्तिः" हु०र० उक्तलक्षणे पञ्चाक्षरपादके २छन्दोभेदे ३दशाक्षरपादके छन्दोजातिभेदे "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" वृ०र०। ४दशसंख्यायाम् पङ्क्तिरथः (दशरथः)। ५पृथिव्यां शब्दमा०। ६गौरवे ७पाके च मेदि०। पतितादीकपङ्क्तौ भोजनादौ दोषः "न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः। एकशय्यासनपङ्क्तिभाण्डपक्वान्नमिश्रणम्। याजनाध्यापने योनिस्तथैव गृहभोजनम्। सहाध्यायस्तु दशमः सह याजनमेव च। एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसङ्गिताः। समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्। तस्मात् सर्वप्रयत्नेन साङ्कर्य्यं परिवर्जयेत्"। पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा। एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम्। भक्षणा हतमर्य्यादा न तेषां मङ्गलो भवेत्। अग्निना भक्षणा चैव षड्भिः पङ्क्तिर्विभिद्यते" कूर्मपु० १५अ०।

पङ्क्तिकण्टक पु०पङ्क्तौ एकपङ्क्तौ वेशनादौ कण्टक इव परिहार्य्यत्वात्। पङ्क्तिदूषके [खीवे शब्दर०।

पङ्क्तिग्रीव पु० पङ्क्तिसङ्ख्यका ग्रीवा यस्य। रावणे दश०

पङ्क्तिदूष(क) पु० पङ्क्तिम् एकपङ्क्तिं भोजने दूषयति दूषि–अण् ण्वुल् वा उप०स०। अपाङ्क्तेये अपङ्क्तब्राह्मणे स च अपाङ्क्तेयशब्दे २४३पृ०उक्तः। अन्येऽपि केचित् पाद्मे ३१अ० उक्ता यथा "अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तान् शृणु। कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृती। ग्राम प्रेष्यो वार्द्धुषिको गायनः सर्वविक्रयी। अगारदाही गरदः कुण्डाशी सोमविक्रयी। सांसुद्रिको राजदूतस्तैलिकः कूटकारकः। पित्रा विवदमानश्च यस्य चोपपतिर्गृहे। अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति। पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः। अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च। अभिशस्तयः परिक्रामेद्यः गुना दृष्ट एव च। परिवित्तिस्तु यश्च स्याद्वृषली गुरुतल्पगः। कुशीलवो देवलको नक्षत्रैर्यश्च जीवति। ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः। रक्षांसि भुञ्जते हव्यं यदेषान्तु प्रदीयते। श्राद्धे भुक्ता महाराज! वृषली गुरुतल्पगः। श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते। सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप! भिषजे शोणितसमं नष्टं देवलके तथा। अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्। बहुवाणिजके दत्तं नेह नामुत्र तद्भवेत्। भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे। ये तु धर्मव्यपेतेषु चरित्रापगतेषु च। हव्यं कव्यं प्रयच्छन्ति तेषां तत्परिणश्यति। ज्ञानपूर्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः। पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्। एतान् विद्धि महाबाहो! अपाङ्क्तेयान् द्विजाधमान्। शूद्राणामुपदेशन्तु ये कुर्वन्त्यल्पबुद्धयः। षष्टिं काणः शतं खञ्जः शिती यावत् प्रपश्यति। पङ्क्त्यां समुपविष्टानां तावद्दूषयते नृप!। यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः। सोपानत्कश्च यद्भुङ्क्ते सर्वं विद्यात्तदासुरम्। असूयया च यद्दत्तं यच्च श्रद्धाविवर्जितम्। सर्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्। श्वानञ्च पङ्क्तिदूषञ्च नावेक्षेरन् कथञ्चन। तस्मात् परिवृते दद्यात्तिलांश्चात्र विकीरयेत्। तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च। यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः। अपाङ्क्त्यान् यावतः पङ्क्त्यां भुञ्जानो नतु पश्यति। तावत् फलाङ्गयति दातारं तस्य वाऽनिशम्"।

पङ्क्तिपावन पु० पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानामावलिं पुनाति पू–णिच्–ल्यु। श्राद्धभोजनार्थमुपविष्टानां विप्राणां पङ्क्तिपवित्रताकारके विद्याविशिष्टादौ "अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः। तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान्। अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च। श्रो-

त्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्। ब्राह्मणदेयात्मसन्तानो ज्येष्ठसामग एव च। वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः" मनुः "इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः। विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि। मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपुरुषः। ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा। वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत। अथर्वशिरसोऽध्येता ब्रह्मचारी व्रतव्रतः। सत्यवादी धर्मशीलः स्वकर्मनिरतश्च यः। ये च पुण्येषु तीर्थेषु अभिषेकप्लुतत्रताः। मखेषु च समस्तेषु भवन्त्यवभृथप्लुताः। अक्रोधना शुचयः शान्ता दान्ता जितेन्द्रियाः। सर्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत्। एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः। यतयो मोक्षधर्मज्ञा ये वा सुचरितव्रताः। ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्। ये च भाषाविदः केचिद्ये च व्याकरणे रताः। अधीयते पुराणं ये धर्मशास्त्राणि चाप्युत। अधीत्य च यथान्यायं विधिवत्तस्य कारिणः। उपसन्नो गुरुकुले सत्यवादी सहस्रदः। अपराः सर्वेषु वेदेषु सर्वप्रवचनेषु च। यावदेते प्रपश्यन्ति पङ्क्तिपां तावत् पुनन्ति च। ततो हि पावनात् पङ्क्तिपा उच्यन्ते पङ्क्तिपावनाः। अन्ऋत्विगनुपाध्यायः स चेदपरासनं व्रजेत्। ऋत्विग्भिरनुज्ञातः पङ्क्तिपा हरति दुष्कृतम्। अथ चेद्देवितृसर्वैः पङ्क्तिदोषैर्विवर्जितः। न च स्यात् पतितो राजन् पङ्क्तिपावन उच्यते" पाद्मे स्वर्गखण्डे ३५अ०।

पङ्क्तिरथ पु० पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य। दशरथे शब्दरत्ना०। [राजनि०।

पङ्क्तिवीज पु० पङ्क्तिभूतानि वीजानि यस्य। वर्बुरवृक्षे

पङ्गु त्रि० खञ्जि-कु-पचाद्यच् नुक् च, १गतिहीने स्त्रियां जङ्। २मन्दगतौ शनिग्रहे शब्दर० तत्कक्षाया अत्युन्नतया बहुकालेन राशिभागादिकस्य तेन भोगात् तस्य मन्दगतित्वम्। अश्वहरणकर्मविपाकेन पङ्गुता जायते इत्युक्तं मनुः। [ङीप्। शिखण्डीचुपे राजनि०।

पङ्गुत्वहारिणी स्त्री पङ्गुत्वं हरति सेवनात् हृ-णिनि

पङ्गुल पु० सितकाषाभहयभेदे हेम०।

पच पाके भ्वा०उभ०सक०अनिट्। पचति ते। अपाक्षीत् अपक्त पपाच पेचे। पक्ता। पक्तुम् पक्त्वेत्यम् पक्तिः पाकः। ङित् पक्तिमः। अनेन विक्लेदनाया उत्पत्त्यनुकूलव्यापारस्य चेति व्यापारद्वयस्य वचनात् द्विकर्मकत्वम् तण्डुलानोदनं पचतीत्यस्य तण्डुलान् विक्लेदयन् ओदनं निष्पादयतीत्यर्थः। दुहा० गौणे कर्मणि उकारादयः। तण्डुला ओदनं पच्यन्ते दुहादिशब्दे कर्मनृशब्दे च अधिकं द्रष्टव्यम्।

परि+परितः पाके परिणामे।

वि+विशेषेण पाके अन्यथाभूतस्य अन्यरूपेण परिणामे।

पच व्यक्तीकारे भ्वा०आत्म० अनिट्। पचते अपक्त पेचे।

पच विस्तारे चु० उ० सक० सेट् इदित्। पञ्चयति ते अपपञ्चत् त।

पचत पु० पच-अतच्। १अग्नौ २सूर्ये ३इन्द्रे च उणादि०।

पचतभृज्जता स्त्री पचत भृज्जत इत्युच्यते यस्यां क्रियायाम् मयू०स०। पाकभर्जनार्थं निदेशक्रियायाम्।

पचत्पुट पु० पचत् पुटमस्य। सूर्यमणिवृक्षे शब्दच०।

पचत्य त्रि० पचते पाके साधुः यत्। पाके साधौ ऋ०१५२। २२भा०। ["कर्मस्थाः पचतेर्भावः" व्याक०का०।

पचति पु० पच-धातुस्वरूपे शतिप्। पचधातुस्वरूपे

पचतिकल्पम् न० ईषदूनं पचति तिङन्तात् कल्पप्। ईषदूनपाककर्त्तरि रूपप्। पचतिरूपमध्यम्।

पचतितरा(मा)म् अव्य० अतिशयेन पचति तर(म)प् आम्! अतिशयेन पाककर्त्तरि।

पचन पु० पच-कर्त्तरि ल्यु। १अग्नौ शब्दच० २पाककर्त्तरि त्रि० भावे ल्युट्। ३पाके न०। करणे ल्युट्। ४पाकसाधने त्रि०स्त्रियां ङीप्। "मांसपचन्या उखायाः" इति महाभाष्यम्। सा च ५वनवीजपूरके राजनि०।

पचपच पु० पचप्रकारः पच-प्रकारे द्वित्वम् पचस्य पाककर्त्तुर्यमादेरपि पचो वा। महादेवे। भा०शा०२८६अ०। "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनो मृत्युर्यस्योपसेचनम्"श्रुतेः "अत्ता चराचरग्रहणात्" शा०सू०न्यायात्। तस्य तथात्वम्।

पचप्रकुटा स्त्री पच प्रकुट (प्रकर्षेण क्लिन्दि) इत्युच्यते यस्यां क्रियायाम् मयू० स०। पाकक्लेदनार्थनियोगक्रियायाम्।

पचम्पचा स्त्री पचं पाचकं पचति पच-वा० खस् मुम्। दारुहरिद्रायाम् अमरः।

पचलवणा स्त्री पच लवणमित्युच्यते यस्यां क्रियायाम् मयू० स०। लवणपाकार्थनिदेशक्रियायाम्।

पचा स्त्री पच-भावे अ। १पाके अमरः। अशु। २पाककर्त्र्यां स्त्रियां स्त्री।

पचादि पु॰ "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" पा॰ कर्त्तरि अच्प्रत्ययनिमित्ते धातुगणे स च गणः पा॰ग॰ उक्तो यथा "पच दच वप वद चन यत नट् भट् स्वट् चरट् गरट् चोरट् गाहट् स्फुरट् देवट् दोषट् रज मद लप मेव मेध कोप मेध नर्त्त व्रण दर्श दनृभ दर्प जार भर त्वपच" । आकृतिगणः ।

पचि पु॰ पच-इन् । १अग्नौ उज्ज्वलदत्तः धातुनिर्देशे इक् । २पचधातौ "इद्रघः पचिरिति" महाभाष्यम् ।

पचेलिम त्रि॰ स्वयमेव पच्यते पच-कर्मकर्त्तरि केलिम । १स्वयं पक्वे नैष॰ १।९४श्लो॰। कर्त्तरि केलिम । २अग्नौ १स्वर्थे च पु॰ उणादिकोषः ।

पचेलुक त्रि॰ पच-बा॰ एलुक । स्वदे पाककर्त्तरि त्रिका॰।

पच्छस् अव्य॰ पादं पादं शस् पङ्गावः । पादं पादमिति वीप्सार्थक्रियाकर्मणि का॰ उ॰५।२।२७। न्युङ्खशब्दे च उदा॰।

पच्य त्रि॰ पच-कर्मणि यत् । पाकार्हे अन्नपच्यः अन्नपच्यः इत्यादि । [पपञ्च ।

पज आवरणे भ्वा॰पर॰सक॰सेट् इदित् । पञ्जति अपञ्जीत् ।

पज्ज पुंस्त्री पद्भ्यां जायते जन-ड । शूद्रे हेमच॰ तस्य "पद्भ्यां शूद्रो अजायत" यजु॰ ३१।१६ ब्रह्मणः पादात् जातत्वोक्तेस्तथात्वम् स्त्रियां जातित्वात् ङीष् ।

पज्झटिका स्त्री "प्रतिपद् यमकितयोडशमात्रा नवमगुरुत्व त्रिभूषितगात्रा । पज्झटिकाया एष विवेकः क्वापि न मध्यगुरुर्गणएकः" वृ॰र॰ उक्ते मात्रावृत्तभेदे ।

पज्र पु॰ पजि-बा॰रक् पृषो॰नलोपः । १अङ्गिरसि मुनौ "पज्रा वाचङ्गिरसः" लाट्यायनः । २पामेन जीर्णे ३हविर्लक्षणान्नयुक्ते च त्रि॰। ऋ॰१।४९।५भा॰। ४प्रार्जिते प्रकर्षेण सम्पादिते च त्रि॰ ऋ॰६।५९।४।भा॰ "पज्रहोषः प्रार्जितघोषरूपःस्तोमः" इति स्थितम् । पज्रस्यायम् शैषिकः ऋन् । पज्रीय आङ्गिरसवंशे पु॰ स्त्री ।

पञ्चक त्रि॰ पञ्चभिः क्रीतः कन् । १पञ्चभिः क्रीते । पञ्चैव स्वार्थे क ।२पञ्चसंख्यान्विते १शकुनि पञ्चकाधिकृते शास्त्रे त्रि॰ कौ॰।पञ्च अंशो भागो वेतनं मूल्यं यास्य(सोऽयश्चस्य भृतयः) पा॰कन् ।३पञ्चांशयुक्ते ४पञ्चभृतियुक्ते ५पञ्चमूल्यान्विते च त्रि॰।पञ्चास्मिन् वृद्ध्यादिरूपेण दीयन्ते "तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते" पा॰कन् । वृद्ध्यादित्वेन दीयमानपञ्चसंख्यायुक्ते ६यतादौ । वृद्धिर्दीयत इत्यादिक्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पञ्चास्मिन् वृद्धिः आयः लाभः शुल्कउपदा वा दीयते । पञ्चकः शतिकः शत्यः साहस्रः । उत्तमर्णेन मूलातिरिक्तम् याच्यं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भागः आयः विक्रेता मूल्यादधिकग्राह्योः लाभः । रक्षानिर्वेशो राजभागः शुल्कः" त्रि॰कौ॰ "वर्षक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" याज्ञ॰ "चतुर्थ्यर्थे उपसंख्यानम्" वार्त्ति॰पञ्च वृद्ध्यादिना दीयन्ते ऽस्मै । ७वृद्ध्यादिना दीयमानपञ्चसंख्यान्वितद्रव्यसम्प्रदाने त्रि॰ । पञ्चमेन रूपेण ग्रहणम् "तावतिथं ग्रहणमिति लुग्वा" पा॰ कन् । पूरणार्थस्य वा लुक् । पञ्चमेन रूपेण कस्यचित् ग्रहणे । "तावतिथेन ग्रहणातीति कन् वक्तव्यः नित्यस्य लुक्" वार्त्ति॰ उक्तः कन् पूरणार्थस्य वा लुक् । पञ्चमेन रूपेण ग्राह्यके त्रि॰। पञ्चानामवयवम् कन् अर्द्धचा॰ पु॰न॰ । १॰पञ्चसंख्यायाम् "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा" हरिका॰। ११धनिष्ठान्त्यार्द्धादिपञ्चतारके ज्योतिषम् । १२रोगाग्निराजचौरमृत्युसंज्ञके बाणपञ्चके च "भौमार्करिक्तामाद्यूने चरोनेऽङ्के विपञ्चके" सुहू॰ व्याख्याने पी॰ धारायां पक्षान्तरे विपञ्चक इत्यस्य बाणपञ्चकार्थकत्वस्योक्तेः बाणाश्च उपयमशब्दे १२६९पृः दर्शिताः । पञ्चभागेनानीतत्वा तेषां तथात्वम् । पञ्चके निषिद्धानि यथा वसिष्ठः "वस्त्रपरार्द्धात्पञ्चकधिष्ण्ये कार्यं गेहस्य गोपनं नैव । दक्षिणादिङ्मुखगमनं दाहं प्रेतस्य काष्ठसंग्रहणमिति" नारदः "वस्त्रन्यार्द्धादिपञ्चर्क्षे संग्रहं शय्यकाष्ठयोः । याम्यदिग्गमनं शय्या न कार्यं गृहगोपनम्" इति श्रीपतिरपि "वारुणोत्तरदलादिपञ्चके याम्यदिग्गमनगेहगोपनम् । प्रेतदाहशयकाष्ठसंग्रहं शय्यकावितनं च वर्जयेत्" त्रिविक्रमोऽपि "शय्यावितानं प्रेतादिक्रियां काष्ठस्यार्जनम् । याम्यदिग्गमनं कुर्यान्न चन्द्रे कुम्भमीनगे" इति नतु प्रेतदाहे किं नक्षत्रान्तरे मृतस्य धनिष्ठोत्तरार्द्धादिके दाहो न कार्य इति उत पञ्चकएव मृतस्य पञ्चके दाहो न कार्य इति व्याहोस्विदस्मिन् कस्मिंश्चिन्नक्षत्रे पञ्चकातिरिक्ते पञ्चके वा मृतस्य पञ्चके दाहो न कार्य इति त्रयः पक्षाः सम्भवन्ति तत्र यदि विज्ञायते नक्षत्रान्तरे मृतस्य पञ्चके दाहो न कार्य इति तत्र पञ्चके मरणस्य दोषवत्ता न प्राप्नोति तच्चायुक्तं यस्मादुक्तं ब्रह्मपुराणे "कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते । न तस्योर्ध्वगतिर्दृष्टा सन्ततौ न शुभं भवेत्" इति । अथ विज्ञायते पञ्चकएव मृतस्य पञ्चके दाहो न कार्य इति तदपि न, त्रयाणे, धनिष्ठापूर्वार्द्धे च मृतस्य

पञ्चके दाहनिषेधो न प्राप्नोति किन्तु दाहः कर्तव्य इत्येव प्राप्नोति । अस्त्वेवमिति चेन्न प्राप्तस्य दाहं त्यजेदिति दाहस्यैव क्रियाकारकसम्बन्धेन प्राधान्यतो निषेधात्, किञ्च "त्रिगुणफलदोषद्वौ नष्टे हृते च मृतेऽपि वेति" त्रिपुष्करयोगफलवत् पञ्चकमरणनिषेध एव वक्तव्ये दाहनिषेधस्य पृथगुपादानात् कर्त्तव्यतापत्तिः । तस्माद्यस्मिन् कस्मिंश्चिन्नक्षत्रे मृतस्य पञ्चके दाहो न कार्य इति तृतीयः पक्षः साधीयान् । प्राधान्याद्दाहस्यैव निषेध इत्युक्तं प्राक् यतः पञ्चकात् प्राक् मरणदोषो नास्ति तथा तत्रैव दाहोऽपि न दोषाय । यदि क्रियाकरणवशात् कालातिक्रमे सति पञ्चकप्रवृत्तिस्तदा शान्तिं विधाय दाहः कार्यः पञ्चके तु द्वयमपि निषिद्धं मरणं दाहश्चेति । उक्तं च ब्रह्मपुराणे "कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते । न तस्योर्ध्वगतिर्दृष्टा सन्ततौ न शुभं भवेत् । न तस्य दाहः कर्त्तव्यो विनाशः स्वेषु जन्तुषु । पञ्चकानन्तरं कार्यं कार्यं दाहादिकं खलु । अथ वा तद्दिने कार्यो दाहस्तु विधिपूर्वकम्" । रेवतीप्रान्ते मृतस्य रेवतीमपहाय दाहः कार्य इत्यर्थः धनिष्ठोत्तरार्द्धादिमृतस्य दाहस्तु सद्यएव पञ्चकस्य बहुकालव्यापित्वात्पर्युषितदाहनिषेधाच्च । स च दाहः शान्तिविधिपूर्वकः कार्यः । स च विधिरुक्तो ब्रह्मपुराणे "दाहदेशे शवं नीत्वा स्नापयेच्च प्रयत्नतः । दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः । यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् । प्रेतदाहः प्रेतसखः प्रेतपः प्रेतभूमिपः । प्रेतहर्त्ता पञ्चमश्च नामान्येतानि च क्रमात्" इति । विशेषस्त्वन्त्येष्टिपद्धत्यादौ द्रष्टव्यः । नन्वत्र "त्रिगुणफलदो दद्वौ नष्टे हृते च मृतेऽपि वेति" मरणनिषेधएव वक्तव्यो किं पुनर्दाहनिषेधेन । उच्यते दोषाधिक्यसूचनार्थं हि पुनर्दाहनिषेधः अतएव पञ्चके मृतस्य पुत्तलकविधानं कृत्वा दाहः कार्यः ततः सूतकान्ते पुत्रादिभिः शान्तिकं च विधेयम् । उक्तं च गरुडपुराणे "ततो दाहः प्रकर्त्तव्यस्तैश्च पुत्तलकैः सह । सूतकान्ते तदा पुत्रैः कार्यं शान्तिकमौष्टिकम् । पञ्चके तु मृतो वीऽस्त्री न गतिं लभते नरः । तिलांश्चैव हिरण्यं च तद्दिशा हृतं दद्यात्" इति । अतो नक्षत्रान्तरे मृतस्य पञ्चके दाहप्राप्तौ पुत्तलकविधिरेव भवति ततः सूतकान्ते शान्तिकं च । एवं पञ्चकान्ते मृतस्याश्विन्यां दाहप्राप्तौ पुत्तलकविधिर्न किन्तु सूतकान्ते शान्तिकमेव विधेयम्" पी० भा० ।

पञ्चकपाल त्रि० पञ्चसु कपालेषु संस्कृतः अण् तस्य लुक् । पञ्चकपालेषु संस्कृते पुरोडाशादौ समा० द्वि० । समाहृते पञ्चकपालेषु स्त्री ङीप् ।

पञ्चकर्ण त्रि० पञ्च कर्णा अस्य लक्षणत्वेऽपि विष्टादित्वात् न पूर्वपददीर्घः । पञ्चकर्णलक्षणयुक्ते ।

पञ्चकर्मन् न० पञ्चानां कर्मणां समाहारः "अनो नलोपश्च वा द्विगुः स्त्रियाम्" वार्त्ति० पक्षे नलोपाभावः । पञ्चानां कर्मणां उत्क्षेपादीनां १समाहारे । तानि च कर्माणि कर्मन्शब्दे १७३६पृ० उक्तानि । २वैद्यकोक्ते कर्मपञ्चकभेदे "वमनं रेचनं नस्यं निरूहश्चानुवासनम् । पञ्चकर्मेदमन्यच्च क्षेत्रसूत्रक्षेपणादिकम्" । पक्षे नलोपे ङीपि पञ्चकर्मीत्यपि स्त्री ।

पञ्चकषाय पु०न०पञ्चविधः कषायः "जम्बुशालमलिवाट्यालं बदरं बकुलं तथा । एतेषां वल्कलरसः कषायः परिकीर्त्तितः इत्युक्ते पञ्चानां १कषाये वल्कलरसे । कर्मधा० संज्ञात्वात् न द्विगुः । २पञ्चसु कषायेषु ब०व० । "जम्बु शालमलि वाट्यालं बदरं बकुलं तथा । कषायाः पञ्च विज्ञेयाः देव्याः प्रीतिकराः शुभाः" दुर्गोत्सवत० ।

पञ्चकाम पु० ब०व० । कर्म० संज्ञात्वात् न द्विगुः । "पञ्चकामा इमे देवि ! नामानि शृणु पार्वति । काममन्मथकन्दर्पमकरध्वजसंज्ञकाः । मीनकेतुर्मदेशानि ! पञ्चमः परिकीर्त्तितः" तन्त्रसा० उक्तेषु पञ्चसु काममेदेषु ।

पञ्चकृत्य पु०पञ्च विस्तृतं कृत्यं यत्र । पक्षगौडद्वये राजनि० ।

पञ्चकृष्ण पु० पञ्चसु कृष्णः । कीटभेदे कीटशब्दे दृश्यम् ।

पञ्चकोण न० पञ्च कोणा यस्य । पञ्चकोणात्मके १क्षेत्रभेदे २तन्त्रोक्ते यन्त्रभेदे ३लग्नावधिनवमपञ्चमात्मके स्थाने च

पञ्चकोल न० "पञ्चकोलं कणामूलं कृष्णाचव्याग्निनागरैः" शब्दच० उक्ते पाचनविशेषे अस्य गुणाः "पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् । तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् । गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्" भावप्र०उक्ताः । "पिप्पलीपिप्पलीमूलं चव्याचित्रकनागरम् । दीपनीयः शृतो वर्गः कफातिलगदापहः" चक्रदत्तोक्ते २पाचनभेदे च ।

पञ्चकोष पु० संज्ञात्वात् कर्म० । वेदान्तिकसिद्धे अन्नमयादिषु पञ्चसु कोषवदाच्छादकेषु देहादिषु । तेषां स्वरूपादिकञ्च विवेकचूडामणौ दर्शितं यथा "कोशैरन्नमयाद्यैः पञ्चभिरात्मा न संवृतो भाति । निजशक्तिसमुत्पन्नैः शैवालपटलैरिवाम्बु वापीस्थम्" इत्युपक्रमे "देहोऽयमन्नभवनोऽन्नमयस्तु कोष-

स्वाङ्गेन जीवति विनश्यति तद्विहीनः। त्वक्चर्ममांस-रुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्य-शुद्धः"। "कर्मेन्द्रियैः पञ्चभिरन्वितोऽयं प्राणो भवेत् प्राणमयस्तु कोशः"। "ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात् कोशो ममाहमिति वस्तुविकल्पहेतुः। संज्ञादिभेद-कलनाकलितो बलीयांस्तत्पूर्वकोशमभिपूर्य विजृम्भते यः। पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः प्रचीयमानो विषयाज्य-धारया। जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम्"। "बुद्धिर्बुद्धीन्द्रियैः सार्द्धं सवृत्तिः कर्तृलक्षणः। विज्ञानमयकोशः स्यात् पुंसः संसारकारणम्। अनुव्रज-त्यितमतिवि स्वशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः। ज्ञान-क्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते भृशम्" आनन्दमयकोशस्तु आनन्दमयकोशशब्दे ७२६ पृ० उक्तः।

पञ्चक्रोशी स्त्री पञ्चानां क्रोशानां समाहारः। काशग्राः दीर्घविस्ताराभ्यां पञ्चसु क्रोशेषु "वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति। पञ्चक्रोश्यां कृतं पापमन्तर्गेहे विनश्यति" काशीख०। तद्भेदात् पञ्चक्रोशीदीर्घायामायां २काशग्राच्च।

पञ्चतारगण न० ६तत्०। पञ्चानां तारायां गणः उत्तर० द्विगुः। सर्वपञ्चके "तारेतु पञ्चभिः प्रोक्तः पञ्चतारा-भिधो गणः। काचमैन्दवसाद्रविट सौर्यचन्द्रैः समैः। स्यात् पञ्चतारकं तच्च सर्व्वोपेतं षडाङ्गयम्" राजनि०।

पञ्चनङ्ग अव्य० पञ्चानां नङ्गानां नदीनां समाहारः "नदी-भिश्च" पा० अव्ययी० "समाहारे चायमिष्यते" सि०कौ०। समाहृतासु पञ्चसु नदीषु भा०क्रो०५४अ० तत्र पञ्चनङ्गेषु इत्यत्र सप्तम्या वा न लुक्। २काशीस्थे पञ्चनदतीर्थे पञ्चनदशब्दे दृश्यम्।

पञ्चगण पु० पञ्चानां गणो यत्र। 'विदारी गम्भा इक्षती पृश्निपर्णीर्निदिग्धिकाः राजनि० उक्ते विदार्य्यादीनां पञ्चानां गणे।

पञ्चगव न० पञ्चानां गवां समाहारः टच्समा० क्लीबता च। पञ्चानां गवां समाहारे। पञ्च गावोधनमस्य उत्तरपदद्विगौ टच् समा०। पञ्चसंख्यान्वितगवधनस्वामिनि त्रि०।

पञ्चगव्य न० गोर्विकारः यत् पञ्चगुणितं गव्यम्। गोमूत्रादि पञ्चके तस्य प्रमाणादि हेमा०प्र०ख० उक्तं यथा स्कन्दपुराणे विष्णुना तथा वह्नीन्द्रवाय्वर्कदेवतानि यथा-क्रमम्। विद्रुतानि कुशोदश्च पितराजाधिदैवतम्। प्रोक्तामावे स्वशैतानि कपिलायाः प्रकल्पयेत्। गोमूत्र-भागस्तस्यार्द्धं गलत् क्षीरस्य च त्रयम्। दयं दध्नो घृतस्यैकमेकश्च कुशवारिणः। गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधि क्राव्णेति वै दधि। तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्। एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यं प्रचक्षते। एतदेव महापुण्यं ब्रह्मकूर्चमिति स्मृतम्"। व्यासेन "गोमूत्रं ताम्रवर्णायास्त्रैकमाषकसङ्ख्यया। पुण्यं वरु-णदैवत्यङ्गायत्र्याभिमन्त्रितम्। गोमयं श्वेतवर्णा-यास्तुमाषकमात्रया। गृह्णीयादग्निदैवत्यङ्गन्धद्वारेति वै मनैः। क्षीरं काञ्चनवर्णायाः सोमदैवत्यमेव च। आप्यायस्वेति मन्त्रेण माषद्वादशसम्मितम्। गृह्णीत वायुदैवत्यं कृष्णवर्णोद्भवं दधि। दशमाषमात्रकन्तु दधि-क्राव्ण इति स्मरन्। घृतं तु नीलवर्णायाः पञ्चमाषक-संख्यया। गृह्णीत सूर्यदैवत्यं तेजोऽसीति जपन् क्र-मात्। शतत्रयं माषमानं चत्वारिंशच्च पञ्च च। कुशो-दकस्य गृह्णीयाद्देवस्यत्वेति कीर्त्तयन्। ताम्रपात्रे प-लाशे वा पात्रे मिश्रीकृतञ्च तत्। आपोहि ष्ठेति चा-नीय प्रणवेन प्रविश्य तत्। उदङ्मुखस्तिराचम्य ततो गच्छेत् स्वकं गृहम्। तत्रापि होमे प्राग्वच्च कृत्वा दद्याच्च दक्षिणाम्। ब्राह्मणस्य यथा यज्ञ्या शोभनं तु मनोहरम्। गवां वर्णास्तु शुक्लाद्याः सन्ति देशेषु यत्र न। तत्र वर्णविभागेन पञ्च गव्यानि चाहरेत्। वर्णाभावाच्च दोषोऽस्ति मात्राहीनं विवर्जयेत्। त्याज्यानि दूषितानां च दधिमूत्रपर्याषि च। चेलकेशास्थिभक्ष्या-णामभक्ष्यैः सम्पृक्तां तथा। रोगार्त्तानां च यूकार्त्ति मृताण्डानाममङ्गलम्। (मृताण्डा मृतगर्भाः) निष्फ-लत्वेन वन्ध्यानां क्षत्तानां क्षमिभिस्तथा। अमानप्रति-दत्तानि सञ्चिनीप्रभवानि च। शुद्धभाण्डे मनोज्ञे च भूमावपतितानि च। अशीतव्यानि विविधं खेटं तासां न कारयेत्"। ब्रह्मकूर्चव्रतमिदं सर्वपाप प्रणाशनम्। सर्वकामप्रदं पुंसां रूपारोग्ययशःप्रदम्। महतामपि पापानां नाशनं श्रीविवर्द्धनम्"।

पञ्चगव्यघृत सुश्रुतोक्ते पक्वघृतभेदे "त्रिफलां चित्रकं सुक्तं हरिद्रे द्वे विषां वचाम्। विडङ्गं तत्रूपं चव्यं च सुरदारु तथैव च। पञ्चगव्यमिदं पानाद्विषमज्वरनाश-नम्। पञ्चगव्यमृते गर्भात् पाच्यमन्यद्घृतेषु च। वल-याथ परं पाच्यं शुद्ध्या तद्वदेव तु। जीर्णज्वरे च

शोफे च पाण्डुरोगे च पूजितम्" । [भिर्गोभिः क्रीते ।

पञ्चगु त्रि॰ पञ्चभिर्गोभिः क्रीतः ठक् तस्य लुक् लुप्तः । पञ्च-

पञ्चगुण पु॰ पञ्चगुणितो गुणः कर्म॰ । १शब्दस्पर्शरूपरसगन्ध-रूपेषु गुणेषु। पञ्च गुणा यस्याः । २पृथिव्यां स्त्री मेदि॰ "यो यो यावतिखस्तेषां स स तावद्गुणः स स्मृतः"मनुना सामान्यत उक्तेः पृथिव्या पञ्चमत्वात् पञ्चगुणत्वम् । ३त॰। ३पञ्चभिर्गुणिते ४पञ्चप्रकारे च संख्या॰ रघु॰ ।

पञ्चगुप्त पुंस्त्री करचरणयोश्चतुष्कं शिरश्चेति पञ्च गुप्तान्यस्य । १कच्छपे त्रिका॰ स्त्रियां ङीप् । २चार्वाकदर्शने त्रिका॰ ।

पञ्चगुप्तिरसा स्त्री पञ्चधा गुप्तो रसोऽस्याः । स्रक्कायां राजनि॰। [उक्ते षोडशाक्षरपादके छन्दोभेदे ।

पञ्चचामर न॰"प्रमाणिकाद्वयं वदन्ति पञ्चचामरम्"छ॰र॰

पञ्चचितिक पु॰ पञ्च चितयः प्रस्तारा यस्मिन् । १अग्निभेदे "पञ्चक्रत्वः साद्यति पञ्चचितिकोऽग्निः" शत॰ ब्रा॰ ७।१। १।७२"पञ्चक्रत्व इति मध्ये उपधेयेष्टकाचतुष्टयस्यैकस्याः साटनायान्यासां चत्वारीति पञ्चचितयो भवन्ति" भा॰ ।

पञ्चचोर पु॰ पञ्च चोरागमस्य । मञ्जुघोषे त्रिका॰ ।

पञ्चचूडा स्त्री अप्सरोभेदे भा॰व॰ १६६ श्लोके

पञ्चजन पु॰पञ्चभिः भूतैर्जन्यते जन-घञ्, न वृद्धिः । १मनुष्ये अमरः ।२मनुष्यसम्बन्धिनि प्राणादौ ३मनुष्यतुल्ये देवादौ ४मनुष्यभेदे ब्राह्मणादौ च शा॰सू॰ भाष्यम् तथाहि "यस्मिन् पञ्च पञ्च जना ऽ काशश्च प्रतिष्ठितः"तद्धृतवेदमन्त्रे "प्रश्न पञ्च शब्दशब्देन पञ्चविंशतितत्त्वान्युच्यन्ते" इति सांख्यमतनिराकरणेन पञ्चजनशब्दस्य प्राणादिपरत्वं समर्थितं दिङ्मात्रमत्रोच्यते

"कथं तर्हि पञ्च पञ्चजना इति, उच्यते, "दिक्सङ्ख्ये संज्ञायामिति"पा॰ विशेषणस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समासः, ततश्च रूढत्वाभिप्रायेणैव केचित् पञ्चजना नाम विवक्षन्ते, न साङ्ख्यतत्त्वाभिप्रायेण, ते कतीत्यस्यामाकाङ्क्षायां पुनः पञ्चेति प्रयुज्यते, पञ्चजना नाम केचित्, ते च पञ्चेत्यर्थः सम्पर्ययः सम्पेति यथा। के पुनस्ते पञ्चजना नामेति तदुच्यते। "प्राणादयो वाक्यशेषात्"शा॰सू॰"यस्मिन् पञ्च पञ्चजना इत्यत उत्तरस्मिन्मन्त्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पञ्च निर्दिष्टाः "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इत्यत्र वाक्यशेषगताः सन्निधानात् पञ्चजना विवक्ष्यन्ते । कथं पुनः प्राणादिषु पञ्चजनशब्दप्रयोगः तत्त्वेषु वा कथं जनशब्दप्रयोगः समाने तु प्रसिद्धप्रतिक्रमे वाक्यशेषवशात्-प्राणादय एव पञ्चीतव्या भवन्ति जनसम्बन्धाच्च प्राणादयो जनशब्दभाजो भवन्ति । जनवचनश्च पुरुषशब्दः प्रार्थेषु प्रयुक्तः, "ते वा एते पञ्च ब्रह्म पुरुषाः" इति, अत्र "प्राणो ह पिता प्राणो ह माता" इत्यादि च ब्राह्मणम् । समाससमुदायस्य रूढत्वमविरुद्धम् । कथं पुनरसति प्रथमप्रयोगे रूढिः शक्याश्रयितुं शक्या, उद्भिदादिवदित्याह । प्रसिद्धार्थसन्निधानेन ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभिव्याहारात् तद्विषयो नियम्यते यथोद्भिदा यजेत, यूपं छिनत्ति, वेदिं करोतीति । तथाऽत्रापि पञ्चजनशब्दः समासान्वाख्यानादवगतसंज्ञाभावः संज्ञाकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्त्तिष्यते । केचित्तु देवाः पितरो गन्धर्वा असुरा रक्षांसि च पञ्च पञ्च जना व्याख्याताः । अन्ये चत्वारो वर्णा निषादपञ्चमाः परिगृहीताः" । तत्परिग्रहेऽपीह न कश्चिद्विरोधः । आचार्यस्तु न पञ्चविंशतितत्त्वानामिह प्रतीतिरस्तीत्येवंपरतया प्राणादयो वाक्यशेषादिति जगाद" ।

२दैत्यभेदे च यस्यास्त्वा कृष्णस्य पाञ्चजन्यः शङ्खोजातः । पाञ्चजन्यशब्दे दृश्यम् । ३स्वश्वयन्त्रपुत्रे हरिवं॰१२अ॰ अंशुमतः पितरि सगरपुत्रस्य ४पुत्रभेदे १५॰अ॰ । ५प्रजापतिभेदे भाग॰ ६।४।४६ विश्वावसुदुहितरि भरतस्य ६पत्न्यां स्त्री ङीप् । भाग॰ ५।७।१।

पञ्चजनीन पञ्चसु जनेषु व्याप्तः ख । भक्ते हला॰।

पञ्चजीरकगुड पु॰ चक्रदत्तोक्ते जीरकादिभिः पक्वे गुडभेदे "जीरकं हपुषा धान्यं यवाङ्गा सुरदारु च । जमानी त्रपुटकी हिङ्गुपत्रिका कासमर्दकम् । पिप्पली पिप्पलीमूलमजमोदाथ वाम्बिका । चित्रकश्च पलांशानि तथान्यच्च चतुःपलम् । कशेरुकं नागरञ्च कुष्ठं दीप्यकमेव च । गुडस्य च घृतं दद्यात् हतमस्यं तथैव च । जीरद्विप्रस्थसंयुक्तं घनैर्मृदग्निना पचेत् । पञ्चजीरक इत्येष सूतिकानां प्रशस्यते । गर्भार्थिनीनां नारीणां दुःखजीवे समारते । विंशतिं व्यापदो योनेः कासं श्वासं ज्वरं क्षयम् । हृल्लासकं पाण्डुरोगं दौर्गन्ध्यं वङ्कमूत्रताम् । हन्ति पीनोन्नतकुचाः पद्मपत्रायतेक्षणाः । उपयोगात् स्त्रियोनित्यमलक्ष्मीर्मलवर्जिताः" ।

पञ्चज्ञान पु॰ पञ्चानां पदार्थानां ज्ञानमस्य । १बुद्धे त्रिका॰ २पाशुपतदर्शनाभिज्ञे च नकुलीशशब्दे ४।७५ पृ॰ दृश्यम् ।

पञ्चत् पु॰ पञ्च परिमाणमस्य वर्गस्य, पञ्चन्+नि॰। पञ्चसंख्यायुक्ते वर्गे

पञ्चतक्षन्(क्षी) न॰ पञ्चानां तक्ष्णां समाहारः अनन्तत्वात् नलोपे वा ङीप्। पञ्चानां तक्ष्णां समाहारे पक्षे वा ङीपि स्त्री।

पञ्चतत्त्व पु॰न॰ पञ्चानां तत्त्वानां समाहारः। पञ्चसु भूतेषु स्वरोदयः। "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च। पञ्चतत्त्वमिदं प्रोक्तं देवि! निर्वाणहेतवे। मकारपञ्चकं देवि! देवानामपि दुर्लभम्" "पञ्चतत्त्वविहीनानां कलौ सिद्धिर्न जायते" तन्त्रसा॰। वैष्णवानान्तु "गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि!। देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं प्रकीर्त्तितम्" निर्वाणतन्त्रे।

पञ्चतन्त्र न॰ तन्त्रम्। नीतिशास्त्रभेदे।

पञ्चतन्मात्र न॰ पञ्चगुणितं तन्मात्रम्। पञ्चगुणिते शब्दस्पर्शरूपरसगन्धात्मके १तन्मात्रे २सूक्ष्मपञ्चभूतरूपे आकाशादौ तन्मात्रशब्दे १२२९ पृ॰ द्रष्टव्यम्।

पञ्चतप पु॰ पञ्चभिस्तेजस्विभिः अग्निचतुष्टयसूर्यैस्तपति तप-अच्। पञ्चभिस्तपस्यति तपस्विभेदे "ग्रीष्मे पञ्च तपांस्तथा" भा॰अनु॰ १४२अ॰ अस्तृ। पञ्चतपस् तत्रार्थे भावः २।५१ सो॰। पञ्चातप शब्दे द्रष्टव्यम्।

पञ्चतय न॰ पञ्चानामवयवं पञ्च अवयवायस्य वा अवयवे तयप्। १पञ्चसंख्यायां २तद्वन्विते त्रि॰ स्त्रीत्वे ङीप्। "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" पा॰ सू॰।

पञ्चता स्त्री पञ्चानां भूतानां भावः तद्भावापत्तिः। आरम्भक पञ्चभूतानां १तद्भावावस्थौ उपचारात् २मृत्यौ च।

पञ्चतिक्त न॰ पञ्चगुणितं तिक्तम्। "निम्बामृता त्रपपटोल निदिग्धिकाश्चेति" चक्रदत्तोक्ते पञ्चविधे तिक्तद्रव्यभेदे

पञ्चतीर्थी स्त्री पञ्चानां तीर्थानां समाहारः ङीप्। तीर्थपञ्चके सा च तीर्थभेदे भिन्नभिन्नरूपा तत्र काशीस्था यथा "ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्चयेत्। तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः। ततः पुनर्दण्डपाणिरित्येषा पञ्चतीर्थिका" काशीख॰१००अ॰। पुरुषोत्तमस्था यथा "मार्कण्डेयवटे कृष्णे रौहिणेये महोदधौ। इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते" गयास्था यथा उत्तरमानसदक्षिणमानसकनखलधर्मवनफल्गुतीर्थात्मिका। तत्र वायुपु॰ उदीच्यां प्रसिद्धमित्युक्तम् वह्निपु॰ "उदीच्यां मुञ्जपृष्ठस्य देवर्षिगणसेवितम्। नाम्ना धर्मवनं तीर्थं त्रिषु लोकेषु विश्रुतम्" इत्युक्तं तेन धर्मवनस्यैव तत्र प्राप्तता तेनैव पञ्चसंख्यायाः पूरणात्। नानास्थानस्थिता वराहपु॰ उक्ता यथा "पृथिव्यां यानि तीर्थानि सर्वाण्येवाभिषेचनात्। तत् पञ्चतीर्थीस्नानेन समं नास्त्यत्र संशयः। एकादश्यां च विश्रान्तौ १ द्वादश्यां शौकरे२ तथा। त्रयोदश्यां नैमिषे३ च प्रयागे४ च चतुर्दशी। कार्त्तिक्यां पुष्करे५ चैव कार्त्तिकस्य सितासिते। कालेष्वेषु नरः स्नात्वा सर्वं पापं व्यपोहति"।

पञ्चत्व न॰ पञ्चानां भावः तद्भावापत्तिः। १पञ्चभूतानामारम्भकसंयोगनाशात् स्वभावप्राप्तौ २तदुपलक्षिते मरणे अमरः

पञ्चय त्रि॰ पञ्चानां पूरणः। "षट् च छन्दसि" पा॰ वेदे पूरणे यट्। पञ्चसङ्ख्यापूरणे लोके तु पञ्चम इत्येव

पञ्चदक्ष पु॰ देशभेदे कोकङ्गणाः पञ्चदक्षा वसना ह्यवरास्तथा" मार्कपु॰ ५८अ॰। सोऽभिजनोऽस्य तस्य राजा वा अण्। पाञ्चदक्ष पित्रादिक्रमेण तद्देशवासिनि तद्रूपे च बहुषु तस्य लुकि। उक्तः प्रयोगः।

पञ्चदश त्रि॰पञ्चदशानां पूरणः डट्। १पञ्चदशसंख्यापूरणीये स्त्रियां ङीप्। सा च पञ्चदशपूरणतिथिभेदे २पौर्णमास्याम् ३अमावास्यायाम् विद्यारण्यप्रणीते वेदान्तप्रकरणभेदे च। एवं पञ्चविंशादयोऽपि पञ्चाधिकविंशतिसंख्यापूरणे त्रि॰ स्त्रियां ङीप्। इदांस्तु विशेषः विंशत्यादौ पूरणे तमप् वा। पञ्चविंशतितमादयोऽपि तत्रार्थे त्रि॰। "तैयुंतं शतादि "दशादेर्डौयुते शतादौ" सुग्ध॰ ड। तैयुंते शतादौ त्रि॰ स्त्रियां टाप् इति भेदः।

पञ्चदशन् त्रि॰ ब॰व॰। पञ्चाधिका दश। (पनेर) १पञ्चाधिकदशसंख्यायां २ततसंख्येये च।

पञ्चदशाह पु॰ पञ्चदशगुणितमहः टच् समा॰। अङ्गान्तत्वात् पुंस्त्वम्। पञ्चदशगुणिते अह्नि। "वैश्ये पञ्चदशाहः स्यात्" मनुः।

पञ्चदशाहिक त्रि॰ पञ्चदशाहः साधनकालतयाऽस्त्यस्य ठन्। पञ्चदशाहसाध्ये व्रतभेदे "पिण्याकदधिसक्तूनां प्रासश्च प्रतिवासरम्। एकैकमुपवासः स्यात् सौम्यकृच्छ्रः प्रकीर्त्तितः। एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्। तुलापुरुष इत्येषः ज्ञेयः पञ्चदशाहिकः" अत्रिसं॰।

पञ्चदशिन् त्रि॰ पञ्चदश परिमाणमस्य डिनि। पञ्चदश परिमाणयुक्ते शत॰ब्रा॰१३।२।५।१ उदा॰स्त्रियां ङीप्। एवं पञ्चविंशत्यादि परिमाणमस्य डिनि। पञ्चविंशिन्प्रभृतयः पञ्चविंशत्यादि परिमाणयुक्ते त्रि॰ स्त्रियां।

पञ्चदीर्घ त्रि॰ पञ्चसु अवयवेषु दीर्घः। "बाहू नेत्रद्वयं कुक्षिर्हनु नासे तथैव च। स्तनयोरन्तरञ्चैव पञ्चदीर्घः प्रशस्यते" स्मृत्युक्तेषु पञ्चदीर्घत्वप्रशस्तलक्षणयुक्ते पुरुषे

पञ्चदेवता स्त्री संज्ञात्वात् कर्म॰। आदित्यं गणनाथं च देवीं रुद्रं च केशवम्। पञ्चदैवतमित्युक्तं सर्वकर्मसु पूजयेत्" इत्युक्तेषु पञ्चसु देवेषु। केचिदेषाद्विनायकादित्वमिच्छन्ति आर्यास्तु आदित्यादित्वं मन्यन्ते इति भेदः।

पञ्चन् त्रि॰ पचि-कनिन्। १पञ्चसंख्यायां २तत्संख्यायुक्ते च पञ्चसंख्यायुक्ताश्च कतिचित् पदार्था एकादिशब्दे १५०६ पृ॰ दर्शिताः। पञ्चकशब्दे द्रष्टव्यम्।

पञ्चनख पुं॰स्त्री॰पञ्च नखा यस्य। १गजे २कूर्मे च हेमच॰। ३व्याघ्रे राजनि॰। ४शशकादिषु च "शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः" भक्ष्यपञ्चनखोक्तौ स्मृतिः "त्रिविधं शल्लकं गोधां खड्गिकूर्मशशांस्तथा। भक्ष्यान् पञ्चनखेष्वाहुः" मनुः।

पञ्चनद पु॰ पञ्च नद्यः सन्त्यत्र अच्। (पञ्जाब) प्रसिद्धे १देशभेदे। स च देशः अपरस्यां दिशि कूर्मविभागशब्दे २१८८पृ॰ विवृतिः। "वितस्तिचन्द्रभागा च विपाशेरावती तथा। शतद्रुश्चेति विज्ञेयाः पञ्च नद्यः शुभावहाः"। सोऽभिजनोऽस्य तस्य राजा वा अण्। पाञ्चनद पित्रादिक्रमेण तद्वासिनि तद्रूपे च बहुषु अणो लुक्। भा॰आ॰ ७अ॰। पञ्चानां नदीनां समाहारः। "नदीभिश्च" अव्य॰अच्समा॰। २पञ्चनदीसमाहारे तच्च काशीस्थनदीपञ्चकरूपं तीर्थं "किरणाधूतपापे च तस्मिन् धर्मनदे शुभे। स्रवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभह्रदे। ततो भागीरथी प्राप्ता तेन दैलीपिना सह। भागीरथी समायाता यमुना च सरस्वती। किरणा धूतपापा च पुण्यतीर्थे सरस्वती। गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः। अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम्" काशीख॰५९अ॰।

पञ्चनिम्ब न॰ "पञ्चनिम्बन्तु तत्पुष्पमूलत्वक्फलच्छदैरिति" शब्दच॰ उक्ते निम्बस्य पुष्पादिपञ्चके। [शब्दरत्ना॰।

पञ्चनी स्त्री पचि-ल्युट्। शारिष्टङ्गुलायाम् (पाशारछक)

पञ्चपक्षिन् पु॰ शिवोक्ते पक्षिपञ्चकाधिकारेण प्रश्नादिज्ञानार्थं शाकुनशास्त्रभेदे "चरं पक्षिभूतञ्च दिगदैवतदिनानि च। ज्ञानं वर्णं बलं मित्रं धातुलिङ्गादिकं क्रमात्। प्रश्नादिजातिवर्णञ्च देहसङ्कल्पनादिभिः। चिन्तितान्यपि सर्वाणि वक्ष्यन्ते वर्णकौ क्रमात्। शकुनस्य क्रमागत्या द्यूते युद्धे जयादिषु। आरूढपञ्चलग्नेभ्यः प्रथमाक्षरतोऽपि वा। अकारादिस्वराणाञ्च पञ्चानाञ्च विचारयेत्। अस्य नामाक्षरस्यादौ स्वरारूढं समुत्सृजेत्। प्रश्नकस्य वचः श्रुत्वा प्राह्योवर्णः स्वरस्तथा। स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते। पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः। अकाराद्या ओकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः। भुक्त्यर्थं कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः। अकारः शकुनो आख्यात इकारः पिङ्गलस्तथा। उकारं वायसञ्चैव एकारस्ताम्रचेखरः। ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः। अकारः पूर्वदिग्भागे इकारश्चैव दक्षिणे। उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा। शेषस्थानेषु सर्वेषु ओकारः परिकीर्त्तितः। प्राङ् शकुनः, पिङ्गलो याम्ये, पश्चिमे काक उच्यते। उत्तरे ताम्रचूडश्च, कलापी मध्यगो मतः" इत्यादि अस्य फलादिकं तत्र द्रष्टव्यम् विस्तरभयान्नोक्तम्।

पञ्चपञ्चिनी स्त्री पञ्च पञ्च ऋचः परिमाणमस्याः ङिनि। पञ्चदशस्तोमस्य विष्टुतिभेदे "अथ पञ्चदशस्तोमस्य तिस्रो विष्टुतयः। तत्र प्रथमं पञ्चपञ्चिन्याख्यां विष्टुतिं दर्शयति" भा॰। "पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिश्च एकया, पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः, पञ्चपञ्चिनी पञ्चपञ्चदशस्य विष्टुतिः" ताण्ड्य॰ब्रा॰ ४।१। "चतुर्ष्वेषु स्तोत्रेष्वेकैकं त्र्यात्मकं सूक्तं तस्मिन् त्र्ये पञ्चदशसंख्या ऋचः सम्पादनीयाः। तच्च सम्पादनम् आवृत्तिमन्तरेण न सम्भवतीत्यावृत्तिप्रकार इहोपदिश्यते त्रिभिः पर्यायैः स्तोत्रभावर्त्तनीयम्। अग्न आयाहीत्येषा सूक्ते प्रथमा ऋक् "तन्त्वा समिद्भिरिति" द्वितीया "स नः पृथ्विति" तृतीया तासु प्रथमामृचं प्रथमे पर्याये त्रिरावर्त्तयेत् इतरे द्वे सकृत् सकृत्। द्वितीये पर्याये मध्यमां त्रिरभ्यसेत्, तृतीये पर्याये अन्तिमां त्रिरभ्यसेत्। एवं सत्येकैकस्य आवृत्तिः पञ्चधा सम्पद्यते। एषा पञ्चपञ्चिनी एकैकस्मिन् पर्याये पञ्चर्चा भवतीति। पञ्चपञ्चिन्येतत्संज्ञा पञ्चदशस्तोमस्येषा विष्टुतिः"।

पञ्चपत्र पु॰पञ्च पञ्च पत्राण्यस्य। (छान्दना) वृक्षभेदे राजनि॰

पञ्चपदी स्त्री पञ्च पादा अस्याः कन्यलोपे ङीपि पङ्क्तावः। छन्दोभेदे आम्न॰ ट॰ १।७।१९ उदा॰। कुशद्वीपस्थे २नदीभेदे भाग॰५।२०।२९ उदा॰।

पञ्चपर्णिका स्त्री पञ्च पञ्च पर्णान्यस्याः कप् कापि अतइत्वम्। गोक्षुरकुपे राजनि०।

पञ्चपर्वन् न० संज्ञात्वात् कर्म०। "चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च" परिभाषितेषु अष्टम्यादिषु

पञ्चपल्लव न० पञ्चानां पल्लवानां समाहारः पाला०। इष्ट विशेषपञ्चकपल्लवे तच्च गन्धकर्मणि "आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः। गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम्" शब्दचन्द्रिकोक्तम्। वैदिककर्मणि स्वाध्यघटे देयन्तु "अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः। पञ्चपल्लवमित्युक्तं सर्वकर्मणि शोभनम्" ब्रह्मपु० उक्तं प्राह्यम्। तान्त्रिककर्मणि तु "पनसाम्रं तथाश्वत्थं वटं बकुलमेव च। पञ्चपल्लवमुक्तं च मुनिभिस्तन्त्रवेदिभिः"। तेषां फलविशेषस्तत्र दृश्यः। कर्म०। पञ्चभद्रादयोऽप्यत्र ब०व०।

पञ्चपात्र न० पञ्चानां पात्राणां समाहारः पाला० न ङीप्। १समाहृतेषु पञ्चसु पात्रेषु। पञ्च पात्राणि दानोद्देश्यानि यत्र। वैश्वदेवपित्रादित्रयरूपपञ्चदैवते श्राद्धे तच्च अमावास्याप्रेतपक्षमृतोद्देश्यकश्राद्धं सपिण्डीकरणञ्च एतेषु मातामहपक्षाभावात् पञ्चदैवतत्वम्। तथाष्टकाश्राद्धमपि तत्र पित्रादिस्थाने मातृपित्रादिकोद्देश्यत्वात् तथात्वम्।

पञ्चपाद् त्रि० पञ्च पादा अस्य अनलोपः समा०। १पञ्च पादयुक्ते स्त्रियां ङीपि पङ्क्तिः। पञ्चधङ्घ्रिकर्मरूपः पादोऽस्य। २संवत्सरे संवत्सरस्य पञ्चर्तुस्वरूपत्वात् हेमन्तशिशिरयोरेकत्वाभिप्रायेण ऋतूनां पञ्चत्वम्। ऋ० १।६४। १२मा० दृश्यम्।

पञ्चपादी स्त्री पञ्चानां पादानां समाहारः ङीप्। पादपञ्चके पादशब्देन अन्वाक्यभेदः संज्ञायां कन्। पञ्चपादिका शारीरकभाष्यव्याख्याने अन्वभेदे

पञ्चपितृ पु० संज्ञात्वात् कर्म०। "जनकश्चोपनेता च यश्च कन्यां प्रयच्छति। अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः" प्रा०वि० धृतवचनोक्ते जनकादिपञ्चके

पञ्चपित्त न० पञ्चगुणितं पित्तं शा०त०। "वराहच्छागमहिषनृमृगमायूरपित्तकम्। पञ्चपित्तमिदं प्रोक्तं सर्वेष्वेव हि कर्मसु" वैद्यकोक्ते वराहादिपञ्चकपित्ते।

पञ्चप्रदीप न० पञ्च प्रदीपाः यत्र। नीराजनाङ्गे दीपभेदे "हरेः पञ्चप्रदीपेन बहवो भक्तितत्परः" पद्मपु०।

पञ्चपुष्प न० पञ्चगुणितं पुष्पम्। "चम्पकाम्रवमीपद्मकरवीरं च पञ्चमम्" देवीपु० १०७अ० उक्ते पुष्पपञ्चके।

पञ्चप्रस्थ न०पञ्च विषयाः शब्दादयः प्रस्थाः सानव इव यस्य। संसारवने "स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम्। द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम्। एकरश्मिं त्रिकूबरमेकनीडं द्विकूबरम्। पञ्चप्रहरणं सप्तरूपं पञ्चविक्रमम्। हैमोपस्करमारुह्य स्वर्गवर्माक्षयेषुधिः। एकादशचमूनाथः पञ्चप्रस्थमगाद्वनम्" भाग० ४।२६।४। "महानिषङ्गो धनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशोयस्यसः। रथमारुह्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः। रथम् इदानीमेव विवृतं स्वप्रदेहं जायदेहस्य शतसम्वत्सरोपभोग्यपुरत्वेनोक्तत्वात्। पञ्चज्ञानेन्द्रियाण्यश्वा यस्य। आशुगं शीघ्रगतिम्। द्वे अहन्तामते ईषे दण्डिके यस्य। द्वे पुण्यपापे चक्रे यस्य। एकं प्रधानं नीडो यस्य त्रयोगुणावेषबोध्वजा यस्य पञ्च प्राणा बन्धुराणि बन्धनानि यस्य। एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्मनः सूतो यस्य कर्मधारयः। एकं हृदयं नीडं रथिनउपवेशस्थानं यस्मिन्। द्वौ योक्त्रमोहौ कूबरौ युगबन्धनस्थाने यस्य। पञ्च शब्दादयो विषयाः प्रहियन्ते प्रक्षिप्यन्ते यस्मिन् अस्य व्याख्यानं भविष्यति पञ्चेन्द्रियार्थप्रक्षेप इति। सप्त धातवोवरूथा रथरक्षार्थं चर्माद्यावरणानि यस्य पञ्च कर्मेन्द्रियाणि विक्रमा गतिप्रकारा यस्य। हैमोपस्करं मौक्तिकाभरणं स्वर्गवर्मा वर्मं च कवचं रजोगुणाहतं अक्षयेषुधिर्निरङ्कुशं अनन्तवासनाहङ्कारोपाधिः। एकादशो मनोरूपः चमूनाथः सेनापतिर्यस्य। वासनामयस्य मनसः प्रग्रहस्य सङ्कल्पविकल्पात्मकस्य हृदयवनत्वेन वक्ष्यमाणस्य चमूनाथत्वमिति भावः। पञ्च शब्दादयो विषयाः प्रस्थाः सानवो यस्मिन् तद्वनं भजनीयं देशमगात्" श्रीध०।

पञ्चप्राण पु० कर्म०। देहस्थे प्राणनादिवृत्तियुते वायुपञ्चके पञ्चवृत्तिशब्दे दृश्यम्।

पञ्चप्रासाद पु० पञ्चचूडायुक्तः प्रासादः शा०त०। (पञ्चरत्न) इति ख्याते देवगृहभेदे "पञ्चैष्टकाचितं रम्यं पञ्चप्रासादसंयुतम्। कारयित्वा हरौ चाथ धूतपापो दिवं व्रजेत्" अग्निपु०।

पञ्चबन्ध पु०पञ्च पञ्चमः बन्धो भागो यत्र। पञ्चमांशयुतेदमादौ "आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा। पञ्चबन्धोदमस्तत्र राज्ञे तेनाविभाविते" मिता०धृतवचनम्।

पञ्चबला स्त्री पञ्चगुणिता बला। बलानागबलामहाबला-

ऽतिवला राजवलाऽपवलापञ्चके नवरत्नप्रकाशिकायाम् ।

पञ्चबाण पु० पञ्च बाणा अस्य । १कन्दर्पे तस्य बाणपञ्चकं च कालिकापुराणशब्दे २०१२पृ०दर्शितम् संज्ञात्वात् कर्म० । २कामस्य बाणेषु पञ्चविभागेनानीतेषु विवाहादौ वर्जनीयेषु पञ्चसु ३रोगादिषु उपयमशब्दे १२६९पृ० दृश्यम् ।

पञ्चबाहु पु० पञ्च बाहवोऽस्य । महादेवे हरिवं०२७७अ० ।

पञ्चब्रह्म न० उपनिषद्भेदे

पञ्चभद्र पुंस्त्री पञ्चसङ्ख्यभेदेषु भद्रः पुष्टितत्वात् । 'पञ्चभद्रस्तु कृतपृष्ठसुखपार्श्वेषु पुष्टितः' हेम० उक्ते १हयभेदे स्त्रियां जातित्वात् ङीष् "स्त्रीणां स्तनापर्यटवारिवाहभूनिम्बगुण्ठौजनितः कषायः । समीरपित्तज्वरजर्जराणां करोति भद्रं खलु पञ्चभद्रम्" शार्ङ्गधरोक्ते २पाचनभेदे न०

पञ्चभूत न० ब०व०संज्ञात्वात् कर्म० । आकाशवायुतेजोजलभूमिरूपभूतेषु । "भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे" भार०ति० । अस्य पञ्चत्वमपि "यद्दाहश्रोम सर्वतस्तेन वायुस्ताभ्यां रूपाद्भिरेतैः रसाच्च । अम्भांस्तेतैर्गन्धतो भूर्धरात्रा भूताः पञ्च सुर्मुखोनाः क्रमेण" तेषां च द्रव्यविशेषशब्दे १७८१ पृ० सुश्रुतोक्तं गुणादि दृश्यम् तेषामस्थ्यादिविशेषकार्यकारिता ब्रह्मज्ञानतन्त्रे प्रथमपटले उक्ता यथा "अस्थिमांसं नखश्चैव नाडी त्वक् चेति पञ्चमी । पृथ्वी पञ्चगुणा प्रोक्ता ब्रह्मज्ञानेन भाषितम् । मज्जा मूत्रं तथा शुक्रं स्वेदा शोणितमेव च । तोयं पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम् । छायो निद्रा क्षुधा चैव क्लान्तिरालस्यमेव च । तेजः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम् । धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा । वायुः पञ्चगुणः प्रोक्तो ब्रह्मज्ञानेन भाषितम् । कामः क्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः । नभः-पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम् । भूत नक्षत्राणि यथा "धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा-तथा । अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वसदाहृतम् । पूर्वाषाढा तथाऽश्लेषा मूलार्द्रा चैव रोहिणी । पर भाद्रपदा तोयम् आपस्तत्त्वमभीष्टदम् । भरणी कृत्तिका हस्ता मघा पूर्वा च फाल्गुनी । पूर्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ! । विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्वसुः । अश्विनी मृगशीर्षा च वायुस्तत्त्वसदाहृतम् । स्वस्वरोदयः । [प्रपञ्चे नैवरत्नप्र०]

पञ्चभृङ्ग न० देवदालीशमीभृङ्गानिर्गुण्डीतमालात्मके दृश्यम् ।

पञ्चम त्रि०पञ्चानां पूरणः डटि मट् । पञ्चानां पूरणे स्त्रियां ङीप् । २दले ३रुचिरे त्रि० ४मैथुने न० तन्त्री-कण्ठोत्थितस्वरमध्ये ५स्वरभेदे अमरः । "वायुः सञ्चरतो नाभेरुरोहृत्कण्ठमूर्द्धसु । विचरन् पञ्चमस्थानमाप्नुवन् पञ्चम उच्यते" । तन्त्रिवृत्तिः । "प्राणोऽपानः समानश्च उदानो व्यान एव च । एतेषां समवायेन जायते पञ्चमः स्वरः" तत्कारणम् । ६रागभेदे मेदि० स च सोमेश्वरमते तृतीयो रागः अस्य गान्धारस्वरस्तीव्रः ऋषभपञ्चमौ लुप्तौ षड्जः षट्कांशः । भरतमते भैरवरागस्याष्टमः पुत्रः । अस्योच्चारणं पिकध्वनिवत् । उच्चारणस्थानं नाभ उरः शिरश्च ।

पञ्चमकार न०पञ्च मकारा यत्र । मकारादिपदवेद्यमद्यादिपञ्चके "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च । पञ्चतत्त्वमिदं देवि ! निर्वाणमुक्तिहेतवे । मकारपञ्चकं देवि ! देवानामपि दुर्लभम्" गुप्तसाधनतन्त्रे ७ पटले । तत्र मद्यादिकं प्रसिद्धम् । मुद्रा तु "भृगुकाञ्चनकुम्भा भट्टा गोधूमचणकादयः । तेषां नाम भवेद्देवि ! मुद्रा मुक्ति-प्रदायिनी" । तत्र परिभाषिता

पञ्चमहिष न० पञ्चगव्यवत् महिषस्य मूत्रादिपञ्चके । पञ्चगव्य शब्दे दर्शितकल्पेन तस्य पाकविधिः "एतेनैव तु कल्पेन हतं पञ्चाविकं पचेत् । पञ्चाजं पञ्चमहिषं चतुरङ्गमथापि वा" सुश्रुतः । पञ्चाजपञ्चाविकशब्दावपि क्रमेण अजाविसम्बन्धिमूत्रादिपञ्चके ।

पञ्चमहापातक न० पञ्चप्रकारं महापातकम् शा०त० । ब्रह्महत्यादिमहापातकपञ्चके "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह" मनुः । स्तेयमत्र ब्राह्मणस्वाभिलषितस्वर्णहरणं यथाह विष्णुः "ब्रह्महत्या सुरापानं ब्राह्मणस्वर्णहरणं गुरुदाराभिगमनं संयोगश्च तैः सहेति महापातकानि" । सुवर्णश्च कर्मभितस्वर्णम् ।

पञ्चमहायज्ञ पु० पञ्चगुणितो महायज्ञः कर्म० वा । गृहस्थैः प्रतिदिनं कर्तव्ये देवपैतृकादियज्ञपञ्चके । "पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये । पञ्चयज्ञविधानञ्च गृही नित्यं न हापयेत् । पञ्चयज्ञविधानेन तत् पापं तस्य नश्यति । देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च । ब्रह्मयज्ञो नृयज्ञश्च पञ्चयज्ञाः प्रकीर्त्तिताः । होमो दैवो बलिर्भौतः पितॄणां स्वधा स्मृतः । स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम्" मनुसं० । पञ्चमहासत्रादयोऽप्यत्र

"देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् । महासत्राणि जानीयात् एते चेह महामखाः । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । श्राद्धं वा पितृयज्ञः स्यात् पित्रो बलिरथापि वा । यच्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते । स चार्वाक् तर्पणात् कार्यः पश्चाद्वा प्रातराकृतेः । वैश्वदेवावसाने वा नान्यत्रर्त्तुनिमित्तकात् । अथ्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये । अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा । अथ्युद्धृत्य यथाशक्त्या किञ्चिदन्नं यथाविधि । पितृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे । पितृभ्य इदमित्युक्त्वा स्वधाकारसुदीरयेत् । इन्नकारं मनुष्येभ्यस्तद्वद्वं निनयेदपः" कात्या०स०

पञ्चमार पु० १बलदेवपुत्रे शब्दर० कर्म० । २पञ्चविधकामे च ।

पञ्चमाषिक त्रि०पञ्च माषाः प्रमाणमस्य ठक् न पूर्वपदवृद्धिः । स्वर्णमाषपञ्चकमिते दण्डाद्ये मनुः ८।१९८

पञ्चमास्य पुंस्त्री० पञ्चमः स्वरभेदः आस्ये अस्य । १कोकिले शब्दर० स्त्रियां जातित्वेऽपि योषधत्वात् टाप् । पञ्चमं कोकिलो वदेत्" पञ्चसु मासेषु भवः यत् । २पञ्चमासभवे त्रि०

पञ्चमी स्त्री पञ्च पतीन् मिनोति बध्नाति प्रेम्णा मी–बन्धे ऽर्थक् । पञ्चपाण्डवपतिकायां १द्रौपद्याम् २शारिष्टङ्कतायाञ्च (पाशारत्वक)पञ्चन्+पूरणे मट् । पञ्चानां पूरण्यां स्त्री ङीप् । अस्य बहु० समासे समासवाच्यत्वे अच् समा० । कल्याणी पञ्चमी यासु रात्रिषु कल्याणपञ्चमा रात्रयः । सुख्यत्वाभावे कप् । कल्याणी पञ्चमी यत्र पक्षे कल्याणपञ्चमीकः पक्षः अत्र पूरण्या सुख्यत्वाभावात् न समासवाच्यत्वम् । चन्द्रमण्डलस्य प्रवेशनिर्गमाभ्यां सूर्य्यकिरणप्रतिबिम्बयोग्यत्वयोग्यत्वाभावयुक्तायां चन्द्रस्य ४पञ्चम्यां कलायां ५तदुपलक्षितं तिथौ च स्त्री । विहितकर्मविषयविशेषे तस्याः कथं ग्राह्यतेति कालमा० निर्णीतं यथा

"युग्मशास्त्रेण पञ्चमी पूर्वविद्धा ग्राह्या । नतु "प्रायः प्रातरुपोष्या हि तिथिर्दैवे फलेप्सुभिरिति" शिवरहस्यसौरपुराणयोस्तिथ्यग्रभागस्योपवासाङ्गत्वाभिधानात् पञ्चम्युपवासः परेद्युः प्राप्नोति, तन्न हारीतेन परविद्धायाः प्रतिषिद्धत्वात् । "चतुर्थीसंयुता कार्या पञ्चमी वरया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते" इति । नचैतावता प्रायः प्रातरिति वचनस्य निर्विषयत्वं वक्तुमीशम् । निर्णीताच्च निर्णेतव्याच्च तिथिषु यत्र यत्र परविद्धोपवासः शास्त्रान्तरेण प्राप्तस्य सर्वस्य तद्विषयोपपत्तेः । न च तेनैव शास्त्रेण तदुपवासविद्धेः कृतमनेन वचनेनेति शङ्कनीयम् । सामान्यविशेषरूपेण शास्त्रद्वयस्यापि चरितार्थत्वात् । तस्य सामान्यशास्त्ररूपस्य प्राप्तोपवासवचनस्य विरोधिना पक्षे युक्तपञ्चमीनिषेधकेन विशेषशास्त्ररूपेण हारीतवचनेन बाधो युज्यते । एतादृश बाधमभिलक्ष्यैव प्रायः प्रातरुपोष्येति प्रायःशब्दः प्रयुक्तः । प्रतिपन्न्यायेन पौर्वाह्णिकी इति वचनबलात् । पञ्चम्यामपि दानव्रतयोः परदिनानुष्ठानप्राप्तौ तद्बाधत्वे हारीतवचने दैवे कर्मणीत्युच्यते । न च दैवकर्मणि पूर्वाह्णस्य कर्मकालशास्त्रप्राबल्यस्य च वर्णितत्वात् तद्बाधो न युक्त इति शङ्कनीयम् । विधेर्निषेधस्य वा प्रतिपदोक्तस्य प्रबलतरत्वात् । न च पूर्वदिनपूर्वाह्णस्यात्यन्तकर्मकालत्वं, साकल्यवचनापादितकर्मकालत्वस्य सद्भावात् । दैवशब्देन विषयमभिलक्ष्य साकल्यवचनस्य प्रवृत्तत्वात् । स्वाभाविकतिथिव्याप्तियुक्ते विषये साकल्यवचनस्य निरर्थकत्वात् । तस्माद्दैवे कर्मणि परविद्धायाः पञ्चम्याः निषेधो न विरुध्यते । नन्वेवमपि पित्र्ये निषेधो निरर्थकः । पित्र्यस्य स्वत एव परविद्धायामप्राप्तत्वात् । एवं दृष्टान्ततयापि च तदुपन्यासोपपत्तेः । यथा पित्र्यकर्मणि उत्तरविद्धा न ग्राह्या तथा दैवेऽपीति विवक्षया दैवपित्र्ययोः सहोपन्यासः । नतु व्यासनिर्णयमतयुग्मशास्त्रमुदाहृत्य पञ्चम्याः पूर्वविद्धत्वमभिधीयते । आपस्तम्बादयस्तु तद्विपर्य्ययेण युग्मान्युदाजह्रुः । "प्रतिपत् सहितीया स्याद्द्वितीया प्रतिपद्युता । चतुर्थीसहिता या च सा तृतीया फलप्रदा । पञ्चमी च प्रकर्त्तव्या षष्ठ्या युक्ता च नारद!" इति । अतएवैतद्युग्मशास्त्रपर्य्यालोचने पञ्चम्याः परविद्धत्वं प्राप्नोति । बाढम् अतएवात्र शुक्लकृष्णशास्त्रेण व्यवस्था प्रसक्ता तां निषेद्धुं हारीतेन शुक्लपक्षे तथाऽसिते इत्युक्तम् । न च सा व्यवस्था वचनेन निषेद्धुमशक्या, किं हि वचनं न कुर्याद्वास्ति वचनस्यातिभार इति न्यायात् । तस्माद्धारीतवचनेन पञ्चमी पूर्वविद्धा ग्राह्या । स्कन्दपुराणेऽपि "पञ्चमी च तथा कार्या चतुर्थ्या संयुता विभो!" तथा पद्मपुराणभविष्यत्पुराणयोः पूर्वोत्तरविद्धाविषयौ विधिनिषेधौ दृश्येते । "पञ्चमी च चतुर्थ्या तु कार्या षष्ठ्या च संयुता" इति । वसु ब्रह्मवैवर्त्तेऽभिहितम् "पञ्चमी च प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद!

इति तद्वचनं स्कन्दोपवासविषयतया सङ्कोचनीयम्। वाक्यशेषे तथाभिधानात् "स्कन्दोपवासे स्त्रीकार्या पञ्चमी परसंयुता" इति वाक्यशेषः। न चासङ्गातविरोधिनो वाक्योपक्रमस्य सङ्गातविरोधिना वाक्यशेषेण कथं सङ्कोच इति शङ्कनीयम्। असन्दिग्धोपक्रमस्य प्राबल्येऽपि सन्दिग्धोपक्रमस्य वाक्यशेषेण निर्णेतव्यत्वात्। अतएव जैमिनिनापि स्वीकृतम्। "सन्दिग्धे तु वाक्यशेषादिति"। अतः स्कन्दोपवासे पञ्चमी परविद्धा। अन्यत्र पूर्वविद्धेति स्थितम्"।

पञ्चमुख त्रि॰ पञ्च मुखान्यस्य। १पञ्चवदनयुक्ते स्त्रियां स्वाङ्गत्वात् ङीष्। २महादेवे पु॰ तन्मुखनामादि देवीशब्दे उक्तं यथा "शिवस्तत्रस्थितः साक्षात् सर्वपापहरः शुभः। स तु पञ्चमुखः ख्यातो लोकसर्वार्थसाधकः। पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः। पश्चिमे तु मुखे सद्यो, वामदेवस्तथोत्तरे। पूर्वे तत् रूपं विद्याद्घोरं चापि दक्षिणे। ईशानः पञ्चमो मध्ये सर्वेभ्यस्तु परिस्थितः। एते पञ्चमुखा वत्स पापघ्ना पङ्कनाशनाः। सद्योजातो भवेच्छुक्लो वामदेवस्तु पीतकः। रक्तस्तत्पुरुषो ज्ञेयोऽघोरः कृष्णः स एव च। ईशानः पश्चिमस्तेषां सर्ववर्णसमन्वितः। कामदः कामरूपी स्यात् ज्ञानाधारः त्रिवात्मकः"। ३पञ्चवक्त्रे रुद्राक्षभेदे च "पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नामतः स्मृतः। स्वागमस्यागमस्यैव अभक्ष्यस्य च भक्षणात्। सद्यः पतति सर्वपापेभ्यः पञ्चवक्त्रस्य धारणात्" तिथि॰त॰ स्कान्दे। ४जवाभेदे स्त्री ङीष्। ५वासकवृक्षे च राजनि॰। पचि-विस्तारे अच् तादृशं मुखमस्य। ६सिंहे पुंस्त्री॰ स्त्रियां ङीष्। पञ्चवक्त्रादयोऽपि तेष्वर्थेषु।

पञ्चमुद्रा स्त्री पञ्चगुणिता मुद्रा। १आवाहन्यादिमुद्रापञ्चके तत्स्वरूपनामादि पूजाप्रदीपे उक्तं यथा

"सम्यक् प्रपूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः। आवाहनी समाख्याता मुद्रा दैशिकसत्तमैः। अधोमुखी त्रियं चेत् स्यात् स्थापनी२ मुद्रिका भवेत्। उच्छ्रिताङ्गुष्ठमुष्टिस्तु संयोगात् संनिधापनी३। अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी४मता। उत्तानमुष्टियुगला सगा मुद्रीकरणी५मता"। तन्त्रोक्ते देवभेदपूजाङ्गे २योन्यादिमुद्रापञ्चके च तन्त्रसारः।

पञ्चमुष्टिक पु॰ चक्रदत्तोक्ते यवादिमुष्टिपञ्चककषायभेदे "यव कोल कुलत्थानां शङ्खमूलकगुण्ठयोः। एकैकमुष्टिमुद्धृत्य पचेदष्टगुणे जले। पञ्चमुष्टिक इत्येष वातपित्तकफापहः। शस्यते गुल्ममन्दाग्नौ च श्वासे कासे क्षये ज्वरे"।

पञ्चमूत्र न॰ पञ्चप्रकारं मूत्रम्। गवाजामेषीमहिषी गर्दभीनां पञ्चानां मूत्रे राजनि॰।

पञ्चमूल न॰ पञ्चगुणितं मूलम् शा॰त॰। १वैद्यकोक्ते बिल्वादिपञ्चकमूलेतच्च त्रिविधं लघुमहत्तृणाख्यभेदात् तत्र महत् "श्रीफलः सर्वतोभद्रा पाटला गणिकारिका। स्योनाकः पञ्चभिश्चैतैः पञ्चमूलं महन्मतम्। पञ्चमूलं महत् तिक्तं कषायं कफवातनुत्। मधुरं श्वासकासघ्नमुष्णं लघुग्निदीपनम्" अथ लघुपञ्चमूलस्य लक्षणकृत्याह "शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका। गोक्षुरं पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्। पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम्। नात्युष्णं दृंहणं स्वाहि ज्वरश्वासाग्निसीदनुत्" भावप्र॰ "बिल्वाग्निमन्थश्योनाक काश्मर्यः पाटला तथा। ज्ञेयं बृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम्" मतान्तरम्। "शरेक्षुदर्भकाशानां मूलस्य मूलमेव च। सौम्यतं चारकं चैव तृणाख्यं पञ्चमूलकम्" शब्दच॰। पञ्चमूलीत्यपि स्वल्पपञ्चमूलभेदे "शालपर्णी पृश्निपर्णी बृहती कण्टकारिका। तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी" शब्दच॰। पञ्चानां मूलानां समाहारः ङीप्। २मूलपञ्चके

पञ्चमूल्यादि न॰ चक्रदत्तोक्ते पाचनभेदे यथा

"पञ्चमूली बला बिल्वगुडूचीसुस्तनागरैः। पाठा भूनिम्बहीवेरकटजत्वक्फलैः कृतम्। हन्ति सर्वामतीसारान् ज्वरदोषं वमिन्तथा। सम्मूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम्"।

पञ्चयाम पु॰ पञ्च यामा यत्र। १दिवसे "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टये। नाडीनां तद्भवे सन्ध्ये दिवसाद्यन्तसंज्ञिते" उक्तेः अहोरात्रस्य अष्टप्रहरात्मकत्वेन तन्मध्ये रात्रेस्त्रियामत्वात् परिशिष्टयामपञ्चकस्य दिवसत्वम्। २तदभिमानिदेवभेदे "विभावसोरसूतोषा व्युष्टं रोचिष्मतः पुत्रः। पञ्चयामोथ भूतानि येन जायन्ति कर्मसु" भाग॰ ६।६।१५

पञ्चयुग न॰ पञ्चभिः पञ्चभिः युगम्। ऋदादिभिः पञ्चभिः पञ्चभिः वर्षैः द्वादशवर्षात्मकषष्टिसंवत्सरे "भंगत्यराः पञ्चयुगं चाहोरात्रचतुर्विधः" भा॰स॰१२श्लो॰ "दैवपैत्रमानुषब्राह्मभेदात् अहोरात्रचतुर्विध इत्यर्थः" नीलक॰।

पञ्चरक्तक पु॰ पञ्च रक्ता इव कण्टकादयोऽस्य। १पक्षपोत-

इष्टे राजनि० । २इन्द्रियपञ्चकरूपरञ्जकयुक्ते च ।

पञ्चरत्न न० पञ्चगुणितं रत्नम् । पञ्चविधे १रत्नभेदे तच्च नानाविधम् "नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम् । प्रवालं चेति विज्ञेयं पञ्चरत्नं मनीषिभिः" विधाभ्रपा० "सुवर्णं रजतं शङ्खा राजावर्त्तं प्रवालकम् । रत्नपञ्चकमाख्यातम्" हेमा०भ्र० "कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम् । पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः । अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्" हेमा०दा० । पञ्च रत्नानीव उपदेशकत्वात् यत्र । २नीतिगर्भ कवितापञ्चके "नागः मोतस्तथा वैद्यं शान्तिः शक्यो यथाक्रमम् । पञ्चरत्नमिदं प्रोक्तं विदुषापि सुदुर्लभम्" काव्यर्श० । नाग इत्यादिना एकैकपद्यस्य आद्यपदेन सूचितं कवितापञ्चकं च ग्राह्यम् । तानि च पद्यानि प्रागेव काव्यसंग्रहे दृश्यानि । ३पञ्चचूडदेवगृहभेदे न० ।

पञ्चरश्मि पु० पञ्च पञ्चवर्णा रश्मयोऽस्य । पिङ्गलादिपञ्चवर्णरश्मिके सूर्ये तस्य तथात्वम् निर्णीतं छा०उ० यथा "अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः । तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मयः उभौ लोकौ गच्छतीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाड़ीषु सृप्ता आभ्यो नाड़ीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः" उप० "अथ या एता ब्रह्मणो हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिनीनाड़ीहृदयमांसपिण्डात् सर्वतोदिक्षु सृता आदित्यमण्डलादिव रश्मयस्ताहेताः पिङ्गलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य रसेन पूर्णाःसदाकारा एव तिष्ठन्ति वर्त्तन्त इत्यर्थः । तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्य्यम् । सौरेण तेजसा पित्तरूपेण पाकाभिनिर्वृत्तेन कफेनाल्पेन सम्पर्कात् पिङ्गलं भवति सौरं तेजः पित्ताख्यम् । तदेव वातभूयस्त्वान्नीलं भवति । तदेव च कफभूयस्त्वाच्छुक्लम् । कफेन बहुतायां पित्तम् लोहितत्वाच्छ्लेष्मेन लोहितम् । वैद्यकाद्या वर्णविकारा अन्वेष्टव्याः । कथं भवन्तीति श्रुतिस्त्वादित्यसम्बन्धादेष तत्तेजसो नाड़ीष्वनुगतस्यैते वर्णविशेषा इति । कथमसौ वा आदित्यः पिङ्गलो भवति एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव । तस्याध्यात्मं नाड़ीभिः कथं सम्बन्ध इत्यत्र दृष्टान्तमाह तद्यथेति यथा लोके महान् विस्तीर्णः पन्था महापथ आततो व्याप्त उभौ ग्रामौ गच्छतीमं च सन्निहितमसुं च विप्रकृष्टं दूरस्थमेवं यथा लोके दृष्टान्तो महापथ उभौ ग्रामौ प्रविष्टः । एवमेवैता आदित्याः महापथा यथा गच्छन्ति तयोभयतादित्यस्य रश्मयः उभौ लोकावसुं चादित्यमण्डलमिमं च पुरुषं गच्छन्त्युभयत्र प्रविष्टाः यथा महापथः । कथमसुमादादित्यमण्डलात् प्रतायन्ते सन्तता भवन्ति । ता अध्यात्ममासु पिङ्गलादिवर्णासु यथोक्तासु नाड़ीषु सृप्ता सताः प्रविष्टा इत्यर्थः । आभ्यो नाड़ीभ्यः प्रतायन्ते प्रदत्ताः सन्तानभूताः सत्यस्तेऽमुष्मिन् रश्मीनामुभयलिङ्गत्वात्ते इत्युच्यन्ते" भा० । "रसेनाक्षरेति शेषः तदाकारा इति तच्छब्दोऽक्षरसविषयः । शुक्लस्येत्यादिषु षष्ठी पूर्ववत् । सृताविति शब्दोऽध्याहारद्योतनार्थः । कथं पुनरक्षरस्य पिङ्गलादिविचित्रो वर्णविशेषः सिध्यतीत्याशङ्क्याह सौरेणेति वातपित्ताख्यं सौरं तेजः । तेन पाकोऽग्नितस्य च जायते । तेनाभिनिर्वृत्तेनाल्पेन कफेन सम्पर्कात् तदेव पित्ताख्यं सौरं तेजो भवति पिङ्गलम् । तेन सम्पर्कादक्षरस्य नाड़ीनां च जायते पिङ्गलत्वमित्यर्थः । तदेव च पित्ताख्यं सौरं तेजो यथोक्तपाकाभिनिर्वृत्तेन प्रभूतेन वातेन सम्बन्धात्तद्भूयस्त्वाद्भवति नीलं तेन च सम्पर्कादक्षरस्य नाड़ीनां च जायते नैलमित्याह तदेवेति । प्रकृतमेव पित्ताख्यं सौरं तेजो यथोक्तपाकवशादभिनिर्वृत्तकफस्य स्वसम्बन्धिनो भूयस्त्वाद्भवति शुक्लं तेन च सम्पर्कादक्षरस्य नाड़ीनां च शौक्ल्यं भवतीत्याह तदेव चेति । उक्तपाकाभिनिर्वृत्तेन कफेन तदभिनिर्वृत्तस्यैव वातस्य समतायां तदेव तेजस्तत् सम्बन्धि पीतं जायते । तत्सम्बन्धादक्षरस्य च नाड़ीनां च पीतत्वं भवतीत्याह कफेनेति । यदा तु यथोक्तपाकाभिनिष्पन्नं शोणितं बहुलं भवति तदा तस्य नाड़ीनां च लौहित्यं भवतीत्याह शोणितेति । पक्षान्तरमाह वैद्यकाद्वेति । अन्येऽप्यप्रकारमाह कथमिति । नाभेरूर्द्ध्वं हृदयादधस्तादामाशयमाचक्षते । तेजः सौरं पित्तमित्युच्यते । तच्चाक्षरस्य धात्वन्तरसहकारिवशाद्वर्णविशेषे कारणमाशयगतं पीतं रञ्जकं रसरञ्जनादित्यादिवचनादित्यर्थः । कथं तर्हि पिङ्गलत्वेत्याद्या श्रुतिरित्याशङ्क्याह श्रुतिस्त्विति । उक्तमर्थ-

नाकाङ्क्षाद्वारा स्फोरयति कथमित्यादिना आदित्यस्य पिङ्गलादयो वर्णविशेषाः शास्त्रप्रमाणादेव प्रत्येतव्याः। आदित्यस्य तेजसो नाड्योऽनुगतस्य पैङ्गल्यादयो वर्णविशेषा भवन्तीत्युक्तं तदेव प्रश्नद्वारा दृष्टान्तावष्टम्भेन स्फुटयति तस्येत्यादिना" आनन्दगिरिः।

पञ्चरसा स्त्री पञ्चो विस्तीर्णो रसोऽस्याम्। आमलक्यां हारा०।

पञ्चरात्र न० पञ्चानां रात्रीणां समाहारः अच्समा०। रात्रान्तत्वेऽपि संख्यापूर्वकत्वेन क्लीबता। १रात्रिपञ्चके पञ्च रात्राणि ज्ञानानि यत्र। नारदादिप्रणीते ज्ञानोपदेशके श्रुतिभेदे तन्निरूपणादिकं ब्रह्मपु० जन्मखण्डे १२२अ० उक्तं यथा "रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्। तेनेदं रञ्जरात्रं च प्रवदन्ति मनीषिणः। प्रथमं सात्विकं ज्ञानं द्वितीयन्तु तदेव च। नैर्गुण्यं च तृतीयं च ज्ञानं च ब्रह्मतत्परम्। चतुर्थं च राजसिकं भक्तज्ञानाभिवाञ्छति। पञ्चमं तामसं ज्ञानं विहंसज्ञानाभिवाञ्छति। ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः" तच्च सप्तविधं यथा "पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम्। ब्राह्मं शैवं च कौमारं वाशिष्ठं कापिलं परम्। गौतमीयं नारदीयमिदं सप्तविधं स्मृतम्" इति नारदपञ्चरात्रे प्रथमरात्रम्। "पञ्चकं पञ्चरात्राणां ज्ञप्तमाहात्म्यपूर्वकम्। वाशिष्ठं नारदीयं च कापिलं गौतमीयकम्। परं सनत्कुमारीयं पञ्चरात्रं च पञ्चकम्"।

पञ्चरात्रिक पु० पञ्चरात्रस्योपासनासाधनतयास्त्यस्य ठन्। विष्णौ भा० आ० १३अ०।

पञ्चराशिक पु० पञ्च राशयो यत्र कप्। गोलावयवे पञ्चराश्यधिकारेण गणितभेदे यथा "पञ्चसप्तमराशिकादिकेऽन्योन्यपचनयनं फलच्छिदाम्। संत्रिभाय वह्नराशिके मधे लब्धराशिमधभालिते फलम्।

उदाहरणम्। मासे यतस्य यदि पञ्च कलान्तरं स्यादर्धे गते भवति किं वद षोडशानाम्। कालं तथा कथय मूलकलान्तराभ्यां मूलं धनं गणक! कालफले विदित्वा।

न्यासः १ १२ अन्योऽन्यपचनयने कृते १ १२
१०० १६ (फलस्य छेदोऽन्यपक्षे १०० १६
५ ० न नेय इति बोध्यम्) ० ५

वह्नना राशीनां वधः। ९६०।

लब्धराशिवधः १०० फलेन भक्ते लब्धम्। ८।

शेषम् ६० / १०० विंशत्याभवर्त्य ३ / ५ जातं कलान्तरम् ९ ३/५

छेदमङ्गेष्विति कृते जातम् ४८ / ५

पञ्चलक्षण न० पञ्च सर्गादीनि लक्षणान्यस्य। १पुराणे अमरः। पुराणशब्दे दृश्यम् पञ्चानां लक्षणानां समाहारः ङीप्। अनुमानचिन्तामण्युक्ते व्याप्तिलक्षणपञ्चके बाध्याभावदृष्टान्तत्वमित्यादिकं व्याप्तिलक्षणपञ्चकं तल्लोकमिति तस्य पञ्चस्य तथात्वम्।

पञ्चलवण न० पञ्चगुणितं लवणम्। "काचकं सैन्धवं चैव साम्बुद्रं विडमेव च। सौवर्चलं तथा पञ्चलवणं परिकीर्त्तितम्" राजनि० उक्ते लवणपञ्चके।

पञ्चलाङ्गलक न० महादानभेदे तत्स्वरूपं मत्स्यपु० यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। पञ्चलाङ्गलकं नाम महापातकनाशनम्। पुण्यां तिथिं समासाद्य युगादिप्रहणादिकम्। भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम्। कर्षं खेटकं वापि ग्रामं वा मण्डलाधिपम्। निवर्त्तनशतं वापि तदर्धं वापि शक्तितः। सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः। सर्वौषधैरथैर्युक्तान्यान् पञ्च च काञ्चनान्। कृष्णान् पञ्चपलादूर्ध्वं नाशस्त्रपलावधि। हलान् लक्षणसंयुक्तान् दद्य चैव धुरन्धरान्। सुवर्णशृङ्गाधरयान् सुताम्राङ्गूलभूषणान्। कृष्णपादावतिलकान् रक्तकौशेयभूषणान्। जगद्रामचन्द्रकृतान् प्रायायामधिवासयेत्" ततःपरं तत्प्रायाणे २८२अ०दृश्यम्।

पञ्चलोकपाल पु० संज्ञायाम् कर्म०। अष्टवसुरुद्रविनायकादिदेवपञ्चके "विनायकं तथा दुर्गां वायुमाकाशमेव च। अग्निनौ क्रमतः पञ्चलोकपालान् प्रपूजयेत्" विधानपा०।

पञ्चलोह न० पञ्च विस्तीर्णं लोहम्। सौराष्ट्रदेशजे लोहे हेम०। पञ्चगुणितं लोहं. संज्ञायां कन्। पञ्चलोहस्य सुवर्णरजततामररङ्गनागरूपे धातुपञ्चके राजनि०।

पञ्चवक्त्र पु० पञ्च वक्त्राण्यस्य। १महादेवे २रुद्राक्षभेदे च पञ्चमुखशब्दे दृश्यम्। पञ्चवदनादयोऽत्र [त्रिका०।

पञ्चवट पु० पञ्चो विस्तीर्णो वटः नेष्टनम्। वालयज्ञोपवीतके

पञ्चवटी स्त्री पञ्चानां वटानां वटप्रभृतीनां समाहार

ङीप् । वटादिवृक्षपञ्चके "अश्वत्थं बिल्ववृक्षं च वटं धात्रीमशोककम् । वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च । अश्वत्थं स्थापयेत् प्राचि बिल्वमुत्तरभागतः । वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा । अशोकं वह्निदिक् स्थाप्यं तपस्यार्थं सुरेश्वरि ! मध्ये वेदीं चतुर्हस्तां चतुरस्रां मनोहराम् । प्रतिष्ठां कारयेत्तस्याः पञ्चवर्णोत्तरं शिवे ! । अनन्तफलदात्री सा तपस्याफलदायिनी । इयं पञ्चवटी प्रोक्ता दृढ़तपञ्चवटीं शृणु । बिल्ववृक्षं मध्यभागे चतुर्दिक्षु चतुष्टयम् । वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत् । अशोकं वर्तुलाकारं पञ्चविंशतिसम्मितम् । दिग्विदिक्षामलकीं च एकैकं परमेश्वरि ! । अश्वत्थश्च चतुर्दिक्षु दृढ़तपञ्चवटी भवेत् । यः करोति महेशानि ! साक्षादिन्द्रसमो भवेत् । इहलोके महासिद्धिः परे च परमा गतिः" हेमा॰ब्र॰ स्कन्दपु॰ वचनानि । २दक्षिणदिक्स्थे तीर्थभेदे "ततो पञ्चवटीं गत्वा ब्रह्मचारी जितेन्द्रियः । पुण्येन महता युक्तः सतां लोके महीयते । यत्र योगेश्वरः स्थाणुः स्वयमेव वृषध्वजः । तमर्चयित्वा देवेशं गमनादेव सिध्यति" भा॰प॰ ३८अ॰ । रामा॰अर॰ सर्गे दृश्यम् ।

पञ्चवर्ग पु॰ पञ्च वर्गा प्रहारा यत्र । १पञ्चप्रहरयान्विते यागभेदे "सर्वे पञ्चवर्गाः पशुकामस्य" कात्या॰श्रौ॰ ९।४।१८ "पशुकामस्य यजमानस्य सर्वे त्रयोऽप्यभिषवाः पञ्चवर्गाः पञ्चप्रहाराः भवन्ति" कर्कः । पञ्चानां चारार्णां वर्गः । २चारपञ्चके पु॰ "क्षत्रं चाष्टविधं कर्म पञ्चवर्गश्च तत्त्वतः । अनुरागापरागौ च प्रचारं मण्डलस्य च" मनुटीकायां कुल्लू॰ उक्तं यथा "कापटिकोदास्थित गृहपतिवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत् । तत्र परमर्म्मज्ञः प्रगल्भश्चाल्पः कपटव्यवहारित्वात् कापटिकस्तं दूत्यर्थिनमर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति । प्रव्रज्याकृतपतितवदास्थितः तं लोकेषु विदितदोषं प्रज्ञाशौचयुक्तं दूत्यर्थिनं ज्ञात्वा रहसि राजा पूर्ववत् ब्रूयात् । बहत्पत्तिकमठे स्थापयेत् प्रचरणस्योपत्तिकं भूम्यन्तरञ्च तद्दुर्व्यसनमुपलक्षयेत् स चान्येषामपि प्रव्रजितानां राजचारकर्मकारिणां व्यासाच्छादनादिकं दद्यात् । कर्मकः शौण्डवृत्तिः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनरूपमपि पूर्ववदुक्ता स्वभूमौ कृषिकर्म कारयेत् । वाणिजकः शौण्डवृत्तिः वैदेहिकव्यञ्जनस्तं पूर्ववदुक्ता धनमानाभ्यामात्मीकृत्य वाणिज्यं कारयेत् । सण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः सोऽपि क्वचिदाश्रमे यत्र बहुसण्डजटिलान्तरकपटशिष्यगण वृतो गुप्तराजोपकल्पितवृत्तिः तपस्यां कुर्यात् मासद्विमासान्तरितं प्रकाशं वदरादिवृष्टिमन्त्रीयात् रहसि च राजोपकल्पितं यथेष्टमाहारं कल्पयेत् शिष्याश्चास्यातीतानागतज्ञानादिकं ख्यापयेयुः तेन बहुलोकवेष्टनमासाद्य सर्वेषां विश्वसनीयत्वात् सर्वे कार्यमकार्यं च पृच्छन्ति अन्यस्य च कुक्रियादिकं कथयन्त्येवंरूपं पञ्चवर्गं यथावच्चिन्तयेत् । एवं प्रकल्प्य तेनैव पञ्चवर्गद्वारेण प्रतिराजस्यातीयानात्मात्मादीनाम् अनुरागविरागौ ज्ञात्वा तदनुरूपं चिन्तयेत्" कुल्लू॰ । पञ्चानां वर्गाणां समाहारः ङीप् । नील॰ता॰ उक्ते श्वेतचोरादिपञ्चके स्त्री पञ्चवर्गौ बलानयने च रीतिः नील॰ता॰ द्रष्टव्या यथा

"सूर्यादितुङ्गर्क्षमजोच्चनक्रकन्याकुलीरान्यतुलानि वैश्युः । दिग्भिर्गुणैरष्टयमैः शरैकैर्भूतैर्भसङ्ख्यैर्नवमश्विनौ च" । अथोच्चबलनवांशानाह "तत्षण्मं नीचमनेन हीनोच्चहोऽधिकयेद्रसभाद्विशोध्यः चक्रात् तदंशाङ्कवधा बलम् स्यात् क्रियैवतौचीन्दुभतो नवांशाः" अथ ग्रहे शानाह "मेषेऽङ्गतर्कांशरेषुभागा जीवास्फुजिज्ज्ञारयनैश्चराणाम् । वृषेऽष्टषड्भागगराम्बरांशाः शुक्रज्ञजीवार्किकुजेषु ग्रहाः । युग्मे भङ्गेषुनगाङ्गभागाः सौम्यास्फुजिज्जीवकुजार्किग्रहाः । कर्केऽद्रितर्काङ्गनगाब्धिभागाः कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम् । सिंहेऽङ्गभूताद्रिरसाङ्गभागाः देवेज्यशुक्रार्किबुधाग्रहाः । स्त्रियां नगाग्न्यब्धिनगाब्धिभागाः सौम्येज्यशुक्रोजीवकुजार्किनाथाः । तुले रसाष्टाद्रिनगद्रिभागाः कोणज्ञजीवास्फुजिदारनाथाः । कीटे नगाब्ध्यष्टशराङ्गभागाः भौमास्फुजिज्ज्ञेज्यशनैश्चराणाम् । चापे रवीन्द्वम्बुधिपञ्चवेदा जीवास्फुजिज्ज्ञारयनैश्चराणाम् । मृगे नगाद्रयष्टयुगस्रुतीनां सौम्येज्यशुक्रार्किकुजेशग्रहाः । कुम्भे नगाङ्गाद्रिशरेषुभागा शुक्रज्ञजीवारयनैश्चराणाम् । मीनेऽर्कवेदानलनन्दपक्षाः सितेज्यसौम्यारयनैश्चराणाम् । त्रिंशत्स्वभे विंशतिरुच्चभे स्वे हृद्दे उच्चचन्द्रादशकं तकाणे । सप्तक्षहे (नवांशे) पञ्च लग्नाः प्रदिष्टाविंशोपका वेदलवैः प्रकल्प्याः । स्वस्वाधिकारोक्तबलं सुहृद्भे पादोनमर्द्धं समभेऽरिभेऽङ्घ्रिः एवं समानीय बलं तदैक्ये वेदोद्धृते हीनबलः शरोनः" ।

पञ्चवर्ण न० पञ्च वर्णा अस्य। पञ्चवर्णान्वितततण्डुलचूर्णे "रजांसि पञ्चवर्णानि मण्डलार्थं हि कारयेत्। शालितण्डुलचूर्णेन शुक्लं वा यवसम्भवम्। रक्तं कुसुम्भसिन्दूरगैरिकादिसमुद्भवम्। हरितालोद्भवं पीतं रजनीसम्भवं क्वचित्। कृष्णं दग्धपलाशैस्तु कृष्णैर्द्रव्यैरथापि वा। हरितं बिल्वपत्रोत्थं पीतकृष्णविमिश्रितम्"। हेमा०व्र०। २अकारोकारमकारनादबिन्दुयुक्ते प्रणवे च

पञ्चवल्कल न० ५त०। "न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः। सर्वैरकतसंयुक्तैः पञ्चवल्कलमुच्यते" शब्दच० १उक्ते "न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलशाल्मली। क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम्" इत्युपक्रमे "पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पञ्चकं मतम्। त्वक्पञ्चकं हिमं प्राहि व्रणशोथविसर्पजित्" राजनि० २उक्ते च वृक्षपञ्चकवल्कले।

पञ्चवातीय न० राजसूयाङ्गे फाल्गुनशुक्लप्रतिपदि कर्त्तव्ये पञ्चाग्निसाध्यहोमकर्मभेदे "पञ्चवातीयम् आहवनीयं प्रतिदिशं व्यूह्य मध्ये च स्रुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमन्त्रम्" कात्या०श्रौ० १५।१।२० "होममन्त्राणां लिङ्गेन व्यवस्था (फाल्गुनशुक्ल प्रतिपद्यव) पञ्चवातीय संज्ञकं वक्ष्यमाणकर्म भवति आहवनीयं प्रतिदिशं व्यूह्य खरमध्यस्थं हस्तप्रेरितमेव खरमध्य एव प्राच्यादिदिक्षु स्थापयित्वा मध्ये चावशिष्य पञ्चस्वग्निषु जुहोति" कर्कः "उत्तराः समस्य ये देवा इति प्रतिमन्त्रम्" २१सू० जुहोतीति शेषः समस्य चाग्नीनिति प्रतिदिशं व्यूढमाहवनीयमेकत्र कृत्वा उत्तराः पञ्चाहुतीर्जुहोति" कर्कः "त्रियुक्ताऽश्वरथो दक्षिणा" २२सू० "त्रिभिरश्वैर्युक्तोरथो दक्षिणा" कर्कः। तस्य नामनिरुक्तिः शत०ब्रा०५।२।४ दर्शिता यथा "तस्य प्रदिशाकृतोऽश्वरथो दक्षिणा। "त्रयोऽश्वा द्वौ मध्येऽश्वारथी ते पञ्च प्राणा यो वै प्राणः स वातस्तद्यदेतस्य कर्मण एषा दक्षिणा तस्मात् पञ्चवातीयं नाम"। तस्य व्याधितरोगनिवृत्तिहेतुत्वमपि तत्र दर्शितं यथा "स हैतेनापि भिषजेत्"। "अयं वै प्राणो योऽयं पवते यो वै प्राणः स आयुः सोऽयमेक एवैव पवते सोऽयं पुरुषेऽन्तःप्रविष्टो दशधा विहितो दश वा एता आहुतीर्जुहोति तदस्मिन् दश प्राणान् कृत्स्नमेव सर्वमायुर्दधाति समदिहादि गतासुरिव भवत्या हैवैनेन हरति"।

पञ्चविधप्रकृति स्त्री कर्म०। अमात्यराष्ट्रदुर्गार्थदण्डाख्यास पञ्चसु राज्याङ्गप्रकृतिषु मनुः ७अध्याये १५७श्लोके।

पञ्चबीज न०पञ्च विस्तीर्णं मध्ये बीजमस्य। १तत्पुत्रे (यथा) २कर्कट्यां २दाडिमे च नैघण्टुप्र०।

पञ्चवृत्ति स्त्री पञ्चगुणिता वृत्तिः षा०त०, कर्म०, ब०व० वा। पात०उक्तासु पञ्चसु मनोवृत्तिषु "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" सू०। "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" सू० प्राणनापाननसमाननोदाननव्याननरूपवृत्तिपञ्चकयुक्ते देहस्थे वायौ २प्राणे च।

पञ्चशर पु० पञ्च शरा अस्य। १कन्दर्पे अमरः। तच्छराश्च कालिकापुराणशब्दे २०१२पृ०दर्शिताः। पञ्चगुणिताः शराः षा०त०। कामस्य २शरेषु १२६९ पृ० उपयमशब्ददर्शिते ३रोगादिबाणपञ्चके च।

पञ्चशस्य न० समा० द्वि०। "धान्यसङ्घातिना माषाः यवाः सिद्धार्थकोऽथ वा। पञ्चशस्यमिति प्रोक्तम्" इत्युक्तेषु धान्यादिषु। दुर्गोत्सवपद्धतिः।

पञ्चशाख पु० पञ्च शाखाकारा अङ्गुलयो यत्र। १हस्ते अमरः। २गजे पु०स्त्री स्त्रियां जातित्वात् ङीष्। समा० द्वि०। पञ्चानां शाखानां २समाहारे न०।

पञ्चशारदीय पु० यज्ञभेदे कात्या०श्रौ० २२।४।२ द्रष्टव्यः।

पञ्चशिख पु० मुनिभेदे तस्योत्पत्त्यादिकं वामनपु० ५०अ० उक्तं यथा "धर्मस्याहिंसा भार्या या तस्यां पुत्रा चतुष्टयम्। सम्प्राप्तं मुनिशार्दूल! योगशास्त्रविचारकम्। ऋषभः सनत्कुमारोऽसितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः। सांख्यवेत्तारमपरं कपिलं कोटुमासुरिम्! दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्। ज्ञानयोगं न ते दद्युर्ज्ञायां सोऽपि कनीयसाम्"। भा०श्रा० २१अ० तस्य नामनिरुक्तिरन्यथोत्पत्तिश्चोक्ता यथा "तत्र पञ्चशिखो नाम कापिलेयो महामुनिः। परिधावन् महीं कृत्स्नां जगाम मिथिलामथ। सर्वसम्यासधर्माणां तत्त्वज्ञानविनिश्चये। स पर्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयम्। ऋषीणामाहुरेकं यं कामादवसितं ऋषुं। शाश्वतं सुखमत्यन्तमन्विच्छन् सुदुर्लभम्। यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम्। स मन्ये तेन रूपेण विज्ञापयति हि स्वयम्। आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम्। पञ्चस्रोतसि यः सत्रमासे वर्षसहस्रिकम्। यत्र चासीनमासीनं कापिलं मण्डलं महत्। पञ्चस्रोतसि विख्यातः पञ्चरात्रविशारदः। पञ्चघ्नः पञ्चकृत् पञ्चपुरुषः

पञ्चशिखः स्मृतः। पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत्। दृष्टस्तेन सम्यक्ष्टो भूयश्च तपसाहरिः। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं बुद्धे देवदर्शनः। यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते। आसुरिर्मण्डले तस्मिन् प्रतिभेदे तदव्ययम्। तस्य पञ्चशिखः शिष्यो मनुष्यो वयसा श्रुतः। ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी। तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ। ततः स कापिलेयत्वं लेभे बुद्धिश्च नैष्ठिकीम्। एतत्ते भगवानाह कापिलेयस्य सम्भवम्। तस्य तत्कापिलेयस्य सर्वविज्ञमनुत्तमम्"।

पञ्चशीर्ष पु० पञ्च शीर्षाण्यस्य। सर्पभेदे। [ऽथग्रम्।

पञ्चशुक्ल पु० पञ्चसु शुक्लः। कीटभेदे सुश्रुतः कीटशब्दे

पञ्चशूरण पु० पञ्च शूरणा यत्र। "अत्यम्लकाञ्जीरमाषाकन्दहिङ्गूरणैः। क्लृप्तो भवति योगोऽयं पञ्चशूरणसंज्ञकः" राज० उक्ते मिश्रिते अत्यम्लादौ।

पञ्चशैरीषक न० पञ्चशुष्कितं शैरीषकम् शा०त०। शिरीषद्वयस्य पुष्पमूलफलपत्रवल्कलेषु राजनि०।

पञ्चशैल पु० मेरोर्दक्षिणस्थे पर्वतभेदे "पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः। इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः" मार्कण्डेयपु० ९५ अ०।

पञ्चश्र त्रि० ब० पञ्च वा षट् वा अर्थे ब०स० ड अञ्चा०। पञ्च वा षट् वा परिमाणं येषां तेषु पदार्थेषु।

पञ्चसिद्धान्ती स्त्री सभा० द्वि०। ब्रह्मसूर्यसोमाद्युक्तेषु पञ्चसु ज्योतिषसिद्धान्तेषु।

पञ्चसिद्धौषधिक पु० पञ्च सिद्धौषधयो यत्र कप्। "तैलकन्दं सुपाकन्दक्रोडकन्दवदन्तिकाः। सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकः" राजनि० उक्ते तैलकन्दादिसिद्धौषधिपञ्चकयोगभेदे।

पञ्चसुगन्धिक "कर्पूरकक्कोलकवङ्गपुष्पगुणाकजातीफलपञ्चकेन। समांशमानेन च योजितेन मनोहरं पञ्चसुगन्धिकं स्यात्" इत्युक्तेषु मिश्रितसुगन्धिकर्पूरादिद्रव्येषु राजनि०।

पञ्चसूना स्त्री पञ्च सूनाः प्राणिवधस्थानानि। "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्" मनुनोक्तेषु पञ्चसु कीटवधस्थानेषु

पञ्चस्रोतस् त० पञ्च स्रोतांसि यत्र। तीर्थभेदे भा०शा० २१८ अ० दथग्रम्। २योगभेदे पञ्चशिखशब्दे दृश्यम्।

पञ्चस्वरा स्त्री पञ्च स्वराः प्रतिपाद्यतया यत्र। प्रजापतिदाश दैवप्रतते ज्योतिषग्रन्थभेदे।

पञ्चस्वरोदय पु० ज्योतिषग्रन्थभेदे गरुडपु० मूलं दृश्यम्।

पञ्चहारक न० क्षेमचन्द्रोक्ते हारभेदे।

पञ्चहोत्र पु० वैवस्वतमनोः पुत्रभेदे हरिवं० ७अ०।

पञ्चाकृद् पु० पञ्च कृदा—अत्र। तीर्थभेदे स्कन्दपु०।

पञ्चांश पु० दत्तौ सद्भावचनस्य पुरस्कारार्थत्वस्वीकारेण पञ्चशब्दः पञ्चमार्थे कर्म०। त्रिंशदंशात्मकराशेः पञ्चमेऽंशे तदंशपानयनरीतिः नीलकण्ठताजके उक्ता यथा "ओजर्क्षे पञ्चमांशेषा कुलाकीजिन्नभागेषाः। समभे व्यत्ययाद् ज्ञेयाः"

पञ्चाक्षर त्रि० पञ्च अक्षराणि यत्र। १मन्त्रभेदे २प्रतिष्ठाख्य छन्दोभेदे च। "गुरु पञ्चाक्षरेण" यजु०९।२२ "पञ्चाक्षरेण छन्दसा" मेदृदी०। ३पञ्चसे च पञ्चवर्णशब्दे दृश्यम्।

पञ्चाग्नि पु० संज्ञायात् कर्म०। १अन्वाहार्यपचनगार्हपत्याहवनीयसभ्यावसथ्याग्निकेषु पञ्चस्वग्निषु" "पवनः पावनस्त्रेता यस्य पञ्चाग्नयो गृहे" इति हारीतः तत्र पवनः आवसथ्योऽग्निः पावनः सभ्योऽग्निः" कुल्लू०। ते यस्य ब०। २तदग्निभिर्विहिततत्तत्कार्यकारके च। "कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः" वाग्भ० व्याख्यायां सभ्यावसथ्यौ त्रेता अन्वय यस्य इति स पञ्चाग्निः पञ्चाग्निविद्याध्यायी वा" मिता० छान्दो०उ० उक्तेषु च स्वर्गपर्जन्यपृथिवीपुरुषयोषात्मकेषु अग्निवदाख्याधारेषु ३पदार्थेषु "पञ्चाग्नयो ये च त्रिणाचिकेताः" श्रुतिः चतुर्दशु च जङ्घे च स्थितेषु पञ्चसु ४तैजसेषु।

पञ्चाङ्ग पुंस्त्री० पञ्चाङ्गानि यस्य। १कमठे शब्दमाला। पञ्चभद्राख्ये २अश्वभेदे शब्दमा० "बाहुभ्यां चैव जानुभ्यां शिरसा वचसा दृशा"। पञ्चाङ्गोऽयं प्रणामः स्यात्" इति तन्त्रसारोक्ते ३प्रणामभेदे "त्वक्पलकुसुमं मूलं फलमेतस्य याचितः। एकत्र मिलितं चैतत् पञ्चाङ्गमिति संज्ञितम्" राजनि० उक्तेषु ४एकदलतालगादिषु पञ्चसु "जपहोमौ तर्पणाभिषेकौ विप्रभोजनम्। पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते" तन्त्रसारोक्ते ५महापुरश्चरणे न०। "तिथिर्वारश्च नक्षत्रं योगः करणमेव च। पञ्चाङ्गमेतदुद्दिष्टम्" ज्यो०उक्तेषु ६तिथ्यादिषु। "आगमो दीर्घकालश्च निष्कृष्टोऽन्वरवोज्झितः। प्रत्यर्थिसन्निधानश्च पञ्चाङ्गो भोग इष्यते" काव्या० उक्ते आगमादिपञ्चकयुक्ते ७भोगे च।

पञ्चाङ्गगुप्त पुंस्त्री पञ्चाङ्गानि गुप्तान्यस्य। तन्त्रमे त्रिका०। करपादजङ्घशिरोरूपावयवपञ्चकस्य स्त्रेणया गोपनात् तस्य तदात्मनः। स्त्रियां जातित्वात् ङीष्।

पञ्चाङ्गशुद्धि स्त्री पञ्चाङ्गस्य शुद्धिः। तिथिवारादीनां शुद्धौ दोषराहित्ये विहिततिथ्यादौ "पञ्चाङ्गशुद्धिदिवसे चोदये शशितारयोः। शुद्धशुक्लोदये शुद्धे लग्ने द्वादशशोधिते। चन्द्रतारानुकूल्ये च शस्यते सर्वकर्मसु"।

पञ्चाङ्गी स्त्री करिण्यां जटिलस्यमहाभेदि हेमच०।

पञ्चाङ्गुल पु० पञ्च अङ्गुलय इव पत्रेषु यस्य दारुणि अच्छमा०। एरण्डवृक्षे अमरः। २पञ्चाङ्गुलाकारयुक्ते दर्भभेदे च अदारुणि तु न अच्। पञ्चाङ्गुलि इत्येव।

पञ्चाज न० पञ्चसस्यवत् विग्रहः। अजाबाः पूरीषादिपञ्चके तद्वदेव तद्दृष्टपाकविधिः सुश्रुतोक्तः पञ्चसस्यशब्दे दर्शितः।

पञ्चातप त्रि० पञ्चभिरग्न्यादिभिरातप्यते आ+तप–अच् कृत०। अग्निचतुष्टयसूर्यरूपैः पञ्चभिस्तप्यति। तत्स्थापनप्रकारस्तु "वह्नियेदीरभिः शुष्कैश्चतुर्दिक्षु चतुष्कृतम्। वह्निर्मध्यस्थापनं ग्रीष्मे तीव्रांशुकृत पञ्चमः। कृत्वान्तरे चतुष्कोणं कृत्वा वैश्वानरेणिना। तन्मध्यस्था सूर्यबिम्बं शीतली वह्नुनांशुका" कालिकापु० ४२अ०। "ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः" स्मृतिः।

पञ्चात्मक त्रि० पञ्च आकाशादय आत्मा स्वरूपं वा यस्य। आकाशादिपञ्चभूतस्वरूपे "पञ्चात्मकं देहमिदं" मार्कण्डेयपु० २५अ०। पञ्चीकृतभूतजातत्वाद्देहस्य तथात्वं पाञ्चभौतिकशब्दे दृश्यम्।

पञ्चानन पुंस्त्री० पञ्च विस्तीर्णमाननमस्य। १सिंहे स्त्रियां ङीष्। २सिंहराशौ पु० पञ्च आननान्यस्य। ३पञ्चमुखे शिवे च। "विभाव्य मुखपञ्चकं हि शिवस्य वरवर्णिनि!। सद्योजातं वामदेवमघोरञ्च ततःपरम्। तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम्। सद्योजातं च वै शुक्लं शुद्धस्फटिकसन्निभम्। पीतवर्णं तथा सौम्यं वामदेवं मनोहरम्। कृष्णवर्णमघोरं च भस्मं भीमविवर्द्धनम्। रक्तं तत्पुरुषं देवि! दिव्यमूर्त्तिमनोहरम्। श्यामलं च तथेशानं सर्वदेवं शिवात्मकम्। चिन्तयेत् पश्चिमे चाद्यं द्वितीयं च तथोत्तरे। अघोरं दक्षिणे देवं पूर्वे तत्पुरुषं तथा। ईशानं मध्यतो ज्ञेयं चिन्तयेत् भक्तितत्परः" निर्वाणतन्त्रे ६पटले। ४रुद्राक्षभेदे।

पञ्चाप्सरस् यातकर्षिसनेत्रपञ्चाभङ्गार्थमिन्द्रप्रेषित पञ्चाप्सरोभिस्तपञ्चाभङ्गे जाते यत्र सरोवरे तासां सर्वदाऽस्थितिरासीत् तादृशे सरोभेदे रघु० ११सर्गे दृश्यम्।

पञ्चाब्जमण्डलम् न० सर्वतोभद्रमण्डलान्तर्गते पञ्चपद्मात्मके मण्डलभेदे "पञ्चाब्जमण्डलं प्रोक्तमेतत् कलिक वर्जितम्" राघवभट्टोद्धृतवचनम्।

पञ्चामरा स्त्री संज्ञायां कर्म०। अमरसतापञ्चके "एका तु अमरा दूर्वा तस्या अन्यां अमामवेत्। अन्या तु विजया देवी निर्द्विरूपा सरस्वती। अन्या तु नित्यपत्राख्या शिवसन्तोषकारिणी। अन्या तु योगसिद्ध्यर्थं निर्गुण्डी चामरा जता। अन्यात्तु कालतत्त्वज्ञी श्रीविष्णोः प्रियतोषिणी। एताः पञ्चामरा ज्ञेया योगसाधनकर्मसु" इति रुद्रयामलोत्तरखण्डे २६पटले।

पञ्चामृत न० समा०द्वि०। "दुग्धं च शर्करा चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तं नित्युक्तेषु पञ्चसु दुग्धादिषु।

पञ्चामृतयोग पु० "गुडूची गोक्षुरश्चैव मुशली सुखिलका तथा। अतावरीति पञ्चानां योगः पञ्चामृताभिधः" राजनि० ७क्लेषु युक्तगुडूच्यादिषु।

पञ्चाम्नाय पु० संज्ञायां कर्म०। शिवेन पञ्चभिर्वक्त्रैरुक्तेषु आम्नायतन्त्रशास्त्रेषु यथोक्तं "पूर्वाम्नायः पूर्वमुखः प्रथमः पश्चिमामुखः। दक्षिणो दक्षिणमुखदुत्तरश्चोत्तरःपरः। निरुत्तरं तथा चोर्द्ध्वं सिद्धान्तागमरूपिणम्। ऊर्द्ध्वाम्नाय परिज्ञानं नाम्नस्य तपसः फलम्" इति "पूर्वाम्नायः मन्त्ररूपो दक्षिणः कर्मरूपकः। पश्चिमः प्रश्नरूपः स्यादुत्तरं चोत्तरस्तथा। ऊर्द्ध्वाम्नायस्तत्त्वबोधः केवलानुभवात्मकः" इति भैरवतन्त्रम् "शिवपञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः" इत्यादि तन्त्रार्थवतन्त्रम्।

पञ्चाम्ल न० "अम्लत्यमेकं पिचुमर्दमेकं व्यपोधमेकं दशपुष्पजातीः। द्वे द्वे तथा दाडिमसातुलुङ्गे पञ्चाम्लवाणी नरकं न याति" इति वराहपु० १७क्ले "अम्लत्य एकः पिचुमर्द एको द्वौ चम्पकौ त्रीणि च केसराणि। सम्पाद्य ताला नव नारिकेलाः। पञ्चाम्लवाणी नरकं न याति" तिथि०त०२७क्ले च अम्लत्यादौ। वस्तुतः पञ्चानामाम्लानां वापीत्युत्तरपदद्विगुः तात्पर्यवशात् अम्लत्यादीनां वापीत्यध्याहारेणान्वयः इति बोध्यम्।

पञ्चाम्ल न० अम्लपञ्चके "कोलदाडिमडल्लाम्लैरम्लवेतसमंयुतैः। चतुरम्लञ्च पञ्चाम्लं मातुलाङ्गसमन्वितम्" शब्दच० उक्ते अम्लपञ्चके

पञ्चायतनी स्त्री पञ्चानामुपास्यदेवरूपाणामायतनानां समाहारः। गणेशादिपञ्चदेवरूपोपास्यानां समाहारे। पञ्चदेवोपासकस्य यस्मिन् दिने यस्य पूजनं तस्य तद्दिने मध्ये

स्थापनमन्त्रेणं च दिग्भेदेषु स्थापनमुक्तं तन्त्रसा० यामले "भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत्। आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकम्। वायव्यां तपनं चैव पूजाक्रमसदाहृतः। यदा तु मध्ये गोविन्दमैशान्यां शङ्करं यजेत्। आग्नेय्यां गणनाथञ्च नैर्ऋत्यां तपनन्तथा। वायव्यामम्बिकां चैव भोगमोक्षैकभूमिकाम्। शङ्करं च यदा मध्ये ऐशान्यामच्युतं यजेत्। आग्नेय्यां तपनं चैव नैर्ऋत्यां गणनायकम्। वायव्यां पार्वतीं चैव स्वर्गमोक्षप्रदायिनीम्। आदित्यं च यदा मध्ये ऐशान्यां शङ्करं यजेत्। आग्नेय्यां गणनाथं च नैर्ऋत्यां केशवं यजेत्। वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम्। गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत्। आग्नेय्यामीश्वरं चैव नैर्ऋत्यां तपनन्तथा। वायव्यां पार्वतीं चैव पूजयेन्मोक्षदायिनीम्। स्वस्थान वर्जिता देवा दुःखशोकभयप्रदाः"।

पञ्चारी स्त्री पञ्च पञ्च संख्यामञ्चति अञ्च-अण् उप०स०। गौरा० ङीष्। शारीफलके (पाशारङ्क) शब्दमाला। तस्य पञ्चपञ्चकोष्ठात्मकत्वात्तथात्वम्।

पञ्चार्चिस् पु० पञ्च अर्चींषि यस्य। बुधग्रहे त्रिका०।

पञ्चाल पु० ब०व०। पचि-कालन्। १देशभेदे उत्पादिकोषः। विष्णुपु० ४अ० १९अध्याये अस्यान्या निरुक्तिर्दर्शिता यथा "हर्य्यश्वानृसृञ्जयकृञ्जयदृढेषुयवीनरकाम्पिल्ल संज्ञाः। पञ्चानामेतेषां विषयाणां रक्षणायाखमेते मत्पुत्रा इति पिताभिहिता इति पञ्चालाः"। पृषो०दीर्घत्वे पाञ्चालोऽप्यत्र उच्च०। "गच्छताद्यैव पाञ्चालान् द्रुपदस्य निवेशनं" भा०आ० १८४०। सोऽभिजनोऽस्य तस्य राजा वा अण्। पाञ्चाल तद्देशवासिनि तस्य मे च। बहुषु अणो लुक्। पञ्चाला इत्येव। पञ्चालन्द्रुपस्य भारते द्रुपद इति ख्यातः। तस्यापत्यं स्त्री पाञ्चाली द्रौपद्याम् २मत्स्यदेवे भा०प० २८६अ०। ३वाभ्रव्यगोत्रे परमेश्वरात् क्रमप्राप्तरि ४ऋषिभेदे भा०आ०३४६अ०।

पञ्चालिका स्त्री पञ्चाय प्रपञ्चाय अलति अल-ण्वुल् आपि अतइत्वम्। वस्त्रादिलतपुत्तलिकायाम् अमरः।

पञ्चाली स्त्री पञ्चाय अलति अच् गौरा० ङीष्। १वस्त्रादिलतपुत्तलिकायाम् (पाँचाली) ख्याते २गीतिभेदे च मेदि०। पञ्चारी+रस्य लः। ३शारिफलकायाम् (पाशारङ्क) त्रिका०।

पञ्चायट उरस्कटे यज्ञोपवीते हारा०।

पञ्चावत्तिन् त्रि० पञ्चधा अवत्तं खण्डनमस्यत्र। पञ्चधा खण्डिते चर्वादौ आप०श्रौ० १।१० १६

पञ्चावयव पु० पञ्च प्रतिज्ञादयोऽवयवाः यस्य। प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकावयवपञ्चकयुक्ते न्यायवाक्ये

पञ्चावस्थ पु० पञ्चसु भूतेषु स्वकारणेषु अवस्था यस्य। शवे प्रेतदेहे त्रिका० तस्य देहारम्भकभूतानां स्वस्वकारणे लयोत्पत्तात् तथात्वम्।

पञ्चावी स्त्री पञ्च अवयः पञ्चमासात्मककाला वयोऽस्याः ङीप्। खार्द्धपर्वद्वयपर्यन्तायां स्त्रीगव्यां यजु०१८ २६।

पञ्चाशत् स्त्री पञ्च दशतः परिमाणमस्याः नि०। (पञ्चाश) १संख्याभेदे २तत्सङ्ख्यान्विते च ततः पूरणे डट्। पञ्चाश तत्सङ्ख्यापूरणे त्रि०स्त्रियां ङीप्। तमप् पञ्चाशत्तम तदर्थे। षडधिकं यत्र शतादौ ड। पञ्चाश पञ्चाशदधिके शते सहस्रे च डिनि। पञ्चाशिन् तत्परिमाणयुक्ते। स्त्रियां ङीप्। स्वार्थे क टाप्। पञ्चाशिका चौरपञ्चाशिका षट्पञ्चाशिका इत्यादि। [१सङ्ख्याभेदे २तत्संख्यके च।

पञ्चाशीति स्त्री पञ्चाधिका अशीतिः। शा० त०। (पँचासी)

पञ्चास्य पुंस्त्री० पञ्च विस्तीर्णमास्यं यस्य। १सिंहे स्त्रियां जातित्वेऽपि योपधत्वात् टाप्। २सिंहराशौ च पञ्च आस्याण्यस्य। ३ध्यानने शिवे ४पञ्चवक्त्रे रुद्राक्षे च।

पञ्चिन् त्रि० पञ्च परिमाणमस्य डिनि। पञ्च परिमाणयुक्ते ऐत०ब्रा० २।२१८

पञ्चीकरण न० अपञ्च पञ्चात्मकानि क्रियन्ते अनेन पञ्चन्+चि-कृ-भावे ल्युट्। अपञ्चात्मकस्य पञ्चात्मकतासम्पादने व्यापारभेदे। पञ्चीकरणन्तु आकाशादिषु पञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् तदुक्तं "द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते" वेदान्तसारः।

पञ्चीकृत त्रि० अपञ्चीकृत-कर्मणि क्त। पञ्चात्मकताकरणेन उत्पादिते "अपञ्चीकृतभूतोत्थं सूक्ष्मं भोगसाधनम्" वेदान्तपरिभाषा।

पञ्चेधीय पु० पञ्चभिरिध्मैः निर्वृत्तः छ। पञ्चेध्मसाध्ये होमभेदे तैत्ति०६।३।७ "रात्रौ निशायां पञ्चेध्मीयेन च" आपस्तम्बः।

पञ्चेन्द्र त्रि० पञ्च इन्द्राणां देवता यस्य अण् तस्य "दिगो-

र्दुगनपत्ये" पा० लुकि "लुक् तद्धिततलुकि" पा० ५।४।२ समासान्त स्त्रीप्रत्ययस्य लुक् । इन्द्राणीपञ्चकदेवतानां हरिहरादौ ।

पञ्चेन्द्रिय न० संज्ञात्वात् कर्म० । इन्द्रियपञ्चके इन्द्रियशब्दे दृश्यम् । तच्च ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं च ।

पञ्चेषु पु० संज्ञात्वात् कर्म० । कामस्य १बाणपञ्चके कालिकापु० २०।१२दृश्यम् । उपमन्यशब्दे १२६९पृ० उक्ते विवाहादौ वर्ज्ये २चौरादिपञ्चके । पञ्च इषवोऽस्य । ३कामदेवे हला० ।

पञ्चोपचार पु० संज्ञात्वात् कर्म० । गन्धादिनैवेद्यान्तेषु पञ्चसु १पूजाङ्गेषु उपचारशब्दे १२०४पृ०दृश्यम् । पञ्च उपचारा यत्र । २पञ्चोपचाराङ्गे पूजनादौ त्रि० ।

पञ्चोपविष न० संज्ञात्वात् कर्म० । "स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिका । एतान्युपविषाण्याहुः पञ्च पाण्डित्यशालिनः" राजनि० उक्तेषु पञ्चसु स्नुह्यादिषु उपविषेषु ।

पञ्चौषन् पु० संज्ञात्वात् कर्म० । "भौमाग्न्यम्बुवायव्याः पञ्चौषाणः सनाभसाः । तत्तदाहारजः स्वान् स्वान् पार्थिवादीन् पचन्त्यमी" सारकौ० उक्ते आहारपाचके देहस्थाग्निपञ्चके ।

पञ्चौदन पु० पञ्चधा विभक्तः ओदनः । पञ्चाङ्गुलिभिः पञ्चधा विभक्ते ओदने । "पञ्चौदनं पञ्चभिरङ्गुलिभिर्दीर्घैर पञ्चधैतमेनम्" अथ० ७।१४।७ तस्य विनियोगश्च तदुक्तस्तत्र मन्त्रेषु द्रष्टव्यः ।

प(पि)ञ्जर पु०न०पञ्ज (पिञ्ज)वा अरन् । १शरीरास्थिदण्डे बहाले २विहङ्गमादिबन्धनस्थाने न०अमरः । ३कलियुगे ४भवां नीराजनाविधौ च सारकौमुदी । ततः चतुरर्थ्यां सङ्घाया० ण्य । पाञ्जर्य तस्मिन्निकटदेशादौ त्रि० ।

पञ्जराखेट पु० पञ्जरमिवाखेटः । मतृ० *मरणयन्त्रभेदे (पोलो) त्रिका० ।

पञ्जल पु० पञ्ज–अलच् । कोलकन्दे राजनि० ।

पञ्जि(ञ्जी) स्त्री पञ्ज–इन् वा ङीप् । १स्वल्पबाधनालिकायां (पाँइज) ।

पञ्जिका स्त्री पंञ्जि+स्वार्थे क । पाणिनीयसूत्रवृत्तिभेदे तिथिवारादिपञ्चाङ्गबोधिकायां २पत्रिकायाञ्च शब्दमाला (पाँजि) "वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् । तिथिर्भवति सङ्ग्रामा योगः सागरसङ्गमः । करणं सर्वतोयोनि श्रुता चेत् दिनपञ्जिका" ज्योति० । तत्सूचकत्वात् तस्यास्तथात्वम् "टीका निरन्तरव्याख्या पञ्जिका पदमञ्जिका" हेमच० उक्तलक्षणे ३ख्यानभेदे च ४व्ययव्ययसूचनार्थपत्रे च ५अपकन्यायां त्रिका० ।

पञ्जिकारक त्रि०पञ्जिनायव्ययसूचकपत्रं करोति ञ–ण्वुल् । कायस्थे जटाधरः ञ–ट । पञ्जीकरोऽप्यत्र त्रिका० ।

पट गतौ भ्वा०पर०सक०सेट् । पटति । अपाटीत् अपटीत् । पपाट पेटतुः । उदु+णिच् । उन्मूलने उत्पाटयति ।

पट दीप्तौ चु०उभ०अक०सेट् । पाटयति ते अपीपटत् त । अव–छेदने सक० । अवपाटयति छिनत्तीत्यर्थः ।

पट वेष्टने अद० चु०उभ०सक०सेट् । पटयति ते अपपटत् त

पट पु०पट वेष्टने करणे घञर्थे क । १वस्त्रे अमरः स्त्रीत्वमपि अपटीस्तेपेशेत्युदाहरणदर्शनात् । २चित्रपटे मेदि० चित्रलेखनपटस्वरूपादि देवीपु०उक्तं यथा "पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः । पन्थिकेयविहीने तु अजीर्णे समतन्तुके । अस्फुटिते चाच्छिद्रे व्यक्तेनैव समालिखेत् । योगिनीरूपिणी कार्या जयादीभिः परिवारिता । दृष्टेन च भवेद्दोषाधिते व्याधितो भवेत् । कुरूपेण कुरूपस्तु सूक्ष्मेण सूक्ष्मतामियात् । लेखकस्य तु यद्रूपं चित्रे भवति तादृशम् ।

पटस्यांगभेदच्छेदनादिषु फलं तद्वारणनक्षत्रादिफलं च इ०सं० ७१अ० उक्तं यथा

"वस्त्रस्य कोणेषु वसन्ति देवा नराश्च पार्श्वान्वदशान्तमध्ये । शेषास्त्रयस्त्रास निशाचरांशास्तथैव यथासनपाटकाश्च । लिप्ते मसीगोमयकर्दमाद्यैश्छिन्ने प्रदग्धे स्फुटिते च विद्यात् । पुष्टं नवेऽप्यालपतरं च भुक्ते पापं शुभं वाऽधिकसंसरीये । रूपाक्षसाग्नेयथ याति मृत्युः पुष्पस्य तेजश्च मनुष्यभागे । भागेऽमरणामथ भोगदृष्टिः प्राल्लेषु सर्वत्र वटन्यलिष्टम् । कङ्कगोलूकपोतकाकक्रव्यादगोमायुखरोष्ट्रसर्पैः । छेदाकृतिर्दैवतभागगापि पुंसां भयं मृत्युसमं करोति । कलध्वजस्त्रिकवर्द्धमानश्रीवत्सकुम्भाम्बुजतोरणाद्यैः । छेदाकृतिर्नैर्ऋतभागगापि पुंसां विधत्ते नचिरेण लक्ष्मीम् । प्रभूतवस्त्रदाऽश्विनी भरण्यथापहारिणी । प्रदह्यतेऽग्निदैवते२ प्रजेश्वरे४ऽर्थसिद्धयः । स्वर्गे तु मूषकाद्भयं व्यस्तमेव शाङ्करे६ । पुनर्वसौ शुभागमस्तदग्रभेद धनैर्युतिः । भुजङ्गभेद विलुप्यते मघासु मृत्युमादिशेत् । भगाह्वये११ नृपाद्भयं धनागमाय चोत्तरा१२ । करेण१३ कर्मसिद्धयः शुभागमस्तु चित्रया । शुभं च भोज्यमाजिले१५ द्विदैवते१६ जनप्रियः । सुहृद्वाणिज्य मित्रभे१७ पुरन्दरे१८ऽप्यरक्षयः । जलप्रुतिश्च नैर्ऋते१९ रुजो जलाधिदैवते२० । मिष्टनक्षत्रभय विश्वदैवते२१ वैष्णवे२२ भवति नेत्ररोगिता । धान्यरक्षिणि वारुणे२३ विदु-

वाँरथे२४ विवक्षतं मङ्गलयम् । भाद्रपदाद्य भयं वस्त्रि-
कोत्थं तत्परम२६ च भवेद्सुतवस्त्रिः । रत्नयुतिं कथयन्ति
च पौष्णे२७ योऽभिनवाम्बरमिच्छति भोक्तुम् । वि-
प्रमतादथ भूपतिदत्तं यच्च विवाहविधावपि वस्त्रम् । तेषु
गुणैः रहितेष्वपि भोक्तुं नूतनमम्बरमिष्टफलं स्यात् ।
भोक्तुं नवाम्बरं यस्तस्यैऽपि गुणवर्जिते । विवाहे
राजसम्माने ब्राह्मणानां च वस्त्रते"। २पियालवृक्षे पु०
मेदि० ४पुरस्कृते त्रि० विश्वः । ५छदिषि (चाल) भरतः

पट् न० पटवेष्टने–क्विप् । पादबन्धने घण्टीशब्दे दृश्यम् ।

पटक न० पट–वा० वुन् । शिविरे शब्दमाला ।

पटकार त्रि० पटं करोति कृ–अच् । तन्तुवाये

पटकुटी स्त्री पटनिर्मिता कुटी शा०त०। पटमये गृहे (तँबु)
हेमच० । पटगृहादयोऽप्यत्र

पटच्चर न०पटवत् आवेष्टते पट–अत्ति, भूतपूर्वं पटत् पटत्+
चरट्। १जीर्णवस्त्रे । पटदिव वेष्टित इव चरति चर–
अच् । २चौरे पु० अमरः ।

पटत् अव्य०। १अव्यक्तानुकरणशब्दभेदे ततः डाचि टिलोपे द्विते
पटपटाकरोति । इति शब्दवत्तत्वे तु न डाच् पटदिति
करोतीत्येव । २पटे पटत्वरशब्दे दृश्यम् ।

पटत्क पु० पटदिव वेष्टित इव कायति कै–क । चौरे तस्य
कन्या त० नपुंसकता चिरुया० अस्य आद्युदात्तता ।

पटमण्डप पु० पटनिर्मितो मण्डपः (तँबु) ख्याते वस्त्रगृहे

पटमय न० पट+प्राचुर्ये मयट् । १प्रचुरपटनिर्मिते गृहे
(तावुँ) २शाटयां त्रिका० ।

पटर त्रि० पट–वा० अरन् पटं राति रा–क वा । १गति
शीले २वस्त्रदायके च ततः गौरा० स्त्रियां ङीष् ।

पटरक पु० पटर+संज्ञायां कन् । शुन्द्रवृक्षे राजनि०

पटल न०पट–वेष्टने कलच् । १छदिषि (चाल) अमरः २नेत्र-
रोगभेदे च ३पिटके ४परिच्छदे ५तिलके ६समूहे च
मेदि० । ७हरेरावरके (चलेरपाता) । नेत्ररोगभेदश्च
अक्षिपटलशब्दे ४२ पृ० उक्तः "तेजो जलाश्रितं बाह्यं
तेजस्वत् पिशिताश्रितम् । मेदस्तृतीयं पटलमाश्रितं
त्वस्थि चापरम् । पञ्चमांशयुतं दृष्टेस्तेषां बाह्यस्त्वमि-
ष्यते" । एतन्मांशभेदे च । छदिषि अस्य स्त्रीत्वमपि
गौरा० ङीष् । हेमच० दृष्टे (हन्ते) च शब्दरत्ना० ।

पटलप्रान्त पु० ६त० । गृहच्छदिषोऽन्तभागे (काँचि) इति
प्रसिद्धे नीडे अमरः ।

पटवाप पु० पट उप्यतेऽत्र वप–आधारे घञ् । वस्त्रमयगृहे
त्रिका० ।

पटवास पु० पटनिर्मितः वासः । १वस्त्रमयगृहे (तँबु) २शा-
टयाञ्च शब्दरत्ना० । पटं वासयति सुरभीकरोति वासि–
अच् उप०स० । ३वस्त्रसुरभीकारके द्रव्यभेदे । तद्विधानं
द०सं० १२०अ० यथा "त्वगुशीरपत्रभागैः कृष्णैलार्धेन
संयुतैश्चूर्णैः । पटवासः प्रवरोऽयं मृगकर्पूरप्रबन्धेन"।
स्वार्थे क वासि–क्वुच् वा । पटवासकोऽप्यत्र अमरः ।

पटवेश्मन् न० पटनिर्मितं वेश्म । पटमण्डपे (तँबु)

पटह पु०पु० अर्द्धर्चा० । पटेन हन्यते हन–ड, पट इत्येवं
शब्दं जहाति वा हा–वा ड । १डक्कायाद्यो अमरः
२समारम्भे पु० पट–वा० अह । ३हिंसने शब्दरत्ना०

पटाक पुंस्त्री० पट–आक । १स्वने चलज्जवद० स्त्रियां
जातित्वात् ङीष् । २पताकायां स्त्री शब्दर० । [त्रिका०।

पटालुका स्त्री पट इवायति अव–वा० उक । जलौकायां

पटि(टी) स्त्री पट–इन् वा ङीप् । १पटभेदे २कुञ्चिकाख्ये
च ३शाखुली मेदि० स्वार्थे क । प्रटिका तत्रार्थे ववमि-
कायां (पर्दा) त्रिका० । [दृश्यते ।

पटिमन् पु० पटोर्भावः पृथ्वा० इमनिच् ष्टिलोपः । पटुत्वे

पटिष्ठ त्रि० अतिशयेन पटुः इष्ठन् । अतिशयेन पटौ ईयसुन्
पटीयस् तत्रार्थे त्रि० स्त्रियां ङीप् ।

पटीर न० पट–ईरन् । १स्थाणुयाम् २मूलके ३केदारे मेदि०
४वंशसारे ५खदिरे ७उदरे ८कन्दर्पे ९चन्दने च "परि-
पीतपटीररसैरलसः" सा०द०टी० १००अ० ११रमणीये च
त्रि० शब्दरत्ना० ।

पटु न० पट–उन् । १छत्रायां २वचने च मेदि० ३पांशुलवणे
रत्नमा० । ४पटोले पु० अमरः ५पटोलपत्रे न० विश्वः ।
६काश्मीरजतायां ७कारवेल्ले ८चोरके पु० राजनि० ।
९दक्षे १०नीरोगे ११चतुरे त्रि०मेदि० । १२तीक्ष्णे १३स्फुटे
त्रि० हेमच० १४निपुणे त्रि० जटा० । १५धूर्ते त्रिका० ।
गुणवचनत्वात् स्त्रियां ङीप् । ततः भावे अण् पाटव
न० त्व पटुत्व तल् पटुता स्त्री दक्षतायाम् ।

पटुक पु० पटु–संज्ञायां कन् । पटोले शब्दरत्ना० ।

पटुकल्प त्रि० ईषदूनः पटुः पटु+कल्पप् । ईषदूने पटौ

पटुजातीय त्रि० पटुप्रकारः पटु+प्रकारे जातीयर् ।
पटुप्रकारे ।

पटुतृणक न० पटु इवायं तदिव तृणमस्य कप् । लवणाकृ-
तृणयुक्ते तृणद्रुमभेदे राजनि० ।

पटुपत्रिका स्त्री पटु पत्रमस्याः कप् अतइत्वम् । क्षुद्र-
चञ्चुचुपे राजनि० ।

पटुपर्णी स्त्री पटूनि पर्णान्यस्याः जातित्वात् ङीष् । स्वर्ण-

क्षीरिणीवृक्षे अमरः कप् कापि अतइत्वम्। पटुपर्णिकाख्ये क्षीरिणीवृक्षे [भावप्रे राजनि०।

पटुरूप त्रि० प्रशस्तः पटुः पटु+प्राशस्त्ये रूपप्। अति-

पटुश पु० राजसभेदे भा०व० २८४अ०।

पटुस पु० राजभेदे हरिवं० ११७अ०।

पटोटज न० पट इव उटात् मूलात् जायते जन-ड। कलापे चन्द्रला० तस्य मूलतएव वस्त्रतुल्यत्वात्तथात्वम्।

पटोल पु० पट-ओलच्। खनामख्याते १लतामेदे २वस्त्रभेदे न० मेदि०। तल्लतायाः मूलादिगुणाः "पटोलस्य भवेन्मूलं विरेचनकरं सुखात्। नाडं श्लेष्महरं, पत्रं पित्तहारि फलं पुनः। दोषत्रयहरं प्रोक्तं तद्वल्लिका पटोलिका भावप्र०उक्ताः। "पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु। स्निग्धं हृद्यं तथोष्णञ्च ज्वरकासक्लमिप्रणुत्। पटोलं कफपित्तास्रग्ज्वरकुष्ठव्रणापहम्। विषर्पणवनव्याधिमिदोषगरनाशनम्। पटोलफलकश्चेति द्विविधं गुणान्तरा बुधैः" राजवल्लभः।

पटोलक पु० पटोलमिव कायति कै-क। शुक्लो चन्द्रमाला तस्याः पटोलफलाकारत्वात् तथात्वम्।

पटोलादि पु० चक्रदत्तोक्ते कषायभेदे "पटोलं चन्दनं मूर्वा तिक्ता पाठामृतागणः। पित्तश्लेष्मारुचिच्छर्दि ज्वरकण्डूविषापहः"।

पटोलाद्यघृत पु० चक्रदत्तोक्ते घृतभेदे यथा "पटोलं कटुकां दार्वीं निम्बं वासां फलत्रिकम्। दुरालभां पर्पटकं त्रायन्तीञ्च पलोन्मिताम्। प्रस्थमामलकानाञ्च क्वाथयेल्लवणेऽम्भसि। पादशेषे रसे तस्मिन् घृतप्रस्थं विपाचयेत्। कल्कैर्भूनिम्बकुटजसुखयष्ट्याह्वचन्दनैः। सपिप्पलीकैस्तत्सिद्धं चक्षुषोः शुक्लयोर्हितम्। प्राणकर्णाक्षिवर्त्मत्वग्रुक्सरोगव्रणापहम्। कामलाज्वरवीसर्पगण्डमालाहरं परम्"।

पटोली स्त्री अपक्वः पटोलः ङीष् (झिङ्गा) ख्यातायां लतायाम् स्वार्थे क। तत्रैवार्थे मेदि० पटोलशब्दे तद्गुणादि दृश्यम्।

पट्ट न० पट-क्त नेट् ट वा तस्य नेत्वम्। १नगरे २वस्त्रभेदे ३भूम्यादिकरग्रहणलेखपत्रे (पाट्टा) ४पीठे ५फलके (ढाल) ६राजसिंहासने ७उत्तरीयवस्त्रे ८कौषेये (रेशम) ९पेषणपाषाणे पु० मेदि० १०ब्रणादीनां प्रतिकारार्थबन्धनवस्त्रे (पटी) स्वार्थे क। पट्टक तत्रार्थे सिंहासनरूपपट्टलक्षणं ह०सं० १९अ० उक्तं यथा "विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः। तत्सङ्क्षेपः क्रियते मयात्र सकलार्थसम्पन्नः। पट्टः शुभदो राज्ञां मध्येऽष्टाङ्गुलानि विस्तीर्णः। सप्त नरेन्द्रमहिष्याः षड् युवराजस्य निर्दिष्टः। चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये। द्वे च प्रसादपट्टः पञ्चैते कीर्त्तिताः पट्टाः। सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः। सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो हेतवः। पञ्चत्रिको भूमिपतेस्त्रिकिको युवराजपार्थिवमहिष्योः। एकत्रिकः सैन्यपतेः प्रसादपट्टो विना त्रिकया। त्रिकमात्रं यदि पत्रं सुखेन विस्तारमेति पट्टस्य। इह्विजयौ भूमिपतेस्तथा प्रजानां च सुखसम्पत्। जीवितराज्यविनाशं करोति मध्ये व्रणः सुतत्यक्तः। मध्ये स्फुटितस्त्याज्यो भिन्नकरः पार्श्वयोः स्फुटितः। अशुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेद्राज्ञः। शस्त्रनिमित्तः पट्टो नृपराष्ट्रविघातदो भवति"। अस्य पुंस्त्वमपि

पट्टज न०पट्टात् जायते जन-ड। (रेशमी)कौषेयवस्त्रे जटा०

पट्टदेवी स्त्री पट्टे सिंहासने स्थिता तद्दर्हा वा देवी। (पाटराणी) सिंहासनयोग्यायां कृताभिषेकायां राजपत्न्यां राजनि० पट्टराज्ञीत्यपत्र। [नेट्। प्रधाननगरे।

पट्ट(त्त)न न० पट(ट्ट)न्ति जना यत्र पट-पत, वा तनन्

पट्टरङ्ग न० पट्टं रज्यतेऽनेन रनृज-करणे घञ्। (वकम्) इति ख्याते पदार्थे ख्युट्। पट्टरञ्जनमप्यत्र राजनि०।

पट्टशाक पु० कर्म०। (नालिता) १शाकभेदे (पाटशाक) इति ख्याते २शाकभेदे च "पट्टशाकस्तु नाडीको नाडीशाकश्च सः स्मृतः। नाडीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः" भावप्र० तद्गुणा उक्ताः।

पट्टार पु० पट्टमृच्छति ऋ-अण् उप०स०। देशभेदे तत्रो धूमा० भवेऽर्थे वुन्। पट्टारक तद्देशभवे त्रि०।

पट्टार्हा स्त्री पट्टे राजसिंहासने अर्हा वासार्हा। पट्टदेव्यां राजनि०।

पट्टिका स्त्री क्षुद्रं पट्टं पट्टी स्वार्थे कन् कापि अतइत्वम् पट्टीव कायति कै-क वा। क्षोद्रभेदे वाचस्पतिः।

पट्टिकाख्य पु० पट्टिकामाख्याति स्वरूपेण आ+ख्या-अच्। रक्तलोध्रे (पाटियालालोध) अमरः।

पट्टिकालोध्र पु० कर्म०। रक्तलोध्रे भावप्र०

पट्टिल पु० पट्ट+अस्त्यर्थे इलच्। पूतिकरञ्जे जटा०।

पट्टिश(स) पु० अस्त्रभेदे अमरः। तल्लक्षणं हेमा०परि० उशनसोक्तं यथा

उक्तं नाडसूर्यकं पट्टिसविधिर्वक्ष्यते । वत्स ! निबोध त्रिहस्तः सार्द्धत्रिहस्तचतुर्हस्तश्चेति श्रेष्ठमध्यमाधमानां दण्डस्त्रिविधः । कर्तव्योऽयस्तो यात्रानाहो भवेत् । दण्डस्याष्टाविंशतिपर्वो निरुद्धो मध्यमश्चतुस्त्रिंशत्पर्वः श्रेष्ठश्चत्वारिंशत्पर्वः । यथा कुन्तप्रमाणेनोपयोगस्तथास्यापि द्रष्टव्यः । तथा सूर्यचन्द्रसदृशाकारं षोडशाङ्गुलविस्तारं तीक्ष्णधारान्वितं द्वात्रिंशत्पर्वं पत्रं भवति । तस्यारा षडङ्गुलाः । कोशः सप्ताङ्गुलः तस्य पर्वपत्रं तस्यातियोगतः संप्रक्षिप्तकीलाभ्यामेव कोशो भवेत् तदारया दृढसमन्वितया । अपकल्पः सुदृढः सर्वदृश्यमतस्यादारामूलमानाद्द्व्यङ्गुलोन्नतः दण्डः कार्यः । एकाङ्गुलास्या स्यादारा षडङ्गुलानाहा दण्डमूले चार्पिता सफलास्यासहस्रयात् । फलविस्तारोमध्ये भवेत् । समस्य भवेत् पाशधारणक्षिप्तपलगौरवो द्व्यङ्गुलश्च कोशो मूलमार्गो दृढारास्यात् । धारायां वितानार्थं सुनेरपि बलार्थं च मूलं रक्षेत्र सुदृढार्थमारावलेन युक्तं कोशमध्ये सुविस्तारायां यथा दृढं कुण्डलाग्रं यथायोगं च नागपाशधारकं सुनिदेशादुपरि बन्धाधानसहस्रसमन्वितं भवेत् । धारागतं सम्यक्पश्चाङ्गुलायतं सुदृढं दृढापाङ्गं च स्यात् । तथैव चाष्टपलसमन्वितं लेटाङ्गुलकरचमूलं कल्पं विद्यात् भवति चात्र श्लोकाः । प्राधान्यं पट्टिशानां स्याच्छेद्ययोगविधानतः । मध्यमं चैव सर्वेषु नीचं चैवाधमेषु च । मित्रयोगेन मित्रं स्याद्दण्डयोक्तावतःस्वतः । विद्यादेव यथेष्टानि शस्त्राणीह प्रयोजयेत्"

पट्टीश(स) पट्टीं श्यति स्यति वा शो–तनूकरणे शो–अन्तकर्मणि वा क । पट्टिशास्त्रे हरिवं० १८१अ० टी०।

पट्टोलिका स्त्री पट्टालिका+पृषो० । (पाङ्ग) स्थाते भूमिकरणहस्यस्थापके पत्रभेदे लिका० ।

पठ लिखिताक्षरवाचने भ्वा०पर०सक०सेट् । पठति अपाठीत् अपठीत् पपाठ पेठतुः । पठितव्यं पाठ्यं पाठः पठनम्

पठमञ्जरी स्त्री रागिणीभेदे हला० । "विद्योगिनी मानविती चैषुप्यां चलं वहन्ती वपुषाऽतिसुन्दरा । आत्मानमाना प्रियया च दग्धा विधुसराङ्गी पठमञ्जरीयम्" हरी०टी० तदभिमानिनी स्वरूपमुक्तम् । [धातौ पु०।

पठि स्त्री पठ–इन् । १पठने पाठे धातुनिर्देशे इक् । २पठ-

पड नतौ भ्वा० आ० सक० सेट् इदित् । पण्डते अपण्डिष्ट पपण्डे पण्डा । पण्डितः ।

पड संहतौ (राशीकरणे) चु०उभ०सक० सेट् । पण्डयति ते अपिपण्डत्-त । इदित् पण्ड्यते ।

पडङ्गभि पु० असुरभेदे ऋ०१०।४८।५ भाष्ये तथार्थता दग्ध

पडवीश न० १पादबन्धने २तद्योग्यदामनि च ऋ०१।१६२।१४ भा० दृश्यम् ।

पण व्यवहारे (क्रयविक्रयादौ)स्तुतौ च भ्वा०आ०सक०सेट् । देवने अक०अर्चने निघण्टुः । आर्धे आय वा स्तुतौ पर० पणायति ते पणते व्यवहारे तु पणायति इत्येके । आर्द्धधातुके अकारात् वा आय । अपणायीत् अपणाविष्ट अपणिष्ट । क्रयविक्रयार्थे च अस्य कर्मणि शेषत्वेन विवक्षिते षष्ठी तस्यास्य न समासः अतस्य पणायते "व्यवहृपणोः समर्थयोः" पा० द्यूते० क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता अतस्य पणनम् । स्तुतौ तु समासः वाक्यपणनम् ति०को० प्रत्ययान्तत्वात् भावे च पणाया ।

पण पु० पण–कर्मणि "नित्यं पणः परिमाणे" पा० अप् । १कर्षमितताम्रे "ताम्रिकः कार्षिकः पणः" याज्ञ० "अशीतिभिर्वराटकैः पण इत्यभिधीयते" भविष्यत्पु० उक्तेषु २अशीतिवराटकेषु "वराटकानां दशकद्वयं यत् का काकिणी तास्य पणस्तथः" लीला० । भावे अप् ३निर्वेशे ४भृतौ ५द्यूते ग्लहे (बाजि) ६मूल्ये ७धने च ८कार्षापणे ९क्रयणशालायाम् १०व्यवहारे मेदि० वर्त्तरि अच् । ११क्रयविक्रयादिकारके त्रि० १२शौण्डिके पु० जटा० आधारे अप् । १३गृहे शब्दमाला १४विष्णौ पु० "प्राचटः प्रणवः पणः" विष्णुस० "पणतिर्व्यवहारार्थः तत्कुर्वन् पणः "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् य आस्ते" इति श्रुतेः पुण्यानि कर्माणि सृष्टस्याधिकारिस्वस्तत्फलं प्रयच्छन् तत्पणया वा पणः" भा० । [हट्टे हारा० ।

पणग्रन्थि पु० पणस्य क्रयविक्रयादेर्ग्रन्थिः सम्बन्धोऽत्र ।

पणन न० पण–भावे ल्युट् । १विक्रये शब्दरत्ना० । २क्रयादौ

पणफर न० "पणफरं द्वितीयाद्यं पञ्चमैकादशं स्मृतम्" ज्यो०त० उक्ते लग्नात् द्वितीयपञ्चमाष्टमैकादशस्थाने

पणबन्ध पु० ६त० ग्लहे (जुए) राजनि० नियमविशेषे बन्धने । यदि भवानिदं कुर्यात् तर्हि इदमहं भवते दास्यामीतिसमयकरणं पणबन्धः" मनोरमा

पणव पुंस्त्री० पणं स्तुतिं वाति वा–अ । पटहे द्विरूपकोषः

पणस पु० पण–कर्मणि असच् । क्रीयद्रव्ये हलायुधकोषः

पण(न)स् अर्चने भ्वा॰ पर॰ सेट्। पण(न)सति अपण(न)सीत्।

पणाङ्गना स्त्री पण–अर्मणि अप् कर्म॰। पणाङ्गनायां वेश्यायां हेमच॰ पणस्त्रीप्रभृतयोऽप्यत्र स्त्री।

पणाया स्त्री पण–आय–भावे अ। १क्रयविक्रयव्यवहृतौ २स्तुतौ ३द्यूते च जटाध॰।

पणायित त्रि॰ पण–आर्थे आय–क्त। १स्तुते आयाभावपक्षे पणितमप्यत्र अमरः २क्रीते ३विक्रीते ४व्यवहृते च

पणादि न॰ द्व॰। वराटके कपर्दके त्रिका॰।

पणि स्त्री पण–आधारे इन्। १विपणौ पणप्रवीणिकायाम् उज्ज्वलदत्तः। धातुनिर्देशे इक्। २पणधातौ पु॰

पणिन् त्रि॰ व्यवहारो द्यूतं स्तुतिर्वा पणः अस्त्यर्थे इनि। १क्रयादिव्यवहारयुक्ते २स्तुतियुक्ते च ३कक्षभिभेदे पु॰। तस्यापत्यम् अण् "गाथिविदथ्योत्यादि"पा॰ न टिलोपः। पाणिन तस्यापत्ये यूनि ततः इञ् पाणिनिः।

पण्ड पु॰न॰। पण–ड तस्य नेत्वम्। १क्लीबे २निष्फले त्रि विश्वः ३वेदोज्ज्वलायां बुद्धौ स्त्री भागुरिः तस्याः स्तुत्यत्वात् तथात्वम्।

पण्डक पु॰ सार्वभौमनोः पुत्रभेदे हरिवं॰ ७अ॰।

पण्डापूर्व न॰पण्डं फलासाधनमपूर्वम्। वस्तुतः फलसाधनाद्योग्ये फलानुपहिते १धर्माधर्मात्मके ऽदृष्टे यथा सन्ध्यावन्दनादेरभावे दुरदृष्टं जायते सन्ध्यादेर्वन्दने तु तस्यानुत्पत्त्या फलानुपहितं दुरदृष्टं नश्यतीति तत्पण्डापूर्वमिति मीमांसामतसिद्धम् २फलानापादके अदृष्टभेदे। गुरुभिः कार्यत्वेनापूर्वे एव विधेः शक्तिः स्वीकृता न फलञ्च भक्षयेदित्यादिनिषेधे फलञ्चभक्षणाभावविषयकं कार्यं मित्यन्वयबोधश्च स्वीकृतः। तच्चापूर्वं न किञ्चित् फलजनकमिति स्थितम्। न्यायनये तु पण्डापूर्वं नाङ्गीक्रियते विध्यर्थस्तु दृष्टसाधनताज्ञानाधीनप्रवृत्तिसाध्यत्वमेव दृष्टश्च विचलिता यजेत इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते यथोक्तं सि॰मुक्ता॰ "सन्ध्यारूपः सन्ध्यासमासीतेत्यादौ दृष्टानुत्पत्तेः प्रवृत्तिः कथम् न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम् तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः कामनाभावेऽकरणापत्तेश्च इत्यश्च फलश्रुतिस्तत्रार्थवादमात्रमिति चेत्र पर्वणश्राद्धादौ नित्यत्वकाम्यत्वयोरप्यविरोधात्। न च कामनाभावेऽकरणापत्तिः त्रिकालस्नानपाठादाविव कामनाशङ्कावश्यैव कल्पनात्। ननु वेदबोधिकार्यताज्ञानात् प्रवृत्तिः सम्भवतीति चेन्न दृष्टसाधनताज्ञानं विना तादृशकार्यताज्ञानस्यैवापि प्रवृत्तेरसम्भवात्। यदपि पण्डापूर्वं भक्षमिति तदपि न कामनाभावेऽकरणापत्तेस्तौल्यात्। कामनाकल्पने स्वार्थवादिकफलमेव रात्रिसत्रन्यायात् कल्प्यतामन्यथा प्रवृत्त्यनुपपत्तेः। तेन "यथं केचिदुपात्तस्य दुरितस्य प्रचक्षते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते"। एवम् "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्" एवम् "दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्" इत्यादिकमेव फलमस्तु। न च पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यम्। नयाश्राद्धादाविव उद्देश्यप्रत्यक्षसम्बन्धेनैव फलजनकत्वस्य क्वचित् कल्पनात्। अतएवोक्तं "श्राद्धदर्शितफलमनुष्ठातरीत्युत्सर्गः" इति। पितॄणां तृप्तत्वे तु तस्य स्वर्गफलं यावच्छब्दनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकल्पनात्। पण्डापूर्वार्थप्रवृत्तिश्च न सम्भवति। न हि तत्सुखदुःखाभाववत् स्वतः पुरुषार्थः, न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत्। इत्थम् यथा हि नित्यकृते प्रत्यवायाभावश्चिरति तदभावे तदभावः। एवं प्रत्यवायाभावस्य सत्त्वे दुःखाभावस्य तदभावे तदभाव इति योगक्षेमसाधारणकारणतया दुःखप्रागभावं प्रत्यपि सुवचत्वात्"।

पण्डित पु॰ पण्डा वेदोज्ज्वला बुद्धिर्जातास्य तार॰ इतच्। शास्त्रतात्पर्यज्ञे १विदुषि। तस्य बुद्धेरुज्ज्वलत्वञ्च कार्यभेदादनेकम् तदेव तस्य लक्षणं यथा

"पठका पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः। सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः" भा॰व॰

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" गीता २सिद्धके पु॰ मेदि॰। [स्वार्थे क। २पण्डितशब्दार्थे च।

पण्डितक पु॰ १धृतराष्ट्रपुत्रभेदे भा॰आ॰ ६अ॰। पण्डित+

पण्डितिमन् पु॰पण्डितस्य भावः टढा॰ इमनिच्। पाण्डित्ये

पण्डुक पु॰ वातरोगयुते पङ्गौ "विधर्माण्यस्य पूर्वाह्णे सन्ध्याकाले च पण्डुकाः" मार्क॰२१अ॰। सायंकाले स्त्रीगमने पुत्रस्य पण्डुकता भवतीत्युक्तम्।

पण्य त्रि॰ पण–कर्मणि यत्। १व्यवहर्तव्ये २विक्रेये च अमरः०"स्तुत्यर्हे तु न यत्। किन्तु यदेव पाठ्यम्" वि॰कौ॰। कम्बलेन समासेऽस्य आद्युदात्तता।

पण्ययोषित् स्त्री कर्म० । वेश्यायाम् त्रिका० [इत्या० ।
पण्यविक्रयशाला स्त्री ६त० । (हाटशाला) हट्टशालायां
पण्यवीथि स्त्री ६त० । १विक्रेयद्रव्यविक्रयशालायां (हाट-
शाला) २हट्टे च । स्वार्थे क । पण्यवीथिका तत्रार्थे
अमरः ।
पण्यशाला स्त्री ६त० । (हाटशाला) हट्टशालायाम् हेमच० ।
पण्या स्त्री पिण्याक+पृषो० । पिण्याकायां द्विरूपकोषः ।
पण्याङ्गना स्त्री वेश्यायाम् हेमच० पण्यस्त्रीवोऽत्र ।
पण्याजिर न० पण्यस्त्रीजिरमिव । पण्यस्त्रीङ्गनतुल्यस्थाने
हट्टे । [क्रयविक्रयोपजीवके वणिग्जने अमरः ।
पण्याजीव त्रि० पण्यमाजीवति आ+जीव-अण् उप०स० ।
पण्याजीवक न० पण्यमाजीवेन वणिजा कायति कै-क,
आ+जीव-ण्वुल् ६त० वा । १हट्टे २वणिजि च त्रिका० ।
पण्यान्य स्त्री पण्यमन्वयति अच् । हट्टभेदे राजनि० ।
पत गतौ भ्वा० चु० उभ० सक०, ऐश्वर्ये अक० सेट् । पत-
यति-ते अपपतत्-त ।
पत ऐश्वर्ये दि० आ० अक० सेट् । पत्यते अपतिष्ट । पेते
पत गतौ भ्वा० पर०सक०, ऐश्वर्ये अक०ण्यन्ता० सेट् । पतति
अपप्तत् । पपात पेततुः । ण्यन्ता०पतः पातः । पतितः
पतयति पातयति । यङि पित्पतति पापत्यते । अधःस-
न्दर्भे अक०अधःसंयोगाद्गुरुत्वे सक० नरकं पतित इत्यादि
पत न० पत-अच् । १पुष्टे जटाधरः । २पतनकर्त्तरि त्रि०
पतग पुंस्त्री० पतन् उत्प्लवन् सन् गच्छति गम-ड
नि० । खगे अमरः स्त्रियां जातित्वात् ङीष् ।
पतङ्ग पुंस्त्री पतन् उत्प्लवन् गच्छति ड नि० । १खगे
अमरः स्त्रियां जातित्वात् ङीष् । २सूर्य्ये पु० ३शलभे
(फड़िङ्ग)कीटभेदे ४शालिभेदे पु० मेदि० ५लक्ष्मधूकवृक्षे
राजनि० । ६पारदे न०मेदि० ७चन्द्रभेदे न० शब्दच० ।
प्लक्षद्वीपस्थे क्षत्रियस्थानीये ८वर्षभेदे पु० "हंसपतङ्गोर्द्ध-
यनसत्याङ्गसंज्ञास्चत्वारो वर्षाः" भाग० ५।२।०७ श्लो० ।
उत्प्लवनेन १०पतने च पतङ्गशब्दे द्रष्टव्यम् ।
पतङ्गम पुंस्त्री० पतन् उत्प्लवन् सन् गच्छति गम-खश्
नि० । खगे स्त्रियां जातित्वात् ङीष् ।
पतङ्गर पु० पतङ्गं पतनेनोत्प्लवनेन गमनम् पतङ्गं ततः अ-
स्त्यर्थे र । उत्प्लवनेन गतियुक्ते भट्ट०६।४।२ भा० ।
पतङ्गा पु० अन्ने निघण्टुः । [प्रधुमक्षिकाभेदे अमरः
पतङ्गिका स्त्री पतङ्ग+संज्ञायां कन् टाप् अतइत्वम् ।
पतङ्गिन् पु० पतङ्ग-उत्प्लवनेन गमनमस्त्यस्य इनि । खगे
स्त्रियां नान्नत्वात् ङीप् । हरिवं०२०अ० उदाहरणम् ।
पतञ्जिका स्त्री धनुर्ज्यायां शब्दच० ।
पतञ्जल पु० गोत्रप्रवर्त्तकर्षिभेदे स च काश्यः । "ते पतञ्ज-
लस्य काश्यस्य" शत० ब्रा० १४।६।२ पतञ्जल इति तत्र
पाठान्तरम् । बहुत्वे उपका०इन्दे बहुत्वे पतञ्जला इत्येव ।
पतञ्जलि पु० पतन् अञ्जलिर्नमस्यतया यस्मिन् । १योगसूत्र-
कारके ऋषिभेदे गोनर्द्दतीरे तपस्यतः कस्मिंश्चिदवेरञ्ज-
लितः पतिते पाणिनिसूत्रस्य २भाष्यकारे तस्य तथो-
त्पत्तिकथा शब्दकौ० वार्त्ति० शेखरादौ दृश्या । अय
च योगशास्त्रकारकात् भिन्न इति सरस्वतीकण्ठाभिः ।
समर्थितम् । अनयोरभेद इति पाश्चात्यवैयाकरणाः ।
भेदाभेदयोर्युक्तत्वायुक्तत्वे च सुधीर्विभाव्ये । योगमतस्य
सर्वदर्शनसंग्रहे प्रदर्शितं यथा "सांख्यप्रवचनापरनामधेयं
बहुवर्त्तमानानां मतमुपन्यस्यते । तत्र योगशास्त्रं पत-
ञ्जलिप्रणीतं पादचतुष्टयात्मकम् । तत्र प्रथमे पादे "अथ
योगानुशासनमिति" योगशास्त्रारम्भप्रतिज्ञां विधाय
"योगश्चित्तवृत्तिनिरोधः" इत्यादिना योगलक्षणमभि-
धाय समाधिं सप्रपञ्चं निरदिशत् भगवान् पतञ्जलिः ।
द्वितीये "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"
इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च
बहिरङ्गानि साधनानि । तृतीये "देशबन्धश्चित्तस्य
धारणा" इत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं
संयमपदवाच्यं तत्प्रावान्तरफलं विभूतिलाभश्च । चतुर्थे
"जन्मौषधिमन्त्रतपःसमाधिजाःसिद्धयः" इत्यादिना सिद्धि-
संज्ञकप्रपञ्चनपुरःसरं परं प्रयोजनं कैवल्यम् । प्रधाना-
दीनि पञ्चविंशतितत्त्वानि प्राचीनान्येव सम्मतानि षड्-
विंशस्तु परमेश्वरः क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषः
स्वेच्छया निर्माणकायमधिष्ठाय लौकिकवैदिकसम्प्रदाय-
प्रवर्त्तकः संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राहक-
श्च । तत्र पुष्करपलाशवन्निर्लेपस्य तस्य (पुरुषस्य) तापः
कथमुपपद्यते येन परमेश्वरोऽनुग्राहकतया कल्प्यीक्रियते
इति चेदुच्यते तापकस्य रजसः सत्त्वमेव तप्तां बुद्ध्यात्मना
परिणमते इति सत्त्वे परितप्यमाने तन्मोक्षेण तदभेदाव-
गाही पुरुषोऽपि तप्यत इत्युच्यते । तदुक्तमाचार्यैः
"सत्त्वं तप्तं बुद्धिभावेन दृष्टं भावाद्वा राजसाद्वापि
काले । तप्ताभेदग्राहिणी तामसी वा इत्यस्मात्
तप्त इत्युक्त आत्मेति" । तद्भाष्ये व्यासेनाप्युक्तम्
"अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च पुरि-

स्वामिन्यर्थे प्रतिसंक्रान्ते च तद्वृत्तिमनुभवतीति"। भोक्तृशक्तिरिति चिच्छक्तिरुच्यते सा चात्मैव परिणामिन्यर्थे बुद्धिसत्त्वे प्रतिसंक्रान्ते च प्रतिबिम्बिते तद्वृत्तिमनुभवतीति बुद्धौ प्रतिबिम्बिता सा चिच्छक्तिर्बुद्धिच्छायापन्ना बुद्धिसत्त्वानुकारवतीति" भावः। तथा शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासत इति। इत्थं तथ्यमानस्य पुरुषस्यादरनैरन्तर्यदीर्घकालासेवनियमनियमाद्यष्टाङ्गयोगानुष्ठानेन परमेश्वरप्रणिधानेन च सत्पुरुषान्यताख्यातावनुपप्लवायां जातायामविद्यादयः पञ्च क्लेशाः समूलकाषं कषिता भवन्ति शुभाशुभाश्च कर्माशयाः समूलघातं हता भवन्ति। ततश्च पुरुषस्य निर्लेपस्य कैवल्येनावस्थानं कैवल्यमिति सिद्धम्। तत्र "अथ योगानुशासनमिति" प्रथमसूत्रेण प्रेक्षावत्प्रवृत्त्यङ्गं विषयप्रयोजनसम्बन्धाधिकारिरूपमनुबन्धचतुष्टयं प्रतिपाद्यते। अत्राथशब्दोऽधिकारार्थः स्वीक्रियते (इतःपरं तस्यार्थस्यार्थकता महता प्रबन्धेन समर्थिता तत्र द्रष्टव्या) तदपि व्याख्यातम्। "अथेत्ययमधिकारार्थः प्रयुज्यते" इति योगसूत्रविवरणे च तद्व्याख्याने वाचस्पतिः "तस्मादयमथशब्दोऽधिकारद्योतको मङ्गलार्थश्चेति सिद्धमिति"। इदित्यनुशासनशब्दस्याधिकारार्थत्वपक्षे शास्त्रेण प्रसूतमानस्य योगस्योपपर्यनात् समग्रशास्त्रतात्पर्यव्याख्यानेन शास्त्रस्य सुखतोऽवधप्रवृत्तिराज्ञाप्तिरुपपन्नम्। ननु "हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः" इति याज्ञवल्क्यस्मृतेः यतश्चैतिः कथं योगस्य शास्त्रितेति चेदुच्यते यतएव तत्र तत्र पुराणादौ विशिष्य योगस्य विप्रकीर्णतया दुर्बोधार्थत्वं मन्यमानेन भगवता कृपासिन्धुना ऋषिपतिना सारं संक्षिप्तुमुपा अनुशासनसारत्वं न तु शास्त्रान्तरम्। यदाथशब्दोऽधिकारार्थः तदैवं वाक्यार्थः सम्पद्यते योगानुशासनं शास्त्रमधिकृतं वेदितव्यमिति। तत्र शास्त्रे व्युत्पाद्यमानतया योगः ससाधनः सफलो विषयः तद्व्युत्पादनमवान्तरफलं व्युत्पादितस्य योगस्य कैवल्यं परमप्रयोजनम्। शास्त्रयोगयोः प्रतिपाद्यप्रतिपादकभावलक्षणः सम्बन्धः, योगस्य कैवल्यस्य च साध्यसाधनभावलक्षणः सम्बन्धः स च स्मृत्यादिप्रसिद्ध इति प्रागेवावादिषम्। मोक्षमपेक्षमाणाः श्रवणाधिकारिण इत्यर्थसिद्धम्। न चायातो ब्रह्मजिज्ञासेत्यादाविवाधिकारिणोऽर्थतः सिद्धिरायङ्कनीया तत्राथशब्देनानन्तर्याभिधाने प्रयाङ्किया अधिकारिसमर्पणसिद्धावार्थिकत्वशङ्कानुदयात्। अतएवोक्तं "न स्मृतिप्राप्ते प्रकरणादीनामवकाशः" इति। अस्यार्थः यत्र हि स्मृत्या अर्थो न लभ्यते तत्रैव प्रकरणादयोऽर्थं समर्पयन्ति नेतरत्र। यत्र तु शब्दादेवार्थस्योपलम्भः तत्र नेतरस्य सम्भवः शीघ्रबोधिन्या स्मृत्या बोधितेऽर्थे तद्विरुद्धार्थं प्रकरणादि समर्पयति अविरुद्धं वा। न प्रथमः विरुद्धार्थबोधकस्य तस्य बाधितत्वात्। न चरमः वैयर्थ्यात्तदाह "स्मृतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति" "बाधिकैव स्मृतिर्नित्यं समाख्या बाध्यते सदा। मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया" इति च तस्माद्विषयादिसत्त्वाद्ब्रह्मविचारकशास्त्रवद्योगानुशासनं शास्त्रमारब्धव्यमिति स्थितम्। ननु व्युत्पाद्यमानतया योगः एवात्र प्रस्तुतो न शास्त्रमिति चेत् सत्यं प्रतिपाद्यतया योगः प्राधान्येन प्रस्तुतः स च तद्विषयेण शास्त्रेण प्रतिपाद्यत इति तत्प्रतिपादने करणं शास्त्रं करणगोचरश्च कर्तृव्यापारो न कर्मगोचरतामाचरति। यथा छेत्तुर्देवदत्तस्य व्यापारभूतस्य यमननिपातनादि कर्म करणभूतपरशुगोचरं न कर्मभूतवृक्षादिगोचरं तथा च वस्तुः यतश्चैतिः प्रवचनव्यापारापेक्षया योगविषयस्याधिकृतता करणस्य शास्त्रस्य, अभिधानव्यापारापेक्षया तु योगस्यैवेति विभागः। ततश्च यामशास्त्रस्यारम्भः सम्भावनां भजते अत्र चानुशासनीयो योगश्चित्तवृत्तिनिरोध इत्युच्यते। ननु युजिर्योग इति संयोगार्थतया परिपठितात् युजेर्निष्पन्नो योगशब्दः संयोगवचनएव स्यान्न तु निरोधवचनः। अतएवोक्तं याज्ञवल्क्येन "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः" इति तदेतद्वार्त्तं जीवपरयोः संयोगे कारणसंयोगान्यतरकर्मादेरसम्भवादसंयोगस्य कणभक्षाक्षचरणादिभिः प्रतिक्षेपाच्च। मीमांसकमतानुसारेण तदङ्गीकारेऽपि नित्यसिद्धस्य तस्य साध्यत्वाभावेन शास्त्रवैफल्यापत्तेश्च धात्वनेकार्थत्वेन युजेः समाध्यर्थत्वोपपत्तेश्च। तदुक्तम् "निपातोपसर्गाश्च धातवश्चेति ते त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति" अतएव केचन युजिं समाधावपि पठन्ति (युज समाधाविति)। नापि याज्ञवल्क्यवचनव्याकोपः तस्यास्यापि योगशब्दस्य समाध्यर्थत्वात्। "समाधिः समतावस्था जीवात्मपरमात्मनोः। ब्रह्मण्येव

स्थितिर्या सा समाधिः प्रत्यगात्मनः" इति तेनैवोक्तत्वाच्च। तदुक्तं भगवता व्यासेन "योगः समाधिरिति"। यद्येवमष्टाङ्गयोगे चरमस्याङ्गस्य समाधित्वमुक्तं पतञ्जलिना यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टाङ्गानि योगस्येति। न चाङ्गयोगाङ्गतां मन्तुस्तत्सहते उपकार्योपकारकभावस्य दर्शपूर्णमासप्रयाजादौ भिन्नायतनत्वेनात्यन्तभेदादतः समाधिरपि न योगशब्दार्थो युज्यत इति चेत्तन्न युज्यते व्युत्पत्तिमात्राभिधित्सया तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति निरूपितचरमाङ्गवाचकेन समाधिशब्देनाङ्गिनो योगस्याभेदविवक्षया व्यपदेशोपपत्तेः। न च व्युत्पत्तिबलादेव सर्वत्र शब्दः प्रवर्त्तते तथात्वे गच्छतीति गौरिति व्युत्पत्तेः तिष्ठन् गौर्न स्यात् गच्छतो देवदत्तस्यौ स्यात् प्रवृत्तिनिमित्तस्य प्रागुक्तमेव चित्तवृत्तिनिरोध इति तदुक्तं "योगश्चित्तवृत्तिनिरोधः" इति। ननु वृत्तीनां निरोधस्येद्योगोऽभिमतस्तासां ज्ञानत्वेनात्माश्रयतया तन्निरोधोऽपि प्रध्वंसपदवेदनीयस्तदाश्रयो भवेत् प्रागभावप्रध्वंसयोः प्रतियोगिसमानाश्रयत्वनियमात् ततश्च "उपयन्नपयन् धर्मी विकरोति हि धर्मिणमिति" न्यायेनात्मनः कौटस्थ्यं विहन्येतेति चेत्तदपि न घटते निरोधानां प्रमाणविपर्ययविकल्पनिद्राद्यतिस्वरूपाणां वृत्तीनामन्तःकरणाद्यपरपर्यायचित्तधर्मत्वाङ्गीकारात् कूटस्थनित्यचिच्छक्तिरपरिणामिनी विज्ञानधर्माश्रयो भवितुं नार्हत्येव। न च चितिशक्तेरपरिणामित्वमसिद्धमिति वाच्यं चितिशक्तिरपरिणामिनी सदा ज्ञातत्वात् न यदेवं न तदेवं यथा चित्तादि इत्याद्यनुमानसम्भवात् तथा यद्यसौ पुरुषः परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्तासां चित्तवृत्तीनां सदाज्ञातत्वं नोपपद्येत चिद्रूपस्य सदैवाधिष्ठातृत्वेनावस्थितस्य यदन्तरङ्गनिर्मलं सत्त्वं तस्यापि सदैव स्थितत्वात् येन येनार्थेनोपरक्तं भवति तस्य तस्य सदैव चिच्छायापत्त्या भानोपपत्त्या पुरुषस्य निःसङ्गत्वं सम्भवति। ततश्च सिद्धं तस्य सदा ज्ञातत्वमिति न काचित् परिणामित्वाशङ्कावतरति। चित्तं पुनर्येन विषयेणोपरक्तं भवति स विषयो ज्ञातः यदुपरक्तं न भवति तदज्ञातमिति वस्तुतोऽयस्कान्तमणिकल्पस्य ज्ञानाज्ञानकारणभूतोपरागानुपरागधर्मित्वादयःसधर्मकं चित्तं परिणामि इत्युच्यते। ननु चित्तस्येन्द्रियाणां चाहङ्कारिकाणां सर्वगतत्वात् सर्वविषयैरस्ति सदा सम्बन्धः तथाच सर्वेषां सर्वदा सर्वत्र ज्ञानं प्रसज्येत सर्वगतत्वेऽपि चित्तं यत्र शरीरे वृत्तिमत् तेन शरीरेण सह सम्बन्धो येषां विषयाणां तेष्वेवास्य ज्ञानं भवति नेतरेष्वित्यतिप्रसङ्गाभावादतएवावस्थान्तरमणिकल्पा विषयाः स्वयःसधर्मकं चित्तमिन्द्रियप्राणादिकयाभिसम्बध्योपरञ्जयन्ति। तथाचित्तस्य धर्मा वृत्तयो नात्मनः तथाच श्रुतिः "कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति"। चित्तशक्तेरपरिणामित्वं पञ्चशिखाचार्यैराख्याति "अपरिणामिनी भोक्तृशक्तिरिति" पतञ्जलिनापि "सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति"। चित्तपरिणामित्वेऽनुमानमुच्यते चित्तं परिणामि ज्ञाताज्ञातविषयत्वात् श्रोत्रादिवदिति। परिणामश्च त्रिविधः प्रसिद्धः धर्मलक्षणावस्थाभेदात् धर्मिणश्चित्तस्य नीलाद्यालोचनं धर्मपरिणामः यथा कनकस्य कटकमुकुटकेयूरादि। धर्मस्य वर्त्तमानत्वादिर्लक्षणपरिणामः नीलाद्यालोचनस्य स्फुटत्वादिरवस्थापरिणामः कनकादेस्तु नवपुराणत्वादिरवस्थापरिणामः। एवमन्यत्रापि यथासम्भवं परिणामत्रितयमूहनीयं तथाच प्रमाणादिवृत्तीनां चित्तधर्मत्वात् तन्निरोधोऽपि तदाश्रय एवेति न किञ्चिदनुपपन्नम्। ननु वृत्तिनिरोधो योग इत्यङ्गीकारे क्षुप्तप्रादौ विक्षिप्तमूढादिचित्तवृत्तीनां निरोधसम्भवाद्योगत्वप्रसङ्गः न चैतद्युज्यते क्षिप्तादावस्थाने क्लेशप्रहाणादेरसम्भवात्निःश्रेयसपरिपन्थित्वात्। तथा हि क्षिप्तं तेषु तेषु विषयेषु क्षिप्यमाणमस्थिरं चित्तमुच्यते। तमःसमुद्रे मग्नं निद्रावृत्तिमच्चित्तं मूढमिति गीयते। क्षिप्तादिविष्टं चित्तं विक्षिप्तमिति गीयते विशेषो नाम चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढमिति" न्यायेनास्थिरस्यापि मनसः कादाचित्कसमुद्भूतविषयस्थैर्यसम्भवेन स्थैर्यम्। अस्थिरत्वञ्च स्वाभाविकं व्याध्याद्युपद्रवजनितं वा तदाह "व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः" इति। तत्र दोषत्रयवैषम्यनिमित्तो ज्वरादिर्व्याधिः, चित्तस्याकर्मण्यत्वं स्त्यानं, विरुद्धकोटिद्वयावगाहि ज्ञानं संशयः, समाधिसाधनानामभावनं प्रमादः, शरीरगुरुत्वात्प्रवृत्तिराहस्यं, विषयाभिलाषोऽविरतिः, अतस्मिंस्तद्बुद्धिर्भ्रान्तिदर्शनं कृतचित्तनिमित्तात् समाधिभूमेरलाभोऽलब्धभूमिकत्वं, लब्धायामपि तस्यां चित्तस्याप्रतिष्ठा अनवस्थितत्वमित्यर्थः। तस्मान्न वृत्तिनिरोधो

योगपक्षनिक्षेपमर्हति इति चेन्नैवं बोधः ज्ञेयभूतक्षिप्ता-दारभ्याग्रे वृत्तिनिरोधश्च ज्ञेयत्वसम्भवेऽप्युपादेययोरेका-पत्रिरुद्धावस्थयोर्वृत्तिनिरोधस्य योगत्वसम्भवात् । एकतानं चित्तमेकाग्रमुच्यते निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धमिति मन्यते । स च समाधिर्द्विविधः सम्प्रज्ञातासम्प्रज्ञातभेदात् तत्रैकाग्रचेतसि यः प्रसाधा-दिवृत्तीनां बाह्यविषयाणां निरोधः स सम्प्रज्ञातसमाधिः सम्यक् प्रज्ञायतेऽस्मिन् प्रकृतेर्विविक्ततया चित्तमिति व्युत्पत्तेः । स चतुर्विधः सवितर्कादिभेदात् समाधि-नाम भावना सा च भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनं, भाव्यश्च द्विविधम् ईश्वरत्व-त्वानि च । तान्यपि द्विविधानि जड़ाजड़भेदात् जड़ानि प्रकृतिमहदहङ्कारादीनि चतुर्विंशतिः अजड़ः पुरुषः । तत्र यदा पृथिव्यादीनि स्थूलानि विषयत्वेनादाय पूर्वापरा-नुसन्धानेन शब्दार्थोल्लेखसम्भेदेन च भावना प्रवर्त्तते स समाधिः सवितर्कः । यदा तन्मात्रान्तःकरणलक्षणं सूक्ष्मं विषयमालम्ब्य देशाद्यवच्छेदेन भावना प्रवर्त्तते तद् सविचारः । यदा रजस्तमोवेधानुविद्धं चित्तं भाव्यते तदा सुखप्रकाशमयस्य सत्त्वस्योद्रेकात् सानन्दः । यदा रज-स्तमोवेधानभिभूतं शुद्धं सत्त्वमात्रमवलम्ब्य या प्रवर्त्तते भावना तदा तस्यां सत्त्वस्य स्वभावाच्चितिसन्निधेरुद्रेकाच्च सत्त्वमात्रावशेषत्वेन भासितः सकाशिः । वितर्कविचारा-नन्दास्मितारूपानुगमात् सम्प्रज्ञातः इति । सर्ववृत्तिनि-रोधे त्वसम्प्रज्ञातः समाधिः । ननु सर्ववृत्तिनिरोधोयोग इत्युक्ते सम्प्रज्ञाते व्याप्तिर्न स्यात् तत्र सत्त्वप्रधानायाः स-त्त्वपुरुषान्यताख्यातिलक्षणाया वृत्तेरनिरोधादिति चेत्त-देतदार्षं क्लेशकर्मविपाकाशयपरिपन्थिचित्तवृत्तिनिरोध योग इत्यङ्गीकारात् । क्लेशाः पुनः पञ्चधा प्रसिद्धाः अ-विद्याऽस्मितारागद्वेषाभिनिवेशाः । तत्राविद्येत्यत्र किमा-श्रीयते पूर्वपदार्थप्राधान्यम् अमत्रिकं वर्त्तत इतिवत् उत्तरपदार्थप्राधान्यं वा राजपुरुष इतिवत् अन्यपदार्थ-प्राधान्यं वा अमत्रिको देश इतिवत् तत्र न पूर्वः, पूर्व-पदार्थप्रधानत्वे विद्यायाः प्रसज्यप्रतिषेधोपपत्तौ क्लेशा-दिकारणत्वानुपपत्तेः अविद्याशब्दस्य स्त्रीलिङ्गत्वाभावा-पत्तेश्च । न द्वितीयः,कस्यचिदभावेन विशिष्टाया विद्यायाः क्लेशादिपरिपन्थित्वेन तद्धेतुत्वानुपपत्तेः । न तृतीयः "नञोऽन्यार्थानां बहुव्रीहिर्वा उत्तरपदलोपः" इति वृत्तिकारवचनाद्वाक्यारेण अविद्याभावा विद्या बह्वाः वा अविद्या सुद्धिरिति समाधिसिद्धौ तस्या अविद्यायाः क्लेशादिहेतुत्वानुपपत्तेः विवेकख्यातिपूर्वकसर्ववृत्तिसम्भवा-यास्तस्याः साक्षात्साक्षात्प्रसङ्गाच्च उक्तञ्च अस्मितादीनां क्लेशाना-मविद्यानिदानत्वम् । "अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनु-विच्छिन्नोदाराणामिति" । तत्र प्रसुप्तत्वं प्रबोधसहकार्य-भावेनानभिव्यक्तिः, तनुत्वं प्रतिपक्षभावनया शिथिलीक-रणं, विच्छिन्नत्वं बलवता क्लेशेनाभिभवः,उदारत्वं सह-कारिसन्निधिवशात् कार्यकारित्वम् । तदुक्तं वाचस्पति-मिश्रेण व्यासभाष्यव्याख्यायाम् "प्रसुप्तास्तत्त्वज्ञानानां तनुदग्धाश्च योगिनाम् । विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम्" इति इन्द्रवत् स्वतन्त्रपदार्थद्वयानवगमादु-भयपदार्थप्रधानत्वं नायुक्तम् । तस्मात् पञ्चतयेऽपि क्लेशादिनिदानत्वमविद्यायाः प्रसिद्धं स्थीयेतेति चेत् तदपि न शोभनं विभाति पर्युदासशक्तिमाश्रित्याविद्या-शब्देन विद्याविरुद्धस्य विपर्ययज्ञानस्याभिधानमिति वृद्धैरङ्गीकारात् । तदाह "नासमर्थार्थयोगे तु नैव नञ् प्रतिषेधकः । वदत्यत्राक्षणाधर्मावन्यमात्रविरोधिनाविति । वृद्धप्रयोगमन्या हि शब्दार्थाः सर्व एव नः । तेन यत्र प्रयुक्तो यो न तस्मादपनीयते" इति वाचस्पतिमिश्रैर-युक्तं "लोकाधीनावधारणो हि शब्दार्थयोः सम्बन्धः लोके चोत्तरपदार्थप्रधानस्यापि नञ उत्तरपदाभिधेयो-पमर्दकत्वं तद्विरुद्धतया तत्र तत्रोपलब्धेरिहापि तद्विरुद्धे प्रवृत्तिरिति" । एतदेवाभिप्रेत्योक्तम् "अनित्याशुचिदुः-खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति" । अतस्तिं-स्तद्वद्विपर्ययः इत्युक्तं भवति तद्यथा अनित्ये घ-टादौ नित्यत्वाभिमानः, अशुचौ कायादौ शुचित्वप्रत्ययः । "स्नानाद्दोलादवष्टम्भाच्चित्रान्नाद्विषनादपि । कायमा-धेयशौचत्वात् पण्डिता अशुचिं विदुः" इति "परिणाम-तापसंस्कारैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति" न्यायेन दुःखे सुखचन्दनवनितादौ सुखत्वारोपः अनात्मनि देहादावात्मबुद्धिः । तदुक्तम् "अनात्मनि च देहादावात्मबुद्धिस्तु देहिनाम् । अविद्या तत्कृतो बन्ध-स्तस्याशे मोक्ष उच्यते" इति एवमियमविद्या चतुष्प्रकारा भवति । तत्रैतेऽविद्याविशेषेषु किञ्चिदनुगतं सामान्य-लक्षणं वर्णनीयम् अन्यथा विशेषस्याविद्धेः । तथाचोक्तं भट्टाचार्यैः "सामान्यलक्षणं लक्ष्म्या विशेषस्यैव लक्ष-णम् । न ह्यन्यं केवलं वस्तुमतोऽन्यस्य न वाच्यता" इति तदपि न वाच्यमतस्तिं स्तद्वद्विरिति सामान्यलक्षणाभि-

धानेन दत्तोत्तरत्वात् । सत्पुरुषयोरहमहमिकाभिमानोऽस्तिता तद्युक्तं "दृष्टदर्शनयोरेकात्मत्वाभिमानोऽस्तितेति" । सुखाभिज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णारूपो गर्द्धो रागः । दुःखज्ञस्य तदनुस्मृतिपुरःसरत्वात्साधनेषु निन्दा द्वेषः तदुक्तं "सुखानुशयी रागः दुःखानुशयी द्वेषः" इति । किमत्रानुशयिशब्दे ताच्छील्यार्थे णिनिरिनिर्वा मत्वर्थीयोऽभिमतः आद्यः "सुखजाती णिनिस्ताच्छील्ये इत्यत्र सुखीति वर्त्तमाने पुमःस्त्रुद्यन्यस्य उपसर्गनिरपेक्षत्वेन दोषसर्गातोर्थिनेरनुत्पत्तेः यथा कथञ्चिदङ्गीकारेऽपि "यथोऽस्थितीति" इति प्रसङ्गावतिशायादिपदवदनुशायिपदस्य प्रयोगप्रसङ्गात् । न द्वितीयः "एकाजरात् क्त तोजातेः सम्प्रत्यात् न तो (इनिठनौ) क्तताविति" तत्प्रतिषेधादत्र चानुशयशब्दस्याजन्तत्वेन क्तदन्तत्वात् । तस्मादनुशयिशब्दो दुरुपपाद इति चेत् नैतद्युक्तं भावानवबोधात् प्राचिकाभिप्रायमिदं वचनम् । अतएवोक्तं वृत्तिकारेण "कृतिकरणो विवक्षार्थः सर्वत्राभिसम्बध्यते" इति तेन क्वचिद्भवति कार्यी कार्यिकलक्षणकौ तच्छुद्धिक इति तथा च क्तदन्तात् क्तातेश्च प्रतिषेधस्य प्राचिकत्वम् अनुशयशब्दस्य क्तदन्ततया इनेरुत्पत्तिरिति सिद्धम् । पूर्वजन्मानुभूतसुखदुःखानुभवावसानात्वात् वर्त्तस्य प्राक्तनजन्मानुभवेन च विदुषः सञ्जायमानः शरीरविषयादेर्मम वियोगो मा भूदिति प्रत्यहं निमित्तं विना प्रवर्त्तमानोभयरूपोऽभिनिवेशः यज्जनः क्लेशः मा च भूवं हि भूयासमिति प्रार्थनाभावः प्रत्यात्मननुभवसिद्धत्वात् तदाह "स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः" इति । ते चाविद्यादयः पञ्च सांसारिकविविधदुःखोपहारहेतुत्वेन इमे क्लिश्नन्तीति क्लेशाः प्रसिद्धाः । कर्माणि विहितप्रतिषिद्धरूपाणि ज्योतिष्टोमब्रह्महत्यादीनि विपाकाः कर्मफलानि जात्यायुर्भोगाः, आफलविपाकाश्चित्तभूमौ क्लेशते इत्याशयाः धर्माधर्मसंस्काराः । तत्परिपन्थिचित्तवृत्तिनिरोधो योगः । निरोधो, नाशायमात्रमभिमतं तस्य शून्यत्वेन भावरूपसंस्कारजननक्षमत्वासम्भवात् किन्तु तदाश्रयो मधुमतीमधुप्रतीकाविषोकासंस्कारभेदेनाव्यपदेश्यः चित्तस्यावस्थाविशेषः निरुध्यतेऽस्मिन् प्रमाणादाश्चित्तवृत्तय इति व्युत्पत्तेरुपपत्तेः । अभ्यासवैराग्याभ्यां वृत्तिनिरोधः । तत्र स्थितौ भूयान् यत्नोऽभ्यासः । प्रकाशप्रवृत्तिरूपवृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामविशेषः स्थितिः । तन्निमित्तीकृत्य यत्नः पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यासः । धर्मेषु दोषिणं कृत्वीतिवन्निमित्तार्थे यप्रत्ययीत्युक्तं भवति "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्" । ऐहिकपारत्रिकविषयाद्दोषदर्शनाद्विरक्तिमतः वशीते विषया वशाः तान्येतेषां वशं इति विषयौ वैराग्यमित्युक्तं भवति । समाधिपरिपन्थिक्लेशतनूकरणार्थं समाधिलाभार्थं च प्रवर्त्तक्रियायोगविधानपरेण योगिना भवितव्यं क्रियायोगस्वादने अभ्यासवैराग्ययोः सम्भवात् तदुक्तं भगवता "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते" इति । क्रियायोगस्योपदिष्टः पतञ्जलिना "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति । तपःस्वरूपं निरूपितं याज्ञवल्क्येन "विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः । शरीरशोषणं प्राहुस्तपस्तप्तं तपस्विनः" इति । प्रणवगायत्रीमन्त्रप्रणवोनामध्ययनं स्वाध्याय इति । तत्र मन्त्रा द्विविधाः वैदिकास्तान्त्रिकाश्च । वैदिकाश्च द्विविधाः प्रणीता अप्रणीताश्च । तत्र प्रणीताः शास्त्राणि अप्रणीताश्च द्विविधाः छन्दोब्राह्मणद्विजलक्षणाश्च । तत्र प्रथमा ऋक्सामयजूंषि तदुक्तं जैमिनिना "तेषामृक् यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या शेषे यजुःशब्दः" इति । उत्तरेषु शास्त्रिकसारस्वतप्रभृत्याद्यागमेषु ये ये दर्शितास्ते तान्त्रिकाः । ते पुनर्मन्त्राश्चिविधाः स्त्रीपुंनपुंसकभेदात्तदाह "स्त्रीपुंनपुंसकत्वेन त्रिविधा मन्त्रजातयः । स्त्रीमन्त्रा वह्निजायान्ताः नमोऽन्ताः क्लीबसंज्ञकाः । शेषाः पुमांसस्ते मन्त्राः सिद्धा वज्रादिकर्मणि" इति । स्नापनादिसंस्काराभावेऽपि निरस्तसमस्तदोषत्वेन सिद्धिहेतुत्वात् सिद्धत्वम् । स च संस्कारो दशविधः कथितः शारदातिलके "मन्त्राणां दश वक्ष्यन्ते संस्कारा सिद्धिदायिनः । निर्दोषता प्रयान्त्याशु ते मन्त्राः साधु संस्कृताः । जननं जीवनञ्चैव ताडनं बोधनं तथा । अभिषेकोऽथ विमलीकरणाप्यायने पुनः । तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः । मन्त्राणां मातृकावर्णाद्युद्धारो जननं स्मृतम् । प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः । मन्त्रार्णसंख्यया तद्धि जीवनं संप्रचक्षते । मन्त्रवर्णान् समाविश्य ताडयेद्वह्निमारुता । प्रत्येकं वायुबीजेन ताडनं तदुदाहृतम् । विलिख्य मन्त्रवर्णान् पद्मपत्रे सदोरकैः । मन्त्राक्षरेण संपूर्णैर्ज्ञात्वा तद्बोधनं मतम् ।

स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्थसङ्ख्या। अन्यत्वप-
क्षवैमन्त्रमभिषिञ्चेद्विशुद्धये। संचिन्त्य मनसा मन्त्रं ज्योति-
र्मन्त्रेण निर्दहेत्। मन्त्रे मलत्रयं मन्त्री विमलीकर-
णं हि तत्। तारज्योमाग्निमनुयुक् ज्योतिर्मन्त्र उदा-
हृतः। कुशोदकेन जप्तेन प्रत्यर्थं प्रोक्षणं मनोः।
वारिधौतेन विधिवदेतदाप्यायनं मतम्। मन्त्रेण वारिणा
मन्त्रे तर्पणं तर्पणं स्मृतम्। तारमायारमायोगो मनो-
दीपनमुच्यते। जप्यमानस्य मन्त्रस्य गोपनं स्वप्रकाश-
नम्। संस्कारा दश मन्त्राणां सर्वतन्त्रेषु गोपिताः।
एतत्कृत्वा मन्त्रदानेन मन्त्री वाञ्छितमश्नुते। दुष्टकीलि-
तविच्छिन्नसुप्तयप्तादयोऽपि च। मन्त्रदोषाः प्रणश्यन्ति
संस्कारैरेभिरुत्तमैः" इति। तदेतन्नकारणतारणकल्पेन
मन्त्रशास्त्ररहस्योद्घोषणेन। ईश्वरप्रणिधानं नामाभिसंहि-
तानामनभिसंहितानाच्च सर्वासां क्रियाणां परमेश्वरे पर-
मगुरौ फलानपेक्षया समर्पणम्। अत्रैवोक्तम् "काम-
तोऽकामतो वापि यत्करोमि शुभाशुभम्। तत्सर्वं
त्वयि विन्यस्तं त्वत्प्रयुक्तः करोम्यहम्" इति। क्रिया-
फलसंन्यासोऽपि भक्तिविशेषापरपर्यायं प्रणिधानमेव
फलाभिसन्धानेन कर्मकरणात् तथा च गीयते गी-
तासु सप्रथा "कर्मण्येवाधिकारस्ते मा फलेषु कदा-
चन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि" इति
फलाभिसन्धेरपघातकत्वमभिहितं भगवद्भिर्नीलकण्ठभा-
रतीतीर्थचरणैः "अपि मयत्नसम्पन्नं वासेनोपकृतं
तपः। न हृष्टये जन्तोरस्य श्रमीढमिव गायसम्" इति
सा च तपःस्वाध्यायेश्वरप्रणिधानात्मिका क्रिया योग-
साधनत्वाद्योग इति। एकसारोपलक्षणाद्वस्त्रान्तरयोगेन
निरूप्यते यथायुर्वेदमिति। गुणसारोपलक्षणा नाम
लक्षणाप्रभेदः। मुख्यार्थबाधतद्योगाभ्यामर्थान्तरप्रतिपा-
दनं लक्षणा सा द्विविधा रूढिमूला प्रयोजनमूला च
तदुक्तं काव्यप्रकाशे "मुख्यार्थबाधे तद्योगे रूढितोऽथ
प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरो-
पिता क्रिया" इति। यच्छब्देन लक्ष्यत इत्याख्याते गु-
णीभूतं प्रतिपादनमात्रं पराक्रियते। सा लक्षणेति
प्रतिनिर्दिश्यमानापेक्षया तच्छब्दस्य स्त्रीलिङ्गतोपपत्तिः।
तदुक्तं कैयटैः "निर्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमा-
पादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गमुपादद्दते" इति
तत्र रूढिमूला मुख्य इत्यादि रूढिलक्षणा उदाहरणं
कृष्णायु आसीति व्युत्पत्त्या दर्शनकर्तरि यौगिकं
मुख्यपदं विशेषणव्यवहारपरम्परानुपातित्वेनाभिधानवत् प्रयो-
जनमनपेक्ष्य प्रवर्त्तते। तदाह "निरूढा लक्षणाः का-
चित् समयादभिधानवत्" इति। तस्मात् रूढिलक्ष-
णायाः प्रयोजनापेक्षा नास्ति। यद्यपि प्रयुक्तः शब्दः
प्रथमं मुख्यार्थं प्रतिपादयति तेनार्थेनार्थान्तरं लक्ष्यते
इति लक्षणधर्मो लक्षणा तथापि तत्प्रतिपादके शब्दे
समारोपितः सन् शब्दव्यापार इति व्यपदिश्यते" इति।
स च योगो यमादिभेदपञ्चाष्टाङ्ग इति निर्दिष्टः। तत्र
यमा अहिंसादयः। तदाह पतञ्जलिः "अहिंसासत्या-
स्तेयब्रह्मचर्यापरिग्रहा यमाः" इति। नियमाः शौचा-
दयः। तदप्याह "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधा-
नानि नियमाः" इति। एते च यमनियमा विष्णुपुराणे
दर्शिताः "ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान्।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्।
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्। कुर्वीत
ब्रह्मणि परं परस्मिन् प्रवणं मनः। एते यमाः सनि-
यमाः पञ्च पञ्च प्रकीर्त्तिताः। विशिष्टफलदाः काम्ये
निष्कामाणां विशुद्धिदाः" इति। स्थिरसुखमासनं
पद्मासनभद्रासनवीरासनस्वस्तिकासनदण्डकासनसोपाश्र-
यपर्य्यङ्ककौञ्चनिषदनोष्ट्रनिषदनसमसंस्थानभेदाद्दशविधम्
"पादाङ्गुष्ठौ निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु। ऊर्वो-
रुपरि विप्रेन्द्र! कृत्वा पादतले उभे। पद्मासनं भवेदे-
तत् सर्वेषामभिपूजितम्" इत्यादिना याज्ञवल्क्यः पद्मा-
सनादिस्वरूपं निरूपितवान् तत्सर्वं ततएवावगन्तव्यम्।
तस्मिन्नासनस्थैर्ये सति प्राणायामः प्रतिष्ठितो भवति।
स च श्वासप्रश्वासयोर्गतिविच्छेदस्वरूपः तत्र श्वासो नाम
बाह्यस्य वायोरन्तरानयनम्। प्रश्वासः पुनः कौष्ठ्यस्य व-
हिर्निःसारणम्। तयोरुभयोरपि सञ्चरणाभावः प्राणा-
यामः। ननु नेदं प्राणायामसामान्यलक्षणं तद्विशेषेषु
रेचकपूरककुम्भकप्रकारेषु तदङ्गतेरयोगादिति चेन्नैष
दोषः सर्वत्रापि श्वासप्रश्वासगतिविच्छेदसम्भवात् तथा हि
कौष्ठ्यस्य वायोर्बहिर्निःसरणं रेचकः प्राणायामः प्रश्वा-
सत्वेन प्रागुक्तः। बाह्यवायोरन्तर्धारणं पूरकः यः
श्वासरूपः। अन्तस्तम्भवृत्तिः कुम्भकः यस्मिन् जलमिव
कुम्भे निश्चलतया प्राणाख्यो वायुरवस्थाप्यते। तत्र सर्वत्र
श्वासप्रश्वासद्वयगतिविच्छेदोऽस्त्येवेति नास्ति शङ्कावका-
शः। तदुक्तं "यस्मिन् इति श्वासप्रश्वासयोर्गतिविच्छेदः

प्राणायामः" इति । स च वायुः स्वयोदयमारभ्य सार्द्ध-घटिकाद्वयं घटीयन्त्रस्थितघटभ्रमन्यायेन एकैकस्यां नाड्यां भवति एवं सत्यहर्निशं श्वासप्रश्वासयोः षट्शताधिकैकविंशतिसहस्राणि जायन्ते । अतएवोक्तं मन्त्रसमर्थकरहस्यवेदिभिरजपामन्त्रसमर्थने "षट्शतानि नमेशाय षट्सहस्रं स्वयम्भुवे । विष्णवे षट्सहस्रञ्च षट्सहस्रं पिनाकिने । सहस्रमेकं गुरवे सहस्रं परमात्मने । सहस्रमात्मने चैवमर्पयामि हतं जपम्" इति तथा नाडीसञ्चरषट्शायां वायोः सञ्चरणे पृथिव्यादीनि तत्त्वानि वर्णविशेषवशात् पुरुषार्थाभिलाषुकैः पुरुषैरवगन्तव्यानि । तदुक्तमभियुक्तैः "सार्द्धं घटीद्वयं नाडी रेकैकार्द्धोदयात् वहेत् । अरघट्टघटीभ्रान्तिन्यायो नाड्योः पुनः पुनः । प्रतानि तस्य जायन्ते निश्वासोच्छ्वासयोर्नव । सप्तघट्टकुहिकैः २१६०० सङ्ख्याहोरात्रे भवेत् पुनः । षट्त्रिंशद्गुरुवर्णायां या वेला भवने भवेत् । या वेला भवतो नाड्यन्तरे सञ्चरतो भवेत् । प्रत्येकं पञ्च तत्त्वानि नाड्योश्च वहमानयोः । वहन्त्यहर्निशं तानि ज्ञातव्यानि यतात्मभिः । अर्द्धं वह्निरधस्तोयं तिरश्चीनः समीरणः । भूमिरर्द्धपुटे व्योम सर्वत्रं प्रवहेत् पुनः । वायोर्वक्त्रेरपां पुच्छ्या व्योमसत्त्वं वहेत् क्रमात् । वहन्त्योरुभयोर्नाड्योर्ज्ञातव्योऽयं यथाक्रमम् । पुरुष्याः पञ्चाशत्पञ्चाशत्पञ्चाशत्

"ऋतम्भरा तत्र प्रज्ञेति"। ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्य्येत्याख्याद्यते तत्र स्थितौ द्वार्यं गति द्वितीयस्य योगिनः या प्रज्ञा भवतीत्यर्थः। चत्वारः खलु योगिनः प्रसिद्धाः प्रथमकल्पिको मधुमतिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति। तत्राभ्यासे प्रवृत्तिमात्रज्योतिः प्रथमः न स्वेन परचित्तादिगोचरप्रागल्भं ज्योतिर्वशीकृतमित्युक्तं भवति। ऋतम्भरप्रज्ञो द्वितीयः, भूतेन्द्रियजयो तृतीयः परवैराग्यसम्पन्नश्चतुर्थः। मनोजवित्वादयो मधुमतीकसिद्धयः। तदुक्तं "मनोजवित्वं विकरणभावः प्रधानजयश्चेति"। मनोजवित्वं नाम कायस्य मनोवदुत्तमो गतिलाभः विकरणभावः कायनिरपेक्षाणामिन्द्रियाणामभिमतदेशकालविषयापेक्षस्थितिलाभः, प्रधानजयः प्रकृतिविकारेषु सर्वेषु वशित्वम्। एताश्च सिद्धयः करणपञ्चकस्वरूपजयात् तृतीयस्य योगिनः प्रादुर्भवन्ति यथा नयुन एकदेशोऽपि चलते तथा प्रत्येकमेव ताः सिद्धयः स्वदन्त इति मधुमतीकाः। सर्वभावाधिष्ठातृत्वादिरूपाभिधोका सिद्धिः। तदाह "सत्त्वपुरुषान्यताख्यातिमात्रप्रतिलम्भे सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं चेति"। सर्वेषां अवस्थाभावानां गुणपरिणामरूपाणां भावानां स्वाभिव्यक्तिक्रमेण सर्वभावाधिष्ठातृत्वं तेषामेव ज्ञानोदिताभिव्यक्तिधर्मित्वेन स्थितानां विवेकज्ञानं सर्वज्ञातृत्वम्। तदुक्तं "विशोका वा ज्योतिष्मतीति"। सर्वदेशिप्रत्यक्षमपि परं वैराग्यमाश्रितस्य ज्ञानादिगुणानां क्लेशानां निरोधसमर्थो निर्बीजः समाधिः असम्प्रज्ञातपदवेदनीयः संस्कारशेषताख्यपदेभ्यः चित्तस्थावस्थाविशेषः। तदुक्तं "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः इति। एवञ्च सर्वतो विरक्तस्यानन्तस्य तस्य पुरुषार्थैरेव क्लेशबीजानि च निर्दग्धप्रायाणि बीजकल्पानि प्रकृतिगतसत्त्वं विधुराणि मनसा सार्द्धं प्रलयं भजन्ति। तदेतेषु प्रलीनेषु चित्तसत्त्वविवेकख्यातिपरिणामवशात् कार्यकारणात्मकानां प्रधानेजयः चित्तशक्तिस्वरूपप्रतिष्ठा पुनर्बुद्धितत्त्वाभिव्यक्तिविधुरा कैवल्यं भजते इति। सिद्धिद्वयी च सूत्रिरुक्ता पतञ्जलिना "पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"। न चात्मनि सत्यपि कस्मान्न जायते जन्तुरिति वक्तव्यं कारणाभावात् कार्याभाव इति प्रमाणसिद्धार्थे नियोगानुयोगयोरयोगात्। अपरथा कारणाभावेऽपि कार्यजन्मने अभिवेधादयोऽन्यादिभ्यो भवेयुः। तथा चानुपपन्नार्थतायामाख्यातो लौकिक उपपन्नार्थो भवेत्। तथा च श्रूयते "अन्नो भवि-ष्यविध्यसमनकुलिरभावयत् (अधितवान्)। अधीवस्तं प्रत्यसत्त्वत् (पिनद्धवान्) तमजिह्मोऽभ्यदृणवत्" (स्तुतवानिति) यावत्। एवञ्च चिकित्साशास्त्रवद्योगशास्त्रं चतुर्व्यूहं यथा चिकित्साशास्त्रं रोगो रोगहेतुरारोग्यं भेषजमिति तथेदमपि संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति। तत्र दुःखमयः संसारो हेयः, प्रधानपुरुषयोः संयोगो हेयहेतुः, तस्यात्यन्तिकी निवृत्तिर्हानं तदुपायः सम्यग्दर्शनम्। एवमन्यदपि शास्त्रं यथायथं चतुर्व्यूहमूहनीयमिति सर्वमवदातम्"।

पतत् त्रि॰ पत–शतृ वा॰ अति वा। १पतनकर्त्तरि २पक्षिणि पु॰ अमरः।

पतत्र न॰ पत–करणे अत्रन्। वाहने उज्ज्वलदत्तः।

पतत्रि पु॰ पत–अत्रिन्। खगे उज्ज्वल॰ पतत्री पतङ्गवः।

पतत्त्र पु॰ पतत्रं त्रायते त्रै–क। पक्षिणां पक्षे (पाखा) अमरः। [हरिवं॰ २८४५ श्लो॰।

पतत्रिकेतन पु॰ पतत्री केतनं यस्य। गरुड़ध्वजे विष्णौ

पतत्रिन् पु॰ पतत्र+अस्त्यर्थे इनि। खगे अमरः।

पतद्ग्रह पु॰ पतत् शलाकादिभ्यः अवत् अलादि ग्रहाति ग्रह–अच्। (पिकदानी)पात्रभेदे अमरः। अच् उप॰स॰। पतद्ग्राह तत्रार्थे हेमच॰। [भरतः।

पतङ्गीक पु॰ पतन् पक्षी भीरुर्यस्य। क्रौञ्चे जलभेदे

पतन न॰ पत–भावे ल्युट्। १अधःसंयोगानुकूलशब्दे २पातित्वे च "द्विजातिकर्मभ्योऽन्यानि धनमयं। परत्र चाविद्विस्तमेके नरकम्" मनुः। पतितशब्दे उदाहृतम् "विहितस्यानमनुष्ठानात् निन्दितस्य च सेवनात्; अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" भाग॰।

पतनीय त्रि॰ पत–अनीयर् पतनमर्हति छ वा। १पाप्ते २पतनार्हे च त्रि॰। भा॰ करणे अनीयर्। ३पातके न॰

पतम पु॰ पतत्यस्मात् अर्शस्त्वे अत–अप्। अर्शे रुग्भेदे। [शीलिते।

पतयालु त्रि॰ पति–आलु–तत्पर्युदासेन न विशेषः।

पतयिष्णु पति–वा॰ इष्णुच् न विशेषः। पतनशीले भा॰ १।१६२।११। उदा॰।

पतर त्रि॰ पत–वा॰ अरन्। गन्तरि ऋ॰ २।२।४ उद्दा॰

पतरु त्रि॰ पत–वा॰ अरु। पतनशीले ऋ॰ १।१८।७ उदा॰

पतस त्रि॰ पत–असच्। १खगे २पक्षे ३पतङ्गे च ४आदि॰

पताका स्त्री पत्यते ज्ञायते योधोऽनया पत–नि० ण्वुल्। त्रिकोणाकारे १पटादिनिर्मिते वस्त्रखण्डभेदे। मण्डपे देवपताकाकथनं हेमा० दा० मत्स्यपु० उक्तं यथा "सप्तहस्ताः पताकाः स्युर्विंशत्यङ्गुलविस्तृताः। दशहस्ताः पताकानां दण्डाः पञ्चांशवेधिताः। सिन्दूरा कर्बुरा धूम्रा सूक्ष्मा मेघनिभा। हरिता पाण्डुवर्णा च शुभ्रा पूर्वादितः क्रमात्। एवं वर्णाः शुभाः कार्याः पताकाः पाकशासन!"। "लोकेशवर्णास्त्रयुताः पताकाः शैवेन्दुदेव्यां यतिकाश्च मध्ये। चित्रं ध्वजं दिक्करदैर्ध्यवंशं त्रिदोलतप्रान्तकिङ्किणीकम्। श्वेताश्च नवमीं पूर्वैशानयोर्मध्यतो दुधः। विन्यसेत्तु पताकाश्च ध्वजांश्चा अपि पूर्वतः" कृष्णोक्तेः। "लोकेशानां लोकपालानां ये वर्णाः पीतादयः पूर्वलोकोक्ताः, नैरिकादिस्थितवस्त्रग्रन्थिक्लिष्टकृष्णकृष्णपाण्डुशुभ्रादिभूतानि (तेषामस्त्राणि) तैर्युक्ताः सप्तहस्तदीर्घा एकहस्तविस्तृताः पताका दशहस्तवंशग्रीवैगाः चित्रं ध्वजं त्रिहस्तविस्तृतं प्रान्ते वर्तमानकिङ्किणीकं ग्रीवे च चामरं दशहस्तदैर्घ्यवंशञ्च ताडयं तं मध्ये विन्यसेत् पूर्वादितः पताकाश्च विन्यसेदित्युत्तरश्लोकेनान्वयः नवमीं पताकां पूर्वैशानयोर्मध्ये श्वेतां ताडयीमेवाचार्यकुरुते विन्यसेत् ध्वजांश्चा अपि पताकाश्च पूर्वादिक्रमेण भूमौ पञ्चांगरोपणेन विन्यसेदिति"। अस्याः "त्रिकोणा वै पताकाः स्युश्चतुष्कोणाध्वजाः स्मृताः" विधा० उक्तेः त्रिकोणाकारता बोध्या। २सौभाग्ये ३नाटकाङ्गभेदे पताकास्थानकशब्दे दृश्यम् पिङ्गलोक्ते वक्ष्यमाणमेरुपङ्क्तिस्थतत्तत्कोष्ठस्याङ्कनिर्धारितस्वरूपभेदानां प्रथमत्वद्वितीयत्वादिना ४प्रातिस्विकरूपनिर्धारणे ५निर्धारणाङ्कसमूहे वा यथोक्तं पिङ्गलवृत्तीकयोः

"अस्तकवर्णमात्राप्रस्तारयोरेतावद्गुरुलघुयुक्तो भेद एतावत्संख्याक इति मेरुपङ्क्तिवर्तितत्तत्कोष्ठस्याङ्कनिर्धारितस्वरूपसंख्यानां भेदानां प्रथमत्वद्वितीयत्वादिप्रातिस्विकरूपस्य निर्धारणं निर्धारणाङ्कसमूहो वा पताका सा च द्विधा वर्णमात्राभेदात्। तत्र प्रथमं वर्णपताकानिर्माणप्रकारमाह उद्दिष्टेति"टी०। "उद्दिष्टा मरि अङ्का दिज्जसु पुव्वङ्के पर भरण कविज्जसु। पाओण अन्त पड़िअम पत्थरसङ्क्ख पताआ करिज्जसु" पि०मू०"उद्दिष्टमङ्कानङ्कान् देहि पूर्वाङ्कस्य परस्मिन् भरणं कुरुष्व। प्रथमप्राप्तमङ्कं परित्यज्य प्रस्तारसंख्यं पताकां कुर्विति"संस्कृतम्। "उद्दिष्टाङ्कसदृशानङ्कान् देहीत्यर्थः पूर्वमेकमङ्कं दत्त्वा उत्तरोत्तरं द्विगुणितान् द्विचतुरष्टादिकानङ्कान् यथाप्रस्तारसंख्यं स्थापयेत्यर्थः। ततः पूर्वाङ्कस्य परस्मिन्नुत्तरवर्तिन्यङ्के प्रस्तारसंख्यं प्रस्तारस्य संख्या यस्यां क्रियायां तदुयथा स्यात्तथा भरणं योजनं कुरुष्वेत्यर्थः। प्रस्तारसंख्यमित्यस्य योजनकरणविशेषणत्वेन यदि कुत्रचित् पूर्वाङ्कस्य पराङ्कयोजने प्रस्तारसंख्यातोऽधिका संख्या भवेत् तत्र तत्र याञ्चमित्याया-तम्। एवं कृते प्रथमप्राप्तमङ्कं परित्यज्य तेन यत्र प्रथमप्राप्ताङ्क एव कुत्रचित् पूर्वाङ्कस्य योजननिष्पन्नाङ्कस्तत्र च न याञ्च इत्यभ्यावातम्। एवं प्रकारेण वर्णानां पताकां कुरुष्वेत्यर्थः। अत्र यः पूर्वाङ्कः यत्र पराङ्के प्रथमं योज्यते तेन योजननिष्पन्ना अङ्काः तत्पराङ्कादयोऽधोधःस्थाप्या इति नियमो गुरूपदेशतो बोध्यः। पूर्वपरशब्दादेरपेक्षाबोधजनकत्वात् क्रमशोऽपेक्षाकृतं पूर्वापरत्वं भवतीत्यपि। एतद्दर्शनं वक्ष्यमाणमेरुप्रस्तारे चतुरष्टरहस्य प्रथमकोष्ठस्थितिकाङ्कसूचितः चतुर्गुरुक एको भेदो द्वितीयकोष्ठस्थितचतुरङ्कसूचितः त्रिगुरुकाश्चत्वारो भेदास्तृतीयकोष्ठस्थचतुरङ्कसूचिता द्विगुरुकाः षड्भेदाश्चतुर्थकोष्ठस्थचतुरङ्कसूचिता एकगुरुकाश्चत्वारो भेदाः पञ्चमकोष्ठस्थाङ्कसूचितः सर्वलघुक एको भेदः। पञ्चकोष्ठस्थाङ्कयोजननिष्पन्नाङ्को एकसंख्या इति; तत्र तत्तत्संख्यगुरुलघुकाः भेदा यथानिर्दिष्टप्रस्तारकरणे कतमे कतमे इति प्रश्ने प्रथमम् एकं कोष्ठं कर्तव्यं ततश्चतुःसंलग्नमेकं कोष्ठं कृत्वा तदधःकोष्ठद्वयं कार्यं ततो द्वितीयपङ्क्तिवत् तृतीयपङ्क्तौ कोष्ठचतुष्टयं कृत्वा तदधः कोष्ठद्वयं ततस्तृतीयपङ्क्तिस्थितकोष्ठषट्कमध्यादुत्सारितकोष्ठचतुष्टयसंलग्नं कोष्ठचतुष्टयं कार्यं ततः चतुर्थपङ्क्तिस्थितकोष्ठचतुष्टयमध्योपरितनैकसंलग्नमेकं कोष्ठं कार्यमेवं त्रोड्य कोष्ठानि सम्पद्यन्ते चतुरष्टरहस्ते तेषामेवमेवत्वात् नहु क्रममेतेनैव क्रमेण कर्तव्यम् अन्यक्रमस्यापि सम्भवादिति चेन्न मेरुस्थितानां चतुरष्टरहस्ते पञ्चानां कोष्ठानां कोष्ठस्थाङ्कसूचितानाम् एकचतुःषट्चतुरेककोष्ठानां क्रमशः पङ्क्तिरूपेण विन्यासेन तथास्थापनौचित्यात् ततः प्रथमकोष्ठादिक्रमेण एकद्विचतुरष्टकोष्ठयाङ्कान् स्थापयेत्। ततः प्रथमकोष्ठस्थैकाङ्कस्य सर्वेभ्यः पूर्ववर्तित्वात् तेन सह शङ्करपूर्णिद्वङ्के-

न योजितत्रयाङ्को द्व्यङ्कस्याधः स्याप्यः ततः तेन सह चतुरष्टाङ्कयोजननिष्पन्नपञ्चाङ्कनवाङ्कौ त्र्यङ्कादधोऽधः-स्थापौ। तेन सह षोडशाङ्कस्य योजने प्रस्तारसंख्या-धिक्याच्च तत्कर्त्तव्यम्। तथा च तेन सह कस्यचित् पराङ्कस्य योजने प्रथमप्राप्ताङ्क एवायातीति प्रथम-कोष्ठस्थमङ्कं त्यक्त्वा द्वितीयकोष्ठस्थं द्व्यङ्कं तदानीं सर्वेभ्यः पूर्वत्वेन स्वीकुर्यात्। तथाच तेन पूर्वाङ्केन द्व्यङ्केन तदुत्तरवर्त्तितृतीयकोष्ठस्थचतुरङ्कस्य योजननिष्पन्नषडङ्क-चतुरङ्कादधो विन्यासः ततो द्वितीयकोष्ठपङ्क्तिस्थद्व्य-ङ्काधःस्थिततत्र्यङ्केन पूर्वेण चतुरङ्कस्य योजननिष्पन्नः सप्ताङ्कः तृतीयकोष्ठस्थषडङ्कादधः स्थाप्यस्ततः द्वितीय-पङ्क्तिस्थतृतीयकोष्ठस्थपञ्चाङ्केन सह चतुरङ्कस्य योजने जाते पूर्वप्राप्ताङ्कलाभापत्तेस्त्याग्यः। ततः तृतीयपङ्क्तित उत्तरवर्त्तिचतुर्थपङ्क्तिप्रथमकोष्ठस्थाष्टाङ्कस्य योजन-निष्पन्नो दशाङ्कः तृतीयपङ्क्तौ पञ्चमकोष्ठे स्थाप्यः द्वितीय-पङ्क्तिद्वितीयकोष्ठस्थत्र्यङ्केनाष्टाङ्कस्य योजननिष्पन्नैका-दशाङ्कस्तृतीयपङ्क्तौ षष्ठकोष्ठे स्थाप्यः। प्रथमप्राप्ताङ्क-लाभापत्त्या द्वितीयपङ्क्तित्यागः। ततस्तृतीयपङ्क्तिस्थ-चतुःषट्सप्ताङ्कैकत्रवर्त्तिदशाङ्कस्य क्रमशः योजननि-ष्पन्नद्वादशचतुर्दशपञ्चदशाङ्काः क्रमशस्तुर्थपङ्क्तिद्वि-तीयादिकोष्ठेष्वधोऽधोऽस्थाः।

चतुरस्रप्रस्तारे कथाः कोष्ठदर्शनम्।

चतुर्गुरुः१	३गुरुः३	२गुरुः६	१गुरुः४	चतुर्लघुः१	
३	२	४	८	१६	तत्तत्प्रस्तारः
	१	६	१२		ऽ ऽ ऽ ऽ १मः
	५	७	१४		। ऽ ऽ ऽ २यः
	९	१२	१५		ऽ । ऽ ऽ ३यः
		१०			। । ऽ ऽ ४र्थः
		११			ऽ ऽ । ऽ ५मः
अत्रत्याङ्काश्चतुस्त्रिचित					। ऽ । ऽ ६ष्ठः
संख्यापूरणार्थाः					ऽ । । ऽ ७मः
अस्याश्च पताकाकारत्वात्					। । । ऽ ८मः
पताकासंज्ञत्वमेवं माला					ऽ ऽ ऽ । ९मः
पताकाया अपि ।					। ऽ ऽ । १०मः
					ऽ । ऽ । ११यः
					। । ऽ । १२यः
					ऽ ऽ । । १३यः
					। ऽ । । १४यः
					ऽ । । । १५यः
					। । । । १६यः

मालापताका तु तत्रैवोक्ता यथा "यद्यमाप्यमालामेरुस्त-तत्तत्संख्याकभेदानां प्रथमत्वद्वितीयत्वादिनिर्णयाय मालापताकानिर्माणमाह उद्दिष्टेति" टी०। "उद्दिष्ट सरि अङ्का ठापय वामावर्त्तेण परङ्क षट्टय लोपङ्क। एक-लोपे एकगुरु जाणह दुइतिचलोपे दुइतिचगुरु जाणह। मत्तापताकां पिङ्गलो गायदि जो पढमं पावइ स परं बोधयइ" मू० "उद्दिष्टवद्दशानङ्कान् स्थापय वामावर्त्तेन परस्त्रिलीत्वा लोपय। एकलोपे एकगुरुं जा-नीत द्विलिलोपे द्वितान् गुरून् जानीत"। "मालापताकां पिङ्गलो गायति यः प्रथमं प्राप्नोति स परं बोधयतीति" वक्ष०। "उद्दिष्टाङ्कसदृशान् चक्रचक्रारोद्दिष्टपूर्वाङ्कयुगल-युतपराङ्कान् प्रस्तारसंख्यं तत्सदृशान् एकद्वित्रिपञ्चाष्ट-त्रयोदशैकविंशचतुस्त्रिंशदित्येवंरूपान् स्थापय उत्तरो-त्तरमिति शेषः। वामावर्त्तेन प्रतिलोमविधिना सर्वा-न्तिमाङ्काव्यवहितपूर्वाङ्कमारभ्येति यावत् नीत्वा स्त्रीत्वा परस्त्रिनू सर्वान्तिमाङ्के लोपय तत्र्यूनतां नयत सर्वान्ति-माङ्के तदव्यवहितपूर्वाङ्कमारभ्य पूर्वपूर्वाङ्काः क्रमेण लोप्या इत्यर्थः। एकलोपे एकाङ्कलोपे एकगुरुं जानीत द्वि-त्रिलोपे द्वितान् गुरून् जानीत। एकैकपूर्वाङ्कलोपे येऽङ्का अवशिष्यन्ते ते एकगुरुयुक्तभेदज्ञापकाः पूर्वाङ्कद्वयलोपे येऽवशिष्यन्ते ते गुरुद्वययुक्तभेदज्ञापका इत्यर्थः। एवंप्रका-रेण मालापताकां पिङ्गलो गायति कथयति यः प्रथमं प्राप्नोति गुरूपदेशाज्ज्ञातवानिति स परं बोधयतीत्यर्थः। अत्र च एकत्रिद्वित्रसंख्याविशिष्टः प्रथमं सर्वान्तिमे लोप्यते तदव्यवहितपूर्वाङ्कमारभ्यावशिष्टाङ्काःक्रमेणाधोधः स्थाप्या इति यदङ्कद्वयलोपे शून्यमवशिष्यते पूर्वप्राप्ताङ्को या लभ्यते तदङ्कद्वयलोपो न कार्य इति नियमस्तयं गुरू-पदेशादवोध्यम्। अथ तस्मिन्नर्थे षट्चक्रपताकाकथनम् यामदक्षिणयोरङ्गुलपञ्चकपरिमाणमूर्ध्वाधोरेखाद्वयमङ्गु-ष्ठाङ्गुल्यन्तरितं कर्त्तव्यं तत अङ्गुरेखया पार्श्वयोर्मेखलं विधेयमेवमेकं दीर्घकोष्ठं तत्रैकाङ्गुलपरिमितमन्तरं

तद्भोर्द्ध रेखामारभ्याऽन्यरेखापर्य्यन्तं षडुरेखाः क्रमेण दत्त्वा कोष्ठषट्कक्षत्तरोत्तरपरस्परसंश्लिष्टं विधेयं तत्रोद्दिष्टाङ्कसंख्याः षट्कलप्रस्तारे एकद्वित्रिपञ्चाष्टत्रयोदशेति पूर्वोक्ताः पूर्वयुगलैक्यक्रियानिष्पन्नोत्तरोत्तराः षडङ्काः क्रमेण स्थाप्यास्तद्यथः षट्कलभेदस्थितकोष्ठचतुष्टयसत्तरोत्तरसंश्लिष्टं कार्य्यं ततो भेदद्वितीयकोष्ठस्थित षड्ङ्कसूचितषड्भेदानां द्वितीयकोष्ठमेकं तद्यथ ऊर्द्धाधः संश्लिष्टं कोष्ठपञ्चकमिति कोष्ठषट्कमेवं भेदतृतीयकोष्ठे पञ्चाङ्कसत्त्वात् तृतीयकोष्ठमेकं तद्यथः ऊर्द्धाधः संश्लिष्टकोष्ठचतुष्टयमिति कोष्ठपञ्चकमवशिष्टकोष्ठद्वयस्याधो भेदौ एकाङ्कसद्भावात् न कोष्ठान्तरं कार्य्यम्। ततः सर्वान्तिमकोष्ठोद्दिष्टशेषाङ्कस्यान्तिमकोष्ठे स्थापनं ततः सर्वान्तिमत्रयोदशाङ्कमर्द्धं तद्व्यवस्थिताष्टाङ्कलोपे सर्वरितं पञ्चाङ्कं वामावर्त्तेनोपान्तिमोपरिकोष्ठे स्थापयेत् ततोऽष्टाङ्कलोपे पूर्वप्राप्ताङ्कलाभापातान्न लोपः कार्य्यः। किन्तु अष्टाङ्कपूर्वस्थितपञ्चाङ्कस्य त्रयोदशाङ्के लोपं कृत्वा उपान्तिमकोष्ठोपरितनकोष्ठाधःकोष्ठे सर्वरितमष्टाङ्कं स्थापयेत् ततस्त्र्यङ्कस्य त्रयोदशाङ्के लोपं कृत्वा सर्वरितं द्वादशाङ्कं तदधःकोष्ठे स्थापयेत् ततो द्व्यङ्कलोपे सर्वरितमेकादशाङ्कं तदधःकोष्ठे संस्थाप्य एकाङ्कलोपे सर्वरितं द्वादशाङ्कं तदधःस्थापयेत् ततस्त्रयोदशाङ्के लोपकरणे पूर्वाङ्कलाभापातात् न तत् कार्य्यम्। ततः अष्टसप्तैत्यङ्कद्वयलोपे शून्यावशेषात् न तत्कार्य्यम्। अष्टत्रीत्यङ्कद्वयलोपे सर्वरितं द्व्यङ्कं द्वितीयकोष्ठोपरितनकोष्ठे स्थापयेत् ततो द्व्यष्टेत्यङ्कद्वयलोपे सर्वरितत्र्यङ्कस्तदधःस्थाप्यस्तत एकाष्टेत्यङ्कद्वयलोपे सर्वरितचतुरङ्कस्तदधःकोष्ठे स्थाप्यः। ततः अष्टाङ्कघटितद्व्यङ्कलोपासम्भवात् पञ्चाङ्कघटितद्व्यङ्कलोपः कार्य्यस्तत्र पञ्चत्रीत्यङ्कद्वयलोपे पूर्वप्राप्तपञ्चाङ्क एवोर्वरितः स्यात् अतः द्विपञ्चेति द्व्यङ्कलोपे सर्वरितं षड्ङ्कं तदधःकोष्ठे स्थापयेत्। एकपञ्चेत्यङ्कद्वयलोपे सर्वरितं सप्ताङ्कस्तदधःकोष्ठे स्थाप्यस्ततः पञ्चाङ्कघटितद्व्यङ्कलोपे पूर्वप्राप्ताङ्कलाभापातात् न तत्कार्य्यं किन्तु त्रिघटिताङ्कद्वयलोपस्तत्र त्रिद्वीति द्व्यङ्कलोपे पूर्वप्राप्ताङ्कलाभापातात् न तत्कार्य्यं तत एकत्रीत्यङ्कद्वयलोपे सर्वरितनवाङ्कं तदधःकोष्ठे स्थापयेत्। ततः कोष्ठाभावात् एकद्वीत्यङ्कद्वयलोपे सर्वरितदशाङ्कस्य प्राप्तत्वान्न द्व्यङ्कलोपः। तत एकत्र्यष्टेत्यङ्कद्वयलोपे सर्वरितमेकाङ्कं प्रथमे कोष्ठे स्थापयेदिति। तत्र भेदप्रथमकोष्ठस्थैकाङ्कसूचितषट्कलवर्गसुरङ्गभेदस्यात्तत्प्रथमकोष्ठस्थैकाङ्के न प्रथमत्वं सूचितं तत्रङ्कलोपे त्रिगुरुकत्वाभिधानात्। एवं भेदद्वितीयकोष्ठस्थषड्ङ्कसूचितानां षट्कलप्रस्तारस्य द्विगुरुकभेदानां षष्ठां द्वितीयतृतीयत्वादिनिर्णयपताकाद्वितीयकोष्ठस्थाङ्कषट्केन सूचितद्व्यङ्कलोपे द्विगुरुकत्वाभिधानात्। एवं भेदपञ्चाङ्कसूचितानां पञ्चानां षट्कलैकगुरुकभेदानां पताकातृतीयकोष्ठस्थाङ्कपञ्चकेन पञ्चमत्वाष्टमत्वेत्यादि निर्णीतम् एकाङ्कलोपे एकगुरुकत्वाभिधानात्। सर्वान्तिमे त्रयोदशाङ्के अङ्कलोपपूर्वकत्रयोजनासम्भवात् भेदशेषकोष्ठस्थैकाङ्कसूचितषट्कलस्यैकस्य सर्वलघुकभेदस्य पताकान्त्यप्रथमकोष्ठस्थत्रयोदशाङ्के न त्रयोदशत्वं निर्णीतमेवमन्यत्रापि।

षट्कलप्रस्तारे तत्सङ्कपदर्शनम्।

१	२	३	५	८	१२	षट्कलप्रस्तारः
त्रिगुरुः१	द्विगुरुः६		एकगुरुः५	सर्वलघुः१		ऽ ऽ ऽ १भः
१	२		५		१२	। । ऽ ऽ २यः
	२		८			। ऽ । ऽ ३यः
	४		१०			ऽ । । ऽ ४र्थः
	६		११			। । । । ऽ ५भः
	७		१२			। ऽ ऽ । ६तः
	८					ऽ । ऽ । ७भः
अन्त्याङ्कास्तत्सूचित						। । । ऽ । ८भः
संख्यापूरणार्थाः।						ऽ ऽ । । ९भः
						। । ऽ । । १०भः
						। ऽ । । । ११भः
						ऽ । । । । १२भः
						। । । । । । १३यः

पताकाख्यानक न० सा०द० उक्ते नाटकाङ्गभेदे तद्लक्षणभेदादिकं तत्रोक्तं यथा

"यत्रार्थे चिन्तितेऽन्यस्मिन् तद्विङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकाख्यानकन्तु तत्" तद्भेदानाह सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः। पताकाख्यानकमिदं प्रथमं परिकीर्त्तितम्" यथा रत्नावल्यां "यावत्र दृत्तेयमिति" राजा यदा तत्कण्ठपाशं मोचयति तदा तद्भूत्वा "सागरिकेयमिति" प्रत्यभिज्ञाय "कथं प्रिया मे सागरिका अकस्मात्समागतिमात्मसिन्यादि। फलकृपार्थसम्पत्तिः पूर्वोक्तेवा उपचारात्तिशयात्तु कुलवती उद्धृता। "यत्र सातिशयत्वेन नायकस्य समागमः

पताकाख्यानकमिदं द्वितीयं परिकीर्तितम्" । यथा वेण्यां भीमः । "रक्तप्रवाहितमुखः क्षतविग्रहाश्च सख्या भवन्तु कुरुराजसुताः सभृत्याः" । अत्र रक्तादीनां रुधिरशरीरार्थहेतुत्वस्वेच्छयेन बीजार्थप्रतिपादनात् नेतृरसङ्गसप्रतिपत्तौ सत्यां द्वितीयं पताकाख्यानकम् । "अर्थोपक्षेपकं यत्तु बीजं सविनयं भवेत् । श्लिष्टप्रश्नुत्तरोपेतं तृतीयमिदमुच्यते" । बीजमव्यक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रश्नुत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकाख्यानकम् । यथा वेण्यां द्वितीयेऽङ्के । कञ्चुकी । देव ! भग्नं भग्नम् । राजा । केन । कञ्चु । भीमेन । राजा । कस्य । कञ्चु । भवतः । राजा । क्वाः किं प्रलपसि । कञ्चु । अभयं देव ! नहु ब्रवीमि भग्नं भीमेन भवतः । राजा । धिक् दुष्टापसद ! कोऽयमद्य ते व्यामोहः । कञ्चु । देव न व्यामोहः सत्यमेव । "भग्नं भीमेन भवतो महता रथकेतनम् । पातितं किङ्किणीजालबद्धाक्रन्दमिव क्षितौ" । अत्र दुर्योधनोऽभङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपकम् । "द्यूतं वचनविन्यासः सुश्लिष्टः काव्ययोजितः । प्रधानार्थान्तराक्षेपी पताकाख्यानकं परम्" । यथा रत्नावल्याम् "सहामोत्कलिकां विपाण्डुरदलां प्रारब्धतृष्णां सखादायासं मनोज्ञमैरविरलैरातन्वतीमात्मनः । अद्योद्यानवतामिमां समदनां नारीमिवान्यां भुवं पश्यन् कोपविपाटलद्युतिमुखं देव्याः करिष्याम्यहम्" । अत्र भाव्यर्थः सूचितः । एतानि चत्वारि पताकाख्यानकानि कचिन्मुखार्थं कचिदङ्गार्थमपि सर्वसन्धिषु भवन्ति । काव्यकर्तॄरिच्छावशाद् भूयोऽपि भवन्ति" ।

पताकिक त्रि० पताका अस्यास्ति ठन् । पताकायुक्ते ।

पताकिन् त्रि० पताका+अस्त्यर्थे ठन् । पताकायुक्ते अन्यत्र "अहविशेषवेधवशात् तदीयदण्डपदादिलग्नतः फलविशेषसूचके चक्रभेदे तत्स्वरूपादिकं ज्यो०त० उक्तं यथा

"तिर्यग्गूर्ध्वगता रेखास्तिस्रोऽष्टौ पताकया । युताः कार्या वेधविदा सर्वसङ्गतरेखया । दक्षस्योत्तररेखातो वामं मेषादिराशयः । मघाष्टयुग्मविंशाश्च षड्दशेन्द्राग्निसागराः । कर्कटानृमीनपर्यन्तमङ्का देया यथाक्रमम् । बालस्य जन्मकालीनपञ्चलग्नमजादिषु । विन्यस्य चिन्तयेत् प्राज्ञः शुभाशुभं यथाक्रमम् । शुभदण्डयोगवेधैर्लग्नाद्बालस्य शोभनम् । पापदण्डयोगवेधैराग्यङ्गाद्विद्विकालवित् । बलाधिके दिनं, मध्ये मासो, हीने च हायनम् । कर्कीमीनधनुर्भ्यश्च हरिः कीटघटेन च । स्त्रियास्तौलिमृगाभ्याञ्च घटे मीनेन कन्यया । धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया । मीने कर्कितुलाभ्यां मीनस्त्रीधनुषा त्वजे । तुलाकर्किमृगैर्मेषे कीटकुम्भद्वयेषु च । सिंहवृश्चिक एतेषु वामदक्षिणसम्मुखे । राहुकेत्वर्कसौरारैः पापैर्विद्धो युतोऽशुभः । तदन्यैर्युतविद्धस्तु लग्नराशिः शुभप्रदः । एकोनविंशतिः कर्के सिंहे सप्तदशैव तु । षट्त्रिंशद्बलायाश्च षड्विंशतिस्तुलाधरे । वृश्चिके सिंहवज्ज्ञेयमूनत्रिंशच्चरासने । षड्विंशं मकरे ज्ञेयं, कुम्भे सप्तदश स्मृताः । नवयुग्मे तथा मीने मेषे षड् दशभिस्तथा । वृषभे च यथा सिंहे युग्मेऽङ्कुरलोचने । त्रिनयाङ्कादियं संख्या दिनमासाब्दनिर्णये । एकाङ्कात् द्विस्त्रिकाङ्काद्वा कचिद्विष्टेव सम्भवः । मारेशादर्द्धवामेषु राशयोः पञ्चषट्क्रमात् । अधिपाः सुर्यकाशस्य यथाकोष्ठे भवन्ति हि । रवीन्द्वेन्द्वङ्गुरुस्त्राजयभिज्ञरवयो निशि । रविशुक्रशनीयमनीव्यकुजभास्कराः । दिने, तुल्याः परेभ्यो तथा रात्रावपि ग्रहाः । पापदण्डे भवेद्विद्धिः शुभदण्डे शुभं भवेत् । शुभग्रहस्य दण्डे तु कर्मारम्भाच्छुभं भवेत् । आरम्भात् पापदण्डे तु कर्म निष्फलतां व्रजेत् । यस्यार्द्धयामस्यैव प्राग्दण्डः सप्तदाहृतः । षट्षट्परीत्य दण्डाश्च त्रयो रात्रौ मतास्तथा । आदित्ये भृगुजो बुधोऽपि च शशी, सोमे शनीज्यौ कुजो, भौमेऽर्कः सितसोमजौ, च शशिजे सोमः शनिर्भूपतिः । जीवेऽङ्गारशनी भृगुर्भगुसुते सौम्येन्दुमार्त्तण्डजाः । काले जीवशनीजतिग्मकिरणा रात्रौ च दण्डाधिपाः । यामाद्यैश्चियसंख्यातो द्वितीयस्तु तदर्द्धतः । तदर्द्धात् तु तृतीयः स्यात्तदर्द्धात् तु तुरीयकः । अङ्काभावे तु राहुः स्यात्तदङ्को वसुसंख्यकः । भग्नाङ्कस्य परित्यागाद्विना दण्डाधिपा यथा । रविदनुजबुधगुरोचन्द्रसुरासुराः कुजरविदनुजशशाः शेन्दुसुरासुराश्च । गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः शनिकुजरविदैत्या दण्डपाद्यर्द्धयामे" । दनुजो राहुः । अर्द्धयामे दिनार्द्धप्रहरे । शुभदण्डमाह । "शेषावर्कस्य दण्डौ सततशुभकरावादिशेषौ तथेन्दोः, शेषो दण्डः कुजस्याथ गुरुबुधयोराद्यमाद्यं

प्रशस्तम् । आदिर्दण्डस्तथैको भृगुकुजशनैश्चरैः सर्वकार्ये हि शस्तो दण्डाश्चत्वार एव क्वचिदपि समये नैव सौरेः प्रशस्ताः । प्रतिदण्डं पञ्चान्येषां ज्ञात्वा वाच्यं क्वचिच्छुभम् । रवौ च वेदा, वसवः सुधांशौ, कुजे च बाणाः शशिजे तथाङ्काः । शनाश्चतुर्दिक् च दृहस्पतौ स्याद्राहौ तुरङ्गा भृगुजे च रुद्राः । अशुभे दण्डसंयोगे सर्वत्र पुण्यवर्जिते । बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् । अशुभग्रहदण्डे तु सर्वत्र पापवर्जिते । बालस्य कुशलं सर्वं शुभैर्यदि समन्वितम् । अशुभो दण्डनाथो हि वेधश्चेत्तेन लभ्यते । मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् । पापस्य दण्डमाने तु तद्योगवेधवर्जिते । बालस्य कुशलं तत्र शुभैर्यदि समन्वितम् ।

वर्षपताकी तु केतुपताकायन्त्रे २२१६पृ०उक्तः तत्र द्रष्टव्यः

पतापत त्रि० पत–यङ्लुक्–अच् नि० । अतिशयपतनयुक्ते

पति पु०पा–इति । १भर्त्तरि २स्वामिनि च तत्स्त्रियां "पत्युर्नो यज्ञसम्बन्धे" पा० न ङीप् च पत्नी । पतिकृतयज्ञफलभागिन्याम् स्त्रियां "विभाषा सपूर्वस्य" पा० ट्टस्य पतिः ट्टपतिः ट्टपत्नी वा । बहुव्रीहावपि शूद्रः पतिर्यस्याः शूद्रपत्नी शूद्रपतिः । पतिशब्दस्य समास एव विसंज्ञा श्रीपतये श्रीपतेः इत्यादि असमासे तु न विसंज्ञा पत्या पत्ये इत्यादि आर्षे क्वचित् असमासेऽपि चित्वम् "स्त्रीषे वा पतौते पत्नी" पराशरः "सीतायाः पतये नमः" इत्यादि पतिसेवनप्रकारादिकं यथा

"अर्थं व्रतादिकं तस्या या भर्त्तुश्चापकारिणी । तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् । भर्त्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् । यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया । पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् । सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् । सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् । सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् । तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोडशीम् । सुप्रख्ये भारते वर्षे पतिसेवां करोति या । वैकुण्ठं स्वामिना सार्द्धं या याति ब्रह्मणः शतम् । विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् । अव्रतकृच्च प्रवासा या तत्फलं ब्रूयतां सति ! । कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ । ततो भवति चाण्डाली पतिपुत्रविवर्जिता" ब्रह्म० वै०प्र० ४२अ० । पतिसेवाप्रकारस्तु भा०व० २२२अ० द्रौपद्या सत्यभामां प्रति उक्तस्तत्र द्रष्टव्यः । अधिकम् उक्तं पतिव्रतायन्त्रे द्रष्टव्यम् ।

पतिंवरा स्त्री पतिं वृणोति वृ–अच् तुम् । १स्वयं पतिवरणकारिण्यां कन्यायाम् स्वयंवरायाम् । २कृष्णजीरके शब्दच० ।

पतिघातिनी स्त्री पतिं हन्ति हन–णिनि ङीप् । पतिनाशिकायां स्त्रियां तत्सूचकयोगश्च कर्कटे लग्ने कर्कटे चन्द्रे वा सौरत्रिंशांशजन्मेति वृ० जा० उक्तं यथा "लग्नचन्द्रा पतिघातिनी बहुगुणा शिखिन्यवाध्वीन्दुभे" भू० "इन्दुभे कर्कटे लग्ने तद्गते वा चन्द्रे भौमत्रिंशांशकजाता लग्नचन्द्रा स्त्रैरिणी वटेष्टव्यवहारिणी भवति सौरत्रिंशांशकजाता पतिघातिनी भवति" भट्टोत्पलः ।

पतिघ्न त्रि० पतिं हन्ति हन–"लक्षणे जायापत्योष्टक्" पा० टक् । पतिनाशकलक्षणे लक्षणभेदे स्त्रियां ङीप् । पतिघ्नी पाणिरेखा । विवाहात् प्राक् खेलादिकृतपिण्डाष्टकस्य कुमार्यै परीक्षार्थं दाने श्मशानजातमृत्पिण्डस्य कुमार्या पदचिह्ने तस्याः पतिहननफलसूत्रम् आश्व०गृ० १।५।६ "अष्टौ पिण्डान् कृत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं पदाक्रामेति" इति निरीक्षिता कुमारी यदि श्मशानादाहृतं पदं पदाक्रामति तदा पतिघ्नीति विद्यात् तदुक्तं तत्रैव हृद्यः "श्मशानात् पतिघ्नीति" ।

पतित त्रि० पत–णत्वर्थत्वात् कर्त्तरि क्त सनि वेट्कत्वेऽपि पतेः पृथग्ग्रहणात् इट् प्रतिषेधो पितृवतीत्येकरूपविधानं प्रमादात् पत्ते पिपतिषतीति रूपान्तरं भवतीति बोध्यम् । १पतनकर्त्तरि २नरकगमनसूचककर्मविशेषकारके स च कर्मविशेषः पतितलक्षणविषया प्रा०वि० निर्णीतो यथा

गौतमः "ब्रह्महा सुरापः गुरुतल्पगः मातृपितृयोनिसम्बन्धागस्तेनास्तिकनिन्दितकर्माभ्यासी पतितात्यागपतितत्यागिनश्च पतिताः पातकसंयोजकाश्च तैर्वाक्यं समाचरन्निति" । पातकसंयोजकाः सुरापानादौ परान् प्रयोजयन्ति । इत्युपक्रमे सामान्यतस्तस्यापि विशेषतश्चिभेदिष्यति क्षमादिपदस्येव प्रश्नौ, हारीतेन विशेषगणने पाठात् । तथा आपस्तः "अथ पातकोपपातकमहापातकानि व्याख्यास्यामः इति । तथा च पठन्ति "महापातकतुल्यानि पापान्युक्तानि यानि च । तानि पातकसंज्ञानि तदूनस्तूपपातकम्" । अतो महापातकतुल्यपापविशेषेऽप्यस्य शक्तिः । पतनशब्दार्थमाह गौतमः "द्विजातिकर्मभ्यो हानिः पतनं परस्य चाविद्वित्तमेवे नर-

त्वम्। द्विजातिकर्म श्रौतमग्निहोत्रादि स्मार्त्तमष्टकादि प्रायश्चित्ततद्भजपादिव्यतिरिक्तं तेभ्यो हानिरनधिकारः इति द्विजातिग्रहणं प्राधान्यार्थं शूद्रस्यापि वाक्यान्तरेण पातित्याभिधानात्। इह लोके तावत् पातित्यलक्षणमनिष्टं परलोके चासिद्धिः पातककर्मप्रतिबन्धात् उपात्तसुकृतफलानिष्पत्तिः नरकं वा सूतकादिव्यावृत्त्यर्थमिदम्। द्विजातिकर्मानधिकारश्च महापातके श्रूयते यथा देवलः "पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः सङ्गिनोऽनुभाष्यो नानुयाज्योऽभिशस्तः सर्वकर्मवर्जितः पतिततमो भवति"। महापातकाधिकारे मनुः "असम्भाष्याश्च संभोज्या अविवाह्या ह्युपाठिनः। चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः"। अतो महापातकेषु द्विजातिकर्मानधिकारः तद्विहितद्वादशवार्षिकप्रायश्चित्तापनेयत्वादतिपातकानुपातकयोरपि। अतो द्वादशवार्षिकप्रायश्चित्तापनेयार्हं पापं पतनम्। अर्हता च सामान्यबोधितत्वं तच्च स्त्रीत्वादिनाऽसम्भूयोत्तुतानेऽप्यस्त्येव कृत्वले द्रावणातस्य। अथ वा द्विजातिकर्मानधिकारापादकं पापं पतनम् अनधिकारश्च महापातके श्रुतएव अनुपातकेऽपि तत्समत्वात् उपपातकादौ च क्वचित् पततीति श्रुतेः अतिपातके ततो गुरुत्वात् लभ्यते। यद्वा महापातकानपकृष्टं पापं पतनम् अनुपातकस्य तत्समत्वात् उपपातकादेः क्वचित् पततीत्यभिधानात् अनपकर्षएव, अस्त्रजनब्राह्मचीगमने पतनपाताद्युत्पत्तिश्रवणादनपकर्षएव। अतएव "सद्यः पतति मांसेनेति" शूद्रावेदी पतत्यत्रे"त्यादिमनुवचनं निन्दार्थम्।

स्वधर्मच्युते "स्वधर्मं यः परित्यज्य परधर्मं समाश्रयेत्। अनापदि स विज्ञेयः पतितः परिकीर्त्तितः" मार्क०पु० चाण्डालान्त्यादिस्त्रीगमनादिकमभ्यासकृतं पातित्यकारणम् "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानाच्चान्द्रं तु गच्छति" मत्स्यपु०। अन्यान्यपि कतिचित् कर्माणि पतितानामिव दाहनिषेधप्रयोजकान्युक्तानि यु०त० ब्रह्मपु० "गरान्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः। क्रोधात् प्राणं विषं वह्निं यश्चैतद्बन्धनं जलम्। गिरिश्च प्रपातश्च ये कुर्वन्ति नराधमाः, कुशिल्पजीविनश्चैव छलाचारकारिणः" तथा "ब्रह्मदण्डहता ये च ये च ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः। पतितानां न दाहः स्यात्तान्त्येष्टिर्नास्त्यिसंचयः। न चानुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्" यु०त० ब्रह्मपु०। तेषां संसर्गनिषेधो यथा "आसनाच्छयनाद्वैकभोजनात् कथनादिषु। संवत्सरेण पतति पतितेन सहाचरन्" वराहपु० "पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम्। संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनाद्यानपानासनात्। यो येन पतितेनैव संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात् संसर्गस्य विशुद्धये" तत्र पादोनं प्रायश्चित्तमिति तत्र स्थितम्। "पतितस्योदकं कार्यं सपिण्डैर्ब्राह्मणैः सह। निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गृहसन्निधौ। दासो नटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा। अहोरात्रमुपासीनं नाशौचं ब्राह्मणैः सह। निवर्त्तेरंस्तस्मात्तु सम्भाषणसहासनम्" मात्स्ये २०।अ०। "पतिता गुरवस्ताज्या न तु माता कदाचन। गर्भधारणपोषाभ्यां तेन माता गरीयसी" मत्स्यपु०।

पतित्वन न० यौवने ऋ० १०।४०।६ भाष्ये दृश्यम्।

पतिदेवता स्त्री पतिरेव देवता यस्याः। पतिव्रतायाम् पतिदैवताऽप्यत्र। [रिण्याम्।

पतिद्विष् स्त्री पत्ये द्वेष्टि द्विष—क्विप् ४त०। पत्ये द्वेषका-

पतिमती स्त्री पति+अस्त्यर्थे मतुप् ङीप्। स्वामियुक्तायां भूम्यादौ।

पतिलोक पु० पतिभोग्यो लोकः स्वर्गादिः ष०त०। पत्यासहधर्माचरणेन प्राप्ये स्वर्गादिलोके मनुः ५।१५६

पतिवत्नी स्त्री पति+अस्त्यर्थे मतुप् नि० सधवायां मस्य वः नुक् च। समर्द्धायां स्त्रियाम् अमरः। तद्विज्ञायान्तु पतिमतीत्येव सि० कौ०।

पतिवेदन पु० पतिं वेदयति विद—णिचि—ल्यु। पतिप्रापके महादेवे "त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्" यजु० ३।६०

पतिव्रता स्त्री पतिर्व्रतमिव नियतोपास्यत्वात् यस्याः। साध्व्यां स्त्रियाम् अमरः तद्धर्माश्च काशी०ख० ४अ० उक्ता यथा

"पतिव्रतेयं कल्याणी लोपामुद्रा सधर्मिणी। तवाङ्गस्थायया तुल्या यत्कथा पुण्यकारिणी। पतिव्रतास्वरुन्धत्या सावित्र्याप्यनुसूयया। शाण्डिल्यया च सत्या च लक्ष्म्या च व्रतरूपया। मेनया च सुनीत्या च मंत्रया स्वाहया तथा। तथैषा वर्ण्यते श्रेष्ठा न

तथान्येति निश्चितम् । भुङ्क्ते भुक्ते त्वयि शुने ! तिष्ठति त्वयि तिष्ठति । विनिद्रिते च निद्राति प्रथमं प्रतिबुध्यते । अनवहृतमाज्ञानं तव नो दर्शयेत् क्वचित् । कार्यार्थं प्रोषिते क्वापि सर्वमण्डनवर्जिता । न च ते नाम गृह्णीयात्तवायुष्यविवृद्धये । पुरुषान्तरनामापि न गृह्णाति कदाचन । आक्रुष्टापि यथाक्रोशेत् ताडितापि प्रसीदति । इदं कुरु कृतं स्वामिन् ! मन्यतामिति वक्ति च । आहूता गृहकर्माणि त्यक्त्वा गच्छति सत्वरम् । किमर्थं व्याहृता नाथ ! सप्रसादोऽभिधीयताम् । न चिरं तिष्ठते द्वारि न द्वारमुपसेवते । कदापितं त्वया किंचित् कस्मैचिन्न ददात्यपि । मूलोपकरणं सर्वमनुक्त्वा साधयेत् स्वयम् । नियमोदकवर्णीणि यत्पुष्पाद्यतादिकम् । प्रतीक्षमाणावसरं यथाकालोचितं हि यत् । तदुपस्थापयेत् सर्वमनुदिष्टमिति कृत्यवत् । सेवते भर्तृरुच्छिष्टमिष्टमन्नकलादिकम् । महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति । अविभक्ता न भाजीयात् देवपितृतिथिष्वपि । परिचारकवर्गेषु गोषु भिक्षुकुलेषु च । संवर्तोपस्करा दक्षा कृष्टा व्यवपराङ्मुखी । कुर्यात् त्वयाऽनुज्ञाता गोयवाग्र व्रतादिकम् । दूरतो वर्जयेदेषा यत्राजोत्सवदर्शनम् । न गच्छेत् तीर्थयात्रादिविवाहप्रेक्षणादिषु । सुखसुप्तं सुखासीनं वसन्तं वल्लभं या । आनरेभ्यपि कार्येषु पतिं नोत्थापयेत् क्वचित् । स्वीधर्मिणी निरालस्या स्वसुखं नैव दर्शयेत् । स्वामिनं त्रायेत्तापि यावत् स्नाता न शुध्यति । सुस्नाता भर्तृवदनमीक्षतेऽन्यत्र न क्वचित् । अथ वा मनसि ध्यात्वा पतिं मार्गं विलोकयेत् । हरिद्रां कुङ्कुमं चैव सिन्दूरं दन्तकं तथा । मृगनाभिस्तु ताम्बूलं माङ्गल्याभरणं तथा । केशसंस्कार कबरीकरकर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती दूरतेव पतिव्रता । न रजस्या न हेतुक्या तथा श्रमवया न च । न च दुर्भगया क्वापि सहितत्वं कुरुते सती । भर्तृविद्वेषिणीं नारीं नैषा सम्भाषते क्वचित् । नैकाकिनी क्वचिद्भूयात्र सन्ना स्नाति च क्वचित् । नोदूखले न सुप्ते न वह्न्यां दग्धापि । न यन्त्रके न देहल्यां सती चोपविशेत् क्वचित् । विना व्यवायसमयं प्रागल्भ्यं न क्वचिच्चरेत् । यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा । इदमेव व्रतं स्त्रीणामयमेको दमः परः । इयमेका देवपूजा भर्तृवाक्यं न लङ्घयेत् । जीवं वा दुरवस्थं वा व्याधितं दुःखमेव वा । दुस्थितं दुःखितं वापि पतिमेकं न लङ्घयेत् । हृष्टा हृष्टे विषण्णा विषण्णे प्रिये सदा । एकरूपा भवेत् दुःखा सम्पत्सु च विपत्सु च । सर्पिर्लवणतैलादिष्वेऽपि च पतिव्रता । पतिं नास्तीति न ब्रूयादायासेषु न योजयेत् । तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् । यद्गुरादपि विष्णोर्वा पतिरेकोऽधिकः स्त्रियाः । व्रतोपवासनियमं पतिसत्त्वस्तु नाचरेत् । आयुष्यं हरते भर्तुर्व्रता निरयमृच्छति । भर्तुः प्रत्युत्तरं दद्यान्नारी या क्रोधतत्परा । गुरुरी जायते ग्रामे मृगाक्षी निर्जने वने । स्त्रीणां हि परमश्चैको नियमः सद्भिरुद्धृतः । कथ्यर्थं चरणौ भर्तुर्भोक्तव्यं जलनिश्चयम् । उच्छासनं न सेवेत न व्रजेत् परवेश्मसु । न तपाकरवाक्यानि वक्तव्यानि कदाचन । अपवादो न वक्तव्यः कलहं दूरतस्त्यजेत् । गुरुणां सन्निधौ चापि नोच्चैर्ब्रूयान्न वा हसेत् । या भर्तारं परित्यज्य रहश्चरति दुर्मतिः । उलूकी जायते क्रूरा दग्धकोटरशायिनी । ताडिता ताडितं वेष्टेत् सा नारी दमदर्शिका । कटाक्षयति वाक्यं वै वैकराली तु सा भवेत् । या भर्तारं परित्यज्य मिष्टमन्नाति केवलम् । ग्रामे सा शूकरी भूयादुर्वहिर्मलभुग्भुजा । या कुङ्कुमं प्रियं ब्रूते सा मूका जायते खलु । या सपत्नीं वदेद्धेत दुर्भगा सा पुनः पुनः । दृष्टं विकुरुते भर्तुर्वा चिह्नदन्तं समीक्षते । काणा वा विकुरी वापि कुब्जापि च जायते । वाक्यादायान्नमाक्रोशं त्वरिता च जडाक्षमैः । ताम्बूलैर्व्यजनैर्वैव पादसंवाहनादिभिः । तथैव चाटुवचनैः खेदसंमोदनैः परैः । या प्रियं प्रीणयेत् प्रीता त्रिलोकी प्रीणिता तया । पितं दद्याति हि पिता पितं भ्राता पितं सुतः । अपितस्य हि दातारं भर्तारं पूजयेत् सदा । भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि च । तस्मात् सर्वं परित्यज्य पतिमेकं समर्चयेत् । जीवहीनो यथा देहः शवादशुचितां व्रजेत् । भर्तृहीना तथा योषा सुस्नाताप्यशुचिः सदा । अमङ्गलेभ्यः सर्वेभ्यो विधवाशब्दमङ्गला । विधवादर्शनात् सिद्धिर्जातु यातुर्न जायते । विहाय भ्रातरं चैकां सर्वामङ्गलवर्जिताम् । तदाशिष्यमपि प्राज्ञस्त्यजेदाशीविषोपमाम् । कन्यां विवाहसमये वाचयेदुरिति द्विजाः । पत्युः सहचरी भूया जीवतोऽजीवतः सदा । भर्ता सदासुयातस्तो देहवत्

छायया स्त्रिया। चन्द्रमा ज्योत्स्नया यद्वद्विद्युत्वान् विद्युता यथा। अनुव्रजन्ती भर्त्तारं गृहात् पितृवनं सदा। पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम्। व्याघ्रपादी यथा व्याघ्रं बलाद्धरते बिलात्। एवमुत्क्रम्य दूतेभ्यः पतिं स्वर्गं नयेत् सती। यमदूताः पलायन्ते पतीमालोक्य दूरतः। अपि दुष्कृतकर्माणं समुत्सृज्य च तत्पतिम्। न तथा बिभिमो वज्रेन तथा विद्युतो यथा। आपतन्तीं समालोक्य वयं दूताः पतिव्रताम्। तपनस्तपतेऽत्यन्तं दहनोऽपि च दह्यते। कम्पन्ते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः। यावत् स्वलोमसंख्यानि तावत् कोट्ययुतानि च। भर्त्ता स्वर्गसुखं भुङ्क्ते रममाणा पतिव्रता। धन्या सा जननी लोके धन्योऽसौ जनकः पुमः। धन्यः स च पतिः श्रीमान् येषां गेहे पतिव्रता। पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः। पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते। शीलभङ्गेन दुष्टाः पातयन्ति कुलत्रयम्। पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिता। पतिव्रतायाश्चरणौ यत्र यत्र स्पृशेद् भुवम्। नमेति भूमिर्मन्येत नाम भारोऽस्ति पावनी। विभ्यत् पतिव्रतास्वर्गं कुरुते भानुमानपि। सोमो गन्धवहश्चापि स्वपवित्राय नान्यथा। आपः पतिव्रतास्वर्गमभिलिप्सन्ति सर्वदा। अद्य जाड्यविनाशो नो जातास्त्वद्यापि पावनाः। गृहे गृहे न किं नार्यो रूपलावण्यगर्विताः। परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता। भार्यां मूलं गृहस्थस्य भार्यां मूलं सुखस्य च। भार्या धर्मफलायाग्र्या भार्या सन्तानवृद्धये। परलोकस्त्रयं लोको जीयते भार्यया द्वयम्। देवपितृतिथीज्यादि नाभार्यः कर्म चार्हति। गृहस्थः स हि विज्ञेयो यस्य गेहे पतिव्रता। यस्यतेऽन्यः पतिपटं राज्ञ्या जरयाऽथ वा। यथा मङ्गावगाहेन शरीरं पावनं भवेत्। तथा पतिव्रतादृष्ट्या शुभया पावनं भवेत्"। "आर्त्तार्त्ते रुदिते कृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्नी साध्वी ज्ञेया पतिव्रता" शु०त०।

पतिष्ठ त्रि० अतिशयेन पतिता इष्ठन् ठस्य लोपः अतिशयेन पतितरि ऋ०१०।१६५।५ उदा०। ईयसन् पतीयस् तत्रार्थे त्रि० पञ्चमीश्च ब्रा०५।१।१२ उदा० स्त्रियां ङीप्।

पतेर पुं स्त्री पत–एर। १खगे उज्ज्वल० स्त्रियां जातित्वात् ङीप्। २गन्तरि त्रि० ३आढके ४गर्त्ते च पु० संक्षिप्तसा०

पत्ताधिन् त्रि० पादेन कपति गच्छति कप–णिनि पदादेशः इत०। पादेन गन्तरि। मट्टिः २।४उदाहरणं द्रष्टव्यम्।

पत्तङ्ग न० पत्राङ्ग+पृषो०। रक्तचन्दने (वक्रम) वृक्षभेदे शब्दर०। "पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत्। हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम्" भावप्र०।

पत्त पु० पतत्यनेन पत–बा०करणे तक् नेट्। पादे "निधीर्यतो निपत्ततः" ऋग्० ६।१२१।१

पत्तन न० पतत्यत्र बा० आधारे तन। १नगरे महापुर्याम् अमरः २मृदङ्गे हारा०।

पत्तनाधिपति पु० ६त०। राजभेदे भा०अ० १८६अ०।

पत्तरङ्ग पु० पट्टरङ्ग+पृषो०। (वकम्) वृक्षे

पत्ति पु०पद–तिन्। १सेनायाम्। २वीरे विश्वः क्षिन्। ३गतौ (१रथः २गजः ३अश्वाः ५सेनाः) एतत् संख्यान्विते ४सेनाभेदे च स्त्री। "एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" भा०आ०१अ०। ५पञ्चपञ्चाशदात्मकनरसैन्ये "नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते" भा०उ०१५४अ०।

पत्तिगणक त्रि० पत्तिं गणयति गण–अक अकान्तत्वेऽपि याजका० ६त०स०। पत्तीनां गणयितरि। ततः उद्गाला० भावे अञ्। पत्तिगणक तद्भावे।

पत्तिन् त्रि० पद्भ्यां तेजति तिज–गतौ बा० डिन्। पद्भ्यां गन्तरि। "पत्तिनो भुवि चैकस्य गोपस्यात्यवलीयसः" हरिवं० १००अ०।

पत्तिसंहति स्त्री ६त०। पादाते सेनाबन्धे अमरः।

पत्तूर पु० पत–बा० अर पत्तूरा० निपा०। १याज्ञिकपात्रे त्रिका० २पत्तङ्गे रक्तचन्दने न० शब्दच०।

पत्त्र(त्र) न०पत–ष्ट्रन् "ऋरोभरि सवर्णे" पा० वा तलोपः। १वाहनमात्रे २पर्णे ३पक्षिणां पक्षे अमरः। ४लेखनाधारे(पात्र) इति ख्याते पदार्थे ५धातुमयपत्राकारे द्रव्ये च "सुवर्णपत्राभरणा च कार्या सुखोऽपार्श्वद्वयश्चक्षुषाभिः" हरिवं० स्त्री ङीप्। ७तेजपत्रे राजनि० "पत्त्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु। निहन्ति कफवातार्शोहृल्लाहारुचिपीनसान्" भावप्र०। तत्र लिखनाधारपत्रे "बाणमाषिके तु यस्याग्रे भ्रान्तिः संजायते यतः। पात्राक्षराणि लुप्तानि पत्राकृष्टान्यतः पुरा" ज्यो०त०। तस्य रञ्जनं यथा "सुवर्णकुङ्कुमरङ्गाद्यैः रञ्जयेत् पत्रमुत्तमम्। सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्" तत्प्रमाणम् "षड्ङ्गुलाधिकं हस्तं पत्रमुत्तममीरितम्। मध्यमं हस्तमात्रं स्यात् सामान्यं

सुष्टिष्टकम्" पत्रभङ्गप्रकारः "पत्रन्तु त्रिगुणीकृत्य ऊर्द्ध्वं तु द्विगुणं त्यजेत्। शेषभागे लिखेद्वर्णान् गद्य पद्यादिसंयुतान्" पत्रस्य रचनाक्रमः "राजलेखक माहूय नृपो ब्रूयात् प्रयत्नतः। पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्। पण्डितहृदयमानीय लेखको रहसि स्थितः। यथायोग्यानुसारेण पत्रं कुर्यान्मनोरमम्। दिनद्वयं त्रयं वापि विचार्य्य पण्डितेन वै। स्वभावं दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तके। सामान्यपत्रे संलिख्य रहसि श्रावयेन्नृपम्। नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः" लेखनप्रकारः "स्वङ्कुशं प्रथमं दद्यान्मङ्गलार्थं विचक्षणः। मध्ये बिन्दुसमायुक्तमधः सप्राङ्ककसंयुतम्। तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्। ततः श्रीशब्दरूपाणि पदन्यासक्रमं लिखेत्। भाष्या संस्कृतेनापि कुशलं विलिखेत् सुधीः। ततः शुभाशुभं वार्त्तां संस्कृतैः प्राकृतैस्तथा। ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्। कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्। पत्रप्रेषणश्लोकञ्च अवट्टमासादिसंयुतम्। सर्वेषामेव पत्रेषु लिखनं चैवमीरितम्। सर्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत् यः। स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि। एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम्। स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम्। शास्त्रसन्दर्भमज्ञात्वा यो लिखेद्राजपत्रकम्। स राजमन्त्रिभिः सार्द्धं दुर्यशो महदाप्नुयात्"। पत्रनयनक्रमः। "राजपत्रं नयेन्नृमूर्द्ध्नि ललाटे पात्रमन्त्रिणाम्। गुरुपत्रं नयेन्मूर्ध्नि ब्राह्मणानां तथैव च। यतिसन्न्यासिनाञ्चैव स्वामिनस्य तथैव च। सादरेणैव यत्नेन तथा मूर्द्धनि धारयेत्। भार्य्यापुत्रस्य मित्रस्य हृदये धारयेत् सुधीः। प्रयोराणां कण्ठदेशे पत्रधारणमीरितम्। एतेषाञ्चैव पत्राणाञ्चक्रधारणमुत्तमम्। अन्येषामपि पत्राणां नियमो नात्र दर्शितः"। पत्रपठनप्रकारः "पत्रं दृष्ट्वा नमस्कृत्य पूर्वाह्णं स्थापयेत् सुधीः। दक्षिणाह्णं तु सदसि नृपाग्रे राजलेखकः। पत्रं वितत्य सदसि द्विवारं मनसा पठेत्। स्फुटं पश्चात् प्रवक्ष्यामश्चोभौ राजलेखकः। रहसि श्रावयेत् पत्रं शुभं वा यदि वाऽशुभम्। पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः। रहस्यपत्रं रहसि नृपाग्रे श्रावयेद्द्विजः। अशुभं चैव सदसि शुभं पत्रं नृपाज्ञया। एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः। नृपतेः सन्निधौ स्थित्वा नृपाज्ञामनुवर्त्तते"। पत्रचिह्नानि "ऊर्द्ध्वं षड्ङ्कुलं त्यक्त्वा वर्त्तुलं चन्द्रबिम्बवत्। कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम्। मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः। गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः। भार्य्यायाश्चाम्बुजेन चन्दनैः पितृपुत्रयोः। सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च। रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम्। शोणितेनैव शत्रूणां पत्रचिह्नं प्रकल्पयेत्। एतेषाञ्चैव सर्वेषां यथायोग्यानुसारतः। पत्रस्योर्द्ध्वं तु मतिमान् कुर्य्यात् चिह्नं सुवर्त्तुलम्"। राजपत्रस्य कोणच्छेदनप्रकारः "दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः। एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि"। राजपत्रादेः पदन्यासः "महाराजाधिराजञ्च दानशौण्डं तथैव च। तथा सञ्चरितं योज्यं कल्पद्रुमादिकं न्यसेत्। यथायोग्यानुसारेण तथैव गुणभेदतः। राजपत्रेषु सर्वेषु पदन्यासक्रमं विदुः"। मन्त्रिपत्रस्य "प्रवरं गुणभेदेन तथा सञ्चरितादिकम्। विन्यस्य विलिखेत् प्राज्ञो मन्त्रिपत्रे पदक्रमम्"। पण्डितस्य "संख्यावद्वन्दितपदं शास्त्रार्थनिपुणादिकम्। पण्डितानाञ्च पत्रेषु विलिखेद्वै पदक्रमम्"। गुरुपत्रस्य "सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम्। विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रे पदक्रमम्"। स्वामिपत्रस्य "प्रवर्य्यं नमस्कारं प्राणप्रियादिकं पदम्। विन्यस्य विलिखेद्धीमान् स्वामिपत्रे पदक्रमम्"। भार्य्यायाः "प्राणप्रियापदं साध्वीपदं सञ्चरितादिकम्। भार्य्यापत्रे लिखेद्विद्वान् पदक्रममनुत्तमम्"। पुत्रस्य "प्राणतुल्यपदं तद्वत्तथा सञ्चरितादिकम्। आशीर्वचनसंयुक्तं पुत्रपत्रे पदक्रमम्"। पितृपत्रस्य "प्रभुवर्य्यं नमस्कारं तथा सञ्चरितादिकम्। विन्यस्य विलिखेत् पुत्रः पितृपत्रे पदक्रमम्"। सन्न्यासिपत्रस्य "सर्वाशाविनिर्मुक्तं सर्वशास्त्रार्थपारगम्। सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम्"। सामान्यस्य "सामान्यभृत्यशत्रूणां विनियोज्यासकं प्रति। शस्त्रावशेषितपदं कागतुल्यादिकं तथा। एतेषामेव पत्रेषु यथायोग्यानुसारतः। विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम्"। श्रीशब्दविन्यासंख्या यथा "षड्गुरोः स्वामिनः पञ्च द्वे भृत्ये चतुरो रिपौ। श्रीशब्दानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः" पत्रकौ०।

देवभेदे दलरूपपत्रविशेषाणां प्रीतिकरत्वशक्तं यथा "पत्राण्यपि सुपुष्पाणि हरेः प्रीतिकराणि च। प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम। अपामार्गकं प्रथमं तस्माद् भृङ्गारकं परम्। तस्मात्तु खादिरं श्रेष्ठं ततश्च शमीपत्रकम्। दूर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्। पत्रं तस्माद्दमनकं ततो बिल्वस्य पत्रकम्। बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्। एतेषां च यथा लब्धैः पत्रैर्वा योऽर्चयेद्धरिम्। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते" नरसिंहपु० ५२ अ०। देवीप्रीतिकरपत्राणि यथा "अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्। ततोऽपि गन्धिनीपत्रं वल्लाहकमतः परम्। तस्मात् खदिरपत्रं तु वञ्जुलस्तवकस्तथा। आम्रन्तु वकपुष्पस्तु जम्बूपत्रं ततः परम्। बीजपूरस्य पत्रं तु ततोऽपि कुशपत्रकम्। दूर्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्। पत्रमामलकं तस्माद्दामपत्रमतःपरम्। सर्वतो बिल्वपत्रन्तु देव्याः प्रीतिकरं मतम्" कालिकापु०।

पत्त्रक न० पत्त्र+स्वार्थे क तद्वि कायति कै-क वा। १दलस्य पर्णे २पत्रावल्यां शब्दर०। ३तेजपत्रे राजनि० ४शालिञ्जयाके पु० रत्नमाला। ५पत्त्रभङ्गे न० शब्दच०।

पत्त्रकाहला स्त्री १पिञ्जलायां २पत्त्रशब्दे च हारा०।

पत्त्रगुप्त पु० पत्त्रं गुप्तमस्य परनि०। (तेकाटा शिजु) त्रिकण्टे शब्दच०।

पत्त्रघना इत०३त०। सातलाटक्षे राजनि०।

पत्त्रङ्ग न० पत्त्रमञ्चते अनेन अनृज-करणे घञ् अक०। रक्तचन्दनाकारे (वकम) वृक्षे शब्दच०। [त्रिका०।

पत्त्रभङ्गार पु० पत्त्रे भङ्गारोऽस्य। पुरोटिक्षे (रायभटी)

पत्त्रया स्त्री पत्त्रं नम्यतेऽत्र नम-बा० ड संज्ञात्वात् णत्वम्। पत्ररचनायाम् हारा०।

पत्त्रतण्डुली स्त्री पत्त्रे तण्डुलाः सन्त्यस्याः अच् गौरा० ङीष्। यवतिक्तायाम् राजनि०।

पत्त्रतरु पु० पत्त्रप्रधानस्तरुः शा० त०। दुष्खदिरे राजनि०

पत्त्रदारक पु० पत्त्रमिव दारयति दारि-ण्वुल्। क्रकचे (करात) त्रिका०।

पत्त्रनाडिका स्त्री इत०। पर्णशिरायाम् जटा०।

पत्त्रपरशु पु० पत्त्रे धातुमयपत्त्रे परशुरिव। (क्रेनी) ख्याते स्वर्णकारयन्त्रभेदे। पत्त्रपर्शुरप्यत्र शब्दर०।

पत्त्रपाल पु० अस्थितायां क्षुरिकायां हेमच०।

पत्तपाली स्त्री पत्राकारा पालिरग्रं यस्याः वा ङीष्। (काँचि) कर्त्तर्यां हलायु०तस्याः पर्णतुल्यापत्रात्तथात्वम्।

पत्त्रपाश्या स्त्री पत्त्रमिव पाश्या। स्वर्णादिरचितललाटालङ्कारभेदे (टीका) अमरः।

पत्त्रपिशाचिका स्त्री पत्त्रेण पिशाचीव इवार्थे कन्। जलवारणसाधने यन्त्रभेदे (टीका) त्रिका०।

पत्त्रपुष्प पु० पत्त्रं पुष्पमिवास्य। १रक्ततुलस्यां शब्द० २तुलस्यां स्त्री टाप् शब्दमाला। क्षुद्रपत्त्रतुलस्याम् स्त्री रत्नमाला ङीप्। कप्। पत्त्रपुष्पक भूर्जपत्रे शब्दमा०।

पत्त्रबन्ध पु० पत्त्राकारः बन्धः। पुष्परचनाभेदे शब्दरत्ना०।

पत्त्रभङ्ग पु० पत्राकारः भङ्गः रचना। स्तनकपोलादौ कस्तूरिकादिरचितपत्त्रश्रेण्यां तिलकभेदे हेम० पत्त्रभङ्गि, पत्त्रभङ्गीत्यपि तत्र स्त्री शब्दर०।

पत्त्रमञ्जरी स्त्री इत०। १पर्णस्याग्रभागे २पत्राकारमञ्जरीयुते तिलकभेदे हेमच०। [२ततृसमुदाये स्त्री।

पत्त्रमाल पु०पत्त्राणां माला यत्र। १वेतसे नैघण्टु० इत०।

पत्त्रमूल पु० इत०। पर्णस्य मूले ततः प्रकारे स्यूला० कन्। पत्त्रमूलक तत्प्रकारे न०। तत्र गणे पत्त्रमूलेति व्यस्तं समस्तञ्च तेन पत्त्रक मूलक तत्तत्प्रकारे न०

पत्त्रयौवन न० पत्त्रस्य यौवनमत्र। नवपल्लवे जटाध०

पत्त्ररथ स्त्री पत्त्रं पक्षो रथ इव यस्य। खगे अमरः जातित्वात् स्त्रियां ङीष्। [भेदे हेमच०।

पत्त्र(रे)लेखा स्त्री पत्त्राकारा(रे)लेखा। पत्त्रभङ्गे तिलक०

पत्त्रल न० पत्त्रमिवाकारोऽस्त्यस्य विद्या० लच्। द्रुपुष्पे (पाताला०दृ) हेमच०।

पत्त्रलता स्त्री पत्त्राकारा लता यत्र। पत्त्राकारे १तिलकभेदे हेमच० शा०त०। २पत्त्रप्रधानलतायाम्।

पत्त्रलवण न० पत्त्रविशेषेण पक्वं लवणम् शा०त०। सुश्रुतोक्ते लवणभेदे "गन्धर्वहस्तकसुष्ककनक्रमाजाटरूपकपूतीकारग्वधपित्तकादीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽवचुट्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्हाहयेदेतत् पत्त्रलवणमुपदिशन्ति वातरोगेषु"।

पत्त्रवल्लरी स्त्री पत्त्रयुक्ता वल्लरीव। तिलकभेदे पत्त्रभङ्गे हेमच० पत्त्रवल्लीत्यपि तत्र।

पत्त्रवाह पु० पत्त्रं पक्षं लिपिं वा वहति वह-अण् उप० स०। १पक्षवाहे खगे २शरे जटा० ३लिपिवाहके त्रि०।

पत्त्रविशेषक न० पत्त्रमिव विशेषो यत्र कप्। तिलकभेदे

पत्त्रवृश्चिक पु० पत्त्रमिव वृश्चिकः। पत्त्राकारे वृश्चिकभेदे सुश्रु० कीटशब्दे दृश्यम्।

पत्रवेष्ट पु॰ पत्रमिव वेष्ट्यते वेष्ट–कर्मणि घञ्। ताड़ङ्के रघुः १६।१७श्लो॰।

पत्रशाक पत्रात्मकं शाकम्। "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा। शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" भावप्र॰उक्ते शाकवर्गमध्ये पत्रात्मकशाके। पत्रशाकानि च वास्तूकादीनि षष्टिपान्तानि, पुष्पशाके कदलीपुष्पशालूकपुष्पे, फलशाकानि कुष्माण्डादिकण्टकारीफलान्तानि, नालशाकं सर्षपनालम्। कन्दशाकानि सूरणादिशालूकान्तानि, संस्वेदजशाकं शिलीन्ध्रादि" तत्र द्रष्टव्यम्।

पत्र(शि)सिरा स्त्री इत॰। १पत्रनाड्यां २पत्रभङ्गे हारा॰

पत्रशृङ्गी स्त्री पत्रं शृङ्गमिवास्याः ङीष्। द्रवन्तीलतायाम् राजनि॰। [इत॰। २पर्णानां पङ्क्तौ च।

पत्रश्रेणी स्त्री पत्राणां श्रेणीव। १द्रवन्तीलतायां राजनि॰

पत्रश्रेष्ठ पु॰ पत्रं श्रेष्ठं यस्य। बिल्ववृक्षे राजनि॰।

पत्रसुन्दर पु॰ पत्रं सुन्दरमस्य। स्वनामख्याते वृक्षभेदे मेदि॰। [ङीप्।

पत्रसूचि स्त्री न॰ पत्राणां सूचिरिव। कण्टके त्रिका॰ वा

पत्रहिम न॰ पत्रेषु हिमं यतः। हिमवृद्धिने त्रिका॰

पत्राख्य न॰ पत्रेति आख्या यस्य। १तेजपत्रे शब्दच॰ २तालीशपत्रे राजनि॰।

पत्राङ्ग न॰ पत्रमिवाङ्गमस्य। १रक्तचन्दनाकारे काष्ठभेदे (वकम) अमर। २भूर्जपत्रवृक्षे ३पद्मके च मेदि॰।

पत्राङ्गुलि स्त्री पत्रमिवाङ्गुलयो यत्र। पत्रभङ्गे तिलकभेदे अमरः। [शब्दर॰।

पत्राञ्जन न॰पत्रमञ्ज्यतेऽनेन अन्ज–करणे ल्युट्। मस्याम्।

पत्राढ्य त्रि॰ पत्रैराढ्यम्। १वृक्षपत्रयुक्ते २पिप्पलीमूले ३पर्वतलग्ने च न॰ राजनि॰।

पत्राण्य न॰ पत्राङ्ग+पृषो॰। (वकम) काष्ठभेदे राजनि॰।

पत्रान्ना स्त्री पत्रेणान्ना। (चुकोपालङ्क)शाकभेदे नैघण्टु॰

पत्रालु पु॰ पत्र+अस्त्यर्थे आलु। १कासालौ २रक्तुदर्भे च राजनि॰। [इत॰। २पत्रपङ्क्तौ च।

पत्रावलि न॰पत्राणामावलयो यस्मात्। १गैरिके शब्दच॰

पत्रावली स्त्री पत्राणामावलीव। १पत्रभङ्गे तिलकभेदे शब्दच॰ इत॰। २पत्रश्रेणौ च

पत्रिका स्त्री पत्री+स्वार्थे क कापि ह्रस्वः। १लिप्याम्। पत्रं विद्यतेऽस्याः ठन्। २प्रशस्तपत्रयुक्तास्तु नवस्तु कदल्यादिषु त्रिपत्रिकागस्ते १६६०पृ॰ उदा॰ द्रष्टव्यम्। ३पत्रिकाख्ये कर्पूरभेदे (पातकपुर) त्रिकाण्डशेषः।

पत्त्रिकाख्य पत्त्रिका आख्या यस्य। कर्पूरभेदे राजनि॰।

पत्त्रिन् त्रि॰ पत्र+अस्त्यर्थे इनि। १पर्णयुक्ते २शरे पु॰ ३खड्गे अमरः ४श्येनखड्गे ५वृक्षे च पु॰ राजनि॰ ६पर्वते पु॰ मेदि॰ ७ताले ७व्रतकिणिहीवृक्षे ८नक्षत्रपत्रयां ९पाठायाञ्च राजनि॰ १०पक्षिणि स्त्री शब्दच॰ ङीप्।

पत्त्री स्त्री पत–इन् ङीप्। लिपौ

पत्त्रोपस्कर पु॰ पत्त्रेणोपस्करोऽस्य। काण्डभेदे हारा॰

पत्थीर्ण न॰ पत्त्रजाता जर्णा साधनत्वेनास्त्यस्य अच्। धौतकौशेये षट्पदकमयवस्त्रे अमरः वदरादिपर्णजातकृमिजातोर्णाजातत्वात्तस्य तथात्वम्।

पत्थ्य त्रि॰ पत्रस्य हितं यत्। ग्रीवाके वृक्षे पु॰ अमरः

पत्नी स्त्री पति+"पत्युर्नो यज्ञसम्बन्धे" पा॰ नः, ङीप् च। १पतिकृतयज्ञफलभोक्त्र्यां विवाहितायां स्त्रियाम् अमरः "पत्नीमूलं गृहं पुंसां यदि कन्दोऽनुवर्त्तिनी। गृहाश्रमसमं नास्ति यदि भार्या वशानुगा। तया धर्मार्थकामानां त्रिवर्गफलमश्नुते। प्राकाम्ये वर्त्तमाना तु स्नेहात् तु निवारिता। अवश्या वा भवेत् पश्चाद् यथा व्याधिरुपेक्षितः। अनुकूला न वागुग्रा दक्षा साध्वी प्रियंवदा। आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी। अनुकूलकलत्रो यस्य स्वर्गं इहैव हि। प्रतिकूलकलत्रस्य नरको नात्र संशयः। स्वर्गोऽपि दुर्लभं तेन दत्तरागः परस्परम्। रक्तं एको विरक्तोऽन्यस्तस्मात् कष्टतरं तु किम्?। गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्। सा पत्नी या विनीता स्यात्सुतपा वशवर्त्तिनी। दुःखदाऽन्या सदा चित्ता चित्तभेदात् परस्परम्। प्रतिकूलकलत्रस्य हिदारस्य विशेषतः। योषित् सर्वा जलौकेव भूषणाच्छादनाशनैः। सुभूत्यापि कृता नित्यं पुरुषं स्वपकर्षति। जलौका रक्तमादत्ते केवलं सा तपस्विनी। इतरा तु धनं वित्तं मांसं वीर्यं बलं सुखम्। सङ्गा बाल्यभावे तु यौवने विसखी भवेत्। स्थवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम्। अनुकूला न वागुग्रा दक्षा साध्वी पतिव्रता। एभिरेव गुणैर्युक्ता स्त्रीरेव स्त्री न संशयः। या कृष्टमनसा नित्यं स्थानमान विचक्षणा। भर्त्तुः प्रीतिकरी नित्यं सा भार्या स्त्रीतरा ज्वरा" दक्षसं॰। [शालायाम्।

पत्नीशाला(ल) न॰स्त्री इत॰ वा क्लीबत्वम्। पत्न्यधिष्ठित॰

पत्नीसंनहन न॰इत॰। मेखलया योक्त्रेण वा प्रतिमस्याष्ट॰

यज्ञदीक्षार्थे यजमानपत्न्या बन्धनभेदे कात्या० श्रौ० ७।४।६ सू०८।१।७ सूत्रे च दृश्यम् ।

पत्नीसंयाज पु० वैदिके कर्मभेदे स च कात्या० श्रौ०१।७।७ सूत्रादौ उक्तस्तत्रैव द्रष्टव्यः । पत्नीसंयाजनमप्यत्र न० । "जायन्या पत्नीसंयाजनम्' कात्या० श्रौ० ६।६।१४

पत्नग्राट पु० पत्नी अटत्यत्र अट–आधारे घञ् । पत्न्यगारे त्रिका० ।

पत्मन् पु० पत–भावे मनिन् । १पतने करणे मनिन् । २पतनसाधने यजु० ८४८ ऋ० ५।७।७

पत्वन् पु० पतत्यत्र+पत–आधारे वनिप् । मार्गे यजु०२२।२९ उज्ज्वलदत्तेन उणादिसूत्रे पदीति पठित्वा पद्दन् इत्युदाहृतम् वेदटीपकारस्तु तत्र पतिं मत्वा तन्मन्त्रव्याख्याने पतेः वनिपमाह । [उज्ज्वल० ।

पत्सल पु० पतत्यत्र पत–आधारे सरन् रस्य लच्च । मार्गे

पथ गतौ भ्वा० पर०सक० सेट् । पथति एदित् अपथीत् । ज्वला० पथः पाथः प(पा)थयति । पपाथ पेथतुः ।

पथ गतौ वा चु०उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । पन्थयति ते पन्थति । अपपन्थत् त । अपन्थीत् इदित् पन्थयते

पथ पु० पथत्यत्र पथ–घञर्थे आधारे क । मार्गे त्रिका० ।

पथक त्रि०पथे कुशलः कन् । १मार्गकुशले २कपित्थवृक्षायां स्त्री

पथिक त्रि० पन्थानं गच्छति पथिन्+कन् । देशान्तरयानाय गृहान्निःसृत्य पथिगन्तरि राजनि० । [संघातादयोऽस्य० ।

पथिकसंहति पु० ६त० । पान्थसमूहे हारा० । पथिक-

पथिकार त्रि० पन्थानं करोति कृ–अण् उप० स० । मार्गकारके, ततः कर्वा० यत् । पाथिकार्य्य तदपत्ये पुंस्त्री० ।

पथिदेय न० पथि मार्गे देयम् अलुक्स० । रात्रे देये करभेदे हारा० । [खदिरे राजनि० ।

पथिद्रुम पु० पथ-द्रुन् कर्म० । १खदिरवृक्षे जटाध० २श्वेत-

पथिन् पु०पथ–आधारे इनि । १मार्गे तद्भेदलक्षणादिकं यथा "त्रिगव्यूतिं विस्तीर्णो देशमार्गस्तु तैः कृतः । विंशद्धनुर्योजनमार्गः सीमामार्गो दशैव तु । धनूंषि दशविस्तीर्णः श्रीमान् राजपथः स्मृतः । रथाजिरथनागानामसम्बाधः सुसञ्चरः । धनूंषि चैव चत्वारि शाखा रथ्यास्तु निर्मिताः । त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यिका । जङ्घापथश्चतुष्पादस्त्रिपादस्तु गृहान्तरम् । द्वौपादस्त्वर्द्धपादः प्रागङ्गणः पादकः स्मृतः । अवकरः परीवाहः पादशालः समन्ततः" देवीपु० । पथिगमनगुणाः "अध्वा भेदःकृशस्त्रीत्वयौवनाद्यादिनाशनः । यत्तु चंक्रमणं नातिदेहपीडाकरं भवेत् । तदायुर्बलमेधाग्निपटुमिन्द्रियशोधनम्" राजवल्लभः । २धर्माचारे च "महाजनो येन गतः स पन्थाः" भा०व० यक्षप्रश्ने ।

पथिरक्षस् पु० पन्थानं रक्षति रक्ष–असुन् ६त० । १रुद्रभेदे यजु० १६।८६ २मार्गरक्षके त्रि० । विनि । पथिरक्षिन् तत्रार्थे ऋ० १०।१४।११ ।

पथिल पु० पथे–गतौ इलच् । पथिके उज्ज्वल० ।

पथिवाहक त्रि० पन्थानं वाहयति प्रापयति वाहि–ण्वुल् । १मार्गवाहके २शाकुनिके ३निष्ठुरे च शब्दमाला ।

पथीन नामधातुः पन्था इवाचरति पथिन्–क्विप् टीपः मार्गेणेवाचरणे अक० सेट् । पथीनति अपथीनीत् । एवं सुपथीन अभुक्षीण नामधातुः तत्तत्तुल्याचरणे ।

पथिष्ठा त्रि०पथे मार्गे तिष्ठति स्था–क्विप् अलुक्स०वेदे अलुक् । मार्गे वर्त्तमाने ऋ० ५।५०।३। लोके तु पथस्थ इत्येके ।

पथ्य त्रि० पथि साधु दिगा० यत् इको लोपः । १मार्गसाधौ पथोऽनपेतः यत् । २हिते चिकित्सादौ ३हितकारकारकभोज्यद्रव्यभेदे । पथ्यञ्च अपथ्यशब्दे २६६पृ० सुश्रुतोक्तहिताहितीध्याये दर्शितम् । रोगभेदे पथ्यापथ्यञ्च वैद्यके प्रसिद्धं विस्तरभयान्नोक्तम् । ४हरितकीवृक्षे पु० शब्दमाला अमरे स्त्री । ५मृगेर्वारौ हृचिर्भिटायां ७वन्याकर्कटयोश्च स्त्री राजनि० । ८मात्रावृत्तभेदे स्त्री "त्रिप्रं यकेषु दलयोराद्येषु दृश्यते यस्याः । पथ्येति नाम तस्याः प्रकीर्त्तितं नागराजेन" छ०र० ।

पथ्यशाक पु० पथ्यं शाकमस्य । तण्डुलीयशाके राजनि० ।

पथ्यादिगुग्गुलु पु०औषधिविशेषे यथा "पथ्या विभीतामलकीफलानां शतं क्रमेण द्विगुणाभिवृद्धम् । प्रस्थेन युक्तञ्च पलक्रमेण द्रोणे जले संस्थितमेकरात्रम् । अर्द्धावशेषं क्वथितं कषायं भाण्डे पचेत्तत् पुनरेव लोहे । अमूनि वङ्गेरवतार्य्य दद्यात् द्रव्याणि संचूर्ण्य पलार्द्धकानि । त्रिवृद्दन्तीत्रिफलागुडूचीत्रपुत्रिवृत्सागरकोषणानि । यथेष्टचेष्टस्य नरस्य शीघ्रं हिमाम्बुपानानि च भोजनानि । निषेव्यमाणो विनिहन्ति रोगान् सृष्टप्रसर्वी नूतनखञ्जताञ्च । प्लीहानसूपं जठरार्त्तिगुल्मं पाण्डुत्वकण्डूत्वविवातरक्तम् । पथ्यादिको गुग्गुलुरेष नाम्ना ख्यातः क्षितावप्रमितप्रभावः । बलेन नागेन समं मनुष्यं जवेन कुर्य्यात् तुरगेण तुल्यम् । आयुःप्रकर्षं विदधाति चक्षुर्बलं तथा पुष्टिकरो विषघ्नः । क्षतस्य सन्धानकरो विशेषाद्रोगेषु शस्तः सकलेषु तज्ज्ञैः" भावप्र० ।

पद्यावक्त्र न० "युजोर्जेन सरिद्भर्तुः पद्यावक्त्रं प्रकीर्त्तितम्" छ०र० उक्तलक्षणे मात्रावृत्तभेदे। [पपाद भेदतः।

पद् स्थैर्ये भ्वा०पर०सक० सेट। पदति अपादीत् अपदीत्।

पद् गतौ दि० आ०सक०अनिट्। पद्यते अपादि भेदे पन्नः आ+विपत्तौ आपत्तौ च णिच् आपादन व्यापकाभावेन व्याप्याभावकल्पने प्राप्तौ च।

उद्+उत्पत्तौ उद्भवे जनने अक०।

प्रति+उद् झटित्युद्भवे अक०।

वि+उद्—शब्दस्यावयवार्थबोधने व्युत्पत्तिः।

उप+युक्तियोगे उपपद्यते उपपत्तिः।

अभि+उपसान्त्वने। कुमा० ४श्लोकः

निस्+निष्पत्तौ अवस्थान्तरप्राप्तौ अक०।

प्र+प्राप्तौ सक०। प्रपन्नः

प्रति+स्वीकारे अङ्गीकारे सक० प्रतिपत्तिः प्रतिपन्नः।

वि+प्रति+संशये सक० विप्रतिपन्नः।

वि+मरणे नाशे अक०। विपद्यते विपन्नः विपद्।

सम्+सम्यग् दृष्टौ अक० सम्पद्यते सम्पद्।

पद् गतौ भ्वा० चु०आत्म०सक० सेट्। पदयते अपपदत।

पद् पु०पद्यते गच्छत्यनेन करणे क्विप्। पादे "पदादयः पृथक् शब्दा इत्येके "पदङ्घ्रिचरणोऽस्त्रियाम्" अमरः।

पद न० पद्—अच्। १व्यवसाये २स्थाने ३चिह्ने ४पादे ५वस्तुनि च अमरः। ७विभक्त्यन्तशब्दभेदे "सुप्तिङन्तं पदम्" पा०। ८वाक्यैकदेशे च "वर्णाः पदं प्रयोगार्हान्वितैकार्थबोधकाः" सा०द०। ९श्लोकचरणे १०किरणे पु० मेदि० ११अर्थबोधकशक्तिविशिष्टे नैयायिकाः "वृत्तिमत्त्वं पदत्वमिति" तल्लक्षणात्।

पदक त्रि० पदं वेत्ति ज्ञा+वुन्। १वेदमन्त्रपदविभाजकग्रन्थस्याध्येतरि २तद्वेत्तरि च ३गोत्रप्रवर्त्तकर्षिभेदे पु०ततः अपत्ये इञ् पादकि तदपत्ये पुंस्त्री०। यस्का० बहुत्वे लुक्। पदकान्तद्गोत्रापत्येषु।

पदकार पु० पदं पदविभागं करोति कृ—अण् उप०स०। वेदानां मन्त्रपदविभाजकग्रन्थकर्त्तरि

पदक्रम पु० ६त०। वेदमन्त्राणां पदविभाजकक्रमे। तमधीते वेत्ति वा उक्थादि०ठक्। पादक्रमिक तदुपन्याध्येतरि तद्वेत्तरि च त्रि०

पदक्रमक न० पदं क्रमश्च तौ वेत्त्यधीते वा वुन्। १पदक्रमयोर्वेत्तरि २तदुपन्याध्येतरि च। [पदातिके अमरः।

पदग त्रि० पादेन गच्छति गम—ड पादस्य पद इत्यादेशः।

पदगोत्र न०६त०। "भारद्वाजमाख्यातं भार्गवं नाम, वाशिष्ठ उपसर्गः, निपातः काश्यपः" इत्येषु यजु० प्रातिशाख्योक्तेषु भारद्वाजादिषु पदानां गोत्रेषु। "चत्वारि पदजातानि आख्यातनामनिपातोपसर्गाः" इति निरुक्तोक्तानां च तेषां चतुर्णां भारद्वाजादिगोत्रत्वम्। [समूहे निरुक्त०।

पदजात न० ६त०। आख्यातनामनिपातोपसर्गरूपे शब्द-

पदञ्जल पु०ऋषिभेदे ततः उपका०गोत्रप्रत्ययस्य बहुत्वे लुक्।

पददेवता स्त्री पदानां आख्यातादीनां देवता। आख्यादीनां सोमादिषु देवतासु "सौम्यमाख्यातं नाम वायव्यमाग्नेय उपसर्गः निपातोवारुणः" वाजसेयप्रतिशाख्यम्। ६।६। [सू०६।१।१।

पदनिधन न०पदमधिकृत्य निधनम्। सामभेदे लाट्यायनश्रौ०

पदन्यास पु० ६त०। १चरणार्पणे। पदस्येव न्यासोऽस्त्र। २गोक्षुरवृक्षे शब्दच० तन्त्रोक्ते अङ्गपूर्वाभिमन्त्रस्य पदानां तत्तदङ्गेषु न्यासे च यथाह तन्त्रसा०ज्ञानार्णवे "एकमेकं पुनश्चैकं पुनरेकं द्वयं ततः। चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्वति!। पदान्येतानि देवेशि! नवद्वारेषु विन्यसेत्। मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने!। गुह्यादिमस्तकान्तं पदानां नवकं न्यसेत्"। तदुक्तं तत्रैव "ब्रह्मरन्ध्रास्यहृदयमूलाधारेष्वनुक्रमात्। चतुर्वीजानि विन्यस्य परेष्वन्यांश्च विन्यसेत्। भ्रूमध्यनासिका कण्ठनाभिलिङ्गेषु पञ्चसु। पूर्ववत् क्रमतो देवि! नमःप्रभृतिकं न्यसेत्"। [पाठवताञ्च साम्नाम्" देवीभा०।

पदपाठ पु० ६त०। वेदपदविभाजकग्रन्थभेदे "शङ्कीवरस्य

पदभञ्जन न० पदानि भज्यन्तेऽनेन भञ्ज—करणे ल्युट्। १निरुक्तरूपे ग्रन्थे २गूढार्थव्याख्याने च [हेमच०।

पदभञ्जिका स्त्री पदानि भञ्जति भञ्ज—ण्वुल्। टीकग्रन्थाम्

पदमञ्जरी स्त्री पदानां मञ्जरीव। व्याखापरनामके हरदत्तप्रणीते व्याकरणग्रन्थभेदे। [देवीपु० ९अ०।

पदमाला स्त्री ६त०। १पदश्रेणौ २मोहननामविद्यायाम्

पदवि(वी) स्त्री पद—अवि वा ङीप्। १पथि। अमरः २धर्माचारे च। [२०२अ०।

पदविग्रह पु० पदेन विग्रहो यत्र। समासे हरिवं०

पदव्याख्यान न० ६त०। वेदमन्त्रस्य विभाजकग्रन्थभेदे तस्य व्याख्यानो ग्रन्थः तत्र भवो वा शरदादि० अञ्। पादव्याख्यान तस्य व्याख्याने तत्रभवे च त्रि०।

पदष्ठीव न० पादौ च अष्ठीवन्तौ च द्वन्द्व० नि०। पादजानुनोः समाहारे।

पदस्तोभ पु॰ पदस्थितः स्तोभः। पदमध्यपठिते निरर्थके शब्दभेदे गानशब्दे २५७३पृ॰दृश्यम्। [चतायां राजनि॰।

पदाङ्गी स्त्री पदं हंसपदमिवाङ्गं यस्याः ङीष्। हंसपदी-

पदाजि पु॰ पादेन अजति गच्छति अज-इण्। "पादस्य पदाज्यतीति" निर्देशात् अभावः पादस्य पद इत्यादेशः। पादेन गन्तरि पदातौ अमरः।

पदात त्रि॰ पादेनातति अत-अच्। पदातौ शब्दरत्ना॰।

पदाति पु॰ पादेन अतति गच्छति उपपदि अत-इञ् पदादेशः। पादेन गन्तरि (पेयादा) अमरः। स्वार्थे क। पदातिक तत्रार्थे शब्दर॰।

पदाद्यविद् पु॰ पदादिं न वेत्ति विद-क्विप् ६त॰। पदाद्युच्चारणानभिज्ञे छात्रगण्डे अपक्वदन्तवत्ते हारा॰।

पदानुशासन न॰ पदान्यनुशिष्यन्तेऽनेन अनु+शास-करणे ल्युट्। शब्दानुशासने व्याकरणे मेदि॰।

पदानुस्वार पु॰ सामभेदे ताण्ड्यब्रा॰ ६।९।१

पदान्त पु॰ ६त॰। पदावसाने

पदान्तर न॰ अन्यत् पदम् मयू॰ स॰। एकपदभिन्ने अन्यपदे। १पदे २स्थानान्तरे च। [लिङ्गेच मेदि॰।

पदार पु॰ पदात् अर्च्छति ऋ-अच् ५त॰। १पादधूलौ २पदा-

पदार्थ पु॰ ६त॰। शब्दाभिधेये द्रव्यादौ। पदार्थाश्च दर्शनभेदेन नानाविधाः तत्तद्दर्शनमतप्रदर्शने उक्ता यथा वैशेषिकाणां द्रव्यादयः षट्, सप्त वा, वैशेषिकमते प्रमाणादयः षोडश, सांख्यानां प्रकृत्यादयः पञ्चविंशतिः, पातञ्जलानां सेश्वराः प्रकृत्यादयः षड्विंशतिः। वेदान्तिनाम् चिद्चिदात्मकौ द्वावित्येवं बोध्यम्।

पदालिक पु॰ पदस्य चरणस्यालिकमिव। चरणोपरिभागे

पदासन ६त॰। पादपीठे हेमच॰।

पदि पु॰ पद्यते पद-कर्मणि इन्। मन्त्रे निरु॰ "पदिर्गन्तुर्भवति यत् पद्यते" निरु॰ ५।१८ "पदिस्तृप्तिमाति" ऋ॰१।१२५।२। [चारिणि स्त्रियां चित्त्वात् ङीप्।

पदिक त्रि॰ पादेन चरति पर्या॰ ठन् पदादेशश्च। पाद-

पदिन्याय पु॰ जैमि॰ १।१।१८ सूत्रोक्ते न्यायभेदे।

पदिहोम पु॰ पदि पादस्थाने होमः अलुक्स॰। पदि जुहोति वर्त्मनि जुहोतीतिश्रुतिविहितहोमभेदे तत्र पादस्य हस्तिनएव प्राह्यः "सर्वे पदो हस्तिपदे निमग्नाः इत्युक्तेः। [पादेनोपहते।

पदोपहत त्रि॰ पादेन उपहतः पादस्य पद इत्यादेशः।

पद्र त्रि॰ पद्भ्यां गच्छति गम-ड ३त॰। पद्भ्यां गन्तरि पदातौ अमरः। पादशब्देन समासे तु अदन्तपदादेशे पदग इत्येव।

पद्वोष पु॰ ६त॰ वा पदादेशः। पादशब्दे। एवं शब्दभिन्नयोरपि वा पदादेशे पच्छब्दपन्निभिन्नशब्दौ पादशब्दार्थे पक्षे पादघोष पादशब्द पादभिन्न तत्तदर्थे।

पद्धति(ती) स्त्री पादेन हन्यते गम्यते हन-गतौ आधारे क्तिन् पदादेशः वा ङीप्। १पथि २पङ्क्तौ च मेदि॰। ३ग्रन्थस्य निष्कृष्टार्थबोधके ग्रन्थभेदे हेमच॰। ४उपनामभेदे स च शूद्रस्य वसुघोषादिः। "शूद्राणां नामकरणे वसुघोषमित्रादिरूपपद्धतियुक्तनामत्वम्" उद्वा॰ रघु॰।

पद्दिम न॰ पादस्य हिमं पदादेशः। पादशीतस्पर्शे।

पद्म न॰ पद-मन्। १कमले २गजसुखादिस्थे बिन्दुगणटाये कमलाकारेण वैन्यादेरभिनिवेशनरूपे ३व्यूहभेदे ४निधिभेदे "अर्बुदमब्जमिति पद्मपर्य्यायाजनाम्नोक्तायां ५दशार्बुदसंख्यायां ६तत्संख्यातेषु ७पुष्करमूले ८सीसके धातौ ९शरीरस्थे नाडीचक्रभेदे च मेदि॰ १०पद्मकाख्यौषधौ धरणिः। देहस्थपद्मानि च चक्रत्वेन प्रसिद्धानि तानि च चक्रशब्दे २८०८पृ॰ दर्शितानि। कमले पु॰न॰ अमरे स्थितं तत्रास्य पुंस्त्वमपयुक्तदोषयुक्तमित्यालङ्कारिकाः। ११दाशरथौ १२नागभेदे पु॰ धरणिः। १३जिनचक्रवर्त्तिभेदे पु॰हेम॰ १४रतिबन्धभेदे पु॰ "हस्ताभ्यां समालिङ्ग्य नारी पद्मासनोपरि। रमेद्गाढं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः" रतिम॰।

पद्मक न॰ पद्ममिव कायति कै-क। १गजसुखादिस्थे पुष्पाकारे बिन्दुगणे अमरः। २पद्मकाष्ठे मेदि॰। ३कुष्ठौषधौ राजनि॰ स्वार्थे क। ४पद्मशब्दार्थे च पद्मकाष्ठगुणाः भावप्र॰ उक्ता यथा "पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। शीसर्पदाहविस्फोटकण्डूश्वासपित्तहृत्। गर्भसंस्थापनं हृद्यं वमिव्रणतृषाप्रणुत्" [दृश्योऽत्र।

पद्मकर पु॰ पद्मं करेऽस्य। पद्महस्ते विष्णौ पद्महस्ता-

पद्मकन्द पु॰ ६त॰। कमलकन्दे शालूके "शालूकं शीतलं हृद्यं पित्तदाहास्रनुद् गुरु। दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्। संपादि मधुरं रूक्षं स्निग्धाङ्गमपि तद्गुणम्" भावप्र॰।

पद्मकाद्यघृत न॰ "पद्मकामृतनिम्बानां धान्यचन्दनयोः पचेत्। कल्के काथे च हविषः प्रस्थं कर्दिनिवारणम्। तृष्णारुचि शमनं दाहज्वरहरं परम्" चक्रदत्तोक्ते घृतभेदे

पद्मकाष्ठ न॰ पद्ममिव सुगन्धि काष्ठमस्य। ओषधिभेदे राजनि॰

पद्मकिन् पु० पद्मकं बिन्दुलाञ्छनमस्यास्य त्वचि इनि। १भृङ्गे हेमा०। २हस्तिनि [२०५८पृ० दृश्यम्।

पद्मकीट पु० पद्ममिव कीटः। कीटभेदे सुश्रुतः कीटशब्दे

पद्मकेतन पु०१गरुडात्मजभेदे भा०उ०१००अ०। ६त०। २पद्मनिवासे न०

पद्मकेशर पु०न० ६त०। किञ्जल्के राजनि०।

पद्मगन्ध(न्धि) त्रि०पद्मस्येव गन्धोऽस्य वा इत् समा०। १पद्मतुल्यगन्धयुक्ते। इदन्तः। २पद्मकाष्ठे न० भावप्र०।

पद्मगर्भ पु० पद्मं विष्णुनाभिकमलं गर्भ इव उत्पत्तिस्थानमस्य। चतुरानने ब्रह्मणि शब्दर० तस्य तथोत्पत्तिर्यथा "पराबरेषां भूतानामात्मा यः पुरुषः परः। स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन। तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः। तस्मिञ्जज्ञे महाराज! स्वयम्भूश्चतुराननः" भाग०६।१।२। पद्मस्य पुण्डरीकस्य गर्भोमध्य उपाधनास्थानतयाऽस्य। २परमेश्वरे "पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्" विष्णुस०। ६त०। ३कमलमध्ये च। [भा०आ० ६६अ०। ४खड्गे च

पद्मगुणा स्त्री पद्मं गुणयति आवनत्वेन गुण-क। १लक्ष्म्याम्।

पद्मचारिणी स्त्री पद्ममिव चरति चर-णिनि। उत्तरापथप्रसिद्धे स्वनामख्याते लतामेदे अमरः।

पद्मज पु० पद्मात् विष्णुनाभिकमलात् जायते जन-ड। ब्रह्मणि चतुर्मुखे पद्मगर्भशब्दे दृश्यम्। पद्मजातादयोऽप्यत्र।

पद्मतन्तु पु० ६त०। मृणाले राजनि०।

पद्मदर्शन त्रि० पद्मस्येव दर्शनमस्य। १पद्मतुल्यदर्शने (नोवा) इति ख्याते २वृक्षे पु० शब्दच०।

पद्मनाभ पु० पद्मं नाभौ यस्य संज्ञायाम् अच्स०। १विष्णौ। "पद्मनाभोऽरविन्दाक्षः" विष्णुसं० भाषा० तु पद्मस्य नाभौ स्थित इत्येवं उक्तम्। तत्र अर्थ आद्यच् इति भेदः। २धृतराष्ट्रपुत्रभेदे भा० आ० ६७अ०। ३नागभेदे पु० भा०३५७अ०। [समा०। विष्णौ हिरुपकोषः।

पद्मनाभि पु० संज्ञात्वेऽपि समासान्तविधेरनित्यत्वात् न अच्

पद्मनाल न०स्त्री ६त०। मृणाले [पु० हेम०।

पद्मनेत्र त्रि०पद्ममिव नेत्रमस्य। १पद्मतुल्यनेत्रयुक्ते २बुद्धभेदे

पद्मपत्र न० पद्मस्य पत्रमिव। १पुष्करमूले अमरः ६त०। २कमलदले च पद्मपर्णादयोऽप्यत्र न०।

पद्मपाणि पु० पद्मं पाणौ यस्य। ब्रह्मणि चतुर्मुखे २बुद्धे त्रिका०। ३कमलहस्तके त्रि०।

पद्मपुराण न० व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यादि नारदीयपु० उक्तं यथा

प्रथमे सृष्टिखण्डे "पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज!। नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्मविस्तरः। पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम्। ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम्। दानानां कीर्त्तनं यत्र दत्तानाञ्च पृथक् पृथक्। विवाहः शैलजायाश्च तारकाख्यानकं महत्। माहात्म्यञ्च गयादीनां कीर्त्तितं सर्वपुण्यदम्। कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक्। महापापार्जनं दानं यत्र प्रोक्तं द्विजोत्तम!। तत् सृष्टिखण्डसंदिष्टं व्यासेन सुमहात्मना" द्वितीये भूमिखण्डे "पितृमातृादिपूज्यत्वे शिवधर्मकथा पुरः। सुव्रतस्य कथा पश्चात् वृत्रस्य च वधस्तथा। पृथोर्वैण्यस्य चाख्यानं धर्माख्यानं ततः परम्। पितृशुश्रूषाख्यानं नहुषस्य कथा ततः। ययाति-चरितञ्चैव गुरुतीर्थनिरूपणम्। राज्ञा जैमिनिसंवादो बहुचर्यकथायुतः। कथा ह्यगोकसुन्दर्या कुण्डदैत्यवधाचिता। कामोदाख्यानकं तत्र विष्णुखण्डकथासंयुतम्। कुरुः कस्य च संवादश्रवणेन महात्मना। शिवाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोद्भवम्। सूतशौनकसंवादं भूमिखण्डमिदं स्मृतम्"। तृतीये स्वर्गखण्डे "ब्रह्माण्डोत्पत्तिरुदिता यत्रविभ्यस्य सौतिना। सभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम्। नर्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक्। कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः। कालिन्दीपुण्यकथनं काशीमाहात्म्यवर्णनम्। गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम्। वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम्। व्यासजैमिनिसंवादः पुण्यकर्मकथाचितः। सप्तद्रुमधनाख्यानं व्रताख्यानं ततः परम्। कार्त्तिकपाद माहात्म्यं स्तोत्रं सर्वापराधनुत्। एतत् स्वर्गाभिधं विप्र! सर्वपातकनाशनम्"। चतुर्थे पातालखण्डे "रामाश्वमेधे प्रथमं रामराज्याभिषेचनम्। अगस्त्याद्याश्रमश्चैव पौलस्त्याश्वयकीर्त्तनम्। अश्वमेधोपदेशश्च हयचर्य्या ततःपरम्। नाना राजकथाः पुण्या जयद्रथानुवर्णनम्। वृन्दावनस्य माहात्म्यं सर्वपापप्रणाशनम्। नित्यलीलानुकथनं यत्र लक्ष्मीपतेरिव। माधवस्नानमाहात्म्ये स्नानदानार्चने फलम्। धरावराहसंवादो यमब्राह्मणयोः कथा। संवादो राज-

दूतानां लक्ष्मीस्तोत्रनिरूपणम्। शिवशर्म्मुसमाख्यानं देवीव्याख्यानकलतः। भक्तमाहात्म्यमतुलं शिवमाहात्म्यसुत्तमम्। देवरातसुताख्यानं पुराणाश्च प्रशंसनम्। गौतमाख्यानकश्चैव शिवगीता ततः स्मृता। कल्पान्तरी रामकथा भारद्वाजाश्रमस्थितौ। पातालखण्डमेतद्धि ग्रहणतां ज्ञानिनां वदा। सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम्"। पद्मे उत्तरखण्डे "पर्वताख्यानकं पूर्वं गौर्य्यै प्रोक्तं शिवेन वै। जालन्धरकथा पश्चात् श्रीशैलाद्युनुकीर्त्तनम्। सागरस्य कथा पुण्या ततःपरमुदीरिता। गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम्। व्यासादिदानमाहात्म्यं तन्माहात्म्यादशीव्रतम्। चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम्। विष्णुधर्मसमाख्यानं विष्णुनामसहस्रकम्। कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः। जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम्। साधुमत्याश्च माहात्म्यं ऋषिसंहोत्पत्तिवर्णनम्। देवशर्म्मादिकाख्यानं गीतामाहात्म्यवर्णने। भक्तव्याख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य ह। इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथान्वितम्। मन्त्ररत्नाभिधानञ्च त्रिपादभूत्यनुवर्णनम्। अवतारकथा पुण्या मत्स्यादीनामतःपरम्। रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव!। परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च। इत्येतदुत्तरं खण्डं पद्मं सर्वपुण्यदम्" ततःफलश्रुतिः "पद्मखण्डयुतं पाद्मं यः शृणोति नरोत्तमः। स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान्। एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम्। पुराणं लेखयित्वा वै त्र्यैष्ठ्यां स्वर्णाज्यसंयुतम्। यः प्रदद्यात् सुमतये पुराणज्ञाय मानदः। स याति वैष्णवं धाम सर्वदेवनमस्कृतः। पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा। सोऽपि पद्मपुराणस्य लभेत् श्रवणजं फलम्"।

पद्मपुष्प पु॰ पद्मस्येव पुष्पमस्य। १कर्णिकारवृक्षे २पिकाङ्गपक्षिभेदे पुंस्त्री॰ शब्दच॰ स्त्रियां ङीष्।

पद्मप्रभ त्रि॰ पद्मस्येव प्रभा यस्य। १कमलसदृशप्रभान्विते २जैनभेदे पु॰ हेमच॰। [मनसादेव्यां शब्दच॰।

पद्मप्रिया स्त्री पद्मं प्रियं यस्याः। जरत्कारुसुनिपत्न्यां

पद्मबन्ध पु॰ चित्रालङ्कारभेदे अलङ्कारशब्दे १९०पृ॰दृश्यम्।

पद्मबन्धु पु॰ ६त॰। १सूर्य्ये शब्दरत्ना॰ २अर्कवृक्षे च ३भ्रमरे शब्दच॰।

पद्मभू पु॰ पद्मात् विष्णुनाभिकमलात् भवति भू-क्विप्। चतुर्मुखे ब्रह्मणि हला॰। पद्मगर्भशब्दे दृश्यम्।

पद्ममुख त्रि॰ पद्ममिव मुखमस्य। १कमलसदृशमुखयुते स्त्रियां वा ङीष्। सा च २दुर्वालतायां शब्दच॰।

पद्ममुद्रा स्त्री "हस्तौ तु सम्मुखौ कृत्वा तदधःप्रोथिताङ्गुली। तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका" तन्त्रसारोक्ते मुद्राभेदे [चतुर्मुखे अमरः।

पद्मयोनि पु॰ पद्मं विष्णुनाभिकमलं योनिरस्य। ब्रह्मणि

पद्मराग न॰ पद्मस्येव रागोऽस्य। रक्तवर्णमणिभेदे तल्लक्षणादि दृ॰सं॰ ४० उक्तं यथा

"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः। सौगन्धिकजा भ्रमराञ्जनाब्जजम्बुरसद्युतयः। कुरुविन्दुभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः। स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च। स्निग्धः प्रभातुलेपी स्वच्छोऽर्चिष्मान् गुरुः सुसंस्थानः। अन्तःप्रभाऽतिरागा मणिरत्नगुणाः समस्तानाम्। कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः। दुर्विद्धा न मनोज्ञाः सगर्करासेति मणिदोषाः। भ्रमरशिखिकण्ठवर्णो दीपशिखासमप्रभो भुजङ्गानाम्। भवति मणिः किल मूर्धनि योऽनर्घो वै स विज्ञेयः। यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य दोषा भवन्ति विषरोगकृताः कदाचित्। राष्ट्रे च नित्यमभिवर्षति तस्य देवः शत्रूंश्च नाशयति तस्य मणेः प्रभावात्। षड्विंशतिः सहस्राणेकस्य मणेः पलप्रमाणस्य। कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य। अर्द्धपलस्य द्वादश कर्षस्यैकस्य षट् सहस्राणि। यच्चाष्टमाषकमितं तस्य सहस्रत्रयं मूल्यम्। माषकचतुष्टयं दशशतकयं द्वौ तु पञ्चशतमूल्यौ। परिकल्प्यमन्तराले मूल्यं हीनाधिकगुणानाम्। वर्णमूल्यार्धं तेजोहीनस्य मूल्यमष्टांशः। अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम्। आधूम्रं व्रणबहुलं स्वल्पगुणं चाप्नुयाद्दुःखभागम्। इति पद्मरागमूल्यं पूर्वाचार्य्यैः समुद्दिष्टम्"। युक्तिकल्पतरौ चात्रविशेषो यथा "सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम्। पीतं काणपुरोद्भूतं कुरुविन्दमिति स्मृतम्। अशोकपल्लवच्छायमसुं सौगन्धिकं विदुः। तम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम्। उत्तमं सिंहलोद्भूतं निकृष्टं तम्बुरोद्भवम्। मध्यमं मध्यजं ज्ञेयं माणिक्यं चेत्रभेदतः" तथा "बन्धूकगुञ्जाशकलेन्द्रगोपजयासनाशकृ-

समवर्णशोभाः। भ्राजिष्णवो दाडिमबीजवर्णास्तथा परे किंशुकपुष्पभासः। सिन्दूरपद्मोत्पलकुङ्कुमानां चारसस्यापि समानवर्णाः। सान्द्रेऽतिरागे प्रभया क्षयेव भान्ति स्वलक्ष्म्या स्फुटमध्यशोभाः। भानोश्च भासा मतुमेधयोर्ममासाद्य रश्मिप्रकरेण दूरम्। पार्श्वानि सर्वाण्यनुरञ्जयन्ति गुणोपपन्नाः स्फटिकप्रसूताः। कुसुम्भनीलोत्पलमिश्ररागप्रत्यग्ररक्ताम्बरतुल्यभासः। तथा परे ऽरुष्करकण्टकारीपुष्पत्विषो हिङ्गुलकत्विषोऽन्ये। चकोरपुंस्कोकिलसारसानां नेत्रावभासश्च भवन्ति केचित्। अन्ये पुनर्नीतिविपुष्पितानां तुल्यत्विषः कोकनदोदराणाम्। प्रभावकाठिन्यगुरुत्वयोगैः प्रायः समानाः स्फटिकोद्भवानाम्। कानीलरक्तोत्पलचारुभासः सौगन्धिकाख्या मणयो भवन्ति। यो मन्दरागः कुरुविन्दजेषु स एव जातः स्फटिकोद्भवेषु। निरर्चिषोऽन्तर्बहुशोभवन्ति प्रभावन्तोऽपि न तत्समानाः। ये तु रावणमङ्गायां जायन्ते कुरुविन्दकाः। पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्चिषः। वर्णानुयायिनस्तेषामन्वर्थे तथाऽपरे। न जायन्ते तु ते केचित् मूल्यलेशमवाप्नुयुः। तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके। सधर्माणः प्रजायन्ते स्वल्पमूल्या हि ते स्मृताः"। जात्यादि "माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम्। ब्राह्मणक्षत्रियवैश्याश्च शूद्राश्च यथाक्रमम्। रक्तश्वेतो भवेद्विप्रस्तिरक्तस्तु क्षत्रियः। रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथाऽन्त्यजः। पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः। सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः। शोणपद्मसमाकारः खदिराङ्गारसप्रभः। पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्वदा। गुञ्जासिन्दूरबन्धूकनागरङ्गसमप्रभः। दाडिमीकुसुमाभासः कुरुविन्दस्तु बाहुजः। हिङ्गुलाभाशोकपुष्पाभसौगन्धिकतृपीतलोहितम्। अवालाचारसप्रायं वैश्यं सौगन्धिकं विदुः। चारक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः"। मांसखण्डसमाभासो ह्यन्त्यजः पापनाशनः"। तद्दोषादि "माणिक्यस्य समाख्याता अष्टौ दोषा मनीषिभिः। द्विच्छायश्च द्विरूपश्च सभेदः कर्करस्तथा। अयोभवं कोकिलाक्षं जलं धूम्राभिधश्च वै। गुणाश्चत्वार आख्याताश्छायाः षोडश कीर्त्तिताः"। छायास्तु पूर्वोक्ता एव "छाया द्वितयसम्बन्धाद् द्विच्छायं बन्धुनाशनम्। द्विरूपं द्विपदं तेन माणिक्येन पराभवः। सभेदो भिन्नमित्युक्तः सप्तधातविधायकः। कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत्। दुग्धेनेव समाक्षिप्तं मणेः पुटकमुच्यते। अयोभवं सुसंहिष्टं माणिक्यं बहुदुःखकृत्। मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम्। आयुर्लक्ष्म्योर्यशो हन्ति सदोषं तच्च धारयेत्। रागहीनं जलं प्रोक्तं धनधान्यापवादकृत्। धूम्रं धूमसमाकारं वैद्युतं भयमावहेत्"। तथा "शोभाहितयवन्तो ये मणयः क्षतिकारकाः। उभयत्र पदं येषां तेन च स्यात् पराभवः। भिन्नेन युद्धे मृत्युः स्यात् कर्करं धननाशकृत्। दुग्धेनेव समाक्षिप्तः पुटके यस्तु सम्भवेत्। दुःखकृत् स समाख्यातो न त्वपेक्षणीयकः। मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता। तेषां च बहुभेदाः स्युर्न ते धार्या कदाचन"। अथ गुणाः "गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता। वर्णाधिक्यं गुरुत्वञ्च स्निग्धता समताऽच्छता। अर्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः"। फलम् "ये कर्कराम्बुद्रुमबोपदिग्धाः प्रभाविमुक्ताः परुषा विवर्णाः। न ते प्रशस्ता मणयो भवन्ति समानतो जातिगुणैः समस्तैः। दोषोपरुष्टं मणिमप्रबोधाद्बिभर्त्ति यः कश्चन कश्चिदेकम्। तं बन्धुदुःखायसबन्धवित्तनाशादयो दोषगुणाः भजन्ते। सपत्नमध्येऽपि कृताधिवासं प्रमादहस्तादपि वर्त्तमानम्। न पद्मरागस्य महागुणस्य भर्त्तारमापत्सु सुपैति काचित्। दोषोपसर्गप्रभवास्च ये ते नोपद्रवास्तं समभिद्रवन्ति। गुणैः स सख्यैः सकलैरुपेतो यः पद्मरागं प्रयतो बिभर्त्ति"। परीक्षा यथा "बालार्ककरसंस्पर्शात् यः शिखां लोहितां वमेत्। रञ्जयेदाश्रयं वापि स महागुण उच्यते। दुग्धे घृतगुणे क्षिप्तो रञ्जयेद्दुग्धः समन्ततः। वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः। अन्धकारे महाघोरे यो न्यस्तः सनृमहामणिः। प्रकाशयति सूर्याभः स श्रेष्ठः पद्मरागकः। पद्मकोशे तु यच्छस्तं विकाशयति तत्क्षणात्। पद्मरागवरो ह्येष देवानामपि दुर्लभः। सर्वारिष्टप्रशमनाः सर्वसम्पत्तिदायकाः। चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम्। यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः। वंशकान्तिः स विज्ञेयः सर्वसम्पत्तिकारकः। पञ्चसप्तनवविंशतिरागः क्षिप्त एव सकलः खलु वस्त्रे। वर्जयेद्दमति वा करलाबसुत्तरोत्तरमहागुणिनस्ते। नीलं रसं दुग्धरसं जलं वा ये रञ्जयन्ति दिशतप्रमाणम्। ते ते यथापूर्वप्रतिप्रशस्ताः सौभाग्यसम्पत्तिविधानदाश्च"। परि-

माषम् "गुञ्जाफलप्रमाणस्तु दशगुणप्रतिगुञ्जकान्। पद्मरागस्तुलयति यथापूर्वं महागुणः। क्रोष्टुकोलफलाकारो द्वादशार्द्धगुञ्जकान्। पद्मरागस्तुलयति यथापूर्वं महागुणः। बदरीफलतुल्यो यः स्वरदिग्वसुमाषकः। तथा धात्रीफलतिंशद्दिंशतिद्वादशमाषकः। तथाम्रफलतुल्यो यो वह्निपञ्चैकमाषकः। ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः। बिल्वीफलसमाकारो वसुषड्दगतोलकः। अतःपरं प्रमाणेन मानेन च न लभ्यते। यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात्। केचिच्चारुतराः सन्ति जातीनां प्रतिरूपकाः। विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत्। कलसपुरोद्भवसिंहलतम्बुरुदेशोत्थसक्तमालीयाः। श्रीपर्णिकायाः सदृशा विजातयः पद्मरागाणाम्। तुषोपलक्षणात् कलसाभिधानमात्रस्वभावादपि तम्बुरोत्थम्। काण्ड्रात्तथा सिंहलदेशजातं सक्ताभिधानं नभसः स्वभावात्। श्रीपर्णकं दीप्तिनिराकृतित्वाद्विजातिलिङ्गाश्रय एव भेदः"। तथा "स्नेहप्रदेहो मृदुता बहुत्वं विजातिलिङ्गं खलु सर्वजन्यम्। यः श्यामिकां मुञ्चति पद्मरागो यो वा तुषाणामिव चूर्णमध्यः। स्नेहप्रदिग्धो न च यो विभाति यो वा प्रस्फुटः प्रजहाति दीप्तिम्। व्याक्रान्तमूर्ध्नि च तथाकुलिभ्यां यः कालिकां पार्श्वगतां बिभर्त्ति। सम्प्राप्य चोत्क्षेपपथानुवृत्तिं बिभर्त्ति यः सर्वगुणानतीव। तुल्यप्रमाणस्य च तुल्यजाते यो वा गुरुत्वेन भवेन्न तुल्यः। प्राप्यापि रत्नाकरजां स्वजातिं लभेत् गुरुत्वेन गुणेन विद्वान्। अप्रमाणगतिं सन्देहे शिलायां परिघर्षयेत्। दृष्टो योऽत्यन्तशोभावान् परिमाणं न सम्मति। स ज्ञेयः शुद्धजातिस्तु ज्ञेयास्तान्यो विजातयः। स्वजातकसमत्वेन विलिखेद्वा परस्परम्। वज्रं वा कुरुविन्दं वा विसृज्यान्योन्यकेन चेत्। न शक्यं लेखनं कर्तुं पद्मरागेन्द्रनीलयोः। जात्यस्य सर्वेऽपि वर्णेन जातु विजातयः कान्तिसमानवर्णाः। तथापि नानाकरणार्थमेवं भेदप्रकारः परयोः प्रदिष्टः। गुणोपलक्षेण सहावबद्धो मणिस्तु धार्यो विगुणेन जात्यः। न कौसुम्भेनापि सहावबद्धं विद्वान् विजातिं बिभृयात् कदाचित्। चक्षुश्च एकोऽपि यथा द्विजातीन् समेत्य भूरीनपहन्त्यवश्यात्। तथा मणीन् भूरिगुणोपपन्नान् करोति विद्रावयितुं विजातिः"। तस्य मूल्यम् "बाणाकीर्णितुषं क्षिप्त्वा दर्पणे धारयेन्मणिम्। तत्र कान्तिविभागेन छायाभागं विनिर्दिशेत्। वज्रस्य यत्तरस्तुलसंख्ययोक्तं मूल्यं सुसन्नेपितगौरवस्य। तत् पद्मरागस्य गुणान्वितस्य स्यान्माषकाख्यातुलितस्य मूल्यम्। यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्। तावन्मूल्यं तथा गुञ्जे कुरुविन्दे विधीयते। सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्। तावन्मूल्यं चतुर्थांशहीनं स्याद्वै सुगन्धिके। यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः। तावन्मूल्यं चतुर्थांशात् क्षीयते शूद्रजन्मनि। पद्मरागः पलं यस्तु धत्ते बालारुणप्रभः। कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः। इन्द्रनीलपलच्छायः कर्षत्रय धृतो मणिः। द्वाविंशतिसहस्राणां तस्य मूल्यं विनिर्दिशेत्। एको मौनूयते यस्तु जपाकुसुमसन्निभः। कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश। बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते। कार्षापणशतानान्तु मूल्यं वह्निः प्रकीर्त्तितम्। यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सम्मितः। कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत्। चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः। मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम्। द्विमाषको यस्तु गुणैः सर्वैरेव समन्वितः। तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः। माषकैकमितो यस्तु पद्मरागो गुणान्वितः। शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः। अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः। स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रदापयेत्। कार्षापणः समाख्यातः पुराणद्वयवर्णितः। अन्ये ब्रह्मप्रमाणीयसन्निशोदकसन्निभाः। कार्षाका इति विख्याताः स्फटिकप्रभवाश्च ते। तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत्। मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा। ब्रह्मक्षत्रियवैश्यान्त्यास्तत्रार्था ये प्रकीर्त्तिताः। चतुर्विधैर्नृपतिभिर्धार्या सम्पत्तिहेतवे। अतोऽन्यथा धृतः कुर्याद्रोगशोकभयक्षयम्" अत्र तस्य क्लीबत्वमयुक्तम्।

पद्मरेखा स्त्री पद्माकारा रेखा शा०त०। हस्तस्थितपद्माकाररेखायाम्।

पद्मलाञ्छन पु० पद्मं विष्णुचक्रं वा लाञ्छनमस्य। १ब्रह्मणि २सूर्ये ३कुबेरे ४चन्द्रे च मेदि० ५तारायां ६लक्ष्म्यां ७सरस्वत्यां च स्त्री मेदि०८पद्मरेखायुक्ते त्रि०।

पद्मवर्णक त्रि० पद्मस्येव वर्णोऽस्य कप्। १कमलतुल्यवर्णयुक्ते। पद्मं वर्णो वर्णः यस्य कप्। २पुष्करमूले जटा०।

पद्मवासा स्त्री पद्मं वासोऽस्याः। १पद्मालयायां २लक्ष्म्यां

हेमच॰ पद्मस्य वासः सौरभम् ६त॰ । २कमलसौरभे पु॰।

पद्मवृक्ष पु॰ पद्मतुल्यो वृक्षः । पद्मकाष्ठे राजनि॰ ।

पद्म(बी)बीज न॰ ६त॰ । कमलबी(बी)जे पद्माक्षे राजनि॰ "पद्म(बी)बीजं हिमं स्वादु कषायं तिक्तकं गुरु । विषघ्नं वृष्यं रूक्षञ्च गर्भसंस्थापकं परम्" भावप्र॰ ।

पद्मबी(बी)जाभ न॰ पद्मबी(बी)जमिवाभाति आ+भा-क । (माखना) ख्याते मखाक्षे राजनि॰ ।

पद्मा स्त्री पद्मवाधारत्वेनास्त्यस्याः अच् । १लक्ष्म्यां २लवङ्गे ३पद्मवारिण्यां लतायां च अमरः । ४मनसादेव्यां पद्मिन्यां ५फल्गिकावृक्षे च मेदि॰ ६अर्द्धमात्रभेदे हेमच॰ ७कुसुम्भपुष्पे रत्नमाला । ८दक्षदुहितरि दनुकिदेवपत्न्याञ्च कल्किपु॰ ।

पद्माकर पु॰ ६त॰। १जलाशयमात्रे अमरः सपद्मेऽगाधजलाशये २तद्योग्ये निष्पङ्के तदर्थे जलाशयोत्सर्गशब्दर्भिते ३तडागरूपे जलाधारे च ।

पद्माक्ष न॰ पद्मवाक्षोव बहुव्री॰ । १पद्मबी(बी)जे हारा॰ "पद्माक्षैर्निर्मिता माला गतभूणां नाशिनी मता" तन्त्रसारः । पद्मिमवाक्षि यस्य बहुव्री॰ । २पद्मतुल्यनेत्रे त्रि॰ स्त्रियां विभाषात् ङीष् ।

पद्माट पु॰ पद्मिमवाटति अट-अच् । चक्रमर्दवृक्षे (दादमर्दन) राजनि॰ । [अमरः ६त॰। २पद्मानां स्थाने पु॰ ।

तद्मालया स्त्री पद्ममालयो यस्याः । १लक्ष्म्यां २लवङ्गे च

पद्मावती पु॰पद्म+अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घश्च । (पद्मा) १नदीभेदे २मनसादेव्यां शब्दच॰ ३पद्मवारिण्यां लतायां जटाध॰। ४कुमारानुचरमातृभेदे भा॰ग॰४७अ॰। ५पद्मगालन्दपर्वतीभेदे हरिवं॰ १०१अ॰। असंज्ञायां तु न दीर्घः । पद्मवत् पद्मयुक्ते त्रि॰ स्त्रियां ङीप् ।

पद्मावतीप्रिय पु॰ ६त॰ । १जरत्कारुमुनौ २कल्किदेवे ३पद्मगालन्दपे च त्रि॰

पद्मासन "ऊरुमूले वामपादं पुनस्तु दक्षिणं पदम् । वामोरौ स्थापयित्वा तु पद्मासनमिति स्मृतम्" तन्त्रोक्ते आसनभेदे अस्यैव प्रकारभेदः तन्त्रसारे योगाङ्गतया उक्तः तच्च ८८६पृ॰ दर्शितम् एवमन्यदपि तल्लक्षणं योगाङ्गतया ध्येयं बद्धपद्मासनमर्द्धपद्मासनेति च तस्यैव प्रकारभेदः । देवपूजार्थे पद्माकारे १आसनभेदे पद्ममासनं यस्य । २कमलासने ब्रह्मणि पु॰ ।

पद्माङ्गा स्त्री पद्मं तद्गन्धमाङ्गयते अर्द्यते स्वगन्धेन आ+ङ्ग-क । १पद्मवाक्षिण्यां लतायां राजनि॰ २लवङ्गे न॰

पद्मिनी स्त्री पद्मं विद्यतेऽस्याः पुष्करा॰ इनि अभिधानात् स्त्रीत्वम् । १पद्मयुक्तदेशे २पद्मवारिणि विष्णौ पु॰ "पद्मी पद्मनिभेक्षणः" विष्णुसं॰ तस्य शङ्खचक्रगदापद्मधारित्वात् तथात्वम् । ३पद्मधारिमात्रे त्रि॰ स्त्रियां ङीप्। ४हस्तिनि पु॰ अमरः पद्मानां समूहः इनि । ६पद्मसमूहे ७पद्मलतायाञ्च अमरः "सूननाशदलोत्फुल्लफलैः सा लतिका पुनः । पद्मिनीत्युच्यते प्राज्ञैर्विभिन्नादिव सा स्मृता । पद्मिनी मधुरा तिक्ता कषाया शिशिरा सरा । पित्तश्लेष्मविषानिलास्रनाशदोषकृत्" राजनि॰ "भवति कमलनेत्रा नासिकाशुद्धरन्ध्रा अविरलकुचयुग्मा दीर्घकेशी लताङ्गी । मृदुचरणसुशीला गीतनृत्यातुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा" रतिमञ्जर्युक्तलक्षणयुक्ते स्त्रीभेदे "पद्मिनी मयके हृष्टा" इति च तन्त्रोक्तम् । १०सरोवरे ११पद्मे च विश्वः १२स्त्रग्धाते वृत्तमाला ।

पद्मिनीकण्टक पु॰ कमलिन्याः कण्टकाकारे कुसुमोत्थे क्षुद्ररोगभेदे २२८२ पृ॰ दृश्यम् ।

पद्मिनीकान्त पु॰ ६त॰। १सूर्ये जटाध॰ । २अर्कवृक्षे च पद्मिनीवल्लभादयोऽप्यत्र । [भा॰शा॰ २४०अ॰ उदा॰।

पद्मेशय पु॰ पद्मे शेते शी-अच् अलुक्स॰ । विष्णौ हेमच॰।

पद्मोत्तर पु॰ पद्मादुत्तरः उत्तरपदो वर्णेन । कुसुम्भे राजनि॰।

पद्मोत्तराग्रज पु॰ जिनचक्रवर्त्तिभेदे हेमच॰ [देव्यां स्त्री

पद्मोद्भव पु॰ पद्मउद्भवोऽस्य । कमलयोनौ १ब्रह्मणि २मनसा-

पद्य न॰ पदं चरणमर्हति पद+यत् । कविकृते चतुश्चरणात्मके "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" इत्युक्ते १वाक्यभेदे २पदव्यां स्त्री । पद्भ्यां जातः यत् । ४शूद्रे पु॰"पद्भ्यां शूद्रो अजायत" यजु॰३१।११ पदं विध्यति यत् । ५शर्करायां स्त्री । पदमश्नुते इयते यत् । ६नातिशुष्के कर्दमे सि॰कौ॰। ६स्तुतौ विश्वः ७पथि स्त्री अमरः ।

पद्र पु॰ पद्यते गच्छत्यत्र पद-आधारे रक् । ग्रामे उज्ज्वल॰

पद्रथ पु॰ पद्भ्यां रथ इव यस्य । पदुगामिनि भाग॰२।१८।१२

पद्व पु॰ पद-स्थैर्ये आधारे करणे वा वन् । १भूलोके २रथे च संक्षिप्तसारः ।

पद्वन् पु॰ पद-करणे वनिप् । पथि उज्ज्वलद॰ ।

पन स्तुतौ भ्वा॰आत्म॰सक॰सेट स्वार्थे आय वा तत्र आत्म॰। पनायते पनायति आर्द्धधातुके वा आय । अपनायीत् अपनायिष्ट अपनिष्ट । पनायां-बभूव आस चक्रे मेने इत्यादि ।

पनस पु॰ पन्यते स्तूयतेऽसौ इलेषु उत्तमफलत्वात् इडतृफ

लताद्वा पन–कर्मणि असच् । (बाँटाल) इक्षुभेदे फलादौ न० "पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् । तर्पणं हृद्यं स्वादु मांसलं श्लेष्मलं श्रमम् । बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान् । आमलदेव विष्टम्भि वातलं दुर्जरं गुरु । दाहकृन्मधुरं बल्यं कफमेदोविमर्दनम् । पनसोद्भूतबीजानि हृद्यानि मधुराणि च । गुरूणि बहुवर्चांसि स्वेदमूत्राणि संवदेत्" अन्यच्च "मज्जा पनसजो हृद्यो वातपित्तकफापहः । विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः । अलं पनसपाकाय फलं कदलसम्भवम्" भावप्र० "कण्टाफलं सुमधुरं हृद्यं स्निग्धशीतलम् । दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम् । तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम् । अर्द्धिनं न च चक्षुष्यं हृद्यञ्च वातपित्तनुत् । कण्टाफलमपक्वन्तु कषायं स्वादु वातलम् । रक्तपित्तहरं स्वादु तत्फलास्यपि तद्गुणम्" राजवल्लभः ।

पनसतालिका स्त्री पनसं स्तुत्यं तालं तत्तुल्यफलं विद्यते ऽस्याः ठन् । पनसे शब्दमा० पनताल्लिकेति तत्र पाठान्तरं तत्रार्थे ।

पनसिका स्त्री पनसः तदाकारोऽस्त्यस्याः ठन् । सुश्रुतोक्ते क्षुद्ररोगरोगभेदे २३८२ पृ० दृश्यम् ।

पनस्य नामधा० पनं स्तुतिमिच्छति क्यच् सुगागमः स्तोत्रेच्छायां पर०अक०सेट् । पनस्यति अपनस्यीत् ऋ०१।५६।२ उदा० तत्र तङ् आर्षः । निघण्टौ तु पनस्यधातुः अर्चतिकर्मसु पठितः तेन पूजायामपि । [१।२८५

पनस्यु त्रि० पनस्य नामधातुः उ । आत्मनः स्तोत्रेच्छौ ऋ०

पनिष्ठ त्रि० पन–कर्मणि इष्ठन् अतिशयेन पनिः तमप् । स्तुत्यतमे साम० १२२।४

पनिष्ठ त्रि० अतिशयेन पनिता इष्ठन् इष्ठोलोपः । स्तोतृतमे ऋ०६।५९।२ ईयसुन् । पनीयस् तत्रार्थे स्त्रियां ङीप्

पनिस्यत् त्रि० स्यन्द–यङ्लुक् अच् अभ्यासे निगागमः । अयं स्यन्दमाने अथ० ५ ३० १६

पन्नु स्त्री पन–उ । स्तुतौ ऋ० १।६५।२ [जाते त्रिकौ० ।

पन्थक त्रि०पथि जातः "पथः पन्थ च" पा० कन् । पथि०

पन्न त्रि० पद–क्त । १च्युते २गलिते च अमरः । २गते पद–क्त । ४नीचगमने न० उणादयः ।

पन्नग पु० पन्नगोऽस्त्यं यथा तथा गच्छति, पन्नगां न गच्छति वा नञ्+गम्+ड । १सर्पे अमरः जातौ स्त्रीत्वं सर्वाम् । २पन्नकाशे मेदि० ३वीणके न०

पन्नगकेशर पु० पन्नग इव केशरोऽस्य । नागकेशरे राजनि० तस्य सर्पफणाकृतिकेशरत्वात् तथात्वम् ।

पन्नगारि पु० ६त० । गरुड़े

पन्नगाशन पु० पन्नगः अशनमस्य । गरुड़े अमरः पन्नगभोजनादयोऽप्यत्र । तस्य तद्भोक्तृत्वकथा भा०आ० अस्तीकाख्यान० दृश्यम् ।

पन्नद्धा स्त्री पद नद्धा । चर्मपादुकायां हेमच० ।

पन्नद्धी स्त्री पदः नद्धीव नह–इन्–ङीष् वा ६त० । चर्ममयपादुकायां त्रिका० ।

पन्नागार पु० प्राच्ये गोत्रप्रवर्त्तकर्षिभेदे तस्यापत्यम् इञ् । पान्नागारि तदपत्ये पुंस्त्री० । बहुत्वे इञोलुक् । पन्नागारा इत्येव ।

पन्निष्क पुं०न० पादो निष्कस्य एकदेशिस० वा पदादेशः । निष्कस्य चतुर्थभागे पदादेशाभावे पादनिष्कोऽप्यत्र ।

पन्य त्रि० पन–स्तुतौ अन्नादि० यत् । स्तुत्ये ऋ०१।१६।२

पन्यस् त्रि० पन–असुन् युगागमः । १स्तोतरि ऋ० ६ ६ २ उदा० । २स्तुत्ये च ६।१८६ उदा० ।

पपि पु० पा–कि द्वित्वम् । १चन्द्रे २पानकर्त्तरि च त्रि० ।

पपी पु० पा–ईक् द्वित्वम् । १चन्द्रे २सूर्ये च उज्ज्वल० ।

पपु त्रि० पा–कु द्वित्वम् । पालके उज्ज्वल० ।

पपुरि त्रि० पृ–कि द्वित्वम् । प्रीणनशीले । ऋ०१।१६।४

पपुश्चेय त्रि० सम्पूर्वाच्चे । ऋ० ५।२२।६ भाष्ये स्थितम् ।

पप्रि त्रि० प्रा०पूरणे कि द्वित्वम् । पूरणशीले यजु० १।८ ।

पफक पु० गोत्रर्षिभेदे ततः त्रिका० गोत्रे फिञ् । पाफकायनि तद्गोत्रापत्ये । बहुत्वे निरवद्येन यह फिञोलुक् । कफकनिरवद्या इत्येव

पमरा स्त्री (सल्लकी) ख्याते गन्धद्रव्यभेदे राजवल्लभः ।

पम्पस् दुःखे क्रियाभावे कण्ड्वा० प०अक० सेट् । पम्पसति अपम्पसीत् ।

पम्पा स्त्री १दक्षिणस्थनदीभेदे भा०अनु०११६। ऋष्यमूकपर्वतसमीपस्थे २सरोभेदे च "एषा पम्पा शिवजला बहुतोया तडागिनी" भा०व० २७६अ० । ततः वरणादि० आकृतिगणत्वात् लुक् । पम्पानामकृतरसर्वं नगरं पम्पा इत्येव ।

पम्प्र गतौ भ्वा०प०अक०सेट् । पम्प्रति अपम्प्रीत् पम्प्रक्ष ।

पय गतौ भ्वा०आक०अक०सेट् । पयते अपयिष्ट ।

पयःकन्दा स्त्री पयः दुग्धमिव स्वादुत्वात् कन्दोऽस्याः । क्षीरविदार्याम् राजनि० । [भा०व० १२० अ० ।

पयःपयोष्णी स्त्री पयःप्रचुरा पयोष्णी भा०त० । नदीभेदे

पयःफेनी स्त्री पयः दुग्धमिव फेनमस्याः गौरा॰ ङीष्। दुग्धफेन्यां राजनि॰।

पयस्थय पु॰ ६त॰ जलपूरे जटा॰।

पयस् न॰ पा—पाने असुन् इकारस्यान्तादेशः। १दुग्धे २जले च मेदि॰ ३अन्ने ४रात्रौ च निघण्टुः।

पयस्य प्रसृतौ (परिमाणविशेषे) अस्त्रा॰अव॰सेट्। पयस्यति अपयस्यीत्।

पयस्य त्रि॰ पयसो दुग्धस्य विकारः तस्य हितं वा यत्। १दुग्धविकारे दध्यादौ अमरः। २दुग्धहिते त्रि॰ ३विड़ाले पु॰ मेदि॰। ४दुग्धिकायां ५क्षीरकाकोल्यां ६स्वर्णक्षीरिकायां च स्त्री मेदि॰। ७अर्कदुग्धिकायां रत्नमाला ८कटुतुम्बिनीक्षुपे राजनि॰। ९आमिक्षायाम् हेमच॰।

पयस्वत् त्रि॰ पयस्+अस्त्यर्थे मतुप् मस्य वः वान्तत्वात् न पदकार्यम्। १जलविशिष्टे स्त्रियां ङीप्। २नद्यां स्त्री व॰व॰ निघण्टुः।

पयस्वल त्रि॰ पयोऽस्त्यस्य वलच् वान्तत्वात् न पदकार्यम्। १जलयुक्ते। २क्षाने पुंस्त्री राजनि॰ स्त्रियां जातित्वात् ङीष्।

पयस्विन् त्रि॰ पयोऽस्त्यस्य विनि न पदकार्यम्। १पयोविशिष्टे स्त्रियां ङीप्। २नद्यां ३धेन्वां ४रात्रौ च मेदि॰। ५काकोल्यां ६क्षीरकाकोल्यां ७दुग्धफेन्यां ८क्षीरविदार्यां ९लाक्ष्यां राजनि॰। १०जीवन्त्यां भावप्र॰।

पयाय आत्मनः पय इच्छति क्यङ् नामधातुः आ॰अक॰सेट् वा सकोपः। पयायते पयस्यते।

पयोगल पु॰ पयो गलति यस्मात् गल—अपादाने क। १घनोपले (करका) २हीपे च शब्दमा॰।

पयोग्रह पु॰ पयसो दुग्धस्य ग्रहः ग्रह आधारे अच्। वस्त्रिये पात्रभेदे। आत्रा॰ श्रौ॰१०।२।१२।

पयोघन पु॰ पयसा घनो निविड़ः। वर्षोपले हारा॰।

पयोजन्मन् पु॰ पयसो जन्म यस्मात्। १मेघे शब्दमा॰। २सस्ये च।

पयोद पु॰ पयो ददाति दा—क। १जलदे मेघे २सस्ये च ३वृत्तपुष्पभेदे हरिवं॰ २०अ॰ ४कुमारानुचरमातृभेदे स्त्री भा॰अ॰४७अ॰।

पयोधर पु॰ पयो दुग्धं जलं वा धरति धृ—अच् ६त॰। १मेघे २स्तने अमरः ३सस्ये च ४कोणकारे ५नारिकेले ६कमण्डले च मेदि॰। [त्रि॰ उज्ज्वा॰।

पयोधस् पु॰ पयो दधाति धा—असुन्। १जलदे २जलाधारे

पयोधारा स्त्री ६त॰। १जलानां धारारूपम्। पयसां धारा वत्स। २नदीभेदे हरिवं॰ २१२ अ॰।

पयोधि पु॰ पयो धीयतेऽस्मिन् धा—आधारे कि उप॰स॰। समुद्रे राजनि॰। [राजनि॰।

पयोधिक न॰ पयसो तदुपरि कायति कै—क। सस्यफेने

पयोनिधि पु॰पयांसि निधीयन्ते यत्र नि+धा—आधारे कि उप॰स॰। समुद्रे। [२सस्ये च।

पयोमुच् पु॰ पयोमुञ्चति मुच—क्विप्। १जलमुचि मेघे

पयोर पु॰ पयोजलं रेवने सुखनिमित्तजलं राति रा—क। १खदिरे शब्दार्थ॰। २जलदायिनि त्रि॰।

पयोलता स्त्री पयःप्रधाना लता। क्षीरविदार्यां राजनि॰

पयोवाह पु॰ पयो जलं वहति वह—अच् उप॰स॰। १मेघे २सस्ये च।

पयोव्रत न॰ पयः तत्प्रधानमात्रं व्रतम्। १दुग्धपानमात्रे व्रतभेदे तच्च त्रिरात्रादिसाध्यं मत्स्यपु॰ उक्तं यथा "पुष्यां त्रिरात्रं समाधाय युगमन्तरादिकम्। पयोव्रतत्रिरात्रं स्यादेकरात्रमथापि वा" ५२अ॰ तद्दृष्टिविधं प्रायश्चित्तात्मकं काम्यञ्च मतः॥१॥१४४। द्वादशाहसाध्यं च विष्णुव्रतभेदः भाग॰८।१६। पयस्तत्प्रधानं व्रतमस्य। २यज्ञदीक्षितव्रतभेदे शत॰ब्रा॰ ८।६।१।१

पयोष्णिजाता स्त्री। पयोष्णी जाता यस्याः ब्रुवो॰। वरस्त्रियां नद्यां राजनि॰।

पयोष्णी स्त्री विन्ध्याचलदक्षिणस्थे नदीभेदे "पयोष्णी सलिलं रम्यं पवित्रं पापनाशनम्। सर्वौषधकरं सौख्यमलक्ष्मीघ्नमदं वपुः" राजनि॰। "एष विन्ध्यो महाशैलः पयोष्णीयं सरिद्वरा। आश्रमाश्च महर्षीणां बहुमूलफलान्विताः। एष पन्था विदर्भाणामयो गच्छति कोसलाम्। अतः परस्य देशोऽयं दक्षिणे दक्षिणापथः" भा॰ व॰ ६१अ॰।

पर त्रि॰ पृ—भावे अप्, वर्त्तरि अच् वा। १अन्यस्मिन् भिन्ने २उत्तरे ३दूरे ४हीनापरिच्छिन्ने ५श्रेष्ठे च ६मोक्षे ७केवले ब्रह्मणि च न॰ "द्वे ब्रह्मणी वेदितव्ये परञ्चापरञ्चेति" श्रुतिः। ८बलौ पु॰। अस्य अवस्थायां सर्वनामता किन्तु ओर्जसि च वा परस्मात् परात्। परे पराः वा। अतु परस्मेऽपि स्वरूपाबोधनात् सर्वनामता। ९ब्रह्मणि आदुःखाने च पुः "कालसंख्यां समासेन पूर्वां-दिव-स्थितासु। ग्रहः स्मात् परः कालस्तदन्ते परिपूर्यते। निर्जेन ब्रह्म मानेन चातुर्वर्णव्रतं स्मृतम्।

वत्परार्द्धं तदर्द्धं च परार्द्धमभिधीयते"। "त्रीणि ब्रह्मयतानि स्तुत्वा बहिर्हि लोत्तमाः। ब्रह्मणः वर्षं परार्द्धं तत्र यत्पदम्" कौर्मे ६अ०। न्यायमते १०व्यापकसामान्ये "सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च" भाषा० ११तद्वाजाती स्त्री "व्यापकत्वात् परादि स्यात् व्याप्यत्वादपराऽपि च"। व्यवस्था च दिग्देशकालैरवधिनियमभेदरूपा। १२वक्ष्यमाणदैशिकक्षाणिकपरत्वरूपगुणात्रये त्रि०। तस्य दिशि दृष्टत्वेन तद्दोने पञ्चमी। अयमस्मात् पर इत्यादिप्रयोगात्। परस्येदम् गहा०अ कुक्च्। परकीय परसम्बन्धिनि त्रि०। सर्वनामत्वादस्य इत्वो पुंवत्। परस्याः धनं परधनम् परस्यामित्यर्थे परत्र इत्यादि। १३बोधेच्छया उच्चरिते "यत्परः शब्दः स शब्दार्थ इति न्यायः तात्पर्यम्।

परःक्षण त्रि० परः क्षणात् पारस्करा० सुट्। क्षणात् परे छान्दोग्यो० १।६।६उदा०।

परःपुमस् पु० परः अन्यः पुंसः पारस्करा० सुट्। अपुरुषादन्यस्मिन् पुरुषे "यत् परपुंसा वा पत्नी स्यात्" शत० ब्रा० १।२।१।२१

परःशत न० परे शतात् पारस्करा० सुट्। १शताधिकसंख्यायां २तत्सङ्घातेषु च अमरः।

परःश्वस् अव्य० श्वः परं दिनं त्रि० पारस्करा० सुट्। आगामिपरदिवसात् परस्मिन् दिने अमरः पुमो०। परत्र इत्यत्र। [२तत्संख्यातेषु च शत०ब्रा० १०।२।६।८

परःषष्टि स्त्री परःषष्टेः निपा० सुट्। १षष्टेरधिकसङ्ख्यायां

परःसहस्र न० सहस्रात् परे त्रि० सुट्। १सहस्राधिकसंख्यायां २तत्संख्यान्वितेषु च अमरः।

परउर्वी स्त्री परउर्व्याः त्रि० पारस्करा० सुट्। १उपसङ्गेदे "उपर्युपरि एकद्व्यादिभिरन्वा व्रतदक्षिणाभिस्तिस्रः परउर्वीरुपसदस्ताः वेधनाहुतिभिर्जि" शत०ब्रा० ३।४।१ २६ भाष्यम्।

परकीय त्रि०परस्येदम् गहादि०छ "कुक् अनञ् परस्य च" वार्त्ति० कुक्। १परसम्बन्धिनि। २नायिकाभेदे स्त्री रसमञ्जर्यां तद्भेदादिकथनं यथा "अप्रकटितपरपुरुषानुरागा परकीया। सा च द्विविधा परोढा कन्यका चेति कन्यायाः पित्राद्यधीनत्वात् परकीयत्वम्। अस्या गुणा एव सर्वाः चेष्टाः। गुणा(रचिता) विदग्धाकुण्ठाद्यवस्थानाहृदिताप्रभृतयो। परकीयायामेवान्यभावः। विदग्धा द्विविधा वाग्विदग्धा क्रियाविदग्धा। अनुशयाना इत्यस्यानविघटनेन भाविस्वामिभावशङ्कया स्वानधिष्ठितसङ्केतस्थाने भर्तुर्गमनाहमानेन चानुशयाना भवति"। एतदुदाहरणानि तत्र दर्शितानि।

परक्रान्तिव्या स्त्री सू०सि० उत्तायां "परमापक्रमव्या च सप्तरन्ध्रगुणेन्दवः" १२६७ योजनात्मिकायां व्यायाम्। "क्रान्त्योर्व्यं त्रिव्यया भ्यस्ता परक्रान्तिव्ययोद्धृते" सू०सि०। "तत्रूनं चतुर्दशशतं परमक्रान्तिव्ययेति रङ्गनाथः"।

परक्षेत्र न० ६त०। परकीये क्षेत्रे १अक्षेत्रे २भूम्यादौ च। "अपुत्रे च परक्षेत्रे नियोगोत्पादितः सुतः"। "आदद्यात् परक्षेत्रात् दण्डं दातुमर्हति" इति च मनुः।

परगामिन् त्रि० परं वाच्यं गच्छति विङ्गेन वनत्वात्। वाच्यलिङ्गे शब्दे "गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः" अमरः।

परग्रन्थि पु० परेण ग्रन्थिरत्र। अङ्कुरिपर्वणि हारा०।

परचक्र न० परस्य चक्रोचक्रम्। १शत्रोः राष्ट्रादौ भा० आ० १६अ०। ह०सं०२अ०। २तच्छे दैतिभेदे [भिक्षाने च।

परच्छन्द त्रि० परस्य छन्दो वत्र। १पराधीने ६त०। २परा-

परच्छिद्र न० ६त०। परस्य दोषादिच्छिद्रे

परजात त्रि० परेण जातः। औदासीन्येन परेषिते १परपुष्टे अमरः। २अन्येनोत्पन्ने अण्डगोलकादौ जन्म-ड। परजादयोऽप्यत्र।

परजित त्रि० परेण जितः। १परपुष्टे अमरः २पराजिते त्रि०

परञ्ज न० परञ्जयति जि-बा० ड सुट् च। १तैजयन्ते २कुरिकाफले च मेदि०।

परञ्जन पु० परां पश्चिमां दिशं जनयति स्वामित्वात् जन-अच् वर्णनाम्नो इत्वो पुंवत् सुट्। वरुणे हेमच०।

परञ्जय पु० परां पश्चिमां दिशं जयति स्वामित्वात् जि-बा० अच् सुम् पुंवद्भावः। १वरुणे त्रिका० २शत्रुजेतरि त्रि०

परतङ्क्ष पु० देशभेदे भा०भ० ६।१अ०।

परतन्त्र त्रि० परस्य तन्त्रमधीनता यत्र। पराधीने अमरः।

परतर्कुक त्रि० परः शत्रुस्तर्कुरिवास्य कप्। शत्रुभवयुते "कुनखविषैः परतर्कुकाश्च ताभ्यैव प्रदमभूपतयः" ह०सं० ६१अ० नरवशयोस्तौ।

परतस् अव्य० पर+पिभक्त्यर्थे तसिल्। १परस्मादित्याद्यर्थे २पराधीने च। अतोभावेत्यपरतस्य पराधीनत्वे परतो-ग्राह्यशब्दे दृश्यम्। [तापने च।

परतापन न० परस्यतः १पत्रभेदे हरिवं० २०१अ०। २पर-

परतोग्राह्य अव्य०परस्मात् ग्राह्यः। स्वभिन्नज्ञानवतीतो बोध्यो

प्रमाणस्याप्रमाणत्वाद्वा तयोः कथं स्वतोऽज्ञाता कथं वा परतो ज्ञाप्ते ? तदेतत्कृतभेदेन सर्वदर्शनसंग्रहे दर्शितम्

"प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः । नैयायिकाद्यो परतः, सौगताश्चरमं स्वतः । प्रथमं परतः प्राहुः प्रमाणत्वं, वेदवादिनः । प्रमाणत्वं स्वतः प्राहुः, परतश्चाप्रमाणताम्" इति । "वादिविवाददर्शनात् कथं हारं वेदानां धर्मं स्वतःप्रामाण्यमिति विद्वदस्तु स्वीक्रियते । किंच किमिदं स्वतः प्रामाण्यं नाम ? किं स्वत एव प्रामाण्यस्य जन्म ? आहोस्वित् स्वाश्रयज्ञानजन्यत्वम् ? किमुत स्वाश्रयज्ञानसामग्रीजन्यत्वम् ? उताहो ज्ञानसामग्रीजन्यज्ञानविशेषाश्रितत्वम् ? किं वा ज्ञानसामग्रीमात्रजन्यज्ञानविशेषाश्रितत्वम् ? तत्राद्यः शब्दाः-कार्यकारणभावस्य भेदग्रहाभिकारणत्वेनैकत्वसम्भवात्, नापि द्वितीयः गुणस्य ततो ज्ञानस्य प्रामाण्यं प्रति समवायिकारणतया द्रव्यत्वापातात् । नापि तृतीयः प्रामाण्यस्योपाधित्वे जातित्वे वा जन्यायोगात्, स्वतिरस्कारनधिकरणस्य ज्ञानस्य बाधाभावाभावः प्रामाण्योपाधिः न च तस्योत्पत्तिसम्भवः अत्यन्ताभावस्य नित्यत्वाभ्युपगमादत एव न जातेरपि जनिर्युज्यते । नापि चतुर्थः ज्ञानविशेषो ज्ञप्तया विशेषसामग्र्या सामान्यसामग्र्यनुप्रविशति गंगापाषाणसामग्र्यामिव कृतसामग्री, अपरथा तस्याकिञ्चित्करत्वं प्रसज्येत् तस्मात् परतस्त्वेन स्वीकृतं प्रामाण्यं विज्ञानसामग्रीजन्याश्रितमिति व्याप्तिरापद्येत। पञ्चमविकल्पं विकल्पयामः किं दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव ज्ञानसामग्रीमात्रजन्यत्वं, किं दोषाभावासहकृतज्ञानसामग्रीजन्यत्वं, नाद्यः दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव परतः प्रामाण्यमिति परतः प्रामाण्यवादिभिरङ्गीकरणात् नापि द्वितीयः, दोषाभावसहकृतत्वेन सामग्र्यां सहकृतत्वे सिद्धे अनन्वयाव्यतिरेकसिद्धतया दोषाभावस्य कारणतायाः यत्नलेशायमानत्वात् । अभावः कारणमेव न भवतीति चेत् तदा वक्तव्यम् अभावत्वे कार्यत्वमस्ति न वा यदि नास्ति तदा घटप्रध्वंसानुपपत्त्या नित्यताप्रसङ्गः । अथास्ति किमपराद्धं कारणत्वेनेति सैयसुभवतःपाशा रज्जुः । तदुदितसद्वचनेन "भावो यथा तथाऽभावः कारणं कार्यं वस्तुतम्" इति । तथाच प्रयोगः विमता प्रमा ज्ञानहेतुव्यतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् प्रामाण्यं च परतो ज्ञायते अनभ्यासदशायां संशयिकत्वात् अप्रामाण्यवत् । तस्मादुत्पत्तौ प्रमा च परतस्त्वे प्रमाणस्मरणात् स्वतः सिद्धं प्रामाण्यमित्येतत् पूतिकुम्भाण्डावत इति चेत् तदेतदाकाशपुष्पिकनायते । विज्ञानसामग्रीजन्यत्वे सति तद्व्यतिरिक्तहेतुजन्यत्वं प्रमायाः स्वतस्त्वमिति निरुक्तिसम्भवात् अस्ति चात्मानुभवं विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तद्व्यतिरिक्तजन्या न भवति अप्रमात्वानधिकरणत्वात् घटादिवत् न चौदयनमनुमानं परतस्त्वसाधकमिति वक्तुमीशे प्रमा दोषव्यतिरिक्तज्ञानहेतुव्यतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदिति प्रतिसाधनस्य दुष्टत्वात् ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तद्व्यतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गात् । ननु दोषस्याप्रमाहेतुत्वेन तदभावस्य प्रमां प्रति हेतुत्वं दुर्निवारमिति चेत् न दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्वयासिद्धत्वात् । "तस्माद्गुणेभ्यो दोषाभावस्तदभावतः । अप्रमाणद्वयासत्त्वं तेनोत्सर्गो नवोदितः" इति । तथा प्रमाणान्तरेऽपि ज्ञानत्वावच्छेदेनापीत एव जायते। न च संशयादुदयप्रसङ्गो बाधक इति युक्तं वक्तुं सत्य प्रतिभावगुणत्वकारणे प्रतिबन्धकदोषादिसमवधानात् तदुपपत्तेः । किञ्च तावन्मनुमानं स्वतः प्रमाणं न वा आद्ये अनैकान्तिकता द्वितीये तस्यापि परतः प्रामाण्यमेवं तस्य तस्यापीत्यनवस्था दुरवस्था स्यात् । यदत्र कुसुमाञ्जलावुदयनेन झटिति प्रचुरप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वाभावमापादयता प्रचुरमाटि प्रवृत्तिर्दीप्तामपेक्षते तत्प्राचुर्यं चेच्छाप्राचुर्यमुक्त्वा चेष्टसाधनताज्ञानं तच्चेष्टजातीयत्वविशिष्टानुभवं वोऽपीन्द्रियार्थसन्निकर्षं प्रामाण्यग्रहस्तु न कश्चिदुपयुज्यत इति तदपि तच्छरस्य पुरस्तात् कथे सुवर्णसुमेरुसर्वाङ्गोद्घाटनमिव प्रतिभाति । अतः समीहितसाधनज्ञानमेव प्रमाणतयावगम्यमानमिच्छां जनयतीत्यलमेव स्फुटं एव प्रामाण्यग्रहणस्योपयोगः । किञ्च कश्चिदपि चेद्विचिकित्सया प्रवृत्तिः संशयादुपपद्येत तर्हि सर्वत्र तथाभावसम्भवात् प्रमाणनिश्चयो निरर्थकः स्यात् । अनिश्चितस्य वस्तुमेव दुर्लभमिति प्रामाण्यं दत्तजलाञ्जलिकं भवेत् ।

परत्र अव्य॰ परस्मिन् काले पर+त्रल् । परकाले स्वर्गादिलोके ।

परत्रभीरु त्रि॰ परलोकभीरौ धर्मिष्ठे कात्या॰ स्मृतिः ।

परत्व न॰ परस्य भावः । वैशेषिकोक्ते द्रव्याश्रिते गुणभेदे तच्च द्विविधं दैशिकं कालिकञ्च तदेतत् कथादशलोप-

स्वरूपस्योर्निर्णीतं यथा "एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च" सू०।

"दृष्टानोसद्देशसम्प्राप्ते परत्वापरत्वे परस्परानुबद्धव्यवहारकारणतया शिष्यबुद्धिवैशद्यार्थं संक्षेपार्थञ्चैकमन्येनाह परमपरञ्चेति भावप्रधानो निर्देशः, उत्पद्यत इति शेषः, यदा परमपरञ्चेति व्यवहार इति शेषः, इतिरध्याहार्यः। एका दिग् ययोस्तावेकदिशौ ताभ्यामेकदिक्काभ्यां पिण्डाभ्यामित्यर्थः तस्यदेशावच्छेदिकौ भवतः न तु ताभ्यां परत्वापरत्वे उत्पद्येते व्यवच्छिद्येते वेत्यत उक्तं सन्निकृष्टविप्रकृष्टाभ्यामिति, सन्निकर्षः संयुक्तसंयोगाद्यत्वम्, विप्रकर्षस्तद्भूयस्त्वं, तद्वद्भ्यामित्यर्थः। एतेन समवायिकारणत्वमुक्तं, दिक्पिण्डसंयोगस्तस्य समवायिकारणं, तथा हि प्राङ्मुखस्य पुरुषस्य प्राच्यवस्थितयोः पिण्डयोरेकस्मिन् संयुक्तसंयोगभूयस्त्वमपरस्मिन् संयुक्तसंयोगाल्पतरत्वापेक्षया परत्वमपरत्वञ्चोत्पद्यते, असमवायिकारणत्वमुक्तम्, सन्निकृष्टविप्रकृष्टाभ्यामिति विषयेण विषयिणं प्रत्यक्षमुपलक्षयति तथा चापेक्षाबुद्धेर्निमित्तकारणत्वमुक्तम्, एकदिगवस्थितयोरेव परत्वापरत्वे उत्पद्येते इति न सर्वत्रोत्पत्तिः, एकस्यैव द्रष्टुरपेक्षाबुद्धिः सत्युत्पद्यते इति न सर्वथोत्पत्तिः, अपेक्षाबुद्धिनियमात् सर्वदोत्पत्तिः कारणयोरुत्पन्नयोः प्रत्यक्षसिद्धत्वात् परस्परान्वयत्वम्, अन्यथा हि नोत्पद्येयातां न वा प्रतीयेयातां परस्परापेक्षायां हि द्वयोरुत्पत्तिरप्रतीतिश्च स्यात् प्रतीयेते च परत्वापरत्वे, प्रतीतिश्च तयोर्नोत्पत्तिमन्तरेणेति। एककालाभ्यामिति कालिकपरत्वापरत्वे अभिप्रेत्य तत्रैककालाभ्यामिति एको वर्त्तमानः कालो ययोर्युवस्थविरपिण्डयोः तावेककालौ ताभ्यामेककालाभ्यामित्यर्थः। सन्निकर्षोऽल्पतरतपनपरिस्पन्दान्तरितजन्मत्वं, विप्रकर्षश्च बहुतरतपनपरिस्पन्दान्तरितजन्मत्वम्, अत्रापि विषयेण विषयिणो बुद्धिरुपलक्षयति तेन युवस्थविरपिण्डौ समवायिकारणे, कालपिण्डसंयोगश्चासमवायिकारणम्, अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिरपरत्वे बहुतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिः परत्वे निमित्तकारणम्। एते च परत्वापरत्वे अनियतादृग्देशयोरपि पिण्डयोरुत्पद्येते, तत्र दैशिकपरत्वापरत्वयोः सप्तधा विनाशः उत्पादस्तु युगपदेव द्वयोरन्यथाऽन्योन्याश्रयः स्यात्, अपेक्षाबुद्धिनाशात्,१ संयोगस्य समवायिकारणस्य नाशात्,२ द्रव्यस्य च समवायिकारणस्य नाशात्,३ निमित्तसमवायिकारणयोर्नाशात्,४ समवायिसमवायिकारणयोर्नाशात्५ निमित्तासमवायिकारणयोर्नाशात्,६ निमित्तनाशासमवायिकारणनाशसमवायिकारणनाशेभ्यः७। तत्रापेक्षाबुद्धिनाशात्१ तावत्, परत्वोत्पत्तिः परत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिविनाशस्तद्विनाशात् परत्वविशिष्टद्रव्यज्ञानकाले परत्वनाशः, द्वित्वनाशवदेव सर्वमूहनीयम्। असमवायिकारणनाशादपि २तद्यथा यदैवापेक्षाबुद्धिस्तदैव परत्वाधारे पिण्डे कर्म्म ततो यदैव परत्वोत्पत्तिस्तदैव दिक्पिण्डविभागस्ततो यदा परत्वसामान्यज्ञानं तदा दिक्पिण्डसंयोगनाशः ततः सामान्यज्ञानादपेक्षाबुद्धिनाशस्तदैव दिक्पिण्डसंयोगनाशात् परत्वापरत्वयोर्नाशः, तत्र चापेक्षाबुद्धिनाशस्य परत्वनाशसमकालत्वात् तन्नाशकत्वम्। नन्वसमवायिकारणनाशादपि गुणनाशे आत्मनःसंयोगनाशादपि संस्काराद्यदृष्टादीनां विनाशे बहु व्याकुलं स्यादिति चेन्न विप्रकृष्टत्वेन परत्वस्य व्यापनात् परत्वाधारस्याव्यक्तगमने विप्रकर्षाभावात् परत्वनिवृत्तिरावश्यकी न च तदा नाशकान्तरमपेक्षणीयमन्यथाऽनुपपत्त्या संयोगनाश एव नाशकः कल्प्यते, संस्काराद्यदृष्टादेः कार्य्यस्य स्मृतिसुखादेश्चिरेणापि दर्शनात् तन्नाशकल्पना। उपपन्नञ्चैतत् अवधेर्द्रष्टुश्च तत्तद्देशसंयोगनाशादपि परत्वापरत्वे विनश्यतः युक्तेस्तुल्यत्वात्। समवायिकारणनाशादपि क्वचित् परत्वनाशः१ तथा हि यदा पिण्डावयवे सत्युत्पन्नेन कर्म्मणाऽवयवान्तरादिभागस्तदैवापेक्षाबुद्धिः, विभागात् पिण्डारम्भकसंयोगनाशः परत्वोत्पत्तिः, अग्निसम्बन्धे संयोगनाशाद्द्रव्यनाशः परत्वसामान्यज्ञानं, द्रव्यनाशात् परत्वनाशोऽपेक्षाबुद्धिनाशश्च सामान्यज्ञानात्, तथाच यौगपद्यान्नापेक्षाबुद्धिनाशात् परत्वनाश इति, क्वचिद्द्रव्यनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः४ तद्यथा पिण्डावयवे कर्म्मापेक्षाबुद्धेरुत्पादस्ततोऽवयवान्तरविभागः परत्वोत्पत्तिः तत आरम्भकसंयोगनाशसामान्यज्ञाने ततो द्रव्यनाशापेक्षाबुद्धिनाशौ ततश्च परत्वनाशः। क्वचिद्द्रव्यस्य संयोगस्य च नाशाभ्यां परत्वनाशः ५तद्यथा यदा द्रव्यावयवविभागस्तदैव पिण्डकर्म्मापेक्षाबुद्धेरुत्पादस्तदनन्तरमवयवसंयोगनाशाद्दिक्पिण्डविभागपरत्वोत्पत्तयः ततो द्रव्यनाशाद्दिक्पिण्डसंयोगनाशपरत्वसामान्यबुद्धयः ततो द्रव्यनाशाद्दिक्पिण्डसंयोगनाशाभ्यां परत्वनाशः सामान्यबुद्धेरपेक्षाबुद्धिनाश इति। क्वचित् संयोगनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः६ तद्

यथा परत्वोत्पत्तिपिण्डकर्मणी सामान्यज्ञानविभागौ अपेक्षाबुद्धिनाशदिक्पिण्डसंयोगनाशौ ततः परत्वनाशः। क्वचित् समवाय्यसमवायिनिमित्तनाशेभ्यः७ तद्यथा परत्वोत्पत्तिपिण्डावयवविभागपिण्डकर्माणि युगपत्, तदनन्तरं परत्वसामान्यज्ञानावयवसंयोगनाशदिक्पिण्डविभागाः तदनन्तरमपेक्षाबुद्धिनाशद्रव्यनाशदिक्पिण्डसंयोगनाशेभ्यो युगपदुत्पन्नेभ्यः परत्वस्यापरत्वस्य वा दैशिकस्य नाशः। कालजतयोस्तु परत्वापरत्वयोरसमवायिकारणनाशाधीनो नाशो नास्ति दैशिकयोर्दिक्पिण्डसंयोगनाशे सन्निकर्षविप्रकर्षनाशो यथा न तथा कालिकयोरिति तयोः समवायिकारणनाशात्१ अपेक्षाबुद्धिनाशात्२ द्वाभ्यामेति३ त्रयः पक्षाः पूर्ववदूहनीयाः"।

परदार पु० ब०व० ६त०। परस्त्रियां मनुः ३।१७४ "परदाररतांश्चैव परद्रव्यहरांश्च ये। अधोधो नरकं यान्ति पीड्यन्ते यमकिङ्करैः" कर्मलोचनम्। परयोषिदादयोऽप्यत्र "ब्राह्मणैः क्षत्रियो वैश्यो यो रतः परयोषिति" मनुः परदारान् गच्छति ठञ्। पारदारिक तद्वन्तरि।

परदेश पु० कर्म०। स्वाधिष्ठितदेशात् भिन्नदेशे ह०सं० २।१२

परद्वेषिन् त्रि० परेभ्यः द्वेष्टि द्विष–णिनि। परदूषके खले शब्दमाला।

परधर्म पु० ६त०। स्वोचितवर्णाश्रमादिधर्मभिन्ने धर्मे गीता २अ० मनुः १०।८७। कर्म०। उत्कृष्टधर्मे च

परध्यान कर्म०। ध्यानभेदे "ध्येये मनोनिश्चलतां याति ध्येयं विचिन्तयत्। यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः" नरङ्गपु०।

परनिपात पु० परस्य निपातः उच्चारणम्। योग्यतया विग्रहवाक्ये पूर्वश्रुतस्यापि शब्दस्य समासे परस्योच्चारणे यथा राजदन्तादिषु दन्तानां राजा इति विग्रहवाक्ये पूर्वश्रुतस्यापि दन्तशब्दस्य परस्योच्चारणम्। एवं पूर्वं भूत इति वाक्ये भूतपूर्व इत्यादौ।

परन्तप त्रि० परान् शत्रून् तापयति "हिमातपरयोस्तापेः" पा०खच् "खचि ह्रस्वः" पा०ह्रस्वः ह्रस्व। १यत्नुतापके रामरामयोः २पुत्रभेदे हरिवं० ७अ०।

परपद न० कर्म०। १उत्कृष्टस्थाने "तद्विष्णोः परं पदम्" ऋ०। वैष्णवीगायत्री। २मोक्षे च ६त०। ३परस्य स्थाने च

परपाकनिवृत्त पु० परार्थात् पाकाद्विवृत्तः। परोद्देश्यक पाकाद्विवृत्ते पशुयज्ञानन्तरं "गृहीत्वाग्निं समारोप्य पचयज्ञान्न निर्वपेत्। परपाकनिवृत्तोऽग्नौ समिद्भिः परिकीर्त्तितः" मिता०स्मृतिः। तद्भोजननिषेधः पतपाकरतशब्दे दृश्यः।

परपाकरत त्रि० परस्य पाके रतः। परपाकरुचौ "पच यज्ञान् स्वयं कृत्वा परान्नमुपजीवति। सततं प्रातरुत्थाय परपाकरतस्तु सः" मिता० स्मृतिः। "परपाकनिवृत्तस्य परपाकरतस्य च। अपचस्य च भुक्तान्नं द्विजश्चान्द्रायणं चरेत्" मिता० स्मृतिः।

परपिण्डाद परस्य पिण्डमन्नमत्ति अद्–अण् उप०स०। परान्नोपजीविनि अमरः।

परपुरुष पु० कर्म०। १उत्कृष्टपुरुषे पुरुषोत्तमे विष्णौ त्रिका० पुरुषोत्तमशब्दे दृश्यम् स्वभर्तृभिन्ने पुरुषे २उपनायके च।

परपुष्ट पु० परया काक्या पुष्टः पुष्–क्त सर्वनाम्नः पुवेत्। १कोकिले। कोकिलया हि डिम्बस्फोटनात्तया काकनीडस्थं काकडिम्बमपसार्य स्वडिम्बे तत्र स्थापिते काक्या स्वडिम्बमुत्सार्यो पुष्यते इति लोकप्रसिद्धिः। परभृतादयोऽप्यत्र भाषे १२।११६। २अन्यपालिते त्रि०। ३वेश्यायाम् स्त्री मेदि०।

परपुष्टमहोत्सव पु० परपुष्टानां महोत्सवो यत्र। आम्रे तस्य स्वपुष्पोद्गमद्वारा कोकिलानां महोत्सवजननात्तथात्वम्।

परपूर्वा स्त्री पर इतरः पूर्वो यस्याः। "पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते। निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते" मनूक्तायां पुनर्भुवि स्त्रियाम्। तद्भेदश्च नारदेन दर्शितः "परपूर्वाः स्त्रियस्त्रस्याः सप्त प्रोक्ता यथाक्रमम्। पुनर्भूस्त्रिविधा तासां स्वैरिणी च चतुर्विधा" अन्यपूर्वाशब्दे २१६पृ० विवृतिः।

परपौरवतन्तव पु० विश्वामित्रपुत्रभेदे भा०अनु० ४अ०।

परप्रतिनप्तृ पु० प्रतिनप्तुः परः अनन्तरः बा० परनि०। दुहितृपौत्रे हेमच०। [दुहितृपौत्रे हेमच०।

परप्रपौत्र पु० प्रपौत्रात् परः अनन्तरः बा० परनिपातः]

परप्रेष्य स्त्री ६त०। १दासे २दासायां स्त्री काशीख० ३७अ०।

परब्रह्मन् न० कर्म०। निर्गुणे निरुपाधिके १ब्रह्मणि तत्प्रतिपादके २उपनिषद्भेदे च।

परभाग पु० परस्य उत्कृष्टस्य भागः भावः। १गुणोत्कर्षे कर्म०। २पश्चिमभागे च हेमच०। उभयत्र माघः १०।८६ श्लोके उदा०। ३पुत्रसम्पदि त्रिका० ६त०। ४अन्यलाभे

परभाषा स्त्री कर्म०। संस्कृतभिन्नायां भाषायामपभ्रंशे द्वारा०

परभुक्त त्रि० ३त०। १अन्येन भुक्ते २परभोगभुक्तायां स्त्रियां

स्त्री "परभुक्तां च कान्तां च यो भुङ्क्ते स नराधमः। स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ" इत्यादिना तत्स्त्रीगमने दोषाः ब्रह्मवै०पु० जन्मख० १८अ०उक्ताः।

परभृत् पु० परं स्वपुत्रबुद्ध्या कोकिलपुत्रं बिभर्त्ति भृ-क्विप् ह्रस्वः। १काके अमरः २स्वेतरपोषकमात्रे त्रि०।

परभृत पुंस्त्री० परेण स्वजनकभिन्नेन काकेन भृतः। १कोकिले अमरः स्त्रियां जातित्वात् ङीष्। २अन्यपुष्टमात्रे त्रि०। [४पश्चादर्थे च।

परम् अव्य० पृ-असि। १नियोगे २श्रेष्ठे ३केवले च मेदि०।

परम त्रि० परं परतं माति-क। १उत्कृष्टे २प्रधाने ३चाद्ये मेदिनिः ४प्रथमे च विश्वः।

परमक्रान्ति स्त्री ष०वि० उक्तायां सूर्यस्य शेषक्रान्तौ।

परमक्रोधिन् पु० १विश्वेदेवभेदे भा०अनु० ९१अ०। २अत्यन्तक्रोधान्विते त्रि०।

परमपु(पू)रुष पु० कर्म०। पुरुषोत्तमे विष्णौ [मेदिनिः।

परमम् अव्य० पर+मा-डमि। १अतुलायाम् २स्वीकारे च

परममहत् त्रि० परमं सर्वोत्कृष्टं महत्। सर्वापेक्षया उत्कृष्टमहत्त्वगुणयुक्ते आकाशादौ "आकाशादिदिशां सर्वं गतत्वं परमं महत्" भाषा०। भावप्रधानः निर्देशः परममहत्त्वमित्यर्थः। तस्य भावः परममहत्त्वं सर्वोत्कृष्टमहत्त्वे "परमाणुपरममहत्त्वान्तोऽस्य वशीकारः" प्रात०सू० "सूक्ष्मे निविशमानस्य परमाणुत्वं स्थितिपदं भवत इति स्थूले निविशमानस्य परममहत्त्वान्तं स्थितिपदं चित्तस्य एवं तासुभयीं कोटिमनुधावतो योऽस्याप्रतिघातः स परो वशीकारः तद्वशीकारात् परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिक्रमापेक्षते" भा०।

परमर्षि पु० कर्म०। वेदव्यासादिषु ऋषिषु तत्रामनिरुक्तिः मत्स्यपु० १२०अ० यथा

"ऋषिर्हि सायतो धातुर्विद्यात्वत्वपश्रुतेः। एष सन्निचयो यस्मात् ब्राह्मणश्च स्मृतस्तु षिः। विद्वत्तिसमकालन्तु बुद्ध्या व्यक्तिमुपस्त्रियम्। ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः। गत्यर्थाद्व्रतेर्घातोर्नामानि इति कारणम्। यस्मादेष स्वयंभूतस्तस्मात् ऋषिता मता"।

परमहंस परमः हंस आत्मा यस्य सन्यासिभेदे "कुटीचको बहूदकः हंसश्चैव तृतीयकः। चतुर्थः परमो हंसो योऽयं पश्चात् स उत्तमः" हारीतः। परहंसोऽप्यत्र "परहंस खिदण्डं च रज्जुं गोवालविर्मितास्। शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्" स्कन्दपु०। "सशिखं वपनं कुर्यात् हंसस्य परहंसकः। पौर्णमास्यां मृतस्यैषां वपनं परिकीर्त्तितम्" पुराणसमुच्चये तद्धर्माः स्थिताः। दण्डधारणमविदुष एव विदुषस्तु तन्नास्ति "न दण्डं न शिखां नाच्छादनं न भैक्षं चरति परमहंसः" महोपनिषदुक्तेः "ज्ञानमेवास्य दण्डः" इति तत्तत्यवाक्यशेषाच्च। अन्येऽपि तद्धर्मा मिता० नि० सि० च उक्ता द्रष्टव्याः। कर्म०। २परमात्मनि श्रुतेप्रतिपादके उपनिषद्ग्रन्थे।

परमाणु पु० कर्म०। सर्वापकृष्टे परिमाणयुक्ते वैशेषिकमतप्रसिद्धे नित्यपृथिव्यप्तेजोमरुतां १सूक्ष्मांशभेदे तस्य च नित्यत्वं तैरङ्गीकृतम् तत्साधकाभावात्। ततो महाभूतारम्भप्रकारस्तु उत्पत्तिशब्दे १।१।५ पृ० कणादभाष्यन्यायकन्दल्योरुक्तो दर्शितः। "दोधूयमानास्तिष्ठन्ति प्रलये पवमाणवः" इत्युक्तिस्तु सर्वजनोन्मुखवायुपरमाणुविषया उत्पत्तिशब्दार्थिते कणादभाष्यवाक्ये वायवीयपरमाणूनां प्रथमं क्रियोत्पत्त्यैव दोधूयमानत्वोक्तेः अन्येषां च तत्प्रेरणेनैव ततः परं क्रियोत्पत्तेः सम्भवात्। अन्यथा वायवीयपरमाणौ दोधूयमानत्वविशेषणासम्भव इति विवेचनम्। २परमाणुवच्छिन्ने कालभेदे "स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्। सतो विशेषभुग् यस्तु कालः स परमो महान्" भाग० ३।११।५ "यतः प्रपन्नस्य परमाणुतां परमाणुवस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैव विशेषं वाकल्यं यो भुङ्क्ते स परमोमहान्। अयमर्थः "प्रकर्षतारायाक्रस्य" इत्यादिना यत् सूर्यपर्यटनं वक्ष्यति तत्र सूर्यो यावता परमाणुदेशमतिक्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्वं भुवनकोषमतिक्रामति स परमो महान् संवत्सरात्मकः तस्यैवाद्यन्तयोः युगमन्वन्तरादिक्रमेण द्विपरार्धान्तत्वमिति" श्रीधरस्वामी।

परमाणुरङ्गक पु०परमाणुरङ्गं यस्य। ईश्वरे विष्णौ शब्दमात्रा। कर्तुः शरीरावश्यकत्वाङ्गीकारे सर्वकर्त्तुरीश्वरस्य परमाणूनां तत्साधकत्वेनाङ्गीकारेण सामञ्जस्यमिति न्यायमते स्थितम्।

परमात्मन् पु० कर्म०। परमेश्वरे "सर्गापवर्गसोपानं प्रामनन्ति मनीषिणः। सद्रूपास्तिमसावत्र परमात्मा निरुच्यते" कुसुमा०। "परमात्मा परं ब्रह्म निर्गुणं प्रकृतेः परः। कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्" ब्रह्मवै०पु० प्रकृति० २२अ० गीता १५अ०। [विष्णौ]

परमाद्वैत पु० परमसद्वैतं यत्र। सर्वभेदरहिते परमात्मनि

परमानन्द पु० परमः सर्वोत्कृष्ट आनन्दः। सकलानन्दोत्कृष्टानन्दात्मके परमात्मनि "परमानन्दमाधवम्" श्रीधरः। "एतस्यैव मात्रामुपजीवन्ति" इति श्रुतेः तैत्ति०उ० ब्रह्मानन्दवल्ल्यां ८अनुवाके "सैषानन्दस्य मीमांसा" इत्युपक्रमे मानुषानन्दादिभ्यः प्रजापत्यानन्दान्तेभ्य ब्रह्मणः शतगुणानन्दत्वोक्तेश्च तथात्वम्। आनन्दशब्दे ७।८पृ० तदाख्याण्युक्तानि। २तथानन्दयुक्ते परमात्मनि इति नैयायिकाः। तत्रानन्दशब्दस्य दुःखाभावपरत्वम्। इदन्तत्र बोध्यम् "स एको ब्रह्मण आनन्द इत्यत्र अभेदे षष्ठी भेदषष्ठीपक्षे आनन्दशब्दस्य दुःखाभावपरत्वकल्पने च अभावस्य निर्विशेषत्वात् श्रुत्युक्तस्य प्रजापत्यानन्दामेयया शतगुणत्वस्यासम्भवात् ब्रह्मण आनन्दे प्रजापतिशतगुणत्वोक्तिर्विरुध्यते।

परमान्न न० कर्म०। पायसे दुग्धपक्वेऽन्ने अमरः देवपितृप्रियत्वात् परमत्वमस्य। क्षताक्षशब्दे २।८।१ तत्पाकप्रकारगुणाद्युक्तं द्रष्टव्यम्।

परमापक्रमज्या स्त्री स०सि० उक्तायां परमक्रान्तिज्यायां परक्रान्तिशब्दे द्रष्टव्यम्।

परमापूर्व न० कर्म०। कत्तिकापूर्वजन्ये स्वर्गादिफलसाधने अपूर्वभेदे कत्तिकापूर्वशब्दे १८०८ पृ० द्रष्टव्यम्।

परमामुद्रा स्त्री त्रिपुरायाः पूजाङ्गे मुद्राभेदे "मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते। अनामिके मध्यगते तथैव हि कनिष्ठिके। सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीड़िताः। एषा तु परमामुद्रा योनिमुद्रेयमीरिता। एतामुद्रा महेशानि। त्रिपुराया मयोदिताः। पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः" तन्त्रसारः।

परमायुष पु० परममायुर्यस्य पृषो०बा० अच्स०। अदनहृषे शब्दच०।

परमायुस् न० कर्म०। यस्य यावत्कालं जीवनकालः शास्त्रोक्तः तस्य तत्कालपर्य्यन्तजीवनकाले आयुर्दायशब्दे ७७२ पृ० तदानयनाद्युक्तं द्रष्टव्यम्। शब्दमालायां प्राणिभेदे परमजीवनकालभेदाश्च उक्ता यथा

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह। परमायुरिदं प्रोक्तं नराणां करिणामिह। अष्टादशाधिकं शुनां द्वादश वत्सराः। पञ्चविंशतिवर्षाणि खरस्य करभस्य च। चतुर्विंशतिरश्वानां वृषस्य महिषस्य च। अगस्त्यकरवस्तादिपशूनां षड्दशान्विताः" अधिकमायुश्शब्दे ७८५ पृ० द्रष्टव्यम्।

परमार्थ पु० कर्म०। १उत्कृष्टवस्तुनि २यथार्थे च माघुक्या वार्त्तिकं तत्र अर्थस्य अबाधितत्वात् परमत्वम्।

परमार्हत पु०परम अर्हन् उपास्यतया अस्यास्य अण्, अर्हन् देवताऽस्य अण् कर्म० वा। जैनराजर्षिभेदे हेमचन्द्रः।

परमीकरणमुद्रा स्त्री देवताह्वानाङ्गे मुद्राभेदे "अन्योन्यग्रथिताङ्गुष्ठप्रसारितकराङ्गुली। महामुद्रेयमुदिता परमीकरणे बुधैः। प्रयोजयेदिमां मुद्रां देवताह्वानकर्मणि" तन्त्रसा०। इमाः आवाहन्यादिपरमीकरणान्ता इत्यर्थः। परमीकरणस्य अस्या मुद्राया देवदर्शनपथे आगमनम्।

परमृत्यु पु० परस्मात् मृत्युरस्य। काले त्रिधा० तस्य रोगादिना स्वतो मृत्योरभावेन परहेतुकमृत्युत्वात्तथात्वम्।

परमेग्र पु० कर्म०। परमेश्वरे

परमेश्वर पु० कर्म०। जगत्सृष्ट्यादिकारके सगुणे त्रिमूर्त्तिके १ब्रह्मणि २चक्रवर्त्तिनि नृपे च। ३शिवे पृषो० ४विष्णौ च।

परमेष्ठ पु० परमे चिदाकाशे सत्यलोके वा तिष्ठति स्था-क अनुकसमा० अम्बाम्बेति सत्वम्। चतुर्मुखे ब्रह्मणि। किप्। परमेष्ठा अयत्र यजु० १४।२१ तत्र "स्थास्थिनृस्थूणामिति" सत्वम्।

परमेष्ठिन् पु० परमे व्योमनि चिदाकाशे ब्रह्मणि सत्यलोके वा तिष्ठति "परमे किञ्च" उषा०इनि अनुकसमा० "स्थास्थिनृस्थूणाम्" सत्वम्। चतुर्मुखे ब्रह्मणि अमरः २आत्मभीष्टनृपपुत्रभेदे भा०आ०९४अ०। ३जिने पु० हेमच० ४महादेवे भा०व० ३७अ० ५आत्मारामसूर्त्तिभेदे "परमेष्ठी च शुक्लस्तु पद्मचक्रसमन्वितः। चित्राजतिस्तथा पृष्ठे शुभिरं चातिपुष्कलम्" पुराणसर्वस्वे। ६गुरुभेदे "मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः। परात्परो गुरुस्तं हि परमेष्ठी गुरुस्तदम्" तन्त्रम् परापरेति पाठान्तरम्। ७ब्राह्मण्यां (वामनघाटि) स्त्री राजनि० ङीष् तस्येदं यत् टिलोपे। पारमेष्ठ्य तत्सम्बन्धिनि त्रि०।

परम्परा स्त्री परम् अतिशयेन पृणाति विपूर्त्ति वा पृ-पृ-वा अच्। १वंशे २सन्ततौ अविच्छिन्नधारायाम् हेमच० "एवं परम्पराप्राप्तो योगः प्रोक्तोमयाऽनघ!" गीता ३वंशे ४अनुक्रमे च ५मृगभेदे मेदि० प्रपौत्रादौ ६अन्वये ७प्रपौत्रसुते पु० शब्दच०।

परम्पराक न० परम् अतिशयेन परा श्रेष्ठा परम्परा तया धारदा आकोष्टिसमं यत्र अक-कुटिलगतौ चक् प्रकृत्या परम्परा हिंसा अनिष्टाजनकत्वात् कन् वा, कन् सकलं

क्रोधात्। १यज्ञार्थे पशुहनने अमरः "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे। अहिंसामेव तां विद्यात्" इति मनूक्तेस्तस्या अहिंसात्वेन हि प्राशस्त्यम्।

परम्परीण त्रि॰ परम्परया धारया आगतः ख। अविच्छेदसन्तत्यागते भट्टिः ५सर्गः। [युगीन तत्र साधौ त्रि॰।

परयुग न॰ कर्म॰। उत्तरवर्त्तियुगे तत्र साधुः खञ्। पार॰

परर पु॰ पृ–वा॰ अर। केशराजे त्रिका॰।

परूप त्रि॰ परस्य रूपमिव रूपमस्य। स्वोत्तरवर्त्तिपरस्येव रूपवति "एङि पररूपम्" पा॰।

परलोक पु॰ कर्म॰। लोकान्तरे स्वर्गादौ। तत्र स्थितादि ठञ् अनुश्रतिका॰द्विपदवृद्धिः। पारलौकिक तत्र स्थितादौ त्रि॰

परलोकगम पु॰ परलोकं लोकान्तरं गमयति गम–णिच्–अच्। मृत्यौ हेमच॰।

परवत् त्रि॰ परः नियोजकतयाऽस्त्यस्य मतुप् मस्य वः। पराधीने हेमच॰ स्त्रियां ङीप्।

परवश त्रि॰ परस्य वश आयत्तता यत्र। पराधीने हेमच॰।

परवाणि पु॰ परं वाणयति वण–णिच्–इन्। १धर्माध्यक्षे २वत्सरे मेदि॰। ३कुमारशाहने मजूरे शब्दमा॰।

परवाद पु॰ ६त॰। १परस्यापवादे कर्म॰। २उत्तरवादे च।

परवादिन् पु॰कर्म॰। प्रत्यर्थिनि उत्तरवादिनि स्त्रियां ङीप्।

परव्रत पु॰ परं व्रतमस्य। धृतराष्ट्रे शब्दमाला।

परश पु॰ अर्श+पृषो॰। अर्शसो यस्य अर्शात् इतरस्य धातोः स्वर्णता तादृशे रत्नभेदे ब्रह्मवै॰ब्रह्मख॰ ३अ॰।

परशव्य त्रि॰ परशौ हितं यत्। परशुहिते

परशु पु॰ परं शृणाति शॄ–कु डित्। १परशवे (टाङ्गी) अस्त्रभेदे। शॄ–अशुन् पृ आदेशः। पर्शुरप्यत्र २अस्त्रमात्रे च। परशुलक्षणञ्च हेमा॰ औशनसनीतिशास्त्रोक्तं कुठारशब्दे २०७४ पृ॰ दर्शितम्।

परशुराम पु॰ परशुधारी रामः शा॰त॰। जमदग्निजे भगवदवतारभेदे येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता। अस्योत्पत्त्यादिकं यथा "अथ काले व्यतीते तु जमदग्निर्महातपाः। विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम्। भार्यार्थे प्रतिजग्राह रेणुकां वरवर्णिनीम्। सा तस्यात् सुषुवे पुत्रान् चतुरो वेदसम्मतान्। रुचण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा। पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः। आर्त्तवीर्यवधायाशु, यत्कार्य्यः सकलैः सुरैः। यश्चितः प्रथमः कोऽभूत्तेषां रामाभ्यस्तु यः। भारावतरणार्थाय त्राता परशुना यतः। यतः परशुहस्तं तं जहाति कदाच न अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात्। ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्मकृत्। स वेदानधिगत्य ज्ञात्वा धनुर्वेदांश्च सर्वशः। स्वतातात् कृत कृत्योऽभूद्वेदविद्याविशारदः" कालिकापु॰ ८५अ॰।

परशुधर पु॰ परशुं धरति धृ–अच्। १गणेशे हलायु॰। २परशुधारिमात्रे त्रि॰ ३जामदग्न्ये परशुरामे पु॰।

परशुमुद्रा स्त्री मुद्राभेदे "तर्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुष्टिका। अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका। परशुमुद्रा कथिता विद्विदा कङ्कुमुद्रिका" तन्त्रसारः।

परशुवन न॰ परशुवत्पत्रयुक्तं वनम् शा॰त॰। नरकभेदे भा॰व॰ २२२अ॰।

परश्व(स्व)ध पु॰ शि–ड श्वो दृद्धिः परस्य श्वं धयति, परस्य स्वं काष्ठं धयति वा धे–क। कुठारे अस्त्रभेदे अमरः।

परश्वस् अव्य॰ परःश्वस्+पृषो॰। आगामिदिनात् परदिने अमरटीका।

परस् अव्य॰ परस्मात् परस्मिन् परो वा पर+पञ्चम्याद्यर्थे वा॰ अचि। पञ्चम्याद्यर्थवृत्तौ परशब्दार्थे यजु॰५।४२

परसंज्ञक पु॰ परः संज्ञाऽस्य कप्। देहादिभ्यः परस्मिन् आत्मनि शब्दच॰।

परसवर्ण पु॰ समानवर्णः सवर्णः ३त॰। परेण उत्तरवर्त्तिना,वर्णेन समानवर्णे पा॰ ८।४भा॰।

परस्तर त्रि॰ तरप्तरपौ परः अतिशयसूत्रकृत् तरः पारस्करा॰। अतिशयेन तरपौ ऋ॰ १० १५५ २

परस्तात् अव्य॰ पर+पञ्चम्याद्यर्थे अस्ताति। पञ्चम्याद्यर्थवृत्तौ परशब्दार्थे परस्तात् ग्रामः ग्रामात् ग्रामे वा।

परस्त्री स्त्री ६त॰। परकीयायां स्त्रियां तत्र भवादि अण् नञ्जनमः अनुश्रतिका॰द्विपदवृद्धिः। पारस्त्रैण परस्त्रियां भवादौ त्रि॰

परस्पर त्रि॰ "सर्वनाम्नो द्वे वाच्ये समासवच्च बहुवत्" वार्त्ति॰ "समासवद्भावे पूर्वपदस्य सुर्वक्तव्यः" वार्त्ति॰ सुः। इतरेतरशब्दार्थे अत्र स्त्रीक्लीवयोस्तु "स्त्रीनपुंसकयोरुत्तरपदस्यापि विभक्तेरामभावो वक्तव्यः" वार्त्ति॰ आम् परस्पराभिरित्येव। भट्टिः २सर्गे उदा॰।

परस्मैपद न॰ परस्मै परोद्देश्यार्थफलकं पदम् "वैयाकरणाख्यायां चतुर्थ्याः" अमुक्समा॰। पाणिनिपरिभाषितेषु लकारादेशानामष्टानां मध्ये प्रथमेषु तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्ङ्वस्मस्ताताम्झथासाथाम्ध्वमिड्वहिमहिङ्ङ्वस्मस्तातांझथासाथां

"आत्मनेपदनिमित्तहीनात् धातोः परस्मैपदं स्यात्" सि॰कौ॰ आत्मनेपदनिमित्तं च "कर्त्रभिप्राये क्रियाफले" इत्युक्तं कर्तृगामिक्रियाफलत्वं तच्छून्यत्वेन परगामिक्रियाफलबोधयोग्यत्वादस्य परस्मैपदत्वसंज्ञेति बोध्यम्। एवं परस्मैभाषाऽप्यत्र।

परा अव्य॰ पृ–आ। १प्रातिलोम्ये २प्राधान्ये ३वर्जने ४आभिमुख्ये ५त्याने ६विक्रमे ७भृशार्थे ८गतौ ९भङ्गे १०अनादरे ११तिरस्कारे १२प्रत्याहृतौ च मेदि॰ "परा बधगतिदर्शनविक्रमाभिमुखभृशाधीनमोक्षणप्रातिलोम्येषु" गणरत्नटीकोक्तार्थभेदे क्रमादुदाहृतं यथा पराहतः परागतः पराहृष्टः पराक्रान्तः पराहृत्तः पराजितः पराधीनः पराकृतः पराङ्मुखः"। १२बन्ध्याकर्कोट्यां "परा वागनपायिनी" इत्युक्ते १४मूलाधारस्थे शब्दभेदे "सा परा यथाऽक्षरमधिगम्यते" इति श्रुत्युक्तायां १५ब्रह्मविद्यायाञ्च स्त्री।

पराक पु॰ प्रायश्चित्तरूपे व्रतभेदे यथाह प्राय॰वि॰ "यदात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः" मनुः। "अपहोमरतः कुर्यादुद्वादशाहमभोजनम्। पराक एष विख्यातः सर्वपापप्रणाशनः" बृहस्पतिः। "पराके पञ्च धेनवः" इत्युक्तेः पराकस्य पञ्चधेनुतुल्यत्वम्। यथाह अङ्गिराः "कृच्छ्रभिर्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति। मासि मासि पराकेण त्रिभिर्वर्षैर्व्यपोहति"। अत्र षड्भिर्वर्षैः षाशीतिशतप्राजापत्यानि पूर्वसङ्ख्यानि तथा प्रतिमास्येकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत्पराकाः। ततश्च षट्त्रिंशत्पराकाशीत्युत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वम्। षट्त्रिंशतश्च पञ्चगुणमशीत्युत्तरशतं भवतीति" प्रा॰त॰।

पराके अव्य॰ परा+अक–बा॰ ङे। दूरे निघण्टुः।

पराकाश पु॰ वाचा प्रतिज्ञातस्यार्थस्य कर्मणाऽकृतस्य परीक्षायाम् शत॰ब्रा॰ १४ ९ ४ ११ भाष्यम्। [राजनि॰।

पराकपुष्पी स्त्री पराक् पुष्पं यस्याः ङीप्। अपामार्गे

पराक्रम पु॰ परा+क्रम–करणे घञ् न वृद्धिः। बले देहसामर्थ्ये अमरः।

पराग पु॰ परागच्छति परा+गम–ड। १धूलिमात्रे २पुष्परजसि माघः ६।१ ३स्नानीयद्रव्ये कुङ्कुमचूर्णादौ अमरः। ४उपरागे ५चन्दने च मेदि॰ ६स्वच्छन्दगतौ शब्दच॰।

पराङ्ग न॰ ६त॰। १अन्यस्याङ्गे "पराङ्गवत् स्वरे" पा॰ २श्रेष्ठाङ्गे। [१शिवे २उत्कृष्टाङ्गयुक्ते त्रि॰।

पराङ्गद पु॰ परमङ्गदमस्य उत्कृष्टाङ्गेन दायति दै–क वा।

पराङ्गव पु॰ पराङ्गम् उत्कृष्टाङ्गं स्वतन्त्रया वाति याति वा–क। उत्कृष्टे त्रिका॰।

पराङ्मुख त्रि॰ पराक् मुखमस्य। १विमुखे २क्रियादौ प्रतीपाचारिणि स्त्रियां ङीप्। ३निष्टत्तस्त्रये "कामबीजं सुखे माया शिरस्यङ्कुशमेव च। अयो पराङ्मुखः प्रोक्तो मध्ये तु विन्दुलाञ्छितः" तन्त्रसारोक्ते ४मन्त्रभेदे पु॰

पराच् त्रि॰ परा–अञ्चति–क्विप्। १प्रतिलोमगामिनि २ऊर्द्ध्वगामिनि च "ये चामुष्मात् पराञ्चो लोकाः" छा॰उ॰। ३अप्रत्यक्षगम्ये परस्मात्मादौ पु॰। पुंसि सर्वनामस्थाने पराङ् पराञ्चौ इत्यादि स्त्रियां ङीप्। पराञ्ची। पराञ्चति क्विप्। ४परगामिनि बाह्यपदार्थबोधके ५प्रत्यगात्मनि च "पराञ्चि खानि व्यतृणत् स्वयम्भूः, तस्मात् पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप॰। "पराञ्चि परागच्छन्तीति स्वोपलक्षितानि श्रोत्रादीनीन्द्रियाणि खानीत्युच्यन्ते। तानि पराङ्ञ्येव शब्दादिविषयप्रकाशनाय प्रवर्त्तन्ते। यस्मादेवं स्वाभाविकानि तानि व्यतृणत् हिंसितवान् हननं कृतवानित्यर्थः। कोऽसौ स्वयम्भूर्यः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा न परतन्त्र इति। तस्मात् पराङ् प्रत्यग्रूपभिन्नानात्मभूतान् शब्दादीन् पश्यत्युपलभते नान्तरात्मन् नान्तरात्मानमित्यर्थः। एवं स्वभावेऽपि सति लोकस्य कश्चिद्धीरः प्रतिस्रोतःप्रवर्त्तनमिव धीरो धीमान् विवेकी प्रत्यगात्मानं प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यो नु व्युत्पत्तिमर्थेऽपि तत्रैवात्मशब्दो वर्त्तते "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वस्वभावमैक्षद् पश्यतीत्यर्थः छन्दसि कालानियमात्। कथं पश्यतीत्युच्यते। आवृत्तचक्षुरावृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातमर्थेभ्यो विषयादृयस्य स आवृत्तचक्षुः स एवं संस्कृतः प्रत्यगात्मानं पश्यति। न हि बाह्यविषयालोचनपरस्य प्रत्यगात्मालोचनस्यैकस्य सम्भवतीति। किमिच्छन् पुनरित्थं कृतवान् प्रयासेन अभावप्रवृत्तिनिरोधं कृत्वा धीर प्रत्यगात्मान

पश्यतीत्युच्यते अमृतत्वममरत्वधर्मत्वं नित्यस्वभावता-मिच्छन्नात्मन इत्यर्थः" भा०।

पराचित त्रि० परेणाचितः। परपुष्टे अमरः।

पराची स्त्री परा-अनृच-क्विप् ङीप्। अनुलोमेनानादृत्तायामृचि "तिस्रभ्यो हिङ्करोति च पराचीभिः" ताण्ड्य०ब्रा० २परिवर्त्तिन्यां विष्टुतौ च "सैषा पराची" भा० पराचीभिरनादृत्ताभिः ऋग्भिर्गीयते यथा प्रथमे पर्याये अनादृत्ताभिर्गानं तथोत्तरयोरपीति" भा०।

पराचीन त्रि० पराचि भवः ख। १उत्तरकालभवे २पराङ्मुखे अमरः।

पराचैस् अव्य० परा-चि ऐसि। दूरे निघण्टुः ऋ०१।२४ ९

पराजय पु० परा+जि-अच्। पराभवे (हारि) अमरः।

पराजित त्रि० परा+जि-कर्मणि क्त। पराभूते कृतपराजये।

पराञ्च पु० परतोऽञ्च्यते अनुज-बाः अच्। १तैलयन्त्रफेने २ऊरिकाफले च शब्दर०। ल्युट्। पराञ्चनमप्यत्र न०।

पराण् पु० परा+अन-विच् "अन्तः" पा०(पदान्तस्यानितेर्णत्वं व्यादुपसर्गस्यात् निमित्तात् परस्येत्)प्राणम्। जीवनयुक्ते एवं प्राण इत्यादावपि प्राणम्।

परात्पर पु० परस्यात्परः अलुक्स०। १गुरुभेदे परमेष्ठिनूशब्दे दृश्यम्। २परमेश्वरे तस्य सर्वेभ्यः परत्वात् तथात्वम्। "इन्द्रियेभ्यः परे ह्यर्था ह्यर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" कठवल्ली गीता च "परात्परं पुरुषमुपैति दिव्यम्" श्रुतिः।

परात्प्रिय त्रि० परेणाद्यते अद-भावे क्विप् तत्र परस्यादने प्रियम्। (शलु) तद्भेदे शब्दच०।

परात्मन् पु० कर्म०। १परमात्मनि ६त०। २परस्यात्मनि च।

परादन पु० स्त्री० परस्तत्कृष्टमदनं यस्य। पारसदेशोद्भवेऽश्वे (आरबीघोड़ा) त्रिका०।

परादान न० परस्मै आदानं सम्यग् दानम्। परोपकाराय दयादिना कृपणादिभ्यः सम्यग्दाने यजु० १८।६४ वेदटीमे दृश्यम्।

पराधि पु०६त०। १अन्यस्याधौ कर्म०। २परमानसव्यथायाम्।

पराधीन त्रि० पर+ङि अधि इति अलौकिकवाक्ये समासे अध्युत्तरपदात् ख, परस्याधीनो वा। परायत्ते अमरः।

परान(ण)सा स्त्री पराधिक्षिपनया परा+अन-करणे वा० अप। निकृष्टसाधौ शब्दच०। एतमध्यस्तु साधुः।

परान्तक पु० परोऽन्तकः। सर्वनाशके महादेवे काशीखं० दक्ष०। "मृत्युर्यस्योपसेचनम्" इति श्रुतेः तस्य मृत्योर्नाशकत्वात् परान्तकत्वम्।

परान्तकाल पु० परः संसारोत्तरं अन्तकालः। मुमुक्षूणां संसारहानौ देहान्तकाले "ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे" मुण्ड०३।२।६ संसारिणां वै मरणकालास्ते अन्तकालास्तानपेक्ष्य मुमुक्षूणां संसारहानौ देहपरित्यागकालः परान्तकालः"भा०। वस्तुतः कार्यब्रह्मणः आयुःकालरूपपरशब्दार्थस्यान्तकालः परान्तकालः "कार्यान्तये तदध्यक्षेण सहातः परमात्मनानादिति" शा० सूत्रे तत्काले तेषां लयस्योक्तेः ब्रह्मलोकेषु इति विशेषणाच्च तत्रैव तेषां मोक्ष इत्येव युक्तम्।

परान्तिका स्त्री "अस्य युग्मरचिता परान्तिका" ह०र०उक्ते गीतिरूपमात्राद्वत्तभेदे अपरान्तिकेति तत्र पाठे तत्रार्थे

परान्न न० ६त०। १अन्यस्वामिकभक्तपिष्टकादौ। २परव्रतशस्यपाकजद्रव्यमात्रे ३परपक्वान्ने च।

व्रतादौ परान्नस्य त्याज्यत्वं यथा "परान्नं परयासश्च नित्यं धर्मरतस्त्यजेत्" इति स्मृतिः। संयमदिने तस्य त्याज्यत्वं यथा "कांस्यं मांसं मसूरश्च चणकं कोरदूषकम्। शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम्"। पारणदिने तस्य त्याज्यत्वं यथा "अभ्यङ्गञ्च परान्नञ्च तैलं निर्माल्यलङ्घनम्। तुलसीचयनं द्यूतं पुनर्भोजनमेव च। वस्त्रपीड़ां तथा क्षारं द्वादशैतां वर्जयेद्बुधः" एका०त०। तद्भोक्तुर्योगादेर्विफलत्वं यथा "परपाकेण जुष्टस्य द्विजस्य गृहमेधिनः। इष्टं दत्तं तपोऽधीतं यस्मान्नं तस्य तद्भवेत्"। तद्भुक्त्वा पुत्रोत्पादने दोषो यथा "यस्मान्नेन तु भुक्तेन भार्यां समधिगच्छति। यस्मान्नं तस्य ते पुत्रा अस्मात्तेतः प्रवर्त्तते" ब्राह्मणादिपरस्वामिकान्नभोजने दोषो यथा "ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम्। वैश्यान्नेन तु शूद्रत्वं शूद्रान्नैर्नरकं व्रजेत्" इत्यादयोऽनु०। परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा "षोडशांशं स लभते यः परान्नेन गच्छति। अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति" प्राव०त०। महापुरुषनिपाते तस्य त्याज्यत्वं यथा "अन्यान्नाद्यं परान्नञ्च गन्धं माल्यञ्च मैथुनम्। वर्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः" शुद्धित०। तद्भोक्तुर्मन्त्रसिद्धिहानिर्यथा "जिह्वा दग्धा परान्नेन करो दग्धौ

प्रतिपक्षात् । मनो दत्वं परस्त्रीभिः कथं विद्विषेरानने" तन्त्र० । तद्भोजने प्रतिग्रहो यथा "गुर्वन्नं मातुलान्नं वा श्वशुरान्नं तथैव च । पितुः पुत्रस्य चैवान्नं न परान्नमिति स्मृतिः" एकादशीत० ।

परापत्ति त्रि० परागता आपोयतः अच्समा० वा अतदैत्वम् । परागतजलापादने । पक्षे दैत्वे परेण तत्रार्थे ।

परापर न० परमाधिपत्तिं आ+पृ–अच् । १परुषके भावप्र० २देवताख्ये गुरुभेदे परात्परं इत्यत्र पाठान्तरम् । परमेष्ठिनृशब्दे दृश्यम् । परश्च अपरश्च द्वन्द्वः । ३परत्वापरत्वयुक्ते तस्य भावः त्व परापरत्व तद्भावे न० "परापरत्वधीहेतुरेका नित्या दिगुच्यते" भाषा० ।

परापुर् स्त्री परा स्यूताः पुः समाधान्तविधेरनित्यत्वात् न समान्तः । स्यूतदेहे यजु० २।३० ।

पराभव पु०परा+भू–अप् । १तिरस्कारे २अभिभवे ३विनाशे च मेदि० । आर्षे तु अदोरपं बाधित्वा क्वचित् वम् । पराभाव तत्रार्थे भा०भी० ४३अ० उदा० ।

पराभिच्छ पु० परामिच्छते आ+भिच्छ–अच् उप०स० । परस्य गृहे भिक्षाया इच्छाकारके वानप्रस्थभेदे "अग्नहोत्रपरायणाः केचित् पराभिच्छास्तथापरे" हरिवं०२६८अ० ।

परामर्श पु० परा+मृश–भावे घञ् । १युक्तौ २विवेचने ३न्यायोक्ते अनुमितिकारणे ज्ञानभेदे यथोक्तं "व्याप्तस्य पक्षधर्मत्वधीः परामर्श उच्यते" भाषा० "व्याप्तस्य पक्षधर्मत्वधीरिति । व्याप्तिविशिष्टस्य पक्षेच वह्नेर्विशिष्टाभावगाहिज्ञानमनुमितिजनकम् । तत्र व्याप्यः उच्चे इति ज्ञानम् । पक्षो व्याप्यवानिति वा । अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यम् इत्याकारिका । पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका । द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरित्यन्ये । ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं भवति तत्र ज्ञानद्वयादनुमितिदर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञान सर्वत्र न कारणं किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वम् आवश्यकत्वात् । विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः । लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वम् । किञ्च धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकधर्मताज्ञानस्य सत्त्वात् । न च तदानीं स्वाश्रयाव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् । चैत्रस्य व्याप्तिपक्षे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यादिति । यदि तु तत्पुरुषीयस्वाश्रयाव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरुच्यते तदा अनन्तकार्यकारणभावः । मन्यते तु समवायेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिं जनयतीत्यतो नानन्तकार्यकारणभावः । यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानस्य स्वतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूम आसीदवान् पर्वत इति ज्ञानाद्यनुमितिः स्यादिति । इत्थञ्च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलसङ्गौरवस्यादोषत्वात्" सि०चन्द्रा० । परामर्शस्तु अनुमितौ करणं व्याप्तिज्ञानरूपकरणजन्यत्वात् अनुमितिहेतुत्वाच्च यथोक्तं "व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्" भाषा० "अनुमानाम् अनुमितौ व्याप्तिज्ञानं करणम् परामर्शो व्यापारः । तथा हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्वचित् पर्वतादौ अविच्छिन्नमूर्ता धूमलेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं भवति । तस्मात् वह्निव्याप्यधूमवानयमिति ज्ञानं भवति स एव परामर्श इत्युच्यते । तदनन्तरं पर्वतोऽयं वह्निमानिति ज्ञानं जायते । तदेवानुमितिः" सि०चन्द्रा० । तस्य विवेचनं च युक्त्या श्रुतार्थावधारणम् "नोपदेशश्रवणेऽपि कृतकृत्यता परामर्शादृते विरोचनवत्" सां०सू० "परामर्शो गुरुवाक्यतात्पर्यनिर्णयो विचारः" भा० ।

परामृत न० परमामृतं यस्मात् । मेधाद्विर्मन्थे त्रिका० ।

परामृष्ट त्रि० परा+मृश–क्त । १संबद्धे "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात०सू० । २कृतपरामर्शे यस्य वाक्यस्य तात्पर्यावधारणं कृतम् तस्मिन् वाक्ये । साध्यव्याप्यतया हेतुमत्त्वेन ज्ञाते ३पक्षे च ।

परायण न० परमयनं यत्नम् । १यत्नन्यासक्ते २उत्तमाश्रये च ६त० । ३व्यासक्ते यथा धर्मपरायणः धर्म यत्नन्यासक्तः । ४तत्परे ५अभीष्टे च त्रि० मेदि० –परमसत्कृतं पुनरावृत्तिरहितं स्थानमस्य । ६विष्णौ पु० "निष्ठा शान्तिः परायणः" विष्णुसं० ।

परायति स्त्री परा+अय–गतौ वा० अति । प्रत्यग्गन्तरि

क्र०६ ७।७भाष्ये दृश्यम्। आ+यम्–क्तिन् परस्यायतिः आयत्तता यत्र। २पराधीने त्रि० कर्म्म०। ३उत्कृष्टायामायतौ उत्तरकाले स्त्री। षष्ठ० ४तद्युते त्रि०।

परायत्त त्रि०। पराधीने हेमच०।

परारि अव्य० पूर्वतरे वर्षे पूर्वतर+अरि नि० पराद्देशः। १पूर्वतरवत्सरे गतद्वितीयवत्सरे। अस्य च सम्प्रत्यर्थमात्रवृत्तित्वम्। ततः भवार्थे त्र। परारित्र तत्र भवे त्रि०। परोऽरिः। २अत्यन्तशत्रौ पु० [हारा०।

परारु पु०पराच्छति परा+छ–उण्। कारवेल्लवृक्षे (उच्छा)

परारुक पु० परा+छ–उक। प्रस्तरे त्रिका०

परार्थ त्रि० परस्मै इदम् "अर्थेन सह नित्यसमासोविशेषश्च निष्ठता च" वार्त्ति० अर्थेन सह नित्यं चतुर्थीत०। १परनिमित्तके। परः अर्थो उद्देश्यो यस्य सा तत्रार्थे बहु०। २परप्रयोजनादौ पु :

परार्द्ध न० ऋध–अच् कर्म०। १चरमसंख्यायां "पारे परार्द्धं गणितं यदि स्यात्" नैषधम्। "जलधिचान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संख्याः" लीला० तस्य पर्वशेषतया उक्तेस्तथात्वम्। परस्य ब्रह्मणः आयुषोर्द्धं विष्णुः। ब्राह्मण आयुषो २द्वितीयार्द्धे।

परार्द्ध्य त्रि० परार्द्धं चरमसंख्यामुपचारात् अर्हत्वमर्हति यत्। श्रेष्ठे "परार्द्ध्यवर्णान्तरचेति" रघुः

परावत् अव्य० परा+अव–वा० अति। १दूरदेशे निघण्टुः २प्रकृष्टतमे च ऋ०१।२६।२। "पराः परावतोऽयमस्ति" ब्रा०उ० भाष्ये तथा व्याख्यानात्।

परावत न० परा+अव–वा० अवच्। पक्षपक्षे राजनि०।

परावरा स्त्री परं चावरञ्च विषयत्वेनास्त्यस्या अच्। १विद्याभेदे "भारद्वाजोऽङ्गिरसे परावराम्" सुश्रु० "परावराम् परस्मात् परस्मादवरेण प्राप्नोति परावराम् परावरसर्वविद्याविषयव्याप्तेर्वा तां परावरामङ्गिरसे प्राहेत्यनुषङ्गः" भा०। परस्मादवरः। ३श्रेष्ठतमे त्रि०।

परावर्त्त पु० परा+वृत–घञ्। १परीवर्त्ते २विनिमये हेमच० ३प्रत्यावृत्तौ च।

परावसु पु० परागतं यत्तास्वं वसु धनं यस्मात् प्रा०ब०। असुराणां होतृभेदे "निरस्तः परावसुरिति परावसुर्हं वै नामासुराणां होता स तमेवैतद्वोऽवदनाङ्गिरसेति" शत०ब्रा० ३।६।।२३। २रैभ्यसुनिष्टप्तभेदे भा०व०१३६अ०। ३गन्धर्वभेदे भाग० ८।।।२४

परावह पु० परावहति हरा+वह–अच्। सप्तवायुमध्ये परिवहवायोरूर्द्ध्वस्थे वायुभेदे अनिलशब्दे १६४ पृ० आवहशब्दे ८२६पृ० च दृश्यम्। [मात्रे त्रि०।

पराविद्ध पु० परा+व्यध–क्त। १कुबेरे शब्दमा० २प्रत्याविद्ध-

पराव्रज् पु० परावृजति तपसा पापं वर्जयति परा+व्रजो वर्जने क्विप्। ऋषिभेदे ऋ०१।।१२।८

परावृत्ति स्त्री परा+आ+वृत–क्तिन्। १प्रत्यावृत्तौ येन यथागतिस्तत्प्रयत्नेन पुनरावृत्तौ हरिवं० ५६अ०। २परिवर्त्ते च परिवर्त्तिनृशब्दे दृश्यम्।

परावेदी स्त्री परस्तत्कर्मणाविन्दति विद्–लाभे अण् उप० स०। दर्भत्याम् शब्दकल्पद्रु०।

पराशर पु० परान् आ+शृणाति आ+शॄ हिंसायां अच्। १नागभेदे भा०आ० ५७अ०। २इन्द्रे यातूनां पराशरणात् तथात्वं "इन्द्रो यातूनामभवत् पराशरः" ऋ० ७।१०४।२१ इति श्रुतेः। "पराशरः पराशीर्णस्य स्थविरस्य वशिष्ठस्य (कुले) जाते" निरुक्तोक्तेः पराशीर्णस्य स्थविरवशिष्ठस्य कुले जातत्वात् वशिष्ठपुत्रशक्तिपुत्रे अदृश्यन्तीगर्भजाते ३ऋषिभेदे तज्जन्मकथा भा०आ० १७८अ०। तन्नामनिरुक्तौ तत्राध्याये "पराशुः स यतस्तेन वशिष्ठः स्थापितो मुनिः। गर्भस्थेन ततो लोके पराशर इति स्मृतिः" "पराशोराशासन मवस्थानं येन स पराशरः। आङ्पूर्वाच्छासतेः ऽरन् नीलकण्ठः" पृथो० सुलोपः। तालव्यमध्यत्वं वाम्य स च कृष्णद्वैपायनस्य पिता द्वैपायनशब्दे दृश्यम्। तेन च कलिकर्त्तव्यधर्मसंहितां चक्रे सा च द्वादशाध्यायात्मिका तत्र १अ० युगभेदे धर्मभेदसंहिताभेदादिकथनम्। २अ० कलौ गृहस्थधर्मः। ३अ०अशौचम् आत्मरक्षादिदोषाः। ४अ० प्रायश्चित्तविशेषान्त्येष्टिकर्त्तव्यतोक्तिः। ६अ० प्राणिहत्याप्रायश्चित्तादि। ७अ० द्रव्यशुद्ध्यादि। ८अ० गोवधादिप्रायश्चित्तम्। ९अ० गोवधापवादादि। १०अ० अगम्यागमनादि प्रायश्चित्तम्। ११अ० अमेध्यादिभक्षणप्रायश्चित्तम्। १२अ० प्रायश्चित्ताङ्गस्नानभेदादि। पराशरेण प्रोक्तम् अण्। पाराशर पराशरप्रोक्ते त्रि० चक्रदत्तप्रदर्शिते घृतभेदे न० "यष्टी बला गुडूच्यश्वपञ्चमूली तुलां पचेत्। शूर्पेऽपामष्टभागस्थे तत्र पात्रे पचेद् घृतम्। धात्रीविदारीक्षुरसे त्रिपात्रे पयसोर्मते। सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम्। च चैत्यं राजयक्ष्माणमुन्मूलयति शोणितम्"। स्त्रियां ङीप्। "कलौ पारशरी स्मृतिः" पराशरः।

प(पा)राशरिन् ब०व० पराशरस्यापत्यम् गर्गा० यत् पाराशर्य्येण व्यासेन प्रोक्तं भिक्षुसूत्रं शारीरकसूत्रमधीयते "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः" पा० बहुत्वे चिनेर्वा लोपः। भिक्षुसूत्राध्येतृषु शुभो० सूत्रः इति भरतः तन्मूलम् मृग्यम्। तथाऽमरे एकवचनस्योक्तिर्निर्मूला बहुत्वे एव तद्विधानात्।

पराश्रय त्रि० पर आश्रयो यस्य। १अन्याश्रिते वृक्षोपरिजातायां लतायां २वन्द्यायां स्त्री शब्दच०। [अमरः।

परासन त्रि० परा-अस-ल्युटे भावे ल्युट्। मारणे वधे

परासु त्रि० परागता असवोऽस्य। मृते गतप्राणे अमरः।

परास्कन्दिन् त्रि० परमास्कन्दति आ+स्कन्द्-णिनि। चौरभेदे (डाकाइत) अमरः।

पराह पु० परस्तत्परवर्त्ति अहः टच्समा०। "अहान्ताः पुंसि" पा० पुंस्त्वम्। परस्मिन् दिने।

पराह्ण पु० परः परभागोऽह्नः एकदेशिस० टच् अह्नादेशः अत्वञ्च। दिनस्य परभागे अपराह्णे।

परि अव्य० पृ-इन्। १समन्ततोभावे २व्याप्तौ ३दोषकथने ४भूषणे ५आक्षेपे ६पूजने ७वर्जने ८मर्यादायाम् ९आच्छादने नचरत्नटी०। तत्र च क्रमेणोदाहृतं यथा "१परिभ्रमति २परिचितः ३परिवादः ४परिष्करोति। ५परिव्रजते ६परिचरति ७परि त्रिगर्त्तात् ८परिच्छिद्यते वासः ९परिदेवनम्" १०व्याप्तौ ११शेषे च मेदि०। १२उपरमे १३शोके हेमच० १४सन्तोषभाषणे शब्दरत्ना० अस्य उपसर्गत्वमर्थभेदे कर्मप्रवचनीयत्वञ्च पा० उक्तं यथा "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः" पा० "एवमेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञाः स्युः। लक्षणे वृक्षमभि पर्यनु वा विद्योतते विद्युत्। इत्थम्भूताख्याने भक्तो विष्णुमभि पर्यनु वा। भागे चक्रो हरिमभि पर्यनु वा हरेर्भाग इत्यर्थः। वीप्सायाम् वृक्षं वृक्षं प्रति पर्यनु वा सिञ्चति। अत्रोपसर्गत्वाभावात् णत्वम्। एषु किम् परिषिञ्चति" सि०कौ०। "अधिपरी अनर्थकौ" पा० "उक्तसंज्ञौ स्तः। कृताऽभ्यागच्छति। कृतः पर्यागच्छति। गतिसंज्ञाबाधाद् गतिर्गतावित्ति निघातो न" सि०कौ०। "अपपरी वर्जने" पा० एतौ वर्जने कर्मप्रवचनीयौ स्तः "पञ्चम्यपाङ्परिभिः" पा० एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः परि हरेः संसारः। परिरत्न वर्जने उच्चादौ तु द्वितीया हरिपाणि। उपरमे परिशान्तः शोके परिदेवनम्। "अन्यपलाकार्यसंख्याः परिणा" पा० द्यूते व्यवहारे पराजये च अक्षादीनां परिणा समासः। न पूर्वनिपातः द्यूते अक्षं विपरीतं दत्तम् अक्षपरि। एवं मलाकापरि एकपरि इत्यादि। सन्तोषे परितोषः। "परेश्च घाङ्कयोः" पा० रस्य वा षः। परिषः पलिषः पल्यङ्कः पर्य्यङ्कः।

परिंश पु० शेषे क्ष० १।१८७।८ भाष्यम्।

परिकथा स्त्री परितः कथा। कथाभेदे "अथ वाङ्मयभेदाः स्युश्चम्पूः खण्डकथा कथा। आख्यायिका परिकथा कथाप्रकरिभेषकौ" त्रिका०।

परिकम्प पु० परिकम्पते अनेन परि+कम्प-करणे घञ्। १भवे। भावे घञ्। २परितः कम्पे च

परिकर पु० परि+कृ-अप्। १पर्य्यङ्के २परिवारे ३समारम्भे च अमरः ४समूहे ५प्रगाढगाढबन्धे हेमच० ६विवेके मेदि० ७वस्त्रकारिणि च विश्वः।

परिकर्त्तृ पु० अनूढवस्त्रे कनिष्ठस्य विवाहसंस्कारकर्त्तरि याज्ञवल्क्ये परिवेत्तृशब्दे दृश्यम्।

परिकर्मन् न० परि+कृ-मनिन्। १कुङ्कुमादिनाऽङ्गादेः २संस्कारे अङ्गानां गुणभावादौ च। योगवियोगसुखभाग वर्गवर्गमूलघनघनमूलाद्यन्तं परिकर्माष्टकं तथाविधं भिन्नपरिकर्माष्टकं च लीला० उक्तं दृश्यम्। योगशास्त्रप्रसिद्धे चित्तस्य प्रसादनोपाये ३मैत्र्यादौ उपेक्षाशब्दे दृश्यम् परितः कर्माऽस्य। ४परिचारके त्रि० रत्नमा० परिकर्म कार्य्यतयाऽस्त्यस्य ब्रीह्या० इनि। परिकर्मिन् परिकर्म्मकारके आन्ध्र० श्री० २ ४

परिकर्ष पु०परि+कृष-भावे घञ्। समाकर्षणे कर्षस्य वर्जनम् अव्ययी० कर्षवर्जने अव्य०निरुदका०तस्यान्नोदात्तता

परिकलित न०परि+कल-भावे क्त। आकलने तत्कलतमनेन इष्टादि० इनि परिकलितिन् तस्य कर्त्तारः। स्त्रियां ङीप्।

परिकाङ्क्षित पु० परित्यक्तं काङ्क्षितं कल्पचन्दनाद्यभिलाषो येन प्रा०ब०। तपस्विनि शब्दच० [हेमच०।

परिकूट न०परिभूषितं कूटम् मा०त०। प्रहारकूटने हस्तिनखे

परिकूल न०परितः कूलम्। उभयतस्तिरःकूले तिरुद० अस्यान्नोदात्तता। [लवाऽस्य। परिकूलेऽपि तथाक्षरः।

परिक्रंश अव्य०केशस्योपरि। केशोपरिभागे निरुद० अन्नोदा०

परिक्रम पु० परि+क्रम-भावे घञ् न वृद्धिः। १समन्तात् भ्रमणे २प्रदक्षिणीकरणे ३क्रीडार्थं पद्भ्यां गमने च। तत्र पथिष्वा परिक्रमे फलादिकसत्रं वराहपु० "इयु

मद्रे ! महापुण्यं पृथिव्यां सर्वतो दिशम् । परिक्रम्य यथाध्वानं प्रमाणगणितं शुभम् । भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च । षष्टिकोटिसहस्राणि षष्टिकोटीशतानि च । तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले । गणितानि समस्तानि वायुना जगदायुषा । ब्रह्मणा सोमशर्मेव नारदेन ध्रुवेण च । जाम्बवता सुपुत्रेण रावणेन हनूमता । एतैरनेकधा देवैः सुसागरवना मही । क्रमिता वाहिना चैव ब्राह्मणखण्डरेखया । अन्तरे भ्रमणेनैव सुग्रीवेण महात्मना । तथा च पूर्वदेवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः । योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयसुखैरपि । क्रमिता न क्रमिष्यन्ति न पूर्वे नापरे जनाः । अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः । मनसापि न शक्यन्ते गमनस्य च का कथा । सप्रदीपे तु तीर्थानि भ्रमणाद्यत् फलं भवेत् । प्राप्यते चाधिकं तस्मान् मथुरायाः परिक्रमे । मथुरां समनुप्राप्य यस्तु कुर्यात् प्रदक्षिणम् । प्रदक्षिणीकृता तेन सप्रदीपा वसुन्धरा । तस्मात् सर्वप्रयत्नेन सर्वकामानभीप्सुभिः । कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा" । ल्युट् । परिक्रमणं तत्रार्थे न० ।

परिक्रमसह द्वन्द्वी परिक्रमं सहते सह–अच् । स्थाने त्रि० स्त्रियां जातित्वात् ङीष ।

परिक्रय पु० परि+क्री–अच् । १यिनिमये तुल्यरूपदानेन क्रयणे "कोशान् रक्षार्द्धकोशेन सर्वकोशेन वा पुनः । शेषं प्रजातिरक्षार्थं परिक्रय उदाहृतः" कामन्द० । नियतकालं कृत्वा स्वीकरणे त्रि०क्ली० तत्रार्थे करणस्य वा सम्यदानता शतेन शताय वा परिक्रीतः । ल्युट् । परिक्रय तत्रार्थे न० "परिक्रयणे सम्प्रदानमन्यतरस्याम्" पा०

परिक्रिया स्त्री परितः क्रिया । १परिखादिना वेष्टने अमरः २एकाहयागभेदे "सद्यस्क्रिया अत्यक्रिया परिक्रिया वा स्वर्गकामः" आश्व०श्रौ० ९ ५ १२ परिक्रियाण्येकाहा भवति एषामन्यतमेन स्वर्गकामो यजेतेति" नारा० ।

परिक्लपन पु० परि+क्लृप–कर्त्तरि ल्यु । मेघे निरु० ६ ।

परिक्षय पु० परि+क्षि–भावे अच् । नाशे मनुः ९ ५९

परिक्षाय न० परि+क्षै–भावे ल्युट् । परीक्षायां "यानि परिक्षायान्यावंस्ते कृष्णाः पशवोऽभवन्" ऐत०ब्रा० ९ १४

परिक्षित् पु०परिक्षीणे क्षयति वर्त्तते क्षि–क्विप् । १अभिमन्युपुत्रे नृपभेदे तन्नामनिरुक्तिः भा०पौ०१६अ०"विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः । उपयुज्यमानां दृष्ट्वा सत्यवाक् ब्राह्मणोऽब्रवीत् । परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति । एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति । तस्य तद्वचनं साधोः सत्यमेतद् भविष्यति । परिक्षिद् भविता क्षेमं पुनर्वंशकरः सुतः" । क्विपि उपसर्गदीर्घे परीक्षित् अप्यत्र । कर्त्तरि क्त परिक्षितोऽप्यत्र पद्धरः । २कुबेरपुत्रभेदे पु० हरिवं० ३२अ० "द्वादशौ तव वंशेऽस्मिन् द्वावेव च परिक्षितौ" तत्रैवाध्याये । ३स्वक्षित्तः पुत्रे नृपभेदे च "अविक्षितः परिक्षित्तु यवनाश्च वीर्यवान्" भा०आ०९४अ० ।

परिक्षेप पु० परितः क्षिप्यते विषयशासनया जीवात्मा येन परि+क्षिप–करणे घञ् । १इन्द्रिये "एकादशपरिक्षेपं मनोव्यापारयात्मकम्" भा० आश्व० १६अ० भावे घञ् । २परितस्त्यागने च ।

परिक्षेपक त्रि०परि+क्षिप–ताच्छील्ये ण्वुल् । परितस्त्यागशीले

परिक्षेपिन् त्रि० परि+क्षिप–ताच्छील्ये णिनुच् । परितः क्षेपणशीले स्त्रियां ङीप् ।

परिखा स्त्री परितः खन्यते खन–ड । दुरादौ रिपुप्रवेशनिवृत्तये गर्त्तरूपायां जलाधारस्थाने वेष्टनाकारभूमौ अमरः । परिखामानञ्च ब्रह्मवै०पु० जन्मख० २०२अ० उक्तं यथा "प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् । परितः शिबिराणाञ्च गम्भीरदशहस्तकम् । सङ्केतपूर्वकञ्चैव परिखाद्वारभीप्सितम् । शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च" । ततः भवार्थे पक्षाद्या० अण् । पारिख तद्भवादौ त्रि० । तत्र नखे परिखात इति पाठान्तरे पारिखात इत्यपि तत्रार्थे

परिखात न० परितः खातम् । १परिखायाम् । २परिखनकर्मणि त्रि० ।

परिगणन न० परि+गण–भावे ल्युट् । १सर्वतोभावेन गणने २विधिनिषेधशास्त्रयोः विशेषतः कीर्त्तने च

परिगणित त्रि० परि+गण–क्त । १विधिनिषेधयो विशेषरूपेण कीर्त्तिते च । २संख्याते च

परिगत त्रि० परि+गम–क्त । १व्याप्ते २स्थिते ३ज्ञाते ४चेष्टिते च मेदि० ५गते हेमच० ६वेष्टिते च । कर्त्तरि क्त । ७परितो गन्तरि त्रि० ।

परिगर्दित न० परि+गर्द–क्त । परिकथने तद्गतमनेन दृष्टा० इति परिगर्दितिनू तत्कर्त्तरि स्त्रियां ङीप् ।

परिगहन न० परि+गह–भावे ल्युट् चुरा० न अत्यम् । अत्यन्तगहने

परिगूढ़ त्रि॰ परि+गुह क्त। अत्यन्तगुप्ते ततः चतुरर्थ्यां कथ्यादि॰ क। परिगूढक तस्यादूरदेशादौ त्रि॰।

परिगृहीत त्रि॰ परि+ग्रह–कर्मणि क्त। स्वीकृते आचिता॰ नाद्यान्तोदात्तता।

परिग्रहीति स्त्री परि+ग्रह–क्तिन् इट्-इटो दीर्घः। परिग्रहे ऐत॰ब्रा॰ २।१५। [स्त्रियां शब्दच॰।

परिगृह्या स्त्री परि+ग्रह–कर्मणि क्यप्। पाणिगृहीतायां

परिग्रह पु॰ परि+ग्रह-अप्। १स्वीकारे। कर्मणि च। २सैन्यपश्चाद्भागे ३भार्यायां परिजने च। करणे च। ४मूले ५उपाये च अमरः। परितोः ग्रहः। ६राहुश्वा सूर्येन्दोर्ग्रहणे ७विष्णौ पु॰ "परमेष्ठी परिग्रहः" विष्णुसं॰ "शरणार्थिभिः परितो गृह्यते सर्वगतत्वात् परितो ज्ञायते इति वा पत्रपुष्पादिकं भक्तैरर्पितं गृह्णातीति वा परिग्रहः" भा॰।

परिग्राम अव्य॰ ग्रामस्याभिमुखम्। ग्रामस्यासन्ने ततः भवार्थे ठञ्। पारिग्रामिक तद्भवादौ त्रि॰।

परिग्राह पु॰ परि+ग्रह–"परौ यज्ञे" पा॰ घञ्। यज्ञार्थं स्वत्रेण वेदेः स्वीकारे सि॰कौ॰।

परि(लि)घ पु॰ परिहन्यतेऽनेन "परौ घः" पा॰ परौ हन्लेरप् घस्यान्तादेशः रस्य वा लः। १लोहवलयगुड़े २लोहमयवगुड़े च अमरः। विस्तृतादिषु ३उनविंशे योगे ४अर्गले द्वारावरोधिकाष्ठे मेदि॰। ५सुहृदे ६मूले अजयः। ७गृहे दुर्गद्वे हस्तिघटे शब्दरत्ना॰। १०कुमारानुचरगणभेदे भा॰शल्य॰ ५६अ॰। ११चण्डालभेदे भा॰शा॰ १२८अ॰।

परिघट्टन न॰ परि+घट्ट–भावे ल्युट्। परितश्चालने "मासर्तुदर्शीपरिघट्टनेन" भा॰व॰ यज्ञप्रश्ने।

परिघर्म पु॰ परि+घृ-मन्। यज्ञाङ्गमहावीरपात्रपतितफेनादेः चरणे परिघर्मस्वेदम् यत्। परिघर्म्य महावीराङ्गघर्मसम्बन्धिपात्रे "परिघर्म्यमौदुम्बरम्" कात्या॰श्रौ॰ २६।२।६ "परिघर्म्यं घर्मसम्बन्धि यत् पात्रजातं काष्ठमयशुल्वादि तदौदुम्बरम्" देवनाथः।

परिघात पु॰ परिहन्यतेऽनेन घञ्। परिघाताख्ये

परिघातन पु॰ परिघातयति परि+हन–स्वार्थे णिच् कर्त्तरि ल्यु। १परिघाताख्ये अमरः। २सर्वतोहनने कर्त्तरि भावे ल्युट्। २परितोहनने च धरणिः।

परिघृ(घृ)ष्टिका पु॰ परितः घृ(घृ)ष्टं घ्राह्यतेनास्यस्य ठन्। १यानप्रस्थभेदे भा॰आश्व॰ ९२अ॰। नीलकण्ठेन तत्र "परिघृष्टिका वैधसिका इति पाठस्तु "परिपृष्टमेव गृह्णन्ति नान्यथेति व्याख्यातम्"। तेन तत्र परिपृष्टिका इत्येव पाठः तत्र परिपृच्छिका इति पाठान्तरमुक्तं तेन तस्या एतदर्थकता "परिघृष्टिका वैद्यसिका" इति "सद्वृत्तमुक्ते पाठः" अनाकारः परिपृच्छया गृह्णातीति वाच्यम्।

परिचक्षा स्त्री परि+चक्ष–भावे अ सार्वधातुकत्वात् न ख्यादेशः। १निन्दायां शत॰ब्रा॰ १।३५।१४ भाष्ये दृश्यम् परि+वर्जने च। २वर्जने स्त्री।

परिचक्ष्य त्रि॰ परि+वर्जने चक्ष–ण्यत् वर्जनार्थत्वात् न ख्यादेशः। वर्जनीये

परिचतुर्दश त्रि॰ परिहीन चतुर्दश यतः प्रा॰व॰ ड समा॰ एकाधिकचतुर्दशरूपपञ्चदशसंख्यान्विते अर्थे तु समासान्तविधेरनित्यत्वात् न ड। "इन्द्रसेनादयश्चैव भृत्या परिचतुर्दश" भा॰व॰ १अ॰।

परिचय पु॰ परि+चि–अच्। १ज्ञातस्य पौनःपुन्येन ज्ञानं संस्तवे २प्रणये च अमरः। ३सर्वतश्चयने माघः २।७५।

परिचर त्रि॰ परितः चरति चर–ट। १भृत्ये २परप्रहारात् रथरक्षके पु॰ अमरः। ३प्रजासामन्तादिव्यवस्थापनकारिणि ४राजभृत्यभेदे च।

परिचर्य्या स्त्री परि+चर–क्यप्। सेवायाम् अमरः।

परिचाय्य पु॰ परिचीयते संस्क्रियतेऽसौ परि+चि–ण्यत्। यज्ञाग्नौ अमरः "परिचाय्यं चिन्वीत ग्रामकामः" शत॰ब्रा॰ ५।४।१।१२

परिचार पु॰ परि+चर–भावे घञ्। सेवायां भा॰व॰ ९७अ॰ परिचारे प्रहृतः ठन्। परिचारिक दासे भा॰अनु॰ ७८।

परिचारक त्रि॰ नि॰ परि+चर-ण्वुल्। सेवके अमरः।

परिचित् त्रि॰ परितश्चीयते चि–कर्मणि क्विप्। १परितः स्थापिते यजु॰ १२।४६ कर्त्तरि क्विप्। २परिचयकर्त्तरि त्रि॰। [कर्मणि।

परिचित त्रि॰ परि+चि–कर्मणि क्त। १परिचययुक्ते २तत्-

परिच्छद त्रि॰ परिच्छादयति परि+छद+णिच्–क्विप् तुगः। परिच्छदशब्दार्थे "सेनापरिच्छदस्तस्य" रघुः।

परिच्छद पु॰ परि+छद–णिच्-घ तुगः। १उपकरणे २छत्रचामरपादाते ३वस्त्रादिभूषणे ४परिवारे च हेमच॰। ५आच्छादने च।

परिच्छित्ति स्त्री परि+छिद–भावे क्तिन्। १अवधारणे "द्वयोरेकतरस्य वाथवाप्रकृतार्थपरिच्छित्तिः प्रमा" सां॰सू॰ "अर्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा" भा॰ २पारच्छेदशब्दार्थे॰ ।

परिच्छेद पु॰ परि+छिद-भावे करणादौ च घञ्। १अवधौ २सीमायां ३अवधारणे अन्यस्य ४सम्भिन्नभेदे। स च त्रिका॰ दर्शितो यथा "सर्गवर्गे परिच्छेदोद्देशाध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलं काण्डमस्त्रियाम्। स्थानं प्रकरणं पर्वाह्निकञ्च ग्रन्थसञ्चयः"। तत्र काव्ये सर्गः, कोषे वर्गः, अलङ्कारे परिच्छेदोच्छ्वासौ कथायामुद्दातः नाटके अङ्कः, संहितापुराणादौ अध्यायः, तन्त्रे पटलं, ब्राह्मणे काण्डम्॰ इतिहासे पर्व, भाष्ये आह्निकम्। अन्यत्रापि ग्रन्थसञ्चयः ग्रन्थभेदे ज्ञेयाः यथा पाद-ग्रन्थ्युक्तरङ्गसवकप्रपाठकादयोऽपि यथायथमूह्याः। ४परिमाणे।

परिच्छेद्य त्रि॰ परि+छिद-कर्मणि ण्यत्। १परिमेये २अवधार्ये च। [अमरः।

परिजन पु॰ परिगतो जनः। १परिचारे २प्रतिपाल्ये जने

परिजय्य त्रि॰ परि+जि-ण्यत्यार्थे क्यप् नि॰ यान्तादेशः। परितो जेतुं शक्ये।

परिजल्पित न॰ "प्रभोर्निर्देशतामात्रवापकाद्युपपादनात्। अविचारितरम्यत्वाच्छिल्पकृत्या स्यात् परिजल्पितम्" उज्ज्व-लकथायुक्ते कथनभेदे। [रङ्गनाथः।

परिज्ञान न॰ परि+ज्ञा ल्युट्। सूक्ष्मज्ञाने सू॰ सिं॰ ८।१

परिज्ञि त्रि॰ परि+ज्ञ-कि। परितोगन्तरि ऋ॰१।६४।५भा॰

परिज्मन् पु॰ परि+ज्ञ-मोत्वधातुः कनिन्। १चन्द्रे २अग्नौ च उज्ज्वलदत्तः। अत्र परिज्मन् इति परिजन्मन् इति यजुर्वेदकल्पनं प्राग्वादिकं "इकुलधित्यादिके उणादिसूत्रे परिज्मन् इत्यस्यैव पाठात्। [सिद्धे २४।४पृ॰द्रष्टव्यम्।

परिडीन न॰ परि+डी-भावे क्त। खगगतिभेदे खगगति-

परितत त्रि॰ परि+तन-क्त। १परिपक्वे अमरः। २परि-ज्ञानयुक्ते "तिर्यग्ग्रहनक्षत्रे यत्नः परिततोमतः" बृहत्संहितायां ३अन्तभेदे बाधः ४।२८. १।३५. ४वर्णमोगते च पुंसुक्ते च। [भाषे ४परिपाके च भावः १।११।

परितति स्त्री परि+तन-क्तिन्। १धैर्ये २अवसाने। ३परि-

परिदेव पु॰ परि+दी-भावे अप्। १विलापे अमरः भावे घञ्। २परिदेवन तत्रार्थे न॰। परिदयतेर्विला-पार्थत्वात् परिदीता इत्यादौ कर्मविशेषाद्यर्थावगमः।

परिणाम पु॰ परि+नम-घञ्। १प्रकृतेरन्यथाभावे विकारे २धैर्ये "परिणामेऽनुतोपमम्" गीता। ३अर्थालङ्कारभेदे च। अन्यथाभावश्च प्रकृत्युच्छेदेन प्रकृतेर्गुणान्तराधानेन वा यथा मृदादेर्घटादिरूपेण, काष्ठादेर्मञ्चादिना। "प परिणामतापतापसंस्कारदुःखैः" पात॰सू॰ "परिणामतः सलिलवत्" सां॰का॰ "यथा हि वारिदविमुक्तमुदक-मेकरसमपि तत्तद्भूमिविकारानासाद्य नारिकेलताडीवि-ल्वचिरबिल्वतिन्दुकामलकप्राचीनामलककपित्थक्षीरवृक्षतया परिणामानुभधुराम्लतिक्तकटुकषायतया विकल्पते एव-मेकैकगुणसहकारात् प्रधानं गुणमाश्रित्याप्रधानगुणाः परिणामभेदान् प्रवर्त्तयन्ति" सांत॰कौ॰। ४परिपाके "भुक्तस्य परिणामश्चेद्वरौदर्यः (यक्ष्मिः) तर्कसंग्रहः।

परिणामदर्शिन् त्रि॰ परिणाम ज्ञेयं पश्यति दृश-णिनि ६त॰। ज्ञेयद्रष्टरि बहुकर्मकरणे यत्कर्तव्यं तस्य द्रष्टरि।

परिणामशूल न॰ परिणामे शूलम्। शूलरोगभेदे "स्वै-र्निदानैः प्रकुपितो वायुः सञ्चिहितो यदा। कफपित्ते समाहत्य शूलकारी भवेद्बली"। तस्य लक्षणं यथा "भुक्ते जीर्यति यच्छूलं तदेव परिणामजम्। तस्य लक्षणमप्येतत् समासेनाभिधीयते" वातिकस्य तस्य ल-क्षणं यथा "आध्मानाटोपविण्मूत्रविबन्धाऽरतिवेपथैः। स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक्" पैत्तिकस्य तस्य लक्षणं यथा "तृष्णादाहारतिस्वेदकृच्छ्रसम्बन्धोत्तर-म्। शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक्" श्लैष्मि-कस्य तस्य लक्षणं यथा "हृद्दिङ्मुखासक्तोद्गं लाल-दृग्दीर्घसन्नति। कटुतिक्तोपशान्तौ च तद्विद्यात् श्लेष्मा-त्मकम्" त्रिदोषजस्य तस्य लक्षणं यथा "संसृष्टलक्षणं बुद्ध्वा त्रिदोषं परिकल्पयेत्। त्रिदोषजमसाध्यन्तु क्षीण-मांसबलानलम्" माधवकरः।

परिणामिन् त्रि॰ परि+नम-णिनि। परिणामयुक्ते परि-णामिकारणत्वञ्च प्रधानस्यैव न पुरुषस्येति निर्णीतं सां॰ सू॰ "पूर्वभावित्वे द्वयोरेकतरस्य हानेऽन्यतरयोगः" सू॰ "द्वयोरेव पुरुषप्रकृत्योरखिलकार्यपूर्वभावित्वेऽप्येकतरस्य पुरुषस्यापरिणामित्वेन कारणताहान्यान्यतरस्य प्रकृतेः कारणत्वौचित्यमित्यर्थः। पुरुषस्यापरिणामित्वे चेदं बीजम्। पुरुषस्य संहत्यकारित्वे परार्थत्वापत्त्यानवस्था असंहत्यकारित्वे सर्वदा महदादिकार्यप्रसङ्गः। प्रकृ-तिद्वारा परिणामकल्पने च लाघवात् तस्या एव परि-णामोऽस्तु पुरुषे तु स्वामित्वेन स्वत्वोपचारो यथा बोधेषु वर्त्तमानौ जयपराजयौ राजन्युपचर्य्येते तत्-फलसुखदुःखभोक्तृत्वेन तत्स्वामित्वादिति। किञ्च धर्मिग्राहकमानेन कारणतयैव प्रकृतेः सिद्धौ नाव्यका-रणाकाङ्क्षास्ति। यथा धर्मिग्राहकप्रमाणेन दृष्टतया

पुरुषस्य नान्यद्दृष्टाकाङ्क्षेति। अपि च पुरुषस्य परिणामित्वे कदाचिच्चक्षुर्मनआदिषदन्यत्वमपि स्यात्। तथा च विद्यमानमपि सुखदुःखादिकं न ज्ञायेत ततश्चाहं सुखी न वेत्यादिसंशयापत्तिः। अतः सदा प्रकाशस्वरूपत्वानपायेन पुरुषस्यापरिणामित्वं सिद्ध्यति। तदुक्तं योगसूत्रेण "सदा ज्ञातश्चित्तस्य वृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति" तद्भाष्ये च "सदाज्ञानविषयत्वं तु पुरुषस्यापरिणामित्वं परिदीपयतीति" भा॰ उक्तम् संयोगश्च न परिणामः सामान्यगुणातिरिक्तधर्मोपपत्त्यैव परिणामित्वव्यवहारात्" सा॰प॰भा॰। तेन पुरुषस्य संयोगवत्त्वेऽपि विकारहेतुसंयोगाभावात् न परिणामित्वम्। स्त्रियां ङीप्। "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी" कारिका॰।

परि(री)णाय पु॰न॰ परि+नी-ल्युट् विनये घञ् उपसर्गस्य वा दीर्घः। शारीरां वामदक्षिणतो नयने अमरः घञन्तत्वेऽपि अभिधानात् अस्त्री।

परि(री)णाह पु॰ परि+नह-घञ् वा दीर्घः। विस्तारे (ओसार) "धनुः शतं परीणाहो यामात् क्षेत्रान्तरं भवेत्" याज्ञ॰।

परिणाहवत् त्रि॰ परिणाह+वत्वा॰ वा मतुप्। विस्तारयुते स्त्रियां ङीप् पक्षे एकाक्षरकदन्तत्वेऽपि वत्वा॰ इनि। परिणाहिन् तत्रार्थे त्रि॰ स्त्रियां ङीप्।

परिणेतृ पु॰ परि+नी-तृच्। १विवाहकर्त्तरि भर्त्तरि राजनि॰ २परितो नेतरि च।

परिणेय त्रि॰ परि+नी-यत्। १परितोनयनीये आश्व॰श्रौ॰ ४।६।१५। विवाहयोग्यायां २कन्यायां स्त्री।

परितक्मन् न॰ तक-क्वसने भावे मनिन्। परितोगमने तदर्हति यत्। परितक्म्न परितो गन्तव्ये ऋ॰१।२१।६७ भा॰दृग्रम्। "परित एनां रात्रिं तक्मं निरुक्तोक्तायां रात्रौ च रात्रेरुभयत उष्णतोपलम्भात् तथात्वम्।

परितस् अव्य॰ परि+तसिल्। सर्वतोभावे दत्वर्थे। एतद्योगे सम्बन्धार्थे द्वितीया परितः कृष्णं भक्ताः।

परिताप पु॰परितप्यतेऽत्र परि+तप-आधारे घञ्। १नरके करणे घञ्। २दुःखे मेदि॰। ३शोके शब्दच॰ ४भये ५कम्पे विश्वः ६अत्युष्णतायाञ्च "ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्" पात॰भू॰ "ते जन्मायुर्भोगा पुण्यहेतुका सुखफलाः अपुण्यहेतुकादुःखफलाः" भा॰।

परितोष पु॰ परि+तुष-भावे घञ्। शोके आनन्दभेदे

परित्याग पु॰ परि+त्यज-भावे घञ्। सर्वतो भावेन वर्जने

परित्राण न॰ परि+त्रै-ल्युट्। १रक्षणे अनिष्टे प्रवृत्तस्य २निवारणे च "परित्राणाय साधूनाम्" गीता।

परिदंशित त्रि॰ परिदंशो जातोऽस्य तारं॰ इतच्। कृतसन्नाहे भा॰आ॰ १३६अ॰। [अमरः।

परिदान न॰ परि+दा-भावे ल्युट्। प्रतिरूपदाने विनिमये

परिदाय पु॰ परि+दा घञ्। आमोददायिनि सुगन्धौ हरिवं॰ २१८अ॰।

परिदायिन् परिवर्त्त शास्त्रदोषं ददाति दा-णिनि। अकृतविवाहस्य ज्येष्ठस्य कनिष्ठाय कन्यादातरि परिवेत्तृशब्दे हारीतवाक्यं दृश्यम्।

परिदेवन न॰ परि+दिव-ल्युट्। १अनुशोचने कृतस्य कर्मणोऽनुचितत्वधियानुतापे २विलापे च। चित्-युच्। परिदेवनाप्यत्र स्त्री। "तत्र का परिदेवना" गीता २।२८

परिदेविन् त्रि॰ परि+दिव-ताच्छील्ये इनि। परदेवनशीले स्त्रियां ङीप्।

परिद्वीप पु॰ गरुडपुत्रभेदे भा॰आ॰ १००अ॰।

परिधान न॰ परिधीयते परि+धा-कर्मणि ल्युट्। १परिहितवस्त्रे नाभेरधोऽष्टतवसने अमरः भावे ल्युट्। २वस्त्रादेर्देहादौ धारणे च।

परिधानीया स्त्री परि+धा-कर्मणि अनीयर्। १यज्ञादिस्थायाहुत्तमायामृचि "सर्वेत्तमां परिधानीयेति विद्यात्" आश्व॰श्रौ॰ २।६।८ "स यत्रोपाशेते प्रातरनुवाके पुरा परिधानीया स्यात्" छान्दो॰। २परिधेयवस्त्रादौ त्रि॰।

परिधाय पु॰ परि+धा-कर्मणि घञ्। १परिच्छेदे आधारे घञ्। २नितम्बदेशे ३जलस्थाने च मेदि॰ भावे घञ्। परिधाने।

परिधि पु॰ परि+धा कि। चन्द्रसूर्यसमीपस्थे मेघादिवक्रभाते आवलाने वेष्टनाकारे १मण्डले (सूर्यसभा) (चन्द्रसभा) परिवेषशब्दे दृश्यम्। यज्ञियपशुबन्धनार्थं निखातायां यज्ञियतरोः पलाशादेः २शाखायाम् ३गोलमण्डलस्य परितो वेष्टनसूत्रमाने क्षेत्रशब्दे २४०१ पृ॰दर्शितम्। यज्ञियपरिधिमानं च दृश्यशब्दे ६२८ पृ॰ दृश्यम्। तच्चात्रतत्राग्निविषयम् कर्मप्रदीपोक्तमानन्तु छन्दोगविषयम् यथा "बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः। त्रयो भवन्ति त्रीणीया एकेषान्तु चतुर्दशम्। ग्रामस्यावभितः पश्चादुदगग्रमथापरम्। न्यसेत् परिधिमन्त्रेणेदृशः स च पूर्वतः"।

परिधिस्थ त्रि॰ परिधौ तिष्ठति स्था-क। १परिचारके युद्धादौ रथिनो रक्षार्थं परितः स्थिते २सैन्यादौ च।

परिधिपतिखेचर पु॰ महाटेवे भा॰ अनु॰ ६७ अ॰।

परिधूमन सुश्रुतोक्ते व्रणार्दितस्य उद्गारभेदरूपे उपद्रवभेदे (चोंया ढेकुर तोला)।

परिधूमायन न॰ सुश्रुतोक्ते उद्गारभेदे (चोंयाढेकुरतोला)

परिधेय त्रि॰ परितो धेयः। परिधिभवे १विश्वदेवादौ यजु॰ २।१८। परि-धा यत्। २परिधातव्ये वस्त्रादौ त्रि॰।

परिनन्दन त्रि॰ परि+नन्द-णिच्-ल्यु अुम्भा॰ न ह्रस्वम्। १सन्तोषकारके भावे ल्युट्। २सन्तोषकरणे न॰।

परिनिष्ठा परि+नि+स्था-भावे अ। पर्य्यवसाने "पारम्पर्येऽप्येकत्र परिनिष्ठा" सां॰सू॰।

परिपक्व त्रि॰ परि+पच-क्त। १परिपाकयुक्ते २परिणते च

परिपन(ण) न॰ परिपन्थ(पण)ते व्यवह्रियतेऽनेन पन(ण)-घञ्। मूल्यधने अमरः।

परिपति त्रि॰ परि+पत-इन्। १सर्वव्यापिनि यजु॰५।५। २अधिपतौ पु॰ निरु॰ १२।१८ अ॰।

परिपन्थ पु॰ पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पचि-अच्। १पथिवर्जके २पथिव्यापके च "परिपन्थं गच्छति" पा॰ठक्। पारिपन्थिक चौरे त्रि॰कौ॰।

परिपन्थक पु॰ परिपन्थयति दोषाख्यानं गच्छति परि+पन्थ-ण्वुल् पन्थानं वर्जयित्वा गच्छति वा कन् पन्थादेशः। शत्रौ यजु॰ ४।२४। हेमच॰।

परिपन्थिन् पु॰परि+पन्थि-इनि। १शत्रौ २विपरीताचारिणि त्रि॰स्त्रियां ङीप्। "छन्दसि पारपन्थिपरिपरिणौ पर्य्यवस्थातरि" पा॰ वेदे एवास्य प्रयोगः। लोके तूपचारात्।

परिपरिन् पु॰ परिपन्थिनृशब्दोक्ते पा॰ नि॰। शत्रौ वेदे एवास्य योगः। यजु॰ ४।२४।

परिपवन पु॰ परिपूयतेऽनेन परि+पू-करणे ल्युट्। चालन्यां निरु॰ ४।९।

परिपश्यन्त्य त्रि॰ व्याप्तौ परिः पश्योरिदं यत् प्रा॰स॰। सर्वपशुसम्बन्धिनि कात्या॰ श्रौ॰ ८।८।२ [२नैपुण्ये च।

परिपाक परि+पच घञ्। १सुसंस्कृतपाके २परिणामे।

परिपाकिन् स्त्री परिपाकोऽस्त्यस्याः एकाक्षरत्वादन्तत्वेऽपि संज्ञात्वात् इनि ङीप्। त्रिफलायां शब्दच॰।

परिपाटि(टी) स्त्री परि+चुं॰पट-इन्। व्यतिक्रमे आनुपूर्व्याम् अमरः वा ङीप्। [अन्तोदात्तताऽस्य।

परिपाद अव्य॰ पादं वर्जयित्वा। पादवर्जने निघण्टुका॰

परिपिष्टक न॰ परि+पिष-क्त संज्ञायां कन्। शीसके राजनि॰। [रथे च

परिपुटन न॰ परि+कुटा॰ पुट-भावे ल्युट् १भेदने २सम्पुटीकरणे

परिपुष्करा स्त्री परितः पुष्करं सुखं यस्याः। (गोसुक) गोडुम्बायाम् शब्दच॰।

परिपूत त्रि॰ परि+पू-क्त। १अत्यन्तशुद्धे माघः २।१६। सूर्पादिना तुषनिःसारणयुते २धान्यादौ च। "परिपूतेषु धान्येषु" मनुः।

परिपूर्ण त्रि॰ परि पूर-क्त नि॰। आभोगयुते तस्य भावः तल्। परिपूर्णता आभोगे स्त्री अमरः।

परिपेल न॰ परि+पेल-अच्। कैवर्त्तीसुस्तके शैवलमध्ये जायमाने सुस्ताकारे पदार्थे शब्दमाला।

परिपेलव न॰ परितः पेलवं मृदुता यस्य। १कैवर्त्तीसुस्तके अमरः। २अत्यन्तमृदौ त्रि॰ इ॰सं॰ ९४ अ॰।

परिपोट पु॰ सुश्रुतोक्ते कर्णपालीरोगभेदे "परिपोटस्तयोस्तात सन्मन्यो दुःखवर्द्धनः। पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः" इत्युपक्रमे सौकामार्य्यांशिरोवृद्धस्थसहसाभिप्रवर्द्धिते। कर्णयोर्फो भवेत् पाल्यां सरुजः परिपोटनात्। कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः"। परिपोटक इत्यपि पु॰।

परिपोटन न॰ प+पुट-भेदने ल्युट्। भेदने सुश्रुतः।

परिप्रश्न पु॰ परितः प्रश्नः। युक्तायुक्तत्वप्रश्ने गीता ४।३४अ॰

परिप्लव पु॰ परि+प्लु-अच्। १चञ्चले अमरः। भावे अप्। २जलादेरुपरितरणे च।

परिप्लुत स्त्री परि+प्लु-क्त। १जलादिभिराप्लावीभूते। २सदिरायां स्त्री हेमच॰। मैथुनवेदनायुक्ते ३नार्य्यङ्गभेदे स्त्री "परिप्लुतायां योनौ तु पाप्यधर्मे रजा भवेत्" माधवकरः

परिव(ब)र्ह पु॰ परि+वर्ह-घञ्। नृपयोग्ये छत्रचामरादि परिच्छदे अमरः। अन्त्यस्यैव मध्य एव न्यायः।

परिभ(भा)व पु॰ परि+भू-अप् घञ् वा। १अनादरे २तिरस्कारे अमरः। [शीले स्त्रियां ङीप्।

परिभविन् त्रि॰ परि+भू-ताच्छील्ये इनि। परिभवन-

परिभाविन् त्रि॰ परि+भू-णिच्॰ भूतेऽर्थे णिनि। सर्वतोभावेन भवनयुक्ते स्त्रियां ङीप्।

परिभाषण न॰ परि+भाष-ल्युट्। १निन्दया दुष्टवचने आलापे २नियमे च मेदि॰।

परिभाषा स्त्री परि+भाष-अ। शास्त्रज्ञतां १लक्षिमसंज्ञायाम् अवयवार्थमनादृत्य समुदायार्थे २विशिष्टसंज्ञायाम्।

संज्ञापरिभाषयोस्तु अपान्तरभेदः परिभाषेन्दुशेखरे "यथोद्देशं संज्ञापरिभाषम्" "यथालाभं संज्ञापरिभाषम्" अनयोर्व्याख्याने द्रष्टव्यः। "कश्चिदेकदेशस्थः सर्वशास्त्रमभिव्याप्नोति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिव्याप्नोतीति "प्रदी स्थाने" इति सूत्रे भाष्ये उक्तम्। "अधिकारशब्देन पाराभ्यात् परिभाषाभ्युच्यते। कश्चिद् परिभाषारूप इति" कैयटः। दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशक एवमेतत्। स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तात्पर्यम्। ४आधुनिकसङ्केते पारिभाषिकशब्दे द्रष्टव्यम्।

परिभूत त्रि॰ परि+भू-क्त। १तिरस्कृते २अनादृते च हेमच॰

परिभ्रमण न॰ परितो भ्रमणम्। १सर्वतोभ्रमणे २पर्यटने च

परिमण्डल त्रि॰ परितो मण्डलम्। १वर्तुलाकारे हेमच॰ २अणुपरिमाणयुक्ते च परिमाणशब्दे दृश्यम्।

परिमर पु॰ परिम्रियन्ते अस्मिन् परि+मृ-आधारे अप्। वायौ "तद्ब्रह्मणः परिमर इत्युपासीत" तैत्ति॰उ॰ ३। १०।४ "ब्रह्मणः परिमरः परिम्रियन्तेऽस्मिन् पञ्च देवताः विद्युद्वृष्टिचन्द्रमा आदित्योऽग्निरित्येताः। अतो वायुः परिमरः सूत्यन्तरप्रसिद्धेः। "स एवायं वायुराकाशेनानन्त" इत्याकाशो ब्रह्मणः परिमरस्तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत" भा॰।

परिमर्द पु॰ परि+मृद-भावे घञ्। १घर्षणे २नाशने ३पिंषने च भा॰शा॰२१८५श्लो॰। ल्युट्। परिमर्दन तत्रार्थे

परिमल पु॰ परि+मल-अच्। १कुङ्कुमचन्दनादिमर्दने मर्दनोद्भूते २सुगन्धौ अमरः। ३परितः सम्बन्धे च "सतां परिमलोद्भूतबहोत्सवः" इत्युदयनः ४पण्डितसमूहे मल्लर॰

परिमाण न॰ परिमीयतेऽनेन परि+मा-ल्युट्। यशङ्कुमस्यादिभिर्गुञ्जादिभिश्च द्रव्यस्य परिच्छेदे (माप) गुञ्जादिपरिमाणभेदविशेषाश्च कर्षशब्दे १७७५ पृ॰ उक्ता द्रष्टव्याः। कणादादिपरिमाणञ्च वैशेषिकमते द्रव्यगुणभेदस्त्रातुर्विध्यं चोक्तं यथा "अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते।" कणा॰सू॰ "तदेवं स्थूलो नीलः कलस इति मात्यक्तिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्यन्तं परिमाणसन्नीयते प्रत्यक्षतात् द्रव्यप्रत्यक्षहेतुत्वाच्च। द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं नहि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथा च द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते। यदि हि घटादिस्वरूपं परिमाणं स्यात् यदा महदानयेत्युक्ते घटमात्रमानयेत् तथाच प्रयोगप्रतिपत्ती विरुध्येयाताम्, एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति। मानव्यवहारादाभारव्यवहारत्वं द्रव्यत्वात्कारणत्वनिश्चयात्सामान्यगुणत्वं वा महत्त्वम्। मानव्यवहारोऽक्षविल्वादिव्यवहारो नतु पञ्चमञ्चादिव्यवहारः। तच्च परिमाणस्तुर्विधं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च, तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्त्तिनी त्रसरेणुमारभ्य महावयविपर्यन्तं महत्त्वदीर्घत्वे। एवञ्च सर्वाण्यपि द्रव्याणि परिमाणद्वयवन्ति। बिल्वामलकादावणुत्वव्यवहारः सम्भिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारोभाक्तः, भक्तिस्तात् प्रकर्षभावाभावः, आमलके यः प्रकर्षभावस्तस्याभावः कुवले। विल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणसख्योभयभागित्वाद्भक्तिपदवाच्यः। दीर्घह्रस्वत्वे नित्ये न वर्त्तेते इत्येके, परिमाण एव ते न भवत इत्यपरे, महत्सु दीर्घमानीयतामितिवत् महत्सु वर्त्तुलं त्रिकोणञ्चानीयतामिति निर्धारणबलाद्वर्त्तुलत्वादीनामव्यापत्तेरिति तेषामनयात्। इदानीं परिमाणकारणानि परिसङ्ख्यन्ते। "उप॰ह॰"कारणवद्धत्वाच्च" कणा॰सू॰ "चकारो महत्त्वप्रचयौ समुच्चिनोति, परिमाणमुत्पद्यते इति सूत्रशेषः, तत्र कारणवद्धत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः, एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामग्रथिताभ्यामारब्धे पटे केवलं महत्त्वमेवामसवाविकारणं बहुत्वप्रचययोस्तत्राभावात्। यत्र च द्वाभ्यां तूलकपिञ्जाभ्यां तूलकपिञ्जारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात्। एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तं "द्वाभ्यामेकेन सर्वैर्वा" इति। प्रचयश्च आरम्भकसंयोगः, स च स्वाभिमुखकिञ्चिदवयवसंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः, सचावयवसंयोगः स्वावयवप्रतियोगिसंयोगापेक्षः परिमाणजनकः "गुणकर्मारम्भे

सापेक्षं" इति वचनात् ष०-ष्ट०। "अतो विपरीतमणु" क०-सू० "महत्त्वदीर्घत्वे स्तुत्याद्याणुत्वं स्तुत्यादयति। यतः प्रत्यक्षविद्वान्महतः परिमाणादणुपरिमाणं विपरीतं तदणु परिमाणमित्यर्थः। वैपरीत्यज्ञानप्रत्यक्षत्वात् कारणवैपरीत्याच्च, महत्त्वे हि महत्त्वबहुत्वप्रचयानां कारणत्वम्, एतेन दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यम्, वैपरीत्यज्ञानमपि पूर्ववत्" क०-ष्ट० "इदानीं कुवलामलकादावणुत्वव्यवहारो भाक्त इति दर्शयति। "अणु महदिति तच्चित् विशेषभावात् विशेषाभावाच्च" क०-सू० "इतिशब्दो व्यवहारपरतां दर्शयति, तेन बिल्वापेक्षया कुवलमणु, कुवलापेक्षयामलकं महत्, आमलकापेक्षया बिल्वं महदिति तावद्व्यवहारोऽस्ति, तत्र महदिति तेषु व्यवहारो मुख्यः, कुत एवमत आह विशेषभावात् महत्त्वविशेषस्यैव तरतमादिभावेन भावात्। अणुव्यवहारस्तु तेषु भाक्तः, कुत एवमत आह विशेषाभावात् अणुत्वविशेषस्य तत्राभावात्, अणुत्वं हि कार्यं द्व्यणुकमात्रवृत्ति, नित्यं परमाणुवृत्ति, कुवलादौ तदभावात्। यदा विशेषस्य महत्त्वकारणस्यैवावयववत्त्वमहत्त्वप्रचयानां कुवलाद्यवयवेषु भावात् सद्भावात्। विशेषाभावात् विशेषस्य अणुत्वकारणस्य महत्त्वासमानाधिकरणद्वित्वस्य कुवलाद्यवयवेष्वभावादसद्भावादित्यर्थः" उप०-ष्ट०। "अणुत्वव्यवहारो भाक्त इत्यत्र हेतुमाह। "एककालत्वात्" क०-सू० "महत्त्वमणुत्वञ्च द्वयमप्येककालं कालेऽनुभूयते, ते च महत्त्वाणुत्वे परस्परविरोधिनी नैकत्राश्रये सह सम्भवतः, अतो महत्त्वकारणसद्भावान्महत्त्वप्रत्ययस्तत्र मुख्योऽणुत्वप्रत्ययप्रयोगो च भाक्तावित्यर्थः" उप०-ष्ट० "महत्त्वप्रत्ययस्य मुख्यत्वे हेतुमाह "दृष्टान्ताच्च" क०-सू० "दृश्यते या वस्तुगत्या महत्त्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारेण भवितव्यमित्यर्थः यथा वस्तुगत्या शुक्लेष्वेव पटगङ्गस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारः" उप०-ष्ट०। नन्वणु महत्परिमाणमितिव्यवहारस्तावन्महत्त्वेऽपि परिमाणे महत्त्वमणुत्वेऽप्यणुत्वमस्तीति श्रूयते तत् कथं द्रव्यमात्रवृत्तित्वमनयोः कथं वा तुल्ये तुल्यवृत्तित्वविरोधो नापद्यत इत्यत आह। "अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः" क०-सू०। "यथा गुणकर्मणी नाणुत्वमहत्त्ववती तथाऽणुत्वमहत्त्वे अपि नाणुत्वमहत्त्ववती इत्यर्थः प्रयोगश्च भाक्तो द्रष्टव्यः" उप०-ष्ट०। "नन्वु यथा गुणा गुणवन्तः कथमन्यथा महान् बद्धः दौ बद्धौ एकः बद्धः चतुर्दिशतिर्गुणा इत्यादिव्यवहारः, कर्माण्यपि च कर्मवन्ति प्रतीयन्ते कथमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीति व्यवहारः तथाचाणुत्वमहत्त्वे अपि तद्वती स्यातामित्यत आह। "कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः" क०-सू०। "कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणा न तद्वन्तस्तथाऽणुत्वमहत्त्वे अपि न तद्वती, व्यवहारस्तु सर्वत्र भाक्त इत्यर्थः" उप०-ष्ट०। ननु महान्ति कर्माणि अणूनि कर्माणि महान्तो गुणाः अणवो गुणा इत्यादिव्यवहारादणुत्वमहत्त्ववन्ति कर्माणि तदुभयवन्तश्च गुणाः प्रसक्ता इत्यत आह। "अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः" क०-सू०। "यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा न कर्माणि तदुभयवन्ति न वा गुणास्तदुभयवन्त इत्यर्थः, प्रयोगस्तु पूर्ववद्भाक्त इति भावः" उप०-ष्ट०। "अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति। "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" क०-सू०। "ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती महोत्पत्तोत्पादक्रमेण ह्रस्वत्वोत्पादक्रम्, कारणैक्यात् कथं कार्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र ह्रस्वत्वं यत्र नित्यमणुत्वं तत्र नित्यं ह्रस्वत्वमित्याद्यतिदेशार्थः" उप०-ष्ट०। "इदानीं विनाशकमाह "अनित्येऽनित्यम्" क०-सू० "एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात्। घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुभङ्गेऽपि च एवायं घट इति प्रत्यभिज्ञेति चेन्न आश्रयनाशेन तत्र घटनाशाव्यवहितत्वात् न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य त्रसरेणोस्तदाश्रितस्य चूर्णशर्करादेर्विनाश इति युक्तिरभ्युपगमो वा, कथं तर्हि प्रत्यभिज्ञेति सैवेयं दीपकलिकेति प्रत्यभिज्ञानवद्भ्रान्तित्वात्। प्रदीपप्रत्यभिज्ञाऽपि प्रमेय ह्रस्वत्वदीर्घत्वे परत्वादविनाशशालिनी इति चेन्न तद्विनाशस्याश्रयविनाशमन्तरेणानुपपत्तेरुक्तत्वात्" उप० ष्ट०। "नित्ये नित्यम्" क०-सू०। "तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्ववमपि नश्यतीत्यत आह। नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात्" उप०-ष्ट०।

परमाणुपरिमाणस्य वैशेषिकमिद्धां संज्ञामाह "नित्यं परिमण्डलम्" कणा०सू० परिमण्डलमेव परिमाण्डल्यम् (स्वार्थे ष्यञ्) उप०द०।

"परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः" सि०मुक्ता० "अणु दीर्घं महद्ह्रस्वमिति तद्भेद ईरितः। अनित्ये तदनित्यं स्यान्नित्ये नित्यसदाहृतम्। संख्यातः परिमाणाच्च प्रचयादपि जायते। अनित्यं द्व्यणुकादौ तु संख्याजन्यसदाहृतम्। परिमाणं घटादौ तु परिमाणजमुच्यते। प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते" भाषा०"तच्चतुर्विधम् अणु महद् दीर्घं ह्रस्वञ्च। तत्परिमाणम्। नित्यमित्यत्र परिमाणमित्यनुषज्यते। जायत इत्यत्रापि परिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्वेणान्वितम्; तथा चानित्यं परिमाणं सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः। तत्र सङ्ख्याजन्यसदाहरति। द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणम् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्। द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टम्। त्रसरेणुपरिमाणन्तु न स्वजातीयम्। अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य द्व्यणुके, त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यसदाहरति। परिमाणं घटादाविति। परिमाणजं कपालादिपरिमाणजन्यम्। प्रचयजन्यसदाहर्त्तुं प्रचयं निर्वक्ति प्रचय इति" सि०मुक्ता० "परिमाणं तूलकादौ नाशस्तावन्नवनायतः" भाषा० "नाश इति अर्थात् परिमाणस्य। न चावयवनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्रसरेणुनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगमात्रेण नाशस्यापवदितुमशक्यत्वात्। शरीरादावयवापचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः। न च पदार्थविनाशेऽपि तत्पदार्थान्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यम् तत्रापि वैशाद्यमिद्धातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात्। किञ्च तत्पदार्थान्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात् तत्तन्तूपकारत्वाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्। तस्मात् तत्र तत्पदार्थान्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु पालाग्नेन दीपकलिकादिवत्। न च पूर्वतन्तव एव तत्पदार्थान्तरसहकारात् पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम् मूर्त्तयोः समानदेशतावैरोधात्। एकदा नानाद्रव्यस्य तत्तदुपलम्भबाधितत्वाच्च पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्" सि०मुक्ता०।

वेदान्तिमते अणुमहदित्येव परिमाणद्वैविध्यम्। तच्च आरम्भवादशब्दे दर्शितम्। एवं सांख्यमतेऽपि परिमाणद्वैविध्यम्। "न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्" सा०सू०।

परिमार्जन न० परि+मृज-भावे ल्युट् वृद्धिः। १जलगोमयादिना भूम्यादेः शोधने मधुमक्षिकरूपे २भक्ष्यद्रव्यभेदे च "मधुतैलघृतैर्मिश्रे वेष्टिताः समिताचये। मधुमक्षिकसंदिष्टं तस्याख्या परिमार्जनम्" शब्दच०।

परिमित त्रि० परि+मा-क्त। १कृतपरिमाणे २यथार्हपरिमाणे च त्रिका०।

परिमिति स्त्री परि+मा-क्तिन्। परिमाणे भाषापरिच्छेदः

परिमुख अव्य०मुखस्य वर्जनम् अव्ययी० पूर्वनि०। मुखवर्जने "परिमुखञ्च" पा० तत्र वर्त्तते ठक्। पारिमुखिक मेदके परिमुखं भवम् "अव्ययीभावाच्च" पा०परिमुखादिभ्य एवेष्यते इत्युक्तेः अञ्। पारिमुख्य तत्र भवे त्रि०।

परिमुखादि अञ्प्रत्ययनिमित्ते शब्दगणे स च यथः "परिमुख परिहृत पर्य्यौट पर्य्युलूखल परिसीर उपसीर उपाङ्गण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुगीत अनुसाय अनुसीर अनुसाय अनुयव अनुरूप अनुवंश प्रतिगाथ"।

परिमोक्ष पु० परितो मोक्षः। १सम्यगमुक्तौ २निर्वाणमोक्षे माल० २।६१० क्षोके श्रीधरः। ३मोचने च

परिमोषिन् त्रि० परि+मुष-ताच्छील्ये इनि। परिमोषणशीले चौरे स्त्रियां ङीप्।

परियज्ञ पु० परित उभयतो विहितो यज्ञोऽस्य। उभयतो विहितयज्ञे बृहस्पतिसवादौ कात्या० १४।१८। मंत्र०

परि(री)पोग पु०परि+युज-भावे घञ् वा दीर्घः। परितोयोगे

परिरथ्या स्त्री परितो रथ्या। चतुष्पथादौ [लिङ्गने।

परि(री)रम्भ पु० परि+रभ-घञ् सुम् च वा दीर्घः। आ-

परिराटक त्रि॰ परि+रट-ताच्छील्ये वुञ् । समन्ताद् रटनशीले । [रटनशीले स्त्रियां ङीप् ।

परिराटिन् त्रि॰ परि+रट-ताच्छील्ये घिनुण् । समन्ताद्

परिल त्रि॰ परितो लाति ला-क । परितो व्याप्तके ततः शिवा॰ अपत्ये अण् । पारिल तदपत्ये पुंस्त्री॰ ।

परिलेख त्रि॰ परिलिखत्यनेन परि+लिख-करणे घञ् । परितो लेखनसाधने द्रव्ये । उपरागशब्दे १२०२ पृ॰ दर्शिते पदार्थे च । [रेखादिकरणे ।

परिलेखन परि+लिख-भावे ल्युट् । यन्त्रस्थानेषु परितो

परिवत्सर पु॰ संवत्सरपञ्चकान्तर्गते वत्सरभेदे "शकाब्दात् पञ्चभिः शेषात् समाद्यादीषुवत्सराः । सम्परीदानुपूर्वाश्च तथोदापूर्वकामताः" मलमा॰त॰। "परिपूर्वं तथा दानं यज्ञानां च द्विजोत्तमा !" विष्णुध॰ ।

परिवर्जन न॰ परिवर्ज्यतेऽनुभिरनेन ल्युट-णिच्-ल्युट् । १भारथे । ल्युट-भावे ल्युट् । २त्यागे अमरः । पतितादीनां शय्यासनादौ परिवर्जनसूत्रं यथा

"एकशय्यासनं पङ्क्तिभाण्डोपकाशनिम्बचम् । याजनाध्ययने योनिसम्बन्धे सह भोजनम् । सहाध्यायस्तु दशमः सम्भाषणमेव च । एकादश तद्विदुष्टा दोषाः साङ्कर्यसंज्ञिताः । सभीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् । तस्मात् सर्वप्रयत्नेन साङ्कर्यं परिवर्जयेत्" इति कौर्मे उपरिभागे १६अ॰। देशभेदावर्जनीया यथा "यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः । न च विद्यागमः कश्चित् देशं परिवर्जयेत्" चाणक्यः । वर्ज्यवस्तुभेदो यथा "ब्राह्मणं वाणिजं अन्नमयोद्वारं विषं लङ्कम् । शूद्रमन्त्ररसंयुक्तं दूरतः परिवर्जयेत् । कुभार्याञ्च कुमित्रञ्च कुराजानं कुशोद्भवम् । कुमन्त्रञ्च कुदेशञ्च वज्रतः परिवर्जयेत्" नरदपु॰

परि(री)वर्त परि+वृत-भावे घञ् वा दीर्घः । १विनिमये । आधारे घञ् । २युगान्तकाले हेमच॰ ३अन्यविच्छेदे अध्यायादौ लटा॰कर्तरि अच् । ४कूर्मराजे । ५ऋक्षपुत्रदुःसाध्यपुत्रभेदे मार्कण्डे॰ पु॰ ५१ अ॰ । तस्यानिरुक्तिस्तथैव "अन्यगर्भे परान् गर्भान् यदेव परिवर्त्तयन् । इतिमात्रोति वाक्यञ्च विवक्षोरन्यदेव हि । परिवर्त्तन संज्ञोऽयम्" । तस्य सुतौ च विरूपविकृतौ तयोः कर्म च तत्रोक्तं यथा "परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज !। तौ तु ब्रह्मात्मपरिखाप्राकाराम्बोधिसंश्रयौ । पुर्विण्याः परिवर्त्तं तौ कुरुतः पादपादिषु । क्रौष्टुके परिवर्त्तन्या गर्भस्थान्योदराच्ततः । न दृष्टं चैव नैवाष्टं न प्राकारं मनोदधिम् । परिखां वा समाक्रामेद्बला गर्भधारिणी" । इत्याहत्तौ "युगानां परिवर्त्तेन" सू॰ वि॰। यत् स्थानमारभ्य ग्रहसंस्थितिः स चेत् पुनस्तत्स्थानमायाति तादृशे राशिचक्रस्य ७परिवर्त्ते च "तेषान्तु परिवर्त्तेन पोष्णान्ते भगणः स्मृतः" सू॰ वि॰। परिवर्त्यते परि+वृत-अच् । ८परिवृत्तियुक्ते धनादौ ताण्ड्य॰ब्राह्मणम् ।

परिवर्त्तन न॰ परि+वृत-भावे ल्युट् । १विनिमये मेदि॰ । परि+वृत-णिच्-ल्यु । २दुःसाध्यपुत्रभेदे परिवर्त्तशब्दे दृश्यम् ।

परिवर्त्तिका स्त्री मेढ्रसंतरोगभेदे "मर्दनात् पीडनाच्चापि तथैवाल्पभिघातत्तः । मेढ्रचर्म यदा वायुर्भजते सर्वतश्चरन् । तदा वातोपसृष्टन्तु चर्म प्रतिनिवर्त्तते । मध्ये रध्रस्तात् कोषस्य ग्रन्थिरूपेण जायते । सवेदनं दृढाकृष्य मार्गञ्च व्रजति क्वचित् । मारुतागन्तुसम्भूतां विद्यान्नां परिवर्त्तिकाम् । सकण्डूः कठिना चैव तथाश्लेष्मसंस्थिता" सुश्रु॰ ।

परिवर्त्तिन् स्त्री परि+वृत णिनि । १पुनः पुनरावृत्तियुक्ते स्त्रियां ङीप् । सा च त्रिवृत्स्तोमस्य २त्रिष्टुभौ । "तिसृभ्यो त्रिष्टुरोति च पराचीभिः" (एवं त्रिरुक्ता) "परिवर्त्तिनी त्रिवृत्त्रिष्टुप्तिः" ताण्ड्यब्रा॰२।२।। "परिवर्त्तिनी आवर्त्तिनी" भा॰। [रचितच्छत्रादौ अमरः ।

परिवर्ह पु॰ परि+वर्ह घञ् । १परिच्छदे राजचिह्नचाम-

परिवसथ पु॰ परि+वस-आधारे अथच् । आये हेमच॰ ।

परिवह पु॰ परि+वह-अच् । समवायुमध्यपातिनि वायुभेदे अनिलशब्दे दृश्यम् ।

परि(री)वाद पु॰ परि+वद-घञ् वा दीर्घः । १अपवादे "गुरोर्यत्र परीवादः" इति मनुः । करणे घञ् । २वीणावादनसाधने च मेदि॰ ।

परिवादिन् त्रि॰ परि+वद-"संज्ञाचेत्यादि" पा॰ ताच्छील्ये घिनुण् । १परिवदनशीले स्त्रियां ङीप् सा च २सप्ततन्त्रीयुते वीणाभेदे अमरः ।

परि(री)वाप पु॰ परि+वप-घञ् वा दीर्घः । १वपने । वप-णिच्-घञ् । २संस्कृते ३जनस्थाने ४परिच्छदे च । ततः चतुरर्थ्यां कुत्सदा॰ ठक् । पारिवापिक तस्मादूरदेशादौ त्रि॰ । स्त्रियां स्त्रित्वात् ङीष् । प्रेक्षादि॰ तदर्थे इनि । परिवापिन् तस्मादूरदेशादौ त्रि॰ स्त्रियां ङीप् । ल्युट् । परिवापयमध्यम ।

परिवापित त्रि॰ परिवापे निमुक्तः। परिवापने नियोजिते अमरः। परि+वप--णिच्--क्त। २क्षुरिते त्रि॰।

परि(री)वार पु॰परिवियतेऽसौ अनेन वा परि+वृ-घञ् वा दीर्घः। १परिजने कुटुम्बादौ रघुः ६।१॰ २खड्गकोषे (खाप) केचि॰ भावे घञ्। परिवरणे च।

परिवासन न॰परिवास्यतेऽनेन। यत्तिथनेदाभ्यादत्तकुलविशेषे "शुल्वात् प्राग्वेदे परिवास्य वेदपरिवासनानि निदधाति" आपस्तम्बसूत्रम्। तानि च वेदाध्यायि कार्य्याणीति भूर्त्तस्वामी।

परि(री)वाह पु॰ परि+वह-घञ् वा दीर्घः। जलोच्छ्वासे अमरः। परितः समन्ताज्जलानामुच्छ्वसनात् पालवर्त्तनेन वा वहनात्तथात्वम् रघुः ८।७१ उदा॰

परिविक्त पु॰ परि+विद--क्त न दस्य नः। अकृतदाराग्न्याधाने पूर्वं कृतविवाहाग्न्याधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि यजु॰ ३०।९

परिविक्ति पु॰ परि+विद-क्तिच्। अकृतविवाहाग्न्याधाने पूर्वं कृतविवाहाग्न्याधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि परिवेत्तृशब्दे दृश्यम्। [हेमच॰।

परिविद्ध त्रि॰ परि+व्यध-क्त। १परितो विद्धे २कुबेरे पु॰

परिविन्दत् पु॰परिलक्ष्य अतिक्रम्य ज्येष्ठं विन्दति भार्य्यासम्न्याधानं वा विद--लाभे शतृ। अकृतदाराग्न्याधानस्य ज्येष्ठस्य पूर्वं कृतदाराग्न्याधाने कनिष्ठे भ्रातरि अत्र परिवेदने दोषः परिवेत्तृशब्दे शारीतोक्तौ दृश्यः। तत्र प्रतिग्रहवादिकं उद्वा॰ निर्णीतं यथा

छन्दोगपरिशिष्टम् "देशान्तरस्थस्त्रीवैकल्यज्ञानसङ्कोदरान्। वेश्याभिगमनपतितश्रुतत्यागितरोगिणः। जडमूकान्धबधिरकुब्जवृषलकवामनान्। अतिवृद्धामभार्य्यांश्च त्रिभिर्वर्षान् त्यजेच्च। धनवार्द्धुषिकान्दासांश्च वामतः कारिणस्तथा। कुवटोन्मत्तचौरांश्च परिविन्दन्ति दुष्यति"। धनवार्द्धुषिकं राजसेवकं वर्षकं तथा प्रोषितस्य प्रतीक्षेत वर्षत्रयवधि त्वरन्। प्रोषितं यद्यागमनमवदादतिक्रमाचरेत्" । जडो विकलान्धःकरणः स्थिताश्चितावधारणाज्ञान इति दायदिति जिताक्षरा। कुवटः सर्वक्रियावञ्चकः "कुवटो वन्दः क्रियासु वः" इत्यमरोक्तेः अभार्य्यान् भार्य्यानिमित्तभार्य्यासम्बन्धान् नैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुकान्। ऋषस्य चेति चकारेण वक्ष्यमाणमनुक्तमपि। कामतः कारिणः श्रौतस्मार्त्तनिरपेक्षस्वच्छन्दव्यवहारिणः। कुवटः कुत्सितं वटतीति परकुलाटमशील इति भारतस्वमहानङ्कोदाध्यायाः तैः कामतः कामवशः कुलं परकुलम् वटति भजति प्राप्नोति यो दुष्टकः स कुवटः इति। चौरानिमान् चौरानिति पाठे पुरुषनपैशुनान्। धनवार्द्धुषिकादिमयं देशान्तरस्थितस्य ज्येष्ठं त्वरन्नपि वर्षत्रयं प्रतीक्षेत। ततः पूर्ववचने एतान् परिविन्दन्न दुष्यति इत्युक्तम् अत्र परेत्वक्षयार्थत्वादुद्धितीया। तत्र देशान्तरस्थत्रिवत्सरपर्यन्तधनवार्द्धुषिकादीन् प्रति वर्षत्रयादूर्द्ध्वमिति बोद्धव्यम्। अत्रापि प्रोषिते यत्र तत्रवदप्रतीक्षणं तद्विद्याधर्मधनेतरार्थप्रोषितपरं यद्यप्यागमवशिष्टगोतमवचनात् अष्टवर्षानं प्रत्ययध्यत्वेन अभ्यूयमाणमिति परिशिष्टप्रकाशकारः। अष्टवर्षन् च इति पाठस्तु रत्नाकरे प्रोषितस्य कल्याणपर्यासमष्टवर्षं वर्षं प्रतीक्षेत परिचयमं करोति। तत्र समागते ज्येष्ठे कनिष्ठः परिवेदनशुद्धये परिवेदनप्रायश्चित्तस्य कृच्छ्रपादं चरेत् एवमन्यत्रापि प्रायश्चित्तमनुक्तमनाऽन्वेष्यम्। वशिष्ठः "अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति तत्र श्लोकौ "द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः। ज्यायः प्रतीक्षितुं भ्राता भूयमाणः पुनःपुनः। उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीव एव वा। राजयक्ष्मामयावी च न भ्रान्यः स्यात् प्रतीक्षितम्"। गोतमस्य "द्वादश वर्षाणि प्रतीक्षकं ब्राह्मणस्य विद्यासम्बन्धे भ्रातरि चैवं ज्यायसि कनिष्ठेन कन्याग्न्युपयमेषु वह्नित्रीके" इति विद्यार्थं प्रोषितस्य ब्राह्मणस्य दारा अपत्योत्पादनार्थं तदभिगमने द्वादशवर्षाणि प्रतीक्षेरन्निमुक्ता भ्रातरि चैवमिति दिष्टम् यतेनैतदवगीयते विद्याधनधर्मार्थं प्रतीक्षा ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रमशो द्वादशदशाष्टवर्षाणां प्रतीक्षणमिति प्रायश्चित्तविवेकः। रत्नाकरकृत्तु भूयमाणेऽभिलक्षणमनं प्रकृतिते भवतस्य निर्णीतप्रकृतादिलक्षणं गौतमीयं विकिरन् प्रोषिते भ्रातरि ज्येष्ठे विवाहाग्न्याधाने तं कारयित्वमभिलक्षणमनं बलीयसा कर्तव्यं कृतवन्याशे च ततो निवृत्तिरिति व्याख्यातम्। भ्रातातपः "स्त्रीवे देशान्तरगते पतिते भिक्षुकेऽपि वा"। योगशास्त्राभियुक्ते विद्यात्मन्यविरक्ते इति रत्नाकरः। अत एव दक्षः "इन्द्रियाणि मनः कृत्वा चेतस्तं परमात्मनि। एकीकृत्य निरुध्येत योगोऽयं कृत्स्न उच्यते"। तेन विद्यायामपि तदनया स्त्रीपरमात्मनोरभेदचिन्तनविशेषो योग इति। छन्दोगपरिशिष्टम् "भ्रान्यः परि-

विन्दन्ति न यज्ञा न तपांसि च । न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका"। "विकला या च कन्यकेति" पाठः शातातपीये । नाग्नयः परिविन्दन्तीति ज्येष्ठानुमत्या यथाह उशनाः"ज्येष्ठभ्राता यदा तिष्ठेदाधानं नैव कारयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा"। वशिष्ठः "अपजोऽस्य यदानग्निरधिकार्थ्यनुजः कथम् । अपजानुमतः कुर्यादग्निहोत्रं यथाविधि" । एतेन विवाहस्वनुमत्यापि दोषायेति प्रायश्चित्तविवेकः" ।

परिविन्न पु० परि+विद्-क्त तस्य दस्य च नः । नकारेण व्यवधानात् न णत्वम् मूर्द्धन्यपाठः प्रामादिकः"क्तस्यचः" पा० अचः परस्याभावात् नकारेण व्यवधानाच्च अप्राप्ते निर्विणस्योपसंख्यानात् णत्वम् । विप्रसस्य तु उपसर्गस्यनिमित्तत्वाभावात् नास्य प्रवृत्तिः । पूर्वं कृतविवाहाग्न्याधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि परिवेत्तृशब्दे दृश्यम् । २तादृशस्त्रियां स्त्री परिवेदनदोषकर्मत्वात् तयोः परिवेदनकर्मत्वम् ।

परिविष्टि स्त्री परि+विष-विष-वा क्तिच् । १परिचर्य्यायां २व्याप्तौ च ऋ०४।३३।२भा०।

परिवी स्त्री परि+व्ये-क्विप् संप्रसारणे दीर्घः । १परिवारिते २परितः स्यूते च यजु० ६।४

परिवीत त्रि० परि+व्येञ्-क्त सम्प्र० दीर्घः । परिवेष्टिते ऋ० १०५।४१ [१२।१०९

परिवृंहण न०परि+वृंह-णिच्-ल्यु । बहुलीकरणे मनुः

परिवृंहित त्रि० परितो वृंहितम् । १सर्वतोभावेन वर्द्धिते २बहुलीकृते च । भावेक्त । ३करिध्वनिभेदे न० । [छा०उ०

परिवृक्ण त्रि० परि+व्रश्च-क्त । १छिन्ने २छिन्नहस्तपादे च

परिवृक्त त्रि० परि+वृज-क्त । परित्यक्ते ऋ० १० १०२भा०

परिवृढ त्रि०परि+वृंह-क्त नि० । १अधिपे प्रभौ । ततः भावे वृढा० इमनिच् ष्णतोरः । परिवृढिमन् आधिपत्ये पु० पक्षे घञ् । पारिवाढ्य तदर्थे न० ।

परिवृत त्रि० परितो वृतः । परितो वेष्टिते "सभ्यैः परिवृतोऽन्वहम्" कात्या० स्मृतिः ।

परिवृत्त त्रि०परि+वृत-क्त । परितोवृत्ते । ततः चतुरर्थ्यां कुसुदा० वृ-आदि०च क । परिवृत्तश्च तद्दूरदेशादौ त्रि०

परिवृत्ति स्त्री परि+वृत-क्तिन् । १परिवर्त्ते २अर्थालङ्कारभेदे अर्थालङ्कारशब्दे ३८८ पृ० दृश्यम् ।

परिवृत्तिसह त्रि० परिवृत्तिं परावृत्तिंसहते सह-अच् । यौगिके शब्दभेदे स च पूर्वोत्तरपदयोः परावृत्त्या योगलभ्यार्थं बोधयतीति तस्य तथात्वम् । तत्र केचित् पूर्वपदपरावृत्त्यायोगलभ्यार्थबोधकाः केचिदुत्तरपदपरावृत्त्या । केचित्तु नोभयपदपरावृत्तिसहा यथाह हेमच०

"स्वस्वामित्वादिसम्बन्धं तत्राच्छन्नोमतद्वताम् । स्वात् पालधनभुग्नेतृपतिसत्वर्थकादयः । भूपालो भूधनो भूभुग्भूनेता भूपतिस्तथा । भूमांश्चेतिकवेरुच्चाद्येयोदाहरणायली । जन्यात् कृतकर्तृ स्रष्टृ स्रष्टृ विधातृकरस्रसमाः । जनकाद्योनिजरुहजन्मभूसूत्यपादयः । धात्यादुध्वजाक्षपाण्यङ्कमौलिभूप्रणभ्रिभाः । शालिशेखरमत्वर्थभागिभर्तृधरा अपि । भोज्याद्भुगन्योग्रतलिट्पाचिप्राशनादयः । पत्युःकान्तप्रियतमाबधूप्रणविनीनिभाः । कलत्राद्वररमणप्रणयीशप्रियादयः । सख्युः सखिसमा बाह्याद्वानियानासनादयः । जनेः स्वदुहितात्मजापजावरजादयः । आत्रयात्सद्मपर्यायशयवासिसदादयः । बध्याद्विद्वेषिजिद्वातिभ्रुपिपुध्वंसिशासनाः । अयत्नकारिदमनदर्पच्छिन्नाथनादयः । विवक्षितो हि सम्बन्ध एकतोऽपि पदात्ततः । प्राक्प्रदर्शितसम्बन्धिशब्दा योज्या यथोचितम् । दृश्यते खलु बाह्यत्वे दृशस्य दृशवाहनः । स्वत्वे पुनर्दृशपतिर्दार्थत्वे दृशवाञ्छनः । अंशोद्धार्यत्वेऽंशुमाली स्वत्वेऽंशुपतिरंशुमान् । बध्यत्वेऽहेरहिरिपुर्भोज्यत्वे चाहिभुगपि । चिह्नैर्व्यक्तैर्भवेद्व्यक्तो जातिशब्दोऽपि वाचकः । तथा द्युगस्तिपूता दिग्दक्षिणाशा निगद्यते । अयुग्विषमशब्दौ त्रिपञ्चसप्तादिवाचकौ । त्रिनेत्रपञ्चेषुसप्तपन्नागादिषु योजयेत् । गुणशब्दो विरोध्यर्थं नञादिरितरोत्तरः । अभिधत्ते यथालक्षणः स्वादसितः सितेतरः । वाह्यादिषु पदे पूर्वे वाड्वाग्न्यादिषूत्तरे । द्वयेऽपि भ्रष्टदाद्येषु पर्यायपरिवर्त्तनम् । एवं परावृत्तिसहायोगाः स्युरिति यौगिकाः । भिन्नाः पुनः परावृत्त्यसहायोगीयौगसन्निभाः" ।

परिवेत्तृ पु० परि+विद-तृच् । अकृतदाराग्न्याधानस्य ज्येष्ठस्य पूर्वं कृतदाराग्न्याधाने कनिष्ठे "ज्येष्ठे अनिर्विण्णे कनीयान् निर्विण्णः परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्वे पतिताः" उद्वा०त० हारीतः ।

परिवेदन न० परि+विद-लाभे ल्युट् । अकृतदाराग्न्याधाने ज्येष्ठे कनिष्ठस्य पूर्वं १विवाहे २अग्न्याधाने च परिवेत्तृशब्दे दृश्यम् । विद-ज्ञाने विद-सत्तायां भावे

ल्युट् । २सर्वतो ज्ञाने ३सर्वतो दत्तौ सर्वत्र स्थितौ च ।

परिवेदनीया स्त्री परि+विद् कर्मणि अनीयर् । परिवेत्तु-र्भार्यायां परिवेत्तृशब्दे दृश्यम् ।

परिवेदिनी स्त्री परिवेदः अस्त्यस्याम् इनि ङीप् । परि-वेत्तुर्भार्यायां परिवेदनीयायां स्त्रियाम् हेमच० ।

परिवेश(ष) पु० परि+विश-(घ-)घञ् । १परिधौ २वेष्टने सूर्यचन्द्रमण्डलयोर्वेष्टनाकारे ३उपसूर्यकमण्डले तल्ल-क्षणादिकेतु०सं० उक्तं यथा

"सम्मूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः । नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः । ते रक्त-नीलपाण्डुरकापोताभ्राभशबलहरिशुक्लाः । इन्द्रय-मवरुणनिर्ऋतिवसुधनेशपितामहाग्निकृताः । धनदः करोति मेचकमन्योऽन्यगुणाश्रयेण चाभ्यन्तः । प्रवि-लीयते सुखसंकुरत्यफलः सोऽपि वायुकृतः । चाप-शिखिरजततैजसीरजताभः सकालसम्भूतः । अविक-लवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः । सकल-गगनानुचारी नैकाभः चतजवसिभो रूक्षः । अव-कलशकटशरासनशृङ्गाटकवत् स्थितः पापः । शिखि-जलमेघतिवर्णं बहुवर्णं रूपवधो, भयं धूम्रे । हरि-चापनिभे युद्धान्यशोकलक्षमभ्रमे चापि । वर्णेनैवेन यदा बहुलः स्निग्धः शुराभ्रकाकीर्णः । सतैं। सद्योवर्षं करोति पीतश्च दीप्तार्कः । दीप्तशिखरूक्षगरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान् । भयकृत्तडिदुल्काद्यैर्हतो रूपं हन्ति शस्त्रेण । प्रतिदिनमर्कहिमांशोरहर्निश रक्षयोर्नरेन्द्रवधः । परिविष्टयोरभीक्ष्णं जलनाशनभः स्थयोस्तद्वत् । सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्र-कोपकरः । त्रिप्रभृति शस्त्रकोपं युवराजभयं नगर रोधम् । दृष्टिवृष्टिहेण मासेन विग्रहो वा यथेन्दुभ-निरोधे । क्षोराजन्माधिपयोर्जन्मर्क्षे वाशुभो राज्ञः । परिवेषमण्डलगतो रवितनयः क्षुद्भयान्यनाशकरः । जनयति च वातवृष्टिं स्थावरजङ्गमक्षिहन्ता च । भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम् । जीवे परिवेषगते पुरोहितामात्यनृपपीड़ा । मन्दिस्थावर-लेखकपरिवृद्धिवन्द्रजे सुवृष्टिश्च । शुक्रे थायिक्षत्रिय-राज्ञां पीड़ाऽप्रियं चाचम् । क्षुटनक्षत्रनृपराधिप-शस्त्रेभ्यो जायते भयं केतौ । परिविष्टे गर्भभयं राहौ व्याधिर्भयं च । युद्धानि विजानीयात् परि-वेषाभ्यन्तरे द्वयोर्ग्रहयोः । द्विवृद्धतः यमिनो वा वृद्धवृद्धिभयं त्रिषु पोक्तम् । याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः । प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु । तारापङ्क्तिं कुर्यात् पृथगेव सप्तत्रितो नरेन्द्रवधम् । नक्षत्राणामथ वा यदि केतोर्नी-दयो भवति । विप्रक्षत्रियविट्शूद्रा भवेत् प्रतिपदादिषु क्रमशः । त्रेषोपुरकोशानां पञ्चम्यादिष्वशुभकारी । युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः । पुर-रोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम् । नरपतिपत्नी-पीड़ां परिवेषोऽभ्युत्थितश्चतुर्दश्याम् । कुर्यात् तु पञ्च-दश्यां पीड़ां मन्त्रजाधिपस्यैव । नागरकाणामभ्यन्तर-स्थिता यायिनां च बाह्यस्था । परिवेषमध्यरेखा यि-त्रेयाक्रन्दसाराणाम् । रक्तः श्यामो रूक्षश्च भवति येषां पराजयस्तेषाम् । स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस्तेषाम् ।"

परिवेषण न० परि+विष ल्युट् । १परितो वेष्टने विष्ल्युट् । २भोजनार्थं परितो भक्ष्यादेरर्पणे च । तत्र श्राद्धे परिवेषणप्रकारादि श्रा०त० उक्तं यथा

मनुः "पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् । वि-प्राणिके पितृन्ध्यायन् शनकैरुपनिःक्षिपेत् । अन्नस्येति षष्ठी तृतीयार्थे वर्द्धितं पूरितं पात्रमिति मेधः । उप-निःक्षिपेत् परिवेषणार्थं समीपे धारयेत् तथा च याज्ञ-वल्क्यः आलभ्य प्रथमं भोजनपात्रे न देयं किन्तु स्वाल्यादिकं पाणिभ्यां पात्रसमीपे भूमौ संस्थाप्य दक्षा-दुभाभ्यां पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषणं कुर्यात् । "उभाभ्यामपि पाणिभ्यामाहृत्य परिवेषयेत्" इति मत्स्यपुराणात् । यत्तु श्राद्धे परिवेषणस्य दक्षिण-पाणिमात्रेणैवान्यानभिधानादिति मैथिलोक्तं तत्र "एकेन पाणिना दत्तं शूद्रदत्तं न भक्षयेत्" इत्यादि-पुराणीयेनैकपाणिदत्तशूद्रदत्तभक्षणनिषेधेन तन्मात्र-परिवेषणस्यापि निषिद्धत्वात् । पाणिभ्यामपि पात्रान्त-रितं कृत्वा देयम् । "हस्तादत्तान्न मे स्नेहा वसाः व्यञ्जनानि च । दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते तु किल्बिषम् । तस्मादन्तरितं देयं पर्णेनाथ तृणेन वा । मद्यात् न तु हस्तेन नायसेन कदाचन" इति वशि-ष्ठेन सामान्यतोऽभिधानात् पितृभक्तितरङ्गिण्यामप्येवम् । मनुः "गुडांश्च सूपशाकाद्यान् पयोदधि घृतं मधु । विन्यसेत् यत्नतः सम्यक् भूमावेव समाहितः । भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च । हृद्यानि

चैव पांसानि पानानि सुरभीणि च । उपनीय तु तत्सर्वं यत्नकैः सुसमाहितः । व्यामिश्रं पानपात्रञ्च भोक्तुर्दक्षिणतो न्यसेत् । परिवेषयेच्च प्रयतो गुणान् सर्वान् प्रचोदयन्" । गुणान् उपकरणानि । भूमावेव न तु व्यञ्जनादिपात्राद्यन्नपात्रोपरि निःक्षिपेत् पात्रान्तरे भोजनपात्रेऽपि" ।

परिश्राव परि+स्रव कर्त्तरि घञ् । १अम्बुवेतसे २इक्षुरोत्सवे च मेदि० ३परितो वेधनकारके त्रि० ।

परिव्रज्या स्त्री परि+व्रज-भावे क्यप् । तपस्यायां हेमच० ।

परिव्राज् पु० परिवर्ज्यं पुत्रादिकं व्रजति परि+व्रज-क्विप् दीर्घः । पुत्रदारादिकं सर्वकर्माणि च परित्यज्य आश्रमान्तरगामिनि भिक्षौ यतौ अमरः । तल्लक्षणं यथा- "सर्वारम्भपरित्यागी भैक्षाशी ब्रह्मभूयता । निष्परिग्रहताऽद्रोहसमता सर्वजन्तुषु । प्रियाप्रियपरित्यक्तं सुखदुःखाविकारिता । सबाह्याभ्यन्तरं शौचं सुखदुःखाविकारिता । सर्वेन्द्रियसमाहारो धारणाध्यानमित्यता । भावसंशुद्धिरित्येष परिव्राड्वर्य उच्यते' ।

परिव्राज पु० परित्यज्य पुत्रादीन् व्रजति परि+व्रज-संज्ञायां कर्त्तरि घञ् । परिव्राजि भिक्षौ

परिव्राजक पु० परित्यज्य पुत्रादीन् सर्वकर्माणि च व्रजति व्रज-घञ् स्वार्थे क स्वुल् वा । चतुर्थाश्रमिणि यतौ ।

परिव्राजि स्त्री परि+व्रज-णिच्-इन् । श्रावण्यां (चुलकुडि) क्षुपे राजनि० ।

परिशिष्ट त्रि० परि+शिष-क्त । १अवशेषे । ततः अस्त्यर्थे अच् । २तत्प्रकाशकग्रन्थभेदे न० हेमच० यथा ब्रह्मपरिशिष्टं छन्दोगपरिशिष्टम् इत्यादि ।

परिशुष्क त्रि० परि+शुष-क्त तस्य सः । १परितः शोषयुते २नीरसे "मांसं बहुतरैर्भृष्टं स्निग्धस्वेदमुना सुखः । लीरकं [illegible] परिशुष्कं तदुच्यते" भावप्र० उक्ते ३परिपक्वमांसभेदे न० ।

परिशेष पु० परि+शिष-घञ् । अवशेषे

परिशोध पु० परि+भावे घञ् । १क्षालनादेः शोधने । णिच् अच् । २परितः शुद्धिसम्पादने च । ल्युट् । परिशोधन तत्रार्थे न० ।

परिश्रम पु० परि+श्रम-घञ् न वृद्धिः । १व्यायामे क्लेशकारके आयासे हेमच० आर्षे तु क्वचित् वृद्धिः । परिश्राम तत्रार्थे भाग० २।६।२० [च मेदि० ।

परिश्रय पु० परि+श्रि-आधारे अच् । १आम्रवे २सभायां

परिश्रित् स्त्री परिश्रयत्यनया परि+श्रि-करणे क्विप् । सूक्ष्मपाषाणे शत०ब्रा० ७।१।१२ भाष्यम् । २यज्ञियेष्टकासमवस्थके पाषाणखण्डे च कात्या०श्रौ०१८।६।१२

परिश्रित त्रि० परि+श्रि+क्त । १समाश्रिते भावे क्त । २आश्रये न० । ३परितोवेष्टने ४वस्त्रादिपरिष्कारके तिरस्करणादिभिर्वेष्टने शत०ब्रा० १।१।२।८ भा० । आश्व० श्रौ० २।४।१ पारा० ।

परिषद् स्त्री परिसीदत्यस्यां परि+सद-आधारे क्विप् । सभायां धर्मनिर्णयार्थं विद्वद्भेदयुक्तायां२ सभायाञ्च यथोक्तं मनुना "अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् । यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशंयवः"

प्रायश्चित्तनिर्णयार्थं परिषदुपस्थानप्रकारः परिषद्विशेषव्यवस्थादिकञ्च प्रा०वि० उक्तं यथा

"अथ प्रायश्चित्तिनः परिषदुपस्थानम् । तत्राङ्गिराः "कृते निःसंशये पापे न भुञ्जीतानुपस्थितः । भुञ्जानो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन् । सचेलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः । उपस्थाय ततः शोभनार्त्तिभान् धर्मी गतः । गात्रैश्च शिरसा चैव न च किञ्चिदुदाहरेत्" । उपस्थानञ्च वस्त्रादिना ब्राह्मणान् तोषयित्वा कार्यम् "तोषयित्वा द्विजोत्तमानिति" देवलवचनात् । महत्तु पापेषु राज्ञाप्युपस्थितिः कार्य्येत्याह देवलः "स्वयं वा ब्राह्मणैः कृच्छ्रमसदोषे विधीयते । राज्ञा च ब्राह्मणैश्चैव महत्तु परिकल्प्यते" । परिषदमाह अङ्गिराः "एकविंशतिसंख्याभिर्भीमांसान्यायन्यायपारगैः । वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् । चातुर्वैद्यः प्रकल्पी च अङ्गविद्धर्मपाठकः । त्रयश्चाश्रमिणो दृष्टाः परिषत् स्याद्दशावरा" । परिषत्कल्पोऽत्र सभार्हपरः । चातुर्वैद्यः चतुर्वेदपारगः । विकल्पी सर्वधर्मपर्याप्तः धर्मपाठकः धर्मशास्त्रज्ञः । मनुः "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः । त्रयश्चाश्रमिणः पूर्वे परिषद् स्याद्दशावरा" । अङ्गिराः "एषा तु त्र्यङ्गार्थेषु मध्यमेषु तु मध्यमाः । महापातकशोध्येषु दशतो भूय एव वा" प्रदर्शनार्थमिदं यावद्भिरेव निर्णयः भवति तावद्भिरेव परिषद् दृष्टार्थत्वादृष्टाः । तथाच यमः "एको द्वौ वा त्रयो वापि यद्वृद्धा धर्मपाठकाः । स धर्म इति विज्ञेयो नेतरेषां सहस्रशः । यद् वदन्ति तथोन्मत्ता मूर्खा धर्मपतद्विदः । तत्पापं प्रतिपद्य भूत्वा तद्वक्तृन्नहनन्ति" । दक्षप्रजा-

तपः "अनुक्त्वा धर्मशास्त्राणि प्रायश्चित्तं वदन्ति ये। प्रायश्चित्ती भवेत् पूतस्तत् पापं तेषु गच्छति"। अङ्गिराः "ज्ञातानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्चितैरनाम्नातैरपूतैश्चैव संवदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि लक्षतः"। तथा "न्यायतो मार्गमाणस्य क्षत्रियादेः प्रधानिनः। अन्तरा ब्राह्मणं लब्धा व्रतमेतत् समादिशेत्"। [द्विरूपकोषः।

परिषद् त्रि॰ परितः सीदति परि+षद्-अच्। अनुचरे

परिषद्य त्रि॰ परिषदमर्हति यत्। सभार्हे द्विरूप॰। स्तोत्रं समेतानामृत्विजां सभायोग्ये पवमाने अग्निभेदे यजु॰ ५।३२ वेददीपः।

परिषद्वल त्रि॰ परिषद्+अस्त्यर्थे वलच्। सभासदे तत्र आश्रयत्वेन परिषदः सत्त्वात् तथात्वम्।

परिषीवण न॰ परि+सिव-भावे ल्युट् षत्वं वा दीर्घः नि॰। अन्धिकरणे (गाँठदेखोया) माघः ८।६।१२ पक्षे परिषेवणमप्यत्र।

परिषृति स्त्री परि+सृ-प्रेरणे भावे क्तिन्। १प्रेरणे। कर्त्तरि क्तिच्। २प्रेरके त्रि॰ ऋ॰ १।१९।६

परिषेचक परि+सिच-ण्वुल्। परितः सेचके अकानात्वेऽपि याजका॰ समर्थषष्ठ्या समासः। अनोदात्तता चास्य।

परिष्कन्न त्रि॰ परि+स्कन्द्-क्त तस्य दस्य च न वा षत्वे षत्वम्। परपुष्टे षत्वाभावे षत्वाभावात् परिस्कन्न तत्रार्थे।

परिष्क(स्क)न्द त्रि॰ परिस्कद्यते पूर्यते परि+स्कन्द् घञ् वा षत्वम्। १परपुष्टे अमरः २परितः स्यायिनि रथगोपके भा॰म॰ ४२अ॰।

परिष्कर पु॰ परि+कृ-भावे बा॰ अप् सुट् षत्वम्। रथस्य रत्नादौ भा॰क॰ ३४अ॰ "सप्तभिर्मण्डलं ज्ञेयं रथस्यासीत् परिष्करः"।

परिष्कार पु॰ परि+कृ-घञ् सुट् षत्वम्। १भूषणे विद्यमानवस्तुनो गुणान्तरस्य २आधानादौ ३संस्कारे च अमरः ४शुद्धौ।

परिष्कृत त्रि॰ परि+कृ-क्त सुट् षत्वम्। १भूषिते २चेष्टिते ३कृतमार्जनादिसंस्कारे च अमरः यज्ञार्थं पशुबन्धनायज्ञपात्रावदनाय च कृतसंस्कारायां ४भूमौ स्त्री अमरः।

परिष्टि स्त्री परि+इष-क्तिन् भेदे यक्। अन्वेषणे ऋ॰ १।६५। लोके तु परीष्टिरित्येव

परिष्टुभ् त्रि॰ परि+स्तुभ-क्विप् षत्वम्। १परितः निरर्थकशब्दरूपस्तोभयुक्ते ऋ॰ १।६६।११ भा॰। २परितः स्तोतव्ये ऋ॰ ८।६२।२४ भा॰।

परि(ष्टो)स्तोम पु॰ परितः स्तूयते उत्तमवर्णयुक्तत्वात् षत्वम्। परिगतः स्तोमम् प्रा॰स॰ तत्र परेः स्तोतिं प्रत्यनुपसर्गत्वात् न षत्वमिति भेदः इति स्वामी। गजपृष्ठास्तरणकम्बले (झूल) अमरः। [षत्वम्। परितः स्थले।

परिष्ठल न॰ परितः स्थलम् "विभाषमिपरिभ्यः स्थलम्" पा॰

परिष्ठा त्रि॰ परि+स्था-क्विप् षत्वम्। पराङ्मुखे ऋ॰६।

परि(ष्य)स्यन्द त्रि॰ परि+स्यन्द्-घञ्। "परिस्यन्दः प्राच्यभरतेषु" पा॰ प्राच्याद्यर्थे न षत्वम् अन्यत्र वा षत्वम्। १परितः स्यन्दनयुक्ते २कुसुमादेः पत्रावस्थादिरचनायाम् अमरः। ३परिष्कारे ४परिवारे च हेमच॰।

परिष्वङ्ग पु॰ परि+स्वञ्ज-घञ्। आलिङ्गने अमरः

परिसंवत्सर अव्य॰ ऊर्द्ध्वं संवत्सरात् अव्ययी॰। वत्सरादूर्द्ध्वं "परिसंवत्सरात् पुनः" मनु॰ षष्ठस्या अलुक्। २परिवत्सरे पु॰

परिसंख्या स्त्री परि+सम्-ख्या-भावे अङ्। १परिगणिते २विधिभेदे नियमशब्दे ४०७८ पृ॰ ऋतुकालशब्दे च १४ १७पृ॰ द्रष्टव्यम्।

परिसंख्यात त्रि॰ परि+सम्-ख्या-कर्मणि क्त। परिगणिते

परिसञ्चर पु॰ सृष्टिकालादूर्द्ध्वं सञ्चरति परि+सम्-चर-अच्। प्रतिसञ्चरकाले सृष्टिप्रलयकाले "त्रिविधः सर्वभूतानां कीर्त्त्यते परिसञ्चरः। अनावृष्टिर्भास्करश्च घोरः संवर्त्तकोऽनलः। मेघो ह्येकार्णवोवायुस्तथा रात्रिर्महात्मनः" वराहपु॰।

परिसमूहन परि+सम्-ऊह भावे ल्युट्। वह्नादौ अनलोपरि १तृणौघसमिदाधाने परितः पतितदग्धादेः प्रक्षिप्ते अग्निमध्ये २प्रक्षेपरूपव्यापारभेदे च कात्या॰श्रौ॰४।१२।१९। ३अग्नेः समन्तात् मार्जने च।

परिसर पु॰ परि+सृ-अप्। १नदीनगरपर्वतादेः पर्यन्तभूमौ अमरः २मृत्यौ ३विधाने मेदि॰।

परिसर्प पु॰ परि+सृप-भावे घञ्। १परितो जलादिना वेष्टने २समन्ताद् गमने च हेम॰। ३सारस्वतयागभेदे न॰ आश्व॰ १२।६।२२

परिसर्प्या स्त्री परि+सृ-भावे क्यप्। सर्वतो गमने अमरः।

परिसारक त्रि॰ परि+सृ-ण्वुल्। १परितो गन्तरि। ततः मत्वर्थे अच्। पारिसारक तच्छब्दयुक्ते अध्याये आह्नादके च पु।

परिस्य(य)न्द पु० परि+स्यन्द्-भावे घञ् अप्राणिकर्तृकार्थे वा अलम्। इतादेः स्वरस्य प्राणिकर्तृके ह्रस्वादेर्मदस्वरस्य तु न अलम्।

परिस्रव परि+स्रु-भावे अप्। परितः स्वरणे

परिस्राव पु० परि+स्रु-णिच्-अच्। सुश्रुतोक्ते परिस्रवजनके १उपद्रवभेदे "क्रूरकोष्ठस्यातिप्रभूतदोषस्याष्टदोषसमवचारितं मलवृद्धिस्य दोषास्तनिःशेषानपहरति ततस्ते दोषाः परिस्रावमापादयन्ति तत्र दौर्बल्योदरविष्टम्भार्दितानाहवेदनानि भवन्ति सर्वेन्द्रियाणां पित्तश्लेष्माणौ परिस्रवतस्तं परिस्रावमित्याचक्षते। परि+स्रु भावे वा० घञ्। २परिस्रवे च

परिस्राविन् त्रि० परि+स्रु-णिनि। १स्रवणयुक्ते सुश्रुतोक्ते पञ्चविधभगन्दरमध्ये २तद्भेदे च "स्नेहा तु प्रकुपितः समीरणेनाधःप्रेरितः पूर्ववदवस्थितः शुक्रावमार्गं स्थिरां कण्डूमतीं पिडकां जनयति सास्य कण्डूदीन्वेदनाविशेषाञ्जनयत्यप्रतिक्रियमाणा च पारसपेति प्रणाम कठिनः संरम्भी कण्डूप्रायः विच्छिन्नमलमलमार्गावं स्रवत्युपेक्षितस्य वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरं परिस्राविणमित्याचक्षते" तत्र तल्लक्षणलक्षणम्।

परिस्रुत् स्त्री परि+स्रु-क्विप्। १सुरायाम् अमरः। २परितः स्रवणयुक्ते त्रि० "अस्मात् परिस्रुतो रसम्" यजु० १९ ७५ भावे सम्प० क्विप्। ३स्रवे स्त्री।

परिस्रुत त्रि० परि+स्रु-क्त। १घृतादिभ्यो निःसृतसारवस्तुमे पदार्थे "अर्जं वह्नीरमृतं हृतं पयः कीलालं परिस्रुतम्" यजु० २ १४ "परिस्रुतं वह्नीः घृतेभ्यो निःसृतं सारं वहन्त्यः। तत्र सारं त्रिविधम् अर्जशब्देन हृतशब्देन पयःशब्देन चाभिधेयम्। तत्रोर्जशब्दोऽन्नगतं स्वादुत्वमभिधत्ते। हृतपयसी प्रसिद्धे" वेददी०। २मदिरायां स्त्री मेदि०।

परिहनु अव्य० हन्वोरुपरि अव्ययी०। हन्वोरुपरि ततः परिसुप्ता० भवार्थे यत्। पारिहनव्य तत्र भवे त्रि०

परिहस्त अव्य० परिवर्जने अव्ययी०। हस्तस्य वर्जने तस्य निरुदकादित्वात् अन्तोदात्तता।

परि(री)हार पु० परि+हृ-घञ् वा दीर्घः। १त्यजायां अनादरे अमरटी०। २दोषाद्युद्धारणे च

परिहार्य्य त्रि० परि+हृ-कर्मणि ण्यत्। १परिहर्त्तव्ये २त्यक्तव्ये द्विरूपकोषः। ३उद्धार्य्ये च

परि(री)हास पु० परि+हस-घञ् वा दीर्घः। नर्मणि त्रिका०

परिहृत् त्रि० परि+हृ-क्विप्। परिहृत्य गन्तरि ऋ ६।७५

परीक्षक त्रि० परि+ईक्ष-ण्वुल्। तर्केण प्रमाणैरनिर्णीतैर्वनिर्णीतस्य शास्त्रपरिशीलनेन प्राप्तबुद्धिप्रकर्षे उदाहरणशब्दे २६७१ पृ० दृश्यम्। २व्यवहारादौ दिव्यभेदपरीक्षाकारके च।

परीक्षण न० परि+ईक्ष-भावे ल्युट्। राज्ञा अमात्यादेः चारादेश्च दुष्टादुष्टत्वनिरूपणे तर्कप्रमाणाभ्यां २वस्तुतत्त्वावधारणे च "भेदोपजापावुपधाभिर्यैस्तु परीक्षणम्" अमरः।

परीक्षा स्त्री परि+ईक्ष-भावे अ। दिव्यशब्दे २५८९ पृ० आदौ दर्शिते १दिव्यपदार्थे तर्कप्रमाणादिना २वस्तुतत्त्वावधारणे च। [व्यवहारके।

परीक्षिन् त्रि० परि+ईक्ष-णिनि। युक्तिप्रमाणैर्वस्तुस्वरूपा-

परीणस् त्रि० परि+नस-कौटिल्ये धातूनामनेकार्थत्वात् व्याप्तौ क्विप् दीर्घः। १व्यापके ऋ०५।१०।१ भा। परि+नह वा० डसुन् दीर्घः। २परितोनद्धे चक्षु०१ १२९ ९

परीणसा अव्य० परि+नस-व्याप्तौ वा० आत् दीर्घः। बहुपदार्थे निघण्टुः ऋ०९ ९७ ९ उद्वा०।

परीणह्य त्रि० परितः नह्यते बध्यते नह-क्विप् दीर्घः। १परितो बन्धने २तत्कर्मणि च। भावि पदान्ते ह्रस्व वः।

परीत त्रि० परि+इ-क्त। परितो गते [भा०व० ११०व

परीप्सा स्त्री परि+आप्-सन्-आप्ते अ। प्राप्तुमिच्छायाम्

परीर न० पूर्व्यतेऽनेन पृ-वन् दीर्घः। जले उज्ज्वल०।

परीरय पु० परि+रय-अच् दीर्घः। १कण्ठे २दण्डे ३पटाटके च मेदि०।

परीरव पु० परि+रव-अच् वा दीर्घः। आविङ्गने अमरः

परीष्टि स्त्री परि+इष-क्तिन्। १अन्वेषणायाम् २परिचर्यायाञ्च हेमच०।

परीसार पु० परि+सृ-घञ् दीर्घः। सर्वतोगमने हेमच०।

परु पु० पृ-उन्। १खण्डे २खर्वे ३ग्रन्थौ ४पर्वते च संक्षिप्त०

परुच्छेप पु० परुभि श्रेष्ठोऽस्य पूर्वो०। ऋषिभेदे निरु०१०।४२

परुत् अव्य० परस्मिन् वर्षे नि०। परवर्षे इत्यर्थे अमरः। तत्र भवः त्र। परुत्न परवर्षभवे त्रि०।

परुद्वार स्त्री परुः खण्डो पर्वतो वा द्वारमस्य। घोटके चन्द्रमाला स्त्रियां जातित्वात् ङीष्।

परुष न० पृ-उषन्। १निष्ठुरवचने २गोशीर्षिकाग्रामे अमरः ३फलभेदे परुषवे भावप्र०। [श्लक्ष्णे त्रि०।

परुषोक्ति स्त्री कर्म०। १निष्ठुरोक्तौ। वक्र। २कटुवाक्यक-

परुस् न० पृ–उसि। पर्ब्बी (गाँठ) पर्व्वणि अमरः।

परूष न० पृ–उषन्। फलभेदे (फरसा) "परूषकं कषायास्वादपाकं पित्तकरं लघु। तत् पक्वं मधुरं पाके शीतं विष्टम्भि दुर्जरम्। हृद्यं बृंहणं पित्तदाहास्रज्वरक्षयक्षीरकृत्" भावप्र०।

परेत त्रि० परा+इ–क्त। मृते अमरः।

परेतराज्(ज) पु० ६त० टच्समा० परेतेषु राजते राज–क्विप् वा। यमे अमरः।

परेतवास पु० ६त०। श्मशाने।

परेद्यवि अव्य० परस्मिन् अह्नि नि०। परदिने इत्यर्थे

परेद्युस् अव्य० परस्मिन् अह्नि पर+एद्युस्। परदिने इत्यर्थे

परेष्टुका स्त्री परैरिष्यते इष–तु स्वार्थे क। बहुप्रसवायां गवि अमरः।

परैधित त्रि० परैरेधितः एध+णिच्–क्त ३त०। अन्यपालिते कौडासीन्येनापरवर्द्धिते अमरः।

परोक्ष अव्य० अक्ष्णः परम् अव्ययी० सुट् नि० पूर्वनिपातः। १अप्रत्यक्षस्थाने "परोक्षज्ञानमनाहार्य्यं निश्चयश्चेति सिद्धान्तः" इत्युक्तेस्तज्ज्ञानस्यानाहार्य्यत्वम् निश्चयरूपत्वञ्च बोध्यम्। कर्म्म आत्मच्। २तद्विषये त्रि०। ३तपस्विनि ब्रह्मचारी। [स्त्रियाम्।

परोढा स्त्री परोढोढा ३त०। परेण कृतविवाहायां

परोपकार पु० ६त०। परस्य हितादिसम्पादनव्यापारे

परोबाहु पु० परोबाहुर्बन्धोऽस्य नि० सुट्। परसम्बन्धयुक्ते यत ब्रा० ६।५।३।१० [यत०ब्रा० १४।८।१५।१

परोरजस् त्रि० रजसः परः सुट् नि०। १रागाभावे २विशुद्धे

परोलक्ष न० लक्षात् परः सुट् नि०। १लक्षसंख्यातोऽधिकसंख्यायाम् २तदन्विते च।

परोवरीय त्रि० "परांवापरांवानुभवति स अवरस्योत्वं निपात्यते। श्रेष्ठाश्रेष्ठयुक्ते।

परोवरीयस् परच परीयाँच नि० पूर्वपदे सुट्। अत्यन्तश्रेष्ठे परमात्मनि "परोवरीयसीं लोकान् जयति" छा० उ०।

परोक्षी स्त्री परा+तक्ष–अच् गौरा० ङीष्। शैलपालिकायाम् अमरः। [वृक्षदण्डे अमरः।

पर्कटि(टी) स्त्री पृच–कटि स्वार्थिकः कुत्वम्। (पाकुड़)

पर्कटिन् पु० पृच–कटिनि स्वार्थिकः कुत्वम्। वृक्षवृक्षे (पाकुड़) "पर्कटी कटुकः प्रोक्तः शिशिरश्च कषायकः। रक्तदोषहरो मूर्च्छाप्रलापभ्रमनाशनः" राजनि० तद्वृक्षा उक्ताः।

पर्जनी स्त्री पृज–करणे ल्युट् ङीप्। दारुहरिद्रायाम् अमरः।

पर्जन्य पु० पृषु–सेचने अन्य आत्मादेशः। १इन्द्रे २मेघे मेदि० "यस्माद्वर्षति पर्जन्यः" इति मनुः। ३मेघगर्जे विश्वः पर्जन्य इव सर्वान् कामादभिवर्षति। ४विष्णौ इ०। "कुन्दः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः" विष्णुस० ५दारुहरिद्रायां स्त्री राजनि०।

पर्जन्यपत्नी स्त्री पर्जन्यः पतिरिवास्याः वपुर्बलत्वात् पत्युर्न ङीप्। वशायां "वशा पर्जन्यपत्नी देवा अध्येति ब्राह्मणा अवस्ते भद्रे! पर्जन्यो विद्युतस्ते स्तना वर्षे!" अथ १०।१०।६। ६त०। २इन्द्रपत्न्यां शच्याञ्च।

पर्ण हरितीकरणे अ०चु० उभ०सक०सेट्। पर्णयति-ते अपपर्णत्-त। वसन्तः पर्णयति चम्पकम्।

पर्ण न० पृ–न, पर्न–अ वा। १पत्रे २पक्षे ३ "पर्णो गरुत्मे भवः" इति। ४पलाशवृक्षे पु० ५ताम्बूले न ६पक्षयुक्ते त्रि० अमरः। "पर्णभूते भवेद्व्याधिः पर्णौषे पापसम्भवः। जीर्णे पर्णे हरेदायुः स्थिरा बुद्धिप्रणाशिनी" क्रान्तिः त०। तन्मूलादिभक्षणनिषेधः। "अनिधाय तले पर्णं मृगशृङ्गादयते परम्। अतिक्रम्य गतो दरिद्रः स्यादन्ने न स्मरते हरिम्" अत्र परमिलुक्तेः धन्वाकादिवोने न दोषः। पर्णस्येदम् शिवा० अण्। पार्णं तत्सम्बन्धिनि त्रि०। अस्यर्थे भट्टा० सु कन्। पर्णकीय तद्युक्तदेशे त्रि०। तस्यादूरभवादि वदना० अण् पार्णं तस्यादूरदेशादौ त्रि० तस्य तुल्यं पर्णात् इत्येव। तत्र भवः "कृशेचपर्णात् भरद्वाजे" पा० भवादौ ञ्। पर्णीय भरद्वाजदेशभवे अन्यत्र अणेव पार्णं तत्रार्थे त्रि० क्षुद्रं पर्णमृ ङीप्। २क्षुद्रपर्णे स्त्री वाल्पर्णं जयरादि० वन्। पर्णिक तद्विक्रेतरि स्त्रियां ङीप्।

पर्णक पु० ऋषिभेदे तस्य गोत्रापत्यम् इञ् पार्णकि तद्गोत्रापत्ये बहुत्वे तु उपका० तस्य वा लुक्।

पर्णकार पुंस्त्री० पर्णं करोति उत्पादयति कृञ् उप०स०। (वारुइ) ख्याते जातिभेदे ताम्बूलजीविनि स्त्रियां जातित्वात् ङीप्। [रचिते हुडुम्टे (पातेरकुंडे)।

पर्णकुटी स्त्री पर्णैर्निर्मिता कुटी श्या०त०। पर्णशालायाम्

पर्णकूर्च पु० पर्णस्य कूर्चः कूर्चवद्धारणा शिराकोपवासाकौ विशेषतो भोजननिष्पादितस्तभेदे यथाह जिमा०। "यदा तु पर्णादीनामेकीकृतानां क्वाथश्चिराल्लानो पीयते तदा

पर्णकूर्चः यथाह यमः "एतान्येव वनस्थानि त्रिरात्रोपोषितः शुचिः। आचमिता पिबेदद्भिः पर्णकूर्चो ऽभिधीयते" इति। एतानि पर्णकूर्चोक्तद्रव्याणि।

पर्णच्छत्र पु० पलाशवाश्ये श्रवभेदे "पर्णोदुम्बरराजीव विल्वपत्रशयोरैः। प्रत्येकं प्रत्यहं पीतैः पर्णच्छत्र उदाहृतः" वाग्भ० 'पलाशोदुम्बरारविन्दत्रीवृक्षपर्णानामेकैकेन क्वाथितसदकं प्रत्यहं पिबेत्। कुशोदकञ्चैकस्मिन्नहनीति पञ्चाहवाश्यः पर्णच्छत्रः" भिता।

पर्णच्छद पु०पर्णमेव छदः। छद्यते यस्य पुष्पहीनत्वात्। १पुष्पहीने वनस्पतौ वृक्षे शब्दच०। समूहे छदच्। २पर्णसमूहे न०।

पर्णचीरपट पु० महादेवे भा०शा० २८६अ०।

पर्णचोरक पु० पर्णं चोरयति चुर-ण्वुल्। चोरणमन्त्रवृक्षे राजनि०।

पर्णनर पु पर्णनिर्मितः नर ऽण्। अस्थ्यलाभे मृतस्य दाहार्थं पर्णनिर्मिते नराकृतौ इक्षुशिकाभेदे तद्विधानं स्मृ०त० उक्तं यथा

"अथास्थ्यलाभे पर्णनरदाहः। तत्राश्वलायनगृह्यपरिशिष्टम् "अस्थिनाभे पलाशानां त्रीणि प्रादेशमात्राणि च। पुरुषप्रतिकृतिं कृत्वा दहेत् मन्त्रपूर्वकम्। अथोत्तरतः शिरसि पीठायां दश योजयेत्। उरसि त्रिंशतं दद्यात् त्रिंशतिं जठरे तथा। बाहुभ्यां शतं दद्यात् दद्याद्दक्षिणिभिर्दश। द्वादशार्द्धं कृष्णयोरष्टार्द्धं शिश्न एव च। जङ्घाभ्यां शतं दद्यात्त्रिंशतं सक्थिजानुनोः। पादाङ्गुलिषु च दश एतत् प्रेतस्य लक्षणम्। अथोत्तरेण संवेष्ट्य वस्त्रपिण्डेन वेपयेत्"। आदिपुराणम् "तदलाभे पलाशोत्थैः पत्रैः कार्यः पुमानपि। शतैस्त्रिभिर्निशा नद्धा शरपत्रैर्विधानतः"। तदभावेऽस्थ्यलाभे। अत्र पलाशपत्रशरपत्रयोस्तुल्यत्वेनोपादानात् आश्वलायनगृह्येऽपि प्रतिकृतौ शरपत्रस्य लाभः। अलाभाराद्योग्यत्वात्र शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि ततो वेष्टनमूर्ध्वकृत्वेव, वेपनं वस्त्रपिण्डेनेति। अलाभौत्थ्यान्तरे दाहे भेदाद्वेन शुद्धिः तदुत्तरपर्णनरदाहे तु त्रिरात्रम्। "एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्" इत्यादिपुराणात्। यत्र-पार्थः "पुत्रादेर्दुष्कृतस्योरनु तदस्थीनि तदाचरेत्। तदलाभे पलाशस्य पत्रमेव हि पुनःक्रिया"। इति यथा-तदलाभेऽस्थ्यर्थमाशौ पलाशस्य तद्वत्पत्रस्य दाहक्रिया पुनरपि यथाने लाभेऽस्थिदाहक्रिया विहिता तथादुपरि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाहे त्रिरात्रा शौचे कर्तव्ये न पुनः पिण्डादिदानं वक्ष्यमाणत्वात्। "अशौचानन्तरं चेत् स्याद्दाहः पर्णनरस्य च। तत्रदाहाच्छुद्ध्यन्ति च तथा बन्धिजटाः स्त्रीबालाः। दर्शे दहेत् "पर्णनरं दहेच्चैव विना दर्शं कदाचन। अस्थ्यलाभे तु दर्शेऽपि ततः पर्णनरं दहेत्" इति दीपकलिकायां सुमन्तुवचनात्। दर्शे इत्यलाभेऽस्थ्नामिति क्वचित् पाठः। अष्टमी कृष्णा चन्द्रेऽहे पितृकर्मणि कृष्णपक्षप्राधान्ये नोक्तेः। "नरं पर्णं दहेच्चैव प्राक् त्रिपक्षात् कदाचन। त्रिपक्षे तु गते दद्यात् दर्शे प्राप्ते त्वनग्निकः"। इत्यशौचव्यपगमे बोध्यम्। यथाह शुद्धिरत्नाकरे यमः "अशौचमध्ये यत्नेन दाहयेदुक्तया इतः। कृष्णपक्षे पञ्चदश्यामष्टम्यां वा समाहितः। एकादश्यां विशेषेण ततः प्रभृति सूतकम्। त्रिरात्रं सर्ववर्णानामेष धर्मो व्यवस्थितः।" इत्यपि इत्यशौचव्यपगमे बोध्यम्। वायुपुराणे "पर्णनरं दहेच्चैव प्राक् त्रिपक्षात् कदाचन। पितृहा मातृहाऽस्थ्नाञ्चैव दर्शे दहेत् यदि।" विष्णुपु० "त्रिपक्षे तु गते पर्णनरं दद्यादनग्निकः। त्रिपक्षाभ्यन्तरे राजन्! नैव पर्णनरं दहेत्। तद्दुर्गतमतीं प्राप्य दर्शं वापि विचक्षणः।" दहेदिति शेषः। "अथौचाभ्यन्तरे यदि दाहं न कुर्यात् तदा चरणदिनावधि त्रिपक्षानन्तरं दाहः कार्य इत्यर्थः" इति हरिदासवर्मोक्तेः। "पर्णं नरं दहेच्चैव विना दर्शं कदाचन। अस्थ्नामलाभे दर्शे तु ततः पर्णनरं दहेत्" इति दीपकलिकायां सुमन्तुवचनादर्थे दाहः। अलाभेऽमीति क्वचित् पाठः। यमः "त्रिपक्षाभ्यन्तरे राजन्! नैव पर्णनरं दहेत्। तद्दुर्गतमतीं प्राप्य दर्शं वापि विचक्षणः"। अमीत्यत्र अष्टमीत्यर्थः। पितृकर्मणि कृष्णपक्षप्राधान्येनोक्तेः इति हरिदासतर्काचार्यलिखनात्। एतच्चाशौचव्यतिरिक्तविषयम्।

अत्र नक्षत्रादिकालभेदः स०चि० पौ० उक्तो यथा

"शुक्लारार्किषु दर्शभूतमदने नन्दा सुतीयाष्टमे पौष्णे वारुणभे त्रिपुष्करदिने न्यूनाधिकासेऽयने। वाम्येऽवदात परत्र पातपरिणे देवेज्यशुक्रात्मके भद्रावैष्णवयोः शयप्रतिकृतेर्दाहो न पक्षे पिते। जन्मप्रत्यरितारयोर्भृतिसुखान्येऽर्के च प्रवर्ते यन् मध्यो नैत्यगादितिप्रभुवांशयास्याद्भद्रिणे देऽपि च। श्रेष्ठो-

ऽर्वेऽप्यविधोर्दिने स्मृतिकरस्यात्त्रिपुष्करे तथा त्वाशौचान्तरतो विचार्यमखिलं मध्ये यथासम्भवम्" स०चि०। "एवंविधे दिने यस्य मृतस्य प्रतिकृतिः भरपत्नादिना सावयवत्वकल्पनं तस्य दाहो न कार्यः कुतः यतो द्विविधः प्रेतसंस्कारः प्रत्यक्षशरीरसंस्कारः प्रतिकृतेरन्यः तत्र प्रत्यक्षशरीरसंस्कृतौ शुभाशुभदिनविचाराभावः यदाह गार्ग्यः "प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेदिति" प्रतिकृतिसंस्कारस्य हि कालत्रयम् अशौचमध्ये वर्षमध्ये वर्षानन्तरं चेति अत्राशौचमध्ये यदि प्रतिकृतिसंस्कारचिकीर्षितस्तदा यथासम्भवं दिनशुद्धिर्विचार्या वर्षमध्ये वर्षानन्तरं वा प्रतिकृतिसंस्कारे अवश्यं कालशुद्धिर्विचार्या एतदभ्याह गार्ग्य एव "आशौचमध्ये क्रियते पुनःसंस्कारकर्म चेत्। शोधनीयं दिनं तत्र यथासम्भवमेवमेव तु। आशौचविनिवृत्तौ चेत् पुनः संस्क्रियते मृतः। संशोध्यैव दिनं शास्त्रमूर्ध्वं संवत्सरादपि"। प्रेतकार्याणि कुर्वीतेति शेषः अतएवोक्तम् "आशौचान्तरतो विचार्यमखिलं मध्ये यथासम्भवमिति"। एतद्वाक्यमत्रैव स्पष्टं व्याख्यास्यते तत्र दिनशुद्धिरुच्यते शुक्रारेत्यादिना शुक्रः प्रसिद्धः आरो मङ्गलः आर्किः शनिः एषां वारे प्रतिकृतेर्दाहो नेति प्रत्येकं सम्बन्धः। तथा दर्शोऽमावस्या भूतपञ्चदशी मदनत्रयोदशी नन्दाः प्रतिपत्षष्ठ्येकादश्यः आह तिथिषु दाहो न कार्यः यदाह मरीचिः "नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे। पितृश्राद्धं न कुर्वीत दाहो पुत्रधनक्षयात्। एकादश्यां तु नन्दायां त्रिनी वाल्यां भृगोर्दिने। नभस्ये च चतुर्दश्यां क्षत्तिकासु त्रिपुष्करे"। द्वितीयवाक्यमतिदुष्टताकथनार्थं त्रिनी वाल्यामभावास्यायां भृगोर्दिने शुक्रवारे इति सम्बन्धो व्याख्येयः अत्र श्राद्धं न कुर्वीतेत्यनुषङ्गः श्राद्धशब्देनात्र प्रेतक्रिया विवक्षिता। तथा तीक्ष्णोग्रभे मूलज्येष्ठाश्लेषाखीक्ष्णानि उग्राणि पूर्वात्रयभरणीमघाः पौष्णे रेवत्यां वारुणे शतभे त्रिपुष्करदिने भद्रातिथयः सूर्यभौमशनिवाराः क्षत्तिकापुनर्वसूत्तराफाल्गुनी विशाखोत्तराषाढापूर्वभाद्रपदाः एतन्नित्यसंकृतिरूपे दिने प्रतिकृतेर्दाहो न कार्य इति केचिद्व्याकुर्वते तत्र पूर्वपक्षेणैव निषेधवत्त्वात् मतु प्रत्यक्षमृतौ स निषेधो न तु प्रतिकृतिदाहे एवं तर्हि सम्प्रतिवाक्याभावाद्वायमर्थ इति ब्रूमः। यदुक्तं ज्योतिःपराशरेण "साधारणध्रुवोग्रे मैत्रे नो शस्यते मनुष्याणाम्। प्रेतक्रिया क्षयदिनं त्रिपुष्करे वसवधिष्ण्ये चेति" अत्र त्रिपुष्करशब्देन विशिष्टयोगो विवक्षित इति चेत् अत्र ब्रूमः त्रिचरत्वनक्षत्राण्येव त्रिपुष्करपदेनोच्यन्तेऽतो हेमाद्रिणापि कृत्तिकादीन्येव त्रिचरत्वानि मानि त्रिपुष्करशब्देन व्याख्यातानि अतएवाह कश्यपः "भरण्याद्रा मघा श्लेषा मूलं त्रिचरत्वानि च। प्रेतक्रियासु दुष्टानि धनिष्ठाद्यं च पञ्चकम्" इति पराशरवाक्ये दहनि प्रेतकृत्ये सामान्यतो निषिद्धानि कश्यपवाक्येऽन्यान्यतिदुष्टान्युक्तानि दृष्टमेवाभिप्रेत्य यन्मकरोक्तानि तत्र धनिष्ठाया अपहरणं मध्यमेषु वक्ष्यमाणत्वात्। अथ न्यूनाधिमासे क्षयमासे अधिमासे च यथप्रतिकृतिदाहो न कार्यः। उक्तञ्च ज्योतिर्निबन्धे गरुडपुराणे "न कुर्यात् गुरुशुक्रास्ते पौषे क्षामे मलिम्लुचे। विलम्बितं प्रेतकार्यं गयां गोदावरीं विनेति" मेधातिथिः "अस्तं गते गुरौ शुक्रे पौषाषाढाधिमासके। प्रेतकार्यं न कुर्वीत गयां गोदावरीं विनेति" अधिमासस्योपलक्षणत्वात् क्षयमासेऽपि न कार्यं प्रेतकार्यमित्यर्थः। अतएव मूले न्यूनमासनिषेधः। अथाद्देकलाद्यर्धात्परतः अर्धं याम्येऽयने दक्षिणायने कर्कादिषड्राशिस्थिते सूर्ये न दाहः कार्यः अर्धादुत्तरार्धं सम्यक्, उपलक्षणत्वादमदिनमपि निषिद्धम् उक्तञ्च गार्ग्येण "अर्धं संवत्सरादपि" प्रेतकार्याणि कुर्वीत शेषं तत्रोत्तरायणम्। कृष्णपक्षे तत्रापि वर्जयेत् दिनक्षयम्"। इति गारुडपुराणेऽपि "न कुर्याद्गुरुशुक्रास्ते पौषे क्षामे मलिम्लुचे। विलम्बितं प्रेतकार्यं गयां गोदावरीं विनेति"। अत्र वाक्ये पौषक्षापयोर्निषिद्धत्वान्मार्गशीर्षस्य मध्यमत्वं प्रतीयते तदावश्यकविषयं प्रथमवर्षे तु दक्षिणायनमपि शुभमेव। पातपरिघे व्यतिपाताख्ये योगे गणितागते व्यतीपाताख्ये महापात इत्यपि केचित् परिघाख्ये योगे तथा देवेज्यशुक्रास्तके गुरुशुक्रयोरस्ते अत्र स्वार्थे कः। तथा भद्रावैष्टितयोः भद्रावैष्टितौ प्रसिद्धौ गणितसाध्ये वैष्टताख्ये महापाते इत्यपि केचित्। तथा सिते पक्षे शुक्लपक्षे यथप्रतिकृतेर्दाहो न कार्यः। यदुक्तं नारदेन श्राद्धकल्पाध्याये "चतुर्दशीं तिथिं नन्दां शुक्रारावार्किवासरम्। सितेऽयोरस्तमयं द्वाविंशं विषमाश्विभम्। शुक्लपक्षं च सन्त्यज्य पुनर्दहनमुच्यते" इति अन्यत्रापि "नन्दा मदनभूतायां पातवैष्टतविष्टिषु। शुक्रार्किभौमपरिघध्रुवमिश्रोपसूलभे। कर्तृचन्द्रेऽष्टवेदान्ये जन्मप्रत्यरितारके।

त्रिपादभे सिते पक्षेऽयने याम्येऽब्दतः परम् । अवप्रति कृतेर्दाहः शुक्रेऽस्तेऽधिकमासके । नेष्टो मध्यो द्विपानुमैत्रहीशादितिभगध्रुवे" इति तथा कर्तुः प्रेतश्राद्धाद्यधिकारिणो जन्मप्रत्यरितारयोः जन्मतारा उत्पत्तिनक्षत्रं दशममेकोनविंशं चेति प्रत्यरितारा जन्मभात् पञ्चमं चतुर्दशं त्रयोविंशं चेति । कथा कर्तुर्मृतिसुखान्येऽङ्गे स्वजन्मराशेरष्टमचतुर्थद्वादशस्थे चन्द्रे सति दाहो न सन् न प्रशस्तः" ।

वराहपुराणे "चतुर्थाष्टमगे चन्द्रे द्वादशे च विवर्जयेत् । प्रेतक्षयं व्यतीपाते वैधृतौ परिघे तथा । करणे विष्टिसंज्ञे च शनैश्चरदिने तथा" । विष्टिसंज्ञं करणं भद्रा । महाभारते "नक्षत्रेण न कुर्वीत यस्मिन् जातो भवेन्नरः । न प्रोष्ठपदयोः कार्यं तथाग्नेयेऽपि भारत ।। दारुणेषु च सर्वेषु प्रत्यरे च विवर्जयेत्" इति प्रोष्ठपदयोः पूर्वाभाद्रपदोत्तराभाद्रपदयोः आग्नेये कृत्तिकायाम् । कालविशेषादिकं नारदेनोक्तम् "दिनोत्तरार्द्धे तत्कर्तुश्चन्द्रताराबलान्विते । पापग्रहे बलयुते शुक्रे लग्नांशवर्जनम् । तत्पुनर्दहनं प्रोक्तमिति "अथ शवप्रतिकृतिदाहे मध्यनक्षत्राण्युच्यन्ते मैत्रमनुराधा भगः पूर्वाफाल्गुनी अदितिध्रुवविशाखाः प्रसिद्धाः द्व्यङ्गिभं मृगचित्रा धनिष्ठा । क्षेऽपि बुधवारेऽपि शवप्रतिकृतिदाहो मध्यमः न शुभफलदो नाप्यनिष्टफलद इत्यर्थः उक्तञ्च कश्यपेन "फल्गुनीद्वितयं रोहिणयनुराधा पुनर्वसुः । द्वे आषाढे विशाखा च भानि द्विचरणानि च । एतानि किञ्चिद्दुष्टानि वर्जयेत् सति सम्भवे" इति । "नेष्टो मध्यो द्विपानुमैत्रहीशादितिभगध्रुवः" इति चेत्तु तेषु सम्भवाभावः । अथार्केज्यविधोरर्केज्याभ्यां वक्रितो विधुरिति मध्यमपदलोपी समासः । सूर्यगुरुचन्द्राणां दिने वारे दाहः श्रेष्ठस्तथा तेन करणेन श्रुतिकरस्वात्यश्विपुष्येषु निषिद्धनक्षत्रगणाद्बहिर्भूतेषु पञ्चसु भेषु शवप्रतिकृतेर्दाहः श्रेष्ठोऽनुष्ठीयमानः शुभफलद इत्यर्थः । आशौचात्परत इत्यादिव्याख्यातार्थं नन्वु प्रतिकृतिसंस्कारः किंनिमित्तम् उच्यते । दैवान्मानुषाद्वाऽपराधान्मृतस्य विधिवद्दाहो नाभूत् किन्तु काष्ठवद्दाहो जातोऽथ वा परदेशगतस्य चौरदंष्ट्रादिहतस्य तद्भीतेरेव केनचित् काष्ठवद्दाहोऽपि न कृतोऽथ वैकाकित्वाच्च लातस्तदा प्रतिकृतिदाहो विधेयः उक्तञ्च ब्रह्मपुराणे "अनाहिताग्नेर्देहस्य दाहो ब्रह्माग्निना द्विजैः । तदभावे पलाशोत्थैः पत्रैः कार्यः पुमानपि । सर्पिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना । असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबान्धवैः । एवं पर्णशवं दग्ध्वा त्रिरात्रमशुचिर्भवेत्" इति । तदभावे देहाभावे तथाग्निना गृह्याग्निना अपिशब्दात् स्त्रीमरणे तद्देहाभावे स्त्र्यपि पलाशोत्थैः पत्रैः कार्यैत्यर्थः । आहिताग्नेस्तु श्रौतसूत्रे विधिमाहापस्तम्बः "यद्याहिताग्निः प्रोषितः प्रमीतो न प्रज्ञायेत स यां दिशमभिप्रस्थितस्तां दिशमस्याग्निभिः कल्पं दहेयुरपि वाजसनेयिनामिति त्रीणि षष्टिशतानि पलाशवृन्तानि तैः कृष्णाजिने पुरुषाकृतिं कृत्वा तामस्याग्निभिर्दहेयुरिति वा" । अत्र पक्षद्वयं यथाप्रवासगतो यदि न प्रज्ञायेत प्रमीत इति यतो मृत इत्येव निर्णये स यां दिशं प्रस्थितो भवेत्तां दिशं प्रति यः कल्पोऽकल्पोभूमिप्रदेशस्तृणवांस्तं देशमस्य मृतस्य श्रौताग्निभिस्तूष्णीं दहेयुर्बान्धवाः पिण्डमेधविधिना । अयमेकः पक्षः । अपि वा अथवा । त्रीणि षष्ट्युत्तराणि शतानि ३६० पलाशवृन्तानि पलाशानि पर्णानि यत्र तिष्ठन्ति तादृशानि वृन्तानि संपाद्य तैर्वृन्तैः पलाशवृन्तीयैस्त्रिपत्रैर्वृन्तैः कृष्णाजिने पुरुषाकृतिं कृत्वा तामाकृतिमस्याग्निभिः पिण्डमेधविधिना दहेयुरिति वाजसनेयिनां मतमिति द्वितीयः पक्षः । पराशरेण तु कुशैः प्रतिकृतिः कार्येत्युक्तम् । "कृष्णाजिने समास्तीर्य कुशैस्तु पुरुषाकृतिमिति" कुर्यादिति शेषः । अत्र पलाशवृन्तकुशविधोरन्यतरेणानुष्ठानं व्रीहियवतुल्यबलत्वात् । शवप्रतिकृतिदाहानुष्ठानविधिस्तु शौनकाद्युक्त दिशा ज्ञेयः नात्राप्रस्तुतत्वाल्लिख्यते अयं च पलाशवृन्तादिभिः प्रतिकृतिविधिरस्यचाभे यदा तु मृतास्थ्नां लाभस्तदा तैरेव प्रतिकृतिः कार्या । यदुक्तं छन्दोगसूत्रे "अथातः पुनर्दाहविधिं व्याख्यास्यामो यदि शरीरं नश्येदस्थीन्यादायास्थीनि क्षीरोदकेन प्रक्षाल्यास्थिभिः कृष्णाजिने पुरुषाकृतिं कृत्वा पूर्ववद्दहेत्तेषामभावे पलाशवृन्तैः कृष्णाजिने पुरुषाकृतिं कृत्वा चत्वारिंशता शिरो दशभिर्ग्रीवां विंशत्योरस्त्रिंशतोदरं पञ्चाशता पञ्चाशता बाहुतयोरेव पञ्चभिरङ्गुलीनां सप्तत्या सप्तत्या पादौ तथैवाङ्गुलीरष्टाभिः शिश्नं द्वादशभिर्वृषणं तां कुशैर्वेष्टयित्वा तस्मिन्नेव पूर्ववद्दहेदिति" । अस्यार्थः चत्वारिंशता पलाशवृन्तैः शिरः संपाद्य दशभिर्ग्रीवां विंशत्योरस्त्रिंशता उदरं पञ्चाशतैकबाहुं तथैव पञ्चाशतापरम् पञ्चभिः पञ्चभिरङ्गुलीनां तथा सप्तत्या सप्तत्या पादद्वय तत एव

पञ्चभिरङ्गुलीनृ एवं पञ्च पञ्च अङ्ग्येकः पादः सम्पन्नः अष्टाभिः शिखं द्वादशभिर्द्वयं एवं च अङ्ग्यधिकत्रिशत्या पलाशदलैरवयवकल्पना भवति तां प्रतिकृतिं तस्मिन्नेव कृष्णाजिने पूर्ववदिति पितृमेधविधिना दहेदित्यर्थः एतादृशे विषये कालनियमः शुक्रारार्किघ्नित्यादिनोक्तः यतः "अथातः संप्रवक्ष्यामि यत् पुनर्दहनं नृणाम्" इत्यादिना पद्मसमुदायेन कालशुद्धिशङ्का "अतीतविषये कार्य्ये न्यूने श्राद्धे महालये। एतत् सर्वं विचिन्त्याशु कुर्याच्छ्राद्धमतन्द्रितः" इति कल्पमेन कालातीतविषयत्वेनाभिधानात्" ।

आशौचमध्ये क्रियते चेत्तदा भद्रा भरणी धनिष्ठा पञ्चकादिदोषरहितत्वमपेक्षितं, नैव बहुकालव्यापिशुक्रास्तादिदोषापेक्षा कार्येति गर्गवाक्ये यथास्मत्पदस्यार्थः सर्वथा त्वाशौचदिनेषु दुष्टेषु दोषतारतम्येन महादोषत्यागोऽल्पदोषाङ्गीकारो यथा लोकप्रसिद्धिः तादृशे दिने शवप्रतिकृतिदाहो विधेयः सर्वथा दोषरहिते दिने तूत्तम एव सः। अथ यदि मरणशवधानन्तराशौचदिनानां राक्षिकदैविकब्राह्मणाद्यलाभरूपप्रतिबन्धादतिक्रमणमभूत्तदाशौचमस्ति न वेति विचारः राक्षिकदैविकसम्भावनायां सत्यां सद्य एव शौचं स्यात्तत्राशौचं यदाह पराशरः "दुर्भिक्षे राष्ट्रसन्तापे आपदां च समुद्भवे। उपसर्गमृते चैव सद्यः शौचं विधीयते" इति। यमहृदयस्तु "दैवे भये समुत्पन्ने प्रधानांगे विनाशिते। सद्यः शौचं समाख्यातं कात्यायनादि सम्प्रतीति"। पैठीनसिरपि "विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। न तत्र सूतकं तद्वत् कर्म यज्ञादि कारयेत्" इति। कालान्तरान्यायाद्भवादियात्रायां तादृशे एव तीर्थकर्मणि तीर्थस्नानदानादिकर्मणि तादृशे विषये आशौचपरिहाभावादेव शवप्रतिकृतिदाहाभावः यदा तु ब्राह्मणाद्यलाभस्तदाशौचपरिग्रहः स्यादेव परन्त्वाशौचदिनावन्तरं वर्षमध्ये दिनशुद्धिमपेक्ष्यैव शवप्रतिकृतिदाहो विधेयः "आशौचस्य निवृत्तौ चेत् पुनः संस्क्रियते मृतः। संशोध्यैव दिनं ग्राह्यमिति" गर्गेणैवकारसहितदिनपदोक्तेः अयमर्थः अत्रापि भद्राभरणीपञ्चकादिदोषः कतिपयदिनव्यापी त्याज्य एव न तु शुक्रास्तादिबहुकालव्यापिदोषप्रतीक्षा। तदुक्तं ज्योतिर्निबन्धे पितृखण्डे "शुक्रास्तमने चैव दैवज्ञस्य तथैव च। प्रेतकार्यं प्रदुष्येत प्रथमं वत्सरं विनेति"। अथ यदि वर्षमध्ये राक्षिकदैविकाद्युपद्रवः सम्पन्नस्तदा वर्षोत्तरं निषिद्धदक्षिणायनशुक्रास्तादिमहादोषरहिते भद्राभरणीपञ्चकादिदोषरहिते च काले शवप्रतिकृतिदाहः कार्यः उक्तञ्च गार्ग्येण "ऊर्ध्वं संवत्सरादूर्ध्वं। प्रेतकार्याणि कुर्वीतत्रेदं तत्रोत्तरायणम्" इत्यादीनि मूलवाक्यानि प्रागभिहितानि। अतएव मूलपद्येऽप्यब्दात्परतो याम्येऽयने तथा दैवेज्य शुक्रास्तके शवप्रतिकृतिदाहो न कार्य इति व्याख्येयम। प्रथमे वर्षे तु नायं दोषः सर्वत्रापि नवागोदावर्योस्तीर्थयोः प्राप्तयोः सतोरयं शुक्रेज्यास्तदक्षिणायनादिमहादोषविचारः कोऽपि नास्ति तदुक्तं ज्योतिर्निबन्धे प्रेतमञ्जर्याम्। "प्रेतकार्याणि सर्वाणि प्रतस्नानजपादिकम्। वर्ज्यं शुक्रेज्ययोरस्ते गयां गोदावरीं विनेति" पी॰धा॰। अत्र दर्शे विधिनिषेधौ देशाचारभेदात् व्यवस्थाप्यौ पर्णशवपर्णपुत्तलिकादयोऽप्यत्रार्थे।

पर्णभेदिनी स्त्री पर्णानि भिनत्ति भिद्-णिनि ङीप्। १प्रियङ्गुवृक्षे राजनि॰। २पत्रभेदकमात्रे त्रि॰।

पर्णभोजन पुं॰स्त्री॰ पर्णं भुङ्क्ते भुज-ल्यु कृत। १ज्ञामवे त्रिका॰स्त्रियां जातित्वात् ङीप्। २पत्रभक्षणमात्रे त्रि॰ भावे ल्युट्। ३पत्रस्य भक्षणे न॰। [२५१

पर्णमणि पु॰ पर्णवर्णो मणिः शा॰त॰। हरिन्मणौ अम॰

पर्णमय त्रि॰ पर्णस्य विकारः "छन्दसि" पा॰ विकारे मयट्। पर्णस्य विकारे "परमयं बर्हिः" श्रुतिः स्त्रियां ङीप्। "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" श्रुतिः।

पर्णमाचाल पु॰ पर्णं माचालयति मा+चल+णिच्-अच् वा सुम्। कारवेल्लवृक्षे (उच्चा) शब्दमाला।

पर्णमुच् त्रि॰ पर्णानि मुञ्चत्यत्र मुच-आधारे-क्विप् कृत। वृक्षाणां पत्रमोचनाधारे शिशिरकाले।

पर्णमृग पु॰ पर्णचरो मृगः पशुः। पशुभेदे "वनौका वृक्षमार्जारो वृक्षमर्कटिकादयः। एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः"। वनौका वानरः वृक्षमार्जारो वृक्षविडालः। वृक्षमर्कटिका (रूमी) इति लोके "स्मृताः पर्णमृगाः वृक्षाचरयोनिषु हिताः। श्वासार्शःकासशमनाः स्वेदमूत्रपुरीषकाः" भावप्र

पर्णरुह् पु॰ पर्णे रोहत्यत्र रुह-आधारे क्विप्। पर्णजननाधारे वसन्तकाले।

पर्णल त्रि॰पर्ण+अस्त्यर्थे विद्या॰लच्। पत्रयुक्ते [पत्रिणि।

पर्णलता स्त्री पर्णप्रधाना लता शा॰त॰। ताम्बूलीलतायाम

पर्णवल्क पु॰ ऋषिभेदे ततः गर्गा॰ गोत्रापत्ये यञ् पार्ण॰ वल्क्य तद्गोत्रापत्ये पुंस्त्री॰ स्त्रियां यञोपः ङीष् । पार्णवल्की [राजनि॰ ।

पर्णवल्ली स्त्री पर्णप्रधाना वल्ली शा॰त॰ । पत्रशीलतायाम्

पर्णवी त्रि॰पर्णमिव अजति–अज-क्विप् वीभावः । खगे ऋ॰ ९।२।१ भा॰ । [ब्रततामम्बूले ।

पर्णवीटिका स्त्री पर्णस्य वीटिका । (पानेर बिड़ा) स्तवकी

पर्णशद पु॰ पर्णानि शद्यन्ते शीर्य्यन्ते शात्यन्ते यत्र शद–संज्ञायां आधारे घ । १पतितपर्णस्थितिदेशे २तद्रूपे रुद्रभेदे च यजु॰ १६।४६ वेददीपः ।

पर्णशय्या स्त्री पर्णैरचिता शय्या शा॰त॰ । पत्ररचितशय्यायाम् । [मार्कण्डपु॰ ५८अ॰।

पर्णशवर पुंस्त्री॰ पर्णभक्षणकरः शवरो यत्र । देशभेदे

पर्णशाला स्त्री पर्णैरचिता शाला शा॰त॰ । १पत्ररचित कुटीरे कुटीरे अमरः । पर्णमिव शाला यत्र । २ग्रामभेदे "मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह । गङ्गाययुनयोर्मध्ये यत्र मनस्य गिरेरधः । पर्णशालेति विख्यातो रमणीयो नराधिप !" हरिवं॰ ६८अ॰

पर्णशालाग्र पु॰ भद्राश्ववर्षस्थे कुलाचलभेदे तदुपक्रमे "श्वेतपर्वतो नीलश्च श्वेतश्चाचलोत्तमाः । कौरञ्जः पर्णशालाग्रः पञ्चैते तु कुलाचलाः" मार्कण्डपु॰ ।

पर्णशुष् पु॰ पर्णे शुष्यत्यत्र शुष–आधारे क्विप् । वृक्षाणां पत्रशोषाधारे शीतकाले ।

पर्णस त्रि॰ पर्णस्यादूरदेशादि शा॰ अदूरार्थां स । पत्रस्यादूरदेशादौ त्रि॰ ।

पर्णसि पु॰पृ–पूरणे असि–नुक् च । १जलमध्यस्थवृक्षे (जलटुङ्गी) उज्ज्वल॰। २पद्मे उणादिकोषः । ३शाके ४आभरणक्रियायाम् संज्ञिप्रसारः ।

पर्णाटक पु॰ ऋषिभेदे तस्य गोत्रापत्यम् इञ् पार्णाटकि तद्गोत्रापत्ये बहुत्वेऽस्त्रियां तस्य लुक् । पर्णाटकाः स्त्रियान्तु पार्णाटक्य इत्येव ।

पर्णाद त्रि॰पर्णमत्ति व्रतार्थम् अद–अण् उप॰स॰। १व्रतार्थं पत्रभक्षके २ऋषिभेदे पु॰ भा॰स॰ ४अ॰।

पर्णाशन पु॰ पर्णानि अश्नाति अश–ल्यु । १मेषे तस्य पत्रभक्षणकाले मेषलालयाम्बुसम्भवप्रसिद्धिः । २पत्रभोजिमात्रे त्रि॰ । [स्वामु अमरः ।

पर्णास(सि) पु॰ पर्णानि यसति अस–अच्–इन् वा । तच्च-

पर्णिन् पु॰ पर्ण+अस्त्यर्थे इनि । १वृक्षे हेमच॰ २माषपर्ण्यां स्त्री ङीप् शब्दमाला । ३अप्सरोभेदे स्त्री हरिवं॰ २२६अ॰। पर्णतुल्यवर्णत्वात्तस्यास्तथात्वम् ।

पर्णिल त्रि॰ पर्ण+अस्त्यर्थे पिच्छा॰ इलच् उज्ज्वल॰ । पर्णविशिष्टे पिच्छादिगणसूत्रे तु नास्य पाठो दृश्यते ।

पर्णोटज न॰ पर्णनिर्मितकुटजम् शा॰त॰ । पर्णशालायाम् हारा॰ । [हिंट पपर्ट ।

पर्ट अपानवायुक्रियायां भ्वा॰आत्म॰अक॰ सेट् । पर्टते अप-

पर्ट पु॰ पृ–बा॰ ट । १केशसमूहे उणा॰ । पर्ट–भावे घञ् २अपानवायुशब्दे (पाद)। ल्युट् ।पर्टन तत्रार्थे न॰हेमच॰

पर्प गतौ स्वा पर॰सक॰ सेट् । पर्पति अपपीत् पपर्प ।

पर्प न॰ पृ–प । १गृहे २नवदले उणादिकोषः २खड्गवाहनसाधने पीठादौ सि॰कौ॰ । तेन चरति पर्पा॰ ठन् । पार्पिक पर्पेण गतिशक्ते खड्गे । स्त्रियां विच्चात् ङीष् ।

पर्पट पु॰ पर्प+अका॰अटन् । (सेतपापड़ा) १वृक्षभेदे "पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः । कथितः पांशुपर्य्यायस्तथा कवचनामकः । पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् । संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः" भावप्र॰ (पाँपर) ख्याते २पिष्टकभेदे पु लतात्रशब्दे २१८२ पृ॰ दृश्यम् । मेदिन्यां अत्रार्थे क्लीवत्वेन पठितः । ३औषधभेदे पु॰ मेदि॰ स्वर्णपर्पट इत्यादि स्वार्थे क । पिष्टकभेदे भावप्र ।

पर्पटद्रुम पर्पट इव द्रुमः । कुम्भीवृक्षे राजनि॰ ।

पर्पटी स्त्री पर्प–अटन् गौरा॰ ङीष् । १मौराङ्गमृत्तिकायाम् रत्नमाला । २पिष्टकभेदे (पाँपर) उणादिकोषः । ३उत्तरदेशप्रसिद्धगन्धद्रव्ये भावप्र॰ । "पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः । विषव्रणकण्डूकफपित्तास्रकुष्ठनाशिनी" भावप्र॰ ।

पर्परीक पु॰ पृ–ईकन् द्वित्वमभ्यासस्य दक् च । १मूर्खे उज्ज्वल॰ २वस्त्रो त्रिका॰ । ३जलाशये संज्ञिप्रसारः

पर्परीण पु॰पृ–यङ्लुक् वा॰ईनन् । १पर्णस्य सिरायां २द्यूतकस्वले च मेदि॰ ।

पर्पादि तेन चरतीत्यर्थे ठन् प्रत्ययनिमित्ते शब्दगणे स च गणः पा॰गा॰सू॰ उक्तो यथा "पर्प अश्व अश्वत्थ रथ लाभ्यास व्याल (पादः पद्म)" पर्पिक इत्यादि ।

पर्फरीक न॰ स्फुर–ईकन् "पर्फरीकादयश्च" उणा॰ नि॰ किसलये नवपत्रे उज्ज्वल॰ ।

पर्व गतौ भ्वा॰पर॰स॰ सेट् । पर्वति अपर्वीत् पपर्व ।

पर्य्य(ल्य)ङ्क पु॰ परिगतोऽङ्कम् प्रा॰ समा॰ "परेश्च घाङ्कयोः

वा रस्य लः । १खट्वायाम् (पालङ्ग) अमरः । २वीरासनाङ्गे अङ्गुस्थापितकरतले यथाह योगसारे वसिष्ठः "एकं पादमथैकस्मिन् विन्यस्योरौ तु संस्थितम् । इतरस्मिन् तथैवोर्वी वीरासनमिदं स्मृतम् । उत्तानिते करतले करहस्तानितं परम् । आधायाङ्कगतं कृत्वा ध्यायेदात्मस्थ सोऽन्तरम्" । ३अवस्थिकथकायाम् हेमच० । ४योगपट्टे च ।

पर्य्यङ्कपादिका स्त्री पर्य्यङ्कस्येव पादोऽस्यास्याः ठन् बहु० कप् वा कापि अतइत्त्वम् । कोलशिम्बयाम् राजनि० ।

पर्य्यङ्कबन्ध पु०पर्य्यङ्कस्य योगपट्टस्य बन्धः बन्ध–घञ् । योगपट्टबन्धादिना पृष्ठजानुजङ्घाबन्धने "पर्य्यङ्कबन्धं निविड़ं बिभेदेति" कुमारः । ल्युट् । पर्य्यङ्कबन्धन अत्रैव न० ।

पर्य्यग्निकृत त्रि०अग्नेः परितः कृतः । "समन्तादग्निवेष्टनेन कृतसंस्कारे "तान् पर्य्यग्निकृतानुत्सृजति" ताण्ड्य०ब्रा० ।

पर्य्यङ्क पु० अश्वमेधीये प्रथमयूपे बन्धनीयेषु पञ्चदशसंख्याकेषु पशुभेदेषु ते च यजु० २४ १ मन्त्रे उक्ताः । "ते वात ते पञ्चदश पर्य्यङ्काः पशवो भवन्ति" शत०ब्रा० १३.२.२ ।। "पर्य्यङ्कानन्त्रे" कात्या०श्रौ० २०।५।४। "कृष्णपीवादयः वामनान्ताः पञ्चदश पर्य्यङ्कसंज्ञा इत्यर्थः" कर्कः ।

पर्य्यटन न० परितोऽटनम् । पुनःपुनर्भ्रमणे हेमच० ।

पर्य्यनुयोग पु० परितोऽनुयोगः प्रश्नः । दूषणार्थं जिज्ञासायाम् हलायु० "एतेनास्यापि पर्य्यनुयोगस्यानवकाशः" इति दायभागः ।

पर्य्यनुयोज्य त्रि० परि+अनु–युज–कर्मणि ण्यत् । निग्रहोपपत्त्या चोदनीये (निग्रहस्थानं प्राप्तोऽसि) कल्पेषमनुयोज्ये न्यायभाष्यम् ।

पर्य्यनुयोज्योपेक्षण न० गौतमोक्ते निग्रहस्थानभेदे निग्रहस्थानप्रश्नस्योपेक्षणे । "अनिग्रहः पर्य्यनुयोज्योपेक्षणम्" गौ०सू० । पर्य्यनुयोज्योपेक्षणं लक्षयति । निग्रहस्थानं प्राप्नवतोऽनिग्रहः निग्रहस्थानानुद्भावनमित्यर्थः यत्र त्वनेकनिग्रहस्थानपाते एकतरोद्भावनं तत्र न पर्य्यनुयोज्योपेक्षणम् अवसरे निग्रहस्थानोद्भावनत्वावच्छिन्नाभावस्यैव तत्त्वात् नतु वादिना कथमिदमुद्भाव्यं स्वकौशलविपरीतस्यायुक्तत्वादिति चेत् सत्यं मध्यस्थेनैवोद्भाव्यं वादे च स्वयमुद्भावनेऽप्यदोषः" वृत्तिः ।

पर्य्यन्त पु० परिगतोऽन्तम् प्रा०स० । शेषसीमाप्राप्ते ।

पर्य्यन्तभू स्त्री पर्य्यन्तस्य शेषसीमायाः भूः । ग्रामादेः शेषसीमास्थाने परिसरे अमरः ।

पर्य्यन्तिका स्त्री परितोऽन्तिका । गुणनाग्रे हारा० ।

पर्य्यन्य पु० पर्जन्यः+पृषो० । पर्जन्यशब्दार्थे उणा० ।

पर्य्यय पु०परित्यज्य शास्त्रलौकिकमर्य्यादाम् अयः इण–भावे अच् । शास्त्रलोकव्यवहारातिक्रान्ते आचारे अमरः ।

पर्य्यवसान न० परि+अव+सो–भावे ल्युट् । १तत्तदर्थावधारणे २शेषावधौ च ।

पर्य्यवसित त्रि० परि+अव+सो–कर्मणि क्त । १पूर्वापरालोचनेन अवधारितेऽर्थे २निष्कृष्टार्थे च ।

पर्य्यवस्था स्त्री परि+अव+स्था–अङ् । १विरोधे २प्रतिपक्षवादे च । ल्युट् । पर्य्यवस्थान तत्रैव न० । तृच् पर्य्यवस्थातृ तत्कर्त्तरि त्रि० । "परितः विश्वं व्याप्य स्थितः । पर्य्यवस्थित विष्णौ पु० "जीवनः पर्य्यवस्थितः" विष्णुस० ।

पर्य्यसन न० परि+अस–क्षेपे–भावे ल्युट् । १अपसारणे २दूरीकरणे परितः ३क्षेपणे च । [२पतिते च मेदि० ।

पर्य्यस्त त्रि० परि+अस–क्षेपे कर्मणि क्त । १परितः क्षिप्ते

पर्य्यस्ति स्त्री पर्य्यस्यते शरीरं यत्र परि+अस–क्षेपे आधारे भावे वा क्तिन् । १पल्यङ्के (पालङ्ग) त्रिका० तत्रार्थे २दूरीकरणे च स्वार्थे क । पर्य्यस्तिका हेमच० ।

पर्य्याचान्त न० परित आचान्तम् । एकपङ्क्तिस्थान् भुञ्जानानन्यानवमत्य यत्रान्येनान्ने भुज्यमाने अन्येनाचमनं कृतं तादृशे अन्ने तच्चान्नमभक्ष्यम् "उच्छिष्टं स्तृतिकान्नञ्च पर्य्याचान्नमनिर्दशम्" मनुव्याख्यायां कुल्लूकभट्टः । "उदक्याशुष्टसंघुष्टं पर्य्याचान्नञ्च वर्जयेत्" याज्ञ० । तद्विवृतौ पर्य्यायान्नमिति पाठः प्रामादिकः मनुनैकवाक्यत्वात् तथा पाठस्य युक्तत्वात् ।

पर्य्याचित त्रि० परि+आ+चि–क्त । आचिते आचिता० नाद्यान्तोदात्तता ।

पर्य्याण न० परि+या–ल्युट् पृषो० । १अश्वसज्जायां २पल्ययने (जिन्) इण–ल्युट् । पर्य्ययणमप्यत्र ।

पर्य्याणहन न० सोमोऽनेन स्थितः समन्तादानह्यतेऽनेन परि+आ+नह–करणे ल्युट् । सोमशकटोपरिगत पटकुटीरूपे तद्बन्धनोपाये पदार्थे कात्या०श्रौ०७।७।१२०

पर्य्याप्त न० परि+आप–भावे–क्त । १यथेष्टे २लब्धौ ३सामर्थ्ये ४निवारणे ५योग्यत्वे च । कर्त्तरि क्त । ६समर्थे ७प्राप्ते च त्रि० मेदि० । पर्य्याप्तिसम्बन्धयुक्ते त्रि० ।

पर्य्याप्ति स्त्री परि+आप–भावे क्तिन् । १सम्यक् प्राप्तौ न्यायमतसिद्धे २स्वरूपसम्बन्धभेदे तथाहि "द्वित्वादिकं पर्य्याप्तिसम्बन्धेन द्वित्वादिष्वेव वर्त्तते न प्रत्येकम् ।

समवायेन तु प्रत्येकवृत्ति। "प्रत्येकावृत्तेः समुदायावृत्तित्वनियमस्तु समवायादिनैव न पर्य्याप्तिसम्बन्धेनेति भेदः। स च सर्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः। पदार्थभेदेन नाना यथा "पर्य्याप्तिवायमेको घट इमौ द्वौ इत्यादि प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः" इति दीधितिः। समवायेन गुणे गुणत्वासत्त्वेऽपि चत्वारो गुणा इत्यादिप्रतीत्या गुणादिषु संख्यादिसत्त्वनियामकोऽपि तादृशः सम्बन्धः" इति सामान्यभावे जगदीशः द्वितीयवृत्तिवादे गदाधरभट्टाचार्यश्च। पर्य्याप्तिर्द्विविधा अर्धपर्य्याप्तिः पूर्णपर्य्याप्तिश्च। तत्र प्रथमा यत्राधिकस्य निरासार्था या पर्य्याप्तिर्निवेश्यते सार्धपर्य्याप्तिः यथा पर्वतो वह्निमान् धूमादित्यादौ साध्यतावच्छेदकवह्नित्वनिष्ठा पर्य्याप्तिः। द्वितीया। यत्र न्यूनवारणाय या पर्य्याप्तिर्निवेश्यते सा पूर्णपर्य्याप्तिः। यथा पर्वतो न महानसीयवह्निमानित्यादौ साध्यतावच्छेदकीभूतमहानसीयत्वविशिष्टवह्नित्वनिष्ठा पर्य्याप्तिः"।

पर्य्याद्भाव पु॰परि+आ-भू घञ्। १अभिभवशब्दे तैत्ति॰ ब्रा॰ ७५७२। २परित आद्भाव (क्षयलापि)।

पर्य्याय पु॰ परि+इण-घञ्। १अनुक्रमे २प्रकारे ३अवसरे मेदिनिः ४निर्माणे ५द्रव्यधर्मभेदे ६समानार्थबोधके शब्दे च हेमच॰। [क्रमेण शयने अमरः।

पर्य्यायशयन न॰ पर्य्यायेण क्रमेण शयनम्। यामिकभटानां

पर्य्यायोक्त न॰ अर्थालङ्कारभेदे अलङ्कारशब्दे दृश्यम्।

पर्य्यारिणी स्त्री परि+ऋ-णिनि ङीप्। १परित आर्त्तिमत्यां व्याधिग्रस्तायां गवि "तस्य दक्षिणा कृष्णा गौः परिमर्षी पर्य्यारिणी" शत॰ब्रा॰५।२।१।१२। २परित आर्त्तियुक्ते त्रि॰।

पर्य्याली अव्य॰ परि+आ-अल ङे अव्यादि॰। हिंसायाम् गणरत्नावली॰ पर्य्यालीकृत्य हिंसित्वेत्यर्थः।

पर्य्यालोचन न॰परि+आ+लोच-भावे ल्युट्। सम्यग्विवेचने

पर्य्यावर्त्तन न॰ परि+आ-वृत-ल्युट्। सूर्य्यस्य पश्चिमवर्त्तिन्याः छायायाः पूर्वदिग्वर्त्तित्वेन परिवर्त्तो "सन्निवेत् सङ्ख्यादूर्द्ध्वं प्राक् पर्य्यावर्त्तनाद्भवेः" कर्मप्रदीपः।

पर्य्यास पु॰ परि+अस-अपे घञ्। १परिवर्त्ते "पर्य्यासं च परिमाणञ्च गतिं चन्द्रार्कयोरपि" मार्कण्डपु॰। २पतने ३हनने च। बहिष्प्रवमानगतानां त्रयाणां ऋचानां मध्ये ४अन्तिमे ऋचे। "स्तोत्रीयानुरूपौ ऋचौ भवतो ऽवसानस्तृचा भवन्ति उत्तमः पर्य्यासः" सा॰ सं॰ भा॰ ध्रुता श्रुतिः।

पर्युक्षण न॰परित उक्षणम्। जलादेः मन्त्रवर्जं तूष्णीं जलादेः परितः सेचने। "उदकसंस्पर्शं तूष्णीं पर्युक्षणम्" आश्व॰श्रौ॰ १।३।१ "तूष्णीं पर्युक्षणं मन्त्रवर्जमन्ये धर्मा अग्निहोत्रदृष्टा भवन्तीत्येवमर्थम्। त्रिस्त्रिरेकैकं पुनःपुनरुदकमादायादायान्ते च कर्मणां पर्युक्षणम्" नारा॰ एतच्च ऋग्वेदिविषयम् सामगानां तु तत्र गोभिलेनमन्त्रभेदा उक्ता यथा "अग्निमुपसमाधाय परिसमूह्य दक्षिणजान्वक्तो दक्षिणेनाग्निम् "अदितेऽनुमन्यस्वेति" पश्चात् "सरस्वत्यनुमन्यस्वेति" उत्तरतः, "देवसवितः प्रसुवेति" प्रदक्षिणमग्निं पर्युक्षेत् सकृच्छिर्षा"।

पर्युदञ्चन न॰ पर्युदञ्च्यते उद्ध्रियते परि+उद्-अञ्च कर्मणि ल्युट्। १क्षणे अमरः भावे ल्युट्। २उद्धरे च।

पर्युदय अव्य॰ उदयस्य सामीप्यम् सामीप्ये अव्ययी॰। उदयसामीप्ये सूर्य्योदयसमीपे कात्या॰श्रौ॰।४।७।२५

पर्युदस्त त्रि॰ परि+उद्+अस-क्त। १निवारिते २फलप्रत्यवायशून्यतया वर्जिते नञा भेदप्रतियोगिनि "यथा रात्रौ श्राद्धं न कुर्वीत" इति अत्र हि रात्रौ श्राद्धे न फलं न वा प्रत्यवायः इति रात्रिः पर्युदस्ता तद्धर्मा अभावश्च नञा बोध्यते। ३परित उत्क्षिप्ते च।

पर्युदास पु॰ परि+उद्+अस-घञ्। १निवारणे फलप्रत्यवायशून्यतया "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" इत्युक्तलक्षणे भेदरूपे नञर्थे। नञ्शब्दे मतभेदेन विस्तरो दृश्यः।

पर्युपवेशन न॰ परित्यक्ते कर्मान्तरसमुपवेशनम्। सोमाभिषवादिकर्मपरिहारेण उपवेशनमात्रे कात्या॰श्रौ॰ ८।४।१ व्याख्यायां दृश्यम्।

पर्युप्ति स्त्री परि+वप-भावे क्तिन्। परितो वपने मेदि॰

पर्युषित त्रि॰ परिहृत्य स्वकालमतिक्रम्य उषितम् वस-क्त। (बासि) कालातिक्रान्ते गतरात्रिकालके द्रव्ये। देवेभ्यः पर्युषितपुष्पदानं निषिद्धं यथा

नारसिंहे "अपर्युषितनिर्म्माल्यैः प्रोक्षितैर्जन्तुवर्जितैः। स्नोयारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिम्" योगिनीतन्त्रे तत्प्रसवः "बिल्वपत्रञ्च माध्यञ्च तमालामलकीदलम्। कह्लारतुलसी चैव पद्मञ्च शतपुष्पकम्। एतत् पर्युषितं न स्यात् यच्चान्यत् कलिकात्मकम्"। पर्युषिताना-

दिभक्षणनिषेधो यथा "शुक्तं पर्युषितोच्छिष्टं स्रस्तृष्टं प्रतितेषितम्। उदक्यास्पृष्टसंघुष्टं पर्याचान्तञ्च वर्जयेत्" गरुड़पु० "यातयामं गतरसं पूति पर्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" गीता। "शुक्तं पर्युषितञ्चैव शूद्रोच्छिष्टन्तथैव च" मनुः। अत्र प्रतिप्रसवः पर्युषितं रात्र्यन्तरितं तत्तु स्नेहाक्तं भक्ष्यमाह मनुः "यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यभोज्यमगर्हितम्। तत् पर्युषितमप्याद्यं हविःशेषञ्च यद्भवेत्" विशेषमाह मयूख "चिरसंस्थितमप्याद्यं सस्नेहाक्तमपि द्विजैः" आह्निक० "मन्त्राभिमन्त्रितं यत्तं न च पर्युषितं भवेत्"। अन्यत्र फलशाकेभ्यः शुष्कशाकादिकात्ततः। तद्वद्दरिद्राभ्यस्तु गुड़पक्वेभ्य एव" आह्निक० "यद्दे पर्युषितञ्च यत्" स्मृत्युक्तनिषेधविषये प्रतिप्रसवः उपरागशब्दे दृश्यः।

पर्यूहण न० परि+ऊह-भावे ल्युट्। परिसमूहने अग्नेः समन्ताद्मार्जने कात्या० श्रौ० ८।५ २५

पर्य्येषणा स्त्री परितस्तर्कादिना एषणा परीक्षा। १तर्कादिना पदार्थपरीक्षायाम् २अन्वेषणायाञ्च अमरः। परि+एषि-भावे ल्युट्। पर्य्येषणव० तत्रार्थे। क्तिन्। पर्य्येष्टि स्त्री तत्रार्थे।

पर्य्यैहि त्रि० परि+आ+ईह-इन्। समन्ताच्चेष्टाकारके स्त्रियां शाङ्करवा० ङीप्। ऋदिकारान्तत्वेन ङीपः प्राप्तावपि नित्यस्त्रार्थं ङीपोविधानम्।

पर्व पूर्त्तौ भ्वा०पर०सक०सेट्। पर्वति अपर्वीत्। पपर्व।

पर्वक न०पर्वणा क्रायति कै-क। ऋक्सन्धौ (आँटु)शब्दच०

पर्वका(र)रिन् त्रि०अपर्व पर्व तत्तुल्यक्रियं करोति कृ--अण् णिनि वा। धनलोभादिना अपर्वदिने पर्वोक्तकर्म्मकारिणि

पर्वगामिन् पु० पर्वसु गच्छति स्त्रियं गम+णिनि। पर्वकाले स्त्रीगमनकारिणि पर्वशब्दे तत्र स्त्रीगमननिषेधो दृश्यः

पर्वण पु० १राजसमेदे भा०व० २१४अ०। पर्व पूर्त्तौ करणे ल्युट्। २पूर्त्तिकरणे स्त्रियां ङीप् सा च ३पौर्णमास्याम्। "चन्द्रस्योदये प्राप्ते पर्वण्यां सरितां पतिः" हरिव० १५२ अ०। पर्वणि सन्धौ जाता अण् संज्ञापूर्वकत्वात् न वृद्धिः ङीप्। सुश्रुतोक्ते ४अन्त्रिगतरोगभेदे स्त्री "ताभ्यां तस्यो दाहशूलोपपन्ना रक्ताज्ञेया पर्वणी दृष्टमोक्षा"। [सुश्रुतः।

पर्व(णो)णिका स्त्री पर्वणो+स्वार्थे क। पर्वगतरोगभेदे

पर्वत पु० पर्व-अतच्, पर्वाणि भागाः सन्त्यस्य त वा। १गिरौ अमरः दामार्थं कल्पिते पर्वताकारे २धान्यादिमेदयके ३सुनिभेदे कश्यपात् नारदश्चैव पर्वतोऽरुन्धती तथा" तस्य नारदसोदरत्वसूक्तम्। भा०या० ३०अ० तस्य नारदभागिनेयत्वसूक्तम् तत्र कपिञ्जलशब्दे १६७६ पृ० दर्शितम्। कल्पभेदादविरोधः। ४मनुष्यभेदे (पावटा) ५दक्षे ६शाकभेदे च मेदिनिः। ७मन्वन्तरभेदे भा०या० १८७अ०। धर्मस्य पुत्रे साध्यायां जाते ८देवभेदे मत्स्यपु० २०४अ०।

सुमेरोः पूर्वे पर्वता यथा "शीताञ्जनचक्रसङ्घ कुमुदोऽथ कङ्कवान्। मणिशैलोऽथ दधिवान् महानीलो भवाञ्जनः। सुविन्दुः मन्दरे वेणुः सुमेरो निमिषस्तथा। देवशैलस्य पूर्वेण मन्दरस्य महाचलाः सुमेरोः दक्षिणे पर्वता यथा "त्रिकूटः शिखराद्रिश्च कपिलोऽथ सतर्कुकः। रुचकः सानुमांश्चैव ताम्रकोऽथ विशालवान्। श्वेतोदरः समलयो वसधारश्च रत्नवान्। एकशृङ्गो महाशैलो गजशैलः पिशाचकः। पद्मशैलोऽथ कैलासो हिमवांश्चाञ्जनोत्तमः। इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः"। सुमेरोः पश्चिमे पर्वता यथा "सुचक्षुः शिशिरश्चैव वैदूर्य्यः पिङ्गलस्तथा। पिञ्जरोऽथ तथा भद्रः सुरसः कपिलो मधुः। अञ्जनः कुक्कुटः कृष्णः पाण्डुरश्चाचलोत्तमः। कङ्कशिखरश्चाद्रिः पारियात्रः शृङ्गवान्। पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः। एतेऽचलाः समाख्याताः शृण्वन्तस्तथोत्तरान्"। सुमेरोरुत्तरे पर्वता यथा "शङ्खकूटोऽथ कपिलो हंसनामो तथाचलौ। कपिलेन्द्रस्तथा शैलः सानुमांश्चैव एव च। शतशृङ्गः सर्वशृङ्गः पुष्पको मेघपर्वतः। विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा। इत्येते कथिता मन्दरोत्तरतो नगाः" मार्कण्डेय पु०।

श्रेष्ठपर्वता विंशतिर्यथा "हिमवान् हेमकूटश्च निषधो नीलपर्वतः। श्वेतश्च शृङ्गवान् मेरुर्माल्यवान् गन्धमादनः। महेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षमानपि। विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा। लोकालोको महांस्तेषु तथैवोत्तरमानसः। एते विंशतिर्विख्याताः पर्वताश्चाप्यपावराः"। गिरीणां सपक्षत्व तच्छेदनकथा यथा "ततोऽद्रयो जातपक्षा विष्णोश्चैव तु मायया। प्रक्षिप्ता मेदिनीं छन्ना यथापूर्वं निवेशिताः। तत्रस्थानमसुराणान्तु धात्रादिष्ट गता-

र्वे । प्रतीच्यां पर्वताः सर्वे निमज्जन्ति यथा तथा । तत्राहरेभ्यः संहत्य आधिपत्यं सुराज्यम् । तच्छ्रुत्वैव सुराः सर्वे भक्तुरद्योगसत्तमम्" इत्युपक्रमे तेषां युद्धसज्जा युद्धजयानन्तरं तेषां पक्षच्छेदश्च यथा "धरण्यान्तु गिरीन् स्वाथ स्वेषु स्थानेषु नोपतिः । अच्छेद पविना पक्षान् सर्वेषां भुविचारिणाम् । एकः पपतो मैनाकः सुरैस्तत्समये हृतः" अग्निपु० । पर्वतानां स्थावरजङ्गमरूपे द्वे रूपे यथा "नद्यश्च पर्वताः सर्वे द्विरूपाश्च स्वभावतः । तोयं नदीनां रूपन्तु शरीरमपरन्तथा । स्थावरं पर्वतानान्तु रूपं कायस्तथाऽपरः । एकीनामथ कच्छूना तथैवान्तर्गता तनुः । बहिरस्थिरूपन्तु सर्वदैव प्रवर्त्तते । एवं जलं स्थावरच्च नदीपर्वतयोर्यथा । अन्तर्वसति कायस्तु सततं नोपलभ्यते । आप्याय्यते स्थावरेण शरीरं पर्वतस्य तु । तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा । नदीनां कामरूपित्वं पर्वतानां तथैव च । जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः । तोयहानौ नदीदुःखं जायते सततं द्विजाः ! । विशीर्णे स्थावरे दुःखं जायते गिरिकायगम्" कालिकापु० २२६० ।

पर्वतकाक पुंस्त्री० पर्वते भवः काकः । द्रोणकाके हेमच० स्त्रियां जातित्वात् ङीष् ।

पर्वतज त्रि० पर्वताज्जायते जन--ड ६त० । १गिरिजातमात्रे २नद्यां स्त्री हेमच० । [भेदे राजनि० ।

पर्वततृण न० पर्वतभवं तृणं मा०त० । (वण्ड) गिरि तृण-

पर्वतपति पु० ६त० । हिमालये पर्वतनाथादयोऽप्यत्र ।

पर्वतमोचा स्त्री पर्वतोद्भवा मोचा मा०त० । गिरिकदल्यां राजनि० ।

पर्वतराज पु० पर्वतेषु राजते राज--क्विप् । हिमालये

पर्वतराज पु० ६त० टच्समा० । हिमालये "आरभ्य तस्यां दशमीं यात्रां प्रपूजयेत् पर्वतराजपुत्रीम्" ति०त० ।

पर्वतवासिन त्रि० पर्वते वसति वस--णिनि ७त० । १गिरिवासिनि स्त्रियां ङीप् । स च २आकाशगंगास्थांराजनि

पर्वतात्मजा स्त्री ६त० । हैमवत्यां दुर्गायां हरिवं० १७६अ० २मैनाके पु० पर्वतसुतादयोऽप्यत्र । [भूधरत्वेन तस्यास्तथात्वम्

पर्वताधारा स्त्री पर्वत आधारो यस्याः । पृथिव्यां नगानां

पर्वतारि पु० ६त० । इन्द्रे शब्दरत्ना० । तस्य तत्सम्बन्धित्वात् तथात्वम् पर्वतशब्दे द्रष्टव्यम् ।

पर्वताश्रय पु० पर्वते आश्रयते आ+श्री-अच् । मेघे शब्दर्थ० ।

पर्वताश्रय त्रि० पर्वत आश्रयो यस्य । १पर्वतवासिनि २शरभे पुंस्त्री० राजनि० स्त्रियां जातित्वेऽपि योषित्वात् टाप् ।

पर्वतासन न० रुद्रयामलोक्ते आसनभेदे यथा "अथ वक्ष्ये महादेव ! पर्वतासनमङ्गलम् । यत् कृत्वा स्थिररूपिण्याः षट्चक्रादिविबोधनम् । योन्यासनं पर्वतेन योगं योगबलावहम् । तत्कालं च भवं तावत् खेचरो यावदेव हि । पादमेणेन चाक्रम्य विकृष्यं यो नियोजयेत् । अन्यत् पद्मरौ दत्त्वा तत्र योन्यासनं भुवि । एतन्मध्ये महेशान ! पर्वतासनमुच्यते" ।

पर्वतीय पु० पर्वते भवः छ । (पाहाड़ीया) ,जातिभेदे

पर्वतेष्ठा त्रि० पर्वते स्था--क्विप् अत्वम् अलुक्समा० । १पर्वतस्थायिनि ऋ० ६ २२।२ श्लोके तु न अत्वम् ।

पर्वधि पु० पर्वणि दधाति किरत्यहिं धा-कि । चन्द्रे त्रिका०

पर्वन् न० पॄ—वनिप् । १उत्सवे २पन्थौ (गाँठ) ३उत्सवभेदे ४प्रस्तावे ५अन्यविच्छेदस्थाने मेदि । "चतुर्दश्यष्टमी चैव अमावस्या च पूर्णिमा । पर्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च" इति स्मृत्युक्तेषु पञ्चसु दिवसभेदेषु च "स्त्रीतैलमांससंभोगो पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम प्रयाति नरकं स्मृतः" विष्णुपु० । तत्र कर्त्तव्यमाह "नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः चन्द्रार्कयोर्पर्वणोर्व्यतिपातेषु पर्वसु । अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् । यः करोति पवित्रात्मा तस्य स्यादक्षयं फलम्" ब्रह्मपु० "अनध्यायस्तु माङ्गेषु नेतिहासपुराणयोः । न धर्मशास्त्रेषन्येषु पर्वस्वेतानि वर्जयेत्" कूर्मपु । ७दर्शान्तपूर्णिमान्तरूपकाले "नतैस्य पर्वनाड़ीनाम्" सू०सि० "पर्वनाड़ी दर्शान्तपूर्णिमान्तनाड्यस्तासाम्" रङ्ग० । ८अंशे भागे "विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि" सांख्य०सू० "अविद्या पञ्चपर्वेषा प्रादुर्भूता महात्मनः" विष्णुपु० "त्रिंशकद्वादशांशस्य चतुर्विंशतिपर्वणः" भा०व० १११४० । राशिचक्रे सूर्य मत्वा गच्छतोः सूर्यचन्द्रयोर्वदात्मन्तं विप्रकर्षस्तदा पौर्णमासी वदात्मन्तं सन्निकर्षस्तदा दर्शः ते द्वे पर्वणी एवं चतुर्विंशत्या पर्वभिश्चतुष्पञ्चाशदधिकेन शतत्रयेण चान्द्रो वर्षः" भौद० । "पर्वणोऽग्रे चतुर्थे च कर्त्तव्येष्टिर्द्विजोत्तमैः" कालमाधवधृतस्मृतिः । राशिचक्रे अयनसंक्रान्तेर्विषुवद्वयस्य च सन्धिसत्त्वात् पर्वसत्त्वेयम् । चातुर्मास्ययागे वैश्वदेवबलिपञ्चमहायज्ञाकमेधहुतशेषीयास्वेषु १चतुर्षु यागेषु तेषाञ्चोत्सवरूपत्वाच्चयात्मकि-

त्यन्ये कात्या० श्रौ० ५।१।१ सूत्रव्याख्याने द्रष्टव्यम्। "द्वयोः प्रणीयन्तीत्यधिकरणे पर्वचतुष्टयविहितायां उत्तरवेदेर्न पर्वद्वये प्रतिषेध उपपद्यते तत्र पर्वद्वये विकल्पसापेक्षं विधानं पर्वद्वये च निरपेक्षमिति" दायभा० "पर्वचतुष्टयेति चातुर्मास्ययागप्रसङ्गे वैश्वदेव-वरुणप्रघासशाकमेधसुनासीरीयाख्याश्चत्वारो यागाः चातुर्मासाध्या उक्ताः तत्र च "उपात्र वपन्ति न वैश्वदेवे न सुनासीरीये उक्ते वा एतौ यज्ञस्य यद्वरुणप्रघासः शाकमेधश्चेति द्वयोः प्रणयन्तीति" श्रुतिरस्ति। अस्यार्थः अत्र पर्वसंज्ञके यागचतुष्के उत्तरवेदिम् उपवपन्ति निर्वपन्ति सम्पादयन्तीत्यर्थः इति उत्तरवेदिः अग्निप्रणयनपात्रम्" श्रीकृष्णः। एतच्च श्रौतकर्मानभिज्ञानादुक्तम् "उत्तरवेदिं निवपत्युत्तरस्याम्" कात्या०श्रौ ३।३।१६ सूत्रादौ स्थण्डिलभेदस्यैव उत्तरवेदिनामता उक्ता यथा "वक्ष्यमाणेन प्रकारेण उत्तरस्यां वेदौ उत्तरवेदिं निर्वपति उत्तरवेदिरिति वक्ष्यमाणसंस्कारसंस्कृतस्य चात्वालमृदा कृतस्य स्थण्डिलस्य नामधेयम्" कर्कः। तदुत्तरत्र सूत्रेषु तन्निर्माणप्रकार उक्तः चात्वालशब्दे च शत०ब्रा०भाष्यवाक्यं द्रष्टव्यम्। ११चन्द्रसूर्ययोरुपरागे च पर्वशब्दे द्रष्टव्यम्। १२प्रतिपत्पञ्चदश्योरन्तराले काले पर्वसन्धिशब्दे द्रष्टव्यम्। पर्वणि विहितः तत्र भवो वा अण्। पार्वण अमावास्यादिविहिते श्राद्धे पर्वभवे त्रि०

पर्वमूला स्त्री पर्वणि पर्वणि मूलं यस्याः मूलान्तत्वात् जातित्वेऽपि टाप्। श्वेतदूर्वायां राजनि०।

पर्वयोनि पु० पर्व ग्रन्थियोनिरुत्पत्तिस्थानमस्य। इक्षादौ हेमच०। तस्य ग्रन्थितएवोत्पत्तेस्तथात्वम्।

पर्वरीण पु० पर्वरीण+पृषो०। १पत्रहन्तरसे २गर्वे ३मारुते ४पर्णशिरायां ५मृतके ६द्यूतकम्बले ७पत्रचूर्णरसे च ८पर्वणि न० शब्दरत्ना०।

पर्वरुह् पु० पर्वणि रोहति रुह-किप्। दाडिमे त्रिका०

पर्ववल्ली स्त्री पर्वप्रधाना ग्रन्थिश्रेष्ठा वल्ली। माषादूर्वायाम् (गाटदूर्वा) राजनि०।

पर्वसन्धि पु० पर्वणोः सन्धिः। पर्वणोः पञ्चदशीप्रतिपदोरन्तादिदण्डचतुष्टयात्मकाले अमरः "सैंहिको यदा राहुर्ग्रसते पर्वसन्धिषु" यमः। दण्डचतुष्टयोक्तिः प्रायिकी सू०सि० ग्रहणेष्टकालस्य अन्यथा दर्शितत्वात्। तत्र उपरागशब्दे द्रष्टव्यम्।

पर्वाविधि पु० ६त०। परपत्न्यां द्वारा०।

पर्वास्फोट पु० ६त०। अङ्गुलिपर्वणि आस्फोटने कामन्दकी

पर्वित पुंस्त्री० पर्व-क्त। (पावदा) पर्वतमस्त्रे शब्दच०।

पर्वेश पु० ६त०। ग्रहणकालभेदानामधिपभेदे स च ष्ठ०सं० ५अ० उक्तो यथा

"वर्षमासोत्तरदृष्ट्या पर्वेशाः सप्त देवताः क्रमशः। ब्रह्मशचीन्द्रकुबेरा वरुणाग्नियमाश्च विश्वेशाः। १ब्राह्मे हिज पशुवृद्धिक्षेमारोग्याणि शस्यसम्पच्च। तद्वत् २सौम्ये पीडा विदुषामवृष्टिश्च। ३ऐन्द्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमम्। ४कौबेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च। ५वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरम्। ६आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम्। ७याम्यं करोत्यवृष्टिं दुर्भिक्षं सङ्क्षयं च सस्यानाम्। यदतःपरं तदशुभं क्षुन्नाराष्ट्रवृष्टिदं पर्व"।

पर्शान न० पार्श्वस्थानम् पृषो०। १पार्श्वस्थाने ऋ ७।४।५ भा० २पीडयमाने त्रि० ऋ०८ ७ ३४ भा० ३विमर्शयोग्ये ऋ०८ ४५ ४१ ४मेघे पु० निघण्टुः पाठान्तरम्।

पर्शु पु० "स्पृशेः श्वणशुनौ पृ च" उणा० स्पृश-शुनू धातोः पु० आदेशः। १आयुधे २परश्वधे हेमच०। ३आयुधजीविसंघभेदे ततः पर्शा० स्वार्थे अण्। पार्श्व तत्रार्थे।

पर्शुका स्त्री पर्शुरिव कायति कै-क। पार्श्वास्थि अमरः।

पर्शुपाणि पु० पर्शुः पाणावस्य। १गणेशे हेमच० २परशुरामे च। [शब्दच०। परशुरामशब्दे द्रष्टव्यम्।

पर्शुराम पु० पर्शुसहितो जातो रामः शा०त०। जामदग्न्ये

पर्शुल त्रि०पर्शुः तदाकारमस्य ततः सिध्मा०लच्। ऋष्यियुक्ते

पर्श्वध पु० परश्वध+पृषो०। परश्वधे कुठारे जटाध०

पर्श्वादि पु० "पर्श्वादिभ्योऽणञौ" पा० स्वार्थे अण् प्रत्ययनिमित्ते शब्दगणे स च गणः पा० न०सू० उक्तो यथा "पर्शु असुर रक्षस् वाह्लीक वसु मरुत् सत्वत् दशार्ह पिशाच अशनि कार्षापण"

पर्ष स्त्रेहे भ्वा०आत्म०सक०सेट्। पर्षते अपर्षिष्ट पप

पर्षद् स्त्री पृष-अदि। १सभायाम् २धर्मोपदेशकपण्डितसमाजे च। ततः अस्त्यर्थे वलच्। पर्षद्वल सभासदि त्रि हेमच०।

पर्षिक त्रि० पर्षः पूरणम् अस्त्यर्थे ठन्। पूरयितव्ययुक्ते पुरोहिता० भावादौ यक्। पार्ष्क्य तद्भावे न०

पर्ष्वन् त्रि पृष-वनिप्। पूरयितव्ये ऋ० १०।१२६।३०

पल गतौ भ्वा० पर सक०सेट्। पलति अपालीत् पपाल मेघवत्। जित् अत्रसा०मलः पाल।

पल रक्षणे चुरा॰उभ॰सक॰सेट्। पालयति ते अपीपलत्-

पल न॰ पल—अच्। १मांसे न॰ अमरः "दशगुर्वक्षरोच्चारकालः प्राणः षडात्मकः। तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते" ज्योति॰ उक्ते २कालभेदे "पलं तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्। तोलकात्मतयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम्" ति॰त॰उक्ते ३मानभेदे "पलं कर्षचतुष्टयम्" उक्ते ४कर्षचतुष्टये ५पलाल तृणधाने पु॰ हेम॰ "स्वाङ्गाद्रवेयां विषुवद्दिनार्द्धे नतिः पलोऽस्य स एव तज्ज्ञैः" सि॰शि॰ उक्तायां विषुवद्दिनार्द्धे अस्य नतौ पु॰। [तम् बा॰ यत्। पालङ्क्याके राजनि॰।

पलका स्त्री पल++स्वार्थे क पलकं मांसं तत्पुष्टये हि-लत्र पु॰ बहुव्र॰+पृषो॰। १श्वेतवर्णे २श्वेतवर्णयुक्ते त्रि॰ यजु॰ २४,४ वेददी॰।

पलक्षार पु॰ पलस्य मांसस्य क्षार इव उत्पादकत्वात्। योषिते त्रिका॰ तत्पाकेन मांसोत्पत्तेस्तस्य तथात्वम्।

पलगण्ड पु॰ पलं मांसमिव मृदादिना भित्तिं गण्डति वद-नैकदेशमिव करोति गड़—वदनैकदेशे अच्। लेपके (राज) अमरः।

पलङ्कट त्रि॰ पलम् कटति आवरणोति भीत्या कट—आव-रणे बा॰ खच् मुम्। भीरौ त्रिका॰ भीत्या मांसस्या-वरणस्येव करणात्तस्य तथात्वम्। [धातौ त्रिका॰।

पलङ्कर पु॰ पल करोति कृ—बा॰ खच् मुम्। पित्ताख्ये

पलङ्कष पुंस्त्री॰ पलं कषति कष+बा॰खच् मुम्। १राक्षसे मेदि॰ स्त्रियां जातित्वात् ङीष्। २कणगुग्गुलौ पु॰ राजनि॰ ३लाक्षायाम् ४राक्षायां ५शुण्ठीर्य्यां ६किंशुके ७गुग्गुलुमात्रे ८गोक्षुरके च पु॰ मेदि॰। ९क्षुद्रगोक्षुरके १०महाश्रावण्यां ११मक्षिकायाञ्च स्त्री राजनि॰।

पलद त्रि॰ पलं मांसं ददाति सेवनेन दा—क। १सेवनेन मांसदारके द्रव्यभेदे २देशभेदे ३नगरीभेदे स्त्री। "कन्या पलदनगरग्रामह्रदोत्तरपदात्" पा॰ (कन्यादिपञ्चकोत्त-रपदाद्देशवाचिनो ह्रदाच्छः) भवार्थे छ। दक्षिणपलदीय दक्षिणपलदभवे त्रि॰। पलद्यां भवः पलद्या॰ अण्। पालद तत्र भवे त्रि॰ स्त्रियां ङीप्।

पलद्यादि पु॰ "प्रस्थोत्तरपदपलद्यादिकोपधादण्" पा॰ अण्—प्रत्ययनिमित्ते शब्दगणे स च गणः पा॰ग॰ उक्तो यथा "पलदी परिषद् रोमक पाहीक कलकीट बङ्ककीट लाङ्ककीट कमलकीकर कमलभिदा गोर्ग नैकती पारखा गूरसेन गोमती पटच्चर उदपान बलक्षीन"।

पलप्रिय पुंस्त्री॰ पलं प्रियमस्य। १काके राजनि॰ स्त्रियां टाप्। पलप्रियादयोऽप्यत्र २मांसप्रियमात्रे त्रि॰।

पलभा स्त्री पलस्य अक्षस्य भा। विषुवद्दिनार्द्धजायां यष्टु-च्छायायाम्। "मेषादिगे सायनसूर्यभागे दिनार्द्धजा भा पलभा भवेत् सा" ग्रहलाघवम्। अस्यभाविषुवद्भाद-योऽप्यत्र "भुजोऽक्षभा कोटिरिनाङ्गुलो वा" सि॰शि॰ "अक्षभा नाम पलभा"प्रमिता॰"रेखा प्राच्यपरा साध्या विषुवद्भा ग्रहस्तया" सू॰सि॰ रङ्गनाथव्याख्यायां वि-स्तरो दृश्यः।

पलल न॰पल-कलच्। १मांसे २पङ्के ३तिलचूर्णे च "पललं तिलकल्कः स्यात् तिलचूर्णञ्च पिष्टकम्" राजनि॰। पलं लाति ला—क। ४राक्षसे पु॰ स्त्री मेदि॰ स्त्रियां जाति-त्वात् ङीष्। "पलल मधुरं रुच्यं पित्तास्रबलपुष्टिदम्" पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम्" वैद्यकोक्ते (तिलकुटा) ५पिष्टकभेदे "पललं मलकृद् दृष्यं वातघ्नं कफपित्तकृत्। दुर्जरं गुरु दृष्यञ्च स्निग्धं मूत्रनिव-र्त्तकम्" तत्र तद्गुणा उक्ताः।

पललज्वर पु॰ पललं ज्वरयति ज्वर—णिच् अच्। क्षुद्रः। पित्ते धातौ हला॰। [ज्वर॰।

पललाशय पु॰ पललं आशेते आ+शी-अच्। गण्डरोगे

पलव पु॰ पल+बा॰ भावे अच् पलतो गतितो वाति रक्षति वा—क। जीवतां मृतमृत्स्नानां गतिरोधके (पोलो) मृत्स्नधारणसाधने यन्त्रभेदे त्रिका॰।

पलस्ति त्रि॰पल—बा॰ अस्ति। १पलिते २दीर्घायुषि ऋ॰१। ५२ १६ भा॰। [हारा॰।

पलाग्नि पु॰ पलस्य मांसस्य पाचकोऽग्निरिव। पित्ते धातौ

पलाग्र न॰ पलस्याग्रं सारांशः। मांससारांशे हरिवं॰ ८४६२ श्लो॰।

पलाङ्ग पुंस्त्री॰ पलप्रधानमङ्गं यस्य। गिरुमारे हारा॰

पलाण्डु पु॰ पलस्य मांसस्याण्डमिवाचरति अण्ड+बा-चारे क्विप् न्यङ्क्वा॰ कु। मूलकभेदे (पेयाज) "पला-ण्डुर्वनेऽस्य दुर्गन्धो सुखदूषकः। पलाण्डुस्तु गुणै-र्न्यूनो रसोनसदृशैर्गुणैः। स्वादुपाकरसोऽत्युष्णः कफ-जन्मातिपित्तलः। हरते केवलं वातं बलवीर्य्यकरो गुरुः" भावप्र॰। तद्भक्षणे दोषः "पलाण्डुं विड्वराहस्य कुक्कुटस्य ग्रामकुक्कुटम्। लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्" प्रा॰वि॰। एतज्ज्ञानतः कृतं। अत्र च पुनरुपयननिमित्ताह विष्णुः "लशुनपलाण्डुगृञ्जनतद्गु-

न्विविड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्ते भूयः संस्कारं कुर्यात्"।

पलाद पुंस्त्री पलमत्ति अद् उप०स०। १राक्षसे हेमच०। स्त्रियां जातित्वात् ङीष्। २मांसभोजिमात्रे त्रि०

पलादन पुंस्त्री० पलमदनं यस्य। १राक्षसे हेमच० स्त्रियां जातित्वात् ङीष्। २मांसभोजिमात्रे त्रि०।

पलान्न न० पलमिश्रणेन पक्वमन्नं मा०त०। (पोलाओ) ख्याते मांसादिमिश्रणेन पक्वान्नभेदे तत्र द्रव्यादिपाकराजेश्वरे उक्तानि यथा "शरावमात्रं छागमांसं तत्पादमितं हृतम् त्रिमाषकं त्वचं त्वक्कमेलाफलञ्च। शरावमिताश्चण्डुलाः। मरिचं तोलकद्वयम् एकमाषकं कुङ्कुमम्। आर्द्रकं तोलकद्वयमात्रं घृतोलकं लवणम्। शरावार्द्धप्रादमिता दाक्षा"। तत्पाकप्रकारो यथा "छागमांसं सूक्ष्मं घोरयित्वा गुप्तकप्रक्षेपपाककरणानन्तरं पात्रान्तरे तैलपत्रोपरि अल्पाश्चण्डुगन्धद्रव्येण सह प्रथमं सञ्ज्ञी कर्त्तव्यम्। ततश्चण्डुलं जलेनार्द्धसिद्धं कृत्वा चण्डुगाङ्गनपूर्वकमल्पाश्चण्डुगन्धद्रव्येण सह तन्मांसोपरि सञ्ज्ञी कर्त्तव्यम्। एवंप्रकारेण वारंवारं सञ्ज्ञीकृत्य तदुपरि अवशिष्टतत्तेपयेन दण्डद्वयं तप्ताङ्गारोपरि रक्षेत्"।

पलाप पु० पलमाप्यतेऽत्र बाहुलकेन आप–आधारे घञ्। १हस्तिकपोले २कण्ठपाशे च शब्दमाला। [गतौ हेम०।

पलायन न० परा–अय–ल्युट् रस्य लः। भीत्या स्थानान्तर

पलायित त्रि० परा+अय–णत्यर्थत्वात् कर्त्तरि क्त रस्य लः। १भीत्या पलायनकर्त्तरि २अपयाते च हेमच०।

पलाल पु०न०पल–कालन्। शस्यशून्ये धान्यकाण्डे (नाड़ा) (पोयाल) अमरः।

पलालदोहद पु० पलालं दोहदं यस्य। आम्रवृक्षे शब्दमाला पलालवेष्टने हि तस्य दृद्धिरिति तस्य तथात्वम्।

पलाली स्त्री इत०। मांसस्तूपे ततः अस्त्यर्थे पामादि० न ङीप्। पलालिन तद्युक्ते त्रि०।

पलाश न० पल–ततो भावे घञर्थे क पलं गतिं कमनमश्नुते अश–व्याप्तौ अच् उप०स०। १पत्रे अमरः पलं मांसस्तस्य अश्नमांसोत्पन्नत्वेन कारणतया तद्वा अश्नुते अश–व्याप्तौ अच् उप०स०। २खनामख्याते वृक्षभेदे तस्योत्पत्तिः शत०ब्रा० १२।४।४ "मांसेभ्य एवास्य पलाशः समभवत्। तस्मात् बहुरसो लोहितरसो लोहितमिव हि मांसं तेनैवैनं तद्रूपेण समर्धयन्नन्तरे खादिरा भवन्ति बाह्ये पालाशा अन्तराणि ह्यस्योनि बाह्यानि मांसानि च एवैनांस्तदायतने दधाति"। स च ब्रह्ममांसजत्वात् ब्रह्मरूपः यथोक्तं शत०ब्रा० ६।६।१७ "ब्रह्म वै पलाशः" इति "अश्वत्थरूपो भगवान् विष्णुरेव न संशयः। वटरूपो वटस्तद्वत् पलाशो ब्रह्मरूपदृक्" पद्मोक्त १६०अ०। तत्पर्यायगुणादि भावप्र० उक्तं यथा "पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः। क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः। पलाशो दीपनो हृद्यः सरोष्णो व्रणशुद्धिजित्। भग्नसन्धानकृद्दोषप्रहणार्शःकिमीन् हरेत्। तत्पुष्पं स्वादु पाके च कटुतिक्तं कषायकम्। वातलं कफपित्तास्रशुक्रजित् प्राहु शीतलम्। तद्दाहशमनं वातरक्तकुष्ठहरं परम्। फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम्। विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत्"। "नवपलाशपलाशवनम्" माघः २स्त्रियां ४शस्त्रां च स्त्री। पलं मांसमश्नाति अश–भोजने अच् उप० स०। ५राक्षसे पुंस्त्री०मेदि० स्त्रियां जातित्वात् ङीष्। तस्य मांसभोजिमात्रत्वात्। ६हरिदर्भे च ७मगधदेशे पु० शब्दरत्ना० ८पलाशायां स्त्री राजनि० गौरा० ङीष्। [स्वार्थे क। २पलाशवृक्षे शब्दच०।

पलाशक पु० पलाश+संज्ञायां कन्। १शस्त्रां जटाधरः।

पलाशपर्णी स्त्री पलाशस्येव पर्णमस्याः गौरा० ङीष्। अश्वगन्धायाम्। [गाडीहिङ्गो राजनि०।

पलाशाख्य पु० पलाशं तत्पुष्पगन्धमाख्याति आ+ख्यः क।

पलाशादि पु० "पलाशादिभ्यो वा" पा० विकारे अञ् प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "पलाश खदिर शिंशपा चन्दन पुलाक करीर शिरीष यवास विकङ्कत" पलाशस्य विकारः पालाश इत्यादि।

पलाशान्ता स्त्री पलाशानामन्तो मन्त्रवान् यस्याः। शब्दपलाशाम् राजनि०।

पलाशिन् पु०पलाशं विद्यतेऽस्य इनि। १वृक्षे अमरः २पलयुक्ते त्रि० स्त्रियां ङीप्। [यादवजिद्वदेशादौ।

पलाशिल त्रि० पलाशस्यादूरदेशादि काशा० इल्च। पला-

पलाशीय त्रि० पलाशमस्यास्ति छत्रा० छ। पलाशयुक्ते

पलिक त्रि० पलं मानत्वेनास्यास्ति ठन्। पलपरिमितद्रव्ये

पलिक्नी स्त्री पलिता इदा स्त्री "वन्दिनि क वा ङीप्" पा० क्न ङीप्। १श्वेतवेशायां इदायां स्त्रियां यजु० २० १५ वोत्रे च न। पलिता इत्येव। २वालवर्णिन्यां स्त्रीगन्धाम हेमच०।

पलिघ पु॰ परिभवत् । "परेश बाहुयोः" पा॰ रस्य लः । १कार्यघटे २प्राकारे ३गोगृहे च मेदि॰ । ४परिघशब्दार्थे च ।

पलित न॰पल--भावे क्त । १केशादौ जरया जातायां श्वेततायाम् २मांसादेर्वलिपरीतभावे च अमरः २दृढे त्रि॰ स्त्रियां पलिता । वेदे तु पलिक्नीत्युक्तम् । ४तापे ५शिलाले ६कर्टमे मेदि॰ । "पलेरितजादेश्च पः" उणा॰ अत--इतच् पस्य पः । ७केशपाके उज्ज्वलट॰ "क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः । पित्तं च केशान् पचति पलितं तेन जायते" माधवकरः । ततः अर्श॰ अच् । ८तद्युते त्रि॰ ।

पलितङ्करण न॰ अपलितं पलितं क्रियतेऽनेन-करणे ल्युट् समासः । अपलितस्य पलिततासम्पादने ।

पलितम्भविष्णु त्रि॰ अपलितः पलितो भवति अभूततद्भावे भू--कर्त्तरि खिष्णुच् समः । अपलिते पलिततया भूते तदर्थे कुक्कज् । पलितम्भावुक तत्रार्थे त्रि॰ ।

पल्य त्रि॰पल+यत् । उत्तमे वर्त्मना यन्त्रेण समाने अच्समा॰ । पल्यवर्त्मा च उत्तमतेजसि

पल्यङ्क पु॰परिगतोऽङ्कं रस्य लः । शय्यायाम् (पालङ्ग)अमरः

पल्ययन न॰परि+अय-करणे ल्युट् रस्य लः । (जोड़ार जिन्) पर्य्याणे हेमच॰ । [तवति ते अपपल्युलत् त ।

पल्यूल छेदने पूतौ च अद॰चुरा॰उभ॰सक॰सेट् । पल्यु-

पल्यूल छेदने पवित्रताकरणे च अद॰ चुरा॰उभ॰सक॰सेट् । पल्यूलयति ते अपपल्यूलत् त ।

पल्ल गतौ भ्वा॰पर॰सक॰ सेट् । पल्लति अपल्लीत् अपल्ल ।

पल्ल पु॰ पदं लाति ला--क पादस्थाने यत् । (पाबुड़) (नराड़) ख्याते प्राच्याधारभेदे मेदि॰ ।

पल्लव पु॰न॰ अर्द्ध॰ पल्यते सम्य॰ क्विप् पल्, लूयते लू--अप् कर्म॰ । १अभिनवे पल्लवके २तद्युक्तशाखायां ३विस्तारे ४बले ५अवलम्बकराने ६बलये मेदि॰ "पर्णपत्रादिसंघाते शाखायाः पल्लवो मतः" इत्युक्ते ७शाखादेः पर्णपत्रसमूहाये च । ८नवपत्रे अधुस्सूदनः ९विटपे १०अहङ्कारे ११आपणे मल्लर॰ ।

पल्लवक पु॰पल्लव इव कायति कै--क । १अतसभेदे २वेश्यापतौ च चुरा॰ स्वार्थे क । ३नवविल्वले पु॰न॰ पल्लवेन कायति कै--क । ४अयोलवले राजनि॰ ।

पल्लवाङ्कु पु॰ पल्लवप्रधानो ङुः मा॰त॰ । अयोलवले राजनि॰ । पल्लवङ्कुमादयोऽत्र ।

पल्लवाङ्कुर पु॰ पल्लवस्याङ्कुरो यत्र । शाखायाम् कृताम॰ ।

पल्लवाधार पु॰ ६त॰ । शाखायां मल्लर॰ ।

पल्लविक त्रि॰ पल्लवः इव अस्त्यस्य ठन् । कासुके हेमच॰

पल्लवित त्रि॰ पल्लवं नूतनपत्रं विस्तारो वा जातः अस्य तार॰ इतच् । १पल्लवयुक्ते २विस्तारयुक्ते च पल्लव + आचारे क्विप् ततः क्त । ३स्वाचारक्ते त्रि॰ मेदि॰ ।

पल्लविन् पु॰ पल्लव+अस्त्यर्थे इनि । वृक्षे मल्लर॰ ।

पल्लि(ल्ली) स्त्री पल्ल--इन् वा ङीप् । १क्षुद्रग्रामे २खाटग्राम् ३गेहे च । दीर्घान्तः ४नगरभेदे राजनि॰ । पल्लं स्वल्पमाश्रयत्वेनास्त्यस्याः अच् गौरा॰ ङीप् । ४स्वल्पगोधिकायाम् स्त्री हेमच॰ ।

पल्लिवाहु पु॰ पल्लिं क्षुद्रग्रामं वाहयति निर्वाहयति वह-ण्च् उप॰स॰ । वृक्षभेदे राजनि॰ ।

पल्वल न॰ पल--वल । क्षुद्रजलाशये (डोबा) "अल्पं सरः पल्वलं स्यात्तत्र चन्द्रर्क्षगे रवौ । न तिष्ठति जलं वाले तत्रत्यं वारि पाल्वलम् । पाल्वलं पार्थमिच्छन्ति गुरु स्याद् त्रिदोषकृत्" भावप्र॰ । चन्द्रर्क्षम् मृगशिरर्क्षम् ।

पव पु॰ पू--भावे अप् । १निष्पावे सूर्पवायुना धान्यादेर्निर्भूकरणे शाल्यादेः शोधने अमरः कर्त्तरि अच् । २वायौ मल्लर॰ ।

पवन न॰ पू--ल्युट् । १निष्पावे सूर्पवातेन धान्यादेः शोधने आधारे ल्युट् । २कुम्भकारस्य आमघटादिपाकस्थाने (पोयान) मेदि॰ । करणे ल्युट् । ३जले मल्लना॰ कर्त्तरि ल्यु । ४वायौ पु॰ अमरः पवनाच आवहादयः सप्त अनिलशब्दे १६४पृ॰दर्शिताः । वत्सरभेदे तेषां क्रमेणैकैकवत्सराधिपतित्वम् तच्च ज्योतिस्तत्त्वे उक्तं यथा "आवहः पराविवर्तगुरुयो सुनिभिर्भाग हारितः । आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः" गुरुवा शाकाहुः । गुरुवत्रकः ३५ भाक्तकः ७ ५प्रयते त्रि॰ मल्लर॰ । ६विष्णौ पु॰ "पवनः पावनोऽनलः" विष्णुसं॰ । [ऽप्यत् ।

पवनतनय पु॰ ६त॰ । १हनूमति २भीमे च पवनसुतादयो-

पवनविजय पु॰ पवनः श्वासवायुर्विजीयतेऽनेन । वि+जि-करणे अच् । देहस्थवायोः श्वासप्रश्वासगतिभेदेन शुभाशुभसूचके अन्यभेदे तत्प्रकारो मल्लर॰ उक्तो यथा "तत्रे वह्नौ रविः पृथ्वी चोदिरापः प्रकीर्त्तिताः । वायुस्तत्स्थायिनो राजन्दहरन्ध्रावभासकः । सूर्यः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः । वामनाशासु मध्यस्थानु कारवेदात्मनस्तथा । यदासार द्वाशुक्लसदा

कर्म समाचरेत् । स्थानसेवां तथा ध्यानं वाणिज्यं राज दर्शनम् । अन्यानि शुभकर्माणि कारयेत् प्रयत्नतः । दक्षनाडीप्रवाहे तु शनिर्भौमश्च सैंहिकः । इनश्चैव तथाग्येवं पापानामुदयो भवेत् । शुभाशुभविवेको हि ज्ञायते तु स्वरोदयात् । देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः । नाभेरधस्ताद्द्वयः कन्दो अङ्कुरास्तत्र निर्गताः । द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः । चक्रवच्च स्थितास्तास्तु सर्वाः प्राणहराः स्मृताः । तासां तिस्रोमता श्रेष्ठा वामदक्षिणमध्यमाः । वामा सोमात्मिका प्रोक्ता दक्षिणा रविरूपिणी । मध्यमा च भवेदग्निरूपिणी कालरूपिणी । वामा ह्यमृतरूपा च जगदाप्यायने स्थिता । दक्षिणा रौद्रभावेन जगच्छोषयते सदा । द्वयोर्वाहे तु मृत्युः स्यात् सर्वकार्यविनाशिनी । निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता । कारयेत् क्रूरकर्माणि प्राणे पिङ्गल संस्थिते । इडाचारे तथा सौम्यं चन्द्रसूर्यगतस्तथा । यात्रायां सर्वकार्येषु विषापहरणे इडा । भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका । उच्चाटमारणादीषु कर्मस्वेतेषु पिङ्गला । मैथुने चैव संग्रामे भोजने सिद्धिदायिका । शोभनेषु च कार्येषु यात्रायां विषकर्मणि । शान्तिमुक्त्यर्थसिद्धौ च इडायोज्या नराधिपैः । द्वाभ्यामेव प्रवाहे च क्रूरसौम्यविवर्जने । विषुवतीन्तु जानीयात् संचारेत्तु विचक्षणः । सौम्येषु शुभकार्येषु लाभादिजयजीविते । गमनागमने चैव वामा सर्वत्र पूजिता । युद्धादिभोजने घाते स्त्रीणाञ्चैव तु सङ्गमे । प्रशस्ता दक्षिणा नाडी प्रवेशे क्षुद्रकर्मणि । शुभाशुभानि कार्याणि लाभालाभौ जयाजयौ । जीवाजीवाय यत् पृच्छेत् सिध्यति च मध्यमा । वामाचारेऽथ वा दक्षे प्रत्यये यत्र नायकः । तत्रस्थः पृच्छते वस्तु तत्र सिद्धिर्न संशयः । वैश्वन्द्रो वामदेवस्तु यदा वहति चात्मनि । तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला । वामे वा दक्षिणे वापि यत्र संक्रमते सिरा । घोरे घोराणि कर्माणि सौम्ये वै मध्यमानि च । प्रस्थिते भागतो हंसे द्वाभ्यां वै सर्ववाहिनि । तदा मृत्युं विजानीयात् योगी योगविशारदः । यत्र यत्र स्थितः पृच्छेद्वाम दक्षिणसम्मुखः । तत्र तत्र समं दिग्याद्वातस्योदयनं सदा । अपतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा । वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा । जीवो जीवति जीवेन यच्छून्यं तत्स्वरो भवेत् । यत्किञ्चित् कार्यसंदिष्टं जयादि शुभलक्षणम् । तत्सर्वं पूर्वनाड्यान्तु जायते निर्विकल्पकम् । अन्यनाड्यादिपर्यन्तं पञ्चत्वसदाकृतम् । यावत् षष्ठीं तु पृच्छायां पूर्वायां प्रथमं जयेत् । रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः । वामाचारः समं वायुर्जायते कर्मसिद्धिदः । प्रवहे दक्षिणे भागे विषमे विषमाक्षरम् । अन्यत्र वामवाहे तु नाम वै विषमाक्षरम् । तदाशो जयमाप्नोति योधः संग्राममध्यतः । दक्षवातप्रवाहे तु यदि नाम समाक्षरम् । जायते नात्र सन्देहो नाडीमध्ये तु जयेत् । पिङ्गलान्तर्गते प्राणे समानीयाद्दवञ्जयेत् । यावन्नाड्युदयं चारस्तां दिशं यावदाजयेत् । न जातु जयते सोऽपि नात्र कार्या विचारणा । अथ संग्राममध्ये तु यत्र नाडी सदा वहेत् । सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्दिशेत् । जातस्वरे जयं विद्यान्मृतके स्मृतिमादिशेत् । जयं पराजयञ्चैव योजानाति स पण्डितः । वामे वा दक्षिणे वापि यत्र सञ्चरते सिरा । कृत्वा तत् पदमादौ तु यात्रां नयति शोभनाम् । यश्चिर्यप्रवाहे तु सति युद्धं समाचरेत् । तत्रस्थः पृच्छते यस्तु स साधुर्जयते ध्रुवम् । यां दिशं वहते वायुस्तां दिशं यावदाजयेत् । जयते नात्र सन्देहः इन्द्रो यद्यपतः स्थितः । मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः । चरस्थिरद्विभागे तास्तादृशे तादृशः क्रमात् । निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः । पृच्छकस्य वचः श्रुत्वा घण्टाकारेण जयेत् । वामे वा दक्षिणे वापि पञ्चतत्त्वस्थितः शिवे ! । अङ्गेऽग्निरध आपश्च तिर्यक् संस्थः प्रभञ्जनः । मध्ये तु पृथिवी ज्ञेया नभः सर्वत्र सर्वदा । अङ्गे मृत्युरधः शान्तिस्तिर्यक् चोच्चाटयेत् सुधीः । मध्ये ज्ञानं विजानीयान् मोक्षः सर्वत्र सर्वगे" ।

पवनव्याधि पु० पवनः वातरोगभेदो व्याधिरस्य । उदरे यादवक्षत्रियभेदे त्रिका० ।

पवनात्मज पु० ६त० । १हनुमति २भीमे ३वह्नौ च "वायोरग्निः" इति श्रुतेस्तस्य वायुजातत्वात्तत्सुतत्वम् । पवनप्रभवादयोऽप्यत्र ।

पवनाल पु० पवनायालति पर्य्याप्नोति अल—पर्य्याप्तौ अच् ४त० । (देधान) धान्यभेदे "पवनालो हिमः स्वादुः शोषितः श्लेष्मपित्तजित् । अल्पमूत्रकरो रूक्षः कृमिदोषकृत् कथितो बुधैः" भावप्र० ।

पवनाश पुंस्त्री० पवनमश्नाति अश–अण् उप०स०। १सर्पे स्त्रियां जातित्वात् ङीष्। २वायुभक्षके त्रि० हला०।

पवनाशनाश पु०पवनः अशनमस्य पवनाशनं सर्पमश्नाति अश–अण्। १गरुड़े २मयूरे हला०स्त्रियां जातित्वात् ङीष्।

पवनेश्वर न०पवनेन स्थापित ईश्वरः ईश्वरलिङ्गम्। काशीस्थे शिवलिङ्गभेदे काशीख० १३अ०।

पवनेष्ट पु० पवने पवनदृष्टौ इष्टः। महानिम्बे रत्नमा०।

पवनोम्बुज न० पवनं पवित्रमम्बुजमिव पृषो०। पद्मफले शब्दच० पवनाम्बुजमित्येव तत्र पाठः साधुः।

पवमान पु० पू–ताच्छील्ये चानश्। १वायौ अमरः २गार्हपत्येऽग्नौ "अथ यः पवमानस्तु निर्मन्थ्योऽग्निः स उच्यते। स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः" मनुस्मृ० ७८अ०। ३सोमे च तदधिकृत्य प्रवृत्तं सूक्तम् अथ। पावमान सोमदेवताके सूक्तभेदे तानि च सूक्तानि क्र० ९ १सूक्तावधि षट्पटिसूक्तात्मकानि स्वादिष्ठयेत्यादिकानि हिन्वन्तीत्याद्यन्तानि।

पवमानात्मज पु० ६त०। वह्निभेदे "पवमानात्मजो वह्निर्हव्यवाहन उच्यते" मनुस्मृ० ४८अ०। तस्य "वायोरग्निः" इति श्रुतेर्वायुजत्वात्तथात्वम्। [रिक्थे तदपत्ये पुंस्त्री०।

पवष्टुरिक पु० ऋषिभेदे तस्यापत्यम् शुभ्रा० ढक्। पावष्टु-

पवाका स्त्री पू–आक। वालायाम् उज्ज्वलदत्तः।

पवि पु०पू–शोधे इ। १वज्रे अमरः २वाचि स्त्री निघण्टुः।

पवित त्रि० पूङ् शोधे "पूङश्च" पा० वा इट्। "पूङः क्लाच" पा० न कित्त्वम्। १पवित्रे २मरिचे न० राजनि०।

पवित्र पु०न० पूयते आज्यमनेन पू–करणे इत्र। १आज्यसंस्कारके २कुशद्वये उत्पवनशब्दे तल्लक्षणं ११२२पृ० दर्शितम् "अमन्त्रगर्भिणं शाप्यं कौशं द्विदलमेव च। प्राद्देशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" कर्मप्र०। ३अनाभिषावेष्टने पवित्रतासाधके द्रव्ये च यज्ञोपवीते त्रिका० पवित्रारोपणशब्दे दृश्यम्। ४विष्णौ "पवित्रं मङ्गलं परम्" विष्णुसं०। ५वर्षणे हेमाद्रौ ७अयसि न०मेदि०। ८घर्षणे न० विश्वः ९अर्घ्योपकरणे हेमच०। १०घृते ११मधुनि च राजनि०। १२तिलवृक्षे १३पुत्रजीववृक्षे पु० राजनि० १४व्रतशौचादिना १५शुद्धे त्रि० अमरः। १६तन्त्रयां स्त्री शब्दमा० १७नदीभेदे हेमच० १८हरिद्रायाम् १९अश्वत्थवृक्षे च स्त्री राजनि०।

पवित्रक पु० पवित्रमिव कायति कै–क स्वार्थे क, संज्ञायां वन् वा। १पवित्रशब्दार्थे २अश्वत्थवृक्षे ३उदुम्बरवृक्षे ४कुशे ५दूर्वाकवृक्षे राजनि० ६शणसूत्रनिर्मिते जाले मनुस्मृधारणसाधने द्रव्यभेदे न० अमरः।

पवित्रधान्य न० नित्यकर्म०। यवे राजनि०।

पवित्रारोप(ह)ण न० ६त०। विष्णुप्रभृतिदेवसम्प्रदाने यज्ञोपवीतदाने देवभेदेन तिथिभेदादौ तद्दानप्रकारश्च हेमा० व्र० विष्णुरहस्ये उक्तो यथा

"तस्य कृष्णसमायुक्तैर्नरैर्विष्णुपरायणैः। वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेः। श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्। सिंहस्थे वा रवौ कार्य्यं कन्यायान्तु गतेऽथ वा। तस्यामेव तिथौ सम्यक् तुलास्थे न कथञ्चन। विष्णोरुद्रस्य सूर्यस्य विरिञ्चेः शक्रशक्तयोश्च। देव्याश्चाधिनाथस्य मातॄणां धनदस्य च। पवित्रारोपणं कार्य्यमन्येषाञ्च यथाविधि। अकृत्वा फलहानिः स्यात् संवत्सरकृतार्चनात्। सर्वेषान्तु महत् पुण्यं पवित्रारोपणे कृते। तिथयस्तत्त्वविज्ञाताः पृथगुक्तास्तपोधन!। प्रतिपद्दनदस्योक्ता पवित्रारोपणे तिथिः। त्रिया देव्या द्वितीया तु तिथीनामुत्तमा तिथिः। तृतीया तु भवान्यास्तु चतुर्थी तत्सुतस्य तु। पञ्चमी नागराजस्य षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता दुर्गायाश्चाष्टमी स्मृता। मातॄणां नवमी प्रोक्ता दशमी वासुकेः स्मृता। एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः। त्रयोदशी मनङ्गस्य शिवस्योक्ता चतुर्दशी। मम देवमुनिश्रेष्ठ! पौर्णमासी तिथिः स्मृता। यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणस्य च। सर्वेषामेव देवानां तथा कार्य्यं यथाविधि। प्रथमं दर्भसूत्रन्तु पद्मसूत्रं ततःपरम्। ततः क्षौमं सुपुण्यं स्यात् पट्टसूत्रं ततः परम्। शुचि कार्पाससूत्रेण निर्मितं वा शुभाशुभम्। शुचिर्भूत्वा शुचौ देशे कारयेत् प्रयत्नतः। तद्विधानोपयुक्तन्तु यथोक्तफलदायकम्। कन्या कर्त्तयते सूत्रं नारी वाथ पतिव्रता। विधवा साधुशीला वा सूत्रमेतत्तु कर्त्तयेत्। केशयुक्तं क्षतं दग्धं मद्यरक्तादिदूषितम्। मलिनं नीलरक्तं वा प्रयत्नेन विवर्जयेत्। यथोक्तं सूत्रमादाय त्रिगुणं त्रिः प्रयोजयेत्। पवित्रं तेन कुर्वीत कनिष्ठोत्तममध्यमम्। कनिष्ठं तन्तुभिर्ज्ञेयं सप्तविंशतिभिः शुभम्। मर्त्यलोके तु तत्कीर्त्तिसुखायुर्द्धनपुत्रदम्। चतुःपञ्चाशता ज्ञेयं तन्तूनां मध्यमं परम्। दिव्यभोगावहं पुण्यं स्वर्गावासप्रदम्। उत्तमं

चैव तन्तूनां शतमष्टोत्तरं शतम्। दत्त्वा तद्दाष्टदेवाय विष्णुलोकं भजेद्वरः। अष्टोत्तरसहस्रं तु तन्तूनां परिसंख्यया। वनमाला स्मृता विष्णोर्दत्ता भक्तिप्रदा हि वा। कनिष्ठं नाभिमात्रं स्यादूरुमात्रन्तु मध्यमम्। पवित्रं चोत्तमं प्रोक्तं जानुमात्रं प्रमाणतः। वनमाला प्रमाणेन प्रतिमायाः प्रयोजयते। नराणां जन्मसंसार दुःखमृत्युप्रणाशिनी। कनिष्ठे द्वादशैवोक्ता मध्यमे द्विगुणाः स्मृताः। त्रिगुणास्तूत्तमे प्रोक्ता अन्यथस्तु पवित्रके। शतमष्टोत्तरं कार्यं" पन्नीनां तु विधानतः। मुनीन्द्र! वनमालायां विष्णुपूजनतत्पर!। अधिवासनसूत्रे तु अन्यथो द्वादश स्मृताः। तत्त्वन्यास विधानं तु श्रूयतां गुह्यकोत्तम"। इत्यपक्रमे तत्त्वन्यास स्तत उक्तः "पवित्रं तेन विख्यातं ब्रह्मतेजो हि गीयते। विष्णाख्यया तु विख्यातं तदा लोके निगद्यते। तदेव सूत्ररूपेण यज्ञेशः कर्मणः प्रभुः। तदेव त्रिगुणीभूतं नारायणसमाख्यया। त्रिवेदात्मा त्रिदेवात्मा त्र्यक्षरः प्रणवः स्मृतः। ते पर्वतादयस्तु स्मृता वराङ्गाङ्गमाश्रिताः। संघातेन च तन्तूनां नवात्मा परिकीर्त्तितः। तन्तूनां प्रथमो देवो वासुदेवो जगद्गुरुः। हलायुधो द्वितीयस्तु प्रद्युम्नश्च तृतीयकः। अपरे त्वनिरुद्धस्तु ततो नारायणः प्रभुः। ब्रह्माविष्णुस्तथा नृणां वरारोहे समाश्रिताः। अधिदैवेन रूपेण अध्यात्मे च निबोध मे। मनोबुद्धिरहङ्कारस्तन्मात्राणि तथैव च। जीवश्चेति नवैतत्तु अध्यात्मे सुव्यवस्थितम्। द्यौरन्तरिक्षं पृथिवी भूर्भुवःस्वस्तथैव च। अकारस्याप्युकारस्य मकारस्याधिभूतकम्। अग्नित्रयं तथा कर्म त्रयस्तु सदनत्रयम्। ज्ञेयं पवित्रे तद्विज्ञानधिदैवसदाहरेत्"। शिवपवित्रलक्षणम् "एकादशाथ वा स्वर्णैस्त्रिंशता वाष्टयुक्तया। पञ्चशता वा कर्त्तव्यं तुल्यपन्थप्रमाणकम्। द्वादशाङ्गुलमानानि त्र्यायामाष्टाङ्गुलानि च। विस्तारमानानि चतुरङ्गुलिकानि वा। तथैव पिण्डिकास्वर्णं चतुर्थं सार्वदैवतम्। साङ्गावतारकं कार्यं पवित्रमतिसुन्दरम्"। पवित्रारोहणमन्त्र "आषाढशुक्लपक्षस्य श्रावणस्य च। पवित्रारोहणं कुर्याद् इत्यनीतिवरं परम्" कालिकापु० ५८अ०। [न्यायन तद्गोत्रापत्ये प्रोक्तो०।

पविन्द पु० ऋषिभेदे तस्य गोत्रापत्यम् अश्व० फञ्। पाविन्दि।

पवीठ त्रि० पू-क्वच् वेदे दृढो दीर्घः। शोधके ऋ० ९ ४ ४

पवीनस पु० गर्भोपद्रावके असुरभेदे अथ० ८ ६ २

पवीर न० १आयुधे "पविः वज्रो भवति तद्विपुनातिकार्यं तद्वत् पवीरमायुधम्" निरु० १२ २०। पवि+स्वार्थे ईर। २वज्रे ऋ० १० ६० २"पविधीरास्त्रि र पूर्वीरो दीर्घः। ३स्फाले यजु० १२ ७१ वेददी०।

पवीरव पु० पवे रव वेदे दीर्घः। वज्रशब्दे ऋ० १ १७४ ४भा०

पव्य त्रि० पू-क्यत्। १शोध्ये २यज्ञपात्रादौ च ऋ० ९ ८६ ३४ तत्र "पव्यया पात्राणि" भा० यज्ञःस्थाने याट्।

पश(ष-स) बाधे विहतौ भ्वा०उभ०सक० सेट्। पश(ष)-(स)ति ते अपशी(षी)(सी)त् अपाशी(षी)(सी)त् अपशि(षि)(सि)ष्ट। पपाश(ष)(स) बेशे(षे)(से)। इन्त्वान्त्वस्यैव अभ्यासस्य सम् यङ्यङ्लुकोः वि० को० पम्पस्यति—पम्पसीति। तालव्यान्तस्य तथेत्यन्ये।

पश(ष स) स्पर्शे, गतौ अनुपसर्गात् बन्धे बाधे च अट्०पु० उभ०सक०सेट्। पश(ष)(स)यति ते अपपश(ष)(स)त् त।

पश(ष-स) बन्धे चुरा० उभ०सक०सेट्। पाश(ष)(स)यति ते अपीपश(ष)(स) त। [१।१२२०श्लो० २पशुतत्सम्बन्धिनि च।

पशव्य त्रि०पशवे हितम् तस्येदं वा यत्। १पशुहिते वाच०

पशु पु० सर्वजीवविशेषे पश्यति दृश—कु पशादेशः। ब्रह्मादौ लोमवत्ताङ्गुलवति १जन्तुभेदे २दर्पणार्वेऽव्यवहृ अमरः। ३प्रमत्ते ४देवे ५प्राणिमात्रे मेदिनी० ६ज्ञाने "अनादेये पशुस्थानः" मीमांस०। ७यज्ञभेदे धरणिः तस्य पशुसाध्यत्वात् तथात्वम्। "न तो पशौ करोति" श्रुतौ पशुः पशुसाध्या यागः। ७यज्ञोदुम्बरे मेदिनी०। एतन्मोक्षे बाधकानां भावभेदे तत्र जन्तुभेदानां सामान्यभेदा यथा "गोरश्विरजोऽश्वोऽश्वतरो गर्दभो गवयश्चेति सप्त ग्राम्याः पशवः। सहिरण्यानर अश्वतरोष्ट्रपसरु पृषत ऋगाश्चेति सप्तारण्याः पशवः" दुर्गोत्सवतं०। ज्ञानादौ पशुपदप्रयोगमाह ब्रह्मपार्श्वे "उष्ट्रो वा यदि वा मेषश्छागो वा यदि वा हयः। पशुस्थाने विजानीयात् पशुशब्दोऽभिधीयते"। पशुधिष्ठातृदेवताभेदा यथा "सिंहे वसति दुर्गा च वरभे च प्रजापतिः। एणे च वसते वायुर्मेषे चैव च चन्द्रमाः। नक्षत्राणि च शशके जम्बुसारे हरिः स्वयम्। शतक्रतुर्गवां पृष्ठे नवमे मुनयश्च च। ब्रह्मणे ब्रह्मणान्यष्टौ गजे विष्णुर्गणेश्वरः। अन्ये तु द्वादशादित्या ब्राह्मणे सर्वदेवताः। ब्रह्मा तु चमरे चैव छागले तु तथाऽनलः। एतत्सारं कारणादेते पूज्या वन्द्याः प्रयत्नतः" इति पशुसूक्त-

तन्त्रे १९ पटले। बल्यर्थपशुलक्षणादि यथा "निवेदयेत् गोधनमुष्ट्रं माहुषं वा सुखापकम्। वराहं वाथ छागलं चमरं वाऽश्वतन्तवा। मेषञ्चाथ वराहञ्च गोधिकाञ्च निवेदयेत्" मत्स्यसूक्ते "लुखापञ्च तथा खड्गं चमरञ्च वराहकम्। अश्वं मत्स्यं गोधां माहुषं तदनन्तरम्। न दद्याद्ब्राह्मणो मद्यं माहुषञ्च तथा रुरुम्। लैपलिकान् विवर्णांश्च माहुषान्न कपीनपि। संवत्सरात् परं छागं यावत् स्यात्तु त्रिहायणम्। वराहदलसदृशविशाखाभ्यां सुशोभनम्। मदगन्धसमायुक्तं रोमराजिविराजितम्। लक्ष्णं वाऽश्वकञ्चैव छत्रौ द्वादशवार्षिकम्"। जातिभेदे वर्णविशेषमाह तत्रैव "श्वेतञ्च छागलञ्चैव ब्राह्मणस्य विधीयते। रक्तं श्वेतं क्षत्रियस्य वैश्यस्य गौरमेव च। नानावर्णं हि शूद्रस्य सर्वमामलनप्रभम्" योगिनीतन्त्रे "पशूनाञ्चैव षण्मासात् परतश्च बलिर्भवेत्। छागलः प्रणः श्वेतो वा द्विवर्षात् परतो यदि। "तथा चाजं छागञ्चैव छागञ्च पार्वतीयकम्। मूषिकञ्च वराहञ्च चमरीमेव च"।

रुद्रयामले उत्तरख०६प० पशुभावलक्षणं यथा

"पशुभावस्थितां नाथ! देवतां शृणु विस्तरात्। दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः। अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः। केवलं शिवपूजाञ्च यः करोति च स साधकः। पशूनां मध्यमः प्रोक्तः शिवया सह चोत्तमः। केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः। भूतानां देवतानाञ्च सेवां कुर्वन्ति ये सदा। पशूनामधमाः प्रोक्ता नरकस्था न संशयः। त्वत्सेवां मम सेवाञ्च ब्रह्मविष्ण्वादिसेवनम्। कृत्वान्य सर्वभूतानां नायिकानां महाप्रभो!। यश्चिन्तयेत् भूतिनीनां ततः सेवां शुभप्रदाम्। यः पशुर्ब्रह्मलक्ष्मीदिसेवाञ्च कुरुते सदा। तथा श्रीतारकब्रह्मसेवां ये वा नरोत्तमाः। तेषामसाध्यभूतादिदेवताः सर्वकामदाः। वर्जयेत् पशुमार्गेण विष्णुपूजापरोजनः" द्वितीयपटले। "नित्यं श्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्। देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्। गुरोराज्ञापालनञ्च देवतानित्यपूजनम्। पशुभावस्थितो मर्त्यो मन्त्रसिद्धिं लभेद्ध्रुवम्"। यज्ञियपशुलक्षणं च आ०ट० ४९१ स्मृतादौ द्रष्टव्यः। दृष्टैवक्तमप्रसिद्धे जीवालम्भे पशुप्रतिशब्दे द्रष्टव्यम्। :१०पाणौ पतिविशब्दे द्रष्टव्यम्।

पशुकल्प पु० पशोः यज्ञाङ्गपशोः कल्पोविधानम्। "अथ पशुकल्पः" आ०ट० १ ११। स्मृतादौ विहिते पशूपाकरणादिसंस्कारादिकर्मणि।

पशुगायत्री स्त्री०। पशोः कर्णे जप्यमन्त्रभेदे स च "पशुपाशाय विद्महे विश्वकर्मणे धीमहि। तन्नो जीवः प्रचोदयात्" इत्येवं रूपः। [व्याचारे भाग० ५ २६ २१।

पशुचर्या स्त्री पशोरिव चर्याचारः। पशोरिव निर्ल०

पशुतन्त्र न० पशूनां तन्त्रम्। १अनेकोद्देशेन एकजातीयैक पशुग्रहणे आश्व०श्रौ०१ ६ १७ पशोस्तन्त्रम्। २पशुबन्धेन च। कात्या०श्रौ० ५ १। १९। ३पशुकल्पे च।

पशुद त्रि० पशुं ददाति दा—क। १पशुदातरि २कुमारानुचरमात्रभेदे स्त्री भा०श० ४७अ०।

पशुदेवता स्त्री पशुधिष्ठात्री देवता पशुसम्प्रदानं देवता वा। १पशुधिष्ठात्र्यां देवतायाम्। पशुभेदे देवताभेदाच्च पशुशब्दे दर्शिताः। २पशुसम्प्रदाने देवताभेदे च।

पशुधर्म्म पु० पशूनामिव यथेष्टमैथुनादिरूपो धर्मः। यथेष्टमैथुनादिसम्पादके पशुतुल्यधर्मे मनुः ९ ६६ श्लो०।

पशुनाथ पु० ६त०। १शिवे देवच० २पशुस्वामिनि च।

पशुप त्रि० पशून् पाति—क। १पशुपालके २पशूनां पत्नौ च।

पशुपति पु० पशूनां जीवानां पतिः। १महेश्वरे शिवे १पशुस्वामिनि। यजुर्वेदीयकर्मकाण्डपद्धतिकारके कृष्णायुध सहोदरे २पक्षिवृक्षभेदे च। शिवस्य तत्तामविरक्तिर्यथा "अयञ्च सर्वविद्यानां पतिराद्यः सनातनः। अहं वै पतितो येन पशुमध्ये (जीवमध्ये) व्यवस्थितः। अतः पशुपतिर्नाम त्वं लोके ख्यातिमेष्यसि" वराहपु०। पशुपतिनोपदिष्टम् अण्। पाशुपत शैवाचमभेदे तत्र प्रतिपाद्यविषयाश्च सर्वदर्शनसंग्रहे नकुलीशपञ्चमदर्शनानन्तरं दर्शिता यथा

"तत्रिसं परमेश्वरः कर्मादिनिरपेक्षः कारणमिति पक्षं वैशेषिकनैयायिकदोषदूषितत्वात् प्रतिक्षिपन्तः के चन माहेश्वराः शैवागमसिद्धान्तप्रत्यं यथावद्दीक्षयाद्याः कर्मादिसापेक्षः परमेश्वरः कारणमिति पक्षं कक्षीकुर्वाणाः प्रकारान्तरमक्षिपन्ति। तत्र पशुपतिपाशभेदात् त्रयः पदार्था इति। तदुक्तं तन्त्रतत्त्वज्ञैः "त्रिपदार्थं स्वतन्त्रादं महामन्त्रं जगद्गुरुः। सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनः" इति अस्यार्थः त्रयः पशुपतिपाशाः पदार्था यस्मिन् सन्ति तत्त्रिपदाख्य विद्याक्रियायोगचर्याख्याश्चत्वारः पादा यस्मिन् तत्त्रिपदचरणं महामन्त्रमिति। तत्र पशूनामस्वतन्त्रत्वात

पाशानामचैतन्यात् तद्विलक्षणस्य पत्युः प्रथमसद्भावः। चेतनत्वसाधर्म्यात् पशूनां तदानन्त्यम्। अवशिष्टानां पाशानामन्ते विनिवेश इति क्रमनियमः। दीक्षायाः परमपुरुषार्थहेतुत्वात्तस्याश्च पशुपाशेश्वरस्वरूपनिर्णयोपायभूतेन मन्त्रमन्त्रेश्वरादिमाहात्म्यनिश्चायकेन ज्ञानेन विना निष्पादयितुमशक्यत्वात् तदवबोधकस्य विद्यापादस्य प्राथम्यम्। अनेकविधसाङ्गदीक्षाविधिप्रदर्शकस्य क्रियापादस्य तदानन्त्यम्। योगेन विना नाभिमतप्राप्तिरिति साङ्गयोगज्ञापकस्य योगपादस्य तदुत्तरत्वम्। विहिताचरणनिषिद्धवर्जनरूपां चर्यां विना योगोऽपि न निर्वहतीति तत्प्रतिपादकस्य चर्यापादस्य चरमत्वमिति विवेकः। तत्र पतिपदार्थः शिवोऽभिमतः। सकलात्मनां विद्येश्वरादीनाञ्च यद्यपि शिवत्वमस्ति तथापि परमेश्वरपारतन्त्र्यात् स्वातन्त्र्यं नास्ति। ततश्च तदुपकरणभुवनादीनां भावानां सन्निवेशविशिष्टत्वेन कार्यत्वमवगम्यते। तेन च कार्यत्वेनैषां बुद्धिमत्पूर्वकत्वमनुमीयत इत्यनुमानवशात् परमेश्वरप्रसिद्धिरुपपद्यते। ननु देहस्यैव तावत्कार्यत्वमसिद्धं न हि क्वचित् केनचित् कदाचित् देहः क्रियमाणो दृष्टचरः। सत्यं तथापि न केनचित् क्रियमाणत्वं देहस्य दृष्टमिति कर्तृदर्शनापह्नवो न युज्यते तस्यानुमेयत्वेनाप्युपपत्तेः। देहादिकं कार्यं भवितुमर्हति सन्निवेशविशिष्टत्वात् विनश्वरत्वाद्वा घटादिवत् तेन च कार्यत्वेन बुद्धिमत्पूर्वकत्वमनुमातुं सुकरमेव। विमतं सकर्तृकं कार्यत्वात् घटवत् यदुक्तसाधनं तदुक्तसाध्यं न यदेवं न तदेवं यथात्मादि। परमेश्वरानुमानप्रामाण्यप्रसाधनानुमानमन्यत्राकारीत्युपरम्यते "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा" इति न्यायेन प्राणिकृतकर्मापेक्षया परमेश्वरस्य कर्तृत्वोपपत्तेः। न च स्वातन्त्र्यविरहितिरिति वाच्यं करणापेक्षया कर्तुः स्वातन्त्र्यविरहितेरनुपलम्भात् कोशाध्यक्षापेक्षस्य राज्ञः प्रसादादिना दानवत् यथोक्तं सिद्धगुरुभिः "स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता। कर्तुः स्वातन्त्र्यमेतद्धि न कर्माद्यनपेक्षया" इति। तथा च तत्तत्कर्माशयवशाद्भोगतत्साधनतदुपादानादिविशेषज्ञः। ततश्च कर्ता अनुमानादिसिद्ध इति सिद्धम्। तदिदमुक्तं शास्त्रभवद्भिर्दृष्टस्मृतिभिः "इह भोग्यभोगसाधनतदुपादानादि यो विजानाति। तस्मैतेभूतस्मृहीदं पुंस्कर्मा शयविपाकस्मिति"। अन्यत्रापि "विवादाध्यासितं सर्वं बुद्धिमत्पूर्वकर्तृकम्। कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा" इति सर्वोत्कृष्टत्वादेवास्य सर्वज्ञत्वं सिद्धम् अज्ञस्य करणासम्भवात्। उक्तञ्च श्रीमन्मृगेन्द्रैः "सर्वज्ञः सर्वकर्तृत्वात् साधनाङ्गफलैः सह। यो यज्जानाति कुरुते स तदेवेति सुस्थितम्" इति। अस्तु तर्हि स्वतन्त्र ईश्वरः कर्ता न तु तावदशरीरः घटादिकार्यस्य शरीरवता कुलालादिना क्रियमाणत्वदर्शनात् शरीरवत्त्वे चास्मादादिवदीश्वरः क्लेशयुक्तोऽसर्वज्ञः परिमितशक्तिं प्राप्नुयादिति चेन्नैवं संस्याः अशरीरस्याप्यात्मनः स्वशरीरसन्दादौ कर्तृत्वदर्शनादभ्युपगम्यापि ब्रूमहे शरीरवत्त्वेऽपि भगवतो न प्राकृतदोषानुषङ्गः। परमेश्वरस्य हि मलकर्मादिपाशजालासम्भवेन प्राकृतं शरीरं न भवति किन्तु शास्त्रं शक्तिरूपैरीशानादिभिः पञ्चभिर्मन्त्रैर्मस्तकादिकल्पनायामीशानमस्तकस्तत्पुरुषवक्त्रोऽघोरहृदयोवामदेवगुह्यः सद्योजातपादः ईश्वर इति प्रसिद्धा। यथाक्रमानुग्रहतिरोभावादानलक्षणस्थितिलक्षणोद्भवलक्षणलयपञ्चककारणं स्वेच्छानिर्मितं तच्छरीरं न चास्मच्छरीरसदृशम्। तदुक्तं श्रीमन्मृगेन्द्रे "मलाद्यसम्भवाच्छक्तं वपुर्नैतादृशं प्रभोः" इति। अन्यत्रापि "तदपुः पञ्चभिर्मन्त्रैः पञ्चलक्षणयोनिभिः। ईश तत्पुरुषाघोरवामाद्यैर्मस्तकादिमत्" इति। ननु पञ्चवक्त्रस्त्रिपञ्चदृगित्यादिना आगमेषु परमेश्वरस्य सुस्पष्ट एव शरीरेन्द्रियादियोगः श्रूयत इति चेत्सत्यं निराकारे ध्यानपूजाद्यसम्भवेन भक्तानुग्रहकरणाय तत्तदाकारग्रहणाविरोधात्। तदुक्तं श्रीमत्पौष्करे "साधकस्य तु रक्षार्थं तस्य रूपमिदं स्मृतम्" इति अन्यत्रापि "आकारवांस्त्वं नियमादुपास्यो न वस्त्वनाकारसुपैति बुद्धिः" इति। लक्षणपञ्चकं च प्रपञ्चितं भोजराजेन "बहुविधं तल्लक्षणं सृष्टिस्थितिसंहारतिरोभावाः। तद्वदनुग्रहकरणं प्रोक्तं सततोदितस्यास्य" इति। एतच्च लक्षणपञ्चकं शुद्धाध्वविषये साक्षाच्छिवकर्तृकं शुद्धाध्वविषये त्वनन्तादिद्वारेणेति विवेकः। तदुक्तं श्रीमत्करणे "शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोहितो प्रभोः" इति। एवञ्च शिवशब्देन शिवत्वयोगिनां मन्त्रेश्वरमहेश्वरसकलशिवानां सर्वाणकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पतिपदार्थेन संग्रहः कृत इति बोद्धव्यम्। तदित्थं पतिपदार्थो निरूपितः। पशुपति

पशुपदार्थो निरूप्यते। अणुक्षेत्रज्ञादिपदवेदनीयो जीवात्मा पशुः न तु चार्वाकादिवद्देहादिरूपः "नान्यदृष्टं क्वचन्यः" इति न्यायेन प्रतिसन्धानानुपपत्तेः। नापि नैयायिकादिवत् प्रकाश्यः अनवस्थाप्रसङ्गात्। तदुक्तम् "आत्मा यदि भवेन्नेयस्तस्य माता भवेत् परः। पर आत्मा तदानीं स्यात् स परो यदि दृश्यते" इति। न च जैनवद्व्यापकः नापि बौद्धवत् क्षणिकः देशकालाभ्यामनवच्छिन्नत्वात्। तदुक्तम् "अनवच्छिन्नसद्भावं यस्तु यद्देशकालतः। तन्नित्यं विभु चेच्छन्नीत्यात्मनो विभुनित्यता" इति। नाप्यद्वैतवादिनामिवैकः, भोगप्रतिनियमस्य पुरुषबहुत्वज्ञापकस्य सम्भवात्। नापि साङ्ख्यानामिवाकर्त्ता वाग्जालापोहने नित्यनिरतिशयदृक्क्रियादिरूपचैतन्यात्मकशिवत्वश्रवणात्। तदुक्तं "पाशाने शिवतामुते:" इति "चैतन्य दृक्क्रियारूपं तदस्यात्मनि सर्वदा। सर्वतश्च यतो सूक्ष्मो श्रूयते सर्वतो मुखम्" तत्त्वप्रकाशेऽपि "सूक्ष्मात्मानोऽपि शिवाः किञ्चैते सदेशवादतो सूक्ष्माः। सोऽनन्तदृक्क्रिय एको विज्ञेयः पञ्चमन्त्रततुः" इति। पशुस्त्रिविधः विज्ञानाकलप्रलयाकलसकलभेदात् तत्र प्रथमो विज्ञानयोगसन्न्यासैर्भोगेन वा कर्मक्षये सति कर्मक्षयार्थस्य कलादिभोगवत्त्वाभावात् केवलमलमात्रयुक्तो विज्ञानाकल इति व्यपदिश्यते। द्वितीयस्तु प्रलयेन कलादेरुपसंहारात् मलकर्मयुक्तः प्रलयाकल इति व्यपदिश्यते। तृतीयस्तु मलमायाकर्मात्मकबन्धत्रयसहितः सकल इति संज्ञ्यते। तत्र प्रथमो द्विप्रकारो भवति समाप्तकलुषासमाप्तकलुषभेदात्। तत्राद्यानुकालुष्यपरिपाकवतः पुरुषधौरेयात् अधिकारयोग्यानतुग्रहानलादिविद्येश्वराष्टपदं प्रापयति। तद्विद्येश्वराष्टकं निर्दिष्टं षडदैवत्ये "अनन्तश्चैव सूक्ष्मश्च तथैव च शिवोत्तमः। एकनेत्रस्तथैवैकरुद्रश्चापि त्रिमूर्त्तिकः। श्रीकण्ठश्च शिखण्डी च प्रोक्ता विद्येश्वरा इमे"। अन्यान् सप्तकोटिसङ्ख्यातान् मन्त्रानतुग्रहकरणान् विधत्ते तदुक्तं तत्त्वप्रकाशे "पशवस्त्रिविधाः प्रोक्ता विज्ञानप्रलयाकलौ सकलः। मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः स्यात्। मलमायाकर्मयुतः सकलस्तेषु द्विधा भवेदाद्यः। आद्यः समाप्तकलुषोऽसमाप्तकलुषो द्वितीयः स्यात्। आद्यानतुग्रहान् शिवो विद्येशत्वे नियोजयत्यष्टौ। मन्त्रांश्च करोत्यपरान् ते चोक्ताः कोटयः सप्त" इति। सोमशम्भुनाप्यभिहितम् "विज्ञानाकलनामैको द्वितीय प्रलयाकलः। तृतीयः सकलः शास्त्रेऽनुग्राह्यस्त्रिविधो मतः। तत्राद्यो मलमात्रेण युक्तोऽन्यो मलकर्मभिः। कलादिभूमिपर्यन्ततत्त्वैस्तु सकलो युतः" इति। प्रलयाकलोऽपि द्विविधः पक्वपाशद्वयः तद्विलक्षणश्च तत्र प्रथमो मोक्षं प्राप्नोति द्वितीयस्तु पुर्यष्टकयुतः कर्मवशात्सानाविधजन्मभाग् भवति। तदुक्तं तत्त्वप्रकाशे "प्रलयाकलेषु येषामपक्वमलकर्मणी व्रजन्त्येते। पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात्" इति। पुर्यष्टकमपि तत्रैव निर्दिष्टम् "व्यात् पुर्यष्टकमन्तःकरणं धीकर्म करणानि" इति विवृतं चाघोरशिवाचार्येण "पुर्यष्टकं नाम प्रतिपुरुषनियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकलापर्यन्तलिङ्गशरीरात्मकः सूक्ष्मो देहः। तथा चोक्तं तत्त्वसंग्रहे "वसुधाद्यस्तत्त्वगणः प्रतिपुरुषियतः कलान्तोऽयम्। पुर्यष्टकं कर्मवशाद्भुवनजदेहेष्वयञ्च सर्वेषु" इति। तथा चायमर्थः समभवत् अन्तःकरणशब्देन मनोबुद्ध्यहङ्कारचित्तवाचिना अन्यान्यपि पुंसो भोगक्रियायासन्तरङ्गाणि कलाकालनियतिविद्यारागप्रकृतिगुणाख्यानि सप्त तत्त्वानि उपलक्ष्यन्ते धीकर्मशब्देन श्रोत्रादीनि पञ्चभूतानि तत्कारणानि च तन्मात्राणि विवक्ष्यन्ते करणशब्देन ज्ञानकर्मेन्द्रियदशकं संगृह्यते। ननु श्रीमत्काञ्चीपुरे "शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चकम्। बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमुदाहृतमिति" श्रूयते तत्कथमन्यथा कथ्यते। अत्रा अतएव च तत्रभवता रामकण्ठेन तत्सूत्रं भक्तपरतया व्याख्यायीत्यलमतिप्रपञ्चेन। तथापि कथं पुनरस्य पुर्यष्टकस्य भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसप्तैः पञ्चभिर्वर्गैस्तत्करणेन प्रधानेन कलादिपञ्चकात्मना वर्गेण चारब्धत्वादिवविरोधः। तत्र पुर्यष्टकयुतान् विशिष्टपुण्यवत्त्वात् कांश्चिदनुगृह्य भुवनपतित्वमात्रं सहेश्वरोऽन्यः प्रयच्छति। तदुक्तम् "कांश्चिदनुगृह्य वितरति भुवनपतित्वं सहेश्वरस्तेषामिति"। सकलोऽपि द्विविधः पक्वकलुषापक्वकलुषभेदात्। तत्राद्यः परमेश्वरस्तत्परिपाकपरिपाटया तदहरगुणशक्तिपातेन सप्तत्याद्यष्टाद्योत्तरशतं मन्त्रेश्वरपदं प्रापयति। तदुक्तम् "स्वेया भवन्ति सकलाः कलादिभोगादहर्मुखे काले। शतमष्टादश तेषां कुरुते स्वयमेव मन्त्रेशान्। तत्राष्टौ सप्तकिनः क्रोधाद्याश्चण्डसमाह्वधीरेशाः। श्रीकण्ठशतरुद्राः शतमित्यष्टादशा-

व्यधिकम्" इति। तत्परिपाकाधिक्यनिरोधेन शक्त्यु-पसंहारेण दीक्षाकरणेन मोक्षपदो भवत्याचार्यमूर्त्तिमास्थाय परमेश्वरः। तदयुक्तम् "परिपक्वमलानेतानुत्पादनशक्तिपातेन। योजयति परे तत्त्वे स दीक्षयाचार्यमूर्त्तिस्थः" इति। श्रीमृगेन्द्रेऽपि "पूर्वं व्यत्यासितस्याणोः पाशजालमपोहति" इति। व्याकृतञ्च नारायणकण्ठेन "तत्सर्वं तत एवावधार्यम् अस्माभिस्तु विस्तरभिया न प्रस्तूयते। अपक्वकलुषान् बद्धानणून् भोगभाजो विधत्ते परमेश्वरः कर्मवशात्। तदयुक्तम् "बद्धान् शेषानपरान् विनियुङ्क्ते भोगभुक्तये पुंसः। तत्कर्मणामनुगमादित्येवं कीर्त्तिताः पशवः" इति। अथ पाशपदार्थः कथ्यते। पाशश्चतुर्विधः मलकर्ममायारोधशक्तिभेदात्। तत्र "शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात्त्रितयम्। तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशाः" इति पाशः पञ्चविधः कथ्यते तत्कथं चतुर्विध इति गम्यते। उच्यते बिन्दोर्मायात्मनः शिवतत्त्वपदवेदनीयस्य शिवपदप्राप्तिलक्षणपरमशक्त्यपेक्षया पाशत्वेऽपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरशक्तित्वात् पाशत्वेनानुपादानमित्यविरोधः। अतएवोक्तं तत्त्वप्रकाशे "पाशाश्चर्विधाः स्युः" इति। श्रीमन्मृगेन्द्रेऽपि "प्राकृतीयो बलं कर्म मायाकार्यञ्च चतुर्विधम्। पाशजालं यथासेन धर्मनाम्नैव कीर्त्तितम्" इति। अस्यार्थः प्राकृणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति प्राकृतिः स्वाभाविक्यशुचिर्मलः स च ईष्टे स्वातन्त्र्येणेति ईशः। तदुक्तम् "एको ह्यनेकशक्तिदृक्क्रिययोश्छादको मलः पुंसः। तुषतण्डुलवज्ज्ञेयास्तामाश्रित्यकाविकावहेति"। बलं रोधशक्तिः अस्याः शिवशक्तेः पाशाधिष्ठानेन प्रकृतिनिरोधायकत्वादुपचारेण पाशत्वम्। तदुक्तम् "तासामहं वरा शक्तिः सर्वानुग्राहिका शिवा। धर्मोत्तवर्त्तनादेव पाश इत्युपचर्यते" इति। क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकं बीजाङ्कुरवत् प्रवाहरूपेणानादि। यथोक्तं श्रीमत्किरणे "यथानादिर्मलस्तस्य कर्मोत्पत्तिमनादिकम्। यद्यनादि न सांसर्गं वैचित्र्यं केन हेतुना" इति। मायास्यां शक्त्यात्मना प्रलये सर्वं जगत्, सृष्टौ व्यक्तिं यातीति माया। यथोक्तं श्रीमत्सौरभेये "शक्तिरूपेण कार्याणि तत्रोनानि महाक्षये। विकृतौ व्यक्तिमायाति या कार्येण कलादिना" इति। यद्यप्यत्र बहु वक्तव्यमस्ति तथापि ग्रन्थभूयस्त्वभयादुपरम्यते। तदित्थं पतिपशुपाशपदार्थास्त्रयः प्रदर्शिताः। "पतिविद्यो तथाऽविद्या पशुः पाशश्च कारणम्। तत्रिवृत्तावितिप्रोक्ताः पदार्थाः षट्समासतः" इत्यादिना प्रकारान्तरं ज्ञानरत्नावल्यादौ प्रविज्ञेयम्। सर्वं तत एवावगन्तव्यमिति सर्वं समञ्जसम्"।

४ओषधौ च। प्रजापतिना रुद्रादिनामकरणप्रसङ्गे शत० ब्रा० ६।१।३।१२ "तमब्रवीत् पशुपतिरसीति। तद्यदस्य तन्नामाकरोदोषधयस्तद्रूपमभवत्तोषधयो वै पशुपतिस्तस्माद्यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति"। [शब्दच०]

पशुपल्वल न० पशूनां प्रियं पल्वलमिव। कैवर्त्तीमुस्तके

पशुपाल त्रि० पशून् पालयति पालि—अच् उप०स०। १पशूनां पालके इत्यर्थतया मेषादीनां पालके। तस्याभोज्यान्नता मनुनोक्ता ३।१५४ श्लोके। इ०सं० १४अ० उक्ते ऐशान्यां स्थिते २दैशभेदे च तद्देशस्थानां च पशुपालनवृत्तिकत्वात् तथात्वम्। पशुपालस्य भावः ष्यञ्। पाशुपाल्य पशुपालनरूपे वैश्यवृत्तिभेदे "वैश्यानां पाशुपाल्यञ्च" स्मृतिः। ण्वुल्। पशुपालक पशुपालनकर्त्तरि त्रि०। तस्य पत्नी पालकान्तत्वात् पुंयोगेऽपि न ङीष् किन्तु टाप्

पशुपाश पु० ६त०। पशुरूपजीवानां बन्धे पशुपतिशब्दे दृश्यम्।

पशुपाशक पु० "स्त्रियमानतपूर्वाङ्गीं स्वपादान्तःपदद्वयम्। ऊर्द्ध्वांघ्रेण रमेत् कामी बन्धोऽयं पशुपाशकः" रतिमञ्जर्युक्ते रतिबन्धभेदे।

पशुप्रेरण न० ६त०। गवादीनां चालने अमरः।

पशुमारम् अव्य० पशुमिव मारयित्वा णमुल्। पशोरिव हिंसायाम् कर्षादित्वात् मारयतीत्यादेरनुप्रयोगे एवास्य साधुता "पशुमारमसारयत्" भा०व० ११अ०।

यज्ञे पशुमारणञ्च श्वासरोधेन गलादिनिष्पीडनेनैव, न शस्त्रादिना शमिता करणीयमिति श्रौतसम्प्रदायः।

पशुमोहनिका स्त्री पशुर्मोह्यतेऽनेन मुह—णिच्—ल्युट् स्वार्थे क आप अतइत्वम्। १कड्यां २लतायाम् राजनि०।

पशुयाग पु० पशुकरणको यागः ३त०वा। पशुद्रव्यके पशुनामके यागभेदे स च यागः "पशौ" आश्व०श्रौ०सूत्रादौ विहितः "आलनं दर्भकूर्चेन सर्वत्र स्नातस्य पशोः। तूष्णीमिच्छाक्रमेण स्नाद्यर्थे पार्श्वदारुणी। सप्त तावन्मूर्द्ध्न्यानि तथा स्तनचतुष्टयम्। नाभिः श्रोणिरपानञ्च गोक्षोतांसि चतुर्दश। चुरो मांसावदानार्थः

कृतस्नः खिष्टकृदादृता । यथामाटाय जुहुयात्तत्र मन्त्रं समापयेत् । हृज्जिह्वाक्रोडमस्तीनि यकृद्वृक्कौ गुदं स्तनाः । श्रोणिस्कन्धसटापार्श्वं पञ्चाङ्गानि प्रचक्षते । एकादशानामङ्गानामयदमानि सङ्ग्रया । पार्श्वस्य वृक्कसक्थ्नोश्च द्वित्वादाङ्गवतुर्दश । चरितार्थां श्रुतिः कार्या यस्मादयनुकल्पशः । अतोऽष्टर्वेन होमः स्याच्छागपक्षे चरावपि" कर्मप्र० । तत्कालः पश्चिज्याशब्दे दृश्यः ।

पशुरज्जु स्त्री ६त० । पशुबन्धसाधनदामनि अमरः ।

पशुराज पु० पशूनां राजा टच्समा० । सिंहे शब्दच० स्त्रियां जातित्वात् ङीष् ।

पशुबन्धन न० ६त० । पशोः संपुष्टताविधायके व्यापारभेदे यज्ञियपशुबन्धनप्रकारश्च आश्व० ८०५।६ दर्शादौ दृश्यः ।

पशुष ५० पशुषु सीदति सद-ड षत्वम् । पशुषु स्थायिनि चौरदध्यादौ ऋ० ५ ५३ १ तत्र पशुषः इत्यत्र शसः सुः

पशुसनि त्रि० पशुं सनोति ददाति सन-इन् । पशुदायके यजु० १८।४८ मन्त्रः । [आम्रातकफले त्रिका० ।

पशुहरितकी स्त्री पशूनां हरितकीव हितकारित्वात् ।

पश्चा अव्य० पश्चात्+वेदे पृषो० । पश्चादित्यर्थे ऋ० १।१२३।५ आर्षेऽपि क्वचित् अपरशब्दस्थाने पश्चभावः । "पूर्वं पश्चायतावेतौ" मार्कण्डपु० ५४अ० ।

पश्चात् अव्य० अपर+प्रथमापञ्चमीसप्तम्यर्थे आति पश्चादेशः । १प्रमाणार्थेऽन्तेऽपरशब्दस्यार्थे २चरमे ३अधिकारे च मेदि० । ततो भवार्थे त्यक् । पाश्चात्त्य पश्चाद्भवे त्रि० स्वार्थे ताद्धित् पश्चात्तात् तदर्थे अव्य० ऋ० ७।७२।५

पश्चात्ताप पु० पश्चात् चरमस्तापः । अनुशये कृतस्य कर्मणोऽनुचितत्वधिया अनुशोचने अमरः ।

पश्चार्द्ध पु०अपरश्चार्द्धश्च "अपरस्त्रे" पश्चभावः"वार्त्ति० पश्चादेशः । अपरार्द्धे "अर्द्धं नपुंसकम्" पा० एकदेशिसमासे तु अर्द्धपिप्ल्यादिवत् अर्द्धापरमित्येवेति भेदः ।

पश्चिम त्रि०पश्चाद्भवः डिमच् । १पश्चाद्भवे २प्रतीच्यां दिशि स्त्री

पश्चिमानूपक पु० नृपभेदे "पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम !" भा०आ० ६७अ० ।

पश्चिमरात्र पु० पश्चिमं रात्रेः एकदेशिसमा० अच्समा० । रात्रेः शेषभागे "पूर्वापरोत्तरमेकदेशिनैकाधिकरणे" पा० "सर्वोऽप्येकदेशोऽह्ना समस्यते सङ्ग्रायिसावेति ज्ञापकात् मध्याह्नः सायाह्नः । नेचित्तु सर्वएकदेशः कालेन समस्यते नत्वह्नेव ज्ञापकस्य सामान्यापेक्षत्वात् । तेन मध्यरात्रः "उपरताः पश्चिमरात्रगोचरादित्यादि सिद्धमित्याहुः" सि०कौ० । मल्लिनाथेन तु "उपरताः पश्चिमरात्रिगोचरादिति" पठित्वा समासान्तं निराचष्टे यथा पश्चिमा चाऽसौ रात्रिश्चेति विग्रहः अपररात्र इत्यर्थः । पूर्वा दिक् पश्चिमं नभ इत्यादिवत् एकदेशिशब्दस्यैकदेशशब्दसामानाधिकरण्यादेकदेशे पर्य्यवसानं, न तु पश्चिमं रात्रे रित्येकदेशिसमासः तद्विधायके पूर्वापरादिसूत्रे पश्चिमशब्दाग्रहणादतएव "अहः सर्वैकदेशेत्यादिना न समासान्तोऽपि तस्यापि पूर्वापरादिसूत्रोक्तसमासविषयत्वादिति । प्रकाशवर्णस्त्वेकदेशिसमासमेवाश्रित्य समासान्तमाह तन्मूलं मृग्यम्" ।

पश्चिमोत्तरा स्त्री पश्चिमाया उत्तरस्या दिशोऽन्तरला दिक् "दिङ्नामान्यन्तराले" पा०स० । वायुकोणे विदिशि ।

पश्य अव्य०दृश-बा०यः । १प्रशंसायाम् २विस्मये च शब्दरत्ना० ३यथोक्तदर्शिनि विमर्षे त्रि० क्षा०उ० ।

पश्यतोहर त्रि० पश्यतमनादृत्य हरति हृ-अच् अनादरे षष्ठी "वागिद्रूपश्यतङ्गयो युक्तिदण्डहरेषु" वार्त्ति० अलुक्स० । पश्यतमनादृत्य हरे चौरभेदे स्वर्णकारादौ "यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः" हेमच० ।

पश्यन्ती स्त्री दृश-शतृ ङीप् । १दर्शिन्यां स्त्रियां २वाग्विशेषे "प्राणापानान्तरे देवी वाग्वै नित्यं हि तिष्ठति । स्थानेषु विकृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां क्रमरूपानुपातिनी । प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते । अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवातः परा वागनपायिनी" मञ्जूषाधृतवाक्यम् अस्यार्थः शब्दार्थरत्ने "चेतनेन प्राणार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितवानलस्तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततो नाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते एतद्द्वयस्य सूक्ष्मतरसूक्ष्मतमतया ईश्वरयोगिमात्रगम्यता नास्मदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्येत्युच्यते स च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्यः । ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य आहत्य मूर्द्धानं तत्प्रतिघातेन पराहत्य च मुखविवरे कण्ठ दितत्तदृष्टस्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते"

"वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा। द्योतितार्थो तु पश्यन्ती सूक्ष्मा वाग्मनपायिनी" मल्लिनाथधृतवाक्यम्।

पश्वयन न॰ यागभेदे शत॰ब्रा॰४।६।६।१ [ऋ॰ ४।११।६भा॰।

पश्वयन्त्र त्रि॰पशोरिदं वा॰ ड कर्म॰। पशुनिर्गमनार्थयन्त्रभेदे

पश्ववदान न॰ पशोरङ्गविशेषस्यावदानं छेदनम्। पशोरङ्गविशेषच्छेदने पशुशब्दे कर्मप॰ वाक्यं दृश्यम्।

पश्वाचार पु॰ पशूनामधिकारिविशेषाणामाचारः। तन्त्रोक्ते आचारभेदे पशुभावे "वेदोक्तेन यजेद्देवीं कामसंकल्पपूर्वकम्। स एव वैदिकाचारः पश्वाचारः स उच्यते"। कुब्जिकातन्त्रे ७प॰ "भावश्च त्रिविधो देवि! दिव्यवीरपशुक्रमात्। विश्वश्च देवतारूपं भावयेत् सुरसुन्दरि!। स्त्रीमयञ्च जगत्सर्वं पुरुषं शिवरूपिणम्। अभेदे चिन्तयेत् यस्तु स एव देवतात्मकः। नित्यस्नानं नित्यदानं त्रिसन्ध्यञ्च जपार्चनम्। निर्मलं वसनं देवि! परिधानं समाचरेत्। वेदशास्त्रे दृढज्ञानं गुरौ देवे तथैव च। मन्त्रे चैव दृढज्ञानं पितृदेवार्चनं तथा। बलिवैश्वं तथा श्राद्धं नित्यकार्यं शुचिस्मिते!। यत्तु मित्रसमं देवि! चिन्तयेत्तु महेश्वरि!। अत्रचैव महेशानि! सर्वेषां परिवर्जयेत्। गुरोरन्नं महेशानि! भोक्तव्यं सर्वसिद्धये। कदर्यञ्च महेशानि! निष्ठुरं परिवर्जयेत्। देवतानिन्दकं दृष्ट्वा नालापञ्च समाचरेत्। सत्यञ्च कथयेद्देवि! न मिथ्या च कदाचन" महानिर्वाणतन्त्रे "दिव्यवीरमयो भावः कलौ नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्"।

पश्विज्या स्त्री पशुना इज्या। पशुयागभेदे तत्कर्त्तव्यकालादिः कात्या॰श्रौ॰ ६।४।१ मूलादौ दृश्यः।

पश्विष्टका स्त्री अग्निचयनार्थे इष्टकाभेदे पशुयागे हि पञ्च इष्टका भवन्ति यथोक्तं शत॰ब्रा॰ ६।२।१।२० "कथमस्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुस्वारब्धो भवतीति पुरोडाशः कपालेषु स्वेदायत्त इव प्रथमा मृण्मयीष्टकाथ यत् पशुमालभते तेन पश्विष्टकाप्यतेऽथ यद्वपामभितो हिरण्यशकलौ भवतस्तेन हिरण्येष्टकाप्यतेऽथ यदिध्मो यूपः परिधयश्चेन वानस्पत्येष्टकाप्यतेऽथ यदाज्यं प्रोक्षण्यः पुरोडाशस्तेनाज्यं पञ्चमीष्टकाप्यत एवमुपहास्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुस्वारब्धो भवति"।

पश्विष्टि स्त्री इत॰। पशुयागङ्गे इष्टिभेदे सा च इष्टिः "इष्टिरुभयतोऽन्यतरतो वा" आपु॰श्रौ॰१।२ सूत्रादौ विहिता।

पश्वेकादशिनी स्त्री एकादश परिमाणमस्य द्विनि ङीप् पशुना एकादशिनी। शत॰ब्रा॰ २।६।२ उक्ते एकादश देवताकैकादशपशुसाध्ये यज्ञभेदे ते च पशवः "आग्नेयं प्रथमपशुमालभेत् इत्युपक्रमे १आग्नेयः २सारस्वतः ३सौम्यः ४पौष्णः ५बार्हस्पत्यः ६वैश्वदेवः ७ऐन्द्रः ८मारुतः ऐन्द्राग्नः १०सावित्रः ११वारुण इत्येते अस्माद्येकादशदेवताकाः उक्ताः।

पष्ठवाह् पु॰ पृष्ठेन वहति पष्ठं भारं वा वहति वह-खिप् पृषो॰। पश्चवर्त्ये भारवहे वृषे तथावस्थायां स्त्रियां गवि ङीप् वाह ऊठ् षष्ठौही यजु॰ १४।९ "द्वादश पष्ठौहो गर्भिण्यो ब्रह्मणः" आपु॰श्रौ॰९।४।१४। सम्बोधे पृष्ठौ हीत्युक्तिः लोकाभिप्रायेण वेदे तु पष्ठवाट् षष्ठौही इत्येव प्रयोगात्।

पस नाशने चु॰उभ॰सक॰सेट् इदित्। पंसयति ते अपपंसत् त

पसस् न॰ पस-असुन्। राष्ट्रे "गर्भोराष्ट्रं पसोराष्ट्रमेव" शत॰ब्रा॰ १२।२।८।६

पस्त्य न॰ पस-भावे क्तिन् तत्र साधु यत्। गृहे निघण्टुः अस्त्यमिति पाठान्तरम् अस्तये स्थितये साधु यत्। तत्र हेमच॰ निघण्टौ तु पस्त्यमित्येव गृहनामसु पठितम्। पस्त्यामस्त्यस्येति मतुप् मस्य यः दीर्घः। पस्त्यावत् गृहः-प्राचीनवंशादिगृहवति ऋ॰ १।१५।१२भा॰।

पस्पश पु॰ शास्त्रारम्भप्रमर्यके उपोद्घाते सन्दर्भेपन्थभेदे स च महाभाष्यस्य प्रथमाह्निकात्मकः शब्दविद्योपनो भाति राजनीतिरपस्पशा" माघः।

पह्लव पु॰ शस्त्रधारिम्लेच्छजातिभेदे काम्बोजशब्दे १९०७प्र॰ दृश्यम्। स्त्रियां जातित्वात् ङीष्।

पङ्किका स्त्री अप+क्रु+वा॰ ड संज्ञायां कन् कापि अतइत्वम् अपेरलोपः। वारिपृत्र्यां शब्दरत्ना॰।

पा पाने भ्वा॰ पर॰सक॰ अनिट्। पिति पित्रादेशः पिबति अपात् पपौ पेयात् पीयते पीत्वा पीतः पायः पेयं प्रपा। णिच् पाययति पौचङि अपीपयत्। पिपासति पेपीयते।

पा रक्षणे अदा॰पर॰सक॰ सेट्। पाति अपासीत् पपौ। पायात् णिच् पालयति अपीपलत्। पालनम् पालकः

पांश(स)न त्रि॰ पसि-ल्यु वा॰ दीर्घः पृषो॰वा। दूषके त्रिक

पांश(स)व पु॰ पां(सोः)शोर्विकारः अण्। (पाङ्गा) जनपदभेदे पां(सु)शुजादयोऽप्यत्र राजनि॰।

पांशु(सु) पु॰ पसि-नाशने अर्जिदृशिकम्यमिपसिपाशास्यजि

पसिबाधास्तजिपग्रितृक्षुगृदीर्घहाश्च" उणा० उ दीर्घश्च। १धूर्त्ते २शस्त्रार्थचिरसञ्चितगोमये च विश्वः उणादिसूत्रे दन्त्यान्त्य पसिधातोरेव उप्रत्ययदीर्घयोर्विधानात् विश्वप्रकाशे तालव्यान्ते कीर्त्तनाच्च पृथो दन्त्यस्य शः इति बोध्यम्। अतएव "तालव्या अपि दन्त्याः स्युः शंषशूकरपांशवः" शकारभेदे उक्तम्। ३लवणभेदे न० "व्यौद्भिदं पांशु(सु)लवणं यज्जातं भूमितः स्वयम्। क्षारं गुरु कटु स्निग्धं स्वेदनं वातनाशनम्" भावप्र०। ४पर्पटे ५कर्पूरभेदे पु० राजनि०। पांशु(सु)तो भवः यत्। पांशु(सु)सव्य तत्र भवे त्रि०। रुद्रभेदे पु० वसु० १६।२५

पांशु(सु)कासीस न० कासीसे राजनि०।

पां(शु)सुकुली पांशून् कोलति कुल-संहतौ क गौरा० ङीष्। राजमार्गे हारा०।

पांशुकूल न० द्वन्द्व०। निरूपपदशासनभेदे "शासनं धर्म्मकीर्त्तः स्यात् सुकृतिः शुद्धशासनम्। पट्टोत्तिका कृप्रकीर्त्ता पांशुकूलं न कस्यचित्" त्रिका०।

पांशु(सु)क्षार न० पांशु(सु)रिव क्षारम्। क्षारलवणे (पाङ्गाचोन) पार० निघण्टुः।

पांशु(सु)चत्वर पु० पांशुभिश्चत्वर इव। घनोपले शब्दमा०।

पांशु(सु)चन्दन पु० पांशुधूलिश्चन्दनमिवास्य। विभूतिभूषिते शिवे त्रिका०।

पांशु(सु)चामर पु० पांशुश्चामर इवास्य। १पटवासे (ताँबु) वटा०। २दूर्वाङ्कितकटीतटे ३वर्द्धापके ४प्रशंसायाम् ५पुरोटो ६धूलियुक्तके च मेदि०।

पांशु(सु)ज न० पांशु(सु)तो जायते जन-ड। (पाङ्गा) लवणभेदे रत्नमा०। पांशु(सु)भवादयोऽप्यत्र।

पांशु(सु)पत्र न० पांशु(सु)भिः सञ्चितगोमयैः पक्षमस्य। वाल्लूकशाके शब्दमा०।

पांशु(सु)मर्दन पु० पांशुः(सुः) मृद्यतेऽत्र मृद-आधारे ल्युट्। केदारे क्षेत्रभेदे त्रिका०। [(डांश) हारा०।

पांशु(सु)र पु० पांशुः(सुः) राति-क। १खञ्जे २दंशके च

पांशु(सु)रागिणी स्त्री रञ्ज-घिनुण् ङीप्। पांशु(सु)भिः रागिणी ३त०। महामेदायां राजनि०। [५।३अ०।

पांशु(सु)राष्ट्र न० पांशु(सु)प्रधानं राष्ट्रम्। देशभेदे भा०स०

पांशु(सु)ल त्रि० पां(सु)शुरस्त्यस्य विद्या० लच्। १धूलियुक्ते तत्तुल्यपापयुक्ते २पुंश्चले च स्त्रियां टाप्।

पाक पु० पच-भावे घञ्। १तण्डुलादिविक्लेदनव्यापारभेदे स च स्थूणीपार्श्वनाधःसन्तापनाद्योदनपरीक्षानोव्यापारसमूहः। पिबति स्तनम् पा-कन् नवधि धर्मका० नि० वा। २स्तनपायिनि शिशौ ३परिपच्यते जरया ४केशादेः शोक्त्रे अमरः। ५मेघके ६राहुभङ्गे ७भीतौ शब्दरत्ना० ८दैत्यभेदे हेमच० पाकशासनः। द्रव्यादेः पाकप्रकारभेदादिकं पाकराजेश्वरे उक्तं यथा

"भर्जनं तलनं स्वेदः पचनं क्वथनं तथा। तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः"। भर्जनं केवलपात्रे। तलनं स्नेहद्रव्ये, स्वेदनम् अग्न्युत्तापे। पचनं जले। क्वथनं सिद्धद्रव्यरसपरिणामे। तान्दूरं दारवङ्गतप्रयत्ने, पुटपाक अङ्गाधोऽग्नितापे शेषः"।

श्राद्धे पाकप्रकारादिः नि०सि० उक्तो यथा

देवलः "तथैव यन्त्रितो दाता प्रातःस्नात्वा दृढाम्बरः। आरभेत नवैः पात्रैस्तारम्यं च बान्धवैः" अलाभेनपदात् स्वयमेव पाकः कार्यः अशक्तौ पत्न्या तदभावे बान्धवैः "ततस्तानि पवित्राणि गृहीता जनकनन्दिनी" इति पाद्मलिङ्गादिति हेमाद्रिः। श्राद्धदीपकलिकायामाश्वलायनः "समानप्रवरैर्मित्रैः सपिण्डैश्च गुणान्वितैः। कृतोपकारिभिश्चैव पाककार्यं प्रयत्नतः"। व्यासः "गृहिणी चैव सुस्नाता पाकं कुर्यात् प्रयत्नतः। निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत्"। पृथ्वीचन्द्रोदये ब्राह्मे "रजस्वलां च पाषण्डं पुंश्चलीं पतितां तथा। व्यङ्गां क्लीबां तथा वन्ध्यां विधवां चान्यगोत्रजाम्। व्यङ्गकर्णीं चतुर्थाहःस्नातामपि रजस्वलाम्। वर्जयेच्छ्राद्धपाकार्थमभ्रातृपितृवंशजाम्" भ्रातृपितृवंशजभिन्नां त्यजेदित्यर्थः। स्मृतिसारे "न पाकं कारयेत् पत्नीमन्यां (अन्यामन्यवर्णाम्) वाप्यन्यगोत्रजाम्। मृतवत्सां च गर्भिणीं गर्भिणीं चैव दुश्चरीम्"। पाकभाण्डानि तु हेमाद्रौ नागरखण्डे "सौवर्णान्यथ रौप्याणि कांस्यताम्रोद्भवानि च। मार्त्तिकान्यपि भव्यानि नूतनानि दृढानि च" तथैवादित्यपुराणे "पक्वदलानि सुस्नातः पात्रेषु शुचिषु स्वयम्। खण्डादिधातुजातेषु मृण्मयेष्वपि वा द्विजः। सुचिरोद्धृतविक्षिप्तेषु तथाचोपहतेषु च। भायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित्। पूर्वं कृतोपयोगेषु मृण्मयेषु न तु क्वचित्"। वायुपुराणे "न कदाचित्पचेदन्नमयःस्थालीषु पैतृकम्। अयसो दर्शनादेव पितरोऽपद्रवन्ति हि। कालायसं विशेषेण निन्दन्ति पितृकर्मणि। फलानां चैव पाकानां कदलीपत्राणि यानि तु। महानसेऽपि यस्याणि तेषामेव हि वाजिभिः। दृश्यते नेतरस्मात् यस्मात्तस्य दुर्गा-

नम्। श्राद्धदेये तु विदुषा पितॄणां तृप्तिसिद्धता। म-
हानसेऽतियुक्तानामपि कार्यं न दर्शनम्"। तत्रैव "पच-
मानस्तु भाण्डेषु भक्त्या तान्यमयेषु च। सस्तरति वै
घोरात् पितॄन् दुःखमहार्णवात्। तैजसानामभावे तु
पिठरे मृण्मयेऽपि च। नवे शुचौ प्रकुर्वीत पाकं पि-
तॄणामादरात्"। तत्रैवादित्यपुराणे "पक्वान्नस्थापनार्थं तु
यज्ञान्ते दारुजान्यपि। दर्व्यादीन्यपि कार्याणि यज्ञि-
यैरपि दारुभिः"। यमः "विवाहे प्रेतकार्ये च माता
पितोः क्षयेऽहनि। नवभाण्डानि कुर्वीत यज्ञकाले वि-
शेषतः"। अत्र पाकाग्निमाह हेमाद्रौ प्रजापतिः "लोपा-
शनेनान्नविद्विरग्नौकरणमेव च"। पृथ्वीचन्द्रोदयेऽङ्गिराः
"शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः। यज्ञि-
यग्नौ पचेदन्नं तस्मात् होमो विधीयते"। मनुः "वैवा-
हिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि। पञ्चयज्ञ-
विधानञ्च पक्तिं चान्वाहिकीं द्विजः"। श्राद्धस्य गृह्यत्वं
चोक्तमपरार्केण, अत्र विशेषः कर्मप्रदीपे "प्रातर्होमं तु
निर्वर्त्य समुद्धृत्य कृतायनात्। शेषं महानसे कृत्वा
तत्र पाकं समाचरेत्। पाकान्तेऽग्निं तमाकृष्य गृ-
ह्याग्नौ तु पुनःक्षिपेत्। ततोऽग्निनु वैश्वदेवादिकर्म कु-
र्यादतन्द्रितः"। तदभावे लौकिके "ततः पचेयुरन्नानि
निर्वापानन्तरं मनैः। वैवाहिकेऽग्नावन्यत्र लौकिके
वापि संयतः" इति दीपकलिकायां संग्रहोक्तेः"।

पाकभाण्डस्य त्याज्यत्वं यथा "नित्यं नूतनभाण्डेन
कर्त्तव्यः पाक एव च। क्षयं वा पक्षपर्य्यन्तं ततस्त्याज्यं
मनीषिभिः" इति ब्रह्मवैवर्त्तपु०। पाककाले शूद्रायाग्नि-
दानानिषेधो यथा "शूद्रायाग्निञ्च यो दद्यात् पाककाले
विशेषतः। शूद्रपक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात्"
कर्मलोचनम्। एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम्। अभावे
पाकपात्राणां तदहः समुपोषणम्" श्राद्धत०। शूद्रेण
तत्रापि आमान्नेनैव कार्यम् "आमं शूद्रस्य पक्वा-
न्नमित्युक्तेः आमान्नेनैव शूद्रेणेत्युक्तेश्च पाकविधिर्यथा
"पूर्वाशाभिमुखो भूत्वा उत्तराशामुखोऽथ वा।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्जयेत्। अन्नाशा-
भिमुखे पक्वममृतान्नं विजानता। पूर्वमुखो धर्मकामः
शोकहानिञ्च दक्षिणे। श्रीकामश्चोत्तरमुखः पतिकामश्च
पश्चिमे। ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः।
यदा तु जायते पाके पक्वमश्नाति वै द्विजः। स पापि-
ष्ठोऽपि मुङ्क्तेऽन्नं रौरवे परिपच्यते। ताम्रे पक्वा
चतुर्होमानो वै लभते क्षयम्। पितृभ्यां पक्वमन्नञ्च
पितृभ्यञ्च यशस्विनि!। पुण्डरीकस्य यज्ञस्य लभते फ-
लमीप्सितम्। वातुलेन तु यत्पक्वं भगिन्या च कनि-
ष्ठया। असगोत्रेण यत्पक्वं योषितं तदपि क्षतम्।
अभक्तेन च यत्पक्वं स्त्रिया पक्वन्तथैव च। पक्वपात्रे
च यत्पक्वं तत्सर्वं निष्फलं भवेत्। उदुम्बरेण काष्ठेन
कदम्बस्य दलेन च। शालेन करमर्द्देन उदरावर्त्तकेन
च। पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत्। गर्हि-
तान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत्। अप्रजा वा
तु वनिता नाश्नीयादेव तद्गृहे। शालकाष्ठस्य पक्वान्नं शि-
रीषकस्य चैव हि। कलिचण्डातकस्यैव वज्रवाहुकस्य
च। एरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम्।
यदा मृण्मयपात्रे तु पक्वं वै सर्वकालिकम्। मासे पक्षे
तथाष्टाहे तत्पात्रं विसृजेत् गृही। धनुःपात्रे तथा
सिंहे मिथुने वा वरानने!। यः कुर्याद्भोजनं देवि!
कृच्छ्रेणैव विशुध्यति। एकदा तु जलं दद्याद्द्विवारं न
प्रदापयेत्। त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत्"
मत्स्यसूक्ते ४२अ०। जाठराग्निना पाकप्रकारस्तु अन्न-
कृच्छ्रशब्दे ५५८पृ० उक्तः

औषधपाकप्रकारस्तु चक्रपाणिदत्तादिग्रन्थे द्रष्टव्यः।
पच्यते फलं यत्र काले आधारे घञ्। ९फलपाकाधि-
करणे कालभेदे शुभाशुभसूचकग्रहोत्पातादीनां पाक-
कालश्च बृ० सं० ९७ अ० उक्तो यथा

"पक्षाङ्गानोः सोमस्य मासिकोऽङ्गारकस्य वक्रस्य।
या दर्शनाच्च पाको बुधस्य जीवस्य वर्षेण। षड्भिः स-
तस्य मासैरब्देन शनेः सुरद्विषोऽब्दाधात्। वर्षात्सूर्य-
ग्रहणे सद्यः स्यात् त्वाष्ट्रकौलकयोः। त्रिभिरेव धूमके-
तोर्मासैः केतस्य सप्तरात्रात्। सप्ताहात् परिवेषेन्द्र-
चापसन्ध्याभ्रसूचीनाम्। शीतोष्णविपर्यायः फलपाक-
मकालजं दिशां दाहः। स्थिरधरयोरन्यत्र प्रसृतिवि-
कृतिश्च मध्यमाधात्। क्रियमाणकरणं चक्रभ्योऽङ्ग-
लाषो दरिष्टं च। शोषणशोषाद्याया स्रोतोऽन्यत्वं च
वर्षाद्यैः। स्तम्भकुण्डलार्चानां जल्पितरुदितप्रकम्पित-
स्वेदाः। मामुत्तयेण कलहेन्दूपापनिवृत्तिपाकाय।
कीटाल्पमक्षिकोरगबाहुल्यं मृगविहङ्गमरुतं च। शो-
ष्टया चापस्य तरणं त्रिभिरेव निपच्यते ग्रहैः। पश्चतः
शुनामरण्ये यन्त्रितो ग्रामसम्प्रभेशश्च। मधनिलयतोरणो

न्द्रध्वजाश्च वर्षात् समधिकाद्वा । गोमायुगृध्रप्रवृद्धा दशाहिकाः सद्य एव तूर्यरवः। आक्रुष्टं पक्वफलं वल्मीकविदारणं च भूपाहे । अद्भुताग्नप्रज्वलनं हततैलवसादिवर्षणं चापि । सद्यः परिपच्यन्ते मासेऽध्यर्द्धे च जलवादः । क्वचितियूपद्रुतवहपीजानां सम्भिर्भवति पक्षैः । कलस्य तोरणस्य च केचिन्मासात् फलं प्राहुः । अत्यन्तविरुद्धानां स्नेहः शब्दश्च वियति भूतानाम् । मार्जारनकुलयोर्मूषकेण सङ्गश्च मासेन । गन्धर्वपुरं मासाद् रसवैक्लव्यं हिरण्यविक्रतिश्च । ध्वजवेश्मपांशुधूमाकुला दिशश्चापि मासफलाः । नवकैकाष्टदशकैकषट्त्रिकत्रिकसंख्यमासपाकानि । नक्षत्राण्यत्रिपूर्वकाणि सद्यःपाकाऽऽश्लेषा । पितृप्राग्भाद्रः षट् षट् त्रयोऽर्द्धमष्टौ च त्रिपङ्केकैकाः । मासचतुष्काषाढे सद्यःपाकाभिजित् तारा । वसुप्राष्ठावध्यर्द्धं त्रयस्त्रयः पञ्च चैव मासाः स्युः। अश्वादीनां पाको नक्षत्राणां यथासंख्यम् । निगदितसमये न दृश्यते चेद् अधिकतरं द्विगुणे प्रपच्यते तत् । यदि न कनकरत्नगोप्रदानैरुपशमितं विधिवद्द्विजैश्च यान्त्या । दशाशब्देऽन्तर्दशाशब्दे च प्रहस्तचितफलपाकभेदो द्रष्टव्यः । कर्मणि घञ् । १०परिपक्वे ऋ० ७ १०४ ९ ११परिणतबुद्धौ च त्रि० पाकस्तत्तनूशब्देदृश्यम् । १२अल्पे ११प्रशस्ते च पाकयज्ञशब्दे दृश्यम् । पाकस्य अल्पस्य प्रशस्य वा भावः पृथ्वा० ष्ट्यनिच् । पाकिमन् तद्भावे पु०। पाकस्यादूरदेशादिः पञ्चा० फक् । पाकायन पाकस्यादूरदेशादौ त्रि० । [शब्दमाला ।

पाकतृणा पु०पाके फलपाके तृणः । (पानीयामला) वृक्षभेदे

पाकज न० पाकाज्जायते जन–ड । १काचलवणे । २पाकजातमात्रे त्रि० । "अनुष्णाशीतपाकजः" भाषा । ३परिणामसूत्ररोगे । [ऋ०८ १८ १५ ।

पाकता अव्य० पाकः विपक्वप्रश्नः स्वार्थे ता । विपक्वप्रश्ने

पाकदूर्वा स्त्री पाकयुक्ता दूर्वा शा० त० । परिपक्वदूर्वायाम् ऋ० १०।१६।१२ भा० ।

पाकदिष् पु० पाकाय दैत्याय द्वेष्टि द्विष्–क्विप् ४त० । पाकशासने इन्द्रे हेमच० । पाकारिप्रभृतयोऽप्यत्र ।

पाकपात्र न० पाकसाधनं पात्रम् शाक०त० । पचनसाधने पात्रे स्थाल्यादौ । तद्भेदाः पाकशब्दे दृश्याः । पाकभाजनपाकभाण्डादयोऽप्यत्र ।

पाकपुटी स्त्री पाकसाधनं पुटी शा० त० । (मोयान) कुम्भपाकार्थपात्रायाम् हेमच०

पाकफल न० पाकयुक्तं फलमस्य शा०त० । (पानीयामला) फलपाके शब्दच० ।

पाकमत्स्य पु० पाकः पक्वः मत्स्यः । १पक्वमत्स्ये व्यञ्जनभेदे शब्दच० । २कीटभेदे सुश्रुतः कीटशब्दे २०५८ पृष्ठे दृश्यम् । वाराहे ३मत्स्यभेदे सुश्रुतः निरावकशब्दे ४०८६ पृ० दृश्यम् ।

पाकयज्ञ पु० पाकसाध्यो यज्ञः शा०त०। चरुपाकेन कर्त्तव्ये यज्ञभेदे स च यज्ञः दर्शोत्सर्गादिहोमः । "पाकयज्ञे तु साहसम्" ति० त० उक्तेस्तत्राग्निः साहसः । पाकः अल्पः बालकसाध्यात् प्रशस्तो वा यज्ञः । २अल्पयज्ञे ३प्रशस्ययज्ञे च यथाह "त्रयः पाकयज्ञाः" आश्व०गृ०१।१२। स्तवे नारायणः ।

"पाकयज्ञास्त्रयस्त्रिविधा इत्यर्थः। कुतः हुताः प्रहुताः ब्रह्मणि हुताः" इत्येकैकस्मिन् बहुवचननिर्देशात् । यदि हि त्रिविधत्वं न स्यात् एकवचनेन निर्देशं कुर्यात् । तस्मात् त्रिविधत्वमिति । पाकयज्ञाः अल्पयज्ञाः प्रशस्तयज्ञा वा । दर्शसोमयज्ञ पाकशब्दः । योऽस्मात् पाकतरः इत्यत्रास्ते पाकशब्दः । तं पाकेन मनसाऽपश्यम् इति यो मा पाकेन मनसा इति च प्रशंसायाम् । तेन आज्यहोमेष्वपि पाकयज्ञतन्त्रं सिद्धं भवति । यदि हि पाकशब्दः पक्वौ वर्तेत आज्यहोमेषु तन्त्रं न स्यात् । दृश्यते च तस्मात्र तत्र वर्त्तेत । प्रशस्तयज्ञा इत्युक्तम् । कथं प्रशस्तत्वम् उच्यते यस्मादेतेषु संस्कारा उच्यन्ते । तैश्च ब्राह्मण्यमवाप्यते । के पुनस्ते संस्काराः । गर्भाधानादयः । तस्मात् सर्वेषां पाकयज्ञत्वमिति यदुक्तं तत् सम्यक् । कथं त्रिविधत्वमित्यत आह "हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्रह्मणि (ब्राह्मणभोजने) हुताः" श्रु० ।

पाकयज्ञिक पु० पाकयज्ञस्य तत्प्रतिपादकग्रन्थस्य व्याख्यानो ग्रन्थः पाकयज्ञे भवो वा ठञ् । १पाकयज्ञग्रन्थव्याख्याने ग्रन्थे २पाकयज्ञभवे च । [१।७।४।१९

पाकयज्ञिय त्रि० पाकयज्ञमर्हति च । पाकयज्ञार्हे शत०ब्रा०

पाकरञ्जन न० पाकं पच्यमान रञ्जयति रञ्ज–णिच्–ल्यु । तेजपत्रे शब्दच० ।

पाकल न० पाकं लाति ला–क । १कुष्ठौषधौ (कुड़) अमरः २वल्को २वायौ च पु० मेदिः । ४कर्कोटयां स्त्री गौरा० ङीष् । शब्दसा०५कुञ्जरज्वरे ६बोधनद्रव्ये च पु०मेदि०।

पाकलि स्त्री पा–पाने सम्प्रदा०भावे–क्विप् तां पाकं कलयति

कर्त्तरि क्त। रोहिणीति ख्याते वृक्षभेदे रत्नमा०।

पाकशाला स्त्री ६त०। पाकस्थाने पाकगृहपाकस्थानादयोऽप्यत्र "प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्" पौ०भा० धृतवाक्यम् गृहशब्दे दृश्यम्।

पाकशासन पु० पाकं तन्नामदैत्यं शास्ति शास-ल्यु। इन्द्रे तस्य तन्नामकता यथा "पाकं जघान तीक्ष्णाग्रैर्मार्गणैः कङ्कपत्रिभिः। तत्र नाम विभुर्लेभे शासनत्वाच्छरैर्दृढैः। पाकशासनतां शक्रः सर्वामरपतिर्विभुः" वामनपु०।

पाकशासनि पु० पाकशासनस्यापत्यम् इञ्। इन्द्रसुते १वैजयन्ते अमरः २अर्जुने ३वालिवानरे च। [शब्दच०।

पाकशुक्ला स्त्री पाके परिणामे शुक्ला। (खड़ि)ख्याते पदार्थे

पाकसंस्थ त्रि० पाकः संस्था यस्य। पाकसाध्ये यज्ञभेदे। स च गौतमेन दर्शितः "अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणीचैत्राश्वयुजी चेति सप्त पाकसंस्थाः"। हारीतः "पाकयज्ञानृयज्ञेभ्यस्त्वं हविर्यज्ञांश्च नित्यशः। सोमांश्च विधिपूर्वेण य इष्ट्वेत्तमव्ययम्"।

पाकसुत्वन् पु० पाकेन परिपक्वेन मनसा सुनोति सोमाभिषवं करोति सु-क्वनिप् तुक् च परिपक्वमनसा सोमाभिषव कर्त्तरि यजमाने ऋ० १० ८६ १९।

पाकारि पु० पाकमृच्छति ऋ-इन्। १श्वेतकाञ्चने रत्नमाला। ६त०। २पाकशासने इन्द्रे च।

पाकरु त्रि० पाकेन सुखपाकेन अरुर्व्रणम् पाकस्य अन्नादिपाकस्य वा अरुः क्षतम् यक्०। १सुखपाकेन क्षते २अन्नपाकनाशके अग्निवान्द्ये च यजु० १२ ९६। वेददी०।

पाकिन् त्रि०पच-णि० चितुण् कुत्वम्। १पाककर्त्तरि २पाकयुते च बहुपाकी इत्यादि सुब०।

पाकिम त्रि० पाकेन निर्वृत्तः भावान्वयात् पाक+इमन्। पाकेन निर्वृत्ते त्रि०की०।

पाकु त्रि० पच-वण् ण्यङ्का० कुत्वम्। पाचके [उणादि०

पाकुक त्रि०पच-उकञ् चस्य कत्व। स्वपकारे पाचके उणा०।

पाक्य त्रि० पच-कर्मणि यत् यतिं चस्य कत्व। १पक्तव्ये पाकेन साध्यम् पाकस्य हितं वा भा० यत्। २विड्लवणे न० अमरः ३पांशुलवणे रत्नमा० ४यवक्षारे पु० अमरः।

पाक्षिक त्रि० पक्षे पञ्चदशतिथ्यात्मके काले पक्षान्तरे संशयकोटिभेदे वा भव ठञ्। १पक्षकालभवे २पक्षान्तरभवे ३संशयैककोटीभवे च "नियमःपाक्षिके सति" मीमांसा।

पाखण्ड त्रि० "पाखनाद् त्रयीधर्मः पाखण्डं स निगद्यते" इत्युक्तेः पातीति पा-क्विप् पाः त्रयीधर्मः तं खण्डयति खण्ड-अण् उप०स०। पाषण्डे सर्वनिन्दिनि अमरटीकायां भानुदीक्षितः। मूर्खन्यग्रबध्यः सर्वसम्मतः।

पागल त्रि० पिबति सुरां पा+कर्त्तरि क्विप् पाः सुरापायीव गलति स्रवति गल-अच्। उन्मत्ते "पागलायाकुलीनाय चान्धाय बधिराय च। जड़ाय चैव मूर्खाय क्लीबतुल्याय पापिने। ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च" ब्रह्मवै० प्रकृ० १४अ०।

पाङ्क्त त्रि० पङ्क्तौ भवादि वा उत्सा० अञ्। १पङ्क्तिभवे २दशाक्षरपादकछन्दोभेदयुते च। पङ्क्तिसंख्याऽस्त्यस्य अण्। ३तत्संख्यायुतावयवयुते पशौ ४पुरुषे च "पाङ्क्ताः पुरुषः पाङ्क्ताः पशवः" तारब्राह्म० २ ४२। "पाङ्क्तराख्ये छन्दसि पञ्चसंख्या विद्यते तस्य पञ्चभिः पदैरुपेतत्वात् पुरुषेऽपि द्वौ हस्तौ द्वौ पादौ शिरश्चेति पञ्चसङ्ख्या विद्यते पशुष्वपि चत्वारः पादाः पुच्छश्चेति पञ्चसंख्यास्ति" भा० पङ्क्तिश्छन्दसः दशाक्षरपादकत्वात् चतुर्षु चरणेषु चत्वारिंशदक्षराणि सन्ति तेन चतुष्टुपा गणनया पञ्चपादत्वमिति बोध्यम्।

पाचक त्रि० पच-ण्वुल्। १पाककर्त्तरि तद्वृत्तियुक्ते २सूपकारे च। ३अग्नौ हलायु०तस्य जठराग्निरूपेण वाक्याद्देश पाचकत्वात्तथात्वम् ४पित्ताख्ये धातौ भावप्र० "पाचकं रञ्जकं चापि साधकालोचके तथा। भ्राजकश्चेति पित्तस्य नामानि स्थानभेदतः" भावप्र०। तत्कार्यभेदश्च पित्तशब्दे दृश्यः। अन्नादौ विषदानादिपरिजिहीर्षया शृणादिभिर्यथा पाचकः वैद्याद्यधिष्ठितः करणीयस्तथा सुश्रुते कल्पस्थाने दर्शितं यथा "विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः। स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया। विषघ्नयोपयोगाद्वा चयाव्यक्ताद्यद्यन्नरः। तस्माद्वैद्येन सततं विषघ्नो रक्षो नराधिपः। यस्मात्तु चेतोऽनित्यत्वमन्यवत् प्रचितं नृणाम्। न विश्वसात्ततो राजा कदाचिदपि कस्यचित्। कुलीनं धार्मिकं स्निग्धं सुभृतं सततोत्थितम्। अनुव्रतमठं भक्तं कृतज्ञं प्रियदर्शनम्। क्रोधपारुष्यमात्सर्यमहासत्त्वविवर्जितम्। जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितम्। मेधाविनमसंभ्रान्तमनुरक्तं हितैषिणम्। पटुं प्रगल्भं निपुणं दक्षं मायाविवर्जितम्। पूर्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदम्। महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम्। प्रयत्नादिगुणैर्युक्तं शुचिमाप्तं

महच्छचि। सजालकं गवाक्षाढ्यमात्मवर्गनिषेवितम्। विकचकुटसंकुष्टं सवितानं कृताचनम्। परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम्। तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम्। शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः। संविभक्ताः समनसो नीचकेशनखाः स्थिराः। स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः। तस्य चाप्तास्त्रिविधाः स्युर्विविधाः परिकर्मिणः। आहारस्थितयश्चापि भवन्ति प्राणिनो यतः। तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्। माहानसिकवोढारः सौपौदनिकपौपिकाः। भवेयुर्वैद्यवशगा ये चान्ये तु केचन। इङ्गितज्ञो मनुष्याणां वाक्चेष्टासुखवैकृतैः। विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान्। न दद्यात्युत्तरं पृष्टो विब्रूयान् मोहमेति च। अपार्थं बहुसङ्कीर्णं भाषते चापि मूढवत्। स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेद्दसेत्। वेपथुर्जायते तस्य स्तम्भश्चान्योऽन्यमीक्षते। श्यामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि। आत्मभेतासमहीनः करैश्च शिरोरुहान्। निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः। वर्त्तते विपरीतस्तु विषदाता विचेतनः। केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया। अयतामपि सन्तोऽपि चेष्टां कुर्वन्ति मानवाः। तस्मात् परीक्षणं कार्यं भृत्यानामादितो नृपैः। अन्ने पाने दन्तकाष्ठे तथाभ्यङ्गेऽवलेखने। उत्सादने कषाये च परिषेकेऽनुलेपने। स्रजु वस्त्रेषु शय्यासु कवचाभरणेषु च। पादुकायादपीठेषु पृष्ठेषु गजवाजिनाम्। विषजुष्टेषु चान्येषु नखधूमाञ्जनादिषु। लक्षणानि प्रवक्ष्यामि चिकित्सामथानन्तरम्" । ४शुक्राच्चपाचकौषधादौ त्रि०।

पाचन न०पाचयति कर्त्तरि ल्यु पाच्यतेऽनेन करणे ल्युट् वा। १पापक्षयकारके प्रायश्चित्ते मेदि० तस्य फलानुत्पादनेन पापस्य नाशनात् तथात्वम्। २दोषपाचनसाधनद्रव्यभेदे तानि च चक्रपाणिदत्तेन रोगभेदे नानाविधान्युक्तानि तत्र द्रष्टव्यानि तत्प्रदानकालश्च "ज्वरितं षडहेऽतीते लघ्वन्नमतिभोजनम्। सप्ताहात् पच्यतेऽस्तब्धे सामे स्यात् पाचनं हितम्"। सर्वपाचनद्रव्यप्रमाणं वैद्यके उक्तं यथा "दशरत्तिकमाषेण गृहीत्वा तोलकद्वयम्। दत्त्वाम्भः षोडशगुणं ग्राह्यं पादावशेषितम्" ३अग्नौ पु० मेदि०। ४अम्लरसे हेमच०। ५रक्तैरण्डे पु०राजनि०६ह०। रितक्यां स्त्री ङीप् मेदि०। स्वार्थे क। पाचनक तत्रार्थेषु पाचन+संज्ञायां कन्। टङ्कने (सोहागा) हेमच०।

पाचल न०पाचयति पच–णिच् बा०कलन्। १पाचने हेमच० २पाचके ३अग्नौ ४रम्यनद्रव्ये ५वायौ च पु० शब्दर०।

पाची स्त्री पाचयति पाचि–इन् गौरा० ङीष्। मरकतपत्रां हरितलतायां (पाच्ये) ख्याते लताभेदे राजनि०

पाच्य त्रि०पच–आवश्यके यत् आवश्यकार्थत्वात् न कुत्वम्। अवश्यपचनीये।

पाजस् न० पाति रक्षत्यनेन पा–असुन् जुट् च। १बले निघण्टुः पृषो० पस्य बः। बाजस् अन्ने निघण्टुः पाजसे हितम् यत्। पाजस्य बलकरे त्रि० यजु० २५ ८।

पाञ्चकपाल त्रि० समाहारद्विगुः तस्येदम् अण्। पञ्चकपालसम्बन्धिनि। द्विगुनिमित्तत्वाभावात् "द्विगोर्लुगनपत्ये" पा० न लुक् सि०कौ०।

पाञ्चजन्य पु० पञ्चजनस्य दैत्यभेदस्येदम् बा० यञ्। पञ्चजनदैत्यास्थिनिमित्ते १विष्णोः शङ्खे तत्कथा "ससद्रः प्रत्युवाचेदं दैत्यः पञ्चजनो महान्। तिमिरूपेण तं बालं ग्रस्तवानिति भारत!। स पञ्चजन्यमासाद्य जघान पुरुषोत्तमः। न चासमाप्तं तं बालं गुरुपुत्रं तदाऽच्युतः। स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्दनः। स च देवमनुष्येषु पाञ्चजन्य इति श्रुतः" हरिवं० ९०अ०। पञ्चभिर्जनैर्निर्वृत्तः ष्ट्रञ्। पञ्चजननिष्पाद्ये पञ्चवर्णे काश्यपवासिष्ठभारद्वाजाङ्गिरसच्यवनरूपाग्निपञ्चकसाध्ये २वह्निभेदे यथोक्तं भा०व० २१९अ०। "काश्यपो ह्यथ वासिष्ठः प्राणश्च प्राणपुत्रकः। अग्निराङ्गिरसश्चैव च्यवनश्चिसुवर्चकः। अचरत् स तपस्तीव्रं पुत्रार्थं बहुवार्षिकम्। पुत्रं लभेयं धर्मिष्ठं यशसा ब्रह्मणा समम्। महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ। जज्ञे तेजोमहार्चिष्मान् पञ्चवर्णः प्रभावतः। समिद्धोऽग्निः शिरस्तस्य बाहू सूर्यनिभौ तथा। त्वङ्नेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत। पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः। पाञ्चजन्यः श्रुतोदेवः पञ्चवंशकरस्तु सः"। पाञ्चजन्यसादूरदेशादि चतुरर्थ्यां० कर्णा०फिञ्। पाञ्चजन्यायनि तत्सन्निकृष्टदेशादौ त्रि०।

पाञ्चजन्यधर पु० पाञ्चजन्यं धारयति धारि–अच् ह्रस्व। विष्णौ हारा०। [पञ्चदश्यां भवे

पाञ्चदश्य त्रि० पञ्चदश्यां भवः कालत्वेऽपि सन्निवेशा०ष्यञ्।

पाञ्चदश्य पु० पञ्चदशभिः सामधेनीमन्त्रैः प्रकाश्यः ष्यः। पञ्चदशभिः सामधेनीमन्त्रैः प्रकाश्ये अलौकिके यज्ञौ भाग० ६।१।२१।

पाञ्चभौतिक त्रि॰ पञ्चभ्यो भूतेभ्य आगतः ठक् द्विपदवृद्धिः। आकाशादिभूतपञ्चकारब्धे देहादौ "पाञ्चभौतिको देहः" "चातुर्भौतिकमित्येके" "ऐकभौतिकमित्यपरे" सां॰सू॰। "ऐकभौतिकमैकैकिकभौतिकमित्यर्थः तत्र मनुष्यादिशरीरे पार्थिवाधिक्येन पार्थिवता एवं मूर्ध्यादिलोकेषु तैजसाधिक्येन तैजसादिना शरीराणां सुवर्णादीनामिव" भा॰। इत्यनेकेषां मतसङ्गा ५अ॰ स्वयं निर्णयस्तत्रोक्तो यथा "न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्" सां॰सू॰ "बहूनां भिन्नजातीयानां चोपादानत्वं घटपटादिस्थले न दृष्टमिति सजातीयमेवोपादानम्। इतरच्च भूतचतुष्टयसुपष्टम्भकमित्याशयेन पाञ्चभौतिकत्वव्यवहारः। एकोपादानकत्वेऽपि पृथिव्येवोपादानं सर्वशरीरस्य शरीरस्यैकमात्रभूतोपादानकत्वं पूर्वोक्तमनेनैव प्रसङ्गेन विशिष्यते" भा॰ "सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत्" सां॰ सू॰ सर्वेषु शरीरेषु पृथिव्येवोपादानम् असाधारण्यात् आधिक्यादिभिरुत्कर्षात्। अत्रापि शरीरे पाञ्चभौतिकादिभौतिकत्वव्यपदेशः पूर्ववत् इन्द्रियाणां भौतिकत्ववदुपष्टम्भकत्वमात्रेणेत्यर्थः" भा॰। अयञ्च सांख्यपक्षः। वेदान्तिमते तु तत्रात्मकता कायस्य तच्च कायशब्दे १६२४ पृष्ठादौ दर्शितं तत्र द्रष्टव्यम्।

पाञ्चालिका स्त्री पञ्चाली स्वार्थे अण् ततः स्वार्थे क कापि अतइत्त्वम्। वस्त्रादिनिर्मितपुत्तलिकायाम् हिरूप॰।

पाञ्चवर्षिक त्रि॰ पञ्च वर्षाः प्रमाणमस्य ठञ् तस्य वा न लुक्। पञ्चवर्षवयस्के लिका॰।

पाञ्चशब्दिक त्रि॰ पञ्चभिः शब्दैर्निर्वृत्तं ठक्। पञ्चभिः शब्दैर्निष्पादिते वाद्यभेदे। पञ्चशब्दाश्च वाद्यभेदाः यथा "अङ्गुजं कर्मजं चैव तन्त्रजं कांस्यजं तथा। फुत्कृतं चेति मुनिभिः कथितं पाञ्चशब्दिकम्" स्कन्दे रेवाख॰।

पाञ्चार्थिक पु॰ बहु अर्थाः सन्त्यानि पाशाःवा यत्र सन्ति ठन् बा॰ वृद्धिः। १पशुपतिशब्दवर्णितकृत्यपञ्चकान्विते २तत्रोक्तपाशपञ्चकयुते च पाशुपतागमे त्रिका॰।

पाञ्चाल त्रि॰पञ्चालदेशे भवः स्वार्थे वा अण्। १पञ्चालदेशभवे स्त्रियां ङीप्। पाञ्चाली। २पञ्चालदेशे च पञ्चानां विषयाणामन्यतोऽनवगतानां प्रकाशनायाचलमिति पृथो॰। ३शास्त्रे "भद्रत्तं च निवृत्तं च शास्त्रं पाञ्चालसंज्ञकम्" भाग॰ ४।२५ व्याख्यायां श्रीधरधृतवाक्यम्।

पाट् अव्य॰ पट-णिच् क्विप्। सम्बोधने मेदि॰।

पाटक त्रि॰ पट-ण्वुल्। १छेदके २महाकिल्लो ३कटकान्तरे ४वाद्ये ५अन्नादिवाहने ६मूलद्रव्यापचये ७रोधे मेदि॰ ८ग्रामैकदेशे हेमच॰।

पाटच्चर पु॰ पटच्चर एव स्वार्थे प्रज्ञादित्वादण्। चौरे अमरः

पाटन न॰ चु॰ पट-भावे ल्युट। छेदने

पाटल पु॰ पाटयति पट-णिच्-कलच्। १श्वेतरक्तवर्णे। २तद्वति त्रि॰ (पारुल) ख्याते १वृक्षे स्त्री॰ अमरः। ४तत्पुष्पे ५आशुधान्ये च न॰ "अत्युष्णं पाटलं बहुनिष्यन्दि च त्रिदोषकृत्" राजनि॰। ६रक्तलोध्रे स्त्री शब्दच॰। पाटलोत्पत्तिर्यथा। "प्रदह्यमानौ चरणौ दृष्ट्वाऽसौ कुसुमायुधः। उत्ससर्ज धनुः श्रेष्ठं तच्चमामाथ पञ्चधा। यदासोनृसृष्टिबन्धन्तु रक्तपृष्ठं महाप्रभम्। स चम्पकतरुर्जातः खगगन्धाढ्यो सुधाकृतिः। नाहस्यानं शुभाकारं यदासीद् वज्रभूषितम्। तत् जातं केशराढ्यं च बकुलो नामतो नगः। या च कोटी शुभाह्यासीदिन्द्रनीलविभूषिता। जाता सा पाटला रम्या भृङ्गराजिविभूषिता" वामनपु॰ ६अ॰। पाटलवर्णत्वात् ७दुर्गायाम् स्त्री तन्त्रसा॰। पाटलावनौषधदे द्रव्यम्। पाटलानां समूहः पाशा॰ य। पाटल्या वृक्षसमूहे स्त्री।

पाटलद्रुम पु॰ नित्यकर्म्म॰। पुन्नागवृक्षे राजनि॰।

पाटलापुष्पसन्निभ न॰ पाटलापुष्पेण तुल्यम् नित्यस॰। पद्मकाष्ठे राजनि॰।

पाटलावती स्त्री १नदीभेदे भा॰भी॰ ६अ॰। २दुर्गायाञ्च। "अपर्णानेकपर्णा च पाटला पाटलावती" तन्त्रसा॰।

पाटलि स्त्री पट-णिच् अलि। (पारुल) ख्याते १वृक्षे "पाटलिसंसर्गसुरभिवनवाताः" इति शकुन्तला २घण्टापाटली च अमरः वा ङीप्। ङीवन्तः ३कटभीवृक्षे ४शुष्ककचवृक्षे च राजनि॰। [हारा॰।

पाटलिक पु॰ पाटि-अलि संज्ञायां कन्। अन्यधर्म्मज्ञे

पाटलिपुत्र न॰ (पाटना) ख्याते नगरभेदे कुसुमपुरे हेमच॰

पाटलोपल पु॰ नित्यक॰। श्वेतरक्तवर्णयुक्ते मणिभेदे

पाटव न॰पटोर्भावः पृथ्वा॰इमनिचोऽभावपक्षे अण्। १दक्षत्वे २आरोग्ये च राजनि॰। पटोरुत्पन्नाः अण्। पाटवाः तच्छाते ब॰व॰। [त्रिका॰।

पाटविक त्रि॰ पाटवमस्यस्य ठन्। १पटौ दक्षे २धूर्त्ते च

पाटहिका स्त्री पटहस्येदम् पाटहं तदाकारमस्यास्ति ठन्। १गुञ्जायां हारा॰ पटहे तद्वाद्ये प्रहतः ठक्। २पटहवाद्यवादके त्रि॰।

पाटा स्त्री पाठा+पृषो॰ । पाठायाम् त्रय॰ २।२७।४

पाटित त्रि॰ चुरा॰ पट–क्त । विदारिते हेमच॰ ।

पाटी स्त्री पट–इन् वा ङीष् । १बालाष्टवर्षे राजनि॰ २परिपाट्याम् गुणनादीनां ३सप्तकमे च "अस्ति त्रैराशिकं बीजं पाटी च विमला मतिः" लीला॰।

पाटीगणित न॰ पाट्या परिपाट्या गणितम् । लीलावत्याद्यङ्कशास्त्ररूपे गणितशास्त्रे । "पाटी नाम सङ्कलितव्यवकलितगुणनभजनादीनां क्रमः तया युक्तं गणितं पाटीगणितम्" लीलावती टीका ।

पाटीर पु॰पटीर+स्वार्थे अण् । पटीरे चन्दने विश्वः ।

पाटुपट त्रि॰ "पाठेर्णिलुक् चोक् चाभ्यासस्य" वार्त्ति॰ पाटि–अच् नि॰ णिलुक् द्वित्वमभ्यासस्य उक् च । पाटके । त्रि॰कौ॰ । पक्षे पाठ तत्रार्थे ।

पाटच त्रि॰ चु॰ पट–कर्मणि यत् । १छेद्ये २षट्शाके न॰ राजनि॰ । "पाटच्याकन्तु मधुरं दुर्जरं गुरवाकि च" राजनि॰ ।

पाठ पु॰ पठ–भावे घञ् । १शास्त्रादेरभ्यासे पौनःपुन्येन उच्चारणे । णिच्–भावे अच् । २अध्यापने शिष्येभ्यः प्रतिपादने च पाठस्याष्टादश दोषा यथा "शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् । विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् । काकस्वरं निरसितं तथा स्थानविवर्जितम् । व्याकुलं तालहीनञ्च पाठदोषाः चतुर्दश । संगीतं शिरसः कम्पमल्पकण्ठमनर्थकम्" मार्क॰पु॰। अध्ययनक्रमो यथा "आचम्य प्रयतो नित्यमधीयीत उदङ्मुखः । उपसृत्य तत्पादौ वीक्षमाणो गुरोर्मुखम्" अध्यापनक्रमो यथा "अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चाचमेत् । प्राक् कूलात् पर्युपासीनः पवित्रैश्चैव पावितः । प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति । ब्राह्मणः प्रणवं कुर्यादन्ते च विधिवद्द्विजाः ! । कुर्याद्ध्यापनं नित्यं च ब्रह्मादीनि पूर्वतः । सर्वेषामेव भूतानां वेदश्चक्षुः सनातनः । अधीयीताध्ययन्नित्यं ब्राह्मण्यमधीयतेऽन्यथा" इति कौर्मे उपरिभागे १३अ॰ ।

पाठक त्रि॰ पठ–ण्वुल् । १पठनकर्त्तरि णिच्–ण्वुल् । पाठके २अध्यापके ३पुराणादिवाचके च । तल्लक्षणादिकस्तु तिन्त॰ यथा

"भविष्यपुराणम् "इतिहासपुराणानि श्रुत्वा भक्त्या विशांपते !। सुचरितं सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो !। ब्राह्मणं वाचकं विद्वान्नान्यवर्णजमादरात्। श्रुत्वान्यवर्णजाद्राजन् ! वाचकाद्वरकं व्रजेत्" तथा "देवार्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः । ग्रन्थिञ्च शिथिलं कुर्याद्वाचकः कुरुनन्दन ! । पुनर्बध्नीत तत्सूत्रं न सङ्गा धारयेत् क्वचित् । हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः । दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत्फलम्" । कांस्योपदोहनाः कांस्यक्रोड़ाः । "वाचकः पूजितोयेन प्रसन्नास्तस्य देवताः"। तथा "ज्ञात्वा पर्वसमाप्तिं च पूजयेत् वाचकं बुधः । आत्मानमपि विक्रीय, य इच्छेत् सफलं कृतम्" । तथा "विस्पष्टमद्भुतं शान्तं स्पष्टाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् । बुध्यमानः स्वयं युक्तो यन्यार्थं कृतस्त्रयो नृप ! । ब्राह्मणादिषु सर्वेषु यन्यार्थं चार्थयन्नृप ! । य एवं याचयेद्ब्रह्मन् स विप्रो व्यास उच्यते" । "सप्तस्वरसमायुक्तं काले काले विशाम्पते ! । प्रदर्शयन् रसान् सर्वान् याचयेद्वाचको नृप !"।

पाठच्छेद पु॰ ६त॰। १पाठस्य विच्छेदे २यतौ च त्रिका॰।

पाठन न॰ पाठ–णिच्–भावे ल्युट् । १अध्यापने युच् पाठना तत्रार्थे स्त्री। २कर्त्तरि ल्यु । ३पाठके त्रि॰ स्त्रियां गौरा॰ ङीष् ।

पाठभू स्त्री ६त॰ । पाठस्थाने त्रिका॰ पाठशालादयोऽप्यत्र ।

पाठमञ्जरी स्त्री पाठस्याभ्यासस्य मञ्जरीव । शारिकादाम् शब्दमाला । [रिकायाम् शब्दमा॰ २ पाठयुक्ते त्रि॰ ।

पाठशालिनी स्त्री पाठेन शलते शल–णिनि ङीष् । १शा-

पाठा स्त्री पठ–कर्मणि घञ् टाप् । विडङ्गवल्याम्(आकनादि) अमरः । "पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः । हन्ति शूलज्वरच्छर्दि कुष्ठातीसारहृद्रुजः । दाहकण्डूविषश्वासमिगुल्मगलग्रहान्" भावप्र॰ । स्वार्थे क कादि च्यतद्रूपम् । पाठिका तत्रार्थे भावप्र॰ । पाठकचर्यां स्त्रियां च ।

पाठाद्यचूर्ण न॰"पाठा विल्वानलव्योषजम्बूदाडिमधातकी । कटुकातिविषामुस्तदारवीभूनिम्बवत्सकैः । सर्वैरेतैः समं चूर्णं कौटजतण्डुलाम्बुना । सक्षौद्रञ्च पिबेच्छर्दि ज्वरातीसारशूलवान् । तद्दाहपक्षपीदोषारोचकानलसादजित्" चक्र॰ उक्ते चूर्णभेदे ।

पाठि पु॰ पाठ–इन् । पृष्ठे पाठीनशब्दे दृश्यम् ।

पाठिन् त्रि॰ पठ–णिनि । १पाठके स्त्रियां ङीष् । पाठेवाकारेऽस्यस्य इनि । २चित्रकवृक्षे अमरः । [राजनि॰ ।

पाठीकुट पु॰ पाठेव कुटति कुट–क पृषो॰ । चित्रकवृक्षे

पाठीन पु॰स्त्री॰पाठिं पृष्ठं नमयति नम–ड दीर्घः । १मत्स्य-

भेदे (बोयाल) अमरः स्त्रियां ङीष्। "पाठीनरोहिता-वाद्यौ" मनुः। "पाठीनः श्लेष्मलः स्निग्धो मधुरश्च कषायकः। बल्यो हृद्यः कटुः पाके रोचनो वातपित्तनुत्" राजव०पठ-ईनन्। २गुग्गुलुवृक्षे ३पाठके त्रि० मेदि०।

पाठेय त्रि० पाठायां भवः नद्या० ढक्। पाठाभवे

पाण पु०पण-भावे घञ्। १व्यवहारे २पणने ३समये च भा० व०६०४८श्लो०। ४पाणौ शब्दच०।

पाणि पु० पण-इण् आयाभावः। १करे २कुञ्चिके वृक्षे च (कुलेखाड़ा) अमरः ३पणप्रवीण्यां ४वृद्धे च स्त्री० उणा०। करश्च मणिबन्धावध्यङ्गुलिपर्य्यन्तः।

पाणिक त्रि० पणेन क्रीतं निष्का० ठक्। १पणेन क्रीते २कुमारानुचरमात्रभेदे भा०व० ५५अ०।

पाणिकच्छपिका स्त्री पाणिभ्यां कृता कच्छपिका कच्छपस्तदाकारोऽस्त्यस्याः ठन्। कूर्मसदृश्याम् "पाणिकच्छपिकां कुर्य्यात् कूर्ममन्त्रेण साधकः" कालिकापु०५६अ०

पाणिकर्म्मन् पु० पाणिभ्यां वादनरूपं कर्म्मास्य। १महादेवे भा०शा० २८६। २पाणिभ्यां वादके त्रि०।

पाणिकूर्चा स्त्री कुमारानुचरमात्रभेदे भा० श० ४६ अ०।

पाणिखात न० तीर्थभेदे भा०व० ८३ अ०।

पाणिगृहीती स्त्री पाणिर्गृहीतो यस्याः ङीप्। पाणिग्रहणेन कृतसंस्कारायां सवर्णायां स्त्रियाम् अमरः। "पाणिग्रहणसंस्काराः सवर्णास्वेव पठ्यते" मनुना सवर्णायामेव पाणिग्रहणविधानात् तथात्वम्।

पाणिग्रह पु० पाणिर्गृह्यतेऽत्र ग्रह-आधारे अप्। विवाहे "हस्तास्वातिषु ग्रहतौ त्रिमिथुनेषूद्यतस्य पाणिग्रहः" वृ०स० १०० अ०।

पाणिग्रहण न० पाणिर्गृह्यते अत्र ग्रह-आधारे ल्युट्। विवाहे हेमच०। पाणिग्रहणप्रकारः आश्व० गृ० सू० १७२ यथा "पश्चादग्नेर्वेदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुम्भं समन्वारब्धायां स्त्रियां तिष्ठन् प्रत्यङ्मुखः प्राङ्मुखा आसीनाया गृह्णामि ते सौभगत्वाय हस्तमित्यङ्गुष्ठमेव गृह्णीयादादि कामयीत पुमांस एव मे पुत्रा जायेरन्निति" सू०। "दक्षिणतः पत्युरुपविशेत् उत्तरतः पतिरिति शास्त्रान्तरे दृष्टम्। "उत्तानेनोत्तानं पाणिं गृह्णीयात्" नारा०।

"अङ्गुलीष्वेव स्त्रीकामः" सू० "एवकारोऽङ्गुष्ठनिवृत्त्यर्थः। स्त्रीकामो दुहितृकाम इत्यर्थः" नारा०"हस्तमङ्गुष्ठमुभयकामः" सू०। "उभयकामः पुत्रदुहितृकामः अङ्गुष्ठमङ्गुलीभिः" सह गृह्णीयादित्यनुषङ्गः नारा०।

पाणिग्रहणिक त्रि०पाणिग्रहणं प्रयोजनमस्य ठक्। विवाहाङ्गे मन्त्रे "पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः" "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" मनुः ते च मन्त्राः "अर्य्यमणं नु देवं कन्या अग्निमयक्षतेत्यादयः" आश्व० गृ० १।७।१७ सूत्रादौ १९ सूत्रान्ते पठिता बोध्याः। [पत्यौ भा० अनु० २४२२ श्लोकः।

पाणिग्रहीत पु० पाणिं गृह्णाति ग्रह-क्त कृ०तः। वोढरि

पाणिग्राह पु० पाणिं गृह्णाति ग्रह-अण् उप० स०। वोढरि मनुः ५।१४८।

पाणिघ त्रि० पाणिं पाणिना वा हन्ति "पाणिघताडघौ शिल्पिनि" पा० हन-ट नि०। १पाणिताडके पाणिना २मृदङ्गादिपादके च शिल्पिभेदे।

पाणिघात पु० पाणिं हन्ति-अशिल्पित्वात् अण् उप०स०। १पाणिताडकमात्रे सि०कौ०। हन-भावे घञ्। २पाणिहनने पु०। [हस्ततालवादके यजु० ३५।२०।

पाणिघ्न त्रि० पाणौ हन्ति हन-टक् वेदे शिल्पिनि नि०।

पाणिज पु० पाणौ जायते जन-ड ७त०। नखे हेमच०।

पाणितल न० ६त०। १करस्याधोभागे पाणिरेव तलम्। करतले। तन्नितद्रव्ये २तोलके कर्मशब्दे दृश्यम्।

पाणिधर्म्म पु० पाणिग्रहणाख्यो धर्म्मः शा० त०। पाणिग्रहणरूपे धर्म्मे "पाणिधर्मो नाङ्गमयं नपुंभिः सेवितः पुरा" भा० अ० ८१ आ०।

पाणिन पु० पणिनो मुनेरपत्यम् अण् गाथीत्यादिना प्रकृत्या न टिलोपः। पाणिनौ मुनौ त्रिका०।

पाणिनि पु० पणिनो मुन्यपत्यम् अण् ततः यूनि इञ् न टिलोपः। पाणिनिनामके मुनौ "येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः" शेखरः। स च अष्टाध्यायीरूपसूत्रपाठं गणपाठं धातुपाठं लिङ्गानुशासनं शिक्षारूपं च सन्वपञ्चकं चकार। पाणिनिमतञ्च सर्वदर्शनसंग्रहे दर्शितं ततो दिङ्मात्रं प्रदर्श्यते।

"भवति च व्याकरणशास्त्रस्य शब्दानुशासनं प्रयोजनं (तस्य तदुद्देशेन प्रवृत्तेः ततप्रयोजनत्वम्) यथा स्वर्गोद्देशेन प्रवृत्तस्य यागस्य स्वर्गः प्रयोजनं तस्मात् शब्दानुशिष्टिः संस्कारपदवदनीया शब्दानुशासनस्य प्रयोजनम्। नन्वेवमप्यभिमतं प्रयोजनं न लभ्यते तदपायाभावात्। अथ प्रति-

पदपाठ एवाभ्युपाय इति मन्येथाः तर्हि स क्षनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठो भवेत् शब्दापशब्दभेदेनानन्त्याच्छब्दानाम् एवं हि समाम्नायते "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदपाठविहितानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम" बृहस्पतिश्च प्रवक्ता इन्द्रोऽध्येता दिव्यं वर्षसहस्रमध्ययनकालः न च पारावाप्तिरभूत् किंतु ताद्य यचिरं न जीवति अधीतबोधाचरणप्रचारणैस्तुर्भिरुपायैर्विद्योपयुक्ता भवति। तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात्तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति प्रयोजनं न सिद्ध्येदिति चेन्नैवं शब्दप्रतिपत्तेः प्रतिपदपाठसाध्यत्वानङ्गीकारात् प्रकृत्यादिविभागकल्पनावत्तु लक्ष्येषु सामान्यविशेषरूपाणां लक्षणानां पर्जन्यवत् सकृदेव प्रवृत्तौ बहूनां शब्दानामनुशासनोपलम्भाच्च तथाहि कर्मेगयण्, इत्येकेन सामान्यरूपेण लक्षणेन कर्मोपपदाद्गातुमात्मादण्प्रत्यये कृते कुम्भकारः काण्डलाव इत्यादीनां बहूनां शब्दानामनुशासनमुपलभ्यते एवमातोऽनुपसर्गेक इति। प्रतिपदपाठस्याशक्यत्वप्रतिपादनपरोऽर्थवादः। नन्वन्येष्वयङ्क्षेषु कृतेषु किमित्येतदेवाद्रियते। उच्यते प्रधानत्वं षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। तदुक्तम् "व्यासस्य ब्रह्मणस्तस्य तपसासुत्तमं तपः। प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः" इति। तस्मात् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनं पारम्पर्येण तु वेदरक्षादीनि। अतएवोक्तं भगवता भाष्यकारेण "रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति" साधुशब्दप्रयोगवशादभ्युदयोऽपि भवति तथाच कथितं कात्यायनेन "शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देनेति"। अन्यैरप्युक्तम् "एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति"। तथा "नाकमिष्टसुखं यान्ति सुयुक्तैर्वाङ्मयैः। अथ पतन्त्यधिपो यान्ति ये चोत्क्रमणभाषिणः"। "नन्वचेतनस्य शब्दस्य कथमीदृशं सामर्थ्यमुपपद्यत इति चेन्नैवं मन्येथाः महता देवेन साम्यश्रवणात् तदाह श्रुतिः "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश"। व्याचकार च भाष्यकारः "चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः, त्रयो अस्य पादाः लडादिविषयाः त्रिधा भूतभविष्यद्वर्तमानकालाः। द्वे शीर्षे द्वौ नित्यानित्यावात्मानौ नित्यः कार्यश्च व्यङ्ग्यव्यञ्जकभेदात्, सप्त हस्तासो अस्य तिङा षड् सप्त सुब्विभक्तयः, त्रिधा बद्धः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः, वृषभ इति प्रसिद्धवृषभत्वेन रूपणं क्रियते वर्षणाद्वर्षणञ्च स्नानपूर्वकानुष्ठानेन फलप्रदत्वं, रोरवीति शब्दं करोति रौतिः शब्दकर्मा। इह शब्दशब्देन प्रपञ्चो विवक्षितः। महो देवो मर्त्यां आविवेश महादेवः शब्दः मर्त्यां मरणधर्माणो मनुष्यास्तानाविवेशेति महता देवेन परेण ब्रह्मणा साम्यमुक्तं स्यादिति" जगच्चिदानं स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मेति हरिणाभाणि ब्रह्मकाण्डे "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति। ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीतेः कथं चातुर्विध्यमुक्तमिति चेन्नैवं प्रकारान्तरस्य प्रसिद्धत्वात्। तदुक्तं प्रकीर्णके "द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा। अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवदिति"। "कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति" हेलाराजो व्याख्यानवान्। कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतव इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषद्योतनादुपसर्गेष्वेवान्तर्भवतीत्यभिसन्धाय यदचातुर्विध्यं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम्। ननु भवता स्फोटात्मा नित्यः शब्द इति निजागद्यते तत्र मृष्यामहे तत्र प्रमाणाभावादिति केचित् अत्रोच्यते प्रत्यक्षमेवात्र प्रमाणं गोरित्येकं पदमिति नानावर्णातिरिक्तैकपदावगतेः सर्वजनीनत्वात्र क्षमति बाधके पदानुभवः शक्यो मिथ्येति वक्तुं पदार्थप्रतीतेरन्यथानुपपत्त्यापि स्फोटोऽभ्युपगन्तव्यः। न च वर्णेभ्य एव तत्प्रत्ययः प्रादुर्भवतीति परीक्षाक्षमं विकल्पासहत्वात् किं समस्ता व्यस्ता वा अर्थप्रत्ययं जनयन्ति ? नाद्यः वर्णानां क्षणिकानां समूहासम्भवात् नान्त्यः व्यस्तवर्णेभ्योऽर्थप्रत्ययासम्भवात्। न च व्यासमासाभ्यामन्यः प्रकारः समस्तीति तस्माद्वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिप्रत्तिः स स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति। अतएव स्फुट्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यङ्ग्यः स्फुटीभवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायक इति स्फोटशब्दार्थसम्भवथा निराकृतः। तथाचोक्तं भगवता पतञ्जलिना महाभाष्ये

"अथ गोरित्यत्र कः शब्दो ? येनोच्चरितेन साक्षात्कृतसकलदूरविप्रकर्षाणां सम्प्रत्ययो भवति स शब्द इत्युच्यते" इति। विहतश्च कैयटेन "वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाचकत्वमिच्छन्ति वर्णानां वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गादित्यादिना तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापित" इत्यन्तेन प्रबन्धेन। ननु स्फोटस्यार्थप्रत्यायकत्वं न घटते विकल्पासहत्वात् किमभिव्यक्तः स्फोटोऽर्थं प्रत्याययति अनभिव्यक्तो वा न चरमः सर्वदा अर्थप्रत्ययजनकार्थोत्पादप्रसङ्गात् स्फोटस्य नित्यत्वाभ्युपगमेन निरपेक्षस्य हेतोः सदा सत्त्वेन कार्यस्य विलम्बायोगात्। अथैतद्दोषपरिजिहीर्षया अभिव्यक्तः स्फोटोऽर्थं प्रत्यायतीति कल्प्यते तथाभिव्यञ्जयन्तो वर्णाः किं प्रत्येकमभिव्यञ्जयन्ति सम्भूय वा पक्षद्वयेऽपि वर्णानां वाचकत्वपक्षे भवता ये दोषा भाषितास्त एव स्फोटाभिव्यञ्जकत्वपक्षे आपर्तनीयाः। तदुक्तं भट्टाचार्यैर्मीमांसाश्लोकवार्तिके "यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः। सोऽपि पर्यनुयोगेन नैकेनापि विमुच्यते" इति। "विभक्त्यन्तं पदम्" विभक्त्यन्तेष्वेव वर्णेषु पाणिनिना "ते विभक्त्यन्ताः पदमिति" गौतमेन च पदसंज्ञायाविहितत्वात् सङ्केतग्रहणेनानुग्रहवशाद्वर्णेष्वेव पदबुद्धिर्भविष्यति। तर्हि यर इत्येतस्मिन् पदे यावन्तो वर्णास्तावन्त एव रस इत्यत्रापि वर्णं नवं नदी दीनो रामो मारो राजा जारेत्यादिष्वर्थभेदप्रतीतिर्न स्यादिति चेन्न क्रमभेदेन भेदसम्भवात् तदुक्तं तौतातिकैः "यावन्तो यादृशा ये च यदर्थप्रतिपादने। वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः" इति। तस्माद्यथोभयोः समो दोषो न तेनैकश्चोद्यो भवतीति न्यायात् वर्णानामेव वाचकत्वोपपत्तौ नातिरिक्तस्फोटकल्पनाऽवकल्पते इति चेत् तदेतत् कामकुशावलम्बनकल्पं विकल्पासहत्वात्। किं वर्णमात्रे पदप्रत्ययावलम्बनं वर्णसमूहे वा ? नाद्यः परस्परविलक्षणवर्णानामभिन्नं निमित्तं पुष्पेषु विना स्रग्नं मालाप्रत्ययवदित्येकं पदमिति प्रतिपत्तेरनुपपत्तेः नापि द्वितीयः उच्चरितप्रध्वस्तानां वर्णानां समूहभावासम्भवात्। तत्र हि समूहव्यपदेशः ये पदार्था एकस्मिन् प्रदेशे सहावस्थिततया बहवोऽनुभूयन्ते यथा एकस्मिन् प्रदेशे सहावस्थिततयानुभूयमानेषु धवखदिरपलाशादिषु समूहव्यपदेशः यथा वा गजनरतुरगादिषु, न च ते वर्णास्तथानुभूयन्ते उच्चरणप्रध्वस्तत्वात्। अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्तौ समूहासम्भवात् नापि वर्णेषु काल्पनिकः समूहः कल्पनीयः परस्परान्वयप्रसङ्गात्। एकार्थप्रत्यायकत्वसिद्धौ तदुपाधिना वर्णेषु पदत्वप्रतीतिः तत्सिद्धावेकार्थप्रत्यायकत्वसिद्धिरिति। तस्माद्वर्णानां वाचकत्वासम्भवात् स्फोटोऽभ्युपगन्तव्यः। ननु स्फोटवाचकतापक्षेऽपि प्रागुक्तविकल्पप्रसरेण घट्टकुटीप्रभातायितमिति चेत् तदेतन्मनोराज्यविजृम्भणं वैधर्म्यसम्भवात्। तथाहि अभिव्यञ्जकोऽपि प्रथमो ध्वनिः स्फोटमस्फोटमभिव्यनक्ति उत्तरोत्तराभिव्यञ्जककमेण स्फुटं स्फुटतरं स्फुटतमं, यथा स्वाध्यायः सकृत् पठ्यमानो नावधार्यते अभ्यासेन तु स्फुटाध्यवसायः यथा वा रत्नतत्त्वं प्रथमप्रतीतौ स्फुटं न चकास्ति चरमे चेतसि यथावदभिव्यज्यते "नादेराहितबीजायामन्त्येन ध्वनिना सह। आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवधार्यते" इति प्रामाणिकोक्तेः। तस्मादस्माच्छब्दादर्थं प्रतिपद्यामहे इति व्यवहारवशाद्वर्णानामर्थवाचकत्वानुपपत्तेः प्रथमे काण्डे तत्रभवद्भिर्भर्तृहरिभिरभिहितत्वात् निरवयवमर्थप्रत्यायकं शब्दतत्त्वं स्फोटाख्यमभ्युपगन्तव्यमित्येतत् सर्वम् "परमार्थसंविल्लक्षणसत्ता जातिरेव सर्वेषां शब्दानामर्थ इति प्रतिपादनपरे जातिसमुद्देशे प्रतिपादितम्। यदि सत्तैवार्थः सर्वेषां शब्दानां पर्यायता स्यात् तथा च कश्चिदपि युगपच्चतुरपदप्रयोगाभोग इति मन्यमानस्य भाषुमतः। तदुक्तम् "पर्यायाणां प्रयोगो हि भोगपक्षेण नेष्यते। पर्यायेष्वेव ते यस्माद्धदन्त्यर्थं न संहताः" इति। तस्मादयं पक्षो न चोदक्षम इति चेत् तदेतद्गगनरोमन्थकल्पं नीललोहितपीताद्युपरञ्जकद्रव्यभेदेन स्फटिकमणेरिव सम्बन्धिभेदात् सत्तायास्तदात्मना भेदेन प्रतिपत्तिसिद्धौ गोसत्तादिरूपगोत्वादिभेदनिबन्धनव्यवहारवैलक्षण्योपपत्तेः तथाचाम्नायवाक्यम् "स्फटिकं विमलं द्रव्यं यथा युक्तं पृथक् पृथक्। नीललोहितपीताद्यैस्तद्वर्णैरुपलभ्यते" इति। तथा हरिणाप्युक्तम् "सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः। तां प्रातिपदिकार्थश्च धात्वर्थश्च प्रचक्षते। सा सत्ता सा महानात्मा तामाहुस्तत्त्वदर्शिनः" इति। आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः गोत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं न भवति गोसत्तैव गोत्वं

नापरमन्वयि प्रतिभासते एवमन्वयसत्ता अश्वत्वमित्यादि वाच्यम्। एवञ्च तस्यामेव गवादिभिन्नायां सत्तायां जातौ गोशब्दादयो वाचकत्वेन व्यवस्थिताः प्रातिपदिकार्थञ्च सत्तामाहुः। भाववचनो धातुरिति पक्षे भावः सत्तैवेति धात्वर्थः सत्ता भवत्येव क्रियावचनो धातुरिति पक्षेऽपि "जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीमिति" जातिपदार्थनयानुसारेणानेकव्यक्तिक्रियासमूहे क्रियाया जातिरूपत्वप्रतिपादनात् धात्वर्थः सत्ता भवत्येव तस्य भावस्त्वतलाविति भावार्थे त्वतलादीनां विधानात् सत्तावाचित्वं युक्तं सा च सत्ता उदयव्ययवैधुर्याच्चित्या सर्वस्य प्रपञ्चस्य तद्विवर्त्ततया देशतः कालतो वस्तुतश्च परिच्छेदराहित्यात् सा सत्ता महानात्मेति व्यपदिश्यत इति कारिकाद्वयार्थः। द्रव्यपदार्थसंविज्ञानं तत्त्वमेव सर्वशब्दार्थ इति सम्बन्धसमुद्देशे समर्थितम् "सत्यं वस्तु तदाकारैरसत्यैरवधार्यते। असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते। अभ्रुवेण निमित्तेन देवदत्तस्टकं यथा। स्टकीतस्टकशब्देन शुक्लमेवाभिधीयते" इति। भाष्यकारेणापि "सिद्धे शब्दार्थसम्बन्धे" इत्येतद्वार्त्तिकव्याख्यानावसरे द्रव्यं हि नित्यमित्यनेन पन्थेन अवस्तोपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यं सर्वशब्दार्थः" इति निरूपितम्। जातिशब्दार्थवादिनो वाजप्यायनस्य मते गवादेः शबलः भिन्नद्रव्यसमवेतां जातिमभिदधति तस्यामवगाह्यमानायां तत्सम्बन्धात् द्रव्यमवगम्यते, शुक्लादयः शब्दा गुणसमवेतां जातिमाचक्षते गुणे तत्सम्बन्धात् प्रत्ययः द्रव्यसम्बन्धिसम्बन्धात् संज्ञाशब्दानामुत्पत्तिप्रभृत्याविनाशात् शैशवकौमारयौवनाद्यवस्थादिभेदेऽपि स एवायमित्यभिप्रत्ययबलात् सिद्धा देवदत्तत्वादिजातिरभ्युपगन्तव्या। क्रियास्वपि जातिराचक्ष्यते सैव धातवाच्या पचतीत्यादावनुवृत्तप्रत्ययस्य प्रादुर्भावात्। द्रव्यपदार्थवादिमते शब्दस्य व्यक्तिरेवाभिधेयतया प्रतिभासते जातिस्तूपलक्षणतयेति नानन्यादिदोषावकाशः। पाणिन्याचार्य्यस्योभयं सम्मतं यतो जातिपदार्थमभ्युपगम्य "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इत्यादिव्यवहारः, द्रव्यपदार्थमङ्गीकृत्य "सरूपाणामेकशेष एकविभक्तौ" इत्यादिः। व्याकरणस्य सर्वपारमेश्वरत्वान्नतद्वयाभ्युपगमे न कश्चिद् विरोधः। तस्मात् अद्वयं सत्यं परं ब्रह्मतत्त्वं सर्वशब्दार्थ इति स्थितम्। तदुक्तम् "तस्माच्छक्तिविभागेन सत्यः सर्वः सदात्मकः। इयोरर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते" इति। सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे "यत्र द्रष्टा च दृश्यञ्च दर्शनञ्चाविकल्पितम्। तस्यैवार्थस्य सत्यत्वमाहुस्तत्त्वविदिनः" इति। द्रव्यसमुद्देशेऽपि "विकारोपगमे सत्यं सुवर्णं कुण्डले यथा। विकारापगमो यत्र तामाहुः प्रकृतिं पराम्" इति। अभ्युपगताद्वितीयत्वनिर्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः "वाच्या सा सर्वशब्दानां शब्दाश्च न पृथक् ततः। अपृथक्त्वेऽपि सम्बन्धस्तयोर्नानात्मनोरिव" इति तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्यामात्रकल्पितत्वेन प्रतिनियताकारोपधीयमानरूपभेदं ब्रह्मतत्त्वं सर्वशब्दविषयः अभेदे च पारमार्थिके संहतिवशाद्व्यवहारदशायां स्वप्नावस्थावदुन्नावचः प्रपञ्चो विवर्त्तत इति कारिकार्थः। तदाहुर्वेदान्तवादिनिपुणाः। "यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः। एवं जाग्रत्प्रपञ्चोऽपि मयि मायाविजृम्भितः" इति। तदित्थं कूटस्थे परस्मिन् ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगते अनाद्यविद्यानिवृत्तौ तादृग्ब्रह्मात्मनावस्थानलक्षणं निःश्रेयसं सेत्स्यति। "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इत्यभियुक्तोक्तेः। तथाच शब्दानुशासनस्यास्य निःश्रेयससाधनत्वं सिद्धम्। तदुक्तम् "तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षते" इति। तथा "इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमार्गाणां नजिह्मा राजपद्धतिरिति"। तस्माद्व्याकरणशास्त्रं परमपुरुषार्थसाधनतयाध्येतव्यमिति"।

पाणिनिप्रोक्ताष्टाध्यायीरूपस्य व्याकरणत्वम्। तत्तात्पर्यञ्च वाक्यपदीये हरिणा ब्रह्मकाण्डे विस्तरतः उक्तं द्रष्टव्यम्।

पाणिनीय त्रि॰ पाणिनौ भक्तिरस्य छ। १पाणिनिभक्तियुक्ते तेन ज्ञातमुपज्ञातं वा छ। २पाणिनिना ज्ञाते ३तेनोपज्ञाते च। पाणिनिना प्रोक्तम् अण्। ४पाणिना प्रोक्ते त्रि॰ "अलतव्यूहाः पाणिनीयाः" व्या॰ परिभाषा।

पाणिन्धम(य) पाणिं धमति ध्मा—धयति वा धे—वा खश्। १पाणिवादके यान्तः २पाणितापके सुग्धबो॰तन्मूलं सुग्धम्।

पाणिपाद न॰ पाणी च पादौ च समाहृतौ समा॰द्व॰। पाण्योः पादयोश्च समाहारे ततः अस्त्यर्थे प्राग्वद्भूतात् मतुबेव न ठन्। पाणिपादवत् तद्युते त्रि॰कौ॰।

पाणिपीडन न॰ पाणिः पीड्यते अत्र पीड—आधारे ल्युट्। १विवाहे अमरः। ६तृ॰। २अन्योन्यं पाण्योर्मर्दने च।

पाणिबन्ध पु॰ पाणिर्बध्यतेऽत्र बन्ध–आधारे घञ्। विवाहे भा॰शा॰ २६७अ॰।

पाणिभुज् पु॰ पाणिरिव भुज्यते भोट्यते भुज–भोटने क्विप्। १उदुम्बरवृक्षे। पाणिना भुङ्क्ते भुज–क्विप्। २हस्तेन भोजके त्रि॰ शब्दच॰।

पाणिमर्द्द पु॰ पाणिं मृद्नाति मृद–अण् उप॰स॰। १करमर्द्दे राजनि॰। २करमर्द्दकमात्रे त्रि॰। [यस्मे हवा॰।

पाणिमुक्त न॰पाणिभ्यां मुक्तम्। हस्तक्षिप्यमाणे आयुधे

पाणिमुख पु॰ पाणिर्विप्रपाणिर्मुखमिव होमस्थानं यस्य। पितरि। "अग्निमुखा वै देवाः पाणिमुखाः पितरः हि ब्राह्मणम्" आश्व॰श्रौ॰४।८।६ "देवानामग्निमुखत्वादग्नौ होमः पितॄणां पाणिमुखत्वात् पाणौ होमः" नारा॰। होमयात्राग्नौकरणाङ्गहोमः पाणिहोमशब्दे दृश्यः।

पाणिरुह पु॰ पाणौ रोहति रुह–क। नखे राजनि॰

पाणिवाद पु॰ पाणिं पाणिना मृदङ्गादिकं वा वादयति वद–णिच्–अच्। १हस्तताडके २हस्तेन मृदङ्गादिवादके च अमरः ण्वुल्। पाणिवादक तत्रार्थे त्रि॰ हेमच॰। [कृत्वम्। रज्ज्वाम् त्रि॰कौ॰।

पाणिसर्य्या स्त्री पाणिभ्यां सृज्यतेऽसौ सृज–कर्म्मणि यत्

पाणिस्नानक त्रि॰ पाणिस्नानः प्रयोजनमस्य ठक्। हस्तावदायके पाणिवादके भा॰द्रो॰ ८२अ॰।

पाणीतक पु॰ कुमारानुचरमातृभेदे भा॰ग॰ ४६अ॰।

पाणिहोम पु॰ ७त॰। पात्रब्राह्मणानां पाणौ कर्त्तव्ये होमे "उद्धृत्य हुताक्षमन्त्रमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति" इत्युपक्रमे "अभ्यनुज्ञायां पाणिष्वेव वा" आश्व॰ श्रौ॰४ ८ ५सू॰ "अभ्यनुज्ञायामिति यदि ब्राह्मणाः पाणिषु होममभ्यनुजानन्ति अग्निकार्यकरणं यदि पाणिषु स्वेषामभ्युपगच्छन्तीत्यर्थः। तथा सति पाणिषु जुहोति। ताभ्यामेव मन्त्राभ्यां पाणिषु जुहुयात्। ब्राह्मणाः पित्रादितत्तदार्थम् उपविष्टास्तेषां सर्वेषां पाणिषु जुहोतीति वचनात्, मन्त्रौ च द्वौ तत्तदार्थादेकैकाम् आहुतिं विगृह्य विष्टस्य सर्वेषां दक्षिणपाणिषु जुहोति" नारा॰। कुशब्राह्मणपक्षे जले एव स होमो विधेयः "अन्यभावे तु विप्रस्य पाणावेव जलेऽपि वा" मत्स्यपु॰ वाक्यात् एतयोः पक्षयोरपि अनूद्येनैव अग्नौ करिष्ये" कृष्ण इत्येवानुज्ञापयन्ति आ॰त॰ रघु॰।

पाणीकरण न॰ पाणौ क्रियतेऽनेन कृ–आधारे ल्युट् अनुकृ॰। विवाहे जटाध॰।

पाण्ड त्रि॰ पण्डएव स्वार्थे अण्। पण्डे स्त्रियां गौरा॰ पाठात् ङीषं बाधित्वा ङीष् स्वरे भेदः।

पाण्डर पु॰ पडि–अर दीर्घश्च। १मरुवकवृक्षे २श्वेतवर्णे च २तद्वति त्रि॰अमरः। ४कुन्दपुष्पे ५गैरिके च न॰ शब्दच॰

पाण्डरपुष्पिका स्त्री पाण्डरं पुष्पमस्याः कप् कापि अतइत्त्वम्। शीतलावृक्षे शब्द॰।

पाण्डव पु॰ पाण्डोरपत्यम् अोरञ्। पाण्डुनृपस्य क्षेत्रजे धर्मादिभ्योजाते युधिष्ठिरादौ "यः स कौरव्यदायादः पाण्डुर्नाम नराधिपः। कामभोगान् परित्यज्य गतस्तुङ्गमितो गतः। ब्रह्मचर्य्यव्रतस्यस्य तस्य दिव्येन हेतुना। साक्षाद्धर्मोदयं पुत्रस्तत्र जातो युधिष्ठिरः। तथैव बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः। मातरिश्वा ददौ पुत्रं भीमं नाम महाबलम्। पुरुहूतादयं जज्ञे कन्यामेव धनञ्जयः। यस्य कीर्त्तिर्महेष्वासान् सर्वानभिभविष्यति। यौ तु माद्री महेष्वासावस्तत पुरुषोत्तमौ। अश्विभ्यां पुरुषव्याघ्राविमौ तावपि पश्यत" भा॰आ॰ १२६अ॰। [अभीडोयतः। श्रीकृष्णे त्रिका॰।

पाण्डवाभील पु॰अभीः अभयं ताला॰ति ला–क। पाण्डवः

पाण्डवायन पु॰ पाण्डवानामयनं रक्षणादिकं यतः। श्रीकृष्णे हृत॰। तत्रार्थे न॰। [सम्बन्धिनि।

पाण्डवीय त्रि॰ पाण्डवस्येदम् "दृद्वाच्छः" पा॰छ। पाण्डव

पाण्डवेय पु॰पाण्डोरियम् अञ् ङीप् पाण्डवी कुन्ती माद्री च तयोरपत्यम् ढक्। पाण्डुपत्नीपुत्रेषु युधिष्ठिरादिषु भा॰आ॰ १अ॰। तेषां क्षेत्रजत्वात् मातृद्वारेण कीर्त्तनम्।

पाण्डार पुंस्त्री॰ पण्डस्यापत्यम् आरक्। पण्डस्यापत्ये त्रि॰ कौ॰। [१पण्डितभावे २तत्कर्म्मणि च न॰।

पाण्डित्य न॰पण्डितस्य भावः कर्म्म वा दृढादि॰ पक्षे ष्यञ्।

पाण्डु पु॰ पडि–कु नि॰ दीर्घः। "सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः" १सुभूम्युक्ते "पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः" इत्युक्ते च २वर्णभेदे २तद्वति त्रि॰। स्त्रियामुदन्तगुणवचनत्वेऽपि न ङीप् पाण्डुशब्दपर्य्युदासात्। ४सितवर्णे शब्दरत्ना॰ ५तद्वति त्रि॰ शान्तनुपुत्रविचित्रवीर्य्यस्य क्षेत्रे व्यासेनोत्पादिते हृद्रूपभेदे ७नागभेदे ८श्वेतगजे ९रोगभेदे च शब्दर॰। १०पाण्डुरफलीक्षुपे ११पटोले च राजनि॰। १२देशभेदे पु॰ पाण्डुनृपोत्पत्तिकथा भा॰आ॰१०६अ॰ तत्रानताकारणञ्च उक्तं यथा ततस्तेनैव विधिना महर्षिस्तामविन्दत। अम्बालिकामथाभ्यायाद्दृष्ट्वा च सापि

तम्। विवर्णा पाण्डुसङ्काशा समपद्यत भारत!" इत्युपक्रमे "यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह। तस्मादेव सुतस्ते वै पाण्डुरेव भविष्यति। नाम तस्य तदेवेह भविष्यति शुभानने"। तस्य दिग्विजयादिकथा तदुत्तराध्यायेषु दृश्या। पाण्डुरोगभेदे निदानादिकं भावप्र० उक्तं यथा

"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः। चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः" पञ्चमो भक्षणात् मृद इति ननु मृत्तिकापि दूषितवातादिदोषद्वारैरेव पाण्डुरोगं जनयतीति मृद्भक्षणजः पाण्डुरोगोदोषजादभिन्न एव कथं पञ्चम इति उच्यते अपरकारणकुपिता वातादयोऽन्यानपि रोगान् कुर्वन्ति। मृत्तिकाभक्षणात् कुपितास्तु वातादयो विशेषतः पाण्डुरोगमेव जनयन्त्येवेति विशेषात् चिकित्साविशेषाच्च पञ्चमः चरकेणोक्तः। तच्चिकित्सापरकारणकुपितदोषजनितपाण्डुरोगचिकित्सा भवतीति सुश्रुतेन मृत्तिकाजः पृथक् न पठितः। अथ विप्रकृष्टनिदानपूर्विकां रुग्माह "व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम्। निषेवमाणस्य विदूषणं रक्तं दोषास्त्रयं पाण्डुरतां नयन्ति" तीक्ष्णं राजिकादि। अथ पूर्वरूपमाह "त्वक्क्लोटनिष्ठीवनगात्रवादमृद्भक्षणप्रेक्षणकूटशोथाः। विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि" प्रेक्षणकूटशोथः इति अक्षिगोलकशोथः। अथ वातिकस्य पाण्डुरोगस्य लक्षणमाह "त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणश्यामता। वातपाण्डुरामये रुग्स्तोदाधाध्मानादयः"। कृष्णारुणश्यामता पाण्डुत्वं नातिक्रामति। अतएव सुश्रुते "सर्वेषु चैतेष्वपि पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोगः" इति। भ्रमादय इत्यादिशब्दात् मेदःस्फुरादयः। अथ पैत्तिकस्य लक्षणमाह "पीतत्वङ्नखविण्मूत्रदाहतृष्णाज्वरान्वितः। भिन्नविट्कोऽतिपीताभः पित्तपाण्डुरामये नरः"। भिन्नविट्कः सद्रवमलः। अथ श्लैष्मिकस्य लक्षणमाह "कफप्रसेकः श्वयथुः तन्द्रालस्यातिगौरवैः। पाण्डुरोगी कफात् शुक्लैस्त्वङ्मूत्रनयनाननैः"। अत्रोपलक्षणे तृतीया। सान्निपातिकस्य लक्षणमाह "सर्वाङ्गसेविनः सर्वे दुष्टा दोषास्त्रिदोषजम्। त्रिदोषलिङ्गं कुर्वन्ति पाण्डुरोगं सुदुःसहम्"। अथ मृण्मयस्य रुग्माह "मृत्तिकादनशीलस्य कृष्णत्वग्यतमो मलः। कषायां मारुतं, पित्तं मूर्च्छा, मधुरा कफम्। कोपयेत्मृद्रसादीव रौक्ष्याद्भुक्तञ्च रूक्षयेत्। पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि। इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा। पाण्डुरोगं करोत्याशु समवर्णाग्निनाशनम्"। स्रोतांसि शिरासुखानि। तेजो दीप्तिः ओजः सर्वधातुरसः। अथ मृण्मयस्य लक्षणमाह "मृद्भक्षणाद्भवेत्पाण्डुस्तन्द्रालस्यनिपीडितः। श्वासश्वासमूलार्तः सदाऽरुचिसमन्वितः। मूर्धाक्षिकूटगण्डभ्रूः भ्रूनपाङ्गाभिमेहनः। कृमिकोष्ठोऽतिसार्यैत मलं सासृक्कफान्वितम्"। क्रिमिकोष्ठः उदराभ्यन्तरस्थकृमिभिर्भवेदित्यनेन सम्बध्यते अतिसार्यैत मलमिति कर्मकर्तृ ततृकर्मवत् मन्तव्यम्। तच्चिनृ कर्मण्यर्थेऽत्र यक्प्रत्ययः। अथासाध्यस्य लक्षणमाह "ज्वरारोचकहृल्लासच्छर्दिश्वाक्रमान्वितः। पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः। पाण्डुरोगश्चिरोत्सन्नः खरीभूतो न सिध्यति। कालप्रकर्षात् शूनाक्षो यो वा पीतानि पश्यति" खरीभूतः अतिरूक्षितः सर्वधातुः "बद्धाल्पविट् सहरितं सकफं योऽतिसार्यैत। पीतस्वेदातिदिग्धाङ्गः छर्दिमूर्च्छातृषान्वितः। पाण्डुदलनखो यस्तु पाण्डुनेत्रश्च यो भवेत्। पाण्डुसङ्काशदर्शी च पाण्डुरोगी विनश्यति"। पाण्डुसङ्काशदर्शी पीतवर्णस्य राशिं पश्यति। "अन्तेषु शूनं परिहीनमध्यं स्थानं तथान्तेषु च मध्यशूनम्। गुदे सुखे मेढ्रवि सुष्कयोश्च शूनं प्रतास्यन्तमसंस्पृकल्पम्"। "उरभ्रे मिश्रते चैव पाण्डुरोगः प्रजायते" शाता० मेषबधकर्मणोर्विपाकस्तद्रोग उक्तः। १२माषपर्ण्याम् (माषाणी) स्त्री राजनि०। पाण्डोरपत्यम् "ओरञ्" पा० अञ्। पाण्डव पाण्डोरपत्ये युधिष्ठिरादौ। पाण्डोः जनपदभेदस्य राजा "पाण्डोर्ढञ्" वार्त्ति० ढञ्। पाण्डुदेशस्थमे रघु० ४।९२। स्वार्थे क पाण्डुक तत्रार्थे ततः अस्त्यर्थे इनि पाण्डुकिन् तद्रोगयुते त्रि०। संज्ञायां कन्। पाण्डुक धानाभेदे सुश्रुतः। तत्र पृथो० दीर्घमध्यः पाण्डुक तत्रार्थे पङ्कयशब्दे २४९२पृ० सुश्रुतवाक्यं दृश्यम्। पाण्डुकस्य वृद्धिः क्षीरिकावद्वा भवतीत्युक्तं वृ०सं० २९अ०।

पाण्डुकण्टक पु० पाण्डुवर्णानि कण्टकानि यस्य। अपामार्गे राजनि० पाण्डुरोगस्य नाशकत्वात् तस्य तथात्वम्।

पाण्डुकम्बल पु० पाण्डुवर्णः कम्बलः निर्णक०।

१राजास्तरणे कम्बलभेदे (शाल) शि०कौ०। २प्रकरभेदे मेदि० ततः "पाण्डुकम्बलादिनिः" पा० अस्त्यर्थे इनि। पाण्डुकम्बलिन् तद्युक्ते। तत इनिप्रत्ययमपोनिहत्यर्थमिति सि०कौ०।

पाण्डुकर्म्मन् न० ६त०। शुक्लवर्णसम्पादने सुश्रुतोक्ते व्रणस्य उपक्रमभेदे चिकित्साभेदे। पाण्डुकरणमपत्र कृष्णकर्मशुक्लकर्मणी तु सप्रकारे तत्रोक्ते यथा "भल्लातकान् वासयेत् क्षीरे प्राङ्मूत्रभावितान्। ततो द्विधा छेदयित्वा क्षीरे कुम्भे निधापयेत्। कुम्भेऽन्यस्मिन्निक्षिप्तान्येतं कुम्भमथ योजयेत्। सुखं सुखेन सन्धाय गोमयेदीपयेत्ततः। यः स्नेहश्चवते तस्मादुपादाय तं भिषक्। पाम्यानूपशफान्दग्धान् सूक्ष्मचूर्णानि कारयेत्। तेनेनानेन सङ्घृष्टं शुक्लमालेपयेद्व्रणम्। भल्लातकविधानेन सारस्नेहांस्तु कारयेत्। ये च केचित्फलस्नेहविधानं तेषु कीर्त्तितम्। दुरूढत्वात्तु कृष्णानां पाण्डुकर्म हितं भवेत्। सप्तरात्रं स्थितं क्षीरे लागले रोहिणीफलम्। तेनैव पिष्टं सुश्लक्ष्णं सवर्णकरणं हितम्"।

पाण्डुतरु पु० कर्म०। धवदृक्षे राजनि०।

पाण्डुतीर्थ न० तीर्थभेदे शिवपुराणम्।

पाण्डुनाग पु० नाग इव पाण्डुः राजद०। १पुन्नागवृक्षे २श्वेतहस्तिनि ३श्वेतसर्षपे च शब्दरत्ना०।

पाण्डुपत्री स्त्री पाण्डु पत्रं यस्याः जातित्वात् ङीप्। रेणुकानामद्रव्ये राजनिः। [त्रिका०।

पाण्डुपृष्ठ त्रि० पाण्डु पृष्ठं यस्य। दुर्लक्षणरूपश्वेतपृष्ठयुक्ते

पाण्डुफल पु० पाण्डूनि फलान्यस्य। १घटोले २चिर्भटयां स्त्री राजनि०।

पाण्डुभूम त्रि० पाण्डुः भूमिरत्र अच्समा०। १पाण्डुवर्णभूमियुक्ते कर्मधारये अच्समा०नेपत्रते। २श्वेतमृत्तिकायां ३खटिकायाम् च स्त्री हेमच० "पाण्डूदकृष्णतो भूमिः पाण्डूदकृष्णमृत्तिकाः" हेमचन्द्रोक्तेः। अन्ये तु तत्रापि अच्समा०। सा च तत्रार्थे स्त्रीति भेदः।

पाण्डुमृत्तिका स्त्री नित्यक०। खटिकायाम् हेमच०। पाण्डुमृदादयोऽप्यत्र स्त्री।

पाण्डुर पु० पाण्डुर्वर्णोऽस्त्यस्य रः। १श्वेतपीतमिश्रिते वर्णे अमरः २तद्वति त्रि०। पडि—उर पृषो० इत्रिः। ३श्वेतवर्णे ४तद्वति च हेमा०। ५कामलाख्ये रोगे ६पित्तरोगे न० शब्दरत्ना०। ७नागपर्ण्यां स्त्री टाप् राजनि०।

पाण्डुरङ्ग पु० पाण्डुरमङ्गमस्य कक०। (पाटराङ्गा) शाके "पाण्डुरङ्गः क्रमिस्नेहपित्तजित् कफनिकृन्तकः" राजवल्लभः

पाण्डुरद्रुम पु० नित्यक०। कुटजवृक्षे (कुरची) त्रिका०।

पाण्डुरपृष्ठ त्रि० पाण्डुरं पृष्ठमस्य। दुर्लक्षणरूपपाण्डुरपृष्ठयुते हेमच०।

पाण्डुरफली स्त्री पाण्डुरं फलमस्या रः ङीप्। क्षुद्रक्षुपभेदे। "कफास्रदोषपित्तानां मूत्रघातस्य नाशिनी। बल्या हृद्या च पाण्डुरफली तु शिशिरा तथा" राजनि०

पाण्डुराग पु०० पाण्डूरागोऽस्य। दमनकवृक्षे राजनि०।

पाण्डुरेक्षु पु० नित्यकर्म०। श्वेतेक्षौ राजनि०।

पाण्डुलेख पु०(सुखविदा) ख्याते पूर्वपक्षादिलेखनभेदे पाण्डुलेख्यादयोऽप्यत्र। तत्प्रकारादि वीरमि० उक्तो यथा "अयञ्च पक्षः प्राक्पाण्डुलेख्यं भूमिफलकादौ कारयित्वा शोधितः पश्चात्पत्रे लेखनीयः तथा च हरस्मृतिः "अधिकाँश्छातयेदर्थान् न्यूनांश्च परिपूरयेत्। भूमौ निवेशयेत्तावद्यावदर्थो विनिश्चितः" शातयेद्धरयेत् भूमाविति पाण्डुलेख्यशोध्याधारोपलक्षणम्। अतएवाह स एव "पूर्वपक्षं स्वभावोक्तं प्राङ्विवाकोऽभिलेखयेत्। पाण्डुलेखेन फलके ततः पत्रे विशोधितम्" इति। स्वभावोक्तस्य भयाद्युपाधिनोक्तम्। व्यासोऽपि "पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्। जनाधिकन्तु संशोध्य पश्चात्पत्रे निवेशयेत्"। शोधनशोत्तरयोग्यावधिविधेयम् न ततःपरमनवस्थापत्तेरदृष्टार्थतापाताच्च। तथा च नारदः "शोधयेत्पूर्ववादन्तु यावच्छोत्तरदर्शनम्। अवष्टब्धस्योत्तरेण निहत्तं शोधनञ्चरेत्" अवष्टब्धस्योत्तरयोग्यस्य। यस्यर्थ्यप्रगल्भत्वात् पक्षदोषगुणहानादानाभ्यां शोधयितुमशक्तस्य वक्तव्यार्थं निर्धार्य्य सभ्यैरेव संशोधनीयः। यथाह हरस्मृतिः "अभियोक्ताऽप्रगल्भत्वाद्वक्तुं नोत्सहते यदा। सभ्यैस्तु शोधनन्तस्य कार्यमर्थोहरूपतः" इति। यदि भाषामशोधयित्वैवोत्तरन्दापयन्ति सभ्यास्तदा रागाद्योभाङ्गयाद्वापीत्याद्युक्तदण्डेन सभ्यान् दण्डयित्वा पुनः प्रतिज्ञालेखनपूर्वकं व्यवहारः प्रवर्त्तनीयो राज्ञेति तात्पर्य्यम्। यदा त्वर्थिप्रत्यर्थिनोर्लेखनापाटवाद्राजकीयलेखकद्वारा तौ भाषोत्तरे लेखयतः। च चान्यतरपक्षपातेनान्यथा लिखत्यन्यत् स राज्ञा चौरवद्दण्ड्य इत्याह कात्यायनः "अन्यद्वक्तुं लिखेदन्यद्योऽर्थिप्रत्यर्थिनां वचः। चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः" इति।

पाण्डुलोमशा स्त्री पाण्डूनि लोमानीवाङ्गानि सन्ति यस्याः शा । १माषपर्ण्याम् । २श्वेतलोमवति त्रि० रत्नमा० । पाण्डुलोमाऽप्यत्र जटा० । [रोगे यरड्पु० १८२ अ० ।

पाण्डुशर्करा स्त्री पाण्डुवर्णा शर्करा । सितानामकप्रमेहे ।

पाण्डुशर्म्मिला स्त्री द्रौपद्यां त्रिका० ।

पाण्डुसोपाक पु० संकीर्णजातिभेदे "चाण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् । आहिण्डको निषादेन वैदेह्यामेव जायते" मनुः । त्वक्सारः वेणुः ।

पाण्ड्य पु० पाण्डुः देशोऽभिजनोऽस्य तस्य राजा वा ष्यञ् । १तद्देशवासिनि २पाण्डुदेशजन्मे च । स च देशः द्र०स० १४ अ० मध्यमे भागे उक्तः । दक्षिणदिक्स्थः । "दिशि मन्दायतेतेजः दक्षिणस्यां रवेरपि । तस्यामेव रवोः पाण्ड्याः पताणं न विभेदिरे" रघुः ।

पाण्ड्यवाट पु० पाण्डुदेशस्थे शुक्लानामाकरभेदे द्र०स० ८। अ०। शुक्लाशब्दे दृश्यम् ।

पात पु० पातयति ग्रहस्तत्रा दक्षिणा वा पाति—अच् । रविभिन्नग्रहाणां दक्षिणोत्तरार्कभे अदृश्यरूपे कालमूर्त्तिरूपे सू०सि० उक्ते भचक्रस्थिते १जीवभेदे तदधिष्ठातृदेवे २राहौ च । पातस्य तथात्वसूचशब्दे सू०सि० वाक्ये दर्शितम् । तस्य ग्रहाणां दक्षिणोत्तरार्कभेदत्वं च तत्रोक्तं यथा "दक्षिणोत्तरतोऽप्येवं पातो राहुः खरंहसा । विक्षिपत्येव विक्षेपं चन्द्रादीनामपक्रमात्" सू०सि० "चन्द्रादीनां विरविग्रहाणामपक्रमात् क्रान्तिवृत्तस्थग्रहभोगस्थानाद्दक्षिणोत्तरतो दक्षिणस्यामुत्तरस्यां वा दिशि । अपिशब्दः पूर्वापराभ्यां समुच्चयार्थकः । एष गणितागतः पातः पातराशग्रादिभोगस्थानम् । अत्राप्यपिशब्दः उच्चेन समुच्चयार्थकोऽस्त्येति । यथोच्चेन पूर्वापरयोः फलान्तरं भवति तथेत्यर्थः । विक्षेपं विक्षेपणं खरंहसात्यवेगेन विक्षिपति करोति । विशिष्टवाचकानां पदानां विशेष्यवाचकपदसमवधाने विशेष्यप्रधानार्थत्वात् चन्द्रादीन् विक्षिपतीति तात्पर्यार्थः । ननूच्चेन स्वाधिष्ठितजीवद्वारा ग्रहाकर्षणं क्रियते तथा पातेनाचेतनत्वादेगाभावेन ग्रहविक्षेपणं कर्त्तुमशक्यमित्यत आह राहुरिति । पातस्यानाधिष्ठाता देवता राहुर्जीवविशेषश्चन्द्रपातस्तु दैत्यविशेषो राहुः । रहति त्यजति ग्रहमिति राहुरिति व्युत्पत्तेः । यथैतद्विवृणोति" रङ्ग० "उत्तराभिमुखं पातो विक्षिपत्यपरार्द्धगः । ग्रहं प्राग्भगणार्धस्थो याम्यायामपकर्षति" सू०सि० "अपरार्द्धगो ग्रहस्थानात् पश्चिमविभागस्थितभगणार्द्धात्मकराशिषट्कस्थितो राहुर्ग्रहबिम्बं खराशग्रादिभोगस्थानीयप्रदेशादुत्तरदिगभिमुखं विक्षिपति विक्षेपान्तरेण त्यजति । प्राग्भगणार्धस्थः ग्रहस्थानात् पूर्वविभागस्थितराशिषट्कमध्यस्थितो दक्षिणस्यां दिग्ग्रहमपकर्षति विक्षिपति । अथ बुधशुक्रयोर्विशेषमाह" रङ्ग० "बुधभार्गवयोः शीघ्रात् तद्वत् पातो यदा स्थितः । तच्छीघ्रार्कर्षणात् तौ तु विक्षिप्येते यथोक्तवत्" सू०सि० "बुधशुक्रयोः शीघ्रोच्चाज्जात्यभिप्रायेणैकवचनम् । तद्वत् परार्द्धपूर्वार्द्धभगणार्द्धमध्ये यदा तत्काले स्थितस्तुकारात् यत्काले पातोऽभ्यादित्यर्थः । तौ बुधशुक्रौ यथोक्तवत् पूर्वार्द्धपरार्द्धक्रमेण दक्षिणोत्तरयोर्विक्षिप्येते विक्षेपान्तं च त्यज्येते । तथा हि स्वशीघ्रोच्चाद्बुधशुक्रयोर्यदन्तरं राशग्रात्मकं तद्वत् पातस्तेनान्तरेण युक्तः पूर्वानीतपात इत्यर्थः । यथा बुधशुक्रयोरपरपूर्वार्द्धक्रमेण स्थितोऽवस्थितस्तुकारात् तथेत्यर्थः । तच्छीघ्रकर्षणात् तादृशपाताभ्यां शीघ्रं वेगेनाकर्षणं तस्मात् पातस्थानाधिष्ठातृदेवताभ्यां ग्रहस्तस्थितग्रहसम्बद्धवायुस्कन्धस्यातिवेगाकर्षणरचनादित्यर्थः । तौ बुधशुक्रावुक्तवदुत्तरदक्षिणक्रमेण विक्षिप्येते । अत्र पातशब्देन चक्रयोधितपातो बोध्यः । अन्यथा ग्रहोनशीघ्रोच्चरूपकेन्द्रयोजनस्योपपत्तिविरुद्धत्वेन शीघ्रोच्चोनग्रहरूपकेन्द्रयोजनोक्तप्रतुपपत्तेः । तथा च सर्वग्रहसाधारणं विक्षेपकथनं पातभेददर्शनार्थं बुधशुक्रयोः प्रगतुक्तम् । न ह्यन्यथितं पत्र उच्चयोर्विक्षेपणं प्रतीयते येन प्रागुक्तसर्वविक्षेपाभ्यन्तं ग्रहणीयम् । पातभेदोक्तिकारणं च "ये चात्र पातभगणाः कथिता ग्रहयोः ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः । स्वल्पाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ पातौ तयोः पठितचक्रभवौ विधेयौ" इति भास्कराचार्योक्तमिति दिक्" रङ्ग० ।

अत्रेदं बोध्यं रवेः स्वतएव दक्षिणोत्तरयोर्गमनसम्भवात् नास्य पातेन विक्षेपणामेत्येति विरविग्रहाणामित्युक्तम् । तत्र युगे चन्द्रपातभगणाः "चन्द्रोच्चस्याग्निशून्याग्निवसुसर्पार्यमा युगे । वामं पातस्य यस्मिन्नियमात्रिशिखिदस्रकाः" सू०सि० "चन्द्रमन्दोच्चस्य पूर्वगतेरदृग्रूपस्य भगणा महायुगे रामनखाष्टवेदमिताः । पातस्य चन्द्रशब्दस्य सन्निहितत्वाच्चन्द्रपातस्याऽदृग्रूपस्य वामं पश्चिमगत्या द्वादशराशिभागात्मकपरिवर्त्तरूपभगणा महायुगे वसु-

रामाक्षतिरामद्विमिताः। अत्र युगपदृक्षं वक्ष्यमाणग्रहोच्चपातभगणसम्बन्धिकल्पकालवारणार्थम्। ग्रहोच्चपातभगणास्तु युगे युगे नोत्पन्ना इत्यस्मिन् युगसम्बन्धिप्रसङ्गे नोक्ताः" रङ्ग०। कल्पे भौमादिपातानां भगणास्तु तत्रोक्ता यथा "पातानामथ वामतः" इत्युपक्रमे "अथानन्तरं पातानां भौमादिपातानां वामतः पश्चिमगत्या भगणा उच्यन्त इति शेषः। तान् श्लोकाभ्यामाह" रङ्ग० "मनुदस्रास्तु कौजस्य,बौधस्याष्टाष्टसागराः। लताद्रिचन्द्रा जैवस्य तिथाङ्काश्च भृगोस्तथा। शनिपातस्य भगणाः कल्पे यमरसर्तवः। भगणाः पूर्वमेवात्र प्रोक्ताश्चन्द्रोच्चपातयोः" सू०सि० "कौजस्य कुजसम्बन्धिनः। तुकारात् पातस्य भौमपातस्य कल्पे भगणाश्चतुर्दशाधिकं शतद्वयम्। बौधस्य बुधसम्बन्धिनः शनिपातस्यैत्यस्यैकदेशपातस्येत्यन्वयः। बुधपातस्य द्वादशोना षड्शती। जैवस्य गुरुपातस्य चतुःसप्तत्यधिकं शतम्। भृगोः शुक्रस्य तथा सम्बन्धिनश्चकारात्पातस्य शुक्रपातस्येत्यर्थः। तत्राधिका नवशती। शनिपातस्य द्विरसषट्का भगणाः कल्पे भवन्ति। नन्वस्मिन् प्रसङ्गे चन्द्रोच्चपातयोर्भगणाः कथं नोक्ता इति मन्दाशङ्कापाकरणाय पूर्वोक्तं स्मारयति भगणा इति। चन्द्रोच्चपातयोश्चन्द्रस्य मन्दोच्चपातयोर्भगणा अत्रास्मिन्नधिकारे पूर्वं ग्रहयुगभगणकथने उक्ताः" रङ्ग०। पतति चन्द्रार्कयोः क्रान्तिसाम्येन उत्तिष्ठति यत—ध्यवा॰कर्त्तरि च। सूर्यसिद्धान्तोक्ते चन्द्रार्कयोः क्रान्तिसाम्येनानानीते अशुभसूचके महापातरूपे ग्रहभेदे तथा हि "तत्र भेदद्वयात्मकपातस्य सम्भवं विवक्षुः प्रथमं वैधृतसंज्ञपातस्य सम्भवमाह" रङ्ग० "एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा। तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधौ" सू० सि०। सूर्याचन्द्रौ "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति" श्रुत्युक्तप्रयोगः। एकायनगतौ अभिन्नदक्षिणोत्तरान्यतरायनस्थौ भवतस्तत्र यदा यस्मिन् काले तद्युतौ सूर्यचन्द्रयोर्भाद्योर्योगे मण्डले द्वादशराशिमिते सति तदा तयोः क्रान्त्योः समत्वे महापातरूपे वैधृतसंज्ञः पातो भवति। अथ व्यतीपातसंज्ञपातस्य सम्भवमाह" रङ्ग० "विपरीतायनगतौ चन्द्रार्कौ क्रान्तिभिन्नाः। समास्तदा व्यतीपातो भगणार्धं तयोर्युतौ" सू०सि० "चन्द्रार्कौ विपरीतायनगतौ भिन्नायनस्थौ भवतस्तत्र यदा तयोः सूर्यचन्द्रयोर्भाद्योर्योगे भगणार्द्धे राशिषट्के सति तयोः क्रान्तिकलास्तुल्या भवन्ति तदा तस्मिन् काले व्यतीपातसंज्ञकः पातो भवति" "ननु क्रान्त्योः साम्ये कथं पातो भवतीत्यत आह" रङ्ग०। "तत्तांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः। तद्दृक्क्रोधभवो वह्निर्लोकाभावाय जायते" सू० सि०। "तयोश्चन्द्रसूर्ययोः। तुकारात् क्रान्तिसाम्यकालिकयोः। तत्तांशुजालसम्पर्कात् स्वकिरणानां जालं समूहस्तयोरन्योन्याभिमुखयोः सम्पर्कात् एकीभावापन्नत्वात् तद्दृक्क्रोधभवः सूर्यचन्द्रयोरन्योन्याभिमुखयोर्दृक्क्रोधो बिम्बचन्द्रयोर्दृग्रूपो यो क्रोधः परस्पराभिमुखेन दीप्ताधिक्यं तदुत्पन्नोऽग्निः। प्रवहाहतः प्रवहवायुप्रज्वलितः लोकाभावाय जनानामशुभफलाय जायते। अथायं वह्निर्व्यतीपाताख्यो वैधृताख्यो वेत्यत आह" रङ्गना०। "विनाशयति पातोऽस्मिन् लोकानामसदात्मतः। व्यतीपातः प्रसिद्धोऽयं संज्ञाभेदेन वैधृतिः" सू० सि०। "अस्मिन् क्रान्तिसाम्यकाले प्रसिद्धः पूर्वश्लोकोक्तस्वरूपः पातो वह्निः, यतः कारणात् असत् स्वसम्बन्धेन वारं वारम् लोकानां विनाशयति। नाशं करोति। अतः कारणादयं वह्निर्व्यतीपातसंज्ञोऽयमेवाग्निः संज्ञाभेदेन नामान्तरेण वैधृतिसंज्ञः। तथा चोभयत्र पाताख्यो वह्निर्भवतीति भावः। अथ तत्स्वरूपमाह" रङ्गना०। "स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः। सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते" सू० सि०। "स क्रान्तिसाम्यकालोत्थ उभयसंज्ञकः पाताख्योऽग्निस्वरूपः कृष्णः श्यामः, दारुणवपुः कठिनशरीरः, लोहिताक्षः आरक्तनेत्रः, महोदरः पृथूदरः। अतएव सर्वानिष्टकरः सर्वलोकानामशुभकारकः, रौद्रः क्षयकारकः, भूयोभूयोऽनेकवारम् प्रजायते। प्रत्येकं क्रान्तिसाम्यकाले उत्पन्नो भवतीत्यर्थः" रङ्गना०।

उपयमशब्दे १२६५ पृ० तद्भेदादिकं दृश्यम् भावे घञ्। सि०शि०टी०उक्ते ४प्रतिमण्डलविमण्डलयोः संपाते मैलने च "पातो नाम प्रतिमण्डलविमण्डलयोः संपातः। यस्मादारभ्य विक्षेपप्रवृत्तिः। इह सुरत्नवंशगलाकया कक्षामण्डलं तत्प्रतिमण्डलं च क्षेत्रकोक्तविधिना विरचय्य तत्र शीघ्रप्रतिमण्डले मेषादेः प्रतिलोमं पातस्थानं च चिह्नयित्वा तत्र विमण्डलं निवेशयम्। पातचिह्नाद्राशिषट्कान्तरे विमण्डलप्रतिमण्डलयोरन्यं संपातं कृत्वा पातात् पूर्वतस्त्रिभेऽन्तरे पठितविक्षेपप्रमाणेन

प्रतिमण्डलादुत्तरतो विमण्डलं केनचिदाधारेण स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं यद्वा प्रतिमण्डले विमण्डले च दत्त्वा विक्षेपोपपत्तिं दर्शयेत् । तत्र तयोर्यद्वयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः । अथ तस्यानयनम् । पातस्थाने हि विक्षेपाभावः । ततस्त्रिभेऽन्तरे परमो विक्षेपः । अन्तरेऽनुपातेन । अतः पातयद्वचिह्नयोरन्तरं तावज्ज्ञेयम् । तच्च तयोर्योगे कृते भवति । यतो मेषादेरनुलोमं यद्वो दत्तः । पातस्तु प्रतिलोमम्" । गणितागतपातकाले कृतालाकृते "पातस्थितिकालान्तर्भङ्गकृतत्वं न गण्यते तज्ज्ञैः । स्नानजपहोमदानादिकमक्षयमेवेति खलु हरिम्" सि० शि० उक्ते । पत–घञ् भावे १पतने । दृष्टिपातः स्त्रवपात इत्यादि । पत–ल्युट्० कर्त्तरि च । ६पतनकर्त्तरि त्रि० । पा–रक्षणे कर्म्मणि घञ् । ७त्राते त्रि०मेदि० ।

पातक त्रि० पातयति पाति–ण्वुल् । १पतनकारके नरकरूपापकृष्टस्थानप्रापके नवविधे पापभेदे २अनुपातके च यथोक्तं प्रा० वि० "पातकपदमनुपातकपर्य्यायः, ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः, "स्त्रीगोब्राह्मणवैश्यक्षत्रियघाती बोधविक्रयी शूद्रेण सहभोजी कन्यादूषी अगारदाही हयवीपतिरग्न्युत्सादी चेति पातकिनः" । नवविधं पापमभिधाय विष्णुः "एवं पातकिनः पापमनुभूय सुदुःखिताः । तिर्य्यग्योनौ प्रवर्त्तन्ते दुःखानि विविधानि च" । याज्ञवल्क्यः "नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् । विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम्" । पतनीयानि पातकानीत्यर्थः । "कृत्यल्युटो बहुलमिति" करणेऽनीयर् । "महापातकतुल्यानि पापान्युक्तानि यानि च । तानि पातकसंज्ञानि तदूनमुपपातकम्" । अतो महापातकतुल्यपापविशेषेऽप्यस्य शक्तिः । "नवविधपातकस्य विष्णुसं० "तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु प्रवर्त्तते । जातिभ्रंशकरणेषु सङ्करीकरणेष्वपात्रीकरणेषु च । मलावहेषु प्रकीर्णकेषु च" उक्तम् । ततः अस्त्यर्थे इनि । पातकिन् तद्युक्ते त्रि० स्त्रियां ङीप् ।

पातङ्गि पु०पतङ्गस्य सूर्य्यस्यापत्यम् इञ् । १शनैश्चरे २यमे च ३कर्णे ४वैवस्वतमनौ ५सुग्रीवे च ।

पातञ्जल न० पतञ्जलिना प्रोक्तम् अण् । १पाणिनिसूत्रवार्त्तिकव्याख्यानरूपे "अथ शब्दानुशासनम्" इत्यादिके महाभाष्ये, "पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः" मेश्वरः । "अथ योगानुशासनम्" इत्यादिके २योगशास्त्रे च । पतञ्जलिशब्दे दृश्यम् ।

पातञ्जिन् पु० पतञ्जी तच्छब्दोऽस्त्यस्याध्याये अनुवाके वा विमुक्ता०अण् । पतञ्जिशब्दयुक्ते १अध्याये २अनुवाके च ।

पातन त्रि०पातयति पाति–ल्यु ।१पतनकारके स्त्रियां गौरा० ङीष् । भावे ल्युट् । २अधोनयने न० ।

पातनत्र त्रि०पत–बा० अन्यण् । पतनशीले ऋ०२।५२।७भा० ।

पाताल न० पतत्यस्मिन्नधर्मेण पत–आलच् । १भुवनस्याधोभागे २सर्वाधोभागस्थे स्थानभेदे । तानि च सप्तैव यथा "पातालानि च सप्तैव सुनयः संप्रचक्षते । अतलं वितलञ्चैव सुतलञ्च तलातलम् । महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्" । "ततः पातालमित्येवं सप्त पातालसंज्ञकाः । एते स्वर्गाधिकसुखा ! विलस्वर्गाः प्रकीर्त्तिताः । सप्तद्वभवनोद्यानविहारक्रीडचत्वराः" पाद्मे पातालखण्डे । "अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् । महातलं रसातलं पातालं सप्तमं स्मृतम् । कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम् । रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि । पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् । सुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश । अष्टाविंशतिसंख्याता ततो नरककोटयः । नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः । तस्याधस्तादनन्तोऽसौ रुद्रः सर्वमयो महान् । तदधो धर्मचक्रन्तु येनेदं धार्य्यते जगत्" अग्निपु० । ३औषधपाकार्थबन्धभेदे "अर्द्धमापस्तले वह्निर्मध्ये च रसमध्यगः । पातालचक्रमेतद्धि शोधयेत् पारदादिकम्" । ४वडवानले ५गर्त्तभाण्डे च मेदि० ।

पातालकेतु पु० दानवभेदे मार्क०पु० ९१अ० ।

पातालगरुडी स्त्री किंकिरिणडाख्ये लताभेदे राजनि० । भावप्र० अस्य पुंस्त्वमुक्तं यथा "किंकिरिणडो महामूलः पातालगरुडाह्वयः । किंकिरिणडः परं ज्ञेयः कफघ्नः पवनापहः" ।

पातालनिवास पु० नि+वस–आधारे घञ् पातालं निवासो यस्य । दैत्ये पातालनिवासादयोऽप्यत्र इडा० पातेलोकस् तत्रार्थे ङेमच० । [ञिणि च उज्ज्वलद० ।

पाति पु० पाति पा–रक्षणे अति । १प्रभौ पत–इञ् । २क-

पातिक पुंस्त्री० पातः पतनं जलमज्जनं प्रयोजनमस्य पाते साधु वा ठक् । शिशुमारे जलजन्तुभेदे शब्दमाला स्त्रियां जातित्वात् ङीप् ।

पातिली स्त्री पतिः स्वामी पत्नी वा लीयते अत्र लि–बा० ड गौरा०ङीष्। १वाणुरायां २नार्य्यां ३मृत्पात्रभेदे (पातिल) मेदि०। [स्त्रिनि च मेदि०।

पातुक त्रि० पत–उकञ्। १पतनशीले २प्रपाते ३जलकह-

पाल त्रि०पाति रक्षति पिबति वा पा–डच्। १रक्षके २पायिनि च त्रि० स्त्रियां ङीप्। ३गन्धपत्रे ४दण्डभेदे पु० हेमच०। [सेनागणककर्मणि तद्भावे च।

पाल्तिगणक न० पत्तिगणकस्य भावः उद्गाता० अञ्।

पाल्लीवत पु०पल्ली विद्यतेऽस्य मतुप्। "छन्दसीरः" पा०यस्य वः तच्छब्दोऽस्यत्र विसुक्ता० अण्। पल्लीवच्छन्दयुक्ते १अध्याये २अनुवाके च। सचानुवाकः "तान् यजतान् इत्यादिवर्गः" ऋ० १।१४,७। तस्येदम् अण्। ३ग्रहरूपपात्रभेदे यजु० १८।२० कात्या० ९।५।२१ शत०ब्रा० १७।७।२।९।

पात्य न०पत्युर्वाः यक्। १पतित्वे "भरणाद्धि स्त्रिया भर्त्ता पात्याच्चैव स्त्रियाः पतिः" भा०शा० २६७अ० पत–णिच् यत्, पत–ण्यत् वा। २पातनीये ३पतनीये च त्रि०।

पात्र पु०न० अर्त्तीं० प्राति रक्षत्याधेयं पिबत्यनेन वा पा–ष्ट्रन्। १जलाद्याधारे भोजनयोग्ये २अमत्रे अमरः। अस्य स्त्रीत्वमपि दिक्षात् ङीष्। विद्यादियुक्ते दानयोग्ये ३ब्राह्मणे न० "ब्राह्मणं पात्रमाहुः" इति स्मृतिः। ४यज्ञिये स्रुवादौ, तीरद्वयमध्यवर्त्तिनि ५जलाधारस्थाने ६राजामात्ये च मेदि०। नाटकेऽभिनेये ७नायकादौ च न० हेमच० ८मानभेदे वैद्यकम्। यज्ञियश्रौतादिसाधनपात्रलक्षणम् कात्या० श्रौ० भाष्ये।

"अथ पात्राणां लक्षणमुच्यते खादिरः स्रुवोऽङ्गुष्ठपर्वदत्तपुष्करो नाभिकावत् पर्वार्द्धखातो भवति। स्फ्यश्च खादिरः खड्गाकृतिररत्निमात्रः। स्रुचो बाहुमात्रो मूलदण्डास्त्रिखाता हंसतुण्डवदेकप्रणालिकायुक्ताः। पाणिमात्रपुष्कराधस्तात्खातयुक्ताश्च कार्य्याः। पालाशी जुहूः, उपभृदाश्वत्थी, वैकङ्कती ध्रुवा "एतेषां दक्षाणामेकस्य वा सर्वाः स्रुचः कारयेत्, बाहुमात्रोऽरत्निमात्रो वाप्यास्यस्त्रोविला हंसतुण्डः" इत्यापस्तम्बः। अग्निहोत्रहवणी वैकङ्कती, अग्निहोत्रस्रुवो वैकङ्कतः। यैः पात्रैर्होमो न क्रियते तानि सर्वाणि वारणानि भवन्ति तानि चोलूखलमूषलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याग्रहतावटामाश्वत्थ्यौ पवेषान्तर्द्धानकटप्राशित्रहरणमन्थपात्रब्रह्मासनादीनि। तत्रोलूखलादीनि वाणानि। कूर्चो बाहुमात्रः पीठाकारः। इडापात्री पिष्टपात्र्यौ अरत्निमात्र्यौ मध्यसंगृहीते। पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा षड्ङ्गुलदृत्तखातवती। शम्या प्रादेशद्वादशाङ्गुला प्राशित्रहरणं दृत्तमादर्शाकारं चतुरस्रं चमसाकारं वा तथैव द्वितीयमपिधानपात्रम् षडङ्गुलं चोभयत्र खातवत्। आसनानि चारत्निमात्रदीर्घाणि प्रादेशमात्रविपुलानि सर्वेषु पात्रेषु मूलाभिज्ञानार्थं दृत्तानि कार्य्याणि अनादेशे होमसाधनभूतानि पात्राणि वैकङ्कतानि भवन्ति यथा सोमयागे ग्रहचमसद्रोणकलशादीनि तत्रापि हविर्धानाधिषवणफलकस्मरणोपरिसवादीन्यहोमसंयुक्तानि वारणान्येव षोडशिनः पात्रं खादिरं चतुरस्रम् अंशदाभ्यपात्रमौदुम्बरं वचनात् वाजपेये सप्तदशानां सोमग्रहाणां पात्राणि वारणानि अहोमसंयुक्तत्वात्। सुराग्रहपात्राण्यपि वारणानि ग्राम्यान्तरानृमृण्मयानि वा इत्येवमादि सर्वमूहनीयम्। मूलं कात्या०श्रौ०१।२।२१ स्रुवादौ दृश्यम्। कर्मप्रदीपे च "आज्यस्थाली च कर्त्तव्या तैजसद्रव्यसम्भवा। मृण्मयी वा कर्त्तव्या सर्वास्वाज्याहुतीषु च। आज्यस्थाल्याः प्रमाणं तु यथाकामन्तु कारयेत्। सुदृढामन्त्रणां भद्रामाज्यस्थालीं प्रचक्षते। तिर्य्यगूर्द्धं वनिस्तारा दृढा नातिदृहन्मुखी। मृण्मयीदुम्बरी वापि चरुस्थाली प्रशस्यते। स्वशाखोक्तः प्रसुखिस्तो ह्यदग्धोऽकठिनः शुभः। न चातिश्लिष्टिः पाच्यो न चरुस्थालसमा। इध्मजातीयमिध्मार्द्धप्रमाणं मेखलं भवेत्। दत्तं चाङ्गुष्ठपृथ्वप्रसवदानक्रियाक्षमम्। एवैव दर्वी यज्ञस्य विशेषस्तमहं ब्रुवे। दर्वी द्व्यङ्गुलपृथ्वमा तृतीयोऽनन्तमेखलम्। मूलोलूखले पार्श्वे खायते सुदृढे तथा। इध्माप्रमाणे भवतः मूर्ध्नि वैष वमेव च। दक्षिणं वामतो बाह्यमात्मानिमुखमेव च। बाहुमात्राः परिधय ऋजवः दृत्तपोऽग्रणाः। त्रयो भवन्ति शीर्षाग्रा एवैषान्तु चतुर्दिशम्। प्रागग्रावभितः पश्चादुदग्रमथवा परम्। न्यसेत् परिधिमन्यन्तु दृढगग्रः स पूर्वतः" देवपूजाङ्गपात्रमानं देवीपु० उक्तं यथा "षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम्। मध्यमं तत्त्रिभागेन हीनं कन्यसमीरितम्। वस्त्रङ्गुलप्रमाणन्तु तत्पात्रं कारयेत् क्वचित्। नानाविधिलक्षणानि शौण्डरीकाकृतीनि च। शङ्खनीलोत्पलाकारपात्राणि परिकल्पयेत्। रत्नादिरचितानि कुर्य्यात् काचीमूलतल-

ञ्चितान् । यथाशोभं यथालाभं तथा पात्राणि कारयेत् । विना पात्रेण यः कुर्यात् प्रतिष्ठां याज्ञिकीं क्रियाम् । विफला भवते सर्वांवाङ्नाटिधनापहा" दानशब्दे दानपात्रलक्षणादिकं ३५२० पृ० उक्तम् । पाकपात्रलक्षणादिकं पाकशब्दे ४२८२पृ० द्रष्टव्यम् ।

पात्रट पु० पातेव पिबन्निव अटति अट् अच् । १कर्पटे २क्षये शब्दच० ।

पात्रटीर पु० पातेव पिबन् रक्षन्निव वा अटति अट वा० ईरन् । १उचितव्यापारयुते सन्त्रिणि २लौहपात्रे ३कांस्यपात्रे ४रजतपात्रे ५सिंचाने ६पावके च मेदि० । ७पिङ्गाक्षे ८काके ९कङ्के च पुंस्त्री० शब्दरत्ना स्त्रियां जातित्वात् ङीष् । [रक्षके तुलाधटे पु० जटाध० ।

पात्रपाल त्रि० पात्रं पालयति पाल–अण् उप०स० । पात्र-

पात्रसंस्कार पु० ६त० । पात्रशुद्धौ मृज्जलादिना पात्रमार्जने पुरोटौ शब्दच० ।

पात्रासादन न० ६त० । यज्ञपात्राणां यथोक्तक्रमेण यज्ञनिष्पादनाय स्थापने यज्ञपात्रासादनक्रमस्तु कात्या०श्रौ० २।२।५ सू० तद्भाष्ये उक्तो यथा

"भूर्यग्निहोत्रहवणीस्रुक्कपालं शम्याजुहूपालाशिनसक्तुकलशमूषलं दृषदुपलमर्थवच्च" ८सू० "स्रुक्कपालमित्येकवद्भावादिदमेकं द्वन्द्वम् तेन बहुभिरपि कपालैरेकमेव पात्रमिति द्रष्टव्यम् । कपालानि च भिन्नस्य घटादेर्याह्याणि अभिन्नान्यपि रौहिणकपालवत् निर्मितानि भवन्तीत्येके इति धूर्तस्वामिनः । भूर्यं च नडतृणमयनिर्मोकनिर्मितं वेणुदलनिर्मितं वा भवति । अर्थवच्च येन येन पात्रेणात्र प्रयोजनं तेषां सर्वेषामुपयोगक्रमेणासादनम् । तथा च कात्यायनः "प्राचं प्राञ्चमुदगग्रेदुदगग्रं समीपतः । तत्तथा सादयेद्द्रव्यं यद्यथा विनियुज्यते" इति तत्रैवम् "अनो वा पात्री वा व्रीहयो यवा वा ततश्चैवम् अनोव्रीहयश्चानोयवाश्च पात्रीव्रीहयः पात्रीयवाश्चेति वा पवित्रच्छेदनानि पवित्रे च उपवेषः संयवनार्थमुदकं च आज्यस्थाली आज्यं च अमावस्यायां दोहनं चतुष्टयम्, वेदार्थः कुशमुष्टिः, दक्षिणायां अन्वाहार्यं तण्डुलाश्च दर्भतृणमभिश्च इध्मो बर्हिश्च स्रुवो जुहूश्च उपभृद्ध्रुवा च प्राशित्रहरणे ग्रहतावदानं च द्वे पुरोडाशपात्रे इति" कर्कादयः । तदयुक्तमिति केचित् । सूत्रतथाशास्त्रान्तरसूत्रेषु सादनप्रतापनोपस्तरणादिष्वेकस्या एव दर्शनात् । यज्ञेडापात्रीपिष्टपात्रयोरभेदमाङ्गस्तदपि अयुक्तम् शास्त्रान्तरसूत्रेषु तयोर्भेददर्शनात् तथा च तैत्तिरीयसूत्रम् "प्राशित्रहरणं चेडापात्रं च मेक्षणं च पिष्टपात्रो चेति" विस्तरो चातुर्मास्यादौ यत्र चर्वादिभिर्व्यवहिताः पुरोडाशाः तत्र भवतु पुरोडाशपात्रीभेदः । याज्ञ यूनकुशाश्च परिधयः कुशास्तीर्णं होतृमदनं च इडापात्री ग्रहवत्तं च अन्तर्धानकटः पूर्णपात्रं च पक्षे कर्मांपवर्गां समिदयासाद्यते परिधीनामपि प्रथमासादनमष्टादशकाष्ठकेध्मपक्षे एकविंशतिकाष्ठकेध्मपक्षे तत्रादेध्मात् त्रीणि काष्ठान्यादाय विकल्पेन परिधिपरिधानविधानात् । एवमत्र पात्राणामुपादानक्रमेणासादनमुक्तम् । यस्य यस्य पात्रस्य येन क्रमेण तस्यासादनम् एवं च सुतरां दृष्टार्थता भवति लाघवं च विनियोगक्रमेणासादने च तथा न स्यात् हविर्भक्षणे पात्राणां हविर्द्रव्यस्य च देशविप्रकर्षात् आज्यनिर्वापे स्थाल्याज्यस्य च तस्मादुपादानक्रम एव पितृभूतियाज्ञिकसम्मतः पात्रासादने युक्तः । कर्कार्याणां विनियोगक्रमेणासादनमाहुः" । सूत्रे अर्थवच्चेत्युक्तेर्यथा यथा यत्र यत्र यस्य यस्योपयोगस्तस्य तत्र तत्रासादनम् । तत्स्थानप्रकारो च तदुत्तरत्र सूत्रेषु द्रष्टव्यो

पात्रिक त्रि० पात्रस्य वापः ठन् । पात्रवापश्चेत्रादौ स्त्रियां विस्वात् ङीष् पात्रिकी चेत्रभक्तिः सि० कौ० । पात्रं सम्भवति अपहरति आहरति वा ठञ् । पात्रावहारकादौ स्त्रियां ङीप् । पक्षे ख । पात्रीय तत्रार्थे स्त्रियां टाप् । तत्रार्थे ।

पात्रिय त्रि० पात्रमर्हति घ । पात्रार्हे पक्षे यत् । पात्र्र

पात्रीय न० पात्रे साधु वा० छ । पात्रसाधौ यज्ञद्रव्ये त्रिका० । [यज्ञद्रव्ये ।

पात्रीव(र) पुंन०अर्श आदि०पात्रीं रा(वा)ति रा–(वा) क ।

पात्रेबहुल पु० ब० व० । पात्रे भोजनसमये एव बहुला० न तु कार्ये पात्रेसमिता० आचेपे गम्ये अलुक्स० । भोजनसमय एव बहुलीभूतेषु कार्याद्यसमेषु । युक्तराज्ञा० अस्याद्युदात्तता ।

पात्रेसमित त्रि० पात्रं भोजनकाल एव समितः सङ्गतः पात्रेसमि० अलुक्स० । १कार्यकाले अन्यमेषु भोजन एव सङ्गतेषु । युक्तरोज्ञा० अस्याद्युदात्तता । "स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः" त्रिका० "निधायहृदये चापि यः परं शंसति स्वयम् । स पात्रेसमितोऽथ स्यादिति" शब्दसा० उक्तलक्षणे पुरुषविशेषे च ।

पात्रे समितादि पु० क्षेमे चतुष्टयमासादिनिमित्ते शब्दभेदे च च गणः पा० सू० उक्तो यथा

"पात्रे समिताः पात्रे बहुलाः उदुम्बरमशकः उदुम्बरजनिः कूपेकच्छपः अवटेकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पितरिशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्षेड्डी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदम्भः गेहेधृष्टः गर्भेतृप्तः आखनिकवकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्षेड्डी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेगल्भः कर्णेटिरिटिरा कर्णे चुरुचुरा"।

पात्रोपकरण न० ६त०। पात्राद्यासुपभूषणे "रीतिवर्णादिसङ्घातं पात्रोपकरणादिकम्। दद्यादायसवर्जन्तु भूषणं न कदाचन। चमूद्वाचामरकुम्भादि पात्रोपकरणादिकम्। तद्भूषणान्तरे दद्याद्यत्तदुपभूषणम्" कालिकापु० ८६अ०।

पात्र न० पतति पत–क्विप् पतं पतनं त्रायते त्रै–क स्वार्थे प्रज्ञाद्यण्। पापित्रातरि "सर्वेषामेव पात्राणां परं पात्रं महेश्वरः। पतनं त्रायते यस्मादतीव नरकार्णवात्" नन्दिपु०। महेश्वर इति प्रदर्शकं हेतोरविशेषात् "पात्राण्याध्यात्मिका सुख्या विशुद्धाग्निहोत्रिणः। देवत्वं तथा सुख्या गोदानं स्रोतदुत्तमम्" प्रा० त०।

पात्र न० पीयतेऽदः पा–कर्मणि ष्ट्र। १जले पाति रक्षति च। २अग्नौ ३स्वर्गे च मेदि०।

पात्रस् न० पाति रक्षति, पीयते वा पा–पाने रक्षणे वा अस्तन् धुक् च। १जले २अग्नौ च उज्ज्वलट० अस्मभोजने हि देहरक्षा ३आकाशे च मेदि०। [स्त्रियां ङीप्।

पात्रिक पुंस्त्री० पात्रिकस्यापत्यं शिवा० अण्। पात्रिकापत्ये

पात्रिकत्व न० पात्रिकस्य भावः पुरोहि० यक्। पात्रिकत्वे

पात्रिस् पु० पा–पाने इत्रिन् धुक् च। १षड्ज २नेत्रे च उज्ज्वलट०।

पात्रेय त्रि०पात्रे तद्व्यवहारे साधु ढञ्। १मार्गेषु आहारोपयोगिद्रव्ये २कन्यारामौ दीपिका कौर्यशब्दे २१७८पृ० दृश्यम्। ३देशभेदे। ततो भवेऽर्थे धूमा० वुञ्। पात्रेयक तत्रभवे त्रि० [राजनि० २शङ्खे च पात्रोजातादयोऽस्यत्र।

पात्रोज न० पात्रेषु जायते जन–ड ७त०। १जलजे कमले

पात्रोद पु०पात्रो ददाति दा–कं। १मेघे त्रिका० मेघनामनामके २सुस्तके अमरः।

पात्रोधर पु० पात्रो धारयति धारि–अच् मुम्। जलधरे १मेघे हेमा० २सुस्तके च। [जलधौ सुस्तके त्रिका०।

पात्रोधि पु० पात्रो धीयतेऽत्र धा–आधारे कि उपसं०।

पात्रोनिधि पु० पात्रो निधीयतेऽत्र नि+धा–कि उपसं०। जलनिधौ सुस्तके शब्दरत्ना०। भवे यजु० ११।१४।

पात्र्य त्रि० पात्रेषु भवः वेदे ष्यन्। पात्रेषु हृदयाकाशे

पाट् पु० पट+क्विप् क्विप्। चरणे पादे जटा०

पाद पु० पद्यते गम्यतेऽनेन करणे कर्मणि वा घञ्। १चरणे अमरः २श्लोकमन्त्रयोश्चतुर्थांशे "सोऽपि श्लोके चेत् पादपूरणम्" पा० "पादश्चेच्छ्लोके सत्येव पूर्यते" सि०कौ०। "पादेन नाक्रमेत् पादसुच्छिष्टं नैव लङ्घयेत्। न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः" इति कर्मलोचनम्। पादप्रक्षालनादिनिषेधो यथा "न पादप्रक्षालनं कुर्यात् पादेन वा कदाचन। नाम्नौ प्रक्षापयेत् पादौ न कांस्ये धावयेद्बुधः। नातिप्रसारयेद्देवब्राह्मणानामथापि वा। वाय्वग्निब्रह्मविप्राणां सूर्यं वा शशिनं प्रति" कौर्मे उपरिभागे १५अ०। सुसंख्यापूर्वकस्य अन्यस्योपः बहु० समा०। द्विपाद् सुपाद्। उपमानात्तु वा व्याघ्रपाद्(दः)। पाद्शब्दैकोपपत्तौ अन्यत्रोपविधानम् द्विपादः सुपादः इति प्रयोगवारणार्थम्। पादश्च इन्द्रियभेदः इन्द्रियशब्दे ९५५ पृ० दृश्यः। २छन्दोऽङ्गे पादपः। ३चतुर्थभागे ५प्रत्यन्तपर्वते महाद्रिसन्निहितक्षुद्रपर्वते ६किरणे च मेदि० ७अन्त्यांशमात्रे ८अवयवमात्रे। भावे घञ्। ९गमने तत्र कुशलः आकर्षादनू। पादक गमनकुशले त्रि०। पादेन चरति पर्षा० ठन् पदादेशश्च पदिक पादचारिणि त्रि० स्त्रियां ङीप्। अस्य भत्वे यणादौ च परे वा पदादेशः। पादानू पदः इत्यादि। हेमा० चादुदात्तताऽस्य। १०छन्दोभेदे

पादकटक पु० पादस्य कटक इव। नूपुरे अमरः।

पादकृच्छ्र पु० व्रतभेदे तल्लक्षणमुक्तं यथा "एकभुक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः" याज्ञ० "एतच्चतुरहसाध्यम्" प्रा०वि०।

पादगण्डीर पु० पादस्य गण्डोः (गुँडि) इवस्यामूलाच्छावधिभागस्य दैः शोभाऽस्यत्र बा० र। श्लीपदे (गोद) रोगभेदे त्रिका०।

पादगृह्य पु० गृह्यः पादः मयूर० पूर्वनि०। गृह्ये पादे

पादग्रन्थि पु० पादस्य ग्रन्थिरिव। १गुल्फे २पादसन्धौ च।

पादग्रहण न० पादौ गृह्येते यत्र ग्रह–आधारे ल्युट्। १चरणग्रहणपूर्वकप्रणामे। "विप्रोऽत्र पादग्रहणमन्त्रं

भिवादनम्" यद्यः अभिवादनशब्दे २९९ पृ० द्रष्टव्यम्। तत्र शौचाचारमाह शङ्खलिखितः "अस्मिन् स्थाने कृतं शौचं वारिणा तद्विशोधयेत्"। अनभिवादानाह हारीतः "धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारकृतन्तथा। भुञ्जानञ्चाचमनार्हञ्च नाभिवादं नाभिवादयेत्। अन्यप्रभृतिवत् किञ्चित् चेतसा धर्ममाचरेत्। सर्वं तद्भिन्नमस्य याति एकहस्ताभिवादनात्"। "समिद्धाग्नुदकस्यापुष्पाक्षतहस्तो नाभिवादयेत् यज्ञार्थं युक्तम्" इति। बौधायनः। "जपयज्ञजलस्यञ्च समित्पुष्पकुशानलान्। दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत्" वसुहारीतः। "न शुष्कार्द्रतपस्विनौशुचिर्न जपन् न देवपितृकार्यं कुर्वन्" अभिवादयेदित्यनुवृत्तौ मनुलिखितौ।

पादधृत न० पादयोर्धेवनार्थं धृतं शा०त०। पादयोरभ्यङ्गनार्थे धृते भा० व० १९९ अ०।

पादचतुर त्रि०पादे पादव्यापारे चतुरः। १पादव्यापारदक्षे २स्नानके पुंस्त्री। २स्नैकते ३पिण्डके ४करके ५करके ६परदोषैकप्रवक्तृपुरुषे च मेदि०।

पादचारिन् पु० पादेन चरति चर-णिनि ३त०। १पदातौ २पद्भ्यां गन्तरि त्रि० हेमच० स्त्रियां ङीप्।

पादज पुंस्त्री पादात् जायते जन-ड ५त०। ब्रह्मणः पदादुत्पन्ने १शूद्रे त्रिका० स्त्रियां जातित्वात् ङीप्। "पद्भ्यां शूद्रो अजायत" यजु० ३०।११। श्रुतेस्तथात्वम्। २चरणजातरोगादौ त्रि०।

पादजल न०पादक्षालनं जलम् शा०त०। १पादोदके। पादक्षितं जलं यत्र। २चतुर्थांशमितजलयुक्ते त्रि०२कक्षे न० अमरः

पादजाह न० पादस्य मूलं जङ्घा० आ०च्। पादस्य मूले।

पादत्र त्रि० पादौ त्रायते त्रै-क। १पादरक्षके २पादुकायाम् स्त्री। [जटाध०। उपानच्छब्दे दृश्यम्।

पादत्राण न० पादस्त्रायतेऽनेन त्रै-करणे ल्युट्। पादुकायां

पाददाह पु० पादौ दहति-अण् उप० स०। सुश्रुतोक्ते १वातव्याधिभेदे "पादयोः कुरुते दाहं पित्तात्कुरुविहितो ऽनिलः। विशेषतश्चक्रवतः पाददाहं तमादिशेत्"।

पादप पु० पादेन मूलेन पिबति पिब्-क। १वृक्षे अमरः। पादं पाति रक्षति पा-क। २पादपीठे मेदि०। ३पादुकायां स्त्री मेदि०। पादेन क्षतम् अज। ४पादप्रक्षते त्रि०। ततः वसूक्ते स्वरूपम्। पादपस्यस्य तद्वत्सपूर्वे न०। [(पदमात्रा)। राजनि०।

पादपद्धति स्त्री पादयं रोहति रुह-क। वल्लीवाम्

पादपाश पु० ६त० १अश्वपादबन्धनदामनि हेमच० २पद्मकायां २खट्टुकायाम् (खँटूदा) ४लतायां स्त्री मेदि० गौरा० ङीप्।

पादपीठ पुंन० ६त०। पादस्थापनार्थे पीठे हेमच०। संज्ञायां कन् क्वापि अतइत्वम्। पादपीठिका० नाथितादिभिन्ने स्त्री शब्दमा०।

पादप्रक्षालन न० ६त०। पादयोः १क्षालने जले "पादप्रक्षालनं मेधाजनकं सुपवित्रकम्। अकस्मीकविकृष्टैव आयुषो हितकारि च" राजनि० "पादप्रक्षालनं विशेषयति देवलः "प्रथमं प्राङ्मुखः स्थित्वा पादं प्रक्षालयेज्जनैः। उदङ्मुखो वा दैवत्ये पैत्रके दक्षिणामुखः" मनेरत्वरः। दैवपैत्रकेतरत्रापसव्यः "प्रत्यक् पादावसेचनमिति"। प्रत्यक् पश्चिमाभिमुखः। अत्र साह गोभिलः "दत्तं पादप्रक्षालनेनिले इति दत्तं पादप्रक्षालयति"। कर्णपीडे तथा दर्शनात् सर्वत्र तत्र कल्प्यते। पारस्करः "दत्तं प्रक्षाल्य दक्षिणं प्रक्षालयतीति" "दत्तं प्रथमं प्रक्षालयतीति" सूत्रेण प्राक् दत्तपादप्रक्षालने सिद्धे दत्तं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र दत्तपदस्य सामान्यार्थं तेनान्यत्रिकृतिः या प्रक्षालने दत्तस्यैव प्राथम्यं अन्यार्थं पूर्वपक्षमिति दर्शनात्"। "ब्राह्मणस्य दक्षिणं प्रथमिति" सूत्रं यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं दत्तं विति न दत्तस्य। यथा प्रक्षालयतीत्यनुवृत्तेरभावात्। "दक्षिणमपि ब्राह्मणाय प्रयच्छेत् दत्तं गृह्णातीति अर्थं प्रक्षालने दत्तस्यैव प्राथम्यमिति फलितम् एवञ्च दक्षिणपादप्रक्षालनानन्तरं वामपादप्रक्षालनं वा स्मृतिसिद्धाद्युक्तं ज्ञेयमिति" शा०त० रघुनन्दनः।

पादबन्धन न० पादौ बध्येते अनेन करणे ल्युट् ६त १गोमहिषादेः पादबन्धने दामनि। भावे-ल्युट्। २गं हिपादिपादयोर्बन्धने जटा०। घञ् पादबन्ध तत्रार्थे

पादभाग पु० ६त०। १चरणाधोभागे हेमच०। २पादस्य भागः शा०त०। ३चतुर्थांशे च।

पादमूल न० ६त०। १चरणस्याधोभागे २चरणसमीपे

पादरक्ष त्रि० पादं रक्षति रक्ष-अण् उप०स०। १चरणरक्षके पादुकादौ २रथचरणचक्ररक्षके च भा०शि० ६५अ०। ल्यु। पादरक्षस्य तत्रार्थे त्रि०भावे ल्युट्। ६त०। २पादस्य रक्षणे न०। [पादबन्धनार्थे दामनि जटाध०।

पादरज्जु स्त्री पादबन्धनार्थं रज्जुः शा०त०। हस्त्यादेः

पादरथी स्त्री क्षुद्रो रथः ङीप् पादस्य रथीव । पादुकायां त्रिका० । [त्यु । पादरोहश्च तत्रार्थे राजनि० ।

पादरोह पु० पादेन मूलेन रोहति रुह–अच् । वटवृक्षे

पादवन्दन न० पादयोर्वन्दनम् । पादस्पर्शपूर्वकप्रणामे "कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा" याज्ञ० मनुना कचिद्विशेष उक्तः "गुरुपत्नीस्तु युवतिर्नाभिवाद्येह पादयोः । पूर्णोऽहमवर्णेन गुरुदोषो विजानता" [हेदच०

पादवल्मीक पु० पादे वल्मीक इव । श्लीपदरोगे (गोद)

पादविक त्रि० पदशीमनुधावति ठक् । पथिके सि०कौ० ।

पादविग्रह पु० पादस्यावयवस्य विग्रहः । अवयवस्पर्शे । "ये च विष्णुमधीयन्ते बहुधा पादविग्रहैः" हरिवं० २१७अ० । पादः चतुर्थांशमितो विग्रहो यस्य । पादमितावयवयुक्ते त्रि० "अधर्मो पादविग्रहः" १९८अ० ।

पादविरजस् स्त्री पादो विरजाः धूलिहीनो यस्याः । १पादुकायां हारा० । ६ब० । २देवेषु च तेषां विरजस्कपादत्वात्तथात्वम् ।

पादशस् अव्य० पादं पादमित्यादिकारकार्थे वीप्सायाम् अव् अस्य पादभिन्नत्वे न पदादेशः । वीप्सायां कारकार्थेतरो पादशब्दार्थे मनु १।८२। तु अस्य पादे तु पच्चस्

पादशाखा स्त्री पादस्य शाखेव । पादाङ्गुली शब्दार्थकल्पत०

पादशैल पु० पादालक्षः शैलः । प्रलम्बपर्वते शब्दरत्ना० ।

पादशोथ पु० पादजातः शोथः शा०त० । पादजाते शोथे रोगभेदे "अन्योन्योपद्रवकृतः शोथः पादसमुत्थितः । इदं हन्ति नारीन्तु सुखजो गुह्यजो ह्यवम्" माधवः ।

पादशौच न० ६त० । पादप्रक्षालने पादप्रक्षालनशब्दे दृश्यम् "शौच्यास्यतः पादशौचम्" आह्निकप्रयोगः । श्राद्धे दक्षिणासुखेनैव तस्य करणं यथोक्तं श्राद्ध०त० "प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः । उदङ्मुखो वा दैवत्ये पैत्रे दक्षिणासुखः" इति देवलवचनात् दक्षिणासुखः सन् कृतपादशौचस्तत्रापि वामपादादिक्रमः" रघु० ।

पादस्फोट पु० ६त० । १विपादिकाख्ये २क्षुद्रकुष्ठभेदे अमरः कुष्ठशब्दे २१५९पृ० तस्य लक्षणादि दृश्यम् ।

पादस्वेदन न० ६त० । पादयोः स्वेदने । ततः अस्त्यस्य निर्वृत्तेऽर्थे ठञ् । पादस्वेदनिक तन्निर्वृत्ते रोगभेदोपशमादौ त्रि० ।

पादहर्ष पु० "कृष्णतरश्चो यस्य भवतश्च प्रसुप्तवत् । पादहर्षः स विज्ञेयः कफवातप्रकोपजः" सुश्रुतोक्ते वातव्याधिभेदे ।

पादहारक त्रि० पादाभ्यां हरति ह्रियते वा हृ–कर्त्तरि कर्मणि वा णि० ण्वुल् । १पादेन हरणकर्त्तरि २तत्कर्मणि च । [२चरणशून्ये च ।

पादहीन त्रि० ३त० । १त्रिपादात्मके पदार्थे (तिमपोया)

पादाकुलक "यदतीतलतविविधलक्षणयुतैर्मात्रासमादिपादैः कथितम् । अनियतदत्तपरिमाणसहितम् प्रथितं जनतस्तु पादाकुलकम्" छ०र० उक्ते मात्रावृत्तभेदे ।

पादाग्र न० ६त० । चरणाभागे प्रपदे अमरः ।

पादाङ्गद न० पादस्य अङ्गदमिव । नूपुरे अमरः गौरा० ङीष् । तत्रार्थे स्त्री हारा० ।

पादाङ्गुलीयक न०६त० (चुटकी) चरणाङ्गुलीयके हेमच०

पादात् त्रि० पादाभ्यामतति अत–क्विप् । पद्भ्यां गन्तरि २पदातौ पु० हेमच० ।

पादात न० पदातीनां समूहः अण् । १सैन्यसमुदाये अमरः पादाभ्यामतति गच्छति अत–अच् । २पदातौ सैन्ये पु० पादातिः पादातिकोऽप्यत्र पु० हेमच० ।

पादाम्बु न० पादमितमम्बु यत्र । तक्रे (गोल) अमरः ।

पादाभ्यञ्जन न० ६त० । पादलेपनार्थे इतादौ आर्थी०२अ० ।

पादाभ्यस् न० पादप्रक्षालनमस्यः । पादशौचजले "दूराद्दुश्चिष्टविच्छूलपादाभ्यांसि समुत्सृजेत्" याज्ञ० तस्य दूरे त्यज्यतोक्ता । [पादर्षिगोत्रापत्ये ।

पादायन पुंस्त्री० पादस्यर्षेः गोत्रापत्यम् अश्वा० फञ् ।

पादारक पु० पाद इव कृच्छ्रति कृ–ण्वुल् । नौकावयवभेदे पोलिन्दे हेमच० । [नौकायां हारा०

पादालिन्दी स्त्री पाद इवालिन्दो यस्याः गौरा० ङीष् ।

पादावर्त्त पु० पाद इवावर्त्तते आ+वृत–अच् । कूपादितो जलोद्धारणे यन्त्रभेदे अरघट्टे हेमच० ।

पादाविक त्रि० पादातिक+पृषो० । पदातौ शब्दरत्ना० ।

पादिक त्रि० पादेन चतुर्थांशेन जीवति वेतना० ठक् । १चतुर्थांशवृत्तियुते । पादः परिमाणमस्य निष्का० ठक् । २पादपरिमाणे मनुः २१ ।

पादिन् त्रि० पादवरणोऽस्त्यस्य पादचतुर्थांशो पक्षीतृत्वेनास्त्यस्य वा इनि । १पादयुते जलजन्तुभेदे "कुम्भीरकूर्मनक्राश्च गोधामकरशङ्खकः । शिशुमारश्चेत्यादयः पादिनः स्मृताः । पादिनोऽपि च ये ते तु कोशस्थानां गुणैः समाः" भावप्र० । २चतुर्थांशग्राहके च "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे । तृतीयिनस्तृतीयांशाच्चतुर्थांशास्तु पादिनः" मनु०त० अर्द्धिन्शब्दे १७८पृ० दृश्यम् ।

पादु स्त्री भावे उण्। गमने ऋ० १०१७१४ भाष्ये दृश्यम्।

पादुक त्रि०पद-उकञ्। १गमनशीले पादु+स्वार्थे क "क्रेऽणः" पा० हुस्वः। चर्ममयपादत्राणे स्त्री अमरः। तस्या उत्पत्तिकथा आतपत्रशब्दे ६४९ पृ० दृश्या तत्र चातुर्वर्णनिरूपणाध्यायसंख्या ९२ ९३स्थाने९५,९६संख्या ज्ञेया। "वर्णांतपादिके क्षत्री दण्डी राजप्रटवीषु च। शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्" व्यो०त० "पादप्रधारणं दृष्टमोजस्यं चक्षुषो हितम्। सुखप्रचारमायुष्यं तस्मात् पादरक्षापहम्"। तथा अधारणे दोषा यथा "पादाभ्यामनुपानद्भ्यां नृणां च क्रमणं यदा। अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिकृत्" राजनि० अधिकं दिनचर्याशब्दे २१९० पृ० दृश्यम्। "दृष्टमानाय विप्राय यः प्रयच्छत्युपानहौ। स्नातवाय जटावाहो! संयिताय द्विजातये। सोऽपि सोपानतावाप्नोति देवतैरपि पूजिताम्। लोकेऽपि च सदा युक्तो वर्तति प्रेत्य भारत!" भा०आनु० ९६अ०। क्वचित्पादुकाधारणनिषेधः "वहन्नुपानहौ पद्भ्यां यस्तु भानुपसंक्रमेत्। चर्मकारस्तु जायेत वर्षाणान्तु त्रयोदश" वराहपु०। "सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते" मनुः। देवताणादुकानिर्माणप्रकारो देवीपु० यथा "मणिरत्नमयी कार्या हेमरूप्यमयी तथा। चन्दनेनापि कर्त्तव्या पादुका प्रतिमापि वा। श्रीपर्णी श्रीद्रुमा चापि देवदारुमयी तथा। यद्वृक्षा च सा कार्या पादुकां पूजयेत् सदा"।

पादुकाकार पु० पादुकां करोति कृ-अण् उप०स०। चर्मकारे पादुकत्पादुकाकृदादयोऽप्यत्र हेमच०।

पादू स्त्री पद्यते सुखेनानया पद-करणे "चितः कथिपद्यर्त्तेः" उणा० उ-चित्। चर्ममयपादुकायाम् अमरः।

पादोदक न० पादप्रक्षालनसदकम् षा०त०। पादप्रक्षालनजले हरिमूर्त्तिपादोदकपानफलं हरिभक्तिविलासादौ दृश्यम्।

पादोदर पु०स्त्री० पाद उदरे यस्य। वर्णे प्रज्ञोप० स्त्रियां जातित्वात् ङीष्।

पाद्धत न० पद्धतीनां समूहः भिक्षा० अण्। पद्धतिसमूहे

पाद्म न०पद्ममधिकृत्य प्रवृत्तम् अण्। "तदधिकृत्य कृते ग्रन्थे" पा० वा अण्। पद्माधिकारेण प्रवृत्ते १जगदादिनिरूपे ब्रह्मभेदे तदधिकारेण कृते २पद्मपुराणाख्ये ग्रन्थे च।

पाद्य त्रि०पादार्थं पाद-यत्। १पादशौचार्थे जले अपरं स्त्री तेन "पाद्याः पाद्याः पाद्याः प्रतिष्टस्नानामिति" विवाहे ऽष्टशौचप्रश्नः। पादं पद्यर्थायमर्हति यत्। २चतुर्थीयार्हे त्रि०। देवदेयपाद्ये द्रव्यविशेषे उक्तो यथा "पाद्यं श्यामाकदूर्वाक्षतविष्णुक्रान्ताभिरीरितम्"। एतद्द्रव्यमुक्तं जलमिति देवप्र० रघु०। तद्दानपात्रलक्षणं यथा "पादावसेचनजलपूरणं पात्रमद्भुतम्। शोभनं ताम्रजातं वा हेमं राजतमेव वा" वैखानससं०। "षडङ्गुलप्रविस्तारस्तदर्धे चतुरङ्गुलम्। षोडशेत्याङ्गुलं कुर्यात् नाविकां चतुरङ्गुलाम्। पृष्ठे पादसमायुक्तं चतुरङ्गुलमानतः। पाद्यपात्रमिति ख्यातं सर्वदेवप्रपूजने" विद्वान्मनोहरः। पाद्यप्रकारः स्वशा० वसु। पाद्यक पाद्यप्रकारे त्रि०।

पान न० पा-ल्युट्। १द्रवद्रव्यस्य गलाधःसंयोजने २रसने च ३निम्बामे च पु० हेमच०। निम्ब सेन प्राचरसवात्तपालम्। आधारे ल्युट्। ४पानभाजने मेदि० पीयतेऽस्मात् अपादाने ल्युट्। ५शौण्डिके पु० जटा०। करणे ल्युट्। चक्षुषां तीक्ष्णप्रभावस्यादने ६व्यापारभेदे (पानदेखोया) अविशब्दे ६६१ पृ० पावनाशब्दे च दृश्यम्। पीयते कर्मणि ल्युट्। ७मद्यादौ।

पानक न० पानार्थं कायति कै-क। अम्लिकामिश्चुरवादिमिश्रितशर्करादौ लताशब्दे २१८पृ० दृश्यम्।

पानगोष्ठिका स्त्री पानार्थं गोष्ठिका। १समूह मद्यादिपानार्थसभायाम् तन्त्रोक्ते २भैरवीचक्रे च।

पानठ त्रि० पाने कुशलः वा० अठच्। पानकुशले स्त्रियां गौरा० ङीष्। [रापाविधि।

पानप त्रि० पानं पेयं मद्यादि पिबति पा-पाने क। सु-

पानपात्र न० पानस्य पेयस्य सुरादेः पात्रम्। पेयसुरादेः पात्रे कंसे अमरः। पानभाजनादयोऽप्यत्र।

पानवणिज् पु० पानस्य पेयस्य सुरादेः वणिज्। शौण्डिके हेमच०। [प्रकृतिस्वरः।

पानशौण्ड त्रि० पाने शौण्डः ७त०। सुरादिपानदक्षे

पानस न० पनसस्य तत्फलस्य विकारः तस्येदं वा अण्। पनसभवे १मद्यभेदे "पानसं द्राक्षमाध्वीकम्" द्वादशमद्योक्तौ पा०वि०। २पनसस्वन्धिनि त्रि०।

पानात्यय पु० सुश्रुतोक्ते मद्यपानजे रोगभेदे मद्यस्य पानदोषादिकनिरूपणेन तल्लक्षणादिकं तत्रोक्तं यथा "मद्यस्तथ्यं तथा तीक्ष्णं सूक्ष्मं विशदमेव। रूक्षं भाशुकरञ्चैव व्यवायि च विकाशि च। शीघ्रप्राप्तीतोपचारं तत्तैक्ष्ण्यात्प्राहन्ति मनोगतिम्। विषलक्षणवाशु शीघ्रप्राहैर्मद्यात्रक्षणुक्तम्। भारतं कोपवेगौष्ण्यादाशुत्वादाशुकर्मजत्। रूक्षदक्ष व्यवायित्वाद्विकाशित्वाद्वि-

[illegible] रसः [illegible] रोचनदीपनम् । [illegible] रसानसादिवन्ति हि । स्निग्धै-[illegible] [illegible] । अभेदायुःप्रकर्षाय [illegible] ; [illegible] मनसस्तुष्टिर्धैर्यं तेजो-[illegible] । विधिवत्सेव्यमाने तु मद्ये वृद्धिहिता सुखाः । मद्येनानुगमेन सेव्यमानमनामया । कायाग्निवाय्वग्निवर्धनं बलेन कुरुते मदम् । मदेन करणानान्तु भावानामस्ते कृते सति । निगूढमपि भावं सम्यक्ताशी कुरुतेऽवशः । तत्रवस्थच मदो ज्ञेयः पूर्वो मध्योऽथ दारुणः । पूर्वे वीर्यरतिप्रीतिहर्षभाग्यादिवर्द्धनम् । प्रकाशो मध्यमे हर्षो युक्तायुक्तक्रियानयां । विदंशः दारुणे मते नष्टकर्मक्रियायुतः । [illegible] । पानं न बाधतेऽत्यर्थं विपरीतांस्तु बाधते । निर्भक्तमेकान्तत एव मद्यं निषेधमात्रं मतुलेन नित्यम् । उत्पादयेत् कष्टतमान्विकारानाशादयेच्चापि शरीरभेदम् । क्रुद्धेन भीतेन पिपासितेन श्रोत्राभितप्तेन बुभुक्षितेन । आयासभाराध्वपरिक्षतेन वेलावरोधाभिहतेन चापि । अत्यन्तभग्नावततोदरेण स्त्रीचेष्टकेन तथा वमेन । उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान् । पानात्ययं परमदस्यानाज्जीर्णमथापि वा । पानविभ्रमसंज्ञं तेषां वक्ष्यामि लक्षणम् । तस्माद्भुग्नदृष्टवपक्षतोदकस्याः पानात्ययेऽभिहते शिरसो रुजश्च । स्वेदप्रलापसंज्ञाशोषवदाहमूर्च्छाः पित्तात्मके वदनलोचनपीतता च । श्लेष्मात्मके वमथुशीतकफप्रसेकाः सर्वात्मके भवति सर्वविकारसम्पत् । तस्या शरीरसुखता विरसाननत्वं क्रोधाधिकत्वमरुचिर्मलमूत्रसङ्गः । जिह्वं परस्य तु मदस्य वदन्ति तज्ज्ञास्तृष्णारुजा शिरसि सन्धिषु चापि भेदः । आध्मानमङ्गिरसमन्तरसो विदाहोऽजीर्णस्य पानजनितस्य वदन्ति लिङ्गम् । ज्ञेयानि तत्र भिषजा सुविनिश्चितानि पित्तप्रकोपजनितानि च कारणानि । कृष्णास्तोदवमथुज्वरकण्ठधूमसूर्च्छाकफक्लमवमूर्च्छरुजो विदाहः । ज्ञेयः सुराजविकृतेषु च तेषु तेषु तं पानविभ्रमसुखप्रभिन्नेन धीराः । हीनोत्तरौष्णमतिशीतमसन्दाहं तैलप्रभास्वमतिमानहतं विजह्यात् । लिङ्गोष्टदन्तसहितं त्वचवापि नीलं पीते च यस्य नयने रुधिरप्रभे च । हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः कासश्लमावपि च पानकृतं भजन्ते" । परमदपानाज्जीर्णेपानविभ्रमा अपि तस्योक्ते मद्यपानजे रोगभेदे तल्लक्षणमत्रैवोक्तम् ।

पानिल न॰ पानमाधारतयाऽस्त्यत्र इलच् । जलपात्रे शब्दच॰

पानीय त्रि॰ पा–पाने रसने वा कर्मणि अनीयर् । १पेये जलादौ २रसनीये च १जले न॰ अमरः । तद्गुणभेदादि अम्बुशब्दे दृश्यम् ।

पानीयकाकिक न॰ काकस्येवाकारोऽस्याति ठन् ७त॰ । (पानकौड़ि) पक्षिभेदे मद्गुसगे उज्ज्वलट॰ ।

पानीयनकुल पुंस्त्री॰ पानीये जले नकुल इव । (उदिराव) जलविडाले हेमच॰ ।

पानीयपृष्ठज पु॰ पानीयपृष्ठे जलोपरि जायते जन–ड । (पाना) कुम्भ्राम् रत्नमाला ।

पानीयफल न॰ ६त॰ । (माखना) जलकन्दफलभेदे भावप्र॰

पानीयभक्तगुड़िका स्त्री चक्रदत्तोक्ते गुलिकाभेदे "रसोऽर्द्धभागिकस्तुल्याविडङ्गमरिचाश्मकाः । भक्तोदकेन संमर्द्य कुर्यादु गुञ्जासमां गुड़ीम् । भक्तोदकस्य पानेच सेव्या वह्निप्रदीपनी । वार्य्यन्नभोजनस्यात्र प्रयोगे सात्म्यमिष्यते" । [चक्रद॰ ।

पानीयमूलक न॰ पानीयं मूलं यस्य कप् । सोमराज्याम्

पानीयवर्णिका स्त्री पानीयमिव वर्णयति वर्णि–ण्वुल् । माकुचायां राजनि॰ ।

पानीयशालिका स्त्री पीयतेऽस्याम् आधारे अनीयर् । तादृशी शाला पानीयवितरणार्थं वा शाला ततः स्वार्थे क आपि अतइत्वम् । प्रपायाम् (जलसत्रे) अमरः । तद्दानविधिः हेमाद्रि॰दा॰ भविष्यपु॰ उक्तो यथा "अतीते फाल्गुने मासि प्राप्ते चैत्र महोत्सवे । पुण्येऽह्नि विप्रकथिते महचन्द्रवलान्विते । मण्डपं कारयेद्विद्वान् धनाढ्यायं धनोत्तमम् । इत्रस्य मध्ये पथि वा चैत्यद्रुमतलेऽथ वा । सुपीतवसनं रम्य विचित्रावसनसंयुतम् । तन्मध्ये स्थापयेद्भव्यान् मणिकुम्भांश्च शोभनान् । आकल्पयुक्तान् करकान् वस्त्रैरावेष्टितानवान् । ब्राह्मणे शीलसम्पन्ने भक्तिं दत्त्वा यथोचिताम् । प्रपायाः प्रकर्त्तव्यो बहुपुण्यपरिच्छदः । पानीयपानादन्नान्नान् यः कारयति मानवान् । एवंविधां प्रपां कृत्वा शुभेऽह्नि विधिपूर्वकम् । यथाशक्त्या नरश्रेष्ठ ! प्रारम्भे भोजयेद्विजान् । ततश्चोत्सर्जयेद्विद्वान्नन्नेनानेन मानवः । प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता । अस्याः प्रदानात् पितरस्तृप्यन्तु च पितामहाः । अनिवारितं तथो देयं जलं मानवसत्तमैः । तिपक्षं वा महाराज !

जीवानां जीवनं परम्। नत्वाद्यं सरसं शीतं शोभने राजते स्थितम्। प्रदद्यादप्रतिहतं सुखस्थानवलोकयन्। प्रसन्नं कारयेत्तस्मां भोजनं शक्तितो द्विजान्। अनेन विधिना वस्तु शीघ्रं तापप्रशमनम्। पानीयसुत्तमं दद्यात्तस्य पुण्यफलं शृणु। कपिलाशतदानस्य सम्यग्दत्तस्य यत् फलम्। तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः। पूर्णचन्द्रप्रतीकाशं विमानमधिरुह्य सः। याति देवेन्द्रनगरं पूज्यमानोऽप्सरोगणैः। त्रिंशत्कोट्यो हि वर्षाणां यत्रगन्धर्वसेवितम्। पुण्यक्षयादिहागत्य चतुर्वेदो द्विजो भवेत्। ततःपरं पदं याति पुनराहृत्तिदुर्लभम्"।

पानीयामलक न० कर्म०। (पानिआमला) वृक्षभेदे "पानीयामलकं दोषत्रयज्वरविशोषनम्। रूक्षं स्वादु सुखशुद्धिकरं मलविशुद्धिकृत्" राजवल्लभः।

पानीयालु पु० पानीयजात आलुः शा०त०। (पानीआलु) वृक्षभेदे राजनि० "पानीयालुस्त्रिदोषघ्नः सन्तर्पणकरः परम्"। [बा० य टाप्। वल्लजायां राजनि०।

पानीयाश्वा स्त्री पानीयं जलमश्नाति भूतेन अश्व—भोजने

पान्थ त्रि० पन्थानं नित्यं गच्छति अण् पन्थादेशः। नित्यं पथि गन्तरि १पथिके अमरः। २विरोगिनि च त्रि०।

पान्थायन त्रि० पथोऽदूरदेशादि पथिन्+पन्था० फक् पन्थादेशः। मार्गस्यादूरदेशादौ।

पान्नागारि पुंस्त्री० पन्नागारस्य ऋषेरपत्यं युवा इञ् "इञः प्राच्यभरतेषु" पा० युवप्रत्ययस्लुक्। गोत्रप्रवर्त्तकपन्नागारर्षेः १गोत्रापत्ये २तदीये यून्यपत्ये च।

पाप न० पाति रक्षति आत्मानमस्मात् पा—अपादाने प। १नरकहेतौ दुरदृष्टे तत्साधने २हिंसादौ ज्योतिषोक्तेषु अर्द्धोनचन्द्ररविप्रभृतिषु ग्रहेषु पापग्रहशब्दे दृश्यम्। पापलक्षणं पापसत्तायां प्रमाणञ्च प्रा०वि० उक्तं यथा ननु किं पापलक्षणम् उच्यते चोदनालक्षणोऽर्थोधर्म्म इति धर्मलक्षणं कृत्वा सूत्रकारेण जैमिनिना वेदैकप्रतिपाद्योऽनर्थोऽधर्म्म इत्यधर्म्मलक्षणं सूचितम् अनर्थस्य निष्टसाधनं तथा चोक्तं भाष्यकृता कोऽर्थो योऽभ्युदयाय कोऽनर्थो योऽनभ्युदयाय"। ननु पापसत्तायां किं मानं न तावत् वेदः तस्य वार्त्ता काव्योक्तिते वा प्रामाण्यात् न च दुरितापूर्वं वार्त्ता काव्योक्तितं वा। न च नित्यकर्म्माकरणस्य निषिद्धाचरणस्य च वेदोक्तप्रत्यवायसाधनत्वान्यथानुपपत्त्या कल्प्यं तत्र तथाविधशब्दाभावेन अविद्यत्वेन चावगन्तुमशक्यत्वात्, उच्यते "यो ब्राह्मणायावसुरेत् तं यतेन यातायात्" इति श्रुतौ विहितयज्ञतेरवगोरप्यशक्यतयातनयोः साध्यसाधनभावोऽवगम्यते "हेतु हेतुमतोर्विहितिः" पाणिनिस्मरणादिति यथोक्तं शंखधिकरणे, तथालापि क्वचित् पञ्चम्या क्वचित् तृतीयया क्वचिद्विशेषणेन तदवगम्यते। यथा याज्ञवल्क्यः "विहितस्यानुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" (अत्र पञ्चम्या) मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितां। इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा। प्राप्नुवन्ति दुरात्मानो नराः पापविपर्य्ययम्" (अत्र तृतीयया) विष्णुपु० "नरकं कर्म्मणां घोरादेवमाहुर्मनीषिणः" यमः "सुरापो ब्रह्महा गोघ्न सुवर्णस्तेयकृन्नरः। पतितैः संप्रयुक्तश्च तत्संसर्गी गुरुतल्पगः। एते पतन्ति सर्वेषु नरकेष्वनुपूर्वशः"। अत्रैते सुरापादयः पतन्तीति सुरापादीनां पतनकर्त्तृत्वावगतेः पतनकर्त्तृत्वञ्च साधनत्वविशेषः। अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्बन्धे पतनसाधनत्वमवगम्यते। "सद्यदग्ध्वाजापत्यानृषभूनाजभेत" इति वत्। एवं "वारिदस्तृप्तिमाप्नोति" इत्यादिवच्च। नरकसाधनत्वस्य वाच्यान्वयाभावात् कथं शब्दादवगतिरिति चेत् संबुवत् विषयविशेषकतया इति ब्रूमः। यथा यातनासाधनादवगोरप्यात्रिवर्त्तितव्यमिति विधिः। तथा नरकसाधनात् सुरापानादेरपि निवर्त्तितव्यमिति"। यथा कालान्तरभावि स्वर्गादिसाधनत्वान्यथानुपपत्त्या यागादेर्दारीभूतधर्मकल्पकता एवं कालान्तरभाविनरकादिसाधनत्वान्यथानुपपत्त्या सुरापानादेर्दारीभूताधर्मकल्पकत्वमिति बोध्यम्। पापमस्त्यस्य अर्श० अच्। ४पापयुक्ते त्रि०। पापं च कायिकादिभेदेन दशविधं दशहराशब्दे २४८२पृ०दर्शितम् कायिकादिभेदेनान्यान्यपि पापान्युक्तानि यथा "प्राणाभिपातनं स्तैन्यं परदारसमापि च। त्रीणि पापानि कायेन सर्वतः परिवर्जयेत्। असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा। चत्वारि वाचा राजेन्द्र! न जल्पेत् न चिन्तयेत्। अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम्। कर्म्मणां फलमस्तीति त्रिविधं मनसाचरेत्" भा०शा०दानधर्मः। पापस्य पुरुषस्यावश्यानुवर्त्तित्वं यथा "नाधर्म्मचरितो राजन्! सद्यः फलति गौरिव। शनै-

रावर्त्तमानस्य मूढान्यपि निहनति । यदि नाहानि मिलेषु न चेत् पुत्रेषु नप्तृषु । पापमाचरितं कर्म निर्वर्तमनुवर्त्तते । फलस्येव ध्रुवं पापं गुरु भुक्तमिवोदरे" भारते २८अ० । राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा "राजा राष्ट्रकृतात् पापात् पापी भवति वै फेरे !। तथैव राष्ट्रः पापेन तद्राज्यस्थास्तु ये जनाः । वर्णान्नशादय सर्वे पापिनो नात्र संशयः । भार्य्यांशोदुष्कृतो स्वामी दुष्टिनात् स्वामिनोऽपरा । तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा । शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती । पातकी यजमानः स्यात् पापिनोऽस्य पुरोधसः । पुरोहितस्तथा पापी यजमानांहसो ध्रुवम्" अदत्तपुण्यपापभागित्वं यथा "अदत्तानि च पुण्यानि पापानि च यथा प्रिये !। प्राप्नोति मनेवाचेन तद्यथावच्छिशामय । देवग्रामकृतानि सुभोजनभाक्षि कृतादिषु । कर्त्ता तु केवलं कर्त्ता फलभुक् पुण्यपापयोः । अकृतेऽपि च संसर्गे व्यवस्थे यतदाकृता । संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् । एकत्र मैथुनाद्यानां देवपात्रस्वभोजनात् । फलार्द्धं प्राप्नुयान्नारी यथावत् पुण्यपापयोः । अर्थनाद्भाषणाद्वापि परस्य स्तवनादपि । दर्शनं पुण्यपापानां नित्यं प्राप्नोति मानवः । दर्शनस्पर्शनाभ्यां च मनोध्यानात्तथैव । परस्य पुण्यपापानां भागं प्राप्नुयान्नरः । परस्य निन्दापैशुन्यं धिक्कारस्य करोति यः । तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति यः । कुर्वतः पुण्यकर्माणि सेवां यः कुरुते परः । यत्रीभूतोऽथ शिष्यो वा सजातीयोऽपि मानवः । तस्य सेवाकृतेनैव तस्य तत्पुण्यभाग्भवेत् । एकपङ्क्तेस्ततो यस्तु शक्तवन् परिवेषयेत् । तस्य पापमतांश्चन्तु लभते परिवेषकः । स्नानतन्त्रादिकं कुर्वन् संस्कृतेदा प्रमाणते । स पुण्यकर्मणस्तांश्च दद्यात्तस्मै सुनिश्चितम् । धर्मोद्देशेन यो द्रव्यं परं याचयते नरम् । तत्पुण्यं कर्मजं तस्य धनं दत्त्वाप्नुयात् फलम् । अपहृत्य परद्रव्यं पुण्यकर्म करोति यः । कर्मजात् पापभोक्तास्य धनिनस्तद्भवेत् फलम् । नापहृत्य धनं यस्तु परस्य जिवते नरः । धनी तत्पुण्यमाप्नोति स्वधनस्यातुरूपतः । बुद्धिदत्तस्तमना च यशोपचरणप्रदः । यत्रतत्रापि यैर्तांश्च प्राप्नुयात् पुण्यपापयोः । प्रजाभ्यः पुण्यपापानां राजा भागं हरेत् । शिष्याद्गुरुः स्त्रिया भर्त्ता पिता प्रजातस्तथैव च । अन्येरपि पुण्यस्य भाग्यार्द्धं समाप्नुयात् । परस्येन दानादि कुर्वतः पुण्यकर्मणः । विना स्वस्वशिष्याद्यां कर्त्ता भागमाहरेत् । आत्मनो वा परस्यापि यदि सेवां न कारयेत्" श्रीलक्ष्मी उवाच "इत्थं सदृत्तान्यपि पुण्यपापान्यायान्ति नित्यं परसञ्चितानि । ब्रह्मन् चाखिलितिहासमयं पुराभवं पुण्यमतिप्रसिद्धम्" पाद्मोत्तरखण्डे ७।१५७अ०। अत्र कर्त्ता संसर्गजपापोक्तिः महापातकिविषया संसर्गशब्दे दृश्यम् । ५गर्ह्ये त्रि० पापयोनिः महः ४।१६६ पापनाशित इत्यादि । [पिण्डीकृते प्रेते च आ०त०रघु०।

पापकृत् त्रि०पापं कृतवान् कृ-क्विप् । १कृतपापे २अस०

पापग्रह पु०कर्म० । "यद्वैनेन्दुः कुजो राहुः शनिस्तैर्युत इन्दुजः । रविः पापग्रहाश्चैते शुभाशुभे प्रकीर्त्तिताः" ज्योतिषोक्तेषु ग्रहेषु ।

पापघ्न पु०पापं हन्ति हन-टक् । १तिले तस्य हि दानेन पापनाशकत्वमिति तस्य तथात्वम् । २पापनाशके त्रि० राजनि० ।

पापचेली स्त्री पुनःपुनः पचति पा-यङ्-अच् पापचीवासुस्तीरयति रैर-अच् रस्य वः । (आकनादि) पाठात्तावाम् अमरः स्वार्थे क ह्रस्वः । पापचेलिका तत्रार्थे स्त्री रत्नमाला ।

पापति त्रि० पत-यङ्लुक् इन् । पुनःपुनः पतनशीले

पापनापित पु० कर्म० "कृतुसितानि कुत्सितैः" पा० पापत्वेन (गर्हितत्वेन)नापितस्य कृतुसितानस्यात नापितस्य पूर्वं निपाते प्राप्ते "पापाचके कुत्सितैः" पा०परनि०। धूर्त्तनापिते

पापनाशन त्रि० पापं नाशयति नाशि-ल्यु । १पापनाशके २विष्णौ पु० "स्तितोयः पापनाशनः" विष्णुसं० । भावे ल्युट् ६त० । ३पापस्य नाशने च न० । करणे ल्युट् । ४प्रायश्चित्ते न० ।

पापपति पु० पापजनकः पतिः । जारपतौ जारे त्रिका० ।

पापपुरुष पु० पापात्मकः पुरुषः पुरुषाकारः । तन्त्रोक्ते वामकुक्षिस्थे पापात्मके ध्येये नराकारे पदार्थे तन्त्रसारे भूतशुद्धिप०, बहुपापावयवभेदयुते २पुरुषभेदे च । पाद्मे क्रिया० २१अ० तत्स्वरूपस्तु यथा "सृष्टादौ पुरुषश्रेष्ठः संसारं सचराचरम् । सर्वेषां दर्शनार्थाय सृष्टवान् पापपुरुषम् । द्विजातिकृत्यामूर्द्धानं मदिरापानलोचनम् । सुवर्णस्तेयवदनं गुरुतल्पगतिं स्तुतिम् । स्त्रीहत्यानाधिकस्तैव गोहत्यादोषवाहकम् । ब्राह्मणपरपत्नीयं भ्रूणहत्यागलत्वया । परव्यागति-

वुक्कानं सुहृल्लोकवशोदरम्। गरणापद्रहत्यादिनाभिं गर्वकथाकटिम्। गुरुनिन्दासक्थिभागं कन्याविक्रयशेफसम्। विश्वासवाक्यकथनपायुं पितृवधाङ्घ्रिकम्। उपपातकरोमाचं महाकायं भवङ्करम्। अन्यत्वर्णं पिङ्गनेत्रं स्वान्वयात्यन्तदुःखदम्"।

पापयज्ञान् पु० वास्तुमण्डलस्थे पूज्यगणभेदे इ०सं० ५१अ०।

पापमुक्त त्रि० पापात् मुक्तः ५त०। परित्यक्तपापे। पापमोचनहेतवश्च मनुना दर्शिता यथा "ख्यापनेनानुतापेन तपसाध्ययनेन च। पापकृन्मुच्यते पापात् तथा दानेन चापदि"। अन्ये च तस्य हेतवो वराहपु० दर्शिता यथा "यः समः सर्वभूतेषु जितात्मा शान्तमानसः। स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित्। गुणागुणपरिज्ञाता क्षयस्य क्षयस्य च। ध्याने चैवं क्षसंमूढः स पापेभ्यः प्रमुच्यते। स्वदेहे परदेहे च सुखदुःखेन नित्यशः। विचारज्ञो भवेद्यस्तु स मुच्येतैनसो ध्रुवम्। अहिंसः सर्वभूतेषु तृष्णाक्रोधविवर्जितः। कृतन्यासः सदा यस्य स पापेभ्यः प्रमुच्यते। प्राणायामैश्च निर्दग्धं अंहः, मन्त्रारचारतः। व्यवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते। निराशीः सर्वतस्तिष्ठेदिष्टार्थेषु न लोलुपः। पवित्रात्मा त्यजेत् प्राणान् सर्वपापात् प्रमुच्यते। अदृप्तानोजितक्रोधः परद्रव्यविवर्जितः। अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते। गुरुशुश्रूषया युक्तो ह्यहिंसानिरतश्च यः। क्षुद्रोऽपि क्षुद्रशीलोऽपि स पापेभ्यः प्रमुच्यते। प्रशस्तानि सदा कुर्यादु अप्रशस्तानि वर्जयेत्। योऽभिगच्छति सीयोन विमुक्तेनान्तरात्मना। पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते। उत्थाय ब्राह्मणं गच्छेत्सरो भक्त्या समन्वितः। अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते"। अन्येऽपि तस्य हेतवः शास्त्रान्तरेषु द्रष्टव्याः।

पापयोनि स्त्री० पापा गर्हा योनिः। १तिर्यग्योन्यादौ। पापहेतुका योनिः। २पापहेतुके जन्मभेदे तद्भेदे कारणभेदो यास्त० उक्तो यथा "महापातकजान् घोरान्नरकान् प्राप्य गर्हितान्। कर्मक्षयात् प्रजायन्ते महापातकिनस्त्विह। मृगाश्वशूकरोष्ट्राणां ब्रह्मघ्ना योनिमृच्छति। सुरापकृच्छ्रवेश्यानां सुरापो नात्र संशयः। कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्। दृष्टगुरुनखतात्वच क्रमशो गुरुतल्पगः"। 'तैलकृच्छ्रैकपायी स्यात् पूतिवक्त्रस्तु सूचकः। परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये निर्जने घोरे भवति ब्रह्मराक्षसः। हीनजातौ प्रजायेत परस्वापहारकः। पतयाकं गिरौ हृत्वा गन्धान्मूषुच्छुन्दरिः शुभान्। मूषिको धान्यहारी स्याद् यानसद्रं फलं कपिः। जलं मूषः पयः काको गृहकारी च पक्षकम्। मधु, दंश फलं गृध्रो, गां गोधाऽग्निं बकस्तथा। शिखी वस्त्रं च रक्षन्तु चोरी लवणहारकः। प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि। द्रव्यापहारा हि यथा तथैव प्राणिजातयः। यथा कर्मफलं प्राप्य तिर्यक्त्वं आत्मपर्यवात्। जायन्ते बहुधभ्रष्टा दरिद्राः पुरुषाधमाः"। गौतमोऽपि क्वचिद्विशेषमाह "विद्याविक्रयी पुरुषमृगः वेदविक्रयी दीपी, बहुयाजको जलमूषः, अयाज्ययाजको वराहः, अनिमन्त्रितभोजी वायस, मिष्टैकभोजी वानरः, यतस्ततोऽन्नं नाजीरः, कलहनदहनात् खद्योतः, दारकार्यार्थी सुखविगन्धिः, पर्युषितभोजी कृमिः, अदत्तादायी बकोहीं, मत्सरी भ्रमरः, अन्युत्थादी मण्डलकुक्कुटी, गूढाचार्यः श्वपाकः, गोहर्ता वर्षः, क्षेत्रापहारी शयी, अन्नापहार्यजीर्णी, ज्ञानापहारी मूर्खः, चण्डालीपुष्कसीगमनेऽजगरः, प्रव्रजितागमने महिषाचः, गूढागमने दीर्घकीटः, वर्णाभिगामी दरिद्रः, जलहारी मत्स्यः, क्षीरहारी बलाका। वार्धुषिकोऽकृपीनः, अविक्रेयविक्रयी गृध्रः, राजमहिषीगामी नपुंसकः, राजाक्रोशको गर्दभः, योगामी मण्डूकः, अनध्यायाध्ययने मृगालः परद्रव्यापहारी परभेद्रः, मत्स्यवधे मर्कटाशी, इत्येतेऽमर्ज्ममना इति। स्त्रियोऽप्येतेषु निमित्तेषु पूर्वोक्तास्वेव जातिषु स्त्रीत्वमनुभवन्ति"। विष्णुस०४४अ० अन्येऽपि पापभेदकृतयोनिभेदा दर्शिताः। बहु०। १तद्युते त्रि०।

पापरोग पु० पापविशेषकृते रोगभेदे स च विष्णुसं० उक्तो यथा "नरकानुभूतदुःखानां तिर्यक्त्वसत्तीर्णानां मनुष्येषु लक्षणानि भवन्ति। कुष्ठ्रतिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः। सुवर्णहारी कुनखः। गुरुतल्पगो दुष्कर्मा। पूतिनासः पिशुनः। पूतिवक्त्रः सूचकः, धान्यचौरोऽङ्गहीनः। मित्रचौरोऽतिरिक्ताङ्गः। वस्त्रापहारकस्त्वामयावी। वाग्यहारको मूकः। वस्त्रापहारकः शिती। अन्नापहारकः पङ्गुः। देवब्राह्मणक्रोधकोमूकः। लोकजिह्वो गरदः। उन्मत्तोऽग्निदः। गुरुप्रतिकूलोऽपस्मारी। गोघ्नस्त्वन्धः। दीपापहारकस्त्र

काश्च दीपनिर्वापकः। त्रपुचामरसीसकविक्रयी रजकः। एकयफविक्रयी मृगव्याधः। कुण्डाशी भगास्य, चाण्डिकःस्तेनः। वार्धुषिको भ्रामरी। मिष्टाश्ये काकी वातगुल्मी। समयभेत्ता खल्लाटः, स्त्रीपद्यवकीर्णी। परवृत्तिघ्नो दरिद्रः। परपीडाकरो दीर्घरोगी। एवं कर्मविशेषेण जायन्ते लक्षणान्विताः। रोगान्वितास्तथा न्याच कुब्जखञ्जैकलोचनाः। वामनाबधिरामूका दुर्बलाश्च तथा परे। तस्मात् सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत्"। यद्यपि सर्वेषां रोगाणां दुःखदायकत्वेन पापहेतुकत्वं तथापि उन्मादाद्यष्टरोगाणां प्राधान्येन महापापजत्वेन पापरोगत्वं यथोक्तं शु०त०रघुनन्दनेन "महारोगिण इति पापरोगाष्टकान्यतमरोगवतः। ते च उन्मादस्त्वगदोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः। कर्मविपाकशब्दे १७४५ पृ० विस्तरः। २मसुरीरोगे शब्दरत्ना०।

पापरोगिन् त्रि० पापजन्यरोगो निन्द्यत्वेनास्त्यस्य इनि। महारोगयुक्ते ३।५।२ मनुः। [२पापहर्त्री च।

पापर्द्धि स्त्री पापानामृद्धिरत्र। १जलयायां हेमच० ६त०।

पापल त्रि० पापं लाति ला-क। १पापप्राहके पातयति तस्मादण्डं स्वाधिष्ठानेन अधोनयति पाति-कलच् तस्य पत्व। २परिमाणभेदे न० उणादिकोषः।

पापशमनी स्त्री पापं शम्यतेऽनया शम-णिच्-करणे ल्युट् ङीप्। १शमीवृक्षे राजनि०। पापं शमयति शमि-ल्यु। २पापनिवारके त्रि०। [तुल्ये।

पापसम अव्य०पापेन तुल्यम् तिष्ठद्गु० अव्ययीभावः। पाप०

पापहन् त्रि० पापं हन्ति हन-क्विप्। पापनाशके मनुः ७।२५।

पापाख्या स्त्री पापमनिष्टमाख्याति स्वयति आ+ख्या-क। द०मं०७अ०उक्ते बुधस्य गतिभेदे "प्राकृतविमिश्रसंधिप्रतीक्ष्णयोगान्यघोरपापाख्याः। पराशरतन्त्रे नवतैः कीर्त्तितागतयः" इत्युपक्रमे "पापाख्या सावित्रं सौम्यं शक्राग्निदैवतं चेति" सावित्रादिनवके तद्गतैः संज्ञाभेदा "प्राकृतगत्यामारोग्यदृष्टिस्वप्रवृत्तयः क्षेमम्। संधिप्रमिश्रयोर्मिश्रमेतदन्यासु विपरीतम्" इति तस्याः अशुभफलकथनेन पापसूचकत्वात् तथात्वम्।

पापात्मन् त्रि० पापयुक्त आत्मा अन्तःकरणं यस्य। पापान्विते जीवे "पापात्मा पापसम्भवः" इति पुराणम्। तेषां संवरणप्रकारः पाद्मे क्रियायो० २२अ० यथा "पापात्मनां शृणु गतिं विस्तरेण वदाम्यहम्। षडशीति सहस्राणि योजनानि दुरात्मनाम्। प्रोक्तो मार्गस्य विस्तारः सर्वदुःखान्वितस्य च। क्वचित् क्वचित् ज्वलद्वह्निः सन्तप्तः कर्दमः क्वचित्। क्वचित् क्वचित् द्विजश्रेष्ठ! सन्तप्तं ताम्रवालुकम्। क्वचित् क्वचित्तीक्ष्णशिलाः क्वचित्प्रशिलास्तथा। क्वचित् क्वचिच्छ्वदृष्टिः क्वचिदङ्गारवर्षणम्। कुत्रचिद्वह्निवृष्टिश्च कुत्रचित् पङ्कवर्षणम्। उष्णाम्बुवर्षणं क्वापि क्वचित् प्राणाग्निवर्षणम्। ज्वलदग्निरिव क्वापि सन्तप्तो वाति मारुतः। गभीरा अन्धकूपाश्च तृणाद्यतरुणा द्विज!। क्वापि कण्टकवृक्षाश्च नाराचसमकण्टकाः। पाषाणश्रेणयः क्वापि दुरारोहाः सपन्नगाः। क्वचिद्वाढान्धकाराश्च क्वचित् शोणितकन्दराः। क्वचिद्वीरणवृक्षाश्च क्वचित् काशाः क्वचित् शराः। क्वचित् क्वचिच्छर्कराश्च लेष्टवश्च क्वचित् क्वचित्। क्वचिद्गुहां राशयश्च दुर्गन्धा मांसराशयः। क्वचित्कण्टकराशिश्च शैवालानि क्वचित् क्वचित्। कीलकावलयः क्वापि क्वचिद्व्याघ्रास्तथा शिवाः। खड्गिनः करिणः क्वापि क्वचिद्व्या भयङ्कराः। एवं बहुविधक्लेशैः क्वाया लवविवर्जिते। तस्मिन्मार्गे द्विजश्रेष्ठ! पापिनो यान्ति दुःखिनः। नग्नाविसृक्तकेशाश्च प्रेताकारभयङ्कराः। गच्छन्ति पापिनस्तत्र शुष्ककण्ठौष्ठतालुकाः"।

पापान्त न० पृथूदकापरनामके तीर्थभेदे वामनपु० २८अ०।

पापाह पु०पापमहत्वात् गर्ह्यमहः टच्समा०। अघौघदिने

पापिन् त्रि० पाप+अस्त्यर्थे इनि। पापयुक्ते। अतिशयेन पापी इष्ठन्। पापिष्ठ अतिशयेन पापयुक्ते। ईयसुन् पापीयस् तत्रार्थे त्रि० स्त्रियां ङीप्। [पापे अमरः।

पाप्मन् पु० आप्नोति व्याप्नोति पापिनम् आप-मनिन् नि०।

पामघ्न पु० पाम हन्ति हन-टक्। १गन्धके राजनि०। २कटुकायां स्त्री लटाधरः।

पामन् न० पा-मनिन्। विचर्चिकायां (खोस पाचड़ा) स्त्रीत्वमपि मनन्तात् वा ङीप् पामाप्यत्र अमरः।

पामन त्रि० पामास्त्यस्य मत्वर्थे न। पामरोगवति अमरः पक्षे मतुप् मस्य वः। पामवत् तत्रार्थे त्रि० स्त्रियां ङीप्

पामर त्रि० पाति क्विप् पाः त्रयीधर्मः स स्त्रियतेऽनेन मृ-घ। १मूर्खे २नीचे मेदि० ३खले हेमच०।

पामरोद्धारा स्त्री पामरमुद्धरति उद्-हृ-अण् अलोपात्वात् टाप्। गुडूच्याम् शब्दरत्ना०।

पामादि पु०"पामादिभ्यो नः" पा० अस्त्यर्थे नप्रत्ययनिमित्ते

शब्दगणे स च गणः पा०भ० सू० उक्तो यथा "पामन् वामन् वेमन् श्लेष्मन् कद्रुवलि सामन् जग्मन् क्रमि- (अङ्गात् कल्याणे) (शाकीपलाशीदद्रूणां कुम्भत्वञ्च)(विश्वगित्युत्तरपदलोपश्चालतसन्तेः) (उच्छ्राया अश्च)

पामारि पु० ६त०। गन्धके हेमच०। तत्सेवने हि पामरोगनाशः इति तस्य तथात्वम्।

पायना स्त्री पा–णिच+भावे युच्। अस्त्रादीनां धाराकरणार्थे व्यापारभेदे तेषां पायना त्रिविधा "क्षारोदकतैलेषु, तत्र क्षारपायितं शरगल्यास्त्रिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु, तैलपायितं सिराव्यधनस्नायुच्छेदनेषु" सुश्रुतः।

पायस त्रि०पयसोविकारः अण्। १दुग्धविकारे २परमान्ने पु० अमरः। तत्पाकप्रकारो यथा "अतप्ततण्डुलो धौतः परिष्टो दृतेन च। खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत्" पायसः कफकृद्बल्यो विष्टम्भी मधुरो गुरुः" पाकरागेश्वरः।

पायसिक त्रि० पायसो भक्तिरस्य। पायसभक्तियुक्ते

पायिक पु० पादविक+पृषो०। पदातौ शब्दच०।

पायित त्रि० पा+णिच–क्त। १पानकर्तृभूतीकृते पदार्थे (पानदेवोया) २अस्त्रे च पायनाशब्दे दृश्यम्।

पायु पु० अपैति अनेन वायुः अप+इण् करणे–उण् अपेरकोपः पिबत्यौषधमनेन पा–उण् वा। १अपानवायुस्थाने २कर्मेन्द्रियभेदे च इन्द्रियशब्दे दृश्यम्।

पाय्य न० मीयतेऽनेन मा–ण्यत् नि० पादेशः। १परिमाणे २पानीये न० ३निन्दनीये त्रि० विश्वः। ४पाने उणादि०

पार कर्मसमाप्तौ चुरादि०उभ०सक०सेट्। पारयति ते अपपारत् त।

पार न० परं तीरं परमेव अण्, पृ–घञ् वा। नदीलङ्घनेन प्राप्ते १परे तीरे अमरः। २प्रान्तभागे ग्रेषावधौ मेदि०।

पारक त्रि० पृ–ण्वुल्। १पूर्त्तिकारके २पालके ३प्रीतिकारके च स्त्रियां गौरा० ङीष्। [साधौ।

पारकुलीन त्रि० परंकुले साधु प्रतिजना० खञ्। परकुले

पारक्य त्रि०परस्मै लोकाय हितम् तस्येदं वा ष्यञ् कुक्च। १परलोकसाधने २परकीये च "पारक्यमविरोधि च" कर्मप्रदीप "उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत्" व्यतिष०। [समाप्तिगन्तरि च।

पारग त्रि० पारं गच्छति गम–ड। १पारगन्तरि २कार्य-

पारगत त्रि० पारं गतः। १पारगामिनि ३ज्ञिने पु० हेमच०

पारज् न० पार–अजिन्। सुवर्णे उज्ज्वलद०। [गन्तरि।

पारजायिक पु०परजायां गच्छति परदारादि०ठक्। परदार-

पारटीन पु० प्रस्तरे त्रिका०।

पारण न० पार–भावे ल्युट्। १व्रतान्नभोजने युच् पारणा तत्रार्थे। "पारणं पार्वणं पुंसां सर्वपापप्रणाशनम्। उपवासाङ्गभूतश्च फलदं शुद्धिकारणम्। सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते। अन्यथा फलहानिः स्यादतो धारणपारणम्। न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्। निशायां पारणं कुर्यादर्जयित्वा महानिशाम्। पूर्वाह्णे पारणं शस्तं कृत्वा विप्र। सुरार्चनम्। सर्वेषां सम्मतं कुर्यादृते वै रोहिणीव्रतम्" ब्रह्मवै० श्रीकृष्णजन्मखण्डे ८अ०। जन्माष्टमीशब्दे एकादशीशब्दे च दृश्यम्। ल्यु। २भेषे पु० शब्दमाला। ३क्षत्रिभेदे। पारणस्यैरपत्यम् इञ्। पारणि तदपत्ये। ततः यूनि फञ् पारणायन यूनि तदपत्ये। तौल्वला० फिञो न लुक्।

पार(द)त पु० पृ–णिच्–तन्, पृषो० तस्य दो वा। १रसभेदे (पारा)। पारं ददाति दा–क। २पारदायिनि त्रि०हेमच० "रसायनार्थिभिर्लोकैः पारदो रक्ष्यते यतः। ततो रस इति प्रोक्तः स च धातुरपि स्मृतः"। अथ पारदस्योत्पत्तिलक्षणानामगुणाः "शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले। तद्देहसारजातत्वाच्छुक्लमध्यमभूत्ततः। भेदभेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम्। श्वेतं रक्तमथा पीतं कृष्णं तत्तु भवेत् क्रमात्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः। श्वेतं शस्तं रसायनागे रक्तञ्चिल्लरसायनम्। धातुवादे तु तत्पीतं खेचरौ कृष्णमेव च। पारदो रसधातुश्च रसेन्द्रश्च महारसः। चपलः शिववीर्य्यञ्च रसः स्मृतः शिवाङ्गजः। पारदः कठिनः स्निग्धस्त्रिदोषघ्नो रसायनः। योगवाही महादिव्यः सदा दृष्टिबलप्रदः। सर्वामयहरः प्रोक्तो विषेणात्सर्वकुष्ठहृत्। खस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्दनः। रञ्जितः कामितश्चापि साक्षाद्देवमहेश्वरः। मूर्च्छितो हरति रुजं मन्त्रनमनुभूय खेचरतां कुरुते। अजरीकरोति हि मृतः कोऽन्यः करुणाकरः स्मृतात्। असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम्। रसेन्द्रो हन्ति तं रोगं नरकाङ्गरराजिभाम्। अर्कं विषं वह्निगिरिं च वापकल्केर्गिकन्दोपसमनि पारदे। उपाधिजौ द्वौ लघुनागयोगजौ द्वौ रसेन्द्रे कथितौ

सनीश्वरैः । मलेन मूर्च्छां, मरणं विषेण दाहोऽग्निना कष्टतरः शरीरे। देहस्य आद्यक्रियया वदा स्यात् चाञ्चल्यतो वीर्यहतिश्च पुंसाम्। वह्निना कुलत्थभुजगेन मण्डो भवेदतोऽसौ परिशोधनीयः। वह्निर्विषं मलश्चेति सूतदोषास्त्रयो रसे। एते कुर्वन्ति सन्तापं मृतिं मूर्च्छां यथा क्रमात्। अन्येऽपि कथिता दोषा भिषग्भिः पारदे यदि। तथाप्येते त्रयो दोषा हरणीया विशेषतः। संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम्। देहस्य नाशं विदधाति नूनं कष्टांश्च रोगान् जनयेन्नराणाम्"। तस्य शोधनादिविधिः तत्स्वेदनञ्च "नानाधान्यैर्यथाप्राप्तैस्तुषवज्रैर्जलान्वितैः। मृद्भाण्डं पूरितं रसेद् यावदन्तस्तमाप्नुयात्। तन्मध्ये भृङ्गरा सुण्ठी विष्णुक्रान्ता पुनर्नवा। मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी। त्रिफला गिरिकर्णी च हंसपदी च चित्रकम्। समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत्। पूर्वाह्णभाण्डमध्ये तु धान्याम्बुकमिदं स्मृतम्। स्वेदनादिषु सर्वत्र रसराजस्य योजयेत्" विष्णुक्रान्ता गिरिकर्णी च अपराजितैव मीलयेत्तुल्यभेदात्। "अलाभेऽमारनालं वा तदभावे प्रयोजयेत्" तदभावे धान्याम्बुभावे "भृङ्गराजं लवणं राजी रजनी त्रिफला ऽर्द्रकम्। महावला नागबला मेषनादः पुनर्नवा। मेषशृङ्गी चित्रकञ्च नवसारं समं समम्। एतत्समस्तं अस्तं वा पूर्वाह्णे मेषयेत्। प्रक्षिप्येत्तेन कल्केन वस्त्रमङ्गुलमात्रकम्। तन्मध्ये निक्षिपेत्सूतं बद्धा तच्छिदिनं पचेत्। दोलायन्त्रेऽम्बुसंयुक्ते जायते स्वेदितो रसः" मेषनादः (अपराजिता)शाकविशेषः। मेषशृङ्गी (मेढाशृङ्गी)। तदभावे कर्कटशृङ्गी ग्राह्या। नवसारं नवसादरम्। अन्यच्च "मूलकानलसिन्धूत्थलशुनयवार्द्रकराजिका। रसस्य षोडशांशेन द्रव्यं युञ्जयात् पृथक् पृथक्। द्रवेष्वष्टसमानेषु मतं मानमिदं बुधैः। पञ्चाद्यतेषु चैतेषु सूतं प्रक्षिप्य काञ्जिके। स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान्। स्वेदात्तीव्रो भवेत्सूतो मर्दनाच्च सुनिर्मलः"। मूलकम् (सुरट) अनलश्चित्रकम्। लशुनं त्रिकटु राजिका (राई)। अथ मर्दनम् "दृष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः। दत्त्वा गुडेन सिन्धूत्थराजिकाम्लदधूमवैः"। अन्यच्च "कुमारिकाचित्रकरक्तसर्षपैः कृतैः कषायैर्द्रुतीविभिश्रितैः। फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते"। अथ मूर्च्छनम् "लशुनं त्रिफलाबन्ध्याकन्दैः क्षुद्राह्वयान्वितैः। चित्रकोशीनिशाक्षारकन्यार्कनककद्रवैः। सूतं क्षतेन यूषेण वारान् सप्ताभिमर्दयेत्। इत्थं समूर्च्छितः सूतस्त्यजेत्सप्तापि कञ्चुकान्"। बन्ध्याकन्दः(वान्दूखेसराकन्द) क्षुद्राह्वयं (छोटीकटाई बड़ीकटाई) उभौ उर्ध्वमेषका। निशा हरिद्रा क्षारः यवक्षारः। कन्या कुमारिका अर्कस्तत्पत्ररसः कनकधुत्तूरपत्ररसः। अथोर्द्धपातनम् "मयूरपीततार्क्ष्याभ्यामष्टपिष्टीकृतस्य च। यन्त्रे विद्याधरे कुर्याद्रसेन्द्रस्योर्द्धपातनम्"। तार्क्ष्यम् सुवर्णमाक्षी। अष्टपिष्टीकृतस्य। कुमारिकाद्रवयोगेन तावन्मर्दनं कर्त्तव्यं यावत्सारदः पृथक् न दृश्यत इत्यर्थः। विद्याधरयन्त्रे डमरुयन्त्रे। अथाधःपातनम् "त्रिकटुकाग्निशुण्ठिभिर्लवणाक्षरसंयुतैः। अष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाजनम्। ततो दीर्घैरधःपातैः सुपक्वैस्तस्य कारयेत्। यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुध्यति। स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत्। तदा कार्याणि कुरुते प्रयोज्यः सर्वकर्मसु"। अथ सूतदोषहरः शोधनविधिः "स्टहकन्या हरति मलान्नि कलाऽग्निश्चित्रको विषं हन्ति। "तस्मादेभिर्मित्रैर्वारान् संमूर्च्छयेत् सप्त"। अथ सर्वदोषहरः शोधनविधिः "कुमारिकाचित्रकरक्तसर्षपैः कृतः कषायैर्द्रुतीविभिश्रितैः। फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते। कुमार्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत्। एवं कदर्थितः सूतो मण्डो भवति निश्चितम्। वह्नौ-मधीकमायेण स्वेदितः स बली भवेत्। सर्पाक्षीचिञ्चिकाबन्ध्यामृद्वद्रैः स्वेदितो बली। ततः स पावकद्रावैः स्निग्धः स्यादतिदीप्तिमान्"। सर्पाक्षी (नागफणी) चिञ्चिका (अम्बली) बन्ध्या (वाङ्कुसेखसा) भृङ्गः भृङ्गराजः। अवदो सुखा पावकः चित्रकम्। अथ रसस्य मारणविधिः "धूमासारं रसं तोरीगन्धकं नवसादरम्। यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम्। काचकूप्यां विनिक्षिप्य तान्य मृद्भस्तसूत्रया। विलिप्य परितो वह्नौ मुद्रां दत्त्वा विशोधयेत्। अधःसञ्चिद्रपिठरीमध्ये कूपीं निवेशयेत्। पिठरीं वालुकापूरैर्भृत्वा च कूपिकाग्रकम्। निवेश्य चुल्ल्यां तदधो वह्निं कुर्याच्छनैः शनैः। तस्मादप्यधिकं किञ्चित्पावकं ज्वालयेत् क्रमात्। एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः। स्फोटयेत् स्वाङ्गशीतं तमूर्ध्वगङ्गन्धकं त्यजेत्। अग्नस्तु

मृतं स्वतं गृह्णीयात्तन्तु मात्रया । यथोचिताहुपानेन सर्वकर्मसु योजयेत्"भावप्र॰। सर्व॰सं॰ रसेश्वरदर्शने तन्निरुक्तिः "संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः" इति । रसार्थवेऽपि "पारदो गदितो यस्मात् पारार्थं साधकोत्तमैः । गुप्तोऽयं महसो देवि मम प्रत्यङ्गसम्भवः । मम देहरसो यस्माद्रसस्तेनायमुच्यते" इति "कर्मयोगेन देवेशि ! प्राप्यते पिण्डधारणम् । रसस्य पवनस्येति कर्मयोगो द्विधा स्मृतः । मूर्च्छितो हरति व्याधीन् मृतो जीवयति स्वयम् । वज्रः खेचरतां कुर्याद्रसो वायुश्च भैरवि !"इति। मूर्च्छितस्वरूपमप्युक्तम् "नानावर्णो भवेत् स्मृतो विहाय घनचापलम् । लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि । आर्द्रत्वञ्च घनत्वञ्च तेजो गौरव चापलम् । यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम्" इति । अन्यत्र वज्रस्वरूपमप्यभ्यधायि "अक्षतश्च चतुर्द्वारो तेजस्वी निर्मलो गुरुः । स्फोटनं पुनराहत्तो वज्रस्तस्य लक्षणम्" इति । "नन्वेवं हरगौरीरूपिणिद्वौ पिण्डस्यैवैश्वमास्यातं पार्यते तत्सिद्धिरेव कथमिति चेन्न अष्टादशसंस्कारवशात्तदुपपत्तेः तदुक्तमाचार्यैः "तस्य हि साधनविधौ सुधियां प्रतिकर्मनिर्मलाः प्रथमम् । अष्टादशसंस्कारा विज्ञातव्याः प्रयत्नेनेति" । ते च संस्कारानिरूपिताः "स्वेदनमर्द्दनमूर्च्छनस्थापनपातननिरोधनियमाश्च । दीपनगगनसाधनमाधमाधमश्च जारणापिधानम् । गर्भद्रुतिबाह्यद्रुतिसारणसरागसारणाश्चैव क्रमेण वेधो भक्षणमष्टाशयेति रसकर्मेति"। रसेश्वरशब्दे विवृतिः

पारतन्त्र्य न॰ परतन्त्रस्य भावः ष्यञ् । पराधीनत्वे

पारत्रिक त्रि॰ परत्र भवं, हितं वा ठक् । १परलोकहितकारके कर्मणि २परलोकभवे च ।

पारदण्डक पु॰ देशभेदे शब्दरत्ना॰ ।

पारदारिक पु॰परस्य दारान् गच्छति "गच्छतौ परदारादिभ्यः" वार्त्ति॰ ठक् । यथेष्टं परस्त्रीगामिनि ।

पारदार्य्य न॰ परस्य दारा दारा अस्य तस्य कर्म–ष्यञ् । परदारगमने । तच्चोपपातकम् याज्ञ॰ ३।२३५ श्लो॰ ।

पारदृश्वन् त्रि॰ पारं दृष्टवान् दृश–भूते क्वनिप् । पारं दृष्टवति । स्त्रियां ङीप् रचान्तादेशः ।

पारदेश्य त्रि॰ परदेशे भवः परदेशात् आगतो वा यञ् । १परदेशोद्भवे द्रव्यादौ याज्ञ॰२।२५५ । २परदेशागते च ।

पारमार्थिक त्रि॰ परमार्थाय पारलौकिकधर्माय हितं ठक् । १परमार्थोपायभूते श्रवणादौ कर्मणि । परमार्थतो भवः तत आगतो वा ठक् । २वस्तुत आगते स्वाभाविके । स्वार्थे वा ठक् । यथार्थे "सत्ता त्रिविधा पारमार्थिकी व्यवहारिकी प्रातीति की चेति वेदान्तसा॰ ।

पारम्परीण त्रि॰ परम्परायाः आगतः खञ् । परम्परायाः क्रमादागते । ["पारम्पर्यक्रमागतः" इति मनु ।

पारम्पर्य्य न॰ परम्परैव स्वार्थे ष्यञ् । कुलादिपरम्परायाम्

पारम्पर्य्योपदेश पु॰ पारम्पर्येण पित्रादिपरम्परया उपदेशः न तु साक्षात्कारादिज्ञानम् । ऐतिह्यं अमरः (यथा इह वटे यक्षः) इत्यादिरूपदिश्यते एव सर्वैः न तु तत्र यक्षः केनचित् दृश्यते । [साधौ ।

पारयुगीन त्रि॰ परयुगे साधु प्रतिजना॰ खञ् । परयुग-

पारलौकिक त्रि॰ परलोकाय हितं ठक् द्विपदवृद्धिः । परलोके जन्मान्तरादौ, हिते कर्मणि ।

पारवत पुंस्त्री पारावत+पृषो॰ । पारावते द्विरूपकोषः ।

पारवश्य न॰ परवशस्य भावः ष्यञ् । पारतन्त्र्ये त्रिका॰।

पारशव पुंस्त्री "निषादः शूद्रकन्यायां यः पारशव उच्यते । स पारवश्येव शवसत्वात् पारशवः स्मृतः" इति मनूक्ते जड़ायां शूद्रायां ब्राह्मणेनोत्पादिते निषादरूपे १सङ्कीर्णवर्णे २परस्त्रीतनये ३लौहे च मेदि॰। परशु+इदमर्थे–ऽण् । ४परशुसम्बन्धिनि त्रि॰। ५मध्यस्थे देशभेदे द॰सं॰ १४अ॰। पारशवस्य गोत्रापत्यं युवादि॰अञ्। ६तद्गोत्रापत्ये हरिता॰ फञ् । पारशवायन तद्गोत्रे यूनि गोत्रापत्ये ।

पारशीक पु॰ १देशभेदे तद्देशोद्भवे २घोटके च (आरबी) ।

पारश्वधिक पु॰ परश्वधः प्रहरणमस्य "परश्वधाट्ठञ्" च पा॰ ठञ् । परश्वधास्त्रेण योद्धरि अमरः । पक्षे अण् पारश्वध तत्रार्थे हेमच॰ ।

पारस त्रि॰पारसदेशभवे अण् बा॰यलोपः । १पारसदेशोद्भवे २तत्सम्बन्धिनि च स्त्रियां ङीप् । "ज्येष्ठाश्लेषामघापूर्वारेवतीभरणीद्वये । विशाखार्द्रोत्तराषाढाशतभे पापवासरे । लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्" मुहूर्त्तगणपतिः । [स्त्री॰शब्दरत्ना॰ स्त्रियां ङीष् ।

पारसिक पु॰ पारसीक+पृषो॰ । १पारसदेशे २घोटके पुं

पारसीक पु॰१देशभेदे २तद्देशस्थे जने ब॰व॰। "पारसीकांस्ततो जेतुम्"रघुः । ३तद्देशस्थे घोटके पु॰स्त्री (आरबीघोड़ा) तद्देशस्य कुङ्कुमाकरता भावप्र॰ उक्ता कुङ्कुमशब्दे ३६४॰ पृ॰ दृश्या ।

पारस्कर पु॰पारं करोति कृ–ट पारस्करा॰ सुट् । १देशभेदे २सूत्रकृत्कारके मुनिभेदे च ।

पारस्करादि "पारस्करप्रभृतीनि च संज्ञायाम्" पा० उक्ते पदार्थ्यभिजातनिर्मिते शब्दलक्षणे च "पारस्करो देशः। पारस्करोऽक्षः। रथस्या नदी। किष्कुः प्रमाणम्। किष्किन्धा गुहा। (तद्धृतोः करपत्योरदेवतयोः सुट् तकोपश्च) (प्रान्तुस्यतो गवि कर्त्तरि)।

पारस्त्रैणेय त्रि० परस्त्रिया अपत्यं ढञ् इनङादेशः। जारजे परस्त्रियाः सुते अमरः स्त्रियां ङीप्।

पारस्यकुलीन त्रि० परस्य कुले भवः प्रतिजना० खञ् तत्र परस्यकुलेति पाठात् अलुक्स०। परकुलोत्पन्ने दत्तकसुतादौ

पारापत पुंस्त्री० पारादपापतति प्रेम्णा आ+पत-अच्। पारावते (पायरा) अमरः स्त्रियां ङीष्।

पारावत पुंस्त्री० परं जीवमवति परात् यस्मीर्या अहङ्कारहा ज्ञानोपदेशद्वारा अवति अव-अच् परावत् तत्त्वज्ञः महायस्तदेष्टा अच्। कपोते अमरः स्त्रियां ङीष्। चतुर्विंशगुरुमध्ये पारावतस्यापि गुरुत्वमुक्तं तत्र प्रसङ्गात् चतुर्विंशतिगुरवोऽत्र प्रदर्श्यन्ते "पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः। कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः। मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः। कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत्। ततो मे गुरवो राजन्! चतुर्विंशतिराश्रिताः। शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मना" भाग० ११।७ अ०। तत्कथा तदुत्तरत्र दृश्या

पारापा(वा)र न० पारमपारञ्चास्यस्य अर्शा० अच्। १समुद्रे अमरः ह०। २तटद्वये हि०व०। पारावारशब्दोऽप्युभयलिङ्गे।

पारायण न० पारं समाप्तिमयतेऽनेन अय-ल्युट्। १साकल्ये अमरः २ग्रन्थादीनामाद्यन्तपाठे च। तत्र वेदपारायणं चतुष्प्रकारम् ऋग्वेदशब्दे १४१२पृ०दृश्यम्। पुराणमन्त्रर्गपन्थपाठेऽपि पारायणव्यवहारः। तत्र भागवतपारायणे कश्चिद्विशेषः पद्म०पाता० ७।अ०उक्तो यथा "कृतनित्यक्रियः प्रातः कुशहस्तः कृतासनः। देवद्विजगुरूस्तुत्वा ध्यात्वा विष्णुं सनातनम्। द्वैपायनं नमस्कृत्य शुकदेवञ्च भक्तितः। हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत्। चरितं भरतस्यापि द्वितीये,ऽथ तृतीयके। मथनञ्चामृतस्यापि, यत्र कूर्मः स्वयं हरिः। चतुर्थदिवसे, चैव दशमे हरिजन्म च। पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि। षष्ठे श्रीकृष्णसंवादं सप्तमे तु समापयेत्। अध्यायं प्राप्य विरमेच्च मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः। पठेदर्थं बुध्यमानः श्रावयेद्वैष्णवोत्तमैः। श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः। अध्याये सूर्णमाषैकं तथा दद्याच्च दक्षिणाम्। समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्। कुर्याच्च वैष्णवं होमं सात्वतान् भोजयेत्ततः। एवं यः कुरुते देवि! पाठं भागवतस्य तु। श्रवणं श्रावणं वापि स दृष्टां गतिमाप्नुयात्। एतत् पारायणं नाम सर्वकामफलप्रदम्" तत्र मासभेदाः पाद्मोत्तरख० ६अ० उक्ता यथा "अथ ते संप्रवक्ष्यामि सप्ताहश्रवणे विधिम्। सहायैर्बन्धुभिश्चैव प्रायः साध्यो विधिः स्मृतः। दैवज्ञन्तु समाहूय सुहूर्त्तं पृच्छ्य यत्नतः। विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्। नभस्य आश्विनौ जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः"। "शङ्खो देव्युत्तथैव प्राणायामशतद्वयम्। तिलहोमसहस्रन्तु वेदपारायणं भवेत्" इति मिताक्षरायां तद्विलिंगन्मतम्।

पारायणिक त्रि० पारायणमावर्त्तयति ठक्। १तदावर्त्तनकारिणि। पारायणस्येदं तदधिकृत्य वा प्रवृत्तं "दृष्टान्तः" पा० ७। पारायणीय पारायणकसम्बन्धिनि पारायणग्रन्थाधिकारेण प्रवृत्ते ग्रन्थभेदे च।

पारारुक पारमृच्छति ऋ-उकञ्। प्रस्तरे शब्दच०

पारावतघ्नी स्त्री पारावारं हन्ति हन-टक् पृषो०। पारावति दूरदेशे भवाऽपि दृष्टादेर्हन्त्री। सरस्वत्यां नद्याम् ऋ० ६।६१।२। एतामृचमधिकृत्य निरु०२।२४ उक्तं "पारावतघ्नीं पारावारघातिनीं"।

पारावतपदी स्त्री पारावतस्येव पादो मूलमस्य अन्त्यलोपः ङीष् पद्भावः। (नया फटकि) १लतायां रत्नमा०। २काकजङ्घायां राजनि०। [मूलोलतायाम् अमरः।

पारावताङ्घ्रि पु० पारावतस्याङ्घ्रिरिव मूलमस्य।

पारावताङ्घ्रिपिच्छ पुंस्त्री० पारावताङ्घ्रिरिवास्तदाकारयुतं पिच्छमस्य। पारावतभेदे राजनि०।

पारावारीण त्रि० पारमपारञ्च समन्तं समुद्रं वा गच्छति खञ्। १तटद्वयगामिनि २समुद्रगामिनि च। पारापारीणोऽप्यत्र।

पाराशर पु० पराशरस्यापत्यं गर्गा० यञ् पाराशर्य्यः तस्य छात्रा० कण्वा० अण् अन्त्यलोपः। १पाराशर्य्यस्य छात्रेषु। पराशरस्य गोत्रम् अण्। २पराशरगोत्रे स्त्रियां ङीष् "कलौ पाराशरी स्मृतिः" पराशरः।

पाराशरकल्पिक त्रि०पाराशरकृतं कल्पः तं वेत्त्यधीते वा

"विद्यालक्षणसम्पन्नात्" पार्ति॰ ठक् । १पराशरकृतकल्पग्रन्थाध्येतरि २तत्कल्पग्रन्थस्यार्थवेत्तरि च ।

पाराशरि त्रि॰ पराशरस्येदम् इञ् । अपत्ये तु अञेव । १पराशरसम्बन्धिनि २शुकदेवे पु॰ त्रिका॰ ।

पाराशरिन् पु॰ बन्ध॰। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते इनि यजोप । वेदव्यासप्रणीतशारीरकसूत्ररूपभिक्षुसूत्राध्यायिषु षष्ठयोत्रमिषु अमरः ।

पाराशरीय त्रि॰ पराशरस्यादूरदेशा॰ ज्यायाः छ । पराशरसन्निकृष्टदेशादौ ।

पाराशर्य्य पु॰ पराशरस्यापत्यं गर्गा॰ यञ् । पराशरस्यापत्ये वेदव्यासे द्वैपायनशब्दे दृश्यम् । "यञञोः" पा॰ ततो यूनि फञ् पाराशर्य्यायण तदीये युग्यपत्ये ।

पारिकर्म्मिक त्रि॰ परिकर्मणि नियुक्तः ठञ् । परिकर्मकरणे नियुक्ते ।

पारिकाङ्क्षिन् पु॰ पारयति संसारात् तारयति पारि णिनि पारि ब्रह्मज्ञानं तत्काङ्क्षति णिनि । यतिभेदे अमरः ।

पारिख त्रि॰ परिखायां भव॰ पथ्या॰ अण् । परिखाभवे तत्रेदं "उद्यानाच्च" पा॰ छ। पारखीय तत्सम्बन्धिनि त्रि॰।

पारिखेय त्रि॰ परिखा प्रयोजनमस्य ठक् । परिखार्थे खनादौ स्त्रियां ङीप् पारिखेयी भूमिः ।

पारिग्रामिक त्रि॰परिग्रामं भवः ठञ् । ग्रामस्य परितोभवे

पारिजात पु॰ पारमस्याति पारी उकुरुत्वं जातः जनकः । १देवतरुभेदे "ततोऽभवत् पारिजातः सुरलोकविभूषणम्" भाग॰ ८।८।५श्लो॰। तस्यामृतमथनकाले समुद्रादुत्पत्तिरुक्ता । हरिवंशे तु १८६अ॰तस्य कश्यपात् सृष्टिरुक्ता तस्यापनिर्वृत्तिरुक्ता दर्शिता यथा

"पारिजातं ततोऽस्याभीदहितानां प्रियकाम्यया। सर्वकामप्रदैः पुष्पैरावृतं दिव्यगन्धजैः । त्रिषोडशं सर्वदा दृश्यं सर्वभूतमनोहरम् । सर्वपुष्पाणि दृश्यन्ते तस्मिन्नेव महाद्रुमे । ईदृशान्यस्य पुष्पाणि विभक्त्यै काऽतिरिक्तयो । बहुरूपाणि चाप्यस्य पत्राऽपि च तथाऽपरा । मन्दारादपि दृश्यास्य सारवद्भूत्व कश्यपः । तस्यादेव परश्रेष्ठः सर्वेषां ज्येष्ठतां गतः । ततस्तस्य निवध्याथ कश्यपं प्रददौ शुभा । अदितिर्मम पुत्रार्थं सौभाग्यार्थं तथैव च । निष्क्रमेण यथा कृष्णः कश्यपस्तु तपोधनः । इन्द्रोऽदत्तस्तथेन्द्राण्या सौभाग्यार्थं ततो मम । सौभाग्यस्य रोहिण्या ब्रह्मा च धनलब्धया । एवं सौभाग्यदो वृक्षः पारिजातो न संशयः । पारिजातो पिष्पुपद्याः पारिजातेति प्रथितः । मन्दारपुष्पैर्बहुशो मन्दारस्तेन उच्यते । कोऽप्येभं दारुरित्याहुरज्ञानन्तो यतो जनाः । कोविदारः इति ख्यातस्तस्यैव महातरुः । मन्दारः कोविदारश्च पारिजातश्च नामभिः । स वृक्षो जायते दिव्यो यस्यैतत् कुसुमोत्तमम्" । तस्य द्वारकायामानयनकथा पारिजातहरणे तद्वृत्तान्ताध्यायेषु दृश्या । २नागभेदे भा॰आ॰ ५७अ॰ । ३वृक्षभेदे भा॰स॰५अ॰। स्वार्थे क । पारिजातक तथार्थे अमरः ।

पारिजातसरस्वती स्त्री पारिजातेश्वरी सरस्वती । सरस्वतीभेदे तन्त्रसारादि तन्त्रसारे दृश्यम् ।

पारिणायन त्रि॰ परिणये तत्काले भवम् वा॰ अञ् । परिणयकाले भवे धनादौ "मातृ पारिणाय्यं स्त्रियो विभजेरन्" दायभागे वसिष्ठः ।

पारिणाह्य त्रि॰ परिणाहमर्हति वा॰ ण्यत् । ण्टेरोप करणे शकाशनादौ मनु॰ ८।११ कुल्लू॰ ।

पारितथ्या स्त्री परितस्या परितथा स्वार्थे अण् । बीजनस्थितायां स्वर्णादिपट्टिकायां (सिंती) अमरः ।

पारितोषिक त्रि॰ परितोषः प्रयोजनमस्य ठञ् । परितोषार्थं दीयमाने धनादौ ।

पारिधेय त्रि॰ परिधौ भवः शुभा॰ ठक् । परिधौ भवे ।

पारिन्द्र पु॰ स्त्री॰पारीन्द्र+पृषो॰। सिंहे हेमच॰ स्त्रियां ङीप् ।

पारिपन्थिक त्रि॰ पन्थानं वर्ज्यित्वा व्याप्य वा परिपन्थम् अव्ययीभा॰ तत्र तिष्ठति इनि वा ठक् "परिपन्थञ्च तिष्ठति" पा॰उक्तेः निपा॰ पन्थादेशः । पन्थानं वर्ज्यित्वा व्याप्य वा १स्थायिनि २दस्यौ च चौरे हेमच॰ ।

पारिपाट्य न॰ परिपाट्येव स्वार्थे ष्यञ् । परिपाट्याम् ।

पारिपा(या)त्र पु॰ पर्वतभेदे "हिमवान् पारिपात्रश्च" भा॰ स॰ १॰ अ॰ । स तु भारतवर्षस्यकुलाचलभेदः प्रथोक्तः "विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः । तेषां बहुशतो राजन् ! पर्वतास्तो समीपतः" भा॰ भी॰ ९ अ॰। "जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ । आनीलनिषधौ प्राप्तौ पूर्वस्यां निरन्तरौ । निषधः पारिपात्रश्च मेरोःपार्श्वे तु पश्चिमे । यथा पूर्वौ तथा चैतावानीलनिषधायतौ" मार्क॰ पु॰ ५४अ॰। "वेदस्मृतिर्वेदवती शतद्रुश्चन्द्रभागा सिन्धुरेव च । वेत्रवती कृष्णवेणा नन्दिनी चैव सदानीरा नदी तथा । धारा चर्मण्वती यमुना विदिशा वेत्रवत्यपि । शिप्रा शतवती च तथा पारिपात्राश्रयाः

स्मृताः" मार्क॰पु॰ ५७ अ॰। "मरुकामालवाश्चैव पारियात्रनिवासिनः" विष्णुपु॰। स च पर्वतः ह॰स॰ १४ अ॰ कूर्मविभागे मध्यस्थिततयोक्तः यथा "उत्तरस्यामेतक-ङ्कुरुकालकोटिकुरुराश्च पारियात्रनगः" स्वार्थे क। पारियात्रक तत्रार्थे क्वचिद् वमध्यपाठस्तत्रार्थे।

पारिपार्श्विक त्रि॰ परिपार्श्वं पार्श्वं व्याप्य वर्त्तते ठक्। पार्श्वं व्याप्य स्थायिनि १सेवकादौ। स्थापकानुचरे २नट-भेदे पु॰ "नटी विदूषको वाऽपि पारिपार्श्विक एव वा। सूत्रधारेण सहितः संलापं यत्र कुर्वते"। सूत्रधार-सदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते तस्यानुचरः पारिपार्श्विकः" सा॰द॰।

पारिप्लव त्रि॰ परि+प्लु-अच् स्वार्थेऽण्। १चञ्चले २व्याकुले च अमरः। ३तीर्थभेदे भा॰ व॰ ८ अ॰। पञ्चमन्वन्तरे ५प्रजापतिभेदे हरिवं॰ ७ अ॰। ६आख्यानभेदे शत॰ ब्रा॰ १३।४।३।२। तदाख्यानं "पारिप्लवमाख्यानमाख्यास्यन्" इत्युपक्रमे "मनुर्वैवस्वतो राजेत्याह" इत्यादिकं तत्र द्रष्टव्यम्

पारिभद्र पु॰ परितो भद्रमस्यस्य प्रज्ञाद्यच्। (पालदामान्दार) १वृक्षे अमरः। "पारिभद्रोऽतिलक्षेशशोणभेदः क्षमिप्रभुत्। तस्य पुष्पं पित्तरोगकर्णव्याधिविनाशनम्" भावप्र॰। परिभद्राय कायति कै-क। २देवदारुवृक्षे ३निम्बवृक्षे च पु॰ मेदि॰। ४कुशौषधौ न॰ शब्दच॰। ५सरलवृक्षे पु॰ शब्दच॰ ६शाल्मलिद्वीपपतिप्लक्षभेदे ७तद्वर्षभेदे च पु॰ भाग॰ ५।२०।९ श्लो॰।

पारिभाव्य न॰ परिभवाय रोगप्रशमनाय हितः यत्। कुशौषधौ अमरः। परिभुवः प्रतिभुवो भावः यत्। प्रतिभूभवने "वाचिकं पारिभाव्यञ्च" इति स्मृतिः।

पारिभाषिक त्रि॰ परिभाषात आगतः ठञ्। १परिभाषातः प्राप्ते २परिभाषाऽर्थाधुनिकसङ्केतयुते शब्दे पु॰ ३तादृश-संज्ञायां स्त्री। "उभयावृत्तिधर्मेण संज्ञा स्यात् पारि-भाषिकी"। "उभयावृत्तिधर्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाशमित्यादिः सा हि द्वितीयावृत्तिनैव शब्दादिना रूपेण तदाश्रयमभिधत्ते न चाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि पटपदं न पटत्वावच्छिन्न-शक्तिमदित्यादिप्रयोगः ततः पटत्वविशिष्टस्यानुभ-वादयम् तच्छक्तिरवच्छिन्नेति चेत् शब्दवति शक्तम-काशपदं न शब्दत्वावच्छिन्नशक्तिमदित्येवं पदद-शायामाकाशादिपदात् शब्दत्वेन गगनस्य प्रतीतिरन-स्यापि शब्दत्वावच्छिन्नैव तत्र शक्तिरिति विभाव-यताम्। "यद्वाधुनिकसङ्केतयोगित्वात् पारिभाषिकम्" यत्रार्थे यत्रामाधुनिकसङ्केतवत्तदेव तत्र पारिभाषिकं यथा पित्रादिभिः पुत्रादौ सङ्केतितं चैत्रादि यथा च शास्त्रलक्षिः सिद्धप्रभावादौ पञ्चतादि" शब्दशक्तिप्रका॰।

पारिमाण्डल्य न॰ परितो मण्डलं यस्य सर्वत्र विद्यमान-त्वात् परिमण्डलः परमाणुस्तस्य भावः ष्यञ्। १न्योयोक्ते असमवायिकारणतानुग्ये परमाणुपरिमाणे। स्वार्थे यञ्। २परिमण्डलशब्दार्थे परिमण्डलशब्दे दृश्यम्।

पारिमुखिक त्रि॰ परिमुखं वर्त्तते ठक्। मुखसमीपे वर्त्त-माने। [हेमच॰। पारियात्रशब्दे दृश्यम्।

पारियात्रिक पु॰ पारियात्र+स्वार्थे ठक्। कुलाचलभेदे

पारियानिक पु॰ परियानं प्रयोजनमस्य ठक्। मार्गयान-योग्यरथे हेमच॰। [रिचि तापसे हेमच॰।

पारिरक्षक पु॰ परिरक्षा व्रतभेदः प्रयोजनमस्य ठक्। भक्ष-

पारिव्राजक न॰ परिव्राजकस्य भावः युवा॰ ष्यञ्। परि-व्राजकस्य भावे सन्न्यासे। [(पलाशपिण्ड) ख्याते वृक्षे।

पारिश पु॰ पिपूर्त्ति पृ-क्विनि पारी तं श्यति शो-क।

पारिषत्क पु॰ परिषदं तत्प्रतिपादकं ग्रन्थमधीते वेत्ति वा ठक्ष्या॰ ठक्। परिषद्ग्रन्थाध्येतरि तद्वेत्तरि च।

पारिषद त्रि॰ परिषदि साधु अण् भवेऽर्थे वृद्धा॰ अण् वा। १सभासाधौ २सभाभवे च।

पारिषदक त्रि॰ परिषदा कृतं कृत्या॰ वुञ्। परिषदा कृते

पारिषद्य त्रि॰ परिषदि साधु-यत्। सभायां साधौ

पारिसौर्य्य त्रि॰ परिसौरं सौरं वर्जयित्वा भवम् परिसुखा॰ ञ्य। हृद्यवर्जनेन भवे।

पारिहनव्य त्रि॰ परिहनु+परिसुखा॰ ञ्य। हनूपरिभवे

पारिहारिक त्रि॰ परिहारे साधु ठक्। परिहारकारके शब्दार्थकल्पतरु। [स्वार्थे यञ्। वलय अमरः।

पारिहार्य्य पु॰ परिह्रियतेऽसौ परि+हृ-कर्मणि यञ्

पारी स्त्री पा-पाने रक्षणे वा बम॰भावे क्विप् तां राति रा-क गौरा॰ ङीष्। १जलपूरे २कर्दमां गवलिकायां ३हस्तिपादबन्धनदामनि च मेदि॰। [आग्निकारके च।

पारीण त्रि॰ पारं गच्छति पार+खञ्। १पारगे २कर्मक-

पारीन्द्र पु॰ इ-पालने कर्मणि इन् पारिः पशुः पारिरिन्द्र इव। १सिंहे २अलगर्दर्पे च हेमच॰।

पारीरथ पु॰ स्त्री॰पार्यां जलपूरे रथति रथ+अच्। कण्ठे स्त्रियां ङीष्। १दण्डे २घटप्राटके च विश्व। [उणादि॰

पारु पु॰पिबति जलं रश्मिभिः पा–क । १आदित्ये २वज्रौ च

पारुच्छेपि पु॰ आवापभेदे आश्व॰श्रौ॰ ७।१२।१।

पारुषा स्त्री पशुभेदे यजु॰ २४।२४ स्त्रियां ङीष् ।

पारुष्य न॰ परुषस्य भावः परुषि भवो वा ष्यञ् । १निष्ठुरत्वे २दुर्वाक्ये च मेदि॰ । ३इन्द्रवने विश्वः ४अगुरुचन्दने शब्दच॰ ५बृहस्पतौ पु॰ मेदि॰ । ६विरुद्धाचरणे दण्डपारुष्यशब्दे ३५३४ पृ॰ द्रष्टव्यम् ।

पारेगङ्ग अव्य॰ गङ्गायाः पारम् अव्ययी॰ एदन्तत्वं निपा॰। गङ्गायाः पारे पारेसमुद्रादयोऽपि तत्तत्पारे ।

पार्घट न॰ पादे घटते घट–अच् पृषो॰ । पांशौ हारा॰ ।

पार्थ पु॰ पृथायाः कुन्त्या अपत्यम् शिवा॰ अण् । १कुन्तीपुत्रे युधिष्ठिरादौ २अर्जुननामदत्ते शब्दच॰ । पृथेः पृथिव्या ईश्वरः अण् । ३पृथिवीपाले

पार्थक्य न॰ पृथक् इत्यस्य भावः ष्यञ् भत्वे अव्ययस्य टिलोपस्यानित्यत्वात् न टिलोपः । पृथक्त्वे

पार्थव न॰ पृथोर्भावः पृथ्वा॰ इगन्तिजोऽभावपक्षे अण् । १पृथुत्वे । पृथोरयम् अण् । २पृथुसम्बन्धिनि स्त्रियां ङीप् । अस्य कार्त्तकौजपा॰ इत्ये न अन्तोदात्तता ।

पार्थसारथि पु॰ ६त॰ । १श्रीकृष्णे २भीमांसाग्रन्थकारके मिश्रोपाधिके विद्वद्भेदे च ।

पार्थिव पु॰ पृथिव्या ईश्वरः अण् । १राजनि पृथिव्याविकारः इदं वा उत्सा॰अञ् । २भूमिभवे त्रि॰ ३सीतायां स्त्री ङीप् । ४तगरपुष्पे न॰ राजनि॰ । पृथिव्याः निमित्तं संयोग उत्पातो वा अण् । ५पृथिवीनिमित्ते ६तत्संयोगे ७तदुत्पाते च प्रशरीरे पु॰ त्रिका॰ । [९२।१५ भा॰।

पार्थ्य पु॰पृथेरपत्यं बा॰ यक् । पृथिवंशप्रे नृपभेदे भा॰१॰।

पार्थ्य पु॰ पारे भवः यञ् । रुद्रभेदे यजु॰ १६।४२।

पार्य्याग्निक त्रि॰ पर्य्याग्निरेव स्वार्थे क सा अस्यास्य प्रज्ञा॰ अण् । १सम्मूर्छे २स्नगभेदे पुंस्त्री॰ शब्द॰ स्त्रियां ङीष् पर्य्याग्निमाह ठक् । ३पर्य्याग्निजातेति वादिनि ।

पार्वण त्रि॰पर्वणि क्रियते शैत्रिकोऽण् पर्वणि भवे तु कालाट्ठञेव स्यात् तेन पार्विक इत्येव अतएव "न शारदः पार्विक श्रौरीश्वरः" इति नैषधे पठित्वा मल्लिनाथेन तथोक्तम् । १पर्वविहिते २अमावास्यानिमित्तके श्राद्धे न॰ यथोक्तं श्रा॰त॰ "अमावास्याकर्त्तव्यपर्वकर्त्तव्ययोः पार्वणत्वमाह भविष्यपुराणम् "अमावास्यां यत् क्रियते तत्पार्वणमुदाहृतम् । क्रियते वा पर्वणि यत् तत्पार्वणमिति स्मृतिः" । अत्र यदित्यादेरुभयत्राभिधानेन विकल्पार्थवाचकेन च पार्वणस्य लक्षणं द्वितीयपक्षे पर्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनयौगिकत्वेन पार्वणत्वप्राप्तौ अमावास्यायां यत् पृथगुपादानं तदमावास्याश्राद्धस्य रूढित्वार्थं तेन पार्वणेन विधानेन इत्यादौ यौगिकनानावयवशक्त्यपेक्षया एकस्या एव समुदायशक्तेर्लघुत्वात् अमावास्यापार्वणधर्मातिदेशो लभ्यते न तु पूर्णादिद्रव्याष्टकादिपार्वणधर्मातिदेशः । अतः अमावास्यामष्टम्यादि पर्वणि च तन्निमित्तकश्राद्धे पार्वणश्राद्धम् अन्यत्र पार्वणविधिना श्राद्धमित्यभिलाषे विशेषः"। कालमाधवीये च शातातप आह "दर्शश्राद्धन्तु यत् प्रोक्तं पार्वणं तत् प्रकीर्त्तितम् । अपराह्णे पितॄणां तु तत् प्रदानं विशेषतः" इति । यद्यपि तादृशं पार्वणं प्रतिपदि न प्राप्नोति तथापि तद्विकृतिरूपतया त्रिपुरुषोद्देशेन कर्त्तव्यादिकाम्यश्राद्धादेः पार्वणत्वं व्यवहर्त्तुं शक्यम् । अतएव काण्वकाण्वं पूर्वमुदाहृतम् "त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः" इति । तस्य कालभेदाश्च नि॰सि॰ निर्णीताः यथा हेमाद्रौ पराशरः "श्राद्धं हेमाद्रावचन्द्रेभच्छायायामहःसंक्रमे । नवोदके नवान्ने च नवच्छन्ने तथा गृहे । नवैश्वयेषु चेद्धन्ने पितरो हि नवास्त्रपि" । "पितरः स्मृदवन्त्यन्नमष्टकासु नवासु च" इति शातातपपाठः नवोदके नवकूपवाप्यादाविति केचित् । वर्षोपक्रमे आर्द्रा-प्रवेशे इति गौडाः "दधिके शुक्लपक्षे तु नवान्नं भक्षते बुधैः" अतः कृष्णपक्षे नेति गौडाः मैथिलास्तु "अन्नताप्ययं चैव धान्यजातं नरोत्तम !" इति वाराहोक्तेः प्रतिधान्यं श्राद्धमाहुः तत्र जातपदस्य श्राद्धयोग्यसमूहपरत्वात् । हेमाद्रौ आतुकर्त्यः "ग्रहोपरागे च सुते च जाते पित्रे गयायामयनद्वये च । नित्यं च शङ्खे च तथैव पद्मे दत्तं भवेच्छिक्षसहस्रतुल्यम् । शङ्खं प्राहुरमावास्यां चीणचन्द्रां द्विजोत्तमाः । अष्टकासु भवेत्पद्मं तत्र दत्तं तथाऽक्षयम् । तत्रैव शङ्खः "यदाविष्टिर्व्यतीपातो भानुवारस्तथैव च । पद्मकं ज्ञेयं तत्प्रोक्तमयनाश्च चतुर्गुणम्" । याज्ञवल्क्यः "अमावास्याष्टकाद्वित्रः कृष्णपक्षोऽयनद्वयम् । द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसंक्रमः । व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः । श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः" कृष्णपक्षे सर्वोऽपि "शाकेनापरपक्षं नातिक्रमेद्ध मासि मासि वाऽश्नमिति श्रुतेः "जर्द्धं वा चतुर्थ्या वदहः इत्यस्यते

ऋते चतुर्दशीमिति" कात्यायनोक्तेः "माघि माघि कार्यं अपरपक्षश्चापराह्णः श्रेयान्" इत्यापस्तम्बोक्तेश्च वीप्सया सर्वकृष्णपक्षेषु नित्यम् "तैलोपसंहाराज्जहाद्वयपरत्व परात्वम् अत्र प्रत्यहं पक्षस्यादि यदहःसम्पत्तिर्भवति तत्र पक्षाः यदैकैकदिने श्राद्धं तदा दार्शं पृथगेव याज्ञवल्क्येनामावास्यायाः पृथङ्निर्देशात् । एतेन कृष्णपक्षे यदहः सम्पद्यते अमावास्यायां तु विशेषेणेति निगमोक्तेर्गुणोऽपक्षस्य श्राद्धस्यामावास्येति भूयसाधिमतमप्ययास्तम् । अमान्तौ दर्शेनापि मासि श्राद्धसिद्धिरिति नारायणवृत्तिः । निरग्निकानां कर्त्तिसिद्धिने आहिताग्नेस्तु दर्शे एव "न दर्शेन विना श्राद्धमाहिताग्नेर्हि जन्मन" इति मनूक्तेः सर्वकृष्णपक्षाभावे मात्स्ये "अनेन विधिना श्राद्धं निरब्दं श्रेष्ठ निर्वपेत् । कन्याकुम्भद्वयस्थेऽर्के कृष्णपक्षे च सर्वदा" । कर्कोऽपि "आहिताग्नेः संवत्सरे तिः श्राद्धनियम" इति । देवलः "अनेन विधिना श्राद्धं कुर्यात् संवत्सरं सकृत् । द्विचतुर्वा यथाशक्ति मासे मासे दिने दिने" । कृष्णपक्षेष्वपि महालयस्य श्रेष्ठत्वं तत्रोक्तं प्राक् । व्यतीपाते विशेषमाह हेमाद्रौ शङ्खः "फलं लक्षप्रसूतस्य अमस्ये कोटिरुच्यते । पतने शतकोटिस्तु पाते दैवतमक्षयम्" ज्योतिःशास्त्रे "द्वाविंशतिस्तथोत्पत्तौ भसये चैकविंशतिः । पतने दश नाड्यस्तु पतिते सप्त नाडिकाः" अन्यौ च द्वौ व्यतीपातौ प्रागुक्तौ । हेमाद्रौ मार्कण्डेयः "यदा च श्रोत्रियोऽभ्येति गृहं वेदविदम्बिचित् । तेनैकेनापि कर्त्तव्यं श्राद्धं च विधुवन्मुखम्" । इदं चापिण्डं कार्यमिति हेमाद्रिः एतच्छ्लोक पिण्डकोऽपि "उद्वाहे पुत्रजनने पितृश्राद्धे गृहे मखे । तीर्थे ब्राह्मण आयाते भक्षेते जीवतः पितुः" इति मैत्रायणीयपरिशिष्टोक्तेः । तिथिविशेषे फलविशेषो याज्ञवल्क्येनोक्तः "कन्यां १ कन्यावेदिनश्च पशूं२ न्ये वृत्ततानपि३ । द्यूतं४ क्षयिं५ च माथिष्यं७ द्विजैकैकयकांश्च८ तथा । ब्रह्मवर्चस्विनः पुत्रान्१० अक्षरौघे बकुलके११।१२ । ज्ञानिश्रेष्ठ १३ सर्वकामानाप्नोति१४ श्राद्धदः सदा । प्रतिपत्प्रभृतिभेषा वर्जयित्वा चतुर्दशीम्" एताः कृष्णपक्षस्या एव मन्वादयश्च फलभूमेति पृथ्वीचन्द्रोदयः । पौर्णमास्यां हेमाद्रौ पितामहः "अमावास्याव्यतीपाते पौर्णमास्यष्टकासु च । विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते" एतन्नाध्यादिपरम् "व्रीतिपाते च कर्त्तव्यं बहुपाके च पार्थिव ! । पौर्णमासी तथा माघी श्रावणी च नृपोत्तम ! । प्रोष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी । एतासु श्राद्धकार्याणि नित्यानाह प्रजापतिः" इति विष्णुधर्मोक्तेः । विष्णुः "माघी प्रोष्ठपदूर्द्ध कृष्णा त्रयोदशीति" । अत्र माघी पौर्णमासीति कल्पतरुः । श्रावणूर्णमपि मघायोगसम्भवात्त्रयोदशी विशेषणमिति गौडाः नक्षत्रेऽपि याज्ञवल्क्यः "स्वर्गं शतभिषोजश्च शौर्यं शेषं बलं तथा । पुत्रान् चैत्रं च सौभाग्य पुष्यादि सुखतः शुभम् । प्रदत्तचक्रला वापि वाणिज्यप्रभृतीनपि । अरोगित्वं यशोवीतशोकतां परमाङ्गतिम् । धनं वेदान् भिषक्सिद्धिं कुम्भङ्गाभयजाविकम् । अन्यानामुच्च विधि बहुयः श्राद्धं संप्रयच्छति । कृत्तिकादिभरण्यन्तं सकामान् प्राप्नुयादिमान्" । फलान्तराण्यपि महाभारत कौर्मादेर्ज्ञेयानि । माधवीये मरीचिः "कृत्तिकादिषु कृष्णेषु श्राद्धे यत् फलमीरितम् । विष्कम्भादिषु योगेषु तदेव फलमिष्यते" दक्षस्मृतिः "आरोग्यं चैव सौभाग्यं शत्रूणां च पराजयम् । सर्वान् कामान् प्रियां विद्यां धनमायुर्यथाक्रमम् । सूर्यादिदिवसेष्वेतच्छ्राद्धकृद्भजते फलम् । नवाटिकरणेष्वेतच्छ्राद्धकृद्भजते फलम्" । अन्यानि च भविष्यपुराणे श्राद्धाटीनि प्रागुक्तानि मार्कण्डेयपुराणे श्राद्धार्हद्रव्यसम्पत्तौ तथा दुःखप्रदर्शने । जन्मर्क्षे पक्षमीड्यास्तु श्राद्धं कुर्वीत चेच्छया" ।

"संक्रान्तान्नावुपरागे च पर्वण्यपि महालये । निर्वापास्तु त्रयः पिण्डा एकतस्तु त्रयऽहनि । एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः । अकृतं तद्विजानीयात् स नरः पितृघातकः । अमावस्यां त्रयो यस्य प्रेतपक्षेऽथ वा यदि । यपिण्डीकरणादूर्द्ध तस्योक्तः पार्वणो विधिः । त्रिदण्डमहणादेव प्रेतत्वं नैव जायते । अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते" लिखितः । एतेषां व्याख्यानतात्पर्यवर्णनपूर्वकं द्विकृतिपार्वणविधानम् आ० त० निर्णीतं यथा "त्रयं चरुटानानां त्रय कुर्यात् त्रिभ्यो दद्यादित्यर्थः । मृताहपर्युदासस्त्रिदैवतस्य प्रतिप्रसवमाह अमावास्यामिति प्रेतस्योऽस्य पितृपक्षे अन्वयुक्तकृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्र कृष्णपक्षसामान्यपरत्वेऽमावास्यापदवैयर्थ्यापत्तेः पितृपक्ष विशेषयति हेमाद्रिमाधवाचार्य्यकृतं नागरखण्डम "नभो वाथ नभस्यो वा कृष्णमासो सदा भवेत् । सहस्रः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः" । अत्र आषाढाद्योरन्यतरस्य सद्भावपक्षे

आषाढामेचया सप्तमपक्षस्य पितृपक्षत्वात् अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य। ततश्च तत्र मृतस्य वर्षान्तरेऽश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणे न पार्वणं किन्त्वेकोद्दिष्टमिति। अत्र पार्वणो विधिः पार्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः तत्र पूर्ववचनोक्तत्वैपुरुषिकस्य मृताहे पर्युदस्तस्य पार्वणो विधिरित्यनेन प्रतिप्रसवात् तस्मात् तदेकोद्दिष्टं त्वैपुरुषिकं न तु षाट्पौरुषिकं "कर्त्तृसमन्वितं सङ्ख्या तथाद्यं श्राद्धमोड़शम्। प्रत्यावृदिकञ्च शेषेषु पिण्डाः स्युः षड़िति स्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्यावृदिकव्यतिरेकेण षट् संख्यानियमात्। एवमभावाद्यादिमरणनिमित्तेन मातुरपि प्रत्यावृदिकं पार्वणविधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्वणाभ्यनुज्ञानात्। एतच्च भ्रात्रादित्रितयदेवतं कार्य्यम् "मात्रे पितामह्यै प्रपितामह्यै च पूर्ववत् ब्राह्मणान् भोजयित्वा" इत्यन्वष्टकायां तथा दर्शनात् अवसानदिननिमित्तत्वेन पार्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यं "न योषिद्भ्यः पृथगद्यादवसानदिनादृते" इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात्। एवं सपिण्डीकरणेऽपि। एतच्च मृताहे पार्वणं मातापित्रोरेव। तथा च हेमाद्रिधृतकात्यायनवचनं "सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्वणम्। पितृव्यभ्रातृमातृष्वामेकोद्दिष्टं सदैव तु"। मातृपदं सपत्नीमातृपरम्। सपत्नीमातृत्वत्र मातृपदस्य राजदन्तादित्वात् परनिपातः ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम्। एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्वणं कर्त्तव्यम् "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश" इति जाबालवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्। पार्वणेन विधानेन देयमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात्। उशना च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्वीत वै द्विजः। एकोद्दिष्टं सदा कुर्याच्चिरग्निः श्राद्धदः सुतः"।

पार्वत त्रि॰ पर्वते भवः अण्। १पर्वतजातमात्रे (घोड़ादिन) २निम्बभेदे ३दुर्गायां स्त्री ङीप् अमरः। ४शक्त्यां ५गोपालपूतिकायां स्त्री मेदि॰ ६जीवन्त विम्बः ७द्रौपद्यां ८सौराष्ट्रमृत्तिकायासु रत्नमाला ९क्षुद्रपाषाणभेदायां १०धातक्यां राजनि॰ तत्र दुर्गायां पार्वतीशब्दनिरुक्तिर्यथा

"तिथिभेदे कल्पभेदे पर्वभेदप्रभेदतः। ख्यातौ तेषु च विख्याता पार्वती तेन कीर्त्तिता। महोत्सवविशेषस्य पर्वेति प्रकीर्त्तितम्। तस्याधिदेवी या सा च पार्वती परिकीर्त्तिता। पर्वतस्य सुता देवी साविर्भूता च पर्वते। पर्वताधिष्ठातृदेवी पार्वती तेन कीर्त्तिता" इति प्रकृतिखण्डे दुर्गोपाख्याने ५४अ०। ११अन्ने स्त्री व॰३॰ निघण्टुः तत्र वार्वत्यः इति पाठान्तरं तत्रार्थे।

पार्वतायन पुंस्त्री॰ पर्वतस्यर्षेः गोत्रापत्यम् फक् वा। पर्वतर्षेर्गोत्रापत्ये पक्षे इञ्। पार्वति तत्रार्थे

पार्वतीनन्दन पु॰ ६त॰। कार्त्तिकेये अमरः पार्वतीसुतादयोऽप्यत्र तस्य तत्सुतत्वज्ञया अग्निकुमारशब्दे ५५पृ॰ भा॰व॰ २२४अ॰ वाक्ये दृश्या। तत्र उमायोन्यां तु रुद्रेणेत्यशुद्धम् उमायोन्यां तु रुद्रेणेत्येव पाठः साधुः।

पार्वतीश्वर न॰१काशीस्थे शिवलिङ्गभेदे काशीख॰२शिवे पु॰

पार्वतेय न॰पर्वते भवं ढक्। १सौवीराञ्जने २सूर्य्यावर्त्तदन्ते पु॰ रत्नमाला।

पार्वायनान्तीया स्त्री पर्वणोऽयनस्य चान्ते विहिता छण्। दृष्टिभेदे सा च दृष्टिर्दर्शपौर्णमासाम्नायस्य काले विहिता" "दृष्टे पार्वायनान्तीयाः केवला निर्वपेत् सदा" मनु॰ कुल्लूकव्याख्याने।

पार्शव पु॰ पर्शुः प्रहरणमस्य। पर्शुप्रहरणयुक्ते

पार्श्व पु॰न॰ स्पृश-वन् धातोः पृ-च। १कक्षाधोभागे अमरः २समीपे च। पर्शूनां पार्श्वाभ्यां समूहः पर्शु-अण्। पर्शुसमूहे न॰ मेदि॰ ४जिने पु॰ ५सन्निकृष्टे त्रि॰ हेमच॰। ६अन्यजूपाये शाठ्ये सि॰कौ॰।

पार्श्वक त्रि॰ पार्श्वेन अन्यजूपायेन शाठ्येनान्विच्छति कन्। शाठ्येनान्विच्छायुक्ते।

पार्श्वतस् अव्य॰ पार्श्व+सार्वविभक्तिकस्तसिल्। तत्तद्विभक्त्यर्थयुते पार्श्वशब्दार्थे ततो भवार्थे गहादा॰छ भत्वे टिलोपः। पार्श्वतीय पार्श्वतोभवे त्रि॰।

पार्श्वद त्रि॰पार्श्वं ददाति दा-क। पार्श्वचरे भा॰श॰४६अ॰

पार्श्वनाथ पु॰ परेशनाथे जैनदेवभेदे

पार्श्वपरिवर्त्तन न॰ पार्श्वेन परिवर्त्तनम्। यत्पार्श्वमधःस्थापयित्वा शयितः तत्पार्श्वस्योर्द्धीकरणे (पाशमोड़)

१पार्श्वस्य परावृत्तौ । सुप्तस्य हरेः भाद्रशुक्लैकादश्यादौ कर्त्तव्ये पार्श्वपरिवर्त्तनाख्ये २उत्सवभेदे च "प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि । कटिदानं भवेद्विष्णोर्महापातकनाशनम् । जलाशयान्तिकं नीत्वा संपूज्याभ्यर्च्य च प्रभुम् । कर्णिकापरिवृत्तिञ्च दक्षिणाङ्गे प्रकल्पयेत्" हरिभ०भवि०पु० । एकादश्यामिति सन्ध्यायां श्रवणमध्यपादलाभे बोध्यमन्यथा "द्वादश्यामेव कारयेत्" तत्र व्यवस्था उत्थानशब्दे ११०२पृ०द्रष्टव्या । [भावप्र०।

पार्श्वपिप्पल न०पार्श्वे पिप्पलमिव । हरीतकीभेदे (गलाठ)

पार्श्वभाग पु० कर्म० । १पक्षभागे हस्त्यादेः २पार्श्वदेशे अमरः

पार्श्वल त्रि० पार्श्व+अस्त्यर्थे सिध्मा०लच् । पर्शुसहदाययुते

पार्श्ववक्त्र पु० पार्श्वे वक्त्रमस्य । महादेवे हरिवं० २१७अ०।

पार्श्वशय त्रि० पार्श्वाभ्यां शेते शी-अच् । पार्श्वाभ्यां क्रमेण शायिनि ।

पार्श्वशूल पु० सुश्रुतोक्ते शूलरोगभेदे तल्लक्षणादि यथा "रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः । स संरुध्य करोत्याशु घ्नानं गुडगुडायनम् । सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः । नाश्नं वाञ्छति नो निद्रां सुपैत्यार्त्तिनिपीडितः । पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः" । [२तथाभूते नटे पारिपार्श्विके हेमच०।

पार्श्वस्थ त्रि० पार्श्वे तिष्ठति स्था-क ७त० । १समीपस्थिते

पार्श्वादि "पार्श्वादिभ्यः संख्यानम्" वार्त्ति० उक्ते शेतेरच्प्रत्ययनिमित्ते शब्दगणे स च गणः "पार्श्व उदर पृष्ठ उत्तान अवमूर्द्ध" ।

पार्श्वास्थि न० ६त० । देहपार्श्वस्थिते अस्थि (पाँजर) अमरः

पार्श्विक त्रि०पार्श्वे भवः ठक् । १पार्श्वभवे २सन्निजीवके हारा०

पार्श्वी स्त्री द्वि०व० । द्यावापृथिव्योः निघण्टुः ।

पार्श्वैकादशी स्त्री पार्श्वस्य हरेः पार्श्ववर्त्तनस्य निमित्तमेकादशी । पार्श्ववर्त्तनैकादश्याम् भाद्रशुक्लैकादश्याम् । पार्श्ववर्त्त नशब्दे द्रष्टव्यम् । [क । कर्कटे हेमच० ।

पार्श्वोदराप्रय पार्श्वं उदरञ्च ताभ्यां प्रीणाति भोजनं प्री-

पार्षिक पु० गोत्रप्रवर्त्तकर्षिभेदे प्रवराध्यायः ।

पार्षत त्रि०पृषतस्य विराट्छन्दसस्येदम् अण् । १विराट्छन्दसम्बन्धिनि २तत्पुत्रे पृष्टद्युम्ने पु०३स्त्रीपद्यां स्त्री ङीप् त्रिका०

पार्षद् स्त्री परि द्+पृषो० । सभायां त्रिका० ।

पार्षट त्रि० पार्षदमर्हति अण् । पारिषदे शब्दच० । अञ् । पार्षद्योऽप्यत्रार्थे भरतः । [रंगे भवे ।

पार्षदंग त्रि० पृषदंगे भवः उत्सवा० अञ् । पृषदंगे विन्हो-

पार्षदश्व पु० पृषदश्वस्य वायोर्ष्टषभेदस्य वेदम् अण् । १वायुसम्बन्धिनि २ऋषभेदसम्बन्धिनि च ३गोत्रप्रवर्षिभेदे पु० आश्व० श्रौ०१२ ११ [कात्या०श्रौ० २२ ७ ।

पार्ष्टिक त्रि० पृष्ठे षडहे भवः ठञ् । षडहसम्बन्धिनि

पार्ष्णि पुंस्त्री० पृष-नि नि०वृद्धिः । १पादप्रत्येर्गुल्फस्याधोभागे अमरः । (गोडारि) २पृष्ठे मेदि० ३सैन्यपृष्ठे हला० ४जिगीषायाञ्च पु० रत्नकोषः ५उन्मदस्त्रियां स्त्री मेदि० कुन्त्यां स्त्री धरणिः ।

पार्ष्णिक्षेम पु० विश्वदेवभेदे भा०अनु० ९१अ० ।

पार्ष्णिग्राह पु० पार्ष्णिं पृष्ठपदं गृह्णाति अण् । विजयार्थं जिगमिषोः पश्चात्पदग्राहिणि पृष्ठस्थे १शत्रौ २द्वादशराजचक्रमध्ये पृष्ठस्थायिन्नृपे च अरिशब्दे २५५पृ०द्रष्टव्यम् ।

पार्ष्णिवाह त्रि० पार्ष्णिं वहति वह-अण् । पृष्ठस्थे कार्यनिर्वाहके भा० स्त्री० १२०अ० ।

पार्ष्णील त्रि०पार्ष्णिरस्त्यस्य सिध्मा०लच् दीर्घश्च । पार्ष्णियुक्ते

पाल रक्षणे चु०उभ०सक०सेट् । पालयति ते अपीपलत् त ।

पाल त्रि० पालयति पाल-अच् । १रक्षके "पालदोषविनाशे च पाले दण्डो विधीयते" इति स्मृतिः । भावे अच् । २रक्षणे पु० ।

पालक पु० पालयति पाल-ण्वुल् । १अश्वरक्षके जटा० २चित्रकवृक्षे पु० राजनि० ३पालनकर्त्तरि त्रि० स्त्रियां टाप् क्वापि व्यतदृत्वम् एतदन्तस्य पुंयोगेऽपि टाप् गोपालकस्य पत्नी गोपालिका इत्येव न ङीष् ।

पालकाव्य पु० १करेणुभुवि मुनिभेदे हेमच० २तत्कृते हस्त्यश्वादिलक्षणज्ञापके अर्थशास्त्रभेदे न० [हेमच० ।

पालक्या स्त्री पालाय कायति कै-क । (पालङ्) शाकभेदे

पालघ्न पु० पालं जलादितो रक्षकं कलं हन्ति हन-ठक् । १कलाख्ये २जलजलक्षणभेदे अमरः ।

पालङ्ग पु० पाल-सम्प० क्विप् पाला अङ्गते अङ्ग-घञ् । (पालङ्) १शाकभेदे अमरः । स्त्रीत्वमपि स्त्रियां ङीष् । अत्रैव "पालङ्गी कथिता रूक्षा वातादिमयवन्मतुत् राजवल्लभः २कुन्दुरुकृते स्त्री अमरः गौरा० ङीष् ।

पालङ्गा न०पालङ्ग+स्वार्थे अञ् । (पालङ्) १शाके राजनि० २कुन्दुरौ स्त्री अमरः । "पालङ्ग्या वातला शीता श्लेष्मला मेदिनी गुरुः । विष्टम्भिनी मदग्लानपित्तरक्तविषापहा" भावप्र० । ३श्येनचणे मेदि० ।

पालन न०पाल-भावे ल्युट् । १रक्षणे करणे ल्युट् । वयःप्रसूतायाः गोः क्षीरे मैथुने शब्दचन्द्रिका । तत्रत्री

•रस्य पानहारा यतृमपालनकरत्वात् तथाभूतत्वम्।

पालवणिज् पु॰पाले कन्यारक्षणे वणिक्। कन्यापाले त्रिका॰

पालल त्रि॰ पललस्य तिलचूर्णस्य विकारः अण्। तिलचूर्णपिष्टके "पाललाः श्लेष्मजननाः शक्तुल्यः कफपित्तलाः" सुश्रु॰।

पालाश त्रि॰पलाशस्य विकारः अवयवो वा अण्। १पलाशावयवे २तद्विकारे च "पालाशो दण्ड आषाढः" अमरः। ३तमालपत्रे (तेजपात) राजनि॰तद्वर्णः अस्त्रस्य अण्। ४हरिद्वर्णे पु॰ ५तद्विशिष्टे त्रि॰ अमरः पलाशेन निर्वृत्तम् सङ्घाशा॰ यण्। पालाश्य पलाशनिर्वृत्ते त्रि॰। पलाशस्यादूरदेशादि वराहा॰ कन्। पालाशक तत्सन्निकृष्टदेशादौ। स्वार्थे क। तत्रार्थे

पालाशखण्ड पु॰ मगधदेशे शब्दरत्ना॰।

पालाशि पु॰ पलाश गोत्रप्रवर्षिभेदे प्रवराध्यायः।

पालि(ली) स्त्री पल-वा॰ इण्। १कर्णलतायां २अश्वौ कोणे ३त्रेणौ ४अङ्कभेदे ५क्षात्रादिदेवे च मेदि॰ ६यूकायां ७पोटायां ८प्रशंसायां ९प्रस्थे १०उत्सङ्गे क्रोडे च हेमच॰ वा ङीप् दीर्घान्तः ११स्थाल्याम् शब्दच॰।

पालिंहिर स्त्री मण्डलिसर्पभेदे सुश्रुतः अहिशब्दे दृश्यम्।

पालिका स्त्री पालि+स्वार्थे क। १पालिशब्दार्थे संज्ञायां कन्। २कर्णपत्रे शब्दच॰ ३दध्यादिच्छेदन्यां हारा॰। ४पालनकर्त्र्यां स्त्रियां च।

पालित त्रि॰ पाल-क्त। १रक्षिते क्रोष्टुवंश्ये २नृपभेदे ३देशभेदे च पु॰ हरिवं॰३७अ॰। ४शाखोटवृक्षे पु॰शब्दार्थकल्प॰ ५कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰।

पालित्य न॰ पलितस्य भावः ष्यञ्। केशादेः शुभ्रतादौ। पलितस्यादूरदेशादि सङ्घाशा॰यण्। पलितस्य सन्निकृष्टदेशादौ त्रि॰। [नृपभेदे पु॰ हरिवं॰ ३अ॰।

पालिन् त्रि॰ पालयति पालि-णिनि। १पालके २पृथुपुत्र-

पालिन्द पु॰ पालि-वा॰ किन्दच्। १कुन्दुरुवृक्षे राजनि॰। २श्यामालतायां स्त्री अमरः गौरा॰ ङीष्। पलिन्दीति पाठान्तरम् पृषो॰। ३त्रिवृतायां द्विरूपकोषः।

पालियायन पु॰ गोत्रप्रवर्षिभेदे प्रवराध्यायः।

पालीवत काण्डरोह्ये वृक्षभेदे वृ॰सं॰ ५४अ॰। "द्राक्षापालीवतायैव बीजपूरातिमुक्तकाः। एते द्रुमाः काण्डरोह्या गोमयेन प्रलेपिताः। मूलच्छेदेऽथ वा स्कन्धे रोपणीयाः प्रयत्नतः"।

पालोहय पु॰ गोत्रप्रवर्षिभेदे प्रवराध्यायः।

पाल्लक त्रि॰ पल्लयां भवः धूमा॰ वुञ्। पल्लीभवे जानटौ

पाल्वलतीर त्रि॰ पल्वलतीरे भवः अञ्। पल्वलतीरभवे

पावक पु॰ पुनाति पू-ण्वुल्। १वह्नौ अमरः "अपावनानि सर्वाणि वह्निसंसर्गतः क्वचित्। पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः" इति काशीख॰ ६अ॰ उक्तेस्तस्य तथात्वम्। २वैद्युताग्नौ च "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः। निर्मन्थ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः। यस्मात्तौ तपते सूर्यः शुचिरग्निश्च स स्मृतः" कूर्मपु॰। ३सदाचारे ४वह्निमन्थे ५चित्रकवृक्षे ६भल्लातके ७वडङ्गे च मेदि॰। ८गोधके त्रि॰ हेमच॰। ९रक्तचित्रके १०कुसुम्भे च पु॰ राजनि॰ ११वह्नौ १२सूर्ये च भा॰१।५०।६भा॰तयोश्च शोधकत्वात् तथात्वम्। १३ऋषिभेदे भा॰व॰१२५अ॰। पावः पवनं शुद्धिस्तं कायति कै-क। १४सरस्वत्यां स्त्री ऋ॰ १।३।२०भा॰। पावकाश्च सप्तविंशतिः "पावकाः सप्तविंशतिः" भा॰स॰ ७अ॰व्याख्यायां नीलकण्ठधृतवाक्येभ्यः तानि च "ब्रह्मणोऽङ्गात् प्रसूतोऽग्निरङ्गिरा१ इति विश्रुतः। दक्षिणाग्निर्गार्हपत्याहवनीयाविति२।३।४ त्रयी। निर्मन्थ्य५ वैद्युतः६ सूरः७ संवर्त८ औत्तिकस्तथा। जाठरो१०विश्वभः११ क्रव्यात्१२ क्षेमवान्१३ वैष्णव१४स्तथा। दस्युमान्१५ बलद१६श्चैव शान्तः१७ पुष्टो१८विभावसुः१९। ज्योतिष्मान्२० भरतो२१ भद्रः२२ २३स्विष्टकृत्२४समान्२४ कृतः२५। सोमश्च२६ पितृमां२७श्चैव पावकाः सप्तविंशतिः"। अन्ये पावकभेदा अग्निशब्दे ५३१पृ॰ दृश्याः ति॰त॰ष्टक्षपरिशिष्टे कर्मभेदे तस्य नामभेदाश्चोक्ता यथा "लौकिके पावको१ ह्यग्निः प्रथमः परिकल्पितः। अग्निस्तु मारुतो२ नाम गर्भाधाने विधीयते। पुंसवने चन्द्रनामा३ शुङ्गाकर्मणि शोभनः४। सीमन्ते मङ्गलो५ नाम प्रगल्भो६ जातकर्मणि। नाम्नि स्यात् पार्थिवो७ ह्यग्निः प्राशने च शुचिस्तथा। सत्यनामा८थ चूडायां व्रतादेशे समुद्भवः१०। गोदाने सूर्यनामा११ च केशान्ते ह्यग्नि१२रुच्यते। वैश्वानरो१३ विसर्गे तु विवाहे योजकः१४स्तथा"। गोदाने गोदानाख्ये संस्कारे। "चतुर्थ्यान्तु शिखी१५ नाम धृति१६रग्निस्तथाऽपरे"। अपरे धृतिहोमादौ। "प्रायश्चित्ते विधु१७श्चैव पाकयज्ञे तु साहसः"१८। प्रायश्चित्ते तदात्मकमहाव्याहृतिहोमादौ। पाकयज्ञे पाकाङ्गकदधोत्पर्गन्टहोमादौ। "वृत्तहोमे च वह्निः१९ स्यात् कोटिहोमे हुताश-

नः२० । पूर्णाङ्कुत्यां रुद्रो२१ नाम शान्तिके वरदः२२ सदा । पौष्टिके वलद२३श्चैव क्रोधो२४ऽग्निशाभिचारके । कोष्ठे तु जठरो२५ नाम क्रव्यादो२६ मृतभक्षके । आहुय चैव होतव्यो यत्र यो विहितोऽनलः" ।

पावकात्मज पु० ६त० । १कार्त्तिकेये पावकसुतादयोऽप्यत्र इक्ष्वाकुवंशप्रदुर्योधनकन्यावोढरि सुदर्शनाख्ये २सुनिभेदे च

पावकारणि पुंस्त्री० ६त० । अग्निमन्थनकाष्ठे शब्दमाला । अरणिशब्दे दृश्यम् ।

पावकि पु० पावकस्यापत्यम् इञ् । १कार्त्तिकेये सुदर्शनाख्ये सुनिभेदे च भा० आनु० २अ० ततथा दृश्या ।

पावकेश्वर पु० १तीर्थभेदे शिवपु० । काशीस्थे पावकस्थापिते २शिवलिङ्गभेदे न० ।

पावन त्रि०पावयति पू–णिच्–ल्यु । १पवित्रीकारके २प्रायश्चित्ते ३जले च न० मेदि० ४गोमये न० शब्दच० । ५रुद्राक्षे ६कुष्ठौषधे न० राजनि० ७चित्रकवृक्षे ८व्यभ्यासे न०विश्वः । पावके ९वह्नौ १०देवव्यासे पु० मेदि० । १०सिद्धके विश्वः । ११पीतभृङ्गराजे पु०राजनि० । १२सिद्धे १३पावयितरि त्रि० हेमच० १४विष्णौ पु० विष्णुसं० पवनशब्दे दृश्यम् तस्य स्मृतिमात्रेण पवित्रताकरणात् तथात्वम् "पवनः पावनोऽनलः" इति द्विधापाठस्तु पावयतीति "भीषास्माद्वातः पवते" इति श्रुतेः पवनव्यापारनियोक्तृत्वात् पावनत्वम् इति अर्थभेदान्नामद्वयम् । करणे ल्युट् ङीप् । १५हरीतक्यां १६स्त्रीमय्यां १७तुलस्यां च स्त्री राजनि० १८गङ्गायां च स्त्री ।

पावनध्वनि पु० पावनो ध्वनिरस्य । १शङ्खे राजनि० २पावनशब्दयुक्ते त्रि० ।

पावमान त्रि० पवमानमधिकृत्य प्रवृत्तम् अण् । १पवमानवक्त्राद्यधिकारेण प्रवृत्ते सूक्ते २ऋचि स्त्री ङीप् ।

पावित्रायण पुंस्त्री पवित्रस्यर्षेर्गोत्रापत्यम् अश्वा० फञ् । पवित्रर्षेर्गोत्रापत्ये ।

पावीरवी स्त्री १शोधयित्र्यां स्त्रियां ऋ०६।४९।७भा० "आयुधवान् पवीरवान् इन्द्रो देवताऽस्य अण् ङीप् । २दिव्यायां श्वाचि निरु०१२।३० "इन्द्रः पावीरवान् तद्देवताका पावीरवी पावीरवी च दिव्या वाक्" इत्युक्तम् ।

पाश पु० पश्यते बध्यतेऽनेन पश–करणे घञ् । १मृगविहगादिबन्धने रज्ज्वुभेदे (फाँद) २रज्ज्वुमात्रे च । केशादुत्तरं पाशशब्दः संबार्थः । यथा केशपाशः । कर्णात् परः शोभार्थः यथा कर्णपाशः शोभनकर्ण इत्यर्थः । कात्रादिभ्यः पाशप् । कात्रपाश कपक्षणच्छात्र इत्याद्यर्थे शस्त्रभेदे शब्दरत्ना० । तल्लक्षणं हेमा०परि० औशनसशास्त्रोक्तं यथा "शाणं क्षौमं कार्पासं स्नायुं तथा रोमाणि चर्म च सर्वकालिकस्य पाशस्य द्रव्याणि भवन्ति तानि द्रव्याणि स्नायुभिश्चाणि चैकस्य पाशस्य योग्यानि स्युः । नालिकेरवल्कलादिबन्धनादि प्रावृषेण्यस्य नारिकेलाश्मन्तक तालहन्तवल्कलानि हैमनस्य पाशस्य भवन्ति त्रिवृतादृढवृतगुणसयुक्तः पाशः प्रयोगिकः । पाशो भवेदामूलात् सङ्कपाशः षड्हस्तः स्याद्रज्ज्वाद्युप्रमाणः सुखावहः सुखस्पर्शश्च पाशस्याने सुमृष्टोऽनुपूर्ववलान्वितो भवति । रज्ज्वुपाशस्तु नवकानुवर्त्तितः स्यात् । एकहस्तस्त्रिहस्तः पादहीनः सह कर्णाभ्यां च पाशो दशपलिकः पादान्ते पञ्चकार्षकः श्रेष्ठो भवति पञ्चदशपलो वा तथा रथाश्वयोरपि वित्तयो । विंशतिपलिकः कर्त्तव्यः प्रमाणे सप्तकार्षकस्त्रिंशत्पलिको वा स्यन्दिनां मतङ्गजस्य नवपलको हस्तिनि प्लवे च पाशो भवति भावविकृते नागारत्निगुणः पाशः" इति ।

पाशक पु० पश–ण्वुल् । द्यूतक्रीडासाधने गुडिकादौ (पाशा) अमरः । [दृश्यम् ।

पाशद्युम्न पु० वयतः पुत्रे एतन्नामके ऋषे ऋ० ९ ३३ २भा०

पाशधर पु०पाशं धारयति धारि–अच् तुम्नः । १वरुणे हरिवं०४८०अ०तद्देवताके २शततारके ३पाशधारिमात्रे त्रि०

पाशन न० पाशि–भावे ल्युट् । बन्धने भा०द्रो० ५९अ० ।

पाशपाणि पु०पाशः पाणौ यस्य । १वरुणे हला० २शतभे च पाशहस्तादयोऽप्यत्र पाश+अस्त्यर्थे इनि । पाशीत्यप्यत्र

पाशभृत् पु०पाशं बिभर्त्ति भृ–क्विप् । १वरुणे २तद्देवताके शतभिषानक्षत्रे न० । ३पाशधारिमात्रे त्रि० । "हंसारूढः पाशभृद्वरुणः" इ०सं० ५०अ० ।

पाशमुद्रा स्त्री तन्त्रसारोक्ते मुद्राभेदे "वामसुष्टेसु तर्जन्या दक्षसुष्टेसु तर्जनीम् । संयोज्याङ्कुशकाभ्यां तर्जन्यग्रे स्वके क्षिपेत् । एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता" ।

पाशव त्रि०पशोरिदम् अण् । १पशुसम्बन्धिनि तन्त्रोक्ते २पशुआचारे च पशूनां समूहः अण् । ३पशुसमूहे न० [शब्दच०

पाशवपालन न०पाशवं पशुसंघं पालयति पालि–ल्यु । चासे

पाशवासन न० "पाशवासनमावच्छ्रे कृत्वा पशुपतिर्भवेत् । पृष्ठे हस्तद्वयं बद्ध्वा कर्परायै समस्तकम्" रुद्रजा० उक्ते आसनभेदे ।

पाशबीज न० (ॐ) इत्याकारके बीजे देवप्र० रघु०।

पाशहस्त पु०पाशः हस्ते यस्य। १वरुणे २शतभे च ३हस्तस्थितपाशके त्रि०।

पाशादि (पाशादिभ्योयः) पा० उक्तयप्रत्ययनिमित्ते शब्दगणे स च गणः "पाश दण्ड धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन"। तदन्तः स्त्रीलिङ्गः पाशया वात्या इत्यादि। [य०।

पाशान्त पु०पार्श्वस्यान्तः ष्ठषो०। वस्त्रस्य पार्श्वान्ते ष्ठ०सं०७१

पाशिक त्रि० पाशः प्रहरणमस्य ठक्। पाशबन्धनरूपप्रहरणयुक्ते मृगयौ ष्ठ०सं० ७५अ०।

पाशिन् पु० पाशोऽस्त्यस्य इनि। १वरुणे २शतभे ३पाशवति त्रि०। स्त्रियां ङीप्। ४व्याधे पु० भेदि० ५धृतराष्ट्रपुत्रभेदे पु० भा०आ० ११७अ०। [क्षुद्रदेशादौ।

पाशिल त्रि० पाशस्यादूरदेशादि०काशा०इल। पाशस्य सन्नि-

पाशिवाट पु०देयभेदे भा०भी०९अ०। सोऽभिजनोऽस्य अण्। तस्य बहुषु लुक्। पित्रादिक्रमेण तद्देयवाविषु ब०व०।

पाशुक पु० पशोर्यागज्ञापकग्रन्थस्य व्याख्यानो ग्रन्थः द्व्यच्कत्वात् ठक्। १पशुयागज्ञापकग्रन्थव्याख्याने। पशोरिदम् ठक्। २पशुसम्बन्धिनि त्रि० कात्या० श्रौ०२१।२०"नानापाशुकमज्जमांसरुधिरैः कृत्वा नवम्यां बलिम्" ति०त०।

पाशुपत त्रि० पशुपतिर्देवताऽस्य तस्येदं तेन प्रोक्तम् वा अश्वपत्या०अण्। १पशुपतिदेवताके अस्त्रादौ २तद्देवते हविरादौ ३पशुपतिसम्बन्धिनि ४तेनोपदिष्टे शास्त्रभेदे न० तन्मतं पशुपतिशब्दे दर्शितम्। ५वकवृक्षे पु०भेदि० तस्य तत्प्रियत्वात्तथात्वम्। [१।११९

पाशुपाल्य न० पशुपालस्य भावः ष्यञ्। वैश्यवृत्तौ याज्ञ०

पाशुबन्धक त्रि०पशुबन्धः प्रयोजनमस्य ठक्। यज्ञे १आलम्भनार्थपशुबन्धनस्थानादौ २वेद्यां स्त्री कापि अतद्वत्तम् आश्व०श्रौ० ३।१।६

पाश्चात्त्य त्रि० पश्चाद् भवः त्यक्। पश्चिमदेशभवे।

पाश्चात्त्याकरसम्भव न०पाश्चात्त्ये आकरे सम्भवति सम्+भू-अच् ७त०। (सामरी) लवणभेदे रत्नमाला।

पाषक न० पष-बञ्चे ण्वुल्। पादाभरणभेदे

पाषण्ड त्रि० पाति रक्षति दुरितेभ्यः पा-क्विप् पाः वेदधर्मस्तं षण्डयति निष्फलं करोति। "पाखनाच्च त्रयीधर्मः पाशब्देन निगद्यते। षण्डयन्ति तु तं यस्मात् पाषण्डस्तेन कीर्त्तित" इत्युक्ते वेदाचारत्यागिनि अमरः ण्वुल्। पाषण्डक तत्रार्थे त्रि०।

पाषण्डिन् पु० पां वेदधर्मं षण्डयति षण्ड+णिच-इनि पाषण्डे शब्दच० तस्य लक्षणं यथा

"येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः। नारायणाद् जगद्वन्द्यात् ते वै पाषण्डिनस्तथा। कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः। ऋते वनस्थाश्रमांश्च जटावल्कलधारिणः। अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा। शङ्खचक्रोर्द्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः। रहिता ये द्विजा देवि! ते वै पाषण्डिनो मताः। श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः। स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः। समस्तयज्ञभोक्तारं विष्णुं ब्रह्मणदैवतम्। उदस्य देवतान्येभ्यो जुहोति च ददाति च। स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्मसु। स्वातन्त्र्यात् क्रियते यैस्तु कर्म वेदोदितं महत्। विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः। यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः। समत्वेनैव जानाति स पाषण्डो भवेत् सदा। अनास्था क्रियते यैस्तु मनोवाक्कायकर्मभिः। वासुदेवं न जानाति स पाषण्डी भवेत् द्विजः। हरेर्नामकमन्त्राभ्यां लोकाः सङ्गविवर्जिताः। यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः। वर्णानां गुरवो नित्यं शिवे! यद्यप्यवैष्णवाः। भगवद्भक्तिरहिता वैष्णवादिविनिन्दकाः। रजस्तमोमया जीवहिंसका जीवभक्षकाः। असत्प्रतिग्रहरता देवता यामयाजकाः। अनाचारास्तथा व्रात्या नानाविबुधपूजकाः। देवतोच्छिष्टश्राद्धादिभोजिनः शूद्रवत्क्रियाः। विविधासत्कर्मरता भक्षणाद्यविचारिणः। लोभमोहमदक्रोधकामाहङ्कारिणः सदा। एवंविधाः पारदारिकाद्या येऽत्र शुभानने!। अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः। वर्णाश्रमाद्या ये मर्त्याः स्वस्वधर्मविवर्जिताः। ते वै पाषण्डिनो देवि! नारायणबहिर्मुखाः। सर्वाशिनो द्विजा येऽपि सर्वविक्रयिणस्तथा। ये वेदाचाररहितास्ते वै पाषण्डिनो मताः। ये त्वसङ्ख्यपानादिरता लोका निरन्तरम्। शिवे! पाषण्डिनो ज्ञेया इह नास्त्यत्र संशयः। विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः। अश्वत्थतुलसीतीर्थक्षेत्रादिषु महागुरौ। लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने!। स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः। रुद्राक्षेन्द्राक्षभद्राक्षस्फटिकाक्षादिधारिणः। जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये!। असिजीवी मसीजीवी-

श्रावकः पाचकस्तथा। एते पाषण्डिनो विप्रा मादक द्रव्यभोजिनः। देवि! कार्ष्णादयो भक्ता अनन्यशरणास्तु ये। पाषण्डसङ्गं न कुर्युस्तद्गेहे पानभोजने। तत् स्पर्शजलपानञ्च चक्रुस्तत्सङ्गमादिकम्। तत्पानभोजनालापसङ्गाभिङ्गनतोऽचिरात्। पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा। किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः। असदाचरणाद्येत् स्युस्तदा पाषण्डिनः स्मृताः। एतद्भोजनपानादिकर्मभिर्वैष्णवा जनाः। पाषण्डिनस्तथा ह्यूर्वे जटाभस्मादिधारिणः" पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४२अ०। यतस्तु वैष्णवप्रशंसार्थं गैरिकधारणस्यापि शास्त्रसिद्धत्वात्। तत्संसर्गादिनिषेधो यथा "तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत्। विशेषतः क्रियाकाले यत्नाद्दौ चापि दीक्षितः। क्रियाहानिर्गृहे स्पर्शं पश्येत् सतिसान् नरः। किं पुनर्वैस्तु सन्त्यक्ता त्वयी सर्वात्मना द्विज!। पाषण्डभोजिभिः पापैर्वेदवादविरोधिभिः। पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान्। हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्। दूरादालस्तु संसर्गः सहास्या वापि पापिभिः। पाषण्डिभिर्दुराचारैस्तत्प्रान्तान् परिवर्जयेत्। एते नग्नास्तवाख्याता दृष्ट्या श्राद्धोपघातकाः। तेषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति। एते पाषण्डिनामानो ह्येतान्न चालमेद्बुधः। पुण्यं नश्यति सम्भाषादेतेषां तद्विनोद्भवम्। पुंसां जटाधरणमौण्ड्यवतां ह्यवैव मोघाशिनामखिलशौचनिराकृतानाम्। तोयप्रदानपिण्डवह्निप्रकृतानां सम्भाषणादपि नरा नरकं प्रयान्ति" विष्णुपु० ३अंशे १८अ०।

पाषाण पु० पिनष्टि पिष-संचूर्णने आनच् पृषो०। १प्रस्तरे अमरः अस्यार्थे ङीप्। २पाषाणी (वाटखारा) २तुलामानपाषाणे स्त्री शब्दच०।

पाषाणगर्दभ पु० सुश्रुतोक्ते क्षुद्ररोगभेदे "कृतसन्धौ सशङ्कृतं शोफमल्परुजं स्थिरम्। पाषाणगर्दभं विद्याद् बन्धनाशयनात्मकम्"।

पाषाणचतुर्दशी स्त्री दशिकस्यरविके माघे शुक्लचतुर्दश्याम् तस्यां पाषाणाकारपिष्टकभोजनात्तस्यास्तन्नामता यथोक्तं भविष्ये "दशिके शुक्लपक्षे तु या पाषाणचतुर्दशी। तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः"। पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः" ति० त० रघु०।

पाषाणदारक पु० पाषाणं दारयति दारि-ण्वुल्। टङ्कास्त्रे (पाथरकाटाछेनी) अमरः। ल्यु। पाषाणदारणोऽप्यत्र।

पाषाणभेदन पु० पाषाणं भिनत्ति ल्यु। (हाडजोडा) १वृक्षभेदे राजनि० ण्वुल्। पाषाणभेदकोऽप्यत्र "पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी। अश्मभेदो हिमशिक्तः कषायो वस्तिशोधनः। भेदनो हन्ति दोषार्शो गुल्मकृच्छ्राश्मकृद्रुजः। योनिरोगान् प्रमेहांश्च प्लीहा शूलव्रणानि च" भावप्र०। २प्रस्तरभेदकमात्रे त्रि०।

पाषाणभेदिन् पु० पाषाणं भिनत्ति भिद्-णिनि (पाथुरचुर) १वृक्षभेदे रत्नमा० २शिलाभेदके त्रि० स्त्रियां ङीप्।

पाषी स्त्री पाश्यते बध्यतेऽनया पश-बन्धे करणे घञ्। १शक्त्यां २शिलायाञ्च अ० १।५।६।६भा०। पाषाणवद्दृढायाञ्च अ० ६।१०२।२भा०। [ऋ० ४।२१।६भा०।

पाष्य त्रि० पस्त्रे गृहे वसति यैत्रिकोऽण्। गृहवासिनि

पाहत पु० अपाहन्ति अप+आ+हन-ड अपेरकोपः पाहः स इव अतति अत-अच् अकः। ब्रह्मदारुवृक्षे शब्दच०।

पि गतौ तु० अक० पर० अनिट्। पियति। अपैषीत्। पिपाय। पिपयत्। [अमरः स्त्रियां ङीप्।

पिक पुंस्त्री० अपि कायति कै-क अपेरतोलोपः। कोकिले

पिकप्रिया स्त्री ६त०। महाजम्बूम्राम् राजनि०।

पिकबन्धु पु० ६त०। आम्रवृक्षे त्रिका०।

पिकराग पु० पिकोरज्यतेऽत्र रञ्ज-आधारे घञ् कुत्वम्। आम्रवृक्षे राजनि०।

पिकवल्लभ पु० ६त०। आम्रवृक्षे भावप्रकाशः।

पिकाक्ष पु० पिकस्याक्षीवास्तत्र समानवर्णत्वात् अच्। १रोचन्याम् शब्दच० पिकस्याक्षीवाक्षि अस्य बहुव्री०। २पिकतुल्यरक्तनेत्रयुक्ते त्रि० स्त्रियां प्रित्वात् ङीष्।

पिकाङ्ग पुंस्त्री० पिकस्याङ्गमिवाङ्गमस्य। पक्षिभेदे शब्दच०।

पिकानन्द पु० पिकमानन्दयति आ+नन्दि-अच् उप०स०। वसन्तकाले राजनि०।

पिकेक्षणा स्त्री पिकस्येक्षणं तदर्थोऽस्त्यस्याः अच्। १कोकिलाक्षे करवीरभेदे राजनि०। पिकस्येक्षणमिवेक्षणमस्य। २रक्तनेत्रे त्रि० स्त्रियां स्वाङ्गत्वेऽपि बहुव्रीहित्वात् न ङीष् किन्तु टाप्।

पिक्क पु० पिक इव कायति कै-क पृषो०। १हस्तिशावके शब्दमा०। २शक्त्यपरिमाणभेदे स्त्री इ०सं०८१अ०।

पिङ्ग पु० पिञ्ज-वर्णे-अच् न्यङ्क्वा० कुत्वम्। १मूषिके मेदि० स्त्रियां ङीष्। २दीपशिखाभे वर्णे पु० "पिङ्गो दीपशिखाभः स्यात् पिङ्गलः पद्मधूलिवत्"। ३तद्वति त्रि०

अमरः गौरा० पाठात् स्त्रियां ङीप् । कड़ारा० पाठात् अस्य पूर्वनिपातः । ४ऋषिभेदे पु०तेन प्रोक्तः कल्पः णिनि पैङ्गिन् तत्प्रोक्ते कल्पे । पिङ्ग+अस्त्यर्थे सिध्मा०वा लच् । पिङ्गल तदर्थयुते त्रि० पक्षे मतुप् मस्य वः । पिङ्गवत् तत्रार्थे त्रि० स्त्रियां ङीप् ।

पिङ्गकपिशा स्त्री पिङ्गा च कपिशा च "वर्णौवर्णेन" पा० स० । १तैलपायिकायां स्त्री हेमच० २पिङ्गवर्णयुते अथच कपिशवर्णयुते त्रि० । [नेत्रे त्रि०।

पिङ्गचक्षुस् पु० पिङ्गं चक्षुरस्य । कृष्णीरे हेमच० । २पिङ्ग-

पिङ्गजट पु० पिङ्गा जटाऽस्य । शिवे हेमच० ।

पिङ्गतीर्थ न० तीर्थभेदे भा०व० ८२अ० ।

पिङ्गल पु० पिङ्ग+सिध्मा०लच् पिङ्गं लाति-क वा । १नील-पीतमिश्रितवर्णे २तद्वति त्रि०अमरः । अस्मिन् परे घोषा० पूर्वपूर्वपदमाद्युदात्तम् । प्राकृतभाषयाच्छन्दोग्रन्थकारके ३नागभेदे ४रुद्रे ५सूर्यपारिषार्द्धिकभेदे ६निधिभेदे ७वा-नरे नकुले ८स्थावरविषभेदे च हेमच० । ९लुद्रोलूके राजनि०"देशभङ्गोऽथ दुर्भिक्षं समाजात् कलयाम्यहम् । पिङ्गले चारुपक्षाक्षि ! दुर्भिक्षं नर्मदातटे"इति ज्यो०त० चक्रे प्रभवादिवर्षमध्ये १०वर्षभेदे च । ११नागराजभेदे भा०आ०३५अ० । १२यक्षभेदे भा०व० २१०अ० । १३रीतौ पित्तले १४शिंशपायां च स्त्री राजनि० । १५वामनदिग्-गजस्य स्त्रियां कुसुदस्य १६करिण्यां मेदि० । १७कर्णि-कायां तन्त्रोक्ते १८नाडीभेदे हेमच० । ड़ाशब्दे दृश्यम्

पिङ्गलक पु० पिङ्गल+स्वार्थे क । पिङ्गलशब्दार्थे २यक्षभेदे पु० भा०स०१०अ० । ततः उपका० हस्वे अह्रस्वे च गोत्रप्रत्ययस्य बहुत्वे वा लुक् ।

पिङ्गला स्त्री १वेश्याभेदे संज्ञायां कन् । कापि अतद्वत्तम् । पिङ्गलिका बलाकायां त्रिका०

पिङ्गललौह न० नित्यकर्म० । पित्तले राजनि० ।

पिङ्गसार पु० पिङ्गं सारमस्य । हरितालें राजनि० ।

पिङ्गस्फटिक पु० नित्यकर्म० । गोमेदमणौ राजनि० ।

पिङ्गा स्त्री पिङ्ग-अस्त्यर्थे अच् । १गोरोचनायां २छिङ्गी ३नालिकायां ४चक्षिकायां मेदि० ५हरिद्रायां शब्दच० ६वंशरोचनायां राजनि० ।

पिङ्गाक्ष पुंस्त्री० पिङ्गं वर्णमस्त्यस्य अक्ष-व्याप्तौ अण् । (पा-ङ्गाक्ष) १मत्स्यभेदे स्त्रियां ङीष् । २पक्षीपतौ ३उत्तम-वर्णे न० मेदि० ४गोलिकायां स्त्री मेदि० ।

पिङ्गाक्ष्य पुंस्त्री पिङ्गमाक्षमस्य । (पाङ्गाक्ष) मत्स्यभेदे शब्दच० । स्त्रियां योगधर्मात् टाप् । २पिङ्गलचक्षुक्ते त्रि०

पिङ्गाच्च पु० पिङ्गे अक्षिणी यस्य बहुव्री० । १शिवे काशी० ख० १२अ० उक्ते २व्याधभेदे , ३पिङ्गवर्णनेत्रयुक्ते त्रि० स्त्रियां ङीप् । २कुमारानुचरमातृभेदे स्त्री भा०श० ४७०

पिङ्गी स्त्री पिङ्ग+अस्त्यर्थे अच् गौरा० ङीप् । शमीवृक्षे मेदि० । [नेत्रयुक्ते त्रि०।

पिङ्गेक्षण पु० पिङ्गमीक्षणमस्य । १शिवे हेमच० । २पिङ्ग-

पिचण्ड पु० अपि+चम-ड तस्य नेत्वम् अपेरकोप । १उदरे २पशोरवयवे च हेमच० । पृषो०दत्वम् । पिचण्डोऽप्यत्र ततः तुन्दादि० इलच् । पिचण्डिल उद्योदरे तुन्दिले त्रि० पक्षे ठन् । पिचण्डिक तत्रार्थे त्रि० "भोगाढ्या समजठरा निःस्नाः सुगन्धवस्त्रिभाः । वर्णोदरा दरिद्राः स्युः गरुड़े तस्यागुभस्तुचकत्वतस्तक्रभृ ।

पिचण्डक त्रि० पिचण्डे कुशलः आकर्षा० कन् । कौदरिके उदरपूर्त्तौ कुशले उदरम्भरौ ।

पिचव्य पु० पिचवे तूलाय साधुः यत् । कार्पासवृक्षे हेमच० ।

पिचु पु० पच-उ पृषो० । १कार्पासतूले (तूला) अमरः २कुष्ठ-भेदे ३कर्मे ४असुरभेदे मेदि० ५भैरवे ६शस्त्रभेदे विश्वः ।

पिचुक पु० पिचुरिव कायति कै-क । १मदनवृक्षे (मयना) रत्नमाला । ततः अस्त्यर्थे उत्करा० क । पिचुकीव त-द्युते देशादौ त्रि० ।

पिचुतूल न० ६त० । तूले (तुला) त्रिका० ।

पिचुमन्द(र्द) पु० पिचुं कुष्ठं मन्दयति अद्रति वा अच् उप०स० । निम्बवृक्षे(दौलः) अमरः (न्दालः) हेमच० ।

पिचुल पु०पिचुं लाति ला-क । १भ्रामुकवृक्षे (भाउ)२हस्तिवे ३जलवायसे च मेदि० ४तूले अमरटीका ।

पिञ्ज छेदे चु०उभ०सक० सेट् । पिञ्जयति ते अपिपिञ्जत् त ।

पिञ्जट न० पिञ्ज-अटन् । १शीसके २रङ्गे ३नेत्ररोगभेदे पु० ।

पिञ्जा स्त्री सुक्तापरिमाणभेदे वृ०सं० ८१अ० ।

पिञ्जिट पु० कीटभेदे कीटशब्दे २०५८पृ० सुश्रुतवाक्यम् ।

पिञ्जित न० सुश्रुतोक्ते काण्डभग्नभेदे "पिञ्जितं पृथुतां गत-मनल्पशोफम्" इति तल्लक्षणम् ।

पिच्छ बाधे तु०पर०सक०सेट । पिच्छति अपिच्छीत् पिपिच्छ

पिच्छ न० पिच्छ-अच् । १मयूरपुच्छे २चूडायां ३ला-कूले पु० मेदि० ४शालमलीवेष्टे स्त्री अमरः । ५पूले ६कटाक्षे ७कोषे ८मोक्षायां ९पङ्कौ १०भस्मखण्डे ११हयपदामवे च स्त्री मेदि० १२कोकिलायां १३फणि-नागायां हारा० । १४शिंशपावृक्षे च स्त्री शब्दच०

पिच्छवाण पु॰ पिच्छं वाण इव यस्य। श्येनखगे राजनि॰

पिच्छल पु॰ वासुकिवंश्ये सर्पभेदे भा॰आ॰ ५७अ॰।

पिच्छलदला स्त्री पिच्छ-कलच् तादृशं दलमस्याः। बदरीवृक्षे त्रिका॰।

पिच्छादि अस्त्यर्थे इलच्प्रत्ययनिमित्ते शब्दगणे यथा "पिच्छा उरस् धुवक ध्रुवक (जटाघटाकालाः क्षेमे) वर्ण उदक पङ्क प्रज्ञा"। [शिंशपादृक्षे शब्दच॰।

पिच्छितिका स्त्री पिच्छ-भावे क्तिन् तया कायति कै-क।

पिच्छिल त्रि॰ पिच्छ-बा॰ इल। (पिचल) १पदार्थे २भक्त॰ ३मण्डे तद्युक्ते च ४स्निग्धस्त्रपादौ। पिच्छा+अस्त्यर्थे पिच्छा॰ इलच्। ४चूडायुक्ते त्रि॰ ५श्लेष्मातकवृक्षे पु॰ राजनि॰ संज्ञायां कन्। पिच्छिलक धन्वनवृक्षे पु॰ राजनि॰।

पिच्छिलच्छदा स्त्री पिच्छिलः च्छदोऽस्याः। उपोदक्यां राजनि॰। [त्रिका॰।

पिच्छिलत्वच् पु॰पिच्छिला त्वक्ष्णा त्वच् यस्य। नागरङ्गवृक्षे

पिच्छिलसार पु॰पिच्छिलः सारोऽस्य। मोचरसे राजनि॰

पिच्छिला स्त्री पिच्छ-इल पिच्छा+अस्त्यर्थे इलच् वा। १पोतिकायां २शिंशपायां ३शाल्मलौ ४निम्बुभेदे मेदि॰ ५कोकिलाक्षे हृद्दविकाक्षुपे ७अतसां ८शूलीवृक्षे च राजनि॰ ९कटुकायां शब्दच॰।

पिज दीप्तौ वासे वधे (सामर्थ्ये) च अक॰ हिंसायां दाने च सक॰चु॰उभ॰सेट् इदित्। पिञ्जयति ते अपिपिञ्जत् त।

पिजवन पु॰ स्वर्जनीयजये विश्वामित्रयाज्ये नृपभेदे निरु॰ २।२४ दृशद्रम्। [तद्गोत्रापत्ये पुंस्त्री॰।

पिज्वल पु॰ ऋषिभेदे ततः अश्वा॰ गोत्रे फञ्। पैज्वलायन

पिञ्ज न॰ पिञ्ज-पृषो॰। पिञ्जशब्दार्थे हेमच॰।

पिञ्ज न॰ पिञ्ज-अच्। १बले २व्याकुले त्रि॰ मेदि॰ ३वधे अमरः ४कर्पूरभेदे पु॰ ५तूले ६हरिद्रायां स्त्री मेदि॰ ७हिंसायां स्त्री त्रिका॰। भावे अच्। ८जटायां स्त्री रत्नमाला।

पिञ्जट पु॰ पिञ्ज-अटन्। नेत्रमले (पिँचुटी) शब्दरत्ना॰।

पिञ्जन न॰ पिञ्ज-करणे ल्यु। तूलस्फोटने १यन्त्रभेदे। भावे ल्युट्। २तूलादेः स्फोटने।

पिञ्जर न॰ पिञ्ज-अरच्। १हरिताले अमरः २स्वर्णे मेदि॰ ३नागकेशरे राजनि॰ ४विहगादिबन्धनस्थाने ५देहास्थिवृन्दे च रामाश्रमः। ६अश्वभेदे पु॰ ७पीतरक्तवर्णे ८पीतवर्णे च पु॰ हेमच॰। ९तडति त्रि॰ १०सर्पभेदे पु॰ भा॰ आ॰ ३५अ॰। स्वार्थे क। पिञ्जरक तत्रार्थे न॰।

पिञ्जल न॰पिञ्ज-कलच्। १हरिताले २कुशपत्रे च धरणिः ३अत्यन्ताकुलसैन्यादौ पु॰ अमरः ४कुशान्तरवेष्टिते सापकुशपत्रद्वये स्त्री ङीप्, "एतदेव पिञ्जल्या लक्षणं सम्यदाहृतम् कर्मप्रदीपे तत्र पवित्रलक्षणाविदेशात्तथात्वम्।

पिञ्जाल न॰ पिञ्ज-बा॰ आलच्। स्वर्णे राजनि॰।

पिञ्जिका स्त्री पिञ्ज-ण्वुल् अतइत्वम्। तूलनालिकायां (पाँइज) त्रिका॰।

पिञ्जूल पु॰ पिञ्ज-ऊलच्। १कुशवर्त्तिकायाम् उज्ज्वलद॰। संज्ञायां कन्। पिञ्जूलक २ऋषिभेदे ततः। उपका॰ गोत्रप्रत्ययस्य बहुत्वे इन्द्रे अद्वन्द्वे च वा लुक्।

पिञ्जूष पु॰ पिञ्ज-बा॰ ऊषन्। कर्णमले हेमच॰।

पिञ्जेट पु॰ पिञ्जे अटति अट् अच् अलुक्स॰। नेत्रमले शब्दरत्ना॰।

पिञ्जोला स्त्री पिञ्ज-बा॰ ओल। पत्रशब्दे हारा॰[पिपेट।

पिट संहतौ ध्वनौ च भ्वा॰पर॰अक॰सेट्। पेटति अपेटीत्

पिट न॰पिट-क। १चाले त्रिका॰(पेटारा) २पेटके पु॰धरणिः

पिटक पु॰ पिट-बा॰ कन्। (पेटरा) वेत्रादिनिर्मिते समुद्गकाकारे पदार्थे अमरः। तेन हरति उत्सवसङ्घा॰ठञ्। पैटकिक पेटकेन हारिणि त्रि॰। २स्फोटके पु॰ मेदि॰। देहजातस्फोटशुभाशुभादिकं वृ॰सं॰ ५२अ॰ उक्तं यथा "सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये। ते क्रमशः प्रोक्तफला वर्णानामप्यजादीनाम्। सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्ध्नि सौभाग्यमाराद्दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलतां च। तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं प्रत्रव्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगाश्चातिचिन्ताम्। घोणागण्डे वसनसुतटाच्चोष्ठयोरन्नलाभं कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे। कन्धोरेवं गलकृतपटा भूषणान्यन्नपाने श्रोत्रे तद्भूषणगणमपि ज्ञानमात्मस्वरूपम्। शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता अयोघातं घातं सुततनयलाभं शुचमपि। प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्विनाशं कक्षोत्था विदधति धनानां वहुसुखम्। दुःखशत्रुनिचयस्य विघातं पृष्ठबाहुयुगजा रचयन्ति। संयमं च मणिबन्धनजाता भूषणाद्यसुपबाहुयुगोत्थाः। धनाप्तिं सौभाग्यं शुचमपि कराङ्गुल्यटरगाः सुपानाप्तिं नाभौ तदथ इह चोरैर्धनहृतिम्। धनं धान्यं नस्त्री युवतिमथ मेढ्रे सुततनयान् धनं सौभाग्यं

वा गुदहपणजाता विदधति। अर्वोयानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम्। शस्त्रेण जङ्घयोर्गुल्फे ऽध्वबन्धक्लेशदायिनः। स्फिक्पार्ष्णिपादजाता धननाशागम्यगमनमध्वानम्। बन्धनमङ्गुलिनिचयेऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम्। उत्पातगण्डपिटका दक्षिणतो वामतस्त्वभीघाताः। धन्या भवन्ति पुंसां तद्विपरीतास्तु नारीणाम्। इति पिटकविभागः प्रोक्तः व्यामूर्द्धतोऽयं व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः। भवति मशकलक्ष्मावर्तजन्मापि तद्वन्निगदितफलकारि प्राणिनां देहसंस्थम्"।

पिटक्या स्त्री पिटकानां समूहः पाशा० य। पिटकसमूहे

पिटङ्कोक्ती स्त्री पिटं कोकते कु–वा० ख सुम्। इन्द्रवारुण्यां रत्नमाला।

पिटाक पु० पिट–बा० काक। १मुनिभेदे ततः शिवा० अण् पैटाक तदपत्ये पुंस्त्री०। २पेटके च तेन हरति छत्रङ्गा० ष्ठन्। पैटाकिक तेन हारिणि त्रि०। संघार्थे पाशा० य। पिटाक्या तत्समूहे स्त्री।

पिट्टक न० पिट–ण्वुल् पृषो०। टनकिट्टके शब्दर०।

पिट्ट कुट्टनभेदे (पेटा) कुट्टनेनाधःप्रवेशने च० उभ० सक० सेट्। पिट्टयति ते अपिपिट्टत त। कात्या० श्रौ० ६।३।११कर्कः।

पिट्टिक त्रि० पिट्ट–इन् स्वार्थे क। कुट्टनेन अधःप्रवेशिते मेदि०। [पिपेठ।

पिठ क्रीडे अक० वधे सक० भ्वा० पर० सेट्। पेठति अपेठीत्

पिठर पु० पिठ–करन्। १स्थालभेदे त्रिका० २सुस्तायां ३मन्थानदण्डे च न० मेदि०। ४स्थाल्यां पुंस्त्री० स्त्रीत्वे ङीप्। अमरः। ५दानवभेदे पु० भा० स० ६अ०। संज्ञायां कन्। पिठरक ६नागभेदे पु० भा० आ० ३५अ०। पीलुपाकशङ्खे हस्थम्। [पैठीनसि तदपत्ये उपस्कृतिकारके ऋषिभेदे।

पिठीनस पु० ऋषिभेदे ऋ० ६।२६।६भा० तस्यापत्यम् इञ्

पिड राशीकरणे भ्वा० आत्म० सक० सेट् इदित्। पिण्डते अपिण्डिष्ट। अयं चुरादिरपि तत्रार्थे उभ०। पिण्डयति ते अपिपिण्डत् त।

पिडका स्त्री पीड्यति पीड–ण्वुल् क्षिपकादि० नि० कुष्ठाधिकारे पीड़ादायके क्षुद्रस्फोटके भावप्रका०। कुष्ठाटौ रोगभेदे नानाविधैव पिडका उक्ता तत्र भगन्दरे "अपक्वाः पिडकाः पक्वास्तु भगन्दराः" इत्युपक्रमे पित्तादिपिड़का उक्ता यथा "पित्तन्तु प्रकुपितमनिलेनाभिप्रेरितं पूर्ववदवस्थितं रक्ता तन्त्रीसुच्छ्रितासुद्रयोवाकारां पिडकां जनयति। सास्य चोषादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्चाग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवति" "श्लेष्मजालक्षणादिकं तु परिस्रावितृशब्दे दर्शितम् वायुजालक्षणादि तत्रोक्तं यथा

"वायुः प्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिगृह्यापो गत्वा पूर्ववदवस्थितः पादाङ्गुष्ठप्रमाणां सर्वलिङ्गां पिडका जनयति सास्य तोददाहकण्डूादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्च नानाविधवर्णमास्रावं स्रवति पूर्णनदीशम्बूकावर्त्तवच्चात्र सञ्चरन्ति वेदनाविशेषाः"। मेहजास्तु भावप्र० उक्ता यथा "शराविका कच्छपिका जालिनी विनताऽलजी। मसूरिका सर्षपिका पुत्रिणी सविदारिका। विद्रधिश्चेति पिडकाः प्रमेहापेक्षया दश। सन्धिमर्मसु जायन्ते मांसलेषु च धामसु। अन्नोन्नता च तद्रूपा निम्नमध्याः शराविका१। सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका२ बुधैः। जालिनी३ तीव्रदाहा तु मांसजालसमाहता। अविमादरजालोदा पृष्ठे वाप्युदरेऽपि वा। महती पिडका नीला सा बुधैर्विनता४ स्मृता। रक्ताऽसिता स्फोटचिता विज्ञेया त्वलजी५ बुधैः। मसूरदलसंस्थाना विज्ञेया तु मसूरिका६। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी७। महत्यल्पचिता ज्ञेया पिडकापि च पुत्रिणी८। विदारीकन्दवद्वृत्ता कठिना च विदारिका९। विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा। ये यन्मायाः स्मृता मेहास्तेषामेतास्तु तन्मयाः। विना प्रमेहमप्येता जायन्ते दुष्टमेदसः। तावच्चैता न लक्ष्यन्ते यावद्वास्तु परिग्रहः। गुदे हृदि शिरस्यंसे पृष्ठे मर्मसु चोत्थिताः१०। सोपद्रवा दुर्बलाग्नेः पिडकाः परिवर्जयेत्। लट्वास्रमांसमज्जोचमेहक्रिकामदज्वराः। विसर्पधर्मसंरोधाः पिड़कानामुपद्रवाः"।

कुष्ठाधिकारे भावप्र० पिडकानां क्षुद्रत्वे स्फोटत्वम् क्षुद्रत्वे पिडकत्वमुक्त्वा तल्लक्षणं उक्ता यथा

"यवाकारा सुकठिना ग्रथिता मांससंश्रिता। पिडका श्लेष्मवाताभ्यां ग्रथग्रन्थिरिति स्मृता। घनामवक्त्रां पिडकामुक्तां परिमण्डलाम्२। अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम्। विस्तृतास्यां महाटाहां पक्वोडुम्बरसन्निभाम्। परिमण्डलां पित्तकृतां विस्तृताख्यां तां विदुः। ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छ-

पोपमाः । कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिकाः बुधैः । ग्रीवांसकक्षाकरपादरेषे सन्धौ गले वा त्रिभिरेव दोषैः । यन्त्रिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतप्रवृद्धिः । सुखैरनेकैः श्रुतितोदवद्भिर्विसर्पवत् सर्पति चोग्रताप्यैः । वल्मीकप्रमाणैर्भिषजोविकारं निष्प्रत्यनीकं चिरजं विशेषात् । पद्मकर्णिकवन्मध्ये पिड़काभिः सदाचिताम् । इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् । मण्डलं वृत्तसंस्थानं सरक्तं पिडकाचितम् । इजाकरीं गर्दभिकां७ तां विद्याद् वातपित्तजाम् । वातश्लेष्मसमुद्भूतः श्वयथुर्हसमन्वितः । स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ८। वर्षाभ्यन्तरे जातां पिडकासमवेदनाम् । स्थिरां पनसिकाहन्तां विद्यादल्पप्रपाकिनीम् । विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् । दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः१० । पिडकासुत्तमाङ्गस्थां वृत्तामल्पुपरुग्ज्वराम् । सर्वोत्थिकां सर्वनिद्रां जानीयादिरिवेल्लिकाम्११ । बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् । पित्तप्रकोपसम्भूतां कक्षा१२मित्यभिनिर्दिशेत् । एकामितादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम् । तद्वतां पित्तकोपेन गन्धनामां१३ प्रचक्षते । कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः । अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः । सप्ताहाद्द्वादशाहा पक्षाद्वा घ्नन्ति मानवम् । तामग्निरोहिणीं१४ विद्यादसाध्या सन्निपाततः । नखमांसमधिष्ठाय वातपित्तञ्च देहिनाम् । कुरुते दाहपाकौ च व्याधिं चिप्य१५मादिशेत् । तदेवाल्पतरैर्दोषैः कुनखं परुषं१६ वदेत् । गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् । पादस्थामुपयीं१७ तान्तु विद्यादल्पप्रपाकिनीम् । विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु । विदारी१८मिति तां विद्यात् सर्वजां सर्वलक्षणाम्" ।

पिण्ड त्रि॰पिडि–अच् । १संहते २घने च ततः गौरा॰स्त्रियां ङीष् । तस्या अपत्यं कुर्वा॰ण्य । पैण्ड्य संहतायाः स्त्रियाः अपत्ये पुंस्त्री॰ । २बोले ३बले ५देहैकदेशे ६गटकैकदेशे ७देहमात्रे ८अन्नादिमये पितृभ्यो देये गोलाकारे ९पदार्थे १०गोले ११सिद्धके १२जलपुष्पे च पु॰ मेदि॰ १३छन्दे (अर्बुदपिण्डम्)१४कवले पु॰ हेमच॰ १५गजकुम्भे १६अमरः १७मटनद्रव्ये पु॰ राजनि॰ । १८शालीवने १९अयसि न॰मेदि॰। तत्र श्राद्धेषद्रव्यान्नादिनिर्मिते पदार्थे वामगानां पुंस्त्वेन प्रयोगः "पिण्डानोदाहरनास्तेषाम्" छन्दोगपरिशिष्टे पुंस्त्वेन प्रयोगात् । यजुर्वेदिभिः "अमावेतत्ते पिण्डं स्वधेति" यजुःश्राद्धप्रयोगात् क्लीबत्वम् । "तेभ्यःपिण्डं मया दत्तमक्षय्यमुपतिष्ठताम्" वायुपु॰प्रयोगः यजुर्वेदिविषयः । तत्र हेयद्रव्यादि श्रा॰त॰निरूपितं यथा "यावदन्नमुपादाय हविषोऽर्धकमर्धकम् । चरुणा सह सञ्चीय पिण्डदानमुपक्रमेत्" । श्राद्धार्थाद्धविषोऽन्नादेः सकाशाद् यावत् भक्ष्यभोजनव्यञ्जनादि ततोऽल्पाल्पं गृहीत्वा अग्नौकरणचरुणेन सह मिश्रीकृत्य पिण्डदानमारभेदित्यर्थः । एकस्मिन् पात्रेऽन्नं मध्वादिद्रव्येण मिश्रयेत् । "मध्वाज्यतिलसंयुक्तं सर्वव्यञ्जनसंयुतम् । उष्णमादाय पिण्डन्तु कृत्वा बिल्वफलोपमम् । दद्यात् पितामहादिभ्यो दर्भमूले यथाक्रमम्" इति ब्रह्मपुराण वचनात् । अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात् । "स्वपित्रे प्रथमं पिण्डं दद्याद्दक्षिणसंज्ञकौ । पितामहाय चैवाथ तत्पित्रे च ततःपरम् । दर्भमूले लेपभाजस्तर्पयेन्नेपवर्गकैः" ।

अत्र पिण्डमात्रस्य बिल्वफलोपमत्वश्रुतेः छन्दोगपरिशिष्टे च पित्रादीन् मातामहादीनुपक्रम्य "अवनेजनवत् पिण्डानकृत्वा बिल्वप्रमाणकानिति" श्रुतेश्च मामग यजुर्वेदिनोर्बिल्वप्रमाणकत्वम् "पृथङ्मातामहानाञ्च केचिदिच्छन्ति सत्तमा । तीन् पिण्डानानुपूर्व्येण साङ्कुशं सुदिवस्वतात्" इति वायुपुराणीयं शाख्यान्तरीयं श्रा॰त॰। वायवीये "मधुसर्पिस्तिलयुतांस्त्रीन् पिण्डान्निर्वपेद्बुधः । तिलस्त्री सेतौ "तिलमन्नं च पानीयं धूपं दीपं पयस्तथा । मधु सर्पिः खण्डयुक्तं पिण्डमष्टाङ्गमुच्यते"। याज्ञवल्क्यः "सर्वमन्नमुपादाय सतिलं दक्षिणामुखः । उच्छिष्ट सन्निधौ पिण्डान् दद्याद्वै पितृयज्ञवत्" । केचित्तु पिण्डेषु माषान् वर्जयन्ति "माषाः श्राद्धेषु वैश्याह्या वर्ज्याश्चैवाग्निपिण्डयोः । ब्राह्मणेषु यथा मद्यं तथा माषोऽग्निपिण्डयोः" इति । स्मृतिसारात् "माषान् सर्वत्र वै दद्यात् पिण्डेऽग्नौ च विवर्जयेत्" इति स्मृतेश्च । अथ पिण्डप्रमाणभेदः हेमाद्रावङ्गिराः "कपित्थबिल्वमात्रान् वा पिण्डान् दद्याद् विधानतः । कुक्कुटाण्डप्रमाणान् वामलकैर्बदरैः पुमान्" इति । तत्रैव धूम्रः "कपित्थस्य प्रमाणेन पिण्डान् दद्यात् समाहितः । तत्समं विकिरं दद्यात् पिण्डान्ते तु षडङ्गुलैः" । अन्त्येष्टिपद्धतौ भट्टास्तु "एकोद्दिष्टे सपिण्डे तु कपित्थन्तु विधीयते । नारिकेलप्रमाणन्तु प्रत्यब्दं मासिके तथा । तीर्थे दर्शे

च सप्ताग्रे कुक्कुटाण्डप्रमाणतः। महालये गयाश्राद्धे कुर्यादामलकोपमम्" इत्याह्नः कलिकायामाचार्यः "यत्र स्युर्बहवः पिण्डास्तत्र बिल्वफलोपमाः। यत्र चैको भवेत् पिण्डस्तत्र लाङ्गुलिसन्निभः"। प्रेतपिण्डस्तु दैर्घ्येण द्वादशाङ्गुल उच्यते" इति। वायवीये "पत्नी पिण्डांस्तु गृह्णीयात् त्रिवर्गस्य सहायिनी"। हेमाद्रौ लोगाक्षिः "महालये गयायां च प्रेतश्राद्धे दशाहिके। पिण्डशब्दप्रयोगः स्यादन्यत्र कीर्त्तयेत्" निःसि०

पिण्डदानद्रव्यभेदाः आग्नेये उक्ता यथा "पायसेनाज्ययुक्तेन सक्तुना चरुणा तथा। पिण्डदानं तण्डुलैश्च गोधूमैस्तिलमिश्रितैः" इति। देवीपुराणे च "सक्तुभिः पिण्डदानञ्च संयावैः पायसेन च। कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा" अथ प्रेतपिण्डसंख्या यद्यपि हेमाद्रौ पारस्करेण

"ब्राह्मणे दश पिण्डास्तु क्षत्रिये द्वादश स्मृताः। वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत् प्रकीर्त्तिता" इत्युक्तं तथापि "प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान् दद्याद्दशैव तु" इति। तेनैवोक्तेः सर्वेषां दशैव ज्ञेयाः। मदरत्नेऽप्येवम् तथा च हेमाद्रौ ब्राह्मपाद्मयोः "जात्युक्तागौचतुल्यांस्तु वर्णानां क्वचिदेव हि। देशधर्मान् पुरस्कृत्य प्रेतपिण्डान् वपन्त्यपि" इत्युक्त्वा विप्राद्येषु दशमपि पिण्डोत्कर्षः उक्तः "देयस्तु दशमः पिण्डो राज्ञां वै द्वादशेऽहनि। वैश्यानां वै पञ्चदशे देयस्तु दशमस्तथा। शूद्रस्य दशमः पिण्डो मासे पूर्णेऽङ्गि दीयते"। प्रेतपिण्डदानस्थानम् "असंस्कृतानां भूमौ पिण्डं दद्यात् संस्कृतानां कुशेषु" इति याज्ञवल्क्योक्तम् मिताक्षरायां "कृत्यन्तरे भूमौ माल्यं पिण्डं पानीयसपले वा दद्युः" पिण्डं प्रेतपिण्डम्।

पुनःपृच्छः "फलमूलैश्च पयसा शाकेन च गुडेन च। तिलमिश्रन्तु दर्भेषु पिण्डं दक्षिणतो हरेत्। तृप्तौ प्रसेकं पुष्पं च धूपं दीपं तथैव च। शालिनासक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमे नियतं द्रव्यं तदेव स्याद्दशाहिकम्"। पिण्डशब्दस्य देहतदेकदेशपरता तु असपिण्डशब्दे उक्ता। दायभागमते तु निर्वाप्यपिण्डपरतेति। भावे घञ्। २०संघात पिण्डारकशब्दे दृश्यम्

पिण्डक पु० पिण्ड इव कायति कै–क। १पिण्डालो स्वार्थे क। २सिद्धकगन्धद्रव्ये ३बोले ४पिण्डमूले मूलभेदे राजनि०।

पिण्डकन्द पु० पिण्डाकारः कन्दः। पिण्डालो राजनि०।

पिण्डखर्जूर पु० पिण्डाख्यः खर्जूरः। स्वनामख्याते वृक्षे (छोहारा) प्रसिद्धे २खर्जूरे स्त्री ङीष्। अथ पिण्डखर्जूरीभेदः "सुनेपाली तु मृदुना बलिहीनकफला च सा। सुनेपाली भ्रमश्वासदाहमूर्च्छास्रपित्तनुत्" भावप्र०। "पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्। खर्जूरी गोस्तनाकारा परादुद्वीपादिहागता। जायते पश्चिमे देशे सा च्छोहारेति कीर्त्त्यते। खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः। स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु। तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भि एकदम्। कोष्ठमारुतकृद्बल्यं बाह्यवातकफापहम्। ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम्। मदमूर्च्छाभ्रमृतृपित्तमदोद्भूतगदान्नहृत्। मृदुतीभ्यां गुणैरल्पं स्वल्पखर्जूरिका स्मृता। खर्जूरी तरुतोयन्तु मदपित्तकरं भवेत्। वातश्लेष्महरं रूक्ष्यं दीपनं बलशुक्रकृत्"।

पिण्डगोस पु० गां जलं सनोति सन–ड पिण्डः संहतो गोसः। यन्त्ररसे रसनाथः।

पिण्डतर्कुक पु० पिण्डं तर्कयति तर्क–बा० उक। पिण्डलेपभागिषु वृद्धप्रपितामहादिषु त्रिषु "प्रपितामहाः दक्षिणतः पृष्ठतः पिण्डतर्कुकाः" गृह्यसाम०।

पिण्डतैलक पु० पिण्डं संहतं तैलं यस्य कप्। तुरस्के गन्धद्रव्ये राजनि०।

पिण्डद पु० पिण्डं ददाति दा–क। श्राद्धे पिण्डदातरि पुत्रादौ "पिण्डदोऽंशहरश्चैव पूर्वाभावे परः परः" याज्ञ० तच् पिण्डदातृ तत्रार्थे "उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः" मनुः।

पिण्डपट न० पिण्डस्य संहतस्य पटम्। १अङ्गभेदे ज्योतिः गृहशब्दे दृश्यम्। २पिण्डस्थाने च।

पिण्डपाद पुंस्त्री० पिण्ड इव पादोऽस्य। गजे त्रिका०। स्त्रियां जातित्वात् ङीष्।

पिण्डपितृयज्ञ पु० पिण्डैः पितॄणां यज्ञः। साग्निकगृहस्थकर्त्तव्ये पितृमुद्देश्यके पिण्डदानात्मके यज्ञभेदे आश्व० श्रौ० २६ सूत्रादौ कात्या० श्रौ० ४।१।१सूत्रादौ च दृश्यम्। तत्कालश्च "अपराह्णे पिण्डपितृयज्ञस्य दर्शनेऽमावास्यायाम्" तत्रैव प्रथमसूत्रम्।

पिण्डपुष्प न० पिण्डं संहतं पुष्पम्। १अशोकपुष्पे २जवापुष्पे ३पद्मपुष्पे ४तगरपुष्पे च मेदि० शब्दच०।

पिण्डपुष्पक पु० पिण्डेन संहतेन पुष्पेण कायति कै–क। शालूकवृक्षे शब्दमाला।

पिण्डफला स्त्री पिण्डमिव फलं यस्याः । कटुतुम्बग्राम् जटा०

पिण्डमुस्ता स्त्री पिण्डा संहता मुस्ता । नागरमुस्तायाम् राजनि० ।

पिण्डमूल न० पिण्डमिव मूलमस्य । गर्जरे (गाँजर) राजनि०

पिण्डयज्ञ पु० पिण्डेन यज्ञः । पिण्डदानरूपे यज्ञरूपे श्राद्धे याज्ञ० १।१६ पिण्डपितृयज्ञे च ।

पिण्डल्ल पिंडि–बा० कलच् । सेतौ हारा० ।

पिण्डलेप पु० पिण्डस्य लेपः करसंलग्नांशभेदः । करमस्ये पिण्डांशभेदे तद्भागिनश्च दत्तप्रपितामहादयः त्रयः यथाह "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" मनुवाक्यम् "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्" कुल्लू० धृत मातृस्वचनम् ।

पिण्डस पु० पिण्डं सनति यज्ञे सन–सम्भक्तौ सम्प्रदाने वा० ड । परपिण्डोपजीविनि भिक्षोपजीविनि शब्दर०

पिण्डसम्बन्ध पु० पिण्डेन देहेन देयपिण्डेन वा सम्बन्धः । देहेन सह जन्यजनकतारूपे १सम्बन्धे मिता० देयपिण्डस्य २दातृत्वभोक्तृत्वान्यतरसम्बन्धे च दायभागादयः ।

पिण्डसेक्तृ पु० सर्पभेदे भा० आ० ५७अ० ।

पिण्डा स्त्री पिण्ड–अच् । १पिण्डावसे २कस्तूरीभेदे च राजनि० । ३शंखपत्र्यां भावप्र० ।

पिण्डात पु० पिण्ड इवाततति अत–सातत्ये अच् । पिण्डं संहननं वा अततति+अत–गतौ अच् । सिल्लके पु० ।

पिण्डान्वाहार्य्यक न० पिण्डानां पिण्डपितृयज्ञानां पश्चादाह्रियते अनु+आ+हृ–ण्यत् स्वार्थे क । पार्वणश्राद्धे "पिण्डान्वाहार्य्यकं श्राद्धं कुर्यान्मासानुमासिकम्" मनुः ।

पिण्डाभ पु० पिण्डः संघात इवाभाति आ+भा क । सिल्लके रत्नमालायां पाठान्तरम् ।

पिण्डाभ्र न० अभ्रस्येदम् अण् आभ्रं पिण्डमिव घनमाभ्रम् । मेघजातकरकायाम् शब्दच० । [राजनि० ।

पिण्डायस न० पिण्डं संहतमयः अच् समा० । तीक्ष्णायसे

पिण्डार पु० पिण्डं संघातमृच्छति ऋ–अण् । १विकङ्कत वृक्षे राजनि० २चणके ३गोपे ४महिषीरक्षके ५कुमभेदे मेदि० ६शाकभेदे न० "पिण्डारं शीतलं बल्यं पित्तनाशि रुचिप्रदम् । पाके लघु विशेषेण विषशान्तिकरं मतम्" भावप्र० । ७सर्पभेदे पु० भा० उ० १०२अ० स्वार्थे क पिण्डारक तत्रार्थे दनागभेदे भा० आ० ३६अ० । ८बलरामानुजभेदे पु० हरिवं० ३६अ० १०तीर्थभेदे न० "पिण्डारके नरः स्नात्वा लभेद्रुक्मवद्भवेत्" भा० व० ८२अ० ।

पिण्डालु पु० पिण्डाकार आलुः । (गोलआलु) राजनि० । १कन्दभेदे २कन्दगुडूच्याञ्च स्वार्थे क अत्रैव । "पिण्डालुर्मधुरः शीतः मूत्रकृच्छ्रविनाशनः । दाहशोषप्रमेहघ्नो हृद्यः सन्तर्पणो गुरुः" राजनि० संज्ञायां कन् । (चुर्वाडआलु) आलुभेदे न० "पिण्डालुकं कफहरं गुरु वातप्रकोपकृत्" राजवल्लभः ।

पिण्डाह्वा स्त्री पिण्डां कस्तूरीभेदमाह्वयते सर्दते गन्धेन आ+ह्वे–क । नाडीहिङ्गुनि राजनि० ।

पिण्डि(ण्डी) स्त्री पिंडि–इन् वा ङीप् स्वार्थे क वा । सर्वकाष्ठासङ्घनाधारे रथचक्रमध्ये स्थाने १रथनाभौ अमरः । २पीठे जानुनोऽधःस्थे ३मांसलप्रदेशे च हेमच० ४श्वेतास्थौ राजनि० ५देवादेः पीठिकाभेदे तल्लक्षणादि मत्स्यपु० २५२अ० उक्तं यथा

"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्वशः । पीठोच्छ्रायं यथायच्च भागान् षोडश कारयेत् । भूमावेकः प्रविष्टः स्यात्तुर्यभर्जगती मता । वृत्तोभागस्तथैकः स्यात् वृत्तपट्टस्य भागतः । भागैस्त्रिभिस्तथा कण्ठः कण्ठपट्टस्त्रिभागतः । भागाभ्यामूर्द्ध्वपट्टस्य शेषभागेन पट्टिका । प्रविष्टं भागमेकैकं जगती यावदेव तु । निर्गमस्तु पुनस्तस्य यावद्वै शेषपट्टिका । वारिनिर्गमणार्थन्तु तत्र कार्या प्रणालिका । पीठिकानान्तु सर्वाणामेतत्सामान्यलक्षणम् । विशेषान् देवताभेदान् शृणुध्वं द्विजसत्तमाः ।। स्थण्डिला वाथ वापी वा यक्षी देवी च मण्डला । पूर्णचन्द्रा च वज्री च पद्मा वार्धशशी तथा । त्रिकोणा दशमी तासां स्वस्थानं वा निबोधत । स्थण्डिला१ चतुरस्रा तु वर्जिता मेखलादिभिः । वापी२ द्विमेखला ज्ञेया यक्षी३ चैव त्रिमेखला । चतुरस्रायता वेदी४ न तां लिङ्गेषु योजयेत् । मण्डला५ वर्तुला या तु मेखलाभिर्गणप्रिया । रक्ता द्विमेखला मध्ये पूर्णचन्द्रा६ तु सा भवेत् । मेखलात्रयसंयुक्ता कडसा वज्रिका७ भवेत् । षोडशास्रा भवेत्पद्मा८ किञ्चिद्वृत्ता तु मूलतः । तथैव धनुराकारा सार्द्धचन्द्रा९ प्रशस्यते । त्रिशूलसदृशी१०तद्वत् प्रशस्तलक्षणान्विता । परिवेषं त्रिभागेण निर्गमं तत्र कारयेत् । विस्तारं तत्प्रमाणञ्च मूले चाग्रे ततोऽर्द्धतः । जलमार्गस्य कर्त्तव्यस्त्रिभागेण सुशोभनः । लिङ्गस्यार्द्धत्रिभागेण स्थौल्येन समधिष्ठिता । मेखला तत्त्रिभागेण ज्ञातव्यैव प्रमाणतः । अथ वा

घाटडीनन्तु शोभनं कारयेत्सदा । उत्तरस्यां प्रणालञ्च प्रमाणादधिकारवेत् । स्थण्डिलायामथारोग्यं धनं धान्यञ्च पुष्कलम् । गोप्रदा च भवेद्यज्ञी वेदी सम्पत्प्रदा भवेत् । मण्डलायां भवेत्कीर्त्तिर्वरदा पूर्णचन्द्रिका । आयुःप्रदा भवेद्यज्ञी पद्मा सौभाग्यदा भवेत् । पुत्रप्रदार्द्धचन्द्रा स्यात्त्रिकोणा शत्रुनाशिनी । देवस्य यजनार्थन्तु पीठिका दश कीर्त्तिताः । शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीं तथा । दारुजे दारुजां कुर्यात् मिश्रे मिश्रां तथैव च । नाम्न्योर्निस्तु कर्तव्या सदा शुभफलेप्सुभिः । अङ्गायामसमन्दैर्घ्यं जिह्वायामसमन्तथा । यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत् । एतत्सर्वं समाख्यातं समासात् पीठलक्षणम्" ।

पिण्डित त्रि॰ पिण्ड–क्त । १संहते २गणिते मेदि॰ ३गुणिते ४तुरस्के पु॰ राजनि॰। [२गणके त्रि॰ उणादि॰ ।

पिण्डिल पु॰पिण्ड+अस्त्यर्थे–इलच् । सेतौ शब्दच॰ ।

पिण्डी स्त्री पिण्ड–इन् ङीप् । १पिण्डीतगरे २अलाबुलतायां ३खर्जूरभेदे (छोहारा) मेदि॰ ४तत्त्वज्ञानार्थोपदेशे धरणिः ।

पिण्डीजङ्घ पु॰ ऋषिभेदे । तस्य गोत्रापत्यम् इञ् । पैण्डीजङ्घि तदपत्ये बहुत्वे तु अस्त्रियां वस्का॰ तस्य लुक् ।

पिण्डीतक पु॰ पिण्डीं स्वल्पपिण्डं फलपुष्पद्वारा तकति अनुकरोति तक–ण्वुल् अच् । १मदनवृक्षे २तगरे च अमरः ३फणिजझके विश्वः ।

पिण्डीतगर पु॰ पिण्ड्या स्वल्पपिण्डेनोपलक्षितस्तगरः । तगरवृक्षे त्रिका॰ । [अशोकवृक्षे राजनि॰।

पिण्डीपुष्प पु॰पिण्ड्या उपलक्षितं पुष्पमस्य । संहतस्तबकपुष्पे

पिण्डीर पु॰ पिण्डं पिण्डाकारं फलमीरयति ईर–अण् । १दाडिमवृक्षे त्रिका॰२नीरमे हारा॰।३क्षिण्डीरे रायमु॰

पिण्डीशूर पु॰ पिण्ड्यां भोजने एव नान्यत्र शूरः । गेहेनर्द्दिन युद्धादावसमर्थे हेमच॰। भट्टिः ५।८७ उदा॰

पिण्या स्त्री पण्यते क्रूयते रोगहन्तृत्वेन यत् पृषो॰इत्वम् ज्योतिष्मतीलतायाम् अमरः ।

पिण्याक पु॰न॰ पण–व्यवहारे आकन् नि॰ । १तिलकल्के २क्षिङ्कुनि ३वाङ्गीके च । ४क्षिङ्कुके पुंस्त्री॰ मेदि॰। स्त्रीत्वे ङीप् तस्य व्रतार्थभक्षणे न दोषः मनुः ११।९२ अन्यत्र दोषो यथा "पिण्याकं भक्षयित्वा तु यो वै आमुपसर्पति । तस्य वै ब्रह्मणो ब्रध्नि ! प्रायश्चित्तं दुर्योधनम् । उलूको दृश वर्षाणि कृष्णसर्पो यमालयम् । जायते मानवस्तत्र मम कर्मपारायणः" वराहपु॰ ।

पितरिशूर पु॰ पाल्ये समिता॰ अलुक्स॰ । पितृविषये-एव शूरे नान्यत्रेति । लेपेऽस्य प्रयोगः ।

पितापुत्र पु॰द्वि॰व॰ द्वन्द्वे पूर्वपदे आनङ् । पितरि पुत्रे च

पितामह पु॰ पितुः पिता पितृ+डामह । पितुः पितरि पितृपितादयोऽप्यत्र । तत्पत्न्यां स्त्री॰ ङीप् अमरः ।

पितु पु॰ पा–रक्षणे तुन् पृषो॰ । अन्ने निघण्टुः । पातेर्वा पिबतेः पायतेर्वा" निरु॰९।२४। ऋ॰ १०।७६।५ उदा॰।

पितुःपुत्र पु॰ ६त॰ अलुक्स॰। विख्यातात् (बापेर मत बेटा) पितुरुत्पन्ने पुत्रे क्षेपे तु वा अलुक्स॰।

पितुःस्व(ष्व)सृ स्त्री ६त॰अलुक्स॰ वा षत्वम् । पितृभगिन्यां तस्या अपत्यं ढक् । पितुःस्व(ष्व)सीय तदपत्ये पुंस्त्री॰।

पितृ पु॰ पाति रक्षति पा–तृच् नि॰ । १जनके । मातृ सहोक्तौ पितृशेषः द्वि॰व॰। मातापित्रोः अमरः । पञ्च॰ पितृशब्दे ४१८८पृ॰दृश्यम् । पितरः श्राद्धदेवता इत्युक्तेः श्राद्धोद्देश्ये २प्राग्नपितृलोकके । पितृलोकः पितृयाणम्

पितृक त्रि॰ पैतृक+पृषो॰ । १पितुरागते शब्दमा॰। पितृदत्त एव ठच् वा दत्तलोपः । २पितृदत्ते च ।

पितृकर्मन् न॰ पितृनुद्दिश्य कर्म । श्राद्धादौ मनुः ३।२५२ स्त्री॰। पितृकार्य्यादयोऽप्यत्र ।

पितृकल्प पु॰ पितॄनुद्दिश्य कल्पो विधानम् । पितॄणाम् श्राद्धादिकर्मणि । हरिवं॰ १७अ॰ उक्ते पितॄणामुत्पत्त्यादिज्ञापके २अन्यभेदे च हरिवं॰२२अ॰ । ईषदूने कल्पप् । ३पितृतुल्ये च

पितृकानन न॰ ७त॰। श्मशाने जटा॰ ।

पितृकुल्या स्त्री पितृकृता कुल्या । तीर्थभेदे भा॰व॰५७अ॰।

पितृगण पु॰ ६त॰। अग्निष्वात्तादिषु "मनोर्हिरण्यगर्भस्य ये मरीच्यादयः सुताः । तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः । विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः । अग्निष्वात्ताश्च देवानां मारीच्या लोक विश्रुताः । दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम् । सुपर्णानां नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः । सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः । सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः । पुलस्त्यस्याज्यपाः पुत्रा वशिष्ठस्य सुकालिनः । अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा । अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् । य एते तु गणा ह्यस्याः पितॄणां परिकी-

र्त्तिताः । तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् । एते च दिव्यपितरः ।

पितृगाथा स्त्री पितृभिः पठिता गाथा । पितृभिः पठिते श्लोकसमुदाये मार्क॰पु॰ २२अ॰ यथा
"पितृगाथास्तथैवात्र गीयन्ते ब्रह्मवादिभिः । या गीताः पितृभिः पूर्वमेतस्यासीन्महीपतेः । कदा नः सन्ततावग्र्यः कश्चिद्भविता सुतः । यो दोग्धिभुक्तशेषान्नो भुवि पिण्डं प्रदास्यति । गयायामथ वा पिण्डं खड्गमांसं महाहविः । कालशाकं तिलाढ्यं वा लवणं मासतृप्तये । वैश्वदेवस्य सौम्यस्य खड्गमांसं परं हविः । विधाय वर्जं स्वर्गत्वा आस्थ्यर्थमाप्नुयामहे । दद्यात् श्राद्धं त्रयोदश्यां मघासु च यथाविधि । मधुसर्पिः समायुक्तं पायसं दक्षिणायने" । अन्या अपि पितृगाथा शास्त्रान्तरे द्रष्टव्याः ।

पितृगृह न॰ ६त॰ । श्मशाने हेमच॰ ।

पितृग्रह पु॰ स्कन्दानुचरे ग्रहभेदे ग्रहशब्दे २७४५पृ॰ सुश्रुतवाक्ये १७७६ भारतवाक्ये च द्रष्टव्यम् ।

पितृतर्पण न॰ ६त॰ । १पितॄणां जलदानरूपे तृप्तिजनकव्यापारभेदे । करणे ल्युट् । २पितृतीर्थे शब्दच॰ ३तिले राजनि॰ ।

पितृतिथि पुंस्त्री॰ पितृप्रिया तिथिः । अमावास्यावान् ।

पितृतीर्थ न॰पितृप्रियं तीर्थम् शा॰त॰। "अन्तराङ्गुष्ठदेशिन्योः पितॄणां तीर्थमुत्तमम्" कूर्मपु॰ उक्ते १तर्जन्यङ्गुष्ठमध्यस्थाने अमरः। २गयादौ तीर्थे च यथोक्तं मत्स्यपु॰२२अ॰ "पितृतीर्थं मया नाम सर्वतीर्थवरं शुभम् । यत्रास्ते देवदेवेशः स्वयमेव पितामहः । तत्रैषा पितृभिर्गीता गाथा भागवभीष्मभिः । एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् । तथा वाराणसी२ पुण्या पितॄणां वल्लभा सदा । यत्राविमुक्तसान्निध्यं मुक्तिमुक्तिफलप्रदम् । पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम्३ । पितृतीर्थं प्रयाग४न्तु सर्वकामफलप्रदम् । वटेश्वर४स्तु भगवान् माधवेन समन्वितः । योगनिद्राश्रयस्तद्वत् सदा वसति केशवः । दशाश्वमेधिकं६पुण्यं गङ्गाद्वारं७ तथैव च । नन्दाद्य ललिता८ तद्वत्तीर्थं मायापुरी९ शुभा । तथा मित्रपदं११ नाम ततः केदार१२मुत्तमम् । गङ्गासागर१३मित्याहुः सर्वतीर्थमयं शुभम् । तीर्थं ब्रह्मसर१४स्तद्वच्छतद्रुसलिले शुभे । तीर्थन्तु नैमिषं१५ नाम सर्वतीर्थफलप्रदम्। गङ्गोद्भेदा१६स्तु गोमत्यां यत्रोद्भूतः सनातनः । तथा यज्ञवराह१७स्तु देवदेवश्च भूवभ्यत् । यत्र तत्काञ्चनं द्वारमष्टाद्यमजो हरः । नेमिस्तु हरिचक्रस्य शीर्णा यत्राभवत्पुरा । तदेतत्सैमिषारण्यं १८ सर्वतीर्थनिषेवितम् । देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् । यः प्रयाति स पूतात्मा नारायणपदं व्रजेत् । कृतशौचं महा पुण्यं सर्वपापनिषूदनम । तत्रास्ते नारसिंहस्तु स्वयमेव जनार्द्दनः । तीर्थमिक्षुमती१९ नाम पितॄणां वल्लभं सदा । सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा । कुरुक्षेत्रं२० महापुण्यं सर्वतीर्थसमन्वितम् । तथा च सरयूः २१ पुण्या सर्वदेवनमस्कृता । इरावती२२ नदी तद्वत् पितृतीर्थाधिवासिनी । यमुना२३ देविका२४ क्षान्ती२५ चन्द्रभागा२६ दृषद्वती२७ । नदी वेणुमती२८ पुण्या परा वेत्रवती२९ तथा । पितॄणां वल्लभा ह्येताः श्राद्धे कोटीगुणा मताः । जम्बूमार्गं३० महापुण्यं यत्र मार्गो हि उच्यते । अद्यापि पितृतीर्थं तत्सर्वकामफलप्रदम् । नीलकण्ठमिति३१ ख्यातं पितृतीर्थं द्विजोत्तमाः ! । तथा रुद्रसरः३२ पुण्यं सरोमानस३३मेव च । मन्दाकिनी३४ तथाऽच्छोदा३५ विपाशा३६ च सरस्वती३७ । पूर्वमित्रपदं३८ तद्वद्दानार्थं३९ महाफलम् । शिप्रा४० नदी महाकाल४१स्तथाकालञ्जरं४२ शुभम् । वंशोद्भेदं४३ हरोद्भेदं४४ गङ्गोद्भेदं४५ महाफलम् । भद्रेश्वरं४६ विष्णुपदं४७ नर्मदाद्वार४८मेव च । गयापिण्डप्रदानेन समान्याहुर्महर्षयः । एतानि पितृतीर्थानि सर्वपापहराणि च । स्मरणादपि लोकानां किंतु श्राद्धकृतां नृणाम् । ओङ्कारं४९ पितृतीर्थञ्च कावेरी५० कपिलोदकम्५१ । सम्भेदं५२ खण्डवेणायास्तथैवामरकण्टकम्५३ । कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् । शुक्रतीर्थं५४ञ्च विख्यातं तीर्थं सोमेश्वरं५५ परम् । सर्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् । श्राद्धे दाने तथा होमे स्वाध्याये जपसन्निधौ । कायावरोहणं५६ नाम तथा चर्मण्वती५७ नदी । गोमती५८ वरुणा५९ तत्तद्वत्तीर्थमौशनस६०म्परम् । भैरवं६१ भृगुतुङ्गं६२च गौरीतीर्थं६३मनुत्तमम् । तीर्थं वैनायकं६४ नाम भद्रेश्वरं६५मतःपरम् । तथा पापहरं६६ नाम पुण्याय तपती६७ नदी । मूलतापी६८पयोष्णी६९ च पयोष्णीसङ्गम७०स्तथा । महाबोधिः७१ पाटला७२ च नागतीर्थ७३मवन्तिका७४ ।

तथा वेणा७५ नदी पुण्या महाशालं ७६तथैव च। महारुद्रं७७ महालिङ्गं दशार्णा७८ च नदी शुभा। शतरुद्रा७९ शताङ्गाद० च तथा विश्वपदं८१ परम्। अङ्गारवाहिकाद८२ तद्वद्दो च शोणद८३ वर्षरौद८४। कालिकाद८५ च नदी पुण्या वितस्ताऽद८६ तो नदी तथा। एतानि पितृतीर्थानि यस्यन्ते स्नानदानयोः। श्राद्धमेतेषु यद्दत्तन्तदनन्तफलं स्मृतम्। क्षोणीद८७ वाटनदीद८८ धाराद८९सरित् क्षीरनदीद९० तथा। गोकर्णं९१ गजकर्णद९२च तथा च पुरुषोत्तमः९३। द्वारकाद९४ कृष्णतीर्थच९५ तथार्बुदसरस्वतीद९६। नदी मणिमतीद९७ नाम तथा च गिरिकर्णिकाद९८। धूतपापंद९९ तथा तीर्थं समुद्रो१०० दक्षिणस्तथा। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। तीर्थं मेघकरं१०१ नाम स्वयमेव जनार्दनः। यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थितः। तथा मन्दोदरीतीर्थं१०२ तीर्थं चम्पा१०३नदी शुभा। तथा सामलनाथ१०४च महाशालनदी१०५ तथा। चक्रवाकं१०६ चर्मकोटं१०७ तथा जम्बूश्वरं१०८ महत्। अर्जुनं१०९ त्रिपुरं११० चैव सिद्धेश्वर१११मतःपरम्। श्रीशैलं११२ शाङ्करं११३ तीर्थं नारसिंह११४मतःपरम्। महेन्द्र११५च तथा पुण्यमथ श्रीरङ्गसंज्ञितम्११६। एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम्। दर्शनादपि चैतानि सद्यः पापहराणि वै। तुङ्गभद्रा११७ नदी पुण्या तथा भीमरथी११८ सरित्। भीमेश्वरं११९ कृष्णवेणा१२० कावेरी१२१ कुडमला१२२ नदी। नदी गोदावरी१२३ नाम त्रिसन्ध्यातीर्थं१२४मुत्तमम्। तीर्थं त्र्यम्बकं१२५ नाम सर्वतीर्थनमस्कृतम्। यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः। श्राद्धमेतेषु सर्वेषु कोटिकोटिगुणं भवेत्। स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः!। श्रीपर्णी१२६ ताम्रपर्णी१२७ च जयाबीर्थं१२८मनुत्तमम्। तथा मत्स्यनदी१२९ पुण्या शिवधारं१३० तथैव च। भद्रतीर्थं१३१च विख्यातं पम्पातीर्थं१३२च शाश्वतम्। पुण्यं रामेश्वरं१३३ तद्वेलापुर१३४मलमृपुर१३५म्। अङ्गभूत१३६च विख्यातमानन्दकमलं पुरम्१३७। व्याघ्रातकेश्वरं१३८ तद्वदेकाम्रक१३९मतःपरम्। गोवर्धनं१४० हरिश्चन्द्रं१४१ लघुचन्द्रं१४२ पृथूदकम्१४३। सहस्राक्षं१४४ हिरण्याक्ष१४५ तथा च कद्रवी१४६ नदी। रामाधिवास१४७ स्तथापि तथा सौमित्रिसङ्गमः१४८। इन्द्रकीलं१४९महानाट१५०स्तथा च प्रियमेलकम्१५१। एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु। 'एतेषु सर्वदेवानां सान्निध्यं दृश्यते यतः। दानमेतेषु सर्वेषु दत्तं कोटिशताधिकम्। बाहुदा१५२ च नदी पुण्या तथा सिद्धवनं१५३ शुभम्। तीर्थं पाशुपतं१५४ नाम नदी पार्वतिका१५५ शुभा। श्राद्धमेतेषु सर्वेषु दत्तं कोटिशतोत्तरम्। तथैव पितृतीर्थन्तु यत्र गोदावरी नदी। यूता त्रिङ्गमहस्रेण मर्त्यानरजलावहा१५६। जामदग्न्यस्य तत्तीर्थं१५७क्रमादायातमुत्तमम्। प्रतीकस्य भयाद्विप्रा यत्र गोदावरी नदी। तत्तीर्थं हव्यकव्यानामप्सरोयुगसंज्ञितम्१५८। श्राद्धाग्निकार्य्यदानेषु तथा कोटिशताधिकम्। तथा महाकालिङ्ग१५९च राघवेश्वर१६० मुत्तमम्। सेन्द्रफेना१६१ नदी पुण्या यत्रेन्द्रः पतितः पुरा। निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्नवान्। तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत्। तीर्थन्तु पुष्करं१६२ नाम शालग्रामं१६३ तथैव च। सोमपान१६४च विख्यातं यत्र वैश्वानरालयः। तीर्थं सारस्वतं१६५ नाम स्वामितीर्थं१६६ तथैव च। मन्दरा१६७ नदी पुण्या कौशिकी१६८ चन्द्रिका१६९ तथा। वेदर्भा१७०चाथ वैरा१७१ च पयोष्णी१७२ प्राङ्मुखा परा। कावेरी१७३ चोत्तरा पुण्या तथा जालन्धरी१७४ गिरिः। एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते। लोहदण्डं१७५ तथा तीर्थं चित्रकूट१७६ स्तथैव च। विन्ध्ययोग१६७च गङ्गायास्तथा नदीतटं१७८ शुभम्। कुब्जाभ्र१७९न्तु तथा तीर्थं सर्वशीपुलिनं१८० तथा। संसारमोचनं१८१ तीर्थं तथैव ऋणमोचनम्१८२। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। अट्टहासं१८३ तथा तीर्थं गोतमेश्वर१८४मेव च। तथा वशिष्ठतीर्थं१८५न्तु हारीतं१८६ तु ततःपरम्। ब्रह्मावर्तं१८७ कुशावर्तं१८८ हयतीर्थं १८९ तथैव च। पिण्डारकच्च १९०विख्यातं शङ्खोद्धारं १९१ तथैव च। घण्टेश्वरं१९२ बिल्वकच्च१९३ नीलपर्वत१९४ मेव च। तथा च धरणीतीर्थं१९५ रामतीर्थं १९६ तथैव च। अश्वतीर्थं१९७च विख्यातमनन्तं श्राद्धदानयोः। तीर्थं वेदगिरी१९८ नाम तथैवोघवती १९९ नदी। तीर्थं वसुप्रदं२०० नाम छागलाण्डं २०१तथैव च। एतेषु श्राद्धदातारः प्रयान्ति परमं पदम्। तथा च बदरीतीर्थं२०२ गणतीर्थं२०३ तथैव च। जयन्तं२०४

विजय२०५ श्चैव शुक्रतीर्थं२०६ तथैव च। श्रीपर्वतेश्व२०७ तथा तीर्थं तीर्थं रैवतकं२०८ तथा। तथैव शारदातीर्थं२०९ भद्रकालेश्वरं२१० तथा। वैकुण्ठतीर्थं२११श्च परं भीमेश्वर२१२मथापि वा। एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम्। तीर्थं मातृगृहं२१३ नाम करवीरपुरं२१४ तथा। कुशेश्वर२१५श्च विख्यातं गौरीशिखर२१६मेव च। नकुलेशस्य२१७ तीर्थञ्च कर्दमालं २१८ तथैव च। दण्डिपुण्यकरं२१९ तद्वत् पुण्डरीकपुरं२२० तथा। सप्तगोदावरीतीर्थं२२१ सर्वतीर्थेश्वरेश्वरम्२२२। तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभिः"।

पित्रदान न० पित्रे दानम्। निवापे श्राद्धे अमरः स्वार्थे क। पितृदानक तत्रार्थे न० शब्दच०।

पित्रदिन न० ६त०। १अमावास्यायाम्। पञ्चदयात्मके २ततृसम्बन्धिदिने च "मानेनानेन यो मासः पञ्चदशसमन्वितः। पितॄणां तदहोरात्रमिति कालविदो विदुः। कृष्णपक्षस्त्वहर्ज्ञेयां शुक्लपक्षस्तु शर्वरी। कृष्णपक्षे त्वहः श्राद्धं पितॄणां वर्त्तते नृप!" हरिवं० ७अ०।

पित्रपक्ष पु० पितॄणां प्रियः पक्षः। गौणाश्विनकृष्णपक्षे "नभो वाथ नभस्यो वा मलमासो यदा भवेत्। सप्तमः पित्रपक्षः स्यादन्यत्र तु च प्रथमः" नागरख०। २पितृकुलजे च "पित्रपक्षः प्रभुः स्त्रियाः" दायभागे नारदः पार्वणादौ ३पित्रादिलिके च।

पित्रपति पु० ६त०। यमे अमरः।

पित्रपित्र पु० ६त०। पितामहे अमरः।

पित्रप्रसू स्त्री ६त०। १पितामह्याम् पितॄणां प्रसूरिव। २सन्ध्यायाम् अमरः। पितृकृत्ये सन्ध्यागामितिथेर्ग्राह्यत्वात् तस्याः प्रसूवत् पालकत्वात् तथात्वम्।

पित्रप्रिय पु० ६त०। शङ्कराजे राजनि०।

पित्रबन्धु पु० ६त०। "पितुः पितृष्वसुः पुत्राः पितुर्मातुः स्वसुःसुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबन्धव" इत्युक्तेषु पितुः पितृष्वसृपुत्रादिषु।

पित्रभोजन पु० पितृभिर्भुज्यते कर्मणि ल्युट्। १भाद्रे श्राद्धे तद्दानस्य प्रशस्तत्वात् तथात्वम्। भावे ल्युट् ६त०। २पितृभक्षणे न० राजनि०।

पित्रमेध पु० कात्या० श्रौ० २१।१२।१ शूलादिषूक्ते पित्रनुद्देश्यके कर्ममेदे। [पितृतर्पणे "पितृयज्ञस्तु तर्पणम्" मनुः।

पित्रयज्ञ पु० पित्र्युद्देश्यको यज्ञः शा०त०। पञ्चमहायज्ञान्तर्गते

पित्रयाण पु० पितरौ यान्ति अनेन या-करणे ल्युट् संज्ञात्वात् यात्वम्। पितॄणां चन्द्रलोकगमनमार्गे। तत्प्रापककर्मरूपहेतुसहितः तद्यानप्रकारः छान्दो०५।३०।१ यथा "अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान् नैते संवत्सरमभिप्राप्नुवन्ति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" उप०। "य इमे गृहस्थाः। ग्राम इति गृहस्थानामसाधारणं विशेषणमरण्यवासिभ्यो व्यावृत्त्यर्थम्। यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थं तद्वत्। इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म। पूर्तं वापीकूपतडागारामादिकरणम्। दत्तं च बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसम्भारो दत्तम्। इत्येवंविधं परिचरणपरित्राणादुपासते इतिशब्दस्य प्रकारदर्शनार्थत्वात्। ते दर्शनजितत्वाद्धूमं धूमाभिमानिनीं देवतामाभिमुख्येन सम्भवन्ति प्रतिपद्यन्ते। तयाऽनिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम् एवमेव कृष्णपक्षाभिमानिनीमपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता। तान् मासान्, दक्षिणायन षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः। सङ्कुचारिणो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु। नैते कर्मिणः पुण्यकृतः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति। कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते। अस्ति हि संवत्सरस्य प्रसङ्गोऽहोरात्रावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता। अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येत्यतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसम्। कोऽसौ यस्तैः प्राप्यः चन्द्रमा य एष दृश्यतेऽन्तरीक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति। अतस्ते धूमादिनो गत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते नन्वनर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् नैष दोषः अन्नमित्युपकरणमात्रस्य विवक्षितत्वात्। न हि ते केवलोत्तेजनेन देवैर्भक्ष्यन्ते। किं तर्ह्युपकरणमात्रं ते देवानां भवन्ति स्त्रीपशुभृत्यादिवत्। इष्टापूर्तशब्द

उपकरणेषु त्रिवोऽस्त्रं पञ्चमीऽस्त्रं त्रिवोऽस्त्रं राक्षसि-
ष्टाहि। न च तेषां स्वादीनां पुरुषोपभोग्यत्वेऽप्युप-
भोगो नास्ति। तस्मात्तस्मिन्नो देवतामानुषभोग्या अपि
सन्तः सुखिनो देवैः क्रीडन्ते। शरीरस्य तेषां सुखोप-
भोगयोग्यं चन्द्रमण्डले चाथसारभ्यते। तदुक्तं पुरस्ता-
च्छुक्लाबद्धा आपोऽमृतोकाभ्यो कृताः सोमो राजा
तस्यवतीति। ता आपः कर्मसमवायिन्य इतरैव भूतैरनु-
गताः शुक्लोकं प्राप्य चन्द्रवदापन्नाः शरीराद्यारम्भिका
इत्याद्युपासकानां भवन्ति" शाङ्करभाष्यम्।

पितराज पु० ६त० टच्समा०। यमे भा०व० ६अ०।

पितरूप पु०ऽपेक्षूनः जनकः पिता पितृ+रूपम्। शिवे भा०
अनु०१५०अ०। तस्य सर्वजनकत्वेन पितृतुल्यत्वात् तथात्वम्

पितृलोक पु० ६त०। चन्द्रलोकोपरिस्थे १भुवनभेदे "विधु-
र्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति।
पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतोऽस्मादु सुदर्शनं
तदेषाम्। भागौन्तरत्वात् त्रिवोरधःस्थं तस्मात्त्रिवोधः
खलु पौर्णमास्याम्। कृष्णे रविः पञ्चदशेऽभ्युदेति शुक्ले
ऽस्तमेत्यर्धत एव सिद्धम्" "सि०शि०। पितृणां लोकः
६तत्पु०। कर्म०। २पितृकर्मे लोके ३अग्निष्वात्तादौ च।

पितृवन न०६त०। प्रेतावासे श्मशाने षष्ठ्यर्थव०। [शिवे।

पितृवनेचर त्रि० पितृवने चरति चर-ट। श्मशानवासिनि

पितृदर्शिन् पु० अङ्गदसनामके वानरभेदे हरिवं० २०अ०।

पितृव्य पु० पितुर्भ्राता पितृ+व्यत्। ज्येष्ठे कनिष्ठे वा पितृ-
भ्रातरि। [स्फुट् भेदे धातवः। क्रुधे यजु० ५।२६

पितृसदन न० पितरः सीदन्ति अपि[illegible]त्रम् सद-आधारे

पितृष्व(स्व)सृ स्त्री ६त० या स्वसा। पितृभगिन्याम्।

पितृष्वसीय पु० स्त्री०पितुः स्वसुरपत्यम् छ। पितृष्वसुरपत्ये

पितृसखि पु० पित्रा सुमुखा सखिभा सुखता सखा।
पितृसखे इन्द्रस्यास्य भा०पि० देवलोक्ता यथा "आचा-
र्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः
श्वशुरश्चैता मातामहपितामहौ। सर्वज्येष्ठो पितृ
श्चैव पूज्यन्ते गुरवो मताः"। [गन्धर्वराजा।

पितृसू स्त्री पितरं सूते सू-क्विप्। १पितामह्यां २सत्यभामायां

पितृहू पु० "पितृहूर्दीक्षितः कर्म उत्तरो देवहूः स्मृतः" भाग०
४।१९ उक्ते दक्षिणकर्मणि तस्य तथात्वम् तथोक्तं "मा-
ध्यन्दिनवत्तत्रापि मध्यन्दिनात् दक्षिणकर्मणः प्रथमं भवति।
मासे च प्रथमं श्रोतव्यं कर्मेत्यादिना
शब्देन प्रकृतस्य कर्मणो दक्षिणकर्मणः प्रथम-
मिष्यते। अत्र तदर्थमनुष्ठाय पितृभिराहूतः पितृयोग-
सम्बन्धं पितृयागं प्रपद्यते। तदनेन प्रकारेण पितृहूयागा-
ह्वानं भवतीति पितृहूर्दक्षिणकर्मा" ४।१५।३८ श्रीधरेण

पित्त न० अपि+दो-क्त सादेशः अद्योपः न दीर्घः। देहस्थे
धातुभेदे तत्स्वरूपादि भावप्र० उक्तं यथा
"पित्तमुष्णं द्रवं पीतं नीलं कट्वम्लगन्धि च। कटु
कं सुस्निग्धं तीक्ष्णमस्थ्नि प्राकृतः"। पीतशिराभम् नीलं
शामम्। एवं पित्तं वातवत्पञ्चात्मकं स्थानकर्मभेदैः पञ्चविधम्।
तेषां पित्तानां नामान्याह "पाचकं रञ्जकञ्चापि सा-
धकालोचके तथा। भ्राजकञ्चेति पित्तस्य नामानि
स्थानभेदतः" अथ पाचकादीनां स्थानान्याह "आम्या-
शये यकृत्प्लीह्नोर्हृदये लोचनद्वये। त्वचि सर्वशरी-
रेषु पित्तं निवसति क्रमात्" अथ तेषां कर्माण्याह।
"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम्। रञ्जकम्
पुरीषाणि विरेचयति नित्यशः"। पाचकं पित्तमाश-
यस्थमाशयमध्यस्थं षड्विधमाहारं भोज्यं भक्ष्यं चर्व्यं
लेह्यं चूष्यं मेयं पचति दोषरसमूत्रपुरीषाणि पृथक्क-
रोति च। तदग्न्याशयस्थमेव स्वधाम्ना रसरञ्जनादि-
यस्थकफतभोपनोदनरूपस्वकर्मप्रभाप्रकाशनाभ्यङ्गेपादि-
पाचनाद्यग्निकर्मणां विशेषाणां पित्तस्थानानामनुग्रहं
करोति। शेषाण्यपि पित्तस्थानानि यकृत्प्लीह्नादीनि
भागेन यथा तत्र तत्र रसरञ्जनादिकर्मभिरुपकरोती-
त्यर्थः। कथम्भूतं पाचकं पित्तं शेषाग्निबलवर्द्धनम् शेषा
अग्नयः पृथिव्यादिमहाभूतगताः। यत उक्तं चरकेण
"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः शनाभसाः" इति।
ऊष्माणः अग्नयः। यत उक्तं वाग्भटेन "दोषधातुमला-
दीनामूष्मा ज्ञेयस्तथाग्निवत्" इति। दोषधातुमलादीनामूष्मा
ग्निरित्यर्थः। रसादिसप्तधातुगताः तेषां बलवर्द्ध-
नम् यथा व्यक्ते स्थापितानि रत्नानि खद्योतवद्दूर-
भास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भ-
वन्ति तथा अग्न्याशयस्थपाचकाग्नितेजसा सर्वे अग्नयो
बलवन्तो भवन्ति तथा च वाग्भटः "बलस्य पक्ता
सर्वेषां पक्तुश्चाग्निर्बलो मतः। तस्मूलाश्चे च तद्वृद्धिक्षय-
वृद्धिक्षयात्मकाः" इति। ननु पित्तादन्योऽग्निराहोस्वि-
त्तिसमेवाग्निरिति सन्देहः। उच्यते पित्तस्योष्णादिगुण-
साराहारपाचनरञ्जनदर्शनादिकर्माणि न खलु पित्तस्य
तिरेकेणान्योऽग्निः। तस्मादग्निरूपस्यैव पित्तस्य स्थान
भेदात्पाचकरञ्जकसाधकालोचकभ्राजकसंज्ञाः। तथा च

वाग्भटः "पाचकं तिलमात्रं स्यात् काठिन्याद्यास्य दोषता । अनुष्टक्षुत्पिपासाविलतं पित्तं पाकोष्णदर्शनैः । क्षुत्तृट्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः । पित्तं यच्चालकं तच्च पक्वामाशयमध्यगम् । पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयम् । त्वक्तद्रवत्वं पाकादिकर्मणानलयन्त्रितम् । पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा । तत्स्थमेव पित्तानां शेषाणामप्यनुग्रहम् । करोति बलदानेन पाचकं नाम तत्स्मृतम्" । ननु यदि पित्ताग्न्योरभेदस्तदा कथं दृतं पित्तस्य शमकभग्नेदीपकमिति । तथा मतस्याः पित्तं कुर्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते । तथा "द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथेति" । अत्रोच्यते । पित्तमग्नेः सन्तताधिष्ठानम् । तथा चोक्तं तन्त्रान्तरे "अग्निर्भिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा । द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा । तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स शक्तिमान् । स चञ्चरति कुक्षिस्थः सर्वतो धमनीमुखैः । स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् । अनन्यगतिरित्येवं देहे कायाग्निरुच्यते" अन्यच्च "वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् । मन्मध्ये मण्डलं सौर्यं तन्मध्येऽग्निर्व्यवस्थितः । जरायुमात्रप्रच्छन्नः काचकोशस्य दीपवत्" । तथा च मधुकोषे "द्रवतेजःसमुदायात्मकस्यापि पित्तस्य तेजो भागोऽग्निरिति" । तेन पित्तमप्यग्निवन्मन्यते अतितापितायोगोलकवत् । परमार्थतस्तु अग्निः पित्ताद्भिन्न एवेति सिद्धान्तः । अतएवाह रसप्रदीपे "जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाऽऽददानो विभक्तुं नैव शक्यते । नाभौ मध्ये शरीरस्य विशेषात् सोममण्डलम् । सोममण्डलमध्यस्थं विद्यात्सूर्यस्य मण्डलम् । प्रदीपवत्तत्र नृणां स्थितो मध्ये हुताशनः । सूर्यो दिवि यथा तिष्ठंस्तेजोयुक्तैर्गभस्तिभिः । विशोषयति सर्वाणि पल्वलानि सरांसि च । तद्वच्छरीरिणां भुक्तं ज्वलनो नाभिमाश्रितः । मयूखैः पचते क्षिप्रमन्नानाव्यञ्जनसंस्कृतम् । स्थूलकायेषु सत्त्वेषु यवमात्रः प्रभाणतः । सूक्ष्मकायेषु सत्त्वेषु तिलमात्रः प्रभाणतः । कामकीटपतङ्गेषु बालमात्रोऽवतिष्ठते" इति । पुनः प्रकृतमनुसरति "रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् । यत्तु साधकसंज्ञं तत्कुर्याद् बुद्धिं धृतिं स्मृतिम्" । धृतिं मेधाम् "यदालोचकसंज्ञं तद्रूपग्रहणकारणम् । "भ्राजकं कान्तिकारि स्यात्त्वाभ्यङ्गादिपाचकम्" यातायातादिनिरूपणे । स्थानान्तरे तत्रैव पित्तप्रकृतिक उक्तो यथा "पित्तप्रकृतिको यादृक् तादृशोऽयं निगद्यते । अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् । बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति । अग्रामकेशः क्षमी स्थूलो बहुवीर्यो महाबलः । पित्तं वह्निर्वैद्युतं वा तद्यस्य पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः । गौरोष्णाङ्गस्ताम्रहस्तोद्भिन्नरक्तः शूरोमाणी पिङ्गकेशोऽल्पलोमा" । पित्तस्योपशमहेतुरक्तस्तत्रैव "तिक्तस्वादुकषायशीतपवनच्छायानिशाशीजनच्छोतृच्छामृष्टहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्शनम् । सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत्" । पित्तप्रकोपकारणान्युक्तानि "कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसम्भोगतृषाक्षुधाभिहननव्यायामसद्यादिभिः । भुक्तेऽजीर्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां मध्याह्ने च यथार्द्धरात्रसमये पित्तप्रकोपो भवेत्" भावप्र० "पित्तञ्च तिक्ताम्लरसञ्च सारकं तृष्णं द्रवं तीक्ष्णमिदं मधौ बहु । वर्षान्तकाले शरदर्द्धरात्रे मध्यन्दिने ऽस्ताप्युदिते च कुप्यति" राजनि० ।

पित्तघ्न त्रि० पित्तं हन्ति हन-टक् । १पित्तनाशकद्रव्ये स्त्रियां ङीप् । सा च २गुडूच्यां शब्दच० ।

पित्तज्वर पु० पित्तनिमित्तो ज्वरः शाक०त० । प्रैत्तिके ज्वरे ज्वरशब्दे २१७१ पृ० माधवकरोक्तं तल्लक्षणं द्रष्टव्यम् ।

पित्तद्राविन् पु० पित्तं द्रावयति द्रु-णिच् णिनि । मधुरलम्बीरे राजनि० ।

पित्तधरा स्त्री सुश्रुतोक्ते कलाभेदे "षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । एकामाशयमध्यस्था यकृच्छ्लीहा प्रकीर्त्तिता" । [रक्तपित्तशब्दे कलादि द्रष्टव्यम् ।

पित्तरक्त न० पित्तसंसृष्टं रक्तम् । रक्तपित्ते रोगे राजनि० ।

पित्तल त्रि० पित्तमस्त्यस्याधिकत्वेन विद्यते० मत्व० । १पित्तबहुले । पित्तं लाति ला-क । २सुवर्णाह्वभेदे रीतौ ३भूर्जपत्रे शब्दमा० ४तोयपिप्पल्यां स्त्री मेदि० । रीतिश्च द्विविधा यथोक्तं राजनि० "एका स्निग्धा मृदुः पीता सुरङ्गा सूक्ष्मपत्रिणी । हेमोपमा शुभा मध्या जात्या रीतिः प्रकीर्त्तिता" । "रीतिरप्यपरा शुक्लाताम्रश्च यवदश्च च । पित्तलस्य शुभा ज्ञेया स्वयोनिसदृशा जनैः । संयोगस्य प्रभावेन तस्यान्येऽपि शुभा स्मृताः । रीतिकायुगलं कृष्णं तिलश्च सवर्णं रसे । शोधनं पाण्डुरो-

गन्नं क्षमिन्नं नातिक्लेदनम्' भावप्र० । तन्मारणशोधन-विधिः कांस्यशब्दे १८४२ पृ० दृश्यः ।

पित्तातिसार पु० पित्तजनितोऽतिसारः शाक०त० । पित्त-जनिते अतिसाररोगभेदे अतिसारशब्दे १०७पृ०दृश्यम् ।

पित्ताभिष्यन्द पु० पित्तकृतः अभिष्यन्दः शाक०त० । पित्तकृते नेत्रजलक्षरणरूपे रोगभेदे अभिष्यन्दशब्दे १०४पृ०दृश्यम्

पित्तारि पु० ६त० । १पर्पटे (क्षेतपापड़ा) २कालायां ३खर्जूरे च राजनि० ।

पित्र्य त्रि० पितुः इदं प्रियं वा पितृत आगतं वा यत् । १पितृसम्बन्धिनि । २पितृतीर्थे तर्जन्यङ्गुष्ठयोर्मध्यस्थाने ३मधुनि ४मघानक्षत्रे च राजनि० । तस्य पितृदैवतत्वात्तत्सम्बन्धित्वम् । ६पितृप्रिये माघे पु० ६अमावास्यायां तिथौ स्त्री हेमच० ७ज्येष्ठभ्रातरि पु० ८पौर्णमास्यां स्त्री शब्दच० ।

पित्र्यावत् त्रि० पित्र्यः तत्सम्बन्धि अस्त्यस्य मतुप् मस्य वः दीर्घः । १पितृसम्बन्धियुक्ते २कन्यायां स्त्री ङीप् । ऋ०९।४६।२ भा० ।

पित्सत् त्रि० पतितुमिच्छति पत–यङ् इस् अभ्यासलोपः । १पतितुमिच्छायुते २खगे पुंस्त्री० अमरः ।

पित्सल पु० पतितुमिच्छत्यत्र पत–सन् पिह्न+आधारे क-लच् । पथि मार्गे उणादि० ।

पिद्ध पु० मृगभेदे यजु० २४।३२ [२उदश्वने च हेमच० ।

पिधान न० अपि+धा–ल्युट् अल्लोपः । १आवरणे अमरः

पिधानक पु० पिधानाय कायति कै–क । खड्गकोषे हेमच०

पिनद्ध त्रि० अपि+नह–क्त अल्लोपः । परिहिते वस्त्रादौ हेमच० ।

पिनाक पु०न० पा–रक्षणे आकन् नुट् धातोरात इत्वम् । १शिवधनुषि उज्ज्वलद० । २शूलास्त्रे अमरः ३दिश उत्तरनामसु निघण्टुः ।

पिनाकिन् पु० पिनाक+अस्त्यर्थे इनि । महादेवे अमरः पिनाकवृषादयोऽप्यत्र । [जटा० ।

पिन्यास न० अपिगतो न्यासोऽत्र प्रा०व०अल्लोपः । शिखायां

पिपतिषत् त्रि० पतितुमिच्छति पत–सन्–शतृ । १पतितुमिच्छति । २खगे मेदि० [२खगे राजनि०

पिपतिषु त्रि० पतितुमिच्छुः पत–सन उ । १पतितुमिच्छौ

पिपासा स्त्री पातुमिच्छा पा–पाने सन् आप् अ । पातुमिच्छायाम् सा च प्राणवृत्तिः ऊर्मिभेदः "बुभुक्षा च पिपासा च प्राणस्य, मनसः स्पृहौ । शोकमोहौ, शरीरस्य ज्वरामृत्यू ऊर्मयः" शा०नि० । तद्भेदः पित्तभेदलक्षणशब्दे दृश्यम् । तारका०इतच् । पिपासित संजातपिपासे त्रि० ।

पिपीतक पु०ब्राह्मणभेदे येन पिपीतकीद्वादशीव्रतमाचरितम्

पिपीतकी स्त्री पिपीतको ब्राह्मणभेदः स प्रवर्त्तकतयास्त्यस्य अच् गौरा० ङीष् । वैशाखशुक्लद्वादश्याम् तद्विधानं भविष्यपु० "वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः । तस्यां दशीतलजलैः स्नापयेत् केशवं प्रभुम् । पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्विधानतः । नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ दानसा । जप्त्वा तु वैष्णवं मन्त्रं दण्डवत् प्रणमेत्ततः । दद्याद्विप्रेभ्यो विधिवत् कुम्भाँस्तोयसमन्वितान् । प्रथमेऽब्दे घटःकुम्भान् दद्याल्लवणसंयुतान् । माषाभिरङ्कितग्रीवान् सुशीतलजलान्वितान् । शुक्लवस्त्रावृतमुखानुपवीतसुसंयुतान् । धनुर्बाणसमायुक्तान् समोज्ज्वलदक्षिणान्वितान् । द्वितीयेऽह्नि घटान् दद्याद्घृतशर्करसंयुतान् । तृतीये द्वादश घटान् तिलमोदकसंयुतान् । चतुर्थे षोडश घटान् दुग्धगुडकसंयुतान् । दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः । दक्षिणां शक्तितो दद्यात् भोज्यञ्चैव विशेषतः" पिपीतकब्रह्मणं प्रति यमोपदेशः । तत्फलन्तु ति०त०उक्तः द्वादशीशब्दे ३७९९ पृ० दृश्यः । अधिकं तत्कथायां दृश्यम् ।

पिपीलक पु० अपि–पील–ण्वुल् अल्लोपः । (डेंगोपिपड़ा) ख्याते १कीटे (चुटेपिपड़ा) २ख्याते कीटे स्त्री टाप् । हेमच० । अच्–पिपीलोऽप्यत्र शब्दच० गौरा० ङीष् पिपीलीत्यप्यत्र हेम० । क्षुद्रकीटे राजनि० ।

पिपीलिकामध्य न० पिपीलिकायामध्यमिव मध्यमस्य । चान्द्रायणभेदे पुंस्त्री० चान्द्रायणशब्दे ३९।२ पृ०दृश्यम् ।

पिप्पक पुंस्त्री०शरव्यादेवतोद्देशेन आलभ्ये पक्षिणि अजादि० टाप् । स्त्रीपक्षिभेदे स्त्री यजु० २४।४० ।

पिप्पटा स्त्री खाद्यभेदे तिका० ।

पिप्पल न० पा–अलच् पृषो० । १जले निघण्टुः २वृक्षखण्डभेदे च मेदि० ३अश्वत्थवृक्षे अमरः ४बन्धनशून्ये पक्षिणि च पु०शब्दच० ५कणायां (पिपुल) स्त्री गौरा० ङीष् सुश्रुतः पिप्पलिः पिप्पली चास्य । तस्याः फलम् अण् हरीतक्या० तस्य लुप् । तत्फलेऽपि स्त्री । अस्त्यर्थे उत्करादि०छ । पिप्पलीव द्युते त्रि० । रेवत्यां जाते ६शिवपुत्रभेदे पु० भाग०६।१८।६ [४।११]

पिप्पलाद पु० ऋषिभेदे भाग० १।१९।९

पिप्पलायन पु० भरतवंशे भागवतप्रधाने ऋषिभेदे भाग०५।

पिप्पलीघृत न० चक्रदत्तोक्ते घृतभेदे "पिप्पलीगुडसंयुक्तं

सामशीरयुतं हतम् । एतद्त्रिविधमूर्धं मर्दिय कथमा-
दिनात्" ।

पिप्पलीओषि स्त्री नदीभेदे मार्क०पु० ५७अ०

पिप्पलीमूल न० पिप्पलया इव मूलमस्य । (पिपुलमूल)ख्याते
वृक्षे राजनि० "दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु । रूक्षं पित्तकरं भेदि कफवातोदरापहम् । आ-
नाहगुल्मगुल्मघ्नं शमिश्वासक्षयापहम्" भावप्र० । ततः
मत्वर्थे उष्ट्रका० अ । पिप्पलमूलीय तद्युते त्रि० ।

पिप्पलु पु० ऋषिभेदे तस्य गोत्रापत्यं यञि० अञ् । पैप्प-
लव्य तद्गोत्रापत्ये पुंस्त्री० ।

पिप्पल्याद्य न०कल्पटसोक्ते तैलभेदे "पिप्पली भद्रमुस्तं बिल्वं
यवाङ्गां मदनं दधास् । कुष्ठं घटीं इन्द्रयवाख्यं चित्रकं
देवदारु च । पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयु-
तम् । अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम् । गुद-
निःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् । सक्थ्यूरुगुल्मदौर्ब-
ल्यानाहं यच्छ्वासमेव च । पिच्छास्रावं गुदे घोरं
वातवर्चोविनिग्रहम् । उत्थानं बस्तिदोषञ्च जयेत्तैलानु-
वासनात्" ।

पिप्पलिका स्त्री दलमले हेमच० । [शुमस्तुचकत्वतञ्जम् ।

पिप्पीक पुंस्त्री० जलभेदे ह०सं०८६अ०सह दक्षिणदिक्स्थते

पिप्रु पु० अश्वभेदे ऋ० १।५१।५ भा० ।

पिप्रु पु० अपि+प्रु-कु अमेरलोपः । जटुले अमरः ।

पिब्दमाना स्त्री अपि+शब्द-शानच् पृषो० । शब्दायमाने

पिब्दन त्रि० अपि+शब्द-ल्युट् पृषो० । १शब्दवत् शब्दाय-
माने २रक्षोभेदे पु० ऋ०६।४६।३

पिशाक पी-हिंसायां वा० आकच् । हिंस्रे ऋ०१।१६०।५
"पीशतिर्हि वाकर्मेति" निरु० ४।२५

पिशाच पु०पी-पाने काचच् । पीतमाते (पेयाशन) (सुर-
गा) वृक्षभेदे अमरः "पिशाचस्तु खरःकन्धसारो न-
कुलप्रियकः । राजादनस्तापसेष्टः शुभ्रकद्रुर्द्रुमटः ।
आरः पिलुकाक्षाग्रसुफलं मधुरं गुरु । स्निग्धं सरं
कफदृष्टिसंहाहज्वरतृषापहम् । पिशाचभक्षा मधुरो
मद्यः पित्तानिलापहः । वृद्धोऽतिदुर्ज्जरः स्निग्धो वि-
ष्टम्भी मलबद्धकृत्" भावप्र० ।

पिशङ्ग प्रेषण चु०उ०सक०सेट् । प्रेषयति ते अपीशिषत् त ।

पिशिञ्जिला स्त्री चिकुराभ्रे भुवि । यजु० १२।१२ "श्रोत्रं
पिशिञ्जिला" शत० ब्रा० १२।२।३।११ "श्रवणे नामिति
श्रोत्रशब्देन गृहीतेति" वेददीपः ।

पिशु पु० अपि+शा-डु । पीशुवृक्षे शब्दरत्नावली ।

पिशुनी स्त्री अपि+शा वा० डुन् नीरा० ङीप् । मूर्वायां
रत्नमाला । [टालतायां रत्नमाला ।

पिशुपर्णी स्त्री पीतोरिव पर्णमस्याः ङीप् पृषो० । मोर-

पिशुन न० क्लिद-क पिशादेशः । १क्लिन्नचक्षुषि । २तद्युते
त्रि० अमरः ।

पिशुका स्त्री पिशा इव कायति कै-क । इक्षिण्यां शब्दमा०

पिष्य सेचने भ्वा०पर०सक० सेट् इदित् । पिष्यति अपिष्यीत् ।
पिपिष्य पिष्यतुः । पिष्यमस्

पिष्ट अवयवे समूहस्यांशभावे चक्र० दीपनायां सक० तुदा०
सुचा० पर० सेट् । पिंषति पटः समूहीभवतीत्यर्थः ।
"त्वष्टा रूपाणि पिंषतु" ऋ०१०।१८४।१ दीपयतु इत्यर्थः
अपेषीत् पिपेष ।

पिष्ट(स) त्रि० पिष-क । १धान्यनिर्मुक्ते २चक्रुरूपे न० ।

पिष्टक पु० पिष्ट-कङ्कन् किच्च । पद्मपुष्पितुल्ये १पिष्टमयपूपे
२तद्वति त्रि० अमरः ।

पिष्टपूक पु० पिष्टक+स्वार्थे क । १पिष्टकशब्दार्थे पिष्टकेन
जायति कै-क । २विष्णौ शङ्खपु० ।

पिष्टमुष्टि त्रि० भ्रसल-कर्मणि क्तिच् पिष्टः मुष्ट इव मुष्टिः
सारभूतोऽस्य । शुद्धपिष्टकवर्णे ऋ० १।२२।५भा० ।

पिष्टरराति त्रि० पिष्टकः चक्रुरूपो रातिर्धनमस्य । चक्रुध-
नप्रदायिनि ऋ० ६।२१।२ भा० । [पिष्टके ।

पिष्टकिला स्त्री पिष्टं चक्रुरूपं लिलति ला क्तम् । रीतौ

पिशाच पु० पिशितमाचामति आ+चम-वा० ड पृषो० ।
१देवयोनिभेदे २प्रेते च अमरः "अन्तरीक्षचरा ये च
भूतप्रेत पिशाचकाः । दर्शयिष्या वह्नमयांस्ते तत्रैव
चरन्ति हि । नोक्तं विक्रमणे शक्तिस्तेषां सम्भूतया-
पुनाम् । अत ऊर्ध्वं हि विप्रेन्द्र ! राक्षसा ये अतै-
नसः । ते तु सूर्यादयः सर्वे विहरन्त्यूर्ध्वमर्जिताः" इति
शास्त्रे स्वर्गखण्डे १५अ० । प्रेते यथा "अयौचान्ताद्वि-
तीयेऽह्नि यस्य नोत्सृज्यते वपा । पिशाचत्वं भवेत्तस्य
दत्तैः श्राद्धशतैरपि" शु० त० । तन्निवारणे कुशलः
आकर्षा० कन् । पिशाचन तन्निवारणकुशले त्रि० आर्षे
धर्मा० अण् । पैशाच तदर्थे पिशाच इव आचरति
कै-क । पिशाचतुल्ये यक्षगुह्यकादौ ।

पिशाचकिन् पिशाचक. यक्षादिरस्त्यस्य खार्थेन पिशाचक+
इनि । यक्षेश्वरे कुबेरे हेमच० । [याकोटवृक्षे त्रिका०

पिशाचघ्नु पु० पिशाचघ्नः धनाद्यकारस्तानूनः भा०अ०

पिशाचमोचन न० स्नानपर्व्वणि तीर्थभेदे स्कन्दपुराणम्।
पिशाचसभ न० इन्द्रसभाभेदः। पिशाचानां सभायाम्
पिशाची स्त्री पिशाचजातिः स्त्री ङीष्। १पिशाचजाति स्त्रियां तद्रक्षस्यङ्गनायां २गन्धर्व्वभार्य्यां राजनि०। [तुल्यः।
पिशिक पु० देशभेदे स च द्वन्द्वं १४कुर्म्मविभागे दक्षिणस्या-
पिशित न०पिश-क्त। १मांसे अमरः। २जटामांस्यां स्त्री वा ङीप् मेदि०। [चमादौ पिशितामादयोऽत्र।
पिशितभुज् त्रि० पिशितं भुङ्क्ते भुज-क्विन्। क्रव्यादे रा-
पिशी स्त्री पिश-अ गौरा० ङीष्। जटामांस्यां राजनि०।
पिशील न० पिश-घा०इल। शराबे मद्यमयपात्रे शत०ब्रा० २।५।२।६ भा०। कात्या० ५।२।४२ कर्कः।
पिशुन न० पिश-उनन् किच्च। १सूचके अमरः। २मार्द्दे ३काके च पु० ४सूचके ५क्रूरे च त्रि० (पिशिङ्) ६शाकभेदे स्त्री० टाप् मेदि०।
पिष चूर्णने रु० पर०सक० अनिट्। पिनष्टि अपिषत् पिपेष पेष्टा पिष्टः पेषः पेषणम्। "शुष्कचूर्णरूक्षेषु पिषः" पा० यद्यपपदेषु कर्म्मसु असत् कपा० यथाविध्यनुप्रयोगः "शुष्कपेषं पिनष्ट्यौ" भट्टिः "क्लेदने पिषः" पा० क्लेदसाधने करणे उपपदे असत्। उदपेषम् पिनष्टि उदकेन पिनष्टीत्यर्थः पेषमादिपरे उदकस्योदादेशः।
पिष्ट न० पिष-क्त। १सीसके रत्नमाला २पिष्टके पु०न० "अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः। पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्। घृतादष्टगुणं तैलं मर्द्दनाच्च च भक्षणात्" वैद्य० अस्य गुणाः "पिष्टं प्राणकरं रूक्षं विदाहि गुरु दुर्जरम्। गालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः। वैदला गुरवो भक्ष्या विष्टम्भिस्निग्धगौरताः। सगुड़ाः घृतिलाश्चैव सक्षीरक्षारशर्करा। यक्ष्या वल्याश्च कृष्याश्च गुरवो बृंहणा परम्। बल्लेहाः क्षौद्रतिलाश्च भक्ष्या गोधूमसम्भवाः। गुरवस्तर्पणा रूक्षा बलोपचयवर्द्धनाः। मर्द्दितं मथितं क्षीरं नारिकेलहृतादिभिः। अव्यक्तं हृते पक्वा हृतपूरीयरुच्यते। हृतपूरी गुरुर्ज्ञेयः कफकृद्रक्तमांसदः। रक्तपित्तहरो रूक्षः स्वादुः पित्तहरोऽग्निदः"। गोधूमचूर्णं दमिता। "दमिता मधुदुग्धेन खण्डेनामारचादिभिः। हते पक्वा क्षिपेत् रूक्षे संयावो बृंहणो गुरुः। दमिता वेष्टिता भक्ष्ये मधु दत्त्वा हते हृता। मधुमक्षकसंहितं तद्भक्ष्यं गुरु दुर्जरम्" राजवल्लभः। एकपे न०निघण्टुः ४चूर्णिते त्रि०। ५क्षत्रियभेदे पु०। तस्यापत्यम् गर्गा०यञ्। पैष्ट तदपत्ये पुं स्त्री०। ततः गोत्रप्रत्ययस्य बहुत्वे इन्ते अङ्गे च यञ्क्रा० लुक्।
पिष्टक त्रि० पिष्टस्य विकारः अन्। १पिष्टस्य विकारभेदे संज्ञायां कन्। २अपूपे अस्त्री अमरः। अतोऽन्यत्रे भावप्र० वाक्यं द्रष्टव्यम्। ३तिलचूर्णे न०राजनि०। ४नेत्ररोगभेदे मेदि० "श्लेष्मा मारुतकोपेन शुक्ले पिष्टवत्कृतम्। पिष्टवत् पिष्टकं विद्धि अत्राक्षादर्शसन्निभम्" माधवकरः।
पिष्टप न० पिष्टप्रत्यय पिष-अप निपा०। भुवने अमरः।
पिष्टपचन न० पिष्टं पच्यतेऽनेन पच-करणे ल्युट्। पिष्टपाकपात्रे घटाद्यादौ अमरः।
पिष्टपाकवत् न० पिष्टस्य पाकं करोति आधारस्य कर्त्तत्वविवक्षायां कृ-कर्त्तरि क्विप् तुक् च। १पिष्टपाकाधारे पात्रे हेमच० कर्त्तरि क्विप्। २पिष्टपाचके त्रि०।
पिष्टपूर पु० पिष्ट इव पूर्य्यते पूरि-कर्म्मणि अच्। वटके घार्त्तिके हेमच०।
पिष्टपाकभृत् न० पिष्टपाकं बिभर्त्ति भृ-क्विप्। पिष्टपाकपात्रे हेमच०। [त्रि०को०।
पिष्टमय त्रि० पिष्टस्य विकारः मयट्। पिष्टविकारे भक्ष्यादौ
पिष्टमेहिन् पु० पिष्टमिव मेहति मिह-णिनि। सुश्रुतोक्ते प्रमेहभेदरोगयुते "पिष्टरक्तस्यं पिष्टमेही मेहति" सुश्रुतः। [(धूमसी) हेमच०।
पिष्टवर्त्ति पु० पिष्टं वर्त्तयति वर्त्ति-इगु। सुद्रमाषादिचूर्णे
पिष्टसौरभ न० पिष्टस्येव सौरभमस्य। चन्दने हारा०।
पिष्टात पु०पिष्टमितातति अत-अच्। १पटवासे पटवासनामे सुगन्धद्रव्ये (आबीर) ख्याते २पदार्थे च अमरः।
पिष्टिक न० पिष्टमभ्रस्य उत्पत्तिसाधनत्वेन ठन्। तण्डुलचूर्णभवे दूषालके (पिठालि) ख्याते पदार्थे राजनि० (पिठो) प्रसिद्धायां पिष्टद्विदले स्त्री "दालिः संस्कृतिपिष्टा तोत्रे ततोऽपहृतकञ्चुका। शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः" भावप्र०।
पिष्टोडी स्त्री श्वेतास्त्रिकायां राजनि०।
पिष्टोदक न० पिष्टमिश्रितमुदकं शात०त०। चूर्णतण्डुलमिश्रितजले भा० आ० १२१अ०। [अपिपेषत्-त।
पिस गतौ भ्वा०पर०सक०सेट्। पेसति अपेसीत् पिपेस अदित्
पिस दीप्तौ वा चु० उभ०पक्षे भ्वा० पर०सक० सेट् इदित्। पिंसयति ते अपिपिंसत् त। पक्षे पिंसति अपिंसीत्।

पिस् क्षेपे वधे च अक॰अनि॰ दाने भ्वा॰ च सक॰ पु॰ उभ॰ सेट् । पेषयति–ते अपीपिसत् त ।

पिसङ्ग पु॰ पिष–अङ्गच् किच्च । पिशङ्गशब्दार्थे

पिहित त्रि॰ अपि+धा–क्त अपेरह्रोपः । १तिरोहिते २आच्छादिते च हेमच॰ ।

पी पाने दि॰ सक॰ आत्म॰ अनिट् । पीयते अपेत । ल्यप् "निपीय यस्य क्षितिरक्षिणः कथाम् नैषधः पिबतेस्तु निपाय इत्यपि ।

पीठ पु॰ न॰ पीयते पिब्यते वा अत्र घा–ठक् पिठ–क वा इको॰दीर्घः । (पीँढ़े) १आसनभेदे अमरः । २त्रतिनाशासने त्रिका॰ तत्रार्थे स्त्री रत्नमाला गौरा॰ ङीप् ।

पीठलक्षणादिकं युक्तिकल्पतरौ दर्शितं यथा "धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते । धातवश्च त्रिधाश्चैव पाषाणा विविधाश्च ये । तदत्र संप्रवक्ष्यामि तद्देवासुपयुज्यते" । तस्य मानम् "हस्तद्वयस्तु दैर्घ्येण तदर्द्धं परिणाहतः । तदर्द्धोन्नतः पीठः सुख इत्यभिधीयते । हस्तद्वयदशाधिक्यात् पञ्च पीठा भवन्ति हि । सुखो लयः शुभः सिद्धिः सम्पद्भेति यथाक्रमम् । धनभोगसुखैश्वर्य्यवाञ्छितार्थप्रदायकः । यमदोर्षे सुखावाप्तिर्विघ्ने विघ्नापहः । आयाम[illegible]दशाहाभ्यां हस्तद्वयमितो हि यः । अर्द्धहस्तोन्नतः पीठो लारको नाम विश्रुतः । दैर्घ्यौन्नतिपरीणाहैश्चतुर्हस्तमितो हि यः । राजपीठ इति ज्ञेयः सकलार्थप्रसाधकः । अत्राभिषेकमिच्छन्ति नितिमस्य पुराविदः । दैर्घ्यौन्नतिपरीणाहैः षड्हस्तमितो हि यः । राज्ञां चित्तप्रसादार्थं केलिपीठाभिधानकः । दैर्घ्यौन्नतिपरीणाहैरष्टहस्तमितो हि यः । अङ्कपीठो ह्ययं नाम्ना भवेत् स च सुखप्रदः । कामको राजपीठः स्याज्जयो वा राजतः सुखः । राज्ञामेवोपयोक्तव्यो जयवद्योत्तरोत्तरम् । राजपीठे शिरायुः स्याज्जये सर्वां महीं जयेत् । लारको लाभवेच्छान्तं सुखे सुखमवाप्नुयात् । राजतः कीर्त्तिजननो धनहृद्धिकरः परः । ताम्रः प्रतापजनको विपक्षक्षयकारकः । लौहस्फाटने घावैः सर्वकर्मसु युज्यते । लक्षणीकरणाद्याः शत्रुक्षयकरप्रदाः" इति धातुपीठाः । अथ त्रिधापीठाः "वज्रपीठो वज्रप्राणेरेव नाम्नश्च दृश्यते । पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि । राहोर्मारकतः पीठः शनेर्नीलसङ्कटः । गोमेदकस्तु सौम्यस्य स्फाटिकस्तु बृहस्पतेः । शुक्रस्य वैदूर्यमयः प्रवालो मङ्गलस्य हि" । पुराणप्रसिद्धाः । "यो यस्य हि दशाजातः पीठस्तस्य हि तन्मयः । स्फटिकस्तु महीन्द्राणां सर्वेषामेव युज्यते । अभिषेके च यात्रायामुत्सवे जयकर्मणि । अदस्कालोपघटितः कंस्याने पीठ इष्यते । गरुडोद्धाररचिते वर्णांस्तु नृपतिर्वसेत् । सुकरत्नमयं पीठं भजते धनगर्द्धिते । सामान्यः प्रासादः पीठो विद्यायाय महीभुजाम् । एषां मानं गुणाश्चापि विज्ञेया धातुपीठवत् । काष्ठपीठानां मानं पूर्ववदेव । "सत्यक्षिसुखदद्रव्यं सम्भारजनितो जयः । लारको रोगनाशाय सुखः शत्रुविनाशनः । सिद्धिः सर्वार्थसंसिद्धै विजयाय च वैरिणाम् । शुभः स्यादभिषेके च शम्बरैरनिवारिणी । पाषाणो लारकः पीठः सुखसम्पत्तिकारकः । जयः स्यादभिषेके च शुभः शत्रुविनाशनः । सुखो रोगविनाशाय सिद्धिः सर्वार्थदायिका । सम्पदुच्चाटनविधौ विज्ञेया पीठलक्षणम् । चान्दनस्तु सुखः पीठो अभिषेके महीभुजाम् । जयः स्याद्रोगनाशाय शुभः सौख्यं प्रयच्छति । लारको अष्टहस्तप्रमाणे तु रतिङ्करः । यत्नतो निर्मितास्ते तु साम्राज्यफलदायकाः । काञ्चेयको लायको हि भूभुजामभिषेचने । पीठानमुष्कादीनामन्ये चन्दनवद्विदुः । बाकुलस्तु शुभः पीठो भूभुजामभिषेचने । जयो रोगविनाशाय सुखः सम्पत्तिकारकः । सिद्धिः सिद्धिप्रदा सम्पत् सर्वाणि विजयप्रदा । लारको जरणाय स्यादिति भोजस्य सम्मतम् । एवं सुगन्धिकुसुमाः सुसारा ये च शाद्पाः । बाकुलेन समः कार्य्य एव पीठस्य निर्णयः । ये शुम्बकाश्च हस्तास्तु कदली सघसोऽथ वा । माम्बरीसदृशः पीठस्तेषां कार्य्यस्तथा सुखः । फलिनश्च ससारास्च रक्तकाराश्च ये मताः । तेषां पानसवत् पीठस्तथैव सुखमावहेत् । अथ निषिद्धपीठाः "विद्रुमो निन्दितः पीठो मौक्तिकः सर्वधातुजे । शिलोत्थः शार्करो वर्ज्यः कर्करश्च विशेषतः । काष्ठजेषु च पीठेषु नाखादा नातिसारिणः" तथा च "आम्रजम्बुकदम्बानामासनं वंशनाशनम्" भोजस्तु "गुरुः पीठो गौरवाय शत्रुसौख्यकारकः" पराशरस्तु "नाम्नन्यिनीतिमन्यिश्च नाशुभमांसभक्षतिः । पीठः स्यात् सुखधर्मार्थे नातिदीर्घो न वामनः । ये चान्ये पीठलक्षणा ज्ञेयाः शिल्पिविनिर्मिताः । सुपानृ दोषांश्च मानञ्च तेषां पीठवदादिशेत् । विद्यामीमेन

विधिना यः शुद्धं पीठमाचरेत् । तस्य लक्ष्मीः स्वयं वेश्मं कदाचिन्न विमुञ्चति । अज्ञानाद्यद्वा मोहादुयोऽन्यथा पीठमाचरेत् । एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् । इत्यंसामान्ये पु० हरिवं० १६१अ० । दशसुरभेदे पु० मा० द्रो० १७अ० । ५देवतामूर्त्तिस्थापनाधारे पिण्डिकायां स्त्री ङीप् स्वार्थे क पीण्डिका तत्रार्थे पिण्डिकाशब्दे दृश्यम् । ६देवतापूजनाङ्गे हृदयरूपे आधारे तत्र पूज्यपदार्थाः पूज्यदेवताश्च तन्त्रसारे उक्ता यथा "पीठपूजां ततः कुर्यात् आधारशक्तिपूर्वकम् । प्रकृतिं कमठञ्चैव शेषं पृथ्वीं तथैव च । सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा । श्मशानं पारिजातञ्च तन्मूले रत्नवेदिकाम्" । शारदायाम् "अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान् । एषु स्वस्वकलां न्यस्य नामाद्यक्षरपूर्वतः । दलादीन् त्रिगुणान्यस्य यथैवात्र गुरूत्तमः । आत्मानमन्तरात्मानं परमात्मानमेव च । ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुत्तमः" । पीठशक्तयश्च देवताभेदे इच्छाज्ञानादयस्तत्तत्कलोक्ताः शारदादौ दृश्याः । ७अन्यविद्यार्थैलपस्थानभेदे तत्रापि विष्णुचक्रेण विभक्तस्य यतोदेहस्य तत्तदङ्गभेदपतनात् तत्तत्स्थानस्य पूज्यता तत्र पीठानि अङ्गप्रत्यङ्गभेदपतनं च तन्त्रचूडामण्यादौ यथा "एकपञ्चाशच्च पीठाः शक्तिभैरवदेवताः । अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च । असाक्षे तपुरो देव ! हिताय त्वयि कथ्यते । तत्पुरञ्च हिङ्गुलायां भैरवो भीमलोचनः । कोट्टरीशा महादेव ! त्रिगुणा वा दिगम्बरी ।। करवीरे त्रिनेत्रं मे देवी महिषमर्द्दिनी । त्रयोदशो भैरवश्च २, सुनन्दाशाक्ष्य नायिका । देवस्त्र्यम्बकनामा च सुनन्दा तत्र देवता ३, काश्मीरे कण्ठदेशस्य त्रिसन्ध्येश्वरभैरवः । महामाया भगवती गुणातीता वरप्रदा४ । ज्वालामुख्यां महालिङ्गा देव उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी५, कम्बो लाटाम्बरे मम । भीमश्चो भैरवस्तत्र देवी त्रिपुरमालिनी६ । हृदयपीठं वैद्यनाथे वैद्यानाथस्तु भैरवः । -देवता जयदुर्गाख्या७, नेपाले जातु मे शिव ! । जयाख्यो भैरवः श्रीमान् महामाया च देवताः । मालवे दण्डकाख्ये मे देवी दाक्षायणी हर ! । अमरो भैरवस्तत्र सर्वसिद्धिप्रदायकः९ । उत्कले नाभिदेशस्तु विरजाक्षेत्रमुच्यते । विमला सा महादेवी जगन्नाथस्तु भैरवः१०। मण्डुक्यां मण्डपातस्य तत्र विठिर्भ सम्भवः । तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः११ । मण्डलायां वामवाहुर्वेदुलाख्या च देवता । भीरुको भैरवस्तत्र सर्वसिद्धिप्रदायकः १२ । उज्जयिन्यां ध्रुवस्तु माङ्गल्यकपिलाम्बरः । भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका१३ । अट्टहासे दन्तवाहुर्भैरवश्चन्द्रशेखरः । व्यालरूपा भगवती भवानी तत्र देवता । विशेषतः कलियुगे वसामि चन्द्रशेखरे १४। त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी । भैरवस्त्रिपुरेशश्च सर्वाभीष्टप्रदायकः१५ । त्रिस्रोतायां वामपादो भ्रामरी भैरवेश्वरः१६। योनिपीठं कामगिरौ कामाख्या तत्र देवता । यत्रास्ते त्रिगुणातीता रत्नपाषाणरूपिणी । यत्रास्ते माधवः साक्षादुमानन्दोऽत्र भैरवः । सर्वदा विहरेद्देवी तत्र सन्निर्न संशयः । तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता । प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुरालिका । बगला कमला तत्र भुवनेशी सभूमिनी । एतानि नवपीठानि शंसन्ति नव भैरवाः१७। अक्षुल्लश्चैव कल्पस्य प्रयागे ललिता भवः१८। जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः १९। भूतधात्री महामायाः भैरवः क्षीरकण्ठकः । सुमाद्या सा महामाया दण्डाकुण्ड२ यदो मम२० । जङ्घाक्षेत्रः कालिपीठे दक्षपादाङ्गुली च मे । सर्वसिद्धिकरी देवी कालिका तत्र देवता" २१ । भुवनेशो त्रिविरूपा किरीटस्या किरीटनः । देवता विमलानाम्नी संवर्त्तो भैरवस्तथा२२ । वाराणस्यां विशालाक्षी देवता कालभैरवः । मणिकर्णीति विख्याता कुण्डलस्य मम श्रुतेः२३। कन्याश्रमे च मे पृष्ठं निमिषो भैरवस्तथा । सर्वाणी देवता तत्र २४, कुरुक्षेत्रे च गुल्फतः । स्थाणुर्गौरी च सावित्री२५ मणिवेदिकदेशतः । मणिबन्धे च गायत्री सर्वानन्दस्तु भैरवः२६। श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता । भैरवः संवरानन्दो देशेदेशे व्यवस्थितः २७। काञ्चीदेशे च कङ्कालो भैरवो रुरुनामकः । देवता देवगर्भाख्या२८नितम्बः कालमाधवे । भैरवश्चासिताङ्गश्च देवी काली सुविद्विदा२९ । दद्रा दद्रा नमस्कृत्य सर्वसिद्धिमवाप्नुयात् । शोणाख्ये महासेनस्तु नर्मदाख्या शिलाकम् ३०। रामगिरौ तथा नाला शिवानी चण्डभैरवः ३१। वृन्दावने उमजाले उमानाम्नी च देवता । भूतेशो भैरवस्तत्र सर्वसिद्धिप्रदायकः ३२ । संहाराख्ये चर्मदन्ते देवी नारायणी शुचौ ३३ अधोदन्ते महारुद्रो वाराही गङ्गासागरे ३४। करतोयातटे

तत्र वामे वामनभैरवः। अवन्ती देवता तत्र ब्रह्मरूपा वरोद्भवा३५। शोणदेशे दक्षगुल्फं तत्र श्रीसुन्दरी परा। सर्वसिद्धीश्वरी सर्वा सुनन्दानन्दभैरवः३६। कपालिनि भीमरूपा वामगुल्फविभागतः। भैरवश्च महादेव! सर्वानन्दः सुखप्रदा३७। उदरश्च प्रयागे मे चन्द्रभागा यशस्विनी। वज्रहस्तो भैरवश्चोड्डीशो भैरवपर्वते। अवन्यां च महादेवी लम्बकर्णस्तु भैरवः३८। चिबुके भ्रामरी देवी विश्वताख्या जलेश्वरे। भैरवः सर्वसिद्धीशस्तत्र सिद्धिरनुत्तमा ४०। मण्डलोमोदावरीतीरे विश्वेशो विश्वमातृका। दण्डपाणिर्भैरवस्तु४१ वामगण्डे तु राक्षिणी। भैरवो वत्सनाभस्तु तत्र सिद्धिर्न संशयः४२। रत्नावल्यां दक्षकण्ठे कुमारी भैरवः शिवः४३। मिथिलायां महादेवी वामकण्ठे महोदरा४४। मलाहाटां मलापातो योगीशो भैरवस्तथा। तत्र सा कालिका देवी सर्वसिद्धिप्रदायिका४५। कर्णाटे चैव कर्णाने त्वभीरुर्नाम भैरवः। देवता जयदुर्गाख्या नानाभोगप्रदायिनी ४६। वक्रेश्वरे महापातो वक्रनाथस्तु भैरवः। नदी पापहरा तत्र देवी महिषमर्दिनी४७। वशोरे पाणिपद्मस्य देवता वशोरेश्वरी। चण्डश्च भैरवस्तत्र यत्र सिद्धिमवाप्नुयात्४८। अट्टहासे चौट्टपातो देवी सा फुल्लरा स्मृता। विश्वेशो भैरवस्तत्र सर्वाभीष्टप्रदायकः४९। हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः। नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः५०। लङ्कायां नुपुरश्चैव भैरवो राक्षसेश्वरः। इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा५१। विराटदेशमध्ये तु पादाङ्गुलिनिपातनम्। भैरवश्चामृताख्यश्च देवी तत्राम्बिका स्मृता ५२। मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः। सर्वानन्दकरी देवी सर्वानन्दफलप्रदा५३। (पुस्तकान्तरपाठसंवादात् पीठद्वयाधिक्यं लिपिकरप्रमादात् पीठद्वयस्य निर्मूलता तत्र कथानिर्मूलता तत्र गङ्गुमोविवेचयितुम्)। एतास्ते कथिताः पुत्र! पीठनाथाधिदेवताः। क्षेत्राधीशं विना देव! पूजयेन्नान्यदेवताम्। भैरवैर्हियते सर्वं जपपूजादिसाधनम्। अज्ञात्वा भैरवं पीठे पीठयक्षिञ्च शङ्कर!। प्राणनाथ! न सिध्येत् तु कल्पकोटिशतैरपि"। अन्यान्यपि सिद्धपीठानि कुब्जिकातन्त्रे ७पटलोक्तानि यथा "श्रूयतां सावधानेन सिद्धपीठं पतिव्रते!। यस्मिन् साधनमात्रेण सर्वसिद्धीश्वरी भवेत्। जायावती मधुपुरी लाभी गोरक्षचारिणी। हिङ्गुला च महापीठं तथा जालन्धरं पुनः। ज्वालामुखी महापीठं पीठं नगरसम्भवम्। रामगिरिर्महापीठं तथा गोदावरी प्रिये!। नेपालं कर्णहस्तश्च महाकर्णं तथा प्रिये। अयोध्या च कुरुक्षेत्रं सिंहलाख्यं मनोरमम्। मणिपुरं हृषीकेशं प्रयागस्तु तपोवनम्। बदरी च महापीठमम्बिका अर्बुदालयम्। त्रिवेणी च महापीठं गङ्गासागरसङ्गमम्। नारिकेलस्तु विरजा उड्डीयानं महेश्वरी। अमला विमला चैव तथा माहेश्वरी पुरी। वाराणसी त्रिपुरा चैव वाग्मती नीलवाहिनी। गोवर्द्धनो विन्ध्यगिरिः कामरूपं कलौ युगे। चन्द्राकर्णोऽजयश्चैवो आधस्य सुरेश्वरि!। क्षीरपाणं वैद्यनाथं जानीयाद्वामलोचने!। कामरूपं महापीठं सर्वकामफलप्रदम्। कलौ क्षीरपाणं देवि! कामरूपे जयः स्मृतः"। "पीठप्रसङ्गाद्देवेशि! पीठानि शृणु भैरवि!। शृणु तानि महाप्राज्ञे! श्रेष्ठस्थानानि यानि च। सिद्धिप्रदानि साधूनां सद्भिः सेवितानि च। पुष्करस्य मयाख्यं अक्षयाख्यवटाख्या। वराहपर्वतश्चैव तीर्थं त्रिपुरकण्टकम्। मर्मदां यमुनां सिन्धुं गङ्गाद्वारं तथा प्रिये!। गङ्गासागरसङ्गञ्च कुशावर्त्तञ्च बिल्वकम्। श्रीशैलपर्वतश्चैव मल्लिकार्जुनिके तथा। भृगुतुङ्गञ्च केदारं सर्वप्रियमहाफलम्। लक्षिता च शुभा गत्वा च शक्रसरोवरप्रियम्। अर्बुदतीर्थं सङ्गमकं लक्षिकाश्रम एव च। कुमारास्त्रप्रयागौ च भद्रा धन्या सरस्वती। अगस्त्याश्रमश्रेष्ठं च कन्याश्रमजयः परम्। कौशिकी सरयूर्गण्डकीतिःसरपुरःसरः। कालोदकं प्रियं श्रीमत् प्रियकुत्तरमानसम्। मलयवासी गङ्गार्चिर्महाविष्णुपदं महत्। वैद्यनाथं महातीर्थं प्रियः कालञ्जरो गिरिः। रामोद्भेदं गङ्गोद्भेदं हरोद्भेदं महाफलम्। महेश्वरमहातीर्थं कन्यायोद्भेदमेव च। लागीहि प्रियश्रेष्ठा च गायत्री अग्निहोत्रा। कोलेश्वरं शुक्लतीर्थं कन्यातेषामभेदकम्। पाटला च महाबोधिर्नगतीर्थं महत्प्रिये। एकाम्रं रामेश्वरं देवि! तथा मेघवनं हरेः। ऐलेयकवनञ्चैव गोवर्द्धनमहाप्रियम्। हरिश्चन्द्रं पुरश्चन्द्रं शुभूदकमथ प्रिये। इन्द्रनीलं महानादं तथैव प्रियसैनकम्। पञ्चाशुभरः पञ्चवटी वटी वर्वटिका तथा। गङ्गाविलप्रसङ्गञ्च प्रियमादयटं तथा। गङ्गारामाचलञ्चैव तथैव कुक्कुटोत्तमम्। गौतमेश्वरतीर्थञ्च यमितीर्थमेव च। हारीतञ्च तथा देवि! गङ्गासङ्गं प्रियप्रियम्। कुशावर्त्तमभिख्यातं हंसतीर्थं

तथैव च। पिण्डारकवनं ख्यातं हरिहरं तथैव च। तथैव वटरातीर्थं रामतीर्थं तथैव च। जयन्तो विजयन्तश्च सर्वकल्याणदं प्रिये!। विजया वारदातीर्थं भद्रकालेश्वरं तथा। अश्वतीर्थं सुविख्यातं तथा देवि! शिवप्रियम्। ओघवती नदी चैव तीर्थमन्यत्प्रदं तथा। छागलिङ्गमाहात्म्यं करवीरपुरं तथा। वप्रगोदावरं तीर्थं लिङ्गाख्यं सर्वमोक्षदम्। किरीटसत्तरे तीर्थं दक्षिणे तीर्थसत्तमम्। विशालतीर्थं काल्याश्च वनं इन्द्रावनं तथा। ज्वालामुखी हिङ्गुला च महातीर्थं गयेश्वरम्। जानीहि सर्वतीर्थानां क्षेत्रस्थानानि सुन्दरि!। अत्र सन्निहिता नित्यं सर्वदेवा महर्षयः। पितरो योगिनश्चैव ये ये सिद्धिपरायणाः। आगच्छन्ति क्रमाणि श्रद्धाभक्तिमतां प्रिये!। पुण्यकाले पठेद्यस्तु तत्पुण्यमक्षयं भवेत्। श्राद्धकाले पठेद्यस्तु जडत्वाद्वापि भक्तितः। अक्षयं तद्भवेत् सर्वं पितॄणां परमं सुखम्। कस्मिन् स्थाने पठेद्यस्तु सिद्धिर्भवति तत्क्षणात्। अथ वक्ष्ये महेशानि! यत्र या देवता शृणु। यत्र ते यानि नामानि कथयिष्यामि तत् शृणु। मग्नोऽहं परमानन्दे तत्कथामृतवारिधौ। पुष्करे कमलाक्षी च भयायाश्च गयेश्वरी। अक्षया चाक्षयवटेऽमरेशोऽमरकण्टके। वराहपर्वते च त्वं वराही वरयोगिया। नर्मदा नर्मदायाश्च कालिन्दी यमुनाजले। शिवामृता च गङ्गाया भद्रा देहलिकाश्रमे। शारदा शरमूलीरे शोणे च जनकेश्वरी। अप्रकाशा सदा देवी ज्योतिर्मय्यब्धिसङ्गमे। श्रीगाला श्रीगिरी चैव काली कालोदके तथा। महोदरी महातीर्थे गोका गोकरनाजले। मातङ्गिनी मतङ्गे च सुप्रसिद्धिर्विष्णुपादके। अर्गटा स्वर्गमार्गे च गोदावर्यां गयेश्वरी। विष्णुक्षिप्रा च गोमत्यां विशालायां महाबला। शतद्रौ शतरूपा च चन्द्रभागा च तत्र वै। ऐरावत्याश्च दैनोम सिद्धिदा सिद्धितीरके। दृष्टा पवनदे चैव दक्षिणा त्वं प्रकीर्तिता। कौशिकी वीर्यदा च त्वं सङ्गमा तीर्थसङ्गमे। नाकुदायामवन्ती त्वं कुरुक्षेत्रेऽरुणेऽरुणा। तपस्विनी पुण्यतमा भारती भारताश्रमे। सकथा नैमिषारण्ये पाण्डौ च पाण्डुरानना। विशालायां विशालाक्षी सुरङ्गपृष्ठे शिवालिका। श्रद्धा कनखले तीर्थे सुबुद्धिर्बुद्धिनीश्वरी। सुवेशा सुमना गोरी मानसे च सरोवरे। नन्दाद्रौ महानन्दा कपिला कपिलाद्रौ। ब्रह्माणी ब्रह्मगिरौ ब्रह्माण्डकमालिनी। पूर्णिमा चेन्दुमत्याश्च सिन्धोरनिप्रिया सदा। लाङ्गली लङ्गमे हस्तिः स्वधा च पितृतुष्टिदा। पुण्या मङ्गलितायाश्च प्रयागे पापनाशिनी। ब्रह्मसंहरणे चैव घोररूपा महोदरी। स्वर्गोद्भेदे महाकाली प्रवला च महावने। भद्रा च भद्रकाली च भद्रेश्वरी शिवप्रिया। भद्रेश्वरे रमा विष्णुप्रिया विष्णुपदे तथा। दारुका नर्मदोद्भेदे कावेर्यां कपिलेश्वरी। भेदिनी कृष्णवेण्यां च भेदं सुभयवाहिनी। श्रद्धा च शुक्रतीर्थे च प्रभासे चेश्वरी तथा। महाबोधौ महाबुद्धिर्पाटले पाटलेश्वरी। सुवला रामतीर्थे च नागेशी नागवन्दिता। मदनी च मदली च प्रमदा च मदन्तिका। मेघस्वना मेघवाहे विद्युत्तडोद्दामनीच्छदा। रामेश्वरे महाबुद्धिर्वीरा चैलापुरे वती। प्रियाचमार्गके दुर्गा सुवेशा सुरसुन्दरी। कात्यायनी महादेवी गोवर्द्धनेऽखिलाखिका। सुमेश्वरी हरिश्चन्द्रे, पुरचन्द्रे पुरेश्वरी। पृथूदके महावेगा मैनाकेऽखिलवर्द्धिनी। इन्द्रनीले महाकान्ता रत्नवेगा सुशोभना। वाणेश्वरी महानादे, महातेजा महावने। प्रयाप्यरणि सारङ्गा, पञ्चवट्यां तपस्विनी, वटीशी वटिकायाश्च सर्वयज्ञे सुरङ्गिणी। सङ्गमे विन्ध्यगङ्गाख्या, विन्ध्ये श्रीविन्ध्यवासिनी; महानन्दा नन्दवटे, गङ्गवाटाचले शिवा। आर्यावर्त्ते महार्या त्वं, विसङ्गिर्ङ्गचमोचने। अङ्गुहाले च चामुण्डा, तन्त्रे श्रीगौतमेश्वरी। वेदमयी ब्रह्मविद्या वाग्विशे त्वमरस्वती। कारीते हरिणाक्षी च ब्रह्मावर्त्ते व्रजेश्वरी। मायली चैव वामिनी कुशावर्त्ते कुशप्रिया। हंसेश्वरी महातीर्थे परहंसेश्वरेश्वरी। पिण्डारकवने भव्या सुरवा सुखदायिनी। नारायणी वैष्णवी च मङ्गलारे विमुक्तिदा। श्रीविद्या बदरीतीर्थे, रामतीर्थे महाकृतिः। जयन्ती च जयन्ते त्वं, विजयन्तेऽपराजिता। विजया च महाबुद्धिः, वारदायाश्च वारदा। सुभद्रे भद्रदा, भव्या भद्रकालेश्वरे तथा। महाभद्रा महाकाली हयतीर्थे गयेश्वरी। वेदा वेदमाता च विदेशे वेदमस्तके। सुवलायाश्च महाविद्या, महानद्यां महोदया। चण्डा च तिपदे चैव लागलिङ्गे बलिप्रिया। साहदेशे जगन्माता, करवीरपुरे सती। माहने रङ्गिणी रामा परमा परमेश्वरी। वप्रगोदावरे तीर्थे देवमातृविशेश्वरी। अयोध्यायां भवानी च जयदा जयमङ्गला। माथुरी मथुरायाश्च देवकी यादवेश्वरी। द्वारकायां रुक्मिणी राधा राधावृन्दावने रमा!।

कात्यायनी महामाया भद्रकाली कलावती। चन्द्रभागा महायोगा महायोगिन्यधीश्वरी। वज्रेश्वरी यशोदेति वज्रश्रीर्गोकुलेश्वरी। कालञ्जरे कलञ्जाक्षी स्वादवन्त्यामतिपावनी। विद्या विद्यापुरे चैव विमला नीलपर्वते। रामेश्वरी सेतुबन्धे, विमला पुरुषोत्तमे। विरजा नाभिपृथ्वीञ्च भद्राश्वे भद्रकर्णिका। तमोलिप्ते तमोघ्नी च स्वाहा सागरसङ्गमे। कुलश्रीर्वैद्यहट्टे च माधवी माधवप्रिया। मङ्गला मङ्गले कोटे, राढ़े मङ्गलचण्डिका। ज्वालामुखी शिवापीठे मन्दरे भुवनेश्वरी। काशीघाटे गुह्यकाली, किरीटे च महेश्वरी। किरीटेश्वरी महादेवी. लिङ्गाख्ये लिङ्गवाहिनी। साक्षात् सर्वत्र भक्तानाम भक्तानां कुतोऽपि न। अथान्यत्संप्रवक्ष्यामि सिद्धस्थानानि सुन्दरि!। सर्वपापविनाशार्थं सर्वसिद्धिप्रदं नृणाम्। निर्मितानि शिवेनेह सिद्धस्थानानि यानि च। श्रुत्वा मनसि भाव्यानि प्रकाश्यान्यधिकारिषु। अमरेशे महापीठे कुमुदङ्कारसंज्ञकः। तत्र दुर्गोदयं नाम चण्डिका च महेश्वरी। प्रभासे सोमनाथोऽसौ देवी च पुष्करक्षया। देवदेवाधिप शम्भुर्नैमिषे च महेश्वरः। तत्र प्रज्ञा च देवी च शिवानी लिङ्गधारिणी। पुष्करे च राठ.गश्रिः पुरहूता महेश्वरी। श्रीपर्वते त्रिया नाम्ना शङ्करस्त्रिपुरान्तकः। मायावी शङ्करी तत्र भक्तानामखिलार्थदा। जयेश्वरे महास्थाने शङ्करी च त्रिशूलिनी। त्रिशूली शङ्करस्तत्र सर्वपापविमोचकः। आत्मातकेश्वरे स्कन्दा स्कन्दाख्या परमेश्वरी। गयक्षेत्रे महाख्या शिवो यः प्रपितामहः। कुरुक्षेत्रे शिवःस्थाणुः शिवा स्थाणुप्रिया परा। दृष्टनाभे स्वयम्भूश्च देवी स्वायम्भुवा मता। उग्रः कनखले प्रोक्तः शिवोऽग्रे शिववल्लभा। विमलेश्वरे विश्वगम्भुरिष्टा विश्वप्रिया सदा। अट्टहासे महानन्दो महानन्दा महेश्वरी। महालक्ष्मी महेन्द्रे च पार्वती च महालका। भीमेश्वरो भीमपीठे शिवा भीमेश्वरी तथा। वस्त्रपादे भवो नाम भवानी भुवनेश्वरी। अद्रिकूटे महायोगी रुद्राणी परमेश्वरी। अविमुक्ते महादेवो विशालाक्षी शिवा परा। महामाये हरोरुद्रो महाभागा शिवा तथा। मङ्गीशस्य गोकर्णे शिवभद्रा च चण्डिका। भद्रकर्णे महादेवो भद्रा च कर्णिका तथा। सुपर्णाख्ये सहस्राक्षः सुपर्णा परमेश्वरी। स्थाणुसंज्ञे शिवः स्थाणुरीशस्था श्रीधरा शिवा। वराहाख्ये महास्थाने कपर्दाख्यो महेश्वरः। कपर्दाक्षी महेशानी सकलार्थप्रदायिनी। लागला तु कपर्दी च प्रवला च महेश्वरी। अर्बुदेशे अरण्ये च सन्ध्याख्या परमेश्वरी। वाकोटे च महाकोटः शिवा च सुरसुन्दरी। माण्डलेश्वरपीठे च वरवीरार्च्य ईश्वरा। श्रीनद्याम्रपुरे साक्षाद्वरनामा सभापतिः। शिवः सभापतिर्नाम यत्र तत्यति शङ्करः। आत्मानन्दमहानादं पूर्णानन्दमहार्णवम्। स्थलं यत्र देवेशं देवेशी परिपश्यति। तत्र चापु महादेवो भक्तानां वरदो भवेत्। स्थलं यत्र सर्वेशं वीक्ष्य लोको विमुच्यते। पुण्यस्थानेषु सर्वेषु स्थानमेतन्मनोरमम्। यद्दुष्कर्माणि सर्वाणि अक्षयाणि भवन्ति वै। तस्मिन् महोत्तमे स्थाने शिवगङ्गाख्यमद्भुतम्। तडागमस्ति तत्तीरे दक्षिणे स्थलतीर्थगः। तटाकेऽस्मिन् वसन् स्नात्वा सभानाथं समीक्ष्य च। अष्टोत्तरसहस्रन्तु लभेच्छ्रुत्वोपदाम्बितः। यानि ते कथितान्यत्र सदा तिष्ठन्ति देवताः। पिबतः सिद्धगन्धर्वा सिद्धयः सर्वसिद्धिदाः। अत्र दत्तं हुतं जप्तं स्थानमक्षयपुण्यदम्। यद्यत् प्रकीर्त्तितं नाम तेरेव परिपूर्णकम्। प्रणवादिहृदन्तेन भजतेऽभीष्टसुत्तमम्। भोजयेद्ब्राह्मणान् योऽत्र क्षयं फलमश्नुते। इह नानासुखं भुक्त्वा हरगौरीपुरं व्रजेत्। शोकदुःखविनाशोऽयं कल्याणनिधिरीश्वरः। निर्मिते सर्वसम्पत्त्यै पुण्यक्षेत्रादि भूतले। अकाले पुण्यगुह्यानामनेनैव पुण्यप्रयोगनैः। साधिकानां भवेदत्र निवासः साधनं प्रति। तस्माद्धृदयेन कर्त्तव्यमत्र साधनमुत्तमैः"।

कालिकापु० १६अ० एकपञ्चाशत्पीठोत्पत्तिर्दृश्या।

पीठकेलि पु० पीठमर्द्दे नायकसहायभेदे त्रिका०।

पीठगात्र न० लेखप्रताकाष्टकमलाद्यवयवभेदे ब्रह्म०त०।

पीठचक्र न० पीठ इव चक्रमस्य। शकटादौ "पीठचक्रेण गोयुक्तेनेत्येके" आश्व०गृ० ४।२।६ "गोयुक्तेन पीठचक्रेण शकटादिना" नारा०।

पीठन्यास पु०पीठे न्यासः। पीठदेवतानां आधारशक्तिप्रकृत्यादीनां प्रणवादिनमोऽन्तेन हृदये न्यासभेदे तन्त्रसारः

पीठभू स्त्री प्राकारसमीपस्थे भूभागे वप्रे हेमच०।

पीठमर्द्द पु० नायकसहायभेदे "दूरावर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु। किञ्चित्तद्धीनः सहाय एवास्य पीठमर्द्दाख्यः"। "तस्य नायकस्य बहुव्यापिनि प्रसङ्गागतेतिवृत्तेऽनन्तरोक्तैर्नायकसामान्यगुणै किञ्चिदूनः पीठमर्द्दनामा सहायो भवति। यथा राम-

चन्द्रादीनां सपीवादयः" साहित्यदर्पणे उक्तम् ।

पीठसर्प त्रि॰पीठे सर्पति सृप–अच् । खञ्जे भा॰व॰१५अ॰ । चिनि पीठसर्पिन् तत्रार्थे हारा॰ ।

पीड वधे विलोडने च चु॰उभ॰सक॰सेट् । पीडयति ते अदित् अपिपीडत् त । पीडा पीडनम् । धान्यादेर्मर्दने च । आ+भूवधे सक॰। आपीडयति आपीडा । अवादिपूर्वकस्तु तत्तदुपसर्गस्योत्थार्थयुक्ते विलोडने ।

पीडन न॰ पीड+भावे ल्युट् । १दुःखोत्पादने २धान्यादीनां मर्दने (माडा) (टेपा) ३व्यापारभेदे "मर्दोऽभिघातविमाथनपीडनाद्यैः पक्वं द्रुमादिव फलं पतति क्षणेन" माधवकरः ।

पीडा स्त्री पीड–भावे भिदा॰ अङ् । १व्यथायां २दुःखे च ३लज्जायां ४शिरोमालायां ५परवशत्वे च मेदि॰ ।

पीडित त्रि॰पीड–क्त । १व्यथिते २मर्दिते ३स्त्रीणां करणभेदे मेदि॰ "सहस्राणाधिका मन्त्रा दशकृत्वः पीडिताङ्गयाः" तन्त्रसारोक्ते ४मन्त्रभेदे पु॰ भावे क्त । ५पीडायां न॰ ।

पीत त्रि॰पा–कर्मणि क्त । १पानकर्मणि भावे क्त । २पाने न॰ पिबति यथान्तरं पा–अच्॰ कर्त्तरि क्त । ३वर्णभेदे पु॰ ४तद्वति त्रि॰ अमरः । ५हरिताले न॰ मेदि॰ । पीतं पानमस्त्यस्य अच् । ६पानकर्त्तरि त्रि॰ "वनाय पीत प्रतिबद्धवत्सामृ" रघुः । काव्ये वर्णनीयपीतवर्णद्रव्याणि कविकल्पलतायामुक्तानि यथा "पीतानि ब्रह्मा जीवे२न्द्र३ गरुडे४भरत५मञ्जटाः६ । गौरी७ द्वापरट गोमूत्रट मधु॰ पीतरवा११ रत्नः १२ । हरिद्रा१३ रोचना१४ रीति१५गन्धके१६ दीप१७ चम्पके१८ । किञ्जल्कट वल्कले२० शालि२१ हरिताल२२ मनःशिलाः २३। कर्णिकारं२४ चक्रवाक२५ वानरौ२६ शारिकासुखम्२७ । केशवांशुक२८ मण्डूक२९ पराग३० कनकादयः३१ ।

पीतक त्रि॰ पीत+स्वार्थे क । १पीतशब्दार्थे संज्ञायां कन् । २हरिताले अमरः ३कुसुम्भे जटाधरः । ४असुरभेदे ५पद्मकाष्ठे ६हरीतौ पित्ते ७माणिके ८पीतचन्दने न॰ राजनि॰ ९नन्दीवृक्षे १०पीतशाले च पु॰ रत्नमाला । ११श्योनाकभेदे १२हरिद्रुक्षे १३अशोकवृक्षे च पु॰ राजनि॰। पीतेन हरितालेन रक्तं "तेन रक्तं रागात्" पा॰ इत्यधिकारे "पीतात् कन्" वार्त्ति॰कन् । १४हरितालेन रक्ते त्रि॰। १५अव्यक्तरागोः संज्ञाभेदे बीजगणितम् । अव्यक्तमध्ये दृश्यम् ।

पीतकदली स्त्री नित्यकर्म॰ । स्वर्णकदल्याम् (चंपाकला) राजनि॰ ।

पीतकद्रुम पु॰ नित्यकर्म॰ । हरिद्रुक्षे राजनि॰ ।

पीतकन्द न॰ पीतः कन्दो यस्य । गञ्जरे (गाँजर) राजनि॰

पीतकरवीरक पु॰ नित्यकर्म॰। स्वार्थे क । पीतवर्णकरवीरवृक्षे राजनि॰ ।

पीतकावेर न॰कुत्सितं वेरं कावेरं पीतं कावेरं यस्मात् यस्य वा । कुत्सिताङ्गं पीतं कुर्वति १कुङ्कुमे २पित्तले च मेदि॰।

पीतकाष्ठ न॰नित्यकर्म॰। पीतचन्दने पीतागुरुणि राजनि॰।

पीतकाला स्त्री पीता अच च काला । आवर्त्तकलतायां राजनि॰ । [चैव पीतकुष्ठं प्रजायते" भाता॰।

पीतकुष्ठ न॰ नित्यकर्म॰ । पीतवर्णकुष्ठरोगे "भगिनी गमने

पीतगन्ध न॰पीतमच्च गन्धं गन्धयुक्तम् । पीतचन्दने राजनि॰

पीतघोषा स्त्री नित्यकर्म॰। पीतपुष्पवल्लां घोषातकाम् राजनि॰ । [राजनि॰।

पीतचन्दन न॰ नित्यकर्म॰ । कालेयकेतिप्रसिद्धे चन्दनभेदे

पीतचम्पक पु॰ पीतः चम्पक इव । प्रदीपे जटा॰।

पीततण्डुल पु॰पीतस्तण्डुलो यस्य । (काङ्गनी) १धान्यभेदे हेमच॰। २क्षीरिकावृक्षे स्त्री टाप् । राजनि॰। [ङीष्।

पीततुण्ड पु॰पीतं तुण्डमस्य । कारण्डवपक्षिणि त्रिका॰ स्त्रियां

पीततैला स्त्री पीतं तैलं यस्याः । १ज्योतिष्मतीलतायां जटा॰ २महाज्योतिष्मतीलतायां राजनि॰ । पीतं तैलं येन राजद॰वा परनि॰। पीततैल तैलपीत वा तैलपायिनि त्रि॰

पीतदारु न॰ नित्यकर्म॰ । १परवृक्षे रत्नमाला २देवदारुणि ३हरिद्रुक्षे च राजनि॰। तस्य विकारः रजतादि॰ अञ् । पैतदारव तद्विकारे त्रि॰ स्त्रियां ङीप् ।

पीतदुग्धा स्त्री पीतं दुग्धं यस्याः । दृढिपरिवर्त्तनेन दृढिरूपेण यस्या दुग्धमुत्तमर्णेन पीयते तस्याम् गवि आहितगव्यां धेनुव्यायां हेमच॰ ।

पीतद्रु पु॰नित्यकर्म॰। १परवृक्षे २दारुहरिद्रायाञ्च अमर॰ ।

पीतन न॰ पीतं करोति पीत–णिच्–ल्यु । १कुङ्कुमे २हरिताले ३पीतदारुणि च मेदि॰। ४मूले ५आम्रातके च पु॰ मेदि॰ स्वार्थे क । आम्रातके (आमडा) पु॰ राजनि॰ ।

पीतनील पु॰ "वर्णो वर्णेन" पा॰ कर्म॰ । १नीलपीतमिश्रिते हरिद्वर्णे हेमच॰ । २तद्वति त्रि॰ । [पत्रच॰ ।

पीतपर्णी स्त्री पीतं पर्णं यस्याः ङीप् । (विडिटी)लतायाम्

पीतपाणि पु॰ पीतः पाणिरस्य । रोगभेदेन पीतवर्णहस्तयुक्ते "मार्जारे निहते चैव पीतपाणिः प्रजायते" भाता॰

पीतपादा स्त्री पीतौ पादौ यस्याः। शारिकाभेदे हेमच०।

पीतपुष्प त्रि० पीतं पुष्पमस्य। १पीतवर्णपुष्पयुक्ते २कर्णिकारवृक्षे पु० मेदि०। ३चम्पकवृक्षे पु० राजनि०। ४पीतभिण्टाख्यां ५पिण्डातकभेदे पु० रत्नमाला। पीतं पुष्पं यस्याः कप् टाप्। ६इन्द्रवारुण्यां ७भिङ्गरिकाक्षुपे ८आढक्यां च स्त्री राजनि०। पीतं पुष्पं यस्याः जातित्वाद् ङीष्। ९वरुपुष्प्यां १०वरुदेव्यां ११मङ्गोपातक्यां १२तपुष्पायां स्त्री राजनि०।

पीतप्रसव पु० पीतः प्रसवः पुष्पमस्य। पीतकरवीरे राजनि०

पीतफल(क) पु० पीतं फलं यस्य वा कप्। १शाखोटवृक्षे राजनि० २कर्णिकारवृक्षे त्रिका०। [त्रिका०।

पीतबालुका स्त्री पीता बालुकेव चूर्णमात्। हरिद्रायाम्

पीतवी(बी)जा स्त्री पीतं बी(बी)जमस्याः। मेथिकायां राजनि०। [युक्ते भृङ्गराजभेदे राजनि०।

पीतभृङ्गराज पु० कर्म०। (पीलाभँगरिया) ख्याते पीतवर्णे-

पीतमणि पु० नित्यकर्म०। पुष्परागमणौ राजनि०।

पीतमस्तक पु० पीतं मस्तकं यस्य। खगभेदे मेदि०।

पीतमाक्षिक न० नित्यकर्म०। माक्षिके राजनि०।

पीतमुद्ग पु० कर्म०। (बोनासग) मुद्गभेदे हेमच०।

पीतमूलक न०पीतं मूलमस्य कप्। (गाँजर) गर्जरे राजनि०

पीतयूथी स्त्री नित्यकर्म०। स्वर्णयूथ्यां राजनि०।

पीतरक्त न० "वर्णो वर्णेन" पा० कर्म०। १रक्तवर्णे यद्यपि पीतवर्णे च पीतेन रक्तं जातरागम्। २पुष्परागमणौ न० राजनि०।

पीतराग न० पीतो रागो वर्णो यस्य। १किञ्जल्के २सिन्दूरे च कर्म०। ३पीतवर्णे पु० ४तद्वति त्रि०।

पीतरोहिणी स्त्री पीता सती रोहति रुह-णिनि ङीप्। काञ्चन्यां भावप्र०। [द्युते त्रि०।

पीतल पु०पीतं मलमरं लाति ला-क। १पीतवर्णे २त-

पीतलक न०पीतलेन वर्णेन लायते ला-क। पित्तले राजनि०

पीतलोह न०नित्यकर्म०। पित्तले राजनि० [द्राभवस्त्रयुते त्रि०

पीतवासस् पु०पीतं वासो यस्य। १श्रीकृष्णे हला० २हरि-

पीतवृक्ष पु० नित्यकर्म०। शोनाकभेदे राजनि०।

पीतशाल पु० पीतं फलं शलति याति शल-घञ् उपस०। अर्जुनवृक्षे (पियाशाल) अमरः।

पीतसार न० पीतं सारं यस्य। १पीतवर्णचन्दनकाष्ठे मलयजे शब्दर० २हरिचन्दने च ३गोमेदरत्नौ पु०मेदि० ४जलकाष्ठवृक्षे जटा० ५बुरस्के नीलके च पु० राजनि०। कप्। पीतसारक निम्बे शब्दच०। [शब्दच०।

पीतसारि न० पीतं सारयति सृ-णिच्-इन्। स्रोतोऽञ्जने

पीतसालक पु० कर्म० संज्ञायां कन्। (पियाशाल) पियालवृक्षे अमरः। [वृक्षभेदे शब्दार्थकल्प०।

पीतस्कन्ध पु० पीतः स्कन्धोऽस्य। हरिद्राभस्कन्धयुक्ते

पीतस्फटिक पु० नित्यकर्म०। पुष्परागमणौ राजनि०।

पीतहरित पु०"वर्णो वर्णेन" पा० १पीतवर्णे अथच हरिद्वर्णे २तद्युते त्रि०हेमच०। [द्राभगात्रे त्रि स्त्रियां ङीष्।

पीताङ्ग पु०पीतमङ्गमस्य। १शोनाकभेदे राजनि०। २हरि-

पीताब्धि पु० पीताब्धिः समुद्रो यत्र। अगस्त्यमुनौ हेमच० तत्कथा भा०व० १०५अ० द्रष्टा।

पीताम्बर पु०पीतमम्बरं यस्य। १श्रीकृष्णे अमर २शैलूषे नटे च मेदि० ३हरिद्राभवस्त्रयुक्ते त्रि०कर्म०। ४पीतवसने न०। [वर्णयुक्ते २तद्वति त्रि०।

पीतारुण पु० "वर्णो वर्णेन" पा०कर्म०। १पीतरक्तमिश्रित-

पीताश्मन् पु० नित्यकर्म०। पुष्परागमणौ राजनि०।

पीति पु० पा-क्तिच्। १घाटके अमरः पा-भावे क्तिन्। २पाने ३गतौ च करणे क्तिन्। ४गुण्डायाम् मेदि०।

पीतिका स्त्री पीतैव स्वार्थे क अतइत्वम्। १दारुहरिद्रायां रत्नमाला २स्वर्णयूथ्यां जटा०।

पीतिन् स्त्री पीतमनेन इष्टादित्वादिनि। घोटके रायमुकुटः

पीतु पु०पा-पाने पा-रक्षणे वा क्तु किच्च। १वह्नौ २दिवाकरे च उज्ज्वलद०. सूर्यश्च रश्मिभिर्जलस्य पानात् वह्निना स्वदेहसामायोयुक्तजलस्य पानात्तथात्वम्। ३यूपपतौ वह्निप्रसारः।

पीतुदारु पु० पीतुरिव अग्नितुल्यं स्वर्णाभं वा दारु यस्य। १देवदारुवृक्षे शत०ब्रा० २५२१५ माधवः। २देवदारुणि कात्या०श्रौ० २४३१२ कर्कः। [स्थिरीभूते।

पीत्वास्थिरक त्रि० पीत्वा स्थिरः मयू० स०। पानोत्तरं

पीथ न० पा-पाने कर्मणि थक्। १हते २जले च ३स्वर्णे ४वह्नौ च पु० उज्ज्वलद०।

पीथि पु० पीति+पृषो०। घाटके हारस्वामी

पीन त्रि०पाय-क्त समुदारस्य दीर्घः। १स्थूले २दृढे अभ्रके च अमरः। भावे क्त। ४स्थूलतायां न०। पीनस्तादूरदेशादि अश्वादि०र। पीनर पीनस्य मञ्चिलदेशादौ त्रि०।

पीनस पु० पीनं पीनतां स्यति सो-क। १नासिकारोगभेदे प्रतिश्याये अमरः तद्रोगस्य निदानादि माधवकरोक्तं यथा "घ्राणस्रुते वक्त्र विशुष्यते च प्रक्लिद्यते घूर्णति चैव

नाथा । न वेत्ति यो मन्दरयांच मन्थुर्भुंष्टं व्यवस्थेत् कलु पीनदेम । तत्रानिकर्त्तेप्रभवं विकारं ब्रूयात् प्रतिश्रावसमानलिङ्गम्" । आमपीनवलक्षणं यथा "शिरोगुरुत्वनद्धचिनांसाश्वासकासकः । आमः क्षीयति आभीक्ष्णमामपीनसलक्षणम्" । पक्वपीनसलक्षणं यथा "आमलिङ्गान्वितः श्लेष्मा घनः श्लेष्मु निमज्जति । स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम्" । २कर्कर्यां स्त्री राजनि० गौरा० ङीष् । [पक्वावां नवि अमरः ।

पीनोधी स्त्री पीनमुधोऽस्याः ङीष् अनङ्गलादेशः । पीवरो

पीपर् वाच्याया भ्वा०चु०पर०सेट् । पीपरति निचखनुः ।

पीपरि पु०अपि+पृ-इन् अङ्गोपः दीर्घः । मुखमूले राजनि०

पीय प्रीणने चौ०पर० सक० सेट् । पीयति अपीयीत् पिपीय । अयं हिंसायां निरु० ४ २५

पीयलु त्रि० पीय-हिंसायां बा० कलु । हिंसायीले यत्नौ उ० ८ २ १५ [२रवौ ४चूके च मेदि० ।

पीरु पु० पा-पाने कु नि० । १घाते २काके च उज्ज्वल० ।

पीयूषा स्त्री वृक्षभेदे ततः चतुरर्थ्यां काशा० टच । पीयूषिच तत्संबन्धदेशादौ त्रि० । तस्याः विकारः ताला० अण् । पैयूष तद्विकारे त्रि० । एतत्परस्य वनस्य अत्वं पीयूषावणम् ।

पीयूष न०पीव-अमन् । देवानां पेयभेदे १अमृते । नदप्रसूतायाः गोः आद्यप्रसवे २दुग्धे च अमरः । तत्रपेयूषमपि

पीयूषमहस् पु०पीयूषमिव आह्लादकं महो यस्य । सुधाकरे १चन्द्रे चन्द्रप्रभा० २कर्पूरे च । पीयूषरुचिप्रभृतयोऽप्यत्र ।

पीयूषवर्ष पु० पीयूषं वर्षति वृष्टारा वृष-अण् उप०स० । १चन्द्रे २कर्पूरे ३चन्द्रालोकालङ्कारप्रन्थकारे विद्वन्नेदे च

पील रोधे भ्वा०पर०अक०सेट् । पीलति अपीलीत् पिपील ।

पीलक त्रि०पील-ण्वुल् । १रोधके २पिपीलिकायां हेमच० ।

पीला स्त्री पीलनाम्न्यां स्त्रियाम् तस्या अपत्यं "पीलाया वा" पा०अण् पक्षे "द्व्यचः" इति ठक् । पैलपैलेय तदपत्ये पुंस्त्री० ।

पीलु पु० पील-उ । १परमाणौ पीलुपाकः इति वैशेषिकादयः । पीलुपाकप्रकारः कणादकृतोपस्कारवृत्तौ ७ ६ सूत्रे दर्शितः औलुक्यशब्दे सर्वदर्शनसंग्रहोक्तं १५८७ पृ० दर्शितम् । २गजे ३अस्थिखण्डे ४तालकाण्डे ५कुसुमे च मेदि० ६शरे ७क्षमौ धरणिः । कोङ्कणदेशख्याते ८गुडफलवृक्षे राजनि० । तस्य गुणाश्च राजनि० उक्ता यथा "पीलुः श्लेष्म वायुगुल्मनाशनः पित्तदो मतः । यत् स्वादु तिक्तं तद्रोष्णं त्रिदोषहरणं फलम्" तस्य फलमप्य तस्य गुण । एतत्फले न० ।

पीलुक पु० पीलुरिव कायति कै-क । कृमिभेदे हेमच० स च त्रीन्द्रियः "कृमिपीलुकलूताद्याः क्षुद्रिमिचतुरिन्द्रियाः" हेमच० ।

पीलुकुष्ठ न० पीलूनां पाकः पीलादि० कुष्ठ । पीलुपाके तत्रोदम् उत्पन्नम् । पैलुकुष्ठ तत्सम्बन्धिनि त्रि० ।

पीलुनी स्त्री पील-उन गौरा० ङीष् । मूर्वायाम् रत्नमा० ।

पीलुपत्र पु० पीलुवत् कृमिकलितं पत्रं यस्य । मोरटालतायां राजनि० ।

पीलुपर्णी स्त्री पीलुकलितानि पर्णान्यस्याः ङीष् । १मूर्वायाम् २विम्बिकायाम् ३ओषधिभेदे च मेदि० ।

पीलुमूल न०६त० । १पीलोर्मूले २यतमूल्यां स्त्री रत्नमाला ३शालपर्ण्यां भावप्र० ४तरुण्यां गवि च संक्षिप्तसारः । ५अन्नगन्धायां ६यतावर्य्यां च स्त्री टाप् राजनि० । तत्र दीयते ऋ०टाऽण् । पैलुमूल । तत्र देये । "तेनैकदिक्" पा० अधिकारे तस्मिः । पीलुमूलतस् पीलुमूलैकदिशि अव्य० ।

पीलुवह त्रि०पीलुं वहति वह-अच् पीलादीनां पर्युदासात् "इको वहे" पा० न दीर्घः । पीलुवाहिनि जलादौ ।

पील्वादि पु०पाके कृष्णपत्यवनिमित्ते शब्दगणे स च पा० ग०सू०उक्तो यथा "पीलु कर्कन्धू शमी करीर कुवल बदर अत्रत्य खदिर" ।

पीव स्थौल्ये भ्वा०पर०अक०सेट् । पीवति अपीवीत् पिपीव ।

पीवन् त्रि० पीव-कनिण् सम्प्र०दीर्घः । १स्थूले अमरः । २बलवति त्रि० ३वायौ पु० संक्षिप्तसारः ।

पीवर त्रि०पीव-अरच् सम्प्र० दीर्घः । १स्थूरे उपचितावयवयुक्ते (मोटा) अमरः स्त्रियां ङीष् । तामसमन्वन्तरे २सप्तर्षिभेदे पु० मार्क०पु० ७४अ० । [इत्यादि ।

पीवस् त्रि० पीव-स्थौल्ये असुन् । स्थूले । पीवान् पीवांसौ

पीवा स्त्री पी-पाने बा० व । जले संक्षिप्तसारः ।

पीवोपवसन त्रि० पीवसः उपवसनं समीपस्थितिरस्य पृषो० सलोपः । स्वच्छे यजु० २१ ४१ वेददीपः ।

पुंयोग पु० ६त० । पुरुषयोगे "लक्ष्मीः पुंयोगमाशंसुः" ।

पुंराशि पु० कर्म० । विषमे राशौ मेषमिथुनसिंहादौ ।

पुंलिङ्ग न० ६त० । १पुरुषचिह्ने शिश्ने । पुंस इव लिङ्गमस्य । २पुंस्त्वबोधके शब्दभेदे पु० ।

पुंवत् अव्य०पुंसइव वति । पुंसा तुल्ये । तस्य भाव । पुंवद्भाव पुंलिङ्गस्य शब्दस्येव भावे पुंसइव रूपे ।

पुंवत्स पु॰ कर्म॰। पुरुषरूपे वत्से। पुमान् वत्सो यस्याः। ईषदूनपुरुषवद्भूतायां गव्यादौ स्त्री आत्मा॰ त्रो॰४।१४।१

पुंवृक्ष पु॰पुमानिव वर्धते वृक्ष—क। कदूम्बरे (कुँदा)वृक्षभा॰

पुंश्चली स्त्री पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छति चल् गौरा॰ ङीष् पुंसोऽन्यस्योपे अनुपरे स्वयिरक्तस्य "संपुंकानां सः" पा॰ सः सुलम्। १व्यभिचारिण्यां स्त्रियाम् अमरः। उपचारात् २पारदारिकपुरुषेऽपि। "अरेखे-चायुर्मनुष्यविधिस्त्रीभिश्च पुंश्चला" भरतपु॰ ६६अ॰। पुंश्चलीनिन्दा ब्रह्मवै॰पु॰ श्रीकृष्णजन्मख॰ ३६।२४।३२अ॰ यथा "अहो कोवेद भुवने दुर्वेदं पुंश्चलीमनः। पुंश्चल्यां को हि विश्वस्तो विधिना च विडम्बितः। अग्निमध्यतप यथा धर्मेण च कुशेन च। वाञ्छितं नूतनं प्राप्य विस्मरति पुरातनम्। यदा स्वकर्मांशाध्या वा को वा तस्याः प्रियोऽप्रियः। दैवे कर्मणि पैत्रे च पुत्रे वन्धौ च भर्तरि। दारुणं पुंश्चलीचित्तं यदा अङ्गार कर्मणि। प्राणाधिकं रविस्तं साऽमृतदृष्ट्या हि पुंश्चली। रत्नमर्दं रत्नविस्तं विषदृष्ट्या हि पश्यति। सर्वेषां स्त्रवमस्त्येव पुंश्चलीनां न कुत्रचित्। दारुणा पुंश्चली जातिर्नरजातिश्च एव च। निष्कृतिः कर्मयोगात्मे सर्वेषामस्ति निश्चितम्। न पुंश्चलीनां विप्रेन्द्र! यावच्चन्द्रदिवाकरौ। अन्यासां कामिनीनाञ्च कीटं कृत्तुञ्च वा दया। वा नास्ति पुंश्चलीनान्तु कान्तं हन्तुं पुरातनम्। रतिस्तं नूतनं प्राप्य विस्मरत्यं पुरातनम्। कान्तं दहा हिनस्त्येव शोपायेनावलीलया। पृथिव्यां यानि पापानि पुंश्चलीत्वे भारते। तिष्ठन्ति ताश्चो न पराः पापिष्ठाः सन्ति केचन। पुंश्चलीपरिपञ्चाशं सर्वपातकमिश्रितम्। दैवे कर्मणि पैत्रे च देवं न च तथा सत्यम्। अन्नं विना यथो मूत्रं पुंश्चलीनाञ्च निश्चितम्। दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत्। अन्यर्थं कामसन्ते पचन्त्येव सदारथे। चोराग्नयारे जनवस्तदन्ति दिनानियम्। पुंश्चल्यन्नञ्च यो भुङ्क्ते देवाद्यदि नराधमः। सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम्। आयुःश्रीयशसां हानिरिह लोके परत्र च। तस्माद्यत्नात्कुलस्त्रीयं पाकपात्रं कथञ्चनम्। पुंश्चलीदर्शने पुण्यं बालाविद्विर्भवेद्ध्रुवम्। अर्थेने च महापापं नीचस्त्रीमाहिमुच्यति। स्नानं दानं व्रतञ्चैव जपश्च देवपूजनम्। निष्फलं पुंश्चलीनाञ्च भारते जीवनं पुना"। "अहो वैं परिमाण्या पुंश्चली च विशेषतः। धनायुःप्राणवयसां नाशिनी दुःखदायिनी। अकार्यं तत्परा नित्यं परकार्यविघातिनी। निष्ठुरा परघातिन्यः सर्वापहीनरूपिणी। विद्युद्दीप्तिर्जले रेखा लोभानुमैत्री यथा भवेत्। परद्रोहाद्यथा सम्यत् कुलटा प्रेम तत्परम्। सर्वेभ्यो हिंसजन्तुभ्यो विषदुर्वीजा सदैव या। योषिन्नेत्रां संमूढो विपत्तस्य पदे पदे"।

पुंश्चलू स्त्री पुंश्चलति चल—कू पुंश्चलीवत् सन्निकार्यम्। पुंश्चल्यां स्त्रियाम् "कामस्य पुंश्चलूम्" यजु॰१०।५॰वेददी॰

पुंश्चिह्न न॰ ६त॰ पुंश्चलीवत् सन्निकार्यम्। पुरुषचिह्ने चिह्ने शेषच॰।

पुंस नर्दे पु॰ उम॰सच॰ सेट्। पुंसयति ते सदुपुंसत् त।

पुंसवन न॰पुमान् स्रूयते अनेन सू—करणे ल्युट्। स्त्रीणां गर्भपातसंस्कारभेदे तच्च कर्म द्विविधम् यथाह व्यो॰त॰गोभिलः "तृतीयस्य गर्भमासस्यादिमदिने पुंसवनस्य कालः"। गर्भे सति तृतीयमासस्य आदिमदिने दशमदिनाभ्यन्तरे ज्योतिःशास्त्रोक्तकाले पुंसवनं कार्यम्। "प्रातः शिरस्स्नाता पश्चादग्नेरुदगपवेषु कुशेषु प्राङ्मुखमुपविशति"गो॰। आप्लुता स्नाता पश्चात् पश्चिमदिशि प्राङ्मुखी उपविशति "पत्युर्दक्षिणतः प्राङ्मुखोपविशति"इत्यन्यत्र दर्शनात्। पश्चादित्यभिधानात् अग्निस्थापनं लभ्यते। यद् सार्थकत्वाय "नाम्नं दध्यमनादेशे जुहोतिषु विधीयते। मन्त्रस्य देवताऽभावे प्रजापतिरिति स्थितिः"इति कल्पोगपरिशिष्टोक्तेरग्न्यादि लभ्यते। जुहोतिषु हवनेषु मन्त्रस्यानादेशे प्रजापतिः प्राजापत्योमन्त्रः। स च मन्त्रः व्याहृत्यात्मकः। ततश्च विरूपाक्षजपान्तां कुशण्डिकां समाप्य समित्पत्रेपादिमहाव्याहृतिभिर्होमं कृत्वा प्रजापतिदेवताकमन्त्रमहाव्याहृतिहोमं कुर्यात्। ततः प्रकृतं कर्म। तत्र गोभिलः "पश्चात् पतिरन्यस्याव दक्षिणेन पाणिना दक्षिणमंसमनुसृत्य प्राणाहितं नाभिदेशमभिमृशेत् पुमांसौ जिजीवतमाविशतेतयर्चा"। उपविष्टायां पत्न्याः पश्चिमदेशं गत्वानुपविष्टः पतिर्दक्षिणहस्तेन तूष्णीं तस्या दक्षिणस्कन्धमवलम्ब्य वस्त्राद्व्यवहितं नाभिं पुंसाविति मन्त्रेण स्पृशेत्। अथ अनन्तरं वामदेव्यसामानां समापयेत्। यदि स्वयं दैवाचारात् कुलाचाराद्वा एकस्मिन् दिने द्वितीयपुंसवनमपि क्रियते तदा सर्वमेकं परिमृष्टमस्य "इन्द्रो वह्निःपर्युक्षणमात्रभागः सर्वेभ्यः समपदेव सकृदेव पौर्विष्टिकृतं मृष्टोमीति" गोभिलस्मृत्यन्तराद्। उभय॰

कर्मान्ते वामदेव्यगानाद्युदीच्यं कर्म कर्त्तव्यम् । अतएव
वरलायां दिनद्वये महाभाद्रभवदेवयोरेकदिने उभयकरणं
लिखितम् । "अथापरम्" गो० अथ प्रथमपुंसवनकर्माग्नि-
आधानानन्तरं तदानीमपरमन्यत् पुंसवनं कार्यम् "प्राग्-
उदीच्यां दिशि न्यग्रोधशुङ्गाशुभवतःफलामन्त्रानामलमि-
परिस्तृतां त्रिःसप्तभिर्दर्भैर्मांसैर्वा परिक्रीय उत्थापयेत् ।
यद्यसि सोमो सोमाय त्वा वज्रे परिक्रीणामि, यद्यसि
वारुणी वारुणाय त्वा वज्रे परिक्रीणामि, यद्यसि व-
सुभ्यः वसुभ्यस्त्वापरिक्रीणामि, यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा
परिक्रीणामि, यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परि-
क्रीणामि, यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि,
यद्यसि विश्वेभ्यो देवेभ्यस्त्वापरिक्रीणामि ओषधयः सुम-
नसो भूत्वा अस्यां वीर्यं समाधत्त इयं कर्म करिष्यती-
त्युत्थाप्य तस्यैः परिधायाहृत्य वैहायसीं निदध्यात् "सू०।
वटतरोः पूर्वस्यां दिशि शुङ्गा सुकुलितमुखः । "सताप-
स्त्रुवो गूढः शुङ्गेति परिकीर्त्यते । पतिव्रता व्रतवती
ब्रह्मचर्यमुपाश्रिता" इत्युक्तेः । अस्तो वेदहीनः तां
फलकुसुमयुतामन्त्रानां लक्षिभिरव्याप्तां त्रिराहृतैः सप्त-
भिर्दर्भैर्मांसैर्वा त्रिराहृतैः क्रीत्वा गृह्णीयात् । क्रयश्च
दक्षस्वामिनी, न दद्यात् तेन दक्षस्वामिने यवां माषा वा
देयाः यद्यसीत्यादि सप्तभिर्मन्त्रैः । प्रतिमन्त्रञ्च शुङ्क-
लग्नम् दद्यात् । ओषधय इति मन्त्रेणोत्थाप्य च तस्यै-
र्वेष्टयित्वा आनीयाग्नावस्यां निदध्यात् । इदं प्रक्षाल्य
ब्रह्मचारीव्रतवती वा ब्रह्मबन्धुः कुमारी वा अप्रत्या-
हरन्ती पिनष्टि इदं शिलां पेषणार्थत्वेन वपुत्रां कुमारी
अनूढा व्रतवती पतिव्रता अप्रत्याहरन्ती तिर्यक्पुत्र
पेषं पेषणमकुर्वती किन्तु पिष्टं तपुत्रपेषं पुनःपुनः पेषणं
कुर्वती प्रातःअग्निरक्षामुत्तरा उदगग्रेषु कुशेषु प्राक्-
शिराः संविशति शेते शेषं सुगमम् । "पश्चात् प्रतिरव-
स्थाय दक्षिणतः प्राङ्गेरङ्गुष्ठेनोपकनिष्ठयाऽङ्गुल्या अ-
भिसंगृह्य दक्षिणनासिकायेण तस्या नयेत् । पुमानग्निः
पुमानिन्द्र इत्येतयर्चा" सू० । पश्चाद्बध्वाः पश्चिम-
दिशि उपकनिष्ठयानामिकया तेनाङ्गुष्ठानामिकाभ्याम् ।
पिष्टां शुक्लां वस्त्रवतां गृहीत्वा निष्पीड्य दक्षिणना-
सारन्ध्रे क्षिपेत् पुमानग्निरिति मन्त्रेण । अत्र अन
न्तरं दाधयाद्युदीच्यं कर्म कुर्यात् । पुंसवनकर्माधान-
कर्त्तरसन्निधानेऽन्येनापि कर्त्तव्यम् "अष्टौ संस्कारक
र्माणि नर्माधानमिव स्वयम् । पिता कुर्यात्तदन्यो वा
तस्याभावेऽपि तत्क्रमात्" इति स्मृतेः । मुनयश्चे "शुक्ल-
वस्त्रं करे कृत्वा स्थिरे तत्रासने तथा । अष्टोत्तरेण
होमस्य शान्तिकैव च कारयेत् । अर्थांस्तत्रैव संपाद्य
जीवं जातोऽस्य विक्रमम् । सुवर्णं रजतं हेम दद्यात् स्नान
तटान्तरे । तत्प्रभृति नदीतीरं देवजातोदकं त्यजेत् ।
वन्ध्याटनं तरोर्मूलं तथा देवगृहं त्यजेत्" ।

पुंसवन मुहूर्तादिकं सं०चि०पी० उक्तं यथा
"पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथ विष्णुपूजा"
सं०चि० "पूर्वोदितैरिति । पूर्वं सीमन्तोन्नयने उदितैः
प्रोक्तैस्त्रिभिर्वारनक्षत्रलग्नैरुपलक्षिते तृतीये मासि पुंस-
वनाख्यं कर्म विधेयम् । पुमान् सूयतेऽनेन कर्मणेति
व्युत्पत्त्या पुंसवनकर्मणा पुंस्त्वहेतुना । यदाह गौतमः
"व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत् । गर्भेऽव्यक्ते
तृतीये चेत् चतुर्थे मास वा भवेत्" लक्षिकः "सीमन्तो-
न्नयनस्योक्तातिथिवासररात्रिषु । पुंसवं कारयेद्दिनान् सर्वैव-
कदिनेऽथ वा" इति । विशेषमाह वसिष्ठः "कुर्यात्पुंस-
वनं प्रसिद्धविधवे गर्भे तृतीयेऽथ वा मासि स्फीततनौ
तुषारकिरणे पुष्येऽथ वा वैष्णवे । छित्वा कर्कटकं त्वयु-
ग्मसमसामग्र्यं परिक्रे तिथौ शुद्धे नैधनधाम्नि शुक्र
गुरुभ्यां दिनमन्त्रिणां वासरे" इति । नैधनधाम्नि अष्टम-
स्थाने शुद्धे सर्वग्रहरहिते । यदाह वसिष्ठः "अष्टमस्था
ग्रहाः सर्वे नेष्टास्तेऽस्ते शुभावहाः । एवं सम्यक् परी-
क्ष्यैव कुर्यात्पुंसवनक्रियाम्" इति । वाराणां तु सौम्य-
ग्रहाणामुक्तः । इहस्पतिरपत्र विशेषमाह "गुरुशुक्र-
बुधेन्दूनां हेम्नाग्यदिवसांशकाः । तेषामुदयहोराश्च पुं-
सवेऽतिशुभावहाः" इति अन्येषु श्रीपत्यादिभिः पुंवारा
एव प्रशस्ता अभिहितास्तत्फलान्याह गर्गः "सौम्ये
सुतप्रजा मन्दे सुतबन्ध्या च भार्गवे । सोमे दुग्धविहीं-
ना स्यात् शेषाः सर्वार्थसिद्धिदा" इति । अत्र वचनद्वय
प्रामाण्यादिकल्पः । केचित्तु यदा तृतीये मासि पुंस-
वनं चिकीर्षितं तदा सौम्यवारा एव ग्राह्याः । यदा तु
चतुर्थे मासि गर्भस्य व्यक्तत्वात् पुंसवनं चिकीर्षितं तदा
पुंवारा एव ग्राह्या इत्याहुः । नक्षत्राणि तत्र पुंना-
मानि ग्राह्याणि तानि "अश्वः सकर" इति श्रीपति-
नोक्तानि । वसिष्ठेन तु पुंनामान्यभिहितानि यथा
"पुंनाम अश्वं त्रिभः स्वाती उत्तरः पुनर्वसुः । मूलं
शोभपदं चातुराधा अगशिरोऽश्विनौ" । विशेषमाह भ्र-
गोश्चयः । "हस्तार्द्रातिश्रवणमूलानि सौम्यो विष्णुः पुन-

वैद्यः। प्रोष्ठपदादयं शोभनाभाद्वयमेव च। श्रेष्ठानि कथितान्येव विष्णुप्राप्येकादशैव तु। स्वातौ तथा भद्रायां च रेवत्यां कर्तुमीहये। अश्विन्यां चैव नक्षत्रे यदा पुंसवनं भवेत्। नरः सम्पद्यते दैवाद्यदा साधुरतत्परः। स्त्रीक्षुद्रतरः क्रूरो नारी चेत् कुबटा भवेत्। शेषाणि दश विष्णूनि निन्दितानि विशेषतः" तदेतयोर्विरुद्धार्थयोर्वाक्ययोर्देशाचारतो व्यवस्था। तत्र वसिष्ठवाक्येन दाक्षिणात्याव्यवहरन्ति। प्राच्यास्तु कश्यपवाक्येन। अथ लग्नशुद्धिमाह कश्यपः "मीनवृश्चिककुम्भेषु चापगोसिंहकन्यकाः। उक्ताः पुंसवनादौषु सद्यपुत्रादिवाञ्छया। केन्द्रत्रिकोणभवनेषु शुभस्थितेषु पापेषु षट्त्रिदशलाभगतेषु। जीवेन्दुभानुभृगुभूमिजमन्दिरेषु लग्नेषु लग्नपरिशुद्धशुभांशकेषु"। अत्रापि स्त्रीपुंसयोश्चन्द्रबलमावश्यकमित्याह ऋषिसिंहः "अपि पुंसवनं कार्यं दम्पत्योरनुकूलभे। जन्मादि वर्जयेद्राशिं चांशकं विपदादिषु" इति पी०धा०।

"कुर्यात् पुंसवनं सुयोगकरणे नन्दे समद्रे तिथौ भाद्राभाद्रमघेश्वरेषु ऋदिने वेधं विनेन्दौ शुभे। अर्चीशे नवपञ्चकण्टकगते सौम्ये शुभे दृष्टिषु स्त्रीशुद्धा घटयुग्म सूर्यगुरुभेषूद्यतस्य मासत्रये" ज्यो०त०। ऋदिने पुं अश्वारे। वेधो दशयोगभङ्गः। दृष्टिरुपचयनस्थानम्। अण्। पुंसवोऽस्य पु०।

पुंसवनव्रतञ्च भाग० ६स्कन्धे १९अ० "शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तृरतुस्नया। आरभेत व्रतमिदं सार्वकामिकमादिशेत्" इत्युपक्रम्योक्तं द्रष्टव्यम्। [तस्मिन् त्रि०कौ०।

पुंसानुज पु० पुंसानुजः अलुक्स०। यस्यानुज पुमान्

पुंस्कामा स्त्री पुमांसं कामयते कामि-अण् पुंसोऽन्तस्योपे रूपे "संपुंकानामिति" वा० रोः मः। पुरुषकामायां स्त्रियाम्। [कोकिले कुमा० ३।२०।

पुंस्कोकिल पु० कर्म०। पुंस्त्वाभावात् मन्थिकार्यम्। पुरुष-

पुंस्त्व न० पुंसोभावः त्व बहुवत्वे। १पुरुषत्वे तदुपनिश्चिते २शुक्रे वीर्ये हेमच०। [राजनि०।

पुंस्त्वविग्रह पु० पुंस्त्वक शुक्रस्येव विग्रहोऽस्य। भूतृणे

पुक्क पु० पु-वा० कक्। पवित्रे तस्यादूरदेशादि प्रेक्षा० इनि। पुक्किन् तत्रवसितदेशादौ।

पुक्कश(स) पुंस्त्री०पुक् कल्पितं कसति कस-गतौ अच् पृषो० वा शः। १चण्डाले २अधमे त्रि०अमरः "ऋषायां शूद्रसंसर्गाज्जातः पुक्कश(स) उच्यते" उशनसोक्ते ३संकीर्णजातिभेदे स्त्रियां जातित्वात् ङीष्। ङीबन्तः ४कोकिलायां ५नीलाब्राह्मीप्रभेदौ च मेदि०।

पुंक्षीर न० पुंप्रियं क्षीरम् शा०त० अवः असूपरत्वाभावात् न रः। पुरुषप्रिये क्षीरे। [अमरः।

पुङ्ख पु०न० पुमांसं खनति खन-ड। १बाणमूले २पुङ्खे

पुङ्खतीर्थ न० रामसेते तीर्थभेदे शिवपु०।

पुङ्ग पु० पूग-पृषो०। समूहे शब्दच०।

पुङ्गव पु० पुमान् गौः कर्म+खच् वमा०। १वृषे २श्रेष्ठमौषधौ च मेदि० उत्तरपदस्थः श्रेष्ठवाचकः। यथा नरः पुङ्गव इव उपमितसमासवाक्यम्। नरपुङ्गव नरश्रेष्ठार्थे।

पुङ्गवकेतु पु० पुङ्गवः वृषः केतुरस्य। वृषध्वजे शिवे।

पुच्छ प्रवादे भ्वा०पर०अक० सेट्। पुच्छति अपुच्छीत् पुपुच्छ रायमुकुटः।

पुच्छ पु०न०अर्द्धर्चा०। पुच्छ-अच्। १लाङ्गूले अमरः। २पक्षाग्रभागे न०मेदि० ३लोमवल्लाङ्गूले ४अश्वापे च पु०स्याद्वि० बहुव्रीहौ एतदन्तात् ङीष् कवरपुच्छी।

पुच्छकण्टक पु० पुच्छे कण्टको यस्य। वृश्चिके हेमच०।

पुच्छटि(टी) स्त्री पुच्छ-अटि वा ङीप्। अङ्गुलिमोटने (आङ्गुलमट्कान) त्रिका०।

पुच्छदा स्त्री पुच्छमिव दायति दै-क। उच्छ्रयांकन्दे राजनि०

पुच्छण्डक पु० तक्षकवंशे नागभेदे भा०आ० ५७अ०

पुच्छिन् पु० पुच्छ+अस्त्यर्थे इनि। १कुक्कुटे अजच० २अर्कवृक्षे च राजनि०। ३लाङ्गूलयुक्ते त्रि०।

पुच्छ पु० पिछि-अच् पृषो०। उच्छ्रया पुमांसं कर्षति छ-ड वा। रायौ चये अमरः।

पुच्छातुक पु० वृक्षभेदे भारा०।

पुच्छि पु० पिच्छयति पिछि-छिंपादवदानमिवेतने इन् पृषो०। समूहे। तत्र तिष्ठति स्था-क। अन्यान्येत्यादिना सकम्। पुच्छिका पक्षिपुच्छजातके यजु० १६।२७।

पुच्छिकास्तना स्त्री अप्सरोभेदे भार०पु० ५४अ०।

पुच्छिकास्थला स्त्री अप्सरोभेदे यजु० १५।१६ वेददी०।

पुच्छिल पु० पिछि-वा० इल पृषो०। पिच्छले (पाँज) तैत्ति० ६।१।११८। [पुपोट।

पुट दीप्तौ अक०चुरा०उभ० सेट्। पोटयति-ते

पुट श्लेषे त०क०पर०सक० सेट्। पुटति अपुटीत् पुपोट।

पुट संसर्गे अद०चु०उभ०सक०सेट्। पुटयति ते अपुपुटत् त।

पुट न०पुट-क। १जातीफले राजनि० २उपर्यधोभावापन्नेन मृदादिकपालद्वयेन निर्मिते औषधपाकपात्रभेदे च पु०

३अन्नचुरे ४०न० मन्दर० । ५मिश्रःवस्त्रे ६आच्छादने च पुटभेदनमिश्रमरस्थाख्यानां सुगुटः । ७पक्वादिरचिते दुग्धादिपानपात्रे त्रि० (दोना) स्त्रियां ङीष् ।

औषधपात्रप्रकारः भावप्र० उक्तो यथा

"धात्वादिमारणोपयुक्तात् पुटप्रकारानाह रसप्रदीपे "कोष्ठादेरपुनर्भावस्तद्दुःखलं युगाढ्यता । कृत्रिमे तरचक्रादि तत्त्विदिः पुटनाङ्गुलेत् । गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके । वनोपलवकृष्णेन पूरितं पुनरौषधम् । कोष्ठे रुद्धे प्रयत्नेन गोविष्ठोपरि भारयेत् । वनोपलवकृष्णार्द्धं कोष्ठिकोपरि निःक्षिपेत् । वह्निं विनिःक्षेपेत्तत्र महापुटमिति स्मृतम् । कोष्ठं यथ्यमूषा गोविष्ठा (गोइटा)। महापुटम् । "यथाद् कृष्णमानेन कुण्डे निम्ने तथायते । वनोपलवकृष्णेन पूर्णे मध्ये विधारयेत् । पुटनद्रव्यसंयुक्तां कोष्ठिकां छादितां सुखे । अन्यद्रौषि करण्डानि अङ्गोष्ठ्युपरि निःक्षिपेत् । एतद्गजपुटं प्रोक्तं स्यातं सर्वपुटोत्तमम्" । कृष्णवस्तुभिं यत्कुक्कुटप्रमाणः स यथाद्दः तेन लिंपदङ्गुलप्रमाणेनेत्यर्थः अतएवोक्तम् "कोपारणकराकुल्या लिंपदङ्गुलको गजः" इति भावपुटम् । "अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते । वितस्तिमात्रके स्याते कथितं कौक्कुटं पुटम्"। अरत्निस्तु "मिष्टानिष्टेन हस्तिना"इत्यमरः । निःकृतमनिष्टया मुष्टयोपलक्षितो हस्तोऽरत्निरित्यर्थः । "गोदयाङ्गुलके स्याते कस्यचित् कौक्कुटं पुटम् । यत्पुटं दीयते स्याते अष्टसंख्यैर्वनोपलैः । कपोतपुटमेतत्तु कथितं पुटवेदिभिः । गोदान्तर्गोकुरचुर्यं गुप्तं चूर्णितगोमयम् । गोवरं तद्वयाख्यातं परिष्टं रसबन्धने । दृढ्ढाण्डस्थितैर्यत्र गोवरैर्दीयते पुटम् । तद्गोवरपुटं प्रोक्तं भिन्नभिः सूतसत्तमैः । दृढ्ढाण्डे सुधैः पूर्णे मध्ये भूमां विधारयेत् । लिप्तायिं सुखेत् भाण्डं तद्भाण्डं पुटमुच्यते" । "मनुस्मृतिरतिर्मौ स्तो पुटोऽयम्" इ०२० उक्तो उद्दाहमरपादेन छन्दोभेदे पु०

पुटक्क न० पुट इव कायति कै-क । १पत्रे मन्दरत्ना० "पुटके पुटके रघु" भाट्टो० ६ट्ठ० । ततः पुष्करा० इनि । पुटकिनी तत्समूहे पद्मिन्याम् । स्वार्थे क । २पुटकाख्ये ।

पुटकन्द पु०पुटमिव कन्दोऽस्य । कोशकन्दे राजनि० [मेदिन

पुटग्रीव पु० पुटमिव ग्रीवाऽस्य । १गर्दभे २आम्रवृक्षे च

पुटपाक पु०पुटेन पाकः । पुटपाकेन औषधपाके तद्विधिभेदो भावप्र०उक्तो यथा

"अथ पुटपाकविधिः । पुटपाकस्य कल्कस्य करणं कृत्स्नं यतः । अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया । पुटपाकेन पाकोऽयं वेपक्वाङ्गारवर्णता । वेपक्व द्रव्यकुलं स्थूलं मुख्यद्रव्यकुलमात्रकम् । काश्मरीपटलाद्यादिमलनेत्रसुसमम् । मलमात्रो रसो याद्यः कर्षमात्रं मधु क्षिपेत् । मन्दकूर्मद्रवाद्यास्तु देयाः कोलमिता बुधैः" । नेत्ररोगचिकित्सायामन्यत्तत्प्रकार उक्तस्तत्र द्रष्टव्यः । चक्रपाणिना तु अन्ययोक्तो यथा.

"कृष्णप्रमाणमहनं शुद्धं कृत्वैवमातपमध्यम् । ततः कटाहसदृशं तत्र करीषं दृढं च काष्ठं । अलर्कमतरनर्द्धमुष्टिं परिपूर्णं दृढमगाधोच्च । पश्चादवसूर्यं स्वच्छं पद्मोपमं कुर्यात् । लिप्तकाण्डुष्टकुक्कुटेसरमतावरिकाकन्दमानसफलरसैः । भल्लातकरिकर्णच्छदसूक्ष्मपुनर्नवाखरसैः । चित्रार्थ कोष्ठपाके मार्द्दे वा कोष्ठपार्द्दपालाभ्याम् । तस्याभ्यां पूर्णेनाच्छाद्यात्रे रज्जुमाक्षिप्य । तत्पुटपालं तत्र स्वस्थाने निधाय भूयोभिः । काष्ठकरीषतृणैस्तत्र च्छाद्याकर्णिभं दहेत् प्राज्ञः । एवं नवभिर्मेघजराशैः पचेत् पुटपाकम् । प्रत्येकनेकमेभिर्सिंचितैर्वा लिंपतरामु वारान् । प्रतिपुटनं सह लिंपद्राद् क्षारोमाकं विधाय तत्रैव । तादृशि दृढ्ढि च लिंपद्राद् विमलद्रवया तु युज्यते यत्र । तदवसूर्यं पिष्टं दृष्टं वनकृष्णरागपि स्वच्छम् । यदि रजसा दृश्यं स्यात् केतकाकार्णि तद्भद्रम् । पुटने स्यात्तोपाकेऽधिकतमुरुके स्वभावरुगधिगमात् । कथितमपि देयमौषधमुचितमुपादेयमन्यदपि" ।

पुटभेद पु० पुटं संघेभं भिनत्ति भिद्-अच् । १मदीदेशकाकारे २जलावर्ते ३पत्तने ४मगरे ५आतोद्ये च मेदि० ।

पुटभेदन न० पुटानि पात्राणि भिद्यन्तेऽत्र भिद्-आधारे ल्युट् । मगरे अमरः ।

पुटापुटिका स्त्री पूर्वं पुटा संश्लिष्टा पश्चात् स्वस्थिता या० त० । पूर्वं संश्लिष्टायां पश्चात् असंश्लिष्टायाम् ।

पुटालु पु० पुटं संश्लिष्टं आलुः । कोशकन्दे राजनि० ।

पुटिका स्त्री पुटमस्त्यस्याः ठन् । एलायां स्त्रियां रा० ।

पुटित त्रि०पुटोजातोऽस्य पुट+इतच् । आद्यन्तयोः मन्त्रभेदेन पुटाकारतां प्राप्ते १मन्त्रभेदे यथा (ॐ राम ॐ) इत्यादि २कृतपुटे न० ३पाटिते ४स्फुटे च त्रि० मेदि० ।

पुटी स्त्री पुट-ङ गौरा० ङीष् । १पक्वादिरचिते पानपात्रभेदे (दोना) भरतः । २कौपीने जटा०

पुटोटज न॰ पुटं संश्लिष्टजमिव। श्वेतच्छत्रे लिङ्गाच्छत्रेषः।

पुटोदक पु॰ पुटं संश्लिष्टसदृशं जलं, पुटे कपालाकारपात्रभेदमध्ये उदकं वा यस्य। नारिकेले हारा॰।

पुट्ट अनादरे चु॰उभ॰सक॰ सेट्। पुट्टयति-ते अपुपुट्टत्-त।

पुड मर्दने भ्वा॰पर॰सक॰ सेट् इदित्। पुण्डति अपुण्डीत्।

पुण धर्माचरणे तु॰पर॰सक॰सेट्। पुणति अपोणीत् पुपोण।

पुण्ड पु॰ पुडि-अच्। तिलके जटा॰।

पुण्डरिन् पु॰ पुण्डं तिलकमस्यति अस्-णिनि मत्व॰। (पुण्डरिया) ख्याते शालपर्णीतिल्यपत्रे क्षुपभेदे शब्दर॰।

पुण्डरीक न॰ पुडि-ईक नि॰। १श्वेतपद्मे २अग्निकोणस्थे ३दिग्गजे पु॰ ४व्याघ्रे पुंस्त्री॰ अमरः स्त्रियां जातित्वात् ङीष्। ५श्वेतपद्मे ६भेषजे च न॰। ७व्याघ्रे दराजिवर्षे ८इक्षिखण्डे पु॰ हेमच॰। १०दलनकदम्बे राजनि॰। ११कमण्डलौ १२श्वेतवर्षे अनेकार्थकोषः १३श्वेतवर्षवति त्रि॰ १४कुष्ठभेदे पु॰। "सम्पूर्णं रक्तपर्यन्तं पुण्डरीकदलोपमम्। सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते" माधवकरः। १५कोषकारभेदे पु॰ मेदि॰।

पुण्डरीकप्लव पुंस्त्री॰ पुण्डरीकमिव प्लवते जले प्लु-अच्। सम्प्रतीते संघातचारिणि जलभेदे स्त्रियां जातित्वात् ङीष्। [जलाप्लवभेदे सुश्रुतः।

पुण्डरीकमुखा स्त्री पुण्डरीकमिव मुखं यस्याः। निर्विषे

पुण्डरीकाक्ष पु॰ पुण्डरीकमिवाक्षि यस्य बहुव्री॰ कृदव पुण्डरीकम् अक्ष्णोति अश-व्याप्तौ अच् उप॰स॰ वा। १विष्णौ "अमोघः पुण्डरीकाक्षः" विष्णुसं॰ "कृतपुण्डरीकपुरमध्यसंस्थितम्" श्रुतेस्तत्र तथात्वम् भागवतम्। २पुण्डर्ये (पुण्डरिया) ख्याते क्षुपे शब्दच॰।

पुण्डरीयक न॰ पुण्डरीयाचरति पुण्डरिन्+आचारे क्यच् ततः खुन्। १स्वर्णपद्मे शब्दच॰ २प्रपौण्डरीके राजनि॰।

पुण्डर्य न॰ पुण्डयति पुडि-खण्डने अच् तस्यार्थं प्रधानम् यक॰। (पुण्डरिया) ख्याते शालपर्णीतिल्यपत्रे क्षुपभेदे अमरः।

पुण्ड्र पु॰पुडि-भेदने रक्। (पुंडिया) १इक्षुभेदे अमरः। इक्षुशब्दे दृश्यम् अर्द्धपुण्ड्रकादौ इक्षुभेदलक्षणाचारतया प्रयोगः २देशभेदे ३चित्रके ४चित्रके ५क्षत्री ६पुण्डरीके ७देशभेदे पु॰ मेदि॰। स च देशः द॰ १४अ॰ उदयगिरिमङ्ग मोदकपौण्ड्रोत्कलकाशिमेखलाह्वयाः" पूर्वस्यामुक्तः। तेन तस्य प्राच्यत्वात् नगरान्तरे द्विपदहिः पौण्ड्रनगरं तत्र भवे त्रि॰ "पुण्ड्रः कलिङ्गश्च तथा वाङ्गे च जनमेजयः" हरिवं॰ २१८अ॰ सोऽभिजनोऽस्य तस्य राजा वा अण्। पौण्ड्र पितादिक्रमेण तद्देशवासिनि तद्भूपे च। बहुत्वे तस्य लुक्। "कृतेर्मांसपुण्ड्रैश्च गीयमानस्ततस्ततः" हरिवं॰२११अ॰। दतिवकदले हेमच॰। इक्षुखण्डे राजनि॰। खार्जे च।

पुण्ड्रक नाधवीलतायाम् अमरः। इक्षुभेदादौ च।

पुण्ड्रकेलि पु॰ पुण्ड्रः इक्षुभेदः केलिः केलिसाधनमस्य गजे शब्दमाला। तस्य इक्षुप्रियत्वात् तथात्वम्।

पुण्य न॰ पू-कुण्य। १शुभादृष्टे धर्मे २तद्वति त्रि॰ अमरः। ३शोभनकर्मान्विते ४पावने ५सुन्दरे च त्रि॰ हेमच॰ ६सुगन्धौ त्रि॰ जटाध॰। लग्नावधिके ७नक्षत्रस्थाने स्त्री॰त॰ नील॰ता॰ उक्ते वर्ग॰स्थाने ८वहुगमभेदे पुण्यशब्दमशब्दे दृश्यम्। धर्मरूपपुण्यञ्च गङ्गास्नानादिजन्यं कर्मनाशाजलस्पर्शनाद्यञ्च। कीर्त्तनादपि तस्य नाशकता "दृष्टं दृष्टमधीतं वा विनश्यत्यल्पकीर्त्तनात्। स्नानाचमनोचनाभ्याञ्च भग्नतेजो विभिद्यते। तस्मादाजन्मतं पुण्यं दृष्टा न परिकीर्त्तयेत्" पु॰त॰ देवलोक्तेः। जागदाजाध्ययनादीनामाशुविनाशित्वात् तज्जन्यं पुण्यमेव विनश्यतीति बोध्यम्। तस्मादाजन्मतं पुण्यमित्युत्तरत्र निर्देशश्च। तत्र प्रारब्धभिन्नानामेव तत्त्वज्ञानेनाशकत्वम् प्रारब्धपुण्यानां तु भोगादेव क्षयः "जीवे पुण्ये गतं लोकं विशन्ति" इति श्रुतेः "तद्यथेह कर्म्मजितो लोकः क्षीयते एवमेवात्र पुण्यजितो लोकः क्षीयते" इति श्रुतेः। "पुण्यञ्च पुण्यरश्मेव आधानाख्यमेव च। मूलाद्यस्या भवन्त्येते नित्यं द्वादश राशयः" ज्यो॰त॰ उक्ते ९मेषवृषटलवाणधरूपे राशौ पु॰।

पुण्यक न॰ पुण्याय कायति कै-क। १पुण्यार्थे जपयज्ञादौ व्रते हरिवं॰१२६अ॰ उक्ते २व्रतभेदे। अन्यच्च ३पुण्यकव्रतं ब्रह्मवै॰पु॰ २ ३अ॰ उक्तम् दृश्यम्। २विष्णौ पु॰ "पूर्णः पूरयिता पुण्यः" विष्णुस॰। "स्मरणेन सर्वेषां पापनाशनेन पवित्रताधायकत्वात् पुण्यः" भाष्यम्।

पुण्यकर्म्मन् न॰ पुण्यजनकं कर्म। १पुण्यजनके कर्मणि। पुण्यं कर्म यस्य। २पुण्यकर्मकारिणि त्रि॰ भा॰ शा॰ २९९अ॰।

पुण्यकाल पु॰ पुण्यनिमित्तं कालः कालभेदः। रवेः स्थिरसंक्रान्तौ स्थाद्यादीनां चरसंक्रान्तौ च विहितस्नानदानादौ पुण्यजनके कालभेदे यत्र रवेः स्थिरसंक्रान्तिमुखकालनिर्णयः कृ॰वि॰रत्न॰ दर्शितो यथा

"अर्कमानकलाः षष्ट्या गुणिताभुक्तिभाजिताः। तद्दर्ग-नाड्यः संक्रान्तेरर्वाक् पुण्यं तथापरे" सू०सि० "सूर्यस्य बिम्बप्रमाणकलाः षष्ट्या गुणिताः सूर्यगत्या भक्तास्तस्य फलस्यार्द्धं" तत्संख्याका घटिका इत्यर्थः। संक्रान्तेः सूर्यस्य राशिप्रवेशकालादित्यर्थः। अर्वाक् पूर्वं पुण्यं स्नानादिधर्मकृत्ये पुण्यघटिकाः पुण्यदृङ्निकारिकाः। अपरे संक्रान्त्युत्तरकाले तथा स्नानादिधर्मकृत्ये पुण्यदृङ्निदा इत्यर्थः। अत्रोपपत्तिः। सूर्यबिम्बकेन्द्रस्य राश्यादौ सचरत्वकालः संक्रमणकालस्तस्य सूक्ष्मत्वेन दुर्ज्ञेयत्वात् स्थूलकालः कोऽप्यभ्युपेयः स च राश्यादौ बिम्बसचरत्वरूपोऽङ्गीकृतो बिम्बसम्बन्धात्। अतः सूर्यगत्या यदि घटिकावयवघटिकास्तदा सूर्यबिम्बकलाभिः का इत्यनुपातानीता बिम्बघटिकाः संक्रान्तिकालः स्थूलः प्राङ्नेमिसचरत्वकालात् पश्चिमनेमिसचरत्वकालपर्यन्तं तदर्द्धघटिका व्यासार्द्धघटिका इति संक्रान्तिकालात् ताभिः पूर्वमपरत्र काले प्रागपरनेम्योः क्रमेण सचरत्वात् पूर्वोत्तरकाले पुण्या इति" रङ्ग०। स च सौरमासेन "सौरेण द्युनिशोर्वासम्" इत्युपक्रमे "संक्रान्तेः पुण्यकालता" इति तल्लोः। तत्र संक्रान्तिविशेषे कालविशेषस्य पुण्यपुण्यतरत्वादिकं समपक्षं कालमाधवीये निर्णीतं यथा मातातपः "संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद् यदि मानवः। सप्तजन्मतु रोगी स्याद्दुःखभागीह जायते" इति। स्नानदानाद्यङ्गभूते संक्रान्तिकाले सूर्यकल्यस्यासम्भवाद्दृक्कल्यएवादर्त्तव्यः। तदाह देवलः "संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगाद्यधचोर्द्धं त्रिंशन्नाड्यः पवित्रता" इति देशाव्यवधानादत्यन्तसंश्लिष्टयोः पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावत्कालभेदेनोत्तरराशिं प्रविशति स लेशो योगदृष्टिं विना नांशदृष्ट्या दुर्ज्ञेयः। अतोऽनुष्ठाने सूक्ष्मसंक्रान्तिकालासम्भवात् संक्रान्तिसम्बन्धिनौ पूर्वोत्तरकालौ पर्यालोचनीयौ। संक्रान्तेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशत् घटिकाः पुण्या इति सामान्योक्तम् तत्र विशेषमाह हृद्वसिष्ठः "अतीतानागते पुण्ये द्वे उदगुदक्चायने। त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः" इति। उदगयनमतीतं यस्मुण्यं भवति। दक्षिणायनमनागतं पुण्यं त्रिंशद्दिनादिना तदेव अष्टीक्रियते कर्कटाख्याद्दक्षिणायनात् प्राचीनास्त्रिंशद्घटिकाः पुण्याः। मकराख्यादुत्तरायणादूर्द्ध्वकालीना विंशतिघटिकाः पुण्याः। इदमतिरपि "अयने त्रिंशतिः पूर्वा मकरे विंशतिः परा। वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश" इति वचनात्। न चात्र त्रिंशद्घटिकादिना सामान्यवचनेन विरोधः शङ्कनीयः सामान्यवचनस्याभ्यनुज्ञापरत्वात् विशेषवचनोक्तो घटिकासङ्ख्येव एव प्रशस्तः। "वायोः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" इति देवलोक्तत्वात्तेनापि निमित्तेन सन्निहितघटिकासत्त्वस्थानासम्भवे त्रिंशद्घटिकाः परा अवधित्वेनानुष्ठायन्ते। षडशीतिषु ततोऽपि दीर्घमवधिमाह हृद्वसिष्ठः "षडशीत्यामतीतायां घटिकास्तु नाडिकाः" इति। विष्णुपद्यां प्रशस्तकालं स एवाह "पुण्यायां विष्णुपद्यां च प्राक् पश्चादपि षोडश" इति संक्रान्तीनां पूर्वोत्तरौ पुण्यकालौ निर्णीतौ। तास्तु संक्रान्तयः कदाचिदृक्ष भवन्ति कदाचिद्रात्रौ भवन्ति तद्भेदादनुष्ठानभेदमाह हृद्वसिष्ठः "ऋक्षे संक्रमणे पुण्यमहः सत्तमं प्रकीर्त्तितम्। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः। अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया। अर्द्धं संक्रमणे चोर्द्ध्वमुदयात् प्रहरद्वयम्। पूर्वे चेदर्द्धरात्रे तु यदा संक्रमते रविः। प्राङ्मध्यदिनद्वयं पुण्यं सङ्गा मकरकर्कटौ" इति। ऋक्षे यदा संक्रान्तिर्भवति तदा सत्तमाह्नः पुण्यतमम्। रात्रौ संक्रमणे पूर्वोत्तरदिनार्द्धयोः पुण्यत्वं विदधता वचनेनार्द्धरात्रौ स्नानदानादिकं प्रतिषिध्यते। एवं सत्युदयानन्तरभाविनि दक्षिणायने पूर्वभागे प्राशस्त्यं बाधित्वोत्तरभागेऽनुष्ठानं भवति। अस्तमयप्राचीनत्वभाविन्युत्तरायणे चोत्तरभागप्राशस्त्यं परित्यज्य पूर्वभागेऽनुष्ठातव्यम्। उत्तरभागप्राशस्त्यं तु मध्याह्नादिसंक्रमणविषयम्। तदाह न्येव देवोपादेवयोः पूर्वोत्तरभागयोः सत्त्वात्, दक्षिणेनैव न्यायेन कर्कटेऽपि मध्याह्नभाविनि पूर्वभागप्राशस्त्यं भवति अस्तमयप्राचीनभाविषु षडशीतिसङ्ख्येष्वुत्तरभागप्राशस्त्यं परित्यज्य मकरन्यायेन पूर्वभागप्राशस्त्यं विधातव्यम्। उदयानन्तरभाविषु वचनान्तराविरोधेनोत्तरभाग एवानुष्ठानवत्त्वात् तद्विरुद्धं पूर्वभागप्राशस्त्यं न विधीयते। उभयभागप्राशस्त्योपेतेषु विषुवद्विष्णुपदेषु मध्याह्नभाविषु पूर्वोत्तरत्र वा स्वेच्छयानुष्ठातव्यम्। उदयानन्तरभाविषु तेषु पूर्वभागप्राशस्त्यं बाध्यते अस्त

अवप्राप्तु तेषु उत्तरप्रागस्त्रं बाध्यते इति विवेकः। एतद्वचनाहुसारेण यस्य संक्रमणस्य यस्मिन् भागेऽनुष्ठानं तस्मिन्नेव भागे व्यवस्थिता नाड्यः पुण्याः दैण्यस्थिताः पुण्यतराः अत्यन्तसंस्थिताः पुण्यतमा द्रष्टव्याः। यदा रात्रौ भानोः संक्रमणं भवति तदा तस्या रात्रेः पूर्वस्या उत्तरस्या वा दिनस्यार्द्धप्रहरद्वयं स्नानदानयोः पुण्यम्। कुत्र पूर्वदिनं कुत्र परदिनमिति विचिकित्सायां तदुभयमर्द्धरात्रादिति वचनेन व्यवस्थाप्यते। अर्द्धं रात्रेः अर्द्धरात्रः, द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येवं घटिकाद्वययुक्तः कालस्तस्मादर्द्धरात्रादधः संक्रमणे सति पूर्वदिनमध्याह्नोपरितने प्रहरद्वये क्रियाकार्या। अर्द्धरात्रादूर्द्धं संक्रमणे सति उत्तरकालीनादुदयादूर्द्धं प्रहरद्वयं पुण्यं पूर्वेऽर्द्धरात्रे घटिकाद्वये संक्रान्तौ पूर्वोत्तरदिनद्वयं तत्पुण्यम्। तदुक्तं भविष्योत्तरे "संक्रमस्तु निशीथे स्यात् षड्भागाः पूर्वपश्चिमाः। संक्रान्तिकालो विज्ञेयस्तत्र स्नानादिकं चरेत्" इति। अत्रेदं व्यवस्था। अर्द्धरात्रे यदा षड्यीतिसदानीमेतद्वचनानुसारेण पूर्वोत्तरदिनद्वयस्य पुण्यत्वात् यद्यपीच्छितो विकल्पः प्राप्नोति। तथाप्युत्तरदिने घटिकाप्रतिपादकप्रातिस्विकवचनानुपङ्गाभावात्तमेवानुष्ठातव्यम्। विष्णुपदीविष्णुपदेषु च प्रातिस्विकवचनं न नियामकम्, तस्य वचनस्य पूर्वोत्तरभागयोः शब्देन प्रायस्त्रप्रतिपादकत्वात्। प्रकृतं वचनं पूर्वोत्तरदिने शब्देन विधत्ते। तस्मात् पूर्वस्मिन्नुत्तरस्मिन् वा स्वेच्छयानुष्ठानमिति विकल्प्यते। अयनयोरस्तु प्रकारान्तरं वक्ष्यते। अयनव्यतिरिक्तान्तु दक्षं संक्रान्तिषु षड्भरात्रादूर्द्धं प्रकृतास्तु परेद्युरनुष्ठानमिलतापि नास्ति सन्देहः। षड्यीत्यास्तु प्रकृतवचनेन पूर्वेद्युरनुष्ठानं साधुम्। घटिकाप्रायस्त्रप्रतिपादकप्रातिस्विकवचनेन परेद्युः प्राप्नोति। अतः सन्देहे इति पूर्वेद्युरनुष्ठानमिति निर्णयो द्रष्टव्यः। कुतः "विष्णुपद्यां धनुर्मीनेऽधुकन्यासु वै तदा। पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत्। पूर्वाह्णे पञ्च नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। अपराह्णे तु पञ्चैव प्रीते श्राद्धे च कर्मणि" इति स्मृतेः। यदा रात्रौ पूर्वभागगतं विष्णुपदी षड्यीतिसंक्रमणं भवेत्। तदा पूर्वेद्युरपराह्णे पञ्च नाड्यः पुण्याः उत्तरभागगते संक्रमणे परेद्युः पूर्वाह्णे पञ्च नाड्य पुण्याः। न चैवं सति प्रहरद्वयपुण्यत्वविरोध इति वाच्यम्। पञ्चनाडिकावचनेषु पुण्याधिक्यस्य विवक्षितत्वात्। अतः प्रहरद्वयवाक्यं पुण्यमात्राभिप्रायम्। एतस्मिन्नेव विषये देवीपुराणे पठ्यते "अर्धपूर्वेऽर्द्धरात्रे तु षडशीतेऽप्ययनेऽपि च। भागार्द्धं भास्करे पुण्यमपूर्वे शर्वरीदले। अर्द्धरात्रे त्वपूर्वे दिवा पुण्यमभागतम्। संपूर्वे अयनोर्मध्यमतिरिक्ते परेऽहनि" इति। भास्करशब्देन सूर्ययुक्तं दिनमुच्यते। यद्वा भास्करशब्दो न सूर्ये रूढः किन्तु यौगिकः भासं करोतीति व्युत्पत्तिसम्भवात्। तथा च सूर्य इव भास्करशब्दो दिनेऽपि रूढः। तस्मादपि भासं प्रत्यधिकरणकारकत्वेन कर्तृत्वात्। भास्करे दिवसे विद्यमानं प्रहरचतुष्टयं तस्यार्द्धं प्रहरद्वयम् आदित्यास्तमयस्योपरितन आगामिसूर्योदयात् प्राचीनः कालो रात्रिः। उदयोपरि अस्तमयात् प्राचीनः कालो दिनम्। उदयास्तमयकालौ सन्निकृष्टतया प्रोक्ताभ्यां रात्रिदिवाभ्यां पृथगिलेखे। रेखामात्रस्यापि सर्वमण्डलांशस्य दृश्यमानतया दिवसान्तःपातित्वात्परे। सर्वथापि न रात्रौ तयोरन्तर्भावः। या च रात्रिस्त्रेधा भिद्यते मध्यमपश्चिमघटिकाद्वयात्मक एको भागस्तस्मात् पूर्वोत्तरौ द्वौ भागौ। तत्र पूर्वभागे संपूर्वेऽर्द्धरात्र इत्यनेन विवक्ष्यते तस्मिन् यदा संक्रान्तिसदानीं सूर्योदयसमये प्रत्यासन्नं यत् पूर्वदिनस्योत्तरार्द्धं तत्पुण्यम्। अपूर्वे शर्वरीदल इत्यनेनार्द्धरात्रादनन्तरभावी रात्रिभागो विवक्षितः। पूर्वोत्तरदलयोरेकस्यापि घटिकाया अर्द्धरात्रकालार्द्धस्य पृथक् कृतत्वादसंपूर्णत्वं रवगन्तव्यम्। तस्मिन् घटिकाऽन्यूने परभागे यदा संक्रान्तिसदानीं भास्करोदये प्रत्यासन्नं दिनार्द्धं पुण्यम्। अयमेवार्थो द्वितीयश्लोके प्रपञ्च्यते। घटिकान्यूनमर्धमस्यूर्द्धं रात्रे पूर्वभागे यदा संक्रमणं भवति तदा यद्यपि दिवासंक्रमणमागतं तथापि तस्य दिवसस्य उत्तरार्द्धं पुण्यं यदा सम्पूर्णेऽर्द्धरात्रे घटिकाद्वयात्मके मिथुने संक्रमणं भवेत्तदानीं पूर्वोत्तरयोर्दिनयोः पुण्यं श्रेयः। अतिरिक्ते परभागे संक्रान्तौ परेऽहनि पूर्वार्द्धं पुण्यम्। देवलोऽपि "आयनसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः। रात्रौ संक्रमणे भानोर्विषुवत्ययने दिने" इति। अयमर्थः। रात्रौ भानोः संक्रमणे विषुवद्भागे जाते सति संक्रमणस्यासन्नदिनार्द्धं पुण्यम्। पूर्वरात्रसंक्रमणे पूर्वदिनस्योत्तरार्द्धं पुण्यम्। अपरदा

संक्रमणे परदिनस्य पूर्वार्द्धं सिद्धवगलज्जम्। अयने अयननामके भागोः संक्रमणे द्विधा ज्ञाते यति यथा-योगं तद्दिनार्द्धं तु पुण्यं द्रष्टव्यम्। कर्कटे पूर्वार्द्धं मकरे उत्तरार्द्धम्। एतच्च मध्यंदिनादनविषयम्। उदयास्तमयप्रत्यासन्ने अयने पूर्वोत्तरभागप्राप्तसूर्यापेक्षया कल्पादिषु पुण्यत्वनिर्णयः पूर्वमेवोक्तः। अयनव्यतिरिक्तेषु दृश्यसंक्रमणेषु रात्रिगतेषु यो निर्णयस्तं सर्वं पर्युदस्तं तद्यथा-शेषः "शुक्ला मकरकर्कटाविति वर्णितः। "बाला: वृश्चिकिता माघ्याद्याः पुण्यतमाः स्मृताः" इत्युक्तेन सामान्यवचनेन रात्रिसंक्रमणेषु रात्रावेवानुष्ठानं प्रसक्तं तदपोह्य दिवसे संक्रान्तिषु दिवानुष्ठानं विधाय मकरकर्कटयोस्तत्पर्युदासे सति पूर्वप्रसक्तं रात्रावनुष्ठानमेव पर्यवस्यति। एवं सति रात्रौ स्नानमभ्युपगच्छतो याज्ञवल्क्यवचनस्यापि कश्चिदिषयः सम्पद्यते। तथा च याज्ञवल्क्यः "राहुदर्शनसंक्रान्तिविवाहात्ययदर्शिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च" इति। हेमन्तुरपि "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु। यज्ञे विवाहे यात्रायां तथा पुत्रकर्मणि। दानान्येतानि यज्ञानि रात्रौ दैवाहवे तथा। ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च। अपवे चेति-ष्टानस्य रात्रौ दानं प्रशस्यते" इति। नन्वु यथोक्तपर्युदासानुष्ठीतेः पुण्यतमत्वादिदेवलयाज्ञवल्क्यसुमन्तुवचनैर्मकरकर्कटयोर्निशानुष्ठानप्राप्तेः शास्त्रान्तरेण विरुद्धम्। तथा च भविष्योत्तरे "मिथुने कर्कसंक्रान्तिर्यदि स्यादंशमाश्रितः। प्रभाते वा निशीथे वा कुर्यादहनि पुर्वतः. कार्कटे तु परित्यज्य ऋषं (मकरम्) संक्रमते रविः। प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि" इति। हेमाद्रौऽपि "यदाऽस्तमयवेलायां मकरं याति भास्करः। प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि" इति। "अर्द्धरात्रे तदूर्द्धं वा संक्रान्तौ दक्षिणायने। पूर्वमेव दिनं ज्ञेयं यावत्सोदयते रविः" इति। भविष्योत्तरहेमाद्रिवचनेषु रात्र्यनुष्ठानप्रतिषेधस्याप्रसक्तेर्दिवसानुष्ठानप्रतिषेधकल्पने पर्युदासानुष्ठीतवचनानामानर्थक्यं प्राप्नोति। तस्माच्छास्त्रद्वयेन विकल्पप्राप्तौ तत्तद्देशप्रसिद्धिविचारेण व्यवस्था द्रष्टव्या"। अयनसंक्रान्तिशब्दे च २१०पृ० रव्यादिषड्राशीनां षडसंक्रान्तौ पुण्यत्वाद्भुता दर्शिता।

पुण्यकीर्त्तन त्रि० पुण्यं पुण्यजनकं कीर्त्तनं यस्य। १विष्णौ "पुण्यश्रवणकीर्त्तनः" विष्णुसं०। २पुण्यजनककीर्त्तनयुक्ते त्रि० ६त०। ३पुण्यकथने न०। पुण्यश्रवणयोऽपि विष्णौ।

पुण्यकीर्त्ति पु० पुण्या कीर्त्तिर्यस्य। १पुण्यश्लोके यस्य कीर्त्तने पुण्यं जायते तस्मिन्। कर्म०। २पुण्यजनिकायां कीर्त्तौ च।

पुण्यकृत् त्रि० पुण्यं कृतवान् कृ-भूते क्विप् "सुकर्मपापमन्त्रपुण्येषु कृञः" पा० त्रिविधः नियमः क्विबेवेति नियमात् कर्म कृतवानित्यत्राऽण् न। कृञ एवेति नियमान्मन्त्रमधीतवान् मन्त्राध्यायः अत्र न क्विप्। भूत एवेति नियमात् मन्त्रं करोति करिष्यति वेति विवक्षायां न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्। याज्ञवल्क्यं भाष्यकृत्" सि०कौ०। धर्मं कृतवति।

पुण्यक्षेत्र न० पुण्यस्य क्षेत्रम्। पुण्यभूमौ आर्य्यावर्त्ते इला०

पुण्यगन्ध पुण्यः सुन्दरः गन्धो यस्य। चम्पके त्रिका०।

पुण्यगन्धि त्रि० पुण्यः शुभावहः गन्धोऽस्यास्ति इत्यस्मा०। शुभावहसौरभयुक्ते भा० उ० १८२अ०।

पुण्यजन पुंस्त्री० पुण्यः विरुद्धलक्षणया पापी जनः कर्म०। १राक्षसे अमरः। २यक्षे मेदि० स्त्रियां जातित्वात् ङीष्। ३सज्जने पु० मेदि० ४दयस्य प्राचेतसेषु पुत्रेषु "दश प्राचेतसाः पुत्राः सन्तः पुण्यजनाः स्मृताः" भा०आ० ८५अ०।

पुण्यजनेश्वर पु० ६त०। कुबेरे अमरः।

पुण्यजित पु० पुण्येन जितः आयत्तीकृतः। चन्द्रलोकादौ "एवमस्तु पुण्यजितो लोकः क्षीयते" श्रुतिः।

पुण्यतृण न० नित्यकर्म०। श्वेतकुशे राजनि०।

पुण्यदर्शन पुंस्त्री पुण्यं दर्शनमस्य। १चाणक्ये राजनि०। स्त्रियां जातित्वात् ङीष्। यस्य दर्शने पुण्यं भवति तस्मिन् २देवप्रतिमादौ त्रि०।

पुण्यनामन् पु० १कुमारानुचरभेदे भा०शा०४६अ०। २पुण्यसाधनमात्रके त्रि० स्त्रियां वा ङीप्।

पुण्यफल पु० पुण्यानि शुभानि फलान्यस्य। १वृक्षप्रावारोवनभेदे शब्दमा० कर्म०। २पुण्यरूपे फले न० बहुः २६।५

पुण्यभाज् त्रि० पुण्यं भजते भज-क्विप् उप०स०। पुण्ययुक्ते

पुण्यभूमि स्त्री पुण्यस्य पुण्योत्पादनार्थां भूमिः। आर्य्यावर्त्तदेशे अमरः। "या सरस्वत्या वै पूर्वादा सरस्वत्या पश्चिमात्। तयोरेवान्तरं गिर्योरार्य्यावर्त्तं विदुर्बुधाः"

मतना वह बीजोक्ता । (तयोर्विन्ध्यहिमाचलयोः)। पुण्यभूमध्यतयोऽयम् ।

पुण्यरात्र पु॰पुण्या रात्रिः कर्म॰ समा॰रात्रान्तत्वात् पुंस्त्वम् । पुण्यायां रात्रौ । [चन्द्रलोकाटौ कर्म॰। २धर्मिष्ठजने च।

पुण्यलोक पु॰ पुण्यप्राप्योलोकः शा॰त॰ । १पुण्येनप्राप्ये

पुण्यवत् त्रि॰ पुण्य+भूमार्थे मतुप् मस्य वः । बहुपुण्ययुक्ते अमरः । स्त्रियां ङीप् ।

पुण्यशकुन न॰ पुण्यसूचकं शकुनम् । १शुभसूचके शकुने साध्यतया तदस्यास्ति अच् । २तत्साधने त्रि॰ "मयूराः पुण्यशकुनाः हंससारसघातकाः" भा॰ उ॰१३२अ॰ ।

पुण्यशील त्रि॰ पुण्यं शीलयति शील—अण् उप॰स॰ । नियतपुण्यानुष्ठायिनि ।

पुण्यश्लोक त्रि॰ पुण्यः पुण्यदायकः श्लोको यशश्चरितं वा यस्य । "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः" इत्युक्तेषु १नलादिषु । २पुण्यचरितयुक्तमात्रे च ३स्त्रीपद्यां स्त्री शब्दमा॰ ४वैदेह्यां स्त्री ।

पुण्यसम अव्य॰पुण्यं समं यत्र तिष्ठद्गु॰अव्ययी॰ तुल्यपुण्ये

पुण्यसहम न॰ नील॰ता॰ उक्ते सहमभेदे तदानयनप्रकारस्तत्रोक्तो यथा "सूर्योनचन्द्रान्वितभक्ति लग्नं रवीन्दुयुक्तं निधि पुण्यसंज्ञम् । शोध्यर्क्षगुद्यात्रयभान्तराले लग्नं न चेत् सैकभमेतदुक्तम्" । "यत्राब्दे पुण्यसहमे शुभं सोऽब्दः शुभावहः" । अनिष्टेऽस्मिन् शुभं नेति पुण्यसादौ विचारयेत्" ।

पुण्यस्थान न॰पुण्यनिमित्तं स्थानम् । १पुण्योत्पादनसाधने स्थानभेदे २लग्नावधिके नवमस्थाने च ज्यो॰। [मात्रे च ।

पुण्या स्त्री पु-ड्युण्य । १तुलस्यां शब्दमा॰। २पुण्यजनकस्त्री॰

पुण्यात्मन् त्रि॰ पुण्यं आत्मा यस्य । पुण्यस्वभावे तेषां परलोकगतिप्रकारः पद्मपु॰ क्रिया॰ उक्तो यथा

"सुमतिरुवाच शृणु विप्र ! प्रवक्ष्यामि यत्तया श्रोतुमिच्छते । पुण्यात्मनां पापिनाञ्च पन्थानं सुखदुःखदम् । आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् । शृणुष्व द्विजशार्दूल ! शृण्वतां प्रीतिवर्द्धनम् । प्रस्तरैरिष्टकैर्बद्धो दिव्यस्त्रीः समाकृतः । भाति पुण्यात्मनां पन्थाः सर्वोपद्रववर्जितः । क्वचिद्गन्धर्वकन्याभिर्गीयते गानसत्तमम् । क्वचिन्मञ्जुगरीराभिरप्सरोभिश्च नृत्यते । क्वचिच्च वीणावादनं नानावाद्यं मनोहरम् । क्वचित् कुसुमवृष्टिश्च क्वचिद्वायुः सुशीतलः । क्वचित् क्वचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिताः । क्वचित्पुण्याः शीततोयाः कुत्रचित् भक्तशालिकाः । क्वचिद्वेणुश्च गन्धर्वाः पठन्तस्तत्सुसंगमम् । सुच्छायाः पादपाः क्वापि पुष्पिता मञ्जुवादयः । समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः । पुण्यात्मानो द्विजश्रेष्ठ ! सुखमत्यनुभवाय च । केचित्तुरङ्गमारूढा नानालङ्कारभूषिताः । उद्दण्डधवलच्छत्रैर्गच्छन्त्याहत मस्तकाः । केचिद्यान्ति गजारूढा रथारूढाश्च केचन । यानारूढा जनाः केचित् सुखेन यममन्दिरम् । केचिद्वेणुनाहस्तन्यस्तचामरवायुभिः । गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः । केचिद्दिव्याम्बरधराः सुचन्दनविभूषिताः । भुञ्जतो यान्ति ताम्बूलं पुण्यात्मानो यमालयम् । निजगात्रत्विषा केचिज्ज्वालयन्तो दिशो दश । व्रजन्ति यमनागारं चलद्घण्टनिवासिनः । केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन । केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा । केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् । केचिद्घीनि खादन्तः केचिन्नानाफलानि च । केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै । तानागतांस्ततो दृष्ट्वा नरान् धर्मपरायणान् । भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् । चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः । शङ्खचक्रगदापद्मधारी गरुडवाहनः । स्वर्णयज्ञोपवीती च स्वेरचारुतराननः । किरीटी कुण्डली चैव वनमालाविभूषितः । चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः । सर्वे नारायणाकारा बभूवुर्मधुरोक्तयः । ततः स्वयं धर्मराजस्तान् सर्वान् मनुजोत्तमान् । परमां प्रीतिमासाद्य पितृवत् पूजयेद्द्विज ! । दिव्यैर्वस्त्रैः फलैश्चैव तेषां पुण्यवतां नृणाम् । भोजनं कारयित्वा तु तानुवाचाथ भास्करिः । यम उवाच "यूयं सर्वे महात्मानो नरकक्लेशभीरवः । निजपुण्यप्रभावेन गच्छतां परमं पदम् । संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः । स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् । इत्युक्त्वा धर्मराजेन ते सर्वे द्विजसत्तम ! । दिव्यं रथं समारुह्य नारायणपुरं ययुः" ।

पुण्याह न॰ पुण्यमहः टच् समा॰ अहान्तत्वेऽपि पुण्यशब्दिनाभ्यामहः" अमरोक्तेः क्लीवता । पुण्यदिने

पुण्याहवाचन न॰ ६त॰। पुण्यदिनस्य विप्रद्वारा वाचने तत्प्रकारः "पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते । एतदेव निरोऽङ्कारं कुर्यात् क्षत्रियवैश्ययोः । ओङ्कारं

ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ । उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत्" उद्वा०त० यमोक्तः ।

पुण्योदका स्त्री पुण्यजनकं स्नानदानादुदकं यस्याः । नदीभेदे भा०अनु० १३०अ० । [पुत्रामनुशब्दे नद्येतद्दर्शयः ।

पुत् न० "निपरणाद्वा पुत्" निरु०पृ–वा०डुति पृषो० । नरकभेदे

पुत्त गतौ चौ०भ्वा०पर०सक० सेट् । पुत्तति अपुत्तीत् पुपुत्त ।

पुत्तलक पु० पुत्त–वा० ल स्वार्थे क । पत्रादिनिर्मिते गवादिप्रतिमूर्त्तिभेदे पर्यनरशब्दे दर्शयम् शब्दि०त० ।

पुत्तली स्त्री पुत्त–ल गौरा० ङीष् । वस्त्रपत्रमृदादिनिर्मिते (पुतुल) ख्याते पदार्थे "अमावास्यां समासाद्य मध्यरात्रे विचक्षणः । पुत्तलीं मृण्मयीं कृत्वा दीपादिभिरलङ्कृताम्" उत्तरकामाख्यातन्त्रम् । स्वार्थे क अतइत्वम् । पुत्तालिका तत्रार्थे स्त्री ।

पुत्तिका स्त्री पुत् इति शब्दं तनोति तन–ड स्वार्थे क ह्रस्वः अत इत्वम् । क्षुद्रमक्षिकायाम् अमरः ।

पुत्र(त्र) पु० पू–क्त्र ह्रस्वश्च पुत्रो नरकभेदात् त्रायते त्रै–क वा । १स्वजन्यपुरुषे २स्वजन्यायां स्त्रियां स्त्री ङीष् । निरुक्ते तु २ ।।अन्या व्युत्पत्तिरुक्ता "पुत्र पुरु त्रायते निपरणाद्वा पुत् नरकं तस्मात् त्रायते वा" पृषो० । "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः" मनुः । तेनास्य एकतकारता द्वितकारता च । तस्यापत्यं विदा०अञ् । पात्र तदपत्ये पुंस्त्री० हरितादि०यूनि फक् । पौत्रायण पुत्रस्य पुत्रापत्ये पुंस्त्री० राजदन्ता० पतिपशुशब्दाभ्यां समासे पतिपशुशब्दयोः परनि० । पत्युःपुत्रः पुत्रपतिः पशोः पुत्रः पुत्रपशुः । स च गौणमुख्यभेदेन द्वादशविधः द्वादशपुत्रशब्दे ८०१पृ०दर्शयम् अन्यपि ते चतुर्विधाः यथा "अन्यसम्बन्धिनः केचित् केचिन्नाकापहारकाः । रिपवश्च प्रियाश्चेति स्वकर्मवशवर्त्तिनः । भेदैश्चतुर्भिर्जायन्ते पुत्रा मित्राः स्त्रियस्तथा । भार्या पिता च माता च भृत्याः स्वजनबान्धवाः । स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले । न्यासापहरणं पूर्वं यस्य यस्य कृतं भुवि । न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् भुवि । येन चापहृतो न्यासस्तस्य गेहे न संशयः । न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः । न्यासस्वामी स पुत्रोऽभून्न्यासापहारकस्य च । गुणवान् रूपवांश्चैव सर्वलक्षणसंयुतः । भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने । प्रियवाक्यधरो वापि वक्तव्यं हितं प्रदर्शयेत् । स्वीयं द्रव्यं यत्तद्राज्यं प्रीतिस्तस्याद्य चाहनाम । भुक्त्वा तु पोषणात्तेन तदादाय पुनर्व्रजेत् । यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा । दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् । तादृशं तस्य दद्यात् स पुत्रो भूत्वा महागुणैः । अल्पायुषस्तथा भूत्वा मरणं यान्ति ते तथा । दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्यैव पुनः पुनः । यदाह पुत्र पुत्रेति प्रलापं हि करोति सः । तदा हास्यं करोत्येष कः स पुत्रो हि कस्य च । अनेनापि हृतो न्यासो मदीयः परिचारिणा । द्रव्यापहारोऽपि पिता पूर्वमद्यैव तस्य च । पिशाचत्वं मया दत्तमद्यैव हि दुरात्मनः । द्रव्यापहरणेनापि मम प्राणा गताः किल । दुःखेन महता चैव यथाहं पीडितः पुरा । तथा दुःखं प्रदत्त्वाहं द्रव्यं सुदाडम्रुत्तमम् । भोगेन सर्वमादाय चिराद्विनाश्य सौख्यवत् । गतोऽस्मि स्वगृहत्वाद्य कस्याहं सुत ईदृशः । न चैषोऽपि पिता पूर्वमद्यैव न च कस्यचित् । पिशाचत्वं मया दत्तमद्यैव च दुरात्मनः । एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः । प्रवालनेन मार्गेण दुःखं दत्त्वा सुदारुणम् । एवं न्यासस्य सम्बन्धात् पुत्राः केचित् भवन्ति वै । संसारे दुःखबहुला दर्शयन्ते यत्र तत्र हि ।। अन्यसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः । ऋणं यस्य गृहीत्वा वः प्रयाति मरणं किल । अतस्तस्य सुतो भूत्वा भ्राता वाथ पिता प्रियः । मित्ररूपेण वर्त्तेत अन्तर्दुष्टः सदैव वः । गुणं नैव प्रपश्यन्ते स क्रूरो निष्ठुराकृतिः । अल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च । नित्यमिष्टं समश्नाति भोगान् भुञ्जीत नित्यशः । द्यूतकर्मरतो नित्यं चौरकर्मणि नित्यशः । गृहाद्द्रव्यं यदाहृत्य वार्यमाणः प्रयुज्यति । पितरं मातरञ्चैव कुरुते च दिने दिने । द्रावकस्तापकश्चैव बहु निष्ठुरजल्पकः । वञ्चयित्वैव सुहृदः कृत्वा सुखेन तिष्ठति । जातकर्मादिभिर्बाल्ये द्रव्यं गृह्णाति दारुणः । पुनर्विवाहसंयोगान्नानाभेदैरनेकधा । एवं संचीयते द्रव्यं नैवमेतद्दहात्यपि । गृहक्षेत्रादिकं सर्वं ममैव हि न संशयः । पितरं मातरञ्चैव वदत्येवं दिने दिने । सुदण्डैर्मूषलैश्चैव कशाघातैस्तु दारुणैः । मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् । निःस्नेहो निर्दयश्चैव जायते नात्र संशयः । एवंविधास्ततः पुत्रा भवन्ति च महीतले २। रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ।। बाल्ये वयसि सम्प्राप्ते रिपुवद्वर्त्तते सदा । पितरं मातरञ्चैव क्रीडमानो हि ताडयेत् । ताडयित्वा प्रयात्येवं

प्रकृत्यैव पुनःपुनः। पुनरायाचितं तत्र पितरं मातरं पुनः। क्रोधो वर्त्तते नित्यं वैरकर्मणि सर्वदा। पितरं मारयित्वा तु मातरञ्च पुनःपुनः। प्रयात्येवं स दुष्टात्मा पूर्वैरानुभावतः ३। अथातः संप्रवक्ष्यामि यत्कार्य्यं भवेत् प्रियम्। जातमात्रः प्रियं कुर्य्याद्दुःखे गमनक्रीडनैः। वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम्। भक्त्या कन्योऽभवेत् नित्यं तावुभौ परिपालयेत्। स्नेहेन वचसा चैव प्रियवस्त्राभरणेन च। मृतौ गुरू समाप्नाय स्नेहेनरुदते पुनः। श्राद्धकर्माणि सर्वाणि पिण्डदानादिकं क्रियाम्। करोत्येवं सुदुःखार्त्तस्तेभ्यो यातां प्रयच्छति। श्रद्धान्वितः स्नेहाश्रियापयति निश्चितः। यत्कार्य्यं भवेत् कान्तं प्रयच्छति न संशयः। पुत्रो भूत्वा गङ्गाप्राप्तं धनेन विधिना किल ४। उदासीनं प्रवक्ष्यामि तवाग्रे द्विज! साम्प्रतम्। उदासीनेन भावेन स देव परिवर्त्तते। ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति। नैवोपयाति संतुष्टं उदासीनो द्विजोत्तम!। तवाग्रे कथितं सर्वं पुत्राणां गतिरीदृशी। यथा पुत्रास्तथा भार्य्या पिता भ्राता च बान्धवाः। भृत्याश्चान्ये समाख्याताः पथ्यस्तुरगास्तथा। गजामहिष्यो दासश्च कथ्यन्त्विनस्त्वमी" पाद्मे भूमिख०११.१२।

तत्रैव १८।२०अ० सुपुत्रलक्षणं यथा

"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम्। पुत्रःप्रवक्तो यस्यात्मा सत्यधर्मरतः सदा। बुद्धिमान् ज्ञानसम्पन्नश्चक्षुष्मान् वाग्विदांवरः। सर्वकर्मसु सन् धीरो वेदाध्ययनतत्परः। सर्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः। याजकः सर्वयज्ञानां दाता त्यागी प्रियंवदः। विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत् प्रियः। शिष्टाचारपरो नित्यं सर्वप्राणनवत्सलः। कुलस्य तारको विद्वान् कुलस्य परिपोषकः। एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः"।

वैष्णवपुत्रस्य पूर्वपुरुषत्रातृत्वं यथा "वैष्णवो यदि पुत्रः स्यात् त्रायते हि स पूर्वजान्। विष्णुभक्तजनान् वंशास्तारयन्ति च पावनाः" कुपुत्रजनने पितॄणां नरकगमनं यथा "तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्वजाः। घोरे नरके दीनाः शयन्ति च सुदुःखिताः। यथा जले कुपुत्रेण तरन्मज्जति मूढधीः। तथा पिता कुपुत्रेण नरकान्ते निमज्जति। जातमात्रे कुपुत्रे तु तेन संजायते पितामहः। विनेमोऽधो नयेद्यस्तान्मूर्ध्नि वा वैष्णवो भवेत्"। इत्यनावश्यके पञ्चमस्थाने मीन०ता० सर्वत्रा-

स्त्रीणे ४ सहस्रभेदे च। पुत्रसहस्रमस्त्रे हस्तम्।

पुत्रक पु० पुत्र+अनुकम्पायां संज्ञायां वा कन् स्वार्थे क वा। १अनुकम्पितपुत्रे २पुत्रमात्रे च अमरः ३शरमे पशुभेदे पुं स्त्री०। ४धूर्त्ते ५शैवभेदे ६हस्तभेदे च मेदि० ७पतङ्गे ८अनुकम्पाग्रहणे च शब्दरत्ना०।

पुत्रकन्दा स्त्री पुत्र इव स्निग्धत्वात् कन्दोऽस्याः। तस्याकन्दायां राजनि०।

पुत्रका स्त्री पुत्र इव कायति कै-क। धौरसपुत्र्यायां पुत्रिकायां शब्दरत्ना०। [भिक्षापुत्रा।

पुत्रकाम त्रि० पुत्रं कामयते कामि-अच् उप०स०। पुत्रा-

पुत्रकाम्या स्त्री आत्मनः पुत्रमिच्छति पुत्र+काम्यच्-भावे अ। आत्मनः पुत्रेच्छायाम् भट्टिः २।४२ [६।१।२।

पुत्रक्रथ पु० क्र+बां० भावे थक् ह्रस्वः। पुत्रस्योत्पादने अ०५।

पुत्रघ्नी स्त्री पुत्रं हन्ति हन-टक्। सुश्रुतोक्ते योनिरोगभेदे "स्त्रियं स्त्रियं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्"।

पुत्र(त्र)जग्धी स्त्री पुत्रो जग्धोऽयया ङीप्। "वा हतजग्ध्योः" वार्त्ति०तकारस्य वा हित्वम्। पुत्रभक्षणकर्त्र्यां स्त्रियां तथा पुत्र(त्र)हतीशब्देऽपि वा तस्य हित्वं ङीप् च। सा च पुत्रहन्त्र्यां स्त्रियां स्त्री।

पुत्रजीव पु० पुत्रं गर्भं जीवयति जीव-णच् उप० स०। (जियापुता) वृक्षे "पुत्रजीवो हिमो वृष्यः स्नेहदो गर्भजीवनः। चक्षुष्यः पित्तशमनः दाहतृष्णानिवारकः" राजनि० "पुत्रजीवो गुरुर्वातकारी वृक्षे मतो बुधैः। स्वादुमूलफलः स्वादुः पटुः कटुरपि स्मृतः" भावप्र०। [पुत्रजीवदले रत्नमा०।

पुत्रञ्जीवक पु० पुत्रं गर्भं जीवयति जीव+ण्वु० स्वुक्।

पुत्रदा स्त्री पुत्रं गर्भं ददाति दीयमानं दा-क। १वन्ध्याकर्कश्यां २वन्ध्यायाञ्च राजनि० गर्भधारके त्रि०।

पुत्रदात्री स्त्री पुत्रं ददाति दा-तृच् ङीप्। मातृके प्रसिद्धे वृक्षभेदे "पुत्रदात्री वातकफकटूष्णनाशिनी मता। सुरभिः सर्वदा पथ्या वन्ध्यादोषविनाशिनी" राजनि०।

पुत्रपौत्र न० मयूरादि० समा० द्व०। पुत्रपौत्रयोः समाहारे तदनुभवति च। पुत्रपौत्रीय पुत्रपौत्रपर्य्यन्तसन्तानिनि भट्टि० ५।१४। [राजनि० २पुत्रदातृमात्रे त्रि०।

पुत्रप्रदा स्त्री पुत्रं प्रददाति प्र+दा-क। १स्त्रियां क्षुपभेदे

पुत्रप्रिय पु० ६त०। जनभेदे भा०व० १०८अ०।

पुत्रभद्रा स्त्री पुत्रस्य भद्रं यस्याः ६ब०। कृष्णजीवन्त्याम् कन्यायां राजनि०।

पुत्रभाव पु॰पुत्रस्य भावः। १पुत्रत्वे ज्योतिषोक्ते २पञ्चमे भावे द्वादशभावगन्दे १८०२ पृ॰ द्रष्टव्यम्। तत्र ग्रहादिस्थित्यादिफलादि जातकपद्धतावुक्तं यथा

"शुभखगवसतिः सुतालयस्थैश्चुभदृष्टितः शुभवीक्षितोऽपि वा स्यात्। कथयति शुभसन्ततिं नराणां स च विपरीतफलः खलस्य योगात्। चन्द्रादिलग्नादपि पुत्रभावे वर्गौ यदैकोऽपि च गोप्रतेः स्यात्। तदा यदैदोरसमेव पुत्रं बलावलोकस्य हि तारतम्यात्। तनौ धने वा सहजे विलग्ननाथे सुतः स्यात् प्रथमं चतुर्थे। पुत्री भवेत्तत्परतस्तु पुत्रात् द्विकन्यकानां जननप्रदः स्यात्। चन्द्रभौमभृगवोदिदृक्षा आदिमे वयसि सन्ततिप्रदाः। ते पुनर्धनुषि नालिमे तथा प्राचि सन्ततिकरा मता विदाम्। सन्तानभावे ग्रहदृष्टियोगो नवांशयोगोऽथ वाक्ययोगः। यावन्मितः स्यात् खलु तत्प्रसंख्या स्यात् सन्ततिस्तत्प्रवांशतो वा। अपत्यसंख्या सुतभे नवांशाद्वाच्या दिनिष्ठा शुभदृष्टियोगात्। शुभांशतो जीववती च कन्या पापांशतः पापखगप्रदृष्टेः। कश्चित्क्रूरकवयः कर्मांश्च हिबलभाः। क्रमात् कुर्वन्ति मतस्तं तोकक्रौतुकवर्जितम्। कविबलानिधिवर्गयुते सुते कविकलानिधियुक्तनिरीक्षिते। बलभवर्गगते खलु कन्यका विषमभे तु सुतान् प्रदिशन्ति हि। दाक्षोभवान्यपत्यानि सितांशे सुतभावने। सितदृष्टे च केचित्तु चन्द्रादन्येवमूचिरे। शनिभाद्याः शनिभं सुतभे यदा शशिसुतेन दृशा प्रविलोकितम्। गुरुकुजार्कदृशा न युतं तदा प्रततुते तनयं निजभूमिजम्। सुतभं शनिभं चेत् स्याच्छनियुक् शनिनेक्षितम्। दत्तात्मजाग्निबद्बोध्यं तदन्वेत् क्रीतपुत्रदम्। सन्तानभावे कुजपञ्चमांशे मन्दान्वितेऽन्यग्रहदृष्टिहीने। पुत्रो भवेत् क्षत्रिमकोऽथ कुण्डः पापैर्युते पापगृहे सुतर्क्षे। चन्द्रे कुजांशे सुतगे प्रदृष्टे मन्देन नान्यैः खलु गूढजातः। शन्यंशके सूर्यनिरीक्षिते च कुजे सुतस्थे च सुतोऽपविद्धः। शनिवर्गगते चन्द्रे शनियुक्ते च पञ्चमे। प्रदृष्टे रविशुक्राभ्यां भवेत् पौनर्भवः सुतः। रविचन्द्रमसोर्वर्गः सुतभे च तयोर्युतिः। शुक्रेण केवलं दृष्टे सहोढः कथितः सुतः। सुतालये भूसुतसंस्थितिश्चेत् संजातसंजातसुतक्षतिः स्यात्। यदा न दृष्टिर्गुरुदैत्यगुर्वोर्दृष्टा तयोः स्यात् प्रथमोत्थनाशः। सन्तानभावे नवमांशको यः पापैः प्रदृष्टः खलु वन्ध्यतेः स्यात्। शशी विनश्यन्ति हि तत्प्रमाणा यदा न दृष्टिः शुभखेचराणाम्। काव्ये कुजे नीचरिपोर्नवांशे पराजिते वापि मृतप्रजः स्यात्। स्त्री खेटभांशे तु सुताप्रजः स्यादन्यांशकस्थे पुमपत्यभाक् ना। पापैः सुतस्थानगतैर्धनैः स्वजनैः सुखैर्नो रहितः कुजे तु। वैकल्यभाग् व्याधियुतः शनौ तु शुभग्रहैः पुत्रधनैः प्रपूर्णः"। वर्षलग्नतः पुत्रभावफलं नी॰ता॰ उक्तं यथा

"पुत्रायगो वर्षपतिर्गुरुश्चेत् सूर्यारसौम्योशनसोऽथ चेत्यम्। सत्पुत्रसौख्याय खलार्हितास्ते दुःखप्रदाः पुत्रत एव चिन्त्याः। पुत्रे सुतस्य सहमे बले सुताग्निः सौम्येक्षितेऽप्यतिसुखं यदि तत्र वर्षे। सौम्येक्षिते शुभगृहे सकुजो बुधश्चेत् पुत्रायगः सुतसुखं विबले सुतार्त्तिः। जीवो लग्नाद् यद्राशावद्देऽस्य सुतगोबली। पुत्रसौख्याय भौमो शो वर्षेशोऽस्य सुताग्निदः। बलेऽथो लग्नाद्दृष्टे विलग्नमेवत् पुत्राग्रे बुधसितयोरयोत्यमूहम्। यद्राशौ लग्नाद् शनिः कुजश्च शोऽब्दे पुत्रार्त्तिं तनुसुतगः करोति नूनम्। पुत्रे पुण्यस्य सहमं पुत्राग्रे शुभदृष्टियुक्। लग्नपुत्रेश्वरौ पुत्रे पुत्रदौ बलिनौ यदि। चन्द्रो जीवोऽथ वा शुक्रः स्त्रीभगः सुतदः सुते। वक्री भौमः सुतस्थश्चेदुत्पन्नसुतनाशनः। सुताधिपो लग्नाद् भार्गवोऽब्दे पुत्रे विलग्नाधिपतीत्यभाषः। पुत्रप्रदो मन्दगृहस्थपुत्रे पापाधिकारीक्षित चात्मजार्त्तिः। यद्राशिगोपग्रहः सुतौ च राशिस्तत्प्रदाभिधः। बली जन्मोत्थसौख्याय वर्षे तद्दुःखदोऽन्यथा"

पुत्रवल त्रि॰ पुत्रोऽस्यास्य "अन्यतापि दृश्यते" वार्त्ति॰ वलच्। पुत्रयुक्ते पथि मतुप् मस्य वः। पुत्रवत् तथार्थे त्रि॰ स्त्रियां ङीप्।

पुत्रशृङ्गी स्त्री पुत्रं पवित्रं शृङ्गमिव पुष्पमस्याः ङीप्। अजशृङ्ग्यां राजनि॰। इयं सुश्रुते श्यामादिगणे पठिता।

पुत्रश्रेणी स्त्री पुत्रा पवित्रा श्रेणिरत्र ङीप्। मूषिककर्ण्यां रत्नमाला।

पुत्रसङ्करिन् पु॰ पुत्रे पुत्रोत्पादने सङ्करी। भिन्नवर्णायां स्त्रियां पुत्रोत्पादनेन वर्णसङ्करकारके भा॰क॰ ४४अ॰।

पुत्रसहम न॰ नील॰ता॰ उक्ते सहमभेदे। तदानयनञ्च तत्र दर्शितं यथा "सुतोऽहर्निशमिन्दुमीज्यात्"। एतदुदयादिन्दुं त्यक्त्वा दिवारात्रौ लग्नयोगे पुत्रसहम भवति तत्र च पुण्यसहमवत् सैकतादि ज्ञेयम्।

पुत्रसू स्त्री पुत्रं सूते सू-क्विप्। पुत्रप्रसवकर्त्र्याम्।

पुत्राचार्य्य पु॰ पुत्र आचार्योऽध्यापको यस्य। इलतोभ्यामिनि। भट्ट॰ २।१।१२

पुता(त्रा)दिन् पु॰ पुत्रमत्ति अद्-णिनि आक्रोशे गम्ये तकारस्य वा द्वित्वम्। (बेटाखेक) पुत्रभक्षकत्वेन आक्रुश्यमाने १पुरुषे २तथाभूतायां स्त्रियां स्त्री ङीप्।

पुत्रामद पु॰ पुत्रस्य पुत्रोपहृतमन्नमत्ति अद्-अच् उप॰स॰। कुटीचके सन्न्यासिभेदे त्रिका॰ कुटीचकशब्दे दृश्यम्।

पुत्रिक त्रि॰ पुत्रोऽस्यास्य ठन्। पुत्रयुक्ते। ततः पुरोहिता॰ भावे यक्। पौत्रिक्य तद्युक्तत्वे न॰।

पुत्रिका स्त्री पुत्री+स्वार्थे क। १कन्यायाम् शब्दर॰। २पुत्तल्यां श्यावकतूले च मेदि॰। अपुत्रेण समयभेदेन ३कृतायां सुतायां स्त्री। स च समयः तद्विभागादिश्च मनुनोक्तो यथा "अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्। अनेन तु विधानेन पुरा चक्रेऽथ प्रत्रिकाः। विदत्यर्थं स्वयंश्रेष्ठः स्वयं दक्षः प्रजापतिः। ददौ च दश धर्माय, कश्यपाय त्रयोदश। सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम्। यथैवात्मा तथा पुत्र पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्" "दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्। स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च। पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः। तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः। पुत्रिकायां सुतायान्तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः।" "मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्यास्तृतीयं तत्पितुःपितुः"। अधिकं पुत्रिकापुत्रशब्दे दृश्यम्।

पुत्रिकापुत्र पु॰ पुत्रिकैव सुतः, ६त॰ वा। १पुत्रिकारूपपुत्रे २पुत्रिकायाः पुत्रे च यथाह वशिष्ठः "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति"। "अथ वा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरसस्सम एव पित्रवयवानामस्यत्वान्मात्रवयवानां वाहुल्याच्च यथाह वशिष्ठः "द्वितीयः पुत्रिकैवेति। द्वितीयः पुत्रः कन्यैवेत्यर्थः इति, मिताक्षरा। अत्र विशेषो दायभागोक्तो यथा "तत्र पुत्रिकौरसयोस्तुल्यांशित्वं न पुनः पुत्रिकाया ज्येष्ठत्वेन विंशोद्धारार्हता तदाह मनुः "पुत्रिकायां सुतायान्तु" (इत्यादि अनुपदमुक्तम्) स्वतो ज्येष्ठपुत्रकार्यकरत्वात् स्वपुत्रद्वारेण पुत्रिकायाः पिण्डदातृत्वात्। तदाह मनुः "अपुत्रोऽनेन विधिना" (इत्यादि उक्तम्)। न च पुत्रिकायामेव प्रथमं पुत्रे जाते तदनन्तरमौरसपुत्रोत्पत्तौ पुत्रिकापुत्रस्य ज्येष्ठांशता भवेदिति वाच्यं तस्य पौत्रत्वात् तदाह मनुः "अक्षता वा क्षता वापि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनम्"। पुत्रिका हि पुत्रस्तस्याः पुत्रः पौत्र एव भवति तद्वांश्च पौत्री भवति न च ज्येष्ठत्वेन पौत्रस्यांशातिरेकः श्रुतोऽस्ति"। यत्तु वशिष्ठवचनम् "अभ्रातृकां प्रदास्यामि" (इत्यादि उक्तम्)। पुत्रिकापुत्रस्यैव पुत्रत्वं वदति तेन पुत्रिकायास्तत्पुत्रस्य च पुत्रत्वं तन्न मनुविरोधात् पिण्डदानमात्रयोगात् पुत्रत्वमस्य गौणं तद्द्वारेणैव पुत्रिकायाः पिण्डदातृत्वात् एकस्य स्वतोऽन्यस्य तद्योगात्। पुत्रिकौरसयोस्तु सवर्णत्वे सति पूर्वोक्तविभागो बोद्धव्यः असवर्णत्वे तयोरसवर्णौरसपुत्रवदेव, विभागः पुत्रिकौरसयोः समानत्वात्। यदि च सुतापि पुत्रमनुत्पाद्यैव विधवा भूता वन्ध्यात्वेनवाऽवधृता तदा तस्याः पितृधनेऽनधिकारः स्वधाकरपुत्रार्थं पुत्रिकायाः कृतत्वात् तदभावे दुहित्रन्तरतुल्यत्वात् "दा॰भा॰। व्याकृतं चैतत् श्रीकृष्णेन "ज्येष्ठता श्रेष्ठता वा च पुत्रामनरकत्राणनिबन्धना तदभावात् श्रेष्ठत्वाभाव इत्याह स्वत इति साक्षादित्यर्थः। ज्येष्ठत्वेनेति। ज्येष्ठपुत्रकार्यं पुन्नामनरकत्राणं तत्करणात्। तर्हि पुत्रिकाकरणं किमर्थमत आह स्वपुत्रद्वारेणेति। स्वधाकरं त्रिविधक्रियाकरम् अन्यथा स्वधाकरशब्दस्य श्राद्धकरणमात्रार्थत्वे दौहित्रान्तरसाधारण्यात् पुत्रिकाकरणवैयर्थ्यापत्तेः। एतेन पुत्रिकापुत्रसत्त्वेऽपि पुत्रिकाया एव प्रेतश्राद्धाधिकार इति मतमपि निरस्तमिति वेदितव्यं तथा च परम्परयोपकारार्थमेव पुत्रिकापुत्रकरणमिति भावः। ज्येष्ठांशतेति। तस्य साक्षादेव ज्येष्ठपुत्रकार्यकरणादिति भावः। पौत्रत्वादिति आतिदेशिकपौत्रत्वादित्यर्थः। मनुविरोधादिति। न च विनिगमनाविरहः किं मनुविरोधात् वशिष्ठोक्तं पुत्रत्वं गौणं, किं वा वशिष्ठविरोधात् मनूक्तं पौत्रत्वमेव गौणमिति वाच्यं मनुस्मृतेः सर्वस्मृतिप्रबलत्वस्यैव विनिगमकत्वात्। पुत्रत्वं पुत्रव्यपदेशः। गौणमिति पिण्डदातृत्वस्य मुख्यपुत्रगुणस्य योगात् गौणता बोध्या। पिण्डदानयोगमेवोपपादयति तद्द्वारेणैवेति। एकस्य पुत्रिकापुत्रस्य, अन्यस्य पुत्रिकास्वरूपस्य तद्योगात् पुत्रत्वयोगात्। न च परम्परया पिण्डदानापेक्षया साक्षात् पिण्डदानस्य बलवत्त्वेन पुत्रिकापुत्रस्यैव पुत्रत्वं न्याय्यं

न तु पुत्रिकाया इति वाच्यं पुत्रिकाया अङ्गजत्वात् तदधीनजन्मतया च ततपुत्रस्य पिण्डदानयोगात् तस्या एवोत्कर्षेण पुत्रत्वौचित्यात् । एतन्न्यायादेव अपुत्रिकाया अपि दुहितुरभाव एव दौहित्रस्यैव प्रायधिकारोपपत्तिः । अतएव समस्तत्वेत्यनेन पुत्रिकौरसयोरेव धनभागिता मनूक्ता न तु तस्याः पुत्रस्य औरससमता केनाप्युक्तेति । इत्यत्र "पुत्रिकापुत्र एव चेति" द्वादशविधपुत्रगणनायां कर्मधारयो न तु तत्पुरुष इति विभावनीयम् । पूर्वोक्तविभाग इति समभाग इत्यर्थः" । अपत्यधनाधिकारे च दाय॰मा॰ कश्चिद्विशेष उक्तो यथा "यतएव स्वपुत्रद्वारेण पिण्डदाहतया दुहितुः पितृधनाधिकारः अतएव पुत्रिकाया अपि पितुपरमजातधनसम्बन्धायाः पश्चाद्वन्ध्यात्वेन तद्भर्तुर्वा प्रसवासामर्थ्येन विपर्यस्त पुत्राया मरणे तद्धनं न भर्तुः । यथा शङ्खलिखितौ "प्रेतायाः पुत्रिकायास्तु न भर्त्ता द्रव्यमर्हत्यपुत्रायाः" । तथा पैठीनसिः "प्रेतायां पुत्रिकायान्तु न भर्त्ता द्रव्यमर्हति । अपुत्रायां, कुमार्यां वा स्वस्रा ग्राह्यं तदन्यया" । ततः कुमार्यां स्वस्रा अन्यया वा पुत्रवत्या समाश्रितपुत्रया स्वस्रा तद्धनं ग्राह्यम् । अतः स्त्र्यधिकारे व्यावृत्तिरन्याधिकारस्य । यत्तु मनुवचनम् "अपुत्रायां मृतायान्तु पुत्रिकायां कथञ्चन । धनं तत् पुत्रिकाभर्त्ता हरेतैवाविचारयन्" । तदविपर्यस्तपुत्रायाः अनुत्पन्नमृतपुत्रायाः पुत्रिकाया मरणे वेदितव्यम्" "विपर्यस्तपुत्रायाः पुत्रात्यन्ताभाववत्याः । तद्धनं ग्राह्यमिति । तदपि पत्न्यभावे कुमार्यादीनां पत्नीबाध्यत्वादिति बोध्यम् । अत इति उक्तोभयसत्वाभ्यां विपर्यस्तपुत्रायाः पुत्रिकायामरणे कुमार्यादीनामधिकारे प्राप्ते भर्तुरधिकारस्य व्यावृत्तिरिति समयोपसंहारः । प्राञ्चस्तु यतः पुत्रिकाया एव विपर्यस्तपुत्रायामरणे न तत्संक्रान्तदाये भर्तुरधिकारोऽतः स्त्र्यधिकारे अन्यासां दुहित्रादीनामप्यधिकारेऽनन्तरं विपर्यस्तपुत्राणां तासां मरणे भर्तुरधिकारस्य व्यावृत्तिरिति व्याचक्रुः । तदविपर्यस्तपुत्रायाः इति । एतस्यैव विवरणम् अनुत्पन्नमृतपुत्रायाः इति । अत्र पक्षान्तराभावात् चकारः क्वाचित्क पाठः प्रामादिकः । अथात्र शङ्खलिखितादिवचनमेव उत्पन्नमृतपुत्राविषयं मनुवचनन्तु अनुत्पन्नपुत्राविषयमिति वैपरीत्यमेव न कुतः ? उत्पन्नपुत्रायाः, इवाविपर्यस्तपुत्रायाः पुत्रोत्पत्तेरेव पितुः पुन्नामनरकनिवर्त्तकत्वेन कृतोपकारकतया स्वामित्वे निर्व्यूढे पितुरितराशेषया तस्या एवाधिकोपकारित्वात् तद्भर्तुरधिकारो युक्तः अतएव "दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि" इत्यनेन दौहित्रमुखदर्शनस्यापि नरकनिस्तारकतेति । पुत्रानुत्पत्तौ तु पितृपकाराभावात् तस्या एव न स्वामित्वं कुतस्तत्स्यादिति तत्पितृधनाधिकारिणां कन्यादीनामेव तदानीं तत्राधिकारस्य न्याय्यत्वात् । यद्यपि वैन्ध्यात्वेनावष्टतायां जीवन्त्यामप्येषमुचितं तथापि प्रेतायाः इति पक्षात् न जीवन्त्यां तस्याम् अन्यदुहित्रादीनामधिकार इति" श्रीकृष्णव्याख्या ।

पुत्रिन् पुं॰स्त्री॰ पुत्र+अस्त्यर्थे इनि । पुत्रयुक्ते स्त्रियां ङीप् ।

पुत्री स्त्री॰ पुत्र+गौरा॰ ङीष् । १कन्यायां २वृक्षभेदे हला॰ ।

पु(त्रीय)त्र त्रि॰ पुत्रस्य निमित्तं संयोग उत्पातो वा "पुत्राच्छ च" पा॰ छ प्रत्ये यत् । १पुत्रनिमित्ते संयोगे २तदीयोत्पाते च । पुत्रस्येदम् छ । ३पुत्रसम्बन्धिनि त्रि॰ । "धन्यं यशस्यं पुत्रीयमायुष्यं विजयाय च" भा॰व्या॰ ६७अ॰ । ४दृष्टिभेदे स्त्री रामा॰अयो॰ १५।३

पुत्रेष्टि स्त्री पुत्रकाम कर्त्तव्या इष्टिः मा॰त॰ । पुत्रकामकार्यं इष्टिभेदे सच आश्व॰श्रौ॰२।१०,८सूत्रादौ दर्शयत्रः । "गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्" दत्तकमीमांसाधृतवाक्यम् । स्वार्थे क । तत्रार्थे जटाध॰ ।

पुत्रैषणा स्त्री ऋत॰ । पुत्रेच्छायां शत॰ब्रा॰ १४।६।१।१

पुथ हिंसे दि॰पर॰सक॰सेट् । पुथ्यति अपोथीत् । पुपोथ ।

पुथ वधे सक॰ क्लेशे अक॰भ्वा॰पर॰सेट् इदित् । पुन्थति अपुन्थीत् पुपुन्थ पुन्थयते ।

पुथ दीप्तौ चु॰उभ॰सक॰ सेट् । पोथयति-ते अपूपुथत्-त ।

पुद्गल पुं॰ पूरणात् पुत् गलतीति गलः कर्म॰ । १परमाणौ "पूरणाद्गलनात् देहे पुद्गलाः परमाणवः" इति विष्णुपु॰टीकायां श्रीधरधृतवाक्यम् । २बौद्धमतप्रसिद्धे त्र्यणुकादिपदार्थभेदे च । पुत् कुत्सितो गलो यस्मात् । ३सुन्दराकारे त्रि॰गद्दर॰।४रूपादिविशिष्टे त्रि॰हेमच॰[भीरुणे अमरः ।

पुनःपुनर् अव्य॰पुनर्+वीप्सायां द्वित्वम् ।१सकृदित्यर्थे २अ॰

पुनःपुना स्त्री॰ पुनः पुनाति पू-नक् पृषो॰ । नदीभेदे "कीकटेषु गया पुण्या नदी पुण्या पुनःपुना" वायुपु॰।

पुनःसंस्कार पु॰ पुनर्वारः संस्कारः । १द्वितीयोपनयनसंस्कारे गोमांसादिभक्षणे प्रायश्चित्तनिमित्ते पुनर्वारोपयनभेदे "पुनर्वैसो कृतो विप्रः पुनःसंस्कारमर्हति" इत्युक्ते उपनयने ज्यो॰त॰ "अज्ञानात् प्राश्य विण्मूत्रं सुरासं-

स्पृष्टमेव च । पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः । वपनं मेखलादण्डो भैक्षचर्य्याव्रतानि च । निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि" मनुः । "विड्वराहादीनां बह्वशनत्वात् मनुवचनसम्बन्धि मूत्रं पुरीषं वा अनुद्विपूर्वकं प्राश्य सुरासंस्पृष्टस्य भक्षादिरसं वा प्राश्य द्विजातयस्त्रयोवर्णाः पुनरुपनयनमर्हन्ति । वपनमिति "शिरोमुण्डनं मेखलाधारणं दण्डधारणं भैक्षाणि च मधुमांससंस्पर्शवर्जनयुतानि प्रायश्चित्तार्थं पुनरुपनयने द्विजातीनां न भवन्ति" कुल्लू० ।

पुनः(न)स्तोम पु० वा विसर्गलोपः । उक्थ्यसंस्थे यज्ञभेदे "बहुप्रतिगृह्य गरगीरिव योमन्यते तस्य पुनःस्तोम उक्थ्यः" कात्या० २२।६०।६ "बहुप्रतिगृह्य गरगृहीतमिवात्मानं यो मन्यते तस्य पुनःस्तोमसंज्ञक उक्थ्यसंस्थो भवति" कर्कः ।

पुनर् अव्य० पन-स्तुतौ भा० अरि पृषो० । १द्वितीयवारे अप्रथमे२ भेदे च अमरः । ४अधिकारे ५पक्षान्तरे मेदि० "पुनरित्यप्रथमे ६विशेषे च" गणर० उक्ते विशेषे च पुनरिति भूयोऽर्थविशेषयोः" गणरत्नटीका ।

पुनरसु पु० पुनरसुर्जीवनं यस्यासौ यस्य वोऽस्य । पुनर्जाते शत० ब्रा० १।५।२।१४ ।

पुनरागत त्रि० पुनर्वारमागतः । प्रत्यागते मनुः ११।१९६

पुनरागमन न० पुनर्वारमागमनम् । प्रत्यागमने

पुनराधान न० पुनर्वारमाधानम् । श्रौतस्मार्त्ताग्नेर्द्वितीयाधाने "पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च" मनुः ५।१५८। "अरण्योरल्पसम्बन्धं यावत्तिष्ठति पूर्वयोः । न तावत् पुनराधानमन्यारण्योर्विधीयते" कर्मप्रदीपः । "नाशक्षयदाहादिनिमित्तेष्वन्ययोः परिग्रहोपदेशाच्च" कात्या० श्रौ० ४।७।२२ "अरण्योर्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा । आहृत्याग्ने समारोप्य पुनस्तत्रैव निर्मथेत्" इति "अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहृतः । दाक्षवेदुपवाल्लोऽग्निं पुनराधानमिष्यते" कर्मप्रदीपः ।

पुनराधेय न० पुनर्वारमाधेयमन्याधानम् । श्रौते कर्मभेदे तच्च "पुनराधेय आधानाप्रतिष्ठातस्य" कात्या० श्रौ० ४।११।स्तवादौ तद्भाष्ये च पद्धतौ दृश्यम् ।

पुनरावर्त्तिन् त्रि० पुनःपुनर्वारमावर्त्तते आ+वृत्त-णिनि । भूयो भूय आगन्तरि "आ ब्रह्मभुवनात् लोकाः पुनरावर्त्तिनोऽर्जुन !" गीता ।

पुनराहार पु० पुनर्वारमाहारो भोजनं शा० त० । द्वितीयवारभोजने भूयस्तत्तदर्थाहरणे च कात्या० श्रौ० २५।११।१०

पुनरुक्त त्रि० पुनर्वारमुक्तम् । पुनर्वारं कथिते १कर्मे २शब्दे च । तत्र शब्दस्य पुनरुक्तत्वे तदर्थस्यापि पुनरुक्तत्वं नियतम् ततः उक्त्या० तद्वेत्त्यर्थे ठक् पौनरुक्तिक तद्वेत्तरि त्रि० । शब्दपरत्वे कगनयनादित्वात् अण् । पौनरुक्त तच्छब्दाध्येतरि त्रि० । भावे क्त । २पुनःकथने न०

पुनरुक्तजन्मन् पु० पुनरुक्तं द्वितीयवारं जन्म यस्य । १द्विजातौ २ब्राह्मणे त्रिका० "द्वितीयं मौञ्जीबन्धने" मनूक्तेस्तस्य तथात्वम् । [द्रव्यम् ।

पुनरुक्तवदाभास पु० अलङ्कारभेदे अलङ्कारशब्दे १८८ पृ०

पुनरुत्पत्ति स्त्री उत्पन्नस्य पुनरुत्पत्तिः । असत्ये उत्पन्नस्य पुनरुत्पादे च न सम्भवति उत्पन्नस्य पुनरुत्पादासम्भवात् इति सिद्धान्तः ।

पुनरुत्सृष्ट पु० पशुभेदे । पूर्वं वाञ्छितः दौर्बल्यात् स उत्सृष्टः पुनरपि सबलो जातः पुनरपि वाञ्छितः पुनश्च दौर्बल्याद्य उत्सृष्टस्तादृशे पशौ" कात्या० ७।।।५ सूत्रभाष्यम् । [तु कौन्तेय ! पुनर्जन्म न विद्यते" गीता

पुनर्जन्मन् न० पुनर्भूयोजन्म । भूयोजन्मनि "मासमेव

पुनर्ण(न)व पु० पुनरपि नवः "पूर्वपदात् संज्ञायामगः" पा० संज्ञायां णत्वम् अन्यत्र न णत्वम् । १नखे हेमच० तस्य छिन्नरूढत्वात्तथात्वम् । २भूयोनवे त्रि० णत्वम् ।

पुनर्नवा स्त्री पुनर्नवा पुनर्नूयते नू-अच् वा शुभ्रादेराकृतिगणत्वात् न णत्वम् । शोथघ्न्यां (पुनपुना) शाकभेदे अमरः । सा च द्विविधा श्वेता रक्ता च तयोर्गुणादिभावप्र० उक्तं यथा

"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका । कटुः कषायाऽरुच्यर्शःपाण्डुहृद्दीपनी परा । शोफानिलगरश्लेष्महरी ब्रह्मोदरप्रणुत् । पुनर्नवाऽपरा रक्ता रक्तपुष्पानिलाटिका । शोथघ्नी क्षुद्वर्धाभूर्षणेतुः कटिल्लकः । पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः । वातला श्लेष्मपित्तरक्तविनाशिनी" ।

पुनर्नवामण्डूर न० चक्रपाणिदत्तोक्ते औषधभेदे

"पुनर्नवातिविष्कुण्ठीपिप्पलीमरिचानि च । विडङ्गं देवकाष्ठञ्च चित्रकं पुष्कराह्वयम् । त्रिफलां द्वे हरिद्रे च दन्तीञ्च चविकन्तथा । कुटजस्य फलं तिक्तां पिप्पली मूलमुस्तकम् । एतानि समभागानि मण्डूरं द्विगुणं ततः । गोमूत्रेऽष्टगुणे पक्त्वा स्थापयेत् स्निग्धभाजने । पाण्डुशोथोदरानाहगुल्मार्शःक्रिमियुङ्मतुत्" ।

पुनर्भव पु० छिन्नोऽपि पुनर्भवति भू-अप् । १नखे अमरः

भूयोजाते त्रि० भावे क्त । १सुमङ्गलपादे पु०कुमा०१सर्गे०

पुनर्भू स्त्री पुनर्भवति जायात्वेन भू–क्विप । एकेन व्यूढायां पुनरन्यस्मै दत्तायां भार्यायाम् अन्यपूर्वायाम् अन्यपूर्वाशब्दे २१२ पृ० दृश्यम् । [२।२।२०।

पुनर्मृत्यु पु० भूयोभूयो मृत्युः । भूयोभूयोमरणे शत०ब्रा०

पुनर्यज्ञ पु०भूयः कार्ये यज्ञे । कात्या०श्रौ०२५।१।२०भाष्यम् ।

पुनर्यात्रा स्त्री १प्रत्यागतौ जगन्नाथस्य पुनर्वारं २रथयात्रायाञ्च "पुनर्यात्रा विधातव्या तथैव नवमेऽहनि" तिथ्य०। सा च द्वितीयातो नवमदिने दशम्यां कर्त्तव्याऽहनुशब्दस्य चान्द्रदिनपरत्वात् । २पुनर्वारगमने च ।

पुनर्वत् त्रि० पुनः पुनःशब्दोऽस्त्यस्य मतुप् मस्य वः । पुनःशब्दयुक्ते कात्या० २१।१०।२७ भाष्यम् ।

पुनर्वसु पु०पुनर्+वस–उ । १विष्णौ "विश्वयोनिः पुनर्वसुः" विष्णुस० पुनः पुनः सर्वशरीरेषु जीवरूपेण वसतीति पुनर्वसुः, भाष्यम् । २शिवे च अश्विन्यादिके सप्तमे ३नक्षत्रे द्वि०व० ४कात्यायनसूनौ ५लोकभेदे हृधनारम्भे च चन्द्रच० । अश्विन्यादिषु मध्ये सप्तमनक्षत्रस्वरूपादिदेवादि अस्मच्छब्दे ४९७पृ०दर्शितम् । तदीयाद्यचरणत्रयं मिथुनराशिघटकम् शेषपादस्तु कर्कटराशिघटकः । तस्य द्विवचनान्तत्वं तु प्राचिकं "पुनर्वसौ कृतो विप्रः" इत्यादिप्रयोगात् । नक्षत्रार्थे तिष्यश्च सह द्वन्द्वे अस्य द्विवचनान्तता, तिष्यश्च पुनर्वसुश्च तिष्यपुनर्वसू पुनर्वसुनक्षत्रस्य द्विवचनत्वेन बहुत्वे प्राप्ते द्वित्वविधानम् । कङ्कणबन्धप्रे ४नृपभेदे हरिवं०४२अ०

पुन्नाग क्ली० पुमान् नाग इव श्रेष्ठत्वात् स इव वा । १स्वनामख्याते पुष्पप्रधाने वृक्षे अमरः "पुन्नागपुष्पं मधुरं सुगन्धि शीतलं तथा । मलप्रसादनकरं पित्तनाशनमेव तत्" राजनि० । २सितोत्पले ३जातीफले ४नरश्रेष्ठे ५पाण्डुनागे च मेदि० ।

पुन्नाट(ड) पु० पुमानिव नाटयति नाटि–अच् । चक्रमर्दे राजनि० । नाडि–अच् । पुन्नाडोऽप्यत्र ।

पुन्नामन् पु० पुदिति नामास्य । १नरकभेदे "पुंनाम्नो नरकात् यस्मात्" मनुः । तन्नरकगतिकारणञ्च षोडशविधं यथोक्तं वामनपु० ५८अध्याये

"परदाराभिगमनं पापानाञ्चोपसेवनम् । पारुष्यं सर्वभूतानां प्रथमं नरकं स्मृतम् । कलत्रस्य महापापं कलार्द्धस्य च पाटनम् । पाटनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम् । वज्रादानं तथा द्विप्रवध्यवधबन्धनम् । विशादिसमहेतुत्वं तृतीयं नरकं स्मृतम् । भयदं सर्वसत्त्वानां नरभूतिविनाशनम् । स्वांशस्य निजपत्नीनां चतुर्थं नरकं स्मृतम् । मारणं मित्रकोटिस्थं मिथ्याभिशपनञ्च यत् । मिष्टैकाशनमित्युक्तं पञ्चमन्तु विषाशनम् । प्रदीप्तं यन्त्रकरणं योगसाधनम् । यान सस्यस्य हरणं षष्ठमुक्तं भयार्थनम् । राजमानस्य हरणं राजजायानिषेवणम् । राज्ये सञ्चितकारित्वं सप्तमं नरकं स्मृतम् । सत्यत्वं लोकुपत्वञ्च सत्यधर्मार्थनाशनम् । नानाकर्मकरं प्रोक्तमष्टमं नरकं स्मृतम् । ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम् । विरोधो ब्राह्मणैश्चोक्तो नवमो नरकस्तवम् । मित्राचारविनाशञ्च मित्रद्रोहं शिशोर्वधम् । शास्त्रस्तेयं धर्मभूर्त्तं दशमं परिचक्षते । षडङ्गनिधनं घोरं षाड्गुण्यप्रतिषेधनम् । एकादशमेवोक्तं नरकं सङ्गिरुत्तम ! । सङ्गिरुत्तं सदाचारं विना चारोज्झसत्क्रियां । संस्कारपरिहीनत्वमिष्टं द्वादशमं स्मृतम् । कानिर्धर्मार्थकामानामपवर्गस्य कारणम् । स्वर्गहर्त्तृ च मतिदं त्रयोदशमुच्यते । वंशस्य धर्मशीलस्य यद्वर्ज्यं यच्च दोषजम् । चतुर्दशकमेवोक्तं नरकं संहिगर्हितम् । अज्ञानञ्चाप्यनिष्टत्वमशोचमशुभावहम् । गर्हां तत्पञ्चदशकमसत्यवचनानि च । आलस्यं चातताविभ्यमगारेष्वग्निदापनम् । इच्छा च परदारेषु नरकाय निगद्यते । ऐश्वर्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् । एतैस्तु पापैः पुरुषः पुन्नामनरके पतेत् । पुन्नामनरकं घोरं किमर्थं प्राह सर्वतः । एतस्मात् कारणात् त्राता ततः पुन्नो निगद्यते" । पुमान् पुंलिङ्गनामाख्यनक्षत्रभेद "कृत्तो मूलत्रयपुनर्वसुमृगशिरस्तथा पुष्यः । गर्भाधानादिकार्यर्षु पुन्नामार्थं नयः शुभदः" ज्यो० त० ।

पुप्पुट पु० "दन्तवेष्टः शोषकृच्छः शीताभो दन्तपुप्पुटः" इति सुश्रुतोक्ते १क्षुद्ररोगे "नीरुक् स्थायी कोलमात्रः कफात् स्यात् मेदोयुक्तात् पुप्पुटस्तादृशेषे" तत्रोक्ते २तादृशे रोगभेदे च ।

पुप्पुस पु० (फोफरा) ख्याते १क्षोमे यद्बीजाधारे २बीजकोषे च हेमच० । फुप्फुस इति पाठान्तरं तत्रार्थे ।

पुमस् पु० पाति पा–पालने "पातेर्डुमसुन्" उणा०डुमसुन् । १पुरुषे २मनुष्यजातिमात्रे च अमरः । सत्त्वप्रधानत्रिगुणकार्ये शब्दसंस्कारविशेषयुक्ते शब्दे च । सर्वनामस्थाने परे असुन् पुमांसौ पुमांस इत्यादि समासे पदान्तत्वे अमु-

परे खयि परे रः तस्य च सः । पुंस्कोकिल इत्यादि । बहुव्रीहौ उरःप्रभृतित्वात् नित्यं कप् । स पुंस्का अपुंस्का इत्यादि ।

पुमनुजा स्त्री पुमांसमनुरुध्य जायते "अनौ कर्मणि" पा० (अनुपूर्वाज्जनेः कर्मगत्युपपदे डः स्यात्) अनु+जन–ड पुमांसमनुरुध्य जाता पुमनुजा" सि०कौ० । "इह जनिः सकर्मकः अनुरोधविशिष्टजननवृत्तित्वात्" तत्त्वकौ० पदान्तत्वेन अन्त्यलोपः । पुरुषानन्तरजातायां भगिन्याम् ।

पुमपत्य न० पुंरूपमपत्यम् । पुंरूपापत्ये अमरः ।

पुमाख्या स्त्री ६त० । १पुरुषसंज्ञायां पुमांसमाख्याति आ+ख्या–क । "जातिभेदाः पुमाख्याश्च" अमरोक्ते २पुरुषवाचकशब्दे पु० ।

पुमभ्रूमन् पु० ६त० । पुलिङ्गबहुत्वे अमरः ।

पुर अग्रगतौ तु०पर०सक० सेट् । पुरति अपोरीत् । [ङीप् ।

पुरःसर त्रि० पुरोऽग्रे सरति सृ–ट । अग्रगामिनि स्त्रियां

पुर न० पुर–अग्रगमने क । १गेहे २देहे पाटलिपुत्रे ३नगरभेदे ४कुसुमदलवृन्ते मेदि० ५नागरमुस्तायां रत्नमा० ६चर्मणि शब्दर० ७मटकोपरिमटके च विश्वः । ८बहुस्वामीशब्दव्यवहारस्थाने बहुकुटुम्बादियुक्ते प्रधानग्रामे न० स्त्री श्रीधरः । स्त्रीत्वे ङीप् । ९पीतभिण्टग्राम् अमरः धान्यादिचये १०राशौ ११गुग्गुलौ च पु० शब्दच० पृ–क । १२पूर्णे प्रचुरे त्रि० । नगरशब्दे ३९१६ पृ० पुरीशब्दे च द्रष्टव्यम् । पुरे वर्णनीयपदार्थाः कविकल्पलतायामुक्ता यथा "पुरे कुट्टमतोली च परिखातोरणध्वजाः । प्राकाराध्वपपारामवापीवेश्मग्रामतीर्थरी" ।

पुरग त्रि०पुरं गच्छति गम–ड । नगरगामिनि ततः कृत्याद्याः चतुरर्थ्यां कण् । पौरगीय तत्सम्बन्धिष्टदेशादौ । कोटरादि० वनशब्दे परे दीर्घः, कृतदीर्घात् परस्य वनस्य णत्वम् । पुरागवण नगरगतवने ।

पुरजित पु०पुरं त्रिपुरासुरं जितवान् जि–भूते क्विप् । १त्रिपुरारौ शिवे त्रिपुरघ्नशब्दे ३१७पृ०द्रष्टव्यम् २चन्द्रवंशजे नृपभेदे च "अजाऽथ पुरजित्सुतः" भाग०९ १३ १२श्लो० ।

पुरज्योतिस् पु० पुरं प्रचुरं ज्योतिरस्य । बह्वौ शब्दार्थके ।

पुरञ्जन पु०पुरं देहरूपमन्तर्जनयति जनि–णा० ख । क्षेत्रज्ञे जीवे "पुरुषं पुरञ्जनं विद्याद् यदव्यक्तात्मनः पुरम् । एकद्वित्रिचतुष्पादं बहुपादमपादकम्" भाग०४।२९। ४श्लो० १तदधिष्ठानरूपायां २बुद्धौ स्त्री ङीप् भाग०४।२५ २९ अध्याये पुरञ्जनोपाख्याने द्रष्टव्यम् ।

पुरञ्जय पु० ऋक्षेयुवंशजे सञ्जयपुत्रे १नृपभेदे हरिवं०३१अ० २सूर्यवंशजे काकुत्स्थे त्रिका० । "पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः । काकुत्स्थ इति चाप्युक्तः" भाग० ९।६।१२ श्लो० ।

पुरट न०पुर–बा०अटन् । सुवर्णे "पुरटलताकूटस्थलविहङ्गमिथुनैः" भाग० ५ २ ५ "पुरटलता स्वर्णवल्ल्यः" श्रीधरः

पुरण पु० पृ–क्यु । समुद्रे उज्ज्वलदत्तः ।

पुरतटी स्त्री पुरस्य तटीव । क्षुद्रकुट्टे हारा० ।

पुरतस अव्य० पुर–अतसुच् । अग्रत इत्यर्थे अमरः ।

पुरद्वार न० ६त० । गोपुरे नगरप्रवेशद्वारे अमरः ।

पुरद्विष् पु० पुराणां मयनिर्मितानां नगरभेदानां दाहकत्वात् द्विट् द्विष–क्विप् ६त० । शिवे जटा० त्रिपुरघ्नशब्दे ३१७२पृ०

पुरन्दर पु० पुरः शत्रूणां दारयति "पूःसर्वयोर्दारिसहोः" पा खच् । "वाचंयमपुरन्दरौ" पा०नि० । १इन्द्रे अमरः । तस्य शत्रुपुरदारकत्वात् तथात्वम् । स च वैवस्वतमन्वन्तरे इन्द्रभेदः भाग०८ १३ २ द्रष्टव्यम् ३ऋग्वेदानन्तरे । ४विष्णौ "आदिदेवः पुरन्दरः" विष्णु न० । ५चक्रे (चर्ख) स्याते न० शब्दच० ६गङ्गायां स्त्री हारा० ।

पुरन्धि स्त्री द्वि०व० द्यावापृथिव्योः निघण्टुः । बहु दृष्टकालातं दधति पुरुधा बहुधा धीयते स्थाप्यते वा धा–कि पृषो० । २दृष्टकाभेदे यजु०१४।२ वेदटी० ३बहुबुद्धौ स्त्री "कल्पीवते कुरदतं पुरन्धिम्" ऋ० १।११६।७ पुरन्धिर्बहुधिरिति यास्कः पृषोदरादित्वात् पुरन्धिभावः । यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरन्धिर्बुद्धिः कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः । "तत्पुरुषे कृति बहुलमिति" पा०बहुलवचनादलुक् इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव" माधवभाष्यम् । पुरन्धिः अस्त्यस्य मतुप् "छन्दसीरः पा०मस्य वः पुरन्धिवत् ऋ०९७ २ ४ तद्युक्ते त्रि० ।

पुरन्धि(न्ध्री) पुरं गेहस्वजनं धारयति पालयति धृ–अच् ङीप् पृषो० वा ह्रस्वः । बहुकुटुम्बवत्याम्, पतिपुत्रवत्याञ्च स्त्रियां, "गृहेगृहे व्याप्तपुरन्ध्रिवर्गम्" कुमा० ।

पुरपाल पु० पुरं नगरं देहं वा पालयति पालि–अण् । १नगरपाले २देहपालके जीवे च ।

पुरभिद् पु० पुराणि त्रिपुरासुरपुराणि भिनत्ति–भिद–क्विप् । महादेवे शिवे हेमच० त्रिपुरघ्नशब्दे द्रष्टव्यम् । पुरभेदनादयोऽप्यत्र ।

पुरमथन पु० पुरं त्रिपुरासुरं मथ्नाति मथ–ल्यु । शिवे

पुरमार्ग पु० ६त० । नगरमार्गे कुमा० ४ ११ श्लो० ।

पुरमानिनी स्त्री नदीभेदे भा०भी० ९अ० ।

पुरय पु० नृपभेदे ऋ० ६ ६३ ९ भा० ।

पुररक्ष पु० पुरं रक्षति रक्ष-अण् उप०स० । नगररक्षके णिनि ६त० । पुररक्षित् तत्रार्थे ।

परला स्त्री पुर-कलच् । दुर्गायां हेमच० ।

पुरवासिन् त्रि० पुरे वसति णिनि । नगरवासिनि पौरे जने स्त्रियां ङीप् ।

पुरशासन पु० पुरं शास्ति शास-ल्यु । महादेवे कुमा०७।३०

पुरश्चरण न० पुरस्+चर-भावे ल्युट् । १अग्रत आचरणे तन्त्रोक्ते २गृहीतमन्त्रसिद्धिहेतुप्रयोगभेदे तत्प्रकारादि तन्त्रसारे उक्तं यथा

"अथ पुरश्चरणं योगिनीहृदये "गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः । ततः पुरस्क्रियां कुर्यान्मन्त्रसंसिद्धिकाम्यया" । तस्य नित्यतामाह "जीवहीनो यथा देही सर्वकर्मसु न क्षमः । पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः । तस्मादादौ स्वयं कुर्यादुगुरुं वा कारयेद्बुधः" योगिनीहृदये "गुरोरभावे विप्रं वा सर्वप्राणिहिते रतम् । स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् । स्त्रियं वा सद्गुणोपेतां सपत्नीं विनियोजयेत् । आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते" । योगिनीहृदये "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् । तीर्थप्रदेशाः सिद्धानां सङ्गमः पावनं वनम् । उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः । तुलसीकाननं गोष्ठं दृष्टशून्यं शिवालयम् । अश्वत्थामलकीमूलं गोशाला जलमध्यतः । देवतायतनं कूलं सप्तद्रुस्य निजं गृहम् । साधने तु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् । अथ वा निवसेत्तत्र यत्र चित्तं प्रसीदति" । वायवीयसंहितायामपि "सूर्यस्याग्ने गुरोरिन्दोर्दीपस्य च जलस्य च । विप्राणाञ्च गवां चैव सन्निधौ शस्यते जपः" । तथा "गृहे शतगुणं विद्याद्गोष्ठे जलगुणं भवेत् । कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ । गृहे गोष्ठे तड़ागे च नदीनदशिवालये । गुरोर्वा सन्निधिर्यत्र स जपः परमोमतः । म्लेच्छदुष्टमृगव्यालभङ्गातङ्कविवर्जिते । एकान्तप्रवणे निन्दारहिते भक्तिसंयुते । स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे । रम्ये भक्तजनस्थाने निवसेत्तापसः प्रिये ! । गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा । प्रेतभूम्यादिकञ्चैव तत्तत्कल्पप्रकाशितम् । एषामन्यतमं स्थानमाश्रित्य जपमाचरेत् । यत्र ग्रामे जपेन्मन्त्री तत्र कूर्मं विचिन्तयेत्" गौतमीये "पर्वते सिन्धुतीरे वा पुण्येऽरण्ये नदीतटे । यदि कुर्यात् पुरश्चर्यां तत्र कूर्मं न चिन्तयेत् । ग्रामे वा यदि वा वाऽपि गृहे तच्च विचिन्तयेत्" रुद्रयामले "जपमेकगुणं गेहे गोष्ठे दशगुणं भवेत् । वनान्तरे शतगुणं तड़ागे च सहस्रकम् । नदीतीरे लक्षगुणं नगाग्रे कोटिसम्मितम् । शिवालये कोटिशतमनन्तं गुरुसन्निधौ" । अथ पुरश्चरणे भक्ष्यादिनियमाः गौतमीये "पुरश्चरणमन्त्री तत्र भक्ष्यं विवेचयेत् । अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते । यस्माद्यच्च समभ्योयान्मन्त्रसिद्धिसमीहया । तस्माच्चित्यं प्रयत्नेन यस्माद्भोगी भवेन्नरः" । अगस्त्यसंहितायाम् "तिलाश्चैव सितासुद्गाः कन्दः केसुकवर्जितः । नारिकेलफलञ्चैव कदली लवणी तथा । आम्रमामलकञ्चैव पनसञ्च हरीतकी । व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः" । व्रतान्तर इति "हैमन्तिकं सितास्तिन्नं धान्यं सुद्गास्तिला यवाः । कलायकङ्गुनीवारा वास्तूकं हिलमोचिका । पटिकाः कालशाकानि मूलकं केसुकेतरत् । लवणे सिन्धुसामुद्रे गव्ये च दधिसर्पिषी । पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी । पिप्पलीजीरकञ्चैव नागरङ्कतिन्तिडी । कदली लवणी धात्री फलान्यगुडमैलवम् । अतैलपक्वं सनयो हविष्यान्नं प्रचक्षते । भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा । पयोमूलं फलं वापि यत्र यत्रोपलभ्यते । रम्भाफलं तिन्तिडीकं कमलानागरङ्गकम् । फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्" यत्तु योगिनीतन्त्रे "चिञ्चाञ्च नालिकाशाकं कलायं लकुचं तथा । कदम्बं नारिकेलञ्च व्रते कृष्माण्डकं त्यजेत्" इति तत्तु व्रतान्तरे बोद्धव्यम् । तथा वर्ज्यानि "विवर्जयेन्मधुक्षारं लवणं तैलमेव च, ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च" । तथा "क्षारञ्च लवणं मांसं गृञ्जनं कांस्यभोजनम् । माषाढकीमसूरांश्च चनकान् कोद्रवानपि । कौटिल्यं चौरमभ्यङ्गमनिवेदितभोजनम् । असङ्कल्पितं क्रयञ्च वर्जयेन्मर्दनादिकम् । स्नायाच्च पञ्चगव्येन तोयेनामलकेन वा । मन्त्रजाप्यत्रपानीयैः स्नानाचमनभोजनम् । कुर्याद्यथोक्तविधिना त्रिसन्ध्यं देवतार्चनम् । अपवित्रकरो नग्नः शिरसि प्राङ्मुखोऽपि वा । प्रलपन् प्रजपेद्यावत्तावच्छिष्यलक्षमुच्यते" । नारदीये "मृदु शीर्ण

सुपक्वं कुर्याद्वै सुभोजनम् । नेन्द्रियाणां यथाऽद्धि-
तथा भुञ्जीत साधकः । कुलार्णवेऽपि "यस्यान्नपान-
पुष्टाङ्गः कुरुते धर्मसञ्चयम् । यस्यटातुः फलस्यार्द्धं
कर्तुश्चार्द्धं न संशयः । तस्मात्सर्वप्रयत्नेन परान्नं वर्ज-
येत् बुधीः । पुरश्चरणकाले तु सर्वकर्मसु शाम्भवि ! ।
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् । मनो-
दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने !" परान्नं भिक्षे-
त्यादिवचनम् । भिक्षायां तस्य सत्योत्पादात् तथा च
"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् । सत्कु-
लस्थानजातानां भिक्षा स्यादग्रजन्मनाम्" योगिनीहृदये
"विहाय वह्निं न हि वस्तु किञ्चित् ग्राह्यं परेभ्यः सति
वह्नये च । असम्भवे तीर्थवहिर्विशुद्धात् पर्वातिरिक्ते
प्रतिगृह्य जप्यात्' तत्रासमर्थोऽस्त्वटितं विशुद्धाद्याचेत-
यावह्निमालंभक्षम् । गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरतुल्यं । सकृद्गुरिते शब्दे प्रणवं स
कृदोरवेत् । प्रोक्ते पारणवे शब्दे प्राणायामं सकृच्च-
रेत् । वह्नप्रतापी आचम्य न्यसेदङ्गानि ततो जपेत् ।
श्रुतेऽप्येवं तथाऽस्मृत्यस्थानानां स्मरणेन च । एवमादीन्य
नियमान् पुरश्चरणकृच्चरेत् । विण्मूत्रोत्सर्गयङ्गादियुक्तः
कर्म करोति यः । जपार्चनादिकं सर्वमपवित्रं भवेत्
प्रिये ! । मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः । यो जपेत्तं
दृष्ट्वाशु देवता गुप्तिसंस्थिता । आलस्यं जृम्भणं निद्रां
क्षुतं निष्ठीवनं भयम् । नीचाङ्गस्पर्शनं कोपं जपकाले
विवर्जयेत् । एवमुक्तविधानेन विलम्बं त्वरितं विना ।
सङ्गसङ्ख्यं जपं कुर्यात् पुरश्चरणसिद्धये । देवतागुरु-
मन्त्राणामैक्यं सम्भावयन् धिया । जपेदेकमनाः प्रातः-
कालान्मध्यन्दिनावधि । यत्सङ्ख्या समारब्धं तत्कर्त्तव्य
महर्निशम् । यदि न्यूनाधिकं कुर्यात् व्रतभ्रष्टो भवेन्नरः" ।
सुखमालायाम् "यत्सङ्ख्या समारब्धं तच्छ्रमाद्यं दिने
दिने । न्यूनाधिकं न कर्त्तव्यमाद्यमाप्तं सदा जपेत् ।
प्रजपेदुक्तसंख्यायाश्चतुर्गुणजपं कलौ" । अन्यत्रापि "कृते
जपस्तु कल्पोक्तो त्रेतायां द्विगुणो जपः । द्वापरे त्रिगुणः
प्रोक्तश्चतुर्गुणजपः कलौ" । कुलार्णवेऽपि "न्यूनातिरि-
क्तकर्माणि न फलन्ति कदाचन । यथाविधि कृतान्येव
तत्कर्माणि फलन्ति हि । मूकश्चाब्रह्मचारित्वं मौन-
माचार्य सेविता । नित्यं त्रिवारं स्नानं क्षुद्रकर्मविव-
र्जनम् । नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम् ।
नैमित्तिकार्चनञ्चैव विप्राणां गुरुदेवयोः । जपविद्या हा-
दयेते धर्माः सुर्वर्णसिद्धिदाः । स्त्रीशूद्रपतितानाञ्च ना-
स्तिकोच्छिष्टभाषणम् । असत्यभाषणं जिह्मभाषणं परि-
वर्जयेत् । सत्येनापि न भाषेत जपहोमार्चनादिषु ।
अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकम्" । तन्त्रे "ऋतु
काले विना मन्त्री स्त्रियं नापि संस्पृशेत् । मैथुनं
तत्कथालापं तद्गोष्ठीः परिवर्जयेत् । पुरश्चरणकाले तु
यदि स्यान्मृतसूतकम् । तथापि कृतसंकल्पो व्रतं नैव
परित्यजेत्" योगिनीहृदये "शयीत कुशशय्यायां शुचि-
वस्त्रधरः सदा । प्रत्यहं चालयेत् शय्यामेकाकी निर्भयः
क्षमेत् । असत्यभाषणं वाचं कुटुम्बं परिवर्जयेत् । वर्ज-
येद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् । अभ्यङ्गं मन्यसे-
वञ्च पुष्पधारणमेव च । त्यजदुष्णोदकस्नानमन्यदेव
प्रपूजनम्" । तत्रैव "नैकवासा जपेन्मन्त्रं वस्त्रवासा-
कुलोऽपि वा" । वैशम्पायनसंहितायाम् "विपर्यासं न
कुर्याच्च कदाचिदपि मोहतः । उपर्यधो बहिर्वस्त्रे पु-
रश्चरणकृच्चरः । विनियोगविधाने तु भवेदनियमः क्व-
चित् । पतितानामन्त्यजानां दर्शने भाषणे श्रुते । श्रुतेऽधो
वायुगमने जृम्भणे जपसूत्रजेत् । तथा तस्य च तत्-
प्राप्तौ प्राणायामं शतद्वयम् । कृत्वा सम्यग् जपेच्छेषं
यदा स्यादिदर्शनम्" । आदिशब्दाद्भिन्नाक्षरो ।
तन्त्रान्तरे "मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्त-
नम् । अभ्यासमनिर्वेदो जपसम्पत्तिहेतवः । उष्णीषी
कञ्चुकी नग्नो मुक्तकेशो मलाकृतः । अपवित्रकराऽशुद्धः
प्रलपन् न जपेत् क्वचित् । अनासीनः शयानो वा गच्छन्
भुञ्जान एव वा । अप्राकृतौ करौ कृत्वा शिरसि प्राकृ-
तोऽपि वा । चिन्ताव्याकुलचित्तो वा क्षुधो श्रान्त क्षु-
धान्वितः । रथ्यायामशिवे स्थाने न जपेत्तिमिरान्तरे ।
उपानद्गूढपादो वा यानशय्यागतस्तथा । प्रसार्य न
जपेत् पादावुत्कटासन एव वा । न यज्ञकाष्ठे पाषाणे न
भूमौ नासने स्थितः । मार्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं
कपिं खरम् । दृष्ट्वाचम्य जपेच्छेषं सूर्या स्नानं विधीयते" ।
"एवं जपं पुरा कृत्वा तेजोऽङ्गं समर्चयेत् । देवस्य
दक्षिणे हस्ते कुशपुष्पाक्षतारिभिः । सफलं तद्विभाव्यैव
प्राणायामं समाचरेत् । जपस्यादौ जपान्ते च त्रितयं
त्रितयञ्चरेत्" । यक्षिणीविषये देव्या वामहस्ते तथा च
"एवं जपं पुरा कृत्वा गन्धाक्षतकुशोदकैः । जपं सम-
र्पयेद्देव्या वामहस्ते विचक्षणः" । "जपान्ते प्रत्यहं मन्त्री
शीर्षदेशेऽङ्गसंमतः । तर्पयच्चाभिषेकञ्च तत्तद्गुणवतो सुने ! ।

प्रकारं भोजयेद्विप्रान् न्यूनाधिक्यप्रकारान्ते। अथवा सर्व-सम्पत्तौ होमादिकमथाचरेत्" । सुरुमालायाम् "तस्य वाक्यानु जपः प्रोक्तस्तद्दशांशमहक्रमात् । तत्तद्दुग्धैर्जपान्ते होमं कुर्याद्दिने दिने" । पुरश्चरणचन्द्रिकायाञ्च "ततो जपदशांशेन होमं कुर्याद्दिने दिने । अथवा जपसंख्यायां पूर्णायां होममाचरेत्"। तथ होमाद्य यज्ञो सनत्कुमारीये "यद्यदङ्गं भवेद्भग्नं तत्संख्याद्विगुणो जपः । होमाभावे जपः कार्यो होमसंख्याचतुर्गुणः । विप्राणां, क्षत्रियाणाञ्च रसयज्ञप्रा गुणः स्मृतः । वैश्यानां वसुसंख्याकमेवं स्त्रीणामयं विधिः । यं वर्णमाश्रितः शूद्रः स च तस्य विधिश्चरेत । अनाश्रितस्य शूद्रस्य दिक्संख्याकः समीरितः । शूद्रस्य विप्रभृत्यस्य तत्पत्न्याः सदृशो जपः" । अत्राभ्यक्तवेदु-योगिनीहृदये "होमकर्मणि यज्ञानां विप्राणां द्विगुणो जपः । इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः । त्रिगुणादिः होमसंख्यात्रयजपः क्षत्रियेण कार्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः कार्यः । तदुक्तं कुलमकाशे "यद्यदङ्गं विहीनं स्यात्तत्संख्याद्विगुणो जपः । कुर्वीत त्रिगुणः पञ्च यथावस्थं द्विजादयः" । एतेन स्त्रीशूद्रादीनां होमाधिकारः । तथा च शूद्राणां त्वमतिति कुलप्रकाशे शारदायाम् । स्त्रीणां होमाधिकारश्च तत्रैव "बालैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति । अनेन विधिना कन्या वरमाप्नोति वाञ्छितम्" । अत स्त्रीणां होमाधिकारः । अत्र ब्राह्मणद्वारा तथा च तन्त्रे "स्त्रीद्वारोच्चारणाद्वापि शास्त्रमानमिवार्चनात् । ब्राह्मणीजनवाक्यैव शूद्रब्राह्मणतां व्रजेत्" । तथा स्त्रीणामपि सर्वदेहिकर्मसु शूद्रत्वव्यवस्थितिपादनात् यथा "स्त्रीशूद्राक्षरसंस्कारौ वस्तुवाक्यमयौ मम" इति भगवद्वचनात् तथा नारायणबलौ "ब्रह्मणो ब्रह्मणस्यः क्षत्रियः शूद्रयोनिजः । वैश्यात्मा शूद्रयोनिजः । वैश्यात्मा शूद्रयोनिजः । वैश्यात्मा

जपस्यावश्यकत्वम् "त्राह्मादेरनुरोधेन यदि जाप्यं त्यजेन्नरः। स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः" इति सनत्कुमारीयवचनादिति केचित्। वस्तुतस्तु आरब्ध पुरश्चरणविषयमिदम्। तथा हि "आरब्धे पुरश्चरणे यदि ग्रहो भवेत् तदा। त्राह्मादेरनुरोधेन जपं नैव त्यजेत् नरः"। एवं रात्रावपि पुरश्चरणे बोद्धव्यम् इति सर्वसमञ्जसम्। नारदतन्त्रे "रोहिणी त्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम्। पुष्या शतभिषा हस्ता पुरश्चरणकर्मणि। पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा। त्रयोदशी च दशमी प्रशस्ता सर्वकर्मणि। शनौ चैकेषु पाठे तन्त्रदामनपर्वणि। पुरश्चर्यां प्रकुर्वीत मासार्धादीन् न शोधयेत्"। योगिनीहृदये "कल्पोक्तविधिना मन्त्री कुर्याद्धोमादिकन्ततः। अथ वा तद्दशांशेन होमादींश्च समाचरेत्" तथा "अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत्। बदन्ते महतीं पूजां कुर्यात् त्राह्मणभोजनम्। ततो मन्त्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत्। एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति। दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे। स याति परमेशानि! नरकानेकविंशतिम्"। यद्यपि पुरश्चरणपदं पञ्चाङ्गपर तथा च "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्। पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते" तथापि यत्रघाटौ पुरश्चरणपदं गौणं जपमात्रम् "सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम्" इत्यादौ तथादर्शनात् तत्र होमादेरभावात्। तर्हि कथं यत्रघ पुरश्चरणे होमादिरिति चेत्। वचनादेव ज्ञायते न च पुरश्चरणस्य पुष्पाङ्गत्वात् सर्वत्र तदेव स्यादिति वाच्यम्। यत्रघ पुनस्तदिधानमनर्थकं स्यात्। किञ्च यत्रघ होमादिनियमान् नान्यत्र होमादिः। यत्रघपुरश्चरणे होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरणतुल्यताबोधनाय। अतएव यत्रघ पञ्चाङ्गस्वरूपपुरश्चरणकर्ता तत्प्रयोगे ऽप्यधिकार इति प्रकटीकृतम्। तदकरणे पुनः केवलजपमात्रपुरश्चरणे नाधिकार इति सर्वसम्मतम्। पुरश्चरणकालस्तु वाराहीतन्त्रे "चैत्रे मासथ वा कुर्यात् शुभर्क्षे गुरुवासरात्। द्वादश्यां शुक्लपक्षे तु भाद्रे मासि तिथौ। आरभेदमलायां वै पुरश्चर्यां विशुद्धये"। इदन्तु बोधालयिप्रयम्। वैशम्पायनसंहितायाम् "चन्द्रताराद्यनुकूले च शुक्लपक्षे शुभेऽहनि। आरभेन्मकरादौ च सूर्ये विष्णौ जपेच्च च। चन्द्रताराद्यनुकूले च शुक्लपक्षे शुभेऽहनि। आरभेन्मकरादौ च हरौ सूर्ये न आरभेत्"। प्रतिप्रसवो रुद्रयामले "कार्त्तिकाश्विनवैशाखमासेऽथ मार्गशीर्षके। कार्त्तिके आश्विने दीक्षा पुरश्चर्या प्रशस्यते। रवौ गुरौ स्थिते सौमे वर्जयेत् बुधवासरे। चन्द्रताराद्यनुकूले च पुरश्चरणकर्म तत्। यत्रघ च यत्रातीर्थे न कालमवधारयेत्"। यत्रास्ते यत्रोदये च दीक्षा पुरश्चरणयोर्निषेधमाह तन्त्रान्तरे "यत्रोऽस्ते क्षुद्दिते नैव दीक्षां कुर्याच्छिवं प्रिये!। ऋते मासोऽभवेदाशु क्षाद्युः स्त्रीसुतसम्पदाम्"। ऋण्। पुरश्चर्याऽस्य स्त्री। [तिका०।

पुरश्छद पु०पुरश्छादयति छदि णच् हुमच। (धतु) दृष्टभेदे

पुरस् अव्य० प्रथमापञ्चमीसप्तम्यर्थवृत्तेः पूर्वशब्दात् दिग्देशकालवाचकात् असि पुर् आदेशः। १पूर्वस्यां दिशि पूर्वस्मिन् २काले ३देशे च। तथा च पूर्वा दिक् पुरः कालो देशो वा तथा पूर्वस्या दिश आगच्छति पूर्वस्मादागच्छति पूर्वस्यां दिशि वर्त्तते पुरो वर्त्तते एवं देशे काले च। ४अग्रत इत्यर्थे अमरः। "पुरोऽव्ययम्" पा० अस्य च समर्थेन सह समासः लक्ष्योगे भूयस्त्वतियोगे च अग्रतदर्थभावात् पुरस्कृत्य पुरोभूय पुरोगत्येति प्रयोगः।

पुरसंस्कार प० ६त०। नष्टदुर्गस्य संस्कारे शास्त्र०।

पुरस्कार पु० पुरस्+कृ-भावे घञ्। १पूजने २अग्रिमपदे ३अभिशापे तेजयतः करणे ५स्वीकारे ६वेशे च। पुरस्+कृ-भावे घ। पुरस्क्रिया तथार्थे पुरस्करणे च स्त्री।

पुरस्कृत त्रि० पुरस्+कृ-क्त। १पूजिते २अग्रिमे ३करिगृहीते ४अग्रतः कृते च मेदि०। ५स्वीकृते ६शिष्ये च हेमच०।

पुरस्तात् अव्य०दिग्देशकालपरात् पूर्वशब्दात् प्रथमापञ्चमीसप्तम्यर्थे अस्ताति पुर् आदेशः। दिग्देशकालवृत्तौ प्रथमापञ्चमीसप्तम्यर्थवृत्तौ पूर्वशब्दार्थे, इरोपह स्वदाहरणम् बोध्यम्

पुरहन् पु० पुरं त्रिपुरं हन्ति ज हन-मूले क्विप्। १महादेवे शत्रुपुराणां हन्तरि २विष्णौ च भाग० ७।१०।६८ तत्र महादेवे स्वयन्त्राः संक्रमणात् त्रिपुरनाशकत्वम् तत्कथा तत्र अध्याये द्रष्टव्या।

पुरा अव्य०पुर-का। १अविच्छेदेन क्रियाकरणे २पुराणे ३अतीते ४भाविनि ५निकटे पुराणे च अमरः। पुर+अ टाप्। ७पूर्वस्यां दिशि ८युगन्धिद्रव्यभेदे च स्त्री०राजनि० "पुरा तिक्ता कटुः शीता कषायकफपित्तहृत्। पित्तज्वरास्रविषदाहमूर्च्छाहृत्पापहा" तद्गुणाः ततोक्ताः ९मीरो क्ष्म० शब्दरत्ना०।

पुराकथा स्त्री पुरा प्राचीना कथा। इतिहासे भाग० २।१२।४९

पुराकल्प पु० पुरा प्रराचः कल्पः। प्राचीने कल्पे मनुः ९। २२अ०। "स्तुतिर्निन्दापुराकल्पतिपुराकल्पः" इत्यर्थवादः मी०। १ ६०उक्ते २अर्थवादभेदे। अर्थवादशब्दे २६९ पृ० उदा० दृश्यम्।

पुराकृत त्रि० पुरा पूर्वं कृतम्। पूर्वस्मिन् इह जन्मनि जन्मान्तरे कृते पापपुण्यादौ "अकाले दर्शनं विष्णोर्हेलि पश्यं पुराकृतम्" स्मृतिः। प्रारब्धकर्मणान्तु भोगादेव क्षयो न तेषां केनापि शक्यतेति विद्वांसः।

पुराग त्रि० पुरा गच्छति गम-ड। पूर्वगामिनि ततः क्षणादा०चतुरर्थां०ङस्। पौरागीय तत्सम्बन्धिकृष्टदेशादौ त्रि०

पुराण आख्याने कण्ड्वादेराकृतिगणत्वात् यक् पर० सक० सेट्। पुराण्यति अपुराण्यीत्।

पुराण त्रि० पुरा भवः ञ्यु नि० तुट् न, पुरा नीयते नी ड वा पूर्व०चलम्। १पुराभवे "सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च। वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्" इत्युक्तलक्षणे व्यासादिप्रणीते २शास्त्रभेदे न०।

तत्र द्विविधं महापुराणोपपुराणभेदात् तत्र उपपुराणशब्दे तद्भेदादिकमुक्तं महापुराणं च दशलक्षणकम् "सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च। वंशोवंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन्! महदल्पव्यवस्थया। अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग उच्यते। पुरुषानुगृहीतानामेतेषां वासनामयः। विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्। वृत्तिर्भूतानि भूतानां चराणामचराणि च। कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा। रक्षाऽच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्यङ्नर्षिदेवेषु हन्यमाने यैस्त्रयीद्विषः। मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोऽंशावतारा च हरेः षड्विधमुच्यते। राज्ञां ब्रह्मप्रसूतीनां वंशस्त्रैकालिकोऽन्वयः। वंशानुचरितं तेषां वृत्तं वंशधराश्च ये। नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्तश्चतुर्द्धा स्वमतेः। हेतुर्जीवोऽस्य सर्गादेरविद्यासंज्ञितो यतः। यं चानुशयिनं प्राहुरव्याकृतगुणोदधेः। व्यतिरेकान्वयौ यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः। पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु। बीजादिपञ्चतान्तासु स्थास्नुषु युतायुतम्" भाग०१२।७अ०। तच्चाष्टादशविधम्। विष्णुपुराणे तद्भेदा उक्ता यथा

"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा। तथान्यन्नारदीयञ्च मार्कण्डेयञ्च वह्नमम्। आग्नेयमष्टमञ्चैव भविष्यं नवमं स्मृतम्। दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्। वाराहं द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्। चतुर्दशं वामनञ्च कौर्मं पञ्चदशं स्मृतम्। मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततःपरम्"। हेमाद्रिः त्र० उक्तं तेषां श्लोकसंख्यादि तत्तत्पुराणशब्दे दृश्यम्। तेषां तामसत्वादिभेदाः पद्मपु० उत्तरख० ४२अ० दर्शिता यथा

"मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च। आग्नेयञ्च षडेतानि तामसानि निबोधत"। "वैष्णवं नारदीयञ्च तथा भागवतं शुभम्। गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!। सात्त्विकानि पुराणानि विद्धि मे शुभानि वै"। "ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च। भविष्यं वामनं ब्राह्मं राजसानि निबोधत। सात्त्विका मोक्षदा देवि! निर्वाणप्राप्तिहेतवः"। अशीति वराटकमिते २पणे ४कार्षापणे च पु०न० शब्दरत्ना०।

पुराणग पु० पुराणैः गीयते गै-घञर्थे क, पुराणं गायति गै-क वा। १ब्रह्मणि परात्मनि हेमच० २पुराणगायके त्रि०।

पुराणपुरुष पु० पुराणैरुपस्तुत्यः पुरुषः शाक०त० कर्म० वा। १विष्णौ २शङ्खे पुरुषे च त्रिका०।

पुराणान्त पु० पुराणान् पुरातनान् अन्तयति अन्त+णिच्-अच् उप०स०। १यमे हेमकरः। ६त०। २पुराणशेषे च

पुरातन त्रि० पुराभवः पुरा+ञ्यु-तुट् च। १पुराभवे अमरः स्त्रियां ङीप्। २विष्णौ पु० "ज्ञानगम्यः पुरातनः" विष्णुसं०। "कालेनापरिच्छिन्नत्वात् पुराऽपि भवतीति पुरातनः" भा०। [देहाधिने जीवे पुरञ्जनशब्दे दृश्यम्

पुराधिप पु० ६त०। १नगराधिपे। पुराध्यक्षादयोऽप्यत्र।

पुरायोनि पु० पुरा प्राचीना योनिरस्य महादेवे। "पुरायोनिर्युधाजित्स्य कमिया सुदितो भवः" भा०व०१८९अ०।

पुरारातिः पु० ६त०। त्रिपुरभेदके शिवे पुरारिप्रभृतयोऽपि

पुरार्द्धविस्तार पु० पुरा प्राग्वर्ती अर्द्धविस्तारोऽस्य। १खेटके २अस्त्रभेदे हेमच०।

पुरावती स्त्री नदीभेदे भा०भी० ९अ०।

पुरावसु पु० पुरा पूर्वं वसुः। यदुभेदाख्यजाते भीष्मे त्रिका०।

द्युनाथवसोर्वविद्यशापेन भीष्मरूपत्वाविर्भवत्या भा॰आ॰ ९७अ॰ दृश्या। [भिन्ने।

पुराविद् त्रि॰ पुरा पुराहृत्तं वेत्ति विद्-क्विप्। पुराहृत्ता-

पुराहृत्त न॰ पुरा पूर्वकालिकं हृत्तम् यत्र। १इतिहासे पूर्व-तनकथने भारतादौ अमरः। कर्म॰। २पूर्वतनहृत्तान्ते च।

पुराभाङ् पु॰ पुराणि शत्रुपुराणि सहते अभिभवति सह-क्विप् पूर्वपददीर्घः। १शत्रुपुराभिभावके २इन्द्रे च। कलि-पदान्ते च "सहेः साडः सः" पा॰ षत्वम् ऋ॰। ७१४ अन्यत्र न षत्वम्। [तायां राजनि॰।

पुरासिनी स्त्री पुरं स्टकमस्यति अस-णिनि। सप्तदेवीन-

पुरासुहृद् पु॰ पुरस्य त्रिपुरस्यासुहृत् शत्रुः। त्रिपुरारौ महादेवे हेमच॰।

पुरि(री) स्त्री पूर्यते पृ-इ किच्च। १नगरे २मद्याङ्ग उज्ज्वटः॰ वा ङीष्। ३राजनि त्रि॰ मे॰। तत्र जिगीषु नगरे वर्णनीयपदार्थाः भा॰व॰ दर्शिता यथा

"अभिषेचेच सर्वेच तत्र युद्धमवर्त्तत। पुरी वैजयन्ताद्भि-र्हिता वपताका सतोरणा। सचक्रा सध्वजा चैव सयन्त्रशतका तथा। सोपशल्यप्रतोलीका साट्टाट्टा-लकगोपुरा। सचक्रपट्टिशी चैव सोल्काजातावपोषिका। सोष्ट्रिका भरतश्रेष्ठ! समेरीपश्वानका। स तोमराङ्कुशा राजन्! सशतघ्नीकवाङ्कुशा। सभुशुण्ड्यश्मगुडका सायुधा सपरश्वधा। सोहचर्मवसी चापि सग्निः सगुडष्टङ्किका। शास्त्रदृष्टेन विधिना सयुक्ता भरतर्षभ!। रथैरनेकैर्विविधैर्गजाश्वोष्ट्रवाटिभिः। पुरुषैः कुरुशार्दूल! समर्थैः प्रतिवारणे। अतिख्यातकुलैर्वीरैर्दृष्टवीर्यैश्च संयुगे। मध्यमेन च गुल्मेन रक्षिभिः शा सुरक्षिता। उद्धिग्नगुल्मैश्च तथा रथैश्च सपताकिभिः। आघोषितश्च नगरे न शातव्या सुरेति वै। यस्माद् परिरक्षद्भिरश्वगोरथादिभिः। प्रमत्तेष्वभिघातं हि कुर्याच्छाल्वो नराधिपः। इति कृत्वाऽप्रमत्तास्ते सर्वे हृष्टाग्रन्थकाः स्थिताः। आनर्तास्, तथा सर्वे भट नर्त्तकसाधनाः। वर्द्धकिभिर्वासिताः क्षिप्रं रथकृद्भिर्विसर्जनम्। संक्रमा मेदिताः सर्वे नावश्च प्रतिषेधिताः। परिखाश्चापि कौरव! क्रोशैः सुमिश्रिता कृताः। उदकानाः कुरुश्रेष्ठ! तथैवाश्वरोधयाः। सकलात् क्रोशमात्रस्य कारिता विषमा च भूः। प्रकृत्या विषमं दुर्गं प्रकृत्या च सुरक्षितम्। प्रकृत्या चाप्युपेतं विशेषेण महाऽगम!॥ सुरक्षितं सुगुप्तं च सर्वायुधसमन्वितम्। तत्पुरं भरतश्रेष्ठ! यथेन्द्रभवनं तथा। न चाशक्तोऽभिनिर्वाति न चाशक्तः प्रवेक्ष्यते। इत्यात्मकपुरी राज्ञ कृता सौभसमागमे। अक्षरश्चापि सर्वांश्च चक्ररेषु च कौरव!। यत्तं बभूव राजेन्द्र! पभूतनलवालिनत्। दत्तवेतनभक्तं च दत्तायुधपरिच्छदम्। कृतोपधानं च तदा बलमाहीन् महाभुज!। न कुप्यवेतनी कश्चित् नातिक्रान्तवेतनो। नातुपहन्यतः कश्चित् नाहृष्टपराक्रमः। एवं सुविहिता राजन् द्वारका भूरिदक्षिणा। शाल्वेन सुगुप्ता च राज्ञा राजीवलोचन!" भा॰व॰१५अ॰। "अभितः परितः सपरितश्चायुधानां सरथं निःसरथमभिसारक्षेत्रेण सर्वेणाभिद्रुत्य सर्वाभ्यो दिग्भ्यो युगपद्विरलायुधसमूहागमेनेत्यर्थः। पताका ध्वजाश्च तोरणानि बहिर्द्वाराणि चक्राणि योधगणाः कुड्याश्चाश्वयन्त्राणि भाषायां (बुरुज)इति संज्ञानि। अन्ये तु विष्वमूलोत्सर्जनमहङ्गाणि कुड्या इत्याहुः उदाहरन्ति च "कल्पान्ते कुड्यमहङ्गाणि रथस्योपरि धूरपि विष्वमूलस्यर्गगुडार्थं करादिसर्गं उच्यते" इति। वन्नागशाग्नेयौषधवत्तेन दहतृपिण्डोत्क्षेपणीनि सङ्घानि(कलान) इति संज्ञानि शुण्डाणि सीसगुलिकोत्क्षेपणानि (बन्दुक) इति संज्ञानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः। उपशल्या लोहशल्याः कीलास्तद्युक्ताः प्रतोल्यो रथ्यामार्गा यस्यां सा अट्टालिका उपरिगृहाः गोपुराणि साट्टानि अट्टेनाट्टेन सहितानि अट्टालकादीनि यस्यां सा साट्टेति विशेषणम् उपशल्यस्य सामान्यस्य रथ्यायाश्चाट्टस्य संबध्यते। चक्रपट्टिशी सैन्यनिर्याहिका (मोर्चा) इति लोकप्रसिद्धा। सोल्काजातावपोषिका सोल्कजातं ज्वालासहितमुल्कं यस्यां सा सोल्काजाता अवपोषिकाश्चाः योषिकाश्चन्द्रवद्राः काष्ठपाषाणादयो रिपूणामुपरिपातनाय यस्यामिति प्राहुः। उष्ट्रैर्वोल्का प्राणहरत्वाद्यन्त्रोत्क्षिप्तो गोलः सजातं सकाष्ठदण्डलोहमयमाग्नेयं प्रहरणं (बाण) इति भाषायां प्रसिद्धं तयोरप्रत्याक्षेपणशीलयोपोषिकाः पातयित्र्यो ऊन्तमयः शक्तयः कर्णावेष्टदलशक्ति सदृशास्तद्युक्ताः सोल्काजाताश्चपोषिकाः। उष्ट्रिका चर्ममयानि भाण्डानि सर्टिवेनि पाठे पाठस्य आयुधविशेषाः। अश्मगुडका पर्यस्तीकृताः पाषाणाः लोहमयानि चर्माणि कमठपृष्ठाकाराणि प्रहारवारकाणि (ढाल) भाग्निः आग्नेयौषधसहिता गुडागोलकः प्रक्षिप्तकाष्ठदृत्क्षेप कंदन्धाणि शत्रूणामुपरिपातनाय तप्तोष्णो द्रवीभूतो

वत्र शिखरे आप्यते संश्लिष्टितेत्यर्थे। मध्यतो गुरुत्वः वत्र स्थितेन योषवक्त्रेन अर्द्धिगवस्थिता स्त्रियोऽपि पुरुषं आकर्षन्ति ग्रहर्तुं च प्रभवन्ते तादृशस्तनस्थानम्। उत्तिष्ठमुखैः परकोयगुल्मोत्पाटनकरैः।' अप्रसन्ना दृष्टिर्यस्य सः। संकल्पा नदीवेतवः। कीलैः शूलैः सुनिचिता व्याप्ताः। "उदयानाः क्रूराः"अध्वरीषो भवेद्व्याघ्रः" इति विश्वः गुप्तान्निरित्यर्थे। विषमकोष्ठकण्टकाद्याकीर्णा। अनुरथ्याशु प्रतिरथ्यम्। मेलनं धनं भक्ष्यं नित्यभोजनं ऋतोपधानं ऋतविशेषम्। कुप्यं स्वर्णरूप्येतरधनं ताम्रादि। अघोरपोद्यमसमहस्तस्त्रीजन्य स्तनोऽनुग्रहभृतत्वात्कालस्त्रीजनो न कश्चित् किन्तु चिरसंभृत एव। कृपा भृतो न किन्तु शौर्य एवेति वा। भूरिदक्षिणा बहवो दाक्षिण्ययुक्ता यस्याम् आडम्बेन उपसेनेन" नील०। ४सन्ध्याविनाशुपाधिभेदे स्त्री "ज्ञानरत्नेन सम्पूर्णा पूर्णतत्त्वपर्यास्तिः। परब्रह्मरतो नित्यं पुरीनामा स उच्यते" महानिर्वा०। ५देहे च स्त्री।

पुरि(री)तत् स्त्री पुरीं देहं तनोति तन-क्विप्। १देहारम्भके (आँत) अन्त्राख्ये नाडीभेदे। पुरि देहे तनोति आच्छादयति हृदयादि अनुकृ० तुक्मध्यः। २हृदयाच्छादके मांसभेदे वसु० २६।९ दीर्घपाठः अन्यत्र ह्रस्वपाठः। ३देहे च "यदा सुप्तो न कञ्चन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते" शत०ब्रा० १४।५।१।२१ "यस्मिन् काले जाग्रत्स्वप्नयोर्द्रष्टा दर्शनस्पर्शनाभ्यां स्वप्नं हित्वा सुषुप्तः विशेषज्ञानाभावेन सम्प्रसादसंज्ञरूपं ब्रह्मैक्यं गतो भवति। हृदयं नामोदरवक्षःप्रदेशयोर्मध्यस्थितः पुण्डरीकाकारो मांसपिण्डस्तत्परिवेष्टनं पुरीतदित्युच्यते इह पुनस्तदुपलक्षितं शरीरं पुरीतच्छब्देनाभिप्रेतम्। तथा च हृदयात् पुरीततं शरीरमभिप्रतिष्ठन्त इति ऋतुस्थं शरीरं व्याप्नुवन्त्योऽग्रस्थं पर्णराजय इव बहिर्निर्यान्तः अभितो निःसरन्ति। ताभिर्नाडीभिः कृत्वा जाग्रद्विषयाया बुद्धेः कर्षणात् प्रत्यवसर्पणमनु विज्ञानमय आत्मा प्रत्यवसृप्येन्द्रियाण्युपसंहृत्य पुरीतति शेते अग्निवत् तत्र लोकपिण्डमविशेषेण संव्याप्य वर्त्तते" भा०

पुरिश्य पु० पुरि देहे शेते श्री-अच् अलुक् स०। जीवे शत०ब्रा०१४।५।५।१८ [शब्दमाला

पुरीक्षेप पु० पुरीं देहं क्षेपयति क्षिप्-णिच्-अण्। धूकूरे

पुरीष न० पृ-ईषन् किच्च। १विष्ठायाम् अमरः। २उदके निघण्टुः पुरीषितृकवृदे उदग्रम्। विष्ठात्यागप्रकारादिर्यथा "मुहूर्त्तं आस्ते उत्थाय रात्रिशेषं परित्यजेत्। परिधाय वस्त्रं वस्त्रं शयनस्थानतोऽन्यत्रम्। सुखाङ्गिकृत्वा प्रक्षाल्य हिरण्यस्य ततो द्विजः। अन्य! अन्य! कृतिं कृत्वा खनित्वा नैर्ऋतीं दिशम्। खनित्रखनमेनैव द्वादशाङ्गुल्यधोमुखम्। अष्टौ तोदकपात्रस्य मितं भक्षेत्तनुः यतम्। यामाद्या गरविक्षेपमात्रमनुदिते रवौ। मैत्रमावश्यकं कर्त्तुं नगराच्च शतगुणम्। तच्चिरुद्यायतं गर्त्तं तथा कृत्वा गभीरकम्। कृत्वा तद्भिः खनित्रेण कुशैराच्छाद्य तत्तृणम्। शुष्कैः काष्ठैरवशीर्यैर्भूगर्त्तमवगुण्ठितः। संवीताङ्गो वेणुदलैः पत्रैर्वा यमयमाजनैः। कृत्वं खनित्रं संस्थाप्य वारिपात्रसुपानहौ। ततो द्विजस्तूपविशेद्वस्त्रेणाच्छाद्य मस्तकम्। यज्ञोपवीतं कर्णेऽथ धृत्वा मौनी च दक्षिणे। अग्रतो द्विजमग्निं नो पश्यन् वलञ्च भास्करम्। गुरुं समीरणं सर्वदेवतामूर्त्तिमेव च। मातरं पितरं चन्द्रं सर्वं गुरुजनं स्त्रियम्। उदङ्मुखस्त्रिसन्ध्यासु दिवसे च यदा निशि। दक्षिणामुख उत्सर्गं कुर्यान्मूत्रपुरीषयोः। पूर्वाह्णे तु द्विजः कुर्यात् पश्चिमाभिमुखोऽथ वा। अपराह्णे पूर्वमुखो मूत्रगूथविसर्जनम्। मध्याह्ने प्रवतः कुर्यादुत्तरामुखः। दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः। निशायामन्धकारे तु छायायां दिवसे तथा। यथेच्छं मुखो भूत्वा मैत्रं कुर्यात् द्विजो भयात्। दिग्भ्रमाच्च मनोदुःखाद्विण्मूत्रस्य विसर्जनम्। मोहाद्वाऽधोमुखः कुर्यादुत्तरावाक्प्रयतो द्विजः। सन्न्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विज!। शास्त्राध्यायी च वेदानां सर्वयज्ञेषु दीक्षितः। मुनिश्च सर्वधर्मज्ञो दान्तः शान्त उदारधीः। उदोत्तरमुखः कुर्याद्दैन्यो नान्य एव च। प्रातश्च मैत्रं सायाह्ने दक्षिणाभिमुखो निशि। योगिनान्तु तथा स्त्रीणां शूद्रादीनामयं क्रमः। न देवायतने वृक्षमूले च न जले नदे। न नदीकूपमार्गेषु न वापीगोष्ठभस्मसु। न चिताग्निश्मशानेषु गोखरे न द्विजालये। नास्थिसमीपे न पुष्पे नाकाशे न च शाद्वले। न वस्त्रे न काष्ठे च न तीर्थे न द्विजाश्रमे। न यज्ञवृक्षमूलेषु गोपहारे चतुष्पथे। न शस्यक्षेत्रे न जले पुष्पोद्याने न चत्वरे। शोपानत्कोण नम्रस्य न रक्षा-

देशभूमौ। न वैष्णवालये गोष्ठे न कुर्याभिशुचस्तथा। न क्षेत्रकृष्टकेदारे न तिर्यक् सदाचन। न गच्छेत् च वल्मीके न च पर्वतमस्तके। न जलं न दिशोभागाद्वाकाशमवलोकयेत्। न गोव्रजे नदीतीरे निम्नस्थाने न गोमये। न यज्ञभूमौ न स्पृष्टे न पवित्रीकृतस्थले। दिशो न देहच्छायायां यज्ञकूलविवर्जनम्। कुर्याद्दु यज्ञेष्टकाभूते न च समाधिमर्कके। उद्धृताभ्योस्तिकाभ्यामिमं नारद! यत्नतः। जलोत्सर्गं ततः कुर्यात् शौचं मूत्रपुरीषयोः। शुष्कार्थेन कोष्टेनायसीयेन दलेन वा। प्रक्षाल्य शुद्धमुत्तिष्ठेत् शिश्नं चैव विशेषतः। विधृत्य वामहस्तेन शिश्नं तूपविशेद्दिवि। पेद्दिशाभुखः सन्ध्यां दिवोत्तरमुखस्तदा। पूतिगन्धि जलं दुष्टं सफेनञ्च प्रबुद्बुदम्। तीर्थोदकं सवर्णं पाथो वर्णान्तरन्तथा। सप्तद्रगा नदीवारः सप्तद्रुश्च शकर्दमम्। यवनान्त्यजसंघातान्मः सप्तद्रगनगोदकम्। धान्यचेलस्य सन्निधं शकीटस्य परित्यजेत्। मानवो देवधातान्मः सकले शौचकर्मणि"। "मृदः शकीटाशीर्षानां देवायतनगोदयोः। उदोदधि नदीदेवधातीरस्य मृत्तिकाः। महीतलोद्भवाः क्षेत्र कूपयोः सिकताश्च याः। अन्यजला घूणिमृदो वल्मीकस्य च कर्दमाः। उत्तराश्च हलोत्खाता मृत्तिका भवनस्य च। अश्वत्थतुलसीधात्रीमूलादीनां च वा मृदः। श्मशानभूमेः शैलस्य तथाऽपूतस्थलस्य च। शौचावशिष्टा मार्गस्य आखूत्खाताश्च मृत्तिकाः। दग्धस्थानस्य विप्राणां साधूनामालयस्य च। मृत्तिका वर्जयेदेता देवर्षे! शौचकर्मणि। पवित्रस्थानतो याम्या द्वादशाङ्गुलमृद्भवः। द्विजः सकलशौचार्थं शर्करादिविवर्जिताः। प्रथमेऽङ्गिनेरः शौचं कुर्यान्मृद्भिरतःपरम्। पुनर्जलैः पुरीषस्य यथा लज्जलयो भवेत्। मृत्तिका प्रथमा शौचे त्वङ्मांसस्तिषञ्चिता। पूर्वप्रस्तुतिमात्रा तु द्वितीया सजला तथा। तृतीया प्रमिता शौचे मार्गप्रस्तुतिमृत्तिका। चतुर्थ्याद्याः क्रमादेवमर्द्धप्रस्तुतिवर्द्धिता। यथा मृत्तिकया 'पूर्वं' त्रिपर्वं शौचकारिणः। अर्द्धप्रस्तुतिमात्रा या मुनिभिः परिकीर्त्तिता। गुदे दद्यान्मृदस्त्रिस्रः पञ्च वा सप्त वा तथा। मृदमेकां तथा शिश्ने तिस्रो वा मृत्तिकादयम्। वाम करे दद्यान्मृदस्त्रिस्त्रिश्चतुर्दश। तिस्रो वा कलयोः सप्त मृदश्च च शोधयेत्। पादयोरेकां मृदं दद्यात्तिस्रो मृत्तिका। कलत्रवनकेशेषु तिस्रश्च षड् मृदस्तथा। मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्द्वयम्। दद्यात्तिस्रश्च शिश्ने च तिस्रो वामकरे मृदः। कुक्षौ च मृद्द्वयं जप्तेत्तिस्रो वा सुहितत्परः। शूद्रैकैके द्विजस्त्रिस्रो मृदीत्वं शौचमाचरेत्। क्षत्रियो द्विगुणं शौचं वैश्यो वै त्रिगुणमेव च। सन्न्यासिनां वैष्णवानां शौचं सेव्यं चतुर्गुणम्। कलपादारिवालेषु त्रिद्विरद्विश्च मोमयैः। दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत्। एतदर्द्धनशौचे तु जातके मृतकेऽपि च। चोरादिबाधिते मार्गे शौचमर्द्धमाचरेत्। योषितामेतदर्द्धन्तु मृद्दादीनाञ्च नारद!। व्याधिभिर्वातुरो मर्त्यो आर्त्तो यदि यथाबलम्। शौचं कुर्यात्तु कृतं यत्र तत् स्थानं शोधयेज्जलैः। वेदस्मृतिपुराणानि धर्मशास्त्राणि नैत्तिकम्। मैत्रादिकर्म यः कुर्यात्तिहाय मन्दधीर्द्विजः। प्रतिग्रहाद्यमाचुष प्रज्ञां कृन्तिवयः स्त्रियम्। यस्माचारहीनस्य यदा तस्यापवित्रता। शास्त्रताचेद्द्विजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः। कुर्वन्ति शौचं यत्नेन यावन्नेतःपवित्रता। येषां कृष्णस्य भजनं तथा नामप्रकल्पनम्। यदेव स्मरणं भागवतानां साधुसेवनम्। भक्तिप्रधौतमनसां गोविन्दार्पितकर्मणाम्। तान्मानःकृष्णचित्तानां शुचिता तद्दिनिशम्। मनोभवजलैः शौचमन्यैः कुरुते यदि। मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति। गोविन्ददासता नास्ति यस्य लोकस्य जन्मनि। सोऽपि देहाशुचिः ज्ञात्वा शौचं मैत्रादिकर्मसु। यतश्च यदि देवर्षे! शौचं कुर्यात् सहस्रधा। अहारिमोमयैर्लोको भावदुष्टो न शुध्यति। यदा चित्तापवित्रत्वमकाण्डे भुवि यो नरः। तस्य तु स्नात्र मैत्रादिशौचेनैव न शुध्यति। पर्वताकारकूटैश्च मोषिट्वर्वनदीजलैः। शौचं कृत्वा न शुध्येत दुष्टचित्तो भवेद् यदि" पाद्मोत्तरखण्डे १०९अ०। २पुरीषवत्स्यायां मृदि ३भवने च वेदटी०

पुरीषवाहनशब्दे दृश्यम्। [स्युट्। पुरीषे विष्ठायां त्रिका०

पुरीषण पु० पुरीतो देहात् ईष्यते ईष्-दाने (त्यागे) कर्मणि

पुरीषम पु० पुरीषं मिमीते मा-क। मर्दे जले मार्गे त्रिका०।

पुरीषवाहन पुरीषमिव संशुष्कपां मृदं यवसं वा वहति वह-अण्ट्। १पांशुकृपमृदाहरे २यवसवाहके मर्दने यजु० १३ ३। वेदटी०

पुरोडाधान न॰ पुरोडाशो धीयतेऽत्र आ+धा—आधारे ल्युट्। देहस्थे पुरोडाशसमाने "पुरोडाशानमेव च" आप॰ २ ८५ "पुरोडाशवः" इति चिता॰पुरोडाशवादयोऽत्र।

पुरोडाशिन् त्रि॰ पुरोडाशं भोक्ष्यतीति पुरोडाशशब्दात् ततः भवार्थे इनि। जलयुक्ते ऋ॰ ५ ५५ ५।

पुरोध्य त्रि॰ पुरोधाय हितम् यत्। पुरोधस्थिते।

पुरु त्रि॰ पॄ—पालनपोषणयोः कु। १प्रचुरे अमरः २देवलोके मेदि॰ तस्य वर्मभिः पूरणात् तथात्वम्। ३ययातिपुत्रभेदे हरिवं॰३०अ॰।तद्वंशकथा ३१अ॰। ४तद्वंशजे बुधिश्रिरवस्थे नृपभेदे भा॰ व॰ ४अ॰। ५पराणे मेदि॰। ६दैत्यभेदे पुरुहूतशब्दे दृश्यम्। ७नदीभेदे स्त्री वाचस्प॰।

पुरुकुत्स पु॰ मान्धातृपुत्रभेदे हरिवं॰ १२अ॰। तस्य पत्नी नर्मदा कन्या नर्मदा ऋषिशापेन नदीत्वमाप्ता।

पुरुकुत्सन पु॰ १दैत्यभेदे "इन्द्रो विषचिद्दैत्यानां तद्रिपु पुरुकुत्सनः। जघान कृत्तिकृद्येन धनवान् वसुकृद्यमः" गारुडे ८७ अ॰।

पुरुकुतसानी स्त्री पुरुकुत्सस्य पत्नी वा॰ आनङ् ङीप् पुरुकुत्सवमानवति अस—णिच् अच् गौरा॰ ङीष् वा। पुरुकुत्सपत्न्यां ऋ॰१ ४६ ८।

पुरुत्र त्रि॰ पुरवःबुपोऽस्त्यस्य छान्दसः अन्यत्रोप॰। बहु-स्वामिनि ऋ॰२५।२। पुरुषु जीवते जि—निवासे डु। २बहुनिवेशने यजु॰ २७।२० वेददी॰।

पुरुज पु॰ भरतवंश्ये सुमान्योः पुत्रे नृपभेदे भाग॰ ९ २१ २२ हरिवंशे "पुरुजादिः सुमान्योश्च" ३२अ॰। पाठान्तरात् सोऽपि तत्रार्थे

पुरुजित् त्रि॰ कुन्तिभोजे नृपभेदे भा॰ ९ २४ अ॰। स च यदुवंशमाहुलः वसोः "पुरुजित् कुन्तिभोजश्च माहुलः सव्यसाचिनः" भा॰ व॰ ६अ॰। २बृहद्विष्णुवंश्ये नृपभेदे भाग॰ ९ २३।१५ ३विष्णौ पु॰। "पुरुजित् पुरुशोभनः" विष्णुस॰। बहूनां जेतृत्वात्तस्य तथात्वम्।

पुरुजा(ना)य पु॰ पुरुजा नायोनेता संज्ञायां चलम्। १एतन्नामके नृपभेदे ऋ॰१४८।७। २बहुजेतृमात्रे त्रि॰ तथात्वम्

पुरुजन् पु॰ पुरुराजा यस्य बहुव्री॰। प्रचुराजके ऋ॰। २ २८

पुरुतरा अव्य॰ द्वितीयास्थानस्य तरप्प्रत्ययस्य पुरुशब्दात् तरा। बहुकर्मके बहुभिरधिके च ऋ॰ १।३२।७

पुरुद न॰ पुरु—प्रचुरं ददाति दै—क। सुवर्णे शब्दार्थक॰।

पुरुदंशक पु॰ पुरवो दंशा यस्य बहुव्री॰ कप्। हंसे त्रिका॰।

पुरुदंसस् पु॰ पुरु तद्वामानमसुरं दृष्टवान् दंस—असुन्। इन्द्रे शब्दर्थ॰ असमस्तौ तौ परे वानङ्। ५इन्द्रंश्च

पुरुदस्म त्रि॰ पुरुषु दस्मानि कर्माण्यस्य। बहुकर्मयुक्ते। इदं तद्वामाभं दैत्यभेदं दसयते पराजयति गतुत्वेन पुरा॰ दसि—दर्शने भूते असुन्। २इन्द्रे पु॰ तस्यवदस्मः।

पुरुदक्ष पु॰ दीयते दा—कृत दक्षं धनम् पुरु दक्षमस्य बहुधने इन्द्रे ऋ॰ ६।१८।९ भा॰।

पुरुदस्य त्रि॰ पुरु दसति दस—बा॰ सन्। बहुनाशके २बहु-कर्मके च ऋ॰ १५४।८।

पुरुदृह् त्रि॰ पुरुभ्यो बहुभ्यः, पुरवे दैत्याय वा द्रुह्यति द्रुह—क्विप्। १बहूनां द्रोहकारके ऋ॰१।।८।।। २पुरुहूते इन्द्रे च। अत्रि पदान्ते च वा बलदाने।

पुरुहत् पु॰ वैदर्भ्यां जाते क्रोष्टुवंश्ये मधुहते नृपभेदे हरिवं॰ १७ अ॰। [प्रचारे ऋ॰१।१२२।२

पुरुधा अव्य॰ बहुत्वेन संख्यावद्भावात् प्रचारे धाच्। बहु-

पुरुभूत पु॰ पुरुहूत+पृषो॰। इन्द्रे हरिवं॰१५अ॰। पुरुहूत इत्येव तत्र पाठः साधुः।

पुरुभोजस् पु॰ पुरून् भुङ्क्ते भुज—असुन्। १मेघे त्रिक॰ २प्रचुरभोजके त्रि॰। [२धृतराष्ट्रपुत्रभेदे च

पुरुमित्र पु॰ १मन्त्रारचन्द्रनृपभेदे भा॰व॰६अ॰। भा॰आ॰ ६२अ॰

पुरुमीढ ऐक्ष्वाक्यां कुरोर्जात जाते अजमीढाद्वंशे नृपभेदे भा॰ आ॰ ९४ अ॰।

पुरुरथ पु॰ रथा रंहतेः पुरुः रथो रंहणं यस्य। प्रचुरं भुक्तिभेदात् बहुरंहणे आदित्ये ऋ॰ १०।६४।५। भा॰

पुरू(रु)रवस पु॰ सोमवंश्ये नृपभेदे "तथैव ताभ्यामुक्तो तु देवाभ्यां सेव कन्यया। इला यमनयत् सद्यः सुद्युम्न इति विश्रुतः। पुमर्थेश्वरशापेन स्त्रीत्वमाप्तेन वने। स्त्रीत्वमापादितस्तेन महायोगेन भीमता। पुरू(रु)रवसमानामं चक्रवर्तिनमूर्जितम्। जनयामास तनयं यत्र सोमसुतो बुधः" मार्क॰पु॰१११अ॰। पुरू(रु)रवस् पृषो॰ तत्रार्थे

पुरुरावन् त्रि॰ पुरु फलं ददाति रा—दाने वनिप्। बहु-विधफलदातरि यजु॰ ५।७ स्त्रियां ङीप् वनोरच।

पुरुवर्गस् त्रि॰ पुरुर्वर्गोऽस्य। बहुमाने ऋ॰१०।१२०।५।

पुरुवन्द्र त्रि॰ पुरुः चन्द्र आह्लादकत्वात् दीप्तिरस्य पृषो॰। "हृस्वाच्चन्द्रोत्तरपदे मन्त्रे" पा॰ ६ट्। बहुदीप्तिके ऋ॰ १ २७ १। अमन्त्रे तु न सुट् पुरुचन्द्र इत्येव

पुरुष पु॰ पुर—अपगतो कृषन् दरिद्रेऽस्ते यो—ड पृषो॰। १मनुष्ये २पुंसि च अमरः। ३आत्मनि वाक्यमतसिद्धे पञ्चविंशे ४तत्त्वे ५पुष्पागदृष्टे च मेदि॰। ६विष्णौ शब्दर्थ॰

७रेवर्णमिदुनादौ विषमराशौ । "भौमारक्षीवाः पुरुषाः" ज्ञो०न० दमौमादिषु राशिषु । पुरुषाणां शुभाशुभलक्षणं ह०सं० ६८अ० उक्तं यथा

"उन्नानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वमनूकमादौ । चेलं नखां च विधिवत् कुशलोऽवलोक्य वाक्यविदिति वातमनागतं च । अस्वेदनौ मृदुतलौ कमलोदराभौ स्निग्धाकुलौ रुचिरताम्रनखौ सुपाणी । उष्णौ शिराविरहितौ सुनिगूढगुल्फौ कूर्मोन्नतौ च चरणौ महतेश्वरस्य । मूर्पाकारविरलपाण्डुरनखौ वक्रौ शिरावलितौ संशुष्कौ विरलाकुलौ च चरणौ दारिद्र्यदुःखप्रदौ । मांसोत्कटौ कृशावक्रौ संग्रस्तविच्छिन्नितौ मलिनौ परिरूक्षद्युतिनखौ घोतावनम्यारती । प्रविरलतनुरोमहस्तजङ्घा दिरदकरप्रतिमैर्वरोरुभिश्च । उपचितकमलाजानवश्च भूपा धनरहिताः मलिनाकृतस्त्वजङ्घाः । रोमैकैकं कूपके पार्थिवानां द्वे द्वे शेषे परिकल्पितश्रीनिवासाम् । लग्नाद्यैर्निःस्वा मानवा दुःखभाजः केषाञ्चैव निन्दिताः पूजिताश्च । निर्मांसजानुस्त्रिवते प्रवासे सौभाग्यमल्पैर्विकटैर्दरिद्राः । स्त्रीनिर्जिताश्चापि भवन्ति निम्नै राज्यं समांसैश्च महद्भिरायुः । स्थिरेऽस्थि धनवानपत्यरहितः स्थूले विहीनो धनैर्वेटे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् । दारिद्र्यं विनते स्वधोऽस्यतनवो स्थिरे विरावलते स्थूलग्रन्थियुत सुखी मृदुकरोऽत्यन्तं प्रमेहादिभिः । शोणिमूर्दैर्भूपा दीर्घैर्मन्त्रैव वित्तपरिहीनाः । अनुदत्तशोणया कुविरावत्रिभाश्च भवयन्तः । अवमृत्युरेखहस्तो विषमैः स्त्रीपञ्चकः धनैः क्षितिपः । सुखाकुलोदयैः प्रकम्पहस्तश्च प्रतमायुः । रक्तैराज्ञा नखिभिर्दुःखाः पाण्डुरैश्च मलिनैश्च । सुखिनः स्वयमन्नाः निःस्वा निःसन्धयाश्च । त्रिपञ्चशीराभिः प्रहसिताश्चैवक्षितमूलाभिः । पृथीपतयो रेखा विहीनमूलाश्च धनहीनाः । एकैव मूलधारा वलिता रूपप्रधानसुतदाता । स्त्रियोऽतनुमनसयो भवन्तितारभोक्तारः । नखिभिश्च मन्त्रिभिः कन्याधितरो भवन्ति निःस्वाश्च । बहुपरुषाश्च मध्योन्नतेन मानुषवर्णैः धनिनः । दरिद्रकरस्त्रिभिर्वैधनरहिता दुर्भगाश्च विज्ञेयाः । कृष्णसमनखाश्च विज्ञातव्या नष्टीभाग्याः । मधुनखे बहुविद्या मत्स्यसमनखे महाभोगाः । मदिरानखे यज्ञा चाम्रसमनखे च रेतसि दरिद्रः । शौभं मैथुनशाली दीर्घायुरतोऽन्यथाऽल्पायुः । निःस्वोऽतिस्थूलस्फिक् मांसलस्फिक् सुखान्वितो भवति । व्याघ्राभाध्यर्धस्फिगण्डकस्फिग्नराधिपतिः । सिंहकटिर्मेषुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः । समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः । अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसन्त्यक्ताः । समकक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः । उन्नतकक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकक्षाः । कर्णोदरा दरिद्रा भवन्ति कङ्काशिनश्चैव । परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः । अल्पा स्वल्पनिम्ना नाभिः क्लेशावहा भवति । वलिमध्यगता विषमा सुखाबाधं करोति नैःस्वाय । याम्यं वामावर्तां करोति मेधां प्रदक्षिणतः । पार्थिवता चिरायुरुपरिष्टाद्वैश्वरं गवाद्यमध. गमपत्यकर्णिकाभा नाभिर्मधुजेश्वरं कुरुते । यस्यान्तं स्त्रीभोगिनमाचार्यं बहुश्रुतं यथाकृत्यम् । एकद्वित्रिचतुर्भिर्वलिभिर्विद्याभृपं स्वदिशम् । विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः । ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव । मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः । विपरीतैर्निर्द्रव्याः शुष्कपरिहीनाः परप्रेष्याः । सुभगा भवन्त्यहृदयङ्गमुखा [illegible] विषमदीर्घैः । पीनोपचितनिम्नैः क्षितिपतयश्च [illegible] सुखिनः । हृदयं बहुश्रुतं पृथु [illegible] नृपतीनाम् । अधमानां विपरीतं [illegible] विरावश्च । समवलयोऽर्थवन्तः दीर्घैः शूराश्चिरायुषः सुखिनः । विषमं बलो वेषां ते निःस्वाः [illegible] । विषमैर्विषमैः [illegible] मृदुभिरदीर्घैर्विहीनोऽस्थिकृच्छ्रिकरिभिश्चैः । [illegible] [illegible] नीलैः । [illegible] निःस्वोऽल्पैर्मानुषीभिः । [illegible] निःस्वः शुष्का [illegible] । [illegible] शूरः [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible]

नाखधानां रोमशो कृष्णौ । कृष्णाकुलयो दीर्घाविरायुषामवस्थितास्च शुभगानाम् । भेषाभिनां च कृष्णाश्चिपिटाः परकर्मनिरतानाम् । स्वूषाभिर्धनरहिता बहिर्मताभिस्च मलिनिर्वाचाः । कपिलदशकरा धनिनो व्याघ्रोपमपाणयः पापाः । कपिलनखैर्निगूढैः सुश्लिष्टसन्धिभिर्भूषाः । हीनैर्हस्तच्छेदः कर्मैः कथमहैव निर्दुःखाः । पिहविस्तेन विहीना भवन्ति निम्नेन करतलेन नराः । संहतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः । विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाभाभैः । पीतैरनम्बधनिताभिगामिनो निर्धना रूक्षैः । तुषसदृशनखाः क्लीवाश्चिपिटैः स्फुटितैश्च विस्तवन्त्यल्पाः । कुनखविवर्णैः परतर्कुकाश्च लाक्षैश्च भूपतयः । अकुलयवैराढ्याः, सुतवन्तोऽकुलमूलगैश्च यवैः । दीर्घाकुलिपर्वाणः सुभगा दीर्घायुषश्चैव । स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निःस्वानाम् । विरलाकुलयो निःस्वा धनसङ्गिनो धनाकुलयः । तिस्रो रेखा मणिबन्धगोत्थिताः करतलोपगा रूपतेः । मीनयुगाङ्कितमणिर्जिलं सत्प्रदो भवति । कङ्काधारा धनिनां विद्याभाजां च मीनपुच्छनिभाः । मङ्गातपत्रमिविकागजाङ्कुशोपमा रूपतेः । कलशशङ्खातपत्राङ्कुशोपमाभिर्भवन्ति निधिपाणाः । दानमिमाभिराढ्याः स्वस्तिकरूपाभिरैश्वर्यम् । चक्राब्धिपरशुतोमरयष्टिधनुःकुन्तयष्टिभाः रेखाः । कुर्वन्ति चभूनाथं यज्ञानसुखुखाकाराः । अक्षरध्वजकोष्ठागारयष्टिभाभिर्महाधनोपेताः । वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन । वापीदेवकुलाद्यैर्यशं कुर्वन्ति च त्रिकोणाभिः । अकुलमूलरेखाः पुत्राः स्युर्दीर्घाः कन्याः । रेखाः प्रदेशिनीनाः शतायुषां कनीयसीनाभिः । छिन्नाभिर्भुजभङ्गं वक्ररेखारेखिणो निःस्वाः । अतिलम्बदीर्घविपुलैर्निर्दुःखा मांसलैर्धनोपेताः । विस्तीर्णैरवक्रैरधरैर्भूषास्तुभिरल्पाः । ओष्ठैः स्फुटितविशीर्णतनिवर्णरूक्षैश्च धनपरित्यक्ताः । स्निग्धा धनाढ्य दयनाः सुतीक्ष्णदंष्ट्राः शमाश्च शुभाः । जिह्वा रक्ता दीर्घा कृष्णा सुभगा च भोजिनां श्रेया । श्वेता कृष्णा पङ्का निर्दुःखाढ्यां तथा तालु । भङ्गं सौम्यं संहतमकम्पं कृष्णं शवं च भूपानाम् । विपरीतं क्लेशभुजां भङ्गाकुलं दुर्भगानां च । स्त्रीसुखमनपत्यानां गाढ्यवतां भङ्गुरं मदिरेक्षणम् । दीर्घं निर्दुःखानां भीरुसुखाः पापकर्माणः । चतुरस्रं धूर्तानां निम्नं भङ्गं च तनयरहितानाम् । अपत्यानामतिकृष्णं दम्भूर्णं भोगिनां धान्तम् । अस्फुटितान्तं स्निग्धं शान्तं शुभं बहु च सुखं चैव । रक्तैः पद्मैर्गौराः शुभ्रैरल्पैश्च विप्रेयाः । निर्मांसैः कर्णैः पापाल्पवर्चटैः सुखभोगाः । अपत्यास्तुल्यवर्णाः बहुभवाश्च भूपतयः । रोमशवर्णा दीर्घायुषस्तु धनभागिनो विपुलवर्णाः । क्रूराः विरावनद्धैर्व्यालैर्मांसलैः सुखिनः । भोगी त्वनिम्नगण्डो मन्त्री कम्बूर्णमांसगण्डो यः । सुखभाक् शुकसमनासविरजोभी शुष्कनासश्च । छिन्नातुल्यपयाऽगम्यगामिनो दीर्घया च सौभाग्यम् । आकुञ्चितया चौरः स्त्रीलत्यु: स्फिटनासः । धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभवन्त्याः क्रूराः । अन्त्री खल्वच्छिद्रा सुपुटा नासा सभाग्यानाम् । धनिनां श्रुतं सलघु हिलिपिलितं स्फाटि बाहुनाहं च । दीर्घायुषां प्रसन्नं विप्रेयं संहतं चैव । एकदशाधनिनो रक्तान्तविलोचनाः श्रियोभाजः । मधुपिङ्गलैर्मेहाढ्यां सालोरविलोचनाः पापाः । 'कृपिणाढ्या मण्डलवलोचनाश्च लिङ्गैश्च लोभनैश्चौराः । क्रूराः केकरनेत्रा मलसदृशदृशश्च भूपतयः । ऐश्वर्यं मन्त्रीरैर्नीलोत्पलशान्तिभिश्च विहीनाः । अतिलम्बतारकाश्चामलाश्रुलाटनं भवति । मन्त्रिणं स्फुटदृशां स्त्रीणाशाश्यां च भवति सौभाग्यम् । दीना उङ्गनःखानां स्निग्धा विपुलार्थभोगवताम् । अस्थुकताभिरक्षायुषो विषादोन्नताभिरतिरतिसुखिनः । विषमक्षुषो दरिद्रा बाहेन्द्रुनतभ्रुवः सधनाः । दीर्घासंबद्धाभिर्धनिनः सम्पदाभिरर्थपरिहीना । मध्यविनतभ्रुवो ये ते सुखाः स्त्रीभ्यमन्याश्च । उन्नतविपुलैः भङ्गैर्धन्या निम्नैः सुतार्थसन्त्यक्ताः । विषमललाटा विधना भवन्तोऽर्धेन्द्रुकटमेन । मुक्तिविशालैराचार्यता सिराकुलतैरधर्मरताः । उन्नतविराभिराढ्याः स्त्रीभिरवमुखैश्चिताभिश्च । निम्नललाटा मधवन्मभाजिनः क्रूरकर्मनिरताश्च । अभ्युन्नतैश्च भूपाः स्युः सङ्कटललाटाः । उदितमदीनमसमस्तु स्निग्धं च शुभावहं महाभाग्यम् । रूक्षं दीनं प्रभुताश्च चैव न शुभप्रदं पुंसाम् । हसितं शुभदसकम्पं वनिमिलितलोचनं च पापस्य । लूतस्य हसितमसकृत् शोभाढ्याश्चलत् प्रान्ते । तिस्रो रेखाः शतजीविनां ललाटोपगताः स्थिता यदि ताः । शतकृत्वः शतजीवनं भवतिचाहुः सपङ्कान्दा । विच्छिन्नाभिश्चा-

मध्यगामिनो भवतिरथ्यरेखेव । मेषान्तोपगताभी रेखा-
भिरशीतिवर्षायुः । पञ्चभिरायुः सप्ततिरेकाग्रावस्थि-
ताभिरपि वृष्टिः । बहुरेखेव मतार्धं चत्वारिंशच्च
वक्राभिः । लिंगवृषणमध्यगाभिर्द्विसप्ततिरेव वाम-
वक्राभिः । जुद्राभिः खल्वायुर्युगाभिश्चान्तरे कथ्यम् ।
परिमण्डलैर्भोगाद्यान्यत्वाकारैः शिरोभिरवनीशः ।
चिपिटैः पितृमातृघ्नाः करोटिशिरसां चिरानुभवत्वं ।
घटमूर्धा ध्यानरुचिर्द्विमस्तकः पापकृन्नैस्वकृः । निम्नं
तु शिरो महतां बहुनिम्नमनर्थं भवति । एवैकमवैः
स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः । कृष्णैर्भिन्नं चाति-
बहुभिः केशैः सुखभाग् नरेन्द्रो वा । बहुमूर्धविनम-
कपिशाः स्थूलस्फुटिताग्रपरुषसुखाश्च । अतिकुटिला-
चातिघनाश्च मूर्धजा वित्तहीनानाम् । बहुबहुगात्रं रूक्षं
मांसविहीनं शिरावनद्धं च । तत्तदनिष्टं प्रोक्तं
विपरीतमतः शुभं वर्णम् । त्रिषु विपुलो गम्भीर
स्त्रिष्वेव महुन्नतस्तथा तृतीयः । वक्रस्तु रक्तो राजा
पंचस्तु दीर्घश्च रूक्षाश्च । उरो ललाटं वदनं च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् । नाभिः स्वरः सत्त्वमिति
प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम् । मणोऽथ
कक्षा नखनासिकाक्षं कपाटिका चेति महुन्नतानि ।
हस्तानि चत्वारि च शिरःपृष्ठं ग्रीवा च जङ्घे च
हितप्रदानि । नेत्रान्तवाङ्करतालुजिह्वा रक्ता
नखाश्च खलु तप्त सुखावहानि । स्कन्धाक्षि वक्षः दश-
नाङ्गुलिपर्वकेशाः सार्कं स्वधा करदहाश्च न दुःखिता-
नाम् । हस्तोचनवाङ्गुलिकाः सनखोरन्तरमत्र पञ्च-
नम् । इति दीर्घमिदं तु पञ्चकं न भवत्येव मथाम-
भूमृताम्" (इति चेतम्) । "छाया शुभाशुभफलानि
निवेदयन्ती लक्ष्मा मनुष्यपशुपक्षिषु वक्षयस्तैः । तेजो-
युक्तान् वहिरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्न-
घटस्थितेव । स्निग्धद्विजत्वङ्नखरोमनेत्रच्छाया सुगन्धा
च महीपतेस्या । तच्छर्यताभाग्युदयान् करोति धर्मस्य
चाहन्यहनि प्रवृत्तिम् । स्निग्धा सिताच्छहरिता
नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाया२ छाया फलं तद्व-
ष्टतां शुभमादधाति । चक्षा ऽष्टया पद्मदेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः । आग्नेयीति२ प्राणिनां
स्वाप्तयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते । मलिन-
वरुणकृष्णा पापगन्धाऽनिष्टोत्था३ जगवति वपनन्यव्याध्य-
नर्थायैनाशान् । स्फटिकसदृशरूपा भाग्यवृद्धान्युदारा
निधिरिव मणमोत्थाः श्रेयसां सञ्चयार्थाः । छायाः क्र-
मेण कृष्णाग्न्यनिलाम्बरोत्थाः केचिद्वदन्ति दश तास्
वयाहपूर्वाः । सर्वाजनाभ्युदयकृतयमोद्भुपानां तस्यास्तु
सञ्चयकरैरिति तत्त्वमाहः" (इति छाया) । "वरिष्ठ-
रथौघमेरीवृद्धपिंडाद्यनिःस्वना भूपाः । गर्दभखर्जर-
खराश्च धनसौख्यसन्त्यक्ताः" (इति स्वरः) । "वप्र भवन्ति
च सारा मेदोमज्जास्थिशुक्राणि । रुधिरं मांसं
चेति प्राणभृतां तत्त्वमाचक्षम् । ताम्रोष्ठदन्तपाणी-
लिङ्गानेत्रान्तपादुकरचरणैः । रक्तैस्तु रक्तसारा बहु-
सुखधनितार्थपुत्रयुताः । स्निग्धत्वक्ता धनिनो बहुभिः
सुभगा विचक्षणाश्चाल्पैः । मज्जामेदःसाराः सुख-
रीराः प्रभविष्णवो भुक्ताः । स्थूलास्थिरस्थिसारो बलवान्
विद्यान्वितः सुरूपश्च । बहुगुरुशुक्राः सुभगा विद्यांसो
रूपवन्तश्च । उपचितदेहो विद्वान् धनी सुरूपस्
मांससारो यः । (इति सारः) बहुजात इति च सुस्थि-
रसंज्ञिता सुखभुजो ज्ञेयाः" (इति संहतिः) । "स्नेहः
पञ्चसु सञ्चोवागलिङ्गाद्यनेत्रनखसत्त्वः । सुतधन-
सौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः" (इति स्नेहः) ।
"द्युतिमान् वर्णः स्निग्धः स्थितिपानां मध्यमः सुतार्थ-
वताम् । रूक्षो धनहीनानां गुरुः शुभदो न सङ्कीर्णः"
(इति वर्णः) । "साध्यमनूनं वक्षाद् गोदमपार्श्वस्थिरं
गरुडसत्त्वाः । अनतिकृतप्रताणा स्थिरपिण्डो मानवे-
न्द्राश्च । वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुख-
भाजः । गर्दभकरभप्रतिमैस्तैः शरीरैश्च निःस्वसुखाः"
(इत्यनूनम् ।) "अष्टशतं मध्यवतिः परिभाषां चतुरशीति
रिति पुंसाम् । उत्तमसमहीनानामङ्गुलसङ्ख्या स्व-
मानेन" (इत्युन्मानम्) । "भारार्धतहः सुखभाक् तुलितो-
ऽतो दुःखभाग्भवत्यूनः । भारोऽतीवाढ्यानामध्यर्धः
सर्वधरणीशः । विंशतिवर्षा नारी पुरुषः खलु पञ्च-
विंशतिभिरब्दैः । अर्हति मानोन्मानं जीवितमाने
चतुर्थे वा" (इति मानम्) । "भूजलशिखानिलाम्बरसुर-
नररजःपिशाचपतिरक्षाम् । अन्येन भवति पुरुषो
लक्षणमेतद्भवत्रेणाम् । महीप्रसादः सुखपुत्रगन्धः
सम्भोगवान् सुखसमः स्थिरश्च । तोयप्रसादो बहुतोय-
पायी प्रियाप्रियाप्री रसलोलनश्च । वायोः प्रसादेन
चलः क्षणश्च क्षिप्रं च कोपस्य वशं प्रयाति । खप्रसाद-
निर्पृथो विहतास्तः गन्धगतौ कुशलः सुधिरा ।

त्वागवृतो पुरुषो मृदुकोपः स्नेहरतश्च भवेत् सुरसज्ञः। मर्त्यं सत्त्वसंयुतो गीतमूषणप्रियः। संविभागशीलवान्नित्यमेव मानवः। तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्त्वेन निशाचराणाम्। पिशाचसत्त्वप्रबलो मलाक्षो बहुप्रलापी च सुखत्वाङ्गः। भीरुः क्षुधालुर्बहुभुक् च यः स्यात्स ज्ञेयः स सत्त्वेन नरस्तिरश्चाम्। एवं नराणां प्रकृतिः प्रदिष्टा यद्यत्त्वयाः प्रवदन्ति सत्त्वम्" (इति प्रकृतिः)। "गाढ़ूलहंससमदद्विपगोपतीनां तुल्या भवन्ति गतिभिः शिखिनां च भूपाः। येषां च यद्रहितं स्थितं च यातं तेऽपीश्वरा हृतपरिच्छुतगा दरिद्राः"। (इति गतिः)। "श्रान्तस्य यानमशनं च बुभुक्षितस्य पानं तृषापरिगतस्य भवेषु रक्षा। एतानि यस्य पुरुषस्य भवन्ति काले धन्यं वदन्ति खलु तं नरलक्षणज्ञाः। पुरुषलक्षणमुक्तमिदं मया सुनिमतान्यवलोक्य समासतः। इदमधीत्य नरो रूपवान्मतो भवति सर्वजनस्य च वल्लभः"। प्रकृत्यादिभ्योऽतिरिक्तत्वेन साङ्ख्यकारिकया पुरुषस्यास्तित्वं समर्थितं यथा "सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च"। "का॰" पुरुषोऽस्त्यव्यक्तादेर्व्यतिरिक्तः कुतः सङ्घातपरार्थत्वात् अव्यक्तमहदहङ्कारपञ्चतन्मात्राणि पराणि सङ्घातत्वात् शयनासनाद्यङ्गवत् सुखदुःखमोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः। स्यादेतत् शयनासनादयः सङ्घाताः सङ्घातशरीराद्यर्थाः दृष्टा न तु आत्मानं अव्यक्तादिव्यतिरिक्तं प्रति परार्थाः तस्मादसङ्घातान्तरमेव परं गमयेयुर्नत्वसङ्घातमात्मानमित्यत आह त्रिगुणादिविपर्ययात्। अयमभिप्रायः सङ्घातान्तरार्थत्वे हि तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थेन भवितव्यमेवं तेन तेनेत्यनवस्थात्। न च अवस्थायां सत्यामनवस्थाकल्पना युक्ता गौरवप्रसङ्गात्। न च प्रमाणवत्त्वेन कल्पना गौरवमपि सहत्यत इति युक्तं संहतत्वस्य पारार्थ्यमात्रेणान्यत्वात्। दृष्टान्तदृष्टसर्वधर्मानुरोधेन स्वप्रमाणमिष्टतः सर्वानुमानोच्छेदप्रसङ्गः इत्युपपादितं न्यायवार्त्तिकतात्पर्यटीकायामस्माभिः। तस्मादनवस्थाभिया अस्माभिरङ्गीकृतत्वात्कृता अतिशुद्धत्वलक्षणविशेषितत्वमसामान्यत्वं चेतनत्वप्रसवधर्मित्वं चाभ्युपेयं त्रिगुणत्वादयो हि धर्माः सङ्घातत्वेन व्याप्ताः। तत् संहतत्वलक्षणं परे निवर्त्तमानं त्रिगुणत्वादि व्यवर्त्तयति आत्मलक्षणं निवर्त्तमानं कठत्वादिकं तस्मादाचार्येण त्रिगुणादिविपर्ययादिति वदता असंहतः परोऽविवक्षितः स चात्मेति सिद्धम्। इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत्तत् परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकश्चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यम्। स च परस्त्रैगुण्यादन्य आत्मेति। इतश्चास्ति पुरुषः भोक्तृभावात् भोक्तृभावेन भोग्ये सुखदुःखे उपलभ्यते। भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्मानुभूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीयाः वा बुद्ध्यादयस्तेषां सुखदुःखाद्यात्मकत्वेन आत्मनि वृत्तिविरोधात्। तस्माद्योऽसुखाद्यात्मा योऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति। अन्ये त्वाहुः भोग्या दृश्या बुद्ध्यादयः न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषां, तस्मादस्ति द्रष्टा दृश्यबुद्ध्यादिव्यतिरिक्तः, स चात्मेति। भोक्तृभावात् दृश्येन द्रष्टृत्वानुमानादित्यर्थः। दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम् "त॰कौ॰ अधिकम् आत्मशब्दे ६६२ पृष्ठादौ दर्शितम्

रतिमधुर्यां पुरुषचातुर्विध्यसङ्ख्या तेषां लक्षणसङ्ग्रहं यथा "शशो मृगो हयश्चाश्वो नृणां जातिचतुष्टयम्। मृदुवचनसुशीलः कोमलाङ्गः सुकेशः सकलगुणनिधानः सत्यवादी शशोऽयम्।१ वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरुः पलमतिसुदेहः शीघ्रवेगो मृगोऽयम्।२ बहुगुणबहुवस्तुः शीघ्रकामो नताङ्गः सकलरुचिरदेहः सत्यवादी हयोऽयम्।३ उदरकटिकृशः स्यादुष्णकण्ठाधरौष्ठो दशनवदननासः श्रोत्रदीर्घौ हि वाजी४"। तत्र विष्णौ "अव्ययः पुरुषः साक्षी" विष्णुस॰। "आसीत् पुरा पूर्वमेवेति" विग्रहं कृत्वा क्युत्यादितः पुरुषः पूर्वमेवाङ्गिरादिरिति तत् पुरुषस्य पुरुषत्वमिति" श्रुतेः पूर्षु पुरीषु सत्कर्मस्वाविष्ट सत्त्वेऽवसीदतीति वा, पुरुषि बहूनि फलानि मनोऽभिलषितानि सनोति ददाति वा, पुरुषि भुवनानि संहारसमये स्वति अन्तं करोतीति वा पूरणात् वदनाद्वा पुरुषः, "पूरणात् वदनाच्चैव ततोऽसौ पुरुषो मतः" इति महाभारतम्" भाष्यम्। "पुरं शरीरं ब्रह्म पुरं वा शेते इति पुरुषः। नवद्वारं पुरं पुण्यमितैर्भूयः समन्वितम्। आसरोति महाज्ञा यत्तस्मात् पुरुष उच्यते" इति महाभारते यद्वा यद् शरीरमलवशादनेन

प्रथ दाने वो थ्यलकर्मणि इत्येषां धातूनां रूपाणि पूरणात् पृ-पालनपूरणयोरिति धातोरिदं रूपं पुरुः। वीदति गच्छति द्युलोकान्तरिक्षपृथिवीषु सूर्य्यवत्स्वव्यात्मना गत्यर्थकदेरिदं रूपम्" आनन्दगि० "पुराणनेन सृष्टानि ऋतिर्यग्विदेवताः "शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ" भाग०७।१४।२७ "पुरः स चक्रे द्विपदः पुरस्तकं चतुष्पदः" इत्युपक्रमे "पुरः पुरुष आविशत्" इति श्रुतेस्तस्य सर्वपुरप्रवेशात् तथात्वम्।

पुरुषक न० पुरुष इव कायति कै-क। अश्वानामूर्ध्वस्थितौ (शिरपातोत्था) त्रिका०।

पुरुषकार पु० कृ-भावे घञ् ६त०। पुरुषचेष्टिते पौरुषे दैवात् पुरुषकारस्य प्राधान्यसूक्तं मनुस्मृ० १२५५ श्लो० यथा "स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम्। तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः। प्रसिद्ध्यन्त्यन्यथा दैवं पौरुषेण विहन्यते। अकृत्याचारवृत्तानां नित्यमुत्थानशालिनाम्। येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम!। पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम्। कर्मणा प्राप्यते लोके राजसस्य तथा फलम्। कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम्। पौरुषेणाप्यते राजन्! सार्गिणव्यं फलं नरैः। दैवमेव विलाशन्ति नराः पौरुषवर्जिताः। तस्मान्निष्फलसंयुक्तं दैवं न फलदं भवेत्। पौरुषं दैवसम्पन्नं काले फलति पार्थिव!। दैवं पुरुषकारस्य कालश्च मनुजोत्तम!। त्रयमेतन्महद्यस्य पिण्डितं स्यात् फलावहम्। कर्मेष्टसिद्धयायोगाद्दृश्यन्ते फलसिद्धयः। तासु काले प्रदत्तासु नैवाकाले कदाचन। तस्मात् यदेव कर्त्तव्यं सधर्मं पौरुषं नृभिः। एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम्। नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः। तस्मात् सर्वप्रयत्नेन पौरुषे यत्नमाचरेत्। त्यक्त्वालस्यान्दैवपरान् मनुष्यान्सत्यानयुक्तान् पुरुषान् हि लक्ष्मीः। अन्विष्य यत्नाद्दृणु ते नृपेन्द्र! तस्मात् यदोत्थानवता हि भाव्यम्"।

पुरुषच्छन्दस् स्त्री पुरुष इव द्विपादत्वात् छन्दो यस्याः। द्विपदाख्ये छन्दोभेदे "अथ द्विपदाः पुरुषच्छन्दसं वै द्विपदा द्विपाद्वा अयं पुरुषः" शत०ब्रा०२।३।४।

पुरुषत्रा अव्य० द्वितीयासप्तम्यन्तार्थवत्तेः पुरुषशब्दात् त्राच्। द्वितीयासप्तम्यन्तार्थवत्तौ पुरुषत्रा वन्दे रमे वा

पुरुषदघ्न त्रि० पुरुषः पुरुषपरिमाणं परिमाणमस्य। जर्ध्वविस्तृतबाहुकरपरिमाणवत्ये पञ्चहस्तपरिमाणे स्त्रियां ङीष्। तदर्थं द्वयसच्। पुरुषद्वयस्य तत्तार्थे त्रि०स्त्रियां ङीष्। एवं मात्रच्। पुरुषमात्रं तत्तार्थे त्रि०स्त्रियां टाप्।

पुरुषदन्तिका स्त्री पुरुषस्येव दन्तो दन्ताकारोऽस्याः कप्० कापि अतइत्वम्। मेदायां राजनि०।

पुरुषधर्म पु० ६त०। पुरुषमात्रधर्मे न यज्ञधर्मे। "वेमनडुहोर्मांसं नाश्नीयात्" इत्युपक्रमे "पुरुषधर्मो वाऽवमात्वात्" कात्या०श्रौ०७।२।२३। "क्रतुमध्ये समाम्नानात् क्रतुधर्मोऽयमिति प्राप्ते दृष्टत्वात् पुरुषमात्रधर्मोऽयम् न क्रतुधर्मः कृतः क्रतावश्रवणात् न हि क्रतौ वेमनडुहमांसभोजनस्य प्राप्तिः वा निषिध्येत यतो दीक्षितस्य यद्व्रतता विहिता तन्निवृत्त्यनन्तरं ऋषिःशेषमश्च भक्षः यतो निषेधस्याश्रवणात् पुरुषमात्रधर्म एवायमिति" कर्कः

पुरुषनाय पु० पुरुषान् नयति णच् उप०स०। १नरपाले २सनापतौ च शान्दो० ६।८।२।

पुरुषपुण्डरीक पु० पुरुषः पुण्डरीकः व्याघ्रभेद इव उपमितस०। १मनुष्यश्रेष्ठे २जिनराजभेदे च हेमच०।

पुरुषमेध पु० पुरुषेण परमपुरुषेण इष्टो मेधः, पुरुषा नरजातीया मिध्यन्ते हिंस्यन्तेऽत्र वा मिध-आधारे घञ्। स्वनामख्याते यज्ञभेदे तद्वृत्तं शत०ब्रा०१३।६।१।१। "पुरुषो ह नारायणोऽकामयत। अतितिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वातिष्ठत् सर्वाणि भूतानीदं सर्वमभवत् अतितिष्ठति सर्वाणि भूतानीदं सर्वं भवति य एवं विद्वान् पुरुषमेधेन यजते यो वैतदेवं वेद"। यजु० ३० अ० व्याख्यायाञ्च तत्कालाद्युक्तं यथा "कत उत्तरं पुरुषमेधो व्याख्यायते "नारायणः पुरुषोऽपश्यत्। आत्मपरान्यघोरातङ्काकामयोः पुरुषमेधसंज्ञको यज्ञो भवति। सर्वभूतान्यतिक्रम्य स्थानमतिष्ठा। चैत्रशुक्लदशम्यामारम्भः। अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्चसुत्या इति चत्वारिंशद्दिनैः सिध्यति अत्र यूपैकादशिनी भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपं सम्भवे वा यूपे यथेच्छं नियोजनम्। आध्वर्यवेण बलदुग्धहीतेन "देव सवितरिति" प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति" वेददी०। तत्र चाध्याये चतुर्थ्यन्तेन देवताभेदा द्वितीयान्तेन पशुभेदा उक्ताः।

पुरुषवाच् स्त्री पुरुषस्येव वाक् यस्याः। शारिकायां यजु० २४।२६। वेददी०।

पुरुषवाह पु॰ पुरुषेण नरेण वह्यते वह-कर्मणि घञ्। नरवाहने १शुभेदे। पुरुषमादिपुरुषं वहति-वह-अच् उप॰स॰। २गरुडे। भाग॰ ६।२४ २९ श्लो॰।

पुरुषवाहम् अव्य॰ पुरुष+वह-खश्। पुरुषकर्मके वहते पुरुषवाहं वहति पुरुषं वहतीत्यर्थः अवादि॰ अव्ययीभावप्रबोधः।

पुरुषविध त्रि॰पुरुषस्येव विधा यस्य। पुरुषप्रकारे त्रि॰ ७।६

पुरुषव्याघ्र पु॰ पुरुषः व्याघ्र इव उपमितस॰। श्रेष्ठपुरुषे एवं पुरुषपुङ्गवादयोऽपि व्याघ्रादित्वात् उपमितस॰। नरश्रेष्ठे "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" अमरः। व्याघ्रादितुल्यत्वेन नरस्य प्रशंसनात् श्रेष्ठत्वं गम्यते।

पुरुषसिंह पु॰ उपमितस॰। १पुरुषश्रेष्ठे अमरः। २जिनराजभेदे हेमच॰।

पुरुषसूक्त न॰ षष्ठपुरुषप्रतिपादकम् सूक्तम्। ऋ॰ १०।९०पठिते सहस्रशीर्षेत्यादिके षोडशर्चात्मके सूक्तभेदे।

पुरुषांशक पु॰ ६त॰स्वार्थे क। १पुरुषांशभेदे २तत्प्रतिपादके ग्रन्थे च। ततः शाभवा॰ तद्वेत्त्यधीते वेत्त्यर्थे छन्दसि घिनि। पौरुषांशकिन् तदध्येतरि तद्वेत्तरि च त्रि॰ व॰ व॰।

पुरुषाद पु॰ पुरुषमत्ति अद-क्विप्। राक्षसे।

पुरुषाद पु॰स्त्री पुरुषमत्ति अद-अच् उप॰स॰। १राक्षसे स्त्रियां जातित्वात् ङीष्। २मध्यदेशभेदे ह॰सं॰१४अ॰ दण्डम्। [वाद्योवस्त्र। २राक्षसे च।

पुरुषाद्य पु॰ पुरुषेणाद्यः। १विष्णौ २जिनभेदे। पुरुषो नर

पुरुषायण त्रि॰ पुरुष आत्मा अयनं प्रतिष्ठा यस्य पूर्वप॰ अत्वम्। आत्मप्रतिष्ठे प्राणादौ। "षोडश कलाः पुरुषायणाः पुरुष प्राणास्तं गच्छन्ति" प्रश्नोप॰६।५। "षोडश कलाः प्राणाद्या उक्ताः कलाः पुरुषायणा नदीनामिव समुद्रः पुरुषोऽयनमात्मभावगमनं यासां कलानां ताः पुरुषायणाः पुरुषं प्राप्य पुरुषात्मभावमुपगम्य यथैयासां तं गच्छन्ति" आत्मम्। [रघुः १।६२।

पुरुषायुष न॰ ६त॰ अत्समा॰। पुरुषस्यायुःकाले

पुरुषार्थ पु॰ ६त॰। १धर्मार्थकाममोक्षरूपेषु पुरुषस्य इष्टेषु "धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः" अग्निपु॰। वैष्णवमते भक्तिरपि पुरुषेष्टत्वात् पुरुषार्थः। २पुरुषप्रयोजनमात्रे च कर्मधा॰ २२८५ पृष्ठादौ दृश्यम्। ४सांख्यमते पुरुषाय दृश्ये दृष्टे भोगेऽपवर्गे च।

पुरुषाशिन् पु॰ पुरुषमश्नाति अश-णिनि ६त॰। अट्टहासे राक्षसे राजनि॰ स्त्रियां ङीप्।

पुरुषास्थिमालिन् पु॰ पुरुषस्यास्थिमाला यास्तस्य इनि। महादेवे हेम॰।

पुरुषोत्तम पु॰ पुरुषेषु उत्तमः। नारायणे "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" गीता। अत्र समासादिविवेकः शब्दकल्पद्रुमे २६२४ पृ॰ द्रष्टव्यः।

पुरुष्य त्रि॰ पुरुषाय हितं यत्। पुरुषहिते ऋ॰ ७।२९।४

पुरुहू त्रि॰ पुरु पुरुत्वं हन्ति गच्छति हन-गतौ ड। प्रचुर अमरः। हन-दा॰ हु अमरे पुरुहू इति पाठान्तरं तत्रार्थे क्षीरस्वामी।

पुरुहूत पु॰ पुरुषि प्रचुराणि हूतानि नामान्यस्य पुरुदैत्यभेदो हूतो युद्धार्थं येन वा। इन्द्रे अमरः।

पुरुहूति स्त्री दाक्षायण्यां १पुरवो हूतयो नामान्यस्य। २विष्णौ पु॰ भाग॰ ६।८।२९।

पुरुहोत्र पु॰ अजमीढपुत्रभेदे भाग॰ ९।२१।१।

पुरूद्वह पु॰ पुरून् पौरवरूपान् तद्भारसहदहति उद्+वह। १पौरवंशस्थरूपभेदे २द्वादशमन्वन्तरे रुद्रसावर्णमनोः पुत्रभेदे च मार्कपु॰ ९४ अ॰।

पुरूरवस् पु॰ पुरु रौति रु-असि दीर्घः सोमवंशे बुधस्य पुत्रे १राजभेदे तज्जन्मकथा यथा

"इडोवाच। मित्रावरुणयोरंशे जाताऽस्मि वदतां वर!। तयोः सकाशं यास्यामि न मां धर्मो हतोऽवधीत्। दैवसङ्गा मतं देवं मित्रावरुणयोरिला। मत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत्। अंशेऽस्मित् तनयोर्जातः देवौ किं करवाणि वाम्। मत्तुना चाहसङ्गा वै अतुगच्छस्व मामिति। तां तथा वादिनीं साध्वीमिलां धर्मपरायणाम्। मित्रश्च वरुणश्चोभावूचतुर्यन्निबोध तत्। अनेन तव धर्मेण मन्त्रेण दमेन च। सत्येन चैव शुभोणि! प्रीतौ स्वो वरवर्णिनि!। आवयोस्तं महाभागे! ख्यातिं कन्येति यास्यसि। मनोर्वंशकरः पुत्रस्तवेव च भविष्यति। सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने!। जगत्प्रियो धर्मशीलो मनोर्वंशविवर्द्धनः। निवृत्ता सा तु तच्छ्रुत्वा मध्यमी पितृरन्तिकम्। बुधेनान्तरमासाद्य मैथुनायोपगन्तिता। सोमपुत्राद्बुधाद्राजन्! तस्या जज्ञे पुरूरवाः। जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता" हरिवं॰१०अ॰। २विश्वदेवभेदे जटा॰।

च च पार्वणे वजनीयदेवः । "पुरुरवामाद्देवाच पार्वणे सप्तदाहुतौ" आश्वत० कल्पसूत्रिः ।

पुरुवसु त्रि० पुरु प्रचुरं वसु धनं यस्य वेदे दीर्घः । बहुधने अ० १।८१।८ । [अमरः । २प्रधाने च हेमच०

पुरोग त्रि० पुरोऽग्रे गच्छति गम-ड । १अग्रगामिनि

पुरोगति पु० पुरोऽग्रे गतिरस्य । १कुक्कुरे धरणिः । २पुरोगन्तरि त्रि० ।

पुरोगम त्रि०पुरो गच्छति गम-खच् । पुरोगन्तरि अ०६।८५।८

पुरोग्निः पु० पुरोऽग्रे अङ्गति अङ्ग-नि त्रि० । अग्रगमे यजु० १७।६६ ।

पुरोचन पु० जतुगेहे पाण्डवानां दाहार्थं निर्मोजिते दुर्योधनभिन्नभेदे तत्कथा भा० आ० ६१ अ० द्रष्टव्या ।

पुरोजन्मन् त्रि० पुरोऽग्रे जन्म यस्य । १अग्रजन्मनि २अग्रजन्मनि स्त्री वा ङीप् ।

पुरोटि पु० पुरोऽटति+अट-इन् । पत्रशाके त्रिका० ।

पुरोडाश(श) पु०पुरोदाश्यते दाश-दाने कर्मणि क्विप्, षत्वं वा दस्य डः । हविषि यज्ञियद्रव्ये । पदमे अन् । पुरोडा इत्येव । पुरोडाशसङ्घचरितो मन्त्रः अन् । अदन्तः २पुरोडाशसङ्घचरिते मन्त्रे । तस्य व्याख्यानो ग्रन्थः ठन् । पुरोडाशिक तद्व्याख्यातरि त्रि० । अदन्तः ३यवचूर्णमिश्रितरोटिकाभेदे ४कृतशेषे ५पिष्टकधूमस्यां च मेदि० ।६सोमरसे हेमच० ।

पुरोडाशीय त्रि० पुरोडाशाय हितं छ । पुरोडाशहिते यवतण्डुलादौ यज्ञे यत् । पुरोडाशस्य तत्रार्थे त्रि० ।

पुरोद्भवा स्त्री पुरे उद्भवति उद्+भू-अच् । १कन्यामेदायां रत्नमाला । २नगरभवे त्रि० । [पुरोहिते अमरः ।

पुरोधस् पु० पुरोऽग्रे धीयते धा-कर्मणि असि किच्च ।

पुरोधा स्त्री पुरस्+धा-अङ्ग० भावे क्विप् । पौरहित्ये "एतामेव पुरोधामाश्रय कुर्यात्" यजु भी० २।१६।४

पुरोऽनुवाक्या स्त्री पुरोऽग्रेऽनुवाक्या । यज्ञभेदे यजु०२१।१२

पुरोभागिन् त्रि०पुरः पूर्वं भजते भज-णिनुच् । १सुखत्यागेन दोषनाशप्राप्तिषि । २अग्रभागवति त्रि० । कर्त्तरि घञ् । पुरोभाग तत्रार्थे तस्य भावः ष्यञ् । पौरोभाग्य दोषदर्शने दुष्टत्वे च । [पूर्वदिग्भवे वायौ ।

पुरोमारुत पु० पूर्वो मारुतः पूर्वपदादेर्वा पुर् आदेशः ।

पुरोयावन् त्रि० या-वनिप् ओत० । पुरोगते भा० ५।६५ ।

पुरोरवस् पु० पुरूरवस्+पृषो० । पुरूरवसि भा०९१ अ० ।

पुरोरुच् स्त्री पुरोऽग्रे रोचते रुच-क्विप् । १कन्यामेदे यजु० २०।३६ । "वायुरग्रेऽग्ना यज्ञप्रीतिरिति यज्ञानां पुरोरुचो तस्मात्तस्या उपरिष्टाद् रुच रुचं प्रयेत्" आ० श्रौ० ५।१०।४।"एताः यज्ञ पुरोरुचो नाम ऋचः"भारा०मन्त्रिपर्वणि अन्यापि ऋग् व्रत०ब्रा०५।४।४।२०आ०श्रौ०, यजु०७।१६ मन्त्रे च तदन्यापि ऋक् तत्संज्ञा बोध्या ।

पुरोवात पु० पूर्वदिक्कः वातः । पौरस्त्यवायौ कात्या०श्रौ० ४।५।१८। "वापयति वाययति वा मां पुरोवातः" द्वि० श्रौ० । रघुः १७।१८ श्लो० ।

पुरोहित पु० पुरो धीयतेऽसौ धा-क्त । देवतादौ यज्ञे कार्यं १पुरोधसि तद्गुणं दर्शयितुमाह यथा "पुरोहितो हितो वेदश्रुतिज्ञः कुलवान् शुचिः । ब्रह्मण्यो विनयाचारः प्रतिकर्त्ताऽऽपदाकुलः" । "वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः । आशीर्वादवचोयुक्त एष राजपुरोहितः" चाणक्यः । "तस्मात् धर्मप्रधानाय वेदधर्मविदीप्सितः । ब्राह्मणो दुष्यवान् कश्चित् पुरोधाः प्रतिदृश्यताम् । क्षत्रियेणाभिजातेन पृथिवी जेतुमिच्छता । पूर्वं पुरोहितः कार्यः पार्थ ! राज्याभिवृद्धये । मन्त्री जितेन्द्रियो राज्ञा ब्रह्मा कार्यो पुरःसरः" भा०आ०१७१अ०। भा०आ०७२ अ० "राज्ञा पुरोहितः कार्यो भवेदुविद्यासु बहुश्रुतः । उभौ यमौ धर्मार्थावप्रमेयावनन्तरम् । धर्मात्मा मन्त्रविद्येषां राज्ञां राजन् ! पुरोहितः । राजा चैव सुखो येषां कुमन्त्रं तेषु वर्जतः । उभौ प्रजा वर्द्धयतो देवान् सर्वान् सुतान् पितॄन् । सर्वेषामेव स्थितो धर्मे श्रद्धेयो सुतपस्विनौ । परस्परस्य सुहृदौ विहितौ सर्वचेतसौ । ब्रह्मक्षत्रस्य सम्भावात् प्रजा सुखमवाप्नुयात् । विमानमात् तयोरेव प्रजा नश्येद् दुरेव हि । ब्रह्म बलं च सर्वेषां वर्णानां सूयतेऽन्यते" इत्युपक्रमे "राज्ञां पुरोहिताधीनः विजयादिः तत्रोक्तो द्रष्टव्यः । अग्निपु० "मन्त्रान् दण्डनीतां च कुशलः स्यात् पुरोहितः" "अथर्ववेदविहितं कुर्यात्तत्राभिचारिकम्" । "कार्यं अङ्गमयुतं पाठनमिश्रयजितेन्द्रियम् । न क्षुद्रं व्याधितं वापि रूपः कुर्यात् पुरोहितम्" वाचिकापु० तदीयदोषा उक्ताः । २अग्रचारिते त्रि० । पुरोहितस्य धर्मः कर्मिका० अन् । ३पुरोहितकर्मणि ।

पुरोहितादि पु०"पुरोहितादिभ्यो वक्"पा०वक्प्रत्ययनिमित्ते वक्तव्ये च च यथः पा०म०भा०उक्तो यथा "पुरोहित (राजाऽर्थे)पालित पिष्टक सुहित वाहमन्द खरिउत्र वर्मित वर्मित धर्मिक धिलिक सूतिक भूतिक बिलक

अञ्जलिक कर्णिक पुलिक अविक दलिक पर्णिक पथिक चर्मिक प्रतिक वारधि आलिक स्फुटिक संरक्ष स्फुटक नालिक अजानिक शाकर नागर चूडिक"। पुरोहितस्य भावः कर्म वा यक्। पौरहित्य तद्भावे तत्कर्मणि च न०

पुरोहितिका स्त्री पुरोहितस्य पत्नी ङीष् पुरोहिती ततः स्वार्थे क अतुकम्पायां कन् वा। अनुकम्पित पुरोहित-पत्न्याम्। ततः शिवा० अपत्ये अण् न स्त्रीभ्यो ढक्। पौरोहितिक तदपत्ये पुंस्त्री। [ऽवलिम्बन्ये

पुर्व् निवासे भ्वा०प०सक०सेट्। पूर्वति अपूर्वीत् ओष्ठ्योपधो-

पुर्व् पूरणे भ्वा० प० सक० सेट्। पूर्वति अपूर्वीत् अन्तःस्थो-पधोऽयम्।

पुल् महत्त्वे भ्वा० प० सक० सेट्। पोलति ते अपोलीत्। पुपोल अयं ज्वलादिरपि तेन पुलयति पोलयतीति भेदः

पुल् उत्तौ चु० उभ०सक० सेट्। पोलयति ते अपूपुलत् त

पुल पु० पुल-क। १पुलके २विपुले त्रि० मेदि०।

पुलक न० पुल+संज्ञायां कन्। १कञ्चुके २पर्वतीयवल्लिकाभेदे राजनि०।२रोगाण्डे पु० त्रिका०। ४देहाद् बहिर्भूतकीटभेदे हेमच०। ५प्रस्तरभेदे तद्भक्षणादि गारुडे ७७ अ० उक्तं यथा"पुलकेषु पर्वतवरेषु च निम्नगासु स्थानान्तरेषु च तथोत्तरदेशगर्त्ते। संस्थापिताश्च नखरा भुजगैः प्रकाशं संपूज्य दानमपरिं प्रणिते प्रदेशे। दाधार्थवामदवमेकत कालगाद्रौ मुक्ताङ्गनाचौद्रुकाश्वकाश्वाः। गन्धर्व-वज्रिकदलीवदयामभाग्या, एते प्रस्तराः पुलकाः प्रकृताः। अङ्गाङ्गभङ्गार्थविचित्रभङ्गा सूत्रैकरेखाः परमाः पवित्राः। भक्तस्यवृत्ता बहुभक्तिचित्रा दक्षिप्रदाश्चे पुलका भवन्ति। आकल्पराजभङ्गगाद्रदोषभङ्गैर्दोषैः शमांदरुधिरार्द्रसुखै-रुपेताः। यद्वत्तुमहाभ्यु विदुषा परिपर्जनीया मूलं पवस्य लक्षितञ्च भवति पच"।६पक्षिदोषभेदे ७हरिताले ८वज्रपर्य-भेदे ९गलकाकपिच्छे मेदि०१०अप्सरोऽस्यां ११गन्धर्वे च हेम०

पुलकिन् त्रि० पुलक+मत्वर्थे इनि। १रोमाञ्चयुते स्त्रियां ङीप्। २धाराकदम्बे पु०राजनि०। [सुनौ उज्ज्व०।

पुलस्ति पु० पुलं महत्त्वमस्ते मन्यते अस-ति मक०। पुलस्त्ये

पुलस्त्य पु० सप्तर्षिभेदे स च ब्रह्मणः वर्णतो जातः तस्य भार्या कर्दमकन्या हविर्भूः। तस्य पुत्रः। अगस्त्यः विश्रवाश्च तत्कथा भाग० ३।१२।०।

पुलह पु० सप्तर्षिभेदे स च ब्रह्मणोनाभितो जातः तस्य पत्नी कर्दमकन्या गतिः कर्मभेदः यथीयान् बर्हिष्मुच तत् पुत्राः भाग० ३।१।२१।

पुलाक पु०पुल+कलाका०नि०।१संक्षेपे २शस्यशून्ये (आगड़ा) धान्ये ३मल्लसिक्थके भल्लपुत्रिकायां ४क्षिप्रे च अमरः।

पुलाकिन् पु० पुल-बा० काकिनि। दृष्टे हेमच०।

पुलालिका स्त्री सुश्रुतोक्ते नाराचपटंगे विशेषपुत्रभेदे "गोफण कण्डूद पुलालिका च धूमायनं चैव नराचपटंगे"।

पुलायित न० पुल+क्यच्-क्त। अन्यगतिभेदे लिका०। अर्द्ध-पुलायितशब्दे २३५ पृ० दृश्यम्। [अमरः।

पुलिन न० पुल-इनन् किच्च। तोयादुत्थिते तटे (चड़ा)।

पुलिनवती स्त्री पुलिन+मत्वर्थे मतुप् मस्य वः अजिरा० न पूर्वपददीर्घः ङीप्। नद्याम्।

पुलिन्द पु०स्त्री पुल-किन्दच्।१चाण्डालभेदे स्त्रियां जाति-त्वात् ङीष्। तदुत्पत्तिकथा वामनपु०७३अ० उक्ता ततः संक्षेपः। अदितिगर्भनिक्षिप्तेन जातस्य चरुत्यागपक्ष यज्ञस्य तपश्चर्यानन्तरं पुलिन्दाः देहात् जाताः ते च किराताद्रिकाञ्चनगिर्यौरन्तरालवासिनः। भा० आ०१७५ अ० तु वसिष्ठसेनोऽफेनतस्तेभ्यस्तत्पत्तिरुक्ता। २तद्देशे देशभेदे भा० भी० ९ अ०।

पुलिश पु० ज्योतिषसिद्धान्तकारके ऋषिभेदे तस्येदमण्। पौलिश तत्कृतसिद्धान्ते तत्र गणिते पौलिशरोमक-वासिष्ठसौरपैतामहेषु पञ्चसु तेषु सिद्धान्तेषु" इ०सं०२अ०।

पुलुकाम पु० पुरु-कामयते कामि-अण् उप० स० रस्य सः। बहुकामे निरु० ६।४ ऋ०१७९।५।

पुलोमन् पु० दैत्यभेदे। हरिवं० ६अ०। स च इन्द्रस्य श्वशुरः। "पुलोमानं जघानाशौ जामाता वज्र यत-क्रतुः" हरिवं २० अ०। तेन पुलोमजित् पुलोमहन् पुलोमारिप्रभृतयः इन्द्रे। २राक्षसभेदे भा० आ० ६अ०। अवनशब्दे २९७१ पृ० दृश्यम्। [पत्न्याम् अमरः।

पुलोमजा स्त्री पुलोमनो जायते जन-ड ६त०। शच्यां इन्द्र-

पुलोमा स्त्री अद्भुताख्यायाम् अवनमातरि २९७१ पृ० दृश्यम्

पुल्कस पु०स्त्री० ब्राह्मण्यात् अनियायां जाते सङ्कीर्णवर्णभेदे मनु०आ०१३।७।१।२२ भाष्ये दृश्यम्। स्त्रियां जातित्वात् ङीष्।

पुल्य त्रि० पुल+चतुरर्थे वत्वादि० यः। पुलनिर्वृत्तादौ।

पुल्ल त्रि० फुल्ल+पृषो०। विकसिते शब्दार्थकल्पतरुः।

पुल्लघ पु० पुरु बहु अत्ति अद-अच्-पृषो० रस्य लः। बहु-भक्षके मृगभेदे ऋ० १०।८६।२२। स्वाङ्गचमधिकृत्य "क स पुल्लघो मृगः क स वह्वादो मृगः" निरु०१२।२। उक्तम्

पुष् पुष्टौ दिवा० पर०सक०अनिट्। पुष्यति बुद्धिं अपुषत्

पुपोष । "स्वे पुषः" भा० अस्य ब्रह्मादिषु यथापिध्य-
ङ्पयोगात् स्वपोषं पुष्यति आत्मानं पुष्यतीत्यर्थः ।
पुष पुष्टौ अक०पोषणे सक०अ०प०सेट् । पुष्णाति अपोषीत्
पुष पुष्टौ भ्वा०पर०अक०सेट् । पोषति अपोषीत् ।
पुष पुष्टौ चु०उभ०सक०सेट् । पोषयति ते अपूपुषत् त ।
पुषा स्त्री पुष्णाति पुष-क टाप् । याज्ञवीहृदे मद्दृष० ।
पुष्क न० पुष-बा० भावे क किच्च आद्य अस्य नेत्वम् । १पुष्टौ
ततः सिद्धा०मत्वर्थे लच् । पुष्कल तद्युते त्रि० ।
पुष्कर न० पुष्कं पुष्टिं राति रा-क । १हस्तिशुण्डाग्रे
२पद्मभाण्डसुखे ३जले ४आकाशे ५व्यसिफले ६पद्मे
७तीर्थभेदे ८कुशद्वीपस्थौ क्षमरः । ९काण्डे १०द्वीपभेदे च
मेदि० । ११रोगभेदे १२नागभेदे १३वारणसङ्घे नलराज
भ्रातरि १४ऋषभेदे १५ वरुणपुत्रे पुष्करद्वीपस्था १६राजभेदे च
इ०मेदि० । १७मेघाधिपभेदे १८त्रिपुष्करयोगे त्रिपुष्क-
शब्दे २२२१ पृ० दृश्यम् । १९अन्तरभेदे हरिवं०
२०विष्णौ भा० आ० ४२ अ० । तीर्थभेदश्च त्रिपुष्करशब्दे
दृश्यः । २१ब्रह्मकृतसरोवरभेदे न० । "पितामहसरः
पुण्यं पुष्करं नाम नामतः" भा० व० ८५ अ० ।
२।पुष्करद्वीपस्थे पर्वतभेदे पु० "पुष्करो नाम
पर्वतो मणिवाहुमान्" भा०भी० १२अ० । १३पुष्कर-
द्वीपाधिपशब्दे "द्वीपे शुभे पुष्कलनेरुपेते ऽवाप राजा
सह पुष्कराख्यः । तेनैव नाम्नास्य तु पुष्करोऽपि सदोच्यते
देवगणैः सुसिद्धैः" अग्निपु० । तस्य पुष्कर (पद्म)
तुल्यवानत्वात् वा तथात्वम् "तेनैव यागेन तथाम्बुजेन
बभूव नाम्ना तमथाह्वयन्ति" अग्निपु० ।
१७मेघाधिपभेदानयनस्य ज्योत० उक्तं यथा
"त्रिवृते शाकवर्षे तु चतुर्भिः मेलिते क्रमात् । आवर्त्तं
विद्धि संवर्त्तं पुष्करं द्रोणमव्युदम्" तस्य फलम् "पुष्करे
पुष्करं वारि शङ्खहीना वसुन्धरा । विपद्रोपहता
लोकाः पुष्करे जलदाधिपे" । १०द्वीपभेदश्च "अत एव जाता
सप्त भुवो द्वीपाः जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कर-
संज्ञाः" भाग०५।१।३३ । विष्णुपु० तस्य प्रमाणाद्युक्तं
यथा "शाकद्वीपप्रमाणेन जलधेनैव वेष्टितः । क्षीरोदधिः
सर्वतो ब्रह्मन् ! पुष्कराख्येन वेष्टितः । द्वीपेन शाकद्वीपाच्च
द्विगुणेन समन्ततः । तद्द्वीपापिप्रतीकेन शङ्खादीनोऽ-
भवन् सुतः । धातकिश्च महावीर्यौ धातकीखण्डमण्डितम् । एकश्चात्र
महाभाग ! प्रख्यातो वर्षपर्वतः । मानसोत्तरसंज्ञो वै
मध्यतो वलयाकृतिः । योजनानां सहस्राणि ऊर्द्ध्वं
पञ्चाशदुच्छ्रितः । तावदेव च विस्तीर्णः सर्वतः परि-
मण्डलः । पुष्करद्वीपवलयं मध्ये च विभजन्निव ।
स्थितोऽसौ पर्वतस्तेन जातं तद्वर्षकद्वयम् । वलयाकार-
मेकैकं तद्वर्षं तथा गिरिः । दशवर्षसहस्राणि तत्र
जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेष
विवर्जिताः । अमानोन्मानौ न तेषान्तु न वध्यवधकौ
द्विज ।। नैवाप्रियमथाप्रं रोगो दोषो लोभादिको न च ।
महावीर्यं महावर्षं धातकिसंज्ञकन्ततः । मानसोत्तर
शैलस्य देवदेवादिवेष्टितम् । मध्यान्तरे च तत्र स्थो द्वीपे
पुष्करसंज्ञिते । न तत्र शैलनद्यो वा द्वीपे वर्षद्वयान्विते ।
तस्यैवेशास्तु मनुजा देवैस्तत्रैकरूपिणः । वर्णाश्रमाचार-
हीनं धर्माचरणवर्जितम् । त्रयीवार्त्तादण्डनीति-
शुश्रूषारहितञ्च तत् । वर्षद्वयञ्च मैत्रेय ! भौमः स्वर्गोऽव-
स्तमः । सर्वत्र सुखदः कालो जरारोगादिवर्जितः ।
पुष्करे धातकीखण्डे महावीर्ये च वै सुने ! ।
न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् । तस्मिन्निव
इति ब्रह्मा पूज्यमानः सुरासुरैः । सादुदन्वेनोदधिना
पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्तारान् मण्ड-
लात्मना" ।१४मनस्वपुत्रातरि "पुष्कर ! त्वं हि मे भ्राता
सञ्जीव शरदः शतम् । एवं नमः सान्त्वयित्वा भ्रातरं
सत्यविक्रमः । स्वपुरं प्रेषयामास परिष्वज्य पुनः पुनः ।
स्वान्वितो नैषधेनैव पुष्करः प्रत्युवाच तम्" भा०व०७८
अ० । भगवतः २२पद्मरूपेण प्रादुर्भावे हरिवं०२०२अ० ।
पुष्करकर्णिका स्त्री पुष्करं पद्ममिव कर्णः पुत्रं यस्याः
कप् कापि अत इत्वम् । स्वल्पपद्मिन्यां राजनि० ।
पुष्करचूड़ पु० लोकालोकपर्वतोपरिस्थे दिग्गजभेदे भाग०
५।२० । [गौरा० ङीष् । स्वल्पपद्मिन्यां राजनि० ।
पुष्करजाड़ी स्त्री पुष्करं जाड्यति नाशि+अच् उप०स०
पुष्करनाभ पु०पुष्करं पद्मं नाभौ यस्य अच्समा० । पद्मनाभे
विष्णौ पु० ।
पुष्करप्रादुर्भावः पु०पुष्करस्याकारः प्रादुर्भावः । भगवतः पद्मा-
कारेण प्रादुर्भावे तद्विवरणम् ।
"अथ योगविदां श्रेष्ठं सर्वभूतमनोमयम् । स्रष्टारं
सर्वभूतानां ब्रह्माणं सर्वतोमुखम् । तस्मिन् हिरण्य-
मये पद्मे मण्डलोत्तमविस्तृते । सर्वतेजोगुणमये
वार्त्तिकैश्चयवेष्टिते । तत्र पद्मं पुराणज्ञाः पृथिवीरुह-
सम्मतम् । मारावस्थात् सहस्रपद्मं प्रवदन्ति पुरातनाः ।

सा तु पद्मात्मा देवी तां पृथ्वीं परिभवते। ये तु गर्भाङ्कुराः सारास्तान् दिव्यान् पर्वतान् विदुः। हिमवन्तश्च मेरुश्च नीलं निषधमेव च। कैलासं क्रौञ्चवन्तश्च तथाऽद्रि गन्धमादनम्। पुष्पं त्रिशिखरं चैव कालं मन्दरमेव च। उदयश्च गिरिश्रेष्ठं विन्ध्यश्चास्तश्च पर्वतम्। एते देवगणानाञ्च सिद्धानाञ्च महात्मनाम्। आश्रयाः सर्वभूतानां पुण्याः कामयुजोऽद्रयः। एतेषामन्तरो देशो जम्बूद्वीप इति स्मृतः। जम्बुद्वीपस्य संख्यानं याज्ञिका यत्र कुर्वते। गर्भाद्यतः क्षरेत् तोयं देवामृतरसोपमम्। दिव्यतीर्थमयतापाङ्गुरुता दिव्याः सरितः स्मृताः। आन्येतानि तु पद्मस्य केसराणि प्रचक्षते। असंख्याता पृथिव्यान्तु सर्वे ते धातुपर्वताः। यानि पद्मस्य पत्राणि भूरीणि तु नराधिप!। ते दुर्गमाः शैलचिता म्लेच्छदेशा विकल्पिताः। यान्यधः पद्मपत्राणि निवासार्थं विभागशः। दैत्यानामुरगाणाञ्च पातालं तन्महात्मनाम्। तेषामधोगतं यत्तदुदकेनाभिसंश्रितम्। महापातककर्माणो मज्जन्ते यत्र मानवाः। पद्मस्यान्ते पुरं यत्तदैकार्णवजलं महत्। लोकास्ते दिक्षु सङ्घाताश्चत्वारो जलसागराः। एष नारायणस्याद्यो महापुष्करसञ्ज्ञकः। प्राङ्मुखोऽव्ययसंज्ञात्मा पुष्करसंज्ञितः। एतस्मात् कारणात् तज्ज्ञैः पुराणैः परमर्षिभिः। याज्ञिकैर्वेदवादैर्यत्ते पद्मविधिः स्मृतः। एवं भगवता पद्मविधया परया विधिः। पर्वतानां नदीनाञ्च देशानाञ्च विनिर्मितः। विभुस्तथा चाप्रतिमप्रभावः प्रभाकरो योगिवरोऽनिरुद्धः। स्वयं स्वयम्भूः शयनेऽम्बुजस्तदा जगन्मयं पद्मनिधिं महार्णवे" हरिवं० २०२ अ०।

पुष्करमालिन् त्रि० पुष्करमाला+अस्त्यस्य इनि। १पद्ममालायुक्ते स्त्रियां ङीप्। २शिशुमारकन्याभेदभर्त्तरि पु० भागवत० २।१०।

पुष्करमूल न० पुष्करमिव मूलमस्य। १कुष्ठौषधे राजनि०। ६त०। २पद्ममूले च स्वार्थे क०। तत्रार्थे त्रिका०।

पुष्करवी(बी)ज न० ६त०। पद्मबीजे।

पुष्करशारिका स्त्री सङ्घचारिकाभेदे सुवे सुश्रुतः।

पुष्करशिफा पुष्करस्य शिफा जटेव। पुष्करमूले राजनि०। पुष्करजटायाम्।

पुष्करसद् त्रि० पुष्करे सीदति सद्-क्विप्। १पद्मशायिनि। २गोत्रप्रवर्त्तकर्षिभेदे पु० तस्य गोत्रापत्यम् शङ्खा० श्रौ० अनुक्रमणि० द्विपदर्षिः पौष्करसादि तदपत्ये इन्दी। ततो यूनि फञ् पौष्करसादायन तदीये यूनि व्यपत्ये बह्वृचे तु यञो वक्तव्य० लुक्।

पुष्करसागर पु० पुष्करं सागर इव। १कुष्ठौषधे मेदिनी० प्र०।

पुष्करसाद पु० पुष्करं पद्मं सीदति भक्षयति धातुनामनेकार्थत्वात् सद-भक्षणे अण् उपस०। कमलभक्षे पक्षिभेदे यजु० २४ २।

पुष्करस्थपति पु० महादेवे भा० आनु० १७ अ०।

पुष्करस्रज् स्त्री ६त०। १पद्ममालायाम्। पुष्करमयी स्रज् यस्य। २पुष्करमालायुक्ते त्रि० २अश्विनीकुमारयोः पु० द्वि० व०। यजु० २ ३१।

पुष्कराक्ष पु० पुष्करमिवाक्षि यस्य बहुव्री०। १पद्मतुल्यनेत्रे स्त्रियां ङीष्। २विष्णौ पु० "पुष्कराक्षो महाक्षः" "पुष्कराक्षो महामनाः" इति च विष्णुस०। "पुष्करं हृदयपुण्डरीकमश्नोति व्याप्नोति अक्ष-उपस० अण्। हृदयपुण्डरीकव्यापितया तस्य तथात्वम् व्युत्पत्तिभेदाच्च नामद्वयम्।

पुष्कराख्य पु० पुष्करस्य पद्मस्याख्या आख्या यस्य। पद्मतुल्यनामके १क्षारसे अमरः। पुष्कराह्वये २कुष्ठौषधे राजनि०। [मूले कुष्ठौषधे मेदिनी प्र०।

पुष्कराङ्गिज न० पुष्कराङ्गिरिव जायते जन-ड। पुष्कर-

पुष्कराद्रि पु० "पुष्कराद्रिभ्यो देशे" पा० देशे गम्ये भावकर्मणोरनिप्रत्ययनिमित्ते षष्ठ्यन्ते च गणः पा० म० उक्तो यथा "पुष्कर पद्म उत्पल तमाल कुसुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष गिरीष पलाश प्रवाह हिरण्य कैरव कह्लार तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कनक पयस"

पुष्कराक्षि प० पुरवर्ष्मे गजपौत्रे नरपेदे भाग० ९।२१।१५

पुष्करावती स्त्री पुष्कराणि सन्त्यस्य मतुप् मस्य वः दीर्घः। नदीभेदे।

पुष्करावर्त्तक पु० पुष्करं जलमावर्त्तयति आ+वृत-णिच्-अण् उपस०। मेघाधिपभेदे "पुष्करावर्त्तका नाम ते मेघाः पद्मभाराः। संयोगाद्वायुनोत्क्षिप्ताः पर्वतानां महौजसाम्। कामगानां प्रहृष्टानां लोकानां शिवमिच्छताम्। पुष्करा नाम ते मेघा वृहत्तोयसरोवराः। पुष्करावर्त्तकास्तेन कारणेनेह संस्मृताः" विष्णुपु०। भीमो भीमसेनस्य उत्तरपदलोपे पुष्करोऽयम् ३०६३५ष्ठे दृश्यम्।

पुष्करार्ह पु० पुष्करस्यार्हा आर्हा यस्य। सारसपक्षे अमरः पुष्करार्हयमप्यत्र। तच्च पुष्करमूले कुष्ठौषधे न० राजनि०।

पुष्करिका स्त्री पुष्करं तदाकारोऽस्त्यस्य ठन्। शूकदोषनिमित्ते रोगभेदे "पित्तशोणितसम्भूता पिडका पिडकातिता। या पुष्करसमानाभा ज्ञेया पुष्करिकेति वा" सुश्रुतः

पुष्करिन् पु० पुष्करं शुण्डाग्रमस्त्यस्य इनि। १गजे हारा० स्त्रियां ङीप्। पुष्करादि० देशे गस्य इनि ङीप्। २स्थलकमले ३पुष्करमूले कुष्ठौषधे राजनि०। ४पद्मिन्यां ५जलाशयभेदे मेदि०। जलाशयशब्दे ३०७५ पृ० तल्लक्षणादि द्रष्टव्यम्। ६चाक्षुषमनोःपत्नीभेदे हरिवं० २अ०। ७ऋचीकमातरि भूमन्युपत्नीभेदे भा० आ० ९४ अ०। समूहार्थे इनि। ८पद्मसमूहे हेम०।

पुष्कल त्रि०पुष-कलच् किच्च आद्यकस्य नेत्वम् पुष्क+सिध्मा० लच् वा। १श्रेष्ठे अमरः २उपचिते जटा० ३बहुत्वयुक्ते च। "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" इत्युक्ते ४परिमाणे न० ५भिक्षार्थदेवे अन्नमानभेदे न०। "भिक्षामाढ्यपौषमात्रमन्नं तच्चाष्टगुणम्। पुष्कलं हलकारन्तु तच्चतुर्गुणमुच्यते" कूर्मपु०। ६असुरभेदे पु०। हरिवं० ४२अ०। ७भरतपुत्रे पु० भाग० ९ ११ ७।

पुष्क(व्य)लक पु० गन्धमृगे त्रिका० रघुः १५ ८ "सीन्निपुष्क(व्य)कोद्धतः" सि० कौ०। यमध्यपाठस्तत्रैव

पुष्कलावत पु० १उत्तरस्थे देशभेदे बृ०स०१४अ०। २भरतपुत्रपुष्कलस्य राजधान्याम् स्त्री।

पुष्ट त्रि० पुष-क्त। यस्य पोषणं कृतं तस्मिन् १कृतपोषणे अमरः। भावे क्त। २पुष्टौ न०। तत् कार्य्यतया अस्त्यस्य अच्। ३विष्णौ पु० "तुष्टः पुष्टः पुष्टिकरः" विष्णुस०।

पुष्टावत् त्रि० पुष्टं पोषणं कार्य्यत्वेनाऽस्त्यस्य मतुप् मस्य वः वेदे दीर्घः। पोषणकर्त्तरि सम्भृतवासे ऋ० ८।४५।१६

पुष्टि स्त्री पुष-भावे क्तिन्। १पोषणे अन्नादि नोपचयकरणे २वृद्धौ च मेदि०। कर्त्तरि क्तिच्। ३अश्वगन्धायां राजनि० गव्यादिषु ४मालकाभेदे ५योषिन्नीभेदे ६धर्मस्य पत्नीभेदे भा० ६६अ०। [राजनि०।

पुष्टिका स्त्री पुष्ट्रै कं जलमस्याः। जलशुक्तिकायां

पुष्टिकान्त पु० ६त०। गणाधिपे गणेशे।

पुष्टिद त्रि० पुष्टिं ददाति दा-क। १पोषणकारके २अश्वगन्धायां स्त्री राजनि०।

पुष्टिपति पु० १अग्निभेदे भा० व० २२० अ०। २सरस्वत्यां च शत०ब्रा० ११ ४ २ १६।

पुष्प विकाशे दि०पर०अक०सेट्। पुष्पति अपुष्पीत्। पुपुष्प "शरदि पुष्पन्ति सप्तच्छदाः"। कण्ड्वा०अपुष्पत्रीत्।

पुष्प न० पुष्पति पुष्प-विकाशे अच्। (फुल) ख्याते १कुसुमे २स्त्रीरजसि। भावे घञ्। १विकाशे पु० मेदि० ४कुबेरविमाने न० नेत्ररोगभेदे हेमच०। "पुष्पञ्च पत्रं च फलं तथैव यथोत्तरं ते बलवः प्रदिष्टाः तेषां तु पुष्पं कफपित्तहन्तृ फलं निहन्यात् कफमारुतौ च" सुश्रुते सामान्यतस्तस्य गुणा उक्ताः। विशेषतः पुष्पवर्गे अन्येषां गुणा तत्रोक्ताः। स्त्रीरजसि "शुक्रं दुष्टं योषितां चाङ्गनानां पुष्पोद्रेकं तस्य नाशञ्च कष्टम्। पुष्पकाले शुचिस्तस्यादपत्यार्थी स्त्रियं व्रजेत्" इति सुश्रुतः। पुष्पशब्दनिरुक्तिस्तद्गतविशेषादिकं नानातन्त्रे उक्तं यथा तत्र पुष्पशब्दव्युत्पत्तिः कुलार्णवे "पुण्यसंवर्द्धनाद्यापापौघपरिहारतः। पुष्कलार्थप्रदानाच्च पुष्पमित्यभिधीयते"। प्रपञ्चसारे "तुलसी पङ्कजे जात्यौ केतक्यौ करवीरके। शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च। उत्पलानि च नीलानि कह्लारकुमुदानि च"। विश्वसारतन्त्रे "बहूनि कुसुमानि च" इति पाठः। "मालतीं कुन्दमन्दारं नन्द्यावर्त्तादिकानि च। पलाशपाटलापद्मजयन्त्यावर्त्तकानि च। चम्पकानि मनागानि रक्तमन्दारकाणि च। अशोकोद्भवबिल्वाख्य कर्णिकारोद्भवानि च"। विश्वसारतन्त्रे शक्तिविषये विशेष उक्तो यथा "अथ देव्यर्चने वक्ष्ये पुष्पाणि शृणु पार्वति!। इत्युपक्रमे तुलसादीन्युक्त्वा "एतान्यन्यानि तन्त्रेऽस्मिन् पुष्पाणि सन्ति वै प्रिये!। अनादिशोद्भवानि स्युः सर्वकालोद्भवानि च। फलानि चैव पुष्पाणि दद्याद्देव्यै विशेषतः। अथ पुष्पं प्रवक्ष्यामि कर्मयोगे महेश्वरि! शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा। कमले करवीरे द्वे कुसुमे तुलसीद्वयम्। जातीषु मे केतकीद्वे कुमारीचम्पकोत्पलम्। कुन्दमन्दारपुन्नागपाटलानागचम्पकम्। आरग्वधं कर्णिकारं पावन्ती नवमल्लिका। मौलसिरं बकोरञ्च पलाशाशोकसर्जकाः। अपामार्गः सिन्धुवारो वायुसोकञ्च कामलम्। व्याघ्रचेलं दमनकं मरुवकं ततःपरम्। लवङ्गं लवकर्पूरं तगरञ्च लता तथा। शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम्। अन्यानि वनपुष्पाणि जलजस्थलजानि च।

गिरिजानि देशजानि नानापुष्पाण्यतःपरम्।" सारदायाम् "कमले करवीरे द्वे कुसुदे तुलसीद्वयम्। जातीद्वयं केसके द्वे कह्लारं चम्पकोत्पले। कुन्दमन्दारपुन्नागपाटलानागचम्पकम्। आरग्वधं कर्णिकारं जयन्ती नवमालिका। सौगन्धिकं सकोरण्टं पलाशाशोकमल्लिकाः। धुस्तूरं सर्जकं बिल्वमर्जुनं सुनिपुष्पकम्। अन्यान्यपि सुगन्धीनि पत्रपुष्पाणि देशिकैः। उपदिष्टानि पूजायामाददीत विचक्षणः"। योगिनीतन्त्रे ७ पटले "शृणु देवि! प्रवक्ष्यामि पुष्पाध्यायं समासतः। ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुङ्कुमैः। सितरक्तैस्तथापुष्पैर्नीलपद्मैश्च पाण्डुरैः। किंशुकैस्तगरैश्चैव जवाकनकचम्पकैः। बकुलैश्चैव मन्दारैः कुन्दपुष्पैः कुरण्टकैः। धुस्तूरकादियुक्तैश्च वन्धूकागस्त्यसम्भवैः। मदनैः सिन्धुवारैश्च दर्भाङ्कुरसुकोमलैः। मञ्जरीभिः कुशानाञ्च बिल्वपत्रैः सुकोमलैः" तत्रैव ६ पटले "तुलसीद्वे मालतीद्वे तमालामलकी तथा। पुन्नागं सुनिपुष्पञ्च मल्लिकाञ्च निवेदयेत्। करवीरस्य कुसुमैर्येऽर्चयन्ति जनार्दनम्। दर्शनात्तस्य देवेशि! नरकाग्निः प्रणश्यति"। करवीरादिमाहात्म्यं पूरश्चरणरत्नोल्लासे १० पटले "करवीरं जवा देवि! स्वयं काली न चान्यथा। तारा च अपरा चैव स्वयं त्रिपुरसुन्दरी"। तथा "करवीरजवामूले तुलसी जगन्मन्दिनि। यदि प्राणान्परित्यजेद्देवि! माहात्म्यं तस्य सुन्दरि!। वक्त्रकोटिशतेनापि जिह्वाकोटिशतेन च। वर्णितुं तस्य माहात्म्यं न शक्नोमि कदाचन"। "शुक्लं कृष्णं तथा पीतं हरितं लोहितं तथा। करवीरं कहेशानि! जवापुष्पं तथैव च। स्वयं काली महामाया स्वयं त्रिपुरसुन्दरी। अनादरं न कर्त्तव्यं कृत्वा च नरकं व्रजेत्"। दशमपटले "कृष्णापराजिता साक्षाद्भद्रकाली न संशयः। करवीरञ्च भुवना द्रोणं भुवनसुन्दरी। जवा साक्षाद्भगवती सर्वविद्यास्वरूपिणी। ये साधका जगन्मातरर्चयन्ति शिवप्रियाम्। एतैश्च कुसुमैश्चण्डि! स शिवो नात्र संशयः। येनार्चिता जगद्धात्री द्रोणकृष्णजवादिभिः। राजसूयाश्वमेधाद्यैर्वाजपेयाग्निहोत्रकैः। फलं यज्जायते चण्डि! तत् सर्वं कुसुमार्चनात्। जवाद्रोणं तथा कृष्णामालूरं करवीरकम्। साक्षाद्ब्रह्म स्वरूपञ्च महादेव्यै निवेदयेत्। श्वेतचन्दनसंयुक्तं रक्तचन्दनवेपितम्। यो दद्याद्भक्तिभावेन स विश्वेशो न संशयः"। अथ कामनाभेदे पुष्पविशेषः तत्रैव "करवीरस्य माल्यस्य सहस्राणि ददाति यः। स कामान् प्राप्य चाभीष्टान् देवीलोके महीयते। तथैव करवीरेण पद्मानां द्वे सहस्रके। महाघोरे महोत्पाते महापदि च सङ्कटे। महादुःखे महारोगे महाशोके महाभये। पूजयेत् कालिकां गौरीं भुवनां षोडशीं शिवाम्। बालां छिन्नाञ्च वगलां धूमां भीमां करालिनीम्। कमलामन्नपूर्णाञ्च दुर्गां दुःखविनाशिनीम्। सर्वविद्या जवाद्रोण करवीरैर्मनोहरैः। मालूरपत्रैः कृष्णाभिः कृष्णां संपूज्य मूतले। साधकेन्द्रो महेशानि! भवेन्मुक्तो न संशयः"। शुण्डमालायां दशमपटले "जवापुष्पैर्द्रोणपुष्पैः करवीरैर्मनोहरैः। कृष्णापराजितापुष्पैरञ्जैश्च सुनिपुष्पकैः। पूजयेत् परया भक्त्या चण्डिकां परमेश्वरीम्"। योगिनीतन्त्रमतस्यस्कन्दयोः "येऽर्चयन्ति जनाध्यक्षं करवीरैः सितासितैः। चतुर्युगानि देवेशि! प्रीतो भवति माधवः। "वकपुष्पं च जातिस्तु तथा रुद्रजटस्य च। बालपेयस्य यज्ञस्य फलं प्राप्नोति नान्यथा। सर्वेषामेव पुष्पाणां प्रवरं नीलसत्पलम्। नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति। दुर्गायै विधिवद्देवि! तस्य पुण्यफलं शृणु। वर्षकोटिसहस्राणि वर्षकोटिशतानि च। देव्या अनुचरो भूत्वा रुद्रलोके महीयते"। शुण्डमालायाम् "लक्षाणां महिषैर्मेषैरजैर्दानैर्भवैः शुभैः। पूजिता सा जगद्धात्री यद्येषा कुसुमार्चिता। माहात्म्यञ्चैव कृष्णायाः कृष्णा जानाति तत्त्वतः। तदर्द्धञ्चाप्यहं देवि! तदर्द्धं श्रीपतिः सदा। तदर्द्धमजजन्मा वै तदर्द्धं वेदसाधकः। अन्यपुष्पस्य माहात्म्यं संक्षेपादुवच्मि शङ्करि!। पृथिव्यां मण्डले स्वर्गे वैकुण्ठे कालिकापुरे। जवादिकरवीरैश्च दलैः किं किं फलं लभेत्। न जानाति जगद्धात्री को वेद पार्वतीं विना। करवीरैः श्वेतरक्तैरक्तचन्दनमिश्रितैः। पूजयेत् कृष्णाटे यस्तु स विश्वेशो भवेद्ध्रुवम्। कृष्णापराजितापुष्पैर्यस्तु देवीं प्रपूजयेत्। सोऽश्वमेधसहस्राणां फलं प्राप्य शिवां व्रजेत्। महाविपत्तौ यो दद्याज्जवां कृष्णापराजिताम्। द्रोणं वा करवीरं वा स गच्छेत् कालिकापुरम्"। तत्रैव "किञ्च पाद्यैः किञ्च वाद्यैर्नैवेद्यैः किञ्च पूजनैः। मधुदानैर्मधुपर्कैः कुम्भकैः किञ्च रेचकैः। पूरकैः किञ्च वा ध्यानैः प्राणायामैश्च किञ्च वा। किं जपैः किं तपोभिर्वा मत्स्यैर्मांसैश्च पञ्चभिः। किमन्यमन्त्रैः किं

मन्त्रैः किं यन्त्रैः किमु साधनैः। किं वेदैरागमैः किं वा
पुराणैर्मन्त्रसाधनैः। किमध्वरैर्जप्तैर्मन्त्रार्थैर्मन्त्रजी-
वनैः। किं योनिमुद्रया किं वा तीर्थैः किं ब्रह्मचा-
रिभिः। किं मातृकान्यासगणैः किं घटैः किं घटैः
घटैः। किं काकचक्षुभिः कोड्यासैः किं धर्मसाधनैः।
देवार्चिता महादेवी करवीरैर्जपादिभिः। कथापरा-
जितापुष्पैः करवीरैर्मनोहरैः। श्रीपीठेषु केतकीपुष्पै-
र्जपामालूरपत्रकैः। पूजिता यैर्भगवती तेषां किं कर्म
साधनैः"। नित्यातन्त्रे एकादशपटले "न कुलस्या
यजेत् कालीं मालतीभिर्विमुक्तिदैः। अपराजितायाः
दानेन साक्षात्तुष्टा भवेच्छिवा। कालिकायाश्च शारदा
करवीरमतिप्रियम्। जपापुष्पं महेशानि! दद्यात्न
धारयेत् क्वचित्। रक्तोत्पलेन देवेशि! कालिकां
पूजयेत् सकृत्। शतवर्षसहस्राणां पूजायाः फलमा-
प्नुयात्"। तथा "दूर्वापि वर्षसंयुक्ता देवी तुष्टिकरी
भवेत्"। पुरश्चर्यार्णवे "मञ्जरीं सहकारस्य
केशवाय निवेदयेत्। भृङ्गराजं गिरीशस्य दाडिमं कार्त्तिकं
तथा। नीलकण्ठं मयूरस्य योन्यागारस्य वर्जयेत्।
पुष्पदाने काम्यफलं नित्यातन्त्रे ईश्वर उवाच।
"ब्रह्महत्यादिपापानां प्रायश्चित्तं सुरेश्वरि। रक्तपुष्पै-
र्महादेवि! चक्रराजं प्रपूजयेत्। कुलाचारक्रमेणैव
कर्पूरचोदमण्डितम्। महापातककोटिघ्नं जन्मान्तर-
कृतं अपि। मालतीमालया हन्यात् सत्यं सत्यं न
संशयः। लक्ष्मीस्तस्य भवेद्गेहे स्थिरा पीठसन्निधे॥
जपापुष्पैर्महेशानि! पूर्ववद् यदि पूजयेत्। मालतीमालया
नश्यन्ति सप्तजन्मकृतान्यपि। ब्रह्महत्यादिपापानि
धनवान् जायते कविः। पूर्ववत् केतकीपुष्पैः पत्रैर्वा
यदि पूजयेत्। मालतीमालया देवेशि! सर्वपातकको
टयः"। (नश्यन्तीति पूर्वोक्तेनान्वयः)। "लभते राज-
सौभाग्यं साधको नात्र संशयः। शतपत्रैर्महेशानि!
पूर्ववत् पूजयेच्छिवाम्। मालतीमालया देवेशि! सर्वपापं
विनाशयेत्। चम्पकैः पूजयेद्देवीं पूर्ववन्मालतीक्रमम्।
निहत्य परमेशानि! पातकं शतजन्मजम्। सौभाग्यं
लभते मन्त्री त्रिषु लोकेषु पार्वति!॥ श्वेतपद्मैर्महे-
शानि! मालतीमालां प्रपूजयेत्। त्रिंशज्जन्मकृतं पापं
नाशयेन्नात्र संशयः। बन्धूकैः पूर्ववद्देवि! मालतीमालां प्रपू-
जयेत्। निहत्य सर्वपापानि राजानं वशमानयेत्। मालती-
सौमल्लिकाजातीकुन्दैः श्वेतोत्पलैः सह। सुमित्रैः पूर्व-
वद्देवि! मालतीमालां प्रपूजयेत्। ब्रह्महत्यादिपापानि
कृतजन्मकृतान्यपि। नाशयेत् परमेशानि! शास्त्रतत्त्व
करे स्थिता। रक्तोत्पलजपाकुसुम्भकागस्त्यैः शि-
वाम्। पूर्ववत् परमेशानि! मालतीमालां प्रपूजयेत्।
पातकं नाशयित्वाऽसौ यम दुःखो भवेद्धरः। नागकेशर-
कह्लारबकुलैः सिन्धुवारकैः। पाटलैः पूजयेद्देवि!
श्रीपीठान्तर्निवासिनीम्। पूर्ववत् पूजयेद्देवि! मालतीमालां
प्रसन्नधीः। सहस्रजन्मजं पापं नाशयेन्नात्र संशयः।
सौभाग्यमतुलं तस्य भवेद्देवी प्रसादतः"। योगिनी-
तन्त्रे "नोत्पलस्य दद्यात् पुष्पाणि वनस्थानि कदाचन।
न यस्मुवन्ति वै देवाः यमाकर्षितुमुद्यताः। एकैकं कुसुमं
यस्मा रक्षन्ति दय वै यतः। तस्मा यस्मात्तनाः एव
सर्वतः कुसुमाहृताः। तस्मादाकृष्य कुसुमं यजेद्देवान्
पितॄनपि" इति इत्यस्यपुष्पदानविधेः। मतृस्कन्दे
"स्नात्वा मध्याह्नसमये न चिन्तयात् कुसुमं नरः। तत्-
पुष्पैरर्चने देवि! रौरवे परिपच्यते" मध्याह्न इत्युपा-
दानात् प्रातःस्नातस्य पुष्पाहरणे न दोषः। अथ पुष्प
माला विश्वसारतन्त्रे "नीलोत्पलसहस्रेण यस्तु मालां
प्रयच्छति। दुर्गादेवि विधिवद्देवि! तस्य पुण्यफलं शृणु।
वर्षकोटिसहस्राणि वर्षकोटिशतानि च। तया
अनुचरो भूत्वा रुद्रलोके महीयते"। योगिनीतन्त्रे
नवमपटले "मालतीमालया विष्णुरर्चितो येन कार्त्तिके।
पापाच्चरकृता माला नाशिता तस्य विष्णुना"।
तथा "करवीरकृतां मालां आपदाय प्रयच्छति।
देवेन्द्रोऽपि महेशानि! करोति वरसंपुटम्"। तत्रैव
"न भेदयेद् मालतीमालां मालाधैव न भेदयेत्। वि-
क्रिय मालतीमाला व्य प्रवर्म तथैव च"। रुद्रयामलतन्त्रे
द्वितीयपटले "कोकणदस्य बन्धूकं कर्णिकारमथैव च।
कदम्बारकरक्तानि करवीराणि मल्लिके। मल्लिकाजितयं
जाती चौमपुष्पं जयन्तिका। बिल्वपत्रं कुरुवकं सुनि-
पुष्पस्य केसरम्। वासन्ती चैव सौगन्धं कालपुष्पं
मनोहरम्। आमलकस्य कादम्बं बकुलं यूथिका तथा।
विल्वैर्मल्लकाद्यैश्च तुलसीवर्जितैः शुभैः। षोडपुष्पै-
र्विशेषेण वज्रपुष्पेण शोभितम्। सर्व पुष्पं प्रदद्याच्च
भक्तियुक्तेन चेतसा। जपापुष्पं महेशानि! दद्याद्देवै
विशेषतः। पद्मं प्रियतरं देव्या केशाली बकुलं तथा।
रक्तोत्पलेन देवेशि! पूजयेत परमां शिवाम्। लक्षवर्ष-
सहस्राणां पूजायाः फलमाप्नुयात्। शिरीषं करव

देव्याः प्रीतिर्द्विकरं तथा । कमलपद्मं दशकरं लक्ष-
संख्यकमेव च । यदि दद्यात्सुरेशानि ! धर्मसिद्धिः
सुरेश्वरि ! । नदैव मन्त्रसिद्धिः स्याद्यत्र कार्या विचा-
रणा । द्विजातीं सुवर्णी दद्यां तथाः प्रीतिकरीं पराम् ।
ताम्रं रक्तवर्णं च अतिप्रियकरं मतम् । भक्तिमुक्तो
महादानि ! सर्वपुष्पं निवेदयेत्" । ऊर्ध्वतन्त्रे "चातु-
र्मासे तु लक्षैकमालती योऽर्चयेद्धरिम् । शतजन्मकृत
पापं तत्क्षणादेव नश्यति । करवीरस्य कुसुमैर्यजे-
यन्ति हरेर्दिने । दर्शनात्तस्य देवेशि ! करकाग्निः
प्रणश्यति" । मन्त्रपुष्पाणि "नार्चयेत् श्रिष्ट-
पुष्पेण पीतेन मरकेण वा । श्वेतेनोष्ट्रेण लक्षेण वि-
लसेन मन्त्रार्चयेत्" । प्रपञ्चसारे मन्त्रपटले "कमले पतितै
र्मौल्यैः शीर्णैर्वा जन्तुदूषितैः । आघ्रातैरङ्गसंस्पृष्टै
र्मूषिकैर्वापि चार्चयेत्" । वारदायाम् "मलिनं भूमि-
संस्पृष्टं लमिकेशादिदूषितम् । अङ्गस्पृष्टं समाघ्रातं
त्यजेत् पर्युषितं तथा" । मन्त्रतन्त्रे चतुर्दशपटले
"शेफालिका तु कर्तव्या शरत्काले प्रयत्नतः । अन्यत्र
न स्पृशेद्देवि ! प्रायश्चित्तं पूजनात् । नार्चयेद्वल्लभ्यैव
तथोन्मत्तिकेन च । करवीरस्य माध्यस्य बन्धूकस्य
चैव हि । कमलस्य सवल्लस्य रक्तं देवि ! प्रयत्नतः" ।
योगिनीतन्त्रे "बिल्वपत्रं शमीपत्रं तमालामलकीदलम् ।
अपामार्गभृङ्गपत्रं कुशं दूर्वाक्षतैव च । पुष्पाभावे तु
फलान्यपि निवेदयेत् । फलानामभावे तु तत्पत्रैः पूजयेद्
हरिम् । गुप्तपूजापुष्पस्तु तत्रैव "सिद्धाक्षतैव मालूरं धुस्तूरस्य
चतुर्विधम् । तथा रुद्रजटे हे च गुप्तपुष्पस्तु शङ्करि ।
पद्मे नीलोत्पले देवि ! वकमन्दारकाञ्चने । माधवीहे
तमालस्य गुप्तमेतद्वरार्चने" । दिवारात्रिभेदेन पुष्पविशेषेण
पूजनमुक्तं तत्रैव "कनकानि सुगन्धीनि रात्रौ देवानि
शङ्करि ! । दिवा चान्यानि पुष्पाणि दिवा रात्रौ च
मल्लिका । देवाधिपस्य पुष्पेण यो देवं प्रतिपूजयेत् ।
अन्यत्वं प्राप्नुयात् सोऽपि दश वर्षाणि पञ्च च" । देवता-
विशेषे पुष्पविशेषवर्जनमपि तत्रैव "शिवे विवर्जयेत् कुन्दं
माधे माध्यं प्रयत्नतः । मन्त्रेषे वर्जयेन्माध्यमशोकं तगर-
न्तथा । सूर्ये माध्यस्य मन्दारं कनकस्य तथैव च ।
महालक्ष्म्यै च तुलसीं श्रिष्टिकां काञ्चनमघा । बन्धू-
कीवस्य द्रोणस्य दशमं दापयेत् । यक्षाणां बिल्वपत्रस्य
शमीपत्रं तथैव च । प्रभुणे वर्जयेत् काशं कौसुम्भं शमी-
पुष्पकम् । वाणीपुष्पं करवीरस्य जलपुष्पं तथैव च ।
दुर्गायै न प्रदद्याच्च कोविदारं तथैव च । त्रिपुरायै
कालुकस्य कनकं कासकं तथा । विष्णुकं लक्ष्मणायाश्च
इन्द्राक्षे वर्जयेत्तथा । अकर्मण्यपुष्पदाने दोषो यथा
"वराह उवाच "अकर्मण्येन पुष्पेण यो मामर्चयते भुवि ।
मातरं तस्य यच्छामि तस्मृत्यु त्व वसुन्धरे ! । नाहं
तत् प्रतिगृह्णामि न च ते वै, मम प्रियाः । मूर्खैर्भाग-
वतैर्दत्तं मम विप्रियकारिणः । पतन्ति नरके घोरे रौरवे
तदवन्नरम् । अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च ।
यावरो इव वर्षाणि भाजारस्य त्रयोदश । मूषकः पञ्च-
वर्षाणि वर्मीवर्दस्य द्वादश । छागस्यैवाष्ट वर्षाणि वर्षं वै
पांसुकुक्कुटः । त्रीणि वर्षाणि महिषो भवत्येव न
संशयः । एतत्ते कथितं भद्रे ! इदं यत्प्रमेऽत्र रोचते ।
अकर्मण्यं विशालाक्षि ! पुष्पं यो न ददाति वै"
वराहपु० । देवी प्रियपुष्पाणि यथा "पुष्पाणि देव्या
वैष्णव्याः प्रियाणि शृणु संप्रति । बकुलैश्चैव मन्दारैः
कुन्दपुष्पकुरण्टकैः । करवीरार्कपुष्पैश्च मालतीचापा-
राजितैः । दमनैः सिन्धुवारैश्च वर्षैर्वर्षकेतकैः ।
लताभिर्मालतीयूथैर्दूर्वाङ्कुरैश्च कोमलैः । मञ्जरीभिः
कुशानाञ्च बिल्वपत्रैः सुशोभनैः । पूजयेद्वैष्णवीं देवीं
नामाख्यां त्रिपुरां तथा । अन्याश्च याः शिवाग्रीत्वे
लायन्ते पुष्पजातयः । ता दूराः शृणु वीरेन्द्र मया
देताल ! भैरव ! । मालती जल्लिका जाती यूथिका
माधवीलता । पाटला करवीरस्य लता तर्कारिका तथा ।
कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः । चम्पका-
जातकी वाणवर्वरी मल्लिका तथा । अशोका कोम-
लिकावटकूपशिरीषके । शमीपुष्पस्य द्रोणस्य पद्मो-
त्पलवनादयाः । श्वेतादयश्च विल्वस्य प्रसादः
खदिरस्तथा । वनयाताऽथ शेवन्ती कुरण्टोऽथ कदम्बकः ।
चक्रं कोकनदश्चैव मल्लिको गिरिकर्णिका । भाग-
वेश्वरपुष्पाणि केतक्यञ्जलिका तथा । दोपटा योजपूरथ
नमेरुः शालमेव च । लवणी चण्डसिन्धुश्च भिण्टी
पञ्चविधा तथा । एतान्युक्तकुसुमैः पूजयेत् वरदां शिवाम्
वर्जनीयपुष्पं यथा "पुष्पञ्च लक्षिसञ्चिन्नं विशीर्णं
भग्नसद्भवम् । सकेशं मूषिकाधूतं यत्नेन परिवर्जयेत्
याचितं परकीयञ्च तथा पर्युषितञ्च यत् । अन्यस्पृष्ट
पदाक्रान्तं यत्नेन परिवर्जयेत्" कालिका पु० ६८ ५४अ० ।
केशवपूजने प्रशस्तपुष्पाणि यथा "मालतीमल्लिका चैव
यूथिका चातिमल्लिका । पाटलाकरवीरञ्च जयाश्वतिरेव

च । कुब्जकस्तगरश्चैव कर्णिकारः कुरण्टकः । चम्पकस्तगरः कुन्दो बाणवर्वरमल्लिकाः । अशोकतिलकपुन्नागस्तथा चैवाटरूषकः । अमी पुष्पप्रकाराश्च शस्ताः केशवपूजने । केतकीपत्रपुष्पञ्च पुष्पं श्रृङ्गारकञ्च च । तुलसामलकी चैव सद्यस्तुष्टिकरं हरेः । पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले । सितोत्पलञ्च लक्ष्मीश्च दयितानि सदा नृप ! । तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे" अग्निपु० । किञ्च "जाती शताङ्घ्रा सुमना कुन्दं बकुपुटं तथा । बाणञ्च पङ्कजाशोकं करवीरञ्च यूथिका । पारिभद्रं पाटला च बकुलं गिरिशायिनी । तिलकं वनजञ्चैव पीतकं तगरस्त्वपि । एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने । सुरभीणि तथान्यानि वर्जयित्वा तु केतकीम् । केशवपि हि पुष्पाणि प्रशस्तान्यच्युतार्चने । पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर ! । वीरुधानां प्रधानेन यर्हिभाश्चार्चयेत्तथा । नानारूपैस्साम्बुभवैः कमलेन्दीवरादिभिः । प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्बले !। दनस्पतीनामर्चेत तथा दूर्वादिपल्लवैः" वामनपु० ९१ । विष्णौ पुष्पविशेषदानस्य फलं यथा "क्षारामप्रभवैः पुष्पैरच्छिद्रैः कीटवर्जितैः । तथाऽपर्युषितैस्तद्वत् कार्त्तिके विष्णुमर्चयेत् । वर्णानां हि यथा विप्रस्तीर्थानां जाह्नवी यथा । देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा । मालतीमालया देवं योऽर्चयेद् गरुड़ध्वजम् । जन्मदुःख जरारोगैः कर्मभिर्मुक्तिमाप्नुयात् । मालतीमालया येन पूजितः कार्त्तिके हरिः । पापलक्षायुतं तस्य वत्स ! शौरिः प्रणाशयति । मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम् । विष्णोर्गृहे कृतं यैस्तु ते यान्ति परमां गतिम् । जातिपुष्पैर्विरचितां मालां यः सम्प्रयच्छति । विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु । कल्पकोटिसहस्राणि कल्पकोटिशतानि च । वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः । यः स्वर्णकेतकैः पुष्पैः पूजयेद् गरुड़ध्वजम् । चन्द्रकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः । दामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः । स वसेद्विष्णुनिलये देवेन सह मोदते । मल्लिका कुसुमैर्देवं योऽर्चयेत् त्रिदेश्वरम् । कार्त्तिके परया भक्त्या दहेत् पापं त्रिधार्जितम् । सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्चयेन्मुने ! । स सर्वपापनिर्मुक्तो विष्णुलोके महीयते । वेदधर्मेण केनापि संग्राम मधुमाधवे । योऽर्चयेत् स मुनिश्रेष्ठ ! लभते वैष्णवं पदम् । यः पुनः पाटलापुष्पैरर्चयेद् गरुड़ध्वजम् । सुपुण्यात्मा परं स्थानं स प्रयाति हरेर्मुने ! । अगस्त्यपुष्पैर्देवेशं वेऽर्चयन्ति जनार्दनम् । देवर्षे ! दर्शनात्तेषां नरकाग्निः प्रणश्यति । न तत् करोति विप्रेन्द्र ! तपसा तोषितो हरिः । यत् करोति हृषीकेशो मुनिपुष्पैरलङ्कृतः । विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवम् । कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत् । मुनिपुष्पकृतां मालां ये यच्छन्ति जनार्दने । शक्रोऽपि तैः समं वत्स ! कुरुते ह्यभिभाषणम् । ददात्यभीप्सितान् कामान् इष्ट चिन्तामणिर्यथा । कार्त्तिके मुनिपुष्पेण पूजितो गरुड़ध्वजः । गवामयुतदानेन यत् फलं कार्त्तिके मुने ! । मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् । वेऽर्चयन्ति सुराध्यक्षं करवीरैः सितासितैः । तेषां वर्षशतं यावत् प्रभुर्भवति केशवः । वकुलाशोककुसुमैर्वेऽर्चयन्ति जगत्पतिम् । निर्भीकास्ते भवन्तीह यावच्चन्द्रदिवाकरौ । अशोककुसुमैरभ्यर्चेज्जन्मशोकभयापहम् । पूजयित्वा हरिं याति पदं विष्णोरनामयम् । सुगन्धैः सितैर्वत्स ! कुसुमैः पङ्कजोद्भवैः । अशोकञ्च समभ्यर्च्य नरो याति हरेः पदम् । अभ्यर्च्य कौमुदैः पुष्पैः केशवं त्रिदशैरपि । अटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम् । स पुण्यप्रभावन्नरो याति तद्विष्णोः परमं पदम् । कार्त्तिके योऽर्चयेद्विष्णुं तुलसीबिल्वपल्लवैः । त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः । माधवे योऽर्चयेद्विष्णुं तुलसीबिल्वपल्लवैः । त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः । माधवे योऽर्चयेद्विष्णुं सुपुष्पैस्त्रिककोद्भवैः । घृतपायो निराहारः स विष्णोर्याति तत् पदम् । समित्पुष्पकुशादीनि त्रोत्रियः स्वयमाहरेत् । शूद्रानीतैस्तैश्च हरेः पूजां कुर्वन् प्रणश्यति । तस्माद्विप्रो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा । पुष्पादीनि समानीय पूजयेत् परमेश्वरम् । विप्रो दूर्वाभवैः पुष्पैस्तथा काशकुशोद्भवैः । तुलसीबिल्वपत्रैश्च पूजयेद्देवताः पितॄन् । नार्चयेत्तगरैः स्वर्णं धूर्तपुष्पैश्च केशवम् । देवीं लकुचपुष्पैश्च शङ्करं नागकेशरैः" । कालविशेषे तस्य पर्युषितत्वं यथा "प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका । त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम्" । आम्रमञ्जरीबिल्वपत्रदानफलं यथा "मञ्जरीं सुरकारस्य ये प्रयच्छन्ति वैष्णवाः । कार्त्तिके

वमलाले सुगौकोटीफलभागिनः। कार्त्तिके योऽर्चयेद्भक्त्या बिल्वपत्रेण केशवम्। दद्याद् यज्ञायुतफलं केशवस्तस्य वै सुने!। बिल्वपत्रेण ये कृष्णं कार्त्तिके कलिमर्दनम्। पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता। नागकेशरपुष्पैर्यः पूजयेद् गरुड़ध्वजम्। न याति वैष्णवं स्थानं यत्र गत्वा न शोचते। कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम्। जन्मायुतार्जितं पापं स्फोटितं तेन नारद!। न तथा केतकीपुष्पैर्मालती कुसुमैस्तथा। तोषमायाति देवेशः कदम्बकुसुमैर्यथा। दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधवः। किं पुनः पूजितो देवः सर्वकामप्रदो हरिः। हरिं किंशुकपुष्पैर्यः पूजयेत् त्रिदशाधिपम्। वैकुण्ठे रमते सत्यं विष्णुना सह वैष्णवः। वर्षाकाले च देवेशं कुन्ददैश्चन्द्रनार्चितैः। योऽर्चयेत् परमं विष्णुं संसारे न पुनर्विशेत्। कुन्दपुष्पैश्च विप्रर्षे! योऽर्चयेद् गरुड़ध्वजम्। कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति। शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम्। यमं न पश्येद्विप्रर्षे! न याति दुर्गतिं नरः" माघोत्तरख० १२१ अ०। लक्ष्मीतुल्यप्रियपुष्पाणि नारदीयसं० "मालती बकुलाशोक शेफालीनवमालिकाः। अम्लानतगराङ्कोठमल्लिका मधुपिण्डिकाः। यूथिकाष्टापदं कुन्दं कदम्बं मधुपिप्पलम्। पाटलाचम्पकं कृष्णं लवङ्गमतिमुक्तकम्। केतकं न कुरुण्टकं बिल्वं कह्लारकं द्विज!। पद्मपिंयतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे"। केशवार्चने निषिद्धपुष्पाणि विष्णुधर्मोत्तरे। "अग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत्। अम्लानतगलातानि कण्टकीनि तथैव च। रक्तानि यानि धर्मज्ञ! चैत्यवृक्षोद्भवानि च। श्मशानजातान्यन्यानि यानि लोकालयानि च"। तथा "कुटज बालमल्लीपुष्पं शिरीषञ्च जनार्दने। निवेदितं भयं रोगं निःस्वत्वं प्रयच्छति। वज्रजीवकपुष्पाणि रक्तान्यपि च दापयेत्। अन्यरक्तकपुष्पाणां दानात् दौर्भाग्यमाप्नुयात्"। परारोपितवृक्षस्य पुष्पग्रहणे दोषः। अगस्त्यः "परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्चयेत्। अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम्"। एतद् द्विजेतरपरम् "द्विजस्तृणैधः पुष्पाणि सर्वतः स्वयदाहरेत्" इति याज्ञवल्क्यात्। "देवाद्यर्थन्तु कुसुममन्यैर्यं ग्रहरमणीयं" इति वचनात्। "गोऽन्यर्थं तृणमेधांसि वीरुदनम्मतीनां पुष्पाणि स्वयदाददीत फलानि चापरिष्टंहितानि" इति गोतमवचनात्। द्विजेतरस्य दण्डोऽपि "दृष्टं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्। अनापृच्छन् हि गृह्णानो दण्डच्छेदनमर्हति" इति स्मृतेः। "देवोपरिष्टतं मस्तकोपरिष्टतम् अधोवस्त्रष्टतम् अन्यजलक्षालितञ्च पुष्पं दुष्टमिति" हरिभक्तिनामके ग्रन्थे। अभिवाद्याभिवादकवरस्यपुष्पं प्रोक्षयात् कर्मणस्त्रम्" इति केचित्। याचितादिपुष्पदानस्य निष्फलत्वम्। "याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलम्" इति वदन्ति। वामहस्तचितादि पुष्पस्यादेयत्वं यथा "न पुष्पच्छदनं कार्यं देवार्थं वामहस्ततः। न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः। शमितृपुष्पादीनां स्वयमाहरणीयत्वं हारीतयातातपौ "शमितृपुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्। शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः"। क्रये प्रतिग्रहमाह ब्रह्मपु० "पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाकृतैः"। वीरक्रयो वीरयत् याच्ञाशून्येन विक्रेतृरूपन्यस्तमूल्येन क्रयः। पुष्पदानप्रकारो ज्ञानमालायां "पुष्पं वा यदि वा पत्रं फलं नेत्रमधोमुखम्। पुष्पाञ्जलिविधिं कृत्वा यथोत्पन्नं तथार्पणम्"। मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा "स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः। देवतास्तत्र गृह्णन्ति सफलीभवति दारुवत्"। एतत्तु द्वितीयस्नानाभिप्रायम्। इति रत्नाकरः। व्यक्तं मत्स्यसूक्ते "स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः। तत्तत्पुष्पार्चने देवि! रौरवे परिपच्यते"। पुष्पाभावे देयानि विष्णुधर्मोत्तरे "पुष्पाभावेऽपि देयानि पत्राणि च जनार्दने। पत्राभावे जलं दद्यात्तेन पुष्पत्रमवाप्यते"। पुष्पदानमाहात्म्यं यथा "न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा। तथा प्रसादमायाति यथा पुष्पैर्जनार्दनः"। देवताविशेषे वर्जनीयपुष्पं यथा शातातपः "शिवे विवर्जयेत् कुन्दसुमत्तञ्च हरेस्तथा। देवीनामर्कमन्दारौ सूर्यस्य तगरन्तथा"। पुष्पविशेषाणां कालभेदे पर्युषितत्वं भविष्ये "पद्मानि पितरक्तानि कुशदान्युत्पलानि च। एषां पर्युषितानङ्गा कार्या पञ्चदिनोत्तरम्"। पुष्पविशेषस्यापर्युषितत्वं यथा "तुलसगस्त्यबिल्वानां न च पर्युषिताक्षता"। योगिनीतन्त्रे "बिल्वपत्रस्य माध्यञ्च तमालामलकीदलम्। कह्लारं तुलसीञ्चैव पद्मञ्च शनिपुष्पकम्। एतत् पर्यु

श्रित न स्यात् तथाभूतं वस्तिकाभरणम् ।" वस्तिकाभरणं मण्डूकनयोग्यम्" एका०व० । अन्यत् यद्वं वितमन्दे दृश्यम् ।

पुष्पक्र न० पुष्पमिव पुष्पेण वा कायति कै-क स्वार्थे क वा । १पुष्पशब्दार्थे २रीतिपुष्पे ३कुबेरविमाने ४नेमरोगभेदे ५रत्नकङ्कणे ६रथाङ्गने ७वीरकांसी ८वस्त्रिकाङ्कारवा० ९कथकस्याञ्च मेदि० । ९काशीशे हेमच० ।

पुष्पकरण्डक न० अवन्तिस्थे शिवोद्यानभेदे "मन्दाकाल-स्रोतस्विनी विशालाऽवन्तिका तथा । तस्योद्यानं तु विस्तीर्णं नाम्ना पुष्पकरण्डकम्" शब्दमा० । ततः अस्त्यर्थे इनि ङीप् । पुष्पकरण्डिका उज्जयिन्यां स्त्री हेमच० । ६त० । (वासि) २पुष्पचयनपात्रभेदे न० ।

पुष्पकाल पु० पुष्पस्य कालः । १स्त्रीणामृतुसमये द्वादशवर्षादौ च वे पुष्पप्रधानः कालः शा०त०२कुसुमप्रधाने २वसन्तकाले ।

पुष्पकासीस न० पुष्पमिव कासीसम् । कासीसभेदे राजनि० । "कासीसं धातुकासीसं पांशुकासीसमित्यपि । तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते" भावप्र० कासीसशब्दे दृश्यम् ।

पुष्पकीट पु० पुष्पप्रियः कीटः । १भ्रमरे त्रिका० ७त० २कुसुमस्थितकृमिमात्रे च ।

पुष्पकेतन पु० पुष्पं केतनं यस्य । कामदेवे हेमच० ।

पुष्पकेतु न० पुष्पनिर्मितः केतुरिव । १कुसुमाञ्जने अमरः ६व० । २कामदेवे च । [२कुसुमनामके त्रि० ।

पुष्पघातक पु० पुष्पं हन्ति हन-ण्वुल् । १वंशे शब्दमा० ।

पुष्पचाप पु० पुष्पमय चापमस्य । कामे पुष्पधन्वादयोऽप्यत्र ।

पुष्पचामर पु० पुष्पं चामर इव यस्य । १मदनवृक्षे त्रिका० । २वेतवृक्षे शब्दमाला० ।

पुष्पज न० पुष्पाज्जायते जन-ड ६त० । १पुष्परसे राजनि० । २पुष्पजातमात्रे त्रि० "अपारवन्तं किल पुष्पजं तेजः" शा०द०

पुष्पद पु० पुष्पं ददाति दा-क उप०स० । वृक्षे हेमच० ।

पुष्पदंष्ट्र पु० पुष्पमिव दंष्ट्राऽस्य । नागभेदे हरिवं०२अ० ।

पुष्पदन्त पु० पुष्पमिव दन्तो यस्य । १वायुकोणस्थे दिग्गजभेदे अमरः । २विद्याधरभेदे मेदि० । ३जिनभेदे हेमच० । ४नागभेदे धरणिः । ५वैश्रवणसरभेदे भाग०८।२१।१० । ६पुरद्वाराधिपभेदे "गुप्ताक्षमेन्द्रं महाटं पुष्पदन्तं तथैव च" हरिवं० ११६ अ० ।

पुष्पदन्तक पु० मक्षिका इत्यादिलक्षणकर्णरि मत्स्यवेधभेदे ।

पुष्पदामन् न० पुष्पनिर्मितं दाम । १पुष्पनिर्मितमाल्ये भूता नाथाल्ल मतनवरत्नै. कीर्त्तितं पुष्पदाम" ह०र०टी०लक्षे जगतिमत्यक्षरपादके छन्दोभेदे च ।

पुष्पद्रव पु० ६त० । कुसुमरसे मकरन्दे राजनि० ।

पुष्पध पु०स्त्री "ब्राह्मात् तु जायते विप्राद् वैश्यात्मायुर्जलघटवः । वाहनवाटधानौ च पुष्पधः शैल एव च" मनूक्ते ब्राह्मविप्रजाते जातिभेदे स्त्रियां जातित्वात् ङीष् ।

पुष्पधनुस् पु० पुष्पं धनुरस्य "या संज्ञायाम्" बा० पक्षे संज्ञायां न अनङ् । कामदेवे माघः ९ ।

पुष्पधन्वन् पु० पुष्पं धनुरस्य संज्ञायात् वा अनङ् । कामदेवे अमरः । धन्वनृशब्दे समासेनैव प्रयोगोपपत्तौ अनङ्-विधानम् असंज्ञायां बहुशब्दप्रयोगनिवृत्त्यर्थम् ।

पुष्पधारण पु०पुष्पं धारयति धारि-ल्यु । विष्णौ भा०७अ० ।

पुष्पनिक्ष पु०स्त्री पुष्पं निक्षति निक्ष-पुष्पणे अच् उप०स० । भ्रमरे पु०स्त्रियां जातित्वात् ङीष् ।

पुष्पनिर्यास पु० ६त० । पुष्परसे मकरन्दे राजनि० । "पुष्प-निर्यासकः शीतः कषायः स्वौल्यकारकः । दाहज्वरार्त्ति-वमिहृद् मोहतृष्णाभ्रमप्रणुत् । दन्तार्त्तिकफविष्टम्भ-शिरारोगकजाधनः । तर्पणः कुरसिः क्षारो क्षिप्तमूलः परिकीर्त्तितः" राजनि० ।

पुष्पनेत्र न० पुष्पनिर्मितं नेत्रम् । पुष्पनिर्मिते वस्त्रिजनाना-ऽवयवभेदे नेत्रशब्दे ४।४० पृ० दृश्यम् । "कारस्यकवाप-यन्तु पुष्पनेत्रेण योजितम्" सुश्रुतः ।

पुष्पपत्रय पु०स्त्री० पुष्पं पवति पै-क्यप् ह्रस्वः । १भ्रमरे राजनि० स्त्रियां जातित्वात् ङीष् । २कुसुमरसपानिनि त्रि० स्त्रियां पेटः स्त्रित्वात् ङीप् ।

पुष्पपत्र न० ६त० । (कुबेर पाषड़ि) नवदल पद्मा० ।

पुष्पपत्रिन् पु० पुष्पं पत्रदः पत्री माषोऽस्य । कुसुमभरे माषे ।

पुष्पपद्म पु० ६त० । स्त्रीणामुत्तरगोनिर्गमद्वारे योनौ त्रिका० ।

पुष्पपादु पु० पद्मलिनगर्भभेदे पुष्पपादु शब्दे दृश्यम् ।

पुष्पपुर न० पाटलिपुत्रनगरे कुसुमपुर (पाटना) ।

पुष्पप्रच(चा)य पु० प्र+चि-"हस्तादाने चेरस्तेये" पा० घञ् "हस्तादान इत्यनेन प्रत्यवचिरादेरपि ग्रहणम्" सि०कौ० प्रचयेन तादृशो प्रत्यवचिर्गृह्यते । हस्तेन कुसुमानां चयने । चौर्ये तु अच् । चौर्येण कुसुमचयने । हस्तादान इत्युक्तेः वृक्षादिना चयने तु अजेव ।

पुष्पप्रचायिका स्त्री पुष्पार्थेन पुष्पाणां चयनम् प्र+चि-ण्वुल् तदनस्य स्त्रीत्वम् स्त्रीत्वात् निम्न०स० । पाशुपाशुता च परिपाक्या कुसुमानां चयने ।

पुष्पफल पु॰पुष्पयुक्तं फलमस्य । १कपित्थे अमरः २कुष्माण्डे शब्दमाला ।

पुष्पभूषित त्रि॰ ३त॰ । १कुसुमेनालङ्कृते । २वणिग्नायके रूपकप्रकरणभेदे सा॰ द॰ प्रकरणोदाहरणम् ।

पुष्पमास पु॰ पुष्पप्रधानो मासः शाक॰त॰ । चैत्रे माघि २वसन्तसमये राजनि॰ ।

पुष्परक्त पु॰ पुष्पं रक्तं यस्य । सूर्य्यमणिवृक्षे राजनि॰ ।

पुष्परजस् न॰ ६त॰ । कुसुमपरागे हेमच॰ ।

पुष्परथ पु॰ पुष्पनिर्मितो रथः । पुष्पनिर्मिते रथभेदे हेमच॰

पुष्परस पु॰ ६त॰ । मकरन्दे कुसुमनिर्यासे अमरः ।

पुष्परसाह्वय न॰पुष्पस्य रस आह्वयो यस्य । मधुनि राजनि॰

पुष्पराग पु॰ पुष्पस्येव रागो वर्णो यस्य । १मणिभेदे (पोकराज) तस्य लक्षणादि युक्तिकल्पतरावुक्तं यथा "सुच्छायपीतगुरुगात्रसुरङ्गशुद्धं स्निग्धञ्च निर्मलमतीव सुवृत्तपीतम् । यः पुष्परागशकलं कलयेदमुष्य पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान्" । तस्य दोषलक्षणं यथा "कृष्णबिन्दुङ्कितं रूक्षं धवलं मलिनं लघु । विच्छायं शर्करागारं पुष्परागं सदोषकम्" । तस्य परीक्षालक्षणे यथा "दृष्टो विकाशयेत् पुष्परागमधिकमात्मीयम् । न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः" राजनि॰ । तस्योत्पत्त्यादि यथा "सूत उवाच । पतिता या हिमाद्रौ हि त्वचस्तन्वाः सुरद्विषः । प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः । आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु । कौरण्टकनामा स्यात् स एव यदि लोहितापीतः । आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः । आनीलशुक्लवर्णः स्निग्धः सोमाभकः सगुणैः । अत्यन्तलोहितो यः स एव खलु पद्मरागः स्यात् सुनीलः सन् । मूल्यं वैदूर्य्यमणेरिव गदितं तस्य रत्नशास्त्रविदा । धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुखप्रदो भवति" गारुडे ७५ अ॰। प्रकारान्तरम् अणपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः । पुत्रदो धनदः पुण्यः पुष्परागो मणिर्मतः । दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा । पद्मरागाकरे कश्चित् कश्चित्ताम्रोपलाकरे । दैवतपीतच्छविच्छायं स्वच्छं कान्त्या मनोहरम् । पुष्परागमिति प्राहुः रङ्गसोममहीभुजा । ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् । छाया चतुर्विधा तस्य सिता पीता सिताऽसिता" । क्लीबत्वमपि । [राजनि॰

पुष्पराज पु॰ पुष्पमिव राजते राज–अच् । पुष्परागमणौ ।

पुष्परेणु पु॰ ६त॰ । परागे कुसुमरजसि शब्दर॰ ।

पुष्परोचन पु॰ पुष्पं रोचनेव यस्य । नागकेशरे । त्रिका॰

पुष्पलाव त्रि॰ पुष्पं लुनाति मालारचनायै लू–अण् उपप॰स॰। मालाकारे त्रिका॰। णिनि । पुष्पलाविन् तत्रार्थे जटा॰।

पुष्पलिह् पु॰ पुष्पं लेढि लिह–क्विप् ६त॰। मधुकरे । क । पुष्पलिहोऽप्यत्र अमरः ।

पुष्पवन्त(त्) पु॰ द्वि॰व॰ । पुष्प+मत्वर्थे मतुप् मस्य वः । १रविशशिनोः । पृषो॰ अदन्तोऽप्ययं तयोरर्थयोः । अत्र "रवित्वचन्द्रत्वाभ्यामेकशक्तिमदेव नियतद्विवचनाकाङ्क्षम्" शब्द॰प्र॰द्वन्द्वक॰। विस्तरस्तु गदाधर शक्तिवादे दृश्यः । २कुसुमयुक्ते त्रि॰ । [कदलत्यां स्त्रियाम् अमरः ।

पुष्पवती स्त्री पुष्पं स्त्रीरजः अस्त्यस्य मतुप् मस्य वः ।

पुष्पवर्ग पु॰ ६त॰ । सुश्रुतोक्ते कुसुमविशेषसमुदाये तेषां विशेषगुणाश्च तत्रोक्ता यथा "कोविदारशणशाल्मलीपुष्पाणि मधुराणि मधुरविपाकानि रक्तपित्तहराणि च । दृढागस्त्यप्रयोः पुष्पाणि तिक्तानि कटुविपाकानि क्षयकासापहानि । मधुशिग्रुकरीरकुसुमानि कटुविपाकानि वातहराणि स्फुटमूत्रपुरीषाणि च । "आगस्त्यं नातिशीतोष्णं नक्तान्धार्त्तं प्रशस्यते । रक्तदृष्टस्य निम्बस्य शुष्ककाकोदुम्बरस्य च । कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च । सुतिक्तं मधुरं शीतं पद्मं पित्तकफापहम् । मधुरं पिच्छिलं स्निग्धं कुसुदं स्नादि शीतलम् । तस्यादस्यान्तरगुणे विद्यात् कुवलयोत्पले । स्निग्धुवारं विजानीयाद्धितं पित्तविनाशनम् । मालतीमल्लिके तिक्ते सौरभ्यात् पित्तनाशने । सगन्धिविशदं हृद्यं बकुलं पाटलानि च । श्लेष्मपित्तविषघ्नन्तु नामं तद्वच्च कुङ्कुमम् । चम्पकं रक्तपित्तघ्नं शीतोष्णं कफनाशनम् । किंशुकं कफपित्तघ्नं तद्वदेव कुरण्टकम् । यथादृष्टं विजानीयात् पुष्पं दृष्टोचितं तथा । मधुशिग्रुकरीराणि कटुश्लेष्महराणि च" । अन्येषां गुणा भावप्र॰ विशेषत उक्तास्तत्र द्रष्टव्याः ।

पुष्पवाटी स्त्री॰ ६त॰ । पुष्पोद्याने । स्वार्थे क । तत्रार्थे अमरः । "दक्षिणेन पुष्पवाटिकामालाप इव श्रूयते" शकुन्तला ।

पुष्पवा(बा)ण पु॰ पुष्पं बाणोऽस्य । १कन्दर्पे २कुशद्वीपस्थपर्वतभेदे भा॰प॰ १२ अ॰ । ३दैत्यभेदे भा॰शा॰२२७अ॰ । ४नायकभेदे पुष्पबाणचरिते दृश्यम् ।

पुष्पवाहन पु॰ राजभेदे अग्निपु॰ ।

पुष्पवाहिनी स्त्री नदीभेदे हरिवं० २६६ अ०।

पुष्पशकटी स्त्री दैववाद्याम् हारा०। [द्रव्यम्।

पुष्पशकलिन् पु० निर्विषसर्पभेदे सुश्रुतः। अहिशब्दे

पुष्पशर पु० पुष्पं शरोऽस्य। कुसुमेषौ कामदेवे।

पुष्पशरासन पु० पुष्पमयं शरासनं धनुर्यस्य। कामे [त्रि०

पुष्पशून्य पु० ३त०। १डडुम्बरे राजनि०। २पुष्परहितमात्रे

पुष्पसमय पु० ६त०। वसन्ते वहतौ अमरः।

पुष्पसार पु० ६त०। १कुसुमरसे राजनि०। ७त०। २तुलस्यां ब्रह्मवै०पु०। [कलिकारादश्चे राजनि०।

पुष्पसौरभा स्त्री पुष्पे सौरभमस्याः। कुसुमे सौरभान्विते

पुष्पस्वेद पु० ६त०। कुसुमरसे मकरन्दे राजनि०।

पुष्पहासा स्त्री पुष्पं हास इव यस्याः। १रजस्वलायां स्त्रियां शब्दच०। सुकुलात्मना स्थितानां पुष्पाणां हास इव प्रपञ्चरूपेण प्रकाशोऽस्य। २विष्णौ पु०। "पुष्पहासः प्रजागरः" विष्णुस०। ६त०। १कुसुमविकाशे पु०।

पुष्पहीन पु० ३त० १कुसुमरहिते द्रुमे। २छन्दःशास्त्रे स्त्री १रजःशून्यायां स्त्रियां स्त्री हेम०।

पुष्पा स्त्री चम्पापुर्याम् (भागलपुर) त्रिका०।

पुष्पागम पु०पुष्पाण्यागच्छन्त्यत्र आ+गम आधारे अच्। वसन्ते पुष्पातरादयोऽप्यत्र। [मालाकारे हेमच०।

पुष्पाजीव पु० पुष्पमाजीवति आ+जीव-अण् उप०स०।

पुष्पाञ्जन न० ६त०। कुसुमाञ्जने (कोमकाजल)। राजनि०

पुष्पानन पु० पुष्पमिव विकसितमाननमस्यात्। मद्यभेदे भा० स० १०अ०।

पुष्पाम्बुज न० पुष्पस्याम्बुनो जायते जन-ड ६त०। मकरन्दे राजनि०। [द्रयोऽप्यत्र।

पुष्पायुध पु० पुष्पमायुधमस्य। कुसुमायुधे कामदेवे पुष्पास्त्रा-

पुष्पार्ण पु० राजभेदे भाग० ४ १२ ११।

पुष्पावचायिन् पु० पुष्पमवचिनोति मालार्थम् अव+चि-णिनि ६त०। मालाकारे हेमच० [मादकत्वाच्च तथात्वम्।

पुष्पासव न० ६त०। मधुनि राजनि० तस्य पुष्पोद्भवत्वात्

पुष्पास्त्र पु० पुष्पमस्त्रमस्य। कुसुमायुधे कामे हेमच०।

पुष्पाह्वा स्त्री पुष्पमित्याह्वा यस्याः। शतपुष्पायाम् राजनि०

पुष्पिका स्त्री पुष्प+ण्वुल्। १दलमले हारा०। २लिङ्गमले हेम०। ग्रन्थाध्यायसमाप्तौ तत्प्रतिपाद्यकथने ग्रन्थांशभेदे यथा "इति महाभारते शतसाहस्र्यां संहितायामित्यादि"। [ज्ञ। २विकसिते च।

पुष्पित त्रि०पुष्प+ता२०इतच्। १संजातकुसुमे। पुष्प-कर्तरि

पुष्पिताग्रा स्त्री "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" छ०र०उक्ते अर्द्धसमवृत्तभेदे।

पुष्पिन् त्रि० पुष्प+मत्वर्थे इनि। १कुसुमयुक्ते वृक्षे स्त्रियां ङीप्। सा च २रजस्वलायां स्त्रियां स्त्री।

पुष्पेषु पु० पुष्पमिषुर्यस्य। कुसुमबाणे कामे हेम०।

पुष्पोत्कटा स्त्री राक्षसीभेदे सा च रावणकुम्भकर्णयोर्माता "पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ। कुम्भकर्णदशग्रीवौ" भा० व० २७४ अ०। [अपुष्पीत्।

पुष्प्य पुष्प विकसने कण्ड्वा० पाठान्तरम् सक०सेट्। पुष्प्यति

पुष्य पुं०स्त्री कार्य्यं पुष्यति पुष-कर्त्तरि यत् नि०। अश्विन्यादि २७ नक्षत्रमध्ये १अष्टमे नक्षत्रे, स्त्रीत्वे टाप्। तस्याधिपतिः जीवः। तद्योगतारादिकम् अश्वेशशब्दे द्रष्टव्यम्। २पौषमासे ३कलियुगे च पु० मेदि०।

पुष्यनेत्रा स्त्री पुष्यः नक्षत्रं नेता प्रथमावधिशेषपर्य्यन्तं समीपको यस्याः बहुव्री०। यस्यां रात्रौ प्रथमावधिशेषपर्य्यन्तं पुष्यनक्षत्रस्य दर्शनं तादृश्यां रात्रौ। [तत्रार्थे

पुष्यरथ पु० यात्रार्थे रथे अमरः। पुष्परथेति तत्र पाठान्तरं

पुष्यलक पुं०स्त्री पुष-कि पुष्टिः पुष्टिस्तस्यै अलति पर्य्याप्नोति अल-अच् स्वार्थे क। गन्धप्रधाने मृगभेदे। "सीम्नि पुष्यलकोद्धतः" सि०कौ०। स्त्रियां जातित्वात् ङीष्। २अपस्मारे ३कोशे च पु० मेदि०।

पुष्यस्नान न० पुष्यनक्षत्रकाले स्नानम्। शास्त्रोक्तविधानेन पुष्यनक्षत्रयुक्तकाले नृपस्याभिषेकभेदे तद्विधानं द०सं०४८ अ०दृश्यम्। तत्कालश्च तत्रोक्तो यथा "शुभे मुहूर्त्ते संप्राप्ते पुष्ययुक्ते निशाकरे" पुष्याभिषेकोऽप्यत्र।

पुस भर्त्सने व्यूसे हानौ च चुरा०उभ०सक०सेट्। पोसयति ते अपूपुसत् त। [पुसत् त।

पुस्त बन्धे अनादरे च चु०उभ०सक०सेट्। पुस्तयति ते अपु-

पुस्त न० पुस्त-अच्। "मृदा वा दारुणा वापि वस्त्रेणाथवा चर्मणा। लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते" इत्युक्ते १लिप्यादिशिल्पकर्मणि। स्वार्थे च। २लिप्याधारे ग्रन्थे पुंस्त्री० स्त्रीत्वे गौरा० ङीष्।

पुस्तकमानलेखनप्रकारादिकं योगिनीतन्त्रे उक्तं यथा "मानं वक्ष्ये पुस्तकस्य शृणु देवि! समासतः। मानेनास्य फलं विन्द्यादमाने श्रीर्हता भवेत्। हस्तमात्रं सुविस्तारमाबाहु द्वादशाङ्गुलम्। दशाङ्गुलं तथाष्टौ च ततो हीनं न कारयेत्"। तस्य वेधो यथा "वेधदर्शं दृष्टिदर्शे बाहुमात्रे त्रिरन्ध्रकम्। समभागे सहेशाने

हस्तादौ रूप(१)रन्ध्रकम्। अष्टाङ्गुलं परित्यज्य मध्ये वेधं तु कारयेत्। प्रादेशादौ भवेद्रन्ध्रं द्व्यङ्गुले वा समाचरेत्। पुस्तकस्य च आदौ वन्त्रवेधं विकल्पयेत्। भार्य्याहानिर्भवेदाशु धनानां वा क्षयो भवेत्। दग्धरन्ध्रे भवेत् पीड़ा वर्द्धनं शुभदं भवेत्। चतुष्कोणे विशुद्धं तु त्रिकोणे मरणं भवेत्"। पुस्तकलेखनपत्रं यथा "भूर्जं वा तेजपत्रे वा ताले वा ताड़िपत्रके। अगत्यापि देवेशि! पुस्तकं कारयेत् प्रिये!। सम्भवे स्वर्णपत्रे च ताम्रपात्रे च शङ्करि!। अन्यद्वस्त्रेषु देवि! तथा केतकीपत्रके। भार्त्तण्डपत्रे रौप्ये वा वटपत्रे वरानने!। अन्यपत्रे वस्त्रदले लिखित्वा यः समभ्यसेत्। स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम्। पुस्तके पाठमेदलिखननिषेधो यथा "वेदस्य लिखनं कृत्वा यः पठेद् ब्रह्महा भवेत्। पुस्तकं वा गृहे स्थाप्यं वज्रपातो भवेद् ध्रुवम्"। युगभेदे पुस्तकाक्षरस्य देवा यथा "सत्येऽक्षरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः। प्रजापतिर्द्वापरे च त्रेतायां सूर्य्य एव च। कृते युगे पिनाकी च कलौ त्रियक्षरे हरिः"। तल्लेखकपूजाफलं यथा "आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्। हरिश्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः। यावदक्षरसंख्यानं प्रतिपत्रं च सुन्दरि!। तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम्"। लेखकस्य वेतनग्रहणे दोषो यथा "वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु। यावदक्षरसंख्यानं तावन्नरकं वसेत्"। भूमौ पुस्तकलेखनस्थापननिषेधो यथा "न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत्। न भूमौ पुस्तकं स्थाप्यं न सुप्तमाचरेत्तु तत्। भूपृष्ठग्रहणे चैव अक्षरं वाऽथ पुस्तकम्। भूमौ तिष्ठति देवेशि! जन्मजन्मसु मूर्खता। तदा भवति देवेशि! तस्मात्तत् परिवर्जयेत्"। तस्य दानफलं यथा "विप्राय पुस्तकं दत्त्वा धर्मशास्त्रस्य च द्विज। पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्। शास्त्रदृष्ट्या जगत्सर्वं सुस्थतस्य शुभाशुभम्। तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके। वेदविद्यास्तु यो दद्यात् स्वर्गे कल्पत्रयं वसेत्। आत्मविद्यास्तु यो दद्यात्तस्य संख्या न विद्यते। त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च। शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती" इति पाद्मोत्तरखण्डे ११७ अ०। वेदशास्त्रादिदानफलं यथा "वेदार्थयज्ञशास्त्राणि धर्मशास्त्राणि चैव हि। मूल्येन लेखयित्वा यो दद्याद् याति स वैदिकम्। इतिहासपुराणानि लिखित्वा यः प्रयच्छति। ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्" इति गारुड़े २१५ अ०। पुराणादिपुस्तकदानविधिः हेमा०दा० चण्डीयज्ञेऽधिकं द्रष्टव्यम्।

पुस्तकमुद्रा स्त्री "वामसृष्टिं स्वाभिमुखीं कृत्वा पुस्तकसन्निभा" तन्त्रसारोक्ते मुद्राभेदे। [कर्मकर्त्तरि ड्वा०।

पुस्तकर्म्मन् त्रि० पुस्तं पत्रलेखनं कर्माऽस्य। लेख्यादि-

पू शोधे दि०आत्म०सक०सेट्। पूयते अपवित्र। पुपुवे पूत।

पू शोधे भ्वा०आ०सक०सेट्। पवते अपवित्र। पुपुवे पूतः पवित्रः।

पू शोधे क्र्यादि०पा०उभ०सक०सेट्। पुनाति पुनीते अपावीत् अपवित्र पुपाव पुपुवे। आर्षे क्वचित् आत्मनेपदस्य लुप्तः। "स्मरणात् पुनते पापं धारणात् पूर्वसञ्चितम्"।

पूग पु० पू-गन् किच्च। (सुपारि) १वृक्षे २समूहे अमरः ३कन्दर्पे ४भावे ५कफटांकवृक्षे च शब्दरत्ना०। ६पूगफले न०। समूहार्थात् तस्मात् पूरणे डट् तियुक् च। पूगति च पूगपूरणे त्रि०स्त्रियां ङीप्। पूगे भवः दिगा० यत्। पूग्य तद्भवे त्रि०। समासे आद्युदात्तताऽस्य।

पूगपात्र न० पूगस्य दलचर्वित तद्रसस्य आधारभूत पात्रम्। (पिकदानी) पतद्ग्रहे हारा०।

पूगपीठ पु०न० ६त०। पतद्ग्रहे त्रिका०।

पूगपुष्पिका स्त्री पूगसंहितं पुष्पमस्य कप् कापि अत इत्वम्। विवाहोत्सवे दीयमाने सुवाकयुक्ततास्बूलदानकर्मणि त्रिका०।

पूगरोट पु० पूगः पूगवृक्ष इव रोटयति द्योतते रुट-द्युतौ अच्। छिन्नालवृक्षे त्रिका०।

पूज पूजने चु०उभ०सक०सेट्। पूजयति ते अपूपुजत् त।

पूजक त्रि० पूज-ण्वुल्। पूजाकारके। अकान्तत्वेऽपि याजकादि० षष्ठीसमासः देवपूजकः इत्यादि।

पूजन न० पूज-भावे ल्युट्। १अर्चने। पूज्यतेऽसौ कर्मणि ल्युट् ङीप्। २शकुनिविहगस्त्रीभेदे भा०आ०१२९ अ० तदुपाख्यानं द्रष्टव्यम्।

पूजनीय त्रि० पूज+कर्मणि अनीयर्। १पूजार्हे। २पूजन्यां पतगयोषिद्भेदे स्त्री हरिवं० २० अ० द्रष्टव्यम्।

पूजा स्त्री पूज-भावे अ। अर्चने। ल्युट्। पूजनमपत्र न०। उपचारशब्दे तद्भेदा उक्ताः

देवीपूजायां सप्तभेदनिरूपणं यथा

"दिग्विभागे तु कौबेरी दिक् शिवाप्रीतिकारिणी। तस्यात्तन्मुखमासीनः पूजयेच्छिवकां सदा" पूजास्थानानि यथा "लिङ्गस्यां पूजयेद्देवीं पुस्तकस्यां तथैव च। स्थण्डिलस्यां महामायां पादुकाप्रतिमासु च। चित्रे च त्रिशिखे खड्गे जलस्यां वापि पूजयेत्। पञ्चाशद्दङ्गुलं खड्गं त्रिशिखञ्च त्रिशूलकम्। शिलायां पर्वतस्याग्रे गङ्गायामपि तत्समम्। आर्य्यावर्त्ते मध्यदेशे तथा पर्वतगह्वरे। देवीं संपूज्येच्चित्यं भक्तिश्रद्धासमन्वितः। वराणास्यां सदा पूजा सम्पूर्णफलदायिनी। ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ। ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषता। सर्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा। विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा। आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च। विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा। ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले। तस्माच्चतुर्गुणफलानन्दिकुण्डे च भैरव!। ततश्चतुर्गुणा प्रोक्ता जल्पीशेश्वरसन्निधौ। तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता। ततश्चतुर्गुणा प्रोक्ता लोहित्यनदपार्श्वे। तत्समा कामरूपे तु सर्वत्रैव जले स्थले। सर्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा। देवीपूजा तथा शस्ता कामरूपे सरान्वये। देवीक्षेत्रं कामरूपं विद्यतेऽन्यन्न तत्समम्। अन्यत्र विरला देवी कामरूपे गृहे गृहे। ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके। ततोऽपि द्विगुणं प्रोक्तं क्षीरके शिवलिङ्गके। ततोऽपि द्विगुणा प्रोक्ता शैलपुत्रादियोनिषु। ततः शतगुणा प्रोक्ता कामाख्या योनिमण्डले" कालिकापु० ५४५७ अ०। पूजासनानि तत्फलानि च यथा "उपविश्यासने रम्ये कृष्णाजिनकुशोत्तरे। राङ्कवे कम्बले वापि काष्ठादौ व्याघ्रचर्मणि। न कुर्यादर्चनं विष्णोः शिवे! काष्ठासनादिषु। काष्ठासने वृथा पूजा पाषाणे रोगसम्भवः। भूम्यासने गतिर्नास्ति यस्तासने दरिद्रता। कुशासने ज्ञानवृद्धिः कम्बले सिद्धिरुत्तमा। कृष्णाजिने धनी पुत्री मोक्षः स्याद्व्याघ्रचर्मणि। मन्त्रयोगं प्रकुर्वीत भोगार्थं शुक्लमासने" इति पाद्मोत्तरखण्डे ७४ अ०। पूजाधिकारिताप्रयोजकदेवषट्कपूजाऽऽदौ कार्य्या "गणेशञ्च दिने शक्तिं विष्णुं शिवं शिवाम्। संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने। गणेशं विघ्ननाशाय निष्पापाय दिवाकरम्। शक्तिं शुद्धाय विष्णुञ्च सुखाय पूजयेच्छिवम्। शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिवृद्धये। संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा" इति ब्रह्मवै० प्रकृतिखण्डे ८ अ०। सामान्यतस्तन्त्रोक्तपूजाप्रकारस्तु "आदावृष्यादिकन्यासः करशुद्धिस्ततःपरम्। अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च। ध्यानं पूजा जपश्चेति सर्वतन्त्रेष्वयं विधिः" तन्त्रसारः।

पूजाधार पु० ६त० देवतानां पूजनाधारे जलादौ यथोक्तं तन्त्रसारे नारदीये "आपोऽग्निर्हृदयं चक्रं विष्णोः क्षेत्रसमुद्भवम्। यन्त्रञ्च प्रतिमास्थानं अर्चने सर्वदा हरेः" गौतमीये "शालग्रामे मनौ यन्त्रे प्रतिमामण्डलेषु वा। नित्यं पूजा हरेः कार्य्या न तु केवलभूतले। शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनम्। किं पुनरर्चनं तत्र हरिसान्निध्यकारणम्। बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत्। गोष्पदेनैव चिह्नेन तेन जन्म समाप्यते"। एतेन विष्णुपूजायां शिलाया अतिप्राधान्यम् मण्डलादीनान्तु सर्वसाधारण्यात्" योगिनी तन्त्रे "लिङ्गस्यां पूजयेन्देवीं पुस्तकस्यां तथैव च। मण्डलस्यां महामायां यन्त्रस्यां प्रतिमासु च। जलस्यां वा शिलास्यां वा पूजयेत् परमेश्वरीम्"। कौलावलीये "यत्रापराजितापुष्पं जयापुष्पञ्च विद्यते। करवीरे शुक्लरक्ते द्रोणं वा यत्र तिष्ठति। तत्र देवी वसेन्नित्यं यद्यन्त्रे चण्डिकार्चनम्"। एतत् सर्वं यन्त्राभावे तथा च "यन्त्रं मन्त्रमयं प्रोक्तं मन्त्राणां देवतैव हि। देवात्मनोर्यथाऽभेदो यन्त्रदेवतयोस्तथा। तथा। आदौ लिखेद्यन्त्रराजं देवतायास्तु विग्रहम्। कामक्रोधादिदोषोत्थसर्वदुःखनियन्त्रणात्। यन्त्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः। विना यन्त्रेण पूजायां देवता न प्रसीदति। दुःखनिर्यन्त्रणात् यन्त्रमिताहुस्तन्त्रवेदिनः"। [२मान्ये च शब्दर०।

पूजार्ह त्रि० पूजामर्हति अर्ह-अण् उप०स०। १पूजायोग्ये

पूजित त्रि० पूज-कर्मणि क्त। यस्य पूजा कृता तस्मिन् अर्चिते अमरः। [२देवे उणा०।

पूजिल पु० पूज-कर्मणि इलच् किच्च। १पूज्ये त्रि०।

पूज्य पु० पूज-यत्। १श्वशुरे। २पूजनीयमात्रे त्रि०। "य एव विद्वांस्तपसा च वृद्धः स एव पूज्यो भवति हि मानाम्" मत्स्यपु० ९अ०।

पूण रागीकरणे चु०उभ०सक०सेट्। पूणयति ते अपूपुणत् त

पूत न० पू-क्त। अपनीतबुधे (आगड़ारहित) १वङ्कीकृते

धान्ये अमरः। २व्रतादिना शुद्धे त्रि॰ जटाध॰। ३सत्ये। ४यज्ञे ५श्वेतकुशे ६विकङ्कतवृक्षे च पु॰। ७दूर्वायां स्त्री टाप् राजनि॰ ८पवित्रे त्रि॰।

पूतक्रतु पु॰ पूतः शुद्धः क्रतुरस्य। इन्द्रे जटा॰। तस्य पत्नी ङीष् ऐङ्। पूतक्रतायी तत्पत्न्यां शच्याम् स्त्री।

पूतगन्ध पु॰ पूतः पवित्रो गन्धो यस्य। वर्बरे (वाबुइतुलसी) राजनि॰।

पूतलक्ष न॰ नित्यक॰। श्वेतकुशे राजनि॰।

पूतद्रु पु॰ नित्यक॰। पनसवृक्षे राजनि॰।

पूतधान्य न॰ नित्यक॰। तिले राजनि॰।

पूतना स्त्री पूतयति पूत+णिच्-ल्यु। १हरीतकीभेदे सा च सिन्धुदेशजादल्पत्वक् दृढती च लेपने प्रशस्ता राजनि॰। २गन्धमांस्यां राजनि॰। ३कंसस्य धात्रीभेदे सा च शकुनी रूपं कृत्वा कृष्णस्य विषाक्तं स्तनं ददौ। कृष्णेन च तस्याः प्राणेन सह स्तनं पपाविति कथा हरिवं॰ ६२अ॰। भाग॰ १०।६। कंसेन प्रहिता सा राक्षसीरूपा बालघातिनी सौम्यरूपं कृत्वा कृष्णाय विषाक्तं स्तनं पातुं ददौ कृष्णेन च तस्याः स्तनपानमिषेण प्राणा कर्षणेन सा निहतेति स्थितम्। ४बालग्रहभेद सुश्रुतः तल्लक्षणादिकं ग्रहशब्दे २७६४पृ॰ उक्तम्। ५बालानां क्षुद्रोगभेदे अहिपूतनशब्दे ५८४ पृ॰ तल्लक्षणादि। ६बालमातृकाभेदे "तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। नालस्तद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति जृम्भं निरीक्षते" चक्रपाणिदत्तः।

पूतनारि पु॰ ६त॰। वासुदेवे श्रीकृष्णे शब्दर॰ पूतनारात्यादयोऽप्यत्र। पूतनाशब्दे दृश्यम्।

पूतफल पु॰ पूतानि फलान्यस्य। धनञ्जये (कांटाल)। राजनि॰

पूतभृत् पु॰ पूतं शुद्धं सोमरसं बिभर्त्ति भृ-क्विप् ६त॰। सोमरसाधारे यज्ञभेदे यजु॰ १८।२२ वेददी॰।

पूतयय अव्य॰ पूता निस्तूषीकृता यवा यत्र तिष्ठ॰ अव्ययी॰। पूतयवाधारे खलादौ।

पूतात्मन् त्रि॰ पूत आत्मा यस्य। १शुद्धान्तःकरणे २शुद्धदेहे च। ३विष्णौ पु॰ "पूतात्मा परमात्मा च" विष्णुस॰।

पूति न॰ पू-क्तिरि क्लिच्। १रोहिषतृणे। भावे क्तिन्। २पवित्रतायाम् राजनि॰। पूय विस्रसे दुर्गन्धे च क्लिच्। ३दुर्गन्धे ४दुर्गन्धवति त्रि॰ रायमुकुटः।

पूतिक न॰ पूता दुर्गन्धेन कायति कै-क। १विष्ठायाम् २पूतिकरञ्जे पु॰। ३शाकभेदे स्त्री (पुँइ) "पूतिका ब्रह्मजातिका" इति स्मृतिः। ४गाजीलायाञ्च राजनि॰। पूतिका च सोमांशुतो जातेति सोमस्यालाभे प्रतिनिधित्वेन प्राप्ता तदेतत् ताण्ड्यब्रा॰ ८।४।५।२ उक्तं यथा "तस्य वै म्रियमाणस्यांशवः परापतंस्ते पूतीका अभवन्" छान्दसो दीर्घः। "म्रियमाणस्य सोमस्य पतिताः अंशवः पूतिका अभवन्" तस्मात् सोमाभावे पूतीकादीनां प्रतिनिधित्वेन स्वीकर्त्तव्यतामभिधातुं प्रासङ्गिकागामेषाम् उपन्यासः" भा॰।

पूतिकरञ्ज(ञ्ज) पु॰पूतियुक्तः करञ्जः(ञ्जः)। (नाटाकरमजा) करञ्जभेदे अमरः। करञ्जशब्दे १६८८ पृ॰ दृश्यम्।

पूतिकर्णक पु॰ पूतिः कर्णो यत्र कप्। कर्णरोगभेदे "कर्णविद्रधिपाकाद्या जायते चाक्षुपूरणात्। पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः" इति माधवकरः। [शब्दरत्ना॰।

पूतिकामुख पु॰ पूतिका तत्फलमिव मुखमस्य। शम्बूके

पूतिकाष्ठ न॰ पूतेः पावनार्थं काष्ठम् चतुर्थ्यर्थे अश्वघासवत् ६त॰। देवदारुणि शब्दच॰। संज्ञायां कन्। पूतिकाष्ठक सरलवृक्षे पु॰ अमरः।

पूतिकीट पु॰ कर्म॰। (गँधोपोका) कीटभेदे सुश्रुतः।

पूतिकेश्वरतीर्थ तीर्थभेदे शिवपु॰।

पूतिगन्ध पु॰ पूतिर्दुष्टो गन्धो यस्य। १गन्धके अमरः। २दुष्टदीर्घे राजनि॰। ३रङ्गे न॰। कर्म॰। ४दुर्गन्धे पु॰ बा ६तत्स॰। पूतिगन्धि दुष्टगन्धयुक्ते त्रि॰। स्वार्थे क। पूतिगन्धिकदुष्टगन्धान्विते। पूतिगन्धे वाकुच्यां स्त्री राजनि॰

पूतिघास पु॰ "मङ्गुमुञ्जिकदर्भयावियाऽवकुशपूतिघासवानरप्रभृतयः शकाः" सुश्रुतोक्ते जन्तुभेदे।

पूतितैल स्त्री पूति दुर्गन्धं तैलं यस्याः। ज्योतिष्मत्याम् (बताकट्की) रत्नमा॰।

पूतिनस्य न॰ नस्सि भवः यत् कर्म॰। "दोषैर्विदग्धैर्गलतालुमूले संबाधितो यस्य समीरणस्तु। निरेति पूतिर्सुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम्" सुश्रुतोक्ते नासारोगभेदे

पूतिनासिक त्रि॰ पूतिर्नासिकाऽस्य। दुर्गन्धनासायुक्ते "पिशुनः पूतिनासिकः" याज्ञ॰ पिशुनताकर्मविपाकतया पौतनासिकत्वसूत्रम्।

पूतिपत्र पु॰ पूतीनि पत्राण्यस्य। शोणाकभेदे राजनि॰।

पूतिपुष्पिका स्त्री पूतीनि पुष्पाण्यस्याः कप् कापि अत इत्वम्। मातुलुङ्गायाम् रत्नमा॰।

पूतिफला(ली) स्त्री पूतीनि फलान्यस्याः वा ङीप्। सोमराज्याम् अमरः। ङीबन्तः जटाध॰।

पूतिमयूरिका स्त्री पूतिर्मयूरीव ततः स्वार्थे क। वन मोदायाम् राजनि०।

पूतिमाष पु० गोत्रप्रवर्त्तिभेदे "संज्ञतिपूतिमाषतण्डिशब्दुशैव नवानामाङ्गिरसगौरिधीतसाङ्कृत्येति" आश्वश्रौ०।१२ १२ ५ ततः गर्ग०अपत्ये यञ्। पौतिमाषय तदपत्ये पुंस्त्री०।

पूतिमृत्तिक न० ७त०। नरकभेदे याज्ञ० ३ २२ श्लो०।

पूतिमेद पु० पूतिर्मेदोऽस्य। खरिमेदे विट् खदिरे। राजनि०

पूतिवक्त्र पु० पूति वक्त्रमस्य। दुर्गन्धसहयुक्ते "पूतिवक्त्रस्तु स्रुवकः" याज्ञ०१ २११ श्लो० तच्चिदानकर्मभेद उक्तः।

पूतिवात पु० पूत्ये पवित्रवाये वातोऽस्य। १विल्लवृक्षे रत्नमा० कर्म०। २दुष्टगन्धयुक्तवायौ पु०।

पूतिवृक्ष पु० कर्म०। यज्ञोनाकवृक्षे रत्नमा०।

पूतिशारिका स्त्री पूतिः शारीव जायते जन-ड। खट्टाशे (खटाश) वनजन्तुभेदे त्रिका०।

पूतीक पु० पूतिक+पृषो०। पूतिकरञ्जे अमरः।

पूतीकरञ्ज पु० पूतिकरञ्ज+पृषो०। करञ्जभेदे रत्नमाला।

पूतीका स्त्री पूतिका+पृषो०। (पुँई) ख्याते लताभेदे पूतिकशब्दे तात्र्य०ब्रा० वाक्ये दृश्यम्।

पूत्यण्ड पु० पूति दुर्गन्धमण्डमस्य। (गँधोपोका) १गन्धकीटे २मूलनाभियोनिच्छदभेदे च पुंस्त्री०मेदि०।भा०श्रा०२२४अ०

पूथिका स्त्री पूतिका+पृषो०। पूतिकायां शाकभेदे सुश्रुतः। चुच्चुशब्दे २९५६ पृ० दृश्यम्।

पून त्रि० पू-क्त "पूञो विनाशे" पा० क्तस्य नः। विनष्टे।

पूप पु० पू-पक्। १पिष्टके अमरः। पूपाय हितम् अपूपा० छ पक्षे यत्। पूपीय पूप्य तदर्थे तण्डुलादौ त्रि०।

पूपला स्त्री पूपं तदाकारं लाति ला-क। पोलिकायां हेमच० स्वार्थे क। पूपलिका तत्रार्थे हारा०। [कायां त्रिका०।

पूपाली स्त्री पूपाय अलति अल-अच् गौरा०ङीष्। पोलि-

पूपाष्टका स्त्री अष्ट परिमाणं यस्याः कन् अष्टका अष्टमी उपचारात् तत्कर्त्तव्यं श्राद्धम् पूपद्रव्यसाधनाष्टका कर्म०। आग्रहायण्याः परतः कृष्णाष्टमीविहिते श्राद्धे। "आद्याः पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा। शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः" ति०त०।

पूपिका स्त्री पूपस्तदाकारोऽस्त्यस्याः ठन्। पोलिकायां हेम०

पूय दुर्गन्धे अक० भेदने विशरणे च सक०दिवा०आत्म०सेट्। पूयते अपूयिष्ट। अपूयिढ्वं (ध्वम्) पुपूये।

पूय न० पूय-अच्। व्रणादिनिःसृते रक्तविकारभेदे (पूँज)। हेमच०। भावे ल्युट्। पूयन तत्रार्थे न० शब्दच०।

पूयमानयव अव्य० पूयमाना निस्तुषीक्रियमाणा यवा यत्र। तिष्ठद्गु० अव्ययी०। परिष्क्रियमाणयवाधारे खलादौ।

पूयरक्त पु० पूययुक्तं रक्तमत्र। "दोषैर्विदग्धैरथ वापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तु। नासा स्रवेत् पूयसङ्गविमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्" सुश्रुतोक्ते नासारोगभेदे पूयशोणितादयोऽप्यत्र।

पूयवर्द्धन पु० पूयं वर्द्धयति दध-णिच्-ल्यु। सुश्रुतोक्ते नवधान्यादौ द्रव्यवर्गभेदे।

"नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्लवेतसकटुकंगुडपिष्टविक्लातवल्लूरगुष्कशाकाजाविकानूपौदकमांसवशायीतोदकक्षीरपायसदधिदुग्धतक्रमद्यतीन् परिहरेत्। तक्रान्नोनवधान्यादिर्योऽयं वर्ग उदाहृतः। दोषसङ्जननो ह्येष विज्ञेयः पूयवर्द्धनः"। [द्वयोऽप्यत्र।

पूयारि पु० ६त०। निम्बवृक्षे राजनि०। पूयनाशका-

पूयालस पु० "पक्वः शोफः सन्निजः संज्ञवेद्यः स्वाङ्गं पूयं पूति पूयालसः सः" सुश्रुतोक्ते सन्निपातरोगभेदे।

पूयोद न० पूयमेवोदकमत्र उदादेशः। नरकभेदे भाग०५ २ ७।

पूर पूर्त्तौ प्रीणने च दिवा०आत्म०सक०सेट्। पूर्य्यते अपूरि-अपूरिष्ट। पुपूरे पूरिता। पूर्णः। [पूरितः।

पूर पूर्त्तौ प्रीणने चु० उभ०सक०सेट्। पूरयति अपूपुरत् त।

पूर पु० पूर-क। १जलसमूहे २स्वाद्यभेदे ३शस्यगुच्छे च मेदि० ४दाहागुरुणि न० राजनि०।

पूरक त्रि०पूरयति पूरि-ण्वुल्। १पूरणकर्त्तरि २गुणके अङ्के च। ३वीजपूरे राजनि०। ४बहिर्वायुनिरुद्धस्य प्राणस्य वायोः नासयाकृष्य देहान्तःप्रवेशनरूपव्यापारभेदे। प्राणायामशब्दे दृश्यम्। स्वाशौचकालमध्ये देवे प्रेतस्यातिवाहिकदेहनाशनेन प्रेतदेहपूरके पिण्डे तत्कर्त्तव्यतादिशु०त०यथा "अन्नेदं बीजं पूर्वक्रियाया आतिवाहिकदेहत्यागोत्तरदेहान्तरजननं, मध्यक्रियाया अपि प्रेतत्वपरिहारोत्तरं देहान्तरजननं ततश्चैकयैव तत्सिद्धौ पुनस्तत्करणं वचनाभावेऽनर्थकम्। तथा च विष्णुधर्मोत्तरे "ततश्चयादेव मृच्छाति शरीरमातिवाहिकम्। ऊर्द्ध्वं व्रजन्ति भूतानि त्रीण्यव्यक्तस्य विग्रहात्"। त्रीणि भूतानि तेजोवाय्वाकाशानि पृथिवीजले तु अधो गच्छतः। तत्त्वयात् मृत्युत्वयात्। तथा "आतिवाहिकसंज्ञोऽयं देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। तथा "प्रेतपिण्डे त्वया दत्ते-

देहमाप्नोति भार्गव ! । भोगदेहमिति प्रोक्तं क्रमादेव न संशयः । प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोचणम् । आशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते । तत्रास्य यातना घोराः शतवातातपोद्भवाः । ततः सपिण्डीकरणे बान्धवैः स कृते नरः । पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते । ततः स नरके याति स्वर्गे वा स्वेन कर्मणा"। तथा च वायुपुराणम् "पूरकेण तु पिण्डेन देहो निष्पाद्यते यतः । अतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम् । अत एवातिवाहिकदेहपरित्यागाय तत्कालीनकर्माऽसमर्थपुत्रमन्त्रेऽप्यन्येन दाहादि क्रियते "पिहज सपिण्डैस्तु समानसलिलैर्नरैः । संचालगतैर्वापि राजा वा धनहारिणा । पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः" शुद्धितः ।

तेन दाहादिपूरकपिण्डदानान्तमाद्यक्रिया तया आतिवाहिकदेहनिवृत्तिपूर्वकं प्रेतदेहप्राप्तिः आद्यश्राद्धादि सपिण्डान्ता मध्यक्रिया तया प्रेतदेहवस्तुपूर्वकं भोगदेहप्राप्तिः तदुत्तरवार्षिकादिश्राद्धादि उत्तरक्रिया तया भोगसाक्षात्मिति भेदः । पूरकपिण्डदानकालादिश्च शुद्धितः निर्णीतो यथा

"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः । यत्रान्नं वस्त्रं चान्येषु स एव प्रददात्यपि । मृण्मयं भाण्डमादाय नवं स्नातः ससंयतः । जगुड़ं मर्दयेद्दोषान्नं गृहीत्वा तोयमानयेत् । ततस्तोत्तरपूर्वस्यामग्निमुपसमाधाय । तण्डुलप्रभृतिं तत्र प्रक्षाल्याद्भिः पचेत् स्वयम् । घृतपिण्डैस्तिलैर्मिश्रां केशकीटविवर्जिताम् । द्वारोपान्ते ततः क्षिप्त्वा शुद्धां वा गोरजस्तिकाम् । तत्पृष्ठे प्रस्तरेदर्भान् यास्याद्यान् देवसम्मतान् । ततोऽवनेजनं दद्यात् संस्कारं गोत्रनामनी । तिलसर्पिर्मधुक्षीरैः सहितं तन्नमेव हि । दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः । फलमूलगुड़क्षीरतिलमिश्रन्तु कुत्रचित् । कार्य्यैः पुष्पैस्तथा धूपैर्दीपैर्गोदैः सुगीतलैः । सूत्रतन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् । तयाति यावदाकाशं पिण्डाद्वाष्पमयी शिखा । तावत्तदुद्भवं सुखमिच्छेत् सर्वं तोये ततः क्षिपेत् । दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु । सद्यःशौचेऽपि दातव्याः सर्वेऽपि युगपत्तथा । त्रिरात्राशौचे प्रदातव्याः प्रथमे त्वेक एव हि । द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि । दैवात् सन्निदाना पूरकपिण्डस्यादाने आद्यश्राद्धाधिकारिणा अन्तिमदिने आद्यश्राद्धदिने वा तत् करणीयमिति व्यवस्था शुद्धितः स्थिता ।

पूरण न॰ पूर–भावे ल्युट् । अङ्कशास्त्रप्रसिद्धे १गुणने २दृष्टौ ३कुटचटे शब्दमा॰। करणे ल्युट् । ४वापतन्तुषु ३ने॰। ५सेतौ ६समुद्रे च पु॰ ७सङ्ख्यापूरणे मेदिनिः । यथा द्वयोः पूरणः द्वितीयः । कर्त्तरि ल्यु । ८पूरयितरि त्रि॰ ९विष्णुतैले धरणिः । करणे ल्युट् ङीप् यथा संख्या पूर्य्यते १० तस्यां संख्यायां स्त्री तयाख्यां पूरणी तृतीयेत्यादि । कर्मणि ल्युट् ।१२शालमलिवृक्षे पु॰अमरः

पूरयित्नु त्रि॰ पूर–तृच् । १पूरणकर्त्तरि त्रि॰ स्त्रियां ङीप् । २विष्णौ पु॰ । "पूर्णः पूरयिता पुण्यः" विष्णुस॰ ।

पूरान्न पु॰ पूरमन्नं यत्र । दधान्ने राजनि॰ ।

पूरिका स्त्री पिष्टकभेदे कृतान्नशब्दे २।८२४ पृ॰ दृश्यम् ।

पूरित त्रि॰ पूर–क्त । १पूर्णे २गुणिते च अमरः ।

पूरु पु॰ व॰व॰ । पू–बा॰ कु । १मनुष्ये निघण्टुः ऋ॰६ २॰ । वैराजस्य मनोः नड्वलायां जाते २पुत्रभेदे हरिवं॰२अ॰। ३अङ्गपुत्रभेदे भाग॰९ ३५ २ । ४राक्षसभेदे यजु॰१२।२४ वेददी॰ । ५ययातिपुत्रभेदे भा॰ आ॰ ७५ अ॰। तस्यापत्यं अण् । पौरव तदपत्ये पुंस्त्री॰ स्त्रियां ङीप् ।

पूरुष पु॰ पूर–उषन् । १पुरुषे २नरे च अमरः तस्य शुभाशुभलक्षणं पुरुषशब्दे उक्तं किञ्चिदधिकमत्रोच्यते

"कटिर्विशाला मङ्गलभागी विशालहस्तो नरपुङ्गवः स्यात् । उरो विशालं धनधान्यभागी शिरोविशालं नरपूजितः स्यात् । न श्रीरश्नुते रक्ताक्षं नार्यं कनकपिङ्गलम् । दीर्घबाहुं न चैश्वर्यं न मांसोपचितांगकम् । कदाचिद्धन्तुरो मूर्खः कदाचिद्भोगवान् सुखी । कदाचित् तन्द्रितो दुःखी कदाचिच्चञ्चला मती । नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । हस्तस्नेहेन चैश्वर्यं पादस्नेहेन वाहनम् । अकर्मकठिनौ हस्तौ पादावध्वनि कोमलौ । यस्य पाणितले रक्ते तस्य राज्यं विनिर्दिशेत् । दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः । अल्पलिङ्गेन सौभाग्यं हस्वलिङ्गेन भूपतिः । रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता । रक्ताभिः श्रियमाप्नोति कृष्णाभिर्लोकपूजितः । अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः । उत्तमं भोजनं तस्य शतं जीवति मानवः । अङ्गुष्ठं कुलिशं छत्रं यस्य पाणितले भवेत् । ऐश्वर्यञ्च विनिर्दिष्टमशीत्यायुर्भवेद्ध्रुवम् । भद्रयस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।

तस्यैश्वर्य्यं च राज्यञ्च अशीत्यायुर्भवेद् ध्रुवम्। कनिष्ठा तर्जनी यावत् रेखा भवति चाञ्चला। विंशत्यब्दाधिकं शतं नरा जीवन्त्यनामयाः। कनिष्ठामध्यमां यावत् रेखा भवति चाञ्चला। शताब्दं वाथ वाशीतिर्नरो जीवेन्न संशयः। कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चला। विंशत्यब्दाधिकं शतं नरा जीवन्त्यनामयाः। कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चला। षष्टिपञ्चाशदब्दं वा नरा जीवन्त्यसंशयम्। रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः। कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता। तावती पुरुषाणान्तु नारी भवति निश्चितम्। करमध्यगता रेखा भ्रुवा ऊर्द्ध्वं भवेद् यदि। ऋषो वा ऋषतुल्यो वा चिरं ख्यातोऽर्थवान् भवेत्। अतस्सुपुष्पप्रकीर्णेन विद्यावित्तसमन्वितः। पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम्। मध्यमायां यदि यवा दृश्यन्ते ऽत्यन्तशोभनाः। तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्कुशके यवे। यस्याश्च चक्रमङ्कुशे यवादूर्द्ध्वञ्च दृश्यते। तदा वै पामरादीनामर्ज्जितं धनमाप्नुयात्। तर्जन्यामथ चक्रञ्च मित्रद्वारा धनं भवेत्। तेनैव विपरीतन्तु व्ययो भवति निश्चितम्। अनामायां भवेत् चक्रं सर्वद्वारा भवेद्धनम्। तेनैव विपरीतन्तु व्ययो भवति निश्चितम्। कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत्। तेनैव विपरीतन्तु व्ययो भवति निश्चितम्। ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम्। अशीत्यायुः समाप्नोति पञ्च रेखाः शतं समाः। वस्त्रोन्नतं ललाटञ्च ताम्रवर्णञ्च दृश्यते। रेखाहीनञ्च कक्षञ्च स चोन्नतो वर्षी भ्रमेत्। यस्य जिह्वा भवेद्दीर्घा मासार्धं लेढि सर्वदा। भोगी भवति निर्दिष्ट पृथ्वीं भ्रमति सर्वदा। दन्ताश्च विरला यस्य नीचवक्त्रीचकर्मकृत्। प्रगल्भो दन्तुरः सत्यं वेदान्तपारगो भवेत्"। प्राकारान्तरम्। "दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते। परस्त्री रमणो नित्यं परवित्तेन वित्तवान्। दीर्घलिङ्गे च सौभाग्यं ह्रस्वलिङ्गे ऋषो भवेत्। वक्रस्य कठिनैर्लिङ्गैः प्रमाणाच्चिर्गतः सदा। रमते च सदा दास्यां निर्धनो भवति ध्रुवम्। अश्वलिङ्गेन ह्रस्वेण रक्तवर्णेन भूपतिः। बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत्। अश्वलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम्। राज्यं बुद्धञ्च दिव्याङ्गयाः कन्यकायाः पतिर्भवेत्। यस्य पादतले पद्मं चक्रं वाथ तोरणम्। अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम्। अश्वनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः। कातरा व्याकुलिङ्गाश्च ते दरिद्रा न संशयः। कपिला मलिनाङ्गाश्च कृशाश्चैव दृढव्रताः। अश्वातिदीर्घा मनुजास्ते दरिद्रा न संशयः। चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये। ते धूर्त्ता नैव सन्देहः सत्यवचनं यथा। सूचीमुखाः भग्नपृष्ठाः लम्बदन्ताः कुचेलकाः। वक्रनासा वक्रनासास्ते नरा दुष्टमानसाः। दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः। परोपकारिणश्चैव तेऽपूर्वा मानवाः स्मृताः"।

पूर्ण त्रि॰ पूर—क्त नि॰। १पूरिते २सकले ३समये च ज्योतिषोक्तासु उभयपक्षयोः ४पञ्चमीदशमीपञ्चदशीतिथिषु च स्त्री मेदि॰। ५आप्तकामे पु॰ स्वेच्छावच्छिन्ने (अमेच्छाशून्ये) गदाधरः। वृ॰सं॰८८अ॰ उक्ते पक्षिभेदानां ६स्वरभेदे पु॰ तत्र दृश्यम् ७नागभेदे पु॰ भा॰ आ॰५७ अ॰। ८प्राधिये देवगन्धर्वभेदे पु॰ ६५ अ॰। ९घटके न॰ निघण्टुः।

पूर्णक पुंस्त्री॰ पूर्ण+संज्ञायां कन्। स्वर्णचूडगे मेदि॰। स्त्रियां जातित्वात् ङीष्। स्वार्थे क। पूर्णशब्दार्थे स्त्रियां टाप् अत इत्त्वम्।

पूर्णककुद् पु॰ पूर्णं ककुदमस्य अवस्थायाम् अन्यलोपः समा॰। तारुण्यावस्थे वृषे। अनवस्थायां तु नान्यलोपः।

पूर्णकाकद त्रि॰ पूर्णं काकुदं तालु अस्य न अन्यलोपः समा॰। पूर्णतालुकवाके।

पूर्णकाम पु॰पूर्णः कामोऽस्य। आप्तेच्छे परमेश्वरे मार्क॰११अ॰

पूर्णकू(कु)ट पुंस्त्री पक्षिभेदे "मयकूटपरिकरवकचरायिकाः पूर्णकूटसंज्ञाः स्युः" वृ॰ सं॰ ८८ अ॰। तत्रैव २५श्लोके कृष्णमध्यतया पठितः तत्रार्थे।

पूर्णकुम्भः पु॰ जलादिभिः पूर्णः कुम्भः। १जलादिभिः पूरिते घटे अमरः। २दानवभेदे पु॰ हरिवं॰२४२ अ॰।

पूर्णकोशा ओषधिभेदे वृ॰सं॰ ४८ अ॰।

पूर्णकोष्ठा स्त्री पूर्णं कोष्ठं यस्याः। नागरसुस्तायाम् राजनि॰

पूर्णपर्वेन्दु स्त्री पूर्णः पर्वणि इन्दुः पर्वेन्दुः यत्र। पौर्णमास्यां द्वे द्वे चित्रादितारायां पूर्णपर्वेन्दुसङ्गते" सङ्गर्षणकाण्डम्। "पूर्णपर्वेन्दुसङ्गते पौर्णमासीयुते" भरतः रघुनन्दनः।

पूर्णपात्र न॰ नित्यक॰। वह्नाद्यके वस्तुपूर्णे १पात्रे मेदि॰। "कर्णादुत्सवकाले यदलङ्कारांशुकादिकम्। आलम्ब्य गृह्यते पूर्णपात्रं पूर्णकञ्च तत्" जटाधरोक्ते २पुत्रजन्मोत्सवादिषु दाने स्वामिनोऽङ्गात् वस्त्रादेर्ग्रहणे। होमान्ते ब्रह्मणे देये दक्षिणारूपे ३ब्रह्मभेदे "होमान्ते पूर्णपात्रं दक्षिणां

ब्रह्मणे दद्यात् गोभिः। तन्मानञ्च स्मृत्यर्थसारे "अष्टसृष्टिर्भवेत् कुडिः कुडयोऽष्टौ च पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते"। तेन २५६ सृष्टिभिः पूर्णपात्रम्। तत्तत्पदव्यञ्जोक्तं "पूर्णपात्रो दक्षिणा" कात्या०श्रौ०६।१।२७। कर्केण। "पाकयज्ञेषु तण्डुलतण्डुलगोधूमादियत्तियधान्यपूर्णः पूर्णपात्रो दक्षिणा धान्यस्य मानपात्रम्" कर्कः। तेनास्य पुंस्त्वमपि। छन्दोगपरिशिष्टे (कर्मप्रदीपे) २।५।२ कात्यायनस्तु प्रकारान्तरमाह "यावता वटुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते। तावदार्ध्यमतः कार्यात् पूर्णपात्रमिति स्थितिरिति"। ४जलपूर्णपात्रे च कात्या०श्रौ० ३।८।८।

पूर्णप्रज्ञ त्रि० पूर्णा प्रज्ञा यस्य। सम्पूर्णबुद्धौ वायोस्तृतीयावतारे मध्वापरनामके आनन्दतीर्थे २वैष्णवमतभेदप्रस्थापकाचार्यभेदे। तन्मतञ्च सर्व० सं० न्यरूपि यथा "तदेतद्रामानुजमतं जीवाणुत्वदासत्ववेदापौरुषेयत्वसिद्धार्थबोधकत्वस्वतःप्रमाणत्वप्रमाणत्रितयपाञ्चरात्रोपजीव्यत्वप्रपञ्चभेदसत्यत्वादिसाम्येऽपि परस्परविरुद्धभेदादिपञ्चत्वस्वीकारेण अपञ्चकपञ्चनिष्ठिप्रमित्युपेक्षमाणः स आत्मा तत्त्वमसीत्यादिवैदान्तवाक्यजातस्य भङ्गान्तरेणार्थान्तरपरत्वसूपपादा ब्रह्ममीमांसाविवरणव्याजेनानन्दतीर्थः प्रस्थानान्तरमास्थित। तन्मते हि द्विविधं तत्त्वं स्वतन्त्रास्वतन्त्रभेदात्। तदुक्तं तत्त्वविवेके "स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्त्वमिष्यते। स्वतन्त्रो भगवान् विष्णुर्निर्दोषोऽशेषसद्गुणः" इति। तत्र सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्म तत्त्वमिति प्रतिपादकेषु वेदान्तेषु आगमेषु अखण्डैकरसत्वं तस्य कथ्यत इति चेत्तथैव भेदप्रत्यक्षप्रमाणविरोधेन तेषां तत्र तात्पर्याभावानुपपत्तेः तथा हि प्रत्यक्षं तावदिदमस्माद्भिन्नमिति नीलपीतादेर्भेदग्रहणं भवति। अथ मन्येथाः किं प्रत्यक्षं भेदमेवावगाहते किं वा धर्मिप्रतियोगिघटितम्। न प्रथमः धर्मिप्रतियोगिप्रतिपत्तिमन्तरेण तदुभयमेकस्य भेदस्याप्यव्यवसायत्वात्। द्वितीयोऽपि धर्मिप्रतियोगिग्रहणपुरःसरं भेदग्रहणमथ वा युगपत् तत्सर्वग्रहणम्। न पूर्वः बुद्धेरिदम्यं व्यापाराभावात् अन्योन्याश्रयप्रसङ्गाच्च। नापि चरमः कार्यकारणबुद्ध्योर्युगपद्भावात् धर्मिप्रतीतिहि भेदप्रत्ययस्य कारणं सन्निहितेऽपि धर्मिणि व्यक्तिप्रतियोगिज्ञानमन्तरेण भेदस्याग्रहणेनाभावप्रतिरेकाभ्यां कार्यकारणभावावगमात्। तस्मान्न भेदप्रत्ययं सुप्रसरमिति चेत् किं वस्तुस्वरूपभेदवादिनं प्रति इमानि दूषणान्युदुद्यन्ते किं वा धर्मिभेदवादिनं प्रति। प्रथमे चोरापराधान्मारयतीति न्यायापातः भवदभिधीयमानदूषणानां तद्विषयत्वात्। ननु वस्तुस्वरूपस्यैव भेदत्वे प्रतियोगिसापेक्षत्वं न घटते घटादितत्तत्प्रतियोगिसापेक्ष एव सर्वत्र भेदः प्रत्यक्ष इति चेन्न प्रथमं सर्वतो विलक्षणतया वस्तुस्वरूपे भासमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्तेः तथा हि परिमाणघटितं वस्तुस्वरूपं प्रथममवगम्यते पश्चात् प्रतियोगिविशेषापेक्षया ह्रस्वं दीर्घमिति तदेव विशिष्टव्यवहारभाजनं भवति। तदुक्तं विष्णुतत्त्वनिर्णये "न च विशेषणविशेष्यतया भेदसिद्धिः विशेषणविशेष्यभावस्य भेदापेक्षः, धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्षश्च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यासिद्धेः पदार्थस्वरूपत्वाद्भेदस्येत्यादिना"। अत एव भवार्थिनो भवदर्शनान्न प्रवर्त्तन्ते गोशब्दश्च न स्मरन्ति। न च नीरक्षीरादौ स्वरूपे गृह्यमाणे भेदप्रतिभासोऽपि स्यादिति भवनीयं समानाभिहारादिप्रतिबन्धकवशाद्भेदभानव्यवहाराभावोपपत्तेः तदुक्तम् "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्चेति" अतिदूरात् गिरिशिखरवर्त्तिनि वटौ, अतिसामीप्यात् लोचनाञ्जनादौ, इन्द्रियघातादिद्युदादौ, मनोऽनवस्थानात् कामाद्यपसृतमनस्कस्य स्त्रीतालोकवर्त्तिनि घटादौ, सौक्ष्म्यात् परमाण्वादौ, व्यवधानात् कुड्याद्यन्तर्हिते, अभिभवात् दिवाप्रदीपप्रभादौ, समानाभिहारात् नीरक्षीरादौ यथावदुपलक्षणं नास्तीत्यर्थः। भवतु वा धर्मभेदवादस्तथापि न कश्चिद्दोषः धर्मिप्रतियोगिग्रहणे इति धर्मभेदभानसम्भवात्। न च धर्मभेदवादे तस्य तस्य भेदस्य भेदान्तरभेदाभेदानवस्था दुरवस्था स्यादित्याशङ्क्यं भेदान्तरप्रसक्तौ मूलाभावात् भेदभेदिनौ भिन्नाविति व्यवहारदर्शनात्। न चैवमभेदवेनान्यभेदानुमानं दृष्टान्तभेदाविघातेनोत्थानदोषाभावात्। सोऽयं शिष्याकयाचनाय गतस्य खारिकातैलदाहलाभ्युपगम इव दृष्टान्तभेदविमर्दे स्वतुल्यानमेव। न हि वरविधातायकल्पोद्वाहः। तस्मान्मूलक्षयाभावादनवस्था न दोषाय। अनुमानेनापि भेदोऽवगीयते। परमेश्वरो जीवाद्भिन्नः तं प्रति शेष्यत्वात् यो यं प्रति शेषः स तस्माद्भिन्नः यथा भृत्यो राजा। न हि सुखं मे स्यात् दुःखं मे न भवेदिति

पुरुषार्थमर्थयमानाः पुरुषाः स्वपतिपदं कामयमानाः सत्कारभाजो भवेयुः। प्रत्युत सर्वानर्थभाजनं भवन्ति। यः स्वस्यात्मनो हीनत्वं परस्य गुणोत्कर्षञ्च कथयति स स्तुत्यः प्रीतः स्तावकस्य तस्याभीष्टं प्रयच्छति। तदाह "घातयन्ति हि राजानो राजाहमिति वादिनम्। दद्यात्स्वखिलमिष्टञ्च स्वगुणोत्कर्षवादिनामिति"। एवञ्च परमेश्वराभेदश्रुत्या विष्णोर्गुणोत्कर्षस्य भगवत्प्रिकासमत्वाभिधानं विपुलकदलफललिप्सया जिह्वाच्छेदमनुहरति एतादृशविष्णुविद्वेषवादस्वतमसप्रवेशप्रसङ्गात्। तदेतत् प्रतिपादितं मध्यमन्दिरेण महाभारततात्पर्यनिर्णये "अनादिद्वेषिभिर्दैत्यैर्विष्णोर्द्वेषो विवर्द्धितः। तमसस्वे पातयति दैत्यानन्ये विनिश्चयादिति"। सा च सेवा अङ्कननामकरणभजनभेदात्त्रिविधा। तत्राङ्कनं नारायणायुधादीनां,तद्रूपस्मरणार्थमपेक्षितार्थसिद्ध्यर्थञ्च। तथा च शाकल्यसंहितापरिशिष्टम् "चक्रं बिभर्त्ति पुरुषोऽभितप्तं बलं देवानाममृतस्य विष्णोः। स याति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः। देवासो येन विष्टुतेन वाहुना सुदर्शनेन प्रयातास्तमायन्। येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वृहन्ति। तद्विष्णोः परमं पदं येन गच्छन्ति लाञ्छिताः। उरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवाम" इति "व्यतप्ततनुर्न तदानो अश्नुते त्रिताय इद्वृहत्सस्तन् समासतेति" तैत्तिरीयकोपनिषच्च। स्थानविशेषश्चाग्नेयपुराणे दर्शितः "दक्षिणे तु करे विप्रो बिभ्यादद्वै सुदर्शनम्। सव्येन शङ्खं बिभ्यादिति ब्रह्मविदो विदुरिति"। अन्यत्र चक्रधारणे मन्त्रविशेषश्च दर्शितः "सुदर्शन! महाज्वाल! कोटिसूर्यसमप्रभ!। अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय। त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। नमितः सर्वदेवैश्च पञ्चजन्य! नमोऽस्तु ते इति"।नामकरणं पुत्रादीनां केशवादिनाम्ना व्यवहारः सर्वदा तन्नामानुस्मरणार्थम्। भजनं दशविधं वाचा सत्यं हितं प्रियं स्वाध्यायः, कायेन दानं परित्राणं परिरक्षणं, मनसा दया स्पृहा श्रद्धा चेति। अत्रैकैकं निष्पाद्य नारायणे समर्पणं भजनम्। तदुक्तम् "अङ्कनं नामकरणं भजनं दशधा च तदिति"। एवं ज्ञेयत्वादिनापि भेदोऽनुमातव्यः तथा श्रुत्यापि भेदोऽवगन्तव्यः सत्यमेतमनुविद्ये मदन्ति रातिं देवस्य पश्यतोमघोनः सत्यासो अस्य महिमा पत्ये यज्ञेषु विप्रराज्ये वसु आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा मयि वारुणो मयि वारुणः" इति मोक्षानन्दभेदप्रतिपादकश्रुतिभ्यः। "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" "जगद्व्यापारवर्जम्" "प्रभुकरणात्मकत्वाच्चेत्यादिभ्यश्च। न च "ब्रह्म वेद ब्रह्मैव भवतीति" श्रुतिबलाज्जीवस्य पारमैश्वर्यं शक्यशङ्कं "सम्भूय ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदिति"वत् दृष्टितो भवतीत्यर्थपरत्वात्। "नन्वप्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः" इति वचनात् द्वैतस्य कल्पितत्वमवगम्यत इति चेत् सत्यं भावमनभिसन्धायाभिधानात् तथा हि यद्यपसत्यद्येत तर्हि निवर्त्तेत न संशयः। तस्मादनादिरेवायं प्रकृष्टः पञ्चविधो भेदप्रपञ्चः। न चायमविद्यमानः मायामात्रत्वान्मायेति भगवदिच्छोच्यते। "महामायेत्यविद्येति नियतिर्मोहिनीति च। प्रकृतिर्वासनेत्येव तवेच्छानन्द! कथ्यते। प्रकृष्टतया प्रकृतिर्वासना वासयेद्यतः। च इत्यर्थे हरिस्तस्य मायाऽविद्येति संज्ञिता। मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टं हि मयाभिधा। विष्णोः प्रकृष्टैरेवैका शब्दैरेतैरुदीर्यते। प्रकृष्टो हि हरिः सा च स्वानन्दलक्षणा" इत्यादिवचननिश्चयप्रामाण्यबलात्। सैव प्रज्ञा मानत्राणकर्त्री च यस्य तन्मायामात्रं ततश्च परमेश्वरेण ज्ञातत्वाद्वृत्तितत्वाच्च न द्वैतं भ्रान्तिकल्पितं न हीश्वरे सर्वस्य भ्रान्तिः सम्भवति विशेषादर्शननिबन्धनत्वाद्भ्रान्तेः। तर्हि तद्व्यपदेशः कथमित्यत्रोत्तरम् अद्वैतं परमार्थत इति परमार्थत इति परमार्थापेक्षया तेन सर्वस्याद्वैतस्य विष्णुतत्त्वस्य समाभ्यधिकशून्यत्वसिद्धं भवति। तथा च परमा श्रुतिः "जीवेश्वरभिदा चैव जडेश्वरभिदा तथा। जीवभेदो मिथश्चैव जडजीवभिदा तथा। मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः। सोऽयं सत्योऽथनादिश्च सादिश्चेत्याह्यसाधुयात्। न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः। कल्पितश्चेन्निवर्त्तेत न चासौ विनिवर्त्तते। द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम्। मतं हि ज्ञानिनामेतन्नितं ज्ञानं हि विष्णुना। तस्मान्मात्रमिति प्रोक्तं परमो हरिरेव तु"इत्यादि।.तस्माद्विष्णोः सर्वोत्कर्ष एव तात्पर्यं सर्वागमानाम्। एतदेवाभिसन्धायाभिहितं भगवता। "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः

परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसंमूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत!। इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ!। एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत!"। महाबाराहेऽपि "सुखञ्च सर्ववेदानां तात्पर्यं श्रीपतौ परे। उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम्" इति। युक्तश्च विष्णोः सर्वोत्कर्षे महातात्पर्यम्। "मोक्षो हि सर्वपुरुषार्थोत्तमः धर्मार्थकामास्त्वनित्याः मोक्ष एव नित्यः तस्मान्नित्यं तदर्थाय यतेत मतिमान्नर" इति भाल्लवेयश्रुतेः। मोक्षश्च विष्णुप्रसादमन्तरेण न लभ्यते। "यस्य प्रसादात् परमा यत्स्वरूपात् तस्मात् संसारान्मुच्यते नावरे सुरानाराधयन्तोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशाद्मुमुक्षादिति" नारायणश्रुतिः। "तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं सर्वार्थकामैरलमल्पकास्ते। समाश्रितादुत्तमकल्पतरोरनन्तात् निःसंशयं सन्निहितं प्रयातः" इति विष्णुपुराणोक्तेश्च। "प्रसादश्च गुणोत्कर्षज्ञानादेव नाभेदज्ञानादित्युक्तम्। न च तत्त्वमस्यादितादात्म्यव्याकोपः स्तुतितात्पर्यापरिज्ञानविजृम्भणात्। "व्याह नित्यपरश्चोक्तन्तु तच्छब्दो ह्यविशेषतः। त्वंशब्दस्यापरोक्षार्थं तयोरैक्यं कथं भवेत्। आदित्योयूप इतिवत् बाढग्याथां तु सा श्रुतिरिति"। तथाच परमा श्रुतिः। जीवस्य परमैक्यञ्च युद्धिसारूप्यमेव वा। एकस्याननिर्वाणे वा व्यक्तिस्थानमपेक्ष्य वा। न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः। स्वातन्त्र्यपूर्णतेऽस्यात्मपारतन्त्र्ये विरूपता" इति। अथ वा तत्त्वमसीत्यत्र स एवात्मा स्वातन्त्र्यादिगुणोपेतत्वात् अतत्त्वमसि त्वं तत्र भवसि तद्दृष्टितत्वादित्येकत्वमतिशयेन निराकृतम्। तदाह "अतत्त्वमिति वा च्छेदस्तेनैक्यं श्रुतिराकृतम्" इति। तस्मात् दृष्टान्तनवकेऽपि "स यथा शकुनिः सूत्रेण बद्ध" इत्यादिना भेद एव दृष्टान्ताभिधानाय अयमभेदोपदेश इति तत्त्ववादरहस्यम्। तथाच महोपनिषत् "यथा पक्षी च सूत्रञ्च नानादृष्टरसा यथा। यथा नद्यः समुद्राच्च गुणोदक्षयणे यथा। चारापहार्यौ च यथा यथा पुंविषयावपि। तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ। तथापि सूक्ष्मरूपत्वाच्च जीवात् परतो हरिः। भेदेन मन्दबुद्धीनां दृश्यते प्रेरकोऽपि सन्। वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्ययेति। तस्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः। लक्ष्मीरक्षरदेहत्वादक्षरातः परो हरिः। स्वातन्त्र्यप्रशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः। निखीभत्वेन ते सर्वे तद्वशाः सर्वदेवता" इति। विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः। निर्दुःखानन्दभुग्नित्यं तत्समीपे स मोदते। मुक्तानाञ्चाश्रयो विष्णुरधिकाधिपतिस्तथा। तद्वशा एव ते सर्वे सर्वदैव स ईश्वर" इति च। एकविज्ञानेन सर्वविज्ञानञ्च प्रधानत्वकारणत्वादिना युज्यते न तु सर्वमिथ्यात्वेन। न हि सत्यज्ञानेन मिथ्याज्ञानं सम्भवति यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां यामो ज्ञातः अज्ञात इत्येवमादिव्यपदेशो दृष्ट एव। यथा च कारणे पितरि ज्ञाते जानात्यस्य पुत्रमिति। अन्यथा "यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातम्" इत्यत्र एकपिण्डशब्दौ द्वथा प्रसज्येयातां सदा विज्ञातवेत्येतावतैव वाक्यस्य पूर्णत्वात्। न च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्येतत् कार्यस्य मिथ्यात्वमाचष्टे इत्येष्टव्यं वाचारम्भणं विकारो यस्य तत् अविकृतं नित्यं नामधेयं मृत्तिकेत्यादिकमित्येतद्वचनं सत्यमिति तथ्यस्य स्वीकारात्। अपरथा नामधेयमेवेति शब्दयोर्वैयर्थ्यं प्रसज्येत। अतो न कुत्रापि जगतो मिथ्यात्वसिद्धिः। किञ्च प्रपञ्चो मिथ्येत्यत्र मिथ्यात्वं तथ्यमतथ्यं वा। प्रथमे सत्याद्वैतभङ्गप्रसङ्गः चरमे प्रपञ्चसत्यत्वापातः। नन्वनित्यत्वं नित्यमनित्यं वा उभयथाप्यनुपपत्तिरित्याक्षेपवदयमपि नित्यसमजातिभेदः स्यात्। तदुक्तं न्यायनिर्वाणवेधसा "नित्यमनित्यभावादनित्यनित्यस्वोपपत्तेर्नित्यसमः" इति। तार्किकरक्षायाञ्च "धर्मस्य तदतद्रूपविकल्पानुपपत्तितः। धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत्" इति। अस्याः संज्ञायाः उपलक्षणत्वमभिप्रेत्याभिहितं प्रबोधसिद्धौ "अन्वर्थित्वात्तु परप्रकर्षसमेति"। तस्मादसदुत्तरमेतदिति चेत् अभिप्रायतत्त्वासमेतत् दुष्टत्वमूलानिरूपणात्। तद्द्विविधं साधारणमसाधारणञ्च तत्राद्यं स्वव्याघातकं द्वितीयं त्रिविधं युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्वञ्चेति। तत्र साधारणमसम्भावितमेव उक्तस्याक्षेपस्य स्वात्मव्यापनानुपलम्भात्। एवमसाधारणमपि घटस्य नास्तितायां नास्तितोक्तावस्तित्ववत् प्रजतेऽप्युपपत्तेः। नन्तु प्रपञ्चस्य मिथ्यात्वमभ्युपेयते नासत्त्वमिति चेत्

मदेतत् सोऽयं विरञ्चेरेऽपि यत्नं न ददाति विंशति-
पञ्चकन्तु प्रयच्छतीति शाण्डिल्यदृष्टान्तमनुहरेत् मिथ्या-
ज्ञानयोः पर्य्यायत्वादिलक्षणप्रपञ्चेन । तत्र "अथातो
ब्रह्म जिज्ञासेति" प्रथमसूत्रस्यायमर्थः तस्मादथशब्दो मङ्ग-
लार्थोऽधिकारानन्तर्य्यार्थश्च स्वीक्रियते । अतःशब्दो
हेत्वर्थः तदुक्तं गारुडे "अथातःशब्दपूर्वाणि सूत्राणि
निखिलान्यपि । प्रारभेत नियत्यैव तत्क्रमत्र नियामकम् । कथार्थस्तु तयोर्विद्वान् कथसूत्रमता तयोः ।
एतदाख्याहि मे ब्रह्मन् ! यथा ज्ञास्यामि तत्त्वतः ।
एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः । आनन्तर्य्याधि-
कारे च मङ्गलार्थे तथैव च । अथशब्दस्ततःशब्दो
हेत्वर्थे सम्प्रदीरितः" इति । यतो नारायणप्रसादमन्तरेण न मोक्षो लभ्यते प्रसादश्च ज्ञानमन्तरेण यतो ब्रह्म
जिज्ञासा कर्त्तव्येति सिद्धम् । जिज्ञास्यब्रह्मणो लक्षण-
सूत्रं "जन्माद्यस्य यतः" इति । सृष्टिस्थित्यादि यतो
भवति तद्ब्रह्मेति वाक्यार्थः । तथाच स्कान्दे वचः
"उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमाहतिः । बन्धमोक्षौ
च पुरुषाद् यस्मात् स हरिरेवराट्" इति । "यतो वा
इमानीत्यादि" श्रुतिभ्यश्च । तत्र प्रमाणमप्युक्तं यथा "शा-
स्त्रयोनित्वादिति", "नावेदविन्मनुते तं बृहन्तम्" "तन्त्वोप-
निषदम्" इत्यादिश्रुतिभ्यः तस्यानुमानिकत्वं निराक्रियते
न चानुमानस्य स्वातन्त्र्येण प्रामाण्यमस्ति । तदुक्तं
कौर्मे "श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्च-
यात् साधयेदर्थं प्रमाणान्तरमेव च । श्रुतिसंहायं
यत् प्रमाणान्तरमुत्तमम् । प्रमाणपदवीं गच्छेन्नात्र
कार्य्या विचारणा" इति शास्त्रस्वरूपसूत्रं स्कान्दे "ऋग्-
यजुः सामाथर्वाणश्च भारतं पाञ्चरात्रकम् । मूलरामा-
यणश्चैव शास्त्रमित्यभिधीयते । यस्मात्तदुत्तमेतस्य तस्य
शास्त्रं प्रकीर्त्तितम् । अतोऽन्यो ग्रन्थविस्तारो नैव
शास्त्रं कुवर्त्मतः" इति । तदनेनानन्यलभ्यः शास्त्रार्थ
इति न्यायेन भेदस्य प्राप्तत्वेन तत्र न तात्पर्यं किन्त्वद्वैत
एव वेदवाक्यानां तात्पर्यमिति अद्वैतप्रत्याशा प्रतिक्षिप्ता
अनुमानादीश्वरस्य सिद्धत्वेन तद्भेदस्यापि ततः सिद्धि
भावात् । तस्मात् भेदानुवादकत्वमिति तत्परत्वमवगम्यते
अत एवोक्तम् "सदागमैकविज्ञेयं समनीतजराचरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम्" इति । शा-
स्त्रस्य तत्र प्रामाण्यसूपपादितं "तत्तु समन्वयादिति" सम-
न्वय उपक्रमादितिक्रमेण उक्तं इदमुपबृंहितायाम् "उप-
क्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती-
च लिङ्गं तात्पर्यनिर्णये" इति । एवं वेदान्ततात्पर्य-
वशात्तदेव ब्रह्म शास्त्रगम्यमित्युक्तं भवति । दिङ्मात्र-
मत्र प्रादर्शि शिष्टमानन्दतीर्थभाष्यव्याख्यानादौ द्रष्टव्यं
ग्रन्थबाहुल्यभियोपरम्यत इति । एतच्च रहस्यं पूर्णप्रज्ञेन
मध्यमन्दिरेण वायोस्तृतीयावतार मन्येन निरूपित-
मिति । "प्रथमस्तु हनूमान् स्यात् द्वितीयो भीम एव
च । पूर्णप्रज्ञस्तृतीयश्च भगवत्कार्यसाधकः" इति । एत-
देवाभिप्रेत्य तत्र तत्र ग्रन्थसमाप्तावेदं पद्यं लिख्यते
"यस्य त्रीण्युदितानि वेदवचने दिव्यानि रूपाण्यलं ह्येत-
द्दर्शितमित्यमेतदुचितं वेदस्य गर्भे महः । वायो रामं
प्रणोनतं प्रथमकं दृष्टो द्वितीयं वपुर्मध्वो वस्तु तृतीय-
मेतदसुना ग्रन्थः कृतः केशवे" । तस्मात् सर्वस्य शास्त्रस्य
विष्णुतत्त्वं सर्वोत्तममित्यत्र तात्पर्यमिति सर्वं निरवद्यम्"

पूर्णबीज पु० पूर्णं बीजं यस्य । बीजपूरे राजनि० ।

पूर्णभद्र पु० १नागभद्रे भा०आ०२५ अ० । २यक्षभेदे हरिवं०
२१ अ० । स च रत्नभद्रसुतः तस्य पुत्रः हरिकेशः
तत्कथा काशीख० ३२ अ० ।

पूर्णमा स्त्री पूर्णः कलापूर्णश्चन्द्रो मीयतेऽस्यां मा—अङ्गे
क । पूर्णमास्यां तिथौ ।

पूर्णमास स्त्री पूर्णः कलाभिः पूर्णोमासश्चन्द्रो यत्र । १पूर्णि-
मायाम् । पूर्णं मासं मिमीते मा—अङ्गे । २कर्म्मणि चन्द्रे च
"एष वै पूर्णमासः । य एष तपत्यहरहश्चैष वै पूर्णोऽसौ एष
दर्शो यच्चन्द्रमा दृश्य इव ह्येष अथो इतरश्चन्द्रः एष एव
पूर्णमा यच्चन्द्रमा एतस्य ह्यन्तपूरणं पौर्णमासीत्याचक्षते"
शत०ब्रा०११।२।४। "एषः ह्यर्धमासि एष खलु पूर्णमासः
य पूर्णमासः दृश्य इव अमावास्यात्रामविद्यमानः
प्रतिपदि यस्माद्दृश्यमानो भवति । एतस्य पूरणमन्तरेण
पौर्णमासीत्याचक्षते" श्रु० ।

पूर्णमासस पु० पूर्णमासो विधानमस्यास्तीत्यस्य अच् ।
१पूर्णिमायां कर्त्तव्ये यागभेदे "दर्शपूर्णमासाभ्यां यजेत"
"सर्वेभ्यो दर्शपूर्णमासौ" श्रुतिः । व्याडिभेदस्य
वाहरनुमतिभार्य्यायां जाते २पुत्रभेदे । "धातः कुहूः
सिनीवाली राकाश्चानुमतिस्तथा । सायं १दर्शं तथा
प्रातः२ पूर्णमासं४ मनुक्रमात्" भाग० ६।१६।३। अमृते-
त्यस्य कुहूः । पूर्णमासयागविधानञ्च शत०ब्रा० ११।२।४।८ ।
पूर्णोमासश्चान्द्रमासो यत्र गौरा०ङीष् । २पूर्णिमाप्रतिपदौ
स्त्री शब्दमाला ।

PK
925
T37
v.5

Tarkavachaspati, Taranatha
Vācaspatyam

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY